CC-0. In Public Domain. Digitization by eGangotri

Almira 1
Shelf 2
21

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain, Digitization by eGangotri

श्रीस्कन्दं महापुराणं

स्कान्दं महापुराणम्
(माहेश्वरखण्ड१, वैष्णवखण्ड २,
ब्रह्मखण्ड ३, काशीखण्ड ४)

(पूर्ण)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ब्राह्मखण्डम्॥ ३॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांद महापुराणे तृतीये ब्रह्मखण्डे सेतुमाहात्म्य प्रारंभः (३-१)॥

G. AGENCY. गोरखा एजेन्सी. नेपाल. NEPAL.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ श्रीगणेशाय नमः ॥ श्रीवेदव्यासाय नमः ॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ १ ॥ नैमिषारण्य
निलया ऋषयः शौनकादयः ॥ अष्टांगयोगनिरता ब्रह्मज्ञानैक[१]तत्पराः ॥ १ ॥ मुमुक्षवो महात्मानो निर्ममा ब्रह्मवादिनः ॥ धर्मज्ञा अनसूयाश्च
सत्यव्रतपरायणाः ॥ २ ॥ जितेंद्रिया जितक्रोधाः सर्वभूतदयालवः ॥ भक्त्या परमया विष्णुमर्चयंतः सनातनम् ॥३ ॥ तपस्तेपुर्महापुण्ये नैमिषे
मुक्तिदायिनि ॥ एकदा ते महात्मानः समाजं चक्रुरुत्तमम् ॥ ४ ॥ कथयंतो महापुण्याः कथाः पापप्रणाशिनीः ॥ भुक्तिमुक्त्योरुपायं च जिज्ञा
संतः परस्परम् ॥ ५ ॥ षड्विंशतिसहस्राणामृषीणां भावितात्मनाम् ॥ तेषां शिष्यप्रशिष्याणां संख्या कर्तुं न शक्यते ॥ ६ ॥ अत्रांतरे[२] महाविद्वान्व्या
सशिष्यो महामुनिः ॥ आगमन्नैमिषारण्यं सूतः पौराणिकोत्तमः ॥ ७ ॥ तमागतं मुनिं दृष्ट्वा ज्वलंतमिव पावकम् ॥ अर्घ्याद्यैः पूजयामासुर्मुनयः
शौनकादयः ॥ ८ ॥ सुखोपविष्टं तं सूतमासने परमे शुभे ॥ पप्रच्छुः परमं गुह्यं लोकानुग्रहकांक्षया[३] ॥ ९ ॥ सूत धर्मार्थतत्त्वज्ञ स्वागतं मुनिपुंगव ॥
श्रुतवांस्त्वं पुराणानि व्यासात्सत्यवतीसुतात् ॥ १० ॥ अतः सर्वपुराणानामर्थज्ञो[४]ऽसि महामुने ॥ कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले
॥ ११ ॥ कथं वा लप्स्यते मुक्तिर्जीवानां भवसागरात् ॥ कथं हरे हरौ वापि नृणां भक्तिः प्रजायते ॥ १२ ॥ केन सिध्येत च फलं कर्मणस्त्रिविधा
त्मनः ॥ एतच्चान्यच्च तत्सर्वं कृपया वद सूतज ॥ १३ ॥ ब्रूयुः स्निग्धाय शिष्याय गुरवो गुह्यमप्युत ॥ इति पृष्टस्तदा सूतो नैमिषारण्यवासिभिः ॥
॥ १४ ॥ वक्तुं प्रचक्रमे नत्वा व्यासं स्वगुरुमादितः ॥ श्रीसूत उवाच ॥ ॥ सम्यक्पृष्टमिदं विप्रा युष्माभिर्जगतो हितम् ॥ १५ ॥ रहस्यमे
तद्युष्मांकं वक्ष्यामि श्रृणुतादरात् ॥ मया नोक्तमिदं पूर्वं कस्यापि मुनिपुंगवाः ॥ १६ ॥ मनो नियम्य विप्रेंद्राः शृणुध्वं भक्तिपूर्वकम् ॥ अस्ति रामे
श्वरं नाम[५] रामसेतौ पवित्रितम् ॥ १७ ॥ क्षेत्राणामपि सर्वेषां तीर्थानामपि चोत्तमम् ॥ दृष्टमात्रे रामसेतौ मुक्तिः संसारसागरात् ॥ १८ ॥ हरे हरौ
च भक्तिः स्यात्तथा पुण्यसमृद्धिता ॥ कर्मणस्त्रिविधस्यापि सिद्धिः स्यान्नात्र संशयः ॥ १९ ॥ यो नरो जन्ममध्ये तु सेतुं भक्त्यावलोकयेत् ॥
तस्य पुण्यफलं वक्ष्ये शृणुध्वं मुनिपुंगवाः ॥२० ॥ मातृतः पितृतश्चैव द्विकोटिकुलसंयुतः ॥ निर्विश्य शंभुना कल्पं ततो मोक्षं समश्नुते ॥ २१ ॥
गण्यंते पांसवो भूमेर्गण्यंते दिवि तारकाः ॥ सेतुदर्शनजं पुण्यं शेषेणापि न गण्यते ॥ २२ ॥ समस्तदेवतारूपः सेतुबंधः प्रकीर्तितः ॥ तद्दर्शनवतः
पुसः कः पुण्यं गणितु क्षमः ॥ २३ ॥ सेतुं दृष्ट्वा नरो विप्राः सर्वयागकरः स्मृतः ॥ स्नातश्च सर्वतीर्थेषु तपोऽतप्यत चाखिलम् ॥२४॥ सेतुं गच्छे

१ ब्रह्मनिष्ठैकतत्पराः–इति पाठान्तरम्। २ अथान्तरे–इ० पा०। ३ लोकानुग्रहकाम्यया–इ० पा०। ४ सर्वज्ञोऽसि–इ० पा०। ५ नाम्ना–इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

ति यो ब्रूयाद्यं कं वापि नरं द्विजाः ॥ सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषणः[1] ॥ २५ ॥ सेतुस्नानकरो मर्त्यः सप्तकोटिकुलान्वितः ॥ संप्रा
प्य विष्णुभवनं तत्रैव परिमुच्यते ॥ २६ ॥ सेतुं रामेश्वरं लिंगं गंधमादनपर्वतम् ॥ चिंतयन्मनुजः सत्यं सर्वपापैः प्रमुच्यते ॥ २७ ॥ मातृतः
पितृतश्चैव लक्षकोटिकुलान्वितः ॥ संप्राप्य विष्णुभवनं तत्रैव परिमुच्यते ॥ कल्पत्रयं शंभुपदे स्थित्वा तत्रैव मुच्यते ॥ २८ ॥
मूषावस्थां वसाकूपं तथा वैतरणीं नदीम् ॥ श्वभक्षं मूत्रपानं च सेतुस्नायी न पश्यति ॥ २९ ॥ तप्तशूलं तप्तशिलां पुरी
षह्रदमेव च ॥ तथा शोणितकूपं च सेतुस्नायी न पश्यति ॥ ३० ॥ शाल्मल्यारोहणं रक्तभोजनं कृमिभोजनम् ॥ स्वमांसभोजनं चैव
वह्निज्वालाप्रवेशनम् ॥ ३१ ॥ शिलावृष्टिं वह्निवृष्टिं नरकं कालसूत्रकम् ॥ क्षारोदकं चोष्णतोयं नेयात्सेत्ववलोककः ॥ ३२ ॥
सेतुस्नायी नरो विप्राः पंचपातकवानपि ॥ मातृतः पितृतश्चैव शतकोटिकुलान्वितः ॥ ३३ ॥ कल्पत्रयं विष्णुपदे स्थित्वा तत्रैव मुच्यते ॥
अधःशिरःशोषणं च नरकं क्षारसेवनम् ॥ ३४ ॥ पाषाणयन्त्रपीडां च मरुत्प्रपतनं तथा ॥ पुरीषलेपनं[2] चैव तथा क्रकचदारणम् ॥ ३५ ॥
पुरीषभोजनं रेतःपानं संधिषु दाहनम् ॥ अंगारशय्याभ्रमणं तथा मुसलमर्दनम् ॥ ३६ ॥ एतानि नरकाण्यद्धा सेतुस्नायी न पश्यति[3] ॥ तुसे
स्नानं करिष्येऽहमिति बुद्ध्या विचिंतयन् ॥ ३७ ॥ गच्छेच्छतपदं यस्तु स महापातकोऽपि सन् ॥ बहूनां काष्ठयंत्राणां कर्षणं शस्त्रभेदनम् ॥ ३८ ॥
पतनोत्पतनं चैव गदादण्डनिपीडनम् ॥ गजदन्तैश्च हननं नानाभुजगदंशनम् ॥ ३९ ॥ धूमपानं पाशबन्धं नानाशूलनिपीडनम् ॥ मुखे
च नासिकायां च क्षारोदकनिषेचनम् ॥ ४० ॥ क्षारांबुपानं नरकं तप्तायःसूचिभक्षणम् ॥ एतानि नरकान्यद्धा न याति गतपातकः[4] ॥ ४१ ॥
क्षारांबुपूर्णरंध्राणां प्रवेशं मलभोजनम्[5] ॥ स्नायुच्छेदं स्नायुदाहमस्थिभेदनमेव च ॥ ४२ ॥ श्लेष्मादनं पित्तपानं महातिक्तनिषेवणम् ॥ अत्युष्ण
तैलपानं च पानं क्षारोदकस्य च ॥ ४३ ॥ कषायोदकपानं च तप्तपाषाणभोजनम् ॥ अत्युष्णसिकतास्नानं तथा दशनमर्दनम् ॥ ४४ ॥
तप्तायःशयनं चैव संतप्तांबुनिषेचनम् ॥ सूचिप्रक्षेपणं चैव नेत्रयोर्मुखसंधिषु ॥ ४५ ॥ शिश्ने सवृषणे चैव ह्ययोभारस्य बन्धनम् ॥ वृक्षाग्रात्पतनं
चैव दुर्गंधपरिपूरिते ॥ ४६ ॥ तीक्ष्णधारास्त्रशय्यां च रेतःपानादिकं तथा ॥ इत्यादिनरकान्घोरान्सेतुस्नायी न पश्यति ॥ ४७ ॥ सेतुसैकतमध्ये
यः शेते तत्पांसुकुंठितः ॥ यावन्तः पांसवो लग्नास्तस्यांगे विप्रसत्तमाः ॥ ४८ ॥ तावतां ब्रह्महत्यानां नाशः स्यान्नात्र संशयः ॥ सेतुमध्यस्थ

१ बहुभाषितैः—इ० पा० । २ पुरीषलोचनम्—इ० पा० । ३ गच्छति—इ० पा० । ४ गतकल्मषः—इ० पा० । ५ मेहभोजनम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वातेन यस्यांगं स्पृश्यतेऽखिलम् ॥ ४९ ॥ सुरापानायुतं तस्य तत्क्षणादेव नश्यति ॥ वर्तते यस्य केशास्तु वपनात्सेतुमध्यतः ॥ ५० ॥ गुरुतल्पा युतं तस्य तत्क्षणादेव नश्यति ॥ यस्यास्थि सेतुमध्ये तु स्थापितं पुत्रपौत्रकैः ॥ स्वर्णस्तेयायुतं तस्य तत्क्षणादेव नश्यति ॥ ५१ ॥ स्मृत्वा यं सेतुमध्ये तु स्नानं कुर्याद्द्विजोत्तमाः ॥ महापातकिसंसर्गदोषस्तस्य लयं व्रजेत् ॥ ५२ ॥ मार्गभेदी स्वार्थपाकी यतिब्राह्मणदूषकः ॥ अत्याशी वेदविक्रेता पंचैते ब्रह्मघातकाः ॥ ५३ ॥ ब्राह्मणान्यः समाहूय दास्यामीति धनादिकम् ॥ पश्चान्नास्तीति यो ब्रूते ब्रह्महा सोपि कीर्तितः ॥ ५४ ॥ परिज्ञाय यतो धर्मांस्तस्मै यो द्वेषमाचरेत् ॥ अवजानाति वा विप्रान्ब्रह्महा सोपिकीर्तितः ॥ ५५ ॥ जलपानार्थमायातं गोवृन्दं तु जलाशये ॥ निवारयति यो विप्रा ब्रह्महा सोपि कीर्तितः ॥ ५६ ॥ सेतुमेत्य तु ते सर्वे मुच्यंते दोषसंचयैः ॥ ब्रह्मघातकतुल्या ये संति चान्ये द्विजोत्तमाः ॥ ॥ ५७ ॥ ते सर्वे सेतुमागत्य मुच्यंते नात्र संशयः ॥ औपासनपरित्यागी देवतान्नस्य भोजकः ॥५८॥ सुरापयोषित्संसर्गी गणिकान्नाशनस्तथा ॥ गणान्नभोजकश्चैव पतितान्नरतश्च यः ॥ ५९ ॥ एते सुरापिनः प्रोक्ताः सर्वकर्मबहिष्कृताः ॥ सेतुस्नानेन मुच्यंते ते सर्वे हतकिल्बिषाः ॥ ६० ॥ सुरापतुल्या ये चान्ये मुच्यंते सेतुमज्जनात् ॥ कन्दमूलफलानां च कस्तूरीपट्टवाससाम् ॥ ६१ ॥ पयश्चंदनकर्पूरक्रमुकाणां तथैव च ॥ मध्वाज्यताम्रकांस्यानां रुद्राक्षाणां तथैव च ॥ ६२ ॥ चोरकास्तु परिज्ञेया सुवर्णस्तेयिनः समाः ॥ ते सेतुक्षेत्रमागत्य मुच्यन्ते नात्र संशयः ॥ ६३ ॥ अन्ये च स्तेयिनः सर्वे सेतुस्नानेन वै द्विजाः ॥ मुच्यंते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ ६४ ॥ भगिनीं पुत्रभार्यां च तथैव च रजस्वलाम् ॥ भ्रातृभार्यां मित्रभार्यां मद्यपां च परस्त्रियम् ॥६५॥ हीनस्त्रियं च विश्वस्तां योऽभिगच्छति रागतः ॥ गुरुतल्पी स विज्ञेयः सर्वकर्मबहिष्कृतः ॥६६॥ एते चान्ये च ये संति गुरुतल्पगतुल्यकाः ॥ ते सर्वे प्रविमुच्यंते सेतुस्नानेन वै द्विजाः ॥ ६७ ॥ एतैः संसर्गिणो विप्रा ये चान्ये संति पापिनः ॥ सेतुस्नानेन महता तेऽपि मोक्षमवाप्नुयुः॥६८॥ यागं विना देवलोके घृताचीमेनकादिभिः॥ संभोगकामिनो विप्राः स्नातुं सेतावघापहे ॥ ६९ ॥ अनिषेव्य रविं वह्निमनुपास्य परान्सुरान् ॥ शुभकामी जनः सेतौ कुर्यात्स्नानं सभक्तिकम् ॥७०॥ तिलान्भूमिं सुवर्णं च धान्यं तंदुलमेव च ॥ अदत्त्वेच्छंति ते स्वर्गं स्नांतु सेतौ तु ते द्विजाः ॥७१॥ उपवासैर्व्रतैः कृत्स्नैरसंताप्य निजां तनुम् ॥ स्वर्गाभिलाषिणः पुंसः स्नांतु सेतौ विमुक्तिदे ॥७२॥ सेतुस्नानं मोक्षदं

१ विनश्यति–इ० पा० । २ तमाहुर्ब्रह्मघातकम्–इ० पा० । ३ सोऽप्युदीरितः–इ० पा० । ४ तमाहुर्ब्रह्मघातकम्–इ० पा० । ५ सेतुस्नानाद्विमुच्यन्ते–इ० पा० । ६ सदा–इ० पा० । ७ विश्वस्ताम्–विधवाम्–इत्यर्थः ।

हिमनःशुद्धिप्रदं तथा ॥ जपाद्धोमात्तथा दानाद्यागाच्च तपसोऽपि च ॥ ७३ ॥ सेतुस्नानं विशिष्टं हि पुराणे परिपठ्यते ॥ अकामनाकृतं स्नानं सेतौ पापविनाशने ॥ ७४ ॥ अपुनर्भवदं प्रोक्तं सत्यमुक्तं द्विजोत्तमाः ॥ यः संपदं समुद्दिश्य स्नाति सेतौ नरो मुदा ॥ ७५ ॥ ससंपदमवाप्नोति विपुलां द्विजपुंगवाः ॥ शुद्ध्यर्थं स्नाति चेत्सेतौ तदा शुद्धिमवाप्नुयात् ॥ ७६ ॥ रत्यर्थं यदि च स्नायादप्सरोभिर्नरो दिवि ॥ तदा रतिमवाप्नोति स्वर्गलोकेऽमरीजनैः ॥ ७७ ॥ मुक्त्यर्थं यदि च स्नायात्सेतौ मुक्तिप्रदायिनि ॥ तदा मुक्तिमवाप्नोति पुनरावृत्तिवर्जिताम् ॥७८॥ सेतुस्नानेन धर्मः स्यात्सेतुस्नानादघक्षयः ॥ सेतुस्नानं द्विजश्रेष्ठाः सर्वकामफलप्रदम् ॥ ७९ ॥ सर्वव्रताधिकं पुण्यं सर्वयज्ञोत्तरं स्मृतम् ॥ सर्वयोगाधिकं प्रोक्तं सर्वतीर्थाधिकं स्मृतम् ॥ ८० ॥ इंद्रादिलोकभोगेषु रागो येषां प्रवर्तते ॥ स्नातव्यं तैर्द्विजश्रेष्ठाः सेतौ रामकृते सकृत् ॥ ८१ ॥ ब्रह्मलोके च वैकुण्ठे कैलासेऽपि शिवालये ॥ रंतुमिच्छा भवेद्येषां ते सेतौ स्नांतु सादरम् ॥ ८२ ॥ आयुरारोग्यसंपत्तिमतिरूपगुणाढ्यताम् ॥ चतुर्णामपि वेदानां सांगानां पारगामिनाम् ॥ ८३ ॥ सर्वशास्त्राधिगंतृत्वं सर्वमंत्रेष्वभिज्ञताम् ॥ समुद्दिश्य तु यः स्नायात्सेतौ सर्वार्थसिद्धिदे ॥ ८४ ॥ तत्तत्सिद्धिमवाप्नोति सत्यं स्यान्नात्र संशयः ॥ दारिद्र्यान्नरकाद्ये च मनुजा भुवि बिभ्यति ॥ ८५ ॥ स्नानं कुर्वंतु ते सर्वे रामसेतौ विमुक्तिदे ॥ श्रद्धया सहितो मर्त्यः श्रद्धया रहितोऽपि वा ॥ ८६ ॥ इहलोके परत्रापि सेतुस्नायी न दुःखभाक् ॥ सेतुस्नानेन सर्वेषां नश्यते पापसंचयः ॥ ८७ ॥ वर्द्धते धर्मराशिश्च शुक्लपक्षे यथा शशी ॥ यथा रत्नानि वर्द्धंते समुद्रे विविधान्यपि ॥ ८८ ॥ तथा पुण्यानि वर्द्धंते सेतुस्नानेन वै द्विजाः ॥ कामधेनुर्यथा लोके सर्वान्कामान्प्रयच्छति ॥ ८९ ॥ चिंतामणिर्यथा दद्यात्पुरुषाणां मनोरथान् ॥ यथाऽमरतरुर्दद्यात्पुरुषाणामभीप्सितम् ॥ ९० ॥ सेतुस्नानं तथा नृणां सर्वाभीष्टान्प्रदास्यति ॥ अशक्तः सेतुयात्रायां दारिद्र्येण च मानवः ॥ ९१ ॥ याचित्वा स धनं शिष्टात्सेतौ स्नानं समाचरेत् ॥ सेतुस्नानसमं पुण्यं तत्र दाता समश्नुते ॥ ९२ ॥ तथा प्रतिगृहीतापि प्राप्नोत्यविकलं फलम् ॥ सेतुयात्रां समुद्दिश्य गृह्णीयाद्ब्राह्मणाद्धनम् ॥ ९३ ॥ क्षत्रियादपि गृह्णीयान्न दद्युर्ब्राह्मणा यदि ॥ वैश्याद्वा प्रतिगृह्णीयान्न प्रयच्छंति चेन्नृपाः ॥ ९४ ॥ शूद्रान्न प्रतिगृह्णीयात्कथंचिदपि मानवः ॥ यः सेतुं गच्छतः पुंसो धनं वा धान्यमेव वा ॥ ९५ ॥ दत्त्वा वस्त्रादिकं वापि प्रवर्तयति मानवः ॥ सोऽश्वमेधादियज्ञानां फलमाप्नोत्यनुत्तमम् ॥ ९६ ॥ चतुर्णामपि वेदानां पारायणफलं लभेत् ॥ तुलापुरुषमुख्यानां दानानां फलमश्नुते ॥ ९७ ॥ ब्रह्महत्यादिपापानां नाशः स्यान्नात्र संशयः ॥ बहुना किं प्रलापेन सर्वान्कामान्समश्नुते ॥ ९८ ॥ एवं प्रतिगृहीतापि तत्तुल्यफलमश्नुते ॥ याचतः सेतुयात्रार्थं न प्रतिग्रहकल्म

CC-0. In Public Domain. Digitization by eGangotri

षम् ॥ ९९ ॥ सेतुं गच्छ धनं तेऽहं दास्यामीति प्रलोभ्य यः ॥ पश्चान्नास्तीति च ब्रूयात्तमाहुर्ब्रह्मघातकम् ॥ १०० ॥ लोभेन सेतुयात्रार्थं संपन्नोऽपि
दरिद्रवत् ॥ मानवो यदि याचेत तमाहुस्तेयिनं बुधाः ॥ १०१ ॥ गमिष्ये सेतुमिति वै यो गृहीत्वा धनं नरः ॥ न याति सेतुं लोभेनतमाहुर्ब्रह्मघा
तकम् ॥ १०२ ॥ येन केनाप्युपायेन सेतुं गच्छेन्नरो मुदा ॥ अशक्तो दक्षिणां दत्त्वा गमयेद्वा द्विजोत्तमम् ॥१०३॥ याचित्वा यज्ञकरणे यथा दोषो
न विद्यते ॥ याचित्वा सेतुयात्रायां तथा दोषो न विद्यते ॥ १०४ ॥ याचित्वाप्यन्यतो द्रव्यं सेतुस्नाने प्रवर्तयेत् ॥ सोऽपि तत्फलमाप्नोति सेतु
स्नायी नरो यथा ॥ १०५ ॥ ज्ञानेन मोक्षमभियांति कृते युगे तु त्रेतायुगे यजनमेव विमुक्तिदायि ॥ श्रेष्ठं तथान्ययुगयोरपि दानमाहुः सर्वत्र सेत्व
भिषवो हि वरो नराणाम् ॥१०६॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सेतुगमनफलादिवर्णनं
नाम प्रथमोऽध्यायः॥१॥ ॥ ऋषय ऊचुः ॥ ॥ कथं सूत महाभाग रामेणाक्लिष्टकर्मणा ॥ सेतुर्बद्धो नदीनाथे ह्यगाधे वरुणालये ॥१॥ सेतौ च कति
तीर्थानि गंधमादनपर्वते ॥ एतन्नः श्रद्दधानानां ब्रूहि पौराणिकोत्तम ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ रामेण हि यथा सेतुर्निबद्धो वरुणालये ॥ तदहं
संप्रवक्ष्यामि युष्माकं मुनिपुंगवाः ॥ ३ ॥ आज्ञया हि पितू रामो न्यवसद्दंडकानने ॥ सीतालक्ष्मणसंयुक्तः पंचवट्यां समाहितः॥ ४ ॥ तस्मिन्निव
सतस्तस्य राघवस्य महात्मनः ॥ रावणेन हृता भार्या मारीचच्छद्मना द्विजाः ॥५ ॥ मार्गमाणो वने भार्यां रामो दशरथात्मजः॥ पंपातीरे जगा
मासौ शोकमोहसमन्वितः ॥६॥ दृष्टवान्वानरं तत्र कंचिद्दशरथात्मजः ॥ वानरेणाथ पृष्टोऽयं को भवानिति राघवः ॥ ७ ॥ आदितः स्वस्य वृत्तांतं
तस्मै प्रोवाच तत्त्वतः ॥ अथ राघवसंपृष्टो वानरः को भवानिति ॥ ८ ॥ सोपि विज्ञापयामास राघवाय महात्मने ॥ अहं सुग्रीवसचिवो हनूमा
न्नाम वानरः ॥ ९ ॥ तेन च प्रेरितोऽभ्यागां युवाभ्यां सख्यमिच्छता ॥ आगच्छतं तद्भद्रं वां सुग्रीवांतिकमाशु वै ॥ १० ॥ तथास्त्विति स रामो
पि तेन साकं मुनीश्वराः ॥ सुग्रीवांतिकमागत्य सख्यं चक्रेऽग्निसाक्षिकम् ॥ ११ ॥ प्रतिजज्ञेऽथ रामोऽपि तस्मै वालिवधं प्रति ॥ सुग्रीवश्चापि वै
देह्याः पुनरानयनं द्विजाः ॥ १२ ॥ इत्येवं समयं कृत्वा विश्वास्य च परस्परम् ॥ मुदा परमया युक्तौ नरेश्वरकपीश्वरौ ॥१३॥ आसाते ब्राह्मणश्रेष्ठा
ऋष्यमूकगिरौ तथा ॥ सुग्रीवप्रत्ययार्थं च दुंदुभेः कायमाशु वै ॥ १४ ॥ पादांगुष्ठेन चिक्षेप राघवो बहुयोजनम् ॥ सप्ततालान् विनिर्भिन्ना राघवेण
महात्मना ॥ १५ ॥ ततः प्रीतमना वीरः सुग्रीवो राममब्रवीत् ॥ इंद्रादिदेवताभ्योऽपि नास्ति राघव मे भयम् ॥ १६ ॥ भवान्मित्रं मया लब्धो

१ वाणेन--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

यस्मादति पराक्रमः ॥ अहं लंकेश्वरं हत्वा भार्यामानयितास्मि ते ॥ १७ ॥ ततः सुग्रीवसहितो रामचंद्रो महाबलः ॥ सलक्ष्मणो ययौ तूर्णं किष्किंधां वालिपालिताम् ॥ १८ ॥ ततो जगर्ज सुग्रीवो वाल्यागमनकांक्षया ॥ अमृष्यमाणो वाली च गर्जितं स्वानुजस्य ॥ ॥ १९ ॥ अंतःपुराद्विनिष्क्रम्य युयुधेऽवरजेन सः ॥ वालिमुष्टिप्रहारेण ताडितो भृशविह्वलः ॥ २० ॥ सुग्रीवो निर्गतस्तूर्णं यत्र रामो महाबलः वै ततो रामो महाबाहुस्सुग्रीवस्य शिरोधरे ॥ २१ ॥ लतामाबध्य चिह्नं तु युद्धायाचोदयत्तदा ॥ गर्जितेन समाहूय सुग्रीवो वालिनं पुनः ॥ २२ ॥ रामप्रेरणया तेन बाहुयुद्धमथाकरोत् ॥ ततो वालिनमाजघ्ने शरेणैकेन[1] राघवः ॥ २३ ॥ हते वालिनि सुग्रीवः किष्किंधां प्रत्यपद्यत ॥ ततो वर्षास्व तीतासु सुग्रीवो वानराधिपः ॥ २४ ॥ सीतामानयितुं तूर्णं वानराणां महाचमूम् ॥ समादाय समागच्छदंतिकं नृपपुत्रयोः ॥ २५ ॥ प्रस्थापयामास कपीन्सीतान्वेषणकांक्षया ॥ विदितायां तु वैदेह्यां लंकायां वायुसूनुना ॥ २६ ॥ दत्ते चूडामणौ चापि राघवो हर्षशोकवान् ॥ सुग्रीवेणानुजेनापि वायुपुत्रेण धीमता ॥ २७ ॥ तथान्यैः कपिभिश्चैव जांबवन्नलमुख्यकैः ॥ अन्वीयमानो रामोऽसौ मुहूर्तेऽभिजिति द्विजाः ॥२८॥ विलंघ्य विविधा न्देशान्महेंद्रं पर्वतं ययौ ॥ चक्रतीर्थं ततो गत्वा निवासमकरोत्तदा ॥ २९ ॥ तत्रैव तु स धर्मात्मा समागच्छद्विभीषणः[2] ॥ भ्राता वै राक्षसेंद्रस्य चतु र्भिः सचिवैः[3] सह ॥ ३० ॥ प्रतिजग्राह रामस्तं स्वागतेन महात्मना ॥ सुग्रीवस्य तु शंकाऽभूत्प्रणिधिः[4] स्यादयं त्विति ॥ ३१ ॥ राघवस्तस्य चेष्टाभिः सम्यक्स्वचरितैर्हितैः ॥ अदुष्टमेनं दृष्ट्वैव तत एनमपूजयत् ॥ ३२ ॥ सर्वराक्षसराज्ये तमभ्यषिंचद्विभीषणम् ॥ चक्रे च मंत्रिप्रवरं सदृशं रविसूनुना ॥ ३३ ॥ चक्रतीर्थं समासाद्य निवसद्रघुनंदनः ॥ चिंतयन्राघवः श्रीमान्सुग्रीवादीनभाषत ॥ ३४ ॥ मध्ये वानरमु ख्यानां प्राप्तकालमिदं वचः ॥ उपायः को नु भवतामेतत्सागरलंघने ॥ ३५ ॥ इयं च महती सेना सागरश्चापि दुस्तरः ॥ अंभोराशिरयं नीलश्चंचलोर्म्मिसमाकुलः ॥ ३६ ॥ उद्यन्मत्स्यो महानक्रशंखशुक्तिसमाकुलः ॥ क्वचिदौर्वानलाक्रांतः फेनवानतिभीषणः ॥ ॥ ३७ ॥ प्रकृष्टपवनाकृष्टनीलमेघसमन्वितः ॥ प्रलयांभोधरारावः सारवाननिलोद्धतः ॥ ३८ ॥ कथं सागरमक्षोभ्यं तरामो वरुणा लयम् ॥ सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् ॥ ३९ ॥ उपायैरधिगच्छामो यथा नदनदीपतिम् ॥ कथं तरामः सहसा

१ वाणेन । २ विभीषणः--इ० पा० । अत्र हि 'विभिषण विभीषण' शब्दयोर्मध्ये प्रायो विवादः सर्वत्र सर्वतः शोश्रूयते नात्र निश्चयोऽधिगम्यते तन्निर्णयश्चास्मद्बुद्ध्यायमेव–'ञिभी:भये' इत्यस्य सन्नान्तत्वाद्युचि रूपमत्रिभेतुमिच्छति अधर्मो मां मास्प्राक्षीत् इति विभीषति बिभीषतीति विभीषण--इति । ३ सह मंत्रिभिः--इ० पा० । ४ गुप्तचारः इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ससैन्या वरुणालयम् ॥ ४० ॥ शतयोजनमायातं मनसापि दुरासदम् ॥ अतो नु विघ्ना बहवः कथं प्राप्या च मैथिली ॥ ४१ ॥ कष्टात्कष्टतरं प्राप्ता वयमद्य निराश्रयाः ॥ महाजले महावाते समुद्रे हि निराश्रये ॥ ४२ ॥ उपायं कं विधास्यामस्तरणार्थं वनौकसाम् ॥ राज्याद्भ्रष्टो वनं प्राप्तो हृता सीता मृतः पिता ॥ ४३ ॥ इतोऽपि दुःसहं दुःखं यत्सागरविलंघनम् ॥ धिग्धिग्गर्जितमंभोधे धिगेतां वारिराशिताम् ॥ ४४ ॥ कथं तद्वचनं मिथ्या महर्षेः कुम्भजन्मनः ॥ हत्वा त्वं रावणं पापं पवित्रे गंधमादने ॥ पापोपशमनायाशु गच्छस्वेति यदीरितम् ॥४५॥ ॥ श्रीसूत उवाच ॥ ॥ इति रामवचः श्रुत्वा सुग्रीवप्रमुखास्तदा ॥ ४६ ॥ ऊचुः प्रांजलयः[1] सर्वे राघवं तं महाबलम् ॥ नौभिरेनं तरिष्यामः प्लवैश्च विविधैरिति ॥ ४७ ॥ मध्ये वानरकोटीनां तदोवाच बिभीषणः ॥ समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ४८ ॥ खनितः सागरैरेष समुद्रो वरुणालयः ॥ कर्तुमर्हति रामस्य तज्ज्ञातेः कार्यमंबुधिः ॥ ४९ ॥ बिभीषणेनैवमुक्तो राक्षसेन विपश्चिता ॥ सांत्वयन्राघवः सर्वान्वानरानिदमब्रवीत् ॥ ५० ॥ शतयोजन विस्तारमशक्ताः सर्ववानराः ॥ तर्तुं प्लवोडुपैरेनं समुद्रमतिभीषणम् ॥ ५१ ॥ नावो न संति सेनाया बह्वया वानरपुंगवाः ॥ वणिजामुपघातं च कथमस्मद्विधश्चरेत् ॥ ५२ ॥ विस्तीर्णं चैव नः सैन्यं हन्याच्छिद्रेषु वा परः ॥ प्लवोडुपप्रतारोऽतो नैवात्र मम रोचते ॥ ५३ ॥ बिभीषणोक्तमेवेदं मोदते मम वानराः ॥ अहं त्विमं जलनिधिमुपास्ये मार्गसिद्धये ॥ ५४ ॥ नो चेद्दर्शयिता मार्गं धक्ष्याम्येनमहं तदा ॥ महास्त्रैरप्रतिहतैरत्यग्निपवनोज्वलैः ॥ ५५ ॥ इत्युक्त्वा सहसौमित्रिरुपस्पृश्याथ राघवः ॥ प्रतिशिश्ये जलनिधिं विधिवत्कुशसंस्तरे ॥ ५६ ॥ तदा रामः कुशास्तीर्णे तीरे नदनदीपतेः ॥ संविवेश महाबाहुर्वेद्यामिव हुताशनः ॥ ५७ ॥ शेषभोगनिभं बाहुमुपधाय रघूद्वहः ॥ दक्षिणो दक्षिणं बाहुमुपास्ते मकरालयम्[2] ॥ ५८ ॥ तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले ॥ नियमादप्रमत्तस्य निशास्तिस्रोऽतिचक्रमुः ॥ ५९ ॥ स त्रिरात्रोषितस्तत्र नयज्ञो धर्मतत्परः ॥ उपास्तेस्म तदा रामः सागरं मार्गसिद्धये ॥ ६० ॥ न च दर्शयते मन्दस्तदा रामस्य सागरः ॥ प्रयतेनापि रामेण यथार्हमपि पूजितः ॥ ६१ ॥ तथापि सागरो रामं न दर्शयति चात्मनः ॥ समुद्राय ततः क्रुद्धो रामो रक्तांतलोचनः ॥ ६२ ॥ समीपवर्तिनं चेदं लक्ष्मणं प्रत्यभाषत ॥ अद्य मद्बाणनिर्भिन्नैर्मकरैर्वरुणालयम् ॥ ६३ ॥ निरुद्धतोयं सौमित्रे करिष्यामि क्षणादहम् ॥ सशंखशुक्ताजालं हि समीनमकरं शनैः ॥ ६४ ॥ अद्य बाणैरमोघास्त्रैर्वारिधिं परिशोषये ॥ क्षमया हि समायुक्तं मामयं मकरालयः ॥ ६५ ॥ असमर्थं विजानाति धिक्क्षमामीदृशे

१ सखायस्ते--इ० पा० । २ वरुणालयम्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

जने ॥ न दर्शयति साम्ना मे सागरो रूपमात्मनः ॥ ६६ ॥ चापमानय सौमित्रे शरांश्चाशीविषोपमान् ॥ सागरं शोषयिष्यामि पद्भ्यां यांतु प्लुवंगमाः ॥ ६७ ॥ एनं लंघितमर्यादं सहस्रोर्मिसमाकुलम् ॥ निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् ॥ ६८ ॥ महार्णवं शोषयिष्ये[1] महादानवसंकुलम् ॥ महामकरनक्राढ्यं महावीचिसमाकुलम् ॥ ६९ ॥ एवमुक्त्वा धनुष्पाणिः क्रोधपर्याकुलेक्षणः ॥ रामो बभूव दुर्धर्षस्त्रिपुरघ्नो यथा शिवः ॥ ७० ॥ आकृष्य चापं कोपेन कम्पयित्वा शरैर्जगत् ॥ मुमोच विशिखानुग्रांस्त्रिपुरेषु यथा भवः ॥ ७१ ॥ दीप्ता बाणाश्च ये घोरा भासयन्तो दिशो दश ॥ प्राविशन्वारिधेस्तोयं दृप्तदानवसंकुलम् ॥७२ ॥ समुद्रस्तु ततो भीतो वेपमानः कृतांजलिः ॥ अनन्यशरणो विप्राः पाता लात्स्वयमुत्थितः॥७३॥ शरणं राघवं भेजे कैवल्यपदकारणम् ॥ तुष्टाव राघवं विप्रा भूत्वा शब्दैर्मनोरमैः ॥ ७४ ॥ ॥ समुद्र उवाच ॥ ॥ नमामि ते राघव पादपंकजं सीतापते सौख्यद पादसेवनात् ॥नमामि ते गौतमदारमोक्षजं श्रीपादरेणुं सुरवृन्दसेव्यम्॥७५॥सुन्दप्रियादेहविदारिणे नमो नमोऽस्तु ते कौशिकयागरक्षिणे ॥ नमो महादेवशरासभेदिने नमो नमो राक्षससंघनाशिने ॥ ७६ ॥ रामराम नमस्यामि भक्तानामिष्टदायिनम् ॥ अवतीर्णो रघुकुले देवकार्यचिकीर्षया ॥ ७७ ॥ नारायणमनाद्यंतं मोक्षदं शिवमच्युतम् ॥ रामराम महाबाहो रक्ष मां शरणागतम् ॥ ७८ ॥ कोपं संहर राजेंद्र क्षमस्व करुणालय ॥ भूमिर्वातो वियच्चापो ज्योतींषि च रघूद्वह ॥ ७९ ॥ यत्स्वभावानि सृष्टानि ब्रह्मणा परमेष्ठिना ॥ वर्तंते तत्स्वभा वानि स्वभावो मे ह्यगाधता ॥ ८० ॥ विकारस्तु भवेद्गाध एतत्सत्यं वदाम्यहम् ॥ लोभात्कामाद्भयाद्वापि रागाद्वापि रघूद्वह ॥ ८१ ॥ न वंशजं गुणं हातुमुत्सहेयं कथंचन ॥ तत्करिष्ये च साहाय्यं सेनायास्तरणे तव ॥ ८२ ॥ इत्युक्तवन्तं जलधिं रामोऽवादीन्नदीपतिम् ॥ ससैन्योऽहं गमि ष्यामि लंकां रावणपालिताम् ॥ ८३ ॥ तच्छोषमुपयाहि त्वं तरणार्थं ममाधुना ॥ इत्युक्तस्तं पुनः प्राह राघवं वरुणालयः ॥ ८४ ॥ शृणुष्वाव हितो राम श्रुत्वा कर्तव्यमाचर ॥ यद्याज्ञया ते शुष्यामि ससैन्यस्य यियासतः ॥८५॥ अन्येऽप्याज्ञापयिष्यंति मामेवं धनुषो बलात् ॥ उपायमन्यं वक्ष्यामि तरणार्थं बलस्य ते ॥ ८६ ॥ अस्ति ह्यत्र नलोनाम वानरः शिल्पिसंमतः ॥ त्वष्टुः काकुत्स्थ तनयो बलवान्विश्वकर्मणः ॥ ८७ ॥ स यत्काष्ठं तृणं वापि शिलां वा क्षेप्स्यते मयि ॥ सर्वं तद्धारयिष्यामि स ते सेतुर्भविष्यति ॥ ८८ ॥ सेतुना तेन गच्छ त्वं लंकां रावणपालि ताम् ॥ उक्त्वेत्यंतर्हिते तस्मिन्रामो[2] नलमुवाच ह ॥ ८९ ॥ कुरु सेतुं समुद्रे त्वं शक्तो ह्यसि महामते ॥ तदाऽब्रवीन्नलो वाक्यं रामं धर्मभृतां

१ क्षोभयिष्ये–इ० पा० । २ स रामो नलमूचिवान्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरम् ॥ ९० ॥ अहं सेतुं विधास्यामि ह्यगाधे वरुणालये ॥ पित्रा दत्तवरश्चाहं सामर्थ्ये चापि तत्समः ॥ ९१ ॥ मातुर्मम वरो दत्तो मन्दरे विश्वकर्मणा ॥ शिल्पकर्मणि मत्तुल्यो भविता ते सुतस्त्विति ॥ ९२ ॥ पुत्रोऽहमौरसस्तस्य तुल्यो वै विश्वकर्मणा ॥ अद्यैव कामं बध्नंतु सेतुं वानरपुंगवाः ॥ ९३ ॥ ततो रामनिसृष्टास्ते[1] वानरा बलवत्तराः ॥ पर्वतान्गिरिशृंगाणि लतातृणमहीरुहान् ॥ ९४ ॥ समाजह्रुर्महाकाया गरुडानिलरंहसः ॥ नलश्चक्रे महासेतुंमध्ये नदनदीपतेः ॥ ९५ ॥ दशयोजनविस्तीर्णं शतयोजनमायतम् ॥ जानकीरमणो रामः सेतुमेवमकारयत् ॥ ९६ ॥ नलेन वानरेन्द्रेण विश्वकर्मसुतेन वै ॥ तमेवं सेतुमासाद्य रामचन्द्रेण कारितम् ॥ ९७ ॥ सर्वे पातकिनो मर्त्या मुच्यन्ते सर्वपातकैः ॥ व्रतदानतपोहोमैर्न तथा तुष्यते शिवः ॥ ९८ ॥ सेतुमज्जनमात्रेण यथा तुष्यति[2] शंकरः ॥ न तुल्यं विद्यते तेजो यथा सौरेण तेजसा ॥ ९९ ॥ सेतुस्नानेन च तथा न तुल्यं विद्यते क्वचित् ॥ तत्सेतुमूलं लंकायां यत्र रामो यियासया ॥ १०० ॥ वानरैः सेतुमारेभे पुण्यं पापप्रणाशनम् ॥ तद्दर्भशयनं नाम्ना पश्चाल्लोकेषु विश्रुतम् ॥ १०१ ॥ एवमुक्तं मया विप्राः समुद्रे सेतुबंधनम् ॥ अत्र तीर्थान्यनेकानि संति पुण्यान्यनेकशः ॥ १०२ ॥ न संख्यां नामधेयं वा शेषो गणयितुं क्षमः ॥ किं त्वहं प्रब्रवीम्यद्य तत्र तीर्थानि कानिचित् ॥ १०३ ॥ चतुर्विंशतितीर्थानि संति सेतौ प्रधानतः ॥ प्रथमं चक्रतीर्थं स्याद्वेतालवरदं ततः ॥ १०४ ॥ ततः पापविनाशार्थं तीर्थं लोकेषु विश्रुतम् ॥ ततः सीतासरः पुण्यं ततो मंगलतीर्थकम् ॥ ॥ १०५ ॥ ततः सकलपापघ्नी नाम्ना चामृतवापिका ॥ ब्रह्मकुण्डं ततस्तीर्थं ततः कुंडं हनूमतः ॥ १०६ ॥ आगस्त्यं हि ततस्तीर्थं रामतीर्थमतः परम् ॥ ततो लक्ष्मणतीर्थं स्याज्जटातीर्थमतः परम् ॥ १०७ ॥ ततो लक्ष्म्याः परं तीर्थमग्नितीर्थमतः परम् ॥ चक्रतीर्थं ततः पुण्यं शिवतीर्थमतः परम् ॥ १०८ ॥ ततः शंखाभिधं तीर्थं ततो यामुनतीर्थकम् ॥ गंगातीर्थं ततः पश्चाद्गयातीर्थमनन्तरम् ॥ १०९ ॥ ततः स्यात्कोटितीर्थाख्यं साध्यानाममृतं ततः ॥ मानसाख्यं ततस्तीर्थं धनुष्कोटिस्ततः परम् ॥ १०० ॥ प्रधानतीर्थान्येतानि महापापहराणि च ॥ कथितानि द्विजश्रेष्ठास्सेतुमध्यगतानि वै ॥ १११ ॥ यथा सेतुश्च बद्धोऽभूद्रामेण जलधौ महान् ॥ कथितं तच्च विप्रेन्द्राः पुण्यं पापहारं तथा ॥ ११२ ॥ यच्छ्रुत्वा च पठित्वा च मुच्यते मानवो भुवि ॥ ११३ ॥ अध्यायमेनं पठते मनुष्यः शृणोति वा भक्तियुतो द्विजेंद्राः ॥ सो

१ रामनिसृष्टाः—रामेणाज्ञापिताः—इत्यर्थः । २ प्रीणाति—इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नंतमाप्नोति जयं परत्र पुनर्भवक्लेशमसौ न गच्छेत् ॥ ११४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्ये सेतुनिर्माणादिवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ चतुर्विंशतितीर्थानि यान्युक्तानि त्वया
मुने ॥ तेषां प्रधानतीर्थानां सेतौ पापविनाशने ॥ १ ॥ आदिमस्य तु तीर्थस्य चक्रतीर्थमिति प्रथा ॥ कथं समागता सूत वदास्माकं
हि पृच्छताम् ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ चतुर्विंशतितीर्थानां प्रधानानां द्विजोत्तमाः ॥ यदुक्तमादिमं तीर्थं सर्वलोकेषु विश्रुतम् ॥
॥ ३ ॥ स्मरणात्तस्य तीर्थस्य गर्भवासो न विद्यते ॥ विलयं यांति पापानि लक्षजन्मकृतान्यपि[1] ॥ ४ ॥ तस्मिंस्तीर्थे सकृत्स्नाना
त्स्मरणात्कीर्तनादपि ॥ लोके ततोधिकं तीर्थं तत्तुल्यं वा द्विजोत्तमाः ॥ ५ ॥ न विद्यते मुनिश्रेष्ठाः सत्यमुक्तमिदं मया ॥ गंगा
सरस्वती रेवा पंपा गोदावरी नदी ॥ ६ ॥ कालिंदी चैव कावेरी नर्मदा मणिकर्णिका ॥ अन्यानि यानि तीर्थानि नद्यः पुण्या महीतले ॥
॥ ७ ॥ अस्य तीर्थस्य विप्रेंद्राः कोट्यंशेनापि नो समाः ॥ धर्मतीर्थमिति प्राहुस्तत्तीर्थं हि पुराविदः ॥ ८ ॥ यथा समागता तस्य चक्रतीर्थमिति
प्रथा ॥ तदिदानीं प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ ९ ॥ सेतुमूलं हि तत्प्रोक्तं तद्दर्भशयनं मतम् ॥ तत्रैव चक्रतीर्थं तु महापातकमर्दनम् ॥
॥१०॥ पुरा हि गालवोनाम मुनिर्विष्णुपरायणः ॥ दक्षिणांभोनिधेस्तीरे हालास्यादविदूरतः ॥११॥ फुल्लग्रामसमीपे च तथा क्षीरसरोंतिके ॥ धर्म
पुष्करिणीतीरे सोऽतप्यत महत्तपः ॥ १२ ॥ युगानामयुतं ब्रह्म गृणन्विप्राः सनातनम् ॥ दयायुक्तो निराहारः सत्यवान्विजितेंद्रियः ॥१३॥ आत्म
वत्सर्वभूतानि पश्यन्विषयनिःस्पृहः ॥ सर्वभूतहितो दांतः सर्वद्वंद्वविवर्जितः ॥ १४ ॥ वर्षाणि कतिचित्सोऽयं जीर्णपर्णाशनोऽभवत ॥ किंचि
त्कालं जलाहारो वायुभक्षः कियत्समाः ॥ १५ ॥ एवं पंचसहस्राणि वर्षाणि स महामुनिः ॥ अतप्यत तपो घोरं देवैरपि सुदुष्करम् ॥ १६ ॥
ततः पंचसहस्राणि वर्षाणि मुनिपुंगवः ॥ निराहारो निरालोको निरुच्छ्वासो निरास्पदः ॥ १७ ॥ वर्षास्वासारसहनं हेमंतेषु जलेशयः॥ ग्रीष्मे पंचा
ग्निमध्यस्थो विष्णुध्यानपरायणः॥ १८ ॥ जपन्नष्टाक्षरं मंत्रं ध्यायन्हृदि जनार्दनम् ॥ तताप सुमहातेजा गालवो मुनिपुंगवः ॥ १९ ॥ एवं त्वयुतव
र्षाणि समतीतानि वै मुनेः ॥ अथ तत्तपसा तुष्टो भगवान्कमलापतिः ॥ २० ॥ प्रत्यक्षतामगात्तस्य शंखचक्रगदाधरः ॥ विकचांबुजपत्राक्षः सूर्य
कोटिसमप्रभः ॥ २१ ॥ विनतानंदनारूढश्छत्रचामरशोभितः[2] ॥ हारकेयूरमुकुटकटकादिविभूषितः ॥ २२ ॥ विष्वक्सेनसुनंदादिकिंकरैः परिवा ॥ ६ ॥

१ लक्षजन्मार्जितान्यपि–इ० पा० । २ चक्रचामरशोभितः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रितः ॥ वीणावेणुमृदंगादिवादकैर्नारदादिभिः ॥ २३ ॥ उपगीयमानविजयः पीतांबरविराजितः ॥ लक्ष्मीविराजितोरस्को नीलमेघसमच्छविः ॥ ॥ २४ ॥ धुनानः पद्ममेकेन पाणिना मधुसूदनः ॥ सनकादिमहायोगिसेवितः पार्श्वयोर्द्वयोः ॥ २५ ॥ मंदस्मितेन सकलं मोहयन्भुवनत्रयम् ॥ स्वभासा भासयन्सर्वान्दिशो दश च भूसुराः ॥ २६ ॥ कंठलग्नेन मणिना कौस्तुभेन च शोभितः ॥ सुवर्णवेत्रहस्तैश्च सौविदल्लैरनेकशः ॥ ॥ २७ ॥ अनन्यदुर्लभाचिंत्यगीयमाननिजाद्भुतः ॥ सुभक्तसुलभो देवो लक्ष्मीकांतो हरिः स्वयम् ॥ २८ ॥ सन्न्यधत्त पुरस्तस्य गालवस्य महामुनेः ॥ आविर्भूतं तदा दृष्ट्वा श्रीवत्सांकितवक्षसम् ॥ २९ ॥ पीतांबरधरं देवं तुष्टिं प्राप महामुनिः ॥ भक्त्या परमया युक्तस्तुष्टाव जगदीश्वरम् ॥ ॥३०॥ गालव उवाच ॥ नमो देवादिदेवाय शंखचक्रगदाभृते ॥नमो नित्याय शुद्धाय सच्चिदानंदरूपिणे ॥३१॥ नमो भक्तार्तिहंत्रे ते हव्यकव्यस्वरूपिणे॥ नमस्त्रिमूर्तये तुभ्यं सृष्टिस्थित्यंतकारिणे॥३२॥नमः परेशाय नमो विभून्ने नमोऽस्तु लक्ष्मीपतये विधात्रे॥नमोऽस्तु सूर्येंदुविलोचनाय नमो विरिंच्याद्यभिवंदिताय ॥३३॥ यो नामजात्यादिविकल्पहीनः समस्तदोषैरपि वर्जितो यः ॥समस्तसंसारभयापहारिणे तस्मै नमो दैत्यविनाशनाय ॥ ३४ ॥ वेदांतवेद्याय रमेश्वराय वैकुण्ठवासाय विधातृपित्रे ॥ नमोनमः सत्यजनार्तिहारिणे नारायणायामितविक्रमाय ॥ ३५ ॥ नमस्तुभ्यं भगवते वासुदेवाय शार्ङ्गिणे ॥ भूयोभूयो नमस्तुभ्यं शेषपर्यंकशायिने ॥ ३६ ॥ इति स्तुत्वा हरिं विप्रास्तूष्णीमास्ते स गालवः ॥ श्रुत्वा स्तुतिं श्रुतिसुखां हरिस्तस्य महात्मनः ॥ ३७ ॥ अवाप परमं तोषं शंखचक्रगदाधरः ॥ अथालिंग्य मुनिं शौरिश्चतुर्भिर्बाहुभिस्तदा ॥ ३८ ॥ बभाषे प्रीतिसंयुक्तो वरो वै व्रियतामिति ॥ तुष्टोऽस्मि तपसा तेऽद्य स्तोत्रेणापि च गालव ॥ ३९ ॥ नमस्कारेण च प्रीतो वरदोऽहं तवागतः ॥ ॥ गालव उवाच ॥ ॥ नारायण रमानाथ पीतांबर जगन्मय ॥ ४० ॥ जनार्दन जगद्धामन्गोविंद नरकांतक ॥ त्वद्दर्शनात्कृतार्थोऽस्मि सर्वस्मादधिकस्तथा ॥ ४१ ॥ त्वां न पश्यंत्यधर्मिष्ठा यतस्त्वं धर्मपालकः ॥ यन्न वेत्ति भवो ब्रह्मा यन्न वेत्ति त्रयी तथा ॥ ४२ ॥ तं वेद्मि परमात्मानं किमस्मादधिकं वरम् ॥ योगिनो यं न पश्यन्ति यं न पश्यंति कर्मठाः ॥ ४३ ॥ तं पश्यामि परात्मानं किमस्मादधिकं वरम् ॥ एतेन च कृतार्थोऽस्मि जनार्दन जगत्पते ॥ ४४ ॥ यन्नामस्मृतिमात्रेण महापातकिनोऽपि च ॥ मुक्तिं प्रयांति मुनयस्तं पश्यामि जनार्दनम् ॥ ४५ ॥ त्वत्पादपद्मयुगले निश्चला भक्तिरस्तु मे ॥ ॥ हरिरुवाच ॥ ॥ मयि भक्तिर्दृढा तेऽस्तु निष्कामा गालवाधुना ॥ ४६ ॥ शृणु चाप्यपरं वाक्यमुच्यमानं मया

१ उपगीयमानविभवः–इ० पा० । २ भासुराः–इ० पा० । ३ दृष्ट्वाथदर्भ–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मुने ॥ मदर्थं कर्म कुर्वाणो मद्ध्यानो मत्परायणः ॥४७॥ एतत्प्रारब्धदेहांते मत्स्वरूपमवाप्स्यसि ॥ अस्मिन्नेवाश्रमे वासं कुरुष्व मुनिपुंगव ॥४८॥
धर्मपुष्करिणी चेयं पुण्या पापविनाशिनी ॥ अस्यास्तीरे तपः कुर्वंस्तपःसिद्धिमवाप्नुयात् ॥ ४९ ॥ धर्मः पुरा समागत्य दक्षिणस्योदधेस्तटे ॥
तपस्तेपे महादेवं चिंतयन्मनसा तदा ॥ ५० ॥ स्नानार्थमेकं तीर्थं च चक्रे धर्मो महामुने ॥ धर्मपुष्करिणी तेन प्रसिद्धा तत्कृता यतः ॥ ५१ ॥
त्वया यथा तपस्तप्तमिदानीं मुनिसत्तम ॥ तथा तप्तं तपस्तेन धर्मेण हरसेविना ॥ ५२ ॥ तपसा तस्य तुष्टः सञ्छूलपाणिर्महेश्वरः ॥ प्रादुरासी
त्स्वया दीप्त्या दिशो दश विभासयन् ॥ ५३ ॥ अथाश्रममनुप्राप्तं महादेवं कृपानिधिम् ॥ धर्मः परमसन्तुष्टस्तुष्टाव परमेश्वरम् ॥ ५४ ॥ ॥ धर्म
उवाच ॥ ॥ प्रणमामि जगन्नाथमीशानं प्रणवात्मकम् ॥ समस्तदेवतारूपमादिमध्यांतवर्जितम् ॥ ५५ ॥ ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं नमाम्य
हम् ॥ समस्तजगदाधारमनन्तमजमव्ययम् ॥५६॥ यमामनन्ति योगीन्द्रास्तं वन्दे पुष्टिवर्धनम् ॥ नमो लोकाधिनाथाय वंचते परिवंचते ॥५७॥
नमोऽस्तु नीलकण्ठाय पशूनां पतये नमः ॥ नमः कल्मषनाशाय नमो मीढुष्टमाय च ॥ ५८ ॥ नमो रुद्राय देवाय कद्रुद्राय प्रचेतसे ॥ नमः
पिनाकहस्ताय शूलहस्ताय ते नमः ॥ ५९ ॥ नमश्चैतन्यरूपाय पुष्टीनां पतये नमः ॥ नमः पंचास्यदेवाय क्षेत्राणां पतये नमः ॥ ६० ॥ इति
स्तुतो महादेवः शंकरो लोकशंकरः ॥ धर्मस्य परमां तुष्टिमापन्नस्तमुवाच वै ॥ ६१ ॥ ॥ महेश्वर उवाच ॥ ॥ प्रीतोस्म्यनेन स्तोत्रेण तव धर्म
महामते ॥ वरं मत्तो वृणीष्व त्वं मा विलंबं कुरुष्व वै ॥ ६२ ॥ ईश्वरेणैवमुक्तस्तु धर्मो देवमथाब्रवीत् ॥ वाहनं ते भविष्यामि सदाहं पार्वतीपते ॥
॥ ६३ ॥ अयमेव वरो मह्यं दातव्यस्त्रिपुरांतक ॥ तवोद्वहनमात्रेण कृतार्थोऽहं भवामि भोः ॥ ६४ ॥ इत्थं धर्मेण कथितो
देवो धर्ममथाब्रवीत् ॥ ॥ ईश्वर उवाच ॥ ॥ वाहनं भव मे धर्म सर्वदा लोकपूजितः ॥ ६५ ॥ मम चोद्वहने शक्तिरमोघा ते
भविष्यति ॥ त्वत्सेविनां सदा भक्तिर्मयि स्यान्नात्र संशयः ॥ ६६ ॥ इत्युक्ते शंकरेणाथ धर्मोपि वृषरूपधृक् ॥ उवाह परमेशानं तदाप्रभृति
गालव ॥ ६७ ॥ महादेवस्तमारुह्य धर्मं वै वृषरूपिणम् ॥ शोभमानो भृशं धर्ममुवाच परमामृतम् ॥ ६८ ॥ ॥ ईश्वर उवाच ॥ ॥
त्वया कृतं हि यत्तीर्थं दक्षिणस्योदधेस्तटे ॥ धर्मपुष्करिणीत्येषा लोके ख्याता भविष्यति ॥६९॥अस्यास्तीरे जपो होमो दानं स्वाध्याय एव च ॥

१ सर्वलोकैकपूजितः--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्ये च धर्मनिवहाः क्रियमाणा नरैर्मुदा ॥ ७० ॥ अनंतफलदा ज्ञेया नात्र कार्या विचारणा ॥ इति दत्त्वा वरं तस्मै धर्मतीर्थाय शंकरः ॥ ७१ ॥
आरुह्य वृषभं धर्मं कैलासं पर्वतं ययौ ॥ धर्मपुष्करिणीतीरे गालव त्वमतोधुना ॥ ७२ ॥ शरीरपातपर्यंतं तपः कुर्वन्समाहितः ॥ वस त्वं मुनि
शार्दूल पश्चान्मामाप्स्यसे ध्रुवम् ॥ ७३ ॥ यदा ते जायते भीतिस्तदा तां नाशयाम्यहम् ॥ ममायुधेन चक्रेण प्रेरितेन मयाक्षणात् ॥७४॥ इत्युक्त्वा
भगवान्विष्णुस्तत्रैवांतरधीयत ॥ ॥ श्रीसूत उवाच ॥ ॥ तस्मिन्नंतर्हिते विष्णौ गालवो मुनिपुंगवः ॥७५॥ धर्मपुष्करणीतीरे विष्णुध्यानपरायणः ॥
त्रिकालमर्चयन्विष्णुं शालग्रामे विमुक्तिदे ॥ ७६ ॥ उवास मतिमान्धीरो विरक्तो विजितेंद्रियः ॥ कदाचिन्माघमासे तु शुक्लपक्षे हरेर्दिने ॥ ७७ ॥
उपोष्य जागरं कृत्वा रात्रौ विष्णुमपूजयत् ॥ स्नात्वा परेद्युर्द्वादश्यां धर्मपुष्करिणीजले ॥ ७८ ॥ संध्यावन्दनपूर्वाणि नित्यकर्माणि चाकरोत् ॥
ततः पूजां विधातुं स हरेः समुपचक्रमे ॥ ७९ ॥ तुलस्यादीनि पुष्पाणि समाहृत्य च गालवः ॥ विधाय पूजां कृष्णस्य स्तोत्रमेतदुदैरयत् ॥ ८० ॥
॥ गालव उवाच ॥ ॥ सहस्रशिरसं विष्णुं मत्स्यरूपधरं हरिम् ॥ नमस्यामि हृषीकेशं कूर्मवाराहरूपिणम् ॥ ८१ ॥ नारसिंहं वामनाख्यं जाम
दग्न्यं च राघवम् ॥ बलभद्रं च कृष्णं च कल्किं विष्णुं नमाम्यहम् ॥ ८२ ॥ वासुदेवमनाधारं प्रणतार्तिविनाशनम् ॥ आधारं सर्वभूतानां
प्रणमामि जनार्दनम् ॥ ८३ ॥ सर्वज्ञं सर्वकर्तारं सच्चिदानंदविग्रहम् ॥ अप्रतर्क्यमनिर्देश्यं प्रणतोऽस्मि जनार्दनम् ॥ ८४ ॥ एवं स्तुवन्महा
योगी गालवो मुनिपुंगवः ॥ धर्मपुष्करिणीतीरे तस्थौ ध्यानपरायणः ॥ ८५ ॥ एतस्मिन्नंतरे कश्चिद्राक्षसो गालवं मुनिम् ॥ आययौ भक्षितुं
घोरः क्षुधया पीडितो भृशम् ॥ ८६ ॥ गालवं तरसा सोऽयं राक्षसो जगृहे तदा ॥ गृहीतस्तरसा तेन गालवो नैर्ऋतेन सः ॥ ८७ ॥ प्रचुक्रोश दयां
भोधिमापन्नानां परायणम् ॥ नारायणं चक्रपाणिं रक्षरक्षेति वै मुहुः ॥ ८८ ॥ परेश परमानंद शरणागतपालक ॥ त्राहि मां करुणासिंधो रक्षोवश
मुपागतम् ॥ ८९ ॥ लक्ष्मीकांत हरे विष्णो वैकुंठ गरुडध्वज ॥ मां रक्ष रक्षसाक्रांतं ग्राहाक्रांतं गजं यथा ॥ ९० ॥ दामोदर जगन्नाथ हिरण्यासुर
मर्दन ॥ प्रह्लादमिव मां रक्ष राक्षसेनातिपीडितम् ॥ ९१ ॥ इत्येवं स्तुवतस्तस्य गालवस्य द्विजोत्तमाः ॥ स्वभक्तस्य भयं ज्ञात्वा चक्रपाणिर्वृषा
कपिः ॥ ९२ ॥ स्वचक्रं प्रेषयामास भक्तरक्षणकारणात् ॥ प्रेरितं विष्णुचक्रं तद्विष्णुना प्रभविष्णुना ॥ ९३ ॥ आजगामाथ वेगेन धर्मपुष्करिणी
तटम् ॥ अनंतादित्यसंकाशमनंताग्निसमप्रभम् ॥ ९४ ॥ महाज्वालं महानादं महासुरविमर्दनम् ॥ दृष्ट्वा सुदर्शनं विष्णो राक्षसोऽथ प्रदुद्रुवे ॥
॥ ९५ ॥ द्रवमाणस्य तस्याशु राक्षस्य सुदर्शनम् ॥ शिरश्चकर्त सहसा ज्वालामालादुरासदम् ॥ ९६ ॥ ततस्तु गालवो दृष्ट्वा राक्षसं पतितं भुवि ॥

मुदा परमया युक्तस्तुष्टाव च सुदर्शनम् ॥ ९७ ॥ ॥ गालव उवाच ॥ ॥ विष्णुचक्र नमस्तेस्तु विश्वरक्षणदीक्षित ॥ नारायणकरांभोजभूषणाय
नमोऽस्तु ते ॥ ९८ ॥ युद्धेष्वसुरसंहारकुशलाय महारव ॥ सुदर्शन नमस्तुभ्यं भक्तानामार्तिनाशिने ॥ ९९ ॥ रक्ष मां भयसंविग्नं सर्वस्मादपि कल्म
षात् ॥ स्वामिन्सुदर्शन विभो धर्मतीर्थे सदा भवान् ॥ १०० ॥ संनिधेहि हिताय त्वं जगतो मुक्तिकांक्षिणः ॥ गालवेनैवमुक्तं तद्विष्णुचक्रं मुनी
श्वराः ॥ तं प्राह गालवमुनिं प्रीणयन्निव सौहृदात् ॥ १०१ ॥ ॥ सुदर्शन उवाच ॥ ॥ गालवैतन्महापुण्यं धर्मतीर्थमनुत्तमम् ॥ १०२ ॥ अस्मि
न्वसामि सततं लोकानां हितकाम्यया ॥ त्वत्पीडां परिचिंत्याहं राक्षसेन दुरात्मना ॥१०३॥ प्रेरितो विष्णुना विप्र त्वरया समुपागतः॥ त्वत्पीडको
थ निहतो मयायं राक्षसाधमः ॥१०४॥ मोचितस्त्वं भयादस्मात्त्वं हि भक्तो हरेः सदा ॥ पुष्करिण्यामहं त्वस्यां धर्मस्य मुनिपुंगव ॥१०५॥ सततं
लोकरक्षार्थं संनिधानं करोमि वै ॥ अस्यां मत्संनिधानात्ते तथान्येषामपि द्विज ॥१०६॥ इतः परं न पीडा स्याद्भूतराक्षससंभवा ॥ धर्मपुष्करिणी
ह्येषा सर्वपापविनाशिनी ॥ १०७ ॥ देवीपट्टणपर्यंता कृता[१] धर्मेण वै पुरा ॥ अत्र सर्वत्र वत्स्यामि सर्वदा मुनिपुंगव ॥ १०८ ॥ अस्या मत्संनिधा
नात्स्याच्चक्रतीर्थमिति प्रथा॥ स्नानं येऽत्र प्रकुर्वंति चक्रतीर्थे विमुक्तिदे ॥ १०९ ॥ तेषां पुत्राश्च पौत्राश्च वंशजाः सर्व एव हि॥विधूतपापा यास्यंति
तद्विष्णोः परमं पदम् ॥ ११० ॥ पितॄनुद्दिश्य पिंडानां दातारो येऽत्र गालव ॥ स्वर्गं प्रयांति ते सर्वे पितरश्चापि तर्पिताः ॥ १११ ॥ इत्युक्त्वा
विष्णुचक्रं तद्गालवस्यापि पश्यतः ॥ अन्येषामपि विप्राणां पश्यतां सहसा द्विजाः ॥ ११२ ॥ धर्मपुष्कारिणीं तां तु प्राविशत्पापनाशिनीम् ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ धर्मतीर्थस्य विप्रेंद्राश्चक्रतीर्थमिति प्रथा ॥ ११३ ॥ प्राप्ता यथा तत्कथितं युष्माकं हि मया मुदा ॥ चक्रतीर्थसमं
तीर्थं न भूतं न भविष्यति ॥ ११४ ॥ अत्र स्नाता नरा विप्रा मोक्षभाजो न संशयः ॥ कीर्तयेदिममध्यायं शृणुयाद्वा समाहितः ॥ ११५ ॥ चक्र
तीर्थाभिषेकस्य प्राप्नोति फलमुत्तमम् ॥ इह लोके सुखं प्राप्य परत्रापि सुखं लभेत् ॥ ११६ ॥ यो धर्मतीर्थं च तथैव गालवं कुर्वाणमत्युग्रसमाधियो
गम् ॥ सुदर्शनं राक्षसनाशनं च स्मरेत्सकृद्वा न[२] स पापभाग्जनः ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये
ब्रह्मखण्डे· सेतुमाहात्म्ये गालवाख्याने धर्मतीर्थस्यचक्रतीर्थप्रथावर्णनंनाम तृतीयो ऽध्यायः ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्राक्षसः
कोऽसौ सूत पौराणिकोत्तम ॥ विष्णुभक्तं महात्मानं यो गालवमबाधत ॥ १ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि राक्षसं क्रूरं तं

१ त्वत्सकाशमुपागतः—इ० पा० । १ समपुण्यभाग्भवेत्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

विप्राः शृणुतादरात् ॥ यथा स राक्षसो जातो मुनीनां शापवैभवात् ॥ २ ॥ पुरा कैलासशिखरे हालास्ये शिवमंदिरे ॥ चतुर्विंशतिसाहस्रा मुनयो ब्रह्मवादिनः ॥ ३ ॥ वसिष्ठात्रिमुखाः सर्वे शिवभक्ता महौजसः ॥ भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः ॥ ४ ॥ रुद्राक्षमालाभरणाः पंचाक्षरजपे रताः ॥ हालास्यनाथं भूतेशं चंद्रचूडमुमापतिम् ॥ ५ ॥ उपासांचक्रिरे मुक्त्यै मधुरापुरवासिनः ॥ कदाचित्तत्र गंधर्वो विश्वावसुसुतो बली ॥ ६ ॥ दुर्दमोनाम विप्रेंद्रा विटगोष्ठीपरायणः ॥ ललनाशतसंयुक्तो विवस्त्रः सलिलाशये ॥ ७ ॥ चिक्रीड स विवस्त्राभिः साकं युवतिभिर्मुदा ॥ हालास्यनाथतीर्थं तद्वसिष्ठो मुनिभिः सह ॥ ८ ॥ माध्यंदिनं[2] कर्तुमना ययौ शंकरमंदिरात् ॥ तानृषीनवलोक्याथ रामास्ता भयकातराः ॥ ९ ॥ वासांस्याच्छादयामासुर्दुर्दमो न तु साहसी ॥ ततो वसिष्ठः कुपितः शशापैनं गतत्रपम् ॥ १० ॥ ॥ वसिष्ठ उवाच ॥ ॥ यस्माद्दुर्दम गंधर्व दृष्ट्वास्माँल्लज्जया त्वया ॥ वासो नाच्छादितं शीघ्रं याहि राक्षसतां ततः ॥ ११ ॥ इत्युक्त्वा ता स्त्रियः प्राह वसिष्ठो मुनिपुंगवः ॥ यस्मादाच्छादितं वस्त्रं दृष्ट्वास्माँल्ललनोत्तमाः ॥ १२ ॥ ततो न युष्माञ्छप्स्यामि गच्छध्वं त्रिदिवं ततः ॥ एवमुक्ता वसिष्ठेन रामाः प्रांजलयस्तदा ॥ १३ ॥ प्रणिपत्य वसिष्ठं तं भक्तिनम्रेण चेतसा ॥ मुनिमंडलमध्ये तं वसिष्ठमिदमब्रुवन् ॥ १४ ॥ ॥ रामा ऊचुः ॥ ॥ भगवन्सर्वधर्मज्ञ चतुराननंदन ॥ दयासिंधोऽवलोक्यास्मान्न कोपं कर्तुमर्हसि ॥ १५ ॥ पतिरेवहि नारीणां भूषणं परमुच्यते ॥ पतिहीना तु या नारी शतपुत्रापि सा मुने ॥ १६ ॥ विधवेत्युच्यते लोके तत्स्त्रीणां मरणं स्मृतम् ॥ तत्प्रसादं कुरु मुने पत्यावस्माकमादरात् ॥ १७ ॥ एकोऽपराधः क्षंतव्यो मुनिभिस्तत्त्वदर्शिभिः ॥ क्षमां कुरु दयासिंधो युष्मच्छिष्येऽत्र दुर्दमे ॥ १८ ॥ वसिष्ठः प्रार्थितस्त्वेवं दुर्दमस्यांगनाजनैः ॥ प्रोवाच वचनं भूयः प्रसन्नः स द्विजोत्तमाः ॥ १९ ॥ न मे स्याद्वचनं मिथ्या कदाचिदपि सुभ्रुवः ॥ उपायं वः प्रवक्ष्यामि शृणुध्वं श्रद्धया सह ॥ २० ॥ षोडशाब्दावधिः शापो भर्तुर्वो भविता ध्रुवम् ॥ षोडशाब्दावधौ चैष दुर्दमो राक्षसाकृतिः ॥ २१ ॥ यदृच्छयाचक्रतीर्थं गमिष्यति सुरांगनाः ॥ आस्ते तत्र महायोगी गालवो विष्णुतत्परः ॥ २२ ॥ भक्ष्यार्थं तं मुनिं सोऽयं राक्षसोभिगमिष्यति ॥ ततो गालवरक्षार्थं प्रेरितं चक्रमुत्तमम् ॥ २३ ॥ विष्णुनास्य शिरो रामा हरिष्यति न संशयः ॥ ततः स्वरूपमासाद्य शापान्मुक्तः सुदुर्दमः ॥ २४ ॥ पतिर्वस्त्रिदिवं भूयो

२ ऋषयः–इ० पा० । २ माध्यं दिनं कर्तुं–माध्याह्निककर्म कर्तुमित्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

गंतास्त्यत्र न संशयः ॥ ततस्त्रिदिवमासाद्य दुर्दमोऽयं पतिर्हि वः ॥ २५ ॥ रमयिष्यति सुन्दर्यो युष्मान्सुन्दरवेषभृत् ॥ ॥ श्रीसूत उवाच ॥ ॥ इत्यु
क्त्वा तु वसिष्ठस्ता दुर्दमस्य वरांगनाः ॥ २६ ॥ स्वाश्रमं प्रययौ तूर्णं हालास्येश्वरभक्तिमान् ॥ अथ रामास्तमालिंग्य दुर्दमं पतिमातुराः ॥ २७ ॥
रुरुदुः शोकसंविग्ना दुःखसागरमध्यगाः ॥ प्रपश्यंतीषु तास्वेव दुर्दमो राक्षसोऽभवत् ॥ २८ ॥ महादंष्ट्रो महाकायो रक्तश्मश्रुशिरोरुहः ॥ तं दृष्ट्वा
भयसंविग्ना जग्मू रामास्त्रिविष्टपम् ॥ २९ ॥ ततो राक्षसवेषोऽयं दुर्दमो भैरवाकृतिः ॥ भक्षयन्प्राणिनः सर्वान्देशाद्देशं वनाद्वनम् ॥ ३० ॥ भ्रमन्न
निलवेगोऽसौ धर्मतीर्थं ततो ययौ ॥ एवं षोडशवर्षाणि भ्रमतोऽस्य ययुस्तदा ॥ ३१ ॥ ततस्तु षोडशाब्दांते राक्षसोयं मुनीश्वराः ॥ भक्षितुं गाल
वमुनिं धर्मतीर्थनिवासिनम् ॥ ३२ ॥ उपाद्रवद्वायुवेगः स चास्तौषीज्जनार्दनम् ॥ गालवेन स्तुतो विष्णुस्तदा चक्रमचोदयत् ॥ ३३ ॥ रक्षितुं गाल
वमुनिं राक्षसेन प्रपीडितम् ॥ अथागत्य हरेश्चक्रं राक्षसस्य शिरोऽहरत् ॥ ३४ ॥ ततोऽयं राक्षसं देहं त्यक्त्वा दिव्यकलेवरः ॥ विमानवरमारुह्य
दुर्दमः पुष्पवर्षितः ॥ ३५ ॥ प्रांजलिः प्रणतो भूत्वा ववन्दे तं सुदर्शनम् ॥ तुष्टाव श्रुतिरम्याभिर्वाग्भिरग्र्याभिरादरात् ॥ ३६ ॥ ॥ दुर्दम उवाच ॥
सुदर्शन नमस्तेऽस्तु विष्णुहस्तैकभूषण ॥ नमस्तेऽसुरसंहर्त्रे सहस्रादित्यतेजसे ॥ ३७ ॥ कृपालेशेन भवतस्त्यक्त्वाहं राक्षसीं तनुम् ॥ स्वरूपमभजं
विष्णोश्चक्रायुध नमोऽस्तु ते ॥ ३८ ॥ अनुजानीहि मां गन्तुं त्रिदिवं विष्णुवल्लभ ॥ भार्या मे परिशोचंति विरहातुरचेतसः ॥ ३९ ॥ त्वन्मनस्को
भविष्यामि यावज्जीवं यथा ह्यहम् ॥ तथा कृपां कुरुष्व त्वं मयि चक्र नमोऽस्तु ते ॥ ४० ॥ एवं स्तुतं विष्णुचक्रं दुर्दमेन सभक्तिकम् ॥ अनुज
ग्राह सहसा तथास्त्विति मुनीश्वराः ॥ ४१ ॥ चक्रायुधाभ्यनुज्ञातो दुर्दमो गालवं मुनिम् ॥ प्रणम्य तेनानुज्ञातो गन्धर्वस्त्रिदिवं ययौ ॥ ४२ ॥
दुर्दमे तु गते स्वर्गं गालवो मुनिपुंगवः ॥ स चक्रं प्रार्थयामास विष्ण्वायुधमनुत्तमम् ॥ ४३ ॥ चक्रायुध नमामि त्वां महासुरविमर्दन ॥ देवीपट्टण
पर्यंते धर्मतीर्थे ह्यनुत्तमे ॥ ४४ ॥ सन्निधानं कुरुष्व त्वं सर्वपापविनाशनम् ॥ त्वत्सन्निधानात्सर्वेषां स्नातानां पापिनामिह ॥ ४५ ॥ पापनाशं
कुरुष्व त्वं मोक्षं च कुरु शाश्वतम् ॥ चक्रतीर्थमिति ख्यातिं लोकस्य परिकल्पय ॥ ४६ ॥ त्वत्सन्निधानादत्रत्यमुनीनां भयनाशनम् ॥ इतः परं
भवत्वार्य चक्रायुध नमोऽस्तु ते ॥ ४७ ॥ भूतप्रेतपिशाचेभ्यो भयं मा भवतु प्रभो ॥ इति संप्रार्थितं चक्रं गालवेन मुनीश्वराः ॥ ४८ ॥ तथैवा
स्त्विति सम्भाष्य तस्मिंस्तीर्थे तिरोहितम् ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितो विप्रा राक्षसस्य भवो मया ॥ ४९ ॥ माहात्म्यं चक्र
तीर्थस्य कथितं च मलापहम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ५० ॥ ॥ ऋषय ऊचुः ॥ ॥ व्यासशिष्य महाप्राज्ञ सूत पौरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिकोत्तम ॥ आरभ्य दर्भशयनमादेवीपत्तनावधि ॥ ५१ ॥ बहुव्यायामसंयुक्तं चक्रतीर्थमनुत्तमम् ॥ ययौ विच्छिन्न[1]तां मध्ये कथं कथय सांप्रतम् ॥
॥ ५२ ॥ एनं मनसि तिष्ठन्तं संशयं छेत्तुमर्हसि ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा हि पर्वताः सर्वे जातपक्षा मनोजवाः ॥ ५३ ॥ पर्यंतपर्वतैः
सार्द्धं चेरुराकाशमार्गगाः ॥ नगरेषु च राष्ट्रेषु ग्रामेषु च वनेषु च ॥ ५४ ॥ आप्लुत्याप्लुत्य तिष्ठंति पर्वताः सर्वतो [2]भुवि ॥ आक्रम्याक्रम्य तिष्ठंति
यत्रयत्र महीधराः ॥ ५५ ॥ तत्रतत्र नरा गावस्तथान्ये प्राणिसंचयाः ॥ मरणं सहसा प्रापुः पीड्यमाना महीधरैः ॥ ५६ ॥ ब्राह्मणादिषु [3]वर्णेषु
नष्टेषु समनन्तरम् ॥ यज्ञाद्यभावात्सहसा देवता व्यसनं ययुः ॥ ५७ ॥ तत इन्द्रो महाक्रुद्धो वज्रमादाय वेगवान् ॥ चिच्छेद सहसा पक्षान्पर्वतानां
तरस्विनाम् ॥ ५८ ॥ छिद्यमानच्छदाः सर्वे वासवेन महीधराः ॥ अनन्यशरणा भूत्वा समुद्रं प्राविशन्भयात् ॥ ५९ ॥ अचलेषु च सर्वेषु पतत्सु
लवणार्णवे ॥ निपेतुरर्णवभ्रांत्या चक्रतीर्थेऽपि केचन ॥ ६० ॥ पतितैः पर्वतैस्तैस्तु मध्यतः पूरितोदरम् ॥ चक्रतीर्थं महापुण्यं मध्ये विच्छेदमाययौ
॥ ६१ ॥ यदृच्छया महाशैलाः पार्श्वयोस्तत्र नापतन् ॥ अतो वै दर्भशयने तथा देवीपुरेऽपि च ॥ ६२ ॥ विच्छिन्नमध्यं तद्द्वेधा विभक्तमिव
दृश्यते ॥ मध्यतः पतितैः शैलैश्चक्रतीर्थं स्थलीकृतम् ॥ ६३ ॥ ॥ श्रीसूत उवाच ॥ ॥ युष्माकमेवं कथितं मुनीन्द्रा यन्मध्यतस्तीर्थमिदं स्थली
कृतम् ॥ यथा महीध्राः सहसा बिडौजसा विच्छिन्नपक्षा इह पेतुरुन्नताः ॥ ६४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
तीये ब्रह्मखण्डे सेतुमाहात्म्ये दुर्दमगंधर्वशापमोचनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ प्रस्तुत्य चक्रतीर्थं तु पुण्यं पापविना
शनम् ॥ पुनरप्यद्भुतं किञ्चित्प्रब्रवीमि मुनीश्वराः ॥ १ ॥ विधूमनामा हि वसुर्देवस्त्री चाप्यलंबुषा[4] ॥ ब्रह्मशापान्महाघोरात्पुरा प्राप्तौ मनुष्यताम् ॥
॥ २ ॥ चक्रतीर्थे महापुण्ये स्नात्वा शापाद्विमोचितौ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूतसूत महाप्राज्ञ पुराणार्थविशारद ॥ ३ ॥ प्राज्ञत्वाद्व्यासशिष्य
त्वादज्ञातं ते न किंचन ॥ ब्रह्मा केनापराधेन सहालंबुसया वसुम् ॥ ४ ॥ पुरा विधूमनामानं शप्तवांश्चतुराननः ॥ ब्रह्मशापेन घोरेण कथमेतौ
पुत्रतां गतौ ॥ ५ ॥ शापस्यान्तः कथमभूद्ब्रह्मणा शप्तयोस्तयोः ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा
हि भगवान्ब्रह्मा स्वयम्भूश्चतुराननः ॥ सावित्र्या च सरस्वत्या पार्श्वयोः प्रविराजितः ॥ ७ ॥ सनातनेन मुनिना सनकेन च धीमता ॥ सनत्कुमा
रनाम्ना च नारदेन महात्मना ॥ ८ ॥ सनन्दनादिभिश्चान्यैः सेव्यमानो मुनीश्वरैः ॥ सुपर्ववृन्दजुष्टेन स्तूयमानो बिडौजसा ॥ ९ ॥ आदित्यादि

१ त्रिभिन्नताम्—इ० पा० । २ दिशः—इ० पा० । ३ नष्टेषु जनेषु—इ० पा० । ४ अलंबुसा—इति सर्वत्र सकारोपधः 'अलंबुसा' इति पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

ग्रहैश्चैव स्तूयमानपदांबुजः ॥ सिद्धैः साध्यैर्मरुद्भिश्च किंनरैश्च समावृतः ॥ १० ॥ गणैः किंपुरुषाणां च वसुभिश्चाष्टभिर्वृतः ॥ उर्वशीप्रमुखानां च स्ववेंश्यानां मनोरमम् ॥ ११ ॥ नृत्यं वादित्रसहितं वीक्ष्यमाणो मुहुर्मुहुः ॥ गोष्ठीं चक्रे सभामध्ये सत्यलोके कदाचन ॥ १२ ॥ मेघगर्जितगम्भीरो जनानानंदयन्मुहुः ॥ वीणावेणुमृदंगानां ध्वनिस्तत्र व्यसर्पत ॥ १३ ॥ गंगातरंगमालानां शीकरस्पर्शशीतलः ॥ पवमानः सुखस्पर्शो मन्दं मन्दं ववौ तदा ॥ १४ ॥ पर्यायेण तदा सर्वा ननृतुर्देवयोषितः ॥ नृत्यश्रमेण खिन्नासु वेश्यास्वन्यासु सादरम् ॥ १५ ॥ अलंबुसा देवनारी ह्ययौ वनशालिनी ॥ मदयन्ती जनान्सर्वान्सभामध्ये ननर्त वै ॥ १६ ॥ तस्मिन्नवसरे तस्या नृत्यंत्याः संसदि द्विजाः ॥ वस्त्रमाभ्यंतरं वायुर्लीलया समुदक्षिपत् ॥ १७ ॥ तत्क्षिप्ते वसने स्पष्टमूरुमूलमदृश्यत ॥ तथाभूतां तु तां दृष्ट्वा सर्वे ब्रह्मादयो ह्रिया ॥ १८ ॥ सभामध्ये समासीना निमीलितदृशोऽभवन् ॥ विधूमनामा तु वसुः कामबाणप्रपीडितः ॥ १९ ॥ तामेव ब्रह्मभवने दृष्ट्वानिलहृतांशुकाम् ॥ हर्षसंफुल्लनयनो हृष्टरोमा ततोऽभवत् ॥ २० ॥ अलंबुसायां तस्यां तु जातकामं विलोक्य तम् ॥ वसुं विधूमनामानं शशाप चतुराननः ॥ २१ ॥ यस्मात्त्वमीदृशं कार्यं विधूम कृतवानसि ॥ तस्माद्धि मर्त्यलोके त्वं मानुषत्वमवाप्स्यसि ॥ २२ ॥ इयं च देवयोषित्ते तत्र भार्या भविष्यति ॥ एवं स ब्रह्मणा शप्तो विधूमः खिन्नमानसः ॥ २३ ॥ प्रसादयामास वसुर्ब्रह्माणं प्रणिपत्य तु ॥ ॥ विधूम उवाच ॥ ॥ अस्य शापस्य घोरस्य भगवन्भक्तवत्सल ॥ २४ ॥ नाहमर्होऽस्मि देवेश रक्ष मां करुणानिधे ॥ एवं प्रसादितस्तेन भारतीपतिरव्ययः ॥ २५ ॥ कृपया परया युक्तो विधूमं प्राह सांत्वयन् ॥ ॥ ब्रह्मोवाच ॥ ॥ त्वयि शापोऽप्ययं दत्तो न चासत्यं ब्रवीम्यहम् ॥ २६ ॥ ततोऽवधिं कल्पयामि शापस्यास्य तवाधुना ॥ मर्त्यभावं समापन्नः सहालंबुसयाऽनया ॥ २७ ॥ तत्र भूत्वा महाराजः शासयित्वा चिरं महीम् ॥ पुत्रमप्रतिमं त्वस्यां जनयित्वा महीपतिम् ॥ २८ ॥ अभिषिच्य च राज्ये तं राज्यरक्षाविचक्षणम् ॥ एतच्छापस्य शांत्यर्थं दक्षिणस्योदधेस्तटे ॥ फुल्लग्रामसमीपस्थे चक्रतीर्थे महत्तरे ॥ २९ ॥ अनया भार्यया सार्द्धं यदा स्नानं करिष्यसि ॥ तदा त्वं मानुषं भावं जीर्णत्वचमिवोरगः ॥ ३० ॥ विसृज्य भार्यया सार्द्धं स्वं लोकं प्रतिपत्स्यसे ॥ चक्रतीर्थे विना स्नानं न नश्येच्छाप ईदृशः॥३१॥ इति ब्रह्मवचः श्रुत्वा विधूमो नातिहृष्टवान् ॥ स्ववेश्म प्राविशत्तूर्णमामंत्र्य चतुराननम्॥३२॥चिंतयामास तत्रासौ मर्त्यतां यास्यतो मम॥को वा पिता भवेद्भूमौ का वा माता भविष्यति॥३३॥बहुधेत्थं समालोच्य विधूमो निश्चिकाय सः॥कौशांबीनगरे राजा शतानीक इति श्रुतः ॥३४॥ अस्ति वीरो महाभागो भार्या चापि पतिव्रता ॥ तस्य विष्णुमतीनाम विष्णोः श्रीरिव वल्लभा ॥३५॥ तमेव पितरं कृत्वा मातरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च विधाय ताम् ॥ संभविष्यामि भूलोके स्वकर्मपरिपाकतः ॥३६॥ ततः स माल्यवन्तं च पुष्पदंतं बलोत्कटम् ॥ त्रीनाहूयात्मनो भृत्यान्वृत्तमेतन्न्यवे दयत् ॥ ३७ ॥ भृत्याः शृणुत भद्रं वो ब्रह्मशापान्महाभयात् ॥ जनिष्यामि शतानीकाद्विष्णुमत्यामहं सुतः ॥ ३८ ॥ इति श्रुत्वा वचो भृत्यास्तस्य प्राणा बहिश्चराः ॥ बाष्पपूर्णमुखाः सर्वे विधूमं वाक्यमब्रुवन् ॥ ३९ ॥ ॥ भृत्या ऊचुः ॥ ॥ त्वद्वियोगं वयं सर्वे त्रयोऽपि न सहामहे ॥ तस्मान्मानुष भावं त्वमस्माभिः सह यास्यसि ॥ ४० ॥ शतानीकस्य राजर्षेर्मंत्री योऽयं युगन्धरः ॥ सेनानीर्विप्रतीकश्च योऽयं प्राग्रसरो रणे ॥४१॥ नर्मकर्मसु ह्द्विप्रो वल्लभाख्यो महांश्च यः ॥ तेषां पुत्रास्त्रयोऽप्येते भविष्यामो न संशयः ॥ ४२ ॥ शतानीकस्य राजर्षेः पुत्रभावं गतस्य ते ॥ शुश्रूषां संविधा स्यामस्तेषु तेषु च कर्मसु ॥ तानेवंवादिनः सोऽयं विधूमो वाक्यमब्रवीत् ॥ ४३ ॥ ॥ विधूम उवाच ॥ ॥ जानेऽहं भवतां स्नेहं तादृशं मय्य नुत्तमम् ॥ ४४ ॥ तथापि कथयाम्यद्य तच्छृणुध्वं हितं वचः ॥ ब्रह्मशापेन घोरेण स्वेन दुष्कर्मणा कृतम् ॥ ४५ ॥ कुत्सितं मानुषं भावमहमेकोऽ नुवर्तये ॥ विहितं न हि युष्माकमेतच्छापानुवर्तनम् ॥ ४६ ॥ जुगुप्सितेऽतो मानुष्ये मा कुरुध्वं मनोऽधुना ॥ अतः शापावधिर्यावन्मद्वियोगो विष ह्यताम् ॥ ४७ ॥ इत्युक्तवन्तं ते सर्वे माल्यवत्प्रमुखास्तदा ॥ ऊचुः प्रणम्य शिरसा प्रार्थयंतः पुनःपुनः ॥ ४८ ॥ रक्षित्वा कृपया ह्यस्मान्मा कुरुष्व च साहसम् ॥ परित्यजसि नः सर्वान्भक्तानद्य निरागसः ॥ ४९ ॥ त्वद्वियोगान्महाघोरान्मानुष्यमपि कुत्सितम् ॥ बहु मन्यामहे देव तस्मान्न स्त्राहि सांप्रतम् ॥ ५० ॥ एवं स याचमानांस्त्रीनन्वमन्यत भृत्यकान् ॥ तैस्त्रिभिः सहितः सोऽयं कौशांबीं गन्तुमैच्छत ॥ ५१ ॥ एतस्मिन्नेव काले तु सोमवंशविवर्द्धनः ॥ अर्जुनाभिजने जातो जनमेजयसंभवः ॥ ५२ ॥ शतानीको महीपालः पृथिवीमन्वपालयत् ॥ बुद्धिमान्नीतिमा न्वाग्मी प्रजापालनतत्परः ॥ ५३ ॥ चतुरंगबलोपेतो विक्रमैकधनो युवा ॥ स कौशांबीं महाराजो नगरीमध्युवास वै ॥ ५४ ॥ तस्य मन्त्ररह स्यज्ञो मन्त्री जातो युगंधरः ॥ सेनानीर्विप्रतीकश्च तस्य प्राग्रसरो रणे ॥ ५५ ॥ नर्मकर्मसु तस्यासीद्वल्लभाख्यः सखा द्विजः ॥ तस्य विष्णुमती नाम विष्णोः श्रीरिव वल्लभा ॥ ५६ ॥ स सर्वगुणसंपन्नः शतानीको महामतिः ॥ पुत्रमात्मसमं तस्यां भार्यायां नान्वविंदत ॥ ५७ ॥ आत्मान मसुतं ज्ञात्वा स भृशं पर्यतप्यत ॥ स युगंधरमाहूय मंत्रिणं मन्त्रवित्तमम् ॥ ५८ ॥ पुत्रलाभः कथं मे स्यादिति कार्यममन्त्रयत् ॥ युगन्धरो मही पालं पुत्रालाभेन पीडितम् ॥ हर्षयन्वचसा स्वेन वाक्यमेतदभाषत ॥ ५९ ॥ ॥ युगन्धर उवाच ॥ ॥ अस्ति शांडिल्यनामा तु महर्षिः सत्य वाक्छुचिः ॥ ६० ॥ शत्रुमित्रसमो दांतस्तपःस्वाध्यायतत्परः ॥ तमेव मुनिमासाद्य ज्वलंतमिव पावकम् ॥ ६१ ॥ पुत्रमात्मसमं राजन्प्रार्थयेथा

CC-0. In Public Domain. Digitization by eGangotri

विनीतवत् ॥ कृपावान्स महर्षिस्तु पुत्रं ते दास्यति ध्रुवम् ॥ ६२ ॥ इति तद्वचनं श्रुत्वा हर्षसंफुल्ललोचनः ॥ मंत्रिणा तेन संयुक्तस्तस्यागादा
श्रमं मुनेः ॥ ६३ ॥ तमाश्रमे समासीनं प्रणनाम महीपतिः ॥ शांडिल्यस्तु महातेजा राजानं प्राप्तमाश्रमम् ॥ ६४ ॥ दृष्ट्वा पाद्यादिभिः पूज्य
स्वागतं व्याजहार सः ॥ ॥ शांडिल्य उवाच ॥ ॥ शतानीक किमर्थं त्वमाश्रमं प्राप्तवान्मम ॥ ६५ ॥ यत्कर्तव्यमिदानीं ते तद्वदस्व करो
म्यहम् ॥ मुनिमेवं वदंतं तं प्रत्यवादीद्युगंधरः ॥ ६६ ॥ भगवन्नेष वै राजा पुत्रालाभेन कर्षितः ॥ भवंतं शरणं प्राप्तः सांप्रतं पुत्रकारणात् ॥ ६७ ॥
अस्यापुत्रत्वजं दुःखं त्वमपाकर्तुमर्हसि ॥ इति तस्य वचः श्रुत्वा शांडिल्यो मुनिसत्तमः ॥६८॥ पुत्रलाभवरं तस्मै प्रतिजज्ञे नृपाय वै ॥ स राज्ञो
वरदः श्रीमान्कौशांबीमेत्य सादरम् ॥ ६९ ॥ पुत्रेष्ट्यां पुत्रकामस्य याजकोऽभून्महामुनिः ॥ ततो मुनिप्रसादेन राजा दशरथोपमः ॥ ७० ॥
यज्वा राममिव प्राप सहस्रानीकमात्मजम् ॥ एवं विधूमः संजज्ञे शतानीकान्नृपोत्तमात् ॥ ७१ ॥ अत्रांतरे मंत्रिवरस्सेनानीस्तु महीपतेः ॥
द्विजो नर्मवयस्यश्च पुत्रान्प्रापुः कुलोचितान् ॥ ७२ ॥ पुत्रो युगंधरस्यासीन्माल्यवान्नाम भृत्यकः ॥ यौगंधरायणो नाम्ना मन्त्रशास्त्रेषु कोविदः ॥
॥ ७३ ॥ विप्रतीकस्य तनयः पुष्पदन्तो बभूव ह ॥ रुमण्वानिति विख्यातः परसैन्यविमर्दनः ॥ ७४ ॥ वल्लभस्य तदा जज्ञे तनयो वै बलो
त्कटः ॥ वसंतक इति ख्यातो नर्मकर्मसु कोविदः ॥ ७५ ॥ अथ ते ववृधुः सर्वे राजपुत्रपुरोगमाः ॥ पञ्चहायनतां तेषु यातेषु तदनंतरम् ॥ ७६ ॥
अलंबुसापि स्ववेश्या भूपतेः कृतवर्मणः ॥ अयोध्यायां महापुर्यां कन्या जाता मृगावती ॥ ७७ ॥ एवं विधूममुख्यास्ते जज्ञिरे क्षितिमण्डले ॥
अत्रांतरे महासत्त्वो दुष्टसानुचरो बली ॥ ७८ ॥ अहिदंष्ट्र इति ख्यातो महादैत्यो बलोत्कटः ॥ युक्तः स्थूलशिरोनाम्ना सहायेन दुरात्मना ॥७९॥
रुरोध देवनगरं बबाधे विबुधानपि ॥ वर्तमाने दिवि महासमरे सुररक्षसाम् ॥ ८० ॥ आनिनाय शतानीकं सहायार्थं पुरंदरः ॥ स यौवराज्ये
तनयं विधाय विधिना नृपः ॥ ८१ ॥ प्रतस्थे रथमास्थाय युद्धाय दितिजैः सह ॥ नीतो मातलिनाभ्येत्य सादरं स धनुर्धरः ॥ ८२ ॥ विधाय
प्रेक्षकान्देवाञ्जघान दितिजान्रणे ॥ अथ दैत्याधिपः सोऽपि निहतः समरे दिवि ॥ ८३ ॥ ततः शक्रस्य वचसा परेतं नृपपुंगवम् ॥ रथमारोप्य
सहसा कौशांबीं मातलिर्ययौ ॥ ८४ ॥ नीत्वा महीतलमसौ तत्सुताय न्यवेदयत् ॥ ततः सहस्रानीकोपि विलप्य बहुदुखितः ॥ ८५ ॥ मंत्रिभिः
सह संभूय प्रेतकार्यं न्यवर्तयत् ॥ मृतं ज्ञात्वा पतिं राज्ञी सहैवानुममार च ॥ ८६ ॥ महिष्या सह संप्राप्ते भूपाले कीर्तिशेषताम् ॥ भेजे राज्यं
शतानीकतनयो मंत्रिणां गिरा ॥ ८७ ॥ युगन्धरे विप्रतीके वल्लभे च मृते सति ॥ यौगन्धरायणमुखास्तत्पुत्राः सर्व एव हि ॥ ८८ ॥ शतानीक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतस्यास्य तत्तत्कार्यमकुर्वत ॥ एवं स पालयामास महीं राजसुतो बली ॥ ८९ ॥ याते काले महेन्द्रेण सनन्दनमहोत्सवे ॥ निमंत्रितस्तत्क थितां भाविनीमशृणोत्कथाम् ॥ ९० ॥ स्वर्योषिद्ब्रह्मणः शापादयोध्यायायामलंबुसा ॥ जाता मृगावती कन्या भूपतेः कृतवर्मणः ॥ ९१ ॥ विधूम नामा च वसुस्त्वं नाकललनां पुरा ॥ तामेव ब्रह्मसदने दृष्ट्वानिलहृतांशुकाम् ॥ ९२ ॥ तदैव मादनाक्रांतः शापान्मर्त्यत्वमागतः ॥ सैव ते दयिता राजन्भाविनी न चिरात्सखे ॥ ९३ ॥ यदा त्वमात्मनः पुत्रं राज्ये संस्थाप्य भूपते ॥ मृगावत्या स्त्रिया सार्द्धं दक्षिणस्योदधेस्तटे ॥ ९४ ॥ चक्रतीर्थे महापुण्ये फुल्लग्रामसमीपतः ॥ स्नानं करिष्यसि तदा शापान्मुक्तो भविष्यसि ॥ ९५ ॥ इति प्रोवाच भगवान्सत्यलोके पितामहः ॥ इतींद्रवचनं श्रुत्वा सहस्रानीकभूपतिः ॥ ९६ ॥ तथोद्वाहकृतोत्साहः समामंत्र्य शचीपतिम् ॥ कौशांबीं प्रस्थितो हृष्टः स तिलोत्तमया पथि ॥ ॥ ९७ ॥ स्मरन्किमपि तां कांतां भाषमाणामनन्यधीः ॥ ध्यायञ्छतक्रतुवचो नालुलोके महीपतिः ॥ ९८ ॥ सा शशाप नृपं सुभ्रूरनादरतिर स्कृता ॥ आहूयमानोपि मया सहस्रानीक भूपते ॥ ९९ ॥ मृगावतीं हृदा ध्यायन्किमर्थं मामुपेक्षसे ॥ सौभाग्यमत्ता मानिन्यो न सहंतेऽवधीर णाम् ॥ १०० ॥ मामवज्ञाय यां राजन्हृदा ध्यायसि सांप्रतम् ॥ तया चतुर्दशसमा वियुक्तस्त्वं भविष्यसि ॥ १०१ ॥ इति शप्तवतीं राजा तामु वाच तिलोत्तमाम् ॥ तामेव यदि लभ्येयं तनुजां कृतवर्मणः ॥ १०२ ॥ चतुर्दशसमा दुःखं सहिष्ये तद्वियोगजम् ॥ इत्युक्त्वा तद्गतमना नृपः प्राया न्निजां पुरीम् ॥ १०३ ॥ ततः कालेन तनया भूपतेः कृतवर्मणः ॥ तमाससाद दयिता सर्वस्वं पुष्पधन्वनः ॥ १०४ ॥ मृगावतीं समासाद्य विला सतरुवल्लरीम् ॥ विभ्रमांभोधिलहरीं ननंद मदनद्युतिः ॥ १०५ ॥ सा तस्माद्गर्भमाधत्त भवानीवेंदुशेखरात् ॥ पांडिम्ना शशिलेखेव पीयूषक्षालिता बभौ ॥ १०६ ॥ सुन्दरी दौर्हृदव्यक्तेरथ पौरंदरीव दिक् ॥ रराज राजमहिषी रजनीकरगर्भिणी ॥ १०७ ॥ सा दौर्हृदवशाद्राज्ञी यंयं काममकाम यत् ॥ सुदुर्लभमपि प्रेम्णा तत्तत्सर्वं समाहरत् ॥ १०८ ॥ पत्यौ समीहितकरे सा कदाचिन्मृगावती ॥ स्वेच्छया वै मतिं चक्रे रक्तवापीनिम ज्जने ॥ १०९ ॥ अभिलाषं स विज्ञाय मृगावत्या महीपतिः ॥ कौसुम्भसलिलैः पूर्णां क्षणाद्वापीमकारयत् ॥ ११० ॥ तस्मिन्रक्तजले राज्ञी स्नानं सादरमातनोत्॥ततस्तां रक्ततोयार्द्रां फुल्लकिंशुकसन्निभाम्॥ १११॥राजस्त्रीमामिषधिया सुपर्णकुलसंभवः॥जहार विकटः पक्षी मुग्धां दग्धविधेर्वशात्॥ ॥ ११२॥नीत्वा विहायसा दूरं स तामचलसन्निभः॥तत्याज मोहविवशामुदयाचलकंदरे॥ ११३॥लब्धसंज्ञा शनैः कंपविलोलतनुवल्लरी॥दृग्भ्यामुत्पलतु ल्याभ्यां मुहुरश्रूण्यवर्तयत्॥ ११४॥हा नाथ मंदभाग्याहं त्वद्वियोगेन पीडिता॥का गतिः क्व नु गच्छामि द्रक्ष्यामि त्वन्मुखं कदा॥ ११५॥इत्युक्त्वा गजसिं

CC-0. In Public Domain. Digitization by eGangotri

हानां पुरोभूद्वधकांक्षिणी ॥ सा सर्वकेसरिगजैस्त्यक्ता न निधनं गता॥११६॥आपत्काले नृणां नूनं मरणं नैव लभ्यते॥अतिदीनं समाकर्ण्य तस्याः क्रंदितमुन्मुखाः॥११७॥मृगा निष्पंदगतयो न तृणान्यप्यभक्षयन् ॥ ततस्तां करुणासिंधुर्मुनिपुत्रस्तथास्थिताम् ॥११८॥ रुदतीं कृपया राज्ञीं समानीय स्वमाश्रमम् ॥ न्यवेदयच्च तां राज्ञीं गुरवे जमदग्नये ॥ जमदग्निस्तु धर्मात्मा तामाश्वासयदंतिके ॥ ११९ ॥ ॥ जमदग्निरुवाच ॥ ॥ तथा जानीहि मां भद्रे कृतवर्मा यथा तव ॥ १२० ॥ एवमाश्वासिता तत्र कृपया जमदग्निना ॥ चक्रे तत्रैव सा वासमाश्रमे मुनिसंकुले ॥ १२१ ॥ ततस्स्वल्पेन कालेन विशाखमिव पार्वती ॥ असूत तनयं बाला शौर्यधैर्यगुणान्वितम् ॥ १२२ ॥ सूतिकागृहकृत्यानि यानि कार्याणि बंधुभिः ॥ चक्रिरे मातृवत्तानि मृगावत्या मुनिस्त्रियः ॥ १२३ ॥ तं सुजातं नृपसुतं कापि वागशरीरिणी ॥ उदयाचलजातत्वाच्चकारोदयनाभिधम् ॥ ॥ १२४ ॥ आश्रमे स मुनीन्द्रेण कृतचूडादिकव्रतः ॥ जग्राह सकला विद्या जमदग्नेर्महामुनेः ॥१२५॥ युवा नृपसुतः सोऽयं कदाचिन्मृगयापरः ॥ अपश्यदेकं भुजगं व्याधेन दृढसंयतम् ॥ १२६ ॥ उवाच स कृपायुक्तो व्याध मुंच भुजंगम् ॥ किं करिष्यस्यनेन त्वं नैनं हिंसितुमर्हसि ॥१२७॥ तमुवाच ततो व्याधः सर्पेणानेन पूरुष ॥ धनधान्यादिकं लप्स्ये ग्रामेषु नगरेषु च ॥ १२८ ॥ अतोहं जीविकामेनं नैव मोक्ष्ये कथंचन ॥ इत्युक्त्वा पेटिकायां तं बबंध शबराधमः ॥ १२९ ॥ बद्धमालोक्य भुजगं शबराय धनार्थिने ॥ अमोचयत्स्वजननीदत्तं दत्त्वा स कंकणम् ॥ १३० ॥ मोचितस्तेन सर्पोऽसौ नरो भूत्वा कृतांजलिः ॥ सख्यं कृत्वा च सहसा तं पातालं निनाय वै ॥ १३१ ॥ किन्नराख्येन नागेन धृतराष्ट्रसुतेन सः॥ पातालं प्राविशत्तत्र न्यवसत्पूजितस्सुखम् ॥ १३२ ॥ धृतराष्ट्रस्य तनयां भगिनीं किन्नरस्य च ॥ ललिताख्यां गुणोपेतां प्रियां भेजे नृपात्मजः ॥ ॥ १३३ ॥ सा तस्माज्जनयामास पुत्रमप्रतिमौजसम् ॥ ततः सा ललिता प्राह त्वरितोदयनं प्रति ॥ १३४ ॥ ॥ ललितोवाच ॥ ॥ अहंविद्याधरी पूर्वं सुकर्णीनाम नामतः ॥ शापात्सर्पत्वमाप्तास्मि शापांतो गर्भ एष मे ॥ १३५ ॥ ततोऽमुं प्रतिगृह्णीष्व पुत्रमप्रतिमौजसम् ॥ तांबूलीं स्रजमम्लानां वीणां घोषवतीमपि ॥ १३६ ॥ तथेति प्रतिजग्राह तत्सर्वं नृपनंदनः॥ पश्यतां सर्वसर्पाणां साप्यगच्छद्विहायसम् ॥ १३७ ॥ ततः सोऽपि गृहीत्वा तु वीणां मालां च पुत्रकम् ॥ दुःखितामात्मजननीं द्रष्टुकामस्त्वरान्वितः ॥ १३८ ॥ श्वशुरादीननुज्ञाप्य सहसा स्वाश्रमं ययौ ॥ जननीं शोकसंतप्तामाश्वस्तां जमदग्निना ॥ १३९ ॥ समेत्य तोषयामास वृत्तं चास्यै न्यवेदयत् ॥ तदा प्रहृष्टहृदया सा बभूव मृगावती ॥ १४० ॥ अत्रांतरे स शबरः कौशांब्यां वणिजं ययौ ॥ सहस्रानीकनामांकं विक्रेतुं मणिकंकणम्॥१४१॥राजमुद्रां समालोक्य कंकणे स वणिग्वरः ॥ शबरेण समं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा सर्वं राज्ञे न्यवेदयत्॥ १४२॥ ततः सहस्रानीकोऽयं तत्प्राप्य मणिकंकणम् ॥ मृगावतीविप्रयोगविषाग्निपरिपीडितः ॥ १४३ ॥ तद्बाहुसंगपीयूष शीकरासारशीतलम् ॥ कंकणं हृदये न्यस्य विललाप सुदुःखितः ॥ १४४ ॥ उवाच च कथं लब्धं कंकणं शबर त्वया ॥ स चैवमुक्तस्तत्प्राप्ति क्रमं तस्मै न्यवेदयत् ॥ १४५ ॥ शबरस्य वचः श्रुत्वा सहस्रानीकभूपतिः ॥ प्रतस्थे मंत्रिभिः सार्द्धं प्रियालोकनकौतुकी ॥ १४६ ॥ यत्रेंदुभास्क रमुखा लभंते सहसोदयम् ॥ तमेव गिरिमुद्दिश्य सहसा सोऽभ्यगच्छत ॥ १४७ ॥ किंचिन्मार्गं समुल्लंघ्य तस्थौ विश्रांतसैनिकः ॥ तस्मिन्विनिद्रे दयितासंगमध्यानतत्परे ॥ १४८ ॥ वसंतको विचित्रास्तु कथयामास वै कथाः ॥ तत्कथाश्रवणेनैव तां रात्रिं स निनाय वै ॥ १४९ ॥ ततः कालेन ककुभं प्राप्य जंभारिपालिताम् ॥ जमदग्न्याश्रमं गत्वा निर्वैरहरिकुंजरम् ॥ १५० ॥ तपस्यंतं मुनिं दृष्ट्वा शिरसा प्रणनाम सः ॥ आशीर्वादेन स मुनिः प्रतिजग्राह तं नृपम् ॥ १५१ ॥ विधिवत्पूजयामास पाद्यार्घ्याचमनीयकैः ॥ उवाच च महीपालं धर्मार्थसहितं वचः ॥ १५२ ॥ नरनाथ मृगावत्यां जातोऽयं तनयस्तव ॥ यशोनिधिर्महातेजा रामचंद्र इवापरः ॥ १५३ ॥ भविष्यति दिशां जेता सिंहसंहननो युवा ॥ पौत्र एष महाभाग तथा ह्युदयनात्मजः ॥ १५४ ॥ इयं मृगावती भार्या पाति व्रत्यपरायणा ॥ तदेतांस्त्रीन्महाराज प्रतिगृह्णीष्व मा चिरम् ॥ १५५ ॥ उक्त्वैवं मुनिना दत्तांस्तान्गृहीत्वा महीपतिः ॥ प्रियासहायः स्वपुरीं प्रत स्थे मंत्रिभिर्वृतः ॥ १५६ ॥ ततः प्रविश्य कौशांबीं नगरीं स नृपोत्तमः ॥ स्मरञ्छक्रस्य वचनं मानुषं जन्म कुत्सयन् ॥ १५७ ॥ महीमुदयनायैव ददौ पुत्राय धीमते ॥ तस्मिन्नुदयने पुत्रे राज्यपालनदक्षिणे ॥१५८॥ राज्यभारं विनिक्षिप्य स शापविनिवृत्तये ॥ वसंतकरुमण्वद्भ्यां मृगावत्या च भार्यया ॥ १५९ ॥ यौगन्धरायणेनापि मंत्रिपुत्रेण संयुतः ॥ चक्रतीर्थे महापुण्ये दक्षिणस्योदधेस्तटे ॥ १६० ॥ स्नानं कर्तुं ययौ तूर्णं सर्वतीर्थोत्त मोत्तमे ॥ वाहनैर्वातरंहोभिरचिराल्लवणोदधिम् ॥ १६१ ॥ संप्राप्य चक्रतीर्थं च स्नानं चक्रुर्यथाविधि ॥ तेषु च स्नातमात्रेषु चक्रतीर्थे नृपादिषु ॥ ॥१६२॥विनष्टं तत्क्षणादेव मानुष्यमतिकुत्सितम् ॥ ततो विधूतपापास्ते स्वं रूपं प्रतिपेदिरे ॥१६३॥ दिव्यांबरधराः सर्वे दिव्यमाल्यानुलेपनाः ॥ विमानानि महार्हाणि समारुह्य विभूषिताः ॥ १६४ ॥ तत्तीर्थं बहु मन्वानाः स्वशापच्छेदकारणम् ॥ पश्यतां सर्वलोकानां स्वर्गलोकं ययुस्तदा ॥ ॥१६५॥ तदाप्रभृति ते सर्वे ज्ञात्वा तत्तीर्थवैभवम् ॥ पावने चक्रतीर्थेऽस्मिन्स्नानं कुर्वंति सर्वदा ॥१६६॥ एवंप्रभावं तत्तीर्थं ये समागत्य मानवाः ॥ स्नानं सकृच्च कुर्वंति ते सर्वे स्वर्गवासिनः ॥ १६७ ॥ एवं वः कथितं विप्रा विधूमचरितं महत् ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ यंयं

CC-0. In Public Domain. Digitization by eGangotri

कामयते कामं तं सर्वं शीघ्रमाप्नुयात् ॥ १६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये चक्रतीर्थप्रशंसायामलंबुसाविधूमशापविमोचनंनाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ द्वैपायनविनेय[1] त्वं सूत पौराणिकोत्तम ॥ देवीपत्तनपर्यंतं चक्रतीर्थमनुत्तमम् ॥ १ ॥ इत्यब्रवीः पुरास्माकमतः पृच्छाम किंचन ॥ देवीपुरं हि तत्कुत्र यदन्तं चक्रतीर्थकम् ॥ २ ॥ देवीपत्तनमित्याख्या कथं तस्याभवत्तथा ॥ श्रीरामसेतुमूले च स्नातानां पापिनामपि ॥ ३ ॥ कीदृशं वा भवेत्पुण्यं चक्रतीर्थे तथैव च ॥ एतच्चान्यान्विशेषांश्च ब्रूहि पौराणिकोत्तम ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ सर्वमेतत्प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ पठतां शृण्वतां चैतदाख्यानं पापनाशनम् ॥ ५ ॥ यत्र पाषाणनवकं स्थापयित्वा रघूद्वहः ॥ बबन्ध प्रथमं सेतुं समुद्रे मैथिलीपतिः ॥ ६ ॥ देवीपुरं तु तत्रैव यदन्तं चक्रतीर्थकम् ॥ देवीपत्तनमित्याख्या यथा तस्य समागता ॥ ७ ॥ तदब्रवीमि मुनिश्रेष्ठाः शृणुध्वं श्रद्धया सह ॥ पुरा देवासुरे युद्धे देवैर्नाशितपुत्रिणी ॥ दितिः प्रोवाच तनयामात्मनः शोकमोहिता ॥ ८ ॥ ॥ दितिरुवाच ॥ ॥ याहि पुत्रि तपः कर्तुं तपोवनमनुत्तमम् ॥ ९ ॥ पुत्रार्थं तव सुश्रोणि नियता नियतेन्द्रिया ॥ इन्द्रादयो न शिष्येरन्येन पुत्रेण वै सुराः ॥ १० ॥ उदिता तनया चैवं जनन्या तां प्रणम्य सा ॥ स्वीकृत्य माहिषं रूपं वनं पञ्चाग्निमध्यगा ॥ ११ ॥ तपोऽतप्यत सा घोरं तेन लोकाश्चकंपिरे ॥ तस्यां तपः प्रकुर्वंत्यां त्रिलोक्यासीद्भयातुरा ॥ १२ ॥ इन्द्रादयः सुरगणा मोहमापुर्द्विजोत्तमाः ॥ सुपार्श्वस्तपसा तस्या मुनिः क्षुब्धोऽवदत्तु ताम् ॥ १३ ॥ ॥ सुपार्श्व उवाच ॥ ॥ परितुष्टोऽस्मि सुश्रोणि पुत्रस्तव भविष्यति ॥ मुखेन महिषाकारो वपुषा नररूपवान् ॥ १४ ॥ महिषो नाम पुत्रस्ते भविष्यत्यतिवीर्यवान् ॥ पीडयिष्यति यः स्वर्गं देवेन्द्रं च ससैनिकम् ॥ १५ ॥ सुपार्श्वस्त्वेवमुक्त्वा तां विनिवार्य तपस्तथा ॥ आगच्छदात्मनो लोकमनुनीय तपस्विनीम् ॥ १६ ॥ अथ जज्ञे स महिषो यथोक्तं ब्रह्मणा पुरा ॥ व्यवर्द्धत महावीर्यः पर्वणीव महोदधिः ॥ १७ ॥ ततः पुत्रो विप्रचित्तेर्विद्युन्माल्यसुराग्रणीः ॥ अन्येऽप्यसुरवर्यास्ते संति ये भूतले द्विजाः ॥ १८ ॥ ते सर्वे महिषस्यास्य श्रुत्वा दत्तं वरं मुदा ॥ समागम्य मुनिश्रेष्ठाः प्रावदन्महिषासुरम् ॥ १९ ॥ स्वर्गाधिपत्यमस्माकं पूर्वमासीन्महामते ॥ देवैर्विष्णुं समाश्रित्य राज्यं नो हृतमोजसा ॥ २० ॥ तद्राज्यमानय बलादस्माकं महिषासुर ॥ वीर्यं प्रकटयस्वाद्य प्रभावमपि चात्मनः ॥२१॥ अतुल्यबलवीर्यस्त्वं ब्रह्मदत्तवरोद्धतः ॥ पुलोमजापतिं युद्धे जहि देवगणैः सह ॥२२॥ दनुजैरेवमुक्तोऽसौ योद्धुकामोऽमरैः सह ॥ महा

१ द्वैपायनस्य शिष्यस्त्वम्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर्योऽथ महिषः प्रययावमरावतीम् ॥२३॥ देवानामसुराणां च संवत्सरशतं रणम् ॥ पुरा बभूव विप्रेंद्रास्तुमुलं रोमहर्षणम् ॥ २४ ॥ देववृन्दं ततो भीत्या पुरस्कृत्य पुरन्दरम् ॥ कांदिशीकमभूद्विप्रा ब्रह्माणं च ययौ तदा ॥ २५ ॥ ब्रह्मा तानमरान्सर्वान्समादाय ययौ पुनः॥ नारायणशिवौ यत्र वर्तेते विश्वपालकौ ॥२६॥ तत्र गत्वा नमस्कृत्य स्तुत्वा स्तोत्रैरनेकशः ॥ ब्रह्मा निवेदयामास महिषासुरचेष्टितम् ॥ २७ ॥ सुराणामसुरैः पीडां देवयोः शंभुकृष्णयोः ॥ इंद्राग्नियमसूर्येंदुकुबेरवरुणादिकान् ॥ २८ ॥ निराकृत्याधिकारेषु तेषां तिष्ठत्ययं स्वयम् ॥ अन्येषां देववृंदानामधिकारेपि तिष्ठति ॥ २९ ॥ निरस्तं देववृंदं तत्स्वर्लोकादवनीतले ॥ मनुष्यवद्विचरते महिषासुरबाधितम् ॥ ३० ॥ एतज्ज्ञापयितुं देवौ युवयोरहमागतः॥ सार्द्धं देवगणैरत्र रक्षतं तान्समागतान् ॥ ३१ ॥ ब्रह्मणो वचनं श्रुत्वा रमेश्वरमहेश्वरौ ॥ कोपात्करालवदनौ दुष्प्रेक्ष्यौ तौ बभूवतुः ॥ ३२ ॥ अत्यंतकोपज्वलितान्मुखाद्विष्णोरथ द्विजाः ॥ निश्चक्राम महत्तेजः शंभोः स्रष्टुस्तथैव च ॥ ३३ ॥ अपरेषां सुराणां च देहादिंद्रशरीरतः ॥ तेजः समुदभूत्क्रूरं तदेकं समजायत ॥ ३४ ॥ तेषां तु तेजसां राशिर्ज्वलत्पर्वतसंनिभः ॥ ददृशे देववृंदैस्तैर्ज्वालाव्याप्तदिगंतरः ॥ ३५ ॥ तेजसां समुदायोऽसौ नारी काचिदभूत्तदा ॥ शिवतेजो मुखमभूद्विष्णुतेजो भुजौ द्विजाः ॥ ३६ ॥ ब्रह्मतेजस्तु चरणौ मध्यमैंद्रेण तेजसा ॥ यमस्य तेजसा केशाः कुचौ चंद्रस्य तेजसा ॥ ३७ ॥ जंघोरू कल्पितौ विप्रा वरुणस्य तु तेजसा ॥ नितंबः पृथिवीतेजः पादांगुल्योऽर्कतेजसा ॥ ३८ ॥ करांगुल्यो वसूनां च तेजसा कल्पितास्तथा ॥ कुबेरतेजसा विप्रा नासिका परिकल्पिता ॥ ३९ ॥ नवप्रजापतीनां च तेजसा दंतपंक्तयः ॥ चक्षुर्द्वयं समजनि हव्यवाहनतेजसा ॥ ॥ ४० ॥ उभे संध्ये भ्रुवौ जाते श्रवणे वायुतेजसा ॥ इतरेषां च देवानां तेजोभिरतिदारुणैः ॥ ४१ ॥ कृतान्यावयवा नारी दुर्गा परमभास्वरा ॥ बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ४२ ॥ सर्ववृंदारकानीकतेजःसंघसमुद्भवा ॥ तां दृष्ट्वा प्रीतिमापुस्ते देवा महिषबाधिताः ॥ ४३ ॥ ततो रुद्रादयो देवा विनिष्कृष्यायुधान्निजात् ॥ आयुधानि ददुस्तस्यै शूलादीनि द्विजोत्तमाः ॥ ४४ ॥ भूषणानि ददुस्तस्यै वस्त्रमाल्यानि चंदनम् ॥ सापि देवी तदा वस्त्रैर्भूषणैश्चंदनादिभिः ॥ ४५ ॥ कुसुमैरायुधैर्हारैर्भूषिता परिचारकैः ॥ साट्टहासं प्रमुंचंती भैरवी भैरवस्वना ॥ ४६ ॥ ननाद कंपयंतीव रोदसी देवसेविता ॥ देव्या भैरवनादेन चचाल सकलं जगत् ॥ ४७ ॥ सिंहवाहनमारूढां देवींताममरास्तदा ॥ मुनयः सिद्धगंधर्वास्तुष्टुवुर्जयशब्दतः ॥ ४८ ॥ अतिभीषणनादेन देव्याः क्षुब्धं जगत्त्रयम् ॥ दृष्ट्वा देवारयो दैत्याः समुत्तस्थुरुदायुधाः ॥ ४९ ॥ महिषोऽपि महाक्रोधात्समुद्यतमहायुधः ॥ तं शब्दमवलक्ष्याथ ययावसुरसंवृतः ॥ ५० ॥ व्यलोकयत्ततो देवीं तेजोव्याप्तजगत्त्रयीम् ॥ सायुधानंतबाह्वाढ्यां नादकंपितभूतला

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ ५१ ॥ क्षोभिताशेषशेषादिमहानागपरंपराम् ॥ विलोक्य देवीमसुराः समनह्यन्नुदायुधाः ॥ ५२ ॥ ततो देव्या तया सार्द्धमसुराणामभूद्रणः ॥
अस्त्रैः शस्त्रैः शरैश्चक्रैर्गदाभिर्मुसलैरपि ॥ ५३ ॥ गजाश्वरथपादातैरसंख्येयैर्महाबलः ॥ महिषो युयुधे तत्र देव्या साकमरिंदमः ॥ ५४ ॥ लक्षको
टिसहस्राणि प्रधानासुरयूथपाः ॥ एकैकस्य तु सेनायास्तेषां संख्या न विद्यते ॥ ५५ ॥ ते सर्वे युगपद्देवीं शस्त्रैरावव्रुरोजसा ॥ सापि देवी ततो
भीमा दैत्यमुक्तास्त्रसंचयम् ॥ ५६ ॥ बिभेद लीलया बाणैः स्वकार्मुकविनिःसृतैः ॥ ससर्ज दैत्यकायेषु बाणपूगान्यनेकशः ॥ ५७ ॥ देव्याश्रयबला
देवा निर्भया दैत्ययूथपैः ॥ युयुधुः संयुगे शस्त्रैरस्त्रैरप्यायुधांतरैः ॥ ५८ ॥ ततो देवा बलोत्सिक्ता देवीशक्त्युपबृंहिताः ॥ निःशेषमसुरान्सर्वानायु
धैर्निरमूलयन् ॥ ५९ ॥ स्वसैन्ये तु क्षयं याते संक्षुब्धो महिषासुरः ॥ चापमादाय वेगेन विकृष्य च महास्वनम् ॥ ६० ॥ संधाय मुमुचे बाणान्देव
सैन्येषु भूसुराः ॥ इंद्रे तु दशसाहस्रं यमे पंचसस्रकम् ॥ ६१ ॥ वरुणे चाष्टसाहस्रं कुबेरे षट्सहस्रकम् ॥ सूर्ये चंद्रे च वह्नौ च वायौ वसुषु चाश्विनोः
॥ ६२ ॥ अन्येष्वपि च देवेषु महिषो दानवेश्वरः ॥ प्रत्येकमयुतं बाणान्मुमुचे बलिनां वरः ॥ ६३ ॥ पलायंते ततो देवा महिषासुरमर्दिताः ॥
देवीं शरणमाजग्मुस्त्राहित्राहीतिवादिनः ॥ ६४ ॥ ततो देवी गणान्स्वस्य भूतवेतालकादिकान् ॥ यूयं नाशयत क्षिप्रमासुरं बलमित्यशात्[1] ॥
॥ ६५ ॥ अहं तु महिषं युद्धे योधयामि बलोद्धतम् ॥ ततो देव्या गणैः सर्वमासुरं क्षतमाशु[2] वै ॥ ६६ ॥ ततः सैन्ये क्षयं नीते गणै
र्देवीप्रचोदितैः ॥ योद्धुकामः स महिषो गणैः साकं व्यतिष्ठत ॥ ६७ ॥ अत्रांतरे महानादः सुचक्षुश्च महाहनुः ॥ महाचंडो महाभक्षो महोदरम
होत्कटौ ॥ ६८ ॥ पञ्चास्यः पादचूडश्च बहुनेत्रः प्रबाहुकः ॥ एकाक्षस्त्वेकपादश्च बहुपादोऽप्यपादकः ॥ ६९ ॥ एते चान्ये च बहवो महिषासुर
मंत्रिणः ॥ योद्धुकामा रणे देव्याः पुरतस्त्ववतस्थिरे ॥ ७० ॥ सिंहं वाहनमारुह्य ततो देवी मनोजवम् ॥ प्रलयांबुदनिर्घोषं चापमादाय भैरवम् ॥
॥ ७१ ॥ विस्फोट्य मुमुचे बाणान्वज्रवेगसमान्युधि ॥ दशलक्षगजैश्चापि शतलक्षैश्च वाजिभिः ॥ ७२ ॥ शतलक्षै रथैश्चापि लक्षायुतपदातिभिः ॥
युक्तो महाहनुर्दैत्यो देव्या युधि निपातितः ॥७३॥ सैन्ये च तस्य निहता देव्या बाणैर्द्विजोत्तमाः ॥ लक्षकोटिसहस्राणि प्रधानासुरनायकाः ॥७४॥
महिषस्य हि विद्यन्ते महाबलपराक्रमाः ॥ एकैकस्य प्रधानस्य चतुरङ्गबलं तथा ॥ ७५ ॥ महाहनोर्यथा विप्रास्तथैवास्ति महद्बलम् ॥ तत्सर्वं

१ अशात्—आज्ञापयत्—इत्यर्थः । २ हतम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निहतं देव्या शरैः कांचनपुंखितैः ॥ ७६ ॥ याममात्रेण विप्रेंद्रास्तदद्भुतमिवाभवत् ॥ ७७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये चक्रतीर्थप्रशंसायां देवीपुराभिधानकथने देवीमहिषासुरयुद्धवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्वसैन्यमवलोक्याथ महिषो दानवेश्वरः ॥ हतं देव्या महाक्रोधाच्चंडकोपमथाब्रवीत् ॥ १ ॥ ॥ महिष उवाच ॥ ॥ चंडकोप महावीर्य युद्धयस्वैनां दुरात्मिकाम् ॥ तथास्त्विति स चोक्त्वाथ चंडकोपः प्रतापवान् ॥ २ ॥ अवाकिरद्बाणवर्षैर्देवीं समरमूर्द्धनि ॥ बाणजालानि तस्याशु चंडकोपस्य लीलया ॥ ३ ॥ छित्त्वा जघान शस्त्रेण चंडकोपस्य सांबिका ॥ चकर्त वाजिनोऽप्यस्य सारथिं च [१]ध्वजं धनुः ॥ ४ ॥ उन्ममाथ रथं चापि तं बाणैर्ह्यताडयत् ॥ स भग्नधन्वा विरथो हताश्वो हतसारथिः ॥ ५ ॥ चंडकोपस्ततो देवीं खड्गचर्मधरोऽभ्यगात् ॥ खड्गेन सिंहमाजघ्ने देव्या वाहं महासुरः ॥ ६ ॥ देवीमपि भुजे सव्ये खड्गेन प्रजघान सः ॥ खड्गो देव्या भुजे सव्ये व्यशीर्यत सहस्रधा ॥ ७ ॥ ततः शूलेन महता चंडकोपं तदांबिका ॥ जघान हृदये सोऽपि पपात च ममार च ॥ ८ ॥ चंडकोपे हते तस्मिन्महावीर्ये महाबले ॥ चित्रभानुर्गजारूढो देवीं तामभ्यधावत ॥ ९ ॥ दिव्यां शक्तिं ससर्जाथ महाघंटारवाकुलाम् ॥ न्यवारयत हुंकारैर्देवी शक्तिं निराकुलाम् ॥ १० ॥ ततः शूलेन सा देवी चित्रभानुं व्यदारयत् ॥ मृते तस्मिंस्ततो युद्धे करालो द्रुतमभ्यगात् ॥ ११ ॥ करमुष्टिप्रहारेण सोऽपि देव्या निपातितः ॥ ततो देवी मदोन्मत्तं गदया व्यसुमातनोत् ॥ १२ ॥ बाष्कलं पट्टिशेनापि चक्रेणापि तथांतिकम् ॥ प्राहिणोद्यमलोकाय दुर्गा देवी द्विजोत्तमाः ॥ १३ ॥ एवमन्यान्महाकायान्मंत्रिणो महिषस्य च ॥ शूलेन प्रोथयित्वाथ प्राहिणोद्यमसादनम् ॥ १४ ॥ आत्मसैन्ये हते त्वेवं दुर्गया महिषासुरः ॥ माहिषेणाथ रूपेण गणान्देव्या अभक्षयत् ॥ १५ ॥ तुण्डेन निजघानैकान्खुराघातैस्तथापरान् ॥ निश्वासवायुभिश्चान्यान्पातयामास रोषितः ॥ १६ ॥ देव्या भूतगणं त्वेवं निहत्य महिषासुरः ॥ सिंहं मारयितुं देव्याश्चुक्रोध च ननाद च ॥ १७ ॥ ततः सिंहोऽभवत्क्रुद्धो महावीर्यो महाबलः ॥ खुराभिघातनिर्भिन्नमहीतलमहीधरः ॥ १८ ॥ महिषासुरमायांतं नखैरेनं व्यदारयत् ॥ चंडिकापि ततः क्रुद्धा वधे तस्याकरोन्मतिम् ॥ १९ ॥ बबन्ध पाशैर्महिषं चंडिका कोपमूर्च्छिता ॥ मोचयित्वा ततः पाशांस्त्यक्तमाहिषवेषवान् ॥ २० ॥ सिंहवेषोऽभवद्दैत्यो महाबलपराक्रमः ॥ देवी तस्य शिरो यावच्छेत्तुं बुद्धिमधारयत् ॥ २१ ॥ तावत्स पुरुषो भूत्वा खड्गपाणिरदृश्यत ॥ अथ तं पुरुषं देवी खड्गहस्तं शरोत्करैः ॥ २२ ॥ जघान

१ अभक्षयत्-इ० पा० । २ त्रासयामास-इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णधाराग्रैः परमर्मविदारणैः ॥ ततः स पुरुषो विप्रा गजोऽभूद्धस्तदन्तवान् ॥ २३ ॥ दुर्गाया वाहनं सिंहं करेण विचकर्ष च ॥ ततः सिंहः करं
तस्य विचकर्त नखांकुरैः ॥ २४ ॥ भूयो महासुरो जातो माहिषं वेषमाश्रितः ॥ ततः क्रुद्धा भद्रकाली महत्पानमसेवत ॥ २५ ॥ ततः पानवशा
न्मत्ता जहासारुणलोचना ॥ महिषः सोऽपि गर्वेण शृंगाभ्यां पर्वतोत्करान् ॥२६॥ चंडिकां प्रति चिक्षेप सा च तानच्छिनच्छरैः ॥ ततो देवी जग
न्माता महिषासुरमब्रवीत् ॥ २७ ॥ ॥ देव्युवाच ॥ ॥ कुरु गर्वं क्षणं मूढ मधु यावत्पिबाम्यहम् ॥ निवृत्तमधुपानाहं त्वां नयिष्ये यमक्षयम् ॥
॥२८॥हते त्वयि दुराधर्षे मया दैवतकंटके॥स्वंस्वं स्थानं प्रपद्यंतां सिद्धाः साध्या मरुद्गणाः॥२९॥उक्त्वैवं ताडयामास मुष्टिना महिषासुरम्॥ ताडि
तोऽयं ततो देव्या महिषो भृशविह्वलः॥३०॥दक्षिणस्योदधेस्तीरे प्रदुद्राव त्वरान्वितः॥अनुदुद्राव तं देवी सिंहमारुह्य वाहनम्॥३१॥अनुद्रुतस्ततो देव्या
महिषो दानवेश्वरः॥धर्मपुष्करिणीतोये दशयोजनमायते॥३२॥प्रविश्यांतर्हितस्तस्थौ दुर्गाताडनविह्वलः॥ततो दुर्गा समासाद्य धर्मपुष्करिणीतटम् ॥
॥३३॥ नददर्शासुरं तत्र महिषं चंडिका तदा ॥ अशरीरा ततो वाणी दुर्गां देवीमभाषत ॥३४॥ भद्रकालि महादेवि महिषो दानवस्त्वया ॥ ताडितो
मुष्टिना भद्रे धर्मपुष्करिणीजले ॥३५॥ अस्मिन्नंतर्हितः शेते भयार्तो मारयस्व तम् ॥ येन केनाप्युपायेन चैनं प्राणैर्वियोजय ॥३६॥ एवं वाचाऽशरी
रिण्या कथिता चंडिका तदा ॥ प्राह स्ववाहनं सिंहमसुरेंद्रवधोद्यता ॥३७॥ मृगेंद्र सिंहविक्रांत महाबलपराक्रम ॥ धर्मपुष्करिणीतोयं निःशेषं पीय
तां त्वया ॥ ३८ ॥ देव्यैवमुक्तः पंचास्यो धर्मपुष्करिणीजलम् ॥ निःशेषं च पपौ विप्रा यथा पांसुर्भवेत्तथा ॥ ३९ ॥ निरगान्महिषो दीनस्ततस्तस्मा
ज्जलाशयात् ॥ आयांतमसुरं देवी पादेनाक्रम्य मूर्द्धनि ॥ ४० ॥ कंठं शूलेन तीक्ष्णेन पीडयामास कोपिता ॥ ततो देव्यसिमादाय चकर्तास्य
शिरो महत् ॥ ४१ ॥ एवं स महिषो विप्राः सभृत्यबलवाहनः ॥ दुर्गया निहतो भूमौ पपात च ममार च ॥ ४२ ॥ ततो देवाः सगंधर्वाः सिद्धा
श्च परमर्षयः ॥ स्तुत्वा देवीं ततः स्तोत्रैस्तुष्टा जहृषिरे तदा ॥ ४३ ॥ अनुज्ञातास्ततो देव्या देवा जग्मुर्यथागतम् ॥ ततो देवी जगन्माता स्व
नाम्ना पुरमुत्तमम् ॥ ४४ ॥ दक्षिणस्य समुद्रस्य तीरे चक्रे तदोत्तरे ॥ ततो देव्यनुशिष्टास्ते देवाः शक्रपुरोगमाः ॥ ४५ ॥ पूरयामासुरमृतैर्धर्मपुष्क
रिणीं तदा ॥ ततो ह्यमृततीर्थाख्यां लेभे तत्तीर्थमुत्तमम् ॥ ४६ ॥ ततो देवी वरमदात्स्वपुरस्य मुदान्विता ॥ पशव्यं चापरोगं च पुरमेतद्भवत्विति
॥ ४७ ॥ ददौ तीर्थाय च वरं स्नातानामत्र वै नृणाम् ॥ यथाभिलाषं सिद्धिः स्यादित्युक्त्वा सा दिवं ययौ ॥ ४८ ॥ ॥ श्रीसूत उवाच ॥ ॥
यत्स्वनाम्ना चकारेदं देवी पुरमनुत्तमम् ॥ देवीपत्तनमित्युक्तं तेन देव्याः पुरोत्तमम् ॥ ४९ ॥ देवीपत्तनमारभ्य सुमुहूर्ते दिने द्विजाः ॥ विघ्नेश्वरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्यादौ सलिलस्वामिनं तथा ॥ ५० ॥ महादेवाभ्यनुज्ञातो रामचंद्रोऽतिधार्मिकः ॥ स्थापयित्वा स्वहस्तेन पाषाणनवकं मुदा ॥ ५१ ॥ सेतु मारब्धवान्विप्रा यावल्लंकामतंद्रितः ॥ सिंहासनं समारुह्य रामो नलकृतं शुभम् ॥ ५२ ॥ वानरैः कारयामास सेतुमब्धौ नलादिभिः ॥ पर्वता ञ्छाखिनो वृक्षान्दृषदः काष्ठसंचयान् ॥ ५३ ॥ तृणानि च समाजह्रुर्वानरा वनमध्यतः ॥ ५४ ॥ नलस्तानि समादाय चक्रे सेतुं महोदधौ ॥ पंचभिर्दिवसैः सेतुर्यावल्लंकासमीपतः ॥ ५५ ॥ दशयोजनविस्तीर्णश्शतयोजनमायतः ॥ कृतः सेतुर्नलेनाब्धौ पुण्यः पापविनाशनः ॥ ५६ ॥ देवीपुरस्य निकटे नवपाषाणरूपके ॥ सेतुमूले नरः स्नायात्स्वपापपरिशुद्धये ॥ ५७ ॥ चक्रतीर्थे तथा स्नायाद्व्रजेत्सेत्वधिपं हरिम् ॥ देवीपत्तनमा रभ्य यत्कृतं सेतुबंधनम् ॥ ५८ ॥ तत्सेतुमूलं विप्रेंद्रा यथार्थं परिकल्पितम् ॥ सेतोस्तु पश्चिमा कोटिर्दर्भशय्या प्रकीर्तिता ॥ ५९ ॥ देवीपुरी च प्राक्कोटिरुभयं सेतुमूलकम् ॥ उभयं पुण्यमाख्यातं पवित्रं पापनाशनम् ॥ ६० ॥ यत्सेतुमूलं गच्छंति येन मार्गेण ये नराः ॥ तत्तन्मार्गगतास्ते ते तस्मिंस्तस्मिन्विमुक्तिदे ॥ ६१ ॥ स्नात्वादौ सेतुमूले तु चक्रतीर्थे तथैव च ॥ संकल्पपूर्वकं पश्चाद्गच्छेयुः सेतुबंधनम् ॥ ६२ ॥ देवीपुरे तथा दर्भशय्यायामपि भूसुराः ॥ चक्रतीर्थे शिवे स्नानं पुण्यं पापविनाशनम् ॥६३॥ स्मरणादुभयत्रापि चक्रतीर्थस्य वै द्विजाः ॥ भस्मीभवंति पापानि लक्षजन्मकृतान्यपि ॥ ६४ ॥ जन्मापि विलयं यायान्मुक्तिश्चापि करे स्थिता ॥ चक्रतीर्थसमं तीर्थं न भूतं न भविष्यति ॥ ६५ ॥ भूलोके यानि तीर्थानि गंगादीनि द्विजोत्तमाः ॥ चक्रतीर्थस्य तान्यद्धा कलां नार्हंति षोडशीम् ॥ ६६ ॥ आदौ तु नवपाषाणमध्येऽब्धौ स्नानमाचरेत् ॥ क्षेत्रपिंडे ततः कुर्याच्चक्रतीर्थे तथैव च ॥ ६७ ॥ सेतुनाथं हरिं सेवेत्स्वपापपरिशुद्धये ॥ एवं हि दर्भशय्यायां कुर्युस्तन्मार्गतो गताः ॥ ६८ ॥ आरूढं रामचंद्रेण यो नमस्कुरुते जनः ॥ सिंहासनं नलकृतं न तस्य नरकाद्भयम् ॥ ६९ ॥ सेतुमादौ नमस्कुर्याद्रामं ध्यायन्हृदा तदा ॥ रघुवीरपदन्या सपवित्रीकृतपांसवे ॥ ७० ॥ दशकंठशिरश्छेदहेतवे सेतवे नमः ॥ केतवे रामचंद्रस्य मोक्षमार्गैकहेतवे ॥ ७१ ॥ सीताया मानसांभोजभानवे सेतवे नमः ॥ ॥ साष्टांगं प्रणिपत्यादौ मंत्रेणानेन वै द्विजाः ॥ ७२ ॥ ततो वेतालवरदं तीर्थं गच्छेन्महाबलम् ॥ तत्र स्नानादवाप्नोति सिद्धिं पारमिकां नरः ॥ ७३ ॥ योऽध्यायमेनं पठते मनुष्यः शृणोति वा भक्तियुतो द्विजेंद्राः ॥ स्वर्गादयस्तस्य न दुर्लभाः स्युः कैवल्यमप्यस्य करस्थमेव ॥ ७४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमहात्म्ये चक्रतीर्थप्रशंसायां देवीपुराभिधानकथने

१ तिलकस्वामिनम्–इ० पा० । २ यात्रार्थम्–इ० पा० । ३ दुर्गापुरी–इ० पा० । ४ क्षेत्रपिण्डम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

महिषासुरसंहारवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्सूत सर्वज्ञ कृष्णद्वैपायनप्रिय ॥ त्वन्मुखाद्वै कथाः श्रुत्वा श्रोत्रकामृतवर्षिणीः ॥ १ ॥ तृप्तिर्न जायतेऽस्माकं त्वद्वचोमृतपायिनाम् ॥ अतः शुश्रूषमाणानां भूयो ब्रूहि कथाः शुभाः ॥ २ ॥ वेतालवरदंनाम चक्रतीर्थस्य दक्षिणे ॥ तीर्थमस्ति महापुण्यमित्यवादीद्भवान्पुरा[1] ॥ ३ ॥ वेतालवरदाभिख्या तीर्थस्यास्यागता कथम् ॥ किं प्रभावं च तत्तीर्थमेतन्नो वक्तुमर्हसि ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ साधु पृष्टं हि युष्माभिरतिगुह्यं मुनीश्वराः ॥ शृणुध्वं मनसा सार्द्धं ब्रवीम्यत्यद्भुतां कथाम् ॥ ५ ॥ पामरा अपि मोदन्ते यां वै श्रुत्वा कथां शुभाम् ॥ कथा चेयं महापुण्या पुरा कैलासपर्वते ॥ ६ ॥ केलिकालेषु पार्वत्यै शंभुना कथिता द्विजाः ॥ तां ब्रवीमि कथामेनामत्यद्भुततरां हि वः ॥ ७ ॥ पुरा हि गालवोनाम महर्षिः सत्यवाक्छुचिः ॥ चिंतयानः परं ब्रह्म तपस्तेपे निजाश्रमे ॥ ॥ ८ ॥ तस्य कन्या[2] महाभागा रूपयौवनशालिनी ॥ नाम्ना कांतिमती बाला व्यचरत्पितुरंतिके ॥ ९ ॥ आहरंती च पुष्पाणि बल्यर्थं तस्य वै मुनेः ॥ वेदिसंमार्जनादीनि समिदाहरणानि च ॥ १० ॥ कुर्वंती पितरं बाला सम्यक्परिचचार ह ॥ कदाचित्सा तु बल्यर्थं पुष्पाण्याहर्तुमुद्यता ॥ ॥ ११ ॥ तस्मिन्वने कांतिमती सुदूरमगमत्तदा ॥ तत्र पुष्पाणि रम्याणि समाहृत्य च पेटके ॥ १२ ॥ तूर्णं निववृते बाला पितृशुश्रूषणे रता ॥ निवर्तमानां तां कन्यां विद्याधरकुमारकौ ॥ १३ ॥ सुदर्शनसुकर्णाख्यौ विमानस्थौ ददर्शतुः ॥ तां दृष्ट्वा गालवसुतां रूपयौवनशालिनीम् ॥ १४ ॥ कामस्य पत्नीं ललितां रतिं मूर्तिमतीमिव ॥ सुदर्शनाभिधो ज्येष्ठो विद्याधरकुमारकः ॥ १५ ॥ हर्षसंफुल्लनयनश्चकमे काममोहितः ॥ पूर्णचन्द्राननां तां वै वीक्षमाणो मुहुर्मुहुः ॥ १६ ॥ तया रिरंसुकामोऽसौ विमानाग्रादवातरत् ॥ तामुपेत्य मुनेः कन्यामित्युवाच सुदर्शनः ॥ १७ ॥ ॥ ॥ सुदर्शन उवाच ॥ ॥ कासि भद्रे सुता कस्य रूपयौवनशालिनी ॥ रूपमप्रतिमं ह्येतदाह्लादयति मे मनः ॥ १८ ॥ त्वां दृष्ट्वा रतिसंकाशां बाधते मां मनोभवः ॥ सुकण्ठनामधेयस्य विद्याधरपतेरहम् ॥ १९ ॥ आत्मजो रूपसंपन्नो नाम्ना चैव सुदर्शनः ॥ प्रतिगृह्णीष्व मां भद्रे रक्ष मां करुणादृशा ॥ २० ॥ भर्तारं मां समासाद्य सर्वान्भोगानवाप्स्यसि ॥ इत्याकर्ण्य वचस्तस्य विद्याधरसुतस्य सा ॥ २१ ॥ तदा कांतिमती वाक्यं धर्मयुक्तमभाषत ॥ सुदर्शन महाभाग विद्याधरपतेः सुत ॥ २२ ॥ आत्मजां मां विजानीहि गालवस्य महात्मनः ॥ कन्या चाहमनूढास्मि पितृशु

---

१ इत्यवादि त्वया पुरा–इ०पा० । २ पुत्री–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूषणे रता ॥ २३ ॥ बल्यर्थं हि पितुश्चाहं पुष्पाण्याहर्तुमागता ॥ आहरंत्याश्च पुष्पाणि याम एको न्यवर्तत ॥ २४ ॥ मद्विलंबेन स मुनिर्देवतार्चनतत्परः ॥ कोपं विधास्यते नूनं तपस्वी मुनिपुंगवः ॥ २५ ॥ तच्छीघ्रमद्य गच्छामि पुष्पाण्यप्याहृतानि मे ॥ कन्याश्च पितुराधीना न स्वतन्त्राः कदाचन ॥२६॥ यदि मामिच्छति भवान्पितरं मम याचय ॥ इति विद्याधरसुतमुक्त्वा कांतिमती तदा ॥ २७ ॥ पितुराशंकिता तूर्णमाश्रमं गन्तुमुद्यता ॥ गच्छन्तीं तां समालोक्य विद्याधरकुमारकः ॥ २८ ॥ तूर्णं जग्राह केशेषु धावित्वा मदनार्दितः ॥ अभ्येत्य निजकेशेषु गृह्णन्तं तं विलोक्य सा ॥ २९ ॥ उच्चैश्चक्रंद सहसा कुररीव मुनेः सुता ॥ अस्माद्विद्याधरसुतात्जनक त्राहि मां विभो ॥ ३० ॥ बलाद्गृह्णाति दुष्टात्मा विद्याधरसुतोऽद्य माम् ॥ इत्थमुच्चैः प्रचुक्रोश स्वाश्रमान्नातिदूरतः ॥ ३१ ॥ तदाक्रंदितमाकर्ण्य गन्धमादनवासिनः ॥ मुनयस्तु पुरस्कृत्य गालवं मुनिपुंगवम् ॥ ३२ ॥ किमेतदिति विज्ञातुं तं देशं तूर्णमाययुः ॥ तं देशं तु समागत्य सर्वे ते ऋषिपुंगवाः ॥ ३३ ॥ विद्याधरगृहीतां तां ददृशुर्मुनिकन्यकाम् ॥ विद्याधरसुतं चान्यमंतिके समुपस्थितम् ॥ ३४ ॥ एतद्दृष्ट्वा महायोगी गालवो मुनिपुंगवः ॥ गतः कोपवशं किंचिद्दुरात्मानं शशाप तम् ॥ ३५ ॥ कृतवानीदृशं कार्यं यत्त्वं विद्याधराधम ॥ तद्याहि मानुषीं योनिं स्वस्य दुष्कर्मणः फलम् ॥ ३६ ॥ संप्राप्य मानुषं जन्म बहुदुःखसमाकुलम् ॥ अचिरेण तु कालेन तस्मिन्नेव तु जन्मनि ॥ ३७ ॥ मनुष्यैरपि निंद्यं तद्वेतालत्वं प्रयास्यसि ॥ मांसानि शोणितं चैव सर्वदा भक्षयिष्यसि ॥ ३८ ॥ वेताला राक्षसप्राया बलाद्गृह्णन्ति योषितः ॥ तस्मात्त्वं मानुषो भूत्वा वेतालत्वमवाप्स्यसि ॥ ३९ ॥ तव दुष्कर्मणो योऽसावनुमंता कनिष्ठकः ॥ सुकर्ण इति विख्यातो भविता सोपि मानुषः ॥ ४० ॥ किं तु साक्षान्न कृतवान्यतोऽसावीदृशीं क्रियाम् ॥ तन्मानुषत्वमेवास्य वेतालत्वं तु नो भवेत् ॥ ४१ ॥ विज्ञतिकौतुकाभिख्यं यदा विद्याधराधिपम् ॥ द्रक्ष्यतेऽसौ कनिष्ठस्ते तदा शापाद्विमोक्ष्यते ॥ ४२ ॥ ईदृशस्य तु यः कर्ता महापापस्य कर्मणः ॥ स त्वं संप्राप्य मानुष्यं तस्मिन्नेव तु जन्मनि ॥ ४३ ॥ वेतालजन्म संप्राप्य चिरं लोके चरिष्यसि ॥ इत्युक्त्वा गालवः कन्यां गृहीत्वा मुनिभिः सह ॥ ४४ ॥ विद्याधरसुतौ शप्त्वा स्वाश्रमं प्रति निर्ययौ ॥ ततस्तस्मिन्महाभागे निर्याते मुनिपुंगवे ॥ ॥ ४५ ॥ सुदर्शनसुकर्णाख्यौ विद्याधरपतेः सुतौ ॥ मुनिशापेन दुःखार्तौ चिंतयामासतुर्भृशम् ॥ ४६ ॥ कर्तव्यं तौ विनिश्चित्य सुदर्शनसुकर्णकौ ॥ गोविंदस्वामिनामानं यमुनातटवासिनम् ॥ ४७ ॥ ब्राह्मणं शीलसंपन्नं पितृत्वे परिकल्प्य तौ ॥ परित्यज्य स्वकं रूपमजायेतां तदात्मजौ ॥ ४८ ॥ विजयाशोकदत्ताख्यौ तस्य पुत्रौ बभूवतुः ॥ सुतो विजयदत्ताख्यो ज्येष्ठो जज्ञे सुदर्शनः ॥ ४९ ॥ अशोकदत्तनामा तु सुकर्णश्च

CC-0. In Public Domain. Digitization by eGangotri

कनिष्ठकः ॥ विजयाशोकदत्तौ तु क्रमाद्यौवनमापतुः ॥ ५० ॥ एतस्मिन्नेव काले तु यमुनायास्तटे शुभे ॥ अनावृष्ट्या तु दुर्भिक्षमभूद्द्वादशवार्षि
कम् ॥ ५१ ॥ गोविंदस्वामिनामा तु ब्राह्मणो वेदपारगः ॥ दुर्भिक्षोपहतां दृष्ट्वा तदानीं स निजां पुरीम् ॥ ५२ ॥ प्रययौ काशीनगरं सपुत्रः सह
भार्यया ॥ स प्रयागं समासाद्य पुण्यं दृष्ट्वा महावटम् ॥ ५३ ॥ कपालमालाभरणं सोऽपश्यद्यतिनं पुरः ॥ गोविंदस्वामिनामा तु नमश्चक्रे स तं
मुनिम् ॥ ५४ ॥ सपुत्रस्य सभार्यस्य सोऽवादीदाशिषो मुनिः ॥ इदं च वचनं प्राह गोविंदस्वामिनं प्रति ॥ ५५ ॥ ज्येष्ठेनानेन पुत्रेण सांप्रतं
ब्राह्मणोत्तम ॥ क्षिप्रं विजयदत्तेन वियोगस्ते भविष्यति ॥ ५६ ॥ इति तस्य वचः श्रुत्वा गोविंदस्वामिनामकः ॥ सूर्ये चास्तं गते तत्र सांध्यं कर्म
समाप्य च ॥ ५७ ॥ सभार्यः ससुतो विप्रः सुदूराध्वसमाकुलः ॥ उवास तस्यां शर्वर्यां शून्ये वै देवतालये ॥ ५८ ॥ तदा त्वशोकदत्तश्च ब्राह्मणी
च समाकुलौ ॥ वस्त्रेणास्तीर्य पृथिवीं रात्रौ निद्रां समापतुः ॥ ५९ ॥ ततो विजयदत्तस्तु दूरमार्गविलंबनात् ॥ बभूवात्यंतमलसो भृशं शीतज्व
रार्दितः ॥ ६० ॥ गोविंदस्वामिना पित्रा शीतबाधानिवृत्तये ॥ गाढमालिंग्यमानोऽपि शीतबाधां न सोऽत्यजत् ॥ ६१ ॥ बाधतेऽत्यर्थमधुना
तात मां शीतलो ज्वरः ॥ एतद्बाधानिवृत्त्यर्थं वह्निमानय मा चिरम् ॥ ६२ ॥ इति पुत्रवचः श्रुत्वा सर्वत्राग्निं गवेषयन् ॥ अलब्धवह्निः प्रोवाच पुन
रभ्येत्य पुत्रकम् ॥ ६३ ॥ न वह्निं पुत्र विंदामि मार्गमाणोऽपि सर्वशः ॥ रात्रिमध्ये तु संप्राप्ते द्वारेषु पिहितेषु च ॥ ६४ ॥ निद्रापरवशाः पौरा
नैव दास्यंति पावकम् ॥ इत्थं विजयदत्तोऽसावुक्तः पित्रा ज्वरातुरः ॥ ६५ ॥ ययाचे वह्निमेवासौ पितरं दीनया गिरा ॥ शीतज्वरसमुद्भूतशीतबा
धाप्रपीडितम् ॥ ६६ ॥ हिमशीकरवान्वायुर्द्विगुणं बाधतेऽद्य माम् ॥ वह्निर्न लब्ध इति वै मिथ्यैवोक्तं पितस्त्वया ॥ ६७ ॥ दूरादेष पुरोभागे
ज्वालामालासमाकुलः ॥ शिखाभिर्लेलिहानोऽभ्रं दृश्यते पश्य पावकः ॥ ६८ ॥ तं वह्निमानय क्षिप्रं तात शीतनिवृत्तये ॥ इत्युक्तवन्तं तं पुत्रं स
पिता प्रत्यभाषत ॥ ६९ ॥ नानृतं वच्मि पुत्राद्य सत्यमेव ब्रवीम्यहम् ॥ वह्निमान्योऽयमुद्देशो दूरादेव विलोक्यते ॥ ७० ॥ पितृकाननदेशं तं
पुत्र जानीहि सांप्रतम् ॥ यद्येषोऽभ्रंलिहज्वालः पुरस्ताज्ज्वलतेऽनलः ॥ ७१ ॥ पुत्र वित्रासजनकं तं जानीहि चितानलम् ॥ अमंगलो न सेव्योऽयं
चिताग्निः स्पर्शदूषितः ॥ ७२ ॥ तस्य चायुःक्षयं याति सेवते यश्चितानलम् ॥ तस्मात्तवायुर्हानिर्मा भूयादिति मया सुत ॥ ७३ ॥ अमंगलस्तथा
स्पृश्यो नानीतोऽयं चितानलः ॥ इत्युक्तवंतं पितरं स दीनः प्रत्यभाषत ॥ ७४ ॥ अयं शवानलो वा स्यादध्वरानल एव वा ॥ सर्वथानीयतामेष
नोचेन्मे मरणं भवेत् ॥ ७५ ॥ पुत्रस्नेहाभिभूतोऽथ समाहर्तुं चितानलम् ॥ गोविंदस्वामिनामा तु श्मशानं शीघ्रमभ्यगात् ॥ ७६ ॥ गोविंदस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिनि गते समाहर्तुं चितानलम् ॥ तूर्णं विजयदत्तोऽपि तदा गच्छंतमन्वयात् ॥ ७७ ॥ संप्राप्य तापनिकटं विकीर्णास्थि चितानलम् ॥ आलिंगन्निव सोद्वेगं शनैर्निर्वृतिमाप्तवान् ॥ ७८ ॥ अथावादीत्स पितरं तदिदं परिवर्तुलम् ॥ अतिदीप्तं विभात्यग्नौ किं रक्तांबुजसन्निभम् ॥ ७९ ॥ इति तस्य वचः श्रुत्वा पुत्रस्य ब्राह्मणोत्तमः ॥ निपुणं तं निरूप्यैतद्वचनं पुनरब्रवीत् ॥ ८० ॥ ॥ गोविंदस्वाम्युवाच ॥ ॥ एतत्कपालमनलज्वालावलयवर्तुलम् ॥ वसाकीकसमांसाढ्यमेतद्रक्तांबुजोपमम् ॥ ८१ ॥ द्विजस्य सूनुः श्रुत्वेति काष्ठाग्रेण जघान तत् ॥ येन तत्स्फुटनोद्गीर्णवसासिक्तमुखोऽभवत् ॥ ८२ ॥ कपालघट्टनाद्रक्तं यत्संसक्तं मुखे तदा ॥ जिह्वया लेलिहानोऽसौ मुहुस्तद्रक्तमास्वदत् ॥ ८३ ॥ आस्वाद्यैवं समादाय तत्कपालं समाकुलः ॥ पीत्वा वसां महाकायो बभूवातिभयंकरः ॥ ८४ ॥ सद्यो वेतालतां प्राप तीक्ष्णदंष्ट्रस्तदा निशि ॥ तस्याट्टहासघोषेण दिशश्च प्रदिशस्तदा ॥ ८५ ॥ द्यौरंतरिक्षं भूमिश्च स्फुटिता इव सर्वशः ॥ तस्मिन्वेगात्समाकृष्य पितरं हन्तुमुद्यते ॥ ८६ ॥ मा कृथाः साहसमिति प्रादुरासीद्वचो दिवि ॥ स दिव्यां गिरमाकर्ण्य वेतालोऽतिभयंकरः ॥ ८७ ॥ पितरं तं परित्यज्य महावेगसमन्वितः ॥ तूर्णमाकाशमाविश्य प्रययावस्खलद्गतिः ॥८८॥ स गत्वा दूरमध्वानं वेतालैः सह संगतः ॥ तमागतं समालोक्य वेतालास्सर्व एव ते ॥ ८९ ॥ कपालस्फोटनादेष वेतालत्वं यदाप्तवान् ॥ कपालस्फोटनामानमाह्वयांचक्रिरे ततः ॥९०॥ ततः कपालस्फोटोऽसौ वेतालैः सर्वतो वृतः॥ नरास्थिभूषणाख्यस्य सद्यो वेतालभूपतेः ॥९१॥ अन्तिकं सहसा प्राप महाबलसमन्वितः ॥ नरास्थिभूषणश्चैनं सेनापतिमकल्पयत् ॥ ९२ ॥ तं कदाचित्तु गन्धर्वश्चित्रसेनाभिधो बली ॥ नरास्थिभूषणं संख्ये न्यवधीत्सोऽपि संस्थितः ॥ ९३ ॥ नरास्थिभूषणे तस्मिन्गन्धर्वेण हते युधि ॥ तदा कपालस्फोटोऽसौ तत्पदं समवाप्तवान् ॥ ९४ ॥ विद्याधरेन्द्रस्य सुतः सुदर्शनो मनुष्यतां वै प्रथमं स गत्वा ॥ वेतालतां प्राप्य महर्षिशापात्क्रमाच्च वेतालपतिर्बभूव ॥ ९५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये वेतालवरदतीर्थप्रशंसायां सुदर्शनवेतालत्वप्राप्तिवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥ ततः स विप्रः प्रत्यूषे पुत्रशोकेन पीडितः ॥ अशोकदत्तसंयुक्तो भार्यया विललाप ह ॥ १ ॥ विलपंतं समालोक्य गोविंदस्वामिनं द्विजाः ॥ वणिक्समुद्रदत्ताख्यः समानिन्ये निजं गृहम् ॥ २ ॥ समानीय समाश्वास्य दयायुक्तो वणिग्वरः ॥ स्वधनानां हि सर्वेषां रक्षितारमकल्पयत् ॥ ३ ॥ स्मरन्महायतिवचः पुत्रदर्शनलालसः ॥ स तस्थौ वणिजो गेहे पुत्रभार्यासमन्वितः ॥ ४ ॥ अशोकदत्तनामा तु द्वितीयो विप्रनंदनः ॥ शस्त्रे चैव तथा शास्त्रे बभूवातिविचक्षणः ॥ ५ ॥ तथा

न्यास्वपि विद्यासु नास्ति तत्सदृशो भुवि ॥ कृतविद्यो द्विजसुतः प्रख्यातो नगरेऽभवत् ॥ ६ ॥ अत्रांतरे नरपतिं प्रतापमुकुटाभिधम् ॥ काशी
देशाधिपो मल्लः कश्चिदभ्याययौ बली ॥ ७ ॥ प्रतापमुकुटो राजा मल्लस्यास्य जयाय सः ॥ बलिनं द्विजपुत्रं तमाह्वयामास भृत्यकैः ॥ ८ ॥
तमागतं समालोक्य प्रतापमुकुटोऽब्रवीत् ॥ अशोकदत्त सहसा मल्लमेनं बलोत्कटम् ॥ ९ ॥ दुर्जयं जहि संग्रामे त्वं वै बलवतां वरः ॥ दाक्षि
णात्यमहामल्लपतावस्मिञ्जिते त्वया ॥ १० ॥ यदिष्टं तव तत्सर्वं दास्याम्यहं न संशयः ॥ इति तस्य वचः श्रुत्वा बलवान्द्विजनंदनः ॥ ११ ॥
दाक्षिणात्यमहामल्लनृपतिं समताडयत् ॥ ताडितो द्विजपुत्रेण मल्लः स बलिना बली ॥ १२ ॥ सद्यो विवृत्तनयनः परासुर्न्यपतद्भुवि ॥ द्विज
पुत्रस्य तत्कर्म देवैरपि सुदुष्करम् ॥ १३ ॥ प्रतापमुकुटो दृष्ट्वा प्रसन्नहृदयोऽभवत् ॥ दत्त्वा बहुधनान्ग्रामान्समीपेऽस्थापयत्तदा ॥ १४ ॥ स
कदाचिन्महाराजः सहितो द्विजसूनुना ॥ संध्यायां विजने देशे चचार तुरगेण वै ॥ १५ ॥ द्विजसूनुसखस्तत्र दीनां वाणीमथाशृणोत् ॥ राज
न्नल्पापराधोऽहं शत्रुप्रेरणयासकृत् ॥ १६ ॥ दण्डपालेन निहितः शूले निर्घृणचेतसा ॥ दिनमद्य चतुर्थं मे शूलस्थस्यैव जीवतः ॥ १७ ॥
प्राणाः सुखेन निर्यांति न हि दुष्कृतकर्मणाम् ॥ भृशं मां बाधते तृष्णा तां निवारय भूपते ॥ १८ ॥ इति दीनां समाकर्ण्य वाचं राजा द्विजा
त्मजम् ॥ अशोकदत्तनामानं धैर्यवंतमभाषत ॥ १९ ॥ अस्मै निरपराधाय शूलप्रोताय जंतवे ॥ तृष्णार्दिताय दातव्यं द्विजसूनो त्वया जलम् ॥
॥ २० ॥ इत्यादिष्टो नरेन्द्रेण सहसा द्विजनन्दनः ॥ जलपूर्णं समादाय कलशं वेगवान्ययौ ॥ २१ ॥ तच्छ्मशानं समासाद्य भूतवेतालसंकुलम् ॥
शूलप्रोताय वै तस्मै जलं दातुं समुत्सुकः ॥ २२ ॥ ददर्शाथ स्थितां नारीं नवयौवनशालिनीम् ॥ उदैक्षत महाकांतिं मूर्तामिव रतिं द्विजः ॥
॥ २३ ॥ तामालोक्य ततः प्राह धैर्यवान्द्विजनंदनः ॥ कासि भद्रे वरारोहे श्मशाने विजने स्थिता ॥ २४ ॥ अस्याधस्तात्किमर्थं त्वं
शूलप्रोतस्य तिष्ठसि ॥ इति तस्य वचः श्रुत्वा सा प्राह रुचिरानना ॥ २५ ॥ पुरुषो वल्लभोऽयं मे शूले राज्ञा समर्पितः ॥ धनं यथा
च कृपणः पश्य प्राणान्न मुंचति ॥ २६ ॥ आसन्नमरणं चैनमनुयातुमिह स्थिता ॥ तृषितो याचते वारि मामयं व्यथते मुहुः ॥ २७ ॥ शूलप्रोतो
द्धतग्रीवं मुमूर्षुं प्राणनायकम् ॥ नास्मि पाययितुं शक्ता जलमेनमधः स्थिता ॥२८॥ अशोकदत्तस्तच्छ्रुत्वा करुणावरुणालयः ॥ तत्कालसदृशं वाक्यं
तां वधूमब्रवीत्तदा ॥२९॥ ॥ अशोकदत्त उवाच ॥ ॥ मातर्मत्स्कंधमारुह्य देह्यस्मै शीतलं जलम् ॥ सा तथेति तमाभाष्य तरुणी त्वरयान्विता ॥३०॥

१ गतासुः–इ० पौ० ।

CC-0. In Public Domain. Digitization by eGangotri

आनम्रवपुषस्तस्य स्कंधं पद्भ्यां रुरोह वै ॥ द्विजसूनुर्ददर्शाथ शोणितं नूतनं पतत्॥३१॥किमेतदिति सोपश्यदुन्नम्य सहसा मुखम् ॥ भक्ष्यमाणं तया
तत्स विज्ञाय द्विजनंदनः॥३२॥अशोकदत्तो जग्राह तस्याः पादं सनूपुरम्॥ ततोऽगान्नूपुरं त्यक्त्वा बद्धरत्नं विहाय तत्॥३३॥ प्रत्युप्तानेकरत्नाढ्यं
तदादाय च नूपुरम् ॥ अशोकदत्तः प्रययौ तच्छ्मशानान्नृपांतिकम्॥३४॥स्मशानवृत्तं तत्सर्वं स नृपाय निवेद्य वै॥महार्घ्यरत्नप्रत्युप्तं नूपुरं च ददौ तदा
॥३५॥ ज्ञात्वा तद्वीरचरितं वीरैरन्यैः सुदुष्करम् ॥ ददौ मदनलेखाख्यां सुतां तस्मै महीपतिः॥३६॥कदाचिदथ तद्दिव्यं नूपुरं वीक्ष्य भूपतिः॥ अस्य
नूपुरवर्यस्य तुल्यं वै नूपुरांतरम्॥ ३७ ॥ कुतो वा लभ्यत इति सादरं समचिंतयत् ॥ अशोकदत्तस्तु तदा विज्ञाय नृपकांक्षितम् ॥ ३८ ॥ नूपुरांतरसि
द्ध्यर्थं चिंतयामास चेतसा ॥ श्मशाने नूपुरमिदं यतः प्राप्तं मया पुरा ॥ ३९ ॥तां नूपुरांतरप्राप्त्यै कुत्र द्रक्ष्यामि सांप्रतम् ॥ इत्थं वितर्क्य बहुधा नि
श्चिकाय महामतिः॥४०॥ विक्रेष्यामि महामांसं समेत्य पितृकाननम् ॥ तत्र राक्षसवेतालपिशाचादिषु सर्वशः॥४१॥ मंत्रैराहूयमानेषु साप्यायास्य
ति राक्षसी ॥ तामागतां बलाद्धृत्य तद्ग्रहीष्यामि नूपुरम्॥४२॥ राक्षसानां सहस्रं वा पिशाचानां तथायुतम् ॥ वेतालानां तथा कोटिर्न लक्ष्यं बलिनो
मम ॥ ४३ ॥ इति निश्चित्य मनसा श्मशानं सहसा ययौ ॥ विक्रीणानो महामांसं मंत्रैराहूय राक्षसान् ॥४४॥गृहाणेत्युच्चया वाचा चचार श्रावयन्दि
शः ॥ विक्रीयते महामांसं गृह्यतांगृह्यतामिति ॥ ४५ ॥ तत्र राक्षसवेतालाः कंकालाश्च पिशाचकाः ॥ अन्ये च भूतनिवहाः समाजग्मुः प्रहर्षिताः ॥
॥ ४६ ॥ भक्षयिष्यामहे सर्वे मांसमिष्टतमं त्विति ॥ तत्रागच्छत्सु सर्वेषु रक्षःकन्यां[2]समावृता ॥ ४७ ॥ आययौ राक्षसी सापि मांसभक्षणलालसा ॥
गवेषयंस्तदा विप्रस्तां समुद्वीक्ष्य राक्षसीम् ॥ ४८ ॥ सेयं दृष्टा पुरेत्येष प्रत्यभिज्ञानमाप्तवान् ॥ तामाह द्विजपुत्रोऽन्यद्देहि मे नूपुरं त्विति ॥ ४९ ॥
सा तस्य वचनं श्रुत्वा प्रीता वाक्यमथाऽब्रवीत् ॥ ममैव च त्वया नीतं पुरा वीरेंद्र नूपुरम् ॥ ५० ॥ गृहाण रत्नरुचिरं द्वितीयमपि नूपुरम् ॥
इत्युक्त्वा नूपुरं तस्मै स्वसुतां च ददौ प्रियाम् ॥ ५१ ॥ विद्युत्केश्या तदा दत्तां प्रियां विद्युत्प्रभाभिधाम् ॥ विप्रः संप्राप्य मुमुदे रूपयौवनशालि
नीम् ॥ ५२ ॥ विद्युत्केशी तु जामात्रे हेमाब्जमपि सा ददौ ॥ विद्युत्प्रभां नूपुरं च हेमाब्जमपि लभ्य सः ॥ ५३ ॥ श्वश्रूमाभाष्य सहसा पुनः
प्रायान्नृपांतिकम् ॥ ततः प्रतापमुकुटो नूपुरप्राप्तिनंदितः ॥ ५४ ॥ शौर्यधैर्यसमायुक्तं प्रशशंस द्विजात्मजम्॥ [1]अथ विद्युत्प्रभां विप्रः सोऽब्रवीद्विहसि
प्रियाम् ॥ ५५ ॥ मात्रा तव कुतो लब्धमेतद्धेमांबुजं प्रिये ॥ एतत्तुल्यानि चान्यानि यतः प्राप्स्ये वरानने ॥ ५६ ॥ द्विजात्मजं ततः प्राह पतिं

१ पुनः—इ० पा० । २ रक्षःकन्याः समावृताः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

विद्युत्प्रभा रहः ॥ प्रभो कपालविस्फोटनाम्नो वेतालभूपतेः ॥ ५७ ॥ अस्ति दिव्यं सरः किंचिद्धेमांबुजपरिष्कृतम् ॥ तव श्वश्र्वा जलक्रीडां वितन्वं त्येदमाहृतम् ॥ ५८ ॥ इति श्रुत्वा वचस्तत्र मां नयेति जगाद सः ॥ ततः सा सहसा विप्रं निन्ये तत्कांचनं सरः ॥ ५९ ॥ ततः स हेमपद्मानामा जिहीर्षुर्द्विजात्मजः ॥ तद्विघ्नकारिणः सर्वान्वेतालादींस्ततोऽवधीत् ॥ ६० ॥ स्वयं कपालविस्फोटं निहताशेषसैनिकम् ॥ ददर्श वेतालपतिं तं च हंतुं प्रचक्रमे ॥ ६१ ॥ अत्रांतरे महातेजा नाम्ना विज्ञप्तिकौतुकः ॥ विद्याधरपतिः प्राप्य विमानेनैनमब्रवीत् ॥ ६२ ॥ अशोकदत्त विप्रेंद्र साहसं मा कृथा इति ॥ तदाकर्ण्य द्विजसुतो विमानवरसंस्थितम् ॥६३॥ ददर्श प्रभया युक्तं विद्याधरपतिं दिवि ॥ तस्य दर्शनमात्रेण शापान्मुक्तो द्विजात्मजः ॥ ६४ ॥ संत्यज्य मानुषं रूपं दिव्यं रूपमवाप्तवान् ॥ विमानवरमारूढं दिव्याभरणभूषितम् ॥ ६५ ॥ शापान्मुक्तं सुकर्णं तं प्राह विज्ञप्तिकौतुकः ॥ अयं सुकर्ण ते भ्राता गालवस्य महामुनेः ॥ ६६ ॥ शापाद्वेतालतां प्राप तत्कन्यास्पर्शपातकी ॥ त्वं च शप्तः पुरा तेन तत्पापस्यानुमोदकः ॥ ६७ ॥ तवायमल्पपापस्य शापो मद्दर्शनावधिः ॥ कल्पितस्ततेन मुनिना शापांतो नास्य कल्पितः ॥ ६८ ॥ तदेहि मुक्तशापोसि सुकर्ण स्वर्गमारुह ॥ ततः सुकर्णस्तं प्राह विद्याधरकुलाधिपम् ॥ ६९ ॥ विद्याधरपते भ्रात्रा विना ज्येष्ठेन सांप्रतम् ॥ सर्वभोगयुतं स्वर्गं नैव गंतुं समुत्सहे ॥ ७० ॥ शापस्यांतो यथा भूयान्मम भ्रातुस्तथा वद ॥ तमुवाच महातेजास्तथा विज्ञप्तिकौतुकः ॥ ७१ ॥ दुर्निवारमिमं शापमन्यः को वा निवारयेत् ॥ किं तु गुह्यतमं किंचित्तव वक्ष्यामि सांप्रतम्॥७२॥ब्रह्मणा सनकादिभ्यो मुनिभ्यः कथितं पुरा॥सर्वतीर्थाश्रये पुण्ये दक्षिणस्योदधेस्तटे॥७३॥चक्रतीर्थसमीपे तु तीर्थमस्ति महत्तरम्॥ महापातकसंघाश्च यस्य दर्शनमात्रतः॥७४॥नश्यंति तत्क्षणादेव न जाने स्नानजं फलम्॥तत्र गत्वा तव ज्येष्ठो यदि स्नायान्महत्तरे ॥७५॥ वेतालत्वं त्यजेन्नूनं तदा गालवशापजम्॥ सुकर्णस्तद्वचः श्रुत्वा भ्रात्रा वेतालरूपिणा ॥७६॥ सहितः सहसा प्रायाद्दक्षिणस्योदधेस्तटम् ॥ दक्षिणं चक्रतीर्थाख्यादुत्तरं गंधमादनात् ॥ ७७ ॥ ब्रह्मणा सनकादिभ्यः कथितं तीर्थमभ्यगात् ॥ तत्तीर्थकूलमासाद्य भ्रातरं चेदमब्रवीत् ॥ ७८ ॥ भ्रातर्गालवशापस्य घोरस्यास्य निवृत्तये ॥ तीर्थेऽस्मिन्नचिरात्स्नाहि सर्वतीर्थोत्तमोत्तमे ॥ ७९ ॥ तस्मिन्नवसरे विप्रास्तस्य तीर्थस्य शीकराः ॥ न्यपतंस्तस्य गात्रेषु वायुना वै समाहृताः ॥ ८० ॥ स तच्छीकरसंस्पर्शात्त्यक्त्वा वेतालतां तदा ॥ तदेव मानुषं भावं द्विजपुत्रत्वमाप्तवान् ॥ ८१ ॥ ततः संकल्प्य सहसा तस्मिंस्तीर्थोत्तमोत्तमे ॥ मनुष्यत्वनिवृत्त्यर्थं निममज्ज द्विजात्मजः ॥ ८२ ॥

१ रथम्—इ० पां० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तिष्ठन्नेव सहसा दिव्यं रूपमवाप्तवान् ॥ विमानवरमारूढो देवस्त्रीपरिवारितः ॥ ८३ ॥ सर्वाभरणसंयुक्तः सह भ्रात्रा सुदर्शनः ॥ श्लाघमानश्च तत्तीर्थं नमस्कृत्य पुनःपुनः ॥ ८४ ॥ विज्ञप्तिकौतुकं चापि पुरस्कृत्य दिवं ययौ ॥ तदाप्रभृति तत्तीर्थं वेतालवरदाभिधम् ॥ ८५ ॥ वेतालत्वं विनष्टं यच्छीकरस्पर्शमात्रतः ॥ य इदं तीर्थमासाद्य चक्रतीर्थस्य दक्षिणे ॥ ८६ ॥ स्नानं कदाचित्कुर्वंति जीवन्मुक्ता भवंति ते ॥ एतत्तीर्थसमं पुण्यं न भूतं न भविष्यति ॥ ८७ ॥ घोरां वेतालतां त्यक्त्वा दिव्यतां स यदाप्तवान् ॥ ८८ ॥ अत्र संकल्प्य च स्नात्वा वेतालवरदे शुभे ॥ पितृभ्यः पिंडदानं च कुर्याद्वै नियमान्वितः ॥ ८९ ॥ एवं वः कथितं विप्रास्तस्य तीर्थस्य वैभवम् ॥ वेतालवरदाभिख्या यथा चास्य समागता ॥ ॥ ९० ॥ यः पठेदिममध्यायं शृणुयाद्वा स मुच्यते ॥ ९१ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये वेतालवरदतीर्थप्रशंसायां सुदर्शनसुकर्णशापमोक्षणंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ वेतालवरदे तीर्थे नरः स्नात्वा द्विजोत्तमाः ॥ ततः शनैःशनैर्गच्छेद्गन्धमादनपर्वतम् ॥ १ ॥ योंऽबुधौ सेतुरूपेण वर्तते गन्धमादनः ॥ स मार्गो ब्रह्मलोकस्य विश्वकर्त्रा विनिर्मितः ॥ २ ॥ लक्षकोटिसहस्राणि सरांसि सरितस्तथा ॥ समुद्राश्च महापुण्या वनान्यप्याश्रमाणि च ॥ ३ ॥ पुण्यानि क्षेत्रजातानि वेदारण्यादिकानि च ॥ मुनयश्च वसिष्ठाद्याः सिद्धचारणकिन्नराः ॥ ४ ॥ लक्ष्म्या सह धरण्या च भगवान्मधुसूदनः ॥ सावित्र्या च सरस्वत्या सहैव चतुराननः ॥ ५ ॥ हेरंबः षण्मुखश्चैव देवाश्चेंद्रपुरोगमाः ॥ आदित्यादिग्रहाश्चैव तथाष्टौ वसवो द्विजाः ॥ ६ ॥ पितरो लोकपालाश्च तथान्ये देवतागणाः ॥ महापातकसंघानां नाशने लोकपावने ॥ ७ ॥ दिवानिशं वसंत्यत्र पर्वते गंधमादने ॥ अत्र गौरी सदा तुष्टा हरेण सह वर्तते ॥ ८ ॥ अत्र किन्नरकांतानां क्रीडा जागर्ति नित्यशः ॥ तस्य दर्शनमात्रेण बुद्धिसौख्यं नृणां भवेत् ॥ ९ ॥ तन्मूर्धनि कृतावासाः सिद्धचारणयोषितः ॥ पूजयंति सदा कालं शंकरं गिरिजापतिम् ॥ १० ॥ कोट्यो ब्रह्महत्यानामगम्यागमकोटयः ॥ अंगलग्नैर्विनश्यंति गन्धमादनमारुतैः ॥ ११ ॥ असावुल्लोलकल्लोले तिष्ठन्मध्ये महांबुधौ ॥ आसीन्मुनिगणैः सेव्यः पुरा वै गन्धमादनः ॥ १२ ॥ ततो नलेन सेतौ तु बद्धे तन्मध्यगोचरः ॥ रामाज्ञयाखिलैः सेव्यो बभूव मनुजैरपि ॥ १३ ॥ सेतुरूपं गिरिं तं तु प्रार्थयेद्गंधमादनम् ॥ क्षमाधर महापुण्य सर्वदेवनमस्कृत ॥ १४ ॥ विष्णवादयोऽपि यं देवास्सेवंते श्रद्धया सह ॥ तं भवंतमहं पद्भ्यामाक्रमामि नगोत्तम ॥ १५ ॥ क्षमस्व पादघातं मे दयया पापचेतसः ॥ त्वन्मूर्द्धनि

१ इत्येतत्-इ० पा० ।

कृतांवासं शंकरं दर्शयस्व मे ॥ १६ ॥ प्रार्थयित्वा नरस्त्वेवं सेतुरूपं नगोत्तमम् ॥ ततो मृदुपदं गच्छेत्पावनं गंन्धमादनम् ॥ १७ ॥ अब्धौ तत्र नरः स्नात्वा पर्वते गन्धमादने ॥ पिंडदानं ततः कुर्यादपि सर्षपमात्रकम् ॥ १८ ॥ तृप्तिं प्रयांति पितरस्तस्य यावद्युगक्षयः ॥ शमीदलसमानान्वा दद्यात्पिंडान्पितॄन्प्रति ॥१९॥ स्वर्गस्था मोक्षमायांति स्वर्गं नरकवासिनः ॥ ततस्तस्योपरि महातीर्थं लोकेषु विश्रुतम् ॥२०॥ सर्वतीर्थोत्तमं पुण्यं नाम्ना पापविनाशनम् ॥ अस्ति पुण्यतमं विप्राः पवित्रे गन्धमादने ॥२१॥ यस्य संस्मरणादेव गर्भवासो न विद्यते ॥ तत्प्राप्य तु नरः स्नायात्स्वदेहमलनाशनम् ॥ तत्र स्नानान्नरो याति वैकुण्ठं नात्र संशयः ॥२२॥ ॥ ऋषय ऊचुः ॥ ॥ सूत पापविनाशाख्यतीर्थस्य ब्रूहि वैभवम् ॥ व्यासेन बोधितस्त्वं हि वेत्सि सर्वं महामुने॥२३॥ ॥श्रीसूत उवाच॥ ॥ब्रह्माश्रमपदे वृत्तां पार्श्वे हिमवतः शुभे॥वक्ष्यामि ब्राह्मणश्रेष्ठा युष्माकं तु कथां शुभाम्॥२४॥ अस्याश्रमपदं पुण्यं ब्रह्माश्रमपदे शुभे ॥ नानावृक्षगणाकीर्णं पार्श्वे हिमवतः शुभे ॥ २५ ॥ बहुगुल्मलताकीर्णं मृगद्विपनिषेवितम् ॥ सिद्धचारणसंघुष्टं रम्यं पुष्पितकाननम् ॥ २६ ॥ वृतिभिर्बहुभिः कीर्णं तापसैरुशोभितम् ॥ ब्राह्मणैश्च महाभागैः सूर्यज्वलनसंनिभैः ॥ २७ ॥ नियमव्रतसंपन्नैः समाकीर्णं तपस्विभिः ॥ दीक्षितैर्यागहेतोश्च[1] यताहारैः कृतात्मभिः ॥ २८ ॥ वेदाध्ययनसंपन्नैर्वैदिकैः परिवेष्टितम् ॥ वर्णिभिश्च गृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ॥ २९ ॥ स्वाश्रमाचारनिरतैः स्ववर्णोक्तविधायिभिः ॥ वालखिल्यैश्च मुनिभिः संप्राप्तैश्च मरीचिभिः ॥ ३० ॥ तत्राश्रमे पुरा कश्चिच्छूद्रो दृढमतिर्द्विजाः ॥ साहसी ब्राह्मणाभ्याशमाजगाम मुदान्वितः ॥ ३१ ॥ आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ॥ नाम्ना दृढमतिः शूद्रः साष्टांगं प्रणनाम वै ॥ ३२ ॥ तान्स दृष्ट्वा मुनिगणान्देवकल्पान्महौजसः ॥ कुर्वतो विविधान्यज्ञान्संप्रहृष्य स शूद्रकः ॥ ३३ ॥ अथास्य बुद्धिरभवत्तपःकर्तुमनुत्तमम् ॥ ततोऽब्रवीत्कुलपतिं मुनिमागत्य तापसम् ॥ ३४ ॥ ॥ दृढमतिरुवाच ॥ ॥ तपोधन नमस्तेऽस्तु रक्ष मां करुणानिधे ॥ तव प्रसादादिच्छामि धर्मं चर्तुं द्विजर्षभ ॥ ३५ ॥ तस्मादभिगतं मां त्वं यागे दीक्षय सुव्रत ॥ ब्रह्मन्नवरवर्णोऽहं शूद्रो जात्यास्मि सत्तम ॥ ३६ ॥ शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे ॥ एवमुक्ते तु शूद्रेण तमाह ब्राह्मणस्तदा ॥ ३७ ॥ ॥ कुलपतिरुवाच ॥ ॥ यागे दीक्षयितुं शक्यो न शूद्रो हीनजन्मभाक् ॥ श्रूयतां यदि ते बुद्धिः शुश्रूषानिरतो भव ॥ ३८ ॥ उपदेशो न कर्तव्यो जातिहीनस्य कर्हिचित्[2] ॥ उप

१ योगहेतोश्च—इ० पा० । २ वै कचित्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

देशे महान्दोष उपाध्यायस्य विद्यते ॥ ३९ ॥ नाध्यापयेद्बुधः शूद्रं तथा नैव च याजयेत् ॥ न पाठयेत्तथा शूद्रं शास्त्रं व्याकरणादिकम् ॥ ४० ॥ काव्यं वा नाटकं वापि तथालंकारमेव च ॥ पुराणमितिहासं च शूद्रं नैव तु पाठयेत् ॥ ४१ ॥ यदि चोपदिशेद्विप्रः शूद्रंचैतानि कर्हिचित् ॥ त्यजेयुर्ब्राह्मणा विप्रं तं ग्रामाद्ब्रह्मसंकुलात् ॥ ४२ ॥ शूद्राय चोपदेष्टारं द्विजं चंडालवत्त्यजेत् ॥ शूद्रं चाक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥ ४३ ॥ अतः शुश्रूष भद्रं ते ब्राह्मणाञ्छ्रद्धया सह ॥ शूद्रस्य द्विजशुश्रूषा मन्वादिभिरुदीरिता॥४४॥ न हि नैसर्गिकं कर्म परित्यक्तुं त्वमर्हसि ॥ एवमुक्तस्तु मुनिना स शूद्रोऽचिंतयत्तदा ॥ ४५ ॥ किं कर्तव्यं मया त्वद्य व्रते श्रद्धा हि मे पुरा ॥ यथा स्यान्मम विज्ञानं यतिष्येऽहं तथाद्य वै ॥ ४६ ॥ इति निश्चित्य मनसा शूद्रो दृढमतिस्तदा ॥ गत्वाश्रमपदाद्दूरं कृतवानुटजं शुभम् ॥ ४७ ॥ तत्र वै देवतागारं पुण्यान्यायतनानि च ॥ पुष्पारामादिकं चापि तटाकखननादिकम् ॥ ४८ ॥ श्रद्धया कारयामास तपःसिद्ध्यर्थमात्मनः ॥ अभिषेकांश्च नियमानुपवासादिकानपि ॥ ४९ ॥ बलिं च कृत्वा हुत्वा च दैवतान्यभ्यपूजयत् ॥ संकल्पनियमोपेतः फलाहारो जितेंद्रियः ॥ ५० ॥ नित्यं कंदैश्च मूलैश्च पुष्पैरपि तथा फलैः ॥ अतिथीन्पूजयामास यथावत्समुपागतान् ॥ ५१ ॥ एवं हि सुमहान्कालो व्यतिचक्राम तस्य वै ॥ अथाश्रममगात्तस्य सुमतिर्नाम नामतः ॥ ५२ ॥ द्विजो गर्गकुलोद्भूतः सत्यवादी जितेंद्रियः ॥ स्वागतेन मुनिं पूज्य तोषयित्वा फलादिकैः ॥ ५३ ॥ कथयन्वै कथाः पुण्याः कुशलं पर्यपृच्छत ॥ इत्थं स प्रणिपाताद्यैरुपचारैस्तु पूजितः ॥ ५४ ॥ आशीर्भिरभिनंद्यैनं प्रतिगृह्य च सत्क्रियाम् ॥ तमापृच्छय प्रहृष्टात्मा स्वाश्रमं पुनराययौ ॥ ५५ ॥ एवं दिनेदिने विप्रः शूद्रेस्मिन्पक्षपातवान् ॥ आगच्छदाश्रमं तस्य द्रष्टुं तं शूद्रयोनिजम् ॥ ५६ ॥ बहुकालं द्विजस्याभूत्संसर्गः शूद्रयोनिना ॥ स्नेहस्य वशमापन्नः शूद्रोक्तं नातिचक्रमे ॥ ५७ ॥ अथागतं द्विजं शूद्रः प्राह स्नेहवशीकृतम् ॥ हव्यकव्यविधानं मे कृत्स्नं ब्रूहि मुनीश्वर ॥ ५८ ॥ पितृकार्यविधानार्थं देवकार्यार्थमेव च ॥ मंत्रानुपदिश त्वं मे महालयविधिं तथा ॥ ५९ ॥ अष्टकाश्राद्धकृत्यं च वैदिकं यच्च किंचन ॥ सर्वमेतद्रहस्यं मे ब्रूहि त्वं वै गुरुर्मतः ॥ ६० ॥ एवमुक्तः स शूद्रेण सर्वमेतदुपादिशत् ॥ कारयामास तस्यायं पितृकार्यादिकं तथा ॥ ६१ ॥ पितृकार्ये कृते तेन विसृष्टः स द्विजो गतः ॥ अथ दीर्घेण कालेन पोषितः शूद्रयोनिना ॥ ६२ ॥ त्यक्तो विप्रगणैः सोऽयं पंचत्वमगमद्द्विजः वैवस्वतभटैर्नीत्वा पातितो नरकेष्वपि ॥ ६३ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ भुक्त्वा क्रमेण नरकांस्तदंते स्थावरोऽभवत् ॥ ६४ ॥ गर्दभस्तु ततो जज्ञे विड्वराहस्ततः परम् ॥ जज्ञेऽथ सारमेयोऽसौ पश्चाद्वायसतां गतः ॥ ६५ ॥ अथ चंडालतां प्राप

CC-0. In Public Domain. Digitization by eGangotri

शूद्रयोनिमगात्ततः ॥ गतवान्वैश्यतां पश्चात्क्षत्रियस्तदनंतरम् ॥ ६६ ॥ प्रबलैर्बाध्यमानोऽसौ ब्राह्मणो वै तदाऽभवत् ॥ उपनीतः स पित्रा तु वर्षे गर्भाष्टमे द्विजः ॥ ६७ ॥ वर्तमानः पितुर्गेहे स्वाचाराभ्यासतत्परः ॥ गच्छन्कदाचिद्गहने गृहीतो ब्रह्मरक्षसा ॥ ६८ ॥ रुदन्भ्रमन्स्खलन्मूढः प्रहसन्विलपन्नसौ ॥ शश्वद्धाहेति च वदन्वैदिकं कर्म सोऽत्यजत ॥ ६९ ॥ दृष्ट्वा सुतं तथाभूतं पिता दुःखेन पीडितः ॥ सुतमादाय च स्नेहादगस्त्यं शरणं ययौ ॥ ७० ॥ भक्त्या मुनिं प्रणम्यासौ पिता तस्य सुतस्य वै ॥ तस्मै निवेदयामास स्वपुत्रस्य विचेष्टितम् ॥ ७१ ॥ अब्रवीच्च तदा विप्रः कुम्भजं मुनिपुंगवम् ॥ एष मे तनयो ब्रह्मन्गृहीतो ब्रह्मरक्षसा ॥ ७२ ॥ सुखं न भजते ब्रह्मन्नक्ष तं करुणादृशा ॥ नास्ति मे तनयोऽप्यन्यः पितॄणामृणमुक्तये ॥ ७३ ॥ अस्य पीडाविनाशार्थमुपायं ब्रूहि कुम्भज ॥ त्वत्समस्त्रिषु लोकेषु तपःशीलो न विद्यते ॥ ७४ ॥ अग्रणीः शिवभक्तानामुक्तस्त्वं हि महर्षिभिः ॥ त्वां विनास्य परित्राणं न मे पुत्रस्य विद्यते ॥ ७५ ॥ पित्रे कृपां कुरुष्व त्वं दयाशीला हि साधवः ॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तस्तदा तेन कुम्भजो ध्यानमास्थितः ॥ ७६ ॥ ध्यात्वा तु सुचिरं कालमब्रवीद्ब्राह्मणं ततः ॥ ॥ अगस्त्य उवाच ॥ ॥ पूर्वजन्मनि ते पुत्रो ब्राह्मणोऽयं महामते ॥ ७७ ॥ सुमतिर्नाम विप्रोऽयं मतिं शूद्राय वै ददौ ॥ कर्माणि वैदिकान्येष सर्वाण्युपदिदेश वै ॥ ७८ ॥ अतोऽयं नरकान्भुक्त्वा कल्पकोटिसहस्रकम् ॥ जातो भुवि तदंतेषु स्थावरादिषु योनिषु ॥ ७९ ॥ इदानीं ब्राह्मणो जातः कर्मशेषेण ते सुतः ॥ यमेन प्रेषितेनात्र गृहीतो ब्रह्मरक्षसा ॥ ८० ॥ क्रूरेण पातकेनाद्धा पूर्वजन्मकृतेन वै ॥ उपायं ते प्रवक्ष्यामि ब्रह्मरक्षोविनाशने ॥ ८१ ॥ शृणुष्व श्रद्धया युक्तः समाधाय च मानसम् ॥ दक्षिणांभोनिधौ विप्र सेतुरूपो महागिरिः ॥ ८२ ॥ वर्तते दैवतैः सेव्यः पावनो गन्धमादनः ॥ तस्योपरि महातीर्थं नाम्ना पापविनाशनम् ॥ ८३ ॥ अस्ति पुण्यं प्रसिद्धं च महापातकनाशनम् ॥ भूतप्रेतपिशाचानां वेतालब्रह्मरक्षसाम् ॥ ८४ ॥ महतां चैव रोगाणां तीर्थं तन्नाशकं स्मृतम् ॥ सुतमादाय गच्छ त्वं तत्तीर्थं सेतुमध्यगम् ॥ ८५ ॥ प्रयतः स्नापय सुतं तीर्थे पापविनाशने ॥ स्नानेन त्रिदिनं तत्र ब्रह्मरक्षो विनश्यति ॥ ८६ ॥ नैवोपायांतरं तस्य विनाशे विद्यते भुवि ॥ तस्माच्छीघ्रं प्रयाहि त्वं रामसेतुं विमुक्तिदम् ॥ ८७ ॥ तत्र पापविनाशाख्यतीर्थे स्नापय ते सुतम् ॥ मा विलंबं कुरुष्वात्र त्वरया याहि वै द्विज ॥ ८८ ॥ इत्युक्तः स द्विजोऽगस्त्यं प्रणम्य भुवि दण्डवत् ॥ अनुज्ञातश्च तेनासौ प्रययौ गंधमादनम् ॥ ८९ ॥ सुतेन साकं विप्रेंद्रो गत्वा पापविनाशनम् ॥ संकल्पपूर्वं संस्नाप्य दिनत्रयमसौ सुतम् ॥ ९० ॥ सस्नौ स्वयं च विप्रेंद्राः पिता पापविनाशने ॥ अथ तस्य सुतस्तत्र विमुक्तो ब्रह्मरक्षसा ॥ ९१ ॥ समजायत नीरोगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्थः सुन्दररूपधृक् ॥ सर्वसंपत्समृद्धोऽसौ भुक्त्वा भोगाननेकशः ॥ ९२ ॥ देहांते प्रययौ मुक्तिं स्नानात्पापविनाशने ॥ पितापि तत्र स्नानेन देहांते मुक्तिमातवान् ॥ ९३ ॥ तेनोपदिष्टो यः शूद्रः स भुक्त्वा नरकान्क्रमात् ॥ अनेकासु जनित्वा च कुत्सितास्वपि योनिषु ॥ ९४ ॥ गृध्रजन्मा भवत्पश्चाद्गंधमादनपर्वते ॥ स कदाचिज्जलं पातुं तीर्थे पापविनाशने ॥ ९५ ॥ समागतः पपौ तोयं सिषिचे चात्मनस्तनुम् ॥ तदैव दिव्यदेहः सन्सर्वाभरणभूषितः ॥ ९६ ॥ दिव्यमाल्यांबरधरो रक्तचंदनरूषितः ॥ दिव्यं विमानमारुह्य शोभितश्छत्रचामरैः ॥ ९७ ॥ उत्तमस्त्रीपरिवृतः प्रययावमरालयम् ॥९८॥ श्रीसूत उवाच ॥ ॥ एवं प्रभावमेतद्धि तीर्थं पापविनाशनम् ॥ स्वर्गदं मोक्षदं पुण्यं प्रायश्चित्तकरं तथा ॥ ब्रह्मविष्णुमहेशानैः सेवितं सुरसेवितम् ॥ ९९ ॥ पापानां नाशनाद्विप्राः पापनाशाभिधं हि तत् ॥ श्रेयोर्थी पुरुषस्तस्मात्स्नायात्पापविनाशने ॥१००॥ इत्थं रहस्यं कथितं मुनींद्रास्तद्वैभवं पापविनाशनस्य ॥ यत्राभिषेकात्सहसा विमुक्तौ द्विजश्च शूद्रश्च विनिंद्यकृत्यौ ॥१०१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये गंधमादनप्रशंसायां पापविनाशप्रभावकथनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ श्रीसूत उवाच ॥ ॥ पापनाशे नरः स्नात्वा सर्वपापनिबर्हणे ॥ ततः सीतासरो गच्छेत्स्नातुं नियमपूर्वकम् ॥ १ ॥ यानि कानि च पुण्यानि ब्रह्मांडांतर्गतानि वै ॥ तानि गंगादितीर्थानि स्वपापपरिशुद्धये ॥ २ ॥ सीतासरसि वर्तंते महापातकनाशने ॥ क्षेत्राण्यपि महार्हाणि काश्यादीनि दिवानिशम् ॥ ३ ॥ सीतासरोत्र सेवंते स्वस्वकल्मषशांतये ॥ तस्याः सरसि संगीतगुणेनाकृष्य बालिशः ॥ ४ ॥ पंचाननोऽपि वसते पंचपातकनाशनः ॥ तदेतत्तीर्थमागत्य स्नात्वा वै श्रद्धया सह ॥ पुरंदरः पुरा विप्रा मुमुचे ब्रह्महत्यया ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्महत्या कथमभूद्वासवस्य पुरा मुने ॥ सीतासरसि स स्नानात्कथं मुक्तोऽभवत्तया ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ कपालाभरणोनाम राक्षसोऽभूत्पुरा द्विजाः ॥ ॥ ७ ॥ अवध्यः सर्वदेवानां सोऽभवद्ब्रह्मणो वरात् ॥ शवभक्षणनामा तु तस्यासीन्मंत्रिसत्तमः ॥ ८ ॥ अक्षौहिणीशतं तस्य हयेभरथसंकुलम् ॥ अस्ति तस्य पुरं चापि वैजयंतमिति श्रुतम् ॥ ९ ॥ वसत्यस्मिन्पुरे सोऽयं कपालाभरणो बली ॥ शवभक्षं समाहूय बभाषे मंत्रिणं द्विजाः ॥ ॥ १० ॥ शवभक्ष महावीर्य मंत्रशास्त्रेषु कोविद ॥ वयं देवपुरीं गत्वा विनिर्जित्य सुरान्रणे ॥ ११ ॥ शक्रस्य भवने रम्ये स्थास्यामस्सैनिकैः सह ॥ रमावो नंदने तस्य रंभाद्यप्सरसां गणैः ॥ १२ ॥ कपालाभरणस्येदं निशम्य वचनं तदा ॥ शवभक्षोऽब्रवीद्विप्रा वचस्तत्र तथास्त्विति ॥ ॥ १३ ॥ ततः कपालाभारणः पुत्रं दुर्मेधसं बली ॥ प्रतिष्ठाप्य पुरे शूरं सेनया परिवारितः ॥ १४ ॥ युयुत्सुरमरैः साकं प्रययावमरावतीम् ॥ गजा

CC-0. In Public Domain. Digitization by eGangotri

श्वरथपादातैरुद्धतै रेणुसंचयैः ॥ १५ ॥ शोषयञ्जलधीन्सिंधूंश्चूर्णयन्पर्वतानपि ॥ निःसाणध्वनिना विप्रा नादयन्रोदसी तथा ॥ १६ ॥ अश्वानां
हेषितरवैर्गजानामपि बृंहितैः ॥ रथनेमिस्वनैरुग्रैः सिंहनादैः पदातिनाम् ॥ १७ ॥ श्रोत्राणि दिग्गजानां च वितन्वन्बधिराणि सः ॥ अगमद्देवन
गरीं युयुत्सुरमरैः सह ॥ १८ ॥ तत इन्द्रादयो देवाः सेनाकलकलध्वनिम् ॥ श्रुत्वाभिनिर्य्ययुः पुर्या युद्धाभिमनसो द्विजाः ॥ १९ ॥ ततो युद्धं
समभवद्देवानां राक्षसैः सह ॥ अदृष्टपूर्वं जगति तथैवाश्रुतपूर्वकम् ॥ २० ॥ तत इन्द्रादयो देवा राक्षसाञ्जघ्नुराहवे ॥ राक्षसाश्च सुराञ्जघ्नुः समरे
विजिगीषवः ॥ २१ ॥ द्वन्द्वयुद्धं च समभूदन्योन्यं सुररक्षसाम् ॥ कपालाभरणेनाजौ युयुधे बलवृत्रहा ॥ २२ ॥ यमेन शवभक्षश्च वरुणेन च
कौशिकः ॥ कुबेरो रुधिराक्षेण युयुधे ब्राह्मणोत्तमाः ॥ २३ ॥ मांसप्रियो मद्यसेवी क्रूरदृष्टिर्भयावहः ॥ चत्वार एते विक्रांताः कपालाभरणा
नुजाः ॥ २४ ॥ अश्विभ्यामग्निवायुभ्यां युद्धे युयुधिरे मिथः ॥ ततो यमो महावीर्यः कालदण्डेन वेगवान् ॥ २५ ॥ शवभक्षं निहत्याजावनयद्यम
सादनम् ॥ तस्य चाक्षौहिणीस्त्रिंशन्निजघ्ने समरे यमः ॥ २६ ॥ वरुणः कौशिकस्याजौ प्रासेन प्राहरच्छिरः ॥ कुबेरो रुधिराक्षस्य कुन्तेनाभ्यहर
च्छिरः ॥ २७ ॥ अश्विभ्यामग्निवायुभ्यां कपालाभरणानुजाः ॥ निहताः समरे विप्राः प्रययुर्यमसादनम् ॥ २८ ॥ अक्षौहिणीशतं चापि देवेन्द्रेण
मृधे द्विजाः ॥ यामार्द्धेन हतं युद्धे प्रययौ यमसादनम् ॥ २९ ॥ ततः कपालाभरणः प्रेक्ष्य सेनां निजां हताम् ॥ चापमादाय निशिताञ्छरां
श्चापि महाजवान् ॥ ३० ॥ अभ्ययात्समरे शक्रं तिष्ठतिष्ठेति चाब्रवीत् ॥ ततः शक्रस्य शिरसि व्यधमच्छरपंचकैः ॥ ३१ ॥ तानप्राप्तान्प्रचि
च्छेद शरैर्युद्धे स वृत्रहा ॥ ततः शूलं समादाय कपालाभरणो मृधे ॥ ३२ ॥ देवेंद्राय प्रचिक्षेप तं शक्त्या निजघान सः ॥ ततः कपालाभरणः
शतहस्तायतां गदाम् ॥ ३३ ॥ आयसीं पंचसाहस्रतुलाभारेण निर्मिताम् ॥ आददे समरे शक्रं वक्षोदेशे जघान च ॥३४॥ ततः स मूर्च्छितः शक्रो
रथोपस्थ उपाविशत् ॥ मृतसंजीविनीं विद्यां जपित्वाथ बृहस्पतिः ॥ ३५ ॥ पुलोमजापतिं युद्धे समजीवयदद्भुतम् ॥ ऐरावतं तदारुह्य कपालाभर
णांतिकम् ॥ ३६ ॥ आजगाम शचीभर्ता प्रहर्तुं कुलिशेन तम् ॥ एकप्रहारेण तदा महेंद्रः पाकशासनः ॥ ३७ ॥ कपालाभरणं युद्धे वज्रेण सरथा
श्वकम् ॥ सचापं सध्वजं चैव सतूणीरं सवर्मकम् ॥३८॥ चूर्णयामास कुपितस्तिलशः कणशस्तथा ॥ हते तस्मिन्महावीरे कपालाभरणे रणे॥३९॥

१ कौशिकः--इति सर्वत्र पाठः । २ यमवश्यताम्--इ०पा० । ३ समारुह्य--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखं सर्वस्य लोकस्य बभूव चिरदुःखिनः ॥ राक्षसस्य वधोत्पन्ना ब्रह्महत्या पुरंदरम् ॥ अन्वधावत्तदा भीमा नादयंती दिशो दश ॥४०॥ ॥ ऋषय ऊचुः ॥ ॥ न विप्रो राक्षसः सूत कपालाभरणो मुने ॥ तत्कथं ब्रह्महत्येंद्रं तद्वधात्समुपाद्रवत् ॥ ४१ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि परमं गुह्यं मुनींद्राः परमाद्भुतम् ॥४२॥ शृणुत श्रद्धया यूयं समाधाय स्वमानसम् ॥ पुरा विंध्यप्रदेशेषु त्रिवक्रोनाम राक्षसः ॥ ४३ ॥ तस्य भार्या गुणोपेता सौंदर्यगुणशालिनी ॥ सुशीलानाम सुश्रोणी सर्वलक्षणलक्षिता ॥ ४४ ॥ सा कदाचिन्मनोज्ञांगी सुवेषा चारुहासिनी ॥ विंध्यपादवनोद्देशे विचचार विलासिनी ॥ ४५ ॥ तस्मिन्वने शुचिर्नाम वर्तते स्म महामुनिः ॥ तपस्समाधिसंयुक्तो वेदाध्ययनतत्परः ॥ ४६ ॥ तस्याश्रमसमीपं तु सा ययौ वरवर्णिनी ॥ तां दृष्ट्वा स मुनिर्धैर्यं मुमोचानंगपीडितः॥ तामासाद्य वरारोहां बभाषे मुनिसत्तमः ॥ ४७ ॥ ॥ शुचिरुवाच ॥ ॥ ललने स्वागतं तेऽस्तु कस्य भार्या शुचिस्मिते ॥ ४८ ॥ किमागमनकृत्यं ते वनेऽस्मिन्नतिभीषणे ॥ श्रांतासि त्वं वरारोहे वसास्मिन्कुटजे मम ॥ ४९ ॥ तथोक्ता सा तु सुश्रोणी तं मुनिं प्रत्यभाषत ॥ त्रिवक्ररक्षोभार्याहं सुशीला नामतो मुने ॥५०॥ पुष्पावचयकामेन वनमेतत्समागता ॥ अपुत्राहं मुने भर्त्रा प्रेरिता पुत्रमिच्छता ॥ ५१ ॥ शुचिं मुनिं समाराध्य तस्मात्पुत्रमवाप्नुहि ॥ इति प्रतिसमादिष्टा पतिना त्वां समागता ॥५२॥ पुत्रमुत्पादय त्वं मे कृपां कुरु मुने मयि ॥ एवमुक्तः स तु शुचिः सुशीलां तामभाषत ॥ ५३ ॥॥ शुचिरुवाच ॥॥ त्वां दृष्ट्वा मम च प्रीतिः सुशीले विद्यतेऽधुना॥ मनोरथमहांभोधिं त्वमापूरय मामकम् ॥ ५४ ॥ इत्युक्त्वा स मुनिस्तत्र तया रेमे दिनत्रयम् ॥ तामुवाच मुनिः प्रीतः सुशीलां सुन्दराकृतिम् ॥ ॥ ५५ ॥ तवोदरे महावीर्यः कपालाभरणाभिधः ॥ भविष्यति चिरं राज्यं पालयिष्यति मे[1]दिनीम् ॥ ५६ ॥ सहस्रं वत्सरान्वत्सस्तपसा प्रीणय न्विधिम् ॥ पुरंदरं विनान्येभ्यो देवेभ्यो नास्य वध्यता॥५७॥ ईदृशस्ते सुतो भूयादिंद्रतुल्यपराक्रमः ॥ इत्युक्त्वा स मुनिर्नारीं काशीं शिवपुरीं ययौ ॥५८॥ सुशीला सापि सुषुवे कपालाभरणं सुतम् ॥ तं जघान मृधे शक्रो वज्रेण मुनिपुंगवाः ॥५९॥ शुचेर्बीजसमुद्भूतं तमिंद्रो न्यवधीद्यतः ॥ ततः पुरंदरः शक्रो जगृहे ब्रह्महत्यया ॥६०॥ धावति स्म तदा शक्रः सर्वाँल्लोकान्भयाकुलः॥ धावंतमनुधावंती ब्रह्महत्या तमन्वगात्॥६१॥ अनुद्रुतो हि विप्रेंद्राः शक्रोऽयं ब्रह्महत्यया ॥ पितामहसदः[2] प्राप संतप्तहृदयो भृशम् ॥६२॥ न्यवेदयद्ब्रह्महत्यां ब्रह्मणे स पुरंदरः ॥ भगवँल्लोकनाथेयं ब्रह्महत्याति भीषणा॥६३॥बाधते मां प्रजानाथ तस्या नाशं ब्रवीहि मे ॥ पुरंदरेणैवमुक्तो ब्रह्मा प्राह दिवस्पतिम्॥६४॥ ब्रह्मोवाच ॥ सीताकुण्डं प्रयाहींद्र गंधमा

१ सुंदरि–इ० पा० । २ पितामहपदम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

दनपर्वते॥ सीताकुण्डस्य तीरे त्वं इष्ट्वा यागैः सदाशिवम् ॥ ६५ ॥ तस्मिन्सरसि च स्नायाः सर्वपापहरे शुभे ॥ ततः पूतो भवेश्शक्र ब्रह्महत्याविमो
चितः॥६६॥ देवलोकं पुनर्यायाः सर्वदुःखविवर्जितः ॥ सर्वपापहरं पुण्यं सीताकुण्डं विमुक्तिदम् ॥६७॥ महापातकसंघानां नाशकं परमामृतम् ॥
सर्वदुःखप्रशमनं सर्वदारिद्र्यनाशनम् ॥ ६८ ॥ धनधान्यप्रदं शुद्धं वैकुण्ठादिपदप्रदम् ॥ तस्मात्तत्र कुरुष्वेष्टिं सीतासरसि वृत्रहन् ॥ ६९ ॥ इत्युक्तः
सुरराजोऽसौ प्रययौ गंधमादनम् ॥ प्राप्य सीतासरो विप्राः स्नात्वेष्ट्वा च तदंतिके ॥ ७० ॥ प्रययौ स्वपुरीं भूयो ब्रह्महत्याविमोचितः ॥ एवं
प्रभावं तत्तीर्थं सीतायाः कुण्डमुत्तमम् ॥ ७१ ॥ राघवप्रत्ययार्थं हि प्रविश्य हुतवाहनम् ॥ संनिधौ सर्वदेवानां मैथिली जनकात्मजा ॥ ७२ ॥
विनिर्गता पुनर्वह्नेः स्थिता सर्वांगशोभना ॥ निर्ममे लोकरक्षार्थं स्वनाम्ना तीर्थमुत्तमम् ॥ ७३ ॥ तत्र सस्नौ स्वयं सीता तेन सीतासरः
स्मृतम् ॥ तत्र यो मानवः स्नाति सर्वान्कामाल्लँभेत सः ॥ ७४ ॥ तस्मिन्नुपस्पृश्य नरो द्विजेंद्रा दत्त्वा च दानानि पृथग्विधानि ॥ कृत्वा च
यज्ञान्बहुदक्षिणाभिर्लोकं प्रयायात्परमेश्वरस्य ॥ ७५ ॥ युष्माकमेवं प्रथितं मुनींद्राः सीतासरो वैभवमेतदुक्तम् ॥ शृण्वन्पठन्वै· तदिहैव भोगा
न्भुक्त्वा परत्रापि सुखं लभेत ॥ ७६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सीतासरःप्रशंसाया
मिंद्रब्रह्महत्याविमोक्षणं नामैकादशोऽध्यायः ॥ ११ ॥ ॥ श्रीसूत उवाच ॥ ॥ सीताकुण्डे महापुण्ये नरः स्नात्वा द्विजोत्तमाः ॥
ततस्तु मंगलं तीर्थमभिगच्छेत्समाहितः ॥ १ ॥ सन्निधत्ते सदा यत्र कमला विष्णुवल्लभा ॥ अलक्ष्मीपरिहाराय यस्मिन्सरसि वै सुराः
॥ २ ॥ शतक्रतुमुखाः सर्वे समागच्छंति नित्यशः ॥ तदेतत्तीर्थमुद्दिश्य ऋषयो लोकपावनम् ॥ ३ ॥ इतिहासं प्रवक्ष्यामि पुण्यं
पापविनाशनम् ॥ पुरा मनोजवो नाम राजा सोमकुलोद्भवः ॥ ४ ॥ पालयामास धर्मेण धरां सागरमेखलाम् ॥ अयष्ट स सुरान्यज्ञै
र्ब्राह्मणानन्नसंचयैः ॥ ५ ॥ तर्पयामास कव्येन प्रत्यब्दं पितृदेवताः ॥ त्रयीमध्यैष्ट[1] सततमपाठीच्छास्त्रमर्थवत् ॥ ६ ॥ व्यजेष्ट शत्रून्वीर्येण प्राणं
सीदीशकेशवौ ॥ अरंस्त नीतिशास्त्रेषु तथापाठीन्महामनून् ॥७॥ एवं स धर्मतो राजा पालयामास मेदिनीम् ॥ रक्षतस्तस्य राज्ञोऽभूद्राज्यं निहत
कंटकम् ॥ ८ ॥ अहंकारोऽभवत्तस्य पुत्रसंपद्विनाशनः ॥ अहंकारो भवेद्यत्र तत्र लोभो मदस्तथा ॥९॥ कामः क्रोधश्च हिंसा च तथाऽसूया विमो

१ त्रयीमध्यैष्ट–त्रेदं प्रथम मधीतवान्–इत्यर्थः । एतच्छ्लोकस्य समार्थकः श्लोको भट्टिकाव्ये यथा–"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारात्सममस्त बन्धून् । व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीद श्वरीं" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिनी ॥ भवंत्येतानि विप्रेंद्राः संपदां नाशहेतवः ॥ १० ॥ एतानि यत्र विद्यंते पुरुषे स विनश्यति ॥ क्षणेन पुत्रपौत्रैश्च सार्द्धं चाखिलसंपदा ॥ ॥ ११ ॥ बभूव तस्यासूया च जनविद्वेषिणी सदा ॥ असूयाकुलचित्तस्य वृथाहंकारिणस्तथा ॥ १२ ॥ लुब्धस्य कामदुष्टस्य मतिरेवं बभूव ह ॥ विप्रग्रामे करादानं करिष्यामीति निश्चितः ॥ १३ ॥ अकरोच्च तथा राजा निश्चित्य मनसा तदा ॥ धनं धान्यं च विप्राणां जहार किल लोभतः ॥ ॥ १४ ॥ शिवविष्ण्वादिदेवानां वित्तान्यादत्त रागतः ॥ शिवविष्ण्वादिदेवानां विप्राणां च महात्मनाम् ॥ १५ ॥ क्षेत्राण्यपजहारायमहंकारवि मूढधीः ॥ एवमन्याययुक्तस्य देवद्विजविरोधिनः ॥ १६ ॥ दुष्कर्मपरिपाकेन क्रूरेण द्विजपुंगवाः ॥ पुरं रुरोध बलवान्परदेशाधिपो रिपुः ॥ १७ ॥ गोलभोनाम विप्रेंद्राश्चतुरंगबलैर्युतः ॥ षण्मासं युद्धमभवद्गोलभेन दुरात्मनः ॥ १८ ॥ मनोजवस्य नृपतेरहंकाररतात्मनः ॥ ततः स गोलभेनाजौ जितो राज्यात्परिच्युतः ॥ १९ ॥ वनं सपुत्रदारः सन्प्रपेदे समनोजवः ॥ गोलभः पालयन्नास्ते मनोजवपुरे चिरम् ॥२०॥ चतुरंगबलोपेतस्तमुद्रा स्य रणे बली ॥ मनोजवोपि विप्रेंद्राः शोचन्स्त्रीपुत्रसंयुतः ॥ २१ ॥ क्षुत्क्षामः प्रस्खलञ्छश्वत्प्रविवेश महावनम् ॥ झिल्लिकागणसंघुष्टं व्याघ्रश्वापद भीषणम् ॥ २२ ॥ व्यात्तद्विरदचीत्कारं वराहमहिषाकुलम् ॥ तस्मिन्वने महाघोरे क्षुधया परिपीडितः ॥ २३ ॥ अयाचतान्नं पितरं मनोजवसुतः शिशुः ॥ अंब मेन्नं प्रयच्छ त्वं क्षुधा मां बाधते भृशम् ॥ २४ ॥ एवं स्वजननीं चापि प्रार्थयामास बालकः ॥ तन्मातापितरौ तत्र श्रुत्वा पुत्रस्य भाषितम् ॥ २५ ॥ शोकाभिभूतौ सहसा मोहं समुपजग्मतुः ॥ भार्यामथाब्रवीद्राजा सुमित्रांनाम नामतः ॥ २६ ॥ मुह्यमानश्च स मुहुः शुष्ककंठौ ष्ठतालुकः ॥ सुमित्रे किं करिष्यामि कुत्र यास्यामि का गतिः ॥ २७ ॥ मरिष्यत्यचिरादेष सुतो मे क्षुधयार्दितः ॥ किमर्थं ससृजे वेधा दुर्भाग्यं मां वृथा प्रिये ॥ २८ ॥ को वा मोचयिता दुःखमेतद्दुष्कर्मजं मम ॥ न पूजितो मया शंभुर्हरिर्वा पूर्वजन्मसु ॥ २९ ॥ तथान्या देवताः सूर्यविभाव सुमुखाः प्रिये ॥ तेन पापेन चाद्याहमस्मिञ्जन्मनि शोभने ॥ ३० ॥ अहंकाराभिभूतोऽस्मि विप्रक्षेत्राण्यपाहरम् ॥ शिवविष्ण्वादिदेवानां वित्तं चाप हृतं मया ॥ ३१ ॥ एवं दुष्कर्मबाहुल्याद्गोलभेन पराजितः ॥ वनं यातोस्मि विजनं त्वया सह सुतेन च ॥ ३२ ॥ निरन्नो निर्धनो दुःखी क्षुधितो ऽहं पिपासितः ॥ कथमन्नं प्रदास्यामि क्षुधिताय सुताय मे ॥ ३३ ॥ न मयान्नानि दत्तानि ब्राह्मणेभ्यः शुचिस्मिते ॥ न मया पूजितः शंभुर्विष्णु र्वा देवतांतरम् ॥ ३४ ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ न मयाग्नौ हुतं पूर्वं न तीर्थमपि सेवितम् ॥ ३५ ॥ मातृश्राद्धं पितृश्राद्धं मृताह

१ जनविद्वेपिणस्तथा–इ० पा० । २ रणदेशाधिपः–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

दिवसे तयोः॥ नैकोद्दिष्टविधानेन पार्वणेनापि वै प्रिये ॥३६॥ कृतं न हि मया भद्रे भूरिभोजनमेव वा ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥
॥ ३७ ॥ चैत्रमासे प्रिये चित्रानक्षत्रे पानकं मया ॥ पनसानां फलं स्वादु कदलीफलमेव वा ॥ ३८ ॥ तथा छत्रं सदंडं च रम्यं पादुकयोर्द्वयम् ॥
तांबूलानि च पुष्पाणि चंदनं चानुलेपनम् ॥ ३९ ॥ न दत्तं वेदविद्भ्यस्तु चित्रगुप्तस्य तुष्टये ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ ४० ॥
नाश्वत्थश्चूतवृक्षो वा न्यग्रोधस्तिंतिणी तथा ॥ पिचुमंदः कपित्थो वा तथैवामलकीतरुः ॥ ४१ ॥ नारिकेलतरुर्वापि स्थापितोऽध्वगशांतये ॥
तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ ४२ ॥ सम्मार्जनं च न कृतं शिवविष्णवालये मया ॥ न खानितं तटाकं च न कूपोपि ह्रदोऽपि वा ॥
॥ ४३ ॥ न रोपितं पुष्पवनं तथैव तुलसीवनम् ॥ शिवविष्णवालयौ वापि निर्मितो न मया प्रिये ॥ ४४ ॥ तेन पापेन मे त्वद्य दुःखमेतत्समाग
तम् ॥ न मया पैतृके मासि पितॄनुद्दिश्य शोभने ॥ महालयं कृतं श्राद्धमष्टकाश्राद्धमेव वा ॥ ४५ ॥ नित्यश्राद्धं तथा काम्यं
श्राद्धं नैमित्तिकं प्रिये ॥ न कृताः क्रतवश्चापि विधिवद्भूरिदक्षिणाः ॥ ४६ ॥ मासोपवासो न कृतः एकादश्यामुपोषणम् ॥
धनुर्मासेप्युषःकाले शंभुविष्ण्वादिदेवताः ॥ ४७ ॥ संपूज्य विधिवद्भद्रे नैवेद्यं न कृतं मया ॥ तेन पापेन मे त्वद्य दुःखमेतत्समा
गतम् ॥ ४८ ॥ हरिशंकरयोर्नाम्नां कीर्तनं न मया कृतम् ॥ उद्धूलनं त्रिपुण्ड्रं च जाबालोक्तैश्च सप्तभिः ॥ ४९ ॥ न धृतं भस्मना
भद्रे रुद्राक्षं न धृतं मया ॥ जपश्च रुद्रसूक्तानां पंचाक्षरजपस्तथा ॥ ५० ॥ तथा पुरुषसूक्तस्य जपोऽप्यष्टाक्षरस्य च ॥ नैवकारि मया भद्रे
नैवान्यो धर्मसंचयः ॥ ५१ ॥ तेन पापेन मे त्वद्य दुःखमेतत्समागतम् ॥ एवं स विलपन्राजा भार्यामाभाष्य खिन्नधीः ॥ ५२ ॥ मूर्च्छामुपाययौ
विप्राः पपात च धरातले ॥ सुमित्रा पतितं दृष्ट्वा भार्या सा पतिमंगना ॥ ५३ ॥ आलिंग्य विललापाथ सपुत्रा भृशदुःखिता ॥ मम नाथ
महाराज सोमान्वयधुरंधर ॥ ५४ ॥ मां विहाय क्व यातोऽसि सपुत्रां विजने वने ॥ अनाथां त्वामनुगतां सिंहत्रस्तां मृगीमिव ॥ ५५ ॥ मृतोऽसि
यदि राजेंद्र तर्हि त्वामहमप्यरम् ॥ अनुव्रजामि विधवा न स्थास्ये क्षणमप्युत ॥ ५६ ॥ पितरं पश्य पतितं चन्द्रकांत सुत क्षितौ ॥ इत्युक्तश्चंद्रकां
तोऽपि सुतो राज्ञः क्षुधार्दितः ॥ ५७ ॥ पितरं परिरभ्याथ निःशब्दं प्ररुरोद सः ॥ एतस्मिन्नंतरे विप्रा जटावल्कलसंवृतः ॥ ५८ ॥ भस्मोद्धूलितस
र्वांगस्त्रिपुण्ड्रांकितमस्तकः ॥ रुद्राक्षमालाभरणः सितयज्ञोपवीतवान् ॥ ५९ ॥ पराशरोनाम मुनिराजगाम यदृच्छया ॥ तं शब्दमभिलक्ष्यासौ

१ साध्वि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधुसज्जनसंमतः ॥ ६० ॥ ततः सुमित्रा तं दृष्ट्वा पराशरमुपागतम् ॥ ववंदे चरणौ तस्य सपुत्रा सा पतिव्रता ॥ ६१ ॥ ततः पराशरेणेयं सुमित्रा परिसांत्विता ॥ आश्वासिता च मुनिना मा शोचस्वेति भामिनि ॥ ततः सुमित्रां पप्रच्छ शक्तिपुत्रो महामुनिः ॥ ६२ ॥ ॥ पराशर उवाच ॥ का त्वं सुश्रोणि कश्चासौ यश्चायं पतितोऽग्रतः ॥ ६३ ॥ अयं शिशुश्च कस्ते स्याद्वद तत्त्वेन मे शुभे ॥ पृष्टैवं मुनिना साध्वी तमुवाच महामुनिम् ॥ ६४ ॥ ॥ सुमित्रोवाच ॥ ॥ पतिर्ममायमस्याहं भार्या वै मुनिसत्तम ॥ आवाभ्यां जनितश्चायं चंद्रकांताभिधः सुतः ॥ ६५ ॥ अयं मनोजवोनाम राजा सोमकुलोद्भवः ॥ विक्रमाढ्यस्य तनयः शौर्ये विष्णुसमो बली ॥ ६६ ॥ सुमित्रानाम तस्याहं भार्या पतिमनुव्रता ॥ युद्धे विनिर्जितो राजा गोलभेन मनोजवः ॥ ६७ ॥ राज्याद्भ्रष्टो निरालंबो मया पुत्रेण चान्वितः ॥ वनं विवेश ब्रह्मर्षे क्रूरसत्त्वभयानकम् ॥६८॥ क्षुधया पीडितः पुत्रो ह्यावामन्नमयाचत ॥ निरन्नो विधुरो राजा दृष्ट्वा पुत्रं क्षुधार्दितम् ॥ ६९ ॥ शोकाकुलमना ब्रह्मन्मूर्च्छितः पतितो भुवि ॥ इति तद्वचनं श्रुत्वा शोकपर्याकुलांक्षरम्[1] ॥ ७० ॥ शक्तिपुत्रो मुनिः प्राह सुमित्रां तां पतिव्रताम् ॥ मनोजवस्य नृपतेर्भार्यामग्निशिखोपमाम् ॥ ॥ ७१ ॥ ॥ पराशर उवाच ॥ ॥ मनोजवस्य भार्ये ते मा भीर्भूयात्कथंचन ॥ युष्माकमशुभं सत्यमचिरान्नाशमेष्यति ॥ ७२ ॥ मूर्च्छां विहाय ते भद्रे क्षणादुत्थास्यते पतिः ॥ ततः पराशरो विप्रः पाणिना तं नराधिपम् ॥ ७३ ॥ पस्पर्श मंत्रं प्रजपन्ध्यात्वा देवं त्रियंबकम् ॥ ततो मनोजवो राजा करस्पृष्टो महामुनेः ॥ ७४ ॥ उत्थितः सहसा तत्र त्यक्त्वा मूर्च्छां तमोमयीम् ॥ ततः पराशरमुनिं प्रणम्य जगतीपतिः ॥ उवाच परमप्रीतः प्रांजलिर्विप्रसत्तमम् ॥ ७५ ॥ ॥ मनोजव उवाच ॥ ॥ पराशरमुने त्वद्य त्वत्पादाब्जनिषेवणात् ॥ ७६ ॥ मूर्च्छा मे विगता सद्यः पातकं चैव नाशितम् ॥ त्वद्दर्शनमपुण्यानां नैव सिध्येत्कदाचन ॥ ७७ ॥ रक्ष मां करुणादृष्ट्या च्यावितं शत्रुभिः पुरात् ॥ इत्युक्तः स मुनिः प्राह राजानं तं मनोजवम् ॥ ७८ ॥ ॥ पराशर उवाच ॥ ॥ उपायं ते प्रवक्ष्यामि राजञ्छत्रुजयाय वै ॥ रामसेतौ महापुण्ये गंधमादनपर्वते ॥ ७९ ॥ विद्यते मंगलं तीर्थं सर्वैश्वर्यप्रदायकम् ॥ सर्वलोकोपकाराय तस्मिन्सरसि राघवः ॥ ८० ॥ सन्निधत्ते सदा लक्ष्म्या सीतया राजसत्तम ॥ सपुत्रभार्यस्त्वं तत्र गत्वा स्नात्वा सभक्तिकम् ॥ ८१ ॥ क्षेत्रश्राद्धादिकं चापि तत्तीरे कुरु भूपते ॥ एवं कृते त्वया राजन्नलक्ष्मीः क्लेशकारिणी ॥ ८२ ॥ वैभवात्तस्य तीर्थस्य नाशं यास्यत्यसंशयम् ॥ मंगलानि च सर्वाणि प्राप्स्यसे

१ शोकपर्याकुलेक्षणम्–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

न चिरान्नृप ॥ ८३ ॥ विजित्य शत्रूंश्च रणे पुनर्भूमिं प्रपत्स्यसे ॥ अतस्त्वं भार्यया सार्द्धं पुत्रेण च मनोजव ॥ ८४ ॥ गच्छ मंगलतीर्थं तद्गन्धमादनपर्वते ॥ अहमप्यागमिष्यामि तवानुग्रहकाम्यया ॥ ८५ ॥ पराशरस्त्वेवमुक्त्वा राजमुख्यैस्त्रिभिः सह ॥ प्राया त्सेतुं समुद्दिश्य स्नातुं मंगलतीर्थके ॥ ८६ ॥ राजादिभिः सह मुनिर्विलंघ्य विविधं वनम् ॥ वनप्रदेशदेशांश्च दस्युग्रामाननेकशः । ॥ ८७ ॥ प्रययौ मंगलं तीर्थं गन्धमादनपर्वते ॥ तत्र संकल्प्य विधिवत्सस्नौ स मुनिपुंगवः ॥ ८८ ॥ तानपि स्नापयामास राजादीन्विधिपूर्व कम् ॥ तत्र श्राद्धं च भूपालश्चकार पितृतृप्तये ॥ ८९ ॥ तत्र मासत्रयं सस्नौ राजा पत्नी सुतस्तथा ॥ ततः पराशरमुनिः सस्नौ नियमपूर्वकम् ॥ ॥ ९० ॥ एवं मासत्रयं सस्नौ तैः साकं मुनिपुंगवः ॥ मंगलाख्ये महापुण्ये सर्वामंगलनाशने ॥ ९१ ॥ ततः पराशरमुनिः सर्वानर्थविनाशनम् ॥ रामस्यैकाक्षरं मंत्रं तदंते समुपादिशत् ॥ ९२ ॥ चत्वारिंशद्दिनं तत्र मंत्रमेकाक्षरं नृपः ॥ तत्र तीर्थे जजापासौ मुन्युक्तेनैव वर्त्मना ॥ ९३ ॥ एव मभ्यसतस्तस्य मंत्रमेकाक्षरं द्विजाः ॥ मुनिप्रसादात्पुरतो धनुः प्रादुरभूद्दृढम् ॥ ९४ ॥ अक्षयाविषुधी चापि खड्गौ च कनकत्सरू ॥ एकं चर्म गदा चैका तथैको मुसलोत्तमः ॥ ९५ ॥ एकः शंखो महानादो वाजियुक्तो रथस्तथा ॥ ससारथिः पताका च तीर्थादुत्तस्थुरग्रतः ॥ ९६ ॥ कवचं कांचनमयं वैश्वानरसमप्रभम् ॥ प्रादुर्बभूव तत्तीर्थात्प्रसादेन मुनेस्तथा ॥ ९७ ॥ हारकेयूरमुकुटकटकादिविभूषणम् ॥ तीर्थानां प्रवरात्तस्मा दुत्थितं नृपतेः पुरः ॥ ९८ ॥ दिव्यांबरसहस्रं च तीर्थात्प्रादुरभूत्तदा ॥ माला च वैजयंत्याख्या स्वर्णपंकजशोभिता ॥ ९९ ॥ एतत्सर्वं समालोक्य मुनयेऽसौ न्यवेदयत् ॥ ततः पराशरमुनिर्जलमादाय तीर्थतः ॥ १०० ॥ अभ्यषिंचन्नरपतिं मंत्रपूतेन वारिणा ॥ ततोऽभिषिक्तो नृपतिर्मुनिना परिशोभितः ॥ १०१ ॥ सन्नद्धः कवची खड्गी चापबाणधरो युवा ॥ हारकेयूरमुकुटकटकादिविभूषितः ॥ १०२ ॥ दिव्यांबरधरश्चापि वाजियुक्त रथस्थितः ॥ शुशुभेऽतीव नृपतिर्मध्याह्न इव भास्करः ॥ १०३ ॥ तस्मै नृपतये तत्र ब्रह्माद्यस्त्रं महामुनिः ॥ सांगं च सरहस्यं च सोत्सर्गं सोप संहृति ॥ १०४ ॥ उपादिशच्छक्तिपुत्रः सुमित्राजानये तदा ॥ मनोजवोऽथ मुनिना ह्याशीर्वादपुरःसरम् ॥ १०५ ॥ प्रेरितो रथमास्थाय प्रणम्य मुनिपुंगवम् ॥ प्रदक्षिणीकृत्य तदाभ्यनुज्ञातो महर्षिणा ॥ १०६ ॥ सार्द्धं पत्न्या च पुत्रेण प्रययौ विजयाय सः ॥ स गत्वा स्वपुरं राजा प्रदध्मौ जलजं तदा ॥ १०७ ॥ ततः शंखरवं श्रुत्वा गोलभस्तु ससैनिकः ॥ युद्धाय निर्ययौ तूर्णं मनोजवनृपेण सः ॥ १०८ ॥ दिनत्रयं रणं जज्ञे गोलभेन नृपस्य वै ॥ ततश्चतुर्थे दिवसे गोलभं तु ससैनिकम् ॥ १०९ ॥ मनोजवो नृपो युद्धे ब्रह्मास्त्रेण व्यनाशयत् ॥ ततः सपुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्योऽयं पुरं प्राप्य निजं नृपः ॥ ११० ॥ पालयन्पृथिवीं सर्वां बुभुजे भार्यया सह ॥ तदाप्रभृति राजासौ नाहंकारं चकार वै ॥ १११ ॥ असूयादींस्तथा दोषान्वर्जयामास भूपतिः ॥ अहिंसानिरतो दांतः सदा धर्मपरोऽभवत् ॥ ११२ ॥ सहस्रं वत्सरानेवं ररक्ष स महीपतिः ॥ ततो विरक्तो राजेन्द्रः पुत्रे राज्यं निधाय तु ॥ ११३ ॥ जगाम मंगलं तीर्थं गन्धमादनपर्वते ॥ तपश्चचार तत्रासौ ध्यायन्हृदि सदाशिवम् ॥ ११४ ॥ ततोऽचिरेण कालेन त्यक्त्वा देहं मनोजवः ॥ शिवलोकं ययौ राजा तस्य तीर्थस्य वैभवात् ॥ ११५ ॥ तस्य भार्या सुमित्रापि तस्यालिंग्य तनुं तदा ॥ अन्वारूढा चितां विप्राः प्राप तल्लोकमेव सा ॥ ११६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवंप्रभावं तत्तीर्थं श्रीमन्मंगलनामकम् ॥ मनोजवो नृपो यत्र स्नात्वा तीर्थे महत्तरे ॥ ११७ ॥ शत्रून्विजित्य देहांते शिवलोकं ययौ स्त्रिया ॥ तस्मात्सर्वप्रयत्नेन सेव्यं मंगलतीर्थकम् ॥ ११८ ॥ तीर्थमेतदतिशोभनं शिवं भुक्तिमुक्तिफलदं नृणां सदा ॥ पापराशितृणतूलपावकं सेवत द्विजवरा विमुक्तये ॥ ११९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये मंगलतीर्थप्रशंसायां मनोजवालक्ष्मीविनाशवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ श्रीसूत उवाच ॥ ॥ मंगलाख्ये महातीर्थे नरः स्नात्वा विकल्मषः ॥ एकांतरामनाथाख्यं क्षेत्रं गच्छेत्ततः परम् ॥ १ ॥ तत्र रामो जगन्नाथो जानक्या लक्ष्मणेन च ॥ हनुमत्प्रमुखैश्चापि वानरैः परिवारितः ॥ २ ॥ सन्निधत्ते सदा विप्रा लोकानुग्रहकाम्यया ॥ विद्यते पुण्यदा तत्र नाम्ना ह्यमृतवापिका ॥ ३ ॥ तस्यां निमज्जतां नृणां न जरांतकजं भयम् ॥ अस्याममृतवाप्यां यः सश्रद्धं स्नाति मानवः ॥ ४ ॥ अमृतत्वं भजत्येष शंकरस्य प्रसादतः ॥ महापातकनाशिन्यामस्यां वाप्यां निमज्जताम् ॥ ५ ॥ अमृतत्वं हरो दातुं सन्निधत्ते सदा तटे ॥ ॥ ऋषय ऊचुः ॥ ॥ इयं ह्यमृतवापीति कुतो हेतोर्निगद्यते ॥ ६ ॥ अस्माकमेतद्ब्रूहि त्वं कृपया व्यासशासित ॥ तथैवामृतनाम्न्या वापिकायाश्च वैभवम् ॥ तृप्तिर्न जायतेऽस्माकं त्वद्वचोऽमृतपायिनाम् ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ ॥ अस्या अमृतनामत्वं वैभवं च मनोहरम् ॥ ८ ॥ प्रवक्ष्यामि विशेषेण शृणुत द्विजसत्तमाः ॥ पुरा हिमवतः पार्श्वे नानामुनिसमाकुले ॥ ९ ॥ सिद्धचारणगंधर्वदेवकिन्नरसेविते ॥ सिंहव्याघ्रवराहेभमहिषादिसमाकुले ॥ १० ॥ तमालतालहिंतालचंपकाशोकसंतते ॥ हंसकोकिलदात्यूहचक्रवाकादिशोभिते ॥ ११ ॥ पद्मेंदीवरकह्लारकुमुदाढ्यसरोवृते ॥ सत्यवाञ्छीलवान्वाग्मी वशी कुंभजसोदरः ॥ १२ ॥ आस्ते तपश्चरन्नित्यं मोक्षार्थी शंकरप्रियः ॥ त्रिकालमर्चयञ्छंभुं वन्यैर्मूलफलादिभिः ॥ १३ ॥ आगतान्स्वाश्रमाभ्याशमतिथीन्वन्यभोजनैः ॥ पूजयन्नर्चयन्नग्निं संध्योपासनतत्परः ॥ १४ ॥ गायत्र्यादीन्महामंत्रान्कालेकाले जप

CC-0. In Public Domain. Digitization by eGangotri

न्मुदा ॥ निद्रां परित्यजन्ब्राह्मे मुहूर्ते विष्णुचिंतकः ॥ १५ ॥ स्नानं कुर्वन्नुषःकाले नमन्संध्यां प्रसन्नधीः ॥ गायत्रीं प्रजपन्विप्राः पूजयन्हरिशंकरौ ॥
॥ १६ ॥ वेदाध्यायी शास्त्रपाठी मध्याह्नेऽतिथिपूजकः ॥ श्रोता पुराणपाठानामग्निकार्येष्वतंद्रितः ॥ १७ ॥ पंचयज्ञपरो नित्यं वैश्वदेवबलिप्रदः ॥
प्रत्यब्दं श्राद्धकृतिपित्रोस्तथान्यश्राद्धकृद्द्विजाः ॥ १८ ॥ एवं निनाय कालं स नित्यानुष्ठानतत्परः ॥ तस्यैवं वर्तमानस्य तपश्चरत उत्तमम् ॥ १९ ॥
सहस्रवर्षाण्यगमञ्च्छंकरासक्तचेतसः ॥ तथापि शंकरो नास्याययौ प्रत्यक्षतां तदा ॥ २० ॥ ततस्त्वगस्त्यभ्रातासौ ग्रीष्मे पंचाग्निमध्यगः ॥
भास्करे दत्तदृष्टिश्च मौनव्रतसमन्वितः ॥ २१ ॥ तिष्ठन्कनिष्ठिकांगुल्यां वामपादस्य निश्चलः ॥ ऊर्ध्वबाहुर्निरालंबस्तपस्तेपेऽतिदारुणम् ॥ २२ ॥
अथ तस्य प्रसन्नात्मा महादेवो घृणानिधिः ॥ प्रादुरासीत्स्वया दीप्त्या दिशो दश विभासयन् ॥ २३ ॥ ततोऽद्राक्षीन्मुनिः शंभुं सांबं वृषभसंस्थि
तम् ॥ दृष्ट्वा प्रणम्य तुष्टाव भवानीपतिमीश्वरम् ॥ २४ ॥ ॥ मुनिरुवाच ॥ ॥ नमस्ते पार्वतीनाथ[1] नीलकंठ महेश्वर ॥ शिव रुद्र महादेव नम
स्ते शंभवे विभो ॥ २५ ॥ श्रीकंठोमापते शूलिन्भगनेत्रहराव्यय ॥ गंगाधर विरूपाक्ष नमस्ते रुद्र मन्यवे ॥ २६ ॥ अंतकारे कामशत्रो देवदेव
जगत्पते ॥ स्वामिन्पशुपते शर्व नमस्ते शतधन्वने ॥ २७ ॥ दक्षयक्षविनाशाय स्नायूनां पतये नमः ॥ निचेरवे नमस्तुभ्यं पुष्टानां पतये नमः ॥
॥ २८ ॥ भूयोभूयो नमस्तुभ्यं महादेव कृपालय ॥ दुस्तराद्भवसिंधोर्मां तारयस्व त्रिलोचन ॥ २९ ॥ अगस्त्यसोदरेणैवं स्तुतः शंभुरभाषत ॥
प्रीणयन्वचसा स्वेन कुंभजस्यानुजं मुनिम् ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ कुंभजानुज वक्ष्यामि मुक्त्युपायं तवानघ ॥ सेतुमध्ये महातीर्थं
गंधमादनपर्वते ॥ ३१ ॥ मंगलाख्यस्य तीर्थस्य नातिदूरेण वर्तते ॥ तत्र गत्वा कुरु स्नानं ततो मुक्तिमवाप्स्यसि ॥३२॥ तत्तीर्थसेवनान्नान्यो मोक्षो
पायो लघुस्तव ॥ न हि तत्तीर्थवैशिष्ट्यं वक्तुं शक्यं मयापि च ॥ ३३ ॥ संदेहो नात्र कर्तव्यस्त्वयाद्य मुनिसत्तम॥ तस्मात्तत्रैव गच्छ त्वं यदीच्छसि
भवक्षयम् ॥ ३४ ॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ ततो देवस्य वचनादगस्त्यस्य सहोदरः ॥ ३५ ॥ गत्वा सेतुं समुद्रे तु गंधमादनपर्वते॥
ईश्वरेणैव गदितं तीर्थं तच्छीघ्रमासदत् ॥ ३६ ॥ तत्र तीर्थे महापुण्ये स्नातानां मुक्तिदायिनि ॥ एकांतरामनाथाख्ये क्षेत्रालंकरणे शुभे ॥ ३७ ॥
सस्नौ नियमपूर्वं स त्रीणि वर्षाणि वै द्विजः ॥ ततश्चतुर्थवर्षे तु समाधिस्थो महामुनिः ॥ ३८ ॥ ब्रह्मनाड्यां प्राणवायुं मूर्द्धन्यारोप्य योगतः ॥
प्राणान्निर्गमयामास ब्रह्मरंध्रेण तत्र सः ॥ ३९ ॥ ततोऽगस्त्यानुजः सोयं परित्यज्य कलेवरम् ॥ अवाप मुक्तिं परमां तस्य तीर्थस्य वैभवात् ॥४०॥

१ पार्वतीकान्त–३० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनष्टाशेषदुःखस्य तत्तीर्थस्नानवैभवात् ॥ अमृतत्वमभूद्यस्मादगस्त्यानुजजन्मनः॥४१॥ ततो ह्यमृतवापीति प्रथाऽस्यासीन्मुनीश्वराः ॥ अत्र तीर्थे नरा ये तु वर्षत्रयमतंद्रिताः॥४२॥स्नानं कुर्वंति ते सत्यममृतत्वं प्रयांति हि ॥ एवं त्वमृतवापीति प्रथा तद्वैभवं तथा ॥ युष्माकं कथितं विप्राः किं भूयः श्रोतुमिच्छथ ॥ ४३ ॥ ॥ ऋषय ऊचुः ॥ ॥ एकांतरामनाथाख्या तस्य क्षेत्रस्य वै मुने ॥ ४४ ॥ कथं समागता सूत वक्तुमेतत्त्वमर्हसि ॥ अस्माकं मुनिशार्दूल तच्छुश्रूषातिभूयसी ॥ ४५ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा दाशरथी रामः ससुग्रीवविभीषणः ॥ लक्ष्मणेन युतो भ्रात्रा मंत्रज्ञेन हनूमता ॥ ४६ ॥ वानरैर्वध्यमाने तु सेतावंबुधिमध्यतः ॥ चिंतयन्मनसा सीतामेकांते सममंत्रयत् ॥ ४७ ॥ तेषु मंत्रयमाणेषु रावणादिवधं प्रति ॥ उल्लोलतरकल्लोलो जुघोष जलधिर्भृशम् ॥ ४८ ॥ अर्णवस्य महाभीमे जृंभमाणे महाध्वनौ ॥ अन्योन्यकथितां वार्तां नाशृण्वंस्ते परस्परम् ॥ ४९ ॥ ततः किंचिदिव क्रुद्धो भृकुटीकुटिलेक्षणः ॥ भ्रूभंगलीलया रामो नियम्य जलधिं तदा ॥ ॥ ५० ॥ न्यमंत्रयत विप्रेंद्रा राक्षसानां वधं प्रति ॥ एकांतेऽमंत्रयत्तत्र तैः सार्धं राघवो यतः ॥ ५१ ॥ एकांतरामनाथाख्यं तत्क्षेत्रमभवद्द्विजाः ॥ सोयं नियमितो वार्धी रामभ्रूभंगलीलया ॥ ५२ ॥ अद्यापि निश्चलजलस्तत्प्रदेशेषु दृश्यते ॥ एकांतरामनाथाख्यं तदेतत्क्षेत्रमुत्तमम् ॥ ५३ ॥ आगत्यामृतवाप्यां च स्नात्वा नियमपूर्वकम् ॥ रामादीनपि सेवंते ते सर्वे मुक्तिमाप्नुयुः ॥ ५४ ॥ अद्वैतविज्ञानविवेकशून्या विरक्तिहीनाश्च समाधिहीनाः ॥ यागाद्यनुष्ठानविवर्जिताश्च स्नात्वात्र यास्यंत्यमृतं द्विजेंद्राः ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये अमृतवापीप्रशंसायामगस्त्यभ्रातृविमुक्तिवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्नात्वा त्वमृतवाप्यां वै सेवित्वैकांतराघवम् ॥ जितेंद्रियो नरः स्नातुं ब्रह्मकुंडं ततो व्रजेत् ॥ १ ॥ सेतुमध्ये महातीर्थं गंधमादनपर्वते ॥ ब्रह्मकुंडमिति ख्यातं सर्वदारिद्र्यभेषजम् ॥ २ ॥ विद्यते ब्रह्महत्यानामयुतायुतनाशनम् ॥ दर्शनं ब्रह्मकुंडस्य सर्वपापौघनाशनम् ॥ ३ ॥ किं तस्य बहुभिस्तीर्थैः किं तपोभिः किमध्वरैः ॥ महादानैश्च किं तस्य ब्रह्मकुंडविलोकिनः ॥ ४ ॥ ब्रह्मकुंडे सकृत्स्नानं वैकुंठप्राप्तिकारणम् ॥ब्रह्मकुंडसमुद्भूतं भस्म येन धृतं द्विजाः॥ ॥ ५ ॥ तस्यानुगास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ ब्रह्मकुंडसमुद्भूतभस्मना यस्त्रिपुंड्रकम् ॥ ६ ॥ करोति तस्य कैवल्यं करस्थं नात्र संशयः ॥ तद्भस्मपरमाणुर्वा यो ललाटे धृतो भवेत् ॥ ७ ॥ तावदेवास्य मुक्तिः स्यान्नात्र कार्या विचारणा ॥ तत्कुंडभस्मना मर्त्यः कुर्यादुद्धूलनं तु यः ॥ ८ ॥ तस्य पुण्यफलं वक्तुं शंकरो वेत्ति वा न वा ॥ ब्रह्मकुंडसमुद्भूतं भस्म यो नैव धारयेत् ॥ ९ ॥ रौरवे नरके सोऽयं पतेदाचंद्रतारकम् ॥ उद्धूलनं

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुंड्रं वा ब्रह्मकुंडस्थभस्मना ॥ १० ॥ नराधमो न कुर्याद्यः सुखं नास्य कदाचन ॥ ब्रह्मकुंडसमुद्भूतभस्मनिंदारतस्तु यः ॥ ११ ॥ उत्पत्तौ तस्य
सांकर्यमनुमेयं विपश्चिता ॥ ब्रह्मकुंडसमुद्भूतं भस्मैतल्लोकपावनम् ॥ १२ ॥ अन्यभस्मसमं यस्तु न्यूनं वा वक्ति मानवः ॥ उत्पत्तौ तस्य सांकर्य
मनुमेयं विपश्चिता ॥ १३ ॥ ब्रह्मकुंडसमुद्भूतेऽप्यस्मिन्भस्मनि जाग्रति ॥ भस्मांतरेण मनुजो धारयेद्यस्त्रिपुंड्रकम् ॥ १४ ॥ उत्पत्तौ तस्य सांक
र्यमनुमेयं विपश्चिता ॥ कदाचिदपि यो मर्त्यो भस्मैतत्तु न धारयेत् ॥ १५ ॥ उत्पत्तौ तस्य सांकर्यमनुमेयं विपश्चिता ॥ ब्रह्मकुंडसमुद्भूतं भस्म
दद्याद्द्विजाय यः ॥ १६ ॥ चतुरर्णवपर्यंता तेन दत्ता वसुन्धरा ॥ संदेहो नात्र कर्तव्यस्त्रिर्वा शपथयाम्यहम् ॥ १७ ॥ सत्यंसत्यं पुनः सत्यमुद्धृत्य
भुजमुच्यते ॥ ब्रह्मकुंडोद्भवं भस्म धारयध्वं द्विजोत्तमाः ॥ १८ ॥ एतद्धि पावनं भस्म ब्रह्मयज्ञसमुद्भवम् ॥ पुरा हि भगवान्ब्रह्मा सर्वलोकपितामहः
॥ १९ ॥ सन्निधौ सर्वदेवानां पर्वते गंधमादने ॥ ईशशापनिवृत्त्यर्थं क्रतून्सर्वान्समातनोत् ॥ २० ॥ विधाय विधिवत्सर्वानध्वरान्बहुदक्षिणान् ॥
मुमुचे सहसा ब्रह्मा शंभुशापाद्द्विजोत्तमाः ॥ २१ ॥ तदेतत्तीर्थमासाद्य स्नानं कुर्वंति ये नराः ॥ ते महादेवसायुज्यं प्राप्नुवंति न संशयः ॥ २२ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ व्यासशिष्य महाप्राज्ञ पुराणार्थविशारद ॥ चतुर्दशानां लोकानां स्रष्टारं चतुराननम् ॥ २३ ॥ शंभुः केनापराधेन
शप्तवान्भारतीपतिम् ॥ शापश्च कीदृशस्तस्य पुरा दत्तो हरेण वै ॥ एतत्सर्वं मुने ब्रूहि तत्त्वतोऽस्माकमादरात् ॥ २४ ॥ ॥ श्रीसूत उवाच ॥
पुरा बभूव कलहो ब्रह्मविष्ण्वोः परस्परम् ॥ २५ ॥ कंचिद्धेतुं समुद्दिश्य स्पर्धया श्लाघमानयोः ॥ अहं कर्ता न मत्तोऽन्यः कर्तास्ति जगतीतले ॥
॥ २६ ॥ एवमाह हरिं ब्रह्मा ब्रह्माणं च हरिस्तथा ॥ एवं विवादः सुमहान्प्रावर्त्तत पुरा तयोः ॥ २७ ॥ एतस्मिन्नंतरे विप्राः कुर्वतोः कलहं मिथः ॥
तयोर्गर्वविनाशाय प्रबोधार्थं च देवयोः ॥ २८ ॥ मध्ये प्रादुरभूल्लिंगं स्वयंज्योतिरनामयम् ॥ तौ दृष्ट्वा विस्मितौ लिंगं ब्रह्मविष्णू
परस्परम् ॥ २९ ॥ समयं चक्रतुर्विप्रा देवानां सन्निधौ पुरा ॥ अनाद्यंतं महालिंगं यदेतद्दृश्यते पुरः ॥ ३० ॥ अनंतादित्यसंका
शमनंताग्निसमप्रभम् ॥ आवयोरस्य लिंगस्य योऽतमादिं च द्रक्ष्यति ॥ ३१ ॥ स भवेदधिको लोके लोककर्ता च स प्रभुः ॥
अहमूर्ध्वं गमिष्यामि लिंगस्यांतं गवेषयन् ॥ ३२ ॥ गवेषणाय मूलस्य त्वमधस्ताद्धरे व्रज ॥ इति तस्य वचः श्रुत्वा तथे
त्याह रमापतिः ॥ ३३ ॥ एवं तौ समयं कृत्वा मार्गणाय विनिर्गतौ ॥ विष्णुर्वराहरूपेण गतोऽधस्ताद्गवेषितुम् ॥ ३४ ॥ हंसतां भारतीजानिः
स्वीकृत्योपरि निर्ययौ ॥ अधो लोकान्विचित्याथो विष्णुर्वर्षगणान्बहून् ॥ यथास्थानं समागत्य बभाषे देवसन्निधौ ॥ ३५ ॥ ॥ विष्णुरुवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहं लिंगस्य नाद्राक्षमादिमस्येति सत्यवाक् ॥ ३६ ॥ ऊर्ध्वं गवेषयित्वाथ ब्रह्माप्यागच्छदत्र सः ॥ आगत्य च वचः प्राह छद्मना चतुराननः ॥ ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ अहमद्राक्षमस्यांतं लिंगस्येति मृषा पुनः ॥ तयोस्तद्वचनं श्रुत्वा ब्रह्मविष्ण्वोर्महेश्वरः ॥ मिथ्यावादिनमाहेदं प्रहस्य चतुराननम् ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ असत्यं यदवोचस्त्वं चतुरानन मत्पुरः ॥ ३९ ॥ तस्मात्पूजा न ते भूयाल्लोके सर्वत्र सर्वदा ॥ अथ विष्णुं पुनः प्राह भगवान्परमेश्वरः ॥ ४० ॥ यस्मात्सत्यमवोचस्त्वं कमलायाः पते हरे ॥ तस्मात्ते मत्समा पूजा भविष्यति न संशयः ॥ ४१ ॥ ततो ब्रह्मा विषण्णः सञ्छंकरं प्रत्यभाषत ॥ स्वामिन्ममापराधं त्वं क्षमस्व करुणानिधे ॥ ४२ ॥ एकोपराधः क्षंतव्यः स्वामिभिर्जगदीश्वरैः ॥ ततो महेश्वरोऽवादीद्ब्रह्माणं परिसांत्वयन् ॥ ४३ ॥ ॥ ईश्वर उवाच ॥ ॥ न मिथ्यावचनं मे स्याद्ब्रह्मन्वक्ष्यामि ते शृणु ॥ गच्छ त्वं सहसा वत्स गन्धमादनपर्वतम् ॥४४॥ तत्र क्रतून्कुरुष्व त्वं मिथ्यादोषप्रशांतये ॥ ततो विधूतपापस्त्वं भविष्यसि न संशयः ॥ ॥४५॥तेन श्रौतेषु ते ब्रह्मन्स्मार्तेष्वपि च कर्मसु ॥ पूजा भविष्यति सदा न पूजा प्रतिमासु ते॥४६॥इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ ततो ब्रह्मा ययौ विप्रा गंधमादनपर्वतम् ॥ ४७ ॥ ईजे च क्रतुकर्तारं क्रतुभिः पार्वतीपतिम् ॥ अष्टाशीतिसहस्राणि वर्षाणि मुनिपुंगवाः ॥ ४८ ॥ पौंडरीकादिभिः सर्वैरध्वरैर्भूरिदक्षिणैः ॥ इन्द्रादिसर्वदेवानां सन्निधावयजच्छिवम् ॥ तेन तुष्टोऽभवच्छंभुर्वरमस्मै प्रदत्तवान् ॥ ४९ ॥ ॥ ईश्वर उवाच ॥ ॥ मिथ्योक्तिदोषस्ते नष्टः कृतैरेतैर्मखैरिह ॥ ५० ॥ चतुरानन ते पूजा श्रौतस्मार्तेषु कर्मसु ॥ भविष्यत्यमला ब्रह्मन्न पूजा प्रतिमासु ते ॥ ५१ ॥ यागस्थलमिदं तेऽद्य ब्रह्मकुण्डमिति प्रथाम् ॥ गमिष्यति त्रिलोकेस्मिन्पुण्यं पापविनाशनम् ॥ ५२ ॥ ब्रह्मकुण्डाभिधे तीर्थे सकृद्यः स्नानमाचरेत् ॥ मुक्तिद्वारार्गलं तस्य भिद्यते तत्क्षणाद्विधे ॥ ५३ ॥ ब्रह्मकुण्डसमुद्भूतं ललाटे भस्म धारयन् ॥ मायाकपाटं निर्भिद्य मुक्तिद्वारं प्रयास्यति ॥ ५४ ॥ ब्रह्मकुण्डोत्थितं भस्म ललाटे यो न धारयेत् ॥ स्वपितुर्बीजसंभूतो न मातरि सुतस्तु सः ॥५५॥ ब्रह्मकुण्डसमुद्भूतभस्मधारणतो विधे ॥ ब्रह्महत्यायुतं नश्येत्सुरापानायुतं तथा ॥ ५६ ॥ गुरुतल्पायुतं नश्येत्स्वर्णस्तेयायुतं तथा ॥ तत्संसर्गायुतं नश्येत्सत्यमुक्तं मया विधे ॥ ॥ ५७ ॥ ब्रह्मकुण्डसमुद्भूतभस्मधारणवैभवात् ॥ भूतप्रेतपिशाचाद्या नश्यंति क्षणमात्रतः ॥ ५८ ॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ यज्ञेष्वथ समाप्तेषु मुनयश्च जितेंद्रियाः ॥ ५९ ॥ इन्द्रादिदेवताश्चैव सिद्धचारणकिन्नराः ॥ अन्ये च देवनिवहा गंधमादनपर्वते ॥ ६० ॥ तां यज्ञभूमिमाश्रित्य स्वयं रुद्रेण सेविताम् ॥ निरंतरमवर्तंत विदित्वा तस्य वैभवम् ॥ ६१ ॥ यथाविधि ततो यज्ञान्समाप्य बहुदक्षिणान् ॥ सत्य

CC-0. In Public Domain. Digitization by eGangotri

लोकमगाद्ब्रह्मा शिवाल्लब्धमनोरथः ॥ ६२ ॥ तदाप्रभृति देवाश्च मुनयश्च द्विजोत्तमाः ॥ ब्रह्मकुण्डं समासाद्य चक्रुर्यागान्विधानतः ॥ ६३ ॥
तस्मादियक्षवो मर्त्याः कुर्युर्यज्ञानिहैव हि ॥ ६४ ॥ मनुजदेवमुनीश्वरवंदितं सकलसंसृतिनाशकरं द्विजाः ॥ जलजसंभवकुण्डमिदं शुभं सकल
पापहरं सकलार्थदम् ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये ब्रह्मकुण्डप्रशंसायां
ब्रह्मशापविमोक्षणवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्रीसूत उवाच ॥ ॥ ब्रह्मकुण्डे महापुण्ये स्नानं कृत्वा समाहितः ॥ नरो
हनूमतः कुण्डमथ गच्छेद्द्विजोत्तमाः ॥ १ ॥ पुरा हतेषु रक्षःसु समाप्ते रणकर्मणि ॥ रामादिषु निवृत्तेषु गंधमादनपर्वते ॥ २ ॥ सर्व
लोकोपकाराय हनूमान्मारुतात्मजः ॥ सर्वतीर्थोत्तमं चक्रे स्वनाम्ना तीर्थमुत्तमम् ॥ ३ ॥ विदित्वा वैभवं यस्य स्वयं रुद्रेण सेव्यते ॥
तस्य तीर्थस्य सदृशं न भूतं न भविष्यति ॥ ४ ॥ यत्र स्नाता नरा यांति शिवलोकं सनातनम् ॥ यस्मिंस्तीर्थे महापुण्ये
महापातकनाशने ॥ ५ ॥ सर्वलोकोपकाराय निर्मिते वायुसूनुना ॥ सर्वाणि नरकाण्यासञ्च्छून्यान्येव चिराय वै ॥ ६ ॥ वैभवं
तस्य तीर्थस्य शंकरो वेत्ति वा न वा ॥ यत्र धर्मसखोनाम राजा केकयवंशजः ॥ ७ ॥ भक्त्या सह पुरा स्नात्वा शतं पुत्रानवाप्त
वान् ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत धर्मसखस्याद्य चरितं वक्तुमर्हसि ॥ हनूमत्कुण्डतीर्थे यो लेभे स्नात्वा शतं सुतान् ॥ ८ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ शृणुध्वमृषयो यूयं चरितं तस्य भूपतेः ॥ ९ ॥ अद्य धर्मसखस्याहं प्रवक्ष्यामि समासतः ॥ राजा धर्मसखोनाम
विजितारिः सुधार्मिकः ॥ १० ॥ बभूव नीतिमान्पूर्वं प्रजापालनतत्परः ॥ तस्य भार्याशतं विप्रा बभूव पतिदैवतम् ॥ ११ ॥ स पालयन्महीं
राजा सशैलवनकाननाम् ॥ तासु भार्यासु तनयं नाविंदद्वंशवर्द्धनम् ॥ १२ ॥ पुत्रार्थं स महीपालो बहून्यत्नानथाकरोत् ॥ अकरोच्च महादानं
पुत्रार्थं स महीपतिः ॥ १३ ॥ अश्वमेधादिभिर्यज्ञैरयजच्च सुरान्प्रति ॥ तुलापुरुषमुख्यानि ददौ दानानि भूरिशः ॥ १४ ॥ आमध्यरात्रमन्नानि
सर्वेभ्योऽप्यनिवारितम् ॥ प्रायच्छद्बहुसूपानि सस्योपेतानि भूमिपः ॥ १५ ॥ पितॄनुद्दिश्य च श्राद्धमकरोद्विधिपूर्वकम् ॥ संतानदायिनो मंत्राञ्ज
जाप नियतेंद्रियः ॥ १६ ॥ एवमादीन्बहून्धर्मान्पुत्रार्थं कृतवान्नृपः ॥ पुत्रमुद्दिश्य सततं कुर्वन्धर्माननुत्तमान् ॥ १७ ॥ राजा दीर्घेण कालेन
वृद्धतां प्रत्यपद्यत ॥ कदाचित्तस्य वृद्धस्य यतमानस्य भूपतेः ॥ १८ ॥ पुत्रस्सुचंद्रनामाभूज्ज्येष्ठपत्न्यां मनोरमः ॥ जातं पुत्रं जनन्यस्ताः सर्वा वैष
म्यवर्जिताः ॥ १९ ॥ समं संवर्द्धयामासुः क्षीरादिभिरनुत्तमाः ॥ राज्ञश्च सर्वमातॄणां पौराणाम्मंत्रिणां तथा ॥ २० ॥ मनोनयनसंतोषजनकोऽयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतोऽभवत् ॥ लालयानः सुतं राजा मुदं लेभे परात्पराम् ॥२१॥ आंदोलिकाशयानस्य सूनोस्तस्य कदाचन ॥ वृश्चिकोऽकुट्टयत्पादे पुच्छेनोग्रद्विषा
ग्निना ॥ २२ ॥ कुट्टनाद्वृश्चिकस्यासावरुदत्तनयो भृशम् ॥ ततस्तन्मातरः सर्वाः प्रारुदन्च्छोककातराः ॥ २३ ॥ परिवार्यात्मजं विप्राः सध्वनिः
संकुलोऽभवत् ॥ आर्तध्वनिं स शुश्राव राजा धर्मसखस्तदा ॥ २४ ॥ उपविष्टः सभामध्ये सहामात्यपुरोहितः ॥ अथ प्रातिष्ठिपद्राजा सौविदल्लं
स वेदितुम् ॥ २५ ॥ अन्तःपुरबहिर्द्वारं सौविदल्लः समेत्य सः ॥ षंढवृद्धान्समाहूय वाक्यमेतदभाषत ॥ २६ ॥ षंढाः किमर्थमधुना रुदंत्यन्तःपुर
स्त्रियः ॥ तत्परिज्ञायतां तत्र गत्वा रोदनकारणम् ॥ २७ ॥ एतदर्थं हि मां राजा प्रेरयामास संसदि ॥ इत्युक्तास्तु परिज्ञाय निदानं रोदनस्य
ते ॥ २८ ॥ निर्गम्यांतःपुरात्तस्मै यथावृत्तं न्यवेदयत् ॥ स षंढकवचः श्रुत्वा सौविदल्लः सभां गतः ॥ २९ ॥ राज्ञे निवेदयामास पुत्रं वृश्चिकपी
डितम् ॥ ततो धर्मसखो राजा श्रुत्वा वृत्तांतमीदृशम् ॥ ३० ॥ त्वरमाणः समुत्थाय सामात्यः सपुरोहितः ॥ प्रविश्यांतःपुरं सार्द्धं मांत्रिकैर्विषहा
रिभिः ॥ ३१ ॥ चिकित्सयामास सुतमौषधाद्यैरनेकशः ॥ जातस्वास्थ्यं ततः पुत्रं लालयित्वा स भूपतिः ॥ ३२ ॥ मानयित्वा च मंत्रज्ञान्रत्नकां
चनमौक्तिकैः ॥ निष्क्रम्यांतःपुराद्राजा भृशं चिंतासमाकुलः ॥ ३३ ॥ ऋत्विक्पुरोहितामात्यैस्तां सभां समुपाविशत् ॥ तत्र धर्मसखो राजा
समासीनो वरासने ॥ उवाचेदं वचो युक्तमृत्विजः सपुरोहितान् ॥ ३४ ॥ ॥ धर्मसख उवाच ॥ ॥ दुःखायैवैकपुत्रत्वं भवति ब्राह्मणो
त्तमाः ॥ ३५ ॥ एकपुत्रत्वतो नृणां वरा चैव ह्यपुत्रता ॥ नित्यं व्यपाययुक्तत्वाद्वरमेव ह्यपुत्रता ॥ अहं भार्याशतं विप्रा उदवोढं विचिंत्य
तु ॥ ३६ ॥ वयश्च समतिक्रांतं सपत्नीकस्य मे द्विजाः ॥ प्राणा मम च भार्याणामस्मिन्पुत्रे व्यवस्थिताः ॥ ३७ ॥ तन्नाशे मम भार्याणां सर्वासां
च मृतिर्ध्रुवा ॥ ममापि प्राणनाशः स्यादेकपुत्रस्य मारणे ॥ ३८ ॥ अतो मे बहुपुत्रत्वं केनोपायेन वै भवेत् ॥ तमुपायं मम ब्रूत ब्राह्मणा वेदवि
त्तमाः ॥ ३९ ॥ एकैकः शतभार्यासु पुत्रो मे स्याद्यथा गुणी ॥ तत्कर्म ब्रूत यूयं तु शास्त्रमालोक्य धर्मतः ॥ ४० ॥ महता लघुना वापि कर्मणा
दुष्करेण वा ॥ फलं यद्यपि तत्साध्यं करिष्येऽहं न संशयः ॥ ४१ ॥ युष्माभिरुदितं कर्म करिष्यामि न संशयः ॥ कृतमेव हि तद्वित्त शपेऽहं
सुकृतैर्मम ॥ ४२ ॥ अस्ति चेदीदृशं कर्म येन पुत्रशतं भवेत् ॥ तत्कर्म कुत्र कर्तव्यं मयेति वदताधुना ॥ ४३ ॥ इति पृष्टास्तदा राज्ञा ऋत्विजः
सपुरोहिताः ॥ संभूय सर्वे राजानमिदमूचुः सुनिश्चितम् ॥ ४४ ॥ ॥ ऋत्विज ऊचुः ॥ ॥ अस्ति राजन्प्रवक्ष्यामो येन पुत्रशतं तव ॥ भवेद्ध
र्मेण महता शतभार्यासु कैकय ॥ ४५ ॥ अस्ति कश्चिन्महापुण्यो गन्धमादनपर्वतः ॥ दक्षिणांबुधिमध्ये यः सेतुरूपेण वर्तते ॥ ४६ ॥ सिद्धचा

CC-0. In Public Domain. Digitization by eGangotri

रणगंधर्वदेवर्षिगणसंकुलः ॥ दर्शनात्स्पर्शनान्नृणां महापातकनाशनः ॥ ४७ ॥ तत्रास्ति हनुमत्कुंडमिति लोकेषु विश्रुतम् ॥ महादुःखप्रशमनं स्वर्गमोक्षफलप्रदम् ॥ ४८ ॥ नरकक्लेशशमनं तथा दारिद्र्यमोचनम् ॥ पुत्रप्रदमपुत्राणामस्त्रीणां स्त्रीपदं नृणाम् ॥ ४९ ॥ तत्र त्वं प्रयतः स्नात्वा सर्वाभीष्टप्रदायिनीम् ॥ पुत्रीयेष्टिं च तत्तीरे कुरुष्व सुसमाहितः ॥ ५० ॥ तेन ते शतभार्यासु प्रत्येकं तनयो नृप ॥ एकैकस्तु भवेच्छीघ्रं मा कुरुष्वात्र संशयम् ॥ ५१ ॥ तथोक्तो नृपतिर्विप्रैर्ऋत्विग्भिः सपुरोहितैः ॥ तत्क्षणेनैव ऋत्विग्भिर्भार्याभिश्च पुरोधसा ॥ ५२ ॥ वृतोमात्यैश्च भृत्यैश्च यज्ञसंभारसंयुतः ॥ प्रययौ दक्षिणांभोधौ गन्धमादनपर्वतम् ॥ ५३ ॥ हनुमत्कुंडमासाद्य तत्र सस्नौ ससैनिकः ॥ मासमात्रं स तत्तीरे न्यवसत्स्नानमाचरन् ॥ ५४ ॥ ततो वसंते संप्राप्ते चैत्रमासि नृपोत्तमः ॥ इष्टिमारब्धवांस्तत्र पुत्रीयां सपुरोहितः ॥ ५५ ॥ सम्यक्कर्माणि चक्रुस्ते ऋत्विजः सपुरोधसः ॥ सपत्नीकस्य राजर्षेस्तथा धर्मसखस्य तु ॥ ५६ ॥ इष्टौ तस्य समाप्तायां हनूमत्कुंडतीरतः ॥ पुरोहितो हुतोच्छिष्टं प्राशयद्राजयोषितः ॥ ५७ ॥ ततो धर्मसखो राजा हनूमत्कुंडवारिषु ॥ सम्यक्चकारावभृथस्नानं भार्याशतान्वितः ॥ ५८ ॥ ऋत्विग्भ्यो दक्षिणाः प्रादादसंख्यातास्तु भूरिशः ॥ ग्रामांश्च प्रददौ राजा ब्राह्मणेभ्यो द्विजोत्तमाः ॥ ५९ ॥ सामात्यः सपरीवारः सपत्नीकः स धार्मिकः ॥ राजा ततो निववृते पुरीं स्वां प्रति नंदितः ॥ ६० ॥ ततः कतिपये काले गते दशममासि वै ॥ शतं भार्याः शतं पुत्रान्सुषुवुर्गुणवत्तरान् ॥ ६१ ॥ अथ प्रीतमना राजा वीरो धर्मसखो महान् ॥ स्नातः शुद्धश्च संकल्प्य जातकर्माकरोत्तदा ॥ ६२ ॥ गोभूतिलहिरण्यादि ब्राह्मणेभ्यो ददौ बहु ॥ द्वौ पुत्रौ ज्येष्ठभार्यायाः पूर्वजोऽवरजस्तदा ॥ ६३ ॥ सर्वे ववृधिरे पुत्रा एकाधिकशतं द्विजाः ॥ प्रौढेषु तेषु राजासौ तेभ्यो राज्यं विभज्य तु ॥ ६४ ॥ दत्त्वा च प्रययौ सेतुं सभार्यो गन्धमादनम् ॥ हनुमत्कुंडमासाद्य तपोऽतप्यत तत्तटे ॥ ६५ ॥ महान्कालो व्यतीयाय राज्ञस्तस्य तपस्यतः ॥ राज्ञो धर्मसखस्यास्य ध्यायमानस्य शूलिनम् ॥ ६६ ॥ ततो बहुतिथे काले गते धर्मसखो नृपः ॥ कालधर्मं ययौ तत्र धार्मिकश्शांतमानसः ॥ ६७ ॥ पत्न्योपि तस्य राजर्षेरनुजग्मुः पतिं तदा ॥ ज्येष्ठपुत्रः सुचन्द्रोपि संस्कृत्य पितरं ततः ॥ ६८ ॥ अकरोच्छ्राद्धपर्यंतं कर्माणि श्रद्धया सह ॥ राजा सभार्यो वैकुंठं मरणादत्र जग्मिवान् ॥ ६९ ॥ सुचन्द्रमुख्यास्ते सर्वे राजपुत्रा महौजसः ॥ स्वस्वराज्यं बुभुजिरे भ्रातरस्त्यक्तमत्सराः ॥ ७० ॥ एवं वः कथितं विप्रा हनूमत्कुंडवैभवम् ॥ राज्ञो धर्मसखस्यापि चरित्रं परमाद्भुतम् ॥ ७१ ॥ तत्सर्वं कामसिद्ध्यर्थं स्नायात्कुंडे हनूमतः ॥ ७२ ॥ अध्यायमेनं पठते मनुष्यः शृणोति वा यः सुसमाहितो द्विजाः ॥ सोऽनंतमाप्नोति सुखं परत्र क्रीडेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सार्द्धं दिवि देववृन्दैः ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये हनुमत्कुंडप्रशंसायां धर्मसखशतपुत्रावाप्तिवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कुंडे हनुमतः स्नात्वा स्वयं रुद्रेण सेविते ॥ अगस्तितीर्थं विप्रेंद्रास्ततो गच्छेत्समाहितः ॥ १ ॥ एतद्विनिर्मितं तीर्थं साक्षाद्वै कुम्भयोनिना ॥ प्रवर्तमाने कलहे पुरा वै मेरुविंध्ययोः ॥ २ ॥ निरुद्धभुवनाभोगो ववृधे विंध्यपर्वतः ॥ तदा प्राणिषु सर्वेषु निरुच्छ्वासेषु देवताः ॥ ३ ॥ कैलासं पर्वतं गत्वा शंभवे तद्व्यजिज्ञपन् ॥ तदा स पार्वतीपाणिग्रहणोत्सुककौतुकी ॥ ४ ॥ प्रेषयित्वा वसिष्ठादीन्पार्वतीं याचितुं मुनीन् ॥ कुंभज त्वं निगृह्णीष्व विंध्याद्रिमिति सोऽन्वशात् ॥ ५ ॥ ततः स कुम्भजः प्राह भगवंतं पिनाकिनम् ॥ उद्वाहवेषं ते देव न द्रक्ष्येऽहं कथं विभो ॥ ६ ॥ इति विज्ञापितः शंभुः पुनः कुंभजमब्रवीत् ॥ कुंभजोद्वाहवेषं ते पार्वत्या सहितो ह्यहम् ॥ ७ ॥ वेदारण्ये महापुण्ये दर्शयिष्याम्यसंशयः ॥ तद्गच्छ शीघ्रं विंध्याद्रिं निग्रहीतुं मुनीश्वर ॥ ८ ॥ एवमुक्तस्ततोगस्त्यो विन्ध्याद्रिं स निगृह्य च ॥ पादाक्रमणमात्रेण समीकुर्वन्महीतलम् ॥ ९ ॥ चरित्वा दक्षिणान्देशान्गन्धमादनमन्वगात् ॥ स विदित्वा महर्षिस्तु गन्धमादनवैभवम् ॥ १० ॥ तत्र तीर्थं महापुण्यं स्वनाम्ना निर्ममे मुनिः ॥ लोपामुद्रासखस्तत्र वर्ततेऽद्यापि कुंभजः ॥ ११ ॥ तत्र स्नात्वा च पीत्वा च न भूयो जन्मभाग्भवेत् ॥ इह लोके त्रिकालेपि तत्तीर्थसदृशं द्विजाः ॥ ॥ १२ ॥ तीर्थं न विद्यते पुण्यं भुक्तिमुक्तिफलप्रदम्[1] ॥ सर्वाभीष्टप्रदं नृणां यत्तीर्थस्नानवैभवात् ॥ १३ ॥ सुदीर्घतमसः पुत्रः कक्षीवान्नाम नामतः ॥ लेभे मनोरमां नाम स्वनयस्य सुतां प्रियाम् ॥ १४ ॥ कक्षीवतः कथा सेयं पुण्या पापविनाशिनी ॥ तां कथां वः प्रवक्ष्यामि तच्छृणुध्वं मुनीश्वराः ॥ १५ ॥ अस्ति दीर्घतमानाम मुनिः परमधार्मिकः ॥ तस्य पुत्रः समभवत्कक्षीवानिति विश्रुतः ॥ १६ ॥ उपनीतः स कक्षीवान्ब्रह्मचारी जितेंद्रियः ॥ वेदाभ्यासाय स गुरोः कुले वासमकल्पयत् ॥ १७ ॥ उदंकस्य गुरोर्गेहे वसन्दीर्घतमःसुतः ॥ सोऽध्येष्ट चतुरो वेदान्सांगाञ्छास्त्राणि षट् तथा ॥ १८ ॥ इतिहासपुराणानि तथोपनिषदोऽपि च ॥ उषित्वा षष्टिवर्षाणि कक्षीवान्गुरुसन्निधौ ॥ १९ ॥ प्रयास्यन्स्वगृहं विप्रा गुरवे दक्षिणामदात् ॥ उवाच वै गुरुर्विद्वान्कक्षीवान्ब्रह्मवित्तमः ॥ २० ॥ ॥ कक्षीवानुवाच ॥ ॥ अहं गृहं प्रयास्यामि कुर्वनुज्ञां महामुने ॥ अवलोक्य कृपादृष्ट्या मां रक्षोदंक सांप्रतम् ॥ उदंकस्त्वेवमुदितः कक्षीवंतमथाब्रवीत् ॥ २१ ॥ ॥ उदंक उवाच ॥ ॥ अनुजानामि कक्षीवन्गच्छ त्वं स्व

१ भुक्तिमुक्तिप्रवर्द्धनम्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

गृहं प्रति ॥ २२ ॥ उद्वाहार्थमुपायं ते वत्स वक्ष्यामि तच्छृणु ॥ रामसेतुं प्रयाहि त्वं गंधमादनपर्वतम् ॥ २३ ॥ तत्रागस्त्यकृतं तीर्थं सर्वाभीष्टप्रदायकम् ॥ भुक्तिमुक्तिप्रदं पुंसां सर्वपापनिबर्हणम् ॥ २४ ॥ विद्यते स्नाहि तत्र त्वं सर्वमंगलसाधने ॥ त्रिवर्षं वस तत्र त्वं नियमाचारसंयुतः ॥ २५ ॥ वर्षेषु त्रिषु यातेषु चतुर्थे वत्सरे ततः ॥ निर्गमिष्यति मातंगः कश्चित्तीर्थोत्तमात्ततः ॥ २६ ॥ चतुर्दंतो महाकायः शरदभ्रसमच्छविः[1] ॥ तं गजं गिरिसंकाशं स्नात्वा तत्र समारुह ॥ २७ ॥ आरुह्य तं गजं वत्स स्वनयस्य पुरीं व्रज ॥ चतुर्दंतगजस्थं त्वां दृष्ट्वा शक्रमिवापरम् ॥ २८ ॥ राजर्षिः स्वनयो धीमान्हर्षव्याकुललोचनः ॥ स्वकन्यायाः कृते दुःखं त्यजेदेव हृदि स्थितम् ॥ २९ ॥ पुरा हि प्रतिजज्ञे सा तस्य पुत्री मनोरमा ॥ चतुर्दंतं महाकायं गजं सर्वांगपांडुरम् ॥ ३० ॥ आरुह्य यः समागच्छेत्स मे भर्ता भवेदिति ॥ स्वकन्यायाः प्रतिज्ञां तां समाकर्ण्य स भूपतिः ॥ ॥ ३१ ॥ दुःखाकुलमना भूत्वा सततं पर्यचिंतयत् ॥ स्वनये चिंतयत्येवं नारदः समुपागमत् ॥ ३२ ॥ तमागतं मुनिं दृष्ट्वा राजर्षिरतिधार्मिकः ॥ प्रत्युद्गम्य मुदा युक्तः पाद्यार्घ्याद्यैरपूजयत् ॥ ३३ ॥ प्रणम्य नारदं राजा वचनं चेदमब्रवीत् ॥ कन्येयं मम देवर्षे प्रतिज्ञामकरोत्पुरा ॥ ३४ ॥ चतुर्दंतं महाकायं गजं सर्वांगपांडुरम् ॥ आरुह्य यः समागच्छेत्स मे भर्ता भवेदिति ॥ ३५ ॥ चतुर्दंतो महाकायो गजः सर्वांगपांडुरः ॥ संभवेदिंद्रभवने भूतले नैव विद्यते ॥ ३६ ॥ इयं च दुस्तरामेनां प्रतिज्ञां बालिशाऽकरोत् ॥ इयं प्रतिज्ञातितरां सततं बाधते हि माम् ॥ ३७ ॥ अनूढा हि पितुः कन्या सर्वदा शोकमावहेत् ॥ इति तस्य वचः श्रुत्वा स्वनयं नारदोऽब्रवीत् ॥ ३८ ॥ मा विषीदस्व राजर्षे तस्या ईदृग्विधः पतिः ॥ भविष्यत्यचिरादेव पृथिव्यां ब्राह्मणोत्तमः ॥ ३९ ॥ कक्षीवानिति विख्यातो जामाता ते भविष्यति ॥ इत्युक्त्वा नारदमुनिर्ययावाकाशमार्गतः ॥ ४० ॥ स्वनयस्तद्वचः श्रुत्वा नारदेन प्रभाषितम् ॥ आकांक्षते दिवारात्रं तादृग्विधसमागमम् ॥ ४१ ॥ अतः सौम्य महाभाग कक्षीवन्बालतापस ॥ अगस्त्यतीर्थमद्य त्वं स्नातुं गच्छ त्वरान्वितः ॥ ४२ ॥ सर्वमंगलसिद्धिस्ते भविष्यति न संशयः ॥ उदंकेनैवमुक्तोऽथ कक्षीवान्द्विजपुंगवः ॥ ४३ ॥ अनुज्ञातश्च गुरुणा प्रययौ गंधमादनम् ॥ संप्राप्यागस्त्यतीर्थं च तत्र सस्नौ जितेंद्रियः ॥ ४४ ॥ क्षेत्रोपवासमकरोद्दिनमेकं मुनीश्वरः ॥ अपरेद्युः पुनः स्नात्वा पारणामकरोद्द्विजः ॥ ४५ ॥ रात्रौ तत्रैव सुष्वाप कक्षीवान्धर्मतत्परः ॥ एवं नियमयुक्तस्य तस्य कक्षीवतो मुनेः ॥ ४६ ॥ एकेन दिवसेनोनं वर्षत्रयमथागमत् ॥ अथ वर्षत्रयस्यांते तस्मिन्नेव दिने मुनिः ॥ ४७ ॥ अन्वास्य पश्चिमां संध्यां सुखं सुष्वाप तत्तटे ॥ याममात्रावशिष्टायां

१ शरच्चन्द्रसमच्छविः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभावर्यां महाध्वनिः ॥ ४८ ॥ उदभूत्प्रलयांभोधिवीचिकोलाहलोपमः ॥ तेन शब्देन महता कक्षीवान्प्रत्यबुध्यत ॥ ४९ ॥ ततस्तु स्वनयोनाम राजा सानुचरो बली ॥ मृगयाकौतुकी तत्र मधुरापतिराययौ ॥ ५० ॥ विनिघ्नन्स गजान्सिंहान्वराहान्महिषान्रुरून् ॥ अन्यान्मृगविशेषांश्च स राजा न्यवधीच्छरैः ॥ ५१ ॥ सामात्यो मृगयासक्तो रथवाजिगजैर्युतः ॥ अगस्त्यतीर्थसविधमाससाद भटान्वितः ॥ ५२ ॥ स राजा मृगयाश्रांतः श्रांतसैनिकसंवृतः ॥ तत्तीर्थतीरप्रांतेषु निषसाद महीपतिः ॥ ५३ ॥ ततः प्रभाते विमले कक्षीवान्मुनिसत्तमः ॥ अगस्त्यतीर्थे स्नात्वाऽसौ संध्यां पूर्वामुपास्य च ॥ ५४ ॥ तस्य तीरे जपन्मंत्रांस्तस्थौ नियमसंयुतः ॥ अत्रांतरे तीर्थवराद्गज एको विनिर्ययौ ॥ ५५ ॥ चतुर्दंतो महाकायः कैलास इव मूर्तिमान् ॥ स समुत्थाय तत्तीर्थादगात्कक्षीवदंतिकम् ॥ ५६ ॥ तमागतमुदंकोक्तलक्षणैरुपलक्षितम् ॥ तदा निरीक्ष्य कक्षीवानारोढुं स्नानमातनोत् ॥ ५७ ॥ नमस्कृत्य च तत्तीर्थं श्लाघमानो मुहुर्मुहुः ॥ आरुरोह च कक्षीवांश्चतुर्दंतं महागजम् ॥ ५८ ॥ आरुह्य तं चतुर्दंतं रजताचलसंनिभम् ॥ स्वनयस्य पुरीमेव कक्षीवान्गंतुमैच्छत ॥ ५९ ॥ तमारूढं चतुर्दंतं श्वेतदंतावलोत्तमम् ॥ स वीक्ष्य निश्चिकायैनं कक्षीवानिति भूपतिः ॥ ६० ॥ प्रसन्नहृदयो राजा तस्यांतिकमुपागमत् ॥ तदाभ्याशमुपागम्य कक्षीवंतं नृपोऽब्रवीत् ॥ ६१ ॥ ॥ स्वनय उवाच ॥ ॥ त्वं ब्रह्मन्कस्य पुत्रोऽसि नाम किं तव मे वद ॥ गजमेनं समारुह्य कुत्र वा गन्तुमिच्छसि ॥ स्वनयेनैवमुक्तस्तु कक्षीवान्वाक्यमब्रवीत् ॥ ६२ ॥ ॥ कक्षीवानुवाच ॥ ॥ पुत्रोऽहं दीर्घतमसः कक्षीवानिति विश्रुतः ॥ ६३ ॥ स्वनयस्य तु राजर्षेर्गच्छामि नगरं प्रति ॥ अहमुद्वोढुमिच्छामि तस्य कन्यां मनोरमाम् ॥ ६४ ॥ चतुर्दंतगजारूढस्तत्प्रतिज्ञां च पूरयन् ॥ स्वनयस्य सुतापाणिं ग्रहीष्यामि नराधिप ॥ ६५ ॥ तद्भाषितं समाकर्ण्य श्रोत्रपीयूषवर्षणम् ॥ हर्षसंफुल्लनयनः स्वनयो वाक्यमब्रवीत् ॥ ६६ ॥ कक्षीवन्भोः कृतार्थोस्मि स एव स्वनयो ह्यहम् ॥ उद्वोढुमिच्छति भवान्यस्य कन्यां मनोरमाम् ॥ ६७ ॥ स्वागतं ते मुनिश्रेष्ठ कक्षीवन्बालतापस ॥ मम कन्यां गृहाण त्वं तपोधन मनोरमाम् ॥ ६८ ॥ तया सह चरन्धर्मान्गार्हस्थ्यं प्रतिपालय ॥ राज्ञोक्तः स तदोवाच कक्षीवान्धर्मतत्परः ॥ राजानं स्वनयं प्रीतं मधुरापुरवासिनम् ॥ ६९ ॥ ॥ कक्षीवानुवाच ॥ ॥ पिता दीर्घतमानाम वेदारण्ये मम प्रभो ॥ ॥ ७० ॥ आस्ते तपश्चरन्सौम्यो नियमाचारतत्परः ॥ तस्यांतिकं प्रेषय त्वं विप्रमेकं धरापते ॥ ७१ ॥ तथोक्तः स तदा राजा स्वनयो हृष्टमानसः ॥ अनेकसेनया सार्धं प्राहिणोत्स्वपुरोधसम् ॥ ७२ ॥ विप्रं सुदर्शनं नाम वेदारण्यस्थलं प्रति ॥ सुदर्शनः समादिष्टः स्वनयेन नृपेण

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ ७३ ॥ महत्या सेनया सार्धं प्रययौ वेदकाननम् ॥ तत्रोटजे समासीनं तं दीर्घतमसं मुनिम् ॥ ७४ ॥ तपश्चरंतमासीनं ध्यायन्वेदाटवी पतिम् ॥ पुरोहितो ददर्शाथ जपंतं मंत्रमुत्तमम् ॥ ७५ ॥ प्रणाममकरोत्तस्मै मुनये स सुदर्शनः ॥ उवाच दीर्घतमसं मुनिं प्रह्लादयन्निव ॥ ७६ ॥ ॥ ॥ सुदर्शन उवाच ॥ ॥ कच्चित्ते कुशलं ब्रह्मन्कच्चित्ते वर्धते तपः ॥ आश्रमे कुशलं कच्चित्कच्चिद्धर्मे सुखं वद ॥ ७७ ॥ पृष्टः सुदर्शनेनैवं मुनिर्दीर्घतमास्तदा ॥ सुदर्शनमुवाचेदमर्घ्यादिविधिपूर्वकम् ॥ ७८ ॥ ॥ दीर्घतमा उवाच ॥ ॥ सर्वत्र कुशलं ब्रह्मन्सुदर्शन महामते ॥ मम वेदाटवीनाथकृपया नाशुभं क्वचित् ॥ ७९ ॥ तवापि कुशलं ब्रह्मन्किं सुखागमनं तथा ॥ किं वाऽऽगमनकार्यं ते सुदर्शन ममाश्रमे ॥ ८० ॥ स्वनयस्य पुरोधास्त्वं खलु वेदविदां वरः ॥ तं विहाय महाराजं मधुरापुरवासिनम् ॥ ८१ ॥ महत्या सेनया सार्धं किमर्थं त्वमिहागतः ॥ इत्युक्तो दीर्घतमसा तदानीं स सुदर्शनः ॥ ८२ ॥ उवाच तं महात्मानं मुनिं ज्वलिततेजसम् ॥ सर्वत्र मे सुखं ब्रह्मन्भवतः कृपया सदा ॥ ८३ ॥ भगवन्स्वनयो राजा साष्टांगं प्रणिपत्य तु ॥ त्वां प्राह प्रश्रितं वाक्यं मन्मुखेन शृणुष्व तत् ॥ ८४ ॥ ॥ स्वनय उवाच ॥ ॥ कक्षीवांस्ते सुतो ब्रह्मन्गंधमादनपर्वते ॥ स्नानं कुर्वन्नगस्त्यस्य तीर्थे संप्रति वर्तते ॥ ८५ ॥ तस्य रूपं तपो धर्ममाचारान्वैदिकांस्तथा ॥ वेदशास्त्रप्रवीणत्वमाभिजात्यं च तादृशम् ॥ ८६ ॥ लोकोत्तरमिदं सव विज्ञाय तव नंदने ॥ मनोरमां सुतां तस्मै दातुमिच्छाम्यहं मुने ॥ ८७ ॥ मृगयाकौतुकी चाहं गंधमादनपर्वतम् ॥ आगतो मुनिशार्दूल वर्त्ते युष्मत्सुतांतिके ॥८८॥ पित्रनुज्ञां विना नाहमुद्वहेयं सुतां तव ॥ इति ब्रूते तव सुतः कक्षीवान्मुनिसत्तम ॥८९॥ तद्भवान् मत्सुतां तस्मै दातुं मेऽनुग्रहं कुरु ॥ प्रेषयं च समीपं ते सेनया च सुदर्शनम् ॥ ९० ॥ ॥ सुदर्शन उवाच ॥ ॥ इति मां भगवन्राजा प्राहिणोत्तव सन्निधिम् ॥ तद्भवाननुमन्यस्व राज्ञस्तस्य चिकीर्षितम् ॥ ९१ ॥ ॥ श्रीसूत उवाच ॥ ॥ इत्युक्त्वा विररामाथ स्वनयस्य पुरोहितः ॥ ततो दीर्घतमाः प्राह स्वनयस्य पुरोहितम् ॥ ९२ ॥ ॥ दीर्घतमा उवाच ॥ ॥ सुदर्शन भवत्वेवं कथितं स्वनयेन यत् ॥ ममाभीष्टतमं ह्येतत्पाणिग्रहणमंगलम् ॥ ९३ ॥ आगमिष्याम्यहं विप्र गन्धमादनपर्वतम् ॥ इत्युक्त्वा स मुनिर्विप्रा महादीर्घतमा मुनिः ॥ ९४ ॥ वेदाटवीपतिं नत्वा भक्तिप्रवणचेतसा ॥ सुदर्शनेन सहितः सेतुमुद्दिश्य निर्ययौ ॥ ९५ ॥ षड्भिर्दिनैर्मुनिः पुण्यं प्रययौ गन्धमादनम् ॥ अगस्तितीर्थतीरं च गत्वा दीर्घतमा मुनिः ॥ ९६ ॥ अथ पुत्रं ददर्शाग्रे कक्षीवंतं महामुनिः ॥ कक्षीवान्पितरं दृष्ट्वा ववन्दे नाम कीर्तयन् ॥ ९७ ॥ ततो दीर्घतमा योगी स्वांकमारोप्य तं सुतम् ॥ मूर्ध्न्युपाघ्राय सस्नेहं सस्वजे पुलकाकुलः ॥ ९८ ॥ कुशलं परिपप्रच्छ तदा दीर्घतमा ऋषिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्ववेदास्त्वयाधीताः कक्षीवन्किमु वत्सक ॥ ९९ ॥ शास्त्राण्यपाठीः किं त्वं वा वत्स सव वदस्व मे ॥ इति पृष्टः स्वपित्रा स सर्वं वृत्तं तमब्रवीत् ॥ ॥ १००॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्येऽगस्तितीर्थप्रशंसायां कक्षीवदुद्वाहोद्योगवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुनरित्याह कक्षीवान्पितरं तं मुनीश्वराः ॥ यथोदंकेन गुरुणा प्रेषितोऽहमिहाधुना ॥ १ ॥ समागतोस्मि तीर्थेऽस्मिन्नागस्त्ये मुनिसत्तम ॥ स्वनयस्य सुतोद्वाहसिद्ध्यर्थं गुरुचोदितः ॥ २ ॥ उपायं तन्निगदितमत्र कुर्वन्न्यवर्तिषम् ॥ वर्षत्रयावसाने मामुद्वाहोपायसंयुतम् ॥ ३ ॥ स्वनयोत्रैव तिष्ठन्तमाससाद यदृच्छया ॥ स च मामेत्य कन्यां ते दास्यामीति वचोऽब्रवीत् ॥ ४ ॥ ततोस्मदनुरोधेन त्वामाह्वयदयं नृपः ॥ इतीरयित्वा पितरं कक्षीवान्विरराम सः ॥ ५ ॥ सुदर्शनोऽथ विप्रेंद्रः पुरोधाः स्वनयस्य सः ॥ प्रययौ राजसविधं स्वनयाय निवेदितुम् ॥ ६ ॥ राजानं तं समासाद्य स्वनयं स सुदर्शनः ॥ प्राप्तं निवेदयामास तं दीर्घतमसं मुनिम् ॥ ७ ॥ ततः स राजा स्वनयो मुनिं प्राप्तं पुरोहितात् ॥ श्रुत्वा विनिर्ययौ द्रष्टुं सहसा पटमण्डपात् ॥ ८ ॥ अगस्त्यतीर्थतीरे तं सपुत्रमृषिसत्तमम् ॥ ददर्श राजा स्वनयो ब्रह्माणमिव देवराट् ॥ ९ ॥ ववंदे दीर्घतमसश्चरणौ लोकमंगलौ ॥ उत्थाप्य नृपतिं विप्रास्तदा दीर्घतमा मुनिः ॥ ॥ १० ॥ आशिषं प्रयुयोजाथ स्वनयाय नृपाय सः ॥ अत्रांतरे समायात उदंकोऽपि महानृषिः ॥ ११ ॥ रामसेतौ धनुष्कोटौ स्नातुं शिष्यगणैर्वृतः ॥ लक्षसंख्यो मुनिगणस्तेन साकं मुनीश्वरः ॥ १२ ॥ उदंकोऽगस्त्यतीर्थेस्मिन्स्नातुं संप्राप्तवान्मुनिः ॥ उदंकमागतं दृष्ट्वा कक्षीवान्प्रणनाम तम् ॥ १३ ॥ अकरोदाशिषं विप्रः शिष्यायाथ गुरुस्तदा ॥ अथ दीर्घतमा विप्रस्तमुदंकं महामुनिम् ॥ १४ ॥ कुशलं परिपप्रच्छ सोऽपि तं मुनिपुंगवम् ॥ उभौ तौ मुनिशार्दूलौ सर्वलोकेषु विश्रुतौ ॥ १५ ॥ कथयामासतुस्तत्र कथाः पापप्रणाशिनीः ॥ अथ राजाप्युदंकं तं प्रणनाम मुनीश्वरम् ॥ १६ ॥ उदंकोप्याशिषं तस्मै प्रायुंक्त स्वनयाय वै ॥ राजाथ स्वनयः प्रीतस्तत्र वाक्यमभाषत ॥ १७ ॥ मुनिं तं दीर्घतमसं विवाहः क्रियतामिति ॥ तथास्त्वित्यवदत्सोऽपि तदा दीर्घतमा मुनिः ॥ १८ ॥ श्व एव क्रियतां राजन्सुमुहूर्ते महामते ॥ अत्रैव पाणिग्रहणं क्रियतां गन्धमादने ॥ १९ ॥ तस्मादिहानय क्षिप्रं कन्यामंतःपुरं तथा ॥ इत्युक्तः स्वनयो राजा गत्वा स्वपटमण्डपम् ॥ २० ॥ आहूय शतसंख्याकान्वृद्धांन्वर्षवरांस्तदा ॥ आनेतुं प्रेषयामास कन्यामंतःपुरं तथा ॥ २१ ॥ ते वर्षवरमुख्यास्तु स्वनयेन प्रचोदिताः ॥ मनोजवान्समारुह्य वाजिनो मधुरां

१ वर्षवरान्—षण्ढान्—इत्यर्थः । 'षण्ढो वर्षवरस्तुल्यः क्लीबः पण्डो नपुंसके'—इत्यमरः ।

CC-0. In Public Domain. Digitization by eGangotri

ययुः ॥ २२ ॥ गत्वा चांतःपुरं तूर्णं वृत्तं सर्वं निवेद्य च ॥ कन्ययांतःपुरेणापि सहिताः पुनराययुः ॥ २३ ॥ ततः परस्मिन्दिवसे शुभे दीर्घतमा ऋषिः ॥ गोदानादीनि पुत्रस्य विधिवन्निरवर्तयत् ॥ २४ ॥ निर्वृत्तेष्वथ कक्षीवान्गोदानादिषु कर्मसु ॥ उद्वोढुं राजतनयां पित्रा च गुरुणा सह ॥ ॥ २५ ॥ चतुर्दंतं महाकायं गजं सर्वांगपांडुरम् ॥ आरुह्य हर्षसंयुक्तो द्वितीय इव देवराट् ॥ २६ ॥ मनोरमायाः कन्यायाः पूरयंश्च मनोरथम् ॥ ब्राह्मणैर्बहुसाहस्रैः सहितः स्वस्तिवाचकैः ॥२७॥ तोरणालंकृतद्वारं राजर्षेः पटमण्डपम् ॥ कृतमंगलकृत्योऽसौ कक्षीवान्मुदितो ययौ ॥२८॥ ततः स्वनयकन्या सा कृतमंगलभूषणा ॥ चतुर्दंतमहाकायश्वेतदंतावलस्थितम् ॥ २९ ॥ कक्षीवंतं समायांतं दृष्ट्वा स्वोद्वाहनोत्सुकम् ॥ प्रतिज्ञा मत्कृते दानीं निर्वृत्तेति मुदं ययौ ॥ ३० ॥ कक्षीवान्दीर्घतमसा तथोदंकेन संयुतः ॥ पटाकारबहिर्द्वारं क्रमाद्राज्ञः समाययौ ॥ ३१ ॥ स्वनयस्तु ततो दृष्ट्वा कक्षीवंतं समागतम् ॥ प्रत्युज्जगाम सहितः सुदर्शनपुरोधसा ॥ ३२ ॥ कक्षीवतो वरस्याथ कन्यकापरिचारिकाः ॥ राजतैः स्वर्णपात्रैश्च चक्रुर्नीराजनाविधिम् ॥ ३३ ॥ स्वनयेन समाहूतो ब्राह्मणैः परिवारितः ॥ प्रविवेशाथ लक्ष्मीवान्कक्षीवान्राजमंदिरम् ॥ ३४ ॥ ततो वरेण सहितं तं दीर्घतमसं मुनिम् ॥ सोदंकमनयद्राजा स्वगृहं विनयान्वितः ॥ ३५ ॥ उदंकदीर्घतमसोरर्घ्यं च प्रददौ नृपः ॥ अलंकृते प्रपामध्ये वस्त्रचामरतोरणैः ॥ ३६ ॥ वरो दीर्घतमाश्चान्ये सोदंका मुनयस्तदा ॥ न्यषीदन्स्वनयश्चापि सामात्यः सपुरोहितः ॥ ३७ ॥ ततो दुहितरं कन्यां सुकेशीं तां मनोरमाम् ॥ भूषणालंकृतां गात्रे दिव्यवस्त्रधरां शुभाम् ॥ ३८ ॥ बिंबोष्ठीं चारुसर्वांगीं पीनोन्नतपयोधराम् ॥ प्रपायामध्यमनयन्महाजनसमाकुलम् ॥ ॥ ३९ ॥ ततो वरस्य कंठे सा मालां चंपकनिर्मिताम् ॥ निवेशयामास शुभा जनमध्ये मनोरमा ॥ ४० ॥ उदंकस्तत आगत्य प्रतिष्ठाप्यानलं स्थले ॥ कृत्वाग्निमुखपर्यंतं लाजाहोमादिकं तथा ॥ ४१ ॥ पाणिमग्राहयत्तस्याः कन्यायाश्च वरेण तु ॥ उदंकः सर्वकर्माणि कारयामास तत्र वै ॥ ॥ ४२ ॥ वरवध्वोस्तदा विप्राः प्रायुंजत तदाशिषः ॥ ततः स राजा स्वनयो वरं दीर्घतमोमुनिम्॥४३॥उदंकं वरपक्षीयान्स्वपक्षीयांस्तथा द्विजाः ॥ त्रिलक्षं ब्राह्मणानन्नैर्भोजयामास षड्रसैः ॥ ४४ ॥ ततः संभावयामास तांबूलाद्यैरनेकधा ॥ अथामंत्र्य मुनिश्रेष्ठमुदंकः स्वाश्रमं ययौ ॥४५ ॥ अन्ये च ब्राह्मणाः सर्वे स्वदेशान्प्रययुस्तदा ॥ एवं विवाहे निर्वृत्ते कक्षीवद्राजकन्ययोः ॥४६॥ प्रविश्यागस्त्यतीर्थं स तिरोधत्त गजोत्तमः ॥ ततो दीर्घतमा विप्राः पुत्रेण स्नुषया सह ॥ ४७ ॥ अगस्त्यस्य महातीर्थे स्नानं कृत्वेष्टदायिनि ॥ श्लाघमानश्च तत्तीर्थं सर्वलोकेषु विश्रुतम् ॥ ४८ ॥ प्रयातुं स्वाश्रमं पुण्यं वेदारण्यं मनो दधे ॥ राजानं च तमागंतुमापृच्छन्मुनिसत्तमः ॥ ४९ ॥ स्वनयोऽपि तदा राजा स्वदुहित्रे मुदान्वितः ॥ ददौ शतसह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्राणि स्वर्णानि स्त्रीधनं तदा ॥ ५० ॥ गवां सहस्रं प्रददौ दासीनां च सहस्रकम् ॥ ग्रामं पंचशतं चापि ददौ दुहितृवत्सलः ॥ ५१ ॥ दिव्यवस्त्रा युतं चापि शतं भूषणपेटिकाः ॥ हारमालासहस्रं च ददौ दुहितृसौहृदात् ॥ ५२ ॥ एतत्सर्वं समादाय सपुत्रः सस्नुषो मुनिः ॥ राज्ञा च समनुज्ञातः प्रययौ वेदकाननम् ॥ ५३ ॥ वेदारण्यं समासाद्य तदा दीर्घतमा मुनिः ॥ उवास सुसुखं विप्राः पुत्रेण स्नुषया सह ॥ ५४ ॥ सेवन्वेदाटवीनाथं भुक्तिमुक्तिफलप्रदम् ॥ न्यवसत्सुचिरं कालं कक्षीवानपि भार्यया ॥ ५५ ॥ स्वनयोपि स राजर्षिः स्नात्वा कुंभजनिर्मिते ॥ तत्र तीर्थे महापुण्ये सहितः सर्वसैनिकैः ॥ ५६ ॥ अंतःपुरं समादाय मुदितः स्वपुरं ययौ ॥ अगस्त्यतीर्थमाहात्म्यादेवं कक्षीवतो मुनेः ॥ अनन्यसुलभो विप्रा विवाहः समजायत ॥ ५७ ॥ ॥ श्रीसूत उवाच ॥ ॥ इतिहासस्त्वयं पुण्यो वेदसिद्धो मुनीश्वराः ॥ ५८ ॥ धन्यो यशस्य आयुष्यः कीर्तिसौभाग्य वर्द्धनः ॥ श्रोतव्यः पठितव्योऽयं सर्वथा मानवैर्द्विजाः ॥ ५९ ॥ पठतां शृण्वतां चेममितिहासं पुरातनम् ॥ नेहामुत्रापि वा क्लेशो दारिद्र्यं चापि नो भवेत् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां सहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये कक्षीवद्विवाहनिष्पत्तिवर्णनंनाम सप्त दशोऽध्यायः ॥ १७ ॥ ॥ श्रीसूत उवाच ॥ ॥ कुंभसंभवतीर्थेऽस्मिन्विधायाभिषवं नरः ॥ रामकुंडं ततः पुण्यं गच्छेत्पापविमुक्तये ॥ १ ॥ रघुनाथसरः पुण्यं द्विजाः पापहरं तथा ॥ रघुनाथसरस्तीरे कृतो यज्ञोऽल्पदक्षिणः ॥ २ ॥ संपूर्णफलदो भूयात्स्वाध्यायोऽपि जपस्तथा ॥ रघुनाथ सरस्तीरे मुष्टिमात्रमपि द्विजाः ॥ ३ ॥ दत्तं चेद्वेदविदुषे तदनंतगुणं भवेत् ॥ रामतीर्थं समुद्दिश्य वक्ष्यामि मुनिपुंगवाः ॥ ४ ॥ इतिहासं महापुण्यं सर्वपातकनाशनम् ॥ सुतीक्ष्णनामा विप्रेंद्रो मुनिर्नियतमानसः ॥ ५ ॥ अगस्त्यशिष्यो रामस्य चरणाब्जविचिंतकः ॥ रामचंद्रसरस्तीरे तपस्तेपे सुदुष्करम् ॥ ६ ॥ जपन्षडक्षरं मंत्रं रामचंद्राधिदैवतम् ॥ नित्यं स पंचसाहस्रं मंत्रराजमतंद्रितः ॥ ७ ॥ जजाप कुर्वन्स्नानं च रघुनाथसरोजले ॥ भिक्षाशी नियताहारो जितक्रोधो जितेंद्रियः ॥ ८ ॥ एवं सुतीक्ष्णो विप्रेंद्रा बहुकालमवर्तत ॥ ततः कदाचित्स मुनीरामं ध्याय न्सदा हृदि ॥ तुष्टाव सीतासहितं रामचंद्रं सभक्तिकम् ॥ ९ ॥ ॥ सुतीक्ष्ण उवाच ॥ ॥ नमस्ते जानकीनाथ नमस्ते हनुमत्प्रिय ॥ १० ॥ नमस्ते कौशिकमुनेर्यागरक्षणदीक्षित ॥ नमस्ते कौसलेयाय विश्वामित्रप्रियाय च ॥ ११ ॥ नमस्ते हरकोदण्डभंजकामरसेवित ॥ मारीचांतक गजेंद्र ताटकाप्राणनाशन ॥ १२ ॥ कबंधारे हरे तुभ्यं नमो दशरथात्मज ॥ जामदग्न्यजिते तुभ्यं खरविध्वंसिने नमः ॥ १३ ॥ नमः सुग्रीवना

CC-0. In Public Domain. Digitization by eGangotri

थाय नमो वालिहराय ते ॥ विभीषणभयक्लेशहारिणे मलहारिणे ॥ १४ ॥ अहल्यादुःखसंहर्त्रे[1] नमस्ते भरताग्रज ॥ अंभोधिगर्वसंहर्त्रे तस्मिन्सेतु
कृते नमः ॥ १५ ॥ तारकब्रह्मणे तुभ्यं लक्ष्मणाग्रज ते नमः ॥ रक्षःसंहारिणे तुभ्यं नमो रावणमर्द्दिने ॥ १६ ॥ कोदण्डधारिणे तुभ्यं सर्व
रक्षाविधायिने ॥ इति स्तुवन्मुनिः सोऽयं सुतीक्ष्णो राममन्वहम् ॥ १७ ॥ निनाय कालमनिशं रामचंद्रनिषण्णधीः ॥ एवमभ्यसतस्तस्य राम
मन्त्रं षडक्षरम् ॥ १८ ॥ स्तुवतो रामचंद्रं च स्तोत्रेणानेन सुव्रताः ॥ तीर्थे च रघुनाथस्य कुर्वतः स्नानमन्वहम् ॥ १९ ॥ अभवन्निश्चला भक्ती
रामचंद्रेतिनिर्मला ॥ अभूदद्वैतविज्ञानं प्रत्यगात्मैकलक्षणम् ॥ २० ॥ अनधीतत्रयीज्ञानं तथैवाश्रुतवेदनम् ॥ परकायप्रवेशे च सामर्थ्यमभव
द्विजाः ॥ २१ ॥ आकाशगमने शक्तिः कलावैदग्ध्यमेव च ॥ अश्रुतानां च शास्त्राणामभिज्ञानं विना गुरुम् ॥ २२ ॥ गमनं सर्वलोकेषु प्रति
घातविवर्जितम् ॥ अतींद्रियार्थद्रष्टृत्वं देवैः संभाषणं तथा ॥ २३ ॥ पिपीलिकादिजंतूनां वार्ताज्ञानमपि द्विजाः ॥ ब्रह्मविष्णुमहादेवलोकेषु गमनं
तथा ॥ २४ ॥ चतुर्दशसु लोकेषु स्वाधीनगमनं तथा ॥ एतान्यन्यानि सर्वाणि योगिलभ्यानि सत्तमाः ॥ २५ ॥ सुतीक्ष्णस्याभवन्विप्रा राम
तीर्थनिषेवणात् ॥ एवंप्रभावं तत्तीर्थं महापातकनाशनम् ॥ २६ ॥ महासिद्धिकरं पुण्यमपमृत्युविनाशनम् ॥ भुक्तिमुक्तिप्रदं पुंसां नरकक्लेशना
शनम् ॥ २७ ॥ रामभक्तिप्रदं नित्यं संसारोच्छेदकारणम् ॥ अस्य तीरे महल्लिंगं स्थापयित्वा रघूद्वहः ॥ पूजयामास तल्लिंगं लोकानुग्रहका
म्यया ॥ २८ ॥ रामतीर्थे महापुण्ये स्नात्वा तल्लिंगदर्शनात् ॥ नराणां मुक्तिरेव स्यात्किमुतान्या विभूतयः ॥ २९ ॥ तत्र स्नात्वा शिवं दृष्ट्वा धर्म
पुत्रः पुरा द्विजाः ॥ अनृतोक्तिसमुद्भूतदोषान्मुक्तोऽभवत्क्षणात् ॥ ३० ॥ ॥ ऋषय ऊचुः ॥ ॥ असत्यमुदितं कस्माद्धर्मपुत्रेण सूतज ॥
यद्दोषशांतये सस्नौ रामतीर्थेऽतिपावने ॥ ३१ ॥ ॥ श्रीसूत उवाच ॥ ॥ युष्माकमृषयो वक्ष्ये यथोक्तमनृतं रणे ॥ छलेन धर्मपुत्रेण यन्नष्टं
रामतीर्थके ॥ ३२ ॥ अन्योन्यं पांडवा विप्रा धर्मपुत्रादयः पुरा ॥ धृतराष्ट्रस्य पुत्राश्च दुर्योधनमुखास्तदा ॥ ३३ ॥ महद्वै वैरमासाद्य राज्यार्थं
विप्रसत्तमाः ॥ महत्या सेनया सार्द्धं कुरुक्षेत्रे समेत्य च ॥ ३४ ॥ अयुध्यन्समरे वीराः समरेष्वनिवर्तिनः ॥ युद्धं कृत्वा दशदिनं गांगेयः
पतितो भुवि ॥ ३५ ॥ ततः पंचदिनं भूयो धृष्टद्युम्नेन वीर्यवान् ॥ आचार्यो युयुधे द्रोणो महाबलपराक्रमः ॥ ३६ ॥ अनेकास्त्राणि शस्त्राणि
द्रोणाचार्यो महाबली ॥ विसृजन्पांडवानीकं पीडयामास वीर्यवान् ॥ ३७ ॥ अथ दिव्यास्त्रविच्छूरो धृष्टद्युम्नो महाबलः ॥ अभिनद्बाणवर्षेण
द्रोणसेनामनेकधा ॥ ३८ ॥ धृष्टद्युम्नं तदा द्रोणः शरवर्षैरवाकिरत् ॥ पार्थसेना तथा द्रोणबाणवर्षातिपीडिता ॥ ३९ ॥ दशदिक्षु भयाक्रांता

१ अहल्याभयसंहर्त्रे-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्रुता द्विजसत्तमाः ॥ ततोऽर्जुनो रणे द्रोणं युयुधे रथिनां वरः ॥ ४० ॥ रणप्रवीणयोस्तत्र विजयद्रोणयो रणे ॥ द्रष्टुं समागतैर्दैवैरभूद्व्योम निरंतरम् ॥ ४१ ॥ द्रोणफाल्गुनयोर्विप्रा नास्ति युद्धोपमा भुवि ॥ सामर्षयोस्तदाचार्यशिष्ययोरभवद्रणः ॥ ४२ ॥ द्रोणफाल्गुनयोर्युद्धं द्रोणफाल्गुनयोरिवं ॥ बहु मेनेऽथ मनसा द्रोणोऽर्जुनपराक्रमम् ॥ ४३ ॥ ततो द्रोणो महावीर्यं प्रियशिष्यं स फाल्गुनम् ॥ विहाय पांचालबलं समयुध्यत वीर्यवान् ॥ ४४ ॥ सविंशतिसहस्राणि दश तत्रायुतानि च ॥ द्रोणाचार्योऽवधीद्राज्ञां युद्धे सगजवाजिनाम् ॥ ४५ ॥ धृष्टद्युम्नोऽथ कुपितो द्रोणमभ्यहनच्छरैः ॥ द्रोणश्च पट्टिशं गृह्य धृष्टद्युम्नमताडयत् ॥ ४६ ॥ शरैर्विव्याध तं युद्धे तीक्ष्णैरग्निशिखोपमैः ॥ पराङ्मुखोऽभवत्तत्र धृष्टद्युम्नः शराहतः ॥ ४७ ॥ ततो विरथमागत्य धृष्टद्युम्नं वृकोदरः ॥ स्वं स्यंदनं समारोप्य द्रोणाचार्यमथाब्रवीत् ॥ ४८ ॥ स्वकर्मभिरसंतुष्टाः शिक्षितास्त्रा द्विजाधमाः ॥ न युद्ध्येरन्यदि क्रूरा न नश्येरन्नृपा रणे ॥ ४९ ॥ अहिंसा हि परो धर्मो ब्राह्मणानां सदा स्मृतः ॥ हिंसया दारपुत्रादीन्रक्षंते व्याधजातयः ॥ ५० ॥ हिंसीस्त्वमेकपुत्रार्थे युद्धे स्थित्वा बहून्नृपान् ॥ स चापि ते सुतो ब्रह्मन्हतः शेते रणाजिरे ॥ ५१ ॥ तथापि लज्जा ते नास्ति शोकोऽपीह न जायते ॥ वचनं त्विति भीमस्य सत्यं श्रुत्वा युधिष्ठिरात् ॥ ५२ ॥ निजायुधं स तत्याज पपात स्यंदनोपरि ॥ योगवित्प्रायमातस्थे द्रोणाचार्यस्तदा द्विजाः ॥ ५३ ॥ तदंतरं परिज्ञाय द्रोणाचार्यस्य पार्श्वतः ॥ खड्गपाणिः शिरश्छेत्तुमभ्यधावद्रणाजिरे ॥ ५४ ॥ वार्यमाणोऽपि पार्थाद्यैस्तच्छिरश्छेत्तुमुद्ययौ ॥ योगवित्त्वाद्द्रोणमूर्ध्नो ज्योतिरूर्ध्वं दिवं ययौ ॥ ५५ ॥ दृष्टं कृष्णार्जुनकृपधर्मपुत्रादिभिर्मृधे ॥ द्रोणस्यास्य गतप्राणाच्छरीरादच्छिनच्छिरः ॥ ५६ ॥ भारद्वाजे हते युद्धे कौरवाः प्राद्रवन्भयात् ॥ जहृषुः पांडवा विप्रा धृष्टद्युम्नादयस्तदा ॥ ५७ ॥ सेनां तां विद्रुतां दृष्ट्वा द्रौणिरूचे सुयोधनम् ॥ एतद्द्रवति किं सैन्यं त्यक्तप्रहरणं नृप ॥ ५८ ॥ तदा दुर्योधनो राजा स्वयं वक्तुमशक्नुवन् ॥ युद्धे द्रोणवधं वक्तुं कृपाचार्यमचोदयत् ॥ द्रौणयेऽथ कृपाचार्यो वधमूचे गुरोस्तदा ॥ ५९ ॥ ॥ कृप उवाच ॥ ॥ अश्वत्थामंस्तव पिता ब्रह्मास्त्रेण मृधे रिपून् ॥ हत्वा निनाय सदनं यमस्य शतशो बली ॥ ६० ॥ दुराधर्षतमं दृष्ट्वा तद्वीर्यं केशवस्तदा ॥ पांडवान्प्राह विप्रेंद्र वाक्यं वाक्यविशारदः ॥ ६१ ॥ ॥ केशव उवाच ॥ ॥ द्रोणं जेतुमुपायोऽस्ति पांडवा युधि दुर्जयम् ॥ ६२ ॥ अश्वत्थात्मा तव सुतो हतो द्रोण मृधेऽधुना ॥ सत्यवादी वदेदेवं यदि प्रामाणिको जनः ॥ ६३ ॥ द्रोणो निवर्तेत रणात्तदा त्यक्त्वायुधं क्षणात् ॥ अत एनां मृषावार्तां धर्म

१ अत्र अनन्वयालंकारः—"उपमानोपमेयत्वं यदेकस्यैव वस्तुनः । इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥" इति तल्लक्षणात् ।

CC-0. In Public Domain. Digitization by eGangotri

राजोऽधुना वदेत् ॥ ६४ ॥ नान्यथा शक्यते जेतुं द्रोणो युद्धविशारदः ॥ धर्माज्जेतुमशक्यं चेद्धर्मं त्यक्त्वाऽप्यरिं जयेत् ॥ ६५ ॥ इति केशववाक्यं तच्छ्रुत्वा भीमः पृथासुतः ॥ पितरं ते सम॑भ्येत्य मिथ्यावाक्यमभाषत ॥ ६६ ॥ अश्वत्थामा हतो द्रोण युद्धेऽत्र पतितोऽधुना ॥ द्रोणाचार्योपि तद्वाक्यममन्यत यथार्थतः ॥ ६७ ॥ अविश्वस्य पुनः सोऽथ धर्मजं प्राप्य चाब्रवीत् ॥ धर्मात्मज मृधे सूनुरश्वत्थामा ममाधुना ॥ ६८ ॥ हतः किं त्वं वदस्वाद्य सत्यवादी भवान्मतः ॥ धर्मपुत्रोऽसत्यभीरुरासीच्चारिजयोत्सुकः ॥ ६९ ॥ किं कर्तव्यं मयाद्येति दोलालोलमना अभूत् ॥ स दृष्ट्वा भीमनिहतमश्वत्थामाभिधं गजम् ॥७०॥ अश्वत्थामा हतो युद्धे भीमेनाद्य रणे महान् ॥ इत्थं द्रोणं बभाषेऽसौ धर्मपुत्रश्छलोक्तितः ॥ ७१ ॥ तच्छ्रुत्वा त्वत्पिता शस्त्रं त्यक्त्वा युद्धान्न्यवर्त्तत ॥ अथ धर्मसुतः प्राह परं वारण इत्यपि ॥ ७२ ॥ त्यक्तं शस्त्रं न गृह्णीयां युद्धे पुनरिति स्म सः ॥ प्रतिजज्ञे तव पिता वत्स द्रोणो बली पुनः ॥ ७३ ॥ अतः शस्त्रं न जग्राह प्रतिज्ञाभंगकातरः ॥ धृष्टद्युम्नं तदा दृष्ट्वा पिता ते मृत्युमात्मनः ॥ ७४ ॥ मत्वा प्रायोपवेशेन रथोपस्थे स योगवित् ॥ अशयिष्ट समाधिस्थः प्राणानायम्य वाग्यतः ॥ ७५ ॥ ततो निर्भिद्य मूर्धानं तत्प्राणा निर्ययुः क्षणात् ॥ तदा मृतस्य द्रोणस्य वत्स खड्गेन तच्छिरः ॥ ७६ ॥ केशान्गृहीत्वा हस्तेन धृष्टद्युम्नोऽच्छिनद्युधि ॥ मावधीरिति पार्थाद्याः प्रोचुः सर्वे च सैनिकाः ॥ सर्वैर्निवार्यमाणोपि त्वत्तातं पार्श्वतोऽवधीत् ॥ ७७ ॥ ॥ श्रीसूत उवाच ॥ ॥ पितरं निहतं श्रुत्वा रुदन्द्रौणिश्चिरं द्विजाः ॥ ७८ ॥ कोपेन महता तत्र ज्वलन्वाक्यमथाब्रवीत् ॥ अनृतं प्रोच्य पितरं न्यस्तशस्त्रं चकार यः ॥ ७९ ॥ पितरं मेऽद्य तं पार्थमप्यन्यानथ पांडवान् ॥ गृहीत्वा केशपाशं यस्त्यक्तशस्त्रशिरोऽहनत् ॥ ८० ॥ छद्मना पार्षतं तं च हनिष्याम्यचिरादहम् ॥ कृष्णेन सह पश्यंतु पांडवा मत्पराक्रमम् ॥ ८१ ॥ इति द्रौणिर्द्विजास्तत्र प्रतिजज्ञे भयंकरम् ॥ ततोस्तं गत आदित्ये राजानः सर्व एव ते ॥ ८२ ॥ उभये निहते द्रोणे प्राविशन्पटमण्डपम् ॥ अष्टादशदिनैरेवं निवृत्तमभवद्रणम् ॥ ८३ ॥ शल्यं कर्णं तथान्यांश्च दुर्योधनमुखांस्ततः ॥ धार्तराष्ट्रान्निहत्याजौ धर्मराजो युधिष्ठिरः ॥ ८४ ॥ स्वीयानां च परेषां च मृतानां सांपरायिकम् ॥ अकरोद्विधिवद्विप्राः सार्धं धौम्यादिभिर्द्विजैः ॥ ८५ ॥ वंदित्वा धृतराष्ट्रं च सर्वे संभूय पाण्डवाः ॥ धृतराष्ट्राभ्यनुज्ञाता हतशिष्टजनैर्वृताः ॥ ८६ ॥ संप्राप्य हास्ति

१ समासाद्य—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुरं प्राविशंस्ते स्वमंदिरम् ॥ ततः कतिपयाहःसु गतेषु किल नागराः ॥ ८७ ॥ धौम्यादिमुनिभिः सार्धं धर्मजस्य महात्मनः ॥ राज्या भिषेचनं कर्तुं प्रारभंत मुनीश्वराः ॥ ८८ ॥ राज्याभिषेचने तस्य प्रवृत्ते धर्मजस्य तु ॥ अशरीरा ततो वाणी बभाषे धर्मनंदनम् ॥ ८९ ॥ धर्म पुत्र महाभाग रिपूणामपि वत्सल ॥ राज्याभिषेकं मा कार्षीर्नार्हस्त्वं राज्यपालने ॥ ९० ॥ यतस्त्वं छद्मनाचार्यमुक्त्वा सत्यं द्विजोत्तमम् ॥ न्यस्त शस्त्रं रणे राजन्नघातयदलज्जकः ॥ ९१ ॥ अतस्ते पापबाहुल्यं विद्यते धर्मनंदन ॥ प्रायश्चित्तमकृत्वास्य राज्यपालनकर्मणि ॥ ९२ ॥ नार्हता विद्यते यस्मात्प्रायश्चित्तमतश्चर ॥ इत्युक्त्वा विरराम‍ाथ सा तु वागशरीरिणी ॥ ९३ ॥ ततो धर्मसुतो राजा तद्वाक्यं भृशकातरः ॥ मूढोऽहं साहसी क्रूरः पिशुनो लोभमोहितः ॥ ९४ ॥ तुच्छराज्याभिलाषेण कृतवान्पापमीदृशम् ॥ एतत्पापविशुद्ध्यर्थं किं करिष्यामि का गतिः ॥ ९५ ॥ किं वा दानं प्रदास्यामि कुत्र यास्यामि वा पुनः ॥ इति शोकसमाविष्टे तस्मिन्राजनि धर्मजे ॥ ९६ ॥ कृष्णद्वैपायनो व्याससमायातस्तदंतिकम् ॥ ततोऽभिवंद्य तं व्यासं प्रत्युत्थाय कृतांजलिः ॥ ९७ ॥ संपूज्यार्घ्यादिना विप्रा भक्तियुक्तेन चेतसा ॥ अदेहवाचा[1] यत्प्रोक्तंतत्सर्वमखिलेन सः ॥ ॥ ९८ ॥ व्यासाय श्रावयामास दुःखितो धर्मनंदनः ॥ श्रुत्वा तदखिलं वाक्यं धर्मजस्य महामुनिः ॥ ध्यात्वा तु सुचिरं कालं ततो वक्तुं प्रच क्रमे ॥ ९९ ॥ ॥ व्यास उवाच ॥ ॥ मा कार्षीस्त्वं भयं राजन्नुपायं प्रब्रवीमि ते ॥ अस्य पापस्य शांत्यर्थं श्रुत्वानुष्ठीयतां त्वया ॥ १०० ॥ ॥ युधि ष्ठिर उवाच ॥ ॥ किं तद्ब्रूहि महायोगिन्पाराशर्य कृपानिधे ॥ येन मे पापनाशः स्यादचिरात्तद्वदाधुना ॥ १०१ ॥ ॥ व्यास उवाच ॥ ॥ दक्षिणांभोनिधौ सेतौ गंधमादनपर्वते ॥ १०२ ॥ रामसेतौ महाराज रामतीर्थमिति श्रुतम् ॥ अस्ति पुण्यं सरः सिद्धं महापातकनाशनम् ॥ ३ ॥ यस्य दर्शनमात्रेण महापातककोटयः ॥ प्रयांति विलयं सद्यस्तमः सूर्योदये यथा ॥ ४ ॥ रामतीर्थं यदा पश्येत्स्वयं रामेण निर्मितम् ॥ तदैव ब्रह्मह त्याया मुच्यते नात्र संशयः ॥ ५ ॥ तत्र गत्वा महाराज रामतीर्थे विमुक्तिदे ॥ स्नाहि ते पापशुद्धिः स्याद्राज्यरक्षार्हतापि च ॥ ६ ॥ दानं कुरुष्व तत्तीरे गोभूमितिलवाससाम् ॥ सुवर्णरजतानां च दानं कुरु युधिष्ठिर ॥ अवश्यमेतत्पापानां शुद्धिस्ते न चिराद्भवेत् ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ व्यासेन धर्मपुत्रोऽयमेवमुक्तो द्विजोत्तमाः ॥ ८ ॥ तत्क्षणेनैव धौम्येन सहितः सानुजस्तदा ॥ सहदेवं प्रतिष्ठाप्य राज्ये धर्मात्मजस्तदा ॥ ९ ॥ रामसेतुं समुद्दिश्य प्रतस्थे वाहनं विना ॥ दिनैः कतिपयैरेव रामसेतुं जगाम सः ॥ ११० ॥ रामतीर्थं समासाद्य धौम्येन सह पांडवः ॥ पुरोहितो

१ अदेहवाचा—आकाशवाण्या—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

क्तमार्गेण संकल्प्य विधिपूर्वकम् ॥ ११ ॥ सस्नौ रामसरस्तीर्थे पुण्ये पापविनाशने ॥ स्नात्वाचम्य विशुद्धात्मा क्षेत्रपिंडं प्रदाय च ॥ १२ ॥ व्यासो क्ताखिलदानानि प्रददौ स युधिष्ठिरः ॥ मासमेकं निराहारः सस्नौ तत्र स धर्मजः ॥ १३ ॥ प्रत्यहं च ददौ दानं वित्तलोभं विना द्विजाः ॥ एक मासे गते त्वेवं कस्मिंश्चिद्दिवसे ततः ॥ १४ ॥ आह धर्मात्मजं वाणी पुनरप्यशरीरिणी ॥ राजंस्ते विलयं यातं सर्वं पापं युधिष्ठिर ॥ १५ ॥ छले नासत्यवचनादाचार्यस्य वधेन यः ॥ दोषस्ते समभूत्पूर्वं सोऽपि नष्टः परंतप ॥ १६ ॥ याहि स्वनगरं राजन्गत्वा पालय मेदिनीम् ॥ अभिषेचय चात्मानं राज्यरक्षार्हतास्ति ते ॥ १७ ॥ इत्युक्त्वा विररामाथ सापि वागशरीरिणी ॥ ततो धर्मात्मजः प्रीतस्तामुद्दिश्य दिशं प्रति ॥ १८ ॥ नमस्कृत्वाशरीरिण्यै तस्यै वाचे सहानुजः ॥ प्रययौ हास्तिनपुरं सुप्रीतेनांतरात्मना ॥ १९ ॥ अभिषिक्तोऽथ राज्येऽसौ पालयामास मेदिनीम् ॥ इत्थं धर्मात्मजो विप्रा[1] रामतीर्थनिमज्जनात् ॥ १२० ॥ गतपापो विशुद्धात्मा योग्योऽभूद्राज्यरक्षणे ॥ एवं वः कथितं चित्रं रामती र्थस्य वैभवम् ॥ २१ ॥ सर्वपापहरं पुण्यं भक्तिमुक्तिप्रदायकम् ॥ यत्र स्नानाद्विमुक्तोऽभून्मिथ्यादोषात्स धर्मजः ॥ २२ ॥ पठंति येऽ ध्यायमिदं द्विजोत्तमाः शृण्वंति वा ये मनुजा विपातकाः ॥ यास्यंति कैलासमनन्यलभ्यं गत्वा न संयांति पुनश्च जन्म ॥ ॥ १२३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामतीर्थप्रशंसायां धर्मपुत्रमिथ्या कथनदोषशांतिवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ तारकेब्रह्मणस्तस्य तीर्थे[2] स्नात्वा द्विजोत्तमाः ॥ लक्ष्मणस्य ततस्तीर्थमभिगच्छेत्समाहितः ॥ १ ॥ श्रीलक्ष्मणस्य तीर्थे तु स्नात्वा पापैर्विमोचिताः ॥ मुक्तिं प्रयांति विमलां[3]मपुनर्भवलक्षणाम् ॥ २ ॥ स्नानाल्लक्ष्मणतीर्थे तु दारिद्र्यं नश्यते खिलम् ॥ आयुष्मान्गुणवान्विद्वान्पुत्रश्चैवास्य जायते ॥ ३ ॥ कूले लक्ष्मणतीर्थस्य तन्मन्त्रं जपते तु यः ॥ स सर्वशास्त्रवेत्ता स्याच्चतुर्वेदविदप्यसौ ॥ ४ ॥ तस्य कूले महल्लिंगं स्थापयामास लक्ष्मणः ॥ तत्र तीर्थे तु यः स्नात्वा सेवते लक्ष्मणेश्वरम् ॥ ५ ॥ इह दारिद्र्यरोगाभ्यां संसाराच्च विमुच्यते ॥ स्नात्वा लक्ष्मणतीर्थे तु सेवित्वा लक्ष्मणेश्वरम् ॥ बलभद्रः पुरा विप्रा मुमुचे ब्रह्महत्यया ॥ ६ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रह्महत्या कथमभूद्रौहिणेयस्य सूतज ॥ कथं चात्र विनष्टा सा तन्नो ब्रूहि महामुने ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ ॥ शेषावतारो भगवान्बलभद्रः पुरा द्विजाः ॥ ८ ॥ कुरूणां पांडवानां च युद्धोद्योगं विलोक्य तु ॥ बंधूनां स वधं सोढुमसमर्थो हलायुधः ॥ ९ ॥

१ विप्राः—इ० पा० । २ तारकब्रह्मणस्तस्य तीर्थे—रामस्य तीर्थे—इत्यर्थः । ३ विपुलाम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचारमेवमकरोद्बलभद्रो महामतिः ॥ यद्यहं कुरुराजस्य करिष्यामि सहायताम् ॥ १० ॥ कोपः स्यात्पांडुपुत्राणां मध्यवार्यः सुदारुणः ॥ उपकारं करिष्यामि पांडवानामहं यदि ॥ ११ ॥ दुर्योधनस्य कोपः स्यादिति बुद्ध्वा हलायुधः ॥ तीर्थयात्राच्छलेनासौ मध्यस्थः प्रययौ तदा ॥ १२ ॥ प्रभासमभिगम्याथ स्नात्वा संकल्पपूर्वकम् ॥ देवानृषीन्पितृगणांस्तर्पयामास वारिणा ॥ १३ ॥ सरस्वतीं ततः प्रायात्प्रतीच्यभिमुखां हली ॥ पृथूदकं बिंदुसरो मुक्तिदं ब्रह्मतीर्थकम् ॥ १४ ॥ गंगां च यमुनां सिंधुं शतद्रूं च सुदर्शनम् ॥ संप्राप्य बलभद्रोऽयं स्नात्वा तीर्थेषु धर्मतः ॥ १५ ॥ प्रपेदे नैमिषारण्यं मुनींद्रैरभिसेवितम् ॥ आगतं तं विलोक्याथ नैमिषीयास्तपस्विनः ॥ १६ ॥ दीर्घसत्रे स्थिताः सम्यङ्नियता धर्मतत्पराः ॥ अभ्युद्गम्य यदुश्रेष्ठं प्रणम्योत्थाय चासनात् ॥ १७ ॥ अपूजयन्विष्टराद्यैः कंदमूलफलैस्तदा ॥ आसनं परिगृह्यायं पूजितः सपुरःसरः ॥ १८ ॥ उच्चासने स्थितं सूतमनमंतमनुत्थितम् ॥ अकृतांजलिमासीनं व्यासशिष्यं विलोक्य सः ॥ १९ ॥ विप्रांश्चानमतो दृष्ट्वा विलोक्यात्मानमागतम् ॥ चुक्रोध रोहिणीसूनुः सूतं पौराणिकोत्तमम् ॥ २० ॥ मध्ये मुनीनां सूतोऽयं कस्मान्निंद्योऽनुलोमजः ॥ उच्चासने समध्यास्ते न युक्तमिदमंजसा ॥ ॥ २१ ॥ अवमत्य भृशं चास्मान्धर्मसंरक्षकानयम् ॥ आस्तेऽनुत्थाय निर्भीतिर्न च प्रणमते तथा ॥ २२ ॥ पठित्वायं पुराणानि द्वैपायनसकाशतः ॥ सेतिहासानि सर्वाणि धर्मशास्त्राण्यनेकशः ॥ २३ ॥ न मां दृष्ट्वा प्रणमते नैव त्यजति चासनम् ॥ द्वैपायनस्य महतः शिष्याः पैलादयो द्विजाः ॥ २४ ॥ एवंविधमधर्मं ते नैव कुर्युर्यथा त्वयम् ॥ तस्मादेनं वधिष्यामि दुरात्मानमचेतनम् ॥ २५ ॥ दुष्टानां निग्रहार्थं हि भूर्लोकमहमागमम् ॥ मया हतो हि दुष्टात्मा शुद्धिमेष्यत्यसंशयम् ॥ २६ ॥ इत्युक्त्वा भगवान्रामो मुसली प्रबलो हली ॥ पाणिस्थेन कुशाग्रेण तच्छिरः प्राच्छिनद्रुषा ॥ २७ ॥ तत्रत्या मुनयः सर्वे हा कष्टमिति चुक्रुशुः ॥ अवादिषुस्तदा रामं मुनयो ब्रह्मवादिनः ॥ २८ ॥ रामाधर्मः कृतः कष्टस्त्वया संकर्षण प्रभो ॥ अस्य सूतस्य चास्माभिर्दत्तं ब्रह्मासनं महत् ॥ २९ ॥ अक्षयं चायुरस्माभिरस्य दत्तं हलायुध ॥ भवताऽऽजानतैवाद्य कृतो ब्रह्मवधो महान् ॥ ३० ॥ योगेश्वरस्य भवतो नास्ति कश्चिन्नियामकः ॥ अस्यास्तु ब्रह्महत्याया यत्कर्त्तव्यं विचार्य तत् ॥ ३१ ॥ प्रायश्चित्तं भवानेव लोकसंग्रहणाय तु ॥ कुरुष्व भगवन्राम नान्येन प्रेरितः कुरु ॥ इत्युक्तो भगवान्रामस्तानुवाच मुनीन्प्रति ॥ ३२ ॥ ॥ राम उवाच ॥ ॥ प्रायश्चित्तं चरिष्यामि पापशोधकमास्तिकाः ॥ ३३ ॥ लोकसंग्रहणार्थाय नान्यकामनयाऽधुना ॥ यादृशो नियमोऽस्माभिः

१ स वली–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यः पापशांतये ॥ ३४ ॥ तादृशं नियमं त्वद्य भवंतः प्रब्रुवंतु नः ॥ भवद्भिरस्य सूतस्य यदायुर्दत्तमक्षयम् ॥ इंद्रियाणि च सत्त्वं च करिष्ये
योगमायया ॥३५॥ ॥ मुनय ऊचुः ॥ ॥ पराक्रमस्य तेऽत्रास्य मृत्योर्नश्च यथा प्रभो ॥ स्यात्सत्यवचनं राम तद्भवान्कर्तुमर्हति ॥ ३६ ॥
॥ ॥ राम उवाच ॥ ॥ आत्मा वै पुत्ररूपेण भवतीति श्रुतिस्सदा ॥३७॥ उद्घोषयति विप्रेंद्रास्तस्मादस्य शरीरतः ॥ पुत्रो भवतु दीर्घायुः सत्त्वेंद्रिय
बलोर्जितः ॥ ३८ ॥ कथयिष्यति युष्माकं पुराणादीनि सोऽन्वहम् ॥ संभविष्यति सर्वज्ञो योगमायाबलान्मम ॥ ३९ ॥ इत्युक्त्वा रौहि
णेयस्तान्पुनः प्रश्रितमब्रवीत् ॥ मनोभिलषितं किं वा युष्माकं करवाण्यहम् ॥ ४० ॥ तद्ब्रूत मुनयो यूयं करिष्यामि न संशयः ॥ अज्ञानान्मत्कृत
स्यास्य पापस्यापि निवर्तकम् ॥ प्रायश्चित्तं भवन्तो मे प्रब्रूत मुनिसत्तमाः ॥ ४१ ॥ ॥ मुनय ऊचुः ॥ ॥ इल्वलस्यात्मजः कश्चिद्दानवो
बल्वलाभिधः ॥ ४२ ॥ स दूषयति नो यागं रामेहागत्य पर्वणि ॥ दुष्टं तं दानवं पापं जहि लोकैककण्टकम् ॥४३॥ अनेन पूजा ह्यस्माकं कृता
स्याद्भवताधुना ॥ अस्थिविण्मूत्ररक्तानि सुरामांसानि च क्रतौ ॥ ४४ ॥ सदाभिवर्षतेऽस्माकमत्रागत्य स दानवः ॥ अस्मिन्भारतभूभागे यानि
तीर्थानि संति हि ॥ ४५ ॥ तेषु स्नाह्यब्दमेकं त्वं सर्वेषु सुसमाहितः ॥ तेन ते पापशांतिः स्यान्नात्र कार्या विचारणा ॥ ४६ ॥ ॥ श्रीसूत
उवाच ॥ ॥ पर्वकाले तु विप्रेंद्राः समावृत्ते मुनिक्रतौ ॥ महाभीमो रजोवर्षो झंझावातश्च भीषणः ॥ ४७ ॥ प्रादुर्बभूव विप्रेंद्राः पूयरक्तैश्च
वर्षणम् ॥ ततो विष्ठामया वृष्टिर्बल्वलेन कृताप्यभूत् ॥ ४८ ॥ असुरं यज्ञशालायां शूलपाणिमथ क्षणात् ॥ अपश्यद्बलभद्रोऽसौ महाबलपरा
क्रमम् ॥ ४९ ॥ तमालोक्य महादेहं दग्धाद्रिप्रतिमं तदा ॥ प्रतप्तताम्रसंकाशश्मश्रुदंष्ट्रोत्कटाननम् ॥ ५० ॥ चिंतयामास मुसलं रामः परविदा
रणम् ॥ सीरं च दानवहरं गदां दैत्यविदारिणीम् ॥ ५१ ॥ यान्यायुधानि तं रामं चिंतितान्युपतस्थिरे ॥ सीराग्रेण तमाकृष्य बल्वलं खेचरं
तदा ॥ ५२ ॥ मुसलेन निजघ्ने स कुपितो मूर्ध्नि वेगतः ॥ पपात भुवि संक्षुण्णललाटो रक्तमुद्वमन् ॥ ५३ ॥ बल्वलो दीनकथनो गिरिर्वज्रहतो
यथा ॥ स्तुत्वाथ मुनयो रामं प्रोच्चार्य विमलाशिषः ॥ ५४ ॥ अभ्यषिंचञ्छुभैस्तोयैर्वृत्रशत्रुं यथा सुराः ॥ मालां ददुर्वैजयन्तीं श्रीमदंबुज
शोभिताम् ॥ ५५ ॥ माधवाय शुभे वस्त्रे भूषणानि शुभानि च ॥ धारयंस्तानि सर्वाणि रौहिणेयो महाबलः ॥५६॥ पुष्पितानोकहोपेतः कैलास
इव पर्वतः ॥ अनुज्ञातोऽथ मुनिभिः सर्वतीर्थेषु स द्विजाः ॥ ५७ ॥ एकमब्दं चरन्सस्नौ नियमाचारसंयुतः ॥ ततः संवत्सरे पूर्णे कालिंदीभेदनो
बलः ॥ ५८ ॥ समाप्ततीर्थयात्रः सन्पुरीं गन्तुं प्रचक्रमे ॥ ततस्तमोमयीं छायां पृष्ठतोऽनुगतां कृशाम् ॥ ५९ ॥ अपश्यद्बलदेवोयं महानादविरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विणीम् ॥ अथ वार्तां स शुश्राव समुद्भूतां तदांबरे ॥ ६० ॥ रामराम महाबाहो रौहिणेय सितप्रभ ॥ तीर्थाभिगमनेनाद्य चरितेन त्वयाऽनघ ॥ ॥ ६१ ॥ न नष्टा ब्रह्महत्या ते निःशेषं रोहिणीसुत ॥ इति वार्तां समाकर्ण्य चिंतयामास वै बलः ॥ ६२ ॥ प्रायश्चित्तं मया चीर्णमेकाब्दं तीर्थसेवया ॥ तथापि ब्रह्महत्या सा न नष्टेति श्रुतं वचः ॥ ६३ ॥ किं कुर्म इति संचिंत्य नैमिषारण्यमभ्यगात् ॥ तत्र गत्वा मुनीनां तन्यवेदयदरिंदमः ॥ ६४ ॥ यच्छ्रुतं गगने वाक्यं या च दृष्टा तमोमयी ॥ न्यवेदयत तत्सर्वं मुनीनां रोहिणीसुतः ॥ तच्छ्रुत्वा मुनयः सर्वे रामं वाक्यमथाब्रुवन् ॥ ६५ ॥ ॥ मुनय ऊचुः ॥ ॥ यदि राम न नष्टा ते ब्रह्महत्या तु कृत्स्नशः ॥ ६६ ॥ तर्हि गच्छ महाभाग गंधमादनपर्वतम् ॥ महादुःखप्रशमनं महारोगविनाशनम् ॥ ६७ ॥ रामसेतौ महापुण्ये गन्धमादनपर्वते ॥ अस्ति लक्ष्मणतीर्थाख्यं सरः पापविनाशनम् ॥ ६८ ॥ स्नानं कुरुष्व तत्र त्वं तल्लिंगं च नमस्कुरु ॥ निःशेषं तेन नष्टा स्याद्ब्रह्महत्या न संशयः ॥ ६९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तस्तदा रामो गन्धमादनपर्वतम् ॥ गत्वा लक्ष्मणतीर्थं च प्राप्तवान्मुनिपुंगवाः ॥ ७० ॥ स्नात्वा संकल्पपूर्वं तु तत्र तीर्थे हलायुधः ॥ ब्राह्मणेभ्यो ददौ वित्तं धान्यं गाश्च वसुन्धराम् ॥ ७१ ॥ तस्मिन्नवसरे तत्र राममाहाशरीरवाक् ॥ निःशेषं राम नष्टा ते ब्रह्महत्याधुना त्विह ॥ ७२ ॥ संदेहो नात्र कर्तव्यः सुखं याहि पुरीं निजाम् ॥ तच्छ्रुत्वा बलभद्रोऽथ तत्तीर्थं प्रशशंस ह ॥ ७३ ॥ ततस्तत्रत्यतीर्थेषु स्नात्वा सर्वेषु माधवः ॥ धनुष्कोटौ तथा स्नात्वा रामनाथं निषेव्य च ॥ द्वारकां स्वपुरीं प्रायान्नष्टपातकसंचयः ॥ ७४ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्राः श्रीलक्ष्मणसरोऽमलम् ॥ ७५ ॥ पुण्यं पवित्रं पापघ्नं ब्रह्महत्यादिशोधकम् ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ ७६ ॥ स याति मुक्तिं विप्रेंद्राः पुनरावृत्तिवर्जिताम् ॥ ७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये लक्ष्मणतीर्थप्रशंसायां बलभद्रब्रह्महत्याविमोक्षणंनामैकोनविंशोऽध्यायः ॥ १९ ॥

॥ श्रीसूत उवाच ॥ ॥ लक्ष्मणस्य महातीर्थे ब्रह्महत्याविनाशने ॥ स्नात्वा स्वचित्तशुद्ध्यर्थं जटातीर्थं ततो व्रजेत् ॥ १ ॥ जन्ममृत्युजराक्रांतसंसारातुरचेतसाम् ॥ अज्ञाननाशकं नास्ति जटातीर्थादृते द्विजाः ॥ २ ॥ लोके मुमुक्षवः केचिच्चित्तशुद्धिमभीप्सवः ॥ वाचा पठंति वेदांतांस्तूष्णीन्नानुभवंति ते ॥ ३ ॥ पूर्वपक्षमहाग्राहे सिद्धांतझषसंकुले ॥ वेदांताब्धाविहाज्ञानं मुह्यंति पतिता द्विजाः ॥ ४ ॥ प्रथमं चित्तशुद्ध्यर्थं वेदांतान्संपठंति ये ॥ विवदंते पठित्वा ते कलहं च वितन्वते ॥ ५ ॥ चित्तशुद्धिर्न

१ महाप्रभो–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वेदांताद्बहुव्यामोहकारणात् ॥ ततो वयं न वेदांतान्मुनींद्रा बहु मन्महे ॥ ६ ॥ चित्तशुद्धिं यदीच्छध्वं लघूपायेन तापसाः ॥ उद्घोषयामि सर्वेषां
जटातीर्थं निषेवत ॥ ७ ॥ पुरा सर्वोपकारार्थं तीर्थमज्ञाननाशनम् ॥ एतद्विनिर्मितं साक्षाच्छम्भुना गन्धमादने ॥ ८ ॥ निहते रावणे विप्रा जटां
रामस्तु धार्मिकः ॥ क्षालयामास यत्तोये तज्जटातीर्थमुच्यते ॥ ९ ॥ वर्षाणां षष्टिसाहस्रं जाह्नवीजलमज्जनम् ॥ गोदावर्यां सकृत्स्नानं सिंहस्थे च
बृहस्पतौ ॥ १० ॥ तावत्सहस्रस्नानानि सिंहं देवगुरौ गते ॥ गोमत्यां लभ्यते वर्षैस्तज्जटातीर्थदर्शनात् ॥ ११ ॥ जटातीर्थे मनुष्याणां स्नातानां
द्विजपुंगवाः ॥ अन्तःकरणशुद्धिः स्यात्ततोऽज्ञानं विनश्यति ॥ १२ ॥ अज्ञाननाशे ज्ञानं स्यात्ततो मुक्तिमवाप्स्यसि ॥ अखण्डसच्चिदानंदसंपूर्णः
स्यात्ततः परम् ॥ १३ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ पितुः पुत्रस्य संवादं व्यासस्य च शुकस्य च ॥ १४ ॥ पुरा मुनिवरं कृष्णं भावि
तात्मानमच्युतम् ॥ पारंपर्यविशेषज्ञं सर्वशास्त्रार्थकोविदम् ॥ प्रणम्य शिरसा व्यासं शुकः पप्रच्छ वै द्विजाः ॥ १५ ॥ ॥ श्रीशुक उवाच ॥ ॥
भगवंस्तात सर्वज्ञ ब्रूहि गुह्यमनुत्तमम् ॥ १६ ॥ अन्तःकरणशुद्धिः स्यात्तथाज्ञानविनाशनम् ॥ ज्ञानोदयश्च येन स्यादंते मुक्तिश्च शाश्वती ॥ १७ ॥
तमुपायं वदस्वाद्य स्नेहान्मम महामुने ॥ वेदांताश्चेतिहासाश्च पुराणादीनि कृत्स्नशः ॥ १८ ॥ अधीतानि मया त्वत्तः शोधयंति न मानसम् ॥
अतो मे चित्तशुद्धिः स्याद्यथा तात तथा वद ॥ १९ ॥ इति पृष्टस्तदा व्यासः शुकेन मुनिसत्तमाः ॥ रहस्यं कथयामास येनाविद्या विन
श्यति ॥ २० ॥ ॥ व्यास उवाच ॥ ॥ शुक वक्ष्यामि ते गुह्यमविद्याग्रन्थिभेदनम् ॥ बुद्धिशुद्धिप्रदं पुंसां जन्मादिभयनाशनम् ॥ २१ ॥
रामसेतौ महापुण्ये गन्धमादनपर्वते ॥ विद्यते पापसंहारि जटातीर्थमिति श्रुतम् ॥ २२ ॥ जटां स्वां शोधयामास यत्र रामो हरिः स्वयम् ॥
रामो दाशरथिः श्रीमांस्तीर्थाय च वरं ददौ ॥ २३ ॥ स्नांति येऽत्र समागत्य जटातीर्थेऽतिपावने ॥ अन्तःकरणशुद्धिश्च तेषां भूयादिति स्म
सः ॥ २४ ॥ विना यज्ञं विना ज्ञानं विना जाप्यमुपोषणम् ॥ स्नानमात्राज्जटातीर्थे बुद्धिशुद्धिर्भवेन्नृणाम् ॥ २५ ॥ सर्वदानसमं पुण्यं स्नानादत्र
भविष्यति ॥ दुर्गाण्यनेन तरति पुण्यलोकान्समश्नुते ॥ २६ ॥ महत्त्वमश्नुते स्नानाज्जटातीर्थे शुभोदके ॥ जटातीर्थं विना नान्यदंतःकरणशु
द्धये ॥ २७ ॥ विद्यते नियमो वापि जपो वा नान्यदेवता ॥ धन्यं यशस्यमायुष्यं सर्वलोकेषु विश्रुतम् ॥ २८ ॥ पवित्राणां पवित्रं च जटातीर्थं
शुकाधुना ॥ सर्वपापप्रशमनं मंगलानां च मंगलम् ॥ २९ ॥ भृगुर्वै वारुणिः पूर्वं वरुणं पितरं शुक ॥ बुद्धिशुद्धिप्रदोपायमपृच्छत्पावनं शुभम् ॥
प्रोवाच वरुणस्तस्मै बुद्धिशुद्धिप्रदं शुभम् ॥ ३० ॥ ॥ वरुण उवाच ॥ ॥ रामसेतौ भृगो पुण्ये गन्धमादनपर्वते ॥ ३१ ॥ स्नानमात्राज्जटा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे बुद्धिशुद्धिर्भवेद्ध्रुवम् ॥ स पितुर्वचनात्सद्यो भृगुर्वै वरुणात्मजः ॥ ३२ ॥ गत्वा स्नात्वा जटातीर्थे बुद्धिशुद्धिमवाप्तवान् ॥ विनष्टाज्ञानसंतानस्तया शुद्ध्या तदा भृगुः ॥ ३३ ॥ उत्पन्नाद्वैतविज्ञानः स्वपितुर्वरुणादयम् ॥ अखण्डसच्चिदानंदपूर्णाकारोऽभवच्छुक ॥ ३४ ॥ शंकरांशोऽपि दुर्वासा जटातीर्थेऽभिषेकतः ॥ मनःशुद्धिमवाप्याशु ब्रह्मानंदमयोऽभवत् ॥ ३५ ॥ दत्तात्रेयोऽपि विष्ण्वंशस्तीर्थेऽस्मिन्नभिषेचनात् ॥ शुद्धांतःकरणो भूत्वा ब्रह्माकारोऽभवच्छुक ॥ ३६ ॥ इच्छेदज्ञाननाशं यः स स्नायात्तु जटाभिधे ॥ तीर्थे शुद्धतमे पुण्ये सर्वपापविनाशने ॥ ३७ ॥ जटातीर्थमतस्त्वं च शुक गच्छ महामते ॥ मनःशुद्धिप्रदे तस्मिन्स्नानं च कुरु पुण्यदे ॥ ३८ ॥ पित्रैवमुक्तो व्यासेन शुकः पुत्रस्तदा द्विजाः ॥ रामसेतुं महापुण्यं गन्धमादनपर्वतम् ॥ ३९ ॥ अगमत्स्नातुकामः सञ्जटातीर्थे विशुद्धिदे ॥ स्नात्वा संकल्पपूर्वं च जटातीर्थे शुको मुनिः ॥ ४० ॥ मनःशुद्धिमनुप्राप्य तेन चाज्ञाननाशने ॥ स्वस्वरूपं समापन्नः परमानंदरूपकम् ॥ ४१ ॥ ये चाप्यन्ये मनःशुद्धिकामाः संति द्विजोत्तमाः ॥ जटातीर्थे तु ते सर्वे स्नांतु भक्तिपुरःसरम् ॥ ४२ ॥ अहो जना जटातीर्थे कामधेनुसमे शुभे ॥ विद्यमानेऽपि किं तुच्छे रमंतेन्यत्र मोहिताः ॥ ४३ ॥ भुक्तिकामो लभेद्भुक्तिं मुक्तिकामस्तु तां लभेत् ॥ स्नानमात्राज्जटातीर्थे सत्यमुक्तं मया द्विजाः ॥ ४४ ॥ वेदानुवचनात्पुण्याद्यज्ञाद्दानात्तपोव्रतात् ॥ उपवासाज्जपाद्योगान्मनःशुद्धिर्नृणां भवेत् ॥ ४५ ॥ विनाप्येतानि विप्रेंद्रा जटातीर्थेऽतिपावने ॥ स्नानमात्रान्मनःशुद्धिर्ब्राह्मणानां ध्रुवं भवेत् ॥ ४६ ॥ जटातीर्थस्य माहात्म्यं मया वक्तुं न शक्यते ॥ शंकरो वेत्ति तत्तीर्थं हरिर्वेत्ति विधिस्तथा ॥ ४७ ॥ जटातीर्थसमं तीर्थं न भूतं न भविष्यति ॥ जटातीर्थस्य तीरे यः क्षेत्रपिंडं समाचरेत् ॥ ४८ ॥ गयाश्राद्धसमं पुण्यं तस्य स्यान्नात्र संशयः ॥ जटातीर्थे नरः स्नात्वा न पापेन विलिप्यते ॥ दारिद्र्यं न समाप्नोति नेयाच्च नरकार्णवम् ॥ ४९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा जटातीर्थस्य वैभवम् ॥ ५० ॥ यत्र व्याससुतो योगी स्नात्वा पापविमोचने ॥ अवाप्तवान्मनःशुद्धिमद्वैतज्ञानसाधनाम् ॥ ५१ ॥ यस्त्विमं पठतेऽध्यायं शृणुते वा समाहितः ॥ स विधूयेह पापानि लभते वैष्णवं पदम् ॥ ५२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये जटातीर्थप्रशंसायां शुकचित्तशुद्धिवर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ जटातीर्थाभिधे तीर्थे सर्वपातकनाशने ॥ स्नानं कृत्वा विशुद्धात्मा लक्ष्मीतीर्थं ततो व्रजेत् ॥ १ ॥ यंयं कामं समुद्दिश्य लक्ष्मीतीर्थे द्विजोत्तमाः ॥ स्नानं समाचरेन्मर्त्यस्तंतं कामं समश्नुते ॥ २ ॥ महादारिद्र्यशमनं महाधान्यसमृद्धिदम् ॥ महादुःखप्रशमनं महासंपद्विवर्धनम् ॥ ३ ॥ अत्र

CC-0. In Public Domain. Digitization by eGangotri

स्नात्वा धर्मपुत्रो महदैश्वर्यमाप्तवान् ॥ इन्द्रप्रस्थे वसन्पूर्वं श्रीकृष्णेन प्रचोदितः ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ यथैश्वर्यं धर्मपुत्रो लक्ष्मीतीर्थे
निमज्जनात् ॥ आप्तवान्कृष्णवचनात्तन्नो ब्रूहि महामुने ॥ ५ ॥ ॥ श्रीसूत उवाच ॥ ॥ इन्द्रप्रस्थे पुरा विप्रा धृतराष्ट्रेण चोदिताः ॥ न्यवस
न्पांडवाः पंच महाबलपराक्रमाः ॥ ६ ॥ इन्द्रप्रस्थं ययौ कृष्णः कदाचित्तान्निरीक्षितुम् ॥ तमागतमेभिप्रेक्ष्य पांडवास्ते समुत्सुकाः ॥ ७ ॥
स्वगृहं प्रापयामासुर्मुदा परमया युताः ॥ कश्चित्कालमसौ कृष्णस्तत्रावात्सीत्पुरोत्तमे ॥ ८ ॥ कदाचित्कृष्णमाहूय पूजयित्वा युधिष्ठिरः ॥ पप्रच्छ
पुंडरीकाक्षं वासुदेवं जगत्पतिम् ॥ ९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृष्णकृष्ण महाप्राज्ञ येन धर्मेण मानवाः ॥ लभंते महदैश्वर्यं तन्नो ब्रूहि
महामते ॥ इत्युक्तो धर्मपुत्रेण कृष्णः प्राह युधिष्ठिरम् ॥ १० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ धर्मपुत्र महाभाग गन्धमादनपर्वते ॥ ११ ॥ लक्ष्मी
तीर्थमिति ख्यातमस्त्यैश्वर्यैककारणम् ॥ तत्र स्नानं कुरुष्व त्वमैश्वर्यं ते भविष्यति ॥ १२ ॥ तत्र स्नानेन वर्धंते धनधान्यसमृद्धयः ॥ सर्वे
सपत्ना नश्यंति क्षात्रमेषां विवर्द्धते ॥ १३ ॥ तीर्थे सस्नुः पुरा देवा लक्ष्मीनामनि पुण्यदे ॥ अलभन्त्सर्वमैश्वर्यं तेन पुण्येन धर्मज ॥ १४ ॥
असुरांश्च महावीर्यान्समरे जघ्नुरंजसा ॥ मही लक्ष्मीश्च धर्मश्च तत्तीर्थस्नायिनां नृणाम् ॥ १५ ॥ भविष्यंत्यचिरादेव संशयं मा कृथा इह ॥
तपोभिः क्रतुभिर्दानैराशीर्वादैश्च पांडव ॥ १६ ॥ ऐश्वर्यं प्राप्यते यद्वल्लक्ष्मीतीर्थनिमज्जनात् ॥ सर्वपापानि नश्यंति विघ्ना यांति लयं सदा ॥
॥ १७ ॥ व्याधयश्च विनश्यंति लक्ष्मीतीर्थनिषेवणात् ॥ श्रेयः सुविपुलं लोके लभ्यते नात्र संशयः ॥ १८ ॥ स्नानमात्रेण वै लक्ष्म्यास्तीर्थेऽस्मि
न्धर्मनंदन ॥ रंभामप्सरसां श्रेष्ठां लब्धवानवधो नृपः ॥ १९ ॥ स्नात्वात्र तीर्थे पुण्ये तु कुबेरो नरवाहनः ॥ स महापद्ममुख्यानां निधीनां नायकोऽ
भवत् ॥२०॥ तस्मात्त्वमपि राजेंद्र लक्ष्मीतीर्थे शुभप्रदे ॥ स्नात्वा वृकोदरमुखैरनुजैरपि संवृतः ॥२१॥ लप्स्यसे महतीं लक्ष्मीं जेष्यसे च रिपूनपि॥
संदेहो नात्र कर्तव्यः पैतृष्वस्रेय धर्मज ॥२२॥ इत्युक्तो धर्मपुत्रोऽयं कृष्णेनाद्भुतदर्शनः ॥ सानुजः प्रययौ शीघ्रं गन्धमादनपर्वतम् ॥२३॥ लक्ष्मी
तीर्थं ततो गत्वा महदैश्वर्यकारणम् ॥ सस्नौ युधिष्ठिरस्तत्र सानुजो नियमान्वितः॥२४॥लक्ष्मीतीर्थस्य तोये स सर्वपातकनाशने ॥ सानुजो मासमेकं
तु सस्नौ नियमपूर्वकम् ॥२५॥ गोभूतिलहिरण्यादीन्ब्राह्मणेभ्यो ददौ बहून् ॥ सानुजो धर्मपुत्रोऽसाविंद्रप्रस्थं ययौ ततः ॥ २६ ॥ राजसूयक्रतुं

१ नलकूबर–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तुं तत एच्छद्युधिष्ठिरः ॥ कृष्णं समाह्वयामास यियक्षुर्धर्मनंदनः ॥ २७ ॥ कृष्णो धर्मजदूतेन समाहूतः ससंभ्रमः ॥ चतुर्भिरश्वैः संयुक्तं रथमारुह्य वेगिनम् ॥ २८ ॥ सत्यभामासहचर इंद्रप्रस्थं समाययौ ॥ तमागतं समालोक्य प्रमोदाद्धर्मनंदनः ॥ २९ ॥ न्यवेदयत्स कृष्णाय राजसूयोद्यमं तदा ॥ अन्वमन्यत कृष्णोपि तथैव क्रियतामिति ॥ ३० ॥ वाक्यं च युक्तिसंयुक्तं धर्मपुत्रमभाषत ॥ पैतृष्वस्रेय धर्मात्मञ्छृणु पथ्यं वचो मम ॥ ॥ ३१ ॥ दुष्करो राजसूयोऽयं सर्वैरपि महीश्वरैः ॥ अनेकशतपादातरथकुंजरवाजिमान् ॥ ३२ ॥ महीपतिरिमं यज्ञं कर्तुमर्हति नेतरः ॥ दिशो दश विजेतव्याः प्रथमं बलिना त्वया ॥ ३३ ॥ पराजितेभ्यः शत्रुभ्यो गृहीत्वा करमुत्तमम् ॥ तेन कांचनजातेन कर्तव्योऽयं क्रतूत्तमः ॥ ३४ ॥ रोचये युक्तिविदहं न हि त्वां भीषयामि भोः ॥ अतः क्रतुसमारंभात्पूर्वं दिग्विजयं कुरु ॥ ३५ ॥ ततो धर्मात्मजः श्रुत्वा कृष्णस्य वचनं हितम् ॥ प्रशंसन्देवकीपुत्रमाजुहाव निजानुजान् ॥ ३६ ॥ आहूय चतुरो भ्रातॄन्धर्मजः प्राह हर्षयन् ॥ अयि भीम महाबाहो बहुवीर्य धनंजय ॥ ३७ ॥ यमौ च सुकुमारांगौ शत्रुसंहारदीक्षितौ ॥ चिकीर्षामि महायज्ञं राजसूयमनुत्तमम् ॥ ३८ ॥ स च सर्वान्रणे जित्वा कर्तव्यः पृथिवीपतीन् ॥ अतो विजेतुं भूपालांश्चत्वरोऽपि ससैनिकाः ॥ ३९ ॥ दिशश्चतस्रो गच्छंतु भवंतो वीर्यवत्तराः ॥ युष्माभिराहृतैर्द्रव्यैः करिष्यामि महाक्रतुम् ॥ ४० ॥ इत्युक्ताः सादरं सर्वे वृकोदरमुखास्तदा ॥ प्रसन्नवदना भूत्वा धर्मपुत्रानुजाः पुरात् ॥ ४१ ॥ राज्ञां जयाय सर्वासु निर्ययुर्दिक्षु पांडवाः ॥ ते सर्वे नृपतीञ्जित्वा चतुर्दिक्षु स्थितान्बहून् ॥ ४२ ॥ स्ववशे स्थापयित्वा तान्नृपतीन्पांडुनंदनाः ॥ तैर्दत्तं बहुधा द्रव्यमसंख्यातमनुत्तमम् ॥ ४३ ॥ आदाय स्वपुरं तूर्णमाययुः कृष्णसंश्रयाः ॥ भीमः समाययौ तत्र महाबलपराक्रमः ॥ ४४ ॥ शतभारसुवर्णानि समादाय पुरोत्तमम् ॥ सहस्रं भारमादाय सुवर्णानां ततोऽर्जुनः ॥ ४५ ॥ शक्रप्रस्थं समायातो महाबलपराक्रमः ॥ शतभारं सुवर्णानां प्रगृह्य नकुलस्तथा ॥ ४६ ॥ समागतो महातेजाः शक्रप्रस्थं पुरोत्तमम् ॥ दत्तान्विभीषणेनाथ स्वर्णतालांश्चतुर्दश ॥ ४७ ॥ दाक्षिणात्यमहीपानां गृहीत्वा धनसंचयम् ॥ सहदेवोपि सहसा समायातो निजां पुरीम् ॥ ४८ ॥ लक्षकोटिसहस्राणि लक्षकोटिशतान्यपि ॥ सुवर्णानि ददौ कृष्णो धर्मपुत्राय यादवः ॥ ४९ ॥ स्वानुजैराहृतैरेवमसंख्यातैर्महाधनैः ॥ कृष्णदत्तैरसंख्यातैर्धनैरपि युधिष्ठिरः ॥ ५० ॥ कृष्णाश्रयोऽयजद्विप्रा राजसूयेन पांडवः ॥ तस्मिन्यागे ददौ द्रव्यं ब्राह्मणेभ्यो यथेष्टतः ॥ ५१ ॥ अन्नानि प्रददौ तत्र ब्राह्मणेभ्यो युधिष्ठिरः ॥ वस्त्राणि गाश्च भूमिं च भूषणानि ददौ तथा ॥ ५२ ॥ अर्थिनः परितुष्यंति

१ महामतिः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

यावता कांचनादिना ॥ ततोपि द्विगुणं तेभ्यो दापयामास धर्मजः ॥ ५३ ॥ इयंति दत्तान्यर्थिभ्यो धनानि विविधान्यपि ॥ इतीयत्तां परिच्छेतुं न शक्ता ब्रह्मकोटयः ॥ ५४ ॥ अर्थिभिर्दीयमानानि दृष्ट्वा तत्र धनानि वै ॥ सर्वस्वमप्यहो राज्ञा दत्तमित्यब्रवीज्जनः ॥ ५५ ॥ दृष्ट्वा कोशांस्तथा नंतान्नंतमणिकांचनान् ॥ ५६ ॥ स्वल्पं हि दत्तमर्थिभ्य इत्यवोचञ्जनास्तदा ॥ इष्ट्वैवं राजसूयेन धर्मपुत्रः सहानुजः ॥ ५७ ॥ बहुवित्तसमृद्धः सत्रेमे तत्र पुरोत्तमे ॥ लक्ष्मीतीर्थस्य माहात्म्याद्धर्मपुत्रो युधिष्ठिरः ॥ ५८ ॥ लेभे सर्वमिदं विप्रा अहो तीर्थस्य वैभवम् ॥ इदं तीर्थं महापुण्यं महा दारिद्र्यनाशनम् ॥ ५९ ॥ धनधान्यप्रदं पुंसां महापातकनाशनम् ॥ महानरकसंहर्तृ महादुःखनिवर्तकम् ॥ ६० ॥ मोक्षदं स्वर्गदं नित्यं महाऋण विमोचनम् ॥ सुकलत्रप्रदं पुंसां सुपुत्रप्रदमेव च ॥ ६१ ॥ एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥ एतद्वः कथितं विप्रा लक्ष्मीतीर्थस्य वैभवम् ॥ ६२ ॥ दुःस्वप्ननाशनं पुण्यं सर्वाभीष्टप्रसाधकम् ॥ यः पठेदिममध्यायं शृणुते वा सभक्तिकम् ॥ ६३ ॥ धनधान्यसमृद्धः स्यात्स नरो नास्ति संशयः ॥ भुक्त्वेह सकलान्भोगान्देहांते मुक्तिमाप्नुयात् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये लक्ष्मीतीर्थप्रशंसायां धर्मपुत्रनिरतिशयसंपदवाप्तिवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ श्रीसूत उवाच ॥ ॥ लक्ष्मीतीर्थे शुभे पुंसां सर्वैश्वर्यैककारणे ॥ स्नात्वा नरस्ततो गच्छेदग्नितीर्थं द्विजोत्तमाः ॥ १ ॥ अग्नितीर्थं महापुण्यं महापातकनाशनम् ॥ तीर्थानामुत्तमं तीर्थं सर्वाभीष्टैकसाधनम् ॥ तत्र स्नायान्नरो भक्त्या स्वपापपरिशुद्धये ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ अग्नितीर्थमितिख्यातिः कथं तस्य मुनीश्वर ॥ ॥ ३ ॥ कुत्रेदमग्नितीर्थं च कीदृशं तस्य वैभवम् ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ सम्यक्पृष्टं हि युष्माभिः शृणुध्वं मुनिपुंगवाः ॥ पुरा हि राघवो हत्वा रावणं सपरिच्छदम् ॥ ५ ॥ स्थापयित्वा तु लंकायां भर्तारं च बिभीषणम् ॥ सीतासौमित्रिसंयुक्तो रामो दशरथात्मजः ॥ ६ ॥ सिद्धचारणगंधर्वैर्देवैरप्सरसां गणैः ॥ स्तूयमानो मुनिगणैः सत्याशीस्तीर्थकौतुकी ॥ ७ ॥ धारयँल्लीलया चापं रामोऽसह्यपराक्रमः ॥ आत्मनः शुद्धिमाधातुं जानकीं शोधितुं तथा ॥ ८ ॥ इंद्रादिदेववृन्दैश्च मुनिभिः पितृभिस्तथा ॥ बिभीषणेन सहितः सर्वैरपि च वानरैः ॥ ९ ॥ आययौ सेतुमार्गेण गंधमादनपर्वतम् ॥ लक्ष्मीतीर्थतटे स्थित्वा जानकीशोधनाय सः ॥ १० ॥ अग्निमावाहयामास देवर्षिपितृसन्निधौ ॥ अथोत्तस्थौ महांभोधेर्लक्ष्मीतीर्थाद्विदूरतः ॥ ११ ॥ पश्यत्सु सर्वलोकेषु लिहन्नंभांसि पावकः ॥ आताम्रलोचनः पीतः पीत

१ त्यक्ताशीस्तीर्थकोविदैः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासा धनुर्धरः ॥ १२ ॥ सप्तभिश्चैव जिह्वाभिर्लेलिहानो दिशो दश ॥ दृष्ट्वा रघुपतिं शूरं लीलामानुषरूपिणम् ॥ १३ ॥ जगाद वचनं रम्यं जानकीशुद्धिकारणात् ॥ रामराम महाबाहो राक्षसानां भयावह ॥ १४ ॥ पातिव्रत्येन जानक्या रावणं हतवान्भवान् ॥ सत्यंसत्यं पुनः सत्यं नात्र कार्या विचारणा ॥ १५ ॥ कमलेयं जगन्माता लीलामानुषविग्रहा ॥ देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥ १६ ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ॥ यदायदा जगत्स्वामिन्देवदेव जनार्दन ॥ १७ ॥ अवतारान्करोषि त्वं तदेयं त्वत्सहायिनी ॥ यदा त्वं भार्गवो रामस्तदाभूद्धरणी त्वियम् ॥ १८ ॥ अधुना जानकी जाता भवित्री रुक्मिणी ततः ॥ अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥ १९ ॥ तस्मान्मद्वचनादेनां प्रतिगृह्णीष्व राघव ॥ पावकस्य तु तद्वाक्यं श्रुत्वा देवा महर्षयः ॥ २० ॥ विद्याधराश्च गंधर्वा मानवाः पन्नगास्तथा ॥ अन्ये च भूतनिवहा रामं दशरथात्मजम् ॥ २१ ॥ जानकीं मैथिलीं चैव प्रशशंसुः पुनःपुनः ॥ रामोऽग्निवचनात्सीतां प्रतिजग्राह निर्मलाम् ॥ २२ ॥ एवं सीताविशुद्ध्यर्थं रामेणाक्लिष्टकर्मणा ॥ आवाहने कृते वह्निर्लक्ष्मीतीर्थाद्विदूरतः ॥ २३ ॥ यतः प्रदेशादुत्तस्थावंबुधेर्द्विजसत्तमाः ॥ अग्नितीर्थं विजानीत तं प्रदेशमनुत्तमम् ॥ २४ ॥ ततो विनिर्गमादग्नेरग्नितीर्थमितीर्यते ॥ अत्र स्नात्वा नरो भक्त्या वह्नेस्तीर्थे विमुक्तिदे ॥ २५ ॥ उपोष्य वेदविदुषो ब्राह्मणानपि भोजयेत् ॥ तेभ्यो वस्त्रं धनं भूमिं दद्यात्कन्यां च भूषिताम् ॥ २६ ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ अग्नितीर्थस्य कूलेस्मिन्नन्नदानं विशिष्यते ॥ २७ ॥ अग्नितीर्थसमं तीर्थं न भूतं न भविष्यति ॥ दुष्पण्योपि महापापो यत्र स्नानात्पिशाचताम् ॥ २८ ॥ परित्यज्य महाघोरां दिव्यं रूपमवाप्तवान् ॥ पशुमान्नाम वैश्योऽभूत्पुरा पाटलिपुत्रके ॥ २९ ॥ स वै धर्मपरो नित्यं ब्राह्मणाराधने रतः ॥ कृषिं निरंतरं कुर्वन्गोरक्षां चैव सर्वदा ॥ ३० ॥ पण्यवीथ्यां च विक्रीणन्कांचनादीनि धर्मतः ॥ पशुमन्नामधेयस्य वणिक्छ्रेष्ठस्य तस्य वै ॥ ३१ ॥ बभूव भार्यात्रितयं पतिशुश्रूषणे रतम् ॥ ज्येष्ठा त्रीन्सुषुवे पुत्रान्वैश्यवंशविवर्द्धनान् ॥ ३२ ॥ सुपण्यं पण्यवंतं च चारुपण्यं तथैव च ॥ मध्यमा सुषुवे पुत्रौ सुकोशबहुकोशकौ ॥ ३३ ॥ तृतीयायां त्रयः पुत्रास्तस्य वैश्यस्य जज्ञिरे ॥ महापण्यो महाकोशो दुष्पण्य इति विश्रुताः ॥ ३४ ॥ एवं पशुमतस्तस्य वैश्यस्य द्विजसत्तमाः ॥ बभूवुरष्टौ तनयास्तासु स्त्रीषु तिसृष्वपि ॥ ३५ ॥ ते सुपण्यमुखाः सर्वे पुत्रा ववृधिरे क्रमात् ॥ धूलिकेलिं वितन्वंतः पितरौ तोषयंति ते ॥ ३६ ॥ पंचहायनतां प्राप्ताः क्रमात्ते वैश्यनंदनाः ॥ पशुमानपि वैश्येंद्रः सर्वानपि च तान्सुतान् ॥ ३७ ॥ बाल्यमारभ्य सततं

१ जिष्णोः–इ० पा० । २ पाटलपट्टणे–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

स्वकृत्येषु व्यशिक्षयत् ॥ कृषिगोत्राणवाणिज्यकर्मसु क्रमशिक्षिताः ॥ ३८ ॥ सुपण्यमुख्याः सप्तैव पितृवाक्यमश्रृण्वत ॥ पशुमान्वक्ति यत्कार्यं तत्क्ष
णान्निरवर्तयन्॥३९॥नैपुण्यं प्रापुरत्यंतं ते सुवर्णक्रियास्वपि॥ दुष्पण्यस्त्वष्टमः पुत्रो बाल्यमारभ्य संततम्॥४०॥ दुर्मार्गनिरतो भूत्वा नाशृणोत्पितृभा
षितम्॥धूलिकेलिं समारभ्य दुर्मार्गनिरतोऽभवत्॥४१॥स बाल एव सन्पुत्रो बालानन्यानबाधत॥दुष्कर्मनिरतं दृष्ट्वा तं पिता पशुमांस्तथा॥४२॥उपेक्षा
मेव कृतवान्बालिशोऽयमितीरयन् ॥ अथाष्टावपि वैश्यस्य प्रापुर्यौवनमात्मजाः॥४३॥ ततोऽयमष्टमः पुत्रो दुष्पण्यो बलिनां वरः ॥ गृहीत्वा पाणिषु
गलेबालान्नगरवर्तिनः ॥ ४४ ॥ निचिक्षेप स कूपेषु सरित्सु च सरःस्वपि ॥ न कोऽपि तस्य जानाति दुश्चरित्रमिदं जनः ॥ ४५ ॥ यावन्म्रियंते ते
बालास्तावन्निक्षिप्तवाञ्जले ॥ तेषां मृतानां बालानां पितरो मातरस्तथा ॥४६॥ गवेषयंति तान्सर्वान्नगरेषु हि सर्वशः ॥ तान् दृष्ट्वा च मृतान्पुत्रान्के
वलं प्रारुदञ्जनाः ॥ ४७ ॥ जलेष्वथ शवान्दृष्ट्वा जनाश्चक्रुर्यथोचितम् ॥ एवं प्रतिदिनं बालान्दुष्पण्यो मारयन्पुरे ॥ ४८ ॥ जनैरप्यपरिज्ञातश्चिर
मेवमवर्तत ॥ म्रियमाणेषु बालेषु वैश्यपुत्रस्य कर्मणा ॥ ४९ ॥ प्रजानां वृद्धिराहित्याच्छून्यप्रायमभूत्पुरम् ॥ ततः समेत्य पौरास्तद्वृत्तं राज्ञे न्यवेद
यन् ॥ ५० ॥ श्रुत्वा नृपस्तद्वचनमाहूय ग्रामपालकान् ॥ कारणं बालमरणे चिंत्यतामिति सोऽन्वशात् ॥ ५१ ॥ ग्रामपालास्तथेत्युक्त्वा तत्र तत्र
व्यवस्थिताः ॥ सम्यग्गवेषयामासुः कारणं बालमारणे ॥ ५२ ॥ ते वै गवेषयंतोऽपि नाविंदन्बालमारकम् ॥ ते पुनर्नृपमासाद्य भीता वाक्यमथाब्रु
वन् ॥ ५३ ॥ गवेषयंतोऽपि वयं तन्न विंदामहे नृप ॥ यो बालान्नगरे स्थित्वा संततं मारयत्यपि ॥ ५४ ॥ पुनश्च नागराः सर्वे राजानं प्राप्य
दुःखिताः ॥ पुनः प्रजानां मरणमब्रुवन्बाष्पसंकुलाः ॥ ५५ ॥ राजा तत्कारणाज्ञानात्तूष्णीमास्ते विचिंत्य तु ॥ कदाचिद्वैश्यपुत्रोयं पंचभिर्बा
लकैः सह ॥ ५६ ॥ तटाकांतिकमापेदे पंकजाहरणच्छलात् ॥ बलाद्गृहीत्वा तान्बालान्दुष्पण्यः क्रोशतस्तदा ॥ ५७ ॥ क्रूरात्मा मज्जयामास कंठ
दघ्ने सरोजले ॥ मृतान्मत्वा च तान्शीघ्रं दुष्पण्यः स्वगृहं ययौ ॥ ५८ ॥ पञ्चानां पितरस्तेषां मार्गयंतः सुतान्पुरे ॥ तेषु वै मार्गमाणेषु पंच तेना
तिबालकाः ॥ ५९ ॥ निक्षिप्ता अपि तोयेषु नाम्रियंत यदृच्छया ॥ ते शनैः कूलमासाद्य पंचापि क्लिन्नमौलयः ॥ ६० ॥ अशक्ता नगरं गंतुं
बाल्यात्तत्रैव बभ्रमुः ॥ दूरादुच्चार्यमाणानि स्वनामानि स्वबंधुभिः ॥ ६१ ॥ श्रुत्वा पंचापि ते बालाः प्रतिशब्दमकुर्वत ॥ ततस्तत्पितरः श्रुत्वा
तत्रागत्य सरस्तटे ॥ ६२ ॥ पुत्रान्दृष्ट्वा तु सप्राणान्प्रहर्षमतुलं गताः ॥ किमेतदिति पित्राद्यैः पृष्टास्ते बालकास्तदा ॥ ६३ ॥ दुष्पण्यस्याथ
दुष्कृत्यं बन्धुभ्यस्ते न्यवेदयन् ॥ ततो विदितवृत्तांता राजानं प्राप्य नागराः ॥ ६४ ॥ पंचभिः कथितं वृत्तं दुष्पण्यस्य न्यवेदयन् ॥ ततो राजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहूय पशुमंतं वणिग्वरम् ॥ पौरेष्वपि च शृण्वत्सु वाक्यमेतदभाषत ॥ ६५ ॥ ॥ राजोवाच ॥ ॥ दुष्पण्यनाम्ना पशुमन्बहुप्रजमिदं पुरम् ॥ ६६ ॥ शून्यप्रायं कृतं पश्य त्वत्पुत्रेण दुरात्मना ॥ इदानीं बालिशानेतान्मज्जयामास वै जले ॥ ६७ ॥ यदृच्छया च सप्राणाः पुनरप्या गताः पुरम् ॥ अस्मिन्नित्थं गते कार्ये किं कर्तव्यं वदाधुना ॥ ६८ ॥ अद्य त्वामेव पृच्छामि यतस्त्वं धर्मतत्परः ॥ इत्युक्तः पशुमान्राज्ञा धर्मज्ञो युक्तमब्रवीत् ॥ ६९ ॥ ॥ पशुमानुवाच ॥ ॥ पुरं निःशेषितं येन वधमेवायमर्हति ॥ न ह्यत्र विषये किंचित्प्रष्टव्यं विद्यते नृप ॥ ७० ॥ न ह्ययं मम पुत्रः स्याच्छत्रुरेवातिपापकृत् ॥ न ह्यस्य निष्कृतिं पश्ये येन निःशेषितं पुरम् ॥ ७१ ॥ वध्यतामेव दुष्टात्मा सत्यमेव ब्रवीम्यहम् ॥ श्रुत्वा पशुमतो वाक्यं नागराः सर्व एव हि ॥ ७२ ॥ वणिग्वरं श्लाघमाना राजानमिदमूचिरे ॥ न वध्यतामयं दुष्टस्तूष्णीं निर्वास्यतां पुरात् ॥ ७३ ॥ ततः स राजा दुष्पण्यं समाहूयेदमब्रवीत् ॥ अस्माद्देशाद्व्रवाञ्छीघ्रं दुष्टात्मन्गच्छ सांप्रतम् ॥ ७४ ॥ यदि तिष्ठेस्त्वमत्रैव दण्डयेयं वधेन वै ॥ इति राज्ञा विनिर्भर्त्स्य दूतैर्निर्वासितः पुरात् ॥ ७५ ॥ दुष्पण्यस्त्वथ तं देशं परित्यज्य भयान्वितः ॥ मुनिमंडलसंबाधं वनमेव ययौ तदा ॥ ७६ ॥ तत्राप्येकं मुनिसुतं स तोयेषु न्यमज्जयत् ॥ केल्यर्थमागता दृष्ट्वा मुनिपुत्रा मृतं शिशुम् ॥ ७७ ॥ तत्पित्रे कथयामासुरभ्येत्य भृशदुःखिताः ॥ तत उग्रश्रवाः श्रुत्वा तेभ्यः पुत्रं जले मृतम् ॥ ७८ ॥ तपोमहिम्ना दुष्पण्यचरितं तदमन्यत ॥ उग्रश्रवाः शशापैनं दुष्पण्यं वैश्यनंदनम् ॥ ७९ ॥ ॥ उग्रश्रवा उवाच ॥ ॥ मत्सुतं पयसि क्षिप्य यत्त्वं मारितवानसि ॥ तवापि मरणं भूयाज्जल एव निमज्जनात् ॥ ८० ॥ मृतश्च सुचिरं कालं पिशाचस्त्वं भविष्यसि ॥ इति शापे श्रुते सद्यो दुष्पण्यः खिन्नमानसः ॥ ८१ ॥ तद्वै वनं परित्यज्य घोरमन्यद्वनं ययौ ॥ सिंहादिक्रूरसत्वाढ्यं तस्मिन्प्राप्ते वनांतरम् ॥ ८२ ॥ पांसुवर्षं महद्वर्षन्वृक्षानामोटयन्मुहुः ॥ वज्रवातसमस्पर्शो ववौ झंझानिलो महान् ॥ ८३ ॥ वेगेन गात्रं भिंदन्ती वृष्टिश्चासीत्सुदुःसहा ॥ तद्दृष्ट्वा स तु दुष्पण्यश्चिंतयन्भृशदुःखितः ॥ ८४ ॥ मृतं शुष्कं महाकायं गजमेकमपश्यत ॥ महावातं महावर्षं तदा सोढुमशक्नुवन् ॥ ८५ ॥ गजास्यविवरेणैव विवेशोदरगह्वरम् ॥ तस्मिन्प्रविष्टमात्रे तु वृष्टिरासीत्सुभूयसी ॥ ८६ ॥ ततो वर्षजलैः सर्वैः प्रवाहः सुमहानभूत् ॥ स प्रवाहो वने तस्मिन्नदी काचिदजायत ॥ ८७ ॥ अथ तैर्वर्षसलिलैः स गजः पूरितोदरः ॥ प्लवमानो महापूरे नीरंध्रः समजायत ॥ ८८ ॥ ततो निर्विवरस्यास्य जलपूर्णोदरस्य च ॥ गजस्य जठरात्सोऽयं निर्गंतुं न शशाक ह ॥ ८९ ॥ ततश्च वृष्टितोयानां प्रवाहो भीमवेगवान् ॥ उदरस्थितदुष्पण्यं समुद्रं प्रापयद्गजम् ॥ ९० ॥ दुष्पण्यः

CC-0. In Public Domain. Digitization by eGangotri

सलिले मग्नः क्षणात्प्राणैर्व्यमुज्यत ॥ मृत एव स दुष्पण्यः पिशाचत्वमवाप्तवान् ॥ ९१ ॥ पीडितः क्षुत्पिपासाभ्यां दुर्गमं वनमाश्रितः ॥ घोरेषु घर्मकालेषु समाक्रोशन्भयानकम् ॥ ९२ ॥ अतिष्ठद्दहनेऽरण्ये दुःखान्यनुभवन्बहु ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ ९३ ॥ स पिशाचो महादुःखी न्यवसद्घोरकानने ॥ वनाद्वनांतरं धावन्देशाद्देशांतरं तथा ॥ ९४ ॥ सर्वत्रानुभवन्दुःखमाययौ दण्डकान्क्रमात् ॥ अगस्त्यादाश्रमात्पुण्यान्नातिदूरे स संचरन् ॥ ९५ ॥ नदन्भैरवनादं च वाक्यमुच्चैरभाषत ॥ भोभोस्तपोधनाः सर्वे शृणुध्वं मामकं वचः ॥ ९६ ॥ भवन्तो हि कृपावन्तः सर्वभूतहिते रताः ॥ कृपादृष्ट्यानुगृह्णीत मां दुःखैरतिपीडितम् ॥ ९७ ॥ पुरा दुष्पण्यनामाहं वैश्यः पाटलिपुत्रके[1] ॥ पुत्रः पशुमतश्चापि बहून्बालानमारयम् ॥ ९८ ॥ ततो विवासितो राज्ञा तस्माद्देशाद्वनं गतः ॥ अमारयं जले पुत्रं तत्रोग्रश्रवसो मुनेः ॥ ९९ ॥ स मुनिर्दत्तवाञ्छापं ममापि मरणं जले ॥ पिशाचतां च मे घोरां दत्तवान्दुःखभूयसीम् ॥ १०० ॥ कल्पकोटिसहस्राणि कल्पकोटिशतान्यपि ॥ पिशाचतानुभूतेयं शून्यकाननभूमिषु ॥ १०१ ॥ नाहं सोढुं समर्थोऽस्मि पिपासां क्षुधमेव च ॥ रक्षध्वं कृपया यूयमतो मां बहुदुःखिनम् ॥ १०२ ॥ यथा मुच्येय पैशाच्यात्तथा कुरुत तापसाः ॥ इति श्रुत्वा पिशाचस्य वचनं ते तपोधनाः ॥ लोपामुद्रासहचरमूचिरे कुम्भसंभवम् ॥ ३ ॥ ॥ तापसा ऊचुः ॥ ॥ पिशाचस्यास्य भगवन्ब्रूहि निष्कृतिमुत्तमाम् ॥ ४ ॥ एवंविधानां पापानां त्वं समर्थो हि रक्षणे ॥ तेषामगस्त्यः श्रुतवान्कृपया परया युतः ॥ प्रियशिष्यं समाहूय सुतीक्ष्णं वाक्यमब्रवीत् ॥ ५ ॥ ॥ अगस्त्य उवाच ॥ ॥ सुतीक्ष्ण गच्छ त्वरितं पर्वतं गंधमादनम् ॥ ६ ॥ तत्राग्नितीर्थं सुमहद्विद्यते पापनाशनम् ॥ पिशाचमोक्षणार्थाय तत्र स्नाहि महामते ॥ ७ ॥ पिशाचार्थं त्वयि स्नाते तत्र संकल्पपूर्वकम् ॥ पिशाचभावमुन्मुच्य दिव्यतामेष यास्यति ॥ ८ ॥ निष्कृतिं नास्य पश्यामि[3] विना तत्तीर्थसेवनात् ॥ अतः सुतीक्ष्ण कृपया रक्षस्वैनं पिशाचकम् ॥ ९ ॥ अगस्त्येनैवमुक्तस्तु सुतीक्ष्णो गन्धमादनम् ॥ प्राप्याग्नितीर्थे संकल्प्य पिशाचार्थं कृपानिधिः ॥ ११० ॥ सस्नौ तत्र पिशाचार्थं नियमेन दिनत्रयम् ॥ रामनाथादिकं सेव्य तत्तीर्थं प्रतिगृह्य च ॥ ११ ॥ स्वाश्रमं प्रति गत्वाथ सुतीक्ष्णो विप्रसत्तमः ॥ तत्तीर्थप्रोक्षणात्सद्यः स विसृज्य पिशाचताम् ॥ १२ ॥ वैभवात्तस्य तीर्थस्य सद्यो दिव्यत्वमाप्तवान् ॥ विमानवरमारूढो दिव्यस्त्रीपरिवारितः ॥ १३ ॥ सुतीक्ष्णं चाप्यगस्त्यं च तथान्यांश्च तपोधनान् ॥ पुनःपुनर्नमस्कृत्य तांश्चामंत्र्य प्रहर्षितः ॥ १४ ॥ स्वर्गमेवारुहत्तूर्णं देवैरपि स पूजितः ॥

१ पाटलपट्टणे–इ० पा० । २ लोकानाम्–इ० पा० । ३ नात्र पापस्य–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नितीर्थस्य माहात्म्याद्दुष्पण्यो वैश्यनंदनः ॥ १९ ॥ पैशाच्यं शापजं त्यक्त्वा दिव्यतामित्थमाप्तवान् ॥ एवं वः कथितं विप्रा अग्नितीर्थस्य वैभवम् ॥ ११६ ॥ यः पठेदिममध्यायं शृणुयाद्वा सं[1]भक्तिकम् ॥ पिशाचमोक्षणाख्यानं मुच्यते सर्वपातकैः ॥ ११७ ॥ इह भुक्त्वा महाभोगान्परत्रापि सुखं लभेत् ॥ ११८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्येऽग्नितीर्थप्रशंसायां दुष्पण्यपैशाच्यमोक्षणंनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्रीसूत उवाच ॥ ॥ अग्नितीर्थाभिधे तीर्थे सर्वपातकनाशने ॥ स्नानं कृत्वा विशुद्धात्मा चक्रतीर्थं ततो व्रजेत् ॥ १ ॥ यंयं कामं समुद्दिश्य चक्रतीर्थे द्विजोत्तमाः ॥ स्नानं समाचरेन्मर्त्यस्तंतं कामं समश्नुते ॥ २ ॥ पुराहिर्बुध्न्यनामा तु महर्षिः संशितव्रतः ॥ सुदर्शनमुपास्तास्मिंस्तपस्वी गंधमादने ॥ ३ ॥ तपस्यंतं मुनिं तत्र राक्षसा घोररूपिणः ॥ अबाधंत सदा विप्रास्तपोविघ्नैकतत्पराः ॥ ॥ ४ ॥ सुदर्शनं तदागत्य भक्तरक्षणवांछया ॥ यातुधानान्बाधमानान्व्यवधीर्लीलया पुरा ॥ ५ ॥ तदाप्रभृति तच्चक्रं भक्तप्रार्थनया द्विजाः ॥ अहिर्बुध्न्यकृते तीर्थे सन्निधानं सदाऽकरोत् ॥ ६ ॥ तदाप्रभृति तत्तीर्थं चक्रतीर्थमितीर्यते ॥ सुदर्शनप्रसादेन तत्र तीर्थे निमज्जनात् ॥ ७ ॥ रक्षःपिशाचादिकृता पीडा नास्त्येव कर्हिचित् ॥ स्नात्वास्मिन्पावने तीर्थे छिन्नपाणिः पुरा रविः ॥ स हिरण्मयौ पाणी लब्धवांस्तीर्थवैभवात् ॥ ८ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ छिन्नपाणिः कथमभूदादित्यः सूतनंदन ॥ यथा च लब्धवान्पाणी सौवर्णौ तद्वदस्व नः ॥ ९ ॥ ॥ श्रीसूत उवाच ॥ इंद्रादयः सुराः पूर्वं संततं दैत्यपीडिताः ॥ १० ॥ किं कुर्म इति संचित्य संभूय सममंत्रयन् ॥ बृहस्पतिं पुरस्कृत्य मंत्रयित्वा चिरं सुराः ॥ ११ ॥ तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥ ते ब्रह्माणं समासाद्य दृष्ट्वा स्तुत्वा च भक्तितः ॥ १२ ॥ ततो व्यजिज्ञपंस्तस्मै स्वेषामागमकारणम् ॥ ॥ ॥ सुरा ऊचुः ॥ ॥ भगवन्भारतीनाथ दैत्या ह्यस्मान्बलो[2]त्कटाः ॥ १३ ॥ बांधते सततं देव तत्र ब्रूहि प्रतिक्रियाम् ॥ इत्युक्तः स सुरैर्ब्रह्मा तानाह कृपया वचः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ माभैष्ट यूयं विबुधास्तत्रोपायं ब्रवीम्यहम् ॥ माहेश्वरं महायज्ञमसुराणां विनाशनम् ॥ ॥ १५ ॥ प्रारभध्वं सुरा यूयं मुनिभिस्तत्त्वदर्शिभिः ॥ अयं च दैवतैः सर्वैर्विधिलोभं विना कृतः ॥ १६ ॥ माहेश्वरो महायज्ञः क्रियतां गंधमादने ॥ यदि ह्यन्यत्र तं यज्ञं कुर्युस्तद्विबुधर्षभाः ॥ १७ ॥ यज्ञविघ्नं तदा कुर्युर्दुरात्मानः सुरद्विषः ॥ क्रियते यद्ययं यज्ञो गंधमादनपर्वते ॥ १८ ॥ सुदर्शनप्रसादेन नैव विघ्नो भवेत्तदा ॥ अहिर्बुध्न्याभिधानस्य महर्षेर्गंधमादने ॥ १९ ॥ अनुग्रहाय तत्तीर्थे सन्निधत्ते सुदर्शनम् ॥ अतः कुरुध्वं भो

१ समाहितः–इ० पा० । २ भवन्तः–इति शेषः । भवन्तः कुर्युः–इति संबंधः ।

CC-0. In Public Domain. Digitization by eGangotri

यूयं तं यज्ञं गंधमादने ॥ २० ॥ नातिदूरे चक्रतीर्थादसुराणां विनाशकम् ॥ ततस्ते ब्रह्मवचसा सहसा गंधमादनम् ॥ २१ ॥ बृहस्पतिं पुरस्कृत्य जग्मुर्यज्ञचिकीर्षया ॥ ते प्रणम्य महात्मानमहिर्बुध्न्यं मुनीश्वरम् ॥२२॥ अकल्पयन्यज्ञवाटन्नातिदूरे तदाश्रमात् ॥ यज्ञकर्मसु निष्णातैः सहितास्ते तपोधनैः ॥ २३ ॥ इष्टिमारेभिरे देवा असुराणां विनाशिनीम् ॥ तस्मिन्कर्मणि होतासीत्स्वयमेव बृहस्पतिः ॥ २४ ॥ बभूव मैत्रावरुणो जयंतः पाकशासनिः ॥ अच्छावाको बभूवात्र वसूनामष्टमो वसुः ॥ २५ ॥ ग्रांवस्तुदभवत्तत्र शक्तिपुत्रः पराशरः ॥ अष्टावक्रो महातेजा अध्वर्युधुरमूढवान् ॥ ॥ २६ ॥ तत्र प्रतिप्रस्थाताभूद्विश्वामित्रो महामुनिः ॥ नेष्टा बभूव वरुण उन्नेता च धनेश्वरः ॥ २७ ॥ ब्रह्मा बभूव सविता यज्ञस्यार्धधुरं वहन् ॥ बभूव ब्राह्मणाच्छंसी वसिष्ठो ब्रह्मणोत्तमः ॥ २८ ॥ आग्नीध्रोऽभूच्छुनःशेपः पोता जातश्च पावकः ॥ उद्गाता वायुरभवत्प्रस्तोता च परेतराट् ॥ ॥ २९ ॥ प्रतिहर्ता तु तत्रासीदगस्त्यः कुंभसंभवः ॥ सुब्रह्मण्यो मधुच्छंदा विश्वामित्रात्मजो महान् ॥ ३० ॥ यजमानः स्वयमभूद्देवराजः पुरंदरः ॥ उपद्रष्टा बभूवात्र व्यासपुत्रः शुको मुनिः ॥ ३१ ॥ ततस्ते ऋत्विजः सर्वे देवराजं पुरंदरम् ॥ विधिवद्दीक्षयांचक्रुस्तत्र माहेश्वरे क्रतौ ॥३२॥ प्रावर्तत महायज्ञ एवं वै गंधमादने ॥ सुदर्शनप्रभावेन दुःसहेनातिपीडिताः ॥ ३३ ॥ नाविंदन्नसुरास्तत्र रंध्रं यज्ञे प्रवर्तिते ॥ एवन्निरंतरायोऽसौ प्रावर्तत महा क्रतुः ॥ ३४ ॥ भक्षयंश्च हविस्तत्र जज्वाल हुतवाहनः ॥ विधिवत्कर्मजालानि कृत्वाध्वर्युरसंभ्रमात् ॥ ३५ ॥ मंत्रपूतं पुरोडाशं जुहवामास पावके ॥ हुतशेषं पुरोडाशं विभज्याध्वर्युरादरात् ॥ ३६ ॥ ऋत्विग्भ्यो होतृमुख्येभ्यः प्रददौ पापनाशनम् ॥ सवित्रे ब्रह्मणे चैकमत्युग्रतरतेजसम् ॥ ॥ ३७ ॥ ददौ तत्र पुरोडाशभागं प्राशित्रनामकम् ॥ प्रतिजग्राह पाणिभ्यां प्राशित्रं सविता तदा ॥ ३८ ॥ सवित्रा स्पृष्टमात्रं सत्तत्प्राशित्रं दुरासदम् ॥ तस्य पाणी प्रचिच्छेद पश्यतां सर्वऋत्विजाम् ॥ ३९ ॥ ततः संछिन्नपाणिः स प्राशित्रेणोग्रतेजसा ॥ किमेतदिति संत्रस्तो विषण्णवदनोऽभवत् ॥ ४० ॥ सविता ऋत्विजः सर्वान्समाहूयेदमब्रवीत् ॥ सवितोवाच ॥ पुरोडाशस्य भागोऽयं मम प्राशित्रनामकः ॥ ४१ ॥ दत्तश्चिच्छेद मत्पाणी मिषतस्त्वेव भवत्स्वपि ॥ अतो भवंतः संभूय सर्वे एव हि ऋत्विजः ॥ ४२ ॥ कल्पयंतामिमौ पाणी नोचेद्यज्ञं निहन्म्यमुम् ॥ सवितुर्वाक्यमाकर्ण्य ते सर्वे समचिंतयन् ॥ ४३ ॥ तत्र मध्ये मुनींद्राणां देवानां चैव सर्वशः ॥ अष्टावक्रो महातेजा ऋत्विजस्तानभाषत ॥ ४४ ॥ ॥ अष्टावक्र उवाच ॥ ॥ शृणुध्वमृत्विजः सर्वे मम वाक्यं समाहिताः ॥ मयि जीवति विप्रेंद्रा विरिं

१ ग्रांवस्तुत्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चानां शतं गतम् ॥ ४५ ॥ जायंते च म्रियंते च चतुराननकोटयः ॥ पश्यन्नेव च तान्सर्वानहं प्राणानधारयम् ॥ ४६ ॥ तत्र लोकेश्वराभिख्ये वर्तमाने प्रजापतौ ॥ विप्रो हरिहरोनाम निवसञ्छ्यामलापुरे ॥ ४७ ॥ व्याधेनारण्यवासेन केल्यर्थं लक्ष्यवेधिना ॥ छिन्नपादोऽभवद्बाणैर्लक्ष्य मध्यं समागतः ॥ ४८ ॥ स गंधमादनं प्राप्य मुनिभिः प्रेरितस्तदा ॥ स्नात्वा च मुनितीर्थेऽस्मिन्प्राप्तवांश्चरणौ पुरा ॥ ४९ ॥ तदा पुण्यमिदं तीर्थं मुनितीर्थमितीरितम् ॥ इदानीं चक्रतीर्थाख्यं चक्रनाम त्वविंदत ॥ ५० ॥ तदत्र क्रियतां स्नानं प्राशित्रच्छिन्नपाणिना ॥ मुनितीर्थे सवित्रापि युष्माकं यदि रोचते ॥ ५१ ॥ ऋत्विजः कथितास्त्वेवमष्टावक्रमहर्षिणा ॥ सवितारमभाषंत सर्व एव प्रहर्षिताः ॥ ५२ ॥ सवितः स्नाहि तीर्थेऽस्मिंस्तव पाणी भविष्यतः ॥ अष्टावक्रो यथा प्राह तथा कुरु समाहितः ॥ ५३ ॥ ततः स सविता गत्वा चक्रतीर्थं महत्तरम् ॥ सस्नौ पाण्योरवाप्त्यर्थमिष्टदायिनि तत्र सः ॥ ५४ ॥ उत्तिष्ठन्नेव स तदा तत्र स्नात्वा सभक्तिकम् ॥ युक्तो हिरण्मयाभ्यां तु पाणिभ्यां समदृश्यत ॥ ५५ ॥ हिरण्य पाणिं तं दृष्ट्वा जहृषुः सर्वऋत्विजः ॥ ततः समाप्य तं यज्ञं दैत्यसंघान्विजित्य च ॥ ५६ ॥ इंद्रादयः सुराः सर्वे सुखिताः स्वर्गमाययुः ॥ तस्मादेतत्समागत्य तीर्थं सर्वैश्च मानवैः ॥ ५७ ॥ सेवनीयं प्रयत्नेन स्वस्वाभीष्टस्य सिद्धये ॥ अंधैश्च कुणिभिर्मूकैर्बधिरैः कुब्जकैरपि ॥ ५८ ॥ खंजैः पंगुभिरप्येतदंगहीनैस्तथापरैः ॥ संछिन्नपाणिचरणैः संछिन्नान्यांगसंचयैः ॥ ५९ ॥ मनुष्यैश्च तथान्यैश्च विकलांगस्य पूर्तये ॥ सेवनीयमिदं तीर्थं सर्वाभीष्टप्रदायकम् ॥ ६० ॥ एवं वः कथितं विप्राश्चक्रतीर्थस्य वैभवम् ॥ यत्र स्नात्वा पुरा छिन्नौ पाणी प्राप प्रभाकरः ॥ ६१ ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ अंगानि विकलान्यस्य पूर्णानि स्युर्न संशयः ॥ ६२ ॥ मोक्षकामस्य मर्त्यस्य मुक्तिः स्यान्नात्र संशयः ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये चक्रतीर्थप्रशंसायामादित्यहिरण्मयपाण्यवाप्तिवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ चक्रतीर्थे नरः स्नात्वा शिवतीर्थं ततो व्रजेत् ॥ यत्र हि स्नानमात्रेण महापातककोटयः ॥ १ ॥ तत्संसर्गाश्च नश्यंति तत्क्षणादेव तापसाः ॥ अत्र स्नात्वा ब्रह्महत्यां मुमुचे कालभैरवः ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ कालभैरवरुद्रस्य ब्रह्महत्या महामुने ॥ किमर्थमभवत्सूत तन्नो वक्तुमिहार्हसि ॥ ३ ॥ ॥ श्रीसूत उवाच ॥ ॥ वक्ष्यामि मुनयः सर्वे पुरावृत्तं विमुक्तिदम् ॥ यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ४ ॥ प्रजापतेश्च विष्णोश्च बभूव कलहः पुरा ॥ किंचित्कारणमुद्दिश्य समस्तजनसन्निधौ ॥ ५ ॥ अहमेव जगत्कर्ता नान्यः कर्तास्ति कश्चन ॥ अहं सर्वप्रपंचानां निग्रहानुग्रहप्रदः ॥ ६ ॥ मत्तो नास्त्यधिकः कश्चिन्मत्समो वा सुरेष्वपि ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स मनुते ब्रह्मा देवानां सन्निधौ पुरा ॥ ७ ॥ तदा नारायणः प्राह प्रहसन्द्विजपुंगवाः ॥ किमर्थमेवं ब्रूषे त्वमहंकारेणसां प्रतम् ॥ ८ ॥ वाक्यमेवं
विधं भूयो वक्तुं नार्हसि वै विधे ॥ अहमेव जगत्कर्ता यज्ञो नारायणो विभुः ॥ ९ ॥ मां विनास्य प्रपञ्चस्य जीवनं दुर्लभं भवेत् ॥ मत्प्रसादाज्ज
गत्सृष्टं त्वया स्थावरजंगमम् ॥ १० ॥ विवादं कुर्वतोरेवं ब्रह्मविष्ण्वोर्जयैषिणोः ॥ देवानां पुरतस्तत्र वेदाश्चत्वार आगताः ॥ प्रोचुर्वाक्यमिदं तथ्यं
परमार्थप्रकाशकम् ॥ ११ ॥ ॥ वेदा ऊचुः ॥ ॥ त्वं विष्णो न जगत्कर्ता न त्वं ब्रह्मन्प्रजापते ॥ १२ ॥ किं त्वीश्वरो जगत्कर्ता परात्परतरो विभुः ॥
तन्मायाशक्तिसंक्लृप्तमिदं स्थावरजंगमम् ॥ १३ ॥ सर्वदेवाभिवंद्यो हि सांबः सत्यादिलक्षणः ॥ स्रष्टा च पालको हर्ता स एव जगतां प्रभुः ॥ १४ ॥
एवं समीरितं वेदैः श्रुत्वा वाक्यं शुभाक्षरम् ॥ ब्रह्मा विष्णुस्तदा तत्र प्रोचतुर्द्विजपुंगवाः ॥ १५ ॥ ॥ ब्रह्मविष्णू ऊचतुः ॥ ॥ पार्वत्यालिंगितः शंभुर्मूर्तिमान्प्रमथा
धिपः ॥ कथं भवेत्परं ब्रह्म सर्वसंगविवर्जितम् ॥ १६ ॥ ताभ्यामितीरिते तत्र प्रणवः प्राह तौ तदा ॥ अरूपो रूपमादाय महता ध्वनिना द्विजाः ॥ १७ ॥
॥ ॥ प्रणव उवाच ॥ ॥ असौ शंभुर्महादेवः पार्वत्या स्वातिरिक्तया ॥ संक्रीडते कदाचिन्नो किं तु स्वात्मस्वरूपया ॥ १८ ॥ असौ शंभुर
नीशानः स्वप्रकाशो निरंजनः ॥ विश्वाधिको महादेवो विश्वाधिक इति श्रुतः ॥ १९ ॥ सर्वात्मा सर्वकर्तासौ स्वतन्त्रः सर्वभावनः[1] ॥ ब्रह्मन्नयं
सृष्टिकाले त्वां नियुंक्ते रजोगुणैः ॥ २० ॥ सत्त्वेन रक्षणे शंभुस्त्वां प्रेषयति केशव ॥ तमसा कालरुद्राख्यं संप्रेरयति संहृतौ ॥ २१ ॥ अतः
स्वतन्त्रता विष्णो युवयोर्न कदाचन ॥ नापि प्रजापतेरस्ति किं तु शंभोः स्वतन्त्रता ॥ २२ ॥ ब्रह्मन्विष्णो युवाभ्यां तु किमर्थं न महेश्वरः ॥
ज्ञायते सर्वलोकानां कर्ता विश्वाधिकस्तथा ॥ २३ ॥ सापि शक्तिरुमा देवी न पृथक्छंकरात्सदा ॥ शंभोरानंदभूता सा देवी नागंतुकी स्मृता ॥
॥ २४ ॥ अतो विश्वाधिको रुद्रः स्वतंत्रो निर्विकल्पकः ॥ सर्वदेवैरयं[2] वन्द्यो युवाभ्यामपि शंकरः ॥ २५ ॥ कर्ता नास्यास्ति रुद्रस्य नाधिकोऽ
स्माच्च विद्यते ॥ न तत्समोऽपि लोकेषु विद्यते शतशस्तथा[3] ॥ २६ ॥ अतो मोहं न कुरुतं ब्रह्मविष्णो युवां वृथा ॥ इत्युक्तं प्रणवेनाथ श्रुत्वा ब्रह्मा
च केशवः ॥ २७ ॥ मायया मोहितौ शंभोर्नैवाज्ञानममुंचताम् ॥ एतस्मिन्नंतरे ब्रह्मा प्रददर्श महाद्भुतम् ॥ २८ ॥ व्याप्नुवद्गगनं सर्वमनंतादित्य
सन्निभम् ॥ तेजोमण्डलमाकाशमध्यगं विश्वतोमुखम् ॥ २९ ॥ तन्निरूपयितुं ब्रह्मा ससर्जोर्ध्वगतं मुखम् ॥ तपोबलविसृष्टेन पंचमेन मुखेन सः ॥
॥ ३० ॥ निरूपयामास विभुस्तत्तेजोमण्डलं मुहुः ॥ तत्प्रजज्वाल कोपेन मुखं तेजोविलोकनात् ॥ ३१ ॥ अनंतादित्यसंकाशं ज्वलत्तत्पंचमं

१ सर्वभासकः--इ० पा० । २ देवदेवैः--इ० पा० । ३ सर्वदा तदा--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

शिरः ॥ दिधक्षुः प्रलये लोकान्वडवाग्निरिवाबभौ ॥ ३२ ॥ व्यदृश्यत च तत्तेजः पुरुषो नीललोहितः ॥ दृष्ट्वा स्रष्टा तदा ब्रह्मा बभाषे परमेश्वरम् ॥ ३३ ॥ वेदाहं त्वां महादेव ललाटान्मे पुरा भवान् ॥ विनिर्गतोऽसि शंभो त्वं रुद्रनामा ममात्मजः ॥ ३४ ॥ इति गर्वेण संयुक्तं वचः श्रुत्वा महेश्वरः ॥ कालभैरवनामानं पुरुषं प्राहिणोत्तदा ॥ ३५ ॥ अयुद्ध्यत चिरं कालं ब्रह्मणा कालभैरवः ॥ महादेवांशसंभूतः शूलटंकगदाधरः ॥ ॥ ३६ ॥ युद्ध्वा तु सुचिरं कालं ब्रह्मणा कालभैरवः ॥ वदनं ब्रह्मणः शुभ्रं व्यलोकयत पंचमम् ॥ ३७ ॥ विलोक्योर्ध्वगतं वक्त्रं पञ्चमं भारतीपतेः ॥ गर्वेण महता युक्तं प्रजज्वालातिकोपितः ॥ ३८ ॥ ततस्तत्पंचमं वक्त्रं भैरवः प्राच्छिनद्रुषा ॥ ततो ममार ब्रह्माऽसौ कालभैरवहिंसितः ॥ ॥ ३९ ॥ ईश्वरस्य प्रसादेन प्रपेदे जीवितं पुनः ॥ ततो विलोकयामास शंकरं शशिभूषणम् ॥ ४० ॥ वासुक्याद्यष्टभोगींद्रविभूषणविभूषितम् ॥ दृष्ट्वा वेधा महादेवं पार्वत्या सह शंकरम् ॥ ४१ ॥ लेभे माहेश्वरं ज्ञानं महादेवप्रसादतः ॥ ततस्तुष्टाव गिरिशं वरेण्यं वरदं शिवम् ॥ ४२ ॥

॥ ब्रह्मोवाच ॥

॥ मह्यं प्रसीद गिरिश शशांककृतशेखर ॥ यन्मयापकृतं शंभो तत्क्षमस्व दयानिधे ॥ ४३ ॥ क्षमस्व मम गर्वं त्वं शंकरेति पुनःपुनः ॥ नमश्चकार सोमं[१] तं सोमार्धकृतशेखरम् ॥ ४४ ॥ अथ देवः प्रसन्नोऽस्मै ब्रह्मणे स्वांशजाय तु ॥ मा भैरित्यब्रवीच्छंभुर्भैरवं चाभ्यभाषत ॥ ४५ ॥

॥ ईश्वर उवाच ॥

॥ एष सर्वस्य जगतः पूज्यो ब्रह्मा सनातनः ॥ हतस्यास्य विरिंचस्य धारय त्वं शिरोऽधुना ॥ ४६ ॥ ब्रह्महत्याविशुद्ध्यर्थं लोकसंग्रहकाम्यया ॥ भिक्षामट कपालेन भैरव त्वं ममाज्ञया ॥ ४७ ॥ उक्त्वैवं शंकरो विप्रास्तत्रैवांतरधीयत ॥ नीलकण्ठो महादेवो गिरिजार्द्धतनुस्ततः ॥ ४८ ॥ भैरवं ग्राहयामास वदनं वेधसो द्विजाः ॥ चरस्व पापशुद्ध्यर्थं लोकसंग्रहणाय वै ॥ ४९ ॥ कपालधारी हस्तेन भिक्षां गृह्णातु भैरवः ॥ इतीरयित्वा गिरिशः कन्यां कांचिद्भयंकरीम् ॥ ५० ॥ ब्रह्महत्याभिधां क्रूरां वडवानलसन्निभाम् ॥ तां प्रेरयित्वा गिरिशो भैरवं पुनरब्रवीत् ॥ ५१ ॥

॥ ईश्वर उवाच ॥

॥ भैरवैतद्व्रतं त्वब्दं ब्रह्महत्याविशुद्धये ॥ चर त्वं सर्वतीर्थेषु स्नाहि शुद्ध्यर्थमात्मनः ॥५२॥ ततो वाराणसीं गच्छ ब्रह्महत्याप्रशांतये ॥ वाराणसीप्रवेशेन ब्रह्महत्या तवाधमा ॥५३॥ पादशेषा विनष्टा स्याच्चतुर्थांशो न नश्यति ॥ तस्य नाशं प्रवक्ष्यामि तव भैरव तच्छृणु ॥५४॥ दक्षिणांभोनिधेस्तीरे गन्धमादनपर्वते ॥ सर्वप्राण्युपकाराय कृतं तीर्थं मया शुभम् ॥५५॥ शिवसंज्ञं महापुण्यं तत्र याहि त्वमादरात् ॥ तत्प्रवेशनमात्रेण ब्रह्महत्या तवाशुभा ॥ ५६ ॥ शिवतीर्थस्य माहात्म्यान्निःशेषं नश्यति ध्रुवम् ॥ उक्त्वैवं भैरवं

१ सोमम्—उमया सहितम्—साम्बं शंकरम्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

रुद्रः कैलासं प्रययौ क्षणात् ॥ ५७ ॥ ततः कपालपाणिस्तु भैरवः शिवचोदितः ॥ देवदानवयक्षादिलोकेषु विचचार सः ॥५८॥ तं यांतमनुयाति
स्म ब्रह्महत्यातिभीषणा ॥ भैरवः सर्वतीर्थानि पुण्यान्यायतनानि च ॥ ५९ ॥ चरित्वा लीलया देवस्ततो वाराणसीं ययौ ॥ वाराणसीं प्रविष्टे तु भैर
वे शंकरांशजे ॥ ६० ॥ चतुर्थांशं विना नष्टा ब्रह्महत्यातिकुत्सिता ॥ चतुर्थांशेन दुद्राव भैरवं शंकरांशजम् ॥६१॥ ततः स भैरवो देवः शूलपाणिः
कपालधृक् ॥ शिवाज्ञया ययौ पश्चाद्गंधमादनपर्वतम् ॥ ६२ ॥ शिवतीर्थं ततो गत्वा भैरवः स्नातवान्द्विजाः ॥ स्नानमात्रेण तत्रास्य शिवतीर्थे मह
त्तरे ॥ ६३ ॥ निःशेषं विलयं याता ब्रह्महत्यातिभीषणा ॥ अस्मिन्नवसरे शंभुः प्रादुरासीत्तदग्रतः ॥ प्रादुर्भूतो महादेवो भैरवं वाक्यमब्रवीत् ॥६४॥
॥ ॥ ईश्वर उवाच ॥ ॥ निःशेषं ब्रह्महत्या ते शिवतीर्थे निमज्जनात् ॥ ६५ ॥ नष्टा भैरव नास्त्यत्र संदेहस्तव सुव्रत ॥ इदं कपालं काश्यां त्वं
स्थापयस्व क्वचित्स्थले ॥ ६६ ॥ इत्युक्त्वा भगवाञ्छंभुस्तत्रैवांतरधीयत ॥ भैरवोऽपि तदा विप्रा ब्रह्महत्याविमोचितः ॥ ६७ ॥ शिवतीर्थस्य माहा
त्म्याद्ययौ वाराणसीं पुरीम् ॥ कपालं स्थापयामास प्रदेशे कुत्रचिद्द्विजाः ॥ कपालतीर्थमित्याख्यामलभत्तत्स्थलं तदा ॥ ६८ ॥ ॥ श्रीसूत
उवाच ॥ ॥ एवंप्रभावं तत्पुण्यं शिवतीर्थं विमुक्तिदम् ॥ ६९ ॥ महादुःखप्रशमनं महापातकनाशनम् ॥ नरकक्लेशशमनं स्वर्गदं मोक्षदं तथा ॥
॥ ७० ॥ शिवतीर्थस्य माहात्म्यं मया प्रोक्तं विमुक्तिदम् ॥ इदं पठन्सदा मर्त्यो दुःखग्रामाद्विमुच्यते ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशी
तिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये शिवतीर्थप्रशंसायां भैरवब्रह्महत्याविमोक्षणवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ शिवतीर्थे नरः स्नात्वा ब्रह्महत्याविमोक्षणे ॥ स्वपापजालशांत्यर्थं शंखतीर्थं ततो व्रजेत् ॥ १ ॥ यत्र मज्जनमात्रेण
कृतघ्नोऽपि विमुच्यते ॥ मातॄः पितॄन्गुरूंश्चापि ये न मन्यंति मोहिताः ॥ २ ॥ ये चाप्यन्ये दुरात्मानः कृतघ्ना निरपत्रपाः ॥ ते सर्वे शंखतीर्थे
स्मिञ्छुद्ध्यंति स्नानमात्रतः ॥ ३ ॥ शंखनामा मुनिः पूर्वं गंधमादनपर्वते ॥ अवर्तत तपः कुर्वन्विष्णुं ध्यायन्समाहितः ॥ ४ ॥ स तत्र कल्पयामास
स्नानार्थं तीर्थमुत्तमम् ॥ शंखेन निर्मितं तीर्थं शंखतीर्थमितीर्यते ॥ ५ ॥ तत्र स्नात्वा सकृन्मर्त्यः कृतघ्नोऽपि विमुच्यते ॥ अत्रेतिहासं वक्ष्यामि
पुराणं पापनाशनम् ॥ ६ ॥ यस्य श्रवणमात्रेण नरो मुक्तिमवाप्नुयात् ॥ पुरा बभूव विप्रेंद्रो वत्सनाभो महामुनिः ॥ ७ ॥ सत्यवाञ्छीलवान्वाग्मी
सर्वभूतदयापरः ॥ शत्रुमित्रसमो दांतस्तपस्वी विजितेंद्रियः ॥ ८ ॥ परब्रह्मणि निष्णातस्तत्त्वब्रह्मैकसंश्रयः ॥ एवंप्रभावः स मुनिस्तपस्तेपे निजा

१ तस्मिन्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रमे ॥ ९ ॥ स वै निश्चलसर्वांगस्तिष्ठंस्तत्रैव भूतले ॥ परमाण्वंतरं वापि न स्वस्थानाच्चचाल सः ॥ १० ॥ स्थित्वैकत्र तपस्यंतमनेकशतवत्सरान् ॥ तमाचक्राम वल्मीकं छादितांगं चकार च ॥ ११ ॥ वल्मीकाक्रांतदेहोपि वत्सनाभो महामुनिः ॥ अकरोत्तप एवासौ वल्मीकं न त्वबुद्ध्यत ॥ ॥ १२ ॥ तस्मिंश्च तप्यति तपो वासवो मुनिपुंगवाः ॥ विसृज्य मेघजालानि वर्षयामास वेगवान् ॥ १३ ॥ एवं दिनानि सप्तायं स ववर्ष निरंतरम् ॥ आसारेणातिमहता वृष्यमाणोपि वै मुनिः ॥ १४ ॥ तं वर्षं प्रतिजग्राह निमीलितविलोचनः ॥ महता स्तनितेनाशु तदा बधिरयञ्छ्रुती ॥ ॥ १५ ॥ वल्मीकस्योपरिष्टाद्वै निपपात महाशनिः ॥ तस्मिन्वर्षति पर्जन्ये शीतवातातिदुःसहे ॥ १६ ॥ वल्मीकशिखरं ध्वस्तं बभूवाशनिताडितम् ॥ विशीर्णशिखरे तस्मिन्वल्मीकेऽशनिताडिते ॥ १७ ॥ सेहेतिदुःसहां वृष्टिं वत्सनाभो विचिंतयन् ॥ महर्षौ वर्षधाराभिः पीड्यमाने दिवानिशम् ॥ १८ ॥ धर्मस्य चेतसि कृपा संबभूवातिभूयसी ॥ स धर्मश्चिंतयामास वत्सनाभे तपस्यति ॥ १९ ॥ पतत्यप्यतिवर्षेऽयं तपसो न निवर्तते ॥ अहोऽस्य वत्सनाभस्य धर्मैकायत्तचित्तता ॥ २० ॥ इति चिंतयतस्तस्य मतिरेवमजायत ॥ अहं वै माहिषं रूपं सुमहांतं मनोहरम् ॥ २१ ॥ वर्षधारानिपातानां सोढारं कठिनत्वचम् ॥ स्वीकृत्य माहिषं रूपं स्थास्याम्युपरि योगिनः ॥ २२ ॥ न हि बाधिष्यते वर्षं महावेगयुतं त्वपि ॥ धर्म एवं विनिश्चित्य धाराः पृष्ठेन धारयन् ॥ २३ ॥ वत्सनाभोपरि तदा गात्रमाच्छाद्य तस्थिवान् ॥ ततः सप्तदिनांते तु तद्वै वर्षमुपारमत् ॥ २४ ॥ ततो महिषरूपी स धर्मोऽतिकृपया युतः ॥ तद्वै वल्मीकमुत्सृज्य नातिदूरे ह्यवर्त्तत ॥२५॥ ततो निवृत्ते वर्षे तु वत्सनाभो महामुनिः॥ निवृत्तस्तपसस्तूर्णं दिशः सर्वा व्यलोकयन्॥२६॥स्थितोऽहं वृष्टिसंपाते कुर्वन्नद्य महत्तपः॥ पृथिवी सलिलक्लिन्ना दृश्यते सर्वतोदिशम्॥२७॥ शिखराणि गिरीणां च वनान्युपवनानि च ॥ आश्रमाणि महर्षीणामाप्लुतानि जलैर्नवैः ॥ २८ ॥ एवमादीनि सर्वाणि दृष्ट्वा प्रमुदितोऽभवत् ॥ चिंतयामास धर्मात्मा वत्सनाभो महामुनिः ॥ २९ ॥ अहमस्मिन्महावर्षे नूनं केनापि रक्षितः ॥ वर्षत्यस्मिन्महावर्षे जीवितं त्वन्यथा कुतः ॥ ३० ॥ विचिंत्यैवं मुनिश्रेष्ठः सर्वत्र समलोकयत् ॥ ततोऽपश्यन्महाकायमदूरादग्रतः स्थितम् ॥ ३१ ॥ महिषं नीलवर्णं च वत्सनाभस्तपोधनः ॥ महिषं तं समुद्दिश्य मनसा समचिंतयत् ॥ ३२ ॥ तिर्यग्योनिष्वपि कथं दृश्यते धर्मशीलता ॥ यतो ह्यहं महावर्षान्महिषेणाभिरक्षितः ॥ ३३ ॥ दीर्घमायुरमुष्यास्तु यन्मां रक्षितवानिह ॥ इत्यादि स विचिंत्यैवं तपसे पुनरुद्ययौ ॥ ३४ ॥ तं पुनश्च तपस्यंतं दृष्ट्वा महिषरूपधृक् ॥ रोमांचावृतसर्वांगः प्रमोदमगमद्भृशम् ॥ ॥ ३५ ॥ वत्सनाभस्य हि मुनेः पुनश्चैव तपस्यतः ॥ मनः पूर्ववदेकाग्रं परब्रह्मणि नाभवत् ॥ ३६ ॥ स विषण्णमना भूत्वा वत्सनाभो व्यचिं

CC-0. In Public Domain. Digitization by eGangotri

तयत् ॥ न भवेद्यदि नैर्मल्यं तदा स्याच्चंचलं मनः ॥ ३७ ॥ मनश्च पापबाहुल्ये निर्मलं नैव जायते ॥ पापलेशोपि मे नास्ति कथं लोला
यते मनः ॥ ३८ ॥ अचिंतयद्दोषहेतुं वत्सनाभः पुनःपुनः ॥ स विचिंत्य विनिश्चित्य निनिंदात्मानमंजसा ॥ ३९ ॥ धिङ्मामद्य दुरात्मान
महो मूढोस्म्यहं भृशम् ॥ कृतघ्नता महान्दोषो मामद्य समुपागतः ॥ ४० ॥ यदीदृशान्महावर्षात्त्रातारं महिषोत्तमम् ॥ तिष्ठाम्यपूजयन्नेव ततो मे
भूत्कृतघ्नता ॥ ४१ ॥ कृतघ्नता महान्दोषः कृतघ्ने नास्ति निष्कृतिः ॥ कृतघ्नस्य न वै लोकाः कृतघ्नस्य न बांधवाः ॥ ४२ ॥ कृतघ्नतादोष
बलान्मम चित्तं मलीमसम् ॥ कृतघ्ना नरकं यांति ये च विश्वस्तघातिनः ॥ ४३ ॥ निष्कृतिं नैव पश्यामि कृतघ्नानां कथंचन ॥ ऋते
प्राणपरित्यागाद्धर्मज्ञानां वचो यथा ॥ ४४ ॥ पित्रोरभरणं कृत्वा ह्यदत्त्वा गुरुदक्षिणाम् ॥ कृतघ्नतां च संप्राप्य मरणांता हि निष्कृतिः ॥ ४५ ॥
तस्मात्प्राणान्परित्यज्य प्रायश्चित्तं चराम्यहम् ॥ इति निश्चित्य मनसा वत्सनाभो महामुनिः ॥ ४६ ॥ तृणीकृत्य निजान्प्राणान्निःसंगेनांतरा
त्मना ॥ मेरोः शिखरमारूढः प्रायश्चित्तचिकीर्षया ॥ ४७ ॥ सुमेरुशिखरात्तस्मादियेष पतितुं मुनिः ॥ तस्मिन्पतितुमारब्धे मा त्वरिष्ठा इति
ब्रुवन् ॥ त्यक्तमाहिषरूपः सन्धर्म एव न्यवारयत् ॥ ४८ ॥ ॥ धर्म उवाच ॥ ॥ वत्सनाभ महाप्राज्ञ जीवस्व बहुवत्सरान् ॥ ४९ ॥ परितुष्टो
ऽस्मि भद्रं ते देहत्यागचिकीर्षया ॥ न हि त्वद्धर्मकक्षायां लोके कश्चित्समोऽस्ति वै ॥ ५० ॥ यद्यपि प्राणसंत्यागः कृतघ्ने निष्कृतिर्भवेत् ॥
तथापि धर्मशीलत्वात्तवान्यां निष्कृतिं वदे ॥ ५१ ॥ शंखतीर्थाभिधं तीर्थमस्ति वै गंधमादने ॥ शांत्यर्थमस्य पापस्य तत्र स्नाहि समाहितः ॥
॥ ५२ ॥ प्राप्स्यसे चित्तशुद्धिं त्वमतो विगतकल्मषः ॥ ततश्च लब्धविज्ञानः प्राप्स्यसे शाश्वतं पदम् ॥ ५३ ॥ अहं धर्मोस्मि योगीन्द्र सत्य
मेव ब्रवीमि ते ॥ इति धर्मवचः श्रुत्वा वत्सनाभो महामुनिः ॥ ५४ ॥ स्नातुकामः शंखतीर्थे गंधमादनमन्वगात् ॥ शंखतीर्थं च संप्राप्य तत्र
सस्नौ महामुनिः ॥ ५५ ॥ ततो विगतपापस्य मनो निर्मलतां गतम् ॥ ततोऽचिरेण कालेन ब्रह्मभूयमगान्मुनिः ॥ ५६ ॥ एवं वः कथितं विप्राः
शंखतीर्थस्य वैभवम् ॥ यत्र हि स्नानमात्रेण कृतघ्नोऽपि विमुच्यते ॥ ५७ ॥ मातृद्रोही पितृद्रोही गुरुद्रोही तथैव च ॥ अन्ये कृतघ्ननिवहा
मुच्यंतेऽत्र निमज्जनात् ॥ ५८ ॥ अतः कृतघ्नैर्मनुजैः सेवनीयमिदं सदा ॥ अहो तीर्थस्य माहात्म्यं यत्कृतघ्नोपि मुच्यते ॥ ५९ ॥ अकृत्वा
भरणं पित्रोरदत्त्वा गुरुदक्षिणाम् ॥ कृतघ्नतां च संप्राप्य मरणांता हि निष्कृतिः ॥ ६० ॥ इह तु स्नानमात्रेण कृतघ्नस्यापि निष्कृतिः ॥ कृतघ्न
तापि तत्तीर्थे स्नानमात्राद्विनश्यति ॥ ६१ ॥ अन्येषां तुच्छपापानां सर्वेषां किमुताधुना ॥ ६२ ॥ अध्यायमेनं पठेद्भक्तियुक्तः कृतघ्नोपि मर्त्याः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापाद्विमुक्तः ॥ विशुद्धांतरात्मा गतः सत्यलोकं समं ब्रह्मणा मोक्षमप्याशु गच्छेत् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये शंखतीर्थप्रशंसायां वत्सनाभकृतघ्नदोषशांतिवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २९ ॥ ॥ श्रीसूत उवाच ॥ ॥ विधायाभिषवं मर्त्याः शंखतीर्थे द्विजोत्तमाः ॥ यमुनां चैव गंगां च गयां चापि क्रमाद्व्रजेत् ॥ १ ॥ यमुनाख्यं महातीर्थं गंगातीर्थमनुत्तमम् ॥ गयातीर्थं च मर्त्यानां महापतकनाशनम् ॥ २ ॥ एतत्तीर्थत्रयं पुण्यं सर्वलोकेषु विश्रुतम् ॥ सर्वविघ्नप्रशमनं सर्वरोगनिबर्हणम् ॥ ३ ॥ एतद्धि तीर्थत्रितयं सकलाज्ञाननाशनम् ॥ अविद्यायां विनष्टायां तथा ज्ञानप्रदं नृणाम् ॥ ४ ॥ जानश्रुतिर्महाराज एषु तीर्थेषु वै पुरा ॥ स्नात्वा रैक्वाद्द्विजश्रेष्ठात्प्राप्तवाञ्ज्ञानमुत्तमम् ॥ ५ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सर्वार्थतत्त्वज्ञ व्यासशिष्य महामते ॥ यमुना चैव गंगा च गया चैवेति विश्रुतम् ॥ ६ ॥ एतत्तीर्थत्रयं कस्मादागतं गंधमादने ॥ जानश्रुतेश्च राजर्षेः स्नानात्तीर्थत्रयेऽपि च ॥ ज्ञानावाप्तिः कथं रैक्वादस्माकं सूत तद्वद ॥ ७ ॥ ॥ श्रीसूत उवाच ॥ ॥ रैक्वनामा महर्षिस्तु पुरा वै गन्धमादने ॥ ८ ॥ तपस्सुदुश्चरं कुर्वन्न्यवसत्तपसां निधिः ॥ दीर्घकालं तपः कुर्वन्स वै रैक्वो महामुनिः ॥ ९ ॥ तपोबलेन महता दीर्घमायुरवाप्तवान् ॥ जन्मना पंगुरेवासीद्रैक्वनामा महामुनिः ॥ १० ॥ पंगुत्वादसमर्थोऽभूद्गंतुं तीर्थान्यसौ मुनिः ॥ संति यानि तु तीर्थानि गन्धमादनपर्वते ॥ ११ ॥ तानि गच्छति सामीप्याच्छकटेनैव संचरन् ॥ स यद्रैक्वो मुनिवरो युग्वेन सह वर्तते ॥ १२ ॥ तपस्वी वैदिकैर्लोके सयुग्वेत्यभिधीयते ॥ युग्वेति शकटं प्रोक्तं स तेन सह वर्तते ॥ १३ ॥ स खल्वेवं मुनिश्रेष्ठः सयुग्वानाम वै मुनिः ॥ पूर्णज्ञानस्तपस्तेपे गन्धमादनपर्वन ॥१४॥ ग्रीष्मे पञ्चाग्निमध्यस्थः सोऽतप्यत महत्तपः ॥ वर्षायां कण्ठदघ्नेषु जलेषु समवर्तत ॥ १५ ॥ तपसा शोषिते गात्रे पामा तस्य व्यजायत ॥ कण्डूयत स पामानं दिवारात्रं मुनीश्वरः ॥ १६ ॥ कण्डूयमान एवायं पामानं न तपोऽत्यजत् ॥ अजायत मनस्त्वेवं तस्य सयुग्वनो मुनेः ॥ १७ ॥ यमुनायां च गंगायां गयायां चाधुनैव हि ॥ अस्मिंस्तीर्थे त्रये पुण्ये स्नातव्यं हि मया त्विति ॥ १८ ॥ एवं विचिंत्य स मुनिरन्यां चिंतामथाकरोत् ॥ अहं हि जन्मना पंगुरतः स्नानं हि दुर्लभम् ॥ १९ ॥ अतिदूरं मया गन्तुं शकटेन न शक्यते ॥ किंकरोम्यधुनेत्येवं स वितर्क्य महामतिः ॥ २० ॥ तीर्थत्रयेषु स्नानार्थं कर्तव्यं निश्चिकाय वै ॥ अप्रसह्यमनाधृष्यं विद्यते मे तपोबलम् ॥ २१ ॥ तेनैवावाहयिष्यामि तद्धि तीर्थत्रयं त्विह ॥ इति निश्चित्य मनसा प्राङ्मुखो नियतेंद्रियः ॥ २२ ॥ त्रिराचम्य च सयुग्वान्दध्यौ क्षणमतंद्रितः ॥ तस्य मंत्रप्रभावेन यमुना सा महानदी ॥ २३ ॥ गंगा च जह्नुतनया गया सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापनाशिनी ॥ भूमिं निर्भिद्य तिस्रोपि पातालात्सहसोत्थिताः ॥ २४ ॥ मानुषं रूपमास्थाय सयुग्वानमुपेत्य च ॥ ऊचुः परमसंहृष्टा हर्षयंत्यश्च तं मुनिम् ॥ २५ ॥ सयुग्वन्रैक्व भद्रं ते ध्यानादस्मादुपारम ॥ त्वन्मंत्रेण समाकृष्टा वयमत्र समागताः ॥ २६ ॥ किं कर्तव्यं तवास्माभिस्तद्व दस्व मुनीश्वर ॥ इति तासां वचः श्रुत्वा सयुग्वान्हि महामुनिः ॥ २७ ॥ ध्यानादुपारमत्तूर्णं ताश्चापश्यत्पुरःस्थिताः ॥ स ताः संपूज्य विधिव द्रैक्वो वाचमभाषत ॥ २८ ॥ यमुने देवि हे गंगे हे गये पापनाशिनि ॥ सन्निधानं कुरुध्वं मे गन्धमादनपर्वते ॥ २९ ॥ यत्र भूमिं विनिर्भिद्य भवत्य इह निर्गताः ॥ तानि पुण्यानि तीर्थानि भवेयुर्वोऽभिधानतः ॥ ३० ॥ सहसांतरधीयंत तथास्त्वित्येव तत्र ताः ॥ तदाप्रभृति तीर्थानि तानि त्रीण्यपि भूतले ॥ ३१ ॥ तेनतेनाभिधानेन गीयन्ते सर्वदा जनैः ॥ यत्र भूमिं विनिर्भिद्य यमुना निर्गता तदा ॥ ३२ ॥ यमुनातीर्थमिति वै तज्जनैरभिधीयते ॥ यतो वै पृथिवीरंध्राज्जाह्नवी सहसोत्थिता ॥ ३३ ॥ गंगातीर्थमिति ख्यातं तल्लोके पापनाशनम् ॥ गया हि मानुषं रूपं यत आस्थाय निर्ययौ ॥ ३४ ॥ तदेव भूमिविवरं गयातीर्थं प्रचक्षते ॥ एवमेतन्महापुण्यं तीर्थत्रयमनुत्तमम् ॥ ३५ ॥ रैक्वमंत्रप्रभावेण पृथिव्याः सहसोत्थितम् ॥ अत्र तीर्थत्रये स्नानं ये कुर्वंति नरोत्तमाः ॥ ३६ ॥ तेषामज्ञाननाशः स्याज्ज्ञानमप्युदयं लभेत् ॥ स्वमंत्रेण समाकृष्टे तत्र तीर्थत्रये मुनिः ॥ ३७ ॥ स्नानं समाचरन्नित्यं स कालानत्यवाहयत् ॥ एतस्मिन्नेव काले तु राजा जानश्रुतिर्महान् ॥ ३८ ॥ पुंत्रसंज्ञस्य[1] राजर्षेः पौत्रो धर्मैकतत्परः ॥ देयमन्नादि स तदा ह्यर्थिभ्यः श्रद्धयैव यत् ॥ ३९ ॥ तस्मादेनं नजालोके श्रद्धादेयं प्रचक्षते ॥ यतो बहुतरं वाक्यमन्नाद्यस्य मही पतेः ॥४०॥ अर्थिनां क्षुधितानां तु तृप्त्यर्थं वर्तते गृहे ॥ अतोयमर्थिभिः सर्वैर्बहुवाक्य इतीर्यते ॥४१॥ स वै पौत्रायणो राजा जानश्रुतसुतो बली ॥ प्रियातिथिर्बभूवासौ बहुदायी तथाऽभवत् ॥ ४२ ॥ नगरेषु च राष्ट्रेषु ग्रामेषु च वनेषु च ॥ चतुष्पथेषु सर्वेषु महामार्गेषु सर्वशः ॥ ४३ ॥ बह्वन्नपान संयुक्तं सूपशाकादिसंयुतम् ॥ आतिथ्यं कल्पयामास तृप्तयेऽर्थिजनस्य वै ॥४४॥ अन्नपानादिकं सर्वमुपयुङ्ध्वमिहार्थिनः ॥ इत्यसौ घोषयामास तत्र तत्र जनास्पदे ॥४५॥ तस्य प्रियातिथेरेव नृपस्य बहुदायिनः ॥ अर्थिभ्यो दानशौंडस्य गुणाः सर्वत्र विश्रुताः ॥४६॥ अथ पौत्रायणस्यास्य गुण ग्रामेण वर्ततः ॥ देवर्षयो महाभागास्तस्यानुग्रहकांक्षिणः ॥ ४७ ॥ हंसरूपं समास्थाय निदाघसमये निशि ॥ रमणीयां विधायाशु श्रेणीमा

१ तत्र सुज्ञस्य–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काशमार्गतः ॥ ४८ ॥ सौधवातायनस्थस्य तस्योपरि महीपतेः ॥ उड्डीयोड्डीय वेगेन तरसा जग्मुरुच्चकैः ॥ ४९ ॥ तरसा पततां तेषां हंसानां पृष्ठतो व्रजन् ॥ एको हंसस्तु संबोध्य हंसमग्रेसरं तदा ॥ ५० ॥ सोपहासमिदं वाक्यं प्राह शृण्वति राजनि ॥ भोभो भल्लाक्ष भल्लाक्ष पुरो गच्छन्मरालक ॥ ५१ ॥ सौधमध्ये पुरस्ताद्वै जानश्रुतसुतो नृपः ॥ वर्तते पूजनीयोऽयं न पश्यसि किमंधवत् ॥ ५२ ॥ यस्य तेजो दुराधर्षमाब्रह्मभवनादिदम् ॥ अनंतादित्यसंकाशं ज्वलते पुरतो भृशम् ॥ ५३ ॥ तमतिक्रम्य राजर्षिं मा गास्त्वमुपरि द्रुतम् ॥ यदि गच्छसि तत्तेजस्त्वां सांप्रतं त्वां प्रधक्ष्यति ॥ ५४ ॥ इत्युक्तवंतं तं हंसमग्रतः प्रत्यभाषत ॥ अहो भवानभिज्ञोऽसि श्लाघनीयोऽसि सूरिभिः ॥ ५५ ॥ अश्लाघनीयं कितवं यत्त्वमेनं प्रशंससे ॥ प्रशंससे किमर्थं त्वमल्पं संतमिमं जनम् ॥ ५६ ॥ भस्त्रावत्पशुवच्चैव केवलं श्वासधारिणम् ॥ न ह्ययं वेत्ति धर्माणां रहस्यं पृथिवीपतिः ॥ ५७ ॥ तत्त्वज्ञानी यथा रैक्वः सयुग्वान्ब्राह्मणोत्तमः ॥ रैक्वस्य हि महज्ज्योतीरहस्यं दैवतैरपि ॥ ५८ ॥ न ह्यस्य प्राणमात्रस्य तेजस्तादृशमस्ति वै ॥ रैक्वस्य पुण्यराशीनामियत्ता नैव विद्यते ॥ ५९ ॥ गण्यंते पांसवो भूमेर्गण्यंते दिवि तारकाः ॥ रैक्वपुण्यमहामेरुसमूहो नैव गण्यते ॥ ॥ ६० ॥ किं च तिष्ठंतिमे धर्मा नश्वरास्तस्य वै मुनेः ॥ ब्रह्मज्ञानमबाध्यं यत्तेन स श्लाघ्यते मुनिः ॥ ६१ ॥ जानश्रुतेस्तु तादृक्षो धर्म एव न विद्यते ॥ दुर्लभं यत्तु योगीन्द्रैः कुतस्तज्ज्ञानवैभवम् ॥ ६२ ॥ परित्यज्य दुरात्मानं तद्वराकमिमं जनम् ॥ स एव रैक्वः सयुग्वाञ्श्लाघ्यतां भवता मुनिः ॥ ६३ ॥ जन्मना पंगुरपि यः स्वस्य स्नानचिकीर्षया ॥ गंगां च यमुनां चापि गयामपि मुनीश्वरः ॥ ६४ ॥ आह्वयामास मन्त्रेण निजाश्रमसमीपतः ॥ तस्य ब्रह्मविदो रैक्वमहर्षेर्धर्मसंचये ॥ ६५ ॥ अंतर्भवंति धर्मौघास्त्रैलोक्योदरवर्तिनाम् ॥ रैक्वस्य धर्मकक्षा तु न हि त्रैलोक्यवर्तिनाम् ॥ ६६ ॥ प्राणिनां धर्मकक्षायामन्तर्भवति कर्हिचित् ॥ एवमग्रेसरे हंसे कथित्वोपरते सति ॥ ६७ ॥ हंसरूपा मुनींद्रास्ते ब्रह्मलोकं ययुः पुनः ॥ अथ पौत्रायणो राजा जानश्रुतिररिंदमः ॥ ६८ ॥ रैक्वं चोत्कर्षकाष्ठायां निशम्य परमावधिम् ॥ विषण्णोऽभवदत्यर्थं वराकोऽक्षजितो यथा ॥ ६९ ॥ चिंतयामास स नृपः पौनःपुन्येन निःश्वसन् ॥ हंस उत्कर्षयन्रैक्वं निकृष्टं मामिहाब्रवीत् ॥ ७० ॥ अहो रैक्वस्य माहात्म्यं यं प्रशंसंति पक्षिणः ॥ तत्परित्यज्य संसारं सर्वं राज्यमिहाधुना ॥ ७१ ॥ सयुग्वानं महात्मानं तमेव शरणं व्रजे ॥ कृपानिधिः स वै रैक्वः शरणं मामुपागतम् ॥ ७२ ॥ प्रतिगृह्यात्मविज्ञानं मह्यं समुपदेक्ष्यति ॥ इत्यसौ चिंतयन्नेव कथंकथमपि द्विजाः ॥ ७३ ॥ जाग्रन्नेवायमुद्वेलां रात्रिं तामत्यवाहयत् ॥ निशावसाने संप्राप्ते बंदिवृन्दप्रवर्तितम् ॥ ७४ ॥ अशृणोन्मंगलरवं तूर्यघोषसमन्वितम् ॥ तदाकर्ण्य महाराजस्तदा तल्पस्थ एव

CC-0. In Public Domain. Digitization by eGangotri

सन् ॥ ७५ ॥ सारथिं शीघ्रमाहूय बभाषे सादरं वचः ॥ सारथे सत्वरं गत्वा रथमारुह्य वेगवत् ॥ ७६ ॥ आश्रमेषु महर्षीणां पुण्येषु विपिनेषु च ॥ विविक्तेषु प्रदेशेषु सतामावासभूमिषु ॥ ७७ ॥ तीर्थानां च नदीनां च कूलेषु पुलिनेषु च ॥ अन्येषु च प्रदेशेषु यत्र संति मुनीश्वराः ॥ ॥ ७८ ॥ तेषु सर्वेषु योगींद्रं पंगुं शकटसंस्थितम् ॥ रैक्काभिधानं सर्वेषां धर्माणामेकसंश्रयम् ॥ ७९ ॥ ब्रह्मज्ञानैकनिलयं सयुग्वानं गवेषय ॥ अन्विष्य तूर्णं मत्प्रीत्यै पुनरागच्छ सारथे ॥ ८० ॥ स तथेति विनिर्गत्य वेगवद्रथसंस्थितः ॥ सर्वत्रान्वेषयामास रैक्वं ब्रह्मविदं मुनिम् ॥ ८१ ॥ गुहासु पर्वतानां च मुनीनामाश्रमेषु च ॥ संचचार महीं कृत्स्नां तत्र तत्र गवेषयन् ॥ ८२ ॥ अन्विष्य विविधान्देशान्सारथिस्त्वरया सह ॥ क्रमान्महर्षिसंबाधं गंधमादनमन्वगात् ॥ ८३ ॥ मार्गमाणः स तत्रापि तं ददर्श मुनीश्वरम् ॥ कंडूयमानं पामानं शकटीयस्थलस्थितम् ॥ ८४ ॥ अद्वैतनिष्कलं ब्रह्म चिंतयंतं निरन्तरम् ॥ तं दृष्ट्वा सारथिस्तत्र सयुग्वानं महामुनिम् ॥ ८५ ॥ रैक्वोऽयमिति संचिंत्य तमासाद्य प्रणम्य च ॥ विनयान्मुनिमप्राक्षीदुपविश्य तदन्तिके ॥ ८६ ॥ सयुग्वान्रैक्वनामा च ब्रह्मन्किं वै भवानिति ॥ तस्य वाक्यं समाकर्ण्य स मुनिः प्रत्यभाषत ॥ ८७ ॥ अहमेव सयुग्वान्वै रैक्वनामेति वै तदा ॥ इत्याकर्ण्य मुनेर्वाक्यमिंगितैर्बहुभिस्तथा ॥ ८८ ॥ कुटुम्बभरणार्थाय धनेच्छामवगम्य च ॥ सर्वं न्यवेदयद्राज्ञे निवृत्तो गंधमादनात् ॥ ८९ ॥ जानश्रुतिर्निशम्याथ सारथेर्वाक्यमादरात् ॥ षट्शतानि गवां चापि निष्कभारं धनस्य च ॥ ९० ॥ रथं चाश्वतरीयुक्तं समादाय त्वरान्वितः ॥ पौत्रायणः स राजर्षिस्तं रैक्वं प्रतिचक्रमे ॥ ९१ ॥ गत्वा च वचनं प्राह तं रैक्वं स महीपतिः ॥ भगवन्रैक्व सयुग्वन्मद्दत्तं प्रतिगृह्यताम् ॥ ९२ ॥ षट्शतानि गवां चापि निष्कभारं धनस्य च ॥ रथं चाश्वतरीयुक्तं प्रतिगृह्णीष्व मामकम् ॥ ९३ ॥ गृहीत्वा सर्वमेतत्तु भो ब्रह्मन्ननुशाधि माम् ॥ अद्वैतब्रह्मविज्ञानं मह्यं समुपदिश्यताम् ॥ ९४ ॥ इति तस्य वचः श्रुत्वा सस्पृहं च संसभ्रम् ॥ रैक्वः प्रत्याह सयुग्वाञ्जानश्रुतिमरिंदमम् ॥ ॥ ९५ ॥ ॥ रैक्व उवाच ॥ ॥ एता गावस्तवैवास्तु निष्कभारस्तथा रथः ॥ किमल्पेन ममानेन बहुकल्पेषु जीवतः ॥ ९६ ॥ न मे कुटुंबनिर्वाहे पर्याप्तमिदमंजसा ॥ एवं शतगुणं चापि यदि दत्तं त्वया मम ॥ ९७ ॥ नालं तदपि राजेंद्र कुटुंबभरणाय वै ॥ इति रैक्ववचः श्रुत्वा जानश्रुतिरभाषत ॥ ९८ ॥ ॥ जानश्रुतिरुवाच ॥ ॥ त्वयोपदिश्यमानस्य ब्रह्मज्ञानस्य वै मुने ॥ न हि मूल्यमिदं ब्रह्मन्गोधनं रथ एव च ॥ ॥ ९९ ॥ प्रतिगृह्णीष्व वा मा वा ममैतत्तु गवादिकम् ॥ निष्कलाद्वैतविज्ञानं ब्रह्मन्नुपदिशस्व मे ॥ तदाकर्ण्य वचस्तस्य सयुग्वान्वाक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मब्रवीत ॥ १०० ॥ ॥ रैक्व उवाच ॥ ॥ निर्वेदो यस्य संसारे तथा वै पुण्यपापयोः ॥ १०१ ॥ प्रारब्धयोर्विनाशश्च स वै ज्ञानोपदेशभाक् ॥ तव यद्यपि संसारे निर्वेदः समजायत ॥ २ ॥ तथापि पुण्यपापानां न हि नाशो व्याजयत ॥ पुण्यपापौघसंघाश्च पुनर्जन्मनि हेतवः ॥ ३ ॥ न हि भोगं विना तेषां नाशो भवति भूपते ॥ तन्नाशोपायमद्याहं तथापि प्रब्रवीमि ते ॥ ४ ॥ यतो मां शरणं प्राप्तस्तच्छृणुष्व समाहितः ॥ अत्र तीर्थत्रयं पुण्यं वर्ततेऽभीष्टदायकम् ॥ ५ ॥ मुमुक्षूणां हि सर्वेषां सर्वप्रारब्धनाशनम् ॥ एतद्धि यमुनातीर्थं गंगातीर्थं तथैव च ॥ ६ ॥ गयातीर्थमिदं चापि तदेषु स्नाहि मा चिरम् ॥ सर्वप्रारब्धनाशः स्यात्तदा नैवात्र संशयः ॥ ७ ॥ ततस्ते शुद्धचित्तस्य ज्ञानं चैव दिशाम्यहम् ॥ इत्युक्ते रैक्वमुनिना हर्षसंफुल्ललोचनः ॥ ८ ॥ ससंभ्रममुपागम्य सस्नौ तीर्थत्रयेऽपि सः ॥ तत्तीर्थस्नानमात्रेण शुद्धचित्तोऽभवन्नृपः ॥ ९ ॥ उपातिष्ठत राजासौ सयुग्वानं गुरुं पुनः ॥ सयुग्वा स च रैक्वोऽपि मुनीन्द्रैरपि दुर्लभम् ॥ ११० ॥ तज्जानश्रुतये ज्ञानं कृपया समुपादिशत् ॥ तेनोपदिष्टमात्रे तु विज्ञाने ब्रह्मरूपिणि ॥ ११ ॥ अबाधितानुभववानभवद्राजसत्तमः ॥ ब्रह्मरूपं गतस्यास्य प्रसादाद्रैक्वयोगिनः ॥ १२ ॥ घटकुड्यकुसूलात्मा न प्रपंचस्समस्फुरत् ॥ निर्भिद्य सहसा मायामभूद्ब्रह्मैव केवलम् ॥ १३ ॥ इत्थं तीर्थत्रये स्नानाज्जानश्रुतिरहो नृपः ॥ दुर्लभं योगिवृंदैश्च ब्रह्मभूयत्वमाप्तवान् ॥ १४ ॥ एवं वः कथितं विप्रास्तत्तीर्थत्रयवैभवम् ॥ यस्त्विमं पठतेऽध्यायं तीर्थत्रितयवैभवम् ॥ १५ ॥ निर्भिद्याज्ञानतिमिरं ब्रह्मभूयाय कल्पते ॥ ११६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये यमुनागंगागयातीर्थप्रशंसायां जानश्रुतिज्ञानावाप्तिवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ यमुनायां च गंगायां गयायां च नरो मुदा ॥ स्नानं विधाय विधिवत्कोटितीर्थं ततो व्रजेत् ॥ १ ॥ कोटितीर्थं महापुण्यं सर्वलोकेषु विश्रुतम् ॥ सर्वसंपत्करं शुद्धं सर्वपापप्रणाशनम् ॥ २ ॥ दुःस्वप्ननाशनं ह्येतन्महापातकनाशनम् ॥ महाविघ्नप्रशमनं महाशांतिकरं नृणाम् ॥ ३ ॥ स्मृतिमात्रेण यत्पुंसां सर्वपापनिषूदनम् ॥ लीलया धनुषः कोट्या स्वयं रामेण निर्मितम् ॥ ४ ॥ पुरा दाशरथी रामो निहत्य युधि रावणम्[1] ॥ ब्रह्महत्याविमोक्षाय गंधमादनपर्वते ॥ ५ ॥ प्रातिष्ठिपल्लिंगमेकं लोकानुग्रहकाम्यया ॥ लिंगस्यास्याभिषेकाय शुद्धं वारि गवेषयन् ॥ ६ ॥ नाविंदत जलं तत्र पार्श्वे दशरथात्मजः ॥ लिंगाभिषेकयोग्यं च जलं किमिति चिंतयन् ॥ ७ ॥ नवेन वारिणा लिंगं स्नापनीयं मयेति सः ॥ निश्चित्य मनसा तत्र धनुष्कोट्या रघूद्वहः ॥ ८ ॥ बिभेद

१ वैरिणम्-इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

धरणीं शीघ्रं मनसा जाह्नवीं स्मरन् ॥ रामकार्मुककोटिः सा तदा प्राप रसातलम् ॥ ९ ॥ तत उद्धारयामास तद्धनुर्धन्विनां वरः ॥ धनुष्युद्ध्रियमाणे तु राघवेण महीतलात् ॥ १० ॥ काकुत्स्थेन स्मृता गंगा निर्ययौ विवरात्ततः ॥ वारिणा तेन तल्लिंगमभ्यषिंचद्रघूद्वहः ॥ ११ ॥ रामकार्मुककोट्यैव यतस्तन्निर्मितं पुरा ॥ अतः कोटिरिति ख्यातं तत्तीर्थं भुवनत्रये ॥ १२ ॥ यानि यानीह तीर्थानि संति वै गंधमादने ॥ प्रथमं तेषु तीर्थेषु स्नात्वा विगतकल्मषः ॥ १३ ॥ शेषपापविमोक्षाय स्नायात्कोटौ नरस्ततः ॥ तीर्थांतरेषु स्नानेन यः पापौघो न नश्यति ॥ १४ ॥ अनेकजन्मकोटीभिरर्जितो ह्यस्थिसंस्थितः ॥ विनश्यति स सर्वोऽपि कोटिस्नानान्न संशयः ॥ १५ ॥ यदि हि प्रथमं स्नायादत्र कोटौ नरो द्विजाः ॥ तस्य मुक्तस्य तीर्थानि व्यर्थान्येवापराणि हि ॥ १६ ॥ ॥ ऋषय ऊचुः[1] ॥ ॥ सूत सर्वार्थतत्त्वज्ञ व्यासशिष्य मुनीश्वर ॥ अस्माकं संशयं कंचिच्छिधि पौराणिकोत्तम ॥ १७ ॥ कोटौ स्नातस्य मर्त्यस्य यदि तीर्थांतरं वृथा ॥ किमर्थं धर्मतीर्थादितीर्थेषु स्नांति मानवाः ॥१८॥ तीर्थानि तानि सर्वाणि समतिक्रम्य मानवाः॥ अत्रैव कोटौ किं स्नानं न कुर्वंति हि तद्वद ॥ १९ ॥ ॥ श्रीसूत उवाच ॥ ॥ अहो रहस्यं युष्माभिः पृष्टमेतन्मुनीश्वराः ॥ नारदाय पुरा शंभुः पृच्छते यत्किलाब्रवीत् ॥ २० ॥ तद्ब्रवीमि मुनिश्रेष्ठाः शृणुध्वं श्रद्धया सह ॥ गच्छन्यदृच्छया वापि तीर्थयात्रापरोऽपि वा ॥ २१ ॥ मार्गमध्ये द्विजश्रेष्ठास्तीर्थं देवालयं तथा ॥ दृष्ट्वा श्रुत्वापि वा मोहान्न सेवेत नराधमः ॥ २२ ॥ निष्कृतिस्तस्य नास्तीति प्राब्रुवन्परमर्षयः ॥ सेतुं गच्छंस्ततोऽन्येषु न स्नायाद्यदि मानवः ॥ २३ ॥ तीर्थातिक्रमदोषैः स बहिष्कार्योऽत्यवद्द्विजैः ॥ अतः स्नातव्यमेवैषु चक्रतीर्थादिषु द्विजाः ॥ २४ ॥ स्नात्वा चैतेषु तीर्थेषु शेषपापविमुक्तये ॥ प्रयत्नैर्मनुजैरत्र स्नातव्यं कोटितीर्थके ॥ २५ ॥ कोटौ चाभिषवं कृत्वा न तिष्ठेद्गन्धमादने ॥ निवर्तेत्तत्क्षणादेव निष्पापो गंधमादनात् ॥ २६ ॥ रामोऽपि हि पुरा कोटितीर्थसंभूतवारिणा ॥ रामनाथेऽभिषिक्ते तु स्वयं स्नात्वा च तत्र वै ॥ २७ ॥ ब्रह्महत्याविमुक्तः संस्तत्क्षणादेव सानुजः ॥ आरूढपुष्पकोऽयोध्यां प्रययौ कपिभिर्वृतः ॥ २८ ॥ अतः कोटौ नरः स्नात्वा पापशेषविमोचितः ॥ निवर्तेत्तत्क्षणादेव रामो दाशरथिर्यथा ॥ २९ ॥ एतद्धि तीर्थप्रवरं सर्वलोकेषु विश्रुतम् ॥ रामनाथाभिषेकाय निर्मितं राघवेण यत् ॥ ३० ॥ स्वयं भगवती यत्र सन्निधत्ते च जाह्नवी ॥ तारकब्रह्मणा यत्र रामेण स्नातमादरात् ॥ ३१ ॥ तस्य वै कोटितीर्थस्य महिमा केन कथ्यताम्[2] ॥ यत्र[3] स्नात्वा पुरा कृष्णो लोकसंग्रहणेच्छया ॥ ३२ ॥ मातुलस्य तु कंसस्य वधदोषाद्विमोचितः ॥ तस्य वै कोटिती

१ शौनक उवाच–इ–पा० । २ भण्यताम्–इ०पा० । ३ यत्र मातुलदोषौघाद्विमुक्तो यदुनन्दनः–इ० पा० पुस्तकांतरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थस्य महिमा केन कथ्यते ॥ ३३ ॥ ॥ ऋषय ऊचुः ॥ ॥ किमर्थमवधीत्कंसं मातुलं यदुनंदनः ॥ यद्दोषशांतये सूत सस्नौ कोटौ महामनाः ॥ ३४ ॥ ॥ श्रीसूत उवाच ॥ ॥ वसुदेव इति ख्यातः शूरपुत्रो यदोः कुले ॥ आसीत्स देवकसुतां देवकीमिति विश्रुताम् ॥ ३५ ॥ उद्वाह्य रथमारूढः स्वपुरं प्रस्थितः पुरा ॥ अथ सूतो बभूवाथ कंसो ह्यानकदुन्दुभेः ॥ ३६ ॥ अशरीरा तदा वाणी कंसं सारथिमब्रवीत् ॥ भगिनीं च तथा भामं वाहयंतं रथोत्तमे ॥ ३७ ॥ यामिमां वाहयस्यत्र रथेन त्वमरिंदम ॥ अस्यास्त्वामष्टमो गर्भो वधिष्यति न संशयः ॥ ३८ ॥ इत्याकर्ण्य वचो दिव्यं कंसः खड्गं प्रगृह्य च ॥ स्वसारं हंतुमुद्योगं चकार द्विजपुंगवाः ॥ ३९ ॥ ततः प्रोवाच तं कंसं वसुदेवः स सांत्वयन् ॥ ॥ ॥ वसुदेव उवाच ॥ ॥ अस्यां प्रसूतान्दास्यामि तुभ्यं कंस सुतानहम् ॥ ४० ॥ एनां स्वसारं मा हिंसीर्नास्यास्ते भीतिरस्ति हि ॥ श्रुत्वा तद्वचनं कंसो निवृत्तस्तद्वधात्तदा ॥ ४१ ॥ देवकीवसुदेवाभ्यां सहितः स्वपुरं ययौ ॥ पादावसक्तनिगडौ देवकीवसुदेवकौ ॥ ४२ ॥ स्थापयामास दुष्टात्मा कंसः कारागृहे तदा ॥ ततः कालेन महता वसुदेवाद्धि देवकी ॥ ४३ ॥ षट्पुत्राञ्जनयामास क्रमेण मुनिपुंगवाः ॥ जातांस्तान्वसुदेवेन दत्तान्कंसोऽपि सोऽवधीत् ॥ ४४ ॥ हतेषु षट्सु पुत्रेषु देवक्युदरजन्मसु ॥ कंसेन क्रूरमतिना निष्कृपेण द्विजोत्तमाः ॥ ४५ ॥ शेषोऽभूत्सप्तमो गर्भो देवक्या जठरे तदा ॥ मायादेवी ततो गर्भं तं वै विष्णुप्रचोदिता ॥ ४६ ॥ नंदगोपगृहस्थायां रोहिण्यां समवेशयत् ॥ देवक्याः सप्तमो गर्भः पतितो जठरादिति ॥ ४७ ॥ लोके प्रसिद्धिरभवन्महती विष्णुलीलया ॥ देवकीजठरे पश्चाद्विष्णुर्गर्भत्वमाप्तवान् ॥ ४८ ॥ ततो दशसु मासेषु गतेषु हरिरव्ययः ॥ देवकीजठराज्जज्ञे कृष्ण इत्यभिविश्रुतः ॥ ४९ ॥ शंखचक्रगदाखड्गविराजितचतुर्भुजः ॥ किरीटी वनमाली च पित्रोः शोकविनाशनः ॥ ५० ॥ तं दृष्ट्वा हरिमीशानं तुष्टावानकदुंदुभिः ॥ ५१ ॥ ॥ वसुदेव उवाच ॥ ॥ विश्वं भवान्विश्वपतिस्त्वमेव विश्वस्य योनिस्त्वयि विश्वमास्ते ॥ महान्प्रधानश्च विराट् स्वराट् च सम्राडसि त्वं भगवन्समस्तम् ॥ ५२ ॥ एवं जगत्कारणभूतधाम्ने नारायणायामितविक्रमाय ॥ श्रीशार्ङ्गचक्रासिगदाधराय नमोनमः कृत्रिममानुषाय ॥ ५३ ॥ स्तुवन्तमेवं शौरिं तं वसुदेवं हरिस्तदा ॥ अवोचत्प्रीणयंस्तं च देवकीं च द्विजोत्तमाः ॥ ५४ ॥ ॥ हरिरुवाच ॥ ॥ अहं कंसं वधिष्यामि मा भीर्वां पितराविति ॥ नन्दगोपस्य गृहिणी यशोदाऽजनयत्सुताम् ॥ मम मायां पूर्वदिने सर्वलोकविमोहिनीम् ॥ ५५ ॥ मां तस्याः शयने

१ श्यालम्–इति पाठान्तरमस्ति । तदसत् । 'श्यालाः स्युर्भ्रातरः पत्न्याः' इति कोशात् । अत्र वसुदेवस्य भामत्वात्–अयं मूलस्थ एव पाठो युक्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यस्य यशोदायाः सुतां तु ताम् ॥ आदाय देवकीशय्यां प्रापयस्व यदूत्तम ॥ ५६ ॥ एवमुक्तः स कृष्णेन तथैव ह्यकरोद्द्विजाः ॥ रुरोद माया तनया देवकीशयने स्थिता ॥ ५७ ॥ अथ बालध्वनिं श्रुत्वा कंसः संकुलमानसः ॥ सूतिकागृहमागम्य तामादाय च दारिकाम् ॥५८॥ शिलायां पोथयामास निर्दयो निरपत्रपः ॥ अथ तद्धस्तमाच्छिद्य सायुधाष्टमहाभुजा ॥ महादेव्यब्रवीत्कंसं समाहूयातिकोपना ॥ ५९ ॥ ॥ मायोवाच ॥ ॥ अरे रे कंस पापात्मन्दुर्बुद्धे मूढचेतन ॥ ६० ॥ यत्र कुत्रापि शत्रुस्ते वर्तते प्राणहारकः ॥ मार्गयस्वात्मनो मृत्युं तं शत्रुं कंस माचिरम् ॥ ६१ ॥ इतीरयित्वा सा देवी दिव्यस्थानान्यवाप्य च ॥ लब्धपूजा मनुष्येभ्यो बभूवाभीष्टदायिनी ॥ ६२ ॥ श्रुत्वा स देवीवचनं कंसोऽपि भृशमाकुलः ॥ बालग्रहान्पूतनादीन्स्वांतकं बाधितुं रिपुम् ॥ ६३ ॥ प्रेषयामास देशेषु शिशूनन्यांश्च बाधितुम् ॥ ते च बालग्रहाः सर्वे प्रययुर्नंदगोकुलम् ॥ ६४ ॥ हताश्च कृष्णेन तदा प्रययुर्यमसादनम् ॥ ततः कतिपयाहस्सु गतेषु द्विजपुंगवाः ॥ ६५ ॥ रामकृष्णौ व्यवर्द्धेतां गोकुले बालकौ तदा ॥ अनेकबालक्रीडाभिश्चिक्रीडतुररिंदमौ ॥ ६६ ॥ कंचित्कालं वत्सपालौ वेणुनादमकुर्वताम् ॥ कंचित्कालं च गोपालौ गुंजातापिच्छभूषितौ ॥ ६७ ॥ रेमाते बहुकालं तौ गोकुले रामकेशवौ ॥ कंसः कदाचिदक्रूरं गोकुले रामकेशवौ ॥ ६८ ॥ प्रेषयामास विप्रेंद्राः समानयितुमंजसा ॥ आनयामास चाक्रूरो रामकृष्णौ स गोकुलात् ॥ ६९ ॥ मथुरां कंसनिर्देशात्स्वर्णतोरणराजिताम् ॥७०॥ ततः समानीय स रामकेशवौ ययौ पुरीं गांदिनिजस्तदग्रे ॥ दृष्ट्वा च कंसं विनिवेद्य कार्यं तस्मै स्वगेहं प्रविवेश पश्चात् ॥७१॥ अथापराह्णे वसुदेवपुत्रावन्येद्युरिष्टैः सह गोपपुत्रैः ॥ उपेयतुः सालनिखातयुक्तां सगोपुराढ्यां मथुरापुरीं तौ ॥ ७२ ॥ स्तोत्राणि शृण्वन्पुरयौवतानां कृष्णस्तु रामेण सहैव गत्वा ॥ धनुर्निवेशं सहसैव तत्र ददर्श चापं च महद्दृढज्यम् ॥ ७३ ॥ विद्राव्य सर्वानपि चापपालान्धनुः समादाय स लीलयाऽऽशु ॥ मौर्व्यां नियोक्तुं नमयांचकार तदंतरे भग्नमभूद्द्विधैव ॥ ७४ ॥ कोदंडभंगोत्थितशब्दमाशु श्रुत्वाभियातान्बलिनो निहंतुम् ॥ निजघ्नतुस्तौ प्रतिगृह्य खंडौ चापस्य पालान्बलिनौ द्विजेंद्राः ॥ ७५ ॥ ततः कुवलयापीडं गजं द्वारि स्थितं क्षणात् ॥ निहत्य रामकृष्णौ तौ महाबलपराक्रमौ ॥ ७६ ॥ तस्य दंतौ समुत्पाट्य दधानौ करयोर्द्वयोः ॥ अंसे निधाय तौ दंतौ रंगं प्रययतुः क्षणात् ॥ ७७ ॥ निहत्य मल्लं चाणूरं मुष्टिकं तोशलं तथा ॥ अन्यांश्च मल्लप्रवरान्निन्यतुर्यमसादनम् ॥७८॥ समारुरुहतुस्तूर्णं तुंगं मंचं च तौ तदा ॥ तत्र तुंगे समासीनमासने कंसमेत्य तौ ॥ तस्थतुस्तं तृणीकृत्य सिंहौ क्षुद्रमृगं यथा ॥७९॥

१ ग्रामेषु द्विजपुंगवाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ततः कंसं समाकृष्य कृष्णो मंचोपरि स्थितम् ॥ पादौ गृहीत्वा वेगेन भ्रामयामास चांबरे ॥ ८० ॥ ततस्तं पोथयामास[1] स भूमौ गतजीवितम् ॥ कंसभ्रातॄन्बलोऽप्यष्टौ निजघ्ने मुष्टिना द्विजाः ॥ ८१ ॥ एवं निहत्य तं कंसं कृष्णः परबलार्दनः ॥ पितरौ मोचयामास निगडादतिदुःखितौ ॥ ८२ ॥ सर्वानास्थापयामास[2] बलेन सह माधवः ॥ श्रीकृष्णेन हतं कंसं श्रुत्वा प्रापुः पुरीं तदा ॥ ८३ ॥ बांधवा मथुरायां ये पूर्वं कंसेन बाधिताः ॥ उग्रसेनं तथा राज्ये स्थापयामास केशवः ॥ ८४ ॥ असहिष्णुर्द्विजाः पित्रोरेवं कंसकृतागसम् ॥ जघान मातुलं कंसं देवब्राह्मणकंटकम् ॥ ८५ ॥ ततः कदाचित्कृष्णोऽयमात्मानं द्रष्टुमागतान् ॥ नारदादीन्मुनीन्सर्वानिदं पप्रच्छ सत्तमः ॥ ८६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मयाऽयं मातुलो विप्रा हतः कंसोऽतिपापकृत् ॥ मातुलस्य वधे दोषः प्रोच्यते शास्त्रवित्तमैः ॥ ८७ ॥ प्रायश्चित्तमतो ब्रूत तद्दोषविनिवृत्तये ॥ अवोचन्नारदस्तत्र कृष्णमद्भुतविक्रमम् ॥ वाचा मधुरया विप्रा भक्तिप्रणयपूर्वकम् ॥ ८८ ॥ ॥ नारद उवाच ॥ ॥ नित्यशुद्धश्च मुक्तश्च[4] भद्रश्चैव भवान्सदा ॥ ८९ ॥ सच्चिदानंदरूपश्च परमात्मा सनातनः ॥ पुण्यं पापं च ते नास्ति कृष्ण यादवनंदन[3] ॥ ९० ॥ तथापि लोकशिक्षार्थं[5] भवता गरुडध्वज ॥ प्रायश्चित्तं तु कर्तव्यं विधिनानेन माधव ॥ ९१ ॥ लोकसंग्रहणं तावत्कर्तव्यं भवताधुना ॥ रामसेतौ महापुण्ये गंधमादनपर्वते ॥ ९२ ॥ रामेण स्थापितं लिंगं रामनाथाभिधं पुरा ॥ तस्याभिषेकतोयार्थं धनुष्कोटया रघूद्वहः ॥ ९३ ॥ गां भित्त्वोत्पादयामास तीर्थं कोटीति विश्रुतम् ॥ तव पूर्वावतारेण रामेणाक्लिष्टकर्मणा ॥ ९४ ॥ ब्रह्महत्याविशुद्ध्यर्थं निर्मितं स्वयमेव यत् ॥ तत्र स्नानं कुरुष्व त्वं धर्म्ये[6] पापविनाशने ॥ ९५ ॥ तेन ते मातुलवधाद्दोषः शीघ्रं विनंक्ष्यति ॥ कोटितीर्थे हरेः स्नानं ब्रह्महत्यादिशोधकम् ॥ ९६ ॥ स्वर्गमोक्षप्रदं पुंसामायुरारोग्यवर्धनम् ॥ इति श्रुत्वा मुनेर्वाक्यं नारदस्य स माधवः ॥ ९७ ॥ विसृज्य तानृषीन्सर्वांस्तस्मिन्नेव क्षणे द्विजाः ॥ रामसेतौ ययौ तूर्णं स्वदोषपरिशुद्धये ॥ ९८ ॥ दिनैः कतिपयैर्गत्वा कोटितीर्थं यदूद्वहः ॥ स्नात्वा संकल्पपूर्वं च दत्त्वा दानान्यनेकशः ॥ ९९ ॥ स मातुलवधोत्पन्नदोषेभ्यो मुमुचे क्षणात् ॥ निषेव्य रामनाथं च स्वपुरं मथुरां ययौ ॥ १०० ॥ ॥ श्रीसूत उवाच ॥ ॥ एवंप्रभावं पुण्यं च कोटितीर्थं मुनीश्वराः ॥ ब्रह्महत्यादिभिः पापैः सद्यो मुच्येत मानवः ॥ नानेन सदृशं तीर्थमन्यदस्ति महीतले ॥ १ ॥ अत्र स्नानात्त्रयो देवा ब्रह्मविष्णुशिवा द्विजाः ॥ प्रीताः स्युरन्ये देवाश्च नात्र कार्या विचारणा ॥ २ ॥ एवं वः कथितं चित्रं कोटितीर्थस्य वैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ३ ॥

१ पातयामास–इ० पा० । २ आश्वासयामास–इ० पा० । ३ यादवाः–इ० पा० । ४ बुद्धः–इ० पा० । ५ लोकसिद्ध्यर्थम्–इ० पा० । ६ सर्वपापविनाशने–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वेमं पुण्यमध्यायं पठित्वा च मुनीश्वराः ॥ ब्रह्महत्यादिभिः सत्यं मुच्यते पातकैर्नरः ॥ १०४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये कोटितीर्थप्रशंसायां कृष्णस्य मातुलवधदोषशांतिवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥

॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ कोटितीर्थं महापुण्यं सेवित्वा केवलं नरः ॥ स्नातुं जितेंद्रियस्तीर्थं ततः साध्यामृतं व्रजेत् ॥ १ ॥ साध्यामृतं महातीर्थं महापुण्यफलप्रदम् ॥ महादुःखप्रशमनं गन्धमादनपर्वते ॥ २ ॥ अस्ति पापहरं पुंसां सर्वाभीष्टप्रदायकम् ॥ यत्र स्नात्वा नरो भक्त्या सर्वान्कामानवाप्नुयात् ॥ ३ ॥ तपसा ब्रह्मचर्येण यज्ञैर्दानेन वा पुनः ॥ गतिं तां न लभेन्मर्त्यो यां साध्यामृतमज्जनात् ॥ ४ ॥ स्पृष्टानि येषामंगानि साध्यामृतजलैः शुभैः ॥ तेषां देहगतं पापं तत्क्षणादेव नश्यति ॥ ५ ॥ साध्यामृतजले यस्तु साघमर्षणकृन्नरः ॥ स विधूयेह पापानि विष्णुलोके महीयते ॥ ६ ॥ पूर्वे वयसि पापानि कृत्वा कर्माणि यो नरः ॥ पश्चात्साध्यामृतं सेवेत्पश्चात्तापसमन्वितः ॥ ७ ॥ अन्ते वयसि मुक्तः स्यात्स नरो नात्र संशयः ॥ साध्यामृते नरः स्नात्वा देहबंधाद्विमुच्यते ॥ ८ ॥ साध्यामृतजले स्नाता मनुष्याः पापकर्मिणः ॥ अनेकक्लेशघोराणि नरकाणि न यांति हि ॥ ९ ॥ साध्यामृतजले स्नानात्पुंसां या स्याद्गतिर्द्विजाः ॥ न सा गतिर्भवेद्यज्ञैर्न वेदैः पुण्यकर्मभिः ॥ १० ॥ यावदस्थि मनुष्याणां साध्यामृतजले स्थितम् ॥ तावद्वर्षाणि तिष्ठंति शिवलोके सुपूजिताः ॥ ११ ॥ अपहृत्य तमस्तीव्रं यथा भात्युदये रविः ॥ तथा साध्यामृतस्नायी भित्त्वा पापानि राजते ॥ १२ ॥ वांछिताँल्लभते कामानत्र स्नातो नरः सदा ॥ यत्र स्नात्वा महापुण्ये पुरा राजा पुरूरवाः ॥ विप्रयोगं सहोर्वश्या जहौ तुंबुरुशापजम् ॥ १३ ॥ ॥ ऋषय ऊचुः ॥ ॥ कथं सूत महाभाग सहोर्वश्यामरस्त्रिया ॥ १४ ॥ प्रथमं लब्धवान्योगं मर्त्यो राजा पुरूरवाः ॥ विप्रयोगं सहोर्वश्या जहौ तुंबुरुशापजम् ॥ १५ ॥ हेतुना केन राजानं शशाप तुंबुरुर्मुनिः ॥ एतत्सर्वं समाचक्ष्व विस्तरान्मुनिपुंगव ॥ १६ ॥ ॥ सूत उवाच ॥ ॥ आसीत्पुरूरवानाम शक्रतुल्यपराक्रमः ॥ राजराजसमो राजा पुरा ह्यमरपूजितः ॥ १७ ॥ धर्मतः पालयामास मेदिनीं स नृपोत्तमः ॥ ईजे च बहुभिर्यज्ञैर्ददौ दानानि सर्वदा ॥ १८ ॥ प्रशासति महीं सर्वां राज्ञि तस्मिन्महामतौ ॥ मित्रावरुणशापेन भुवं प्रापोर्वशी द्विजाः ॥ १९ ॥ सा चचारोर्वशी तत्र राज्ञस्तस्य पुरांतिके ॥ कोकिलालापमधुरवीणयोपवने जगौ ॥ २० ॥ स राजोपवने रंतुं कदाचिद्धृतकौतुकः ॥ आरूढतुरगः प्रायाल्ललनाशतसंवृतः ॥ २१ ॥ तादृशी

१ पुरूत्तमः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुर्वशीं तत्र करसम्मितमध्यमाम् ॥ उवाच चैनां राजासौ भार्या मम भवेति वै ॥ २२ ॥ सापि कामातुरा तत्र राजानं प्रत्यभाषत ॥ भवत्वेवं
नरश्रेष्ठ समयं यदि मे भवान् ॥ २३ ॥ करिष्यति तवाभ्याशे वत्स्यामि धृतकौतुका ॥ करिष्ये समयं सुभ्रु तवाहमिति सोऽब्रवीत् ॥ २४ ॥
अथोर्वशी बभाषे तं पुरूरवसमुत्सुका ॥ पुत्रभूतं मम यदि रक्षस्युरणकद्वयम् ॥ २५ ॥ न नग्नो दृश्यसे राजन्कदापि यदि वै तथा ॥ नोच्छिष्टं
मम दद्याश्चेत्तदा वत्स्ये तवांतिके ॥ २६ ॥ घृतमात्राशना चाहं भविष्यामि नृपोत्तम ॥ एवमस्त्विति राजोक्तां तां निनाय निजं गृहम् ॥ २७ ॥
अलकायां स भूपालस्तथा चैत्ररथे वने ॥ रेमे सरस्वतीतीरे पद्मखण्डमनोरमे ॥ २८ ॥ एकषष्टिं स वर्षाणि रममाणस्तयानयत् ॥ तेनोर्वशी
प्रतिदिनं वर्धमानानुरागिणी ॥ २९ ॥ स्पृहां न देवलोकेऽपि चकार तनुमध्यमा ॥ नाभवद्रमणीयोऽसौ देवलोकस्तया विना ॥ ३० ॥
अतस्तामानयिष्यामि देवलोकमिति द्विजाः ॥ विश्वावसुर्विचार्यैवं भूर्लोकमगमत्क्षणात् ॥ ३१ ॥ उर्वश्याः समयं राज्ञा विश्वावसुरयं
सह ॥ विदित्वा सह गन्धर्वैः समवेतो निशांतरे ॥ ३२ ॥ उर्वश्याः शयनाभ्याशाज्जग्राहोरणकं जवात् ॥ आकाशे नीयमानस्य तस्य
श्रुत्वोर्वशी पतिम् ॥३३॥ अब्रवीन्मत्सुतः केन गृह्यते त्यज्यतामयम् ॥ अनाथा शरणं यामि कं नरं गतचेतना ॥३४॥ पुरूरवाः समाकर्ण्य वाक्यं
तस्या निशांतरे ॥ मां न नग्नं निरीक्षेत देवीति न ययौ तदा ॥ ३५ ॥ अथान्यमप्युरणकं गन्धर्वाः प्रतिगृह्य ते ॥ ययुस्तस्योरणस्यापि शब्दं
शुश्राव चोर्वशी ॥ ३६ ॥ अनाथाया मम सुतो गृह्यते तस्करैरिति ॥ चुक्रोश देवी परुषं कं यामि शरणं नरम् ॥ ३७ ॥ अमर्षवशमापन्नः श्रुत्वा
तद्वचनं नृपः ॥ तिमिरेणावृतं सर्वमिति मत्वा स खड्गधृक् ॥ ३८ ॥ दुष्टदुष्ट कुतो यासीत्यभ्यधावद्वचो वदन् ॥ तावत्सौदामिनी दीप्ता गन्ध
र्वैर्जनिता भृशम् ॥ ३९ ॥ तत्प्रभामंडलैर्देवी राजानं विगतांबरम् ॥ दृष्ट्वा निवृत्तसमया तत्क्षणादेव निर्ययौ ॥ ४० ॥ त्यक्त्वा ह्युरणकौ तत्र
गंधर्वा अपि निर्ययुः ॥ राजा मेषौ समादाय हृष्टः स्वशयनांतिकम् ॥ ४१ ॥ आगतो नोर्वशीं तत्र ददर्शायतलोचनाम् ॥ तां चापश्यन्विवस्त्रश्च
बभ्रामोन्मत्तवद्भुवि ॥ ४२ ॥ कुरुक्षेत्रं गतो राजा तटाके पद्मसंकुले ॥ चतुर्भिरप्सरस्त्रीभिः क्रीडमानां ददर्श ताम् ॥ ४३ ॥ हे जाये तिष्ठ मनसा
घोरेति व्याहरन्मुहुः ॥ एवं बहुप्रकारं वै स सूक्तं प्रालपन्नृपः ॥ ४४ ॥ अब्रवीदुर्वशी तं च क्रीडंती साप्सरोगणैः ॥ महाराजालमेतेन चेष्टितेन
तवानघ ॥ ४५ ॥ त्वत्तो गर्भिण्यहं पूर्वमब्दांते भवतात्र वै ॥ आगंतव्यं कुमारस्ते भविष्यत्यतिधार्मिकः ॥ ४६ ॥ एकां विभावरीं राजंस्त्वया
वत्स्यामि वै तदा ॥ इत्युक्तो नृपतिर्हृष्टः स्वपुरीं प्राविशद्द्विजाः ॥ ४७ ॥ तासामप्सरसां सा तु कथयामास तं नृपम् ॥ अयं स पुरुषश्रेष्ठो येनाहं

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामरूपिणा ॥ ४८ ॥ एतावंतं महाकालमनुरागवशातुरा ॥ उषितास्मि सहानेन सख्यो नृपतिना चिरम् ॥ ४९ ॥ एवमुक्तास्ततः सख्यस्तामूचुः
साधुसाध्विति ॥ अनेन साकमास्यामः सर्वकालं वयं सखि ॥ ५० ॥ इत्यूचुरुर्वशीं तत्र सखीमप्सरसस्तदा ॥ अब्देऽथ पूर्णे राजापि तटाकांति
कमाययौ ॥ ५१ ॥ आगतं नृपतिं दृष्ट्वा पुरूरवसमुर्वशी ॥ कुमारमायुषं तस्मै ददौ संप्रीतमानसा ॥ ५२ ॥ तेन साकं निशामेकामुषिता सानु
रागिणी ॥ पंचपुत्रप्रदं गर्भं तस्मादापाशु सोर्वशी ॥ ५३ ॥ उवाच चैनं राजानमुर्वशी परमांगना ॥ वरं दास्यंति गन्धर्वा मत्प्रीत्या तव
भूपते ॥ ५४ ॥ भवतां प्रार्थ्यतां तेभ्यो वरो राजर्षिसत्तम ॥ इत्युक्तः स तया राजा प्राह गन्धर्वसत्तमान् ॥ ५५ ॥ अहं संपूर्णकोशश्च विजिताराति
मंडलः ॥ सलोकतां विनोर्वश्याः प्राप्तव्यं नान्यदस्ति मे ॥ ५६ ॥ अतस्तया सहोर्वश्या कालं नेतुमहं वृणे ॥ एवमुक्ते नृपेणाथ गन्धर्वास्तुष्ट
मानसाः ॥ अग्निस्थालीं प्रदायास्मै प्रोचुश्चैनं नृपं तदा ॥ ५७ ॥ ॥ गन्धर्वा ऊचुः ॥ ॥ अग्निं वेदानुसारी त्वं त्रिधा कृत्वा नृपोत्तम
॥ ५८ ॥ इष्ट्वा यज्ञेन चोर्वश्याः सालोक्यं याहि भूपते ॥ इतीरितस्तैरादाय स्थालीमग्नेर्ययौ नृपः ॥ ५९ ॥ अहो बतातिमूढोहमिति मध्येवनं[2]
नृपः ॥ उर्वशी न मया लब्धा वह्निस्थाल्या तु किं फलम् ॥ ६० ॥ निधायैव वने स्थालीं स्वपुरं प्रययौ नृपः ॥ अर्धरात्रे व्यतीतेऽसौ
विनिद्रोऽचिंतयत्स्वयम् ॥ ६१ ॥ उर्वशीलोकसिद्ध्यर्थं मम गन्धर्वपुंगवैः ॥ अग्निस्थाली संप्रदत्ता सा च त्यक्ता मया वने ॥ ६२ ॥ आहरिष्ये
पुनः स्थालीमित्युत्थाय ययौ वनम् ॥ नाग्निस्थालीं ददर्शासौ वने तत्र पुरूरवाः ॥ ६३ ॥ शमीगर्भमथाश्वत्थमग्निस्थाने विलोक्य सः ॥
व्यचिंतयन्मया स्थाली निक्षिप्तात्र वने पुरा ॥ ६४ ॥ सा चाश्वत्थः शमीगर्भः समभूदधुना त्विह ॥ तस्मादेनं समादाय वह्निरूपमहं पुरम् ॥
॥ ६५ ॥ गत्वा कृत्वारणीं सम्यक्तदुत्पन्नाग्निमादरात् ॥ उपास्यामीति निश्चित्य स्वपुरं गतवान्नृपः ॥ ६६ ॥ रमणीयारणीं चक्रे स्वांगुलैः प्रमिता
मसौ ॥ निर्माणसमये राजा गायत्रीमजपद्द्विजाः ॥ ६७ ॥ गायत्र्याः पठ्यमानाया यानि संत्यक्षराणि हि ॥ तावदंगुलिमर्यादामकरोदरणीं नृपः
॥ ६८ ॥ तत्र निर्मथनादग्नित्रयमुत्पाद्य भूपतिः ॥ उर्वशीलोकसंप्राप्तिफलमुद्दिश्य कांक्षितम् ॥ ६९ ॥ वेदानुसारी नृपतिर्जुहावाग्नित्रयं मुदा ॥
तेनैव चाग्निविधिना बहून्यज्ञानथातनोत् ॥ ७० ॥ तेन गन्धर्वलोकांश्च संप्राप्य जगतीपतिः ॥ सहोर्वश्या चिरं रेमे देवलोके द्विजो
त्तमाः ॥ ७१ ॥ अथ सर्वामरोपेतः कदाचिद्बलवृत्रहा ॥ नृत्यं सुरांगनानां वै व्यलोकयत संसदि ॥ ७२ ॥ पुरूरवा नृपोप्यायात्तदा देवैं

१ नृपतिम्—इ०पा०। २ मध्येवनम्—वनस्य मध्ये—इति मध्येवनम् "पारे मध्ये षष्ठ्या वा" इत्यव्ययीभावः समासः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रसंसदम् ॥ द्रष्टुं सुरांगनानृत्यं मनोहारि दिवौकसाम् ॥ ७३ ॥ एकैकशस्ताः शक्रस्य ननृतुः पुरतोऽगनाः ॥ अथोर्वशी समागत्य ननर्त पुरतो हरेः ॥ ७४ ॥ नृत्ताभिनयसामर्थ्यगर्वयुक्ता तदोर्वशी ॥ तं पुरूरवसं दृष्ट्वा जहासातिमनोहरा ॥ ७५ ॥ जहास तत्र राजापि तां विलोक्य तदोर्वशीम् ॥ हाससंकुपितस्तत्र नाट्याचार्योऽथ तुंबुरुः ॥ शशाप तावुभौ कोपादुर्वशीं च नृपोत्तमम् ॥ ७६ ॥ ॥ ॥ तुंबुरुरुवाच ॥ ॥ अनेकदेवसंपूर्णसभायामत्र यत्कृतम् ॥ ७७ ॥ युवाभ्यां हसितं नृत्तमध्ये निष्कारणं वृथा ॥ तस्माज्झटिति राजेंद्र वियोगो युवयोः क्षणात् ॥ ७८ ॥ भूयादिति शशापैनं सर्वदेवतसंनिधौ ॥ अथ शप्तो नृपस्तत्र नाट्याचार्येण दुःखितः ॥ ७९ ॥ जगाम शरणं तत्र पाहिपाहीति वज्रिणम् ॥ उवाच दीनया वाचा पुरुहूतं पुरूरवाः ॥ ८० ॥ उर्वश्या सह सालोक्यसिद्ध्यर्थमहमिष्टवान् ॥ अतस्तस्या वियोगो मेऽसह्यः स्यात्पाकशासन ॥ ८१ ॥ इत्युक्तवंतं तं प्राह सहस्राक्षः शचीपतिः ॥ शापमोक्षं प्रवक्ष्यामि मा भैषीस्त्वं नृपोत्तम ॥ ८२ ॥ दक्षिणांभोनिधौ पुण्ये गंधमादनपर्वते ॥ साध्यामृतमिति ख्यातं तीर्थमस्ति महत्तरम् ॥ ८३ ॥ सेवितं सर्वदेवैश्च सिद्धचारणकिन्नरैः ॥ सनकादिमहायोगिमुनिवृंदनिषेवितम् ॥ ८४ ॥ भुक्तिमुक्तिप्रदं पुंसां सर्वशापविमोक्षदम् ॥ अस्ति तीर्थं भवांस्तत्र गच्छस्व त्वरया नृप ॥ ८५ ॥ सर्वेषाम मृतं स्नानादत्र साध्यं यतस्ततः ॥ साध्यामृतमिति ख्यातं सर्वलोकेषु विश्रुतम् ॥ ८६ ॥ तत्र स्नानात्तवोर्वश्याः पुनर्योगो भविष्यति ॥ मम लोके निवासश्च भविष्यति न संशयः ॥ ८७ ॥ इति प्रतिसमादिष्टो नृपः संप्रीतमानसः ॥ साध्यामृतं महातीर्थं समुद्दिश्य ययौ क्षणात् ॥ ८८ ॥ सस्नौ साध्यामृते तत्र महापातकनाशने ॥ तत्र स्नानान्नृपो विप्राः सद्यः शापेन मोचितः ॥ ८९ ॥ स्नानानंतरमेवासावुर्वश्या सह संगतः ॥ तया सह विमानस्थः प्रययावमरावतीम् ॥ ९० ॥ रेमे पुनस्तया सार्धं देववद्देवमंदिरे ॥ एवंप्रभावं तत्तीर्थं साध्यामृतमनुत्तमम् ॥ ९१ ॥ पुरूरवा सहोर्वश्या यत्र स्नानेन संगतः ॥ अतोऽत्र तीर्थे यः स्नायान्महापातकनाशने ॥ ९२ ॥ वांछिताँल्लभते कामान्यास्यति स्वर्गमुत्तमम् ॥ निष्कामः स्नाति चेद्विप्रा मोक्षमाप्नोति मानवः ॥९३॥ इमं पवित्रं पापघ्नमध्यायं पठते तु यः॥ शृणुयाद्वा मनुष्योऽसौ वैकुंठे लभते स्थितिम् ॥९४॥ एवं वः कथितं विप्रा वैभवं पापनाशनम् ॥ साध्यामृतस्य तीर्थस्य विस्तराच्छ्रद्धया मया ॥ ९५ ॥ यत्पुरा सनकादिभ्यः प्रोक्तवांश्चतुराननः ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये साध्यामृततीर्थप्रशंसायां पुरूरवःशापविमोक्षणवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्नात्वा साध्यामृते तीर्थे नृपशापविमोक्षणे ॥ सर्वतीर्थं ततो गच्छेन्मनुजो नियमान्वितः ॥ १ ॥ सर्वतीर्थं

CC-0. In Public Domain. Digitization by eGangotri

महापुण्यं महापातकनाशनम् ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ २ ॥ शुद्ध्येत तत्क्षणादेव सर्वतीर्थनिमज्जनात् ॥ तावत्सर्वाणि पापानि देहे तिष्ठंति सुव्रताः ॥ ३ ॥ न यावत्सर्वतीर्थेऽस्मिन्निमज्जेत्पापपूरुषः ॥ स्नानार्थं सर्वतीर्थेऽस्मिन्दृष्ट्वा यांतं द्विजा नरम्॥ ४ ॥ वेपंते सर्वपापानि नाशोऽस्माकं भवेदिति ॥ गर्भवासादिदुःखानि तावद्याति नरो भुवि ॥ ५ ॥ न स्नायात्सर्वतीर्थेऽस्मिन्यावद्ब्राह्मणपुंगवाः॥ अनुष्ठितैर्महायागैस्तथा तीर्थनिषेवणैः ॥ ६ ॥ गायत्र्यादिमहामंत्रजपैर्नियमपूर्वकम् ॥ चतुर्णामपि वेदानामावृत्त्या शतसंख्यया ॥ ७ ॥ शिवाविष्ण्वादिदेवानां पूजया भक्तिपूर्वकम् ॥ एकादश्यादितिथिषु तथैवानशनेन च यत्फलं लभते मर्त्यस्तल्लभेदत्र मज्जनात् ॥ ८ ॥ ॥ ऋषय ऊचुः ॥ ॥ सर्वतीर्थमिति ख्यातिः सूतास्य कथमागता ॥ ब्रूह्यस्माकमिदं पुण्यं विस्तराच्छृण्वतां मुने ॥ ९ ॥ ॥ श्रीसूत उवाच ॥ ॥ पुरा सुचरितोनाम मुनिर्नियमसंयुतः ॥ ॥ १० ॥ भृगुवंशसमुद्भूतो जात्यंधो जरयातुरः ॥ अशक्तस्तीर्थयात्रायां नेत्राभावेन स द्विजाः ॥ ११ ॥ सर्वेषामेव तीर्थानां स्नातुकामो महामुनिः ॥ दक्षिणांबुनिधौ पुण्यं गंधमादनपर्वतम् ॥ १२ ॥ गत्वा शंकरमुद्दिश्य तपस्तेपे सुदुष्करम् ॥ त्रिकालमर्चयञ्छंभुमुपवासी जितेंद्रियः ॥१३॥ तथा त्रिषवणस्नानात्तथैवातिथिपूजकः ॥ शिशिरे जलमध्यस्थो ग्रीष्मे पंचाग्निमध्यगः ॥ १४ ॥ वर्षास्वासारसहन अब्भक्षो वायुभोजनः ॥ उद्धूलनं त्रिपुंड्रं च भस्मना धारयन्सदा ॥ १५ ॥ जाबालोपनिषद्रीत्या तथा रुद्राक्षधारकः ॥ एवमुग्रं तपश्चक्रे दशसंवत्सरं द्विजः ॥ १६ ॥ तपसा तस्य संतुष्टः शंकरश्चंद्रशेखरः ॥ प्रादुरासीन्मुनेस्तस्य द्विजाः सुचरितस्य वै ॥ १७ ॥ समारुह्य महोक्षाणं भूतवृंदनिषेवितः ॥ गिरिजार्धवपुः शूली सूर्यकोटिसमप्रभः ॥ १८ ॥ स्वभासा भासयन्सर्वा दिशो वितिमिरास्तदा ॥ भस्मपांडुरसर्वांगो जटामंडलमंडितः ॥ १९ ॥ अनंतादिमहानागविभूषणविभूषितः ॥ प्रादुर्भूतस्ततः शंभुः प्रादात्तस्य विलोचने ॥ २० ॥ आत्मावलोकनार्थाय शंकरो गिरिजापतिः ॥ ततः सुचरितो विप्राः शंभुना दत्तदृग्द्वयः ॥ आलोक्य परमेशानं प्रतुष्टाव प्रसन्नधीः ॥ २१ ॥ ॥ सुचरित उवाच ॥ ॥ जय देव महेशान जय शंकर धूर्जटे ॥ २२ ॥ जय ब्रह्मादिपूज्य त्वं त्रिपुरघ्न यमांतक ॥ जयोमेश महादेव कामांतक जयामल ॥ २३ ॥ जय संसारवैद्य त्वं भूतपाल शिवाव्यय ॥ त्रियंबक नमस्तुभ्यं भक्तरक्षणदीक्षित ॥ २४ ॥ व्योमकेश नमस्तुभ्यं जय कारुण्यविग्रह ॥ नीलकण्ठ नमस्तुभ्यं जय संसारमोचक ॥२५॥ महेश्वर नमस्तुभ्यं परमानंदविग्रह ॥ गंगाधर नमस्तुभ्यं विश्वेश्वर मृडाव्यय॥ २६ ॥ नमस्तुभ्यं भगवते वासुदेवाय शंभवे॥ शर्वायोग्राय गर्भाय कैलासपतये नमः ॥ २७ ॥ रक्ष मां करुणासिंधो कृपादृष्ट्यवलोकनात् ॥ मम वृत्तमनालोच्य त्राहि मां कृपया हर ॥ २८ ॥ ॥ श्रीसूत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ इति स्तुतो महादेवस्तमेनमिदमभ्यधात् ॥ मुनिं सुचरितं विप्रा दयोदन्वानुमापतिः[1] ॥ २९ ॥ ॥ महादेव उवाच ॥ ॥ मुने सुचरिताद्य त्वं वरं वरय कांक्षितम् ॥ वरं दातुं तवायातः पुण्येस्मिन्नाश्रमे शुभे ॥ इतीरितो मुनिः प्राह महादेवं दयानिधिम्[2] ॥ ३० ॥ ॥ ॥ सुचरित उवाच ॥ ॥ भगवंस्त्वं प्रसन्नो मे यदि स्याश्चन्द्रशेखर ॥ ३१ ॥ तर्हि त्वां प्रवृणोम्यद्धा वरं मदभिकांक्षितम् ॥ जरापलितदेहोहं कुत्रचिद्गंतुमक्षमः ॥ ३२ ॥ सर्वतीर्थेषु च स्नातुमाकांक्षा मम विद्यते ॥ तस्मात्सर्वेषु तीर्थेषु स्नानेन मनुजो हि यत् ॥ फलं प्राप्नोति मे ब्रूहि तत्फलावाप्तिसाधनम् ॥ ३३ ॥ ॥ महादेव उवाच ॥ ॥ अहमावाहयिष्यामि तीर्थान्यत्रैव कृत्स्नशः ॥ ३४ ॥ रामस्य सेतुना पूते नगेऽस्मिन्गंधमादने ॥ इत्युक्त्वा स महादेवः पर्वते गन्धमादने ॥ ३५ ॥ तीर्थान्यावाहयामास मुनिप्रीत्यर्थमुत्तमः ॥ ततस्सुचरितं प्राह शंकरः करुणानिधिः ॥ ३६ ॥ मुने सुचरितेदं तु महापातकनाशनम् ॥ सांनिध्यात्सर्वतीर्थानां सर्वतीर्थाभिधं स्मृतम् ॥ ३७ ॥ मयात्र सर्वतीर्थानां मनसाकर्षणादिदम् ॥ मानसं तीर्थमित्याख्यां लप्स्यते भुक्तिमुक्तिदम् ॥ ३८ ॥ अतः सुचरितात्र त्वं स्नाहि सद्यो विमुक्तये ॥ महापातकसंघानां दावानलसमद्युतौ ॥ ॥ ३९ ॥ काममोहभयक्रोधलोभरोगादिनाशने ॥ विना वेदांतविज्ञानं सद्योनिर्वाणकारणे ॥ ४० ॥ जन्ममृत्य्वादिनक्रौघसंसारार्णवतारणे ॥ कुम्भीपाकादिसकलनरकाग्निविनाशने ॥ ४१ ॥ इतीरितः सुचरितः शम्भुना मदनारिणा ॥ सस्नौ विप्राः सर्वतीर्थे महादेवस्य संनिधौ ॥ ४२ ॥ स्नात्वोत्थितः सुचरितो ददृशेऽखिलमानवैः ॥ जरापलितनिर्मुक्तस्तरुणोऽतीव सुन्दरः ॥ ४३ ॥ दृष्ट्वा स्वदेहसौंदर्यं ततः सुचरितो मुनिः ॥ श्लाघयामास तत्तीर्थं बहुधाऽन्ये च तापसाः ॥ ४४ ॥ महादेवः सुचरितं बभाषे तदनंतरम् ॥ अस्य तीर्थस्य तीरे त्वं वसन्सुचरित द्विज ॥ ॥ ४५ ॥ स्नानं कुरुष्व सततं स्मरन्मां मुक्तिदायकम् ॥ देशांतरीयतीर्थेषु मा व्रज ब्राह्मणोत्तम ॥ ४६ ॥ अस्य तीर्थस्य माहात्म्यान्मामंते प्राप्स्यसि ध्रुवम् ॥ अन्येऽपि येऽत्र स्नास्यंति तेऽपि मां प्राप्नुयुर्द्विज ॥ ४७ ॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत ॥ तस्मिन्नंतर्हिते रुद्रे ततः सुचरितो मुनिः ॥ ४८ ॥ अनेककालं निवसन्सर्वतीर्थस्य तीरतः ॥ स्नानं समाचरंस्तीर्थे मानसे नियमान्वितः ॥ ४९ ॥ देहांते शंकरं प्राप सर्वबन्धविमोचितः ॥ सायुज्यं चापि संप्राप सर्वतीर्थस्य वैभवात् ॥ ५० ॥ एवं वः कथितं विप्राः सर्वतीर्थस्य वैभवम् ॥ एतत्पठन्वा शृण्वन्वा मुच्यते सर्व

१ दयोदन्वान्—दयासिन्धुः । २ घृणानिधिम्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पातकैः ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सर्वतीर्थप्रशंसायां सर्वतीर्थस्वरूप
कथनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥छ॥ ॥ श्रीसूत उवाच ॥ ॥ विहिताभिषवो मर्त्यः सर्वतीर्थेऽतिपावने ॥ ब्रह्महत्यादिपापघ्नीं
धनुष्कोटिं ततो व्रजेत् ॥ १ ॥ यस्याः स्मरणमात्रेण मुक्तः स्यान्मानवो भुवि ॥ धनुष्कोटिं प्रपश्यंति स्नांति वा कथयंति ये ॥ २ ॥
अष्टाविंशतिभेदांस्ते नरकान्नोपभुंजते ॥ तामिस्रमंधतामिस्रं महारौरवरौरवौ ॥ ३ ॥ कुम्भीपाकं कालसूत्रमसिपत्रवनं तथा ॥ कृमि
भक्षोंऽधकूपश्च संदंशं शाल्मली तथा ॥ ४ ॥ सूर्मिर्वैतरणी प्राणरोधो विशसनं तथा ॥ लालाभक्षोऽप्यवीचिश्च सारमेयादनं तथा ॥ ५ ॥
तथैव वज्रकणकं क्षारकर्दमपातनम् ॥ रक्षोगणाशनं चापि शूलप्रोतं वितोदनम् ॥ ६ ॥ दंदशूकाशनं चापि पर्यावर्तनसंज्ञितम् ॥ तिरो
धानाभिधं विप्रास्तथा सूचीमुखाभिधम् ॥ ७ ॥ पूयशोणितभक्षं च विषाग्निपरिपीडनम् ॥ अष्टाविंशतिसंख्याकमेवं नरकसंचयम् ॥ ८ ॥
न याति मनुजो विप्रा धनुष्कोटौ निमज्जनात् ॥ वित्तापत्यकलत्राणां योऽन्येषामपहारकः ॥ ९ ॥ स कालपाशनिर्बद्धो यमदूतैर्भयानकैः ॥ तामि
स्रनरके घोरे पात्यते बहुवत्सरम् ॥ १० ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥ यो निहत्य तु भर्तारं भुंक्ते तस्य धनादिकान् ॥ ११ ॥
पात्यते सोंऽधतामिस्रे महादुःखसमाकुले ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥ १२ ॥ भूतद्रोहेण यो मर्त्यः पुष्णाति स्वकुटुंबकम् ॥
स तानिह विहायाशु रौरवे पात्यते ध्रुवम् ॥ १३ ॥ विषोल्बणमहासर्पसंकुले यमपूरुषैः ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥
॥ १४ ॥ यः स्वदेहंभरो मर्त्यो भार्यापुत्रादिकं विना ॥ स महारौरवे घोरे पात्यते निजमांसभुक् ॥ १५ ॥ स्नाति चेद्धनुषः कोटौ तस्मि
न्नासौ निपात्यते ॥ यः पशून्पक्षिणो वापि सप्राणान्निरुणद्धि वै ॥ १६ ॥ कृपालेशविहीनं तं क्रव्यादैरपि निंदितम् ॥ कुंभीपाके तप्ततैले पात
यंति यमानुगाः ॥ १७ ॥ स्नाति चेद्धनुषः कोटौ तस्मिन्नासौ निपात्यते ॥ मातरं पितरं विप्रान्यो द्वेष्टि पुरुषाधमः ॥ १८ ॥ स कालसूत्र
नरके विस्तृतायुतयोजने ॥ अधस्तादग्निसंतप्त उपर्यर्कमरीचिभिः ॥ १९ ॥ खले ताम्रमये विप्राः पात्यते क्षुधयार्दितः ॥ स्नाति चेद्धनुषः
कोटौ तस्मिन्नासौ निपात्यते ॥ २० ॥ यो वेदमार्गमुल्लंघ्य वर्तते कुपथे नरः ॥ सोऽसिपत्रवने घोरे पात्यते यमकिंकरैः ॥ २१ ॥ स्नाति
चेद्धनु० ॥ यो राजा राजभृत्यो वा ह्यदंडचे दंडमाचरेत् ॥ २२ ॥ शरीरदंडं विप्रे वा स शूकरमुखे द्विजाः ॥ पात्यते नरके घोरे इक्षुवद्यंत्रपीडितः ॥
॥ २३ ॥ स्नाति चे० ॥ ईश्वराधीनवृत्तीनां हिंसां यः प्राणिनां चरेत् ॥ २४ ॥ तैरेव पीड्यमानोऽयं जंतुभिः स्वेन पीडितैः ॥ अंधकूपे माह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीमे पात्यते यमकिंकरैः ॥ २५ ॥ तत्रांधकारबहुले विनिद्रो निर्वृतश्चरेत् ॥ स्नानि चे० ॥ २६ ॥ योऽश्नाति पंक्तिभेदेन संस्यसूपादिकं नरः ॥ अकृत्वा पंचयज्ञं वा भुंक्ते मोहेन स द्विजाः ॥ २७ ॥ प्रपात्यते यमभटैर्नरके कृमिभोजने ॥ भक्ष्यमाणः कृमिशतैर्भक्षयन्कृमिसंच यान् ॥ २८ ॥ स्वयं च कृमिभूतः संस्तिष्ठेद्यावदवक्षयम् ॥ स्नाति चे० ॥ २९ ॥ यो हरेद्विप्रवित्तानि स्तेयेन बलतोऽपि वा ॥ अन्येषामपि वित्तानि राजा तत्पुरुषोऽपि वा ॥ ३० ॥ अयस्मयाग्निकुंडेषु संदंशैः सोऽतिपीडितः ॥ संदंशे नरके घोरे पात्यते यमपूरुषैः ॥ ३१ ॥ स्नाति चे० ॥ अगम्यां योभिगच्छेत स्त्रियं वै पुरुषाधमः ॥ ३२ ॥ अगम्यं पुरुषं योषिदभिगच्छेत वा द्विजाः ॥ तावयस्मयनारीं च पुरुषं चाप्ययस्मयम् ॥ ३३ ॥ तत्रावालिंग्य तिष्ठंतौ यावच्चंद्रदिवाकरौ ॥ सूर्म्याख्ये नरके घोरे पात्येते बहुकंटके ॥ ३४ ॥ स्नाति चे० ॥ बाधते सर्वजंतून्यो नानो पायैरुपद्रवैः ॥ ३५ ॥ शाल्मलीनरके घोरे पात्यते बहुकंटके ॥ स्नाति चे० ॥ ३६ ॥ राजा वा राजभृत्यो वा यः पाषंडमनुव्रतः ॥ भेदको धर्मसेतूनां वैतरण्यां निपात्यते ॥ ३७ ॥ स्नानि चे० ॥ वृषलीसंगदुष्टो यः शौचाद्याचारवर्जितः ॥ ३८ ॥ त्यक्तलज्जस्त्यक्तवेदः पशुचर्यारतस्तथा ॥ स पूयविष्ठामूत्रासृक्श्लेष्मपित्तादिपूरिते ॥ ३९ ॥ अतिबीभत्सनरके पात्यते यमकिंकरैः ॥ स्नाति चे० ॥ ४० ॥ अश्मभिर्मृगयुर्हन्याद्बाणैर्वा बाधते मृगान् ॥ स विध्यमानो बाणौघैः परत्र यमकिंकरैः ॥ ४१ ॥ प्राणरोधाख्यनरके पात्यते यमकिंकरैः ॥ स्नाति चे० ॥ ४२ ॥ दांभिको यः पशून्यज्ञे विध्यनुष्ठानवर्जितः ॥ हंत्यसौ परलोकेषु वैशसे नरके द्विजाः ॥ ४३ ॥ कृन्त्यमानो यमभटैः पात्यते दुःखसंकुले ॥ स्नाति चे० ॥ ४४ ॥ आत्मभार्यां सवर्णां यो रेतः पाययते तु सः ॥ परत्र रेतःपायी सन्रेतःकुंडे निपात्यते ॥ ४५ ॥ स्नाति चे० ॥ यो दस्युमार्गमाश्रित्य गरदो ग्रामदाहकः ॥ ४६ ॥ वणिग्द्रव्यापहारी च स परत्र द्विजोत्तमाः ॥ वज्रदंष्ट्राहिकाभिख्ये नरके पात्यते चिरम् ॥ ४७ ॥ स्नाति चे० ॥ विद्यंते यानि चान्यानि नरकाणि परत्र वै ॥ ४८ ॥ तानि नाप्नोति मनुजो धनुष्कोटिनिमज्जनात् ॥ धनुष्कोटौ सकृत्स्नानादश्वमेधफलं लभेत् ॥ ४९ ॥ आत्मविद्या भवेत्साक्षान्मुक्तिश्चापि चतुर्विधा ॥ न पापे रमते बुद्धिर्न भवेद्दुःखमेव वा ॥ ५० ॥ बुद्धेः प्रीतिर्भवेत्सम्यग्धनुष्कोटौ निमज्जनात् ॥ तुलापुरुषदानेन यत्फलं लभ्यते नरैः ॥ ५१ ॥ तत्फलं लभ्यते पुंभिर्धनुष्कोटौ निमज्जनात् ॥ गोसहस्रप्रदानेन यत्पुण्यं हि भवेन्नृणाम् ॥ ५२ ॥ तत्पुण्यं लभते मर्त्यो धनुष्कोटौ निमज्जनात् ॥ धर्मार्थकाममोक्षेषु यंयमिच्छति पूरुषः ॥ ५३ ॥

१ शाकम्-इ०पा० ।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंतं सद्यः समाप्नोति धनुष्कोटौ निमज्जनात् ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ ५४ ॥ सद्यः पूतो भवेद्विप्रा धनुष्कोटौ निमज्जनात् ॥ प्रज्ञा लक्ष्मीर्यशः संपज्ज्ञानं धर्मो विरक्तता ॥५५॥ मनःशुद्धिर्भवेन्नॄणां धनुष्कोटिनिमज्जनात्॥ ब्रह्महत्यायुतं चापि सुरापानायुतं तथा॥५६॥अयुतं गुरुदारागमनं पापकारणम्॥ स्तेयायुतं सुवर्णानां तत्संसर्गश्च कोटिशः॥५७॥ शीघ्रं विलयमाप्नोति धनुष्कोटौ निमज्जनात्॥ ब्रह्महत्यासमानानि सुरापनसमानि च॥५८॥गुरुस्त्रीगमनेनापि यानि तुल्यानि चास्तिकाः॥सुवर्णस्तेयतुल्यानि तत्संर्गसमानि च॥५९॥तानि सर्वाणि नश्यंति धनुष्को टिनिमज्जनात्॥उक्तेष्वेतेषु संदेहो न कर्तव्यः कदाचन ॥६०॥ जिह्वाग्रे परशुं तप्तं धारयामि न संशयः ॥ अर्थवादमिमं सर्वं ब्रुवन्वै नारकी भवेत् ॥ ॥ ६१ ॥ संकरः स हि विज्ञेयः सर्वकर्मबहिष्कृतः॥ अहो मौर्ख्यमहो मौर्ख्यमहो मौर्ख्यं द्विजोत्तमाः ॥ ६२ ॥ धनुष्कोट्यभिधे तीर्थे सर्वपातकनाश ने ॥ अद्वैतज्ञानदे पुंसां भुक्तिमुक्तिप्रदायिनि ॥ ६३ ॥ इष्टकाम्यप्रदे नित्यं तथैवाज्ञाननाशने ॥ स्थितेऽपि तद्विहायायं रमतेऽन्यत्र वै जनः ॥६४॥ अहो मोहस्य माहात्म्यं मया वक्तुं न शक्यते ॥ स्नातस्य धनुषः कोटौ नांतकाद्भयमस्ति वै ॥६५॥ धनुष्कोटिं प्रपश्यंति तत्र स्नांति च ये नराः॥ स्तुवंति च प्रशंसंति स्पृशंति च नमंति च ॥ न पिबंति हि ते स्तन्यं मातॄणां द्विजपुंगवाः ॥ ६६ ॥ ॥ ऋषय ऊचुः ॥ ॥ धनुष्कोट्यभिधा तस्य कथं सूत समागता ॥ ६७ ॥ तत्सर्वं ब्रूहि तत्त्वेन विस्तरान्मुनिपुंगव ॥ इति पृष्टो नैमिषीयैराह सूतः पुनश्च तान् ॥ ६८ ॥ ॥ श्रीसूत उवाच ॥ ॥ रामेण निहते युद्धे रावणे लोककण्टके ॥ बिभीषणे च लंकायां राजनि स्थापिते ततः ॥ ६९ ॥ वैदेहीलक्ष्मणयुतो रामो दशरथा त्मजः ॥ सुग्रीवप्रमुखैर्वीरैर्वानरैरपि संवृतः ॥ ७० ॥ सिद्धचारणगन्धर्वदेवविद्याधरर्षिभिः ॥ अप्सरोभिश्च सततं स्तूयमाननिजाद्भुतः ॥ ७१ ॥ लीलाविधृतकोदण्डस्त्रिपुरघ्नो यथा शिवः ॥ सर्वैः परिवृतो रामो गंधमादनमन्वगात् ॥ ७२ ॥ तत्र स्थितं महात्मानं राघवं रावणांतकम् ॥ प्रांजलिः प्रार्थयामास धर्मज्ञोऽथ बिभीषणः ॥ ७३ ॥ सेतुनानेन ते राम राजानः सर्व एव हि ॥ बलोद्रिक्ताः समभ्येत्य पीडयेयुः पुरीं मम ॥ ॥ ७४ ॥ अतः सेतुमिमं भिंधि धनुष्कोट्या रघूद्वह ॥ इति संप्रार्थितस्तेन पौलस्त्येन स राघवः ॥ ७५ ॥ बिभेद धनुषः कोट्या स्वसेतुं रघुनं दनः ॥ अतो द्विजास्ततस्तीर्थं धनुष्कोटिरिति श्रुतम् ॥ ७६ ॥ श्रीरामधनुषः कोट्या यो रेखां पश्यते कृताम् ॥ अनेकक्लेशसंयुक्तं गर्भवासं न पश्यति ॥ ७७ ॥ धनुष्कोट्या कृता रेखा रामेण लवणांबुधौ ॥ तद्दर्शनाद्भवेन्मुक्तिर्न जाने स्नानजं फलम् ॥ ७८ ॥ नर्मदारोधसि तपो महापातक नाशनम् ॥ गंगातीरे तु मरणमपवर्गफलप्रदम् ॥ ७९ ॥ दानं द्विजाः कुरुक्षेत्रे ब्रह्महत्यादिशोधकम् ॥ तपश्च मरणं दानं धनुष्कोटौ कृतं नरैः ॥८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापातकनाशाय मुक्त्यै चाभीष्टसिद्धये ॥ भवेत्समर्थं विप्रेंद्रा नात्र कार्या विचारणा ॥ ८१ ॥ तावत्संपीड्यते जंतुः पातकैश्चोपपातकैः ॥ यावन्नालोक्यते रामधनुष्कोटिर्विमुक्तिदा ॥ ८२ ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते पापकर्माणि धनुष्कोट्यवलोकिनः ॥ ८३ ॥ दक्षिणांभोनिधौ सेतौ रामचन्द्रेण निर्मिता ॥ या रेखा धनुषः कोट्या बिभीषणहिताय वै ॥ ८४ ॥ सैव कैलासपदवीं वैकुण्ठब्रह्मलोकयोः ॥ मार्गः स्वर्गस्य लोकस्य नात्र कार्या विचारणा ॥ ८५ ॥ तुल्यं यज्ञफलैः पुण्यैर्धनुष्कोट्यवगाहनम् ॥ सर्वमंत्राधिकं पुण्यं सर्वदानफलप्रदम् ॥ ८६ ॥ कायक्लेशकरैः पुंसां किं तपोभिः किमध्वरैः ॥ किं वेदैः किमु वा शास्त्रैर्धनुष्कोट्यवलोकिनः ॥ ८७ ॥ रामचंद्रधनुष्कोटौ स्नानं चेल्लभ्यते नृणाम् ॥ सितासितसरित्पुण्यवारिभिः किं प्रयोजनम् ॥ ८८ ॥ रामचंद्रधनुष्कोटिदर्शनं लभ्यते यदि ॥ काश्यां तु मरणान्मुक्तिः प्रार्थ्यते किं वृथा नरैः ॥ ८९ ॥ अनिमज्ज्य धनुष्कोटावनुपोष्य दिनत्रयम् ॥ अदत्त्वा कांचनं गां च दरिद्रः स्यान्न संशयः ॥ ९० ॥ धनुष्कोट्यवगाहेन यत्फलं लभते नरः ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वापि बहुदक्षिणैः ॥ ९१ ॥ न तत्फलमवाप्नोति सत्यंसत्यं वदाम्यहम् ॥ धनुष्कोट्यभिधं तीर्थं सर्वतीर्थाधिकं विदुः ॥ ९२ ॥ दशकोटिसहस्राणि संति तीर्थानि भूतले ॥ तेषां सान्निध्यमस्त्यत्र धनुष्कोटौ द्विजोत्तमाः ॥ ९३ ॥ अष्टौ वसव आदित्या रुद्राश्च मरुतस्तथा ॥ साध्याश्च सह गन्धर्वाः सिद्धविद्याधरास्तथा ॥९४॥ एते चान्ये च ये देवाः सान्निध्यं कुर्वते सदा ॥ तीर्थेऽत्र धनुषः कोटौ नित्यमेव पितामहः ॥ ९५ ॥ सन्निधत्ते शिवो विष्णुरुमा मा च सरस्वती ॥ धनुष्कोटौ तपस्तप्त्वा देवाश्च ऋषयस्तथा ॥ ९६ ॥ विपुलां सिद्धिमगमंस्तत्फलेन मुनीश्वराः ॥ स्नायात्तत्र नरो यस्तु पितृदेवांश्च तर्पयेत् ॥९७॥ सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥ अत्रैकं भोजयेद्विप्रं यो नरो भक्तिसंयुतः॥९८॥ इह लोके परत्रापि सोनंतसुखमश्नुते ॥ शाकमूलफले वृत्तिं यो न वर्तयते नरः॥९९॥ स नरो धनुषः कोटौ स्नायात्तत्फलसिद्धये ॥ अश्वमेधक्रतुं कर्तुं शक्तिर्यस्य न विद्यते ॥१००॥ धनुष्कोटौ स हि स्नायात्तेन तत्फलमश्नुते ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वापि मुनीश्वराः॥ १॥ निंद्ययोनौ न जायंते धनुष्कोट्यवगाहनात्॥ मकरस्थे रवौ माघे धनुष्कोटौ तु यो नरः॥२॥ स्नायात्पुण्यं निगदितुं तस्याहं न क्षमो द्विजाः॥ माघमासे धनुष्कोटाववगाहेत यो नरः ॥ ३ ॥ स स्नातः सर्वतीर्थेषु गंगादिषु मुनीश्वराः ॥ प्राप्नुयादक्षयाँल्लोकान्मोक्षं चापि लभेत सः ॥ ४ ॥ जन्मप्रभृति यत्पापं स्त्रियो वा पुरुषस्य वा ॥ तत्सर्वं माघमासेऽत्र मज्जनाद्विलयं व्रजेत् ॥ ५ ॥ यथा सुराणां सर्वेषामुत्तमो रघुनंदनः ॥ तथैव च धनुष्कोटिः सर्वतीर्थोत्तमा स्मृता ॥ ६ ॥ तत्र स्नानं माघमासे सर्वाभीष्टप्रदायकम् ॥ त्रिंशद्दिनं माघमासे नियतोऽपि जितेंद्रियः ॥ ७ ॥ धनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्कोटौ नरः स्नायादपुनर्भवसिद्धये ॥ एकभुक्तो जितक्रोधो माघमासेऽत्र यो नरः ॥ ८ ॥ स्नानं करोति विप्रेंद्रा मुच्यते ब्रह्महत्यया ॥ श्रीरामध
नुषः कोटौ माघमासे नरस्तु यः ॥ ९ ॥ स्नात्वांते शिवरात्रौ च निराहारो जितेंद्रियः ॥ कृत्वा जागरणं रात्रौ प्रतियामं विशेषतः ॥ ११० ॥ राम
नाथं महादेवमभ्यर्च्य विधिपूर्वकम् ॥ परेद्युरुदिते सूर्ये धनुष्कोटौ निमज्ज्य च ॥ ११ ॥ अन्येष्वपि च तीर्थेषु स्नात्वा नियतमानसः ॥ निर्वर्त्य
नित्यकर्माणि रामनाथं निषेव्य च ॥ १२ ॥ यथाशक्ति द्विजानन्नैर्भोजयित्वा द्विजोत्तमाः ॥ भूमिं गां च तिलान्धान्यं दत्त्वा वित्तं च शक्तितः ॥
॥ १३ ॥ ब्राह्मणैरप्यनुज्ञातः स्वयं भुंजीत वाग्यतः ॥ एवं कृतवतः पुंसो रामनाथो महेश्वरः ॥ १४ ॥ विमोच्य सर्वपापानि भुक्तिं मुक्तिं प्रय
च्छति ॥ अतः सर्वप्रयत्नेन माघमासे मुनीश्वराः ॥ १५ ॥ स्नातव्यं हि धनुष्कोटौ नरैरत्र मुमुक्षुभिः ॥ धनुष्कोटौ नरः स्नानं सेतावर्धोदये तु यः
॥ १६ ॥ करोति तस्य पापानि नश्यंत्येव क्षणाद्द्विजाः ॥ स्नानं महोदये चात्र भुक्तिमुक्तिफलप्रदम् ॥ १७ ॥ यः स्नायाद्धनुषः कोटावर्द्धोदयमहो
दये ॥ तस्य वश्यास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ १८ ॥ धनुष्कोटौ द्विजाः स्नानमर्द्धोदयमहोदये ॥ विनाप्यद्वैतविज्ञानं सायुज्यप्राप्तिकारणम् ॥
॥ १९ ॥ तत्र स्नानं द्विजाः पुंसामर्द्धोदयमहोदये ॥ मन्वाद्युक्तं विना सत्यं प्रायश्चित्तं हि पापिनाम् ॥ १२० ॥ अत्र सेतौ धनुष्कोटावर्धोदयमहो
दये ॥ स्नाति चेन्मनुजो विप्राः सत्यं यज्ञं विनाप्ययम् ॥ २१ ॥ यज्ञानां फलमाप्नोति संपूर्णं नात्र संशयः ॥ चंद्रसूर्योपरागेषु यः स्नायादत्र
मानवः ॥ २२ ॥ तस्य पुण्यफलं वक्तुं शेषेणापि न शक्यते ॥ चंद्रसूर्योपरागेषु धनुष्कोट्यवगाहनम् ॥ २३ ॥ ब्रह्महत्यादिपापानां प्रायश्चित्त
मुदीरितम् ॥ श्रीरामधनुषः कोटौ चंद्रसूर्योपरागयोः ॥ २४ ॥ स्नानं सायुज्यदं प्रोक्तं सर्वतीर्थफलप्रदम् ॥ चंद्रसूर्योपरागेषु अर्धोदयमहोदये ॥
॥ २५ ॥ स्नातव्यमत्र मनुजैर्भुक्तिमुक्तिफलेच्छुभिः ॥ अतः सर्वं परित्यज्य गच्छध्वं मुनिपुंगवाः ॥ २६ ॥ धनुष्कोटिं महापुण्यां भुक्तिमुक्तिफल
प्रदाम् ॥ तत्र गत्वा पितृभ्यश्च कुरुध्वं पिंडदापनम् ॥ २७ ॥ आकल्पं पितृतृप्तिः स्यादत्र पिंडनिवापनात् ॥ पितॄणां तृप्तिदं स्थानत्रयं रामेण निर्मि
तम् ॥ २८ ॥ सेतुमूले धनुष्कोट्यां गंधमादनपर्वते ॥ पिंडं दत्त्वा पितृभ्योऽत्र ऋणान्मुक्तो भविष्यति ॥ २९ ॥ सेतुमूलं धनुष्कोटिं गंधमादनमेव
च ॥ ऋणमोक्ष इति ख्यातं त्रिस्थानं देवनिर्मितम् ॥ १३० ॥ अतः सर्वप्रयत्नेन धनुष्कोटिर्निषेव्यताम् ॥ अत्रागत्य धनुष्कोटौ स्नात्वा नियमपूर्व
कम् ॥ ३१ ॥ द्रोणाचार्यसुतः श्रीमानश्वत्थामा मुनीश्वराः ॥ सुप्तमारणदोषेण घोरेण मुमुचे क्षणात् ॥ ३२ ॥ एवं वः कथितं विप्रा धनुष्कोटे

१ गण्यत–इ० पा० । २ धनुष्कोटौ निमज्जनम्––इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तु वैभवम् ॥ भुक्तिमुक्तिप्रदं नृणां सर्वपापनिबर्हणम् ॥ १३३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतु माहात्म्ये धनुष्कोटिप्रशंसायां धनुष्कोटिवैभवकथनवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ अश्वत्थामा कथं सूत सुप्तमारणमाचरत् ॥ कथं च मुक्तस्तत्पापाद्धनुष्कोटौ निमज्जनात् ॥ १ ॥ एतन्नः श्रद्दधानानां ब्रूहि पौराणिकोत्तम ॥ तृप्तिर्न जायतेऽस्माकं त्वद्वचोमृतपायिनाम् ॥ २ ॥ इति पृष्टस्तदा सूतो नैमिषारण्यवासिभिः ॥ वक्तुं प्रचक्रमे तत्र व्यासं नत्वा गुरुं मुदा ॥ ३ ॥ ॥ श्रीसूत उवाच ॥ ॥ राज्यार्थं कलहे जाते पांडवानां पुरा द्विजाः ॥ धार्तराष्ट्रैर्महायुद्धे महदक्षौहिणीयुते ॥ ४ ॥ युद्धं दशदिनं कृत्वा भीष्मे शांतनवे हते ॥ द्रोणे पंचदिनं कृत्वा कर्णे च द्विदिनं तथा ॥ ५ ॥ तथैवैकदिनं युद्धा शल्ये च निधनं गते ॥ अष्टादशदिने तत्र रणे दुर्योधने द्विजाः ॥ ॥ ६ ॥ भग्नोरौ भीमगदया पतिते राजसत्तमे ॥ सर्वे नृपतयो विप्रा निवेशाय कृतत्वराः ॥ ७ ॥ ये जीवितास्तु राजानस्ते ययुर्हृष्टमानसाः ॥ धृष्टद्युम्नशिखंड्याद्याः सृञ्जयाः सर्व एव हि ॥ ८ ॥ अन्ये चापि महीपाला जग्मुः स्वशिबिराण्यथ ॥ अथ पार्था महावीरा कृष्णसात्यकिसंयुताः[1] ॥ ९ ॥ दुर्योधनस्य शिबिरं प्राविशन्निर्जनं द्विजाः ॥ वृद्धैरमात्यैस्तत्रस्थैः षंढैः स्त्रीरक्षकैस्तथा ॥ १० ॥ कृतांजलिपुटैः प्रह्वैः काषायमलिनांबरैः ॥ प्रणम्यमानास्ते पार्थाः कुरुराजस्य वेश्मनि ॥ ११ ॥ तत्रत्यद्रव्यजातानि समादाय महा बलाः ॥ सुयोधनस्य शिबिरे न्यवसंत सुखेन ते ॥ १२ ॥ अथ तानब्रवीत्पार्थाञ्छ्रीकृष्णः प्रीणयन्निव[2] ॥ मंगलार्थाय चास्माभिर्वस्तव्यं शिबिराद्बहिः ॥ १३ ॥ इत्युक्ता वासुदेवेन तथेत्युक्त्वाथ पांडवाः ॥ कृष्णसात्यकिसंयुक्ताः प्रययुः शिबिराद्बहिः ॥ १४ ॥ वासुदेवेन सहिता मंगलार्थं हि पांडवाः ॥ ओघवत्याः समासाद्य तीरं नद्या नरोत्तमाः ॥ १५ ॥ ऊषुस्तां रजनीं तत्र हतशत्रुगणाः सुखम् ॥ कृतवर्मा कृपो द्रौणिस्तथा दुर्योधनांतिकम् ॥ १६ ॥ आदित्यास्तमयात्पूर्वमपराह्णे समाययुः ॥ सुयोधनं तदा दृष्ट्वा रणपांसुषु रूषितम् ॥ १७ ॥ भग्नोरुदण्डं गदया भीमसेनस्य भीमया ॥ रुधिरासिक्तसर्वांगं चेष्टमानं महीतले ॥ १८ ॥ अशोचंत तदा तत्र द्रोणपुत्रादयस्त्रयः ॥ शुशोच सोऽपि तान्दृष्ट्वा रणे दुर्योधनो नृपः ॥ १९ ॥ दृष्ट्वा तथा तु राजानं बाष्पव्याकुललोचनम् ॥ अश्वत्थामा तदा कोपाज्ज्वलन्निव महानलः ॥ २० ॥ पाणौ पाणिं विनिष्पिष्य क्रोधविस्फारितेक्षणः ॥ अश्रुविक्लवया वाचा दुर्योधनमभाषत ॥ २१ ॥ पिता मे पातितः क्षुद्रैश्छलेनैव रणाजिरे ॥ न तथा तेन शोचामि यथा निष्पा

१ कृष्णपार्थिवसंयुताः–इ० पा० । २ प्रहसन्निव–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तिते त्वयि ॥ २२ ॥ शृणु वाक्यं ममाद्य त्वं यथार्थं वदतो नृप ॥ सुकृतेन शपे चाहं सुयोधन महामते ॥ २३ ॥ अद्य रात्रौ हनिष्यामि पांडवा न्सह सृंजयैः ॥ पश्यतो वासुदेवस्य त्वमनुज्ञां प्रयच्छ मे ॥ २४ ॥ तस्य तद्वचनं श्रुत्वा द्रौणिं राजा तदाऽब्रवीत् ॥ तथास्त्विति पुनः प्राह कृपं राजा द्विजोत्तमाः ॥ २५ ॥ आचार्येन द्रोणपुत्रं कलशोत्थेन वारिणा ॥ सैनापत्येऽभिषिंचस्वेत्यथ सोपि तथाऽकरोत् ॥ २६ ॥ सोभिषिक्तस्तदा द्रौणिः परिष्वज्य नृपोत्तमम् ॥ कृतवर्मकृपाभ्यां च सहितस्त्वरितं ययौ ॥ २७ ॥ ततस्ते तु त्रयो वीराः प्रयाता दक्षिणोन्मुखाः ॥ आदित्यास्तम यात्पूर्वं शिबिरांतिकमासत ॥ २८ ॥ पार्थानां भीषणं शब्दं श्रुत्वा तत्र जयैषिणः ॥ पांडवानुद्रुता भीतास्तदा द्रौण्यादयस्त्रयः ॥ २९ ॥ प्राङ्मुखा दुद्रुवुर्भीत्या कियद्दूरं श्रमातुराः ॥ मुहूर्तं ते ततो गत्वा क्रोधामर्षवशानुगाः ॥ ३० ॥ दुर्योधनवधार्तास्ते क्षणं तत्रावतस्थिरे ॥ ततोऽपश्यन्नरण्यं वै नानातरुलतावृतम् ॥ ३१ ॥ अनेकमृगसंबाधं क्रूरपक्षिगणाकुलम् ॥ समृद्धजलसंपूर्णतटाकपरिशोभितम् ॥ ३२ ॥ पद्मेंदीवरकह्लारसरसी शतसंकुलम् ॥ तत्र पीत्वा जलं ते तु पाययित्वा हयांस्तथा ॥ ३३ ॥ अनेकशाखासंबाधन्यग्रोधं ददृशुस्ततः ॥ संप्राप्य तु महावृक्षं न्यग्रोधं ते त्रयस्तदा ॥ ३४ ॥ अवतीर्य रथेभ्यश्च मोचयित्वा तुरंगमान् ॥ उपस्पृश्य जलं तत्र सायंसंध्यामुपासत ॥ ३५ ॥ अथ चास्तगिरिं भानुः प्रपेदे च गतप्रभः ॥ ततश्च रजनी घोरा समभूत्तिमिराकुला ॥ ३६ ॥ रात्रिंचराणि सत्त्वानि संचरंति ततस्ततः ॥ दिवाचराणि सत्त्वानि निद्रावशमुपा ययुः ॥ ३७ ॥ कृतवर्मा कृपो द्रौणिः प्रदोषसमये हि ते ॥ न्यग्रोधस्योपविविशुरंतिके शोककर्शिताः ॥ ३८ ॥ कृपभोजौ तदा निद्रां भेजातेऽतिप याक्रमौ ॥ सुखोचितास्त्वदुःखार्हा निषेदुर्धरणीतले ॥ ३९ ॥ द्रोणपुत्रस्तु कोपेन कलुषीकृतमानसः ॥ ययौ न निद्रां विप्रेंद्रा निश्वसन्नुरगो यथा ॥ र॥ ४० ॥ ततोऽवलोकयांचक्रे तदरण्यं भयानकम् ॥ न्यग्रोधं च ततोऽपश्यद्बहुवायससंकुलम् ॥ ४१ ॥ तत्र वायसवृन्दानि निशायां वासमाय युः ॥ सुखं भिन्नासु शाखासु सुषुपुस्ते पृथक्पृथक् ॥ ४२ ॥ काकेषु तेषु सुप्तेषु विश्वस्तेषु समंततः ॥ ततोऽपश्यत्समायांतं भासं द्रौणिर्भयंकरम् ॥ ॥ ४३ ॥ क्रूरशब्दं क्रूरकायं बभ्रुपिंगकलेवरम् ॥ स भासोऽथ भृशं शब्दं कृत्वालीयत शाखिनि ॥ ४४ ॥ उत्प्लुत्य तस्य शाखायां न्यग्रोधस्य विहंगमः ॥ सुप्तान्काकान्निजघ्नेऽसावनेकान्वायसांतकः ॥ ४५ ॥ काकानामभिनत्पक्षान्स केषांचिद्विहंगमः ॥ इतरेषां च चरणाञ्छिरांसि चरणा युधः ॥ ४६ ॥ विचकर्त क्षणेनासावुलूको बलवान्द्विजाः ॥ स भिन्नदेहावयवैः काकानां बहुभिस्तदा ॥ ४७ ॥ समंतादावृतं सर्वं न्यग्रोधपरि मण्डलम् ॥ वायसांस्तान्निहत्यासावुलूको मुमुदे तदा ॥ ४८ ॥ द्रौणिर्दृष्ट्वा तु तत्कर्म भासेनैवं कृतं निशि ॥ करिष्याम्यहमप्येवं शत्रूणां निधनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशि ॥ ४९ ॥ इत्यचिंतयदेकः सन्नुपदेशमिमं स्मरन् ॥ जेतुं न शक्याः पार्था हि ऋजुमार्गेण युद्ध्यता ॥ ५० ॥ मया तच्छद्मना तेऽद्य हंतव्या जितकाशिनः ॥ सुयोधनसकाशे च प्रतिज्ञातो मया वधः ॥ ५१ ॥ ऋजुमार्गेण युद्धे मे प्राणनाशो भविष्यति ॥ छलेन युध्यमानस्य जयश्चास्य रिपुक्षयः ॥ ५२ ॥ यच्च निंद्यं भवेत्कार्यं लोके सर्वजनैरपि ॥ कार्यमेव हि तत्कर्म क्षत्रधर्मानुवर्तिना ॥ ५३ ॥ पार्थैरपि छलेनैव कृतं कर्म सुयोधने ॥ अस्मिन्नर्थे पुराविद्भिः प्रोक्ताः श्लोका भवंति हि ॥ ५४ ॥ परिश्रांते विदीर्णे च भुंजाने च रिपोर्बले ॥ प्रस्थाने च प्रवेशे च प्रहर्तव्यं न संशयः ॥ ५५ ॥ निद्रार्तमर्धरात्रे च तथा त्यक्तायुधं रणे ॥ भिन्नयोधं बलं सर्वं प्रहर्तव्यमरातिभिः ॥ ५६ ॥ एवं स नियमं कृत्वा सुप्तमारणकर्मणि ॥ प्राबोधयद्द्रोजकृपौ सुप्तौ रात्रौ स साहसी ॥ द्रौणिर्ध्यात्वा मुहूर्तं तु तावुभावभ्यभाषत ॥ ५७ ॥ ॥ ॥ अश्वत्थामोवाच ॥ ॥ मृतः सुयोधनो राजा महाबलपराक्रमः ॥ ५८ ॥ शुद्धकर्मा हतः पार्थैर्बहुभिः क्षुद्रकर्मभिः ॥ भीमेनातिनृशंसेन शिरो राज्ञः पदा हतम् ॥ ५९ ॥ ततोऽद्य रात्रौ पार्थानां समेत्य पटमण्डपम् ॥ सुखसुप्तान्हनिष्यामः शस्त्रैर्नानाविधैर्वयम् ॥ कृपः प्रोवाच तत्रैनमिति श्रुत्वा द्विजोत्तमाः ॥ ६० ॥ ॥ कृप उवाच ॥ ॥ सुप्तानां मारणं लोके न धर्मो नच पूज्यते ॥ ६१ ॥ तथैव त्यक्तशस्त्राणां संत्यक्तरथवाजिनाम् ॥ शृणु मे वचनं वत्स मुच्यतां साहसं त्वया ॥ ६२ ॥ वयं तु धृतराष्ट्रं च गांधारीं च पतिव्रताम् ॥ पृच्छामो विदुरं चापि तदुक्तं करवामहे ॥ इत्युक्तः स तदा द्रौणिः कृपं प्रोवाच वै पुनः ॥ ६३ ॥ ॥ अश्वत्थामोवाच ॥ ॥ पांडवैश्च पुरा यन्मे छलाद्युद्धे पिता हतः ॥ ६४ ॥ तन्मे सर्वाणि मर्माणि निकृन्तति हि मातुल ॥ द्रोणहंताहमित्येतद्धृष्टद्युम्नस्य यद्वचः ॥ ६५ ॥ कथं जनसमक्षे तद्वचनं संश्रृणोम्यहम् ॥ तैरेव पांडवैः पूर्वं धर्मसेतुर्निराकृतः ॥ ६६ ॥ समक्षमेव युष्माकं सर्वेषामेव भूभृताम् ॥ त्यक्तायुधो मम पिता धृष्टद्युम्नेन पातितः ॥ ६७ ॥ तथा शांतनवो भीष्मस्त्यक्तचापो निरायुधः ॥ शिखंडिनं पुरोधाय निहतः सव्यसाचिना ॥ ६८ ॥ एवमन्येऽपि भूपालाश्छलेनैव हतास्तु तैः ॥ तथैवाहं करिष्यामि सुप्तानां मारणं निशि ॥ ६९ ॥ एवमुक्त्वा तदा द्रौणिः संयुक्ततुरगं रथम् ॥ प्रायादभिमुखः शत्रून्समारुह्य क्रुधा ज्वलन् ॥ ७० ॥ तं यांतमन्वगातां तौ कृतवर्मकृपावुभौ ॥ ययुश्च शिबिरे तेषां संप्रसुप्तजनं तदा ॥ ७१ ॥ शिबिरद्वारमासाद्य द्रोणपुत्रो व्यतिष्ठत ॥ रात्रौ तत्र समाराध्य महादेवं घृणानिधिम् ॥ ७२ ॥ अवाप विमलं खड्गं महादेवाद्वरप्रदात् ॥ ततो द्रौणिरवस्थाप्य कृतवर्मकृपावुभौ ॥ ७३ ॥ द्वारदेशे महावीरः शिबिरांतः प्रविष्टवान् ॥ प्रविष्टे शिबिरे द्रौणौ कृतवर्मकृपावुभौ ॥ ७४ ॥ द्वारदेशे व्यतिष्ठेतां यत्तौ परमधन्विनौ ॥ अथ द्रौणिः सुसंक्रुद्धस्तेजसा प्रज्वल

Nepal Sanskrit University, Balmeeki Campus Kathmandu

न्निव ॥ ७५ ॥ खड्गं विमलमादाय व्यचरच्छिबिरे निशि ॥ ततस्तु धृष्टद्युम्नस्य शिबिरं मंदमाययौ ॥ ७६ ॥ धृष्टद्युम्नादयस्तत्र महायुद्धेन
कर्शिताः ॥ सुषुपुर्निशि विश्वस्ताः स्वस्वसैन्यसमावृताः ॥ ७७ ॥ धृष्टद्युम्नस्य शिबिरं प्रविश्य द्रौणिरस्त्रवित् ॥ तं सुप्तं शयने शुभ्रे ददर्शारान्महा
बलम् ॥ ७८ ॥ पादेनाघातयद्रोषात्स्वपंतं द्रोणनंदनः ॥ स बुद्धश्चरणाघातादुत्थाय शयनादथ ॥ ७९ ॥ व्यलोकयत्तदा वीरो द्रोणपुत्रं पुरः
स्थितम् ॥ तमुत्पतंतं शयनाद्द्रोणाचार्यसुतो बली ॥ ८० ॥ केशेष्वाकृष्य बाहुभ्यां निष्पिपेष धरातले ॥ धृष्टद्युम्नस्तदा तेन निष्पिष्टः स भया
तुरः ॥ ८१ ॥ निद्रांधः पादघातार्तो न शशाक विचेष्टितुम् ॥ द्रौणिस्त्वाक्रम्य तस्योरः कण्ठं बद्ध्वा धनुर्गुणैः ॥ ८२ ॥ नदंतं विस्फुरंतं तं पशु
मारममारयत् ॥ तस्य सैन्यानि सर्वाणि न्यवधीच्च तथैव सः ॥ ८३ ॥ युधामन्युं महावीर्यमुत्तमौजसमेव च ॥ तथैव द्रौपदीपुत्रानवशिष्टांश्च सोम
कान् ॥ ८४ ॥ शिखंडिप्रमुखानन्यान्खड्गेनामारयद्बहून् ॥ तद्भयाद्द्वारनिर्यातान्सर्वानेव च सैनिकान् ॥ ८५ ॥ प्रापयामासतुर्मृत्युं कृतवर्मकृपा
वुभौ ॥ एवं निहतसैन्यं तच्छिबिरं तैर्महाबलैः ॥ ८६ ॥ तत्क्षणे शून्यमभवत्त्रिजगत्प्रलये यथा ॥ एवं हत्वा ततः सर्वान्द्रोणपुत्रादयस्त्रयः ॥८७॥
निरगुः शिबिरात्तस्मात्पार्थभीता भयातुराः ॥ सर्वे पृथक्पृथग्देशान्दुद्रुवुः शीघ्रगामिनः ॥ ८८ ॥ अथ द्रौणिर्ययौ विप्रा रेवातीरं
मनोरमम् ॥ तत्र ह्यनेकसाहस्रा ऋषयो वेदवादिनः ॥ ८९ ॥ कथयंतः कथाः पुण्यास्तपश्चक्रुरनुत्तमम् ॥ तत्रायं प्रययौ द्रौणिर्ऋ
षीणामाश्रमेष्वथ ॥ ९० ॥ प्रविष्टमात्रे तस्मिंस्तु मुनयो ब्रह्मवादिनः ॥ द्रौणेर्दुश्चरितं ज्ञात्वा प्राहुर्योगबलेन तम् ॥ ९१ ॥ सुप्तमा
रणकृत्पापी द्रौणे त्वं ब्राह्मणाधमः ॥ त्वद्दर्शनेन ह्यस्माकं पातित्यं भवति ध्रुवम् ॥ ९२ ॥ त्वत्संभाषणमात्रेण ब्रह्महत्यायुतं भ
वेत् ॥ अतोऽस्मदाश्रमेभ्यस्त्वं निर्गच्छ पुरुषाधम ॥ ९३ ॥ इत्यब्रुवंस्तदा द्रौणिं तत्रत्या मुनयो द्विजाः ॥ इतीरितस्ततो द्रौणिर्मुनिभिर्ब्रह्म
वादिभिः ॥ ९४ ॥ लज्जितो निरगात्तस्मादाश्रमान्मुनिसेवितात् ॥ एवं काश्यादितीर्थेषु पुण्येषु प्रययौ च सः ॥ ९५ ॥ तत्रतत्र द्विजैः सर्वै
र्निंदितोऽसौ महात्मभिः ॥ व्यासं शरणमापेदे प्रायश्चित्तचिकीर्षया ॥ ९६ ॥ ततो बदरिकारण्ये समासीनं महामुनिम् ॥ द्वैपायनं समागम्य
प्रणनाम सभक्तिकम् ॥ ९७ ॥ ततो व्यासोऽब्रवीदेनं द्रोणाचार्यसुतं मुनिः ॥ त्वमस्मदाश्रमाद्द्रौणे निर्याहि त्वरया त्विति ॥ ९८ ॥ सुप्तमारण
दोषेण महापातकवान्भवान् ॥ अतो मे भवतालापान्महत्पापं भविष्यति ॥ इत्युक्तः स तदा द्रौणिः प्रोवाचेदं वचो मुनिः ॥ ९९ ॥ ॥ अश्व ॥ ५७ ॥
त्थामोवाच ॥ ॥ भगवन्निंदितः सर्वैस्त्वामस्मि शरणं गतः ॥ १०० ॥ ब्रवीषि चेत्त्वमप्येवं कोऽन्यो मे शरणं भवेत् ॥ कृपां कुरु मयि ब्रह्मन्साधवो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीनवत्सलाः ॥ १ ॥ सुतमारणदोषस्य शांत्यर्थं भगवन्मम ॥ प्रायश्चित्तं विधेहि त्वं सर्वज्ञोऽसि भवान्यतः ॥ इत्युक्तो द्रौणिना व्यासश्चिरं ध्यात्वा तमब्रवीत् ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ एतत्पापस्य शांत्यर्थं प्रायश्चित्तं स्मृतौ न हि ॥ ३ ॥ तथाप्युपायं वक्ष्यामि तवैतद्दोष शांतये ॥ दक्षिणांबुनिधौ पुण्ये रामसेतौ विमुक्तिदे ॥ ४ ॥ धनुष्कोटिरितिख्यातं तीर्थमस्ति महत्तरम् ॥ अस्ति पुण्यतमं द्रौणे महापात कनाशनम् ॥ ५ ॥ स्वर्गमोक्षप्रदं पुंसां ब्रह्महत्यादिशोधकम् ॥ सर्वमंगलमांगल्यं सर्वाभीष्टप्रदायकम् ॥ ६ ॥ पवित्राणां पवित्रं च तीर्थानां च तथोत्तमम् ॥ दुःस्वप्ननाशनं पुण्यं नरकक्लेशनाशनम् ॥ ७ ॥ अकालमृत्युशमनं पुंसां विजयवर्द्धनम् ॥ दारिद्र्यनाशनं पुंसामायुर्वर्धनकारणम् ॥ ८ ॥ चित्तशुद्धिप्रदं नृणां शांतिदांत्यादिकारणम् ॥ तत्र गत्वा धनुष्कोटौ रामसेतौ विमुक्तिदे ॥ ९ ॥ स्नानं कुरुष्व द्रौणे त्वं मासमात्रं निरंतरम् ॥ सुतमारणदोषात्त्वं सद्यः पूतो भविष्यसि ॥ ११० ॥ कुरुष्व वचनं शीघ्रं मम त्वं द्रोणनंदन ॥ एवमुक्तस्तदा द्रौणिर्व्यासेन परमर्षिणा ॥ ११ ॥ रामसेतुं समासाद्य धनुष्कोटिं पवित्रदाम् ॥ सस्नौ संकल्पपूर्वं तु मासमेकं निरन्तरम् ॥ १२ ॥ त्रिसंध्यं रामनाथं च सिषेवे स दिने दिने ॥ ततस्त्रिंशद्दिने तोयस्नानाद्द्रोणात्मजस्तदा ॥ १३ ॥ जजाप च धनुष्कोट्यां मंत्रं पंचाक्षरं तदा ॥ अकार्षीदुपवासं च द्रोणपुत्रस्तु तद्दिने ॥ १४ ॥ अकरोज्जागरं रात्रौ रामनाथस्य सन्निधौ ॥ अपरेद्युर्धनुष्कोटौ स्नात्वा संकल्पपूर्वकम् ॥ १५ ॥ सिषेवे रामनाथं च स्तुत्वा भक्तिपुरःसरम् ॥ ननर्त पुरतः शंभोरानंदाश्रुपरिप्लुतः ॥ १६ ॥ ततः प्रसन्नो भगवान्प्रादुरासीत्तदग्रतः ॥ दृष्ट्वा तत्र महादेवं तुष्टाव परमेश्वरम् ॥ ॥ १७ ॥ ॥ द्रौणिरुवाच ॥ ॥ नमस्ते देवदेवेश करुणाकर शंकर ॥ आपदंबुधिमग्नानां पोतायितपदांबुज ॥ १८ ॥ महादेव कृपामूर्ते धूर्जटे नीललोहित ॥ उमाकांत विरूपाक्ष चंद्रशेखर ते नमः ॥ १९ ॥ मृत्युंजय त्रिनेत्र त्वं पाहि मां कृपया दृशा ॥ पार्वतीपतये तुभ्यं त्रिपुरघ्नाय शंभवे ॥ १२० ॥ पिनाकपाणये तुभ्यं त्र्यंबकाय नमोनमः ॥ अनंतादिमहानागहारभूषणभूषित ॥ २१ ॥ शूलपाणे नमस्तुभ्यं गंगाधर मृडाव्यय ॥ रक्ष मां कृपया देव पापसंघातपंजरात् ॥ इति स्तुतो महादेवो द्रौणिं प्रोवाच हर्षितः ॥ २२ ॥ ॥ महादेव उवाच ॥ ॥ सुतमारणदोषस्ते धनुष्कोटौ निमज्जनात् ॥ २३ ॥ अश्वत्थामन्विनष्टोऽभूद्दरं वरय सुव्रत ॥ मयि प्रसन्ने लोकेषु किमलभ्यं भवेन्नृणाम् ॥ २४ ॥ अतोऽभीष्टं वृणीष्व त्वं मत्तो द्रोणात्मजाधुना ॥ इत्युक्तः शंभुना द्रौणिः प्राह तं परमेश्वरम् ॥ २५ ॥ तवाद्य दर्शनेनाहं कृतार्थोस्मि महेश्वरम् ॥ त्वद्दर्शन

१ द्रौणिः-इ० पा० । २ नमोऽस्तु ते-इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मपुण्यानामलभ्यं जन्मकोटिभिः ॥ २६ ॥ अतो युष्मत्पदांभोजे निश्चला भक्तिरस्तु मे ॥ इममेव वरं देहि मह्यं शंभो नमोऽस्तु ते ॥२७॥ उक्त्वा
तथास्त्विति द्रौणिं देवदेवो महेश्वरः ॥ पश्यतो द्रोणपुत्रस्य तत्रैवांतरधीयत ॥२८॥ अश्वत्थामापि विप्रेंद्रा धूतपापो विनिर्मलः ॥ रामचंद्रधनुष्को
टौ स्नानमात्रेण तत्क्षणे ॥२९॥ धूतपापमिमं द्रौणिं सर्वे चापि महर्षयः ॥ शुद्धं प्रत्यग्रहीषुस्ते तदाप्रभृति निर्मलम् ॥१३०॥ एवं वः कथितं विप्रा
द्रौणिपापविमोक्षणम् ॥ रामचन्द्रधनुष्कोटिस्नानवैभवमात्रतः ॥३१॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ स विधूयेह पापानि शिवलोके म
हीयते ॥ १३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायामश्वत्थामसुप्तमारणदो
षशांतिवर्णनंनामैकत्रिंशोऽध्यायः ॥३१॥ ॥ श्रीसूत उवाच ॥ ॥ भूयोऽपि संप्रवक्ष्यामि धनुष्कोटेस्तु वैभवम् ॥ युष्माकमादरेणाहं नैमिषारण्यवा
सिनः ॥१॥ नंदोनाम महाराजः सोमवंशसमुद्भवः ॥ धर्मेण पालयामास सागरांतां धरामिमाम् ॥२॥ तस्य पुत्रः समभवद्धर्मगुप्त इति श्रुतः ॥ राज्य
रक्षाधुरं नंदो निजपुत्रे निधाय सः ॥३॥ जितेंद्रियो जिताहारः प्रविवेश तपोवनम् ॥ ताते तपोवनं याते धर्मगुप्ताभिधो नृपः ॥४॥ मेदिनीं पालया
मास धर्मज्ञो नीतितत्परः ॥ ईजे बहुविधैर्यज्ञैर्देवानिंद्रपुरोगमान् ॥ ५ ॥ ब्राह्मणेभ्यो ददौ वित्तं क्षेत्राणि च बहूनि सः ॥ सर्वे स्वधर्मनिरतास्तस्मिन्रा
जनि शासति ॥ ६ ॥ बभूवुर्नाभवन्पीडास्तस्मिंश्चोरादिसंभवाः ॥ कदाचिद्धर्मगुप्तोऽयमारूढस्तुरगोत्तमम् ॥ ७ ॥ वनं विवेश विप्रेंद्रा मृगयारसकौ
तुकी ॥ तमालतालहिंतालकुरवाकुलदिङ्मुखे ॥ ८ ॥ विचचार वने तस्मिन्सिंहव्याघ्रभयानके ॥ मत्तालिकुलसंनादसंमूर्छितदिगंतरे ॥ ९ ॥ पद्म
कल्हारकुमुदनीलोत्पलवनाकुलैः ॥ तटाकैरपि संपूर्णे तपस्विजनमंडिते ॥१०॥ तस्मिन्वने संचरतो धर्मगुप्तस्य भूपतेः ॥ अभूद्विभावरी विप्रास्त
मसावृतदिङ्मुखा ॥ ११ ॥ राजापि पश्चिमां संध्यामुपास्य नियमान्वितः ॥ जजाप तत्र च वने गायत्रीं वेदमातरम् ॥ १२ ॥ सिंहव्याघ्रादिभीत्या
स्मिन्वृक्षमेकं समास्थिते ॥ राजपुत्रे तदाभ्यागादृक्षः सिंहभयार्दितः ॥ १३ ॥ अन्वधावत तं ऋक्षमेकः सिंहो वनेचरः ॥ अनुद्रुतः स सिंहेन
ऋक्षो वृक्षमुपारुहत् ॥ १४ ॥ आरुह्य ऋक्षो वृक्षं तं ददर्श जगतीपतिम् ॥ वृक्षस्थितं महात्मानं महाबलपराक्रमम् ॥ १५ ॥ उवाच भूपतिं दृष्ट्वा
ऋक्षोयं वनगोचरः ॥ मा भीतिं कुरु राजेंद्र वत्स्यावो रजनीमिह ॥ १६ ॥ महासत्त्वो महाकायो महादंष्ट्रासमाकुलः ॥ वृक्षमूलं समायातः सिंहो
यमतिभीषणः ॥ १७ ॥ रात्र्यर्धं भज निद्रां त्वं रक्ष्यमाणो मयादितः ॥ ततः प्रसुप्तं मां रक्ष शर्वर्यर्धं महामते ॥ १८ ॥ इति तद्वाक्यमादाय सुप्ते ॥ ५८ ॥
नंदसुते हरिः ॥ प्रोवाच ऋक्षं सुप्तोऽयं नृपश्च त्यज्यतामिति ॥ १९ ॥ तं सिंहमब्रवीदृक्षो धर्मज्ञो द्विजसत्तमाः ॥ भवान्धर्मं न जानीषे मृगराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनेचर ॥ २० ॥ विश्वासघातिनां लोके महाकष्टा भवंति हि ॥ न हि मित्रद्रुहां पापं नश्येद्यज्ञायुतैरपि ॥ २१ ॥ ब्रह्महत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् ॥ विश्वस्तघातिनां पापं न नश्येज्जन्मकोटिभिः ॥ २२ ॥ नाहं मेरुं महाभारं मन्ये पंचास्य भूतले ॥ महाभारमिमं मन्ये लोके विश्वासघातकम् ॥ २३ ॥ एवमुक्तेऽथ ऋक्षेण सिंहस्तूष्णीमभूत्तदा ॥ धर्मगुप्ते प्रबुद्धे तु ऋक्षः सुष्वाप भूरुहे ॥२४॥ ततः सिंहोऽब्रवीद्भूपमेनमृक्षं त्यजस्व मे ॥ एवमुक्तेऽथ सिंहेन राजा सुतमशंकितः ॥२५॥ स्वांकन्यस्तशिरस्कं[1] तमृक्षं तत्याज भूतले ॥ पात्यमानस्ततो राज्ञा नखालंबितपादपः ॥२६॥ ऋक्षः पुण्यवशाद्वृक्षान्न पपात महीतले ॥ स ऋक्षो नृपमभ्येत्य कोपाद्वाक्यमभाषत ॥२७॥ कामरूपधरो राजन्नहं भृगुकुलोद्भवः ॥ ध्यानकाष्ठाभिधो नाम्ना ऋक्षरूपमधारयम् ॥ २८ ॥ यस्मादनागसं सुतमत्याक्षीन्मां भवान्नृप ॥ मच्छापात्त्वमतः शीघ्रमुन्मत्तश्चर भूपते ॥ २९ ॥ इति शप्त्वा मुनिर्भूपं ततः सिंहमभाषत ॥ नृसिंहस्त्वं महायक्षः कुबेरसचिवः पुरा ॥३०॥ हिमवद्गिरिमासाद्य कदाचित्त्वं वधूसखः ॥ अज्ञानाद्गौतमाभ्याशे विहारमतनोर्मुदा ॥ ॥ ३१ ॥ गौतमोप्युटजाद्दैवात्समिदाहरणाय वै ॥ निर्गतस्त्वां विवसनं दृष्ट्वा शापमुदाहरत् ॥ ३२ ॥ यस्मान्ममाश्रमेऽद्य त्वं विवस्त्रः स्थितवानसि ॥ अतः सिंहत्वमद्यैव भविता ते न संशयः ॥ ३३ ॥ इति गौतमशापेन सिंहत्वमगमत्पुरा ॥ कुबेरसचिवो यक्षो भद्रनामा भवान्पुरा ॥ ॥ ३४ ॥ कुबेरो धर्मशीलो हि तद्भृत्याश्च तथैव हि ॥ अतः किमर्थं त्वं हंसि मामृषिं वनगोचरम् ॥ ३५ ॥ एतत्सर्वमहं ध्यानाज्जानामीह मृगाधिप ॥ इत्युक्ते ध्यानकाष्ठेन त्यक्त्वा सिंहत्वमाशु सः ॥ ३६ ॥ यक्षरूपं गतो दिव्यं कुबेरसचिवात्मकम् ॥ ध्यानकाष्ठमसावाह प्रांजलिः प्रणतो मुनिम् ॥ ३७ ॥ अद्य ज्ञातं मया सर्वं पूर्ववृत्तं महामुने ॥ गौतमः शापकाले मे शापांतमपि चोक्तवान् ॥ ३८ ॥ ध्यानकाष्ठेन संवाद ऋक्षरूपेण ते यदा ॥ तदा निर्धूय सिंहत्वं यक्षरूपमवाप्स्यसि ॥ ३९ ॥ इति मामब्रवीद्ब्रह्मन्गौतमो मुनिपुंगवः ॥ अद्य सिंहत्वनाशान्मे जानामि त्वां महामुने ॥ ४० ॥ ध्यानकाष्ठाभिधं शुद्धं कामरूपधरं सदा ॥ इत्युक्त्वा तं प्रणम्याथ ध्यानकाष्ठं स यक्षराट् ॥ ४१ ॥ विमानवरमारुह्य प्रययावलकापुरीम् ॥ तस्मिन्गते तु यक्षेशे ध्यानकाष्ठो महामुनिः ॥ ४२ ॥ अव्याहतेष्टगमनो यथेष्टः प्रययौ महीम् ॥ ध्यानकाष्ठे गते तस्मिन्कामरूपधरे मुनौ ॥ ४३ ॥ धर्मगुप्तो मुनेः शापादुन्मत्तः प्रययौ पुरीम् ॥ उन्मत्तरूपं तं दृष्ट्वा मंत्रिणस्तु नृपोत्तमम् ॥ ४४ ॥ पितुः सकाशमानिन्यू रेवातीरे मनोरमे ॥ तस्मै निवेदयामासुर्मतिभ्रंशं सुतस्य ते ॥ ४५ ॥ ज्ञात्वा तु पुत्रवृत्तांतं नन्दस्तस्य पिता तदा ॥ पुत्रमादाय तरसा

१ शाखान्यस्तशिरस्कम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

जैमिनेरन्तिकं ययौ ॥ तस्मै निवेदयामास पुत्रवृत्तान्तमादितः ॥ ४६ ॥ भगवञ्जैमिने पुत्रो ममाद्योन्मत्ततां गतः ॥ ४७ ॥ अस्योन्मादविनाशाय
ब्रूह्युपायं महामुने ॥ इति पृष्टश्चिरं दध्यौ जैमिनिर्मुनिपुंगवः ॥ ४८ ॥ ध्यात्वा तु सुचिरं कालं नृपं नंदमथाब्रवीत् ॥ ध्यानकाष्ठस्य शापेन ह्युन्म
त्तस्ते सुतोऽभवत् ॥ ४९ ॥ तस्य शापस्य मोक्षार्थमुपायं प्रब्रवीमि ते ॥ दक्षिणांबुनिधौ सेतौ पुण्ये पापविनाशने ॥ ५० ॥ धनुष्कोटिरिति
ख्यातं तीर्थमस्ति महत्तरम् ॥ पवित्राणां पवित्रं च मंगलानां च मंगलम् ॥ ५१ ॥ श्रुतिसिद्धं महापुण्यं ब्रह्महत्यादिशोधकम् ॥ नीत्वा तत्र सुतं
तेऽद्य स्नापयस्व महीपते ॥ ५२ ॥ उन्मादस्तत्क्षणादेव तस्य नश्येन्न संशयः ॥ इत्युक्तस्तं प्रणम्यासौ जैमिनिं मुनिपुंगवम् ॥ ५३ ॥ नंदः पुत्रं
समादाय धनुष्कोटिं ययौ तदा ॥ तत्र च स्नापयामास पुत्रं नियमपूर्वकम् ॥ ५४ ॥ स्नानमात्रात्ततः सद्यो नष्टोन्मादोऽभवत्सुतः ॥ स्वयं सस्नौ स
नन्दोपि धनुष्कोटौ सभक्तिकम् ॥ ५५ ॥ उषित्वा दिनमेकं तु सपुत्रस्तु पिता तदा ॥ सेवित्वा रामनाथं च सांबमूर्तिं घृणानिधिम् ॥ ५६ ॥
पुत्रमापृच्छ्य नंदस्तं प्रययौ तपसे वनम् ॥ गते पितरि पुत्रोऽपि धर्मगुप्तो नृपो द्विजाः ॥ ५७ ॥ प्रददौ रामनाथाय बहुवित्तानि भक्तितः ॥ ब्राह्म
णेभ्यो धनं धान्यं क्षेत्राणि च ददौ तदा ॥ ५८ ॥ प्रययौ मंत्रिभिः सार्धं स्वां पुरीं तदनंतरम् ॥ धर्मेण पालयामास राज्यं निहतकण्टकम् ॥५९॥
पितृपैतामहं विप्रा धर्मगुप्तोऽतिधार्मिकः ॥ उन्मादैरप्यपस्मारैर्ग्रहैर्दुष्टैश्च ये नराः ॥ ६० ॥ ग्रस्ता भवंति विप्रेंद्रास्तेऽपि चात्र निमज्जनात् ॥ धनु
ष्कोटौ विमुक्ताः स्युः सत्यं सत्यं वदाम्यहम् ॥ ६१ ॥ परित्यज्य धनुष्कोटिं तीर्थमन्यद्व्रजेत्तु यः ॥ सिद्धं स गोपयस्त्यक्त्वा स्नुहीक्षीरं प्रयाचते ॥
॥ ६२ ॥ धनुष्कोटिर्धनुष्कोटिर्धनुष्कोटिरिति द्विजाः ॥ त्रिः पठन्तो नरा ये तु यत्र क्वापि जलाशये ॥ ६३ ॥ स्नांति सर्वे नरास्ते वै यास्यंति
ब्रह्मणः पदम् ॥ एवं वः कथिता विप्रा धर्मगुप्तकथा शुभा ॥ ६४ ॥ यस्याः श्रवणमात्रेण ब्रह्महत्या विनश्यति ॥ स्वर्णस्तेयादयश्चान्ये नश्येयुः
पापसंचयाः ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां धर्मगुप्तोन्मा
दविमोक्षणवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ श्रीसूत उवाच ॥ भूयोऽप्यहं प्रवक्ष्यामि धनुष्कोटेस्तु वैभवम् ॥ अत्यद्भुततरं गुह्यं
सर्वलोकैकपावनम् ॥ १ ॥ पुरा परावसुर्नाम ब्राह्मणो वेदवित्तमः ॥ अज्ञानात्पितरं हत्वा ब्रह्महत्यामवाप्तवान् ॥ सोऽपि स्नात्वा धनुष्कोटौ तद्दोषा
न्मुमुचे क्षणात् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ पितरं हतवान्पूर्वं कथं सूत परावसुः ॥ ३ ॥ कथं वा धनुषः कोटौ मुक्तिस्तस्याप्यभून्मुने ॥
एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ आसीद्राजा बृहद्द्युम्नश्चक्रवर्ती महाबलः ॥ धर्मेण पालयामास सागरांतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुन्धराम् ॥ ५ ॥ अयजत्सत्रयागेन देवानिंद्रपुरोगमान् ॥ याजकस्तस्य रैभ्योऽभूद्विद्वान्परमधार्मिकः ॥ ६ ॥ आस्तां पुत्रावुभौ तस्यार्प्यर्वावसु परावसू ॥ षडंगवेदविदुषौ श्रौतस्मार्तेषु कोविदौ ॥ ७ ॥ काणादे जैमिनीये च सांख्ये वैयासिके तथा ॥ गौतमे योगशास्त्रे च पाणिनीये च कोविदौ ॥ ८ ॥ मन्वादिस्मृतिनिष्णातौ सर्वशास्त्रविशारदौ ॥ सत्रयागे सहायार्थं बृहद्द्युम्नेन याचितौ ॥ ९ ॥ भ्रातरौ समनुज्ञातौ पित्रा रैभ्येण जग्मतुः ॥ बृहद्द्युम्नस्य सत्रं तावश्विनाविव रूपिणौ ॥ १० ॥ अतिष्ठदाश्रमे रैभ्यः स्नुषया ज्येष्ठया सह ॥ तौ गत्वा भ्रातरौ तत्र राज्ञः सत्रमनुत्तमम् ॥ ११ ॥ याजयामासतुः सत्रे बृहद्द्युम्नं महीपतिम् ॥ नाभवत्स्खलनं भ्रात्रोः सत्रे सांगेषु कर्मसु ॥ १२ ॥ सत्रे संतन्यमानेऽस्मिन्बृहद्द्युम्नस्य भूपतेः ॥ मुनयोऽभ्यागमन्सर्वे राज्ञाहूता निरीक्षितुम् ॥ १३ ॥ वसिष्ठो गौतमश्चात्रिर्जाबालिरथ कश्यपः ॥ क्रतुर्दक्षः पुलस्त्यश्च पुलहो नारदो मुनिः ॥ १४ ॥ मार्कंडेयः शतानंदो विश्वामित्रः पराशरः ॥ भृगुः कुत्सोऽथ वाल्मीकिर्व्यासधौम्यादयोऽपरे ॥ १५ ॥ शिष्यैः प्रशिष्यैर्बहुभिरसंख्यातैः समावृताः ॥ तानागतान्समालोक्य बृहद्द्युम्नो महीपतिः ॥ १६ ॥ अर्घ्यादिना मुनीन्सर्वान्पूजयामास सादरम् ॥ नानादिग्भ्यः समायाताश्चतुरंगबलैर्युताः ॥ १७ ॥ उपदासहिता भूपास्सत्रं वीक्षितुमादरात् ॥ वैश्याः शूद्रास्तथा वर्णाश्चत्वारोऽपि समागताः ॥ १८ ॥ वर्णिनोऽथ गृहस्थाश्च वानप्रस्थाश्च भिक्षवः ॥ सत्रं निरीक्षितुं तस्य बृहद्द्युम्नस्य चाययुः ॥ १९ ॥ तान्सर्वान्पूजयामास यथार्हं राजसत्तमः ॥ ददौ चान्नानि सर्वेभ्यो घृतसूपादिकांस्तथा ॥ २० ॥ वस्त्राणि च सुवर्णानि हाररत्नान्यनेकशः ॥ एवं सत्कारयामास राजा सत्रे समागतान् ॥ २१ ॥ रैभ्यपुत्रौ तदा विप्रा अर्वावसुपरावसू ॥ अध्वरादीनि कर्माणि चक्रतुः स्खलितं विना ॥ २२ ॥ तद्दृष्ट्वा मुनयस्सर्वे कौशलं रैभ्यपुत्रयोः ॥ श्लाघंते सशिरःकम्पं वसिष्ठप्रमुखास्तदा ॥ २३ ॥ कर्माणि कानि चित्तत्र कारयित्वा परावसुः ॥ तृतीयसवनस्यांते गृहकृत्यं निरीक्षितुम् ॥ २४ ॥ प्रययौ स्वाश्रमं सायं विनैवार्वावसुं द्विजाः ॥ तस्मिन्नवसरे रैभ्यं कृष्णाजिनसमावृतम् ॥ २५ ॥ वने चरंतं पितरं दृष्ट्वा स मृगशंकया[1] ॥ निद्राकलुषितो रात्रावंधे तमसि संकुले ॥ २६ ॥ आत्मानं हंतुमायाति मृगो[2]ऽयमिति चिंतयन् ॥ जघान पितरं सोऽयं महारण्ये परावसुः ॥ २७ ॥ रिरक्षुणा शरीरं स्वं तेनाकामनया पिता ॥ रजन्यां हिंसितो विप्रा महापातककारिणा ॥ २८ ॥ अंतिकं स समागत्य व्यलोकयत तं हतम् ॥ ज्ञात्वा स्वपितरं रात्रौ शुशोच व्यथितेंद्रियः ॥ २९ ॥ प्रेतकार्यं ततः कृत्वा पितुः सर्वं परावसुः ॥ भूयोपि नृपतेः सत्रं परावसुरुपाययौ ॥ ३० ॥ स्वचेष्टितं तु तत्सर्वमनुजाय ततोऽब्रवीत् ॥

१ व्याघ्रशंकया–इ० पा० । २ व्याघ्र–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मृतं स्वपितरं श्रुत्वा सोऽपि शोकाकुलोऽभवत् ॥ ३१ ॥ ज्येष्ठोऽनुजं ततः प्राह वचनं द्विजसत्तमाः ॥ महत्सत्रं समारब्धं बृहद्द्युम्नस्य भूपतेः ॥
॥ ३२ ॥ वोढृत्वशक्तिर्नास्त्यस्य कर्मणो बालकस्य ते ॥ जनकश्च हतो रात्रौ मयापि मृगशंकया ॥ ३३ ॥ प्रायश्चित्तं च कर्त्तव्यं ब्रह्महत्या
विशुद्धये ॥ मदर्थं व्रतचर्यां त्वं चर तात कनिष्ठक ॥ ३४ ॥ एकाकी धुरमुद्वोढुं शक्तोऽहं सत्रकर्मणः ॥ अर्वावसुरिति प्रोक्तो ज्येष्ठेन स तमभ्य
धात् ॥ ३५ ॥ तथा भवत्वहं ज्येष्ठ चरिष्ये व्रतमुत्तमम् ॥ ब्रह्महत्याविशुद्ध्यर्थं त्वं सत्रधुरमावह ॥ ३६ ॥ इत्युक्त्वा सोनुऽजो ज्येष्ठं तस्मात्सत्राद्वि
निर्ययौ ॥ कारयामास कर्माणि ज्येष्ठस्तस्मिन्गते क्रतौ ॥ ३७ ॥ द्वादशाब्दं कनिष्ठोपि ब्रह्महत्याव्रतं द्विजाः ॥ चरित्वा सत्रयागेऽस्मिन्नाजगाम
पुनर्मुदा ॥ ३८ ॥ तं दृष्ट्वा भ्रातरं ज्येष्ठो बृहद्द्युम्नमुवाच ह ॥ अयं ते ब्रह्महा सत्रमर्वावसुरुपागतः ॥ ३९ ॥ एनमुत्सारयाशु त्वमस्मात्सत्रान्नृपो
त्तम ॥ अन्यथा सत्रयागस्य फलहानिर्भविष्यति ॥ ४० ॥ इतीरितः स स्वप्रेष्यैर्यागात्तमुदवासयत् ॥ उद्वास्यमानो राजानमर्वावसुरथाब्रवीत् ॥
॥ ४१ ॥ न मया ब्रह्महत्येयं बृहद्द्युम्न कृतानघ ॥ किन्तु ज्येष्ठेन मे सा हि ब्रह्महत्या कृता विभो ॥ ४२ ॥ ब्रह्महत्याव्रतं चीर्णं तदर्थं च मया
धुना ॥ एवमुक्तोपि राजासौ वचसा स परावसोः ॥ ४३ ॥ अर्वावसुं निजात्सत्रादुदवासयदाशु वै ॥ धिक्कृतो ब्राह्मणैश्चायं ययौ तूष्णीं वनं
तदा ॥ ४४ ॥ मुनिवृन्दसमाकीर्णं तपोवनमुपेत्य सः ॥ अर्वावसुस्तपश्चक्रे देवैरपि सुदुष्करम् ॥ ४५ ॥ तपः कुर्वंस्तथादित्यमुपतस्थे समा
हितः ॥ मूर्तिमांस्तपसा तस्य महताऽदुष्टधीः स्वयम् ॥ ४६ ॥ आविरासीत्स्वया दीप्त्या भासयञ्जगतीतलम् ॥ कर्मसाक्षी जगच्चक्षुर्भास्करो
देवताग्रणीः ॥ ४७ ॥ अविर्बभूवुर्देवाश्च पुरस्कृत्य शचीपतिम् ॥ इन्द्रादयस्ततो देवाः प्रोचुरर्वावसुं द्विजाः ॥४८॥ अर्वावसो त्वं प्रवरस्तपसा ब्रह्म
चर्यतः ॥ आचारेण श्रुतेनापि वेदशास्त्रादिशिक्षया ॥ ४९ ॥ निराकृतोवमानेन त्वं परावसुना बहु ॥ तथापि क्षमया युक्तो न कुप्यति
भवान्यतः ॥ ५० ॥ यस्माज्ज्येष्ठोऽवधीत्तातं न हिंसीस्त्वं महामते ॥ ब्रह्महत्याव्रतं यस्मात्तदर्थं चरितं त्वया ॥ ५१ ॥ अतः स्वीकुर्म
हे त्वां तु पराकुर्मः परावसुम् ॥ उक्त्वैवं बलभिन्मुख्याः सर्वे च त्रिदिवालयाः ॥ ५२ ॥ तं ते प्रवरयामासुर्निरासुश्च परावसुम् ॥ पुनरिंद्रादयो
देवाः पुरोधाय दिवाकरम् ॥ ५३ ॥ अर्वावसुं प्रोचुरिदं वरं त्वं वरयेति वै ॥ स चापि प्रार्थयामास जनकस्योत्थितिं पुनः ॥ ५४ ॥ वधे चास्मरणं
देवानात्मनो जनकस्य वै ॥ तथास्त्विति सुराः प्रोचुः पुनरूचुरिदं वचः ॥ ५५ ॥ वरं चान्यं प्रदास्यामो वरय त्वं महामते ॥ एवमुक्तः सुरैः
सोयमर्वावसुरभाषत ॥ ५६ ॥ मम भ्रातुरदुष्टत्वं भवतु त्रिदशालयाः ॥ अर्वावसोर्वचः श्रुत्वा त्रिदशाः पुनरब्रुवन् ॥ ५७ ॥ ब्राह्मणस्य पितुर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्महान्दोषः परावसोः ॥ न ह्यन्यकृतपापस्य परेणानुष्ठितेन वै ॥५८॥ प्रायश्चित्तेन शांतिः स्यान्महापातकपंचके ॥ पितुर्ब्राह्मणहंतुस्तु सुतरां नास्ति निष्कृतिः॥५९॥आत्मनानुष्ठितेनापि व्रतेन न हि दुष्कृतिः॥परावसोस्तव भ्रातुरतो नैवास्तिनिष्कृतिः ॥६०॥ अतोऽस्माभिरदुष्टत्वमस्मै दातुं नशक्यते ॥ अर्वावसुः पुनःप्राह देवानिंद्रपुरोगमान्॥६१॥ तथापि युष्मन्माहात्म्यात्प्रसादाद्भवतां तथा॥पितुर्ब्राह्मणहंतुर्मे भ्रातुस्त्रिदशसत्तमाः॥६२॥ यथा स्यान्निष्कृतिर्ब्रूत तथैव कृपया युताः ॥ एवमर्वावसोः श्रुत्वा वचस्ते त्रिदशालयाः ॥ ६३ ॥ ध्यात्वा तु सुचिरं कालं विनिश्चित्येदमब्रुवन् ॥ उपायं ते प्रवक्ष्यामस्तत्पातकनिवारणम् ॥६४॥ दक्षिणांबुनिधौ पुण्ये रामसेतौ विमुक्तिदे ॥ धनुष्कोटिरिति ख्यातं तीर्थमस्ति विमुक्तिदम् ॥ ६५ ॥ ब्रह्महत्यासुरापानस्वर्णस्तेयविनाशनम् ॥ गुरुतल्पगसंसर्गदोषाणामपि नाशनम् ॥ ६६ ॥ अकामेनापि यः स्नायादपवर्गफलप्रदम् ॥ दुस्वप्ननाशनं धन्यं नरकक्लेशनाशनम् ॥ ६७ ॥ कैलासादिपदप्राप्तिकारणं परमार्थदम् ॥ सर्वकाममिदं पुंसामृणदारिद्र्यनाशनम् ॥ ६८ ॥ धनुष्कोटिर्धनुष्कोटिर्धनुष्कोटिरितीरणात् ॥ स्वर्गापवर्गदं पुंसां महापुण्यफलप्रदम् ॥ ६९ ॥ तत्र गत्वा तव भ्राता स्नायाद्यदि परावसुः ॥ तत्क्षणादेव ते ज्येष्ठो मुच्यते ब्रह्महत्यया ॥ ७० ॥ इदं रहस्यं सुमहत्प्रायश्चित्तमुदीरितम् ॥ उक्त्वेत्यर्वावसुं देवाः प्रययुः स्वपुरीं प्रति ॥ ७१ ॥ तत अर्वावसुर्ज्येष्ठं समादाय परावसुम् ॥ रामचन्द्रधनुष्कोटिं प्रययौ मुक्तिदायिनीम् ॥ ७२ ॥ सेतौ संकल्पमुक्त्वा तु नियमेन परावसुः ॥ सह भ्रात्रा धनुष्कोटौ सस्नौ पातकशुद्धये ॥ ७३ ॥ स्नात्वोत्थितं धनुष्कोटौ तं प्रोवाचाशरीरिणी ॥ परावसो विनष्टा ते पितुर्ब्राह्मणघातजा ॥ ७४ ॥ ब्रह्महत्या महाघोरा नरकक्लेशकारिणी ॥ इत्युक्त्वा विरराामथ सापि वागशरीरिणी ॥ ७५ ॥ परावसुस्तदा विप्राः कनिष्ठेन समन्वितः ॥ रामचन्द्रधनुष्कोटिं प्रणम्य च सभक्तिकम् ॥ ७६ ॥ रामनाथं महादेवं नत्वा भक्तिपुरःसरम् ॥ विमुक्तपातको विप्राः प्रययौ पितुराश्रमम् ॥ ७७ ॥ मृत्वोत्थितस्तदा रैभ्यो दृष्ट्वा पुत्रौ समागतौ॥ संतुष्टहृदयो ह्यास्ते पुत्राभ्यां स्वाश्रमे तदा ॥ ७८ ॥ रामचन्द्रधनुष्कोटौ स्नानेन हतपातकम् ॥ एनं परावसुं सर्वे स्वीचक्रुर्मुनयस्तदा ॥ ७९ ॥ एवं परावसोरुक्तं ब्रह्महत्याविमोक्षणम् ॥ स्नानमात्राद्धनुष्कोटौ युष्माकं मुनिपुंगवाः ॥ ८० ॥ सुरापानादयो विप्रा नश्यंत्येवात्र मज्जनात् ॥ सत्यंसत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ८१ ॥ महापातकसंघाश्च नश्येयुर्मज्जनादिह ॥ य इमं पठतेऽध्यायं ब्रह्महत्याविमोक्षणम् ॥ ८२ ॥ ब्रह्महत्या विनश्येत तत्क्षणान्नास्ति संशयः ॥ सुरापानादयोऽप्यस्य शांतिं गच्छेयुरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जसा ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां परावसोर्ब्रह्महत्याविमो
क्षणंनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ श्रीसूत उवाच ॥ ॥ इतिहासं पुनर्वक्ष्ये धनुष्कोटिप्रशंसनम् ॥ सृगालस्य च संवादं वानरस्य च सत्तमाः
॥१॥ सृगालवानरौ पूर्वमास्तां जातिस्मरावुभौ॥ पुरापि मानुषे भावे सखायौ तौ बभूवतुः॥२॥अन्यां योनिं समापन्नौ सार्गालीं वरानीं तथा ॥ सख्यं
समीयतुरुभौ सृगालो वानरो द्विजाः ॥ ३ ॥ कदाचिद्रुद्रभूमिष्ठं सृगालं वानरोऽब्रवीत् ॥ श्मशानमध्ये संप्रेक्ष्य पूर्वजातिमनुस्मरन् ॥ ४ ॥ ॥ वानर
उवाच ॥ ॥ सृगाल पातकं पूर्वं किमकार्षीः सुदारुणम् ॥ यस्त्वं श्मशाने मृतकान्पूतिगंधांश्च कुत्सितान् ॥ अत्सीत्युक्तोऽथ कपिना सृगालस्तमभा
षत ॥ ५ ॥ ॥ सृगाल उवाच ॥ ॥ अहं पूर्वभवे ह्यासं ब्राह्मणो वेदपारगः ॥ ६ ॥ वेदशर्माभिधो विद्वान्सर्वकर्मकलापवित् ॥ ब्राह्मणाय प्रतिश्रुत्य
न मया तत्र जन्मनि ॥ ७ ॥ कपे धनं तदा दत्तं सृगालोऽहं ततोऽभवम् ॥ तस्मादेवंविधं भक्ष्यं भक्षयाम्यतिकुत्सितम् ॥ ८ ॥ प्रतिश्रुत्य दुरात्मानो
न प्रयच्छंति ये नराः ॥ कपे सृगालयोनिं ते प्राप्नुवंत्यतिकुत्सिताम् ॥ ९ ॥ यो न दद्यात्प्रतिश्रुत्य स्वल्पं वा यदि वा बहु ॥ सर्वाशास्तस्य नष्टाः
स्युः षंढस्येव प्रजोद्भवः ॥ १० ॥ प्रतिश्रुत्याप्रदाने तु ब्राह्मणाय प्लवंगम ॥ दशजन्मार्जितं पुण्यं तत्क्षणादेव नश्यति ॥ ११ ॥ प्रतिश्रुत्याप्रदानेन
यत्पापमुपजायते ॥ नाश्वमेधशतेनापि तत्पापं परिशुध्यति ॥ १२ ॥ न जानेहमिदं पापं कदा नष्टं भवेदिति ॥ तस्मात्प्रतिश्रुतं द्रव्यं दातव्यं
विदुषा सदा ॥ १३ ॥ प्रतिश्रुत्याप्रदानेन सृगालो भवति ध्रुवम् ॥ तस्मात्प्राज्ञेन विदुषा दातव्यं हि प्रतिश्रुतम् ॥ १४ ॥ इत्युक्त्वा स सृगालस्तं
वानरं पुनरब्रवीत् ॥ भवता किं कृतं पापं येन वानरतामगात् ॥ १५ ॥ अनागसो वनचरान्पक्षिणो हिंसि वानर ॥ तत्पातकं वदस्वाद्य वान
रत्वप्रदं मम ॥ इत्युक्तः स सृगालेन सृगालं वानरोऽब्रवीत् ॥ १६ ॥ ॥ वानर उवाच ॥ ॥ पुरा जन्मन्यहं विप्रो वेदनाथ इति स्मृतः ॥
॥ १७ ॥ विश्वनाथो मम पिता ममांबा कमलालया ॥ सृगाल सख्यमभवदावयोः प्राग्भवेऽपि हि ॥ १८ ॥ त्वं न जानासि तत्सर्वं वेद्म्यहं पुण्य
गौरवात् ॥ तपसाराध्य गिरिशं तत्प्रसादात्पुरा मम ॥ १९ ॥ अतीतभाविविज्ञानमस्ति जन्मांतरेऽपि च ॥ गोमायो तद्भवे शाकं ब्राह्मणस्य हृतं
मया ॥ २० ॥ तत्पापाद्वानरो जातो नरकानुभवादनु ॥ नाहर्तव्यं विप्रधनं हरणान्नरकं भवेत् ॥ २१ ॥ अनंतरं वानरत्वं भविष्यति न संशयः ॥

१ सहायौ–इ०पा० । २ देवशर्माभिधः–इ० पा० । ३ कान्तम्–इ० पा० । ४ तेनाहम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मान्न ब्राह्मणस्वं तु हर्तव्यं विदुषा सदा ॥ २२ ॥ ब्रह्मस्वहरणात्पापमधिकं नैव विद्यते ॥ पीतवंतं विषं हंति ब्रह्मस्वं सकुलं दहेत् ॥ २३ ॥ ब्रह्मस्वहरणात्पापी कुंभीपाकेषु पच्यते ॥ पश्चान्नरकशेषेण वानरीं योनिमश्नुते ॥ २४ ॥ विप्रद्रव्यं न हर्तव्यं क्षंतव्यं तेष्वतः सदा ॥ बाला दरिद्राः कृपणा वेदशास्त्रादिवर्जिताः ॥ २५ ॥ ब्राह्मणा नावमंतव्याः क्रुद्धाश्चेदनलोपमाः ॥ अतीतानागतं ज्ञानं सृगालाखिलमस्ति मे ॥ २६ ॥ ज्ञानमस्ति न मे त्वेकमेतत्पापविशोधनम्॥ जातिस्मरोऽपि हि भवान्भावि कार्यं न बुध्यते ॥ २७ ॥ अतीतेष्वपि किंचिज्ज्ञः प्रतिबंधवशाद्भवान् ॥ अतो भवान्न जानीते भाव्यतीतं तथाखिलम् ॥ २८ ॥ कियत्कालं सृगालातो भुक्ता व्यसनमीदृशम् ॥ आवयोरस्य पापस्य को वा मोचयिता भवेत् ॥ ॥ २९ ॥ एवं प्रब्रुवतोस्तत्र प्लवंगमसृगालयोः॥ यदृच्छया दैवयोगात्पूर्वपुण्यवशाद्द्विजाः ॥३०॥ आययौ स महातेजाः सिंधुद्वीपाह्वयो मुनिः॥ भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः ॥ ३१ ॥ रुद्राक्षमालाभरणः शिवनामानि कीर्तयन् ॥ सृगालवानरौ दृष्ट्वा सिंधुद्वीपाभिधं मुनिम् ॥ प्रणम्य मुदितौ भूत्वा पप्रच्छतुरिदं तदा ॥ ३२ ॥ ॥ सृगाल वानरावूचतुः ॥ ॥ भगवन्सर्वधर्मज्ञ सिंधुद्वीप महामुने ॥ ३३ ॥ आवां रक्ष कृपादृष्ट्या विलोकय मुहुर्मुदा ॥ कपित्वं च सृगालत्वमावयोर्येन नश्यति ॥ ३४ ॥ तमुपायं वदस्वाद्य त्वं हि पुण्यवतां वरः ॥ अनाथान्कृपणानज्ञान्बालान्रोगातुराञ्जनान् ॥ ३५ ॥ रक्षंति साधवो नित्यं कृपया निरपेक्षकाः ॥ ताभ्यामितीरितः प्राज्ञः सिंधुद्वीपो महामुनिः ॥ प्राह तौ कपिगोमायू ध्यात्वा तु मनसा चिरम् ॥ ३६ ॥ ॥ सिंधुद्वीप उवाच ॥ ॥ जानाम्यहं युवां सम्यग्वे सृगालप्लवंगमौ ॥ ३७ ॥ सृगाल प्राग्भवे त्वं वै वेदशर्माभिधो द्विजः ॥ ब्राह्मणाय प्रतिश्रुत्य धान्यानामाढकं त्वया ॥ ३८ ॥ न दत्तं तेन पापेन सार्गालीं योनिमाप्तवान् ॥ त्वं च वानर पूर्वस्मिन्वेदनाथाभिधो द्विजः ॥ ३९ ॥ ब्राह्मणस्य गृहाच्छाकं हृतं चौर्यात्त्वया ततः ॥ प्राप्तोसि वानरीं योनिं सर्वपक्षिभयंकरीम् ॥ ४० ॥ युवयोः पापशांत्यर्थमुपायं प्रवदाम्यहम् ॥ दक्षिणांबुनिधौ रामधनुष्कोटौ युवामरम्[1] ॥ ४१ ॥ गत्वात्र कुरुतं स्नानं तेन पापाद्विमोक्ष्यथः ॥ पुरा किरातीसंसर्गात्सुमतिर्ब्राह्मणः सुराम् ॥ पीतवान्त्स धनुष्कोटौ स्नात्वा पापाद्विमोचितः ॥ ४२ ॥ ॥ सृगाल वानरावूचतुः ॥ ॥ सुमतिः कस्य पुत्रोऽसौ कथं च स सुरां पपौ ॥ ४३ ॥ कथं किरात्यां सक्तोऽभूत्सिंधुद्वीप महामते ॥ आवयोर्विस्तरादेतद्वद त्वं कृपायाधुना ॥ ४४ ॥ ॥ सिंधुद्वीप उवाच ॥ ॥ महाराष्ट्राभिधे देशे ब्राह्मणः कश्चिदास्तिकः ॥ यज्ञदेव इति

१ अरम्—क्षिप्रम् शीघ्रम्—इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

ख्यातो वेदवेदांगपारगः ॥ ४५ ॥ दयालुरातिथेयश्च शिवनारायणार्चकः ॥ सुमतिर्नाम पुत्रोऽभूद्यज्ञदेवस्य तस्य वै ॥ ४६ ॥ पितरौ स परित्यज्य
भार्यामपि पतिव्रताम् ॥ प्रययावुत्कले देशे विटगोष्ठीपरायणः ॥ ४७ ॥ काचित्किराती तद्देशे वसन्ती युवमोहिनी ॥ यूनां समस्तद्रव्याणि
प्रलोभ्य जगृहे चिरम् ॥ ४८ ॥ तस्या गृहं स प्रययौ सुमतिर्ब्राह्मणाधमः ॥ सुमतिं सा न जग्राह किराती निर्धनं द्विजम् ॥ ४९ ॥ तया
त्यक्तोऽथ सुमतिस्तत्संयोगैकतत्परः ॥ इतस्ततश्चोरयित्वा बहुद्रव्याणि संततम् ॥ ५० ॥ दत्त्वा तया चिरं रेमे तद्गृहे बुभुजे च सः ॥ एकेन चषके
णासौ तया सह सुरां पपौ ॥ ५१ ॥ एवं स बहुकालं वै रममाणस्तया सह ॥ पितरौ निजपत्नीं च नास्मरद्विषयातुरः ॥ ५२ ॥ स कदाचित्कि
रातैस्तु चौर्यं कर्तुं ययौ सह ॥ द्रव्यं हर्तुं किरातास्ते लाटानां विषयं ययुः ॥५३॥ विप्रस्य कस्यचिद्गेहे सोऽपि कैरातवेषधृक् ॥ ययौ चोरयितुं द्रव्यं
साहसी खड्गहस्तवान् ॥ ५४ ॥ तद्गृहस्वामिनं विप्रं हत्वा खड्गेन साहसी ॥ समादाय बहु द्रव्यं किरातीभवनं ययौ ॥ ५५ ॥ तं यांतमनुयाति स्म
ब्रह्महत्या भयंकरी ॥ नीलवस्त्रधरा भीमा भृशं रक्तशिरोरुहा ॥ ५६ ॥ गर्जंती साट्टहासं सा कंपयन्ती च रोदसी ॥ अनुद्रुतस्तया सोऽयं बभ्राम
जगतीतले ॥ ५७ ॥ एवं भ्रमन्भुवं सर्वां कदाचित्सुमतिः स्वयम् ॥ स्वं ग्रामं प्रययौ भीत्या हे सृगालप्लवंगमौ ॥ ५८ ॥ अनुद्रुतस्तया भीतः
प्रययौ स्वगृहं प्रति ॥ ब्रह्महत्याप्यनुद्रुत्य तेन साकं गृहं ययौ ॥ ५९ ॥ पितरं रक्ष रक्षेति सुमतिः शरणं ययौ ॥ मा भैषीरिति तं प्रोच्य पिता रक्षि
तुमुद्यतः ॥ तदानीं ब्रह्महत्येयं तत्तातं प्रत्यभाषत ॥ ६० ॥ ॥ ब्रह्महत्योवाच ॥ ॥ मैनं त्वं प्रतिगृह्णीष्व यज्ञदेव द्विजोत्तम ॥ ६१ ॥ असौ
सुरापी स्तेयी च ब्रह्महा चातिपातकी ॥ मातृद्रोही पितृद्रोही भार्यात्यागी च पापकृत् ॥ ६२ ॥ किरातीसंगदुष्टश्च नैनं मुञ्चाम्यहं द्विज ॥ गृह्णासि
चेदिमं विप्र महापातकिनं सुतम् ॥ ६३ ॥ त्वद्भार्यामस्य भार्यां च त्वां च पुत्रमिमं द्विज ॥ भक्षयिष्यामि वंशं च तस्मान्मुञ्च सुतं त्विमम् ॥
॥ ६४ ॥ इमं त्यजसि चेत्पुत्रं युष्मान्मोक्ष्यामि सांप्रतम् ॥ नैकस्यार्थे कुलं हन्तुमर्हसि त्वं महामते ॥ इत्युक्तः स तया तत्र यज्ञदेवोऽब्रवीच्च
ताम् ॥ ६५ ॥ ॥ यज्ञदेव उवाच ॥ ॥ बाधते मां सुतस्नेहः कथमेनं परित्यजे ॥ ब्रह्महत्या तदाकर्ण्य द्विजोक्तं तमभाषत ॥ ६६ ॥ ॥ ब्रह्मह
त्योवाच ॥ ॥ अयं हि पतितोऽभूत्ते वर्णाश्रमबहिष्कृतः ॥ ६७ ॥ पुत्रेस्मिन्मा कुरु स्नेहं निंदितं तस्य दर्शनम् ॥ इत्युक्त्वा ब्रह्महत्या सा यज्ञदे
वस्य पश्यतः ॥ ६८ ॥ तलेन प्रजहारास्य पुत्रं सुमतिनामकम् ॥ रुरोद तात तातेति पितरं प्रब्रुवन्मुहुः ॥ ६९ ॥ रुरुदुर्जनको माता भार्यापि

१ विप्राणाम्—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुमतेस्तदा ॥ एतस्मिन्नंतरे तत्र दुर्वासाः शंकरांशजः ॥ ७० ॥ दिष्ट्या समाययौ योगी हे सृगालप्लवंगमौ ॥ यज्ञदेवोऽथ तं दृष्ट्वा मुनिं रुद्रावतारकम् ॥ श्रुत्वा प्रणम्य शरणं ययाचे पुत्रकारणात् ॥ ७१ ॥ ॥ पितोवाच ॥ ॥ दुर्वासस्त्वं महायोगी साक्षाद्वै शंकरांशजः ॥ ७२ ॥ त्वद्दर्शनमपुण्यानां भविता न कदाचन ॥ ब्रह्महा च सुरापी च स्तेयी चाभूत्सुतो मम ॥ ७३ ॥ एनं प्रहर्तुमायाता ब्रह्महत्या विवर्तते ॥ भूयाद्यथा मे पुत्रोऽयं महापातकमोचितः ॥ ७४ ॥ घोरा च ब्रह्महत्येयं यथा शीघ्रं लयं व्रजेत् ॥ तमुपायं वदस्वाद्य मम पुत्रे दयां कुरु ॥ ७५ ॥ अयमेव हि पुत्रो मे नान्योऽस्ति तनयो मुने ॥ अस्मिन्मृते तु वंशो मे समुच्छिद्येत्समूलतः ॥ ७६ ॥ ततः पितृभ्यः पिंडानां दातापि न भवेद्ध्रुवम् ॥ अतः कृपां कुरुष्व त्वमस्मासु भगवन्मुने ॥ ७७ ॥ इत्युक्तः स तदोवाच दुर्वासाः शंकरांशजः ॥ ध्यात्वा तु सुचिरं कालं यज्ञदेवं द्विजोत्तमम् ॥ ७८ ॥ ॥ दुर्वासा उवाच ॥ ॥ यज्ञदेव कृतं पापमतिक्रूरं सुतेन ते ॥ नास्य पापस्य शांतिः स्यात्प्रायश्चित्तायुतैरपि ॥ ७९ ॥ अथापि ते सुतस्याहमस्य पापस्य शांतये ॥ प्रायश्चित्तं वदिष्यामि शृणु नान्यमना द्विज ॥ ८० ॥ श्रीरामधनुषः कोटौ दक्षिणे सलिलार्णवे ॥ स्नाति चेत्तव पुत्रोऽयं पातकान्मोक्ष्यते क्षणात् ॥ ८१ ॥ दुर्विनीताभिधो विप्रो यत्र स्नानाद्विजोत्तम ॥ गुरुस्त्रीगमपापेभ्यस्तत्क्षणादेव मोचितः ॥ ८२ ॥ सैषा श्रीधनुषः कोटी राघवस्य स्वयं हरेः ॥ स्नानमात्रेण पापौघं नाशयेत्त्वत्सुतस्य सा ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां सृगालवानरसंवादे सुमतिमहापातकविमोक्षोपायकथनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ यज्ञदेव उवाच ॥ ॥ दुर्वासर्षे महाप्राज्ञ परापरविचक्षण ॥ दुर्विनीताभिधः कोऽयं योऽसौ गुर्वंगनामगात् ॥ १ ॥ कस्य पुत्रो धनुष्कोटौ स्नानेन स कथं द्विजः ॥ तत्क्षणान्मुमुचे पापाद्गुरुस्त्रीगमसंभवात् ॥ एतन्मे श्रद्दधानस्य विस्तराद्वक्तुमर्हसि ॥ २ ॥ ॥ दुर्वासा उवाच ॥ ॥ पांड्यदेशे पुरा कश्चिद्ब्राह्मणोभूद्बहुश्रुतः ॥ ३ ॥ इध्मवाहाभिधो नाम्ना तस्य भार्या रुचिस्तथा ॥ बभूव तस्य तनयो दुर्विनीताभिधो द्विजः ॥ ४ ॥ बाल्ये वयसि पुत्रस्य ममार जनकोऽस्य वै ॥ दुर्विनीतः पितुस्तस्य स कृत्वा चौर्ध्वदैहिकम् ॥ ५ ॥ कंचित्कालं गृहेऽवात्सीन्मात्रा विधवया सह ॥ ततो दुर्भिक्षमभवद्द्वादशाब्दमवर्षणात् ॥ ६ ॥ ततो देशांतरमगान्मात्रा साकं द्विजोत्तम ॥ गोकर्णं स समासाद्य सुभिक्षं धान्यसंचयैः ॥ ७ ॥ उवास सुचिरं कालं मात्रा विधवया सह ॥ ततो बहुतिथे काले दुर्विनीतो

१ साक्षाद्वै शंकरांशजः–इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

गते सति ॥ ८ ॥ पूर्वदुष्कर्मपाकेन मूढबुद्धिरहो बत ॥ अनंगशरविद्धांगो रागाद्विकृतमानसः ॥९॥ मामेति वादिनीमंबां बलादाकृष्य पातकी ॥
बुभुजे काममोहात्मा मैथुनेन द्विजोत्तम ॥ १० ॥ स खिन्नो दुर्विनीतोऽयं रेतःसेकादनंतरम् ॥ मनसा चिंतयन्पापं रुरोद भृशदुःखितः ॥ ११ ॥
अहोतिपापकृदहं महापातकिनां वरः ॥ अगमं जननीं यस्मात्कामबाणवशानुगः ॥ १२ ॥ इति संचिंत्य मनसा स तत्र मुनिसन्निधौ ॥ जुगुप्स
मानश्चात्मानं तान्मुनीनिदमब्रवीत् ॥ १३ ॥ गुरुस्त्रीगमपापस्य प्रायश्चित्तं मम द्विजाः ॥ वदध्वं शास्त्रतत्त्वज्ञाः कृपया मयि केवलम् ॥ १४ ॥
मरणान्निष्कृतिः स्याच्चेन्मरिष्यामि न संशयः ॥ भवद्भिरुच्यते यत्तु प्रायश्चित्तं ममाधुना ॥ १५ ॥ करिष्ये तद्विजाः सत्यं मरणं वान्यदेव वा ॥
तच्छ्रुत्वा वचनं तस्य केचित्तत्र मुनीश्वराः ॥ १६ ॥ अनेन साकं वार्ता तु दोषायेति विनिश्चिताः ॥ मौनित्वं भेजिरे केचिन्मुनयः केचिदा
भृशम् ॥ १७ ॥ दुष्टात्मा मातृगामी त्वं महापातकिनां वरः ॥ गच्छगच्छेति बहुशो वाचमूचुर्द्विजोत्तमाः ॥ १८ ॥ तान्निवार्य कृपाशीलः सर्वज्ञः
करुणानिधिः ॥ कृष्णद्वैपायनस्तत्र दुर्विनीतमभाषत ॥ १९ ॥ गच्छाशु रामसेतौ त्वं धनुष्कोटौ सहांबया ॥ मकरस्थे रवौ माघे मासमेकं
निरंतरम् ॥ २० ॥ जितेंद्रियो जितक्रोधः परद्रोहविवर्जितः ॥ एकमासं निराहारः कुरु स्नानं सहांबया ॥ २१ ॥ पूतो भविष्यस्यद्धा त्वं गुरुस्त्री
गमदोषतः ॥ यत्पातकं न नश्येत सेतुस्नानेन तन्नहि ॥ २२ ॥ श्रुतिस्मृतिपुराणेषु धनुष्कोटिप्रशंसनम् ॥ बहुधा भण्यते पंचमहापातकनाशनम् ॥
॥ २३ ॥ तस्मात्त्वं त्वरया गच्छ धनुष्कोटिं सहांबया ॥ प्रमाणं कुरु मद्वाक्यं वेदवाक्यमिव द्विज ॥ २४ ॥ श्रीरामधनुषः कोटौ स्नातस्य द्विज
पुत्रक ॥ महापातककोट्योपि नैव लक्ष्या इतीव हि ॥ २५ ॥ प्रायश्चित्तांतरं प्रोक्तं मन्वादिस्मृतिभिः स्मृतौ ॥ तद्गच्छ त्वं धनुष्कोटिं महापातक
नाशिनीम् ॥ २६ ॥ इतीरितोऽथ व्यासेन दुर्विनीतो द्विजोत्तमाः ॥ मात्रा साकं धनुष्कोटिं नत्वा व्यासं च निर्ययौ ॥ २७ ॥ मकरस्थे रवौ
माघे मासमात्रं निरंतरम् ॥ मात्रा सह निराहारो जितक्रोधो जितेंद्रियः ॥ २८ ॥ श्रीरामधनुषः कोटौ सस्नौ संकल्पपूर्वकम् ॥ रामनाथं नमस्कुर्व
त्रिकालं भक्तिपूर्वकम् ॥ २९ ॥ मासांते पारणां कृत्वा मात्रा सह विशुद्धधीः ॥ व्यासांतिकं पुनः प्रायात्तस्मै वृत्तं निवेदितुम् ॥ ३० ॥ स
प्रणम्य पुनर्व्यासं दुर्विनीतोऽब्रवीद्वचः ॥ ३१ ॥ ॥ दुर्विनीत उवाच ॥ ॥ भगवन्करुणासिंधो द्वैपायन महत्तम ॥ भवतः कृपया रामधनु
ष्कोटौ सहांबया ॥ माघमासे निराहारो मासमात्रमतंद्रितः ॥ ३२ ॥ अहं त्वकरवं स्नानं नमस्कुर्वन्महेश्वरम् ॥ इतः परं मया व्यास भगव
न्भक्तवत्सल ॥ ३३ ॥ यत्कर्त्तव्यं मुने तत्त्वं ममोपदिश तत्त्वतः ॥ इति तस्य वचः श्रुत्वा दुर्विनीतस्य वै मुनिः ॥ बभाषे दुर्विनीतं तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यासो नारायणांशकः ॥ ३४ ॥ ॥ व्यास उवाच ॥ ॥ दुर्विनीत गतं तेऽद्य पातकं मातृसंगजम् ॥ ३५ ॥ मातुश्च पातकं नष्टं त्वत्संगतिनिमित्तजम् ॥ संदेहो नात्र कर्तव्यः सत्यमुक्तं मया तव ॥ ३६ ॥ बांधवाः स्वजनाः सर्वे तथान्ये ब्राह्मणाश्च ये ॥ सर्वे त्वां संग्रहीष्यंति दुर्विनीतां त्वया सह ॥ ३७ ॥ मत्प्रसादाद्धनुष्कोटौ विशुद्धस्त्वं निमज्जनात् ॥ दारसंग्रहणं कृत्वा गार्हस्थ्यं धर्ममाचार ॥ ३८ ॥ त्यज त्वं प्राणिहिंसां च धर्मं भज सनातनम् ॥ सेवस्व सज्जनान्नित्यं भक्तियुक्तेन चेतसा ॥ ३९ ॥ संध्योपासनमुख्यानि नित्यकर्माणि न त्यज ॥ निगृहीष्वेन्द्रियग्राममर्चयस्व हरं हरिम् ॥ ४० ॥ परापवादं मा श्रूया मासूयां भज कर्हिचित् ॥ अन्यस्याभ्युदयं दृष्ट्वा संतापं कुरु मा वृथा ॥ ४१ ॥ मातृवत्परदारांश्च त्वन्नित्यमवलोकय ॥ अधीतवेदानखिलान्माविस्मर कदाचन ॥ ४२ ॥ अतिथीन्मावमन्यस्व श्राद्धं पितृदिने कुरु ॥ पैशुन्यं मा वदस्व त्वं स्वप्नेऽप्यन्यस्य कर्हिचित् ॥ ४३ ॥ इतिहासपुराणानि धर्मशास्त्राणि संततम् ॥ अवलोकय वेदांतं वेदांगानि तथा पुनः ॥ ४४ ॥ हरिशंकरनामानि मुक्तलज्जोऽनुकीर्त्तय ॥ जाबालोपनिषन्मंत्रैस्त्रिपुंड्रोद्धूलनं कुरु ॥ ४५ ॥ रुद्राक्षान्धारय सदा शौचाचारपरो भव ॥ तुलस्या बिल्वपत्रैश्च नारायणहरावुभौ ॥ ४६ ॥ एकं कालं द्विकालं वा त्रिकालं चार्चयस्व भोः ॥ तुलसीदलसंमिश्रं सिक्तं पादोदकेन च ॥ ४७ ॥ नैवेद्यान्नं सदा भुंक्ष्व शंभुनारायणाग्रतः ॥ कुरु त्वं वैश्वदेवाख्यं बलिमन्नविशुद्धये ॥ ४८ ॥ यतीश्वरान्ब्रह्मनिष्ठान्तर्पयान्नैर्गृहागतान् ॥ वृद्धानन्यान नाथांश्च रोगिणो ब्रह्मचारिणः ॥ ४९ ॥ कुरु त्वं मातृशुश्रूषामौपासनपरो भव ॥ पंचाक्षरं महामंत्रं प्रणवेन समन्वितम् ॥ ५० ॥ तथैवाष्टाक्षरं मंत्रमन्यमंत्रानपि द्विज ॥ जप त्वं प्रयतो भूत्वा ध्यायन्मंत्राधिदेवताः ॥ ५१ ॥ एवमन्यांस्तथा धर्मान्स्मृत्युक्तान्सर्वदा कुरु ॥ एवं कृतवतस्ते स्याद्देहांते मुक्तिरप्यलम् ॥ ५२ ॥ इत्युक्तो व्यासमुनिना दुर्विनीतः प्रणम्य तम् ॥ तदुक्तमखिलं कृत्वा देहांते मुक्तिमाप्तवान् ॥ ५३ ॥ तन्मातापि मृता काले धनुष्कोटिनिमज्जनात् ॥ अवाप परमां मुक्तिमपुनर्भवदायिनीम् ॥ ५४ ॥ ॥ दुर्वासा उवाच ॥ ॥ एवं ते दुर्विनीतस्य तन्मातुश्च विमोक्षणम् ॥ धनुष्कोट्यभिषेकेण यज्ञदेव मयेरितम् ॥ ५५ ॥ पुत्रमेनं त्वमप्याशु ब्रह्महत्याविशुद्धये ॥ समादाय व्रज ब्रह्मन्धनुष्कोटिं विमुक्तिदाम् ॥ ५६ ॥ ॥ सिंधुद्वीप उवाच ॥ ॥ इति दुर्वाससा प्रोक्तो यज्ञदेवो निजं सुतम् ॥ समादाय ययौ राम धनुष्कोटिं विमुक्तिदाम् ॥ ५७ ॥ गत्वा निवासमकरोत्षण्मासं तत्र स द्विजः ॥ पुत्रेण साकं नियतो हे सृगालप्लवंगमौ ॥ ५८ ॥ स सस्नौ च धनुष्कोटौ षण्मासं वै स पुत्रकः ॥ षण्मासांते यज्ञदेवं प्राह वागशरीरिणी ॥ ५९ ॥ विमुक्ता यज्ञदेवस्य ब्रह्महत्या सुतस्य ते ॥ स्वर्णस्तेयात्सुरापानात्किरातीसंगमात्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

था ॥ ६० ॥ अन्येभ्योपि हि पापेभ्यो विमुक्तोयं सुतस्तव ॥ संशयं मा कुरुष्व त्वं यज्ञदेव द्विजोत्तम ॥ ६१ ॥ इत्युक्त्वा विररामाथ सा तु वाग शरीरिणी ॥ तदाऽशरीरिणीवाक्यं यज्ञदेवः स शुश्रुवान् ॥ ६२ ॥ संतुष्टः पुत्रसहितो रामनाथं निषेव्य च ॥ धनुष्कोटिं नमस्कृत्य पुत्रेण सहि तस्तदा ॥ ६३ ॥ स्वदेशं प्रययौ हृष्टः स्वग्रामं स्वगृहं तथा ॥ सपुत्रदारः सुचिरं सुखमास्ते सुनिर्वृतः ॥ ६४ ॥ ॥ सिन्धुद्वीप उवाच ॥ ॥ गोमायुवानरावेवं युवयोः कथितं मया ॥ यज्ञदेवसुतस्यास्य सुमतेः परिमोक्षणम् ॥६५॥ पातकेभ्यो महद्भ्यश्च धनुष्कोटौ निमज्जनात् ॥ युवामतो धनुष्कोटिं गच्छतं पापशुद्धये ॥ नान्यथा पापशुद्धिः स्यात्प्रायश्चित्तायुतैरपि ॥६६॥ ॥ श्रीसूत उवाच ॥ ॥ सिन्धुद्वीपस्य वचनमिति श्रुत्वा द्विजो त्तमाः॥६७॥सृगालवानरावाशु विलंघितमहापथौ॥धनुष्कोटिं प्रयासेनगत्वा स्नात्वा च तज्जले॥६८॥विमुक्तौ सर्वपापेभ्यो विमानवरसंस्थितौ॥देवैः कुसुमवर्षेण कीर्यमाणौ सुतेजसौ ॥६९॥ हारकेयूरमुकुटकटकादिविभूषितौ ॥ देवस्त्रीधूयमानाभ्यां चामराभ्यां विराजितौ ॥ गत्वा देवपुरीं रम्यामिंद्र स्यार्द्धासनं गतौ ॥ ७० ॥ ॥ श्रीसूत उवाच ॥ ॥ युष्माकमेवं कथितं सृगालस्य कपेरपि ॥ ७१ ॥ पापाद्विमोक्षणं विप्रा धनुष्कोटौ निमज्जनात् ॥ भक्त्या य इममध्यायं शृणोति पठतेऽपि वा ॥७२॥ स्नानजं फलमाप्नोति धनुष्कोटौ स मानवः ॥ योगिवृंदैरसुलभां मुक्तिमप्याशु विंदति ॥७३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां सृगालवानरविमोक्षणवर्णनंनाम पंच त्रिंशोऽध्यायः ॥ ३५ ॥ ॥ श्रीसूत उवाच ॥ ॥ धनुष्कोटेस्तु माहात्म्यं भूयोऽपि प्रब्रवीम्यहम् ॥ दुराचाराभिधो यत्र स्नात्वा मुक्तो भवद्द्विजाः॥ ॥ १ ॥ ॥ मुनय ऊचुः ॥ ॥ दुराचाराभिधः कोऽसौ सूत तत्त्वार्थकोविद ॥ किंच पापं कृतं तेन दुराचारेण वै मुने ॥ २ ॥ कथं वा पातका न्मुक्तो धनुष्कोटौ निमज्जनात् ॥ एतच्छुश्रूषमाणानां विस्तराद्वद नो मुने ॥ ३ ॥ ॥ श्रीसूत उवाच ॥ ॥ मुनयः श्रूयतां तस्य दुराचारस्य पातकम् ॥ स्नानेन धनुषः कोटौ यथा मुक्तश्च पातकात् ॥ ४ ॥ दुराचाराभिधो विप्रो गौतमीतीरमाश्रितः ॥ कश्चिदस्ति द्विजाः पापी क्रूरकर्मरतः सदा ॥ ५ ॥ ब्रह्मघ्नैश्च सुरापैश्च स्तेयिभिर्गुरुतल्पगैः ॥ तदा संसर्गदुष्टोऽसौ तैः साकं न्यवसद्द्विजाः ॥६॥ महापातकिसंसर्गदोषेणास्य द्विजस्य वै ॥ ब्राह्मण्यं सकलं नष्टं निःशेषेण द्विजोत्तमाः ॥ ७ ॥ महापातकिभिः सार्द्धं दिनमेकं तु यो द्विजः ॥ निवसेत्सादरं तस्य तत्क्षणाद्वै द्विजन्मनः ॥ ॥ ८ ॥ ब्राह्मणस्य तुरीयांशो नश्यत्येव न संशयः ॥ द्विदिनं सेवनात्स्पर्शाद्दर्शनाच्छयनात्तथा ॥ ९ ॥ भोजनात्सह पंक्तौ च महापातकिभिर्द्विजाः द्वितीयभागो नश्येत ब्राह्मणस्य न संशयः ॥ १० ॥ त्रिदिनाच्च तृतीयांशो नश्यत्येव न संशयः ॥ चतुर्दिनाच्चतुर्थांशो विलयं याति हि ध्रुव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ ११ ॥ अतः परं तु तैः साकं शयनासनभोजनैः ॥ तत्तुल्यपातकी भूयान्महापातकसंभवात् ॥ १२ ॥ तेन ब्राह्मण्यहीनोऽयं दुराचाराभिधो द्विजाः ॥ ग्रस्तोऽभवद्भीषणेन वेतालेन बलीयसा ॥१३॥ असौ परवशस्तेन वेतालेनातिपीडितः ॥ देशाद्देशं भ्रमन्विप्रा वनाच्चैव वनांतरम् ॥१४॥ पूर्वपुण्यविपाकेन दैवयोगेन स द्विजः ॥ रामचंद्रधनुष्कोटिं महापातकनाशनीम् ॥ १५ ॥ अनुद्रुतः पिशाचेन तेनाविष्टो ययौ द्विजाः ॥ न्यमज्जयत्स वेतालो धनुष्कोटिजले त्वमुम् ॥ १६ ॥ धनुष्कोटिजले सोऽयं वेतालेन प्रवेशितः ॥ उदतिष्ठत्क्षणादेव वेतालेन विमोचितः ॥ १७ ॥ उत्थितोऽसौ द्विजो विप्रा धनुष्कोटिजलात्तदा ॥ स्वस्थो व्यचिंतयत्कोऽयं देशो जलधितीरतः ॥ १८ ॥ कथं मयागतमिह गौतमीतीरवासिना ॥ इति चिंताकुलः सोऽयं धनुष्कोटिनिवासिनम् ॥ १९ ॥ दत्तात्रेयं महात्मानं योगिप्रवरमुत्तमम् ॥ समागम्य प्रणम्यासौ दुराचारोऽभ्यभाषत ॥ २० ॥ न जाने भगवन्देशः कतमोऽयं वदाधुना ॥ गौतमीतीरनिलयो दुराचाराभिधो ह्यहम् ॥ २१ ॥ कृपया ब्रूहि मे ब्रह्मन्मयात्र कथमागतम् ॥ इति पृष्टो मुनिस्तेन दुराचारेण सुव्रतः ॥ २२ ॥ ध्यात्वा मुहूर्तमवदद्दुराचारं घृणानिधिः ॥ महापातकिसंसर्गे दुराचार कृते पुरा ॥ २३ ॥ ब्राह्मण्यं नष्टमभवद्वेतालस्त्वां ततोऽग्रहीत् ॥ तेनाविष्टस्त्वमायातो विवशोऽत्र विमूढधीः ॥ २४ ॥ न्यमज्जयत्त्वां वेतालो धनुष्कोटिजलेऽत्र तु ॥ तत्र मज्जनमात्रेण विमुक्तः पातकाद्भवान् ॥ २५ ॥ धनुष्कोटौ तु ये स्नानं पुण्ये कुर्वंति मानवाः ॥ तेषां नश्यंति वै सत्यं पंचपातकसंचयाः ॥ २६ ॥ रामचंद्रधनुष्कोटावत्र मज्जनमात्रतः ॥ महापातकिसंसर्गदोषस्ते विलयं ययौ ॥ २७ ॥ तन्नाशादेव वेतालस्त्वां मुक्त्वा विलयं गतः ॥ त्वामग्रहीद्यो वेतालः पुरायं ब्राह्मणोऽभवत् ॥ २८ ॥ सोऽयं भाद्रपदे मासे कृष्णपक्षे महालयम् ॥ पार्वणेन विधानेन पितॄणां नाकरोन्मुदा ॥ २९ ॥ तेन स्वपितृभिः शप्तो वेतालत्वमगादयम् ॥ सोपि चास्य धनुष्कोटेरवलोकनमात्रतः ॥ ३० ॥ वेतालत्वं विहायेह [1]विष्णुलोकमवाप्तवान् ॥ अतो भाद्रपदे मासे कृष्णपक्षे महालयम् ॥ ३१ ॥ उद्दिश्य स्वपितॄन्ये तु न कुर्वन्त्यतिलोभतः ॥ महालोभयुतास्तेऽद्धा वेतालाः स्युर्न संशयः ॥ ३२ ॥ तस्माद्भाद्रपदे मासे कृष्णपक्षे महालयम् ॥ पितॄनुद्दिश्य शक्त्या ये ब्राह्मणान्वेदपारगान् ॥ ३३ ॥ भोजयेयुर्महान्नेन न ते विंदंति दुर्गतिम् ॥ यस्तु भाद्रपदे मासे कृष्णपक्षे महालयम् ॥ ३४ ॥ स्वशक्त्यनुगुणं विप्रमेकं द्वौ त्रीनकिंचनः ॥ भोजयेन्नहि दौर्गत्यं भवेदस्य कदाचन ॥ ३५ ॥ अयं भाद्रपदे मासे पितॄणामनुपासनात् ॥ ययौ वेतालतां विप्रो यस्त्वां जग्राह पापिनम् ॥ ३६ ॥ कालो

१ शिवलोकम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

भाद्रपदमाससमारभ्य वृश्चिकावधि ॥ महालयस्य कथितो मुनिभिस्तत्त्वदर्शिभिः ॥ ३७ ॥ मासो भाद्रपदः कालस्तत्रापि हि विशिष्यते ॥ कृष्ण पक्षो विशिष्टः स्याद्गुराचारक तत्र वै ॥ ३८ ॥ तस्मिन्शुभे कृष्णपक्षे प्रथमायां तथा तिथौ ॥ श्राद्धं महालयं कुर्याद्यो नरो भक्तिपूर्वकम् ॥ ३९ ॥ तस्य प्रीणाति भगवान्पावकः सर्वपावनः ॥ स वह्निलोकमाप्नोति वह्निना सह मोदते ॥ ४० ॥ तस्मै च ज्वलनो देवः सर्वैश्वर्यं ददात्यपि ॥ प्रथमायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ४१ ॥ वह्निर्गृहं दहेत्तस्य श्रियं क्षेत्रादिकं तथा ॥ वेदज्ञे ब्राह्मणे भुक्ते प्रथमायां महालये ॥ ४२ ॥ दश कल्पसहस्राणि पितरो यांति तृप्तताम् ॥ द्वितीयायां तु यो भक्त्या कुर्याच्छ्राद्धं महालयम् ॥ ४३ ॥ तस्य प्रीणाति भगवान्भवानीपतिरीश्वरः ॥ स कैलासमवाप्नोति शिवेन सह मोदते ॥ ४४ ॥ विपुलां संपदं तस्मै प्रीतो दद्यान्महेश्वरः ॥ द्वितीयायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ४५ ॥ तस्य वै कुपितः शंभुर्नाशयेद्ब्रह्मवर्चसम् ॥ रौरवं कालसूत्राख्यं नरकं चास्य दास्यति ॥ ४६ ॥ वेदज्ञे ब्राह्मणे भुक्ते द्वितीयायां महालये ॥ विंशत्कल्पसहस्राणि पितरो यांति तृप्तताम् ॥ ४७ ॥ अनुग्रहात्पितॄणां च संततिश्चास्य वर्द्धते ॥ तृतीयायां नरो भक्त्या कुर्याच्छ्राद्धं महालयम् ॥ ४८ ॥ तस्य प्रीणाति भगवाँल्लोकपालो धनाधिपः ॥ महापद्मादिनिधयो वर्तंते तस्य वै वशे ॥ ४९ ॥ तस्यानुगास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ तृतीयायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ५० ॥ धनदो भगवांस्तस्य संपदं हरति क्षणात् ॥ दारिद्र्यं च ददात्यस्मै बहुदुःखसमाकुलम् ॥ ॥ ५१ ॥ तृतीयायां तिथौ मर्त्यो यः करोति महालयम् ॥ तृप्यंति पितरस्तस्य त्रिंशत्कल्पसहस्रकम् ॥ ५२ ॥ चतुर्थ्यां तु नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्य प्रीणाति भगवान्हेरंबः पार्वतीसुतः ॥ ५३ ॥ तस्य विघ्नाश्च नश्यंति गजवक्त्रप्रसादतः ॥ चतुर्थ्यां तु तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ५४ ॥ विघ्नेशो भगवांस्तस्य सदा विघ्नं करोति हि ॥ चण्डकोलाहलाभिख्ये नरके च पतत्यथ ॥ ५५ ॥ चतुर्थ्यां वै तिथौ मर्त्यो यः करोति महालयम् ॥ पितरः कल्पसाहस्रं चत्वारिंशत्प्रहर्षिताः ॥ ५६ ॥ बहून्पुत्रान्प्रदास्यंति श्राद्धकर्तुर्निरंतरम् ॥ पंचम्यां तु तिथौ भक्त्या यो न कुर्यान्महालयम् ॥ ५७ ॥ तस्य लक्ष्मीर्भगवती परित्यजति मंदिरम् ॥ अलक्ष्मीः कलहाधारा तस्य प्रादुर्भवेद्गृहे ॥ ५८ ॥ पंचम्यां तु तिथौ मर्त्यो यः करोति महालयम् ॥ तस्य तृप्यंति पितरः पंचकल्पसहस्रके ॥ ५९ ॥ संततिं चाप्यविच्छिन्नामस्मै दास्यंतितर्पिताः ॥ पार्वती च प्रसन्ना स्यान्महदैश्वर्यदायिनी ॥ ६० ॥ षष्ठ्यां तिथौ नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्य प्रीणाति भगवान्षण्मुखः पार्वतीसुतः ॥ ६१ ॥ तस्य पुत्राश्च पौत्राश्च षण्मुखस्य प्रसादतः ॥ ग्रहैर्बालग्रहैश्चैव न बाध्यंते कदाचन ॥ ६२ ॥ षष्ठ्यां तिथौ नरो भक्त्या यो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्यान्महालयम् ॥ तस्य स्कन्दो महासेनो विमुखः स्यान्न संशयः ॥ ६३ ॥ गर्भान्निर्गतमात्रैव प्रजा तस्य विनश्यति ॥ पूतनादिग्रहकुलैर्बाध्यते च निरंतरम् ॥ ६४ ॥ वह्निज्वालाप्रवेशाख्ये नरके च पतत्यधः ॥ षष्ठ्यां तिथौ यः श्रद्धावान्कुर्याच्छ्राद्धं महालयम् ॥ ६५ ॥ षष्टिकल्पसहस्रं तु पितरो यांति तृप्तताम् ॥ पुत्रानपि प्रदास्यंति संपदं विपुलां तथा ॥ ६६ ॥ सप्तम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ हिरण्यपाणिर्भगवानादित्यस्तस्य तुष्यति ॥ ६७ ॥ अरोगो दृढगात्रः स्याद्भास्करस्य प्रसादतः ॥ हिरण्यपाणिर्भगवान्हिरण्यं पाणिना स्वयम् ॥ ॥ ६८ ॥ महालयश्राद्धकर्त्रे ददाति प्रीतमानसः ॥ सप्तम्यां तु तिथौ भक्त्या यो न कुर्यान्महालयम् ॥ ६९ ॥ व्याधिभिः क्षयरोगाद्यै र्बाध्यते स दिवानिशम् ॥ तीक्ष्णधारास्त्रशय्याख्ये नरके च पतत्यधः ॥ ७० ॥ सप्तम्यां यो नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ सप्ततिं कल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥ ७१ ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ अष्टम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ ७२ ॥ मृत्युंजयः कृत्तिवासास्तस्य प्रीणाति शंकरः ॥ करस्थं तस्य कैवल्यं शंकरस्य प्रसादतः ॥ ७३ ॥ महालयेन श्राद्धेन तुष्टे साक्षात्त्रियंबके ॥ चतुर्दशसु लोकेषु दुर्लभं तस्य किं भवेत् ॥ ७४ ॥ महालयं न कुर्याद्वै योऽष्टम्यां मूढचेतनः ॥ संसारसागरे घोरे सदा मज्जति दुःखितः ॥ ७५ ॥ कदाचिदपि तस्येष्टं नैव सिद्ध्यति भूतले ॥ वैतरिण्याख्यनरके पतत्याचंद्रतारकम् ॥ ७६ ॥ योऽष्टम्यां श्रद्धया श्राद्धं नरः कुर्यान्महालयम् ॥ अशीतिकल्पसाहस्रं तृप्यंति पितरोऽस्य वै ॥ ७७ ॥ आशीर्भिर्वर्द्धयंत्येनं विघ्नश्चास्य व्यपोहति ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ ७८ ॥ नवम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ दुर्गादेवी भगवती तस्य प्रीणाति शांभवी ॥ ७९ ॥ क्षयापस्मारकुष्ठादीन्क्षुद्रप्रेतपिशाचकान् ॥ नाशयेत्तस्य सन्तुष्टा दुर्गा महिषमर्दिनी ॥ ८० ॥ नवम्यां तु तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ अपस्मारेण पीड्येत तथैव ब्रह्मरक्षसा ॥ ८१ ॥ अभिचारार्थकृत्याभिर्बाध्येत च निरन्तरम् ॥ नवम्यां यस्तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ ८२ ॥ नवतिं कल्पसाहस्रं तृप्यन्ति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ ८३ ॥ दशम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ तस्यामृतकलश्चन्द्रः षोडशात्मा प्रसीदति ॥ ८४ ॥ औषधीनामधीशेऽस्मिन्छ्राद्धेनानेन तोषिते ॥ व्रीह्यादीनि तु धान्यानि दद्युरोषधयः सदा ॥ ॥ ८५ ॥ यो न कुर्याद्दशम्यां तु महालयमनुत्तमम् ॥ ओषध्यो निष्फलास्तस्य कृषिश्चाप्यस्य निष्फला ॥ ८६ ॥ दशम्यां यस्तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ शतकल्पसहस्राणि तृप्यंति पितरोऽस्य वै ॥ ८७ ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ एकादश्यां नरो

CC-0. In Public Domain. Digitization by eGangotri

भक्त्या श्राद्धं कुर्यान्महालयम् ॥ ८८ ॥ संहर्ता सर्वलोकस्य तस्य रुद्रः प्रसीदति ॥ रुद्रस्य सर्वसंहर्तुः प्रसादेन जगत्पतेः ॥ ८९ ॥ शत्रून्पराजय त्येष श्राद्धकर्ता निरन्तरम् ॥ ब्रह्महत्यायुतं चापि तस्य नश्यति तत्क्षणात् ॥ ९० ॥ अग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ॥ एकादश्यां नरो भक्त्या यो न कुर्यान्महालयम् ॥ ९१ ॥ तस्य वै विमुखो रुद्रो न प्रसीदति कर्हिचित् ॥ सर्वतो वर्धमानाश्च बाधन्ते शत्रवो ह्यमुम् ॥ ९२ ॥ अग्निष्टोमादिका यज्ञाः कृताश्च बहुदक्षिणाः ॥ निष्फला एव तस्य स्युर्भस्मनि न्यस्तहव्यवत् ॥ ९३ ॥ ब्रह्मघातकतुल्यः स्याच्छ्राद्धाकरणदोषतः ॥ एकादश्यां तिथौ यस्तु श्राद्धं कुर्यान्महालयम् ॥ ९४ ॥ द्विशतं कल्पसाहस्रं तृप्यंति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ॥ ९५ ॥ द्वादश्यां तु तिथौ मर्त्यः कुर्याच्छ्राद्धं महालयम् ॥ तस्य लक्ष्मीपतिः साक्षात्प्रसीदति जनार्दनः ॥ ९६ ॥ प्रसन्ने सति देवेशे देवदेवे जनार्दने ॥ चराचरं जगत्सर्वं प्रीतमेव न संशयः ॥ ९७ ॥ भूमिर्हरिप्रिया चास्य सस्यं संवर्द्धयत्यपि ॥ लक्ष्मीश्च वर्द्धते तस्य मंदिरे हरिवल्लभा ॥ ९८ ॥ गदा कौमोदकीनाम नारायणकरस्थिता ॥ अपस्मारादिभूतानि नाशयत्येव सर्वदा ॥ ९९ ॥ तीक्ष्णधारं तथा चक्रं शत्रूनस्य दहत्यपि ॥ यातुधानपिशाचादीञ्छंखश्चास्य व्यपोहति ॥१००॥ एवं सर्वात्मना पीडां वारयत्यस्य केशवः ॥ महालयं न कुर्याद्यो द्वादश्यां मनुजाधमः ॥ १ ॥ तस्य क्षेत्राणि संपच्च विनश्यंति न संशयः ॥ अपस्मारादिभूतानि शत्रवश्च महाबलाः ॥२॥ यातुधानाश्च बाधन्ते तं वै विष्णुपराङ्मुखम् ॥ पात्यते नरके चापि अस्थिभेदननामके ॥३॥ द्वादश्यां भक्तियुक्तो यः श्राद्धं कुर्यान्महालयम् ॥ षट्शतं कल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥४॥ संततिं चाप्यविच्छिन्नां पितरोऽस्मै ददत्यपि॥त्रयोदश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥५॥ प्रसीदत्यस्य भगवान्कंदर्पो रतिनायकः ॥ स्रक्चंदनादयो भोगा ललनाश्च मनोरमाः ॥६॥ कामदेवप्रसादेन तस्य सिद्ध्यंति सर्वदा ॥ आजन्ममरणांतं च सुखमेव स विंदते ॥७॥ यो न कुर्यात्त्रयोदश्यां न च श्राद्धं महालयम् ॥ कामदेवोऽस्य विमुखः स्त्रियो भोगांश्च नाशयेत् ॥ ८ ॥ अंगारशय्याश्रमणे नरके पातयत्यमुम् ॥ पितॄनुद्दिश्य यः कुर्यात्त्रयोदश्यां महालयम् ॥ ९ ॥ सहस्रकल्पसाहस्रं प्रीणंति पितरोऽस्य वै ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणास्तदा ॥ १० ॥ चतुर्दश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ तस्याभीष्टप्रदानाय जागर्ति भगवाञ्छिवः ॥ ११ ॥ उपदिश्य शिवज्ञानं सायुज्यं च ददात्यपि ॥ सुरापानायुतं चापि स्वर्णस्तेयायुतं तथा ॥ १२ ॥ नश्यंति तत्क्षणादेव चतुर्दश्यां महालयात् ॥ चण्डालवृषलस्त्रीणां संगदोषोऽपि नश्यति ॥ १३ ॥ अश्वमेधसहस्रस्य पौंडरीकायुतस्य च ॥ पुष्कला फलसिद्धिः स्याच्चतुर्दश्यां महालयात् ॥ १४ ॥ यो न कुर्याच्चतुर्दश्यां श्राद्धमेतन्महालयम् ॥ स कल्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोटिसाहस्रं कल्पकोटिशतं तथा ॥ १५ ॥ संसारांधमहाकूपे पतितः स्यादनिष्कृतिः ॥ अचोरयित्वा कनकमपीत्वापि सुरां तथा ॥ १६ ॥ सुरापानादिभिर्दोषैर्लिप्यते स विमूढधीः ॥ कृता अपि विधानेन यज्ञाः स्युर्निष्फलास्तथा ॥ १७ ॥ चतुर्दश्यां तिथौ यस्तु कुर्याच्छ्राद्धं महालयम् ॥ लक्षकोटिसहस्राणि लक्षकोटिशतानि च ॥१८॥ कल्पानि पितरस्तस्य तृप्यंत्येव न संशयः ॥ नरकस्थाश्च पितरः स्वर्गं यांति प्रहर्षिताः ॥ १९ ॥ संततिं चाप्यविच्छिन्नां दद्युः पितृगणास्तदा ॥ अमायां तु नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ १२० ॥ पितॄणां तस्य तृप्तिः स्यादनंता नात्र संशयः ॥ सुधामास्वाद्य या तृप्तिर्देवानां दिवि वै भवेत् ॥ २१ ॥ अनंता तादृशी तृप्तिरमावास्यां महालयात् ॥ अमावास्या महापुण्या पितृदेवनमस्कृता ॥ २२ ॥ शांता ह्येषा तु परमा शिवस्य च महाप्रिया ॥ तस्यां महालये श्राद्धे भोजयेद्वेदवित्तमान् ॥ २३ ॥ तेन तृप्तिः पितॄणां स्यादनंता तुष्यते शिवः ॥ ब्रह्महत्यादयः पंच पातका नाशमाप्नुयुः ॥ २४ ॥ कृताश्च स्युर्विधानेन सर्वे यज्ञाः सदक्षिणाः ॥ अनुष्ठिताः स्युर्विधिवत्सर्वे धर्माः सनातनाः ॥ २५ ॥ अमावास्यादिने येन कृतं श्राद्धं महालयम् ॥ प्रत्यग्ब्रह्मैकतां ज्ञात्वा सायुज्यं यात्यसंशयम् ॥ ॥ २६ ॥ यो न कुर्यादमावास्यां महालयमचेतनः ॥ ब्रह्मलोकगताश्चास्य पितरो यांति नारकम् ॥ २७ ॥ संततिश्चास्य मूढस्य विच्छिद्येतैव तत्क्षणात् ॥ स एव हि महानर्थो यदमायां तिथौ नरैः ॥ २८ ॥ महालयार्थो विप्रेंद्रा विधिवन्नैव भोजिताः ॥ मासि भाद्रपदे प्राप्ते नृत्यंति पितृदेवताः ॥ २९ ॥ अस्मानुद्दिश्य मत्पुत्रा भोजयेयुर्द्विजोत्तमान् ॥ तेन नो नरकक्लेशो न भविष्यति दारुणः ॥ १३० ॥ वासश्च स्वर्गलोके स्याद्यावदाचन्द्रतारकम् ॥ मासि भाद्रपदे प्राप्ते पितॄणां तृप्तिदायिनी ॥ ३१ ॥ एकैकं भोजयेद्विप्रं प्रत्यहं भक्तिपूर्वकम् ॥ पितृमातृकुलोद्भूताः पितरस्तृप्तिमाप्नुयुः ॥ ३२ ॥ कृष्णपक्षे विशेषेण ब्राह्मणान्भोजयेत्सुधीः ॥ घृतसूपादिसस्यैश्च तैलाभ्यंगपुरःसरम् ॥ ३३ ॥ सुधां पास्यंति पितरस्तस्याकल्पं प्रहर्षिताः ॥ सप्तमीं कृष्णपक्षस्य प्रारभ्य प्रत्यहं नराः ॥ ३४ ॥ विप्रान्यावदमावास्या त्रींस्त्रीनभ्यर्च्य भोजयेत् ॥ आरभ्य द्वादशीं विप्रांस्त्रीनवश्यं तु भोजयेत् ॥ ३५ ॥ अन्यथैश्वर्यहानिः स्यान्महादारिद्र्यभाग्भवेत् ॥ वित्तलोभं परित्यज्य विप्रान्सूपघृतादिभिः ॥ ३६ ॥ पयसा पायसान्नेन दध्नापूपादिभिस्तथा ॥ पेयैर्लेह्यैश्च चोष्यैश्च भक्ष्यैश्च विविधैरपि ॥ ३७ ॥ भोजयेद्वेदविन्मुख्यांस्तृप्तिस्तेषां यथा भवेत् ॥ तेन ब्रह्मा हरिः शंभुस्तृप्ताः स्युर्नात्र संशयः॥३८॥ अग्निष्वात्तादिपितरस्तथैवेंद्रादिदेवताः ॥ बहुनात्र किमुक्तेन तुष्टं तेन जगत्रयम् ॥३९॥ पार्वणेन विधानेन कुर्याच्छ्राद्धे महालयम् ॥ नरो महालयश्राद्धे पितृवंश्यान्पितॄनिव ॥१४०॥ मातृवंश्यानपि पितॄन्भोजयेच्छ्रेयसे मुदा ॥ दक्षिणां

CC-0. In Public Domain. Digitization by eGangotri

च यथाशक्ति दद्याद्वित्तानुसारतः ॥ ४१ ॥ तस्मिन्महालये श्राद्धे वित्तशाठ्यं न कारयेत् ॥ दक्षिणा खलु यज्ञानां कथितेयं पुरोगवा ॥ ४२ ॥ अनः
पुरोगवैर्हीनं करिष्यति यथाध्वनि ॥ अदक्षिणं तथा सोयं पितृयज्ञोऽपि रिष्यति॥४३॥तस्माद्यज्ञेषु दातव्या दक्षिणाल्पा हि जानता ॥ विधवाभिरपि
स्त्रीभिरपुत्राभिर्महालयः ॥ ४४ ॥ भर्तॄनुद्दिश्य कर्तव्यो भूरिभोजनकर्मणा ॥ अन्यथा धर्महानिः स्यान्नरकं च महद्भवेत् ॥ ४५ ॥ मासि भाद्रपदे
प्राप्ते यो न कुर्यान्महालयम् ॥ तत्कुलं नाशमाप्नोति ब्रह्महत्यां च विंदति ॥ ४६ ॥ महालयं प्रकुर्वंति श्रद्धावंतः पितॄन्प्रति ॥ न तेषां संततिच्छेदो
भवेत्संपदभंगुरा ॥ ४७ ॥ आलयं ह्यास्पदं प्रोक्तं महः कल्याणमुच्यते ॥ कल्याणानामास्पदत्वान्महालयमुदीर्यते ॥ ४८ ॥ तस्मान्महालयं
मर्त्यः कुर्यात्कल्याणसिद्धये ॥ अमंगलं भवेत्तस्य न कुर्याच्चेन्महालयम् ॥ ४९ ॥ न कुर्याद्यद्यपि श्राद्धं मातापित्रोर्मृतेऽहनि ॥ कुर्यान्महालयश्राद्ध
मस्मरन्नेव बुद्धिमान् ॥१५०॥ कर्तुं महालयश्राद्धं यदि शक्तिर्न विद्यते ॥ याचित्वापि नरः कुर्यात्पितॄणां तन्महालयम् ॥५१॥ ब्राह्मणेभ्यो विशिष्टे
भ्यो याचेत धनधान्यकम् ॥ पतितेभ्यो न गृह्णीयाद्धनधान्यं कदाचन ॥५२॥ ब्राह्मणेभ्यो न लभ्येत यदि धान्यधनादिकम् ॥ याचेत क्षत्रियश्रेष्ठा
न्महालयचिकीर्षया ॥ ५३ ॥ दातारश्चेन्न भूपाला वैश्येभ्योऽपि च याचयेत् ॥ वैश्या अपि हि दातारो यदि लोके न संति वै ॥ ५४ ॥ दद्याद्भाद्र
पदे मासे गोग्रासं पितृतृप्तये ॥ अथ वा रोदनं कुर्याद्बहिर्निर्गत्य कानने ॥ ५५ ॥ पाणिभ्यामुदरं स्वीयमाहत्याश्रूणि वर्तयन् ॥ तेष्वरण्यप्रदेशेषु
उच्चैरेवं वदेन्नरः ॥ ५६ ॥ शृण्वंतु पितरः सर्वे मत्कुलीना वचो मम ॥ अहं दरिद्रः कृपणो निर्लज्जः क्रूरकर्मकृत् ॥ ५७ ॥ प्राप्तो भाद्रपदो मासः
पितॄणां प्रीतिवर्द्धनः ॥ कर्त्तुं महालयश्राद्धं न च मे शक्तिरस्ति वै ॥ ५८ ॥ भ्रमित्वापि महीं कृत्स्नां न मे किंचन लभ्यते ॥ अतो महालयश्राद्धं
न युष्माकं करोम्यहम् ॥ ५९ ॥ क्षमध्वं मम तद्यूयं भवंतो हि दयापराः ॥ दरिद्रो रोदनं कुर्यादेवं काननभूमिषु ॥ १६० ॥ तस्य रोदनमाकर्ण्य
पितरस्तत्कुलोद्भवाः ॥ हृष्टास्तृप्तिं प्रयांत्येव सुधां पीत्वैव निर्जराः ॥ ६१ ॥ महालयार्थे विप्रौघे भुक्ते तृप्तिर्यथा भवेत् ॥ गोग्रासारण्यरुदितैः पितृ
तृप्तिस्तथा भवेत् ॥ ६२ ॥ मासि भाद्रपदे विघ्नो यदि स्यात्सूतकादिना ॥ यातेषु सूतकाहःसु कुर्यादावृश्चिकावधि ॥ ६३ ॥ बुधो महालय
स्यार्थे ब्राह्मणान्वृणुयान्नव ॥ पित्रर्थमेकं वृणुयात्पितामहकृते तथा ॥ ६४ ॥ प्रपितामहमुद्दिश्य तथैकं वृणुयाद्द्विजः ॥ तथा मातामहार्थं तु एकं वै
वृणुयाद्द्विजम् ॥ ६५ ॥ मातुःपितामहार्थं च वृणुयाद्द्विजमेककम् ॥ वृणुयादेकमुद्दिश्य मातुश्च प्रपितामहम् ॥ ६६ ॥ तथैव विश्वेदेवार्थे वृणुयाद्द्वौद्वि
जोत्तमौ ॥ विष्ण्वर्थं ब्राह्मणं त्वेकं वृणुयाद्वेदवित्तमम् ॥६७॥ एवं महालयश्राद्धे ब्राह्मणान्वृणुयान्नव ॥ अथवा पितृवर्गार्थं वरयेद्विप्रमेककम् ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातामहादीन्वोद्दिश्य वरयेद्विप्रमेककम् ॥ विश्वेदेवार्थमेकं च विष्ण्वर्थं च तथापरम् ॥ ६९ ॥ एवं वै वरयेद्विप्राश्चतुरस्तु महालये ॥ ब्राह्मणान्वे दसंपन्नान्सुशीलान्वरयेत्सुधीः ॥ १७० ॥ दुःशीलान्वरयेद्यस्तु स वै श्राद्धस्य घातकः ॥ मासि भाद्रपदे प्राप्ते कृष्णपक्षे विशेषतः ॥ ७१ ॥ कुर्या न्महालयश्राद्धं यो नरः श्रद्धया सह ॥ स स्नातः सर्वतीर्थेषु दुराचार महामते ॥ ७२ ॥ अग्निष्टोमादयो यज्ञाः शतमप्यमुना कृताः ॥ तुलापुरुषमुख्यानि दानान्यपि कृतानि वै ॥ ७३ ॥ चांद्रायणादिकृच्छ्राणि कृतान्येव न संशयः ॥ चतुर्णां सांगवेदानां पारायणफलं लभेत् ॥ ॥ ७४ ॥ गायत्र्यादिमहामंत्रजपपुण्यं लभेत्तथा ॥ इतिहासपुराणानां पारायणफलं लभेत् ॥ ७५ ॥ महालयसमं पुण्यं वृत्तं नास्ति महीतले ॥ ब्रह्मविष्णुमहेशानलोकप्राप्तिर्महालयात् ॥ ७६ ॥ महालयादिकं श्राद्धं नित्यं काम्यमपीष्यते ॥ तस्मादकरणे तस्य प्रत्यवायो महान्भवेत् ॥ ७७ ॥ करणादिष्टसिद्धिश्च भविष्यति न संशयः ॥ महालयस्य करणाद्भूतवेतालकादयः ॥ ७८ ॥ अपस्मारग्रहाश्चापि शाकिनीडाकिनीगणाः ॥ यातुधानाः पिशाचाश्च वेतालाश्च भयानकाः ॥ ७९ ॥ नश्यंति तत्क्षणादेव भूतान्यन्यानि वै तथा ॥ महालयस्यकर णाद्विपुलां श्रियमश्नुते ॥ १८० ॥ पुरा दशरथो राजा वसिष्ठस्योपदेशतः ॥ मासि भाद्रपदे प्राप्ते कृत्वा श्राद्धं महालयम् ॥ ८१ ॥ रामादींश्च तुरः पुत्रान्प्राप्तवांल्लोकसंमतान् ॥ विश्वातिशायिनीं लक्ष्मीं प्रपेदे कीर्तिमुत्तमाम् ॥ ८२ ॥ महालयस्य करणाद्ययाती राजसत्तमः ॥ यदुमुख्या न्महापुत्रान्प्रपेदे वंशवर्द्धनान् ॥ ८३ ॥ अनन्यदुर्लभं स्वर्गं प्रपेदे श्राद्धपुण्यतः ॥ दुष्यंतो भरतं लेभे महालयविधानतः ॥ ८४ ॥ महालय विधानेन दमयंतीपतिर्नलः ॥ कृच्छ्रं महत्तरं तीर्त्वा पुनर्लेभे महीमिमाम् ॥ ८५ ॥ निजग्राह कलिं घोरं पुष्करं चाप्यरातिनम् ॥ इन्द्रसेनाभिधानं च पुत्रं लेभेऽतिधार्मिकम् ॥ ८६ ॥ हरिश्चंद्रो महाराजो महालयविधानतः ॥ विश्वामित्रकृताद्दुःखान्मुक्तः सत्यवतां वरः ॥ ८७ ॥ लेभे चंद्रवतीं भार्यां लोहिताश्वं सुतं पुनः ॥ महालयविधानेन कृतवीर्यसुतो बली ॥ ८८ ॥ अष्टादशानां द्वीपानामाधिपत्यमवाप्तवान् ॥ रामोऽपि दण्डकारण्ये महालयविधानतः ॥ ८९ ॥ हत्वा तु रावणं संख्ये सीतां पुनरवाप्तवान् ॥ महालयस्य करणाद्धर्मपुत्रो युधिष्ठिरः ॥ १९० ॥ दुःखसागरमुत्तीर्य धार्तराष्ट्राञ्जघान च ॥ महालयस्य करणाद्वसिष्ठो मुनिसत्तमः ॥ ९१ ॥ अत्रिर्भृगुश्च कुत्सश्च गौतमश्चांगिरास्तथा ॥ कश्यपश्च भरद्वाजो विश्वा मित्रश्च कुम्भजः ॥ ९२ ॥ पराशरो मृकण्डश्च ये चान्ये मुनिसत्तमाः ॥ विधाय विधिवच्छ्राद्धं महालयमनुत्तमम् ॥ ९३ ॥ अणिमाद्यष्टसिद्धीनां व्रतानां तपसां तथा ॥ निवासभूता संजातास्तथा विश्वातिशायिनः ॥ ९४ ॥ जीवन्मुक्ताश्च ते सर्वे ह्यभवन्मुनिसत्तमाः ॥ अतो महालयश्राद्धं

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यं भूतिमिच्छता ॥ ९५ ॥ अतोऽद्यापि दुराचार न कुर्याद्यो महालयम् ॥ भूतवेतालकादिभ्यो भूयात्तस्य महद्भयम् ॥ ९६ ॥ महालयस्या करणाद्वेतालत्वमवाप्नुयात् ॥ त्वयाविष्टमिदं भूतं विप्रः सन्पूर्वजन्मनि ॥ ९७ ॥ नाम्ना वेदनिधिः पुण्यो भरद्वाजस्य चात्मनः ॥ कुशस्थलयभिधाने च वसन्ग्रामे महामनाः ॥ ९८ ॥ न चकार विधानेन श्राद्धमेतन्महालयम् ॥ ततोयं पितॄणां शापाद्वेतालत्वमवाप्तवान् ॥ ९९ ॥ तस्माद्भाद्रपदे मासे दुराचार पितॄन्प्रति ॥ ब्राह्मणान्भोजयान्नेन षड्रसेन सभक्तिकम् ॥ २०० ॥ दारिद्र्यं तेन ते न स्यात्सुखीचैव भवान्भवेत् ॥ महापातकिसंसर्गं मा कुरु त्वमितः परम् ॥ १ ॥ त्वयानुभूतं यद्दुःखं वेतालग्रहणोद्भवम् ॥ गच्छ त्वमनुजानामि स्वदेशं प्रति मा चिरम् ॥ २ ॥ इतीरितः स मुनिना दत्तात्रेयेण योगिना ॥ तं प्रणम्य ययौ देशं कृतार्थेनांतरात्मना ॥ ३ ॥ गत्वा च स्वगृहं विप्रो दुराचारो द्विजोत्तमाः ॥ विमुक्तवेतालभयो गतपातककंचुकः ॥ ४ ॥ दत्तात्रेयेरितेनासौ मार्गेण प्रीतमानसः ॥ त्यक्तपातकिसंसर्गः स्वाश्रमाचारतत्परः ॥ ५ ॥ रामचंद्रधनुष्कोटितीर्थमज्जनगौरवात् ॥ देहांते परमां मुक्तिं दुराचारो ययौ तदा ॥ ६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं पुण्यं दुराचरविमोक्षणम् ॥ सेयं पुण्या धनुष्कोटिर्महापातकनाशिनी ॥ ७ ॥ यत्र हि स्नानमात्रेण दुराचारो विमोचितः ॥ अथवा धनुषः कोटेरियत्ता किं हि वै भवेत् ॥ ८ ॥ या निष्कृतिविहीनानि पापान्यपि विनाशयेत् ॥ प्रायश्चित्तविहीनानि यानि पापानि संति वै ॥ ९ ॥ तान्यप्यत्र विनश्यंति धनुष्कोटौ निमज्जनात् ॥ शूद्रेण पूजितं लिंगं विष्णुं वा यो नमेद्द्विजः ॥ २१० ॥ प्रायश्चितं न तस्योक्तं स्मृतिभिः परमर्षिभिः ॥ नश्येत्तस्यापि तत्पापं धनुष्कोटिनिमज्जनात् ॥ ११ ॥ विप्रनिंदाकृतां नृणां प्रायश्चित्तं न विद्यते ॥ विश्वासघातकानां च कृतघ्नानां न निष्कृतिः ॥ १२ ॥ भ्रातृभार्यारतानां च प्रायश्चित्तं न विद्यते ॥ शूद्रान्ने नियतानां च श्रुतिनिंदारतात्मनाम् ॥ १३ ॥ कन्याविक्रयिणां विप्रा हयविक्रयिणां तथा ॥ देवविक्रयिणां वेदविक्रये निरतात्मनाम् ॥ १४ ॥ धर्मविक्रयिणां पुंसां व्रतविक्रयिणां तथा ॥ तीर्थविक्रयिणां पुंसां प्रायश्चित्तं न विद्यते ॥ १५ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ मातृद्रोहपितृद्रोहयतिद्रोहरतात्मनाम् ॥ १६ ॥ गुरुनिंदापराणां च शिवनिंदारतात्मनाम् ॥ विष्णुनिंदापराणां च यतिनिंदारतात्मनाम् ॥ ॥ १७ ॥ सत्कथादूषकाणां च प्रायश्चित्तं न विद्यते ॥ तेषां चात्र धनुष्कोटौ स्नानाच्छुद्धिर्भविष्यति ॥ १८ ॥ एवं वः कथितं विप्रा धनुष्कोटेस्तु वैभवम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ २१९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां दुराचारसंसर्गदोषशांतिवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभोस्तपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनाः सर्वे नैमिषारण्यवासिनः ॥ यावद्रामधनुष्कोटिचक्रतीर्थमुखानि वः ॥ १ ॥ चतुर्विंशतितीर्थानि कथितानि मयाधुना ॥ इतोऽन्यदद्भुतं यूयं किं भूयः श्रोतुमिच्छथ ॥ २ ॥ ॥ मुनय ऊचुः ॥ ॥ क्षीरकुंडस्य माहात्म्यं श्रोतुमिच्छामहे मुने ॥ यत्समीपे त्वया चक्रतीर्थमित्युदितं पुरा ॥ ३ ॥ क्षीरकुंडं च तत्कुत्र कीदृशं तस्य वैभवम् ॥ क्षीरकुण्डमिति ख्यातिः कथं वास्य समागता ॥ ४ ॥ एतन्नः श्रद्दधानानां विस्तराद्वक्तुमर्हसि ॥ ॥ श्रीसूत उवाच ॥ ॥ ब्रवीमि मुनयः सर्वे शृणुध्वं सुसमाहिताः ॥ ५ ॥ देवीपुरान्महापुण्यात्प्रतीच्यां दिश्यदूरतः ॥ फुल्लग्राममिति ख्यातं स्थानमस्ति महत्तरम् ॥ ६ ॥ यत आरभ्य रामेण सेतुबन्धो महार्णवे ॥ तद्धि पुण्यतमं क्षेत्रं फुल्लग्रामाभिधं पुरम् ॥ ७ ॥ क्षीरकुण्डं तु तत्रैव महापातकनाशनम् ॥ दर्शनात्स्पर्शनाद्ध्यानात्कीर्तनाच्चापि मोक्षदम् ॥ ८ ॥ तस्य तीर्थस्य पुण्यस्य क्षीरकुण्डमिति प्रथाम् ॥ भवतां सादरं वक्ष्ये शृणुध्वं श्रद्धया सह ॥ ९ ॥ पुरा हि मुद्गलोनाम मुनिर्वेदोक्तमार्गकृत् ॥ दक्षिणांबुनिधेस्तीरे फुल्लग्रामेतिपावने ॥ १० ॥ नारायणप्रीतिकरम करोद्यज्ञमुत्तमम् ॥ तस्य विष्णुः प्रसन्नात्मा यागेन परितोषितः ॥ ११ ॥ प्रादुर्बभूव पुरतो यज्ञवाटे द्विजोत्तमाः ॥ तं दृष्ट्वा मुद्गलो विष्णुं लक्ष्मीशोभितविग्रहम् ॥ १२ ॥ कालमेघतनुं कांत्या पीतांबरविराजितम् ॥ विनतानंदनारूढं कौस्तुभालंकृतोरसम् ॥ १३ ॥ शंखचक्रगदापद्मराजद्बाहुचतुष्टयम् ॥ भक्त्या परवशो दृष्ट्वा पुलकांकुरमंडितः ॥ मुद्गलः परितुष्टाव शब्दैः श्रोत्रसुखावहैः ॥ १४ ॥ ॥ मुद्गल उवाच ॥ ॥ प्रथमं जगतः स्रष्ट्रे पालकाय ततः परम् ॥ १५ ॥ संहर्त्रे च ततः पश्चान्नमो नारायणाय ते ॥ नमः शफररूपाय कमठाय चिदात्मने ॥ १६ ॥ नमो वराहवपुषे नमः पंचास्यरूपिणे ॥ वामनाय नमस्तुभ्यं जमदग्निसुताय ते ॥ १७ ॥ राघवाय नमस्तुभ्यं बलभद्राय ते नमः ॥ कृष्णाय कल्कये तुभ्यं नमो विज्ञानरूपिणे ॥ १८ ॥ रक्ष मां करुणासिंधो नारायण जगत्पते ॥ निर्लज्जं कृपणं क्रूरं पिशुनं दांभिकं कृशम् ॥ १९ ॥ परदारपरद्रव्यपरक्षेत्रैकलोलुपम् ॥ असूयाविष्टमनसं मां रक्ष कृपया हरे ॥ २० ॥ इति स्तुतो हरिः साक्षान्मुद्गलेन द्विजोत्तमाः ॥ तमाह मुद्गलमुनिं मेघगंभीरया गिरा ॥ २१ ॥ श्रीहरिरुवाच ॥ ॥ प्रीतोऽस्म्यनेन स्तोत्रेण मुद्गल क्रतुना च ते ॥ प्रत्यक्षेण हविर्भोक्तुमहं ते क्रतुमागतः ॥ २२ ॥ इत्युक्तो हरिणा तत्र मुद्गलस्तुष्टमानसः ॥ उवाचाधोक्षजं विप्रो भक्त्या परमया युतः ॥ २३ ॥ ॥ मुद्गल उवाच ॥ ॥ कृतार्थोऽस्मि हृषीकेश पत्नी मे धन्यतां ययौ ॥ अद्य मे सफलं जन्म ह्यद्य मे सफलं तपः ॥ २४ ॥ अद्य मे सफलो वंशो ह्यद्य मे सफलाः सुताः ॥ आश्रमः सफलोऽद्यैव सर्वं

१ क्रियाः—इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

सफलमद्य मे ॥ २५ ॥ यद्भवान्यज्ञवाटं मे हविर्भोक्तुमिहागतः ॥ योगिनो योगनिरता हृदये मृगयंति यम् ॥ २६ ॥ तमद्य साक्षात्त्वां पश्ये सफ
लोऽयं मम क्रतुः ॥ इतीरयित्वा तं विष्णुमर्चयित्वाऽऽसनादिभिः ॥२७॥ चंदनैः कुसुमैरन्यैर्दत्त्वा चार्घ्यं स विष्णवे ॥ प्रददौ विष्णवे प्रीत्या पुरो
डाशादिकं हविः ॥ २८ ॥ स्वयमेव समादाय पाणिना लोकभावनः ॥ हविस्तद्बुभुजे विष्णुर्मुद्गलेन समर्पितम् ॥ २९ ॥ तस्मिन्हविषि भुक्ते तु
विष्णुना प्रभविष्णुना ॥ साग्नयस्त्रिदशाः सर्वे तृप्ताः समभवन्द्विजाः ॥३०॥ ऋत्विजो यजमानश्च तत्रत्या ब्राह्मणास्तथा ॥ यत्किंचित्प्राणिलोकेऽ
स्मिंश्चरं वा यदि वाऽचरम् ॥३१॥ सर्वमेव जगत्तृप्तं भुक्ते हविषि विष्णुना ॥ ततो हरिः प्रसन्नात्मा मुद्गलं प्रत्यभाषत ॥३२॥ प्रीतोऽहं वरदोऽस्म्येष
वरं वरय सुव्रत ॥ इत्युक्ते केशवेनाथ महर्षिस्तमभाषत ॥ ३३ ॥ ॥ मुद्गल उवाच ॥ ॥ यत्त्वया मे हविर्भुक्तं यागे प्रत्यक्षरूपिणा ॥ अनेनैव
कृतार्थोऽस्मि किमस्मादधिकं वरम् ॥ ३४ ॥ तथापि भगवन्विष्णो त्वयि मे निश्चला सदा ॥ भक्तिर्निष्कपटा भूयादिदं मे प्रथमं
वरम् ॥ ३५ ॥ माधवाहं प्रतिदिनं सायंप्रातरिहाग्नये ॥ त्वद्रूपाय तव प्रीत्यै सुरभेः पयसा हरे ॥ ३६ ॥ होतुमिच्छामि वरद तन्मे देहि
वरांतरम् ॥ पयसा नित्यहोमो हि द्विकालं श्रुतिचोदितः ॥ ३७ ॥ न मे सुरभयः संति तापसस्याधनस्य च ॥ इत्युक्ते मुद्गलेनाथ देवो
नारायणो हरिः ॥ ३८ ॥ आहूय विश्वकर्माणं त्वष्टारममृताशिनम् ॥ एकं सरः कारयित्वा शिल्पिना तेन शोभनम् ॥ ३९ ॥ स्फटिकादि
शिलाभेदैस्तेनासौ विश्वकर्मणा ॥ समीचकार च पुनस्तत्प्राकाराद्यलंकृतम् ॥ तत आहूय भगवान्सुरभिं वाक्यमब्रवीत् ॥ ४० ॥ श्रीहरिवाच ॥
मुद्गलो मम भक्तोऽयं सुरभे प्रत्यहं मुदा ॥ ४१ ॥ मत्प्रीत्यर्थं पयोहोमं कर्तुमिच्छति सांप्रतम् ॥ मत्प्रीत्यर्थमितो देवि त्वमतो मत्प्रचोदिता ॥
॥ ४२ ॥ सायंप्रातरिहागत्य प्रत्यहं सुरभे शुभे ॥ पयसा त्वत्प्रसूतेन सर एतत्प्रपूरय ॥ ४३ ॥ तेनासौ पयसा नित्यं सायंप्रातश्च होष्यति ॥
ओमित्युक्त्वाथ सुरभिरेवं नारयणेरिता ॥ ४४ ॥ अथ नारायणो देवो मुद्गलं प्रत्यभाषत ॥ सुरभेः पयसा नित्यमस्मिन्सरसि तिष्ठता ॥
॥ ४५ ॥ सायंप्रातः प्रतिदिनं मत्प्रीत्यर्थमिहाग्नये ॥ जुहुधि त्वं महाभाग तेन प्रीणाम्यहं तव ॥ ४६ ॥ मत्प्रीत्या तेऽखिला सिद्धिर्भविष्यति
च मुद्गल ॥ इदं क्षीरसरोनाम तीर्थं ख्यातं भविष्यति ॥ ४७ ॥ अस्मिन्क्षीरसरस्तीर्थे स्नातानां पंचपातकम् ॥ अन्यान्यपि च पापानि नाशं
यास्यंति तत्क्षणात् ॥ ४८ ॥ मुद्गल त्वं च मां याहि देहांते मुक्तबंधनः ॥ इत्युक्त्वा भगवान्विष्णुस्तं समालिंग्य मुद्गलम् ॥ ४९ ॥ नमस्कृतश्च

१ साम्नायाः–इ०पा० । २ वरं ब्रूहि महायोगिंस्तवादेयं न मे क्वचित् ।–इ० पा० । ३ तथेत्युक्त्वा–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनायं तत्रैवांतरधीयत ॥ मुद्गलोऽपि गते विष्णावनेकशतवत्सरम् ॥ ५० ॥ सुरभेः पयसा जुह्वन्नग्नये हरितुष्टये ॥ उवास प्रयतो नित्यं फुल्ल ग्रामे विमुक्तिदे ॥ देहांते मुक्तिमगमद्विष्णुसायुज्यरूपिणीम् ॥ ५१ ॥ ॥ श्रीसूत उवाच ॥ एवमेतद्द्विजवरा युष्माकं कथितं मया ॥ ५२ ॥ यथा क्षीरसरो नाम तीर्थस्यास्य पुराऽभवत् ॥ इदं क्षीरसरः पुण्यं सर्वलोकेषु विश्रुतम् ॥ ५३ ॥ काश्यपस्य मुनेः पत्नी कद्रूर्यत्र द्विजोत्तमाः ॥ स्नात्वा स्वभर्तृवाक्येन नोदिता नियमान्विता ॥ ५४ ॥ छलेन मुमुचे सद्यः सपत्नीजयदोषतः ॥ अतोऽत्र तीर्थे ये स्नांति मानवाः शुद्धमानसाः ॥ ५५ ॥ तेषां विमुक्तबंधानां मुक्तानां पुण्यकर्मिणाम् ॥ किं यागैः किमु वा वेदैः किं वा तीर्थनिषेवणैः ॥ ५६ ॥ जपैर्वा नियमैर्वापि क्षीर कुंडविलोकिनाम् ॥ क्षीरकुंडस्य वातेन स्पृष्टदेहो नरो द्विजाः ॥ ५७ ॥ ब्रह्मलोकमनुप्राप्य तत्रैव परिमुच्यते ॥ निमग्नाः क्षीरकुंडेऽस्मिन्नवमत्यापि भास्करिम्[2] ॥५८॥ तस्य मूर्द्धनि तिष्ठेयुर्ज्वलंतः पावकोपमाः ॥ मग्नानां क्षीरकुंडेस्मिञ्छीता वैतरणी नदी ॥५९॥ सर्वाणि नरकाण्यद्धा व्यर्थानि च भवंति हि ॥ कामधेनुसमे तस्मिन्क्षीरकुंडे स्थितेऽप्यहो[1] ॥ ६० ॥ योन्यत्र भ्रमते स्नातुं स नरो विप्रसत्तमाः ॥ गोक्षीरे विद्यमानेऽपि ह्यर्कक्षीराय गच्छति ॥ ६१ ॥ स्नातानां क्षीरकुंडेऽस्मिन्नालभ्यं किंचिदस्ति हि ॥ करप्राप्तैव मुक्तिः स्यात्किमन्यैर्बहुभाषणैः ॥ ६२ ॥ ब्रवीमि भुजमुद्धृत्य सत्यंसत्यं ब्रवीमि वः ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ स क्षीरकुंडस्नानस्य लभते फलमुत्तमम् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये क्षीरकुंडप्रशंसायां क्षीरकुंडस्वरूपकथनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत कद्रूः कथं मुक्ता क्षीरकुंडनिमज्जनात् ॥ छलं कथं कृतवती सपत्न्यां पापनिश्चया ॥ १ ॥ कस्य पुत्री च सा कद्रूः सपत्नीसा च कस्य वै ॥ किमर्थमजयत्कद्रूः स्वसपत्नीं छलेन तु ॥ एतन्नः श्रद्दधानानां ब्रूहि सूत कृपानिधे ॥ २ ॥ ॥ श्रीसूत उवाच ॥ ॥ शृणुध्वं मुनयः सर्वे इतिहासं महाफलम् ॥ पुरा कृतयुगे विप्राः प्रजापतिसुते उभे ॥ ३ ॥ कद्रूश्च विनता चेति भगिन्यौ संबभूवतुः ॥ भार्ये ते कश्यपस्यास्तां कद्रूश्च विनता तथा ॥ ४ ॥ विनता सुषुवे पुत्रावरुणं गरुडं तथा ॥ भर्तुः सकाशात्कद्रूश्च लेभे सर्पान्बहून्सुतान् ॥ ॥ ५ ॥ अनंतवासुकिमुखान्विषदर्पसमन्वितान् ॥ एकदा तु भगिन्यौ ते कद्रूश्च विनता तथा ॥ ६ ॥ अपश्यतां समायांतमुच्चैःश्रवसमंतिकात् ॥ विलोक्य कद्रूस्तुरगं विनतामिदमब्रवीत् ॥ ७ ॥ श्वेतोऽश्ववालो नीलो वा विनते ब्रूहि तत्त्वतः ॥ इत्युक्ता विनता विप्राः कद्रूं तामिदमब्र

१ साध्वी–इ०पा० । २ भास्करिम्–यमम्–इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

वीत् ॥ ८ ॥ तुरंगः श्वेतवालो मे प्रतिभाति सुमध्यमे ॥ किं वा त्वं मन्यसे कद्रूरिति तां विनताऽब्रवीत् ॥ ९ ॥ पृष्टैवं विनतां कद्रूर्बभाषे स्वमतं च सा ॥ कृष्णवालमहं मन्ये हयमेनमनिंदिते ॥ १० ॥ ततः पराजये कृत्वा दासीभावं पणं मिथः ॥ व्यतिष्ठेतां महाभागे सपत्न्यौ ते द्विजोत्तमाः ॥ ॥ ११ ॥ ततः कद्रूर्निजसुतान्वासुकिप्रमुखानहीन् ॥ तस्या नाहं यथा दासी तथा कुरुत पुत्रकाः ॥ १२ ॥ तस्याभीप्सितसिद्ध्यर्थमित्यवोचद्भृशातुरा ॥ युष्माभिरुच्चैःश्रवसो बालः प्रच्छाद्यतामिति ॥ १३ ॥ नांगीचक्रुर्मतं तस्या नागाः कद्रू रुषा तदा ॥ अशपत्कुपिता पुत्राञ्ज्वलंती रोषमूर्च्छिता ॥ १४ ॥ पारीक्षितस्य सर्वेऽद्धा यूयं सत्रे मरिष्यथ ॥ इति शापे कृते मात्रा त्रस्तः कर्कोटकस्तदा ॥ १५ ॥ प्रणम्य पादयोः कद्रूं दीनो वचनमब्रवीत् ॥ अहमुच्चैःश्रवोवालं विधास्याम्यंजनप्रभम् ॥ १६ ॥ मा भीरंब त्वया कार्येत्यवादीच्छापविक्लवः ॥ श्वेतमुच्चैःश्रवोवालं ततः कर्कोटकोरगः ॥ १७ ॥ छादयित्वा स्वभोगेन व्यतनोदंजनद्युतिम् ॥ अथ ते विनताकद्र्वौ दास्ये कृतपणे उभे ॥ १८ ॥ देवराजहयं द्रष्टुं संरंभादभ्यगच्छताम् ॥ शशांकशंखमाणिक्यमुक्तैरावतकारणम् ॥ १९ ॥ युगांतकालशयनं योगनिद्राकृतो हरेः ॥ अतीत्य कद्रूविनते समुद्रं सरितां पतिम् ॥ ॥ २० ॥ ददृशतुर्हयं गत्वा देवराजस्य वाहनम् ॥ कृष्णवालं हयं दृष्ट्वा विनता दुःखिताऽभवत् ॥ २१ ॥ दुःखितां विनतां कद्रूर्दासीकृत्ये न्ययुंक्त सा ॥ एतस्मिन्नंतरे तार्क्ष्योऽप्यंडमुद्भिद्य वह्निवत् ॥ २२ ॥ प्रादुर्बभूव विप्रेंद्रा गिरिमात्रशरीरवान् ॥ दृष्ट्वा तद्देहमाहात्म्यमभूत्त्रस्तं जगत्त्रयम् ॥२३॥ ततस्तं तुष्टुवुर्देवा गरुडं पक्षिणां वरम् ॥ दृष्ट्वा तद्देहमाहात्म्यं त्रस्तं स्याद्भुवनत्रयम् ॥ २४ ॥ इत्यालोच्योपसंहृत्य देहमत्यंतभीषणम् ॥ अरुणं पृष्ठमारोप्य मातुरंतिकमभ्यगात् ॥ २५ ॥ अथाह विनतां कद्रूः प्रणतामतिविह्वलाम् ॥ चेटि नागालयं गंतुमुद्योगो मम वर्तते ॥ २६ ॥ त्वत्पुत्रो गरुडोतो मां मत्पुत्रांश्च वहत्विति ॥ ततश्च विनता पुत्रं गरुडं प्रत्यभाषत ॥ २७ ॥ अहं कद्रूमिमां वक्ष्ये त्वं सर्पान्वह तत्सुतान् ॥ तथेति गरुडो मातुः प्रत्यगृह्णद्वचो द्विजाः ॥ २८ ॥ अवहद्विनता कद्रूं सर्वांस्तान्गरुडोऽवहत् ॥ रविसामीप्यगाः सर्पास्तत्करैराहतास्तदा ॥ २९ ॥ अस्तौषीद्वज्रिणं कद्रूः सुतानां तापशांतये ॥ सर्वतापं जलासारैर्देवराजोऽप्यशामयत् ॥ ३० ॥ नीयमानास्तदा सर्पा गरुडेन बलीयसा ॥ गत्वा तं देशमचिरादवदन्विनतासुतम् ॥ ३१ ॥ वयं द्वीपांतरं गंतुं सर्वे द्रष्टुं कृतत्वराः ॥ वह त्वमस्मान्गरुड चेटीसुत ततः क्षणात् ॥ ३२ ॥ ततो मातरमप्राक्षीद्विनतां गरुडो द्विजाः ॥ अहं कस्माद्वहामीमांस्त्वं चेमां वहसे सदा ॥ ३३ ॥ चेटीपुत्रेति मामेते किं भणंति सरीसृपाः ॥ सर्वमेतद्वद त्वं मे मातस्तत्त्वेन पृच्छतः ॥ ३४ ॥ पृष्टैवं जननी तेन गरुडं प्राब्रवीत्सुतम् ॥ भगिन्या क्रूरया पुत्र च्छलेनाहं पराजिता ॥ ३५ ॥ तस्या दासी भवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यद्य चेटीपुत्रस्ततो भवान् ॥ अतस्त्वं वहसे सर्पान्वहाम्येनामहं सदा ॥ ३६ ॥ इत्यादि सर्ववृत्तांतमादितोऽस्मै न्यवेदयत् ॥ अथ तां गरुडोऽवा
दीन्मातरं विनतासुतः ॥ ३७ ॥ अस्माद्दास्याद्विमोक्षार्थं किं कार्यं ते मयाधुना ॥ इति पृष्टा सुतेनाथ विनता तमभाषत ॥ ३८ ॥ सर्पान्पृच्छस्व
गरुड मम मातृविमोक्षणे ॥ युष्माकं मातुः किं कार्यं मयेति वदताधुना ॥ ३९ ॥ इति मात्रा समुदितो गरुडः पन्नगान्प्रति ॥ गत्वाऽपृच्छद्द्विज
श्रेष्ठास्तेऽप्येनमवदंस्तदा ॥ ४० ॥ यदा हरिष्यसे शीघ्रं सुधां त्वममरालयात् ॥ दास्यान्मुक्ता भवेन्माता वैनतेय तवाद्य हि ॥ ४१ ॥ ततो मात
रमागम्य गरुडः प्रणतोऽब्रवीत् ॥ सुधामंब ममानेतुं गच्छतो भक्ष्यमर्पय ॥ ४२ ॥ इतीरिता सुतं प्राह माता तं विनता सुतम् ॥ समुद्रमध्ये वर्तंते
शबराः कतिचित्सुत ॥ ४३ ॥ तान्भक्षयित्वा शबरानमृतं त्वमिहानय ॥ तत्र कश्चिद्द्विजः कामी शबरीसंगकौतुकी ॥ ४४ ॥ त्यज तं ब्राह्मणं कंठं
दहंतं ब्रह्मतेजसा ॥ पक्षादीनि तवांगानि पांतु देवा मरुन्मुखाः ॥ ४५ ॥ इति स्वमातुराशीर्भिर्गरुडो वर्धितो ययौ ॥ शबरालयमभ्येत्य तस्य भक्षय
तो मुखम् ॥ ४६ ॥ आवृतं प्राविशन्व्याधा वयांसीव दरीं गिरेः ॥ अथ स ब्राह्मणोऽप्यागात्तत्कंठं मुनिपुंगवाः ॥ ४७ ॥ कण्ठं दहन्तं विप्रं तमुवाच
विनतासुतः ॥ विप्र पापोऽप्यवध्यो हि निर्याहि त्वमतो बहिः ॥ ४८ ॥ एवमुक्तस्तदा विप्रो गरुडं प्रत्यभाषत ॥ किराती मम भार्यापि निर्गंतव्या
मया सह ॥ ४९ ॥ एवमस्त्विति तं विप्रमुवाच पतगेश्वरः ॥ ततः स गरुडो विप्रमुज्जगार सभार्यकम् ॥ ५० ॥ विप्रोऽप्यभीप्सितान्देशान्निषाद्या
सह निर्ययौ ॥ शबरान्भक्षयित्वाऽथ गरुडः पक्षिणां वरः ॥ ५१ ॥ आत्मनः पितरं वेगात्कश्यपं समुपेयिवान् ॥ कुत्र यासीति तत्पृष्टो गरुडस्तम
भाषत ॥ ५२ ॥ मातुर्दास्यविमोक्षाय सुधामाहर्तुमागमम् ॥ बहून्किराताञ्जग्ध्वापि तृप्तिर्मम न जायते ॥ ५३ ॥ अपर्यंतक्षुधा ब्रह्मन्बाधते मामह
र्निशम् ॥ तन्निवृत्तिप्रदं भक्ष्यं ममार्पय तपोधन ॥ ५४ ॥ येनाहं शक्नुयां तात सुधामाहर्तुमोजसा ॥ इतीरितः सुतं प्राह कश्यपो विनतोद्भवम् ॥
॥ ५५ ॥ ॥कश्यप उवाच ॥ ॥ मुनिर्विभावसुर्नाम्ना पुरासीत्तस्य सानुजः ॥ सुप्रतीक इति भ्राता तावुभौ वंशवैरिणौ ॥ ५६ ॥ अन्योन्यं
शेपतुर्विप्रा महाक्रोधसमाकुलौ ॥ गजोऽभवत्सुप्रतीकः कूर्मोऽभूच्च विभावसुः ॥ ५७ ॥ एवं वित्तविवादात्तौ शेपतुर्भ्रातरौ मिथः ॥ गजः षड्यो
जनोच्छ्रायो द्विगुणायामसंयुतः ॥ ५८ ॥ कूर्मस्त्रियोजनोच्छ्रायो दशयोजनविस्तृतः ॥ बद्धवैरावुभावेतौ सरस्यस्मिन्विहंगम ॥ ५९ ॥ पूर्ववैर
मनुस्मृत्य युध्येते जेतुमिच्छया ॥ उभौ तौ भक्षयित्वा त्वं सुधामाहर तृप्तिमान् ॥ ६० ॥ एवं पित्रेरितः पक्षी गत्वा तद्गजकच्छपौ ॥ समुद्धृत्य
महाकायौ महाबलपराक्रमौ ॥ ६१ ॥ वहन्नखाभ्यां संतीर्थं विळंबाभिधमभ्यगात् ॥ तत्रागतं समालोक्य पक्षिराजं द्विजोत्तमाः ॥ ६२ ॥ तत्तीरजो

CC-0. In Public Domain. Digitization by eGangotri

महावृक्षो रोहिणाख्यो महोच्छ्रयः ॥ वैनतेयमिदं प्राह महाबलपराक्रमम् ॥ ६३ ॥ एनामारुह मच्छाखां शतयोजनमायताम् ॥ स्थित्वात्र
गजकूर्मौ त्वं भक्षयस्व खगोत्तम ॥ ६४ ॥ इत्युक्तस्तरुणा पक्षी स तत्रास्ते मनोजवः ॥ तद्भारात्सा तरोः शाखा भग्नाऽभूद्द्विजसत्तमाः ॥ ६५ ॥
वालखिल्यमुनींस्तस्मिँल्लंबमानानधोमुखान् ॥ दृष्ट्वा तत्पातशंकावाँस्तां शाखां गरुडोऽग्रहीत् ॥ ६६ ॥ गजकूर्मौ च तां शाखां गृहीत्वा यांतमं
बरे ॥ पिता तस्याब्रवीत्तत्र गरुडं विनतासुतम् ॥ ६७ ॥ त्यजेमां निर्जने शैले शाखां तं विनतोद्भव ॥ इत्युक्तः स तथा गत्वा शाखां निष्पुरुषे
नगे ॥ ६८ ॥ विन्यस्याभक्षयत्पक्षी तौ तदा गजकच्छपौ ॥ अथोत्पातः समभवत्तस्मिन्नवसरे दिवि ॥ ६९ ॥ दृष्ट्वोत्पातं बलारातिः पप्रच्छ
स्वपुरोहितम् ॥ उत्पातकारणं जीव किमत्रेति पुनःपुनः ॥ बृहस्पतिस्तदा शक्रं प्रोवाच द्विजसत्तमाः ॥ ७० ॥ ॥ बृहस्पतिरुवाच ॥ ॥
काश्यपो हि मुनिः पूर्वमयजत्क्रतुना हरे ॥७१॥ सर्वान्नृषीन्सुरान्सिद्धान्यक्षान्गंधर्वकिन्नरान् ॥ यज्ञसंभारसिद्ध्यर्थं प्रेषयामास स द्विजाः॥ ७२ ॥
वालखिल्यान्ससंभारान्ह्रस्वानंगुष्ठमात्रकान् ॥ मज्जतो गोष्पदजले दृष्ट्वा हसितवान्भवान् ॥ ७३ ॥ भवतावमताः क्रुद्धा वालखिल्यास्तदा हरे ॥
जुहुवुर्यज्ञवह्नौ ते क्रोधेन ज्वलिताननाः ॥ ७४ ॥ देवेंद्रभयदः शत्रुः कश्यपस्य सुतोऽस्त्विति ॥ तस्य पुत्रोऽद्य गरुडः सुधाहरणकौतुकी ॥ ७५ ॥
समागच्छति तद्धेतुरयमुत्पात आगतः ॥ इत्युक्तः सोऽब्रवीदिंद्रो देवानग्निपुरोगमान् ॥ ७६ ॥ सुधामाहर्तुमायाति पक्षी सा रक्ष्यतामिति ॥ इतीं
द्रप्रेरिता देवा ररक्षुः सायुधाः सुधाम् ॥ ७७ ॥ पक्षिराजस्तदाभ्यागाद्देवानायुधधारिणः ॥ महाबलं ते गरुडं दृष्ट्वाऽकम्पंत वै सुराः ॥ ७८ ॥ गरुडस्य
सुराणां च ततो युद्धमभून्महत् ॥ अखंडि पक्षितुण्डेन भौवनोऽमृतपालकः ॥ ७९ ॥ तदा निजघ्नुर्गरुडं देवाः शस्त्रैरनेकशः ॥ अतीव गरुडो
देवैर्बाधितः शस्त्रपाणिभिः ॥ ८० ॥ पक्षाभ्यामाक्षिपद्दूरे देवानग्निपुरोगमान् ॥ तत्पक्षविक्षिता देवास्तदा परमकोपनाः ॥ ८१ ॥ नाराचान्भिंदि
पालांश्च नानाशस्त्राणि चाक्षिपन् ॥ ततस्तु गरुडो वेगाद्देवदृष्टिविलोपिनीम् ॥ ८२ ॥ धूलिमुत्थापयामास पक्षाभ्यां विनतासुतः ॥ वायुना शम
यामासुस्तान्पांसूंस्त्रिदशोत्तमाः ॥ ८३ ॥ रुद्रान्वसूंस्तथादित्यान्मरुतोऽन्यान्सुरांस्तथा ॥ गरुडः पक्षतुंडाभ्यां व्यथितानकरोद्द्विजाः ॥ ८४ ॥
पलायितेषु देवेषु सोऽद्राक्षीज्ज्वलनं पुरः ॥ ज्वलंतं परितस्त्वग्निं शमापयितुमुद्ययौ ॥ ८५ ॥ स सहस्रमुखो भूत्वा तैः पिबन्छतशो नदीः ॥
तमग्निं नाशयामास तैः पयोभिस्त्वरान्वितः ॥ ८६ ॥ सितधारं भ्रमच्चक्रं सुधारक्षकमंतिके ॥ दृष्ट्वा तदररंध्रेण संक्षिप्तांगोंतराविशत् ॥ ८७ ॥
ततो ददर्श द्वौ सर्पौ व्यक्तास्यौ भीषणाकृती ॥ याभ्यां दृष्टोपि भस्म स्यात्तौ सर्पौ गरुडस्तदा ॥ ८८ ॥ आच्छिद्य पक्षतुंडाभ्यां गृहीत्वाऽमृतमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ययौ ॥ यंत्रमुत्पाट्य चोद्यंतं गरुडं प्राह माधवः ॥ ८९ ॥ तव तुष्टोऽस्मि पक्षीश वरं वरय सुव्रत ॥ अथ पक्षी तमाह स्म कमलानायकं हरिम् ॥ ॥ ९० ॥ तवोपरि[1] स्थितिर्मे स्यान्मा भूतां च जरामृती ॥ तथास्त्विति हरिः प्राह वरं मद्वियतामिति ॥ ९१ ॥ इत्युक्तस्तं हरिः प्राह मम त्वं वाहनं भव ॥ स्यंदनोपरि केतुश्च मम त्वं विनतासुत ॥ ९२ ॥ तथास्त्विति खगोप्याह कमलापतिमच्युतम् ॥ हृतामृतं खगं श्रुत्वा तत आखंडलो जवात् ॥ ९३ ॥ अभिद्रुत्याशु कुलिशं पक्षे चिक्षेप पक्षिणः ॥ ततो विहस्य गरुडः पाकशासनमब्रवीत् ॥ ९४ ॥ कुलिशस्य निपातान्मे न हरे कापि वेदना ॥ सफलो वज्रपातस्ते भूयाच्च सुरनायक ॥ ९५ ॥ इतीरयन्पत्रमेकं व्यसृजत्पक्षतस्तदा ॥ शोभनं पर्णमस्येति सुपर्ण इति सोभवत् ॥ ९६ ॥ तस्मिन्सुपर्णे हेमाभे सर्वे विस्मयमाययुः ॥ ततस्तु गरुडः शक्रमब्रवीद्द्विजपुंगवाः ॥ ९७ ॥ भवता साकमखिलं जगदेतच्चराचरम् ॥ देवेंद्र सततं वोढुममोघा शक्तिरस्ति मे ॥ ९८ ॥ नाखण्डलसहस्रं मे रणे लभ्यं हरे भवेत् ॥ इति ब्रुवाणं गरुडमब्रवीत्पाकशासनः ॥९९॥ किं तेऽमृतेन कार्यं स्याद्दीयताममृतं मम ॥ इमां सुधां भवान्दद्याद्येभ्यो हि विनतोद्भव ॥ १०० ॥ तेऽधुनाऽमृतपानेन जरामरणवर्जिताः ॥ अस्मद्भ्योऽधिकवीर्याः स्युर्बाधेरंस्त्रिदशांस्तथा ॥ १ ॥ इति ब्रुवंतं देवेन्द्रं गरुडोऽप्यब्रवीद्द्विजाः ॥ यत्रैतत्स्थापयिष्यामि तत्रागत्य भवानिदम् ॥ ॥ २ ॥ गृह्णातु झटितीत्युक्तो गरुडं प्राह वृत्रहा ॥ प्रीतोऽहं तव दास्यामि वरं वृणु महामते ॥ ३ ॥ इत्युक्तवन्तं गरुडः पाकशासनमब्रवीत ॥ दास्ये छलप्रयोक्तारो मम मातुः सरीसृपाः ॥ ४ ॥ भक्ष्या भवंतु नित्यं मे पाकशासन वृत्रहन् ॥ इति तेनेरितः शक्रस्तथास्त्वित्यवदच्च तम् ॥ ५ ॥ अथायं गरुडो विप्रा धारयन्नमृतं ययौ ॥ यांतं तमनुयाति स्म गरुडं पाकशासनः ॥ ६ ॥ वेगेन स द्विजश्रेष्ठाः सुधाहरणकौतुकी ॥ मातुरभ्याशमागत्य सर्पान्प्राह स पक्षिराट् ॥ ७ ॥ कुशेषु न्यस्यते सर्पास्सुधैवमधुना मया ॥ स्नात्वा तद्भुङ्ध्वममृतं शुचयः सुसमाहिताः ॥ ८ ॥ मोक्षोऽपि मम मातुः स्याद्दासीभावाद्धि पन्नगाः ॥ तथास्त्वित्यवदन्सर्पा गरुडं विनतासुतम् ॥९॥ मुक्ता तदैव विनता दासीभावाद्द्विजोत्तमाः ॥ सर्पास्तेऽमृतभक्षार्थं स्नातुं सर्वे ययुस्तदा ॥११०॥ तस्मिन्नवसरे शक्रस्तामादाय सुधां ययौ ॥ स्नात्वागत्य भुजंगास्ते तत्राहष्ट्वा तदा सुधाम् ॥ ११ ॥ जिह्वाभिर्लिलिहुर्दर्भानेषु न्यस्ता सुधेति हि ॥ तदाप्रभृति सर्पाणां जिह्वा दर्भाग्रपाटिताः ॥१२॥ द्विधाभवन्मुनिश्रेष्ठा द्विजिह्वास्तेन ते स्मृताः॥ सुधासंयोगतो दर्भाः प्रययुश्च पवित्रताम् ॥१३॥ मोचयित्वा च गरुडो दासीभावात्स्वमातरम् ॥ शशाप कुपितः कद्रूं छद्मना जितमातरम् ॥१४॥ कद्रूस्त्वं जननीं यन्मे छलेन

१ तव उपरि मे स्थितिः स्यान्—इति योजना । स्यन्दनोपरि केतुत्वेन हरेरुपरि गरुडस्य स्थितिर्बोध्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जितवत्यसि ॥ भर्तुस्त्वं परिचर्यायामतो नार्हा भविष्यसि ॥१५॥ शस्वैवं गरुडः कद्रूं प्रययौ स यथेच्छया ॥ कद्रूश्च विनता चोभे ययतुर्भर्तुरंतिकम्
॥ १६ ॥ कश्यपो विमुखस्तत्र कद्रूं कोपादथाब्रवीत् ॥ यस्माच्छलेन विनतां कद्रूर्निर्जितवत्यसि ॥ १७ ॥ अतो मत्परिचर्यायां न योग्यासि
दुरात्मिके ॥ स्त्रियं वा पुरुषं वापि नारी वा पुरुषोऽपि वा ॥ १८ ॥ छलाद्विजयते योऽसौ स महापातकी भवेत् ॥ छलाद्विजयिना सार्धं संभाष्य
ब्रह्महा भवेत् ॥ १९ ॥ स्तेयी सुरापी विज्ञेयो गुरुदाररतश्च सः ॥ संसर्गदोषदुष्टश्च मुनिभिः परिकीर्त्यते ॥ १२० ॥ त्वया संभाषणाद्दोषो मम
स्यान्नरकप्रदः ॥ तस्मात्प्रयाहि कद्रूस्त्वं मत्समीपाद्धि दारुणे ॥ २१ ॥ छलजेत्रा सपंक्तौ यो भुंजीत मनुजो भुवि ॥ तेन संभाषणात्सद्यः पतेद्धि
नरकार्णवे ॥ २२ ॥ विलोक्य च्छलजेतारं तस्य पापस्य शांतये ॥ आदित्यं वा जलं वापि पावकं वा विलोकयेत् ॥ २३ ॥ छलजेता यत्र
तिष्ठेदाश्रमेऽपि गृहेऽपि वा ॥ वस्तव्यं न हि तत्रान्यैर्वसन्नरकमश्नुते ॥ २४ ॥ अतो निर्याहिनिर्याहि मम त्वं दृष्टिमार्गतः ॥ स्वाश्रमात्सरलामेनां
विनतां जितवत्यसि ॥ २५ ॥ इति धिक्कृत्य सहसा कद्रूं तां कश्यपस्तदा ॥ विनतां स्वच्छशीलां तां स्वीचकार महामतिः ॥ २६ ॥ कद्रूरित्थं
सपरुषं कथिता कश्यपेन सा ॥ रुदंती भृशदुःखार्ता पादयोस्तस्य चापतत् ॥ २७ ॥ पतितां पादयोर्दृष्ट्वा कश्यपो मुनिपुंगवः ॥ न जग्राहैव
कद्रूं तां स्मरन्पापं तया कृतम् ॥ २८ ॥ ततः प्रणम्य विनता कश्यपं वाक्यमब्रवीत् ॥ भगवन्भगिनीमेनां स्वीकुरुष्व कृपानिधे ॥ २९ ॥
अज्ञानान्मुग्धया पापं कद्र्वा यदधुना कृतम् ॥ क्षंतुमर्हसि तत्सर्वं दयाशीला हि साधवः ॥ १३० ॥ जनन्या गरुडस्यैवं कथितः कश्यपो मुनिः ॥
उवाच विनते नैनां विना पापस्य निष्कृतिम् ॥ ३१ ॥ ग्रहीष्यामि दुराचारां त्रिस्त्वां शपथयाम्यहम् ॥ कश्यपस्य वचः श्रुत्वा विनता
पुनरब्रवीत् ॥ ३२ ॥ भगिन्या मम पापस्य ब्रह्मंस्त्वं ब्रूहि निष्कृतिम् ॥ येनेयं परिचर्यायां तव योग्या भविष्यति ॥ ३३ ॥ तयैवमुदितो विप्रा
मारीचः कश्यपस्तदा ॥ ध्यात्वा मुहूर्तं मनसा पश्चादिदमभाषत ॥ ३४ ॥ दक्षिणांबुनिधेस्तीरे फुल्लग्रामे विमुक्तिदे ॥ अस्ति क्षीरसरोनाम तीर्थं
पापविनाशनम् ॥ ६५ ॥ तत्तीर्थस्नानमात्रेण दोषश्चास्या विनश्यति ॥ प्रायश्चित्तायुतेनापि तत्तीर्थे मज्जनं विना ॥ ३६ ॥ न नश्यत्येष दोषो
ऽस्यास्तदेषा यातु तत्सरः ॥ भर्त्रैवमुदिते कद्रूस्तं प्रणम्य द्विजोत्तमम् ॥ ३७ ॥ तत्क्षणात्प्रययौ क्षीरं सरः पुत्रसहायिनी ॥ सा कद्रूः पुत्र
सहिता गत्वा कतिपयैर्दिनैः ॥ ३८ ॥ प्राप्य क्षीरसरः पुण्यं प्रयता विजितेंद्रिया ॥ सस्नौ नियमपूर्वं च संकल्प्य क्षीरकुंडके ॥ ३९ ॥ उपोष्य
त्रिदिनं सस्नौ तस्मिन्क्षीरसरोजले ॥ चतुर्थे दिवसे तस्यां कुर्वत्यां स्नानमादरात् ॥ अदेहा व्योमगा वाणी समुत्तस्थौ द्विजोत्तमाः ॥ १४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशरीरिण्युवाच ॥ ॥ कद्रूस्त्वं मज्जनादत्रच्छलजेतृत्वदोषतः ॥ ४१ ॥ विमुक्ता भर्तृशुश्रूषायोग्या चासि न संशयः ॥ शापोपि गरुडोक्तस्ते लयं यातोऽत्र मज्जनात् ॥ ४२ ॥ गच्छ भर्तृसकाशं त्वं सोऽपि त्वां स्वीकरिष्यति ॥ इत्युक्त्वा विरराामाथ व्योमवागशरीरिणी ॥ ४३ ॥ तस्यै वाचे नमस्कृत्य कद्रूः सा प्रीतमानसा ॥ तीर्थं प्रदक्षिणीकृत्य नत्वा पुत्रसमन्विता ॥ ४४ ॥ प्रययौ भर्तुरभ्याशं तच्छुश्रूषणकौतुकात् ॥ आगतां तां समालोक्य स्नातां क्षीरसरोजले ॥ ४५ ॥ ज्ञात्वा विधूतपापां च कश्यपः स समाधिना ॥ अंगीचकार पत्नीं तामात्मशुश्रूषणोचिताम् ॥ ४६ ॥ एवं वः कथितं विप्राः कद्रूपापविमोक्षणम् ॥ मज्जनान्मुक्तिदं पुंसां पुण्ये क्षीरसरोजले ॥ ४७ ॥ यः शृणोतीममध्यायं पठते वापि मानवः ॥ स क्षीरकुंडस्नानस्य लभते फलमुत्तमम् ॥ ४८ ॥ अश्वमेधादियज्ञानां समग्रं फलमश्नुते ॥ गंगादिसर्वतीर्थेषु स स्नातो भवति ध्रुवम् ॥ ॥ ४९ ॥ यः पठेदिममध्यायं क्षीरकुंडप्रशंसनम् ॥ गोसहस्रप्रदातॄणां प्राप्नोत्यविकलं फलम् ॥ १५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये क्षीरकुंडप्रशंसायां कद्रूकृतच्छलदोषशांतिकथावर्णनंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि कपितीर्थस्य वैभवम् ॥ तत्तीर्थं सकलैः पूर्वं गंधमादनपर्वते ॥ १ ॥ सर्वेषामुपकाराय कपिभिर्निर्मितं द्विजाः ॥ रावणादिषु रक्षःसु हतेषु तदनंतरम् ॥ २ ॥ तीर्थं निर्माय तत्रैव सप्तुस्ते कपयो मुदा ॥ तीर्थाय च वरं प्रादुः कपयः कामरूपिणः ॥ ॥ ३ ॥ अस्मिंस्तीर्थे निमग्ना ये भक्तिप्रवणचेतसः ॥ ते सर्वे मुक्तिभाजः स्युर्महापातकमोचिताः ॥ ४ ॥ अत्र तीर्थे निमग्नानां न स्यान्नरकजं भयम् ॥ अत्र स्नाता नराः सर्वे दारिद्र्यं नाप्नुवंति हि ॥ ५ ॥ अत्र तीर्थे निमग्नानां यमपीडापि नो भवेत् ॥ कपितीर्थं प्रयास्येऽहमिति यः सततं ब्रुवन् ॥ ६ ॥ व्रजेच्छतपदं विप्राः स यायात्परमं पदम् ॥ एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥ ७ ॥ एवं वरं तु ते दत्त्वा तीर्थायास्मै कपीश्वराः ॥ रामं दाशरथिं सर्वे प्रणम्याथ ययाचिरे ॥ ८ ॥ स्वामिंस्त्वयास्मै तीर्थाय दीयतां वरमद्भुतम् ॥ कपिभिः प्रार्थितो विप्रा रामचंद्रोऽतिहर्षितः ॥ ९ ॥ तत्तीर्थाय वरं प्रादात्कपीनां प्रीतिकारणात् ॥ अत्र तीर्थे निमग्नानां गंगास्नानफलं लभेत् ॥ १० ॥ प्रयागस्नानजं पुण्यं सर्वतीर्थफलं तथा ॥ अग्निष्टोमादियागानां फलं भूयादनुत्तमम् ॥ ११ ॥ गायत्र्यादिमहामंत्रजपपुण्यं तथा भवेत् ॥ गोसहस्रप्रदातॄणां प्राप्नोत्यविकलं फलम् ॥ १२ ॥ चतुर्णामपि वेदानां पारायणफलं लभेत् ॥ ब्रह्मविष्णुमहेशादिदेवपूजाफलं लभेत् ॥ १३ ॥ कपितीर्थाय रामोयं प्रादादेवं वरं

१ पुरा—इ० पा० । २ प्राहुः—इ० पा० । ३ गतिस्तत्र न संशयः—इ० पा० । ४ शास्त्राणाम्—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

द्विजाः ॥ एवं रामेण दत्ते तु वरे तत्र कुतूहलात् ॥१४॥ षडर्धनयनो[1] ब्रह्मा सहस्राक्षो यमस्तथा ॥ वरुणोग्निस्तथा वायुः कुबेरश्चंद्रमा अपि ॥१५॥
आदित्यो निर्ऋतिश्चैव साध्याश्च वसवस्तथा ॥ अन्येऽपि त्रिदशाः सर्वे विश्वेदेवादयस्तथा ॥ १६ ॥ अत्रिर्भृगुस्तथा कुत्सो गौतमश्च पराशरः ॥
कण्वोऽगस्त्यः सुतीक्ष्णश्च विश्वामित्रादयोऽपरे ॥ १७ ॥ योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः ॥ रामदत्तवरं तीर्थं श्लाघंते बहुधा तदा ॥ १८॥
सस्नुश्च तत्र तीर्थे ते सर्वाभीष्टप्रदायिनि ॥ कपिभिर्निर्मितं यस्मादेतत्तीर्थमनुत्तमम् ॥ १९ ॥ कपितीर्थमिति ख्यातिमतो लोके प्रयास्यति ॥ इत्य
प्यवोचंस्ते सर्वे देवाश्च मुनयस्तथा ॥ २० ॥ तस्मादवश्यं गंतव्यं कपितीर्थं मुमुक्षुभिः ॥ रंभा कौशिकशापेन शिलाभूता पुरा द्विजाः ॥ २१॥ तत्र
स्नात्वा निजं रूपं प्रपेदे च दिवं ययौ ॥ अस्य तीर्थस्य माहात्म्यं मया वक्तुं न शक्यते ॥ २२ ॥ ॥ मुनय ऊचुः ॥ ॥ रंभां किमर्थमशपत्कौ
शिकः सूतनंदन ॥ कथं गता शिलाभूता कपितीर्थं सुरांगना ॥ एतन्नः सर्वमाचक्ष्व विस्तरान्मुनिसत्तम ॥ २३ ॥ ॥ श्रीसूत उवाच ॥ ॥
विश्वामित्राभिधो राजा प्रागभूत्कुशिकान्वये ॥ २४ ॥ स कदाचिन्महाराजः सेनापरिवृतो बली ॥ मेदिनीं परिचक्राम राज्यवीक्षणकौतुकी ॥
॥ २५ ॥ अटित्वा स बहून्देशान्वसिष्ठस्याश्रमं ययौ ॥ आतिथ्याय वृतः सोऽयं वसिष्ठेन महात्मना ॥ २६ ॥ तथास्त्वित्यब्रवीत्सोयं दंडवत्प्रणतो
नृपः ॥ कामधेनुप्रभावेन विश्वामित्राय भूभुजे ॥ २७ ॥ आतिथ्यमकरोद्विप्रा वसिष्ठो ब्रह्मनंदनः ॥ कामधेनुप्रभावं वै ज्ञात्वा कुशिकनंदनः ॥
॥ २८ ॥ वसिष्ठं प्रार्थयामास कामधेनुमभीष्टदाम् ॥ प्रत्याख्यातो वसिष्ठेन प्रचकर्ष च तां बलात् ॥ २९ ॥ कामधेनुविसृष्टैस्तु म्लेच्छाद्यैः स
पराजितः ॥ महादेवं समाराध्य तस्मादस्त्राण्यवाप्य च ॥ ३० ॥ वसिष्ठस्याश्रमं गत्वा व्यसृजच्छरसंचयान् ॥ सर्वाण्यस्त्राणि मुमुचे ब्रह्मास्त्रं च
नृपोत्तमः ॥ ३१ ॥ तानि सर्वाणि चास्त्राणि वसिष्ठो ब्रह्मनंदनः ॥ एकेन ब्रह्मदंडेन निजघ्न स्वतपोबलात् ॥ ३२ ॥ ततः पराजितो विप्रा
विश्वामित्रोऽतिलज्जितः ॥ ब्राह्मण्यावाप्तये स्वस्य तपः कर्तुं वनं ययौ ॥ ३३ ॥ पूर्वासु पश्चिमांतासु त्रिषु दिक्षुत पोऽचरत् ॥ प्रादुर्भूतमहा
विघ्नस्तत्तद्दिक्षु स कौशिकः ॥ ३४ ॥ उत्तरां दिशमासाद्य हिमवत्पर्वतेऽमले कौशिक्यास्सरितस्तीरे पुण्ये पापविनाशिनि ॥ ३५ ॥
दिव्यं वर्षसहस्रं तु निराहारो जितेंद्रियः ॥ निरालोको[2] जितश्वासो जितक्रोधः सुनिश्चलः ॥ ३६ ॥ ग्रीष्मे पंचाग्निमध्यस्थः शिशिरे
वारिषु स्थितः ॥ वर्षास्वाकाशगो नित्यमूर्ध्वबाहुर्निराश्रयः ॥ ३७ ॥ ब्राह्मण्यसिद्ध्येऽत्युग्रं चचार सुमहत्तपः ॥ उद्विग्नमनसस्तस्य

१ षडर्धनयनः—त्रिणेत्रः शिवः । २ जितलोकः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिदशास्त्रिदिवालयाः ॥ जंभारिणा च सहिता रंभां प्रोचुरिदं वचः ॥ ३८ ॥ ॥ देवा ऊचुः ॥ ॥ रंभे त्वं हिमवच्छैले कौशिकीतीरगं मुनिम् ॥ ३९ ॥ विश्वामित्रं तपस्यंतं विलोभय विचेष्टितैः ॥ यथा तत्तपसो विघ्नो भविष्यति तथा कुरु ॥ ४० ॥ एवमुक्ता तदा रंभा देवैरिंद्र पुरोगमैः ॥ प्रत्युवाच सुरान्सर्वान्प्रांजलिः प्रणता तदा ॥ ४१ ॥ ॥ रंभोवाच ॥ ॥ अतिक्रूरो महाक्रोधो विश्वामित्रो महामुनिः ॥ स शप्स्यते मां क्रोधेन बिभेम्यस्मादहं सुराः ॥ ४२ ॥ त्रायध्वं कृपया यूयं मां युष्मत्परिचारिकाम् ॥ इत्युक्तो रंभया तत्र जंभारिस्ताम भाषत ॥ ४३ ॥ ॥ इन्द्र उवाच ॥ ॥ रंभे त्वया न भीः कार्या विश्वामित्रात्तपोधनात् ॥ अहमप्यागमिष्यामि त्वत्सहायः समन्मथः ॥ ४४ ॥ कोकिलालापमधुरो वसन्तोऽप्यागमिष्यति ॥ अतिसुंदररूपा त्वं प्रलोभय महामुनिम् ॥ ४५ ॥ इतींद्रकथिता रंभा विश्वामित्राश्रमं ययौ ॥ तद्द ष्टिगोचरा स्थित्वा ललितं रूपमास्थिता ॥ ४६ ॥ सा मुनिं लोभयामास मनोहरविचेष्टितः ॥ पिकोपि तस्मिन्समये चुकूजानंदयन्मनः ॥ ४७ ॥ श्रुत्वा पिकस्वरं रंभां दृष्ट्वा च मुनिपुंगवः ॥ संशयाविष्टहृदयो विदित्वा शक्रकर्म तत् ॥ शशाप रंभां क्रोधेन विश्वामित्रस्तपोधनः ॥ ४८ ॥ ॥ ॥ विश्वामित्र उवाच ॥ ॥ यस्मात्कोपयसे रंभे मां त्वं कोपजयषिणम् ॥ ४९ ॥ शिला भवात्र तस्मात्त्वं रंभे वर्षशतायुतम् ॥ तदंतरे ब्राह्म णेन रक्षिता मोक्षमाप्स्यसि ॥ ५० ॥ विश्वामित्रस्य शापेन तदंते सा शिलाऽभवत् ॥ बहुकालं शिलाभूता तस्थौ तस्याश्रमे द्विजाः ॥ ५१ ॥ विश्वामित्रोपि धर्मात्मा पुनस्तप्त्वा महत्तपः ॥ लेभे वसिष्ठवाक्येन ब्राह्मण्यं दुर्लभं नृपैः ॥ ५२ ॥ बहुकालं शिलाभूता रंभाप्यासीत्तदाश्रमे ॥ तस्मिन्नेवाश्रमे पुण्ये शिष्योऽगस्त्यस्य संमतः ॥ ५३ ॥ श्वेतोनाम मुनिश्चक्रे मुमुक्षुः परमं तपः ॥ चिरकालं तपस्तस्मिन्प्रकुर्वति महामुनौ ॥ ५४ ॥ अंगारकेतिविख्याता राक्षसी काचिदागता ॥ तस्याश्रममतिक्रूरा मेघस्वनमहास्वना ॥ ५५ ॥ मूत्ररक्तपुरीषाद्यैर्दूषयामास भीषणा ॥ उपद्रवैस्तथा चान्यैर्बाधयामास तं मुनिम् ॥ ५६ ॥ अथ क्रुद्धो मुनिः श्वेतो वायव्यास्त्रेण योजयन् ॥ शप्तां कुशिकपुत्रेण राक्षस्यै प्राक्षिपच्छिलाम् ॥ ५७ ॥ राक्षसी सा प्रदुद्राव वायव्यास्त्रेण योजिता ॥ वायव्यास्त्रप्रयुक्तेन दृषदानुद्रुता च सा ॥ ५८ ॥ दक्षिणांबुनिधेस्तीरं धावति स्म भयार्दिता ॥ धावन्तीमनुधावन्ती सा शिलास्त्रप्रयोजिता ॥ ५९ ॥ पपातोपरि राक्षस्या मज्जंत्याः कपितीर्थके ॥ मृता सा राक्षसी तत्र शिलापातात्स्वमूर्द्धनि ॥ ॥ ६० ॥ विश्वामित्रेण शप्ता सा कपितीर्थे निमज्जनात् ॥ शिलारूपं परित्यज्य रंभारूपमुपेयुषी ॥ ६१ ॥ देवैः कुसुमधाराभिरभिवृष्टा मनो रमा ॥ दिव्यं विमानमारूढा दिव्यांबरविराजिता ॥ ६२ ॥ हारकेयूरकटकनासाभरणभूषिता ॥ उर्वश्याद्यप्सरोभिश्च सखिभिः परिवारिता ॥ ६३ ॥

Nepal Sanskrit University Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपितीर्थस्य माहात्म्यं प्रशंसन्ती पुनःपुनः ॥ निषेव्य रामनाथं च शंकरं शशिभूषणम् ॥ ६४ ॥ आखण्डलपुरीं रम्यां प्रययावमरावतीम् ॥ राक्षसी सापि शापेन कुम्भजस्य महौजसः ॥ ६५ ॥ घृताची देववेश्या हि राक्षसीरूपमागता ॥ साप्यत्र कपितीर्थाप्सु स्नानात्स्वं रूपमाययौ ॥ ६६ ॥ एवं रंभाघृताच्यौ ते कपितीर्थे निमज्जनात् ॥ अगस्त्यशिष्यश्वेतस्य प्रसादाद्द्विजसत्तमाः ॥ ६७ ॥ राक्षसीत्वं शिलात्वं च हित्वा स्वं रूपमागते ॥ तस्मात्सर्वप्रयत्नेन स्नातव्य कपितीर्थके ॥ ६८ ॥ यः शृणोतीममध्यायं पठते वापि मानवः ॥ प्राप्नोति कपितीर्थस्यस्नानजं फलमुत्तमम् ॥ ६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये कपितीर्थप्रशंसायां रंभाघृताचीशापविमोक्षणवर्णनं नामैकोनचत्वारिंशोऽध्यायः ॥३९॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि मुनयो लोकपावनम् ॥ गायत्र्या च सरस्वत्या माहात्म्यं मुक्तिदं नृणाम् ॥ १ ॥ शृण्वतां पठतां चैव महापातकनाशनम् ॥ महापुण्यप्रदं पुंसां नरकक्लेशनाशनम् ॥ २ ॥ गायत्र्यां च सरस्वत्यां ये स्नांति मनुजा मुदा ॥ न तेषां गर्भवासः स्यात्किं तु मुक्तिर्भवेद्ध्रुवम् ॥ ३ ॥ सरस्वत्याश्च गायत्र्या गन्धमादनपर्वते ॥ ब्रह्मपत्न्योः सन्निधानात्तन्नाम्ना कथिते इमे ॥ ४ ॥ ॥ ऋषय ऊचुः ॥ ॥ गायत्र्याश्च सरस्वत्या गन्धमादनपर्वते ॥ किमर्थं संनिधानं वै सूताभूत्तद्वदस्व नः ॥ ५ ॥ ॥ ॥ सूत उवाच ॥ ॥ प्रजापतिः पुरा विप्राः स्वां वै दुहितरं मुदा ॥ वाङ्नाम्नीं कामुको भूत्वा स्पृहयामास मोहनः ॥ ६ ॥ अथ प्रजापतेः पुत्री स्वस्मिन्वै तस्य कामिताम् ॥ विलोक्य लज्जिता भूत्वा रोहिद्रूपं दधार सा ॥ ७ ॥ ब्रह्मापि हरिणो भूत्वा तया रन्तुमनास्तदा ॥ गच्छंतीमनुयाति स्म हरिणीरूपधारिणीम् ॥ ८ ॥ तं दृष्ट्वा देवताः सर्वाः पुत्रीगमनसादरम् ॥ करोत्यकार्यं ब्रह्मायं पुत्रीगमनलक्षणम् ॥ ९ ॥ इति निन्दंति तं विप्राः स्रष्टारं जगतां पतिम् ॥ निषिद्धकृत्यनिरतं तं दृष्ट्वा परमेष्ठिनम् ॥ १० ॥ हरः पिनाकमादाय व्याधरूपधरः प्रभुः ॥ आकर्णपूर्णकृष्टेन पिनाकधनुषा शरम् ॥ ११ ॥ संयोज्य वेधसं तेन विव्याध निशितेन सः ॥ त्रिपुरांतकबाणेन विद्धोऽसौ न्यपतद्भुवि ॥ १२ ॥ तस्य देहादथोत्थाय महज्ज्योतिर्महाप्रभम् ॥ आकाशे मृगशीर्षाख्यं नक्षत्रमभवत्तदा ॥ १३ ॥ आर्द्रानक्षत्ररूपी सन्हरोऽप्यनुजगाम तम् ॥ पीडयन्मृगशीर्षाख्यं नक्षत्रं ब्रह्मरूपिणम् ॥ १४ ॥ अधुनापि मृगव्याधरूपेण त्रिपुरांतकः ॥ अंबरे दृश्यते स्पष्टं मृगशीर्षांतिके द्विजाः ॥ १५ ॥ एवं विनिहते तस्मिन्च्छंभुना परमेष्ठिनि ॥ अनंतरं तु गायत्रीसरस्वत्यौ शुचार्पिते ॥ १६ ॥ भर्तृहीने मुनिश्रेष्ठा भर्तृजीवनकांक्षया ॥ किं करिष्यावहे ह्यावामित्यन्योन्यं विचार्य तु ॥ १७ ॥ स्वपतिप्राणसिद्ध्यर्थं गायत्री च सरस्वती ॥ सर्वोत्कृष्टं शिवस्थानं गन्धमादनपर्वतम् ॥ १८ ॥ सर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीष्टप्रदं पुंसां तपः कर्तुं समुद्यते ॥ जग्मतुर्नियमोपेते तपः कर्तुं शिवं प्रति ॥ १९ ॥ स्नानार्थमात्मनो विप्रा गायत्री च सरस्वती ॥ तीर्थद्वयं स्वनाम्ना वै चक्रतुः पापनाशनम् ॥ २० ॥ तत्र त्रिषवणस्नानं प्रत्यहं चक्रतुर्मुदा ॥ बहुकालमनाहारे कामक्रोधादिवर्जिते ॥ २१ ॥ अत्युग्रनियमोपेते शिवध्यानपरायणे ॥ पंचाक्षरमहामन्त्रजपैकनियते शुभे ॥ २२ ॥ स्वपतेर्जीवनार्थं वै गायत्री च सरस्वती ॥ महादेवं समुद्दिश्य तप एवं प्रचक्रतुः ॥ २३ ॥ तयोरथ तपस्तुष्टो महादेवो महेश्वरः ॥ सन्निधत्ते महामूर्तिस्तपसां फलदित्सया ॥ २४ ॥ ततः सन्निहितं शंभुं पार्वतीरमणं शिवम् ॥ गणेशकार्त्तिकेयाभ्यां पार्श्वयोः परिसेवितम् ॥ २५ ॥ दृष्ट्वा संतुष्टचित्ते ते गायत्री च सरस्वती ॥ स्तोत्रैस्तुष्टुवतुः स्तुत्यं महादेवं घृणानिधिम् ॥ २६ ॥ ॥ गायत्रीसरस्वत्यावूचतुः ॥ ॥ नमो दुर्वारसंसारध्वांतध्वंसैकहेतवे ॥ ज्वलज्ज्वालावलीभीमकालकूटविषादिने ॥ २७ ॥ जगन्मोहन पंचास्त्रदेहनाशैकहेतवे ॥ जगदंतकरक्रूरयमांतक नमोऽस्तु ते ॥ २८ ॥ गंगातरंगसंपृक्तजटामण्डलधारिणे ॥ नमस्तेस्तु विरूपाक्ष बालशीतांशुधारिणे ॥ २९ ॥ पिनाकभीमटंकारत्रासितत्रिपुरौकसे ॥ नमस्ते विविधाकारजगत्स्रष्टृशिरश्छिदे ॥ ३० ॥ शांतामलकृपादृष्टिसंरक्षितमृकण्डुज ॥ नमस्ते गिरिजानाथ रक्षावां शरणागते ॥ ३१ ॥ महादेव जगन्नाथ त्रिपुरांतक शंकर ॥ वामदेव महादेव रक्षावां शरणागते ॥ ३२ ॥ इति ताभ्यां स्तुतः शम्भुर्देवदेवो महेश्वरः ॥ अब्रवीत्प्रीतिसंयुक्तो गायत्रीं च सरस्वतीम् ॥ ३३ ॥ ॥ महादेव उवाच ॥ ॥ भोः सरस्वति गायत्रि प्रीतोऽस्मि युवयोरहम् ॥ वरं वरयतं मत्तो यद्वां मनसि वर्तते ॥ ३४ ॥ इत्युक्ते ते तु गायत्रीसरस्वत्यौ हरेण वै ॥ अब्रूतां पार्वतीकांतं महादेवं घृणानिधिम् ॥ ३५ ॥ ॥ गायत्रीसरस्वत्यावूचतुः ॥ ॥ भगवन्नावयोर्देव भर्त्तारं चतुराननम् ॥ सप्राणं कुरु सर्वेश कृपया करुणाकर ॥ ३६ ॥ त्वमावयोः पिता देव तवाप्यावां सुते उभे ॥ रक्षावां पतिदानेन तस्मात्त्वं त्रिपुरांतक ॥ ३७ ॥ स एवं प्रार्थितः शम्भुस्ताभ्यां ब्राह्मणपुंगवाः ॥ एवमस्त्विति संप्रोच्य गायत्रीं च सरस्वतीम् ॥ ३८ ॥ तदेव वेधसः कायं शिरसा योक्तुमुत्सुकः ॥ तत्रैव वेधसः कायं शिरोभिः सहसुव्रताः ॥ ३९ ॥ भूतैरानाययामास नंदिभृंगिमुखैस्तदा ॥ शिरांसि तान्यनेकानि कायेन सह शंकरः ॥ ४० ॥ क्षणात्संधारयामास वाणीगायत्रिसंनिधौ ॥ संधितोऽथ हरेणासौ चतुर्वक्त्रो जगत्पतिः ॥ ४१ ॥ उत्तस्थौ तत्क्षणादेव सुप्तोत्थित इव द्विजाः ॥ ततः प्रजापतिर्दृष्ट्वा शंकरं शशिभूषणम् ॥ तुष्टाव वाग्भिरग्र्याभिर्भार्याभ्यां च समन्वितः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते देवदेवेश

१ जगदाधार—इ० पा० । २ शिवेशान—इ० पा० । ३ तु शूलिना—इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

करुणाकर शंकर ॥ ४३ ॥ पाहि मां करुणासिंधो निषिद्धाचरणात्प्रभो ॥ मम त्वत्कृपया शंभो निषिद्धाचरणे क्वचित् ॥ ४४ ॥
मा प्रवृत्तिर्भवेद्भूयो रक्ष मां त्वं तथा सदा ॥ तथैवास्त्विति संप्राह ब्रह्माणं गिरिजापतिः ॥ ४५ ॥ इतः परं प्रमादं त्वं मा कुरुष्व विधे पुनः ॥ उत्पथं
प्रतिपन्नानां पुंसां शास्तास्मि सर्वदा ॥ ४६ ॥ एवमुक्त्वा चतुर्वक्त्रं महादेवो द्विजोत्तमाः ॥ सरस्वतीं च गायत्रीं प्रोवाच प्रीणयन्गिरा ॥ ४७ ॥
॥ ॥ महादेव उवाच ॥ ॥ युवयोर्मत्प्रसादेन हे गायत्रि सरस्वति ॥ अयं भर्ता समायातः सप्राणश्चतुराननः ॥ ४८ ॥ सहानेन ब्रह्मलोकं यातं
मा भूद्विलंबता ॥ युवयोः संनिधानेन सदा कुंडद्वयेऽत्र वै ॥ ४९ ॥ भविष्यति नृणां मुक्तिः स्नानात्सायुज्यरूपिणी ॥ युष्मन्नाम्ना च गायत्रीसर
स्वत्याविति द्वयम् ॥ ५० ॥ इदं तीर्थं सर्वलोके ख्यातिं यास्यति शाश्वतीम् ॥ सर्वेषामपि तीर्थानामिदं तीर्थद्वयं सदा ॥ ५१ ॥ शुद्धिप्रदं तथा
भूयान्महापातकनाशनम् ॥ महाशांतिकरं पुंसां सर्वाभीष्टप्रदायकम् ॥ ५२ ॥ मम प्रसादजननं विष्णुप्रीतिकरं तथा ॥ एतत्तीर्थद्वयसमं न भूतं
न भविष्यति ॥ ५३ ॥ अत्र स्नानाद्धि सर्वेषां सर्वाभीष्टं भविष्यति ॥ इदं कुंडद्वयं लोके भवतीभ्यां कृतं महत् ॥ ५४ ॥ युष्मन्नाम्ना प्रसिद्धं च
भविष्यति विमुक्तिदम् ॥ गायत्र्युपास्तिरहिता वेदाभ्यासविवर्जिताः ॥ ५५ ॥ औपासनविहीनाश्च पंचयज्ञविवर्जिताः ॥ युष्मत्कुंडद्वये स्नानात्तत्
त्फलमवाप्नुयुः ॥ ५६ ॥ अन्ये च ये पातकिनो नित्यानुष्ठानवर्जिताः ॥ स्नात्वा कुंडद्वये तत्र शुद्धाः स्युर्द्विजसत्तमाः ॥ ५७ ॥ सरस्वतीं च गाय
त्रीमेवमुक्त्वा महेश्वरः ॥ क्षणादंतरधात्तत्र सर्वेषामेव पश्यताम् ॥ ५८ ॥ पतिं लब्ध्वाऽथ गायत्रीसरस्वत्यौ मुदान्विते ॥ तेन साकं ब्रह्मलोकं जग्म
तुर्द्विजसत्तमाः ॥ ५९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा गंधमादनपर्वते ॥ संनिधानं सरस्वत्या गायत्र्याश्च सहेतुकम् ॥ ६० ॥
यः शृणोतीममध्यायं पठते वा सभक्तिकम् ॥ एतत्तीर्थद्वयस्नानफलमाप्नोत्यसंशयः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये गायत्रीसरस्वतीतीर्थप्रशंसायां गंधमादने गायत्रीसरस्वतीसन्निधानकथनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि गायत्रीं च सरस्वतीम् ॥ लक्ष्यीकृत्य कथामेकां पवित्रां द्विजसत्तमाः ॥ १ ॥ कश्य
पाख्यो द्विजः पूर्वमस्मिंस्तीर्थद्वये शुभे ॥ स्नात्वातिमहतः पापाद्विमुक्तो नरकप्रदात् ॥ २ ॥ ॥ ऋषय ऊचुः ॥ ॥ मुने कश्यपनामासावकरो
त्किं हि पातकम् ॥ स्नात्वा तीर्थद्वयेप्यत्र यस्मान्मुक्तोऽभवत्क्षणात् ॥ ३ ॥ एतन्नः श्रद्दधानानां ब्रूहि सूत कृपाबलात् ॥ त्वद्वचोऽमृततृप्तानां न
पिपासापि विद्यते ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ गायत्र्याश्च सरस्वत्या माहात्म्यप्रतिपादकम् ॥ इतिहासं प्रवक्ष्यामि शृण्वतां पापनाशन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ ५ ॥ अभिमन्युसुतो राजा परीक्षिन्नाम नामतः ॥ अध्यास्ते हास्तिनपुरं पालयन्धर्मतो महीम् ॥ ६ ॥ स राजा जातु विपिने चचार मृगया रतः ॥ षष्टिवर्षवया भूपः क्षुत्तृष्णापरितीडितः ॥ ७ ॥ नष्टमेकं स विपिने मार्गयन्मृगमादरात् ॥ ध्यानारूढं मुनिं दृष्ट्वा प्राह तं चीरवाससम् ॥ ८ ॥ मया बाणेन विपिने मृगो विद्धोऽधुना मुने ॥ दृष्टः स किं त्वया विद्धन्विद्रुतो भयकातरः ॥ ९ ॥ समाधिनिष्ठो मौनित्वान्न किं चिदपि सोऽब्रवीत् ॥ ततो धनुरटन्याऽसौ स्कंधे तस्य महामुनेः॥ १० ॥ निधाय मृतसर्पं तु कुपितः स्वपुरं ययौ ॥ मुनेस्तस्य सुतः कश्चिच्छृंगीनाम बभूव वै ॥ ११ ॥ सखा तस्य कृशाख्योऽभूच्छृंगिणो द्विजसत्तमाः ॥ सखायं शृङ्गिणं प्राह कृशाख्यः स सखा ततः ॥ १२ ॥ पिता तव मृतं सर्पं स्कंधेन वहतेऽधुना ॥ मा भूद्दर्पस्तव सखे मा कृथास्त्वं मदं वृथा ॥ १३ ॥ सोऽवदत्कुपितः शृंगी दित्सुश्शापं नृपाय वै ॥ मत्ताते शवसर्पं यो न्यस्त वान्मूढचेतनः ॥ १४ ॥ स सप्तरात्रान्म्रियतां संदष्टस्तक्षकाहिना ॥ शशापैवं मुनिसुतः सौभद्रेयं परीक्षितम् ॥ १५ ॥ शमीकाख्यः पिता तस्य श्रुत्वा शप्तं सुतेन तम् ॥ नृपं प्रोवाच तनयं शृंगिणं मुनिपुंगवः ॥ १६ ॥ रक्षकं सर्वलोकानां नृपं किं शप्तवानसि ॥ अराजके वयं लोके स्थास्यामः कथमंजसा ॥ १७ ॥ क्रोधेन पातकमभून्न त्वया प्राप्यते सुखम् ॥ यः समुत्पादितं कोपं क्षमयैव निरस्यति ॥ १८ ॥ इह लोके परत्रासावत्यंतं सुखमेधते ॥ क्षमायुक्ता हि पुरुषा लभंते श्रेय उत्तमम् ॥ १९ ॥ ततः शमीकः स्वं शिष्यं प्राह गौरमुखाभिधम् ॥ भो गौ मुख गत्वा त्वं वद भूपं परीक्षितम् ॥ २० ॥ इमं शापं मत्सुतोक्तं तक्षकाहिविदंशनम् ॥ पुनरायाहि शीघ्रं त्वं मत्समीपे महामते ॥ २१ ॥ एवमुक्तः शमीकेन ययौ गौरमुखो नृपम् ॥ समेत्य चाब्रवीद्भूपं सौभद्रेयं परीक्षितम् ॥ २२ ॥ दृष्ट्वा सर्पं पितुः स्कन्धे त्वया विनिहितं मृतम् ॥ शमीकस्य सुतः शृंगी शशाप त्वां रुषान्वितः ॥ २३ ॥ एतद्दिनात्सप्तमेऽह्नि तक्षकेण महाहिना ॥ दष्टो विषाग्निना दग्धो भूयादाश्वभिमन्युजः ॥ २४ ॥ एवं शशाप त्वां राजञ्छृंगी तस्य मुनेः सुतः ॥ एतद्वक्तुं पिता तस्य प्राहिणोन्मां त्वदंतिकम् ॥ २५ ॥ इतीरयित्वा तं भूपमाशु गौरमुखो ययौ ॥ गते गौरमुखे पश्चाद्राजा शोकपरायणः ॥ २६ ॥ अभ्रंलिहमथोत्तुंगमेकस्तंभं सुविस्तृतम् ॥ मध्येगंगं व्यतनुत मंडपं नृपपुंगवः ॥ २७ ॥ महागारुडमंत्रज्ञैरौषधज्ञैश्चिकित्सकैः ॥ तक्षकस्य विषं हंतु यत्नं कुर्वन्समाहितः ॥ २८ ॥ अनेकदेवब्रह्मर्षिराजर्षिप्रवरान्वितः ॥ आस्ते तस्मिन्नृप स्तुंगे मंडपे विष्णुभक्तिमान् ॥ २९ ॥ तस्मिन्नवसरे विप्रः काश्यपो मांत्रिकोत्तमः ॥ राजानं रक्षितुं प्रायात्तक्षकस्य महाविषात् ॥ ३० ॥ सप्तमे

१ मुनिम्—शमीकमहर्षिम्—इत्यर्थः ।

हनि विप्रेंद्रो दरिद्रो धनकामुकः ॥ अत्रांतरे तक्षकोऽपि विप्ररूपी समाययौ ॥ ३१ ॥ मध्येमार्गं विलोक्याथ कश्यपं प्रत्यभाषत ॥ ब्राह्मण त्वं
कुत्र यासि वद मेऽद्य महामुने ॥ ३२ ॥ इति पृष्टस्तदावादीत्काश्यपस्तक्षकं द्विजाः ॥ परीक्षितं महाराजं तक्षकोऽद्य विषाग्निना ॥ ३३ ॥ दक्ष्यते
तं शमयितुं तत्समीपमुपैम्यहम् ॥ इत्युक्तवंतं तं विप्रं तक्षकः पुनरब्रवीत् ॥ ३४ ॥ तक्षकोहं द्विजश्रेष्ठ मया दष्टश्चिकित्सितुम् ॥ न शक्यो
ऽब्दशतेनापि महामंत्रायुतैरपि ॥ ३५ ॥ चिकित्सितुं चेन्मद्दष्टं शक्तिरस्ति तवाधुना ॥ अनेकयोजनोच्छ्रायमिमं वटतरुं त्वहम् ॥ ३६ ॥
दशाम्युज्जीवयैनं त्वं समर्थोऽस्ति ततो भवान् ॥ इतीरयित्वा तं वृक्षमदशत्तक्षकस्तदा ॥ ३७ ॥ अभवद्भस्मसात्सोऽपि वृक्षोऽत्यंतं समुच्छ्रितः ॥
पूर्वमेव नरः कश्चित्तं वृक्षमधिरूढवान् ॥ ३८ ॥ तक्षकस्य विषोल्काभिः सोऽपि दग्धोऽभवत्तदा ॥ तं नरं न विजिज्ञाते तौ च काश्यपतक्षकौ ॥
॥ ३९ ॥ काश्यपः प्रतिजज्ञेऽथ तक्षकस्यापि शृण्वतः ॥ तन्मंत्रशक्तिं पश्यंतु सर्वे विप्रा हि नोऽधुना ॥ ४० ॥ इतीरयित्वा तं वृक्षं
भस्मीभूतं विषाग्निना ॥ अजीवयन्मन्त्रशक्त्या काश्यपो मांत्रिकोत्तमः ॥ ४१ ॥ नरोऽपि तेन वृक्षेण साकमुज्जीवितोऽभवत् ॥
अथाब्रवीत्तक्षकस्तं काश्यपं मंत्रकोविदम् ॥ ४२ ॥ यथा न मुनिवाङ्मिथ्या भवेदेवं कुरु द्विज ॥ यत्ते राजा धनं दद्यात्ततोपि द्विगुणं धनम् ॥
॥ ४३ ॥ ददाम्यहं निवर्तस्व शीघ्रमेव द्विजोत्तम ॥ इत्युक्त्वानर्घ्यरत्नानि तस्मै दत्त्वा स तक्षकः ॥ ४४ ॥ न्यवर्तयत्काश्यपं तं ब्राह्मणं मंत्रको
विदम् ॥ अल्पायुषं नृपं मत्वा ज्ञानदृष्ट्या स काश्यपः ॥ ४५ ॥ स्वाश्रमं प्रययौ तूष्णीं लब्धरत्नश्च तक्षकात् ॥ सोऽब्रवीत्तक्षकः
सर्वान्सर्पानाहूय तत्क्षणे ॥ ४६ ॥ यूयं तं नृपतिं प्राप्य मुनीनां वेषधारिणः ॥ उपहारफलान्याशु प्रयच्छत परीक्षिते ॥ ४७ ॥ तथेत्युक्त्वा
सर्वसर्पा ददू राज्ञे फलान्यमी ॥ तक्षकोपि तदा तत्र कस्मिंश्चिद्बदरीफले ॥ ४८ ॥ कृमिवेषधरो भूत्वा व्यतिष्ठद्दंशितुं नृपम् ॥
अथ राजा प्रदत्तानि सर्पैर्ब्राह्मणरूपकैः ॥ ४९ ॥ परीक्षिन्मंत्रवृद्धेभ्यो दत्त्वा सर्वफलान्यपि ॥ कौतूहलेन जग्राह स्थूलमेकं फलं
करे ॥ ५० ॥ अस्मिन्नवसरे सूर्योऽप्यस्ताचलमगाहत ॥ मिथ्या ऋषिवचो मा भूदिति तत्रत्यमानवाः ॥ ५१ ॥ अन्योन्यमवदन्सर्वे ब्राह्मणाश्च
नृपास्तथा ॥ एवं वदत्सु सर्वेषु फले तस्मिन्नदृश्यत ॥ ५२ ॥ फले रक्तकृमिः सर्वै राज्ञा चापि परीक्षिता ॥ अयं किं मां दशेदद्य कृमिरित्युक्तवा
न्नृपः ॥ ५३ ॥ निदधे तत्फलं कर्णे सकृमि द्विजसत्तमाः ॥ तक्षकोऽस्मिन्स्थितः पूर्वं कृमिरूपी फले तदा ॥ ५४ ॥ निर्गत्य तत्फलादाशु नृपदे
हमवेष्टयत ॥ तक्षकावेष्टिते भूपे पार्श्वस्था दुद्रुवुर्भयात् ॥ ५५ ॥ अनंतरं नृपो विप्रास्तक्षकस्य विषाग्निना ॥ दग्धोऽभूद्भस्मसादाशु सप्रासादो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलीयसा ॥ ५६ ॥ कृत्वोर्ध्वदैहिकं तस्य नृपस्य सपुरोहिताः ॥ मंत्रिणस्तत्सुतं राज्ये जनमेजयनामकम् ॥ ५७ ॥ राजानमभ्यषिंचन्वै गजद्रक्षणवांछया ॥ तक्षकाद्रक्षितुं भूपमायातः काश्यपाभिधः ॥ ५८ ॥ यो ब्राह्मणो मुनिश्रेष्ठाः स सर्वैर्निंदितो जनैः ॥ बभ्राम सकलान्देशाञ्छिष्टैः सर्वैश्च दूषितः ॥ ५९ ॥ अवस्थानं न लेभेऽसौ ग्रामे वाप्याश्रमेऽपि वा ॥ यान्यान्देशानसौ यातस्तत्रतत्र महाजनैः ॥ ६० ॥ तत्तद्देशान्निरस्तः स शाकल्यं शरणं ययौ ॥ प्रणम्य शाकल्यमुनिं काश्यपो निन्दितो जनैः ॥ इदं विज्ञापयामास शाकल्याय महात्मने ॥ ६१ ॥ ॥ काश्यप उवाच ॥ ॥ भगवन्सर्वधर्मज्ञ शाकल्य हरिवल्लभ ॥ ६२ ॥ मुनयो ब्राह्मणाश्चान्ये मां निंदंति सुहृज्जनाः ॥ नास्याहं कारणं जाने किं मां निंदंति मानवाः ॥ ६३ ॥ ब्रह्महत्या सुरापानं गुरुस्त्रीगमनं तथा ॥ स्तेयं संसर्गदोषो वा मया नाचरितः क्वचित् ॥ ६४ ॥ अन्यान्यपि हि पापानि न कृतानि मया मुने ॥ तथापि निंदंति जना वृथा मां बांधवादयः ॥ ६५ ॥ जानासि चेत्त्वं शाकल्य मया दोषं कृतं वद ॥ उक्तोऽथ काश्यपेनैवं शाकल्याख्यो महामुनिः ॥ क्षणं ध्यात्वा बभाषे तं काश्यपं द्विजसत्तमाः ॥ ६६ ॥ ॥ शाकल्य उवाच ॥ ॥ परीक्षितं महाराजं तक्षकाद्रक्षितुं भवान् ॥ ६७ ॥ अयासीदर्धमार्गे तु तक्षकेण निवारितः ॥ चिकित्सितुं समर्थोऽपि विषरोगादिपीडितम् ॥ ६८ ॥ यो न रक्षति लोभेन तमाहुर्ब्रह्मघातकम् ॥ क्रोधात्कामाद्भयाल्लोभान्मात्सर्यान्मोहतोऽपि वा ॥ ६९ ॥ यो न रक्षति विप्रेंद्र विषरोगातुरं नरम् ॥ ब्रह्महा स सुरापी च स्तेयी च गुरुतल्पगः ॥ ७० ॥ संसर्गदोषदुष्टश्च नापि तस्य हि निष्कृतिः ॥ कन्याविक्रयिणश्चापि हयविक्रयिणस्तथा ॥ ७१ ॥ कृतघ्नस्यापि शास्त्रेषु प्रायश्चित्तं हि विद्यते ॥ विषरोगातुरं यस्तु समर्थोपि न रक्षति ॥ ७२ ॥ न तस्य निष्कृतिः प्रोक्ता प्रायश्चित्तायुतैरपि ॥ न तेन सह पंक्तौ च भुंजीत सुकृती जनः ॥ ७३ ॥ न तेन सह भाषेत न पश्येत्तं नरं क्वचित् ॥ तत्संभाषणमात्रेण महापातकभाग्भवेत् ॥ ७४ ॥ परीक्षित्स महाराजः पुण्यश्लोकश्च धार्मिकः ॥ विष्णुभक्तो महायोगी चातुर्वर्ण्यस्य रक्षिता ॥ ७५ ॥ व्यासपुत्राद्धरिकथां श्रुतवान्भक्तिपूर्वकम् ॥ अरक्षित्वा नृपं तं त्वं वचसा तक्षकस्य यत् ॥ ७६ ॥ निवृत्तस्तेन विप्रेंद्रैर्बांधवैरपि दूष्यसे ॥ स परीक्षिन्महाराजो यद्यपिक्षणजीवितः ॥ ७७ ॥ तथापि यावन्मरणं बुधैः कार्यं चिकित्सनम् ॥ यावत्कण्ठगताः प्राणा मुमूर्षोर्मानवस्य हि ॥ ७८ ॥ तावच्चिकित्सा कर्तव्या कालस्य कुटिला गतिः ॥ इति प्राहुः पुरा श्लोकं भिषग्वैद्याब्धिपारगाः ॥ ७९ ॥ अतश्चिकित्साशक्तोऽपि यस्मादकृतभेषजः ॥ अर्धमार्गे निवृत्तस्त्वं तेन तं हतवानसि ॥ शाकल्येनैवमुदितः काश्यपः प्रत्यभाषत ॥ ८० ॥ ॥ काश्यप उवाच ॥ ॥ ममैत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दोषशांत्यर्थमुपायं वद सुव्रत ॥ ८१ ॥ येन मां प्रतिगृह्णीयुर्बांधवाः ससुहृज्जनाः ॥ ८२ ॥ कृपां मयि कुरुष्व त्वं शाकल्य हरिव ल्लभ ॥ काश्यपेनैवमुक्तस्तु शाकल्योपि मुनीश्वरः ॥ क्षणं ध्यात्वा जगदेवं काश्यपं कृपया तदा ॥ ८३ ॥ ॥ शाकल्य उवाच ॥ ॥ अस्य पापस्य शांत्यर्थमुपायं प्रवदामि ते ॥ ८४ ॥ तत्कर्त्तव्यं त्वया शीघ्रं विलंबं मा कृथा द्विज ॥ दक्षिणांबुनिधौ सेतौ गंधमादनप र्वते ॥ ८५ ॥ अस्ति तीर्थद्वयं विप्रा गायत्री च सरस्वती ॥ तत्र त्वं स्नानमात्रेण शुद्धो भूयाश्च तत्क्षणे ॥ ८६ ॥ गायत्र्या च सरस्वत्या जलवात स्पृशो नरः ॥ विधूय सर्वपापानि स्वर्गं यास्यंति निर्मलाः ॥ ८७ ॥ तद्याहि शीघ्रं विप्र त्वं गायत्रीं च सरस्वतीम् ॥ इत्युक्तः काश्यपस्तेन शाक ल्येन द्विजोत्तमाः ॥ ८८ ॥ नत्वा मुनिं च शाकल्यं तमापृच्छ्य मुनीश्वरम् ॥ तेन चैवाभ्यनुज्ञातः प्रययौ गन्धमादनम् ॥ ८९ ॥ तत्र गत्वा च गायत्रीसरस्वत्यौ च काश्यपः ॥ नत्वा तीर्थद्वयं भक्त्या दण्डपाणिं च भैरवम् ॥ ९० ॥ संकल्पपूर्वं तत्तीर्थे सस्नौ नियमसंयुतः ॥ तीर्थद्वये स्नानमात्रान्मुक्तपापोऽथ काश्यपः ॥ ९१ ॥ तीर्थद्वयस्य तीरेऽसौ किंचित्कालं तु तस्थिवान् ॥ तस्मिन्काले च गायत्रीसरस्वत्यौ मुनीश्वराः ॥ ॥ ९२ ॥ प्रादुर्बभूवतुर्मूर्ते सर्वाभरणभूषिते ॥ देव्यौ ते स नमस्कृत्य काश्यपो भक्तिपूर्वकम् ॥ ९३ ॥ के युवां रूपसंपन्ने सर्वालंकारसंयुते ॥ इति पप्रच्छ दृष्ट्वा ते काश्यपो हृष्टमानसः ॥ तेन पृष्टे च गायत्रीसरस्त्यौ तमूचतुः ॥ ९४ ॥ ॥ गायत्रीसरस्वत्यावूचतुः ॥ ॥ काश्यपावां हि गायत्रीसरस्वत्यौ विधिप्रिये ॥ ९५ ॥ एतत्तीर्थस्वरूपेण नित्यं वर्तावहे स्वतः ॥ अत्र तीर्थद्वये स्नानादावां तुष्टे तवाधुना ॥ ९६ ॥ वरं मत्तो वृणीष्व त्वं यदिष्टं काश्यप द्विज ॥ स्नांति तीर्थद्वये येऽत्र दास्यावस्तदभीप्सितम् ॥ ९७ ॥ श्रुत्वा वचस्तद्गायत्रीसरस्वत्योः स काश्यपः ॥ तुष्टाव वाग्भिरग्र्याभिस्ते देव्यौ वेधसः प्रिये ॥ ९८ ॥ ॥ काश्यप उवाच ॥ ॥ चतुराननगेहिन्यौ जगद्धात्र्यौ नमाम्यहम् ॥ विद्यास्वरूपे गायत्री सरस्वत्यौ शुभे उभे ॥ ९९ ॥ सृष्टिस्थित्यंतकारिण्यौ जगतो वेदमातरौ ॥ हव्यकव्यस्वरूपे च चंद्रादित्यविलोचने ॥ १०० ॥ सर्वदेवाधिपे वाणी गायत्र्यौ सततं भजे ॥ गिरिजा कमला चापि युवामेव जगद्धिते ॥ १ ॥ युष्मद्दर्शनमात्रेण जगत्सृष्ट्यादिकल्पनम् ॥ युष्मन्निमेषात्सततं जगतां प्रलयो भवेत् ॥ २ ॥ उन्मेषात्सृष्टिरभवद्गो गायत्रि सरस्वति ॥ युवयोर्दर्शनादद्य कृतार्थोऽभवमाशु वै ॥ ३ ॥ मामद्य पातकान्मुक्तं स्नानात्तीर्थ द्वयेऽत्र तु ॥ स्वीकुर्वंतु मुनिश्रेष्ठा ब्राह्मणा बांधवास्तथा ॥ ४ ॥ इतः परं पापकृत्ये मा मे बुद्धिः प्रवर्तताम् ॥ धर्मे प्रवर्ततां नित्यमयमेव वरो मम ॥ ५ ॥ दीयतां भो महादेव्यौ नान्यमिच्छाम्यहं वरम् ॥ इति ते प्रार्थिते तेन काश्यपेन द्विजोत्तमाः ॥ ६ ॥ सरस्वती च गायत्री द्वे देव्यौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणः प्रिये ॥ काश्यपं प्रोचतुः प्रीते जनन्यौ जगतां सदा ॥ ७ ॥ काश्यपैतद्वरं सर्वं प्रार्थितं यत्त्वयाऽधुना ॥ अनुग्रहादावयोस्तदचिरेण तवास्तु हि ॥ ८ ॥ इत्युक्त्वा तं तु गायत्रीसरस्वत्यौ क्षणेन वै ॥ तिरोधानं गते विप्रास्तस्मिंस्तीर्थद्वये तदा ॥ ९ ॥ काश्यपोऽपि कृतार्थः सन्स्वदेशं प्रति निर्ययौ ॥ बांधवा ब्राह्मणाः सर्वे काश्यपं गतकिल्बिषम् ॥ ११० ॥ प्रत्यगृह्णंश्च गायत्रीसरस्वत्योर्निमज्जनात् ॥ एवं वः कथितं विप्राः काश्यपस्य विमोक्षणम् ॥ ११ ॥ पातकेभ्यो हि गायत्रीसरस्त्योर्निमज्जनात् ॥ पठते त्विममध्यायं शृणुते वा समाहितः ॥ १२ ॥ यो गायत्र्यां सरस्वत्यां स स्नातं[1]फलमश्नुते ॥ ११३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये गायत्रीसरस्वतीतीर्थप्रशंसायां काश्यपपापशांतिवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः सर्वतीर्थानां वैभवं प्रवदाम्यहम् ॥ सेतुमध्यनिविष्टानामनुक्तानां मुनीश्वराः ॥ १ ॥ अस्ति तीर्थं महापुण्यं नाम्ना तु ऋणमोचनम् ॥ ऋणानि त्रीणि नश्यंति नराणामत्र मज्जनात् ॥ २ ॥ द्विजस्य जायमानस्य ऋणानि त्रीणि संति हि ॥ ऋषीणां देवतानां च पितॄणां च द्विजोत्तमाः ॥ ३ ॥ ब्रह्मचर्याननुष्ठानादृषीणामृणवान्भवेत् ॥ यज्ञादीनामकरणाद्देवानां च ऋणी भवेत् ॥ ४ ॥ पुत्रानुत्पादनाच्चैव पितॄणामृणवान्भवेत् ॥ विनापि ब्रह्मचर्येण विना यागं विना सुतम् ॥ ५ ॥ ऋणमोक्षाभिधे तीर्थे स्नानमात्रेण मानवाः ॥ ऋषिदेवपितॄणां तु ऋणेभ्यो मुक्तिमाप्नुयुः ॥ ६ ॥ ब्रह्मचर्येण यज्ञेन तथा पुत्रोद्भवेन च ॥ नैव तुष्यन्ति ऋषयो देवाः पितृगणास्तथा ॥ ७ ॥ ऋणमोक्षे यथा स्नानादतुलां तुष्टिमाप्नुयुः ॥ किं चात्र मज्जनात्तीर्थे दरिद्रा अधमर्णिनः ॥ ८ ॥ मुक्ता ऋणेभ्यः सर्वेभ्यो धनिनः स्युर्न संशयः ॥ यदत्र मज्जनात्पुंसामृणमुक्तिः प्रजायते ॥ ९ ॥ तस्मादुक्तमिदं तीर्थमृणमोचनसंज्ञया ॥ अतोऽत्र ऋणिभिः सर्वैः स्नातव्यं तद्विमुक्तये ॥ १० ॥ एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥ पांडवैः कृतमप्यत्र तीर्थमस्त्यपरं महत् ॥ ११ ॥ यत्रेष्टं धर्मपुत्राद्यैः पांडवैः पंचभिः पुरा ॥ तदेतत्तीर्थमुद्दिश्य भुक्तिमुक्तिफलप्रदम् ॥ १२ ॥ दशकोटिसहस्राणि तीर्थान्यनुत्तमानि हि ॥ पंचपांडवतीर्थेस्मिन्सान्निध्यं कुर्वते सदा ॥ १३ ॥ आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ॥ पांडवानां महातीर्थे नित्यं सन्निहितास्तथा ॥ १४ ॥ अत्राभिषेकं यः कुर्यात्पितृदेवांश्च तर्पयेत् ॥ सर्वपापविनिर्मुक्तो ब्रह्म[2]लोके स पूज्यते ॥ १५ ॥ अप्येकं भोजयेद्विप्रमेतत्तीर्थतटेऽमले ॥ तेनासौ कर्मणा त्वत्र परत्रापि च मोदते ॥ १६ ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो

१ स्नानफलम्—इ० पा० । २ विष्णुलोके—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाप्यन्य एव वा ॥ अस्मिंस्तीर्थवरे स्नात्वा वियोनिं न प्रयाति वै ॥ १७ ॥ पांडवानां महातीर्थे पुण्ययोगेषु यो नरः ॥ स्नायात्स मनुज
श्रेष्ठो नरकं नैव पश्यति ॥ १८ ॥ पांडवानां महातीर्थं सायं प्रातश्च यः स्मरेत् ॥ स स्नातः सर्वतीर्थेषु गंगादिषु न संशयः ॥ १९ ॥ इंद्रादिदेवता
भिश्च यत्रेष्टं दैत्यशांतये ॥ तदन्यद्देवतीर्थाख्यं विद्यते गंधमादने ॥ २० ॥ देवतीर्थे नरः स्नात्वा सर्वपापविमोचितः ॥ प्राप्नुयादक्षयाँल्लोकान्सर्व
कामसमन्वितान् ॥ २१ ॥ जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषेण वा ॥ कृतं तद्देवकुंडेस्मिन्स्नानात्सद्यो विनश्यति ॥ २२ ॥ यथा सुराणां सर्वेषा
मादिर्वै मधुसूदनः ॥ तथादिः सर्वतीर्थानां देवकुंडमनुत्तमम् ॥ २३ ॥ यस्तु वर्षशतं पूर्णमग्निहोत्रमुपासते ॥ यस्त्वेको देवकुंडेस्मिन्कदाचित्स्नान
माचरेत् ॥ २४ ॥ सममेव तयोः पुण्यं नात्र संदेहकारणम् ॥ दुर्लभं देवतीर्थेस्मिन्दानं वासश्च दुर्लभः ॥ २५ ॥ देवतीर्थाभिगमनं स्नानं चाप्य
तिदुर्लभम् ॥ देवतीर्थं समासाद्य देवर्षिपितृसेवितम् ॥ २६ ॥ अश्वमेधमवाप्नोति विष्णुलोकं च गच्छति ॥ द्विदिनं त्रिदिनं चापि पंच वाथ षडेव वा
॥ २७ ॥ उषित्वा देवकुंडस्थतीरे नरकनाशने ॥ न मातृयोनिमाप्नोति सिद्धिं चाप्नोत्यनुत्तमाम् ॥ २८ ॥ त्रिरात्रस्नानतो ह्यत्र वाजपेयफलं भवेत् ॥
देवतीर्थस्मृतेः सद्यः पापेभ्यो मुच्यते नरः ॥ २९ ॥ अर्चयित्वा पितॄन्देवानेतत्तीर्थतटे नरः ॥ सर्वकामसमृद्धिः स्यात्सर्वयज्ञफलं लभेत् ॥ ३० ॥
एतत्तीर्थसमं पुण्यं न भूतं न भविष्यति ॥ तस्मादवश्यं स्नातव्यं देवतीर्थे मुमुक्षुभिः ॥ ३१ ॥ ऐहिकामुष्मिकफलप्राप्तिकामैश्च मानवैः ॥ देवतीर्थ
स्य माहात्म्यं संक्षिप्य कथितं द्विजाः ॥ ३२ ॥ विस्तरेणास्य माहात्म्यं मया वक्तुं न पार्य्यते[3] ॥ सुग्रीवतीर्थं वक्ष्यामि रामसेतौ विमुक्तिदे ॥ ३३ ॥
अत्र स्नात्वा नरो भक्त्या सूर्यलोकं समश्नुते ॥ सुग्रीवतीर्थे स्नानेन हयमेधफलं भवेत् ॥ ३४ ॥ ब्रह्महत्यादिपापानां निष्कृतिश्चापि जायते ॥ सुग्री
वतीर्थगमनाद्गोसहस्रफलं लभेत् ॥ ३५ ॥ स्मरणात्तस्य वेदानां पारायणफलं लभेत् ॥ दिनोपवासमात्रेण तस्य तीर्थस्य तीरतः ॥ ३६ ॥ महापात
कनाशः स्यात्प्रायश्चित्तं विना द्विजाः ॥ तत्राभिषेकं कुर्वाणः पितॄदेवांश्च तर्पयेत् ॥ ३७ ॥ आप्तोर्यामस्य यज्ञस्य फलमष्टगुणं भवेत् ॥ सुग्रीवती
र्थस्नानेन नरमेधफलं लभेत् ॥ ३८ ॥ सुग्रीवतीर्थस्नानेन नरो जातिस्मरो भवेत् ॥ सुग्रीवतीर्थं भो विप्राः प्रयाताभीष्टसिद्धये ॥ ३९ ॥ सुग्रीवतीर्थमा
हात्म्यमेवं वः कथितं द्विजाः ॥ वैभवं नलतीर्थस्य त्विदानीं प्रब्रवीमि वः ॥ ४० ॥ नलतीर्थे नरः स्नानात्स्वर्गलोकं समश्नुते ॥ नलतीर्थे सकृ
त्स्नानात्सर्वपापविमोचितः ॥ ४१ ॥ अग्निष्टोमातिरात्रादिफलमाप्नोत्यनुत्तमम् ॥ त्रिरात्रमुषितस्तस्मिंस्तर्पयन्पितृदेवताः ॥ ४२ ॥ सूर्यवद्भासते

१ देवकुंडे–इ० पा० । २ स्वर्गलोकम्–इ० पा० । ३ शक्यते–इ० पा० । ४ स्नानात्–इ० पा० । ५ प्रवदामि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रा वाजिमेधफलं लभेत् ॥ नीलतीर्थं प्रवक्ष्यामि महापातकनाशनम् ॥ ४३ ॥ अग्निपुत्रेण नीलेन कृतं सेतौ विमुक्तिदम् ॥
नीलतीर्थे नरः स्नानात्सर्वपापविमोचितः ॥ ४४ ॥ बहुवर्ण्यस्य यागस्य फलं शतगुणं लभेत् ॥ नीलतीर्थे नरः स्नात्वा सर्वा
भीष्टप्रदायिनि ॥ ४५ ॥ अग्निलोकमवाप्नोति सर्वकामसमृद्धिमान् ॥ गवाक्षेण कृतं तीर्थं गंधमादनपर्वते ॥ ४६ ॥ विद्यते
स्नानमात्रेण नरकं नैव याति सः ॥ अंगदेन कृतं तीर्थमस्ति सेतौ विमुक्तिदे ॥ ४७ ॥ अत्र स्नानेन मनुजो देवेंद्रत्वं समश्नुते ॥
गजेन गवयेनात्र शरभेण महौजसा ॥ ४८ ॥ कुमुदेन हरेणापि पनसेन बलीयसा ॥ कृतानि यानि तीर्थानि तथाऽन्यैः सर्ववानरैः ॥ ४९ ॥
रामसेतौ महापुण्ये गन्धमादनपर्वते ॥ तेषु तीर्थेषु यः स्नाति सोऽमृतत्वं समश्नुते ॥ ५० ॥ बिभीषणकृतं तीर्थमस्ति पापविमोचनम् ॥
महादुःखप्रशमनं महारोगनिबर्हणम्[1] ॥ ५१ ॥ महापातकसंघानामनलोपममुत्तमम् ॥ कुंभीपाकादिनरकक्लेशनाशनकारणम् ॥ ५२ ॥ दुःस्वप्न
नाशनं धन्यं महादारिद्र्यबाधनम् ॥ तत्र यो मनुजः स्नायात्तस्य नास्तीह पातकम् ॥ ५३ ॥ स वैकुंठमवाप्नोति[2] पुनरावृत्तिवर्जितम् ॥ बिभी
षणस्य सचिवैः कृतं तीर्थचतुष्टयम् ॥ ५४ ॥ तत्र स्नानेन मनुजः सर्वपापैः प्रमुच्यते ॥ सरयूश्च नदी विप्रा गंधमादनपर्वते ॥ ५५ ॥ रामनाथं
महादेवं सेवितुं वर्तते सदा ॥ तत्र स्नात्वा नराः सर्वे सर्वपातकवर्जिताः[3] ॥ ५६ ॥ सर्वयज्ञतपस्तीर्थसेवाफलमवाप्नुयुः ॥ दशकोटिसहस्राणि
तीर्थानि द्विजसत्तमाः ॥ ५७ ॥ वसंत्यस्मिन्महापुण्ये गन्धमादनपर्वते ॥ गंगाद्याः सरितः सर्वास्तथा वै सप्त सागराः ॥ ५८ ॥ ऋष्याश्रमाणि
पुण्यानि तथा पुण्यवनानि च ॥ अनुत्तमानि क्षेत्राणि हरिशंकरयोस्तथा ॥ ५९ ॥ सान्निध्यं कुर्वते नित्यं गन्धमादनपर्वते ॥ उपवीतांतरं तीर्थं
प्रोक्तवांश्चतुराननः ॥ ६० ॥ त्रयस्त्रिंशत्कोट्योऽत्र देवाः पितृगणैः सह ॥ सर्वैश्च मुनिभिः सार्द्धं यक्षैः सिद्धैश्च किन्नरैः ॥ वसंति सेतौ देवस्य रामच
न्द्रस्य चाज्ञया ॥ ६१ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तं द्विजश्रेष्ठा तीर्थानां वैभवं मया ॥ ६२ ॥ इदं पठन्वा शृण्वन्वा दुःखसंघाद्विमुच्यते ॥
कैवल्यं च समाप्नोति पुनरावृत्तिवर्जितम् ॥ ६३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये
सकलतीर्थप्रशंसायामृणमोचनादितीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथे
दानीं प्रवक्ष्यामि रामनाथस्य वैभवम् ॥ यच्छ्रुत्वा[4] सर्वपापेभ्यो मुच्यसे मानवो भुवि ॥ १ ॥ रामप्रतिष्ठितं लिंगं यः पश्यति नरः सकृत् ॥ स

१ महाशौचनिवर्हणम्–इ०पा० । २ कैलासम्–इ०पा० । ३ सर्वपापविमोचिताः–इ०पा० । ४ यज्ज्ञात्वा–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नरो मुक्तिमाप्नोति शिवसायुज्यरूपिणीम् ॥ २ ॥ दशवर्षैस्तु यत्पुण्यं क्रियते तु कृते युगे ॥ त्रेतायामेकवर्षेण तत्पुण्यं साध्यते नृभिः ॥ ३ ॥
द्वापरे तच्च मासेन तद्दिनेन कलौ युगे ॥ तत्फलं कोटिगुणित निमिषे निमिषे नृणाम् ॥ ४ ॥ निःसंदेहं भवेदेवं रामनाथविलोकिनाम् ॥ रामेश्वर
महालिंगे तीर्थानि सकलान्यपि ॥५॥ विद्यंते सर्वदेवाश्च मुनयः पितरस्तथा ॥ एककालं द्विकालं वा त्रिकालं सर्वदैव वा ॥६॥ ये स्मरंति महादेवं
रामनाथं विमुक्तिदम् ॥ कीर्तयंत्यथवा विप्रास्ते विमुक्ताघपंजराः॥७॥ सच्चिदानंदमद्वैतं सांबं रुद्रं प्रयांति वै ॥ रामेश्वराख्यं यल्लिंगं रामचन्द्रेण पूजि
तम् ॥८॥ यस्य स्मरणमात्रेण यमपीडापि नो भवेत् ॥ रामेश्वरमहालिंगं येऽर्चयंति सकृन्नराः ॥९॥ न मानुषास्ते विज्ञेयाः किं तु रुद्रा न संशयः ॥
रामेश्वरमहालिंगं नार्चितं येन भक्तितः ॥ १० ॥ चिरकालं स संसारे संसरेद्दुःखसंकुले ॥ रामेश्वरमहालिंगं ये पश्यंति सकृन्नराः ॥ ११ ॥
किं दानैः किं व्रतैस्तेषां किं तपोभिः किमध्वरैः ॥ रामेश्वरमहालिंगं यो न चिंतयति क्षणम् ॥१२॥ अज्ञानी स च पापी स्यात्स मूको बधिरस्तथा ॥
स जडोंऽधश्च विज्ञेयश्छिद्रं[१] तस्य सदा भवेत् ॥ १३ ॥ धनक्षेत्रसुतादीनां तस्य हानिस्तथा भवेत् ॥ रामेश्वरमहालिंगे सकृद्दृष्टे मुनीश्वराः ॥ १४ ॥
किं काश्या गयया किं वा प्रयागेणापि किं फलम् ॥ दुर्लभं प्राप्य मानुष्यं मानवा यत्र भूतले ॥ १५ ॥ रामनाथमहालिंगं नमस्यंत्यर्चयंति च ॥
जन्म[२] तेषां हि सफलं ते कृतार्थाश्च नेतरे ॥१६॥ रामेश्वरमहालिंगे पूजिते वा स्मृतेपि वा ॥ विष्णुना ब्रह्मणा किं वा शक्रेणाप्यखिलामरैः ॥१७॥
रामनाथमहालिंगं भक्तियुक्ताश्च ये नराः ॥ तेषां प्रणामस्मरणपूजायुक्तास्तु ये नराः ॥ १८ ॥ न ते पश्यंति दुःखानि नैव यांति यमालयम् ॥
ब्रह्महत्यासहस्राणि सुरापानायुतानि च ॥१९॥ दृष्टे रामेश्वरे देवे विलयं यांति कृत्स्नशः ॥ ये वांछंति सदा भोगं राज्यं च त्रिदशालये ॥२०॥ रामे
श्वरमहालिंगं ते नमंतु सकृन्मुदा ॥ यानि कानि च पापानि जन्मकोटिकृतान्यपि ॥ २१ ॥ तानि रामेश्वरे दृष्टे विलयं यांति सर्वदा ॥ संपर्का
त्कौतुकाल्लोभाद्भयाद्वापि च संस्मरन् ॥ २२ ॥ रामेश्वरमहालिंगं नेहामुत्र च दुःखभाक् ॥ रामेश्वरमहालिंगं कीर्तयन्नर्चयन्नपि ॥ २३ ॥ अवश्यं
रुद्रसारूप्यं लभते नात्र संशयः ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात् ॥ २४ ॥ तथा पापानि सर्वाणि रामेश्वरविलोकनात् ॥ रामेश्व
रमहालिंगभक्तिरष्टविधा स्मृता ॥ २५ ॥ तद्भक्तजनवात्सल्यं तत्पूजापरितोषणम् ॥ स्वयं तत्पूजनं भक्त्या तदर्थे देहचेष्टितम् ॥ २६ ॥ तन्माहा
त्म्यकथानां च श्रवणेष्वादरस्तथा ॥ स्वरनेत्रशरीरेषु विकारस्फुरणं तथा ॥ २७ ॥ रामेश्वरमहालिंगस्मरणं संततं तथा ॥ रामेश्वरमहालिंगमाश्रि

१ दरिद्री स सदा भवेत्–इ०पा० । २ तेषां पापविनाशः स्यात्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यैवोपजीवनम् ॥ २८ ॥ एवमष्टविधा भक्तिर्यस्मिन्म्लेच्छेऽपि विद्यते ॥ स एव मुक्तिक्षेत्राणां दायभाक्परिकीर्त्यते ॥ २९ ॥ भक्त्या त्वनन्यया मुक्तिर्ब्रह्मज्ञानेन निश्चिता ॥ वेदांतशास्त्रश्रवणाद्यतीनामूर्ध्वरेतसाम् ॥ ३० ॥ सा च मुक्तिर्विना ज्ञानदर्शनश्रवणोद्भवम् ॥ यत्राश्रमं विना विप्रा विरक्तिं च विना तथा ॥ ३१ ॥ सर्वेषां चैव वर्णानामखिलाश्रमिणामपि ॥ रामेश्वरमहालिंगदर्शनादेव केवलात् ॥ ३२ ॥ अपुनर्भवदा मुक्तिर्भविष्यत्यविलंबिता ॥ कृमिकीटाश्च देवाश्च मुनयश्च तपोधनाः ॥ ३३ ॥ तुल्या रामेश्वरक्षेत्रे रामनाथप्रसादतः ॥ पापं कृतं मयानेकमिति मा क्रियतां भयम् ॥ ३४ ॥ मा गर्वः क्रियतां पुण्यं मयाकारीति वा जनैः ॥ रामेश्वरमहालिंगे सांबरुद्रे विलोकिते ॥ ३५ ॥ न न्यूना नाधिकाश्च स्युः किं तु सर्वे जनाः समाः ॥ रामेश्वरमहालिंगं यः पश्यति सभक्तिकम् ॥ ३६ ॥ न तेन तुल्यतामेति चतुर्वेद्यपि भूतले ॥ रामेश्वरमहालिंगे भक्तो यः श्वपचोऽपि सन् ॥ ३७ ॥ तस्मै दानानि देयानि नान्यस्मै च त्रयीविदे ॥ या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसाम् ॥ ३८ ॥ सा गतिः सर्वजंतूनां रामेश्वरविलोकिनाम् ॥ रामनाथशिवक्षेत्रे ये वसंति नरा द्विजाः ॥ ३९ ॥ ते सर्वे पञ्चवक्त्राः स्युश्चंद्रालंकृतमस्तकाः ॥ नागाभरणसंयुक्तास्तथैव वृषभध्वजाः ॥ ४० ॥ त्रिनेत्रा भस्मदिग्धांगाः कपालाकृतिशेखराः ॥ साक्षात्सांबा महादेवा भवेयुर्नात्र संशयः ॥ ४१ ॥ रामनाथशिवक्षेत्रं ये व्रजंति नरा मुदा ॥ पदेपदेऽश्वमेधानां प्राप्नुयुः सुकृतानि ते ॥ ४२ ॥ रामसेतुं समाश्रित्य रामनाथस्य तुष्टये ॥ ददाति ग्राममेकं यो ब्राह्मणाय सभक्तिकम् ॥४३॥ तेन भूः सकला दत्ता सशैलवनकानना ॥ पत्रं पुष्पं फलं तोयं रामनाथाय यो नरः ॥ ४४ ॥ भक्त्या ददाति तं रक्षेद्रामनाथो ह्यहर्निशम् ॥ रामनाथमहालिंगे सांबे कारुणिके शिवे ॥ ४५ ॥ अत्यंतदुर्लभा भक्तिस्तत्पूजाप्यतिदुर्लभा ॥ स्तोत्रं च दुर्लभं प्रोक्तं स्मरणं चातिदुर्लभम् ॥ ४६ ॥ रामनाथेश्वरं लिंगं महादेवं त्रिलोचनम् ॥ शरणं ये प्रपद्यंते भक्तियुक्तेन चेतसा ॥ ४७ ॥ लाभस्तेषां जयस्तेषामिह लोके परत्र च ॥ रामनाथमहालिंगविषया यस्य शेमुषी ॥ ४८ ॥ दिवारात्रं च भवति स वै धन्यतरो भुवि ॥ रामनाथेश्वरं लिंगं यो न पूजयते शिवम् ॥ ४९ ॥ नायं भुक्तेश्च मुक्तेश्च राज्यानामपि भाजनम् ॥ रामेश्वरमहालिंगं यः पूजयति भक्तितः ॥ ५० ॥ भुक्तिमुक्त्योश्च राज्यानामसौ परमभाजनम् ॥ रामनाथार्चनसमं नाधिकं पुण्यमस्ति वै ॥ ५१ ॥ रामनाथेश्वरं लिंगं द्वेष्टि यो मोहमास्थितः ॥ ब्रह्महत्यायुतं तेन कृतं नरककारणम् ॥ ५२ ॥ तत्संभाषणमात्रेण मानवो नरकं व्रजेत् ॥ रामनाथपरा देवा रामनाथपरा मखाः ॥ ५३ ॥ रामनाथपराः सर्वे तस्मादन्यन्न विद्यते ॥ अतः सर्वं परित्यज्य रामनाथं समाश्रयेत् ॥ ५४ ॥ रामनाथमहालिंगं शरणं याति चेन्नरः ॥ दौर्मत्यं तस्य नास्त्येव शिवलोकं च

CC-0. In Public Domain. Digitization by eGangotri

यास्यति ॥ ५५ ॥ सर्वयज्ञतपोदानतीर्थस्नानेषु यत्फलम् ॥ तत्फलं कोटिगुणितं रामनाथस्य सेवया ॥ ५६ ॥ रामनाथेश्वरं लिंगं चिंतयन्घटिकाद्वयम् ॥ कुलैकवंशमुद्धृत्य शिवलोके महीयते ॥ ५७ ॥ दिनमेकं तु यः पश्येद्रामनाथं महेश्वरम् ॥ इहैव धनवान्भूत्वा सोऽन्ते रुद्रश्च जायते ॥ ५८ ॥ यः स्मरेत्प्रातरुत्थाय रामनाथं महेश्वरम् ॥ अनेनैव शरीरेण स शिवो वर्तते भुवि ॥ ५९ ॥ रामनाथमहालिंगद्रष्टुर्दर्शनमात्रतः ॥ अन्येषां प्राणिनां पापं तत्क्षणादेव नश्यति ॥ ६० ॥ रामनाथेश्वरं लिंगं मध्याह्ने यस्तु पश्यति ॥ सुरापानसहस्राणि तस्य नश्यंति तत्क्षणात् ॥ ॥ ६१ ॥ सायंकाले पश्यति यो रामनाथं सभक्तिकम् ॥ गुरुस्त्रीगमनोत्पन्नपातकं तस्य नश्यति ॥ ६२ ॥ सायंकाले महास्तोत्रैः स्तौति रामेश्वरं तु यः ॥ स्वर्णस्तेयसहस्राणि तस्य नश्यंति तत्क्षणात् ॥ ६३ ॥ स्नानं च धनुषः कोटौ रामनाथस्य दर्शनम् ॥ इति लभ्येत वै पुंसां किं गंगाजलसेवया ॥ ६४ ॥ रामनाथमहालिंगसेवया यत्र लभ्यते ॥ तदन्यद्धर्मजालेन नैव लभ्येत कर्हिचित् ॥ ६५ ॥ रामनाथं महालिंगं यः कदापि न पश्यति ॥ संकरः स तु विज्ञेयो न पितुर्बीजसंभवः ॥ ६६ ॥ रामनाथेतिशब्दं यस्त्रिः पठेत्प्रातरुत्थितः ॥ तस्य पूर्वदिनोत्पन्नपातकं नश्यति क्षणात् ॥ ६७ ॥ रामनाथे महालिंगे भक्तरक्षणदीक्षिते ॥ भोजने विद्यमानेऽपि याचनाः किं प्रयास्यथ ॥ ६८ ॥ रामनाथमहालिंगे प्रसन्ने करुणानिधौ ॥ नश्यंति सकलाः क्लेशा यथा सूर्योदये हिमम् ॥ ६९ ॥ प्राणोत्क्रमणवेलायां रामनाथं स्मरेद्यदि ॥ जन्मनेऽसौ न कल्पेत भूयः शंकरतामियात् ॥ ७० ॥ रामनाथ महादेव मां रक्ष करुणानिधे ॥ इति यः सततं ब्रूयात्कलिनासौ न बाध्यते ॥ ७१ ॥ रामनाथ जगन्नाथ धूर्जटे नीललोहित ॥ इति यः सततं ब्रूयाद्बाध्यतेऽसौ न मायया ॥ ७२ ॥ नीलकण्ठ महादेव रामेश्वर सदाशिव ॥ इति ब्रुवन्सदा जंतुर्नैव कामेन बाध्यते ॥ ७३ ॥ रामेश्वर यमाराते कालकूटविषादन ॥ इतीरयन्जनो नित्यं न क्रोधेन प्रपीड्यते ॥ ७४ ॥ रामनाथालयं यस्तु दारुभिः कुरुते नरः ॥ स पुमान्स्वर्गमाप्नोति त्रिकोटिकुलसंयुतः ॥ ७५ ॥ इष्टकाभिस्तु यः कुर्यात्स वैकुण्ठमवाप्नुयात् ॥ शिलाभिः कुरुते यस्तु स गच्छेद्ब्रह्मणः पदम् ॥ ७६ ॥ स्फटिकादिशिलाभेदैः कुर्वन्नस्यालयं जनः ॥ शिवलोकमवाप्नोति विमानवरमास्थितः ॥ ७७ ॥ रामनाथालयं ताम्रैः कुर्वन्भक्तिपुरःसरम् ॥ शिवसामीप्यमाप्नोति शिवस्यार्द्धासनस्थितः ॥ ७८ ॥ रामेश्वरालयं रूप्यैः कुर्वन्वै मानवो मुदा ॥ शिवसारूप्यमाप्नोति शिववन्मोदते सदा ॥ ७९ ॥ रामनाथालयं हेम्ना यः करोति सभक्तिकम् ॥ स नरो मुक्तिमाप्नोति शिवसायुज्यरूपिणीम् ॥ ८० ॥

१ कालेन–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामनाथालयं हेम्ना धनाढ्यः कुरुते नरः ॥ मृदा दरिद्रः कुरुते तयोः पुण्यं समं स्मृतम् ॥ ८१ ॥ रामनाथमहालिंगस्नानकाले द्विजोत्तमाः ॥ त्रिसंध्यं गेयनृत्ते च मुखवाद्यैश्च काहलम् ॥ ८२ ॥ वाद्यान्यन्यानि कुरुते यः पुमान्भक्तिपूर्वकम् ॥ स महापातकैर्मुक्तो रुद्रलोके महीयते ॥ ॥ ८३ ॥ योभिषेकस्य समये रामनाथस्य शूलिनः ॥ रुद्राध्यायं च चमकं तथा पुरुषसूक्तकम् ॥ ८४ ॥ त्रिसुपर्णं पंचशांतिं पावमान्यादिकं तथा ॥ जपेत्प्रीतियुतो विप्रा नरकं न समश्नुते ॥ ८५ ॥ गवां क्षीरेण दध्ना च पंचगव्यैर्घृतैस्तथा ॥ रामनाथमहालिंगस्नानं नरकनाशनम् ॥ ॥ ८६ ॥ रामनाथमहालिंगं घृतेन स्नापयेच्च यः ॥ कल्पजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ ८७ ॥ रामनाथमहालिंगं गोक्षीरैः स्नापयन्नरः ॥ कुलैकविंशमुत्तार्य शिवलोके महीयते ॥ ८८ ॥ रामनाथमहालिंगं दध्ना संस्नापयन्नरः ॥ सर्वपापविनिर्मुक्तो विष्णुलोके[1] महीयते ॥ ८९ ॥ अभ्यंगं तिलतैलेन रामेश्वरशिवस्य यः ॥ करोति हि सकृद्भक्त्या स कुबेरगृहे वसेत् ॥ ९० ॥ रामनाथमहालिंगे स्नानमिक्षुरसेन यः ॥ सकृदप्याचरेद्भक्त्या चन्द्रलोकं समश्नुते ॥ ९१ ॥ लिकुचाम्ररसोत्पन्नसारेण स्नापयन्नरः ॥ रामनाथमहालिंगं पितृलोकं समश्नुते ॥ ९२ ॥ नालिकेरजलैः स्नानं रामनाथमहेश्वरे ॥ ब्रह्महत्यादिपापानां नाशनं परिकीर्तितम् ॥ ९३ ॥ रामनाथमहालिंगं रंभापक्वैर्विमर्दयन् ॥ विनाश्य सकलं पापं वायुलोके महीयते ॥ ९४ ॥ वस्त्रपूतेन तोयेन रामनाथं महेश्वरम् ॥ स्नापयन्वारुणं लोकमाप्नोति द्विजसत्तमाः ॥ ९५ ॥ चंदनोदकधाराभी रामनाथं महेश्वरम् ॥ स्नापयेत्पुरुषो विप्रा गांधर्वं लोकमाप्नुयात् ॥ ९६ ॥ पुष्पवासिततोयेन हेमसंपृक्तवारिणा ॥ पद्मवासिततोयेन स्नानाद्रामेश्वरस्य तु ॥ ९७ ॥ महेंद्रासनमारुह्य तेनैव सह मोदते ॥ पाटलोत्पलकल्हारपुन्नागकरवीरकैः ९८ ॥ वासितैर्वारिभिर्विप्रा रामेश्वरमहेश्वरम् ॥ अभिषिच्य महद्भिश्च पातकैः स विमुच्यते ॥ ९९ ॥ यानि चान्यानि पुष्पाणि सुरभीणि महांति च ॥ तद्गंधवासितैस्तोयैरभिषिच्य दयानिधिम् ॥ १०० ॥ रामेश्वरमहालिंगं शिवलोके महीयते ॥ एलाकर्पूरलामज्जवासितैः शुद्धवारिभिः ॥ १ ॥ रामेश्वरमहालिंगमभिषिच्य विशुद्धधीः ॥ आग्नेयं लोकमासाद्य सर्वान्कामान्समश्नुते ॥ २ ॥ रामनाथाभिषेकार्थं मृद्घटान्यः प्रयच्छति ॥ इह लोके शतायुः स्यात्सर्वकामसमृद्धिमान् ॥ ३ ॥ ताम्रकुंभप्रदानेन देवेंद्रत्वमवाप्नुयात् ॥ रौप्यकुंभप्रदानेन ब्रह्मलोकं समश्नुते ॥ ४ ॥ हेमकुंभप्रदानेन शिवलोके महीयते ॥ रत्नकुंभप्रदानेन शिवसामीप्यमश्नुते[2] ॥ ५ ॥ रामनाथाभिषेकार्थं नैवेद्यार्थमपि द्विजाः ॥ यो गां पयस्विनीं दद्यात्सोऽश्वमेधफलं लभेत् ॥ ६ ॥ प्राप्नोति शिववेषं च देहांते शिवलोकभाक् ॥ रामसेतौ

१ ब्रह्मलोके-इ० पा० । २ शिवसायुज्यम्-इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

धनुष्कोटौ रामनाथेत्युदीर्य यः ॥ ७ ॥ यत्र क्काप्याचरेत्स्नानं सेतुस्नानफलं लभेत् ॥ सुधाप्रलिप्तं यः कुर्याद्रामनाथशिवालयम् ॥ ८ ॥ तत्पुण्यं
गदितुं नाहं शक्तो वर्षशतादपि ॥ नवीकरोति यो मर्त्यो रामनाथशिवालयम् ॥ ९ ॥ कर्तुः शतगुणं ज्ञेयं तस्य पुण्यफलं द्विजाः ॥ छिन्नं भिन्नं च
यः सम्यग्रामनाथशिवालयम् ॥ ११० ॥ करोति भक्त्या पुरुषो ब्रह्महत्यायुतं दहेत् ॥ रामनाथस्य पुरतो दीपानारोपयन्मुदा ॥ ११ ॥ अविद्याप
टलं भित्त्वा याति ब्रह्म सनातनम् ॥ घृतं तैलं तथा मुद्गाञ्छर्करास्तंडुलान्गुडान् ॥ १२ ॥ प्रयच्छन्रामनाथाय देवेंद्रपदमश्नुते ॥ रामनाथमहा
लिंगदर्शनादर्चनात्स्मृतेः ॥ १३ ॥ स्पर्शनादपि पापानि विलयं यांति तत्क्षणात् ॥ रामनाथाय यो दद्यान्महाघंटां च दर्पणम् ॥१४॥ विमानशतसं
भोगैश्चिरं शिवपुरे वसेत् ॥ भेरीमृदंगपटहनिःसाणमुरजादिकम् ॥ १५ ॥ वंशकांस्यादिवादित्रं तथा वाद्यांतराणि च ॥ प्रयच्छन्रामनाथाय महादे
वाय सादरम् ॥ १६ ॥ स विमानैर्महाभोगैर्वाद्यघोषसमन्वितैः ॥ अनेकयुगपर्यंतं शिवलोके महीयते ॥ १७ ॥ रामनाथं समुद्दिश्य यद्दत्तं स्वल्प
मादरात् ॥ तदनंतफलं दातुः परत्र भवति ध्रुवम् ॥ १८ ॥ रामेश्वरे महाक्षेत्रे रामनाथस्य सन्निधौ ॥ वसन्मुक्तिमवाप्नोति पुनरावृत्तिवर्जिताम् ॥
॥ १९ ॥ आयुः प्रयाति त्वरितं त्वरितं याति यौवनम् ॥ त्वरितं संपदो यांति दारपुत्रादयस्तथा ॥ १२० ॥ राजादिभिर्धनं बाध्यं गृहक्षेत्रादिकं
तथा ॥ सर्वं च क्षणिकं विप्रा गृहोपकरणादिकम् ॥ २१ ॥ तस्मात्सर्वं परित्यज्य संसारस्योपलालनम् ॥ रामेश्वरमहालिंगमापन्नार्तिहरं नृणाम् ॥
॥ २२ ॥ श्रोतव्यं कीर्तितव्यं च स्मर्तव्यं च मनीषिभिः ॥ रामेश्वराय देवाय यो वै ग्रामान्प्रयच्छति ॥ २३ ॥ स हि प्रारब्धदेहांते शिव एव प्रजा
यते ॥ पात्राणामुत्तमं पात्रं रामनाथो महेश्वरः ॥ २४ ॥ तस्मै दत्त्वा द्विजाः सत्यमनंतं सुखमश्नुते ॥ रामनाथमहालिंगदर्शनावधि पातकम् ॥
॥ २५ ॥ दत्त्वा तस्मै जनः किंचित्सार्वभौमो भवेद्ध्रुवम् ॥ तालवृंतं ध्वजं छत्रं चंदनं गुग्गुलुं तथा ॥ २६ ॥ ताम्रकांस्यादिरजतहेमरत्नमयान्घ
टान् ॥ प्रयच्छंत्यभिषेकार्थं रामनाथस्य ये नराः ॥ २७ ॥ भूमंडलाधिपतयो जायंते ते भवांतरे ॥ रामनाथस्य पूजार्थं पुष्पाण्युत्पादयंति ये ॥
॥ २८ ॥ अश्वमेधादियागानां फलान्यद्धाप्नुवंति ते ॥ रामेश्वरे महालिंगे पूजिते नमिते स्मृते ॥ २९ ॥ श्रुते दृष्टे च विप्रेंद्रा दुर्लभं नास्ति किंचन ॥
रामनाथमहालिंगं सेवितुं यः पुमान्व्रजेत् ॥ १३० ॥ तं दृष्ट्वा भयमाप्नोति तस्य पापौघ आशु वै ॥ रामनाथो महादेवो दृष्टो यदि भवेन्नृभिः ॥
॥ ३१ ॥ किं वेदैः किमु वा शास्त्रैः किं वा तीर्थनिषेवणैः ॥ चंदनं कुंकुमं कोष्ठं कस्तूरीं गुग्गुलुं तथा ॥ ३२ ॥ मृगनाभिं

१ सोऽपि कैलासमाप्नुयात्—इ० पा० । २ मुमुक्षुभिः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च सरलं दद्याद्रामेश्वराय यः ॥ स भूमाविह जायेत धनाढ्यो वेदपारगः ॥ ३३ ॥ मुक्ताभरणवस्त्राणि महार्हाणि ददाति यः ॥ राम
नाथाय देवाय नासौ दौर्गत्यमाप्नुयात् ॥ ३४ ॥ रामनाथमहालिंगं गंगातोयैः समाहृतैः ॥ योऽभिषिंचत्यसौ पूज्यः शिवस्यापि न
संशयः ॥ ३५ ॥ यावन्न याति मरणं यावन्नाक्रमते जरा ॥ यावन्नेंद्रियवैकल्यं तावदेव द्विजोत्तमाः ॥३६॥ तावदेव महादेवो रामनाथो मुमुक्षुभिः ॥
वन्द्यः पूज्यश्च मंतव्यः स्तुत्यश्च सततं शिवः ॥ ३७ ॥ रामेश्वरमहालिंगपूजातुल्यो न विद्यते ॥ धर्मः सर्वपुराणेषु सर्वशास्त्रेषु[1] वै तथा ॥ ३८ ॥
रामनाथेश्वरं देवं महाकारुणिकं प्रभुम् ॥ भक्त्या भजंति ये नित्यं ते भूलोके सुखान्विताः ॥ ३९ ॥ भुक्त्वा भोगान्बहुसुखान्पुत्रदारयुता भृशम् ॥
एतच्छरीरपातांते मुक्तिं यास्यंति शाश्वतीम् ॥ ४० ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा रामनाथस्य वै भवम् ॥ यस्त्वेत
च्छृणुयान्नित्यं पठते च सभक्तिकम् ॥ ४१ ॥ स रामनाथसेवायाः फलमाप्नोत्यनुत्तमम् ॥ धनुष्कोटिमहातीर्थस्नानपुण्यं च यास्यति ॥ ४२ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामनाथप्रशंसावर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ ॥ ऋषय ऊचुः ॥ ॥ सर्ववेदार्थतत्त्वज्ञ पुराणार्णवपारग ॥ व्यासपादांबुजद्वंद्वनमस्कारहृताशुभ ॥ १ ॥ पुराणार्थोपदेशेन सर्वप्राण्युपका
रक ॥ त्वया ह्यनुगृहीताः स्म पुराणकथनाद्वयम् ॥ २ ॥ अधुना सेतुमाहात्म्यकथनात्सुतरां मुने ॥ वयं कृतार्थाः संजाता व्यासशिष्य महामते ॥
॥ ३ ॥ यथा प्रातिष्ठिपल्लिंगं रामो दशरथात्मजः ॥ तच्छ्रोतुं वयमिच्छामस्त्वमिदानीं वदस्व नः ॥ ४ ॥ ॥ श्रीसूत उवाच ॥ ॥ यदर्थं स्थापितं
लिंगं गन्धमादनपर्वते ॥ रामचन्द्रेण विप्रेंद्र तदिदानीं ब्रवीमि वः ॥ ५ ॥ हृतभार्यो वनाद्रामो रावणेन बलीयसा ॥ कपिसेनायुतो धीरः ससौमि
त्रिर्महाबलः ॥६॥ महेंद्रं गिरिमासाद्य व्यलोकयत वारिधिम् ॥ तस्मिन्नपारे जलधौ कृत्वा सेतुं रघूद्वहः ॥७॥ तेन गत्वा पुरीं लंकां रावणेनाभिरक्षि
ताम् ॥ अस्तंगते सहस्रांशौ पौर्णमास्यां निशामुखे ॥८॥ रामः ससैनिको विप्राः सुवेलगिरिमारुहत् ॥ ततः सौधस्थितं रात्रौ दृष्ट्वा लंकेश्वरं बली ॥
॥ ९ ॥ सूर्यपुत्रोऽस्य मुकुटं पातयास भूतले ॥ राक्षसो भग्नमुकुटः प्रविवेश गृहोदरम् ॥ १० ॥ गृहं प्रविष्टे लंकेशे रामः सुग्रीवसंयुतः ॥ सानुजः
सेनया सार्द्धमवरुह्य गिरेस्तटात् ॥११॥ सेनां न्यवेशयद्वीरो रामो लंकासमीपतः ॥ ततो निवेशमानांस्तान्वानरान्रावणानुगाः ॥ १२ ॥ अभिज
ग्मुर्महाकायाः सायुधाः सहसैनिकाः ॥ पैर्वणः[1] पूतनो जृंभः खरः क्रोधवशो हरिः ॥१३॥ प्रारुजश्चारुजश्चैव प्रहस्तश्चेतरे तथा ॥ ततोऽभिपततां

१ धर्मशास्त्रेषु—इ०पा० । १ पूर्वणः पूतनः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषामदृश्यानां दुरात्मनाम् ॥ १४ ॥ अन्तर्धानवधं तत्र चकार स्म बिभीषणः ॥ ते दृश्यमाना बलिभिर्हरिभिर्दूरपातिभिः ॥ १५ ॥ निहताः
सर्वतश्चैते न्यपतन्वै गतासवः ॥ अमृष्यमाणः सबलो रावणो निर्ययावथ ॥ १६ ॥ व्यूह्य तान्वानरान्सर्वान्न्यवारयत सायकैः ॥ राघवस्त्वथ
निर्याय व्यूढानीको दशाननम् ॥ १७ ॥ प्रत्ययुध्यत वेगेन द्वंद्वयुद्धमभूत्तदा ॥ युयुधे लक्ष्मणेनाथ इंद्रजिद्रावणात्मजः ॥ १८ ॥ विरूपाक्षेण
सुग्रीवस्तारेयेणापि खर्वटः ॥ पौंड्रेण च नलस्तत्र पुटेशः पनसेन च ॥ १९ ॥ अन्येपि कपयो वीरा राक्षसैर्द्वंद्वमेत्य तु ॥ चक्रुर्युद्धं
सुतुमुलं भीरूणां भयवर्द्धनम् ॥ २० ॥ अथ राक्षांसि भिन्नानि वानरैर्भीमविक्रमैः ॥ प्रदुद्रुवू रणादाशु लंकां रावणपालिताम् ॥ २१ ॥ भग्नेषु
सर्वसैन्येषु रावणप्रेरितेन वै ॥ पुत्रेणेंद्रजिता युद्धे नागास्त्रैरतिदारुणैः ॥ २२ ॥ विद्धौ दाशरथी विप्रा उभौ तौ रामलक्ष्मणौ ॥ मोचितौ वैनते
येन गरुडेन महात्मना ॥ २३ ॥ तत्र प्रहस्तस्तरसा समभ्येत्य बिभीषणम् ॥ गदया ताडयामास विनद्य रणकर्कशः ॥ २४ ॥ स तयाभिहतो
धीमान्गदया भीमवेगया ॥ नाकंपत महाबाहुर्हिमवानिव सुस्थितः ॥ २५ ॥ ततः प्रगृह्य विपुलामष्टघंटां बिभीषणः ॥ अभिमंत्र्य महाशक्तिं चिक्षे
पास्य शिरः प्रति ॥२६॥ पतंत्या स तया वेगाद्राक्षसोऽशनिना यथा ॥ हृतोत्तमांगो ददृशे वातरुग्ण इव द्रुमः ॥२७॥ तं दृष्ट्वा निहतं संख्ये प्रहस्तं
क्षणदाचरम्[१] ॥ अभिदुद्राव धूम्राक्षो वेगेन महता कपीन् ॥ २८ ॥ कपिसैन्यं समालोक्य विद्रुतं पवनात्मजः॥ धूम्राक्षमाजघानाशु शरेण रणमूर्धनि
॥२९॥ धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः ॥ सर्वं राज्ञे यथावृत्तं रावणाय न्यवेदयन् ॥३०॥ ततः शयानं लंकेशः कुम्भकर्णमबोधयत् ॥ प्रबुद्धं
प्रेषयामास युद्धाय स च रावणः ॥ ३१ ॥ आगतं कुम्भकर्णं तं ब्रह्मास्त्रेण तु लक्ष्मणः ॥ जघान समरे क्रुद्धो गतासुर्न्यपतच्च सः ॥ ३२ ॥ दूषण
स्यानुजौ तत्र वज्रवेगप्रमाथिनौ ॥ हनुमन्नीलनिहतौ रावणप्रतिमौ रणे ॥ ३३ ॥ वज्रदंष्ट्रं समवधीद्विश्वकर्मसुतो नलः ॥ अकंपनं च न्यहनत्कुमुदो
वानरर्षभः ॥ ३४ ॥ षष्ठ्यां पराजितो राजा प्राविशच्च पुरीं ततः ॥ अतिकायो लक्ष्मणेन हतश्च त्रिशिरास्तथा ॥ ३५ ॥ सुग्रीवेण हतौ युद्धे देवांत
कनरांतकौ ॥ हनूमता हतौ युद्धे कुम्भकर्णसुतावुभौ ॥ ३६ ॥ बिभीषणेन निहतो मकराक्षः खरात्मजः ॥ तत इन्द्रजितं पुत्रं चोदयामास
रावणः ॥ ३७ ॥ इन्द्रजिन्मोहयित्वा तौ भ्रातरौ रामलक्ष्मणौ ॥ घोरैः शरैरंगदेन हतवाहो दिवि स्थितः ॥ ३८ ॥ कुमुदांगदसुग्रीवनलजांबवदा
दिभिः ॥ सहिता वानराः सर्वे न्यपतंस्तेन घातिताः ॥ ३९ ॥ एवं निहत्य समरेससैन्यौ रामलक्ष्मणौ ॥ अंतर्दधे तदा व्योम्नि मेघनादो महा

१ क्षणदाचरम्—रात्रिंचरम्—राक्षसम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बलः ॥ ४० ॥ ततो बिभीषणो राममिक्ष्वाकुकुलभूषणम् ॥ उवाच प्रांजलिर्वाक्यं प्रणम्य च पुनःपुनः ॥ ४१ ॥ अयमंभो गृहीत्वा तु राजराजस्य शासनात् ॥ गुह्यकोऽभ्यागतो राम त्वत्सकाशमरिंदम ॥ ४२ ॥ इदमंभः कुबेरस्ते महाराज प्रयच्छति ॥ अंतर्हितानां भूतानां दर्शनार्थं परंतप ॥ ४३ ॥ अनेन स्पृष्टनयनो भूतान्यंतर्हितान्यपि ॥ भवान्द्रक्ष्यति यस्मै वा भवानेतत्प्रदास्यति ॥ ४४ ॥ सोऽपि द्रक्ष्यति भूतानि वियत्यंतर्हितानि वै ॥ तथेति रामस्तद्वारि प्रतिगृह्याथ सत्कृतम् ॥ ४५ ॥ चकार नेत्रयोः शौचं लक्ष्मणश्च महाबलः ॥ सुग्रीवजांबवन्तौ च हनुमानंगदस्तथा ॥ ४६ ॥ मैंदद्विविदनीलाश्च ये चान्ये वानरास्तथा ॥ ते सर्वे रामदत्तेन वारिणा शुद्धचक्षुषः ॥ ४७ ॥ आकाशेंतर्हितं वीरमपश्यन्रावणात्मजम् ॥ ततस्तमभिदुद्राव सौमित्रिर्दृष्टिगोचरम् ॥ ४८ ॥ ततो जघान संक्रुद्धो लक्ष्मणः कृतलक्षणः ॥ कुबेरप्रेषितजलैः[1] पवित्रीकृतलोचनः ॥ ॥ ४९ ॥ ततः समभवद्युद्धं लक्ष्मणेंद्रजितोर्महत् ॥ अतीव चित्रमाश्चर्यं शक्रप्रह्लादयोरिव ॥ ५० ॥ ततस्तृतीयदिवसे यत्नेन महता द्विजाः ॥ इंद्रजिन्निहतो युद्धे लक्ष्मणेन बलीयसा ॥ ५१ ॥ ततो मूलबलं सर्वं हतं रामेण धीमता ॥ अथ क्रुद्धो दशग्रीवः प्रियपुत्रे निपातिते ॥ ५२ ॥ निर्ययौ रथमास्थाय नगराद्बहुसैनिकः ॥ रावणो जानकीं हन्तुमुद्युक्तो विंध्यवारितः ॥ ५३ ॥ ततो हर्यश्वयुक्तेन रथेनादित्यवर्चसा ॥ उपतस्थे रणे रामं मातलिः शक्रसारथिः ॥ ५४ ॥ ऐन्द्रं रथं समारुह्य रामो धर्मभृतां वरः ॥ शिरांसि राक्षसेन्द्रस्य ब्रह्मास्त्रेणावधीद्रणे ॥ ५५ ॥ ततो हतदशग्रीवं रामं दशरथात्मजम् ॥ आशीर्भिर्जययुक्ताभिर्देवाः सर्षिपुरोगमाः ॥ ५६ ॥ तुष्टुवुः परिसंतुष्टाः सिद्धविद्याधरास्तथा ॥ रामं कमलपत्राक्षं पुष्पवर्षैरवाकिरन् ॥ ५७ ॥ रामस्तैः सुरसंघातैः सहितः सैनिकैर्वृतः ॥ सीतासौमित्रिसहितः समारुह्य च पुष्पकम् ॥ ५८ ॥ तथाभिषिच्य राजानं लंकायां च बिभीषणम् ॥ कपिसेनावृतो रामो गन्धमादनमन्वगात् ॥५९॥ परिशोध्य च वैदेहीं गंधमादनपर्वते ॥ रामं कमलपत्राक्षं स्थितवानरसंवृतम् ॥ ६० ॥ हतलंकेश्वरं वीरं सानुजं सबिभीषणम् ॥ सभार्यं देववृंदैश्च सेवितं मुनिपुंगवैः ॥ ६१ ॥ मुनयोऽभ्यागता द्रष्टुं दंडकारण्यवासिनः ॥ अगस्त्यं ते पुरस्कृत्य तुष्टुवुर्मैथिलीपतिम् ॥ ६२ ॥ ॥ मुनय ऊचुः ॥ ॥ नमस्ते रामचंद्राय लोकानुग्रहकारिणे ॥ अरावणं जगत्कर्तुमवतीर्णाय भूतले ॥ ६३ ॥ ताटिकादेहसंहर्त्रे गाधिजाध्वररक्षिणे ॥ नमस्ते जितमारीच सुबाहुप्राणहारिणे ॥ ६४ ॥ अहल्यामुक्तिसंदायिपादपंकजरेणवे ॥ नमस्ते हरकोदण्डलीलाभञ्जनकारिणे ॥ ६५ ॥ नमस्ते मैथिलीपाणिग्रहणोत्सवशालिने ॥

---

१ कुबेरमिश्रितजलैः—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नमस्ते रेणुकापुत्रपराजयविधायिने ॥ ६६ ॥ सहलक्ष्मणसीताभ्यां कैकेय्यास्तु वरद्वयात् ॥ सत्यं पितृवचः कर्तुं नमो वनमुपेयुषे ॥ ६७ ॥ भरतप्रार्थनादत्तपादुकायुगुलाय ते ॥ नमस्ते शरभंगस्य स्वर्गप्राप्त्यैकहेतवे ॥ ६८ ॥ नमो विराधसंहर्त्रे गृध्रराजसखाय ते ॥ मायामृगमहाक्रूरमारीचांगविदारिणे ॥ ६९ ॥ सीतापहारिलोकेशयुद्धत्यक्तकलेवरम् ॥ जटायुषं तु संदह्य तत्कैवल्यप्रदायिने ॥ ॥ ७० ॥ नमः कबंधसंहर्त्रे शबरीपूजितांघ्रये ॥ प्राप्तसुग्रीवसख्याय कृतवालिवधाय ते ॥ ७१ ॥ नमः कृतवते सेतुं समुद्रे वरुणालये ॥ सर्वराक्षससंहर्त्रे रावणप्राणहारिणे ॥ ७२ ॥ संसारांबुधिसंतारपोतपादांबुजाय ते ॥ नमो भक्तार्तिसंहर्त्रे सच्चिदानंदरूपिणे ॥ ७३ ॥ नमस्ते रामभद्राय जगतामृद्धिहेतवे ॥ रामादिपुण्यनामानि जपतां पापहारिणे ॥ ७४ ॥ नमस्ते सर्वलोकानां सृष्टिस्थित्यंतकारिणे ॥ नमस्ते करुणामूर्ते भक्तरक्षणदीक्षित ॥ ७५ ॥ ससीताय नमस्तुभ्यं बिभीषणसुखप्रद ॥ लंकेश्वरवधाद्राम पालितं हि जगत्त्वया ॥ ७६ ॥ रक्षरक्ष जगन्नाथ पाह्यस्माञ्जानकीपते ॥ स्तुत्वैवं मुनयः सर्वे तूष्णीं तस्थुर्द्विजोत्तमाः ॥ ७७ ॥ ॥ श्रीसूत उवाच ॥ ॥ य इदं रामचन्द्रस्य स्तोत्रं मुनिभिरीरितम् ॥ त्रिसंध्यं पठते भक्त्या भुक्तिं मुक्तिं च विंदति ॥ ७८ ॥ प्रयाणकाले पठतो न भीतिरुपजायते ॥ एतत्स्तोत्रस्य पठनाद्भूतवेतालकादयः ॥ ॥ ७९ ॥ नश्यंति रोगा नश्यंति नश्यते पापसंचयः ॥ पुत्रकामो लभेत्पुत्रं कन्या विंदति सत्पतिम् ॥ ८० ॥ मोक्षकामो लभेन्मोक्षं धनकामो धनं लभेत् ॥ सर्वान्कामानवाप्नोति पठन्भक्त्या त्विमं स्तवम् ॥ ८१ ॥ ततो रामो मुनीन्प्राह प्रणम्य च कृतांजलिः ॥ अहं विशुद्धये प्राप्यः सकलैरपि मानवैः ॥ ८२ ॥ मद्दृष्टिगोचरो जन्तुर्नित्यमोक्षस्य भाजनम् ॥ तथापि मुनयो नित्यं भक्तियुक्तेन चेतसा ॥ ८३ ॥ स्वात्मलाभेन संतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः शांतान्नमस्याम्यूर्ध्वरेतसः ॥ ८४ ॥ यस्माद्ब्रह्मण्यदेवोऽहमतो विप्रान्भजे सदा ॥ युष्मान्पृच्छाम्यहं किंचित्तद्वदध्वं विचार्य तु ॥ ८५ ॥ रावणस्य वधाद्विप्रा यत्पापं मम वर्तते ॥ तस्य मे निष्कृतिं ब्रूत पौलस्त्यवधजस्य हि ॥ यत्कृत्वा तेन पापेन मुच्येऽहं मुनिपुंगवाः ॥ ८६ ॥ ॥ मुनय ऊचुः ॥ ॥ सत्यव्रत जगन्नाथ जगद्रक्षाधुरंधर ॥ ८७ ॥ सर्वलोकोपकारार्थं कुरु राम शिवार्चनम् ॥ गन्धमादनशृंगेऽस्मिन्महापुण्ये विमुक्तिदे ॥ ८८ ॥ शिवलिंगप्रतिष्ठां त्वं लोकसंग्रहकाम्यया ॥ कुरु राम दशग्रीववधदोषापनुत्तये ॥ ॥ ८९ ॥ लिंगस्थापनजं पुण्यं चतुर्वक्त्रोऽपि भाषितुम् ॥ न शक्नोति ततो वक्तुं किं पुनर्मनुजेश्वर ॥ ९० ॥ यत्त्वया स्थाप्यते लिंगं गन्ध

१ पठताम्–इ०पा०। २ भूतवेतालिका इह–इ० पा०। ३ विप्रा–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादनपर्वते ॥ अस्य संदर्शनं पुंसां काशीलिंगावलोकनात् ॥ ९१ ॥ अधिकं कोटिगुणितं फलमत्रस्त्यान्न संशयः ॥ तत्र नाम्ना त्विदं लिंगं लोके
ख्यातिं समश्नुताम् ॥ ९२ ॥ नाशकं पुण्यपापाख्यकाष्ठानां दहनोपमम् ॥ इदं रामेश्वरं लिंगं ख्यातं लोके भविष्यति ॥ ९३ ॥ मा विलंबं
कुरुष्वातो लिंगस्थापनकर्मणि ॥ रामचंद्र महाभाग करुणापूर्णविग्रह ॥ ९४ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति श्रुत्वा वचो रामो मुनीनां तं
मुनीश्वराः ॥ पुण्यकालं विचार्याथ द्विमुहूर्तं जगत्पतिः ॥ ९५ ॥ कैलासं प्रेषयामास हनुमन्तं शिवालयम् ॥ शिवलिंगं समानेतुं स्थापनार्थं
रघूद्वहः ॥ ९६ ॥ ॥ राम उवाच ॥ ॥ हनूमन्नंजनीसूनो वायुपुत्र महाबल ॥ कैलासं त्वरितो गत्वा लिंगमानय मा चिरम् ॥ ९७ ॥
इत्याज्ञप्तस्स रामेण भुजावास्फाल्य वीर्यवान् ॥ मुहूर्तद्वितयं ज्ञात्वा पुण्यकालं कपीश्वरः ॥ ९८ ॥ पश्यतां सर्वदेवानामृषीणां च महात्मनाम् ॥
उत्पपात महावेगश्चालयन्गंधमादनम् ॥९९॥ लंघयन्स वियन्मार्गं कैलासं पर्वतं ययौ ॥ न ददर्श महादेवं लिंगरूपधरं कपिः॥१००॥ कैलासे पर्वते
तस्मिन्पुण्ये शंकरपालिते ॥ आंजनेयस्तपस्तेपे लिंगप्राप्त्यर्थमादरात् ॥ १ ॥ प्रागग्रेषु समासीनः कुशेषु मुनिपुंगवाः ॥ ऊर्ध्वबाहुर्निरा
लम्बो निरुच्छ्वासो जितेंद्रियः ॥ २ ॥ प्रसादयन्महादेवं लिंगं लेभे स मारुतिः ॥ एतस्मिन्नंतरे विप्रा मुनिभिस्तत्त्वदर्शिभिः ॥ ३ ॥
अनागतं हनूमं कालं स्वल्पावशेषितम् ॥ ज्ञात्वा प्रकथितं तत्र रामं प्रति महामतिम् ॥ ४ ॥ रामराम महाबाहो कालो ह्यत्येति
सांप्रतम् ॥ जानक्या यत्कृतं लिंगं सैकतं लीलया विभो ॥ ५ ॥ तल्लिंगं स्थापयस्वाद्य महालिंगमनुत्तमम् ॥ श्रुत्वैतद्वचनं रामो जानक्या सह
सत्वरम् ॥ ६ ॥ मुनिभिः सहितः प्रीत्या कृतकौतुकमंगलः ॥ ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः ॥ ७ ॥ गरानंदे व्यतीपाते कन्या
चन्द्रे वृषे रवौ ॥ दशयोगे महापुण्ये गन्धमादनपर्वते ॥ ८ ॥ सेतुमध्ये महादेवं लिंगरूपधरं हरम् ॥ ईशानं कृत्तिवसनं गंगाचंद्रकलाधरम् ॥ ९ ॥
रामो वै स्थापयामास शिवलिंगमनुत्तमम् ॥ लिंगस्थं पूजयामास राघवः सांबमीश्वरम् ॥ ११० ॥ लिंगस्थः स महादेवः पार्वत्या सह शंकरः ॥
प्रत्यक्षमेव भगवान्दत्तवान्वरमुत्तमम् ॥ ११ ॥ सर्वलोकशरण्याय राघवाय महात्मने ॥ त्वयात्र स्थापितं लिंगं ये पश्यंति रघूद्वह ॥ १२ ॥
महापातकयुक्ताश्च तेषां पापं प्रणश्यति ॥ सर्वाण्यपि हि पापानि धनुष्कोटौ निमज्जनात् ॥ १३ ॥ दर्शनाद्रामलिंगस्य पातकानि महांत्यपि ॥
विलयं यांति राजेंद्र रामचन्द्र न संशयः ॥ १४ ॥ प्रादाद्देवं हि रामाय वरं देवोंऽबिकापतिः ॥ तदग्रे नंदिकेशं च स्थापयामास राघवः ॥
॥ १५ ॥ ईश्वरस्याभिषेकार्थं धनुष्कोट्याथ राघवः ॥ एकं कूपं धरां भित्त्वा जनयामास वै द्विजाः ॥ १६ ॥ तस्माज्जलमुपादाय स्नापया

CC-0. In Public Domain. Digitization by eGangotri

मास शंकरम् ॥ कोटितीर्थमिति प्रोक्तं तत्तीर्थं पुण्यमुत्तमम् ॥ १७ ॥ उक्तं तद्वैभवं पूर्वमस्माभिर्मुनिपुंगवाः ॥ देवाश्च मुनयो नागा गन्धर्वाप्स
रसां गणाः ॥ सर्वेपि वानरा लिंगमेकैकं चक्रुरादरात् ॥ १८ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्रा यथा रामेण धीमता ॥ १९ ॥
स्थापितं शिवलिंगं वै भुक्तिमुक्तिप्रदायकम् ॥ इमां लिंगप्रतिष्ठां यः शृणोति पठतेऽथवा ॥ १२० ॥ स रामेश्वरलिंगस्य सेवाफलमवाप्नुयात् ॥
सायुज्यं च समाप्नोति रामनाथस्य वैभवात् ॥ १२१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये
रामनाथलिंगप्रतिष्ठाविधिवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं प्रतिष्ठिते लिंगे रामेणाक्लिष्टकारिणा ॥ लिंगं
वरं समादाय मारुतिः सहसाऽऽययौ ॥ १ ॥ रामं दाशरथिं वीरमभिवाद्य स मारुतिः ॥ वैदेहीलक्ष्मणौ पश्चात्सुग्रीवं प्रणनाम च ॥ २ ॥ सीता
सैकतलिंगं तत्पूजयंतं रघूद्वहम् ॥ दृष्ट्वाथ मुनिभिः सार्द्धं चुकोप पवनात्मजः ॥ ३ ॥ अत्यंतं खेदखिन्नः सन्वृथाकृतपरिश्रमः ॥ उवाच रामं[2]
धर्मज्ञं हनूमानंजनात्मजः ॥ ४ ॥ ॥ हनूमानुवाच ॥ ॥ दुर्जातोऽहं वृथा राम लोके क्लेशाय केवलम् ॥ खिन्नोऽस्मि बहुशो देव राक्षसैः
क्रूरकर्मभिः ॥ ५ ॥ मा स्म सीमंतिनी काचिज्जनयेन्मादृशं सुतम् ॥ यतोऽनुभूयते दुःखमनंतं भवसागरे ॥ ६ ॥ खिन्नोऽस्मि सेवया पूर्वं
युद्धेनापि ततोधिकम् ॥ अनन्तं दुःखमधुना यतो मामवमन्यसे ॥ ७ ॥ सुग्रीवेण च भार्यार्थं राज्यार्थं राक्षसेन च ॥ रावणावरजेन त्वं सेवितो
ऽसि रघूद्वह ॥ ८ ॥ मया निर्हेतुकं राम सेवितोऽसि महामते ॥ वानराणामनेकेषु त्वयाज्ञतोऽहमद्य वै ॥ ९ ॥ शिवलिंगं समानेतुं कैलासात्पर्वतो
त्तमात् ॥ कैलासं त्वरितो गत्वा न चापश्यं पिनाकिनम् ॥ १० ॥ तपसा प्रीणयित्वा तं सांबं वृषभवाहनम् ॥ प्राप्तलिंगो रघुपते त्वरितः समु
पागतः ॥ ११ ॥ अन्यलिंगं त्वमधुना प्रतिष्ठाप्य तु सैकतम् ॥ मुनिभिर्देवगन्धर्वैः साकं पूजयसे विभो ॥ १२ ॥ मयानीतमिदं लिंगं कैलासा
त्पर्वताद्वृथा ॥ अहो भाराय मे देहो मन्दभाग्यस्य जायते ॥ १३ ॥ भूतलस्य महाराज जानकीरमण प्रभो ॥ इदं दुःखमहं सोढुं न शक्नोमि
रघूद्वह ॥ १४ ॥ किं करिष्यामि कुत्राहं गमिष्यामि न मे गतिः ॥ अतः शरीरं त्यक्ष्यामि त्वयाहमवमानितः ॥ १५ ॥ ॥ श्रीसूत उवाच ॥
एवं स बहुशो विप्राः क्रुशित्वा पवनात्मजः ॥ दण्डवत्प्रणतो भूमौ क्रोधशोकाकुलोऽभत् ॥ १६ ॥ तं दृष्ट्वा रघुनाथोऽपि[3] प्रहसन्नि
दमब्रवीत् ॥ पश्यतां सर्वदेवानां मुनीनां कपिरक्षसाम् ॥ सांत्वयन्मारुतिं तत्र दुःखं चास्य प्रमार्जयन् ॥ १७ ॥ ॥ श्रीराम उवाच ॥

१ लिंगद्वयम्--इ०पा० । २ वाचम्--इ०पा० । ३ राघवश्चापि--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वं जानाम्यहं कार्यमात्मनोऽपि परस्य च ॥ १८ ॥ जातस्य जायमानस्य मृतस्यापि सदा कपे ॥ जायते म्रियते जन्तुरेक एव स्वकर्मणा १९ ॥ प्रयाति नरकं चापि परमात्मा तु निर्गुणः ॥ एवं तत्त्वं विनिश्चित्य शोकं मा कुरु वानर ॥ २० ॥ लिंगत्रयविनिर्मुक्तं ज्योतिरेकं निरंजनम् ॥ निराश्रयं निर्विकारमात्मानं पश्य नित्यशः ॥ २१ ॥ किमर्थं कुरुषे शोकं तत्त्वज्ञानस्य बाधकम् ॥ तत्त्वज्ञाने सदा निष्ठां कुरु वानरसत्तम ॥ २२ ॥ स्वयंप्रकाशमात्मानं ध्यायस्व सततं कपे ॥ देहादौ ममतां मुंच तत्त्वज्ञानविरोधिनीम् ॥ २३ ॥ धर्मं भजस्व सततं प्राणिहिंसां परित्यज ॥ सेवस्व साधुपुरुषाञ्जहि सर्वेंद्रियाणि च ॥ २४ ॥ परित्यजस्व सततमन्येषां दोषकीर्तनम् ॥ शिवविष्ण्वादिदेवानामर्चां कुरु सदा कपे ॥ २५ ॥ सत्यं वदस्व सततं परित्यज शुचं कपे ॥ प्रत्यग्ब्रह्मैकताज्ञानं मोहवस्तुसमुद्भवम् ॥ २६ ॥ शोभनाशोभना भ्रांतिः कल्पितास्मिन्यथार्थवत् ॥ अध्यास्ते शोभनत्वेन पदार्थे मोहवैभवात् ॥ २७ ॥ रोगो विजायते नृणां भ्रांतानां कपिसत्तम ॥ रागद्वेषबलाद्बद्धा धर्माधर्मवशंगताः ॥ २८ ॥ देवतिर्यङ्मनुष्याद्या निरयं यांति मानवाः ॥ चंदनागरुकर्पूरप्रमुखा अतिशोभनाः ॥ २९ ॥ मलं भवंति यत्स्पर्शात्तच्छरीरं कथं सुखम् ॥ भक्ष्यभोज्यादयः सर्वे पदार्था अतिशोभनाः ॥३०॥ विष्ठा[१] भवंति यत्संगात्तच्छरीरं कथं सुखम्॥ सुगंधि शीतलं तोयं मूत्रं यत्संगमाद्भवेत् ॥३१॥ तत्कथं शोभनं पिंडं भवेद्ब्रूहि कपेऽधुना ॥ अतीव धवलाः शुद्धाः पटा यत्संगमेन हि ॥३२॥ भवंति मलिनाः स्वेदात्तत्कथं शोभनं भवेत् ॥ श्रूयतां परमार्थो मे हनूमन्वायुनंदन ॥ ३३ ॥ अस्मिन्संसारगर्ते तु किंचित्सौख्यं न विद्यते ॥ प्रथमं जंतुराप्नोति जन्म बाल्यं ततः परम् ॥ ॥३४॥ पश्चाद्यौवनमाप्नोति ततो वार्धक्यमश्नुते ॥ पश्चान्मृत्युमवाप्नोति[२] पुनर्जन्म तदश्नुते ॥३५॥ अज्ञानवैभवादेव दुःखमाप्नोति मानवः ॥ तदज्ञाननिवृत्तौ तु प्राप्नोति सुखमुत्तमम् ॥३६॥ अज्ञानस्य निवृत्तिस्तु ज्ञानादेव न कर्मणा ॥ ज्ञानं नाम परं ब्रह्म ज्ञानं वेदांतवाक्यजम् ॥३७॥ तज्ज्ञानं च विरक्तस्य जायते नेतरस्य हि ॥ मुख्याधिकारिणः सत्यमाचार्यस्य प्रसादतः ॥३८॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः ॥ तदा मर्त्योऽमृतोऽत्रैव परं ब्रह्म समश्नुते ॥ ३९ ॥ जाग्रतं च स्वपंतं च भुंजंतं च स्थितं तथा ॥ इमं जनं सदा क्रूरः कृतांतः परिकर्षति ॥ ४० ॥ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः ॥ संयोगा विप्रयोगांता मरणांतं च जीवितम् ॥ ४१ ॥ यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् ॥ यथा नराणां जातानां नान्यत्र पतनाद्भयम् ॥ ४२ ॥ यथा गृहं दृढस्तंभं जीर्णं काले विनश्यति ॥ एवं विनश्यंति नरा जरामृत्युवशंगताः ॥ ४३ ॥ अहोरात्र

१ विष्ठा—इ० पा० । २ पुनश्च मृत्युमापन्नः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य गमनान्नृणामायुर्विनश्यति ॥ आत्मानमनुशोच त्वं किमन्यमनुशोचसि ॥ ४४ ॥ नश्यत्यायुः स्थितस्यापि धावतोऽपि कपीश्वर ॥ सहैव मृत्यु
र्व्रजति सह मृत्युर्निषीदति ॥ ४५ ॥ चारित्वा दूरदेशं च सह मृत्युर्निवर्तते ॥ शरीरे वलयः प्राप्ताः श्वेता जाताः शिरोरुहाः ॥ ४६ ॥ जीर्यते
जरया देहः श्वासकासादिना तथा ॥ यथा काष्ठं च काष्ठं च समेयातां महोदधौ ॥ ४७ ॥ समेत्य च व्यपेयातां कालयोगेन वानर ॥ एवं भार्या
च पुत्रश्च बंधुक्षेत्रधनानि च ॥ ४८ ॥ क्वचित्संभूय गच्छंति पुनरन्यत्र वानर ॥ यथा[1] हि पांथं गच्छंतं पथि कश्चित्पथि स्थितः॥ ४९ ॥ अहमप्या
गमिष्यामि भवद्भिः साकमित्यथ ॥ कंचित्कालं समेतौ तौ पुनरन्यत्र गच्छतः ॥ ५० ॥ एवं भार्यासुतादीनां संगमो नश्वरः कपे ॥ श[2]रीरजन्मना
साकं मृत्युः संजायते ध्रुवम् ॥ ५१ ॥ अवश्यंभाविमरणे न हि जातु प्रतिक्रिया ॥ एतच्छरीरपाते तु देही कर्मगतिं गतः ॥ ५२ ॥ प्राप्य पिंडां
तरं वत्स पूर्वपिंडं त्यजत्यसौ ॥ प्राणिनां न सदैकत्र वासो भवति वानर ॥ ५३ ॥ स्वस्वकर्मवशात्सर्वे वियुज्यंते पृथक्पृथक् ॥ यथा प्राणिशरी
राणि नश्यंति च भवंति च ॥ ५४ ॥ आत्मनो जन्ममरणे नैव स्तः कपिसत्तम ॥ अतस्त्वमंजनासूनो विशोकं ज्ञानमद्वयम् ॥
॥ ५५ ॥ सद्रूपममलं ब्रह्म चिंतयस्व दिवानिशम् ॥ त्वत्कृतं मत्कृतं कर्म मत्कृतं त्वाकृतं तथा ॥ ५६ ॥ मल्लिंगस्थापनं तस्मात्त्वल्लिंग
स्थापनं कपे ॥ मुहूर्तातिक्रमाल्लिंगं सैकतं सीतया कृतम् ॥ ५७ ॥ मयात्र स्थापितं तस्मात्कोपं दुःखं च मा कुरु ॥ कैलासादागतं लिंगं
स्थापयास्मिञ्छुभे दिने ॥ ५८ ॥ तव नाम्ना त्विदं लिंगं यातु लोकत्रये प्रथाम् ॥ हनूमदीश्वरं दृष्ट्वा द्रष्टव्यो राघवेश्वरः ॥ ५९ ॥ ब्रह्मराक्षसयू
थानि हतानि भवता कपे ॥ अतः स्वनाम्ना लिंगस्य स्थापनात्त्वं प्रमोक्ष्यसे ॥ ६० ॥ स्वयं हरेण दत्तं तु हनूमन्नामकं शिवम् ॥ संपश्यन्राम
नाथं च कृतकृत्यो भवेन्नरः ॥ ६१ ॥ योजनानां सहस्रेऽपि स्मृत्वा लिंगं हनूमतः ॥ रामनाथेश्वरं चापि स्मृत्वा सायुज्यमाप्नुयात् ॥ ६२ ॥
तेनेष्टं सर्वयज्ञैश्च तपश्चाकारि कृत्स्नशः ॥ येन दृष्टौ महादेवौ हनूमद्राघवेश्वरौ ॥ ६३ ॥ हनूमता कृतं लिंगं यच्च लिंगं मया कृतम् ॥ जानकीयं
च यल्लिंगं यल्लिंगं लक्ष्मणेश्वरम् ॥ ६४ ॥ सुग्रीवेण कृतं यच्च सेतुकर्त्रा नलेन च ॥ अंगदेन च नीलेन तथा जांबवता कृतम् ॥ ६५ ॥ बिभीष
णेन यच्चापि रत्नलिंगं प्रतिष्ठितम् ॥ इन्द्राद्यैश्च कृतं लिंगं यच्छेषाद्यैः प्रतिष्ठितम् ॥ ६६ ॥ इत्येकादशरूपोऽयं शिवः साक्षाद्विभासते ॥ सदा
ह्येतेषु लिंगेषु संनिधत्ते महेश्वरः ॥ ६७ ॥ तत्स्वपापौघशुद्ध्यर्थं स्थापयस्व महेश्वरम् ॥ अथ चेत्त्वं महाभाग लिंगमुत्सा[4]दयिष्यसि ॥ ६८ ॥

॥ ८५ ॥

१ यथा हि पांथा गच्छन्ति केचित्क्वचित्पथि स्थिताः–इ० पा० । २ जातस्य जन्मना–इ० पा० । ३ जहाति–इ० पा० । ४ उत्पाटयिष्यसि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयात्र स्थापितं वत्स सीतया सैकतं कृतम् ॥ स्थापयिष्यामि च ततो लिंगमेतत्त्वया कृतम् ॥ ६९ ॥ पातालं सुतलं प्राप्य वितलं च रसातलम् ॥ तलातलं च तदिदं भेदयित्वा तु तिष्ठति ॥ ७० ॥ प्रतिष्ठितं मया लिंगं भेत्तुं कस्य बलं भवेत् ॥ उत्तिष्ठ लिंगमुद्वास्य मयैतत्स्थापितं कपे ॥ ॥ ७१ ॥ त्वया समाहृतं लिंगं स्थापयस्वाशु मा शुचः ॥ इत्युक्तस्तं प्रणम्याथाज्ञातसत्त्वोऽथ वानरः ॥ ७२ ॥ उद्वासयामि वेगेन सैकतं लिंगमुत्तमम् ॥ संस्थापयामि कैलासादानीतं लिंगमादरात् ॥ ७३ ॥ उद्वासने सैकतस्य कियान्भारो भवेन्मम ॥ चेतसैवं विचार्यायं हनूमान्मारुतात्मजः ॥ ७४ ॥ पश्यतां सर्वदेवानां मुनीनां कपिरक्षसाम् ॥ पश्यतो रामचन्द्रस्य लक्ष्मणस्यापि पश्यतः ॥ ७५ ॥ पश्यंत्या अपि वैदेह्या लिंगं तत्सैकतं बलात् ॥ पाणिना सर्वयत्नेन जग्राह तरसा बली ॥ ७६ ॥ यत्नेन महता चायं चालयन्नपि मारुतिः ॥ नालं चालयितुं ह्यासीत्सैकतं लिंगमोजसा ॥ ७७ ॥ ततः किलकिलाशब्दं कुर्वन्वानरपुंगवः ॥ पुच्छमुद्यम्य पाणिभ्यां निरास्थत्तन्निजौजसा ॥ ७८ ॥ इत्यनेकप्रकारेण चालयन्नपि वानरः ॥ नैव चालयितुं शक्तो बभूव पवनात्मजः ॥ ७९ ॥ तद्वेष्टयित्वा पुच्छेन पाणिभ्यां धरणीं स्पृशन् ॥ उत्पपाताथ तरसा व्योम्नि वायुसुतः कपिः ॥ ८० ॥ कंपयन्स धरां सर्वां सप्तद्वीपां सपर्वताम् ॥ लिंगस्य क्रोशमात्रे तु मूर्च्छितो रुधिरं वमन् ॥ ८१ ॥ पपात हनुमान्विप्राः कंपितांगो धरातले ॥ पततो वायुपुत्रस्य वक्त्राच्च नयनद्वयात् ॥ ८२ ॥ नासापुटाच्छ्रोत्ररंध्राददपानाच्च द्विजोत्तमाः ॥ रुधिरौघः प्रसुस्राव रक्तकुण्डमभूच्च तत् ॥ ८३ ॥ ततो हाहाकृतं सर्वं सदेवासुरमानुषम् ॥ धावंतौ कपिभिः सार्द्धमुभौ तौ रामलक्ष्मणौ ॥ ८४ ॥ जानकीसहितौ विप्रा ह्यास्तां शोकाकुलौ तदा ॥ सीतया सहितौ वीरौ वानरैश्च महाबलौ ॥ ८५ ॥ रुरुचाते तदा विप्रा गन्धमादनपर्वते ॥ यथा तारागणयुतौ रजन्यां शशिभास्करौ ॥ ८६ ॥ ददर्शतुर्हनूमंतं चूर्णीकृतकलेवरम् ॥ मूर्च्छितं पतितं भूमौ वमन्तं रुधिरं मुखात् ॥ ८७ ॥ विलोक्य कपयः सर्वे हाहाकृत्वाऽपतन्भुवि ॥ कराभ्यां सदयं सीता हनूमंतं मरुत्सुतम् ॥ ८८ ॥ तातताततेति पस्पर्श पतितं धरणीतले ॥ रामोऽपि दृष्ट्वा पतितं हनूमंतं कपीश्वरम् ॥ ॥ ८९ ॥ आरोप्यांकं स्वपाणिभ्यामाममर्श कलेवरम् ॥ विमुंचन्नेत्रजं वारि वायुजं चाब्रवीद्द्विजाः ॥ ९० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामचन्द्रतत्त्वज्ञानोपदेशवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीराम उवाच ॥ ॥ पंपारण्ये वयं दीनास्त्वया वानरपुंगव ॥ आश्वासिताः कारयित्वा सख्यमादित्यसूनुना ॥ १ ॥

१ देवद्य—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

त्वां दृष्ट्वा पितरं बन्धून्कौसल्यां जननीमपि ॥ न स्मरामो वयं सर्वान्मे त्वयोपकृतं बहु ॥ २ ॥ मदर्थं सागरस्तीर्णो भवता बहु योजनः ॥ तलप्रहाराभिहतो मैनाकोऽपि नगोत्तमः ॥ ३ ॥ नागमाता च सुरसा मदर्थं भवता जिता ॥ छायाग्रहां महाक्रूराम् वधीद्राक्षसीं भवान् ॥ ४ ॥ सायं सुवेलमासाद्य लंकामाहत्य पाणिना ॥ अयासी रावणगृहं मदर्थं त्वं महाकपे ॥ ५ ॥ सीतामन्विष्य लंकायां रात्रौ गतभयो भवान् ॥ अदृष्ट्वा जानकीं पश्चादशोकवनिकां ययौ ॥ ६ ॥ नमस्कृत्य च वैदेहीमभिज्ञानं प्रदाय च ॥ चूडामणिं समादाय मदर्थं जानकीकरात् ॥ ७ ॥ अशोकवनिकावृक्षानभांक्षीस्त्वं महाकपे ॥ ततस्त्वशीतिसाहस्रान्किंकरान्नाम राक्षसान् ॥ ८ ॥ रावणप्रतिमान्युद्धे पत्यश्वेभरथाकुलान् ॥ अवधीस्त्वं मदर्थे वै महाबलपराक्रमान् ॥ ९ ॥ ततः प्रहस्ततनयं जंबुमालिनमागतम् ॥ अवधीन्मंत्रितनयान्सप्त सप्ता र्चिवर्चसः ॥ १० ॥ पंच सेनापतीन्पश्चादनयस्त्वं यमालयम् ॥ कुमारमक्षमवधीस्ततस्त्वं रणमूर्धनि ॥ ११ ॥ तत इन्द्रजिता नीतो राक्षसेंद्र सभां शुभाम् ॥ तत्र लंकेश्वरं वाचा तृणीकृत्यावमन्य च ॥ १२ ॥ अभांक्षीस्त्वं पुरीं लंकां मदर्थं वायुनंदन ॥ पुनः प्रतिनिवृत्तस्त्वमृष्यमूकं महागिरिम् ॥ १३ ॥ एवमादि महादुःखं मदर्थं प्राप्तवानसि ॥ त्वमत्र भूतले शेषे मम शोकमुदीरयन् ॥ १४ ॥ अहं प्राणान्परित्यक्ष्ये मृतोऽसि यदि वायुज ॥ सीतया मम किं कार्यं लक्ष्मणेनानुजेन वा ॥ १५ ॥ भरतेनापि किं कार्यं शत्रुघ्नेन श्रियापि वा ॥ राज्येनापि न मे कार्यं परेतस्त्वं कपे यदि ॥ १६ ॥ उत्तिष्ठ हनुमन्वत्स किं शेषेऽद्य महीतले ॥ शय्यां कुरु महाबाहो निद्रार्थं मम वानर ॥ १७ ॥ कन्दमूलफलानि त्वमाहारार्थं ममाहर ॥ स्नातुमद्य गमिष्यामि शीघ्रं कलशमानय ॥ १८ ॥ अजिनानि च वासांसि दर्भांश्च समुपाहर ॥ ब्रह्मास्त्रेणावबद्धोऽहं मोचि तश्च त्वया हरे ॥ १९ ॥ लक्ष्मणेन सह भ्रात्रा ह्यौषधानयनेन वै ॥ लक्ष्मणप्राणदाता त्वं पौलस्त्यमदनाशनः ॥ २० ॥ सहायेन त्वया युद्धे राक्षसा न्रावणादिकान् ॥ निहत्यातिबलान्वीरानवापं मैथिलीमहम् ॥ २१ ॥ हनूमन्नंजनासूनो सीताशोकविनाशन ॥ कथमेवं परित्यज्य लक्ष्मणं मां च जानकीम् ॥ २२ ॥ अप्रापयित्वायोध्यां त्वं किमर्थं गतवानसि ॥ क्व गतोसि महावीर महाराक्षसकण्टक ॥ २३ ॥ इति पश्यन्मुखं तस्य निर्वाक्यं रघुनंदनः ॥ प्ररुदन्नश्रुजालेन सेचयामास वायुजम् ॥ २४ ॥ वायुपुत्रस्ततो मूर्च्छामपहाय शनैर्द्विजाः ॥ पौलस्त्यभयसंत्रस्तलोकर क्षार्थमागतम् ॥ २५ ॥ आश्रित्य मानुषं भावं नारायणमजं विभुम् ॥ जानकीलक्ष्मणयुतं कपिभिः परिवारितम् ॥ २६ ॥ कालांभोधरसंकाशं

१ आर्षमेतत् । पादादौ तेमयादिशनिषेधात् । २ किरातान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रणधूलिसमुक्षितम् ॥ जटामण्डलशोभाढ्यं पुण्डरीकायतेक्षणम् ॥ २७ ॥ खिन्नं च बहुशो युद्धे ददर्श रघुनंदनम् ॥ स्तूयमानममित्रघ्नं देवर्षिपितृ
किन्नरैः ॥ २८ ॥ दृष्ट्वा दाशरथिं रामं कृपाबहुलचेतसम् ॥ रघुनाथकरस्पर्शपूर्णगात्रः स वानरः ॥ २९ ॥ पतित्वा दण्डवद्भूमौ कृतांजलिपुटो
द्विजाः ॥ अस्तौषीज्जानकीनाथं स्तोत्रैः श्रुतिमनोहरैः ॥ ३० ॥ ॥ हनूमानुवाच ॥ ॥ नमो रामाय हरये विष्णवे प्रभविष्णवे ॥ आदि
देवाय देवाय पुराणाय गदाभृते ॥ ३१ ॥ विष्टरे पुष्पके नित्यं निविष्टाय महात्मने ॥ प्रहृष्टवानरानीकजुष्टपादांबुजाय ते ॥ ३२ ॥ निष्पिष्ट
राक्षसेंद्राय जगदिष्टविधायिने ॥ नमः सहस्रशिरसे सहस्रचरणाय च ॥ ३३ ॥ सहस्राक्षाय शुद्धाय राघवाय च विष्णवे ॥ भक्तार्तिहारिणे तुभ्यं
सीतायाः पतये नमः ॥ ३४ ॥ हरये नारसिंहाय दैत्यराजविदारिणे ॥ नमस्तुभ्यं वराहाय दंष्ट्रोद्धृतवसुन्धर ॥ ३५ ॥ त्रिविक्रमाय भवते बलियज्ञ
विभेदिने ॥ नमो वामनरूपाय नमोमंदरधारिणे[1] ॥ ३६ ॥ नमस्ते मत्स्यरूपाय त्रयीपालनकारिणे ॥ नमः परशुरामाय क्षत्रियांतकराय ते ॥३७॥
नमस्ते राक्षसघ्नाय नमोराघवरूपिणे ॥ महादेवमहाभीममहाकोदण्डभेदिने ॥ ३८ ॥ क्षत्रियांतकरक्रूरभार्गवत्रासकारिणे ॥ नमोऽस्त्वहिल्या
संतापहारिणे चापहारिणे ॥ ३९ ॥ नागायुतबलोपेतताटकादेहहारिणे ॥ शिलाकठिनविस्तारवालिवक्षोविभेदिने ॥ ४० ॥ नमो माया
मृगोन्माथकारिणेऽज्ञानहारिणे ॥ दशस्यंदनदुःखाब्धिशोषणागस्त्यरूपिणे ॥ ४१ ॥ अनेकोर्मिसमाधूतसमुद्रमदहारिणे ॥ मैथिलीमानसां
भोजभानवे लोकसाक्षिणे ॥ ४२ ॥ राजेंद्राय नमस्तुभ्यं जानकीपतये हरे ॥ तारकब्रह्मणे तुभ्यं नमो राजीवलोचन ॥ ४३ ॥ रामा
य रामचन्द्राय वरेण्याय सुखात्मने ॥ विश्वामित्रप्रियायेदं नमः खरविदारिणे ॥ ४४ ॥ प्रसीद देवदेवेश भक्तानामभयप्रद ॥ रक्ष मां करु
णासिंधो रामचन्द्र नमोऽस्तु ते ॥ ४५ ॥ रक्ष मां वेदवचसामप्यगोचर राघव ॥ पाहि मां कृपया राम शरणं त्वामुपैम्यहम् ॥ ४६ ॥
रघुवीर महामोहमपाकुरु ममाधुना ॥ स्नाने चाचमने भुक्तौ जाग्रत्स्वप्नसुषुप्तिषु ॥ ४७ ॥ सर्वावस्थासु सर्वत्र पाहि मां रघुनंदन ॥ महि
मानं तव स्तोतुं कः समर्थो जगत्त्रये ॥ ४८ ॥ त्वमेव त्वन्महत्त्वं वै जानासि रघुनंदन ॥ इति स्तुत्वा वायुपुत्रो रामचंद्रं घृणानिधिम् ॥ ४९ ॥
सीतामप्यभितुष्टाव भक्तियुक्तेन चेतसा ॥ जानकि त्वां नमस्यामि सर्वपापप्रणाशिनीम् ॥ ५० ॥ दारिद्र्यरणसंहर्त्रीं भक्तानामिष्टदायिनीम् ॥
विदेहराजतनयां राघवानंदकारिणीम् ॥ ५१ ॥ भूमेर्दुहितरं विद्यां[2] नमामि प्रकृतिं शिवाम् ॥ पौलस्त्यैश्वर्यसंहर्त्रीं भक्ताभीष्टां[3] सरस्वतीम् ॥ ५२ ॥

१ महामंदरधारिणे–इ० पा० । २ देवीम्–इ०पा० । ३ भूतिमुद्राम्–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पतिव्रताधुरीणां त्वां नमामि जनकात्मजाम् ॥ अनुग्रहपरामृद्धिमनघां हरिवल्लभाम् ॥ ५३ ॥ आत्मविद्यां त्रयीरूपामुमारूपां नमाम्य
हम् ॥ प्रसादाभिमुखीं लक्ष्मीं क्षीराब्धितनयां शुभाम् ॥ ५४ ॥ नमामि चन्द्रभगिनीं सीतां सर्वांगसुंदरीम् ॥ नमामि धर्मनिलयां
करुणां वेदमातरम् ॥ ५५ ॥ पद्मालयां पद्महस्तां विष्णुवक्षस्थलालयाम् ॥ नमामि चन्द्रनिलयां सीतां चन्द्रनिभाननाम् ॥ ५६ ॥
आह्लादरूपिणीं सिद्धिं शिवां शिवकरीं सतीम् ॥ नमामि विश्वजननीं रामचन्द्रेष्टवल्लभाम् ॥ सीतां सर्वानवद्यांगीं भजामि सततं हृदा
॥ ५७ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्तुत्वैवं हनुमान्सीतारामचन्द्रौ सभक्तिकम् ॥ ५८ ॥ आनंदाश्रुपरिक्लिन्नस्तूष्णीमास्ते द्विजोत्तमाः ॥
य इदं वायुपुत्रेण कथितं पापनाशनम् ॥ ५९ ॥ स्तोत्रं श्रीरामचंद्रस्य सीतायाः पठतेऽन्वहम् ॥ स नरो महदैश्वर्यमश्नुते वांछितं स
दा ॥ ६० ॥ अनेकक्षेत्रधान्यानि गाश्च दोग्ध्रीः पयस्विनीः ॥ आयुर्विद्याश्च पुत्रांश्च भार्यामपि मनोरमाम् ॥ ६१ ॥ एतत्स्तोत्रं सकृ
द्विप्राः पठन्नाप्नोत्यसंशयः ॥ एतत्स्तोत्रस्य पाठेन नरकं नैव यास्यति ॥ ६२ ॥ ब्रह्महत्यादिपापानि नश्यंति सुमहांत्यपि ॥ सर्वपापविनिर्मुक्तो
देहांते मुक्तिमाप्नुयात् ॥ ६३ ॥ इति स्तुतो जगन्नाथो वायुपुत्रेण राघवः ॥ सीतया सहितो विप्रा हनूमंतमथाब्रवीत् ॥ ६४ ॥ ॥ श्रीराम
उवाच ॥ ॥ अज्ञानाद्वा नरश्रेष्ठ त्वयेदं साहसं कृतम् ॥ ब्रह्मणा विष्णुना वापि शक्रादित्रिदशैरपि ॥ ६५ ॥ नेदं लिंगं समुद्धर्तुं शक्यते
स्थापितं मया ॥ महादेवापराधेन पतितोऽस्यद्य मूर्च्छितः ॥ ६६ ॥ इतः परं मा क्रियतां द्रोहः सांबस्य शूलिनः ॥ अद्यारभ्य त्विदं कुंडं तव
नाम्ना जगत्त्रये ॥ ६७ ॥ ख्यातिं प्रयातु यत्र त्वं पतितो वानरोत्तम ॥ महापातकसंघानां नाशः स्यादत्र मज्जनात् ॥ ६८ ॥ महादेवजटाजाता
गौतमी सरितां वरा ॥ अश्वमेधसहस्रस्य फलदा स्नायिनां नृणाम् ॥ ६९ ॥ ततः शतगुणा गंगा यमुना च सरस्वती ॥ एतन्नदीत्रयं यत्र
स्थले प्रवहते कपे ॥ ७० ॥ मिलित्वा तत्र तु स्नानं सहस्रगुणितं स्मृतम् ॥ नदीष्वेतासु यत्स्नानात्फलं पुंसां भवेत्कपे ॥ ७१ ॥ तत्फलं
तव कुंडेऽस्मिन्स्नानात्प्राप्नोत्यसंशयम् ॥ दुर्लभं प्राप्य मानुष्यं हनूमत्कुंडतीरतः ॥ ७२ ॥ श्राद्धं न कुरुते यस्तु भक्तियुक्तेन चेतसा ॥
निराशास्तस्य पितरः प्रयांति कुपिताः कपे ॥ ७३ ॥ कुप्यंति मुनयोऽप्यस्मै देवाः सेंद्राः सचारणाः ॥ न दत्तं न हुतं येन हनूमत्कुंडतीरतः
॥ ७४ ॥ वृथाजीवित एवासाविहामुत्र च दुःखभाक् ॥ हनूमत्कुंडसविधे येन दत्तं तिलोदकम् ॥ मोदंते पितरस्तस्य घृतकुल्याः पि
बंति च ॥ ७५ ॥ ॥ श्रीसूत उवाच ॥ ॥ श्रुत्वैतद्वचनं विप्रा रामेणोक्तं स वायुजः ॥ ७६ ॥ उत्तरे रामनाथस्य लिंगं स्वेनाहृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुदा ॥ आज्ञया रामचन्द्रस्य स्थापयामास वायुजः ॥ ७७ ॥ प्रत्यक्षमेव सर्वेषां कपिलांगूलवेष्टितम् ॥ हरोपि तत्पुच्छजा तं बिभर्ति च वलित्रयम् ॥ तदुत्तरायां ककुभि गौरीं संस्थापयन्मुदा ॥ ७८ ॥ ॥ श्रीसूत उवाच ॥ एवं वः कथितं विप्रा यदर्थं राघवेण तु ॥ लिंगं प्रतिष्ठितं सेतौ भुक्तिमुक्तिप्रदं नृणाम् ॥ ७९ ॥ यः पठेदिममध्यायं शृणुयाद्वा समाहितः ॥ स विधूयेह पापानि शिवलोके महीयते ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामनाथलिंगप्रतिष्ठाकारणवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ राक्षसस्य वधात्सूत रावणस्य महामुने ॥ ब्रह्महत्या कथमभूद्राघवस्य महात्मनः ॥ ॥ १ ॥ ब्राह्मणस्य वधात्सूत ब्रह्महत्याभिजायते ॥ न ब्राह्मणो दशग्रीवः कथं तद्वद नो मुने ॥ २ ॥ ब्रह्महत्या भवेत्क्रूरा रामचंद्रस्य धीमतः ॥ एतन्नः श्रद्दधानानां वद कारुण्यतोऽधुना ॥ ३ ॥ इति पृष्टस्ततः सूतो नैमिषारण्यवासिभिः ॥ वक्तुं प्रचक्रमे तेषां प्रश्नस्योत्तरमुत्तमम् ॥ ४ ॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ ब्रह्मपुत्रो महातेजाः पुलस्त्योनाम वै द्विजाः ॥ बभूव तस्य पुत्रोऽभूद्विश्रवा इति विश्रुतः ॥ ५ ॥ तस्य पुत्रः पुलस्त्यस्य विश्रवा मुनिपुंगवाः ॥ चिरकालं तपस्तेपे देवैरपि सुदुष्करम् ॥ ६ ॥ तपः कुर्वति तस्मिंस्तु सुमालीनाम राक्षसः ॥ पाताललोकाद्भूलोकं सर्वं वै विचचार ह ॥ ७ ॥ हेमनिष्कांगदधरः कालमेघनिभच्छविः ॥ समादाय सुतां कन्यां पद्महीनामिव श्रियम् ॥ ८ ॥ विचरन्स महीपृष्ठे कदाचित्पुष्पकस्थितम् ॥ दृष्ट्वा विश्रवसः पुत्रं कुबेरं वै धनेश्वरम् ॥ ९ ॥ चिंतयामास विप्रेंद्राः सुमाली स तु राक्षसः ॥ कुबेरसदृशः पुत्रो यद्यस्माकं भविष्यति ॥ १० ॥ वयं वर्द्धामहे सर्वे राक्षसा ह्यकुतोभयाः ॥ विचार्यैवं निजसुतामब्रवीद्राक्षसेश्वरः ॥ ११ ॥ सुते प्रदानकालोऽद्य तव कैकसि शोभने ॥ अद्य ते यौवनं प्राप्तं तद्देयां त्वं वराय हि ॥ १२ ॥ अप्रदानेन पुत्रीणां पितरो दुःखमाप्नुयुः ॥ किंच सर्वगुणोत्कृष्टा लक्ष्मीरिव सुते शुभे ॥ १३ ॥ प्रत्याख्यानभयात्पुंभिर्न च त्वं प्रार्थ्यसे शुभे ॥ कन्यापितृत्वं दुःखाय सर्वेषां मानकांक्षिणाम् ॥ १४ ॥ न जानेऽहं वरः को वा वरयेदिति कन्यके ॥ सा त्वं पुलस्त्यतनयं मुनिं विश्रवसं द्विजम् ॥ १५ ॥ पितामहकुलोद्भूतं वरयस्व स्वयंगता ॥ कुबेरतुल्यास्तनया भवेयुस्ते न संशयः ॥ १६ ॥ कैकसी तद्वचः श्रुत्वा सा कन्या पितृगौरवात् ॥ अंगीचकार तद्वाक्यं तथास्त्विति शुचिस्मिता ॥ १७ ॥ पर्णशालां मुनिश्रेष्ठा गत्वा विश्रवसो मुनेः ॥ अतिष्ठदंतिके तस्य लज्जमाना ह्यधोमुखी ॥ १८ ॥ तस्मिन्नवसरे विप्राः पुलस्त्यतनयः सुधीः ॥ अग्निहोत्र

१ मुनिपुंगवाः—इ० पा० । २ सः—इत्यध्याहार्यमत्र । ३ तत्—तस्मात्कारणात् ।

CC-0. In Public Domain. Digitization by eGangotri

मुपास्ते स्म ज्वलत्पावकसन्निभः ॥ १९ ॥ संध्याकालमतिक्रूरमविचिंत्य तु कैकसी ॥ अभ्येत्य तं मुनिं सुभ्रूः पितुर्वचनगौरवात् ॥ २० ॥ तस्था वधोमुखी भूमिं लिखत्यंगुष्ठकोटिना ॥ विश्रवास्तां विलोक्याथ कैकसीं तनुमध्यमाम् ॥ उवाच सस्मितो विप्राः पूर्णचंद्रनिभाननाम् ॥ २१ ॥ ॥ ॥ विश्रवा उवाच ॥ ॥ शोभने कस्य पुत्री त्वं कुतो वा त्वमिहागता ॥२२॥ कार्यं किं वा त्वमुद्दिश्य वर्तसेऽत्र शुचिस्मिते ॥ यथार्थतो वदस्वाद्य मम सर्वमनिंदिते ॥ २३ ॥ इतीरिता कैकसी सा कन्या बद्धांजलिर्द्विजाः ॥ उवाच तं मुनिं प्रह्वा विनयेन समन्विता ॥ २४ ॥ तपः प्रभावेन मुने मदभिप्रायमद्य तु ॥ वेत्तुमर्हसि सम्यक्त्वं पुलस्त्यकुलदीपन ॥ २५ ॥ अहं तु कैकसीनाम सुमालिदुहिता मुने ॥ मत्तातस्याज्ञया ब्रह्मंस्तवांतिकमुपागता ॥२६॥ शेषं त्वं ज्ञानदृष्ट्याद्य ज्ञातुमर्हस्यसंशयः॥ क्षणं ध्यात्वा मुनिः प्राह विश्रवाः स तु कैकसीम् ॥२७॥ मया ते विदितं सुभ्रूर्मनोगतमभीप्सितम् ॥ पुत्राभिलाषिणी सा त्वं मामगाः सांप्रतं शुभे ॥२८॥सायंकालेऽधुना क्रूरे यस्मान्मां त्वमुपागता ॥ पुत्राभिलाषिणी भूत्वा तस्मात्त्वां प्रब्रवीम्यहम् ॥२९॥ शृणुष्वावहिता रामे कैकसी त्वमनिंदिते ॥ दारुणान्दारुणाकारान्दारुणाभिजनप्रियान् ॥ ३० ॥ जनयिष्यसि पुत्रांस्त्वं राक्षसान्क्रूरकर्मणः ॥ श्रुत्वा तद्वचनं सा तु कैकसी प्रणिपत्य तम् ॥ ३१ ॥ पुलस्त्यतनयं प्राह कृतांजलिपुटा द्विजाः ॥ भगवन्नीदृशाः पुत्रास्त्वत्तः प्राप्तुं न युज्यते ॥ ३२ ॥ इत्युक्तः स मुनिः प्राह कैकसीं तां सुमध्यमाम् ॥ मद्वंशानुगुणः पुत्रः पश्चिमस्ते भविष्यति ॥ ३३ ॥ धार्मिकः शास्त्रविच्छांतो न तु राक्षसचेष्टितः ॥ इत्युक्ता कैकसी विप्राः काले कतिपये गते ॥ ३४ ॥ सुषुवे तनयं क्रूरं रक्षोरूपं भयंकरम् ॥ द्विपंचशीर्षं कुमतिं विंशद्बाहुं भयानकम् ॥ ३५ ॥ ताम्रोष्ठं कृष्णवदनं रक्तश्मश्रुशिरोरुहम् ॥ महादंष्ट्रं महाकायं लोकत्रासकरं सदा ॥ ३६ ॥ दशग्रीवाभिधः सोऽभूत्तथा रावणनामवान् ॥ रावणानंतरं जातः कुम्भकर्णाभिधः सुतः ॥ ३७ ॥ ततः शूर्पणखा नाम्ना क्रूरा जज्ञे च राक्षसी ॥ ततो बभूव कैकस्या बिभीषण इति श्रुतः ॥ ३८ ॥ पश्चिमस्तनयो धीमान्धार्मिको वेदशास्त्रवित् ॥ एते विश्रवसः पुत्रा दशग्रीवादयो द्विजाः ॥ ३९ ॥ अतो दशग्रीववधात्कुम्भकर्णवधादपि ॥ ब्रह्महत्या समभवद्रामस्याक्लिष्टकर्मणः ॥ ४० ॥ अतस्तच्छांतये रामो लिंगं रामेश्वराभिधम् ॥ स्थापयामास विधिना वैदिकेन द्विजोत्तमाः ॥ ४१ ॥ एवं रावणघातेन ब्रह्महत्यासमुद्भवः ॥ समभूद्रामचंद्रस्य लोककांतस्य धीमतः ॥ ४२ ॥ तत्सहेतुकमाख्यातं भवतां ब्रह्मघातजम् ॥ पापं यच्छांतये रामो लिंगं प्रातिष्ठिपत्स्वयम् ॥ ४३ ॥ एवं लिंगं प्रतिष्ठाप्य रामचन्द्रोऽतिधार्मिकः ॥ मेने कृतार्थमात्मानं ससीता

१ पौलस्त्यकुलनंदन—इ० पा० । २ द्विजोत्तमाः—इ० पा० । ३ विभीषण इति ख्यातः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरजो द्विजाः ॥ ४४ ॥ ब्रह्महत्या गता यत्र रामचंद्रस्य भूपतेः ॥ तत्र तीर्थमभूत्किंचिद्ब्रह्महत्याविमोचनम् ॥ ४५ ॥ तत्र स्नानं महापुण्यं ब्रह्महत्याविनाशनम् ॥ दृश्यते रावणोऽद्यापि छायारूपेण तत्र वै ॥ ४६ ॥ तदग्रे नागलोकस्य बिलमस्ति महत्तरम् ॥ दशग्रीववधोत्पन्नां ब्रह्महत्यां बलीयसीम् ॥ ४७ ॥ तद्बिलं प्रापयामास जानकीरमणो द्विजाः ॥ तस्योपरि बिलस्याथ कृत्वा मण्डपमुत्तमम् ॥ ४८ ॥ भैरवं स्थापयामास रक्षार्थं तत्र राघवः ॥ भैरवाज्ञापरित्रस्ता ब्रह्महत्या भयंकरी ॥ ४९ ॥ नाशक्नोत्तद्बिलादूर्ध्वं निर्गंतुं द्विजसत्तमाः ॥ तस्मिन्नेव बिले तस्थौ ब्रह्महत्या निरुद्यमा ॥ ५० ॥ रामनाथमहालिंगं दक्षिणे गिरिजा मुदा ॥ वर्तते परमानंदशिवस्यार्धशरीरिणी ॥ ५१ ॥ आदित्यसोमौ वर्तेते पार्श्वयोस्तत्र शूलिनः ॥ देवस्य पुरतो वह्नी रामनाथस्य वर्तते ॥ ५२ ॥ आस्ते शतक्रतुः प्राच्यामाग्नेयां च तथाऽनलः ॥ आस्ते यमो दक्षिणस्यां रामनाथस्य सेवकः ॥ ५३ ॥ नैर्ऋते निर्ऋतिर्विप्रा वर्तते शंकरस्य तु ॥ वारुण्यां वरुणो भक्त्या सेवते रावणेश्वरम् ॥ ५४ ॥ वायव्ये तु दिशो भागे वायुरास्ते शिवस्य तु ॥ उत्तरस्यां च धनदो रामनाथस्य वर्तते ॥ ५५ ॥ ईशान्येऽस्य च दिग्भागे महेशो वर्तते द्विजाः ॥ विनायककुमारौ च महादेवसुतावुभौ ॥ ५६ ॥ यथाप्रदेशं वर्तेते रामनाथालयेऽधुना ॥ वीरभद्रादयः सर्वे महेश्वरगणेश्वराः ॥ ५७ ॥ यथाप्रदेशं वर्तंते रामनाथालये सदा ॥ मुनयः पन्नगाः सिद्धा गन्धर्वाप्सरसां गणाः ॥ ५८ ॥ संतुष्यमाणहृदया यथेष्टं शिवसन्निधौ ॥ वर्तंते रामनाथस्य सेवार्थं भक्तिपूर्वकम् ॥ ५९ ॥ रामनाथस्य पूजार्थं श्रोत्रियान्ब्राह्मणान्बहून्[1] ॥ रामेश्वरे रघुपतिः स्थापयामास पूजकान् ॥ ६० ॥ रामप्रतिष्ठितान्विप्रान्हव्यकव्यादिनार्चयेत् ॥ तुष्टास्ते तोषिताः सर्वा पितृभिः सहदेवताः ॥ ६१ ॥ तेभ्यो बहुधनान्ग्रामान्प्रददौ जानकीपतिः ॥ रामनाथमहादेवनैवेद्यार्थमपि द्विजाः ॥ ६२ ॥ बहून्ग्रामान्बहुधनं प्रददौ लक्ष्मणाग्रजः ॥ हारकेयूरकटकनिष्काद्याभरणानि च ॥ ६३ ॥ अनेकपट्टवस्त्राणि क्षौमाणि विविधानि च ॥ रामनाथाय देवाय ददौ दशरथात्मजः ॥ ६४ ॥ गंगा च यमुना पुण्या सरयूश्च सरस्वती ॥ सेतौ रामेश्वरं देवं भजंते स्वाघशांतये ॥ ६५ ॥ एतदध्यायपठनाच्छ्रवणादपि मानवः ॥ विमुक्तः सर्वपापेभ्यः सायुज्यं लभते हरेः ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामस्य ब्रह्महत्योत्पत्तिहेतुनिरूपणं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ रामनाथं समुद्दिश्य कथां पापविनाशिनीम् ॥ प्रवक्ष्यामि मुनिश्रेष्ठाः

[1] बहुविधान्-इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

शृणुध्वं सुसमाहिताः ॥ १ ॥ पांडचदेशाधिपो राजा पुरासीच्छंकराभिधः ॥ ब्रह्मण्यः सत्यसंधश्च यायजूकश्च धार्मिकः ॥ २ ॥ वेदवेदांगत
त्त्वज्ञः परसैन्यविदारणः ॥ चतुरोऽप्याश्रमान्वर्णान्धर्मतः परिपालयन् ॥ ३ ॥ वैदिकाचारनिरतः पुराणस्मृतिपारगः ॥ शिवविष्णवर्चको नित्यम
न्यदैवतपूजकः ॥ ४ ॥ महादानप्रदो नित्यं ब्राह्मणानां महात्मनाम् ॥ मृगयार्थं ययौ धीमान्स कदाचित्तपोवनम् ॥ ५ ॥ सिंहव्याघ्रेभमहिषक्रूरस
त्वभयंकरम् ॥ झिल्लिकाभीषणरवं सरीसृपसमाकुलम् ॥ ६ ॥ भीमश्वापदसंपूर्णं दावानलभयंकरम् ॥ महारण्यं प्रविश्याथ शंकरो राजशेखरः ॥
॥ ७ ॥ अनेकसैनिकोपेत आखेटिकुलसंकुलः ॥ पादुकागूढचरणो रक्तोष्णीषो हरिच्छदः ॥ ८ ॥ बद्धगोधांगुलित्राणो धृतकोदण्डसायकः ॥
कक्ष्याबद्धमहाखड्गः श्वेताश्ववरमास्थितः ॥ ९ ॥ सुवेषधारी सन्नद्धः पत्तिसंघसमावृतः ॥ कांतारेषु च रम्येषु पर्वतेषु गुहासु च ॥ १० ॥ समुत्तीर्ण
महास्रोता युवा सिंहपराक्रमः ॥ विचचार बलैः साकं दरीषु मृगयन्मृगान् ॥ ११ ॥ बध्यतां वध्यतामेष याति वेगान्मृगो वने ॥ एवं वदत्सु
सैन्येषु स्वयमुत्प्लुत्य शंकरः ॥ १२ ॥ मृगं हंति महाराजो विगाह्य विपिनस्थलीम् ॥ सिंहान्वराहान्महिषान्कुञ्जराञ्छरभांस्तथा ॥ १३ ॥ विनि
घ्नन्स मृगानन्यान्वन्याञ्छंकरभूपतिः ॥ कुत्रचिद्विपिनोद्देशे दरीमध्यनिवासिनम् ॥ १४ ॥ व्याघ्रचर्मधरं शांतं मुनिं नियतमानसम् ॥
व्याघ्रबुद्ध्या जघानाशु शरेणानतपर्वणा ॥ १५ ॥ अतिवेगेन विप्रेंद्रास्तत्पत्नीं च ससायकः ॥ निजघान पतिप्राणां निविष्टां पत्युरंतिके ॥१६॥
विलोक्य मातापितरौ तत्पुत्रो निहतौ वने ॥ रुरोद भृशदुःखार्तो विललाप च कातरः ॥१७॥ भोस्तात मातर्मां हित्वा युवां यातौ क्व वाधुना ॥
अहं कुत्र गमिष्यामि को वा मे शरणं भवेत् ॥ १८ ॥ को मामध्यापयेद्वेदाञ्छास्त्रं वा पाठयेत्पितः ॥ अंब मे भोजनं का वा दास्यते सोपदेश
कम् ॥ १९ ॥ आचाराञ्छिक्षयेत्को वा तात त्वयि मृतेऽधुना ॥ अंब बालं प्रकुपितं का वा मामुपलायेत् ॥ २० ॥ युवां निरागसावद्य केन
पापेन सायकैः ॥ निहतौ वै तपोनिष्ठौ मत्प्राणौ मद्गुरू वने ॥ २१ ॥ एवं तयोः सुतो विप्रा मुक्तकण्ठं रुरोद वै ॥ अथ प्रलपितं श्रुत्वा शंकरो
विपिने चरन् ॥ २२ ॥ तच्छब्दाभिमुखः सद्यः प्रययौ स दरीमुखम् ॥ तत्रत्या मुनयोऽप्याशु समागच्छंस्तमाश्रमम् ॥ २३ ॥ ते दृष्ट्वा मुनयः
सर्वे शरेण निहतं मुनिम् ॥ तत्पत्नीं च हतां विप्रा राजानं च धनुर्धरम् ॥ २४ ॥ विलपंतं सुतं चापि विलोक्य भृशविह्वलाः ॥ पुत्रमाश्वासयामा
सुर्मा रोदीरिति कातरम् ॥ २५ ॥ ॥ मुनय ऊचुः ॥ ॥ आढ्ये वापि दरिद्रे वा मूर्खे वा पंडितेऽपि वा ॥ पीने वाथ कृशे वापि समवर्ती परेत
राट् ॥ २६ ॥ वने वा नगरे ग्रामे पर्वते वा स्थलांतरे ॥ मृत्योर्वशे प्रयातव्यं सर्वैरपि हि जंतुभिः ॥ २७ ॥ वत्स नित्यं च गर्भस्थैर्जातै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रपि च जंतुभिः ॥ युवभिः स्थविरैः सर्वैर्यातव्यं यमपत्तनम् ॥ २८ ॥ वर्णिभिश्च गृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ॥ काले प्राप्ते त्वयं देहस्त्यक्तव्यो द्विजपुत्रक ॥ २९ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपि च संकरैः ॥ यातव्यं प्रेतनिलये द्विजपुत्र महामते ॥ ३० ॥ देवाश्च मुनयो यक्षा गंधर्वोरगराक्षसाः ॥ अन्ये च जंतवः सर्वे ब्रह्मविष्णुहरादयः ॥ ३१ ॥ सर्वे यास्यंति विलयं न त्वं शोचितुमर्हसि ॥ अद्वयं सच्चिदानंदं यद्ब्रह्मोपनिषद्गतम् ॥ ३२ ॥ न तस्य विलयो जन्म वर्धनं चापि सत्तम ॥ मलभांडे नवद्वारे पूयासृक्छोणितालये ॥ ३३ ॥ देहेऽस्मिन्बुद्बुदाकारे कृमियूथसमाकुले ॥ कामक्रोधभयद्रोहमोहमात्सर्यकारिणि ॥ ३४ ॥ परदारपरक्षेत्रपरद्रव्यैकलोलुपे ॥ हिंसासूयाशुचिव्याप्ते विष्ठामूत्रैकभाजने ॥ ३५ ॥ यः कुर्याच्छोभनधियं स मूढः स च दुर्मतिः ॥ बहुच्छिद्रघटाकारे देहेऽस्मिन्नशुचौ सदा ॥ ३६ ॥ वायोरवस्थितिः किं स्यात्प्राणाख्यस्य चिरं द्विज ॥ अतो मा कुरु शोकं त्वं जननीं पितरं प्रति ॥ ३७ ॥ तौ स्वकर्मवशाद्यातौ गृहं त्यक्त्वा त्रिदिवं क्वचित् ॥ तव कर्मवशात्त्वं च तिष्ठस्यस्मिन्महीतले ॥ ३८ ॥ यदा कर्मक्षयस्ते स्यात्तदा त्वं च मरिष्यसि ॥ मरिष्यमाणप्रेतो हि मृतप्रेतस्य शोचति ॥ ३९ ॥ यस्मिन्काले समुत्पन्नौ तव माता पिता तथा ॥ न तस्मिंस्त्वं समुत्पन्नस्ततो भिन्ना गतिर्हि वः ॥ ४० ॥ यदि तुल्या गतिस्ते स्यात्ताभ्यां सह महामते ॥ तर्हि त्वयापि यातव्यं मृतौ यत्र हि तौ गतौ ॥४१॥ मृतानां बांधवा ये तु मुंचंत्यश्रूणि भूतले ॥ पिबंत्यश्रूणि तान्यद्धा मृताः प्रेताः परत्र वै ॥ ४२ ॥ अतः शोकं परित्यज्य धृतिं कृत्वा समाहितः ॥ अनयोः प्रेतकार्याणि कुरु त्वं वैदिकानि तु ॥ ४३ ॥ शरघातान्मृतावेतौ यस्मात्ते जननी पिता ॥ अतस्तद्दोषशांत्यर्थमस्थीन्यादाय वै तयोः ॥ ४४ ॥ रामनाथशिवक्षेत्रे रामसेतौ विमुक्तिदे ॥ स्थापयस्व तथा श्राद्धं सपिंडीकरणादिकम् ॥ ४५ ॥ तत्रैव कुरु शुद्ध्यर्थं तयोर्ब्राह्मणपुत्रक ॥ तेन दुर्मृत्युदोषस्य शांतिर्भवति नान्यथा ॥ ४६ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तः स मुनिभिः शाकल्यस्य सुतो द्विजाः ॥ जांगलाख्यस्तयोः सर्वं पितृमेधं[1] चकार वै ॥ ४७ ॥ अन्येद्युरस्थीन्यादाय हालास्यं प्रययौ च सः ॥ तस्माद्रामेश्वरं सद्यो गत्वाऽयं जांगलो द्विजः ॥ ४८ ॥ मुनिप्रोक्तप्रकारेण तस्मिन्रामेश्वरस्थले ॥ निधाय पित्रोरस्थीनि श्राद्धादीन्यकरोत्तथा ॥ ४९ ॥ प्रथमाब्दिकपर्यंतं कार्यं तत्राकरोच्च सः ॥ स्थित्वाब्दं स मुनेः पुत्र एको जांगलसंज्ञकः ॥ ५० ॥ आब्दिकांते दिने विप्रो रात्रौ स्वप्ने विलोक्य तु ॥ स्वमातरं च पितरं शंखचक्रगदाधरौ ॥ ५१ ॥ गरुडोपरि संविष्टौ पद्ममालाविभूषितौ ॥ शोभितौ तुलसीदाम्ना स्फुरन्मकरकुंडलौ ॥ ५२ ॥ कौस्तुभालं

१ दाहकर्म—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

कृतोरस्कौ पीतांबरविराजितौ ॥ एवं दृष्ट्वा मुनिसुतो जांगलः सुप्रसन्नधीः ॥ ५३ ॥ स्वाश्रमं पुनरागत्य सुखेन न्यवसद्द्विजाः ॥ स्वप्नदृष्टं च वृत्तांतं
मातापित्रोः स जांगलः ॥ ५४ ॥ तेभ्यों न्यवेदयत्सर्वं ब्राह्मणेभ्योऽतिहर्षितः ॥ श्रुत्वा ते मुनयो वृत्तमासन्संप्रीतमानसाः ॥ ५५ ॥ अथ राजान
मालोक्य सर्वे तेऽपि महर्षयः ॥ अवदन्कुपिता विप्राः शपंतः शंकरं नृपम् ॥ ५६ ॥ पांड्यभूप महामूर्ख क्रौर्याद्ब्राह्मणघातक ॥ स्त्रीहत्या ब्रह्महत्या
च कृता यस्मात्त्वयाधुना ॥ ५७ ॥ अतः शरीरसंत्यागं कुरु त्वं हव्यवाहने ॥ नोचेत्तव न शुद्धिः स्यात्प्रायश्चित्तशतैरपि[1] ॥ ५८ ॥ त्वत्संभाषण
मात्रेण ब्रह्महत्यायुतं भवेत् ॥ अस्मत्सकाशाद्गच्छ त्वं पांड्यानां कुलपांसन ॥ ५९ ॥ इत्युक्तो मुनिभिः पांड्यः शंकरो द्विजपुंगवाः ॥ तथास्तु
देहसंत्यागं करिष्ये हव्यवाहने ॥ ६० ॥ ब्रह्महत्याविशुद्ध्यर्थं भवतां सन्निधावहम् ॥ अनुग्रहं मे कुर्वंतु भवंतो मुनिसत्तमाः ॥ ६१ ॥ तथा शरीर
संत्यागात्पातकं मे लयं व्रजेत् ॥ एवमुक्त्वा मुनीन्सर्वाञ्छंकरः पांड्यभूपतिः ॥ ६२ ॥ सर्वान्मंत्रिणः समाहूय बभाषे वचनं त्विदम् ॥ भो मंत्रिणो
ब्रह्महत्या मयाऽकार्यविचारतः ॥ ६३ ॥ स्त्रीहत्या च तथा क्रूरा महानरकदायिनी ॥ एतत्पातकशुद्ध्यर्थं मुनीनां वचनादहम् ॥ ६४ ॥ प्रदीप्ते
ऽग्नौ महाज्वाले परित्यक्ष्ये कलेवरम् ॥ काष्ठान्यानयत क्षिप्रं तैरग्निश्च समिध्यताम् ॥ ६५ ॥ मम पुत्रं च सुरुचिं राज्ये स्थापयताचिरात् ॥ मा
शोकं कुरुतामात्या दैवतं दुरतिक्रमम् ॥ ६६ ॥ इतीरिता नृपतिना मंत्रिणो रुरुदुस्तदा ॥ पांड्यनाथ महाराज रिपूणामपि वत्सल ॥ ६७ ॥
वयं हि भवता नित्यं पुत्रवत्परिपालिताः ॥ त्वां विना न प्रवेक्ष्याम पुरीं देवपुरोपमाम् ॥ ६८ ॥ हव्यवाहं प्रवेक्ष्यामो महा
काष्ठसमेधितम् ॥ तेषां प्रलपितं श्रुत्वा पांड्यः शंकरभूपतिः ॥ प्रोवाच मंत्रिणः सर्वान्वचनं सांत्वपूर्वकम्[2] ॥ ६९ ॥ ॥ शंकर उवाच ॥
किं करिष्यथ भोऽमात्या महापातकिना मया ॥ ७० ॥ सिंहासनं समारुह्य न कर्तुं युज्यते बत ॥ चतुरर्णवपर्यंतधरापालनमंजसा ॥ ७१ ॥
मत्पुत्रं सुरुचिं शीघ्रमतः स्थापयतासने ॥ काष्ठान्यानयत क्षिप्रं प्रवेष्टुं हव्यवाहनम् ॥ ७२ ॥ मम मंत्रिवरा यूयं विलंबं त्यजताधुना ॥ इत्युक्ता
मंत्रिणः काष्ठं समानिन्युः क्षणेन ते ॥ ७३ ॥ अग्निं प्रज्वलितं काष्ठैर्दृष्ट्वा शंकरभूपतिः ॥ स्नात्वाचम्य विशुद्धात्मा मुनीनां संनिधौ तदा ॥ ७४ ॥
अग्निं प्रदक्षिणीकृत्य तान्मुनीनपि सत्वरम् ॥ अग्निं मुनीन्नमस्कृत्य ध्यात्वा देवमुमापतिम् ॥ ७५ ॥ अग्नौ पतितुमारेभे धैर्यमालंब्य भूपतिः ॥
तस्मिन्नवसरे विप्रा मुनीनामपि शृण्वताम् ॥ ७६ ॥ अशरीरा[3] समुदभूद्वाणी भैरवनादिनी ॥ भोः शंकर महीपाल मानलं प्रविशाधुना ॥७७॥

१ प्रायश्चित्तायुतैः—इ० पा० । २ प्रोवाच मंत्रिणः सर्वान्वचनं हितकारकम्—इ० पा० । ३ अशरीराभवद्वाणी तदा—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्यानिमित्तं ते भयं मा भून्महामते ॥ तवोपदेशं वक्ष्यामि रहस्यं वेदसंमितम् ॥ ७८ ॥ शृणुष्वावहितो राजन्मदुक्तं क्रियतां त्वया ॥ दक्षिणां बुनिधेस्तीरे गंधमादनपर्वते ॥ ७९ ॥ रामसेतौ महापुण्ये महापातकनाशने ॥ रामप्रतिष्ठितं लिंगं रामनाथं महेश्वरम् ॥ ८० ॥ सेवस्व वर्षमेकं त्वं त्रिकालं भक्तिपूर्वकम् ॥ प्रदक्षिणप्रक्रमणं नमस्कारं च वै कुरु ॥ ८१ ॥ महाभिषेकः क्रियतां रामनाथस्य वै त्वया ॥ नैवेद्यं विविधं राजन्क्रियतां च दिनेदिने ॥ ८२ ॥ चन्दनागरुकर्पूरै रामलिंगं प्रपूजय ॥ भारद्वयेन गव्येन ह्याज्येन त्वभिषेचय ॥ ८३ ॥ प्रत्यहं च गवां क्षीरैर्द्विभारपरिसंमितैः ॥ [1]मधुद्रोणेन तल्लिंगं प्रत्यहं स्नापय प्रभोः ॥ ८४ ॥ प्रत्यहं पायसान्नेन नैवेद्यं कुरु भूपते ॥ प्रत्यहं तिलतैलेन दीपाराधनमाचर ॥ ८५ ॥ एतेन तव राजेंद्र रामनाथस्य शूलिनः ॥ स्त्रीहत्या ब्रह्महत्या च तत्क्षणादेव नश्यतः ॥ ८६ ॥ दर्शनाद्रामनाथस्य भ्रूणहत्याशतानि च ॥ अयुतं ब्रह्महत्यानां सुरापानायुतं तथा ॥ ८७ ॥ स्वर्णस्तेयायुतं राजन्गुरुस्त्रीगमनायुतम् ॥ एतत्संसर्गदोषाश्च विनश्यंति क्षणाद्विभो॥८८॥ महापतकतुल्यानि यानि पापानि संति वै ॥ तानि सर्वाणि नश्यंति रामनाथस्य सेवया ॥ ८९ ॥ महती रामनाथस्य सेवा लभ्येत चेन्नृणाम् ॥ किं गंगया च गयया प्रयागेणाध्वरेण वा ॥ ९० ॥ तद्गच्छ रामसेतुं त्वं रामनाथं भजानिशम् ॥ विलंबं मा कुरु विभो गमने च त्वरां कुरु ॥९१॥ इत्युक्त्वा विरराशाथ सापि वागशरीरिणी ॥ तच्छ्रुत्वा मुनयः सर्वे त्वरयंति स्म भूपतिम् ॥ ९२ ॥ गच्छ शीघ्रं महाराज रामसेतुं विमुक्तिदम् ॥ रामनाथस्य माहात्म्यमज्ञात्वास्माभिरीरितम् ॥ ९३ ॥ देहत्यागं कुरुष्वेति वह्नौ प्रज्वलितेऽधुना ॥ अनुज्ञातो मुनिवरैरिति राजा स शंकरः ॥ ॥ ९४ ॥ चतुरंगबलं पुर्यां प्रापयित्वा त्वरान्वितः ॥ नमस्कृत्य मुनीन्सर्वान्प्रहृष्टेनांतरात्मना ॥ ९५ ॥ वृतः कतिपयैः सैन्यैः समादाय धनं बहु ॥ रामनाथस्य सेवार्थमयासीद्गंधमादनम् ॥ ९६ ॥ उवास वर्षमेकं च रामसेतौ विशुद्धिदे ॥ एकभुक्तो जितक्रोधो विजितेंद्रियसंचयः ॥ ॥ ९७ ॥ त्रिसंध्यं रामनाथं च सेवमानः सभक्तिकम् ॥ प्रददौ रामनाथाय दशभारं धनं मुदा ॥ ९८ ॥ प्रत्यहं रामनाथस्य महापूजामकारयत् ॥ अकरोच्च धनुष्कोटौ प्रत्यहं भक्तिपूर्वकम् ॥ ९९ ॥ स्नानं प्रतिदिनं चान्नं ब्राह्मणेभ्यो ददौ मुदा ॥ अशरीरावचःप्रोक्तमखिलं पूजनं तथा ॥ १०० ॥ एवं कृतवतस्तस्य वर्षमेकं गतं द्विजाः ॥ वर्षांते स शुचिर्भूत्वा शंकरस्तुष्टमानसः ॥ तुष्टावपरमेशानं रामनाथं घृणानिधिम् ॥ १ ॥ ॥ शंकर उवाच ॥ ॥ नमामि रुद्रमीशानं रामनाथमुमापतिम् ॥ २ ॥ पाहि मां कृपया

---

१ दधिक्राव्णेति तल्लिंगम्–इ०पा०।

Sampurnanand Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव ब्रह्महत्यां दहाशु मे ॥ त्रिपुरघ्न महादेव कालकूटविषादन ॥ ३ ॥ रक्ष मां त्वं दयासिंधो स्त्रीहत्यां मे विमोचय ॥ गंगाधर विरूपाक्ष रामनाथ त्रिलोचन ॥ ४ ॥ मां पालय कृपादृष्ट्या छिन्धि मत्पातकं विभो ॥ कामारे कामसंदायिन्भक्तानां राघवेश्वर ॥ ॥ ५ ॥ कटाक्षं पातय मयि शुद्धं मां कुरु धूर्जटे ॥ मार्कंडेयभयत्राण मृत्युंजय शिवाव्यय ॥ ६ ॥ नमस्ते गिरिजार्धाय निष्पापं कुरु मां सदा ॥ रुद्राक्षमालाभरण चन्द्रशेखर शंकर ॥ ७ ॥ वेदोक्तसम्यगाचारयोग्यं मां कुरु ते नमः ॥ सूर्यदंतभिदे तुभ्यं भारतीनासिकाच्छिदे ॥ ८ ॥ रामेश्वराय देवाय नमो मे शुद्धिदो भव ॥ आनंदं सच्चिदानंदं रामनाथं वृषध्वजम् ॥ ९ ॥ भूयोभूयो नमस्यामि पातकं मे विनश्यतु ॥ भक्त्यैवं स्तुवतस्तस्य रामनाथं महेश्वरम् ॥ ११० ॥ निर्जगाम मुखाद्राज्ञो ब्रह्महत्यातिभीषणा ॥ नीलवस्त्रधरा क्रूरा महारक्तशिरोरुहा ॥ ११ ॥ तां ब्रह्महत्यां बीभत्सां नृपवक्त्राद्विनिर्गताम् ॥ निजघान त्रिशूलेन भैरवो रुद्रशासनात् ॥ १२ ॥ हतायां ब्रह्महत्यायां भैरवेण शिवाज्ञया ॥ रामनाथो नृपं प्राह स्तुत्या तस्य प्रसन्नधीः ॥ १३ ॥ ॥ श्रीरामनाथ उवाच ॥ ॥ पांड्यभूप महाराज स्तोत्रेणानेन तेऽनघ ॥ प्रसन्नोऽहं वरं दास्ये तुभ्यं वरय चेप्सितम् ॥ १४ ॥ स्त्रीहत्याब्रह्महत्याभ्यां यस्ते दोषः स निर्गतः ॥ शुद्धो विधूतपापोऽसि राज्यं पालय पूर्ववत् ॥ १५ ॥ ये मामत्र निषेवंते भक्तियुक्तेन चेतसा ॥ नाशयामि नृणां तेषां ब्रह्महत्यायुतान्यपि ॥ १६ ॥ सुरापानायुतं भूप गुरुस्त्रीगमनायुतम् ॥ स्वर्णस्तेयायुतमपि तत्संसर्गायुतं तथा ॥ १७ ॥ अन्यान्यपि च पापानि नाशयामि न संशयः ॥ मत्सेविनो नरा राजन्न भूयः संसरंति ते ॥ १८ ॥ किं तु सायुज्यरूपां मे मुक्तिं यास्यन्त्यसंशयम् ॥ स्तुवंत्यनेन स्तोत्रेण ये मां भक्तिपुरःसरम् ॥ १९ ॥ नाशयाम्यहमेतेषां महापातकसंचयम् ॥ प्रीतोऽहं तव भक्त्या च स्तोत्रेण मनुजेश्वर ॥ १२० ॥ यथेष्टं प्रार्थय वरं मत्तस्त्वं वरदान्नृप ॥ एवमुक्तः शिवेनाथ शंकरो नृपपुंगवः ॥ रामनाथं बभाषे तं शंकरं करुणानिधिम् ॥ २१ ॥ ॥ नृप उवाच ॥ ॥ तव संदर्शनेनाहं कृतार्थोऽस्मि महेश्वर ॥ २२ ॥ इतः परं प्रार्थनीयं मम नास्त्यधुनाधिकम् ॥ मृकण्डुसुतसंतापहारि पादयुगं तव ॥ २३ ॥ दृष्टं मया महादेव नातः प्रार्थ्यं विभोऽस्ति वै ॥ त्वत्पादपद्मयुगुले निश्चला भक्तिरस्तु मे ॥ ॥ २४ ॥ न पुनर्जन्म मे भूयान्मातृणामुदरेऽशुचौ ॥ ये मत्कृतमिदं स्तोत्रं कीर्तयंति तव प्रभो ॥ ते नराः पापनिर्मुक्तास्त्वत्सेवाफलमाप्नुयुः ॥२५॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ तथास्त्वित्यनुगृह्यैनं रामनाथो द्विजोत्तमाः ॥ २६ ॥ नीलकण्ठो विरूपाक्षो लिंगरूपे तिरोहितः ॥ राजापि

१ परमेश्वर—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामनाथेन विहितानुग्रहस्ततः ॥ २७ ॥ रामनाथं नमस्कृत्य कृतार्थेनांतरात्मना ॥ स सेनासंवृतः प्रीतः प्रययावात्मनः पुरीम् ॥ २८ ॥ वृत्तांतमेतमवदन्मुनीनां वनवासिनाम् ॥ तेभ्यर्षिंचन्नृपं राज्ये मुनयः प्रीतमानसाः ॥ २९ ॥ पुत्रदारयुतो राजा प्राप्य राज्यमकण्टकम् ॥ मंत्रिभिः सहितो विप्रा ररक्ष पृथिवीं चिरम् ॥ १३० ॥ ततोंतकाले संप्राप्ते ध्यायन्रामेश्वरं शिवम् ॥ देहांते रामनाथस्य सायुज्यं प्रययौ शुभम् ॥ ३१ ॥ एवं वः कथितं विप्रा रामनाथस्य वैभवम् ॥ चरितं पुण्यमाख्यानं शंकराख्यनृपस्य च ॥ ३२ ॥ शृण्वन्पठन्वा मनुजस्त्विममध्यायमादरात् ॥ सर्वपापविनिर्मुक्तो रामनाथं समश्नुते ॥ १३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामनाथप्रशंसायां शाकल्यदुर्मरणदोषशांतिपूर्वकशंकरस्त्रीहत्याब्रह्महत्यादोषशांतिवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥

॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि रामनाथस्य शूलिनः ॥ स्तोत्राध्यायं महापुण्यं शृणुत श्रद्धया द्विजाः ॥ ॥ १ ॥ रामः प्रतिष्ठिते लिंगे तुष्टाव परमेश्वरम् ॥ लक्ष्मणो जानकी सीता सुग्रीवाद्याः कपीश्वराः ॥ २ ॥ ब्रह्मप्रभृतयो देवाः कुम्भजाद्या महर्षयः ॥ अस्तुवन्भक्तिसंयुक्ताः प्रत्येकं राघवेश्वरम् ॥ ३ ॥ तद्वक्ष्याम्यानुपूर्व्येण शृणुतादरपूर्वकम् ॥ एतच्छ्रवणमात्रेण मुक्तः स्यान्मानवो द्विजाः ॥ ४ ॥ ॥ श्रीराम उवाच ॥ ॥ नमो महात्मने तुभ्यं महामायाय शूलिने ॥ स्वपदांबुजभक्तार्तिहारिणे सर्पहारिणे ॥ ५ ॥ नमो देवाधि[1]देवाय रामनाथाय साक्षिणे ॥ नमो वेदांतवेद्याय योगिनां तत्त्वदायिने ॥ ६ ॥ सर्वदानंदपूर्णाय विश्वनाथाय शंभवे ॥ नमो भक्तभयच्छेदहेतुपादाब्जरेणवे ॥ ७ ॥ नमस्तेऽखिलनाथाय नमः साक्षात्परात्मने ॥ नमस्तेऽद्भुतवीर्याय महापातकनाशिने ॥ ॥ ८ ॥ कालकालाय कालाय का[2]लातीताय ते नमः ॥ नमोऽविद्या[3]निहंत्रे ते नमः पापहराय च ॥ ९ ॥ नमः संसारतप्तानां तापनाशैकहेतवे ॥ नमो मद्ब्रह्महत्याविनाशिने च विषाशिने ॥ १० ॥ नमस्ते पार्वतीनाथ कैलासनिलयाव्यय ॥ गंगाधर विरूपाक्ष मां रक्ष सकलापदः ॥ ११ ॥ तुभ्यं पिनाकहस्ताय नमो मदनहारिणे ॥ भूयोभूयो नमस्तुभ्यं सर्वावस्थासु सर्वदा ॥ १२ ॥ ॥ लक्ष्मण उवाच ॥ ॥ नमस्ते रामनाथाय त्रिपुरघ्नाय शंभवे ॥ पार्वतीजीवितेशाय गणेशस्कन्दसूनवे ॥ १३ ॥ नमस्ते सूर्यचंद्राग्निलोचनाय कपर्दिने ॥ नमः शिवाय सोमाय मार्कंडेयभयच्छिदे ॥ १४ ॥ नमः सर्वप्रपंचस्य सृष्टिस्थित्यंतहेतवे ॥ नम उग्राय भीमाय महादेवाय साक्षिणे ॥ १५ ॥ सर्वज्ञाय वरेण्याय वरदाय

१ देवादेवाय-इ० पा० । २ कलातीताय-इ० पा० । ३ विघ्ननिहन्त्रे-इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

 वराय ते ॥ श्रीकण्ठाय नमस्तुभ्यं पंचपातकभेदिने ॥ १६ ॥ नमस्तेऽस्तु परानंदसत्यविज्ञानरूपिणे ॥ नमस्ते भवरोगघ्न स्नायूनां पतये नमः ॥
॥ १७ ॥ पतये तस्कराणां ते वनानां पतये नमः ॥ गणानां पतये तुभ्यं विश्वरूपाय साक्षिणे ॥ १८ ॥ कर्मणा प्रेरितः शम्भो जनिष्ये यत्रयत्र
तु ॥ तत्रतत्र पदद्वंद्वे भवतो भक्तिरस्तु मे ॥ १९ ॥ असन्मार्गे रतिर्मा भूद्भवतः कृपया मम ॥ वैदिकाचारमार्गे च रतिः स्याद्भवते नमः ॥ २० ॥
॥ ॥ सीतोवाच ॥ ॥ परमकारण शंकर धूर्जटे गिरिसुतास्तनकुंकुमशोभित ॥ मम पतौ परिदेहि मतिं सदा न विषमां परपूरुषगोचराम् ॥
॥ २१ ॥ गंगाधर विरूपाक्ष नीललोहित शंकर ॥ रामनाथ नमस्तुभ्यं रक्ष मां करुणाकर ॥ २२ ॥ नमस्ते देवदेवेश नमस्ते करुणालय ॥
नमस्ते भवभीतानां भवभीतिविमर्दन ॥ २३ ॥ नाथ त्वदीयचरणांबुजचिंतनेन निर्धूय भास्करसुताद्भयमाशु शम्भो ॥ नित्यत्वमाशु गतवान्स
मृकंडुपुत्रः किं वा न सिध्यति तवाश्रयणात्परेश ॥ २४ ॥ परेश परमानंद शरणागतपालक ॥ पातिव्रत्यं मम सदा देहि तुभ्यं नमोनमः ॥
॥ २५ ॥ ॥ हनूमानुवाच ॥ ॥ देवदेव जगन्नाथ रामनाथ कृपानिधे ॥ त्वत्पादांभोरुहगता निश्चला भक्तिरस्तु मे ॥ २६ ॥ यं विना न
जगत्सत्ता तद्भानमपि नो भवेत् ॥ नमः सद्भानरूपाय रामनाथाय शंभवे ॥ २७ ॥ ॥ अंगद उवाच ॥ ॥ यस्य भासा जगद्भानं यत्प्रकाशं
विना जगत् ॥ न भासते नमस्तस्मै रामनाथाय शंभवे ॥ २८ ॥ ॥ जांबुवानुवाच ॥ ॥ सर्वानंदो यदानंदो भासते परमार्थतः ॥ नमो
रामेश्वरायास्मै परमानंदरूपिणे ॥ २९ ॥ ॥ नील उवाच ॥ ॥ यद्देशकालदिग्भेदैरभिन्नं सर्वदाद्वयम् ॥ तस्मै रामेश्वरायास्मै नमोऽभिन्नस्व
रूपिणे ॥ ३० ॥ ॥ नल उवाच ॥ ॥ ब्रह्मविष्णुमहेशाना यदविद्याविजृंभिताः ॥ नमोऽविद्याविहीनाय तस्मै रामेश्वराय ते ॥ ३१ ॥ ॥ कुमुद
उवाच ॥ ॥ यस्त्वरूपापरिज्ञानात्प्रधानं कारणत्वतः ॥ कल्पितं कारणायास्मै रामनाथाय शंभवे ॥ ३२ ॥ ॥ पनस उवाच ॥ ॥ जाग्रत्स्व
प्नसुषुप्त्यादियदविद्याविजृंभितम् ॥ जाग्रदादिविहीनाय नमोऽस्मै ज्ञानरूपिणे ॥ ३३ ॥ ॥ गज उवाच ॥ ॥ यत्स्वरूपापरिज्ञानात्कार्याणां परमा
णवः ॥ कल्पिताः कारणत्वेन तार्किकापसदैर्वृथा ॥ ३४ ॥ तमहं परमानंदं रामनाथं महेश्वरम् ॥ आत्मरूपतया नित्यमुपासे सर्वसाक्षिणम् ॥
॥ ३५ ॥ ॥ गवाक्ष उवाच ॥ ॥ अज्ञानपाशबद्धानां पशूनां पाशमोचकम् ॥ रामेश्वरं शिवं शांतमुपैमि शरणं सदा ॥ ३६ ॥
॥ ॥ गवय उवाच ॥ ॥ साध्वस्तजगदाधारं चंद्रचूडमुमापतिम् ॥ रामनाथं शिवं वन्दे संसारामयभेषजम् ॥ ३७ ॥ ॥

१ पशूनां पतये नम—इ० पा० । ९ नमः—इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरभ उवाच ॥ ॥ अंतःकरणमात्मेति यदज्ञानाद्विमोहितैः ॥ भण्यते रामनाथं तमात्मानं प्रणमाम्यहम् ॥ ३८ ॥ ॥ गन्धमादन उवाच ॥ ॥ रामनाथमुमानाथं गणनाथं च त्र्यंबकम् ॥ सर्वपातकशुद्ध्यर्थमुपासे जगदीश्वरम् ॥ ३९ ॥ ॥ सुग्रीव उवाच ॥ ॥ संसारांभोधिमध्ये मां जन्ममृत्युजले भये ॥ पुत्रदारधनक्षेत्रवीचिमालासमाकुले ॥ ४० ॥ मज्जद्ब्रह्मांडखंडे च पतितं नाप्तपारकम् ॥ क्रोशंतमवशं दीनं विषयव्यालकातरम् ॥ ४१ ॥ व्याधिनक्रसमुद्विग्नं तापत्रयझषार्तिदम् ॥ मां रक्ष गिरिजानाथ रामनाथ नमोऽस्तु ते ॥ ४२ ॥ ॥ विभीषण उवाच ॥ ॥ संसारवनमध्ये मां विनष्टनिजमार्गके ॥ व्याधिचौरे क्रोधसिंहे जन्मव्याघ्रे लयोरगे ॥ ४३ ॥ बाल्ययौवनवार्धक्यमहाभीमांधकूपके ॥ क्रोधेर्ष्यालोभवह्नौ च विषयक्रूरपर्वते ॥ ४४ ॥ त्रासभूकंटकाढ्ये च सीदंतमधुनांधकम् ॥ शोभनां पदवीं शंभो नय रामेश्वराधुना ॥ ४५ ॥ ॥ सर्वे वानरा ऊचुः ॥ ॥ निंद्यानिंद्येषु सर्वत्र जनित्वा योनिषु प्रभो ॥ कुंभीपाकादिनरके पतित्वा च पुनस्तथा ॥ ४६ ॥ जनित्वा च पुनर्योनौ कर्मशेषेण कुत्सिते ॥ संसारे पतितानस्मान्रामनाथ दयानिधे ॥ ४७ ॥ अनाथान्विवशान्दीनान्क्रोशतः पाहि शंकर ॥ नमस्तेऽस्तु दयासिंधो रामनाथ महेश्वर ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते लोकनाथाय रामनाथाय शंभवे ॥ प्रसीद मम सर्वेश मदविद्यां विनाशय ॥ ४९ ॥ ॥ ॥ इंद्र उवाच ॥ ॥ यस्य शक्तिरुमा देवी जगन्माता त्रयीमयी ॥ तमहं शंकरं वंदे रामनाथमुमापतिम् ॥ ५० ॥ ॥ यम उवाच ॥ ॥ पुत्रौ गणेश्वरस्कंदौ वृषो यस्य च वाहनम् ॥ तं वै रामेश्वरं सेवे सर्वाज्ञाननिवृत्तये ॥ ५१ ॥ ॥ वरुण उवाच ॥ ॥ यस्य पूजाप्रभावेन जितमृत्युर्मृकंडुजः ॥ मृत्युंजयमुपासेऽहं रामनाथं हृदा तु तम् ॥ ५२ ॥ ॥ कुबेर उवाच ॥ ॥ ईश्वराय लसत्कर्णकुंडलाभरणाय ते ॥ लाक्षारुणशरीराय नमो रामेश्वराय वै ॥ ५३ ॥ ॥ आदित्य उवाच ॥ ॥ नमस्तेऽस्तु महादेव रामनाथ त्रियंबक ॥ दक्षाध्वरविनाशाय नमस्ते पाहि मां शिव ॥ ५४ ॥ ॥ सोम उवाच ॥ ॥ नमस्ते भस्मदिग्धाय शूलिने सर्पमालिने ॥ रामनाथ दयांभोधे स्मशाननिलयाय ते ॥ ॥ ५५ ॥ ॥ अग्निरुवाच ॥ ॥ इन्द्राद्यखिलदिक्पालसंसेवितपदांबुज ॥ रामनाथाय शुद्धाय नमो दिग्वाससे सदा ॥ ५६ ॥ ॥ वायुरुवाच ॥ ॥ हराय हरिरूपाय व्याघ्रचर्मांबराय च ॥ रामनाथ नमस्तुभ्यं ममाभीष्टप्रदो भव ॥ ५७ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ अहंतासाक्षिणे नित्यं प्रत्यगद्वयवस्तुने ॥ रामनाथ ममाज्ञानमाशु नाशय ते नमः ॥ ५८ ॥ ॥ ॥ शुक्र उवाच ॥ ॥ वंचकानामलभ्याय महामंत्रा

CC-0. In Public Domain. Digitization by eGangotri

र्थरूपिणे ॥ नमो द्वैतविहीनाय रामनाथाय शंभवे ॥ ५९ ॥ ॥ अश्विनावूचतुः ॥ ॥ आत्मरूपतया नित्यं योगिनां भासते हृदि ॥ अनन्य
भानदेवाय नमस्ते राघवेश्वर ॥ ६० ॥ ॥ अगस्त्य उवाच ॥ ॥ आदिदेव महादेव विश्वेश्वर शिवाव्यय ॥ रामनाथांबिकानाथ प्रसीद वृष
भध्वज ॥ ६१ ॥ अपराधसहस्रं मे क्षमस्व विधुशेखर ॥ ममाहमिति पुत्रादावहंतां मम मोचय ॥ ६२ ॥ ॥ सुतीक्ष्ण उवाच ॥ ॥ क्षेत्राणि
रत्नानि धनानि दारा मित्राणि वस्त्राणि गवाश्वपुत्राः ॥ नैवोपकाराय हि रामनाथ मह्यं प्रयच्छ त्वमतो विरक्तिम् ॥ ६३ ॥ ॥ विश्वामित्र
उवाच ॥ ॥ श्रुतानि शास्त्राण्यपि निष्फलानि त्रय्यप्यधीता विफलैव नूनम् ॥ त्वयीश्वरे चेन्न भवेद्धि भक्तिः श्रीरामनाथे शिव मानुषस्य ॥६४॥
॥ ॥ गालव उवाच ॥ ॥ दानानि यज्ञा नियमास्तपांसि गंगादितीर्थेषु निमज्जनानि ॥ रामेश्वरं त्वां न नमंति ये तु व्यर्थानि तेषामिति निश्च
योऽत्र ॥ ६५ ॥ ॥ वसिष्ठ उवाच ॥ ॥ कृत्वापि पापान्यखिलानि लोकस्त्वामेत्य रामेश्वर भक्तियुक्तः ॥ नमेत चेत्तानि लयं व्रजेयुर्यथांध
कारो रवितेजसाऽद्धा ॥ ६६ ॥ ॥ अत्रिरुवाच ॥ ॥ दृष्ट्वा तु रामेश्वरमेकदापि स्पृष्ट्वा नमस्कृत्य भवंतमीशम् ॥ पुनर्न गर्भं स नरः प्रयाया
त्किं त्वद्वयं ते लभते स्वरूपम् ॥ ६७ ॥ अंगिरा उवाच ॥ यो रामनाथं मनुजो भवंतमुपेत्य बंधून्प्रणमन्स्मरेत ॥ संतारयेत्तानपि सर्वपापात्किम
द्भुतं तस्य कृतार्थतायाम् ॥ ६८ ॥ ॥ गौतम उवाच ॥ ॥ श्रीरामनाथेश्वर गूढमेत्तद्रहस्यभूतं परमं विशोकम् ॥ त्वत्पादमूलं भजतां नृणां
ये सेवां प्रकुर्वंति हि तेऽपि धन्याः ॥ ६९ ॥ ॥ शतानंद उवाच ॥ ॥ वेदांतविज्ञानरहस्यविद्भिर्विज्ञेयमेतद्धि मुमुक्षुभिस्तु ॥ शास्त्राणि सर्वाणि
विहाय देव त्वत्सेवनं यद्रघुवीरनाथ ॥ ७० ॥ ॥ भृगुरुवाच ॥ ॥ रामनाथ तव पादपंकजद्वंद्वचिंतनविधूतकल्मषः ॥ निर्भयं व्रजति सत्सुखा
द्वयं सुप्रभं त्वथ अमोघचिद्घनम् ॥ ७१ ॥ ॥ कुत्स उवाच ॥ ॥ रामनाथ तव पादसेवनं भोगमोक्षवरदं नृणां सदा ॥ रौरवादिनर
कप्रणाशनं कः पुमान्न भजते रसग्रहः ॥ ७२ ॥ ॥ काश्यप उवाच ॥ ॥ रामनाथ तव पादसेविनां किं व्रतैरुत तपोभिरध्वरैः ॥ वेदशास्त्र
जपचिन्तया च किं स्वर्गसिन्धुपयसापि किं फलम् ॥ ७३ ॥ श्रीरामनाथ त्वमागत्य शीघ्रं ममोत्क्रांतिकाले भवान्या च साकम् ॥ मां
प्रापय स्वात्मपादरविन्दं विशोकं विमोहं सुखं चित्स्वरूपम् ॥ ७४ ॥ ॥ गन्धर्वा ऊचुः ॥ ॥ रामनाथ त्वमस्माकं भजतां भवसागरे ॥
अपारे दुःखकल्लोले न त्वत्तोन्या गतिर्हि नः ॥ ७५ ॥ ॥ किन्नरा ऊचुः ॥ ॥ रामनाथ भवारण्ये व्याधिव्याघ्रभयानके ॥ त्वामंतरेण

१ तथैव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्माकं पदवीदर्शको भवेत् ॥ ७६ ॥ ॥ यक्षा ऊचुः ॥ ॥ रामनाथेंद्रियारातिबाधा नो दुःसहा सदा ॥ तान्विजेतुं सहायस्त्वमस्माकं
भव धूर्जटे ॥ ७७ ॥ ॥ नागा ऊचुः ॥ ॥ अचिन्त्यमहिमानं त्वा रामनाथ वयं कथम् ॥ स्तोतुमल्पधियः शक्ता भविष्यामोऽम्बिकापते ॥
॥ ७८ ॥ ॥ किंपुरुषा ऊचुः ॥ ॥ नानायोनौ च जननं मरणं चाप्यनेकशः ॥ विनाशय तथाऽज्ञानं रामनाथ नमोऽस्तु ते ॥ ७९ ॥ ॥
विद्याधरा ऊचुः ॥ ॥ अम्बिकापतये तुभ्यमसंगाय महात्मने ॥ नमस्ते रामनाथाय प्रसीद वृषभध्वज ॥ ८० ॥ ॥ वसव ऊचुः ॥ ॥ राम
नाथगणेशाय गणवृंदार्चितांघ्रये ॥ गंगाधराय गुह्याय नमस्ते पाहि नः सदा ॥ ८१ ॥ ॥ विश्वेदेवा ऊचुः ॥ ॥ ज्ञप्तिमात्रैकनिष्ठानां मुक्तिदाय
सुयोगिनाम् ॥ रामनाथाय सांबाय नमोऽस्मान्रक्ष शंकर ॥ ८२ ॥ ॥ मरुत ऊचुः ॥ ॥ परतत्त्वाय तत्त्वानां तत्त्वभूताय वस्तुतः ॥ नमस्ते
रामनाथाय स्वयंभानाय शंभवे ॥ ८३ ॥ ॥ साध्या ऊचुः ॥ ॥ स्वातिरिक्तविहीनाय जगत्सत्ताप्रदायिने ॥ रामेश्वराय देवाय नमोऽविद्या
विभेदिने ॥ ८४ ॥ ॥ सर्वे देवा[1] ऊचुः ॥ ॥ सच्चिदानंदसंपूर्णं द्वैतवस्तुविवर्जितम् ॥ ब्रह्मात्मानं स्वयंभानमादिमध्यांतवर्जितम् ॥ ८५ ॥ अविक्रिय
मसंगं च परिशुद्धं सनातनम् ॥ आकाशादिप्रपंचानां साक्षिभूतं परामृतम् ॥ ८६ ॥ प्रमातीतं प्रमाणानामपि बोधप्रदायिनम् ॥ आविर्भावतिरोभाव
संकोचरहितं सदा ॥ ८७ ॥ स्वस्मिन्नध्यस्तरूपस्य प्रपंचस्यास्य साक्षिणम् ॥ निर्लेपं परमानंदं निरस्तसकलक्रियम् ॥ ८८ ॥ भूमानंदं महात्मानं
चिद्रूपं भोगवर्जितम् ॥ रामनाथं वयं सर्वे स्वपातकविशुद्धये ॥ ८९ ॥ चिन्तयामः सदा चित्ते स्वात्मानंदबुभुत्सवः ॥ राक्षास्मान्करुणासिन्धो राम
नाथ नमोऽस्तु ते ॥९०॥ रामनाथाय रुद्राय नमः संसारहारिणे ॥ ब्रह्मविष्ण्वादिरूपेण विभिन्नाय स्वमायया ॥ ९१ ॥ विभीषणसचिवा[2] ऊचुः ॥
वरदाय वरेण्याय त्रिनेत्राय त्रिशूलिने ॥ योगिध्येयाय नित्याय रामनाथाय ते नमः ॥ ९२ ॥ ॥ सूत उवाच ॥ ॥ इति रामादिभिः सर्वैः स्तुतो
रामेश्वरः शिवः ॥ प्राह सर्वान्समाहूय रामादीन्द्विजसत्तमाः ॥ ९३ ॥ रामराम महाभाग जानकीरमण प्रभो ॥ सौमित्रे जानकि शुभे हे सुग्रीव
मुखास्तथा ॥ ९४ ॥ अन्ये ब्रह्ममुखा यूयं शृणुध्वं सुसमास्थिताः ॥ स्तोत्राध्यायमिमं पुण्यं युष्माभिः कृतमादरात् ॥ ९५ ॥ ये पठंति च
शृण्वंति श्रावयंति च मानवाः ॥ ॥ मदर्चनफलं तेषां भविष्यति न संशयः ॥ ९६ ॥ रामचंद्रधनुष्कोटिस्नानपुण्यं च वै भवेत् ॥ वर्षमेकं
रामसेतौ वासपुण्यं भविष्यति ॥ ९७ ॥ गन्धमादनमध्यस्थसर्वतीर्थाभिमज्जनात् ॥ यत्पुण्यं तद्भवेत्तेन नात्र संशयकारणम् ॥ ९८ ॥

१ वानराः--इ० पा० । २ विभीषणामात्याः--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

उक्त्वैवं रामनाथोऽपि स्वात्मलिंगे तिरोदधे ॥ स्तोत्राध्यायमिमं पुण्यं नित्यं संकीर्तयन्नरः ॥ ९९ ॥ जरामरणनिर्मुक्तो जन्मदुःखविवर्जितः ॥ रामनाथस्य सायुज्यमुक्तिं प्राप्नोत्यसंशयः ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामादिभी रामनाथस्तोत्रकथनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ श्रीसूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि सेतुमाधववैभवम् ॥ शृणुध्वं मुनयो भक्त्या पुण्यं पापहरं परम् ॥ १ ॥ पुरा पुण्यनिधिर्नाम राजा सोमकुलोद्भवः ॥ मधुरां पालयामास हालास्येश्वरभूषिताम् ॥ २ ॥ कदाचित्स महीपालश्चतुरंगबलान्वितः ॥ सांऽतःपुरपरीवारो मधुरायां निजं सुतम् ॥ ३ ॥ स्थापयित्वा रामसेतुं प्रययौ स्नानकौतुकी ॥ तत्र गत्वा धनुष्कोटौ स्नात्वा संकल्पपूर्वकम् ॥ ४ ॥ अन्येष्वपि च तीर्थेषु तत्रत्येषु नृपोत्तमः ॥ सस्नौ रामेश्वरं देवं सिषेवे च सभक्तिकम् ॥ ॥ ५ ॥ एवं स बहुकालं वै तत्रैव न्यवसत्सुखम् ॥ रामसेतौ वसन्पुण्ये गन्धमादनपर्वते ॥ ६ ॥ विष्णुप्रीतिकरं यज्ञं कदाचिदकरोन्नृपः ॥ यज्ञाव साने राजासौ मुदावभृथकौतुकी ॥ ७ ॥ सस्नौ रामधनुष्कोटौ सदारः सपरिच्छदः ॥ सेवित्वा रामनाथं च स वेश्म प्रययौ द्विजाः ॥ ८ ॥ एवं निवसमानेऽस्मिन्राज्ञि पुण्यनिधौ तदा ॥ कदाचिद्धरिणा लक्ष्मीर्विनोदकलहाकुला ॥ ९ ॥ हरिणा समयं कृत्वा नृपभक्तिं परिक्षितुम् ॥ विष्णुना प्रेषिता लक्ष्मीर्वैकुंठात्कमलालया ॥ १० ॥ अष्टवर्षवयोरूपा प्रययौ गंधमादने ॥ तत्रागत्य धनुष्कोटौ तस्थौ सा कमलालया ॥ ११ ॥ तस्मिन्नवसरे राजा ययौ गुणनिधिर्द्विजाः ॥ स्नातुं रामधनुष्कोटौ सदारः सहसैनिकः ॥ १२ ॥ तत्र गत्वा स राजाऽयं स्नात्वा नियमपूर्वकम् ॥ तुलापुरुषमुख्यानि कृत्वा दानानि कृत्स्नशः ॥ १३ ॥ प्रयातुकामो भवनं कन्यां कांचिद्ददर्श सः ॥ अतीव रूपसंपन्नामष्टवर्षां शुचिस्मिताम् ॥ ॥ १४ ॥ दृष्ट्वा नृपस्तां पप्रच्छ कन्यां चारुविलोचनाम् ॥ चारुस्मितां चारुदतीं बिंबोष्ठीं तनुमध्यमाम् ॥ १५ ॥ ॥ पुण्यनिधिरुवाच ॥ ॥ का त्वं कन्ये सुता कस्य कुतो वा त्वमिहागता ॥ अत्रागमेन किं कार्यं तव वत्से शुचिस्मिते ॥ १६ ॥ एवं नृपस्तां पप्रच्छ कन्यामुत्पललोच नाम् ॥ एवं पृष्टा तदा कन्या नृपं तमवदद्द्विजाः ॥ १७ ॥ न मे माता पिता नास्ति न च मे बांधवास्तथा ॥ अनाथाहं महाराज भविष्यामि च ते सुता ॥ १८ ॥ त्वद्गृहेऽहं निवत्स्यामि तात त्वां पश्यती सदा ॥ हठात्कृष्यति यो वा मां ग्रहीष्यति करेण तम् ॥ १९ ॥ यदि शासिष्यसे भूप तदाहं तव मंदिरे ॥ वत्स्यामि ते सुता भूत्वा पितर्गुणनिधे चिरम् ॥ २० ॥ एवमुक्तस्तदा प्राह कन्यां गुणनिधिर्नृपः ॥ अहं सर्वं करिष्यामि

१ अवसत्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदुक्तं कन्यके शुभे ॥ २१ ॥ ममापि दुहिता नास्ति पुत्रोऽस्त्येकः कुलोद्वहः ॥ तव यस्मिन्रुचिर्भद्रे त्वां तस्मै प्रददाम्यहम् ॥ २२ ॥ आगच्छ मद्गृहं कन्ये मम चांतःपुरे वस ॥ मद्भार्यायाः सुता भूत्वा यथाकाममनिंदिते ॥ २३ ॥ इत्युक्ता सा नृपेणाथ कन्या कमललोचना ॥ तथास्त्विति नृपं प्रोच्य तेन साकं ययौ गृहम् ॥ २४ ॥ राजा स्वभार्याहस्ते तां प्रददौ कन्यकां शुभाम् ॥ अब्रवीच्च स्वकां भार्यां राजा विंध्यावलिं तदा ॥ २५ ॥ आवयोः कन्यका चेयं राज्ञि विंध्यावले शुभे ॥ रक्षेमां सर्वथा त्वं वै पुरुषांतरतः प्रिये ॥ २६ ॥ इतीरिता नृपेणासौ भार्या विंध्यावलिस्तदा ॥ ओमित्युक्त्वाथ तां कन्यां पुत्रीं जग्राह पाणिना ॥ २७ ॥ पोषिता पालिता राज्ञा सुतवत्कन्यका च सा ॥ न्यवात्सीत्सुसुखं राज्ञो भवने लालिता सदा ॥२८॥ अथ विष्णुर्जगन्नाथो लक्ष्मीमन्वेष्टुमादरात् ॥ आरूढविनतानन्दो वैकुंठान्निर्ययौ द्विजाः ॥२९॥ विनिर्गत्य स वैकुंठाद्विलंघितवियत्पथः ॥ बभ्राम च बहून्देशाल्लँक्ष्मीं तत्र न दृष्टवान् ॥३०॥ रामसेतुमथागच्छद्गंधमादनपर्वते ॥ अन्विष्य सर्वतो रामसेतुं बभ्राम चेंदिराम् ॥ ३१ ॥ एतस्मिन्नेव काले सा पुष्पावचयकौतुकात् ॥ सखीभिः कन्यकायासीद्भवनोद्यानपादपान् ॥ ३२ ॥ पुष्पाण्यवचिनोति स्म सखीभिः सह कानने ॥ तत्रागत्य ततो विष्णुर्विप्ररूपधरो द्विजाः ॥ ३३ ॥ गंगांभो विदधत्स्कंधे वहञ्छत्रं करेण च ॥ गंगास्नायिद्विजस्येव रचयन्वेषमात्मनः ॥ ३४ ॥ धारयन्दक्षिणे पाणौ कुशग्रंथिपवित्रकम् ॥ भस्मोद्धलितसर्वांगस्त्रिपुण्ड्रावलिशोभितः ॥ ३५ ॥ प्रजपञ्छिवनामानि धृतरुद्राक्षमालिकः ॥ सोत्तरीयः शुचिर्विप्रः समायातो जनार्दनः ॥ ३६ ॥ तमागतं द्विजं दृष्ट्वा स्तब्धाऽतिष्ठत कन्यका ॥ अपश्यदष्टवर्षां तां वल्लभां पुष्पहारिणीम् ॥ ३७ ॥ दृष्ट्वा स त्वरया विप्रः कन्यां मधुरभाषिणीम् ॥ हठात्कृत्य करेणासौ जग्राह गरुडध्वजः ॥ ३८ ॥ तदा चुक्रोश सा कन्या सखीभिः सह कानने ॥ तमाक्रोशं समाकर्ण्य राजा स तु समागतः ॥ ३९ ॥ प्रययौ भवनोद्यानं वृतः कतिपयैर्भटैः ॥ गत्वा पप्रच्छ तां कन्यां तत्सखीरपि भूपतिः ॥ ४० ॥ किमर्थमधुना क्रुष्टं सखीभिः सह कन्यके ॥ त्वया तु भवनोद्याने तत्र कारणमुच्यताम् ॥ ४१ ॥ केन त्वं परिभूतासि हठात्कृष्य सुते मम ॥ इति पृष्टा तमाचष्ट कन्या गुणनिधिं नृपम् ॥ बाष्पपूर्णानना खिन्ना रुषिता भृशकातरा ॥ ४२ ॥ ॥ कन्योवाच ॥ ॥ अयं विप्रो हठात्कृत्य जगृहे पांड्यनाथ माम् ॥ ४३ ॥ तातात्र वृक्षमूलेऽसौ स तिष्ठत्यकुतोभयः ॥ तदाकर्ण्य वचस्तस्या राजा गुणनिधिः सुधीः ॥ ४४ ॥ जग्राह तरसा विप्रमविद्वांस्तद्बलं हठात् ॥ रामनाथालयं नीत्वा निगृह्य च हठात्तदा ॥ ४५ ॥ बद्ध्वा निगडपाशाभ्यामानयन्मंडपं च तम् ॥ आत्मपुत्रीं समाश्वास्य शुद्धांतमनयन्नृपः ॥ ४६ ॥ स्वयं च प्रययौ रम्यं भवनं नृपपुंगवः ॥ ततो रात्रौ स्वपन्राजा

CC-0. In Public Domain. Digitization by eGangotri

स्वप्ने विप्रं ददर्श तम् ॥ ४७ ॥ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ कौस्तुभालंकृतोरस्कं पीतांबरधरं हरिम् ॥ ४८ ॥ कालमेघच्छविं कांतं गरुडोपरि सस्थितम् ॥ चारुस्मितं चारुदंतं लसन्मकरकुण्डलम् ॥ ४९ ॥ विष्वक्सेनप्रभृतिभिः किंकरैरुपसेवितम् ॥ शेषपर्यंकशयनं नारदादिमुनिस्तुतम् ॥ ५० ॥ ददर्श च स्वकां कन्यां विकासिकमलस्थिताम् ॥ धृतपंकजहस्तां तां नीलकुञ्चितमूर्धजाम् ॥ ५१ ॥ विष्णुवक्षस्थलावासां समुन्नतपयोधराम् ॥ दिग्गजैरभिषिक्तांगीं श्यामां पीतांबरावृताम् ॥ ५२ ॥ स्वर्णपंकजसंक्लृप्तमालालंकृतमूर्धजाम् ॥ दिव्याभरणशोभाढ्यां चारुहारविभूषिताम् ॥ ५३ ॥ अनर्घरत्नसंक्लृप्तनासाभरणशोभिताम् ॥ सुवर्णनिष्काभरणां कांचीनूपुरराजिताम् ॥ ५४ ॥ महालक्ष्मीं ददर्शासौ राजा रात्रौ स्वकां सुताम् ॥ एवं दृष्ट्वा नृपः स्वप्ने विप्रं तं स्वसुतामपि ॥ ५५ ॥ उत्थितः सहसा तल्पात्कन्यागृहमवाप च ॥ तथैव दृष्टवान्कन्यां यथा स्वप्ने ददर्श ताम् ॥ ५६ ॥ अथोदिते सवितरि कन्यामादाय भूमिपः ॥ रामनाथालयं प्राप ब्राह्मणं न्यस्तवान्यतः ॥ ५७ ॥ स मंडपवरे विप्रं ददर्श हरिरूपिणम् ॥ यथा ददर्श स्वप्ने तं वनमालादिचिह्नितम् ॥ विष्णुं विज्ञाय तुष्टाव नृपतिर्हरिमीश्वरम् ॥ ५८ ॥

॥ पुण्यनिधिरुवाच ॥

॥ नमस्ते कमलाकांत प्रसीद गरुडध्वज ॥ ५९ ॥ शार्ङ्गपाणे नमस्तुभ्यमपराधं क्षमस्व मे ॥ नमस्ते पुण्डरीकाक्ष चक्रपाणे श्रियःपते ॥ ६० ॥ कौस्तुभालंकृतांकाय नमः श्रीवत्सलक्ष्मणे ॥ नमस्ते ब्रह्मपुत्राय दैत्यसंघविदारिणे ॥ ६१ ॥ अशेषभुवनावासनाभिपंकजशालिने ॥ मधुकैटभसंहर्त्रे रावणांतकराय ते ॥ ६२ ॥ प्रह्लादरक्षिणे तुभ्यं धरित्रीपतये नमः ॥ निर्गुणायाप्रमेयाय विष्णवे बुद्धिसाक्षिणे ॥ ६३ ॥ नमस्ते श्रीनिवासाय जगद्धात्रे परात्मने ॥ नारायणाय देवाय कृष्णाय मधुविद्विषे ॥ ६४ ॥ नमः पंकजनाभाय नमः पंकजचक्षुषे ॥ नमः पंकजहस्तायाः पतये पंकजांघ्रये ॥ ६५ ॥ भूयोभूयो जगन्नाथ नमः पंकजमालिने ॥ दयामूर्त्ते नमस्तुभ्यमपराधं क्षमस्व मे ॥ ६६ ॥ मया निगडपाशाभ्यां यः कृतो मधुसूदन ॥ अनयस्त्वत्स्वरूपमविदित्वा कृतः प्रभो ॥ ६७ ॥ अतो मदपराधोऽयं क्षंतव्यो मधुसूदन ॥ एवं स्तुत्वा महाविष्णुं राजा पुण्यनिधिर्द्विजाः ॥ ६८ ॥ लक्ष्मीं तुष्टाव जननीं सर्वेषां प्राणिनां मुदा ॥ नमो देवि जगद्धात्रि विष्णुवक्षस्थलालये ॥ ६९ ॥ नमोऽब्धिसंभवे तुभ्यं महालक्ष्मि हरिप्रिये ॥ सिद्ध्यै पुष्ट्यै स्वधायै च स्वाहायै सततं नमः ॥ ७० ॥ संध्यायै च प्रभायै च धात्र्यै भूत्यै नमोनमः ॥ श्रद्धायै चैव मेधायै सरस्वत्यै नमोनमः ॥ ७१ ॥ यज्ञविद्ये महाविद्ये गुह्यविद्येऽतिशोभने ॥ आत्मविद्ये च देवेशि मुक्तिदे सर्वदेहिनाम् ॥ ७२ ॥ त्रयीरूपे जगन्मातर्जगद्रक्षाविधायिनि ॥ रक्ष मां त्वं कृपादृष्ट्या सृष्टिस्थित्यंतकारिणि ॥ ७३ ॥ भूयोभूयो नमस्तुभ्यं ब्रह्ममात्रे महेश्वरि ॥ इति स्तुत्वा महालक्ष्मीं प्रार्थयामास माधवम् ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदज्ञानान्मया विष्णो त्वयि दोषः कृतोऽधुना ॥ पादे निगडबंधेन स द्रोहः क्षम्यतां त्वया ॥ ७५ ॥ लोकास्ते शिशवः सर्वे त्वं पिता जगतां हरे ॥ सुताऽपराधः पितृभिः क्षंतव्यो मधुसूदन ॥ ७६ ॥ अपराधिनां च दैत्यानां स्वरूपमपि दत्तवान् ॥ भवान्विष्णो ममापीममपराधं क्षमस्व वै ॥ ॥ ७७ ॥ जिघांसयापि भगवन्नागतां पूतनां पुरा ॥ अनयस्त्वत्पदांभोजं तन्मां रक्ष कृपानिधे ॥ लक्ष्मीकांत कृपादृष्टिं मयि पातय केशव ॥ ७८ ॥ ॥ ॥ श्रीसूत उवाच ॥ ॥ इति संप्रार्थितो विष्णू राज्ञा तेन द्विजोत्तमाः ॥ प्राह गंभीरया वाचा नृपं पुण्यनिधिं ततः ॥ ७९ ॥ ॥ विष्णुरुवाच ॥ ॥ राजन्न भीस्त्वया कार्या मद्बंधननिमित्तजा ॥ ८० ॥ भक्तवश्यत्वमधुना तव प्रतिहितं मया ॥ मम प्रीतिकरं यज्ञमकरोद्यद्भवानिह ॥ ॥ ८१ ॥ अतस्त्वं मम भक्तोसि राजन्पुण्यनिधेऽधुना ॥ तेनाहं तव वश्योऽस्मि भक्तिपाशेन यंत्रितः ॥ ८२ ॥ भक्तापराधं सततं क्षमाम्यहमरिंदम ॥ त्वद्भक्तिं ज्ञातुकामेन मया संप्रेरिता त्वियम् ॥ ८३ ॥ लक्ष्मीर्मम प्रिया राजंस्त्वया संरक्षिताऽधुना ॥ तेनाहं तव तुष्टोऽस्मि मत्स्वरूपा त्वियं सदा ॥ ८४ ॥ अस्यां यो भक्तिमांल्लोके स मद्भक्तोऽभिधीयते ॥ अस्यां यो विमुखो राजन्स मद्द्वेषी स्मृतः सदा ॥ ८५ ॥ त्वमिमां भक्तिसंयुक्तो यस्मात्पूजितवानसि ॥ मत्पूजापि कृता तस्मान्मदभिन्ना त्वियं यतः ॥ ८६ ॥ अतस्त्वया नापराधः कृतो मयि नरेश्वर ॥ किं तु पूजैव विहिता तां त्वयार्चयता मम ॥ ८७ ॥ त्वया मद्भार्यया साकं संकेतोऽकारि यत्पुरा ॥ तत्संकेताभिगुप्त्यर्थं मां यद्बंधितवानसि ॥ ८८ ॥ तेन प्रीतोस्मि ते राजँल्लक्ष्मीः संरक्षिताऽधुना ॥ मत्स्वरूपा च सा लक्ष्मीर्जगन्माता त्रयीमयी ॥ ८९ ॥ तद्रक्षां कुर्वता भूप त्वया यद्बंधनं मम ॥ तत्प्रियं मम राजेंद्र मा भयं क्रियतां त्वया ॥ ९० ॥ इयं लक्ष्मीस्तव सुता सत्यमेव न संशयः ॥ इतीरितेऽथ हरिणा लक्ष्मीः प्रोवाच भूपतिम् ॥ ॥ ९१ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ राजन्प्रीतास्मि ते चाहं रक्षिता यद्गृहे त्वया ॥ त्वद्भक्तिशोधनार्थं वा अहं विष्णुरुभावपि ॥ ९२ ॥ विनोदकलहव्याजादागताविह भूपते ॥ तव योगेन भक्त्या च तुष्टावावां परंतप ॥ ९३ ॥ आवयोः कृपया राजन्सुखं ते भवतात्सदा ॥ सर्वभूमंडलैश्वर्यं सदा ते भवतु ध्रुवम् ॥ ९४ ॥ आवयोः पादयुगले भक्तिर्भवतु ते ध्रुवा ॥ देहांते मम सायुज्यं पुनरावृत्तिवर्जितम् ॥ ९५ ॥ नित्यं भवतु ते राजन्माभूत्ते पापधीस्तथा ॥ सदा धर्मे भवतु धीर्विष्णुभक्तियुता तव ॥ ९६ ॥ एवमुक्त्वा नृपं लक्ष्मीर्विष्णोर्वक्षस्थलं ययौ ॥ अथ विष्णुरुवाचेदं राजानं द्विजपुंगवाः ॥ ९७ ॥ यथा त्वयात्र बद्धोहं निगडेन नृपोत्तम ॥ तद्रूपेणैव वत्स्यामि सेतुमाधवसंज्ञितः ॥ ९८ ॥ मयैव कारितः सेतुस्तद्रक्षार्थमहं

१ वै अहम्—इति पदच्छेदः ।

CC-0. In Public Domain. Digitization by eGangotri

नृप ॥ भूतराक्षससंघेभ्यो भयानामुपशांतये ॥९९॥ ब्रह्मापि सेतुरक्षार्थं वसत्यत्र दिवानिशम् ॥ शंकरो रामनाथाख्यो नित्यं सेतौ वसत्यथ ॥१००॥ इंद्रादिलोकपालाश्च वसंत्यत्र मुदान्विताः ॥ अतोऽहमत्र वत्स्यामि सेतुमाधवसंज्ञया ॥१॥ सेतुसंरक्षणार्थं वै सर्वोपद्रवशांतये ॥ सर्वेषामिष्टसिद्ध्यर्थं सर्वपापोपशांतये ॥ २ ॥ त्वया निगडबद्धं मां सेवंते येऽत्र मानवाः ॥ ते यांति मम सायुज्यं सर्वाभीष्टं तथा नृप ॥ ३ ॥ मम लक्ष्म्यास्तत्र तथा चरितं ये पठंति वै ॥ न ते यास्यंति दारिद्र्यं किं त्वैश्वर्यं व्रजंति ते ॥४॥ त्वत्कृतं यदिदं स्तोत्रं मम लक्ष्म्या विशांपते ॥ ये पठंति च शृण्वंति लिखंति च मुदान्विताः ॥ ५ ॥ न तेषां पुनरावृत्तिर्मम लोकात्कदाचन ॥ इत्युक्त्वा स हरिस्तत्र नृपं पुण्यनिधिं तदा ॥ ६ ॥ तत्रैव पूर्णरूपेण सन्निधत्ते स्म सर्वदा ॥ नृपः पुण्यनिधिर्विप्राः सेतुमाधवरूपिणम् ॥ ७ ॥ विष्णुं प्रणम्य भक्त्या तु महापूजां विधाय च ॥ सेवित्वा रामनाथं च स्वमेव भवनं ययौ ॥ ८ ॥ यावज्जीवमसौ तत्र सेतौ न्यवसदुत्तमे ॥ मधुरायां निजं पुत्रं स्थापयामास पालकम् ॥ ९ ॥ तत्रैव निवसन्राजा देहांते मुक्तिमाप्तवान् ॥ विंध्यावलिश्च तत्पत्नी तमेवानुममार सा ॥ पतिव्रता पतिप्राणा प्रययौ सापि सद्गतिम् ॥११०॥ ॥ श्रीसूत उवाच ॥ ॥ येत्र भक्तियुता नित्यं सेवंते सेतुमाधवम् ॥ ११ ॥ न तेषां पुनरावृत्तिः कैलासाज्जातु जायते ॥ सेतुमाधवसेवां ये न कुर्वंत्यत्र मानवाः ॥ ॥ १२ ॥ न तेषां रामनाथस्य सेवा फलवती भवेत् ॥ गृहीत्वा सैकतं सेतोर्गंगायां निक्षिपेद्यदि ॥ १३ ॥ विभज्य माधवपुरे वैकुंठे स वसेन्नरः ॥ गंगां जिगमिषुर्विप्राः सेतुमाधवसन्निधौ ॥ १४ ॥ संकल्प्य गंगां निर्गच्छेत्सा यात्रा सफला भवेत् ॥ आनीय गंगासलिलं रामेशमभिषिच्य च ॥ १५ ॥ सेतौ निक्षिप्य तद्भारं ब्रह्म प्राप्नोत्यसंशयः ॥ इति वः कथितं विप्राः सेतुमाधववैभवम् ॥ १६ ॥ एतत्पठन्वा शृण्वन्वा वैकुंठे लभते गतिम् ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये सेतुमाधवप्रशंसायां पुण्यनिधिचरितकथनंनाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ सूत उवाच ॥ ॥ अथातः संप्रवक्ष्यामि सेतुयात्राक्रमं द्विजाः ॥ यं श्रुत्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ १ ॥ स्नात्वाचम्य विशुद्धात्मा कृतनित्यविधिः सुधीः ॥ रामनाथस्य तुष्ट्यर्थं प्रीत्यर्थं राघवस्य च ॥ २ ॥ भोजयित्वा यथाशक्ति ब्राह्मणान्वेदपारगान् ॥ भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः ॥ ३ ॥ गोपीचन्दलिप्तो वा स्वफालेऽप्यूर्ध्वपुंड्रकः ॥ रुद्राक्षमालाभरणः सपवित्रकरः शुचिः ॥ ४ ॥ सेतुयात्रां करिष्येऽहमिति संकल्प्य भक्तितः ॥ स्वगृहात्प्रव्रजेन्मौनी जपन्नष्टाक्षरं मनुम् ॥ ५ ॥ पंचाक्षरं नाममंत्रं जपेन्नियतमानसः ॥ एकवारं हविष्याशी जितक्रोधो जितेंद्रियः ॥ ६ ॥ पादुकाछत्ररहितस्तांबूलपरिवर्जितः ॥ तैलाभ्यंगविहीनश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीसंगादिविवर्जितः ॥७॥ शौचाद्याचारसंयुक्तः सन्ध्योपास्तिपरायणः ॥ गायत्र्युपास्तिं कुर्वाणस्त्रिसंध्यं रामचिंतकः ॥ ८ ॥ मध्येमार्गं पठन्नित्यं सेतुमाहात्म्यमादरात् ॥ पठन्रामायणं वापि पुराणांतरमेव वा ॥ ९ ॥ व्यर्थवाक्यानि संत्यज्य सेतुं गच्छेद्विशुद्धये ॥ प्रतिग्रहं न गृह्णीयान्नाचारांश्च परित्यजेत् ॥ १० ॥ कुर्यान्मार्गे यथाशक्ति शिवविष्ण्वादिपूजनम् ॥ वैश्वदेवादिकर्माणि यथाशक्ति समाचरेत् ॥ ११ ॥ ब्रह्मयज्ञमुखान्धर्मान्प्रकुर्याच्चाग्निपूजनम् ॥ अतिथिभ्योऽन्नपानादि संप्रदद्याद्यथाबलम् ॥ १२ ॥ दद्याद्भिक्षां यतिभ्योऽपि वित्तशाठ्यं परित्यजन् ॥ शिवविष्ण्वादिनामानि स्तोत्राणि च पठेत्पथि ॥ १३ ॥ धर्ममेव सदा कुर्यान्निषिद्धानि परित्यजेत् ॥ इत्यादिनियमोपेतः सेतुमूलं ततो व्रजेत् ॥ १४ ॥ पाषाणं प्रथमं दद्यात्तत्र गत्वा समाहितः ॥ तत्रावाह्य समुद्रं च प्रणमेत्तदनंतरम् ॥ १५ ॥ अर्घ्यं दद्यात्समुद्राय प्रार्थयेत्तदनंतरम् ॥ अनुज्ञां च ततः कुर्यात्ततः स्नायान्महोदधौ ॥ १६ ॥ मुनीनामथ देवानां कपीनां पितृणां तथा ॥ प्रकुर्यात्तर्पणं विप्रा मनसा संस्मरन्हरिम् ॥ १७ ॥ ॥ ॥ पाषाणसंख्या ॥ ॥ पाषाणसप्तकं दद्यादेकं वा विप्रपुंगवाः ॥ पाषाणदानात्सफलं स्नानं भवति नान्यथा ॥ १८ ॥ ॥ पाषाणदानमंत्रः ॥ ॥ पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरे ॥ पाषाणं ते मया दत्तमाहारार्थं प्रकल्प्यताम् ॥ १९ ॥ ॥ सान्निध्यप्रार्थनामन्त्रः ॥ ॥ विश्वाचि त्वं घृताचि त्वं विश्वयाने विशांपते ॥ सान्निध्यं कुरु मे देव सागरे लवणांभसि ॥ २० ॥ ॥ नमस्कारमन्त्रः ॥ ॥ नमस्ते विश्वगुप्ताय नमो विष्णो ह्यपांपते ॥ नमो हिरण्यशृंगाय नदीनां पतये नमः ॥ समुद्राय वयूनाय प्रोच्चार्य प्रणमेत्तथा ॥ २१ ॥ ॥ अर्घ्यमन्त्रः ॥ ॥ सर्वरत्नमय श्रीमन्सर्वरत्नाकराकर ॥ सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे ॥ २२ ॥ ॥ अनुज्ञापनमंत्रः ॥ ॥ अशेषजगदाधार शंखचक्रगदाधर ॥ देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे ॥ २३ ॥ ॥ प्रार्थनामंत्रः ॥ ॥ प्राच्यां दिशि च सुग्रीवं दक्षिणस्यां नलं स्मरेत् ॥ २४ ॥ प्रतीच्यां मैंदनामानमुदीच्यां द्विविदं तथा ॥ रामं च लक्ष्मणं चैव सीतामपि यशस्विनीम् ॥ २५ ॥ अंगदं वायुतनयं स्मरेन्मध्ये बिभीषणम् ॥ पृथिव्यां यानि तीर्थानि प्राविशंस्त्वा महोदधे ॥ २६ ॥ स्नानस्य मे फलं देहि सर्वस्मात्त्राहि मांहंसः ॥ हिरण्यशृंगमित्याभ्यां नाभ्यां नारायणं स्मरेत् ॥ २७ ॥ ध्यायन्नारायणं देवं स्नानादिषु च कर्मसु ॥ ब्रह्मलोकमवाप्नोति जायते नेह वै पुनः ॥ २८ ॥ सर्वेषामपि पापानां प्रायश्चित्तं भवेत्ततः ॥ प्रह्लादं नारदं व्यासमंबरीषं शुकं तथा ॥ अन्यांश्च भगवद्भक्तांश्चिंतयेदेकमानसः ॥ २९ ॥ ॥ स्नानमन्त्रः ॥ ॥ वेदादिर्यो वेदवसिष्ठयो

१ व्यर्थकार्याणि–इ०पा० । २ मांभसः–इ०पा० ।

निः सरित्पतिः सागररत्नयोनिः ॥ अग्निश्च तेजश्च इला[1] च तेजो रेतोधा विष्णुरमृतस्य नाभिः ॥ ३० ॥ इदं ते अन्याभिरसमानमद्भिर्याः काश्च सिंधुं प्रविशंत्यापः ॥ सर्पो जीर्णामिव त्वचं जहामि पापं शरीरात्सशिरस्कोऽभ्युपेत्य ॥३१॥ समुद्राय वयूनाय नमस्कुर्यात्पुनर्द्विजाः ॥ सर्वतीर्थमयं शुद्धं नदीनां पतिमंबुधिम् ॥ ३२ ॥ द्वौ समुद्राविति पुनः प्रोच्चार्य स्नानमाचरेत् ॥ ब्रह्मांडोदरतीर्थानि करस्पृष्टानि ते रवे ॥ ३३ ॥ तेन सत्येन मे सेतौ तीर्थं देहि दिवाकर ॥ प्राच्यां दिशि च सुग्रीवमित्यादिक्रमयोगतः ॥३४॥ स्मृत्वा भूयो द्विजाः सेतौ तृतीयं स्नानमाचरेत् ॥ देवीपत्तनमारभ्य प्रव्रजे द्यदि मानवः ॥ ३५ ॥ तदा तु नवपाषाणमध्ये सेतौ विमुक्तिदे ॥ स्नानमंबुनिधौ कुर्यात्स्वपापौघापनुत्तये ॥ ३६ ॥ दर्भशय्यापदव्या चेद्गच्छे त्सेतुं विमुक्तिदम् ॥ तदा तत्रोदधावेव स्नानं कुर्याद्विमुक्तये ॥ ३७ ॥

॥ तर्पणविधिः ॥

॥ पिप्पलादं कविं कण्वं[2] कृतांतं जीवितेश्वरम् ॥ मन्युं च कालरात्रिं च विद्यां चाहर्गणेश्वरम् ॥ ३८ ॥ वसिष्ठं वामदेवं च पराशर[3]मुमापतिम् ॥ वाल्मिकिं नारदं चैव वालखिल्यान्मुनींस्तथा ॥ ३९ ॥ नलं नीलं गवाक्षं च गवयं गन्धमादनम् ॥ मैंदं च द्विविदं चैव शरभं चर्षभं तथा ॥ ४० ॥ सुग्रीवं च हनूमंतं वेगदर्शनमेव च ॥ रामं च लक्ष्मणं सीतां महाभागां यशस्विनीम् ॥ ४१ ॥ त्रिः कृत्वा तर्पयेदेतान्मंत्रानुक्त्वा यथाक्रमम् ॥ विभोश्च तत्तन्नामानि चतुर्थ्यंतानि वै द्विजाः ॥४२॥ देवा नृषीन्पितॄंश्चैव विधिवच्च तिलोदकैः॥ द्वितीयांतानि नामानि चोक्त्वा वा तर्पयेद्द्विजाः ॥ ४३ ॥ तर्पयेत्सपवित्रस्तु जले स्थित्वा प्रसन्नधीः ॥ तर्पणात्स र्वतीर्थेषु स्नानस्य फलमाप्नुयात् ॥ ४४ ॥ एवमेतांस्तर्पयित्वा नमस्कृत्योत्तरेज्जलात् ॥ आर्द्रवस्त्रं परित्यज्य शुष्कवासःसमावृतः ॥ ४५ ॥ आचम्य सपवित्रश्च विधिवच्छ्राद्धमाचरेत् ॥ पिंडान्पितृभ्यो दद्याच्च तिलतण्डुलकैस्तथा ॥ ४६ ॥ एतच्छ्राद्धमशक्तस्य मया प्रोक्तं द्विजोत्तमाः ॥ धना ढ्योऽन्नेन वै श्राद्धं षड्रसेन समाचरेत् ॥ ४७ ॥ गोभूतिलहिरण्यादिदानं कुर्यात्समृद्धिमान् ॥ रामचन्द्रधनुष्कोटावेवमेव समाचरेत् ॥ ४८ ॥ पाषाणदानपूर्वाणि तर्पणांतानि वै द्विजाः ॥ सेतुमूले यथैतानि विधिवद्द्वयतनोद्विजाः ॥ ४९ ॥ चक्रतीर्थं ततो गत्वा तत्रापि स्नानमाचरेत् ॥ पश्येच्च सेत्वधिपतिं देवं नारायणं हरिम् ॥ ५० ॥ गच्छन्पश्चिममार्गेण तत्रत्ये चक्रतीर्थके ॥ स्नात्वा दर्भशयं देवं प्रपश्येद्भक्तिपूर्वकम् ॥ ५१ ॥ कपितीर्थं ततः प्राप्य तत्रापि स्नानमाचरेत् ॥ सीताकुंडं ततः प्राप्य तत्रापि स्नानमाचरेत् ॥ ५२ ॥ ऋणमोचनतीर्थं तु ततः प्राप्य महाफलम् ॥ स्नात्वा प्रणम्य रामं च जानकीरमणं प्रभुम् ॥ ५३ ॥ गच्छेल्लक्ष्मणतीर्थं तु कण्ठादुपरि वापनम् ॥ कृत्वा स्नायाच्च तत्रापि दुष्कृतान्यपि

१ रसा–इ०पा० । २ पुण्यम्–इ०पा० । ३ पाराशर्यम्–इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

चिन्तयन् ॥ ५४ ॥ ततः स्नात्वा रामतीर्थे ततो देवालयं व्रजेत् ॥ स्नात्वा पापविनाशने च गंगायमुनयोस्तथा ॥ ५५ ॥ सावित्र्यां च सरस्वत्यां गायत्र्यां च द्विजोत्तमाः ॥ स्नात्वा च हनुमत्कुण्डे ततः स्नायान्महाफले ॥ ब्रह्मकुण्डं ततः प्राप्य स्नायाद्विधिपुरःसरम् ॥ ५६ ॥ नागकुण्डं ततः प्राप्य सर्वपापविनाशनम् ॥ स्नानं कुर्यान्नरो विप्रा नरकक्लेशनाशनम् ॥ गंगाद्याः सरितः सर्वास्तीर्थानि सकलान्यपि ॥ ५७ ॥ सर्वदा नागकुंडे तु वसंति स्वाघशांतये ॥ अनंतादिमहानागैरष्टाभिरिदमुत्तमम् ॥ ५८ ॥ कल्पितं मुक्तिदं तीर्थं रामसेतौ शिवंकरम् ॥ अगस्त्यकुण्डं संप्राप्य ततः स्नायादनुत्तमम् ॥ ५९ ॥ अथाग्नितीर्थमासाद्य सर्वदुष्कर्मनाशनम् ॥ स्नात्वा संतर्प्य विधिवच्छ्राद्धं कुर्यात्पितॄन्स्मरन् ॥ ६० ॥ गोभूहिरण्य धान्यादि ब्राह्मणेभ्यः स्वशक्तितः ॥ दत्त्वाग्नितीर्थतीरे तु सर्वपापैः प्रमुच्यते ॥ ६१ ॥ अथवा यानि तीर्थानि चक्रतीर्थमुखानि वै ॥ अनुक्रांतानि विप्रेंद्राः सर्वपापहराणि तु ॥ ६२ ॥ स्नायात्तदनुपूर्वेण स्नायाद्वापि यथारुचि ॥ स्नात्वैवं सर्वतीर्थेषु श्राद्धादीनि समाचरेत् ॥ ६३ ॥ पश्चाद्रामेश्वरं प्राप्य निषेव्य परमेश्वरम् ॥ सेतुमाधवमागत्य तथा रामं च लक्ष्मणम् ॥ ६४ ॥ सीतां प्रभंजनसुतं तथान्यान्कपिसत्तमान् ॥ तत्रत्यसर्वतीर्थेषु स्नात्वा नियमपूर्वकम् ॥ ६५ ॥ प्रणम्य रामनाथं च रामचंद्रं तथापरान् ॥ नमस्कृत्य धनुष्कोटिं ततः स्नातुं व्रजेन्नरः ॥ ६६ ॥ तत्र पाषाण दानादिपूर्वोक्तनियमं चरेत् ॥ धनुष्कोटौ च दानानि दद्याद्वित्तानुसारतः ॥ ६७ ॥ क्षेत्रं गाश्च तथान्यानि वस्त्राण्यन्यानि चादरात् ॥ ब्राह्मणेभ्यो वेदविद्भ्यो दद्याद्वित्तानुसारतः ॥ ६८ ॥ कोटितीर्थं ततः प्राप्य स्नायान्नियमपूर्वकम् ॥ ततो रामेश्वरं देवं प्रणमेद्वृषभध्वजम् ॥ ६९ ॥ विभवे सति विप्रेभ्यो दद्यात्सौवर्णदक्षिणाम् ॥ तिलान्धान्यं च गां क्षेत्रं वस्त्राण्यन्यानि तंडुलान् ॥ ७० ॥ दद्याद्वित्तानुसारेण वित्तलोभविवर्जितः ॥ धूपं दीपं च नैवेद्यं पूजोपकरणानि च ॥ ७१ ॥ रामेश्वराय देवाय दद्याद्वित्तानुसारतः ॥ स्तुत्वा रामेश्वरं देवं प्रणम्य च सभक्तिकम् ॥ ७२ ॥ अनुज्ञाप्य ततो गच्छेत्सेतुमाधवसंनिधिम् ॥ तस्मै दत्त्वा च धूपादीननुज्ञाप्य च माधवम् ॥ ७३ ॥ पूर्वोक्तनियमोपेतः पुनरायात्स्वकं गृहम् ॥ ब्राह्मणान्भोजयेदन्नैः षड्रसैः परिपूरितैः ॥ ७४ ॥ तेनैव रामनाथोऽस्मै प्रीतोऽभीष्टं प्रयच्छति ॥ नारकं चास्य नास्त्येव दारिद्र्यं च विनश्यति ॥ ॥ ७५ ॥ संततिर्वर्धते तस्य पुरुषस्य द्विजोत्तमाः ॥ संसारमवधूयाशु सायुज्यमपि यास्यति ॥ ७६ ॥ अत्रागन्तुमशक्तश्चेच्छ्रुतिस्मृत्यागमेषु यत् ॥ ग्रंथजातं महापुण्यं सेतुमाहात्म्यसूचकम् ॥ ७७ ॥ तं ग्रंथं पाठयेद्विप्रा महापातकनाशनम् ॥ इदं वा सेतुमाहात्म्यं पठेद्भक्तिपुरःसरम् ॥ ७८ ॥

१ आयात्—आगच्छेत्—इत्यर्थः । प्रयोग आर्षः ।

CC-0. In Public Domain. Digitization by eGangotri

सेतुस्नानफलं पुण्यं तेनाप्नोति न संशयः ॥ अंधपंग्वादिविषयमेतत्प्रोक्तं मनीषिभिः ॥ ७९ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितो विप्राः सेतुयात्राक्रमो द्विजाः ॥ एतत्पठन्वा शृण्वन्वा सर्वदुःखाद्विमुच्यते ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये यात्राक्रमवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ श्रीसूत उवाच ॥ ॥ भूयोऽप्यहं प्रवक्ष्यामि सेतुमुद्दिश्य वैभवम् ॥ युष्माकमादरेणाहं शृणुध्वं मुनिपुंगवाः ॥ १ ॥ स्थानानामपि सर्वेषामेतत्स्थानं महत्तरम् ॥ अत्र जप्तं हुतं तप्तं दत्तं चाक्षय मुच्यते ॥ २ ॥ अस्मिन्नेव महास्थाने धनुष्कोटौ निमज्जनात् ॥ वाराणस्यां दशसमावासपुण्यफलं भवेत् ॥ ३ ॥ तस्मिंस्थले धनुष्कोटौ स्नात्वा रामेश्वरं शिवम् ॥ दृष्ट्वा नरो भक्तियुक्तस्त्रिदिनानि वसेद्द्विजाः ॥ ४ ॥ पुण्डरीकपुरे तेन दशवत्सरवासजम् ॥ पुण्यं भवति विप्रेंद्रा महापातकनाशनम् ॥५॥ अष्टोत्तरसहस्रं तु मंत्रमाद्यं षडक्षरम् ॥ अत्र जप्त्वा नरो भक्त्या शिवसायुज्यमाप्नुयात् ॥ ६ ॥ मध्यार्जुने कुंभकोणे मायूरे श्वेतकानने ॥ हालास्ये च गजारण्ये वेदारण्ये च नैमिषे ॥ ७ ॥ श्रीपर्वते च श्रीरंगे श्रीमद्वृद्धगिरौ तथा ॥ चिदंबरे च वल्मीके शेषाद्रावरुणाचले ॥ ८ ॥ श्रीमद्दक्षिणकैलासे वेंकटाद्रौ हरिस्थले ॥ कांचीपुरे ब्रह्मपुरे वै[1]द्येश्वरपुरे तथा ॥ ९ ॥ अन्यत्रापि शिवस्थाने विष्णुस्थाने च सत्तमाः ॥ वर्षवासभवं पुण्यं धनुष्कोटौ नरो मुदा ॥१०॥ माघमासे यदि स्नायादाप्नोत्येव न संशयः ॥ इमं सेतुं समुद्दिश्य द्वौ समुद्राविति श्रुतिः ॥११॥ विद्यते ब्राह्मणश्रेष्ठा मातृभूता सनातनी ॥ अदो यद्दारुरित्यन्या यत्रास्ति मुनिपुंगवाः ॥ १२ ॥ विष्णोः कर्माणि पश्यंती सेतुवैभवशंसिनी ॥ श्रुतिरस्ति तथान्यापि तद्विष्णोरिति चापरा ॥ १३ ॥ इतिहासपुराणानि स्मृतयश्च तपोधनाः ॥ एकवाक्यतया सेतुमाहात्म्यं प्रब्रुवंति हि ॥ १४ ॥ चंद्रसूर्योपरागेषु कुर्वन्सेत्ववगाहनम् ॥ अविमुक्ते दशाब्दं तु गंगास्नानफलं लभेत् ॥ १५ ॥ कोटिजन्मकृतं पापं तत्क्षणेनैव नश्यति ॥ अश्वमेधसहस्रस्य फलमाप्नोत्यनुत्तमम् ॥१६॥ विषुवायनसंक्रांतौ शशिवारे च पर्वणि ॥ सेतुदर्शनमात्रेण सप्तजन्मार्जिताशुभम् ॥१७॥ नश्यते स्वर्गतिं चैव प्रयाति द्विजपुंगवाः ॥ मकरस्थे रवौ माघे किंचिदभ्युदिते रवौ ॥ १८ ॥ स्नात्वा दिनत्रयं मर्त्यो धनुष्कोटौ विपातकः ॥ गंगादिसर्वतीर्थेषु स्नानपुण्यमवाप्नुयात् ॥ १९ ॥ धनुष्कोटौ नरः कुर्यात्स्नानं पंचदिनेषु यः ॥ अश्वमेधादिपुण्यं च प्राप्नुयाद्ब्राह्मणोत्तमाः ॥ २० ॥ चांद्रायणादिकृच्छ्राणामनुष्ठानफलं लभेत् ॥ चतुर्णामपि वेदानां पारायणफलं तथा ॥ २१ ॥ माघमासे दशाहःसु धनुष्कोटौ निमज्जनात् ॥ ब्रह्महत्यायुतं नश्येन्नात्र कार्या विचा

[1] वैजेश्वर-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणा ॥ २२ ॥ माघमासे धनुष्कोटौ दशपंचदिनानि यः ॥ स्नानं करोति मनुजः स वैकुंठमवाप्नुयात् ॥ २३ ॥ माघमासे रामसेतौ स्नानं विंशदिनं चरन् ॥ शिवसामीप्यमाप्नोति शिवेन सह मोदते ॥ २४ ॥ पंचविंशद्दिनं स्नानं कुर्वन्सारूप्यमाप्नुयात् ॥ स्नानं त्रिंशद्दिनं कुर्वन्सायुज्यं लभते ध्रुवम् ॥ २५ ॥ अतोऽवश्यं रामसेतौ माघमासे द्विजोत्तमाः ॥ स्नानं समाचरेद्विद्वान्किंचिदभ्युदिते रवौ ॥ २६ ॥ चंद्रसूर्योपरागे च तथैवार्द्धोदये द्विजाः ॥ महोदये रामसेतौ स्नानं कुर्वन्द्विजोत्तमाः ॥ २७ ॥ अनेकक्लेशसंयुक्तं गर्भवासं न पश्यति ॥ ब्रह्महत्यादिपापानां नाशकं च प्रकीर्तितम् ॥ ॥ २८ ॥ सर्वेषां नरकाणां च बाधकं परिकीर्तितम् ॥ संपदामपि सर्वासां निदानं परिकीर्तितम् ॥ २९ ॥ इन्द्रादिसर्वलोकानां सालोक्यादिप्रदं तथा ॥ चंद्रसूर्योपरागे च तथैवार्द्धोदये द्विजाः ॥ ३० ॥ महोदये धनुष्कोटौ मज्जनं त्वतिनिश्चितम् ॥ रावणस्य विनाशार्थं पुरा रामेण निर्मितम् ॥ ३१ ॥ सिद्धचारणगंधर्वकिन्नरोरगसेवितम् ॥ ब्रह्मदेवर्षिराजर्षिपितृसंघनिषेवितम् ॥ ३२ ॥ ब्रह्मादिदेवतावृंदैस्सेवितं भक्तिपूर्वकम् ॥ पुण्यं यो रामसेतुं वै संस्मरन्पुरुषो द्विजाः ॥ ३३ ॥ स्नायाच्च यत्र कुत्रापि तटाकादौ जलाशये[1] ॥ न तस्य दुष्कृतं किंचिद्भविष्यति कदाचन ॥ ३४ ॥ सेतुमध्यस्थतीर्थेषु मुष्टिमात्रप्रदानतः ॥ नश्यंति सकला रोगा भ्रूणहत्यादयस्तथा ॥ ३५ ॥ रामेण धनुषः पुण्यां यो रेखां पश्यते कृताम् ॥ न तस्य पुनरावृत्तिर्वैकुंठात्स्यात्कदाचन ॥ ३६ ॥ धनुष्कोटिरिति ख्याता या लोके पापनाशिनी ॥ बिभीषणप्रार्थनया कृता रामेण धीमता ॥ ॥ ३७ ॥ धनुष्कोटिर्महापुण्या तस्यां स्नात्वा सभक्तिकम् ॥ दद्याद्दानानि वित्तानां क्षेत्राणां च गवां तथा ॥३८॥ तिलानां तंडुलानां च धान्यानां पयसां तथा ॥ वस्त्राणां भूषणानां च माषाणामोदनस्य च॥३९॥ दध्नां घृतानां वारीणां शाकानामप्युदश्वितताम् ॥ गुडानां शर्कराणां च सस्यानां मधुनां[2] तथा ॥ ४० ॥ मोदकानामपूपानामन्येषां दानमेव च ॥ रामसेतौ द्विजाः प्रोक्तं सर्वाभीष्टप्रदायकम् ॥ ४१ ॥ अतो दद्याद्रामसेतौ वित्तलोभविवर्जितः ॥ दत्तं हुतं च तप्तं च जपश्च नियमादिकम् ॥ ४२ ॥ श्रीरामधनुषः कोटावनंतफलदं भवेत् ॥ तेन वेदाश्च तुष्यंति तुष्यंति पितरस्तथा ॥ ॥ ४३ ॥ तुष्यंति मुनयः सर्वे ब्रह्मा विष्णुः शिवस्तथा ॥ नागाः किंपुरुषा यक्षाः सर्वे तुष्यंति निश्चितम् ॥४४॥ स्वयं च पूतो भवति धनुष्कोट्यवलोकनात् ॥ स्ववंशजान्नरान्सर्वान्पावयेच्च पितामहान् ॥ ४५ ॥ तारयेच्च कुलं सर्वं धनुष्कोट्यवलोकनात् ॥ रामस्य धनुषः कोट्या कृतरेखावगाहना

१ जलान्विते-इ० पा० । २ मधूनाम्-इत्यपेक्षितम् । "वृद्धयैत्वतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन" इति वार्तिकेन नुटि "नामि" इत्यनेन दीर्घे मधूनाम् इत्येव स्यात् । ह्रस्वपाठस्तु आर्षत्वाद्दीर्घाभावे इति बोधनम् ।

CC-0. In Public Domain. Digitization by eGangotri

त् ॥ ४६ ॥ पंचपातककोटीनां नाशः स्यात्तत्क्षणे ध्रुवम् ॥ श्रीरामधनुषः कोट्या रेखां यः पश्यते कृताम् ॥ ४७ ॥ अनेकक्लेशसंपूर्णं गर्भवासं न पश्यति ॥ यत्र सीताऽनलं प्राप्ता तस्मिन्कुंडे निमज्जनात् ॥ ४८ ॥ भ्रूणहत्याशतं विप्रा नश्यति क्षणमात्रतः ॥ यथा रामस्तथा सेतुर्यथा गंगा तथा हरिः ॥ ४९ ॥ गंगे हरे रामसेतो त्विति संकीर्तयन्नरः ॥ यत्र क्वापि बहिः स्नायात्तेन याति परां गतिम् ॥ ५० ॥ सेतावर्धोदये स्नात्वा गन्धमादनपर्वते ॥ पितॄनुद्दिश्य यः पिंडान्दद्यात्सर्षपमात्रकान् ॥ ५१ ॥ पितरस्तृप्तिमायांति यावच्चंद्रदिवाकरौ ॥ शमीपत्रप्रमाणं तु पितॄनुद्दिश्य भक्तितः ॥ ५२ ॥ द्विजेन पिण्डं दत्तं चेत्सर्वपापविमोचितः ॥ स्वर्गस्थो मुक्तिमायाति नरकस्थो दिवं व्रजेत् ॥ ५३ ॥ सेतौ च पद्मनाभे च गोकर्णे पुरुषोत्तमे ॥ उदन्वदंभसि स्नानं सार्वकालिकमीप्सितम् ॥ ५४ ॥ शुक्रांगारकसौरीणां वारेषु लवणांभसि ॥ संतानकामी न स्नाया त्सेतोरन्यत्र कर्हिचित् ॥ ५५ ॥ अकृतप्रेतकार्यो वा गर्भिणीपतिरेव वा ॥ न स्नायादुदधौ विद्वान्सेतोरन्यत्र कर्हिचित् ॥ ५६ ॥ न कालापेक्षणं सेतोर्नित्यस्नानं प्रशस्यते ॥ वारतिथ्यृक्षनियमाः सेतोरन्यत्र हि द्विजाः ॥ ५७ ॥ उद्दिश्य जीवतः स्नायान्न तु स्नायान्मृतान्प्रति ॥ कुशैः प्रतिकृतिं कृत्वा स्नापयेत्तीर्थवारिभिः ॥ ५८ ॥ इमं मंत्रं समुच्चार्य प्रसन्नेंद्रियमानसः ॥ कुशोऽसि त्वं पवित्रोऽसि विष्णुना विधृतः पुरा ॥ ५९ ॥ त्वयि स्नाते स च स्नातो यस्यैतद्ग्रंथिबन्धनम् ॥ सर्वत्र सागरः पुण्यः सदा पर्वणि पर्वणि ॥ ६० ॥ सेतौ सिन्ध्वब्धिसंयोगे गंगासागरसंगमे ॥ नित्यस्नानं हि निर्दिष्टं गोकर्णे पुरुषोत्तमे ॥ ६१ ॥ नापर्वणि सरिन्नाथं स्पृशेदन्यत्र कर्हिचित् ॥ पितॄणां सर्वदेवानां मुनीनामपि शृण्वताम् ॥ ६२ ॥ प्रतिज्ञामकरोद्रामः सीतालक्ष्मणसंयुतः ॥ मया ह्यत्र कृते सेतौ स्नानं कुर्वंति ये नराः ॥ ६३ ॥ मत्प्रसादेन ते सर्वे न यास्यंति पुनर्भवम् ॥ नश्यंति सर्वपापानि मत्सेतोरवलोकनात् ॥ ६४ ॥ रामनाथस्य माहात्म्यं मत्सेतोरपि वैभवम् ॥ नाहं वर्णयितुं शक्तो वर्षकोटिशतैरपि ॥ ६५ ॥ इति रामस्य वचनं श्रुत्वा देवमहर्षयः ॥ साधुसाध्विति संतुष्टाः प्रशशंसुश्च तद्वचः ॥ ६६ ॥ सेतुमध्ये चतुर्वक्त्रः सर्वदेवसमन्वितः ॥ अध्यास्ते तस्य रक्षार्थमीश्वरस्याज्ञया सदा ॥ ६७ ॥ रक्षार्थं रामसेतौ हि सेतुमाधवसंज्ञया ॥ महाविष्णुः समध्यास्ते निबद्धो निगडेन वै ॥ ६८ ॥ महर्षयश्च पितरो धर्मशास्त्रप्रवर्तकाः ॥ देवाश्च सहगन्धर्वाः सकिन्नरमहोरगाः ॥ ६९ ॥ विद्याधराश्चारणाश्च यक्षाः किंपुरुषास्तथा ॥ अन्यानि सर्वभूतानि वसंत्यस्मिन्नहर्निशम् ॥ ७० ॥ सोऽहं दृष्टः श्रुतो वापि स्मृतः स्पृष्टोऽवगाहितः ॥ सर्वस्माद्दुरिता त्पाति रामसेतुर्द्विजोत्तमाः ॥ ७१ ॥ सेतावर्धोदये स्नानमानंदप्राप्तिकारणम् ॥ मुक्तिप्रदं महापुण्यं महानरकनाशनम् ॥ ७२ ॥ पौषे मासे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुभस्थे दिनेशे भानोर्वारे किंचिदुद्यद्दिनेशे ॥ युक्तामा चेन्नागहीना तु पाते विष्णोर्ऋक्षे पुण्यमर्धोदयं स्यात् ॥ ७३ ॥ तस्मिन्नर्धोदये सेतौ स्नानं सायुज्यकारणम् ॥ व्यतीपातसहस्रेण दर्शमेकं समं स्मृतम् ॥ ७४ ॥ दर्शायुतसमं पुण्यं भानुवारो भवेद्यदि ॥ श्रवणर्क्षं यदि भवेद्भानुवारेण संयुतम् ॥ ७५ ॥ पुण्यमेव तु विज्ञेयमन्योन्यस्यैव योगतः ॥ एकैकमप्यमृतदं स्नानदानजपार्चनात् ॥ ७६ ॥ पंचस्वपि च युक्तेषु किमु वक्तव्यमत्र हि ॥ श्रवणं ज्योतिषां श्रेष्ठममा श्रेष्ठा तिथिष्वपि ॥ ७७ ॥ व्यतीपातं तु योगानां वारं वारेषु वै रवेः ॥ चतुर्णामपि यो योगो मकरस्थे रवौ भवेत् ॥ ७८ ॥ तस्मिन्काले रामसेतौ यदि स्नायात्तु मानवः ॥ गर्भं न मातुराप्नोति किन्तु सायुज्यमाप्नुयात् ॥ ७९ ॥ अर्धोदयसमः कालो न भूतो न भविष्यति ॥ एवं महोदयः कालो धर्मकालः प्रकीर्तितः ॥ ८० ॥ एतेषु पुण्यकालेषु सेतौ दानं प्रकीर्तितम् ॥ आचारश्च तपो वेदो वेदांतश्रवणं तथा ॥ ८१ ॥ शिवविष्ण्वादिपूजापि पुराणार्थप्रवक्तृता ॥ यस्मिन्विप्रे तु विद्यंते दानपात्रं तदुच्यते ॥ ८२ ॥ पात्राय तस्मै दानानि सेतौ दद्याद्विजातये ॥ यदि पात्रं न लभ्येत सेतावाचारसंयुतम् ॥ ८३ ॥ संकल्प्योद्दिश्य सत्पात्रं प्रदद्याद्गाममागतः ॥ अतो नाधमपात्राय दातव्यं फलकांक्षिभिः ॥ उत्तमं सेतुमाहात्म्यं वक्तुर्देयं न चान्यतः ॥ ८४ ॥ अत्रेतिहासं वक्ष्यामि वसिष्ठोक्तमनुत्तमम् ॥ दिलीपाय महाराज्ञे दानपात्रविवित्सवे ॥ ८५ ॥ ॥ दिलीप उवाच ॥ ॥ दानानि कस्मै देयानि ब्रह्मपुत्र पुरोहित ॥ एतन्मे तत्त्वतो ब्रूहि त्वच्छिष्यस्य महामुने ॥ ८६ ॥ ॥ ॥ वसिष्ठ उवाच ॥ ॥ पात्राणामुत्तमं पात्रं वेदाचारपरायणम् ॥ तस्मादप्यधिकं पात्रं शूद्रान्नं यस्य नोदरे ॥ ८७ ॥ वेदाः पुराणमंत्राश्च शिवविष्ण्वादिपूजनम् ॥ वर्णाश्रमाद्यनुष्ठानं वर्तते यस्य संततम् ॥ ८८ ॥ दरिद्रश्च कुटुंबी च तत्पात्रं श्रेष्ठमुच्यते ॥ तस्मिन्पात्रे प्रदत्तं वै धर्मकामार्थमोक्षदम् ॥ ८९ ॥ पुण्यस्थले विशेषेण दानं सत्पात्रगर्हितम् ॥ अन्यथा दशजन्मानि कृकलासो भविष्यति ॥ ९० ॥ जन्मत्रयं रासभः स्यान्मंडूकश्च द्विजन्मनि ॥ एकजन्मनि चाण्डालस्ततः शूद्रो भविष्यति ॥ ९१ ॥ ततश्च क्षत्रियो वैश्यः क्रमाद्विप्रश्च जायते ॥ दरिद्रश्च भवेत्तत्र बहुरोगसमन्वितः ॥ ९२ ॥ एवं बहुविधा दोषा दुष्टपात्रप्रदानतः ॥ तस्मात्सर्वप्रयत्नेन सत्पात्रेषु प्रदापयेत् ॥ ९३ ॥ न लभ्यते चेत्तत्पात्रं तदा संकल्पपूर्वकम् ॥ एकं सत्पात्रमुद्दिश्य प्रक्षिपेदुदकं भुवि ॥ ९४ ॥ उद्दिष्टपात्रस्य मृतौ तत्पुत्राय समर्पयेत् ॥ तस्यापि मरणे प्राप्ते महादेवे समर्पयेत् ॥ अतो नाधमपात्राय दद्यात्तीर्थे विशेषतः ॥ ९५ ॥ ॥ श्रीसूत उवाच ॥ ॥ एवमुक्तो वसिष्ठेन दिलीपः स द्विजोत्तमाः ॥ ९६ ॥ तदाप्रभृति सत्पात्रे प्रायच्छद्दानमुत्तमम् ॥ अतः पुण्यस्थले सेतावत्रापि मुनिपुंगवाः ॥ ९७ ॥ यदि लभ्येत सत्पात्रं तदा दद्याद्धनादिकम् ॥ नो

CC-0. In Public Domain. Digitization by eGangotri

चेत्संकल्पपूर्वं तु विशिष्टं पात्रमुत्तमम् ॥ ९८ ॥ समुद्दिश्य जलं भूमौ प्रक्षिपेद्भक्तिसंयुतः ॥ स्वग्राममागतः पश्चात्तस्मिन्पात्रे समर्पयेत् ॥ ९९ ॥
पूर्वं संकल्पितं वित्तं धर्मलोपोऽन्यथा भवेत् ॥ न दुःखं पुनराप्नोति किं तु सायुज्यमाप्नुयात् ॥ १०० ॥ अर्धोदयसमः कालो न भूतो न भवि
ष्यति ॥ कुम्भकोणं सेतुमूलं गोकर्णं नैमिषं तथा ॥ १ ॥ अयोध्या दंडकारण्यं विरूपाक्षं च वेंकटम् ॥ शालिग्रामं प्रयागं च कांची द्वारावती
तथा ॥ २ ॥ मधुरा पद्मनाभं च काशी विश्वेश्वरालया ॥ नद्यः सर्वाः समुद्राश्च पर्वतं भास्करं स्मृतम् ॥ ३ ॥ मुंडनं चोपवासश्च क्षेत्रेष्वेषु
प्रकीर्तितम् ॥ लोभान्मोहादकृत्वा यः स्वगृहं याति मानवः ॥ ४ ॥ सहैव याति तद्गेहे पातकानि च तेन वै ॥ चतुर्विंशतितीर्थानि पर्वते गन्ध
मादने ॥ ५ ॥ तत्र लक्ष्मणतीर्थे तु वपनं मुनिभिः स्मृतम् ॥ तीरे लक्ष्मणतीर्थस्य लोमवर्ज्यं शिवाज्ञया ॥ ६ ॥ शिरोमात्रस्य वपनं कृत्वा
दत्त्वा च दक्षिणाम् ॥ स्नात्वा लक्ष्मणतीर्थे च दृष्ट्वा लक्ष्मणशंकरम् ॥ ७ ॥ सर्वपापविनिर्मुक्तः शंकरं याति मानवः ॥ अर्धोदये सदा स्नानं
सेतावेवं समाचरेत् ॥ ८ ॥ नास्ति सेतुसमं तीर्थं नास्ति सेतुसमं तपः ॥ नास्ति सेतुसमं पुण्यं नास्ति सेतुसमा गतिः ॥ ९ ॥ उपरागसहस्रेण
सममर्धोददयं स्मृतम् ॥ अर्धोदयसमः कालो नास्ति संसारमोचकः ॥ ११० ॥ तस्मिन्नर्धोदये रामसेतौ स्नानं तु यद्भवेत् ॥ न तत्तुल्यं भवेत्पुण्यं
सर्वशास्त्रेषु सर्वदा ॥ ११ ॥ षष्टिवर्षसहस्राणि भागीरथ्यवगाहनात् ॥ यत्पुण्यमृषिनिर्दिष्टं तत्पुण्यं मुनिपुंगवाः ॥ १२ ॥ एकवारं रामसेतौ
स्नानात्सिध्यति निश्चितम् ॥ अर्द्धोदये विशेषेण तथैव च महोदये ॥ १३ ॥ मकरस्थे रवौ माघे प्रयागे पापमोचने ॥ माघस्नानसहस्रेण
यत्पुण्यं लभते नरः ॥ १४ ॥ तस्मिन्नर्धोदये विप्रा रामसेतौ निमज्जनात् ॥ एकवारेण तत्पुण्यं लभते नात्र संशयः ॥ १५ ॥
त्रैलोक्यस्थेषु तीर्थेषु स्नातानां यत्फलं भवेत् ॥ सकृदर्द्धोदये सेतौ स्नात्वा तत्पुण्यभाग्भवेत् ॥ १६ ॥ ब्रह्मज्ञानविहीनानां कृतघ्नानां दुरा
त्मनाम् ॥ पापिनामितरेषां च महापातकिनां तथा ॥ १७ ॥ सेतावर्द्धोदये स्नानाद्विशुद्धिरिति निश्चिता ॥ स्थलांतरे कृतघ्नानां
निष्कृतिर्नास्ति कर्हिचित् ॥ १८ ॥ सेतावर्द्धोदये स्नानात्तेषामपि हि निष्कृतिः ॥ सेतावर्द्धोदये स्नानं ये न कुर्वंति मोहतः ॥ १९ ॥
संसारेषु निमज्जंति ते यथांधाः पतंत्यधः ॥ सेतावर्धोदये स्नात्वा भित्त्वा भास्करमण्डलम् ॥ १२० ॥ ब्रह्मलोकं प्रयास्यंति नात्र कार्या विचा ॥१००॥
रणा ॥ अर्द्धोदये तु संप्राप्ते स्नात्वा सेतौ विमुक्तिदे ॥ २१ ॥ स्नात्वा सम्यग्जगन्नाथं राघवं सीतया सह ॥ रामेश्वरं महादेवं सुग्रीवादिमु

१ त्पांत्रसंयुतः–इ० पा० । २ इहैव चायुराप्नोति–इ० पा० । ३ नदाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खान्कपीन् ॥ २२ ॥ ध्यात्वा देवानृषींश्चापि तथा पितृगणानपि ॥ तर्पयेदपि तान्सर्वान्स्वदारिद्र्यविमुक्तये ॥ २३ ॥ अर्द्धोदयाख्यममलं जगन्नाथं समर्चयेत् ॥ सेतावर्द्धोदये काले तेन प्रीणाति केशवः ॥ २४ ॥ दिवाकर नमस्तेऽस्तु तेजोराशे जगत्पते ॥ अत्रिगोत्रसमुत्पन्न लक्ष्मीदेव्याः सहोदर ॥ २५ ॥ अर्घं गृहाण भगवन्सुधाकुम्भ नमोस्तु ते ॥ व्यतीपात महायोगिन्महापातकनाशन ॥ २६ ॥ सहस्रबाहो सर्वात्मन्गृहाणार्घ्यं नमोऽस्तु ते ॥ तिथिनक्षत्रवाराणामधीश परमेश्वर ॥ २७ ॥ मासरूप गृहणार्घ्यं कालरूप नमोऽस्तु ते ॥ इति दत्त्वा पृथङ्मंत्रैरर्घ्यमर्द्धोदये नरः ॥ २८ ॥ उपायनानि विप्रेभ्यो दद्याद्वित्तानुसारतः ॥ चतुर्दश द्वादशाष्टौ सप्त षट् पंच वा द्विजान् ॥ २९ ॥ यथाशक्त्यन्नपानाद्यैः पृथङ्मंत्रैः समर्चयेत् ॥ कांस्यपात्रं समादाय नूतनं दारवं तु वा ॥ १३० ॥ विप्राणां पुरतः स्थाप्य पयसा परिपूरितम् ॥ सफलं सगुडं साज्यं सतांबूलं सदक्षिणम् ॥ ३१ ॥ दद्याद्यज्ञोपवीतं च गां सवत्सां पयस्विनीम् ॥ अलंकृतेभ्यो विप्रेभ्यो यथाशक्ति वदेदिदम् ॥ ३२ ॥ श्रवणर्क्षे जगन्नाथ जन्मर्क्षे तव केशव ॥ यन्मया दत्तमर्थिभ्यस्तदक्षयमिहास्तु मे ॥ ३३ ॥ नक्षत्राणामधिपते देवानाममृतप्रद ॥ त्राहि मां रोहिणीकांत कलाशेष नमोऽस्तु ते ॥ ३४ ॥ दीननाथ जगन्नाथ कलानाथ कृपाकर ॥ त्वत्पादपद्मयुगलभक्तिरस्त्वचला मम ॥ ३५ ॥ व्यतीपात नमस्तेऽस्तु सोमसूर्याग्निसंनिभ[1] ॥ यद्दानादि कृतं किंचित्तदक्षयमिहास्तु ते ॥ ३६ ॥ अर्थिनां कल्पवृक्षोऽसि वासुदेव जनार्दन ॥ मासत्वयनकालेश पापं शमय मे हरे ॥ ३७ ॥ इत्यर्चयित्वा विप्रेंद्रास्ततः श्राद्धं समाचरेत् ॥ हिरण्यश्राद्धमामं वा पाकश्राद्धमथापि वा ॥ ३८ ॥ पार्वणं च ततः कुर्याद्वित्तशाठ्यं न कारयेत् ॥ आचार्यं पूजयेत्पश्चाद्वस्त्रभूषणकुण्डलैः ॥ ३९ ॥ प्रतिमामर्पयेत्तस्मै गां च छत्रमुपानहम् ॥ एवमर्द्धोदये सेतौ व्रतं कुर्याद्विजोत्तमाः ॥ १४० ॥ तेनैव कृतकृत्यः स्यात्कर्तव्यं नास्ति किंचन ॥ स्थलांतरेऽप्येवमेतद्व्रतमर्धोदये चरेत् ॥ ४१ ॥ सेतुः समुद्रे रामेण निर्मितो गन्धमादने ॥ सेतुः सेतुरिति प्राज्ञास्तस्य नाम्नः प्रकीर्तनात् ॥ ४२ ॥ स्नानकाले मनुष्याणां पातकानां तु कोटयः ॥ तत्क्षणादेव नश्यंति यास्यंत्यप्यच्युतं पदम् ॥ ४३ ॥ निमिषं निमिषार्द्धं वा सेतौ तिष्ठति यो नरः ॥ तद्दृष्टिगोचरं गंतुं न शक्ता यमकिंकराः ॥ ४४ ॥ रामसेतुं धनुष्कोटिं रामं सीतां च लक्ष्मणम् ॥ रामनाथं हनूमंतं सुग्रीवादिमुखान्कपीन् ॥ ४५ ॥ बिभीषणं नारदं च विश्वामित्रं घटोद्भवम् ॥ वसिष्ठं वामदेवं च जाबालिमथ काश्यपम् ॥ ४६ ॥ रामभक्तांस्तथा चान्यांश्चिंतयन्मनसा तदा ॥ सर्वदुःखाद्विमुच्येत प्रयाति परमं पदम् ॥ ४७ ॥ सत्य

१ सोमसूर्यसुत प्रभो—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रे हरिक्षेत्र कृष्णक्षेत्रे च नैमिषे ॥ शालग्रामे बदर्य्यां च हस्तिशैले वृषाचले ॥ ४८ ॥ शेषाद्रौ चित्रकूटे च लक्ष्मीक्षेत्रे कुरंगके ॥ कांचिके कुम्भकोणे च मोहिनीपुर एव च ॥ ४९ ॥ ऐन्द्रे श्वेताचले पुण्ये पद्मनाभे महास्थले ॥ फुल्लाख्ये घटिकाद्रौ च सारक्षेत्रे हरिस्थले ॥ १५० ॥ श्रीनिवासे महाक्षेत्रे भक्तनाथमहास्थले ॥ अलिंदाख्ये महाक्षेत्रे शुकक्षेत्रे च वारुणे ॥ ५१ ॥ मधुरायां हरिक्षेत्रे श्रीगोष्ठ्यां पुरुषोत्तमे ॥ श्रीरंगे पुण्डरीकाक्षे तथान्यत्र हरिस्थले ॥ ५२ ॥ स्नानेन यानि पापानि विनश्यन्ति द्विजोत्तमाः ॥ तानि सर्वाणि नश्यंति सेतुस्नानेन निश्चितम् ॥ ५३ ॥ रघुनाथकृते सेतौ महामुनिनिषेविते ॥ न स्नांति ये नरास्तेषां न संसारनिवर्तनम् ॥ ॥ ५४ ॥ ये वा नमः शिवायेति मन्त्रं पञ्चाक्षरं शुभम् ॥ न वदन्ति न शृण्वन्ति न स्मरन्ति मुनीश्वराः ॥ ५५ ॥ नमो नारायणायेति प्रणवेन समन्वितम् ॥ मंत्रमष्टाक्षरं वापि न जपंति स्मरंति वा ॥ ५६ ॥ एवं श्रीरामचंद्रस्य षडक्षरमनुं तथा ॥ न जपंति न शृण्वंति न स्मरंति च सत्तमाः ॥ ५७ ॥ तेषां पापानि नश्यंति रामसेतौ निमज्जनात् ॥ उपोषणं न कुर्वंति ये वा हरिदिने शुभे ॥ ५८ ॥ न धारयंति ये भस्म त्रिपुंड्रोद्धूलनादिना ॥ जाबालोपनिषन्मंत्रैस्सप्तभिर्मस्तकादिके ॥ ५९ ॥ शिवं वा केशवं वापि तथान्यानपि वै सुरान् ॥ न पूजयंति वेदोक्तमार्गेण द्विजपुंगवाः ॥ १६० ॥ तेषां पापानि नश्यंति रामसेतौ निमज्जनात् ॥ शिवविष्ण्वादिदेवेभ्यो धूपं दीपं च चंदनम् ॥ ६१ ॥ पुष्पाणि न प्रयच्छंति भक्तिपूर्वं द्विजोत्तमाः ॥ शिवविष्ण्वादिदेवानां श्रीरुद्रैश्चमकैस्तथा ॥ ६२ ॥ श्रीमत्पुरुषसूक्तेन पावमान्यादिसूक्तकैः ॥ त्रिमधुत्रिसुपर्णैश्च पंचशांत्यादिना तथा ॥ ६३ ॥ नाभिषेकं प्रकुर्वंति ये नराः पापचेतसः ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ ६४ ॥ शिवविष्ण्वादिदेवानां नमस्कारप्रदक्षिणे ॥ न प्रकुर्वंति भक्त्या ये पापोपहतबुद्धयः ॥ ६५ ॥ धनुर्मासेऽप्युषःकाले न पूजां च प्रकुर्वते ॥ शिवविष्ण्वादिदेवानां महानैवेद्यपूर्वकम् ॥ ६६ ॥ तेषां पापानि नश्यंति रामसेतौ निमज्जनात् ॥ कीर्तयंति न ये विष्णोर्नामानि तु हरस्य वा ॥ ६७ ॥ शालिग्रामशिलाचक्रं शिवनाभं च ये नराः ॥ न पूजयंति मोहेन द्वारकाचक्रमेव वा ॥ ६८ ॥ गंगामृदं च तुलसीमृत्तिकां गोपिचंदनम् ॥ न धारयंति ये मूढा ललाटे चोरसि द्विजाः ॥ ६९ ॥ दोर्द्वंद्वे च गले सम्यक्सर्वपापौघशांतये ॥ रुद्राक्षं तुलसीकाष्ठं यो न धारयते नरः ॥१७०॥ तस्य पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ ब्राह्मे मुहूर्ते संप्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः ॥ ७१ ॥ हरिशंकरनामानि तत्स्तोत्राण्यथ वा द्विजाः ॥ यो हि चिंतयते

१ अंबिकाख्ये–इ०पा० । २ कुरुक्षेत्रे–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यं विशिष्टं मंत्रमेव वा ॥ ७२ ॥ तस्य पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ प्रातर्जलाशयं गत्वा स्नात्वाऽऽचम्य विशुद्धधीः ॥ ७३ ॥ प्रसन्नात्मा मुनिश्रेष्ठाः संध्योपासनपूर्वकम् ॥ नोपास्ते च नरो यस्तु गायत्रीं वेदमातरम् ॥ ७४ ॥ नोपासनं वा कुर्वंति सायंप्रातरतंद्रिताः ॥ माध्याह्निकं न कुर्वंति ये वा पापहताशयाः ॥ ७५ ॥ ब्रह्मयज्ञं वैश्वदेवं मध्याह्नेऽतिथिपूजनम् ॥ नाचरंति च सायं ये पूजामतिथिसंमताम् ॥ ७६ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ भिक्षां यतीनां मध्याह्ने न प्रयच्छंति ये नराः ॥ ७७ ॥ येऽप्यधीतां त्रयीं विप्रा विस्मरंति कुबुद्धयः ॥ नाधीयते त्रयीं वापि वेदांगानि तथा पुनः ॥ ७८ ॥ प्रत्याब्दिकं मातृपित्रोः श्राद्धं ये नाचरंति वै ॥ श्राद्धं महालयं नित्यमष्टकाश्राद्धमेव वा ॥ ७९ ॥ अन्यन्नैमित्तिकं श्राद्धं ये न कुर्वंति लोभतः ॥ ये चैत्रे तु पौर्णमास्यां चित्रगुप्तस्य तुष्टये ॥ १८० ॥ पानकं कदलीपक्वं पायसान्नं सशर्करम् ॥ सगुडं साम्रफलकं पनसादिफलैर्युतम् ॥ ८१ ॥ तांबूलं पादुके छत्रं वस्त्रपुष्पाणि चंदनम् ॥ विप्रेभ्यो न प्रयच्छंति लोभोपहतबुद्धयः ॥ ॥ ८२ ॥ तेषां पापानि नश्यंति धनुष्कोटौ निमज्जनात् ॥ दुर्वृत्तो वा सुवृत्तो वा यो धनुष्कोटिसेवकः ॥ ८३ ॥ तस्य संसारविच्छित्तिः पुनर्जन्म विना भवेत् ॥ संसारसागरं तर्तुं य इच्छेन्मुनिपुंगवाः ॥ ८४ ॥ रामचन्द्रधनुष्कोटिं स गच्छेदविलंबितम् ॥ सत्यं वच्मि हितं वच्मि सारं वच्मि हितं पुनः ॥ ८५ ॥ रामचन्द्रधनुष्कोटिं गच्छध्वं मुक्तिसिद्धये ॥ रामचन्द्रधनुष्कोटौ कुर्यात्स्नानं विमुक्तये ॥ ८६ ॥ नास्त्युपायांतरं विप्रा भूयोभूयो वदाम्यहम् ॥ रामचंद्रधनुष्कोटौ स्नानं कुर्वंति ये नराः ॥ ८७ ॥ तेषामयत्नतः सिध्येत्संसारभयनाशनम् ॥ सत्यं ज्ञानमनंतं यत्पूर्णं ब्रह्म सनातनम् ॥ ८८ ॥ तत्प्राप्तिः स्याद्धनुष्कोटौ मज्जनान्नात्र संशयः ॥ ॥ श्रीसूत उवाच ॥ ॥ एवं वः कथितं विप्राः सेतुमाहात्म्यमुत्तमम् ॥ ८९ ॥ महादुःखप्रशमनं महारोगनिबर्हणम् ॥ दुःस्वप्ननाशनं पुण्यमपमृत्युनिवारणम् ॥ १९० ॥ महाशांतिकरं पुंसां पठतां शृण्वतामपि ॥ स्वर्गापवर्गदं पुण्यं सर्वतीर्थफलप्रदम् ॥ ९१ ॥ कीर्तयेद्य इदं पुण्यं शृणुयाद्वा समाहितः ॥ सोऽग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ॥ ९२ ॥ चतुर्णां सांगवेदानां शतावृत्त्या तु यत्फलम् ॥ तत्फलं समवाप्नोति ह्येतन्माहात्म्यकीर्तनात् ॥ ९३ ॥ अत्रैकाध्यायपठनाच्छ्रवणाद्वा मुनीश्वराः ॥ अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम् ॥ ९४ ॥ अध्यायद्वयपाठेन श्रवणेन तथैव च ॥ गोमेधाख्यस्य यज्ञस्य फलमाप्नोत्यनुत्तमम् ॥ ९५ ॥ दशाध्यायान्पठेद्यस्तु शृणुयाद्वा सभक्तिकम् ॥ स्वर्गलोकमवाप्नोति शक्रेण सह मोदते ॥ ९६ ॥ विंशत्यध्यायपठनाच्छ्रवणाच्च मुनीश्वराः ॥ ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ ९७ ॥ त्रिंश

CC-0. In Public Domain. Digitization by eGangotri

दध्यायपठनाच्छ्रवणाच्च मुनीश्वराः ॥ विष्णुलोकमवाप्नोति विष्णुना सह मोदते ॥ ९८ ॥ चत्वारिंशत्तमाध्यायान्पठेद्वा शृणुयादपि ॥ रुद्रलोकमवाप्नोति रुद्रेण सह मोदते ॥ ९९ ॥ यः पंचाशत्तमाध्यायान्पठते शृणुतेऽपि वा ॥ स सांबं हरमाप्नोति शिवं चन्द्रार्धशेखरम् ॥ २०० ॥ यः पठेच्छृणुयाच्चेदं कृत्स्नं माहात्म्यमुत्तमम् ॥ स सांबशिवसालोक्यमाप्नोत्येव न संशयः ॥ १ ॥ यः पठेच्छृणुयाच्चेदं द्विवारं मुनिसत्तमाः ॥ स याति शिवसामीप्यं विमानवरसंस्थितः ॥ २ ॥ यस्त्रिवारं पठेदेतच्छृणुयाद्वा समाहितः ॥ शिवसारूप्यमाप्नोति शिवस्य प्रीतिमावहन् ॥३॥ चतुर्वारं पठेद्यस्तु शृणुयाद्वेदमुत्तमम् ॥ स सायुज्यमवाप्नोति शिवस्य गिरिजापतेः ॥ ४ ॥ दिनेदिने पठेन्मर्त्यः श्लोकं श्लोकार्धमेव वा ॥ पादं वा पादमात्रं वा अक्षरं वर्णमेव वा ॥ ५ ॥ तत्तद्दिनकृतं पापं तत्क्षणादेव नश्यति ॥ कृत्स्नेऽस्मिन्सेतुमाहात्म्ये पठितेऽपि श्रुतेऽपि वा ॥ ॥ ६ ॥ श्लोकेष्वत्रैव वर्तंते वर्णा यावंत एव हि ॥ तावत्यो ब्रह्महत्याश्च तावन्मद्यनिषेवणम् ॥ ७ ॥ तावत्सुवर्णस्तेयं च तावान्गुर्वंगनागमः ॥ तावत्संसर्गदोषाश्च नश्यंत्येव हि तत्क्षणात् ॥ ८ ॥ यावतोऽस्मिन्महापुण्ये वर्तंते वर्णराशयः ॥ तावत्कृत्वश्चतुर्विंशत्तीर्थेषु स्नानजं फलम् ॥ ९ ॥ तथान्येष्वपि तीर्थेषु सेतुमध्यगतेषु वै ॥ तत्फलं समवाप्नोति पाठेन श्रवणेन वा ॥ २१० ॥ येनेदं लिखितं भक्त्या सेतुमाहात्म्यमुत्तमम् ॥ विनष्टाज्ञानसंतानः शिवसायुज्यमाप्नुयात् ॥ ११ ॥ यस्येदं वर्तते गेहे माहात्म्यं लिखितं शुभम् ॥ भूतवेतालकादिभ्यो भीतिस्तत्र न विद्यते ॥ १२ ॥ व्याधिपीडा न तत्रास्ति नास्ति चोरभयं तथा ॥ शन्यंगारकमुख्यानां ग्रहाणां नास्ति पीडनम् ॥ १३ ॥ यद्गृहे वर्तते पुण्यमिदं माहात्म्यमुत्तमम् ॥ रामसेतुं विजानीत तद्गृहं मुनिपुंगवाः ॥ १४ ॥ चतुर्विंशतितीर्थानि तत्रैव निवसंति हि ॥ तत्रैव वर्तते पुण्यो गन्धमादनपर्वतः ॥ ॥ १५ ॥ ब्रह्मविष्णुमहेशाश्च वर्तंते तत्र सादरम् ॥ लिखित्वा सेतुमाहात्म्यं ब्राह्मणाय निवेदयेत् ॥ चतुःसागरपर्यंता तेन दत्ता वसुंधरा ॥ १६ ॥ ॥ ॥ सेतुमाहात्म्यदानमन्त्रः ॥ ॥ सेतुमाहात्म्यदानस्य कलां नार्हंति षोडशीम् ॥ दानान्यन्यानि सर्वाणि ह्यतः शान्तिं प्रयच्छ मे ॥ किं पुनर्बहुनोक्तेनवसत्यत्र जगत्त्रयम् ॥ १७ ॥ श्रावयेच्छ्राद्धकाले यो ह्येकमध्यायमत्र वै ॥ नश्येच्छ्राद्धस्य वैकल्यं पितरोऽप्यतिहर्षिताः ॥ १८ ॥ यः पर्वकाले संप्राप्ते ब्राह्मणाञ्छ्रावयेदिदम् ॥ अध्यायमेकं श्लोकं वा गावोस्य निरुपद्रवाः ॥ बहुक्षीराः सवत्साश्च महिष्योऽस्य भवंति हि ॥ १९ ॥ पठनीयमिदं पुण्यं मठे देवालयेऽपि वा ॥ नदीतटाकतीरेषु पुण्ये वारण्यभूतले ॥ श्रोत्रियाणां गृहे वापि नैवान्यत्र तु कर्हिचित् ॥ २२० ॥ विषुवायन

१ वा-इदम्-इति पदच्छेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेषु पुण्ये च हरिवासरे ॥ अष्टम्यां च चतुर्दश्यां पठनीयं विशेषतः ॥ २१ ॥ इदं हि पाठ्यं श्रावण्यां मासि भाद्रपदे तथा ॥ धनुर्मासे च
पाठ्यं स्यात्पाठ्यं चैवोत्तरायणे ॥ २२ ॥ नियमेनैव माहात्म्यं पठनीयमिदं द्विजाः ॥ श्रोतारो नियमैर्युक्ताः शृणुयुश्चेदमुत्तमम् ॥ २३ ॥
कीर्त्यंते पुण्यतीर्थानि माहात्म्येऽस्मिन्बहूनि वै ॥ कीर्त्यंते पुण्यशीलाश्च तथा राजर्षिसत्तमाः ॥ २४ ॥ ऋषयश्च महाभागाः कीर्त्यंतेऽस्मिन्न
नुत्तमे ॥ धर्माधर्मौ च कीर्त्येते पुण्येस्मिन्द्विजपुंगवाः ॥ २५ ॥ ब्रह्मा विष्णुश्च रुद्रश्च कीर्त्यंतेऽत्र त्रिमूर्तयः ॥ इदं पवित्रं पापघ्नं श्रुत्यर्थैरुपबृंहि
तम् ॥ २६ ॥ संमतं स्मृतिकर्तॄणां द्वैपायनमुनिप्रियम् ॥ श्रोतव्यं पठितव्यं च आत्मनः श्रेय इच्छता ॥ २७ ॥ श्रावकाय च दातव्यं
यत्किंचित्कांचनादिकम् ॥ स्वस्वशक्त्यनुरोधेन वित्तशाठ्यं न कारयेत् ॥ २८ ॥ वस्त्रं हिरण्यं धान्यं वा भूमिं गां च यथाबलम् ॥ दत्त्वा संभावनी
योऽयं श्रावकः श्रोतृभिर्जनैः ॥ २९ ॥ पूजिते श्रावके तस्मिन्पूजिताः स्युस्त्रिमूर्तयः ॥ जगत्त्रयं पूजितं स्यात्पूजितासु त्रिमूर्तिषु ॥ ३० ॥
अवतीर्णो महीं साक्षाद्रामो दाशरथिर्हरिः ॥ ससीतालक्ष्मणो नित्यं श्रोतृभ्यः श्रावकाय च ॥ ३१ ॥ दत्त्वेह लोके भोगांश्च मुक्तिं
चांते प्रयच्छति ॥ द्वैपायनमुखांभोजान्निःसृतं शुभदं परम् ॥ ३२ ॥ इदं वै सेतुमाहात्म्यं धर्मराजो युधिष्ठिरः ॥ भीमसेनादिभिः सर्वैरनुजैरपि
संवृतः ॥ ३३ ॥ नियमाचारसंयुक्तः ससैन्यश्च दिनेदिने ॥ शृणोति पठतो धौम्यमहर्षेः स्वपुरोधसः ॥ ३४ ॥ ॥ श्रीसूत उवाच ॥ ॥ भोभो
स्तपोधनाः सर्वे नैमिषारण्यवासिनः ॥ मत्सकाशादिदं गुह्यं माहात्म्यं श्रुतिसंमितम् ॥ ३५ ॥ श्रुतं भवद्भिर्नियतैर्नित्यं पठत सादरम् ॥ पाठयध्वं
स्वशिष्येभ्यो नियतेभ्यो निरन्तरम् ॥ ३६ ॥ इत्युक्त्वा तान्मुनीन्सूतो रोमांचितकलेवरः ॥ गुरुं हृदा स्मरन्व्यासं ननर्ताश्रूणि वर्तयन् ॥ ३७ ॥
अत्रांतरे महाविद्वान्पाराशर्यो महामुनिः ॥ आशु प्रादुरभूत्तत्र शिष्यानुग्रहकांक्षया ॥ ३८ ॥ तमागतं विलोक्याथ मुनिं सत्यवतीसुतम् ॥ सूतः
सर्वैश्च सहितो नैमिषारण्यवासिभिः ॥ ३९ ॥ व्यासस्य चरणांभोजे दंडवत्प्रणिपत्य तु ॥ जलमानंदजं तत्र नेत्राभ्यां पर्यवर्तयत् ॥ ४० ॥
प्रणतं प्रियशिष्यं तं दोर्भ्यामुत्थाप्य वै मुनिः ॥ आशीर्भिरभिनंद्यैनमालिंग्य च मुहुर्मुहुः ॥ ४१ ॥ नैमिषारण्यमुनिभिरानीते परमासने ॥ द्वैपा
यनो महातेजा निषसाद तपोधनः ॥ ४२ ॥ मुनिष्वप्युपविष्टेषु सूतेऽपि च निजाज्ञया ॥ शौनकादीन्मुनीन्सर्वाञ्छक्तेः पौत्रोऽभ्यभाषत ॥ ४३ ॥
मया ज्ञातमिदं सर्वं नैमिषारण्यवासिनः ॥ मम शिष्येण सूतेन सेतुमाहात्म्यमुत्तमम् ॥ कथितं भवतामद्य महापातकनाशनम् ॥ ४४ ॥ श्रुतीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च स्मृतीनां च पुराणानां तथैव च ॥ शास्त्राणां चेतिहासानामन्येषामपि कृत्स्नशः ॥ ४५ ॥ एष पर्यवसन्नोऽर्थो माहात्म्यं यत्त्विदं महत् ॥ सर्वे
ष्वपि पुराणेषु इदं बहुमतं मम ॥ ४६ ॥ शृणोति धर्मजो धौम्यादिदं नित्यं ममाज्ञया ॥ अतो भवंतोऽपि सदा सेतुमाहात्म्यमुत्तमम् ॥ ४७ ॥
पठंतु शृण्वंतु तथा शिष्याणां पाठयंतु च ॥ तच्छ्रुत्वा वचनं तस्य ते प्राहुर्बाढमित्यपि ॥ ४८ ॥ ततो व्यासोऽपि सूतेन शिष्येण च समन्वितः ॥
अनुज्ञाप्य मुनीन्त्सर्वान्कैलासं पर्वतं ययौ ॥ ४९ ॥ ऋषयो नैमिषारण्यनिलयास्तुष्टिमागताः ॥ प्रत्यहं सेतुमाहात्म्यं शृण्वंति च पठंति च ॥
॥ २५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥छ॥ ॥छ॥

इदं स्कांदमहापुराणान्तर्गतब्रह्मखण्डान्तर्गतसेतुमाहात्म्यं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे तृतीये ब्रह्मखण्डे सेतुमाहात्म्यं समाप्तम् (३-१) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे तृतीये ब्रह्मखण्डे धर्मारण्यखंडप्रारम्भः (३–२) ॥

Nepal Sanskrit University Valmeeki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ तर्तुं संसृतिवारिधिं त्रिजगतां नौर्नाम यस्य प्रभोर्येनेदं सकलं विभाति सततं जातं स्थितं संसृतम् ॥ यश्चैतन्यघनप्रमाण विधुरो वेदांतवेद्यो विभुस्तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परम् (॥१॥) दाराः पुत्रा धनं वा परिजनसहितो बंधुवर्गः प्रियो वा माता भ्राता पिता वा श्वशुरकुलजना भृत्य ऐश्वर्य्यवित्ते ॥ विद्या रूपं विमलभवनं यौवनं यौवतं वा सर्वं व्यर्थं मरणसमये धर्म एकः सहायः (॥२॥) नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ १ ॥ एकदा सूतमायांतं दृष्ट्वा तं शौनकादयः ॥ परं हर्षं समाविष्टाः पपुर्नेत्रैः सुचेतसा ॥ चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ॥ २ ॥ अथ तेषूपविष्टेषु तपस्विषु महात्मसु ॥ निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः ॥३॥ सुखासीनं च तं दृष्ट्वा विश्रांतमुपलक्ष्य च ॥ अथापृच्छंस्त ऋषयः काश्चित्प्रास्ताविकीः कथाः ॥ ४ ॥ पुराणमखिलं तात पुरा तेऽधीतवान्पिता ॥ कच्चित्त्वयापि तत्सर्वमधीतं लोमहर्षणे ॥ ५ ॥ कथयस्व कथां सूत पुण्यां पापनिषूदिनीम् ॥ श्रुत्वा यां याति विलयं पापं जन्मशतोद्भवम् ॥ ६ ॥ ॥ सूत उवाच ॥ ॥ श्रीभारत्यंघ्रियुगलं गणनाथपदद्वयम् ॥ सर्वेषां चैव देवानां नमस्कृत्य वदाम्यहम् ॥ ७ ॥ शक्तींश्चैव वसूंश्चैव ग्रहान्यज्ञादिदेवताः ॥ नमस्कृत्य शुभान्विप्रान्कविमुख्यांश्च सर्वशः ॥८॥ अभीष्टदेवताश्चैव प्रणम्य गुरुसत्तमम् ॥ नमस्कृत्य शुभान्देवान्रामादींश्च विशेषतः ॥ ९॥ यान्स्मृत्वा त्रिविधैः पापैर्मुच्यते नात्र संशयः ॥ तेषां प्रसादाद्वक्ष्येऽहं तीर्थानां फलमुत्तमम् ॥ सर्वेषां च नियंतारं धर्मात्मानं प्रणम्य च ॥ १० ॥ धर्मारण्यपतिस्त्रिविष्टपपतिर्नित्यं भवानीपतिः पापाद्वः स्थिरभोगयोगसुलभो देवः स धर्मेश्वरः ॥ सर्वेषां हृदयानि जीवकलया व्याप्य स्थितः सर्वदा ध्यात्वा यं न पुनर्विशंति मनुजाः संसारकारागृहम् ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ एकदा तु स धर्म्मो वै जगाम ब्रह्मसंसदि ॥ तां सभां स समालोक्य ज्ञाननिष्ठोऽभवत्तदा ॥ १२ ॥ देवैर्मुनिवरैः क्रांतां सभामालोक्य विस्मितः ॥ देवैर्यक्षैस्तथा नागैः पन्नगैश्च तथाऽसुरैः ॥ १३ ॥ ऋषिभिः सिद्धगंधर्वैः समाक्रांतोचितासना ॥ ससुखा सा सभा ब्रह्मन्न शीता न च घर्म्मदा ॥ १४ ॥ न क्षुधं न पिपासां च न ग्लानिं प्राप्नुवन्त्युत ॥ नानारूपैरिव कृता मणिभिः सा सभा वरैः ॥ १५ ॥ स्तंभैश्च विधृता सा तु शाश्वती न च सक्षया ॥ दिव्यैर्नानाविधैर्भावैर्भासद्भिरमितप्रभा ॥ १६ ॥ अति[1] चन्द्रं च सूर्य्यं च शिखिनं च स्वयंप्रभा ॥ दीप्यते नाकपृष्ठस्था भर्त्सयंतीव भास्करम् ॥ १७ ॥ तस्यां स भगवान्छास्ति विविधान्देवमानुषान् ॥ स्वयमेकोऽनिशं ब्रह्मा सर्वलोकपितामहः ॥ १८ ॥ उपतिष्ठंति चाप्येनं प्रजानां पतयः प्रभुम् ॥ दक्षः

---

१ अति—अतिक्रम्य—दीप्यतइत्युत्तरेण संबंधः ।

CC-0. In Public Domain. Digitization by eGangotri

प्रचेताः पुलहो मरीचिः कश्यपः प्रभुः ॥ १९ ॥ भृगुरत्रिर्वसिष्ठश्च गौतमोऽथ तथांगिराः ॥ पुलस्त्यश्च क्रतुश्चैव प्रह्लादः कर्दमस्तथा ॥ २० ॥
अथर्वांगिरसश्चैव वालखिल्या मरीचिपाः ॥ मनोंऽतरिक्षं विद्याश्च वायुस्तेजो जलं मही ॥ २१ ॥ शब्दस्पर्शौ तथा रूपं रसो
गंधस्तथैव च ॥ प्रकृतिश्च विकारश्च सदसत्कारणं तथा ॥ २२ ॥ अगस्त्यश्च महातेजा मार्कंडेयश्च वीर्यवान् ॥ जमदग्निर्भरद्वाजः संवर्तश्च्यवन
स्तथा ॥ २३ ॥ दुर्वासाश्च महाभाग ऋष्यशृंगश्च धार्मिकः॥ सनत्कुमारो भगवान्योगाचार्य्यो महातपाः ॥ २४ ॥ असितो देवलश्चैव जैगीषव्यश्च
तत्त्ववित् ॥ आयुर्वेदस्तथाष्टांगो गान्धर्वश्चैव तत्र हि ॥ २५ ॥ चंद्रमाः सह नक्षत्रैरादित्यश्च गभस्तिमान् ॥ वायवस्तंतवश्चैव संकल्पः प्राण एव
च ॥ २६ ॥ मूर्तिमंतो महात्मानो महाव्रतपरायणाः ॥ एते चान्ये च बहवो ब्रह्माणं समुपासिरे ॥२७॥ अर्थो धर्मश्च कामश्च हर्षो द्वेषस्तमो दमः ॥
आयांति तस्यां सहिता गंधर्वाप्सरसां गणाः ॥ २८ ॥ शुक्राद्याश्च ग्रहाश्चैव ये चान्ये तत्समीपगाः ॥ मंत्रा रथंतरं चैव हरिमान्वसुमानपि ॥२९॥
महितो विश्वकर्मा च वसवश्चैव सर्वशः ॥ तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ॥ ३० ॥ ऋग्वेदः सामवेदश्च यजुर्वेदस्तथैव च ॥ अथर्ववेद
श्च तथा सर्वशास्त्राणि चैव ह ॥ ३१ ॥ इतिहासोपवेदाश्च वेदांगानि च सर्वशः ॥ मेधा धृतिः स्मृतिश्चैव प्रज्ञा बुद्धिर्यशः समाः ॥ ३२ ॥ काल
चक्रं च तद्दिव्यं नित्यमक्षयमव्ययम् ॥ यावन्त्यो देवपत्न्यश्च सर्वा एव मनोजवाः ॥३३॥ गार्हपत्या नाकचराः पितरो लोकविश्रुताः ॥ सोमपा
एकशृंगाश्च तथा सर्वे तपस्विनः ॥ ३४ ॥ नागाः सुपर्णाः पशवः पितामहमुपासते ॥ स्थावरा जंगमाश्चापि महाभूतास्तथा परे ॥ ३५ ॥ पुरंदरश्च
देवेंद्रो वरुणो धनदस्तथा ॥ महादेवः सहोमोऽत्र सदा गच्छति सर्वदः ॥ ३६ ॥ गच्छंति सर्वदा देवा नारायणस्तथर्षयः ॥ ऋषयो वालखिल्याश्च
योनिजायोनिजास्तथा ॥ ३७ ॥ यत्किंचित्त्रिषु लोकेषु दृश्यते स्थाणु जंगमम् ॥ तस्यां सहोपविष्टायां तत्र ज्ञात्वा स धर्मवित् ॥ ३८ ॥ देवैर्मुनि
वरैः क्रांतां समालोक्यातिविस्मितः॥ हर्षेण महता युक्तो रोमांचिततनूरुहः ॥ ३९ ॥ तत्र धर्मो महातेजाः कथां पापप्रणाशिनीम् ॥ वाच्यमानां तु
शुश्राव व्यासेनामिततेजसा ॥ ४० ॥ धर्मारण्यकथां दिव्यां तथैव सुमनोहराम् ॥ धर्मार्थकाममोक्षणां फलदात्रीं तथैव च ॥ ४१ ॥ पुत्रपौत्रप्रपौ
त्रादिफलदात्रीं तथैव च ॥ धारणाच्छ्रवणाच्चापि पठनाच्चावलोकनात् ॥४२॥ तां निशम्यसु विस्तीर्णां कथां ब्रह्मांडसंभवाम् ॥ प्रमोदोत्फुल्लनयनो
ब्रह्माणमनुमत्य च ॥ ४३ ॥ कृतकार्योपि धर्मात्मा गंतुकामस्तदाभवत् ॥ नमस्कृत्य तदा धर्मो ब्रह्माणं स पितामहम् ॥ ४४ ॥ अनुज्ञातस्तदा
तेन गतोऽसौ यमशासनम् ॥ पितामहप्रसादाच्च श्रुत्वा पुण्यप्रदायिनीम् ॥ ४५ ॥ धर्मारण्यकथां दिव्यां पवित्रां पापनाशिनीम् ॥ स गतोऽनुचरैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सार्द्धं ततः संयमिनीं प्रति ॥ ४६॥ अमात्यानुचरैः सार्धं प्रविष्टः स्वपुरं यमः ॥ तत्रांतरे महातेजा नारदो मुनिपुंगवः ॥ ४७ ॥ दुर्निरीक्ष्यः कृपा युक्तः समदर्शी तपोनिधिः ॥ तपसा दग्धदेहोपि विष्णुभक्तिपरायणः ॥ ४८ ॥ सर्वगः सर्ववित्चैव नारदः सर्वदा शुचिः ॥ वेदाध्ययनशीलश्च त्वागत स्तत्र संसदि ॥४९॥ तं दृष्ट्वा सहसा धर्मो भार्यया सेवकैः सह ॥ संमुखो हर्षसंयुक्तो गच्छन्नेव स सत्वरः॥५०॥ अद्य मे सफलं जन्म अद्य मे सफलं कुलम् ॥ अद्य मे सफलो धर्मस्त्वय्यायाते तपोधने ॥५१॥ अर्घ्यपाद्यादिविधिना पूजां कृत्वा विधानतः ॥ दंडवत्तं प्रणम्याथ विधिना चोपवेशितः ॥५२॥आसने स्वे महादिव्ये रत्नकांचनभूषिते ॥ चित्रार्पिता सभा सर्वा दीपा निर्वातगा इव ॥५३॥ विधाय कुशलप्रश्नं स्वागतेनाभिनंद्य तम् ॥ प्रहर्षमतुलं लेभे धर्मारण्यकथां स्मरन् ॥ ५४ ॥ नारदं पूजयित्वा तु प्रहृष्टेनांतरात्मना ॥ हर्षितं तु यमं दृष्ट्वा नारदो विस्मिताननः ॥ ५५ ॥ चिंतयामास मनसा किमिदं हर्षितो हरिः[१] ॥ अतिहर्षं च तं दृष्ट्वा यमराजस्वरूपिणम् ॥ आश्चर्यमनसं चैव नारदः पृष्टवांस्तदा ॥ ५६ ॥ ॥ ॥ नारद उवाच ॥ ॥ किं दृष्टं भवताश्चर्यं किं वा लब्धं महत्पदम् ॥ दुष्टस्त्वं दुष्टकर्मा च दुष्टात्मा क्रोधरूपधृक् ॥ ५७ ॥ पापिनां यमनं चैवमेतद्रूपं महत्तरम् ॥ सौम्यरूपं कथं जातमेतन्मे संशयः प्रभो ॥ ५८ ॥ अद्य त्वं हर्षसंयुक्तो दृश्यसे केन हेतुना ॥ कथयस्व महाकाय हर्षस्यैव हि कारणम् ॥ ५९ ॥ ॥ धर्मराज उवाच ॥ ॥ श्रूयतां ब्रह्मपुत्रैतत्कथयामि न संशयः ॥ पुराहं ब्रह्मसदनं गतवानभिवंदितुम् ॥ ६० ॥ तत्रासीनःसभामध्ये सर्वलोकैकपूजिते ॥ नानाकथाः श्रुतास्तत्र धर्म्मवर्गसमन्विताः ॥ ६१ ॥ कथाः पुण्या धर्मयुता रम्या व्यासमुखाच्छ्रुताः ॥ धर्मकामार्थसंयुक्ताः सर्वाघौघविनाशिनीः ॥ ६२ ॥ याः श्रुत्वा सर्वपापेभ्यो मुच्यंते ब्रह्महत्यया ॥ तारयंति पितृगणाञ्छतमेकोत्तरं मुने ॥ ६३ ॥ ॥ ॥ नारद उवाच ॥ ॥ कीदृशी तत्कथा मे तां प्रशंस भवता श्रुताम् ॥ कथां यम महाबाहो श्रोतुकामोस्म्यहं च ताम् ॥ ६४ ॥ ॥ ॥ यम उवाच ॥ ॥ एकदा ब्रह्मलोकेऽहं नमस्कर्तुं पितामहम् ॥ गतवानस्मि तं देशं कार्याकार्यविचारणे ॥ ६५ ॥ मया तत्राद्भुतं दृष्टं श्रुतं च मुनिसत्तम ॥ धर्म्मारण्यकथां दिव्यां कृष्णद्वैपायनेरिताम् ॥ ६६ ॥ श्रुत्वा कथां महापुण्यां ब्रह्मन्ब्रह्मांडगां शुभाम् ॥ गुणपूर्णां सत्ययुक्तां तेन हर्षेण हर्षितः ॥ ६७ ॥ अन्यच्चैव मुनिश्रेष्ठ तवागमनकारणम् ॥ शुभाय च सुखायैव क्षेमाय च जयाय हि ॥ ६८ ॥ आद्यास्मि कृतकृत्योऽहमद्याहं सुकृती मुने ॥ धर्मोनामाद्य जातोऽहं तव पद्युग्मदर्शनात् ॥ ६९ ॥ पूज्योऽहं च कृतार्थोहं धन्योहं चाद्य नारद ॥ युष्मत्पादप्रसादाच्च पूज्योऽहं

१ हरिः—यम—इत्यर्थः—''यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ शुकाहिकपिभेकेषु हरिर्ना—''इत्यमरः ।

CC-0. In Public Domain. Digitization by eGangotri

भुवनत्रये ॥ ७० ॥ ॥ सूत उवाच ॥ ॥ एवंविधैर्वचोभिश्च तोषितो मुनिसत्तमः ॥ पप्रच्छ परया भक्त्या धर्मारण्यकथां शुभाम् ॥ ७१ ॥
॥ ॥ नारद उवाच ॥ ॥ श्रुता व्यासमुखाद्धर्म्मं धर्मारण्यकथा शुभा ॥ तत्सर्वं हि कथय मे विस्तीर्णं च यथातथम् ॥ ७२ ॥ ॥ यम
उवाच ॥ ॥ व्यग्रोऽहं सततं ब्रह्मन्प्राणिनां सुखदुःखिनाम् ॥ तत्तत्कर्मानुसारेण गतिं दातुं सुखेतराम् ॥ ७३ ॥ तथापि साधुसंगो हि धर्मायैव
प्रजायते ॥ इह लोके परत्रापि क्षेमाय च सुखाय च ॥ ७४ ॥ ब्रह्मणः सन्निधौ यच्च श्रुतं व्यासमुखेरितम् ॥ तत्सर्वं कथयिष्यामि मानुषाणां हिता
य वै ॥ ७५ ॥ ॥ सूत उवाच ॥ ॥ यमेन कथितं सर्वं यच्छ्रुतं ब्रह्मसंसदि ॥ आदिमध्यावसानं च सर्वं नैवात्र संशयः ॥ ७६ ॥ कलिद्वापर
योर्मध्ये धर्मपुत्रं युधिष्ठिरम् ॥ गतोऽसौ नारदो मर्त्ये राज्यं धर्मसुतस्य वै ॥ ७७ ॥ आगतः श्रीहरेरंशो नारदः प्रत्यदृश्यत ॥ ज्वलिताग्निप्रतीकाशो
बालार्कसदृशेक्षणः ॥ ७८ ॥ सव्यापवृत्तं विपुलं जटामंडलमुद्वहन् ॥ चंद्रांशुशुक्ले वसने वसानो रुक्मभूषणः ॥ ७९ ॥ वीणां गृहीत्वा महतीं कक्षा
सक्तां सखीमिव ॥ कृष्णाजिनोत्तरासंगो हेमयज्ञोपवीतवान् ॥ ८० ॥ दण्डी कमंडलुकरः साक्षाद्वह्निरिवापरः ॥ भेत्ता जगति गुह्यानां विग्रहाणां गु
होपमः ॥ ८१ ॥ महर्षिगणसंसिद्धो विद्वान्गांधर्ववेदवित् ॥ वैरकेलिकलो विप्रो ब्राह्मः कलिरिवापरः ॥ ८२ ॥ देवगंधर्वलोकानामादिवक्ता मुनिग्रहः ॥
गाता चतुर्णां वेदानामुद्गाता हरिसद्गुणान् ॥ ८३ ॥ स नारदोऽथ विप्रर्षिर्ब्रह्मलोकचरोऽव्ययः ॥ आगतोऽथ पुरीं हर्षाद्धर्मराजेन पालिताम् ॥ ८४ ॥
अथतत्रोविष्टेषु राजन्येषु महात्मसु ॥ महत्सु चोपविष्टेषु गंधर्वेषु च तत्र वै ॥ ८५ ॥ लोकाननुचरन्सर्व्वानागतः स महर्षिराट् ॥ नारदः सुमहातेजा
ऋषिभिः सहितस्तदा ॥ ८६ ॥ तमागतमृषिं दृष्ट्वा नारदं सर्वधर्मवित् ॥ सिंहासनात्समुत्थाय प्रययौ सन्मुखस्तदा ॥ ८७ ॥ अभ्यवादयत प्रीत्या विनयाव
नतस्तदा ॥ तदर्हमासनं तस्मै संप्रदाय यथाविधि ॥ ८८ ॥ गां चैव मधुपर्कं च संप्रदायार्घमेव च ॥ अर्चयामास रत्नैश्च सर्वकामैश्च धर्मवित् ॥ ८९ ॥
तुतोष च यथावच्च पूजां प्राप्य च धर्मवित् ॥ कुशली त्वं महाभाग तपसः कुशलं तव ॥ ९० ॥ न कश्चिद्बाधते दुष्टो दैत्यो हि स्वर्गभूपतिम् ॥
मुने कल्याणरूपस्त्वं नमस्कृतः सुरासुरैः ॥ सर्व्वगः सर्व्ववेत्ता च ब्रह्मपुत्र कृपानिधे ॥ ९१ ॥ ॥ नारद उवाच ॥ ॥ सर्वतः कुशलं मेद्य
प्रसादाद्ब्रह्मणः सदा ॥ कुशली त्वं महाभाग धर्मपुत्र युधिष्ठिर ॥ ९२ ॥ भ्रातृभिः सह राजेंद्र धर्मेषु रमते मनः ॥ दारैः पुत्रैश्च भृत्यैश्च
कुशलैर्गजवाजिभिः ॥ ९३ ॥ औरसानिव पुत्रांश्च प्रजा धर्मेण धर्मज ॥ पालयसि किमाश्चर्यं त्वया धन्या हि सा प्रजा ॥ ९४ ॥ पालनात्पोषणा
न्नृणां धर्मो भवति वै ध्रुवम् ॥ तत्तद्धर्मस्य भोक्ता त्वमित्येवं मनुरब्रवीत् ॥ ९५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कुशलं मम राष्ट्रं च भवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंघ्रिस्पर्शनात् ॥ दर्शनेन महाभाग जातोऽहं गतकिल्बिषः ॥ ९६ ॥ धन्योऽहं कृतकृत्योऽहं सभाग्योऽहं धरातले ॥ अद्याहं सुकृती जातो
ब्रह्मपुत्रे गृहागते ॥ ९७ ॥ कुत आगमनं ब्रह्मन्ब्रूहि ते मुनिसत्तम ॥ अनुग्रहार्थं साधूनां किं वा कार्येण केन च ॥ ९८ ॥ ॥ नारद उवाच ॥
आगतोऽहं नृपश्रेष्ठ सकाशाच्छमनस्य च ॥ व्यासेनोक्तां ब्रह्मणोऽग्रे कथां पौराणिकीं शुभाम् ॥ ९९ ॥ धर्मारण्याश्रितां दिव्यां सर्वसंताप
हारिणीम् ॥ यां श्रुत्वा सर्वपापेभ्यो मुच्यते ब्रह्महत्यया ॥ १०० ॥ हत्यायुतप्रशमनीं तापत्रयविनाशिनीम् ॥ यां वै श्रुत्वातिभक्त्या च कठिनो
मृदुतां भजेत् ॥ १०१ ॥ धर्मराजेन तां श्रुत्वा ममाग्रे च निवेदिताम् ॥ तमपृच्छदमेयात्मा कथां धर्मविनोदिनीम् ॥ २ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ धर्मारण्याश्रितां पुण्यां कथां मे द्विजसत्तम ॥ कथयस्व प्रसादेन लोकानां हितकाम्यया ॥ ३ ॥ ॥ नारद उवाच ॥ ॥
स्नानकालोयमस्माकं न कथावसरो मम ॥ परंतु श्रूयतां राजन्नुपदेशं ददाम्यहम् ॥ ४ ॥ मासानामुत्तमो माघः स्नानदानादिके तथा ॥
तस्मिन्माघे च यः स्नाति सर्वपापैः प्रमुच्यते ॥ ५ ॥ स्नानार्थं याहि शीघ्रं त्वं गंगायां नृपतेऽधुना ॥ व्यासस्यागमनं चाद्य भविष्यति
नृपोत्तम ॥ ६ ॥ तं पृच्छस्व महाभाग श्रावयिष्यति ते शुभम् ॥ तीर्थानां चैव सर्वेषां फलं पुण्यं यदद्भुतम् ॥ ७ ॥ भूतं भव्यं भविष्यं च
उत्तमाधममध्यमाः ॥ वाचयिष्यति तत्सर्वमितिहाससमुद्भवम् ॥ ८ ॥ धर्मारण्यस्य सकलं वृत्तं यद्यत्पुरातनम् ॥ व्यासः सत्यवतीपुत्रो वदि
ष्यति च तेऽखिलम् ॥ ९ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्त्वा विधेः पुत्रस्तत्रैवांतरधीयत ॥ तस्मिन्गते स नृपतिः क्रीडते सचिवैः
सह ॥ ११० ॥ एतस्मिन्नंतरे तत्र प्राप्तः सत्यवतीसुतः ॥ विज्ञापयामास तदा विदुरः पांडवस्य हि ॥ ११ ॥ ॥ सूत
उवाच ॥ ॥ आगतं तु मुनिं श्रुत्वा सर्वे हर्षसमाकुलाः ॥ समुत्तस्थुर्हि भीमाद्याः सह धर्मेण सर्वशः ॥ १२ ॥ तदा हि सन्मुखो
भूत्वा मुमुदे नतकन्धरः ॥ दंडवत्तं प्रणम्याथ भ्रातृभिः सहितस्तदा ॥ १३ ॥ मधुपर्केण विधिना पूजां कृत्वा सुशोभनाम् ॥ सिंहासने
समावेश्य पप्रच्छानामयं तदा ॥१४॥ ततः पुण्यां कथां दिव्यां श्रावयामास धर्मवित् ॥ कथांते मुनिशार्दूलं वचनं चेदमब्रवीत् ॥ १५ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ त्वत्प्रसादान्मया ब्रह्मञ्छ्रुतास्तु प्रवराः कथाः ॥ आपद्धर्म्मा राजधर्मा मोक्षधर्म्मा ह्यनेकशः ॥ १६ ॥ पुराणानां च
धर्माश्च व्रतानि बहुशस्तथा ॥ तीर्थान्यनेकरूपाणि सर्वाण्यायतनानि च ॥ १७ ॥ इदानीं श्रोतुमिच्छामि धर्मारण्यकथां शुभाम् ॥ श्रुत्वा यां हि
विनश्येत पापं ब्रह्मवधादिकम् ॥ १८ ॥ धर्म्मारण्यस्थतीर्थानां श्रोतुमिच्छामि तत्त्वतः ॥ कस्येदं स्थापितं स्थानं कस्मादेतद्विनिर्मितम् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षितं पालितं केन कस्मिन्कालेऽथ निर्मितम् ॥ किंकिं त्वत्राभवत्पूर्वं शंसैतत्पृच्छतो मम ॥ १२० ॥ भूतं भव्यं भविष्यच्च तस्मिन्स्थाने च यद्भवेत् ॥ तत्सर्वं कथयस्वाद्य तीर्थानां च यथा स्थितिः ॥ १२१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्व भागे धर्मारण्यमाहात्म्ये युधिष्ठिरप्रश्नवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ पृथ्वीपुरंध्र्यास्तिलकं ललाटे लक्ष्मीलुठाथाः स्फुटमालवालम् ॥ वाग्देवताया जलकेलिरम्यं नोहेरकं संप्रति वर्णयामि ॥ १ ॥ साधु पृष्टं त्वया राजन्वाराणस्यधिकाधिकम् ॥ धर्मारण्यं नृपश्रेष्ठ शृणुष्वावहितो भृशम् ॥ २ ॥ सर्वतीर्थानि तत्रैव ऊषरं तेन कथ्यते ॥ ब्रह्मविष्णुमहेशाद्यैरिंद्राद्यैः परिसेवितम् ॥ ३ ॥ लोकपालैश्च दिक्पालैर्मातृभिः शिवशक्तिभिः ॥ गंधर्वैश्चाप्सरोभिश्च सेवितं यज्ञकर्मभिः ॥ ४ ॥ भूतवेतालशाकिनीग्रहदेवाधिदेवतैः ॥ ऋतुभिर्मासपक्षैश्च सेव्यमानं सुरासुरैः ॥ ५ ॥ तदाद्यं च नृप स्थानं सर्वसौख्यप्रदं तथा ॥ यज्ञैश्च बहुभिश्चैव सेवितं मुनिसत्तमैः ॥ ६ ॥ सिंहव्याघ्रैर्द्विपैश्चैव पक्षिभिर्विविधैस्तथा ॥ गोमहिष्यादिभिश्चैव सारसैर्मृगशूकरैः ॥ ७ ॥ सेवितं नृपशार्दूल श्वापदैर्विविधैरपि ॥ तत्र ये निधनं प्राप्ताः पक्षिणः कीटकादयः ॥ ८ ॥ पशवः श्वापदाश्चैव जलस्थलचराश्च ये ॥ खेचरा भूचराश्चैव डाकिन्यो राक्षसास्तथा ॥ ९ ॥ एकोत्तरशतैः सार्द्धं मुक्तिस्तेषां हि शाश्वती ॥ ते सर्वे विष्णुलोकांश्च प्रयांत्येव न संशयः ॥ १० ॥ संतारयति पूर्वज्ञान्दश पूर्वान्दशापरान् ॥ यवव्रीहितिलैः सर्पिर्बिल्वपत्रैश्च दूर्वया ॥ ११ ॥ गुडैश्चैवोदकैर्नाथ तत्र पिंडं करोति यः ॥ उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥ १२ ॥ वृक्षैरनेकधा युक्तं लतागुल्मैः सुशोभितम् ॥ सदा पुण्यप्रदं तच्च सदा फलसमन्वितम् ॥ १३ ॥ निर्वैरं निर्भयं चैव धर्मारण्यं च भूपते ॥ गोव्याघ्रैः क्रीडयते तत्र तथा मार्जारमूषकैः ॥ १४ ॥ भेकोऽहिना क्रीडते च मानुषा राक्षसैः सह ॥ निर्भयं वसते तत्र धर्म्मारण्यं च भूतले ॥ १५ ॥ महानंदमयं दिव्यं पावनात्पावनं परम् ॥ कलकंठः कलोत्कंठमनुगुंजति कुंजगः ॥ १६ ॥ ध्यानस्थः श्रोष्यति तदा पारावत्येति वार्य्यते ॥ केकः कोकीं परित्यज्य मौनं तिष्ठति तद्भयात् ॥ १७ ॥ चकोरश्चंद्रिकाभोक्ता नक्तव्रतमिवास्थितः ॥ पठंति सारिकाः सारं शुकं संबोधयत्यहो ॥ १८ ॥ अपारवारसंसारसिंधुपारप्रदः शिवः ॥ आलस्येनापि यो यायाद्गृहाद्धर्मवनं प्रति ॥ १९ ॥ अश्वमेधाधिको धर्मस्तस्य स्याच्च पदेपदे ॥ शापानुग्रहसंयुक्ता ब्राह्मणास्तत्र संति वै ॥ २० ॥ अष्टादशसहस्राणि पुण्यकार्येषु निर्मिताः ॥ षट्त्रिंशत्तु सहस्राणि भृत्यास्ते वणिजो भुवि ॥ २१ ॥ द्विजभक्तिसमायुक्ता ब्रह्मण्यास्ते त्वयोनिजाः ॥ पुराणज्ञाः सदाचारा धार्मिकाः शुद्धबुद्धयः ॥ स्वर्गे देवाः प्रशंसंति धर्म्मारण्यनिवासिनः ॥ २२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मारण्येति त्रिदशैः कदा नाम प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठितम् ॥ पावनं भूतले जातं कस्मात्तेन विनिर्मितम् ॥ २३ ॥ तीर्थभूतं हि कस्माच्च कारणात्तद्वदस्व मे ॥ ब्राह्मणाः कतिसं
ख्याकाः केन वै स्थापिताः पुरा ॥ २४ ॥ अष्टादशसहस्राणि किमर्थं स्थापितानि वै ॥ कस्मिन्वंशे समुत्पन्ना ब्राह्मणा ब्रह्म
सत्तमाः ॥ २५ ॥ सर्वविद्यासु निष्णाता वेदवेदांगपारगाः ॥ ऋग्वेदेषु च निष्णाता यजुर्वेदकृतश्रमाः ॥ २६ ॥ सामवेदांगपारज्ञास्त्रैविद्या धर्म
वित्तमाः ॥ तपोनिष्ठाः शुभाचाराः सत्यव्रतपरायणाः ॥ २७ ॥ मासोपवासैः कृशितास्तथा चांद्रायणादिभिः ॥ सदाचाराश्च ब्रह्मण्याः केन नित्यो
पजीविनः ॥ तत्सर्वमादितः कृत्स्नं ब्रूहि मे वदतां वर ॥ २८ ॥ दानवास्तत्र दैतेया भूतवेतालसंभवाः ॥ राक्षसाश्च पिशाचाश्च उद्वेजंते कथं न
तान् ॥ २९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्ये युधिष्ठिरप्रश्नवर्णनंनाम द्विती
योऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ श्रूयतां नृपशार्दूल कथां पौराणिकीं शुभाम् ॥ यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र
संशयः ॥ १ ॥ एकदा धर्मराजो वै तपस्तेपे सुदुष्करम् ॥ ब्रह्मविष्णुमहेशाद्यैर्जलवर्षातपादिषाट् ॥ २ ॥ आदौ त्रेतायुगे राजन्वर्षाणामयुतत्रयम् ॥
मध्येवनं तपस्यंतमशोकतरुमूलगम् ॥ ३ ॥ शुष्कस्नायुपिनद्धास्थिसंचयं निश्चलाकृतिम् ॥ वल्मीककीटिकाकोटिशोषिताशेषशोणितम् ॥ ४ ॥
निर्मांसकीकसचयं स्फटिकोपलनिश्चलम् ॥ शंखकुंदेंदुतुहिनमहाशंखलसच्छ्रियम् ॥ ५ ॥ सत्त्वावलंबितप्राणमायुःशेषेण रक्षितम् ॥ निश्वासोच्छ्वास
पवनवृत्तिसूचितजीवितम् ॥ ६ ॥ निमेषोन्मेषसंचारपिशुनीकृतजन्तुकम् ॥ पिशंगितस्फुरद्रश्मिनेत्रदीपितदिङ्मुखम् ॥ ७ ॥ तत्तपोग्निशिखादाव
चुंबितम्लानकाननम् ॥ तच्छांत्युदसुधावर्षसंसिक्ताखिलभूरुहम ॥ ८ ॥ साक्षात्तपस्यंतमिव तपो धृत्वा नराकृतिम् ॥ निराकृतिं निराकांक्षं कृत्वा
भक्तिं च कांचनम् ॥ ९ ॥ कुरंगशावैर्गणशो भ्रमद्भिः परिवारितम् ॥ निनादभीषणास्यैश्च वनजैः परिरक्षितम् ॥ १० ॥ एतादृशं महाभीमं दृष्ट्वा
देवाः सवासवाः ॥ ध्यायंतं च महादेवं सर्वेषां चाभयप्रदम् ॥ ११ ॥ ब्रह्माद्या दैवताः सर्वे कैलासं प्रति जग्मिरे ॥ पारिजाततरुच्छायामासीनं च
सहोमया ॥ १२ ॥ नंदिर्भृंगिर्महाकालस्तथान्ये च महागणाः ॥ स्कन्दस्वामी च भगवान्गणपश्च तथैव च ॥ तत्र देवाः सब्रह्माद्याः स्वस्वस्थानेषु
तस्थिरे ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमोस्त्वनंतरूपाय नीलकंठ नमोऽस्तु ते ॥ अविज्ञातस्वरूपाय कैवल्यायामृताय च ॥ १४ ॥ नांतं
देवा विजानंति यस्य तस्मै नमोनमः ॥ यं न वाचः प्रशंसंति नमस्तस्मै चिदात्मने ॥ १५ ॥ योगिनो यं हृदः कोशे प्रणिधानेन निश्चलाः ॥
ज्योतीरूपं प्रपश्यंति तस्मै श्रीब्रह्मणे नमः ॥ १६ ॥ कालात्पराय कालाय स्वेच्छया पुरुषाय च ॥ गुणत्रयस्वरूपाय नमः प्रकृतिरूपिणे ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णवे सत्त्वरूपाय रजोरूपाय वेधसे ॥ तमोरूपाय रुद्राय स्थितिसर्गांतकारिणे ॥ १८ ॥ नमो बुद्धिस्वरूपाय त्रिधाहंकाररूपिणे ॥ पंचतन्मात्ररूपाय नमः प्रकृतिरूपिणे ॥ १९ ॥ नमो नमः स्वरूपाय पंचबुद्धींद्रियात्मने ॥ क्षित्यादिपंचरूपाय नमस्ते विषयात्मने ॥ २० ॥ नमो ब्रह्मांडरूपाय तदंतर्वर्तिने नमः ॥ अर्वाचीनपराचीनविश्वरूपाय ते नमः ॥२१॥ अनित्यनित्यरूपाय सदसत्पतये नमः ॥ नमस्ते भक्तकृपया स्वेच्छाविष्कृतविग्रह ॥ २२ ॥ तव निश्वसितं वेदास्तव वेदोऽखिलं जगत् ॥ विश्वाभूतानि ते पादः शिरो द्यौः समवर्तत ॥ २३ ॥ नाभ्या आसीदंतरिक्षं लोमानि च वनस्पतिः ॥ चंद्रमा मनसो जातश्चक्षोः सूर्यस्तव प्रभो ॥ २४ ॥ त्वमेव सर्वं त्वयि देव सर्वं सर्वस्तुतिस्तव्य इह त्वमेव ॥ ईश त्वया वास्यमिदं हि सर्वं नमोऽस्तु भूयोऽपि नमो नमस्ते ॥ २५ ॥ इति स्तुत्वा महादेवं निपेतुर्दंडवत्क्षितौ ॥ प्रत्युवाच तदा शंभुर्वरदोऽस्मि किमिच्छति ॥ २६ ॥ ॥ महादेव उवाच ॥ ॥ कथं व्यग्राः सुराः सर्वे बृहस्पतिपुरोगमाः ॥ तत्समाचक्ष्व मां ब्रह्मन्भवतां दुःखकारणम् ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ नीलकंठ महादेव दुःखनाशाभयप्रद ॥ शृणु त्वं दुःखमस्माकं भवतो यद्वदाम्यहम् ॥ २८ ॥ धर्मराजोऽपि धर्मात्मा तपस्तेपे सुदुःसहम् ॥ न जानेऽसौ किमिच्छति देवानां पदमुत्तमम् ॥ २९ ॥ तेन त्रस्तास्तत्तपसा सर्व इंद्रपुरोगमाः ॥ भवतोंऽघ्रौ चिरेणैव मनस्तेन समर्पितम् ॥ तमुत्थापय देवेश किमिच्छति स धर्मराट् ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ भवतां नास्ति नु भयं धर्मात्सत्यं ब्रवीम्यहम् ॥ ३१ ॥ तत उत्थाय ते सर्वे देवाः सह दिवौकसः ॥ रुद्रं प्रदक्षिणीकृत्य नमस्कृत्वा पुनःपुनः ॥ ३२ ॥ इन्द्रेण सहिताः सर्वे कैलात्पुनरागताः ॥ स्वस्वस्थाने तदा शीघ्रं गताः सर्वे दिवौकसः ॥ ३३ ॥ इन्द्रोऽपि वै सुधर्मायां गतवान्प्रभुरीश्वरः ॥ न निद्रां लब्धवांस्तत्र न सुखं न च निर्वृतिम् ॥ ३४ ॥ मनसा चिंतयामास विघ्नं मे समुपस्थितम् ॥ अवाप महतीं चिंतां तदा देवः शचीपतिः ॥ ३५ ॥ मम स्थानं पराहर्तुं स्तपस्तेपे सुदुश्चरम् ॥ सर्वान्देवान्समाहूय इदं वचनमब्रवीत् ॥ ३६ ॥ ॥ ॥ इन्द्र उवाच ॥ ॥ शृण्वंतु देवताः सर्वा मम दुःखस्य कारणम् ॥ दुःखेन मम यल्लब्धं तत्किं वा प्रार्थयेद्यमः ॥ बृहस्पतिः समालोक्य सर्वान्देवानथाब्रवीत् ॥ ३७ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ तपसे नास्ति सामर्थ्यं विघ्नं कर्तुं दिवौकसः ॥ उर्वश्याद्याः समाहूय संप्रेष्यंतां च तत्र वै ॥ ॥ ३८ ॥ तासामाकारणार्थाय प्रतिद्वारं प्रतस्थिवान् ॥ स गत्वा ताः समादाय सभायां शीघ्रमाययौ ॥ ३९ ॥ आगतास्ता हरिः[1] प्राह महत्कार्यमु

१ हरिः इन्द्रः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पस्थितम् ॥ गच्छन्तु त्वरिताः सर्वा धर्मारण्यं प्रति द्रुतम् ॥ ४० ॥ यत्र वै धर्मराजोसौ तपश्चक्रे सुदुष्करम् ॥ हास्यभावकटाक्षैश्च गीतनृत्यादि भिस्तथा ॥ ४१ ॥ तं लोभयध्वं यमिनं तपःस्थानाच्च्युतिर्भवेत् ॥ देवस्य वचनं श्रुत्वा तथा अप्सरसां गणाः ॥ ४२ ॥ मिथः संरेभिरे कर्तुं विचार्य च परस्परम् ॥ धर्मारण्यं प्रतस्थेसावुर्वशी स्वर्वरांगना ॥ ४३ ॥ तुष्टुवुः पुष्पवर्षांश्च ससृजुस्तच्छिरस्यमी ॥ ततस्तु देवैर्विप्रैश्च स्तूयमाना समंततः ॥ ४४ ॥ निर्ययौ परमप्रीत्या वनं परमपावनम् ॥ बिल्वार्कखदिराकीर्णं कपित्थधवसंकुलम् ॥ ४५ ॥ न सूर्यो भाति तत्रैव महांधकार संयुतम् ॥ निर्जनं निर्मनुष्यं च बहुयोजनमायतम् ॥ ४६ ॥ मृगैः सिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः ॥ पुष्पितैः पादपैः कीर्णं सुमनोहरशाद्वलम् ॥ ॥ ४७ ॥ विपुलं मधुरानादैर्नादितं विहगैस्तथा ॥ पुंस्कोकिलनिनादाढ्यंझिल्लीकगणनादितम् ॥ ४८ ॥ प्रवृद्धविकटैर्वृक्षैः सुखच्छायैः समावृतम् ॥ वृक्षैराच्छादिततलं लक्ष्म्या परमया युतम् ॥४९॥ नापुष्पः पादपः कश्चिन्नाफलो नापि कंटकी ॥ षट्पदैरप्यनाकीर्णं नास्मिन्वै कानने भवेत् ॥५०॥ विहंगैर्नादितं पुष्पैरलंकृतमतीव हि ॥ सर्वर्तुकुसमैर्वृक्षैः सुखच्छायैः समावृतम् ॥ ५१ ॥ मारुताकलितास्तत्र द्रुमाः कुसुमशाखिनः ॥ पुष्पवृष्टिं विचित्रां तु विसृजंति च पादपाः ॥ ५२ ॥ दिवस्पृशोऽथ संपुष्टाः पक्षिभिर्मधुरस्वनैः ॥ विरेजुः पादपास्तत्र सुगन्धकुसुमैर्वृताः ॥ ५३ ॥ तिष्ठंति च प्रवालेषु पुष्पभारावनादिषु ॥ रुवंति मधुरालापाः षट्पदा मधुलिप्सवः ॥ ५४ ॥ तत्र प्रदेशांश्च बहूनामोदांकुरमंडितान् ॥ लतागृह परिक्षितान्मनसः प्रीतिवर्द्धनान् ॥ ५५ ॥ संपश्यंती महातेजा बभूव मुदिता तदा ॥ परस्पराश्लिष्टशाखैः पादपैः कुसमाचितैः ॥ ५६ ॥ अशोभत वनं तत्तु महेंद्रध्वजसन्निभैः ॥ सुखशीतसुगन्धी च पुष्परेणुवहोऽनिलः ॥ ५७ ॥ एवंगुणसमायुक्तं ददर्श सा वनं तदा ॥ तदा सूर्योद्भवां तत्र पवित्रां परिशोभिताम् ॥ ५८ ॥ आश्रमप्रवरं तत्र ददर्श च मनोरमम् ॥ पतिभिर्वालखिल्यैश्च वृतं मुनिगणा वृतम् ॥ ५९ ॥ अग्न्यगारैश्च बहुभिर्वृक्षशाखावलंबितैः ॥ धूम्रपानकणैस्तत्र दिग्वासोयतिभिस्तथा ॥ ६० ॥ पाल्या वन्या मृगास्तत्र सौम्या भूयो बभूविरे ॥ मार्जारा मूषकैस्तत्र सर्पैश्च नकुलास्तथा ॥ ६१ ॥ मृगशावैस्तथा सिंहाः सत्त्वरूपा बभूविरे ॥ परस्परं चिक्रीडुस्ते यथा चैव सहोदराः ॥ दूराद्ददर्श च वनं तत्र देवोऽब्रवीत्तदा ॥ ६२ ॥ ॥ इन्द्र उवाच ॥ ॥ अयं च खलु धर्मराट् तपस्युग्रेवतिष्ठते ॥ मम राज्याभि कांक्षोऽसावतोर्थे यत्यतामिह ॥ ६३ ॥ तपोविघ्नं प्रकुर्वंतु ममाज्ञा तत्र गम्यताम् ॥ इन्द्रस्य वचनं श्रुत्वा उर्वशी च तिलोत्तमा ॥ ६४ ॥ सुकेशी मंजुघोषा च घृताची मेनका तथा ॥ विश्वाची चैव रंभा च प्रम्लोचा चारुभाषिणी ॥ ६५ ॥ पूर्वचित्तिः सुरूपा च अनुम्लोचा यशस्विनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एताश्चान्याश्च बहुशस्तत्र संस्था व्यचिंतयन् ॥ ६६ ॥ परस्परं विलोक्यैव शंकमाना भयेन हि ॥ यमश्चैव तथा शक्र उभौ वायतनं हि वः ॥ ॥ ६७ ॥ एवं विचार्य बहुधा वर्द्धनीनाम भारत ॥ सर्वासामप्सरसां श्रेष्ठा सर्वाभरणभूषिता ॥ ६८ ॥ उवाचैवोर्वशी तत्र किं खिद्यसि शुभानने ॥ देवानां कार्यसिद्ध्यर्थं मायारूपबलेन च ॥ वर्णधर्मो यथा भूयात्करिष्ये पाकशासन ॥ ६९ ॥ ॥ इन्द्र उवाच ॥ ॥ साधुसाधु महाभागे वर्द्धनीनाम सुव्रता ॥ शीघ्रं गच्छ स्वयं भद्रे कुरु कार्यं कृशोदरि ॥ ७० ॥ धीराणामवने शक्ता नान्या सुभ्रु त्वया विना ॥ वर्द्धनी च तथेत्युक्त्वा गता यत्र स धर्मराट् ॥ ७१ ॥ महता भूषणेनैव रूपं कृत्वा मनोरमम् ॥ कुंकुमैः कज्जलैर्वस्त्रैर्भूषणैश्चैव भूषिता ॥ ७२ ॥ कुसुमं च तथा वस्त्रं किंकिणीकटिराजिता ॥ झणत्कारैस्तथा कष्टैर्भूषिता च पदद्वये ॥ ७३ ॥ नानाभूषणभूषाढ्या नानाचंदनचर्चिता ॥ नानाकुसुममालाढ्या दुकूलेनावृता शुभा ॥ ७४ ॥ प्रगृह्य वीणां संशुद्धां करे सर्वांगसुन्दरी ॥ नर्तनं त्रिविधं तत्र चक्रे लोकमनोरमम् ॥ ७५ ॥ तारस्वरेण मधुरैर्वंशनादेन मिश्रितम् ॥ ७६ ॥ मूर्च्छनातालसंयुक्तं तंत्रीलयसमन्वितम् ॥ क्षणेन सहसा देवो धर्मराजो जितात्मवान् ॥ विमनाः स तदा जातो धर्मराजो नृपात्मजः ॥ ७७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यं परमं ब्रह्मञ्जातं मे ब्रह्मसत्तम ॥ कथं ब्रह्मोपपन्नस्य तपश्छेदो बभूव ह ॥ ७८ ॥ धर्मे धरा च नाकश्च धर्मे पातालमेव च ॥ धर्मे चंद्रार्कमापश्च धर्मे च पवनोऽनलः ॥ ७९ ॥ धर्मे चैवाखिलं विश्वं स धर्मो व्यग्रतां कथम् ॥ गतः स्वामिंस्तद्वैयग्र्यं तथ्यं कथय सुव्रत ॥ ८० ॥ ॥ व्यास उवाच ॥ ॥ पतनं साहसानां च नरकस्यैव कारणम् ॥ योनिकुण्डमिदं सृष्टं कुंभीपाकसमं भुवि ॥ ८१ ॥ नेत्ररज्ज्वा दृढं बद्ध्वा धर्षयंति मनस्विनः॥ कुचरूपैर्महादंडैस्ताड्यमानमचेतसम् ॥ ८२ ॥ कृत्वा वै पातयंत्याशु नरकं नृपसत्तम ॥ मोहनं सर्वभूतानां नारी चैवं विनिर्मिता ॥८३॥ तावद्धंत मनःस्थैर्यं श्रुतं सत्यमनाकुलम् ॥ यावन्मत्तांगनाग्रे न वागुरेव सुचेतसाम् ॥८४॥ तावत्तपोभिवृद्धिस्तु तावद्दानं दया दमः॥ तावत्स्वाध्यायवृत्तं च तावच्छौचं धृतं व्रतम् ॥८५॥ यावन्नस्तमृगीदृष्टिं चपलां न विलोकयेत्॥ तावन्माता पिता तावद्भ्राता तावत्ससुहृज्जनः ॥ ८६ ॥ तावल्लज्जा भयं तावत्स्वाचारस्तावदेव हि ॥ ज्ञानमौदार्यमैश्वर्यं तावदेव हि भासते ॥ यावन्मत्तांगनापाशैः पातितो नैव बन्धनैः ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे धर्मारण्यमाहात्म्ये इन्द्रभयकथनंनाम तृतीयोऽध्यायः ॥ ३ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ अतः परं प्रवक्ष्यामि धर्मराजस्य चेष्टितम् ॥ यच्छ्रुत्वा यमदूतानां न भयं विद्यते क्वचित् ॥१॥ धर्मराजेन सा दृष्टा वर्द्धनी च वराप्सरा ॥ महत्यरण्ये का ह्येषा सुन्दरांग्यतिसुन्दरी ॥२॥ निर्मानुषवनं चेदं सिंहव्याघ्रभयानकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्चर्यं परमं ज्ञात्वा धर्मराजोऽब्रवीदिदम् ॥ ३ ॥ ॥ धर्मराज उवाच ॥ ॥ कस्मात्त्वं मानिनि ह्येका वने चरसि निर्जने ॥ कस्मात्स्थानात्समायाता कस्य पत्नी सुशोभने ॥ ४ ॥ सुता त्वं कस्य वामोरु अतिरूपवती शुभा ॥ मानुषी वाथ गंधर्वी अमरी वाथ किंनरी ॥ ५ ॥ अप्सरा पक्षिणी वाथ अथवा वनदेवता ॥ राक्षसी वा खेचरी वा कस्य भार्या च तद्वद ॥ ६ ॥ सत्यं च वद मे सुभ्रूरित्याहार्कसुतस्तदा ॥ किमिच्छसि त्वया भद्रे किं कार्यं वा वदात्र वै ॥ ७ ॥ यदिच्छसि त्वं वामोरु ददामि तव वांछितम् ॥ ८ ॥ ॥ वर्द्धन्युवाच ॥ ॥ धर्मे तिष्ठति सर्वं वै स्थावरं जंगमं विभो ॥ स धर्मो दुष्करं कर्म कस्मात्त्वं कुरुषेऽनघ ॥ ९ ॥ ॥ यम उवाच ॥ ॥ ईशानस्य च यद्रूपं द्रष्टुमिच्छामि भामिनि ॥ तेनाहं तपसा युक्तः शिवया सह शंकरम् ॥ १० ॥ यशः प्राप्स्ये सुखं प्राप्स्ये करोमि च सुदुष्करम् ॥ युगेयुगे मम ख्यातिर्भवेदिति मतिर्मम ॥ ११ ॥ कल्पे कल्पे महाकल्पे भूयः ख्यातिर्भवेदिति ॥ एतस्मात्कारणात्सुभ्रूस्तप्यते परमं तपः ॥ १२ ॥ कस्मात्त्वमागता भद्रे कथयस्व यथातथा ॥ किं कार्यं कस्य हेतुश्च सत्यमाख्यातुमर्हसि ॥ १३ ॥ ॥ वर्द्धन्युवाच ॥ ॥ तपसैव त्वया धर्म भयभीतो दिवस्पतिः ॥ तेनाहं नोदिता चात्र तपोविघ्नस्य कांक्षया ॥ १४ ॥ इन्द्रासनभयाद्भीता हरिणा हरिसन्निधौ ॥ प्रेषिताहं महाभाग सत्यं हि प्रवदाम्यहम् ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ सत्यवाक्येन च तदा तोषितो रविनंदनः ॥ उवाचैनां महाभाग्यो वरदोहं प्रयच्छ मे ॥ १६ ॥ यमोऽहं सर्वभूतानां दुष्टानां कर्मकारिणाम् ॥ धर्मरूपो हि सर्वेषां मनुजानां जितात्मनाम् ॥ १७ ॥ स धर्मोऽहं वरारोहे ददामि तव दुर्लभम् ॥ तत्सर्वं प्रार्थय त्वं मे शीघ्रं चाप्सरसां वरे ॥ १८ ॥ ॥ ॥ वर्द्धन्युवाच ॥ ॥ इन्द्रस्थाने सदारम्ये सुस्थिरत्वं प्रयच्छ मे ॥ स्वामिन्धर्मभृतां श्रेष्ठ लोकानां च हिताय वै ॥ १९ ॥ ॥ यम उवाच ॥ ॥ एवमस्त्विति तां प्राह चान्यं वरय सत्वरम् ॥ ददामि वरमुत्कृष्टं गानेन तोषितोस्म्यहम् ॥ २० ॥ ॥ वर्द्धन्युवाच ॥ ॥ अस्मिन्स्थाने महाक्षेत्रे मम तीर्थं महामते ॥ भूयाच्च सर्वपापघ्नं मन्नाम्नेति च विश्रुतम् ॥ २१ ॥ तत्र दत्तं हुतं तप्तं पठितं वाऽक्षयं भवेत् ॥ पञ्चरात्रं निषेवेत वर्द्धमानं सरोवरम् ॥ २२ ॥ पूर्वजास्तस्य तुष्येरंस्तर्प्यमाणा दिनेदिने ॥ तथेत्युक्त्वा तु तां धर्मो मौनमाचष्ट संस्थितः॥ त्रिः परिक्रम्य तं धर्मं नमस्कृत्य दिवं ययौ ॥ २३ ॥ ॥ वर्द्धन्युवाच ॥ ॥ मा भयं कुरु देवेश यमस्यार्कसुतस्य च ॥ अयं स्वार्थपरो धर्मं यशसे च समाचरेत् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ वर्द्धनी पूजिता तेन शक्रेण च शुभानना ॥ साधुसाधु महाभागे देवकार्यं कृतं त्वया ॥२५॥ निर्भयत्वं वरारोहे सुखवासश्च ते सदा ॥ यशः सौख्यं श्रियं रम्यां प्राप्स्यसि त्वं शुभानने ॥ २६ ॥ तथेति देवास्तामूचुर्निर्भयानंदचेतसा ॥ नमस्कृत्य च शक्रं सा गता स्थानं स्वकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभम् ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ गतेऽप्सरसि राजेन्द्र धर्मस्तस्थौ यथाविधि ॥ तपस्तेपे महाघोरं विश्वस्योद्वेगदायकम् ॥ २८ ॥ पंचाग्निसा धनं शुक्रे मासि सूर्येण तापिते ॥ चक्रे सुदुःसहं राजन्देवैरपि दुरासदम् ॥ २९ ॥ ततो वर्षशते पूर्णे अन्तको मौनमास्थितः॥ काष्ठभूत इमवातस्थौ वल्मीकशतसंवृतः ॥ ३० ॥ नानापक्षिगणैस्तत्र कृतनीडैः स धर्मराट् ॥ उपविष्टे व्रतं राजन्दृश्यते नैव कुत्रचित् ॥ ३१ ॥ संस्मरंतोऽथ देवेश मुमापतिमनिंदितम् ॥ ततो देवाः सगन्धर्वा यक्षाश्चोद्विग्नमानसाः ॥ कैलासशिखरं भूय आजग्मुः शिवसन्निधौ ॥ ३२ ॥ ॥ देवा ऊचुः ॥ त्राहित्राहि महादेव श्रीकण्ठ जगतः पते ॥ त्राहि नो भूतभव्येश त्राहि नो वृषभध्वज ॥ दयालुस्त्वं कृपानाथ निर्विघ्नं कुरु शंकर ॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ केनापराधिता देवाः केन वा मानमर्दिताः ॥ मर्त्ये स्वर्गेऽथवा नागे शीघ्रं कथय ताचिरम् ॥ ३४ ॥ अनेनैव त्रिशूलेन खट्वांगेनाथवा पुनः ॥ अथ पाशुपतेनैव निहनिष्यामि तं रणे ॥ शीघ्रं वै वदतास्माक मत्रागमनकारणम् ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ कृपासिन्धो हि देवेश जगदानन्दकारक ॥ न भयं मानुषादद्य न ना गाद्देवदानवात् ॥ ३६ ॥ मर्त्यलोके महादेव प्रेतनाथो महाकृतिः ॥ आत्मकार्यं महाघोरं क्लेशयेदिति निश्चयः ॥ ३७ ॥ उग्रेण तपसा कृत्वा क्लिश्यदात्मानमात्मना ॥ तेनात्र वयमुद्विग्ना देवाः सर्वे सदाशिव ॥ शरणं त्वामनुप्राप्ता यदिच्छसि कुरुष्व तत् ॥ ३८ ॥ ॥ सूत उवाच ॥ ॥ देवानां वचनं श्रुत्वा वृषारूढो वृषध्वजः ॥ आयुधान्परिसंगृह्य कवचं सुमनोहरम् ॥ गतवानथ तं देशं यत्र धर्मो व्यवस्थितः ॥ ॥ ३९ ॥ ॥ ईश्वर उवाच ॥ ॥ अनेन तपसा धर्म संतुष्टं मम मानसम् ॥ वरं ब्रूहि वरं ब्रूहि वरं ब्रूहीत्युवाच ह ॥ ४० ॥ इच्छसे त्वं यथा कामा न्यथा ते मनसि स्थितान् ॥ यंयं प्रार्थयसे भद्र ददामि तव सांप्रतम् ॥ ४१ ॥ ॥ सूत उवाच ॥ ॥ एवं संभाषमाणं तु दृष्ट्वा देवं महेश्वरम् ॥ वल्मीकादुत्थितो राजन्गृहीत्वा करसंपुटम् ॥ तुष्टाव वचनैः शुद्धैर्लोकनाथमरिंदम् ॥ ४२ ॥ ॥ धर्म उवाच ॥ ॥ ईश्वराय नमस्तुभ्यं नमस्ते योगरूपिणे ॥ नमस्ते तेजोरूपाय नीलकंठ नमोऽस्तु ते ॥ ४३ ॥ ध्यातॄणामनुरूपाय भक्तिगम्याय ते नमः ॥ नमस्ते ब्रह्मरूपाय विष्णुरूप नमोऽ स्तु ते ॥ ४४ ॥ नमः स्थूलाय सूक्ष्माय अणुरूपाय वै नमः ॥ नमस्ते कामरूपाय सृष्टिस्थित्यंतकारिणे ॥ ४५ ॥ नमो नित्याय सौम्याय मृडाय हरये नमः ॥ आतपाय नमस्तुभ्यं नमः शीतकराय च ॥ ४६ ॥ सृष्टिरूप नमस्तुभ्यं लोकपाल नमोऽस्तु ते ॥ नम उग्राय भीमाय शांत रूपाय ते नमः ॥ ४७ ॥ नमश्चानंतरूपाय विश्वरूपाय ते नमः ॥ नमो भस्मांगलिप्ताय नमस्ते चंद्रशेखर ॥ नमोऽस्तु पंचवक्त्राय त्रिनेत्राय नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नमोंऽधकविनाशाय दक्षपापापहारिणे ॥ कामनिर्दाहिने तुभ्यं त्रिपुरारे नमोऽस्तु ते ॥
ऽस्तु ते ॥ ४८ ॥ नमस्ते व्यालभूषाय कक्षापटधराय च ॥ नमोंऽधकविनाशाय दक्षपापापहारिणे ॥ कामनिर्दाहिने तुभ्यं त्रिपुरारे नमोऽस्तु ते ॥ ५० ॥ गोघ्नश्चैव कृतघ्नश्च सुरापो गुरुत
॥ ४९ ॥ चत्वारिंशच्च नामानि मयोक्तानि च यः पठेत् ॥ शुचिर्भूत्वा त्रिकालं तु पठेद्वा शृणुयादपि ॥ ५० ॥ गोघ्नश्चैव कृतघ्नश्च सुरापो गुरुत
ल्पगः ॥ ब्रह्महा हेमहारी च ह्यथवा वृषलीपतिः ॥ ५१ ॥ स्त्रीबालघातकश्चैव पापी चानृतभाषणः ॥ अनाचारी तथा स्तेयी परदाराभिगस्तथा ॥
॥ ५२ ॥ परापवादी द्वेषी च वृत्तिलोपकरस्तथा ॥ अकार्यकारी कृत्यघ्नो ब्रह्मद्विड्वाडवाधमः ॥ मुच्यते सर्वपापेभ्यः कैलासं स च गच्छति ॥
॥ ५३ ॥ ॥ सूत उवाच ॥ ॥ इत्येवं बहुभिर्वाक्यैर्धर्मराजेन वै मुहुः ॥ ईडितोऽपि महद्भक्त्या प्रणम्य शिरसा स्वयम् ॥ ५४ ॥ तुष्टः शंभुस्तदा
तस्मा उवाचेदं वचः शुभम् ॥ वरं वृणु महाभाग यत्ते मनसि वर्त्तते ॥ ५५ ॥ ॥ यम उवाच ॥ ॥ यदि तुष्टोऽसि देवेश दयां कृत्वा ममोपरि ॥
तं कुरुष्व महाभाग त्रैलोक्यं सचराचरम् ॥ ५६ ॥ मन्नाम्ना स्थानमेतद्धि ख्यातं लोके भवेदिति ॥ अच्छेद्यं चाप्यभेद्यं च पुण्यं पापप्रणाशनम् ॥
॥ ५७ ॥ स्थानं कुरु महादेव यदि तुष्टोऽसि मे भव ॥ शिवेन स्थानकं दत्तं काशीतुल्यं तदा नृप ॥ तद्दत्त्वा च पुनः प्राह अन्यं वरय सत्तम
॥ ५८ ॥ ॥ धर्म उवाच ॥ ॥ यदि तुष्टोऽसि देवेश दयां कृत्वा ममोपरि ॥ तं कुरुष्व महाभाग त्रैलोक्यं सचराचरम् ॥ वरेणैवं यथा ख्यातिं
गमिष्यामि युगेयुगे ॥ ५९ ॥ ॥ ईश्वर उवाच ॥ ॥ ब्रूहि कीनाश तत्सर्वं प्रकरोमि तवेप्सितम् ॥ तपसा तोषितोऽहं वै ददामि वरमीप्सितम् ॥
॥ ६० ॥ ॥ यम उवाच ॥ ॥ यदि मे वांछितं देव ददासि तर्हि शंकर ॥ अस्मिन्स्थाने महाक्षेत्रे मन्नाम्ना भव सर्वदा ॥ ६१ ॥
धर्मारण्यमिति ख्यातिस्त्रैलोक्ये सचराचरे ॥ यथा संजायते देव तथा कुरु महेश्वर ॥ ६२ ॥ ॥ ईश्वर उवाच ॥ ॥
धर्मारण्यमिदं ख्यातं सदा भूयाद्युगेयुगे ॥ त्वन्नाम्ना स्थापितं देव ख्यातिमेतद्गमिष्यति ॥ अथान्यदपि यत्किंचित्करोम्येष वदस्व तत् ॥
॥ ६३ ॥ ॥ यम उवाच ॥ ॥ योजनद्वयविस्तीर्णं मन्नाम्ना तीर्थमुत्तमम् ॥ मुक्तेश्च शाश्वतं स्थानं पावनं सर्वदेहिनाम् ॥
॥ ६४ ॥ मक्षिकाः कीटकाश्चैव पशुपक्षिमृगादयः ॥ पतंगा भूतवेताला पिशाचोरगराक्षसाः ॥ ६५ ॥ नारी वाथ नरो वाथ मत्क्षेत्रे
धर्मसंज्ञके ॥ त्यजते यः प्रियान्प्राणान्मुक्तिर्भवतु शाश्वती ॥ ६६ ॥ एवमस्त्विति सर्वोंपि देवा ब्रह्मादयस्तथा ॥ पुष्पवृष्टिं प्रकुर्वाणाः परं
हर्षमवा[1]पुः ॥ ६७ ॥ देवदुंदुभयो नेदुर्गंधर्वपतयो जगुः ॥ ववुः पुण्यास्तथा वाता ननृतुश्चाप्सरोगणाः ॥ ६८ ॥ ॥ सूत उवाच ॥ ॥

१ स[illegible]ः—महादेवः । अपिश्चार्थः—तथा ब्रह्मादयो देवाः—इति योजना ।

CC-0. In Public Domain. Digitization by eGangotri

यमेन तपसा भक्त्या तोषितो हि सदाशिवः ॥ उवाच वचनं देवं रम्यं साधुमनोरमम् ॥ ६९ ॥ अनुज्ञां देहि मे तात यथा गच्छामि सत्वरम् ॥
कैलासं पर्वतश्रेष्ठं देवानां हितकाम्यया ॥ ७० ॥ ॥ यम उवाच ॥ ॥ न मे स्थानं परित्यक्तुं त्वया युक्तं महेश्वर ॥ कैलासादधिकं देव जायते
वचनादिदम् ॥ ७१ ॥ ॥ शिव उवाच ॥ ॥ साधु प्रोक्तं त्वया युक्तमेकांशेनात्र मे स्थितिः ॥ न मया त्यजितं साधु स्थानं तव सुनिर्मलम् ॥
॥ ७२ ॥ विश्वेश्वरं महालिंगं मन्नाम्नात्र भविष्यति ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ ७३ ॥ शिवस्य वचनात्तत्र तदा लिंगं तदद्भुतम् ॥
तं दृष्ट्वा च सुरैस्तत्र यथानामानुकीर्त्तनम् ॥ ७४ ॥ स्वंस्वं लिंगं तदा सृष्टं धर्मारण्ये सुरोत्तमैः ॥ यस्य देवस्य यल्लिंगं तन्नाम्ना परिकीर्तितम् ॥
॥ ७५ ॥ ॥ सूत उवाच ॥ ॥ धर्मेण स्थापितं लिंगं धर्मेश्वरमुपस्थितम् ॥ स्मरणात्पूजनात्तस्य सर्वपापैः प्रमुच्यते ॥ ७६ ॥ यद्ब्रह्म योगिनां
गम्यं सर्वेषां हृदये स्थितम् ॥ तिष्ठते यस्य लिंगं तु स्वयंभुवमिति स्थितम् ॥ ७७ ॥ भूतनाथं च संपूज्य व्याधिभिर्मुच्यते जनः ॥ धर्मवापीं
ततश्चैव चक्रे तत्र मनोरमाम् ॥ ७८ ॥ आहृत्य कोटितीर्थानां जलं वाप्यां मुमोच ह ॥ यमतीर्थस्वरूपं च स्नानं कृत्वा मनोरमम् ॥ ७९ ॥
स्नानार्थं देवतानां च ऋषीणां भावितात्मनाम् ॥ तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते ॥ ८० ॥ धर्मवाप्यां नरः स्नात्वा दृष्ट्वा धर्मेश्वरं
शिवम् ॥ मुच्यते सर्वपापेभ्यो न मातुर्गर्भमाविशेत् ॥ ८१ ॥ तत्र स्नात्वा नरो यस्तु करोति यमतर्पणम् ॥ व्याधिदोषविनाशार्थं क्लेशदोषोप
शांतये ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय दध्नाय परमेष्ठिने ॥८२॥ वृकोदराय वृकाय दक्षिणेशाय ते नमः ॥ नीलाय
चित्रगुप्ताय चित्र वैचित्र ते नमः ॥ ८३ ॥ यमार्थं तर्पणं यो वै धर्मवाप्यां करिष्यति ॥ साक्षतैर्नामभिश्चैतैस्तस्य नोपद्रवो भवेत् ॥ ८४ ॥ एकां
तरस्तृतीयस्तु ज्वरश्चातुर्थिकस्तथा ॥ वेलायां जायते यस्तु ज्वरः शीतज्वरस्तथा ॥ ८५ ॥ पीडयन्ति न चैतस्य यस्यैवो मतिरीदृशी ॥ रेवत्या
दिग्रहा दोषा डाकिनी शाकिनी तथा ॥ ८६ ॥ धनधान्यसमृद्धिः स्यात्संततिर्वर्धते सदा ॥ भूतेश्वरं तु संपूज्य सुस्नातो विजितेंद्रियः ॥ ८७ ॥
सांगं रुद्रजपं कृत्वा व्याधिदोषात्प्रमुच्यते ॥ अमावास्यां सोमदिने व्यतीपाते च वैधृतौ ॥ संक्रांतौ ग्रहणे चैव तत्र श्राद्धं स्मृतं नृणाम् ॥ ८८ ॥
श्राद्धं कृतं तेन समाः सहस्रं निरस्य चैतत्पितरस्त्वदंति ॥ पानीयमेवापि तिलैर्विमिश्रितं ददाति यो वै प्रथितो मनुष्यः ॥८९॥ एकविंशतिवारैस्तु
गंयायां पिंडदानतः ॥ धर्मेश्वरे सकृद्दत्तं पितृणां चाक्षयं भवेत् ॥ ९० ॥ धर्मेशात्पश्चिमे भागे विश्वेश्वरांतरेपि वा ॥ धर्मवापीति विख्याता
स्वर्गसोपानदायिनी ॥ ९१ ॥ धर्मेण निर्मिता पूर्वं शिवार्थं धर्मबुद्धिना ॥ तत्र स्नात्वा च पीत्वा च तर्पिताः पितृदेवताः ॥ ९२ ॥ शमीपत्रप्रमाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु पिंडं दद्याच्च यो नरः ॥ धर्मवाप्यां महापुण्यां गर्भवासं न चाप्नुयात् ॥ ९३ ॥ कुम्भीपाकान्महारौद्राद्रौरवान्नरकात्पुनः ॥ अंधता
मिस्रकाद्राजन्मुच्यते नात्र संशयः ॥ ९४ ॥ ॥ सूत उवाच ॥ ॥ एकवर्षं तर्पणीयं धर्मवाप्यां नरोत्तमः ॥ ऋतौ मासे च पक्षे च
विपरीतं च जायते ॥ ९५ ॥ बर्हिषदोऽग्निष्वात्ताश्च आज्यपाः सोमपास्तथा ॥ तृप्तिं प्रयांति परमां वाप्यां वै तर्पणेन तु ॥ ९६ ॥ कुरुक्षेत्रादि
क्षेत्राणि अयोध्यादिपुरस्तथा ॥ पुष्कराद्यानि सर्वाणि मुक्तिनामानि संति वै ॥ ९७ ॥ तानि सर्वाणि तुल्यानि धर्मकूपोऽधिको भवेत् ॥ मन्त्रो
वेदास्तथा यज्ञा दानानि च व्रतानि च ॥ ९८ ॥ अक्षयाणि प्रजायंते दत्त्वा जप्त्वा नरेश्वर ॥ अभिचाराश्च ये चान्ये सुसिद्धाथर्ववेदजाः ॥ ९९ ॥
ते सर्वे सिद्धिमायांति तस्मिन्स्थाने कृता अपि ॥ आदितीर्थं नृपश्रेष्ठ काजेशैरुपसेवितम् ॥ १०० ॥ सिद्धिस्थानं सुसौम्यं च ब्रह्माद्यैरपि सेवि
तम् ॥ कृते तु युगपर्यंतं त्रेतायां लक्षपञ्चकम् ॥ १ ॥ द्वापरे लक्षमेकं तु दिनैकेन फलं कलौ ॥ एतदुक्तं मया ब्रह्मन्धर्मारण्यस्य वर्णनम् ॥ फलं
चैवात्र सर्वं हि उक्तं द्वैपायनेन तु ॥ २ ॥ ॥ सूत उवाच ॥ ॥ अतः परं प्रवक्ष्यामि धर्मवाक्यं मनोरमम् ॥ देवानां हितकामाय आज्ञाप्य
च यदुक्तवान् ॥ ३ ॥ ॥ धर्म उवाच ॥ ॥ अस्मिन्क्षेत्रे प्रकुर्वंति विष्णुमायाविमोहिताः ॥ पारदार्यं महादुष्टं स्वर्णस्तेयादिकं तथा ॥ ४ ॥
अन्यच्च विकृतं सर्वं कुर्वाणो नरकं व्रजेत् ॥ अन्यक्षेत्रे कृतं पापं धर्मारण्ये विनश्यति ॥ ५ ॥ धर्मारण्ये कृतं पापं वज्रलेपो भविष्यति ॥ यथा
पुण्यं तथा पापं यत्किंचिच्च शुभाशुभम् ॥ ६ ॥ तत्सर्वं वर्द्धते नित्यं वर्षाणि शतमित्युत ॥ कामिनां कामदं पुण्यं योगिनां मुक्तिदायकम् ॥ ७ ॥
सिद्धानां सिद्धिदं प्रोक्तं धर्मारण्यं तु सर्वदा ॥ अपुत्रो लभते पुत्रान्निर्धनो धनवान्भवेत् ॥ ८ ॥ एतदाख्यानकं पुण्यं धर्मेण कथितं पुरा ॥ यः
शृणोति नरो भक्त्या नारी वा श्रावयेत्तु यः ॥ गोसहस्रफलं तस्य अंते हरिपुरं व्रजेत् ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये क्षेत्रस्थापनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ अतः परं प्रव
क्ष्यामि धर्मारण्यनिवासिना ॥ यत्कार्यं पुरुषेणेह गार्हस्थ्यमनुतिष्ठता ॥ १ ॥ धर्मारण्येषु ये जाता ब्राह्मणाः शुद्धवंशजाः ॥ अष्टादशसहस्राश्च
काजेशैश्च विनिर्मिताः ॥ २ ॥ सदाचाराः पवित्राश्च ब्राह्मणा ब्रह्मवित्तमाः ॥ तेषां दर्शनमात्रेण महापापैर्विमुच्यते ॥ ३ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ पाराशर्य समाख्याहि सदाचारं च मे प्रभो ॥ आचाराद्धर्ममाप्नोति आचाराल्लभते फलम् ॥ आचाराच्छ्रियमाप्नोति तदाचारं वदस्व

१ महापुण्यान्–महापुण्यायाम्--आर्षम् विभक्तिवैपरीत्यं छन्दोनुरोधेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे ॥ ४ ॥ ॥ व्यास उवाच ॥ ॥ स्थावराः कृमयोऽ[1]ब्जांश्च पक्षिणः पशवो नराः ॥ क्रमेण धार्मिकास्त्वेत एतेभ्यो धार्मिकाः सुराः ॥ ५ ॥
सहस्रभागात्प्रथमे द्वितीयानुक्रमास्तथा ॥ सर्वं एते महाभागाः पापान्मुक्तिसमाश्रयाः ॥ ६ ॥ चतुर्णामपि भूतानां प्राणिनोतीव चोत्तमाः ॥ प्राणि
भ्योपि मुनिश्रेष्ठाः सर्वे बुद्ध्युपजीविनः ॥ ७ ॥ मतिमद्भ्यो नराः श्रेष्ठास्तेभ्य श्रेष्ठास्तु वाडवाः ॥ विप्रेभ्योऽपि च विद्वांसो विद्वद्भ्यः कृतबुद्धयः ॥
॥ ८ ॥ कृतधीभ्योऽपि कर्तारः कर्तृभ्यो ब्रह्मतत्पराः ॥ न तेभ्योऽभ्यधिकः कश्चित्रिषु लोकेषु भारत ॥ ९ ॥ अन्योन्यपूजकास्ते वै तपो
विद्याविशेषतः ॥ ब्राह्मणो ब्रह्मणा सृष्टः सर्वभूतेश्वरो यतः ॥ १० ॥ अतो जगत्स्थितं सर्वं ब्राह्मणोऽर्हति नापरः ॥ सदाचारो हि सर्वार्हो
नाचाराद्विच्युतः पुनः ॥ ११ ॥ तस्माद्विप्रेण सततं भाव्यमाचारशीलिना ॥ विद्वेषरागरहिता अनुतिष्ठन्ति यं मुने ॥ १२ ॥ सद्भि
यस्तं सदाचारं धर्ममूलं विदुर्बुधाः ॥ लक्षणैः परिहीनोऽपि सम्यगाचारतत्परः ॥ १३ ॥ श्रद्धालुरनसूयुश्च नरो जीवेत्समाः शतम् ॥
श्रुतिस्मृतिभ्यामुदितं स्वेषुस्वेषु च कर्मसु ॥ १४ ॥ सदाचारं निषेवेत धर्ममूलमतन्द्रितः ॥ दुराचाररतो लोके गर्हणीयः पुमा
न्भवेत् ॥ १५ ॥ व्याधिभिश्चाभिभूयेत सदाल्पायुः सुदुःखभाक् ॥ त्याज्यं कर्म पराधीनं कार्यमात्मवशं सदा ॥ १६ ॥ दुःखी यतः पराधीनः
सदैवात्मवशः सुखी ॥ यस्मिन्कर्मण्यंतरात्मा क्रियमाणे प्रसीदति ॥ १७ ॥ तदेव कर्म कर्त्तव्यं विपरीतं न च क्वचित् ॥ प्रथमं धर्मसर्वस्वं प्रोक्तं
यन्नियमा यमाः ॥ १८ ॥ अतस्तेष्वेव वै यत्नः कर्त्तव्यो धर्ममिच्छता ॥ सत्यं क्षमार्तवं ध्यानमानृशंस्यमहिंसनम् ॥ १९ ॥ दमः प्रसादो माधुर्यं
मृदुतेति यमा दश ॥ शौचं स्नानं तपो दानं मौनेज्याध्ययनं व्रतम् ॥ २० ॥ उपोषणोपस्थदंडो दशैते नियमाः स्मृताः ॥ कामं क्रोधं दमं मोहं मा
त्सर्यं लोभमेव च ॥ २१ ॥ अमून्षड्वैरिणो जित्वा सर्वत्र विजयी भवेत् ॥ शनैः संचिनुयाद्धर्मं वल्मीकं [2]शृंगवान्यथा ॥ २२ ॥ परपीडामकुर्वाणः पर
लोकसहायिनम् ॥ धर्म एव सहायी स्यादमुत्र परिरक्षितः ॥ २३ ॥ पितृमातृसुतभ्रातृयोषिद्बंधुजनाधिकः ॥ जायते चैकलः प्राणी म्रियते च तथै
कलः ॥ २४ ॥ एकलः सुकृतं भुंक्ते भुंक्ते दुष्कृतमेकलः ॥ देहे पंचत्वमापन्ने त्यक्त्वैकं काष्ठलोष्टवत् ॥ २५ ॥ बांधवा विमुखा यांति धर्मो यांतमनु
व्रजेत् ॥ अतः संचिनुयाद्धर्ममत्राऽमुत्र सहायिनम् ॥ २६ ॥ धर्मं सहायिनं लब्ध्वा संतरेद्दुस्तरं तमः ॥ संबंधानाचारेन्नित्यमुत्तमैरुत्तमैः सुधीः ॥
॥२७॥ अधमानधमांस्त्यक्त्वा कुलमुत्कर्षतां नयेत् ॥ उत्तमानुत्तमानेव गच्छेद्धीनांश्च वर्जयेत् ॥ ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम् ॥ २८ ॥

१ अब्जाः—जलजन्तवः—इत्यर्थः । २ शृंगवान्—वल्मीकनिर्माणकर्ता पिपीलिकाजातीयः कीटकविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनध्ययनशीलं च सदाचारविलंघिनम् ॥ सालसं च दुरन्नादं ब्राह्मणं बाधतेंऽतकः ॥ २९ ॥ अतोऽभ्यस्येत्प्रयत्नेन सदाचारं सदा द्विजः ॥ तीर्थान्यप्यभिलष्यंति सदाचारिसमागमम् ॥ ३० ॥ रजनीप्रांतयामार्द्धं ब्राह्मः समय उच्यते ॥ स्वहितं चिंतयेत्प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा ॥ ३१ ॥ गजास्यं संस्मरेदादौ तत ईशं सहांबया ॥ श्रीरंगं श्रीसमेतं तु ब्रह्माणं कमलोद्भवम् ॥ ३२ ॥ इंद्रादीन्सकलान्देवान्वसिष्ठादीन्मुनीनपि ॥ गंगाद्याः सरितः सर्वाः श्रीशैलाद्यखिलान्गिरीन् ॥ ३३ ॥ क्षीरोदादीन्समुद्रांश्च मानसादिसरांसि च ॥ वनानि नंदनादीनि धेनूः कामदुघादयः ॥ ३४ ॥ कल्पवृक्षादिवृक्षांश्च धातून्कांचनमुख्यतः ॥ दिव्यस्त्रीरुर्वशीमुख्याः प्रह्लादाद्यान्हरेः प्रियान् ॥ ३५ ॥ जननीचरणौ स्मृत्वा सर्वतीर्थोत्तमोत्तमौ ॥ पितरं च गुरूंश्चापि हृदि ध्यात्वा प्रसन्नधीः ॥ ३६ ॥ ततश्चावश्यकं कर्तुं नैर्ऋतीं दिशमाव्रजेत् ॥ ग्रामाद्धनुःशतं गच्छेन्नगराच्च चतुर्गुणम् ॥ ३७ ॥ तृणैराच्छाद्य वसुधां शिरः प्रावृत्य वाससा ॥ कर्णोपवीत उदग्वक्त्रो दिवसे संध्ययोरपि ॥ ३८ ॥ विण्मूत्रे विसृजेन्मौनी निशायां दक्षिणामुखः ॥ न तिष्ठन्नाशु नो विप्रगोवन्ह्यनिलसंमुखः ॥ ३९ ॥ न फालकृष्टे भूभागे न रथ्यासेव्यभूतले ॥ नालोकयेद्दिशो भागाञ्ज्योतिश्चक्रं नभो मलम् ॥ ४० ॥ वामेन पाणिना शिश्नं धृत्वोत्तिष्ठेत्प्रयत्नवान् ॥ अथो मृदं समादद्याज्जंतुकर्करवर्जिताम् ॥ ४१ ॥ विहाय मूषकोत्खातां चोच्छिष्टां केशसंकुलाम् ॥ गुह्ये दद्यान्मृदं चैकां प्रक्षाल्य चांबुना ततः ॥ ४२ ॥ पुनर्वामकरेणेति पंचधा क्षालयेद्गुदम् ॥ एकैकपादयोर्दद्यात्तिस्रः पाण्योर्मृदस्तथा ॥ ४३ ॥ इत्थं शौचं गृही कुर्याद्गंधलेपक्षयावधि ॥ क्रमाद्द्वैगुण्यतः कुर्याद्ब्रह्मचर्यादिषु त्रिषु ॥ ४४ ॥ दिवाविहितशौचाच्च रात्रावर्द्धं समाचरेत् ॥ परग्रामे तदर्धं च पथि तस्यार्धमेव च ॥ ४५ ॥ तदर्धं रोगिणां चापि सुस्थे न्यूनं न कारयेत् ॥ अपि सर्वनदीतोयैर्मृत्कूटैश्चाप्यगोपमैः ॥ ४६ ॥ आपातमाचरेच्छौचं भावदुष्टो न शुद्धिभाक् ॥ आर्द्रधात्रीफलोन्माना मृदः शौचे प्रकीर्तिताः ॥ ४७ ॥ सर्वाश्चाहुतयोऽप्येवं ग्रासाश्चांद्रायणेपि च ॥ प्रागास्य उदगास्यो वा सूपविष्टः शुचौ भुवि ॥ ४८ ॥ उपस्पृशेद्विहीनाभिस्तुषांगारास्थिभस्मभिः ॥ अतिस्वच्छाभिरद्भिश्च यावद्बुद्बुदाभिरत्वरः ॥ ४९ ॥ ब्राह्मणो ब्रह्मतीर्थेन हृष्टिपूताभिराचमेत् ॥ कण्ठगाभिर्नृपः शुध्येत्तालुगाभिस्तथोरुजः ॥ ५० ॥ स्त्रीशूद्रावाथ संस्पर्शमात्रेणापि विशुध्यतः ॥ शिरः शब्दं सकंठं वा जले मुक्तशिखोऽपि वा ॥ ५१ ॥ अक्षालितपदद्वंद्व आचांतोऽप्यशुचिर्म्मतः ॥ त्रिः पीत्वांबु विशुद्ध्यर्थं ततः खानि विशोधयेत् ॥ ५२ ॥ अंगुष्ठमूलदेशेन ह्यधरोष्ठौ परिमृजेत् ॥ स्पृष्ट्वा जलेन हृदयं समस्ताभिः शिरः स्पृशेत् ॥ ५३ ॥ अंगुल्यग्रैस्तथा स्कन्धौ सांबु सर्व्वत्र संस्पृशेत् ॥ आचांतः पुनराचामे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कृत्वा रथ्योपसर्पणम् ॥ ५४ ॥ स्नात्वा भुक्त्वा पयः पीत्वा प्रारंभे शुभकर्मणाम् ॥ सुप्त्वा वासः परीधाय दृष्ट्वा तथाप्यमंगलम् ॥ ५५ ॥ प्रमा
दादशुचि स्मृत्वा द्विराचांतः शुचिर्भवेत् ॥ दंतधावनं प्रकुर्वीत यथोक्तं धर्मशास्त्रतः ॥ आचांतोऽप्यशुचिर्यस्मादकृत्वा दंतधावनम् ॥ ५६ ॥
प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे ॥ दंतानां काष्ठसंयोगो दहेदासप्तमं कुलम् ॥ ५७ ॥ अलाभे दंतकाष्ठानां निषिद्धे वाथ वासरे ॥ गंडूषा
द्वादश ग्राह्या मुखस्य परिशुद्धये ॥ ५८ ॥ कनिष्ठाग्रपरीमाणं सत्वचं निर्व्रणारुजम् ॥ द्वादशांगुलमानं च सार्द्रं स्याद्दंतधावनम् ॥ ५९ ॥ एकै
कांगुलमानं तच्चर्वयेद्दंतधावनम् ॥ प्रातः स्नानं चरित्वा च शुद्ध्यै तीर्थे विशेषतः ॥ ६० ॥ प्रातः स्नानाद्यतः शुद्ध्येत्कायोऽयं मलिनः सदा ॥
यन्मलं नवभिश्छिद्रैः स्रवत्येव दिवानिशम् ॥ ६१ ॥ उत्साहमेधासौभाग्यरूपसंपत्प्रवर्द्धकम् ॥ प्राजापत्यसमं प्राहुस्तन्महाघविनाशकृत् ॥ ६२ ॥
प्रातः स्नानं हरेत्पापमलक्ष्मीं ग्लानिमेव च ॥ अशुचित्वं च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति ॥ ६३ ॥ नोपसर्पंति वै दुष्टाः प्रातस्नायिजनं
क्वचित् ॥ दृष्टादृष्टफलं यस्मात्प्रातःस्नानं समाचरेत् ॥ ६४ ॥ प्रसंगतः स्नानविधिं प्रवक्ष्यामि नृपोत्तमाः ॥ विधिस्नानं यतः प्राहुः स्नाना
च्छतगुणोत्तरम् ॥ ६५ ॥ विशुद्धां मृदमादाय बर्हिषस्तिलगोमयम् ॥ शुचौ देशे परिस्थाप्य ह्याचम्य स्नानमाचरेत् ॥ ६६ ॥ उपग्रही बद्ध
शिखो जलमध्ये समाविशेत् ॥ स्वशाखोक्तविधानेन स्नानं कुर्याद्यथाविधि ॥ ६७ ॥ स्नात्वेत्थं वस्त्रमापीड्य गृह्णीयाद्धौतवाससी ॥ आचम्य
च ततः कुर्यात्प्रातःसंध्यां कुशान्वितः ॥ ६८ ॥ प्राणायामांश्चरन्विप्रो नियम्य मानसं दृढम् ॥ अहोरात्रकृतैः पापैर्मुक्तो भवति तत्क्षणात् ॥
॥ ६९ ॥ दश द्वादशसंख्या वा प्राणायामाः कृता यदि ॥ नियम्य मानसं तेन तदा तप्तं महत्तपः ॥ ७० ॥ सव्याहृतिप्रणवकाः प्राणायामास्तु
षोडश ॥ अपि भ्रूणहनं मासात्पुनंत्यहरहःकृताः ॥ ७१ ॥ यथा पार्थिवधातूनां दह्यंते धमनान्मलाः ॥ तथेंद्रियैः कृता दोषा ज्वाल्यंते
प्राणसंयमात् ॥ ७२ ॥ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥ गायत्र्यास्तु परं नास्ति पावनं च नृपोत्तम ॥ ७३ ॥ कर्मणा मनसा वाचा
यद्रात्रौ कुरुते त्वघम् ॥ उत्तिष्ठन्पूर्वसंध्यायां प्राणायामैर्विशोधयेत् ॥ ७४ ॥ यदह्ना कुरुते पापं मनोवाक्कायकर्मभिः ॥ आसीनः पश्चिमां
संध्यां प्राणायामैर्व्यपोहति ॥ पश्चिमां तु समासीनो मलं हंति दिवाकृतम् ॥ ७५ ॥ नोपतिष्ठेत्तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम् ॥
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥ ७६ ॥ अपां समीपमासाद्य नित्यकर्म समाचरेत् ॥ तत आचमनं कुर्याद्यथाविध्यनु
पूर्वशः ॥ ७७ ॥ आपोहिष्ठेति तिसृभिर्मार्जनं तु ततश्चरेत् ॥ भूमौ शिरसि चाकाश आकाशे भुवि मस्तके ॥ ७८ ॥ मस्तके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तथाकाशे भूमौ च नवधा क्षिपेत् ॥ भूमिशब्देन चरणावाकाशं हृदयं स्मृतम् ॥ शिरस्येव शिरःशब्दो मार्जनं तैरुदाहृतम् ॥ ७९ ॥ वारुणादपि चाग्नेयाद्वायव्यादपि चेंद्रतः ॥ मंत्रस्थानादपि परं ब्राह्मं स्नानमिदं परम् ॥ ब्राह्मस्नानेन यः स्नातः स बाह्याभ्यंतरं शुचिः ॥ ८० ॥ सर्वत्र चार्हतामेति देवपूजादिकर्मणि ॥ नक्तंदिनं निमज्ज्याप्सु कैवर्ताः किमु पावनाः ॥ ८१ ॥ शतशोऽपि तथा स्नाता न शुद्धा भावदूषिताः ॥ अंतःकरणशुद्धांश्च तान्विभूतिः पवित्रयेत् ॥ ८२ ॥ किं पावनाः प्रकीर्त्यंते रासभा भस्मधूसराः ॥ स स्नातः सर्वतीर्थेषु मलैः सर्वैर्विवर्जितः ॥८३॥ तेन क्रतुशतैरिष्टं चेतो यस्येह निर्मलम् ॥ तदेव निर्मलं चेतो यथा स्यात्तन्मुने शृणु ॥ ८४ ॥ विश्वेशश्चेत्प्रसन्नः स्यात्तदा स्यान्नान्यथा क्वचित् ॥ तस्माच्चेतोविशुद्ध्यर्थं काशीनाथं समाश्रयेत् ॥ ८५ ॥ इदं शरीरमुत्सृज्य परं ब्रह्माधिगच्छति ॥ द्रुपदांतं ततो जप्त्वा जलमादाय पाणिना ॥ ॥ ८६ ॥ कुर्याद्दतं च मंत्रेण विधिज्ञस्त्वघमर्षणम् ॥ निमज्ज्याप्सु च यो विद्वाञ्जपेत्त्रिरघमर्षणम् ॥ ८७ ॥ जले वापि स्थले वापि यः कुर्यादघमर्षणम् ॥ तस्याघौघो विनश्येत यथा सूर्योदये तमः ॥ ८८ ॥ गायत्रीं शिरसा हीनां महाव्याहृतिपूर्व्विकाम् ॥ प्रणवाद्यां जपंस्तिष्ठन्क्षिपेदंभोंजलित्रयम् ॥ ८९ ॥ तेन वज्रोदकेनाशु मंदेहानाम राक्षसाः ॥ सूर्यतेजः प्रलोपंते शैला इव विवस्वतः ॥ ९० ॥ सहायार्थं च सूर्यस्य यो द्विजो नांजलित्रयम् ॥ क्षिपेन्मंदेहनाशाय सोपि मंदेहतां व्रजेत् ॥९१॥ प्रातस्तावज्जपंस्तिष्ठेद्यावत्सूर्यस्य दर्शनम् ॥ उपविष्टो जपेत्सायमृक्षाणामाविलोकनात् ॥ ॥ ९२ ॥ काललोपो न कर्त्तव्यो द्विजेन स्वहितेप्सुना ॥ अर्द्धोदयास्तसमये तस्माद्वज्रोदकं क्षिपेत् ॥ ९३ ॥ विधिनापि कृता संध्या कालातीताऽफला भवेत् ॥ अयमेव हि दृष्टांतो वंध्यास्त्रीमैथुनं यथा ॥९४॥ जले वामकरं कृत्वा या संध्याऽऽचरिता द्विजैः ॥ वृषली सा परिज्ञेया रक्षोगणमुदावहा ॥ ९५ ॥ उपस्थानं ततः कुर्याच्छाखोक्तविधिना ततः ॥ सहस्रकृत्वो गायत्र्याः शतकृत्वोथवा पुनः ॥ ९६ ॥ दशकृत्वोऽथ देव्यै च कुर्यात्सौरीमुपस्थितिम् ॥ सहस्रपरमां देवीं शतमध्यां दशावराम् ॥ ९७ ॥ गायत्रीं यो जपेद्विप्रो न स पापैः प्रलिप्यते ॥ रक्तचंदनमिश्राभिरद्भिश्च कुसुमैः कुशैः ॥ ९८ ॥ वेदोक्तैरागमोक्तैर्वा मंत्रैरर्घं प्रदापयेत् ॥ अर्चितः सविता येन तेन त्रैलोक्यमर्च्चितम् ॥ ९९ ॥ अर्चितः सविता दत्ते सुतान्पशुवसूनि च ॥ व्याधीन्हरेद्ददात्यायुः पूरयेद्वांछितान्यपि ॥ १०० ॥ अयं हि रुद्र आदित्यो हरिरेष दिवाकरः ॥ रविर्हिरण्यरूपोऽसौ त्रयीरूपोऽयमर्यमा ॥ १०१ ॥ ततस्तु तर्पणं कुर्यात्स्वशाखोक्तविधानतः ॥ ब्रह्मादीनखिलान्देवान्मरीच्यादींस्तथा मुनीन् ॥ १०२ ॥ चंदनागुरुकर्प्पूरगंधवत्कुसमैरपि ॥ तर्पयेच्छुचिभिस्तोयैस्तृप्यंत्विति समुच्चरेत् ॥ ३ ॥ सनकादीन्मनुष्यांश्च निवीती तर्पयेद्यवैः ॥ अंगुष्ठद्वयमध्ये तु कृत्वा दर्भानृजू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्विजः ॥ ४ ॥ कव्यवाडनलादींश्च पितृन्दिव्यान्प्रतर्प्पयेत् ॥ प्राचीनावीतिको दर्भैर्द्विगुणैस्तिलमिश्रितैः ॥ ५ ॥ रवौ शुक्रे त्रयोदश्यां सप्तम्यां निशि संध्ययोः ॥ श्रेयोर्थी ब्राह्मणो जातु न कुर्यात्तिलतर्प्पणम् ॥ ६ ॥ यदि कुर्यात्ततः कुर्याच्छुक्लैरेव तिलैः कृती ॥ चतुर्दश यमान्पश्चात्तर्पयेन्नाम उच्चरन् ॥७॥ ततः स्वगोत्रमुच्चार्य तर्पयेत्स्वान्पितृन्मुदा ॥ सव्यजानुनिपातेन पितृतीर्थेन वाग्यतः ॥८॥ एकैकमंजलिं देवा द्वौद्वौ तु सनकादिकाः ॥ पितरस्त्रीन्प्रवांछंति स्त्रिय एकैकमंजलिम् ॥ ९ ॥ अंगुल्यग्रेण वै दैवमार्षमंगुलिमूलगम् ॥ ब्राह्ममंगुष्ठमूले तु पाणिमध्ये प्रजापतेः ॥ ११० ॥ मध्येंगुष्ठप्रदेशिन्योः पित्र्यं तीर्थं प्रचक्षते ॥ आब्रह्मस्तंबपर्यंतं देवार्षिपितृमानवाः ॥ ११ ॥ तृप्यंतु सर्व्वे पितरो मातृमातामहादयः ॥ अन्ये च मंत्राः प्रोक्ता ये वेदोक्ताः पुराणसंभवाः ॥ १२ ॥ सांगं च तर्प्पणं कुर्यात्पितृणां च सुखप्रदम् ॥ अग्निकार्यं ततः कृत्वा वेदाभ्यासं ततश्चरेत् ॥ १३ ॥ श्रुत्यभ्यासः पंचधा स्यात्स्वीकारोऽर्थविचारणम् ॥ अभ्यासश्च तपश्चापि शिष्येभ्यः प्रतिपादनम् ॥ १४ ॥ लब्धस्य प्रतिपालार्थमलब्धस्य च लब्धये ॥ प्रातःकृत्यमिदं प्रोक्तं द्विजातीनां नृपोत्तम ॥ १५ ॥ अथवा प्रातरुत्थाय कृत्वावश्यकमेव च ॥ शौचाचमनमादाय भक्षयेदन्तधावनम् ॥ ॥ १६ ॥ विशोध्य सर्वगात्राणि प्रातःसंध्यां समाचरेत् ॥ वेदार्थानधिगच्छेद्वै शास्त्राणि विविधान्यपि ॥ १७ ॥ अध्यापयेच्छुचीञ्छिष्यान्हितान्मेधासमन्वितान् ॥ उपेयादीश्वरं[1] चापि योगक्षेमादिसिद्धये ॥ १८ ॥ ततो मध्याह्नसिद्ध्यर्थं पूर्वोक्तं स्नानमाचरेत् ॥ स्नात्वा माध्याह्निकीं संध्यामुपासीत विचक्षणः ॥ १९ ॥ देवतां परिपूज्याथ नैमित्तिकं विधिं चरेत् ॥ पवनाग्निं समुज्वाल्य वैश्वदेवं समाचरेत् ॥ १२० ॥ निष्पावान्कोद्रवान्माषान्कलांपांश्चणकांस्त्यजेत् ॥ तैलपक्वमपक्वान्नं सर्वं लवणयुक्तयजेत् ॥ २१ ॥ आढक्यन्नं मसूरान्नं वर्तुलधान्यसंभवम् ॥ भुक्तशेषं पर्युषितं वैश्वदेवे विवर्जयेत् ॥ २२ ॥ दर्भपाणिः समाचम्य प्राणायामं विधाय च ॥ पृषोदिवीति मंत्रेण पर्य्युक्षणमथाचरेत् ॥ २३ ॥ प्रदक्षिणं च पर्य्युक्ष्य द्विः परिस्तीर्य वै कुशान् ॥ रापोर्द्धे (?) देवमन्त्रेण कुर्याद्वह्निं स्वसंमुखे ॥ २४ ॥ वैश्वानरं समभ्यर्च्य गन्धपुष्पाक्षतैस्तथा ॥ स्वशाखोक्तप्रकारेण होमं कुर्याद्विचक्षणः ॥ २५ ॥ अध्वगः क्षीणवृत्तिश्च विद्यार्थी गुरुपोषकः ॥ यतिश्च ब्रह्मचारी च षडेते धर्मभिक्षकाः ॥ २६ ॥ अतिथिः पांथिको ज्ञेयोऽनूचानः श्रुतिपारगः ॥ मान्यावेतौ गृहस्थानां ब्रह्मलोकमभीप्सताम् ॥ २७ ॥ अपि श्वपाके शुनि वा नैवान्नं निष्फलं भवेत् ॥ अन्नार्थिनि समायाते पात्रापात्रं न चिंतयेत् ॥ २८ ॥ शुनां च पतितानां[2] च श्वपचां पापरोगिणाम् ॥ काकानां च कृमीणां च

१ ईश्वरम्–धनवन्तम्–यजमानम्–यद्वा सर्वयोगक्षेमनिर्वाहसमर्थं परमेश्वरमेव शरणं गच्छेत् । २ कषायान्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहिरन्नं किरेद्भुवि ॥ २९ ॥ ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋताश्च ये ॥ प्रतिगृह्णंत्विमं पिंडं काका भूमौ मयार्पितम् ॥ १३० ॥ इत्थं भूत बलिं कृत्वा कालं गोदोहमात्रकम् ॥ प्रतीक्ष्यातिथिमायातं विशद्भोज्यगृहं ततः ॥ ३१ ॥ अदत्त्वा वायसबलिं नित्यश्राद्धं समाचरेत् ॥ नित्यश्राद्धे स्वसामर्थ्यात्त्रीन्द्वावेकमथापि वा ॥ ३२ ॥ भोजयेत्पितृयज्ञार्थं दद्यादुद्धृत्य वारि च ॥ नित्यश्राद्धं दैवहीनं नियमादिविवर्जितम् ॥ ॥ ३३ ॥ दक्षिणारहितं त्वेतद्दातृभोक्तृसुतृप्तिकृत् ॥ पितृयज्ञं विधायेत्थं स्वस्थबुद्धिरनातुरः ॥ ३४ ॥ अदुष्टासनमध्यास्य भुंजीत शिशुभिः सह ॥ सुगन्धिः सुमनाः स्रग्वी शुचिवासोद्वयान्वितः ॥ ३५ ॥ प्रागास्य उदगास्यो वा भुंजीत पितृसेवितम् ॥ विधायान्नमनग्नं तदुपरिष्टादधस्तथा ॥ ३६ ॥ आपोशानविधानेन कृत्वाश्नीयात्सुधीर्द्विजः ॥ भूमौ बलित्रयं कुर्यादपो दद्यात्तदोपरि ॥ ३७ ॥ सकृच्चाप उपस्पृश्य प्राणाद्याहुतिपंचकम् ॥ दद्याज्जठरकुंडाग्नौ दर्भपाणिः प्रसन्नधीः ॥ ३८ ॥ दर्भपाणिस्तु यो भुंक्ते तस्य दोषो न विद्यते ॥ केशकीटादिसं भूतस्तदश्नीयात्सदर्भकः ॥ ३९ ॥ ततो मौनेन भुञ्जीत न कुर्याद्दंतघर्षणम् ॥ प्रक्षालितऽग्रहस्तस्य दक्षिणांगुष्ठमूलतः ॥ १४० ॥ रौरवेऽपुण्यनि लये अधोलोकनिवासिनाम् ॥ उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् ॥ ४१ ॥ पुनराचम्य मेधावी शुचिर्भूत्वा प्रयत्नतः ॥ मुखशुद्धिं ततः कृत्वा पुराणश्रवणादिभिः ॥ ४२ ॥ अतिवाह्य दिवाशेषं ततः संध्यां समाचरेत् ॥ गृहेषु प्राकृता संध्या गोष्ठे दशगुणा स्मृता ॥ ४३ ॥ नद्याम युतसंख्या स्यादनंता शिवसन्निधौ ॥ अनृतं मद्यगन्धं च दिवामैथुनमेव च ॥ पुनाति वृषलस्थानं संध्या बहिरुपासिता ॥ ४४ ॥ उद्देशतः समाख्यात एष नित्यतनो विधिः ॥ इत्थं समाचरन्विप्रो नावसीदति कर्हिचित् ॥ १४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि तायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये सदाचारवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ उपकाराय साधूनां गृहस्थाश्रमवासिनाम् ॥ यथा च क्रियते धर्मो यथावत्कथयामि ते ॥ १ ॥ वत्स गार्हस्थ्यमास्थाय नरः सर्वमिदं जगत् ॥ पुष्णाति तेन लोकांश्च स जयत्यभिवांछितान् ॥ २ ॥ पितरो मुनयो देवा भूतानि मनुजास्तथा ॥ क्रिमिकीटपतंगाश्च वयांसि पितरोऽसुराः ॥ ३ ॥ गृहस्थ मुपजीवंति ततस्तृप्तिं प्रयांति च ॥ मुखं वास्य निरीक्षंते अपो नो दास्यतीति च ॥ ४ ॥ सर्वस्याधारभूता ये वत्स धेनुस्त्रयीमयी ॥ अस्यां

१ याम्यानैर्ऋतिकाश्च ये—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठितं विश्वं विश्वहेतुश्च या मता ॥ ५ ॥ ऋक्पृष्ठासौ यजुःसंध्या सामकुक्षिपयोधरा ॥ इष्टापूर्तविषाणा च साधुसूक्ततनूरुहा ॥ ६ ॥ शांति पुष्टिशकृन्मूत्रा वर्णपादप्रतिष्ठिता ॥ उपजीव्यमाना जगतां पदक्रमजटाघनैः ॥ ७ ॥ स्वाहाकारस्वधाकारौ वषट्कारश्च पुत्रक ॥ हन्तकारस्तथैवान्यस्तस्याः स्तनचतुष्टयम् ॥ ८ ॥ स्वाहाकारस्तनं देवाः पितरश्च स्वधामयम् ॥ मुनयश्च वषट्कारं देवभूतसुरेश्वराः ॥ ९ ॥ हन्तकारं मनुष्याश्च पिबंति सततं स्तनम् ॥ एवमध्यापयेदेव वेदानां प्रत्यहं त्रयीम् ॥ १० ॥ तेषामुच्छेदकर्त्ता यः पुरुषोऽनंतपापकृत् ॥ स तमस्यंधतामिस्रे नरके हि निमज्जति ॥ ११ ॥ यस्त्वेनां मानवो धेनुं स्ववत्सैरमरादिभिः ॥ पूजयत्युचिते काले स स्वर्गायोपपद्यते ॥ १२ ॥ तस्मात्पुत्र मनुष्येण देवर्षिपितृमानवाः ॥ भूतानि चानुदिवसं पोष्याणि स्वतनुर्यथा ॥ १३ ॥ तस्मात्स्नातः शुचिर्भूत्वा देवर्षिपितृतर्पणम् ॥ यज्ञस्यांते[1] तथैवाद्भिः काले कुर्यात्समाहितः ॥ १४ ॥ सुमनोगन्धपुष्पैश्च देवानभ्यर्च्य मानवः ॥ ततोग्नेस्तर्पणं कुर्याद्दद्याच्चापि बलींस्तथा ॥ १५ ॥ नक्तंचरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् ॥ पितॄणां निर्वपेत्तद्वद्दक्षिणाभिमुखस्ततः ॥ १६ ॥ गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः ॥ ततस्तोयमुपादाय तेष्वेवार्पण सत्क्रियाम् ॥ १७ ॥ स्थानेषु निक्षिपेत्प्राज्ञो नाम्ना तूदिश्य देवताः ॥ एवं बलिं गृहे दत्त्वा गृहे गृहपतिः शुचिः ॥ १८ ॥ आचम्य च ततः कुर्यात्प्राज्ञो द्वारावलोकनम् ॥ मुहूर्तस्याष्टमं भागमुदीक्षेतातिथिं ततः ॥ १९ ॥ अतिथिं तत्र संप्राप्तमर्घ्यपाद्योदकेन च[2] ॥ बुभुक्षुमागतं श्रांतं याचमानमकिंचनम् ॥ २० ॥ ब्राह्मणं प्राहुरतिथिं संपूज्य शक्तितो बुधैः ॥ न पृच्छेत्तत्राचरणं स्वाध्यायं चापि पंडितः ॥२१॥ शोभनाशोभनाकारं तं मन्येत प्रजापतिम् ॥ अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ २२ ॥ तस्मै दत्त्वा तु यो भुंक्ते स तु भुंक्तेऽमृतं नरः ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रति निवर्तते ॥२३॥ स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ अपि वा शाकदानेन यद्वा तोयप्रदानतः ॥ पूजयेत्तं नरः शक्त्या तेनैवातो विमुच्यते ॥२४॥ ॥ युधिष्ठिर उवाच ॥ ॥ विवाहा ब्राह्मदैवार्षाः प्राजापत्यासुरौ तथा ॥ गांधर्वो राक्षसश्चापि पैशाचोष्टम उच्यते ॥२५॥ एतेषां च विधिं ब्रूहि तथा कार्यं च तत्त्वतः ॥ गृहस्थानां तथा धर्मान्ब्रूहि मे त्वं विशेषतः ॥ २६ ॥ ॥ पराशर उवाच ॥ ॥ स ब्राह्मो वरमाहूय यत्र कन्या स्वलंकृता ॥ दीयते तत्सुतः पूयात्पुरुषानेकविंशतिम् ॥ २७ ॥ यज्ञस्थायर्त्विजे दैवस्तज्जः पाति चतुर्दश ॥ वरादादाय गोद्वन्द्वमार्षस्तज्जः पुनाति षट् ॥ २८ ॥ सहोभौ चरतां धर्मं प्राजापत्यः स ईरितः ॥ वरवध्वोः स्वेच्छया च गांधर्वोऽन्योन्यमैत्रतः ॥ प्रसह्य कन्याहरणाद्रा

१ यज्ञस्य—ब्रह्मयज्ञस्य । २ पूजयेदिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षसो निन्दितः सताम् ॥ २९ ॥ छलेन कन्याहरणात्पैशाचो गर्हितोऽष्टमः ॥ प्रायः क्षत्रविशोरुक्ता गांधर्वासुरराक्षसाः ॥ ३० ॥ अष्टमस्त्वेष
पापिष्ठः पापिष्ठानां च संभवः ॥ सवर्णया करो ग्राह्यो धार्यः क्षत्रियया शरः ॥ ३१ ॥ प्रतोदो वैश्यया धार्यो वासोंतः[1] शूद्रया तथा ॥ असवर्णा
स्त्वेष विधिः स्मृतौ दृष्टश्च वेदने ॥ ३२ ॥ सवर्णाभिस्तु सर्वाभिः पाणिर्ग्राह्यस्त्वयं विधिः ॥ धर्म्ये विवाहे जायंते धर्म्याः पुत्राः शतायुषः ॥ ३३ ॥
अधर्म्याद्धर्म्मरहिता मंदभाग्यधनायुषः ॥ कृतकालाभिगमने धर्मोयं गृहिणः परः ॥३४॥ स्त्रीणां वरमनुस्मृत्य यथाकाम्यथवा भवेत् ॥ दिवाभिग
मनं पुंसामनायुष्यं परं मतम् ॥ ३५ ॥ श्राद्धाहः सर्वपर्वाणि न गंतव्यानि धीमता ॥ तत्र गच्छन्स्त्रियं मोहाद्धर्मात्प्रच्यवते परात् ॥ ३६ ॥ ऋतु
कालाभिगामी यः स्वदारनिरतश्च यः ॥ स सदा ब्रह्मचारी हि विज्ञेयः स गृहाश्रमी ॥ ३७ ॥ आर्षे विवाहे गोद्वंद्वं यदुक्तं तत्र शस्यते ॥ शुल्कम
ण्वपि कन्यायाः कन्याविक्रयपापकृत् ॥ ३८ ॥ अपत्यविक्रयात्कल्पं वसेद्विट्कृमिभोजने ॥ अतो नाण्वपि कन्याया उपजीव्यं नरैर्धनम् ॥ ३९ ॥
तत्र तुष्टा महालक्ष्मीर्निवसेद्दानवारिणा ॥ वाणिज्यं नीचसेवा च वेदानध्ययनं तथा ॥ ४० ॥ कुविवाहः क्रियालोपः कुले पतनहेतवः ॥ कुर्याद्वै
वाहिके चाग्नौ गृह्यकर्म्मान्वहं गृही ॥ ४१ ॥ पञ्चयज्ञक्रियां चापि पक्तिं दैनंदिनीमपि ॥ गृहस्थाश्रमिणः पञ्चसूनाकर्म दिनेदिने ॥ ४२ ॥
कुण्डनी पेषणी चुल्ली ह्युदकुम्भी तु मार्जनी ॥ तासां च पंचसूनानां निराकरणहेतवः ॥ ऋतवः पंच निर्दिष्टा गृहिश्रेयोभिवर्द्धनाः ॥ ४३ ॥ पठनं
ब्रह्मयज्ञः स्यात्तर्पणं च पितृक्रतुः ॥ होमो दैवो बलिर्भौत आतिथ्यं नृक्रतुः क्रमात् ॥ ४४ ॥ वैश्वदेवांतरे प्राप्तः सूर्योढो वातिथिः स्मृतः ॥ अति
थेरादितोप्येते भोज्या नात्र विचारणा ॥ ४५ ॥ पितृदेवमनुष्येभ्यो दत्त्वाश्नात्यमृतं गृही ॥ अदत्त्वान्नं च यो भुंक्ते केवलं स्वोदरंभरिः ॥ ४६ ॥
वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः ॥ सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ॥४७॥ अकृत्वा वैश्वदेवं तु भुञ्जंते ये द्विजाधमाः ॥ इह
लोकेन्नहीनाः स्युः काकयोनिं व्रजंत्यथो ॥ ४८॥ वेदोक्तं विदितं कर्म्म नित्यं कुर्यादतंद्रितः ॥ यदि कुर्याद्यथाशक्ति प्राप्नुयात्सद्गतिं पराम् ॥ ४९ ॥
षष्ठ्यष्टम्योर्वसेत्पापं तैले मांसे सदैव हि ॥ चतुर्दश्यां पञ्चदश्यां तथैव च क्षुरे भगे ॥ ५० ॥ उदयन्तं न वीक्षेत नास्तं यंतं न मस्तके ॥ न राहुणो
पस्पृष्टं च नांडस्थं वीक्षयेद्रविम् ॥५१॥ न वीक्षेतात्मनो रूपमप्सु धावेन्न कर्दमे ॥ न नग्नां स्त्रियमीक्षेत न नग्नो जलमाविशेत् ॥५२॥ देवतायतनं
विप्रं धेनुं मधु मृदं तथा ॥ जातिवृद्धं वयोवृद्धं विद्यावृद्धं तथैव च ॥५३॥ अश्वत्थं चैत्यवृक्षं च गुरुं जलभृतं घटम् ॥ सिद्धान्नं दधि सिद्धार्थं गच्छन्कुर्या

१ वासोंतः--वस्त्रांतभाग--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्रदक्षिणम् ॥ ५४ ॥ रजस्वलां न सेवेत नाश्नीयात्सह भार्यया ॥ एकवासा न भुञ्जीत न भुञ्जीतोत्कटासने ॥ ५५ ॥ नाशुचिं स्त्रियमीक्षत तेजस्कामो द्विजोत्तमः ॥ असंतर्प्य पितॄन्देवान्नाद्यादन्नं च कुत्रचित् ॥५६॥ पक्वान्नं चापि नो मांसं दीर्घकालं जिजीविषुः ॥ न मूत्रणं व्रजे कुर्यान्न वल्मीके न भस्मनि ॥ ५७ ॥ न गर्त्तेषु ससत्त्वेषु न तिष्ठन्न व्रजन्नपि ॥ ब्राह्मणं सूर्यमग्निं च चंद्रऋक्षगुरूनपि ॥ ५८ ॥ अभिपश्यन्न कुर्वीत मलमूत्रविसर्जनम् ॥ मुखेनोपधमेन्नाग्निं नग्नां नेक्षेत योषितम् ॥ ५९ ॥ नांघ्री प्रतापयेदग्नौ न वस्तु अशुचि क्षिपेत् ॥ प्राणिहिंसां न कुर्वीत नाश्नीयात्संध्ययोर्द्वयोः ॥ ६० ॥ न संविशेच्च संध्यायां प्रातः सायं क्वचिद्बुधः ॥ नाचक्षीत धयंतीं गां नेंद्रचापं प्रदर्शयेत् ॥ ६१ ॥ नैकः सुप्यात्क्वचिच्छून्ये न शयानं प्रबोधयेत् ॥ पंथानं नैकलो यायान्न वार्य्यंजलिना पिबेत् ॥ ६२ ॥ न दिवोद्धृतसारं च भक्षयेद्दधि नो निशि ॥ स्त्रीधर्म्मिणीं नाभिवदेन्नाद्यादातृप्ति रात्रिषु ॥ ६३ ॥ तौर्यत्रिकप्रियो न स्यात्कांस्ये पादौ न धावयेत् ॥ श्राद्धं कृत्वा परश्राद्धे योऽश्नीयाज्ज्ञानवर्जितः ॥ ६४ ॥ दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग्भवेत् ॥ न धारयेदन्यभुक्तं वासश्चोपानहावपि ॥ ६५ ॥ न भिन्नभाजनेऽश्नीयान्नासीताग्न्यादिदूषिते ॥ आरोहणं गवां पृष्ठे प्रेतधूमं सरित्तटम् ॥ ६६ ॥ बालातपं दिवास्वापं त्यजेद्दीर्घं जिजीविषुः ॥ स्नात्वा न मार्जयेद्गात्रं विसृजेन्न शिखां पथि ॥ ॥ ६७ ॥ हस्तौ शिरो न धुनुयान्नाकर्षेदासनं पदा ॥ करेण नो मृजेद्गात्रं स्नानवस्त्रेण वा पुनः ॥ ६८ ॥ शुनोच्छिष्टं भवेद्गात्रं पुनः स्नानेन शुध्यति ॥ नोत्पाटयेल्लोमनखं दशनेन कदाचन ॥ ६९ ॥ करजैः करजच्छेदं विवर्जयेच्छुभाय तु ॥ यदायत्यां त्यजेत्तन्न कुर्यात्कर्म प्रयत्नतः ॥ ॥ ७० ॥ अद्वारेण न गन्तव्यं स्ववेश्मापि कदाचन ॥ क्रीडेन्नाज्ञैः[1] सहासीत न धर्म्मघ्नैर्न रोगिभिः ॥ ७१ ॥ न शयीत क्वचिन्नग्नः पाणौ भुंजीत नैव च ॥ आर्द्रपादकरास्योऽश्नन्दीर्घकालं न जीवति ॥ ७२ ॥ संविशेन्नार्द्रचरणो नोच्छिष्टः क्वचिदाव्रजेत् ॥ शयनस्थो न चाश्नीयान्न पिबेच्च जलं द्विजः ॥ ७३ ॥ सोपानत्को नोपविशेन्न जलं चोत्थितः पिबेत् ॥ सर्व्वमम्लमयं नाद्यादारोग्यस्याभिलाषुकः ॥ ७४ ॥ न निरीक्षेत विण्मूत्रे नोच्छिष्टः संस्पृशेच्छिरः ॥ नाधितिष्ठेत्तुषांगारभस्मकेशकपालिकाः ॥ ७५ ॥ पतितैः सह संवासः पतनायैव जायते ॥ दद्यादूर्ध्वासनं मंचं न शूद्राय कदाचन ॥ ७६ ॥ ब्राह्मण्याद्धीयते विप्रः शूद्रो धर्माच्च हीयते ॥ धर्मोपदेशः शूद्राणां स्वश्रेयः प्रतिघातयेत् ॥ ७७ ॥ द्विजशुश्रूषणं धर्म्मः शूद्राणां हि परो मतः ॥ कण्डूयनं हि शिरसः पाणिभ्यां न शुभं मतम् ॥ ७८ ॥ आदिशेद्वैदिकं मंत्रं न शूद्राय कदाचन ॥ ब्राह्मण्या

१ अज्ञैः--क्रीडानभिज्ञैः--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धीयते विप्रः शूद्रो धर्म्माच्च हीयते ॥ ७९ ॥ आताडनं कराभ्यां च क्रोशनं केशलुंचनम् ॥ अशास्त्रवर्तनं भूयो लुब्धात्कृत्वा प्रतिग्रहम् ॥ ८० ॥
ब्राह्मणः स च वै याति नरकानेकविंशतिम् ॥ अकालमेघस्तनिते वर्षतौ पांसुवर्षणे ॥ ८१ ॥ महाबालध्वनौ रात्रावनध्यायाः
प्रकीर्तिताः ॥ उल्कापाते च भूकंपे दिग्दाहे मध्यरात्रिषु ॥ ८२ ॥ संध्ययोर्वृषलोपान्ते राज्यहारे च सूतके ॥ दशाष्टकासु भूतायां श्राद्धाहे
प्रतिपद्यपि ॥८३॥ पूर्णिमायां तथाष्टम्यां विड्वरे राष्ट्रविप्लवे ॥ उपाकर्मणि चोत्सर्गे कल्पादिषु युगादिषु ॥८४॥ आरण्यकमधीत्यापि बाणसाम्नोरपि
ध्वनौ ॥ अनध्यायेषु चैतेषु चाधीयीत न वै क्वचित् ॥८५॥ भूताष्टम्योः पञ्चदश्योर्ब्रह्मचारी सदा भवेत् ॥ अनायुष्यकरं चेह परदारोपसर्पणम् ॥
तस्मात्तद्दूरतस्त्याज्यं वैरिणां चोपसेवनम् ॥ ८६ ॥ पूर्वर्द्धिभिः परित्यक्तमात्मानं नावमानयेत् ॥ सदोद्यमवतां यस्माच्छ्रियो विद्या न दुर्लभाः ॥
॥ ८७ ॥ सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥ प्रियं च नानृतं ब्रूयादेष धर्मो विधीयते ॥ ८८ ॥ वाचोवेगं मनोवेगं जिह्वावेगं च वर्ज
येत् ॥ गुह्यजान्यपि लोमानि तत्स्पर्शादशुचिर्भवेत् ॥ ८९ ॥ पादधौतोदकं मूत्रमुच्छिष्टान्युदकानि च ॥ निष्ठीवनं च श्लेष्माणं गृहाद्दूरं विनिः
क्षिपेत् ॥ ९० ॥ अहर्निशं श्रुतेर्जाप्याच्छौचाचारनिषेवणात् ॥ अद्रोहवत्या बुद्ध्या च पूर्वजन्म स्मरेद्द्विजः ॥ ९१ ॥ वृद्धान्प्रयत्नाद्वंदेत दद्यात्तेषां
स्वमासनम् ॥ विनम्रकन्धरो भूयादनुयायात्ततश्च तान् ॥ ९२ ॥ श्रुतिभूदेवदेवानां नृपसाधुतपस्विनाम् ॥ पतिव्रतानां नारीणां निन्दां कुर्यान्न कर्हि
चित् ॥ ९३ ॥ उद्धृत्य पञ्चमृत्पिंडान्स्नायात्परजलाशये ॥ श्रद्धया पात्रमासाद्य यत्किंचिद्दीयते वसु ॥ ९४ ॥ देशे काले च विधिना तदानंत्याय
कल्पते ॥ भूप्रदो मण्डलाधीशः सर्वत्र सुखितोऽन्नदः ॥ ९५ ॥ तोयदाता सुरूपः स्यात्पुष्टश्चान्नप्रदो भवेत् ॥ प्रदीपदो निर्मलाक्षो गोदातार्यमलोक
भाक् ॥९६॥ स्वर्णदाता च दीर्घायुस्तिलदः स्याच्च सुप्रजः ॥ वेश्मदोऽत्युच्चसौधेशो वस्त्रदश्चन्द्रलोकभाक् ॥९७॥ हयप्रदो दिव्यदेहो लक्ष्मीवान्वृषभ
प्रदः॥ सुभार्यः शिबिकादाता सुपर्यंकप्रदोऽपि च ॥९८॥ श्रद्धया प्रतिगृह्णाति श्रद्धया यः प्रयच्छति ॥ स्वर्गिणौ तावुभौ स्यातां पततोऽश्रद्धया त्वधः
॥९९॥ अनृतेन क्षरेद्यज्ञस्तपो विस्मयतः क्षरेत् ॥ क्षरेत्कीर्तिर्विना दानमायुर्विप्रापमानतः ॥१००॥ गंधं पुष्पं कुशा गावः शाकं मांसं पयो दधि ॥
मणिमत्स्यगृहं धान्यं ग्राह्यमेतदुपस्थितम् ॥१०१॥ मधूदकं फलं मूलमेधांस्यभयदक्षिणा ॥ अभ्युद्यतानि ग्राह्याणि त्वेतान्यपि निकृष्टतः॥१०२॥
दासनापितगोपालकुलमित्रार्द्धसीरिणः ॥ भोज्यान्नाः शूद्रवर्गेमी तथात्मविनिवेदकः ॥१०३॥ इत्थमाचारधर्मोयं धर्मारण्यनिवासिनाम् ॥ श्रुतिस्मृ
त्युक्तधर्मोऽन्नं युधिष्ठिर निवेदितः ॥ १०४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदाचारलक्षणवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ संप्राप्य धर्मवाप्यां च यः कुर्यात्पितृतर्पणम् ॥ तृप्तिं प्रयांति
पितरो यावदिंद्राश्चतुर्दश ॥ १ ॥ पितरश्चात्र पूज्याश्च स्वर्गता ये च पूर्वजाः ॥ पिंडांश्च निर्वपेत्तेषां प्राप्येमां मुक्तिदायिकाम् ॥ २ ॥ त्रेतायां पंच
दिवसैर्द्वापरे त्रिदिनेन तु ॥ एकचित्तेन यो विप्राः पिंडं दद्यात्कलौ युगे ॥ ३ ॥ लोलुपा मानवा लोके संप्राप्ते तु कलौ युगे ॥ परदाररता लोकाः
स्त्रियोऽतिचपलाः पुनः॥४॥परद्रोहरताः सर्वे नरनारीनपुंसकाः॥परनिन्दापरा नित्यं परच्छिद्रोपदर्शकाः॥५॥परोद्वेगकरा नूनं कलहा,मित्रभेदिनः॥
सर्वे ते शुद्धतां यांति काजेशाः स्वयमब्रुवन् ॥६॥ एतदुक्तं महाभाग धर्मारण्यस्य वर्णनम् ॥ फलं चैवात्र सर्वं हि यदुक्तं शूलपाणिना ॥ ७ ॥ वाङ्मनः
कायशुद्धाश्च परदारपराङ्मुखाः ॥ अद्रोहाश्च समाः क्रुद्धा मातापितृपरायणाः ॥ ८ ॥ अलौल्या लोभरहिता दानधर्मपरायणाः ॥ आस्तिकाश्चैव
धर्मज्ञाः स्वामिभक्तिरताश्च ये ॥ ९ ॥ पतिव्रता तु या नारी पतिशुश्रूषणे रता ॥ अहिंसका आतिथेयाः स्वधर्मनिरताः सदा ॥ १० ॥ ॥ शौनक
उवाच ॥ ॥ शृणु सूत महाभाग सर्वधर्मविदांवर ॥ गृहस्थानां सदाचारः श्रुतश्च त्वन्मुखान्मया ॥ ११ ॥ एकं मनेप्सितं मेद्य तत्कथयस्व
सूतज ॥ पतिव्रतानां सर्वासां लक्षणं कीदृशं वद ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ पतिव्रता गृहे यस्य सफलं तस्य जीवनम् ॥ यस्यांगच्छा
यया तुल्या यत्कथा पुण्यकारिणी ॥ १३ ॥ पतिव्रतास्त्वरुंधत्या सावित्र्याप्यनसूयया ॥ शांडिल्या चैव सत्या च लक्ष्म्या च शतरूपया ॥
॥ १४ ॥ मेनया च सुनीत्या च संज्ञया स्वाहया समाः ॥ पतिव्रतानां धर्मा हि मुनिना च प्रकीर्तिताः ॥ १५ ॥ भुंक्ते भुक्ते स्वामिनि च तिष्ठ
ति त्वनुतिष्ठति ॥ विनिद्रिते या निद्राति प्रथमं परिबुध्यति ॥ १६ ॥ अनलंकृतमात्मानं देशांते भर्तरि स्थिते ॥ कार्यार्थं प्रोषिते क्वापि सर्व्वमंड
नवर्जिता ॥ १७ ॥ भर्तुर्नाम न गृह्णाति ह्यायुषोऽस्य हि वृद्धये ॥ पुरुषांतरनामापि न गृह्णति कदाचन ॥ १८ ॥ आकृष्टापि च नाक्रोशेत्ताडितापि
प्रसीदति ॥ इदं कुरु कृतं स्वामिन्मन्यतामिति वक्ति च ॥ १९ ॥ आहूता गृहकार्याणि त्यक्त्वा गच्छति सत्वरम् ॥ किमर्थं व्याहृता नाथ स
प्रसादो विधीयताम् ॥ २० ॥ न चिरं तिष्ठति द्वारि न द्वारमुपसेवते ॥ अदातव्यं स्वयं किंचित्कर्हिंचिन्न ददात्यपि ॥ २१ ॥ पूजोपकरणं सर्वम
नुक्ता साधयेत्स्वयम् ॥ नियमोदकबर्हींषि यत्र पुष्पाक्षतादिकम् ॥ २२ ॥ प्रतीक्षमाणा च वरं यथाकालोचितं हि यत् ॥ तदुपस्थापयेत्सर्वमनुद्वि
ग्नातिहृष्टवत् ॥२३॥ सेवते भर्त्तुरुच्छिष्टमिष्टमन्नं फलादिकम् ॥ दूरतो वर्ज्जयेदेषा समाजोत्सवदर्शनम् ॥ २४ ॥ न गच्छेत्तीर्थयात्रादिविवाहप्रेक्षणा
दिषु ॥ सुखसुप्तं सुखासीनं रममाणं यदृच्छया ॥ २५ ॥ अंतरायेऽपि कार्येषु पतिं नोत्थापयेत्क्वचित् ॥ स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येत् ॥ २६ ॥ स्ववाक्यं श्रावयेन्नापि यावत्स्नात्वा न शुध्यति ॥ सुस्नाता भर्तृवदनमीक्षेतान्यस्य न कचित् ॥ अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥२७॥ हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा ॥ कूर्पासकं च तांबूलं मांगल्याभरणं शुभम् ॥ २८ ॥ केशसंस्कारकं चैव करकर्णादिभूषणम् ॥ भर्तुरायुष्यमिच्छंती दूरयेन्न पतिव्रता ॥ २९ ॥ भर्तृविद्वेषिणीं नारीं नैषा संभाषते कचित् ॥ नैकाकिनी कचिद्भूयान्न नग्ना स्नाति च कचित् ॥३०॥ नोलूखले न मुशले न वर्द्धन्यां दृषद्यपि ॥ न यंत्रके न देहल्यां सती चोपविशेत्कचित् ॥ ३१ ॥ विना व्यवायसमयात्प्रागल्भ्यं न कचिच्चरेत् ॥ यत्रयत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा ॥ ३२ ॥ इदमेव व्रतं स्त्रीणामयमेव परो वृषः ॥ इयमेव च पूजा च भर्तुर्वाक्यं न लंघयेत् ॥ ॥ ३३ ॥ क्लीबं वा दुरवस्थं वा व्याधितं वृद्धमेव वा ॥ सुस्थिरं दुःस्थिरं वापि पतिमेकं न लंघयेत् ॥ ३४ ॥ सर्पिर्लवणहिंग्वादिक्षयेऽपि च पतिव्रता ॥ पतिं नास्तीति न[1] ब्रूयादायसीषु[2] न भोजयेत् ॥ ३५ ॥ तीर्थस्नानार्थिनी चैव पतिपादोदकं पिबेत् ॥ शंकरादपि वा विष्णोः पतिरेवाधिकः स्त्रियः ॥ ३६ ॥ व्रतोपवासनियमं पतिमुल्लंघ्य या चरेत् ॥ आयुष्यं हरते भर्तुर्मृता निरयमृच्छति ॥ ३७ ॥ उक्ता प्रत्युत्तरं दद्यान्नारी या क्रोधतत्परा ॥ सरमा जायते ग्रामे शृगाली निर्जने वने ॥ ३८ ॥ स्त्रीणां हि परमश्चैको नियमः समुदाहृतः ॥ अभ्यर्च्य चरणौ भर्तुर्भोक्तव्यं कृतनिश्चया ॥ ३९ ॥ उच्चासनं न सेवेत न व्रजेत्परवेश्मसु ॥ तत्र पारुष्यवाक्यानि ब्रूयान्नैव कदाचन ॥४०॥ गुरूणां सन्निधौ वापि नोच्चैर्ब्रूयान्नवाहयेत् ॥ ४१ ॥ या भर्तारं परित्यज्य रहश्चरति दुर्मतिः ॥ उलूकी जायते क्रूरा वृक्षकोटरशायिनी ॥ ४२ ॥ ताडिता ताडयेच्चेत्तं सा व्याघ्री वृषदंशिका ॥ कटाक्षयति याऽन्यं वै केकराक्षी तु सा भवेत् ॥ ४३ ॥ या भर्तारं परित्यज्य मिष्टमश्नाति केवलम् ॥ ग्रामे सा सूकरी भूयाद्वल्गुली वाथ विड्भुजा ॥ ४४ ॥ हुन्त्वंकृत्याप्रियं ब्रूते मूका सा जायते खलु ॥ या सपत्नीं सदेर्ष्येत दुर्भगा सा पुनःपुनः ॥ दृष्टिं विलुप्य भर्तुर्या कंचिदन्यं समीक्षते ॥ ४५ ॥ काणा च विमुखा वापि कुरूपापि च जायते ॥ बाह्यादायांतमालोक्य त्वरिता च जलासनैः ॥ तांबूलैर्व्यजनैश्चैव पादसंवाहनादिभिः ॥ ४६ ॥ तथैव चारुवचनैः स्वेदसंनोदनैः परैः ॥ या प्रियं प्रीणयेत्प्रीता त्रिलोकी प्रीणिता तया ॥ मितं ददाति हि पिता मितं भ्राता सुतं सुतः ॥ ४७ ॥ अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥ भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि

१ न ब्रूयात्–सिद्धायां पाकक्रियायां न ब्रूयाद्भोजनसमय एव पाकः क्रियातः प्राक्–भोजनोत्तरं च ब्रूयादेव । अन्यथा तदानयनं न स्यात्–इति तत्वार्थः । २ आयसीषु–लोहपात्रीषु–न भोजयेत् अन्नं न परिविष्यात्–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत् ॥ ४८ ॥ जीवहीनो यथा देही क्षणादशुचितां व्रजेत् ॥ भर्तृहीना तथा योषित्सुस्नाताप्य शुचिः सदा ॥ ४९ ॥ अमंगलेभ्यः सर्वेभ्यो विधवा स्याद मंगला ॥ विधवादर्शनात्सिद्धिः क्वापि जातु न जायते ॥ ५० ॥ विहाय मातरं चैकां सर्वा मंगलवर्जिताः ॥ तदाशिषमपि प्राज्ञस्त्यजेदाशीविषोपमाम् ॥ ५१ ॥ कन्याविवाहसमये वाचयेयुरिति द्विजाः ॥ भर्तुः सहचरी भूयाज्जीवतोऽजीवतोपि वा ॥ ५२ ॥ अनुव्रजन्ती भर्तारं गृहात्पितृवनं मुदा ॥ पदेपदेश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥ ५३ ॥ व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ॥ एवमुत्क्रम्य दूतेभ्यः[1] पतिं स्वर्गं व्रजेत्सती ॥ ५४ ॥ यमदूताः पलायंते तामालोक्य पतिव्रताम् ॥ तपनस्तप्यते नूनं दहनोपि च दह्यते ॥ ५५ ॥ कंपंते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः ॥ यावत्स्वलोमसंख्यास्ति तावत्कोटचयुतानि च ॥ ५६ ॥ भर्त्रा स्वर्गसुखं भुंक्ते रममाणा पतिव्रता ॥ धन्या सा जननी लोके धन्योऽसौ जनकः पुनः ॥ ५७ ॥ धन्यः स च पतिः श्रीमान्येषां गेहे पतिव्रता ॥ पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः ॥ पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुंजते ॥ ५८ ॥ शीलभंगेन दुर्वृत्ताः पातयंति कुलत्रयम् ॥ पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिताः ॥ ५९ ॥ पतिव्रतायाश्चरणो यत्रयत्र स्पृशेद्भुवम् ॥ सा तीर्थभूमिर्मान्येति नात्र भारोऽस्ति पावनः ॥ ६० ॥ बिभ्यत्पतिव्रतास्पर्शं कुरुते भानुमानपि ॥ सोमो गन्धर्व एवापि स्वपावित्र्याय नान्यथा ॥ ६१ ॥ आपः पतिव्रतास्पर्शमभिलष्यंति सर्वदा ॥ गायत्र्याघविनाशो नो पातिव्रत्येन साऽघनुत् ॥ ६२ ॥ गृहेगृहे न किं नार्य्यो रूपलावण्यगर्विताः ॥ परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता ॥ ६३ ॥ भार्या मूलं गृहस्थस्य भार्या मूलं सुखस्य च ॥ भार्या धर्मफलायैव भार्या संतानवृद्धये ॥ ६४ ॥ परलोकस्त्वयं लोको जीयते भार्यया द्वयम् ॥ देवपित्रतिथीनां च तृप्तिः स्याद्भार्यया गृहे ॥ गृहस्थः स तु विज्ञेयो गृहे यस्य पतिव्रता ॥ ६५ ॥ यथा गंगावगाहेन शरीरं पावनं भवेत् ॥ तथा पतिव्रतां दृष्ट्वा सदनं पावनं भवेत् ॥ ६६ ॥ पर्यंकशायिनी नारी विधवा पातयेत्पतिम् ॥ तस्माद्भूशयनं कार्य्यं पतिसौख्यसमीहया ॥ ६७ ॥ नैवांगोद्वर्त्तनं कार्य्यं स्त्रिया विधवया क्वचित् ॥ गन्धद्रव्यस्य संभोगो नैव कार्य्यस्तया क्वचित् ॥ ६८ ॥ तर्प्पणं प्रत्यहं कार्य्यं भर्तुः कुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम् ॥ ६९ ॥ विष्णोः संपूजनं कार्यं पतिबुद्ध्या न चान्यथा ॥ पतिमेव सदा ध्यायेद्विष्णुरूपधरं हरिम् ॥ ७० ॥ यद्यदिष्टतमं लोके यद्यत्पत्युः समीहितम् ॥ तत्तद्गुणवते देयं पतिप्रीणनकाम्यया ॥ ७१ ॥

१ दूतेभ्यः—यमदूतेभ्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशाखे कार्त्तिके मासे विशेषनियमांश्चरेत् ॥ स्नानं दानं तीर्थयात्रां पुराणश्रवणं मुहुः ॥ ७२ ॥ वैशाखे जलकुम्भाश्च कार्त्तिके घृतदीपिकाः ॥ माघे धान्यतिलोत्सर्गः स्वर्गलोके विशिष्यते ॥ ७३ ॥ प्रपा कार्या च वैशाखे देवे देया गलंतिका ॥ उशीरं व्यजनं छत्रं सूक्ष्मवासांसि चंदनम् ॥ ॥७४॥ सकर्पूरं च तांबूलं पुष्पदानं तथैव च ॥ जलपात्राण्यनेकानि तथा पुष्पगृहाणि च ॥ ७५ ॥ पानानि च विचित्राणि द्राक्षारंभाफलानि च ॥ देयानि द्विजमुख्येभ्यः पतिर्मे प्रीयतामिति ॥७६॥ ऊर्जे यवान्नमश्नीयादेकान्नमथवा पुनः॥वृन्ताकं सूरणं चैव शूकशिंबीं च वर्जयेत्॥७७॥ कार्त्तिके वर्जयेत्तैलं कांस्यं चापि विवर्जयेत् ॥ कार्त्तिके मौननियमे चारुघण्टां प्रदापयेत् ॥ ७८ ॥ पत्रभोजी कांस्यपात्रं घृतपूर्णं प्रयच्छति ॥ भूमिशय्याव्रते देया शय्या श्लक्ष्णा सतूलिका ॥७९॥ फलत्यागे फलं देयं रसत्यागे च तद्रसः ॥ धान्यत्यागे च तद्धान्यमथवा शालयः स्मृताः ॥ धेनुं दद्यात्प्रयत्ने न सालंकारां सकांचनाम् ॥८०॥ एकतः सर्वदानानि दीपदानं तथैकतः ॥ कार्त्तिके दीपदानस्य कलां नार्हति षोडशीम् ॥८१॥ इत्यादिविधवानां च नियमाः संप्रकीर्तिताः ॥ तेषां फलमिदं राजन्नान्येषां च कदाचन ॥ ८२ ॥ धर्मवापीं समासाद्य दानं दद्याद्विचक्षणः ॥ कोटिधा वर्द्धते नित्यं ब्रह्मणो वचनं यथा ॥ ८३ ॥ तिलधेनुं च यो दद्याद्धर्मेश्वरपुरःस्थितः ॥ तिलसंख्यानि वर्षाणि स्वर्गे लोके महीयते ॥ ८४ ॥ धर्मक्षेत्रे तु संप्राप्य श्राद्धं कुर्यादतंद्रितः ॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम् ॥ ८५ ॥ ये चान्ये पूर्वजाः स्वर्गे ये चान्ये नरकौकसः ॥ ये च तिर्यक्त्वमापन्ना ये च भूतादिसंस्थिताः ॥ ८६ ॥ तान्सर्वान्धर्मकूपे वै श्राद्धं कुर्याद्यथाविधि ॥ अत्र प्रकिरणं यत्तु मनुष्यैः क्रियते भुवि ॥ तेन ते तृप्तिमायांति ये पिशाचत्वमागताः ॥ ८७ ॥ येषां तु स्नानवस्त्रोत्थं भूमौ पतति पुत्रक ॥ तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते ॥ ८८ ॥ या वै यवानां कणिकाः पतंति धरणीतले ॥ ताभिराप्यायनं तेषां ये तु देवत्वमागताः ॥ ८९ ॥ उद्धृतेष्वथ पिंडेषु यावान्नकणिका भुवि ॥ ताभिराप्यायनं तेषां ये च पातालमागताः ॥ ९० ॥ ये वा वर्णाश्रमाचारक्रियालोपा ह्यसंस्कृताः ॥ विपन्नास्ते भवंत्यत्र संमार्जनजलाशिनः ॥ ९१ ॥ भुक्त्वा वाचमनं यच्च जलं पतति भूतले ॥ ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयांति वै ॥ ९२ ॥ एवं यो यजमानश्च यच्च तेषां द्विजन्मनाम् ॥ कश्चिज्जलान्नविक्षेपः शुचिरस्पृष्ट एव च ॥ ९३ ॥ ये चान्ये नरके जातास्तत्र योन्यंतरं गताः ॥ प्रयांत्याप्यायनं वत्स सम्यक्छ्राद्धक्रियावताम् ॥ ॥ ९४ ॥ अन्यायोपार्जितैर्द्रव्यैः श्राद्धं यत्क्रियते नरैः ॥ तृप्यंति तेन चण्डालपुल्कसादिषु योनिषु ॥ ९५ ॥ एवमाप्यायिता वत्स तेन चानेक

१ दातव्याः—इति शेषः । उभयत्रान्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बांधवाः ॥ श्राद्धं कर्तुमशक्तिश्चेच्छाकैरपि हि जायते ॥ ९६ ॥ तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि ॥ कुरुते कुर्वतः श्राद्धं कुलं क्वचिन्न सीदति ॥ ९७ ॥ पापं यदि कृतं सर्वं पापं च वर्द्धते ध्रुवम् ॥ कुर्वाणो नरके घोरे पच्यते नात्र संशयः ॥ ९८ ॥ यथा पुण्यं तथा पापं कृतं कर्म शुभाशुभम् ॥ तत्सर्वं वर्द्धते नूनं धर्मारण्ये नृपोत्तम ॥ ९९ ॥ कामिकं कामदं देवं योगिनां मुक्तिदायकम् ॥ सिद्धानां सिद्धिदं प्रोक्तं धर्मारण्यं तु सर्वदा ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यक्षेत्रमाहात्म्ये धर्माचारवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मारण्यकथां पुण्यां श्रुत्वा तृप्तिर्न मे विभो ॥ यदायदा कथयसि तदा प्रोत्सहते मनः ॥ अतः परं किमभवत्परं कौतूहलं हि मे ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ शृणु पार्थ महापुण्यां कथां स्कंदपुराणजाम् ॥ स्थाणुनोक्तां च स्कंदाय धर्मारण्योद्भवां शुभाम् ॥ २ ॥ सर्वतीर्थस्य फलदां सर्वोपद्रवनाशिनीम् ॥ कैलासशिखरासीनं देवदेवं जगद्गुरुम् ॥ पंचवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनम् ॥ ३ ॥ कपालखट्वांगकरं नागयज्ञोपवीतिनम् ॥ गणैः परिवृतं तत्र सुरासुरनमस्कृतम् ॥ ४ ॥ नानारूपगुणैर्गीतं नारदप्रमुखैर्युतम् ॥ गंधर्वैश्चाप्सरोभिश्च सेवितं तमुमापतिम् ॥ तत्रस्थं च महादेवं प्रणिपत्याब्रवीत्सुतः ॥ ५ ॥ ॥ स्कंद उवाच ॥ ॥ स्वामिन्निंद्रादयो देवा ब्रह्माद्याश्चैव सर्वशः ॥ तव द्वारे समायातास्त्वद्दर्शनैकलालसाः ॥ किमाज्ञापयसे देव करवाणि तवाग्रतः ॥ ६ ॥ ॥ व्यास उवाच ॥ स्कंदस्य वचनं श्रुत्वा आसनादुत्थितो हरः ॥ वृषभं न[1] समारूढो गंतुकामोऽभवत्तदा ॥ ७ ॥ गंतुकामं शिवं दृष्ट्वा स्कंदो वाक्यमथाब्रवीत् ॥ ॥ ८ ॥ ॥ स्कंद उवाच ॥ ॥ किं कार्यं देव देवानां यत्त्वमाहूयसे त्वरम् ॥ वृषं त्यक्त्वा कृपासिंधो कृपास्ति यदि मे वद ॥ ९ ॥ देवदानवयुद्धं वा किं कार्यं वा महत्तरम् ॥ १० ॥ ॥ शिव उवाच ॥ ॥ शृणुष्वैकाग्रमनसा येनाहं व्यग्रचेतसः ॥ अस्ति स्थानं महापुण्यं धर्म्मारण्यं च भूतले ॥ ११ ॥ तत्रापि गंतुकामोऽहं देवैः सह षडाननः ॥ १२ ॥ ॥ स्कंद उवाच ॥ ॥ तत्र गत्वा महादेव किं करिष्यसि सांप्रतम् ॥ तन्मे ब्रूहि जगन्नाथ कृत्यं सर्वमशेषतः ॥ १३ ॥ ॥ शिव उवाच ॥ ॥ श्रूयतां वचनं पुत्र मनसोल्हादकारणम् ॥ आदितः सर्व्ववृत्तानां सृष्टिस्थितिकरं महत् ॥ १४ ॥ परंतु प्रलये जाते सर्वतस्तमसा वृतम् ॥ आसीदेकं तदा ब्रह्म निर्गुणं बीजमव्ययम् ॥ १५ ॥ निर्मितं वै गुणैरादौ महद्व्यं प्रचक्ष्यते ॥ १६ ॥ महाकल्पे च संप्राप्ते चराचरे क्षयं गते ॥ जलरूपी जगन्नाथो रममाणस्तु लीलया ॥ १७ ॥ चिरकाले गते सोपि पृथि

१ वृषभं न समारूढः—वृषभमनारुह्यैव त्वरया—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यादिसुतत्त्वकैः ॥ वृक्षमुत्पादयामासायुतशाखामनोरमम् ॥ १८ ॥ फलैर्विशालैराकीर्णं स्कंधकांडादिशोभितम् ॥ फलौघाढ्यो जटायुक्तो न्यग्रोधो विटपो महान् ॥ १९ ॥ बालभावं ततः कृत्वा वासुदेवो जनार्दनः ॥ शेतेऽसौ वटपत्रेषु विश्वं निर्मातुमुत्सुकः ॥ २० ॥ स नाभिकमले विष्णोर्जातो ब्रह्मा हि लोककृत् ॥ सर्वं जलमयं पश्यन्नानाकारमरूपकम् ॥ २१ ॥ तं दृष्ट्वा सहसोद्वेगाद्ब्रह्मा लोकपितामहः ॥ इदमाह तदा पुत्र किं करोमीति निश्चितम् ॥ २२ ॥ खे जजान ततो वाणी दैवात्सा चाशरीरिणी ॥ तपस्तप विधे धातर्यथा मे दर्शनं भवेत् ॥ २३ ॥ तच्छ्रुत्वा वचनं तत्र ब्रह्मा लोकपितामहः ॥ प्रातप्यत तपो घोरं परमं दुष्करं महत् ॥ २४ ॥ प्रहसन्स तदा बालरूपेण कमलापतिः ॥ उवाच मधुरां वाचं कृपालुर्बाललीलया ॥ २५ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ पुत्र त्वं विधिना चाद्य कुरु ब्रह्मांडगोलके ॥ पातालं भूतलं चैव सिंधुसागरकाननम् ॥ २६ ॥ वृक्षाश्च गिरयो द्विपदाः पशवस्तथा ॥ पक्षिणश्चैव गंधर्वाः सिद्धा यक्षाश्च राक्षसाः ॥ २७ ॥ श्वापदाद्याश्च ये जीवाश्चतुराशीतियोनयः ॥ उद्भिज्जाः स्वेदजाश्चैव जरायुजास्तथांडजाः ॥२८॥ एकविंशतिलक्षाणि एकैकस्य च योनयः ॥ कुरु त्वं सकलं चाशु इत्युक्त्वांतरधीयत ॥ ब्रह्मणा निर्मितं सर्वं ब्रह्मांडं च यथोदितम् ॥ २९ ॥ यस्मिन्पितामहो जज्ञे प्रभुरेकः प्रजापतिः ॥ स्थाणुः सुरगुरुर्भानुः प्रचेताः परमेष्ठिनः ॥ ३० ॥ यथा दक्षो दक्षपुत्रास्तथा सप्तर्षयश्च ये ॥ ततः प्रजानां पतयः प्राभवन्नेकविंशतिः ॥ ३१ ॥ पुरुषश्चाप्रमेयश्च एवं वंश्यर्षयो विदुः ॥ विश्वेदेवास्तथादित्या वसवश्चाश्विनावपि ॥ ३२ ॥ यक्षाः पिशाचाः साध्याश्च पितरो गुह्यकास्तथा ॥ ततः प्रसूता विद्वांसो ह्यष्टौ ब्रह्मर्षयोऽमलाः ॥ ३३ ॥ राजर्षयश्च बहवः सर्वे समुदिता गुणैः ॥ द्यौरापः पृथिवी वायुरंतरिक्षं दिशस्तथा ॥ ३४ ॥ संवत्सरार्तवो मासाः पक्षाहोरात्रयः क्रमात् ॥ कलाकाष्ठामुहूर्तादिनिमेषादिलवास्तथा ॥ ३५ ॥ ग्रहचक्रं सनक्षत्रं युगा मन्वन्तरादयः ॥ यच्चान्यदपि तत्सर्वं संभूतं लोकसाक्षिकम् ॥ ३६ ॥ यदिदं दृश्यते चक्रं किंचित्स्थावरजंगमम् ॥ पुनः संक्षिप्यते पुत्र जगत्प्राप्ते युगक्षये ॥ ३७ ॥ यथर्तावृतुलिंगानि नामरूपाणि पर्यये ॥ दृश्यन्ते तानि तान्येव तथा वत्स युगादिकम् ॥ ३८ ॥ ॥ शिव उवाच ॥ ॥ अतः परं प्रवक्ष्यामि कथां पौराणिकीं शुभाम् ॥ ब्रह्मणश्च तथा पुत्र वंशस्यैवानुकीर्तनम् ॥ ३९ ॥ ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ ४० ॥ मरीचेः कश्यपः पुत्रः कश्यपाच्चरमाः प्रजाः ॥ प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥ ४१ ॥ अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ॥ क्रोधा प्रोवा[1] वसिष्ठा च विनता कपिला

१ प्रोवा—इति नाम्नी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशतिगोत्राणि द्विजानां पांडवर्षभ ॥ तेषां शाखाः प्रशाखाश्च पुत्रपौत्रादयस्तथा ॥ २६ ॥ जज्ञिरे बहवः पुत्राः शतशोऽथ सहस्रशः ॥ चतुर्विंशतिमुख्यानां नामानि प्रवदामि ते ॥ द्विजानामृषयः प्रोक्ताः प्रवराणि तथा शृणु ॥ २७ ॥ भारद्वाजस्तथा वत्सः कौशिकः कुश एव च ॥ शांडिल्यः काश्यपश्चैव गौतमश्छांधनस्तथा ॥ २८ ॥ जातूकर्ण्यस्तथा वत्सो वसिष्ठो धारणस्तथा ॥ आत्रेयो भांडिलश्चैव लौकिकाश्च इतः परम् ॥ २९ ॥ कृष्णायनोपमन्युश्च गार्ग्यमुद्गलमौषकाः ॥ पुण्यासनः पराशरः कौंडिन्यश्च ततः परम् ॥ ॥ ३० ॥ तथा गान्यासनश्चैव प्रवराणि चतुर्विंशतिः ॥ जामदग्न्यस्य गोत्रस्य प्रवराः पंच एव हि ॥ ३१ ॥ भार्गवश्च्यवनाप्नुवानौर्वश्च जमदग्निकः ॥ पंचैते प्रवरा राजन्विख्याता लोकविश्रुताः ॥३२ ॥ एवं गोत्रसमुत्पन्ना वाडवा वेदपारगाः ॥ द्विजपूजाक्रियायुक्ता नानाक्रतुक्रियापराः ॥ ३३ ॥ गुणेनसंहिता आसन् षट्कर्मनिरताश्च ये ॥ एवंविधा महाभागा नानादेशभवा द्विजाः ॥ ३४ ॥ भामेवसं तृतीयं च प्रवराः पंच एव हि ॥ भार्गवच्च्यावनाप्नुवानौर्वजामदग्न्यसंयुताः ॥ आत्रेयोऽर्चनानसश्च श्यावास्येति तृतीयकः ॥ ३५ ॥ अस्मिन्गोत्रे भवा विप्रा दुष्टाः कुटिलगामिनः ॥ धनिनो धर्मनिष्ठाश्च वेदवेदांगपारगाः ॥३६॥ दानभोगरताः सर्वे श्रौतस्मार्तेषु संमताः ॥ मांडव्यगोत्रे विज्ञेयाः प्रवरैः पंचभिर्युताः ॥३७॥ भार्गवश्च्यावनोऽत्रिश्चाप्नुवानौर्वस्तथैव च ॥ अस्मिन्गोत्रे भवा विप्राः श्रुतिस्मृतिपरायणाः ॥ ३८ ॥ रोगिणो लोभिनो दुष्टा यजने याजने रताः ॥ ब्रह्मक्रियापराः सर्वे मांडव्याः कुरुसत्तम ॥ ३९ ॥ गार्ग्यस्य गोत्रे ये जातास्तेषां तु प्रवरास्त्रयः ॥ अंगिराश्चांबरीषश्च यौवनाश्वस्तृतीयकः ॥ ४० ॥ अस्मिन्गोत्रे समुत्पन्नाः सद्वृत्ताः सत्यभाषिणः ॥ शांताश्च भिन्नवर्णाश्च निर्द्धनाश्च कुचैलिनः ॥ ४१ ॥ संगवात्सल्ययुक्ताश्च वेदशास्त्रेषु निश्चलाः ॥ वत्सगोत्रे द्विजा भूप प्रवराः पंच एव हि ॥ ४२ ॥ भार्गवश्च्यवनाप्नुवानौर्वश्च जमदग्निकः ॥ एभिस्तु पंच विख्याता द्विजा ब्रह्मस्वरूपिणः ॥ ४३ ॥ शांता दांताः सुशीलाश्च धर्मपुत्रैः सुसंयुताः ॥ वेदाध्ययनहीनाश्च कुशलाः सर्वकर्मसु ॥ ४४ ॥ सुरूपाश्च सदाचाराः सर्वधर्मेषु निष्ठिताः॥ दानधर्मरताः सर्वे अन्नदा जलदा द्विजाः ॥ ४५ ॥ दयालवः सुशीलाश्च सर्वभूतहिते रताः ॥ काश्यपा ब्राह्मणा राजन्प्रवरत्रयसंयुताः ॥ ४६ ॥ काश्यपश्चापवत्सारो नैध्रुवश्च तृतीयकः ॥ वेदज्ञा गौरवर्णाश्च नैष्ठिका यज्ञकारकाः ॥ ४७ ॥ प्रियवासा महादक्षा गुरुभक्तिरताः सदा ॥ प्रतिष्ठामानवन्तश्च सर्वभूतहिते रताः ॥ ४८ ॥ यजंते च महायज्ञान्काश्यपेया द्विजातयः॥ धारीणसगोत्रजाश्च प्रवरैस्त्रिभिरन्विताः ॥ ४९ ॥ अगस्तिदर्विश्वेताश्च दध्यवाहनसंज्ञकाः ॥ अस्मिन्गोत्रे च ये जाता धर्मकर्मसमाश्रिताः ॥ ५० ॥ कर्मक्रूराश्च ते सर्वे तथैवोदारिणस्तु ते ॥ लंबकर्णा महादंष्ट्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजा धनपरायणाः ॥ ५१ ॥ क्रोधिनो द्वेषिणश्चैव सर्वसत्त्वभयंकराः ॥ लौगाक्षसोद्भवा ये वै वाडवाः सत्यसंश्रिताः ॥ ५२ ॥
प्रवराश्च त्रयस्तेषां तत्त्वज्ञानस्वरूपकाः ॥ कश्यपश्चैव वत्सश्च वसिष्ठश्च तृतीयकः ॥ ५३ ॥ सदाचारास्तु विख्याता वैष्णवा बहुवृ
त्तयः ॥ रोमभिर्बहुभिर्व्याप्ताः कृष्णवर्णास्तु वाडवाः ॥ ५४ ॥ शांता दांताः सुशीलाश्च स्वदारनिरताः सदा ॥ कुशिकसगोत्रे ये
जाताः प्रवरैस्त्रिभिरन्विताः ॥ ५५ ॥ विश्वामित्रो देवरात औदलश्च त्रयश्च ये ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ ५६ ॥
असत्यभाषिणो विप्राः सुरूपा नृपसत्तमाः ॥ सर्व्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ ५७ ॥ उपमन्युसगोत्रेयाः प्रवरत्रयसंयुताः ॥ वसिष्ठश्च
भरद्वाजस्त्विन्द्रप्रमद एव वा ॥ ५८ ॥ अस्मिन्गोत्रे तु ये विप्राः क्रूराः कुटिलगामिनः ॥ दूषणा द्वेषिणस्तुच्छाः सर्वसंग्रहतत्पराः ॥ ५९ ॥ कलहो
त्पादने दक्षा धनिनो मानिनस्तथा ॥ सर्वदैव प्रदुष्टाश्च दुष्टसंगरतास्तथा ॥ ६० ॥ रोगिणो दुर्बलाश्चैव वृत्त्युपकल्पवर्जिताः ॥ वात्स्यगोत्रे भवा
विप्राः प्रवरैः पंचभिर्युताः ॥ ६१ ॥ भार्गवच्च्यावनाप्नुवानौर्वश्च जमदग्निकः ॥ अस्मिन्गोत्रे भवा विप्राः स्थूलाश्च बहुबुद्धयः ॥ ६२ ॥ सर्वकर्मरता
श्चैव सर्वधर्मेषु निश्चलाः ॥ वेदशास्त्रार्थनिपुणा यजने याजने रताः ॥ ६३ ॥ सदाचाराः सुरूपाश्च बुद्धितो दीर्घदर्शिनः ॥ वात्स्यायनसगोत्रेयाः
प्रवरैः पंचभिर्युताः ॥ ६४ ॥ भार्गवच्च्यावनाप्नुवानौर्वश्च जमदग्निकः ॥ पूर्वोक्ताः प्रवराश्चास्य कथितास्तव भारत ॥ ६५ ॥ अस्मिन्गोत्रे तु ये
जाता पाकयज्ञरताः सदा ॥ लोभिनः क्रोधिनश्चैव प्रजायन्ते बहुप्रजाः ॥ ६६ ॥ स्नानदानादिनिरताः सर्वदाश्च जितेंद्रियाः ॥ वापीकूपतडागानां
कर्तारश्च सहस्रशः ॥ व्रतशीला गुणज्ञाश्च मूर्खा वेदविवर्जिताः ॥ ६७ ॥ कौशिकवंशे ये जाताः प्रवरत्रयसंयुताः ॥ विश्वामित्रोऽघमर्षी च
कौशिकश्च तृतीयकः ॥ ६८ ॥ अस्मिन्गोत्रे च ये जाता ब्राह्मणा ब्रह्मवेदिनः ॥ शांता दांताः सुशीलाश्च सर्वधर्मपरायणाः ॥ ६९ ॥ अपुत्रिण
स्तथा रूक्षास्तेजोहीना द्विजोत्तमाः ॥ भारद्वाजसगोत्रेयाः प्रवरैः पंचभिर्युताः ॥ ७० ॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तु सैन्यसः ॥ गार्ग्यश्चै
वेति विज्ञेयाः प्रवराः पंच एव च ॥ ७१ ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ७२ ॥
ब्रह्मभोज्यपराः सर्वे सर्वधर्मपरायणाः ॥ काश्यपगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥ ७३ ॥ काश्यपश्चापवत्सारो रैभ्येति विश्रुतास्त्रयः ॥ अस्मि
न्गोत्रे भवा विप्रा रक्ताक्षाः क्रूरदृष्टयः ॥ ७४ ॥ जिह्वालौल्यरताः सर्वे सर्वे ते पारमार्थिनः ॥ निर्धना रोगिणश्चैते तस्करानृतभाषिणः ॥ ७५ ॥
शास्त्रार्थवेदिनः सर्वे वेदस्मृतिविवर्जिताः ॥ शुनकेषु च ये जाता विप्रा ध्यानपरायणाः ॥ ७६ ॥ तपस्विनो योगिनश्च वेदवेदांगपारगाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधवश्च सदाचारा विष्णुभक्तिपरायणाः ॥ ७७ ॥ ह्रस्वकाया भिन्नवर्णा बहुरामा द्विजोत्तमाः ॥ दयालाः सरलाः शांता ब्रह्मभोज्यपरायणाः ॥ ॥ ७८ ॥ शौनकसेषु ये जाताः प्रवरत्रयसंयुताः ॥ भार्गवशौनहोत्रेति गात्स्यंप्रमद इति त्रयः ॥ ७९ ॥ अस्मिन्वंशे समुत्पन्ना वाडवा दुःसहा नृप ॥ महोत्कटा महाकायाः प्रलंबाश्च मदोद्धताः ॥ ८० ॥ क्लेशरूपाः कृष्णवर्णाः सर्वशास्त्रविशारदाः ॥ बहुभुजो मानिनो दक्षा राग द्वेषोपवर्जिताः ॥ ८१ ॥ सुवस्त्रभूषारूपा वै ब्राह्मणा ब्रह्मवादिनः ॥ वसिष्ठगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥ ८२ ॥ वसिष्ठो भारद्वाजश्च इन्द्रप्रमद एव च ॥ अस्मिन्गोत्रे भवा विप्रा वेदवेदांगपारगाः ॥ ८३ ॥ याज्ञिका यज्ञशीलाश्च सुस्वराः सुखिनस्तथा ॥ द्वेषिणो धनवंतश्च पुत्रिणो गुणिनस्तथा ॥ ८४ ॥ विशालहृदया राजञ्छूराः शत्रुनिबर्हणाः ॥ गौतमसगोत्रे ये जाताः प्रवराः पंच एव हि ॥ ८५ ॥ कौत्सगार्ग्योमवाहाश्च असितो देवलस्तथा ॥ अस्मिन्गोत्रे च ये जाता विप्राः परमपावनाः ॥ ८६ ॥ परोपकारिणः सर्वे श्रुतिस्मृति परायणाः ॥ बकासनाश्च कुटिलाश्छद्मवृत्तिपरास्तथा ॥ ८७ ॥ नानाशास्त्रार्थनिपुणा नानाभरणभूषिताः ॥ वृक्षादिकर्मकुशला दीर्घरोषाश्च रोगिणः ॥ ८८ ॥ आंगिरसगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥ आंगिरसोंबरीषश्च यौवनाश्वस्तृतीयकः ॥ ८९ ॥ अस्मिन्गोत्रे च ये जाताः सत्य संभाषिणस्तथा ॥ जितेंद्रियाः सुरूपाश्च अल्पाहाराः शुभाननाः ॥ ९० ॥ महाव्रताः पुराणज्ञा महादानपरायणाः ॥ निर्द्वेषिणो लोभयुता वेदाध्य यनतत्पराः ॥ ९१ ॥ दीर्घदर्शिमहातेजोमहामायाविमोहिताः ॥ शांडिलसगोत्रेये प्रवरत्रयसंयुताः ॥ ९२ ॥ असितो देवलश्चैव शांडिलस्तु तृतीयकः ॥ अस्मिन्गोत्रे महाभागाः कुब्जाश्च द्विजसत्तमाः ॥ ९३ ॥ नेत्ररोगी महादुष्टा महात्यागा अनायुषः ॥ कलहोत्पादने दक्षाः सर्वसंग्रह तत्पराः ॥९४॥ मलिना मानिनश्चैव ज्योतिःशास्त्रविशारदाः ॥ आत्रेयसगोत्रे ये जाताः पंचप्रवरसंयुताः ॥ ९५ ॥ आत्रेयोऽर्चनानसश्यावाश्वोंगिर सोऽत्रिश्च ॥ अस्मिन्वंशे च ये जाता द्विजास्ते सूर्यवर्चसः ॥ ९६ ॥ चंद्रवच्छीतलाः सर्वे धर्मारण्ये व्यवस्थिताः ॥ सदाचारा महादक्षाः श्रुतिशास्त्र परायणाः ॥ ९७ ॥ याज्ञिकाश्च शुभाचाराः सत्यशौचपरायणाः ॥ धर्मज्ञा दानशीलाश्च निर्मलाश्च महोत्सुकाः ॥ ९८ ॥ तपःस्वाध्यायनिरता न्यायधर्मपरायणाः ॥ ९९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथयस्व महाबाहो धर्मारण्यकथामृतम् ॥ यच्छ्रुत्वा मुच्यते पापाद्घोराद्ब्रह्मवधादपि ॥ ॥ १०० ॥ ॥ व्यास उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कथामेतां सुदुर्लभाम् ॥ १ ॥ यक्षरक्षःपिशाचाद्या उद्वेजयंति वाडवान् ॥ जृंभकोनाम

१ मदोत्सुकाः-इ॰ पा॰ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यक्षोऽभूद्धर्म्मारण्यसमीपतः ॥ २ ॥ उद्वेजयति नित्यं स धर्मारण्यनिवासिनः ॥ ततस्तैश्च द्विजाग्र्यैस्तु देवेभ्यो विनिवेदितम् ॥ ३ ॥ यक्षरक्षादिना चैव परिभूता वयं सुराः ॥ त्यक्ष्यामोऽद्य वरं स्थानं तद्भयान्नात्र संशयः ॥ ४ ॥ ततो देवैः संगधर्वैः स्थापितास्तत्र भूमिषु ॥ सिद्धाश्च वरयोगिन्यः श्रीमातृप्रभृतयस्तथा ॥ ५ ॥ रक्षणार्थं हि विप्राणां लोकानां हितकाम्यया ॥ गोत्रान्प्रति तथैकैका स्थापिता योगिनी तदा ॥ ६ ॥ यस्य गोत्रस्य या शक्ती रक्षणे पालने क्षमा ॥ सा तस्य कुलदेवीति साक्षात्तत्र बभूव ह ॥ ७ ॥ श्रीमाता तारणी देवी आशापूरी च गोत्रपा ॥ इच्छाऽऽर्तिनाशिनी चैव पिप्पली विकारवशा ॥८॥ जगन्माता महामाता सिद्धा भट्टारिका तथा ॥ कदंबा विकरा मीठा सुपर्णा वसुजा तथा ॥९॥ मातंगी च महादेवी वाणी च मुकुटेश्वरी ॥ भद्री चैव महाशक्तिः संहारी च महाबला॥११०॥चामुंडा च महादेवी इत्येता गोत्रमातरः ॥ ब्रह्मविष्णुमहेशाद्यैः स्थापितास्तत्र रक्षणे ॥११॥ ताः पूजयंति विप्रेंद्राः स्वधर्मनिरताः सदा ॥ ततः प्रभृति योगिन्यः स्वेस्वे काले सुरक्षिताः ॥१२॥ वाडवाः स्वस्थतां जग्मुः पुत्रपौत्रैः समावृताः ॥ ततो देवाः सगंधर्वा हर्षनिर्भरमानसाः ॥ विमानवरमारूढा जग्मुर्नाकेऽमृताशनाः ॥ १३ ॥ गते वर्षशते राजन्ब्रह्मविष्णुमहेश्वराः ॥ स्मृत्वा तु धर्मारण्यस्य प्रेक्षणार्थं कुतूहलात् ॥१४॥ समाजग्मुस्तदा राजन्प्रभाते उदिते रवौ ॥ विमानवरमारुह्य अप्सरोगणसेविताः ॥१५॥ गंधर्वैर्गीयमानास्ते स्तूयमानाः प्रबोधकैः ॥ तत्र स्थाने द्विजा राजन्समित्पुष्पकुशान्बहून् ॥१६॥आश्रमांस्तान्परित्यज्य गताः सर्वे दिशो दश ॥ नमश्रमपदं दृष्ट्वा शून्यं चैव महेश्वरः ॥१७॥ उवाच वाक्यं धर्मज्ञो वाडवान्क्लिशते विभो ॥ शुश्रूषार्थं हि शुश्रूषून्कल्पयेदिति मे मतिः ॥१८॥ श्रुत्वा तु व वनं शंभोर्देवदेवो जनार्दनः ॥ सत्यंसत्यमिति प्रोच्य ब्रह्माणमिदमब्रवीत् ॥ १९ ॥ भोभो ब्रह्मन्द्विजातीनां शुश्रूषार्थं प्रकल्पय ॥ सृष्टिर्हि शाश्वती ह्याद्य द्विजोघोपि सुखी भवेत् ॥ विष्णोर्वाक्यमभिश्रुत्य ब्रह्मालोकपितामहः॥१२०॥संस्मरन्कामधेनुं वै स्मरणेनैव तत्क्षणे॥ अगता तत्र सा धेनुर्धर्मारण्ये पवित्रके ॥ १२१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्ये गोत्रप्रवरगोत्रदेवीकथनं नाम नवमोऽध्यायः ॥९॥ ॥छ॥ ॥ व्यास उवाच ॥ ॥ शृणु राजन्यथावृत्तं धर्म्मारण्ये शुभं मतम् ॥ यदिदं कथयिष्यामि अशेषाघौघनाशनम् ॥ १ ॥ अजेशेन तदा राजन्प्रेरितेन स्वयंभुवा ॥ कामधेनुः समाहूता कथयामास तां प्रति ॥ २ ॥ विप्रेभ्योऽनुचरान्देहि एकैकस्मै द्विजातये ॥ द्वौ द्वौ शुद्धात्मकौ चैवं देहि मातः प्रसीद मे ॥ ३ ॥ तथेत्युक्त्वा महाधेनुः क्षीरेणोल्लेखयद्धराम् ॥ हुंकारात्तस्य निष्क्रांताः शिखासूत्रधरा नराः ॥ ४ ॥ षट्त्रिंशच्च सहस्राणि वणिजश्च महाबलाः ॥ सोपवीता महादक्षाः सर्वशास्त्रविशारदाः ॥ ५ ॥ द्विजभक्तिसमायुक्ता ब्रह्मण्यास्ते तपोन्विताः ॥ पुराणज्ञाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदाचारा धार्मिका ब्रह्मभोजकाः ॥ ६ ॥ स्वर्गे देवाः प्रशंसंति धर्मारण्यनिवासिनः ॥ तपोऽध्ययनदानेषु सर्वकालेप्यतींद्रियाः ॥ ७ ॥ एकैकस्मै द्विजायैव दत्तं जातु चरद्वयम् ॥ वाडवस्य च यद्गोत्रं पुरा प्रोक्तं महीपते ॥ ८ ॥ परस्परं च तद्गोत्रं तस्य चानुचरस्य च ॥ इति कृत्वा व्यवस्थां च व्यवसंस्तत्र भूमिषु ॥९॥ ततश्च शिष्यता देवैर्दत्ता चानुचरान्भुवि ॥ ब्रह्मणा कथितं सर्वं तेषामनुहिताय वै ॥१०॥ कुरुध्वं वचनं चैषां दद्ध्वं च यदिच्छितम् ॥ समित्पुष्पकुशादीनि आनयध्वं दिनेदिने ॥ ११ ॥ अनुज्ञयैषां वर्तध्वं मावज्ञां कुरुत क्वचित् ॥ जातकं नामकरणं तथान्नप्राशनं शुभम् ॥ १२ ॥ क्षौरं चैवोपनयनं महानाम्न्यादिकं तथा ॥ क्रियाकर्मादिकं यच्च व्रतं दानोपवासकम् ॥ १३ ॥ अनुज्ञयैषां कर्तव्यं काजेशा इदमब्रुवन् ॥ अनुज्ञया विनैषां यः कार्यमारभते यदि ॥ १४ ॥ दर्शं वा श्राद्धकार्यं वा शुभं वा यदि वाऽशुभम् ॥ दारिद्र्यं पुत्रशोकं च कीर्तिनाशं तथैव च ॥ १५ ॥ रोगैर्निपीड्यते नित्यं न क्वचित्सुखमाप्नुयुः ॥ तथेति च ततो देवाः शक्राद्याः सुरसत्तमाः ॥ १६ ॥ स्तुतिं कुर्वंति ते सर्वे कामधेनोः पुरः स्थिताः ॥ कृतकृत्यास्तदा देवा ब्रह्मविष्णुमहेश्वराः ॥ १७ ॥ त्वं माता सर्वदेवानां त्वं च यज्ञस्य कारणम् ॥ त्वं तीर्थं सर्वतीर्थानां नमस्तेऽस्तु सदानघे ॥ १८ ॥ शशिसूर्यारुणा यस्या ललाटे वृषभध्वजः ॥ सरस्वती च हुंकारे सर्वे नागाश्च कंबले ॥ १९ ॥ क्षुरपृष्ठे च गन्धर्वा वेदाश्चत्वार एव च ॥ मुखाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥ २० ॥ एवंविधैश्च बहुशो वचनैस्तोषिता च सा ॥ सुप्रसन्ना तदा धेनुः किं करोमीति चाब्रवीत् ॥ २१ ॥ ॥ देवा ऊचुः ॥ ॥ सृष्टाः सर्वे त्वया मातर्देयैतेऽनुचराः शुभाः ॥ त्वत्प्रसादान्महाभागे ब्राह्मणाः सुखिनोऽभवन् ॥ २२ ॥ ततोऽसौ सुरभी राजन्गता नाकं यशस्विनी ॥ ब्रह्मविष्णुमहेशाद्यास्तत्रैवांतरधुस्ततः ॥ २३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अभार्यास्ते महातेजा गोजा अनुचरास्तथा ॥ उद्वाहिताः कथं ब्रह्मन्त्सुतास्तेषां कदाऽभवन् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ परिग्रहार्थं वै तेषां रुद्रेण च यमेन च ॥ गन्धर्वकन्या आहृत्य दारास्तत्रोपकल्पिताः ॥ २५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ को वा गन्धर्वराजासौ किंनामा कुत्र वा स्थितः ॥ कियन्मात्रास्तस्य कन्याः किमाचारा ब्रवीहि मे ॥ २६ ॥ ॥ व्यास उवाच ॥ ॥ विश्वावसुरिति ख्यातो गन्धर्वाधिपतिर्नृप ॥ षष्टिकन्यासहस्राणि आसते तस्य वेश्मनि ॥ २७ ॥ अंतरिक्षे गृहं तस्य गधर्वनगरं शुभम् ॥ यौवनस्थाः सुरूपाश्च कन्या गन्धर्वजाः शुभाः ॥ २८ ॥ रुद्रस्यानुचरौ राजन्नंदी भृंगी शुभाननौ ॥ पूर्वदृष्टाश्च ताः कन्याः कथयामासतुः शिवम् ॥ २९ ॥ दृष्टाः पुरा महादेव गन्धर्वनगरे विभो ॥ विश्वावसुगृहे कन्या असंख्याताः सहस्रशः ॥ ३० ॥ ता आनीय बलादेव गोभुजेभ्यः प्रयच्छ भो ॥ एवं श्रुत्वा ततो देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुरघ्नः सदाशिवः ॥ ३१ ॥ प्रेषयामास दूतं तु विजयं नाम भारत ॥ स तत्र गत्वा यत्रास्ते विश्वावसुररिंदमः ॥ ३२ ॥ उवाच वचनं चैव पथ्यं चैव शिवेरितम् ॥ धर्मारण्ये महाभाग काजेशेन विनिर्मिताः ॥ ३३ ॥ स्थापिता वाडवास्तत्र वेदवेदांगपारगाः ॥ तेषां वै परिचर्यार्थं कामधेनुश्च प्रार्थिता ॥ ३४ ॥ तया कृताः शुभाचारा वणिजस्ते त्वयोनिजाः ॥ षट्त्रिंशच्च सहस्राणि कुमारास्ते महाबलाः ॥ ३५ ॥ शिवेन प्रेषितोऽहं वै त्वत्समीपमुपागतः ॥ कन्यार्थं हि महाभाग देहिदेहीत्युवाच ह ॥ ३६ ॥ ॥ गन्धर्व उवाच ॥ ॥ देवानां चैव सर्वेषां गन्धर्वाणां महामते ॥ परित्यज्य कथं लोके मानुषाणां ददामि वै ॥ ३७ ॥ श्रुत्वा तु वचनं तस्य निवृत्तो विजयस्तदा ॥ कथयामास तत्सर्वं गन्धर्व चरितं महत् ॥ ३८ ॥ ॥ व्यास उवाच ॥ ॥ ततः कोपसमाविष्टो भगवाँल्लोकशंकरः ॥ वृषभे च समारूढः शूलहस्तः सदाशिवः ॥ ३९ ॥ भूतप्रेतपिशाचाद्यैः सहस्रैरावृतः प्रभुः ॥ ततो देवास्तथा नागा भूतवेतालखेचराः ॥ ४० ॥ क्रोधेन महताविष्टाः समाजग्मुः सहस्रशः ॥ हाहाकारो महानासीत्तस्मिन्सैन्ये विसर्पति ॥ ४१ ॥ प्रकंपिता धरादेवी दिशापाला भयातुराः ॥ घोरा वातास्तदाऽशांताः शब्दं कुर्वंति दिग्गजाः ॥ ॥ ४२ ॥ ॥ व्यास उवाच ॥ ॥ तदागतं महासैन्यं दृष्ट्वा भयविलोलितम् ॥ गन्धर्वनगरात्सर्वे विनेशुस्ते दिशो दश ॥ ४३ ॥ गन्धर्वराजो नगरं त्यक्त्वा मेरुं गतो नृप ॥ ताः कन्या यौवनोपेता रूपौदार्यसमन्विताः ॥ ४४ ॥ गृहीत्वा प्रददौ सर्वा वणिग्भ्यश्च तदा नृप ॥ वेदोक्तेन विधानेन तथा वै देवसन्निधौ ॥ ४५ ॥ आज्यभागं तदा दत्त्वा गन्धर्वाय गवात्मजाः ॥ देवानां पूर्वजानां च सूर्याचंद्रमसोस्तथा ॥ ४६ ॥ यमाय मृत्यवे चैव आज्यभागं तदा ददुः ॥ दत्त्वाज्यभागान्विधिवद्वव्रिरे ते शुभव्रताः ॥ ४७ ॥ ततः प्रभृति गान्धर्वविवाहे समुपस्थिते ॥ आज्यभागं प्रगृह्णन्ति अद्यापि सर्वतो भृशम् ॥ ४८ ॥ षट्त्रिंशच्च सहस्राणि कुमारा यन्यवेदयन् ॥ तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ॥ ४९ ॥ अत एव हि ताः सर्वा दासत्वे हि विनिर्मिताः ॥ क्षत्रियाश्च महावीरा किंकरत्वे हि निर्मिताः ॥ ५० ॥ ततो देवास्तदा राजञ्जग्मुः सर्वे यथातथा ॥ गते देवे द्विजाः सर्वे स्थानेऽस्मिन्निवसंति ते ॥ ५१ ॥ पुत्रपौत्रयुता राजन्निवसंत्यकुतोभयाः ॥ पठंति वेदान्वेदज्ञाः क्वचिच्छास्त्रार्थमुद्गिरन् ॥ ५२ ॥ केचिद्विष्णुं जपंतीह शिवं केचिज्जपंति हि ॥ ब्रह्माणं च जपंत्येके यमसूक्तं हि केचन ॥ ५३ ॥ यजंति याजकाश्चैव अग्निहोत्रमुपासते ॥ स्वाहाकारस्वधाकारवषट्कारैश्च सुव्रत ॥ ५४ ॥ शब्दैरापूयते सर्वं त्रैलोक्यं सचराचरम् ॥ वणिजश्च महादक्षा द्विजशुश्रूणोत्सुकाः ॥ ५५ ॥ धर्मारण्ये शुभे दिव्ये ते वसंति सुनिष्ठिताः ॥ अन्नपानादिकं सर्वं समित्कुशफलादिकम् ॥ ५६ ॥ आपूरयन्द्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातीनां वणिजस्ते गवात्मजाः ॥ ९७ ॥ पुष्पोपहारनिचयं स्नानवस्त्रादिधावनम् ॥ उपलादिकनिर्माणं मार्जनादिशुभक्रियाः ॥ ९८ ॥ वणि
क्स्त्रियः प्रकुर्वंति कंडनं पेषणादिकम् ॥ शुश्रूषंति च तान्विप्रान्काजेशवचनेन हि ॥ ९९ ॥ स्वस्था जातास्तदा सर्वे द्विजा हर्षपरायणाः ॥
काजेशादीनुपासंते दिवारात्रौ हि संध्ययोः ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मार
ण्यमाहात्म्ये वणिक्परिग्रहवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ युधिष्ठिर उवाच ॥ ॥ अतः परं किमभवद्ब्रवीतु द्विजसत्तम ॥ त्वद्वचनामृतं
पीत्वा तृप्तिर्नास्ति मम प्रभो ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ अथ किंचिद्गते काले युगांतसमये सति ॥ त्रेतादौ लोलजिह्वाख्य अभवद्राक्षसे
श्वरः ॥ २ ॥ तेन विद्रावितं सर्वं त्रैलोक्यं सचराचरम् ॥ जित्वा स सकलाँल्लोकान्धर्मारण्ये समागतः ॥ ३ ॥ तद्दृष्ट्वा सकलं पुण्यं रम्यं द्विजनिषे
वितम् ॥ ब्रह्मद्वेषाच्च तेनैव दाहितं च पुरं शुभम् ॥ ४ ॥ दह्यमानं पुरं दृष्ट्वा प्रणष्टा द्विजसत्तमाः ॥ यथागतं प्रजग्मुस्ते धर्मारण्यनिवासिनः ॥
॥ ५ ॥ श्रीमाताद्यास्तदा देव्यः कोपिता राक्षसेन वै ॥ घातयंत्येव शब्देन तर्जयित्वा च राक्षसम् ॥ ६ ॥ समुच्छ्रितास्तदा देव्यः शतशोऽथ सह
स्रशः ॥ त्रिशूलवरधारिण्यः शंखचक्रगदाधराः ॥७॥ कमंडलुधराः काश्चित्कशाखड्गधराः पराः ॥ पाशांकुशधरा काचित्खड्गखेटकधारिणी ॥ ८ ॥
काचित्परशुहस्ता च दिव्यायुधधरा परा ॥ नानाभरणभूषाढ्या नानारत्नाभिशोभिता ॥ ९ ॥ राक्षसानां विनाशाय ब्राह्मणानां हिताय च ॥
आजग्मुस्तत्र यत्रास्ते लोलजिह्वो हि राक्षसः ॥१०॥ महादंष्ट्रो महाकायो विद्युज्जिह्वो भयंकरः ॥ दृष्ट्वा ता राक्षसो घोरं सिंहनादमथाकरोत् ॥११॥
तेन नादेन महता त्रासितं भुवनत्रयम् ॥ आपूरिता दिशः सर्वाः क्षुभितानेकसागराः ॥ १२ ॥ कोलाहलो महानासीद्धर्मारण्ये तदा नृप ॥ तच्छ्रुत्वा
वासवेनाथ प्रेषितो नलकूबरः ॥ १३ ॥ किमिदं पश्य गत्वा त्वं दृष्ट्वा मह्यं निवेदय ॥ तत्तस्य वचनं श्रुत्वा गतो वै नलकूबरः ॥ १४ ॥ दृष्ट्वा तत्र
महायुद्धं श्रीमातालोलजिह्वयोः ॥ यथादृष्टं यथाजातं शक्राग्रे स न्यवेदयत् ॥ १५ ॥ उद्वेजयति लोकांस्त्रीन्धर्मारण्यमितो गतः ॥ तच्छ्रुत्वा वासवो
विष्णुं निवेद्य क्षितिमागमत् ॥ १६ ॥ दाहितं तत्पुरं रम्यं देवानामपि दुर्लभम् ॥ न दृष्टा वाडवास्तत्र गताः सर्वे दिशो दश ॥ १७ ॥ श्रीमाता
योगिनी तत्र कुरुते युद्धमुत्तमम् ॥ हाहाभूता प्रजा सर्वा इतश्चेतश्च धावति ॥ १८ ॥ तच्छ्रुत्वा वासुदेवो हि गृहीत्वा च सुदर्शनम् ॥ सत्यलोकात्तदा
राजन्समागच्छन्महीतले ॥ १९ ॥ धर्मारण्यं ततो गत्वा तच्चक्रं प्रमुमोच ह ॥ लोलजिह्वस्तदा रक्षो मूर्च्छितो निपपात ह ॥ २० ॥ त्रिशूलेन ततो
भिन्नः शक्तिभिः क्रोधमूर्च्छितः ॥ हन्यमानस्तदा रक्षः प्राणांस्त्यक्त्वा दिवं गतः ॥ २१ ॥ ततो देवाः सगंधर्वा हर्षनिर्भरमानसाः ॥ तुष्टुवुस्तं जगन्नाथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यलोकात्समागताः ॥ २२ ॥ उद्वसं तत्समालोक्य विष्णुर्वचनमब्रवीत् ॥ क्क च ते ब्राह्मणाः सर्वे ऋषीणामाश्रमे पुनः ॥ २३ ॥ ततो देवाः सगं धर्वा इतस्ततः पलायितान् ॥ संशोध्य तरसा राजन्ब्राह्मणानिदमब्रुवन् ॥ २४ ॥ श्रूयतां नो वचो विप्रा निहतो राक्षसाधमः ॥ वासुदेवेन देवेन चक्रेण निरकृंतत ॥ २५ ॥ तच्छुत्वा वाडवाः सर्वे प्रहर्षोत्फुल्ललोचनाः ॥ समाजग्मुस्तदा राजन्स्वस्वस्थाने समाविशन् ॥ २६ ॥ श्रीकांताय तदा राजन्वाक्यमुक्तं मनोरमम् ॥ यस्मात्त्वं सत्यलोकाच्च आगतोऽसि जगत्प्रभुः ॥ स्थापितं च पुरं चेदं हिताय च [1]द्विजात्मनाम् ॥ २७ ॥ सत्यमंदिरमिति ख्यातं तदा लोके भविष्यति ॥ कृते युगे धर्मारण्यं त्रेतायां सत्यमंदिरम् ॥ २८ ॥ तच्छुत्वा वासुदेवेन तथेति प्रतिपद्य च ॥ ततस्ते वाडवाः सर्वे पुत्रपौत्रसमन्विताः ॥ २९ ॥ सपत्नीकाः सानुचरा यथापूर्वं न्यवात्सिषुः ॥ तपोयज्ञक्रियाद्येषु वर्ततेऽध्ययनादिषु ॥ ३० ॥ एवं ते सर्वमाख्यातं धर्म वै सत्यमंदिरे ॥ ३१ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे धर्मारण्यमाहात्म्ये लोलजिह्वासुरवधपूर्वकं सत्यमंदिरसंस्थापनवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ ततो देवैर्नृपश्रेष्ठ रक्षार्थं सत्यमदिरम् ॥ स्थापितं तत्तदाद्यैव सत्याभिख्या हि सा पुरी ॥ १ ॥ पूर्वं धर्मेश्वरो देवो दक्षिणेन गणाधिपः ॥ पश्चिमे स्थापितो भानुरुत्तरे च स्वयंभुवः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गणेशः स्थापितः केन कस्मात्स्थापितवानसौ ॥ किंनामासौ महाभाग तन्मे कथय माचिरम् ॥ ३ ॥ ॥ व्यास उवाच ॥ ॥ अधुनाहं प्रवक्ष्यामि गणेशोत्पत्तिकारणम् ॥ ४ ॥ समये मिलिताः सर्वे देवता मातरस्तथा ॥ धर्मारण्ये महाराज स्थापितश्चंडिकासुतः ॥ ५ ॥ आदौ देवैर्नृपश्रेष्ठ भूमौ वै सत्ययोषिताम् ॥ प्राकारश्चाभवत्तत्र पताकाध्वजशोभितः ॥ ६ ॥ ब्राह्मणायतने तत्र प्राकारमण्डलान्तरे ॥ तन्मध्ये रचितं पीठमिष्टकाभिः सुशोभितम् ॥ ७ ॥ प्रतोल्यश्च चतस्रो वै शुद्धा एव सतोरणाः ॥ पूर्वे धर्मेश्वरो देवो दक्षिणे गणनायकः ॥ ८ ॥ पश्चिमे स्थापितो भानुरुत्तरे च स्वयंभुवः ॥ धर्मेश्वरोत्पत्तिवृत्तमाख्यातं तत्तवाग्रतः ॥ ९ ॥ अधुनाहं प्रवक्ष्यामि गणेशोत्पत्तिहेतुकम् ॥ कदाचित्पार्वती गात्रोद्वर्त्तनं कृतवत्यभूत् ॥ १० ॥ मलं तज्जनितं दृष्ट्वा हस्ते धृत्वा स्वगात्रजम् ॥ प्रतिमां च ततः कृत्वा सुरूपं च ददर्श ह ॥ ११ ॥ जीवं तस्यां च संचार्य उदतिष्ठत्तदग्रतः ॥ मातरं स तदोवाच किं करोमि तवाज्ञया ॥ १२ ॥ ॥ पार्वत्युवाच ॥ ॥ यावत्स्नानं करिष्यामि तावत्त्वं द्वारि तिष्ठ मे ॥ आयुधानि च सर्वाणि परश्वादीनि यानि तु ॥ १३ ॥ त्वयि तिष्ठति मद्द्वारे कोऽपि विघ्नं करोतु

१ ब्राह्मणायतने—ब्राह्मणानां निवासस्थाने—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न ॥ एवमुक्तो महादेव्या द्वारेऽतिष्ठत्स सायुधः ॥ १४ ॥ एतस्मिन्नंतरे देवो महादेवो जगाम ह ॥ आभ्यंतरे प्रवेष्टुं च मतिं दध्रे महेश्वरः ॥ १५ ॥ द्वारस्थेन गणेशेन प्रवेशोदायि तस्य न ॥ ततः क्रुद्धो महादेवः परस्परमयुध्यत ॥ १६ ॥ युद्धं कृत्वा ततश्चोभौ परस्परवधैषिणौ ॥ परशुं जघ्निवान्देवललाटे परमे शुभम् ॥ १७ ॥ ततो देवो महादेवः शूलमुद्यम्य चाहनत् ॥ शिरश्चिच्छेद शूलेन तद्भूमौ निपपात ह ॥ १८ ॥ तं दृष्ट्वा पतितं पुत्रं पार्वती प्ररुरोद ह ॥ हाहाकारो महानासीत्तदा तत्र निपातिते ॥ १९ ॥ पार्वतीं विकलां दृष्ट्वा देवदेवो महेश्वरः ॥ चिंतयामास देवोऽपि किं कृतं वा मुधा मया ॥ २० ॥ एतस्मिन्नंतरे तत्र गजासुरमपश्यत ॥ तं दृष्ट्वा च महादैत्यं सर्वलोकैकपूजितः ॥ २१ ॥ जघ्निवांस्तच्छिरो गृह्य पार्वत्या कृतमर्भकम् ॥ उत्तस्थौ सगणस्तत्र महादेवस्य सन्निधौ ॥ २२ ॥ ततो नाम चकारास्य गजानन इति स्फुटम् ॥ सुराः सर्वे च संपृक्ता हर्षिता मुनयस्तथा ॥ २३ ॥ स्तुवंति स्तुतिभिः शश्वत्कुटुम्बकुशलंकरम् ॥ विक्रीणाति कुटुम्बं यो मोदकार्थं समर्चके ॥ २४ ॥ दक्षिणस्यां प्रतोल्यां तमेकदंतं च पीवरम् ॥ आर्चयच्च महादेवं स्वयंभूः सुरपूजितम् ॥ २५ ॥ जटिलं[1] वामनं चैव नागयज्ञोपवीतकम् ॥ त्र्यक्षं चैव महाकायं करध्वजकुठारकम् ॥ २६ ॥ दधानं कमलं हस्ते सर्वविघ्नविनाशनम् ॥ रक्षणाय च लोकानां नगराद्दक्षिणाश्रितम् ॥२७॥ सुप्रसन्नं गणाध्यक्षं सिद्धिबुद्धिनमस्कृतम् ॥ सिंदूराभं सुरश्रेष्ठं तीव्रांकुशधरं शुभम् ॥ २८ ॥ शतपुष्पैः शुभैः पुष्पैरर्चितं ह्यमराधिपः ॥ प्रणम्य च महाभक्त्या तुष्टुवुस्तं सुरास्ततः ॥ २९ ॥ ॥ देवा ऊचुः ॥ ॥ नमस्तेस्तु सुरेशाय गणानां पतये नमः ॥ गजानन नमस्तुभ्यं महादेवाधिदैवत ॥ ३० ॥ भक्तिप्रियाय देवाय गणाध्यक्ष नमोस्तु ते ॥ इत्येतैश्च शुभैः स्तोत्रैः स्तूयमानो गणाधिपः ॥ सुप्रीतश्च गणाध्यक्षः तदाऽसौ वाक्यमब्रवीत् ॥ ॥ ३१ ॥ ॥ गणाध्यक्ष उवाच ॥ तुष्टोऽहं वो सुरा ब्रूत वांछितं च ददामि वः ॥ ३२ ॥ ॥ देवा ऊचुः ॥ ॥ त्वमत्रस्थो महाभाग कुरु कार्यं च नः प्रभो ॥ धर्मारण्ये च विप्राणां वणिग्जननिवासिनाम् ॥ ३३ ॥ ब्रह्मचर्यादियुक्तानां धार्मिकाणां गणेश्वर ॥ वर्णाश्रमेतराणां च रक्षिता भव सर्वदा ॥ ३४ ॥ त्वत्प्रसादान्महाभाग धनसौख्ययुता द्विजाः ॥ भवंतु सर्वे सततं वणिजश्च महाबलाः ॥३५॥ रक्षितव्यास्त्वया देव यावच्चंद्रार्कमेदिनी ॥ एवमस्त्विति सोवादीद्गणनाथो महेश्वरः ॥ ३६ ॥ देवाश्च हर्षमापन्नाः पूजयंति गणाधिपम् ॥ ततो देवा मुदा युक्ताः पुष्पधूपादितर्पणैः ॥ ३७ ॥

१ संहितः—इत्यर्थः—जटित इतियावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये चान्ये मनुजा लोके निर्विघ्नार्थं च पूजयन् ॥ ३८ ॥ विवाहोत्सवयज्ञेषु पूर्वमाराधितो भवेत् ॥ धर्मारण्योद्भवानां च प्रसन्नो भव सर्वदा ॥
॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे गणेशप्रस्थापनावर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥
॥ ॥ व्यास उवाच ॥ ॥ शंभोश्च पश्चिमे भागे स्थापितः कश्यपात्मजः ॥ तत्रास्ति तन्महाभाग रविक्षेत्रं तदुच्यते ॥ १ ॥ तत्रोत्पन्नौ महादिव्यौ
रूपयौवनसंयुतौ ॥ नासत्यावश्विनौ देवौ विख्यातौ गदनाशनौ ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पितामह महाभाग कथयस्व प्रसादतः ॥
उत्पत्तिरश्विनोश्चैव मृत्युलोके च तत्कथम् ॥ ३ ॥ रविलोकात्कथं सूर्यो धरायामवतारितः ॥ एतत्सर्वं प्रयत्नेन कथयस्व प्रसादतः ॥ ४ ॥
यच्छ्रुत्वा हि महाभाग सर्वपापैः प्रमुच्यते ॥ ५ ॥ ॥ व्यास उवाच ॥ ॥ साधु पृष्टं त्वया भूप ऊर्ध्वलोककथानकम् ॥ यच्छ्रुत्वा नरशार्दूल
सर्वरोगात्प्रमुच्यते ॥ विश्वकर्म्मसुता संज्ञा अंशुमद्द्रविणा वृता ॥ ६ ॥ सूर्यं दृष्ट्वा सदा संज्ञा स्वाक्षिसंयमनं व्यधात् ॥ यतस्ततः सरोषोऽर्कः
संज्ञां वचनमब्रवीत् ॥ ७ ॥ ॥ सूर्य उवाच ॥ ॥ मयि दृष्टे सदा यस्मात्कुरुषे स्वाक्षिसंयमम् ॥ तस्माज्जनिष्यते मूढे प्रजासंयमनो यमः ॥
॥ ८ ॥ ततः सा चपलं देवी ददर्श च भयाकुलम् ॥ विलोलितदृशं दृष्ट्वा पुनराह च तां रविः ॥ ९ ॥ यस्माद्विलोलिता दृष्टिर्मयि दृष्टे त्वया
धुना ॥ तस्माद्विलोलितां संज्ञे तनयां प्रसविष्यसि ॥ १० ॥ ॥ व्यास उवाच ॥ ॥ ततस्तस्यास्तु संजज्ञे भर्तृशापेन तेन वै ॥ यमश्च
यमुना येयं विख्याता सुमहानदी ॥ ११ ॥ सा च संज्ञा रवेस्तेजो महद्दुःखेन भामिनी ॥ असहंतीव सा चित्ते चिंतयामास वै तदा ॥ १२ ॥
किं करोमि क्व गच्छामि क्व गतायाश्च निर्वृतिः ॥ भवेन्मम कथं भर्तुः कोपमर्कस्य नश्यति ॥१३॥ इति संचिंत्य बहुधा प्रजापतिसुता तदा ॥
साधु मेने महाभागा पितृसंश्रयमाप सा ॥१४॥ ततः पितृगृहं गंतुं कृतबुद्धिर्यशस्विनी ॥ छायामाहूयात्मनस्तु सा देवी दयिता रवेः ॥१५॥ तां चो
वाच त्वया स्थेयमत्र भानोर्यथा मया ॥ तथा सम्यगपत्येषु वर्तितव्यं तथा रवौ ॥१६॥ दुष्टमपि न वाच्यं ते यथा बहुमतं मम ॥ सैवास्मि संज्ञाह
मिति वाच्यमेवं त्वयानघे ॥ १७ ॥ ॥ छायासंज्ञोवाच ॥ ॥ आकेशग्रहणाच्चाहमाशापाच्च वचस्तथा ॥ करिष्ये कथयिष्यामि यावत्केशापकर्षणा
त् ॥ १८ ॥ इत्युक्ता सा तदा देवी जगाम भवनं पितुः ॥ ददर्श तत्र त्वष्टारं तपसा धूतकिल्बिषम् ॥ १९ ॥ बहुमानाच्च तेनापि पूजिता विश्व
कर्म्मणा ॥ तत्स्थौ पितृगृहे सा तु किंचित्कालमनिंदिता ॥ २० ॥ ततः प्राह स धर्मज्ञः पिता नातिचिरोषिताम् ॥ विश्वकर्मा सुतां प्रेम्णा बहुमा
नपुरःसरम् ॥ २१ ॥ त्वां तु मे पश्यतो वत्से दिनानि सुबहून्यपि ॥ मुहूर्तेन समानि स्युः किं तु धर्मो विलुप्यते ॥ २२ ॥ बांधवेषु चिरं वासो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न नारीणां यशस्करः ॥ मनोरथो बांधवानां भार्या पितृगृहे स्थिता ॥ २३ ॥ सा त्वं त्रैलोक्यनाथेन भर्त्रा सूर्येण संगता ॥ पितुर्गृहे चिरं कालं वस्तुं नार्हसि पुत्रिके ॥ २४ ॥ अतो भर्तृगृहं गच्छ दृष्टोऽहं पूजिता च मे ॥ पुनरागमनं कार्यं दर्शनाय शुभेक्षणे ॥ २५ ॥ ॥ व्यास उवाच ॥ ॥ इत्युक्ता सा तदा क्षिप्रं तथेत्युक्त्वा च वै मुने ॥ पूजयित्वा तु पितरं सा जगामोत्तरान्कुरून् ॥ २६ ॥ सूर्यतापमनिच्छंती तेजसस्तस्य बिभ्यती ॥ तपश्चचार तत्रापि वडवारूपधारिणी ॥ २७ ॥ संज्ञामित्येव मन्वानो द्वितीयायां दिवस्पतिः ॥ जनयामास तनयौ कन्यां चैकां मनोरमाम् ॥ २८ ॥ छाया स्वतनयेष्वेव यथा प्रेम्णाध्यवर्तत ॥ तथा न संज्ञाकन्यायां पुत्रयोश्चाप्यवर्तत ॥ लालनासु च भोज्येषु विशेषमनुवासरम् ॥ २९ ॥ मनुस्तत्क्षांतवानस्या यमस्तस्या न चाक्षमत् ॥ ताडनाय ततः कोपात्पादस्तेन समुद्यतः ॥ तस्याः पुनः क्षांतमना न तु देहे न्यपातयत् ॥ ३० ॥ ततः शशाप तं कोपाच्छायासंज्ञा यमं नृप ॥ किंचित्प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥ ३१ ॥ पत्न्यां पितुर्मयि यदि पादमुद्यच्छसे बलात् ॥ भुवि तस्मादयं पादस्तवाद्यैव भविष्यति ॥ ३२ ॥ इत्याकर्ण्य यमः शापं मातर्यतिविशंकितः ॥ अभ्येत्य पितरं प्राह प्रणिपातपुरस्सरम् ॥ ३३ ॥ तातैतन्महदाश्चर्यमदृष्टमिति च क्वचित् ॥ मातावात्सल्यरूपेण शापं पुत्रे प्रयच्छंति ॥३४॥ यथा माता ममाचष्ट नेयं माता तथा मम ॥ निर्गुणेष्वपि पुत्रेषु न माता निर्गुणा भवेत् ॥ ३५ ॥ यमस्यैतद्वचः श्रुत्वा भगवांस्तिमिरापहः ॥ छायासंज्ञामथाहूय पप्रच्छ क्वगतेति च ॥३६॥ सा चाह तनया त्वष्टुरहं संज्ञा विभावसो ॥ पत्नी तव त्वयापत्यान्येतानि जनितानि मे ॥ ३७ ॥ इत्थं विवस्वतस्तां तु बहुशः पृच्छतो यदा ॥ नाचचक्षे तदा क्रुद्धो भास्वांस्तां शप्तुमुद्यतः ॥ ३८ ॥ ततः सा कथयामास यथावृत्तं विवस्वते ॥ विदितार्थश्च भगवाञ्जगाम त्वष्टुरालयम् ॥ ३९ ॥ ततः संपूजयामास त्वष्टा त्रैलोक्यपूजितम् ॥ भास्वन्किं रहिता शक्त्या निजगेहमुपागतः ॥ ४० ॥ संज्ञां पप्रच्छ तं तस्मै कथयामास तत्त्ववित् ॥ आगता सेह मे वेश्म भवतः प्रेषिता रवे ॥ ४१ ॥ दिवाकरः समाधिस्थो वडवारूपधारिणीम् ॥ तपश्चरंतीं ददृशे उत्तरेषु कुरुष्वथ ॥ ४२ ॥ असह्यमाना सूर्यस्य तेजस्तेनातिपीडिता ॥ वह्न्याभनिजरूपं तु च्छायारूपं विमुच्य च ॥ ४३ ॥ धर्मारण्ये समागत्य तपस्तेपे सुदुष्करम् ॥ छायापुत्रं शनिं दृष्ट्वा यमं चान्यं च भूपते ॥ ४४ ॥ तदैव विस्मितः सूर्यो दुष्टपुत्रौ समीक्ष्य च ॥ ज्ञातुं दध्यौ क्षणं ध्यात्वा विदित्वा तच्च कारणम् ॥ ४५ ॥ घृण्यौष्ण्याद्दग्धदेहा सा तपस्तेपे पतिव्रता ॥ येन मां तेजसा सह्यं द्रष्टुं नैव शशाक ह ॥ ४६ ॥

१ इति च क्वचित्—अदृष्टं महदाश्चर्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चाशद्धायनेतीते गत्वा कौ तप आचरत् ॥ प्रद्योतनो विचार्यैवं गत्वा शीघ्रं मनोजवः ॥ ४७ ॥ धर्मारण्ये वरे पुण्ये यत्र संज्ञास्थिता तपः ॥ आगतं तं रविं दृष्ट्वा वडवा समजायत ॥ ४८ ॥ सूर्यपत्नी सदा संज्ञा सूर्यश्चाश्वस्ततोऽभवत् ॥ ताभ्यां सहाभूत्संयोगो घ्राणे लिंगं निवेश्य च ॥ ४९ ॥ तदा तौ च समुत्पन्नौ युगलावश्विनौ भुवि ॥ प्रादुर्भूतं जलं तत्र दक्षिणेन खुरेण च ॥ ५० ॥ विदलिते भूमिभागे तत्र कुंडं समुद्भभौ ॥ द्वितीयं तु पुनः कुंडं पश्चार्धचरणोद्भवम् ॥ ५१ ॥ उत्तरवाहिन्याः काश्याः कुरुक्षेत्रादि वै तथा ॥ गंगापुरीसमफलं कुण्डेऽत्र मुनिनोदितम् ॥ ५२ ॥ तत्फलं समवाप्नोति तत्तकुण्डे न संशयः ॥ स्नानं विधाय तत्रैव सर्वपापैः प्रमुच्यते ॥ ५३ ॥ न पुनर्जायते देहः कुष्ठादिव्याधिपीडितः ॥ एतत्ते कथितं भूप दस्रांशोत्पत्तिकारणम् ॥ ५४ ॥ तदा ब्रह्मादयो देवा आगतास्तत्र भूपते ॥ दत्त्वा संज्ञावरं शुभ्रं चिंतितादधिकं हि तैः ॥ ५५ ॥ स्थापयित्वा रविं तत्र बकुलाख्यवनाधिपम् ॥ आनर्चुस्ते तदा संज्ञां पूर्वरूपाऽभवत्तदा ॥ ५६ ॥ स्थापिता तत्र राज्ञी च कुमारौ युगलौ तदा ॥ एतत्तीर्थफलं वक्ष्ये शृणु राजन्महामते ॥ ५७ ॥ आदिस्थानं कुरुश्रेष्ठ देवैरपि सुदुर्लभम् ॥ रविकुण्डे नरः स्नात्वा श्रद्धायुक्तो जितेंद्रियः ॥ ५८ ॥ तारयेत्स पितन्सर्वान्महानरकगानपि ॥ श्रद्धया यः पिबेत्तोयं संतर्प्य पितृदेवताः ॥ ५९ ॥ स्वल्पं वापि बहुवापि सर्वं कोटिगुणं भवेत् ॥ सप्तम्यां रविवारेण ग्रहणं चंद्रसूर्ययोः ॥ ६० ॥ रविकुण्डे च ये स्नाताः न ते वै गर्भगामिनः ॥ संक्रांतौ च व्यतीपाते वैधृतेषु च पर्वसु ॥ ६१ ॥ पूर्णमास्याममावास्यां चतुर्दश्यां सितासिते ॥ रविकुंडे च यः स्नातः क्रतुकोटिफलं लभेत् ॥ ६२ ॥ पूजयेद्बकुलार्कं च एकचित्तेन मानवः ॥ स याति परमं धाम स यावत्तपते रविः ॥ ६३ ॥ तस्य लक्ष्मीः स्थिरा नूनं लभते संततिं सुखम् ॥ अरिवर्गः क्षयं याति प्रसादाच्च दिवस्पतेः ॥ ६४ ॥ नाग्नेर्भयं हि तस्य स्यान्न व्याघ्रान्न च दंतिनः ॥ नच सर्प्पभयं क्वापि भूतप्रेतादिभीर्न हि ॥ ६५ ॥ बालग्रहाश्च सर्वेऽपि रेवती वृद्धरेवती ॥ ते सर्वे नाशमायांति बकुलार्क नमोस्तु ते ॥ ६६ ॥ गाव स्तस्य विवर्द्धंते धनं धान्यं तथैव च ॥ अविच्छेदो भवेद्वंशो बकुलार्के नमस्कृते ॥ ६७ ॥ काकवन्ध्या च या नारी अनपत्या मृतप्रजा ॥ वन्ध्या विरूपिता चैव विषकन्याश्च याः स्त्रियः ॥ ६८ ॥ एवं दोषैः प्रमुच्यंते स्नात्वा कुण्डे च भूपते ॥ सौभाग्यस्त्रीसुतांश्चैव रूपं चाप्नोति सर्वशः ॥ ॥ ६९ ॥ व्याधिग्रस्तोपि यो मर्त्यः षण्मासाच्चैव मानवः ॥ रविकुण्डे च सुस्नातः सर्वरोगात्प्रमुच्यते ॥ ७० ॥ नीलोत्सर्गविधिं यस्तु रविक्षेत्रे

१ षण्मुख-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोति वै ॥ पितरस्तृप्तिमायांति यावदाभूतसंप्लवम् ॥ ७१ ॥ कन्यादानं च यः कुर्यादस्मिन्क्षेत्रे च पुत्रक ॥ उद्वाहपरिपूतात्मा ब्रह्मलोके
महीयते ॥ ७२ ॥ धेनुदानं च शय्यां च विद्रुमं च हयं तथा ॥ दासीमहिषीघण्टाश्च तिलं कांचनसंयुतम् ॥ ७३ ॥ धेनुं तिलमयीं दद्यादस्मि
न्क्षेत्रे च भारत ॥ उपानहौ च छत्रं च शीतत्राणादिकं तथा ॥ ७४ ॥ लक्षहोमं तथा रुद्रं रुद्रातिरुद्रमेव च ॥ तस्मिन्स्थाने च यत्किंचिद्ददाति
श्रद्धयान्वितः ॥ ७५ ॥ एकैकस्य फलं तात वक्ष्यामि शृणु तत्त्वतः ॥ दानेन लभते भोगानिह लोके परत्र च ॥ ७६ ॥ राज्यं च लभते मर्त्यः
कृत्वोद्वाहं तु मानुषाः ॥ जायातो धर्मकामार्थाः प्राप्यंते नात्र संशयः ॥ ७७ ॥ पूजाया लभते सौख्यं भवेज्जन्मनिजन्मनि ॥ सप्तम्यां रवियुक्तायां
बकुलार्कं स्मरेत्तु यः ॥ ७८ ॥ ज्वरादेः शत्रुतश्चैव व्याधेस्तस्य भयं नहि ॥७९॥ ॥ युधिष्ठिर उवाच ॥ ॥ बकुलार्केति वै नाम कथं जातं रवेर्मुने ॥
एतन्मे वदतां श्रेष्ठ तत्त्वमाख्यातुमर्हसि ॥८०॥ ॥ व्यास उवाच ॥ ॥ यदा संज्ञा च राजेंद्र सूर्यार्थं चैकचेतसा ॥ तेपे बकुलवृक्षाधः पत्युस्तेजः प्रशां
तये ॥८१॥ प्रादुर्भावं रवेर्दृष्ट्वा वडवा समजायत ॥ अत्यंतं गोपतिः शांतो बकुलस्य समीपतः ॥८२॥ सुषुवे च तदा राज्ञी सुतौ दिव्यौ मनोहरौ ॥
तेनास्य प्रथितं नाम बकुलार्केति वै रवेः ॥८३॥ यस्तत्र कुरुते स्नानं व्याधिस्तस्य न पीडयेत् ॥ धर्ममर्थं च कामं च लभते नात्र संशयः ॥८४॥
षण्मासात्सिद्धिमाप्नोति मोक्षं च लभते नरः ॥ एतदुक्तं महाराज बकुलार्कस्य वैभवम् ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्योपाख्याने बकुलार्कमाहात्म्यकथनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृपासिंधो
महाभाग सर्वव्यापिन्सुरेश्वर ॥ कदा ह्यत्र तपस्तप्तं विष्णुनामिततेजसा ॥ १ ॥ स्कंदाय कथितं चैव शर्वेण च महात्मना ॥ आनुपूर्व्येण सर्वं हि
कथयस्व त्वमेव हि ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ शृणु वत्स प्रवक्ष्यामि धर्म्मारण्ये नृपोत्तम ॥ एकदात्र तपस्तप्तं विष्णुनाऽमिततेजसा ॥
॥ ३ ॥ ॥ स्कंद उवाच ॥ ॥ कथं देवसरोनाम पंपा चंपा गया तथा ॥ वाराणस्यधिका चैव कथमश्वमुखो हरिः ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥
अत्र नारायणो देवस्तपस्तेपे सुदुष्करम् ॥ दिव्यवर्षशतं त्रीणि जातः सुश्वाननश्च सः ॥ ५ ॥ तपस्तेपे महाविष्णुः सुरूपार्थं च पुत्रक ॥ वाजिमुखो
हरिस्तत्र सिद्धस्थाने महाद्युते ॥ ६ ॥ ॥ स्कंद उवाच ॥ ॥ कारणं ब्रूहि नोद्य त्वमश्वाननः कथं हरिः ॥ महारिपोश्च हंता च देवदेवो जगत्पतिः ॥
॥ ७ ॥ यस्य नाम्ना महाभाग पातकानि बहून्यपि ॥ विलीयंते तु वेगेन तमः सूर्योदये यथा ॥ ८ ॥ श्रूयंते यस्य कर्माणि अद्भुतान्यद्भुतानि वै ॥
सर्वेषामेव जीवानां कारणं परमेश्वरः ॥ ९ ॥ प्राणरूपेण यो देवो हयरूपः कथं भवेत् ॥ सर्वेषामपि तंत्राणामेकरूपः प्रकीर्तितः ॥ १० ॥ भक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गम्यो धर्मभाजां सुखरूपः सदा शुचिः ॥ गुणातीतोऽपि नित्योऽसौ सर्वगो निर्गुणस्तथा ॥ ११ ॥ स्रष्टासौ पालको हंता अव्यक्तः सर्वदेहिनाम् ॥
अनुकूलो महातेजाः कस्मादश्वमुखोऽभवत् ॥ १२ ॥ यस्य रोमोद्भवा देवा वृक्षाद्याः पन्नगा नगाः ॥ कल्पेकल्पे जगत्सर्वं जायते यस्य देहतः ॥
॥ १३ ॥ स एव विश्वप्रभवः स एवात्यंतकारणम् ॥ येनानीताः पुनर्विद्या यज्ञाश्च प्रलयं गताः ॥१४॥ घातितो दुष्टदैत्योऽसौ वेदार्थं कृत उद्यमः ॥
एवमासीन्महाविष्णुः कथमश्वमुखोऽभवत् ॥ १५ ॥ रत्नगर्भा धृता येन पृष्ठदेशे च लीलया ॥ कृत्वा व्यवस्थितं सर्वं जगत्स्थावरजंगमम् ॥
॥ १६ ॥ स देवो विश्वरूपो वै कथं वाजिमुखोऽभवत् ॥ हिरण्याक्षस्य हंता यो रूपं कृत्वा वराहजम् ॥ १७ ॥ सुपवित्रं महातेजाः प्रविश्य जलसा
गरे ॥ उद्धृता च मही सर्वा ससागरमहीधरा ॥ १८ ॥ उद्धृता च मही नूनं दंष्ट्राग्रे येन लीलया ॥ कृत्वा रूपं वराहं च कपिलं शोकनाशनम् ॥
॥ १९ ॥ स देवः कथमीशानो हयग्रीवत्वमागतः ॥ प्रह्लादार्थं स चेशानो रूपं कृत्वा भयावहम् ॥ २० ॥ नारसिंहं महादेवं सर्वदुष्टनिवारणम् ॥
पर्वताग्निसमुद्रस्थं ररक्ष भक्तसत्तमम् ॥ २१ ॥ हिरण्यकशिपुं दुष्टं जघान रजनीमुखे ॥ इंद्रासने च संस्थाप्य प्रह्लादस्य सुखप्रदम् ॥ २२ ॥ प्रह्ला
दार्थे च वै नूनं नृसिंहत्वमुपागतः ॥ विरोचनसुतस्याग्रे याचकोऽसौ भवेत्तदा ॥ २३ ॥ यज्ञे चैवाश्वमेधे वै बलिना यः समर्चितः ॥ हृता वसुमती
तस्य त्रिपदीकृतरोदसी ॥ २४ ॥ विश्वरूपेण वै येन पाताले क्षपितो बलिः ॥ त्रिःसप्तवारं येनैव क्षत्रियानवनीतले ॥ २५ ॥ हत्वाऽददाच्च विप्रेभ्यो
महीमतिमहौजसा ॥ घातितो हैहयो राजा येनैव जननी हता ॥ २६ ॥ येन वै शिशुनोर्व्यां हि घातिता दुष्टचारिणी ॥ राक्षसी ताडका नाम्नी
कौशिकस्य प्रसादतः ॥ २७ ॥ विश्वामित्रस्य यज्ञे तु येन लीलानृदेहिना ॥ चतुर्दशसहस्राणि घातिता राक्षसा बलात् ॥ २८ ॥
हता शूर्पणखा येन त्रिशिराश्च निपातितः ॥ सुग्रीवं वालिनं हत्वा सुग्रीवेण सहायवान् ॥ २९ ॥ कृत्वा सेतुं समुद्रस्य रणे
हत्वा दशाननम् ॥ धर्म्मारण्यं समासाद्य ब्राह्मणानन्वपूजयत् ॥ ३० ॥ शासनं द्विजवर्येभ्यो दत्त्वा ग्रामान्बहूंस्तथा ॥ स्नात्वा चैव धर्म्मवाप्यां
सुदानान्यददाद्बवाम् ॥ ३१ ॥ साधूनां पालनं कृत्वा निग्रहाय दुरात्मनाम् ॥ एवमन्यानि कर्म्माणि श्रुतानि च धरातले ॥३२॥ स देवो लीलया
कृत्वा कथं चाश्वमुखोऽभवत् ॥ यो जातो यादवे वंशे पूतनाशकटादिकम् ॥ ३३ ॥ अरिष्टदैत्यः केशी च वृकासुरबकासुरौ ॥ शकटासुरो महासुर
स्तृणावर्तश्च धेनुकः ॥ ३४ ॥ मल्लश्चैव तथा कंसो जरासंधस्तथैव च ॥ कालयवनस्य हंता च कथं वै स हयाननः ॥ तारकासुरं रणे जित्वा
अयुतपट्टपुरं तथा ॥ ३५ ॥ कन्याश्चोद्वाहिता येन सहस्राणि च षड् दश ॥ अमानुषाणि कृत्वेत्थं कथं सोऽश्वमुखोऽभवत् ॥ ३६ ॥ त्राता यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वभक्तानां हंता सर्वदुरात्मनाम् ॥ धर्मस्थापनकृत्सोऽपि कल्किर्विष्णुपदे स्थितः ॥ ३७ ॥ एतद्वै महदाश्चर्यं भवता यत्प्रकाशितम् ॥ एतदा
चक्ष्व मे सर्वं कारणं त्रिपुरांतक ॥ ३८ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ साधु पृष्टं महाबाहो कारणं तस्य वच्म्यहम् ॥ हयग्रीवस्य कृष्णस्य शृणुष्वै
काग्रमानसः ॥ ३९ ॥ ॥ व्यास उवाच ॥ ॥ पुरा देवैः समारब्धो यज्ञो नूनं धरातले ॥ वेदमंत्रैराह्वयितुं सर्वे रुद्रपुरोगमाः ॥४०॥ वैकुण्ठे च गताः
सर्वे क्षीराब्धौ च निजालये ॥ पातालेऽपि पुनर्गत्वा न विदुः कृष्णदर्शनम् ॥ ४१ ॥ मोहाविष्टास्ततः सर्वे इतश्चेतश्च धाविताः ॥ नैव दृष्टस्तदा
तैस्तु ब्रह्मरूपो जनार्दनः ॥ ४२ ॥ विचारयंति ते सर्वे देवा इन्द्रपुरोगमाः ॥ क्व गतोऽसौ महाविष्णुः केनोपायेन दृश्यते ॥ ४३ ॥ प्रणम्य शिरसा
देवं वांगीशं[1] प्रोचुरादरात् ॥ देवदेव महाविष्णुं कथयस्व प्रसादतः ॥ ४४ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ न जाने केन कार्येण योगारूढो महा
त्मवान् ॥ योगरूपोऽभवद्विष्णुर्योगीशो हरिरच्युतः ॥ ४५ ॥ क्षणं ध्यात्वा स्वमात्मानं धिषणेन ख्यापितो हरिः ॥ तत्र सर्वे गता देवा यत्र देवो
जगत्पतिः ॥ ४६ ॥ तदा दृष्टो महाविष्णुर्ध्यानस्थोऽसौ जनार्दनः ॥ ध्यात्वा कृत्यसमाकारं सशरं दैत्यसूदनम् ॥ ४७ ॥ समास्थानं ततो दृष्ट्वा
बोधोपायं प्रचक्रमे ॥ आह तांश्च तदा वम्र्यो[2] धनुर्गुणं प्रयत्नतः ॥ छेत्स्यंति चेत्तच्छब्देन प्रबुध्येत हरिः स्वयम् ॥ ४८ ॥ ॥ देवा ऊचुः ॥ ॥
गुणभक्षं[4] कुरुध्वं वै येनासौ बुध्यते हरिः ॥ क्रत्वर्थिनो वयं वम्र्यः[5] प्रभुं विज्ञापयामहे ॥ ४९ ॥ ॥ वम्र्य ऊचुः ॥ ॥ निद्राभंगं कथाच्छेदं
दम्पत्योर्मैत्रभेदनम् ॥ शिशुमातृविभेदं वा कुर्वाणो नरकं व्रजेत् ॥ ५० ॥ योगारूढो जगन्नाथः समाधिस्थो महाबलः ॥ तस्य श्रीजगदीशस्य
विघ्नं नैव तु कुर्महे ॥ ५१ ॥ ॥ ब्रह्मोवाच ॥ ॥ भवतां सर्वभक्षत्वं देवकार्यं क्रियेत चेत् ॥ कर्त्तव्यं च ततो वम्र्यो यज्ञसिद्धिर्यथा भवेत् ॥
वम्रीशा सा तदा वत्स पुनरेवमुवाच ह ॥ ५२ ॥ ॥ वम्र्युवाच ॥ ॥ दुःखसाध्यो जगन्नाथो मलयानिलसंनिभः ॥ कथं वा बोध्यतां
ब्रह्मन्नस्माभिः सुरपूजितः ॥ ५३ ॥ नैव यज्ञेन मे कार्यं सुरैश्चैव तथैव च ॥ सर्वेषु यज्ञकार्येषु भागं ददतु मे सुराः ॥ ५४ ॥
॥ ॥ देवा ऊचुः ॥ ॥ प्रदास्यामो वयं वम्र्यै भागं यज्ञेषु सर्वदा ॥ यज्ञाय दत्तमस्माभिः कुरुष्वैवं वचो हि नः ॥ ५५ ॥ तथेति
विधिनाप्युक्तं वम्री चोद्यममाश्रिता ॥ गुणभक्षादिकं कर्म तया सर्वं कृतं नृप ॥ ५६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अस्य वा बोधने

१ वागीशं बृहस्पतिम् । २ वम्र्यः—पुस्तकपत्रवस्त्रादिभक्षिकाः कीटिकाः 'उधई' इति महाराष्ट्रभाषायां प्रसिद्धाः । ३ तच्छब्देन धनुष्यटणत्कारशब्देन । ४ गुणभक्षम्—धनुर्ज्याभक्षणम् । ५ हे वम्र्यः—इति संबोधनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यवतीसुत ॥ ५७ ॥ ॥ व्यास उवाच ॥ ॥ व्यग्रचित्ताः सुराः सर्वे आकृष्टं हरिकार्मुं
देवा गुणभंगे समाधिषु ॥ एतदाश्चर्यं विप्रर्षे सत्यं सत्यवतीसुत ॥ ५७ ॥ ॥ व्यास उवाच ॥ ॥ व्यग्रचित्ताः सुराः सर्वे आकृष्टं हरिकार्मु
कम् ॥ न जाने केन कार्येण विष्णुमायाविमोहिताः ॥ ५८ ॥ मुदितास्ताः प्रमुञ्चंति वल्मीकं चाग्रतो हरेः ॥ कोटिपार्श्वे ततो नीतं वल्मीकं पर्वतो
पमम् ॥ ५९ ॥ गुणे च भक्षिते तस्मिंस्तत्क्षणादेव दूषिते ॥ ज्याघातकोटिभिः सार्द्धं शीर्षं छित्त्वा दिवं गतम् ॥ ६० ॥ गते शीर्षे च ते देवा भृशमु
द्विग्नमानसाः ॥ धावंति सर्वतः सर्वे शिरआलोकनाय ते ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्व
भागे धर्मारण्यमाहात्म्ये विष्णुशिरोनाशोनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ न पश्यंति तदा शीर्षं ब्रह्मा
द्यास्तु सुरास्तदा ॥ किं कुर्म इति हेत्युक्त्वा ज्ञानिनस्ते व्यचिन्तयन् ॥ १ ॥ उवाच विश्वकर्माणं तदा ब्रह्मा सुरान्वितः ॥२॥ ॥ ब्रह्मोवाच ॥ ॥
विश्वकर्मंस्त्वमेवासि कार्यकर्ता सदा विभो ॥ शीघ्रमेव कुरु त्वं वै वक्रं सांद्रं च धन्विनः ॥ ३ ॥ नमस्कृत्य तदा तस्मै स्तुतोऽसौ देववर्द्धकिः ॥
उवाच परया भक्त्या ब्रह्माणं कमलोद्भवम् ॥ ३ ॥ यज्ञकार्यं निर्वृत्याशु वदंति विविधाः सुराः ॥ ४ ॥ यज्ञभागविहीनं मां किं पुनर्वच्मि ते
ऽग्रतः ॥ यज्ञभागमहं देव लभेयैवं सुरैः सह ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ दास्यामि सर्वयज्ञेषु विभागं सुरवर्द्धके ॥ सोमे त्वं प्रथमं वीर पूज्यसे
श्रुतिकोविदैः ॥ ६ ॥ तद्विष्णोश्च शिरस्तावत्संधत्स्वामरवर्द्धक ॥ विश्वकर्माब्रवीद्देवानानयध्वं शिरस्त्विति ॥ ७ ॥ तन्नास्तीति सुराः सर्वे वदंति
नृपसत्तम ॥ मध्याह्ने तु समुद्भूते रथस्थो दिवि चांशुमान् ॥ ८ ॥ दृष्टं तदा सुरैः सर्वैं रथादश्वमथानयन् ॥ छित्त्वा शीर्षं महीपाल कबंधाद्वाजिनो
हरेः ॥ ९ ॥ कबंधे योजयामास विश्वकर्मातिचातुरः ॥ दृष्ट्वा तं देवदेवेशं सुराः स्तुतिमकुर्वत ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ नमस्तेऽस्तु जग
द्बीज नमस्ते कमलापते ॥ नमस्तेऽस्तु सुरेशान नमस्ते कमलेक्षण ॥ ११ ॥ त्वं स्थितिः सर्वभूतानां त्वमेव शरणं सताम् ॥ त्वं हंता सर्वदुष्टानां
हयग्रीव नमोऽस्तु ते ॥ १२ ॥ त्वमोंकारो वषट्कारः स्वाहा स्वधा चतुर्विधा ॥ आद्यस्त्वं च सुरेशान त्वमेव शरणं सदा ॥ १३ ॥ यज्ञो यज्ञप
तिर्यज्वा द्रव्यं होता हुतस्तथा ॥ त्वदर्थं हूयते देव त्वमेव शरणं सखा ॥ १४ ॥ कालः करालरूपस्त्वं त्वं वार्कः शीतदीधितिः ॥ त्वमग्निर्वरुणश्चैव
त्वं च कालक्षयंकरः ॥ १५ ॥ गुणत्रयं त्वमेवेह गुणहीनस्त्वमेव हि ॥ गुणानामालयस्त्वं च गोप्ता सर्वेषु जंतुषु ॥ १६ ॥ स्त्रीपुंसोश्च द्विधा त्वं च
पशुपक्ष्यादिमानवैः ॥ चतुर्विधं कुलं त्वं हि चतुराशीतिलक्षणः ॥ १७ ॥ दिनांतश्चैव पक्षांतो मासांतो हायनं युगम् ॥ कल्पांतश्च महांतश्च

१ निवृत्य- मद्रस्तेन सर्वं संपाद्य--इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालांतस्त्वं च वै हरे ॥ १८ ॥ एवंविधैर्महादिव्यैः स्तूयमानः सुरैर्नृप ॥ संतुष्टः प्राह सर्वेषां देवानां पुरतः प्रभुः ॥ १९ ॥ ॥ श्रीभगवानुवाच ॥ किमर्थमिह संप्राप्ताः सर्वे देवगणा भुवि ॥ किमेतत्कारणं देवाः किं तु दैत्यप्रपीडिताः ॥ २० ॥ ॥ देवा ऊचुः ॥ ॥ न दैत्यस्य भयं जातं यज्ञ कर्मोत्सुका वयम् ॥ त्वद्दर्शनपराः सर्वे पश्यामो वै दिशो दश ॥ २१ ॥ त्वन्मायामोहिताः सर्वे व्यग्रचित्ता भयातुराः ॥ योगारूढस्वरूपं च दृष्टं तेऽस्माभिरुत्तमम् ॥ २२ ॥ वम्री च नोदितास्माभिर्जागराय तवेश्वर ॥ ततश्चापूर्वमभवच्छिरश्छिन्नं बभूव ते ॥ २३ ॥ सूर्याश्वशीर्षमानीय विश्वकर्मातिचातुरः ॥ समधत्त शिरो विष्णो हयग्रीवोऽस्यतः प्रभो ॥ २४ ॥ ॥ विष्णुरुवाच ॥ ॥ तुष्टोऽहं नाकिनः सर्वे ददामि वरमीप्सितम् ॥ हयग्रीवोऽस्म्यहं जातो देवदेवो जगत्पतिः ॥ २५ ॥ न रौद्रं न विरूपं च सुरैरपि च सेवितम् ॥ जातोऽहं वरदो देवा हयाननेति तोषितः ॥ २६ ॥ ॥ ॥ व्यास उवाच ॥ ॥ कृते सत्रे ततो वेधा धीमान्सन्तुष्टचेतसा ॥ यज्ञभागं ततो दत्त्वा वम्रीभ्यो विश्वकर्मणे ॥ २७ ॥ यज्ञांते च सुरश्रेष्ठं नमस्कृत्य दिवं ययौ ॥ एतच्च कारणं विद्धि हयाननो यतो हरिः ॥ २८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ येनाक्रांता मही सर्वा क्रमेणैकेन तत्त्वतः ॥ विवरे विवरे रोम्णां वर्तंते च पृथक्पृथक् ॥२९॥ ब्रह्मांडानि सहस्राणि दृश्यंते च महाद्युते ॥ न वेत्ति वेदो यत्पारं शीर्षघातो हि वै कथम् ॥ ३० ॥ ॥ ॥ व्यास उवाच ॥ ॥ शृणु त्वं पांडवश्रेष्ठ कथां पौराणिकीं शुभाम् ॥ ईश्वरस्य चरित्रं हि नैव वेत्ति चराचरे ॥३१॥ एकदा ब्रह्मसभायां गता देवाः सवासवाः॥ भूर्लोकाद्याश्च सर्वे हि स्थावराणि चराणि च॥३२॥ देवा ब्रह्मर्षयः सर्वे नमस्कर्तुं पितामहम् ॥ विष्णुरप्यागतस्तत्र सभायां मंत्रकारणात् ॥३३॥ ब्रह्मा चापि विगर्विष्ठ उवाचेदं वचस्तदा ॥ भोभो देवाः शृणुध्वं कस्त्रयाणां कारणं महत् ॥३४॥ सत्यं ब्रुवंतु वै देवा ब्रह्मेशविष्णुमध्यतः ॥ तां वाचं च समाकर्ण्य देवा विस्मयमागताः॥३५॥ ऊचुश्चैव ततो देवा न जानीमो वयं सुराः ॥ ब्रह्मपत्नी तदोवाच विष्णुं प्रति सुरेश्वरम् ॥ त्रयाणामपि देवानां महांतं च वदस्व मे ॥ ३६ ॥ ॥ विष्णुरुवाच ॥ ॥ विष्णुमायाबलेनैव मोहितं भुवनत्रयम् ॥ ततो ब्रह्मोवाच चेदं न त्वं जानासि भो विभोः ॥ ३७ ॥ नैव मुह्यंति ते मायाबलेन नैवमेव च ॥ गर्वहिंसापरो देवो जगद्भर्ता जगत्प्रभुः ॥३८॥ ज्येष्ठं त्वां न विदुः सर्वे विष्णुमायावृताः खिलाः ॥ ततो ब्रह्मा स रोषेण क्रुद्धः प्रस्फुरिताननः ॥ ३९ ॥ उवाच वचनं कोपाद्धे विष्णो शृणु मे वचः ॥ येन वक्त्रेण सभायां वचनं समुदीरितम् ॥ ४० ॥ तच्छीर्षं पततादाशु चाल्पकालेन वै पुनः ॥ ततो हाहाकृतं सर्वं सेंद्राः सर्षिपुरोगमाः ॥ ४१ ॥ ब्रह्माणं क्षमयामासुर्विष्णुंप्रति सुरोत्तमाः ॥ विष्णुश्च

१ स्तोत्रैः--इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वचः श्रुत्वा सत्यंसत्यं भविष्यति ॥ ४२ ॥ ततो विष्णुर्महातेजास्तीर्थस्योत्पादनेन च ॥ तपस्तेपे तु वै तत्र धर्मारण्ये सुरेश्वरः ॥ अश्वशीर्ष मुखं दृष्ट्वा हयग्रीवो जनार्दनः ॥ ४३ ॥ तपस्तेपे महाभाग विधिना सह भारत ॥ न शक्यं केनचित्कर्तुमात्मनात्मैव तुष्टवान् ॥ ४४ ॥ ब्रह्मापि तपसा युक्तस्तेपे वर्षशतत्रयम् ॥ तिष्ठन्नेव पुरो विष्णोर्विष्णुमायाविमोहितः ॥ ४५ ॥ यज्ञार्थमवदत्तुष्टो देवदेवो जगत्पतिः ॥ ब्रह्मंस्ते मुक्तताद्यास्ति मम मायाप्यदुःसहा ॥ ४६ ॥ ततो लब्धवरो ब्रह्मा हृष्टचित्तो जनार्दनः ॥ उवाच मधुरां वाचं सर्वेषां हितकारणात् ॥ ४७ ॥ अत्राभवन्महाक्षेत्रं पुण्यं पापप्रणाशनम् ॥ विधिविष्णुमयं चैतद्भवत्वेतन्न संशयः ॥ ४८ ॥ तीर्थस्य महिमा राजन्हयशीर्षस्तदा हरिः ॥ शुभाननो हि संजातः पूर्वेणैवाननेन तु ॥ ४९ ॥ कंदर्पकोटिलावण्यो जातः कृष्णस्तदा नृप ॥ ब्रह्मापि तपसा युक्तो दिव्यं वर्षशतत्रयम् ॥ ५० ॥ सावित्र्या च कृतं यत्र विष्णुमाया न बाधते ॥ मायया तु कृतं शीर्षं पंचमं शार्दूलस्य वा ॥ ५१ ॥ धर्मारण्ये कृतं रम्यं हरेण च्छेदितं पुरा ॥ तस्मै दत्त्वा वरं विष्णुर्जगामादर्शनं ततः ॥ ५२ ॥ स्थापयित्वा विधिस्तत्र तीर्थं चैव त्रिलोचनम् ॥ मुक्तेशंनाम देवस्य मोक्षतीर्थमरिंदम ॥ ५३ ॥ गतः सोऽपि सुरश्रेष्ठः स्वस्थानं सुरसेवितम् ॥ तत्र प्रेता दिवं यांति तर्पणेन प्रतर्पिताः ॥ ५४ ॥ अश्वमेधफलं स्नाने पाने गोदानजं फलम् ॥ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ ५५ ॥ स्नानार्थमत्रागच्छंति देवताः पितरस्तथा ॥ कार्त्तिक्यां कृत्तिकायोगे मुक्तेशं पूजयेत्तु यः ॥ ५६ ॥ स्नात्वा देवसरे रम्ये नत्वा देवं जनार्दनम् ॥ यः करोति नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ ५७ ॥ भुक्त्वा भोगान्यथाकामं विष्णुलोकं स गच्छति ॥ अपुत्रा काकवंध्या च मृतवत्सा मृतप्रजा ॥ ५८ ॥ एकांबरेण सुस्नातौ पतिपत्न्यौ यथाविधि ॥ तद्दोषं नाशयेन्नूनं प्रजाप्तिप्रतिबन्धकम् ॥ ५९ ॥ मोक्षेश्वरप्रसादेन पुत्रपौत्रादि वर्द्धयेत् ॥ दद्यादेकेन चित्तेन फलानि सत्यसंयुता ॥ ॥ ६० ॥ निधाय वंशपात्रेऽपि नारी दोषात्प्रमुच्यते ॥ प्राप्नुवंति च देवाश्च अग्निष्टोमफलं नृप ॥ ६१ ॥ वेधा हरिर्हरश्चैव तप्यंते परमं तपः ॥ धर्मारण्ये त्रिसंध्यं च स्नात्वा देवसरस्यथ ॥ ६२ ॥ तत्र मोक्षेश्वरः शंभुः स्थापितो वै ततः सुरैः ॥ तत्र सांगं जपं कृत्वा न भूयः स्तनपो भवेत् ॥ ६३ ॥ एवं क्षेत्रं महाराज प्रसिद्धं भुवनत्रये ॥ यस्तत्र कुरुते श्राद्धं पितॄणां श्रद्धयान्वितः ॥ ६४ ॥ उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥ देवसरो महारम्यं नानापुष्पैः समन्वितम् ॥ श्यामं सकलकल्हारैर्विविधैर्जलजंतुभिः ॥ ६५ ॥ ब्रह्मविष्णुमहे

१ येन मुखेन ब्रह्मा विष्णवे शापमदात्तत्तस्य मुखं शार्दूलस्येव मुखं पंचममासीत् तत् हरेण पुरा च्छेदितम्—इति संबंधतोऽर्थो बोद्धव्यः । २ यदि स्यात्—तदा—इत्यध्याहृत्य अर्थसंगतिर्योजनीया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाद्यैः सेवितं सुरमानुषैः ॥ सिद्धैर्यक्षैश्च मुनिनिः सेवितं सर्वतः शुभम् ॥ ६६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं तत्सरः ख्यातं तस्मि न्स्थाने द्विजोत्तम ॥ तस्य रूपं प्रकारं च कथयस्व यथातथम् ॥ ६७ ॥ ॥ व्यास उवाच ॥ ॥ साधुसाधु महाप्राज्ञ धर्मपुत्र युधिष्ठिर ॥ यस्य संकीर्तनान्नूनं सर्वपापैः प्रमुच्यते ॥ ६८ ॥ अतिस्वच्छतरं शीतं गंगोदकसमप्रभम् ॥ पवित्रं मधुरं स्वादु जलं तस्य नृपोत्तम ॥ ६९ ॥ महाविशालं गंभीरं देवखातं मनोरमम् ॥ लहर्यादिभिर्गंभीरैः फेनावर्तसमाकुलम् ॥ ७० ॥ झषमंडूककमठैर्मकरैश्च समाकुलम् ॥ शंखशुक्त्यादि भिर्युक्तं राजहंसैः सुशोभितम् ॥ ७१ ॥ वटप्लक्षैः समायुक्तमश्वत्थाम्रैश्च वेष्टितम् ॥ चक्रवाकसमोपेतं बकसारसटिट्टिभैः ॥ ७२ ॥ कमनीय प्रगन्धाच्छच्छत्रपत्रैः सुशोभितम् ॥ सेव्यमानं द्विजैः सर्वैः सारसाद्यैः सुशोभितम् ॥ ७३ ॥ सदेवैर्मुनिभिश्चैव विप्रैर्मर्त्यैश्च भूमिप ॥ सेवितं दुःखहं चैव सर्वपापप्रणाशनम् ॥ ७४ ॥ अनादिनिधनोदंतं सेवितं सिद्धमंडलैः ॥ स्नानादिभिः सर्वदेव तत्सरो नृपसत्तम ॥ ७५ ॥ विधिना कुरुते यस्तु नीलोत्सर्गं च तत्तटे ॥ प्रेता नैव कुले तस्य यावदिन्द्राश्चतुर्दश ॥ ७६ ॥ कन्यादानं च ये कुर्युर्विधिना तत्र भूपते ॥ ते तिष्ठन्ति ब्रह्मलोके यावदाभूतसंप्लवम् ॥ ७७ ॥ महिषीं गृहदासीं च सुरभीं सुतसंयुताम् ॥ हेम विद्यां तथा भूमिं रथांश्च गजवाससी ॥ ७८ ॥ ददाति श्रद्धया तत्र सोऽक्षयं स्वर्गमश्नुते ॥ देवखातस्य माहात्म्यं यः पठेच्छिवसन्निधौ ॥ दीर्घमायुस्तथा सौख्यं लभते नात्र संशयः ॥ ७९ ॥ यः शृणोति नरो भक्त्या नारी वा त्विदमद्भुतम् ॥ कुले तस्य भवेच्छ्रेयः कल्पांतेऽपि युधिष्ठिर ॥ ८० ॥ एतत्सर्वं मयाख्यातं हयग्रीवस्य कारणम् ॥ प्रभास्तस्य तीर्थस्य सर्वपापापनुत्तये ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्य माहात्म्ये हयग्रीवस्याख्यानवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रक्षसां चैव दैत्यानां यक्षाणामथ पक्षिणाम् ॥ भयनाशाय काजेशैर्धर्मारण्यनिवासिनाम् ॥ १ ॥ शक्तीः संस्थापिता नूनं नानारूपा ह्यनेकशः ॥ तासां स्थानानि नामा नि यथारूपाणि मे वद ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ शृणु पार्थ महाबाहो धर्ममूर्ते नृपोत्तम ॥ स्थाने वै स्थापिता शक्तिः काजेशैश्चैव गोत्रपा ॥ ३ ॥ श्रीमाता मदारिकायां शांता नंदापुरे वरे ॥ रक्षार्थं द्विजमुख्यानां चतुर्दिक्षु स्थिताश्च ताः ॥ ॥ ४ ॥ युक्ताश्चैव सुरैः सर्वैः स्वस्वस्थाने नृपोत्तम ॥ वनमध्ये स्थिताः सर्वा द्विजानां रक्षणाय वै ॥ ५ ॥ सा बभूव महाराज सावित्रीतिप्रथा शिवा ॥ असुराणां वधार्थाय ज्ञानजा स्थापिता सुरैः ॥ ६ ॥ गात्रायी पक्षिणी देवी छत्रजा द्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवासिनी ॥ शीहोरी चूटसंज्ञा या पिप्पलाशापुरी तथा ॥ अन्याश्च बहवश्चैव स्थापिता भयरक्षणे ॥ ७ ॥ प्रतीच्योदीच्यां याम्यां वै विबुधैः स्थापिता हि सा ॥ नानायुधधरा सा च नानाभरणभूषिता ॥ ८ ॥ नानावाहनमारूढा नानारूपधरा च सा ॥ नानाकोपसमायुक्ता नानाभयविनाशिनी ॥ ९ ॥ स्थाप्या मातर्यथास्थाने यथायोग्या दिशोदिश ॥ गरुडेन समारूढा त्रिशूलवरधारिणी ॥ १० ॥ सिंहारूढा शुद्धरूपा वारुणीपानदर्पिता ॥ खड्गखेटकबाणाढ्यैः करैर्भाति शुभानना ॥ ११ ॥ रक्तवस्त्रावृता चैव पीनोन्नतपयोधरा ॥ उद्यदादित्यबिंबाभा मदाघूर्णितलोचना ॥ ॥ १२ ॥ एवमेषा महादिव्या काजेशैः स्थापिता तदा ॥ रक्षार्थं सर्वजंतूनां सत्यमंदिरवासिनाम् ॥ १३ ॥ सा देवी नृपशार्दूल स्तुता संपूजिता सह ॥ ददाति सकलान्कामान्वांछितान्नृपसत्तम ॥ १४ ॥ धर्मारण्यात्पश्चिमतः स्थापिता छत्रजा शुभा ॥ तत्रस्था रक्षते विप्रान्क्रियच्छक्तिसमन्विता ॥ १५ ॥ भैरवं रूपमास्थाय राक्षसानां वधाय च ॥ धारयंत्यायुधानीत्थं विप्राणामभयाय च ॥ १६ ॥ सरश्चकार तस्याग्रे उत्तमं जलपूरितम् ॥ सरस्यस्मिन्महाभाग कृत्वा स्नानादितर्पणम् ॥ १७ ॥ पिंडदानादिकं सर्वमक्षयं चैव जायते ॥ भूमौ क्षिप्तांजलीन्दिव्यान्धूपदीपादिकं सदा ॥ १८ ॥ तस्य नो बाधते व्याधिः शत्रूणां नाश एव च ॥ बलिदानादिकं तत्र कुर्याद्भूयः स्वशक्तितः ॥ १९ ॥ शत्रवो नाशमायांति धनं धान्यं विवर्धते ॥ आनंदा स्थापिता राजञ्छत्त्रयंशा च मनोरमा ॥ २० ॥ रक्षणार्थं द्विजातीनां माहात्म्यं शृणु भूपते ॥ शुक्लांबरधरा दिव्या हेमभूषणभूषिता ॥ २१ ॥ सिंहारूढा चतुर्हस्ता शशांककृतशेखरा ॥ मुक्ताहारलतोपेता पीतोन्नतपयोधरा ॥ २२ ॥ अक्षमालासिहस्ता च शुणतोमरधारिणी ॥ दिव्यगंधवराधारा दिव्यमालाविभूषिता ॥ २३ ॥ सात्त्विकी शक्तिरानंदा स्थिता तस्मिन्पुरे पुरा ॥ पूजयेत्तां च वै राजन्कर्पूरारक्तचंदनैः ॥ २४ ॥ भोजयेत्पायसैः शुभ्रैर्मध्वाज्यसितया सह ॥ भवान्याः प्रीतये राजन्कुमार्याः पूजनं तथा ॥ २५ ॥ तत्र जप्तं हुतं दत्तं ध्यातं च नृपसत्तम ॥ तत्सर्वं चाक्षयं तत्र जायते नात्र संशयः ॥ २६ ॥ त्रिगुणे त्रिगुणा वृद्धिस्तस्मिन्स्थाने नृपोत्तम ॥ साधकस्य भवेन्नूनं धनदारादिसंपदः ॥ २७ ॥ न हानिर्न च रोगश्च न शत्रुर्न च दुष्कृतम् ॥ गावस्तस्य विवर्द्धंते धनधान्यादिसंकुलम् ॥ २८ ॥ न शाकिन्या भयं तस्य न च राज्ञश्च वैरिणः ॥ नच व्याधिभयं चैव सर्वत्र विजयी भवेत् ॥ २९ ॥ विद्याश्चतुर्दशास्यैव भासंते पठिता इव ॥ सूर्यवद्द्योतते भूमावानंदमाश्रितो नरः ॥ ३० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्य आनंदास्थापनवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ व्यास उवाच ॥ ॥ दक्षिणे स्थापिता राजञ्छांता देवी महाबला ॥ सा विचित्रांबरधरा वनमालाविभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता ॥ १ ॥ तामसी सा महाराज मधुकैटभनाशिनी ॥ विष्णुना तत्र वै न्यस्ता शिवपत्नी नृपोत्तम ॥ २ ॥ सा चैवाष्टभुजा रम्या मेघश्यामा मनोरमा ॥ कृष्णांबरधरा देवी व्याघ्रवाहनसंस्थिता ॥ ३ ॥ द्वीपिचर्मपरीधाना दिव्याभरणभूषिता ॥ घंटात्रिशूलाक्षमालाकमंडलुधरा शुभा ॥ ४ ॥ अलंकृतभुजा देवी सर्वदेवनमस्कृता ॥ धनं धान्यं सुतान्भोगान्स्वभक्तेभ्यः प्रयच्छति ॥ ५ ॥ पूजयेत्कमलै र्दिव्यैः कर्पूरागरुचंदनैः ॥ तदुद्देशेन तत्रैव पूजयेद्द्विजसत्तमान् ॥ ६ ॥ कुमारीर्भोजयेदन्नैर्विविधैर्भक्तिभावतः ॥ धूपैर्दीपैः फलैः रम्यैः पूजयेच्च सुरादिभिः ॥ ७ ॥ मांसैस्तु विविधैर्दिव्यैरथवा धान्यपिष्टजैः ॥ अन्यैश्च विविधैर्धान्यैः पायसैर्वटकैस्तथा ॥ ८ ॥ ओदनैः कृशरापूपैः पूजयेत्सुसमाहितः ॥ स्तुतिपाठेन तत्रैव शक्तिस्तोत्रैर्मनोहरैः ॥ ९ ॥ रिपवस्तस्य नश्यंति सर्वत्र विजयी भवेत् ॥ रणे राजकुले द्यूते लभते जयमंगलम् ॥ १० ॥ सौम्या शांता महाराज स्थापिता कुलमातृका ॥ श्रीमाता सा प्रसिद्धा च माहात्म्यं शृणु भूपते ॥ ११ ॥ कुलमाता महाशक्तिस्तत्रास्ते नृपसत्तम ॥ कुमारी ब्रह्मपुत्री सा रक्षार्थं विधिना कृता ॥ १२ ॥ स्थानमाता च सा देवी श्रीमाता साभिधानतः ॥ त्रिरूपा सा द्विजातीनां निर्मिता रक्षणाय च ॥ १३ ॥ कमण्डलुधरा देवी घण्टाभरणभूषिता ॥ अक्षमालायुता राजञ्छुभा सा शुभरूपिणी ॥ १४ ॥ कुमारी चादिमाता च स्थानत्राणकरापि च ॥ दैत्यघ्नी कामदा चैव महामोहविनाशिनी ॥ १५ ॥ भक्तिगम्या च सा देवी कुमारी ब्रह्मणः सुता ॥ रक्तांबरधरा साधुरक्तचंदनचर्चिता ॥ १६ ॥ रक्तमाल्या दशभुजा पंचवक्त्रा सुरेश्वरी ॥ चंद्रावतंसिका माता सुरासुरनमस्कृता ॥ १७ ॥ साक्षात्सरस्वतीरूपा रक्षार्थं विधिना कृता ॥ ॐकारा सा महापुण्या काजेशेन विनिर्मिता ॥ १८ ॥ ऋषिभिः सिद्धयक्षादिसुरपन्नगमानवैः ॥ प्रणम्यांघ्रियुगा तेभ्यो ददाति मनसेप्सितम् ॥ १९ ॥ पालयन्ती च संस्थानं द्विजातीनां हिताय वै ॥ यथौरसान्सुतान्माता पालयन्तीह सद्गुणैः ॥ २० ॥ अथ पालयती देवी श्रीमाता कुलदेवता ॥ उपद्रवाणि सर्वाणि नाशयेत्सततं स्तुता ॥ २१ ॥ सर्वविघ्नोपशमनी श्रीमाता स्मरणेन हि ॥ विवाहे चोपवीते च सीमंते शुभकर्मणि ॥ २२ ॥ सर्वेषु भक्तकार्येषु श्रीमाता पूज्यते सदा ॥ यथा लंबोदरं देवं पूजयित्वा समारभेत् ॥ २३ ॥ कार्यं शुभं सर्वमपि श्रीमातरं तथा नृप ॥ यत्किंचिद्भोजनं त्वत्र ब्राह्मणेभ्यः प्रयच्छति ॥ २४ ॥ अथवा विनिवेद्यं च क्रियते यत्परस्परम् ॥ अनिवेद्य च तां राजन्कुर्वाणो विघ्नमेष्यति ॥ २५ ॥ तस्मात्तस्यै निवेद्याथ ततः कर्म समारभेत् ॥ तद्वरेणाखिलं कर्म अविघ्नेन हि सिद्ध्यति ॥ हेमंते शिशिरे प्राप्ते पूजयेद्धर्मपुत्रिकाम् ॥ २६ ॥ हेमपत्रे समालिख्य राजते वाथ कारयेत् ॥ पादुकां चोत्तमां राजञ्छी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातायै निवेदयेत् ॥ २७ ॥ स्नात्वा चैव शुचिर्भूत्वा तिलामलकमिश्रितैः॥ वासोभिः सुमनोभिश्च दुकूलैः सुमनोहरैः ॥ २८ ॥ लेपयेच्चंदनैः शुभ्रैः
कुंकुमैः सिंदुरासकैः ॥ कर्पूरागुरुकस्तूरीमिश्रितैः कर्दमैस्तथा ॥ २९ ॥ कर्णिकारैश्च कह्लारैः करवीरैः सितारुणैः ॥ चंपकैः केतकीभिश्च जपा
कुसुमकैस्तथा ॥ ३० ॥ यक्षकर्दमकैश्चैव बिल्वपत्रैरखंडितैः ॥ पालाशजातिपुष्पैश्च वटकैर्माषसंभवैः ॥ पूपभक्तादिदालीभिस्तोषयेच्छाकसंचयैः ॥
॥ ३१ ॥ धूपदीपादिपूर्वं तु पूजयेज्जगदंबिकाम् ॥ तद्धियैव कुमारीर्वै विप्रानपि च भोजयेत् ॥ पायसैर्घृतयुक्तैश्च शर्करामिश्रितैर्नृप ॥ ३२ ॥ पक्वान्नै
र्मोदकाद्यैश्च तर्पयेद्भक्तिभावतः ॥ तर्प्यमाणे द्विजैकस्मिन्सहस्रफलमश्नुते ॥३३॥ दैत्यानां घातकं स्तोत्रं वाचयेच्च पुनः पुनः ॥ एकाग्रमानसो भूत्वा
श्रीमातरं स्तुवीय यः ॥३४॥ तस्य तुष्टा वरं दद्यात्स्नापिता पूजिता स्तुता ॥ अनिष्टानि च सर्वाणि नाशयेद्धर्मपुत्रिका ॥३५॥ अपुत्रो लभते पुत्रान्नि
र्धनो धनवान्भवेत् ॥ राज्यार्थी लभते राज्यं विद्यार्थी लभते च ताम् ॥३६॥ श्रियोर्थी लभते लक्ष्मीं भार्यार्थी लभते च ताम् ॥ प्रसादाच्च सरस्वत्या
लभते नात्र संशयः ॥ ३७ ॥ अन्ते च परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ प्राप्नोति पुरुषो नित्यं सरस्वत्याः प्रसादतः ॥ ३८ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये श्रीमातामाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥
॥ ॥ रुद्र उवाच ॥ ॥ शृणु स्कन्द महाप्राज्ञ ह्यद्भुतं यत्कृतं मया ॥ धर्मारण्ये महादुष्टो दैत्यः कर्णाटकाभिधः ॥ १ ॥ निभृतं हि समागत्य
दंपत्योर्विघ्नमाचरत् ॥ तं दृष्ट्वा तद्भयाल्लोकः प्रदुद्राव निरन्तरम् ॥ २ ॥ त्यक्त्वा स्थानं गताः सर्वे वणिजो वाडवादयः ॥ मातंगीरूपमास्थाय
श्रीमात्रा त्वनया सुत ॥ ३ ॥ हतः कर्णाटकोनाम राक्षसो द्विजघातकः ॥ तदा सर्वेऽपि वै विप्रा हृष्टास्ते तेन कर्मणा ॥ ४ ॥ स्तुवंति पूजयंति
स्म वणिजो भक्तितत्पराः ॥ वर्षेवर्षे प्रकुर्वंति श्रीमातापूजनं शुभम् ॥ ५ ॥ शुभकार्येषु सर्वेषु प्रथमं पूजयेत्तु ताम् ॥ न स विघ्नं प्रपश्येत तदाप्रभृति
पुत्रक ॥ ६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ दुष्टो महादैत्यः कस्मिन्वंशे समुद्भवः ॥ किं किं तेन कृतं तात सर्वं कथय सुव्रत ॥ ७ ॥
॥ ॥ व्यास उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कर्णाटकविचेष्टितम् ॥ देवानां दानवानां यो दुःसहो वीर्यदर्पितः ॥ ८ ॥ दुष्टकर्मा दुराचारो
महाराष्ट्रो महाभुजः ॥ जित्वा च सकलाँल्लोकांस्त्रैलोक्ये च गतागतः ॥ ९ ॥ यत्र देवाश्च ऋषयस्तत्र गत्वा महासुरः ॥ छद्मना वा बलेनैव विघ्नं
प्रकुरुते नृप ॥१०॥ न वेदाध्ययनं लोके भवेत्तस्य भयेन च ॥ कुर्वते वाडवा देवा न च संध्याद्युपासनम् ॥ ११ ॥ न क्रतुर्वर्तते तत्र न चैव सुरपूज

१ आर्षः प्रयोगः । द्विजे एकस्मिन्—इति पदच्छेदः । २ दुर्गासप्तशत्याख्यं स्तोत्रम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् ॥ देशेदेशे च सर्वत्र ग्रामेग्रामे पुरेपुरे ॥ १२ ॥ तीर्थेतीर्थे च सर्वत्र विघ्नं प्रकुरुतेऽसुरः ॥ परंतु शक्यते नैव धर्मारण्ये प्रवेशितुम् ॥ १३ ॥ भया
च्छक्त्याश्च श्रीमातुर्दानवो विक्लवस्तदा ॥ केनोपायेन तत्रैव गम्यते त्विति चिंतयन् ॥ १४ ॥ विघ्नं करिष्ये हि कथं ब्राह्मणानां महात्मनाम् ॥
वेदाध्ययनकर्तॄणां यज्ञे कर्माधितिष्ठताम् ॥ १५ ॥ वेदाध्ययनजं शब्दं श्रुत्वा दूरात्स दानवः ॥ विव्यथे स यथा राजन्वज्राहत इव द्विपः ॥ १६ ॥
निःश्वासान्मुमुचे रोषाद्दंतैर्दंतांश्च घर्षयन् ॥ दशमानो निजावोष्ठौ पेषयंश्च करावुभौ ॥ १७ ॥ उन्मत्तवद्विचरत इतश्चेतश्च मारिष ॥ सन्निपातस्य
दोषेण यथा भवति मानवः ॥ १८ ॥ तथैव दानवो घोरो धर्मारण्यसमीपगः ॥ भ्रमते दहते चैव दूरादेव भयान्वितः ॥ १९ ॥ विवाहकाले
विप्राणां रूपं कृत्वा द्विजन्मनः ॥ तत्रागत्य दुराधर्षो नीत्वा दांपत्यमुत्तमम् ॥ २० ॥ उत्पपात महीपृष्ठाद्गगने सोऽसुराधमः ॥ स्वयं च रमते
पापो द्वेषाज्जातिस्वभावतः ॥ २१ ॥ एवं च बहुशःसोऽथ धर्मारण्याच्च दंपती ॥ गृहीत्वा कुरुते पापं देवानामपि दुःसहम् ॥ २२ ॥ विघ्नं करोति
दुष्टोऽसौ दंपत्योः सततं भुवि ॥ महाघोरतरं कर्म कुर्वंस्तस्मिन्पुरे वरे ॥ २३ ॥ तत्रोद्विग्ना द्विजाः सर्वे पलायंते दिशो दश ॥ गताः सर्वे भूमिदेवा
स्त्यक्त्वा स्थानं मनोरमम् ॥ २४ ॥ यत्रयत्र महत्तीर्थं तत्रतत्र गता द्विजाः ॥ उद्वसं तत्पुरं जातं तस्मिन्काले नृपोत्तम ॥ २५ ॥ न वेदाध्ययनं
तत्र न च यज्ञः प्रवर्तते ॥ मनुजास्तत्र तिष्ठंति न कर्णाटभयार्दिताः ॥ २६ ॥ द्विजाः सर्वे ततो राजन्वणिजश्च महायशाः ॥ एकत्र मिलिताः सर्वे
वक्तुं मंत्रं यथोचितम् ॥ २७॥ कर्णाटस्य वधोपायं मंत्रयंति द्विजर्षभाः ॥ विचार्यमाणे तैर्दैवाद्वाग्जाता चाशरीरिणी ॥ २८ ॥ आराधयत श्रीमातां
सर्वदुःखापहारिणीम् ॥ सर्वदैत्यक्षयकरीं सर्वोपद्रवनाशनीम् ॥ २९ ॥ तच्छ्रुत्वा वाडवाः सर्वे हर्षव्याकुललोचनाः ॥ श्रीमातां तु समागत्य
गृहीत्वा बलिमुत्तमम् ॥ ३० ॥ मधु क्षीरं दधि घृतं शर्करा पञ्चधारया ॥ धूपं दीपं तथा चैव चंदनं कुसुमानि च ॥ ३१ ॥ फलानि विविधान्येव
गृहीत्वा वाडवा नृप ॥ धान्यं तु विविधं राजन्भक्तापूपा घृताचिताः ॥ ३२ ॥ कुल्माषा वटकाश्चैव पायसं घृतमिश्रितम् ॥ सोहालिका दीपि
काश्च सार्द्राश्च वटकास्तथा ॥ ३३ ॥ राजिकाभिश्च संलिप्ता नवच्छिद्रसमन्विताः ॥ चंद्रबिंबप्रतीकाशा मण्डकास्तत्र कल्पिताः ॥ ३४ ॥ पञ्चा
मृतेन स्नपनं कृत्वा गन्धोदकेन च ॥ धूपैर्दीपैश्च नैवेद्यैस्तोषयामासुरीश्वरीम् ॥ ३५ ॥ नीराजनैः सकर्पूरैः पुष्पैर्दीपैः सुचंदनैः ॥ श्रीमाता
तोषिता राजन्सर्वोपद्रवनाशनी ॥ ३६ ॥ श्रीमाता च जगन्माता ब्राह्मी सौम्या वरप्रदा ॥ रूपत्रयं समास्थाय पालयेत्सा जगत्रयम् ॥ ३७ ॥

१ आर्षत्वाद्दाबन्तो बोध्यः । श्रीमातरम्—इत्यपेक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयीरूपेण धर्मात्मन्नक्षते सत्यमंदिरम् ॥ जितेंद्रिया जितात्मानो मिलितास्ते द्विजोत्तमाः ॥ ३८ ॥ तैः सर्वैरर्चिता माता चंदनाद्येन तोषिता ॥
स्तुतिमारेभिरे तत्र वाङ्मनःकायकर्मभिः ॥ एकचित्तेन भावेन ब्रह्मपुत्र्याः पुरः स्थिताः ॥ ३९ ॥ ॥ विप्रा ऊचुः ॥ ॥ नमस्ते ब्रह्मपुत्र्यास्तु
नमस्ते ब्रह्मचारिणि ॥ नमस्ते जगतां मातर्नमस्ते सर्वगे सदा ॥ ४० ॥ क्षुन्निद्रा त्वं तृषा त्वं च क्रोधतंद्रादयस्तथा ॥ त्वं शांतिस्त्वं रतिश्चैव त्वं
जया विजया तथा ॥ ४१ ॥ ब्रह्मविष्णुमहेशाद्यैस्त्वं प्रपन्ना सुरेश्वरि ॥ सावित्री श्रीरुमा चैव त्वं च माता व्यवस्थिता ॥ ४२ ॥ ब्रह्मविष्णु
सुरेशानास्त्वदाधारे व्यवस्थिताः ॥ नमस्तुभ्यं जगन्मातर्धृतिपुष्टिस्वरूपिणि ॥ ४३ ॥ रतिः क्रोधा महामाया छाया ज्योतिःस्वरूपिणि ॥ सृष्टि
स्थित्यंतकृद्देवि कार्यकारणदा सदा ॥४४॥ धरा तेजस्तथा वायुः सलिलाकाशमेव च ॥ नमस्तेऽस्तु महाविद्ये महाज्ञानमयेऽनघे ॥ ४५ ॥ ह्रींकारी
देवरूपा त्वं क्लींकारी त्वं महाद्युते ॥ आदिमध्यावसाना त्वं त्राहि चास्मान्महाभयात् ॥ ४६ ॥ महापापो हि दुष्टात्मा दैत्योऽयं बाधतेऽधुना ॥
त्राणरूपा त्वमेका च अस्माकं कुलदेवता ॥ ४७॥ त्राहित्राहि महादेवि रक्षरक्ष महेश्वरि ॥ हनहन दानवं दुष्टं द्विजातीनां विघ्नकारकम् ॥४८॥
एवं स्तुता तदा देवी महामाया द्विजन्मभिः ॥ कर्णाटस्य वधार्थाय द्विजातीनां हिताय च ॥ प्रत्यक्षा साऽभवत्तत्र वरं ब्रूहीत्युवाच ह ॥ ४९ ॥
॥ ॥ श्रीमातोवाच ॥ ॥ केन वै त्रासिता विप्राः केन वोद्वेजिताः पुनः ॥ तस्याहं कुपिता विप्रा नयिष्ये यमसादनम् ॥५०॥ क्षीणायुषं नरं वित्त
येन यूयं निपीडिताः ॥ ददामि वो द्विजातिभ्यो यथेष्टं वक्तुमर्हथ ॥५१॥ भक्त्या हि भवतां विप्राः करिष्ये नात्र संशयः ॥५२॥ ॥ द्विजा ऊचुः॥ ॥
कर्णाटाख्यो महारौद्रो दानवो मदगर्वितः ॥ विघ्नं प्रकुरुते नित्यं सत्यमंदिरवासिनाम् ॥५३॥ ब्राह्मणान्सत्यशीलांश्च वेदाध्ययनतत्परान् ॥ द्वेषाद्द्वेष्टि
द्वेषणस्तान्नित्यमेव महामते ॥ वेदविद्वेषणो दुष्टो घातयैनं महाद्युते ॥ ५४ ॥ ॥ व्यास उवाच ॥ ॥ तथेत्युक्त्वा तु सा देवी प्रहस्य कुलदेवता ॥
वधोपायं विचिंत्यास्य भक्तानां रक्षणाय वै ॥ ५५ ॥ ततः कोपपरा जाता श्रीमाता नृपसत्तम ॥ कोपेन भृकुटीं कृत्वा रक्तनेत्रांतलोचनाम् ॥ ५६ ॥
कोपेन महताऽऽविष्टा वसंती पावकं यथा ॥ महाज्वाला मुखान्नेत्रान्नासाकर्णाच्च भारत ॥५७॥ तत्तेजसा समुद्भूता मातंगी कामरूपिणी ॥ काली करा
लवदना दुर्दर्शवदनोज्वला ॥५८॥ रक्तमाल्यांबरधरा मदाघूर्णितलोचना ॥ न्यग्रोधस्य समीपे सा श्रीमाता संश्रिता तदा ॥५९॥ अष्टादशभुजा सा
तु शुभा माता सुशोभना ॥ धनुर्बाणधरा देवी खड्गखेटकधारिणी ॥ ६० ॥ कुठारं क्षुरिकां बिभ्रत्त्रिशूलं पानपात्रकम् ॥ गदां सर्पं च परिघं पिनाकं

१ पादद्वयेऽप्यक्षराधिक्यं छांदसम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैव पाशकम् ॥ ६१ ॥ अक्षमालाधरा राजन्मद्यकुंभानुधारिणी ॥ शक्तिं च मुशलं चोग्रं कर्त्तरीं खर्परं तथा ॥ ६२ ॥ कंटकाढ्यां च बदरीं बिभ्रती
तु महानना ॥ तत्राभवन्महायुद्धं तुमुलं लोमहर्षणम् ॥ ६३ ॥ मातंग्याः सह कर्णाटदानवेन नृपोत्तम ॥ ६४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं
युद्धं समभवत्कथं चैवापवर्तत ॥ जितं केनैव धर्मज्ञ तन्ममाचक्ष्व मारिष ॥ ६५ ॥ ॥ व्यास उवाच ॥ ॥ एकदा शृणु राजेंद्र यज्जातं दैत्यसं
गरे ॥ तत्सर्वं कथयाम्याशु यथावृत्तं हि तत्पुरा ॥ ६६ ॥ प्रणष्टयोषा ये विप्रा वणिजश्चैव भारत ॥ चैत्रमासे तु संप्राप्ते धर्मारण्ये नृपोत्तम ॥ ६७ ॥
गौरीमुद्वाहयामासुर्विप्रास्ते संशितव्रताः ॥ स्वस्थानं सुशुभं ज्ञात्वा तीर्थराजं तथोत्तमम् ॥ ६८ ॥ विवाहं तत्र कुर्वंतो मिलितास्ते द्विजोत्तमाः ॥
कोटिकन्याकुलं तत्र एकत्रासीन्महोत्सवे ॥ धर्मारण्ये महाप्राज्ञ सत्यं सत्यं वदाम्यहम् ॥ ६९ ॥ चतुर्थ्यामपररात्रेऽभ्यंतरतोऽग्निमादधुः ॥
आसनं ब्रह्मणे दत्त्वा अग्निं कृत्वा प्रदक्षिणम् ॥ ७० ॥ स्थालीपाकं च कृत्वाथ कृत्वा वेदीः शुभास्तदा ॥ चतुर्हस्ताः सकलशा नागपाश
समन्विताः ॥ ७१ ॥ वेदमंत्रेण शुभ्रेण मंत्रयंते ततो द्विजाः ॥ चरतां दंपतीनां हि परिवेश्य यथोचितम् ॥ ७२ ॥ ब्रह्मणा सहितास्तत्र वाडवा
स्ते सुहर्षिताः ॥ कुर्वंते वेदनिर्घोषं तारस्वरनिनादितम् ॥ ७३ ॥ तेन शब्देन महता कृत्स्नमापूरितं नभः ॥ तं श्रुत्वा दानवो घोरो वेदध्वनिं द्विजे
रितम् ॥ ७४ ॥ उत्पपातासनात्तूर्णं ससैन्यो गतचेतनः ॥ धावतः सर्वभृत्यास्तं ये चान्ये तानुवाच सः ॥ ७५ ॥ श्रूयतां कुत्र शब्दोऽयं वाडवानां
समुत्थितः ॥ तस्य तद्वचनं श्रुत्वा दैतेयाः सत्वरं ययुः ॥ ७६ ॥ विभ्रांतचेतसः सर्वे इतश्चेतश्च धाविताः ॥ धर्मारण्ये गताः केचित्तत्र दृष्ट्वा द्विजा
तयः ॥ ७७ ॥ उद्गिरंतो हि निगमान्विवाहसमये नृप ॥ सर्वं निवेदयामासुः कर्णाटाय दुरात्मने ॥ ७८ ॥ तच्छ्रुत्वा रक्तताम्राक्षो द्विजद्विट् कोपपू
रितः ॥ अभ्यधावन्महाभाग यत्र ते दंपती नृप ॥ ७९ ॥ खमाश्रित्य तदा दैत्यमायां कुर्वन्स राक्षसः ॥ अहरद्दंपती राजन्सर्वालंकारसंयुतान् ॥
॥ ८० ॥ ततस्ते वाडवाः सर्वे संगता भुवनेश्वरीम् ॥ बुंबारवं प्रकुर्वाणास्त्राहित्राहीति चोचिरे ॥ ८१ ॥ तच्छ्रुत्वा विश्वजननी मातंगी भुवनेश्वरी ॥
सिंहनादं प्रकुर्वाणा त्रिशूलवरधारिणी ॥ ८२ ॥ ततः प्रववृते युद्धं देवीकर्णाटयोस्तथा ॥ ऋषीणां पश्यतां तत्र वणिजां च द्विजन्मनाम् ॥ ८३ ॥
पश्यतामभवद्युद्धं तुमुलं लोमहर्षणम् ॥ अस्त्रैश्चिच्छेद मातंगी मदविह्वलितं रिपुम् ॥ ८४ ॥ सोऽपि दैत्यस्ततस्तस्या बाणेनैकेन वक्षसि ॥ असावपि
त्रिशूलेन घातितः कश्मलं गतः ॥ ८५ ॥ मुष्टिभिश्चैव तां देवीं सोऽपि ताडयतेऽसुरः ॥ सोऽपि देव्या ततः शीघ्रं नागपाशेन यंत्रितः ॥ ८६ ॥ ॥१३४॥
ततस्तेनैव दैत्येन गरुडास्त्रं समादधे ॥ तया नारायणास्त्रं तु संदधे शरपातनम् ॥ ८७ ॥ एवमन्योन्यमाकृष्य युध्यमानौ जयेच्छया ॥ ततः परिघ

१ अभ्याययौ इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादाय आयसं दैत्यपुंगवः ॥ ८८ ॥ मातंगीं प्रति संक्रुद्धो जघान परवीरहा ॥ देवी क्रुद्धा मुष्टिपातैश्चूर्णयामास दानवम् ॥ ८९ ॥
तेन मुष्टिप्रहारेण मूर्च्छितो निपपात ह ॥ ततस्तु सहसोत्थाय शक्तिं धृत्वा करे मुदा ॥ ९० ॥ शतघ्नीं पातयामास तस्या
उपरि दानवः ॥ शक्तिं चिच्छेद सा देवी मातंगी च शुभानना ॥ ९१ ॥ जहासोच्चैस्तु सा सुभ्रूः शतघ्नीं वज्रसन्निभा ॥ एव
मन्योन्यशस्त्रौघैरर्दयंतौ परस्परम् ॥ ९२ ॥ ततस्त्रिशूलेन हतो हृदये निपपात ह ॥ मूर्छां विहाय दैत्योऽसौ मायां कृत्वा च राक्षसीम् ॥ ९३ ॥
पश्यतां तत्र तेषां तु अदृश्योऽभून्महासुरः ॥ पपौ पानं ततो देवी जहासारुणलोचना ॥ ९४ ॥ सर्वत्रगं तं सा देवी त्रैलोक्ये सचराचरे ॥ ९५ ॥
क्व पास्यस्तीति ब्रूते सा ब्रूहि त्वं सांप्रतं हि मे ॥ कर्णाटक महादुष्ट एहि शीघ्रं हि युध्यताम् ॥ ९६ ॥ ततोऽभवन्महायुद्धं दारुणं च भयानकम् ॥
पपौ देवी तु मैरेयं वधार्थं सुमहाबला ॥ ९७ ॥ मातंगी च ततः क्रुद्धा वक्त्रे चिक्षेप दानवम् ॥ ततोऽपि दानवो रौद्रो नासारंध्रेण निर्गतः ॥९८॥
युध्यते स पुनर्दैत्यः कर्णाटो मदपूरितः ॥ ततो देवी प्रकुपिता मातंगी मदपूरिता ॥ ९९ ॥ दशनैर्मथयित्वा च चर्वयित्वा पुनःपुनः ॥ शवास्थि मे
दसा युक्तं मज्जामांसादिपूरितम् ॥ १०० ॥ नखरोमाभिसंयुक्तं प्रक्षिप्य चोदरेऽसुरम् ॥ करेकेण मुखं रुद्धं करेणैकेन नासिकाम् ॥ १ ॥ ततो
महाबलो दैत्यः कर्णरंध्रेण निर्गतः ॥ ततस्तया महादेव्या नाम चक्रे तदा भुवि ॥ २ ॥ कर्णरंध्रप्रसूतोऽयं कर्णाटेति विदुर्बुधाः ॥ पुनर्युद्धार्थं
मायातो दैत्यो हि बलदर्पितः ॥ ३ ॥ गर्जमानोसुरस्तत्र सायुधो युधि संस्थितः ॥ तं दृष्ट्वा दुःसहं दैत्यं विमृश्य च पुनः पुनः ॥ ४ ॥ वधोपायं
हि मातंगी चिंतयामास भारत ॥ यदा चिंतयते[1] देवी मातंगी मदपूरिता[2] ॥ ५ ॥ मायारूपं समास्थाय कर्णाटः कुसुमायुधः ॥ गौरश्चाम्बुजपत्राक्ष
स्तथा षोडशवार्षिकम् ॥ ६ ॥ अभ्येत्य देवीं ब्रूते स्म मां त्वं वरय शोभने ॥ ७ ॥ ॥ श्रीमातोवाच ॥ ॥ साधु चेदं त्वया प्रोक्तं दैत्यराज
सुनिश्चितम् ॥ रूपेण सदृशो नान्यो विद्यते भुवनत्रये ॥ ८ ॥ प्रतिज्ञा मे कृता पूर्वं श्रुता किमसुरोत्तम ॥ ममानुजा शुभा श्यामा विवाहे विप्र
कांक्षिणी ॥ ९ ॥ पित्रा मे स्थापिता दैत्य रक्षार्थं हि द्विजन्मनाम् ॥ केवलं श्यामलांगी सा सर्वलोकहितावहा ॥ ११० ॥ न कश्चिद्वरयेत्क
न्यामित्युक्त्वा स्थापिता तु सा ॥ कथयाशु तव शुभं श्रुत्वोपायं कथं शुभम् ॥ ११ ॥ भगिनी मेऽस्ति दैत्येंद्र श्यामलाह्यपरिग्रहा ॥ तवार्थं
रक्षिता शूर तां च पूर्वेण चोद्वह ॥ १२ ॥ स पिता तां महावीर दास्यते वै शुभामिमाम् ॥ गच्छ त्वं त्रियतां ह्येव श्यामला कोपसंयुता ॥ १३ ॥

१ चिंतयते—अचिंतयत् । २ एतदग्रे 'तदा' इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कर्णाटकः क्रुद्धो गृहीत्वा शक्तिमूर्जिताम् ॥ अभ्यधावत दुष्टात्मा श्यामलानिधनेच्छया ॥१४॥ आगतं चासुरं दृष्ट्वा श्यामला सुमहामनाः॥ विवाहार्थं परं ज्ञात्वाऽभिप्रायं दुष्टचेतसः ॥ १५ ॥ महायुद्धमभूत्तत्र श्यामलाऽसुरवर्ययोः ॥ मासत्रयं ततो राजं श्चाभवत्तुमुलं क्षितौ ॥ १६ ॥ माघे कृष्णतृतीयायां धर्मारण्ये महारणे ॥ मध्याह्नसमये भूप कर्णाटाख्यो निपातितः ॥ १७ ॥ कार्णाटिः पतितस्तत्र यत्र देव्या निपातितः ॥ तच्छैल शृंगप्रतिमं पपात शिर उत्तमम् ॥ १८ ॥ चचाल सकला पृथ्वी साब्धिद्वीपा सपर्वता ॥ ततो विप्राः प्रहृष्टास्ते जय मातरुदैरयन् ॥ १९ ॥ जगु र्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ततोत्सवं प्रकुर्वन्तो गीतं नृत्यं शुभप्रदम् ॥ २० ॥ पायसैर्वटकैश्चैव नैवेद्यैर्मोदकैस्तथा ॥ तुष्टुवुःशुभवाण्या ते स्थाने, मोटेरके वरे ॥ २१ ॥ श्रीमती पूजिता सा च सुतसौख्यधनप्रदा ॥ महोत्सवे च संप्राप्ते मातंगीपूजनं हितम् ॥ २२ ॥ ये ऽर्चयंति स्थापयित्वा धनपुत्रार्थसिद्धये ॥ सुखं कीर्तिं तथायुष्यं यशः पुण्यं समाप्नुयुः ॥ २३ ॥ व्याधयो नाशमायांति चादित्याद्या ग्रहाः शुभाः ॥ भूतवेतालशाकिन्यो जंभाद्याः पीडयन्ति न ॥ २४ ॥ न जायते तथा क्वापि प्रेतादीनां प्रपीडनम् ॥ ततो विप्राः प्रहृष्टाश्च स्तुतिं कर्तुं समुद्यताः ॥ २५ ॥ श्रीमातां चैव शक्तीश्च मातंगीमस्तुवंस्तदा ॥ श्यामलां च महादेवीं हर्षेण महतायुता ॥ २६ ॥ ॥ ॥ विप्रा ऊचुः ॥ ॥ मातस्त्वमेवमस्माकं रक्षिका स्थानके भव ॥ दंपतीनां हितार्थाय यथा नोद्विजते द्विजाः ॥ २७ ॥ ॥ मातंग्युवाच ॥ ॥ तुष्टाहं वो महाभागाः स्तवेनानेन वो द्विजाः ॥ वरयध्वं वरं यद्वो मनसा समभीप्सितम् ॥ २८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ दास्यामहे बलिं देवि यस्ते मनसि वर्तते ॥ अस्माकं चैव दम्पत्यो रक्षार्थं त्वं स्थिरा भव ॥ २९ ॥ ॥ देव्युवाच ॥ ॥ स्वस्थाः संतु द्विजाः सर्वे न च पीडा भविष्यति ॥ मयि स्थितायां दुर्धर्षा दैत्या येऽन्ये च राक्षसाः ॥१३०॥ शाकिनीभूतप्रेताश्च जंभाद्याश्च ग्रहास्तथा ॥ शाकिन्यादिग्रहाश्चैव सर्पा व्याघ्रादयस्तथा ॥ १३१ ॥ पीडयिष्यंति न क्वापि स्थितायां मयि शासने ॥ महोत्सवं यः कुरुते विवाहे समुपस्थिते ॥ ३२ ॥ दंपत्यो श्च हितार्थं हि पूजयेन्मां सदा नरः ॥ तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ ३३ ॥ नाधयो व्याधयश्चैव न क्लेशो न च संभ्रमः ॥ प्राप्यते परमं सौख्यं यशः पुण्यं धनं सदा ॥ नाकाले मरणं तस्य वातपित्तादिकं नहि ॥ ३४ ॥ ॥ विप्रा ऊचुः ॥ ॥ केन वा विधिना पूजा नैवेद्यं कीदृशं भवेत् ॥ धूपं च कीदृशं मातः कथं पूजां प्रकल्पयेत् ॥ ३५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ श्रूयतां मे वचो विप्रा पत्रे चैव हिरण्मये ॥ लिखित्वा पूजयेद्यस्तु चिरायुर्दंपती भवेत् ॥ ३६ ॥ अथवा राजते पत्रे कांसपत्रेऽथवा पुनः ॥ अष्टादशभुजा देवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनेन विचर्चिता ॥ ३७ ॥ शूर्पं शरैः करे श्वानं पद्मं तु परमं पुनः ॥ कर्त्तरीं कारयेदेकां तूणीरं च धनूंषि च ॥ ३८ ॥ चर्म पाशं मुद्गरं च कांसालं तोमरं तथा ॥ शंखं चक्रं गदां शुभ्रां मुशलं परिघं शुभम् ॥ ३९ ॥ खट्वांगं बदरीं चैव अंकुशं च मनोरमम् ॥ अष्टादशायुधैरेभिः संयुता भुवनेश्वरी ॥ १४० ॥ लिखेत्सकुंडलां देवीं बाहुनूपुरभूषिताम् ॥ केयूरमुक्तापद्मैश्च मुंडमालाभिरन्विताम् ॥ ४१ ॥ मातृकाक्षरपरिवृतामंगुलीयकसंयुताम् ॥ नानाभरणशोभाढ्यां लिखित्वा भुवनेश्वरीम् ॥ ४२ ॥ मातंगीमिति विख्यातां प्रतिष्ठार्थं द्विजोत्तमाः ॥ चन्दनेन च हृद्येन पुष्पैश्चैव प्रपूजयेत् ॥ ४३ ॥ यक्षकर्दममानीय मातंगीं पूजयेत्सुधीः ॥ घृतेन बोधयेद्दीपं सप्तवर्तियुतं शुभम् ॥ ४४ ॥ धूपयेद्गुग्गुलेनाथ साज्येनातिसुगंधिना ॥ नालिकेरेण शुभ्रेण दद्यादर्घं च दंपती ॥ ४५ ॥ प्रदक्षिणाः प्रकुर्वीत चतुरः सुमनोरमम् ॥ वस्त्रांशुकं गुंठयित्वा अग्रे कृत्वा च दंपती ॥ ४६ ॥ प्रोक्षिणीकृत्य मातंग्याः प्राश्य माध्वीकमुत्तमम् ॥ गीतवादित्रनिर्घोषैर्मातंगीं पूजयेत्सुधीः ॥ ४७ ॥ सुवासिनीस्तु तद्रूपा मातंगीसंभवा इति ॥ नृत्यंती दम्पती चाग्रे सर्वोपद्रवशांतये ॥ ४८ ॥ नैवेद्यं विविधान्नेन अष्टादशविधं शुभम् ॥ वटकापूपिकाः शुभ्राः क्षीरं शर्करया युतम् ॥ ४९ ॥ बल्लाकरं वरं यूपा क्षिप्तकुल्माषकं तथा ॥ सोहालिका भिन्नवटा लाप्सिका पद्मचूर्णकम् ॥ १५० ॥ शैवेया विमलास्तत्र पर्पटाः शालकादयः ॥ पूरणं तस्य मासस्य कुर्याच्छुभ्रं मनोरमम् ॥ ५१ ॥ राजमाषाः सूपचिताः कल्पयेत्तत्र दंपती ॥ फेणिका रोपिकास्तत्र कुर्याच्चैव मनोरमाः ॥ ५२ ॥ एतान्यष्टादशान्यानि पक्वान्नानि प्रकल्पयेत् ॥ आज्यशर्करायुक्तानि युक्तानि शाकसंचयैः ॥ ५३ ॥ रात्रौ जागरणं कार्यं सुवासिनीं च पूजयेत् ॥ मुखावलोकनं चाज्ये कुर्वीयातां च दम्पती ॥ ५४ ॥ परस्परं हि कुर्वीत उत्पातपरिशांतये ॥ एवंविधं मयाख्यातं मातंगीपूजनं शुभम् ॥ ५५ ॥ न पूजयति यो मूढस्तस्य विघ्नं करोति सा ॥ दंपत्योर्मरणं चाथ धननाशं महाभयम् ॥ ५६ ॥ क्लेशं रोगं तथा वह्नेः प्रादुर्भावं प्रपश्यति ॥ एतस्मात्कारणाद्विप्रा मातंगीं पूजयेत्सुधीः ॥ ५७ ॥ दंपतीनां च सर्वेषांद्विजातीनां च शासने ॥ वणिजां च महादेवी निर्विघ्नं कुरुते सदा ॥ ५८ ॥ तथेति चैव तैरुक्ते पुनर्वचनमब्रवीत् ॥ श्रूयतां ब्राह्मणाः सर्वे विवाहादिमहोत्सवम् ॥ ५९ ॥ मदीयवचनं श्रुत्वा तथा कुरुत वै विधिम् ॥ विवाहकाले संप्राप्ते दंपत्योः सौख्यहेतवे ॥ १६० ॥ निर्विघ्नार्थं तु कर्तव्यं निजैश्च सह सेवकैः ॥ अंजनं नयने कुर्यात्संबंधिनां च सर्वशः ॥ ६१ ॥ भ्रूमध्यात्तु प्रकर्त्तव्यमर्द्धचंद्रसमाकृति ॥ बिंदुं तु कारयेद्विप्रास्तस्योपरि मनोहरम् ॥ ६२ ॥ एवं कृते तदा विप्राः शांतिर्भवति नान्यथा ॥ पुत्रवृद्धिकरं चैतत्तिलकं चार्द्धबिंबकम् ॥ सर्वविघ्नहरं सर्वदौःस्थ्यव्याधिविनाशनम् ॥ ६३ ॥ ॥ व्यास उवाच ॥ ॥ ततः शांताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजाः सर्वा धर्मारण्ये नराधिप ॥ प्रसादाच्चैव मातङ्ग्या देव्या वै सत्यमंदिरे ॥६४॥ ततो हृष्टहृदा विप्राः पुपूजुस्ते विधेः सुताम् ॥ मातंग्याश्च प्रक
र्तव्यं वर्षेवर्षे च पूजनम् ॥ ६५ ॥ माघासिते तृतीयायां भक्ष्यभोज्यादिभिस्तथा ॥ कर्णाटस्य तथोत्पत्तिः पुनर्जाता तु भूतले ॥ ६६ ॥ भयाच्चैव
हि तत्स्थानं त्यक्त्वा याम्यमगात्ततः ॥ गच्छमानस्तदा दैत्यो यक्ष्मरूपो ह्यभाषत ॥६७॥ श्रूयतां भो द्विजाः सर्वे धर्मारण्यनिवासिनः ॥ वणिजश्च
महच्चेदं मद्वाक्यं परिपाल्यताम् ॥ ६८ ॥ माघमासे हि मत्प्रीत्या निर्विघ्नार्थं सदा भुवि ॥ त्रिदलेन च धान्येन मूलकेन विशेषतः ॥ ६९ ॥ तिल
तैलेन वा कुर्यात्पुरुषो नियतव्रतः ॥ एकाशनं हि कुरुते यक्ष्मप्रीत्यै निरंतरम् ॥ १७० ॥ आबालयौवनेनैव वृद्धेनापीह सर्वदा ॥ वर्षेवर्षे प्रकर्त्त
व्यं यक्ष्मणो व्रतमुत्तमम् ॥ ७१ ॥ यस्मिन्गृहे हि यावच्च पुरुषाकाररूपिणः ॥ तस्याह्वयं प्रकुर्युस्त एकभक्तरताः सदा ॥ ७२ ॥ बालस्यार्थे तु
जननी कुरुते व्रतमुत्तमम् ॥ पिता वाप्यथवा भ्राता यन्निमित्तं व्रतं चरेत् ॥ ७३ ॥ न च तस्य भयं क्वापि न व्याधिर्नच बंधनम् ॥ भर्तुर्निमित्ते
स्त्री कुर्यादशक्ते त्वितरेण च[1] ॥ ७४ ॥ एवं समादिशन्दैत्यः सत्यमंदिरमुत्सृजन् ॥ गतोऽसौ याम्यदिग्भाग उदधेस्तीर उत्तमे ॥ ७५ ॥ विपुलं देह
मासाद्य कर्णाटः स नराधिप ॥ स्वनाम्ना चैव तं देशं स्थापयामास चोत्तमम् ॥७६॥ यस्मिंश्च सर्ववस्तूनि धनधान्यानि भूरिशः ॥ कर्णाटदेशं तं
राजन्परिवार्य चिरं स्थितः ॥७७॥ धर्मारण्यकथां पुण्यां कथितां नरसत्तम ॥ श्रीमातुश्चैव माहात्म्यं शृण्वंति श्रावयंति ये ॥ ७८ ॥ तेषां कुले कदा
चित्तु अरिष्टं नैव जायते ॥ अपुत्रो लभते पुत्रान्धनहीनस्तु संपदः ॥ आयुरारोग्यमैश्वर्यं श्रीमातुश्च प्रसादतः ॥ १७९ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये मातंगीकर्णाटकोपाख्यानवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ ॥
॥ ॥ व्यास उवाच ॥ ॥ इन्द्रसरे नरः स्नात्वा दृष्ट्वा चेंद्रेश्वरं शिवम् ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥
केन चादौ निर्मितं तत्तीर्थं सर्वोत्तमोत्तमम् ॥ यथावद्वर्णय त्वं मे भगवन्द्विजसत्तम ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ इन्द्रेणैव महाराज तपस्तप्तं
सुदुष्करम् ॥ ग्रामादुत्तरदिग्भागे शतवर्षाणि तत्र वै ॥ ३ ॥ शिवोद्देशं महाघोरमेकांगुष्ठेन भारत ॥ ऊर्द्ध्वबाहुर्महातेजाः सूर्यस्याभिमुखोऽभवत् ॥
॥ ४ ॥ वृत्रस्य वधतो ज्ञातं यत्पापं तस्य नुत्तये ॥ एकाग्रः प्रयतो भूत्वा शिवस्याराधने रतः ॥ ५ ॥ तपसा च तदा शंभुस्तोषितः शशिशे
खरः ॥ तत्राऽऽजगाम जटिलो भस्मांगो वृषभध्वजः ॥ ६ ॥ खट्वांगी पंचवक्त्रश्च दशबाहुस्त्रिलोचनः ॥ गंगाधरो वृषारूढो भूतप्रेतादिवेष्टितः ॥ ७ ॥

१ कारयितव्यामिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुप्रसन्नः सुरश्रेष्ठः कृपालुर्वरदायकः ॥ तदा हृष्टमना देवो देवेन्द्रमिदमूचिवान् ॥ ८ ॥ ॥ हर उवाच ॥ ॥ यत्त्वं याचयसे देव तदहं प्रद दामि ते ॥ ९ ॥ ॥ इन्द्र उवाच ॥ ॥ यदि तुष्टोसि देवेश कृपासिंधो महेश्वर ॥ ब्रह्महत्या हि मां देव उद्वेजयति नित्यशः ॥ १० ॥ वृत्रासुरस्य हनने जातं पापं सुरोत्तम ॥ तत्पापं नाशय विभो मम दुःखप्रदं सदा ॥ ११ ॥ ॥ हर उवाच ॥ ॥ धर्मारण्ये सुरपते ब्रह्महत्या न पीडयेत् ॥ हत्या गवां द्विजातीनां बालस्य योषितामपि ॥ १२ ॥ वचनान्मम देवेंद्र ब्रह्मणः केशवस्य च ॥ यमस्य वचनाज्जिष्णो हत्या नैवात्र तिष्ठति ॥ प्रविश्य त्वं महाराज अतोत्र स्नानमाचर ॥ १३ ॥ ॥ इन्द्र उवाच ॥ ॥ यदि त्वं मम तुष्टोऽसि कृपासिंधो महेश्वर ॥ मन्नाम्ना च महादेव स्थापितो भव शंकर ॥ १४ ॥ तथेत्युक्त्वा महादेवः सुप्रसन्नो हरस्तदा ॥ दर्शयामास तत्रैव लिंगं पापप्रणाशनम् ॥ १५ ॥ कूर्मपृष्ठात्समुत्पाद्य आत्मयोगेन शंभुना ॥ स्थितस्तत्रैव श्रीकण्ठः कालत्रयविदो विदुः ॥ १६ ॥ वृत्रहत्यासमुत्रस्तदेवराजस्य सन्निधौ ॥ इन्द्रेश्वरस्तदा तत्र धर्मा रण्ये स्थितो नृप ॥ १७ ॥ सर्वपापविशुद्ध्यर्थं लोकानां हितकाम्यया ॥ इन्द्रेश्वरं तु राजेंद्र पुष्पधूपादिकैः सदा ॥ १८ ॥ पूजयेच्च नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ अष्टम्यां च चतुर्दश्यां माघमासे विशेषतः ॥ १९ ॥ सर्वपापविशुद्ध्यर्थं शिवलोके महीयते ॥ नीलोत्सर्गं तु यो मर्त्यः करोति च तदग्रतः ॥ २० ॥ उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥ सांगरुद्रजपं यस्तु चतुर्दश्यां करोति वै ॥ २१ ॥ सर्वपापविशुद्धात्मा लभते परमं पदम् ॥ २२ ॥ सौवर्णनयनं कृत्वा मध्ये रत्नसमन्वितम् ॥ यो ददाति द्विजातिभ्य इन्द्रतीर्थे तथोत्तमे ॥ २३ ॥ अन्धता न भवे त्तस्य जन्मानि षष्टिसंख्यया ॥ निर्मलत्वं सदा तेषां नयनेषु प्रजायते ॥ महारोगास्तथा चान्ये स्नात्वा यांति तदग्रतः ॥ २४ ॥ पूजिते चैकचित्ते न सर्वरोगात्प्रमुच्यते ॥ स्नात्वा कुण्डे नरो यस्तु संतर्पयति यः पितॄन् ॥ २५ ॥ तस्य तृप्ताः सदा भूप पितरश्च पितामहाः ॥ ये वै ग्रस्ता महारोगैः कुष्ठाद्यैश्चैव देहिनः ॥ २६ ॥ स्नानमात्रेण संशुद्धा दिव्यदेहा भवंति ते ॥ ज्वरादिकष्टमापन्ना नराः स्वात्महिताय वै ॥ २७ ॥ स्नान मात्रेण संशुद्धा दिव्यदेहा भवंति ते ॥ स्नात्वा च पूजयेद्देवं मुच्यते ज्वरबन्धनात् ॥ २८ ॥ एकाहिकं द्व्याहिकं च चातुर्थं वा तृतीयकम् ॥ विषमज्वरपीडा च मासपक्षादिकं ज्वरम् ॥ २९ ॥ इन्द्रेश्वरप्रसादाच्च नश्यते नात्र संशयः ॥ विज्वरो जायते नूनं सत्यंसत्यं च भूपते ॥ ३० ॥ वन्ध्या च दुर्भगा नारी काकवन्ध्या मृतप्रजा ॥ मृतवत्सा महादुष्टा स्नात्वा कुण्डे शिवाग्रतः ॥ पूजयेदेकचित्तेन स्नानमात्रेण शुद्ध्यति ॥ ३१ ॥ एवंविधांश्च बहुशो वरान्दत्त्वा पिनाकधृक् ॥ गतोऽसौ स्वपुरं पार्थ सेव्यमानः सुरासुरैः ॥ ३२ ॥ ततः शक्रो महातेजा गतो वै स्वपुरं प्रति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयंतेनापि तत्रैव स्थापितं लिंगमुत्तमम् ॥ ३३ ॥ जयंतस्य हरस्तुष्टस्तस्मिँल्लिंगे स्तुतः सदा ॥ त्रिकालं पुत्रसंयुक्तः पूजनार्थं सुरेश्वरः ॥ ३४ ॥
आयाति च महाबाहो त्यक्त्वा स्थानं स्वकं हि वै ॥ एतत्सर्वं समाख्यातं सर्वसौख्यप्रदायकम् ॥ ३५ ॥ इन्द्रेश्वरे तु यत्पुण्यं जयंतेशस्य पूज
नात् ॥ तदेवाप्नोति राजेन्द्र सत्यंसत्यं न संशयः ॥ ३६ ॥ स्नात्वा कुण्डे महाराज संपूज्यैकाग्रमानसः ॥ सर्वपापविशुद्धात्मा इन्द्रलोके
महीयते ॥ ३७ ॥ यः शृणोति नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ सर्वान्कामानवाप्नोति जयंतेशप्रसादतः ॥ ३८ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये इन्द्रेश्वरजयंतेश्वरमहिमवर्णनोनामैकोनविंशोऽध्यायः
॥ १९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ अतः परं प्रवक्ष्यामि शिवतीर्थमनुत्तमम् ॥ यत्रासौ शंकरो देवः पुनर्जन्मधरोऽभवत् ॥ १ ॥
कीलितो देवदेवेशः शंकरश्च त्रिलोचनः ॥ गिरिजया महाभाग पातितो भूमिमंडले ॥ २ ॥ छलितो मुह्यमानस्तु दिवारात्रिं न वेत्ति च ॥
पुंस्त्रीनपुंसकाश्चैव जडीभूतस्त्रिलोचनः ॥ ३ ॥ कल्पांतमिव संजातं तदा तस्मिंश्च कीलिते ॥ पार्वत्या सहसा तस्य कृतं कीलनकं तदा ॥ ४ ॥ ॥
युधिष्ठिर उवाच ॥ ॥ एतदाश्चर्यमतुलं वचनं यत्त्वयोदितम् ॥ यो गुरुः सर्वदेवानां योगिनां चैव सर्वदा ॥ ५ ॥ पार्वत्या कीलितः कस्मा
न्नष्टवृत्तिः शिवः कथम् ॥ कारणं कथ्यतां तत्र परं कौतूहलं हि मे ॥ ६ ॥ ॥ व्यास उवाच ॥ ॥ मन्त्रौघा विविधा राजञ्छंकरेण प्रकाशिताः ॥
पार्वत्यग्रे महाराज अथर्वणोपवेदजाः ॥ ७ ॥ शाकिनी डाकिनी चैव काकिनी हाकिनी तथा ॥ एकिनी लाकिनी ह्येताः षट्भेदास्तत्र कीर्ति
ताः ॥ ८ ॥ बीजान्युद्धृत्य वै ताभ्यो माला चैकवृता कृता ॥ शंभुना कथिता चैव पार्वत्यग्रे नृपोत्तम ॥ ९ ॥ तैश्चैव अष्टा भवति मंत्रोद्धारः
कृतस्तु सा ॥ साधयेत्सा महादुष्टा शाकिनी प्रमदानवे ॥ १० ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ प्रकाशितास्त्वया नाथ भेदा ह्येते षडेव हि ॥ षड्विधाः
शक्तयो नाथ अगम्यायोगमालिनीः ॥ षड्विधोक्तं त्वयैकेन कूटात्कृतं वदस्व माम् ॥ ११ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ अप्रकाशो महादेवि
देवासुरैस्तु मानवैः ॥ १२ ॥ ॥ पार्वत्युवाच ॥ ॥ नमस्ते सर्वरूपाय नमस्ते वृषभध्वज ॥ जटिलेश नमस्तुभ्यं नीलकण्ठ नमोस्तुते ॥
॥ १३ ॥ कृपासिंधो नमस्तुभ्यं नमस्ते कालरूपिणे ॥ एतैश्च बहुभिर्वाक्यैः कोमलैः करुणानिधिम् ॥ १४ ॥ तोषयित्वाद्रितनया दण्डवत्प्रणि
पत्य च ॥ जग्राह पादयुगलं तां प्रोवाच दयापरः ॥ १५ ॥ किमर्थं स्तूयसे भद्रे याच्यतां मनसीप्सितम् ॥ १६ ॥ ॥ पार्वत्युवाच ॥ ॥
समाहारं च सध्यानं कथयस्व सविस्तरम् ॥ असंदेहमशेषं च यद्यहं वल्लभा तव ॥ १७ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ न प्रकाश्यं त्वया देवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहारोद्भवं फलम् ॥ सर्वं तत्त्वमहं वक्ष्ये मंत्रकूटाद्यमेव हि ॥ १८ ॥ मायाबीजं तु सर्वेषां कूटानां हि वरानने ॥ सर्वेषां मध्यमो वर्णो बिंदुना दादिशोभितः ॥ १९ ॥ वह्निबीजं सवातं च कूर्मबीजसमन्वितम् ॥ आदित्यप्रभवं बीजं शक्तिबीजोद्भवं सदा ॥ २० ॥ एतत्कूटं चाद्यबीजं द्वितीयं च विभोर्मतम् ॥ तृतीयं चाग्निबीजं तु संयुक्तं बिंदुनेंदुना ॥ २१ ॥ चतुर्थं युक्तं शेषेण ब्रह्मबीजमृषिस्तथा ॥ पंचमं कालबीजं च षष्ठं पार्थिव बीजकम् ॥ २२ ॥ सप्तमे चाष्टमे बाह्यं नृसिंहेन समन्वितम् ॥ नवमे द्वितीयमेकं च दशमे चाष्टकूटकम् ॥ २३ ॥ विपरीतं तयोर्बीजं रुद्राक्षे वर चारिणि ॥ चतुर्दशे चतुर्थ्यर्थं पृथ्वीबीजेन संयुतम् ॥ २४ ॥ कूटाः शेषाक्षराः केचिद्रक्षिता मेनकात्मजे ॥ सा पपात यदोर्व्यां हि शिवपत्नी तदा नृप ॥ २५ ॥ रामेणाश्वासिता तत्र प्रहसंस्त्रिपुरांतकः ॥ भद्रे यस्मात्त्वया पत्रं जंत्रशक्तिर्भविष्यति ॥ २६ ॥ मारणे मोहने वश्ये आकर्षणे च क्षोभणे ॥ यंयं कामयते नूनं ततत्सिद्धिर्भविष्यति ॥ २७ ॥ इति श्रुत्वा तदा देवी दुष्टचित्ता शुचिस्मिता ॥ कूटशेषास्ततो वीराःप्रोक्तास्तस्यै तु शंभुना ॥२८॥ उवाचचकृपासिंधुः साधयस्व यथाविधि ॥ कैलासात्तु हरस्तत्र धर्मारण्यं गतो भृशम् ॥२९॥ ज्ञात्वा देवी ययौ तत्र यत्रासौ वृषभध्वजः ॥ तत्क्षणात्पतितो भूमौ धर्मारण्ये नृपोत्तम ॥३०॥ जटा चंद्रोरगाः शूलं वृषभाद्यायुधानि वै ॥ मुंडमाला च कौपीनं कपालं ब्रह्मणस्तु वै ॥३१॥ गंता गणाश्च सर्वत्र भूतप्रेता दिशो दश ॥ विसंज्ञं च स्वमात्मानं ज्ञात्वा देवो महेश्वरः ॥ ३२ ॥ स्वेदजास्तु समुत्पन्ना गणाः कूटादयस्तथा ॥ पंचकूटान्समुत्पाद्य तस्मात्तदाद्यमूलिने ॥ ३३ ॥ साधकास्ते महाराज जपहोमपरायणाः ॥ प्रेतासनास्तु ते सर्वे कालकूटोपरि स्थिताः ॥ ३४ ॥ कथयंति स्वमात्मानं येन मोक्षः पिनाकिनः ॥ ततः कष्टसमाविष्टा गौरी वह्निभयातुरा ॥ ३५ ॥ सभाजितःशिवस्तैश्च गौरी ह्रीणा त्वधोमुखी ॥ तपस्तेपे च तत्रस्था शंकरादेशकारिणी ॥ ३६ ॥ पंचाग्निसेवनं कृत्वा धूम्रपानमधोमुखी ॥ कूटाक्षरैः स्तुतस्तैस्तु तोषितो वृषभध्वजः ॥ ३७ ॥ धराक्षेत्रमिदं राजन्पापघ्नं सर्वकामदम् ॥ देवमज्जनकं शुभ्रं स्थानकेऽस्मिन्विराजते ॥ ३८ ॥ आश्विने कृष्णपक्षे च चतुर्दश्या दिने नृप ॥ तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते ॥ ३९ ॥ पूजयित्वा च देवेशमुपोष्य च विधानतः ॥ शाकिनी डाकिनी चैव वेतालाः पितरो ग्रहाः ॥ ४० ॥ ग्रहा धिष्ण्या न पीडयंते सत्यंसत्यं वरानने ॥ सांगं रुद्रजपं तत्र कृत्वा पापैः प्रमुच्यते ॥ ४१ ॥ नश्यंति त्रिविधा रोगाः सत्यंसत्यं च भूपते ॥ एतत्सर्वं मया ख्यातं देवमज्जनकं शृणु ॥ ४२ ॥ अश्वमेधसहस्रैस्तु कृतैस्तु भूरिदक्षिणैः ॥ तत्फलं समवाप्नोति श्रोता श्रावयिता नरः ॥ ४३ ॥ अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥ आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥ ४४ ॥ मनोवाक्कायजनितं पातकं त्रिविधं च यत् ॥ तत्सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशमायाति स्मरणात्कीर्तनान्नृप ॥ ४९ ॥ धन्यं यशस्यमायुष्पं सुखसंतानदायकम् ॥ माहात्म्यं शृणुयाद्भक्तस सर्वसौख्यान्वितो भवेत् ॥४६॥ सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ सर्वयज्ञैश्च यत्पुण्यं जायते श्रवणान्नृप ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां स[ं]ि तायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये धराक्षेत्रवर्णनं नाम विंशोऽध्यायः ॥ २० ॥ ॥ व्यास उवाच ॥ ॥ तया चोत्पादिता राजञ्छ्रीरा त्कुलदेवताः ॥ १ ॥ भट्टारिकी १तथा छत्रा २ ओविका ३ ज्ञानजा तथा ४ ॥ १ ॥ भद्रकाली च ५ माहेशी ६ सिंहोरी ७ धनमर्दनी ८ गात्रा ९ शांता १० शेषदेवी ११ वाराही १२ भद्रयोगिनी १३ ॥ २ ॥ योगेश्वरी १४ मोहलज्ञा १५ कुलेशी १६ शकुलाचिता १७ तारणी १८ कन कानंदा १९ चामुंडा २० च सुरेश्वरी २१ ॥ ३ ॥ दारभट्टारिकेत्या २२ द्या प्रत्येका शतधा पुनः ॥ उत्पन्नाः शक्तयस्तस्मिन्नानारूपान्विताः शुभाः ॥ अतः परं प्रवक्ष्यामि प्रवराण्यथ देवताः ॥ ४ ॥ औपमन्यवसगोत्रप्रवर ३ गोत्रदेव्यागात्रावसिष्ठ १ भरद्वाज २ इंद्रप्रमदकाश्यपसगो त्रशगोत्रदेव्याज्ञानजा २ प्रवर ३ काश्यपः अवत्सारः २ रैभ्यः ३ मांडव्यसगोत्र ३ गोत्रजा दारभदारिका ३ प्रवर ५ भार्गवच्यव नाअत्रिअवी जमदग्निः ५ कुशिकसगोत्रऽजातारणी ६ महाबलाप्रवर ३ विश्वामित्रदेवराजउद्दालक ६ शौनकसगोत्र ७ गोत्रदेवी ७ शांता प्रवर ३ भार्ग वाणैनहोत्रगार्त्समद ३ कृष्णात्रेयसगोत्रवीगोत्रदेव्याभद्रयोगिनी ८ प्रवर ३ आत्रेयअर्चनानसश्यावाश्व ३ गार्ग्यायणसगोत्र गोत्रजा शांता प्रवर ५ भार्गवच्यवनआप्नवान्अवीजमदग्निः १० गार्गायणगोत्रगोत्रजाज्ञानजा प्रवर ५ काश्यपअवत्सारशांडिलअसितदेवलगांगेयस गोत्रदेवा शांता द्वारवासिनी प्रवर ३ गार्ग्यगार्गि शंख लिखित १२ पैंग्यसगोत्रजाज्ञानजा शेषलउध प्रवर आंगिरसआंबरीषयौवनाश्व १३ वत्ससगोत्रं गोत्रजाज्ञानजाप्रवर ५ भार्गवच्यावनआप्नवान और्वपुरोधसः १४ वात्ससगोत्रगोत्रजाज्ञानजाप्रवर ५ भार्गवच्यावन आप्नवान् और्वपुरोधसः १५ वात्स्यसगोत्रस्य गोत्रजा शीहरीप्रवर ५ भार्गवच्यावनआप्नुवान् और्वपुरोधसः १६ श्यामायनसगोत्रस्य गोत्रजा शीहरी प्रवर भार्गवच्यावनआप्नुवान् अवि जमदग्निः १७ धारणसगोत्रस्य गोत्रजा छत्रजा प्रवर ३ अगस्त्यदार्वच्युतदध्य वाहन १८ काश्यपगोत्रस्य गोत्रजा चामुण्डा प्रवर ३ काश्यपस्यावत्सार नैध्रुव १९ भरद्वाजगोत्रस्य गोत्रजा पक्षिणी प्रवर ३

१ एतेषां गोत्रप्रवरदेवतावटंकादीनां सम्यक्परिज्ञानाभावादत्र शुद्धमशुद्धं सम्यङ्निर्णेतुमशक्यम्, अतो विज्ञापयामहे—येषामेतेगोत्रदेवतादयस्तैः सज्जनैरयं विषयः सम्यक्परिशोधपूर्वकम् परिष्कृत्यास्माकं सविधे प्रेषणीयः द्वितीयावृत्तौ सम्यङ्मुद्रापयिष्यामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आंगिरसबार्हस्पत्यभारद्वाज २२ मांडव्यसगोत्रस्य वत्ससवात्स्यसवात्स्यायनस ४ सामान्यलौगाक्षसगोत्रस्य गोत्रजा भद्रयोगिनी प्रवर ३ काश्यपवसिष्ठ अवत्सार २० कौशिकसगोत्रस्य गोत्रजा पक्षिणी प्रवर ३ विश्वामित्र अथर्व भारद्वाज २१ सामान्यप्रवर १ पैंग्यसभरद्वाज २ समानप्रवरा २ लौगाक्षसगार्ग्यायनसकाश्यपकश्यप ४ समानप्रवर ३ कौशिककुशिकसाः २ समानप्रवरः ४ औपमन्युलौगाक्षस २ समानप्रवराः ५ ॥ यावतां प्रवरेष्वेको विश्वामित्रोऽनुवर्तते ॥ न तावतां सगोत्रत्वाद्विवाहः स्यात्परस्परम् ॥ ॥ ५ ॥ त्यजेत्समानप्रवरां सगोत्रां मातुः सपिंडामचिकित्स्यरोगाम् ॥ अजातलोम्नीं च तथान्यपूर्वां सुतेन हीनस्य सुतां सुकृष्णाम् ॥ ॥ ६ ॥ एक एव ऋषिर्यत्र प्रवरेष्वनुवर्तते ॥ तावत्समानगोत्रत्वमृते भृग्वंगिरोगणात् ॥ ७ ॥ पंचसु त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ॥ भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेत् ॥ ८ ॥ समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च ॥ तस्यामुत्पाद्य चांडालं ब्राह्मण्यादेव हीयते ॥ ९ ॥ कात्यायनः ॥ परिणीय सगोत्रां तु समानप्रवरां तथा ॥ त्यागं कृत्वा द्विजस्तस्यास्ततश्चांद्रायणं चरेत् ॥ १० ॥ उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत् ॥ ११ ॥ याज्ञवल्क्यः ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृत स्तथा ॥ १२ ॥ असमानप्रवरैर्विवाह इति गौतमः ॥ यद्येकं प्रवरं भिन्नं मातृगोत्रवरस्य च ॥ तत्रोद्वाहो न कर्तव्यः सा कन्या भगिनी भवेत् ॥ १३ ॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ १४ ॥ सदा पौनर्भवा कन्या वर्ज्या कुलाधमा ॥ वाचा दत्ता मनोदत्ता कृतकौतुकमंगला ॥ १५ ॥ उदकस्पर्शिता याच याच पाणिगृहीतका ॥ अग्निं परिगता या च पुनर्भूः प्रसवा च या ॥ १६ ॥ इत्येताः काश्यपेनोक्ता दहंति कुलमग्निवत् ॥ १७ ॥ अथावटंकाः कथ्यंते गोत्रं १ पात्र २ दात्र ३ आशयत्र ४ लडकात्र १५ मंडकीयात्र १६ विडलात्र १७ रहिला १८ भादिल १९ वालूआ २० पोकीया २१ वाकीया २२ मकाल्या २३ लाडआ २४ माणवदा २५ कालीया २६ ताली २७ वेलीया २८ पांवलन्डीया २९ मूडा ३० पीतूला ३१ धिगमव ३२ भूतपादवादी ३४ होफोया ३५ शेवार्दत ३६ वपार ३७ वथार ३८ साधका ३९ बहुधिया ४० ॥ १८ ॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ॥

१ एतेऽवटंकाः– यथाप्रतिपुस्तके दृष्टास्तथैव मुद्रिताः, ते च तत्तदवटंककुलैस्तत्परिचितैश्च विद्वद्भिः शोधनीयाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेत् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्य माहात्म्ये श्रीमाताकथितनामगोत्रप्रवरकृतदेव्यवटंककथनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ स्थान वासिन्यो योगिन्यः काजेशेन विनिर्मिताः ॥ कस्मिन्स्थाने हि का देव्यः कीदृश्यस्ता वदस्व मे ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ सर्वज्ञोसि कुलीनोसि साधु पृष्टं त्वयानघ ॥ कथयिष्याम्यहं सर्वमखिलेन युधिष्ठिर ॥ २ ॥ नानाभरणभूषाढ्या नानारत्नोपशोभिताः ॥ नानावसनसंवीता नानायुधसमन्विताः ॥ ३ ॥ नानावाहनसंयुक्ता नानास्वरनिनादिनीः ॥ भयनाशाय विप्राणां काजेशेन विनिर्मिताः ॥ ४ ॥ प्राच्यां याम्या मुदीच्यां च प्रतीच्यां स्थापिता हि ताः ॥ आग्नेयां नैर्ऋते देशे वायव्येशानयोस्तथा ॥ ५ ॥ आशापुरी च गात्राई छत्राई ज्ञानजा तथा ॥ पिप्प लांबा तथा शांता सिद्धा भट्टारिका तथा ॥ ६ ॥ कदंबा विकटा मीठा सुपर्णा वसुजा तथा ॥ मातंगी च महादेवी वाराही मुकुटेश्वरी ॥ ७ ॥ भद्रा चैव महाशक्तिः सिंहारा च महाबला ॥ एताश्चान्याश्च बहवः कथितुं नैव शक्यते ॥ ८ ॥ नानारूपधरा देव्यो नानावेषसमाश्रिताः ॥ स्थानादुत्तरदिग्भागे आशापूर्णासमीपतः ॥ ९ ॥ पूर्वे तु विद्यते देवी आनंदानंददायिनी ॥ वसंती चोत्तरे देव्यो नानारूपधरा मुदा ॥ १० ॥ इष्टान्कामान्ददात्येता जलदानेन तर्प्पिताः ॥ स्थाने नैर्ऋतिदिग्भागे शांता शांतिप्रदायिनी ॥ ११ ॥ सिंहोपरि समासीना चतुर्हस्ता वरप्रदा ॥ भट्टारी च महाशक्तिः पुनस्तत्रैव तिष्ठति ॥ १२ ॥ संस्तुता पूजिता भक्त्या भक्तानां भयनाशिनी ॥ स्थानात्तु सप्तमे क्रोशे क्षेमलाभा व्यव स्थिता ॥ १३ ॥ सा विलेपमयी पूज्या चिंतिता सिद्धिदायिनी ॥ पूर्वस्यां दिशि लोकैस्तु बलिदानेन तर्पिता ॥ परिवारेण संयुक्ता भुक्तिमुक्ति प्रदायिनी ॥ १४ ॥ अचिंत्यरूपचरिता सर्वशत्रुविनाशनी ॥ संध्यायास्त्रिषु कालेषु प्रत्यक्षैव हि दृश्यते ॥ १५ ॥ स्थानात्तु सप्तमे क्रोशे दक्षिणा विन्ध्यवासिनी ॥ सायुधा रूपसंपन्ना भक्तानां भयहारिणी ॥ १६ ॥ पश्चिमे निंबजा देवी तावद्भूमिसमाश्रिता ॥ महाबला सा दृष्टापि नयनानन्द दायिनी ॥ १७ ॥ स्थानादुत्तरदिग्भागे तावद्भूमिसमाश्रिता ॥ शक्तिर्बहुसुवर्णाक्षा पूजिता सासुवर्णदा ॥ १८ ॥ स्थानाद्वायव्यकोणे च क्रोशमात्र मिते श्रिता ॥ क्षेत्रधरा महादेवी समये च्छागधारिणी ॥ १९ ॥ पुरादुत्तरदिग्भागे क्रोशमात्रे तु कर्णिका ॥ सर्वोपकारनिरता स्थानोपद्रवनाशनी ॥ २० ॥ स्थानान्निर्ऋतिदिग्भागे ब्रह्माणीप्रमुखास्तथा ॥ नानारूपधरा देव्यो विद्यंते जलमातरः ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये देवतास्थापनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः परं प्रवक्ष्यामि ब्रह्मणा यत्कृतं पुरा ॥ तत्सर्वं कथयाम्यद्य शृणुष्वैकाग्रमानसः ॥ १ ॥ देवानां दानवानां च वैराद्युद्धं बभूवह ॥ तस्मिन्युद्धे महादुष्टे देवाः संक्लिष्टमानसाः ॥ २ ॥ बभूवुस्तत्र सोद्वेगा ब्रह्माणं शरणं ययुः ॥ ३ ॥ ॥ देवा ऊचुः ॥ ॥ ब्रह्मन्केन प्रकारेण दैत्यानां वधमेव च ॥ करोम्यद्य उपायं हि कथ्यतां शीघ्रमेव मे ॥४॥ ॥ ब्रह्मोवाच ॥ ॥ मया हि शंकरेणैव विष्णुना हि तथा पुरा ॥ यमस्य तपसा तुष्टैर्धर्मारण्यं विनिर्मितम् ॥ ५ ॥ तत्र यद्दीयते दानं यज्ञं वा तप उत्तमम् ॥ तत्सर्वं कोटिगुणितं भवेदिति न संशयः ॥ ६ ॥ पापं वा यदि वा पुण्यं सर्वं कोटिगुणं भवेत् ॥ तस्माद्दैत्यैर्न धर्षितं कदाचिदपि भोः सुराः ॥ ७ ॥ श्रुत्वा तु ब्रह्मणो वाक्यं देवाः सर्वे सविस्मयाः ॥ ब्रह्माणं त्वग्रतः कृत्वा धर्मारण्यमुपाययुः ॥ ८ ॥ सत्रं तत्र समारभ्य सहस्राब्दमनुत्तमम् ॥ वृत्वाऽऽचार्यं चांगिरसं मार्कंडेयं तथैव च ॥ ९ ॥ अत्रिं च कश्यपं चैव होता कृत्वा महामतिः ॥ जमदग्निं गौतमं च अध्वर्युत्वं न्यवेदयन् ॥ १० ॥ भरद्वाजं वसिष्ठं तु प्रत्यध्वर्युत्वमादिशन् ॥ नारदं चैव वाल्मीकिं नोदनायाकरोत्तदा ॥ ११ ॥ ब्रह्मासने च ब्रह्माणं स्थापयामासुरादरात् ॥ क्रोशचतुष्कमात्रां च वेदिं कृत्वा सुरैस्ततः ॥ १२ ॥ द्विजाः सर्वे समाहूता यज्ञस्यार्थे हि जापकाः ॥ ऋग्यजुःसामाथर्वान्वै वेदानुद्गिरयंति ये ॥ १३ ॥ गणनाथं शंभुसुतं कार्त्तिकेयं तथैव च ॥ इन्द्रं वज्रधरं चैव जयंतं चन्द्रसूनुकम् ॥ १४ ॥ चत्वारो द्वारपालाश्च देवाः शूरा विनिर्मिताः ॥ ततो राक्षोघ्नमंत्रेण हूयते हव्यवाहनः ॥ १५ ॥ तिलांश्च यवमिश्रांश्च मध्वाज्येन च मिश्रितान् ॥ जुहुवुस्ते तदा देवा वेदमंत्रैर्नरेश्वर ॥ १६ ॥ आघारावाज्यभागौ च हुत्वा चैव ततः परम् ॥ द्राक्षेक्षुपूगनारिंग जंबीरं बीजपूरकम् ॥ १७ ॥ उत्तरतो नालिकेरं दाडिमं च यथाक्रमम् ॥ मध्वाज्यं पयसा युक्तं कृशरशर्करायुतम् ॥ १८ ॥ तंडुलैः शतपत्रैश्च यज्ञे वाचं नियम्य च ॥ विचिंत्य च महाभागाः कृत्वा यज्ञं सदक्षिणम् ॥ १९ ॥ उत्तमं च शुभं स्तोमं कृत्वा हर्षमुपाययुः ॥ अवारितान्नमददन्दीनांधकृपणेष्वपि ॥ २० ॥ ब्राह्मणेभ्यो विशेषेण दत्तमन्नं यथेप्सितम् ॥ पायसं शर्करायुक्तं साज्यशाकसमन्वितम् ॥ २१ ॥ मंडका वटकाः पूपास्तथा वै वेष्टिकाः शुभाः ॥ सहस्रमोदकाश्चापि फेणिका घुर्घुरादयः ॥ २२ ॥ ओदनश्च तथा दाली आढकीसंभवा शुभा ॥ तथा वै मुद्गदाली च पर्पटा वटिका तथा ॥ २३ ॥ प्रलेह्यानि विचित्राणि युक्तारुयूषणसंचयैः ॥ कुल्माषा वेल्लकाश्चैव कोमला वालकाः शुभाः ॥ २४ ॥ कर्कटिकाश्चार्द्रयुता मरिचेन समन्विताः ॥ एवंविधानि चान्नानि शाकानि विविधानि च ॥ २५ ॥ भोजयित्वा द्विजान्सर्वान्धर्मारण्यनिवासिनः ॥ अष्टादशसहस्राणि सपुत्रांश्च तदा नृप ॥ २६ ॥ प्रतिदिनं तदा देवा भोजयंति स्म वाडवान् ॥ एवं वर्षसहस्रं वै कृत्वा यज्ञं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदामराः ॥ २७ ॥ कृत्वा दैत्यवधं राजन्निर्भयत्वमवाप्नुयुः ॥ स्वर्गं जग्मुस्ते सहसा देवाः सर्वे मरुद्गणाः ॥ २८ ॥ तथैवाप्सरसः सर्वा ब्रह्मवि
ष्णुमहेश्वराः ॥ कैलासशिखरं रम्यं वैकुंठं विष्णुवल्लभम् ॥ २९ ॥ ब्रह्मलोकं महापुण्यं प्राप्य सर्वे दिवौकसः ॥ परं हर्षमुपाजग्मुः प्राप्य
नंदनमुत्तमम् ॥ ३० ॥ स्वेस्वे स्थाने स्थिरीभूत्वा तस्थुः सर्वे हि निर्भयाः ॥ ३१ ॥ ततः कालेन महता कृताख्ययुगपर्यये ॥ लोहासुरो
मदोन्मत्तो ब्रह्मवेषधरः सदा ॥ ३२ ॥ आगत्य सर्वान्विप्रांश्च धर्षयेद्धर्मवित्तमान् ॥ शूद्रांश्च वणिजश्चैव दंडघातेन ताडयेत् ॥ ३३ ॥ विध्वं
सयेच्च यज्ञदीन्होमद्रव्याणि भक्षयेत ॥ वेदिका दीर्घिका दृष्ट्वा कश्मलेन प्रदूषयेत् ॥ ३४ ॥ मूत्रोत्सर्गपुरीषेण दूषयेत्पुण्यभूमिकाः ॥ गहनेन
तथा राजन्स्त्रियो दूषयते हि सः ॥ ३५ ॥ ततस्ते वाडवाः सर्वे लोहासुरभयातुराः ॥ प्रनष्टाः सपरीवारा गतास्ते वै दिशो दश ॥ ३६ ॥ वणि
जस्ते भयोद्विग्ना विप्राननुययुर्नृप ॥ महाभयेन संभीता दूरं गत्वा विमृश्य च ॥३७॥ सह शूद्रैर्द्विजैः सर्वे एकीभूत्वा गतास्तदा ॥ मुक्तारण्यं पुण्यतमं
निर्जनं हि ययुश्च ते ॥ ३८ ॥ निवासं कारयामासुर्नातिदूरे नरेश्वर ॥ वजिङ्नाम्ना हि तद्ग्रामं वासयामासुरेव ते ॥ ३९ ॥ लोहासुरभयाद्राजन्विप्र
नाम्ना विनिर्मितम् ॥ शंभुना वणिजा यस्मात्तस्मात्तन्नामधारणम् ॥ ४० ॥ शंभुग्राममिति ख्यातं लोके विख्यातिमागतम् ॥ अथ केचिद्भ
यान्नष्टा वणिजः प्रथमं तदा ॥ ४१ ॥ ते नातिदूरे गत्वा वै मंडलं चक्रुरुत्तमम् ॥ विप्रागमनकांक्षास्ते तत्र वासमकल्पयन् ॥ ४२ ॥ मंडलेति च
नाम्ना वै ग्रामं कृत्वा न्यवीवसन् ॥ विप्रसार्थपरिभ्रष्टाः केचित्तु वणिजस्तदा ॥ ४३ ॥ अन्यमार्गे गता ये वै लोहासुरभयार्दिताः ॥ धर्मारण्यान्नाति
दूरे गत्वा चिंतामुपाययुः ॥ ४४ ॥ कस्मिन्मार्गे वयं प्राप्ताः कस्मिन्प्राप्ता द्विजातयः ॥ इति चिंतां परं प्राप्ता वासं तत्र त्वकारयन् ॥ ४५ ॥
अन्यमार्गे गता यस्मात्तस्मात्तन्नामसंभवम् ॥ ग्रामं निवासयामासुरडालंजमिति क्षितौ ॥ ४६ ॥ यस्मिन्ग्रामे निवासी यो यत्संज्ञश्च वणिग्भवेत् ॥
तस्य ग्रामस्य तन्नाम ह्यभवत्पृथिवीपते ॥ ४७ ॥ वणिजश्च तथा विप्रा मोहं प्राप्ता भयार्दिताः ॥ तस्मान्मोहेतिसंज्ञास्ते राजन्सर्वे निरब्रुवन् ॥
॥ ४८ ॥ एवं प्रनष्टणं नष्टास्ते गताश्च दिशो दिश ॥ धर्मारण्ये न तिष्ठंति वाडवा वणिजोऽपि वा ॥ ४९ ॥ उद्वसं हि तदा जातं धर्मारण्यं च
दुर्लभम् ॥ भूषणं सर्वतीर्थानां कृतं लोहासुरेण तत् ॥ ५० ॥ नष्टद्विजं नष्टतीर्थं स्थानं कृत्वा हि दानवः ॥ परां मुदमवाप्यैव जगाम स्वालयं ततः
॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ज्ञातिभेदवर्णनंनामत्रयोविंशो
ऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ एतत्तीर्थस्य माहात्म्यं मया प्रोक्तं तवाग्रतः ॥ अनेकपूर्वजन्मोत्थपातकघ्नं महीपते ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानानामुत्तमं स्थानं परं स्वस्त्ययनं महत्॥ स्कंदस्याग्रे पुरा प्रोक्तं महारुद्रेण धीमता ॥ २ ॥ त्वं पार्थ तत्र स्नात्वा हि मोक्ष्यसे सर्वपातकात् ॥ तच्छुत्वा व्यासवाक्यं हि धर्म्मराजो युधिष्ठिरः ॥ ३ ॥ धर्मात्मजस्तदा तात धर्मारण्यं समाविशत् ॥ महापातकनाशाय साधुपालनतत्परः ॥ ४ ॥ विगाह्य तत्र तीर्थानि देवतायतनानि च ॥ इष्टापूर्तादिकं सर्वं कृतं तेन यथेप्सितम् ॥ ५ ॥ ततः पापविनिर्मुक्तः पुनर्गत्वा स्वकं पुरम् ॥ इंद्रप्रस्थं महासेन[1] शशास वसुधातलम् ॥ ६ ॥ इदं हि स्थानमासाद्य ये शृण्वंति नरोत्तमाः॥ तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः॥ ॥ ७ ॥ भुक्त्वा भोगान्पार्थिवांश्च परं निर्वाणमाप्नुयुः ॥ श्राद्धकाले च संप्राप्ते ये पठंति द्विजातयः ॥ ८ ॥ उद्धृताः पितरस्तैस्तु यावच्चंद्रार्कमेदिनि॥ द्वापरे च युगे भूत्वा व्यासेनोक्तं महात्मना ॥ ९ ॥ वारिमात्रे धर्मवाप्यां गयाश्राद्धफलं लभेत् ॥ अत्रागतस्य मर्त्यस्य पापं यमपदे स्थितम् ॥ ॥ १० ॥ कथितं धर्मपुत्रेण लोकानां हितकाम्यया ॥ विना अन्नैर्विना दर्भैर्विना चासनमेव वा ॥ ११ ॥ तोयेन नाशमायाति कोटिजन्मकृतं त्वघम् ॥ सहस्रमुरुशृंगीणां धेनूनां कुरुजांगले ॥ दत्त्वा सूर्यग्रहे पुण्यं धर्मवाप्यां च तर्पणाम् ॥ १२ ॥ एतद्वः कथितं सर्वं धर्मारण्यस्य चेष्टितम् ॥ यच्छ्रुत्वा ब्रह्महा गोघ्नो मुच्यते सर्वपातकैः ॥ १३ ॥ एकविंशतिवारैस्तु गयायां पिंडपातने ॥ तत्फलं समवाप्नोति सकृदस्मिञ्छ्रुते सति ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यतीर्थमाहात्म्यप्रभावकथनंनाम चतुर्विंशोऽध्यायः ॥ ॥ २४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि तीर्थमाहात्म्यमुत्तमम् ॥ धर्मारण्ये यथाऽऽनीता सत्यलोकात्सरस्वती ॥ १ ॥ मार्कंडेयं सुखासीनं महामुनिनिषेवितम् ॥ तरुणादित्यसंकाशं सर्वशास्त्रविशारदम् ॥ २ ॥ सर्वतीर्थमयं दिव्यमृषीणां प्रवरं द्विजम् ॥ आसनस्थं समायुक्तं धन्यं पूज्यं दृढव्रतम् ॥ ३ ॥ योगात्मानं परं शांतं कमंडलुधरं विभुम् ॥ अक्षसूत्रधरं शांतं तथा कल्पांतवासिनम् ॥ ४ ॥ अक्षोभ्यं ज्ञानिनं स्वस्थं पितामहसमद्युतिम् ॥ एवं दृष्ट्वा समाधिस्थं प्रहर्षोत्फुल्ललोचनम् ॥ ५ ॥ प्रणम्य स्तुतिभिर्युक्त्या मार्कंडं मुनयोऽब्रुवन् ॥ भगवन्नैमिषारण्ये सत्रे द्वादशवार्षिके ॥ ६ ॥ त्वयावतारिता ब्रह्मनदी या ब्रह्मणः सुता॥ तथा कृतं च तत्रैव गंगावतरणं क्षितौ ॥ ७ ॥ गीयमाने कुलपतेः शौनकस्य मुनेः पुरः ॥ सूतेन मुनिना ख्यातमन्येषामपि शृण्वताम् ॥ ८ ॥ तच्छुत्वा महदाख्यानमस्माकं हृदि संस्थितम् ॥ पापघ्नी पुण्यजननी प्राणिनां दर्शनादपि ॥ ९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ धर्मारण्ये मया विप्राः सत्यलोका

१ महासेन—हे षण्मुख—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सरस्वती ॥ समानीता सुरेखाद्रौ शरण्या शरणार्थिनाम् ॥१०॥ भाद्रपदे सिते पक्षे द्वादशी पुण्यसंयुता ॥ तत्र द्वारावतीतीर्थे मुनिगंधर्वसेविते ॥ ॥ ११ ॥ तस्मिन्दिने च तत्तीर्थे पिंडदानादि कारयेत् ॥ तत्फलं समवाप्नोति पितॄणां दत्तमक्षयम् ॥ १२ ॥ महदाख्यानमखिलं पापघ्नं पुण्यदं च यत् ॥ पवित्रं यत्पवित्राणां महापातकनाशनम् ॥ १३ ॥ सर्वमंगलमांगल्यं पुण्यं सारस्वतं जलम् ॥ ऊर्ध्वं किं दिवि यत्पुण्यं प्रभासांते व्यवस्थितम् ॥ १४ ॥ सारस्वतजलं नृणां ब्रह्महत्यां व्यपोहति ॥ सरस्वत्यां नराः स्नात्वा संतर्प्य पितृदेवताः ॥ पश्चात्पिंडप्रदातारो न भवंति स्तनंधयाः ॥ १५ ॥ यथा कामदुघा गावो भवन्तीष्टफलप्रदाः ॥ तथा स्वर्गापवर्गैकहेतुभूता सरस्वती ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये सरस्वतीमाहात्म्यवर्णनंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ मार्कंडेयोद्घाटितं वै स्वर्गद्वारमपावृतम् ॥ तत्र ये देहसंत्यागं कुर्वंति फलकांक्षया ॥ १ ॥ लभंते तत्फलं ह्यंते विष्णोः सायुज्यमाप्नुयुः ॥ अतः किं बहुनोक्तेन द्वारवत्यां सदा नरैः ॥ २ ॥ देहत्यागः प्रकर्त्तव्यो विष्णोर्लोकजिगीषया ॥ अनाशके जले वाग्नौ ये च संति नरोत्तमाः ॥ सर्वपापविनिर्मुक्ता यांति विष्णोः पुरीं सदा ॥ ३ ॥ अन्योपि व्याधिरहितो गच्छेदनशनं तु यः ॥ सर्वपापविनिर्मुक्तो याति विष्णोः पुरीं नरः ॥ ४ ॥ शतवर्षसहस्राणां वसेदंते दिवि द्विजः ॥ ब्राह्मणेभ्यः परं नास्ति पवित्रं पावनं भुवि ॥ ५ ॥ उपवासैस्तथा तुल्यं तपः कर्म्म न विद्यते ॥ नास्ति वेदात्परं शास्त्रं नास्ति मातृसमो गुरुः ॥ ६ ॥ न धर्मात्परमस्तीह तपो नानशनात्परम् ॥ स्नात्वा यः कुरुते ऽत्रापि श्राद्धं पिंडोदकक्रियाम् ॥ ७ ॥ तृप्यंति पितरस्तस्य यावद्ब्रह्मदिवानिशम् ॥ तत्र तीर्थे नरः स्नात्वा केशवं यस्तु पूजयेत् ॥ ८ ॥ समुक्तपातकैः सर्वैर्विष्णुलोकमवाप्नुयात् ॥ तीर्थानामुत्तमं तीर्थं यत्र संनिहितो हरिः ॥ ९ ॥ हरते सकलं पापं तस्मिंस्तीर्थे स्थितस्य सः ॥ मुक्तिदं मोक्षकामानां धनदं च धनार्थिनाम् ॥ आयुर्दं सुखदं चैव सर्वकामफलप्रदम् ॥१०॥ किमन्येनात्र तीर्थेन यत्र देवो जनार्द्दनः ॥ स्वयं वसति नित्यं हि सर्वेषामनुकम्पया ॥ ११ ॥ तत्र यद्दीयते किंचिद्दानं श्रद्धासमन्वितम् ॥ अक्षयं तद्भवेत्सर्वमिह लोके परत्र च ॥ १२ ॥ यज्ञैर्दानैस्तपोभिश्च यत्फलं प्राप्यते बुधैः ॥ तदत्र स्नानमात्रेण शूद्रैरपि सुसेवकैः ॥ १३ ॥ तत्र श्राद्धं च यः कुर्यादेकादश्यामुपोषितः ॥ स पितॄनुद्धरेत्सर्वान्नरकेभ्यो न संशयः ॥ १४ ॥ अक्षय्यां तृप्तिमाप्नोति परमात्मा जनार्द्दनः ॥ दीयतेऽत्र यदुद्दिश्य तदक्षय्यमुदाहृतम् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये द्वारिकामाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥छ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ तत्र तस्य समीपस्थं मार्कंडेनोपलक्षितम् ॥ तीर्थं गोवत्ससंज्ञं तु सर्वत्र भुवि संश्रुतम् ॥ १ ॥ तत्रा
वतीर्यं गोवत्सस्वरूपेणांबिकापतिः ॥ स्वयंभूलिंगरूपेण संस्थितो जगतां पतिः ॥ २ ॥ आसीद्बलाहकोनाम रुद्रभक्तो महाबलः ॥ आखेट
कसमायुक्तो नृपः परपुरंजयः ॥ ३ ॥ मृगयूथे स्थितं दृष्ट्वा गोवत्सं तत्पदातिना ॥ उक्तो राजा मया दृष्टं कौतुकं नृपसत्तम ॥ ४ ॥ गोवत्सो
मृगयूथस्य दृष्टो मध्यस्थितो मया ॥ तेषामेवानुरक्तोऽसौ जनन्या रहितस्तथा ॥ ५ ॥ द्रष्टुं तु कौतुकं राजा तं पदातिं पुरः स्थितम् ॥
उवाच दर्शयस्वेति गोवत्सं च समाविशत् ॥ ६ ॥ गत्वाटवीं तदा राज्ञो दर्शितः स पदातिना ॥ पदातिभिर्मृगानीकं दुद्राव त्रासितं यदा ॥ ७ ॥
पीलुगुल्मं प्रति गतं गोवत्सः प्रस्थितस्तदा ॥ राजा तद्धरणाकांक्षो प्राविशद्गुल्ममादरात् ॥ ८ ॥ तत्र स्थितं स गोवत्समपश्यन्नृपतिः स्वयम् ॥
यावद्गृह्णाति तं तावल्लिंगं जातं समुज्ज्वलम् ॥ ९ ॥ तं दृष्ट्वा विस्मितो राजा किमेतदित्यचिंतयत् ॥ यावच्चिंतयते ह्येवं देहं त्यक्त्वा दिवं
गतः ॥ १० ॥ अत्रांतरे गगनतले समंततः श्रूयते सुरजयकारगर्जितम् ॥ पपात पुष्पवृष्टिरंबराद्राजा गतः शिवभुवनं च तत्क्षणात् ॥ ११ ॥
तावत्पश्यति तत्राभ्यं गोवत्सं बालकं स्थितम् ॥ नूनमेष महादेवो वत्सरूपी महेश्वरः ॥ १२ ॥ तमानेतुं समुद्युक्तो राजा तमुज्जहार च ॥ तदा तदेव
लिंगं तु नोत्तिष्ठति कथंचन ॥ तदा देवाः सहानेन प्रार्थयामासुरीश्वरम् ॥ १३ ॥ ॥ देवा ऊचुः ॥ ॥ भगवन्सर्वदेवेश स्थातव्यं भवता विभो॥
शुक्लेन लिंगरूपेण सर्वलोकहितैषिणा ॥ १४ ॥ ॥ श्रीमहादेव उवाच ॥ स्थास्याम्यहं सदैवात्र लिंगरूपेण देवताः ॥ यस्माद्भाद्रपदे मासि
कृष्णपक्षे कुहूदिने ॥ १५ ॥ तथा तद्दिवसे तत्र स्नानं कृत्वा विधानतः ॥ लिंगं ये पूजयिष्यंति न तेषां विद्यते भयम् ॥ १६ ॥ ऋते च पिंडदानेन
पूर्वजाः शाश्वतीः समाः ॥ रौरवे नरके घोरे कुंभीपाके च ये गताः ॥ १७ ॥ अनेकनरकस्थाश्च तिर्यग्योनिगताश्च ये ॥ सकृत्पिंडप्रदानेन स्यात्ते
षामक्षया गतिः ॥ १८ ॥ ततो बलाहको राजा सर्वदेवसमन्वितः ॥ स्थापयामास तल्लिंगं सर्वदेवसमीपतः ॥ १९ ॥ चकार बहुदानानि लोकानां
हितकाम्यया ॥ यावदर्चयते ह्येवं रुद्रोऽपि स्वयमागतः ॥ २० ॥ ॥ रुद्र उवाच ॥ ॥ अस्यां रात्रौ तु मनुजाः श्रद्धाभक्तिसमन्विताः ॥
येऽर्चयिष्यंति देवेशं तेषां पुण्यमनंतकम् ॥ २१ ॥ जागरं ये करिष्यंति गीतशास्त्रपुरःसरम् ॥ उद्धरिष्यंति ते मर्त्याः कुलमेकोत्तरं शतम् ॥ २२ ॥
तावद्गर्ज[illegible] तीर्थानि नैमिषं पुष्करं गया ॥ प्रयागं च प्रभासं च द्वारका मथुराऽर्बुदः ॥ २३ ॥ यावन्न दृश्यते लिंगं गोवत्सं परमाद्भुतम् ॥ यदा हि

१ ए[illegible]पद्यं—छन्दःशास्त्रीयेन केन लक्षणेन लक्षितं न ज्ञायते सम्यक्। आर्षत्वात् तथैव—स्थापितमति बोद्धव्यं सुधीभिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुते भावं गोवत्सगमनं प्रति ॥ २४ ॥ स्ववंशजास्तदा सर्वे नृत्यंति हर्षिता ध्रुवम् ॥ २५ ॥ ॥ सूत उवाच ॥ ॥ यच्चान्यदद्भुतं तत्र वृत्तांतं शृणु त द्विजाः ॥ येन वै श्रुतमात्रेण सर्वपापक्षयो भवेत् ॥ २६ ॥ यदा वै स्थापितं लिंगं सर्वदेवैः पुरातनम् ॥ विष्णोः[1] प्रतिष्ठानगुणात्सर्वेषां च दिवौकसाम् ॥ २७ ॥ अणुमात्रप्रमाणेन प्रत्यहं समवर्द्धत ॥ ततस्ते मनुजा देवा भीतास्तं शरणं ययुः ॥ २८ ॥ ॥ देवा ऊचुः ॥ ॥ वृद्धिं संहर देवेश लोकानां स्वस्ति तद्भवेत्॥एवमुक्ते ततो लिंगाद्वाग्रुवाचाशरीरिणी॥२९॥ ॥ शिववाण्युवाच ॥ ॥ हे लोका मा भयं वोऽस्तु उपायः श्रूयतामयम् ॥ कश्चिच्चंडालमानीय मत्पुरः स्थाप्यतां ध्रुवम् ॥३०॥ चंडालांश्च समानीय दधुर्देवस्य ते पुरः॥तथापि तस्य वृद्धिस्तु नैव निर्वर्तते पुनः ॥३१॥ वागुवाच ॥ कर्म्मणा यस्तु चंडालः सोऽग्रे मे स्थाप्यतां जनाः ॥ तच्छ्रुत्वा महदाश्चर्यं मतिं चक्रुर्विलोचने ॥ ३२ ॥ मार्गमाणास्तदा ते तु ग्रामाणि च पुराणि च ॥ कश्चित्कर्मरतं पापं ददृशुर्ब्राह्मणब्रुवम् ॥३३॥ वृषभान्भारसंयुक्तान्मध्याह्नेवाहयच्च सः ॥ क्षुत्तृट्श्रमपरीतांश्च दुर्बलान्क्रूरमानसः ॥३४॥ अस्नात्वापि पर्युषितं भक्षयंतीह वै द्विजाः ॥ तं समादाय देवेशं जग्मुर्यत्र जगद्गुरुः ॥ ३५ ॥ देवालयाग्रभूमौ तं स्थापयामासुराहताः ॥ अस्मी बभूव सहसा गोवत्साग्रे निरूपितः ॥ ३६ ॥ चंडालस्थल इत्येष प्रसिद्धोसौऽभवत्क्षितौ ॥ तत्र स्थितैर्न चाद्यापि प्रासादो दृश्यते हि सः ॥ ॥ ३७ ॥ तदाप्रभृति तल्लिंगं साम्यभावमुपागतम् ॥ धौतपाप्मा गतस्तीर्थं द्विजो लिंगनिरीक्षणात् ॥ ३८ ॥ प्रत्यहं पूजयामास गोवत्सं गतकिल्बिषः ॥ विशेषात्कृष्णपक्षस्य चतुर्दश्यां समागतः ॥ ३९ ॥ एतत्तदद्भुतं तस्य देवस्य च त्रिशूलिनः ॥ शृणुयाद्योनरो भक्त्या सर्वपापैः प्रमुच्यते ॥ ४० ॥ ॥ सूत उवाच ॥ ॥ गोवत्समिति विख्यातं नराणां पुण्यदं परम् ॥ अनेकजन्मपापघ्नं मार्कंडेयेन भाषितम् ॥ ४१ ॥ तत्र तीर्थे सकृत्स्नानं रुद्रलोकप्रदं नृणाम् ॥ पापदेहविशुद्ध्यर्थं पापेनोपहतात्मनाम् ॥ ४२ ॥ कूपे तर्पणतश्चैव श्राद्धतश्चैव तृप्तता ॥ भाद्रपदे विशेषेण पक्षस्यांते भवेत्कलौ ॥ ४३ ॥ एकविंशतिवारांस्तु गयायां तर्प्पणे कृते ॥ पितॄणां परमा तृप्तिः सकृद्वै गंगकूपके ॥ ४४ ॥ तस्मिन्गोवत्ससामीप्ये तिष्ठते गंगकूपकः ॥ तास्मिंस्तिलोदकेनापि सद्गतिं यांति तर्प्पिताः ॥ ४५ ॥ पितरो नरकाद्वापि सुपुण्येन सुमेधसा ॥ गोप्रदानं प्रशंसंति तस्मिंस्तीर्थे मुनीश्वराः ॥ ४६ ॥ विप्राय स्वर्णदानं तु रुद्रलोके नयेन्नरम् ॥ सरस्वतीशिवक्षेत्रे गंगा च गंगकूपके ॥ ४७ ॥ एकस्थमेतत्त्रितयं स्वर्गापवर्गकारणम् ॥ सेवितं चर्षिभिः सिद्धैस्तीर्थं सर्वत्र विश्रुतम् ॥ ४८ ॥ पीलुयुग्मं स्थितं तत्र तत्तीर्थं मुनिसेवितम् ॥

१ विष्णुकृतं सर्वदेवकृतं च यत् प्रतिष्ठापनम् तस्य गुणात् गुणेन इत्यर्थसंदर्भोऽनुसन्धेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानात्स्वर्गप्रदं चैव पानात्पापविशुद्धिदम् ॥ ४९ ॥ कीर्त्तनात्पुण्यजननं सेवनान्मुक्तिदं परम् ॥ तद्वै पश्यंति ये भक्त्या ब्रह्महा यदि मातृहा ॥ ॥ ५० ॥ बालघाती च गोघ्नश्च ये च स्त्रीशूद्रघातकाः ॥ गरदाश्चाग्निदाश्चैव गुरुद्रोहरताश्च ये ॥ ५१ ॥ तपस्विनिन्दकाश्चैव कूटसाक्ष्यं करोति यः ॥ वक्ता च परदोषस्य परस्य गुणलोपकः ॥ ५२ ॥ सर्वपापमयोऽप्यत्र मुच्यते लिंगदर्शनात् ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पातालखण्डे धर्मारण्यमाहात्म्ये बलाहकोपाख्यानवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ व्यास उवाच ॥ गोवत्सान्नैर्ऋते भागे दृश्यते लोहयष्टिका ॥ स्वयंभुलिंगरूपेण रुद्रस्तत्र स्थितः स्वयम् ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ मोक्षतीर्थे सरस्वत्या नभस्ये चंद्रसंक्षये ॥ विप्रान्संपूज्य विधिवत्तेभ्यो दत्त्वा च दक्षिणाम् ॥ १ ॥ एकविंशतिवारांस्तु भक्त्या पिंडस्य यत्फलम् ॥ गयायां प्राप्यते पुंसां ध्रुवं तदिह तर्प्पणात् ॥ २ ॥ लोहयष्ट्यां कृते श्राद्धे नभस्ये चंद्रसंक्षये ॥ प्रेतयोनिविनिर्मुक्ताः क्रीडंति पितरो दिवि ॥ ३ ॥ अपि नः संकुले भूयाद्यो वै दद्यात्तिलोदकम् ॥ पिंडं वाप्युदकं वापि प्रेतपक्षे विधूदये ॥ ३ ॥ लोहयष्ट्याममावस्यां कार्यं भाद्रपदे जनैः ॥ श्राद्धं वै मुनयः प्राहुः पितरो यदि वल्लभाः ॥ ५ ॥ क्षीरेण तु तिलैः श्वैतैः स्नात्वा सारस्वते जले ॥ पितॄंस्तर्पयते यस्तु तृप्तास्तत्पितरो ध्रुवम् ॥ ६ ॥ तत्र श्राद्धानि कुर्वीत सक्तुभिः पयसा सह ॥ अमावास्यादिनं प्राप्य पितॄणां मोक्षमिच्छकैः ॥ ७ ॥ रुद्रतीर्थे ततो धेनुं दद्याद्वस्त्रादिभूषिताम् ॥ विष्णुतीर्थे हिरण्यं च प्रदद्यान्मोक्षमिच्छुकः ॥ ८ ॥ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात् ॥ ९ ॥ प्रार्थयेत्तत्र गत्वा तं देवदेवं जनार्दनम् ॥ आगतोऽस्मि गयां देव पितृभ्यः पिंडदित्सया ॥ एष पिंडो मया दत्तस्तव हस्ते जनार्दन ॥ १० ॥ परलोकगतेभ्यश्च त्वं हि दाता भविष्यसि ॥ अनेनैव च मंत्रेण तत्र दद्याद्धरेः करे ॥ ११ ॥ चंद्रे क्षीणे चतुर्दश्यां नभस्ये पिंडमाहरेत् ॥ पितॄणामक्षया तृप्तिर्भविष्यति न संशयः ॥ १२ ॥ एकविंशतिवारांश्च गयायां पिंडपातनैः ॥ भक्त्या तृप्तिमवाप्नोति लोहयष्ट्यां पितृतर्प्पणे ॥ १३ ॥ वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमत्र हि ॥ फलप्रदः सुतान्भक्तानारोग्यमभयप्रदः ॥ १४ ॥ वित्तं न्यायार्जितं दत्तं स्वल्पं तत्र महाफलम् ॥ स्नानेनापिहि तत्तीर्थे रुद्रस्यानुचरो भवेत् ॥ १५ ॥ इति श्रीस्कांदे महापुराणे एकाकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये संक्षेपतस्तीर्थमाहात्म्य वर्णनं नामाष्टविंशोऽध्यायः ॥ २८ ॥ ॥ सूत उवाच ॥ ॥ अतः परं शृणुध्वं हि लोहासुरविचेष्टितम् ॥ बलेः पुत्रशतस्यापि कथ

१ लभत इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यिष्यामि विश्रुतम् ॥ १ ॥ यथा तौ भ्रातरौ वृद्धौ प्रापतुः स्थानमुत्तमम् ॥ तदाप्रभृति वैराग्यं दैत्यो लोहासुरे दधौ ॥ २ ॥ किं करोमि क्व गच्छामि तपसे स्थानमुत्तमम् ॥ यस्य पारं न जानंति देवता मुनयो नराः ॥ ३ ॥ को मयाऽऽराध्यतां देवो हृदि चिंतयते भृशम् ॥ इति चिंतयतस्तस्य मतिर्जाता महात्मनः ॥ ४ ॥ दधौ गंगां स्वशीर्षेण पुष्पवंतौ[1] च नेत्रयोः ॥ हृदा नारायणं देवं ब्रह्माणं कटिमंडले ॥ ५ ॥ इंद्राद्या देवताः सर्वे यद्देहे प्रतिबिंबिताः ॥ प्रपश्यंति तदात्मानं भास्करः सलिले यथा ॥ ६ ॥ तमेवाराधयिष्यामि निरंजनमकल्मषः ॥ एवं कृत्वा मतिं दैत्य स्तपस्तेपे सुदुष्करम् ॥ भीतो जन्मभयाद्घोराद्दुष्करं यन्महात्मभिः ॥ ७ ॥ अंबुभक्षो वायुभक्षः शीर्णपर्णाशनस्तथा ॥ दिव्यं वर्षशतं साग्रं यदा तेपे महत्तपः ॥ ततस्तुतोष भगवांस्त्रिशूलवरधारकः ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वृणीष्व भद्रं ते मनसा यदभीप्सितम् ॥ लोहासुर मयादेयं तव नास्ति तपोबलात् ॥ ९ ॥ इत्युक्तो दानवस्तत्र शंकराग्रे वचोऽब्रवीत् ॥ १० ॥ ॥ लोहासुर उवाच ॥ ॥ यदि तुष्टोसि देवेश वरमेकं वृणोम्यहम् ॥ शरीरस्याजरत्वं च मा मृत्योरपि मेभयम् ॥ ११ ॥ जन्मन्यस्मिन्प्रभो भूयात्स्थातव्यं हृदये मम ॥ एवमस्तु शिवः प्राह तत्र तं दानवेश्वरम् ॥ १२ ॥ शर्वलब्धवरो दैवात्पुनस्तेपे महत्तपः ॥ रम्ये सरस्वतीतीरे तरणाय भवार्णवात् ॥ १३ ॥ वत्सराणां सहस्राणि प्रयुतान्यर्बुदानि च ॥ शंकते भगवानिंद्रो भीतस्तस्य तपोबलात् ॥ १४ ॥ मा मे पदच्युतिर्भूयाद्दैत्यल्लोहासुरात्क्वचित् ॥ मघवान्गुप्तरूपेण समेत्याश्रमकाननम् ॥ १५ ॥ तपोभंगं प्रकुरुते कंपयित्वा महासुरम् ॥ ताडयंति शरीरे तं मुष्टिभिस्तीक्ष्णकर्कशैः ॥ १६ ॥ अथ तेन च दैत्येन ध्यानमुत्सृज्य वीक्षितम् ॥ इंद्रेण तत्कृतं सर्वं तपोबलविनाशनम् ॥ १७ ॥ तस्य तैरभवद्युद्धमिंद्राद्यैरथ कर्कशैः ॥ एकस्य बहुभिः सार्द्धं देवास्ते तेन संयुगे ॥ १८ ॥ रुधिराक्लिन्नदेहा वै प्रहारैर्जर्जरीकृताः ॥ केशवं शरणं प्राप्ता त्राहि त्राहीति भाषिणः ॥ १९ ॥ ॥ ॥ सूत उवाच ॥ ॥ देवानां वाक्यमाकर्ण्य वासुदेवो जनार्दनः ॥ युयुधे केशवस्तेन युद्धे वर्षशतं किल ॥ २० ॥ ततो नारायणं तत्र जिगाय स वरोर्जितः ॥ अथ नारायणो देवो जितो लोहासुरेण तु ॥ २१ ॥ मंत्रयामास रुद्रेण ब्रह्मणा च पुनःपुनः ॥ मीमांसित्वा त्रयो देवाः पुनर्युद्धसमुद्यमम् ॥ २२ ॥ लोहासुरस्य दैत्यस्य वपुर्दृष्ट्वा पुनर्नवम् ॥ महदासीत्पुनर्युद्धं दैत्यकेशवयोस्ततः ॥ २३ ॥ न ममार यदा दैत्यो विष्णुना प्रभविष्णुना ॥ तरसा तं केशवोऽपि पातयामास भूतले ॥ २४ ॥ उत्तानं पतितं दृष्ट्वा पिनाकी परमेश्वरः ॥ दधार हृदये तस्य

१ पुष्पवंतौ—सूर्याचन्द्रमसौ "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।" इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपं रूपवर्जितः ॥ २५ ॥ कण्ठे तस्थौ ततो ब्रह्मा तस्य लोहासुरस्य च ॥ चरणौ पीडयामास स्वस्थित्या पुरुषोत्तमः ॥ २६ ॥ अथ दैत्यः समुत्तस्थौ भृशं बद्धोपि भूतले ॥ दृष्ट्वोत्थितं ततो दैत्यं पातयंतं सुरोत्तमान् ॥ २७ ॥ उवाच दिव्यया वाचा विरंचिः कमलासनः ॥ २८ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ लोहासुर सदा रक्ष वाचोधर्ममभीक्ष्णशः ॥ त्वया यत्प्रार्थितं रुद्रात्तदेव समुपस्थितम् ॥ २९ ॥ अहं विष्णुश्च रुद्रश्च त्रयोऽमी सुरसत्तमाः ॥ त्वद्देहमुपवेक्ष्यामो यावदाभूतसंप्लवम् ॥ ३० ॥ दानवेश शिवप्राप्तिर्भावभक्त्यैव जायते ॥ शिवं चालयितुं बुद्धिः कथं तव भविष्यति ॥ ३१ ॥ अचलांश्चालयेद्यस्तु प्रासादान्ब्राह्मणान्पुरान् ॥ अचिरेणैव कालेन पातकेनैव लिप्यते ॥ ३२ ॥ श्मशानवत्परित्याज्यः सत्यधर्मबहिष्कृतः ॥ सत्यवागसि भद्रं ते मा विचालय देवताः ॥ ३३ ॥ येन यातास्तु पितरो येन याताः पितामहाः ॥ तेन मार्गेण गतव्यं न चोल्लंघ्या सतां गतिः ॥ ३४ ॥ दानवेश पिता ते हि ददौ लोकत्रयं हरेः ॥ वाक्पाशबद्धः पाताले राज्यं चक्रे महीपतिः ॥ ३५ ॥ तथा त्वमसि वाक्पाशाच्छिवभक्तिसमन्वितः ॥ भूतले तिष्ठ दैत्येंद्र मावाग्वैकल्प्यमाप्नुहि ॥ ३६ ॥ वरांस्ते च प्रदास्यामो मा विचाल्या हि देवताः ॥ ३७ ॥ ॥ ॥ व्यास उवाच ॥ ॥ तच्छ्रुत्वा ब्रह्मणो वाक्यं संतुष्टो दानवेश्वरः ॥ प्राह प्रसन्नया वाचा ब्रह्माणं केशवं हरम् ॥ ३८ ॥ ॥ लोहासुर उवाच ॥ ॥ वाक्पाशबद्धस्तिष्ठामि न पुनर्भवतां बले ॥ ब्रह्मा विष्णुश्च रुद्रश्च त्रयोऽमी सुरसत्तमाः ॥ ३९ ॥ स्थास्यंति चेच्छरीरे मे किं न लब्धं मया ततः ॥ इदं कलेवरं मे हि समारूढं त्रिभिः सुरैः ॥ ४० ॥ भूम्यां भवतु विख्यातं मत्प्रभावात्सुरोत्तमाः ॥ ४१ ॥ लोहासुरस्य वाक्येन हर्षिता त्रिदशास्त्रयः ॥ ददुः प्रत्युत्तरं तस्मै ब्रह्मविष्णुमहेश्वराः ॥ ४२ ॥ सत्यवाक्पाशतो दैत्यो न सत्याच्चलितो यतः ॥ तेन सत्येन संतुष्टा दास्यामस्ते मनीप्सितम् ॥ ४३ ॥ ॥ ब्रह्मोवाच ॥ ॥ यथा स्नानं ब्रह्मज्ञानं देहत्यागो गयातले ॥ धर्मारण्ये तथा दैत्य धर्म्मेश्वरपुरः स्थिते ॥ ४४ ॥ कूपे तर्प्पणकं श्राद्धं शंसंति पितरो दिवि ॥ संतुष्टा पिंडदानेन गयायां पितरो यथा ॥ ४५ ॥ वांछंति तर्प्पणं कूपे धर्मारण्ये विशुद्धये ॥ दानवेंद्र शरीरं तु तीर्थं तव भविष्यति ॥ ४६ ॥ एकविंशतिवारांस्तु गयायां तर्प्पणे कृते ॥ पितॄणां या परा तृप्तिर्जायते दानवाधिप ॥ ४७ ॥ धर्मेश्वर पुरस्तात्सा त्वेकदा पितृतर्पणात् ॥ स्याद्वै दशगुणा तृप्तिः सत्यमेव न संशयः ॥ ४८ ॥ पितॄणां पिंडदानेन अक्षय्या तृप्तिरस्त्विह ॥ शिवरूपं[...]राले वै धर्मारण्ये धरातले ॥४९॥ श्रद्धयैव हि कर्त्तव्याः श्राद्धपिंडोदकक्रियाः ॥ तथांतराले चास्मांकं श्राद्धपिंडौ विशेषतः ॥ ५० ॥ तथा शरं[...]कापि

१ अस्माकं ब्रह्मविष्णुरुद्राणामन्तरालेंऽतरालप्र[...]शे—इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तांचिंता सत्योऽसि सुव्रत ॥ त्रिषु लोकेषु दुष्प्रापं सत्यं ते दिवि संस्थितम् ॥९१॥ अस्मद्वाक्येन सत्येन तत्तथाऽसुरसत्तम ॥ गयासमधिकं तीर्थं तव
जातं धरातले॥९२॥ अस्माकं स्थितिरव्यग्रा तव देहे न संशयः ॥ सत्यपाशेन बद्धाः स्म दृढमेव त्वयाऽनघ ॥९३॥ ॥ विष्णुरुवाच ॥ ॥ गयाप्रयाग
कस्याऽपि फल समधिकं स्मृतम् ॥ चतुर्दश्याममावास्यां लोहयष्ट्यां पिंडदानतः ॥ ९४ ॥ बलिपुत्रस्य सत्येन महती तृप्तिरत्र हि ॥ मा कुरुष्वात्र
संदेहं तव देहे स्थिता स्वयम् ॥ ९५ ॥ सरस्वती पुण्यतोया ब्रह्मलोकात्प्रयातु त ॥ प्लावयिष्यंति देहांगं मया सह सुसंगता ॥९६॥ यथा वै द्वारका
वासो देवस्तत्र महेश्वरः ॥ विरंचिर्यत्र तीर्थानि त्रीण्येतानि धरातले ॥ ९७ ॥ भविष्यति च पाताले स्वर्गलोके यमक्षये ॥ विख्यातान्यसुरश्रेष्ठ पि
तृणां तृप्तिहेतवे ॥९८॥ अथान्यत्संप्रवक्ष्यामि गाथां पितृकृतां पराम् ॥ आज्ञारूपां हि पुत्राणां तां शृणुष्व ममानघ ॥९९॥ पितर ऊचुः॥ शंकरस्या
ग्रतः स्थानं रुद्रलोकप्रदं नृणाम् ॥ पापदेहविशुद्ध्यर्थं पापेनोपहतात्मनाम् ॥६०॥ तस्मिंस्तिलोदकेनापि सद्गतिं यांति तर्पिताः ॥ पितरो नरकाद्वा
पि सुपुत्रेण सुमेधसा ॥ ६१ ॥ गोप्रदानं प्रशंसंति तत्तत्र पितृमुक्तये ॥ पित्रादिकान्समुद्दिश्य दृष्ट्वा रुद्रं च केशवम् ॥६२॥ तिलपिण्याकपिंडेन तृप्तिं
यास्यामहे पराम् ॥ चतुर्दश्याममावास्यां तथा च पितृतर्पणम् ॥ ६३ ॥ अज्ञातगोत्रजन्मानस्तेभ्यः पिंडांस्तु निर्वपेत् ॥ तेऽपि यांति दिवं सर्वे पिंडे
दत्त इति श्रुतिः ॥ ६४ ॥ सर्वकार्याणि संत्यज्य मानवैः पुण्यमीप्सुभिः ॥ प्राप्ते भाद्रपदे मासे गंतव्या लोहयष्टिका ॥ अज्ञातगोत्रनाम्ना तु पिंड
मंत्रमिमं शृणु ॥ ६५ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ अतीतगोत्रजास्तेभ्यः पिंडोऽयमुपतिष्ठतु ॥ ६६ ॥ ॥ विष्णुरुवाच ॥ ॥ अनेनैव
तु मंत्रेण ममाग्रे सुरसत्तम ॥ क्षीणे चंद्रे चतुर्दश्यां नभस्ये पिंडमाहरेत् ॥ ६७ ॥ पितणामक्षया तृप्तिर्भविष्यति न संशयः ॥ तिलपिण्याकपिंडेन
पितरो मोक्षमाप्नुयुः ॥ ६८ ॥ क्षणत्रयविनिर्मुक्ता मानवा जगतीतले ॥ भविष्यंति न संदेहो लोहयष्ट्यां तिलतर्पणे ॥ ६९ ॥ स्नात्वा यः कुरुते
चात्र पितृपिंडोदकक्रियाः ॥ पितरस्तस्यः तृप्यंति यावद्ब्रह्मदिवानिशम् ॥ ७० ॥ अमावास्यादिनं प्राप्य मासि भाद्रपदे सरः ॥ ब्रह्मणो यष्टिकायां
तु यः कुर्यात्पितृतर्पणम् ॥ ७१ ॥ पितरस्तस्य तृप्ताः स्युर्यावदाभूतसंप्लवम् ॥ तेषां प्रसन्नो भगवानादिदेवो महेश्वरः ॥ ७२ ॥ अस्य तीर्थस्य
यात्रायां मतिर्येषां भविष्यति ॥ गोक्षीरेण तिलैः श्वेतैः स्नात्वा सारस्वते जले ॥ ७३ ॥ तर्पयेदक्षया तृप्तिः पितॄणां तस्य जायते ॥ श्राद्धं चैव प्रकु
र्वीत सक्तुभिः पयसा सह ॥ ७४ ॥ अमावास्यादिनं प्राप्य पितॄणां मोदमिच्छुकः ॥ रुद्रतीर्थे ततो धेनुं दद्याद्वस्त्राणि यमतीर्थके ॥ ७५ ॥ विष्णु
तीर्थे हिरण्यं च पितॄणां मोक्षमिच्छुकः ॥ विनाक्षतैर्विना दर्भैर्विना चासनमेव च ॥ वारिमात्राल्लोहयष्ट्यां गयाश्राद्धफलं लभेत् ॥ ७६ ॥ ॥ सूत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ एतद्वः कथितं विप्रा लोहासुरविचेष्टितम् ॥ यच्छ्रुत्वा ब्रह्महा गोघ्नो मुच्यते सर्वपातकैः ॥ ७७ ॥ एकविंशतिवारन्तु गयायां पिंडपातने ॥ तत्फलं समवाप्नोति सकृदस्मिञ्छ्रुते सति ॥ ७८ ॥ चतुःष्कोटिद्विलक्षं च सहस्रं शतमेव च ॥ धेनवस्तेन दत्ताः स्युर्माहात्म्यं शृणुयात्तु यः ॥ ७९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये लोहासुरमाहात्म्यसंपूर्तिर्नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ पुरा त्रेतायुगे प्राप्ते वैष्णवांशो रघूद्वहः ॥ सूर्यवंशे समुत्पन्नो रामो राजीवलोचनः ॥ १ ॥ स रामो लक्ष्मणश्चैव काकपक्षधरावुभौ ॥ तातस्य वचनात्तौ तु विश्वामित्रमनुव्रतौ ॥ २ ॥ यज्ञसंरक्षणार्थाय राज्ञा दत्तौ कुमारकौ ॥ धनुःशरधरौ वीरौ पितुर्वचनपालकौ ॥ ३ ॥ पथि प्रव्रजतो यावत्ताडकानाम राक्षसी ॥ तावदागम्य पुरतस्तस्थौ वै विघ्नकारणात् ॥ ॥ ४ ॥ ऋषेरनुज्ञया रामस्ताडकां समघातयत्॥ प्रादिशच्च धनुर्वेदविद्यां रामाय गाधिजः ॥५॥ तस्य पादतलस्पर्शाच्छिला वासवयोगतः ॥ अहल्या गौतमवधूः पुनर्जाता स्वरूपिणी ॥ ६ ॥ विश्वामित्रस्य यज्ञे तु संप्रवृत्ते रघूत्तमः ॥ मारीचं च सुबाहुं च जघान परमेषुभिः ॥७॥ ईश्वरस्य धनुर्भग्नं जनकस्य गृहे स्थितम् ॥ रामः पंचदशे वर्षे षड्वर्षां चैव मैथिलीम् ॥ ८ ॥ उपयेमे तदा राजन्रम्यां सीतामयोनिजाम् ॥ कृतकृत्यस्तदा जातः सीतां संप्राप्य राघवः ॥ ९ ॥ अयोध्यामगमन्मार्गे जामदग्न्यमवेक्ष्य च ॥ संग्रामोऽभूत्तदा राजन्देवानामपि दुःसहः ॥ १० ॥ ततो रामं[1] पराजित्य सीतया गृहमागतः[2] ॥ ततो द्वादशवर्षाणि रेमे रामस्तया सह ॥ ११ ॥ सप्तविंशतिमे वर्षे यौवराज्यप्रदायकम् ॥ राजानमथ कैकेयी वरद्वयमयाचत ॥ १२ ॥ तयोरेकेन रामस्तु ससीतः सहलक्ष्मणः ॥ जटाधरः प्रव्रजतां वर्षाणीह चतुर्दश ॥ १३ ॥ भरतस्तु द्वितीयेन यौवराज्याधिपोस्तु मे ॥ मंथरावचनान्मूढा वरमेतमयाचत ॥ १४ ॥ जानकीलक्ष्मणसखं रामं प्राव्राजयन्नृपः ॥ त्रिरात्रमुदकाहारश्चतुर्थेह्नि फलाशनः ॥ १५ ॥ पञ्चमे चित्रकूटे तु रामो वासमकल्पयत् ॥ तदा दशरथः स्वर्गं गतो राम इति ब्रुवन् ॥ १६ ॥ ब्रह्मशापं तु सफलं कृत्वा स्वर्गं जगाम किम् ॥ ततो भरतशत्रुघ्नौ चित्रकूटे समागतौ ॥ १७ ॥ स्वर्गतं पितरं राजन्रामाय विनिवेद्य च ॥ सांत्वनं भरतस्यास्य कृत्वा निवर्तनं प्रति ॥ १८ ॥ ततो भरतशत्रुघ्नौ नंदिग्रामं समागतौ ॥ पादुकापूजनरतौ तत्र राज्यधरावुभौ ॥ १९ ॥ अत्रिं दृष्ट्वा महात्मानं दण्डकारण्यमागमत् ॥ रक्षोगणवधारम्भे विराधे विनिपातिते ॥ २० ॥ अर्द्धत्रयोदशे वर्षे पंचवट्यामुवास ह ॥ ततो विरूपयामास शूर्पणखां निशाचरीम् ॥ वने विचरतस्तस्य जानकीसहितस्य

१ रामम्—परशुरामम्—इत्यर्थः । २ रामः—इति शेषः । दाशरथी रामः—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ २१ ॥ आगतो राक्षसो घोरः सीतापहरणाय सः ॥ ततो माघासिताष्टम्यां मुहूर्ते वृन्दसंज्ञके ॥ २२ ॥ राघवाभ्यां विना सीतां जहार दशकन्धरः ॥ मारीचस्याश्रमं गत्वा मृगरूपेण तेन च ॥ २३ ॥ नीत्वा दूरं राघवं च लक्ष्मणेन समन्वितम् ॥ ततो रामो जघानाशु मारीचं मृगरूपिणम् ॥ २४ ॥ पुनः प्राप्याश्रमं रामो विना सीतां ददर्श ह ॥ तत्रैव ह्रियमाणा सा चक्रंद कुररी यथा ॥ २५ ॥ रामरामेति मां रक्ष रक्ष मां रक्षसा हृताम् ॥ यथा श्येनः क्षुधायुक्तः क्रन्दंतीं वर्तिकां नयेत् ॥ २६ ॥ तथा कामवशं प्राप्तो राक्षसो जनकात्मजाम् ॥ नयत्येष जनकजां तच्छ्रुत्वा पक्षिराट् तदा ॥ २७ ॥ युयुधे राक्षसेंद्रेण रावणेन हतोऽपतत् ॥ माघासितनवम्यां तु वसंतीं रावणालये ॥ २८ ॥ मार्गमाणौ तदा तौ तु भ्रातरौ रामलक्ष्मणौ ॥ २९ ॥ जटायुषं तु दृष्ट्वैव ज्ञात्वा राक्षससंहृताम् ॥ सीतां ज्ञात्वा ततः पक्षी संस्कृतस्तेन भक्तितः ॥ ३० ॥ अग्रतः प्रययौ रामो लक्ष्मणस्तत्पदानुगः ॥ पंपाभ्याशमनुप्राप्य शबरीमनुगृह्य च ॥३१॥ तज्जलं समुपस्पृश्य हनुमद्दर्शनं कृतम् ॥ ततो रामो हनुमता सह सख्यं चकार ह ॥ ३२ ॥ ततः सुग्रीवमभ्येत्य अहनद्वालिवानरम् ॥ प्रेषिता रामदेवेन हनुमत्प्रमुखाः प्रियाम् ॥ ३३ ॥ अंगुलीयकमादाय वायुसूनुस्तदा गतः ॥ संपातिर्दशमे मासि आचख्यौ वानराय ताम्॥३४॥ततस्तद्वचनादब्धिं पुप्लुवे शतयोजनम् ॥ हनुमान्निशि तस्यां तु लंकायां परितोऽचिनोत्॥३५॥ तद्रात्रिशेषे सीताया दर्शनं तु हनूमतः ॥ द्वादश्यां शिंशपावृक्षे हनुमान्पर्यवस्थितः ॥ ३६ ॥ तस्यां निशायां जानक्या विश्वासायाह संकथाम् ॥ अक्षादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत ॥ ३७ ॥ ब्रह्मास्त्रेण त्रयोदश्यां बद्धः शक्रजिता कपिः ॥ दारुणानि च रूक्षाणि वाक्यानि राक्षसाधिपम् ॥ ॥ ३८ ॥ अब्रवीद्वायुसूनुस्तं बद्धो ब्रह्मास्त्रसंयुतः ॥ वह्निना पुच्छयुक्तेन लंकाया दहनं कृतम् ॥ ३९ ॥ पूर्णिमायां महेंद्राद्रौ पुनरागमनं कपेः ॥ मार्गशीर्षप्रतिपदः पंचभिः पथि वासरैः ॥ ४० ॥ पुनरागत्य वर्षेह्नि ध्वस्तं मधुवनं किल ॥ सप्तम्यां प्रत्यभिज्ञानदानं सर्वनिवेदनम् ॥ ४१ ॥ मणिप्रदानं सीतायाः सर्वं रामाय शंसयत्[1] ॥ अष्टम्युत्तरफाल्गुन्यां मुहूर्ते विजयाभिधे ॥ ४२ ॥ मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य च ॥ रामः कृत्वा प्रतिज्ञां हि प्रयातुं दक्षिणां दिशम् ॥ ४३ ॥ तीर्त्वाहं सागरमपि हनिष्ये राक्षसेश्वरम् ॥ दक्षिणाशां प्रयातस्य सुग्रीवोऽथाभवत्सखा ॥ ४४ ॥ वासरैः सप्तभिः सिंधोस्तीरे सैन्यनिवेशनम् ॥ पौषशुक्लप्रतिपदस्तृतीयां यावदब्धौ ॥ उपस्थानं ससैन्यस्य राघवस्य बभूव ह ॥ ४५ ॥ विभीषणश्चतुर्थ्यां तु रामेण सह संगतः ॥ समुद्रतरणार्थाय पंचम्यां मंत्रे[2] उद्यतेः ॥ ४६ ॥ प्रायोपवेशनं चक्रे रामो दिन

१ अशंसयत्—अडभाव आर्षः । २ मंत्रे—मंत्रणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुष्टयम् ॥ समुद्राद्वरलाभश्च सहोपायप्रदर्शनः ॥ ४७ ॥ सेतोर्दशम्यामारंभस्त्रयोदश्यां समापनम् ॥ चतुर्दश्यां सुवेलाद्रौ रामः सेनां न्यवेशयत् ॥ ४८ ॥ पूर्णिमास्या द्वितीयायां त्रिदिनैः सैन्यतारणम् ॥ तीर्त्वा तोयनिधिं रामः शूरवानरसैन्यवान् ॥ ४९ ॥ रुरोध च पुरीं लंकां सीतार्थं शुभलक्षणः ॥ तृतीयादिदशम्यंतं निवेशश्च दिनाष्टकः ॥ ५० ॥ शुकसारणयोस्तत्र प्राप्तिरेकादशीदिने ॥ पौषासिते च द्वादश्यां सैन्यसंख्यानमेव च ॥ ५१ ॥ शार्दूलेन कपींद्राणां सारासारोपवर्णनम् ॥ त्रयोदश्याद्यमांते च लंकायां दिवसैस्त्रिभिः ॥ ५२ ॥ रावणः सैन्यसंख्यानं रणोत्साहं तदाऽकरोत् ॥ प्रययावंगदो दौत्ये माघशुक्लाद्यवासरे ॥ ५३ ॥ सीतायाश्च तदा भर्तुर्मायामूर्धादिदर्शनम् ॥ माघशुक्लद्वितीयायां दिनैः सप्तभिरष्टमीम् ॥ ५४ ॥ रक्षसां वानराणां च युद्धमासीच्च संकुलम् ॥ माघशुक्लनवम्यां तु रात्राविंद्रजिता रणे ॥ ५५ ॥ रामलक्ष्मणयोर्नागपाशबंधः कृतः किल ॥ आकुलेषु कपीशेषु हताशेषु च सर्वशः ॥ ५६ ॥ वायूपदेशाद्गरुडं सस्मार राघवस्तदा ॥ नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात् ॥ ५७ ॥ अवहारो माघशुक्लस्यैकादश्यां दिनद्वयम् ॥ द्वादश्यामांजनेयेन धूम्राक्षस्य वधः कृतः ॥ ५८ ॥ त्रयोदश्यां तु तेनैव निहतोऽकंपनो रणे ॥ मायासीतां दर्शयित्वा रामाय दशकंधरः ॥ ५९ ॥ त्रासयामास च तदा सर्वान्सैन्यगतानपि ॥ माघशुक्लचतुर्दश्यां यावत्कृष्णादिवासरम् ॥ ६० ॥ त्रिदिनेन प्रहस्तस्य नीलेन विहितो वधः ॥ माघकृष्णद्वितीयायाश्चतुर्थ्यंतं त्रिभिर्दिनैः ॥ ६१ ॥ रामेण तुमुले युद्धे रावणो द्रावितो रणात् ॥ पञ्चम्या अष्टमी यावद्रावणेन प्रबोधितः ॥ ६२ ॥ कुंभकर्णस्तदा चक्रेऽभ्यवहारं चतुर्दिनम् ॥ कुम्भकर्णोऽकरोद्युद्धं नवम्यादिचतुर्दिनैः ॥ ६३ ॥ रामेण निहतो युद्धे बहुवानरभक्षकः ॥ अमावास्यादिने शोकाऽभ्यवहारो बभूव ह ॥ ६४ ॥ फाल्गुनप्रतिपदादौ चतुर्थ्यंतैश्चतुर्दिनैः ॥ नरांतकप्रभृतयो निहताः पञ्च राक्षसाः ॥ ६५ ॥ पंचम्याः सप्तमीं यावदतिकायवधस्त्र्यहात् ॥ अष्टम्या द्वादशीं यावन्निहतौ दिनपंचकात् ॥ ६६ ॥ निकुम्भकुम्भौ द्वावेतौ मकराक्षश्चतुर्दिनैः ॥ फाल्गुनासितद्वितीयाया दिने वै शक्रजिज्जितः ॥ ६७ ॥ तृतीयादौ सप्तम्यंतदिनपञ्चकमेव च ॥ ओषध्यानयवैयग्र्यादवहारो बभूव ह ॥ ६८ ॥ अष्टम्यां रावणो मायामैथिलीं हतवान्कुधीः ॥ शोकावेगात्तदा रामश्चक्रे सैन्यावधारणम् ॥ ६९ ॥ ततस्त्रयोदशीं यावद्दिनैः पंचभिरिंद्रजित् ॥ लक्ष्मणेन हतो युद्धे विख्यातबलपौरुषः ॥ ७० ॥ चतुर्दश्यां दशग्रीवो दीक्षामापावहारतः ॥ अमावास्यादिने प्रागाद्युद्धाय दशकंधरः ॥ ७१ ॥ चैत्रशुक्लप्रतिपदः पंचमीदिनपंचके ॥ रावणो युध्यमानोऽभूत्प्रचुरो रक्षसां वधः ॥ ७२ ॥ चैत्रशुक्लाष्टमीं यावत्स्यंदनाश्वादिसूदनम् ॥ चैत्रशुक्लनवम्यां तु सौमित्रेः शक्तिभेदने ॥ ७३ ॥ कोपाविष्टेन रामेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रावितो दशकंधरः ॥ बिभीषणोपदेशेन हनुमद्युद्धमेव च ॥ ७४ ॥ द्रोणाद्रेरोषधीं नेतुं लक्ष्मणार्थमुपागतः ॥ विशल्यां तु समादाय लक्ष्मणं तामपाययत् ॥ ७५ ॥ दशम्यामवहारोऽभूद्रात्रौ युद्धं तु रक्षसाम् ॥ एकादश्यां तु रामाय रथो मातलिसारथिः ॥ ७६ ॥ प्राप्तो युद्धाय द्वादश्यां यावत्कृष्णां चतुर्दशीम् ॥ अष्टादशदिने रामो रावणं द्वैरथेऽवधीत् ॥ ७७ ॥ संस्कारा रावणादीनाममावास्यादिनेऽभवन् ॥ संग्रामे तुमुले जाते रामो जयमवाप्तवान् ॥ ७८ ॥ माघशुक्लद्वितीयादिचैत्रकृष्णचतुर्दशीम् ॥ सप्ताशीतिदिनान्येवं मध्ये पंचदशाहकम् ॥ ७९ ॥ युद्धावहारः संग्रामो द्वासप्ततिदिनान्यभूत् ॥ वैशाखादितिथौ राम उवास रणभूमिषु ॥ अभिषिक्तो द्वितीयायां लंकाराज्ये बिभीषणः ॥ ८० ॥ सीताशुद्धिस्तृतीयायां देवेभ्यो वरलंभनम् ॥ दशरथस्यागमनं तत्र चैवानुमोदनम् ॥ ८१ ॥ हत्वा त्वरेण लंकेशं लक्ष्मणस्याग्रजो विभुः॥ गृहीत्वा जानकीं पुण्यां दुःखितां राक्षसेन तु ॥ ८२ ॥ आदाय परया प्रीत्या जानकीं स न्यवर्तत ॥ वैशाखस्य चतुर्थ्यां तु रामः पुष्पकमाश्रितः ॥ ८३ ॥ विहायसा निवृत्तस्तु भूयोऽयोध्यां पुरीं प्रति ॥ पूर्णे चतुर्दशे वर्षे पंचम्यां माधवस्य च ॥ ८४ ॥ भारद्वाजाश्रमे रामः सगणः समुपाविशत् ॥ नंदिग्रामे तु षष्ठ्यां स पुष्पकेण समागतः ॥ ८५ ॥ सप्तम्यामभिषिक्तोऽसौ भूयोऽयोध्यायां रघूद्वहः ॥ दशाहाधिकमासांश्च चतुर्दश हि मैथिली ॥ ८६ ॥ उवास रामरहिता रावणस्य निवेशने ॥ द्वाचत्वारिंशके वर्षे रामो राज्यमकारयत् ॥ ८७ ॥ सीतायास्तु त्रयस्त्रिंशद्वर्षाणि तु तदाभवन् ॥ स चतुर्दशवर्षांते प्रविष्टः स्वां पुरीं प्रभुः ॥ ८८ ॥ अयोध्यांनाम मुदितो रामो रावणदर्पहा ॥ भ्रातृभिः सहितस्तत्र रामो राज्यमकारयत् ॥ ८९ ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ रामो राज्यं पालयित्वा जगाम त्रिदिवालयम् ॥ ९० ॥ रामराज्ये तदा लोका हर्षनिर्भरमानसाः ॥ बभूवुर्धनधान्याढ्याः पुत्रपौत्रयुता नराः ॥ ९१ ॥ कामवर्षी च पर्जन्यः सस्यानि गुणवंति च ॥ गावस्तु घटदोहिन्यः पादपाश्च सदाफलाः ॥ ९२ ॥ नाधयो व्याधयश्चैव रामराज्ये नराधिप ॥ नार्यः पतिव्रताश्चासन्पितृभक्तिपरा नराः ॥ ९३ ॥ द्विजा वेदपरा नित्यं क्षत्रिया द्विजसेविनः ॥ कुर्वते वैश्यवर्णाश्च भक्तिं द्विजगवां सदा ॥ ९४ ॥ न योनिसंकरश्चासीत्तत्र नाचारसंकरः ॥ न वंध्या दुर्भगा नारी काकवंध्या मृतप्रजा ॥ ९५ ॥ विधवा नैव काप्यासीत्सभर्तृका न लंप्यते[1] ॥ नावज्ञां कुर्वते केपि मातापित्रोर्गुरोस्तथा ॥ ९६ ॥ न च वाक्यं हि वृद्धानामुल्लंघयति पुण्यकृत् ॥ न भूमिहरणं तत्र परनारीपराङ्मुखाः ॥ ९७ ॥ नापवादपरो लोको न दरिद्रो न रोगभाक् ॥ न स्तेयो द्यूतकारी च मैरेयी[2]

१ न लंप्यते—न विलप्यते—पुत्रपौत्रादिसुखमनुभवन्त्याः सौभाग्यवत्याः पत्युरग्रे नातिरोगेण मरणात्—इत्यर्थः । २ मैरेयम्—मद्यम्—तत्प्राशकः—मैरेयी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापिनो नहि ॥ ९८ ॥ न हेमहारी ब्रह्मघ्नो न चैव गुरुतल्पगः ॥ न स्त्रीघ्नो न च बालघ्नो न चैवानृतभाषणः ॥ ९९ ॥ न वृत्तिलोपकश्चासीत्कूट
साक्षी न चैव हि ॥ न शठो न कृतघ्नश्च मलिनो नैव दृश्यते ॥ १०० ॥ सदा सर्वत्र पूज्यंते ब्राह्मणा वेदपारगाः ॥ नावैष्णवोऽव्रती राजन्राम
राज्येऽतिविश्रुते ॥ १०१ ॥ राज्यं प्रकुर्वतस्तस्य पुरोधा वदतां वरः ॥ वसिष्ठो मुनिभिः सार्द्धं कृत्वा तीर्थान्यनेकशः ॥ २ ॥ आजगाम ब्रह्मपुत्रो
महाभागस्तपोनिधिः ॥ रामस्तं पूजयामास मुनिभिः सहितं गुरुम् ॥ ३ ॥ अभ्युत्थानार्घपाद्यैश्च मधुपर्कादिपूजया ॥ प्रपच्छ कुशलं रामं वसिष्ठो
मुनिपुंगवः ॥ ४ ॥ राज्ये चाश्वे गजे कोशे देशे सद्भ्रातृभृत्ययोः ॥ कुशलं वर्त्तते राम इति पृष्टे मुनेस्तदा ॥ ५ ॥ ॥ राम उवाच ॥ ॥
सर्वत्र कुशलं मेऽद्य प्रसादाद्भवतः सदा ॥ पप्रच्छ कुशलं रामो वसिष्ठं मुनिपुंगवम् ॥ ६ ॥ सर्वतः कुशली त्वं हि भार्यापुत्रसमन्वितः ॥
सेवितानि धरापृष्ठे क्षेत्राण्यायतनानि च ॥ रामाय कथयामास सर्वत्र कुशलं तदा ॥ ८ ॥ ततः
स सर्वं कथयामास यथा तीर्थान्यशेषतः ॥ ७ ॥
स विस्मयाविष्टो रामो राजीवलोचनः ॥ पप्रच्छ तीर्थमाहात्म्यं यत्तीर्थेषूत्तमोत्तमम् ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये रामचरित्रवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ श्रीराम उवाच ॥ ॥
भगवन्यानि तीर्थानि सेवितानि त्वया विभो ॥ एतेषां परमं तीर्थं तन्ममाचक्ष्व मानद ॥ १ ॥ मया तु सीताहरणे निहता ब्रह्मराक्षसाः ॥ तत्पा
पस्य विशुद्ध्यर्थं वद तीर्थोत्तमोत्तमम् ॥ २ ॥ वसिष्ठ उवाच ॥ ॥ गंगा च नर्मदा तापी यमुना च सरस्वती ॥ गंडकी गोमती पूर्णा एता
नद्यः सुपावनाः ॥ ३ ॥ एतासां नर्मदा श्रेष्ठा गंगा त्रिपथगामिनी ॥ दहते किल्बिषं सर्वं दर्शनादेव राघव ॥ ४ ॥ दृष्ट्वा जन्मशतं पापं गत्वा
जन्मशतत्रयम् ॥ स्नात्वा जन्मसहस्रं च हंति रेवा कलौ युगे ॥ ५ ॥ नर्मदातीरमाश्रित्य शाकमूलफलैरपि ॥ एकस्मिन्भोजिते विप्रे कोटि
भोजफलं लभेत् ॥ ६ ॥ गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७ ॥ फाल्गुनांते कुहूं
प्राप्य तथा प्रौष्ठपदेऽसिते ॥ पक्षे गंगामधि प्राप्य स्नानं च पितृतर्प्पणम् ॥ ८ ॥ कुरुते पिंडदानानि सोऽक्षयं फलमश्नुते ॥ शुचौ मासे च
संप्राप्ते स्नानं वाप्यां करोति यः ॥ ९ ॥ चतुरशीतिनरकान्न पश्यति नरो नृप ॥ तपत्याः स्मरणे राम महापातकिनामपि ॥ १० ॥
उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतम् ॥ यमुनायां नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ११ ॥ महापातकयुक्तोऽपि स गच्छेत्परमां गतिम् ॥
कार्त्तिक्यां कृत्तिकायोगे सरस्वत्यां निमज्जयेत् ॥ १२ ॥ गच्छेत्स गरुडारूढः स्तूयमानः सुरोत्तमैः ॥ स्नात्वा यः कार्तिके मासि यत्र प्राची

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरस्वती ॥ १३ ॥ प्राचीं माधवमास्तूय स गच्छेत्परमां गतिम् ॥ गंडकीपुण्यतीर्थे हि स्नानं यः कुरुते नरः ॥ १४ ॥ शालग्रामशिलामर्च्य न भूयः स्तनपो भवत् ॥ गोमतीजलकल्लोलैर्मज्जयेत्कृष्णसन्निधौ ॥ १५ ॥ चतुर्भुजो नरो भूत्वा वैकुण्ठे मोदते चिरम् ॥ चर्मण्वतीं नमस्कृत्य अपः स्पृशति यो नरः ॥ १६ ॥ स तारयति पूर्वजान्दश पूर्वान्दशापरान् ॥ द्वयोश्च संगमं दृष्ट्वा श्रुत्वा वा सागरध्वनिम् ॥ १७ ॥ ब्रह्महत्यायुतो वापि पूतो गच्छेत्परां गतिम् ॥ माघमासे प्रयागे तु मज्जनं कुरुते नरः ॥ १८ ॥ इह लोके सुखं भुक्त्वा अन्ते विष्णुपदं व्रजेत् ॥ प्रभासे ये नरा राम त्रिरात्रं ब्रह्मचारिणः ॥ १९ ॥ यमलोकं न पश्येयुः कुंभीपाकादिकं तथा ॥ नैमिषारण्यवासी यो नरो देवत्वमाप्नुयात् ॥ २० ॥ देवानामालयं यस्मात्तदेव भुवि दुर्लभम् ॥ कुरुक्षेत्रे नरो राम ग्रहणे चन्द्रसूर्ययोः ॥ २१ ॥ हेमदानाच्च राजेंद्र न भूयः स्तनपो भवेत् ॥ श्रीस्थले दर्शनं कृत्वा नरः पापात्प्रमुच्यते ॥ २२ ॥ सर्वदुःखविनाशे च विष्णुलोके महीयते ॥ काश्यपीं स्पर्शयेद्यो गां मानवो भुवि राघव ॥ ॥ २३ ॥ सर्वकामदुघावासमृषिलोकं स गच्छति ॥ उज्जयिन्यां तु वैशाखे शिप्रायां स्नानमाचरेत् ॥ २४ ॥ मोचयेद्रौरवाद्घोरात्पूर्वजांश्च सहस्रशः ॥ सिंधुस्नानं नरो राम प्रकरोति दिनत्रयम् ॥ २५ ॥ सर्वपापविशुद्धात्मा कैलासे मोदते नरः ॥ कोटितीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं शिवम् ॥ २६ ॥ ब्रह्महत्यादिभिः पापैर्लिप्यते न च स क्वचित् ॥ अज्ञानामपि जंतूनां महाऽमेध्ये तु गच्छताम् ॥ ॥ २७ ॥ पादोद्भूतं पयः पीत्वा सर्वपापं प्रणश्यति ॥ वेदवत्यां नरो यस्तु स्नाति सूर्योदये शुभे ॥ २८ ॥ सर्वरोगात्प्रमुच्येत परं सुखमवाप्नुयात् ॥ तीर्थानि राम सर्वत्र स्नानपानावगाहनैः ॥ २९ ॥ नाशयंति मनुष्याणां सर्वपापानि लीलया ॥ तीर्थानां परमं तीर्थं धर्मारण्यं प्रचक्षते ॥ ३० ॥ ब्रह्मविष्णुशिवाद्यैर्यदादौ संस्थापितं पुरा ॥ अरण्यानां च सर्वेषां तीर्थानां च विशेषतः ॥ ३१ ॥ धर्मारण्यात्परं नास्ति भुक्तिमुक्तिप्रदायकम् ॥ स्वर्गे देवाः प्रशंसंति धर्मारण्यनिवासिनः ॥ ३२ ॥ ते पुण्यास्ते पुण्यकृतो ये वसंति कलौ नराः ॥ धर्मारण्ये रामदेव सर्वकिल्बिषनाशने ॥ ३३ ॥ ब्रह्महत्यादिपापानि सर्वस्तेयकृतानि च ॥ परदारप्रसंगादि अभक्ष्यभक्षणादि वै ॥ ३४ ॥ अगम्यागमना द्यानि अस्पर्शस्पर्शनादि च ॥ भस्मीभवंति लोकानां धर्मारण्यावगाहनात् ॥ ३५ ॥ ब्रह्मघ्नश्च कृतघ्नश्च बालघ्नोऽनृतभाषणः ॥ स्त्रीगोघ्नश्चैव ग्रामघ्नो धर्मारण्ये विमुच्यते ॥ ३६ ॥ नातः परं पावनं हि पापिनां प्राणिनां भुवि ॥ स्वर्ग्यं यशस्यमायुष्यं वांछितार्थप्रदं शुभम् ॥ ३७ ॥ कामिनां

१ गल्की—इति सर्वत्र पाठांतरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामदं क्षेत्रं यतीनां मुक्तिदायकम् ॥ सिद्धानां सिद्धिदं प्रोक्तं धर्मारण्यं युगेयुगे ॥ ३८ ॥ ॥ ब्रह्मोवाच ॥ ॥ वसिष्ठवचनं श्रुत्वा रामो धर्म
भृतां वरः ॥ परं हर्षमनुप्राप्य हृदयानंदकारकम् ॥ ३९ ॥ प्रोत्फुल्लहृदयो रामो रोमांचिततनूरुहः ॥ गमनाय मतिं चक्रे धर्मारण्ये शुभव्रतः ॥
॥ ४० ॥ यस्मिन्कीटपतंगादिमानुषाः पशवस्तथा ॥ त्रिरात्रसेवनेनैव मुच्यन्तेः सर्वपातकैः ॥ ४१ ॥ कुशस्थली यथा काशी शूलपाणिश्च
भैरवः ॥ यथा वै मुक्तिदो राम धर्मारण्यं तथोत्तमम् ॥ ४२ ॥ ततो रामो महेष्वासो मुदा परमया युतः ॥ प्रस्थितस्तीर्थयात्रायां सीतया भ्रातृभिः
सह ॥ ४३ ॥ अनुजग्मुस्तदा रामं हनुमांश्च कपीश्वरः ॥ कौशल्या च सुमित्रा च कैकेयी च मुदान्विता ॥ ४४ ॥ लक्ष्मणो लक्षणोपेतो भरतश्च
महामतिः ॥ शत्रुघ्नः सैन्यसहितोप्ययोध्यावासिनस्तथा ॥ ४५ ॥ प्रकृतयो नरव्याघ्र धर्मारण्ये विनिर्ययुः ॥ अनुजग्मुस्तदा रामं मुदा परमया
युताः ॥ ४६ ॥ तीर्थयात्राविधिं कर्तुं गृहात्प्रचलितो नृपः ॥ वसिष्ठं स्वकुलाचार्यमिदमाह महीपते ॥ ४७ ॥ ॥ श्रीराम उवाच ॥ ॥
एतदाश्चर्यमतुलं किमादि द्वारकाभवत् ॥ कियत्कालसमुत्पन्ना वसिष्ठेदं वदस्व मे ॥ ४८ ॥ ॥ वसिष्ठ उवाच ॥ ॥ न जानामि महाराज
कियत्कालादभूदिदम् ॥ लोमशो जांबवांश्चैव जानातीति च कारणम् ॥ ४९ ॥ शरीरे यत्कृतं पापं नानाजन्मांतरेष्वपि ॥ प्रायश्चितं
हि सर्वेषामेतत्क्षेत्रं परं स्मृतम् ॥ ५० ॥ श्रुत्वेति वचनं तस्य रामं ज्ञानवतां वरः ॥ गन्तुं कृतमतिस्तीर्थं यात्राविधिमथाचरत् ॥ ५१ ॥
वसिष्ठं चाग्रतः कृत्वा महामांडलिकैर्नृपैः ॥ पुनश्चरविधिं कृत्वा प्रस्थितश्चोत्तरां दिशम् ॥ ५२ ॥ वसिष्ठं चाग्रतः कृत्वा प्रतस्थे पश्चिमां
दिशम् ॥ ग्रामाद्ग्राममतिक्रम्य देशाद्देशं वनाद्वनम् ॥५३॥ विमुच्य निर्ययौ रामः ससैन्यः सपरिच्छदः ॥ गजवाजिसहस्रौघै रथैर्यानैश्च कोटिभिः॥
॥ ५४ ॥ शिविकाभिश्चासंख्याभिः प्रययौ राघवस्तदा ॥ गजारूढः प्रपश्यंश्च देशान्विविधसौहृदान् ॥ ५५ ॥ श्वेतातपत्रं विधृत्य चामरेण
शुभेन च ॥ वीजितश्च जनौघेन रामस्तत्र समभ्यगात् ॥ ५६ ॥ वादित्राणां स्वनैर्घोरैर्नृत्यगीतपुरःसरैः ॥ स्तूयमानोपि सूतैश्च ययौ रामो
मुदान्वितः ॥ ५७ ॥ दशमेऽहनि संप्राप्तं धर्मारण्यमनुत्तमम् ॥ अदूरे हि ततो रामो दृष्ट्वा मांडलिकं पुरम् ॥ ५८ ॥ तत्र स्थित्वा ससैन्यस्तु
उवास निशि तां पुरीम् ॥ श्रुत्वा तु निर्जनं क्षेत्रमुद्वसं च भयानकम् ॥ ५९ ॥ व्याघ्रसिंहाकुलं तत्र यक्षराक्षससेवितम् ॥ श्रुत्वा
जनमुखाद्रामो धर्मारण्यमरण्यकम् ॥ तच्छ्रुत्वा रामदेवस्तु न चिंता क्रियतामिति ॥ ६० ॥ तत्रस्थान्वणिजः शूरान्दक्षान्स्वन्वय

१ इदं—क्षेत्रम्। २ विमुच्य—गमनेन अतिक्रम्य—इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायके ॥ ६१ ॥ समर्थान्हि महाकायान्महाबलपराक्रमान् ॥ समाहूय तदा काले वाक्यमेतदथाब्रवीत् ॥ ६२ ॥ शिबिकां सुसुवर्णां
मे शीघ्रं वाहयताचिरम् ॥ यथा क्षणेन चैकेन धर्मारण्यं व्रजाम्यहम् ॥ ६३ ॥ तत्र स्नात्वा च पीत्वा च सर्वपापात्प्रमुच्यते ॥ एवं ते
वणिजः सर्वे रामेण प्रेरितास्तदा ॥ ६४ ॥ तथेत्युक्त्वा च ते सर्वे ऊहुस्तच्छिबिकां तदा ॥ क्षेत्रमध्ये यदा रामः प्रविष्टः सहसैनिकः ॥
॥ ६५ ॥ तद्यानस्य गतिर्मंदा संजाता किल भारत ॥ मंदशब्दानि वाद्यानि मातंगा मंदगामिनः ॥ ६६ ॥ हयाश्च तादृशा जाता रामो विस्मय
मागतः ॥ गुरुं पप्रच्छ विनयाद्वशिष्ठं मुनिपुंगवम् ॥ ६७ ॥ किमेतन्मंदगतयश्चित्रं हृदि मुनीश्वर ॥ त्रिकालज्ञो मुनिः प्राह धर्मक्षेत्रमुपागतम् ॥
॥ ६८ ॥ तीर्थे पुरातने राम पादचारेण गम्यते ॥ एवं कृते ततः पश्चात्सैन्यसौख्यं भविष्यति ॥ ६९ ॥ पादचारी ततो रामः सैन्येन सह संयुतः ॥
मधुवासनके ग्रामे प्राप्तः परमभावनः ॥ ७० ॥ गुरुणा चोक्तमार्गेण मातॄणां पूजनं कृतम् ॥ नानोपहारैर्विविधैः प्रतिष्ठाविधिपूर्वकम् ॥ ७१ ॥
ततो रामो हरिक्षेत्रं सुवर्णादक्षिणे तटे ॥ निरीक्ष्य यज्ञयोग्याश्च भूमीर्वै बहुशस्तथा ॥ ७२ ॥ कृतकृत्यं तदात्मानं मेने रामो रघूद्वहः ॥ धर्मस्थानं
निरीक्ष्याथ सुवर्णाक्षोत्तरे तटे ॥ ७३ ॥ सैन्यसंघं समुत्तीर्य्य बभ्राम क्षेत्रमध्यतः ॥ तत्र तीर्थेषु सर्वेषु देवतायतनेषु च ॥७४॥ यथोक्तानि च कर्माणि
रामश्चक्रे विधानतः ॥ श्राद्धानि विधिवच्चक्रे श्रद्धया परया युतः ॥ ७५ ॥ स्थापयामास रामेशं तथा कामेश्वरं पुनः ॥ स्थानाद्वायुप्रदेशे तु सुवर्णो
भयतस्तटे ॥ ७६ ॥ कृत्वैवं कृतकृत्योऽभूद्रामो दशरथात्मजः ॥ कृत्वा सर्वविधिं चैव सभायां समुपाविशत् ॥ ७७ ॥ तां निशां स नदीतीरे
सुष्वाप रघुनंदनः ॥ ततोऽर्द्धरात्रे संजाते रामो राजीवलोचनः ॥ ७८ ॥ जागृतस्तु तदा काल एकाकी धर्मवत्सलः ॥ अश्रौषीच्च क्षणे तस्मि
न्रामो नारीविरोदनम् ॥ ७९ ॥ निशायां करुणैर्वाक्यै रुदंतीं कुररीमिव ॥ चारैर्विलोकयामास रामस्तामतिसंभ्रमात् ॥ ८० ॥ दृष्ट्वातिविह्वलां नारीं
क्रंदन्तीं करुणैः स्वरैः ॥ पृष्टा सा दुःखिता नारी रामदूतैस्तदानघ ॥ ८१ ॥ ॥ दूता ऊचुः ॥ ॥ कासि त्वं सुभगे नारि देवी वा दानवी नु
किम् ॥ केन वा त्रासितासि त्वं मुष्टं केन धनं तव ॥८२॥ विकला दारुणाञ्छब्दानुद्गिरंती मुहुर्मुहुः ॥ कथयस्व यथातथ्यं रामो राजाभिपृच्छति॥
॥ ८३ ॥ तयोक्तं स्वामिनं दूताः प्रेषयध्वं ममांतिकम् ॥ यथाहं मानसं दुःखं शांत्यै तस्मै निवेदये ॥ ८४ ॥ तथेत्युक्त्वा ततो दूता राममागत्य
चाब्रुवन् ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये दूतागमनंनामैकत्रिंशो
ऽध्यायः ॥ ३१ ॥ छ॥ ॥ व्यास उवाच ॥ ॥ ततश्च रामदूतास्ते नत्वा राममथाब्रुवन् ॥ रामराम महाबाहो वरनारी शुभानना ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुवस्त्रभूषाभरणां मृदुवाक्यपरायणाम् ॥ एकाकिनीं क्रंदमानां दृष्ट्वा तां विस्मिता वयम् ॥ २ ॥ समीपवर्तिनो भूत्वा पृष्टा सा सुरसुन्दरी ॥ का त्वं देवि वरारोहे देवी वा दानवी नु किम् ॥ ३ ॥ रामः पृच्छति देवि त्वां ब्रूहि सर्वं यथातथम् ॥ तच्छ्रुत्वा वचनं रामा सोवाच मधुरं वचः ॥ ४ ॥ रामं प्रेषयत भद्रं वो मम दुःखापहं परम् ॥ ५ ॥ तदाकर्ण्य ततो रामः संभ्रमात्त्वरितो ययौ ॥ दृष्ट्वा तां दुःखसंतप्तां स्वयं दुःखमवाप सः ॥ उवाच वचनं रामः कृतांजलिपुटस्तदा ॥ ६ ॥ ॥ श्रीराम उवाच ॥ ॥ का त्वं शुभे कस्य परिग्रहो वा केनावधूता विजने निरस्ता ॥ मुष्टं धनं केन च तावकीनमाचक्ष्व मातः सकलं ममाग्रे ॥ ७ ॥ इत्युक्त्वा चातिदुःखार्तो रामो मतिमतां वरः ॥ प्रणामं दंडवच्चक्रे चक्रपाणिरिवापरः ॥८॥ तया भिवंदितो रामः प्रणम्य च पुनःपुनः ॥ तुष्टया परया प्रीत्या स्तुतो मधुरया गिरा ॥ ९ ॥ परमात्मन्परेशान दुःखहारिन्सनातन ॥ यदर्थमवतारस्ते तच्च कार्यं त्वया कृतम् ॥ १० ॥ रावणः कुंभकर्णश्च शक्रजित्प्रमुखास्तथा ॥ खरदूषणत्रिशिरोमारीचाक्षकुमारकाः ॥ ११ ॥ असंख्या निर्जिता रौद्रा राक्षसाः समरांगणे ॥ १२ ॥ किं वच्मि लोकेश सुकीर्त्तिमद्य ते वेधास्त्वदीयांगजपद्मसंभवः ॥ विश्वं निविष्टं च ततो ददर्श वटस्य पत्रे हि यथा वटो मतः ॥ १३ ॥ धन्यो दशरथो लोके कौशल्या जननी तव ॥ ययोर्जातोसि गोविंद जगदीश परः पुमान् ॥ १४ ॥ धन्यं च तत्कुलं राम यत्र त्वमागतः स्वयम् ॥ धन्याऽयोध्यापुरी राम धन्यो लोकस्त्वदाश्रयः ॥ १५ ॥ धन्यः सोऽपि हि वाल्मीकिर्येन रामायणं कृतम् ॥ कविना विप्रमुख्येभ्य आत्मबुद्ध्या ह्यनागतम् ॥ १६ ॥ त्वत्तोऽभवत्कुलं चेदं त्वया देव सुपावितम् ॥१७॥ नरपतिरिति लोकैः स्मर्यते वैष्णवांशः स्वयमसि रमणीयैस्त्वं गुणैर्विष्णुरेव ॥ किमपि भुवनकार्यं यद्विचिंत्यावतीर्य तदिह घटयतस्ते वत्स निर्विघ्नमस्तु ॥१८॥ स्तुत्वा वाचाथ रामं हि त्वयि नाथे नु सांप्रतम् ॥ शून्या वर्ते चिरं कालं यथा दोषस्तथैव हि ॥ १९ ॥ धर्मारण्यस्य क्षेत्रस्य विद्धि मामधिदेवताम् ॥ वर्षाणि द्वादशेहैव जातानि दुःखितास्म्यहम् ॥ २० ॥ निर्जनत्वं ममाद्य त्वमुद्धरस्व महामते ॥ लोहासुरभयाद्राम विप्राः सर्वे दिशो दश ॥ २१ ॥ गताश्च वणिजः सर्वे यथास्थानं सुदुःखिताः ॥ स दैत्यो घातितो राम देवैः सुरभयंकरः ॥ २२ ॥ आक्रम्यात्र महामायो दुराधर्षो दुरत्ययः ॥ न ते जनाः समायांति तद्भयादतिशंकिताः ॥ २३ ॥ अद्य वै द्वादश समाः शून्यागारमनाथवत् ॥ यस्माच्च दीर्घिकायां मे स्नानदानोद्यतो जनः ॥ २४ ॥ राम तस्यां दीर्घिकायां निपतंति च शूकराः ॥ यत्रांगना भर्तृयुता जलक्रीडापरायणाः ॥ २५ ॥ चिक्रीडुस्तत्र महिषा निपतंति जलाशये ॥ यत्र स्थाने सुपुष्पाणां प्रकरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रचुरोऽभवत् ॥ २६ ॥ तद्रुद्धं कंटकैर्वृक्षैः सिंहव्याघ्रसमाकुलैः ॥ संचिक्रीडुः कुमाराश्च यस्यां भूमौ निरंतरम् ॥२७॥ कुमार्यश्चित्रकाणां च तत्र क्रीडंति हर्षिताः ॥ अकुर्वन्वाडवा यत्र वेदगानं तिरंतरम् ॥२८॥ शिवानां तत्र फेत्काराः श्रूयंतेऽतिभयंकराः ॥ यत्र धूमोऽग्निहोत्राणां दृश्यते वै गृहेगृहे ॥ २९ ॥ तत्र दावाः सधूमाश्च दृश्यंतेऽत्युल्बणा भृशम् ॥ नृत्यंते नर्त्तका यत्र हर्षिता हि द्विजाग्रतः ॥ ३० ॥ तत्रैव भूतवेताला प्रेताः नृत्यंति मोहिताः ॥ नृपा यत्र सभायां तु न्यषीदन्मंत्रतत्पराः ॥ ३१ ॥ तस्मिन्स्थाने निषीदंति गवया ऋक्षशल्लकाः ॥ आवासा यत्र दृश्यन्ते द्विजानां वणिजां तथा ॥३२॥ कुट्टिमप्रतिमा राम दृश्यंतेत्र बिलानि वै ॥ कोटराणीह वृक्षाणां गवाक्षाणीह सर्वतः ॥ ३३ ॥ चतुष्का यज्ञवेदिर्हि सोच्छ्राया ह्यभवत्पुरा ॥ तेऽत्र वल्मीकनिचयैर्दृश्यंते परिवेष्टिताः ॥ ३४ ॥ एवंविधं निवासं मे विद्धि राम नृपोत्तम ॥ शून्यं तु सर्वतो यस्मान्निवासाय द्विजा गताः ॥ ३५ ॥ तेन मे सुमहद्दुःखं तस्मात्त्राहि नरेश्वर ॥ एतच्छ्रुत्वा वचो राम उवाच वदतां वरः ॥ ३६ ॥ ॥ श्रीराम उवाच ॥ ॥ न जाने तावकान्विप्रांश्चतुर्दिक्षु समाश्रितान् ॥ न तेषां वेद्म्यहं संख्यां नामगोत्रे द्विजन्मनाम् ॥ ३७ ॥ यथा ज्ञातिर्यथा गोत्रं याथातथ्यं निवेदय ॥ तत आनीय तान्सर्वान्स्वस्थाने वासयाम्यहम् ॥ ३८ ॥ ॥ श्रीमातोवाच ॥ ॥ ब्रह्मविष्णुमहेशैश्च स्थापिता ये नरेश्वर ॥ अष्टादश सहस्राणि ब्राह्मणा वेदपारगाः ॥ ३९ ॥ त्रयीविद्यासु विख्याता लोकेऽस्मिन्नमितद्युते ॥ चतुष्षष्टिकगोत्राणां वाडवा ये प्रतिष्ठिताः ॥ ॥ ४० ॥ श्रीमातादात्त्रयीविद्यां लोके सर्वे द्विजोत्तमाः ॥ षट्त्रिंशच्च सहस्राणि वैश्या धर्मपरायणाः ॥ ४१ ॥ आर्यवृत्तास्तु विज्ञेया द्विजशुश्रूषणे रताः ॥ बहुलार्को नृपो यत्र संज्ञया सह राजते ॥ ४२ ॥ कुमारावश्विनौ देवौ धनदो व्ययपूरकः ॥ अधिष्ठात्री त्वहं राम नाम्ना भट्टारिका स्मृता ॥ ४३ ॥ ॥ श्रीसूत उवाच ॥ ॥ स्थानाचाराश्च ये केचित्कुलाचारास्तथैव च ॥ श्रीमात्रा कथितं सर्वं रामस्याग्रे पुरातनम् ॥ ४४ ॥ तस्यास्तु वचनं श्रुत्वा रामो मुदमवाप ह ॥ सत्यंसत्यं पुनः सत्यं सत्यं हि भाषितं त्वया ॥ ४५ ॥ यस्मात्सत्यं त्वया प्रोक्तं तन्नाम्ना नगरं शुभम् ॥ वासयामि जगन्मातः सत्यमंदिरमेव च ॥ ४६ ॥ त्रैलोक्ये ख्यातिमाप्नोतु सत्यमंदिरमुत्तमम् ॥ ४७ ॥ एतदुक्त्वा ततो रामः सहस्रशतसंख्यया ॥ स्वभृत्यान्प्रेषयामास विप्रानयनहेतवे ॥ ४८ ॥ यस्मिन्देशे प्रदेशे वा वने वा सरितस्तटे ॥ पर्यंते वा यथास्थाने ग्रामे वा तत्रतत्र च ॥ ४९ ॥ धर्मारण्यनिवासाश्च याता यत्र द्विजोत्तमाः ॥ अर्घपाद्यैः पूजयित्वा शीघ्रमानय

१ चित्रकाः—व्याघ्रजातीयहिंस्रपशुविशेषाः 'चित्ता' इति महाराष्ट्रभाषायां प्रसिद्धाः । २ शुद्धाः—इ० प० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तात्र तान् ॥ ५० ॥ अहमत्र तदा भोक्ष्ये यदा द्रक्ष्ये द्विजोत्तमान् ॥ ५१ ॥ विमान्य च द्विजानेतानागमिष्यति यो नरः ॥ स मे वध्यश्च दंड्यश्च निर्वास्यो विषयाद्बहिः ॥ ५२ ॥ तच्छ्रुत्वा दारुणं वाक्यं दुःसहं दुःप्रधर्षणम् ॥ रामाज्ञाकारिणो दूता गताः सर्वे दिशो दश ॥ ५३ ॥ शोधिता वाडवाः सर्वे लब्धाः सर्वे सुहर्षिताः ॥ यथोक्तेन विधानेन अर्घपाद्यैरपूजयन् ॥ ५४ ॥ स्तुतिं चक्रुश्च विधिवद्विनयाचारपूर्वकम् ॥ आमंत्र्य च द्विजान्सर्वान्रामवाक्यं प्रकाशयन् ॥ ५५ ॥ ततस्ते वाडवाः सर्वे द्विजाः सेवकसंयुताः ॥ गमनायोद्यताः सर्वे वेदशास्त्रपरायणाः ॥ ५६ ॥ आगता रामपार्श्वं च बहुमानपुरःसराः ॥ समागतान्द्विजान्दृष्ट्वा रोमांचिततनूरुहः ॥ ५७ ॥ कृतकृत्यमिवात्मानं मेने दाशरथिर्नृपः ॥ स संभ्रमात्समुत्थाय पदातिः प्रययौ पुरः ॥ ५८ ॥ करसंपुटकं कृत्वा हर्षाश्रु प्रतिमुञ्चयन् ॥ जानुभ्यामवनिं गत्वा इदं वचनमब्रवीत् ॥ ५९ ॥ विप्रप्रसादात्कमलावरोऽहं विप्रप्रसादाद्धरणीधरोऽहम् ॥ विप्रप्रसादाज्जगतीपतिश्च विप्रप्रसादान्मम रामनाम ॥ ६० ॥ इत्येवमुक्ता रामेण वाडवास्ते प्रहर्षिताः ॥ जयाशीर्भिः प्रपूज्याथ दीर्घायुरिति चाब्रुवन् ॥ ६१ ॥ आवर्जितास्ते रामेण पाद्यार्घ्यविष्टरादिभिः ॥ स्तुतिं चकार विप्राणां दण्डवत्प्रणिपत्य च ॥ ६२ ॥ कृतांजलिपुटः स्थित्वा चक्रे पादाभिवंदनम् ॥ आसनानि विचित्राणि हैमान्याभरणानि च ॥ ६३ ॥ समर्पयामास ततो रामो दशरथात्मजः ॥ अंगुलीयकवासांसि उपवीतानि कर्णकान् ॥ ६४ ॥ प्रददौ विप्रमुख्येभ्यो नानावर्णाश्च धेनवः ॥ एकैकशतसंख्याका घटोध्नीश्च सवत्सकाः ॥ ६५ ॥ सवस्त्रा बद्धघंटाश्च हेमशृंगविभूषिताः ॥ रूप्यखुरास्ताम्रपृष्ठीः कांस्यपात्रसमन्विताः ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ब्रह्मनारदसंवादे सत्यमंदिरस्थापनवर्णनोनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ राम उवाच ॥ ॥ जीर्णोद्धारं करिष्यामि श्रीमातुर्वचनादहम् ॥ आज्ञा प्रदीयतां मह्यं यथादानं ददामि वः ॥ १ ॥ पात्रे दानं प्रदातव्यं कृत्वा यज्ञवरं द्विजाः ॥ नापात्रे दीयते किंचिद्दत्तं न तु सुखावहम् ॥ २ ॥ सुपात्रं नौरिव सदा तारयेदुभयोरपि ॥ लोहपिंडोपमं ज्ञेयं कुपात्रं भञ्जनात्मकम् ॥ ३ ॥ जातिमात्रेण विप्रत्वं जायते न हि भो द्विजाः ॥ क्रिया बलवती लोके क्रियाहीने कुतः फलम् ॥ ४ ॥ पूज्यास्तस्मात्पूज्यतमा ब्राह्मणाः सत्यवादिनः ॥ यज्ञकार्ये समुत्पन्ने कृपां कुर्वंतु सर्वदा ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततस्तु मिलिताः सर्वे विमृश्य च परस्परम् ॥ केचिदूचुस्तदा रामं वयं शिलोंछजीविकाः ॥ ६ ॥ संतोषं परमास्थाय स्थिता धर्मपरायणाः ॥ प्रतिग्रहप्रयोगेण न चास्माकं प्रयोजनम् ॥ ७ ॥ दशसूनासमश्चक्री दशचक्रिसमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वजः ॥ दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥ ८ ॥ राजप्रतिग्रहो घोरो राम सत्यं न संशयः ॥ तस्माद्वयं न चेच्छमः प्रतिग्रहं भया
वहम् ॥ ९ ॥ एकाहिका द्विजाः केचित्केचित्स्वामृतवृत्तयः ॥ कुम्भीधान्या द्विजाः केचित्केचित्षट्कर्मतत्पराः ॥ १० ॥ त्रिमूर्तिस्थापिताः
सर्वे पृथग्भावाः पृथग्गुणाः ॥ केचिदेवं वदंति स्म त्रिमूर्त्याज्ञां विना वयम् ॥ ११ ॥ प्रतिग्रहस्य स्वीकारं कथं कुर्याम ह द्विजाः ॥ न तांबूलं
स्वीकृतं नो[1] ह्यन्नो दानेन भषितम् ॥ १२ ॥ विमृश्य स तदा रामो वसिष्ठेन महात्मना ॥ ब्रह्मविष्णुशिवादीनां सस्मार गुरुणा सह ॥ स्मृतमात्रा
स्ततो देवास्तं देशं समुपागमन् ॥ सूर्यकोटिप्रतीकाशविमानावलिसंवृताः ॥ १४ ॥ रामेण ते यथान्यायं पूजिताः परया मुदा ॥ १३ ॥ निवेदितं
तु तत्सर्वं रामेणातिसुबुद्धिना ॥ १५ ॥ अधिदेव्या वचनतो जीर्णोद्धारं करोम्यहम् ॥ धर्मारण्ये हरिक्षेत्रे धर्मकूपसमीतः ॥ १६ ॥ ततस्ते
वाडवाः सर्वे त्रिमूर्तीः प्रणिपत्य च ॥ महता हर्षवृंदेन पूर्णाः प्राप्तमनोरथाः ॥ १७ ॥ अर्घ्यपाद्यादिविधिना श्रद्धया तानपूजयन् ॥ क्षणं विश्रम्य
ते देवा ब्रह्मविष्णुशिवादयः ॥ १८ ॥ ऊचू रामं महाशक्तिं विनयात्कृतसंपुटम् ॥ १९ ॥ ॥ देवा ऊचुः ॥ ॥ देवद्रुहस्त्वया राम ये हता
रावणादयः ॥ तेन तुष्टा वयं सर्वे भानुवंशविभूषण ॥ २० ॥ उद्धरस्व महास्थानं महतीं कीर्तिमाप्नुहि ॥ २१ ॥ लब्ध्वा स तेषामाज्ञां तु प्रीतो
दशरथात्मजः ॥ जीर्णोद्धारेऽनंतगुणं फलमिच्छन्निलापतिः ॥ २२ ॥ देवानां संनिधौ तेषां कार्यारंभमथाकरोत् ॥ स्थंडिलं पूर्वतः कृत्वा महागिरि
समं शुभम् ॥२३॥ तस्योपरि बहिःशाला गृहशाला ह्यनेकशः ॥ ब्रह्मशालाश्च बहुशो निर्ममे शोभनाकृतीः ॥२४॥ निधानैश्च समायुक्ता गृहोपकरणै
र्वृताः ॥ सुवर्णकोटिसंपूर्णा रसवस्त्रादिपूरिताः ॥ २५ ॥ धनधान्यसमृद्धाश्च सर्वधातुयुतास्तथा ॥ एतत्सर्वं कारयित्वा ब्राह्मणेभ्यस्तदा ददौ ॥ २६ ॥
एकैकशो दशदश ददौ धेनूः पयस्विनीः ॥ चत्वारिंशच्छतं प्रादाद्ग्रामाणां चतुराधिकम् ॥ २७ ॥ त्रैविद्यद्विजविप्रेभ्यो रामो दशरथात्मजः ॥
काजेशेन त्रयेणैव स्थापिता द्विजसत्तमाः ॥ २८ ॥ तस्मात्त्रयीविद्य इति ख्यातिर्लोके बभूव ह ॥ एवंविधं द्विजेभ्यः स दत्त्वा दानं महाद्भुतम् ॥
॥ २९ ॥ आत्मानं चापि मेने स कृतकृत्यं नरेश्वरः ॥ ब्रह्मणा स्थापिताः पूर्वं विष्णुना शंकरेण ये ॥ ३० ॥ ते पूजिता राघवेण जीर्णोद्धारे
कृते सति ॥ षट्त्रिंशच्च सहस्राणि गोभुजा ये वणिग्वराः ॥ ३१ ॥ शुश्रूषार्थं प्रदत्ता वै देवैर्हरिहरादिभिः ॥ संतुष्टेन तु शर्वेण तेभ्यो दत्तं तु चेत
नम् ॥ ३२ ॥ श्वेताश्वचामरौ दत्तौ खड्गं दत्तं सुनिर्मलम् ॥ तदा प्रबोधितास्ते च द्विजशुश्रूषणाय वै ॥ ३३ ॥ विवाहादौ सदा भाव्यं चामरे

१ नः—अस्माकम्—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंगलं वरम् ॥ खड्गं शुभं तदा धार्य्यं मम चिह्नं करे स्थितम् ॥ ३४ ॥ गुरुपूजा सदा कार्या कुलदेव्याः पुनःपुनः ॥ वृद्ध्यागमेषु प्राप्तेषु वृद्धिदायकदक्षिणा ॥ ३५ ॥ एकादश्यां शनेर्वारे दानं देयं द्विजन्मने ॥ प्रदेयं बालवृद्धेभ्यो मम रामस्य शासनात् ॥ ३६ ॥ मंडलेषु च ये शुद्धा वणिग्वृत्तिरताः पराः ॥ सपादलक्षास्ते दत्ता रामशासनपालकाः ॥ ३७ ॥ मांडलीकास्तु ते ज्ञेया राजानो मंडलेश्वराः ॥ द्विजशुश्रूषणे दत्ता रामेण वणिजां वराः ॥ ३८ ॥ चामरद्वितयं रामो दत्तवान्खड्गमेव च ॥ कुलस्य स्वामिनं सूर्यं प्रतिष्ठाविधिपूर्वकम् ॥ ॥ ३९ ॥ ब्रह्माणं स्थापयामास चतुर्वेदसमन्वितम् ॥ श्रीमातरं महाशक्तिं शून्यस्वामिहरिं तथा ॥ ४० ॥ विघ्नापध्वंसनार्थाय दक्षिणद्वारसंस्थितम् ॥ गणं संस्थापयामास तथान्याश्चैव देवताः ॥ ४१ ॥ कारितास्तेन वीरेण प्रासादाः सप्तभूमिकाः ॥ यत्किंचित्कुरुते कार्यं शुभं मांगल्यरूपकम् ॥ ४२ ॥ पुत्रे जाते जातके वान्नाशने मुंडनेऽपि वा ॥ लक्षहोमे कोटिहोमे तथा यज्ञक्रियासु च ॥ ४३ ॥ वास्तुपूजाग्रहशांत्योः प्राप्ते चैव महोत्सवे ॥ यत्किंचित्कुरुते दानं द्रव्यं वा धान्यमुत्तमम् ॥ ४४ ॥ वस्त्रं वा धेनवो नाथ हेम रूप्यं तथैव च ॥ विप्राणामथ शूद्राणां दीनानाथांधकेषु च ॥ ४५ ॥ प्रथमं बकुलार्कस्य श्रीमातुश्चैव मानवः ॥ भागं दद्याच्च निर्विघ्नकार्यसिद्ध्यै निरन्तरम् ॥ ४६ ॥ वचनं मे समुल्लंघ्य कुरुते योऽन्यथा नरः ॥ तस्य तत्कर्मणो विघ्नं भविष्यति न संशयः ॥ ४७ ॥ एवमुक्त्वा ततो रामः प्रहृष्टेनांतरात्मना ॥ देवानामथ वापीश्च प्राकारांस्तु सुशोभनान् ॥ ४८ ॥ दुर्गोपकरणैर्युक्तान्प्रतोलीश्च सुविस्तृताः ॥ निर्ममे चैव कुंडानि सरांसि सरसीस्तथा ॥ ४९ ॥ धर्मवापीश्च कूपांश्च तथान्यान्देवनिर्मितान् ॥ एतत्सर्वं च विस्तार्य धर्मारण्ये मनोरमे ॥ ५० ॥ ददौ त्रैविद्यमुख्येभ्यः श्रद्धया परया पुनः ॥ ताम्रपट्टस्थितं रामशासनं लोपयेत्तु यः ॥५१॥ पूर्वजास्तस्य नरके पतंत्यग्रे न संततिः ॥ वायुपुत्रं समाहूय ततो रामोऽब्रवीद्वचः ॥ ॥ ५२ ॥ वायुपुत्र महावीर तव पूजा भविष्यति ॥ अस्य क्षेत्रस्य रक्षायै त्वमत्र स्थितिमाचर ॥ ५३ ॥ आंजनेयस्तु तद्वाक्यं प्रणम्य शिरसादधौ ॥ जीर्णोद्धारं तदा कृत्वा कृतकृत्यो बभूव ह ॥ ५४ ॥ श्रीमातरं तदाभ्यर्च्य प्रसन्नेनांतरात्मना ॥ श्रीमातरं नमस्कृत्य तीर्थान्यन्यानि राघवः ॥५५॥ तेऽपि देवाः स्वकं स्थानं ययुर्ब्रह्मपुरोगमाः ॥५६॥ दत्त्वाशिषं तु रामाय वांछितं ते भविष्यति ॥ रम्यं कृतं त्वया राम विप्राणां स्थापनादिकम् ॥ ॥ ५७ ॥ अस्माकमपि वात्सल्यं कृतं पुण्यवता त्वया ॥ इति स्तुवंतस्ते देवाः स्वानि स्थानानि भेजिरे ॥ ५८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वार्धे धर्मारण्यमाहात्म्ये श्रीरामचन्द्रस्य पुरप्रत्यागमनवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ व्यास उवाच ॥ ॥ एवं रामेण धर्मज्ञ जीर्णोद्धारः पुरा कृतः ॥ द्विजानां च हितार्थाय श्रीमातुर्वचनेन च ॥ १ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ कीदृशं शासनं ब्रह्मन्रामेण लिखितं पुरा ॥ कथयस्व प्रसादेन त्रेतायां सत्यमंदिरे ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ धर्मारण्ये
वरे दिव्ये बकुलार्के स्वधिष्ठिते ॥ शून्यस्वामिनि विप्रेंद्र स्थिते नारायणे प्रभौ ॥ ३ ॥ रक्षणाधिपतौ देवे सर्वज्ञे गुणनायके ॥ भवसागर
मग्नानां तारिणी यत्र योगिनी ॥ ४ ॥ शासनं तत्र रामस्य राघवस्य च नामतः ॥ शृणु ताम्राश्रयं तत्र लिखितं धर्मशास्त्रतः ॥ ५ ॥ महा
श्चर्यकरं तच्च ह्यनेकयुगसंस्थितम् ॥ सर्वो धातुः क्षयं याति सुवर्णं क्षयमेति च ॥ ६ ॥ प्रत्यक्षं दृश्यते पुत्र द्विजशासनमक्षयम् ॥ अविनाशो हि ताम्र
स्य कारणं तत्र विद्यते ॥ ७ ॥ वेदोक्तं सकलं यस्माद्विष्णुरेव हि कथ्यते ॥ पुराणेषु च वेदेषु धर्मशास्त्रेषु भारत ॥ ८ ॥ सर्वत्र गीयते विष्णुर्नाना
भावसमाश्रयः ॥ नानादेशेषु धर्मेषु नानाधर्मनिषेविभिः ॥ ९ ॥ नानाभेदैस्तु सर्वत्र विष्णुरेवेति चिंत्यते ॥ अवतीर्णः स वै साक्षात्पुराणपुरुषो
त्तमः ॥ १० ॥ देववैरिविनाशाय धर्मसंरक्षणाय च ॥ तेनेदं शासनं दत्तमविनाशात्मकं सुत ॥ ११ ॥ यस्य प्रतापाद्दृषदस्तारिता जलमध्यतः ॥
वानरैर्वेष्टिता लंका हेलया राक्षसा हताः ॥ १२ ॥ मुनिपुत्रं मृतं रामो यमलोकादुपानयत् ॥ दुंदुभिर्निहतो येन कबंधोऽभिहतस्तथा ॥ १३ ॥
निहता ताडका चैव सप्ततालां विभेदिताः ॥ खरश्च दूषणश्चैव त्रिशिराश्च महासुरः ॥ १४ ॥ चतुर्दशसहस्राणि जवेन निहता रणे ॥ तेनेदं शासनं
दत्तमक्षयं न कथं भवेत् ॥ १५ ॥ स्ववंशवर्णनं तत्र लिखित्वा स्वयमेव तु ॥ देशकालादिकं सर्वं लिलेख विधिपूर्वकम् ॥ १६ ॥ स्वमुद्राचिह्नितं तत्र
त्रैविद्येभ्यस्तथा ददौ ॥ चतुश्चत्वारिंशवर्षो रामो दशरथात्मजः ॥ १७ ॥ तस्मिन्काले महाश्चर्यं संदत्तं किल भारत ॥ तत्र स्वर्णोपमं चापि रौप्योपमम
थापि च ॥ १८ ॥ उवाह सलिलं तीर्थे देवर्षिपितृतृप्तिदम् ॥ स्ववंशनायकस्याग्रे सूर्येण कृतमेव तत् ॥ १९ ॥ तद्दृष्ट्वा महदाश्चर्यं रामो विष्णुं प्रपूज्य
च ॥ रामलेखविचित्रैस्तु लिखितं धर्मशासनम् ॥ २० ॥ यद्दृष्ट्वाथ द्विजाः सर्वे संसारभयबंधनम् ॥ कुर्वते नैव यस्माच्च तस्मान्निखिलरक्षकम् ॥
॥ २१ ॥ ये पापिष्ठा दुराचारा मित्रद्रोहरताश्च ये ॥ तेषां प्रबोधनार्थाय प्रसिद्धिमकरोत्पुरा ॥ २२ ॥ रामलेखविचित्रैस्तु विचित्रे ताम्रपट्टके ॥
वाक्यानीमानि श्रूयंते शासने किल नारद ॥ २३ ॥ आस्फोटयंति पितरः कथयंति पितामहाः ॥ भूमिदोऽस्मत्कुले जातः सोऽस्मान्संतार
यिष्यति ॥ २४ ॥ बहुभिर्बहुधा भुक्ता राजभिः पृथिवी त्वियम् ॥ यस्ययस्य यदा भूमिस्तस्यतस्य तदा फलम् ॥ २५ ॥ षष्टिवर्षसहस्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गे वसति भूमिदः ॥ आच्छेत्ता चानुमंता च तान्येव नरकं व्रजेत् ॥ २६ ॥ संदंशैस्तुद्यमानस्तु मुद्गरैर्विनिहत्य च ॥ पाशैः सुबध्यमानस्तु रोरवीति महास्वरम् ॥ २७ ॥ ताड्यमानः शिरे दंडैः समालिंग्य विभावसुम् ॥ क्षुरिकया छिद्यमानो रोरवीति महास्वनम् ॥ २८ ॥ यमदूतैर्महा घोरैर्ब्रह्मवृत्तिविलोपकः ॥ एवंविधैर्महादुष्टैः पीडयंते ते महागणैः ॥ २९ ॥ ततस्तिर्यक्त्वमाप्नोति योनिं वा राक्षसीं शुनीम् ॥ व्यालीं शृगालीं पैशाचीं महाभूतभयंकरीम् ॥ ३० ॥ भूमेरंगुलहर्ता हि स कथं पापमाचरेत् ॥ भूमेरंगुलदाता च स कथं पुण्यमाचरेत् ॥ ३१ ॥ अश्वमेधसहस्राणां राजसूयशतस्य च ॥ कन्याशतप्रदानस्य फलं प्राप्नोति भूमिदः ॥ ३२ ॥ आयुर्यशः सुखं प्रज्ञा धर्मो धान्यं धनं जयः ॥ संतानं वर्द्धते नित्यं भूमिदः सुखमश्नुते ॥ ३३ ॥ भूमेरंगुलमेकं तु ये हरंति खला नराः ॥ वंध्याटवीष्वतोयासु शुष्ककोटरवासिनः ॥ कृष्णसर्पाः प्रजायंते दत्तदायापहारकाः ॥ ३४ ॥ तडागानां सहस्रेण अश्वमेधशतेन वा ॥ गवां कोटिप्रदानेन भूमिहर्त्ता विशुध्यति ॥ ३५ ॥ यानीह दत्तानि पुनर्धनानि दानानि धर्मार्थयशस्कराणि ॥ औदार्यतो विप्रनिवेदितानि को नाम साधुः पुनराददीत ॥ ३६ ॥ चलदलदललीलाचंचले जीवलोके तृणलवलघुसारे सर्वसंसारसौख्ये ॥ अपहरति दुराशः शासनं ब्राह्मणानां नरकगहनगर्त्तावर्तपातोत्सुको यः ॥ ३७ ॥ ये पास्यंति महीभुजः क्षितिमिमां यास्यंति भुक्त्वाखिलां नो याता न तु याति यास्यति न वा केनापि सार्द्धं धरा ॥ यत्किंचिद्भुवि तद्विनाशि सकलं कीर्तिः परं स्थायिनी त्वेवं वै वसुधापि यैरुपकृता लोप्या न सत्कीर्तयः ॥ ३८ ॥ एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ॥ न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥ ३९ ॥ दत्त्वा भूमिं भाविनः पार्थिवेशान्भूयोभूयो याचते रामचन्द्रः ॥ सामान्योऽयं धर्मसेतुर्नृपाणां स्वे स्वे काले पालनीयो भवद्भिः ॥४०॥ अस्मिन्वंशे क्षितौ कोपि राजा यदि भविष्यति ॥ तस्याहं करलग्नोस्मि मद्दत्तं यदि पाल्यते॥४१॥लिखित्वा शासनं रामश्चातुर्वेद्यद्विजोत्तमान् ॥ संपूज्य प्रददौ धीमान्वसिष्ठस्य च सन्निधौ ॥ ४२ ॥ ते वाडवा गृहीत्वा तं पट्टं रामाज्ञया शुभम् ॥ ताम्रं हैमाक्षर युतं धर्म्यं धर्मविभूषणम् ॥ ४३ ॥ पूजार्थं भक्तिकामार्थास्तद्रक्षणमकुर्वत ॥ चंदनेन च दिव्येन पुष्पेण च सुगन्धिना ॥ ४४ ॥ तथा सुवर्णपुष्पेण रूप्यपुष्पेण वा पुनः ॥ अहन्यहनि पूजां ते कुर्वते वाडवाः शुभाम् ॥ ४५ ॥ तदग्रे दीपकं चैव घृतेन विमलेन हि ॥ सप्तव र्तियुतं राजन्नर्घ्यं प्रकुर्वते द्विजाः ॥ ४६ ॥ नैवेद्यं कुर्वते नित्यं भक्तिपूर्वं द्विजोत्तमाः ॥ रामरामेति रामेति मन्त्रमप्युच्चरंति हि ॥ ४७ ॥ अशने

१ तान्येव–षष्टिवर्षसहस्राणि–इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयने पाने गमने चोपवेशने ॥ सुखे वाप्यथवा दुःखे राममन्त्रं समुच्चरेत् ॥ ४८ ॥ न तस्य दुःखदौर्भाग्यं नाधिव्याधिभयं भवेत् ॥ आयुः श्रियं बलं तस्य वर्द्धयंति दिने दिने ॥ ४९ ॥ रामेति नाम्ना मुच्येत पापाद्वै दारुणादपि ॥ नरकं नहि गच्छेत गतिं प्राप्नोति शाश्वतीम् ॥ ५० ॥ ॥ ॥ व्यास उवाच ॥ ॥ इति कृत्वा ततो रामः कृतकृत्यममन्यत ॥ प्रदक्षिणीकृत्य तदा प्रणम्य च द्विजान्बहून् ॥ ५१ ॥ दत्त्वा दानं भूरितरं गवाश्वमहिषीरथम् ॥ ततः सर्वान्निजांस्तांश्च वाक्यमेतदुवाच ह ॥ ५२ ॥ अत्रैव स्थीयतां सर्वैर्यावच्चंद्रदिवाकरौ ॥ यावन्मेरुर्महीपृष्ठे सागराः सप्त एव च ॥ ५३ ॥ तावदत्रैव स्थातव्यं भवद्भिर्हि न संशयः ॥ यदाहि शासनं विप्रा न मन्यंते नृपा भुवि ॥ ५४ ॥ अथवा वणिजः शूरा मदमायाविमोहिताः ॥ मदाज्ञां न प्रकुर्वंति मन्यंते ॰ वा न ते जनाः ॥ ५५ ॥ तदा वै वायुपुत्रस्य स्मरणं क्रियतां द्विजाः ॥ स्मृतमात्रो हनूमान्वै समागत्य करिष्यति ॥ ५६ ॥ सहसा भस्म तान्सत्यं वचनान्मे न संशयः ॥ य इदं शासनं रम्यं पालयिष्यति भूपतिः ॥ ॥ ५७ ॥ वायुपुत्रः सदा तस्य सौख्यमृद्धिं प्रदास्यति ॥ ददाति पुत्रान्पौत्रांश्च साध्वीं पत्नीं यशो जयम् ॥ ५८ ॥ इत्येवं कथयित्वा च हनुमंतं प्रबोध्य च ॥ निवर्तितो रामदेवःससैन्यः सपरिच्छदः ॥ ५९ ॥ वादित्राणां स्वनैर्विष्वक्सूच्यमानशुभागमः ॥ श्वेतातपत्रयुक्तोऽसौ चामरैर्वीजितो नरैः ॥ अयोध्यां नगरीं प्राप्य चिरं राज्यं चकार ह ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ब्रह्मनारदसंवादे श्रीरामेण ब्राह्मणेभ्यः शासनपट्टप्रदानवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ ॥ ॥ नारद उवाच ॥ ॥ भगवन्देवदेवेश सृष्टिसंहारकारक ॥ गुणातीतो गुणैर्युक्तो मुक्तीनां साधनं परम् ॥ १ ॥ संस्थाप्य वेदभवनं विधिवद्द्विजसत्तमान् ॥ किं चक्रे रघुनाथस्तु भूयोऽयोध्यां गतस्तदा ॥ २ ॥ स्वस्थाने ब्राह्मणास्तत्र कानि कर्माणि चक्रिरे ॥ ॥ ब्रह्मोवाच ॥ ॥ इष्टापूर्तरताः शांताः प्रतिग्रहपराङ्मुखाः ॥ ३ ॥ राज्यं चक्रुर्वनस्यास्य पुरोधा द्विजसत्तमः ॥ उवाच रामपुरतस्तीर्थमाहात्म्यमुत्तमम् ॥ ४ ॥ प्रयागस्य च माहात्म्यं त्रिवेणीफलमुत्तमम् ॥ प्रयागतीर्थमहिमा शुक्लतीर्थस्य चैव हि ॥ ५ ॥ सिद्धक्षेत्रस्य काश्याश्च गंगाया महिमा तथा ॥ वसिष्ठः कथयामास तीर्थान्यन्यानि नारद ॥ ६ ॥ धर्मारण्यसुवर्णाया हरिक्षेत्रस्य तस्य च ॥ स्नानदानादिकं सर्वं वाराणस्या यवाधिकम् ॥ ७ ॥ एतच्छ्रुत्वा रामदेवः स चमत्कृतमानसः ॥ धर्मारण्ये पुनर्यात्रां कर्त्तुकामः समभ्यगात् ॥ ८ ॥ सीतया सह धर्मज्ञो गुरुसैन्यपुरःसरः ॥ लक्ष्मणेन सह

१ पुरोधाः—वसिष्ठः । २ यवाधिकम्—वाराणस्यपेक्षयायवमात्रमधिकमेव—इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ शत्रुघ्नेन परिवृतो गतो मोहेरके पुरे ॥ तत्र गत्वा वसिष्ठं तु पृच्छतेऽसौ महामनाः ॥ १० ॥ ॥ राम
भ्रात्रा भरतेन सहायवान् ॥ ९ ॥ शत्रुघ्नेन परिवृतो गतो मोहेरके पुरे ॥ तत्र गत्वा वसिष्ठं तु पृच्छतेऽसौ महामनाः ॥ ११ ॥ ध्यानं वाथ क्रतुं वाथ
उवाच ॥ ॥ धर्मारण्ये महाक्षेत्रे किं कर्त्तव्यं द्विजोत्तम ॥ दानं वा नियमो वाथ स्नानं वा तप उत्तमम् ॥ १२ ॥ येन वै क्रियमाणेन तीर्थेऽस्मिन्द्विजसत्तम ॥ ब्रह्मह
होमं वा जपमुत्तमम् ॥ दानं वा नियमं वाथ स्नानं वा तप उत्तमम् ॥ १२ ॥ यज्ञं कुरु महाभाग धर्मारण्ये त्वमुत्तमम् ॥ दिनेदिने कोटिगुणं
त्यादिपापेभ्यो मुच्यते तद्ब्रवीहि मे ॥ १३ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यज्ञं कुरु महाभाग धर्मारण्ये त्वमुत्तमम् ॥ तस्मिन्नवसरे सीता रामं व्यज्ञापयन्मुदा ॥ १५ ॥ स्वामि
यावद्वर्षशतं भवेत् ॥ १४ ॥ तच्छ्रुत्वा चैव गुरुतो यज्ञारंभं चकार सः ॥ तस्मिन्नवसरे सीता रामं व्यज्ञापयन्मुदा ॥ १६ ॥ कृते त्रेतायुगे चैव धर्मारण्यनिवासिनः ॥
न्पूर्वं त्वया विप्रा वृता ये वेदपारगाः ॥ ब्रह्मविष्णुमहेशेन निर्मिता ये पुरा द्विजाः ॥ १६ ॥ कृते त्रेतायुगे चैव धर्मारण्यनिवासिनः ॥ स्थापिताश्च यथापूर्वमस्मिन्मोहे
विप्रांस्तान्वै वृणुष्व त्वं तैरेव साधकोऽध्वरः ॥ १७ ॥ तच्छ्रुत्वा रामदेवेन आहूता ब्राह्मणास्तदा ॥ १९ ॥ कुशिकः कौशिको
रके पुरे ॥ १८ ॥ तैस्त्वष्टादशसंख्याकैस्त्रैविद्यैर्मेहिवाडवैः ॥ यज्ञं चकार विधिवत्तैरेवायतबुद्धिभिः ॥ २० ॥ मांडव्यो भार्गवः पैंग्यो वात्स्यो लौगाक्ष एव च ॥
वत्स उपमन्युश्च काश्यपः ॥ कृष्णात्रेयो भरद्वाजो धारिणः शौनको वरः ॥ २० ॥ मांडव्यो भार्गवः पैंग्यो वात्स्यो लौगाक्ष एव च ॥ चकारावभृथं रामो विप्रा
गांगायनोथ गांगेयः शुनकः शौनकस्तथा ॥ २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ एभिर्विप्रैः क्रतुं रामः समाप्य विधिवन्नृपः ॥ चकारावभृथं रामो विप्रा
न्संपूज्य भक्तितः ॥ २२ ॥ यज्ञांते सीतया रामो विज्ञप्तः सुविनीतया ॥ अस्याध्वरस्य संपत्तौ दक्षिणां देहि सुव्रत ॥ २३ ॥ मन्नाम्ना च पुरं तत्र
स्थाप्यतां शीघ्रमेव च ॥ सीताया वचनं श्रुत्वा तथा चक्रे नृपोत्तमः ॥ २४ ॥ तेषां च ब्राह्मणानां च स्थानमेकं सुनिर्भयम् ॥ दत्तं रामेण सीतायाः
संतोषाय महीभृता ॥ २५ ॥ सीतापुरमिति ख्यातं नाम चक्रे तदा किल ॥ तस्याधिदेव्यौ वर्त्तेते शांता चैव सुमंगला ॥ २६ ॥ मोहेरकस्य
पुरतो ग्रामद्वादशकं पुरः ॥ ददौ विप्राय विदुषे समुत्थाय प्रहर्षितः ॥ २७ ॥ तीर्थांतरं जगामाशु काश्यपीसरितस्तटे ॥ वाडवाः केऽपि नीतास्ते
रामेण सह धर्मवित् ॥ २८ ॥ धर्मालये गतः सद्यो यत्र माला कमंडलुः ॥ पुरा धर्मेण सुमहत्कृतं यत्र तपो मुने ॥ २९ ॥ तदारभ्य सुविख्यातं
धर्मालयमिति श्रुतम् ॥ ददौ दाशरथिस्तत्र महादानानि षोडश ॥ ३० ॥ ये पंचाशत्तदा ग्रामाः सीतापुरसमन्विताः ॥ सत्यमंदिरपर्यंता रघुना
थेन वै तदा ॥ ३१ ॥ सीताया वचनात्तत्र गुरुवाक्येन चैव हि ॥ आत्मनो वंशवृद्ध्यर्थं द्विजेभ्योऽदाद्रघूत्तमः ॥ ३२ ॥ अष्टादशसहस्राणां द्विजा
नामभवत्कुलम् ॥ वात्स्यायन उपमन्युर्जातूकर्ण्योऽथ पिंगलः ॥ ३३ ॥ भारद्वाजस्तथा वत्सः कौशिकः कुश एव च ॥ शांडिल्यः कश्यपश्चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौतमश्छांधनस्तथा ॥ ३४ ॥ कृष्णात्रेयस्तथा वत्सो वसिष्ठो धारणस्तथा ॥ भांडिलश्चैव विज्ञेयो यौवनाश्वस्ततः परम् ॥ ३५ ॥ कृष्णायनोपम
न्यू च गार्ग्यमुद्गलमौखकाः ॥ पुशिः पराशरश्चैव कौंडिन्यश्च ततः परम् ॥ ३६ ॥ पंचपंचाशद्ग्रामाणां नामान्येवं यथाक्रमम् ॥ सीतापुरं श्रीक्षेत्रं च
मुशली मुद्गली तथा ॥ ३७ ॥ ज्येष्ठला श्रेयस्थानं च दंताली वटपत्रका ॥ राज्ञः पुरं कृष्णवाटं देहं लोहं चनस्थनम् ॥ ३८ ॥ कोहेचं चंदनक्षेत्रं
थलं च हस्तिनापुरम् ॥ कर्पटं कंनजह्नवी वनोडफनफावली ॥ ३९ ॥ मोहोधं शमोहोरली गोविंदणं थलत्यजम् ॥ चारणसिद्धं सोद्गीत्राभाज्यजं
वटमालिका ॥४०॥ गोधरं मारणजं चैव मात्रमध्यं च मातरम् ॥ बलवती गंधवती ईआम्ली च राज्यजम् ॥४१॥ रूपावली बहुधनं छत्रीटं वंशंजं
तथा ॥ जायासंरणं गोतिकी च चित्रलेखं तथैव च ॥ ४२ ॥ दुग्धावली हंसावली च वैहोलं चैछ्जं तथा ॥ नालावली आसावली सुहाली कामतः
परम् ॥४३॥ रामेण पंचपंचाशद्ग्रामाणि वसनाय च ॥ स्वयं निर्माय दत्तानि द्विजेभ्यस्तेभ्य एव च ॥ ४४ ॥ तेषां शुश्रूषणार्थाय वैश्याञ्रामो न्यवे
दयत् ॥ षट्त्रिंशच्च सहस्राणि शूद्रांस्तेभ्यश्चतुर्गुणान् ॥४५॥ तेभ्यो दत्तानि दानानि गवाश्ववसनानि च ॥ हिरण्यं रजतं ताम्रं श्रद्धया परया मुदा
॥ ४६ ॥ नारद उवाच ॥ अष्टादशसहस्रास्ते ब्राह्मणा वेदपारगाः ॥ कथं ते व्यभजन्ग्रामान्ग्रामोत्पन्नं तथा वसु ॥ वस्त्राद्यं भूषणाद्यं च तन्मे कथय सुव्र
तम् ॥४७॥ ॥ ब्रह्मोवाच ॥ ॥ यज्ञांते दक्षिणा यावत्सर्त्विग्भिः स्वीकृता सुत ॥ महादानादिकं सर्वं तेभ्य एव समर्पितम् ॥४८॥ ग्रामाः साधारणा
दत्ता महास्थानानि वै तदा ॥ ये वसंति च यत्रैव तानि तेषां भवंत्विति ॥ ४९ ॥ वशिष्ठवचनात्तत्र ग्रामास्ते विप्रसात्कृताः ॥ रघूद्वहेन धीरेण नोद्व
संति यथा द्विजाः ॥५०॥ धान्यं तेषां प्रदत्तं हि विप्राणां चामितं वसु ॥ कृतांजलिस्ततो रामो ब्राह्मणानिदमब्रवीत् ॥५१॥ यथा कृतयुगे विप्रास्त्रे
तायां च यथा पुरा ॥ तथा चाद्यैव वर्त्तव्यं मम राज्ये न संशयः ॥ ५२ ॥ यत्किंचिद्धनधान्यं वा यानं वा वसनानि वा ॥ मणयः कांचनादींश्च
हेमादींश्च तथा वसु ॥ ५३ ॥ ताम्राद्यं रजतादींश्च प्रार्थयध्वं ममाधुना ॥ अधुना वा भविष्ये वाभ्यर्थनीयं यथोचितम् ॥ ५४ ॥ प्रेषणीयं वाचिकं
मे सर्वदा द्विजसत्तमाः ॥ यंयं कामं प्रार्थयध्वं तं तं दास्याम्यहं विभो ॥ ५५ ॥ ततो रामः सेवकादीनादरात्प्रत्यभाषत ॥ विप्राज्ञा नोल्लंघनीया सेव
नीया प्रयत्नतः ॥ ५६ ॥ यंयं कामं प्रार्थयंते कारयध्वं ततस्ततः ॥ एवं नत्वा च विप्राणां सेवनं कुरुते तु यः ॥ ५७ ॥ स शूद्रः स्वर्गमाप्नोति धन

१ एतेषां सीतापुरादीनां पंचपंचाशद्ग्रामाणां नामानि कानिंचिदशुद्धानीव भासन्ते, अपरिचितत्वाद्यथाप्रतिपुस्तकमेवात्र मुद्रितानि सन्ति । तानि च तत्तद्ग्रामनामपरिचितैस्तत्रत्यैर्विद्वद्भिः शोधनीयानि इति सविनयं सूच्यतेस्माभिः । २ संदेशवाग्वाचिकं स्यात्—इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वान्पुत्रवान्भवेत् ॥ अन्यथा निर्धनत्वं हि लभते नात्र संशयः ॥ ५८ ॥ यवनो म्लेच्छजातीयो दैत्यो वा राक्षसोपि वा ॥ योत्र विघ्नं करोत्येव भस्मीभवति तत्क्षणात् ॥ ५९ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततः प्रदक्षिणीकृत्य द्विजान्रामोऽतिहर्षितः ॥ प्रस्थानाभिमुखो विप्रैराशीर्भिरभिनंदितः ॥ ६० ॥ आसीमांतमनुव्रज्य स्नेहव्याकुललोचनाः ॥ द्विजाः सर्वे विनिर्वृत्ता धर्मारण्ये विमोहिताः ॥ ६१ ॥ एवं कृत्वा ततो रामः प्रतस्थे स्वां पुरीं प्रति ॥ काश्यपाश्चैव गर्गाश्च कृतकृत्या दृढव्रताः ॥ ६२ ॥ गुर्वासनसमाविष्टाः सभार्याः ससुहृत्सुताः ॥ राजधानीं तदा प्राप रामोऽयोध्यां गुणान्विताम् ॥ ६३ ॥ दृष्ट्वा प्रमुदिताः सर्वे लोकाः श्रीरघुनन्दनम् ॥ ततो रामः स धर्मात्मा प्रजापालनतत्परः ॥ ६४ ॥ सीतया सह धर्मात्मा राज्यं कुर्वंस्तदा सुधीः ॥ जानक्यां गर्भमाधत्त रविवंशोद्भवाय च ॥ ६५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये श्रीरामचन्द्रकृतधर्मारण्यतीर्थक्षेत्रजीर्णोद्धारवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ नारद उवाच ॥ ॥ अतः परं किमभवत्तन्मे कथय सुव्रत ॥ पूर्वं च तदशेषेण शंस मे वदताम्वर ॥ १ ॥ स्थिरीभूतं च तत्स्थानं कियत्कालं वदस्व मे ॥ केन वै रक्ष्यमाणं च कस्याज्ञा वर्तते प्रभो ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्रेतातो द्वापरांतं च यावत्कलिसमागमः ॥ तावत्संरक्षणे चैको हनूमान्पवनात्मजः ॥ ३ ॥ समर्थो नान्यथा कोपि विना हनुमता सुत ॥ लंका विध्वंसिता येन राक्षसाः प्रबला हताः ॥४॥ स एव रक्षते तत्र रामादेशेन पुत्रक ॥ द्विजस्याज्ञा प्रवर्तेत श्रीमातायास्तथैव च ॥ ५ ॥ दिनेदिने प्रहर्षोभूज्जनानां तत्रवासिनाः ॥ पठंति स्म द्विजास्तत्र ऋग्युजुःसामलक्षणान् ॥ ६ ॥ अथर्वणमपि तत्र पठंति स्म दिवानिशम् ॥ वेदनिर्घोषजः शब्दस्त्रैलोक्ये सचराचरे ॥ ७ ॥ उत्सवास्तत्र जायंते ग्रामेग्रामे पुरेपुरे ॥ नाना यज्ञाः प्रवर्तंते नानाधर्मसमाश्रिताः ॥ ८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कदापि तस्य स्थानस्य भंगो जातोथ वा नवा ॥ दैत्यैर्जितं कदा स्थानमथवा दुष्टराक्षसैः ॥ ९ ॥ ॥ व्यास उवाच ॥ ॥ साधु पृष्टं त्वया राजन्धर्मज्ञस्त्वं सदा शुचिः ॥ आदौ कलियुगे प्राप्ते यद्वृत्तं तच्छृणुष्व भोः ॥ १० ॥ लोकानां च हितार्थाय कामाय च सुखाय च ॥ यज्ञं च कथमिष्यामि तत्सर्वं शृणु भूपते ॥११॥ इदानीं च कलौ प्राप्त आमो नाम्ना बभूव ह ॥ कान्यकुब्जाधिपः श्रीमान्धर्मज्ञो नीतितत्परः ॥ १२ ॥ शांतो दांतः सुशीलश्च सत्यधर्मपरायणः ॥ द्वापरांते नृपश्रेष्ठ अनागते कलौ युगे ॥ १३ ॥ भयात्कलिविशेषेण अधर्मस्य भयादिभिः ॥ सर्वे देवाः क्षितिं त्यक्त्वा नैमिषारण्यमाश्रिताः ॥ १४ ॥ रामोपि सेतुबंधं हि ससहायो गतो नृप ॥ १५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं हि कलौ प्राप्ते भयं लोके सुदुस्तरम् ॥ यस्मिन्सुरैः परित्यक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नगर्भा वसुन्धरा ॥ १६ ॥ ॥ व्यास उवाच ॥ ॥ शृणुष्व कलिधर्मांस्त्वं भविष्यंति यथा नृप ॥ असत्यवादिनो लोकाः साधुनिन्दापरा
यणाः ॥ १७ ॥ दस्युकर्मरताः सर्वे पितृभक्तिविवर्जिताः ॥ स्वगोत्रदाराभिरता लौल्यध्यानपरायणाः ॥ १८ ॥ ब्रह्मविद्वेषिणः सर्वे परस्परविरो
धिनः ॥ शरणागतहंतारो भविष्यंति कलौ युगे ॥ १९ ॥ वैश्याचाररता विप्रा वेदभ्रष्टाश्च मानिनः ॥ भविष्यंति कलौ प्राप्ते संध्यालोपकरा
द्विजाः ॥ २० ॥ शांतौ शूरा भये दीनाः श्राद्धतर्पणवर्जिताः ॥ असुराचारनिरता विष्णुभक्तिविवर्जिताः ॥ २१ ॥ परवित्ताभिलाषाश्च उत्कोच
ग्रहणे रताः ॥ अस्नातभोजिनो विप्राः क्षत्रिया रणवर्ज्जिताः ॥ २२ ॥ भविष्यंति कलौ प्राप्ते मलिना दुष्टवृत्तयः ॥ मद्यपानरताः सर्वेऽप्यया
ज्यानां हि याजकाः ॥ २३ ॥ भर्तृद्वेषकरा रामाः पितृद्वेषकराः सुताः ॥ भ्रातृद्वेषकराः क्षुद्रा भविष्यंति कलौ युगे ॥ २४ ॥ गव्यविक्रयि
णस्ते वै ब्राह्मणा वित्ततत्पराः ॥ गावो दुग्धं न दुह्यंते संप्राप्ते हि कलौ युगे ॥ २५ ॥ फलंते नैव वृक्षाश्च कदाचिदपि भारत ॥ कन्याविक्रय
कर्त्तारो गोजाविक्रयकारकाः ॥ २६ ॥ विषविक्रयकर्त्तारो रसविक्रयकारकाः ॥ वेदविक्रयकर्त्तारो भविष्यंति कलौ युगे ॥ २७ ॥ नारी गर्भं
समाधत्ते हायनैकादशेन हि ॥ एकादश्युपवासस्य विरताः सर्वतो जनाः ॥ २८ ॥ न तीर्थसेवनरता भविष्यंति च वाडवाः ॥ बह्वाहारा
भविष्यंति बहुनिद्रासमाकुलाः ॥ २९ ॥ जिह्मवृत्तिपराः सर्वे वेदनिंदापरायणाः ॥ यतिनिंदापराश्चैव च्छद्मकाराः परस्परम् ॥ ३० ॥ स्पर्शदोष
भयं नैव भविष्यति कलौ युगे ॥ क्षत्रिया राज्यहीनाश्च म्लेच्छो राजा भविष्यति ॥ ३१ ॥ विश्वासघातिनः सर्वे गुरुद्रोहरतास्तथा ॥ मित्र
द्रोहरता राजञ्छिश्नोदरपरायणाः ॥ ३२ ॥ एकवर्णा भविष्यंति वर्णाश्चत्वार एव च ॥ कलौ प्राप्ते महाराज नान्यथा वचनं मम ॥ ३३ ॥
एतच्छ्रुत्वा गुरोरेव कान्यकुब्जाधिपो बली ॥ राज्यं प्रकुरुते तत्र आमो नाम्ना हि भूतले ॥ ३४ ॥ सार्वभौमत्वमापन्नः प्रजापालनतत्परः ॥
प्रजानां कलिना तत्र पापे बुद्धिरजायत ॥ ३५ ॥ वैष्णवं धर्ममुत्सृज्य बौद्धधर्ममुपागताः ॥ प्रजास्तमनुवर्तिन्यः क्षपणैः[1] प्रतिबोधिताः॥३६॥
तस्य राज्ञो महादेवी मामानाम्न्यतिविश्रुता ॥ गर्भं दधार सा राज्ञो सर्वलक्षणसंयुता ॥ ३७ ॥ संपूर्णे दशमे मासि जाता तस्याः सुरूपिणी ॥
दुहिता समये राज्ञ्याः पूर्णचन्द्रनिभानना ॥ ३८ ॥ रत्नगंगेति नाम्ना सा मणिमाणिक्यभूषिता ॥ एकदा दैवयोगेन देशांतरादुपागतः ॥ ३९ ॥
नाम्ना चैवेंद्रसूरिर्वै देशेस्मिन्कान्यकुब्जके ॥ षोडशाब्दा च सा कन्या नोपनीता नृपात्मजा ॥४०॥ दास्यांतरेण मिलिता इन्द्रसूरिश्च जीविकः ॥

१ क्षपणैः—बौद्धधर्मानुयायिसंन्यासिभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाबरीं मंत्रविद्यां च कथयामास भारत ॥४१॥ एकचित्ताभवत्सा तु शूलिकर्मविमोहिता ॥ ततः सा मोहमापन्ना तत्तद्वाक्यपरायणा ॥४२॥ क्षपणैर्बोधिता वत्स जैनधर्मपरायणा ॥ ब्रह्मावर्ताधिपतये कुंभीपालाय धीमते ॥४३॥ रत्नगंगां महादेवीं ददौ तामिति विक्रमी[1] ॥ मोहेरेकं ददौ तस्मै विवाहे दैवमोहितः ॥ ४४ ॥ धर्मारण्यं समागत्य राजधानी कृता तदा ॥ देवांश्च स्थापयामास जैनधर्मप्रणीतकान् ॥ ४५ ॥ सर्वे वर्णास्तथाभूता जैनधर्मसमाश्रिताः ॥ ब्राह्मणा नैव पूज्यंते न च शांतिकपौष्टिकम् ॥ ४६ ॥ न ददाति कदा दानमेवं कालः प्रवर्तते ॥ लब्धशासनका विप्रा लुप्तस्वाम्या अहर्निशम् ॥ ४७ ॥ समाकुलितचित्तास्ते नृपमामं समाययुः ॥ कन्यकुब्जस्थितं शूरं पाखण्डैः परिवेष्टितम् ॥ ४८ ॥ कान्यकुब्जपुरं प्राप्य कतिभिर्वासरैर्नृप ॥ गंगोपकण्ठे न्यवसञ्छ्रांतास्ते मोढवाडवाः ॥ ४९ ॥ चारैश्च कथितास्ते च नृपस्याग्रे समागताः ॥ प्रातरशकारिता विप्रा आगता नृपसंसदि ॥ ५० ॥ प्रत्युत्थानाभिवादादीन्न चक्रे सादरं नृपः ॥ तिष्ठतो ब्राह्मणान्सर्वान्पर्यपृच्छदसौ ततः ॥ ५१ ॥ किमर्थमागता विप्राः किंस्वित्कार्यं ब्रुवंतु तत् ॥ ५२ ॥ ॥ विप्रा ऊचुः ॥ ॥ धर्मारण्यादिहायातास्त्वत्समीपं नराधिप ॥ राजंस्तव सुतायास्तु भर्ता कुमारपालकः ॥ ५३ ॥ तेन प्रलुप्तं विप्राणां शासनं महदद्भुतम् ॥ वर्तता जैनधर्मेण प्रेरितेनेंद्रसूरिणा ॥ ५४ ॥ ॥ राजोवाच ॥ ॥ केन वै स्थापिता यूयमस्मिन्मोहेरके पुरे ॥ एतद्धि वाडवाः सर्वं ब्रूत वृत्तं यथातथम् ॥ ५५ ॥ ॥ विप्रा ऊचुः ॥ ॥ काजेशैः स्थापिताः पूर्वं धर्मराजेन धीमता ॥ कृता चात्र शुभे स्थाने रामेण च ततः पुरी ॥ ५६ ॥ शासनं रामचंद्रस्य दृष्ट्वाऽन्यैश्चैव राजभिः ॥ पालितं धर्मतो ह्यत्र शासनं नृपसत्तम ॥ ५७ ॥ इदानीं तव जामाता विप्रान्पालयते न हि ॥ तच्छ्रुत्वा विप्रवाक्यं तु राजा विप्रानथाब्रवीत् ॥ ५८ ॥ यांतु शीघ्रं हि भो विप्राः कथयंतु ममाज्ञया ॥ राज्ञे कुमारपालाय देहि त्वं ब्राह्मणालयम् ॥ ५९ ॥ श्रुत्वा वाक्यं ततो विप्राः परं हर्षमुपागताः ॥ जग्मुस्ततोऽतिमुदिता वाक्यं तत्र निवेदितम् ॥ ६० ॥ श्वशुरस्य वचः श्रुत्वा राजा वचनमब्रवीत् ॥ ॥ कुमारपाल उवाच ॥ ॥ रामस्य शासनं विप्राः पालयिष्याम्यहं नहि ॥ ६१ ॥ त्यजामि ब्राह्मणान्यज्ञे पशुहिंसापरायणान् ॥ तस्माद्धि हिंसकानां तु न मे भक्तिर्भवेद्द्विजाः ॥ ६२ ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ कथं पाखंडधर्मेण लुप्तशासनको भवान् ॥ पालयस्व नृपश्रेष्ठ मा स्म पापे मनः कृथाः ॥ ६३ ॥ ॥ राजोवाच ॥ ॥ अहिंसा परमो धर्मो अहिंसा च परं तपः ॥ अहिंसा परमं ज्ञानमहिंसा परमं फलम् ॥ ६४ ॥ तृणेषु चैव वृक्षेषु पतंगेषु नरेषु च ॥ कीटेषु

१ विक्रमी–पराक्रमवान् इति, अतो हेतोः इति योजना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्कुणाद्येषु अजाश्वेषु गजेषु च ॥ ६५ ॥ लूतासु चैव सर्पेषु महिष्यादिषु वै तथा ॥ जंतवः सदृशा विप्राः सूक्ष्मेषु च महत्सु च ॥ ६६ ॥ कथं
यूयं प्रवर्तध्वे विप्रा हिंसापरायणाः ॥ तच्छ्रुत्वा वज्रतुल्यं हि वचनं च द्विजोत्तमाः ॥ ६७ ॥ प्रत्यूचुर्वाडवाः सर्वे क्रोधरक्तेक्षणा दृशा ॥ ६८ ॥
॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ अहिंसा परमो धर्मः सत्यमेतत्त्वयोदितम् ॥ परं तथापि धर्मोऽस्ति शृणुष्वैकाग्रमानसः ॥ ६९ ॥ या वेदविहिता
हिंसा सा न हिंसेति निर्णयः ॥ शस्त्रेणाहन्यते यच्च पीडा जंतुषु जायते ॥ ७० ॥ स एवाधर्म एवास्ति लोके धर्मविदां वर ॥ वेदमंत्रैर्विहन्यंते विना
शस्त्रेण जंतवः ॥ ७१ ॥ जंतुपीडाकरा नैव सा हिंसा सुखदायिनी ॥ परोपकारः पुण्याय पापाय परपीडनम् ॥ ७२ ॥ वेदोदितां विधायापि हिंसां
पापैर्न लिप्यते ॥ विप्राणां वचनं श्रुत्वा पुनर्वचनमब्रवीत् ॥ ७३ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मादीनां परं क्षेत्रं धर्मारण्यमनुत्तमम् ॥ ब्रह्मविष्णु
महेशाद्या नेदानीमत्र संति ते ॥ ७४ ॥ न धर्मो विद्यते वात्र उक्तो रामः स मानुषः ॥ क्व वापि लंबपुच्छोऽसौ यो मुक्तो रक्षणाय वः ॥ ७५ ॥
शासनं चेन्न दृष्टं वो नैव तत्पालयाम्यहम् ॥ द्विजाः कोपसमाविष्टा ददुः प्रत्युत्तरं तदा ॥ ७६ ॥ ॥ द्विजा ऊचुः ॥ ॥ रे मूढ त्वं कथं वेत्थं
भाषसे मदलोलुपः ॥ स दैत्यानां विनाशाय धर्मसंरक्षणाय च ॥ ७७ ॥ रामश्चतुर्भुजः साक्षान्मानुषत्वं गतो भुवि ॥ अगतीनां च गतिदः स वै
धर्मपरायणः ॥ दयालुश्च कृपालुश्च जंतूनां परिपालकः ॥ ७८ ॥ ॥ राजोवाच ॥ ॥ कुतोऽद्य वर्त्तते रामः कुतो वै वायुनंदनः ॥ अद्याभ्रमिव ते
सर्वे क्व रामो हनुमानिति ॥ ७९ ॥ परंतु रामो हनुमान्यदि वर्त्तेत सर्वतः ॥ इदानीं विप्रसाहाय्य आगमिष्यति मे मतिः ॥ ८० ॥ दर्शयध्वं हनूमंतं
रामं वा लक्ष्मणं तथा ॥ यद्यस्ति प्रत्ययः कश्चित्स नो विप्राः प्रदर्श्यताम् ॥८१॥उक्तं तै रामदेवेन दूतं कृत्वांजनीसुतम् ॥ चतुश्चत्वारिंशदधिकं दत्तं
ग्रामशातं नृप ॥ ८२ ॥ पुनरागत्य स्थानेऽस्मिन्दत्ता ग्रामास्त्रयोदश ॥ काश्यप्यां चैव गंगायां महादानानि षोडश ॥ ८३ ॥ दत्तानि विप्रमुख्येभ्यो
दत्ता ग्रामाः सुशोभनाः ॥ पुनः संकल्पिता वीर षट्पंचाशकसंख्यया ॥ ८४ ॥ षट्त्रिंशच्च सहस्राणि गोभूजा जज्ञिरे वराः ॥ सपादलक्षा वणिजो
दत्ता मांडलिकाभिधाः ॥ ८५ ॥ तेनोक्तं वाडवाः सर्वे दर्शयध्वं हि मारुतिम् ॥ यस्याभिज्ञानमात्रेण स्थितिं पूर्वां ददाम्यहम् ॥ ८६ ॥ विप्रवाक्यं
करिष्यामि प्रत्ययो दर्श्यते यदि ॥ ततः सर्वे भविष्यंति वेदधर्मपरायणाः ॥ ८७ ॥ अन्यथा जनधर्मेण वर्त्तयध्वं हि सर्वशः ॥ नृपवाक्यं तु ते
श्रुत्वा स्वेस्वे स्थाने समागताः ॥ ८८ ॥ वाडवः खिन्नमनसः क्रोधेनांधीकृता भुवि ॥ निश्वासान्मुंचमानास्ते हाहेति प्रवदंति च ॥८९॥ दंतान्प्र
घर्षयन्सर्वान्व्यपीडंश्च करैः करान् ॥ परस्परं भाषमाणाः कथं कुर्मो वयं त्वितः ॥९०॥ मिलित्वा वाडवाः सर्वे चक्रुस्ते मंत्रमुत्तमम् ॥ रामवाक्यं हृदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यात्वा ध्यात्वा चैवांजनीसुतम् ॥९१॥ द्विजमेलापकं चक्रुर्बाला वृद्धतमा अपि ॥ तेषां वृद्धतमो विप्रो वाक्यमूचे शुभं तदा ॥ ९२ ॥ चतुःषष्टिश्च गोत्राणामस्माकं ये द्विसप्ततिः ॥ स्वस्वगोत्रस्यावटंका एकग्रामाभिभाषिणः ॥ ९३ ॥ प्रयातु स्वस्ववर्गस्य एको ह्येको द्विजः सुधीः ॥ रामेश्वरं सेतुबंधं हनूमांस्तत्र विद्यते ॥ ९४ ॥ सर्वे प्रयांतु तत्रैव रामपार्श्वे निरामयाः ॥ निराहारा जितक्रोधा मायया वर्जिताः पुनः ॥ ९५ ॥ एकाग्रमानसाः सर्वे स्तुत्वा ध्यात्वा जपंतु तम् ॥ ततो दाशरथी रामो दयां कृत्वा द्विजन्मसु ॥९६॥ शासनं च प्रदास्यति अचलं च युगेयुगे ॥ महता तपसा तुष्टः प्रदास्यति समीहितम् ॥ ९७ ॥ यस्य वर्गस्य यो विप्रो न प्रयास्यति तत्र वै ॥ स च वर्गात्परित्याज्यः स्थानधर्मान्न संशयः ॥९८॥ वणिग्वृत्ते न संबंधे न विवाहे कदाचन ॥ ग्रामवृत्ते न संबंधः सर्वस्थाने बहिष्कृताः ॥ ९९ ॥ सभावाक्यं च तच्छ्रुत्वा तन्मध्ये वाडवः शुचिः ॥ वाग्मी दक्षः सुशब्दश्च त्रिरवैः श्रावयन्द्विजान् ॥ १०० ॥ प्रतिवाक्यं दत्ततालं तिष्ठन्नेतद्वचोऽब्रवीत् ॥ असत्यवादिनां यच्च पातकं परिनिंदके ॥ परदाराभिगमने परद्रोहरते नरे ॥ १ ॥ मद्यपेषु च यत्पापं यत्पापं हेमहारिषु ॥ तत्पापं च भवेत्तस्य गमने यः पराङ्मुखः ॥ अथ किं बहुनोक्तेन यांतु सत्यं द्विजोत्तमाः ॥ २ ॥ तच्छ्रुत्वा दारुणं वाक्यं गमनाय मनो दधे ॥ गच्छतस्तान्द्विजाञ्छ्रुत्वा राजा कुमारपालकः ॥ ३ ॥ समाहूय कृषेः कर्म भिक्षाटनमथापि वा ॥ नानागोत्रेभ्यो ब्राह्मणेभ्यः प्रापयिष्ये न संशयः ॥ ४ ॥ तच्छ्रुत्वा व्यथिताः सर्वे किं भविष्यत्यतः परम् ॥ तथा त्रीणि सहस्राणि प्रबंधं चक्रिरे तदा ॥ ५ ॥ गमिष्यामो वयं सर्वे रामं प्रति न संशयः ॥ हस्ताक्षरप्रदानं वै अन्योन्यं तु कृतं द्विजैः ॥ ६ ॥ कृतांजलिपुटा विप्रा वाक्यमेतदथाब्रुवन् ॥ नश्यतेऽत्र त्रयी विद्या त्रयीमूर्तिः प्रकुप्यति ॥ ७ ॥ तस्मात्तत्रैव गंतव्यमष्टादशसहस्रकैः ॥ ततः स वणिजः सर्वान्समाहूय च गोभुजान् ॥ ८ ॥ वाक्यमूचे नृपश्रेष्ठो वारयध्वं द्विजानिति ॥ ९ ॥ ॥ व्यास उवाच ॥ न जैनधर्मे ये लिप्ता गोभुजा वणिगुत्तमाः ॥ वृत्तिभंगभयात्तत्र मौनमेव समाचरन् ॥ ११० ॥ वारयाम कथं विप्रान्वह्निरूपान्दहंति ते ॥ शापाग्निना नरपते द्विजा मृत्युपरायणाः ॥ ११ ॥ अडालयेषु ये जाताः शूद्रा आहूय तान्नृपः ॥ निवार्यतामिति प्राह वाडवा गमनोद्यताः ॥ ॥ १२ ॥ तेषां मध्ये कतिपया जैनधर्मसमाश्रिताः ॥ गता वाडवपुंजेषु राजादेशान्निवारणे ॥ १३ ॥ ॥ केचिच्छूद्रा ऊचुः ॥ ॥ क्व रामो लक्ष्मणोपेतः क्व च वायुसुतो बली ॥ वर्तमानेन कालेन वक्तव्यं द्विजसत्तमाः ॥ १४ ॥ व्याघ्रसिंहाकुले दुर्गे वने वनगजाश्रिते ॥ परित्यज्य प्रियान्प्राणान्पुत्रान्दारान्निकेतनान् ॥ १५ ॥ किमर्थं गम्यते विप्रा राज्ये वै दुष्टशासने ॥ तच्छ्रुत्वा वाडवाः केचिद्वाक्येन मनसाऽस्मरन् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचदशसहस्रास्ते वाडवा नृपसत्तमात् ॥ भयाल्लोभाच्च दानाच्च तत्सर्वं भवतामिति ॥ १७ ॥ वृत्तोपकल्पनेनैव करिष्यामः कदाचन ॥ कृषि
कर्म करिष्यामो भिक्षाटनमथापि वा ॥ १८ ॥ ततश्च ते पंचदशसहस्रा द्विजसत्तमाः ॥ दारुणं वाक्यमूचुस्तान्यांतु चान्ये यथोचितम् ॥ १९ ॥
शासनं भवतामस्तु रामदत्तं न संशयः ॥ त्रयीविद्यास्तु विख्याताः सर्वे वाडवपुंगवाः ॥ १२० ॥ सहस्राणि च त्रीण्येव त्रैविद्या अभवन्ध्रुवम् ॥
॥ २१ ॥ ॥ राजोवाच ॥ ॥ चतुर्थांशेन राज्यं च किंचिद्दत्ता वसुन्धरा ॥ तस्माच्चतुर्विधेत्येवं ज्ञातिबन्धमतः परम् ॥ २२ ॥ च्यवनो दास्यते
कन्यां यूयं कन्यामवाप्नुत ॥ न वृत्तिर्न च संबंधो भवतां स्यात्कदापि वा ॥ २३ ॥ इति तस्य वचः श्रुत्वा त्रयीविद्याश्च वाडवाः ॥ स्वेस्वे स्थाने
गताः सर्वे संकेतादनिवृत्त्य च ॥ २४ ॥ पंचदश सहस्राणि ततस्तु द्विजपुंगवाः ॥ यथागतं गताः सर्वे चातुर्विद्या द्विजोत्तमाः ॥ २५ ॥ तद्दिने
अतिवाह्याथ चिंताविष्टेन चेतसा ॥ वार्यमाणाः स्वपुत्रैस्ते दारैश्च विनयान्वितैः ॥ २६ ॥ एकाग्रमानसाः सर्वे न निद्रामुपलेभिरे ॥ ब्राह्मे मुहूर्ते
चोत्थाय मायां त्यक्त्वा हि लौकिकीम् ॥ २७ ॥ परित्यज्य प्रियान्पुत्रान्दारान्सनिलयानपि ॥ ग्रामोपांतेषु मिलिताः सर्वे वाडवपुंगवाः ॥ २८ ॥
सहस्राणि तदा त्रीणि कृतनित्याह्निकक्रियाः ॥ विप्रेभ्यो दक्षिणां दत्त्वा संपूज्य कुलमातरम् ॥ २९ ॥ विघ्नसंघविनाशाय दक्षिणद्वारसंस्थितः ॥
सिंदूरपुष्पमालाभिः पूजितो गणनायकः ॥ १३० ॥ पूजितो बकुलस्वामी सूर्यः सर्वार्थसाधकः ॥ आदराच्च महाशक्तिः श्रीमाता पूजिता
तथा ॥ ३१ ॥ शांतां चैव नमस्कृत्य ज्ञानजां गोत्रमातरम् ॥ गमनेनोद्यमानास्ते परं हर्षमुपाययुः ॥ ३२ ॥ चातुर्विद्या द्वि
जाश्चैव पुनरामंत्र्य तान्प्रति ॥ पप्रच्छुश्च मुहुः सर्वं समागमनकारणम् ॥ ३३ ॥ ॥ विप्रा ऊचुः ॥ ॥ न गंतव्यं भवद्भिर्वै गत्वा
वाऽऽयांतु सत्वराः ॥ ३४ ॥ यथा रामप्रदत्तं हि उपकल्पयसेऽचिरात् ॥ श्रुत्वा पुनरथोचुस्ते चातुर्विद्या द्विजोत्तमाः ॥ ३५ ॥ न स्थानेन द्विजै
र्वापि न च वृत्त्यां कथंचन ॥ वयं नैवागमिष्यामः कथनीयं न वै पुनः ॥ ३६ ॥ रघूद्वहेन दत्ता वै वृत्तिर्वो द्विजसत्तमाः ॥ तां वृत्तिं
प्रति यास्यामो जपहोमार्चनादिभिः ॥ ३७ ॥ ते पंचदशसाहस्राः पुनस्तानूचुरादरात् ॥ अस्माभिरत्र स्थातव्यमग्निसेवार्थतत्परैः ॥ ३८ ॥
युष्माभिस्तत्र गंतव्यं सर्वेषां कार्यसिद्धये ॥ अन्योन्यं सर्वसाहाय्या वृत्तिं याम न संशयः ॥ ३९ ॥ त्यक्तस्वकीयवचना वृत्तिहीना भविष्यथ ॥
ततस्तन्मध्यतः कश्चिच्चातुर्विद्य उवाच ह ॥ १४० ॥ ॥ चातुर्विद्य उवाच ॥ ॥ पूर्वं हि वृत्तिमस्माकं रामो वै दत्तवान्द्विजाः ॥ चातुर्विद्या महासत्त्वाः

१ आत्मनेपदमार्षं छन्दोनुरोधेन । भवत्विति—बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वधर्मप्रतिपालकाः ॥ ४१ ॥ याजनाध्ययनायुक्ताः काजेशेन विनिर्मिताः ॥ दानं दत्त्वा तु रामेण उक्तं हि भवतां पुनः ॥ ४२ ॥ स्थानं त्यक्त्वा न गंतव्यमित्थं हि नियमः कृतः ॥ आपत्काले तु स्मर्तव्यो वायुपुत्रो महाबलः ॥ ४३ ॥ इति रामेण पूर्वं हि स्वे स्थाने स्थापितास्तदा ॥ राम वाक्यमन्यथा तत्कृत्वा गच्छेत्कथं पुनः ॥ ४४ ॥ तस्माद्युष्मान्वयं ब्रूमो गच्छतः कार्यसिद्धये ॥ भवतां कार्यसिद्ध्यर्थं वयं होमार्चनादिभिः ॥ ४५ ॥ झटिति कार्यसिद्धिः स्यात्सत्यं सत्यं न संशयः ॥ इति वाक्यं ततः श्रुत्वा ते द्विजा गमनं प्रति ॥ ४६ ॥ प्रस्थानं च विधायादौ गम नाय मनो दधुः ॥ त्रिसाहस्रास्तदा तस्मात्प्रस्थिता द्विजसत्तमाः ॥ ४७ ॥ देशाद्देशांतरं गत्वा वनाच्चैव वनांतरम् ॥ तीर्थेतीर्थे कृतश्राद्धाः सुसंतर्पितपूर्वजाः ॥ ४८ ॥ ध्यायंतो रामरामेति हनुमंतेति वै पुनः ॥ एकाशनाः सदाचारा द्विजा जग्मुः शनैःशनैः ॥ ४९ ॥ त्यक्तप्रतिग्रहाः शांताः सत्यव्रतपरायणाः ॥ ते गता दूरमध्वानं हनुमद्दर्शनार्थिनः ॥ १५० ॥ संध्यामुपासते नित्यं त्रिकालं चैकमानसाः ॥ एवं तु गच्छतां तेषां शकुना अभवञ्छुभाः ॥ ५१ ॥ एवं तु गच्छतां तेषां पाथेयं त्रुटितं तदा ॥ श्रांता ग्लानिं गताः सर्वे पदं परममास्थिताः ॥ ५२ ॥ क्रमित्वा कियतीं भूमिं पदं गंतुं न तु क्षमाः ॥ मनसा निश्चयं कृत्वा दृढीकृत्य स्वमानसम् ॥ ५३ ॥ हनूमंतमदृष्ट्वैव न यास्यामो वयं गृहान् ॥ त्रैविद्यास्तु गतास्तत्र यत्र रामेश्वरो हरिः ॥ ५४ ॥ दृढव्रताः सत्यपराः कन्दमूलफलाशनाः ॥ ध्यायंतो रामरामेति हनूमंतेति वै पुनः ॥ ५५ ॥ गृहीत्वा नियमं तेऽपि त्यक्त्वा चान्नं तथोदकम् ॥ तृषार्ताश्च क्षुधार्त्ताश्च ययुर्व्रतपरायणाः ॥ ५६ ॥ एवं तु क्लिश्यमानानां द्विजानां भक्तिभाजनः ॥ उद्विग्नमानसो रामो हनूमंतमथाब्रवीत् ॥ ५७ ॥ शीघ्रं गच्छ द्विजार्थे त्वं पवनात्मज धर्मवित् ॥ क्लिश्यंते वाडवाः सर्वे धर्मारण्यनिवासिनः ॥ ५८ ॥ दह्यते मानसं मेऽद्य नान्यथा शांतिरस्ति मे ॥ विप्राणां दुःखकर्त्ता च शास्तव्यो नात्र संशयः ॥ ५९ ॥ येन वै दुःखिता विप्रास्तेनाहं दुःखितः कपे ॥ याहि शीघ्रं हि मां त्यक्त्वा विप्राणां परिपालने ॥ १६० ॥ रामस्य वचनं श्रुत्वा नमस्कृत्य च राघवम् ॥ कृपया परयाविष्टः प्रादुरासीद्धरीश्वरः ॥ ॥ ६१ ॥ वृद्धब्राह्मणरूपेण परीक्षार्थं द्विजन्मनाम् ॥ उवाच परया भक्त्या ब्राह्मणाञ्छ्रमदुर्बलान् ॥ ६२ ॥ कृतांजलिपुटो भूत्वा करान्मुक्त्वा कमंडलुम् ॥ सर्वान्प्रत्यभिवाद्याथ वचनं चेदमब्रवीत् ॥ ६३ ॥ कुतः स्थानादिह प्राप्ता गंतुकामाश्च वै कुतः ॥ किमर्थं वै भवद्भिश्च गम्यते दारुणं वनम् ॥ ६४ ॥ ॥ विप्रा ऊचुः ॥ ॥ धर्मारण्यात्समायाता निजदुःखं निवेदितुम् ॥ रामस्य दर्शनार्थं हि गंतुकामा वयं द्विजाः ॥ ६५ ॥ सेतुबंधं महातीर्थं सर्वकामप्रदायकम् ॥ नियमस्थाः क्षीणदेहा रामं द्रष्टुं समुत्सुकाः ॥ ६६ ॥ यत्र रामेश्वरो देवः साक्षाद्वायुसुतः कपिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्छुत्वा स द्विजः प्राह क रामः क च वायुजः ॥ ६७ ॥ क सेतुबंधरामेशो दूराद्दूरतरो द्विजाः ॥ व्याघ्रसिंहाकुलं चोग्रं वनं घोरतरं महत् ॥ ६८ ॥ गत्वा यस्मान्न वर्तते तदुग्रमनुजीविनः ॥ निवर्तध्वं महाभागा यदि कार्यं हि मद्वचः ॥ ६९ ॥ अथवा गम्यतां विप्राश्चिरं जीव सुखी भव ॥ वृद्धस्य वाक्यं तच्छुत्वा वाडवाश्चैकमानसाः ॥१७०॥ विप्र गच्छामहे सर्वे रामपार्श्वमसंशयः ॥ म्रियेत यदि मार्गेऽस्मिन्रामलोकमवाप्नुयात् ॥ ७१ ॥ जीवन्वृत्तिमवाप्नोति रामादेव न संशयः ॥ अन्यथा शरणं नास्ति अस्माकं राघवं विना ॥ ७२ ॥ इत्युक्त्वा निर्गताः सर्वे रामदर्शनतत्पराः ॥ दिनांतमतिवाह्याथ प्रभाते विमले पुनः ॥ ७३ ॥ हनुमान्ब्रह्मरूपी स वृद्धः पूर्वगुणान्वितः ॥ कमंडलुधरो धीमानभिवादनतत्परः ॥ ७४ ॥ कुत्रस्थानादिह प्राप्ताः सर्वे यूयं हि वाडवाः ॥ कुत्रास्ति वा महालाभो विवाहोत्सव एव वा ॥ ७५ ॥ इति तस्य वचः श्रुत्वा वाडवा विस्मयं गताः ॥ प्रणामपूर्वां विज्ञप्तिं कथयामासुराहृताः ॥ ७६ ॥ अस्माकं तु पुरा वृत्तं महदाश्चर्यकारकम् ॥ भूमिदेव शृणुष्व त्वं दयालुर्दृश्यसे यतः ॥ ७७ ॥ आदौ सृष्टिसमारंभे स्थापिता केशवेन च ॥ शिवेन ब्रह्मणा चैव त्रिमूर्तिस्थापिता वयम् ॥ ७८ ॥ श्रीरामेण ततः पश्चाज्जीर्णोद्धारेण स्थापिताः ॥ ग्रामाणां वेतनं दत्तं हरिराजेन चादरात् ॥७९॥ चतुश्चत्वारिंशदधिकचतुःशतमितात्मनाम् ॥ ग्रामास्त्रयोदशार्चार्थं सीतापुरसमन्विताः ॥ ॥१८०॥ षट्त्रिंशच्च सहस्राणि वणिजो द्विजपालने ॥ गोभूजसंज्ञास्ते शूद्रास्तेभ्यः सपादलक्षकाः ॥ ८१ ॥ ते च जातास्त्रिधा तात गोभूजाडालजास्तथा ॥ मांडलीयास्तथा चैते त्रिविधाश्च मनोरमाः ॥८२॥ वृत्त्यर्थं तेन दत्ता वै ह्यनर्घ्या रत्नकोटयः ॥ तदा ते मोढ १८००० गोभूजा१८००० मांडलीया १२५००० अडालजाः १८००० ॥८३॥ अधुना वाडवश्रेष्ठ आमोनाम महीपतिः ॥ शासनं रामचंद्रस्य न मानयति दुर्मतिः ॥८४॥ जामाता तस्य दुष्टो वै नाम्ना कुमारपालकः ॥ पाखंडैर्वेष्टितो नित्यं कलिधर्मेण संमतः ॥ ८५ ॥ इन्द्रसूत्रेण[2] जैनेन प्रेरितो बौद्धधर्मिणा ॥ शासनं तेन लुप्तं हि रामदत्तं न संशयः ॥ ८६ ॥ वाणिजस्तादृशाः केऽपि तन्मनस्का बभूविरे ॥ निषेधयंति रामं ते हनुमंतं महामतिम् ॥८७॥ प्रत्ययं तु विना विप्रा न दास्यामीति निश्चितम् ॥ तं ज्ञात्वा तु इमे विप्रा रामं शरणमाययुः ॥८८॥ हनुमंतं महावीरं रामशासनपालकम् ॥ तस्माद्गच्छामहे सर्वे रामं प्रति महामते ॥ ८९ ॥ आंजनेयो यदास्माकं न दास्यति समीहितम् ॥ अनाहारव्रतेनैव प्राणांस्त्यक्ष्यामहे वयम् ॥ १९० ॥ अस्माभिस्ते विशेषेण कथितं परिपृच्छते ॥ स्नेहभावं विचिंत्याशु निजवृत्तिं प्रकाशय ॥९१॥ हनुमानुवाच ॥ प्राप्ते कलियुगे विप्राः क देवदर्शनं भवेत् ॥ निवर्त्तध्वं

१ प्रत्येकमाशीर्वादाभिप्रायेणैकवचनम् । २ इंद्रसूरिः–इति पूर्वं तन्नामासीत्, अत्र तु–इंद्रसूत्रेण–इत्युक्तम् । तस्मात्–इंद्रसूरिः–इति,–इंद्रसूत्रः–इति च तन्नामनी–इति बोद्धव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि विप्रेन्द्रा यदीच्छथ सुखं महत् ॥ ९२ ॥ व्याघ्रसिंहाकुले शून्ये वने वनगजाश्रिते ॥ बहुदावसमाविष्टे प्रवेष्टुं नैव शक्यते ॥ ९३ ॥ ॥ विप्राऊचुः ॥ अतीते दिवसे विप्र एकं कथितवानिदम् ॥ अद्यैव त्वं समागम्य एवमेव प्रभाषसे ॥ ९४ ॥ कस्त्वं वाडवरूपेण रामो वाप्यथ वायुजः ॥ सत्यं कथय नः स्वास्मिन्दयां कृत्वा महाद्विज ॥ ९५ ॥ हनुमान्कथयामास गोपितं यद्द्विजाग्रतः ॥ हनुमानित्यहं विप्रा बुध्यध्वं निश्चिता हि माम् ॥ ९६ ॥ स्वरूपं प्रकटीकृत्य लांगूलं दर्शयन्महत् ॥ ९७ ॥ ॥ हनुमानुवाच ॥ ॥ अयमंभोनिधिः साक्षात्सेतुबंधो मनोरमः ॥ अयं रामेश्वरो देवो गर्भवासविनाशकृत् ॥ ९८ ॥ इयं तु नगरी श्रेष्ठा लंकानामेति विश्रुता ॥ यत्र सीता मया प्राप्ता रामशोकापहारिणी ॥ ९९ ॥ तर्जन्यग्रे द्विज श्रेष्ठा अगम्या मां विना परैः ॥ सा सुवर्णमयी भाति यस्यां राज्ये विभीषणः ॥ २०० ॥ स्थापितो रामदेवेन सेयं लंका महापुरी ॥ नियमस्थैः साधुवृंदैस्तीर्थयात्राप्रसंगतः ॥ २०१ ॥ आनीय गंगासलिलं रामेशमभिषिच्य च ॥ क्षिप्ता एते महाभारा दृश्यंते सागरांतरे ॥२०२॥ निष्पापास्तेन संजाताः साधवस्ते दृढव्रताः ॥ नूनं पुण्योदये वृद्धिः पापे हानिश्च जायते ॥ २०३ ॥ स्थानभ्रष्टाः कृताः पूर्वं चातुर्विद्या द्विजा तयः ॥ जीर्णोद्धारेण रामेण स्थापिताः पुनरेव हि ॥ पूर्वजन्मनि भो विप्रा हरिपूजा कृता मया ॥ २०४ ॥ सांप्रतं निश्चला भक्तिर्भवत्सेवा हि दृश्यते ॥ तेन पुण्यप्रभावेण तुष्टो दास्यामि वो वरम् ॥ २०५ ॥ धन्योहं कृतकृत्योहं सुभाग्योहं धरातले ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ २०६ ॥ यदहं ब्राह्मणानां च प्राप्तवांश्चरणांतिकम् ॥ २०७ ॥ ॥ व्यास उवाच ॥ ॥ दृष्ट्वैव हनुमन्तं ते पुलकांकितविग्रहाः ॥ सग द्गदं यथोचुस्ते वाक्यं वाक्यविशारदाः ॥ २०८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे धर्मारण्यमाहात्म्ये हनुमत्समागमो नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ व्यास उवाच ॥ ॥ ततस्ते ब्राह्मणाः सर्वे प्रत्यूचुः पवनात्मजम् ॥ अधुना सफलं जन्म जीवितं च सुजीवितम् ॥ १ ॥ अद्य नो मोढलोकानां धन्यो धर्मश्च वै गृहाः ॥ धन्या च सकला पृथ्वी यज्ञधर्मा ह्यनेकशः ॥ २ ॥ नमः श्रीराम भक्ताय अक्षविध्वंसनाय च ॥ नमो रक्षःपुरीदाहकारिणे वज्रधारिणे ॥ ३ ॥ जानकीहृदयत्राणकारिणे करुणात्मने ॥ सीताविरह तप्तस्य श्रीरामस्य प्रियाय च ॥ ४ ॥ नमोऽस्तु ते महावीर रक्षास्मान्मज्जतः क्षितौ ॥ नमो ब्राह्मणदेवाय वायुपुत्राय ते नमः ॥ ५ ॥ नमोऽस्तु राम भक्ताय गोब्राह्मणहिताय च ॥ नमोस्तु रुद्ररूपाय कृष्णवक्त्राय ते नमः ॥ ६ ॥ अंजनीसूनवे नित्यं सर्वव्याधिहराय च ॥ नागयज्ञोपवी ताय प्रबलाय नमोऽस्तु ते ॥ ७ ॥ स्वयं समुद्रतीर्णाय सेतुबंधनकारिणे ॥ ८ ॥ ॥ व्यास उवाच ॥ ॥ स्तोत्रेणैवामुना तुष्टो वायुपुत्रोऽब्रवीद्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चः ॥ शृणुध्वं हि वरं विप्रा यद्वो मनसि रोचते ॥ ९ ॥ ॥ विप्रा ऊचुः ॥ ॥ यदि तुष्टोऽसि देवेश रामाज्ञापालक प्रभो ॥ स्वरूपं दर्शयस्वाद्य
लंकायां यत्कृतं हरे ॥ १० ॥ तथा विध्वंसयाद्य त्वं राजानं पापकारिणम् ॥ दुष्टं कुमारपालं हि आमं चैव न संशयः ॥ ११ ॥ वृत्तिलोपफलं सद्यः
प्राप्नुयात्त्वं तथा कुरु ॥ प्रतीत्यर्थं महाबाहो किं विलंबं वदस्व नः ॥१२॥ त्वयि चित्तेन दत्तेन स राजा पुण्यभाग्भवेत् ॥ प्रत्यये दर्शिते वीर शासनं
पालयिष्यति ॥ १३ ॥ त्रयीधर्म्मः पृथिव्यां तु विस्तारं प्रापयिष्यति ॥ धर्मधीर महावीर स्वरूपं दर्शयस्व नः ॥ १४ ॥ ॥ हनुमानुवाच ॥ ॥
मत्स्वरूपं महाकायं न चक्षुर्विषयं कलौ ॥ तेजोराशिमयं दिव्यमिति जानंतु वाडवाः ॥ १५ ॥ तथापि परया भक्त्या प्रसन्नोऽहं स्तवादिभिः ॥
वसनांतरितं रूपं दर्शयिष्यामि पश्यत ॥ १६ ॥ एवमुक्तास्तदा विप्राः सर्वकार्यसमुत्सुकाः ॥ महारूपं महाकायं महापुच्छसमाकुलम् ॥ १७ ॥
दृष्ट्वा दिव्यस्वरूपं तं हनुमंतं जहर्षिरे ॥ कथंचिद्धैर्यमालंब्य विप्राः प्रोचुः शनैः शनैः ॥ १८ ॥ यथोक्तं तु पुराणेषु तत्तथैव हि दृश्यते ॥ उवाच स
हि तान्सर्वांश्चक्षुः प्रच्छाद्य संस्थितान् ॥ १९ ॥ फलानीमानि गृह्णीध्वं भक्षणार्थमृषीश्वराः ॥ एभिस्तु भक्षितैर्विप्रा ह्यतितृप्तिर्भविष्यति ॥ २० ॥
धर्मारण्यं विना चाद्य क्षुधा वः शाम्यति ध्रुवम् ॥ २१ ॥ ॥ व्यास उवाच ॥ ॥ क्षुधाक्रांतैस्तदा विप्रैः कृतं वै फलभक्षणम् ॥ अमृतप्राशन
मिव तृप्तिस्तेषामजायत ॥ २२ ॥ न तृषा नैव क्षुच्चैव विप्राः संक्लिष्टमानसाः ॥ अभवन्सहसा राजन्विस्मयाविष्टचेतसः ॥२३॥ ततः प्राहांजनीपुत्रः
संप्राप्ते हि कलौ द्विजाः ॥ नागमिष्याम्यहं तत्र मुक्त्वा रामेश्वरं शिवम् ॥ २४ ॥ अभिज्ञानं मया दत्तं गृहीत्वा तत्र गच्छत ॥ तथ्यमेतत्प्रतीयेत
तस्य राज्ञो न संशयः ॥ २५ ॥ इत्युक्त्वा बाहुमुद्धृत्य भुजयोरुभयोरपि ॥ पृथग्रोमाणि संगृह्य चकार पुटिकाद्वयम् ॥ २६ ॥ भूर्जपत्रेण संवेष्ट्य ते
अदाद्विप्रकक्षयोः ॥ वामे तु वामकक्षोत्थां दक्षिणोत्थां तु दक्षिणे ॥ २७ ॥ कामदां रामभक्तस्य अन्येषां क्षयकारिणीम् ॥ उवाच च यदा राजा
ब्रूते चिह्नं प्रदीयताम् ॥ २८ ॥ तदा प्रदीयतां शीघ्रं वामकक्षोद्भवा पुटी ॥ अथवा तस्य राज्ञस्तु द्वारे तु पुटिकां क्षिप ॥ २९ ॥ ज्वालयति च
तत्सैन्यं गृहं कोशं तथैव च ॥ महिष्यः पुत्रकाः सर्वं ज्वलमानं भविष्यति ॥ ३० ॥ यदा तु वृत्तिं ग्रामांश्च वणिजानां बलिं तथा ॥ पूर्वं स्थितं तु
यत्किंचित्तत्तद्दास्यति वाडवाः ॥ ३१ ॥ लिखित्वा निश्चयं कृत्वाप्यथ दद्यात्स पूर्ववत् ॥ करसंपुटकं कृत्वा प्रणमेच्च यदा नृपः ॥ ३२ ॥ संप्राप्य
च पुरा वृत्तिं रामदत्तां द्विजोत्तमाः ॥ ततो दक्षिणकक्षास्थकेशानां पुटिका त्वियम् ॥ ३३ ॥ प्रक्षिप्यतां तदा सैन्यं पुरावच्च भविष्यति ॥
गृहाणि च तथा कोशः पुत्रपौत्रादयस्तथा ॥ ३४ ॥ वह्निना मुच्यमानास्ते दृश्यंते तत्क्षणादिति ॥ श्रुत्वाऽमृतमयं वाक्यं हनुमंतोदितं परम् ॥३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलभन्त मुदं विप्रा ननृतुः प्रजगुर्भृशम् ॥ जयं चोदैरयन्केऽपि प्रहसन्ति परस्परम् ॥ ३६ ॥ पुलकांकितसर्वाङ्गाः स्तुवन्ति च मुहुर्मुहुः ॥ पुच्छं तस्य च संगृह्य चुचुंबुः केचिदुत्सुकाः ॥ ३७ ॥ ब्रूतेऽन्यो मम यत्नेन कार्यं नियतमेव हि ॥ अन्यो ब्रूते महाभाग मयेदं कृतमित्युत ॥३८॥ ततः प्रोवाच हनुमांस्त्रिरात्रं स्थीयतामिह ॥ रामतीर्थस्य च फलं यथा प्राप्स्यथ वाडवाः ॥ ३९ ॥ तथेत्युक्त्काथ ते विप्रा ब्रह्मयज्ञं प्रचक्रिरे ॥ ब्रह्मघोषेण महता तद्वनं बधिरं कृतम् ॥ ४० ॥ स्थित्वा त्रिरात्रं ते विप्रा गमने कृतबुद्धयः ॥ रात्रौ हनुमतोऽग्रे त इदमूचुः सुभक्तितः ॥ ४१ ॥ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ वयं प्रातर्गमिष्यामो धर्मारण्यं सुनिर्मलम् ॥ न विस्मार्या वयं तात क्षम्यतांक्षम्यतामिति ॥ ४२ ॥ ततो वायुसुतो राजन्पर्वतान्महतीं शिलाम् ॥ बृहतीं च चतुःशालां दशयोजनमायतीम् ॥ ४३ ॥ आस्तीर्य प्राह तान्विप्राञ्छिलायां द्विजसत्तमाः ॥ रक्ष्यमाणा मया विप्राः शयीध्वं विगतज्वराः ॥ ४४ ॥ इति श्रुत्वा ततः सर्वे निद्रामापुः सुखप्रदाम् ॥ एवं ते कृतकृत्यास्तु भूत्वा सुप्ता निशामुखे ॥ ॥ ४५ ॥ कृपालुः स च रुद्रात्मा रामशासनपालकः ॥ रक्षणार्थं हि विप्राणामतिष्ठच्च धरातले ॥ ४६ ॥ ॥ व्यास उवाच ॥ ॥ अर्द्धरात्रे तु संप्राप्ते सर्वे निद्रामुपागताः ॥ तातं संप्रार्थयामास कृतानुग्रहको भवान् ॥ ४७ ॥ समीरण द्विजानेतान्स्थानं स्वं प्रापयस्व भोः ॥ ततो निद्राभिभूतांस्तान्वायुपुत्रप्रणोदितः ॥ ४८ ॥ समुद्धृत्य शिलां तां तु पिता पुत्रेण भारत ॥ विशिष्टो यापयामास स्वस्थानं द्विजसत्तमान् ॥ ४९ ॥ षड्भिर्मासैश्च यः पन्था अतिक्रांतो द्विजातिभिः ॥ त्रिभिरेव मुहूर्त्तैस्तु धर्मारण्यमवाप्तवान् ॥ ५० ॥ भ्रममाणां शिलां ज्ञात्वा विप्र एको द्विजाग्रतः ॥ वात्स्यगोत्रसमुत्पन्नो लोकान्संगीतवान्कलम् ॥ ५१ ॥ गीतानि गायनोक्तानि श्रुत्वा विस्मयमाययुः ॥ प्रभाते सुप्रसन्ने तु उदतिष्ठन्परस्परम् ॥ ५२ ॥ ऊचुस्ते विस्मिताः सर्वे स्वप्नोऽयं वाथ विभ्रमः ॥ ससंभ्रमाः समुत्थाय ददृशुः सत्यमंदिरम् ॥ ५३ ॥ अंतर्बुद्ध्या समालोक्य प्रभावो वायुजस्य च ॥ श्रुत्वा वेदध्वनिं विप्राः परं हर्षमुपागताः ॥ ५४ ॥ ग्रामीणाश्च ततो लोका दृष्ट्वा तु महतीं शिलाम् ॥ अद्भुतं मेनिरे सर्वे किमिदं किमिदं त्विति ॥ ५५ ॥ गृहेगृहे हि ते लोकाः प्रवदंति तथाद्भुतम् ॥ ब्राह्मणैः पूर्यमाणा सा शिला च महती शुभा ॥ ५६ ॥ अशुभा वा शुभा वापि न जानीमो वयं किल ॥ संवदंते ततो लोकाः परस्परमिदं वचः ॥ ५७ ॥ ॥ व्यास उवाच ॥ ॥ ततो द्विजानां ते पुत्राः पौत्राश्चैव समागताः ॥ ऊचुस्ते दिष्ट्या भो विप्रा आगताः पथिका द्विजाः ॥ ५८ ॥ ते तु संतुष्टमनसा सन्मुखाः प्रययुर्मुदा ॥ प्रत्युत्थानाभिवादाभ्यां परिरंभणकं तथा ॥ ५९ ॥ आघ्राणकादींश्च कृत्वा यथायोग्यं प्रपूज्य च ॥ सर्वं विस्तार्य कथितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीघ्रमागममात्मनः ॥ ६० ॥ ततः संपूज्य तान्सर्वान्गंधतांबूलकुम्कुमैः ॥ शांतिपाठं पठंतस्ते हृष्टा निजगृहान्ययुः ॥ ६१ ॥ आनंदाया महा
पीठे प्रातः पांथाः समुत्थिताः ॥ ददृशुस्ते महास्थानं सोत्कंठा हर्षपूरिताः ॥ ६२ ॥ आश्चर्यं परमं प्रापुः किमेतत्स्थानमुत्तमम् ॥ अयंतुदक्षिण
द्वारे शांतिपाठोऽत्र पठ्यते ॥ ६३ ॥ गृहा रम्याः प्रदृश्यंते शचीपतिगृहोपमाः ॥ प्रासादाः कुलमातॄणां दृश्यंते चाग्निशोभनाः ॥ ६४ ॥ एवं
ब्रुवत्सु विप्रेषु महाशक्तिप्रपूजने ॥ आगतो ब्राह्मणोऽपश्यत्तत्र विप्रकदंबकम् ॥ ६५ ॥ हर्षितो भावितस्तत्र यत्र विप्राः सभासदः ॥ उवाच दिष्ट्या
भो विप्रा ह्यागताः पथिका द्विजाः ॥ ६६ ॥ प्रत्युत्तस्थुस्ततो विप्राः पूजां गृहीत्वा समागताः ॥ प्रत्युत्थानाभिवादौ चाकुर्वंस्ते च परस्परम् ॥ ६७ ॥
तेते संपूज्य वेगात्तु यथायोग्यं यथाविधि ॥ हरीश्वरस्य यद्वृत्तं विप्राग्रे संप्रकाशितम् ॥ ६८ ॥ पथिकानां वचः श्रुत्वा हर्षपूर्णा द्विजोत्तमाः ॥
शांतिपाठं पठन्तस्ते हृष्टा निजगृहान्ययुः ॥ ६९ ॥ विमृश्य मिलिताः प्रातर्ज्योतिर्विद्भिः प्रतिष्ठिताः ॥ ब्राह्मे मूहूर्ते चोत्थाय कान्यकुब्जं गता
द्विजाः ॥७०॥ दोलाभिर्वाहिताः केचित्केचिदश्वै रथैस्तथा ॥ केचित्तु शिबिकारूढा नानावाहनगाश्च ते ॥७१॥ तत्पुरं तु समासाद्य गंगायाः शोभने
तटे ॥ अकुर्वन्वसतिं धीराः स्नानदानादिकर्म्म च ॥ ७२ ॥ चरेण केनचिद्दृष्टाः कथिता नृपसन्निधौ ॥ अश्वाश्च बहुशो दोला रथाश्च बहुशो
वृषाः ॥ ७३ ॥ विप्राणामिह दृश्यंते धर्मारण्यनिवासिनाम् ॥ नूनं ते च समायाता नृपेणोक्तं ममाग्रतः ॥ ७४ ॥ अभिज्ञापय मे पूर्वं प्रेषिताः
कपिसंनिधौ ॥ ७५ ॥ इति श्रीस्कांदे महाराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्ड पूर्वभागे धर्मारण्यमाहात्म्ये ब्राह्मणानां प्रत्यागमन
वर्णनं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ ततः प्रभाते विमले कृतपूर्वाह्णिकक्रियाः ॥ शुभवस्त्रपरीधानाः फल
हस्ताः पृथक्पृथक् ॥ १ ॥ रत्नांगदाढ्यदोर्दंडा अंगुलीयकभूषिताः ॥ कर्णाभरणसंयुक्ताः समाजग्मुः प्रहर्षिताः ॥ २ ॥ राजद्वारं तु संप्राप्य संत
स्थुर्ब्रह्मवादिनः ॥ तान्दृष्ट्वा राजपुत्रस्तु ईषत्प्रहसितो बली ॥ ३ ॥ रामं च हनुमंतं च गत्वा विप्राः समागताः ॥ श्रूयतां मंत्रिणः सर्वे दृश्यंतो द्विज
सत्तमान् ॥ ४ ॥ एतदुक्त्वा तु वचनं तूष्णीं भूत्वा स्थितो नृपः ॥ ततो द्वित्रा द्विजाः सर्वे उपविष्टाः क्रमात्ततः ॥ ५ ॥ क्षेमं पप्रच्छुर्नृपतिं
हस्तिरथपदातिषु ॥ ततः प्रोवाच नृपतिर्विप्रान्प्रति महामनाः ॥ ६ ॥ अरिहंतप्रसादेन सर्वत्र कुशलं मम ॥ सा जिह्वा या जिनं स्तौ
ति तौ करौ यौ जिनार्चनौ ॥ ७ ॥ सा दृष्टिर्या जिने लीना तन्मनो यज्जिने रतम् ॥ दया सर्वत्र कर्त्तव्या जीवात्मा पूज्यते सदा ॥ ८ ॥
योगशाला हि गंतव्या कर्त्तव्यं गुरुवंदनम् ॥ न चकारं महामंत्रं जपितव्यमहर्निशम् ॥ ९ ॥ पंचूषणं हि कर्त्तव्यं दातव्यं श्रमणे सदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा वाक्यं ततो विप्रास्तस्य दंतानपीडयन् ॥ १० ॥ विमुच्य दीर्घनिश्वासमूचुस्ते नृपतिं प्रति ॥ रामेण कथितं राजन्धीमता च हनूमता ॥ ११॥
दीयतां विप्रवृत्तिं च धर्मिष्ठोऽसि धरातले ॥ ज्ञायते तव दत्ता स्यान्मदत्ता नैव नैव च ॥१२॥ रक्षस्व रामवाक्यं त्वं यत्कृत्वा त्वं सुखी भव ॥१३॥
॥ ॥ राजोवाच ॥ ॥ यत्र रामहनूमंतौ यांतु सर्वेऽपि तत्र वै ॥ रामो दास्यति सर्वस्वं किं प्राप्ता इह वै द्विजाः ॥ १४ ॥ न दास्यामि न दास्यामि
एकां चैव वराटिकाम् ॥ न ग्रामं नैव वृत्तिं च गच्छध्वं यत्र रोचते ॥ १५ ॥ तच्छ्रुत्वा दारुणं वाक्यं द्विजाः कोपाकुलास्तदा ॥ सहस्व रामकोपं हि
साम्प्रतञ्च हनूमंतः ॥ १६ ॥ इत्युक्त्वा हनुमद्दत्ता वामकक्षोद्भवा पुटी ॥ प्रक्षिप्ता चास्य निलये व्यावृत्ता द्विजसत्तमाः ॥ १७॥ गते तदा विप्रसंघे
ज्वालामालाकुलं त्वभूत् ॥ अग्निज्वालाकुलं सर्वं संजातं चैव तत्र हि ॥ १८॥ दह्यंते राजवस्तूनिच्छत्राणि चामराणि च ॥ कोशागाराणि सर्वाणि
आयुधागारमेव च ॥१९॥ महिष्यो राजपुत्राश्च गजा अश्वा ह्यनेकशः ॥ विमानानि च दह्यंते दह्यंते वाहनानि च ॥२०॥ शिबिकाश्च विचित्रा वै
रथाश्चैव सहस्रशः ॥ सर्वत्र दह्यमानं च दृष्ट्वा राजापि विव्यथे ॥ २१ ॥ न कोपि त्राता तस्यास्ति मानवा भयविक्लवाः ॥ न मंत्रयंत्रैर्वह्निः स साध्यते
न च मूलिकैः ॥ २२ ॥ कौटिल्यकोटिनाशी च यत्र रामः प्रकुप्यते ॥ तत्र सर्वे प्रणश्यंति किं तत्कुमारपालकः ॥ २३ ॥ सर्वं तज्ज्वलितं दृष्ट्वा
नग्नक्षपणकास्तदा ॥ धृत्वा करेण पात्राणि नीत्वा दडाञ्छुभानपि ॥ २४ ॥ रक्तकंबलिका गृह्य वेपमाना मुहुर्मुहुः ॥ अनुपानहिकाश्चैव नष्टाः सर्वे
दिशो दश ॥ २५ ॥ कोलाहलं प्रकुर्वाणाः पलायध्वमिति ब्रुवन् ॥ दाहिता विप्रमुख्यैश्च वयं सर्वे न संशयः ॥ २६ ॥ केचिच्च भग्नपात्रास्ते भग्नदं
डास्तथापरे ॥ प्रनष्टाश्च विवस्त्रास्ते वीतरागमिति ब्रुवन् ॥ २७ ॥ अर्हंतमेव केचिच्च पलायनपरायणाः ॥ ततो वायुः समभवद्वह्निमांदोलयन्निव ॥
॥ २८ ॥ प्रेषितो वै हनुमता विप्राणां प्रियकाम्यया ॥ धावन्स नृपतिः पश्चादितश्चेतश्च वै तदा ॥ २९ ॥ पदातिरेकः प्ररुदन्क्व विप्रा इति जल्पकः ॥
लोकाच्छ्रुत्वा ततो राजा गतस्तत्र यतो द्विजाः ॥ ३० ॥ गत्वा तु सहसा राजन्गृहीत्वा चरणौ तदा ॥ विप्राणां नृपतिर्भूमौ मूर्च्छितो न्यपत
त्तदा ॥ ३१ ॥ उवाच वचनं राजा विप्रान्विनयतत्परः ॥ जपन्दाशरथिं रामं रामरामेति वै पुनः ॥ ३२ ॥ तस्य दासस्य दासोहं रामस्य च द्विज
स्य च ॥ अज्ञानतिमिरांधेन जातोस्म्यंधो हि संप्रति ॥ ३३ ॥ अंजनं च मया लब्धं रामनाममहौषधम् ॥ रामं मुक्त्वा हि ये मर्त्या ह्यन्यं देव
मुपासते ॥ दह्यंते तेऽग्निना स्वामिन्यथाहं मूढचेतनः ॥ ३४ ॥ हरिर्भागीरथी विप्रा विप्रा भागीरथी हरिः ॥ भागीरथी हरिर्विप्राः सारमेकं जगत्त्रये ॥
॥ ३५ ॥ स्वर्गस्य चैव सोपानं विप्रा भागीरथी हरिः ॥ रामनाममहारज्ज्वा वैकुंठे येन नीयते ॥ ३६ ॥ इत्येवं प्रणमन्राजा प्रांजलिर्वाक्यमब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीत् ॥ वह्निः प्रशाम्यतां विप्राः शासनं वो ददाम्यहम् ॥ ३७ ॥ दासोऽस्मि सांप्रतं विप्रा न मे वागन्यथा भवेत् ॥ यत्पापं ब्रह्महत्यायाः पर दाराभिगामिनाम् ॥ ३८ ॥ यत्पापं मद्यपानां च सुवर्णस्तेयिनां तथा ॥ यत्पापं गुरुघातानां तत्पापं वा भवेन्मम ॥ ३९ ॥ यंयं चिंतयते कामं तं तं दास्याम्यहं पुनः ॥ विप्रभक्तिः सदा कार्या रामभक्तिस्तथैव च ॥ ४० ॥ अन्यथा करणीयं मे न कदाचि द्विजोत्तमाः ॥ ४१ ॥ ॥ व्यास उवाच ॥ ॥ तस्मिन्नवसरे विप्रा जाता भूप दयालवः ॥ अन्या या पुटिका चासीत्सा दत्ता शापशांतये ॥ ४२ ॥ जीवितं चैव तत्सैन्यं जातं क्षिप्तेषु रोमसु ॥ दिशः प्रसन्नाः संजाताः शांता दिग्जनितस्वनाः ॥ ४३ ॥ प्रजा स्वस्था ऽभवत्तत्र हर्षनिर्भरमानसा ॥ अवतस्थे यथापूर्वं पुत्रपौत्रादिकं तथा ॥ ४४ ॥ विप्राज्ञाकारिणो लोकाः संजाताश्च यथा पुरा ॥ विष्णुधर्मं परित्यज्य नान्यं जानंति ते वृषम् ॥ ४५ ॥ नवीनं शासनं कृत्वा पूर्ववद्विधिपूर्वकम् ॥ निष्कासितास्तु पाषंडाः कृतशास्त्रप्रयोजकाः ॥ ४६ ॥ वेदबाह्याः प्रनष्टास्ते उत्तमाधममध्यमाः ॥ षट्त्रिंशच्च सहस्राणि येऽभूवन्गोभुजाः पुरा ॥ ४७ ॥ तेषां मध्यात्तु संजाता अढवीजा वणिग्जनाः ॥ शुश्रूषार्थं ब्राह्मणानां राज्ञा सर्वे निरूपिताः ॥ ४८ ॥ सदाचाराः सुनिपुणा देवब्राह्मणपूजकाः ॥ त्यक्त्वा पाखण्डमार्गं तु विष्णुभक्तिपरास्तु ते ॥ ४९ ॥ जाह्नवीतीरमासाद्य त्रैविद्येभ्यो ददौ नृपः ॥ शासनं तु यदा दत्तं तेषां वै भक्तिपूर्वकम् ॥ ५० ॥ स्थानधर्मात्प्रचलिता वाडवास्ते समागताः ॥ नृपो विज्ञापितो विप्रैस्तैरेवं क्लेशकारिभिः ॥ ५१ ॥ ये त्यक्तवाचो विप्रेंद्रास्तान्निःसारय भूपते ॥ परस्परं विवादास्तु संजाता दत्तवृत्तये ॥ ५२ ॥ न्याय प्रदर्शनार्थं च कारितास्तु सभासदः ॥ हस्ताक्षरेषु दृष्टेषु पृथक्पृथक् प्रपादितम् ॥ ५३ ॥ एतच्छ्रुत्वा ततो राजा तुलादानं चकार ह ॥ दीयमाने तदा दाने चातुर्विद्या बभाषिरे ॥ ५४ ॥ अस्माभिर्हारिता जातिः कथं कुर्मः प्रतिग्रहम् ॥ निवारितास्तु ते सर्वे स्थानान्मोहेरका द्विजाः ॥५५॥ दशपंच सहस्राणि वेदवेदांगपारगाः ॥ ततस्तेन तदा राजन्नाज्ञा रामानुवर्तिना ॥ ५६ ॥ आहूतावाडवांस्तास्तु ज्ञातिभेदं चकार सः ॥ त्रयीविद्या वाडवा ये सेतुबंधं प्रति प्रभुम् ॥ ५७ ॥ गतास्ते वृत्तिभाजः स्युर्नान्ये वृत्त्यभिभागिनः ॥ तत्र नैव गता ये वै चातुर्विद्यत्वमागताः ॥ ५८ ॥ वणिग्भिर्न च संबंधो न विवाहश्च तैः सह ॥ ग्रामवृत्तौ न संबंधो ज्ञातिभेदे कृते सति ॥५९॥ द्विजभक्तिपराः शूद्राः ये पाखंडैर्न लोपिताः॥ जैन धर्मात्परावृत्तास्ते गोभूजास्तथोत्तमाः ॥ ६० ॥ ये च पाखंडनिरता रामशासनलोपकाः ॥ सर्वे विप्रास्तथा शूद्रा प्रतिबंधेन योजिताः ॥ ६१ ॥ सत्यप्रतिज्ञां कुर्वाणास्तत्रस्थाः सुखिनोऽभवन् ॥ चातुर्विद्या बहिर्ग्रामे राज्ञा तेन निवासिताः ॥६२॥ यथा रामो न कुप्येत तथा कार्यं मया ध्रुवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पराङ्मुखा ये रामस्य सन्मुखानुगताः किल ॥ ६३ ॥ चातुर्विद्यास्ते विज्ञेया वृत्तिबाह्याः कृतास्तदा ॥ कृतकृत्यस्तदा जातो राजा कुमारपालकः ॥ ६४ ॥ विप्राणां पुरतः प्राह प्रश्रयेण वचस्तदा ॥ ग्रामवृत्तिर्न मे लुप्ता एतद्वै देवनिर्मितम् ॥ ६५ ॥ स्वयं कृतापराधानां दोषो कस्य न दीयते ॥ यथा वने काष्ठवर्षाद्वह्निः स्याद्दैवयोगतः ॥ ६६ ॥ भवद्भिस्तु पणः प्रोक्तो ह्यभिज्ञानस्य हेतवे ॥ रामस्य शासनं कृत्वा वायुपुत्रस्य हेतवे ॥ ६७ ॥ व्यावृत्ता वाडवा यूयं स दोषः कस्य दीयते ॥ अवसाने हरिं स्मृत्वा महापापयुतोऽपि वा ॥ ६८ ॥ विष्णुलोकं व्रजत्याशु संशयस्तु कथं भवेत् ॥ महत्पुण्योदये नृणां बुद्धिः श्रेयसि जायते ॥ ६९ ॥ पापस्योदयकाले च विपरीता हि सा भवेत् ॥ सकृत्पालयते यस्तु धर्मेणैतज्जगत्त्रयम् ॥ ॥ ७० ॥ योंतरात्मा च भूतानां संशयस्तत्र नो हितः ॥ इंद्रादयोऽमराः सर्वे सनकाद्यास्तपोधनाः ॥ ७१ ॥ मुक्त्यर्थमर्चयंतीह संशयस्तत्र नो हितः ॥ सहस्रनाम तत्तुल्यं रामनामेति गीयते ॥ ७२ ॥ तस्मिन्ननिश्चयं कृत्वा कथं सिद्धिर्भवेदिह ॥ मम जन्मकृतात्पुण्यादभिज्ञानं ददौ हरिः ॥ ७३ ॥ पाखंडाद्यत्कृतं पापं मृष्टं तद्वः प्रणामतः ॥ प्रसीदंतु भवंतश्च त्यक्त्वा क्रोधं ममाधुना ॥ ७४ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ राजन्धर्मो विलुप्तस्ते प्रापितानां तथा पुनः ॥ अवश्यं भाविनो भावा भवंति महतामपि ॥ ७५ ॥ नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ एतद्दैव कृतं सर्वं प्रभुर्यः सुखदुःखयोः ॥ ७६ ॥ सत्यप्रतिज्ञास्त्रैविद्या भजंतु रामशासनम् ॥ अस्माकं तु परं देहि स्थानं यत्र वसामहे ॥ ७७ ॥ तेषां तु वचनं श्रुत्वा सुखमिच्छुर्द्विजन्मनाम् ॥ तेषां स्थानं तु दत्तं वै सुखवासं तु नामतः ॥ ७८ ॥ हिरण्यं पुष्पवासांसि गावः कामदुघा नृप ॥ स्वर्णालंकरणं सर्वं नानावस्तुचयं तथा ॥ ७९ ॥ श्रद्धया परया दत्त्वा मुदं लेभे नराधिपः ॥ त्रयीविद्यास्तु ते ज्ञेयाः स्थापिता ये त्रिमूर्तिभिः ॥ ॥ ८० ॥ चतुर्थेनैव भूपेन स्थापिताः सुखवासने ॥ ते बभूवुर्द्विजश्रेष्ठाश्चातुर्विद्याः कलौ युगे ॥ ८१ ॥ चातुर्विद्याश्च ते सर्वे धर्मारण्ये प्रतिष्ठिताः ॥ वेदोक्ता आशिषो दत्त्वा तस्मै राज्ञे महात्मने ॥ ८२ ॥ रथैरश्वैरुह्यमानाः कृतकृत्या द्विजातयः ॥ महत्प्रमोदयुक्तास्ते प्रापुर्मोहेरकं महत् ॥ ८३ ॥ पौषशुक्लत्रयोदश्यां लब्धं शासनकं द्विजैः ॥ बलिप्रदानं तु कृतमुद्दिश्य कुलदेवताम् ॥ ८४ ॥ वर्षेवर्षे प्रकर्त्तव्यं बलिदानं यथाविधि ॥ कार्यं च मंगलस्नानं पुरुषेण महात्मना ॥ ८५ ॥ गीतं नृत्यं तथा वाद्यं कुर्वीत तद्दिने ध्रुवम् ॥ तन्मासे तद्दिने नैव वृत्तिनाशो भवेद्यथा ॥ ८६ ॥ दैवादतीतकाले चेत् वृद्धिरापद्यते यदा ॥ तदा प्रथमतः कृत्वा पश्चाद्वृद्धिर्विधीयते ॥ ८७ ॥ ये च भिन्नप्रपाप्रायास्त्रैविद्या मोढवंशजाः ॥ तथा चातुर्वेदिनश्च कुर्वंति गोत्रपूजनम् ॥ ८८ ॥ वर्षमध्ये प्रकुर्वीत तथा सुप्ते जनार्दने ॥ पौषे च लुप्तं कृत्वा च श्रौतं स्मार्त्तं करोति यः ॥ ८९ ॥ तत्र क्रोधसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विघ्ना निघ्नंति कुलदेवताः ॥ विवाहोत्सवकाले च मौंजीबंधादिकर्मणि ॥ ९० ॥ मुहूर्तं गणनाथस्य ततः प्रभृति शोभनम् ॥ ९१ ॥ निर्वासितास्तु ये विप्रा आमराज्ञा स्वशासनात् ॥ पंचदशसहस्राणि ययुस्ते सुखवासकम् ॥ ९२ ॥ पंचपञ्चाशतो ग्रामान्ददौ रामः पुरा स्वयम् ॥ तत्रस्था वणिजश्चैव तेषां वृत्तिमकल्पयन् ॥ ९३ ॥ अडालजा माण्डलीया गोभूजाश्च पवित्रकाः ॥ ब्राह्मणानां वृत्तिदास्ते ब्रह्मसेवासु तत्पराः ॥ ९४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ब्राह्मणानां शासनवृत्तिप्राप्तिवर्णनं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु पुत्र प्रवक्ष्यामि रहस्यं परमं मतम् ॥ एते ब्रह्मविदः प्रोक्ताश्चातुर्विद्या महाद्विजाः ॥ १ ॥ स्वाध्यायाश्च वषट्कारा: स्वधाकाराश्च नित्यशः ॥ रामाज्ञापालकाश्चैव हनुमद्भक्तितत्पराः ॥ २ ॥ एकदा तु ततो देवा ब्रह्माणं समुपागताः ॥ ब्राह्मणान्द्रष्टुकामास्ते ब्रह्मविष्णुपुरोगमाः ॥ ३ ॥ तान्देवानागतान्दृष्ट्वा स्वस्थानाच्चलितास्तु ते ॥ अर्घपाद्यं पुरस्कृत्य मधुपर्कं तथैव च ॥ ४ ॥ पूजयित्वा ततो विप्रा देवान्ब्रह्मपुरोगमान् ॥ ब्रह्माग्र उपविष्टास्ते वेदानुच्चारयन्ति हि ॥ ५ ॥ संहितां च पदं चैव क्रमं घनं तथैव च ॥ उच्चैः स्वरेण कुर्वीत ऋचामृग्वेदसंहिताम् ॥ ६ ॥ सामगाश्च प्रकुर्वंति स्तोत्राणि विविधानि च ॥ शास्त्राणि च तथा याज्यापुरोनुवाक्यास्तथा ॥ ७ ॥ चंतुरक्षरं परं चैव चतुरक्षरमेव च ॥ द्व्यक्षरं च तथापंचाक्षरं द्व्यक्षरमेव च ॥ एतद्यज्ञस्वरूपं च यो जपेज्ज्ञानपूर्वकम् ॥८॥ अंते ब्रह्मपदप्राप्तिः सत्यंसत्यं वदाम्यहम् ॥ एकाग्रमानसाः सर्वे वेदपाठरता द्विजाः ॥ ९ ॥ तेषामंगणदेशेषु कण्डूयन्ते कचान्मृगाः ॥ ब्राह्मणा वेदमातां च जपंति विधिपूर्वकम् ॥१०॥ हस्ते धृतांश्च तैर्दर्भान्भक्षंते मृगपोतकाः॥ निर्वैरं तं तदा दृष्ट्वा आश्रमं गृहमेधिनाम् ॥११॥ तुतुषुः परमं देवा ऊचुस्ते च परस्परम्॥त्रेतायुगमिदानीं च सर्वे धर्मपरायणाः॥१२॥कलिर्दुष्टस्तथा प्रोक्तः किं करिष्यति पापकः॥चातुर्विद्यान्समाहूय ऊचुस्ते त्रय एव च॥१३॥ वृत्त्यर्थं भवतां चैव त्रैविद्यानां तथैव च ॥ विभागं वः प्रदास्यामो यथावत्प्रतिपाल्यताम्॥१४॥ ये वणिजः पुरा प्रोक्ताः षट्त्रिंशच्च सहस्रकाः ॥ त्रिसहस्रास्तु त्रैविद्या दशपंचसहस्रकाः ॥ १५ ॥ चातुर्विद्यास्तथा प्रोक्ता अन्योन्यं वृत्तिमाश्रिताः ॥ सत्रिभागास्तु त्रैविद्याश्चतुर्भागास्तु चात्रिणः ॥१६॥ वणिजां गृहमागत्य पौरोहित्यस्य नित्यशः ॥ भागं विभज्य संप्रापुः काजेशेन विनिर्मिताः ॥ १७ ॥ परस्परं न विवाहश्चातुर्विद्यत्रिविद्ययोः ॥

१ चतुरक्षरम्–'यजामहे' इति, चतुरक्षरम्–अस्तु श्रौषट्' इति, द्व्यक्षरम्–'यज' इति, पंचाक्षरम्--'ये यजामहे' इति, द्व्यक्षरम्--'वौषट्' इति पंच यज्ञसामयिकान्यध्वर्य्वाद्युच्चारणीयानि वाक्यानि ''चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥'' एतस्य वचनस्याप्ययमेवार्थो वोद्धव्यः । २ आर्षःप्रयोगः । वेदमातरम्-इत्यपेक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चातुर्विद्या मया प्रोक्तास्त्रिविद्यास्तु तथैव च ॥ १८ ॥ त्रैविभागेन त्रैविद्याश्चतुर्भागेन चात्रिणः ॥ एवं ज्ञातिविभागस्तु काजेशेन विनिर्मितः ॥ ॥ १९ ॥ कृतकृत्यास्तु ते विप्राः प्रणेमुस्तान्सुरोत्तमान् ॥ वृत्तिं दत्त्वा ततो देवाः स्वस्थानं च प्रतस्थिरे ॥ २० ॥ पंचपंचाशद्ग्रामाणां ते द्विजाश्च निवासिनः ॥ चतुर्विद्यास्तु ते प्रोक्तास्तदादि तु त्रिविद्यकाः ॥ २१ ॥ चातुर्विद्यस्य गोत्राणि दशपंच तथैव च ॥ भारद्वाजस्तथा वत्सः कौशिकः ८ कुश एव च ॥ २२ ॥ शांडिल्यः ९ कश्यपश्चैव गौतमश्छादनस्तथा ८ ॥ जातूकर्ण्यस्तथा कुंतो वशिष्ठो ११ धारणस्तथा ॥ २३ ॥ आत्रेयो मांडिलश्चैव १४ लौगाक्षश्च १९ ततः परम् ॥ स्वस्थानानां च नामानि प्रवक्ष्याम्यनुपूर्वशः ॥ २४ ॥ सीतापुरं च श्रीक्षेत्रं २ मगोडी च ३ तथा स्मृता ॥ ज्येठलोजस्तथा चैव शेरथा च ततः परम् ॥ २५ ॥ छेदे ताली वनोडी च गोव्यंदली तथैव च ॥ कंटाचोषली चैव कोहेचं चंदनस्तथा ॥२६॥ थलग्रामश्च सोहं च हाथंजं कपडवाणकम् ॥ व्रजन्होरी च वनोडी च फीणां वगोलं ह्णस्तथा (१) ॥२७॥ थलजा चारणं सिद्धा भालजाश्च ततः परम् ॥ महोवी आईया मलीआ गोधरी आमतः परम् ॥ २८ ॥ वाठसुहाली तथा चैव माणजा सानदीयास्तथा ॥ आनन्दीया पाटडीअ टीकोलीया ततः परम् ॥ २९ ॥ गंभी धणीआ मात्रा च नातमोरास्तथैव च ॥ वलोला रांत्यजाश्चैव रूपोला बोधणीच वै ॥ ३० ॥ छत्रोटा अलु एवा च वासतडीआमतः परम् ॥ जाषासणा गोतीया च चरणीया दुधीयास्तथा ॥ ३१ ॥ हालोला वैहोला च असाला नालाडास्तथा ॥ देहोलो सौहासीया च संहालीयास्तथैव च ॥ ३२ ॥ स्वस्थानं पंचपचाशद्ग्रामा एते ह्यनुक्रमात् ॥ दत्ता रामेण विधिवत्कृत्वा विप्रेभ्य एव च ॥ ३३ ॥ अतः परं प्रवक्ष्यामि स्वस्थानस्य च गोत्रजान् ॥ तथा हि प्रवरांश्चैव यथावद्विधिपूर्वकम् ॥ ३४ ॥ ज्ञात्वा तु गोत्रदेवीं च तथा प्रवरमेव च ॥ स्वस्थानं जायते चैव द्विजाः स्वस्थानवासिनः ॥ ३५ ॥ ॥ नारद उवाच ॥ ॥ कथं च जायते गोत्रं कथं तु ज्ञायते कुलम् ॥ कथं वा ज्ञायते देवी तद्वदस्व यथार्थतः ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ ॥ सीतापुरं तु प्रथमं प्रवरद्वयमेव च ॥ कुशवत्सौ तथा चात्र मया ते परिकीर्त्तितौ ॥ ३७ ॥ १ श्रीक्षेत्रे द्वितीयं चैव गोत्राणां त्रयमेव च ॥ छांदनसस्तथा वत्सस्तृतीयं कुशमेव च ॥ ३८ ॥ तृतीयं मुद्गलं चैव कुशभारद्वाजमेव च ३ ॥ शोहोली च चतुर्थं वै कुशप्रवरमेव च ॥ ३९ ॥ ज्येष्ठला पंचमश्चैव वत्सकुशौ प्रकीर्त्तितौ ९ ॥ श्रेयस्थानं हि षष्ठं वै भारद्वाजः कुशस्तथा ॥ ४० ॥ दंताली सप्तमं चैव भारद्वाजः कुशस्तथा १ ॥ वटस्थानमष्टमं च निबोध सुतसत्तम ॥ ४१ ॥ तत्र गोत्रं कुशं

१ अत्र शुद्धप्रयोगा न संति तद्ग्रामनामापरिचयात्तथैव पाठोऽत्र स्थापितोस्माभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्सं भारद्राजं तथैव च ॥ राज्ञः पुरं नवमं च भारद्वाजप्रवरमेव च ९ ॥ ४२ ॥ कृष्णवाटं दशमं चैव कुशप्रवरमेव च ॥ दहलोडमेकादशं वत्सप्रवरमेव हि ॥ ४३ ॥ चेखलीद्वादशं पौककुशप्रवरमेव च ॥ ४४ ॥ चांचोदखे १२ देहोलोडी आत्रयश्च वत्सकुत्सकश्चैव ॥ भारद्वाजीकोणाया च भारद्वाजगोलंहणाशकुस्तथा ॥ ४५ ॥ थलत्यजाद्वये चैव कुशधारणमेव च ॥ नारणसिद्धा च स्वस्थानं कुत्सं गोत्रं प्रकीर्तितम् ॥ ४६ ॥ भालजां कुत्सवत्सौ च मोहोवी आकुशस्तथा ॥ ईयाल्लीआ शांडिलश्च गोधरीपात्रमेव च ॥ ४७ ॥ आनंदीया द्वे चैव भारद्वाजशांडिलश्चैवपाटडीआ कुशमेव च ॥ ४८ ॥ वांसडीआश्चैव जास्त्रा कौत्समणा वत्सआत्रेयौ गीता आकुशगौतमौ ॥ ॥ ४९ ॥ चरणीआ भारद्वाजः दुधीआधारणसा हि अहो सोन्नामांडिल्यस्तथा ॥ ५० ॥ वैलोला हुशश्चैवा असाला कुशश्चैव धारणा च द्वितीयकम् ॥ ५१ ॥ नालोला वत्सधारणीया च देलोला कुत्समेव च ॥ सोहासीया भारद्वाजकुशवत्समेव च ॥ ५२ ॥ सुहालीआ वत्सं वै प्रोक्तं गोत्राणि यथाक्रमम् ॥ मया प्रोक्तानि चैवात्र स्वस्थानानि यथाक्रमम् ॥ ५३ ॥ शीतवाडिया ये प्रोक्ताः कुशो वत्सस्तथैव च ॥ विश्वामित्रो देवरातस्तृतीयो दलमेव च ॥ ५४ ॥ भार्गवच्यावनाप्नवानौर्वजमदग्निरेव हि ॥ वचार्ईशेषाबुटला गोत्रदेव्यः प्रकीर्तिताः ॥ ५५ ॥ इति प्रथमं गोत्रम् ॥ १ ॥ श्रीक्षेत्रं द्वितीयं प्रोक्तं गोत्रद्वितयमेव च ॥ छांदनसस्तथा वत्सं देवी द्वितयमेव च ॥ ५६ ॥ आंगिरसांबरीषश्च यौवनाश्वस्तथैव च ॥ भृगुच्यवनआप्नवानौर्वजमदग्निमेव च ॥ ५७ ॥ देवी भट्टारिका प्रोक्ता द्वितीया शेपला तथा ॥ एतद्वंशोद्भवा ये च शृणु तान्मुनिसत्तम ॥ ५८ ॥ सक्रोधनाः सदाचाराः श्रौतस्मार्तक्रियापराः ॥ पंचयज्ञरता नित्यं संबंधसंमाश्रिताः ॥ क्षतज्ञाः क्रतुजाश्चैव ते सर्वे नृपसत्तमाः ॥ ५९ ॥ इति द्वितीयगोत्रम् ॥ २ ॥ तृतीयं मगोडोआ वै गोत्रद्वितयमेव च ॥ भारद्वाजस्तथा कुत्सं देवी द्वितयमेव च ॥ ६० ॥ आंगिरसबार्हस्पत्यभारद्वाजस्तथैव च ॥ विश्वामित्रदेवरातौप्रवरत्रयमेव च ॥६१॥ शेषला बुधला प्रोक्ताधारशांतिस्तथैव च ॥ अस्मिन्ग्रामे च ये जाता ब्राह्मणाः सत्यवादिनः ॥ ६२ ॥ द्विजपूजाक्रियायुक्ता नानायज्ञक्रियापराः ॥ अस्मिन्गोत्रे समुत्पन्ना द्विजाः सर्वे मुनीश्वराः ॥ ६३ ॥ इति तृतीयगोत्रम् ॥ ३ ॥ चतुर्थं शीहोलियाग्रामं गोत्रद्वितयमेव च ॥ विश्वामित्रदेवराततृतीयौदलमेव च ॥ ६४ ॥ देवी चचाई वै तेषां गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमनसाः ॥ ६५ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्व्वविद्याप्रवीणाश्च ब्राह्मणा ब्रह्मसत्तम ॥ ६६ ॥ इति चतुर्थं स्थानम् ॥ ४ ॥

१ प्रथमं तु मोहेरकं स्थानम्—इति त्वत्र वक्तव्यम् परं तदुल्लेखो न क्वचिद्दृश्यते कुतो नास्तीति तु न विज्ञायते । अथवा पाठः खंडितोऽस्तीति तावदनुमीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्येष्ठलोजा पंचमं च स्वस्थानं प्रतिकीर्तितम् ॥ वत्सशीया कुत्सशीया प्रवरद्वितयं स्मृतम् ॥६७॥ आवारिवृवाप्रः यौवनाश्वभृगुच्यवनआप्नोर्वजमदग्नि स्तथैव हि ? ॥६८॥ चचाई वत्सगोत्रस्य शांता च कुत्सगोत्रजा ॥ एतैस्त्रिभिः पंचभिश्च द्विजा ब्रह्मस्वरूपिणः ॥६९॥ शांता दांताः सुशीलाश्च धन पुत्रैश्च संयुताः ॥ वेदाध्ययनहीनाश्च कुशलाः सर्वकर्मसु॥७०॥सुरूपाश्च सदाचाराः सर्वधर्मेषु निष्ठिताः ॥ दानधर्म्मरताः सर्वे अत्रजा जलदा द्विजाः ॥७१॥ इति पंचमं स्थानम् ॥५॥ शेरथाग्रामेषु वै जाताः प्रवरद्वयसंयुताः ॥ कुशभारद्वाजाश्चैव देवीद्वयं तथैव च ॥७२॥ विश्वामित्रो देवरातस्तृतीयौ दल एव च ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च॥७३॥कमला च महालक्ष्मीर्द्वितीया यक्षिणी तथा॥अस्मिन्गोत्रे च ये जाताः श्रौतस्मार्त्तरता बुधाः॥७४॥वेदाध्ययनशीलाश्च तापसाश्चारिमर्दनाः॥रोषिणो लोभिनो दुष्टा यजने याजने रताः॥ब्रह्मक्रियापराः सर्वे ब्राह्मणास्ते मयोदिताः ॥७५॥ इति षष्ठं स्थानम्॥६॥ दंतालीया भारद्वाजकुत्सशायास्तथैव च॥आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च॥७६॥देवी च यक्षिणी प्रोक्ता द्वितीया कर्मला तथा ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥७७॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्मपरायणाः ॥ ॥ ७८ ॥ इति सप्तमं स्थानम् ॥७॥ वडोद्रीयान्वये जाताश्चत्वारः प्रवराः स्मृताः ॥ कुशः कुत्सश्च वत्सश्च भारद्वाजस्तथैव च ॥७९॥ तत्प्रवराण्यहं वक्ष्ये तथा गोत्राण्यनुक्रमात् ॥ विश्वामित्रो देवरातस्तृतीयोदल एव च ॥ ८० ॥ आंगिरसांबरीषश्च यौवनाश्वस्तृतीयकः ॥ भार्गवश्च्यावनाप्न वानौर्वजमदग्निस्तथैव च ॥ ८१ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ कर्मला क्षेमला चैव धारभट्टारिका तथा ॥८२॥ चतुर्थी क्षेमला प्रोक्ता गोत्रमाता अनुक्रमात् ॥ अस्मिन्गोत्रे तु ये जाताः पंचयज्ञरताः सदा ॥ ८३ ॥ लोभिनः क्रोधिनश्चैव प्रजायंते बुहुप्रजाः ॥ स्नानदानादि निरताः सदा विनिर्जितेंद्रियाः ॥ ८४ ॥ वापीकूपतडागानां कर्त्तारश्च सहस्रशः ॥ व्रतशीला गुणज्ञाश्च मूर्खा वेदविवर्जिताः ॥ ८५ ॥ इत्यष्टमं स्थानम् ॥ ८ ॥ गोदणीयाभिधे ग्रामे गोत्रौ द्वौ तत्र संस्थितौ ॥ वत्सगोत्रं प्रथमकं भारद्वाजं द्वितीयकम् ॥ ८६ ॥ भृगुच्यवनाप्नवानौर्वपुरोध समेव च ॥ शीहरी प्रथमा ज्ञेया द्वितीया यक्षिणी तथा ॥ ८७ ॥ अस्मिन्गोत्रोद्भवा विप्रा धनधान्यसमन्विताः ॥ सामर्षा लौल्यहीनाश्चद्वेषिणः कुटिलास्तथा ॥ ८८ ॥ हिंसिनो धनलुब्धाश्च मया प्रोक्तास्तु भूपते ॥ ८९ ॥ इति नवमं स्थानम् ॥ ९ ॥ कण्टवाडीआ ग्रामे विप्राः कुशगोत्र समुद्भवाः ॥ प्रवरं तस्य वक्ष्यामि शृणु त्वं च नृपोत्तम ॥ ९० ॥ विश्वमित्रो देवरात उदलश्च त्रयः स्मृताः ॥ चचाई देवी सा प्रोक्ता शृणु त्वं नृपसत्तम ॥ ९१ ॥ यजंते क्रतुभिस्तत्र हृष्टचित्तैकमानसाः ॥ सर्वविद्यासु कुशला ब्राह्मणाः सत्यवादिनः ॥ ९२ ॥ इति दशमं स्थानम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेखलोया मया प्रोक्तां कुत्सवंशे समुद्भवाः ॥ प्रवरत्रयसंयुक्ताः शृणु त्वं च नृपोत्तम ॥ ९३ ॥ विश्वामित्रो देवराजौदलश्चेति त्रयः स्मृताः ॥
चचाई देवी तेषां वै कुलरक्षाकरी स्मृता ॥ ९४ ॥ ब्राह्मणाश्च महात्मानः सत्त्ववंतो गुणान्विताः ॥ तपस्वियोगिनश्चैव वेदवेदांगपारगाः ॥ ९५ ॥
साधवश्च सदाचारा विष्णुभक्तिपरायणाः ॥ स्नानसंध्यापरा नित्यं ब्रह्मभोज्यपरायणाः ॥ ९६ ॥ अस्मिन्वंशे मया प्रोक्ताः शृणु त्वं च अतः
परम् ॥ ९७ ॥ इत्येकादशं स्थानम् ॥ ११ ॥ देहलोडीआ ये प्रोक्ताः कुत्सप्रवरसंयुताः ॥ आंगिरस आंबरीषो युवनाश्वस्तृतीयकः ॥ ९८ ॥
गोत्रदेवी मया प्रोक्ता श्रीशेषदुर्बलेति च ॥ कुत्सवंशे च ये जाताः सद्वृत्ताः सत्यभाषिणः ॥ ९९ ॥ वेदाध्ययनशीलाश्च परच्छिद्रैकदर्शिनः ॥
सामर्षा लौल्यतो हीना द्वेषिणः कुटिलास्तथा ॥ १०० ॥ हिंसिनो धनलुब्धाश्च ये च कुत्ससमुद्भवाः ॥ १ ॥ इति द्वादशं स्थानम् ॥ १२ ॥
कोहे च ब्राह्मणाः प्रोक्ता गोत्रत्रितयसंयुताः ॥ भारद्वाजस्तथा वत्सस्तृतीयः कुश एव च ॥ २ ॥ प्रवराण्यहं तथा वक्ष्ये यथा गोत्रक्रमेण हि ॥
भार्गवच्यवनाप्नवानौर्वजमदग्निस्तथैव च ॥ ३ ॥ कुशप्रवरं तृतीयं तु प्रवरत्रयमेव च ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ ४ ॥
यक्षिणी प्रथमा प्रोक्ता द्वितीया शीहुरी तथा ॥ तृतीया चचाई प्रोक्ता यथानुक्रमगोत्रजा ॥ ५ ॥ अस्मिन्गोत्रे भवा विप्राः श्रौतस्मार्त्तरता बुधाः ॥
वेदाध्ययनशीलाश्च तापसाश्चारिमर्दनाः ॥ ६ ॥ रोषिणो लोभिनो दुष्टा यजने याजने रताः ॥ ब्रह्मकर्मपराः सर्वे मया प्रोक्ता द्विजोत्तमाः ॥
॥ ७ ॥ इति त्रयोदशं स्थानम्॥१३॥ चांदणखेडे ये जाता भारद्वाजसमुद्भवाः॥ आंगिरसो बार्हस्पत्यस्तृतीयो भारद्वाजस्तथा ॥८॥ यक्षिणी चास्य
वै देवी प्रोक्ता व्यासेन धीमता ॥ भारद्वाजास्तु ये जाता द्विजा ब्रह्मस्वरूपिणः ॥ ९ ॥ शांता दांताः सुशीलाश्च धनपुत्रसमन्विताः ॥ धर्मारण्ये
द्विजाः श्रेष्ठाः क्रतुकर्मणि कोविदाः ॥११०॥ गुरुभक्तिरताः सर्वे भासयंति स्वकं कुलम् ॥११॥ इति चतुर्दशं स्थानम् ॥१४॥ थलग्रामे च ये जाता
भारद्वाजसमुद्भवाः ॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तृतीयकः ॥ १२ ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥ वस्त्रालंकरणोपेता
द्विजभक्तिपरायणाः ॥ १३ ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्मपरायणाः ॥ गोत्रदेवी मया ख्याता यक्षिणी नाम रक्षिणी ॥ १४ ॥ इति पंचदशं
स्थानम् ॥१५॥ मोऊत्रीयाश्च ये जाता द्वौ गोत्रौ तत्र कीर्तितौ ॥ भारद्वाजःकश्यपश्च देवीद्वितयमेव च ॥ १५ ॥ चामुण्डा यक्षिणी चैव देवी चात्र
प्रकीर्त्तिता ॥ कश्यपाऽवत्सारश्चैव नैध्रुवश्च तृतीयकः ॥ १६ ॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तृतीयकः ॥ प्रियवाक्या महादक्षा गुरु भक्ति
रताः सदा ॥ १७ ॥ सदा प्रतिष्ठावंतश्च सर्वभूतहिते रताः ॥ यजंति ते महायज्ञान्काश्यपा ये द्विजातयः ॥ १८ ॥ सर्वेषां याजनकरा याज्ञिकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमाः स्मृताः ॥ १९ ॥ इति षोडशं स्थानम् ॥ १६ ॥ हाथीजणे च ये जाता वत्सा भारद्वाजास्तथा ॥ ज्ञानजा यक्षिणी चैव गोत्रदेव्यौ प्रकीर्तिते ॥ १२० ॥ अस्मिन्गोत्रे च ये जाताः पंचयज्ञरताः सदा ॥ लोभिनः क्रोधिनश्चैव प्रजावंतो बहुश्रुताः ॥ २१ ॥ स्नानदानादिनिरता विष्णुभक्तिपरायणाः ॥ व्रतशीला गुणज्ञानमूर्खा वेदविवर्जिताः ॥ २२ ॥ इति सप्तदशं स्थानम् ॥ १७ ॥ कपड्वाणजा ब्राह्मणास्तु भारद्वाजाः कुशास्तथा ॥ देवी च यक्षिणी प्रोक्ता द्वितीया चचाई तथा ॥ २३ ॥ आंगिरसबार्हस्पत्यौ भारद्वाजस्तृतीयकः ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ २४ ॥ अस्मिन्गोत्रे च ये जाताः सत्यवादिजितव्रताः ॥ जितेंद्रियाः सुरूपाश्च अल्पाहाराः शुभाननाः ॥ २५ ॥ सदोद्यताः पुराणज्ञा महादानपरायणाः ॥ निर्द्वेषिणो लोभयुता वेदाध्ययनतत्पराः ॥ २६ ॥ दीर्घदर्शिनो महातेजा महामायाविमोहिताः ॥ २७ ॥ इत्यष्टादशं स्थानम् ॥ १८ ॥ जन्होरी वाडवाः प्रोक्ताः कुशप्रवरसंयुताः ॥ विश्वामित्रो देवरातस्तृतीयौदल एव च ॥ २८ ॥ तारणी च महामाया गोत्रदेवी प्रकीर्त्तिता ॥ अस्मिन्वंशे समुत्पन्ना वाडवा दुःसहा नृप ॥ २९ ॥ महोत्कटा महाकायाः प्रलंबाश्च महोद्धताः ॥ क्लेशरूपाः कृष्णवर्णाः सर्वशास्त्रविशारदाः ॥ १३० ॥ बहुभुग्धनिनो दक्षा द्वेषपापविवर्जिताः ॥ सुवस्त्रभूषा वैरूपा ब्राह्मणा ब्रह्मवादिनः ॥ ३१ ॥ इत्येकोनविंशतितमं स्थानम् ॥ १९ ॥ वनोडीयाश्च ये जाता गोत्राणां त्रयमेव च ॥ कुशकुत्सौ च प्रवरौ तृतीयो भारद्वाजस्तथा ॥ ३२ ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ आंगिरस आंबरीषो युवनाश्वस्तृतीयकः ॥ ३३ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ शेषला प्रथमा प्रोक्ता तथा शांता द्वितीयका ॥ ३४ ॥ तृतीया धारशांतिश्च गोत्रदेव्यो ह्यनुक्रमात् ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ ३५ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मवित्तमाः ॥ ३६ ॥ इति विंशतितमं स्थानम् ॥ २० ॥ कीणावाचनकं स्थानं यदेकाधिकविंशति ॥ भारद्वाजाश्च विप्रेंद्राः कथिता ब्राह्मणाः शुभाः ॥ ३७ ॥ आंगिरसबार्हस्पत्यभारद्वाजास्तथैव च ॥ यक्षिणी च तथा देवी गोत्रदेवी प्रकीर्तिता ॥ ३८ ॥ अस्मिन्गोत्रे च ये जाता वाडवा धनिनः शुभाः ॥ वस्त्रालंकरणोपेता द्विजभक्तिपरायणाः ॥ ३९ ॥ ब्रह्मभोज्यपराः सर्वे सर्वे धर्म्मपरायणाः ॥ १४० ॥ इत्येकविंशतितमं स्थानम् ॥ २१ ॥ गोविंदणा च स्वस्थाने ये जाता ब्रह्मसत्तमाः ॥ कुशगोत्रं च वै प्रोक्तं प्रवरत्रयमेव च ॥ ॥४१॥ विश्वामित्रो देवरातौदलप्रवरमेव च ॥ चचई च महादेवी गोत्रदेवी प्रकीर्तिता ॥ ४२ ॥ अस्मिन्गोत्रे च ये जाता ब्राह्मणा ब्रह्मवेदिनः ॥ यजंते क्रतुभिस्तत्र हृष्टचित्तैकमानसाः ॥ ४३ ॥ सर्वविद्यासु कुशला ब्रह्मण्या ब्रह्मवित्तमाः ॥ ४४ ॥ इति द्वाविंशतितमं स्थानम् ॥ २२ ॥ थलत्यजा हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रेंद्रा द्वौ गोत्रौ चाप्यधिष्ठितौ ॥ धारणं संकुशं चैव गोत्रद्वितयमेव च ॥ ४५ ॥ अगस्त्यो दार्ढ्यच्युतश्च रथ्यवाहनमेव च ॥ विश्वामित्रो देवरातस्तृतीयौदल एव च ॥ ४६ ॥ देवी च छत्रजा प्रोक्ता द्वितीया थलजा तथा ॥ धारणसगोत्रे ये जाता ब्रह्मण्या ब्रह्मवित्तमाः ॥ ४७ ॥ त्रिप्रवराश्चैव विख्याता सत्त्ववंतो गुणान्विताः ॥ तदन्वये च ये जाता धर्मकर्म्मसमाश्रिताः ॥ ४८ ॥ धनिनो ज्ञाननिष्ठाश्च तपोयज्ञक्रियादिषु ॥ त्रयोविंशं प्रोक्तमेतत्स्थानं मोढकजातिनाम् ॥ ४९ ॥ इति त्रयोविंशतितमं स्थानम् ॥ २३ ॥ वारणसिद्धाश्च ये प्रोक्ता ब्राह्मणा ज्ञानवित्तमाः ॥ अस्मिन्गोत्रे च ये विप्राः सत्यवादिजितव्रताः ॥ १५० ॥ जितेंद्रियाः सुरूपाश्च अल्पाहाराः शुभाननाः ॥ सदोद्यताः पुराणज्ञा महादानपरायणाः ॥ ॥ ५१ ॥ निर्द्वेषिणोऽलोभयुता वेदाध्ययनतत्पराः ॥ दीर्घदर्शिनो महातेजा महामायाविमोहिताः ॥ ५२ ॥ चतुर्विंशतितमं प्रोक्तं स्वस्थानं परमं मतम् ॥ ५३ ॥ इति चतुर्विंशतितमं स्थानम् ॥ २४ ॥ भालजाश्चात्र वै प्रोक्ता ब्राह्मणाः सत्यवादिनः ॥ ५४ ॥ वत्सगोत्रं कुशं चैव गोत्रद्वितयमेव च ॥ तेषां प्रवराण्यहं वक्ष्ये पंचत्रितयमेव च ॥ भृगुश्च्यवनाप्रवानौर्वजमदग्निस्तथैव च ॥ ५५ ॥ आगिरसौबरीषश्च यौवनाश्वस्तृतीयकः ॥ शांता च शेषला चात्र देवीद्वितयमेव च ॥ ५६ ॥ अस्मिन्वंशे समुत्पन्ना सद्वृत्ताः सत्यभाषिणः ॥ शांताश्च भिन्नवर्णाश्च निर्धनाश्च कुचैलिनः ॥ ॥ ५७ ॥ सगर्वा लौल्ययुक्ताश्च वेदशास्त्रेषु निश्चलाः ॥ पंचविंशतिमं प्रोक्तं स्वस्थानं मोढज्ञातिनाम् ॥ ५८ ॥ इति पंचविंशतितमं स्थानम् ॥ ॥ २५ ॥ महोवीआश्च ये संति ब्राह्मणा ब्रह्मवित्तमाः ॥ एकमेव च वै गोत्रं कुशसंज्ञं पवित्रकम् ॥ ५९ ॥ विश्वामित्रो देवरातस्तृतीयौदल एव च ॥ देवी चवाई चैवात्र रक्षारूपा व्यवस्थिता ॥ १६० ॥ अस्मिन्गोत्रे च ये जाताः सत्यवादिजितेंद्रियाः ॥ सत्यव्रताः सुरूपाश्च अल्पाहाराः शुभाननाः ॥ ६१ ॥ दयालवः कृपालवः सर्वभूतहिते रताः ॥ षड्विंशतितमं प्रोक्तं स्वस्थानं ब्रह्मवादिनाम् ॥ ६२ ॥ रामेण संस्तुताश्चैव सानुजेन तथैव च ॥ ६३ ॥ इति षड्विंशतितमं स्थानम् ॥ २६ ॥ तियाश्रीयामथो वक्ष्ये स्वस्थानं सप्तविंशकम् ॥ अस्मिन्स्थाने च ये जाता ब्राह्मणा वेदपारगाः ॥ ६४ ॥ शांडिल्यगोत्रं चैवात्र कथितं वेदसत्तमैः ॥ पंचप्रवरमथो प्रोक्तं ज्ञानजा चात्र देवता ॥ ६५ ॥ काश्यपावत्सारश्चैव शांडिलोसित एव च ॥ पंचमो देवलश्चैव प्रवराणि तथाक्रमात् ॥ ज्ञानजा च तथा देवी कथिता स्थानदेवता ॥ ६६ ॥ अस्मिन्वंशे च ये जातास्ते द्विजाः सूर्यवर्चसः ॥ चंद्रवच्छीतलाः सर्वे धर्मारण्ये व्यवस्थिताः ॥ ६७ ॥ सदाचारा महाराज वेदशास्त्रपरायणाः ॥ याज्ञिकाश्च शुभाचाराः सत्यशौचपरायणाः ॥ ६८ ॥ धर्मज्ञा दानशीलाश्च निर्मला हि मदोत्सुकाः ॥ तपःस्वाध्यायनिरता न्यायधर्मपरायणाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तविंशतिमं स्थानं कथितं ब्रह्मवित्तमैः ॥ ६९ ॥ इति सप्तविंशं स्थानम् ॥ २७ ॥ गोधरीयाश्च ये जाता ब्राह्मणा ज्ञानसत्तमाः ॥ गोत्रत्रयमथो वक्ष्ये यथा चैवाप्यनुक्रमात् ॥ १७० ॥ प्रथमं धारणसं चैव जातूकर्णं द्वितीयकम् ॥ तृतीयं कौशिकं चैव यथा चैवाप्यनुक्रमात् ॥७१॥ धारणसगोत्रे ये जाताः प्रवरैस्त्रिभिः संयुताः ॥ अगस्तिश्च दार्ढच्युत इध्मवाहनसंज्ञकः ॥ ७२ ॥ वसिष्ठश्च तथात्रेयो जातूकर्णस्तृतीयकः ॥ विश्वामित्रो माधुच्छंदस अघमर्षणस्तृतीयकः ॥ ७३ ॥ महाबला च मालेया द्वितीया चैव यक्षिणी ॥ तृतीया च महायोगी गोत्रदेव्यः प्रकीर्तिताः ॥ ७४ ॥ अस्मिन्वंशे च ये जाता ब्राह्मणाः सत्यवादिनः ॥ अलौल्याश्च महायज्ञा वेदाज्ञाप्रतिपालकाः ॥ ७५ ॥ इत्यष्टाविंशं स्थानम् ॥ २८ ॥ वाटव्रहाले ये जाता गोत्रत्रितयमेव च ॥ धारणं प्रथमं ज्ञेयं वत्ससंज्ञं द्वितीयकम् ॥ ७६ ॥ तृतीयं कुत्ससंज्ञं च गोत्रदेव्यस्तथैवच ॥ प्रथमं धारणसगोत्रं प्रवरत्रयमेव च ॥ ७७ ॥ अगस्तिदार्ढच्युतश्चैव इध्मवाहन एव च ॥ द्वितीयं वत्ससंज्ञं हि प्रवराणि च पंच वै ॥ ७८ ॥ भृगुच्यवनाप्नवानौर्वजमदग्निस्तथैव च ॥ तृतीयं कुत्ससंज्ञं हि प्रवरत्रयमेव च ॥ ७९ ॥ आंगिरसांबरीषौ च यौवनाश्वस्तृतीयकः ॥ देवी चच्छत्रजा चैव द्वितीया शेषला तथा ॥ १८० ॥ ज्ञानजा चैव देवी च गोत्रदेव्यो ह्यनुक्रमात् ॥ अस्मिन्गोत्रे च ये विप्राः सत्यवादिजितेंद्रियाः ॥ ८१ ॥ सुरूपाश्चाल्पाहाराश्च महादानपरायणाः ॥ निर्द्वेषिणो लोभयुता वेदाध्ययनतत्पराः ॥ ८२ ॥ दीर्घदर्शिनो महातेजा महोत्काः सत्यवादिनः ॥ ॥ ८३ ॥ इत्येकोनत्रिंशं स्थनम् ॥ २९ ॥ माणजा च महास्थानं गोत्रद्वितयमेव च ॥ शांडिल्यश्च कुशश्चैव गोत्रद्वयमितीरितम् ॥ ८४ ॥ काश्यपोऽवत्सारश्च शांडिल्योऽसित एव च ॥ पंचमो देवलश्चैव एकगोत्रं प्रकीर्तितम् ॥८५॥ ज्ञानजा च तथा देवी कथिता चात्र सैव च ॥ द्वितीयं च कुशं गोत्रं प्रवरत्रयमेव च ॥ ८६ ॥ विश्वामित्रो देवराजस्तृतीयौदलमेव च ॥ ज्ञानदा चात्र वै देवी द्वितीया संप्रकीर्तिता ॥८७॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ ८८ ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ ८९ ॥ इति त्रिंशं स्थानम् ॥३०॥ साणदा च परं स्थानं पवित्रं परमं मतम् ॥ कुशप्रवरजा विप्रास्तत्रस्थाः पावनाः स्मृताः ॥ ९० ॥ विश्वामित्रो देवरातस्तृतीयोदल एव च ॥ ज्ञानदा च महादेवी गोत्रदेवी प्रकीर्तिता ॥ ९१ ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम॥९२॥ सर्वविद्याकुशिलिनो ब्राह्मणा ब्रह्मवित्तमाः ॥९३॥ इत्येकत्रिंशं स्थानम् ॥ ३१ ॥ आनन्दीया च संस्थानं गोत्रद्वितयमेव

१ त्रिंशस्थानैकत्रिंशस्थानस्थितानां ब्राह्मणांनां च सर्वप्रकारेण समानाभिप्रायेण समानश्लोका एव पठिता इति बोद्धव्यं सुधीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ भारद्वाजं नाम चैकं शांडिल्यं च द्वितीयकम् ॥९४॥ आंगिरसो बार्हस्पत्यो भारद्वाजस्तृतीयकः ॥ चचाई चात्र या देवी गोत्रदेवी प्रकीर्तिता ॥ ९५ ॥ काश्यपावत्सारश्च शांडिल्योऽसित एव च ॥ पंचमो देवलश्चैव प्रवराणि यथाक्रमम् ॥ ९६ ॥ ज्ञानजा च तथा देवी कथिता गोत्रदेवता ॥ अस्मिन्गोत्रे च ये जाता निर्लोभाः शुद्धमानसाः ॥९७॥ यदृच्छालाभसंतुष्टा ब्राह्मणा ब्रह्मवित्तमाः ॥९८॥ इति द्वात्रिंशं स्थानम् ॥३२॥ पाटडीया परं स्थानं पवित्रं परिकीर्तितम्॥कुशगोत्रं भवेदत्र प्रवरत्रयसंयुतम् ॥९९॥ विश्वामित्रो देवरातस्तृतीयौदलमेव हि ॥ अस्मिन्गोत्रे च ये जाता वेदशास्त्र परायणाः ॥२००॥ मदोद्धुराश्च ते विप्रा न्यायमार्गप्रवर्तकाः ॥१॥ इति त्रयस्त्रिंशं स्थानम् ॥ ३३ ॥ टीकोलिया परं स्थानं कुशगोत्रं तथैव च ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥२॥ चचाई चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्गोत्रे भवा विप्राः श्रुतिस्मृतिपरायणाः ॥३॥ रोगिणो लोभिनो दुष्टा यजने याजने रताः ॥ ब्रह्मक्रियापराः सर्वे मोढाः प्रोक्ता मयात्र वै ॥४॥ इति चतुस्त्रिंशं स्थानम् ॥३४॥ गमीधाणीयं परमं स्थानं प्रोक्तं वै पंचत्रिंशकम्॥गोत्रं धारणसं चैव देवी चात्र महाबला॥५॥अगस्तिदार्ढच्युतइध्मवाहनसंज्ञकाः॥अस्मिन्वंशे च ये जाता ब्राह्मणा ब्रह्मतत्पराः ॥ ६ ॥ अलौल्याश्च महाप्राज्ञा वेदाज्ञाप्रतिपालकाः ॥ ७ ॥ इति पंचत्रिंशं स्थानम् ॥३५॥ मात्रा च परमं स्थानं पवित्रं सर्वदेहिनाम् ॥ कुशगोत्रं पवित्रं तु परमं चात्र धिष्ठितम् ॥ ८ ॥ विश्वामित्रो देवरातो दलश्चैव तृतीयकः ॥ ज्ञानदा च महादेवी सर्वलोकैकरक्षिणी ॥ ९ ॥ अस्मिन्वंशे समुद्भूता ब्राह्मणा देवतत्पराः ॥ सस्वाधायवषट्कारा वेदशास्त्रप्रवर्तकाः ॥ २१० ॥ इति षट्त्रिंशं स्थानम् ॥ ३६ ॥ नातमोरा परं स्थानं पवित्रं परमं शुभम् ॥ कुशगोत्रं च तत्रास्ति प्रवरत्रयसंयुतम् ॥ ११ ॥ विश्वामित्रो देवरातस्तृतीयौदलमेव च ॥ ज्ञानजा चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ १२ ॥ अस्मिन्वंशे भवा ये च ब्राह्मणा ब्रह्मवित्तमाः ॥ धर्मज्ञाः सत्यवक्तारो व्रतदानपरायणाः ॥ १३ ॥ इति सप्तत्रिंशं स्थानम् ॥ ३७ ॥ बलोला च महास्थानं पवित्रं परमाद्भुतम् ॥ कुशगोत्रं समाख्यातं प्रवरत्रयमेव च ॥ १४ ॥ पूर्वोक्तं प्रवरं चैव देवी चैवात्र मानदा ॥ वंशेस्मिन्परमाः प्रोक्ताः काजेशेन विनिर्मिताः ॥ १५ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ १६ ॥ इत्यष्टत्रिंशं स्थानम् ॥ ३८ ॥ राज्यजा च महास्थानं लौगाक्षाप्रवरं तथा ॥ काश्यपावत्सारवाशिष्ठं प्रवरत्रयमेव च ॥ १७ ॥ भद्रा च योगिनी चैव गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्वंशे समुद्भूता ब्राह्मणा वेदतत्पराः ॥ १८ ॥ नित्यस्नाननित्यहोमनित्यदानपरायणाः ॥ नित्यधर्मरताश्चैव नित्यनैमित्ततत्पराः ॥ १९ ॥ इत्येकोनचत्वारिंशं स्थानम् ॥ ३९ ॥ रूपोला परमं स्थानं पवित्रमतिपुण्यदम् ॥ अस्मिन्गोत्रत्रये चैव देवीत्रितय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेव च ॥२२०॥ प्रथमं कुत्सवत्साख्यौ भारद्वाजस्तृतीयकः ॥ आंगिरसोंबरीषश्च यौवनाश्वस्तृतीयकः ॥ २१ ॥ भृगुच्यवनाप्नवानौर्वजगदग्निस्तथैव च ॥ आंगिरसबार्हस्पत्यभारद्वाजस्तथैव च ॥२२॥ क्षेमला चैव वै देवी धारभट्टारिका तथा ॥ तृतीया क्षेमला प्रोक्ता गोत्रमाता ह्यनुक्रमात् ॥२३॥ अस्मिन्गोत्रे च ये जाता पंचयज्ञरताः सदा ॥ लोभिनः क्रोधिनश्चैव प्रजायन्ते बहुप्रजाः ॥ २४ ॥ स्नानदानादिनिरताः सदा च विजितेंद्रियाः ॥ वापीकूपतडागानां कर्त्तारश्च सहस्रशः ॥ २५ ॥ इति चत्वारिंशं स्थानम् ॥ ४० ॥ बोधणी परमं स्थानं पवित्रं पापनाशनम् ॥ कुशं च कौशिकं चैव गोत्रद्वितयमेव च ॥ २६ ॥ विश्वामित्रश्च प्रथमो देवरातोदलेति च ॥ विश्वामित्राघमर्षणकौशिकेति तथैव च ॥ २७ ॥ यक्षिणी प्रथमा चैव द्वितीया तारणी तथा ॥ अस्मिन्गोत्रे तु ये जाता दुर्बला दीनमानसाः ॥ २८ ॥ असत्यभाषिणो विप्रा लोभिनो नृपसत्तम ॥ सर्वविद्याकुशलिनो ब्राह्मणा ब्रह्मसत्तमाः ॥ २९ ॥ इत्येकचत्वारिंशं स्थानम् ॥ ४१ ॥ छत्रोटा च परं स्थानं सर्वलोकैकपूजितम् ॥ कुशगोत्रं समाख्यातं प्रवरत्रयमेव हि ॥ २३० ॥ विश्वामित्रो देवरातस्तृतीयो दलमेव वै ॥ चचाई चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ ३१ ॥ अस्मिन्वंशे भवाश्चैव वेदशास्त्रपरायणाः ॥ महोदयाश्च ते विप्रा न्यायमार्गप्रवर्तकाः ॥ ३२ ॥ इति द्विचत्वारिंशं स्थानम् ॥ ४२ ॥ खल एवात्र संस्थानं त्रयश्चत्वारिंशमेव हि ॥ वत्सगोत्रोद्भवा विप्राः कृषिकर्मप्रवर्तकाः ॥ ३३ ॥ गोत्रजा ज्ञानजा देवी प्रवराः पंच एव हि ॥ भार्गवच्यावनाप्नवानौर्वजामदग्न्येति चैव हि ॥ ३४ ॥ अस्मिन्गोत्रे भवा विप्राः श्रौताग्निसुनिषेवकाः ॥ वेदाध्ययनशीलाश्च तापसाश्चारिमर्दनाः ॥ ३५ ॥ रोषिणो लोभिनो हृष्टा यजने याजने रताः ॥ सर्वभूतदयाविष्टास्तथा परोपकारिणः ॥३६ ॥ इति त्रयश्चत्वारिंशं स्थानम् ॥ ४३ ॥ वासंतडयां च विप्राणां कुशगोत्रमुदाहृतम् ॥ विश्वामित्रो देवारातस्तृतीयौदलमेव हि ॥३७॥ चचाई चात्र वै देवी गोत्रदेवी प्रकीर्तिता ॥ अस्मिन्वंशे च ये जाताः पूर्वोक्ता ब्रह्मतत्पराः ॥ ३८ ॥ परोपकारिणश्चैव परचित्तानुवर्तिनः ॥ परस्वविमुखाश्चैव परमार्गप्रवर्त्तकाः ॥ ३९ ॥ इति चतुश्चत्वारिंशं स्थानम् ॥ ॥ ४४ ॥ अतः परं च संस्थानं जाखासणमुदाहृतम् ॥ गोत्रं वै वात्स्यसंज्ञं तु गोत्रजा शीहुरी तथा ॥ प्रवराणि च पंचैव मया तव प्रकाशितम् ॥ ॥ २४० ॥ भार्गवच्यावनाप्नवानौर्वपुरोधसः स्मृतः ॥ अस्मिन्वंशे च ये जाता वाडवाः सुखवासिनः ॥ विप्राः स्थूलाश्च ज्ञातारः सर्वकर्मरताश्च वै ॥ ४१ ॥ सर्वे धर्मैकविश्वासाः सर्वलोकैकपूजिताः ॥ वेदशास्त्रार्थनिपुणा यजने याजने रताः ॥ ४२ ॥ सदाचाराः सुरूपाश्च तुंदिला दीर्घदर्शिनः ॥ शीहुरी चात्र वै देवी कुलदेवी प्रकीर्तिता ॥ ४३ ॥ इति पंचचत्वारिंशं स्थानम् ॥ ४५ ॥ षट्चत्वारिंशकं स्थानं मोटानां तु प्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शितम् ॥ गोतीआनामसंज्ञा तु कुशगोत्रमिहास्ति च ॥ ४४ ॥ विश्वामित्रं प्रथमं चैव द्वितीयं देवरातकम् ॥ तृतीयमौदलं चैव प्रवरत्रितयं त्विदम् ॥ ४५ ॥ यक्षिणी चात्र वै देवी राक्षसानां प्रभंजनी ॥ अस्मिन्वंशे च ये जाता ब्राह्मणा ब्रह्मतत्पराः ॥ ४६ ॥ धर्मे मतिप्रवृत्ताश्च धर्मशास्त्रेषु निष्ठिताः ॥ ४७ ॥ इति षट्चत्वारिंशं स्थानम् ॥ ४६ ॥ सप्तचत्वारिंशकं च संस्थानं परिकीर्तितम् ॥ वरलीयाख्यसंस्थानं पवित्रं परमं मतम् ॥ ४८ ॥ भारद्वाजं तथा गोत्रं प्रवराणि तथैव च ॥ यक्षिणी चात्र वै देवी कुलदेवी प्रकीर्तिता ॥ ४९ ॥ आंगिरसं बार्हस्पत्यं भारद्वाजं तृतीयकम् ॥ अस्मिन्वंशे च ये जाताः ब्राह्मणा पूतमूर्तयः॥ २५० ॥ येषां वाक्योदकेनैव शुध्यंति पापिनो नराः ॥ ५१ ॥ इति सप्तचत्वारिंशकं स्थाम् ॥ ४७ ॥ दुधीयाख्यं परं स्थानं गोत्रद्वितयमेव च ॥ धारणसं तथा गोत्रमांगिरकसमेव च ॥ ५२ ॥ अंगस्तिदार्ढच्युतइध्मवाहनसंज्ञकम् ॥ छत्राई च महादेवी द्वितीयं प्रवरं शृणु ॥ ५३ ॥ आंगिरसांबरीषौ च यौवनाश्वस्तृतीयकः ॥ ज्ञानदा शेषला चैव ज्ञानदा सर्वदेहिनाम् ॥ ५४ ॥ अस्मिन्वंशे समुत्पन्ना वाडवा दुःसहा नृप ॥ मदोत्कटा महाकायाः प्रलंभाश्च मदोद्धताः ॥ ५५ ॥ क्लेशरूपाः कृष्णवर्णाः सर्वशास्त्रविशारदाः ॥ बहुसुग्धनिनो दक्षा द्वेषपापविवर्जिताः ॥ ५६ ॥ इत्यष्टाचत्वारिंशकं स्थानम् ॥ ४८ ॥ हासोलासं प्रवक्ष्यामि स्वस्थानं चात्र संश्रुतम् ॥ शांडिल्यगोत्रं चैवात्र प्रवरैः पंचभिर्युतम् ॥ ५७ ॥ भार्गवच्यावनाप्नवानौर्वं वै जामदग्न्यकम् ॥ यक्षिणी चात्र वै देवी पवित्रा पापनाशिनी ॥ ५८ ॥ अस्मिन्वंशे च ये जाता ब्राह्मणाः स्थूलदेहिनः ॥ लंबोदरा लंबकर्णा लंबहस्ता महाद्विजाः ॥ ५९ ॥ अरोगिणः सदा देवाः सत्यव्रतपरायणाः ॥ ॥ २६० ॥ इत्येकोनपञ्चाशत्तमं स्थानम् ॥ ४९ ॥ वैहालाख्यं च संस्थानं पंचाशत्तममेव हि ॥ कुशगोत्रं तथा चैव देवी चात्र महाबला ॥ ६१ ॥ अस्मिन्गोत्रे भवा विप्रा दुष्टाः कुटिलगामिनः ॥ धनिनो धर्मनिष्ठाश्च वेदवेदांगपारगाः ॥ ६२ ॥ दानभोगरताः सर्वे श्रौते च कृतबुद्धयः ॥ ६३ ॥ इति पञ्चाशत्तमं स्थानम् ॥ ५० ॥ असाला परमं स्थानं प्रवरद्वयमेव हि ॥ कुशं च धारणं चैव प्रवराणि क्रमेण तु ॥६४॥ विश्वामित्रो देवरातो देवलस्तु तृतीयकः ॥ ज्ञानजा च तथा देवी गोत्रदेवी प्रकीर्तिता ॥ ६५ ॥ इत्येकपंचाशत्तमं स्थानम् ॥ ५१ ॥ नालोला परमं स्थानं द्विपंचाशत्तमं किल ॥ वत्सगोत्रं तथा ख्यातं द्वितीयं धारणसं तथा ॥ ६६ ॥ प्रवराश्चैव पूर्वोक्ता देव्युक्ता पूर्वमेव हि ॥ अस्मिन्वंशे च ये जाताः पवित्राः परमा मताः ॥ ६७ ॥ बहुनोक्तेन किं विप्राः सर्व एवात्र सत्तमाः ॥ सर्वे शुद्धा महात्मानः सर्वे कुलपरंपराः॥६८॥ इति द्वापञ्चाश

१ औदलस्तु तृतीयकः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमं स्थानम्॥५२॥ देहोलं परमं स्थानं ब्राह्मणानां परंतप ॥ कुशवंशोद्भवा विप्रास्तत्र जाता नृसत्तम ॥ पूर्वोक्तप्रवराण्येव देवी पूर्वोदिता मया॥६९॥ तस्मिन्गोत्रे द्विजा जाताः पूर्वोक्तगुणशालिनः ॥२७०॥ इति त्रिपंचाशत्तमं स्थानम् ॥ ५३ ॥ सोहासीयापुरं स्थानं गोत्रत्रितयमेव हि ॥ भारद्वाज स्तथा ख्यातं गोत्रं वत्सं तथैव च ॥७१॥ यक्षिणी ज्ञानजा चैव सिहोली च यथाक्रमम्॥एतद्वंशपरीक्षा च पूर्वोक्ता नृपसत्तम ॥७२॥ इति चतुःपंचा शत्तमंस्थानम् ॥५४॥ पंचपंचाशकं स्थानं प्रवक्ष्यामि तवाधुना ॥ नाम्ना संहालियास्थानं दत्तं रामेण वै पुरा ॥७३॥ तत्र वै कुत्सगोत्रस्था ब्राह्मणां ब्रह्मवर्चसः॥ स्वधर्मनिरता नित्याः स्वकर्म्मनिरताश्च ते ॥७४ ॥ आंगिरसांबरीषेच यौवताश्वमतः परम् ॥ शांता चैवात्र वै देवी शांतिकर्म्मणि शा तिदा ॥ ७५ ॥ इति पंचपंचाशत्तमं स्थानम् ॥ ५५ ॥ एवं मया ते गोत्राणि स्थानान्यपि तथैव च ॥ प्रवराणि तथैवात्र ब्राह्मणानां परंतप ॥७६॥ अतः परं प्रवक्ष्यामि त्रैविद्यानां परंतप ॥ स्वस्थानं च मया प्रोक्तं यथानुक्रमेण तु ॥ ७७ ॥ शीलायाः प्रथमं स्थानं मंडोरा च द्वितीयकम् ॥ एरडी च तृतीयं हि गुंदराणा चतुर्थकम् ॥७८॥ पंचमं कल्याणीया देगामा षष्ठकं तथा ॥ नायकपुरा सप्तमं च डलीआ चाष्टमं तथा ॥ ७९ ॥ कडोव्या नवमं चैव कोहाटोया दशमं तथा॥हरडीयैकादशं चैव भदुकीया द्वादशं तथा ॥२८०॥ संप्राणावा तथा चात्र कंदरावा प्रकीर्तितम् ॥ वासरोवा त्रयो दशं शरंडावा चतुर्दशम् ॥ ८१ ॥ लोलासणा पंचदशं वारोला षोडशं तथा ॥ नागलपुरा मया चात्र उक्तं सप्तदशं तथा ॥ ८२ ॥ ॥ ब्रह्मोवाच ॥ ॥ चातुर्विद्यास्तु ये विप्रा नागताः पुनरागताः ॥ वसतिं तत्र रम्ये च चक्रिरे ते द्विजोत्तमाः ॥ ८३ ॥ चतुर्विंशतिसंख्याका रामशासनलिप्सया ॥ हनू मंतं प्रति गता व्यावृत्ताः पुनरागताः ॥८४॥ तेषां दोषात्समस्तास्ते स्थानभ्रंशत्वमागताः॥ कियत्काले गते तेषां विरोधः समपद्यत ॥ ८५ ॥ भिन्ना चारा भिन्नभाषा वेशसंशयमागताः ॥ पंचदशसहस्राणि मध्ये ये के च वाडवाः॥८६॥ कृषिकर्मरता आसन्केचिद्यज्ञपरायणाः॥ केचिन्मल्लाश्च संजा ताः केचिद्वै वेदपाठकाः ॥८७॥ आयुर्वेदरताः केचित्केचिद्द्विजकयाजकाः ॥ संध्यास्नानपराः केचिन्नीलीकर्तृप्रयाजकाः ॥ ८८ ॥ तंतुकृद्याचनरता स्तंतुवायादियाचकाः ॥ कलौ प्राप्ते द्विजा भ्रष्टा भविष्यंति न संशयः ॥ ८९ ॥ शूद्रेषु जातिभेदः स्यात्कलौ प्राप्ते नराधिप ॥ भ्रष्टाचाराः परं ज्ञा त्वा ज्ञातिबंधेन पीडिताः ॥ २९० ॥ भोजनाच्छादने राजन्परित्यक्ता निजैर्जनैः ॥ न कोऽपि कन्यां विवहेत्संसर्गेण कदाचन ॥ ततस्ते वणिजो राजं स्तैलकाराः कलौ किल ॥ ९१ ॥ केचिच्च कलकाराश्च केचित्तंदुलकारिणः ॥ राजपुत्राश्रिताः केचिन्नानावर्णसमाश्रिताः ॥ कलौ प्राप्ते तु वणिजो भ्रष्टाः केपि महीतले ॥ ९२ ॥ तेषां तु पृथगाचाराः सम्बन्धाश्च पृथक्कृताः ॥ सीतापुरे च वसतिः केषांचित्समजायत ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साभ्रमत्यास्तटे केचिद्यत्र कुत्र व्यवस्थिताः ॥ सीतापुरात्तु ये पूर्वं भयभीताः समागताः ॥ ९४ ॥ साभ्रमत्युत्तरे कूले श्रीक्षेत्रे ये व्यवस्थिताः ॥
यदा तेषां पदं स्थानं दत्तं वै सुखवासकम् ॥९५॥ पुनस्तेऽपि गताः सद्यस्तस्मिन्सीतापुरे स्वयम्॥ पंचपञ्चाशद्ग्रामाश्च दत्तास्तु पुनरागमे ॥ ९६ ॥
रामेण मोढविप्राणां निवासांस्तेषु चक्रिरे ॥ वृत्तिबाह्यास्तु ये विप्रा धर्मारण्यांतरस्थिताः ॥ ९७ ॥ नास्माकं वणिजां वृत्तौ ग्रामवृत्तौ न किंचन ॥
प्रयोजनं हि विप्रेंद्रा वासोऽस्माकं तु रोचते ॥ ९८ ॥ इत्युक्ते समनुज्ञातास्त्रैविद्यैस्तैर्द्विजोत्तमैः ॥ तेषु ग्रामेषु ते विप्राश्चातुर्विद्या द्विजोत्तमाः ॥ ९९ ॥
स्वकर्मनिरताः शांताः कृषिकर्मपरायणाः ॥ धर्मारण्यान्नातिदूरे धेनूः संचारयंति ते ॥३००॥ बहवस्तत्र गोपाला बभूवुर्द्विजबालकाः ॥ चातुर्विद्यास्तु
शिशवस्तेषां धेनूरचारयन् ॥ तेषां भोजनकामाय अन्नपानादिसत्कृतम् ॥ १ ॥ अनयन्वै युवतयो विधवा अपि बालकाः ॥ २ ॥ कालेन कियता
राजंस्तेषां प्रीतिरभून्मिथः ॥ गोपाला बुभुजुः प्रेम्णा कुमार्यो द्विजबालिकाः ॥ ३ ॥ जाताः सगर्भास्ताः सर्वा दृष्टास्तैर्द्विजसत्तमैः ॥ परित्यक्ताश्च
सदनाद्धिक्कृताः पापकर्मणा ॥ ४ ॥ तेभ्यो जाता कुमारा ये कातीभा गोलकास्तथा ॥ धेनुजास्ते धरालोके ख्यातिं जग्मुर्द्विजोत्तमाः ॥ ५ ॥ वृत्ति
बाह्यास्तु ते विप्रा भिक्षां कुर्वंति नित्यशः ॥ अन्यच्च श्रूयतां राजंस्त्रैविद्यानां द्विजन्मनाम् ॥ ६ ॥ कुष्ठी कोऽपि तथा पंगुर्मूर्खो वा बधिरोऽपि
वा ॥ काणो वाप्यथ कुब्जो वा बद्धवागथवा पुनः ॥ ७ ॥ अप्राप्तकन्यका ह्येते चातुर्विद्यान्समाश्रिताः ॥ वित्तेन महता राजन्सुतांस्तेषां
कुमारिकाः ॥ ८ ॥ उद्वाहितास्तदा राजंस्तस्माज्जातार्भकास्तु ये ॥ त्रिदलजास्ते विख्याताः क्षितिलोकेऽभवंस्ततः ॥ ९ ॥ वृत्तिं चक्रुर्ब्राह्मणास्तेऽ
न्योन्यं मिश्रसमुद्भवाः ॥ अन्यच्च श्रूयतां राजंस्त्रैविद्यानां द्विजन्मनाम् ॥ १० ॥ रामदत्तेन ग्रामेण करग्रहणहेतवे ॥ एकीभूय द्विजैः सर्वैर्ग्रामं
प्रदाय तं बलिम् ॥ ११ ॥ अर्द्धं निवेदयामासुरर्द्धं चैवोपरक्षितम् ॥ एतल्लब्धं हि मन्वानास्ते द्विजा लौल्यभागिनः ॥ १२ ॥ महास्थानगता
ये च ते हि विस्मयमाययुः ॥ तन्मध्ये कोऽपि विप्रस्तानुवाच कुपितो वचः ॥ १३ ॥ ॥ विप्र उवाच ॥ ॥ अनृतं चैव भाषंते लौल्येन
महता वृताः ॥ पुत्रपौत्रविनाशाय ब्रह्मस्वेष्वतिलोलुपाः ॥ १४ ॥ न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ॥ विषमेकाकिनं हंति ब्रह्मस्वं
पुत्रपौत्रकम् ॥ १५ ॥ ब्रह्मस्वेन च दग्धेषु पुत्रदारगृहादिषु ॥ न च तेऽपि तिष्ठंति ब्रह्मस्वेन विनाशिताः ॥ १६ ॥ न नाकं लभते सोऽथ
सदा ब्रह्मस्वहारकः ॥ यदा वराटिकां चैव ब्राह्मणस्य हरंति ये ॥ १७ ॥ ततो जन्मत्रयाण्येव हर्त्ता निरयमाव्रजेत् ॥ पूर्वजा नोपभुंजंति

१ अतएव—केचिद्गोलकजातीयाः—स्वान्—गोवर्द्धनजातीन्प्रख्यापयन्ति—कुत्रचित्प्रदेशेषु तत्रेदं रहस्यं ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रदत्तं जलं क्वचित् ॥ १८ ॥ क्षयाहे नोपभुंजंति तस्य पिंडोदकक्रियाः ॥ संततिं नैव लभते लभ्यमाना न जीवति ॥ १९ ॥ यदि जीवति दैवाच्चेद्भ्रष्टाचारा भवेदिति ॥ ३२० ॥ एकादशविप्रा ऊचुः ॥ नासत्यं भाषितं विप्राः कथं दूषयसे हि नः ॥ अपराधं विना कस्य कटूक्तिर्युज्यते किल ॥ २१ ॥ तच्छ्रुत्वा तैर्द्विजैः पार्थ ग्रामग्राहयिता वणिक् ॥ परिपृष्टः स तत्सर्वं कथयामास कारणम् ॥ २२ ॥ वणिजैरेव मे दत्तो बलिश्च द्विजसत्तमाः ॥ तत्सर्वं शुद्धभावेन कथितं तु द्विजन्मसु ॥ २३ ॥ ततोऽर्द्धदलं ज्ञात्वा ते कुपिता द्विजपुत्रकाः ॥ वृत्तेर्बहिष्कृतास्ते वै एकादश द्विजास्ततः ॥ २४ ॥ एकादशसमा ज्ञातिर्विख्याता भुवनत्रये ॥ न तेषां सह संबन्धो न विवाहश्च जायते ॥ २५ ॥ एकादशसमा ये च बहिर्ग्रामे वसंति ते ॥ एवं भेदाः समभवन्नाना मोढद्विजन्मनाम् ॥ युगानुसारात्कालेन ज्ञातीनां च वृषस्य वा ॥ ३२६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये ज्ञातिभेदवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ॥ ३९ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ ज्ञातिभेदे तु संजाते तस्मिन्मोहेरके पुरे ॥ त्रैविद्यैः किं कृतं ब्रह्मंस्तन्ममाचक्ष्व पृच्छतः ॥ १ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्वस्थाने वाडवाः सर्वे हर्षनिर्भरमानसाः ॥ अग्निहोत्रपराः केऽपि केऽपि यज्ञपरायणाः ॥ २ ॥ केऽपि चाग्निसमाधानाः केऽपि स्मार्ता निरंतरम् ॥ पुराणन्यायवेत्तारो वेदवेदांगवादिनः ॥ ३ ॥ सुखेन स्वान्सदाचारान्कुर्वन्तो ब्रह्मवादिनः ॥ एवं धर्मसमाचारान्कुर्वतां कुशलात्मनाम् ॥ ४ ॥ स्थानाचारान्कुलाचारानधिदेव्याश्च भाषितान् ॥ धर्मशास्त्रस्थितं सर्वं काजेशैरुदितं च यत् ॥ ५ ॥ परंपरागतं धर्मं मूचुस्ते वाडवोत्तमाः ॥ ६ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ उपास्ते यश्च लिखितं रक्तपादैस्तु वाडवाः ॥ ज्ञातिश्रेष्ठः स विज्ञेयो बलिर्देयस्ततः परम् ॥ ७ ॥ रक्तचंदनं प्रसाध्याथ प्रसिद्धं स्वकुलं तथा ॥ कुकुंमारक्तपादैस्तैर्गंधपुष्पादिचर्चितैः ॥ ८ ॥ संभूय लिखितं तच्च रक्तपादं तदुच्यते ॥ रामस्य लेख्यं ते सर्वे पूजयंतु समाहिताः ॥ ९ ॥ रामस्य करमुद्रां च पूजयंतु द्विजाः सदा ॥ येषां दोषाः सदाचारे व्यभिचारादयो यदि ॥ ॥ १० ॥ तेषां दण्डो विधेयस्तु य उक्तो विधिवद्द्विजैः ॥ चिह्नं न राममुद्राया यावद्दंडं ददाति न ॥ ११ ॥ विना दण्डप्रदानेन मुद्राचिह्नं न धार्यते ॥ मुद्राहस्ताश्च विज्ञेया वाडवा नृपसत्तम ॥ १२ ॥ पुत्रे जाते पिता दद्याच्छ्रीमात्रे तु बलिं सदा ॥ पलानि विंशतिः सर्प्पिर्गुडः पंचपलानि च ॥ १३ ॥ कुंकुमादिभिरभ्यर्च्य जातमात्रः सुतस्तदा ॥ षष्ठे च दिवसे राजन्षष्ठीं पूजयते सदा ॥ १४ ॥ दद्यात्तत्र बलिं साज्यं कुर्याद्धि बलिपंचकम् ॥ पंचप्रस्थान्बलीन्दद्यात्सवस्त्रांश्छ्रीफलैर्युतान् ॥ १५ ॥ कुंकुमादिभिरभ्यर्च्य श्रीमात्रे भक्तिपूर्वकम् ॥ वित्तशाठ्यं न कुर्वीत कुले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संततिवृद्धये ॥ १६ ॥ तद्धि चार्पयता द्रव्यं वृद्धौ यद्श्रीणितं पुनः ॥ जन्मनो नंतरं कार्यं जातकर्म यथाविधि ॥ १७ ॥ त्रिप्रानुकीर्तिता याऽत्र
वृत्तिः सापि विभज्यते ॥ प्रथमा लभ्यमाना च वृत्तिर्वै यावती पुनः ॥ १८ ॥ तस्या वृत्तेरर्द्धभागो गोत्रदेव्यै तु कल्प्यताम् ॥ द्विगुणं
वणिजा चैव पुत्रे जाते भवेदिति ॥ १९ ॥ मांडलीयाश्च ये शूद्रास्तेषामर्कककरं त्विदम् ॥ अडालजानां त्रिगुणं गोभुजानां चतुर्गुणम् ॥ २० ॥
इत्येतत्कथितं सर्वमन्यच्च शूद्रजातिषु ॥ यस्य दोषस्तु हत्यायाः समुद्भूतो विधेर्वशात् ॥ २१ ॥ दण्डस्तु विधिवत्तस्य कर्त्तव्यो वेदशास्त्रिभिः ॥
अन्यायो न्यायवादी स्यान्निर्दोषे दोषदायकः ॥ २२ ॥ पंक्तिभेदस्य कर्त्ता च गोसहस्रवधः स्मृतः [1] ॥ वृत्तिभागविभजनं तथा न्यायविचारणम् ॥
श्रीरामदूतकस्याग्रे कर्त्तव्यमिति निश्चयः ॥ २३ ॥ तस्य पूजां प्रकुर्वीत तदा कालेऽथवा सदा ॥ तैलेन लेपयेत्तस्य देहे वै विघ्नशांतये ॥ २४ ॥
धूपं दीपं फलं दद्यात्पुष्पैर्नानाविधैः किल ॥ पूजितो हनुमानेव ददाति तस्य वांछितम् ॥ २५ ॥ प्रतिपुत्रं तु तस्याग्रे कुर्यान्नान्यत्र कुत्रचित् ॥
श्रीमाताबकुलस्वामिभागधेयं तु पूर्वतः ॥ २६ ॥ पश्चात्प्रतिग्रहं विप्रैः कर्त्तव्यमिति निश्चितम् ॥ समागमेषु विप्राणां न्यायान्यायविनिर्णये ॥
॥ २७ ॥ निर्णयं हृदये धृत्वा तत्रस्थं श्रावयेद्द्विजान् ॥ केवलं धर्मबुद्ध्या च पक्षपातं विवर्जयेत् ॥ २८ ॥ सर्वेषां संमतं कार्यं तद्व्यविकृतमेव
च ॥ आकारितस्ततो विप्रः सभायां भयमेति चेत् ॥ २९ ॥ न तस्य वाक्यं श्रोतव्यं निर्णीतार्थनिवारणे ॥ यस्य वर्जस्तु क्रियते मिलित्वा सर्व
वाडवैः ॥ ३० ॥ खानपानादिकं सर्वं कार्यं तेन विवर्जयेत् ॥ तस्य कन्या न दातव्या तत्संसर्गी च तादृशः ॥ ३१ ॥ ततो दंडं प्रकुर्वीत सर्वैरेव
द्विजोत्तमैः [2] ॥ भोजनं कन्यकादानमिति [3] दाशरथेर्मतम् ॥ ३२ ॥ यत्किंचित्कुरुते पापं लब्धुं स्थलमथापि वा ॥ शुष्कार्द्रं वसते चान्ने तस्मादन्नं परि
त्यजेत् ॥ ३३ ॥ कुर्वंस्तत्पापभागी स्यात्तस्य दंडो यथाविधि ॥ न्यायं न पश्यते [4] यस्तु शक्तौ सत्यां सदा यतः ॥३४॥ पापभागी स विज्ञेय इति
सत्यं न संशयः ॥ उत्कोचं यस्तु गृह्णाति पापिनां दुष्टकर्मिणाम् ॥ सकलं च भवेत्तस्य पापं नैवात्र संशयः ॥३५॥ तस्यान्नं गृह्यते नैव कन्यापि
न कदाचन ॥ हितमाचरते यस्तु पुत्राणामपि वै नरः ॥ ३६ ॥ स एतान्नियमान्सर्वान्पालयेन्नात्र संशयः ॥ एवं पत्रं लिखित्वा तु वाडवास्ते प्रह
र्षिताः ॥ ३७ ॥ प्राप्ते कलियुगे घोरे यथा पापं न कुर्वते ॥ इति ज्ञात्वा तु सर्वे ते न्यायधर्मं प्रचक्रिरे ॥ ३८ ॥ ॥ व्यास उवाच ॥ ॥ कलौ
प्राप्ते द्विजाः सर्वे स्थानभ्रष्टा यतस्ततः ॥ पक्षमुत्कलं ग्रहीष्यंति तथा स्युः पक्षपातिनः ॥ ३९ ॥ भोक्ष्यंते म्लेच्छकग्रामान्कोलाविध्वंसिभिः किल ॥

१ गोसहस्रवधः स्मृतः—गोसहस्रवधकर्तुर्यथा पातकं तादृशपातकवान्स्यादित्यर्थः । २ संमतम्—इति शेषः । ३ कर्त्तव्यम्—इति शेषः । ४ आत्मनेपदमार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदभ्रष्टाश्च ते विप्रा भविष्यंति कलौ युगे ॥ ४० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ देशेदेशे गमिष्यंति ते विप्रा वणिजस्तथा ॥ कथं वै ज्ञायते सर्वैः केन चिह्नेन मारिष ॥४१॥ यस्मिन्गोत्रे समुत्पन्ना वाडवा ये महाबलाः ॥ ४२ ॥ व्यास उवाच ॥ ज्ञायते गोत्रसंज्ञाऽथ केचिच्चैव पराक्रमैः ॥ यस्ययस्य च यत्कर्म तस्य तस्यावटंकक: ॥४३॥ अवटंकैर्हि ज्ञायंते नान्यथा ज्ञायते क्वचित्॥गोत्रैश्च प्रवरैश्चैव अवटंकैर्नृपात्मज॥४४॥ ज्ञायंते हि द्विजा राजन्मोढ ब्राह्मणसत्तमाः ॥ ४५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गोत्रैश्च प्रवरैश्चैव श्रुता एते तवाननात् ॥ कां वा शाखामधीयानास्तन्मे ब्रूहि पितामह ॥ ४६ ॥ ॥ ॥ व्यास उवाच ॥ ॥ ज्ञायंते यत्रयत्रस्था माध्यंदिनीया महाबलाः ॥ कौथमीं च समाश्रित्य केचिद्विप्रा गुणान्विताः ॥४७॥ ऋगथर्वणजा शाखा नष्टा सा च महामते ॥ एवं वै वर्तमानास्ते वाडवा धर्मसंभवाः ॥४८॥ धर्मारण्ये महाभागाः पुत्रपौत्रान्विताऽभवन् ॥ शूद्राः सर्वे महाभागाः पुत्रपौत्रसमावृताः ॥ ४९ ॥ धर्मारण्ये महातीर्थे सर्वे ते द्विजसेवकाः ॥ अभवन्रामभक्ताश्च रामाज्ञां पालयंति च ॥ ५० ॥ आज्ञामत्याऽऽदरेणेह हनूमंतश्च वीर्यवान् ॥ पालयेत्सोऽपि चेदानीं संप्राप्ते वै कलौ युगे ॥ ५१ ॥ अदृष्टरूपी हनुमांस्तत्र भ्रमति नित्यशः ॥ त्रैविद्या वाडवा यत्र चातुर्विद्यास्तथैव च ॥ ५२ ॥ सभायामुपविष्टा येऽन्यायात्पापं प्रकुर्वते ॥ जयो हि न्यायकर्तॄणामजयोऽन्यायकारिणाम् ॥ ५३ ॥ सापराधे यस्तु पुत्रे ताते भ्रातरि चापि वा ॥ पक्षपातं प्रकुर्वीत तस्य कुप्यति वायुजः ॥ ५४ ॥ कुपितो हनुमानेष धननाशं करोति वै ॥ पुत्रनाशं करोत्येव धामनाशं तथैव च ॥ ५५ ॥ सेवार्थं निर्मितः शूद्रो न विप्रान्परिषेवते ॥ वृत्तिं वा न ददात्येव हनुमांस्तस्य कुप्यति ॥ ५६ ॥ अर्थनाशं पुत्रनाशं स्थाननाशं महाभयम् ॥ कुरुते वायुपुत्रो हि रामवाक्यमनुस्मरन् ॥ ५७ ॥ यत्र कुत्र स्थिता विप्राः शूद्रा वा नृपसत्तम ॥ न निर्द्धना भवेयुस्ते प्रसादाद्राघवस्य च ॥ ५८ ॥ यो मूढश्चाप्यधर्मात्मा पापपाषंडमाश्रितः ॥ निजान्विप्रान्परित्यज्य परज्ञातींश्च मन्यते ॥ ५९ ॥ तस्य पूर्वकृतं पुण्यं भस्मीभवति नान्यथा ॥ अन्येषां दीयते दानं स्वल्पं वा यदि वा बहु ॥ ६० ॥ यथा भवति वै पूर्वं ब्रह्मविष्णुशिवैः कृतम् ॥ तस्य देवा न गृह्णंति हव्यं कव्यं च पूर्वजाः ॥ ६१ ॥ वंचयित्वा निजान्विप्रानन्येभ्यः प्रददेत्तु यः ॥ तस्य जन्मार्जितं पुण्यं भस्मीभवति तत्क्षणात् ॥६२॥ ब्रह्मविष्णुशिवैश्चैव पूजिता ये द्विजोत्तमाः ॥ तेषां ये विमुखाः शूद्रा रौरवे निवसंति ते ॥ ६३ ॥ यो लौल्याच्च कुलाचारं गोत्राचारं प्रलोपयेत् ॥ स्वाचारं यो न कुर्वीत कदाचिद्दै विमोहितः ॥ ६४ ॥ सर्वनाशो भवेत्तस्य भस्मीभवति तत्क्षणात् ॥ तस्मात्सर्वः कुलाचारः स्थानाचारस्तथैव च ॥ ६५ ॥ गोत्राचारः पालनीयो यथावित्तानुसारतः ॥ एवं ते कथितं राजन्धर्मारण्यं पुरातनम् ॥ ६६ ॥ स्थापितं देवदेवैश्च ब्रह्मविष्णुशिवादिभिः ॥ धर्मारण्यं कृतयुगे त्रेतायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यमंदिरम् ॥ द्वापरे वेदभवनं कालौ मोहेरकं स्मृतम् ॥ ६७ ॥ ॥ ब्रह्मोवाच ॥ ॥ य इदं शृणुयात्पुत्र श्रद्धया परया युतः ॥ धर्मारण्यस्य माहात्म्यं सर्वकिल्बिषनाशनम् ॥ ६८ ॥ मनोवाक्कायजनितं पातकं त्रिविधं च यत् ॥ तत्सर्वं नाशमायाति श्रवणात्कीर्तनात्सकृत् ॥ ६९ ॥ धन्यं यशस्यमायुष्यं सुखसंतानदायकम् ॥ माहात्म्यं शृणुयाद्वत्स सर्वसौख्याप्तये नरः ॥ ७० ॥ सर्वतीर्थेषु यत्पुण्यं सर्वक्षेत्रेषु यत्फलम् ॥ तत्फलं समवाप्नोति धर्मारण्यस्य सेवनात् ॥ ७१ ॥ ॥ नारद उवाच ॥ ॥ धर्मारण्यस्य माहात्म्यं यच्छ्रुतं त्वन्मुखांबुजात् ॥ धर्मवाप्यां यत्र धर्म्मस्तपस्तेपे सुदुष्करम् ॥ ७२ ॥ तस्य क्षेत्रस्य महिमा मया त्वत्तोऽवधारितः ॥ स्वस्ति तेऽस्तु गमिष्यामि धर्मारण्यदिदृक्षया ॥ ७३ ॥ तव वाक्यजलौघेन पावितोऽहं चतुर्मुख ॥ ७४ ॥ ॥ व्यास उवाच ॥ ॥ इदमाख्यानकं सर्वं कथितं पांडुनंदन ॥ यच्छ्रुत्वा गोसहस्रस्य फलं प्राप्नोति मानवः ॥ ॥ ७५ ॥ अपुत्रो लभते पुत्रान्निर्द्धनो धनवान्भवेत् ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥ ७६ ॥ विद्यार्थी लभते विद्यामुत्तमां कर्मसाधनाम् ॥ तीर्थयात्राफलं तस्य कोटिकन्याफलं लभेत् ॥ ७७ ॥ यः शृणोति नरो भक्त्या नारी वाथ नरोत्तम ॥ निरयं नैव पश्यंति एकोत्तरशतैः सह ॥ ७८ ॥ शुभे देशे निवेश्याथ क्षौमवस्त्रादिभिस्तथा ॥ पुराणपुस्तकं राजन्प्रयतः शिष्टसंमतः ॥ ७९ ॥ अर्चयेच्च यथान्यायं गंधमाल्यैः पृथक्पृथक् ॥ समाप्तौ नृप ग्रंथस्य वाचकस्यानुपूजनम् ॥ ८० ॥ दानादिभिर्यथान्यायं संपूर्णफलहेतवे ॥ मुद्रिकां कुंडले चैव ब्रह्मसूत्रं हिरण्मयम् ॥ ८१ ॥ वस्त्राणि च विचित्राणि गंधमाल्यानुलेपनैः ॥ देववत्पूजनं कृत्वा गां च दद्यात्पयस्विनीम् ॥ ८२ ॥ एवं विधानतः श्रुत्वा धर्मारण्यकथानकम् ॥ धर्मारण्यनिवासस्य फलमाप्नोत्यसंशयम् ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे पूर्वभागे धर्मारण्यमाहात्म्ये धर्मारण्यनिवासिव्यवस्थावर्णनपूर्वकधर्मारण्यपुराणश्रवणमाहात्म्यवर्णनंनामचत्वारिंशोऽध्यायः ॥ ४० ॥

इति श्रीस्कान्दे महापुराणे तृतीये ब्रह्मखण्डे द्वितीयं धर्मारण्यमाहात्म्यं समाप्तम् ॥ (३–२) ॥

॥ ❀ ॥ समाप्तोऽयं तृतीयब्रह्मखण्डपूर्वभागः ॥ ❀ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इति श्रीस्कान्दे महापुराणे तृतीये ब्रह्मखण्डे द्वितीयं धर्मारण्यमाहात्म्यं समाप्तम्॥(३-२)॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीस्कांदे महापुराणे तृतीयब्रह्मोत्तरखण्डप्रारंभः (३–३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ श्रीगणेशाय नमः ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॥ अथ ब्रह्मोत्तरखंडप्रारंभः ॥ ॥ ॐनमः शिवाय ॥ ॥ ज्योतिर्मात्रस्वरूपाय निर्मलज्ञानचक्षुषे[1] ॥ नमः शिवाय शांताय ब्रह्मणे लिंगमूर्त्तये[2] ॥ १ ॥ ॥ ऋषय ऊचुः ॥ ॥ आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ॥ समस्ताघहरं पुण्यं समासेन श्रुतं च नः ॥ २ ॥ इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ॥ तद्भक्तानां च माहात्म्यमशेषाघहरं परम् ॥ ३ ॥ तन्मंत्राणां च[3] माहात्म्यं तथैव द्विजसत्तम ॥ तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ एतावदेव मर्त्यानां परं श्रेयः सनातनम् ॥ यदीश्वरकथायां वै जाता भक्तिरहैतुकी ॥ ५ ॥ अतस्तद्भक्तिलेशस्य माहात्म्यं वर्ण्यते मया ॥ अपि कल्पायुषा नालं वक्तुं विस्तरतः क्वचित् ॥ ६ ॥ सर्वेषामपि पुण्यानां सर्वेषां श्रेयसामपि ॥ सर्वेषामपि यज्ञानां जपयज्ञः परः स्मृतः॥ ७ ॥ तत्रादौ जपयज्ञस्य फलं स्वस्त्ययनं महत् ॥ शैवं षडक्षरं दिव्यं मंत्रमाहुर्महर्षयः[4] ॥ ८ ॥ देवानां परमो देवो यथा वै त्रिपुरांतकः ॥ मंत्राणां परमो मंत्रस्तथा शैवः[5] षडक्षरः ॥ ९ ॥ एष पंचाक्षरो मंत्रो जप्तॄणां मुक्तिदायकः ॥ संसेव्यते मुनिश्रेष्ठैरशेषैः सिद्धिकांक्षिभिः ॥ १० ॥ अस्यैवाक्षरमाहात्म्यं नालं वक्तुं चतुर्मुखः ॥ श्रुतयो यत्र सिद्धांतं गताः परमनिर्वृताः ॥ ११ ॥ सर्वज्ञः परिपूर्णश्च सच्चिदानंदलक्षणः ॥ स शिवो यत्र रमते शैवे पंचाक्षरे शुभे ॥ १२ ॥ एतेन मंत्रराजेन सर्वोपनिषदात्मना ॥ लेभिरे मुनयः सर्वे परं ब्रह्म निरामयम् ॥१३॥ नमस्कारेण जीवत्वं शिवेऽत्र परमात्मनि ॥ ऐक्यं गतमतो मंत्रः परब्रह्ममयो ह्यसौ ॥ १४ ॥ भवपाशनिबद्धानां देहिनां हितकाम्यया ॥ आहोंनमः शिवायेति मंत्रमाद्यं शिवः स्वयम् ॥ १५ ॥ किं तस्य बहुभिर्मंत्रैः किं तीर्थैः किं तपोऽध्वरैः ॥ यस्योंनमः शिवायेति मंत्रो हृदयगोचरः ॥ १६ ॥ तावद्भ्रमंति संसारे दारुणे दुःखसंकुले ॥ यावन्नोच्चारयंतीमं मंत्रं देहभृतः सकृत् ॥ १७ ॥ मंत्राधिराजराजोऽयं सर्ववेदांतशेखरः ॥ सर्वज्ञाननिधानं च सोऽयं चैव षडक्षरः ॥ १८ ॥ कैवल्यमार्गदीपोऽयमविद्यासिंधुवाडवः ॥ महापातकदावाग्निः सोऽयं मंत्रः षडक्षरः ॥ १९ ॥ तस्मात्सर्वप्रदो मंत्रः सोऽयं पञ्चाक्षरः स्मृतः ॥ स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यते मुक्तिकांक्षिभिः ॥ २० ॥ नास्य दीक्षा न होमश्च न संस्कारो न तर्पणम् ॥ न कालो[7] नोपदेशश्च सदा शुचिरयं मनुः ॥ २१ ॥ महापातकविच्छित्त्यै शिव इत्यक्षरद्वयम् ॥ अलं नमस्क्रियायुक्तो मुक्तये परिकल्पते ॥ २२ ॥ उपदिष्टः सद्गुरुणा जप्तः क्षेत्रे च पावने ॥ सद्यो यथेप्सितां सिद्धिं ददातीति किमद्भुतम् ॥ २३ ॥ अतः सद्गुरुमाश्रित्य

१ निर्मलज्ञानरूपिणे–इति, निर्मलज्ञानहेतवे–इति च पाठान्तरम् । २ समस्तगुणवृत्तये–इ० पा० । ३ तद्रतानां तत्पूजायाश्च–इ० पा० । ४ मनीषिणः–इ० पा० । ५ सोऽयम्–इ० पा० । ६ साक्षात्–इ० पा० । ७ न कालनियमश्चात्र–जप्यः सर्वैरयं मनुः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाद्योऽयं मंत्रनायकः ॥ पुण्यक्षेत्रेषु जप्तव्यः सद्यः सिद्धिं प्रयच्छति ॥ २४ ॥ गुरवो निर्मला[1]ः शांताः साधवो मितभाषिणः ॥ कामक्रोधविनिर्मुक्ताः सदाचारा जितेंद्रियाः ॥ २५ ॥ एतैः कारुण्यतो दत्तो मंत्रः क्षिप्रं प्रसिद्धयति[2] ॥ क्षेत्राणि जपयोग्यानि समासात्कथयाम्यहम् ॥ २६ ॥ प्रयागं पुष्करं रम्यं केदारं सेतुबंधनम् ॥ गोकर्णं नैमिषारण्यं सद्यः सिद्धिकरं[3] नृणाम् ॥२७॥ अत्रानुवर्ण्यते सद्भिरितिहासः पुरातनः ॥ असकृद्वा सकृद्वापि शृण्वतां मंगलप्रदः ॥ २८ ॥ मथुरायां यदुश्रेष्ठो दाशार्ह इति विश्रुतः[4] ॥ बभूव राजा मतिमान्महोत्साहो महाबलः ॥ २९ ॥ शास्त्रज्ञो नयवाक्शूरो धैर्यवानमितद्युतिः ॥ अप्रधृष्यः सुगंभीरः संग्रामेष्वनिवर्त्तितः ॥ ३० ॥ महारथो महेष्वासो नानाशास्त्रार्थकोविदः ॥ वदान्यो रूपसंपन्नो युवा लक्षणसंयुतः ॥ ३१ ॥ स काशिराजतनयामुपयेमे वराननाम् ॥ कांतां कलावतीं नाम रूपशीलगुणान्विताम् ॥ ३२ ॥ कृतोद्वाहः स राजेंद्रः संप्राप्य निजमंदिरम् ॥ रात्रौ तां शयनारूढां संगमाय समाह्वयत ॥ ३३ ॥ सा स्वभर्त्रा समाहूता बहुशः प्रार्थिता सती ॥ न बबंध मनस्तस्मिन्न चागच्छत्तदंतिकम् ॥ ३४ ॥ संगमाय यदाहूता नागता निजवल्लभा ॥ बलादाहर्तुकामस्तामुदतिष्ठन्महीपतिः ॥ ३५ ॥ ॥ राज्ञ्युवाच ॥ ॥ मा मां स्पृश महाराज कारणज्ञां व्रते स्थिताम् ॥ धर्माधर्मौ विजानासि मा कार्षीः साहसं मयि ॥ ३६ ॥ क्वचित्प्रियेण भुक्तं यद्रोचते तु मनीषिणाम् ॥ दंपत्योः प्रीतियोगेन संगमः प्रीतिवर्द्धनः ॥ ३७ ॥ प्रियं यदा मे जायेत तदा संगस्तु ते मयि ॥ का प्रीतिः किं सुखं पुंसां बलाद्भोगेन योषिताम् ॥ ३८ ॥ अप्रीतां रोगिणीं नारीमंतर्वत्नीं धृतव्रताम् ॥ रजस्वलामकामां च न कामेत बलात्पुमान् ॥ ३९ ॥ प्रीणनं लालनं पोषं रंजनं मार्दवं दयाम् ॥ कृत्वा वधूमुपगमेद्युवतीं प्रेमवान्पतिः ॥ युवतौ कुसुमे चैव विधेयं सुखमिच्छता ॥ ४० ॥ इत्युक्तोऽपि तया साध्व्या स राजा स्मरविह्वलः ॥ बलादाकृष्य तां हस्ते परिरेभे रिरंसया ॥ ४१ ॥ तां स्पृष्टमात्रां सहसा तप्तायःपिंडसन्निभाम् ॥ निर्दहंतीमिवात्मानं तत्याज भयविह्वलः ॥ ४२ ॥ ॥ राजोवाच ॥ ॥ अहो सुमहदाश्चर्यमिदं दृष्टं तव प्रिये ॥ कथमग्निसमं जातं वपुः पल्लवकोमलम् ॥ ॥ ४३ ॥ इत्थं सुविस्मितो राजा भीतः सा राजवल्लभा ॥ प्रत्युवाच विहस्यैनं विनयेन शुचिस्मिता ॥ ४४ ॥ ॥ राज्ञ्युवाच ॥ ॥ राजन्मम पुरा बाल्ये दुर्वासा मुनिपुंगवः ॥ शैवीं पंचाक्षरीं विद्यां कारुण्येनोपदिष्टवान् ॥४५॥ तेन मंत्रानुभावेन ममांगं कलुषोज्झितम् ॥ स्प्रष्टुं न शक्यते पुंभिः सपापैर्दैववर्जितैः ॥ ४६ ॥ त्वया राजन्प्रकृतिना[5] कुलटागणिकादयः ॥ मदिरास्वादनिरता निषेव्यंते सदा स्त्रियः ॥४७॥ न स्नानं क्रियते नित्यं न

१ निर्ममा.–इ० पा० । २ हि सिद्धयति–इ० पा० । ३ सिद्धिं प्रयच्छति–इ० पा० । ४ संस्मृतः–इ० पा० । ५ राजप्रकृतिना–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रो जप्यते शुचिः ॥ नाराध्यते त्वयेशानः कथं मां स्प्रष्टुमर्हसि ॥ ४८ ॥ ॥ राजोवाच ॥ ॥ तां समाख्याहि सुश्रोणि शैवीं पंचाक्षरीं शुभाम्[1] ॥ विद्याविध्वस्तपापोऽहं त्वयीच्छामि रतिं प्रिये ॥ ४९ ॥ ॥ राज्ञ्युवाच ॥ ॥ नाहं तवोपदेशं वै कुर्यां मम गुरुर्भवान् ॥ उपातिष्ठ गुरुं राजन्गर्गं मंत्रविदांवरम् ॥ ५० ॥ ॥ सूत उवाच ॥ ॥ इति संभाषमाणौ तौ दंपती गर्गसन्निधिम् ॥ प्राप्य तच्चरणौ मूर्ध्ना ववंदाते कृताञ्जली ॥ ५१ ॥ अथ राजा[2] गुरुं प्रीतमभिपूज्य पुनःपुनः ॥ समाचष्ट विनीतात्मा रहस्यात्ममनोरथम् ॥ ५२ ॥ ॥ राजोवाच ॥ ॥ कृतार्थं मां कुरु गुरो संप्राप्तं करुणार्द्रधीः ॥ शैवीं पंचाक्षरीं विद्यामुपदेष्टुं त्वमर्हसि ॥ ५३ ॥ अनाज्ञातं यदाज्ञातं यत्कृतं राजकर्मणा[3] ॥ तत्पापं येन शुद्ध्येत तन्मंत्रं देहि मे गुरो ॥ ५४ ॥ एवमभ्यर्थितो राज्ञा गर्गो ब्राह्मणपुंगवः ॥ तौ निनाय महापुण्यं कालिंद्यास्तटमुत्तमम् ॥ ५५ ॥ तत्र पुण्यतरोर्मूले निषण्णोऽथ गुरुः स्वयम् ॥ पुण्यतीर्थजले स्नातं राजानं समुपोषितम् ॥ ५६ ॥ प्राङ्मुखं चोपवेश्याथ नत्वा शिवपदाम्बुजम् ॥ तन्मस्तके करं न्यस्य ददौ मंत्रं शिवात्मकम् ॥ ॥ ५७ ॥ तन्मंत्रधारणादेव तद्गुरोर्हस्तसंगमात्[4] ॥ निर्ययुस्तस्य वपुषो वायसाः शतकोटयः ॥ ५८ ॥ ते दग्धपक्षाः क्रोशंतो निपतंतो महीतले ॥ भस्मीभूतास्ततः सर्वे दृश्यंते स्म सहस्रशः ॥ ५९ ॥ दृष्ट्वा तद्वायसकुलं दह्यमानं सुविस्मितौ ॥ राजा च राजमहिषी तं गुरुं पर्यपृच्छताम् ॥ ६० ॥ भगवन्निदमाश्चर्यं कथं जातं शरीरतः ॥ वायसानां कुलं दृष्टं किमेतत्साधु भण्यताम् ॥ ६१ ॥ ॥ श्रीगुरुरुवाच[5] ॥ ॥ राजन्भवसहस्रेषु भवता परिधावता ॥ संचितानि दुरन्तानि संति पापान्यनेकशः ॥ ६२ ॥ तेषु जन्मसहस्रेषु यानि पुण्यानि संति ते ॥ तेषामाधिक्यतः क्वापि जायते पुण्ययोनिषु ॥ ६३ ॥ तथा पापीयसीं योनिं क्वचित्पापेन गच्छति ॥ साम्ये पुण्यान्ययोश्चैव मानुषीं योनिमाप्तवान् ॥ ६४ ॥ शैवी पंचाक्षरी विद्या यदा ते हृदयं गता ॥ अघानां कोटयस्त्वत्तः काकरूपेण निर्गताः ॥ ६५ ॥ कोटयो ब्रह्महत्यानामगम्यागम्यकोटयः ॥ स्वर्णस्तेयसुरापानभ्रूणहत्यादिकोटयः ॥ भवकोटिसहस्रेषु येऽन्ये पातकराशयः ॥ ६६ ॥ क्षणाद्भस्मीभवंत्येव शैवे पंचाक्षरे धृते ॥ आसंस्तवाद्य राजेंद्र दग्धाः पातककोटयः ॥ ॥ ६७ ॥ अनया सह पूतात्मा विहरस्व यथासुखम् ॥ इत्याभाष्य मुनिश्रेष्ठस्तं मंत्रमुपदिश्य च ॥६८॥ ताभ्यां विस्मितचित्ताभ्यां सहितः स्वगृहं ययौ ॥ गुरुवर्यमनुज्ञाप्य मुदितौ तौ च दंपती ॥ ६९ ॥ ततः स्वभवनं प्राप्य रेजतुःस्म महाद्युती ॥ राजा दृढं[6] समाश्लिष्य पत्नीं चन्दनशीतलाम् ॥

१ शुभः–इ० पा० । २ स राजा च–इ० पा० । ३ राजकर्मभिः–इ० पा० । ४ तन्मुनेः–इ०पा० । ५ गर्ग उवाच–इ० पा० । ६ दृष्टः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संतोषं परमं लेभे निःस्वः प्राप्य यथा [1]धनम् ॥ ७० ॥ अशेषवेदोपनिषत्पुराणशास्त्रावतंसोऽयमघांतकारी ॥ पंचाक्षरस्यैवं[2] महाप्रभावो मया[3] समासात्कथितो वरिष्ठः ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे पंचाक्षरमन्त्रमाहात्म्यवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ ॥ सूत उवाच ॥ ॥ अथान्यदपि वक्ष्यामि माहात्म्यं त्रिपुरद्विषः ॥ श्रुतमात्रेण येनाशु च्छिद्यंते सर्वसंशयाः ॥ १ ॥ अतः परतरं नास्ति किंचित्पापविशोधनम् ॥ सर्वानंदकरं श्रीमत्सर्वकामार्थसाधनम् ॥ २ ॥ दीर्घायुर्विजयारोग्यभुक्तिमुक्तिफलप्रदम् ॥ यदनन्येन भावेन महेशाराधनं परम् ॥ ३ ॥ आर्द्राणामपि शुष्काणामल्पानां महतामपि ॥ एतदेव विनिर्दिष्टं प्रायश्चित्त[4]मथोत्तमम् ॥ ४ ॥ सर्वकालेऽप्यशेषाणामघानां क्षयकारणम् ॥ महामुनिविनिर्दिष्टैः प्रायश्चित्तैरथोत्तमैः ॥ ५ ॥ इदमेव परं श्रेयः सर्व[5]शास्त्रविनिश्चितम् ॥ यद्भक्त्या परमेशस्य पूजनं परमोदयम् ॥ ६ ॥ जानताऽजानता वापि येन केनापि हेतुना ॥ यत्किंचिदपि देवाय कृतं कर्म विमुक्तिदम् ॥ ७ ॥ माघे कृ[6]ष्णचतुर्दश्यामुपवासोऽतिदुर्लभः ॥ तत्रापि दुर्लभं मन्ये रात्रौ जागरणं नृणाम् ॥ ८ ॥ अतीव दुर्लभं मन्ये शिवलिंगस्य दर्शनम् ॥ सुदुर्लभतरं मन्ये पूजनं परमेशितुः ॥ ॥ ९ ॥ भवकोटिशतोत्पन्नपुण्यराशिविपाकतः ॥ लभ्यते वा पुनस्तत्र बिल्वपत्रार्चनं विभोः ॥ १० ॥ वर्षाणामयुतं येन स्नातं गंगासरिज्जले ॥ सकृद्बिल्वार्चनेनैव तत्फलं लभते नरः ॥ ११ ॥ [11]यानियानि तु पुण्यानि लीनानीह युगेयुगे ॥ माघेऽसितचतुर्दश्यां तानि तिष्ठंति कृत्स्नशः ॥ १२ ॥ एतामेव प्रशंसंति लोके ब्रह्मादयः सुराः ॥ मुनयश्च वशिष्ठाद्या माघेऽसितचतुर्दशीम् ॥ १३ ॥ अत्रोपवासः केनापि कृतः क्रतुशताधिकैः[12] ॥ रात्रौ जागरणं पुण्यं कल्पकोटितपोऽधिकम् ॥ १४ ॥ एकेन बिल्वपत्रेण शिवलिंगार्चनं कृतम् ॥ त्रैलोक्ये तस्य पुण्यस्य को वा सादृश्यमिच्छति ॥ १५ ॥ अत्रानुवर्ण्यते [13]गाथा पुण्या परमशोभना ॥ गोपनीयापि कारुण्याद्गौतमेन प्रकाशिता ॥ १६ ॥ इक्ष्वाकुवंशजः श्रीमान्राजा[14] परमधार्मिकः ॥ आसीन्मित्रसहोनाम श्रेष्ठः सर्वधनुर्भृताम् ॥ १७ ॥ स राजा सकलास्त्रज्ञः शास्त्रज्ञः श्रुतिपारगः ॥ वीरोऽत्यंतबलोत्साहो नित्योद्योगी दयानिधिः ॥ १८ ॥ पुण्यानामिव संघातस्तेजसामिव पंजरः ॥ आश्चर्याणामिव क्षेत्रं यस्य मूर्तिर्विराजते ॥ १९ ॥ हृदयं दययाक्रांतं श्रियाक्रांतं

१ निधिम्–इ० पा० । २ एष महानुभवः–इ० पा० । ३ कलौ–इ पा० । ४ सर्वाघानां विशोधनम् इ० पा० । ५ सर्वेषां च इ० पा० । ६ माघासितचतुर्दश्याम्–इ० पा० । ७ माघे–इ०पा० । ८ कृतम्–इ० पा० । ९ तत्र–इ० पा० । १० तत्र –इ० पा० । ११ यानिकानि च पापानि भिन्नानीह युगेयुगे ॥ माघासितचतुर्दश्यां तानि नश्यंति कृत्स्नशः ॥–इ० पा० । १२ क्रतुशतायते–इ० पा० । १३ पुण्यागाथा–इ० पा० । १४ आस्ते–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तद्वपुः ॥ चरणौ यस्य सामंतचूडामणिमरीचिभिः ॥ २० ॥ एकदा मृगयाकेलिलोलुपः स महीपतिः ॥ विवेश गह्वरं घोरं बलेन महतावृतः ॥
॥ २१ ॥ तत्र विव्याध विशिखैः शार्दूलान्गवयान्मृगान् ॥ रुरून्वराहान्महिषान्मृगेंद्रानपि भूरिशः ॥ २२ ॥ स रथी मृगयासक्तो गहनं दंशित
श्चरन् ॥ कमपि ज्वलनाकारं निजघान निशाचरम् ॥ २३ ॥ तस्यानुजः शुचाविष्टो दृष्ट्वा दूरे तिरोहितः ॥ भ्रातरं निहतं दृष्ट्वा चिंतयामास
चेतसा ॥ २४ ॥ नन्वेष राजा दुर्द्धर्षो देवानां रक्षसामपि ॥ छद्मनैव प्रजेतव्यो मम शत्रुर्न चान्यथा ॥ २५ ॥ इति व्यवसितः पापो राक्षसो
मनुजाकृतिः ॥ आससाद नृपश्रेष्ठमुत्पात इव मूर्तिमान् ॥ २६ ॥ तं विनम्राकृतिं दृष्ट्वा भृत्यतां कर्तुमागतम् ॥ चक्रे महानसाध्यक्षमं[1]ज्ञानात्स
महीपतिः ॥ २७ ॥ अथ तस्मिन्वने राजा किंचित्कालं विहृत्य सः ॥ निवृत्तो मृगयां हित्वा स्वपुरीं पुनराययौ ॥ २८ ॥ तस्य राजेंद्रमुख्यस्य
मदयंतीतिनामतः ॥ दमयन्ती नलस्येव विदिता वल्लभा सती ॥ २९ ॥ एतस्मिन्[2]समये राजा निमंत्र्य मुनिपुंगवम् ॥ वशिष्ठं गृहमानिन्ये
संप्राप्ते पितृवासरे ॥ ३० ॥ रक्षसा सूदरूपेण संमिश्रितनरामिषम् ॥ शाकामिषं पुरः क्षिप्तं दृष्ट्वा गुरुरथाब्रवीत् ॥ ३१ ॥ धिग्धिङ्नरामिषं राजं
स्त्वयैतच्छद्मकारिणा ॥ खलेनोपहृतं मेऽद्य [3]अंतो रक्षो भविष्यसि ॥ ३२ ॥ रक्षःकृतमविज्ञाय शप्त्वैवं स गुरुस्ततः ॥ पुनर्विमृश्य तं शापं चकार
द्वादशाब्दिकम् ॥ ३३ ॥ राजापि कोपितः प्राह यदिदं मे न चेष्टितम् ॥ न ज्ञातं च वृथा शप्तो गुरुं चैव शपाम्यहम् ॥ ३४ ॥ इत्यपोंजलिनादाय
गुरुं शप्तुं समुद्यतः ॥ पतित्वा पादयोस्तस्य मदयन्ती न्यवारयत् ॥३५॥ ततो निवृत्तः शापाच्च तस्या वचनगौरवात् ॥ तत्याज पादयोरंभः पादौ
कल्मषतां गतौ ॥३६॥ कल्मषांघ्रिरिति ख्यातस्ततः प्रभृति पार्थिवः ॥ बभूव गुरुशापेन राक्षसो वनगोचरः ॥३७॥ स बिभ्रद्राक्षसं रूपं घोरं कालां
तकोपमम् ॥ चखाद विविधाञ्जंतून्मानुषादीन्वनेचरः ॥३८॥ स कदाचिद्वने क्वापि रममाणौ किशोरकौ ॥ अपश्यदंतकाकारो नवोढौ मुनिदंपती ॥
॥३९॥ राक्षसो मानुषाहारः किशोरं मुनिनंदनम् ॥ जग्धुं जग्राह शापार्तो व्याघ्रो मृगशिशुं यथा ॥४०॥ [4]रक्षोगृहीतं भर्त्तारं दृष्ट्वा भीताथ तत्प्रिया ॥
उवाच करुणं बाला [5]क्रंदंती भृशवेपिता ॥ ४१ ॥ भोभो मामा कृथाः पापं सूर्यवंशयशोधर ॥ मदयंतीपतिस्त्वं हि राजेंद्रो न तु राक्षसः ॥४२॥ न
खाद मम भर्त्तारं प्राणात्प्रियतमं प्रभो ॥ आर्त्तानां शरणार्त्तानां त्वमेव हि यतो गतिः ॥ ४३ ॥ पापानामिव संघातैः किं मे दुष्टैर्जडासुभिः ॥ देहेन
चातिभारेण विना भर्त्रा महात्मना ॥ ४४ ॥ मलीमसेन पापेन पांचभौतेन किं सुखम् ॥ बालोयं वेदविच्छांतस्तपस्वी बहुशास्त्रवित् ॥ ४५ ॥

१ अजानन्–इ० पा० । २ अंतो–इ० पा० । ३ महान्–इ० पा० । ४ कक्षे–इ० पा० । ५ रुदन्ती–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतोऽस्य प्राणदानेन जगद्रक्षा त्वया कृता ॥ कृपां कुरु महाराज बालायां ब्राह्मणस्त्रियाम् ॥ ४६ ॥ अनाथकृपणार्तेषु सघृणाः खलु साधवः ॥ इत्थमभ्यर्थितः सोऽपि पुरुषादः स निर्घृणः ॥ ४७ ॥ चखाद शिर उत्कृत्य विप्रपुत्रं दुराशयः ॥ अथ साध्वी कृशा दीना विलप्य भृशदुःखिता ॥ ४८ ॥ आहृत्य भर्तुरस्थीनि चितां चक्रे तथोल्बणाम्[1] ॥ भर्तारमनुगच्छंती संविशंती हुताशनम् ॥ ४९ ॥ राजानं राक्षसाकारं शापाग्रेण जघान तम् ॥ रेरे पार्थिव पापात्मंस्त्वया मे भक्षितः पतिः ॥ ५० ॥ अतः पतिव्रतायास्त्वं शापं भुंक्ष्व यथोल्बणम् ॥ अद्यप्रभृति नारीषु यदा त्वमपि संगतः ॥ तदा मृतिस्तवेत्युक्त्वा विवेश ज्वलनं सती ॥ ५१ ॥ सोऽपि राजा गुरोः शापमुपभुज्य कृतावधिम् ॥ पुनः स्वरूपमादाय स्वगृहं मुदितो ययौ ॥ ५२ ॥ ज्ञात्वा विप्रसतीशापं तत्पत्नी रतिलालसम् ॥ पतिं निवारयामास वैधव्यादतिबिभ्यती ॥ ५३ ॥ अनपत्यः स निर्विण्णो[2] राज्यभोगेषु पार्थिवः ॥ विसृज्य सकलां लक्ष्मीं ययौ भूयोऽपि काननम् ॥ ५४ ॥ सूर्यवंशप्रतिष्ठित्यै वशिष्ठो मुनिसत्तमः ॥ तस्याग्मुत्पा दयामास मदयंत्यां सुतोत्तमम् ॥ ५५ ॥ विसृष्टराज्यो राजापि विचरन्सकलां महीम् ॥ आयांतीं पृष्ठतोऽपश्यत्पिशाचीं घोररूपिणीम् ॥ ५६ ॥ सा हि मूर्तिमती घोरा ब्रह्महत्या दुरत्यया ॥ यदासौ शापविभ्रष्टो मुनिपुत्रमभक्षयत् ॥ ५७ ॥ तेनात्मकर्मणा यांतीं ब्रह्महत्यां स पृष्ठतः ॥ बुबुधे मुनिवर्याणामुपदेशेन भूपतिः ॥ ५८ ॥ तस्या निर्वेशमन्विच्छन्राजा निर्विण्णमानसः ॥ नानाक्षेत्राणि तीर्थानि चचार बहुवत्सरम् ॥ ॥ ५९ ॥ यदा सर्वेषु तीर्थेषु स्नात्वापि च मुहुर्मुहुः ॥ न निवृत्ता ब्रह्महत्या मिथिलामाययौ तदा ॥ बाह्योद्यानगतस्तस्याश्चिंतया पर्यार्दितः[3] ॥ ६० ॥ ददर्श मुनिमायांतं गौतमं विमलाशयम् ॥ हुताशनमिवाशेषतपस्विजनसेवितम् ॥ ६१ ॥ विवस्वंतमिवात्यंतं घनदोषतमोनुदम् ॥ शशांकमिव निःशंकमवदातगुणोदयम् ॥ ६२ ॥ महेश्वरमिव श्रीमद्द्विजराजकलाधरम् ॥ शांतं शिष्यगणोपेतं तपसामेकभाजनम् ॥ ६३ ॥ उपसृत्य स राजेंद्रः प्रणनाम मुहुर्मुहुः ॥ गौतमोऽपि मुनिश्रेष्ठो राजानं रविवंशजम् ॥ ६४ ॥ अभिनंद्य मुनिः प्रीत्या सस्मितं[4] समभाषत ॥ ॥ ६५ ॥ ॥ गौतम उवाच ॥ ॥ कच्चित्ते कुशलं राजन्कच्चित्ते पदमव्ययम् ॥ ६६ ॥ कुशलिन्यः प्रजाः कच्चिदवरोधजनोपि वा ॥ किमर्थमिह संप्राप्तो विसृज्य सकलां श्रियम्[5] ॥ ६७ ॥ किं च ध्यायसि भो राजन्दीर्घमुष्णं च निःश्वसन् ॥ ६८ ॥ ॥ राजोवाच ॥ ॥ सर्वे कुशलिनो ब्रह्मन्वयं त्वदनुकंपया ॥ राज्ञामुत्तमवंश्यानां ब्रह्मायत्ता हि संपदः ॥ किं नु मां बाधते त्वेषा पिशाची घोररूपिणी ॥ ६९ ॥ अल

१ यथोचिताम्–इ०पा० । २ निर्वेदम्–इ०पा० । ३ परया वृतः–इ०पा० । ४ विस्मितः–इ०पा० । ५ महीम्–र०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिता मदपरैर्भर्त्सयंती पदेपदे ॥ यन्मया शापदग्धेन कृतमंहो दुरत्ययम् ॥ न शांतिर्जायते तस्य प्रायश्चित्तसहस्रकैः ॥ ७० ॥ इष्टाश्च विविधा यज्ञाः कोशसर्वस्वदक्षिणाः ॥ सरित्सरांसि स्नातानि यानि पूज्यानि भूतले ॥ निषेवितानि सर्वाणि क्षेत्राणि भ्रमता मया ॥ ७१ ॥ जप्तान्यखिलमंत्राणि ध्याताः सकलदेवताः ॥ महाव्रतानि चीर्णानि पर्णमूलफलाशिना ॥ ७२ ॥ तानि सर्वाणि कुर्वंति स्वस्थं मां न कदाचन ॥ अद्य मे जन्मसाफल्यं संप्राप्तमिव लक्ष्यते ॥ ७३ ॥ यतस्त्वद्दर्शनादेव ममात्मानंदभागभूत् ॥ अन्विच्छँल्लभते क्वापि वर्षपूगैर्मनोरथम् ॥ ७४ ॥ इत्येवं जनवादोऽपि संप्राप्तो मयि सत्यताम् ॥ आजन्मसंचितानां तु पुण्यानामुदयोदये ॥ ७५ ॥ यद्भवान्भवभीतानां त्राता नयनगोचरः ॥ कस्माद्देशादिहायातो भवान्भवभयापहः ॥ ७६ ॥ दूरभ्रमणविश्रांतं शंके त्वामिह चागतम् ॥ दृष्ट्वाश्चर्यमिवात्यर्थं मुदितोसि सुखश्रिया ॥ ७७ ॥ आनंदयसि मे चेतः प्रेम्णा संभाषणादिव ॥ अद्य मे तव पादाब्जशरणस्य कृतैनसः ॥ शांतिं कुरु महाभाग यनाहं सुखमाप्नुयाम् ॥७८॥ इति तेन समादिष्टो गौतमः करुणानिधिः ॥ समादिदेश घोराणामघानां साधु निष्कृतिम् ॥ ७९ ॥ ॥ गौतम उवाच ॥ ॥ साधु राजेंद्र धन्योऽसि महाघेभ्यो भयं त्यज ॥८०॥ शिवे त्रातारि भक्तानां क्व भयं शरणैषिणाम् ॥ शृणु राजन्महाभाग क्षेत्रमन्यत्प्रतिष्ठितम् ॥८१॥ महापातकसंहारि गोकर्णाख्यं मनोरमम् ॥ यत्र स्थितिर्न पापानां महद्भ्यो महतामपि ॥ ८२ ॥ स्मृतो ह्यशेषपापघ्नो यत्र संनिहितः शिवः ॥ यथा कैलासशिखरे यथा मंदारमूर्द्धनि ॥ ८३ ॥ निवासो निश्चितः शंभोस्तथा गोकर्णमण्डले ॥ नाग्निना न शशांकेन न ताराग्रहनायकैः ॥ ८४ ॥ तमो निस्तीर्यते सम्यग्यथा सवितृदर्शनात् ॥ तथैव नेतरैस्तीर्थैर्न च क्षेत्रैर्मनोरमैः ॥ ८५ ॥ सद्यः पापविशुद्धिः स्याद्यथा गोकर्णदर्शनात् ॥ अपि पापशतं कृत्वा ब्रह्महत्यादि मानवः ॥ ८६ ॥ सकृत्प्रविश्य गोकर्णं न बिभेति ह्यघात्क्वचित् ॥ तत्र सर्वे महात्मानस्तपसा शांतिमागताः ॥८७॥ इन्द्रोपेंद्रविरिंच्याद्यैः सेव्यते सिद्धिकांक्षिभिः ॥ तत्रैकेन दिनेनापि यत्कृतं व्रतमुत्तमम् ॥ ८८ ॥ तदन्यत्र ब्दलक्षण कृतं भवति तत्समम् ॥ यत्रेंद्रब्रह्मविष्णवादिदेवानां हितकाम्यया ॥ ८९ ॥ महाबलाभिधानेन देवः संनिहितः स्वयम् ॥ घोरेण तपसा लब्ध्वा रावणाख्येन रक्षसा ॥ ९० ॥ तल्लिंगं स्थापयामास गोकर्णे गणनायकः ॥ इन्द्रो ब्रह्मा मुकुन्दश्च विश्वेदेवा मरुद्गणाः ॥ ९१ ॥ आदित्या वसवो दस्रौ शशांकश्च दिवाकरः ॥ एते विमानगतयो

१ स्नातानि–इ० पा० । २ तीर्थानि सर्वाणि–इ० पा० । ३ धूतैनसः–इ० पा० । ४ सर्वपापविशुद्धिः–इ० पा० । ५ यमात्–इ० पा० । ६ पूर्वे–इ० पा० । ७ सिद्धिम्–इ० पा० । ८ तपस्तपति संभृतः–इ० पा० । ९ प्रियकाम्यया–इ० पा० । १० रुद्रा–इ० पा० । ११ सतारकः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवास्ते सह पार्षदैः ॥ ९२ ॥ पूर्वद्वारं[1] निषेवन्ते देवदेवस्य शूलिनः ॥ योन्यो मृत्युः स्वयं साक्षाच्चित्रगुप्तश्च पावकः ॥ ९३ ॥ पितृभिः सह रुद्रैश्च दक्षिणद्वारमाश्रितः ॥ वरुणः सरितां नाथो गंगादिसरितां गणैः ॥ ९४ ॥ आसेवते महादेवं पश्चिमद्वारमाश्रितः ॥ तथा वायुः कुबेरश्च देवेशी भद्रकर्णिका ॥ ९५ ॥ मातृभिश्चंडिकाद्याभिरुत्तरद्वारमाश्रिता ॥ विश्वावसुश्चित्ररथश्चित्रसेनो महाबलः ॥ ९६ ॥ सह गन्धर्ववर्गैश्च पूजयंति महाबलम् ॥ रंभा घृताची मेना च पूर्वचित्तिस्तिलोत्तमा ॥ ९७ ॥ नृत्यंति पुरतः शम्भोरुर्वश्याद्याः सुरस्त्रियः ॥ वशिष्ठः कश्यपः कण्वो विश्वामित्रो महातपाः ॥ ९८ ॥ जैमिनिश्च भरद्वाजो जाबालिः क्रतुरंगिराः ॥ एते वयं च राजेंद्र सर्वे ब्रह्मर्षयोऽमलाः ॥ ९९ ॥ देवं महाबलं भक्त्या समंतात्पर्युपास्महे ॥ मरीचिना सहात्रिश्च दक्षाद्याश्च मुनीश्वराः ॥ १०० ॥ सनकाद्या महात्मान उपविष्टा उपासते ॥ तथैव मुनयः साध्या अजिनांबरधारिणः ॥ १ ॥ दंडिनो व्रतमुण्डाश्च स्नातका ब्रह्मचारिणः ॥ त्वगस्थिमात्रावयवास्तपसा दग्धकिल्बिषाः ॥ २ ॥ सेवन्ते परया भक्त्या देवदेवं पिनाकिनम् ॥ तथा देवाः सगन्धर्वाः पितरः सिद्धचारणाः ॥ ३ ॥ विद्याधराः किंपुरुषाः किन्नरा गुह्यकाः खगाः ॥ नागाः पिशाचा वेतालादैतेयाश्च महाबलाः ॥ ४ ॥ नानाविभवसंपन्ना नानाभूषणवाहनाः ॥ विमानैः सूर्यसंकाशैरग्निवर्णैः शशिप्रभैः ॥ ५ ॥ विद्युत्पुंजनिभैरन्यैः समंतात्परिवारितम् ॥ प्रस्तुवंति प्रगायंति पठंति प्रणमंति च ॥ ६ ॥ प्रनृत्यंति प्रहृष्यंति गोकर्णे पृथिवीपते ॥ लभंतेऽभीप्सितान्कामान्रमंते च यथासुखम् ॥ ७ ॥ गोकर्णसदृशं क्षेत्रं नास्ति ब्रह्मांडगोलके[2] ॥ तत्र घोरं तपस्तप्तमगस्त्येन महात्मना ॥ ८ ॥ तथा सनत्कुमारेण प्रियव्रतसुतैरपि ॥ अग्निना देववर्येण कन्दर्पेण च पार्थिव ॥ ९ ॥ तथा देव्या भद्रकाल्या शिशुमारेण धीमता ॥ दुर्मुखेन फणींद्रेण मणिनागाह्वयेन च ॥ ११० ॥ इलावर्तादिभिर्नागैर्गरुडेन[3] बलीयसा ॥ रक्षसा रावणेनापि कुम्भकर्णाह्वयेन तु ॥ ११ ॥ विभीषणेन पुण्येन तपस्तप्तं महात्मना ॥ एते चान्ये च गीर्वाणाः सिद्धदानवमानवाः ॥ १२ ॥ गोकर्णे देवदेवेशं शिवमाराध्य भक्तितः ॥ स्वनामांकानि लिंगानि स्थापयित्वा सहस्रशः ॥ १३ ॥ लेभिरे परमां सिद्धिं तथा तीर्थानि चक्रिरे ॥ अत्र स्थानानि सर्वेषां देवानां संति पार्थिव ॥ १४ ॥ विष्णोश्च देवदेवस्य ब्रह्मणः परमेष्ठिनः ॥ कार्त्तिकेयस्य वीरस्य गजवक्त्रस्य चानघ ॥ १५ ॥ धर्मस्य क्षेत्रपालस्य दुर्गायाश्च महामते ॥ गोकर्णे शिवलिंगानि विद्यंते कोटिकोटिशः ॥ ॥ १६ ॥ असंख्यातानि तीर्थानि तिष्ठंति च पदेपदे ॥ बहुनात्र किमुक्तेन गोकर्णस्थानि पार्थिव ॥ १७ ॥ सर्वाण्यश्मानि लिंगानि तीर्थान्यंभांसि

१ तस्यैव प्रीतिकारणात्–इ० पा० । २ नास्ति जगत्त्रये–इ० पा० । ३ कालावर्तादिभिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वशः ॥ गोकर्णे शिवलिंगानां तीर्थानामपि भूरिशः ॥ १८ ॥ गीयते महिमा राजन्पुराणेषु महर्षिभिः ॥ गोकर्णे कोटितीर्थं च तीर्थानां मुख्यतां गतम् ॥ १९ ॥ सर्वेषां शिवलिंगानां सार्वभौमो महाबलः ॥ कृते महाबलः श्वेतस्त्रेतायामतिलोहितः ॥ १२० ॥ द्वापरे पीत वर्णश्च कलौ श्यामो भविष्यति ॥ आक्रांतं सप्तपातालं कुर्वन्नपि महाबलः ॥ २१ ॥ प्राप्ते कलियुगे घोरे मृदुतामुपयास्यति ॥ पश्चिमांबुधितीरस्थं गोकर्णक्षेत्रमुत्तमम् ॥ २२ ॥ ब्रह्महत्यादिपापानि दहतीति किमद्भुतम् ॥ ये चात्र ब्रह्महंतारो ये च भूतद्रुहः शठाः ॥ २३ ॥ ये सर्वगुणहीनाश्च परदाररताश्च ये ॥ ये दुर्वृत्ता दुराचारा दुःशीलाः कृपणाश्च ये ॥ २४ ॥ लुब्धाः क्रूराः खला मूढाः स्ते नाश्चैवातिकामिनः ॥ ते सर्वे प्राप्य गोकर्णं स्नात्वा तीर्थजलेषु च ॥ १२५ ॥ देवं महाबलं दृष्ट्वा प्रयाताः शांकरं पदम् ॥ तत्र पुण्यासु तिथिषु पुण्य र्क्षे पुण्यवासरे ॥ २६ ॥ येऽर्चयंति महेशानं ते रुद्राः स्युर्न संशयः ॥ यदा कदाचिद्गोकर्णं यो वा को वापि मानवः ॥ २७ ॥ प्रविश्य पूजयेदीशं स गच्छेद्ब्रह्मणः पदम् ॥ रवींदुसौम्यवारेषु यदा दर्शो भविष्यति ॥ २८ ॥ तदा जलनिधौ स्नानं दानं च पितृतर्पणम् ॥ शिवपूजा जपो होमो व्रतचर्या द्विजार्चनम् ॥ २९ ॥ यत्किंचिद्वा कृतं कर्म तदनंतफलप्रदम् ॥ व्यतीपातादियोगेषु रविसंक्रमणेषु च ॥ १३० ॥ महाप्रदोषवेलासु शिव पूजा विमुक्तिदा ॥ अथैकां ते प्रवक्ष्यामि तिथिं पार्थिव मुक्तिदाम् ॥ ३१ ॥ यस्यां किल महाव्याधो लेभे शंभोः परं पदम् ॥ माघमासे महापुण्या या सा कृष्णचतुर्दशी ॥ ३२ ॥ शिवलिंगं बिल्वपत्रं दुर्लभं हि चतुष्टयम् ॥ अहो बलवती माया यया शैवी महातिथिः ॥ ३३ ॥ नोपोष्यते जनै र्मूढैर्महामूकैरिव त्रयी ॥ उपवासो जागरणं सन्निधिः परमेशितुः ॥ ३४ ॥ गोकर्णं शिवलोकस्य नृणां सोपानपद्धतिः ॥ शृणु राजन्नहमपि गोकर्णा दधुनागतः ॥ १३५ ॥ उपास्यैनां शिवतिथिं विलोक्य च महोत्सवम् ॥ अस्यां शिवतिथौ सर्वे महोत्सवदिदृक्षवः ॥ ३६ ॥ आगताः सर्वदेशेभ्यश्चा तुर्वर्ण्या महाजनाः ॥ स्त्रियो वृद्धाश्च बालाश्च चतुराश्रमवासिनः ॥ ३७ ॥ आगत्य दृष्ट्वा देवेशं लेभिरे कृतकृत्यताम् ॥ अथाहमप्यमी शिष्या ऋषयश्च तथाऽपरे ॥ ३८ ॥ राजर्षयश्च राजेंद्र सनकाद्याः सुरर्षयः ॥ स्नात्वा सर्वेषु तीर्थेषु समुपास्य महाबलम् ॥ ३९ ॥ लब्ध्वा च जन्मसाफल्यं प्रयाताः सर्वतोदिशम् ॥ अमुनाद्य नरेंद्रेण जनकेन यियक्षुणा ॥ १४० ॥ निमंत्रितोऽहं संप्राप्तो गोकर्णाच्छिवमंदिरात् ॥ प्रत्यागमं किमप्यंग

१ वर्ण्यते–इ० पा० । २ कुहरोऽपि–इ० पा० । ३ महात्मानम्–इ० पा० । ४ स्नात्वा कृत्वा च–इ० पा० । ५ चतुर्थाश्रमवासिनः–इ० पा० । ६ आराध्य–इ० पा० । ७ अपुत्रेग–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वाश्चर्यमहं पथि ॥ महानंदेन मनसा कृतार्थोऽस्मि महीपते ॥ १४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तर खंडे गोकर्णमहिमानुवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ राजोवाच ॥ ॥ किं दृष्टं भवता ब्रह्मन्नाश्चर्यं पथि कुत्र वा ॥ तन्ममाख्याहि येनाहं कृतकृत्यत्वमाप्नुयाम् ॥ १ ॥ ॥ गौतम उवाच ॥ ॥ गोकर्णादहमागच्छन्क्कापि देशे विशांपते ॥ जाते मध्याह्नसमये लब्धवान्विमलं सरः ॥ २ ॥ तत्रोपस्पृश्य सलिलं विनीय च पथिश्रमम् ॥ सुस्निग्धशीतलच्छायं न्यग्रोधं समुपाश्रयम् ॥ ३ ॥ अथाविदूरे चांडालीं वृद्धामंधां कृशाकृतिम् ॥ शुष्यन्मुखीं निराहारां बहुरोगनिपीडिताम् ॥ ४ ॥ कुष्ठव्रणपरीतांगीमुद्यत्कृमिकुलाकुलाम् ॥ पूयशोणितसंसक्तजर्जरत्पटलसत्कटीम् ॥ ५ ॥ महायक्ष्मगलस्थेन कंठसंरोधविह्वलाम् ॥ विनष्टदंतामव्यक्तां विलुठंतीं मुहुर्मुहुः ॥ ६ ॥ चंडार्ककिरणस्पृष्टखरोष्णरजसाप्लुताम् ॥ विण्मूत्रपूयदिग्धांगीमसृग्गंधदुरासदाम् ॥ ७ ॥ कफरोगबहुश्वासश्लथन्नाडीबहुव्यथाम् ॥ विध्वस्तकेशावयवामपश्यं मरणोन्मुखीम् ॥ ८ ॥ तादृग्व्यथां च तां वीक्ष्य कृपयाहं परिप्लुतः ॥ प्रतीक्षन्मरणं तस्याः क्षणं तत्रैव संस्थितः ॥ ९ ॥ अथांतरिक्षपदवीं सिंचंतमिव रश्मिभिः ॥ दिव्यं विमानमानीतमद्राक्षं शिवकिंकरैः ॥ १० ॥ तस्मिन्नर्वींदुवह्नीनां तेजसामिव पंजरे ॥ विमाने सूर्यसंकाशानपश्यं शिवकिंकरान् ॥ ११ ॥ ते वै त्रिशूलखट्वांगटंकचर्मासिपाणयः ॥ चंद्रार्धभूषणाः सांद्रचंद्रकुंदोरुवर्चसः ॥ १२ ॥ किरीटकुंडलभ्राजन्महाहिवलयोज्ज्वलाः ॥ शिवानुगा मया दृष्टाश्चत्वारः शुभलक्षणाः ॥ १३ ॥ तानापतत आलोक्य विमानस्थान्सुविस्मितः ॥ उपसृत्यांतिके वेगादपृच्छं गगने स्थितान् ॥ १४ ॥ नमोनमो वस्त्रिदशोत्तमेभ्यस्त्रिलोचनश्रीचरणानुगेभ्यः ॥ त्रिलोकरक्षाविधिमावहद्भ्यस्त्रिशूलचर्मासिगदाधरेभ्यः ॥ १५ ॥ विदिता हि मया यूयं महेश्वरपदानुगाः ॥ इयं वो लोकरक्षार्था गतिराहो विनोदजा ॥ १६ ॥ उत सर्वजनाघौघविजयाय कृतोद्यमाः ॥ ब्रूत कारुण्यतो मह्यं यस्माद्यूयमिहागताः ॥ १७ ॥ ॥ शिवदूता ऊचुः ॥ ॥ एषाग्रे दृश्यते वृद्धा चांडाली मरणोन्मुखी ॥ एतामानेतुमायाताः संदिष्टाः प्रभुणा वयम् ॥ १८ ॥ इत्युक्ते शिवदूतैस्तैरपृच्छं पुनरप्यहम् ॥ विस्मयाविष्टचित्तस्तान्कृतांजलिरवस्थितः ॥ १९ ॥ अहो पापीयसी घोरा चांडाली कथमर्हति ॥ दिव्यं विमानमारोढुं शुनीवाध्वरमंडलम् ॥ २० ॥ आजन्मतोऽशुचिप्रायां पापां पापानुगामिनीम् ॥ कथमेनां दुराचारां शिवलोकं निनीषथ ॥ २१ ॥ अस्या नास्ति शिवज्ञानं नास्ति घोरतरं तपः ॥ सत्यं नास्ति

१ जातानंदेन–इ० पा० । २ परिश्रमम्–इ० पा० । ३ क्षरत्पट–इ० पा० । ४ महायक्ष्मगलत्वेन–इ० पा० । ५ रजसि–इ० पा० । ६ पर्वते–इ० पा० । ७ शिवपुरुषा ऊचुः-इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दया नास्ति कथमेनां निनीषथ ॥ २२ ॥ पशुमांसकृताहारां वारुणीपूरितोदराम् ॥ जीवहिंसारतां नित्यं कथमेनां निनीषथ ॥ २३ ॥ न च पंचाक्षरी जप्ता न कृतं शि[1]वपूजनम् ॥ न ध्यातो भगवाञ्छंभुः कथमेनां निनीषथ ॥ २४ ॥ नोपोषिता शिवतिथिर्न कृतं शिवपूजनम् ॥ भूतसौहृदं न जानाति न च बिल्वशिवार्पणम् ॥ नेष्टापूर्तादिकं वापि कथमेनां निनीषथ ॥ २५ ॥ न च स्नातानि तीर्थानि न दानानि कृतानि च ॥ न च व्रतानि चीर्णानि कथमेनां निनीषथ ॥ २६ ॥ ई[2]क्षणे परिहर्त्तव्या किमु संभाषणादिषु ॥ सत्संगरहितां चंडां कथमेनां निनीषथ ॥ २७ ॥ जन्मांतरार्जितं किंचिदस्याः सुकृतमस्ति वा ॥ तत्कथं कुष्ठरोगे[3]ण कृमिभिः परिभूयते ॥ २८ ॥ अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणाम् ॥ पापात्मानोऽपि नी[4]यंते कारुण्यात्परमं पदम् ॥ २९ ॥ इत्युक्तास्ते मया दूता देवदेवस्य शूलिनः ॥ प्रत्यूचुर्मामथ प्रीत्या सर्वसंशयभेदिनः ॥ ३० ॥ ॥ शिवदूता ऊचुः ॥ ॥ ब्रह्मन्सुमहदाश्चर्यं शृणु कौतूहलं य[5]दि ॥ इमामुद्दिश्य चांडालीं यदुक्तं भवताधुना ॥ ३१ ॥ आसीदियं पूर्वभवे काचिद्ब्राह्मणकन्यका ॥ सुमित्रानाम संपूर्णसोमबिम्बसमानना ॥ ३२ ॥ उत्फुल्लमल्लिकादामसुकुमारांगलक्षणा ॥ कैकेयद्विजमुख्यस्य कस्यचित्तनया सती ॥ ३३ ॥ तां सर्वलक्षणोपेतां रतेर्मू[6]र्तिमिवापराम् ॥ वर्द्धमानां पितुर्गेहे वीक्ष्यासन्विस्मिता जनाः ॥ ३४ ॥ दिनेदिने वर्धमाना बंधुभिर्लालिता भृशम् ॥ सा शनैर्यौवनं भेजे स्मरस्येव महाधनुः ॥ ३५ ॥ अथ सा बंधुवर्गैश्च समेतेन कुमारिका ॥ पित्रा प्रदत्ता कस्मैचिद्विधिना द्विजसूनवे ॥ ३६ ॥ सा भर्त्तारमनुप्राप्य नवयौवनशालिनी ॥ कंचित्कालं शुभाचारा रेमे बंधुभिरावृता ॥ ३७ ॥ अथ कालवशात्तस्याः पतिस्तीव्ररुजार्दितः ॥ रूपयौवनकांतोपि पंचत्वमगमन्मुने ॥ ३८ ॥ मृते भर्त्तरि दुःखेन विदग्धहृदया सती ॥ उवास कतिचिन्मासान्सुशीला विजितेंद्रिया ॥ ३९ ॥ अथ यौवनभारेण जृंभमाणेन नित्यशः ॥ बभूव हृदयं तस्याः कंद[7]र्पपरिकंपितम् ॥ ४० ॥ सा गुप्ता बन्धुवर्गेण शासितापि महोत्तमैः ॥ न शशाक मनो रोद्धुं मदनाकृष्टमंगना ॥ ४१ ॥ सा तीव्रमन्मथाविष्टा रूपयौवनशालिनी ॥ विधवापि विशेषेण जारमार्गरताभवत् ॥ ४२ ॥ न ज्ञाता केनचिदपि जारिणीति विचक्षणा ॥ जुगूहात्मदुराचारं कंचित्कालमसत्तमा ॥ ४३ ॥ तां दोहदसमाक्रांतां घननीलमुखस्तनीम् ॥ कालेन बंधुवर्गोपि बुबोध विटदूषिताम् ॥ ४४ ॥ इति भीतो महाक्लेशाच्चिंतां लेभे दुरत्ययाम् ॥ स्त्रियः कामेन नश्यंति ब्राह्मणा हीनसे[8]वया ॥ ४५ ॥ राजानो ब्रह्मदंडेन यतयो भोगसंग्रहात् ॥ लीढं शुना तथैवान्नं सुरया वार्पितं पयः ॥ ४६ ॥ रूपं कुष्ठरुजाविष्टं कुलं नश्यति कुस्त्रिया ॥

१ लिंगपूजनम्–इ० पा० । २ दर्शने–इ०पा० । ३ कुष्ठयक्ष्मणा–इ० पा० । ४ विन्दन्ते–इ० पा० । ५ महत्–इ० पा० । ६ पुनः–इ० पा० । ७ कंदर्पज्वरपीडितम्–इ०पा० । ८ नीचसेवया–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सर्वे समालोच्य समेताः पतिसोदराः ॥ ४७ ॥ तत्यजुर्गोत्रतो दूरं गृहीत्वा सकचग्रहम् ॥ सघटोत्सर्गमुत्सृष्टा सा नारी सर्वबन्धुभिः ॥ ४८ ॥
विचरंती च शूद्रेण रममाणा रतिप्रिया ॥ सा ययौ स्त्री बहिर्ग्रामाद्दृष्टा शूद्रेण केनचित् ॥ ४९ ॥ स तां दृष्ट्वा वरारोहां पीनोन्नतपयोधराम् ॥ गृहं
निनाय साम्ना च विधवां शूद्रनायकः ॥ सा नारी तस्य महिषी भूत्वा तेन दिवानिशम् ॥ ५० ॥ रममाणा क्वचिद्देशे न्यवसद्गृहवल्लभा ॥ तत्र सा
पिशिताहारा नित्यमापीतवारुणी ॥ ५१ ॥ लेभे सुतं च शूद्रेण रममाणा रतिप्रिया ॥ कदाचिद्भर्त्तरि क्वापि याते पीतसुरा तु सा ॥ ५२ ॥ इयेष
पिशिताहारं मदिरामदविह्वला ॥ अथ मेषेषु बद्धेषु गोभिः सह बहिर्व्रजे ॥ ५३ ॥ ययौ कृपाणमादाय सा तमोंधे निशामुखे ॥ अविमृश्य
मदावेशान्मेषबुद्ध्यामिषप्रिया ॥ ५४ ॥ एकं जघान गोवत्सं क्रोशंतं निशि दुर्भगा ॥ निहतं गृहमानीय ज्ञात्वा गोवत्समंगना ॥ ५५ ॥
भीता शिवशिवेत्याह केनचित्पुण्यकर्मणा ॥ सा मुहूर्त्तमिति ध्यात्वा पिशितासवलालसा ॥ ५६ ॥ छित्त्वा तमेव गोवत्सं चकाराहारमी
प्सितम् ॥ गोवत्सार्धशरीरेण कृताहाराथ सा पुनः ॥ ५७ ॥ तदर्धदेहं निक्षिप्य बहिश्चुक्रोश कैतवात् ॥ अहो व्याघ्रेण भग्नोऽयं जग्धो
गोवत्सको व्रजे ॥ ५८ ॥ इति तस्याः समाक्रंदः सर्वगेहेषु शुश्रुवे ॥ अथ सर्वे शूद्रजनाः समागम्यांतिके स्थिताः ॥ ५९ ॥ हतं गोवत्समालोक्य
व्याघ्रेणेति शुचं ययुः ॥ गतेषु तेषु सर्वेषु व्युष्टायां च ततो निशि ॥ ६० ॥ तद्भर्ता गृहमागत्य दृष्टवान्गृहविड्वरम् ॥ एवं बहुतिथे
काले गते सा शूद्रवल्लभा ॥ ६१ ॥ कालस्य वशमापन्ना जगाम यममंदिरम् ॥ यमोपि धर्ममालोक्य तस्याः कर्म च पौर्विकम् ॥ ६२ ॥
निर्वर्त्य निरयावासाच्चक्रे चंडालजातिकाम् ॥ सापि भ्रष्टा यमपुराच्चांडालीगर्भमाश्रिता ॥ ६३ ॥ ततो बभूव जात्यंधा प्रशांतांगारमेचका ॥
तत्पिता कोपि चांडालो देशे कुत्रचिदास्थितः ॥ ६४ ॥ तां तादृशीमपि सुतां कृपया पर्यपोषयत् ॥ अभोज्येन कदन्नेन शुना लीढेन पूतिना
॥ ६५ ॥ अपेयैश्च रसैर्मात्रा पोषिता सा दिनेदिने ॥ जात्यंधा सापि कालेन बाल्ये कुष्ठरुजार्दिता ॥ ६६ ॥ ऊढा न केनचिद्वापि चांडालेना
तिदुर्भगा ॥ अतीतबाल्ये सा काले विध्वस्तपितृमातृका ॥ ६७ ॥ दुर्भगेति परित्यक्ता बंधुभिश्च सहोदरैः ॥ ततः क्षुधार्दिता दीना शोचन्ती
विगतेक्षणा ॥ ६८ ॥ गृहीतयष्टिः कृच्छ्रेण संचचाल सलोष्टिका ॥ पत्तनेष्वपि सर्वेषु याचमाना दिनेदिने ॥ ६९ ॥ चांडालोच्छिष्टपिंडेन जठरा
ग्निमतर्पयत् ॥ एवं कृच्छ्रेण महता नीत्वा सुबहुलं वयः ॥ ७० ॥ जरया ग्रस्तसर्वांगी दुःखमाप दुरत्ययम् ॥ निरन्नपानवसना सा कदाचि

१ धनवान्–इ० पा० । २ दुष्टेन–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्महाजनान् ॥ ७१ ॥ आयास्यंत्यां शिवतिथौ गच्छतो बुबुधेऽध्वगान् ॥ तस्यां तु देवयात्रायां देशदेशांतयायिनाम् ॥ ७२ ॥ विप्राणां साग्निहोत्रा
णां सस्त्रीकाणां महात्मनाम् ॥ राज्ञां च सावरोधानां सहस्तिरथवाजिनाम् ॥ ७३ ॥ सपरीवारघोषाणां यानच्छत्रादिशोभिनाम् ॥ तथान्येषां च
विट्शूद्रसंकीर्णानां सहस्रशः ॥ ७४ ॥ हसतां गायतां क्वापि नृत्यतामथ धावताम् ॥ जिघ्रतां पिबतां कामाद्गच्छतां प्रतिगर्जताम् ॥ ७५ ॥
संप्रयाणे मनुष्याणां संभ्रमः सुमहानभूत् ॥ इति सर्वेषु गच्छत्सु गोकर्णं शिवमंदिरम् ॥ ७६ ॥ पश्यंति दिविजाः सर्वे, विमानस्थाः सकौतुकाः ॥
अथेयमपि चांडाली वसनाशनतृष्णया ॥ ७७ ॥ महाजनान्याचयितुं चचाल च शनैःशनैः ॥ करावलंबेनान्यस्याः प्राग्जन्मार्जितकर्मणा ॥ दिनैः
कतिपयैर्याती गोकर्णं क्षेत्रमाययौ ॥ ७८ ॥ ततो विदूरे मार्गस्य निषण्णा विवृतांजलिः ॥ याचमाना मुहुः पांथान्बभाषे कृपणं वचः ॥ ७९ ॥
प्राग्जन्मार्जितपापौघैः पीडितायाश्चिरं मम ॥ आहारमात्रदानेन दयां कुरुत भो जनाः ॥ ८० ॥ त्रातारः परमार्तानां दातारः परमाशिषाम् ॥
कर्तारो बहुपुण्यानां दयां कुरुत भो जनाः ॥ ८१ ॥ वसनाशनहीनायां स्वपितायां महीतले ॥ महापांसुनिमग्नायां दयां कुरुत भो जनाः ॥ ८२ ॥
महाशीतातपार्त्तायां पीडितायां महारुजा ॥ अन्धायां मयि वृद्धायां दयां कुरुत भो जनाः ॥ ८३ ॥ चिरोपवासदीप्तायां जठराग्निविवर्धनैः ॥
संदह्यमानसर्वांग्यां दयां कुरुत भो जनाः ॥ ८४ ॥ अनुपार्जितपुण्यायां जन्मांतरशतेष्वपि ॥ पापायां मंदभाग्यायां दयां कुरुत भो जनाः ॥८५॥
एवमभ्यर्थयंत्यास्तु चांडाल्याः प्रसृतेंऽजलौ ॥ एकः पुण्यतमः पांथः प्राक्षिपद्बिल्वमंजरीम् ॥ ८६ ॥ तामंचलौ निपतितां सा विमृश्य पुनः पुनः ॥
अभक्ष्येत्येव मत्वाथ दूरे प्राक्षिपदातुरा ॥ ८७ ॥ तस्याः करेण निर्मुक्ता रात्रौ सा बिल्वमंजरी ॥ पपात कस्यचिद्दिष्ट्या शिवलिंगस्य
मस्तके ॥ ८८ ॥ सैवं शिवचतुर्दश्यां रात्रौ पांथजनान्मुहुः ॥ याचमानापि यत्किंचिन्न लेभे दैवयोगतः ॥ ८९ ॥ तत्रोषितानया रात्रिर्भद्रका
ल्यास्तु पृष्ठतः ॥ किंचिदुत्तरतः स्थानं तदर्धेनातिदूरतः ॥ ९० ॥ ततः प्रभाते भ्रष्टाशा शोकेन महताप्लुता ॥ शनैर्निववृते दीना स्वदेशायैव
केवला ॥ ९१ ॥ श्रांता चिरोपवासेन निपतन्ती पदेपदे ॥ क्रंदंती बहुरोगार्ता वेपमाना भृशातुरा ॥ ९२ ॥ दह्यमानार्कतापेन नग्नदेहा सय
ष्टिका ॥ अतीत्यैतावतीं भूमिं निपपात विचेतना ॥९३॥ अथ विश्वेश्वरः शंभुः करुणामृतवारिधिः ॥ एनामानयतेत्यस्मान्युयुजे सविमानकान् ॥
॥ ९४ ॥ एषा प्रवृत्तिश्चांडाल्यास्तवेह परिकीर्त्तिता ॥ तथा संदर्शिता शंभोः कृपणेषु कृपालुता ॥ ९५ ॥ कर्मणः परिपाकोत्थां गतिं पश्य महा

१ नापि—इ०पा० । २ पांथसंस्थान्—इ० पा० । ३ भ्रष्टा सा—इ०पा० । ४ कृशातुरा--क्षुधातुरा--इति च पा० । ५ आत्तयष्टिका—इ० पा० । ६ आदिदेश विमानगान्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मते ॥ अधमापि परं स्थानमारोहति निरामयम् ॥ ९६ ॥ यदेतया पूर्वभवे नान्नदानादिकं कृतम् ॥ क्षुत्पिपासादिभिः क्लेशैस्तस्मादिह निपीड्यते ॥ ९७ ॥ यदेषा मदवेगांधा चक्रे पापं महोल्बणम् ॥ कर्मणा तेन जात्यंधा बभूवात्रैव जन्मनि ॥ ९८ ॥ अपि विज्ञाय गोवत्सं यदेषाऽभक्षयत्पुरा ॥ कर्मणा तेन चांडाली बभूवेह विगर्हिता ॥ ९९ ॥ यदेषा[1]र्यपथं हित्वा जारमार्गरता पुरा ॥ तेन पापेन केनापि दुर्वृत्ता दुर्भगापि वा ॥ ॥ १०० ॥ यदाश्लिष्य मदाविष्टा जारेण विधवा पुरा ॥ तेन पापेन महता बहुकुष्ठव्रणान्विता ॥ १०१ ॥ कामार्त्ता यदियं स्वैरं शूद्रेण रमिता पुरा ॥ महासृक्पूयकृमिभिः पीड्यते तेन पाप्मना ॥ २ ॥ सुव्रतानि न चीर्णानि नेष्टापूर्तादिकं कृतम् ॥ सर्वभोगविहीनेयं दूयते तेन पाप्मना ॥ ॥ ३ ॥ यदेतया पूर्वभवे सुरा पीता विमूढया ॥ महायक्ष्मार्तिहृच्छूलैः पीड्यते तेन पाप्मना ॥ ४ ॥ अत्रैव सर्वमर्त्येषु पापचिह्नानि कृत्स्नशः ॥ लक्ष्यंते मुनिशार्दूल सविवेकैर्महात्मभिः ॥ ५ ॥ अत्र ये बहुरोगार्त्ता ये पुत्रधनवर्जिताः ॥ ६ ॥ ये च दुर्लक्षणक्लिष्टा याचका विगतह्रियः ॥ वासोन्नपानशयनभूषणाभ्यंजनादिभिः ॥ ७ ॥ हीना विरू[2]पा निर्विद्या विकलांगाः कुभोजनाः ॥ ये दुर्भाग्या निंदिताश्च ये चान्ये परसेवकाः ॥ ॥ ८ ॥ एते पूर्वभवे सर्वे सुमहत्पापकारिणः ॥ एवं विमृश्य यत्नेन दृष्ट्वा लोकजनस्थितिम् ॥ ९ ॥ बुधो न कुरुते पापं यदि कुर्यात्स आत्महा ॥ देहोऽयं मानुषो जंतोर्बहुकर्मैकभाजनम् ॥ ११० ॥ सदा सत्कर्म सेवेत दुष्कर्म सततं त्यजेत् ॥ पुण्यं सुखार्थी कुर्वीत दुःखार्थी पापमाचरेत् ॥ ॥ ११ ॥ द्वयोरेकतरे लोके गृहीते कुशलो जनः ॥ इमं मानुषमाश्रित्य देहं परमदुर्लभम् ॥ १२ ॥ य आत्महितवान्कश्चिद्देवमेकं समाश्रयेत् ॥ अथ पापानि सर्वाणि कुर्वन्नपि सदा नरः ॥ १३ ॥ शिवमेकमतिर्ध्यायेत्स संतरति पातकम् ॥ मृता पूर्वभवे त्वेषा यदा प्राप्ता यमालये ॥ १४ ॥ तदा वितर्कः सुमहानासीद्यमसभासदाम् ॥ यद्यपि ब्राह्मणी त्वेषा सत्कुलाचारदूषिता ॥ १५ ॥ अतोऽस्माभिरिहानीता निरयं यातु वा न वा ॥ अनया साधितो बाल्ये पुण्यलेशोऽस्ति वा न वा ॥ १६ ॥ अथापि सुविमृश्यैवं धार्यो दंडोऽत्र नान्यथा ॥ बहुजन्मसहस्रेषु कृतपुण्यविपाकतः ॥ ॥ १७ ॥ नृणां ब्रह्मकुले जन्म लभ्यते हि कथंचन ॥ अतोस्याः पूर्वपूर्वेषु कृताघं नास्ति जन्मसु ॥१८॥ अन्यथा सत्कुले जन्म कथमेषा प्रपद्यते॥ अत्रैव जन्मन्यनया कृतमंहो दुरत्ययम् ॥ १९ ॥ अ[3]थापि नरकावासं प्रायशो नेयमर्हति ॥ किं तु गोवत्सकं हत्वा विमृश्यागतसाध्वसा ॥ १२० ॥ एषा शिवशिवेत्याह प्रा[4]ग्जन्मार्जितकर्मणा ॥ यदेषा पापविच्छित्त्यै सकृदप्युरुमंगलम् ॥ २१ ॥ शिवनाम वदेद्भक्त्या तर्हि गच्छेत्परं पदम् ॥

१ आर्यपथम्—स्नानदानादिकं कर्म—इत्यर्थः स्वपथम्—इ० पा० । २ कुरूपाः—इ० पा० । ३ तथापि—इ० पा० । ४ तत्पुण्यं प्राग्भवार्जितम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकजन्मकृतस्यास्य दारुणस्यापि यत्फलम् ॥ २२ ॥ क्रमेणानुभवत्वेषा भूत्वा चांडालजातिका ॥ अस्मादन्यतमः को वा नरकोऽस्ति नृणा मिह ॥ २३ ॥ अनेकक्लेशसंघातैर्यन्मुहुः परिपीडनम् ॥ दुष्कुले जन्म दारिद्र्यं महाव्याधिर्विमूढता ॥ २४ ॥ एकैक एव नरकः सर्वे वा चाथ किं पुनः ॥ प्राग्जन्मपुण्यभारेण यन्नाम विवशाऽब्रवीत् ॥ २५ ॥ तेनैषान्यभवे भूरि पुण्यमंते करिष्यति ॥ तेन पुण्येन महता निस्तीर्यांघौघयातनाः ॥ २६ ॥ नीता तत्पुरुषैरंते प्रयास्यति परं पदम् ॥ एतादृशानां मर्त्यानां शास्तारो न वयं क्वचित् ॥ विचार्य स्वयमेवेशो यद्युक्तं तत्करोतु सः ॥ २७ ॥ एवं वैवस्वतपुरे सर्वैर्यमपुरोगमैः ॥ विमृश्य चित्रगुप्ताद्यैरियं मुक्ताऽपतद्भुवि ॥ २८ ॥ आदौ यदेषा शिवनाम नारी प्रमादतो वाप्य सती जगाद ॥ तेनेह भूयः सुकृतेन शंभोर्बिल्वांकुराराधनपुण्यमाप ॥ २९ ॥ श्रीगोकर्णे शिवतिथावुपोष्य शिवमस्तके ॥ कृत्वा जागरणं ह्येषा चक्रे बिल्वार्पणं निशि ॥ १३० ॥ अकामतः कृतस्यास्य पुण्यस्यैव च यत्फलम् ॥ अद्यैव भोक्ष्यते सेयं पश्यतस्तव नो मृषा ॥ ३१ ॥ ॥ ॥ गौतम उवाच ॥ ॥ इत्युक्त्वा शिवदूतास्ते तस्याश्चांडालयोनितः ॥ जीवलेशं समाकृष्य युयुजुर्दिव्यतेजसा ॥ ३२ ॥ तां दिव्यदेहसंक्रांतां तेजोराशिसमुज्ज्वलाम् ॥ विमाने स्थापयामासुः प्रीतास्ते शिवकिंकराः ॥ ३३ ॥ अथ सा परमोदाररूपलावण्यशालिनी ॥ दिव्यभूषणदीप्तांगी दिव्यांबरविधारिणी ॥ ३४ ॥ देहेन दिव्यगंधेन दिव्यतेजोविकाशिना[2] ॥ दिव्यमाल्यावतंसेन विरराज विमानगा ॥ ३५ ॥ रत्नच्छत्रपताकाद्यैर्गीतवादित्रनिस्वनैः ॥ मध्ये सा शिवदूतानां मोदमाना वरानना ॥ ३६ ॥ अनुभूतानि जन्मानि स्मृत्वास्मृत्वा पुनःपुनः ॥ भीता त्रस्ता हृदाश्चर्यं दृष्ट्वा स्वप्नमिवोत्थिता ॥ ३७ ॥ काहं केऽमी महासिद्धाः कोयं लोको मनोरमः ॥ क्व गतं मे वपुः कष्टं चंडचांडालगोत्रजम् ॥ ३८ ॥ अहो सुमहदाश्चर्यं दृष्टं मायाविलासजम् ॥ यन्मे भवसहस्रेषु भ्रांतंभ्रांतं पुनःपुनः ॥ ३९ ॥ अहो ईश्वरपूजाया माहात्म्यं विस्मयावहम् ॥ पत्रमात्रेण संतुष्टो यो ददाति निजं पदम्[1] ॥ १४० ॥ इति तां जातनिर्वेदां स्मरन्तीं भगवत्पदम् ॥ दिव्यं विमानमारोप्य ते महेश्वरकिंकराः ॥ ॥ ४१ ॥ आलोकयन्तु सर्वेषु लोकेशेषु सविस्मयम् ॥ आमंत्र्य तामथानिन्युः परमेश्वरसन्निधिम् ॥ ४२ ॥ राजन्सुमहदाश्चर्यमाख्यातं गिरिजापतेः ॥ माहात्म्यं भक्तिलेशस्य सर्वाघौघविनाशनम् ॥ ४३ ॥ ॥ राजोवाच ॥ ॥ भगवन्परमेशस्य कीदृशो लोक उत्तमः ॥ तस्य मे लक्षणं ब्रूहि यद्यस्ति मयि ते दया ॥ ४४ ॥ ॥ गौतम उवाच ॥ ॥ ब्रह्मादिसुरनाथानां लोकेष्वपि सुदुर्लभः ॥ य आनंदः सदा यत्र स लोकः

१ पदं विभोः—इ० पा० । २ दिव्यतेजोविकाशिनी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पारमेश्वरः ॥ ४५ ॥ सर्वातिगमनं यत्र ज्योतिर्यत्र प्रतिष्ठितम् ॥ क्वापि नास्ति तमोयोगः स लोकः पारमेश्वरः ॥ ४६ ॥ गुणवृत्तिं विनिस्तीर्य
संप्राप्ता यत्र योगिनः ॥ न पतेयुः पुनः सर्वे स लोकः पारमेश्वरः ॥ ४७ ॥ यत्र वासं न कुर्वंति क्रोधलोभमदादयः ॥ यत्रावस्था न जन्माद्याः
स लोकः पारमेश्वरः ॥ ४८ ॥ सर्वेषां निगमानां च यदेकं क्षेत्रमुच्यते ॥ यस्मान्नास्ति परं वित्तं तत्पदं पारमेश्वरम् ॥ ४९ ॥ प्रत्याहारासन
ध्यानप्राणसंयमनादिभिः ॥ यत्र योगपथैः प्राप्तुं यतंते योगिनः सदा ॥ १५० ॥ यत्र देवः सदानंदनिर्मलज्ञानरूपया ॥ अस्ति देव्या सह
क्रीडन्स लोकः पारमेश्वरः ॥ ५१ ॥ जन्मानेकसहस्रेषु संभृतैः पुण्यराशिभिः ॥ आरूढाः पुरुषा नार्यः क्रीडन्ते यत्र संगताः ॥ ५२ ॥ तेजो
राशौ समा[1]लीना दुर्विभाव्ये मनोरमे ॥ अहोरात्रादिसंस्थानं न विंदंति कदाचन ॥ ५३ ॥ स लोकः परमेशस्य दुर्लभो हि कुयोगिनः ॥ एतद्भक्ति
सुपूर्णा ये तैरेव प्रतिपद्यते ॥ ५४ ॥ ये तत्कथाश्रवणकीर्तनजातहर्षा ये सर्वभूतसुहृदः प्रशमैकनिष्ठाः ॥ संसारचक्रमतिवाह्य निरस्तमोहास्ते
शांकरं पदमवाप्य सुखं रमन्ते ॥ ५५ ॥ तथा त्वमपि राजेंद्र गोकर्णं गिरिशालयम् ॥ गत्वा प्रशमिताघौघः कृतकृत्यत्वमाप्नुहि ॥ ५६ ॥
तत्र सर्वेषु कालेषु स्नात्वाभ्यर्च्य महाबलम् ॥ कृत्वा शिवचतुर्दश्यामुपवासं समाहितः ॥ ५७ ॥ कृत्वा जागरणं रात्रौ बिल्वैरभ्यर्च्य शंकरम् ॥
सर्वपापविनिर्मुक्तः शिवेलोकमवाप्स्यसि ॥ ५८ ॥ एष ते विमलो राजन्नुपदेशो मया कृतः ॥ स्वस्ति तेऽस्तु गमिष्यामि मिथिलाधिपतेः
पुरीम् ॥ ५९ ॥ इत्यामन्त्र्य मुनिः प्रीत्या गौतमो मिथिलां ययौ ॥ सोऽपि हृष्टमना राजा गोकर्णं प्रत्यपद्यत ॥ १६० ॥ तत्र दृष्ट्वा महादेवं
स्नात्वाभ्यर्च्य महाबलम् ॥ निर्धूताशेषपापौघो लेभे शम्भोः परं पदम् ॥ ६१ ॥ य इमां शृणुयान्नि[3]त्यं कथां शैवीं मनोहराम् ॥ श्रावयेद्वा जनो
भक्त्या स याति पर[4]मां गतिम् ॥ ६२ ॥ श्रद्दधानः सकृद्वापि य इमां शृणुयात्कथाम् ॥ त्रिःसप्तकुलजैः सार्धं शिवलोकमवाप्नुयात् ॥ ६३ ॥
इति कथितमशेषं श्रेयसामादिबीजं भवशतदुरितघ्नं ध्वस्तमोहांधकारम् ॥ चरितममरगेयं मन्मथारेरुदारं सततमपि निषेव्यं स्वस्तिमद्भिश्च लोकैः ॥
॥१६४॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे शिवचतुर्दशीगोकर्णमाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥
॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ भूयोपि शिवमाहात्म्यं वक्ष्यामि परमाद्भुतम् ॥ शृण्वतां सर्वपापघ्नं भवपाशविमोचनम् ॥
॥ १ ॥ दुस्तरे दुरितांभोधौ मज्जतां विषयात्मनाम् ॥ शिवपूजां विना कश्चित्प्लवो नास्ति निरूपितः ॥ २ ॥ शिवपूजां सदा कुर्याद्बुद्धिमानिह

१ सदा लीनाः--इ० पा० । २ कृतकृत्यत्वमाप्नुहि--इ० पा० । ३ पुण्याम्--इ० पा० । ४ परमं पदम्--इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवः ॥ अशक्तश्चेत्कृतां पूजां पश्येद्भक्तिविनम्रधीः ॥ ३ ॥ अश्रद्धयापि यः कुर्याच्छिवपूजां विमुक्तिदाम् ॥ पश्येद्वा सोपि कालेन प्रयाति परमं पदम् ॥ ४ ॥ आसीत्किरातदेशेषु नाम्ना राजा विमर्दनः ॥ शूरः परमदुर्द्धर्षो जितशत्रुः प्रतापवान् ॥ ५ ॥ सर्वदा मृगयासक्तः कृपणो निर्घृणो बली ॥ सर्वमांसाशनः क्रूरः सर्ववर्णांगनावृतः ॥ ६ ॥ तथापि कुरुते शंभोः पूजां नित्यमतंद्रितः ॥ चतुर्दश्यां विशेषेण पक्षयोः शुक्लकृष्णयोः ॥ ॥ ७ ॥ महाविभवसंपन्नां पूजां कृत्वा स मोदते ॥ हर्षेण महताविष्टो नृत्यति स्तौति गायति ॥ ८ ॥ तस्यैवं वर्तमानस्य नृपतेः सर्वभक्षिणः ॥ दुराचारस्य महिषी चेष्टितेनान्वतप्यत ॥ ९ ॥ सा वै कुमुद्वतीनाम राज्ञी शीलगुणान्विता ॥ एकदा पतिमासाद्य रहस्ये तदपृच्छत ॥ १० ॥ एतत्ते चरितं राजन्महदाश्चर्यकारणम् ॥ क्व ते महान्दुराचारः क्व भक्तिः परमेश्वरे ॥ ११ ॥ सर्वदा सर्वभक्षस्त्वं सर्वस्त्रीजनलालसः ॥ सर्वहिंसापरः क्रूरः कथं भक्तिस्तवेश्वरे ॥ १२ ॥ इति पृष्टः स भूपालो विमृश्य सुचिरं ततः ॥ त्रिकालज्ञः प्रहस्यैनां प्रोवाच सुकुतूहलः ॥ १३ ॥ ॥ ॥ राजोवाच ॥ ॥ अहं पूर्वभवे कश्चित्सारमेयो वरानने ॥ पंपांनगरमाश्रित्य पर्यटामि समंततः ॥ १४ ॥ एवं कालेषु गच्छत्सु तत्रैव नगरोत्तमे ॥ कदाचिदागतः सोहं मनोज्ञं शिवमंदिरम् ॥ १५ ॥ पूजायां वर्तमानायां चतुर्दश्यां महातिथौ ॥ अपश्यमुत्सवं दूराद्बहिर्द्वारं समाश्रितः ॥ १६ ॥ अथाहं परमक्रुद्धैर्दंडहस्तैः प्रधावितः ॥ तस्माद्देशादपक्रांतः प्राणरक्षापरायणः ॥ १७ ॥ ततः प्रदक्षिणीकृत्य मनोज्ञं शिवमंदिरम् ॥ द्वारदेशं पुनः प्राप्य पुनश्चैव निवारितः ॥ १८ ॥ पुनः प्रदक्षिणीकृत्य तदेव शिवमन्दिरम् ॥ बलिपिंडादिलोभेन पुनर्द्वारमुपागतः ॥ १९ ॥ एवं पुनःपुनस्तत्र कृत्वा कृत्वा प्रदक्षिणाम् ॥ द्वारदेशे समासीनं निजध्नुर्निशितैः शरैः ॥ २० ॥ स विद्धगात्रः सहसा शिवद्वारि गतासुकः ॥ जातोऽस्म्यहं कुले राज्ञां प्रभावाच्छिवसन्निधेः ॥ २१ ॥ दृष्टा चतुर्दशीपूजां दीपमाला विलोकिताः ॥ तेन पुण्येन महता त्रिकालज्ञोऽस्मि भामिनि ॥ २२ ॥ प्राग्जन्मवासनाभिश्च सर्वभक्षोऽस्मि निर्घृणः ॥ विदुषामपि दुर्लंघ्या प्रकृतिर्वासनामयी ॥ २३ ॥ अतोऽहमर्चयामीशं चतुर्दश्यां जगद्गुरुम् ॥ त्वमपि श्रद्धया भद्रे भज देवं पिनाकिनम् ॥ २४ ॥ ॥ राज्ञ्युवाच ॥ ॥ त्रिकालज्ञोऽसि राजेन्द्र प्रसादाद्गिरिजापतेः ॥ मत्पूर्वजन्मचरितं वक्तुमर्हसि तत्त्वतः ॥ २५ ॥ ॥ राजोवाच ॥ ॥ त्वं तु पूर्वभवे काचित्कपोती व्योमचारिणी ॥ क्वापि लब्धवती किंचिन्मां

१ सदामांसाशनः—इ० पा० । २ युक्तः—इ० पा० । ३ कृत्वा पूजाम्—इ० पा० । ४ पक्वान्नगृहम्—इ० पा० । ५ तदेव—इ० पा० । ६ शिवध्यानगताशुभः—शिवद्वारि गताशुभः—इति च पा० । ७ भामिनि—इ० पा० । ८ कामचारिणी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सपिंडं यदृच्छया ॥ २६ ॥ त्वद्गृहीतमथालोक्य गृध्रः कोप्यामिषं बली ॥ निरामिषः स्वयं वेगादभिदुद्राव भीषणः ॥ २७ ॥ ततस्त्वं वीक्ष्य
वित्रस्ता विद्रुतासि वरानने ॥ तेनानुयाता घोरेण मांसपिंडजिघृक्षया ॥ २८ ॥ दिष्ट्या श्रीगिरिमासाद्य श्रांता तत्र शिवालयम् ॥ दक्षिणं
परिक्रम्य ध्वजाग्रे समुपस्थिता ॥ २९ ॥ अथानुसृत्य सहसा तीक्ष्णतुंडो विहंगमः ॥ त्वां निहत्य निपात्याधो मांसमादाय जग्मिवान् ॥ ३० ॥
प्रदक्षिणप्रक्रमणाद्देवदेवस्य शूलिनः ॥ तस्याग्रे मरणाच्चैव जातासीह नृपांगना ॥ ३१ ॥ ॥ राज्ञ्युवाच ॥ ॥ श्रुतं सर्वमशेषेण प्राग्जन्मचरितं
मया ॥ जातं च महदाश्चर्यं भक्तिश्च मम चेतसि ॥ अथान्यच्छ्रोतुमिच्छामि त्रिकालज्ञ महामते ॥ इदं शरीरमुत्सृज्य यास्यावः कां गतिं पुनः ॥
॥ ३२ ॥ ॥ राजोवाच ॥ ॥ अतो भवे जनिष्येऽहं द्वितीये सैंधवो नृपः ॥ ३३ ॥ सृंजयेशसुता त्वं हि मामेव प्रतिपत्स्यसे ॥ तृतीये तु भवे
राजा सौराष्ट्रे भविताऽस्म्यहम् ॥ ३४ ॥ कलिंगराजतनया त्वं मे पत्नी भविष्यसि ॥ चतुर्थे तु भविष्यामि भवे गांधारभूमिपः ॥ ३५ ॥
मागधी राजतनया तत्र त्वं मम गेहिनी ॥ पंचमेऽवंतिनाथोऽहं भविष्यामि भवांतरे ॥ ३६ ॥ दाशार्हराजतनया त्वमेव मम वल्लभा ॥ अस्माज्ज
न्मनि षष्ठेऽहमानर्ते भविता नृपः ॥ ३७ ॥ ययातिवंशजा कन्या भूत्वा मामेव यास्यसि ॥ पांड्यराजकुमारोऽहं सप्तमे भविता भवे ॥ ३८ ॥
तत्र मत्सदृशो नान्यो रूपौदार्यगुणादिभिः ॥ सर्वशास्त्रार्थतत्त्वज्ञो बलवान्दृढविक्रमः ॥ ३९ ॥ सर्वलक्षणसंपन्नः सर्वलोकमनोरमः ॥ पद्मवर्ण
इति ख्यातः पद्ममित्रसमद्युतिः ॥ ४० ॥ भविता त्वं च वैदर्भी रूपेणाप्रतिमा भुवि ॥ नाम्ना वसुमती ख्याता रूपावयवशोभिनी ॥ ४१ ॥ सर्व
राजकुमाराणां मनोनयननंदिनी ॥ सा त्वं स्वयंवरे सर्वान्विहाय नृपनंदनान् ॥ ४२ ॥ वरं प्राप्स्यसि मामेव दमयंतीव नैषधम् ॥ सोऽहं जित्वा
नृपान्सर्वान्प्राप्य त्वां वरवर्णिनीम् ॥ ४३ ॥ स्वराष्ट्रस्थोऽखिलान्भोगान्भोक्ष्ये वर्षगणान्बहून् ॥ इष्ट्वा च विविधैर्यज्ञैर्वाजिमेधादिभिः शुभैः ॥ ४४ ॥
संतर्प्य पितृदेवर्षीन्दानैश्च द्विजसत्तमान् ॥ संपूज्य देवदेवेशं शंकरं लोकशंकरम् ॥ ४५ ॥ पुत्रे राज्यधुरं न्यस्य गंतास्मि तपसे वनम् ॥ तत्रा
गस्त्यान्मुनिवराद्ब्रह्मज्ञानमवाप्य च ॥ ४६ ॥ त्वया सह गमिष्यामि शिवस्य परमं पदम् ॥ चतुर्दश्यां चतुर्दश्यामेवं संपूज्य शंकरम् ॥ ४७ ॥
सप्तजन्मसु राजत्वं भविष्यति वरानने ॥ इत्येतत्सुकृतं लब्धं पूजादर्शनमात्रतः ॥ क्व सारमेयो दुष्टात्मा क्वेदृशी बत सद्गतिः ॥ ४८ ॥ ॥ सूत ॥१८०॥
उवाच ॥ इत्युक्ता निजनाथेन सा राज्ञी शुभलक्षणा ॥ ४९ ॥ परं विस्मयमापन्ना पूजयामास तं मुदा ॥ सोऽपि राजा तया सार्द्धं भुक्त्वा भोगान्यथे

१ तरसा–इ०पा० । २ अस्मात्–इ०पा० । ३ मामवाप्स्यसि–इ०पा० । ४ युगांतरे–इ०पा० । ५ दशार्णराजतनया–इ०पा० । ६ पद्ममित्रसमद्युतिः सूर्यसमानकान्तिः–इत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

प्सितान् ॥ ५० ॥ जगाम सप्तजन्मांते शंभोस्तत्परमं पदम् ॥ य एतच्छिवपूजाया माहात्म्यं परमाद्भुतम् ॥ शृणुयात्कीर्तयेद्वापि स गच्छे
त्परमं पदम् ॥ ५१ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे चतुर्दशीमाहात्म्यवर्णनं नाम चतुर्थो
ऽध्यायः ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ शिवो गुरुः शिवो देवः शिवो बंधुः शरीरिणाम् ॥ शिव आत्मा शिवो जीवः शिवादन्यन्न किंचन ॥ १ ॥
शिवमुद्दिश्य यत्किंचिद्दत्तं जप्तं हुतं कृतम् ॥ तदनंतफलं प्रोक्तं सर्वागमविनिश्चितम् ॥ २ ॥ भक्त्या निवेदितं शंभोः पत्रं पुष्पं फलं जलम् ॥
अल्पादल्पतरं वापि तदानंत्याय कल्पते ॥ ३ ॥ विहाय सकलान्धर्मान्सकलागमनिश्चितान्[2] ॥ शिवमेकं भजेद्यस्तु मुच्यते सर्वबन्धनात्
॥ ४ ॥ या प्रीतिरात्मनः पुत्रे या कलत्रे धनेपि सा ॥ कृता चेच्छिवपूजायां त्रायतीति[3] किमद्भुतम् ॥ ५ ॥ तस्मात्केचिन्महात्मानः सकलान्वि
षयासवान् ॥ त्यजंति शिवपूजार्थे स्वदेहमपि दुस्त्यजम् ॥ ६ ॥ सा जिह्वा या शिवं स्तौति तन्मनो ध्यायते शिवम् ॥ तौ कर्णौ तत्कथालोलौ
तौ हस्तौ तस्य पूजकौ ॥ ७ ॥ ते नेत्रे पश्यतः पूजां तच्छिरः प्रणतं शिवे ॥ तौ पादौ यौ शिवक्षेत्रं भक्त्या पर्यटतः[4] सदा ॥ ८ ॥ यस्येन्द्रियाणि
सर्वाणि वर्त्तंते शिवकर्मसु ॥ स निस्तरति संसारं भुक्तिं मुक्तिं च विंदति ॥ ९ ॥ शिवभक्तियुतो मर्त्यश्चांडालः पुल्कसोपि च ॥ नारी नरो वा
षंढो वा सद्यो मुच्येत संसृतेः ॥ १० ॥ किं कुलेन किमाचारैः किं शीलेन गुणेन वा ॥ भक्तिलेशयुतः शंभोः स वंद्यः सर्वदेहिनाम् ॥ ११ ॥
उज्जयिन्यामभूद्राजा चन्द्रसेनसमाह्वयः ॥ जातो मानवरूपेण द्वितीय इव वासवः ॥ १२ ॥ तस्मिन्पुरे महाकालं वसंतं परमेश्वरम् ॥ संपूजयत्यसौ
भक्त्या चन्द्रसेनो नृपोत्तमः ॥ १३ ॥ तस्याभवत्सखा राज्ञः शिवपारिषदाग्रणीः ॥ मणिभद्रो जिताभद्रः[5] सर्वलोकनमस्कृतः ॥ १४ ॥ तस्यै
कदा महीभर्त्तुः प्रसन्नः शंकरानुगः ॥ चिन्तामणिं ददौ दिव्यं मणिभद्रो महामतिः ॥ १५ ॥ स मणिः कौस्तुभ इव द्योतमानोर्कसन्निभः ॥ दृष्टः
श्रुतो वा ध्यातो वा नृणां यच्छति चिंतितम् ॥ १६ ॥ तस्य कांतिलवस्पृष्टं कांस्यं ताम्रमयस्त्रपु ॥ पाषाणादिकमन्यद्वा सद्यो भवति कांचनम् ॥
॥ १७ ॥ स तं चिन्तामणिं कंठे बिभ्रद्राजासनं गतः ॥ रराज राजा देवानां मध्ये भानुरिव स्वयम् ॥ १८ ॥ सदा चिन्तामणिग्रीवं तं श्रुत्वा
राजसत्तमम् ॥ प्रवृद्धतर्षा[7] राजानः सर्वे क्षुब्धहृदोऽभवन् ॥ १९ ॥ स्नेहात्केचिदयाचंत धाष्टर्यात्केचन दुर्मदाः ॥ देवलब्धमजानंतो मणिं मत्स
रिणो नृपाः ॥ २० ॥ सर्वेषां भूभृतां याच्ञा यदा व्यर्थीकृतामुना ॥ राजानः सर्वदेशानां संरंभं चक्रिरे तदा ॥ २१ ॥ सौराष्ट्राः कैकयाः शाल्वाः

१ विद्यते–इ० पा० । २ सकलागमनोदितान्–इ० पा० । ३ सिद्ध्यतीति–इ० पा० । ४ पर्यटिनौ–इ०पा० । ५ महाभद्रः–इ० पा० । ६ मंगलम्–इ० पा० । ७ प्रवृद्धरोषाः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिंगशकमद्रकाः ॥ पांचालावंतिसौवीरा मागधा मत्स्यसृंजयाः ॥ २२ ॥ एते चान्ये च राजानः सहाश्वरथकुंजराः ॥ चन्द्रसेनं मृधे जेतुमुद्यमं चक्रुरोजसा ॥ २३ ॥ ते तु सर्वे सुसंरब्धाः कंपयंतो वसुन्धराम् ॥ उज्जयिन्याश्चतुर्द्वारं रुरुधुर्बहुसैनिकाः ॥ २४ ॥ संरुध्यमानां[1] स्वपुरीं दृष्ट्वा राजभिरुद्धतैः ॥ चंद्रसेनो महाकालं तमेव शरणं ययौ ॥ २५ ॥ निर्विकल्पो निराहारः[2] स राजा दृढनिश्चयः ॥ अर्चयामास गौरीशं दिवा नक्तमनन्यधीः ॥ २६ ॥ एतस्मिन्नंतरे[3] गोपी काचित्तत्पुरवासिनी ॥ एकपुत्रा भर्तृहीना तत्रैवासीच्चिरंतना ॥ २७ ॥ सा पंचहायनं बालं वहंती गतभर्तृका ॥ राज्ञा कृतां महापूजां ददर्श गिरिजापतेः ॥ २८ ॥ सा दृष्ट्वा सर्वमाश्चर्यं शिवपूजामहोदयम् ॥ प्रणिपत्य स्वशिबिरं पुनरेवाभ्यपद्यत ॥ ॥ २९ ॥ एतत्सर्वमशेषेण स दृष्ट्वा बल्लवीसुतः ॥ कुतूहलेन विदधे शिवपूजां विरक्तिदाम् ॥ ३० ॥ आनीय हृद्यं पाषाणं शून्ये तु शिबिरोत्तमे ॥ नातिदूरे[4] स्वशिबिराच्छिवलिंगमकल्पयत ॥ ३१ ॥ यानि कानि च पुष्पाणि हस्तलभ्यानि चात्मनः ॥ आनीय स्नाप्य तल्लिंगं पूजयामास भक्तितः ॥ ३२ ॥ गंधालंकारवासांसि धूपदीपाक्षतादिकम् ॥ विधाय कृत्रिमैर्दिव्यैर्नैवेद्यं चाप्यकल्पयत् ॥ ३३ ॥ भूयोभूयः समभ्यर्च्य पत्रैः पुष्पैर्मनोरमैः ॥ नृत्यं च विविधं कृत्वा प्रणनाम पुनःपुनः ॥३४॥ एवं पूजां प्रकुर्वाणं शिवस्यानन्यमानसम् ॥ सा पुत्रं प्रणयाद्गोपी भोजनाय समाह्वयत् ॥३५॥ मात्राहूतोपि बहुशः स पूजासक्तमानसः ॥ बालोपि भोजनं नच्छत्तदा माता स्वयं ययौ ॥ ३६ ॥ तं विलोक्य शिवस्याग्रे निषण्णं मीलितेक्षणम् ॥ चकर्ष पाणिं संगृह्य कोपेन समताडयत् ॥ ३७ ॥ आकृष्टस्ताडितो वापि नागच्छत्स्वसुतो यदा ॥ तां पूजां नाशयामास क्षिप्त्वा लिंगं विदूरतः[5] ॥ ३८ ॥ हाहेति रुदमानं तं निर्भर्त्स्य स्वसुतं तदा ॥ पुनर्विवेश स्वगृहं गोपी रोषसमन्विता ॥ ३९ ॥ मात्रा विनाशितां पूजां दृष्ट्वा देवस्य शूलिनः ॥ देवदेवेति चुक्रोश निपपात स बालकः ॥ ४० ॥ प्रनष्टसंज्ञः[6] सहसा बाष्पपूरपरिप्लुतः ॥ लब्धसंज्ञो मुहूर्तेन चक्षुषी उदमीलयत् ॥ ॥ ४१ ॥ ततो मणिस्तंभविराजमानं हिरण्मयद्वारकपाटतोरणम् ॥ महार्हनीलामलवज्रवेदिकं तदेव जातं शिबिरं शिवालयम् ॥ ४२ ॥ संतप्तहेमकलशैर्बहुभिर्विचित्रैः प्रोद्भासितस्फटिकसौधतलाभिरामम् ॥ रम्यं च तच्छिवपुरं वरपीठमध्ये लिंगं च रत्नसहितं स ददर्श बालः ॥ ४३ ॥ स दृष्ट्वा सहसोत्थाय भीतविस्मितमानसः ॥ निमग्न इव संतोषात्परमानंदसागरे ॥ ४४ ॥ विज्ञाय शिवपूजाया माहात्म्यं तत्प्रभावतः ॥ ननाम दंड

१ निरुध्यमानाम्–इ० पा० । २ निरातंकः–इ० पा० । ३ "एतस्मिन्नेव समये तत्रैव नगरोत्तमे । चरन्ती गोपिका काचिन्महाकालान्तिकं ययौ ॥" इति पद्यं पाठान्तररूपेण पुस्तकद्वयेवर्तते । ४ अविदूरे–इ० पा० । ५ च दूरतः–इ० पा० । ६ शिवशिवेति--इ० पा० । ७ महोदयम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद्धूमौ स्वमातुरघशांतये ॥ ४५ ॥ देव क्षमस्व दुरितं मम मातुरुमापते ॥ मूढायास्त्वामजानंत्याः प्रसन्नो भव शंकर ॥ ४६ ॥ यद्यस्ति मयि यत्किंचित्पुण्यं त्वद्भक्तिसंभवम् ॥ तेनापि शिव मे माता तव कारुण्यमाप्नुयात् ॥ ४७ ॥ इति प्रसाद्य गिरिशं भूयोभूयः प्रणम्य च ॥ सूर्ये चास्तं गते बालो निर्जगाम शिवालयात् ॥ ४८ ॥ अथापश्यत्स्वशिबिरं पुरंदरपुरोपमम् ॥ सद्यो हिरण्मयीभूतं विचित्रविभवोज्ज्वलम् ॥ ४९ ॥ सोंतः प्रविश्य भवनं मोदमानो निशामुखे ॥ महामणिगणाकीर्णं हेमराशिसमुज्ज्वलम् ॥ ५० ॥ तत्रापश्यत्स्वजननीं स्मरंतीमकुतोभयाम् ॥ महार्हरत्न पर्यंके सितशय्यामधिश्रिताम् ॥ ५१ ॥ रत्नालंकारदीप्तांगीं दिव्यांबरविराजिनीम् ॥ दिव्यलक्षणसंपन्नां साक्षात्सुरवधूमिव ॥ ५२ ॥ जवेनोत्थापयामास संभ्रमोत्फुल्ललोचनः ॥ अंब जागृहि भद्रं ते पश्येदं महदद्भुतम् ॥ ५३ ॥ इति प्रबोधिता गोपी स्वपुत्रेण महात्मना ॥ ततोऽपश्यत्स्वजननी स्मयन्ती मुकुटोज्ज्वला ॥ ५४ ॥ ससंभ्रमं समुत्थाय तत्सर्वं प्रत्यवेक्षत ॥ अपूर्वमिव चात्मानमपूर्वमिव बालकम् ॥ ५५ ॥ अपूर्वं च स्वसदनं दृष्ट्वा सीत्सुखविह्वला ॥ श्रुत्वा पुत्रमुखात्सर्वं प्रसादं गिरिजापतेः ॥ ५६ ॥ राज्ञे विज्ञापयामास यो भजत्यनिशं शिवम् ॥ स राजा सहसागत्य समाप्तनियमो निशि ॥ ५७ ॥ ददर्श गोपिकासूनोः प्रभावं शिवतोषजम् ॥ हिरण्मयं शिवस्थानं लिंगं मणिमयं तथा ॥ ५८ ॥ गोपवध्वाश्च सदनं माणिक्यवरकोज्ज्वलम् ॥ दृष्ट्वा महीपतिः सर्वं सामात्यः सपुरोहितः ॥ ५९ ॥ मुहूर्तं विस्मितधृतिः परमानंदनिर्भरः ॥ प्रेम्णा बाष्पजलं मुंचन्परिरेभे तमर्भकम् ॥ ६० ॥ एवमत्यद्भुताकाराच्छिवमाहात्म्यकीर्त्तनात् ॥ पौराणां संभ्रमाच्चैव सा रात्रिः क्षणतामगात् ॥ ६१ ॥ अथ प्रभाते युद्धाय पुरं संरुध्य संस्थिताः ॥ राजानश्चारवक्त्रेभ्यः शुश्रुवुः परमाद्भुतम् ॥ ६२ ॥ ते त्यक्तवैराः सहसा राजानश्चकिता भृशम् ॥ न्यस्तशस्त्रा निविविशुश्चंद्रसेनानुमोदिताः ॥ ६३ ॥ तां प्रविश्य पुरीं रम्यां महाकालं प्रणम्य च ॥ तद्गोपवनितागेहमाजग्मुः सर्वभूभृतः ॥ ६४ ॥ ते तत्र चंद्रसेनेन प्रत्युद्गम्याभिपूजिताः ॥ महार्हविष्टरगताः प्रीत्यानंदन्सुविस्मिताः ॥ ६५ ॥ गोपसूनोः प्रसादाय प्रादुर्भूतं शिवालयम् ॥ लिंगं च वीक्ष्य सुमहच्छिवे चक्रुः परां मतिम् ॥ ६६ ॥ तस्मै गोपकुमाराय प्रीतास्ते सर्वभूभुजः ॥ वासोहिरण्यरत्नानि गोमहिष्यादिकं धनम् ॥ ६७ ॥ गजानश्वान्रथान्रौक्मान्छत्रयानपरिच्छदान् ॥ दासान्दासीरनेकाश्च ददुः शिवकृपार्थिनः ॥ ६८ ॥ येये सर्वेषु देशेषु गोपास्तिष्ठंति भूरिशः ॥ तेषां तमेव राजानं चक्रिरे सर्वपार्थिवाः ॥६९॥ अथास्मिन्नंतरे सर्वैस्त्रिदशैरभिपूजितः ॥ प्रादुर्बभूव तेजस्वी हनूमान्वानरेश्वरः ॥७०॥ तस्याभिगमनादेव राजानो जातसंभ्रमाः ॥

१ समुदैक्षत--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्युत्थाय नमश्चक्रुर्भक्तिनम्रात्ममूर्त्तयः ॥ ७१ ॥ तेषां मध्ये समासीनः पूजितः प्लवगेश्वरः ॥ गोपात्मजं समाश्लिष्य राज्ञो वीक्ष्येदमब्रवीत् ॥
॥ ७२ ॥ सर्वे शृणुत भद्रं वो राजानो ये च देहिनः ॥ शिवपूजामृते नान्या गतिरस्ति शरीरिणाम् ॥ ७३ ॥ एष गोपसुतो दिष्ट्या प्रदोषे मंदवा
सरे ॥ अमंत्रेणापि संपूज्य शिवं शिवमवाप्तवान् ॥ ७४ ॥ मंदवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् ॥ तत्रापि दुर्लभतरः कृष्णपक्षे समागते ॥
॥ ७५ ॥ एष पुण्यतमो लोके गोपानां कीर्तिवर्धनः ॥ अस्य वंशेऽष्टमो भावी नंदोनाम महायशाः ॥ प्राप्स्यते तस्य पुत्रत्वं कृष्णो नारा
यणः स्वयम् ॥ ७६ ॥ अद्यप्रभृति लोकेस्मिन्नेष गोपालनंदनः ॥ नाम्ना श्रीकर इत्युच्चैर्लोके ख्यातिं गमिष्यति ॥ ७७ ॥ ॥ सूत उवाच ॥
एवमुक्त्वांजनीसूनुस्तस्मै गोपकसूनवे ॥ उपदिश्य शिवाचारं तत्रैवांतरधीयत ॥ ७८ ॥ ते च सर्वे महीपालाः संहृष्टाः प्रतिपूजिताः ॥ चन्द्रसेनं
समामंत्र्य प्रतिजग्मुर्यथागतम् ॥ ७९ ॥ श्रीकरोऽपि महातेजा उपदिष्टो हनूमता ॥ ब्राह्मणैः सह धर्मज्ञैश्चक्रे शम्भोः समर्हणम् ॥ ८० ॥ कालेन
श्रीकरः सोऽपि चंद्रसेनश्च भूपतिः ॥ समाराध्य शिवं भक्त्या प्रापतुः परमं पदम् ॥ ८१ ॥ इदं रहस्यं परमं पवित्रं यशस्करं पुण्यमहर्द्धिवर्धनम् ॥
आख्यानमाख्यातमघौघनाशनं गौरीशपादांबुजभक्तिवर्धनम् ॥ ८२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तर
खण्डे गोपकुमारचरितवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ यदुक्तं भवता सूत महदाख्यानम[2]द्भुतम् ॥
शम्भोर्माहात्म्यकथनमशेषाघहरं परम् ॥ १ ॥ भूयोपि श्रोतुमिच्छामस्तदेव सुसमाहिताः ॥ प्रदोषे भगवाञ्छंभुः पूजितस्तु महात्मभिः ॥ २ ॥
संप्रयच्छति कां सिद्धिमेतन्नो ब्रूहि सुव्रत ॥ श्रुतमप्यसकृत्सूत भूयस्तृष्णा प्रवर्धते ॥ ३ ॥ ॥ सूत उवाच ॥ ॥ साधु पृष्टं महाप्राज्ञा भवद्भि
र्लोकविश्रुतैः ॥ अतोऽहं संप्रवक्ष्यामि शिवपूजाफलं महत् ॥ ४ ॥ त्रयोदश्यां तिथौ सायं प्रदोषः परिकीर्त्तितः ॥ तत्र पूज्यो महादेवो नान्यो
देवः फलार्थिभिः ॥ ५ ॥ प्रदोषपूजामाहात्म्यं को नु[3] वर्णयितुं क्षमः ॥ यत्र सर्वेऽपि विबुधास्तिष्ठंति गिरिशांतिके ॥ ६ ॥ प्रदोषसमये देवः कैलासे
रजतालये ॥ करोति नृत्यं विबुधैरभिष्टुतगुणोदयः ॥ ७ ॥ अतः पूजा जपो होमस्तत्कथास्तद्गुणस्तवः ॥ कर्त्तव्यो नियतं मर्त्यैश्चतुर्वर्गफला
र्थिभिः ॥ ८ ॥ दारिद्र्यतिमिरांधानां मर्त्यानां भवभीरुणाम् ॥ भवसागरमग्नानां प्लवोऽयं पारदर्शनः ॥ ९ ॥ दुःखशोकभयार्त्तानां क्लेशनिर्वाण

१ इदं पवित्रं परमं रहस्यं स्वर्ग्यं यशस्यं गतिदं विचित्रम्–इ० पा० । २ उत्तमम्–इ० पा० । ३ वै–इ० पा० । ४ इदं हि परमाञ्जनम्–इ० पा० । ५ शर्वः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मि[1]च्छताम् ॥ प्रदोषे पार्वतीशस्य पूजनं मंगलायनम् ॥ १० ॥ दुर्बुद्धिरपि नीचोपि मन्दभाग्यः शठोऽपि वा ॥ प्रदोषे पूज्य देवेशं विप[2]द्भ्यः स
प्रमुच्यते ॥ ११ ॥ शत्रुभिर्हन्यमानोऽपि दश्यमानोपि पन्नगैः ॥ शैलैराक्रम्यमाणोऽपि पतितोऽपि महांबुधौ ॥ १२ ॥ आविद्धकालदण्डोऽपि
नानारोगहतोऽपि वा ॥ न विनश्यति मर्त्योऽसौ प्रदोषे गिरिशार्चनात् ॥ १३ ॥ दारिद्र्यं मरणं दुःखमृणभारं नगोपमम् ॥ सद्यो विधूय
संपद्भिः पूज्यते शिवपूजनात् ॥ १४ ॥ अत्र वक्ष्ये महापुण्यमितिहासं पुरातनम् ॥ यं श्रुत्वा मनुजाः सर्वे प्रयांति कृतकृत्यताम् ॥ १५ ॥
आसीद्विदर्भविषये नाम्ना सत्यरथो नृपः ॥ सर्वधर्मरतो धीरः सुशीलः सत्यसंगरः ॥ १६ ॥ तस्य पालयतो भूमिं धर्मेण मुनिपुंगवाः ॥
व्यतीयाय महान्कालः सुखेनैव महाम[3]तेः ॥ १७ ॥ अथ तस्य महीभर्तुर्बभूवुः शाल्वभूभुजः ॥ शत्रवश्चोद्धतबला दुर्मर्षणपुरोगमाः ॥ १८ ॥
कदाचिदथ ते शाल्वाः संनद्धबहुसैनिकाः ॥ विदर्भनगरीं प्राप्य रुरुधुर्विजिगीषवः ॥ १९ ॥ दृष्ट्वा निरुद्ध्यमानां तां विदर्भाधिपतिः पुरीम् ॥
योद्धुमभ्याययौ तूर्णं बलेन महता वृतः ॥ २० ॥ तस्य तैरभवद्युद्धं शाल्वैरपि बलोद्धतैः ॥ पाताले पन्नगेन्द्रस्य गन्धर्वैरिव दुर्मदैः ॥ २१ ॥
विदर्भनृपतिः सोऽथ कृत्वा युद्धं सुदारुणम् ॥ प्रनष्टोरुबलैः शाल्वैर्निहतो रणमूर्धनि ॥ २२ ॥ तस्मिन्महारथे वीरे निहते मंत्रिभिः सह ॥
दुद्रुवुः समरे भग्ना हतशेषाश्च सैनिकाः ॥ २३ ॥ अथ युद्धेभिविरते नदत्सु रिपुमंत्रिषु ॥ नगर्यां युद्ध्यमानायां जाते कोलाहले रवे ॥ २४ ॥ तस्य
सत्यरथस्यैका विदर्भाधिपतेः सती ॥ भूरिशोकसमाविष्टा क्वचिद्यत्नाद्विनिर्ययौ ॥ २५ ॥ सा निशासमये यत्नादंतर्वत्नी नृपांगना ॥ निर्गता शोक
संतप्ता प्रतीचीं प्रययौ दिशम् ॥ २६ ॥ अथ प्रभाते मार्गेण गच्छन्ती श[4]नैः सती ॥ अतीत्य दूरमध्वानं ददर्श विमलं सरः ॥ २७ ॥ तत्रागत्य
वरारोहा तप्ता तापेन भूयसा ॥ वि[5]लसंतं सरस्तीरे छायावृक्षं समाश्रयत् ॥ २८ ॥ तत्र दैववशाद्राज्ञी विजने तरुकुट्टिमे ॥ असूत त[6]नयं साध्वी मुहूर्ते
सद्गुणान्विते ॥ २९ ॥ अथ सा राजमहिषी पिपासाभिहता भृशम् ॥ सरोऽवतीर्णा[7] चार्वंगी ग्रस्ता ग्राहेण भूयसा ॥ ३० ॥ जातमात्रः कुमारोऽ
पि विनष्टपितृमातृकः ॥ रुरोदोच्चैः सरस्तीरे क्षुत्पिपासार्दितोऽबलः ॥ ३१ ॥ तस्मिन्नेवं क्रन्दमाने जातमात्रे कुमारके ॥ काचिदभ्याययौ
शीघ्रं दिष्ट्या विप्रवरांगना ॥ ३२ ॥ साप्येकहायनं बालमुद्वहन्ती निजात्मजम् ॥ अधना भर्तृरहिता याचमाना गृहेगृहे ॥ ३३ ॥ एकात्म
जा बंधुहीना याच्ञामार्गवशंगता ॥ उमानाम द्विजसती ददर्श नृपनंदनम् ॥ ३४ ॥ सा दृष्ट्वा राजतनयं सूर्यबिंबमिव च्युतम् ॥ अनाथमेनं क्रंदंतं

१ क्लेशनिर्वाणकारणम्–इ० पा० । २ विपापः–इ० पा० । ३ महास्मृतेः–इ० पा० । ४ सहसा–इ० पा० । ५ विमले तत्सरस्तीरे–इ० पा० । ६ समये–इ० पा० । ७ अवतीर्य–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिंतयामास भूरिशः ॥ ३५ ॥ अहो सुमहदाश्चर्यमिदं दृष्टं मयाधुन ॥ अच्छिन्ननाभिसूत्रोऽयं शिशुर्माता क्व वा गता ॥ ३६ ॥ पिता नास्ति न चान्योस्ति नास्ति बंधुजनोऽपि वा ॥ अनाथः कृपणो बालः शेते केवलभूतले ॥ ३७ ॥ एष चांडालजो वापि शूद्रजो वैश्यजोपि वा ॥ विप्रात्मजो वा नृपजो ज्ञायते कथमर्भकः ॥ ३८ ॥ शिशुमेनं समुद्धृत्य पुष्णाम्यौरसवद्ध्रुवम् ॥ किं त्वविज्ञातकुलजं नोत्सहे स्प्रष्टुमुत्तमम् ॥ ३९ ॥ इति मीमांसमानायां तस्यां विप्रवरस्त्रियाम् ॥ ४० ॥ कश्चित्समाययौ भिक्षुः साक्षाद्देवः शिवः स्वयम् ॥ तामाह भिक्षुवर्योथ विप्रभामिनि मा खिदः ॥ ४१ ॥ रक्षैनं बालकं सुभ्रूर्विसृज्य हृदि संशयम् ॥ अनेन परमं श्रेयः प्राप्स्यसे ह्यचिरादिह ॥ ४२ ॥ एतावदुक्त्वा त्वरितो भिक्षुः कारुणिको ययौ ॥ अथ तस्मिन्गते भिक्षौ विश्रब्धा विप्रभामिनी ॥ ४३ ॥ तमर्भकं समादाय निजमेव गृहं ययौ ॥ भिक्षुवाक्येन विश्रब्धा सा राजतनयं सती[1] ॥ ४४ ॥ आत्मपुत्रेण सदृशं कृपया पर्यपोषयत् ॥ एकचक्राह्वये रम्ये ग्रामे कृतनिकेतना ॥ ४५ ॥ स्वपुत्रं राजपुत्रं च भिक्षान्नेन व्यवर्धयत् ॥ ब्राह्मणीतनयश्चैव स राजतनयस्तथा ॥ ४६ ॥ ब्राह्मणैः कृतसंस्कारौ ववृधाते सुपूजितौ ॥ कृतोपनयनौ काले बालकौ नियमे स्थितौ ॥ ॥ ४७ ॥ भिक्षार्थं चेरतुस्तत्र मात्रा सह दिनेदिने ॥ ताभ्यां कदाचिद्बालाभ्यां सा विप्रवनिता सह ॥ ४८ ॥ भैक्ष्यं चरंती दैवेन प्रविष्टा देवतालयम् ॥ तत्र वृद्धैः समाकीर्णे मुनिभिर्देवतालये ॥ ४९ ॥ तौ दृष्ट्वा बालकौ धीमाञ्छांडिल्यो मुनिरब्रवीत् ॥ अहो दैवबलं चित्रमहो कर्म दुरत्ययम् ॥ ५० ॥ एष बालोऽन्यजननीं श्रितो भैक्ष्येण जीवति ॥ इमामेव द्विजवधूं प्राप्य मातरमुत्तमाम् ॥ ५१ ॥ सहैव द्विजपुत्रेण द्विजभावं समाश्रितः ॥ इति श्रुत्वा मुनेर्वाक्यं शांडिल्यस्य द्विजांगना ॥ ५२ ॥ सा प्रणम्य सभामध्ये पर्यपृच्छत्सविस्मया ॥ ब्रह्मन्नेषोर्भको नीतो मया भिक्षोर्गिरा[2] गृहम् ॥ ५३ ॥ अविज्ञातकुलोद्यापि सुतवत्परिपोष्यते ॥ कस्मिन्कुले प्रसूतोऽयं का माता जनकोस्य कः ॥ ५४ ॥ सर्वं विज्ञातुमिच्छामि भवतो ज्ञानचक्षुषः ॥ ५५ ॥ इति पृष्टो मुनिः सोथ ज्ञानदृष्टिर्द्विजस्त्रियाः[3] ॥ आचख्यौ तस्य बालस्य जन्म कर्म च पौर्विकम् ॥ ५६ ॥ विदर्भराजपुत्रस्तु तत्पितुः समरे मृतिम् ॥ तन्मातुर्नक्रहरणं साकल्येन न्यवेदयत् ॥ ५७ ॥ अथ सा विस्मिता नारी पुनः प्रपच्छ तं मुनिम् ॥ स राजा सकलान्भोगान्हित्वा युद्धे कथं मृतः ॥ ५८ ॥ दारिद्र्यमस्य बालस्य कथं प्राप्तं महामुने ॥ दारिद्र्यं पुनरुद्धूय कथं राज्यमवाप्स्यति ॥ ॥ ५९ ॥ अस्यापि मम पुत्रस्य भिक्षान्नेनैव जीवतः ॥ दारिद्र्यशमनोपायमुपदेष्टुं त्वमर्हसि ॥६०॥ ॥ शांडिल्य उवाच ॥ ॥ अमुष्य बालस्य

१ तथा इ० पा०। २ भिक्षुस्त्रिया–इ० पा०। ३ द्विजस्त्रियै–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता स विदर्भमहीपतिः ॥ पूर्वजन्मनि पांड्येशो बभूव नृपसत्तमः ॥ ६१ ॥ स राजा सर्वधर्मज्ञः पालयन्सकलां महीम् ॥ प्रदोषसमये शंभुं कदाचित्प्रत्यपूजयत् ॥ ६२ ॥ तस्य पूजयतो भक्त्या देवं त्रिभुवनेश्वरम् ॥ आसीत्कलकलारावः सर्वत्र नगरे महान् ॥ ६३ ॥ श्रुत्वा तमुत्कटं शब्दं राजा त्यक्त[1]शिवार्चनः ॥ निर्ययौ राजभवनान्नगरक्षोभशंकया ॥ ६४ ॥ एतस्मिन्नेव समये तस्यामात्यो महाबलः ॥ शत्रुं गृहीत्वा सामंतं राजांतिकमुपागमत् ॥ ६५ ॥ अमात्येन समानीतं शत्रुं सामंतमुद्धतम् ॥ दृष्ट्वा क्रोधेन नृपतिः शिरच्छेदमकारयत् ॥ ६६ ॥ स तथैव महीपालो विसृज्य शिवपूजनम् ॥ असमाप्तात्मनियमश्चकार निशि भोजनम् ॥ ६७ ॥ तत्पुत्रोपि तथा चक्रे प्रदोषसमये शिवम् ॥ अनर्चयित्वा मूढात्मा भुक्त्वा सुष्वाप दुर्मदः ॥ ६८ ॥ जन्मांतरे स नृपतिर्विदर्भक्षितिपोऽभवत् ॥ शिवार्चनांतरायेण परैर्भोगांतरे हतः ॥ ६९ ॥ तत्पुत्रो यः पूर्वभवे सोस्मिञ्जन्मनि तत्सुतः ॥ भूत्वा दारिद्र्यमापन्नः शिवपूजाव्यतिक्रमात् ॥ ७० ॥ अस्य माता पूर्वभवे सपत्नीं छद्मनाहनत् ॥ तेन पापेन महता ग्राहेणास्मिन्भवे हता ॥ ७१ ॥ एषा प्रवृत्तिरेतेषां भवत्यै समुदाहृता ॥ अनर्चित[2]शिवा मर्त्याः प्राप्नुवंति दरिद्रताम् ॥ ७२ ॥ सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ॥ संसारमुल्बणमसारमवाप्य जंतोः सारो यमीश्वरपदांबुरुहस्य सेवा ॥ ७३ ॥ ये नार्चयंति गिरिशं समये प्रदोषे ये नार्चितं शिवमपि प्रणमंति चान्ये ॥ एतत्कथां श्रुतिपुटैर्न पिबंति मूढास्ते जन्मजन्मसु भवंति नरा दरिद्राः ॥ ७४ ॥ ये वै प्रदोषसमये परमेश्वरस्य कुर्वंत्यनन्यमनसोंऽघ्रिसरोजपूजाम् ॥ नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्त इहैव लोके ॥ ७५ ॥ कैलासशैलभवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकांचितरत्नपीठे ॥ नृत्यं विधातुमभिवाञ्छति शूलपाणौ देवाः प्रदोषसमयेऽनुभजंति सर्वे ॥ ७६ ॥ वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजस्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ॥ विष्णुः सांद्रमृदंगवादनपटुर्देवाः समंतात्स्थिताः सेवंते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ७७ ॥ गंधर्वयक्षपतगोरगसिद्धसाध्या विद्याधरा[3]मरवराप्सरसां गणाश्च ॥ येऽन्ये त्रिलोकनिलयाः सह भूतवर्गाः प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥ ७८ ॥ अतः प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्याः ॥ तस्मिन्महेशे विधिनेज्यमाने सर्वे प्रसीदंति सुराधिनाथाः ॥ ७९ ॥ एष ते तनयः पूर्वजन्मनि ब्राह्मणोत्तमः ॥ प्रतिग्रहैर्वयो निन्ये न यज्ञाद्यैः सुकर्मभिः ॥ ८० ॥ अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि ॥ तद्दोषपरिहारार्थं शरणं यातु

१ त्यक्त्वा शिवार्चनम्–इ० पा० । २ अनर्चिते शिवे–इ० पा० । ३ विद्याधरासुरवरा--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंकरम् ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे प्रदोषमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्ता मुनिना साध्वी सा विप्रवनिता पुनः ॥ तं प्रणम्याथ पप्रच्छ शिवपूजाविधेः क्रमम् ॥ १ ॥ ॥ शांडिल्य उवाच ॥ ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेद्यदा ॥ घटीत्रयादस्तमयात्पूर्वं स्नानं समाचरेत् ॥ २ ॥ शुक्लांबरधरो धीरो वाग्यतो नियमान्वितः॥ कृतसंध्याजपविधिः शिवपूजां समारभेत् ॥ ३ ॥ देवस्य पुरतः सम्यगुपलिप्य नवांभसा ॥ विधाय मंडलं रम्यं धौतवस्त्रादिभिर्बुधः ॥ ४ ॥ वितानाद्यैरलंकृत्य फलपुष्पनवांकुरैः ॥ विचित्रपद्ममुद्धृत्य वर्णपंचकसंयुतम् ॥ ५ ॥ तत्रोपविश्य सुशुभे भक्तियुक्तः स्थिरासने ॥ सम्यक्संपादिताशेषपूजोपकरणः शुचिः ॥ ६ ॥ आगमोक्तेन मंत्रेण पीठमामंत्रयेत्सुधीः ॥ ततः कृत्वात्मशुद्धिं च भूतशुद्ध्यादिकं क्रमात् ॥ ७ ॥ प्राणायामत्रयं कृत्वा बीजवर्णैः सबिंदुकैः ॥ मातृका न्यस्य विधिवद्ध्यात्वा तां देवतां पराम् ॥ ८ ॥ समाप्य मातृका भूयो ध्यात्वा चैव परं शिवम् ॥ वामभागे गुरुं नत्वा दक्षिणे गणपं नमेत् ॥ ९ ॥ अंसोरुयुग्मे धर्मादीन्न्यस्य नाभौ च पार्श्वयोः ॥ अधर्मादीननंतादीन्हृदि पीठे मनुं न्यसेत् ॥ १० ॥ आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात् ॥ उक्तक्रमेण विन्यस्य हृत्पद्मे साधुभाविते ॥ ११ ॥ नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिम्॥ चन्द्रकोटिप्रतीकाशं त्रिनेत्रं चन्द्रशेखरम् ॥ १२ ॥ आपिंगलजटाजूटं रत्नमौलिविराजितम् ॥ नीलग्रीवमुदारांगं नागहारोपशोभितम् ॥ १३ ॥ वरदाभयहस्तं च धारिणं च परश्वधम् ॥ दधानं नागवलयकेयूरांगदमुद्रिकम् ॥ १४ ॥ व्याघ्रचर्मपरीधानं रत्नसिंहासने स्थितम् ॥ ध्यात्वा तद्वामभागे च चिंतयेद्गिरिकन्यकाम् ॥ १५ ॥ भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभाम् ॥ विद्युत्पुंजनिभां तन्वीं मनोनयननंदिनीम् ॥ १६ ॥ बालेंदुशेखरां स्निग्धां नीलकुंचितकुन्तलाम् ॥ भृंगसंघातरुचिरां नीलालकविराजिताम् ॥ १७ ॥ मणिकुंडलविद्योतन्मुखमंडलविभ्रमाम् ॥ नवकुम्कुमपंकांककपोलदलदर्पणाम् ॥१८॥ मधुरस्मितविभ्राजदरुणाधरपल्लवाम् ॥ कंबुकंठीं शिवामुद्यत्कुचपंकजकुड्मलाम् ॥ १९ ॥ पाशांकुशाभयाभीष्टविलसत्सुचतुर्भुजाम् ॥ अनेकरत्नविलसत्कंकणांकितमुद्रिकाम् ॥ २० ॥ वलित्रयेण विलसद्धेमकांचीगुणान्विताम् ॥ रक्तमाल्यांबरधरां दिव्यचंदनचर्चिताम् ॥ २१ ॥ दिक्पालवनितामौलिसन्नतांघ्रिसरोरुहाम् ॥ रत्नसिंहासनारूढां सर्पराजपरिच्छदाम् ॥ २१ ॥ एवं ध्यात्वा महादेवं देवीं च गिरिकन्यकाम् ॥ न्यासक्रमेण संपूज्य देवं गंधादिभिः क्रमात् ॥ २३ ॥ पंचभिर्ब्रह्मभिः कुर्यात्प्रोक्तस्थानेषु वा हृदि ॥ पृथक्पुष्पांजलिं देहे मूलेन च

१ समाचेरत्--इ०पा० । २ मंडपम्--इ०पा० । ३ यजेत्--इ० पा० । ४ चन्द्रभूषणम्--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदि त्रिधा ॥ २४ ॥ पुनः स्वयं शिवो भूत्वा मूलमंत्रेण साधकः ॥ ततः संपूजयेद्देवं बाह्यपीठे पुनः क्रमात् ॥ २५ ॥ संकल्पं प्रवदेत्तत्र
पूजारंभे समाहितः ॥ कृतांजलिपुटो भूत्वा चिंतयेद्धृदि शंकरम् ॥ २६ ॥ ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ॥ अशेषाघविनाशाय प्रसीद मम
शंकर ॥ २७ ॥ दुःखशोकाग्निसंतप्तं संसारभयपीडितम् ॥ बहुरोगाकुलं दीनं त्राहि मां वृषवाहन ॥ २८ ॥ आगच्छ देवदेवेश महादेवाभयंकर ॥
गृहाण सह पार्वत्या तव पूजां मया कृताम् ॥ २९ ॥ इति संकल्प्य विधिवद्बाह्यपूजां समाचरेत् ॥ गुरुं गणपतिं चैव यजेत्सव्यापसव्ययोः ॥ ३० ॥
क्षेत्रेशमीशकोणे तु यजेद्वास्तोष्पतिं क्रमात् ॥ वाग्देवीं च यजेत्तत्र ततः कात्यायनीं यजेत् ॥ ३१ ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमोऽन्तकैः ॥
स्वरैरीशादिकोणेषु पीठपादाननुक्रमात् ॥ आभ्यां बिंदुविसर्गाभ्यामधर्मादीन्प्रपूजयेत् ॥ ३२ ॥ सत्त्वरूपैश्चतुर्दिक्षु मध्येऽनंतं सतारकम् ॥ सत्त्वा
दींस्त्रिगुणांस्तंतुरूपान्पीठेषु विन्यसेत् ॥ ३३ ॥ अत ऊर्ध्वच्छदे मायां सह लक्ष्म्या शिवेन च ॥ ३४ ॥ तदंते चांबुजं भूयः सकलं मंडलत्रयम् ॥
पत्रकेसरकिंजल्कव्याप्तं तारांक्षरैः क्रमात् ॥ ३५ ॥ पद्मत्रयं तथाभ्यर्च्य मध्ये मंडलमादरात् ॥ वामां ज्येष्ठां च रौद्रीं च भागाद्यैर्दिक्षु पूजयेत् ॥
॥ ३६ ॥ वामाद्या नव शक्तीश्च नवस्वरयुता यजेत् ॥ हृदि बीजत्रयाद्येन पीठमंत्रेण चार्चयेत् ॥ ३७ ॥ आवृत्तैः प्रथमांगैश्च पंचभिर्मूर्त्तिशक्तिभिः ॥
त्रिशक्तिमूर्त्तिभिश्चान्यैर्निधिद्वयसमन्वितैः ॥ ३८ ॥ अनंताद्यैः परीतांश्च मातृभिश्च वृषादिभिः ॥ सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च सहायुधैः ॥
॥ ३९ ॥ वृषभक्षेत्रचंडेशदुर्गाश्च स्कंदनंदिनौ ॥ गणेशः सैन्यपश्चैव स्वस्वलक्षणलक्षिताः ॥ ४० ॥ अणिमा महिमा चैव गरिमा लघिमा तथा ॥
ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ॥ ४१ ॥ अष्टैश्वर्याणि चोक्तानि तेजोरूपाणि केवलम् ॥ पंचभिर्ब्रह्मभिः पूर्वं हृल्लेखाद्यादिभिः क्रमात
॥ ४२ ॥ अंगैरुमाद्यैरिंद्राद्यैः पूजोक्ता मुनिभिस्तु तैः ॥ उमाचंडेश्वरादींश्च पूजयेदुत्तरादितः ॥ ४३ ॥ एवमावरणैर्युक्तं तेजोरूपं सदाशिवम् ॥ उमया
सहितं देवमुपचारैः प्रपूजयेत् ॥ ४४ ॥ सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतैरपि ॥ अभिषिच्य महादेवं रुद्रसूक्तैः समाहितः ॥ ४५ ॥ कल्पयेद्विवि
धैर्मंत्रैरासनाद्युपचारकान् ॥ आसनं कल्पयेद्धैमं दिव्यवस्त्रसमन्वितम् ॥ ४६ ॥ अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन च ॥ तेनैवाचमनं दद्यान्मधुपर्कं
मधूत्तरम् ॥ ४७ ॥ पुनराचमनं दत्त्वा स्नानं मंत्रैः प्रकल्पयेत् ॥ उपवीतं तथा वासो भूषणानि निवेदयेत् ॥ गंधमष्टांगसंयुक्तं सुपूतं विनिवेदयेत् ॥
॥ ४८ ॥ ततश्च बिल्वमंदारकह्लारसरसीरुहम् ॥ धत्तूरकं कर्णिकारं शणपुष्पं च मल्लिकाम् ॥ ४९ ॥ कुशापामार्गतुलसीमाधवीचंपकादिकम् ॥

१ समारभेत्–इ० पा० । २ तत्राक्षरैः–इ० पा० । ३ मध्येमण्डपम्–इ० पा० । ४ नवशक्तीः–इत्यत्रान्वेतव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृहतीकरवीराणि यथालब्धानि साधकः ॥ ५० ॥ निवेदयेत्सुगंधीनि माल्यानि विविधानि च ॥ धूपं कालागरूत्पन्नं दीपं च विमलं शुभम् ॥
॥५१॥ विशेषकम् ॥ अथ पायसनैवेद्यं सघृतं सोपदंशकम् ॥ मोदकापूपसंयुक्तं शर्करागुडसंयुतम् ॥ ५२ ॥ मधुनाक्तं दधियुतं जलपानसमन्वितम् ॥
तेनैव हविषा वह्नौ जुहुयान्मंत्रभाविते ॥ ५३ ॥ आगमोक्तेन विधिना गुरुवाक्यनियंत्रितः ॥ नैवेद्यं शंभवे भूयो दत्त्वा तांबूलमुत्तमम् ॥ ५४ ॥
धूपं नीराजनं रम्यं छत्रं दर्पणमुत्तमम् ॥ समर्पयित्वा विधिवन्मंत्रैर्वैदिकतांत्रिकैः ॥ ५५ ॥ यद्यशक्तः स्वयं निःस्वो यथाविभवमर्चयेत् ॥ भक्त्या
दत्तेन गौरीशः पुष्पमात्रेण तुष्यति ॥ ५६ ॥ अथांगभूतान्सकलान्गणेशादीन्प्रपूजयेत् ॥ स्तवैर्नानाविधैः स्तुत्वा साष्टांगं प्रणमेद्बुधः ॥ ५७ ॥
ततः प्रदक्षिणीकृत्य वृषचंडेश्वरादिकान्[1] ॥ पूजां समर्प्य विधिवत्प्रार्थयेद्गिरिजापतिम् ॥ ५८ ॥ जय देव जगन्नाथ जय शंकर शाश्वत ॥ जय सर्व
सुराध्यक्ष जय सर्वसुरार्चित ॥ ५९ ॥ जय सर्वगुणातीत जय सर्ववरप्रद ॥ जय नित्य निराधार जय विश्वंभराव्यय[2] ॥ ६० ॥ जय विश्वैकवेद्येश[3]
जय नागेंद्रभूषण ॥ जय गौरीपते शंभो जय चंद्रार्धशेखर ॥ ६१ ॥ जय कोट्यर्कसंकाश जयानंतगुणाश्रय ॥ ६२ ॥ जय रुद्र विरूपाक्ष
जयाचिंत्य[4] निरंजन ॥ जय नाथ कृपासिंधो जय भक्तार्तिभञ्जन ॥ जय दुस्तरसंसारसागरोत्तारण प्रभो ॥ ६३ ॥ प्रसीद मे
महादेव संसारार्त्तस्य खिद्यतः ॥ सर्वपापभयं[5] हृत्वा रक्ष मां परमेश्वर ॥ ६४ ॥ महादारिद्र्यमग्नस्य महापापहतस्य च ॥ महाशो
कविनष्टस्य महारोगातुरस्य च ॥ ६५ ॥ ऋणभारपरीतस्य दह्यमानस्य कर्मभिः ॥ ग्रहैः प्रपीड्यमानस्य प्रसीद मम शंकर ॥ ६६ ॥ दरिद्रः
प्रार्थयेदेवं पूजांते गिरिजापतिम् ॥ अर्थाढ्यो[6] वापि राजा वा प्रार्थयेद्देवमीश्वरम् ॥ ६७ ॥ दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः ॥ ममास्तु
नित्यमानन्दः प्रसादात्तव शंकर ॥ ६८ ॥ शत्रवः संक्षयं यांतु प्रसीदन्तु मम ग्रहाः[7] ॥ नश्यन्तु दस्यवो राष्ट्रे जनाः संतु निरापदः ॥ ६९ ॥
दुर्भिक्षमारीसंतापाः शमं यांतु महीतले ॥ सर्वसस्यसमृद्धिश्च भूयात्सुखमया दिशः ॥ ७० ॥ एवमाराधयेद्देवं प्रदोषे गिरिजापतिम् ॥ ब्राह्मणा
न्भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥ ७१ ॥ सर्वपापक्षयकरी सर्वदारिद्र्यनाशिनी ॥ शिवपूजा मया ख्याता सर्वाभीष्टवरप्रदा ॥ ७२ ॥ महा
पातकसंघातमधिकं चोपपातकम् ॥ शिवद्रव्यापहरणादन्यत्सर्वं निर्वारयेत्[8] ॥ ७३ ॥ ब्रह्महत्यादिपापानां[9] पुराणेषु स्मृतिष्वपि ॥ प्रायश्चित्तानि

१ नवचण्डेश्वरादिकान्–इ० पा० । २ अच्युत –इ० पा० । ३ विश्वैकवन्द्येश–इ० पा० । ४ नित्य–इ० पा० । ५ सर्वपापक्षयं कृत्वा–इ० पा० । ६ अथान्यो वापि–इ० पा० । ७ प्रजाः–इ० पा० । ८ विनाशयेत्–इ० पा० । ९ ब्रह्महत्यादिदोषाणाम्–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टानि न शिवद्रव्यहारिणाम् ॥ ७४ ॥ बहुनात्र किमुक्तेन श्लोकार्द्धेन ब्रवीम्यहम् ॥ ब्रह्महत्याशतं वापि शिवपूजा विनाशयेत् ॥ ७५ ॥ मया कथितमेतत्ते प्रदोषे शिवपूजनम् ॥ रहस्यं सर्वजंतूनामत्र नास्त्येव संशयः ॥ ७६ ॥ एताभ्यामपि बालाभ्यामेवं[1] पूजा विधीयताम् ॥ अतः संवत्सरादेव परां सिद्धिमवाप्स्यथ ॥ ७७ ॥ इति शांडिल्यवचनमाकर्ण्य द्विजभामिनी ॥ ताभ्यां तु सह बालाभ्यां प्रणनाम मुनेः पदम् ॥ ७८ ॥ ॥ ॥ विप्रस्त्र्युवाच ॥ ॥ अहमद्य कृतार्थास्मि तव दर्शनमात्रतः ॥ एतौ कुमारौ भगवंस्त्वामेव शरणं गतौ ॥ ७९ ॥ एष मे तनयो ब्रह्मन्शुचिव्रत इतीरितः ॥ एष राजसुतो नाम्ना धर्मगुप्तः कृतो मया ॥ ८० ॥ एतावहं च भगवन्भवच्चरणकिंकराः ॥ समुद्धरास्मिन्पतितान्घोरे दारिद्र्यसागरे ॥ ८१ ॥ इति प्रपन्नां शरणं द्विजांगनामाश्वास्य वाक्यैरमृतोपमानैः ॥ उपादिदेशाथ तयोः कुमारयोर्मुनिः शिवाराधनमंत्रविद्याम् ॥ ८२ ॥ अथोपदिष्टौ मुनिना कुमारौ ब्राह्मणी च सा ॥ तं प्रणम्य समामंत्र्य जग्मुस्ते शिवमंदिरात् ॥ ८३ ॥ ततः प्रभृति तौ बालौ मुनिवर्योपदेशतः ॥ प्रदोषे पार्वतीशस्य पूजां चक्रतुरंजसा ॥ ८४ ॥ एवं पूजयतोर्देवं द्विजराजकुमारयोः ॥ सुखेनैव व्यतीयाय तयोर्मासचतुष्टयम् ॥ ८५ ॥ कदाचिद्राजपुत्रेण विनासौ द्विजनंदनः ॥ स्नातुं गतो नदीतीरे चचार बहुलीलया ॥ ८६ ॥ तत्र निर्झरनिर्घातनिर्भिन्ने वप्रकुट्टिमे ॥ निधानकलशं स्थूलं प्रस्फुरंतं ददर्श ह ॥ ८७ ॥ तं दृष्ट्वा सहसागत्य हर्षकौतुकविह्वलः ॥ दैवोपपन्नं मन्वानो गृहीत्वा शिरसा ययौ ॥ ॥ ८८ ॥ ससंभ्रमं समानीय निधाय कलशं बलात् ॥ निधाय भवनस्यांते मातरं समभाषत ॥ ८९ ॥ मातर्मातरिमं पश्य प्रसादं गिरिजापतेः ॥ निधानं कुम्भरूपेण दर्शितं करुणात्मना ॥ ९० ॥ अथ सा विस्मिता साध्वी समाहूय नृपात्मजम् ॥ स्वपुत्रं प्रतिनंद्याह मानयन्ती शिवार्चनम् ॥ ॥ ९१ ॥ शृणुतां मे वचः पुत्रौ निधानकलशीमिमाम् ॥ समं विभज्य गृह्णीतं मम शासनगौरवात् ॥ ९२ ॥ इति मातुर्वचः श्रुत्वा तुतोष द्विजनंदनः ॥ प्रत्याह राजपुत्रस्तां विस्रब्धः शंकरार्चने ॥ ९३ ॥ मातस्तव सुतस्यैव सुकृतेन समागतम् ॥ नाहं ग्रहीतुमिच्छामि विभक्तं धनसंचयम् ॥ ९४ ॥ आत्मनः सुकृताल्लब्धं स्वयमेव भुनक्त्वसौ ॥ स[3] एव भगवानीशः करिष्यति कृपां मयि ॥ ९५ ॥ एवमर्चयतोः शंभुं भूयोपि परया मुदा ॥ संवत्सरो व्यतीयाय तस्मिन्नेव गृहे तयोः ॥ ९६ ॥ अथैकदा राजसूनुः सह तेन द्विजन्मना ॥ वसंतसमये प्राप्ते विजहार वनांतरे ॥ ९७ ॥ अथ दूरं गतौ क्वापि वने द्विजनृपात्मजौ ॥ गन्धर्वकन्याः क्रीडंतीः शतशस्तावपश्यताम् ॥ ९८ ॥ ताः सर्वाश्चारुसर्वांग्यो

१ शिवपूजा—इ० पा० । २ संसारसागरे—इ० पा० । ३ यदा कदाचिद्गौरीशः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहरंत्यो मनोहरम् ॥ दृष्ट्वा द्विजात्मजो दूरादुवाच नृपनंदनम् ॥ ९९ ॥ इतः पुरो न गंतव्यं विहरंत्यग्रतः स्त्रियः ॥ [1]स्त्रीसन्निधानं विबुधास्त्यजंति विमलाशयाः ॥ १०० ॥ एताः कैतवकारिण्यो घनयौवनदुर्मदाः ॥ मोहयन्त्यो जनं दृष्ट्वा [2]वाचानुनयकोविदाः ॥ १ ॥ अतः परित्यजेत्स्त्रीणां सन्निधिं सहभाषणम् ॥ [3]निजधर्मरतो विद्वन्ब्रह्मचारी विशेषतः ॥ २ ॥ अतोऽहं नोत्सहे गन्तुं क्रीडास्थानं मृगीदृशाम् ॥ इत्युक्त्वा द्विजपुत्रस्तु निवृत्तो दूरतः स्थितः ॥ ३ ॥ अथासौ राजपुत्रस्तु कौतुकाविष्टमानसः ॥ तासां विहारपदवीमेक [4]एवाभयो ययौ ॥ ४ ॥ तत्र गंधर्वकन्यानां मध्ये त्वेका वरानना ॥ दृष्ट्वाऽऽयांतं राजपुत्रं चिंतयामास चेतसा ॥ ५ ॥ अहो कोयमुदारांगो युवा सर्वांगसुन्दरः ॥ मत्तमातंगगमनो लावण्यामृतवारिधिः ॥ ६ ॥ लीलालोलविशालाक्षो मधुरस्मितपेशलः ॥ मदनोपमरूपश्रीः सुकुमारांगलक्षणः ॥ ७ ॥ इत्याश्चर्ययुता बाला दूराद्दृष्ट्वा नृपात्मजम् ॥ सर्वाः सखीः समालोक्य वचनं चेदमब्रवीत् ॥ ८ ॥ इतो विदूरे हे सख्यो वनमस्त्येकमुत्तमम् ॥ विचित्रचंपकाशोकपुन्नागबकुलैर्युतम् ॥ ९ ॥ तत्र गत्वा वनं सर्वाः संचीय कुसुमोत्करम् ॥ भवत्यः पुनरायांतु तावत्तिष्ठाम्यहं त्विह ॥ ११० ॥ इत्यादिष्टः सखीवर्गो जगाम विपिनांतरम् ॥ सापि गंधर्वजा तस्थौ न्यस्तदृष्टिर्नृपात्मजे ॥ ११ ॥ तां समालोक्य तन्वंगीं नवयौवनशालिनीम् ॥ बालां [5]स्वरूपसंपत्त्या परिभूततिलोत्तमाम् ॥ १२ ॥ राजपुत्रः समागम्य कौतुकोत्फुल्ललोचनः ॥ अवाप दैवयोगेन मदनस्य शरव्यथाम् ॥ १३ ॥ गन्धर्वतनया सापि प्राप्ताय नृपसूनवे ॥ उत्थाय तरसा तस्मै प्रददौ पल्लवासनम् ॥ १४ ॥ कृतोपचारमासीनं तमासाद्य सुमध्यमा ॥ पप्रच्छ तद्रूपगुणैर्ध्वस्तधैर्याकुलेंद्रिया ॥ १५ ॥ कस्त्वं कमलपत्राक्ष कस्माद्देशादिहागतः ॥ कस्य पुत्र इति प्रेम्णा पृष्टः सर्वं न्यवेदयत् ॥ १६ ॥ विदर्भराजतनयं विध्वस्तपितृमातृकम् ॥ शत्रुभिश्च हृतस्थानमात्मानं परराष्ट्रगम् ॥ १७ ॥ सर्वमावेद्य भूयस्तां पप्रच्छ नृपनंदनः ॥ का त्वं वामोरु किं चात्र कार्यं ते कस्य चात्मजा ॥ १८ ॥ किमवध्यायसि हृदा किं वा वक्तुमिहेच्छसि ॥ इत्युक्ता सा पुनः प्राह शृणु राजेंद्रसत्तम ॥ १९ ॥ [6]अस्त्येको द्रविकोनाम गंधर्वाणां कुलाग्रणीः ॥ तस्याहमस्मि तनया नाम्ना चांशुमती स्मृता ॥ १२० ॥ त्वामायांतं विलोक्याहं त्वत्संभाषणलालसा ॥ त्यक्त्वा सखीजनं सर्वमेकैवास्मि महामते ॥ २१ ॥ सर्वसंगीतविद्यासु न मत्तोऽन्यास्ति काचन ॥ मम योगेन तुष्यंति सर्वा अपि सुरस्त्रियः ॥ २२ ॥ साहं सर्वकलाभिज्ञा ज्ञातसर्वजनेंगिता ॥ तवाहमीप्सितं वेद्मि मयि ते संगतं मनः ॥ २३ ॥ तथा ममापि चौत्सुक्यं दैवेन

१ स्त्रीसंनिकर्षम्–इ० पा० । २ बलान्मानुषकोविदान्–इ० पा० । ३ द्विजधर्मरतो विद्वन्–इ० पा० । ४ स्वयम्–इ० पा० । ५ स्वरूपसंपन्नाम्–इ०पा० । ६ अस्त्येको द्रविणोनाम–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिपादितम् ॥ आवयोः स्नेहभेदोऽत्र नाभिभूयादितः परम् ॥ २४ ॥ इति संभाष्य तेनाशु प्रेम्णा गन्धर्वनंदिनी ॥ मुक्ताहारं ददौ तस्मै स्वकुचांतरभूषणम् ॥ २५ ॥ तमादायाद्भुतं हारं स तस्याः प्रणयाकुलः ॥ गाढहर्षभरोत्सिक्तामिदमाह नृपात्मजः ॥ २६ ॥ सत्यमुक्तं त्वया भीरु तथाप्येकं वदाम्यहम् ॥ त्यक्तराज्यस्य निःस्वस्य कथं मे[2] भवसि प्रिया ॥ २७ ॥ सा त्वं पितृमती बाला विलंघ्य पितृशासनम् ॥ स्वच्छंदाचरणं कर्तुं मूढेव कथमर्हसि ॥ २८ ॥ इति तस्य वचः श्रुत्वा तं प्रत्याह शुचिस्मिता ॥ अस्तु नाम तथैवाहं करिष्ये पश्य कौतुकम् ॥ २९ ॥ गच्छ स्वभवनं कांत परश्वः प्रातरेव तु ॥ आगच्छ पुनरत्रैव कार्यमस्ति च नो मृषा ॥ १३० ॥ इत्युक्त्वा तं नृपसुतं सा संगतसखीजना ॥ अपाक्रामत चार्वंगी स चापि नृपनन्दनः ॥ ३१ ॥ स समभ्येत्य हर्षेण द्विजपुत्रस्य सन्निधिम् ॥ सर्वमाख्याय तेनैव सार्धं स्वभवनं ययौ ॥ ॥ ३२ ॥ तां च विप्रसतीं भूयो हर्षयित्वा नृपात्मजः ॥ परश्वो द्विजपुत्रेण सार्धं तेन वनं ययौ ॥ ३३ ॥ स तया पूर्वनिर्दिष्टं स्थानं प्राप्य नृपात्मजः ॥ गन्धर्वराजमद्राक्षीत्स्वदुहित्रा समन्वितम् ॥ ३४ ॥ स गंधर्वपतिः प्राप्तावभिनंद्य कुमारकौ ॥ उपवेश्यासने रम्ये राजपुत्रमभाषत ॥ ॥ ३५ ॥ ॥ गंधर्व उवाच ॥ ॥ राजेंद्रपुत्र पूर्वेद्युः कैलासं गतवानहम् ॥ तत्रापश्यं महादेवं पार्वत्या सहितं प्रभुम् ॥ ३६ ॥ आहूय मां स देवेशः सर्वेषां त्रिदिवौकसाम् ॥ सन्निधावाह भगवान्करुणामृतवारिधिः ॥ ३७ ॥ धर्मगुप्ताह्वयः कश्चिद्राजपुत्रोऽस्ति भूतले ॥ अकिञ्चनो भ्रष्टराज्यो हृतदेशश्च[3] शत्रुभिः ॥ ३८ ॥ स बालो गुरुवाक्येन मदर्चायां रतः सदा ॥ अद्य तत्पितरः सर्वे मां प्राप्तास्तत्प्रभावतः ॥ ३९ ॥ तस्य त्वमपि साहाय्यं कुरु गन्धर्वसत्तम ॥ अर्थासौ[4] निजराज्यस्थो हतशत्रुर्भविष्यति ॥ १४० ॥ इत्याज्ञप्तो महेशेन संप्राप्तो निजमंदिरम् ॥ अनया मद्दुहित्रा च बहुशोऽभ्यर्थितस्तथा ॥ ४१ ॥ ज्ञात्वेमं सकलं शंभोर्नियोगं करुणात्मनः ॥ आदायेमां दुहितरं प्राप्तोऽस्मीदं वनांतरम् ॥४२॥ अत एनां प्रयच्छामि कन्यामंशुमतीं तव ॥ हत्वा शत्रून्स्वराष्ट्रे त्वां स्थापयामि शिवाज्ञया ॥ ४३ ॥ तस्मिन्पुरे त्वमनया भुक्त्वा भोगान्यथेप्सितान् ॥ दशवर्षसहस्रान्ते गन्तासि गिरिशालयम् ॥४४॥ तत्रापि मम कन्येयं त्वामेव प्रतिपत्स्यते ॥ अनेनैव स्वदेहेन दिव्येन शिवसन्निधौ ॥ ४५ ॥ इति गन्धर्वराजस्तमाभाष्य नृपनन्दनम् ॥ तस्मिन्वने स्वदुहितुः पाणिग्रहमकारयत् ॥ ४६ ॥ पारिबर्हमदात्तस्मै रत्नभारान्महोज्ज्वलान् ॥ चूडामणिं चन्द्रनिभं मुक्ताहारांश्च भासुरान् ॥४७॥ दिव्यालंकारवासांसि कार्त्तस्वरपरिच्छदान् ॥ गजानामयुतं भूयो नियुतं नीलवाजिनाम् ॥४८॥

१ गाढहर्षपरासिक्ताम्–इ० पा० । २ त्वम्–इ० पा० । ३ हृतबंधुश्च–इ० पा० । ४ अप्यसौ–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

स्यन्दनानां सहस्राणि सौवर्णानि महांति च ॥ पुनरेकं रथं दिव्यं धनुश्चेन्द्रायुधोपमम् ॥ ४९ ॥ अस्त्राणां च सहस्राणि तूणी चाक्षय्यसायकौ ॥
अभेद्यं वर्म[1] सौवर्णं शक्तिं च रिपुमर्दिनीम् ॥ १५० ॥ दुहितुः परिचर्यार्थं दासीपञ्चसहस्रकम् ॥ ददौ प्रीतमनास्तस्मै धनानि विविधानि च ॥
॥ ५१ ॥ गंधर्वसैन्यमत्युग्रं चतुरंगसमन्वितम् ॥ पुनश्च तत्सहायार्थे गन्धर्वाधिपतिर्ददौ ॥ ५२ ॥ इत्थं राजेन्द्रतनयः संप्राप्तः श्रियमुत्तमाम् ॥
अभीष्टजायासहितो मुमुदे निजसंपदा ॥ ५३ ॥ कारयित्वा स्वदुहितुर्विवाहं समयोचितम् ॥ ययौ विमानमारुह्य गंधर्वाधिपतिर्दिवम् ॥ ५४ ॥
धर्मगुप्तः कृतोद्वाहः सह गंधर्वसेनया ॥ पुनः स्वनगरं प्राप्य जघान रिपुवाहिनीम् ॥ ५५ ॥ दुर्धर्षणं रणे हत्वा शक्त्या गंधर्वसेनया ॥ निः
शेषितारातिबलः प्रविवेश निजं पुरम् ॥ ५६ ॥ ततोभिषिक्तः सचिवैर्ब्राह्मणैश्च महोत्तमैः ॥ रत्नसिंहासनारूढश्चक्रे राज्यमकण्टकम् ॥ ५७ ॥
या विप्रवनिता पूर्वं तमपुष्णात्स्वपुत्रवत् ॥ सैव माताभवत्तस्य स भ्राता द्विजनन्दनः ॥ ५८ ॥ गंधर्वतनया जाया विदर्भनगरेश्वरः ॥ आराध्य
देवं गिरिशं धर्मगुप्तो नृपोऽभवत् ॥ ५९ ॥ एवमन्ये समाराध्य प्रदोषे गिरिजापतिम् ॥ लभंतेभीप्सितान्कामान्देहांते तु परां गतिम् ॥ १६० ॥
॥ सूत उवाच ॥ ॥ एतन्महाव्रतं पुण्यं प्रदोषे शंकरार्चनम् ॥ धर्मार्थकाममोक्षाणां यदेतत्साधनं परम् ॥ ६१ ॥ य एतच्छृणुयात्[3]पुण्यं माहात्म्यं
परमाद्भुतम् ॥ प्रदोषे शिवपूजांते कथयेद्वा समाहितः ॥ ६२ ॥ भवेन्न तस्य दारिद्र्यं जन्मान्तरशतेष्वपि ॥ ज्ञानैश्वर्यसमायुक्तः सोन्ते शिवपुरं
व्रजेत् ॥ ६३ ॥ ये प्राप्य दुर्लभतरं मनुजाः शरीरं कुर्वंति हंत परमेश्वरपादपूजाम् ॥ धन्यास्त एव निजपुण्यजितत्रिलोकास्तेषां पदांबुजरजो भुवनं
पुनाति ॥ १६४ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे प्रदोषमहिमावर्णनं नाम सप्तमो
ऽध्यायः ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ नित्यानंदमयं शांतं निर्विकल्पं निरामयम् ॥ शिवतत्त्वमनाद्यंतं ये विदुस्ते परं गताः ॥ १ ॥
विरक्ताः कामभोगेभ्यो ये प्रकुर्वंत्यहैतुकीम् ॥ भक्तिं परां शिवे धीरास्तेषां मुक्तिर्न संसृतिः ॥२॥ विषयानभिसंधाय ये कुर्वंति शिवे रतिम् ॥ विषयै
र्नाभिभूयंते भुंजानास्तत्फलान्यपि ॥ ३ ॥ येन केनापि भावेन शिवभक्तियुतो नरः ॥ न विनश्यति कालेन स याति परमां गतिम् ॥ ४ ॥
आरुरुक्षुः परं स्थानं विषया[5]सक्तमानसः ॥ पूजयेत्कर्मणा शंभुं भोगांते शिव[6]माप्नुयात् ॥ ५ ॥ अशक्तः कश्चिदुत्स्रष्टुं प्रायो विषयवासनाम् ॥
अतः कर्ममयी पूजा कामधेनुः शरीरिणाम् ॥६॥ मायामयेपि संसारे ये विहृत्य चिरं सुखम् ॥ मुक्तिमिच्छन्ति देहांते तेषां धर्मोयमीरितः ॥ ७ ॥

१ चर्म–इ० पा० । २ अभिनन्द्य ससस्त्रीकः–इ० पा० । ३ नित्यम्–इ० पा० । ४ संशयः–इ० पा० । ५ विषयांस्त्यक्तुमक्षमः–इ० पा० । ६ शम्भुम्–इ०, सुखम्–इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवपूजा सदा लोके हेतुः स्वर्गापवर्गयोः ॥ सोमवारे विशेषेण प्रदोषादिगुणान्विते ॥ ८ ॥ केवलेनापि ये कुर्युः सोमवारे शिवार्चनम् ॥ न तेषां विद्यते किंचिदिहामुत्र च दुर्लभम् ॥ ९ ॥ उपोषितः शुचिर्भूत्वा सोमवारे जितेंद्रियः ॥ वैदिकैर्लौकिकैर्वापि विधिवत्पूजयेच्छिवम् ॥ १० ॥ ब्रह्मचारी गृहस्थो वा कन्या वापि सभर्तृका ॥ विभर्तृका वा संपूज्य लभते वरमीप्सितम् ॥ ११ ॥ अत्राहं कथयिष्यामि कथां श्रोतृमनोहराम् ॥ श्रुत्वा मुक्तिं प्रयांत्येव भक्तिर्भवति शांभवी ॥ १२ ॥ आर्यावर्ते नृपः कश्चिदासीद्धर्मभृतां वरः ॥ चित्रवर्मेति विख्यातो धर्मराजो दुरात्मनाम् ॥ ॥ १३ ॥ स गोप्ता धर्मसेतूनां शास्ता दुष्पथगामिनाम् ॥ यष्टा समस्तयज्ञानां त्राता शरणमिच्छताम् ॥ १४ ॥ कर्त्ता सकलपुण्यानां दाता सकलसंपदाम् ॥ जेता सपत्नवृंदानां भक्तः शिवमुकुन्दयोः ॥ १५ ॥ सोऽनुकूलासु पत्नीषु लब्ध्वा पुत्रान्महौजसः ॥ चिरेण प्रार्थितां लेभे कन्यामेकां वराननाम् ॥ १६ ॥ स लब्ध्वा तनयां दिष्ट्या हिमवानिव पार्वतीम् ॥ आत्मानं देवसदृशं मेने पूर्णमनोरथम् ॥ १७ ॥ स एकदा जातकलक्षणज्ञानाहूय साधून्द्विजमुख्यवृंदान् ॥ कुतूहलेनाभिनिविष्टचेताः पप्रच्छ कन्याँजनने फलानि ॥ १८ ॥ अथ तत्राब्रवीदेको बहुज्ञो द्विजसत्तमः ॥ एषा सीमंतिनी नाम्ना कन्या तव महीपते ॥ १९ ॥ उमेव मांगल्यवती दमयंतीव रूपिणी ॥ भारतीव कलाभिज्ञा लक्ष्मीरिव महागुणा ॥ ॥ २० ॥ सुप्रजा देवमातेव जानकीव धृतव्रता ॥ रविप्रभेव सत्कांतिश्चंद्रिकेव मनोरमा ॥ २१ ॥ दशवर्षसहस्राणि सह भर्त्रा प्रमोदते ॥ प्रसूय तनयानष्टौ परं सुखमवाप्स्यति ॥ २२ ॥ इत्युक्तवंतं नृपतिर्धनैः संपूज्य तं द्विजम् ॥ अवाप परमां प्रीतिं तद्वागमृतसेवया ॥ २३ ॥ अथान्योऽपि द्विजः प्राह धैर्यवानमितद्युतिः ॥ एषा चतुर्दशे वर्षे वैधव्यं प्रतिपत्स्यति ॥ २४ ॥ इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरम् ॥ मुहूर्तमभवद्राजा चिंताव्याकुलमानसः ॥ २५ ॥ अथ सर्वान्समुत्सृज्य ब्राह्मणान्ब्रह्मवत्सलः ॥ सर्वं दैवकृतं मत्वा निश्चिंतः पार्थिवोऽभवत् ॥ २६ ॥ सापि सीमंतिनी बाला क्रमेण गतशैशवा ॥ वैधव्यमात्मनो भावि शुश्रावात्मसखीमुखात् ॥ २७ ॥ परं निर्वेदमापन्ना चिंतयामास बालिका ॥ याज्ञवल्क्यमुनेः पत्नीं मैत्रेयीं पर्यपृच्छत ॥ २८ ॥ मातस्त्वच्चरणांभोजं प्रपन्नास्मि भयाकुला ॥ सौभाग्यवर्धनं कर्म मम शंसितुमर्हसि ॥ २९ ॥ इति प्रपन्नां नृपतेः कन्यां प्राह मुनेः सती ॥ शरणं व्रज तन्वंगि पार्वतीं शिवसंयुताम् ॥ ३० ॥ सोमवारे शिवं गौरीं पूजयस्व समाहिता ॥ उपोषिता वा सुस्नाता विरजा

१ शिवभक्तिस्तथा कार्या—इ० पा० । २ अत्रापि—इ० पा० । ३ श्रुत्वा कृतधियः शंभौ भक्तिं कुर्वन्ति निश्चलाम्—इ० पा० । ४ परमधार्मिकः—इ० पा० । ५ धर्मराजो दुरात्मनाम्—दुरात्मनां धर्मराजः यमः अंतक इत्यर्थः । धर्मराजो महामनाः—इति पाठान्तरम् । ६ ज्ञातकलत्रलक्षणान्—इ० पा० । ७ तस्या जनने भविष्यम्—इ० पा० । ८ अविशंकितः—इ० पा० । ९ शासितुम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्बरधारिणी ॥ ३१ ॥ यतवाङ्निश्चलमनाः[1] पूजां कृत्वा यथोचिताम् ॥ ब्राह्मणान्भोजयित्वाथ शिवं सम्यक्प्रसादयत् ॥३२॥ पापक्षयोऽभिषेकेण साम्राज्यं पीठपूजनात् ॥ सौभाग्यमखिलं सौख्यं गंधमाल्याक्षतार्पणात् ॥ ३३ ॥ धूपदानेन सौगंध्यं कांतिर्दीपप्रदानतः ॥ नैवेद्यैश्च महाभोगो लक्ष्मीस्तांबूलदानतः ॥ ३४ ॥ धर्मार्थकाममोक्षाश्च नमस्कारप्रदानतः ॥ अष्टैश्वर्यादिसिद्धीनां जप एव हि कारणम् ॥ ३५ ॥ होमेन सर्वकामा[2]नां समृद्धिरुपजायते ॥ सर्वेषामेव देवानां तुष्टिर्ब्राह्मणभोजनात्[3] ॥ ३६ ॥ इत्थमाराधय शिवं सोमवारे शिवामपि ॥ अत्यापदमपि प्राप्ता निस्तीर्णाभिभवा भवेः ॥ ३७ ॥ घोराद्घोरं प्रपन्नापि महाक्लेशं भयानकम् ॥ शिवपूजाप्रभावेण तरिष्यसि महद्भयम् ॥ ३८ ॥ इत्थं सीमंतिनीं सम्यगनुशास्य पुनः सती ॥ ययौ सापि वरारोहा राजपुत्री तथाऽकरोत् ॥ ३९ ॥ दमयंत्यां नलस्यासीदिंद्रसेनाभिधः सुतः ॥ तस्य चंद्रांगदो नाम पुत्रोऽभूच्चंद्रसन्निभः ॥ ४० ॥ चित्रवर्मा नृपश्रेष्ठस्तमाहूय नृपात्मजम् ॥ कन्यां सीमंतिनीं तस्मै प्रायच्छद्गुर्वनुज्ञया ॥ ४१ ॥ सोऽभून्महोत्सवस्तत्र तस्या उद्वाहकर्मणि ॥ यत्र सर्वमहीपानां समवायो[4] महानभूत् ॥ ४२ ॥ तस्याः पाणिग्रहं काले कृत्वा चंद्रांगदः कृती ॥ उवास कतिचिन्मासांस्तत्रैव श्वशुरालये ॥ ४३ ॥ एकदा यमुनां तर्तुं स राजतनयो बली ॥ आरुरोह तरीं कैश्चिद्वयस्यैः सह लीलया ॥ ४४ ॥ तस्मिंस्तरति कालिंदीं राजपुत्रे विधेर्वशात् ॥ ममज्ज सह कैवर्तैरावर्त्ताभिहता तरी ॥ ४५ ॥ हा हेति शब्दः सुमहानासीत्तस्यास्तटद्वये ॥ पश्यतां सर्वसैन्यानां प्रलापो दिवमस्पृशत् ॥ ४६ ॥ मज्जंतो मम्रिरे केचित्केचिद्ग्राहोदरं गताः ॥ राजपुत्रादयः केचिन्नादृश्यंत महाजले ॥ ४७ ॥ तदुपश्रुत्य राजापि चित्रवर्मातिविह्वलः ॥ यमुनायास्तटं प्राप्य विचेष्टः समजायत ॥४८॥ श्रुत्वाथ राजपत्न्यश्च बभूवुर्गतचेतनाः ॥ सा च सीमंतिनी श्रुत्वा पपात भुवि मूर्च्छिता ॥ ४९ ॥ तथान्ये मंत्रिमुख्याश्च नायकाः सपुरोहिताः॥ विह्वलाः शोकसंतप्ता विलेपुर्मुक्तमूर्धजाः ॥५०॥ इंद्रसेनोपि राजेंद्रः पुत्रवार्त्तां सुदुःखितः॥ आकर्ण्य सह पत्नीभिर्नष्टसंज्ञः पपात ह ॥ ५१ ॥ तन्मंत्रिणश्च तत्पौरास्तथा तद्देशवासिनः ॥ आबालवृद्धवनिताश्चुक्रुशुः शोकविह्वलाः ॥ ५२ ॥ शोकात्केचिदुरो जघ्नुः शिरो जघ्नुश्च केचन ॥ हा राजपुत्र हा तात क्वासि क्वासीति बभ्रमुः ॥५३॥ एवं शोकाकुलं दीनमिंद्रसेनमहीपतेः ॥ नगरं सहसा क्षुब्धं चित्रवर्मपुरं तथा ॥ ५४ ॥ अथ वृद्धैः समाश्वस्तश्चित्रवर्मा महीपतिः ॥ शनैर्नगरमागत्य सान्त्वयामास चात्मजाम् ॥ ५५ ॥ स राजांभसि मग्नस्य जामातुस्तस्य बांधवैः ॥ आगतैः कारयामास साकल्यादौर्ध्वदैहिकम् ॥५६॥ सा च सीमंतिनी साध्वी भर्तृलोकमतिः सती ॥ पित्रा

१ निश्चलमतिः—इ० पा० । २ सर्वकोशानाम्—इ० पा० । ३ संयमिभोजनात्—इ० पा० । ४ समुदाय—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

निषिद्धा स्नेहेन वैधव्यं प्रत्यपद्यत ॥ ५७ ॥ मुनेः पत्न्योऽपदिष्टं यत्सोमवारव्रतं शुभम् ॥ न तत्याज शुभाचारा वैधव्यं प्राप्तवत्यपि ॥ ५८ ॥ एवं चतुर्दशे वर्षे दुःखं प्राप्य सुदारुणम् ॥ ध्यायन्ती शिवपादाब्जं वत्सरत्रयमत्यगात् ॥ ५९ ॥ पुत्रशोकादिवोन्मत्तमिंद्रसेनं महीपतिम् ॥ प्रसह्य तस्य दायादाः संतांगं जहुरोजसा ॥ ६० ॥ हृतसिंहासनः शूरैर्दायादैः सोऽप्रजो नृपः ॥ निगृह्य काराभवने सपत्नीको निवेशितः ॥ ६१ ॥ चंद्रांगदोऽपि तत्पुत्रो निमग्नो यमुनाजले ॥ अधोधोमज्जमानोऽसौ ददर्शोरगकामिनीः ॥ ६२ ॥ जलक्रीडासु सक्तास्ता दृष्ट्वा राजकुमारकम् ॥ विस्मितास्तमथो निन्युः पातलं पन्नगालयम् ॥ ६३ ॥ स नीयमानस्तैरसा पन्नगीभिर्नृपात्मजः ॥ तक्षकस्य पुरं रम्यं विवेश परमाद्भुतम् ॥ ६४ ॥ सोऽपश्यद्राजतनयो महेंद्रभवनोपमम् ॥ महारत्नपरिभ्राजन्मयूखपरिदीपितम् ॥ ६५ ॥ वज्रवैडूर्यपाचादिप्रासादशतसंकुलम् ॥ माणिक्यगोपुरद्वारं मुक्तादामभिरुज्ज्वलम् ॥ ६६ ॥ चंद्रकांतस्थलं रम्यं हेमद्वारकपाटकम् ॥ अनेकशतसाहस्रमणिदीपविराजितम् ॥ ६७ ॥ तत्रापश्यत्सभामध्ये निषण्णं रत्नविष्टरे ॥ तक्षकं पन्नगाधीशं फणानेकशतोज्ज्वलम् ॥ ६८ ॥ दिव्यांबरधरं दीप्तं रत्नकुण्डलरंजितम् ॥ नानारत्नपरिक्षिप्तमुकुटद्युतिरंजितम् ॥ ६९ ॥ फणामणिमयूखाढ्यैरसंख्यैः पन्नगोत्तमैः ॥ उपासितं प्रांजलिभिश्चित्ररत्नविभूषितैः ॥ ७० ॥ रूपयौवनमाधुर्यविलासगतिशोभिना ॥ नागकन्यासहस्रेण समंतात्परिवारितम् ॥ ७१ ॥ दिव्याभरणदीप्तांगं दिव्यचंदनचर्चितम् ॥ कालाग्निमिव दुर्धर्षं तेजसादित्यसन्निभम् ॥ ७२ ॥ दृष्ट्वा राजसुतो धीरः प्रणिपत्य सभास्थले ॥ उत्थितः प्रांजलिस्तस्य तेजसाक्षिप्तलोचनः ॥ ७३ ॥ नागराजोपि तं दृष्ट्वा राजपुत्रं मनोरमम् ॥ कोऽयं कस्मादिहायात इति पप्रच्छ पन्नगीः ॥ ७४ ॥ ता ऊचुर्यमुनातोये दृष्टोऽस्माभिर्यदृच्छया ॥ अज्ञातकुलनामायमानीतस्तव सन्निधिम् ॥ ७५ ॥ अथ पृष्टो राजपुत्रस्तक्षकेण महात्मना ॥ कस्यासि तनयः कस्त्वं को देशः कथमागतः ॥ ७६ ॥ राजपुत्रो वचः श्रुत्वा तक्षकं वाक्यमब्रवीत् ॥ ७७ ॥ ॥ राजपुत्र उवाच ॥ ॥ अस्ति भूमंडले कश्चिद्देशो निषधसंज्ञकः ॥ तस्याधिपोऽभवद्राजा नलो नाम महायशाः ॥ स पुण्यकीर्तिः क्षितिपो दमयन्तीपतिः शुभः ॥ ७८ ॥ तस्मादपींद्रसेनाख्यस्तस्य पुत्रो महाबलः ॥ चंद्रांगदोस्मि नाम्नाहं नवोढः श्वशुरालये ॥ विहरन्यमुनातोये निमग्नो दैवचोदितः ॥ ७९ ॥ एताभिः पन्नगस्त्रीभिरानीतोस्मि तवांतिकम् ॥ दृष्ट्वाहं तव पादाब्जं पुण्यैर्जन्मां

१ सतांगम्—राज्यम्—इत्यर्थः । "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्यांगानि" इत्यमरः । २ सहसा—इ० पा० । ३ रत्नकुण्डलमण्डितम्—इ० पा० । ४ फणामणिसहस्रौघैः—इ० पा० । ५ उपस्थितं प्रांजलिभिश्चित्रालंकारभूषितैः—इ० पा० । ६ तस्थौ—इ० पा० । ७ मगधसंज्ञक—इ० पा० । ८ प्रभुः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरार्जितैः ॥ ८० ॥ अद्य धन्योऽस्मि धन्योऽस्मि कृतार्थौ पितरौ मम ॥ यत्प्रेक्षितोऽहं कारुण्यात्त्वया संभाषितोपि च ॥ ८१ ॥ ॥ सूत उवाच ॥ ॥ इत्युदारमसंभ्रांतं वचः श्रुत्वातिपेशलम् ॥ तक्षकः पुनरौत्सुक्याद्बभाषे राजनंदनम् ॥ ८२ ॥ ॥ तक्षक उवाच ॥ ॥ भोभो नरेंद्रदायाद मा भैषीर्धीरतां व्रज ॥ सर्वदेवेषु को देवो युष्माभिः पूज्यते सदा ॥ ८३ ॥ ॥ राजपुत्र उवाच ॥ ॥ यो देवः सर्वदेवेषु महादेव इति स्मृतः ॥ पूज्यते स हि विश्वात्मा शिवोऽस्माभिरुमापतिः ॥ ८४ ॥ यस्य तेजोंशलेशेन रजसा च प्रजापतिः ॥ कृतरूपोऽसृजद्विश्वं स नः पूज्यो महेश्वरः ॥ ८५ ॥ यस्यांशात्सात्त्विकं दिव्यं बिभ्रद्विष्णुः सनातनः[1] ॥ विश्वं बिभर्त्ति भूतात्मा शिवोऽस्माभिः स पूज्यते ॥ ॥ ८६ ॥ यस्यांशात्तामसाज्जातो रुद्रः कालाग्निसन्निभः ॥ विश्वमेतद्धरत्यंते स पूज्योऽस्माभिरीश्वरः ॥ ८७ ॥ यो विधाता विधातुश्च कारणस्यापि कारणम् ॥ तेजसां परमं तेजः स शिवो नः परा गतिः ॥ ८८ ॥ योंतिकस्थोऽपि दूरस्थः पापोपहतचेतसाम् ॥ अपरिच्छेद्य धामासौ शिवो नः परमा गतिः ॥ ८९ ॥ योऽग्नौ तिष्ठति यो भूमौ यो वायौ सलिले च यः ॥ य आकाशे च विश्वात्मा स पूज्यो नः सदाशिवः ॥ ९० ॥ यः साक्षी सर्वभूतानां य आत्मस्थो निरंजनः ॥ यस्येच्छावशगो लोकः सोऽस्माभिः पूज्यते शिवः ॥ ९१ ॥ यमेकमाद्यं पुरुषं पुराणं वदंति[2] भिन्नं गुणवैकृतेन ॥ क्षेत्रज्ञमेकेथ तुरीयमन्ये कूटस्थमन्ये स शिवो गतिर्नः ॥ ९२ ॥ यं नास्पृशंश्चैत्त्यमचिंत्यतत्त्वं दुरंतधामा नमतत्स्वरूपम् ॥ मनोवचोवृत्तय आत्मभाजां स एष पूज्यः परमः शिवो नः ॥ ९३ ॥ यस्य प्रसादं प्रतिलभ्य संतो वांछंति नैंद्रं पदमुज्ज्वलं वा ॥ निस्तीर्णकर्मार्गलकालचक्राश्चरंत्यभीताः स शिवो गतिर्नः ॥ ९४ ॥ यस्य स्मृतिः सकलपापरुजां विघातं सद्यः करोत्यपि च पुल्कसजन्म भाजाम् ॥ यस्य स्वरूपमखिलं श्रुतिभिर्विमृग्यं तस्मै शिवाय सततं करवाम पूजाम् ॥ ९५ ॥ यन्मूर्ध्नि लब्धनिलया सुरलोकसिंधुर्यस्यांगगा[3] भगवती जगदंबिका च ॥ यत्कुंडले[4] त्वहह तक्षकवासुकी द्वौ सोऽस्माकमेव गतिरर्धशशांकमौलिः ॥ ९६ ॥ जयति निगमचूडाग्रेषु यस्यांघ्रिपद्मं जयति च हृदि नित्यं योगिनां यस्य मूर्तिः[5] ॥ जयति सकलतत्त्वोद्भासनं यस्य मूर्तिः स विजितगुणसर्गः[6] पूज्यतेऽस्माभिरीशः ॥ ९७ ॥ ॥ सूत उवाच ॥ ॥ इत्याकर्ण्य वचस्तस्य तक्षकः प्रीतमानसः ॥ जातभक्तिर्महादेवे राजपुत्रमभाषत ॥ ९८ ॥ ॥ तक्षक उवाच ॥ ॥ परि

१ सनातनः—इ० पा० । २ वदंति—इ० पा० । ३ अंगना—इ०पा० । ४ यत्कंठभूषणमिदं गरलं करालं यद्भालनेत्रं ज्वलनः प्रचण्डः—इ० पा० । ५ जयति सदसि नित्यं योगिनां यस्य कीर्तिः—इ०पा० । ६ विजितगुणपूगः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टोऽस्मि भद्रं स्तात्तव राजेंद्रनंदन ॥ बालोपि यत्परं तत्त्वं वेत्सि शैवं परात्परम् ॥ ९९ ॥ एष रत्नमयो लोक एताश्चारुदृशोऽबलाः ॥ एते कल्पद्रुमाः सर्वे वाप्योमृतरसांभसः ॥ १०० ॥ नात्र मृत्युभयं घोरं न जरारोगपीडनम् ॥ यथेष्टं विहरात्रैव भुंक्ष्व भोगान्यथोचितान्[1] ॥ १०१ ॥ इत्युक्तो नागराजेन स राजेंद्रकुमारकः ॥ प्रत्युवाच परं[2] प्रीत्या कृतांजलिरुदारधीः ॥ २ ॥ कृतदारोऽस्म्यहं काले सुव्रता गृहिणी मम ॥ शिवपूजापरा नित्यं पितरावेकपुत्रकौ ॥ ३ ॥ ते त्वद्य मां मृतं मत्त्वा शोकेन महतावृताः ॥ प्रायः प्राणैर्वियुज्यंते दैवात्प्राणान्वहंति वा ॥ ४ ॥ अतो मया बहुतिथं नात्र स्थेयं कथंचन ॥ तमेव लोकं कृपया मां प्रापयितुमर्हसि ॥ ५ ॥ इत्युक्तवंतं नरदेवपुत्रं दिव्यैर्वरान्नैः सुरपादपोत्थैः ॥ आप्याययित्वा वरगंधवासः स्रग्रत्नदिव्याभरणैर्विचित्रैः ॥ ६ ॥ संतोषयित्वा विविधैश्च भोगैः पुनर्बभाषे भुजगाधिराजः ॥ यदायदा त्वं स्मरसि त्वदग्रे तदा तदाविष्क्रियते मयेति ॥ ७ ॥ पुनश्च राजपुत्राय तक्षकोश्वं च कामगम् ॥ नानाद्वीपसमुद्रेषु लोकेषु च निरर्गलम् ॥ ८ ॥ दत्तवान्रत्नाभरणदिव्याभरणवाससाम् ॥ वाहनाय ददावेकं राक्षसं पन्नगेश्वरः ॥ ९ ॥ तत्सहायार्थमेकं च पन्नगेंद्रकुमारकम् ॥ नियुज्य तक्षकः प्रीत्या गच्छेति विससर्ज तम् ॥ १० ॥ इति चंद्रांगदः सोऽथ संगृह्य विविधं धनम् ॥ अश्वं कामगमारुह्य ताभ्यां सह विनिर्ययौ ॥११॥ स मूहूर्तादिवोन्मज्य तस्मादेव सरिज्जलात् ॥ विजहार तटे रम्ये दिव्यमारुह्य वाजिनम् ॥ १२ ॥ अथास्मिन्समये तन्वी सा च सीमंतिनी सती ॥ स्नातुं समाययौ तत्र सखीभिः परिवारिता ॥ १३ ॥ सा ददर्श नदीतीरे विहरंतं नृपात्मजम् ॥ रक्षसा नररूपेण नागपुत्रेण चान्वितम् ॥ १४ ॥ दिव्यरत्नसमाकीर्णं दिव्यमाल्यावतंसकम् ॥ देहेन दिव्यगंधेन व्याक्षिप्तदशयोजनम् ॥ १५ ॥ तमपूर्वाकृतिं[3] वीक्ष्य दिव्याश्वमधिसंस्थितम् ॥ जडोन्मत्तेव भीतेव तस्थौ तन्न्यस्तलोचना ॥ १६ ॥ तां च राजेंद्रपुत्रोऽसौ दृष्टपूर्वामिति स्मरन् ॥ निर्मुक्तकंठाभरणां कंठसूत्रविवर्जिताम् ॥ १७ ॥ असंयोजितधम्मिल्लामंगरागविवर्जिताम् ॥ त्यक्तनीलांजनापांगीं कृशांगीं शोकदूषिताम् ॥ १८ ॥ दृष्ट्वाऽवतीर्य तुरगादुपविष्टः सरित्तटे ॥ तामाहूय वरारोहामुपत्रेश्येदमब्रवीत् ॥ १९ ॥ का त्वं कस्य कलत्रं वा कस्यासि तनया सती ॥ किमिदं तेंगने बाल्ये दुःसहं शोकलक्षणम् ॥ १२० ॥ इति स्नेहेन संपृष्टा सा वधूरश्रुलोचना ॥ लज्जिता स्वयमाख्यातुं तत्सखी सर्वमब्रवीत् ॥ २१ ॥ इयं सीमंतिनी नाम्ना स्नुषा निषधभूपतेः[5] ॥ चंद्रांगदस्य महिषी तनया चित्रवर्मणः ॥ २२ ॥ अस्याः पतिर्दैवयोगान्निमग्नोऽस्मिन्महाजले ॥ तेनेयं प्राप्तवैधव्या बाला दुःखेन[6] शोषिता ॥ २३ ॥

१ यथेप्सितान्--इ०पा० । २ वरम्--इ०पा० । ३ शाष्पतल्पे समासीनम्--इ०पा० । ४ नवदूर्वाकृतिं वीक्ष्य--इ०पा० । ५ मगधभूपतेः--इ०पा० । ६ शोकेन--इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं वर्षत्रयं नीतं शोकेनातिबलीयसा ॥ अथेंदुवारे संप्राप्ते स्नातुमत्र समागता ॥ २४ ॥ श्वशुरोऽस्याश्च राजेंद्रो हृतराज्यश्च शत्रु भिः ॥ बलाद्गृहीतो बद्धश्च सभार्यस्तद्वशे स्थितः ॥ २५ ॥ तथाप्येषा शुभाचारा सोमवारे महेश्वरम् ॥ सांबिकं परया भक्त्या पूजयत्यमलाशया ॥ २६ ॥ ॥ सूत उवाच ॥ ॥ इत्थं सखीमुखेनैव सर्वमावेद्य सुव्रता ॥ ततः सीमंतिनी प्राह स्वयमेव नृपात्मजम् ॥ २७ ॥ कस्त्वं कंदर्पसंकाशः काविमौ तव पार्श्वगौ ॥ देवो नरेंद्रः सिद्धो वा गंधर्वो वाथ किन्नरः ॥ २८ ॥ किमर्थं मम वृत्तांतं स्नेहवानिव पृच्छसि ॥ किं मां वेत्सि महाबाहो दृष्टवान्किमु कुत्रचित् ॥ २९ ॥ दृष्टपूर्व इवाभासि मया च स्वजनो यथा ॥ सर्वं कथय तत्त्वेन सत्यसारा हि साधवः ॥ १३० ॥ ॥ सूत उवाच ॥ एतावदुक्त्वा नरदेवपुत्री सबाष्पकंठं सुचिरं रुरोद ॥ मुमोह भूमौ पतिता सखीभि र्वृता न किंचित्कथितुं शशाक ॥ ३१ ॥ श्रुत्वा चंद्रांगदः सर्वं प्रियायाः शोककारणम् ॥ मुहूर्त्तमभवत्तूष्णीं स्वयं शोकसमाकुलः ॥ ३२ ॥ अथा श्वास्य प्रियां तन्वीं विविधैर्वाक्यनैपुणैः[3] ॥ सिद्धा नाम वयं देवाः कामगा इति सोऽब्रवीत् ॥ ३३ ॥ ततो बलादिवाकृष्य पाणिग्रहणशंकिताम् ॥ पुलकांचितसर्वांगीं तां कर्णे त्विदमब्रवीत् ॥ ३४ ॥ क्वापि लोके मया दृष्टस्तव भर्त्ता वरानने ॥ त्वद्व्रताचरणात्प्रीतः सद्य एवागमिष्यति ॥ ॥ ३५ ॥ अपनेष्यति ते शोकं द्वित्रैरेव दिनैर्ध्रुवम् ॥ एतच्छंसितुमायातस्तव भर्त्तुः सखाऽस्म्यहम् ॥ ३६ ॥ अत्र कार्यो न संदेहः शपामि शिवपा दयोः ॥ तावत्त्वद्धृदये स्थेयं न प्रकाश्यं च कुत्रचित् ॥ ३७ ॥ सा तु तद्वचनं श्रुत्वा सुधाधाराशताधिकम् ॥ संभ्रमोद्भ्रांतनयना तमेव मुहुरैक्षत ॥ ॥ ३८ ॥ प्रेमबंधानुगुणितं वाक्यं चाह रसायनम्[4] ॥ विभ्रमोदारसहितं मधुरापांगवीक्षणम् ॥ ३९ ॥ स्वपाणिस्पर्शनोद्भिन्नपुलकांचितविग्रहम् ॥ पूर्वं दृष्टानि चांगेषु लक्षणानि स्वरादिषु ॥ वयःप्रमाणं वर्णं च परीक्ष्यैनमतर्कयत् ॥ १४० ॥ एष एव पतिर्मे स्याद्ध्रुवं नान्यो भविष्यति ॥ अस्मिन्नेव प्रसक्तं मे हृदयं प्रेमकातरम् ॥ १४१ ॥ परलोकादिहायातः कथमेवं स्वरूपधृक् ॥ दुर्भाग्यायाः कथं मे स्याद्भर्तुर्नष्टस्य दर्शनम् ॥ १४२ ॥ स्वप्नोयं किमु न स्वप्नो भ्रमोऽयं किं तु न भ्रमः ॥ एष धूर्तोऽथवा कश्चिद्यक्षो गंधर्व एव वा ॥ १४३ ॥ मुनिपत्न्या यदुक्तं मे परमापद्गतापि च ॥ व्रतमे तत्कुरुष्वेति तस्य वा फलमेव वा ॥ ४४ ॥ यो वर्षायुतसौभाग्यं ममेत्याह द्विजोत्तमः ॥ नूनं तस्य वचः सत्यं को विद्यादीश्वरं विना ॥ ४५ ॥ निमित्तानि च दृश्यंते मंगलानि दिनेदिने ॥ प्रसन्ने पार्वतीनाथे किमसाध्यं शरीरिणाम् ॥ ४६ ॥ इत्थं विमृश्य बहुधा तां पुनर्मुक्तसंशयाम् ॥

१ प्रमाथिभिः--इ०पा० । २ सुदुर्वृत्ताम्--इति पाठे दुर्भाग्यामित्यर्थः । ३ वाङ्मयैः शुभैः--इ० पा० । ४ मधुरसायनम्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लज्जानम्रमुखीं कर्णे शशंसात्मप्रयोजनम् ॥ ४७ ॥ इमं वृत्तांतमाख्यातुं तत्पित्रोः शोकतप्तयोः ॥ गच्छामः स्वस्ति ते भद्रे सद्यः पतिमवाप्स्यसि ॥ ४८ ॥ इत्युक्त्वाश्वं समारुह्य जगाम नृपनंदनः ॥ ताभ्यां सह निजं राष्ट्रं प्रत्यपद्यत तत्क्षणात् ॥ ४९ ॥ स पुरोपवनाभ्याशे स्थित्वा तं फणिपुत्रकम् ॥ विससर्जात्मदायादान्नृपासनगतान्प्रति ॥१५०॥ स गत्वोवाच तान्छीघ्रमिंद्रसेनो विमुच्यताम् ॥ चंद्रांगदस्तस्य सुतः प्राप्तोऽयं पन्नगालयात् ॥ १५१ ॥ नृपासनं विमुंचंतु भवंतो न विचार्यताम् ॥ नो चेच्चंद्रांगदस्याशु बाणाः प्राणान्हरंति वः ॥ १५२ ॥ स मग्नो यमुनातोये गत्वा तक्षकमंदिरम् ॥ लब्ध्वा च तस्य साहाय्यं पुनर्लोकादिहागतः ॥ १५३ ॥ इत्याख्यातमशेषेण तद्वृत्तांतं निशम्य ते ॥ साधुसाध्विति संभ्रांताः शशंसुः परिपंथिनः ॥ ५४ ॥ अथेंद्रसेनाय निवेद्य सत्वरं नष्टस्य पुत्रस्य पुनः समागमम् ॥ प्रसाद्य तं प्राप्तनरेश्वरासनं दायादमुख्यास्तु भयं प्रपेदिरे ॥ ५५ ॥ अथ पौरजनाः सर्वे पुरोद्याने नृपात्मजम् ॥ दृष्ट्वा राज्ञे द्रुतं प्रोचुर्लेभिरे च महाधनम् ॥ ५६ ॥ आकर्ण्य पुत्रमायांतं राजानंदजलाप्लुतः ॥ न व्यजानादिमं लोकं राज्ञी च परया मुदा ॥ ५७ ॥ अथ नागरिकाः सर्वे मंत्रिवृद्धाः पुरोधसः ॥ प्रत्युद्गम्य परिष्वज्य तमानिन्युर्नृपांतिकम् ॥ ५८ ॥ अथोत्सवेन महता प्रविश्य निजमंदिरम् ॥ राजपुत्रः स्वपितरौ ववंदे बाष्पमुत्सृजन् ॥ ५९ ॥ तं पादमूले पतितं स्वपुत्रं विवेद नासौ पृथिवीपतिः क्षणम् ॥ प्रबोधितोऽमात्यजनैः कथंचिदुत्थाप्य क्लिन्नेन हृदालिलिंग ॥ १६० ॥ क्रमेण मातॄरभिवंद्य ताभिः प्रवर्धिताशीः प्रणयाकुलाभिः ॥ आलिंगितः पौरजनानशेषान्संभावयामास स राजसूनुः ॥६१॥ तेषां मध्ये समासीनः स्ववृत्तांतमशेषतः ॥ पित्रे निवेदयामास तक्षकस्य च मित्रताम् ॥६२॥ दत्तं भुजंगराजेन रत्नादिधनसंचयम् ॥ दिव्यं तद्राक्षसानीतं पित्रे सर्वं न्यवेदयत् ॥६३॥ राजपुत्रस्य चरितं दृष्ट्वा श्रुत्वा च विह्वलः ॥ मेने स्नुषायाः सौभाग्यं महेशाराधनार्जितम् ॥६४॥ सौमांगल्यमयीं वार्तामिमां निषधभूपतिः॥चारैर्निवेदयामास चित्रवर्ममहीपतेः ॥६५॥ श्रुत्वाऽमृतमयीं वार्त्तां स समुत्थाय संभ्रमात् ॥ तेभ्यो दत्त्वा धनं भूरि ननर्तानंदविह्वलः ॥६६॥ अथाहूय स्वतनयां परिष्वज्याश्रुलोचनः ॥ भूषणैर्भूषयामास त्यक्तवैधव्यलक्षणाम् ॥ ६७ ॥ अथोत्सवो महानासीद्राष्ट्रग्रामपुरादिषु ॥ सीमंतिन्याः शुभाचारं शशंसुः सर्वतो जनाः ॥ ६८ ॥ चित्रवर्माथ नृपतिः समाहूयेंद्रसेनजम् ॥ पुनर्विवाहविधिना सुतां तस्मै न्यवेदयत् ॥ ६९ ॥ चन्द्रांगदोऽपि रत्नाद्यैरानीतैस्तक्षकालयात् ॥ स्वां पत्नीं भूषयां चक्रे मर्त्यानामतिदुर्लभैः ॥ १७० ॥ अंगरागेण दिव्येन तप्तकांचनशोभिना ॥ शुशुभे सा सुगंधेन दशयोजनगामिना ॥ ७१ ॥ अम्लानमालया

१ शशंस–सः चंद्रांगदः–इति शेषः । २ मत्पित्रोः–इ० पा० । ३ आनंदातिशयादिमं लोकं न व्यजानात्–ब्रह्मानंदमिवात्यानन्दमन्वभूदितिभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शश्वत्[१]पद्मकिंजल्कवर्णया ॥ कल्पद्रुमोत्थया बाला भूषिता शुशुभे सती ॥ ७२ ॥ एवं चंद्रांगदः पत्नीमवाप्य समये शुभे ॥ ययौ स्वनगरीं भूयः
श्वशुरेणानुमोदितः ॥ ७३ ॥ इन्द्रसेनोऽपि राजेंद्रो राज्ये स्थाप्य निजात्मजम् ॥ तपसा शिवमाराध्य लेभे संयमिनां गतिम् ॥ ७४ ॥ दशवर्ष
सहस्राणि सीमंतिन्या स्वभार्यया ॥ सार्धं चन्द्रांगदो राजा बुभुजे विषयान्बहून् ॥ ७५ ॥ प्रासूत तनयानष्टौ कन्यामेकां वराननाम् ॥
रेमे सीमंतिनी भर्त्रा पूजयती महेश्वरम् ॥ दिनेदिने च सौभाग्यं प्राप्तं चैवेन्दुवासरात् ॥ ७६ ॥ ॥ सूत उवाच ॥ ॥ विचित्रमिदमा
ख्यानं मया समनुवर्णितम् ॥ भूयोऽपि वक्ष्ये माहात्म्यं सोमवारव्रतोदितम् ॥ १७७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
ब्रह्मोत्तरखण्डे सोमवारव्रतवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ [२]साधुसाधु महाभाग त्वया कथितमुत्तमम् ॥
आख्यानं पुनरन्यच्च विचित्रं वक्तुमर्हसि ॥ १ ॥ ॥ सूत उवाच ॥ ॥ विदर्भविषये पूर्वमासीदेको द्विजोत्तमः ॥ वेदमित्र इति ख्यातो वेद
शास्त्रार्थवित्सुधीः ॥ २ ॥ तस्यासीदपरो विप्रः सखा सारस्वताह्वयः ॥ तावुभौ परमस्निग्धावेकदेशनिवासिनौ ॥ ३ ॥ वेदमित्रस्य पुत्रोऽभूत्सु
मेधा नाम सुव्रतः ॥ सारस्वतस्य तनयः सोमवानिति विश्रुतः ॥ ४ ॥ उभौ सवयसौ बालौ समवेषौ सम[३]स्थिती ॥ समं च कृतसंस्कारौ सम
विद्यौ बभूवतुः ॥ ५ ॥ सांगानधीत्य तौ वेदांस्तर्कव्याकरणानि च ॥ इतिहासपुराणानि धर्मशास्त्राणि कृत्स्नशः ॥ ६ ॥ सर्वविद्याकुशलिनौ
बाल्य एव मनीषिणौ ॥ प्रहर्षमतुलं पित्रोर्ददतुः सकलैर्गुणैः ॥ ७ ॥ तावेकदा स्वतनयौ तावुभौ ब्राह्मणोत्तमौ ॥ आहूयावोचतां प्रीत्या षोड
शाब्दौ शुभाकृती ॥ ८ ॥ हे पुत्रकौ युवां बाल्ये कृतविद्यौ सुवर्चसौ ॥ वैवाहिकोयं समयो वर्तते युवयोः समम् ॥ ९ ॥ इमं प्रसाद्य राजानं
विदर्भेशं स्वविद्यया ॥ ततः प्राप्य धनं भूरि कृतोद्वाहौ भविष्यथः ॥ १० ॥ एवमुक्तौ सुतौ ताभ्यां तावुभौ द्विजनंदनौ ॥ विदर्भराजमासाद्य
स[४]मतोषयतां गुणैः ॥ ११ ॥ विद्यया परितुष्टाय तस्मै द्विजकुमारकौ ॥ विवाहार्थं कृतोद्योगौ धनहीनावशंसताम् ॥ १२ ॥ तयोरपि मतं
ज्ञात्वा स विदर्भमहीपतिः ॥ प्रहस्य किंचित्प्रोवाच लोकतत्त्वविवित्सया ॥ १३ ॥ [५]आस्ते निषधराजस्य राज्ञी सीमंतिनी सती ॥ सोमवारे महादेवं
पूजयत्यंबिकायुतम् ॥ १४ ॥ तस्मिन्दिने सपत्नीकान्द्विजाग्र्यान्वेदवित्तमान् ॥ संपूज्य परया भक्त्या धनं भूरि ददाति च ॥ १५ ॥ अतोऽत्र
युवयोरेको नारीविभ्रमवेषधृक् ॥ एकस्तस्याः पतिर्भूत्वा जायेतां विप्रदंपती ॥ १६ ॥ युवां वधूवरौ भूत्वा प्राप्य सीमंतिनीगृहम् ॥ भुक्त्वा भूरि

१ हेमकिञ्जल्कवर्णया--इ० पा० । २ साधु श्रुतं महाप्राज्ञ—साधु सूत महाप्राज्ञ—इ० च पा० । ३ समद्युती—इ० पा० । ४ पर्यतोषयताम्—इ० पा० । ५ इयम्—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनं लब्ध्वा पुनर्यातं ममांतिकम् ॥ १७ ॥ इति राज्ञा समादिष्टौ भीतौ द्विजकुमारकौ ॥ प्रत्यूचतुरिदं कर्म कर्तुं नौ जायते भयम् ॥ १८ ॥
देवतासु गुरौ पित्रोस्तथा राजकुलेषु च ॥ कौटिल्यमाचरन्मोहात्सद्यो नश्यति सान्वयः ॥ १९ ॥ कथमंतर्गृहं राज्ञां छद्मना प्रविशेत्पुमान् ॥
गोप्यमानमपिच्छद्म कदाचित्ख्यातिमेष्यति ॥ २० ॥ ये गुणाः साधिताः पूर्वं शीलाचारश्रुतादिभिः ॥ सद्यस्ते नाशमायांति कौटिल्य
पथगामिनः ॥ २१ ॥ पापं निंदा भयं वैरं चत्वार्येतानि देहिनाम् ॥ छद्ममार्गप्रपन्नानां तिष्ठंत्येव हि सर्वदा ॥ २२ ॥ अत आवां शुभाचारौ
जातौ च शुचिनां कुले ॥ वृत्तं धूर्तजनश्लाघ्यं नाश्रयावः कदाचन ॥ २३ ॥ ॥ राजोवाच ॥ ॥ दैवतानां गुरूणां च पित्रोश्च पृथिवीपतेः ॥
शासनस्याप्यलंघ्यत्वात्प्रत्यादेशो न कर्हिचित् ॥ २४ ॥ एतैर्यद्यत्समादिष्टं शुभं वा यदि वाऽशुभम् ॥ कर्तव्यं नियतं भीतैरप्रमत्तैर्बुभूषुभिः ॥
॥ २५ ॥ अहो वयं हि राजानः प्रजा यूयं हि संमताः ॥ राजाज्ञया प्रवृत्तानां श्रेयः स्यादन्यथा भयम् ॥ २६ ॥ अतो मच्छासनं कार्यं भव
द्भ्यामविलंबितम् ॥ इत्युक्तौ नरदेवेन तौ तथेत्यूचतुर्भयात् ॥ २७ ॥ सारस्वतस्य तनयं सामवन्तं नराधिपः ॥ स्त्रीरूपधारिणं चक्रे वस्त्राकल्पां
जनादिभिः ॥ २८ ॥ स कृत्रिमोद्भूतकलत्रभावः प्रयुक्तकर्णाभरणांगरागः ॥ स्निग्धाञ्जनाक्षः स्पृहणीयरूपो बभूव सद्यः प्रमदोत्तमाभः ॥ २९ ॥
तावुभौ दंपती भूत्वा द्विजपुत्रौ नृपाज्ञया ॥ जग्मतुर्नैषधं देशं यद्वा तद्वा भवत्विति ॥ ३० ॥ उपेत्य राजसदनं सोमवारे द्विजोत्तमैः ॥ सपत्नीकैः
कृतातिथ्यौ धौतपादौ बभूवतुः ॥ ३१ ॥ सा राज्ञी ब्राह्मणान्सर्वानुपविष्टान्वरासने ॥ प्रत्येकमर्चयांचक्रे सपत्नीकान्द्विजोत्तमान् ॥ ३२ ॥ तौ च
विप्रसुतौ दृष्ट्वा प्राप्तौ कृतकदंपती ॥ ज्ञात्वा किंचिद्विहस्याथ मेने गौरीमहेश्वरौ ॥ ३३ ॥ आवाह्य द्विजमुख्येषु देवदेवं सदाशिवम् ॥ पत्नीष्वावाह
यामास सा देवीं जगदंबिकाम् ॥ ३४ ॥ गन्धैर्माल्यैः सुरभिभिर्धूपैर्नीराजनैरपि ॥ अर्चयित्वा द्विजश्रेष्ठान्नमश्चक्रे समाहिता ॥ ३५ ॥ हिरण्मयेषु
पात्रेषु पायसं घृतसंयुतम् ॥ शर्करामधुसंयुक्तं शाकैर्जुष्टं मनोरमैः ॥ ३६ ॥ गंधशाल्योदनैर्हृद्यैर्मोदकापूपराशिभिः ॥ शष्कुलीभिश्च संयावैः
कृसरैर्माषपक्वकैः ॥ ३७ ॥ तथान्यैरप्यसंख्यातैर्भक्ष्यैर्भोज्यैर्मनोरमैः ॥ सुगन्धैः स्वादुभिः सूपैः पानीयैरपि शीतलैः ॥ ३८ ॥ कृतमन्त्रं द्विजा
ग्र्येभ्यः सा भक्त्या पर्यवेषयत् ॥ दध्योदनं निरुपमं निवेद्य समतोषयत् ॥ ३९ ॥ भुक्तवत्सु द्विजाग्र्येषु स्वाचांतेषु नृपांगना ॥ प्रणम्य
दत्त्वा तांबूलं दक्षिणां च यथार्हतः ॥ ४० ॥ धेनूर्हिरण्यवासांसि रत्नस्रग्भूषणानि च ॥ दत्त्वा भूयो नमस्कृत्य विससर्ज द्विजोत्तमान् ॥ ४१ ॥
तयोर्द्वयोर्भूसुरवर्यपुत्रयोरेकस्तया हैमवतीधियार्चितः ॥ एको महादेवधियाभिपूजितः कृतप्रणामौ ययतुस्तदाज्ञया ॥ ४२ ॥ सा तु विस्मृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंभावा तस्मिन्नेव द्विजोत्तमे ॥ जातस्पृहा मदोत्सिक्ता कन्दर्पविवशाब्रवीत् ॥ ४३ ॥ अयि नाथ विशालाक्ष सर्वावयवसुन्दर ॥ तिष्ठतिष्ठ क्व या
यासि मां न पश्यसि ते प्रियाम् ॥ ४४ ॥ इदमग्रे वनं रम्यं सुपुष्पितमहाद्रुमम् ॥ अस्मिन्विहर्तुमिच्छामि त्वया सह यथासुखम् ॥ ४५ ॥
इत्थं तयोक्तमाकर्ण्य पुरोऽगच्छद्द्विजात्मजः ॥ विचिंत्य परिहासोक्तिं गच्छति स्म यथा पुरा ॥ ४६ ॥ पुनरप्याह सा बाला तिष्ठतिष्ठ क्व यास्यसि॥
दुरुत्सहस्मरावेशां परिभोक्तुमुपेत्य माम् ॥ ४७ ॥ परिष्वजस्व मां कांतां पाययस्व तवाधरम् ॥ नाहं गंतुं समर्थास्मि स्मरबाणप्रपीडिता ॥
॥ ४८ ॥ इत्थमश्रुतपूर्वां तां निशम्य परिशंकितः ॥ आयांतीं पृष्ठतो वीक्ष्य सहसा विस्मयं गतः ॥४९॥ कैषा पद्मपलाशाक्षी पीनोन्नतपयोधरा ॥
कृशोदरी बृहच्छ्रोणी नवपल्लवकोमला ॥ ५० ॥ स एव मे सखा किन्तु जात एव वरांगना ॥ पृच्छाम्येनमतः सर्वमिति संचिन्त्य सोऽब्रवीत् ॥५१॥
किमपूर्व इवाभासि सखे रूपगुणादिभिः ॥ अपूर्वं भाषसे वाक्यं कामिनीव समाकुला ॥ ५२ ॥ यस्त्वं वेदपुराणज्ञो ब्रह्मचारी जितेंद्रियः ॥ सार
स्वतात्मजः शांतः कथमेवं प्रभाषसे ॥ ५३ ॥ इत्युक्ता सा पुनः प्राह नाहमस्मि पुमान्प्रभो ॥ नाम्ना सामवती बाला तवास्मि रतिदायिनी॥ ५४ ॥
यदि ते संशयः कांत ममांगानि विलोकय ॥ इत्युक्तः सहसा मार्गे रहस्येनां व्यलोकयत् ॥५५॥ तामकृत्रिमधम्मिल्लां जघनस्तनशोभिनीम् ॥ सुरू
पां वीक्ष्य कामेन किंचिद्व्याकुलतामगात् ॥ ५६ ॥ पुनः संस्तभ्य यत्नेन चेतसो विकृतिं बुधः ॥ मुहूर्तं विस्मयाविष्टो न किंचित्प्रत्यभाषत ॥ ५७ ॥
॥ ॥ सामवत्युवाच ॥ ॥ गतस्ते संशयः कश्चित्तर्ह्यागच्छ भजस्व माम् ॥ पश्येदं विपिनं कांत परस्त्रीसुरतोचितम् ॥ ५८ ॥ ॥ सुमेधा उवाच ॥ ॥
मैवं कथय मर्यादां मा हिंसीर्मदमत्तवत् ॥ आवां विज्ञातशास्त्रार्थौ त्वमेवं भाषसे कथम् ॥५९॥ अधीतस्य च शास्त्रस्य विवेकस्य कुलस्यच ॥ किमेष
सदृशो धर्मो जारधर्मनिषेवणम् ॥ ६० ॥ न त्वं स्त्री पुरुषो विद्वाञ्जानीह्यात्मानमात्मना ॥ अयं स्वयंकृतोऽनर्थ आवाभ्यां यद्विचेष्टितम् ॥ ६१ ॥
वंचयित्वात्मपितरौ धूर्तराजानुशासनात् ॥ कृत्वा चानुचितं कर्म तस्यैतद्भुज्यते फलम् ॥ ६२ ॥ सर्वं त्वनुचितं कर्म नृणां श्रेयोविनाशनम् ॥
यस्त्वं विप्रात्मजो विद्वान्गतः स्त्रीत्वं विगर्हितम् ॥ ६३ ॥ मार्गं त्यक्त्वा गतोऽरण्यं नरो विध्येत कण्टकैः ॥ बलाद्धिंस्येत वा हिंस्रैर्यदा त्यक्तसमा
गमः ॥ ६४ ॥ एवं विवेकमाश्रित्य तूष्णीमेहि स्वयं गृहम् ॥ देवद्विजप्रसादेन स्त्रीत्वं तव विलीयते ॥ ६५ ॥ अथवा दैवयोगेन स्त्रीत्वमेव भवेत्तव ॥
पित्रा दत्ता मया साकं रंस्यसे वरवर्णिनि ॥ ६६ ॥ अहो चित्रमहो दुःखमहो पापबलं महत् ॥ अहो राज्ञः प्रभावोयं शिवाराधनसंभृतः ॥ ६७ ॥

१ एहि–इ० पा० । २ सुपुष्पितलताद्रुमम्–इ० पा० । ३ सारस्वती–इ० पा० । ४ जारमार्गनिषेवणम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्ताप्यसकृत्तेन सा वधूरतिविह्वला ॥ बलेन तं समालिंग्य चुचुंबाधरपल्लवम् ॥ ६८ ॥ धर्षितोपि तया धीरः सुमेधा नूतनस्त्रियम् ॥ यत्ना दानीय सदनं कृत्स्नं तत्र न्यवेदयत् ॥ ६९ ॥ तदाकर्ण्याथ तौ विप्रौ कुपितौ शोकविह्वलौ ॥ ताभ्यां सह कुमाराभ्यां वैदर्भांतिकमीयतुः ॥ ७० ॥ ततः सारस्वतः प्राह राजानं धूर्तचेष्टितम् ॥ राजन्ममात्मजं पश्य तव शासनयंत्रितम् ॥ ७१ ॥ एतौ तवाज्ञावशगौ चक्रतुः कर्म गर्हितम् ॥ मत्पुत्रस्तत्फलं भुंक्ते स्त्रीत्वं प्राप्य जुगुप्सितम् ॥ ७२ ॥ अद्य मे संततिर्नष्टा निराशाः पितरो मम ॥ नापुत्रस्य हि लोकोस्ति लुप्तपिंडादिसंस्कृतेः ॥ ७३ ॥ शिखोपवीतमजिनं मौंजीं दंडं कमंडलुम् ॥ ब्रह्मचर्योचितं चिह्नं विहायेमां दशां गतः ॥ ७४ ॥ ब्रह्मसूत्रं च सावित्रीं स्नानं संध्यां जपार्चनम् ॥ विसृज्य स्त्रीत्वमापन्नोस्य का गतिर्वद पार्थिव ॥ ७५ ॥ त्वया मे संततिर्नष्टा नष्टो वेदपथश्च मे ॥ एकात्मजस्य मे राजन्का गतिर्वद शाश्वती ॥ ७६ ॥ इति सारस्वतेनोक्तं वाक्यमाकर्ण्य भूपतिः ॥ सीमंतिन्याः प्रभावेण विस्मयं परमं गतः ॥ ७७ ॥ अथ सर्वान्समाहूय[1] महर्षीनमितद्युतीन् ॥ प्रसाद्य प्रार्थयामास तस्य पुंस्त्वं महीपतिः ॥ ७८ ॥ तेऽब्रुवन्नथ पार्वत्याः शिवस्य च समीहितम् ॥ तद्भक्तानां च माहात्म्यं कोन्यथा कर्तुमीश्वरः ॥ ७९ ॥ अथ राजा भरद्वाजमादाय मुनिपुंगवम् ॥ ताभ्यां सह द्विजाग्र्याभ्यां तत्सुताभ्यां समन्वितः ॥ ८० ॥ अंबिकाभवनं प्राप्य भरद्वाजोपदेशतः ॥ तां देवीं नियमैस्तीव्रैरुपास्ते स्म महानिशि ॥ ८१ ॥ एवं त्रिरात्रं सुविसृष्टभोजनः स पार्वतीध्यानरतो महीपतिः ॥ सम्यक्प्रणामैर्विविधैश्च संस्तवैर्गौरीं प्रपन्नार्तिहरामतोषयत् ॥ ८२ ॥ ततः प्रसन्ना सा देवी भक्तस्य पृथिवीपतेः ॥ स्वरूपं दर्शयामास चंद्रकोटिसमप्रभम् ॥ ८३ ॥ अथाह गौरी राजानं किं ते ब्रूहि समीहितम् ॥ सोऽप्याह पुंस्त्वमेतस्य कृपया दीयतामिति ॥ ८४ ॥ भूयोप्याह महादेवी मद्भक्तैः कर्म यत्कृतम् ॥ शक्यते नान्यथा कर्तुं वर्षायुतशतैरपि ॥ ८५ ॥ ॥ राजोवाच ॥ ॥ एकात्मजो हि विप्रोयं कर्मणा नष्टसंततिः ॥ कथं सुखं प्रपद्येत विना पुत्रेण तादृशः ॥ ८६ ॥ ॥ देव्युवाच ॥ ॥ तस्यान्यो मत्प्रसादेन भविष्यति[2] सुतोत्तमः ॥ विद्याविनयसंपन्नो दीर्घायुरमलाशयः ॥ ८७ ॥ एषा सामवती नाम सुता तस्य द्विजन्मनः ॥ भूत्वा सुमेधसः पत्नी कामभोगेन युज्यताम् ॥ ८८ ॥ इत्युक्त्वांतर्हिता देवी ते च राजपुरोगमाः ॥ गताः स्वंस्वं गृहं सर्वे चक्रुस्तच्छासने स्थितिम् ॥ ८९ ॥ सोपि सारस्वतो विप्रः पुत्रं पूर्वसुतोत्तमम् ॥ लेभे देव्याः प्रसादेन ह्यचिरादेव कालतः ॥ ९० ॥ तां च सामवतीं कन्यां ददौ तस्मै सुमेधसे ॥ तौ दंपती चिरं कालं बुभुजाते परं

१ आहूय–इ० पा० । २ जनिष्यति–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखम् ॥ ९१ ॥ ॥ सूत उवाच ॥ ॥ इत्येष शिवभक्तायाः सीमंतिन्या नृपस्त्रियाः ॥ प्रभावः कथितः शंभोर्माहात्म्यमपि वर्णितम् ॥ ९२ ॥ भूयोपि शिवभक्तानां प्रभावं विस्मयावहम् ॥ समासाद्वर्णयिष्यामि श्रोतॄणां मंगलायनम् ॥ ९३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे सीमंतिन्याः प्रभाववर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ विचित्रं शिवनिर्माणं विचित्रं शिवचेष्टितम् ॥ विचित्रं शिवमाहात्म्यं विचित्रं शिवभाषितम् ॥ १ ॥ विचित्रं शिवभक्तानां चरितं पापनाशनम् ॥ स्वर्गापवर्गयोः सत्यं साधनं तद्ब्रवीम्यहम् ॥ २ ॥ अवंतीविषये कश्चिद्ब्राह्मणो मंदराह्वयः ॥ बभूव विषयारामः स्त्रीजितो धनसंग्रही ॥ ३ ॥ संध्यास्नानपरित्यक्तो गंधमाल्यांबरप्रियः ॥ कुस्त्रीसक्तः कुमार्गस्थो यथा पूर्वमजामिलः ॥ ४ ॥ स वेश्यां पिंगलां नाम रममाणो दिवानिशम् ॥ तस्या एव गृहे नित्यमासीदविजितेंद्रियः ॥ ५ ॥ कदाचित्सदने तस्यास्तस्मिन्निवसति द्विजे ॥ ऋषभो नाम धर्मात्मा शिवयोगी समाययौ ॥ ॥ ६ ॥ तमागतमभिप्रेक्ष्य मत्वा स्वं पुण्यमूर्जितम् ॥ सा वेश्या स च विप्रश्च पर्यपूजयतामुभौ ॥ ७ ॥ तमारोप्य महापीठे कंबलांबरसंभृते ॥ प्रक्षाल्य चरणौ भक्त्या तज्जलं दधतुः शिरः[1] ॥ ८ ॥ स्वागतार्घ्यनमस्कारैर्गंधपुष्पाक्षतादिभिः ॥ उपचारैः समभ्यर्च्य भोजयामासतुर्मुदा ॥ ९ ॥ तं भुक्तवंतमाचांतं पर्यंके सुखसंस्तरे ॥ उपवेश्य मुदा युक्तौ तांबूलं प्रत्ययच्छताम् ॥ १० ॥ पादसंवाहनं भक्त्या कुर्वंतौ दैवचोदितौ ॥ कल्पयित्वा तु शुश्रूषां प्रीणयामासतुश्चिरम् ॥ ११ ॥ एवं समर्चितस्ताभ्यां शिवयोगी महाद्युतिः ॥ अतिवाह्य निशामेकां ययौ प्रातस्तदाद्दतः ॥ १२ ॥ एवं काले गतप्राये स विप्रो निधनं गतः ॥ सा च वेश्या मृता काले ययौ कर्मार्जितां गतिम् ॥ १३ ॥ स विप्रः कर्मणा नीतो दशार्णधरणीपतेः[2] ॥ वज्रबाहुकुटुंबिन्याः सुमत्या गर्भमास्थितः ॥ १४ ॥ तां ज्येष्ठपत्नीं नृपतेर्गर्भसंपदमाश्रिताम् ॥ अवेक्ष्य तस्यै गरलं सपत्न्यश्छद्मना ददुः ॥ १५ ॥ सा भुक्त्वा गरलं घोरं न मृता दैवयोगतः ॥ क्लेशमेव परं प्राप मरणादतिदुःसहम् ॥ १६ ॥ अथ काले समायाते पुत्रमेकमजीजनत् ॥ क्लेशेन महता साध्वी पीडिता वरवर्णिनी ॥ १७ ॥ स निर्दशो राजपुत्रः स्पृष्टपूर्वो गरेण यत् ॥ तेनावाप महाक्लेशं क्रंदमानो दिवानिशम् ॥ १८ ॥ तस्य बालस्य माता च सर्वांगव्रणपीडिता ॥ बभूवतुरतिक्लिष्टौ गरयोगप्रभावतः ॥ १९ ॥ तौ राज्ञा च समानीतौ वैद्यैश्च कृतभेषजौ ॥ न स्वास्थ्यमापतुर्यत्नैरनेकैर्योजितैरपि ॥ २० ॥ न रात्रौ लभते निद्रां सा राज्ञी विपुलव्यथा ॥ स्वपुत्रस्य च दुःखेन दुःखिता

१ शिरः–शिरसा–इत्यर्थः । शिवम्–इ० पा० । २ दशार्हधरणीपतेः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नितरां कृशा ॥ २१ ॥ नीत्वैवं कतिचिन्मासान्स राजा मातृपुत्रकौ ॥ जीवंतौ च मृतप्रायौ विलोक्यात्मन्यचिंतयत् ॥ २२ ॥ एतौ मे गृहिणीपुत्रौ निरयादागताविह ॥ अश्रांतरोगौ क्रंदंतौ निद्राभंगविधायिनौ ॥ २३ ॥ अत्रोपायं करिष्यामि पापयोर्ध्रुवमेतयोः ॥ मर्तुं वा जीवितुं वापि न क्षमौ पापभोगिनौ ॥ २४ ॥ इत्थं विनिश्चित्य च भूमिपालः सक्तः सपत्नीषु तदात्मजेषु ॥ आहूय सूतं निजदारपुत्रौ निर्वापयामास रथेन दूरम् ॥ २५ ॥ तौ सूतेन परित्यक्तौ कुत्रचिद्विजने वने ॥ अवापतुः परां पीडां क्षुत्तृड्भ्यां भृशविह्वलौ ॥ २६ ॥ सोद्वहंती निजं बालं निपतंती पदे पदे ॥ निःश्वसंती निजं कर्म निंदंती चकिता भृशम् ॥ २७ ॥ क्वचित्कंटकभिन्नांगी मुक्तकेशी भयातुरा ॥ क्वचिद्व्याघ्रस्वनैर्भीता क्वचिद्व्यालैरनुद्रुता ॥ २८ ॥ भत्स्यमाना पिशाचैश्च वेतालैर्ब्रह्मराक्षसैः ॥ महागुल्मेषु धावंती भिन्नपादा क्षुराश्मभिः ॥ २९ ॥ सैवं घोरे महारण्ये भ्रमंती नृपगेहिनी ॥ दैवात्प्राप्ता वणिङ्मार्गं गोवाजिनरसेवितम् ॥ ३० ॥ गच्छंती तेन मार्गेण सुदूरमतियत्नतः ॥ ददर्श वैश्यनगरं बहुस्त्रीनरसेवितम् ॥ ३१ ॥ तस्य गोप्ता महावैश्यो नगरस्य महाजनः ॥ अस्ति पद्माकरो नाम राजराज इवापरः ॥ ३२ ॥ तस्य वैश्यपतेः काचिद्गृहदासी नृपांगनाम् ॥ आयांतीं दूरतो दृष्ट्वा तदंतिकमुपाययौ ॥ ३३ ॥ सा दासी नृपतेः कांतां सपुत्रां भृशपीडिताम् ॥ स्वयं विदितवृत्तांता स्वामिने प्रत्यदर्शयत् ॥ ॥ ३४ ॥ स तां दृष्ट्वा विशां नाथो रुजार्त्तां क्लिष्टपुत्रकाम् ॥ नीत्वा रहसि सुव्यक्तं तद्वृत्तांतमपृच्छत ॥ ३५ ॥ तया निवेदिताशेषवृत्तांतः स वणिक्पतिः ॥ अहोः कष्टमिति ज्ञात्वा निशश्वास मुहुर्मुहुः ॥ ३६ ॥ तामंतिके स्वगेहस्य संनिवेश्य रहोगृहे ॥ वासोन्नपानशयनैर्मातृसाम्यमपूजयत् ॥ ॥ ३७ ॥ तस्मिन्गृहे नृपवधूर्निवसंती सुरक्षिता ॥ व्रणयक्ष्मादिरोगाणां न शांतिं प्रत्यपद्यत ॥ ३८ ॥ ततो दिनैः कतिपयैः स बालो व्रणपीडितः ॥ विलंघितभिषक्सत्त्वो ममार च विधेर्वशात् ॥ ३९ ॥ मृते स्वतनये राज्ञी शोकेन महतावृता ॥ मूर्च्छितां चापतद्भूमौ गजभग्नेव वल्लरी ॥ ४० ॥ दैवात्संज्ञामवाप्याथ बाष्पक्लिन्नपयोधरा ॥ सांत्विताऽपि वणिक्स्त्रीभिर्विललाप सुदुःखिता ॥ ४१ ॥ हा ताततात हा पुत्र हा मम प्राणरक्षक ॥ हा राजकुलपूर्णेन्दो हा ममानंदवर्धन ॥ ४२ ॥ इमामनाथां कृपणां त्वत्प्राणां त्यक्तबांधवाम् ॥ मातरं ते परित्यज्य क्व यातोऽसि नृपात्मज ॥ ॥ ४३ ॥ इत्येभिरुदितैर्वाक्यैः शोकचिंताविवर्धकैः ॥ विलपंतीं मृतापत्यां को नु सांत्वयितुं क्षमः ॥ ४४ ॥ एतस्मिन्समये तस्या दुःखशोकचिकित्सकः ॥ ऋषभः पूर्वमाख्यातः शिवयोगी समाययौ ॥ ४५ ॥ स योगी वैश्यनाथेन सार्घहस्तेन पूजितः ॥ तस्याः सकाशमगमच्छोचन्त्या इद

१ आस्ते—इ० पा० । २ पपात मूर्च्छिता भूमौ—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मब्रवीत् ॥ ४६ ॥ ॥ ऋषभ उवाच ॥ ॥ अकस्मात्किमहो वत्से रोरवीषि विमूढधीः ॥ को जातः कतमो लोके को मृतो वद सांप्रतम् ॥ ॥ ४७ ॥ अमी देहादयो भावास्तोयफेनसधर्मकाः ॥ क्वचिद्भ्रांतिः क्वचिच्छांतिः स्थितिर्भवति वा पुनः ॥ ४८ ॥ अतोऽस्मिन्फेनसदृशे देहे पञ्चत्वमागते ॥ शोकस्यानवकाशत्वान्न शोचंति विपश्चितः ॥ ४९ ॥ गुणैर्भूतानि सृज्यंते भ्राम्यंते निजकर्मभिः ॥ कालेनाथ विकृष्यंते वासनायां च शेरते ॥ ५० ॥ माययोत्पत्तिमायांति गुणाः सत्त्वादयस्त्रयः ॥ तैरेव देहा जायंते जातास्तल्लक्षणाश्रयाः ॥ ५१ ॥ देवत्वं याति सत्त्वेन रजसा च मनुष्यताम् ॥ तिर्यक्त्वं तमसा जंतुर्वासनानुगतोवशः ॥ ५२ ॥ संसारे वर्तमानेस्मिञ्जंतुः कर्मानुबन्धनात् ॥ दुर्विभाव्यां गतिं याति सुखदुःखमयीं मुहुः ॥ ५३ ॥ अपि कल्पायुषां तेषां देवानां तु विपर्ययः ॥ अनेकामयबद्धानां का कथा नरदेहिनाम् ॥ ५४ ॥ केचिद्वदंति देहस्य कालमेव हि कारणम् ॥ कर्म केचिद्गुणान्केचिद्देहः साधारणो ह्ययम् ॥ ५५ ॥ कालकर्मगुणाधानं पञ्चात्मकमिदं वपुः ॥ जातं दृष्ट्वा न हृष्यंति न शोचंति मृतं बुधाः ॥ ५६ ॥ अव्यक्ते जायते जंतुरव्यक्ते च प्रलीयते ॥ मध्ये व्यक्तवदाभाति जलबुद्बुदसन्निभः ॥ ५७ ॥ यदा गर्भगतो देही विनाशः कल्पितस्तदा ॥ दैवाज्जीवति वा जातो म्रियते सहसैव वा ॥ ५८ ॥ गर्भस्था एव नश्यंति जातमात्रास्तथा परे ॥ क्वचिद्युवानो नश्यंति म्रियंते केपि वार्धके ॥ ५९ ॥ यादृशं प्राक्तनं कर्म तादृशं विंदते वपुः ॥ भुंक्ते तदनुरूपाणि सुखदुःखानि वै ह्यसौ ॥ ६० ॥ मायानुभावेरितयोः पित्रोः सुरतसंभ्रमात् ॥ देह उत्पद्यते कोपि पुंयोषित्क्लीबलक्षणः ॥ ६१ ॥ आयुः सुखं च दुःखं च पुण्यं पापं श्रुतं धनम् ॥ ललाटे लिखितं धात्रा वहञ्जंतुः प्रजायते ॥ ६२ ॥ कर्मणामविलंघ्यत्वात्कालस्याप्यनतिक्रमात् ॥ अनित्यत्वाच्च भावानां न शोकं कर्तुमर्हसि ॥ ६३ ॥ क्व स्वप्ने नियतं स्थैर्यमिंद्रजाले क्व सत्यता ॥ क्व नित्यता शरन्मेघे क्व शश्वत्त्वं कलेवरे ॥ ६४ ॥ तव जन्मान्यतीतानि शतकोट्ययुतानि च ॥ अजानंत्याः परं तत्त्वं संप्राप्तोऽयं महाभ्रमः॥ ६५ ॥ कस्यकस्यासि तनया जननी कस्यकस्य वा ॥ कस्यकस्यासि गृहिणी भवकोटिषु वर्तिनी ॥ ॥ ६६ ॥ पञ्चभूतात्मको देहस्त्वगसृङ्मांसबन्धनः ॥ मेदोमज्जास्थिनिचितो विण्मूत्रश्लेष्मभाजनम् ॥ ६७ ॥ शरीरांतरमप्येतन्निजदेहोद्भवं मलम् ॥ मत्त्वा स्वतनयं मूढे मा शोकं कर्तुमर्हसि ॥ ६८ ॥ यदि नाम जनः कश्चिन्मृत्युं तरति यत्नतः ॥ कथं तर्हि विपद्येरन्सर्वे पूर्वे विपश्चितः॥ ॥ ६९ ॥ तपसा विद्यया बुद्ध्या मन्त्रौषधिरसायनैः ॥ अतियाति परं मृत्युं न कश्चिदपि पंडितः ॥ ७० ॥ एकस्याद्य मृतिर्जंतोः श्वश्चान्यस्य वरानने ॥ तस्मादनित्यावयवे न त्वं शोचितुमर्हसि ॥ ७१ ॥ नित्यं सन्निहितो मृत्युः किं सुखं वद देहिनाम् ॥ व्याघ्रे पुरः स्थिते ग्रासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशूनां किं नु रोचते ॥ ७२ ॥ अतो जन्म जरां जेतुं यदीच्छसि वरानने ॥ शरणं व्रज सर्वेशं मृत्युंजयमुमापतिम् ॥ ७३ ॥ तावन्मृत्युभयं घोरं तावज्जन्मजराभयम् ॥ यावन्नो याति शरणं देही शिवपदांबुजम् ॥ ७४ ॥ अनुभूयेह दुःखानि संसारे भृशदारुणे ॥ मनो यदा वियुज्येत तदा ध्येयो महेश्वरः ॥ ७५ ॥ मनसा पिबतः पुंसः शिवध्यानरसामृतम् ॥ भूयस्तृष्णा न जायेत संसारविषयासवे ॥ ७६ ॥ विमुक्तं सर्वसंगैश्च मनो वैराग्ययंत्रितम् ॥ यदा शिवपदे मग्नं तदा नास्ति पुनर्भवः ॥ ७७ ॥ तस्मादिदं मनो भद्रे शिवध्यानैकसाधनम् ॥ शोकमोहसमाविष्टं मा कुरुष्व शिवं भज ॥ ७८ ॥ ॥ सूत उवाच ॥ ॥ इत्थं सानुनयं राज्ञी बोधिता शिवयोगिना ॥ प्रत्याचष्ट गुरोस्तस्य प्रणम्य चरणांबुजम् ॥ ७९ ॥ ॥ राज्ञ्युवाच ॥ ॥ भगवन्मृतपुत्रायास्त्यक्तायाः प्रियबन्धुभिः ॥ महारोगातुराया मे का गतिर्मरणं विना ॥ ८० ॥ अतोऽहं मर्तुमिच्छामि सहैव शिशुनाऽमुना ॥ कृतार्थाहं यदद्य त्वामपश्यं मरणोन्मुखी ॥ ८१ ॥ ॥ सूत उवाच ॥ ॥ इति तस्या वचः श्रुत्वा शिवयोगी दयानिधिः ॥ पूर्वोपकारं संस्मृत्य मृतस्यांतिकमाययौ ॥ ८२ ॥ स तदा भस्म संगृह्य शिवमन्त्राभिमंत्रितम् ॥ विदीर्णे तन्मुखे क्षिप्त्वा मृतं प्राणैरयोजयत् ॥ ८३ ॥ स बालः संगतः प्राणैः शनैरुन्मील्य लोचने ॥ प्राप्तपूर्वेन्द्रियबलो[1] रुरोद स्तन्यकांक्षया ॥ ८४ ॥ मृतस्य पुनरुत्थानं वीक्ष्य बालस्य विस्मिताः ॥ जना मुमुदिरे सर्वे नगरेषु पुरोगमाः ॥८५॥ अथानंदभरा[2] राज्ञी विह्वलोन्मत्तलोचना ॥ जग्राह तनयं शीघ्रं बाष्पव्याकुललोचना ॥८६॥ उपगुह्य तदा तन्वी परमानंदनिर्वृता ॥ न वेदात्मानमन्यं वा सुषुप्तेव परिश्रमात् ॥ ८७ ॥ पुनश्च ऋषभो योगी तयोर्मातृकुमारयोः ॥ विषव्रणयुतं देहं भस्मनैव परामृशत् ॥ ८८ ॥ तौ च तद्भस्मना स्पृष्टौ प्राप्तदिव्यकलेवरौ ॥ देवानां सदृशं रूपं दधतुः कांतिभूषितम् ॥ ८९ ॥ संप्राप्ते त्रिदिवैश्वर्ये यत्सुखं पुण्यकर्मणाम् ॥ तस्माच्छतगुणं प्राप सा राज्ञी सुखमुत्तमम् ॥ ९० ॥ तां पादयोर्निपतितामृषभः प्रेमविह्वलैः[3] ॥ उत्थाप्याश्वासयामास दुःखैर्मुक्तामुवाच ह ॥ ९१ ॥ अयि वत्से महाराज्ञि जीव त्वं शाश्वतीः समाः ॥ यावज्जीवसि लोकेस्मिन्न तावत्प्राप्स्यसे जराम् ॥ ९२ ॥ एष ते तनयः साध्वि भद्रायुरिति नामतः ॥ ख्यातिं यास्यति लोकेषु निजं राज्यमवाप्स्यति ॥ ॥ ९३ ॥ अस्य वैश्यस्य सदने तावत्तिष्ठ शुचिस्मिते ॥ यावदेष कुमारस्ते प्राप्तविद्यो भविष्यति ॥ ९४ ॥ ॥ सूत उवाच ॥ ॥ इति

१ प्राप्तसर्वेंद्रियबलः–इ० पा० । २ अत्यानन्दबलात्–इ० पा० । ३ प्रेमविह्वलाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताम्रृषभो योगी तं च राजकुमारकम् ॥ संजीव्य भस्मवीर्येण ययौ देशान्यथेप्सितान् ॥ ९६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भद्राय्वाख्याने ऋषभयोगिना भद्रायुजीवनं नाम दशमोऽध्यायः ॥ ॥ १० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ पिंगला नाम या वेश्या मया पूर्वमुदाहृता ॥ शिवभक्तार्चनात्पुण्यात्त्यक्त्वा पूर्वकलेवरम् ॥ १ ॥ चन्द्रांगदस्य सा[1] भूयः सीमंतिन्यामजायत ॥ रूपौदार्यगुणोपेता नाम्ना वै कीर्तिमालिनी ॥ २ ॥ भद्रायुरपि तत्रैव राजपुत्रो वणिक्पतेः ॥ ववृधे सदने भानुः शुचाविव महातपाः ॥ ३ ॥ तस्यापि वैश्यनाथस्य कुमारस्त्वेक उत्तमः ॥ स नाम्ना सुनयः प्रोक्तो राजसूनोः सखाऽभवत् ॥ ४ ॥ तावुभौ परमस्निग्धौ राजवैश्यकुमारकौ॥ चित्रक्रीडावुदारांगौ रत्नाभरणमंडितौ ॥ ५ ॥ तस्य राजकुमारस्य ब्राह्मणैः स वणिक्पतिः ॥ संस्कारान्कारयामास स्वपुत्रस्यापि विस्तरात् ॥ ६ ॥ काले कृतोपनयनौ गुरुशुश्रूषणे रतौ ॥ चक्रतुः सर्वविद्यानां संग्रहं विनयान्वितौ ॥ ७ ॥ अथ राजकुमारस्य प्राप्ते षोडशहायने ॥ स[2] एव ऋषभो योगी तस्य वेश्मन्युपाययौ ॥ ८ ॥ सा राज्ञी स कुमारश्च शिवयोगिनमागतम् ॥ मुहुर्मुहुः प्रणम्योभौ पूजयामासतुर्मुदा ॥ ९ ॥ ताभ्यां च पूजितः सोऽथ योगीशो हृष्टमानसः ॥ तं राजपुत्रमुद्दिश्य बभाषे करुणार्द्रधीः ॥ १० ॥ ॥ शिवयोग्युवाच ॥ ॥ कच्चित्ते कुशलं तात त्वन्मातुश्चाप्यनामयम् ॥ कच्चित्त्वं सर्वविद्यानामकार्षीश्च प्रतिग्रहम् ॥ ११ ॥ कच्चिद्गुरूणां सततं शुश्रूषातत्परो भवान् ॥ कच्चित्स्मरसि मां तात तव प्राणप्रदं गुरुम् ॥ १२ ॥ एवं वदति योगीशे राज्ञी सा विनयान्विता ॥ स्वपुत्रं पादयोस्तस्य निपात्यैनमभाषत ॥ १३ ॥ एष पुत्रस्तव गुरो त्वमस्य प्राणदः पिता ॥ एष शिष्यस्तु संग्राह्यो भवता करुणात्मना ॥ १४ ॥ अतो बन्धुभिरुत्सृष्टमनाथं परिपालय ॥ अस्मै सम्यक्सतां मार्गमुपदेष्टुं त्वमर्हसि ॥ १५ ॥ इति प्रसादितो राज्ञ्या शिवयोगी महामतिः ॥ तस्मै राजकुमाराय सन्मार्गमुपदिष्टवान् ॥ १६ ॥ ॥ ऋषभ उवाच ॥ ॥ श्रुतिस्मृतिपुराणेषु प्रोक्तो धर्मः सनातनः ॥ वर्णाश्रमानुरूपेण निषेव्यः सर्वदा जनैः ॥ १७ ॥ भज वत्स सतां मार्गं सदैव[3] चरितं चर ॥ न देवाज्ञां विलंघेथा मा कार्षीर्दैवहेलनम् ॥ १८ ॥ गोदेवगुरुविप्रेषु भक्तिमान्भव सर्वदा ॥ चांडालमपि संप्राप्तं सदा संभावयातिथिम् ॥ १९ ॥ सत्यं न त्यज सर्वत्र प्राप्तेऽपि प्राणसंकटे ॥ गोब्राह्मणानां रक्षार्थमसत्यं त्वं वद क्वचित् ॥ २० ॥ परस्वेषु परस्त्रीषु देवब्राह्मणवस्तुषु ॥ तृष्णां त्यज महाबाहो दुर्लभेष्वपि वस्तुषु ॥ २१ ॥ सत्कथायां सदाचारे सद्व्रते च सदागमे ॥ धर्मादिसंग्रहे नित्यं तृष्णां कुरु महा

१ भार्यायाम्–इ० पा० । २ स हर्षात्–इ० पा० । ३ तदेवं चारितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मते ॥ २२ ॥ स्नाने जपे च होमे च स्वाध्याये पितृतर्पणे ॥ गोदेवातिथिपूजासु निरालस्यो भवानघ ॥ २३ ॥ क्रोधं द्वेषं भयं शाठ्यं पैशुन्यमसदाग्रहम् ॥ कौटिल्यं दंभमुद्वेगं यत्नेन परिवर्जय ॥ २४ ॥ क्षात्रधर्मरतोऽपि त्वं वृथा हिंसां परित्यज ॥ शुष्कवैरं वृथालापं परानिंदां च वर्जय ॥ २५ ॥ मृगयाद्यूतपानेषु स्त्रीषु स्त्रीविजितेषु च ॥ अत्याहारमतिक्रोधमतिनिद्रामतिश्रमम् ॥ २६ ॥ अत्यालापमतिक्रीडां सर्वदा परिवर्जय ॥ ॥ २७ ॥ अतिविद्यामतिश्रद्धामतिपुण्यमतिस्मृतिम् ॥ अत्युत्साहमतिख्यातिमतिधैर्यं च साधय ॥ २८ ॥ सकामो निजदारेषु सक्रोधो निजशत्रुषु ॥ सलोभः पुण्यनिचये साभ्यसूयो ह्यधर्मिषु ॥ २९ ॥ सद्वेषो भव पाखण्डे सरागः सज्जनेषु च ॥ दुर्बोधो भव दुर्मंत्रे बधिरः पिशुनोक्तिषु ॥ ३० ॥ धूर्तं चंडं शठं क्रूरं कितवं चपलं खलम् ॥ पतितं नास्तिकं जिह्मं दूरतः परिवर्जय ॥ ३१ ॥ आत्मप्रशंसां मा कार्षीः परिज्ञातेंगितो भव ॥ धने सर्वकुटुंबे च नात्यासक्तः सदा भव ॥ ३२ ॥ पत्न्याः पतिव्रतायाश्च जनन्याः श्वशुरस्य च ॥ सतां गुरोश्च वचने विश्वासं कुरु सर्वदा ॥ ३३ ॥ आत्मरक्षापरो नित्यमप्रमत्तो दृढव्रतः ॥ विश्वासं नैव कुर्वीथाः स्वभृत्येष्वपि कुत्रचित् ॥ ३४ ॥ विश्वस्तं मा वधीः कंचिदपि चोरं महामते ॥ अपापेषु न शंकेथाः सत्यान्न चलितो भव ॥ ३५ ॥ अनाथं कृपणं वृद्धं स्त्रियं बालं निरागसम् ॥ परिरक्ष धनैः प्राणैर्बुद्ध्या शक्त्या बलेन च ॥ ३६ ॥ अपि शत्रुं वधस्यार्हं मा वधीः शरणागतम् ॥ अपात्रं सुपात्रं वा नीचो वापि महत्तमः ॥ ३७ ॥ यो वा को वापि याचेत तस्मै देहि शिरोपि च ॥ अपि यत्नेन महता कीर्तिमेव सदार्जय ॥ ३८ ॥ राज्ञां च विदुषां चैव कीर्तिरेव हि भूषणम् ॥ सत्कीर्तिप्रभवा लक्ष्मीः पुण्यं सत्कीर्तिसंभवम् ॥ ३९ ॥ सत्कीर्त्या राजते लोकश्चंद्रश्चंद्रिकया यथा ॥ गजाश्वहेमनिचयं रत्नराशिं नगोपमम् ॥ ४० ॥ अकीर्त्योपहतं सर्वं तृणवन्मुंच सत्वरम् ॥ मातुः कोपं पितुः कोपं गुरोः कोपं धनव्ययम् ॥ ४१ ॥ पुत्राणामपराधं च ब्राह्मणानां क्षमस्व भोः ॥ यथा द्विजप्रसादः स्यात्तथा तेषां हितं चर ॥ ४२ ॥ राजानं संकटे मग्नमुद्धरेयुर्द्विजोत्तमाः ॥ आयुर्यशो बलं सौख्यं धनं पुण्यं प्रजोन्नतिः ॥ ४३ ॥ कर्मणा येन जायेत तत्सेव्यं भवता सदा ॥ देशं कालं च शक्तिं च कार्यं चाकार्यमेव च ॥ ४४ ॥ सम्यग्विचार्य यत्नेन कुरु कार्यं च सर्वदा ॥ न कुर्याः कस्यचिद्बाधां परबाधां निवारय ॥ ४५ ॥ चोरान्दुष्टांश्च बाधेथाः

१ दुर्विनयेषु च–इ० पा० । २ दुष्टशत्रुषु–इ० पा० । ३ अतिप्रशंसाम्–इ० पा० । ४ अविज्ञातो भवानघ–इ० पा० । ५ अमात्येषु च–इ० पा० । ६ समार्जय–इ०पा० । ७ क्षमस्व ब्राह्मणान्यम्–इ०पा० । ८ अनव–इ० पा० । ९ पीडाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुनीत्या शक्तिमत्तया ॥ स्नाने जपे च होमे च दैवे पित्र्ये च कर्मणि ॥ ४६ ॥ अत्वरो भव निद्रायां भोजने भव सत्वरः ॥ दाक्षिण्ययुक्तमशठं सत्यं जनमनोहरम् ॥ ४७ ॥ अल्पाक्षरमनंतार्थं वाक्यं ब्रूहि महामते ॥ अभीतो भव सर्वत्र विपक्षेषु विपत्सु च ॥ ४८ ॥ भीतो भव ब्रह्मकुले न पापे[1] गुरुशासने ॥ ज्ञातिबंधुषु विप्रेषु भार्यासु तनयेषु च ॥ ४९ ॥ समभावेन वर्तेथास्तथा भोजनपंक्तिषु ॥ सतां हितोपदेशेषु तथा पुण्यकथासु च ॥ ५० ॥ विद्यागोष्ठीषु धर्म्यासु क्वचिन्मा भूः पराङ्मुखः ॥ शुचौ पुण्यजलस्यांते प्रख्याते ब्रह्मसंकुले ॥ ५१ ॥ महादेशे शिवमये वस्तव्यं भवता सदा ॥ कुलटा गणिका यत्र यत्र तिष्ठति कामुकः ॥ ५२ ॥ दुर्देशे नीचसंबाधे कदाचिदपि मा वस ॥ एकमेवाश्रितोपि त्वं शिवं त्रिभुवनेश्वरम् ॥ ५३ ॥ सर्वान्देवानुपासीथास्तद्दिनानि च मानयन् ॥ सदा शुचिः सदा दक्षः सदा शांतः सदा स्थिरः ॥ ५४ ॥ सदा विजितषड्वर्गः सदैकांतो भवानघ ॥ विप्रान्वेदविदः शांतान्यतींश्च नियतोज्ज्वलान् ॥ ५५ ॥ युग्मम् ॥ पुण्यवृक्षान्पुण्यनदीः पुण्यतीर्थं महत्सरः ॥ धेनुं च वृषभं रत्नं युवतीं च पतिव्रताम् ॥ ५६ ॥ आत्मनो गृहदेवांश्च सहसैव नमस्कुरु ॥ उत्थाय समये ब्राह्मे स्वाचम्य विमलाशयः ॥ ५७ ॥ नमस्कृत्यात्मगुरवे ध्यात्वा देवमुमापतिम् ॥ नारायणं च लक्ष्मीशं ब्रह्माणं च विनायकम् ॥ ५८ ॥ स्कन्दं कात्यायनीं देवीं महालक्ष्मीं सरस्वतीम् ॥ इन्द्रादीनथ लोकेशान्पुण्यश्लोकानृषीनपि ॥ ५९ ॥ चिंतयित्वाथ मार्त्तंडमुद्यंतं प्रणमेत्सदा ॥ गंधं पुष्पं च तांबूलं शाकं पक्कफलादिकम् ॥ ६० ॥ शिवाय दत्त्वोपभुंक्ष्व भक्ष्यं भोज्यं प्रियं नवम् ॥ यद्दत्तं यत्कृतं जप्तं यत्स्नातं यद्धुतं स्मृतम् ॥ ६१ ॥ यच्च तप्तं तपः सर्वं तच्छिवाय निवेदय ॥ भुंजानश्च पठन्वापि शयानो विहरन्नपि ॥ पश्यञ्छृण्वन्वदन्गृह्णञ्छिवमेवानुचिंतय ॥ ६२ ॥ रुद्राक्षकंकणलसत्करदंडयुग्मो मालांतरालधृतभस्मसितत्रिपुंड्रः ॥ पंचाक्षरं परिपठन्परमंत्रराजं ध्यायन्सदा पशुपतेश्शरणं रमेथाः ॥६३ ॥ इति संक्षेपतो वत्स कथितो धर्मसंग्रहः ॥ अन्येषु च पुराणेषु विस्तरेण प्रकीर्तितः ॥६४॥ अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् ॥ जयप्रदं सर्वविपद्विमोचनं[2] वक्ष्यामि शैवं कवचं हिताय ते ॥६५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे भद्रायुं प्रति ऋषभोपदेशवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥ छ ॥

॥ ॥ ऋषभ उवाच ॥ ॥ नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् ॥ वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ १ ॥ शुचौ देशे समासीनो यथावत्कल्पितासनः ॥ जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययम् ॥ २ ॥ हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् ॥ अतींद्रियं

१ पापे पापकर्तरि गुरुशासने गुरुतरदंडादिरूपशासनकरणेन भीतो न भव परं ब्रह्मकुले पापकर्तर्यपि गुरुशासनकरणे भीतो भवेति तात्पर्यम्। २ सर्वविषप्रमोचनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri

सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशम् ॥ ३ ॥ ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंदनिमग्नचेताः ॥ षडक्षरन्याससमाहितात्मा शैवेन कुर्या
त्कवचेन रक्षाम् ॥ ४ ॥ मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ॥ तन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५ ॥
सर्वत्र मां रक्षतु विश्वमूर्त्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥ यो भूस्वरूपेण बिभर्ति
विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः ॥ योऽपां स्वरूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि
यो नृत्यति भूरिलीलः ॥ स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥ ८ ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः॥
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥ ९ ॥ कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः ॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः
पायादघोरो दिशि दक्षिणस्याम् ॥ १० ॥ कुंदेन्दुशंखस्फटिकावभासो वेदाक्षमालावरदाभयांकः ॥ त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोवतु मां
प्रतीच्याम् ॥ ११ ॥ वराक्षमालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १२ ॥
वेदाभयेष्टांकुशटंकपाशकपालढक्काक्षकशूलपाणिः ॥ सितद्युतिः पंचमुखोऽवतान्मामीशान ऊर्द्ध्वं परमप्रकाशः ॥ १३ ॥ मूर्धानमव्यान्मम चंद्रमौ
लिर्भालं ममाव्यादथ भालनेत्रः ॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १४ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्या
त्सततं कपाली ॥ वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १५ ॥ कंठं गिरीशोऽवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः ॥
दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखांतकोऽव्यात् ॥ १६ ॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ॥ हेरंबतातो मम पातु
नाभिं पायात्कटी धूर्जटिरीश्वरो मे ॥ १७ ॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ॥ जंघायुगं पुंगवकेतुरव्यात्पादौ ममाव्या
त्सुरवंद्यपादः ॥ १८ ॥ महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ॥ त्रियंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे ॥
॥ १९ ॥ पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे ॥ गौरीपतिः पातु निशावसाने मृत्युंजयो रक्षतु सर्वकालम् ॥ २० ॥ अंतः
स्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम् ॥ तदंतरे पातु पतिः पशूनां सदा शिवो रक्षतु मां समंतात् ॥ २१ ॥ तिष्ठंतमव्या
द्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः ॥ वेदांतवेद्योऽवतु मान्निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २२॥ मार्गेषु मां रक्षतु नीलकंठः शैला

१ स्थितो रक्षतु—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिदुर्गेषु पुरत्रयारिः ॥ अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २३ ॥ कल्पांतकाटोपपटुप्रकोपः स्फुटाट्टहासोच्चलितांडकोशः ॥ घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः॥२४॥ पत्त्यश्वमातंगघटावरूथसहस्रलक्षायुतकोटिभीषणम् ॥ अक्षौहिणीनां शतमाततायिनां छिंद्या न्मृडो घोरकुठारधारया ॥ २५ ॥ निहंतु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य ॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुःपिनाकम्॥ ॥२६॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः॥२७॥ ओंनमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविहाराय[1] सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवरप्रदाय सकलदुरितार्तिभंजनाय सकलजगदभयंकराय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजाभासाय[2] निर्गुणाय निरुपमाय नीरूपाय निराभासाय निरामयाय निष्प्रपंचाय निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय निर्गमाय नित्यरूपविभवाय निरुपमविभवाय निराधाराय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतप्रकाशतेजोरूपाय जयजय महारुद्र महारौद्र भद्रावतार दुःखदावदारण महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वांगखड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिंडिपालतोमरमुसलमुद्गरपट्टिशपरशुपरिघभुशुंडीशतघ्नीचक्राद्यायुधभीषणकरसहस्र मुखदंष्ट्राकराल विकटाट्टहासविस्फारितब्रह्मामण्डल नागेंद्रकुण्डल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्वतो रक्षरक्ष मां ज्वलज्वल महामृत्युभयमपमृत्युभयं नाशयनाशय रोगभयमुत्सादयोत्सादय विषसर्पभयं शमयशमय चोरभयं मारयमारय मम शत्रूनुच्चाटयोच्चाटय शूलेन विदारय विदारय कुठारेण भिंधिभिंधि खड्गेन छिंधिछिंधि खट्वांगेन विपोथय विपोथय मुसलेन निष्पेषयनिष्पेषय बाणैःसंताडय संताडय रक्षांसि भीषयभीषय भूतानि विद्रावयविद्रावय कूष्मांडवेतालमारीगणब्रह्मराक्षसान्संत्रासयसंत्रासय ममाभयं कुरुकुरु वित्रस्तं मामाश्वासयाश्वासय नरकभयान्मामुद्धारयोद्धारय संजीवयसंजीवय क्षुत्तृड्भ्यां मामाप्याययाप्यायय दुःखातुरं मामानन्दयानंदय शिवकवचेन मामाच्छादयाच्छादय त्र्यंबक सदाशिव नमस्तेनमस्तेनमस्ते ॥ ॥ ऋषभ उवाच ॥ ॥ इत्येतत्कवचं शैवं वरदं व्याहृतं मया ॥ सर्वबाधाप्रशमनं रहस्यं सर्व देहिनाम् ॥ २८ ॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ॥ न तस्य जायते क्वापि भयं शम्भोरनुग्रहात् ॥ २९ ॥ क्षीणायुर्मृत्युमापन्नो महा

१ सकलतत्त्वविदूराय–इ०पा० । २ शाश्वतनिजावासाय–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगहतोऽपि वा ॥ सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदति ॥ ३० ॥ सर्वदारिद्र्यशमनं सौमंगल्यविवर्धनम् ॥ यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ३१ ॥ महापातकसंघातैर्मुच्यते चोपपातकैः ॥ देहांते शिवमाप्नोति शिववर्मानुभावतः ॥ ३२ ॥ त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् ॥ धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे ॥ ददौ शंखं महारावं खड्गं चारिनिषूदनम् ॥ ३४ ॥ पुनश्च भस्म संमंत्र्य तदंगं सर्वतोऽस्पृशत् ॥ गजानां षट्सहस्रस्य द्विगुणं च बलं ददौ ॥ ३५ ॥ भस्मप्रभावात्संप्राप्य बलैश्वर्यधृतिस्मृतीः ॥ स राजपुत्रः शुशुभे शरदर्क इव श्रिया ॥ ३६ ॥ तमाह प्रांजलिं भूयः स योगी राजनंदनम् ॥ एष खड्गो मया दत्तस्तपोमंत्रानुभावतः ॥ ३७ ॥ शितधारमिमं खड्गं यस्मै दर्शयसि स्फुटम् ॥ स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥ ॥ ३८ ॥ अस्य शंखस्य निह्रादं ये शृण्वंति तवाहिताः ॥ ते मूर्च्छिताः पतिष्यंति न्यस्तशस्त्रा विचेतनाः ॥ ३९ ॥ खड्गशंखाविमौ दिव्यौ परसैन्यविनाशिनौ ॥ आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनौ ॥ ४० ॥ एतयोश्च प्रभावेन शैवेन कवचेन च ॥ द्विषट्सहस्रनागानां बलेन महतापि च ॥४१॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि ॥ प्राप्य सिंहासनं पैत्र्यं गोप्तासि पृथिवीमिमाम् ॥४२॥ इति भद्रायुषं सम्यगनुशास्य समातृकम् ॥ ताभ्यां संपूजितः सोऽथ योगी स्वैरगतिर्ययौ ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखंडे सीमंतिनीमाहात्म्ये भद्रायूपाख्याने शिवकवचकथनं नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ दशार्णाधिपतेस्तस्य वज्रबाहोर्महाभुजः ॥ बभूव शत्रुर्बलवान्राजा मगधराट् ततः ॥ १ ॥ स वै हेमरथो नाम बाहुशाली रणोत्कटः[1] ॥ बलेन महतावृत्य दशार्णं न्यरुधद्बली ॥ २ ॥ चमूपास्तस्य[2] दुर्धर्षाः प्राप्य देशं दशार्णकम् ॥ व्यलुंपन्वसुरत्नानि गृहाणि ददहुः परे ॥३॥ केचिद्धनानि जगृहुः केचिद्बालान्स्त्रियोऽपरे ॥ गोधनान्यपरेऽगृह्णन्केचिद्धान्यपरिच्छदान् ॥ केचिदारामसस्यानि गृहोद्यानान्यनाशयन् ॥४॥ एवं विनाश्य तद्राज्यं स्त्रीगोधनजिघृक्षवः ॥ आवृत्य तस्य नगरीं वज्रबाहोस्तु मागधः ॥ ५ ॥ एवं पर्याकुलं वीक्ष्य राजा नगरमेव च ॥ युद्धाय निर्जगामाशु वज्रबाहुः ससैनिकः ॥ ६ ॥ वज्रबाहुश्च भूपालस्तथा मंत्रिपुरःसराः ॥ युयुधुर्मागधैः सार्धं निजघ्नुः शत्रुवाहिनीम् ॥७॥ वज्रबाहुर्महेष्वासो दंशितो रथमास्थितः ॥ विकिरन्बाणवर्षाणि चकार कदनं महत् ॥८॥ दशार्णराजं युध्यंतं दृष्ट्वा युद्धे सुदुःसहम् ॥ तमेव तरसा वव्रुः सर्वे मागधसैनिकाः ॥ ९ ॥ कृत्वा तु

१ रथोत्कटः—इ० पा० । २ ते भूपाः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुचिरं युद्धं मागधा दृढविक्रमाः ॥ तत्सैन्यं नाशयामासुर्लेभिरे च जयश्रियम् ॥१०॥ केचित्तस्य रथं जघ्नुः केचित्तद्धनुराच्छिनन् ॥ सूतं तस्य जघानैकस्त्वपरः खड्गमाच्छिनत् ॥ ११॥ संछिन्नखड्गधन्वानं विरथं हतसारथिम् ॥बलाद्गृहीत्वा बलिनो बबंधुर्नृपतिं रुषा ॥१२॥ तस्य मंत्रिगणं सर्वं तत्सैन्यं च विजित्य ते ॥ मागधास्तस्य नगरीं विविशुर्जयकाशिनः ॥ १३ ॥ अश्वान्नरान्गजानुष्ट्रान्पशूंश्चैव धनानि च ॥ जगृहुर्युवतीः सर्वाश्चावंगीश्चैव कन्यकाः ॥ १४ ॥ राज्ञो बबंधुर्महिषीर्दासीश्चैव सहस्रशः ॥ कोशं च रत्नसंपूर्णं जहुस्तेऽप्याततायिनः ॥ १५ ॥ एवं विनाश्य नगरीं हृत्वा स्त्रीगोधनादिकम् ॥ वज्रबाहुं बलाद्बद्ध्वा रथे स्थाप्य विनिर्ययुः ॥ १६ ॥ एवं कोलाहले जाते राष्ट्रनाशे च दारुणे ॥ राजपुत्रोऽथ भद्रायुस्तद्वार्तामशृणोद्बली ॥ १७ ॥ पितरं शत्रुनिर्बद्धं पितृपत्नीस्तथा हृताः ॥ नष्टं दशार्णराष्ट्रं च श्रुत्वा चुक्रोश सिंहवत् ॥ १८ ॥ स खड्गशंखावादाय वैश्यपुत्रसहायवान् ॥ दंशितो हयमारुह्य[1] कुमारो विजिगीषया ॥ १९ ॥ जवेनागत्य तं देशं मागधैरभिपूरितम् ॥ दह्यमानं क्रंदमानं हृतस्त्रीसुतगोधनम् ॥ २० ॥ दृष्ट्वा राजजनं सर्वं राज्यं शून्यं भयाकुलम् ॥ क्रोधाध्मातमनास्तूर्णं प्रविश्य रिपुवाहिनीम् ॥ आकर्णाकृष्टकोदंडो ववर्ष शरसंततीः ॥ २१ ॥ ते हन्यमाना रिपवो राजपुत्रेण सायकैः ॥ तमभिद्रुत्य वेगेन शरैर्विव्यधुरुल्बणैः ॥ २२ ॥ हन्यमानोऽस्त्रपूगेन रिपुभिर्युद्धदुर्मदैः ॥ न चचाल रणे धीरः शिववर्माभिरक्षितः ॥ २३ ॥ सोऽस्त्रकर्षं प्रसह्याशु प्रविश्य गजलीलया ॥ जघानाशु रथान्नागान्पदातीनपि भूरिशः ॥ २४ ॥ तत्रैकं रथिनं हत्वा ससूतं नृपनंदनः ॥ तमेव रथमास्थाय वैश्यनंदनसारथिः ॥ विचचार रणे धीरः सिंहो मृगकुलं यथा ॥ २५ ॥ अथ सर्वे सुसंरब्धाः शूराः प्रोद्यतकार्मुकाः ॥ अभिसस्रुस्तमेवैकं चमूपा बलशालिनः ॥ २६ ॥ तेषामापततामग्रे खड्गमुद्यम्य दारुणम् ॥ अभ्युद्ययौ महावीरान्दर्शयन्निव पौरुषम् ॥ २७ ॥ करालांतकजिह्वाभं तस्य खड्गं महोज्ज्वलम् ॥ दृष्ट्वैव सहसा मम्रुश्च भूपास्तत्प्रभावतः ॥ २८ ॥ येये पश्यंति तं खड्गं प्रस्फुरंतं रणांगणे ॥ ते सर्वे निधनं जग्मुर्वज्रं प्राप्येव कीटकः ॥ २९ ॥ अथासौ सर्वसैन्यानां विनाशाय महाभुजः ॥ शंखं दध्मौ महारावं पूरयन्निव रोदसी ॥ ३० ॥ तेन शंखनिनादेन विषाक्तेनैव भूयसा ॥ श्रुतमात्रेण रिपवो मूर्च्छिताः पतिता भुवि ॥ ३१ ॥ येऽश्वपृष्ठे रथे ये च ये च दंतिषु संस्थिताः॥ ते विसंज्ञाः क्षणात्पेतुः शंखनादहतौजसः॥३२॥ तान्भूमौ पतितान्सर्वान्नष्टसंज्ञान्निरायुधान्[1] ॥ विगणय्य शवप्रायान्नावधीद्धर्मशास्त्रवित् ॥ ३३ ॥ आत्मनः पितरं बद्धं मोचयित्वा रणाजिरे ॥ तत्पत्नीः शत्रुवशगाः सर्वाः सद्यो

१ दंशितो रथमारुह्य–इ०पा० । १ मृतप्रायान्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यमोचयत् ॥ ३४ ॥ पत्नीश्च मंत्रिमुख्यानां तथान्येषां पुरौकसाम् ॥ स्त्रियो बालांश्च कन्याश्च गोधनादीन्यनेकशः ॥ ३५ ॥ मोचयित्वा रिपुभ
यात्तमाश्वासयदाकुलः ॥ अथारिसैन्येषु चरंस्तेषां जग्राह योषितः ॥ ३६ ॥ मरुन्मनोजवानश्वान्मातंगान्गिरिसन्निभान् ॥ स्यंदनानि च
रौक्माणि दासीश्च रुचिराननाः ॥ ३७ ॥ युग्मम् ॥ सर्वमाहृत्य वेगेन गृहीत्वा तद्धनं बहु ॥ मागधेशं हेमरथं निर्बबंध पराजितम् ॥ ३८ ॥ तन्मं
त्रिणश्च भूपांश्च तत्र मुख्यांश्च नायकान् ॥ गृहीत्वा तरसा बद्ध्वा पुरीं प्रावेशयद्द्रुतम् ॥ ३९ ॥ पूर्वं ये समरे भग्ना विवृत्ताः सर्वतोदिशम् ॥
ते मंत्रिमुख्या विश्वस्ता नायकाश्च समाययुः ॥ ४० ॥ कुमारविक्रमं दृष्ट्वा सर्वे विस्मितमानसाः ॥ तं मेनिरे सुरश्रेष्ठं कारणादागतं भुवम् ॥
॥ ४१ ॥ अहो नः सुमहाभाग्यमहो नस्तपसः फलम् ॥ केनाप्यनेन वीरेण मृताः संजीविताः खलु ॥ ४२ ॥ एष किं योगसिद्धो वा तपःसिद्धो
ऽथवाऽमरः ॥ अमानुषमिदं कर्म यदनेन कृतं महत् ॥ ४३ ॥ नूनमस्य भवेन्माता सा गौरीति शिवः पिता ॥ अक्षौहिणीनां नवकं
जिगायानंतशक्तिधृक् ॥ ४४ ॥ इत्याश्चर्ययुतैर्हृष्टैः प्रशंसद्भिः परस्परम् ॥ पृष्टोऽमात्यजनेनासावात्मानं प्राह तत्त्वतः ॥ ४५ ॥ समागतं
स्वपितरं विस्मयाह्लादविप्लुतम् ॥ मुंचंतमानंदजलं ववंदे प्रेमविह्वलः ॥ ४६ ॥ स राजा निजपुत्रेण प्रणयादभिवंदितः ॥ आश्लिष्य
गाढं तरसा बभाषे प्रेमकातरः ॥ ४७ ॥ कस्त्वं देवो मनुष्यो वा गन्धर्वो वा महामते ॥ का माता जनकः को वा को देशस्तव
नाम किम् ॥ ४८ ॥ कस्मान्नः शत्रुभिर्बद्धान्मृतानिव हतौजसः ॥ कारुण्यादिह संप्राप्य सपत्नीकान्मुमोच यः ॥ ४९ ॥ कुतो लब्धमिदं
शौर्यं धैर्यं तेजो बलोन्नतिः ॥ जिगीषसीव लोकांस्त्रीन्सदेवासुरमानुषान् ॥ ५० ॥ अपि जन्मसहस्रेण तवानृण्यं महौजसः ॥ कर्तुं नाहं सम
र्थोऽस्मि सहैभिर्दारबांधवैः ॥५१॥ इमान्पुत्रानिमाः पत्नीरिदं राज्यमिदं पुरम् ॥ सर्वं विहाय मच्चित्तं त्वय्येव प्रेमबंधनम् ॥५२॥ सर्वं कथय मे तात
मत्प्राणपरिरक्षक ॥ एतासां मम पत्नीनां त्वदधीनं हि जीवितम् ॥ ५३ ॥ ॥ सूत उवाच ॥ ॥ इति पृष्टः स भद्रायुः स्वपित्रा तमभाषत ॥ एष
वैश्यसुतो राजन्सुनयो नाम मत्सखा ॥ ५४ ॥ अहमस्य गृहे रम्ये वसामि सहमातृकः ॥ भद्रायुर्नाम मद्वृत्तं पश्चाद्विज्ञापयामि ते ॥ ५५ ॥ पुरं
प्रविश्य भद्रं ते सदारः ससुहृज्जनः ॥ त्यक्त्वा भयमरातिभ्यो विहरस्व यथासुखम् ॥ ५६ ॥ नैतान्मुंच रिपूंस्तावद्यावदागमनं मम ॥ अहमद्य
गमिष्यामि शीघ्रमात्मनिवेशनम् ॥ ५७ ॥ इत्युक्त्वा नृपमामंत्र्य भद्रायुर्नृपनंदनः ॥ आजगाम स्वभवनं मात्रे सर्वं न्यवेदयत् ॥ ५८॥ सापि हृष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतनयं परिरेभेऽश्रुलोचना ॥ स च वैश्यपतिः प्रेम्णा परिष्वज्याभ्यपूजयत् ॥ ५९ ॥ वज्रबाहुश्च राजेंद्रः प्रविष्टो निजमंदिरम् ॥ स्त्रीपुत्रामात्य सहितः प्रहर्षमतुलं ययौ ॥ ६० ॥ तस्यां निशायां व्युष्टायामृषभो योगिनां वरः ॥ चंद्रांगदं समागत्य सीमंतिन्याः पतिं नृपम् ॥ ६१ ॥ भद्रा युषः समुत्पत्तिं तस्य कर्माण्यमानुषम् ॥ आवेद्य रहसि प्रेम्णा त्वत्सुतां कीर्तिमालिनीम् ॥ ६२ ॥ भद्रायुषे प्रयच्छेति बोधयित्वा च नैषधम् ॥ ऋषभो निर्जगामाथ देशकालार्थतत्त्ववित् ॥ ६३ ॥ विशेषकम् ॥ अथ चंद्रांगदो राजा मुहूर्ते मंगलोचिते ॥ भद्रायुषं समाहूय प्रायच्छत्कीर्त्तिमालि नीम् ॥ ६४ ॥ कृतोद्वाहः स राजेंद्रतनयः सह भार्यया ॥ हेमासनस्थः शुशुभे रोहिण्येव निशाकरः ॥ ६५ ॥ वज्रबाहुं तत्पितरं समाहूय स नैषधः ॥ पुरं प्रवेश्य सामात्यः प्रत्युद्गम्याभ्यपूजयत् ॥ ६६ ॥ तत्रापश्यत्कृतोद्वाहं भद्रायुषमरिंदमम् ॥ पादयोः पतितं प्रेम्णा हर्षात्तं परिषस्वजे ॥ ॥ ६७ ॥ एष मे प्राणदो वीर एष शत्रुनिषूदनः ॥ अथाप्यज्ञातवंशोऽयं मयानंतपराक्रमः ॥ ६८ ॥ एष ते नृप जामाता चंद्रांगद महाबलः ॥ अस्य वंशमथोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ ६९ ॥ इत्थं दशार्णराजेन प्रार्थितो निषधाधिपः ॥ विविक्त उपसंगम्य प्रहसन्निदमब्रवीत् ॥ ७० ॥ एष ते तनयो राजञ्छैशवे रोगपीडितः ॥ त्वया वने परित्यक्तः सह मात्रा रुजार्तया ॥ ७१ ॥ परिभ्रमंती विपिने सा नारी शिशुनामुना ॥ दैवाद्वैश्यगृहं प्राप्ता तेन वैश्येन रक्षिता ॥ ७२ ॥ अथासौ बहुरोगार्तो मृतस्तव कुमारकः ॥ केनापि योगिराजेन मृतः संजीवितः पुनः ॥ ७३ ॥ ऋषभाख्यस्य तस्यैव प्रभावाच्छिवयोगिनः ॥ रूपं च देवसदृशं प्राप्तौ मातृकुमारकौ ॥ ७४ ॥ तेन दत्तेन खड्गेन शंखेन[4] रिपुघातिना ॥ जिगाय[5] समरे शत्रूञ्छिववर्माभिरक्षितः ॥ ७५ ॥ द्विषट्सहस्रनागानां बलमेको बिभर्त्यसौ ॥ सर्वविद्यासु निष्णातो मम जामातृतां गतः ॥ ७६ ॥ अत एनं समादाय मातरं चास्य सुव्रताम् ॥ गच्छस्व नगरीं राजन्प्राप्स्यसि श्रेय उत्तमम् ॥ ७७ ॥ इति चंद्रांगदः सर्वमाख्यायांतर्गृहे स्थिताम् ॥ तस्याग्र पत्नीमाहूय दर्शयामास भूषिताम् ॥ ७८ ॥ इत्यादि सर्वमाकर्ण्य दृष्ट्वा च स महीपतिः ॥ व्रीडितो नितरां मौढ्यात्स्वकृतं कर्म गर्हयन् ॥ ७९ ॥ प्राप्तश्च परमानन्दं तयोर्दर्शनकौतुकात् ॥ पुलकांकितसर्वांगस्तावुभौ परिषस्वजे ॥ ८० ॥ युग्मम् ॥ एवं निषधराजेन पूजितश्चाभिनन्दितः ॥ स भोजयित्वा तं सम्यक्स्वयं च सह मंत्रिभिः ॥ ८१ ॥ तामात्मनोग्रमहिषीं पुत्रं तमपि तां स्नुषाम् ॥ आदाय सपरीवारो वज्रबाहुः पुरीं ययौ ॥८२॥ स संभ्रमेण महता भद्रायुः पितृमंदिरम् ॥ संप्राप्य परमानंदं चक्रे सर्वपुरौकसाम् ॥ ८३ ॥ कालेन दिवमारूढे पितरि [1]प्राप्तयौवनः ॥ भद्रायुः

१ समाश्लिष्य–इ० पा० । २ हठात्–इ० पा० । ३ सह–इ० पा० । ४ शंखेनारिविघातिना–इ० पा० । ५ जघान–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिवीं सर्वां शशासाद्भुतविक्रमः ॥ ८४ ॥ मागधेशं हेमरथं मोचयामास बंधनात् ॥ संधाय मैत्रीं परमां ब्रह्मर्षीणां च सन्निधौ ॥ ८५ ॥ इत्थं त्रिलोकमहितां शिवयोगिपूजां कृत्वा पुरातनभवेऽपि स राजसूनुः ॥ निस्तीर्य दुःसहविपद्गणमात्तराज्यश्चंद्रांगदस्य सुतया सह साधु रेमे ॥ ८६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखंडे भद्रायुविवाहकथनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ प्राप्तसिंहासनो वीरो भद्रायुः स महीपतिः ॥ प्रविवेश वनं रम्यं कदाचिद्भार्यया सह ॥ १ ॥ तस्मिन्विकसिताशोकप्रसूननवपल्लवे ॥प्रोत्फुल्लमल्लिकाखंडकूजद्भ्रमरसंकुले॥२॥नवकेसरसौरभ्यबद्धरागिजनोत्सवे॥सद्यःकोरकिताशोकतमालगहनांतरे ॥३॥ प्रसूनप्रकरानम्रमाधवीवनमंडपे॥ प्रवालकुसुमोद्द्योतचूतशाखिभिरञ्चिते ॥४॥ पुन्नागवनविश्रांतपुंस्कोकिलविराविणि॥ वसन्तसमये रम्ये विजहार स्त्रिया सह ॥५॥ अथाविदूरे क्रोशंतौ धावंतौ द्विजदंपती ॥ अन्वीयमानौ व्याघ्रेण ददर्श नृपसत्तमः ॥ ६ ॥ पाहिपाहि महाराज हा राजन्करुणानिधे ॥ एष धावति शार्दूलो जग्धुमावां महारयः ॥ ७ ॥ एष पर्वतसंकाशः सर्वप्राणिभयंकरः ॥ यावन्न खादति प्राप्य तावन्नौ रक्ष भूपते ॥ ८ ॥ इत्थमाक्रंदितं श्रुत्वा स राजा धनुराददे ॥ तावदागत्य शार्दूलो मध्ये जग्राह तां वधूम् ॥ ९ ॥ हा नाथ नाथ हा कांत हा शंभो जगतः पते ॥ इति रोरूयमाणां तां यावज्जग्राह भीषणः ॥ १० ॥ तावत्स राजा निशितैर्भल्लैर्व्याघ्रमताडयत् ॥ न च तैर्विव्यथे किंचिद्गिरींद्र इव वृष्टिभिः ॥११॥ स शार्दूलो महासत्त्वो राज्ञोस्त्रैरकृतव्यथः ॥ बलादाकृष्य तां नारीमपाक्रामत सत्वरः ॥ १२ ॥ व्याघ्रेणापहृतां पत्नीं वीक्ष्य विप्रोऽतिदुःखितः ॥ रुरोद हा प्रिये बाले हा कांते हा पतिव्रते ॥ १३ ॥ एकं मामिह संत्यज्य कथं लोकांतरं गता ॥ प्राणेभ्योपि प्रियां त्यक्त्वा कथं जीवितुमुत्सहे ॥ १४ ॥ राजन्क ते महास्त्राणि क्व ते श्लाघ्यं महद्धनुः ॥ क्व ते द्वादशसाहस्रमहानागातिगं बलम् ॥ १५ ॥ किं ते शंखेन खड्गेन किं ते मंत्रास्त्रविद्यया ॥ किं च तेन प्रयत्नेन किं प्रभावेण भूयसा ॥ १६ ॥ तत्सर्वं विफलं जातं यच्चान्यत्त्वयि तिष्ठति ॥ यस्त्वं वनौकसं जंतुं निवारयितुमक्षमः ॥ १७ ॥ क्षात्रस्यायं परो धर्मः क्षताद्यत्परिरक्षणम् ॥ तस्मात्कुलोचिते धर्मे नष्टे त्वज्जीवितेन किम् ॥१८॥ आर्तानां शरणार्तानां त्राणं कुर्वंति पार्थिवाः ॥ प्राणैरर्थैश्च धर्मज्ञास्तद्विहीना मृतोपमाः ॥ १९ ॥ धनिनां दानहीनानां गार्हस्थ्याद्भिक्षुता वरा ॥ आर्तत्राणविहीनानां जीवितान्मरणं

१ अद्भुतशासनः–इ० पा० । २ त्रिलोकविहिताम्–इ०पा० । ३ प्रियया–इ० पा० । ४ चूतशाखाभिरञ्जिते–इ० पा० । ५ विराजिते–इ०पा० । ६ अन्तकम्–इ० पा० । ७ किं सत्त्वेन प्रतापेन–इ० पा० । ८ शरणार्थिनाम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वरम् ॥ २० ॥ वरं विषादनं राज्ञो वरमग्नौ प्रवेशनम् ॥ अनाथानां प्रपन्नानां कृपणानामरक्षणात् ॥ २१ ॥ इत्थं विलपितं तस्य स्ववीर्यस्य च गर्ह
णम् ॥ निशम्य नृपतिः शोकादात्मन्येवमचिंतयत् ॥ २२ ॥ अहो मे पौरुषं नष्टमद्य दैवविपर्ययात् ॥ अद्य कीर्तिश्च मे नष्टा पातकं प्राप्तमुत्क
टम् ॥ २३ ॥ धर्मः कालोचितो नष्टो मन्दभाग्यस्य दुर्मतेः ॥ नूनं मे संपदो राज्यमायुष्यं क्षयमेष्यति ॥२४॥ अपुंसां संपदो भोगाः पुत्रदारधना
नि च ॥ दैवेन क्षणमुद्यंति क्षणादस्तं व्रजंति च ॥२५॥ अत एनं द्विजन्मानं हतदारं शुचार्दितम्॥गतशोकं करिष्यामि दत्त्वा प्राणानपि प्रियान् ॥
॥ २६ ॥ इति निश्चित्य मनसा भद्रायुर्नृपसत्तमः ॥ पतित्वा पादयोस्त्वस्य बभाषे परिसांत्वयन् ॥ २७ ॥ कृपां कुरु मयि ब्रह्मन्क्षत्रबंधौ हतौ
जसि ॥ शोकं त्यज महाबुद्धे दास्याम्यर्थं तवेप्सितम् ॥ २८ ॥ इदं राज्यमियं राज्ञी ममेदं च कलेवरम् ॥ त्वधीनमिदं सर्वं किं तेऽभिलषितं वद ॥
॥ २९ ॥ ॥ ब्राह्मण उवाच ॥ ॥ किमादर्शेन चांधस्य किं गृहैर्भैक्ष्यजीविनः ॥ किं पुस्तकेन मूर्खस्य ह्यस्त्रीकस्य धनेन किम् ॥ ३० ॥
अतोऽहं गतपत्नीको भुक्तभोगो न कर्हिचित् ॥ इमां तवाग्रमहिषीं कामार्थं दीयतां मम ॥ ३१ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मन्किमेष धर्मस्ते
किमेतद्गुरुशासनम् ॥ अस्वर्ग्यमयशस्यं च परदाराभिमर्शनम् ॥ ३२ ॥ दातारः संति वित्तस्य राज्यस्य गजवाजिनाम् ॥ आत्मदेहस्य वा
क्वापि न कलत्रस्य कर्हिचित् ॥३३॥ परदारोपभोगेन यत्पापं समुपार्जितम् ॥ न तत्क्षालयितुं शक्यं प्रायश्चित्तशतैरपि ॥३४॥ ॥ ब्राह्मण उवाच ॥
अपि ब्रह्मवधं घोरमपि मद्यनिषेवणम् ॥ तपसा नाशयिष्यामि किं पुनः पारदारिकम् ॥ तस्मात्प्रयच्छ मे भार्यामिमां त्वं ध्रुवमन्यथा ॥ ३५ ॥
अरक्षणाद्भयार्तानां गंतासि निरयं ध्रुवम् ॥ इति विप्रगिरा भीतश्चिंतयामास पार्थिवः ॥ अरक्षणान्महत्पापं पत्नीदानं ततो वरम् ॥ ३६ ॥
अतः पत्नीं द्विजाग्र्याय दत्त्वा निर्मुक्तकिल्बिषः ॥ सद्यो वह्निं प्रवेक्ष्यामि कीर्तिश्च निहिता भवेत् ॥ ३७ ॥ इति निश्चित्य मनसा समुज्ज्वाल्य
हुताशनम् ॥ तं ब्राह्मणं समाहूय ददौ पत्नीं सहोदकाम् ॥ ३८ ॥ स्वयं स्नातः शुचिर्भूत्वा प्रणम्य विबुधेश्वरान् ॥ तमग्निं द्विः परिक्रम्य शिवं
दध्यौ समाहितः ॥ ३९ ॥ तमथाग्नौ पतिष्यंतं स्वपदासक्तचेतसम् ॥ प्रत्यदृश्यत विश्वेशः प्रादुर्भूतो जगत्पतिः ॥ ४० ॥ तमीश्वरं पंचवक्त्रं त्रि
नेत्रं पिनाकिनं चन्द्रकलावतंसम् ॥ आलंबितापिंगजटाकलापं मध्यंगतं भास्करकोटितेजसम् ॥ ४१ ॥ मृणालगौरं गजचर्मवाससं गंगातरंगो
क्षितमौलिदेशम् ॥ नागेंद्रहारावलिकंकणोर्मिकाकिरीटकोट्यंगदकुंडलोज्ज्वलम् ॥ ४२ ॥ त्रिशूलखट्वांगकुठारचर्ममृगाभयेष्टार्थपिनाकहस्तम् ॥

१ मूढस्य—इ० पा० । २ प्रतिषेधाय—इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वृषोपरिस्थं शितिकंठमीशं प्रोद्भूतमग्रे नृपतिर्ददर्श ॥ ४३ ॥ अथांबराद्दुतं पेतुर्दिव्याः कुसुमवृष्टयः ॥ प्रणेदुर्देवतूर्याणि देवाश्च ननृतुर्जगुः ॥ ४४ ॥ तत्राजग्मुर्नारदाद्याः सनकाद्याः सुरर्षयः ॥ इन्द्रादयश्च लोकेशास्तथा ब्रह्मर्षयोऽमलाः ॥ ४५ ॥ तेषां मध्ये समासीनो महादेवः सहोमया ॥ ववर्ष करुणासारं भक्तिनम्रे महीपतौ ॥ ४६ ॥ तद्दर्शनानंदविजृंभिताशयः प्रवृद्धबाष्पांबुपरिप्लुतांगः ॥ प्रहृष्टरोमा गलगद्गदाक्षरं तुष्टाव गीर्भिर्मुकुलीकृतांजलिः ॥ ४७ ॥ ॥ राजोवाच ॥ ॥ नतोस्म्यहं देवमनाथमव्ययं प्रधानमव्यक्तगुणं महांतम् ॥ अकारणं कारणकारणं परं शिवं चिदानंदमयं प्रशांतम् ॥ ४८ ॥ त्वं विश्वसाक्षी जगतोऽस्य कर्त्ता विरूढधामा हृदि सन्निविष्टः ॥ अतो विचिन्वंति विधौ विपश्चितो योगैरनेकैः कृतचित्तरोधैः ॥ ४९ ॥ एकात्मतां भावयतां त्वमेको नानाधियां यस्त्वमनेकरूपः ॥ अतींद्रियं साक्ष्युदयास्तविभ्रमं मनःपथात्संह्रियते पदं ते ॥ ५० ॥ तं त्वां दुरापं वचसो धियाश्च व्यपेतमोहं परमात्मरूपम् ॥ गुणैकनिष्ठाः प्रकृतौ विलीनाः कथं वपुः स्तोतुमलं गिरो मे ॥ ५१ ॥ तथापि भक्त्याश्रयतामुपेयुस्तवांघ्रिपद्मं प्रणतार्तिभंजनम् ॥ सुघोरसंसारदवाग्निपीडितो भजामि नित्यं भवभीतिशांतये ॥ ५२ ॥ नमस्ते देव देवाय महादेवाय शंभवे ॥ नमस्त्रिमूर्तिरूपाय सर्गस्थित्यंतकारिणे ॥ ५३ ॥ नमो विश्वादिरूपाय विश्वप्रथमसाक्षिणे ॥ नमः सन्मात्रतत्त्वाय बोधानंदघनाय च ॥ ५४ ॥ सर्वक्षेत्रनिवासाय क्षेत्रभिन्नात्मशक्तये ॥ अशक्ताय नमस्तुभ्यं शक्ताभासाय भूयसे ॥ ५५ ॥ निराभासाय नित्याय सत्यज्ञानांतरात्मने ॥ विशुद्धाय विदूराय विमुक्ताशेषकर्मणे ॥ ५६ ॥ नमो वेदांतवेद्याय वेदमूलनिवासिने ॥ नमो विविक्तचेष्टाय निवृत्तगुणवृत्तये ॥ ५७ ॥ नमः कल्याणवीर्याय कल्याणफलदायिने ॥ नमोऽनंताय महते शांताय शिवरूपिणे ॥ ५८ ॥ अघोराय सुघोराय घोराघौघविदारिणे ॥ भर्गाय भवबीजानां भंजनाय गरीयसे ॥ नमो विध्वस्तमोहाय विशदात्मगुणाय च ॥ ५९ ॥ पाहि मां जगतां नाथ पाहि शंकर शाश्वत ॥ पाहि रुद्र विरूपाक्ष पाहि मृत्युंजयाव्यय ॥ ६० ॥ शम्भो शशांककृतशेखर शांतमूर्ते गौरीश गोपतिनिशापहुताशनेत्र ॥ गंगाधरांधकविदारण पुण्यकीर्ते भूतेश भूधरनिवास सदा नमस्ते ॥ ६१ ॥ ॥ सूत उवाच ॥ ॥ एवं स्तुतः स भगवान्राज्ञा देवो महेश्वरः ॥ प्रसन्नः सह पार्वत्या प्रत्युवाच दयानिधिः ॥ ६२ ॥ ॥ ईश्वर उवाच ॥ ॥ राजंस्ते परितुष्टोऽस्मि भक्त्या पुण्यस्तवेन च ॥ अनन्यचेता

१ स्तूयमानाः–इ० पा० । २ गिरिजापतिं शिवम्–इ० पा० । ३ चिदानन्दघनप्रकाशम्–इ० पा० । ४ विमूढधामा, विगूढधामा–इ० च पा० । ५ त्रिमूर्तिभेदाय–इ० पा० । ६ अंगजविदारण–इ० पा० । ७ महादेव–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो नित्यं सदा मां पर्यपूजयः ॥ ६३ ॥ तव भावपरीक्षार्थं द्विजो भूत्वाहमागतः ॥ व्याघ्रेण या परिग्रस्ता सैषा देवी गिरींद्रजा ॥ ६४ ॥ व्याघ्रो मायामयो यस्ते शरैरक्षतविग्रहः ॥ धीरतां द्रष्टुकामस्ते पत्नीं याचितवानहम् ॥ ६५ ॥ अस्याश्च कीर्तिमालिन्यास्तव भक्त्या च मानद ॥ तुष्टोऽहं संप्रयच्छामि वरं वरय दुर्लभम् ॥ ६६ ॥ ॥ राजोवाच ॥ ॥ एष एव वरो देव यद्भवान्परमेश्वरः ॥ भवतापपरीतस्य मम प्रत्यक्षतां गतः ॥ ६७ ॥ नान्यं वरं वृणे देव भवतो वरदर्षभात् ॥ अहं च सेयं सा राज्ञी मम माता च मत्पिता ॥ ६८ ॥ वैश्यः पद्माकरो नाम तत्पुत्रः सुनयाभिधः ॥ सर्वानेतान्महादेव सदा त्वत्पार्श्वगान्कुरु ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ अथ राज्ञी महाभागा प्रणता कीर्तिमालिनी ॥ भक्त्या प्रसाद्य गिरिशं ययाचे वरमुत्तमम् ॥ ७० ॥ ॥ राज्ञ्युवाच ॥ ॥ चंद्रांगदो मम पिता माता सीमंतिनी च मे ॥ तयोर्याचे महादेव त्वत्पार्श्वे सन्निधिं सदा ॥ ७१ ॥ एवमस्त्विति गौरीशः प्रसन्नो भक्तवत्सलः ॥ तयोः कामवरं दत्त्वा क्षणादंतर्हितोऽभवत् ॥ ७२ ॥ सोपि राजा सुरैः सार्धं प्रसादं प्राप्य शूलिनः ॥ सहितः कीर्तिमालिन्या बुभुजे विषयान्प्रियान् ॥ ७३ ॥ कृत्वा वर्षायुतं राज्यमव्याहतबलोन्नतिः ॥ राज्यं पुत्रेषु विन्यस्य भेजे शंभोः परं पदम् ॥ ७४ ॥ चंद्रांगदोपि राजेंद्रो राज्ञी सीमंतिनी च सा ॥ भक्त्या संपूज्य गिरिशं जग्मतुः शांभवं पदम् ॥ ७५ ॥ एतत्पवित्रमघनाशकरं विचित्रं शम्भोर्गुणानुकथनं परमं रहस्यम् ॥ यः श्रावयेद्बुधजनान्प्रयतः पठेद्वा संप्राप्य भोगविभवं शिव मेति सोंते ॥ ७६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भद्रायुशिवप्रसादकथनं नाम चतुर्दशोऽध्यायः ॥ ॥ १४ ॥ ॥ सूत उवाच ॥ ॥ ऋषभस्यानुभावोयं वर्णितः शिवयोगिनः ॥ अथान्यस्यापि[1] वक्ष्यामि प्रभावं शिवयोगिनः ॥ १ ॥ भस्मनश्चापि माहात्म्यं वर्णयामि समासतः ॥ कृतकृत्या भविष्यंति यच्छ्रुत्वा पापिनो जनाः ॥ २ ॥ अस्त्येको वामदेवाख्यः शिवयोगी महा तपाः ॥ निर्द्वंद्वो निर्गुणः शांतो निःसंगः समदर्शनः ॥ ३ ॥ आत्मारामो जितक्रोधो गृहदारविवर्जितः ॥ अतर्कितगतिर्मौनी संतुष्टो निष्प रिग्रहः ॥ ४ ॥ भस्मोद्धूलितसर्वांगो जटामंडलमंडितः ॥ वल्कलाजिनसंवीतो भिक्षामात्रपरिग्रहः ॥ ५ ॥ स एकदा चरंल्लोके सर्वानुग्रहतत्परः ॥ क्रौंचारण्यं महाघोरं प्रविवेश यदृच्छया ॥ ६ ॥ तस्मिन्निर्मनुजेऽरण्ये तिष्ठत्येकोऽतिभीषणः ॥ क्षुत्तृषाकुलितो नित्यं यः कश्चिद्ब्रह्मराक्षसः ॥ ७ ॥ तं प्रविष्टं शिवात्मानं स दृष्ट्वा ब्रह्मराक्षसः ॥ अभिदुद्राव वेगेन जग्धुं क्षुत्परिपीडितः ॥ ८ ॥ व्यात्ताननं महाकायं भीमदंष्ट्रं भयानकम् ॥ तमा

[1] तथान्यस्यापि–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यांतमभिप्रेक्ष्य योगीशो न चचाल सः ॥ ९ ॥ अथाभिद्रुत्य तरसा स घोरो वनगोचरः ॥ दोर्भ्यां निष्पीड्य जग्राह निष्कंपं शिवयोगिनम् ॥ १० ॥ तदंगस्पर्शनादेव सद्यो विध्वस्तकिल्बिषः ॥ स ब्रह्मराक्षसो घोरो विषण्णः स्मृतिमाययौ ॥ ११ ॥ यथा चिंतामणिं स्पृष्ट्वा लोहं कांचनतां व्रजेत् ॥ यथा जंबूनदीं प्राप्य मृत्तिका स्वर्णतां व्रजेत् ॥ १२ ॥ यथा मानसमभ्येत्य वायसा यांति हंसताम् ॥ यथामृतं सकृत्पीत्वा नरो देवत्वमाप्नुयात् ॥ ॥ १३ ॥ तथैव हि महात्मानो दर्शनस्पर्शनादिभिः ॥ सद्यः[1] पुनंत्यघोपेतान्सत्संगो दुर्लभो ह्यतः ॥ १४ ॥ यः पूर्वं क्षुत्पिपासार्तो घोरात्मा विपिने चरः ॥ स सद्यस्तृप्तिमायातः पूर्णानंदो बभूव ह ॥ १५ ॥ तद्गात्रलग्नसितभस्मकणानुविद्धः सद्यो विधूतघनपापतमःस्वभावः ॥ संप्राप्तपूर्वभवसंस्मृतिरुग्रकार्यस्तत्पादपद्मयुगुले प्रणतो बभाषे ॥ १६ ॥ ॥ राक्षस उवाच ॥ ॥ प्रसीद मे महायोगिन्प्रसीद करुणानिधे ॥ प्रसीद भवतप्तानामानंदामृतवारिधे ॥ १७ ॥ क्वाहं पापमतिर्घोरः सर्वप्राणिभयंकरः ॥ क्व ते महानुभावस्य दर्शनं करुणात्मनः ॥ १८ ॥ उद्धरोद्धर मां घोरे पतितं दुःखसागरे ॥ तव सन्निधिमात्रेण महानंदोऽभिवर्धते ॥ १९ ॥ ॥ वामदेव[2] उवाच ॥ ॥ कस्त्वं वनेचरो घोरो राक्षसोऽत्र किमास्थितः ॥ कथमेतां महाघोरां कष्टां गतिमवाप्तवान् ॥ २० ॥ ॥ राक्षस उवाच ॥ ॥ राक्षसोऽहमितः पूर्वं पंचविंशतिमे भवे ॥ गोप्ता यवनराष्ट्रस्य दुर्जयो नाम वीर्यवान् ॥ २१ ॥ सोऽहं दुरात्मा पापीयान्स्वैरचारी मदोत्कटः ॥ दंडधारी दुराचारः प्रचंडो[3] निर्घृणः खलः ॥ २२ ॥ युवा बहुकलत्रोऽपि कामासक्तोऽजितेंद्रियः ॥ इमां पापीयसीं चेष्टां पुनरेकां गतोऽस्म्यहम् ॥ २३ ॥ प्रत्यहं नूतनामन्यां नारीं भोक्तुमनाः सदा ॥ आहृताः सर्वदेशेभ्यो नार्यो भृत्यैर्मदाज्ञया ॥ २४ ॥ भुक्त्वाभुक्त्वा परित्यक्तामेकामेकां दिनेदिने ॥ अन्तर्गृहेषु संस्थाप्य पुनरन्याः स्त्रियो धृताः ॥ २५ ॥ एवं स्वराष्ट्रात्परराष्ट्रतश्च देशाकरग्रामपुरव्रजेभ्यः ॥ आहृत्य नार्यो रमिता दिनेदिने भुक्ता पुनः कापि न भुज्यते मया ॥ २६ ॥ अथान्यैश्च न भुज्यंते मया भुक्तास्तथा स्त्रियः ॥ अन्तर्गृहेषु निहिताः[4] शोचंते च दिवानिशम् ॥ २७ ॥ ब्रह्मविट्क्षत्रशूद्राणां यदा नार्यो मया हृताः ॥ मम राज्ये स्थिता विप्राः सह दारैः प्रदुद्रुवुः ॥ २८ ॥ सभर्तृकाश्च कन्याश्च विधवाश्च[5] रजस्वलाः ॥ आहृत्य नार्यो रमिता मया कामहतात्मना ॥ २९ ॥ त्रिशतं द्विजनारीणां राजस्त्रीणां चतुःशतम् ॥ षट्शतं वैश्यनारीणां सहस्रं शूद्रयोषिताम् ॥ ३० ॥ शतं चांडालनारीणां पुलिंदीनां सहस्रकम् ॥ शैलूषीणां पंचशतं रजकीनां चतुःशतम् ॥ ३१ ॥ असंख्या वारमुख्याश्च मया भुक्ता दुरात्मना ॥ तथापि मयि कामस्य न

१ सन्तः—इ० पा० । २ शिवयोग्युवाच—इ० पा० । ३ प्रजाघ्नः—इ०पा० । ४ वनिताः—इ०पा० । ५ विवाह्याश्च—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृप्तिः समजायत ॥ ३२ ॥ एवं दुर्विषयासक्तं मत्तं पानरतं सदा ॥ यौवनेपि महारोगा विविशुर्यक्ष्मकादयः ॥ ३३ ॥ रोगार्दितोऽन पत्यश्च शत्रुभिश्चापि पीडितः ॥ त्यक्तोमात्यैश्च भृत्यैश्च मृतोऽहं स्वेन कर्मणा ॥ ३४ ॥ आयुर्विनश्यत्ययशो विवर्धते भाग्यं क्षयं यात्यतिदुर्गतिं व्रजेत् ॥ स्वर्गाच्च्यवंते पितरः पुरातना धर्मव्यपेतस्य नरस्य निश्चितम् ॥ ३५ ॥ अथाहं किंकरैर्याम्यैर्नीतो वैवस्वतालयम् ॥ ततोऽहं नरके घोरे तत्कुण्डे विनिपातितः ॥ ३६ ॥ तत्राहं नरके घोरे वर्षाणामयुतत्रयम्[1] ॥ रेतः पिबन्पीडयमानो न्यवसं यमकिंकरैः ॥ ३७ ॥ ततः पापावशेषेण पिशाचो निर्जने वने ॥ सहस्रशिश्नः संजातो नित्यं क्षुत्तृषयाकुलः ॥ ३८ ॥ पैशाचीं गतिमाश्रित्य नीतं दिव्यं शरच्छतम् ॥ द्वितीयेऽहं भवे जातो व्याघ्रः प्राणिभयंकरः ॥ ३९ ॥ तृतीयेऽजगरो घोरश्चतुर्थेऽहं भवे वृकः ॥ पंचमे विड्वराहश्च षष्ठेऽहं कृकलासकः ॥ ४० ॥ सप्तमेऽहं सारमेयः सृगालश्चाष्टमे भवे ॥ नवमे गवयो भीमो मृगोऽहं दशमे भवे ॥ ४१ ॥ एकादशे मर्कटश्च गृध्रोऽहं द्वादशे भवे ॥ त्रयोदशेऽहं नकुलो वायसश्च चतुर्दशे ॥ ४२ ॥ अच्छभल्लः पंचदशे षोडशे वनकुक्कुटः ॥ गर्दभोऽहं सप्तदशे मार्जारोष्टादशे भवे ॥ ४३ ॥ एकोनविंशे मण्डूकः कूर्मो विंशतिमे भवे ॥ एकविंशे भवे मत्स्यो द्वाविंशे मूषकोऽभवम्[2] ॥ ४४ ॥ उलूकोहं त्रयोविंशे चतुर्विंशे वनद्विपः ॥ पंचविंशे भवे चास्मिञ्जातोहं ब्रह्मराक्षसः ॥ ४५ ॥ क्षुत्परीतो निराहारो वसाम्यत्र महावने ॥ इदानीमागतं दृष्ट्वा भवंतं जग्धुमुत्सुकः ॥ त्वद्देहस्पर्शमात्रेण जाता पूर्वभवस्मृतिः ॥ ४६ ॥ गतजन्मसहस्राणि स्मराम्यद्य त्वदंतिके ॥ निर्वेदश्च परो जातः प्रसन्नं हृदयं च मे ॥ ४७ ॥ ईदृशोऽयं प्रभावस्ते कथं लब्धो महामते ॥ तपसा वापि तीव्रेण किमु तीर्थनिषेवणात् ॥ ४८ ॥ योगेन देवशक्त्या वा मंत्रैर्वानंतशक्तिभिः ॥ तत्त्वतो ब्रूहि भगवंस्त्वामहं शरणं गतः ॥ ४९ ॥ ॥ वामदेव उवाच ॥ ॥ एष मद्गात्रलग्नस्य प्रभावो भस्मनो महान् ॥ यत्संपर्कात्तमोवृत्तेस्तवेयं मतिरुत्तमा ॥ ५० ॥ को वेद भस्मसामर्थ्यं महादेवादृते परः ॥ दुर्विभाव्यं यथा शंभोर्माहात्म्यं भस्मनस्तथा ॥ ५१ ॥ पुरा भवादृशः कश्चिद्ब्राह्मणो धर्मवर्जितः ॥ द्राविडेषु स्थितो मूढः कर्मणा शूद्रतां गतः ॥ ५२ ॥ चौर्यवृत्तिर्नैष्कृतिको वृषलीरतिलालसः ॥ कदाचिज्जारतां प्राप्तः शूद्रेण निहतो निशि ॥ ५३ ॥ तच्छवस्य बहिर्ग्रामात्क्षिप्तस्य प्रेतकर्मणः ॥ चचार सारमेयोऽगे भस्मपादो यदृच्छया ॥ ५४ ॥ अथ तं नरके घोरे पतितं शिवकिंकराः ॥ निन्युर्विमानमारोप्य प्रसह्य यमकिंकरान् ॥ ५५ ॥ शिवदूतान्समभ्येत्य यमोपि परिपृष्टवान् ॥ महापातककर्त्तारं कथमेनं निनीषथ ॥ ५६ ॥ अथोचुः शिवदूतास्ते पश्यास्य

१ अयुतद्वयम्–इ०पा० । २ ऊनैकाविंशतिभवे मकरोऽहं सरित्पतौ । दशद्वयभवे कर्मस्तत्रैव च भवाम्यहम् ॥ सैकविंशे भवे वृध्रो द्वाविंशेऽहं च मूषकः–इ० पा० पुस्तकान्तरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शवविग्रहम् ॥ वक्षोललाटदोर्मूलान्यंकितानि सुभस्मना ॥ ५७ ॥ अत एनं समानेतुमागताः शिवशासनात् ॥ नास्मान्निषेद्धुं शक्तोसि मास्त्वत्र तव संशयः ॥ ५८ ॥ इत्याभाष्य यमं शंभोर्दूतास्तं ब्राह्मणं ततः ॥ पश्यतां सर्वलोकानां निन्युर्लोकमनामयम् ॥ ५९ ॥ तस्मादशेषपापानां सद्यः संशोधनं परम् ॥ शंभोर्विभूषणं भस्म सततं ध्रियते मया ॥ ६० ॥ इत्थं निशम्य माहात्म्यं भस्मनो ब्रह्मराक्षसः ॥ विस्तरेण पुनः श्रोतु मौत्कंठ्यादित्यभाषत ॥ ६१ ॥ साधुसाधु महायोगिन्धन्योस्मि तव दर्शनात् ॥ मां विमोचय धर्मात्मन्घोरादस्मात्कुजन्मनः ॥ ६२ ॥ किंचि दस्तीह मे भाति मया पुण्यं पुराकृतम् ॥ अतोहं त्वत्प्रसादेन मुक्तोस्म्यद्य[1] द्विजोत्तम ॥ ६३ ॥ एकस्मै शिवभक्ताय तस्मिन्पार्थिवजन्मनि ॥ भूमिर्वृत्तिकरी दत्ता सस्यारामान्विता मया ॥ ६४ ॥ यमेनापि तदैवोक्तं पंचविंशतिमे भवे ॥ कस्यचिद्योगिनः संगान्मोक्ष्यसे संसृतेरिति ॥ ६५ ॥ तदद्य फलितं पुण्यं यत्किंचित्प्राग्भवार्जितम् ॥ अतो निर्मनुजारण्ये संप्राप्तस्तव संगमः ॥ ६६ ॥ अतो मां घोरपाप्मानं संसरंतं कुजन्मनि ॥ समुद्धर कृपासिन्धो दत्त्वा भस्म समंत्रकम् ॥ ६७ ॥ कथं धार्यमिदं भस्म को मंत्रः को विधिः शुभः ॥ कः कालः कश्च वा देशः सर्वं कथय मे गुरो ॥ ६८ ॥ भवादृशा महात्मानः सदा लोकहिते रताः ॥ नात्मनो हितमिच्छंति कल्पवृक्षसधर्मिणः ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तस्तेन[2] योगीशो घोरेण वनचारिणा ॥ भूयोपि भस्ममाहात्म्यं वर्णयामास तत्त्ववित्[3] ॥ ७० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भस्ममाहात्म्यकथनं नाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ सूत उवाच ॥ ॥ शृणुध्वं मुनयः श्रेष्ठा वामदेवस्य भाषितम् ॥ १ ॥ ॥ वामदेव उवाच ॥ ॥ पुरा मंदरशैलेंद्रे नानाधातुविचित्रिते ॥ नानासत्वसमाकीर्णे नानाद्रुमलताकुले ॥ २ ॥ कालाग्निरुद्रो भगवान्कदाचिद्विश्ववंदितः ॥ समाससाद भूतेशः स्वेच्छया परमेश्वरः ॥ ३ ॥ समंतात्समुपातिष्ठन्रुद्राणां शतकोटयः ॥ तेषां मध्ये समासीनो देवदेवस्त्रिलोचनः ॥ ४ ॥ तत्रागच्छत्सुरश्रेष्ठो[4] देवैः सह पुरंदरः ॥ तथाग्निर्वरुणो वायुर्यमो वैवस्वतस्तथा ॥ ५ ॥ गंधर्वाश्चित्रसेनाद्याः खेचराः पन्नगादयः ॥ विद्याधराः किंपुरुषाः सिद्धाः साध्याश्च गुह्यकाः ॥ ६ ॥ ब्रह्मर्षयो वसिष्ठाद्या नारदाद्याः सुरर्षयः ॥ पितरश्च महात्मानो दक्षाद्याश्च प्रजेश्वराः ॥ ७ ॥ उर्वश्याद्याश्चाप्सरसश्चंडिकाद्याश्च मातरः ॥ आदित्या वसवो दस्रौ विश्वेदेवा महौजसः ॥ ८ ॥ अथान्ये भूतपतयो लोकसंहरणे क्षमाः ॥ महाकालश्च नंदी च तथावै शंखपालकौ ॥ ९ ॥ वीरभद्रो महातेजाः शंकुकर्णो महाबलः ॥ घंटाकर्णश्च दुर्धर्षो मणिभद्रो वृकोदरः ॥ १० ॥ कुंडोदरश्च विकटास्तथा कुंभोदरो बली ॥ मंदोदरः कर्णधारः केतुर्भृंगीरिटिस्तथा ॥ ११ ॥ भूतनाथा

१ मोऽस्येऽस्माद्भवबंधनात्–इ० पा० । २ यतः–इ०पा० । ३ तत्त्वतः–इ० पा० । ४ शंकरपार्श्वगो–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तथान्ये च महाकाया महौजसः ॥ कृष्णवर्णास्तथा श्वेताः केचिन्मंडूकसंप्रभाः ॥ १२ ॥ हरिता धूसरा धूम्राः कर्बुराः पीतलो
हिताः॥ चित्रवर्णा विचित्रांगाश्चित्रलीला मदोत्कटाः ॥ १३ ॥ नानायुधोद्यतकरा नानावाहनभूषणाः ॥ केचिद्व्याघ्रमुखाः केचित्सूकरास्या मृगा
ननाः ॥ १४ ॥ केचिच्च नक्रवदनाः सारमेयमुखाः परे ॥ सृगालवदनाश्चान्य उष्ट्रभवदनाः परे ॥ १५ ॥ केचिच्छरभभेरुंडसिंहाश्वोष्ट्रबकाननाः ॥
एकवक्त्रा द्विवक्त्राश्च त्रिमुखाश्चैव निर्मुखाः ॥ १६ ॥ एकहस्तास्त्रिहस्ताश्च पंचहस्तास्त्वहस्तकाः ॥ अपादा बहुपादाश्च बहुकर्णैककर्णकाः ॥१७॥
एकनेत्राश्चतुर्नेत्रा दीर्घाः केचन वामनाः ॥ समंतात्परिवार्येशं भूतनाथमुपासते ॥ १८ ॥ अथागच्छन्महातेजा मुनीनां प्रवरः सुधीः ॥ सनत्कु
मारो धर्मात्मा तं द्रष्टुं जगदीश्वरम् ॥ १९ ॥ तं देवदेवं विश्वेशं सूर्यकोटिसमप्रभम् ॥ महाप्रलयसंक्षुब्धसप्तार्णववनस्वनम् ॥ २० ॥ संवर्त्ताग्निसमा
टोपं जटामंडलशोभितम् ॥ अक्षीणभालनयनं ज्वालाम्लानमुखत्विषम् ॥ २१ ॥ प्रदीप्तचूडामणिना शशिखंडेन शोभितम् ॥ तक्षकं वामकर्णेन
दक्षिणेन च वासुकिम् ॥ २२ ॥ बिभ्राणं कुंडलयुगं नीलरत्नमहाहनुम् ॥ नीलग्रीवं महाबाहुं नागहारविराजितम् ॥ २३ ॥ फणिराजपरिभ्राजत्कंक
णांगदमुद्रिकम् ॥ अनंतगुणसाहस्रमणिरंजितमेखलम् ॥ २४ ॥ व्याघ्रचर्मपरीधानं घंटादर्पणभूषितम् ॥ कर्कोटकमहापद्मधृतराष्ट्रधनंजयैः ॥२५॥
कूजन्नूपुरसंघुष्टपादपद्मविराजितम् ॥ प्रासतोमरखट्वांगशूलटंकधनुर्धरम् ॥ २६ ॥ अप्रधृष्यमनिर्देश्यमचिंत्याकारमीश्वरम् ॥ रत्नसिंहासनारूढं प्रण
नाम महामुनिः ॥ २७ ॥ तं भक्तिभारोच्छ्वसितांतरात्मा संस्तूय वाग्भिः श्रुतिसंमिताभिः ॥ कृतांजलिः प्रश्रयनम्रकंधरः पप्रच्छ धर्मानखिलाञ्छु
भप्रदान् ॥ २८ ॥ यान्यानपृच्छत मुनिस्तांस्तान्धर्मानशेषतः ॥ प्रोवाच भगवान्रुद्रो भूयो मुनिरपृच्छत ॥ २९ ॥ ॥ सनत्कुमार उवाच ॥ ॥
श्रुतास्ते भगवन्धर्मास्त्वन्मुखान्मुक्तिहेतवः ॥ यैर्मुक्तपापा मनुजास्तरिष्यंति भवार्णवम् ॥ ३० ॥ अथापरं विभो धर्ममल्पायासं महाफलम् ॥
ब्रूहि कारुण्यतो मह्यं सद्यो मुक्तिप्रदं नृणाम् ॥ ३१ ॥ अभ्यासबहुला धर्माः शास्त्रदृष्टाः सहस्रशः ॥ सम्यक्संसेविताः कालात्सिद्धिं यच्छंति वा
न वा ॥ ३२ ॥ अतो लोकहितं गुह्यं भुक्तिमुक्त्योश्च साधनम् ॥ धर्मं विज्ञातुमिच्छामि त्वत्प्रसादान्महेश्वर ॥ ३३ ॥ ॥ श्रीरुद्र उवाच ॥ ॥
सर्वेषामपि धर्माणामुत्तमं श्रुतिचोदितम् ॥ रहस्यं सर्वजंतूनां यत्त्रिपुंड्रस्य धारणम् ॥ ३४ ॥ ॥ सनत्कुमार उवाच॥ ॥ त्रिपुंड्रस्य विधिं ब्रूहि
भगवञ्जगतां पते ॥ तत्त्वतो ज्ञातुमिच्छामि त्वत्प्रसादान्महेश्वर ॥ ३५ ॥ कति स्थानानि किं द्रव्यं का शक्तिः का च देवता ॥ किं प्रमाणं च कः

१ मंडूकसन्निभाः--इ० पा० । २ सिंहगृध्रवृकाननाः--इ० पा० । ३ बहुवक्त्राश्च--इ० पा० । ४ त्वत्तोऽहं परमेश्वरः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्ता के मंत्रास्तस्य किं फलम् ॥ ३६ ॥ एतत्सर्वमशेषेण त्रिपुंड्रस्य च लक्षणम्[१] ॥ ब्रूहि मे जगतां नाथ लोकानुग्रहकाम्यया ॥ ३७ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ आग्नेयमुच्यते भस्म दग्धगोमयसंभवम् ॥ तदेव द्रव्यमित्युक्तं त्रिपुंड्रस्य महामुने ॥ ३८ ॥ सद्योजातादिभिर्ब्रह्ममयैर्मंत्रैश्च पंचभिः॥ परिगृह्याग्निरित्यादिमंत्रैर्भस्माभिमंत्रयेत् ॥ ३९ ॥ मानस्तोकेति संमृज्य[२] शिरो लिंपेच्च त्र्यंबकम् ॥ त्रियायुषादिभिर्मंत्रैर्ललाटे च भुजद्वये ॥ स्कंधे च लेपयेद्भस्म सजलं मंत्रभावितम् ॥ ४० ॥ तिस्रो रेखा भवंत्येषु स्थानेषु मुनिपुंगव ॥ भ्रुवोर्मध्यं[३] समारभ्य यावदंतो भ्रुवोर्भवेत् ॥ ४१ ॥ मध्यमानामिकांगुल्योर्मध्ये तु प्रतिलोमतः ॥ अंगुष्ठेन कृता रेखा त्रिपुंड्रस्याभिधीयते ॥ ४२ ॥ तिसृणामपि रेखाणां प्रत्येकं नव देवताः ॥ अकारो गार्हपत्यश्च ऋग्भूर्लोको रजस्तथा ॥ ४३ ॥ आत्मा चैव क्रियाशक्तिः प्रातः सवनमेव च ॥ महादेवस्तु रेखायाः प्रथमायास्तु देवता ॥ ४४ ॥ उकारो दक्षिणाग्निश्च नभः सत्त्वं यजुस्तथा ॥ मध्यंदिनं च सवनमिच्छाशक्त्यंतरात्मकौ ॥ ४५ ॥ महेश्वरश्च रेखाया द्वितीयायाश्च देवता ॥ मकाराहवनीयौ च परमात्मा तमो दिवः ॥ ४६ ॥ ज्ञानशक्तिः सामवेदस्तृतीयसवनं तथा ॥ शिवश्चेति तृतीयाया रेखायाश्चाधिदेवता ॥ ४७ ॥ एतानित्यं नमस्कृत्य त्रिपुंड्रं धारयेत्सुधीः[४] ॥ महेश्वरव्रतमिदं सर्ववेदेषु कीर्तितम् ॥४८॥ मुक्तिकामैर्नरैः सेव्यं पुनस्तेषां न संभवः ॥ त्रिपुंड्रं कुरुते यस्तु भस्मना विधिपूर्वकम् ॥४९॥ ब्रह्मचारी गृहस्थो वा वनस्थो यतिरेव वा॥महापातकसंघातैर्मुच्यते चोपपातकैः॥५०॥ तथान्यैः क्षत्रविट्शूद्रस्त्रीगोहत्यादिपातकैः॥वीरहत्याश्वहत्याभ्यां मुच्यते नात्र संशयः॥५१॥अमंत्रेणापि यः कुर्यादज्ञात्वा महिमोन्नतिम्॥त्रिपुंड्रं भालपटले मुच्यते सर्वपातकैः ॥५२॥ परद्रव्यापहरणं परदाराभिमर्शनम्॥ परनिंदा परक्षेत्रहरणं परपीडनम्॥५३॥सस्यारामादिहरणं गृहदाहादिकर्म च॥ असत्यवादपैशुन्यं पारुष्यं वेदविक्रयः॥कूटसाक्ष्यं व्रतत्यागः कैतवं नीचसेवनम् ॥५४॥ गोभूहिरण्यमहिषीतिलकंबलवाससाम्॥अन्नधान्यजलादीनां नीचेभ्यश्च परिग्रहः॥५५॥ दासीवेश्याभुजंगेषु वृषलीषु नटीषु च ॥ रजस्वलासु कन्यासु विधवासु च संगमः ॥ ५६ ॥ मांसचर्मरसादीनां लवणस्य च विक्रयः ॥ एवमादीन्यसंख्यानि पापानि विविधानि च ॥ ५७ ॥ सद्य एव विनश्यंति त्रिपुंड्रस्य च धारणात् ॥ शिवद्रव्यापहणं शिवनिंदा च कुत्रचित् ॥ ५८ ॥ निंदा च शिवभक्तानां प्रायश्चित्तैर्न शुद्ध्यति ॥ रुद्राक्षा यस्य गात्रेषु ललाटे च त्रिपुंड्रकम् ॥५९॥ स चांडालोऽपि संपूज्यः सर्ववर्णोत्तमो भवेत् ॥

१ धारणम्–इ० पा० । २ संमंत्र्य–इ० पा० । ३ भ्रुकुटी शीर्ष–केशान्तराले पूर्वं ललाटवामभागमारभ्य यावद्दक्षिणभागमनामिकामध्यमांगुलिभ्यो रेखाद्वयं विनिर्माय तन्मध्ये दक्षिणभागतोंगुष्ठेन मध्यगा प्रतिलोमेन कर्तव्या–अयं त्रिपुंड्रविधेः संप्रदायोऽनेन त्रिपुंड्रलक्षणेनोच्यते इति बोध्यम्. एवमेव त्रिपुंड्रः कर्तव्यः । ४ च्छुचिः–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानि तीर्थानि लोकेऽस्मिन्गंगाद्याः सरितश्च याः ॥ ६० ॥ स्नातो भवति सर्वत्र ललाटे यस्त्रिपुंड्रधृक् ॥ सप्तकोटिमहामंत्राः पंचाक्षरपुरःसराः ॥
॥ ६१ ॥ तथान्ये कोटिशो मंत्राः शैवाः कैवल्यहेतवः ॥ ते सर्वे येन जप्ताः स्युर्यो बिभर्ति त्रिपुंड्रकम् ॥ ६२ ॥ सहस्रं पूर्वजातानां सहस्रं च
जनिष्यताम् ॥ स्ववंशजानां मर्त्यानामुद्धरेद्यस्त्रिपुंड्रधृक् ॥ ६३ ॥ इह भुक्त्वाखिलान्भोगान्दीर्घायुर्व्याधिवर्जितः ॥ जीवितांते च मरणं सुखेनैव
प्रपद्यते ॥ ६४ ॥ अष्टैश्वर्यगुणोपेतं प्राप्य दिव्यं वपुः शुभम् ॥ दिव्यं विमानमारुह्य दिव्यस्त्रीशतसेवितः ॥ ६५ ॥ विद्याधराणां सिद्धानां
गंधर्वाणां महौजसाम् ॥ इंद्रादिलोकपालानां लोकेषु च यथाक्रमम् ॥ ६६ ॥ भुक्त्वा भोगान्सुविपुलान्प्रजेशानां पुरेषु च ॥ ब्रह्मणः पदमासाद्य
तत्र कल्पशतं रमेत् ॥ ६७ ॥ विष्णोर्लोके च रमते यावद्ब्रह्मशतत्रयम्[1] ॥ ६८ ॥ शिवलोकं ततः प्राप्य रमते कालमक्षयम् ॥ शिवसायुज्यमाप्नोति
न स भूयोऽभिजायते ॥ ६९ ॥ सर्वोपनिषदां सारं समालोच्य मुहुर्मुहुः ॥ इदमेव हि निर्णीतं परं श्रेयस्त्रिपुंड्रकम् ॥ ७० ॥ एतत्त्रिपुंड्रमाहात्म्यं
समासात्कथितं मया ॥ रहस्यं सर्वभूतानां गोपनीयमिदं त्वया ॥ ७१ ॥ इत्युक्त्वा भगवान्रुद्रस्तत्रैवांतरधीयत ॥ सनत्कुमारोऽपि मुनिर्जगाम
ब्रह्मणः पदम् ॥ ७२ ॥ तवापि भस्मसंपर्कात्संजाता विमला मतिः ॥ त्वमपि श्रद्धया पुण्यं धारयस्व त्रिपुंड्रकम् ॥ ७३ ॥ ॥ सूत
उवाच ॥ ॥ इत्युक्त्वा वामदेवस्तु शिवयोगी महातपाः ॥ अभिमंत्र्य ददौ भस्म घोराय ब्रह्मरक्षसे ॥ ७४ ॥ तेनासौ भालपटले चक्रे तिर्य
क्त्रिपुंड्रकम् ॥ ब्रह्मराक्षसतां सद्यो जहौ तस्यानुभावतः ॥ ७५ ॥ स बभौ सूर्यसंकाशस्तेजोमण्डलमंडितः ॥ दिव्यावयवरूपैश्च दिव्यमाल्यांबरो
ज्वलः ॥ ७६ ॥ भक्त्या प्रदक्षिणीकृत्य तं गुरुं शिवयोगिनम् ॥ दिव्यं विमानमारुह्य पुण्यलोकाञ्जगाम सः ॥ ७७ ॥ वामदेवो महा
योगी दत्त्वा तस्मै परां गतिम् ॥ चचार लोके गूढात्मा साक्षादिव शिवः स्वयम् ॥ ७८ ॥ य एतद्भस्ममाहात्म्यं त्रिपुंड्रं शृणुयान्नरः ॥ श्रावयेद्वा
पठेद्वापि स हि याति परां गतिम् ॥ ७९ ॥ कथयति शिवकीर्तिं संसृतेर्मुक्तिहेतुं प्रणमति शिवयोगिध्येयमीशांघ्रिपद्मम् ॥ रचयति शिवभक्तो
द्धासि भाले त्रिपुंड्रं न पुनरिह जनन्या गर्भवासं भजेत्सः ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तर
खण्डे भस्ममाहात्म्यकथनं नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ वेदवेदांगतत्त्वज्ञैर्गुरुभिर्ब्रह्मवादिभिः ॥ नृणां
कृतोपदेशानां सद्यः सिद्धिर्हि जायते ॥ १ ॥ अथान्यजनसामान्यैर्गुरुभिर्नीतिकोविदैः ॥ नृणां कृतोपदेशानां सिद्धिर्भवति कीदृशी ॥ २ ॥

१ ब्रह्मशतायुषम्--इ० पा० । २ ब्रह्मलोकं जगाम सः--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ सूत उवाच ॥ ॥ श्रद्धैव सर्वधर्मस्य चातीव हितकारिणी ॥ श्रद्धयैव नृणां सिद्धिर्जायते लोकयोर्द्वयोः ॥ ३ ॥ श्रद्धया भजतः पुंसः शिलापि फलदायिनी ॥ मूर्खोऽपि पूजितो भक्त्या गुरुर्भवति सिद्धिदः ॥ ४ ॥ श्रद्धया पठितो मन्त्रस्त्वबद्धोऽपि फलप्रदः ॥ श्रद्धया पूजितो देवो नीचस्यापि फलप्रदः ॥ ५ ॥ अश्रद्धया कृता पूजा दानं यज्ञस्तपो व्रतम् ॥ सर्वं निष्फलतां याति पुष्पं वन्ध्यतरोरिव ॥ ६ ॥ सर्वत्र संशयाविष्टः श्रद्धाहीनोऽतिचंचलः ॥ परमार्थात्परिभ्रष्टः संसृतेर्न हि मुच्यते ॥ ७ ॥ मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥ ८ ॥ अतो भावमयं विश्वं पुण्यं पापं च भावतः ॥ ते उभे भावहीनस्य न भवेतां कदाचन ॥ ९ ॥ अत्रेदं परमाश्चर्यमाख्यानमनुवर्ण्यते ॥ अश्रद्धा सर्वमर्त्यानां येन सद्यो निवर्तते ॥ १० ॥ आसीत्पांचालराजस्य सिंहकेतुरिति श्रुतः ॥ पुत्रः सर्वगुणोपेतः क्षात्रधर्मरतः सदा ॥ ११ ॥ स एकदा कतिपयै[3]र्भृत्यैर्युक्तो महाबलः ॥ जगाम मृगयाहेतोर्बहुसत्त्वान्वितं वनम् ॥ १२ ॥ तद्भृत्यः शंबरः कश्चिद्विचरन्मृगयां वने ॥ ददर्श जीर्णं स्फुटितं पतितं देवतालयम् ॥ १३ ॥ तत्रापश्यद्भिन्नपीठं पतितं स्थंडिलोपरि ॥ शिवलिङ्गमृजुं सूक्ष्मं मूर्तं भाग्यमिवात्मनः ॥ १४ ॥ स समादाय वेगेन पूर्वकर्मप्रचोदितः ॥ तस्मै संदर्शयामास राजपुत्राय धीमते ॥ १५ ॥ पश्येदं रुचिरं लिंगं मया दृष्टमिह प्रभो ॥ तदेतत्पूजयिष्यामि यथाविभवमादरात् ॥ १६ ॥ अस्य पूजाविधिं ब्रूहि यथा देवो महेश्वरः ॥ अमंत्रज्ञैश्च मन्त्रज्ञैः प्रीतो भवति पूजितः ॥ १७ ॥ इति तेन निषादेन पृष्टः पार्थिवनंदनः ॥ प्रत्युवाच प्रहस्यैनं [6]परिहासविचक्षणः ॥ १८ ॥ संकल्पेन सदा कुर्यादभिषेकं नवांभसा ॥ उपवेश्यासने शुद्धे शुभैर्गंधाक्षतैर्नवैः ॥ वन्यैः पत्रैश्च कुसुमैर्धूपैर्दीपैश्च पूजयेत् ॥ ॥ १९ ॥ चिताभस्मोपहारं च प्रथमं परिकल्पयेत् ॥ आत्मोपभोग्येनान्नेन नैवेद्यं कल्पयेद्बुधः ॥ २० ॥ पुनश्च धूपदीपादीनुपचारान्प्रकल्पयेत् ॥ नृत्यवादित्रगीतादीन्यथावत्परिकल्पयेत् ॥ २१ ॥ नमस्कृत्वा तु विधिवत्प्रसादं धारयेद्बुधः ॥ एष साधारणः प्रोक्तः शिवपूजाविधिस्तव ॥ ॥ २२ ॥ चिताभस्मोपहारेण सद्यस्तुष्यति शंकरः ॥ २३ ॥ ॥ सूत उवाच ॥ ॥ परिहासरसेनेत्थं शासितः स्वामिनाऽमुना ॥ स चंडकाख्यः शबरो मूर्ध्ना जग्राह तद्वचः ॥ २४ ॥ ततः स्वभवनं प्राप्य लिंगमूर्तं महेश्वरम् ॥ प्रत्यहं पूजयामास चिताभस्मोपहारकृत् ॥ २५ ॥ यच्चात्मनः प्रियं वस्तु गन्धपुष्पाक्षतादिकम् ॥ निवेद्य शंभवे नित्यमुपायुंक्त ततः स्वयम् ॥ २६ ॥ एवं महेश्वरं भक्त्या सह पत्न्याभ्यपूजयत् ॥

१ असिद्धेः कारणं परम्–इ० पा० । २ शक्रस्येव धनंजयः–इ० पा० । ३ गजैः–इ० पा० । ४ शंवरः–इ० पा० । ५ यथाविभवविस्तरात्–इ० पा० । ६ परिषत्सुविशारदम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शबरः सुखमासाद्य निनाय कतिचित्समाः ॥ २७ ॥ एकदा शिवपूजार्थं प्रवृत्तः शबरोत्तमः ॥ न ददर्श चिताभस्म पात्रे पूरितमण्वपि ॥ २८ ॥ अथासौ त्वरितो दूरमन्विष्यन्परितो भ्रमन् ॥ न लब्धवांश्चिताभस्म श्रांतो गृहमगात्पुनः ॥ २९ ॥ तत आहूय पत्नीं स्वां शबरो वाक्यमब्रवीत् ॥ न लब्धं मे चिताभस्म किं करोमि वद प्रिये ॥३०॥ शिवपूजांतरायो मे जातोद्य बत पाप्मनः ॥ पूजां विना क्षणमपि नाहं जीवितुमुत्सहे ॥३१॥ उपायं नात्र पश्यामि पूजोपकरणे हते ॥ न गुरोश्च विहन्येत शासनं सकलार्थदम् ॥ ३२ ॥ इति व्याकुलितं दृष्ट्वा भर्त्तारं शबरांगना ॥ प्रत्यभाषत मा भैस्त्वमुपायं प्रवदामि ते ॥ ३३ ॥ इदमेव गृहं दग्ध्वा बहुकालोपबृंहितम् ॥ अहमग्निं प्रवेक्ष्यामि चिताभस्म भवेत्ततः ॥ ३४ ॥ ॥ शबर उवाच ॥ ॥ धर्मार्थकाममोक्षाणां देहः परमसाधनम् ॥ कथं त्यजसि तं देहं सुखार्थं नवयौवनम् ॥ ३५ ॥ अधुना त्वनपत्या त्वमभुक्तविषयासवा ॥ भोगयोग्यमिमं देहं कथं दग्धुमिहेच्छसि ॥ ३६ ॥ ॥ शबर्युवाच ॥ ॥ एतावदेव साफल्यं जीवितस्य च जन्मनः ॥ परार्थे यस्त्यजेत्प्राणाञ्छिवार्थे किमुत स्वयम् ॥ ३७ ॥ किं नु तप्तं तपो घोरं किं वा दत्तं मया पुरा ॥ किं वार्चनं कृतं शंभोः पूर्वजन्मशतांतरे ॥ ३८ ॥ किं वा पुण्यं मम पितुः का वा मातुः कृतार्थता ॥ यच्छिवार्थे समिद्धेऽग्नौ त्यजाम्येतत्कलेवरम् ॥ ३९ ॥ इत्थं स्थिरां मतिं दृष्ट्वा तस्या भक्तिं च शंकरे ॥ तथेति दृढसंकल्पः शबरः प्रत्यपूजयत् ॥ ४० ॥ सा भर्त्तारमनुप्राप्य स्नात्वा शुचिरलंकृता ॥ गृहमादीप्य तं वह्निं भक्त्या चक्रे प्रदक्षिणम् ॥ ४१ ॥ नमस्कृत्वात्मगुरवे ध्यात्वा हृदि सदाशिवम् ॥ अग्निप्रवेशाभिमुखी कृतांजलिरिदं जगौ ॥ ४२ ॥ ॥ शबर्युवाच ॥ ॥ पुष्पाणि संतु तव देव ममेंद्रियाणि धूपोऽगुरुर्वपुरिदं हृदयं प्रदीपः ॥ प्राणा हवींषि करणानि तवाक्षताश्च पूजाफलं व्रजतु सांप्रतमेष जीवः ॥ ४३ ॥ वांछामि नाहमपि सर्वधनाधिपत्यं न स्वर्गभूमिमचलां न पदं विधातुः ॥ भूयो भवामि यदि जन्मनिजन्मनि स्यां त्वत्पादपंकजलसन्मकरंदभृंगी ॥ ४४ ॥ जन्मानि संतु मम देव शताधिकानि माया न मे विशतु चित्तमबोधहेतुः ॥ किंचित्क्षणार्धमपि ते चरणारविन्दान्नापैतु मे हृदयमीश नमोनमस्ते ॥४५॥ इति प्रसाद्य देवेशं शबरी दृढनिश्चया ॥ विवेश ज्वलितं वह्निं भस्मसादभवत्क्षणात् ॥ ४६ ॥ शबरोपि च तद्भस्म यत्नेन परिगृह्य सः ॥ चक्रे दग्धगृहोपान्ते शिवपूजां समाहितः ॥ ४६ ॥ अथ सस्मार पूजांते प्रसादग्रहणोचिताम् ॥ दयितां नित्यमायांतीं प्रांजलिं विनयान्विताम् ॥ ४८ ॥ स्मृतमात्रां तदापश्यदागतां पृष्ठतः स्थिताम् ॥

१ भस्मलेपनम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वेणावयवेनैव भक्तिनम्रां शुचिस्मितां[1]ताम् ॥ ४९ ॥ तां वीक्ष्य शबरः पत्नीं पूर्ववत्प्राजलिं स्थिताम् ॥ भस्मावशेषितगृहं यथापूर्वमवस्थितम् ॥
॥ ५० ॥ अग्निर्दहति तेजोभिः सूर्यो दहति रश्मिभिः ॥ राजा दहति दंडेन ब्राह्मणो मनसा दहेत् ॥ ५१ ॥ किमयं स्वप्न आहोस्वित्किं वा माया
भ्रमात्मिका ॥ इति विस्मयसंभ्रांतस्तां भूयः पर्यपृच्छत ॥ ५२ ॥ अपि[2] त्वं च कथं प्राप्ता भस्मभूतासि पावके ॥ दग्धं च भवनं भूयः कथं पूर्व
वदास्थितम् ॥ ५३ ॥ ॥ शबर्युवाच ॥ ॥ यदा गृहं समुद्दीप्य प्रविष्टाहं हुताशने ॥ तदात्मानं न जानामि न पश्यामि हुताशनम् ॥ ५४ ॥
न तापलेशोप्यासीन्मे प्रविष्टाया इवोदकम् ॥ सुषुप्तेव क्षणार्धेन प्रबुद्धास्मि पुनः क्षणात् ॥ ५५ ॥ तावद्भवनमद्राक्षमदग्धमिव सुस्थितम् ॥ अधुना
देवपूजांते प्रसादं लब्धुमागता ॥ ५६ ॥ एवं परस्परं प्रेम्णा दंपत्योर्भाषमाणयोः ॥ प्रादुरासीत्तयोरग्रे विमानं दिव्यमद्भुतम् ॥ ५७ ॥ तस्मिन्वि
माने शतचन्द्रभास्वरे चत्वार ईशानुचराः पुरःसराः ॥ हस्ते गृहीत्वाथ निषाददंपती आरोपयामासुरमुक्तविग्रहौ ॥ ५८ ॥ तयोर्निषाददंपत्यो
स्तत्क्षणादेव तद्वपुः ॥ शिवदूतकरस्पर्शात्तत्सारूप्यमवाप ह ॥ ५९ ॥ तस्माच्छ्रद्धैव सर्वेषु विधेया पुण्यकर्मसु ॥ नीचोपि शबरः प्राप श्रद्धया
योगिनां गतिम् ॥ ६० ॥ किं जन्मना सकलवर्णजनोत्तमेन किं विद्यया सकलशास्त्रविचारवत्या ॥ यस्यास्ति चेतसि सदा परमेशभक्तिः कोऽन्य
स्ततस्त्रिभुवने पुरुषोस्ति धन्यः ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे भस्ममाहात्म्यवर्णनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥ ॥ सूत उवाच ॥ ॥ अथाहं संप्रवक्ष्यामि सर्वधर्मोत्तमोत्तमम् ॥ उमामहेश्वरं नाम व्रतं सर्वार्थसिद्धिदम् ॥ १ ॥ आनर्त्त
संभवः कश्चिन्नाम्ना वेदरथो[3] द्विजः ॥ कलत्रपुत्रसंपन्नो विद्वानुत्तमवंशजः ॥ २ ॥ तस्यैवं वर्तमानस्य ब्राह्मणस्य गृहाश्रमे ॥ बभूव शारदानाम कन्या
कमललोचना ॥३॥ तां रूपलक्षणोपेतां बालां द्वादशहायनाम् ॥ ययाचे पद्मनाभाख्यो मृतदारश्च[4] स द्विजः ॥ ४ ॥ महाधनस्य शांतस्य सदा राज
सखस्य च ॥ याञ्चाभंगभयात्तस्य तां कन्यां प्रददौ[5] पिता ॥ ५ ॥ मध्यंदिने कृतोद्वाहः स विप्रः श्वशुरालये ॥ संध्यामुपासितुं सायं सरस्तटमुपा
ययौ ॥६॥ उपास्य संध्यां विधिवत्प्रत्यागच्छत्तमोवृते ॥ मार्गे दष्टो भुजंगेन ममार निजकर्मणा ॥७॥ तस्मिन्मृते कृतोद्वाहे सहसा तस्य बांधवाः ॥
चुक्रुशुः शोकसंतप्तौ श्वशुरावस्य कन्यका ॥ ८ ॥ निर्हृत्य तं बंधुजना जग्मुः स्वं स्वं निवेशनम् ॥ शारदा प्राप्तवैधव्या पितुरेवालये स्थिता ॥९॥
भूताच्छादनभोज्येन भर्त्रा विरहिता सती ॥ निनाय कतिचिन्मासान्सा बाला पितृमंदिरे ॥ १० ॥ एकदा नैध्रुवो नाम कश्चिद्वृद्धतरो मुनिः ॥

१ सुविस्मिताम्–इ० पा० । २ अपि प्रिये–इ० पा० । ३ देवरथः–इ०पा० । ४ मृतभार्यो जरद्विजः–इ० पा० । ५ शूद्रस्य सदाचाररतस्य च–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्धः शिष्यकरग्राही तन्मंदिरमुपाययौ ॥ ११ ॥ तस्मिन्वृद्धे गृहं प्राप्ते क्वापि यातेषु बंधुषु ॥ साक्षादिवात्मनो दैवं सा बाला समुपागमत् ॥
॥ १२ ॥ स्वागतं ते महाभाग पीठेऽस्मिन्नुपविश्यताम् ॥ नमस्ते मुनिनाथाय प्रियं ते करवाणि किम् ॥ १३ ॥ इत्युक्त्वा भक्तिमास्थाय कृत्वा
पादावनेजनम् ॥ वीजयित्वा परिश्रांतं तं मुनिं पर्यतोषयत् ॥ १४ ॥ श्रांतं पीठे समावेश्य कृत्वाभ्यंगं स्वपाणिना ॥ कृतस्नानं च विधिवत्कृतदेवा
र्चनं मुनिम् ॥ १५ ॥ सुखासनोपविष्टं तं धूपमाल्यानुलेपनैः ॥ अर्चयित्वा वरान्नेन भोजयामास सादरम् ॥ १६ ॥ भुक्त्वा च सम्यक्छनकैस्तृप्त
श्चानंदनिर्भरः ॥ चकारांधमुनिस्तस्यै सुप्रीतः परमाशिषम् ॥ १७ ॥ विहृत्य भर्त्रा सहसा च तेन लब्ध्वा सुतं सर्वगुणैर्वरिष्ठम् ॥ कीर्तिं च
लोके महतीमवाप्य प्रसादयोग्या भव देवतानाम् ॥ १८ ॥ इत्यभिव्याहृतं तेन मुनिना गतचक्षुषा ॥ निशम्य विस्मिता बाला प्रत्युवाच
कृतांजलिः ॥ १९ ॥ ब्रह्मंस्त्वद्वचनं सत्यं कदाचिन्न मृषा भवेत् ॥ तदेतन्मंदभाग्यायाः कथमेतत्फलिष्यति ॥ २० ॥ शिलाग्र्यामिव
सद्वृष्टिः शुनक्यामिव सत्क्रिया ॥ विफला मंदभाग्यायामाशीर्ब्रह्मविदामपि ॥ २१ ॥ सैषाहं विधवा ब्रह्मन्दुष्कर्मफलभागिनी ॥ त्वदा
शीर्वचनस्यास्य कथं यास्यामि पात्रताम् ॥ २२ ॥ ॥ मुनिरुवाच ॥ ॥ त्वामनालक्ष्य यत्प्रोक्तमंधेनापि मयाऽधुना ॥ तदेतत्साधयिष्यामि
कुरु मच्छासनं शुभे ॥ २३ ॥ उमामहेश्वरं नाम व्रतं यदि चरिष्यसि ॥ तेन व्रतानुभावेन सद्यः श्रेयोऽनुभोक्ष्यसे ॥ २४ ॥ ॥ शारदोवाच ॥ ॥
त्वयोपदिष्टं यत्नेन चरिष्याम्यपि दुश्चरम् ॥ तद्व्रतं ब्रूहि मे ब्रह्मन्विधानं वद विस्तरात् ॥ २५ ॥ ॥ मुनिरुवाच ॥ ॥ चैत्रे वा मार्गशीर्षे वा
शुक्लपक्षे शुभे दिने ॥ व्रतारंभं प्रकुर्वीत यथावद्गुर्वनुज्ञया ॥ २६ ॥ अष्टम्यां च चतुर्दश्यामुभयोरपि पर्वणोः ॥ संकल्पं विधिवत्कृत्वा प्रातःस्नानं
समाचरेत् ॥ २७ ॥ सन्तर्प्य पितृदेवादीन्गत्वा स्वभवनं प्रति ॥ मंडपं रचयेद्दिव्यं वितानाद्यैरलंकृतम् ॥ २८ ॥ फलपल्लवपुष्पाद्यैस्तोरणैश्च सम
न्वितम् ॥ पंचवर्णैश्च तन्मध्ये रजोभिः पद्ममुद्धरेत् ॥ २९ ॥ चतुर्दशदलैर्बाह्ये द्वाविंशद्भिस्तदंतरे ॥ तदंतरे षोडशभिरष्टभिश्च तदंतरे ॥ ३० ॥
एवं पद्मं समुद्धृत्य पंचवर्णैर्मनोरमम् ॥ चतुरस्रं ततः कुर्यादंतर्वर्तुलमुत्तमम् ॥ ३१ ॥ व्रीहितंडुलराशिं च तन्मध्ये च सकूर्चकम् ॥ कूर्चोपरि सुसंस्था
प्य कलशं वारिपूरितम् ॥ ३२ ॥ कलशोपरि विन्यस्य वस्त्रं वर्णसमन्वितम् ॥ तस्योपरिष्टात्सौवर्ण्यौ प्रतिमे शिवयोः शुभे ॥ निधाय पूजयेद्भक्त्या
यथाविभवविस्तरम् ॥ ३३ ॥ पंचामृतैस्तु संस्नाप्य तथा शुद्धोदकेन च ॥ रुद्रैकादशकं जप्त्वा पंचाक्षरशताष्टकम् ॥ ३४ ॥ अभिमंत्र्य पुनः स्थाप्य

१ उपेतम्–इ०पा० । २ योग्यास्मि सांप्रतम्–इ० पा० । ३ धान्यपूरितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पीठं[1]मध्ये तथार्चयेत् ॥ स्वयं शुद्धासनासीनो धौतशुक्लांबरः सुधीः[2] ॥ ३५ ॥ पीठमामंत्र्य मंत्रेण प्राणायामान्समाचरेत् ॥ संकल्पं प्रवदेत्तत्र शिवाग्रे विहितांजलिः ॥ ३६ ॥ यानि पापानि घोराणि जन्मांतरशतेषु मे ॥ तेषां सर्वविनाशाय शिव[3]पूजां समारभे ॥ ३७ ॥ सौभाग्यविजयारोग्यधर्मैश्वर्याभिवृद्धये ॥ स्वर्गापवर्गसिद्ध्यर्थं करिष्ये शिवपूजनम् ॥ ३८ ॥ इति संकल्पमुच्चार्य यथावत्सुसमाहितः ॥ अंगन्यासं ततः कृत्वा ध्यायेदीशं च पार्वतीम् ॥ ३९ ॥ कुंदेंदुधवलाकारं नागाभरणभूषितम् ॥ वरदाभयहस्तं च बिभ्राणं परशुं मृगम् ॥ ४० ॥ सूर्यकोटिप्रतीकाशं जगदानंदकारणम् ॥ जाह्नवीजलसंपर्कादीर्घपिंगजटाधरम् ॥ ४१ ॥ उरगेंद्रफणोद्भूतमहामुकुटमंडितम् ॥ शीतांशुखंडविलसत्कोटीरांगदभूषणम् ॥ ४२ ॥ उन्मीलद्भालनयनं तथा सूर्येंदुलोचनम् ॥ नीलकंठं चतुर्बाहुं गजेंद्राजिनवाससम् ॥ ४३ ॥ रत्नसिंहासनारूढं नागाभरणभूषितम् ॥ देवीं च दिव्यवसनां बालसूर्यायुतद्युतिम् ॥ ४४ ॥ बालवेषां च तन्वंगीं बालशीतांशुशेखराम् ॥ पाशांकुशवराभीतिं बिभ्रतीं च चतुर्भुजाम् ॥ ४५ ॥ प्रसादसुमुखीं मंवां लीलारसविहारिणीम् ॥ लसत्कुरबकाशोकपुन्नागनवचंपकैः ॥ ४६ ॥ कृतावतंसामुत्फुल्लमल्लिकोत्कलितालकाम् ॥ कांचीकलापपर्यस्तजघनाभोगशालिनीम् ॥ ४७ ॥ उदारकिंकिणीश्रेणीनूपुराढ्यपदद्वयाम् ॥ गंडमंडलसंसक्तरत्नकुंडलशोभिताम् ॥ ४८ ॥ बिंबाधरानुरक्तांशुलसद्दशनकुड्मलाम् ॥ महार्हरत्नग्रैवेयतारहारविराजिताम् ॥४९॥ नवमाणिक्यरुचिरकंकणांगदमुद्रिकाम् ॥ रक्तांशुकपरीधानां रत्नमाल्यानुलेपनाम् ॥ ५० ॥ उद्यत्पीनकुचद्वंद्वनिंदितांभोजकुड्मलाम् ॥ लीलालोलासितापांगीं भक्तानुग्रहदायिनीम् ॥ ५१ ॥ एवं ध्यात्वा तु हृत्पद्मे जगतः पितरौ शिवौ ॥ जप्त्वा तदात्मकं मंत्रं तदंते बहिरर्चयेत् ॥ ५२ ॥ आवाह्य प्रतिमायुग्मे कल्पयेदासनादिकम् ॥ अर्घ्यं च दद्याच्छिवयोर्मंत्रेणानेन मंत्रवित् ॥ ५३ ॥ नमस्ते पार्वतीनाथ[5] त्रैलोक्यवरदर्षभ ॥ त्र्यंबकेश महादेव गृहाणार्घ्यं नमोऽस्तु ते ॥ ५४ ॥ नमस्ते देवदेवेशि प्रपन्नभयहारिणि ॥ अंबिके वरदे देवि[6] गृहाणार्घ्यं शिवप्रिये ॥ ५५ ॥ इति त्रिवारमुच्चार्य दद्यादर्घ्यं समाहितः ॥ गन्धपुष्पाक्षतान्सम्यग्धूपदीपान्प्रकल्पयेत् ॥ ५६ ॥ नैवेद्यं पायसान्नेन घृताक्तं परिकल्पयेत् ॥ जुहुयान्मूलमंत्रेण हविरष्टोत्तरं शतम् ॥ ५७ ॥ तत उद्वास्य[7] नैवेद्यं धूपनीराजनादिकम् ॥ कृत्वा निवेद्य तांबूलं नमस्कुर्यात्समाहितः ॥ ५८ ॥ अथाभ्यर्च्योपचारेण भोजयेद्विप्रदंपती ॥ ५९ ॥ एवं सायंतनीं पूजां कृत्वा विप्रानुमोदितः ॥ भुंजीत वाग्यतो रात्रौ हविष्यं क्षीरभावितम् ॥ ६० ॥ एवं संवत्सरं कुर्याद्व्रतं पक्षद्वये बुधः ॥ ततः संवत्सरे पूर्णे व्रतोद्या

१ पीठे हेममये-र्चयेत्–इ० पा० । २ शुचिः–इ० पा० । ३ करिष्ये शिवपूजनम्–इ० पा० । ४ रत्नांकुश–इ० पा० । ५ पार्वतीकांत–इ० पा० । ६ गौरि–इ० पा० । ७ उत्साद्य–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नमाचरेत् ॥ ६१ ॥ शतरुद्राभिजप्तेन स्नापयेत्प्रतिमे जलैः ॥ आगमोक्तेन मन्त्रेण संपूज्य गिरिजाशिवौ ॥ ६२ ॥ सवस्त्रं ससुवर्णं च कलशं प्रति मान्वितम् ॥ दत्त्वाचार्याय महते सदाचाररताय च ॥ ब्राह्मणान्भोजयेद्भक्त्या यथाशक्त्याभिपूज्य च ॥ ६३ ॥ दद्याच्च दक्षिणां तेभ्यो गोहिरण्यांब रादिकम् ॥ भुंजीत तदनुज्ञातः सहेष्टजनबंधुभिः ॥ ६४ ॥ एवं यः कुरुते भक्त्या व्रतं त्रैलोक्यविश्रुतम् ॥ त्रिःसप्तकुलमुद्धृत्य भुक्त्वा भोगान्यथेप्सि तान् ॥ ६५ ॥ इन्द्रादिलोकपालानां स्थानेषु रमते ध्रुवम् ॥ ब्रह्मलोके च रमते विष्णुलोके च शाश्वते ॥ ६६ ॥ शिवलोकमथ प्राप्य तत्र कल्पशतं पुनः ॥ भुक्त्वा भोगान्सुविपुलाञ्छिवमेव प्रपद्यते ॥ ६७ ॥ महाव्रतमिदं प्रोक्तं त्वमपि श्रद्धया चर ॥ अत्यंतदुर्लभं वापि लप्स्यसे च मनोरथम् ॥ ॥ ६८ ॥ इत्यादिष्टा मुनींद्रेण सा बाला मुदिता भृशम् ॥ प्रत्यग्रहीत्सुविश्रब्धा तद्वाक्यं सुमनोहरम् ॥ ६९ ॥ अथ तस्याः समायाताः पितृमातृ सहोदराः ॥ तं मुनिं सुखमासीनं ददृशुः कृतभोजनम् ॥ ७० ॥ सहसागत्य ते सर्वे नमश्चक्रुर्महात्मने ॥ प्रसीद नः प्रसीदेति गृणंतः पर्यपूज यन् ॥ ७१ ॥ श्रुत्वा च ते तया साध्व्या पूजितं परमं मुनिम् ॥ अनुग्रहं व्रतं तस्यै श्रुत्वा हर्षं परं ययुः ॥ ७२ ॥ ते कृतांजलयः सर्वे तमूचुर्मुनि पुंगवम् ॥ ७३ ॥ अद्य धन्या वयं सर्वे तवागमनमात्रतः ॥ पावितं नः कुलं सर्वं गृहं च सफलीकृतम् ॥ ७४ ॥ इयं च शारदा नाम कन्या वैधव्यमागता ॥ केनापि कर्मयोगेन दुर्विलंघ्येन भूयसा ॥ ७५ ॥ सैषाद्य तव पादाब्जं प्रपन्ना शरणं सती ॥ इमां समुद्धरासह्यात्सुघोराद्दुःख सागरात् ॥ ७६ ॥ त्वयापि तावदत्रैव स्थातव्यं नो गृहांतिके ॥ अस्मद्गृहमठेऽप्यस्मिन्स्नानपूजाजपोचिते ॥ ७७ ॥ एषा बालापि भगवन्कुर्वंती त्वत्पदार्चनम् ॥ व्रतं त्वत्सन्निधावेव चरिष्यति महामुने ॥ ७८ ॥ यावत्समाप्तिमायाति व्रतमस्यास्त्वदंतिके ॥ उषित्वा तावदत्रैव कृतार्थान्कुरु नो गुरो ॥ ७९ ॥ एवमभ्यर्थितः सर्वैस्तस्या भ्रातृजनादिभिः ॥ तथेति स मुनिश्रेष्ठस्तत्रोवास मठे शुभे ॥ ८० ॥ सापि तेनोपदिष्टेन मार्गेण गिरिजाशिवौ ॥ अर्चयंती व्रतं सम्यक्चचार विमला सती ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे उमामहेश्वरव्रताचरणं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं महाव्रतं तस्याश्चरंत्या गुरुसन्निधौ ॥ संवत्सरो व्यतीयाय नियमासक्तचेतसः ॥ १ ॥ संवत्सरांते सा बाला तत्रैव पितृमंदिरे ॥ चकारोद्यापनं सम्यग्विप्रभोजनपूर्वकम् ॥ २ ॥ दत्त्वा च दक्षिणां तेभ्यो ब्राह्मणेभ्यो यथार्हतः ॥ विसृज्य तान्नमस्कृत्य पितृभ्यामभिनंदिता ॥ ३ ॥ उपोषिता स्वयं तस्मिन्दिने नियममाश्रिता ॥ जजाप परमं

१ प्रदाय–इ० पा० । २ मुदान्वितः–इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रमुपदिष्टं महात्मना ॥ ४ ॥ अथ प्रदोषसमये प्राप्ते संपूज्य शंकरम् ॥ तस्मिन्गृहांतिकमठे गुरोस्तस्य च सन्निधौ ॥ ५ ॥ जपार्चनरता साध्वी ध्यायंती परमेश्वरम् ॥ तस्मिञ्जागरणे रात्रावुपविष्टा शिवांतिके ॥ ६ ॥ युग्मम् ॥ तस्यां रात्रौ तया सार्धं स मुनिर्जगदंबिकाम् ॥ जपध्यान तपोभिश्च तोषयामास पार्वतीम् ॥ ७ ॥ तस्याश्च भक्त्या व्रतभाविताया मुनेस्तपोयोगसमाधिना च ॥ तुष्टा भवानी जगदेकमाता प्रादुर्बभूवा कृतसांद्रमूर्तिः ॥ ८ ॥ प्रादुर्भूता यदा गौरी तयोरग्रे जगन्मयी ॥ अन्धोऽपि तत्क्षणादेव मुनिः प्राप दृशोर्द्वयम् ॥ ९ ॥ तां वीक्ष्य जगतां धात्री माविर्भूतां पुरःस्थिताम् ॥ निपेततुस्तत्पदयोः स मुनिः सा च कन्यका ॥ १० ॥ तौ भक्तिभावोच्छ्वसितामलाशयावानंदबाष्पोक्षित सर्वगात्रौ ॥ उत्थाप्य देवी कृपया परिप्लुता प्रेम्णा बभाषे मृदुवल्गुभाषिणी ॥ ११ ॥ ॥ देव्युवाच ॥ ॥ प्रीतास्मि ते मुनिश्रेष्ठ वत्से प्रीतास्मि तेऽनघे ॥ किं वा ददाम्यभिमतं देवानामपि दुर्लभम् ॥ १२ ॥ ॥ मुनिरुवाच ॥ ॥ एषा तु शारदा नाम कन्या तु गतभर्तृका ॥ मया प्रतिश्रुतं चास्यै तुष्टेन गतचक्षुषा ॥ १३ ॥ सह भर्त्रा चिरं कालं विहृत्य सुतमुत्तमम् ॥ लभस्वेति मया प्रोक्तं सत्यं कुरु नमोऽस्तु ते ॥ १४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ एषा पूर्वभवे बाला द्राविडस्य द्विजन्मनः ॥ आसीद्द्वितीया दयिता भामिनी नाम विश्रुता ॥ १५ ॥ सा भर्तृप्रेयसी नित्यं रूपमाधुर्यपेशला ॥ भर्तारं वशमानिन्ये रूपवश्यादिकैतवैः ॥ १६ ॥ अस्यां चासक्तहृदयः स विप्रो मोहयंत्रितः ॥ कदाचिदपि नैवागाज्ज्येष्ठपत्नीं पतिव्रताम् ॥ १७ ॥ अनभ्यागमनाद्भर्तुः सा नारी पुत्रवर्जिता ॥ सदा शोकेन संतप्ता कालेन निधनं गता ॥ १८ ॥ अस्या गृहसमीपस्थो यः कश्चिद्ब्राह्मणो युवा ॥ इमां वीक्ष्याथ चार्वंगीं कामार्तः करमग्रहीत् ॥ १९ ॥ अनया रोषताम्राक्ष्या स विप्रस्तु निवारितः ॥ इमां स्मरन्दिवानक्तं निधनं प्रत्यपद्यत ॥ २० ॥ एषा संमोह्य भर्तारं ज्येष्ठपत्न्यां पराङ्मुखम् ॥ चकार तेन पापेन भवेस्मिन्विधवाऽभवत् ॥ २१ ॥ याः कुर्वंति स्त्रियो लोके जायापत्योश्च विप्रियम् ॥ तासां कौमारवैधव्यमेकविंशतिजन्मसु ॥ २२ ॥ यदेतया पूर्वभवे मत्पूजा महती कृता ॥ तेन पुण्येन तत्पापं नष्टं सर्वं तदैव हि ॥ २३ ॥ यो विप्रो विरहार्तः सन्मृतः कामविमोहितः ॥ सोऽस्याः पाणिग्रहं कृत्वा भवेस्मिन्निधनं गतः ॥ २४ ॥ प्राग्जन्मपतिरेतस्याः पांड्यराष्ट्रेषु सोऽधुना ॥ जातो विप्रवरः श्रीमान्सदारः सपरिच्छदः ॥ २५ ॥ तेन भर्त्रा प्रतिनिशं सैषा प्रेम्णाभिसंगता ॥ स्वप्ने रतिसुखं यातु श्रेष्ठं जागरणादपि ॥२६॥

१ एनां संस्मृत्य यो विप्रः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ट्युत्तरत्रिशतयोजनदूरसंस्थो देशादितो द्विजवरः स च कर्मगत्या ॥ एनां वधूं प्रतिनिशं मनसोभिरामां स्वप्नेषु पश्यति चिरं रतिमाद
धानः ॥ २७ ॥ सैषा वै स्वप्नसंगत्या पत्युः प्रतिनिशं सती ॥ कालेन लप्स्यते पुत्रं वेदवेदांगपारगम् ॥ २८ ॥ एतस्यां तनयं जातमात्म
नश्चिरसंगमात् ॥ सोऽपि विप्रोऽनिशं स्वप्ने द्रक्ष्यति प्रेमभावितम् ॥ २९ ॥ अनयाराधिता पूर्वे भवे साहं महामुने ॥ अस्यैव वरदानाय
प्रादुर्भूतास्मि सांप्रतम् ॥ ३० ॥ ॥ सूत उवाच ॥ ॥ अथोवाच महादेवी तां बालां प्रति सादरम् ॥ अयि वत्से महाभागे शृणु मे परमं वचः
॥ ३१ ॥ यदा कदापि भर्त्तारं क्वापि देशे पुरातनम् ॥ द्रक्ष्यसि स्वप्नदृष्टं प्राक्ज्ञास्यसे त्वं विचक्षणा ॥ ३२ ॥ त्वां द्रक्ष्यति स विप्रोपि सुनयां
स्वप्नलक्षणाम् ॥ तदा परस्परालापो युवयोः संभविष्यति ॥ ३३ ॥ तदा स्वतनयं भद्रे तस्मै देहि बहुश्रुतम् ॥ फलमस्य व्रतस्याग्र्यं तस्य
हस्ते समर्पय ॥ ३४ ॥ ततः प्रभृति तस्यैव वशे तिष्ठ सुमध्यमे ॥ युवयोर्दैहिकः संगो माभूत्स्वप्नरताहृते ॥ ३५ ॥ कालात्पंचत्वमापन्ने तस्मि
न्ब्राह्मणसत्तमे ॥ अग्निं प्रविश्य तेनैव सह यास्यसि मत्पदम् ॥ ३६ ॥ पुत्रस्ते भविता सुभ्रु सर्वलोकमनोरमः ॥ संपदश्च भविष्यंति प्राप्स्यते
परमं पदम् ॥ ३७ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा त्रिजगन्माता दत्त्वा तस्यै मनोरथम् ॥ तयोः संपश्यतोरेव क्षणेनादर्शनं गता
॥ ३८ ॥ सापि बाला वरं लब्ध्वा पार्वत्याः करुणानिधेः ॥ अवाप परमानंदं पूजयामास तं गुरुम् ॥ ३९ ॥ तस्यां रात्र्यां व्यती
तायां स मुनिर्लब्धलोचनः ॥ तस्याः पित्रोश्च तत्सर्वं रहस्याचष्ट धर्मवित् ॥ ४० ॥ अथ सर्वानुपामंत्र्य शारदां च यशस्विनीम् ॥
विधायानुग्रहं तेषां ययौ स्वैरगतिर्मुनिः ॥ ४१ ॥ एवं दिनेषु गच्छत्सु सा बाला च प्रतिक्षणम् ॥ भर्तुः समागमं लेभे स्वप्ने सुख
विवर्धनम् ॥ ४२ ॥ गौर्या वर[१]प्रदानेन शारदा विशदव्रता ॥ दधार गर्भं स्वप्नेपि भर्तुः संगानुभावतः ॥ ४३ ॥ तां श्रुत्वा भर्तृ
रहितां शारदां गर्भिणीं सतीम् ॥ सर्वे धिगिति प्रोचुस्तां जारिणीति जगुर्जनाः ॥ ४४ ॥ संपरेतस्य तद्भर्तुर्ये जातिकुलबांधवाः ॥ तां वार्तां दुः
सहां श्रुत्वा ययुस्तत्पितृमंदिरम् ॥ ४५ ॥ अथ सर्वे समायाता ग्रामवृद्धाश्च पंडिताः ॥ समाजं चक्रिरे तत्र कुलवृद्धैः समन्वितम् ॥ ४६ ॥
अन्तर्वत्नीं समाहूय शारदां विनताननाम् ॥ अतर्जयन्सुसंक्रुद्धाः केचिदासन्पराङ्मुखाः ॥ ४७ ॥ अयि जारिणि दुर्बुद्धे किमेतत्ते
विचेष्टितम् ॥ अस्मत्कुले सुदुष्कीर्त्ति कृतवत्यसि बालिशे ॥ ४८ ॥ इति संतर्जयंतस्ते ग्रामवृद्धा मनीषिणः ॥ सर्वे संमंत्रयामासुः

१ सहसा—इ०पा० । २ व्रतप्रसादेन—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं कुर्म इति भाषिणः ॥ ४९ ॥ तत्रोचुः के च वृद्धास्तां बालां प्रति विनिर्दयाः ॥ एषा पापमतिर्बाला कुलद्वयविनाशिनी ॥ ५० ॥ कृत्वास्याः केशवपनं छित्त्वा कर्णौ च नासिकाम् ॥ निर्वास्यतां बहिर्ग्रामात्परित्यज्य स्वगोत्रतः ॥ ५१ ॥ इति सर्वे समालोच्य तां तथा कर्तुमुद्यताः ॥ अथांतरिक्षे संभूता शुश्रुवे वागगोचरा ॥ ५२ ॥ अनया न कृतं पापं न चैव कुलदूषणम् ॥ व्रतभंगो न चैतस्यास्सुचरित्रेय मंगना ॥ ५३ ॥ इतः परमियं नारी जारिणीति वदंति ये ॥ तेषां दोषविमूढानां सद्यो जिह्वा विदीर्यते ॥ ५४ ॥ इत्यंतरिक्षे जनितां वाणीं श्रुत्वाऽशरीरिणीम् ॥ सर्वे प्रजहृषुस्तस्या जननीजनकादयः ॥५५॥ ततः ससंभ्रमाः सर्वे ग्रामवृद्धाः सभाजनाः ॥ मुहूर्तं मौनमालंब्य भीतास्तस्थुरधोमुखाः ॥५६॥ तत्र केचिदविश्वस्ता मिथ्यावाणीत्यवादिषुः॥ तेषां जिह्वा द्विधा भिन्ना ववमुस्ते कृमीन्क्षणात् ॥ ५७ ॥ ततः संपूजयामासुस्तां बालां ज्ञातिबांधवाः ॥ बांधवांश्च स्त्रियो वृद्धाः शशंसुः साधुसाध्विति ॥ ५८ ॥ मुमुचुः केचिदानंदबाष्पबिंदून्कुलोत्तमाः ॥ कुलस्त्रियः प्रमुदितास्तामुद्दिश्य समाश्वसन् ॥ ५९ ॥ अथ तत्रापरे प्रोचुर्देवो वदति नानृतम् ॥ कथमेषां दधौ गर्भं शीलान्न चलिता ध्रुवम् ॥ ६० ॥ इति सर्वान्सभ्यजनान्संशयाविष्टचेतसः ॥ विलोक्य वृद्धस्तत्रैको सर्वज्ञो लोकतत्त्ववित् ॥ ६१ ॥ मायामयमिदं विश्वं दृश्यते श्रूयते च यत् ॥ किं भाव्यं किमभाव्यं वा संसारेऽस्मिन्क्षणात्मके ॥ ६२ ॥ अनिरूप्यमभूतार्थं मायया जायते स्फुटम् ॥ ईश्वरस्य वशे माया तस्यं को वेद चेष्टितम् ॥ ६३ ॥ यूपकेतोश्च राजर्षेः शुक्रं निपतितं जले ॥ सशुक्रं तज्जलं पीत्वा वेश्या गर्भं दधौ किल ॥ ६४ ॥ मुनेर्विभांडकस्यापि शुक्रं पीत्वा सहांभसा ॥ हरिणी गर्भिणी भूत्वा ऋष्यशृंगमसूयत ॥ ६५ ॥ सुराष्ट्रस्य तथा राज्ञः करं स्पृष्ट्वा मृगांगना ॥ तत्क्षणाद्गर्भिणी भूत्वा मुनिं प्रासूत तापसम् ॥ ६६ ॥ तथा सत्यवती नारी शफरीगर्भसंभवा ॥ तथैव महिषीगर्भो जातश्च महिषासुरः॥ ६७ ॥ तथा संति पुरा नार्यः कारुण्याद्गर्भसंभवाः॥ तथा हि वसुदेवेन रोहिण्यास्तनयोऽभवत् ॥ ६८ ॥ देवतानां महर्षीणां शापेन च वरेण च ॥ अयुक्तमपि यत्कर्म युज्यते नात्र संशयः ॥ ६९ ॥ सांबस्य जठराज्जातं मुसलं मुनिशापतः ॥ युवनाश्वस्य गर्भोऽभून्मुनीनां मंत्रगौरवात् ॥ ७० ॥ नूनमेषापि कल्याणी महर्षेः पादसेवनात् ॥ महाव्रतानुभावाच्च धत्ते गर्भमनिंदिता ॥ ७१ ॥ अस्मिन्नर्थे रहस्येनां सत्यं पृच्छंतु योषितः ॥ ततो निवृत्तसंदेहो भविष्यति महाजनः ॥ ७२ ॥ ततस्तद्वचनादेव तामपृच्छन्स्त्रियो मिथः ॥ ताभ्यः शशंस तत्सर्वं सा स्ववृत्तं महाद्भुतम् ॥ ७३ ॥ विजानंतस्ततः सर्वे मानयित्वा च तां सतीम् ॥ मोदमानाः प्रशंसंतः प्रययुः स्वं

१ बंधुस्त्रियश्च वृद्धाश्च–इ० पा० । २ आश्लिष्य–इ० पा० । ३ सर्वश–इ० पा० । ४ भ्रमान्विते–इ० पा० । ५ तस्या–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमालयम् ॥ ७४ ॥ अथ काले शुभे प्राप्ते शारदा विमलाशया ॥ असूत तनयं बाला बालार्कसमतेजसम् ॥ ७५ ॥ स कुमारो महोदारलक्षणः कमलेक्षणः ॥ अवाप्य महतीं विद्यां बाल्य एव महामतिः ॥ ७६ ॥ अथोपनीतो गुरुणा काले लोकमनोरमः ॥ स शारदेय एवेति लोके ख्याति मवाप ह ॥ ७७ ॥ ऋग्वेदमष्टमे वर्षे नवमे यजुषां गणम् ॥ दशमे सामवेदं च लीलयाध्यगमत्सुधीः ॥ ७८ ॥ अथ त्रिलोकमहिते संप्राप्ते शिवप र्वणि ॥ गोकर्णं प्रययुः सर्वे जनाः सर्वनिवासिनः[1] ॥ ७९ ॥ शारदापि स्वपुत्रेण गोकर्णं प्रययौ सती ॥ ८० ॥ तत्रापश्यत्समायातं सदा स्वप्नेषु लक्षितम् ॥ पूर्वजन्मनि भर्तारं द्विजबंधुजनावृतम् ॥ ८१ ॥ तं दृष्ट्वा प्रेमनिर्विण्णा पुलकांकितविग्रहा ॥ निरुद्धबाष्पप्रसरा तस्थौ तन्न्यस्तलोचना ॥ ८२ ॥ स च विप्रोऽपि तां दृष्ट्वा रूपलक्षणलक्षिताम् ॥ स्वप्ने सदा भुज्यमानामात्मनो रतिदायिनीम् ॥ ८३ ॥ तं कुमारमपि स्वप्ने दृष्ट्वा चात्म शरीरजम् ॥ विलोक्य विस्मयाविष्टस्तदंतिकमुपाययौ ॥ ८४ ॥ भद्रे त्वां प्रष्टुमिच्छामि यत्किंचिन्मनसि स्थितम् ॥ इति प्रथममाभाष्य रहः स्थानं निनाय ताम् ॥ ८५ ॥ का त्वं कथय वामोरु कस्य भार्यासि सुव्रते ॥ को देशः कस्य वा पुत्री किन्नामेत्यब्रवीच्च ताम् ॥ ८६ ॥ इति तेन समापृष्टा सा नारी बाष्पलोचना ॥ व्याजहारात्मनो वृत्तं बाल्ये वैधव्यकारणम् ॥ ८७ ॥ पुनः पप्रच्छ तां बालां पुत्रः कस्यायमुत्तमः ॥ कथं धृतो वा जठरे बालोऽयं चंद्रसन्निभः ॥ ८८ ॥ ॥ शारदोवाच ॥ ॥ एष मे तनयः स्वामिन्सर्वविद्याविशारदः॥ शारदेय इति प्रोक्तो मम नाम्नैव कल्पितः ॥ ८९ ॥ इति तस्या वचः श्रुत्वा विहस्य ब्राह्मणोत्तमः ॥ प्रोवाच कष्टात्कष्टं हि चरितं[2] तव भामिनि ॥ ९० ॥ पाणिग्रहणमात्रं ते कृत्वा भर्ता मृतः किल ॥ कथं चायं सुतो जातस्तस्य कारणमुच्यताम् ॥ ९१ ॥ इति तेनोदितां वाणीमाकर्ण्यातीव लज्जिता ॥ क्षणं चाश्रु मुखी भूत्वा धैर्यादित्थमभाषत ॥ ९२ ॥ ॥ शारदोवाच ॥ ॥ तदलं परिहासोक्त्या त्वं मां वेत्सि महामते ॥ त्वामहं वेद्मि चार्थेऽस्मिन्प्रमाणं मन आवयोः ॥ ९३ ॥ इत्युक्त्वा सर्वमावेद्य देव्या दत्तं वरादिकम् ॥ व्रतस्यार्धं कुमारं तं ददौ तस्मै धृतव्रतम् ॥ ९४ ॥ सोऽपि प्रमुदितो विप्रः कुमारं प्रतिगृह्य तम् ॥ पित्रोरनुमतेनैव तां निनाय निजालयम् ॥ ९५ ॥ सापि स्थित्वा बहून्मासांस्तस्य विप्रस्य मंदिरे ॥ तस्मिन्कालवशं प्राप्ते प्रविश्याग्निं तमन्वगात् ॥ ९६ ॥ ततस्तौ दंपती भूत्वा विमानं दिव्यमास्थितौ ॥ दिव्यभोगसमायुक्तौ जग्मतुः शिवमंदिरम् ॥ ९७ ॥ इत्येत

---

१ भारतवासिनः–इ० पा० । २ रचितम्–इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्पुण्यमाख्यानं मया समनुवर्णितम् ॥ पठतां शृण्वतां सम्[1]यग्भुक्तिमुक्तिफ[2]लप्रदम् ॥ ९८ ॥ आयुरारोग्यसंपत्तिधनधान्यविवर्द्धनम् ॥ स्त्रीणां मंगलसौभाग्यसंतानसुखसाधनम् ॥ ९९ ॥ एतन्महाख्यानमघौघनाशनं गौरीमहेशव्रतपुण्यकीर्तनम् ॥ भक्त्या सकृद्यः शृणुयाच्च कीर्त्तयेद्भुक्त्वा स भोगान्पदमेति शाश्वतम् ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे शारदाख्यानवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ सूत उवाच ॥ ॥ अथ रुद्राक्षमाहात्म्यं वर्णयामि समासतः ॥ सर्वपापक्षयकरं शृण्वतां पठतामपि ॥ ॥ १ ॥ अभक्तो वापि भक्तो वा नीचो नीचतरोपि वा ॥ रुद्राक्षान्धारयेद्यस्तु मुच्यते सर्वपातकैः ॥ २ ॥ रुद्राक्षधारणं पुण्यं केन वा सदृशं भवेत् ॥ महाव्रतमिदं प्राहुर्मुनयस्तत्त्वदर्शिनः ॥ ३ ॥ सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः ॥ तं नमंति सुराः सर्वे यथा रुद्रस्तथैव सः ॥ ४ ॥ अभावे तु सहस्रस्य बाह्वोः षोडश षोडश ॥ एकं शिखायां करयोर्द्वादश द्वादशैव हि ॥ ५ ॥ द्वात्रिंशत्कंठदेशे तु चत्वारिंशत्तु मस्तके ॥ एकैकं कर्णयोः षट् षट् वक्षस्यष्टोत्तरं शतम् ॥ यो धारयति रुद्राक्षान्रुद्रवत्सोपि पूज्यते ॥ ६ ॥ मुक्ताप्रवालस्फटिकरौप्यवैदूर्यकांचनैः ॥ समेतान्धारयेद्यस्तु रुद्राक्षान्स शिवो भवेत् ॥ ७ ॥ केवलानपि रुद्राक्षान्यथालाभं बिभर्ति यः ॥ तं न स्पृशंति पापानि तमांसीव विभावसुम् ॥ ८ ॥ रुद्राक्षमालया जप्तो मंत्रोऽनंतफलप्रदः ॥ अरुद्राक्षो जपः पुंसां तावन्मात्रफलप्रदः ॥ ९ ॥ यस्यांगे नास्ति रुद्राक्ष एकोपि बहुपुण्यदः ॥ तस्य जन्म निरर्थं स्यात्त्रिपुंड्ररहितं यदि ॥ १० ॥ रुद्राक्षं मस्तके बद्ध्वा शिरःस्नानं करोति यः ॥ गंगास्नानफलं तस्य जायते नात्र संशयः ॥ ११ ॥ रुद्राक्षं पूजयेद्यस्तु विना तोयाभिषेचनम् ॥ यत्फलं लिंगपूजायास्तदेवाप्नोति निश्चितम् ॥ १२ ॥ एकवक्त्राः पंचवक्त्रा एकादशमुखाः परे ॥ चतुर्दशमुखाः केचिद्रुद्राक्षा लोकपूजिताः ॥ १३ ॥ भक्त्या संपूजितो नित्यं रुद्राक्षः शंकरात्मकः ॥ दरिद्रं वापि कुरुते राजराजश्रियान्वितम् ॥ १४ ॥ अत्रेदं पुण्यमाख्यानं वर्णयंति मनीषिणः ॥ महापापक्षयकरं श्रवणात्कीर्त्तनादपि ॥ १५ ॥ राजा काश्मीरदेशस्य भद्रसेन इति श्रुतः ॥ तस्य पुत्रोऽभवद्धीमान्सुधर्मानाम वीर्यवान् ॥ १६ ॥ तस्यामात्यसुतः कश्चित्तारको नाम सद्गुणः ॥ बभूव राजपुत्रस्य सखा परमशोभनः ॥ १७ ॥ तावुभौ परमस्निग्धौ कुमारौ रूपसुन्दरौ ॥ विद्याभ्यासपरौ बाल्ये सह क्रीडां प्रचक्रतुः ॥ १८ ॥ तौ सदा सर्वगात्रेषु रुद्राक्षकृतभूषणौ ॥ विचेरतु[3]रुदारांगौ

१ सद्यः—इ० पा० । २ अत्र हि कस्मिंश्चित्पुस्तके—'एवं शिवतमः पंथाः' इत्यारभ्य अध्यायो दृश्यते परमेतास्मिन्पुस्तके । सोऽध्यायोऽत्र आगमिष्यत्यतोत्र न गृहीतः—इति भावनीयं सुधीभिः । ३ अलं प्रीत्यादिव्यालंकारधारिणौ—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सततं भस्मधारिणौ ॥ १९ ॥ हारकेयूरकटककुंडलादिविभूषणम् ॥ हेमरत्नमयं त्यक्त्वा रुद्राक्षान्दधतुश्च तौ ॥ २० ॥ रुद्राक्षमालिनौ नित्यं
रुद्राक्षकरकंकणौ ॥ रुद्राक्षकंठाभरणौ सदा रुद्राक्षकुंडलौ ॥ २१ ॥ हेमरत्नाद्यलंकारे लोष्टपाषाणदर्शनौ ॥ बोध्यमानावपि जनैर्न रुद्राक्षान्व्य
मुंचताम् ॥ २२ ॥ तस्य काश्मीरराजस्य गृहं प्राप्तो यदृच्छया ॥ पराशरो मुनिवरः साक्षादिव पितामहः ॥ २३ ॥ तमर्चयित्वा विधिवद्राजा
धर्मभृतां वरः ॥ प्रपच्छ सुखमासीनं त्रिकालज्ञं महामुनिम् ॥ २४ ॥ ॥ राजोवाच ॥ ॥ भगवन्नेष पुत्रो मे सोपि मंत्रिसुतश्च मे ॥ रुद्राक्ष
धारिणौ नित्यं रत्नाभरणनिःस्पृहौ ॥ २५ ॥ शास्यमानावपि सदा रत्नाकल्पपरिग्रहे ॥ विलंघितास्मद्वचनौ रुद्राक्षेष्वेव तत्परौ ॥ २६ ॥ नोप
दिष्टाविमौ बालौ कदाचिदपि केनचित् ॥ एषा स्वाभाविकी वृत्तिः कथमासीत्कुमारयोः ॥ २७ ॥ ॥ पराशर उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि तव
पुत्रस्य धीमतः ॥ यथा त्वं मंत्रिपुत्रस्य प्राग्वृत्तं[1] विस्मयावहम् ॥२८॥ नंदिग्रामे पुरा काचिन्महानंदेति विश्रुता॥बभूव वारवनिता शृंगारललिताकृतिः
॥२९॥ छत्रं पूर्णेंदुसंकाशं यानं स्वर्णविराजितम् ॥ चामराणि सुदंडानि पादुके च हिरण्मये॥३०॥अंबराणि विचित्राणि महार्हाणि द्युमंति च ॥ चंद्र
रश्मिनिभाः शय्याः पर्यंकाश्च हिरण्मयाः ॥ ३१ ॥ गावो महिष्यः शतशो दासाश्च शतशस्तथा ॥ ३२ ॥ सर्वाभरणदीप्तांग्यो दास्यश्च नवयौव
नाः ॥ भूषणानि पराध्यार्णि नवरत्नोज्वलानि च ॥ ३३ ॥ गन्धकुंकुमकस्तूरीकर्पूरागुरुलेपनम् ॥ चित्रमाल्यावतंसश्च यथेष्टं मृष्टभोजनम् ॥३४॥
नानाचित्रवितानाढ्यं नानाधान्यमयं गृहम् ॥ बहुरत्नसहस्राढ्यं कोटिसंख्याधिकं धनम् ॥ ३५ ॥ एवं विभवसंपन्ना वेश्या कामविहारिणी ॥
शिवपूजारता नित्यं सत्यधर्मपरायणा ॥ ३६ ॥ सदाशिवकथासक्ता शिवनामकथोत्सुका ॥ शिवभक्तांघ्र्यवनता शिवभक्तिरतानिशम् ॥ ३७ ॥
विनोदहेतोः सा वेश्या नाट्यमण्डपमध्यतः॥ रुद्राक्षैर्भूषयित्वैकं मर्कटं चैव कुक्कुटम् ॥३८॥ करतालैश्च गीतैश्च सदा नर्तयति स्वयम् ॥ पुनश्च विह
संत्युच्चैः सखीभिः परिवारिता ॥ ३९ ॥ युग्मम् ॥ रुद्राक्षैः कृतकेयूरकर्णाभरणभूषणः ॥ मर्कटः शिक्षया तस्याः सदा नृत्यति बालवत् ॥ ४० ॥
शिखायां बद्धरुद्राक्षः कुक्कुटः कपिना सह ॥ चिरं नृत्यति नृत्यज्ञः पश्यतां चित्रमावहन्[3] ॥४१॥ एकदा भवनं तस्याः कश्चिद्वैश्यः शिवव्रती॥ आज
जगाम सरुद्राक्षस्त्रिपुंड्री निर्मम: कृती ॥ ४२ ॥ स बिभ्रद्रत्नम विशदे प्रकोष्ठे वरकंकणम् ॥ महारत्नपरिस्तीर्णं ज्वलंतं तरुणार्कवत् ॥४३॥ तमागतं ॥२१०॥
सा गणिका संपूज्य परया मुदा ॥ तत्प्रकोष्ठगतं वीक्ष्य कंकणं प्राह विस्मिता ॥ ४४ ॥ महारत्नमयः सोऽयं कंकणस्त्वत्करे स्थितः ॥ मनो हरति

१ प्रकृतिर्विस्मयावहा–इ० पा० । २ द्वयम्–इ०पा० । ३ चित्तमाहरत्–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे साधो दिव्यस्त्रीभूषणोचितः ॥ ४५ ॥ इति तां वररत्नाढ्ये सस्पृहां करभूषणे ॥ वीक्ष्योदारमतिर्वैश्यः सस्मितं समभाषत ॥ ४६ ॥ ॥ ॥ वैश्य उवाच ॥ ॥ अस्मिन्रत्नवरे दिव्ये यदि ते सस्पृहं मनः ॥ तमेवादत्स्व सुप्रीता मौल्यमस्य ददासि किम् ॥ ४७ ॥ ॥ वेश्योवाच ॥ ॥ वयं तु स्वैरचारिण्यो वेश्यास्तु न पतिव्रताः ॥ अस्मत्कुलोचितो धर्मो व्यभिचारो न संशयः ॥ ४८ ॥ यद्येतद्रत्नखचितं ददासि करभूषणम् ॥ दिनत्रयमहोरात्रं तव पत्नी भवाम्यहम् ॥ ४९ ॥ ॥ वैश्य उवाच ॥ ॥ तथास्तु यदि ते सत्यं वचनं वारवल्लभे ॥ ददामि रत्नवलयं त्रिरात्रं भव मद्वधूः ॥ ५० ॥ एतस्मिन्व्यवहारे तु प्रमाणं शशिभास्करौ ॥ त्रिवारं सत्यमित्युक्त्वा हृदयं मे स्पृश प्रिये ॥ ५१ ॥ ॥ ॥ वेश्योवाच ॥ ॥ दिनत्रयमहोरात्रं पत्नी भूत्वा तव प्रभो ॥ सहधर्मं चरामीति सा तद्धृदयमस्पृशत् ॥ ५२ ॥ अथ तस्यै स वैश्यस्तु प्रददौ रत्नकङ्कणम् ॥ लिंगं रत्नमयं चास्या हस्ते दत्त्वेदमब्रवीत् ॥ ५३ ॥ इदं रत्नमयं शैवं लिंगं मत्प्राणसंनिभम् ॥ रक्षणीयं त्वया कांते तस्य हानिर्मृतिर्मम ॥ ५४ ॥ एवमस्त्विवति सा कांता लिंगमादाय रत्नजम् ॥ नाट्यमण्डपिकास्तंभे निधाय प्राविशद्गृहम् ॥ ५५ ॥ सा तेन संगता रात्रौ वैश्येन विटधर्मिणा ॥ सुखं सुष्वाप पर्यंके मृदुतल्पोपशोभिते ॥ ५६ ॥ ततो निशीथसमये नाट्यमण्डपिकांतरे ॥ अकस्मादुत्थितो वह्निस्तमेव सहसावृणोत् ॥ ५७ ॥ मण्डपे दह्यमाने तु सहसोत्थाय संभ्रमात् ॥ सा वेश्या मर्कटं तत्र मोचयामास बंधनात् ॥ ५८ ॥ स मर्कटो मुक्तबंधः कुक्कुटेन[1] सहामुना ॥ भीतो दूरं प्रदुद्राव विधूयाग्निकणान्बहून् ॥ ५९ ॥ स्तंभेन सह निर्दग्धं तल्लिंगं शकलीकृतम् ॥ दृष्ट्वा वेश्या च वैश्यश्च दुरंतं दुःखमापतुः ॥ ६० ॥ दृष्ट्वा प्राणसमं लिंगं दग्धं वैश्यपतिस्तथा ॥ स्वयमप्याप्तनिर्वेदो[2] मरणाय मतिं दधौ ॥ ६१ ॥ निर्वेददान्नितरां खेदाद्वैश्यस्तामाह दुःखिताम् ॥ शिवलिंगे तु निर्भिन्ने नाहं जीवितुमुत्सहे ॥ ६२ ॥ चितां कारय मे भद्रे तव भृत्यैर्बलाधिकैः ॥ शिवे मनः समावेश्य प्रविशामि हुताशनम् ॥ ६३ ॥ यदि ब्रह्मेंद्रविष्णवाद्या वारयेयुः समेत्य माम् ॥ तथाप्यस्मिन्क्षणे धीरः प्रविश्याग्निं त्यजाम्यसून् ॥ ६४ ॥ तमेवं दृढबंधं सा विज्ञाय बहुदुःखिता ॥ स्वभृत्यैः कारयामास चितां स्वनगराद्बहिः[3] ॥ ६५ ॥ ततः स वैश्यः शिवभक्तिपूतः प्रदक्षिणीकृत्य समिद्धमग्निम् ॥ विवेश पश्यत्सु जनेषु धीरः सा चानुतापं युवती प्रपेदे ॥ ६६ ॥ अथ सा दुःखिता नारी स्मृत्वा धर्मं सुनिर्मलम् ॥ सर्वान्बन्धून्समीक्ष्यैवं बभाषे करुणं वचः ॥ ६७ ॥ रत्नकंकणमादाय मया सत्यमुदाहृतम् ॥ दिनत्रयमहं पत्नी वैश्यस्यामुष्य संमता ॥ ६८ ॥ कर्मणा मत्कृतेनायं मृतो वैश्यः शिवव्रती ॥ तस्मादहं प्रवेक्ष्यामि सहानेन हुताशनम् ॥ सधर्मचारिणीत्युक्तं

१ कुक्कुटश्च महामते--इ० पा० । २ आख्यातनिर्बन्धः--इ० पा० । ३ स्वभवनात्--इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यमेतद्धि पश्यथ ॥ ६९ ॥ सत्येन प्रीतिमायांति देवास्त्रिभुवनेश्वराः ॥ सत्यासक्तिः परो धर्मः सत्ये सर्वं प्रतिष्ठितम् ॥ ७० ॥
सत्येन स्वर्गमोक्षौ च नासत्येन परा गतिः ॥ तस्मात्सत्यं समाश्रित्य प्रवेक्ष्यामि हुताशनम् ॥ ७१ ॥ इति सा दृढनिर्बंधा वार्यमाणापि बंधुभिः ॥
सत्यलोपभयान्नारी प्राणांस्त्यक्तुं मनो दधे ॥ ७२ ॥ सर्वस्वं शिवभक्तेभ्यो दत्त्वा ध्यात्वा सदाशिवम् ॥ तमग्निं त्रिः परिक्रम्य प्रवेशाभिमुखी स्थि
ता ॥ ७३ ॥ तां पतंतीं समिद्धेऽग्नौ स्वपदार्पितमानसाम् ॥ वारयामास विश्वात्मा प्रादुर्भूतः शिवः स्वयम् ॥ ७४ ॥ सा तं विलोक्याखिलदेव
देवं त्रिलोचनं चन्द्रकलावतंसम् ॥ शशांकसूर्यानलकोटिभासं स्तब्धेव भीतेव तथैव तस्थौ ॥ ७५ ॥ तां विह्वलां परित्रस्तां वेपमानां जडी
कृताम् ॥ समाश्वास्य गलद्बाष्पां करे गृह्याब्रवीद्वचः ॥ ७६ ॥ ॥ शिव उवाच ॥ ॥ सत्यं धर्मं च ते धैर्यं भक्तिं च मयि निश्चलाम् ॥ निरी
क्षितुं त्वत्सकाशं वैश्यो भूत्वाहमागतः ॥ ७७ ॥ माययाग्निं समुत्थाप्य दग्धवान्नाट्यमंडपम् ॥ दग्धं कृत्वा रत्नलिंगं प्रविष्टोस्मि हुताशनम् ॥
॥ ७८ ॥ वेश्याः कैतवकारिण्यः स्वैरिण्यो जनवंचकाः ॥ सा त्वं सत्यमनुस्मृत्य प्रविष्टाग्निं मया सह ॥ ७९ ॥ अतस्ते संप्रदास्यामि भोगां
स्त्रिदशदुर्लभान् ॥ आयुश्च परमं दीर्घमारोग्यं च प्रजोन्नतिम् ॥ यद्यदिच्छसि सुश्रोणि तत्तदेव ददामि ते ॥ ८० ॥ ॥ सूत उवाच ॥ ॥ इति
ब्रुवति गौरीशे सा वेश्या प्रत्यभाषत ॥ ८१ ॥ ॥ वेश्योवाच ॥ ॥ न मे वांछास्ति भोगेषु भूमौ स्वर्गे रसातले ॥ तव पादांबुजस्पर्शादन्य
त्किंचिन्न वै वृणे ॥ ८२ ॥ एते भृत्याश्च दास्यश्च ये चान्ये मम बांधवाः ॥ सर्वे त्वदर्चनपरास्त्वयि संन्यस्तवृत्तयः ॥ ८३ ॥ सर्वानेतान्मया सार्धं
नीत्वा तव परं पदम् ॥ पुनर्जन्मभयं घोरं विमोचय नमोस्तु ते ॥ ८४ ॥ तथेति तस्या वचनं प्रतिनंद्य महेश्वरः ॥ तान्सर्वांश्च तया सार्धं निनाय
परमं पदम् ॥ ८५ ॥ ॥ पराशर उवाच ॥ ॥ नाट्यमंडपिकादाहे यौ दूरं विद्रुतौ पुरा ॥ तत्रावशिष्टौ तावेव कुक्कुटो मर्कटस्तथा ॥ ८६ ॥
कालेन निधनं यातो यस्तस्या नाट्यमर्कटः ॥ सोभूत्तव कुमारोऽसौ कुक्कुटो मंत्रिणः सुतः ॥ ८७ ॥ रुद्राक्षधारणोद्भूतात्पुण्यात्पूर्वभवार्जितात् ॥
कुले महति संजातौ वर्तेते बालकाविमौ ॥ ८८ ॥ पूर्वाभ्यासेन रुद्राक्षान्दधाते शुद्धमानसौ ॥ अस्मिञ्जन्मनि तं लोकं शिवं संपूज्य यास्य
तः ॥ ८९ ॥ एषा प्रवृत्तिस्त्वनयोर्बालयोः समुदाहृता ॥ कथा च शिवभक्ताया किमन्यत्प्रष्टुमिच्छसि ॥ ९० ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे रुद्राक्षमहिमवर्णनं नाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एवं ब्रह्मर्षिणा ॥२११॥
प्रोक्तां वाणीं पीयूषसन्निभाम् ॥ आकर्ण्य मुदितो राजा प्रांजलिः पुनरब्रवीत् ॥ १ ॥ ॥ राजोवाच ॥ ॥ अहो सत्संगमः पुंसामशेषाघप्रशो

१ कामये इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनः ॥ कामक्रोधनिहंता च इष्टदोग्धा जनस्य हि ॥ २ ॥ मम मायातमो नष्टं ज्ञानदृष्टिः प्रकाशिता ॥ तव दर्शनमात्रेण प्रायोहममरोत्तमः ॥
॥ ३ ॥ श्रुतं च पूर्वचरितं बालयोः सम्यगेतयोः ॥ भविष्यदपि पृच्छामि मत्पुत्राचरणं मुने ॥ ४ ॥ अस्यायुः कति वर्षाणि भाग्यं वद च कीदृ
शम् ॥ विद्या कीर्तिश्च शक्तिश्च श्रद्धा भक्तिश्च कीदृशी ॥ ५ ॥ एतत्सर्वमशेषेण मुने त्वं वक्तुमर्हसि ॥ तव शिष्योस्मि भृत्योस्मि शरणं त्वां गतो
स्म्यहम् ॥ ६ ॥ ॥ पराशर उवाच ॥ ॥ अत्रावाच्यं हि यत्किंचित्कथं शक्तोस्मि शंसितुम् ॥ यच्छ्रुत्वा धृतिमंतोपि विषादं प्राप्नुयुर्जनाः ॥
॥ ७ ॥ तथापि निर्व्यलीकेन भावेन परिपृच्छतः ॥ अवाच्यमपि वक्ष्यामि तव स्नेहान्महीपते ॥ ८ ॥ अमुष्य त्वत्कुमारस्य वर्षाणि द्वादशा
त्यॆयुः[1] ॥ इतः परं प्रपद्येत सप्तमे दिवसे मृतिम् ॥ ९ ॥ इति तस्य वचः श्रुत्वा कालकूटमिवोदितम् ॥ मूर्च्छितः सहसा भूमौ पतितो नृपतिः
शुचा ॥ १० ॥ तमुत्थाप्य समाश्वास्य स मुनिः करुणार्द्रधीः ॥ उवाच मा भैर्नृपते पुनर्वक्ष्यामि ते हितम् ॥ ११ ॥ सर्गात्पुरा निरालोकं
यदेकं निष्कलं परम् ॥ चिदानंदमयं ज्योतिः स आद्यः केवलः शिवः ॥ १२ ॥ स एवादौ रजोरूपं सृष्ट्वा ब्रह्माणमात्मना ॥
सृष्टिकर्मनियुक्ताय तस्मै वेदांश्च दत्तवान् ॥ १३ ॥ पुनश्च दत्तवानीश आत्मतत्त्वैकसंग्रहम् ॥ सर्वोपनिषदां सारं रुद्राध्यायं
च दत्तवान् ॥ १४ ॥ यदेकमव्ययं साक्षाद्ब्रह्मज्योतिः सनातनम् ॥ शिवात्मकं परं तत्त्वं रुद्राध्याये प्रतिष्ठितम् ॥ १५ ॥
स आत्मभूः सृजद्विश्वं चतुर्भिर्वदनैर्विराट् ॥ ससर्ज वेदांश्चतुरो लोकानां स्थितिहेतवे ॥ १६ ॥ तत्रायं यजुषां मध्ये ब्रह्मणो दक्षि
णान्मुखात् ॥ अशेषोपनिषत्सारो रुद्राध्यायः समुद्गतः ॥ १७ ॥ स एष मुनिभिः सर्वैर्मरीच्यत्रिपुरोगमैः ॥ सह देवैर्धृतस्तेभ्यस्तच्छिष्या
जगृहुश्च तम् ॥ १८ ॥ तच्छिष्यशिष्यैस्तत्पुत्रैस्तत्पुत्रैश्च क्रमागतैः ॥ धृतो रुद्रात्मकः सोऽयं वेदसारः प्रसादितः ॥ १९ ॥ एष एव परो मन्त्र
एष एव परं तपः ॥ रुद्राध्यायजपः पुंसां परं कैवल्यसाधनम् ॥ २० ॥ महापातकिनः प्रोक्ता उपपातकिनश्च ये ॥ रुद्राध्यायजपात्सद्यस्तेऽपि
यांति परां गतिम् ॥ २१ ॥ भूयोपि ब्रह्मणा सृष्टाः सदसन्मिश्रयोनयः ॥ देवतिर्यङ्मनुष्याद्यास्ततः संपूरितं जगत् ॥ २२ ॥ तेषां कर्माणि सृष्टा
नि स्वजन्मानुगुणानि च ॥ लोकास्तेषु प्रवर्तंते भुंजते चैव तत्फलम् ॥ २३ ॥ लोकसृष्टिप्रवाहार्थं स्वयमेव प्रजापतिः ॥ धर्माधर्मौ ससर्जाग्रे
स्ववक्षःपृष्ठभागतः ॥ २४ ॥ धर्ममेवानुतिष्ठंतः पुण्यं विंदंति तत्फलम् ॥ अधर्ममनुतिष्ठंतस्ते पापफलभोगिनः ॥ २५ ॥ पुण्यकर्मफलं स्वर्गो
नरकस्तद्विपर्ययः ॥ तयोर्द्वावधिपौ धात्रा कृतौ शतमखांतकौ ॥ २६ ॥ कामः क्रोधश्च लोभश्च मदमानादयः परे ॥ अधर्मस्य सुता आस

[1] अत्यगुः–इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्सर्वे नरकनायकाः ॥ २७ ॥ गुरुतल्पः सुरापानं तथान्यः पुल्कसीगमः ॥ कामस्य तनया ह्येते प्रधानाः परिकीर्तिताः ॥ २८ ॥ क्रोधात्पितृवधो जातस्तथा मातृवधः परः ॥ ब्रह्महत्या च कन्यैका क्रोधस्य तनया अमी ॥ २९ ॥ देवस्वहरणश्चैव ब्रह्मस्वहरणस्तथा ॥ स्वर्णस्तेय इति त्वेते लोभस्य तनयाः स्मृताः ॥ ३० ॥ एतानाहूय चांडालान्यमः पातकनायकान् ॥ नरकस्य विवृद्ध्यर्थमाधिपत्यं चकार ह ॥ ३१ ॥ ते यमेन समादिष्टा नव पातकनायकाः ॥ ते सर्वे संगता भूयो घोराः पातकनायकाः ॥ ३२ ॥ नरकान्पालयामासुः स्वभृत्यैश्चोपपातकैः ॥ रुद्राध्याये भुवि प्राप्ते साक्षात्कैवल्यसाधने ॥ ३३ ॥ भीताः प्रदुद्रुवुः सर्वे तेऽमी पातकनायकाः ॥ यमं विज्ञापयामासुः सहान्यैरुपपातकैः ॥ ३४ ॥ जय देव महाराज वयं हि तव किंकराः ॥ नरकस्य विवृद्ध्यर्थं साधिकाराः कृतास्त्वया ॥ ३५ ॥ अधुना वर्तितुं लोके न शक्ताः स्मो वयं प्रभो ॥ रुद्राध्यायानुभावेन निर्दग्धाश्चैव विद्रुताः ॥ ३६ ॥ ग्रामेग्रामे नदीकूले पुण्येष्वायतनेषु च ॥ रुद्रजाप्ये तु पर्याप्ते कथं लोके चरेमहि ॥ ३७ ॥ प्रायश्चित्तसहस्रं वै गणयामो न किंचन ॥ रुद्रजाप्याक्षराण्येव सोढुं बत न शक्नुमः ॥ ३८ ॥ महापातकमुख्यानामस्माकं लोकघातिनाम् ॥ रुद्रजाप्यं भयं घोरं रुद्रजाप्यं महद्विषम् ॥ ३९ ॥ अतो दुर्विषहं घोरमस्माकं व्यसनं महत् ॥ रुद्रजाप्येन संप्राप्तमपनेतुं त्वमर्हसि ॥ ४० ॥ इति विज्ञापितः साक्षाद्यमः पातकनायकैः ॥ ब्रह्मणोऽतिकमासाद्य तस्मै सर्वं न्यवेदयत् ॥ ४१ ॥ देवदेव जगन्नाथ त्वामेव शरणं गतः ॥ त्वया नियुक्तो मर्त्यानां निग्रहे पापकारिणाम् ॥ ४२ ॥ अधुना पापिनो मर्त्या न संति पृथिवीतले ॥ रुद्राध्यायेन निहतं पातकानां महत्कुलम् ॥ ४३ ॥ पातकानां कुले नष्टे नरकाः शून्यतां गताः ॥ नरके शून्यतां याते मम राज्यं हि निष्फलम् ॥ ४४ ॥ तस्मात्त्वयैव भगवन्नुपायः परिचिन्त्यताम् ॥ यथा मे न विहन्येत स्वामित्वं मर्त्यदेहिनाम् ॥ ४५ ॥ इति विज्ञापितो धाता यमेन परिखिद्यता ॥ रुद्रजाप्यविघातार्थमुपायं पर्यकल्पयत् ॥४६॥ अश्रद्धां चैव दुर्मेधामविद्यायाः सुते उभे ॥ श्रद्धामेधाविघातिन्यौ मर्त्येषु पर्यचोदयत् ॥ ४७ ॥ ताभ्यां विमोहिते लोके रुद्राध्यायपराङ्मुखे ॥ यमः स्वस्थानमासाद्य कृतार्थ इव सोऽभवत् ॥ ४८ ॥ पूर्वजन्मकृतैः पापैर्जायंतेऽल्पायुषो जनाः ॥ तानि पापानि नश्यंति रुद्रं जपवतां नृणाम् ॥ ४९ ॥ क्षीणेषु सर्वपापेषु दीर्घमायुर्बलं धृतिः ॥ आरोग्यं ज्ञानमैश्वर्यं वर्धते सर्वदेहिनाम् ॥ ५० ॥ रुद्राध्यायेन ये देवं स्नापयंति महेश्वरम् ॥ तज्जलैः कुर्वतः स्नानं ते मृत्युं संतरंति च ॥ ५१ ॥ रुद्राध्यायाभिजप्तेन स्नानं कुर्वंति येऽभसा ॥ तेषां मृत्युभयं नास्ति शिवलोके महीयते ॥ ५२ ॥ शतरुद्राभिषेकेण शतायुर्जायते नरः ॥ अशेषपापनिर्मुक्तः शिवस्य दयितो भवेत् ॥ ५३ ॥ एष रुद्रायुतस्नानं करोतु

१ सः—इ०पा० । २ पूरयामासुः—इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव पुत्रकः ॥ दशवर्षसहस्राणि मोदते भुवि शक्रवत् ॥ ५४ ॥ अव्याहतबलैश्वर्यो हतशत्रुर्निरामयः ॥ निर्धूताखिलपापौघः शास्ता
राज्यमकंटकम् ॥ ५५ ॥ विप्रा वेदविदः शांताः कृतिनः शंसितव्रताः ॥ ज्ञानयज्ञतपोनिष्ठाः शिवभक्तिपरायणाः ॥ ५६ ॥ रुद्राध्याय
जपं सम्यक्कुर्वंतु विमलाशयाः ॥ तेषां जपानुभावेन सद्यः श्रेयो भविष्यति ॥ ५७ ॥ इत्युक्तवंतं नृपतिर्महामुनिं तमेव वव्रे प्रथमं क्रियागुरुम् ॥
अथापरांस्त्यक्तधनाशयान्मुनीनावाहयामास सहस्रशः क्षणात् ॥ ५८ ॥ ते विप्राः शांतमनसः सहस्रपरिसंमिताः ॥ कलशानां शतं स्थाप्य पुण्य
वृक्षरसैर्युतम् ॥ ५९ ॥ रुद्राध्यायेन संस्नाप्य तमुर्वीपतिपुत्रकम् ॥ विधिवत्स्नापयामासुः संप्राप्ते सप्तमे दिने ॥ ६० ॥ स्नाप्यमानो मुनिजनैः स
राजन्यकुमारकः ॥ अकस्मादेव संत्रस्तः क्षणं मूर्च्छामवाप ह ॥ ६१ ॥ सहसैव प्रबुद्धोऽसौ मुनिभिः कृतरक्षणः ॥ प्रोवाच कश्चित्पुरुषो दंडहस्तः
समागतः ॥ ६२ ॥ मां प्रहर्तुं कृतमतिर्भीमदण्डो भयानकः ॥ सोऽपि चान्यैर्महावीरैः पुरुषैरभिताडितः ॥ ६३ ॥ बद्ध्वा पाशेन महता दूरं नीत
इवाभवत् ॥ एतावदहमद्राक्षं भवद्भिः कृतरक्षणः ॥ ६४ ॥ इत्युक्तवंतं नृपतेस्तनूजं द्विजसत्तमाः ॥ आशीर्भिः पूजयामासुर्भयं राज्ञे न्यवेदयन् ॥
॥ ६५ ॥ अथ सर्वानृषीञ्छ्रेष्ठान्दक्षिणाभिर्नृपोत्तमः ॥ पूजयित्वा वरान्नेन भोजयित्वा च भक्तितः ॥ ६६ ॥ प्रतिगृह्याशिषस्तेषां मुनीनां ब्रह्मवादि
नाम् ॥ भक्त्या बंधुजनैः सार्धं सभायां समुपाविशत् ॥ ६७ ॥ तस्मिन्समागते वीरे मुनिभिः सह पार्थिवे ॥ आजगाम महायोगी देवर्षिर्नारदः
स्वयम् ॥ ६८ ॥ तमागतं प्रेक्ष्य गुरुं मुनीनां सार्धं सदस्यैरखिलैर्मुनींद्रैः ॥ प्रणम्य भक्त्या विनिवेश्य पीठे कृतोपचारं नृपतिर्बभाषे ॥ ६९ ॥
॥ ॥ राजोवाच ॥ ॥ दृष्टं किमस्ति ते ब्रह्मंस्त्रिलोक्यां किंचिदद्भुतम् ॥ तन्नो ब्रूहि वयं सर्वे त्वद्वाक्यामृतलालसाः ॥ ७० ॥ ॥ नारद
उवाच ॥ ॥ अद्य चित्रं महद्दृष्टं व्योम्नोवतरता मया ॥ तच्छृणुष्व महाराज सहैभिर्मुनिपुंगवैः ॥ ७१ ॥ अद्य मृत्युरिहायातो निहंतुं तव पुत्रकम् ॥
दंडहस्तो दुराधर्षो लोकमुद्राधयन्सदा ॥ ७२ ॥ ईश्वरोपि विदित्वैनं त्वत्पुत्रं हंतुमागतम् ॥ सहैव पार्षदैः कंचिद्वीरभद्रमचोदयत् ॥ ७३ ॥ स आग
त्य हठान्मृत्युं त्वत्पुत्रं हंतुमागतम् ॥ गृहीत्वा सुदृढं बद्ध्वा दंडेनाभ्यहनद्रुषा ॥ ७४ ॥ तं नीयमानं जगदीशसन्निधिं शीघ्रं विदित्वा भगवान्यमः
स्वयम् ॥ कृतांजलिर्देव जयेत्युदीरयन्प्रणम्य मूर्ध्ना निजगाद शूलिनम् ॥ ७५ ॥ ॥ यम उवाच ॥ ॥ देवदेव महारुद्र वीरभद्र नमोऽस्तु ते ॥
निरागसि कथं मृत्यौ कोपस्तव समुत्थितः ॥ ७६ ॥ निजकर्मानुबंधेन राजपुत्रं गतायुषम् ॥ प्रहर्तुमुद्यते मृत्यौ कोपराधो वद प्रभो ॥ ७७ ॥
॥ ॥ वीरभद्र उवाच ॥ ॥ दशवर्षसहस्रायुः स राजतनयः कथम् ॥ विपत्तिमंतरायाति रुद्रस्नानहताशुभः ॥ ७८ ॥ अस्ति चेत्तव संदेहो मद्रा

१ वशिनः-इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कयेऽप्यनिवारिते ॥ चित्रगुप्तं समाहूय प्रष्टव्योऽद्यैव मा चिरम् ॥ ७९ ॥ ॥ नारद उवाच ॥ ॥ अथाहूतश्चित्रगुप्तो यमेन सहसागतः ॥ आयुःप्र माणं त्वत्सूनोः परिपृष्टः स चाब्रवीत् ॥ ८० ॥ द्वादशाब्दं च तस्यायुरित्युक्त्वाथ विमृश्य च ॥ पुनर्लेख्यगतं प्राह स वर्षायुतजीवितम् ॥८१॥ अथ भीतो यमो राजा वीरभद्रं प्रणम्य च ॥ कथंचिन्मोचयामास मृत्युं दुर्वारबंधनात् ॥ ८२ ॥ वीरभद्रेण मुक्तोऽथ यमोऽगान्निजमंदिरम् ॥ वीरभद्रश्च कैलासमहं प्राप्तस्तवांतिकम् ॥ ८३ ॥ अतस्तव कुमारोऽयं रुद्रजाप्यानुभावतः ॥ मृत्योर्भयं समुत्तीर्य सुखी जातोऽयुतं समाः ॥ ८४ ॥ इत्युक्त्वा नृपमामंत्र्य नारदे त्रिदिवं गते ॥ विप्राः सर्वे प्रमुदिताः स्वंस्वं जग्मुरथाश्रमम् ॥ ८५ ॥ इत्थं काश्मीरनृपती रुद्राध्यायप्रभावतः ॥ निस्तीर्याशेषदुः खानि कृतार्थोभूत्सपुत्रकः॥८६॥ ये कीर्तयंति मनुजाः परमेश्वरस्य माहात्म्यमेतदथ कर्णपुटैः पिबंति ॥ ते जन्मकोटिकृतपापगणैर्विमुक्ताः शांताः प्रयांति परमं पदमिंदुमौलेः ॥ ८७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखंडे रुद्राध्यायमहिमवर्णनंनामैक विंशोऽध्यायः ॥ २१ ॥ ॥ सूत उवाच ॥ ॥ एवं शिवतमः पंथाः शिवेनैव प्रदर्शितः ॥ नृणां संसृतिबद्धानां सद्यो मुक्तिकरः परः ॥ १ ॥ अथ दुर्मेधसां पुंसां वेदेष्वनधिकारिणाम् ॥ स्त्रीणां द्विजातिबंधूनां सर्वेषां च शरीरिणाम् ॥ २ ॥ एष साधारणः पंथाः साक्षात्कैवल्यसाधनः ॥ महामुनि जनैः सेव्यो देवैरपि सुपूजितः ॥३॥ यत्कथाश्रवणं शंभोः संसारभयनाशनम् ॥ सद्योमुक्तिकरं श्लाघ्यं पवित्रं सर्वदेहिनाम् ॥४॥ अज्ञानतिमिरांधानां दीपोऽयंज्ञानसिद्धिदः ॥ भवरोगनिबद्धानां सुसेव्यं परमौषधम् ॥ ५ ॥ महापातकशैलानां वज्रघातसुदारुणम् ॥ भर्जनं कर्मबीजानां साधनं सर्व संपदाम् ॥ ६ ॥ ये शृण्वंति सदा शम्भोः कथां भुवनपावनीम् ॥ ते वै मनुष्या लोकेस्मिन्रुद्रा एव न संशयः ॥ ७ ॥ शृण्वतां शूलिनो गाथां तथा कीर्तयतां सताम् ॥ तेषां पादरजांस्येव तीर्थानि मुनयो जगुः ॥ ८ ॥ तस्मान्निःश्रेयसं गन्तुं येभिवांछंति देहिनः ॥ ते शृण्वंतु सदा भक्त्या शैवीं पौराणिकीं कथाम् ॥ ९ ॥ यद्यशक्तः सदा श्रोतुं कथां पौराणिकीं नरः ॥ मुहूर्तं वापि शृणुयान्नियतात्मा दिनेदिने ॥ १० ॥ अथ प्रतिदिनं श्रोतुमशक्तो यदि मानवः ॥ पुण्यमासेषु वा पुण्ये दिने पुण्यतिथिष्वपि ॥ ११ ॥ यः शृणोति कथां रम्यां पुराणैः समुदीरिताम् ॥ स निस्तरति संसारं दग्ध्वा कर्ममहाटवीम् ॥ १२ ॥ मुहूर्त्तं वा तदर्द्धं वा क्षणं वा पावनीं कथाम् ॥ ये शृण्वंति सदा भक्त्या न तेषामस्ति दुर्गतिः ॥ १३ ॥ यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् ॥ सकृत्पुराणश्रवणात्तत्फलं विंदते नरः ॥ १४ ॥ कलौ युगे विशेषेण पुराणश्रवणादृते ॥ नास्ति धर्मः परः पुंसां नास्ति मुक्तिपथः परः ॥ १५ ॥ पुराणश्रवणाच्छंभोर्नास्ति संकीर्तनं परम् ॥ अत एव मनुष्याणां कल्पद्रुममहाफलम् ॥ १६ ॥

१ प्रसाद्य—इ० पा० । २ महर्षयः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलौ हीनायुषो मर्त्या दुर्बलाः श्रमपीडिताः ॥ दुर्मेधसो दुःखभाजो धर्माचारविवर्जिताः ॥ १७ ॥ इति संचिंत्य कृपया भगवान्बादरायणः ॥ हिताय तेषां विदधे पुराणाख्यं सुधारसम् ॥ १८ ॥ पिबन्नेवामृतं यत्नादेतत्स्यादजरामरः ॥ शम्भोः कथामृतं कुर्यात्कुलमेवाजरामरम् ॥ १९ ॥ बालो युवा दरिद्रो वा वृद्धो वा दुर्बलोऽपि वा ॥ पुराणज्ञः सदा वन्द्यः पूज्यश्च सुकृतार्थिभिः ॥ २० ॥ नीचबुद्धिं न कुर्वीत पुराणज्ञे कदाचन ॥ यस्य वक्त्रांबुजाद्वाणी कामधेनुः शरीरिणाम् ॥ २१ ॥ गुरवः संति लोकेषु जन्मतो गुणतस्तथा ॥ तेषामपि च सर्वेषां पुराणज्ञः परो गुरुः ॥ २२ ॥ भवकोटिसहस्रेषु भूत्वाभूत्वावसीदति ॥ यो ददात्यपुनर्वृत्तिं कोऽन्यस्तस्मात्परो गुरुः ॥ २३ ॥ पुराणज्ञः शुचिर्दांतः शांतो विजितमत्सरः ॥ साधुः कारुण्यवान्वाग्मी वदेत्पुण्यकथां सुधीः ॥ २४ ॥ व्यासासनं समारूढो यदा पौराणिको द्विजः ॥ असमाप्तप्रसंगश्च नमस्कुर्यान्न कस्य चित् ॥ २५ ॥ ये धूर्ता ये च दुर्वृत्ता ये चान्ये विजिगीषवः ॥ तेषां कुटिलवृत्तीनामग्रे नैव वदेत्कथाम् ॥ २६ ॥ न दुर्जनसमाकीर्णे न शूद्रश्वापदावृते ॥ देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥ २७ ॥ सद्ग्रामे सुजनाकीर्णे सुक्षेत्रे देवतालये ॥ पुण्ये नदनदीतीरे वदेत्पुण्यकथां सुधीः ॥ २८ ॥ शिवभक्तिसमायुक्ता नान्यकार्येषु लालसाः ॥ वाग्यताः शुचयोऽव्यग्राः श्रोतारः पुण्यभागिनः ॥ २९ ॥ अभक्ता ये कथां पुण्यां शृण्वंति मनुजाधमाः ॥ तेषां पुण्यफलं नास्ति दुःखं स्याज्जन्मजन्मनि ॥ ३० ॥ पुराणं ये त्वसंपूज्य तांबूलाद्यैरुपायनैः ॥ शृण्वंति च कथां भक्त्या दरिद्राः स्युर्न पापिनः ॥ ३१ ॥ कथायां कीर्त्यमानायां ये गच्छंत्यन्यतो नराः ॥ भोगांतरे प्रणश्यंति तेषां दाराश्च संपदः ॥ ३२ ॥ सोष्णीषमस्तका ये च कथां शृण्वंति पावनीम् ॥ ते बलाकाः प्रजायन्ते पापिनो मनुजाधमाः ॥ ३३ ॥ तांबूलं भक्षयन्तो ये कथां शृण्वंति पावनीम् ॥ स्वविष्ठां खादयंत्येतान्नरके यमकिंकराः ॥ ३४ ॥ ये च तुंगासनारूढाः कथां शृण्वंति दांभिकाः ॥ अक्षयान्नरकान्भुक्त्वा ते भवंत्येव वायसाः ॥ ३५ ॥ ये च वीरासनारूढा ये च मंचकसंस्थिताः[1] ॥ शृण्वंति सत्कथां ते वै भवंत्यनृजुपादपाः ॥ ३६ ॥ असंप्रणम्य शृण्वंतो विषवृक्षा भवंति ते ॥ कथां शयानाः शृण्वन्तो भवंत्यजगरा नराः ॥ ३७ ॥ यः शृणोति कथां वक्तुः समानासनमाश्रितः ॥ गुरुतल्पसमं पापं संप्राप्य नरकं व्रजेत् ॥ ३८ ॥ ये निंदंति पुराणज्ञं कथां वा पापहारिणीम् ॥ ते वै जन्मशतं मर्त्याः शुनकाः संभवंति च ॥ ३९ ॥ कथायां वर्तमानायां ये वदंति नराधमाः ॥ ते गर्दभाः प्रजायन्ते कृकलासास्ततः परम् ॥ ४० ॥ कदाचिदपि ये पुण्यां न शृण्वंति कथां नराः ॥ ते भुक्त्वा नरकान्घोरान्भवंति वनसूकराः ॥ ४१ ॥ ये कथामनुमोदन्ते कीर्त्यमानां नरोत्तमाः ॥ अशृण्वंतोऽपि ते यांति शाश्वतं परमं पदम् ॥ ४२ ॥ कथायां कीर्त्य

१ ये चान्यध्यानसंस्थिताः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानायां विघ्नं कुर्वंति ये शठाः ॥ कोट्यब्दान्नरकान्भुक्त्वा भवंति ग्रामसूकराः ॥ ४३ ॥ ये श्रावयंति मनुजान्पुण्यां पौराणिकीं कथाम् ॥
कल्पकोटिशतं साग्रं तिष्ठंति ब्रह्मणः पदम् ॥ ४४ ॥ आसनार्थं प्रयच्छंति पुराणज्ञस्य ये नराः ॥ कम्बलाजिनवासांसि मञ्चं फलकमे
व च ॥ ४५ ॥ स्वर्गलोकं समासाद्य भुक्त्वा भोगान्यथेप्सितान् ॥ स्थित्वा ब्रह्मादिलोकेषु पदं यांति निरामयम् ॥ ४६ ॥ पुराणज्ञस्य यच्छंति
ये सूत्रवसनं नवम् ॥ भोगिनो ज्ञानसंपन्नास्ते भवंति भवेभवे ॥ ४७ ॥ ये महापातकैर्युक्ता उपपातकिनश्च ये ॥ पुराणश्रवणादेव ते यांति परमं पदम्
॥ ४८ ॥ अत्र वक्ष्ये महापुण्यमितिहासं द्विजोत्तमाः ॥ शृण्वतां सर्वपापघ्नं विचित्रं सुमनोहरम् ॥ ४९ ॥ दक्षिणापथमध्ये वै ग्रामो बाष्कलसं
ज्ञितः ॥ तत्र[1] संति जनाः सर्वे मूढाः कर्मविवर्जिताः ॥ ५० ॥ न तत्र ब्राह्मणाचाराः श्रुतिस्मृतिपराङ्मुखाः ॥ जपस्वाध्यायरहिताः परस्त्री
विषयातुराः ॥ ५१ ॥ कृषीवलाः शस्त्रधरा निर्देवा जिह्मवृत्तयः ॥ न जानंति परं धर्मं ज्ञानवैराग्यलक्षणम् ॥ ५२ ॥ स्त्रियश्च पापनिरताः स्वैरि
ण्यः कामलालसाः॥ दुर्बुद्धयः कुटिलगाः सद्वृताचारवर्जिताः ॥ ५३ ॥ तत्रैको विदुरो नाम दुरात्मा ब्राह्मणाधमः ॥ आसीद्वेश्यापतिर्योऽसौ सदा
रोऽपि कुमार्गगः ॥ ५४ ॥ स्वपत्नीं बंदुलां[2] नाम हित्वा प्रतिनिशं तथा ॥ वेश्याभवनमासाद्य रमते स्मरपीडितः ॥ ५५ ॥ सापि तस्यांगना रात्रौ
वियुक्ता नवयौवना ॥ असहंती स्मरावेशं रेमे जारेण संगता ॥ ५६ ॥ तां कदाचिद्दुराचारां जारेण सह संगताम् ॥ दृष्ट्वा तस्याः पतिः क्रोधादभि
दुद्राव सत्वरः ॥ ५७ ॥ जारे पलायिते पत्नीं गृहीत्वा स दुराशयः ॥ संताड्य मुष्टिबंधेन मुहुर्मुहुरताडयत् ॥ ५८ ॥ सा नारी पीडिता भर्त्रा कुपिता
प्राह निर्भया ॥ भवान्प्रतिनिशं वेश्यां रमते का गतिर्मम ॥ ५९ ॥ अहं रूपवती योषा नवयौवनशालिनी ॥ कथं सहिष्ये कामार्ता तव संगतिव
र्जिता ॥ ६० ॥ इत्युक्तः स तया तन्व्या प्रोवाच ब्राह्मणाधमः ॥ युक्तमेव त्वयोक्तं हि तस्माद्वक्ष्यामि ते हितम् ॥ ६१ ॥ जारेभ्यो धनमाकृष्य
तेभ्यो देहि परां रतिम् ॥ तद्धनं देहि मे सर्वं पण्यस्त्रीणां ददामि तत् ॥ ६२ ॥ एवं संपूर्यते कामो ममापि च वरानने ॥ तथेति भर्तृवचनं प्रतिज
ग्राह सा वधूः ॥ ६३ ॥ एवं तयोस्तु दंपत्योर्दुराचारप्रवृत्तयोः ॥ कालेन निधनं प्राप्तः स विप्रो वृषलीपतिः ॥ ६४ ॥ मृते भर्तरि सा नारी[3] पुत्रैः
सह निजालये ॥ उवास सुचिरं कालं किंचिदुत्क्रांतयौवना ॥ ६५ ॥ एकदा दैवयोगेन संप्राप्ते पुण्यपर्वणि ॥ सा नारी बंधुभिः सार्धं गोकर्णं क्षेत्र
मायया ॥ ६६ ॥ तत्र तीर्थजले स्नात्वा कस्मिंश्चिद्देवतालये ॥ शुश्राव देवमुख्यानां पुण्यां पौराणिकीं कथाम् ॥ ६७ ॥ योषितां जारसक्तानां नरके
यमकिंकराः ॥ संतप्तलोहपरिघं क्षिपंति स्मरमंदिरे ॥ ६८ ॥ इति पौराणिकेनोक्तां सा श्रुत्वा धर्मसंहिताम् ॥ तमुवाच रहस्येषा भीता ब्राह्मणपुं

१ तत्रत्याश्च—इ० पा० । २ चुंचुलाम्—इ० पा० । ३ सा नारी व्यभिचारिणी—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गवम् ॥ ६९ ॥ ब्रह्मन्पापमजानंत्या मयाचरितमुल्बणम् ॥ यौवने कामचारेण कौटिल्येन प्रवर्तितम् ॥ ७० ॥ इदं त्वद्वचनं श्रुत्वा पुराणार्थविजृंभितम् ॥ भीतिर्मे महती जाता शरीरं वेपते मुहुः ॥ ७१ ॥ धिङ्मां दुरिंद्रियासक्तां पापां स्मरविमोहिताम् ॥ अल्पस्य यत्सुखस्यार्थे घोरां यास्यामि दुर्गतिम् ॥ ७२ ॥ कथं पश्यामि मरणे यमदूतान्भयंकरान् ॥ कथं पाशैर्बलात्कंठे बध्यमाना धृतिं लभे ॥ ७३ ॥ कथं सहिष्ये नरके खंडशो देहकृंतनम् ॥ पुनः कथं पतिष्यामि संतप्ता क्षारकर्दमे ॥ ७४ ॥ कथं च योनिलक्षेषु क्रिमिकीटखगादिषु ॥ परिभ्रमामि दुःखौघात्पीड्यमाना निरंतरम् ॥ ७५ ॥ कथं च रोचते मह्यमद्यप्रभृति भोजनम् ॥ रात्रौ कथं च सेविष्ये निद्रां दुःखपरिप्लुता ॥ ७६ ॥ हाहा हतास्मि दग्धास्मि विदीर्णहृदयास्मि च ॥ हा विधे मां महापापे दत्त्वा बुद्धिमपातयः ॥ ७७ ॥ पततस्तुंगशैलाग्राच्छूलाक्रांतस्य देहिनः ॥ यद्दुःखं जायते घोरं तस्मात्कोटिगुणं मम ॥ ७८ ॥ अश्वमेधायुतं कृत्वा गंगां स्नात्वा शतं समाः ॥ न शुद्धिर्जायते प्रायो मत्पापस्य गरीयसः ॥ ७९ ॥ किं करोमि क्व गच्छामि कं वा शरणमाश्रये ॥ को वा मां त्रायते लोके पतंतीं नरकार्णवे ॥ ८० ॥ त्वमेव मे गुरुर्ब्रह्मंस्त्वं माता त्वं पितासि च ॥ उद्धरोद्धर मां दीनां त्वामेव शरणं गताम् ॥८१॥ इति तां जातनिर्वेदां पतितां चरणद्वये ॥ उत्थाप्य कृपया धीमान्बभाषे द्विजपुंगवः ॥ ८२ ॥ ॥ ब्राह्मण उवाच ॥ ॥ दिष्ट्या काले प्रबुद्धासि श्रुत्वेमां महतीं कथाम् ॥ माभैषीस्तव वक्ष्यामि गतिं चैव सुखावहाम् ॥८३॥ सत्कथाश्रवणादेव जाता ते मतिरीदृशी ॥ इंद्रियार्थेषु वैराग्यं पश्चात्तापो महानभूत् ॥ ८४ ॥ पश्चात्तापो हि सर्वेषामघानां निष्कृतिः परा ॥ तेनैव कुरुते सद्यः प्रायश्चित्तं सुधीर्नरः ॥ ८५ ॥ प्रायश्चित्तानि सर्वाणि कृत्वा च विधिवत्पुनः ॥ अपश्चात्तापिनो मर्त्या न यांति गतिमुत्तमाम् ॥ ८६ ॥ सत्कथाश्रवणान्नित्यं संयाति परमां गतिम् ॥ पुण्यक्षेत्रनिवासाच्च चित्तशुद्धिः प्रजायते ॥८७॥ यथा सत्कथया नित्यं संयाति परमां गतिम् ॥ तथान्यैः सद्व्रतैर्जंतोर्न भवेन्मतिरुत्तमा ॥ ॥८८॥ यथा मुहुः शोध्यमानो दर्पणो निर्मलो भवेत् ॥ तया सत्कथया चेतो विशुद्धिं परमां व्रजेत् ॥ ८९ ॥ विशुद्धे चेतसि नृणां ध्यानं सिध्यत्युमापतेः ॥ ध्यानेन सर्वं मलिनं मनोवाक्कायसंभृतम् ॥ ९० ॥ सद्यो विधूय कृतिनो यांति शम्भोः परं पदम् ॥ अतः संन्यस्तपुण्यानां सत्कथा साधनं परम् ॥ ९१ ॥ कथया सिध्यति ध्यानं ध्यानात्कैवल्यमुत्तमम् ॥ असिद्धपरमध्यानः कथामेतां शृणोति यः ॥ सोऽन्यजन्मनि संप्राप्य ध्यानं यातिपरां गतिम् ॥ ९२ ॥ नामोच्चारणमात्रेण जप्त्वा मंत्रमजामिलः ॥ पश्चात्तापसमायुक्तस्त्ववाप परमां गतिम् ॥ ९३ ॥ सर्वेषां श्रेयसां बीजं सत्कथाश्रवणं नृणाम् ॥ यस्तद्विहीनः स पशुः कथं मुच्येत बन्धनात् ॥ ९४ ॥ अतस्त्वमपि सर्वेभ्यो विषयेभ्यो निवृत्तधीः ॥ भक्तिं परां

१ अच्छिद्रविमलज्ञानः—इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समाधाय सत्कथां शृणु सर्वदा ॥ शृण्वंत्याः सत्कथां नित्यं चेतस्ते शुद्धिमेष्यति ॥ ९५ ॥ तेन ध्यायसि विश्वेशं ततो मुक्तिमवाप्स्यसि ॥
ध्यायतः शिवपादाब्जं मुक्तिरेकेन जन्मना ॥ ९६ ॥ भविष्यति न सन्देहः सत्यंसत्यं वदाम्यहम् ॥ इत्युक्ता तेन विप्रेण सा नारी बाष्प[1]संकुला
॥ ९७ ॥ पतित्वा पादयोस्तस्य कृतार्थास्मीत्यभाषत ॥ तस्मिन्नेव महाक्षेत्रे तस्मादेव द्विजोत्तमात् ॥ ९८ ॥ शुश्राव सत्कथां साध्वीं[2] कैवल्यफल
दायिनीम् ॥ स उवाच द्विजस्तस्यै कथां वैराग्यबृंहिताम् ॥ ९९ ॥ यां श्रुत्वा मनुजः सद्यस्त्यजेद्विषयवासनाम् ॥ तस्याश्चित्तं यथा शुद्धं
वैराग्यरसं[3]गं यथा ॥ १०० ॥ तथोवाच द्विजः शैवीं कथां भक्तिसमन्विताम् ॥ यथायथा मनस्तस्याः प्रसादमभिगच्छति ॥ तथातथा शनैः
शंभोर्ध्यानयोगमुपादिशत् ॥ १ ॥ शनैः शनैर्ध्वस्तरजस्तमोमलं विमुक्तसर्वेन्द्रिय[4]भोगविग्रहम् ॥ विशुद्धतत्त्वं हृदयं द्विजस्त्रिया विवेश विश्वेश्वर
रूपचिंतनम् ॥ २ ॥ इत्थं सद्गुरुमाश्रित्य सा नारी प्राप्तसन्मतिः ॥ दध्यौ मुहुर्मुहुः शंभोश्चिदानंदमयं वपुः ॥ ३ ॥ नित्यं तीर्थजले स्नात्वा
जटावल्कलधारिणी ॥ भस्मोद्धूलितसर्वांगी रुद्राक्षकृतभूषणा ॥ ४ ॥ शिवनामजपासक्ता वाग्यता मितभोजना ॥ बद्धपद्मासनाऽव्यग्रा सत्कथा
श्रवणोत्सुका ॥ ५ ॥ गुरुशुश्रूषणरता त्यक्तापत्यसुहृज्जना ॥ गुरूपदिष्टयोगेन शिवमेवमतोषयत् ॥ ६ ॥ विश्वेश विश्वविलयस्थितिजन्महेतो
विश्वैकवंद्य शिव शाश्वत विश्वरूप ॥ विध्वस्तकालविपरीतगुणावभास श्रीमन्महेश मयि धेहि कृपाकटाक्षम् ॥ ७ ॥ शंभो शशांककृतशेखर
शांतमूर्ते गंगाधरामरवरार्चितपाद[5]पद्म ॥ नागेंद्रभूषण नगेंद्रनिकेतनेश भक्तार्तिहन्मयि निधेहि कृपाकटाक्षम् ॥८॥ श्रीविश्वनाथ करुणाकर शूलपाणे
भूतेश भर्ग भुवनत्रयगीतकीर्ते ॥ श्रीनीलकण्ठ मदनान्तक विश्वमूर्ते गौरीपते मयि निधेहि कृपाकटाक्षम् ॥ ९ ॥ इत्थं प्रतिदिनं भक्त्या प्रार्थयंती
महेश्वरम् ॥ शृण्वंती सत्कथां सम्यक्कर्मबंधं सं[6]माच्छिनत् ॥ ११० ॥ अथ कालेन सा नारी समुत्सृज्य कलेवरम् ॥ महेशानुचरैर्नीता संप्राप्ता शिव
मंदिरम् ॥ ११ ॥ तत्र देवैर्महादेवं सेव्यमानं सहोमया ॥ गणेशनंदिभृंग्याद्यैर्वीर[7]भद्रेश्वरादिभिः ॥ १२ ॥ उपास्यमानं गौरीशं कोटिसूर्यसमप्रभम् ॥
त्रिलोचनं पंचमुखं नीलग्रीवं सदाशिवम् ॥ १३ ॥ वामांके बिभ्रतं गौरीं विद्युच्चंद्रसमप्रभाम् ॥ दृष्ट्वा ससंभ्रमं नारी सा प्रणम्य पुनःपुनः ॥ १४ ॥
आनन्दाश्रुजलोत्सिक्ता रोमहर्षसमाकुला[8] ॥ संमानिता करुणया पार्वत्या शंकरेण च ॥१५॥ तस्मिँल्लोके परानन्दघनज्योतिषि शाश्वते ॥ लब्ध्वा
निवासमचलं लेभे सुखमनाहतम् ॥ १६ ॥ सा कदाचिदुमां देवीमुपसृत्य प्रणम्य च ॥ पर्यपृच्छत मे भर्त्ता कां गतिं गतवानिति ॥१७॥ तामुवाच

१ बाष्पलोचना–इ० पा० । २ साध्याम्–इ० पा० । ३ वैराग्यरसधारया–इ० पा० । ४ विविक्तसर्वेन्द्रियभोगविग्रहम्–इ० पा० । ५ पीठ–इ० पा० । ६ पुण्यां कर्मबन्धमपाकरोत्–इ०पा० ।
७ नीलकंठे श्वरादिभिः–इ०–पा० । ८ महाहर्षसमाकुला–इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

महादेवी सते भर्त्ता दुराशयः ॥ भुक्त्वा नरकदुःखानि विंध्ये जातः पिशाचकः ॥ १८ ॥ पुनः प्रपच्छ सा नारी देवीं त्रिभुवनेश्वरीम् ॥ केनोपायेन मे भर्त्ता सद्गतिं प्राप्नुयादिति ॥ १९ ॥ ॥ देव्युवाच ॥ ॥ सोऽस्मत्कथां महापुण्यां कदाचिच्छृणुयाद्यदि ॥ निस्तीर्य दुर्गतिं सर्वामिमं लोकं प्रयास्यति ॥ १२० ॥ इति गौर्या वचः श्रुत्वा सा नारी विहितांजलिः ॥ प्रार्थयामास तां देवीं भर्तुः पापविशोधने ॥२१॥ तया मुहुः प्रार्थ्यमाना पार्वती करुणायुता ॥ तुंबुरुं नाम गंधर्वमहूयेदमाथाब्रवीत् ॥ २२ ॥ तुंबुरो गच्छ भद्रं ते विंध्यशैलं सहानया ॥ आस्ते पिशाचकस्तत्र योऽस्याः पतिरसन्मतिः ॥ २३ ॥ तस्याग्रे परमां पुण्यां कथामस्मद्गुणैर्युताम् ॥ आख्याय दुर्गतेर्मुक्तं तमानय शिवांतिकम् ॥ २४ ॥ इति देव्या समादिष्ट स्तुंबुरुस्तां प्रणम्य च ॥ तया सह विमानेन विंध्याद्रिं सहसा ययौ ॥ २५ ॥ तत्रापश्यन्महाकायं रक्तनेत्रं महाहनुम् ॥ प्रहसंतं रुदंतं च वल्गंतं च पिशाचकम् ॥ २६ ॥ बलाद्गृहीत्वा तं पाशैर्बद्ध्वा[1] वै संनिवेश्य च ॥ तुंबुरुर्वल्लकीहस्तो जगौ गौरीपतेः कथाम् ॥ २७ ॥ स पिशाचो महापुण्यां कथां श्रुत्वा पुरद्विषः[2] ॥ विधूय कलुषं सर्वं सप्ताहात्प्राप संस्मृतिम् ॥ २८ ॥ स पैशाचं वपुस्त्यक्त्वा[3] स्वरूपं दिव्यमाप्य च ॥ जगौ स्वयमपि श्रीमच्चरितं पार्वतीपतेः ॥ २९ ॥ विमानमारुह्य स दिव्यरूपधृक्स[4]तुंबुरुः पार्श्वगतः स्वकांतया ॥ गायन्महेशस्य गुणान्मनोरमाञ्जगाम कैवल्यपदं सनातनम् ॥ १३० ॥ ॥ सूत उवाच ॥ ॥ इत्येतत्कथितं पुण्यमाख्यानं दुरितापहम् ॥ महेश्वरप्रीतिकरं निर्मलज्ञानसाधनम् ॥ ॥ ३१ ॥ य इदं शृणुयान्मर्त्यः कीर्तयेद्वा समाहितः ॥ शंभोर्गुणानुकथनं विचित्रं पापनाशनम् ॥ ३२ ॥ परमानन्दजनकं भवरोगमहौषधम् ॥ भुक्त्वेह विविधान्भोगान्मुक्तो याति परां गतिम् ॥ ३३ ॥ ॥ सूत उवाच ॥ ॥ यूयं खलु महाभागाः कृतार्था मुनिसत्तमाः ॥ ये सेवंते सदा शंभोः कथामृतरसं नवम् ॥ ३४ ॥ ते जन्मभाजः खलु जीवलोके येषां मनो ध्यायति विश्वनाथम् ॥ वाणी गुणान्स्तौति कथां शृणोति श्रोत्रद्वयं ते भवमुत्तरंति ॥ ३५ ॥ विविधगुणविभेदैर्नित्यमस्पृष्टरूपं जगति च बहिरंतर्वा समानं महिम्ना ॥ स्वमहसि विहरंतं वाङ्मनोवृत्तिदूरं परमशिवमनंतानंदसांद्रं प्रपद्ये ॥ १३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मोत्तरखण्डे पुराणश्रवणमहिमवर्णनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ समाप्तमिदं ब्राह्मखण्डे तृतीयं ब्रह्मोत्तरखण्डम् ॥ (३–३) ॥ ॥ इति स्कान्दे तृतीयं ब्राह्मखण्डं संपूर्णम् ॥ ३ ॥

१ कण्ठे बद्ध्वा समुपवेश्य च–इ० पा० । २ असुरद्विषः-इ० पा० । ३ हित्वा–इ० पा० । ४ वत–इ० पा० ।

इदं पुस्तकं मुंबय्यां क्षेमराज श्रीकृष्णदास श्रेष्ठिना स्वकीये "श्रीवेंकटेश्वर" स्टीम्–यन्त्रालये मुद्रितम् । सं० १९६६–शके १८३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीस्कांदे महापुराणे तृतीयं ब्राह्मखण्डं समाप्तम् (३-३) ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कांदमहापुराणांतर्गतचतुर्थकाशिखंडपूर्वार्धं सटीकमारभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकाशीखण्ड चित्रम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावना ।

अद्य सानन्दं निवेद्यते सर्वेषामपि सज्जनानां पुरतो नितान्तरम्यं पुरातनविषयमपि नूतनायितं पुराणपुरुषोत्तममाहात्म्यकथानकोपनिबद्धविचित्रचरित्रचातुरीधुरीणतया सार्वजनीनं वृत्तम् । विदितमेव खल्वास्ति सम
स्तवैदिकधर्मानुयायिनां सज्जनानाम्—यदिह भगवता शब्दब्रह्मस्वरूपिणाऽनिरुद्धांशस्वरूपेण सकलवाङ्मयमाविर्भावयांचक्रे वेदस्वरूपस्वरूपपरिणामेनेति । ततश्च सुस्पष्टमेव सिद्धं सर्वं वाङ्मयं भगवत्स्वरूपमेवेति । एत
देवाभिप्रेत्योक्तं श्रीमद्भागवत एकादशस्कन्धे—"स एष जीवः परमात्मसंज्ञकः प्राणेन घोषेण गुहां प्रविष्टः । मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥" इति । अत एव 'वेदो नारायणः' इत्यप्युच्यते ।
वेदस्वरूपत्वं सकलवाङ्मयस्य प्रथमः परिणामः प्रोक्तप्राक्तनभागवतवचनतः सिध्यति । ततश्च—"यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतिवचनतः परमेष्ठिनः प्रजापतेः प्राक्तनत्वं नत्वे
तावदेव अपि तु सनातनत्वमेव वेदानाम् । अत एवेदं प्रकृत्य मनुस्मृतावप्युच्यते—"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥" इति । नचात्र दोहनेन नव्यकल्पनाशङ्कायाः कथ
ङ्कारमवसरः, धेनूधसि सिद्धस्थितेरेव पयसो दोहनौचित्यवत्सनातनस्यापि वेदस्य शतपथब्राह्मणप्रोक्तदिशाऽध्यात्मस्थिताग्निवायुरविभ्य औदरजातवेदऔरसप्रश्वासमास्तिष्कसूर्याभितपनतः प्रादुर्भावस्य समुचितं प्रादुर्भावनम् ।
सैषा सनातनी वेदरूपा वाङ्मयी भगवतोऽनादिरनन्ता मूर्तिरिति सुबहुप्रमाणतः सिद्धोऽयं विषयः श्रीमन्माधवाचार्यादिभिर्ऋग्वेदभाष्यादौ सम्यग्विवेचित एव । अथ चैवं स वेदपुरुषो भगवान्निखिलजीवजैवातृकतयैहिका
मुष्मिकानर्थान्संप्रदर्श्य कृतार्थयन्भव्यभाविकजनान्यथोचितकर्मज्ञानोपासनात्मककाण्डत्रयप्रतिपादितभव्यभावुकसंप्रदर्शनेन विराजतेतराम् । अथ च तदर्थोपबृंहणाय पुराणेतिहासानां प्रथमतः प्रादुर्भावो बभूव । तान्ये
तानि पुराणानि—पुराणानि तु वैदिकान्येवासन्ब्राह्मणादिरूपाणि । अथ कालमहिम्ना मनुजबुद्धिमान्द्यमवलोकयता भगवता जगतीतले चातुर्वर्ण्यव्यवस्थायां च सप्रचारायां तत्र च केषांचिद्वेदानधिकारं च विमृश्य तदर्थस्यो
पलब्ध्यै प्राचीनतरवैदिकसंप्रदायतत्त्वस्य नवीनतया स्वोपज्ञत्वमुपनिर्वर्ण्याविश्चिकीर्षया श्रीव्यासावतारं धृत्वाऽष्टादशमहापुराणप्रबन्धरचनया स्वकीयवेदवागुपनिबद्धं रहस्यार्थकदम्बकं क्रमेणाविर्भावितम् । तदेतदुक्तं गारुडमहा
पुराणे २२७ तमेऽध्याये—"पुराणमेकमेवासीत्सर्वकल्पेषु मानद ॥ चतुर्वर्गस्य बीजं च शतकोटिप्रविस्तरम् ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ॥ कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः ॥ हरिर्व्यासस्वरूपेण जायते
च युगेयुगे ॥ चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥ तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि ॥ अद्यापि देवलोके तु शतकोटिप्रविस्तरम् । अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते ॥" इति । तानि चैतानि सुप्रसिद्धानि
तावन्महापुराणानि—"ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च ॥ भागवतं नारदीयं मार्कण्डेयं च कीर्तितम् ॥ आग्नेयं च भविष्यं च ब्रह्मवैवर्तलैङ्गके ॥ वाराहं च तथा स्कान्दं वामनं कौर्मसंज्ञकम् ॥ मात्स्यं च गारुडं
तद्वद्ब्रह्माण्डाख्यमिति त्रिषट् ॥" इति । एतेषु पुराणेषु सर्ववेदार्थोऽनुस्यूतः सूत्ररूपेण । तस्यैव चोपबृंहणार्थं पुराणोपयोग इति च—"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति वचनेनैव सिद्धमिति च सर्वविद्वज्जन
विदितमेव । अथ च प्रकृते किञ्चित्प्रस्तूयते—

एतेषु महापुराणेषु च तावत्त्रयोदशं स्कान्दं महापुराणम् । तत्र चैकाशीतिसाहस्रसंहितात्मके स्कान्दमहापुराणे हि सप्त खण्डानि सन्ति । तानि चोक्तानि नारदमहापुराणोक्तानुसारेण—"माहेश्वरो वैष्णवब्राह्मय
काश्यास्त्ववंतिका नागरमत्र षष्ठम् ॥ प्राभासिको विप्रवरेण खण्डाः स्कान्दे पुराणे कथिताः सुपुण्याः॥" इति कैश्चिदभियुक्तैः। एवं चैकाशीतिसाहस्रसंहितात्मकं श्रीस्कान्दमहापुराणं विद्यते । यच्च पञ्चाशत्खण्डमण्डितं स्कान्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुराणं विद्यते तच्चोपपुराणान्तर्गतमेव । नारदीयमहापुराणे तु सप्तखण्डात्मकमेवैतत्स्कान्दमहापुराणं समस्तखण्डानुक्रमणिकोपेतं महापुराणत्वेन परिगण्यते । अतः सप्तखण्डात्मकमेव स्कान्दं महापुराणम्—इति सर्वसंमतम् । एतद्विषये विशेषं तु समस्तस्कान्दमहापुराणप्रस्तावनायामस्माभिर्विविच्य निदर्शितं पश्यन्तु विद्वांस इत्यभ्यर्थ्य प्रकृतमनुसरामः । तच्च श्रीस्कान्दमहापुराणमस्माभिः स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशयितु मुपक्रान्तमस्ति । इदं च श्रीस्कान्दमहापुराणान्तर्गतं चतुर्थं श्रीकाशीखण्डं शताध्यायात्मकं पूर्वार्धोत्तरार्धविभेदभिन्नं सविस्तरश्रीकाशीक्षेत्रमाहात्म्यसंसूचकं वरीवर्ति । अत्र श्रीमदविमुक्तक्षेत्रस्थसकलदेवतीर्थक्षेत्रतपःस्थलमहिमा लोकोत्तरसच्चरित्रसंदर्भसमुपबृंहितः सकलसांसारिकजनोदिधीर्षया जागर्ति सद्वृन्दैः—"शिवः काशी शिवः काशी शिवः काशी शिवः शिवः ॥ शिवः काशी शिवः काशी काशीकाशी शिवः शिवः ॥" इत्यादितन्नाम निर्देशपुरःसरं जोघुष्यमाणः । अत एवेदं श्रीकाशीखण्डं श्रीकाशीक्षेत्रमाहात्म्यसूचकं सर्वजनसमादरणीयतामर्हति । एतस्य रचनाचातुर्यं श्रीव्यासमहर्षेः संस्कृतसरस्वतीसौन्दर्यं प्रकाशयति । एतस्य श्रीकाशीखंडस्य सुस्पष्टार्थबोधाय परममान्यविद्वद्वरिष्ठश्रीमत्परमहंसपरिव्राजकाचार्यभगवत्पूज्यपादशिष्यश्रीरामेन्द्रवनशिष्यश्रीरामानन्दमुनीन्द्रवर्यैः सरला सुबोधाऽनेकप्रमाणैरुपबृंहिता विद्वज्जनमनोरञ्जनी व्युत्पित्सुजनसाहाय्यकारिणी टीका निर्मितास्ति । अथ च पृथक्तया केवलसटीककाशीखण्डजिघृक्षूणां सज्जनानां केवलकाशीखण्डलब्धये पृथगपि मुद्रयित्वेदं प्रकाशमानीयत । अतश्च संप्रार्थयामः समस्तसज्जनान्—येषां श्रीस्कान्दमहापुराणं समग्रं संजिघृक्षितं ते समग्रस्कान्दमहापुराणसंग्रहाय स्वाभिप्रायं निवेदयेयुः । येषां केवलं श्रीकाशीखण्डमेव संग्रहणीयं स्यात्त एतत्सटीकमतिशुद्धमास्माकीन "श्रीवेङ्कटेश्वर" मुद्रणालये पुष्टचिक्कणपत्रेषु मुद्रयित्वा प्रकाशितं संगृह्य सफलयन्तु मे मुद्रणपरिश्रममिति सविनयमभ्यर्थयते—

श्रीमतां कृपाकांक्षी—क्षेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम्—मुद्रणालयाध्यक्षः—मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीस्कान्दमहापुराणान्तर्गतकाशीखण्डपूर्वार्द्धोत्तरार्द्धाध्यायस्थितविषयानुक्रमणिका ॥

अध्यायाः	विषयाः.	प०	पृ०
१	मंगलाचरणम्, सूताग्रे व्यासस्य काशीखंडकथोपक्रमकरणम्, नारदस्य नर्मदांभसि स्नात्वोंकारमभ्यर्च्य च पुरतो विंध्यपर्वतदर्शनम्, प्रसंगेन विंध्याचलवर्णनम्, मेरुस्त्वामवमन्यत इति नारदमुनेर्वचः श्रुत्वा विंध्यस्य वर्धनेन श्रीसूर्यमार्गावरोधवर्णनञ्च	१	१
२	एकतो नैशतिमिरसंबंधादन्यत्र दिवाकरचंडातपात् त्रैलोक्यानवस्थावर्णनम्, देवकृतविधिस्तवनम्, सत्यलोके भयाभावं दर्शयितुं सत्यलोकागंतृपुरुषपुण्याचारवर्णनपूर्वकं विधिकृतदेवसांत्वनम्, ब्रह्मणो वचनात्त्रैलोक्यापन्निवारणाय श्रीक्षेत्रकाशीस्थागस्त्यमुनिसमीपे गन्तुं श्रीकाशीशकाशीदर्शनोत्सुकामरप्रयाणवर्णनम्, संक्षेपतः काशीवर्णनञ्च	१०	१
३	काशीक्षेत्रे मणिकर्णिकास्नानविश्वेश्वरदर्शनादियात्रां विधाय सुराणामगस्त्यमुन्याश्रमगमनम्, अमरकृतागस्त्याश्रमवर्णनम्, सुराणां तदाश्रमे लोपामुद्रामुन्यगस्त्यरूपदर्शनञ्च	१६	१
४	बृहस्पतिप्रणीतागस्त्यमुनिस्तुतिप्रसंगेन लोपामुद्रावर्णनम्, एतत्प्रसंगेन पतिव्रताचारनिरूपणम्, सूर्यमार्गनिरोधकविंध्यवृद्धिनिवारणाय प्रार्थ्यमानसुराचार्यवचनानुसारेणागस्त्यकृतामराश्वासनम्, अमराणां स्वर्लोकगमनञ्च	२०	१
५	अमरप्रार्थनामंगीकृत्य विंध्यविवृद्धिनिराकरणाय सह भार्यया अगस्त्यमुनेः काशीक्षेत्राद्बहिः प्रयाणम्, काशिकावियोगदुःखितस्य मुनेर्विश्वनाथकालभैरवादिदेवताज्ञाग्रहणपूर्वकं विशेषतो विलापकरणम्, अगस्त्यमुनिमायांतं दृष्ट्वा विंध्यस्य खर्वतास्वीकारः, यावन्ममागमनं पुनर्भवेत् तावत् खर्वतरो भवेति मुनेरद्रिं प्रति कथनम्, मुनेर्महालक्ष्मीदर्शनम्, अगस्त्यमुनिकृतमहालक्ष्मीस्तोत्रम्, महालक्ष्मीवरदानम्, अगस्त्यस्याग्रे प्रयाणञ्च	२३	२
६	परोपकारप्रशंसनम्, श्रीशैलशिखरादिपुण्यस्थानदर्शनेन मुक्तिश्चेत्किं काशीमहत्त्वमिति लोपामुद्राप्रश्नः, तीर्थमाहात्म्यवर्णनप्रसंगेन काशीक्षेत्रमहत्त्वकथनम्, सर्वतीर्थानि काशीक्षेत्रप्रापकाणीति काशीश्रैष्ठ्यद्योतनञ्च	३०	२
७	शिवशर्माख्यमथुरापुरीस्थद्विजस्य स्वदेहे समागतां जरां दृष्ट्वा चिंतोद्गाराः, सप्तपुरीयात्रार्थं गृहाद्बहिर्द्विजस्य प्रयाणम्, अयोध्यायात्रां समाप्य प्रयागे समागमनम्, प्रसंगेन प्रयागमाहात्म्यवर्णनम्, द्विजस्य काशीयात्राकथनम्, तस्य महाकालपुरीप्रयाणम्, तत्प्रसंगान्महाकालमाहात्म्यकथनम्, मायापुरीतीर्थयात्राकथनम्, द्विजस्य मायापुर्यां देहावसानम्, पुण्यशीलसुशीलनामकवैष्णवगणाधिष्ठितस्वर्णविमानमास्थाय द्विजस्य नभोवर्त्मारोहणञ्च	३३	१
८	मुक्तिपुर्यां मायाख्यपुर्यां मृतस्य शिवशर्मणो द्विजस्य कथं मोक्षानवाप्तिरिति लोपामुद्रासतीप्रश्नः, षट्पुरीषु मायादिषु साक्षात्सायुज्यं नास्तीति दर्शयितुं शिवशर्मविष्णुगणसंवादारंभः, द्विजप्रश्नानुसारेण पिशाचगुह्यकगांधर्वलोकस्थितपुरुषसंपादितसदाचारवर्णनम्, यमलोकमागतस्य द्विजस्य शिवशर्मणः सत्कारपूर्वकंपूजनार्थं धर्मराजस्यागमनम्, धर्मराजस्य सौम्यमूर्तेः सौम्यवचांसि श्रुत्वा कथमिदमिति द्विजप्रश्नः, यमस्य रूपद्वयनिरूपणप्रसंगेन संक्षेपतो यमलोकव्यवस्थावर्णनञ्च	३८	२
९	अप्सरोलोकवर्णनम्, सूर्यलोकवर्णनम्, सूर्योपासनावर्णनप्रसंगेन गायत्रीमंत्रमाहात्म्यानिरूपणम्, अर्घप्रदानविधिनिरूपणञ्च	४३	१
१०	सहस्राक्षपुरीवर्णनम्, आर्चिष्मत्याख्यवीतिहोत्रपुरीवर्णनम्, कृशानूत्पत्तिकथनप्रसंगेन ज्योतिष्मतीपुरीस्थविश्वानराख्यमुनीतिहासकथनम्, शुचिष्मतीकथनानुसारेण मुनेः		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ०	विषयाः.	प०	पृ०
	काशीक्षेत्रे गत्वा वीरेश्वरशिवलिंगसमीपे तपोनुष्ठानकथनम्, त्रयोदशे मासि बालरूपेण लिंगे शिवदर्शनम्, अभिलाषाष्टकस्तोत्रकथनम्, शिवाद्वरलाभेन संतुष्टस्य मुनेः स्वगृहे प्रयाणञ्च	४६	२
११	कालान्तरेण विश्वानराच्छुचिष्मत्यां गर्भाधानम्, शुभमुहूर्ते सुतोत्पत्तिः, जातकर्मादिसंस्कारनिरूपणम्, हस्तसामुद्रिकं वीक्ष्य नारदोक्तं बालस्य वैश्वानरस्य गंडांतंश्रुत्वा मातापित्रोः शोककरणम्, अपमृत्युहरणाय मुनिकुमारस्य काश्यां लिंगं संस्थाप्यानुष्ठानकरणम्, तृतीयसंवत्सरे वरप्रदानाय समागतस्य कुलिशायुधस्य मुनिकुमारं प्रति वचनम् नाहं त्वत्तो वरान् ग्रहीतुमुत्सहे इति वचः श्रुत्वा इन्द्रस्य कुलिशपातनोद्योगं विलोक्य मुनिकुमारस्य मूर्च्छावगमः, तत्रैव शिवप्रादुर्भावः, शिववराद्वैश्वानरस्य दिक्पतित्वादिप्राप्तिवर्णनञ्च	५१	१
१२	नैर्ऋतलोकवर्णनम्, विन्ध्याटव्यां पल्लीपतेः पिंगाक्षस्य विश्वनाथपुरीयातुकामसार्थप्राणपरिरक्षणार्थं प्राणदानाल्लोकपालत्वप्राप्तिः, वारुणलोकवर्णनम्, कर्दमस्य प्रजापतेः पुत्रस्य शुचिष्मतो जलक्रीडायां शिशुमारेण सरस्याहरणम्, सरसि मग्नं श्रुत्वाऽपि सुतं पूजायामधिकासक्तस्य सविधे मुनेः शिवगणेन साशिशुमारस्य बालकस्यानयनम्, शुचिष्मतो मुनिकुमारस्य काश्यां शिवलिंगं संस्थाप्य तपश्चरणम्, शिवप्रसादाद्वारुणलोकसंप्राप्तिश्च	५७	२
१३	जगत्प्राणस्य पवनस्य गंधवतीपुरीवर्णनम्, कश्यपपुत्रस्य पूतात्मनः श्रीकाशीक्षेत्रे लिंगं संस्थाप्य तपश्चरणम्, तस्य शिवाल्लोकपालत्वप्राप्तिकथनम्, गुह्यकेश्वरस्यालकावतीपुरीवर्णनम्, कांपिल्यनगरे यज्ञदत्तनाम्नो ब्राह्मणस्य नाम्ना गुणनिधिरप्यगुणनिधिर्द्यूतासक्तो मद्यपः पुत्रो बभूव तस्य बहुकालं मात्रा प्रच्छन्नदुराचारस्य सुतस्य दुष्कीर्तिं संपश्यता पित्रा स्वगृहान्निष्कासनम्, स्वार्थदीपदशोद्द्योतेन लिंगमौलितमोहरस्य बहूपोषितस्यास्य शिवरात्र्यां शिवालयेऽन्नापहरणाद्घातितस्य कालिंगदेशराजपुत्रत्वप्राप्तिवर्णनम्, तत्र तस्य शिवालयेषु दीपदानात्कल्पे विश्रवःसुतत्वमधिगम्य दुःसहतपश्चरणतः शिवसख्यालकाराज्यादिलाभवर्णनञ्च	६१	१
१४	रुद्रभक्तोषितैशानीपुरीवर्णनम्, अजैकपादादिरुद्रगणस्थापितैशानलिंगमाहात्म्यवर्णनम्, चन्द्रलोकवर्णनम्, ब्रह्मणो मानसात्समुद्भूतस्य सोमस्य वाराणस्यां लिंगं विधाय तत्पुरो महत्तपश्चरणम्, शिवप्रसादात्तस्य महैश्वर्यलाभकथनञ्च	६६	२
१५	दक्षप्रजापतेः षष्टिदुहितृभिरेकपतिलाभाय लिंगं संस्थाप्य वाराणस्यां तपःकरणात् शिववरानुसारतः सोमं पतिमासाद्य संपादितस्य नक्षत्रलोकस्य संक्षेपतो वर्णनम्, अत्रिपुत्रस्य सोमस्य गुरुभार्यापहरणम्, रुद्रचंद्रमसोर्युद्धकथनम्, युद्धं निवार्यब्रह्मणो वचनाच्चंद्रस्य बृहस्पतये तारासमर्पणम्, तस्यां बुधस्योत्पत्तिः, बुधकृतशिवाराधनम्, बुधस्य शिववराल्लोकपालत्वादिवरैश्वर्यलाभवर्णनञ्च	६८	२
१६	समरे देवैर्घातितानां दानवेंद्रांधकसैनिकानां संजीवनीमंत्रतो भार्गवशुक्रकृतं पुनरुज्जीवनम्, देवप्रार्थनया नंदिकेश्वरादानाय्य शुक्रस्य शिवेन मुखे निक्षेपणम्, अंधकस्य ससैन्यस्य प्रमथैः सह युद्धवर्णनम्, शुक्रतः शुक्रस्य बहिर्निःसरणम्, शुक्रस्य वाराणस्यां तपश्चरणाच् शिवप्रसादतो लोकाधिपत्यादिवरप्राप्तिवर्णनञ्च	७१	२
१७	श्रीशिवस्य भूमौ निपतिताद् भालस्थलतः स्वेदाबिंदोर्लोहितांगस्योत्पत्तिः, शिवप्रसादात्तस्य लोकाधिपत्यादिकथनम्, आंगिरसस्य शिवप्रसादार्थं वाराणस्यां तपःकरणम्, शिवस्य वरप्रसादाल्लोकपतित्वदेवगुरुत्वलाभः, मार्तण्डात्संज्ञाप्रतिकृतौ छायायां शनैश्चरोत्पत्तिकथनम्, तस्य वाराणस्यां तपश्चरणाल्लोकपालत्वग्रहमुख्यत्वलाभवर्णनञ्च	७६	२
१८	मरीच्यादिब्रह्ममानससृष्टपुत्रसप्तर्षिलोकवर्णनम्, अरुंधतीनक्षत्रस्थानदर्शनादिवर्णनञ्च	८१	१
१९	पितुरंकाधिष्ठितस्य सपत्नमात्रा तिरस्कृतस्य ध्रुवस्य मातृवचनात् तपस्यार्थं विपिनप्रवेशः तत्र सप्तर्षिसमागमः, द्वादशाक्षरमंत्रमुपदिश्य मुनीनामन्तर्धानञ्च	८२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ०	विषयाः	प०	पृ०
२०	यमुनातटे मधुवने स्थितस्य ध्रुवस्य तपस्यावर्णनम्, इन्द्रप्रेषितनानाविधतपोविघ्ननिरूपणम्, ध्रुवस्य साक्षाच् श्रीभगवतो दर्शनञ्च	८६	२
२१	ध्रुवकृतश्रीभगवत्स्तोत्रनिरूपणम्, ज्योतिश्चक्रस्य आधारपदं ते दास्यामि तथापि मया सह काशीं याहि तत्र लिंगार्चनं कृत्वा कृतकृत्यो भवेति ध्रुवं संदिश्य तेन सह भगवतः काशीपुर्यां प्रयाणम्, तत्र ध्रुवस्य लिंगसंस्थापनेन कृतकृत्यत्वमासाद्य स्वगृहे प्रयाणञ्च	९०	१
२२	महर्जनस्तपोलोकवर्णनम्, सत्यलोके समागतानां ब्रह्मणा सह संवादाः, द्विजप्रशंसनपूर्वकं ब्रह्मकृतकाशीवर्णनञ्च	९५	१
२३	भूलोकाच्छिवलोकपर्यंतं योजनप्रमाणकथनम्,शिवोपासनतो विष्णोरात्मसाम्यप्राप्तिकथनपूर्वकं शिवकृतविष्ण्वभिषेकवर्णनञ्च	९९	१
२४	द्विजस्य मायापुर्यां मरणतो विष्णुलोके ब्रह्मणो वत्सरपर्यंतं बहुविधोपभोगप्राप्तिः, ततश्च पुण्यक्षये नंदिवर्धनग्रामे भूपत्वमासाद्य प्रजारंजनकर्तुरस्य काशीमाहात्म्यश्रवणसंजातहर्षस्य काश्यां प्रयाणम्, विश्वेश्वरानुग्रहात् तत्र शिवप्रासादं विधाय वृद्धकालेश्वराख्यस्थापितशिव लिंगाग्रे तपस्यतः परीक्षणार्थमागतशिवपरीक्षणोत्तरं सह तेन सस्त्रीकस्य राज्ञस्तस्मि न्नेव लिंगे लयो भविष्यति इति विष्णुगणप्रतिपादितशिवशर्मद्विजभाविस्थितिवर्णनम्	१०१	१
२५	अगस्त्यमुनेः सभार्यस्य श्रीगिरिं प्रदक्षिणीकृत्य स्कंदवने कुमारदर्शनम्, अगस्त्यकृतस्कंद-स्तोत्रम्,काशीमाहात्म्यविषये स्कंदं प्रति मुनिप्रश्नः, स्कंदनिरूपितकाशीवासफलकथनञ्च	१०४	२
२६	अविमुक्तक्षेत्रोत्पत्तिवर्णनम्, चक्रपुष्करिणीतीरेविष्णोस्तपोवर्णनम्, मणिकार्णिकाया उत्पत्ति वर्णनम्, मणिकार्णिकास्नानविधिकथनञ्च	१०७	२
२७	गंगामाहात्म्यवर्णनं दशहरास्तोत्रकथनञ्च	११३	१
२८	शिवाधिष्टानगौरवतः काश्यां गंगास्नानान्महापातकोपपातकशमनवर्णनम्, कलिंगदेशे वाहीक नाम्नः कस्य चिन्नाममात्रद्विजस्य वृषलीपत्युः अरण्ये व्याघ्रेण मारणम्, साम्थि [illegible] समादाय गच्छतो गृध्रस्य अन्यगृध्रेण युद्धम्, दैवतस्तदस्थिगंगाजलसंगमान्महाश्चर्यम् नानाविधपातकक्षालनाय कुंभीपाकादिनरकेषु प्रक्षिप्तस्यापि सुखावाप्तिं विलोक्य सर्वेषां विस्मयकरणम्, अन्ते विमानमारुह्य वाहीकस्य स्वर्गलोकप्रयाणम्, गंगामाहात्म्य-कथनञ्च	११९	१
२९	अशक्तानां स्नानतुल्यफलावाप्तिमिच्छूनां महावीघनिवारकश्रीगंगासहस्रनामस्तोत्रम् ...	१२२	१
३०	मणिकर्ण्यां भगीरथनृपानीतगंगासंगमात् क्षेत्रमाहात्म्याधिक्यकथनम्, दक्षिणोत्तरभागे असिवरणावस्थितिकथनम्, देहलीविनायकस्य शिवाज्ञां विना अंतःप्रवेशं कुर्वतां विघ्नो-त्पादनाय नियोजनम्, धनंजयवणिगितिहासकथनम्,काश्या वाराणसीनामव्याख्या-नञ्च	१३६	१
३१	ब्रह्मणः शिरश्छेत्तु शिवात्कालराजस्योत्पत्तिः शिवनिंदाकारिब्रह्मशिरश्छेदात्कालराजस्य का-पालिकवेषेण काश्यां प्रयाणम्, तत्र गतस्य कालभैरवस्य पृष्ठलग्नाया ब्रह्महत्यायाः पातालगमनम्, तत्र कपालमोचनतीर्थे सर्वेषां पातकक्षालनाय कालभैरवस्थितिवर्णनञ्च	१४२	२
३२	पूर्णभद्रनामकयक्षस्य शिवाराधनात्कनककुंडलाख्यभार्यायां हरिकेशाभिधपुत्रजन्मकथनम्, बाल्यावस्थामारभ्य शिवासक्तस्य हरिकेशस्य पितुस्ताडनभयात् गृहान्निर्गतस्य काश्यां प्रयाणम् ,पार्वतीं प्रति शिवनिरूपितानंदकाननवर्णनम्, आनंदकानने हरिकेशस्य तपः संतुष्टमहेश्वरवराद् दंडपाणित्वकथनम्, दंडपाण्यष्टककथनञ्च	१४७	२
३३	ज्ञानवपीनामकतीर्थोत्पत्तितन्माहात्म्यवर्णनम्, काशीनिवासिहरिस्वामिकन्याया ज्ञानवापीं सेवमानायास्तद्रूपमोहितविद्याधरेणाहरणम्, मलयपर्वते विद्याधरेण साकं राक्षसस्य युद्ध-वर्णनम्, युद्धे राक्षसविद्याधरयोः परस्परप्रहारेणैव मरणाद्धरिस्वामिकन्याया विद्याधरं पतिं मन्यमानाया देहपरित्यागकथनम्, उभयो राजदेहमासाद्य तत्र चित्रपटीविलोकनञ्च	१५५	२
३४	माल्यकेतुकलावत्योस्तयोः काशीप्रयाणम्, तत्र काशीयात्रां विधाय ज्ञानवापीनिकटे शिवो-पदेशाद्विमानमारूह्योभयोः शिवलोकगमनकथनम्, ज्ञानवापीमाहात्म्यकथनञ्च	१६१	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ०	विषयाः.	प०	पृ०
३५	काशीप्रापकब्राह्मणसदाचारवर्णनप्रसंगेन नित्यकर्तव्यधर्मनिरूपणम्	१६४	२
३६	सदाचारवर्णनप्रसंगेन द्विजानां ब्रह्मचर्यधर्मनिरूपणम्	१७४	२
३७	सुलक्षणां स्त्रियं विना गृहस्थाश्रमस्य न सिद्धिस्तस्माद्विस्तरेण स्त्रीलक्षणनिरूपणम् ...	१७७	१
३८	अष्टविधविवाहवर्णनम्, शुभाचारस्य द्विजादीनां काशीप्राप्तिकारस्य विस्तरेण कथनञ्च	१८२	१
३९	दिवोदासनृपेतिहासकथनप्रसंगेनाविमुक्ते क्षेत्रे अविमुक्तेशाशिवलिंगोत्पत्तिवर्णनम् ...	१८५	२
४०	काशिकाक्षेत्रगमनविघ्नविधायिद्विजादिनिषिद्धाचारस्वरूपवर्णनम्, गृहस्थाश्रमिणां विहिताचारनिरूपणञ्च	१८८	१
४१	वानप्रस्थयतिधर्माणां विस्तरेण निरूपणे योगाख्यानम्	१९३	१
४२	निकटासन्नमृत्युचिह्नकथनपूर्वकं श्रीक्षेत्रकाशीमाहात्म्यमिश्रितकालवंचनोपायकथनम्	२००	२
४३	दिवोदासे काश्या मुषित्वा भुवो राज्यं शासति सर्वेषां विश्वेश्वरादिदेवानां भुवं परित्यज्य मंदराचलगमनम्, दिवोदासराज्ये प्रजासौख्यवर्णनम्, भुवं परित्यज्य अग्नेरपि स्वर्गगमनं विलोक्य राज्ञा व्याहृतस्य स्वसामर्थ्यस्य वर्णनञ्च	२०२	२
४४	विश्वनाथभवान्योर्मंदरगिरिवरे स्थितयोः काशीवियोगदुःखवर्णनम्, दिवोदासनृपस्य काशीक्षेत्रपरित्यागार्थं शिवस्य योगिनीगणप्रेषणवर्णनञ्च	२०६	१
४५	चतुःषष्टियोगिनीनां शिवाज्ञया काशीपुरे राज्ञो दिवोदासस्य विघ्नार्थं प्रवेशकथनम्, तासां नामनिरूपणञ्च	२१०	१
४६	दिवोदासस्य विघ्नमुत्पाद्य काश्यां बहिर्निष्कासनाय शिवादिष्टरव्यागमनम्, दिवोदासराज्ये नानाविधप्रयत्नेन छिद्रान्वेषणोद्यतस्य रवेर्द्वादशधा आत्मानं विभज्य काश्यामेव निवासकथनम्, लोलार्कस्थानकथनम् , तत्तीर्थयात्राविधिमाहात्म्यकथनञ्च	२११	२
४७	उत्तरार्ककुंडानिरूपणम्, तत्र स्थिताया द्विजकन्याया मातापित्रोर्मरणानन्तरं उत्तरार्कसमीपे तपश्चरणम्,तस्यै स्वसखीत्वरूपगौरीवरप्रदानम्, उत्तरार्ककुंडमाहात्म्यनिरूपणञ्च	२१३	२
४८	कृष्णपुत्रस्य सांबस्य नारदापमानात् कृष्णशापप्रभवकुष्ठरोगावगमकथनम्, तत्परिहाराय काश्यां तस्य स्वनाम्ना कुंडं विधाय तपश्चरणाद्रोगनिवृत्तिः कुंडमाहात्म्यसहितसांबादित्यमाहात्म्यकथनञ्च	२१५	१
४९	पांडवानां वनवासप्रसंगेन काश्यांगमनम्, तत्र द्रौपदीकृतसूर्याराधनात् तस्यै सूर्यतः स्थालीप्राप्तिः, द्रौपद्याराधितरवेः स्थाननिरूपणम्, मयूखादित्यमाहात्म्यवर्णनञ्च	२१७	१
५०	उच्चैःश्रवसो वर्णविषये कद्रूविनतयोर्वादकथनम्, तत्र कापट्येन विनतायाः पराभवात् कद्रूदास्यकरणम्,मातुर्दास्याप्रनोदाय गरुडस्य सुधाहरणवर्णनम् ,विनतागरुडयोः काश्यां शिवलिंगस्थापनपूर्वकं तपश्चरणम्, तयोर्वरप्रदानपूर्वकखखोल्कादित्यस्थानमाहात्म्यकथनञ्च	२२०	१
	इति श्रीकाशीखंडपूर्वार्धानुक्रमणिका समाप्ता ।		
५१	अरुणादित्यमाहात्म्यवर्णनम्, विनतादास्यकारणकथनम्,वृद्धहारीतोपासितवृद्धादित्यमाहात्म्यकथनम्, विष्णुवचनात्काश्यां शिवलिंगं प्रतिष्ठाप्य सूर्यस्य तपश्चरणम्, तस्य केशवादित्यनामप्राप्तिपूर्वकमाहात्म्यवर्णनम् , विमलगंगायमादित्यानां संक्षेपतो वर्णनञ्च	२२६	१
५२	दिवोदासनृपनिष्कासनाय शिवप्रेषितस्य चतुराननस्य द्विजवेषेण काश्यां दशाश्वमेधकरणात्तीर्थस्य दशाश्वमेधनामकरणकथनम्, तत्तीर्थमाहात्म्यवर्णनञ्च	२२९	१
५३	शिवप्रेषितानां योगिनीभानुविधीनां काश्यामेव शिवलिंगानि संस्थाप्य तत्रैव स्थितानां स्थितिं परिज्ञातुं दिवोदासस्य निष्कासनाय च शंकुकर्णादीनां शिवाज्ञया काशीप्रयाणवर्णनं काशीवर्णनञ्च	२३१	२
५४	शंभोरत्यंतप्रियकपर्दिगणस्थापितशिवलिंगमाहात्म्यवर्णनप्रसंगेन वाल्मीकिसंज्ञकद्विजेतिहासकथनम्, तत्कृतपिशाचोद्धारवर्णनम् , पिशाचमोचनतीर्थयात्रामाहात्म्यकथनञ्च	२३५	१
५५	पिंगलादिगणस्थापितशिवलिंगमाहात्म्यनिरूपणम्,येये गणाद्याः काशीस्थितिं विलोकयितुं शिवेन प्रेषितास्तेषा मपुनरावृत्तिं विलोक्य काश्यां शिवाज्ञया गणेशस्य प्रवेशवर्णनञ्च	२३७	२
५६	गणेशस्य ज्यौतिषिकद्विजवेषमाश्रित्य काश्यां प्रवेशवर्णनम्, स्वमायया पुरीस्थितानेकजनमोहं विधाय राज्ञोंतःपुरे गणेशस्य राजस्त्रीभिः सहालापादिवर्णनम्, दिवोदासनृपसमागमे राज्ञो वर्णनपूर्वकं गणेशस्य तस्मै किंचिद्भविष्यकथनञ्च	२३९	१
५७	विष्णुना दिवोदासे काशीत उच्चाटिते सति मंदरादागत्य काश्यां शिवेन कृताया गणेशस्तु-		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ०	विषयाः.	प०	पृ०
	तेर्वर्णनम्, गणेशस्य ढुंढिनामकथनम्, भगीरथहरिश्चन्द्रकपर्दादिगणेशस्थानकथनञ्च	२४१	१
५८	गणेशेऽपि विलंबिते चिंतापरवशस्य शिवस्य दिवोदासनृपस्य काशीत उच्चाटनाय विष्णुनिरूपणम्, काश्यां विष्णोर्नानाविधस्थाननिरूपणम्, विष्णुलक्ष्मीगरुडैः सौगतपरिव्राजिकाशिष्यरूपैर्बौद्धधर्मस्थापनप्रकारवर्णनम्, प्रजाऽधर्मरुचीः कृत्वा गणेशवचनानुसारेण द्विजरूपस्य विष्णोः राज्ञे शिवलिंगस्थापन कथनम्, शिवलिंगमभ्यर्च्य राज्ञो दिवोदासस्य विमानमारुह्य कैलासपुरप्रयाणवर्णनञ्च	२४६	१
५९	वेदशिरसो मुनेः शुचिमप्सरसं दृष्ट्वा स्खलितवीर्यस्य वीर्यात्कन्योत्पत्तिकथनम्, धूतपापाख्यकन्यायाः पितुर्वचनात्तपश्चर्याकरणम्, ब्रह्मणो वरदानात्तस्याः पावित्र्यविशेषताप्राप्तिकथनम्, तां दृष्ट्वा मर्दस्य कामोद्दीपनात्परस्परं शापप्रसंगेन तयोर्नदीनदत्वप्राप्तिकथनम्, गंगायमुनासरस्वतीकिरणाधूतपापाधर्मनदसंगमात्पंचनदतिर्थिकथनम्, तन्माहात्म्यकथनञ्च	२५१	१
६०	अग्निबिंदुमुनिकृतविष्णुस्तुतिवर्णनम्, तत्र बिंदुमाधवावस्थानवर्णनम्, बिंदुमाधवमाहात्म्यवर्णनञ्च	२५४	२
६१	आदिकेशवतार्क्ष्यकेशवादिवैष्णवस्थानानां संक्षेपतो वर्णनम्, बिंदुमाधवनिरूपितनानास्थानतयात्रादिनिरूपणम्, बिंदुमाधवकथनादग्निबिंदुमुनेः सुदर्शनचक्रसंस्पर्शात्सायुज्यलाभनिरूपणञ्च	२५८	१
६२	दिवोदासनृपे विष्णुकथनानुसारेण कैलासपुरं प्रविष्टे विष्ण्वादीनां मंदरे हरसन्निधौ शिवानयनार्थं गमनम्, शिवकृतकपिलतीर्थवर्णनम्, कापिलतीर्थे वृषध्वजप्रादुर्भावकथनञ्च	२६४	१
६३	जैगीषव्यमुनितपोवर्णनम्, तस्य शिवाद्वरप्राप्तिकथनम्, ज्येष्ठेशमाहात्म्यकथनञ्च ...	२६७	१
६४	मंदराचलादागतं शिवं सगणं साम्बं द्रष्टुं नानातीर्थागतानां द्विजानां शिवदर्शनम्, शिवप्रणीतकाशीक्षेत्ररहस्यकथनञ्च	२६९	१
६५	पराशरेश्वरमांडव्येश्वरजाबालेश्वरकंदुकेश्वरादिनानाविधशिवलिंगमाहात्म्यकथनम्	२७२	१
६६	शैलेश्वरादीनां काशीक्षेत्रस्थितशिवलिंगानां निर्णयकथनम्	२७४	१
६७	गौरीं प्रति शिवनिरूपितरत्नेश्वराशिवलिंगमाहात्म्यकथनम्, कस्याश्चिन्नर्तक्याः शिवरात्र्यां,		

अ०	विषयाः.	प०	पृ०
	रत्नेश्वरसमीपे नर्तनगानादिना जागरणाच्च शिवप्रसादेन देहान्तरे वसुभूतिनामकगंधर्वराजतनयात्वलाभवर्णनम्, रत्नावलीनाम्न्यास्तस्या गंधर्वकन्याया रत्नेश्वरलिंगवरप्रभावात् परमाश्चर्यजनकविवाहादिचरित्रवर्णनम्, दाक्षायणीश्वरमाहात्म्यकथनञ्च	२७८	१
६८	महिषासुरपुत्रस्य गजासुरस्य विधिवरादन्यावध्यस्य शूलेन शिवकृतविनाशकथनम्, कृत्तिवासेश्वरोत्पत्तिकथनम्, कृत्तिवासेशमाहात्म्यकथनञ्च	२८३	२
६९	नानाधिष्ठानस्थितानां शुभदानामष्टषष्टिसंख्यकानामायतनानां काश्यां समागमनकथनम्	२८६	१
७०	वेतालादिपरिवारसहितानां नवकोटिसंख्यचंडीनां काशीरक्षणाय स्थानेस्थाने स्थापनवर्णनम्	२९०	१
७१	रुरुदैत्यपुत्रस्य पुंभिरजेयस्य दुर्गासुरस्य त्रैलोक्यराज्यकर्तुर्नाशाय स्वनिकटे तमानेतुं भगवत्याः कालरात्रिप्रेषणम्, कालरात्रिवचनात्ससैन्यस्य दुर्गदैत्यस्य भगवत्याः समीपे आगमनम्, युद्धोद्यतं दुर्गसैन्यं विलोक्य देवीशरीराच्छक्त्युद्गमवर्णनम्, दुर्गासुरस्य भगवत्या सह युद्धवर्णनञ्च	२९२	२
७२	भगवतीशरीरोत्पन्नशक्तीनां नामनिरूपणम्, दैत्यदेवीयुद्धवर्णनम्, दुर्गदैत्यवधसुसंतुष्टदेवकृतदुर्गादेवस्तुतिकथनम्, दुर्गाभैरवपूजनफलकथनञ्च	२९६	१
७३	पार्वतीं प्रति शिवनिरूपितोंकारादिचतुर्दशलिंगगणनम्, ओंकारेशोत्पत्तिवर्णनप्रसंगेन ब्रह्मकृतोंकारस्तुतिकथनम्, ओंकारेशलिंगमाहात्म्यनिरूपणञ्च	२९९	१
७४	पाद्मकल्पीयभारद्वाजसुतदमनस्य विद्यामधीत्य विरक्तस्य रेवातीरे अमरकंटकक्षेत्रे गर्गनाम्नो मुनेर्दर्शनम्, गर्गमुनिनिरूपितोंकारमाहात्म्यवर्णनञ्च	३०४	२
७५	सप्तजन्मार्जितपापनिवारणैकदक्षत्रिलोचनेश्वराविर्भावकथनम्, तन्माहात्म्यनिरूपणञ्च	३०८	१
७६	मणिमाणिक्यनिर्मितत्रिलोचनप्रासादस्थितपारावतद्वंद्वेतिहासकथनपूर्वकं त्रिलोचनाख्यशिवलिंगमाहात्म्यकथनम्	३१०	१
७७	केदारेश्वरमाहात्म्यकथनप्रसंगेनोज्जयिनीस्थितद्विजदारकेतिहासकथनम्	३१४	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ०	विषयाः.	प०	पृ०
७८	यनधर्माराधितधर्मेश्वराख्यशिवलिंगमाहात्म्यनिरूपणम्	३१६	२
७९	धर्मतपःसाक्षिणां कीरशिशूनां शिववरात्कैलासपदाप्तिकथनपूर्वकं धर्मेशमाहात्म्यकथनम्	३१७	२
८०	पुलोमजां प्रति शिवानिरूपितस्य चैत्रशुक्लतृतीयामारभ्य फाल्गुनशुक्लतृतीयापर्यंतं विश्वभुजाख्यगौरीविनायकदैवतमनोरथतृतीयाव्रतस्य विस्तरेण वर्णनम्	३२०	१
८१	सुरगुरोर्वचनाद्वृत्रहत्योद्भवत्राससंतप्तेंद्रस्य काश्यामुत्तरवाहिन्यां स्नात्वा धर्मेशाख्यशिवलिंगसन्निधौ तपश्चरणम्, ब्रह्महत्यानिवृत्तिपूर्वकमिंद्रस्य पूर्ववत्तेजःप्राप्तिकथनम्, दुर्दमभूपेतिहासकथनपूर्वकधर्मेशमाहात्म्यकथनञ्च	३२२	१
८२	वीरेश्वराविर्भावप्रसंगेन मित्राजित्पराक्रमवर्णनम्, महावैष्णवस्य मित्राजिन्नृपस्य कंकालासुरं त्रिशूलेन हत्वा कंकालासुरहृतमलयगंधिनीं विद्याधरकन्यां गांधर्वेणोद्वाह्य तया सह काश्यामागमनम्, अभीष्टतृतीयाव्रतविषये राज्ञीं प्रति नृपप्रश्नश्च	३२४	१
८३	नृपप्रश्नानुसारेण मार्गशीर्षशुक्लतृतीयायां राज्ञीनिरूपितगौरीविधिदैवताभीष्टतृतीयाव्रतनिरूपणम्, व्रतकरणाद्राज्ञीपुत्रलाभः, मूलर्क्षे जातस्य मात्रा विकटादेवीपुरतः स्थापितस्य तस्य शिशोर्देव्यनुज्ञया माहेश्वर्यादिमातृसमीपे प्रेषणम्, मातृविसृष्टस्य बालकस्यानंदकानने पंचमुद्रादेवीनिकटे तपश्चरणाच्छिवलिंगाविर्भावः, अस्यैव लिंगस्य वीरेश्वराख्याप्राप्तिस्तन्माहात्म्यकथनम्, वीरेश्वराशिवेन तस्मै राजपुत्राय नानाविधवरान्दत्त्वाकथितानामसिगंगासंगमस्थितपुण्यस्थानानां क्रमेण वर्णनञ्च	३२७	२
८४	मित्रजिन्नृपपुत्राय वीरेश्वराख्याशिवनिरूपितानां श्रीमदादिकेशवादिभगीरथतीर्थानां कथनम्	३३०	१
८५	आनंदकानने शिवलिंगं संस्थाप्य बहुतपस्तप्त्वापि फलाभावाद्दुर्वाससि काशीं शप्तुमुद्यते शिवस्य लिंगादाविर्भाववर्णनम, दुर्वासःकामपूरणात्तच्छिवलिंगस्य कामेश्वराभिधानं तन्माहात्म्यकथनञ्च	३३३	१
८६	विश्वकर्मनिर्मितशिवलिंगस्य काश्यां विश्वकर्मेश्वराभिधानकथनपूर्वकतन्माहात्म्यवर्णनम्	३३५	१
८७	दक्षेश्वरोत्पत्तिकथनपूर्वकं केनाचित्प्रसंगेन शिववैरिणो दक्षप्रजापतेः शिवौ विना यज्ञारंभवर्णनम्	३३८	१
८८	नारदमुखादध्वरवृत्तमाकर्ण्य शिववचनमनादृत्यैव सत्या दक्षयज्ञगमनम्, तत्र शिवनिंदां पितुर्मुखादाकर्ण्य परमकुपितायास्तस्या देहविसर्जनवर्णनञ्च	३४१	१
८९	शिवगणवीरभद्रकृतं यज्ञविध्वंसनपूर्वकं दक्षशिरोनाशनम्,पुनःशिवकथनाद्दक्षस्य मेषवदनत्वं संपाद्य विमोचनम्, काश्यां शिवलिंगं संस्थाप्य दक्षस्य तपःकरणम् दक्षेश्वरोत्पत्तिकथनञ्च	३४४	१
९०	पार्वतीकृतपार्वतीशशिवलिंगस्थापनं तन्माहात्म्यनिरूपणञ्च	३४७	२
९१	विश्वनाथशिवलिंगात्पूर्वतो गंगास्थापितगंगेशलिंगमाहात्म्यवर्णनम्	३४८	१
९२	ब्रह्मणः सकाशाद्गंगासाम्यरूपं वरमलब्ध्वा काश्यां शिवलिंगं संस्थाप्य रेवायास्तपःकरणम्, नर्मदेश्वरदत्तरेवावरदानकथनपूर्वकताल्लिंगमाहात्म्यवर्णनञ्च	३४८	२
९३	शिवं पतिं लब्धुं काश्यां सतीस्थापितसतीश्वरलिंगमाहात्म्यवर्णनम्	३४९	१
९४	अमृतेश्वरकरुणेश्वरज्योतीरूपेश्वराणां शिवलिंगानां माहात्म्यवर्णनम्	३५०	१
९५	काश्यामपि भुजमूर्ध्वीकृत्य हरिः सेव्यो हरिः सेव्य इति व्यासवचनं श्रुत्वा शैलादिकृतव्यासभुजवाक्स्तम्भनवर्णनम्, विष्णुकठसंस्पर्शनापस्तंभननिवृत्तौ व्यासकृतशिवस्तुतिवर्णनञ्च	३५१	२
९६	व्यासशापमोचनकथनम्, कृच्छ्रादिस्वरूपकथनम्, व्यासस्य काशीतो बहिर्निष्कासनं च	३५३	२
९७	सर्वपापापनोदनकाशीक्षेत्रस्थितसर्वतीर्थकथनम्	३५८	२
९८	काश्यां मुक्तिमंडपे श्रीविश्वेश्वरसमागमनमहोत्सवस्य विशेषेण वर्णनम्	३६४	२
९९	श्रीशंभुना ब्रह्मविष्ण्वादिदेवेभ्यः प्रतिपादितस्य श्रीविश्वेश्वराख्यकाशीक्षेत्रपरमदैवतस्य माहात्म्यनिरूपणम्	३६७	१
१००	काशीखडान्तर्गतेतिहासानुक्रमवर्णनम्, पञ्चतीर्थ्यादियात्रावर्णनम , काशीखण्डश्रवणपठनफलवर्णनञ्च	३६९	१

॥काशीखंडस्थविषयानुक्रमोऽयं यथामति ॥ विरच्य श्रीविश्वनाथपदयोरार्पितो मया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ श्रीपरमात्मनेनमः ॥ ॥ सच्चिदानंदसंदोहंभक्तैककामोदमंदिरम् ॥ सादरंप्रणुवेभक्त्याश्रीगोपीजनवल्लभम् ॥ १ ॥ संहारखेदादिवयःस्वयंप्रभुःश्रितोऽविमुक्तंभगवान्स होमया ॥ दिशत्यभीक्ष्णंपरमात्मतारकंभजेतमानंदवनेतनुत्यजाम् ॥ २ ॥ माधवंगिरिजांढुंढिंभैरवंदंडनायकम् ॥ मणिकर्णींगुहांकाशीमुदक्स्रोतोवहांनुमः ॥ ३ ॥ अद्वैताब्जविकास कैकतरणिंहार्दांधकारच्छिदंशांत्यादेर्निलयंदयैकशरणंवैराग्यवन्मूर्त्तिकम् ॥ हृत्कांतारमहाटवीसुविलसत्कामेभपंचाननंश्रीरामेंद्रवनाभिधंगुरुमहोभक्त्यानमामस्तराम् ॥ ४ ॥ यत्पादांवुरुहध्या नाद्वाईमेगलितंतमः ॥ परमंतंगुरुंभक्त्याश्रीदेवेंद्रवनंनुमः ॥ ५ ॥ व्यासोक्तिस्कांदसंज्ञेऽयंपुराणेकाशिकाह्वयः ॥ खंडोयस्तस्यटीकेयंरामानंदेनरच्यते ॥ ६ ॥ श्रीवासुदेवाभिधभूसुरेंद्रगुणैकरत्ना मलसत्त्ववार्द्धेः ॥ वाक्याग्रहेणाहमिहप्रवृत्तःक्षंतव्यमस्मच्चपलंकृतींद्रैः ॥ ७ ॥ अध्यायानांशतंप्रोक्तंव्यासेनात्रतदादितः ॥ विंध्यनारदसंवादोवर्ण्यतेतिमनोहरः ॥ ८ ॥ तत्रादौतावच्चिकीर्षितस्य पुराणस्यनिष्प्रत्यूहपरिसमाप्तिप्रचयाभ्यांनानेतिहासपुराणशास्त्रप्रबंधसंबंधाविष्कृतलीलावतारोभगवान्द्वैपायनोविघ्नाधिराजंपूजयति ॥ तंमन्महइति ॥ तत्रसर्वनाम्नस्तावदौत्सर्गिकंप्रसिद्धार्थत्वम् ॥ यथाहुः ॥ सर्वनामप्रसिद्धार्थंप्रसाध्यार्थविधानकृदिति ॥ नचयदाग्नेयोऽष्टाकपालोभवतीत्यत्रव्यभिचारः ॥ वचनानित्वपूर्वत्वादितिन्यायेनतदर्थस्यतत्रान्यतोऽलब्धत्वात्प्रसिद्धार्थत्वंसर्वनाम्नोवला दपलप्यते ॥ अत्रतुतदपवादाभावेपुनरुत्सर्गस्यस्थितिरेवेत्यभिप्रेत्यप्रसिद्धार्थमाह ॥ तमिति ॥ तंप्रसिद्धंपारमेश्वरंरूपंमन्महेध्यायामःचिंतयामेत्यर्थः ॥ मन्महइतिमनुअववोधनइत्यस्मात्तना देर्यातोर्लडुत्तमपुरुषबहुवचनं लोपश्चास्यान्यतरस्यांम्वोरित्युकारलोपः ॥ सर्वनाम्नापरामृष्टंविशेष्यंदर्शयति ॥ करिगणेशाननमिति ॥ करःशुंडादंडोविद्यतेयेषांतेकरिणोहस्तिनइतियावत्

श्रीगणेशायनमः ॥ ॥ तंमन्महेमहेशानंमहेशानप्रियार्भकम् ॥ गणेशानंकरिगणेशाननमनामयम् ॥ १ ॥

गणाःसमूहाः करिणांगणाःकरिगणास्तेषामीशानईश्वरःश्रेष्ठइत्यर्थः ॥ तस्येवाननंतस्याननमिवाननंयस्यसतथातम् ॥ एवंहिपाद्मेश्रूयतेचक्रेश्वरमाहात्म्यप्रसंगे ॥ विघ्नाधिराजेजातेतदवलोक नायब्रह्मादयोमिलिताअभूवन्शनैश्चरस्तुनागतोभूत् ॥ ततोऽविकायांरुष्टायामागतेचतस्मिन्गणेशस्यमौलिरपतत् ॥ ततोमहादेवेनहस्तिवृंदेंद्रशिरश्छित्त्वायोजितमिति ॥ कदाचिद्गात्रोद्वर्त्तनंकृत्वा तज्जनितमलेनगणेशप्रतिकृतिंविधायजीवंचतस्यांसंचार्ययावन्मयास्नायतेतावदत्रकोप्यागंतुंनदेयइतिगौरीतंव्याजहार ततश्चतस्मिन्द्वारिस्थितेकुतश्चिदागतोमहेशस्तेनप्रतिरुद्धोऽतःपुरंप्रवेष्टमलभमानः क्रुद्धःसन्बहुयुद्धंकृत्वापश्चात्तस्यमौलिमुज्जहार पश्चाच्छोकरोषाभ्यामाविष्टायांपार्वत्यांकरिगणेंद्रशिरश्छित्त्वायोजितमितिचभाविष्ये ॥ गजीभूयक्रीडतोर्भगवतोर्जातत्वाद्वागजाननइतिपुराणांतरम् ॥ तथाहि॥गजासुरः किललीलयास्वर्गमाक्रम्यदेवान्व्याजहार हेदेवामयासार्द्धंयुद्धंचध्वंयद्वात्रिदिवंविहायपलायध्वं अथवाकरंप्रयच्छतेति ॥ ततोदेवैःकःकरोदेयइत्युक्ते तेनोक्तं स्वकर्णौधृत्वास्वशिरोधून नंस्वशिरःकुट्टनं[१]चमदग्रेकर्त्तव्यमिति ततोदेवाब्रह्माणंप्रतितदुक्तंन्यवेदयन् कथंतस्यासुराधमस्याग्रेऽस्माभिरेवंकर्तव्यमिति ततोब्रह्माविष्णुश्चविश्वनाथंगत्वातदेतत्सर्वंविज्ञापितवंतौ ततईश्वरेणगजीभूय क्रीडतोरावयोर्गजाननःपुत्रोजातोरितितेनसमारणीयइत्युक्त्वागणेशमाहूयतत्सर्वंनिवेद्यत्वमपिगजाननःसोपिताद्दशइतित्वमेवतस्यप्रतियोद्धेत्यादिप्रोत्साह्यत्वयैवहंतव्यइत्युक्तेनगणेशेनोक्तं तदामयासमा रणीयोयदितेनप्रार्थितोदंडोमह्यंदीयतइति तदादेवैरुक्तं भवानस्माकंस्वामीत्वय्यग्रेक्रियमाणेऽस्माकंखेदोनास्ति यदुच्यतेतत्कर्तव्यमिति ततोगजाननोगजासुरंहतवानित्यतएवेदानीमपिगणेशस्याग्रे

१ भावप्रधाननिर्देशाच्चापलमित्यर्थः । २ विघातकृदित्यपिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीसार्वभौमभट्टाचार्य्यादाक्षिणात्याश्चस्वकर्णौधृत्वाशिरोधूननंशिरःकुट्टनंचकुर्वतीति ॥ उक्तंच ॥ विनायकंवंदकमस्तकाहतिसन्नादसंघुष्टसमस्तविष्टपम् ॥ नमामिनित्यंप्रणतार्त्तिनाशनंकविंकवीनामुपमश्रवस्तममिति ॥ कदाचिदीश्वरंद्रष्टुंकैलासंगतेनभार्गवेणरामेणगणेशप्रतिरुद्धेनाभ्यंतरंगंतुमलभमानेनतज्जनितप्रचंडकोपानलेनगणेशस्यहस्तात्परशुंबलात्कारेणगृहीत्वागणेशस्यशिरोऽच्छेदि ततोज्ञाताशेषवृत्तांतेनेश्वरेणरामायाभ्यधायित्वमद्यारभ्योननपरशुनापरशुरामोभीविष्यसीतिगजेंद्रस्यशिरश्छित्त्वागणेशस्यमौलौयोजितमितिचपौराणिकाः ॥ क्रियाशक्तिमत्सूत्रात्मत्वाद्धलाधिक्यमाह ॥ गणेशानमिति ॥ नन्दिभृंगिप्रमुखागणास्तेषांतेषुवाईशानमीश्वरंनियंतारमितियावत् ॥ गणश्चासावीशानश्चतंवेत्यर्थः ॥ योनितोपिश्रैष्ठ्यमाह ॥ महेशानप्रियार्भकमिति ॥ महांश्चासावीशानश्चेतिमहेशानोमहेश्वरइत्यर्थस्तस्यप्रियावल्लभाउमाचिद्रूपाशक्तिस्तस्याअर्भकस्तयोर्वाऽर्भकोमहेशानप्रियार्भकइतिवा ॥ प्रियश्चासावर्भकश्चेतिप्रियार्भकः ॥ यद्वाप्रसिद्धत्वेहेतुमाह ॥ महेशानप्रियार्भकमिति ॥ ननुपरमात्मनःसर्वात्मत्वादन्येषामपितदीयानांरूपाणांभूयसांभावादिदमेवपारमेश्वरंरूपंकस्मादादावनुस्मर्य्यतेतत्राह ॥ महेशानमिति ॥ विरोधिलक्षणयापुण्यजनोराक्षसइतिवन्महांतोत्राकारप्रश्लेषाद्वाऽमहांतोहिंस्रस्वभावाविघ्नाःश्रेयोविघातकत्वात्तिचतेस्वकार्येप्रभुत्वादीशाश्चतानानयतिचेष्टयतिप्रवर्त्तयतीतितथातम् ॥ अथवानविद्यतेमहउत्सवोयेभ्यस्तेऽमहाविघ्नास्तेषामीशानं विघ्नप्रोत्सारणायैवविघ्नानामधिष्ठातारमितियावत् ॥ तत्प्राप्तिस्तुप्राणिनांस्वदोषवशादितिभावः॥महांश्चासावीशानश्चेतिवा महत्त्वंचात्रविघ्नाधिष्ठातृत्वेनैव॥एतदिहाकूतम्॥सर्वात्मकोपिपरमात्माविघ्नाधिराजोपाधिरेवविघ्नान्जरीहर्ति॥तदुक्तं सजयतिसिंधुरवदनोदेवोयत्पादपंकजस्मरणं।वासरमणिरिवतमसांराशिंनाशयतिविघ्नानामिति॥ महोदयेचपुराणारंभेविघ्नानांसंभवात्तन्निरासाययुक्तंपरस्य प्रकृतदेवतात्मकस्यैवानुसंधानमितिभावः ॥ यद्वा ननुकृष्णंद्वैपायनंविद्धिसाक्षान्नारायणंप्रभुम् । कोह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेदितिवैष्णवाद्युक्तेर्व्यासस्येश्वरत्वावगमाद्विघ्नाएवनसंभाव्यंतेऽतःकथंतन्निवृत्त्यर्थंगणेशानुस्मरणमित्याशंकायामाह॥ महेशानमिति ॥ महांश्चासावीशानश्चेतिमहेशानस्तम् ॥ अत्रापिमहत्त्वंब्रह्मादिनियंतृत्वेनैवबोद्धव्यम् ॥ तथाचायमर्थःसम्पद्यते॥ महतांब्रह्मादीनामीशानंनियंतारम् अपूजितंसंतंतत्कार्याणांप्रतिबद्धारमसिद्धिप्रदमित्यर्थः ॥ तदुक्तंसंक्षेपशारीरके ॥ आरंभाःफलिनःप्रसन्नहृदयोयश्चेत्तिरश्चामपिनोचेद्विश्वसृजोप्यलंविफलतामायांत्युपायोद्यमाः । विश्वैश्वर्यमतोनिरंकुशमभूद्यस्यैवविश्वप्रभोःसोऽयंविश्वहितेरतोविजयतेविघ्नेश्वरोविश्वकृत् ॥ अत्रापिचवक्ष्यति ॥ जयसृष्टिकृतांवन्द्य त्वदुष्टदृष्टिविशिखैर्निहतान्निहन्मिदैत्यान्पुरांधकजलंधरमुख्यकांश्च। कस्यास्तिशक्तिरिहयस्त्वदृतेपितुच्छंवांछेद्विधातुमिहसिद्धिदकार्य्यजातमित्यादि ॥ इदमत्रतत्त्वम् ॥ गणेशव्यासादीनामीश्वरत्वाविशेषेपिसेव्यसेवकत्वंबाध्यबाधकत्वं च। यथोभेशरमेशयोर्यथावारामपरशुरामयोरिति ॥ तदुक्तंवैष्णवे सर्वंविष्णुमयंजगदित्युपक्रम्य ॥ तथाप्यनेकरूपस्यतस्यरूपाण्यहर्निशं। बाध्यबाधकतांयांतिकल्लोलाइवसागरइति ॥ नन्वसिद्धंमहेशानत्वंगणेशस्यशनैश्चरावलोकमात्रेणशिरःपातायवगमादित्याशंक्याहानामयमिति ॥ आमयोरोगस्तेनतापत्रयंलक्ष्यते ॥ ततश्चायमर्थः ॥ नविद्यतेआमयस्तापत्रयंयस्ययस्तादितिवासतथातम् ॥ अयंभावः ॥ नशिरःपातादिकमनीश्वरत्वेकारणमवश्यंभाविनोऽर्थस्येश्वरस्यापिदुष्परिहरत्वात् ॥ तदुक्तम् ॥ अवश्यंभाविनोभावाभवंतिमहतामपि । नग्नत्वंनीलकण्ठस्यमहाहिशयनंहरेरिति ॥ यद्वा शिरःपातादिकंतुलीलामात्रंयथानिकुंभपरिघप्रहारेणमोहःश्रीकृष्णस्य यथाचेंद्रजित्प्रयुक्तनागपाशबंधनंश्रीदाशरथेर्यथावाबलेर्ध्वरेयाच्ञाश्रीविष्णोरिति ॥ तदुक्तंहरिवंशे ॥ नूनमात्मेच्छयाकृष्णस्तथाचक्रेसुरोत्तमः कोहिशक्तोमहात्मानंयुद्धेमोहयितुंहरिम् ॥ भागवतेच ॥ कोवेत्तिभूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम् ॥ क्वाहोकथंवाकतिवाकदेतिविस्तारयन्क्रीडसियोगमायामिति ॥ श्रुतौचविष्णोः शिरःप्रचिच्छिदतुरिति ॥ यद्वा ग्रंथारंभेमंगलायपञ्चायतनदेवतानुसंधानमनुविधत्ते ॥ तामिति ॥ तंप्रसिद्धम् ॥ अत्राऽकारप्रश्लेषात् अःवासुदेवश्चासौमहेशानश्चतंमन्महेध्यायामइतिसर्वत्र ॥ तत्रअमित्युक्तेअक्षराणामकारोस्मिइतिभगवद्वचनादकाराक्षरेगच्छतितद्वारणायमहेशानमित्युक्तम् ॥ तावत्युक्तेविश्वनाथेगच्छतितद्वारणायअकारोवासुदेवःस्यादितिवचनादमित्युक्तम् ॥ महेशानप्रियार्भकं ॥ विश्वनाथभवानीगणेशेतिद्वंद्वैकवद्भावेनत्रयंनिर्दिष्टम् ॥ तत्रार्भकमित्युक्तेशाखविशाखादावतिव्याप्तिःस्यात्तद्वारणायगणेशानमित्युक्तम् ॥ तथापिस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिकार्तिकेयेगच्छतितद्वारणायकरिगणेशाननामिति ॥ अत्रसमा सनिष्ठस्यार्भकपदस्यविशेष्यत्वंछांदसम् ॥ तत्कथ्यतांमहाभागयादिविष्णुकथाश्रयम् अथवास्यपदांभोजमकरन्दलिहांसता मिति तथाप्राचीनवर्हिर्भगवान्पाताळतलचारिणः समुद्रतनयायातुकृतदारोऽभवत्प्रभुरितीत्यादिवद्बोद्धव्यम् ॥ अनामयंनविद्यतेआमयोरोगमात्रंयस्मात्तंसर्वरोगनाशकंसूर्यविरंचिनारायणशंकरा त्मकम् ॥ आरोग्यंभास्करादिच्छेदितिवचनादित्यर्थः ॥ १ ॥ एवंविघ्नाधिराजंप्रपूज्यजगन्निःश्रेयसमाशासानःपुराणार्थाश्रयभूतमविमुक्तंप्रस्तौति ॥ भूमिष्ठेति ॥ साकाशीअपायाज्जगत्पायादि त्यन्वयः ॥ सेतिप्रसिद्धेत्यर्थः ॥ प्रसिद्धत्वंचास्याःसोऽविमुक्तेउपास्योयएषोऽनंतोऽव्यक्तआत्मासोऽविमुक्तेप्रतिष्ठितइत्याद्ययाश्रुत्याबोद्धव्यम् ॥ अविमुक्तंकाशीत्यनर्थांतरम् ॥ तत्त्वग्रेवक्ष्यति ॥ काशीति ॥ अनाख्येयंस्वप्रकाशंचैतन्यंप्रकाशतेस्यामितिकाशी ॥ तथाचवक्ष्यति ॥ काशतेऽत्रयतोज्योतिस्तदनाख्येयमीश्वरः ॥ अतोनामापरं चास्तु काशीति प्रथितं प्रभो ॥ यद्वा काशंतेराजंते स्वप्रकाशतयाऽस्यांतनुत्यागमात्रेणप्राणिनइतिकाशी ॥ एतदप्युक्तमत्रैव ॥ कीटाःपतंगामशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः ॥ मंडूकमस्त्याःकृमयोपिकाश्यांत्यक्त्वाशरीरंशिवमाप्नुवंतीत्यादि ॥ अत एवोक्तंअपायाज्जगत्पायादिति ॥ अपगतोऽयनमयोज्ञानम् ॥ सर्वेगत्यर्थाज्ञानार्थाइतिन्यायाद्यस्मिन्नित्यपायमज्ञानंतत्कार्यंतस्मात् ॥ गच्छतिजन्मादिषड्भावविकारान्प्राप्नोति ॥ सर्वेगत्यर्थाः प्राप्त्यर्थाइतिन्यायाज्जगत्समष्टिव्यष्टिजीवजातमित्यर्थः ॥ पायान्मोचयत्वित्यर्थः ॥ यद्वासर्वाभ्योऽयोध्यादिपुरीभ्योऽधिकतयाकाशतेराजतइतिकाशी ॥ वक्ष्यतिहि । अन्यानिपुण्यक्षेत्राणि काशीप्राप्तिकराणिवै । काशींप्राप्यविमुच्येतनान्यथाकल्पकोटिभिरिति ॥ अधिकत्वेजगन्मोचकत्वेचहेतुंवदन्विरोधाभासालंकारलक्षणैश्चतुर्भिर्विशेषणैर्विशिनष्टि ॥ भूमिष्ठेत्यादियस्यांमृताजंतवइत्यं

भूमिष्ठापिनयात्रभूस्त्रिदिवतोप्युच्चैरधःस्थापियायाबद्धाभुविमुक्तिदास्युरमृतंयस्यांमृताजंतवः ॥
यानित्यंत्रिजगत्पवित्रतटिनीतीरेसुरैःसेव्यतेसाकाशीत्रिपुरारिराजनगरीपायादपायाज्जगत् ॥ २ ॥

तेन ॥ भूमिष्ठापिनयात्रभूरितिविरोधाभासःसर्वत्रस्पष्टएव ॥ भूमौतिष्ठतीतिभूमिष्ठा ॥ अंबांबगोभूमिसव्येत्यादिनाषत्वम् ॥ भूमिष्ठत्वेनभूम्यवयवत्वेनायोध्यादिक्षेत्रवत्प्रतीयमानापियाकाशीअत्रभूमौ भूर्नभवति भूम्यधिकरणिकाभूर्नभवति भूमौनतिष्ठतीतियावत्॥अन्यैवेयंकाचिद्भूरित्यर्थः॥ईश्वरस्यत्रिशूलाग्रेस्थितत्वात् ॥ वक्ष्यतिच ॥ क्षेत्रमेतत्त्रिशूलाग्रेशूलिनस्तिष्ठतिद्विज अन्तरिक्षेनभूमिष्ठंनेक्षंते मूढबुद्धयःभूर्लोकेनचसंलग्नमंतरिक्षेममालयम् विमूढास्तंनपश्यंतिमुक्ताःपश्यंतिचेतसेत्यादि ॥ त्रिदिवतोप्युच्चैरधःस्थापियेति॥अधस्तिष्ठतीत्यधःस्थाभुवर्लोकादीनांषण्णांमध्यस्थापियाकाशीत्रिदिवतोप्यु च्चैस्त्रिदिवतोप्युपरितिष्ठतीत्यर्थः ॥ प्रलयसमयएवत्रिशूलाग्रेणोर्ध्वीकृत्यविश्वनाथेनधृतत्वात् ॥ तत्रदैनंदिनप्रलयेत्रिदिवतःस्वर्लोकादित्येव ॥ प्राकृतप्रलयेतुत्रयोब्रह्मविष्णुमहेश्वरादीव्यंतिक्रीडं त्यस्मिन्नितित्रिदिवंब्रह्मांडंतस्मादितिव्याख्येयम्॥तथाचवक्ष्यति॥अहोजनानांजडताविहायकाशींयदन्यत्रनयंतिचेतः ॥ परिस्फुरद्गांगजलाभिरामांकामारिशूलाग्रधृतांलयेपि॥महासंवर्तसंवृत्ततापाद्विश्वे शपालिताम् स्वर्धुन्याहारयष्ट्येवराजितांकण्ठभूमिषु ॥ सनत्कुमारसंहितायांच ॥ गतेपरार्द्धद्वितयेविलीनेजगत्यशेषेमयिदेविसर्वे रक्षंतिसर्वैर्विविधायुधौघैर्वाराणसींकाशितसूक्ष्मसिद्धिमिति ॥ ननुदैनंदिन प्रलयेत्रिशूलाग्रेणमहेशेनोर्ध्वीकृत्यधृतत्वात्कथंचित्काशीतिष्ठतुनाम प्राकृतेतुप्रलयेप्रकृतिकार्यमात्रस्यसर्वस्यविलयात्कथंकाशीतिष्ठेत्कुतस्तरांगणाःकुतस्तमांत्रिशूलमिति ॥ किंचधर्त्तुर्विश्वनाथस्या प्यभावःश्रूयते ॥ तथाचोक्तवान्वासिष्ठेभगवान्रामः ॥ परमेष्ठ्यपिनिष्ठावान्ह्रियतेहरिरप्यजः भवोप्यभावमायातिकैवास्थामादृशेजनेइति ॥ तस्मात्तदेतत्सर्वमर्थवादमात्रमिति न भूर्लोकेनचसंलग्नंतत्क्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रंत्वंतरिक्षगं अयोगिनोनवीक्षंतेपश्यंत्येवचयोगिनः अविमुक्तमिदंक्षेत्रमपित्रह्मांडमध्यगम् ब्रह्मांडमध्येनभवेत्पंचक्रोशप्रमाणतः यथायथाहिवर्द्धेतजलमेकार्णवस्यच तथातथोन्नयेदीशस्तत्क्षेत्रंप्रलया
दपि क्षेत्रमेतत्त्रिशूलाग्रेशूलिनस्तिष्ठतिद्विजाः अंतरिक्षेनभूमिष्ठंनेक्षंतेमूढबुद्धयः यावंतोभास्वतःस्पर्शाद्वासंतेसैकताःकणाः तावंतोद्रुहिणाजग्मुर्नैत्येषामणिकर्णिका तामसींप्रकृतिंप्राप्यकालोभूत्वा चराचरम्
ग्रसामिलीलयादेविकाशींरक्षामियत्नतः सामाणिकर्णिकेतीयंनाभिर्गाभीर्यभूमिका ब्रह्मांडगोलकंसर्वंयस्यामेतिलयोदयम् नयदाभूमिवलयंनयदापांसमुद्भवः तदाविहर्त्तुमीशेनक्षेत्रमेतद्विनिर्मितम् अभावः
कल्प्यतेमूढैर्यदाचशिवयोस्तयोः क्षेत्रस्यास्यतदाभावः कल्प्योनिर्वाणकारिणेत्याद्यभ्यासदर्शनात्॥अभ्यासेहिअर्थस्यभूयस्त्वंदूरतस्तूपचरितार्थत्वम्॥यथा अहोरमणीयारमणीयालक्ष्मीरिति ॥ पुराणेष्व
र्थवादत्वंयेवदंतिनराधमाः तैरार्जितानिपुण्यानितद्वदेवभवंतिहि समस्तकर्मनिर्मूलसाधनानिनराधमः पुराणान्यर्थवादेनमृतोनरकमश्नुते यावद्ब्रह्मासृजत्येतज्जगत्स्थावरजंगमम् तावत्सपच्यतेपापीनरकां
तेषुसंततम् अहोहिवाक्येचतुरक्षरेद्वेपुण्यस्यपापस्यनिदानभूते उच्चारणादेवनृणांमुनीन्द्रानारायणश्चेतितथार्थवादः॥ पुराणेषुद्विजश्रेष्ठाःसर्वधर्मप्रवक्तृषु प्रवदन्त्यर्थवादत्वंयेतेनरकभाजनाइत्यादीनांचभूय
सामर्थवादवक्तृनिंदापराणांबृहन्नारदीयेदर्शनात् ॥ शैवेच वेदाःप्रतिष्ठितादेविपुराणेनात्रसंशयः पुराणमन्यथाकृत्वातिर्यग्योनिमवाप्नुयात् सुशांतोपिसुदांतोपिनगतिंप्राप्नुयात्क्वचिदित्यादि ॥ अत्रापि
चवक्ष्याति॥उदाहरंतियेमुढाःकुतर्कबलदर्पिताः काश्यांसर्वार्थवादोयंतेविट्कीटायुगेयुगइत्यादि ॥ तर्हियुक्तिविरोधस्यकागतिरितिचेद्यैवगतिस्सैवगतिरितिब्रूमः ॥ नहिश्रुतिस्मृतीहासपुराणात्माभगवान्
वराकेणयुक्तिविरोधेनास्माभिरनुयोक्तव्यः ॥ तथाचश्रुतिः॥नैषामतिस्तर्केणापनेयेति॥ननुग्रावाणःप्लुवंते यजमानःप्रस्तरइत्यादीनां वेदवाक्यानामप्यर्थवादोदृश्यतेतद्वदत्रापिभविष्यतीतिचेद्दृश्यतांनाम
पुराणानांतुतदपवादस्योक्तत्वादिति ॥ किंचप्राकृतप्रलयेब्रह्मांडतदन्तर्वर्तिनांलयेनभवितव्यं नचकाशीब्रह्मांडगा ॥ तथाचात्रैववक्ष्यति दर्शितमेवतत्पूर्वम् ॥ अविमुक्तमिदंक्षेत्रमपिब्रह्मांडमध्यगं ब्रह्मां
डमध्येनभवेत्पञ्चक्रोशप्रमाणतः यथायथाहिवर्द्धेतजलमेकार्णवस्यच तथातथोन्नयेदीशस्तत्क्षेत्रंप्रलयादपीत्यादि ॥ अतोब्रह्मांडाद्बहिःस्थितायाःकाश्याःकुतोनाशावकाशोभुशुंडवत् ॥ तथाच
वासिष्ठेनिर्वाणप्रकरणेभुशुंडाख्यानेभुशुण्डवाक्यम् ॥ ब्रह्मांडपारमासाद्यतत्वांतेविमलेपदे सुषुप्तावस्थयातावत्तिष्ठामिप्रलयेसति यावत्पुनःकमलजःसृष्टिकर्मणितिष्ठति तत्रप्रविश्यब्रह्मांडंतिष्ठामि
विहगालयइति ॥ श्लोकद्वयस्यायमर्थः ॥ प्रलयेप्राकृतप्रलयेसतिब्रह्मांडस्यपारंबहिर्भागंमासाद्यतत्त्वांतेब्रह्मांडावरणभूतानामप्तेजोवाय्वाकाशाहंकारमहत्प्रकृतिरूपाणांसप्तानामंतेविमलेपदेसुषुप्तावस्थ
यासमाध्यवस्थयातावत्तिष्ठामियावत्कमलजःपुनःसृष्टिकर्मणितिष्ठति ॥ तदापुनःसृष्टौब्रह्मांडंप्रविश्यविहगालयेतिष्ठामीति ॥ अन्यथाब्रह्मांडमावरणानिचभित्वालिंगशरीरेणवैकुंठंगतानामपिवि
देहकैवल्यप्रसंगात् ॥ यत्त्वत्रब्रह्मांडपारमासाद्येत्यत्रमहाप्रलयसंपत्ताविति पाठंप्रकल्प्यमहाप्रलयसंपत्तावित्यादिचिरजीवित्वातिरेकार्थवादः ॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे । परस्यांतेकृतात्मानः
प्रविशंतिपरंपदम् तेब्रह्मलोकेषुपरांतकालेपरामृताःपरिमुच्यंतिसर्वेइत्याद्यागमाज्जीवन्मुक्तानामधिकारिणांमहाप्रलयेविदेहमुक्त्यवगमादित्यद्वयारण्यश्रीचरणैरुक्तम्॥तन्न ॥ तेषामागमानांब्रह्मांडांतरव
स्थितजीवन्मुक्तविषयत्वाद्ब्रह्मांडबहिर्गतानांतदभावात् ॥ एतेननाहोनरात्रिर्ननभोनभूमिर्नासीत्तमोज्योतिरभून्नचान्यत् श्रोत्रादिबुद्ध्याद्युपलभ्यमेकंप्राधानिकंब्रह्मपुमांस्तदासीत् तद्धेदंतर्ह्यव्याकृतमा
सीत्सदेवसोम्येदमग्रआसीत् इत्यादिश्रुतिस्मृतीनांविरोधाभावोपिव्याख्यातः ॥ विशेषतोविरोधाभावमग्रेव्याख्यास्यामः ॥ यत्तुदनंदिनेथप्रलयेत्रिशूलकोटौसमुत्क्षिप्यपुरींहरःस्वाम् बिभर्त्तिसंवर्त्तमहा
स्थिभूषणस्ततोहिकाशीकलिकालवर्जितेति ॥ तत्तुनप्राकृतप्रलयव्यावृत्यर्थम् ॥ अप्यर्थेनाथशब्देनमहाप्रलयस्यसमुच्चीयमानत्वात् ॥ अतएवसंवर्त्तमहास्थिभूषणइतिविशेषणम् ॥ अन्यथामहापद
घटितस्यैतस्यास्थिशब्दस्यैवैयर्थ्यापातात् ॥ कलिकालवर्जितत्वेवास्यतात्पर्यम् ॥ किंचप्राकृतेप्रलयेप्राकृतानांप्रकृत्यधीनानामेवलयेनभवितव्यम् नचकाश्यादिकंप्राकृतंकिंत्वचिंत्यशुद्धसत्त्वात्मक ॥ २ ॥
मेवेश्वरेच्छयाव्यक्तीभावमापन्नंश्रीकृष्णशरीरवत् ॥ नचासिद्धोदृष्टांतः ॥ नराकृतिपरंब्रह्मेत्यादिबहुतरवचनविरोधात् तेषामर्थांतरकल्पनायांकारणाभावात् भक्तानुग्रहार्थंब्रह्मणएवस्वाधीन्यामाय
यादेहाकारतोपपत्तेश्च ॥ तथाचस्कांदेस्वामिकार्त्तिकेयवाक्यम् ॥ कैवल्यंयत्परंब्रह्मनिराकारमगोचरं तच्चमूर्त्यापरिणतंभक्तानांभक्तिहेतुतइति॥विष्णुपुराणेच॥नाकारणात्कारणाद्वाकारणाकारणान्नच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरीरग्रहणंव्यापिन्धर्मत्राणायतेपरमिति अतएवोक्तंश्रीधरस्वामिना ॥ जीवस्यानाद्यविद्ययामिथ्याभूतदेहसंबंधः ईश्वरस्यतुचिद्घनलीलाविग्रहाविर्भावइतिमहान्विशेषइति ॥ तथाचमहतांवचनमुप निषदर्थमुलूखलेनिबद्धमिति ॥ किंच कृष्णशरीरस्यजगत्कारणत्वात्तन्नाशेदाहेवाजगतोपिनाशदाहप्रसंगात् ॥ कृष्णशरीरस्यजगत्कारणत्वंचित्सुखाचार्येणब्रह्मस्तुतौतनुभूतमयस्येत्यत्रतनुभिः सूक्ष्मरूपैराब्रह्मस्तंबपर्यंतंभूतैर्व्याप्तस्यकारणशरीरस्येत्युक्तत्वात् ॥ अतएवतन्नपांचभौतिकं तेषांततएवोत्पत्तेः ॥ नचशरीरत्वात्पांचभौतिकत्वमनुमेयम् ॥ तत्रस्वकर्मजन्यत्वस्योपाधित्वात् नचपुत्रादिकर्मजन्यशरीरेव्यभिचारः ॥ आत्मावैजायतेपुत्रः अर्द्धोवाएषआत्मनोयत्पत्नीतिश्रुतेस्तत्रापिस्वकर्मजन्यत्वसत्त्वात् नचधर्तुरभावोब्रह्मविष्णुशंकरभावमापन्नस्यैवेक्षणमात्रेणधारकत्वात् ॥ ससेतुर्विधृतिरितरेषांलोकानामसंभेदायेतिश्रुतेः ॥ नचब्रह्मादिदेहानामंतर्द्धानवत्काश्यादिशरीराणामप्यंतर्द्धानेनभवितव्यमितिवाच्यम् ॥ ईश्वरेच्छायाःस्वतंत्रत्वात् ब्रह्मादिदेहानतर्द्धायापिकाशी गणास्त्रिशूलंचरक्षणीयामित्येतादृश्याअपीच्छायाः।सिसृक्षादिवत्सभंवात् ॥ नचब्रह्मादिदेहानामप्यंतर्द्धानमस्ति तेषांदेहानामप्रलीयमानत्वात् ॥ तथाचोक्तं पंचात्मकस्यविष्णोरहमेवाग्र इतिसाधारणलक्षणात्मकेपद्येकैवल्यदीपिकाकारेण ॥ नापिसाकारेषुचतुर्व्व्याप्तिस्तेषामाकारातिरोहितत्वादिति ॥ नचैककालीनाःसर्वपरमाणवःसमग्रोपादेयप्रबंधशून्याःआरंभकत्वात् नष्टपवनारंभकपरमाणुवदित्यादिनैयायिकादिसमयसिद्धप्रलयसाधकानुमानात्काश्यादिदेहानामप्यंतर्द्धानेनभवितव्यमितिवाच्यम् ॥ नरशिरःकपालानुमानवत्स्मृत्यातस्यबाधितविषयत्वादितिसंतो ष्टव्यमलमितिविस्तरेण ॥ सनत्कुमारसंहितादिवचनानुसारेणैतद्व्याकृतमास्माभिरतःस्वसिद्धांतरोषकषायीकृतनयनैर्नैयायिकादिभिःशिरःकुट्टनंनविधेयमिति ॥ पंचानांयच्छब्दानांसेत्यने नान्वयः ॥ यावद्धाभुविमुक्तिदेति ॥ याकाशीभुविबद्धापिभूमंडलेबद्धत्वेनप्रतीयमानापिमुक्तिदाभवतीतिपूर्वस्यापेरनुषंगः ॥ मनुष्यत्वेनप्रतीयमानोपिदाशरथिर्यथामुक्तिदइत्यभिप्रायः ॥ अत्रहिजंतोःप्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेताविमुक्तंनविमुंचेदित्यादिश्रुतेः ॥ नचात्रभूमिष्ठेत्यनेनपुनरुक्तिर्विरोधाभासभेदेनार्थभेदो पलंभात् ॥ अतएवस्युरमृतंयस्यांमृताजंतवइति ॥ यस्यांकाश्यांमृताजंतवःप्राणिनोऽमृतंकैवल्यंस्युः कैवल्यभाजोभवंतीत्यर्थः ॥ यद्वाकेनप्रकारेणमुक्तिदास्यादितिपृच्छायामाह स्युरमृतंयस्यांमृताजंतवइति ॥ यद्वाऽतिप्रसंगंवारयति स्युरमृतंयस्यांमृताजंतवइति ॥ अथवायेभुविबद्धाःस्वभूमौसंबद्धा कृतवसतयइत्यर्थः ॥ तेषांमुक्तिदाजीवन्मुक्तिदेत्यर्थः ॥ अत्रा ध्याहृत्ययोजनासोढव्या ॥ तथाचोक्तंपाद्मे ॥ काश्यांतिष्ठंतियेकेचित्तान्पश्यंतिसुरोत्तमाः चतुर्भुजांस्त्रिनयनान्गंगोद्भासितमूर्द्धजानिति ॥ अत्रापिचवक्ष्यति ॥ येवसंतिसदाकाश्यामापंचत्व विनिश्चयाः जीवन्मुक्तास्तुतेज्ञेयावंद्याःपूज्यास्तएवहीति ॥ एवंजीवन्मुक्तिमभिधायविदेहमुक्तिमाह ॥ स्युरमृतमिति ॥ समानमन्यत् ॥ स्युरमृताइतिक्वचित्पाठस्तदाम्रियंतइति मृतानमृताअमृताः ॥ मरणमित्युपलक्षणं जन्मादिषड्भावविकाररहिताभवंतीत्यर्थः ॥ गंगाश्रितत्वाच्चास्याःश्रेष्ठत्वमाह ॥ यानित्यंत्रिजगत्पवित्रतटिनीतीरेइति ॥ त्रीणिचतानिजगंतिचे तित्रिजगंतितानिपवित्रयतीतित्रिजगत्पवित्रागंगा ॥ तदुक्तंभागवते ॥ यस्यामलंदिवियशःप्रथितंरसायांभूमौचतेभुवनमंगलदिग्वितानं मन्दाकिनीदिविचभोगवतीतिचाधोगंगेतिचेहचरणांबुपुनाति विश्वमिति ॥ तटंतीरंवर्त्ततेऽस्याइतितटिनीत्रिजगत्पवित्राचासौतटिनीचत्रिजगत्पवित्रतटिनीगंगातस्यास्तीरेयाकाशीवर्त्तते ॥ त्रिजगत्पवित्रतटिन्यागंगयायानित्यमाश्रितेत्यर्थः ॥ एवंहिश्रूयते सनत्कुमारसंहितायाम् ॥ यत्संपर्कात्पवित्रत्वंगंगायात्येवसर्वतः पूर्वंविनिःसृतादेविमममौलिमहालयात् अत्रागत्यपुनर्देविगंगापुण्यतमाभवत् पवित्रमाद्यंस्वयमेवगंगापुनश्च्युताविष्णुपदात्ततोपि ब्रह्मादिलोकादपिमूर्ध्निशंभोर्न्निपातनाद्भूतिसुपांडुरांगा उन्मथ्यमार्गंचभगीरथस्यकाशींप्रविश्याथविमुक्तमंतारित्यादि ॥ पारावारविहारेणविश्लेषशंकांवारयाति ॥ नित्यमिति ॥ ब्रह्मादिभिःसेव्य त्वादपिश्रेष्ठतामाह ॥ सुरैःसेव्यते इति ॥ येत्यनुषंजनीयंनित्यमितिच ॥ कादाचित्कसेवांवारयाति ॥ नित्यमिति ॥ यानित्यांत्रिजगत्पवित्रतटिनीतीरेसुरैःसेव्यतइत्येकंवाक्यम् ॥ अयमभि प्रायः ॥ अस्माभिःसेव्यमानापीयंसुरनदीत्रिजगत्पुनानापिस्वर्गालयापिकेनापिसुखनिमित्तेनकाशीमधितिष्ठत्यतोऽसौसांद्रानंदखनिरितिनिश्चित्यदेवैर्नित्यंसेव्यतइति ॥ अधिष्ठातृद्वारापिश्रैष्ठ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माह ॥ त्रिपुरारिराजनगरीति ॥ त्रयाणांपुराणांस्वर्णरूप्यलोहत्रयनिर्मितानांअरिस्त्रिपुरारिः ॥ अथवास्थूलसूक्ष्मकारणशरीरलक्षणानांत्रयाणांपुराणांवृत्त्यारूढःसन्नरिस्त्रिपुरारिःसचासौस्वयं राजतेइतित्रिपुरारिराजस्तस्यनगरीत्रिपुरारिराजनगरी ॥ त्रिपुरारेःराजधानीतिवा ॥ अथवैवंगणेशोपाधिंभगवंतंस्तुत्वाऽशेषविशेषाश्रयभूतांप्रत्यग्दृशिंस्तौति ॥ भूमिष्ठेति ॥ पूर्ववदेवान्वयः ॥ तत्र काशतेस्वप्रकाशतयाराजतइतिकाशीप्रत्यक्चैतन्यम् ॥ अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतेरित्येतावान्विशेषः ॥ ननुपंचक्रोशावच्छिन्नायाभुवःकाशीत्वेनप्रसिद्धेःकथंप्रत्यग्दृशिपरतयासाव्याक्रियतेत त्राह ॥ भूमिष्ठापिनयात्रभूरिति ॥ भूमिशब्दोत्रभावप्रधानः ॥ तथाचायमर्थः ॥ भूमिष्ठापिभूमित्वेनस्थितापिप्रतीतापियाकाशीअत्रतत्त्वनिरूपणदशायांभूर्नभवति ॥ स्वप्रकाशप्रत्यग्ब्रह्म रूपत्वात् ॥ यथादेहित्वेनप्रतीयमानोपिश्रीकृष्णोदेहीनभवतितद्वदित्यर्थः ॥ अस्थूलमनणु अथातआदेशोनेतिनेतीत्यादिश्रुतेः ॥ वक्ष्यतिचात्रापि ॥ अविमुक्तंमहाक्षेत्रंपंचक्रोशपरीमितम् ॥ ज्योतिर्लिंगंहितत्क्षेत्रंपरंविश्वेश्वराभिधम् ॥ तथापाद्मेच ॥ यल्लिंगंदृष्टवंतौतौनारायणपितामहौ तदेवलोकेवेदेचकाशीतिपरिगीयतइति ॥ एवंभूभिप्रतीतेरभावमुक्त्वापरिच्छिन्नप्रतीतेरप्यभावमाह ॥ त्रिदिवतोप्युच्चैरधःस्थापियेति ॥ अपित्रयंसमुच्चयार्थम् ॥ याकाशीभुवर्लोकादीनांषण्णामधःस्थापित्रिदिवतोप्युचैस्त्रयोब्रह्मविष्णुमहेश्वरादीव्यंतिक्रीडंतियस्मिन्नितित्रिदिवंब्रह्मांडंतस्मादप्युच्चैरुपरि सर्वव्यापिकेत्यर्थः ॥ सत्यज्ञानानंतब्रह्मरूपत्वात् ॥ यथादेवक्याउदरस्थत्वेनप्रतीयमानोपिश्रीकृष्णस्तत्स्थोनभवति किंतुसर्वव्यापकस्तद्वदित्यर्थः ॥ सभूमिंविश्वतोवृत्वाऽत्यतिष्ठद्दशांगुलम् सत्यं ज्ञानमनंतमित्यादिश्रुतेः ॥ ननुतत्सृष्ट्वा तदेवानुप्राविशदितिश्रुत्याचैतन्यस्यकार्येप्रवेशश्रवणात्परिपूर्णस्यचप्रवेशासंभवात्कथमस्यपरिपूर्णत्वमित्याशंकायामाह ॥ यावद्धाभुवीति ॥ भुवीत्यनेनभूत भौतिकमुपलक्ष्यते ॥ ततश्चायमर्थः ॥ याकाशीभुविभूतभौतिकेकार्येप्रपंचेवद्धाप्रविष्टेत्यर्थः ॥ प्रागेवकारणतयाविद्यमानत्वात् ॥ तदुक्तंसदृष्टांतंभागवते ॥ यथेमेऽविकृताभावास्तथातेविकृ तैस्सहेत्यादिना ॥ प्रवेशश्रवणंत्वौपचारिकम् ॥ तथाचोक्तंवृहदारण्यकभाष्येभगवत्पादैः ॥ कार्यस्थस्योपलभ्यत्वमेवप्रवेशइति ॥ भागवतेच ॥ सएवस्वप्रकृत्येदंसृष्ट्वाग्रेत्रिगुणात्मकम् ॥ तदनुत्वंह्यप्राविष्टःप्रविष्टइवभाव्यसइति ॥ द्विविधोहिपरःपुरुषार्थः सर्वानर्थनिवृत्तिःपरमानंदावाप्तिश्च ॥ तत्रचितेःसर्वानर्थनिवृत्तिरूपतामाह ॥ मुक्तिदेति ॥ मुक्तिमाध्यात्मिकादितापत्रयोच्छि त्तिंददातिप्रयच्छतीतिमुक्तिदा ॥ याहिसर्वाननर्थानन्येषांनिवर्त्तयतिसासुतरांसर्वानर्थविनिर्मुक्ताभवति ॥ यथालोकेयोऽन्यानधनिनोधनिनःसंपादयतिसतेभ्योऽतिशयेनधनीतिगम्यतेतद्वदिति ॥ परमानन्दरूपतामाह ॥ स्युरमृतंयस्यांमृताजंतवइति ॥ यस्यांप्रत्यक्चैतन्यलक्षणायांकाश्यांमनननिदिध्यासनांगकश्रवणजनितब्रह्मात्मैकत्वसाक्षात्कारेणमृतास्त्यक्तप्राणेंद्रियदेहाःसंतोजंतवः प्राणिनोऽमृतंकैवल्यंपरमानंदसुखमितियावत् ॥ आनंदंब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितमित्युक्तेः ॥ स्युर्भवेयुः॥यस्याःप्रत्यग्दृशेस्तादात्म्यज्ञानेनजीवाःपरमानंदस्वरूपाभवंतीत्यर्थः ॥ तत्त्वमस्यहंब्रह्मास्मि सएषपरमआनंदएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीत्यादिश्रुतेः॥एवंभूताप्रत्यग्दृशिरेवाज्ञानतत्कार्ययोर्हंत्रीत्यत्रसदाचारंदर्शयंस्तांविशिनष्टि॥यानित्यंत्रिजगत्पवित्रतटिनीतीरेसुरैःसेव्यतइति॥ त्रिजगत्पवित्रागंगातटिन्योन्यागौतमीप्रमुखास्तासांतीरेयाकाशीसुरैरित्यसुरादीनामुपलक्षणम् सुरासुरैरिंद्रविरोचनप्रभृतिभिर्ब्रह्मचर्यादिपुरःसरंश्रवणमनननिदिध्यासनाद्युपायैःसेव्यतेचिंत्यतेभाव्यतइ त्यर्थः॥इंद्रोहवैदेवानामभिप्रवव्राजविरोचनोसुराणांतौसंदिहानावेवसमित्पाणीप्रजापतिसकाशमाजग्मतुस्तौहद्वात्रिंशतंवर्षाणिब्रह्मचर्यमूषतुरित्यादिश्रुतेः॥ननुप्रत्यग्दृशिरज्ञानंतत्कार्य्यंचहंतीत्यनुपपन्नम् तस्याअज्ञानाश्रयत्वविषयत्वोपलंभात् अन्यथातदयोगात्संसारप्रतीतेरभावप्रसंगाच्चेत्याशंक्यस्वरूपसत्त्वेनयद्यपितयोरनिवर्तिकाऽपितुसाधिकैवतथापितत्त्वमस्यादिवाक्योत्थबुद्धिवृत्त्याभिव्यक्तासतीप्रत्य ग्दृशिरज्ञानंतत्कार्य्यंचहंतीत्यभिप्रेत्यप्रत्यग्दृशिंविशिनष्टि ॥ त्रिपुरारिराजनगरीति ॥ त्रयाणांपुराणांस्थूलसूक्ष्मकारणशरीराणांयोऽरिराजःशत्रुराजस्तत्त्वमस्यादिवाक्योत्थसम्यग्बोधःसएवअभिव्यक्ति स्थानत्वेननगरमिवनगरमाश्रयोयस्याःसातथासाऽपायाज्जगत्पायादिति॥तथाचोक्तंवार्तिकेसुरेश्वराचार्यैः तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ॥ अविद्यासहकार्येणनाभूदस्तिभविष्यतीति॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेयांसिवहुविघ्नानिभवंतिमहतामपीतिन्यायात्प्रपंचितंमंगलंविघ्ननिरासद्वाराचिकीर्षितस्यपुराणस्यनिष्प्रत्यूहपरिसमाप्तिप्रचयाभ्यामलमितिमत्वापुनःसवितृरूपापन्नजगत्सृष्टिस्थितिसंहारकर्तृब्रह्मनमस्कारलक्षणंमंगलमाचरति ॥ नमस्तस्मैइति ॥ तस्मैप्रसिद्धायापरिमितगुणायेतियावत् ॥ महेशायमहांश्चासावीशश्चेतिमहेशः सूर्यः ॥ अविचिन्त्यवपुःश्रेष्ठोमहायोगीमहेश्वरइतिभविष्यपुराणांतर्गतसूर्यसहस्रनामोक्तेः ॥ तस्मैनमोस्तु ॥ करोमीतिवाशेषः ॥ महेशत्वमेवदर्शयति ॥ यस्येति ॥ यस्यमहेशस्यसूर्यस्यसंध्यात्रयच्छलात्संध्यात्रयस्यप्रातर्मध्याह्नसायंलक्षणस्यच्छलाद्व्याजात्कापट्यादित्यर्थः॥ अहोरात्रादीनांतत्रकल्पितत्वात् ॥ तदुक्तंभागवते ॥ तरणाविवाहनीइति ॥ त्रिजगत्पतयोब्रह्मविष्णुरुद्रेंद्रादयोऽनिशंयातायातंप्रकुर्वंतिनिरंतरमात्रवृत्त्याआविर्भावतिरोभावमासाद्यसृष्ट्यादिकंरचयन्तीत्यर्थः ॥ तदुक्तंभागवते ॥ गुणाभिमानिनोदेवाःसर्गादिष्वस्ययद्भयात् वर्त्ततेऽनुयुगंयेषांवशएतच्चराचरमिति ॥ सूर्यगत्याहिअहरादीनांसृष्ट्यादिकंभवतीतिप्रसिद्धंलोकेशास्त्रेच ॥ तथाचश्रुतिः ॥ अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ॥ स्मृतिश्च नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे त्रयीमयायत्रिगुणात्मधारिणेविरञ्चिनारायणशंकरात्मनेइति ॥ अथवानमस्तस्मैमहेशायेत्यनेनांतर्यामित्वेनपरमात्मैवस्तूयते ॥ तदामहांश्चासावीशश्चेतिमहेशईश्वरस्तस्मै ॥ तथापूर्वमध्यापरत्वसाम्यात्संध्यात्रयंसृष्टिस्थितिप्रलयरूपंतच्छलात्यातायातंगमनागमनंकुर्वंतीतिव्याख्येयम् ॥ अन्यत्समानम् ॥ अथवापूर्वमपायाज्जगन्मोचकतयाप्रत्यग्दर्शिंस्तुत्वापुनः सृष्ट्यादिहेतुमायाश्रयत्वेनस्तौति ॥ नमस्तस्मैमहेशायेति ॥

नमस्तस्मैमहेशाययस्यसंध्यात्रयच्छलात् ॥ यातायातंप्रकुर्वंतित्रिजगत्पतयोऽनिशम् ॥ ३ ॥
अष्टादशपुराणानांकर्त्तासत्यवतीसुतः ॥ सूताग्रेकथयामासकथांपापापनोदिनीम् ॥ ४ ॥

अत्रचध्यानंध्यासम्यग्ध्यासंध्यातस्याअत्तृभक्षकंविरोधीतिसंध्यात्तृ ॥ अयतेगच्छतिस्वकार्यंव्याप्नोतीत्ययम् ॥ संध्यात्तृचतदयंचेतिसंध्यात्रयमज्ञानंतच्छलादितिच्छलयतीतिच्छलंसंध्यात्रयंचतच्छलंचेतिसंध्यात्रयच्छलंतस्मादितिव्याख्येयम् ॥ अन्यत्समानमिति ॥ ३ ॥ एवंमंगलमारचय्यश्रोतृप्ररोचनार्थंचिकीर्षितपुराणस्येश्वरकर्तृतांदर्शयन्नुपोद्घातसंगतिमाह ॥ अष्टादशपुराणानामिति ॥ सत्यवतीसुतोव्यासःसूताग्रेकथांकथयामासेतिसंबंधः ॥ सूतस्याग्रेसूतोरोमहर्षणाख्यस्तस्याग्रे ॥ रोमहर्षणनामानंमहाबुद्धिंमहामुनिः ॥ सूतंजग्राहशिष्यंसइतिहासपुराणयोरितिवैष्णवोक्तेः ॥ सूतोनामब्राह्मण्यांक्षत्रियादुत्पन्नः ॥ तदुक्तम् ॥ ब्राह्मण्यांक्षत्रियाज्जातः सूतइत्यभिधीयतइति ॥ कथंभूतोव्यासः ॥ अष्टादशपुराणानांकर्त्ता ॥ अष्टादशपुराणानिब्राह्मादीनि ॥ तदुक्तंवैष्णवे ॥ ब्राह्मंपाद्मंवैष्णवंचशैवंभागवतंस्मृतम् तथान्यन्नारदीयंचमार्कंडेयंचसप्तमम् आग्नेयमष्टमंप्रोक्तंभविष्यंनवमंतथा ॥ दशमंब्रह्मवैवर्त्तंलैंगमेकादशंस्मृतम् ॥ वाराहंद्वादशंचैवस्कांदंचात्रत्रयोदशम् चतुर्दशंवामनंचकौर्मंपंचदशंस्मृतम् मात्स्यंचगारुडंचैवब्रह्मांडंचततःपरमिति ॥ तेषांकर्त्तेति ॥ कर्त्तेतितृच्प्रत्ययांतंरूपम् ॥ अतोऽनिर्दिष्टार्थाः प्रत्ययास्त्रिष्विकालेषुभवंतीतिन्यायात्आसमाप्तेर्वर्त्तमानत्वाच्चातीतवर्त्तमानभविष्यत्पुराणानांकर्तृत्वमविरुद्धमितिभावः ॥ कथंभूतांकथाम् ॥ पापापनोदिनीम् पापानिमहापातकोपपातकसंकरीकरणापात्री

१ तथेत्यपिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणमलिनीकरणजातिभ्रंशकरादीन्यपनोदितुंशीलंयस्याःसातथातामिति ॥ ४॥ यदर्थमुपोद्घातआरचितस्तांकथामाह ॥ कदाचिदिति ॥ एकदानारदोविष्णोर्नरांशाज्जातंयन्नारंजलंमाणिकर्णिकास्थंतत्पितृभ्योदत्तवानितिनारदः ॥ तदुक्तंसनत्कुमारसंहितायाम् ॥ याभ्यःपराद्ध्यःपितॄणांनतृप्तिस्तादत्तवांस्त्वंपितृभक्तवर्यनारंददासीतिहिनारदोसीति ॥ विंध्यंविंध्यनामानंपुरोऽग्रेविलोकयांचक्रेददर्शेत्यग्रिमेणान्वयः ॥ कथंभूतः ॥ श्रीमान् ब्रह्मवर्चसवान् ॥ किंकुर्वन् श्रीनर्मदांभसिश्रीयुक्तेनिर्मलेरेवायाअंभसिस्नात्वा ॥ नार्मदेंभसीतिकचित् ॥ श्रीगौरी शंकरोभगवान् विष्णुर्लक्ष्मीगौरीद्विजोत्तमेतिवैष्णवोक्तेः सावर्त्ततेयस्यासौश्रीमान् श्रीमांश्चासावोंकारश्चेतिश्रीमदोंकारस्तंगौरीसहितमोंकाराख्यमीश्वरंअमरकंटकक्षेत्राधिष्ठातारमितियावत् ॥ अभ्यर्च्यपूजयित्वा ॥ ५ ॥ व्रजन्गच्छन् ॥ लिंगविशेषणत्वाच्छ्रीमदितिपृथक्पदंवा ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ कथंभूतम् ॥ सर्वदमिति ॥ सर्वदेहिनामशेषप्राणिनांधर्मार्थकाममोक्षपूरकमित्यर्थः ॥ विंध्यंविशिनष्टि धराधरमित्याद्यक्षरचतुष्टयाधिकसार्द्धत्रिशताश्लोकैः ॥ कथंभतंविंध्यम् ॥ धराधरंधरांपृथ्वींधरतीतिधराधरस्तंपर्वतमितियावत् पुनःकथंभूतम् ॥ संसारेतापंसंसारतापमाध्यात्मिकाधिभौतिकाधिदैविकलक्षणंतंसंहर्तुंशीलंयस्यतत्तथातच्चतद्रेवावारिनर्मदाजलंचतेनपरिष्कृतमाश्रितंसेवितंरेवातीरस्थमितियावत् ॥ यद्वा परिष्कृतंदर्शनादेवपावयितृपवित्रतममित्यर्थः ॥ तदुक्तम् ॥ त्रिभिःसारस्वतंतोयंसप्ताहेनचयामुनं सद्यःपुनातिगांगेयंदर्शनादेवनार्मदमिति ॥ ६ ॥ पुनःकथंभूतम् ॥ द्विरूपमेवद्वैरूप्यम् ॥ स्वार्थेष्यञ् तेनद्वैरूप्येणद्विरूपेण ॥ अपिश्चार्थेसमुच्चयवाची ॥ इमां वसुमतींपृथ्वींयथार्थाख्यांयथासदृशोबाधितोर्थोयस्याःसायथार्थाआख्यायस्याःसायथार्थाख्यातामेवंविशिष्टामुच्चैरतिशयेनकुर्वंतंसम्पादयन्तमिति ॥ किन्तद्वैरूप्यमितिपृच्छायामाह ॥ स्थावरे

श्रीव्यासउवाच ॥ ॥ कदाचिन्नारदःश्रीमान्स्नात्वाश्रीनर्मदांभसि ॥ श्रीमदोंकारमभ्यर्च्यसर्वदंसर्वदेहिनाम् ॥ ५ ॥ व्रजन्विलोकयांचक्रे पुरोविंध्यंधराधरम् ॥ संसारतापसंहारिरेवावारिपरिष्कृतम् ॥ ६ ॥ द्वैरूप्येणापिकुर्वंतंस्थावरेणचरेणच ॥ साभिख्येनयथार्थाख्यामुच्चैर्वसुमतीमिमाम् ॥ ७ ॥ रसालयंरसालैस्तैरशोकैःशोकहारिणाम् ॥ तालैस्तमालैर्हिंतालैःसालैःसर्वत्रशालितम् ॥ ८ ॥

णचरेणचेति ॥ स्थावरेणस्वस्मिन्नुत्पन्नरत्नप्रवालादिनेत्यर्थः ॥ चरेणस्वशृंगेनिरंतरंक्रीडितुमागतेनवस्वग्न्यादिनेत्यर्थः ॥ वस्वग्निरश्मिरत्नधनानिवसुशब्दवाच्यानिविद्यन्तेयस्याःसावसुमतीतिहितस्यायथार्थाख्याम् ॥ यदाहामरः ॥ देवभेदेऽनलेरश्मौवसुरत्नेधनेपिचेति ॥ अतएववक्ष्यतिचात्रापि ॥ तुच्छश्रियः स्वर्गभूमीःपरिहायागतैरिव नानासुरनिकायैश्चविष्वग्भोगेच्छयोषितामितिअतएवोक्तमुच्चैरीति ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ कथंभूतेनस्थावरेणजंगमेन साभिख्येनअभिख्याशोभा ॥ अभिख्यानामशोभयोरित्यमरः ॥ तयासहवर्त्ततइतिसाभिख्यंतेन ॥ ७ ॥ पुनःकथंभूतम् ॥ रसालयमिति ॥ तैःप्रसिद्धैरसालैराम्रैः ॥ आम्रश्चूतोरसालोसावित्यमरः ॥ रसालयम् षण्णांरसानामालयमाश्रयमित्यर्थः ॥ पुनःकथंभूतम् ॥ काकाक्षिन्यायेनतच्छन्दस्योभयत्रसंबंधात्तैःप्रसिद्धैरशोकैर्वंजुलैः ॥ वंजुलोऽशोककइत्यमरः ॥ शोकहारिणंशोकांगारविपच्यमानानांशोकंहर्त्तुंशीलंयस्यसशोकहारीतंशोकहारिणम् ॥ नविद्यतेशोकोयैस्तेऽशोकाइत्यशोकपदव्युत्पत्तिरतस्तैःशोकहारित्वंयुक्तमितिभावः ॥ तदुक्तम् ॥ अशोककलिकाश्चाष्टौयेपिबंतिपुनर्वसौ ॥ चैत्रेमासिसिताष्टम्यांनतेशोकमवाप्नुयुरितित ॥ पुनःकथंभूतं ॥ सर्वत्रसमंततःशालितंशोभितम् ॥ कैः ॥ तालैस्तृणराजैः ॥ तृणराजाह्वयस्तालइत्यमरः ॥ तथातमालैःकालस्कंधैः ॥ कालस्कन्धस्तमालःस्यादित्यमरः ॥ तथाहिंतालैस्तृणद्रुमविशेषैः ॥ खर्जूरःकेतकीतालीखर्जूरीचतृणद्रुमाइत्यमरः ॥ तद्विशेषैः ॥ तथासालैःसर्जैः ॥ सालेतुसर्जकाऽर्याश्वकर्णिकाइत्यमरः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनःकथंभूतम् ॥ खपुरैःपूगैःगुवाकैरितियावत् ॥ घोंटातुपूगः क्रमुकोगुवाकःखपुरइत्यमरः ॥ खमाकाशंपूरयतीतिखपुरः ॥ हस्वत्वमार्षम् ॥ खपुरआकारआकृतिर्यस्यसखपुराकारस्तम् ॥ अत्युच्छ्रितैःपूगवृक्षैराकाशंछादयंतामित्यर्थः यद्वा खपुरमाकाशगृहंतद्वदाकारोयस्यसखपुराकारस्तम् ॥ अत्युच्छ्रितैःपूगवृक्षैराकाशगृहमिवशोभमानामित्यर्थः ॥ पुनःकथंभूतम् ॥ श्रीफलै र्विल्वैः ॥ विल्वेशांडिल्यशैलूषौमालूरश्रीफलावपीत्यमरः ॥ श्रियंशोभांफलयतिनिष्पादयतीतिश्रीफलस्तम् ॥ फलनिष्पत्तावितिधातुः ॥ श्रीफलैर्वृक्षैरत्यंतशोभांसंपादयंतामित्यर्थः ॥ यद्वा श्रीफलैर्वृक्षैःकृत्वाश्रीफलंश्रियायुक्तानिफलानिअर्थतोनामतश्चयत्रसतथातम् ॥ विल्ववृक्षाणांफलैःश्रीफलाख्यैर्लोकप्रसिद्धैःप्रपूरितमित्यर्थः ॥ किलेत्युत्प्रेक्षायांप्रसिद्धौवा ॥ पुनःकथंभूतम् ॥ अगुरुभिःकालागुरुभिः कालागुर्वगुरुःस्यादित्यमरः ॥ गुर्वीमहतीश्रीःसौगंध्यसंपत्तिः शोभासंपत्तिर्वायस्यतथातम् ॥ तुशब्दश्चार्थःसमुच्चयवाची ॥ पुनःकथंभूतम् ॥ कपित्थैर्दधित्थैः ॥ अथकपित्थेस्युर्दधित्थग्राहिमन्मथाइत्यमरः ॥ कपिपिंगंवानरवत्पिंगलम् कडारःकपिशःपिंगपिशंगौकद्रुपिंगलावित्यमरः ॥ यद्वा कपिपिंगंश्रेष्ठपिंगम् ॥ कपिर्वराहः श्रेष्ठश्चेतिवचनात् ॥ ९ ॥ पुनःकथंभूतम् ॥ लकुचैर्लिकुचैः ॥ लकुचोलिकुचोडहुरित्यमरः ॥ मनोहरंसुन्दरम् ॥ वकुलैरितिक्वचित्पाठः ॥ कथंभूतैः ॥ वनश्रीर्वनलक्ष्मीर्वनदेवीतियावत् ॥ तस्याःकुचाकारैः स्तनाकारैः ॥ चकारःसमुच्चये ॥ पुनःकथंभूतम् ॥ सुधाऽमृतंतत्सदृशानियानिफलानितैःसमारम्भःसंबंधोवर्ततेयासांतास्तथाताश्चतारंभाश्चकदल्यः ॥ कदलीवारणबुसारंभेत्यमरः ॥ ताभिः परिभासितंप्रकाशितम् ॥ १० ॥ पुनःकथंभूतमिव ॥ सुरंगैश्चेति ॥ नारंगैर्नागरंगैः ॥ गकारलोपआर्षः ॥ ऐरावतैरित्येतत् ॥ ऐरावतोनागरंगोनादेयीभूमिजंबुकाइत्यमरः ॥ प्रकृत्यंतरंवा ॥

खपुरैःखपुराकारंश्रीफलंश्रीफलैःकिल ॥ गुरुश्रियंत्वगुरुभिःकपिपिंगंकपित्थकैः ॥ ९ ॥ वनश्रियःकुचाकारैर्लकुचैश्चमनोहरम् ॥ सुधाफलसमारंभिरंभाभिःपरिभासितम् ॥१०॥ सुरंगैश्चापिनारंगैरंगमंडपवच्छ्रियः ॥ वानीरैश्चापिजंबीरैर्बीजपूरैःप्रपूरितम् ॥ ११ ॥ अनिलालोलकंकोलवल्लीहल्लीसकायितम् ॥ लवलीलवलीलाभिर्लास्यलीलालयंकिल ॥ १२ ॥

नारंगःपिप्पलीरसे यमजप्राणिनिविडेनागरंगद्रुमेपिचेतिमेदिनीकारः ॥ श्रियोलक्ष्म्यारंगमण्डपमिवनृत्यस्थलमिव ॥ रंगमण्डपवच्छ्रियमितिपाठेरंगमण्डपस्येवश्रीःशोभायस्यतमित्यर्थः ॥ कथंभूतैर्नारंगैः ॥ सुरंगैः शोभनोरंगोरागोहर्षोवायेभ्यः रक्तवर्णोयेषामितिवातेसुरंगास्तैः ॥ पुनःकथंभूतम् ॥ वानीरैर्वेतसैः ॥ अथवेतसे रथाभ्रपुष्पविदुलश्वेतवानीरवंजुलाइत्यमरः ॥ समुच्चयवाचीचशब्दःसर्वत्रसंवध्यते ॥ जंबीरैःसमीरणैः ॥ समीरणोमरुवकःप्रस्थपुष्पःफणिज्जकः जंबीरइत्यमरः ॥ बीजपूरैःफलपूरैः ॥ फलपूरोबीजपूरइत्यमरः प्रपूरितंखचितं व्याप्तमितियावत् ॥ प्रपूरकैरितिपाठेप्रपूरकैरेतैश्चश्रियोरंगमण्डपवदितिपूर्वेणैवान्वयः ॥ ११ ॥ अनिलेति ॥ पुनःकथंभूतमिव ॥ अनिलेनालोलाश्चपलायाःकंकोलवल्ल्यः कंकोलनाम्न्योलताः ॥ वल्लीतुव्रततिर्लतेत्यमरः ॥ ताभिर्हल्लीसकायितम् हल्लीसकंनामएकस्यपुंसोबह्वीभिःस्त्रीभिःसहक्रीडनं नारीणांमण्डलीनृत्यवंधोवा ॥ तदुक्तं ॥ नारीणांमण्डलीनृत्यवंधेहल्लीसकंविदुरिति ॥ एषवरासक्रीडा ॥ तल्लक्षणमिदं ॥ पृथुसुवृत्तंमसृणंवितस्तिमात्रोन्नतंकौविनिखन्यशंकुम् ॥ आक्रम्यपद्भ्यामितरेतरंतुहस्तैर्भ्रमोयंखलुरासगोष्ठीति ॥ तद्वदाचरितम् ॥ नारिस्थानीयाभिर्गोपीस्थानीयाभिर्वानिलालोलकंकोलवल्लीभिःसहहल्लीसकंपुरुषोत्तमादौफागुइतिप्रसिद्धंनृत्यंकुर्वतमिवेत्यर्थः ॥ अथवाअशोकापरपर्यायस्यकंकेलिशब्दस्यकंकोलशब्देनाभिधानम् कंकोलककोशफलापरपर्यायस्यकंकोलशब्दस्यवा उभयत्रार्षत्वात्साधुत्वम् ॥ मंजुलोवंजुलोशोकःकंकेलिर्दोहदप्रियइति रत्नमाला ॥ अथकोलकंकंकोलकंकोशफलमित्यमरः ॥ सुकाशितामितिक्वचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पाठःसचिन्त्यः ॥ क्यङ्प्रत्ययांतंरूपमिदम्॥पुनःकथंभूतम् ॥ लवलीवल्ली ॥ लवलीवल्लिदोर्वल्लीत्यग्रेवक्ष्यमाणत्वात् ॥ तस्यायालवलीलाअल्पक्रीडामृदुपवनाल्पांदोलनरूपास्ताभिर्लास्यलीलालयं॥
लास्यंनृत्यं॥लास्यंनृत्यंचनर्तनमित्यमरः॥तदेवलीलातस्याआलयस्थानम्॥किलेतिप्रसिद्धौ॥यद्वा लवल्योवृक्षभेदाः[1]लवावल्लीतिगौडेप्रसिद्धाः॥मुक्ताफलंतुकर्पूरेमौक्तिकेलवलीफलइतिविश्वप्रकाशः१२॥
पुनःकथंभूतमिव ॥ अध्वगानाहूयंतमिवआकारयंतमिव ॥ कथंभूतानध्वगान् ॥ श्रमापन्नान्मार्गजनितंक्लेशंप्राप्तानित्यर्थः ॥ किमर्थमित्याकांक्षायामाह ॥ विश्रमाय ॥ श्रमाभावायेत्यर्थः ॥
कया मन्दांदोलितानियानिकर्पूरकदलीदलानिसुरभिरंभापत्राणि ॥ पत्रंपलाशंछदनंदलंपर्णंछदःपुमानित्यमरः ॥ अथवामंदंयथास्यात्तथांदोलिताःप्रकंपितायाःकर्पूरकदल्यःकर्पूरनाम्न्यःकर्पूरोत्पादि
न्योवाकदल्यस्तासांदलानितत्संज्ञयातद्व्याजेनतत्संकेतेनेतिवा ॥ १३ ॥ पुनःकथंभूतमिव ॥ पुन्नागपल्लवैः पुन्नागस्यदेववल्लभस्य ॥ पुन्नागेपुरुषस्तुंगःकेसरोदेववल्लभइत्यमरः ॥ पल्लवैः
किसलयैः ॥ पल्लवोऽस्त्रीकिसलयमित्यमरः ॥ पुन्नागमिवपुंगजमिव ॥ यद्वा पुमांश्चासौनागश्चेतिपुन्नागः पुरुषश्रेष्ठइत्यर्थः ॥ सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थवाचकाइत्युक्तेस्तमिव ॥ पुनः
कथंभूतमिव ॥ मल्लिकायामालतीतिगौडेप्रसिद्धायास्तवकोमल्लिकास्तवकः ॥ स्तवकोगुच्छः ॥ गुच्छस्तुस्तबकइत्यमरः ॥ सएवस्तनस्तंकरपल्लवैःकररूपाःपल्लवाःकरपल्लवास्तैःकलयंतमिव

मंदांदोलितकर्पूरकदलीदलसंज्ञया ॥ विश्रमायश्रमापन्नानाहूयंतमिवाध्वगान् ॥ १३ ॥ पुन्नागमिवपुन्नागपल्लवैःकरपल्लवैः ॥ कलयंतमि
वाऽलोलैर्मल्लिकास्तबकस्तनम् ॥ १४ ॥ विदीर्णदाडिमैःस्वांतंदर्शयंतंतुरागवत् ॥ माधवींधवरूपेणश्लिष्यंतमिवकानने ॥ १५ ॥ उदुंबरैरं
बरगैरनंतफलमालितैः ॥ ब्रह्मांडकोटीर्बिभ्रंतमनंतमिवसर्वतः ॥ १६ ॥

मर्दयंतमिवस्पर्शयंतमिववावृक्षानितिशेषः ॥ कलधातोश्चुरादित्वात्स्पृशंतमिववार्थः ॥ कथंभूतैःकरपल्लवैरालोलैश्चंचलैः ॥ १४ ॥ विदीर्णेति ॥ पुनःकथंभूतं ॥ स्वांतंस्वस्यअन्तंस्वांतम्
मुखमध्यमित्यर्थः ॥ दर्शयंतम् ॥ कथंभूतम् ॥ रागवत्रागयुक्तम् ॥ स्वांतंमनइतिवा ॥ स्वांतंहृन्मानसंमनइत्यमरः ॥ कैर्विदीर्णदाडिमैःस्फुटितकरकैः ॥ समौकरकदाडिमावित्य
मरः ॥ तुःसमुच्चये ॥ रागिवदितिक्वचित् ॥ पुनःकथंभूतमिव ॥ माधवींवासंतींलतांधवरूपेणकांतरूपेणकाननेवनेश्लिष्यंतमिवालिंगंतमिव ॥ अतिमुक्तःपुण्ड्रकःस्याद्वासंतीमाधवीलतेत्यमरः
॥ १५ ॥ पुनःकथंभूतमिव ॥ उदुंबरैरिति ॥ सर्वतोब्रह्मांडकोटीर्बिभ्रंतमिवधारयंतमिवेतियावत् ॥ कैरुदुंबरैर्जंतुफलैः ॥ उदुंबरोजंतुफलोयज्ञांगोहेमदुग्धकइत्यमरः ॥ कथंभूतैः ॥
अंबरगैः अत्युच्छ्रितैरित्यर्थः ॥ अगवैरितिपाठेमखांगत्वादेववृक्षश्रेष्ठत्वंज्ञातव्यम् ॥ पुनःकथंभूतैरनंतफलमालितैरपरिमितफलसंजातमालैरित्यर्थः ॥ शालितैरितिपाठेशोभितैरित्यर्थः ॥ कमिव ॥
अनंतमिव ॥ इवशब्दस्यकाकाक्षिन्यायेनोभयत्रसम्बन्धः ॥ तमोमहदहंकारखचराग्निवार्भूसंवेष्टिताऽविगणितब्रह्मांडपरमाणुपरिभ्रमणवाताध्वरोमविवरंपरमात्मानमिवेत्यर्थः ॥ १६ ॥

---

[1] लवलीतिप्रसिद्धाइत्यपिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पनसैरिति ॥ पुनःकथंभूतम् ॥ आवृतम् ॥ कैःपनसैःकंटकिफलैः ॥ पनसःकंटकिफलइत्यमरः ॥ कथंभूतैर्वननासाभैर्वनस्यनासानासिकातद्वदाभायेषांतेतथातैर्वनदेवीनांनासापुटैरिवेत्युत्प्रेक्षा ॥वनना
गाभैरितिपाठेऽरण्यगजसदृशैःस्थूलैरित्यर्थः ॥ तथापलाशकैःकिंशुकैः ॥ पलाशेकिंशुकःपर्णोवातपोतइत्यमरः ॥ कथंभूतैः ॥ शुकनासैः ॥ शुकस्यपक्षिणोनासेवनासिकायेषांतेतथातैः ॥
शुकनासिकायारक्तवक्रत्वात्पलाशकुसुमस्यापितथात्वात्तत्साम्यम् ॥ यद्वा शुकनासैरंकुशाकारैःस्वपुष्पैर्विरहिणांपलाशनादितिव्यधिकरणेवातृतीया ॥ अथवाशुकनासैःश्योनाकवृक्षैरित्यर्थः ॥
श्योनाकशुकनासर्क्षदीर्घवृंतकुटंनटाइत्यमरः ॥ पुनःकथंभूतैः ॥ भर्तृभिःसहस्त्रीभिर्वाविरहोविश्लेषोयेषांजनानांतेविरहिणस्तेषांपलाशनात्पलस्यामिषस्यमांसस्येतियावत् ॥ अधःस्वरूपयोरस्त्री
तलंस्यात्त्वामिषेपलमित्यमरः ॥ अशनाद्भोजनान्नाशनादित्यर्थः ॥ पत्रत्यक्तैःपत्राणित्यक्तानियैस्तेतथा ॥ यद्वा पत्रैस्त्यक्ताः पत्रत्यक्तास्तैरित्यर्थः ॥ अयंभावः ॥ योददातिपरेदुःखंध्रुवं
दुःखंसविंदतीतिन्यायात्परेषांमांसादनात्स्वयमपिगतपत्रैरिवेत्युत्प्रेक्ष्यतइति ॥ पात्रत्यक्तैरितिवापाठः ॥ तत्रपात्रंअरणिः ॥ १७ ॥ कदंबेति ॥ पुनःकथंभूतम् ॥ कदंबकानांप्रियकाणां ॥
नीपप्रियकदंबास्तुहलिप्रियइत्यमरः ॥ कदंबकाःसमूहास्तैःसर्वतोभ्राजमानंराजमानम् ॥ कैरिव ॥ कंटकितैरिवउद्गतरोमांचैरिवेत्यर्थः ॥ किंकृत्वा ॥ कदंबवादिनोनीपान्दृष्ट्वा ॥ अयमर्थः ॥
स्थूलसूक्ष्मभेदेनद्विविधास्तावद्धलिप्रियाः नीपाःकदंबाश्च ॥ तेषांनीपादारत्वेनोत्प्रेक्ष्यंते ॥ कंग्राम्यसुखंददातीतिकदंकलत्रंतदतिशयेनवदितुंशीलंयेषांतेकदंबवादिनः ॥ बकारस्यपरतःश्रवणंछां
दसंविभक्तेर्लोपाभावश्च ॥ तान्कदंबवादिनोनीपान् ॥ दारान्दृष्ट्वेत्यर्थः ॥ यद्वाऽकदंबाएववयंकदंबाइतिवक्तुंशीलंयेषांतेकदंबवादिनस्तान्नीपान्दृष्ट्वाक्रोधेनोत्पुलकितैरिव ॥ यथालोकेऽधमानुत्तमवा

पनसैर्वननासाभैःशुकनासैःपलाशकैः ॥ पलाशनाद्विरहिणांपत्रत्यक्तैरिवावृतम् ॥ १७ ॥ कदंबवादिनोनीपान्दृष्ट्वाकंटकितैरिव ॥ समंततो
भ्राजमानंकदंबककदंबकैः ॥ १८ ॥ नमेरुभिश्चमेरूच्चशिखरैरिवराजितम् ॥ राजादनैश्चमदनैःसदनैरिवकामिनाम् ॥ १९ ॥ तटेतटेपटुवटैरुच्चैःपटकुटी
वृतम् ॥ कुटजस्तबकैर्भांतमधिष्ठितबकैरिव ॥ २० ॥ करमर्दैःकरीरैश्चकरंजैश्चकरंबकैः ॥ सहस्रकरवद्भांतमर्थिप्रत्युद्गतैःकरैः ॥ २१ ॥

दिनोदृष्ट्वाक्रोधादुत्पुलकिताभवंतिप्राणिनस्तद्वदित्यर्थः ॥ कदंबपातिनोभृंगानितिकश्चित् ॥ १८ ॥ नमेरुभिरिति ॥ पुनःकथंभूतम् ॥ विराजितं ॥ कैर्नमेरुभीरुद्राक्षवृक्षैः ॥ तथाचोक्तं
कुमारे ॥ दृष्टिप्रपातंपरिहृत्यतस्यकामंपुरःशुक्रमिवप्रयाणे ॥ प्राणेषुसंसक्तनमेरुशाखंध्यानास्पदंभूतपतेर्विवेशेति ॥ नमेरुशाखंरुद्राक्षशाखम् ॥ व्याख्यातंचतथातट्टीकाकृद्भिः ॥ कथंभूतैः ॥
मेरूच्चशिखरैर्मेरूच्चानियानिशिखराणिशृंगाणितैरिवेत्युत्प्रेक्षा ॥ चकारःसमुच्चये ॥ राजादनैःप्रियालैः ॥ राजादनःप्रियालःस्यात्सन्नकद्रुर्धनुष्पटइत्यमरः ॥ समुच्चयेचकारः ॥ मदनै
र्धत्तूरैः ॥ उन्मत्तःकितवोधूर्तोधत्तूरःकनकाह्वयः मातुलोमदनश्चेत्यमरः ॥ कथंभूतैः ॥ कामिनांसदनैरिवेत्युत्प्रेक्षा ॥ मदनसदनैरितिपाठेराजादनैरित्यस्यविशेषणम् ॥ १९ ॥
तटेतटेइति कथंभूतम् ॥ उच्चैःपटकुटीवृतं उच्चैर्महतीभिःपटकुटीभिर्वस्त्रगृहैर्वृतमावृतमिव ॥ इवशब्दोत्रद्रष्टव्यः ॥ कैः तटेतटेउच्चोच्चप्रदेशेपटुवटैःपटवोमनोहराश्चतेवटान्यग्रोधाश्च ॥ न्यग्रोधोबहुपाद्व
टइत्यमरः ॥ तैःपटुवटैरित्यस्यवाविशेषणमुच्चैरिति ॥ पुनः कथंभूतम् ॥ कुटजानांशक्राख्यानांवृक्षाणाम् ॥ जयोथकुटजः शक्रोवत्सकोगिरिमल्लिकेत्यमरः ॥ स्तबकागुच्छास्तैर्भांतंशोभमा
नम् ॥ कैरिव ॥ अधिष्ठिताअधिश्रिताश्चतेबकाःकह्वाः ॥ अथबकःकह्वइत्यमरः ॥ तैरिव ॥ २० ॥ करमर्दैरिति ॥ पुनःकथम्भूतम् ॥ अर्थिप्रत्युद्गतैःकरैः अर्थिनोयाचकान्प्रतिउद्गतैरूर्ध्वी
कृत्यधृतैराकारणार्थंकरैर्हस्तैः सहस्रकरवद्भांतम् अनेकहस्तमिवस्फुरंतमिवेत्यर्थः ॥ कैः करमर्दैःकृष्णपाकफलैः ॥ कृष्णपाकफलाविग्नसुषेणाःकरमर्दकइत्यमरः ॥ तथाकरीरैःक्रकरैः ॥ करीरेतु
क्रकरग्रंथिलावुभावित्यमरः ॥ तथाकरञ्जैःचिरिबिल्वैः ॥ चिरिबिल्वोनक्तमालःकरजश्चकरञ्जकइत्यमरः ॥ तथाकरम्बकैःकलम्बैः ॥ करम्बकःकलंबःस्यात्तैलपायिकमेवचेतिधरणिः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पाठःसचिन्त्यः ॥ क्यङ्प्रत्ययांतरूपमिदम्॥पुनःकथंभूतम् ॥ लवलीवल्ली ॥ लवलीवल्लिदोर्वल्लीत्यग्रेवक्ष्यमाणत्वात् ॥ तस्यायालवलीला अल्पक्रीडामृदुपवनाल्पांदोलनरूपास्ताभिर्लास्यलीलालयं॥ लास्यंनृत्यं॥लास्यंनृत्यंचनर्तनमित्यमरः॥तदेवलीलातस्याआलयंस्थानम्॥किलेतिप्रसिद्धौ॥यद्वा लवल्योवृक्षभेदाः[१]लवावल्लीतिगौडेप्रसिद्धाः॥मुक्ताफलंतुकर्पूरेमौक्तिकेलवलीफलइतिविश्वप्रकाशः १२॥ पुनःकथंभूतमिव ॥ अध्वगानाहूयंतमिवआकारयंतमिव ॥ कथंभूतानध्वगान् ॥ श्रमापन्नान्मार्गजनितंक्लेशंप्राप्तानित्यर्थः ॥ किमर्थमित्याकांक्षायामाह ॥ विश्रमाय ॥ श्रमाभावायेत्यर्थः ॥ कया मन्दांदोलितानियानिकर्पूरकदलीदलानिसुरभिरंभापत्राणि ॥ पत्रंपलाशंछदनंदलंपर्णंछदःपुमानित्यमरः ॥ अथवामंदंयथास्यात्तथांदोलिताःप्रकंपितायाःकर्पूरकदल्यःकर्पूरनाम्न्यःकर्पूरोत्पादिन्योवाकदल्यस्तासांदलानितत्संज्ञयातद्व्याजेनतत्संकेतेनेतिवा ॥ १३ ॥ पुनःकथंभूतमिव ॥ पुन्नागपल्लवैः पुन्नागस्यदेववल्लभस्य ॥ पुन्नागेपुरुषस्तुंगःकेसरोदेववल्लभइत्यमरः ॥ पल्लवैः किसलयैः ॥ पल्लवोऽस्त्रीकिसलयमित्यमरः ॥ पुन्नागमिवपुंगजमिव ॥ यद्वा पुमांश्चासौनागश्चेतिपुन्नागः पुरुषश्रेष्ठइत्यर्थः ॥ सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थवाचकाइत्युक्तेस्तमिव ॥ पुनः कथंभूतमिव ॥ मल्लिकायामालतीतिगौडेप्रसिद्धायास्तवकोमल्लिकास्तवकः ॥ स्तवकोगुच्छः ॥ गुच्छस्तुस्तवकइत्यमरः ॥ सएवस्तनस्तंकरपल्लवैःकररूपाःपल्लवाःकरपल्लवास्तैःकलयंतमिव

मंदांदोलितकर्पूरकदलीदलसंज्ञया ॥ विश्रमायश्रमापन्नानाहूयंतमिवाध्वगान् ॥ १३ ॥ पुन्नागमिवपुन्नागपल्लवैःकरपल्लवैः ॥ कलयंतमिवाऽलोलैर्मल्लिकास्तबकस्तनम् ॥ १४ ॥ विदीर्णदाडिमैःस्वांतंदर्शयंतंतुरागवत् ॥ माधवींधवरूपेणश्लिष्यंतमिवकानने ॥ १५ ॥ उदुंबरैरंबरगैरनंतफलमालितैः ॥ ब्रह्मांडकोटीर्बिभ्रंतमनंतमिवसर्वतः ॥ १६ ॥

मर्दयंतमिवस्पर्शयंतमिववावृक्षानितिशेषः ॥ कलधातोश्चुरादित्वात्स्पृशंतमिववार्थः ॥ कथंभूतैःकरपल्लवैरालोलैश्चंचलैः ॥ १४ ॥ विदीर्णेति ॥ पुनःकथंभूतं ॥ स्वांतंस्वस्यअन्तंस्वांतम् मुखमध्यमित्यर्थः ॥ दर्शयंतम् ॥ कथंभूतम् ॥ रागवत्रागयुक्तम् ॥ स्वांतंमनइतिवा ॥ स्वांतंहृन्मानसंमनइत्यमरः ॥ कैर्विदीर्णदाडिमैःस्फुटितकरकैः ॥ समौकरकदाडिमावित्यमरः ॥ तुःसमुच्चये ॥ रागिवदितिक्वचित् ॥ पुनःकथंभूतमिव ॥ माधवींवासंतींलतांधवरूपेणकांतरूपेणकाननेवनेश्लिष्यंतमिवालिंगंतमिव ॥ अतिमुक्तःपुण्ड्रकःस्याद्वासंतीमाधवीलतेत्यमरः ॥ १५ ॥ पुनःकथंभूतमिव ॥ उदुंबरैरिति ॥ सर्वतोब्रह्मांडकोटीर्बिभ्रंतमिवधारयंतमिवेतियावत् ॥ कैरुदुंबरैर्जंतुफलैः ॥ उदुंबरोजंतुफलोयज्ञांगोहेमदुग्धकइत्यमरः ॥ कथंभूतैः ॥ अंबरगैः अत्युच्छ्रितैरित्यर्थः ॥ अगवैरितिपाठेमखांगत्वादेववृक्षश्रेष्ठत्वंज्ञातव्यम् ॥ पुनःकथंभूतैरनंतफलमालितैरपरिमितफलसंजातमालैरित्यर्थः ॥ शालितैरितिपाठेशोभितैरित्यर्थः ॥ कमिव ॥ अनंतमिव ॥ इवशब्दस्यकाकाक्षिन्यायेनोभयत्रसम्बन्धः ॥ तमोमहदहंकारखचराग्निवार्भूसंवेष्टिताऽविगणितब्रह्मांडपरमाणुपरिभ्रमणवाताध्वरोमविवरंपरमात्मानमिवेत्यर्थः ॥ १६ ॥

१ लवलीतिप्रसिद्धाइत्यपिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पनसैरिति ॥ पुनःकथंभूतम् ॥ आवृतम् ॥ कैःपनसैःकंटकिफलैः ॥ पनसःकंटकिफलइत्यमरः ॥ कथंभूतैर्वननासाभैर्वनस्यनासानासिकातद्वदाभायेषांतेतथातैर्वनदेवीनांनासापुटैरिवेत्युत्प्रेक्षा॥वनना
गाभैरितिपाठेऽरण्यगजसदृशैःस्थूलैरित्यर्थः ॥ तथापलाशकैःकिंशुकैः ॥ पलाशेकिंशुकःपर्णोवातपोतइत्यमरः ॥ कथंभूतैः ॥ शुकनासैः ॥ शुकस्यपक्षिणोनासेवनासिकायेषांतेतथातैः ॥
शुकनासिकायारक्तवक्रत्वात्पलाशकुसुमस्यापितथात्वात्तत्साम्यम् ॥ यद्वा शुकनासैरंकुशाकारैःस्वपुष्पैर्विरहिणांपलाशनादितिव्यधिकरणेवातृतीया ॥ अथवाशुकनासैःश्योनाकवृक्षैरित्यर्थः ॥
श्योनाकशुकनासर्क्षदीर्घवृंतकुटंनटाइत्यमरः ॥ पुनःकथंभूतैः ॥ भर्तृभिःसहस्त्रीभिर्वाविरहोविश्लेषोयेषांजनानांतेविरहिणस्तेषांपलाशनात्पलस्यामिषस्यमांसस्येतियावत् ॥ अधःस्वरूपयोरस्त्री
तलंस्यात्त्वामिषेपलमित्यमरः ॥ अशनाद्भोजनान्नाशनादित्यर्थः ॥ पत्रत्यक्तैःपत्राणित्यक्तानियैस्तेतथा ॥ यद्वा पत्रैस्त्यक्ताः पत्रत्यक्तास्तैरित्यर्थः ॥ अयंभावः ॥ योददातिपरेदुःखंध्रुवं
दुःखंसविंदतीतिन्यायात्परेषांमांसादनात्स्वयमपिगतपत्रैरिवेत्युत्प्रेक्ष्यतइति ॥ पात्रत्यक्तैरितिवापाठः ॥ तत्रपात्रंअरणिः ॥ १७ ॥ कदंबेति ॥ पुनःकथंभूतम् ॥ कदंबकानांप्रियकाणां ॥
नीपप्रियकदंबास्तुहलिप्रियइत्यमरः ॥ कदंबकाःसमूहास्तैःसर्वतोभ्राजमानंराजमानम् ॥ कैरिव ॥ कंटकितैरिवउद्गतरोमांचैरिवेत्यर्थः ॥ किंकृत्वा ॥ कदंबवादिनोनीपान्दृष्ट्वा ॥ अयमर्थः ॥
स्थूलसूक्ष्मभेदेनद्विविधास्तावद्धलिप्रियाः नीपाःकदंबाश्च ॥ तेषांनीपादारत्वेनोत्प्रेक्ष्यंते ॥ कंग्राम्यसुखंददातीतिकदंकलत्रंतदतिशयेनवदितुंशीलंयेषांतेकदंबवादिनः ॥ बकारस्यपरतःश्रवणंछां
दसंविभक्तेर्लोपाभावश्च ॥ तान्कदंबवादिनोनीपान् ॥ दारान्दृष्ट्वेत्यर्थः ॥ यद्वाऽकदंबाएववयंकदंबाइतिवक्तुंशीलंयेषांतेकदंबवादिनस्तान्नीपान्दृष्ट्वाक्रोधेनोत्पुलकितैरिव ॥ यथालोकेऽधमानुत्तमवा

पनसैर्वननासाभैःशुकनासैःपलाशकैः ॥ पलाशनाद्विरहिणांपत्रत्यक्तैरिवावृतम् ॥ १७ ॥ कदंबवादिनोनीपान्दृष्ट्वाकंटकितैरिव ॥ समंततो
भ्राजमानंकदंबककदंबकैः ॥ १८ ॥ नमेरुभिश्चमेरूच्चशिखरैरिवराजितम् ॥ राजादनैश्चमदनैःसदनैरिवकामिनाम् ॥ १९ ॥ तटेतटेपटुवटैरुच्चैःपटकुटी
वृतम् ॥ कुटजस्तबकैर्भांतमधिष्ठितबकैरिव ॥ २० ॥ करमर्दैःकरीरैश्चकरंजैश्चकरंबकैः ॥ सहस्रकरवद्भांतमर्थिप्रत्युद्गतैःकरैः ॥ २१ ॥

दिनोदृष्ट्वाक्रोधादुत्पुलकिताभवंतिप्राणिनस्तद्वदित्यर्थः ॥ कदंबपातिनोभृंगानितिकश्चित् ॥ १८ ॥ नमेरुभिरिति ॥ पुनःकथंभूतम् ॥ विराजितं ॥ कैर्नमेरुभीरुद्राक्षवृक्षैः ॥ तथाचोक्तं
कुमारे ॥ दृष्टिप्रपातंपरिहृत्यतस्यकामंपुरःशुक्रमिवप्रयाणे ॥ प्राणेषुसंसक्तनमेरुशाखंध्यानास्पदंभूतपतेर्विवेशेति ॥ नमेरुशाखंरुद्राक्षशाखम् ॥ व्याख्यातंचतथातट्टीकाकृद्भिः ॥ कथंभूतैः ॥
मेरूच्चशिखरैर्मेरूच्चानियानिशिखराणिशृंगाणितैरिवेत्युत्प्रेक्षा ॥ चकारःसमुच्चये ॥ राजादनैःप्रियालैः ॥ राजादनःप्रियालःस्यात्सन्नकद्रुर्धनुष्पटइत्यमरः ॥ समुच्चयेचकारः ॥ मदनै
र्धत्तूरैः ॥ उन्मत्तःकितवोधूर्तोधत्तूरःकनकाह्वयः मातुलोमदनश्चेत्यमरः ॥ कथंभूतैः ॥ कामिनांसदनैरिवेत्युत्प्रेक्षा ॥ मदनसदनैरितिपाठेराजादनैरित्यस्यविशेषणम् ॥ १९ ॥
तटेतटेइति कथंभूतम् ॥ उच्चैःपटकुटीवृतं उच्चैर्महतीभिःपटकुटीभिर्वस्त्रगृहैर्वृतमावृतमिव ॥ इवशब्दोत्रद्रष्टव्यः ॥ कैः तटेतटेउच्चोच्चप्रदेशेपटुवटैःपटवोमनोहराश्चतेवटान्यग्रोधाश्च ॥ न्यग्रोधोबहुपाद्व
टइत्यमरः ॥ तैःपटुवटैरित्यस्यवाविशेषणमुच्चैरिति ॥ पुनः कथंभूतम् ॥ कुटजानांशक्राख्यानांवृक्षाणाम् ॥ जयोथकुटजः शक्रोवत्सकोगिरिमल्लिकेत्यमरः ॥ स्तबकागुच्छास्तैर्भांतंशोभमा
नम् ॥ कैरिव ॥ अधिष्ठिताअधिश्रिताश्चतेबकाःकह्वाः ॥ अथबकःकह्वइत्यमरः ॥ तैरिव ॥ २० ॥ करमर्दैरिति ॥ पुनःकथम्भूतम् ॥ अर्थिप्रत्युद्गतैःकरैः अर्थिनोयाचकान्प्रतिउद्गतैरूर्ध्वी
कृत्यधृतैराकारणार्थंकरैर्हस्तैः सहस्रकरवद्भांतम् अनेकहस्तमिवस्फुरंतमिवेत्यर्थः ॥ कैः करमर्दैःकृष्णपाकफलैः ॥ कृष्णपाकफलाविग्नसुषेणाःकरमर्दकइत्यमरः ॥ तथाकरीरैःक्रकरैः ॥ करीरेतु
क्रकरग्रंथिलावुभावित्यमरः ॥ तथाकरंजैःचिरिबिल्वैः ॥ चिरिबिल्वोनक्तमालःकरजश्चकरंजकइत्यमरः ॥ तथाकरम्बकैःकलम्बैः ॥ करम्बकःकलंबःस्यात्तैलपायिकमेवचेतिधरणिः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नीराजितमिति ॥ पुनःकथम्भूतम् ॥ चम्पकश्चांपेयः भण्डिलोप्ययचांपेयश्चम्पकोहेमपुष्पकइत्यमरः ॥ चम्पकएवराजचम्पकस्तस्यकोरकैःकलिकाभिः गन्धफलीभिरीति यावत् ॥ क्षारकोजालकंक्लीविकलिकाकोरकःपुमानित्यमरः ॥ कीदृशैः ॥ उद्दीपैःउत्कष्टकांतिभिः ॥ तैर्नीराजितन्नीराजनामारात्तिक्यम्प्रापितमिव ॥ पुनःकथम्भूतम् ॥ जितपद्माकरश्रियम् ॥ जिताअभिभूतापद्मानामाकराउत्पत्तिस्थानानिपद्माकराःसरोवरादयस्तेषांश्रीःशोभायेनतथातम् ॥ कैः सपुष्पशाल्मलीभिः ॥ पुष्पेणसहवर्ततंइतिसपुष्पास्ताश्चताःशाल्मल्यश्चपिच्छिलाः ॥ पिच्छिलापूरणीमोचास्थिरायुःशाल्मलीद्वयोरित्यमरः ॥ तास्ताभिः ॥ समुच्चयेचकारः ॥ २२ ॥ क्वचिदिति ॥ पुनःकथम्भूतम् ॥ क्वचिच्छोभमानम् ॥ कैः चलदलैरश्वत्थैः ॥ बोधिद्रुमश्चलदलःपिप्पलःकुञ्जराशनः अश्वत्थइत्यमरः ॥ तथाक्वचित्कांचनकेतकैःस्वर्णकेतकीभिः ॥ तथाक्वचित्कृतमालैःआरग्वधैः ॥ आरग्वधेराजवृक्षशम्याकचतुरंगुलाःआरेवतव्याधिघातकृतमालसुवर्णकाइत्यमरः ॥ तथाक्वचिन्नक्तमालैःकरञ्जैश्च ॥ उपमाभेदान्नकरंजैरित्यनेनपुनरुक्तिः ॥ २३ ॥ कर्कंधिवति ॥ पुनःकथम्भूतम् ॥ विराजितम् ॥ कैः कर्कंधवोवदर्यः ॥ कर्कंधूर्बदरीकोलिरित्यमरः ॥ वन्धुजीवारक्तकाश्च ॥ रक्तकस्तुवन्धूकोवन्धुजीवकइत्यमरः ॥ चःसमुच्चये ॥ पुत्रजीवाजीवपुत्राः ॥ जीवांपोताइतिगौडेप्रसिद्धाः ॥ अंगुल्याजपसंख्यानमेकमेवमुदाहृतम् रिष्ट्याष्टगुणंविद्यात्पुत्रजीवैर्दशाधिकमितिशास्त्रप्रसिद्धाश्च उभयप्रकृतिकावापुत्रजीवाइतिचतैः ॥ तिन्दुकाःशितिसारकाः तिन्दुकःस्फूर्जकःकालस्कन्धश्चशितिसारकइत्यमरः ॥

नीराजितमिवोद्दीपैराजचंपककोरकैः ॥ सपुष्पशाल्मलीभिश्चजितपद्माकरश्रियम् ॥ २२ ॥ क्वचिच्चलदलैरुच्चैःक्वचित्कांचनकेतकैः ॥ कृतमालैर्नक्तमालैःशोभमानंक्वचित्क्वचित् ॥ २३ ॥ कर्कंधुबंधुजीवैश्चपुत्रजीवैर्विराजितम् ॥ सतिंदुकेंगुदीभिश्चकरुणैःकरुणालयम् ॥ २४ ॥ गलन्मधूककुसुमैर्धरारूपधरंहरम् ॥ स्वहस्तमुक्तमुक्ताभिरर्चयंतमिवानिशम् ॥ २५ ॥ सर्जार्जुनांजनैर्बीजैर्व्यजनैर्वीज्यमानवत् ॥ नारिकेलैःसखर्जूरैर्धृतच्छत्रमिवांबरे ॥ २६ ॥

तैःसहयाइंगुद्यस्तापसतरवः ॥ अथद्वयोः इंगुदीतापसतरुरित्यमरः ॥ तैश्चविराजितमितिपूर्वेणैवान्वयः ॥ पुनःकथंभूतम् ॥ करुणैर्वृक्षभेदैः ॥ तरुणःस्यान्नवेयूनिकुन्दपुष्पोपवृंदयोः ॥ करुणोवृक्षभेदेस्याद्रसेचकरुणावतीतिधरणिः ॥ तेषामालयमाश्रयम् ॥ यद्वा करुणैः करुणावद्भिःस्वस्मिंस्तिष्ठद्भिः करुणालयदयायाअधिष्ठानमित्यर्थः ॥ अर्शआद्यच् ॥ २४ ॥ गलदिति ॥ पुनःकथंभूतमिव ॥ अनिशंसततम् ॥ सततानारताश्रांतसंततताविरतानिशमित्यमरः ॥ हरंमहेशमर्चयंतंपूजयंतमिव ॥ कथंभूतंहरम् ॥ धरारूपधरंधरायारूपंधरतीतिधरारूपधरस्तम् ॥ सर्वात्मकत्वात्सापृथिव्यभवदितिश्रुतेश्च ॥ अत्रवक्ष्यमाणसूर्येंदुवाय्वग्निपयोवकाशपृथिव्यात्माष्टमूर्तित्वाद्वैष्णवोक्तसूर्याम्महीवायुवह्न्याकाशयजमानचंद्राष्टमूर्तित्वाद्वाधरारूपधरमिति ॥ सूर्योजलंमहीवायुर्वह्निराकाशमेवच दीक्षितोब्राह्मणःसोमइत्येतास्तनवःक्रमादितिवैष्णववचनम् ॥ कैः ॥ गलन्मधूककुसुमैर्गलंतिचतानिमधूककुसुमानिचतानितथातैः ॥ उपमैवतिरोभूतभेदारूपकमिष्यतइतिन्यायाद्रूपकतामाह ॥ स्वहस्तमुक्तमुक्ताभिर्गलन्मधूककुसुमान्येवस्वंसद्गुडपुष्पाण्येवस्वहस्तमुक्तमुक्ताःपर्वतकरत्यक्तमौक्तिकानिताभिरित्यर्थः ॥ २५ ॥ सर्जेति ॥ पुनःकमिव ॥ वीज्यमानवत्वीज्यमानमिवव्यजनमारुतैःसेव्यमानमिव ॥ कैः सर्जार्जुनांजनैः ॥ शालसर्जयोरवांतरभेदः ॥ अतएवशालैःसर्वत्रशालिनमित्यनेनापौनरुक्त्यम् उपमाभेदेनवा ॥ सर्जःशालः ॥ अर्जुनोनदी

---

१ जियायोताइत्यपिपाठः।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्जः ॥ नदीसर्जोवीरतरुरिंद्रद्रुःककुभोर्जुनइत्यमरः ॥ अंजनःशिग्रुः ॥ शिग्रुःशोभांजनोंऽजनइत्युत्पलिनी ॥ बीजैस्तरुविशेषैः ॥ बीजेरेतसितत्त्वेचहेतावंकुरकारणे बीजस्तरुविशेषेचतथाव्यजनमारुत इतिविश्वप्रकाशः ॥ सर्जार्जुनासनैरितिक्वचित्पाठः ॥ तत्रासनःपीतसालः ॥ अथपीतसालके सर्जकासनबंधूकपुष्पप्रियकजीवकाइत्यमरः ॥ एतैरेवव्यजनैस्तालवृंतैरित्यर्थः ॥ व्यजनंतालवृंतकमित्यमरः ॥ पुनःकमिव ॥ अंबरेआकाशेधृतंछत्रं यस्मैयेनेतिवासधृतच्छत्रस्तमिव ॥ कैर्नारिकेलैर्लांगलिभिः ॥ नारिकेरस्तुलांगलीत्यमरः॥कथंभूतैः॥सखर्जूरैः खर्जूरास्तृणद्रुमविशेषास्तैःसहितैः॥ २६॥ अमंदैरिति ॥ पिचुमंदैर्निंबैः ॥ पिचुमंदश्चनिंबेथेत्यमरः ॥ चःसमुच्चये ॥ मन्दारैःपारिजातकैः ॥ पारिभद्रेनिंबतरुर्मंदारःपारिजातकइत्यमरः ॥ कोविदारैश्चमरिकैः ॥ कोविदारेचमरिकः कुद्दालोयुगपत्रकइत्यमरः ॥ कथंभूतैः ॥ अमंदैःशोभमानैरितिसर्वेषांविशेषणम् ॥ पाटलेत्यादितृतीयांतपदानामपिधृतच्छत्रमित्यनेनैवान्वयः ॥ तत्रपाटलापाटलिः ॥ अथद्वयोः पाटलिः पाटलामोघाकाचस्थालीफलेरुहा कृष्णवृंताकुबेराक्षीत्यमरः ॥ तिंतिणीचिंचा ॥ तिंतिणीचिंचाम्लिकेत्यमरः ॥ घोंटाबदरम् ॥ बदरंघोंटेत्यमरः ॥ कर्कंधुघोंटयोरवांतरभेदः प्रकृतिभेदोवा ॥ अतएवकर्कंधित्यनेनापौनरुक्त्यम् ॥ शाखोटःपिशाचवृक्षः ॥ शाखोटोमल्लिकात्रिपुटामतेतिधरणिः ॥ बहुवचनांतैर्वाएतैरिति ॥ करहाटैःपिंडीतकैः ॥ पिंडीतकोमरुबकःश्वसनःकरहाटकः शल्यश्चमदनइत्यमरः ॥ २७ ॥ उद्दंडैरिति ॥ पुनःकथंभूतमिव ॥ उद्दंडैर्बहुलैःअनेकैरितिसर्वेषांविशेषणम् ॥ शेहुंडैःशीहुंडैः ॥ ईकारस्यैकारआर्षः ॥ वज्रद्रुभिः ॥ अथशीहुंडोवज्रद्रुः स्नुक्स्नुहीगुडेत्यमरः ॥ एरंडैरुरुवूकैः ॥ एरंडउरुवूकश्चरुचकश्चित्रकश्चसइत्यमरः ॥ गुडपुष्पैर्मधूकैः ॥ मधूकेतुगुडपुष्पमधुद्रुमावित्यमरः ॥ बकुलैःकेसरैः ॥ अथकेसरे बकुलइत्य

अमंदैःपिचुमंदैश्चमंदारैःकोविदारकैः ॥ पाटलातिंतिणीघोंटाशाखोटैःकरहाटकैः ॥ २७ ॥ उद्दंडैश्चापिशेहुंडैरेरंडैर्गुडपुष्पकैः ॥ बकुलैस्तिलकैश्चैव तिलकांकितमस्तकम् ॥ २८ ॥ अक्षैःप्लक्षैःशल्लकीभिर्देवदारुहरिद्रुमैः ॥ सदाफलसदापुष्पवृक्षवल्लीविराजितम् ॥ २९ ॥ एलालवंगमरिचकुलंजनवनावृतम् ॥ जंब्वाम्रातकभल्लातशेलुश्रीपर्णिवर्णितम् ॥ ३० ॥

मरः ॥ पुनःकथंभूतमिव ॥ तिलकेनललाटस्थगोपीचन्दनाद्येनअंकितंचिह्नितंमस्तकंयस्यसतथातमिव ॥ इवशब्दोत्रद्रष्टव्यः ॥ कैः तिलकैःक्षुरकैः ॥ तिलकःक्षुरकःश्रीमानित्यमरः ॥ चः समुच्चये ॥ २८ ॥ अक्षैरिति ॥ पुनःकथंभूतम् ॥ विराजितम् ॥ कैः ॥ अक्षैर्विभीतकैः ॥ त्रिलिंगस्तुविभीतकः ॥ अक्षद्रुमःकर्षफलोभूतावासःकलिद्रुमइत्यमरः ॥ प्लक्षैःकर्कटिभिः ॥ प्लक्षोजटीकर्कटीस्यादित्यमरः ॥ शल्लकीभिःगजभक्ष्याभिः ॥ गन्धिनीगजभक्ष्यातुसुवहासुरभीरसा महेरणाकुंदुरुकीशल्लकीह्लादिनीतिचेत्यमरः ॥ देवदारुहरिद्रुमैः ॥ देवदारवःशक्रपादपाः ॥ शक्रपादपःपारिभद्रकः भद्रदारुद्रुकिलिमंपीतदारुचदारुच पूतिकाष्ठंचसप्तस्युर्देवदारुणीत्यमरः ॥ हरिद्रुमाःपीतद्रवः ॥ अथपीतद्रुःकालेयकहरिद्रुमाइत्यमरः ॥ तेचतेचतैर्देवदारुहरिद्रुमैर्विराजितमिति ॥ समासस्थमपिविराजितपदंपृथग्योजनीयम् ॥ यद्वा अक्षादिभिःसहसदाफलानिपुष्पाणिचयासांवृक्षवल्लीनांताभिर्विराजितमिति ॥ २९ ॥ एलेति ॥ पुनःकथंभूतम् ॥ एला पृथ्वीका ॥ पृथ्वीकाचंद्रवालैलानिष्कुटिर्बहुलेत्यमरः ॥ लवंगानिलवंगलताकुसुमानिदेवकुसुमानिचेत्येतत् ॥ यदाहजयदेवः ॥ ललितलवंगलतापरिशीलनकोमलमलयसमीरेइति ॥ लवंगं देवकुसुमंश्रीसंज्ञमित्यमरः ॥ मरिचानिकोलकानिच ॥ अथवेल्लजं मरिचंकोलकंकृष्णमूषणंधर्मपत्तनमित्यमरः ॥ कुलंजनाश्चकुद्दालावेतसाइतिवा ॥ कुलंजनस्तुकुद्दालःकोविदारोपिसस्मृत इतिरत्नमाला ॥ कुलंजनोवेतसेस्याद्गृहपुत्रःकुलंजनइतिचहारावली ॥ तेषांवनैरावृतंव्याप्तम् ॥ पुनःकथंभूतम् ॥ जंब्वश्चवृक्षविशेषाः यासांफलंजंबूइतिप्रसिद्धम् ॥ फलेजंब्वाजंबूस्त्रीजंबुजां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ववमित्यमरः ॥ जंबूःसुमेरुहरितिद्वीपद्रुमविशेषयोरितिचविश्वः ॥ आम्रातकाःपीतनाः ॥ द्वौपीतनकपीतनौ आम्रातकइत्यमरः ॥ भल्लाताश्चभल्लातकावीरवृक्षाइतियावत् ॥ वीरवृक्षोऽरुष्करोग्निमुखीभल्लातकीत्रिष्वित्यमरः ॥ शेलवःश्लेष्मातकाः ॥ शेलुःश्लेष्मातकःपीतउद्दालोवहुवारकइत्यमरः ॥ श्रीपर्ण्यश्चगंभार्यः ॥ गंभारीसर्वतोभद्राकाश्मरीमधुपर्णिका श्रीपर्णीभद्रपर्णीचकाश्मर्यश्चेत्यमरः ॥ तैर्वर्णितंकथितंलक्षितमित्यर्थः ॥ ३० ॥ शाकेति ॥ पुनःकथंभूतम् ॥ शाकाःपत्रपुष्पाद्याः ॥ शाकाख्यंपत्रपुष्पादीत्यमरः ॥ अंतःखरस्पर्शानिवहिर्मृदुस्पर्शानिपत्राणियेषांतेशाकवृक्षाइतिवा ॥ शंखा श्चशुक्तयः ॥ शुक्तिःशंखःखुरःकोलदलंनखमित्यमरः ॥ तेषांवनैः ॥ चन्दनैश्चगंधसारैः ॥ गन्धसारोमलयजोभद्रश्रीश्चंदनोस्त्रियामित्यमरः ॥ रक्तचन्दनैश्चतिलपर्णीभिः ॥ तिलपर्णीतुपत्रांगरंजनंरक्तचंदनं कुचंदनंचेत्यमरः ॥ रम्यंसुन्दरम् ॥ पुनःकथंभूतम् ॥ हरीतक्यश्चाभयाः ॥ अभयात्वव्यथापथ्यावयस्थापूतनामृता हरीतकीहैमवतीचेतकीश्रेयसीशिवेत्यमरः ॥ कर्णिकाराद्रुमोत्पलाः ॥ अथद्रुमोत्पलः कर्णिकारःपरिव्याधइत्यमरः ॥ धात्र्यश्चामलक्यः ॥ धात्रीस्यादुपमातापिक्षितिरप्यामलक्यपीत्यमरः ॥ तासांवनैर्वनमेववाभूषणंशोभायस्य वनानिवाभूषयतीतिसतथातम् ॥ ३१ ॥ द्राक्षेति ॥ पुनःकथंभूतम् ॥ द्राक्षावल्ल्यश्चमृद्वीकावल्ल्यः ॥ मृद्वीकागोस्तनीद्राक्षास्वाद्वीमधुरसेतिचेत्यमरः ॥ नागवल्ल्यश्चतांबूलवल्ल्यः ॥ तांबूलवल्लीतांबूलीनागवल्ल्यपीत्यमरः ॥ कणावल्ल्यश्चजीरकवल्ल्यः ॥ जीरकोजरणोजाजीकणेत्यमरः ॥ यद्वा कणावल्ल्यःपिप्पलीलताः ॥ कृष्णोपकुल्या

शाकशंखवनैरम्यंचंदनैरक्तचंदनैः ॥ हरीतकीकर्णिकारधात्रीवनविभूषणम् ॥ ३१ ॥ द्राक्षावल्लीनागवल्लीकणावल्लीशतावृतम् ॥ मल्लिकायूथिकाकुंदमदयंतीसुगंधिनम् ॥३२॥ भ्रमद्भ्रमरमालाभिर्मालतीभिरलंकृतम् ॥ अलिच्छलागतंकृष्णंगोपीरंतुमनेकशः ॥३३॥ नानामृगगणाकीर्णंनानापक्षिविनादितम् ॥ नानासरित्सरःस्रोतःपल्वलैःपरितोवृतम् ॥३४॥ तुच्छश्रियःस्वर्गभूमीःपरिहायागतैरिव ॥ नानासुरनिकायैश्चविष्वग्भोगेच्छयोषितम् ॥३५॥

वैदेहीमागधीचपलाकणा ऊषणापिप्पलीशौंडीकोलेत्यमरः ॥ तासांशतैरावृतम् ॥ पुनःकथंभूतम् ॥ मल्लिकाश्चतृणशून्यानि ॥ तृणशून्यंतुमल्लिकेत्यमरः ॥ यूथिकाश्चमागध्यः ॥ अथमागधीगणिकायूथिकांवष्ठेत्यमरः ॥ कुंदा निचमाघ्यानि ॥ माघ्यंकुंदमित्यमरः ॥ मदयंत्यश्चज्योतिष्मत्यः ॥ मदयंतीमादयंतीपिन्याज्योतिष्मतीमतेतिधरणिः ॥ ताभिःसुगंधोवर्ततेयस्यसतथातम् ॥ सुगंधितामितिकश्चित् ॥३२॥ भ्रमद्भ्रमरेति ॥ पुनःकथंभूतम् ॥ मालतीभिर्जातीभिरलंकृतम् ॥ कथंभूताभिः ॥ भ्रमतांभ्रमराणांमालाःसमूहायासुतास्तथाताभिः ॥ अतएवअलिच्छलेनभ्रमरव्याजेनानेकशोवहुरूपं विधायगोपीर्गोपांगनाःक्रीडितुमागतंकृष्णमिवेत्युत्प्रेक्षा॥३३॥नानेति॥ पुनःकथंभूतम् ॥ विविधमृगसमूहैर्व्याप्तम् ॥ पुनःकथंभूतम् ॥ विचित्रविहगैःशब्दितम् ॥ पुनःकथंभूतम् ॥ परितः सर्वतोवृतमावृतम् ॥ कैः नानाऽनेकानियानिसरितांसरसांचस्रोतांसिपल्वलानिचअल्पोदकजलाशयास्तैः ॥ अत्रसरसांस्रोतस्त्वंनामानिर्झरत्वमेव ॥ ३४ ॥ तुच्छश्रियइति ॥ पुनःकथंभूतम् ॥ विविधदेवनिकायैर्विष्वक्समंततोभोगेषु सर्वभोगेष्वित्यर्थः ॥ विष्वग्भोगानांवाइच्छयाउषितमध्युषितमाश्रितमितियावत् ॥ आश्रयणेहेतुंवदन्कारणगर्भयोत्प्रेक्षयासुरनिकायान्विशिनष्टि ॥ तुच्छाश्रीःशोभायासांतास्तथाविधाःस्वर्गभूमीः स्वर्गस्थानानिपरिहायपरित्यज्यागतैरिवेति॥ अयंभावः ॥ स्वर्गभुवामपुण्यहेतुत्वात्तच्छ्रियोपितथात्वेनापुण्यहेतुत्वात्तत्प्रतियोगित्वाच्चविंध्यस्यतच्छ्रियश्चनानासुरनि ॥ ७ ॥

१ सञ्जातवर्णमितिवा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कायानामध्युषितत्वामिति ॥ तदुक्तम् ॥ आर्यावर्त्तःपुण्यभूमिर्मध्यंविंध्यहिमालयोरिति ॥ इहापिचसंसारतापसंहारिरेवावारिपरिष्कृतामित्यादि ॥ ३५ ॥ उत्सृजंतमिति ॥ पुनःकथंभूतमिव ॥ इतस्ततःसर्वत्रपत्रपुष्पैःपतद्भिरितिशेषः ॥ पतत्पुष्पैरितिवापाठः ॥ अर्घ्यमुत्सृजंतमिवप्रयच्छंतमिवआत्मानंप्रतिअध्वगान्वाप्रति ॥ पुनःकथंभूतमिव ॥ केकामयूरस्यध्वनिः ॥ केकावाणी मयूरस्येत्यमरः ॥ सावर्त्ततेयस्यसतथातस्यकेकिनोमयूरस्यकेकारवैःकेकाशब्दैर्दूरान्नारदमन्यान्वाऽध्वगान्प्रतिस्वागतंसुष्ठुआगतमागमनंकृतमितिकुर्वंतंकिलकुर्वंतमिवेत्युत्प्रेक्षा ॥ शाब्दीह्याकांक्षा शब्देनैवपूर्यतइतिन्यायात्केकिशब्दःप्रयुक्तः ॥३६॥ एवंनारदस्यविंध्यदर्शनमुक्त्वाविंध्यस्यापिनारददर्शनमाह॥अथेति ॥ अथनारदेनस्वस्यदर्शनानंतरंनभसिशैलोनारदंददर्श॥दूराद्दूरतएवतंप्रत्युज्जगा मचेत्यन्वयः ॥ ३७ ॥ ब्रह्मसून्विति ॥ हिरण्यगर्भतनयशरीरकांत्याविनाशितगुहातिमिरोमानसंतमोहृत्स्थमज्ञानमुज्जहौत्यक्तवान् ॥ ३८ ॥ ब्रह्मतेजइति ॥ ब्राह्मणोनारदस्यतेजसःप्रभा वात्समुत्पन्नंसाध्वसंसंभ्रमोयस्यसतथा ॥ साधुयथास्यात्तथासतीसन्मार्गगाक्रियायस्य साधूनामिववासतीक्रियायस्यसतथा ॥ कठिनोपिपाषाणस्वभावोपिपरित्यज्यकाठिन्यमितिशेषः ॥ काठिन्यं

उत्सृजंतमिवार्घ्यंवैपत्रपुष्पैरितस्ततः ॥ केकिकेकारवैर्दूरात्कुर्वंतंस्वागतंकिल ॥ ३६ ॥ अथसूर्यशताभासंनभसिद्योतितांबरम् ॥ नारदंदृष्टवाञ्छैलो दूरात्प्रत्युज्जगामतम् ॥ ३७ ॥ ब्रह्मसूनुवपुस्तेजोदूरीकृतदरीतमाः ॥ तमागच्छंतमालोक्यमानसंतमउज्जहौ ॥ ३८ ॥ ब्रह्मतेजःसमुद्भूतसाध्वसःसाधुस त्क्रियः ॥ कठिनोपिपरित्यज्यधत्तेमृदुलतांकिल ॥ ३९ ॥ दृष्ट्वामृदुलतांतस्यद्वैरूप्येपिसनारदः ॥ मुमुदेसुतरांसंतःप्रश्रयग्राह्यमानसाः ॥ ४० ॥ गृहानायांतमालोक्यगुरुंवाऽगुरुमेववा ॥ योऽगुरुर्नम्रतांधत्तेसगुरुर्नगुरुर्गुरुः ॥ ४१ ॥ तंप्रत्युच्चैःशिराःसोपिविनम्रतरकंधरः ॥ शैलस्त्विलामिलन्मौलिः प्रणनाममहामुनिम् ॥४२॥ तमुत्थाप्यकराग्राभ्यामाशीर्भिरभिनंद्यच ॥ तदुद्दिष्टासनंभेजेमनसोपिसमुच्छ्रितम् ॥४३॥ सदध्नामधुनाज्येननीराद्राक्षतदूर्व या ॥ तिलैःकुशैःप्रसूनैस्तमष्टांगार्घ्यैरपूजयत् ॥ ४४ ॥ गृहीतार्घ्यंकिलश्रांतंपादसंवाहनादिभिः ॥ गतश्रममथालोक्यबभाषेऽवनतोगिरिः ॥ ४५ ॥

चेतिकचित्पाठः मृदुलतांकोमलताम् ॥ किलेतिनिश्चितम् ॥ कापट्यमकृत्वेत्येतत् ॥ धत्तेआधत्त ॥ ३९ ॥ दृष्ट्वेति ॥ द्विरूपमेवद्वैरूप्यंतस्मिन्नुभयरूपेपीत्यर्थः ॥ सुतरामतिशयेन ॥ युक्तमे वैतदित्याह ॥ सन्तइति ॥ प्रश्रयेणविनयेनग्राह्यमायत्तंमानसमंतःकरणंयेषांतेतथा ॥ ४० ॥ गृहानिति ॥ अगुरुरितिपदच्छेदः ॥ गुरुरत्रगुरुतरोमहान्वा ॥ ४१ ॥ तंप्रतीति ॥ उच्चैरूर्ध्वंशिरोयस्य उच्चैःशिराः ॥ अपिर्भिन्नक्रमे ॥ सशैलःउच्चैःशिराअपिविनम्रतरकंधरोऽतिप्रणतग्रीवःसंस्तंमहामुनिंप्रतिप्रणनामेत्यन्वयः ॥ प्रकृत्युच्चैरितिकचित् ॥ महांश्चासौमुनिश्चेतिमहामुनिस्तम् ॥ तत्रमहत्त्व मप्रतिहतेच्छत्वनिवृत्तत्वसर्वतत्त्वज्ञत्वादिरूपम् ॥ तदुक्तम् ॥ निवृत्तःसर्वतत्त्वज्ञःकामक्रोधाविवर्जितः ध्यानस्थोनिष्क्रियोदांतस्तुल्यमृत्कांचनोमुनिरिति ॥ तुशब्दोभक्तिश्रद्धावद्योती ॥ तदवद्योतकमाह ॥ इलायांपृथिव्यांमिलतिपततिमौलिर्मस्तकंयस्यसतथोक्तः ॥४२॥ अभिनंद्यसमर्धयित्वा॥४३॥सदध्नेति ॥ नीरेणजलेनार्द्राःप्रक्षालिताइत्यर्थः॥ तेचतेअक्षताश्चेतिनीरार्द्राक्षतास्तैःसहदूर्वयेति४४॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अघेति ॥ रजोरजःस्वभावोगुणोवा ॥ महसातेजसा ॥ अपिर्भिन्नक्रमे ॥ अंतरेअंतःकरणेभवतीत्यांतरमज्ञानंतदपिपरिहृतमित्यर्थः ॥ ४६ ॥ सफलेति ॥ सुकृतैःपुण्यैःकर्तृभिःफलितमफालि ॥ ४७ ॥ धराधरत्वमिति ॥ कुलिषुपर्वतेषुमान्यंमानयोग्यंपूजार्हमित्येतत् ॥ किंचिदुच्छ्वस्यकिंचिद्यथास्यात्तथोच्छ्वासंमुक्त्वा ॥ ४८ ॥ कुलिवरःपर्वतेषुश्रेष्ठः ॥ मुनिवरमितिक्वचित्पाठः ॥ संभ्रमापन्नमानसःभयप्राप्तांतःकरणः ॥ ४९ ॥ अदृष्टमिति ॥ विष्टपत्रयेभुवनत्रयेयदिष्टमभिलषितंतत्त्वादृष्टमेतिनदृष्टंपुराणैरितिशेषः ॥ यद्वा नोस्माकमदृष्टंभावितत्त्वदृष्टंगोचरइत्यर्थः ॥ अनुक्रोशोदया ॥ ५० ॥ त्वदिति ॥ मेदुरोमंथरः ॥ आनन्दगद्गदआरवआरावःशब्दोयस्यममसोहमसकृद्वक्तुंनसमर्थस्तथाप्येकंकथयामीत्यर्थः ॥ मेदुरारावत्वेहेतुमाह ॥ त्वदिति ॥ मेदुरोदरइतिक्वचित्पाठः ॥ ५१ ॥ धरेति ॥ मेर्वादौधराधरणसामर्थ्यंपूर्वपूरुषैर्यद्वर्ण्यतेतत्तेषांसमुदायादेकीभावादहमेकःकेवलोऽन्यनिरपेक्षोधरांदधेइतिस्वस्योत्कर्षोक्तिः ॥ ५२ ॥ एवंसामान्येनविनिंद्यप्रत्येकंविनिंदति ॥ गौरीगुरुत्वादिति ॥ गुरुरत्रपिता ॥ आदिपत्यादादिपतित्वात् ॥ आधिपत्यादितिक्वचित्पाठः ॥ यदाहकालिदासः ॥ हिमालयोनामनगाधिराजइति ॥ सम्बन्धित्वात्श्वशुरत्वात् ॥

अघसघःपरिहृतंत्वदंघ्रिरजसारजः ॥ त्वदंगसंगिमहसासहसाऽप्यांतरंतमः ॥ ४६ ॥ सफलर्धिरहंचाद्यसुदिवाद्यचमेमुने ॥ प्राक्कृतैःसुकृतैरद्यफलितंमेचिरार्जितैः ॥ ४७ ॥ धराधरत्वंकुलिषुमान्यंमेऽद्यभविष्यति ॥ इतिश्रुत्वातदाकिंचिदुच्छ्वस्यस्थितवान्मुनिः ॥ ४८ ॥ पुनरूचेकुलिवरःसंभ्रमापन्नमानसः ॥ उच्छ्वासकारणंब्रह्मन्ब्रूहिसर्वार्थकोविद ॥ ४९ ॥ अदृष्टंतवनोदृष्टंयदिष्टंविष्टपत्रये ॥ अनुक्रोशोत्रमयिचेदुच्यतांप्रणतोस्म्यहम् ॥ ५० ॥ त्वदागमनजानन्दसंदोहैर्मेदुरारवः ॥ अलंनवक्तुमसकृत्तथाप्येकंवदाम्यहम् ॥ ५१ ॥ धराधरणसामर्थ्यंमेर्वादौपूर्वपूरुषैः ॥ वर्ण्यतेसमुदायात्तदहमेकोदधे धराम् ॥ ५२ ॥ गौरीगुरुत्वाद्धिमवानादिपत्याच्चभूभृताम् ॥ संबंधित्वात्पशुपतेःसएकोमान्यभृत्सताम् ॥ ५३ ॥ नमेरुःस्वर्णपूर्णत्वाद्रत्नसानुतयाथवा ॥ सुरसद्मतयावापिक्वापिमान्योमतोमम ॥ ५४ ॥ परंशतंनकिंशैलाइलाकलनकेलयः ॥ इहसंतिसतांमान्यामान्यास्तेतुस्वभूमिषु ॥ ॥ ५५ ॥ मन्देहदेहसंदेहादुदयैकदयाश्रितः ॥ निषधोनौषधिधरोऽप्यस्तोप्यस्तमितप्रभः ॥ ५६ ॥

राजादिगुणरहितत्वात् ॥ स्वतोमान्योनभवतिगौरीपितृत्वादिपतित्वादिहेतुभिःसएकोमान्यइतिवक्रोक्त्यानिन्दा ॥ नाधिपत्याच्चेतिपाठेसाक्षादपिखण्डमण्डलाधिपत्यवन्मुख्याधिपत्याभावादिति ॥ मान्यभृत्सतांशिष्टानांमाननाधारी ॥ मान्यभूःसतामितिक्वचित्पाठः ॥ ५३ ॥ ननुसएकएवमान्यइतिकथमुच्यतेस्वर्णपूर्णत्वादिनासुमेरोरपिमान्यत्वादित्यतआह ॥ नमेरुरिति ॥ तस्याल्पसारत्वादितिभावः ॥ ५४ ॥ परमिति ॥ शतात्परंपरंशतम् ॥ परःशतमितिपाठेशतात्परंपरःशतंअसंख्यातमित्यर्थः ॥ इलाकलनकेलयः पृथ्वीधरणलीलाः ॥ ५५ ॥ मंदेहेति ॥ मन्देहाराक्षसास्तेषांदेहसंदेहादेहनाशंप्राप्यालोच्यउदयैकदयाश्रितः उदयःउदयगिरिः सचएकदयाश्रितश्चएषांमन्देहानांसूर्योदयेजीवनलक्षणांदयामाश्रितश्चसः ॥ मन्देहानामराक्षसाब्रह्मणःशापाद्रात्रौम्रियन्तेसूर्योदये उदयपर्वतेपुनर्जीवन्तीतिवैष्णवादौप्रसिद्धम् ॥ उदयेकदयाश्रिताइतिपाठेस्पष्टएवार्थः ॥ निर्गताऔषधयोओषधयोवायस्मादसौनिषधः ॥ ओकारौकारेकाराणामश्रवणमार्षम् ॥ एवमुत्तरत्रापियथायथंसाधुत्वमवसेयम् ॥ तदुक्तम् ॥ पदज्ञैर्नातिनिर्बंधःकर्त्तव्योमुनिभाषणे अर्थस्मरणतात्पर्यान्नाद्रियंतेहिलक्षणम् ॥ किंच ॥ यान्युज्जहारमाहेशाद्व्यासोव्याकरणार्णवात् तानिकिंपदरत्नानिमां ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिः ाणानिगोष्पदेइत्यादि ॥ ५६ ॥ नलिश्चेति ॥ नीलीनीलिमागुणस्तस्यनिलयःअन्धकाराश्रयइत्यर्थः ॥ अर्शआद्यच्प्रत्ययेनतथाप्रतीतेः ॥ मन्दलोचनःमन्दप्रकाशः ॥ मन्दंरोचतइतिमन्दलोचनः ॥ रायंधनम् ॥ ५७ ॥ हेमकूटइति ॥ कूटःकूटइतिशब्दउत्तरपदंयेषांतेतथा ॥ एवार्थेतुशब्दः ॥ कूटोत्तरपदाएवतइत्यर्थः ॥ किष्किधेति ॥ आदिपदेन मैनाकादयोगृह्यंते ॥ क्षुद्रत्वात्तेषामितिभावः ॥ ५८ ॥ इतिअखर्वगर्वसंसर्गोमहाभिमानसंश्लेषइत्यर्थः ॥ ५९ ॥ श्रीशैलेति ॥ श्रीशैलोमुख्यःप्रधानोयेषाम् ॥ मन्दरमधुसूदनोगौडेप्रसिद्धः ॥ मन्दरादीनांतेतथा ॥ तदुक्तम् ॥ वीरचन्दनयोर्मध्येमन्दरोनामपर्वतः ॥ यस्यारोहणमात्रेणनरोनारायणोभवेदित्यादि ॥ अत्रापिचवक्ष्यति ॥ श्रीशैलशिखरंश्रीम

नीलश्चनीलीनिलयोमन्दरोमन्दलोचनः ॥ सर्पालयःसमलयोरायंनावैतिरैवतः ॥ ५७ ॥ हेमकूटत्रिकूटाद्याःकूटोत्तरपदास्तुते ॥ किष्किंधक्रौंचसह्याद्याभारसह्यानतेभुवः ॥ ५८ ॥ इतिविंध्यवचःश्रुत्वानारदोऽचिन्तयद्धृदि ॥ अखर्वगर्वसंसर्गोनमहत्त्वायकल्पते ॥ ५९ ॥ श्रीशैलमुख्याः किंशैलानेहसंत्यमलश्रियः ॥ येषांशिखरमात्रादिदर्शनंमुक्तयेसताम् ॥ ६० ॥ अद्यास्यबलमालोक्यमितिध्यात्वाब्रवीन्मुनिः ॥ सत्यमुक्तंहिभवतागिरिसारंविवृण्वता ॥ ६१ ॥ परंशैलेषुशैलेंद्रोमेरुस्त्वामत्रमन्यते ॥ मयानिःश्वसितंचैतत्त्वयिचापिनिवेदितम् ॥ ६२ ॥ अथवामाद्विधानांहिकेयंचिंतामहात्मनाम् ॥ स्वस्त्यस्तुतुभ्यमित्युक्त्वाययौसव्योमवर्त्मनि ॥ ६३ ॥ गतेमुनौनिनिंदस्वमतीवोद्विग्नमानसः ॥ चिन्तामवापमहतींविंध्योवंध्यमनोरथः ॥ ६४ ॥ विंध्यउवाच ॥ ॥ धिग्जीवितंशास्त्रकलोज्झितस्यधिग्जीवितंचोद्यमवर्जितस्य ॥ धिग्जीवितंज्ञातिपराजितस्यधिग्जीवितंव्यर्थमनोरथस्य ॥ ६५ ॥ कथंभुनक्तिसदिवाकथंरात्रौस्वपित्यहो ॥ रहःशर्मकथंतस्ययस्याभिभवनंरिपोः ॥ ६६ ॥ अहोदवाग्निदवथुस्तथामांनसबाधते ॥ बाधतेतुयथाचित्तेचिन्तासंतापसंततिः ॥ ६७ ॥ युक्तमुक्तंपुराविद्भिश्चिन्तामूर्तिःसुदारुणा ॥ नभेषजैर्लंघनैर्वानचान्यैरुपशाम्यति ॥ ६८ ॥ चिन्ताज्वरोमनुष्याणांक्षुधांनिद्रांबलंहरेत् ॥ रूपमुत्साहबुद्धिंश्रींजीवितंचनसंशयः ॥ ६९ ॥

दिदन्तद्यद्विलोकनात् ॥ पुनर्भवोमनुष्याणांभवेत्रनभवेत्कचिदिति ॥ आदिपदेनसानुमात्रादीनिगृह्यंते ॥ ६० ॥ आलोक्यंज्ञातव्यम् ॥ सत्यमिति ॥ गिरिसारंपर्वतानांसामर्थ्यंविवृण्वतादर्शयताउपहासपरोहिशब्दः ॥ ६१ ॥ ६२ अथवेति ॥ महात्मनामुदारचित्तानाम् ॥ अथवामहतिब्रह्मणिआत्मायेषांतेतथातेषाम् ॥ हिशब्दोऽरुचौ ॥ ६३ ॥ गतइति ॥ वंध्यमनोरथोव्यर्थाभिलाषः ॥ ६४ ॥ धिगिति ॥ कलालेशोविद्यावा ॥ ६५ ॥ कथमिति ॥ दिवादिवसे ॥ भुनक्तिभुंक्ते ॥ रहइतिग्राम्यधर्मोक्तिः ॥ अथवारहःशर्मएकांतवासजन्यंसुखम् ॥ ॥ ६६ ॥ अहोइति ॥ दवाग्निदवथुर्वनाग्निकंपः ॥ बाधतेतुबाधतएव ॥ पादपूरणेवातुशब्दः ॥ तुहिचस्महवैपादपूरणइत्यमरः ॥ एवमन्यत्रापि ॥ ६७ ॥ ६८ ॥ चिन्ताज्वरइतिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्साहबुद्धि उत्साहेनसहितांबुद्धिम् ॥ उत्साहबुद्धिश्रीरितिवापाठः ॥ ६९ ॥ ज्वरइति ॥ नवतांतरुणताम् ॥ ७० ॥ धन्यइति ॥ चरकश्चरकाचार्यआयुर्वेदप्रवर्त्तकः ॥ इह चिंताज्वरे ॥ नचरतिनप्रभवतीत्यर्थः ॥ नासत्यौअश्विनीकुमारावपिनासत्यौनआईषदपिसमर्थौ ॥ यथार्थावित्यर्थः ॥ नशब्दोनिषेधे ॥ अभावेनह्यनोनेत्यमरः ॥ ७१ ॥ जयोपायंविमृशति ॥ किंकरोमीति ॥ जयोपायंविनिश्चित्यस्वयमेवस्वात्मानमाह ॥ अतइतःस्थानात्तस्यशिरस्युत्प्लुत्योत्फालंकृत्वापतामीति ॥ स्वयमेवनिराकरोति ॥ नपतामीति ॥ ७२ ॥ क्रिमित्याकांक्षायामाह ॥ शक्रंकोपयतेति ॥ यत्रजये ॥ यस्माद्वापक्षस्यममचेष्टितंधिक् ॥ धिगित्यधिक्षेपे ॥ धिग्गर्हितमित्यर्थः ॥ ७३ ॥ मेरोःस्पर्धांस्वस्मिन्विघटयति ॥ अथवेति ॥ स्पर्धायांकारणाभावादित्यर्थः ॥ पुनःस्पर्धासंभावयति ॥ भूमिभारभृतइति ॥ महाभारंदधानाःप्रायःप्रायशोभ्रांतिभूमयोऽज्ञानाश्रयाभवंतीत्यर्थः ॥ भूमभर्मेतिपाठेबहुस्वर्णानिबहुधनानिदधतइत्यर्थः ॥ तपनीयंशातकुंभंगांगेयंभर्मकर्बुरमित्यमरः ॥ ७४ ॥ स्पर्धायांहेत्वंतरमुद्भावयाति ॥ अलीकवाक्कमिति ॥ अलीकवाक्कासंभवेहेतुंवदन्नारदंविशिनष्टि ॥ ब्रह्मेति ॥ ब्रह्मणिपरमात्मनिश्रवण

ज्वरोव्यतीतेषडहेजीर्णज्वरइहोच्यते ॥ असौचिन्ताज्वरस्तीव्रःप्रत्यहंनवतांव्रजेत् ॥ ७० ॥ धन्योधन्वंतरिर्नात्रचरकश्चरतीहन ॥ नासत्यावपिनाऽसत्यावत्रचिन्ताज्वरेकिल ॥ ७१ ॥ किंकरोमिक्कगच्छामिकथंमेरुंजयाम्यहम् ॥ उत्प्लुत्यतस्यशिरसिपतामिनपताम्यतः ॥ ७२ ॥ शक्रंकोपयतापूर्वमस्मद्गोत्रेणकेनचित् ॥ पक्षहीनःकृतोयत्राधिगपक्षस्यचेष्टितम् ॥ ७३ ॥ अथवासकथंमेरुस्तथोच्चैःस्पर्द्धतेमया ॥ भूमेर्भारभृतःप्रायोभवंतिभ्रांतिभूमयः ॥ ७४ ॥ अलीकवाक्कमथवासंभाव्यंनारदेकथम् ॥ ब्रह्मचारिणिवेदज्ञेसत्यलोकनिवासिनि ॥ ७५ ॥ युक्तायुक्तविचारोथमादृशेनोपयुज्यते ॥ पराक्रमेष्वशक्तानांविचारंगाहतेमनः ॥ ७६ ॥ अथवाचिन्तनैरेतैःकिंव्यर्थैर्विश्वकारकम् ॥ विश्वेशंशरणंयायांसमेबुद्धिंप्रदास्यति ॥ ७७ ॥ अनाथनाथःसर्वेषांविश्वनाथोहिगीयते ॥ क्षणंमनसिसंचिंत्यभवेदित्थमसंशयम् ॥ ७८ ॥ एतदेवकरिष्यामिनेष्टंकालविलंबनम् ॥ विचक्षणैरुपेक्ष्यौनवर्द्धमानौपरामयौ ॥७९॥ मेरुंप्रदक्षिणीकुर्यान्नित्यमेवदिवाकरः ॥ सग्रहर्क्षगणोनूनंमन्यमानोबलाधिकम् ॥ ८० ॥ इतिनिश्चित्यविन्ध्याद्रिर्ववृधेसमृधेक्षणः ॥ अनंतगगनस्यांतंकुर्वद्भिःशिखरैरिव ॥ ८१ ॥

मननादिपूर्वकंचरितुंशीलंयस्यसतथातस्मिन् ॥ अतएववेदनंवेदःस्वप्रकाशश्चिदात्मातंजानातीतितथातस्मिन् ॥ अतएवसत्यःकालत्रयाऽबाध्यःपरमात्मासएवलोक्यतेमुमुक्षुभिःप्राप्यतइतिलोकस्तस्मिन्निवसितुमद्वैतब्रह्मात्मैक्यानुभवेनस्थातुंशीलंयस्यसतथातस्मिन् ॥ प्राक्तंव्याख्यानंस्पष्टम् ॥ ७५ ॥ अतोनारदस्यालीकवाक्त्वंयुक्तमयुक्तंवाऽयंविचारोवामयिनोपयुज्यतइत्याह ॥ युक्तायुक्तेति ॥ तर्हिकिमुपयुज्यतेउद्यमएवेत्याह ॥ पराक्रमेष्विति ॥ ७६ ॥ करोतुनामनीतिज्ञोव्यवसायमितस्ततः ॥ फलंपुनस्तदेवास्ययद्विधेर्मनसिस्थितमितिन्यायादुद्यमोनैकांतिकफलइतिहृदिनिधायाह ॥ अथवेति ॥ ७७ ॥ अन्तर्यामिप्रेरितोनिश्चयंविदधाति ॥ क्षणमितिश्लोकेन ॥ ७८ ॥ कालाविलंबनेहेतुमाह ॥ विचक्षणैरिति ॥ परामयौशत्रुरोगौ ॥ ७९ ॥ ८० ॥ इतिनिश्चित्येति ॥ सविंध्यइत्येवंनिश्चित्यववृधइत्यन्वयः ॥ मृधेक्षणः मृधेसंग्रामेस्पर्धायामित्येतत्ईक्षणंदर्शनंअभिनिवेशोयस्यसतथा ॥ समृधेषणइत्यैकपद्यपाठेसम्यक्ऋध्सम‍ृधःसम्यग्वृद्धिरिति ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावत् ॥ तत्रैषणाइच्छायस्यसतथा ॥ ८१ ॥ सम्यग्वृद्धीच्छयाभिवृद्धौपरामर्शपूर्वकंहेतुमाह ॥ कैश्चिदिति ॥ ८२ ॥ निरुद्धचेतिव्यासोक्तिः ॥ अत्रअनंतगगनस्यांतंकुर्वद्भिरविशिखरैर्वैवृध
इतिवचनात् ॥ निरुध्यत्राम्रमध्वानंकृतकृत्यइव स्वस्थोभवदित्युक्तेश्चदक्षिणोत्तरमार्गयोरवरोधोवगम्यते ॥ अतएवाग्रेवक्ष्यति ॥ क्रमंतःसर्वमर्वतोहेलयाहेलिकस्यखम् ॥ नशेकुरग्रतोगन्तुमतोनू
रुर्व्यजिज्ञपदित्यादि ॥ ननुप्रबलतरेवैरिणिसतिसुस्थताऽयुक्तेत्यतआह ॥ भवाधीनेति ॥ भवत्यस्मादितिभवोऽदृष्टंतदधीनातदायत्तेत्यर्थः ॥ भवईश्वरस्तदधीनावा ॥ ८३ ॥ ननुसूर्यमार्गा
वरोधेकथंकृतकृत्यतातत्राह ॥ यमद्योति ॥ यमकर्तासूर्यः ॥ महितःपूजितः ॥ ८४ ॥ ननुशक्तस्यपरानुपद्राव्यस्वसामर्थ्यदर्शनेनकिंतत्राह ॥ यावदिति ॥ सामर्थ्यादर्शनेलंघनेदृष्टांतो
ज्वलनइति ॥ दारुगःकाष्ठगः ॥ ८५ ॥ ८६ ॥ ॥ इतिश्रीकाशीखंडेरामानंदकृतायांटीकायांप्रथमोध्यायः ॥ १ ॥ ॥ छ ॥ द्वितीयेतरणेर्याननिरोधोनिमिषद्दशाम् ॥ सत्यलोक
स्यसंप्राप्तिःप्रभावश्चनिगद्यते ॥ १ ॥ विंध्यावरोधेनसूर्यगमननिरोधंवक्तुमादौतावत्तस्योदयमाह ॥ सूर्यआत्मेति ॥ सूर्यउदयगिरौ ॥ अत्रउदयगिरिरस्तगिरिरितिचज्योतिःशास्त्रप्रक्रियया ब्रह्म

कैश्चित्सार्द्धंविरोधोनकर्तव्यःकेनचित्क्वचित् ॥ कर्तव्यश्चेत्प्रयत्नेनयथानोपहसेज्जनः ॥ ८२ ॥ निरुध्यब्राध्नमध्वानंकृतकृत्यइवाद्रिराट् ॥ स्वस्थोऽ
भवद्भवाधीनाप्राणिनांहिभविष्यता ॥ ८३ ॥ यमद्ययमकर्तासौदक्षिणंप्रक्रमिष्यति ॥ सकुलीनःसचश्रीमान्समहान्महितः सच ॥ ८४ ॥ यावत्स्वश
क्तिंशक्तोपिनदर्शयतिकर्हिचित् ॥ तावत्सलंघ्यःसर्वेषांज्वलनोदारुगोयथा ॥ ८५ ॥ इतिचिन्तामहाभारंत्यक्त्वातस्थौस्थिरोद्यमः ॥ आकांक्षमाणस्तरणे
रुदयंब्राह्मणोयथा ॥ ८६ ॥ इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखंडेपूर्वार्धेविन्ध्यवर्धनंनामप्रथमोऽध्यायः ॥ १ ॥
व्यासउवाच ॥ सूर्यआत्मास्यजगतस्तस्थुषस्तमसोरिपुः ॥ उदियायोदयगिरौशुचिप्रसृमरैः करैः ॥ १ ॥ संवर्धयन्सतांधर्मान्न्यक्कुर्वंस्तामसींस्थि
तिम् ॥ पद्मिनींबोधयंस्त्विष्टांरात्रौमुकुलिताननाम् ॥ २ ॥ हव्यंकव्यंभूतबलिंदेवादीनांप्रवर्तयन् ॥ प्राह्णापराह्णमध्याह्नक्रियाकालंविजृंभयन् ॥ ३ ॥

सिद्धांतशिरोमण्याद्युक्तयाज्ञेयः ॥ तत्रहि पातालादुद्गच्छन्सूर्योयत्रयैर्दृश्यतेसतेषामुदयाचलः ॥ भूमेःपातालंगच्छन्यत्रादृश्योभवतिसोस्ताचलः ॥ तथापुराणप्रक्रियायांच ॥ यैर्यत्रदृश्यतेभा
स्वान्सतेषामुदयःस्मृतः ॥ यत्रचादर्शनंयातितत्रैवास्तमनंविदुः ॥ नैवास्तमनमर्कस्यनोदयःसर्वदासतः ॥ उदयास्तमनाख्यंहिदर्शनादर्शनंरवेरित्युक्तत्वात्प्रथमदर्शनोपलक्षितःप्रदेशउदयगिरिः ॥
प्रथमादर्शनोपलक्षितःप्रदेशोस्तगिरिरिति ॥ उदियायउदगादुदितइतियावदित्यन्वयः ॥ किंभूतः ॥ जंगमस्यस्थावरस्यचात्माफलरूपः ॥ योसावादित्येपुरुषःसोसावहमितिश्रुतेः ॥ फल
रूपत्वेहेतुमाह ॥ तमसोरिपुरिति ॥ तमसोऽज्ञानस्यतत्त्वमस्यादिवाक्योत्थबुद्धिवृत्त्यभिव्यक्तःसन्रिपुर्नाशकइत्यर्थः ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ किंकुर्वन् ॥ शुचिप्रसृमरैःशुचयश्चतेपावित्र्य
हेतुत्वात्प्रसृमराश्चप्रसरणशीलास्तैःकरैरश्मिभिः ॥ १ ॥ सतांसन्मार्गवर्तिनांधर्मान्वैदिकीःक्रियाःसंवर्धयन्तमसइयंतामसीतमोगुणयुक्तानांतामसानांवाइयंतामसीतांतामसींस्थितिंनिष्ठांन्यक्कुर्वं
स्तिरस्कुर्वन्निति ॥ इष्टामभिप्रेताम् ॥ अभिप्रेतत्वंचास्याःकरेधृतत्वात् ॥ तुश्चार्थेसमुच्चयवाचीबोधयंश्चेत्यर्थः ॥ २ ॥ हव्यंदेवेभ्योदेयम् ॥ कव्यंपितृभ्योदेयम् ॥ भूतबलिंभूतेभ्योदेयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजृंभयन्कुर्वन्निति ॥ ३ ॥ असतामिति ॥ तमसस्तमोगुणस्य ॥ यामिनीरात्रिःसैवकालस्तेनकलितंगिलितम् ॥ ४ ॥ यस्मिन्निति ॥ पुण्यजनोदयः पुण्यजनामंदेहाख्याराक्षासाः ॥ यातुधानःपुण्यजनोनैर्ऋतोयातुरक्षसीत्यमरः ॥ सूर्योदयात्पूर्वंतेषामुत्पत्तेः ॥ पुण्यजनाधार्मिकालोकाइतिवा ॥ तेषामुदयउत्कर्षः ॥ अनुदितइतिपाठेपुण्यजनाःसामान्यराक्षसाः ॥ उदयास्तमनेदिनरात्रित्वेननिरूपयन्परोपकारस्यसद्यःफलवत्त्वमाह ॥ अहोइति ॥ अहोइत्याश्चर्ये ॥ ५ ॥ सायमिति ॥ प्राचींपूर्वांदिशमाश्वास्यसांत्वयित्वातथाग्नेयींदिशांनाथःदक्षिणांदिशं प्रतिप्रस्थितवान्प्रयाणंकृतवानितिषष्ठेनान्वयः ॥ आश्वास्येत्यनेनाकांक्षितंहेतुमाह ॥ सानुरागेति ॥ अनुरागोऽनूरुकिरणस्तेनसार्धंवर्त्तमानायेकरारश्मयस्तेषांस्पर्शास्तैः ॥ कथंभूतांप्राचीम् ॥ खण्डितांप्रातःकालेप्राप्तात्मनाथाम् ॥ तदुक्तम् ॥ निद्राकषायमुकुलीकृतचारुनेत्रोनारीनखव्रणचयेनचचर्चितांगः ॥ यस्याःकुतोपिपातिरेतिगृहेप्रभातेसाखंडितेतिकथिताकविभिःपुराणैरिति ॥ तत्रनितरांद्रातिस्वकार्यंव्याप्नोतीतिनिद्राअविद्यासैवकषायःतत्त्वज्ञानमंतरेणदुस्त्यजत्वात्तेनमुकुलीकृतमाच्छादितंचारुनेत्रमुत्तमज्ञानंयस्यसनिद्राकषायमुकुलीकृतचारुनेत्रः ॥ तथामंदेहानांराक्षसानांनारीनखनामानोनारीनखतुल्यावायेवाणास्तैर्योव्रणचयःक्षतसमुदायस्तेनचर्चितानिचिह्नितानिअंगानियस्येत्येतदपिविशेषणद्वयंसूर्यपक्षेयोजनीयम् ॥ ६ ॥ ननुप्रणयकोपितायाःकांतायाःसानुरागकरस्पर्श

असतांहृदिवक्रेषुनिर्दिशंस्तमसःस्थितिम् ॥ यामिनीकालकलितंजगदुज्जीवयन्पुनः ॥ ४ ॥ यस्मिन्नभ्युदितेजातःसम्यक्पुण्यजनोदयः ॥ अहोपरोपकरणंसद्यःफलतिनेतिचेत् ॥ ५ ॥ सायमस्तमितःप्रातःकथंजीवेद्रविःपुनः ॥ सानुरागकरस्पर्शैःप्राचीमाश्वास्यखंडिताम् ॥ ६ ॥ यामंभुक्त्वा तथाग्नेयींज्वलंतींविरहादिव ॥ लवंगैलामृगमदचंद्रचंदनचर्चिताम् ॥ ७ ॥ तांबूलीरागरक्तौष्ठींद्राक्षास्तबकसुस्तनीम् ॥ लवलीवल्लिदोर्वल्लींकंकोलीपल्लवांगुलिम् ॥ ८ ॥ मलयानिलनिःश्वासांक्षीरोदकवरांबराम् ॥ त्रिकूटस्वर्णरत्नांगींसुवेलाद्रिनितंबिनीम् ॥ ९ ॥ कावेरीगौतमीजंघांचोलचोलांशुकावृताम् ॥ सह्यदर्दुरवक्षोजांकांतीकांचीविभूषणाम् ॥ १० ॥

मात्रेणकिंतत्राह ॥ यामंभुक्त्वेति ॥ यामंप्रहरमात्रंचभुक्त्वा ॥ भोगोऽत्रतस्यास्तमआद्युत्सारणेनपालनमेव ॥ आग्नेय्याविशेषणंविरहादिति ॥ विरहाद्विरहजन्यखेदादित्यर्थः ॥ ज्वलंतीमग्निवत्प्रस्फुरंतीम् ॥ अतएवोक्तमाग्नेयीमिति ॥ उभयोर्वाविशेषणम् ॥ पक्षांतरेव्याख्यानंस्पष्टम् ॥ इदानींदक्षिणांदिशंविशेषयन्स्त्रीसाम्यार्थानिविशेषणान्याह ॥ लवंगैलामृगमदेत्यादिचतुर्भिः ॥ चन्द्रःकर्पूरः ॥ अथकर्पूरमस्त्रियाम् घनसारश्चंद्रसंज्ञइत्यमरः ॥ ७ ॥ तांबूलीति ॥ तांबूलीनागवल्ल्याख्यालता ॥ द्राक्षामृद्वीका ॥ स्तवकोगुच्छः ॥ सुस्तनीमित्यत्रस्तनशब्देनस्तनाग्रंलक्ष्यते ॥ सह्यदर्दुरवक्षोजामित्यनेनस्तनयोर्वक्ष्यमाणत्वात् ॥ लवलीवल्लिर्लवलीलतासैवदोर्वल्लीबाहुलतायस्याःसातथाताम् ॥ कंकोलीअशोकस्तस्याःपल्लवाःकिसलयान्येवांगुलयोयस्याःसातथाताम् ॥ ८ ॥ त्रिकूटस्थानियानिस्वर्णरत्नानितान्यंगेषुयस्याःसातथाताम् ॥ रक्तांगीमितिपाठेत्रिकूटस्वर्णैरक्तानिरंजितानिभूषितान्यंगानियस्यास्ताम् ॥ सुवेलश्चासावद्रिश्चेतिसुवेलाद्रिस्सएवनितंबःस्त्रीकट्याःपश्चाद्भागःस्ववर्त्ततेयस्याःसातथाताम् ॥ ९ ॥ कावेरीति ॥ जंघाप्रसृताजानुनोरधोभागइतियावत् ॥ चोलचोलौदेशविशेषौतावेवांशुकम् ॥ यद्वा चोलदेशएवचोलःकूर्पासकःकंचुकीतियावत ॥ १० ॥
चोलःकूर्पासकोस्त्रियामित्यमरः ॥ यद्वा भामासत्यभामेतिवन्निचोलएवचोलःप्रच्छदपटः ॥ निचोलःप्रच्छदपटइत्यमरः ॥ तेनावृतां कांतीपुर्येवकांचीमेखला ॥ स्त्रीकट्यांमेखलाकांची

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यमरः ॥ सैवतयावाविभूषणंयस्याःसातथाताम् ॥ कांचीतिक्कचित्पाठः ॥ कांचीस्यान्मेखलादाम्निप्रभेदेनगरस्यचेतिमेदिनीकारः ॥ १० ॥ सुकोमलेति ॥ वाग्विलासोवाक्यविशेषोवाचा
तुर्यमितियावत् ॥ यांदाक्षिणांदिशं ॥ महालक्ष्मीःकोलापुराधिष्ठात्री ॥ ११ ॥ सुदक्षेति ॥ सुदक्षाचासौदक्षिणाचेतिसुदक्षदक्षिणाताम् ॥ सुदक्षताचास्याःश्राद्धादिकर्मणिप्रशस्तत्वात् ॥
हेसुदक्षेतिसूतसंबोधनंवा ॥ क्रमंतइति ॥ हेलिकस्यसूर्यस्य ॥ रश्रुतेर्लश्रुतिरितिवचनात् हेआकाशेरिंगतिगच्छतीतिव्युत्पत्तेः ॥ हेलिकाश्चित्रभानुश्चेतिसूर्यनामसप्ततिमध्येवक्ष्यमाणत्वाच्च ॥
क्रमेणसर्वंखमाकाशंक्रमंतोगच्छंतोऽर्वंतोऽश्वाअग्रेगंतुंयदानशेकुस्तदातदनंतरमितिवाअनूरुःसूर्यरथयंता ॥ सूरसूतोऽरुणोऽनूरुःकाश्यपिर्गरुडाग्रजइत्यमरः ॥ व्यजिज्ञपत्विज्ञापयामाससूर्यंप्रतिशेषः
क्रमंतोच्चैर्हयास्तस्येतिक्कचित्पाठः ॥ तदासंधिरार्षः ॥ १२ ॥ १३ ॥ विज्ञापनमेवाह ॥ भानोइति ॥ एतज्ज्ञानंचास्यापृष्टेनतेनकथनादनुमानात्सर्वज्ञत्वाद्वेतिवोद्धव्यम् ॥ १४ ॥ अनूरु
वाक्यमिति ॥ अतिशयितोविस्मयोयस्यससविताहृद्यचिंतयदित्यन्वयः ॥ अत्रविस्मयइतिक्कचित्पाठः ॥ पुनरर्थेचशब्दः ॥ १५ ॥ सूरइति ॥ सूरःसूर्यःशूरोपिसमर्थोपिकिंकुर्यात् ॥
अशूरेणहतःशूरएकेनापिशतंहतामितिन्यायादित्यर्थः ॥ एकोऽसहायः ॥ १६ ॥ राहुबाहुग्रहव्यग्रइति ॥ उह्यतेकंठादधःक्रियतेभुक्तंपीतंचानेनेतिबाहुर्मुखम् ॥ विधुंतुदमुखग्रहणेनाकुलित

सुकोमलमहाराष्ट्रीवाग्विलासमनोहराम् ॥ अद्यापिनमहालक्ष्मीर्यांविमुंचतिसद्गुणाम् ॥११॥ सुदक्षदक्षिणामाशामाशानाथः प्रतस्थिवान् ॥ क्रमंतः
सर्वमर्वन्तोहेलयाहेलिकस्यखम् ॥१२॥ नशेकुरग्रतोगंतुंततोऽनूरुर्व्यजिज्ञपत् ॥१३॥ अनूरुरुवाच ॥ ॥ भानोमानोन्नतोविन्ध्योनिरुद्ध्यगगनंस्थि
तः ॥ स्पर्धतेमेरुणाप्रेप्सुस्त्वद्दत्तांतुप्रदक्षिणाम् ॥१४॥ अनूरुवाक्यमाकर्ण्यसविताहृद्यचिन्तयत् ॥ अहोगगनमार्गोपिरुध्यतेचातिविस्मयः ॥ १५ ॥
व्यासउवाच ॥ ॥ सूरःशूरोपिकिंकुर्यात्प्रांतरेवर्त्मनिस्थितः ॥ त्वरावानपिकोरुद्धंमार्गमेकोविलंघयेत् ॥ १६ ॥ राहुबाहुग्रहव्यग्रोयः क्षणंना
वतिष्ठति ॥ शून्यमार्गेनिरुद्धःसकिंकरोतुविधिर्बली ॥ १७ ॥ योजनानांसहस्रेद्वेद्वेशतेद्वेचयोजने ॥ योजनस्यनिमेषार्धाद्यातिसोपिचिरंस्थि
तः ॥ १८ ॥ गतेबहुतिथेकालेप्राच्यौदीच्याभृशार्दिताः ॥ चण्डरश्मेःकरव्रातपातसन्तापतापिताः ॥ १९ ॥ पाश्चात्यादक्षिणात्याश्चनिद्रामुद्रि
तलोचनाः ॥ शयिताएववीक्षन्तेसतारग्रहमंबरम् ॥२०॥ अहोनाहस्कराभावान्निशानैवाऽनिशाकरात्॥अस्तंगतर्क्षान्नभसःकःकालस्त्वेष नेक्ष्यते ॥२१॥

इत्यर्थः ॥ उक्तंच ॥ भानुर्विधुंतुदमुखाकुलितैकपार्श्वःपार्श्वांतरेणजगतांतिमिरंनिहंतीति ॥ यद्वा हस्तिरूपधारिणोराहोर्बाहुग्रहेणकराकर्षणेनव्यग्रआकुलइतिव्याख्येयम् ॥ राहुर्हस्तीभूत्वा
सूर्याचंद्रमसौग्रसतीतिश्रुतेः ॥ अवातिष्ठतिअवतिष्ठते ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ विधिर्ब्रह्माईश्वरोऽदृष्टंवा ॥ १७ ॥ योजनानामिति ॥ जनस्यमनुष्यस्ययोजनानांक्रोशचतुष्टयानांसहस्रेद्वेइ
त्याद्यन्वयः ॥ यःसूर्यः ॥ १८ ॥ १९ ॥ पाश्चात्याइति ॥ सतारेति ॥ ताराअश्विन्यादिव्यतिरिक्तानिनक्षत्राणिनक्षत्रमात्राणिवा ग्रहामंगलादयस्तैःसार्द्धमंबरामिति ॥ २० ॥ पूर्वादि
दिग्भवानांप्रजानांव्याकुलतामाह ॥ अहोइति ॥ अयमर्थः ॥ एषकःकालःकिंदिनंकिंवारात्रिर्नेक्ष्यतेनलक्ष्यतइत्यर्थः ॥ ननुदिनंभविष्यतिसूर्यस्यविद्यमानत्वादित्याशंक्याह ॥ अहोनाहस्क
राभावादिति ॥ अयंकालोऽहर्दिनंनभवति ॥ कुतोहस्कराभावात् ॥ भावप्रधानोयंनिर्देशः ॥ सूर्योदयमारभ्यप्रहरचतुष्टयंहिअहरित्युच्यते ॥ तस्यचातीतत्वात्पश्चात्सूर्यस्यअहस्कर्तृत्वाभावादिति
भावः ॥ तर्हिनिशाभविष्यतितत्राह ॥ निशानैवानिशाकरादिति ॥ चंद्राभावादित्यर्थः ॥ ननुचंद्राभावेपिअमावास्यादौनिशादृश्यतेतत्राह ॥ अस्तंगतर्क्षान्नभसइति ॥ अस्तमदर्शनंगतानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तानिऋक्षाणिनक्षत्राणियस्मिंस्तस्मान्नभसआकाशाद्धेतोरित्यर्थः ॥ प्राच्यौदीच्यव्याकुलतायामित्यंव्याख्यातम् ॥ पाश्चात्यदाक्षिणात्यव्याकुलतायांग्रंथार्थोऽतिरोहितएव ॥ नचास्मिन्पक्षेशयिताएववीक्षंतेसताग्रहमंबरमित्येननविरोधः अस्तंगतंगतंगमनंयेषांतान्यस्तंगतानिऋक्षाणियस्मिंस्तदस्तंगतर्क्षंतस्मान्नभसइतिव्याख्यानात ॥ ऐकंपद्यपाठेछंदोभंगआर्षः ॥ एतदुक्तंभवति ॥ चंद्रसूर्ययोर्गतौस्तंभितायांसत्यां ततः प्रागगतानांग्रहर्क्षताराणामपिसंचाराभावेनरात्रिलक्षणाभावाद्रात्रिर्नभवतीत्यर्थः ॥ नचनिरस्तैतद्दीपवर्तिरविरश्मिजालःकालविशेषोरात्रिरितिरात्रेर्लक्षणस्यसद्भावात्पाश्चात्यदाक्षिणात्यानांरात्रिर्भविष्यतीतिवाच्यम् ॥ तदाएतदित्यादिविशेषणवैयर्थ्येनलक्षणस्याकिंचित्करत्वादितिभावः ॥ २१ ॥ ब्रह्मांडमिति ॥ अकांडेऽनवसरे ॥ कांडोऽस्त्रीदंडवाणार्ववर्गावसरवारिष्वित्यमरः ॥ परापतंतियातायातंकुर्वंति ॥ पारंपरतीरम् ॥ अवारंअर्वाक्तीरम् ॥ पारावारेपरार्वाचीतीरेइतिवचनात् ॥ तत्रभवास्तत्संबंधिन्योवापारावाराःप्रजाइतिशेषः ॥ २२ ॥ पंचयज्ञात ॥ देवयज्ञपितृयज्ञभूतयज्ञब्रह्मयज्ञमनुष्ययज्ञाइतिपंचतेषामनुष्ठानाभावादित्यर्थः ॥ २३ ॥ सवितातत्रकारणमिति ॥

ब्रह्मांडंकिमकांडेवैलयमेष्यतितत्कथम् ॥ परापतंतिनाद्यापिपारावाराइतस्ततः ॥ २२ ॥ स्वाहास्वधावषट्कारवर्जितेजगतीतले ॥ पंचयज्ञक्रियालोपाच्चकंपेभुवनत्रयम् ॥ २३ ॥ सूर्योदयात्प्रवर्ततेयज्ञाद्याःसकलाःक्रियाः ॥ ताभिर्यज्ञभुजांतृप्तिःसवितातत्रकारणम् ॥ २४ ॥ चित्रगुप्तादयःसर्वेकालंजानंतिसूर्यतः ॥ स्थितिसर्गविसर्गाणांकारणंकेवलंरविः ॥ २५ ॥ तत्सूर्यस्यगतिस्तंभात्स्तंभितंभुवनत्रयम् ॥ यद्यत्रतत्स्थितंतत्रचित्रन्यस्तमिवाखिलम् ॥ २६ ॥ एकतस्तिमिरान्नैशादेकतस्तुदिवातपात् ॥ बहूनांप्रलयोजातःकांदिशीकमभूज्जगत् ॥ २७ ॥ इतिव्याकुलितेलोकेसुरासुरनरोरगे ॥ आःकिमेतदकांडेभूद्दुद्रुवुर्दुद्रुवुःप्रजाः ॥२८॥ ततःसर्वेसमालोक्यब्रह्माणंशरणंययुः ॥ स्तुवंतोविविधैःस्तोत्रैरक्षरक्षेतिचाब्रुवन् ॥२९॥ ॥ देवाऊचुः ॥ नमोहिरण्यरूपायब्रह्मणेब्रह्मरूपिणे ॥ अविज्ञातस्वरूपायकैवल्यायामृतायच ॥ ३० ॥

अग्नौप्रास्ताहुतः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिश्रुतेरित्यर्थः ॥ २४ ॥ विसर्गोत्रसंहारः ॥ कारणंकेवलमिति ॥ अभिन्ननिमित्तोपादानमित्यर्थः ॥ तदुक्तम् ॥ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयायत्रिगुणात्मधारिणेविरंचिनारायणशंकरात्मनेइति ॥ २५ ॥ स्तंभितत्वमेवदर्शयति ॥ यद्यत्रतत्स्थितंतत्रेति ॥ २६ ॥ कांदिशीकंभयेनद्रुतम् ॥ कांदिशीकोभयद्रुतइत्यमरः ॥ २७ ॥ लोकेभुवने लोकस्तुभुवनेजनेइत्यमरः ॥ सुरनरोरगे सुराधिष्ठात्रीदेवतावरुणात्मजावारुणीतस्याःपरिग्रहात्सुरादेवास्तस्याअपरिग्रहादसुरादैतेयाः ॥ तदुक्तंबालकांडेरामायणे ॥ वरुणस्यततःकन्यावारुणीरघुनंदन ॥ उत्पपातमहावीर्यावांछमानापरिग्रहम् ॥ दितेः पुत्रानतांरामजगृहुर्वरुणात्मजाम् ॥ अदितेस्तुसुतावीराजगृहुस्तामनिंदिताम् ॥ तेनाभवन्सुरादेवादैतेयाश्चासुरास्ततइति ॥ सुरासुरैःसहनरोरगायस्मिन्सतथातस्मिन् ॥ एतच्चान्येषामुपलक्षणम् ॥ यत्तुभागवतेविपर्ययश्रवणंतच्चकल्पभेदाभिप्रायेण ॥ आः पीडायाम् ॥ आस्तुस्यात्कोपपीडयोरित्यमरः ॥ दुद्रुवुश्चसर्वेदेवाः ॥ २८ ॥ २९ ॥ त्रैलोक्यरक्षणार्थायसगुणागुणभेदतः ॥ स्तुवंतिसत्यलोकेशंगीर्वाणाभयशंकिताः ॥ नमोहिरण्यगर्भायेत्या

१ अस्तगतर्क्षादित्येवरूपे । २ अद्यापि पारावाराः प्रलयपयोधयः इतस्ततो नपरापतंतिपृथिवीं प्लावयन्त्यतो नायं प्रलयकाल इति कथन्नार्थ ऊहीकर्तव्यः ? ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यैर्द्वादशभिःशुभैः ॥ पद्यैः प्रसन्नगंभीरैः श्रोतृपापापनोदनैः ॥ तत्रादावाधिदैविकविराड्हिरण्यगर्भांतर्यामिरूपेणस्तुवंति ॥ तत्रब्रह्मरूपिणेविराडात्मनेनेनमइत्यन्वयः ॥ तपस्तप्त्वासृजद्यंतु सस्वयं पुरुषोविराडितिमनुः ॥ हिरण्यगर्भाय हिरण्यरूपंब्रह्मांडंगर्भेयस्यसतथातस्मैब्रह्मणेपूर्णायांतर्यामिणेइत्यर्थः ॥ तदुक्तं ॥ स्वतश्चिदंतर्यामितुमायावीसूत्रसृष्टितः ॥ सूत्रात्मास्थूलदृष्ट्यैषविराडित्युच्यतेपरइति ॥ सूत्रात्माहिरण्यगर्भः ॥ स्वगुणंस्तुत्वानिर्गुणंस्तुवंति ॥ अविज्ञातस्वरूपायअविज्ञातंप्रत्यक्षाद्यगम्यंस्वरूपंयस्यसतथातस्मै ॥ विज्ञातारमरेकेनविजानीयादितिश्रुतेः ॥ कैवल्यायमोक्षस्वरूपाय ॥ कथंभूतायकैवल्याय ॥ अमृतायानंदरूपाय ॥ आनंदंब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितमितिश्रुतेः ॥ ३० ॥ अविज्ञातस्वरूपत्वेहेतुमाह ॥ यंनदेवाविजानंतीति ॥ तस्मैचिदात्मनेनमइत्यन्वयः॥तस्मैकस्मैइत्याकांक्षायामाह॥यन्नदेवाइति ॥ देवाइंद्रियाणितदधिष्ठातारोवा ॥ मनोयत्रापिकुंठितंमनोपियत्रकुंठितंउपलप्रयुक्तक्षुरतैक्ष्ण्यवत्प्रतिहतसामर्थ्यम् ॥ नयत्रवाक्प्रसरतिप्रबोधयितुंवागपिनसमर्थाभवतीत्यर्थः।तस्मैअपरिमितगुणगरिम्णेप्रसिद्धायवा चिदात्मनेचैतन्यघनायनमोस्तुकुर्मइतिवाशेषः ॥ सवेत्तिविश्वंनचतस्यवेत्तातमाहुरग्र्यंपुरुषंमहांतम् ॥ यतोवाचोनिवर्ततेअप्राप्यमनसासहेत्यादिश्रुतेः॥३१॥तर्हिप्रमाणाभावाच्छशशृंगवन्नास्तितदित्याशंक्याहुः॥योगिनोयमिति ॥ तस्मैश्रीब्रह्मणेनमइत्यन्वयः ॥ तस्मैकस्माइत्याकांक्षायामाहुर्योगिनइति ॥ हृदेवाकाशोहृदाकाशस्तस्मिन्आकाशवच्छुद्धेंऽतःकरणइत्यर्थः॥प्रणिधानेनएकाग्रतयानिदिध्यासनेनेतियावत् ॥ ज्योतिःस्वप्रकाशंरूपंस्वरूपंयस्यतत्तथाप्रपश्यंति॥स्वप्रकाशसच्चिदानंदरूपेणैवावतिष्ठंतइत्यर्थः॥ श्रीःसावित्री स्रष्टाविष्णुरियंसृष्टिरितिपराशरोक्तेः॥सृज्यतेनयासृष्टिहेतुत्वाद्वासृष्टिःसावित्रीतत्सहितायब्रह्मणेसत्यलोकाधिष्ठात्रे॥यद्वा श्रयंत्येतांयोगिनइतिश्रीर्ब्रह्मविद्यातत्स्वरूपायब्रह्मणेपरमात्मनेनेनमइति॥३२॥

यन्नदेवाविजानंतिमनोयत्रापिकुंठितम् ॥ नयत्रवाक्प्रसरतिनमस्तस्मैचिदात्मने ॥ ३१ ॥ योगिनोयंहृदाकाशेप्रणिधानेननिश्चलाः ॥ ज्योतीरूपंप्रपश्यंतितस्मैश्रीब्रह्मणेनमः ॥ ३२ ॥ कालात्परायकालायस्वेच्छयापुरुषायच ॥ गुणत्रयस्वरूपायनमःप्रकृतिरूपिणे ॥ ३३ ॥ विष्णवेसत्त्वरूपायरजोरूपायवेधसे ॥ तमसेरुद्ररूपायस्थितिसर्गांतकारिणे ॥ ३४ ॥ नमोबुद्धिस्वरूपायत्रिधाहंकृतयेनमः ॥ पंचतन्मात्ररूपायपंचकर्मेंद्रियात्मने ॥ ३५ ॥

कालादिति ॥ कालान्निमेषादिद्विपरार्धांतात्परायभिन्नाय ॥ माययाकालाय तच्चेष्टारूपत्वात्कालस्य ॥ तदुक्तंभागवते ॥ योयंकालस्तस्यतेऽव्यक्तबंधोचेष्टामाहुरीरिति ॥ यद्वा अविद्यात्मनोःसम्बन्धःकालस्तद्रूपाय ॥ यद्वा कालयतिनाशयतिकालादीन्सर्वानितिकालस्तस्मै ॥ सकालकालः कालमूषिकभक्षकः कालायतेनमः इत्यादिश्रुतिस्मृतिभ्यः ॥ स्वेच्छयास्वस्येच्छयाईक्षणलक्षणयापुरुषायजीवाय ॥ सऐक्षतवहुस्यांप्रजायेय तत्सृष्ट्वा तदेवानुप्राविशदितिश्रुतेः ॥ यद्वा स्वीयानांभक्तानामिच्छयापुरुषायपूर्षुशरीरेषुशेतइतितथातस्मै ॥ मत्स्यकूर्माद्यवतारायेत्यर्थः ॥ नवद्वारेपुरेशेतेपुरुषस्तेनचोच्यतइतिस्मृतेः ॥ यद्वा स्वेच्छयास्वातंत्र्येणैवपुरुषायपुरुषाख्यावताराय ॥ तदुक्तंभागवते ॥ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन्स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवइति ॥ यद्वा स्वेच्छयापूर्वमपिपुरुषुकार्येषुस्थितत्वात्पुरुषस्तस्मै ॥ तथाचश्रुतिः ॥ पूर्वमेवाहमिहासमिति ॥ तत्पुरुषस्यपुरुषत्वमित्यलमतिविस्तरेण ॥ प्रधानत्वेननमस्यंति ॥ गुणत्रयेति ॥ गुणत्रयंसत्त्वरजस्तमउपलक्षणम् ॥ प्रकृतिःप्रधानम् ॥ ३३ ॥ गुणत्रयोपाधिविष्णवब्जयोनिरुद्ररूपेणनमंति ॥ विष्णवइति ॥ नमइत्यनुषंजनीयम् ॥ ३४ ॥ महत्तत्वादित्रयोविंशतितत्त्वभेदेनप्रणमन्ति ॥ नमोबुद्धिस्वरूपायेत्यादिना ॥ बुद्धिस्वरूपायमहत्तत्त्वाय ॥ त्रिधाहंकृतयेवैकारिकतैजसतामसाहंकाराय ॥

Nepal Sanskrit University, Baluwatar, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचतन्मात्ररूपायशब्दस्पर्शरूपरसगन्धतन्मात्ररूपात्मने ॥ पंचकर्मेंद्रियात्मनेपायूपस्थहस्तपादवागात्मने ॥ ३५ ॥ नमइति ॥ मनःस्वरूपायांतःकरणरूपाय ॥ पंचबुद्धींद्रियात्मनेश्रोत्रत्वक्चक्षुर्जिह्वानासात्मने ॥ क्षित्यादिपञ्चरूपायपृथिव्यप्तेजोवाय्वाकाशरूपाय ॥ विषयात्मनेस्थूलविषयरूपायपंचीकृतात्मनइतियावत् ॥ ३६ ॥ समष्टिव्यष्टिप्रबंधभेदेनप्रणमंति ॥ नमइत्यादिना ॥ ब्रह्मांडरूपायसमष्ट्यात्मकविराड्रूपायकारणरूपायेत्यर्थः ॥ तदन्तर्वर्तिनेभूतभौतिकव्यष्टिरूपायकार्यरूपायेत्यर्थः ॥ अर्वाचीनेति ॥ अर्वाचीनमिदानींतनंततःपराचीनंपूर्वकालीनंएतद्रूपंयद्विश्वंजगत्तद्रूपायतेतुभ्यंनमइत्यर्थः ॥ ३७ ॥ अनित्येति ॥ आगमापायनित्यंकालत्रयाबाध्यंनित्यंतद्रूपाय सत्स्थूलंअसत्सूक्ष्मंकार्यकारणेवासदसतीतयोः पतयेनियंत्रेनमइति ॥ कृपालुतांदर्शयन्तःस्तुवंति ॥ समस्तेति ॥ समस्तशब्दश्चतुर्विधविषयः ॥ चतुर्विधाभजंतेमामितिभगवद्वचनात् ॥ नवविधविषयोवा भक्तैर्नवभिराश्रितमितिमुक्ताफलकारवचनात् ॥ विग्रहःशरीरम् ॥ ३८ ॥ शास्त्रयोनित्वेनस्तुवन्ति ॥ तवनिःश्वसितंवेदाइति ॥ निःश्वासवदनायासेनवेदानामाविर्भावाद्वेदानिःश्वसितमित्युपचारः ॥ निःश्वसितमेतदृग्वेदोयजुर्वेदःसामवेदइतिश्रुतेः शास्त्रयोनित्वादितिव्याससूत्राच्च ॥ तवस्वेदोऽखिलंजगदिति ॥ तवेश्वरस्य ॥ स्वेदशब्देनात्राप्सुनिसृष्टवीर्यशक्तिविशेषउच्यते तज्जातत्वादशेषस्यजगतः ॥ यद्वा स्वेदशब्देनात्रापंचीकृतंजलतत्त्वमुच्यते तच्चभूम्यादिचतुष्टयस्योपलक्षणम् तत्परिणामत्वादशेषस्यभूतभौतिकप्रपंचस्य ॥ तदुक्तंहरिवंशे ॥ ततःस्वयंभूर्भगवान्सिसृक्षुर्विविधाःप्रजाः ॥ अयएवससर्जादौतासुवीर्यमवासृजत ॥

नमोमनःस्वरूपायपंचबुद्धींद्रियात्मने ॥ क्षित्यादिपंचरूपायनमस्तेविषयात्मने ॥ ३६ ॥ नमोब्रह्मांडरूपायतदंतर्वर्तिनेनमः ॥ अर्वाचीनपराचीनविश्वरूपायतेनमः ॥ ३७ ॥ अनित्यनित्यरूपायसदसत्पतयेनमः ॥ समस्तभक्तकृपयास्वेच्छाविष्कृतविग्रह ॥ ३८ ॥ तवनिश्श्वसितंवेदास्तवस्वेदोखिलंजगत् ॥ विश्वाभूतानितेपादः शीर्ष्णोद्यौःसमवर्तत ॥ ३९ ॥ नाभ्याआसीदंतरिक्षंलोमानिचवनस्पतिः ॥ चन्द्रमामनसोजातश्चक्षोःसूर्यस्तवप्रभो ॥ ४० ॥ त्वमेवसर्वंत्वयि देवसर्वं स्तोतास्तुतिःस्तव्यइहत्वमेव ॥ ईशत्वयाऽवास्यमिदंहिसर्वंनमोस्तुभूयोपिनमोनमस्ते ॥ ४१ ॥

आपोनाराइतिप्रोक्ताआपोवैनरसूनवः ॥ अयनंतस्यताःपूर्वंतेननारायणःस्मृतइति ॥ पुरुषसूक्तेनचस्तुवंति ॥ विश्वेति ॥ तत्रपादोस्यविश्वाभूतानीत्यस्याःश्रुतेरर्थमाहुः ॥ विश्वाभूतानितेपादइति ॥ ३९ ॥ मायावच्छिन्नैकदेशइत्यर्थः ॥ विश्वाइतिशेश्छंदसिबहुलमितिशेर्लोपः ॥ शीर्ष्णोद्यौःसमवर्ततेत्यस्याःश्रुतेरर्थमाहुः ॥ शीर्ष्णइति ॥ नाभ्याआसीदंतरिक्षमित्यस्याःश्रुतेरर्थमाहुः ॥ नाभ्याइति ॥ अन्तरिक्षमंतरिक्षलोकः ॥ लोमानीति ॥ पुष्पंविनाफलवान्वनस्पतिः ॥ चन्द्रमामनसोजातइत्यस्याःश्रुतेरर्थमाहुः ॥ चन्द्रमाइति ॥ चक्षोःसूर्योअजायतेत्यस्याःश्रुतेरर्थमाहुः ॥ चक्षोःसूर्यइति ॥ चक्षोश्चक्षुषइत्यर्थः ॥ ४० ॥ उपसंहरंति त्वमेवसर्वमिति ॥ अत्रोपासनार्थंसर्वप्रपंचरूपत्वंब्रह्मणोविधीयते ॥ योयंस्थाणुःपुमानेषपुंधियास्थाणुधीरिवेत्यादिवद्बाधेसामानाधिकरण्यंवा ॥ अधिष्ठानांतरंवारयति ॥ त्वयिदेवसर्वमिति ॥ देवहेस्वप्रकाश ॥ नन्वहंचेत्सर्वंकथंभवद्भिःस्तोतृभिःस्तवेनाहंस्तूयेतत्राहुः ॥ स्तोतेति ॥ औपाधिकभेदमादायस्तोत्रादिव्यवहारइत्यर्थः ॥ किंबहुना ईशाईश्वरेणत्वयाइदंसर्वंजगदावास्यंवासनीयंसम्बद्धंग्रंथितंतंतुनेवपटइति ॥ यद्वा आवास्यंसत्ताचैतन्याभ्यांसंव्याप्यइदंपरिदृश्यमानंसर्वमिति ॥ ईशावास्यमिदंसर्वंयत्किंचिज्जगत्यांजगत् तेनत्यक्तेनभुंजीथामागृधःकस्यचिद्धनमितिश्रुतेः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४२ ॥ यथार्थयेति ॥ यथार्थयायथासदृशोऽबाधितोऽर्थोयस्याःसातथातया ॥ ४३ ॥ ४४ ॥ ४५ ॥ ऐहिकेति ॥ अपवर्गंमोक्षम् ॥ सालोक्यादिव्यावृत्त्यर्थमक्षयमितिविशेषणम् ॥ सायुज्यमित्यर्थः ॥ ४६ ॥ तस्मादिति ॥ यतोऽभीष्टदइतिख्यातोऽतएवसर्वसिद्धिदः ॥ सर्वेषांसिद्धिदइतिवा ॥ ४७ ॥ अत्रापिसत्याख्येममलोकेपीत्यर्थः ॥ ४८ ॥ सत्यलोकस्थानांव्याकुलताभावंदर्शयति ॥ एतेवेदामूर्तिधराइत्यादिना ॥ करुणाभारतीत्वियमित्यंतंमूर्तिधराइत्यनुषंजनीयम् ॥ अखिलाःशिक्षाकल्पज्योतिश्छंदोनिरुक्तव्याकरणमीमांसान्यायपुराणधर्मशास्त्रायुर्वेदधनुर्वेदगांधर्वार्थशास्त्रलक्षणाश्चतुर्दश ॥ यज्ञास्त्वग्निष्टोमादयः ॥ सत्यंयथार्थभाषणम् ॥ धर्मोऽदृष्टम् ॥ तपःकृच्छ्रचांद्रायणादि ॥ दमोविषयेभ्योबाहिरिंद्रियानिवृत्तिरिंद्रियमात्रानिवृत्तिर्वा ॥ ४९ ॥ विपरीतंब्रह्मचर्यमिति ॥ ब्रह्मचर्यमष्टांगमैथुनपरित्यागः ॥ तदुक्तम् ॥ दर्शनंस्पर्शनंकेलिःस्मरणंगुह्यभाषणम् ॥ संकल्पोध्यवसायश्चक्रियानिर्वृतिरेवच ॥ एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः ॥ विपरीतं

इतिस्तुत्वाविधिंदेवानिपेतुर्दंडवत्क्षितौ ॥ परितुष्टस्तदाब्रह्माप्रत्युवाचदिवौकसः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ यथार्थयाऽनयास्तुत्यातुष्टोस्मि प्रणताःसुराः ॥ उत्तिष्ठतप्रसन्नोस्मिवृणुध्वंवरमुत्तमम् ॥ ४३ ॥ यःस्तोष्यत्यनयास्तुत्याश्रद्धावान्प्रत्यहंशुचिः ॥ मांवाहरंवाविष्णुंवातस्यतुष्टाःसदा वयम् ॥ ४४ ॥ दास्यामःसकलान्कामान्पुत्रान्पौत्रान्पशून्वसु ॥ सौभाग्यमायुरारोग्यंनिर्भयत्वंरणेजयम् ॥ ४५ ॥ ऐहिकामुष्मिकान्भोगानपवर्गं तथाऽक्षयम् ॥ यद्यदिष्टतमंतस्यतत्तत्सर्वंभविष्यति ॥ ४६ ॥ तस्मात्सर्वप्रयत्नेनपठितव्यःस्तवोत्तमः ॥ अभीष्टदइतिख्यातः स्तवोयंसर्वसिद्धिदः ॥ ४७ ॥ पुनःप्रोवाचतान्वेधाःप्रणिपत्योत्थितान्सुरान् ॥ स्वस्थास्तिष्ठतभोयूयंकिमत्रापिसमाकुलाः ॥ ४८ ॥ एतेवेदामूर्तिधराइमाविद्यास्तथाखिलाः ॥ सदक्षिणाअमीयज्ञाःसत्यंधर्मस्तपोदमः ॥ ४९ ॥ ब्रह्मचर्यमिदंचैषाकरुणाभारतीत्वियम् ॥ श्रुतिस्मृतीतिहासार्थचरितार्थाअमीजनाः ॥ ५० ॥ नेहक्रोधोनमात्सर्यंलोभः कामोऽधृतिर्भयम् ॥ हिंसाकुटिलतागर्वोनिंदासूयाऽशुचिःक्वचित् ॥ ५१ ॥ येब्राह्मणाब्रह्मरतास्तपोनिष्ठास्तपोधनाः ॥ मासोपवासषण्मासचातुर्मास्यादिसद्व्रताः ॥ ५२ ॥ पातिव्रत्यरतानार्योयेचान्येब्रह्मचारिणः ॥ तेचामीपश्यतसुरायेषंढाः परयोषिति ॥ ५३ ॥

ब्रह्मचर्यमेतदेवप्रकीर्तितमिति ॥ करुणाहितैषिणी ॥ इदानींसर्वेभ्यःकाश्याःश्रैष्ठ्यंवक्तुंकर्मादिभिःप्राप्तस्वलोकान्दर्शयाति ॥ श्रुतिस्मृतीति ॥ श्रुतिस्मृतीतिहासानामर्थेष्वनुष्ठेयेषुप्रतिपाद्येषु चरितःकृतोऽर्थःपुरुषार्थःपुरुषकारोऽनुष्ठानंयैस्तेतथा ॥ इतिहासोमहाभारतादिः ॥ श्रुतिस्मृतिपुराणानामितिक्वचित्पाठः ॥ व्याख्यांतरंस्पष्टम् ॥ ५० ॥ नेति ॥ क्रोधःपराभिभवेच्छा ॥ मात्सर्यंपरगुणासहिष्णुता ॥ प्राप्तेऽर्थेप्रार्थनालोभः ॥ अप्राप्तेऽर्थेप्रार्थनाकामः ॥ यद्वा लोभोऽर्थमात्रविषयः ॥ कामःस्त्र्यादिविषयः ॥ अधृतिरधारणंदेहाद्यवसादेसत्यनुत्तंभनम् ॥ भयंभीः ॥ हिंसाकायवाङ्मनोभिःप्राणिमात्रपीडा ॥ कुटिलताअनृजुतावक्रतेतियावत् ॥ गर्वोऽभिमानः ॥ निंदापरापवादः ॥ असूयागुणेषुदोषाविष्करणम् ॥ अशुचिरपवित्रः ॥ ५१ ॥ ब्रह्मरतावेदरताः ॥ तपोधनाअकिंचनाविरक्ताइत्यर्थः ॥ ५२ ॥ पातिव्रत्यरताः पतिव्रतायाभावःपातिव्रत्यंतत्ररतास्तद्धर्मयोगिन्यइत्यर्थः ॥ पंढाःनपुंसकाः ॥ तृतीयाप्रकृतिःपंढःक्लीबःपंडोनपुंस

CC-0. In Public Domain. Digitization by eGangotri

कइत्यमरः ॥ जितेंद्रियाइत्यर्थः ॥ ५३ ॥ गोग्रहणेहताःगवांरक्षणेत्यक्तप्राणाइत्यर्थः ॥ ५४ ॥ ५५ ॥ गायत्रीति ॥ द्विमुखींप्रसूयमानागौः ॥ तदुक्तं ॥ यावद्वत्सस्यपादौद्वौमुखंयोन्यांचदृश्यते ॥ तावद्गौःपृथिवीज्ञेयायावद्गर्भंनमुंचतीति ॥ पृथिवीज्ञेयापृथिवीतुल्या ॥ समग्रायाःपृथिव्यादानेनयादृशंपुण्यंभवतितादृशमस्यादानेनेत्यर्थः ॥ शुक्लासर्वशरीरेविशेषतःपादेषुचशुक्लवर्णाकपिला ॥ तदुक्तम् ॥ सर्वतःशुक्लवर्णायापादेषुचविशेषतः ॥ कपिलासातुविज्ञेयासर्वपापप्रणाशिनी ॥ देशविशेषेपिंगलवर्णाकपिलेतिप्रसिद्धिः ॥ ५६ ॥ द्विजपादोदपाःब्राह्मणचरणोदकपातारः ॥ सारस्वते

मातापित्रोरमीभक्ताअमीगोग्रहणेहताः ॥ व्रतेदानेजपेयज्ञेस्वाध्यायेद्विजतर्पणे ॥ ५४ ॥ तीर्थेतपस्युपकृतौसदाचारादिकर्मणि ॥ फलाभिलाषिणीबुद्धिर्नयेषांतेजनाअमी ॥ ५५ ॥ गायत्रीजाप्यनिरताअग्निहोत्रपरायणाः ॥ द्विमुखीगोप्रदातारःकपिलादानतत्पराः ॥ ५६ ॥ निस्पृहाःसोमपायेवैद्विजपादोदपाश्चये ॥ मृताःसारस्वतेतीर्थेद्विजशुश्रूषकाश्चय ॥ ५७ ॥ प्रतिग्रहसमर्थाहियेप्रतिग्रहवर्जिताः ॥ तएतेमत्प्रियाविप्रास्त्यक्ततीर्थप्रतिग्रहाः ॥ ५८ ॥ प्रयागेमाघमासेयैरुषःस्नातोऽमलात्माभिः ॥ मकरस्थेरवौशुद्धास्तइमेसूर्यवर्चसः ॥ ५९ ॥ वाराणस्यांपांचनदेत्र्यहंस्नातास्तुकार्तिके ॥ अमीतेशुद्धवपुषःपुण्यभाजोतिनिर्मलाः ॥ ६० ॥ स्नात्वातुमणिकर्णिक्यांप्रीणिताब्राह्मणाधनैः ॥ तएतेसर्वभोगाढ्याःकल्पंस्थास्यंतिमत्पुरे ॥ ६१ ॥ ततःकाशींसमासाद्यतेनपुण्येननोदिताः ॥ विश्वेश्वरप्रसादेनमोक्षमेष्यंत्यसंशयम् ॥ ६२ ॥ अविमुक्तेकृतंकर्मयदल्पमपिमानवैः ॥ श्रेयोरूपंतद्विपाकोमोक्षोजन्मांतरेष्वपि ॥ ६३ ॥ अहोवैश्वेश्वरेक्षेत्रेमरणादपिनोभयम् ॥ यत्रसर्वेप्रतीक्षंतेमृत्युंप्रियमिवातिथिम् ॥ ६४ ॥ ब्राह्मणेभ्यःकुरुक्षेत्रेयैर्दत्तंवसुनिर्मलम् ॥ निर्मलांगास्तएतेवैतिष्ठंतिममसंनिधा ॥ ६५ ॥ पितामहंसमासाद्यगयायांयैःपितामहाः ॥ तर्पितात्राह्मणमुखेतेषामेतेपितामहाः ॥ ६६ ॥ नस्नानेननदानेननजपेननपूजया ॥ मल्लोकःप्राप्यतेदेवाःप्राप्यतेद्विजतर्पणात् ॥ ६७ ॥ सोपस्कराणिवेश्मानिमुसलोलूखलादिभिः ॥ यैर्दत्तानिसशय्यानितेषांहर्म्याण्यमूनिवै ॥ ६८ ॥

तीर्थेप्रभासेपृथूदकेवा ॥ ५७ ॥ ५८ ॥ उषसिस्नातःप्रातःस्नानेननीतःसमापितइतियावत् ॥ ५९ ॥ पंचनदमेवपांचनदं ॥ स्वार्थेऽण् ॥ पंचनदइतिवापाठः ॥ ६० ॥ कल्पंद्विपरार्धम् ॥ ६१ ॥ ६२ ॥ तद्विपाकस्तस्यकर्मणोविपाकःफलम् ॥ किंतदाह ॥ मोक्षमिति ॥ नपुंसकत्वमार्षम् ॥ मोक्षइत्येववापाठः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ सोपस्कराणिगृहो

१ पुंवद्भावाभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पकरणसहितानि सभूषणानीतिवा ॥ ६८ ॥ ब्रह्मशालावेदाध्ययननिमित्तंगृहम् ॥ पुराणमितिवापाठः ॥ ६९ ॥ ७० ॥ अखंडंवसुसमग्रंधनम् ॥ वसुवर्चसःअग्निवर्चसः ॥ ७१ ॥ ७२ ॥ ७३ ॥
॥ ७४ ॥ एकंकुलंएकःफलसाधनसमुदायः ॥ ७५ ॥ ७६ ॥ ७७ ॥ महेश्वरीब्रह्मादीनांनियंत्री ॥ गौरीमहेश्वरावितिवापाठः ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ विभावसोरग्नेः ॥ ८३ ॥

ब्रह्मशालांकारयंतिवेदमध्यापयंतिच ॥ विद्यादानंचयेकुर्युः[1]पुराणंश्रावयंतिच ॥ ६९ ॥ पुराणानिचयेदद्युः पुस्तकानिददत्यपि ॥
धर्मशास्त्राणियेदद्युस्तेषांवासोत्रमेपुरे ॥ ७० ॥ यज्ञार्थंचविवाहार्थंव्रतार्थंब्राह्मणायवै ॥ अखंडं वसुयेदद्युस्तेत्रस्युर्वसुवर्चसः ॥ ७१ ॥
आरोग्यशालांयःकुर्याद्वैद्यपोषणतत्परः ॥ आकल्पमत्रवसतिसर्वभोगसमन्वितः ॥ ७२ ॥ मुक्तींकुर्वंतितीर्थानि येच दुष्टावरोधतः ॥
ममावरे[2]धेतेमान्याऔरसास्तनयाइव ॥ ७३ ॥ विष्णोर्वाममवाशंभोर्ब्राह्मणाएवसुप्रियाः ॥ तेषांमूर्त्यावयंसाक्षाद्विचरामोमहीतले ॥ ७४ ॥
ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् ॥ एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति ॥ ७५ ॥ ब्राह्मणाजंगमंतीर्थंनिर्मितंसार्वभौमिकम् ॥
येषांवाक्योदकेनैवशुद्ध्यंतिमलिनाजनाः ॥ ७६ ॥गावःपवित्रमतुलंगावोमंगलमुत्तमम् ॥ यासांखुरोत्थितोरेणुर्गंगावारिसमोभवेत् ॥ ७७ ॥ शृंगाग्रे
सर्वतीर्थानिखुराग्रेसर्वपर्वताः ॥ शृंगयोरंतरेयस्याःसाक्षाद्गौरीमहेश्वरी ॥ ७८ ॥ दीयमानांचगांदृष्ट्वानृत्यंतिप्रपितामहाः ॥ प्रीयंतेऋषयःसर्वेतुष्यामो
दैवतैःसह ॥ ७९ ॥ रोरूयंतचपापानिदारिद्र्यंव्याधिभिःसह ॥ धा[3]त्र्यःसर्वस्यलोकस्यगावोमातेवसर्वथा ॥ ८० ॥ गवांस्तुत्वानमस्कृत्यकृत्वाचैवप्र
दक्षिणाम् ॥ प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा ॥ ८१ ॥ यालक्ष्मीःसर्वभूतानांयादेवेष्वव्यवस्थिता ॥ धेनुरूपेणसादेवीर्ममपापंव्यपोहतु ॥ ८२ ॥
विष्णोर्वक्षसियालक्ष्मीःस्वाहाचैवविभावसोः ॥ स्वधायापितृमुख्यानांसाधेनुर्वरदासदा ॥ ८३ ॥ गोमयंयमुनासाक्षाद्गोमूत्रंनर्मदाशुभा ॥ गंगाक्षीरंतुया
सांवैकिंपवित्रमतःपरम् ॥ ८४ ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ ८५ ॥ इतिमंत्रंसमुच्चार्यधेनूर्वाधेनु
मेववा ॥ योदद्याद्द्विजवर्यायससर्वेभ्योविशिष्यते ॥ ८६ ॥ मयाचविष्णुनासार्धंशिवेनचमहर्षिभिः ॥ विचार्यगोगुणान्नित्यंप्रार्थनेतिविधीयते ॥ ८७ ॥
गावोमेपुरतःसंतुगावोमेसंतुपृष्ठतः ॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् ॥ ८८ ॥

॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥

---

१ अत्रमूलपाठोनोपलब्धः । २ अन्तःपुरे । ३ पोषयित्र्यः । ४ दातुःपापंव्यपोहतीतिपुस्तकांतरपाठः ।

Nepal Sanskrit University, Balamandir Collection

CC-0. In Public Domain. Digitization by eGangotri

नीराजयतिप्रोंछतिमार्जयतीत्यर्थः ॥ अंगानिस्वांगानि ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ एषांसत्यलोकादिगोलोकांतानाम् ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ उपसंहरति ॥ इत्युद्देशादिति ॥ उद्देशात्संक्षेपात् ॥ भयार्तानांभीतिपीडितानांयदभयंतद्व्याख्यातमित्यर्थः ॥ २ ॥ एवंकाशीप्रकर्षपुरःसरान्धर्मानुक्त्वादेवागमनकारणंस्वयमेववर्णयन्सूर्यमार्गपरिरोधाभावोपायंप्रतिजानीते ॥ स्पर्धतइति ॥ ३ ॥ अस्तीति ॥ मित्रावरुणयोरपत्यंमैत्रावरुणिः ॥ उर्वशीदर्शनात्स्कन्नंरेतस्ताभ्यां

नीराजयतियोंगानिगवांपुच्छेनभाग्यवान् ॥ अलक्ष्मीःकलहोरोगास्तस्यांगाद्यांतिदूरतः॥८९॥ गोभिर्विप्रश्चवेदैश्चसतीभिःसत्यवादिभिः॥ अलुब्धैर्दानशीलैश्चसप्तभिर्धार्यतेमही॥९०॥ ममलोकात्परोलोकोवैकुंठइतिगीयते॥ तस्योपरिष्टात्कौमारउमालोकस्ततःपरम्॥९१॥ शिवलोकस्तदुपरिगोलोकस्तत्समीपतः ॥ गोमातरःसुशीलाद्यास्तत्रसंतिशिवप्रियाः ॥ ९२ ॥ गवांशुश्रूषकायेचगोप्रदायेचमानवाः ॥ एषामन्यतमेलोकेतेस्युःसर्वसमृद्धयः ॥ ९३ ॥ यत्रक्षीरवहानद्योयत्रपायसकर्दमाः ॥ नजराबाधतेयत्रतत्रगच्छंतिगोप्रदाः ॥ ९४ ॥ श्रुतिस्मृतिपुराणज्ञाब्राह्मणाःपरिकीर्तिताः॥ तदुक्ताचारचरणाइतरेनामधारकाः॥९५॥ श्रुतिस्मृतीतुनेत्रेद्वेपुराणंहृदयंस्मृतम् ॥ श्रुतिस्मृतिभ्यांहीनोंधःकाणःस्यादेकयाविना॥९६॥ पुराणहीनाद्धृच्छून्यात्काणांधावपितौवरौ ॥ श्रुतिस्मृत्युदितोधर्मःपुराणेपरिगीयते॥९७॥ तद्ब्राह्मणायगौर्देयासर्वत्रसुखमिच्छता ॥ नदेयाद्द्विजमात्रायदातारंसोप्यधोनयेत्॥९८॥ यस्यधर्मेऽस्तिजिज्ञासायस्यपापाद्भयंमहत्॥ श्रोतव्यानिपुराणानिधर्ममूलानितेनवै॥९९॥ चतुर्दशसुविद्यासुपुराणंदीपउत्तमः॥ अंधोपिनतदालोकात्संसाराब्धौक्वचित्पतेत् ॥१००॥ श्रोतव्यानिपुराणानिवस्तव्यंजाह्नवीतटे ॥ तर्पणीयाद्द्विजानित्यंममलोकेप्सुभिःसदा ॥ १ ॥ इत्युद्देशान्मयाख्यातासत्यलोकव्यवस्थितिः[3] ॥ अभयंयद्भयार्तानांनभेतव्यंचहेसुराः ॥२॥ स्पर्धतेमेरुणाविंध्योब्रध्नाध्वपरिरोधकृत् ॥ तदर्थमागतायूयंतदुपायंदिशामिवः॥३॥ अस्त्यगस्त्यस्तप्यमानस्तप उग्रं महातपाः ॥ मैत्रावरुणिराधाय चित्तं विश्वेश्वरे विभौ ॥ ४ ॥ अविमुक्तेमहाक्षेत्रेसर्वेषांमुक्तिहेतुके ॥ तारकस्योपदेशार्थविश्वेशाऽधिष्ठितेस्वयम् ॥ ५ ॥ याचध्वंतत्रगत्वातंसवःकार्यविधास्यति ॥ तेनैकदावितालोकावातापील्वलभक्षणात् ॥ ६ ॥

कुंभेनिषिक्तंतस्मादगस्त्योजज्ञे ॥ तथाचश्रुतिः ॥ कुंभेरेतःसिषिचतुःसमानमिति ॥ तत्रमैत्रावरुणिरित्युक्तेवसिष्ठेपिगच्छतितद्वारणार्थमगस्त्यइत्युक्तम् ॥ तावत्युक्तेअंगानिनिष्क्रियाणिगात्राणिरत्यायतिसंघातयतीत्यगस्त्यः अगस्त्यनामावाकश्चित्तत्रातिव्याप्तिःस्यात्तद्वारणार्थमुक्तंमैत्रावरुणिरिति ॥ ४ ॥ तारकस्यप्रणवस्यषडक्षरश्रीराममंत्रराजस्यवा ॥ ५ ॥ वोयुष्माकम् ॥ कथम्

---

१ पारिपठ्यतेइत्यपिक्वचित्पाठः । २ सश्रुतिस्मृतिपुराणज्ञोयोब्राह्मणस्तस्मै । ३ लोकस्यचस्थितिरित्यपिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षिमात्रस्यताहृग्दुर्घटकार्यकरणसामर्थ्यमित्याशंकायामाह ॥ तेनैकदेति ॥ वातापील्वलभक्षणात्इल्वलस्यसंबंधीवातापिर्वातापील्वलः ॥ राजदंतादित्वात्पूर्वनिपातः॥तस्यभक्षणात् ॥ तथाचोक्तम् ॥
वातापिर्भक्षितोयेनसमुद्रःशोषितःपुरा ॥ यद्वा वातापिश्चइल्वलश्चतयोर्भक्षणात् ॥ तत्रवातापेर्भक्षणंशरीरतःइल्वलस्यभक्षणंत्वर्थतः ॥ मनुष्यान्भक्षयिष्यंतिह्यर्थतोनशरीरतइत्यादौधननाशेपिभक्षण
शब्दप्रयोगात् ॥ यद्वा भ्रातुर्भक्षणात्सोपिभक्षितइतितथोक्तम् ॥ यद्वा वातापील्वलभक्षणात्तयोर्मारणादित्यर्थः ॥ तदुक्तंरामायणेअरण्यकांडे ॥ अगस्त्येनततःक्रोधादागत्यभ्रातुराश्र
मम् ॥ अनुभूयैकदाश्राद्धंभक्षितःसनिशाचरः ॥ ततःसंपन्नमित्युक्त्वादत्वाहस्तावसेचनम् ॥ भ्रातरंनिष्क्रमेत्युच्चैरिल्वलःसोभ्यभाषत ॥ तंतथाहूयमानंतुराक्षसंमेषरूपिणम् ॥ अब्रवीत्प्रहसञ्छ्री
मानगस्त्योमुनिसत्तमः ॥ कुतोनिष्क्रमितुंशक्तिर्मयाजीर्णस्यरक्षसः ॥ भ्रातुस्तेमेषरूपस्यगतस्ययमसादनम् ॥ तस्यैतद्वचनंश्रुत्वाभ्रातुर्मरणशंकितः ॥ प्रधर्षयितुमारेभेमुनिंक्रोधा

अतिमित्रंतत्रतेजोमित्रावरुणजेमुनौ॥तदाप्रभृतिलोकेषु[1]कोगस्त्यान्नैवबिभ्यति ॥७॥ इत्युक्त्वांतर्दधेवेधास्तेपिप्रमुदिताननाः ॥ देवाःपरस्परंप्रोचुरहोधन्य
तमावयम् ॥ ८ ॥ प्रसंगतोपिद्रष्टव्यौकाशीकाशीपतीशिवौ ॥ अहोअहोभिर्बहुभिःफलितोनोमनोरथः ॥ ९ ॥ उत्फुल्लपद्मनयनानिर्मिताःसुकृतार्थिनः॥
तावेवचरणौधन्यौकाशीमभिप्रयायिनौ ॥ ११० ॥ येयंकथाश्रुतास्माभिर्वेधसासमुदीरिता ॥ तस्याःश्रवणजात्पुण्यात्प्राप्तुमस्त्वद्यकाशिकाम् ॥ ११॥
एकाक्रियाद्व्यर्थकरीप्राप्यतेपुण्यगौरवात् ॥ एवंवदंतोहृष्टास्याःसुराःकाशींसमाययुः ॥१२॥ व्यासउवाच ॥ इदंपुण्यतमाख्यानंयेश्रोष्यंतीहमानवाः ॥
विधूयसर्वपापानिपुत्रदारसमन्विताः ॥ १३ ॥ इहवंशंपरिस्थाप्यभुक्त्वासर्वसुखानिच ॥ सत्यलोकेचिरंस्थित्वाततोयास्यंतिशाश्वतम् ॥ ११४ ॥
इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडे पूर्वार्धे सत्यलोकवर्णनंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ सूतउवाच ॥
भगवन्भूतभव्येशसर्वज्ञानमहानिधे ॥ अवाप्यकाशींगीर्वाणैःकिमकारि[2]वदाच्युत ॥ १ ॥

निशाचरः ॥ अभ्यद्रवदगस्त्यंतुमुनिनादीप्ततेजसा ॥ चक्षुषादीप्तकल्पेननिर्दग्धःसपपातहेति ॥ नचैवंसतिरामायणभारतयोःपरस्परविरोधः ॥ कल्पभेदेनव्यवस्थोपपत्तेः ॥ तथा
न्यत्रापि ॥ ६ ॥ अतिमित्रंसूर्यमतिक्रम्यवर्ततइतितत्तेजस्तथा ॥ ७ ॥ ८ ॥ ९ ॥ उत्फुल्लपद्मनयनाःसुराःकाशींसमाययुरितितृतीयेनान्वयः ॥ उत्फुल्लपद्मानीवनयना
नियेषांतेतथा ॥ कथंभूताः ॥ निर्मिताःनिःशेषेणमितंकाशीकाशीपतीद्रष्टव्यावित्यादिचिंतितंयैस्तेतथा ॥ काशीगमनेकृतसम्यङ्निश्चयाइत्यर्थः ॥ तत्रहेतुमाह ॥ तावेवेति ॥ ११० ॥
प्राप्नुयुःप्राप्स्यामः ॥ ११ ॥ १२ ॥ श्रोतृप्ररोचनार्थमाह ॥ इदमिति ॥ १३ ॥ शाश्वतंकैवल्यम् ॥ ११४ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखण्डटीकायांद्वितीयोऽध्यायः ॥ २ ॥
अगस्तेराश्रमपदेदेवतानांसमागमः ॥ तस्यचाश्रममाहात्म्यंतृतीयेध्यायईर्यते ॥ १ ॥ एवंवदन्तोहृष्टास्याः सुराःकाशींसमाययुरित्युक्तंतत्रपृच्छाति ॥ भगवन्निति ॥ अच्युतनिर्विकारहेविष्णो

१ अत्रकेइत्यपेक्षितमितिभाति । २ व्याससंबोधनम् ।

Nepal Sanskrit University, Balambu Collection

CC-0. In Public Domain. Digitization by eGangotri

इतिवा ॥ १ ॥ नतृप्तिमधियामिअलंप्रत्ययंनाधिगच्छामि ॥ तपसांशेवधिर्निधिः ॥यथा पद्मादिनिधिर्धनानामाश्रयस्तथातपसामाश्रयःखनिरित्यर्थः ॥ २ ॥ वागमृतांभोधौवाक्सुधासमुद्रे ॥
उत्सुकमुत्कंठितम् ॥ ३ ॥ कृत्स्नंसमग्रम् ॥ प्रश्नमितिवापाठः ॥ समुपचक्रमेउपक्रांतवान् ॥ ४ ॥ संसारांगारेविपच्यमानान्संसारिणोऽज्ञानकरुणयाशोचतीतिशुकः ॥ तदुक्तंभागवते ॥
संसारिणांकरुणयाहपुराणगुह्यमिति ॥ यद्वा शुकवन्मनोज्ञंवचनंवक्तीतिशुकः ॥ तथाचब्रह्मवैवर्तेव्यासंप्रतिभगवद्वचनम् ॥ व्यासत्वदीयतनयःशुकवन्मनोज्ञंब्रूतेवचोभवतुतच्छुकएवनाम्ना । हर्म्ये
नवत्स्यतितवापिनमाययासौस्पृष्टोयतोममकथाहृदिमास्यशोकामिति ॥ तथाविगतंनामोच्चारणादेवशंपायाःशतह्रदायाअयनंपतनंयस्यसविशंपायनःसएववैशंपायनः ॥ स्वार्थेताद्धितः ॥ उक्तंच ॥
शंपांशतह्रदामाहुरयनंपतनंयतः ॥ विगतंपतनंयस्माद्वैशंपायनइत्यतइति ॥ तौशुकवैशंपायनावाद्यौयेषांतेतथा ॥ आद्यपदेनजातूकार्ण्यजैमिनिपैलसुमंतूनांसंग्रहः ॥ शृण्वंत्वन्येमहर्षयइतिक

अधीत्येमांकथांदिव्यांनतृप्तिमधियाम्यहम् ॥ शेवधिस्तपसांदेवैरगास्तिःप्रार्थितःकथम् ॥ २ ॥ कथंविंध्योप्यवापस्वांप्रकृतिंताहगुन्नतः ॥ तववागमृतां
भोधौमनोमेस्नातुमुत्सुकम् ॥ ३ ॥ इतिकृत्स्नंसमाकर्ण्यव्यासःपाराशरोमुनिः ॥ श्रद्धावतेस्वशिष्यायवक्तुंसमुपचक्रमे ॥ ४ ॥ पाराशरउवाच ॥
शृणुसूतमहाबुद्धेभक्तिश्रद्धासमन्वितः ॥ शुकवैशंपायनाद्याःशृण्वंत्वेतेचबालकाः ॥ ५ ॥ ततोवाराणसींप्राप्यगीर्वाणाःसमहर्षयः ॥ अविलंबंप्रथमतोम
णिकर्ण्यांविधानतः ॥ ६ ॥ सचैलमभिमज्ज्याथकृतसंध्यादिसत्क्रियाः ॥ संतर्प्यतर्प्यादिपितॄन्कुशगंधतिलोदकैः ॥ ७ ॥ तीर्थवासार्थिनः
सर्वान्संतर्प्यचपृथक्पृथक् ॥ रत्नैर्हिरण्यवासोभिरश्वाभरणधेनुभिः ॥ ८ ॥ विचित्रैश्चतथापात्रैःस्वर्णरौप्यादिनिर्मितैः ॥ अमृतस्वादुपक्वान्नैःपायसै
श्चसशर्करैः ॥ ९ ॥ सगोरसैरन्नदानैर्धान्यदानैरनेकधा ॥ गंधचंदनकर्पूरैस्तांबूलैश्चारुचामरैः ॥ ॥ १० ॥ सतूलैर्मृदुपर्यंकैर्दीपिकादर्पणासनैः ॥
शिबिकादासदासीभिर्विमानैःपशुभिर्गृहैः ॥ ११ ॥ चित्रध्वजपताकाभिरुल्लोचैश्चंद्रचारुभिः ॥ वर्षाशनप्रदानैश्चगृहोपस्करसंयुतैः ॥ १२ ॥
उपानत्पादुकाभिश्चयतिनश्चतपस्विनः ॥ योग्यैःपट्टदुकूलैश्चविविधैश्चित्ररल्लकैः ॥ १३ ॥ दंडैःकमंडलुयुतैरजिनैर्मृगसंभवैः ॥ कौपीनैरुच्चमंचै
श्चपरिचारककांचनैः ॥ १४ ॥

चित्पाठः ॥ ५ ॥ ६ ॥ तर्प्यास्तर्पणीयाश्चतेआदिपितरस्तांस्तर्प्यादिपितॄन्संतर्प्य ॥ तर्प्यान्देवपितॄनितिपाठेऽक्षराधिक्यमार्षम् ॥ सन्तर्प्यविधिवद्दिव्यपितॄन्कुशतिलोदकैरितिचक्वचित्पाठः
॥ ७ ॥ रत्नैरित्यादिसप्रदक्षिणैरित्यंतानांतृतीयांतानांतीर्थवासार्थिनः सर्वान्संतर्प्यचेत्यनेनान्वयः ॥ चकाराद्देवादीनपि ॥ ८ ॥ अमत्रैःपात्रैः ॥ पात्रामत्रंचभाजनमित्यमरः ॥ ९ ॥ १० ॥
मृदुपर्यंकैःकोमलखट्वाभिः ॥ मृदुत्वेहेतुमाह ॥ सतूलैर्हंसतूलिकाभिःसहितैरित्यर्थः ॥ यद्वा मृदुपर्यंकैः सूत्रादिनिर्मितपर्यंकैः ॥ शिबिकानरयानम् ॥ विमानैरथैः ॥ ११ ॥ उल्लोचैश्चंद्रातपैर्वितानैरिति
यावत् ॥ अस्त्रीवितानमुल्लोचइत्यमरः ॥ १२ ॥ उपानत्पादुकाभिश्च चर्मनिर्मिताउपानहः काष्ठनिर्मिताःपादुकास्ताभिश्च ॥ चशब्दाःसमुच्चयार्थाः ॥ पट्टदुकूलैर्नूतनक्षौमैः ॥ क्षौमं
दुकूलमित्यमरः ॥ पट्टदुकूलैरितिक्वचित्पाठःसाचिंत्यः ॥ चित्ररल्लकैश्चित्रकंबलैः ॥ समौरल्लककंबलावित्यमरः ॥ १३ ॥ अजिनैर्मृगचर्मभिः ॥ उच्चमंचैरुन्नतकाष्ठनिर्मितखट्वादिकैः ॥ पारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारककांचनैःशुश्रूषकाणांदेयैःस्वर्णैः ॥ परिचारिकैरितिपाठेपिसएवार्थः ॥ १४ ॥ महापुस्तकसंभारैरनेकैःपुस्तकसमूहैः ॥ नानापुस्तकसामग्रीभिरितिवा ॥ १५ ॥ सत्रदानैर्वस्त्रदानैर्यज्ञदानैर्धनदानैरि
तिवा॥ सत्रमाच्छादनेयज्ञेसदादानेधनेपिचेत्यमरः॥ हेमन्तेऽग्निष्टिकेंधनैःशिशिरर्तौशीतापनोदायलोहमृदादिनिर्मितान्यग्न्याधारपात्राणिअग्निष्टिकास्ताश्चतास्वग्निकरणार्थानींधनानिकाष्ठानिचतैः१६॥
आच्छादनिकंछदिर्गृहादिकम ॥ १७ ॥ १८ ॥ देवालयसुधाकार्यैःदेवप्रासादचूर्णदानैः ॥ रंगमालादिमंडनैःरंगमालारंगसमूहाः आदिशब्देनसंमार्जनादीनिगृह्यंते ॥ तैर्यानिमंडनानिता
न्येववामंडनानितैः ॥ मंडलैरितिपाठेमंडलंसर्वतोभद्रादि ॥ १९ ॥ नीराजनैःआरार्तिकैः बहुवर्तियुक्तदीपैरित्यर्थः ॥ तदुक्तंविष्णुभक्तिरहस्ये ॥ बहुवर्तिसमायुक्तंज्वलंतंकेशवोपरि ॥ कुर्या
दारार्तिकंयस्तुकल्पकोटिदिवंवसेदिति ॥ आरार्तिकैरितिवापाठः ॥ दशांगधूपकैरिति ॥ षड्भागकुष्ठोद्विगुणोगुडश्चलाक्षात्रयंपंचनखस्यभागाः ॥ हरीतकीसर्जरसश्चमांसंभागत्रयंचैवतुशैलजस्य ॥
घनस्यचत्वारिपुरस्यचैकोदशांगधूपःकथितोमुनींद्रैरित्यनेनोक्तोदशांगधूपआदिर्येषांतेचतेसुधूपाश्चतैः ॥ कर्पूरवर्तिकाद्यैरिति ॥ कर्पूरवर्तिकायस्यसकर्पूरवर्तिकः आदौभवआद्यः कर्पूरवर्तिकोदीपआ

मठैर्विद्यार्थिनामन्नैरतिथ्यर्थंमहाधनैः ॥ महापुस्तकसंभारैर्लेखकानांचजीवनैः॥१५॥बहुधौषधदानैश्चसत्रदानैरनेकशः ॥ ग्रीष्मेप्रपार्थद्रविणैर्हेमंतेग्निष्टि
केंधनैः॥१६॥छत्राच्छादनिकाद्यर्थैर्वर्षाकालोचितैर्बहु॥रात्रौपाठप्रदीपैश्चपादाभ्यंजनकादिभिः ॥१७॥ पुराणपाठकांश्चापिप्रतिदेवालयंधनैः ॥ देवाल
येनृत्यगीतकरणार्थैरनेकशः ॥१८॥ देवालयसुधाकार्यैर्जीर्णोद्धारैरनेकधा ॥ चित्रलेखनमूल्यैश्चरंगमालादिमंडनैः ॥ १९ ॥ नीराजनैर्गुग्गुलुभिर्दशां
गादिसुधूपकैः ॥ कर्पूरवर्तिकाद्यैश्चदेवार्चार्थैरनेकशः ॥ २० ॥ पंचामृतानांस्नपनैः सुगंधस्नपनैरपि ॥ देवार्थमुखवासैश्चदेवोद्यानैरनेकशः ॥ २१ ॥
महापूजार्थमाल्यादिगुंफनार्थैस्त्रिकालतः ॥ शंखभेरीमृदंगादिवाद्यनादैः शिवालये ॥ २२ ॥ घंटागडुककुंभादिस्नानोपस्करभाजनैः ॥ श्वेतै
र्मार्जनवस्त्रैश्चसुगंधैर्यक्षकर्दमैः ॥ २३ ॥ जपहोमैःस्तोत्रपाठैःशिवनामोच्चभाषणैः ॥ रासक्रीडादिसंयुक्तैश्चलनैः सप्रदक्षिणैः ॥ २४ ॥ एवमादि
भिरुद्दंडैः क्रियाकांडैरनेकशः ॥ पंचरात्रमुषित्वातुकृत्वातीर्थान्यनेकशः ॥ २५ ॥

द्योयेषांतेदीपास्तथातैः ॥ कर्पूरवर्तिकार्यैरितिक्वचित्पाठः ॥ देवार्चार्थैर्देवपूजानिमित्तैर्धनैः ॥ २० ॥ पंचामृतानांस्नपनैर्घृतदुग्धदधिमधुशर्कराणांस्नानैः ॥ २१ ॥ गुंफनार्थैःग्रंथना
र्थद्रविणैः ॥ गुंफनंग्रंथसंदर्भेदर्पेगुंफनमिष्यतइतिमेदिनीकारः ॥ २२ ॥ गडुकंभृंगारंअंगुलीयकंवा ॥ गडुकंत्वंगुलीयकमित्युत्पलिनी ॥ मड्डुकेतिपाठेमड्डुकोवाद्यभेदः ॥ तथाचमाघे
जग्मुर्जलानिजलमड्डुकवाद्यवल्गुवल्गद्धनस्तनतटस्खलितानिमंदमिति ॥ वाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झराइतिचामरः ॥ यक्षकर्दमैःकर्पूरागुरुकस्तूरीकंकोलैर्यक्षकर्दमइत्यमरः ॥ २३॥ ॥ २४ ॥
उपसंहरति ॥ एवमादिभिरिति ॥ उद्दंडैर्नानाप्रकारैः क्रियाकांडैःकर्मकांडप्रतिपादितैःकर्मभिरित्यर्थः ॥ यद्वा क्रियाकांडैःक्रियासमूहैरित्यर्थः ॥ पंचरात्रमुषित्वेति पंचरात्रेणयावान् कालोभवतिता
वंतंकालं स्थित्वेत्यर्थः ॥ यद्वा काश्यांरात्रिदिनविभागस्यदिविष्ठचंद्रसूर्याभ्यांविनेवेश्वरेणकृतत्वाद्यथाश्रुतएवार्थः ॥ ताभ्यांदिनरात्रिविभागप्रतीतिस्तुभूभ्यांकाशीतिष्ठतीतिप्रतीतिवद्भ्रांतैव ॥

Nepal Sanskrit University, Baljhi Collection

CC-0. In Public Domain. Digitization by eGangotri

अतएवविंध्योन्नतेःसर्वस्मिन्जगतिभयद्रुतेपिकाशीस्थानांभयद्रवणाद्यभावाद्देवागमनतीर्थवासार्थिसंतर्पणादिकंचसर्वंसंगच्छते ॥ तथाचात्रैवस्मृत्यर्थापत्तिः ॥ क्षुब्धेषुतेषुवीरेषुचकंपेभुवनत्रयम् ॥ दुर्वाससश्चकोपाग्निज्वालाभिर्व्याकुलीकृतम् ॥ तदाविविशतुःकाश्यांसूर्याचंद्रमसावपि ॥ नगणैरकृतानुज्ञौतत्तेजःशमितप्रभाविति ॥ अनेकशःआवृत्यावृत्य बहुवारानित्यर्थः ॥ २५ ॥ २६ ॥ अगस्तिरिति ॥ अगस्तिः स्यादगस्त्यश्चेतिद्विरूपकोशादिकारांतोपि ॥ २७ ॥ २८ ॥ तंदृष्ट्वेति ॥ प्रथमतस्तमगस्त्यंदूरतोदृष्ट्वापश्चाद्गीर्वाणादेवामुनेरुटजंप्रांगणंददृशुरितिद्विसप्ततितमश्लोके नान्वयः ॥ २९ ॥ आगाम्यष्टत्रिंशच्छ्लोकस्थितेतिशब्दपरामृष्टंकर्माहुः ॥ साक्षादित्यादि ॥ तत्रत्रयेणमुनेरुत्प्रेक्षा ॥ अवशिष्टेनाश्रमपशुपक्ष्यादिवर्णनमितिविवेक्तव्यम् ॥ सतांमनःसन्मनः ॥ ३० ॥ ॥ ३१ ॥ चपलाविद्युत् ॥ तडित्सौदामनीविद्युच्चंचलाचपलाअपीत्यमरः ॥ अचपलास्थिरेतियावत् ॥ ३२ ॥ हिंस्राःक्रूराः ॥ सत्त्वरूपाःसात्त्विकाःसत्त्वगुणप्रधानाइत्यर्थः ॥ स्वभावजंसाहजिकम् ॥ ३३ ॥ करटःप्रशस्तगंडोऽस्यास्तीतिकरटिःहस्ती ॥ छांदसत्वात्साधुत्वम् ॥ काकेभगंडौकरटौगजगंधकटीकटावितिद्वादशसाहस्री ॥ करटोगजगंडेस्यात्कुसुंभेनिंद्यजीवनेइतिमेदिनीकारः ॥ अष्टा

दीनानाथांश्चसंतर्प्यनत्वाविश्वेश्वरंविभुम् ॥ ब्रह्मचर्यादिनियमैस्तीर्थमेवंप्रसाध्यच ॥ २६ ॥ पुनः पुनर्विश्वनाथंदृष्ट्वास्तुत्वाप्रणम्यच ॥ जग्मुःपरो
पकारार्थमगस्तिर्यत्रतिष्ठति ॥ २७ ॥ स्वनाम्नालिंगमास्थाप्यकुंडंकृत्वातदग्रतः ॥ शतरुद्रियसूक्तेनजपन्निश्चलमानसः ॥ २८ ॥ तंदृष्ट्वादूरतोदेवा
द्वितीयमिवभास्करम् ॥ ज्वलज्ज्वलनसंकाशैरंगैःसर्वत्रसोज्ज्वलम् ॥ २९ ॥ साक्षात्किंवाडवाग्निर्वामूर्त्यावैतप्यतेतपः ॥ स्थाणुवन्निश्चलतरंनिर्मलं
सन्मनोयथा ॥ ३० ॥ अथवासर्वतेजांसिश्रित्वेमांब्राह्मणींतनुम् ॥ शीलयंतिपरंधामशांतंशांतपदाप्तये ॥ ३१ ॥ तपनस्तप्यतेऽत्यर्थंदहनोपिहिदह्यते ॥
यत्तीव्रतपसाद्यापिचपलाऽचपलाभवत् ॥ ३२ ॥ यस्याश्रमे ऽत्रदृश्यंतेहिंस्राअपिसमंततः ॥ सत्त्वरूपाअमीसत्त्वास्त्यक्त्वावैरंस्वभावजम् ॥ ३३ ॥
शुंडादंडेनकरटिः सिंहंकंडूयतेऽभयः ॥ अष्टापदांकेस्वपितिकेसरीकेसरोद्भटः ॥ ३४ ॥ सूकरःस्तब्धरोमापिविहायनिजयूथकम् ॥ चरेद्वनशुनांमध्ये
मुस्तान्यस्तेक्षणोबली ॥ ३५ ॥ भूदारोपिनभूदारंतथाकुर्याद्यथाऽन्यतः ॥ सर्वालिंगमयीकाशीयतस्तद्भीतियंत्रितः ॥ ३६ ॥ क्रोडीकृत्यक्रोडपोतं
तरक्षुःक्रीडयत्यहो ॥ शार्दूलबालानुत्सार्यशार्दूलीमेणपोतकः ॥ ३७ ॥

पदःशरभः ॥ अष्टापदंस्यात्कनकेसारीणांफलकेपिच ॥ अष्टापदंचशरभेचंद्रमण्यांचमर्कटइतिचविश्वप्रकाशः ॥ तस्यांकेक्रोडेकेसरीसिंहः ॥ सिंहोमृगेंद्रःपंचास्योहर्यक्षःकेसरीहरिरित्यमरः ॥ कीदृशः ॥ केसरोद्भटः केसरैःस्कंधस्थैर्लोमाविशेषैः ॥ किंजल्केकेसरःपुष्पपशुरोमविशेषयोरितिमेदिनीकारः ॥ उद्भटउन्नद्धः ॥ ३४ ॥ सूकरोवराहः ॥ स्तब्धरोमेतितस्यविशेषणम् अतिक्रूरतयास्तब्धानिउन्नतानिरोमाणियस्यसतथाविधोपीत्यतोनपौनरुक्त्यम् ॥ वनश्वानोऽत्रव्याघ्राः अरण्यभवाःश्वानइतिवा ॥ मुस्तासुकुरुविल्वेषु ॥ कुरुविल्वोमेघनामामुस्तामुस्तकमस्त्रिया मित्यमरः ॥ मोथाइतिप्रसिद्धासुन्यस्तेदत्तेईक्षणेनेत्रेयेनसतथा ॥ ३५ ॥ भदारइतिसार्धम् ॥ भुवंपृथ्वींदारयतीतिभूदारःसूकरस्तथाविधोपि ॥ यथान्यत्रभूविदारंकरोतितथात्रनकरोती त्यर्थः ॥ तत्रहेतुमाह ॥ सर्वालिंगमयीति ॥ ३६ ॥ क्रोडपोतंसूकरशावकम् ॥ वराहःसूकरोघृष्टिःकोलःपोत्रीकिरिःकिटिः दंष्ट्रीघोणीस्तब्धरोमा क्रोडोभूदारइत्यपीत्यमरः ॥ तरक्षुर्मृगादनः ॥ ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

तरक्षुस्तुमृगादनइत्यमरः ॥ शार्दूलवालान्व्याघ्रशावकानुत्सार्यदूरीकृत्यशार्दूलींव्याघ्रींएणपोतकोहरिणबालकः ॥ दयायांकः ॥ चलत्पुच्छंयस्यसतथा ॥ पिबति ॥ पयइतिशेषः ॥ पिबतिरत्रद्विकर्मकः ॥ लक्षणयावाशार्दूल्याःस्तनंपिबतीत्यर्थः ॥ फेनिलेनफेनयुक्तेन ॥ स्वपंतंशयानंभल्लुंऋक्षम् ॥ अथभल्लुके ऋक्षाच्छभल्लभल्लूकाइत्यमरः ॥ कथंभूतम् ॥ लोमशंबहुलोमयुक्तम् ॥ ३७ ॥ ३८ ॥ यूकालिक्षाः ॥ यूकालिक्षाकीटभेदालाक्षातुस्याद्द्रुमामयेइतिमालती ॥ समुउपसर्गस्यवीक्ष्येत्यनेनाग्रेपिसंबंधः ॥ दंतकोटिभिर्दन्ताग्रैर्भक्षयेत् ॥ अत्रसाहजिकवैराभावस्यविवक्षितत्वाद्यूकाभक्षणंनदोषावहम् ॥ यद्वा मृतानामेवयूकानांभक्षणमत्रविवक्षितम् ॥ अतएवसंवीक्ष्यवीक्ष्येत्युक्तम् ॥ अथवालक्षणयांगुलीभिर्विचार्यसंवीक्ष्यदंतकोटिभिर्दूरीकरोतीत्यर्थः ॥ अथवावानरजातिस्वभावत्वाद्भक्षयेदित्येवेत्यर्थः ॥ गोलांगूलाःकापिविशेषास्तेषांविशेषणंरक्तमुखाःनीलांगाइतिच स्वतंत्रावा ॥ ३९ ॥ शशामृगाविशेषाः ॥ तैःप्रसिद्धैः ॥ तेइतिपाठेपिसएवार्थः ॥ पृष्ठलुंठनैःपृष्ठसंघर्षणैः ॥ ४० ॥ आखुभुजोमार्जारस्य ॥ ओतुर्बिडालः ॥ ओतुर्बिडालोमार्जारोवृषदंशकआखुभुगित्यमरः ॥ ४२ ॥ केकिकंठेमयूरग्रीवायाम् ॥

चलत्पुच्छोथपिबतिफेनिलेनाननेनवै ॥ स्वपंतंलोमशंभल्लुंवानरश्चलदंगुलिः॥३८॥यूकांसंवीक्ष्यवीक्ष्यैवभक्षयेद्दंतकोटिभिः ॥ गोलांगूलारक्तमुखानीलांगायूथनायकाः॥३९॥जातिस्वभावमात्सर्यंत्यक्त्वैकत्ररमंतिच ॥ शशाःक्रीडंतिचवृकैस्तैः पृष्ठलुंठनैर्मुहुः॥४०॥आखुश्चाखुभुजःकर्णंकंडूयेतचलाननः ॥ मयूरपुच्छपुटगोनिद्रात्योतुः सुखाधिकम् ॥ ४१ ॥ स्वकंठंवर्षयत्येवकेकिकंठेभुजंगमः ॥ भुजंगमफणापृष्ठेनकुलः स्वकुलोचितम् ॥ ४२ ॥ वैरंपरित्यज्यलुठेदुत्प्लुत्योत्प्लुत्यलीलया ॥ आलोक्यमूषकंसर्पश्चरंतंवदनाग्रतः ॥ ४३ ॥ क्षुधांधोपिनगृह्णातिसोपितस्माद्बिभेतिनो ॥प्रसूयमानांहरिणींदृष्ट्वाकारुण्यपूर्णदृक् ॥ ४४ ॥ तद्दृष्टिपातंमुंचन्वैव्याघ्रोदूरंव्रजत्यहो ॥ व्याघ्रीव्याघ्रस्यचरितंमृगीमृगविचेष्टितम् ॥ उभेकथयतोऽन्योन्यंसख्याविवमुदान्विते ॥४५॥ दृष्ट्वाप्युद्दंडकोदंडंशबरंशंबरोमृगः ॥ धृष्टोनवर्त्मत्यजतिसोपिकंडूयतेपितम् ॥ ४६ ॥ रोहितोऽरण्यमहिषमुद्धर्षतिनिराकुलः॥चमरीशबरीकेशैःसंमिमीतेस्ववालधिम् ॥४७॥ गवयःशल्यकश्चाऽयमुभावेकत्रतिष्ठतः ॥ तीव्र[1]मात्सर्यमुत्सृज्यमुनितेजोनियंत्रितौ ॥ ४८ ॥

फटाफणा ॥ फटायांतुफणाद्वयोरित्यमरः ॥ ४२ ॥ लुठेत्क्रीडेत् ॥ उत्प्लुत्योत्प्लुत्यउत्फाल्योत्फाल्य ॥ लीलयाऽवज्ञयाभयमगणयित्वेतियावत् ॥ ४३ ॥ क्षुधाबुभुक्षयार्तः पीडितइति यावत् ॥ क्षुधांधइतिपाठेपिसएवार्थः ॥ कारुण्यपूर्णदृक्करुणाव्याप्तज्ञानः ॥ ४४ ॥ अहोइत्याश्चर्येहर्षेवा ॥ ४५ ॥ उद्दंडकोदंडमत्यूर्जितचापम् ॥ अथास्त्रियौ धनुश्चापौधन्वशरासनकोदंडकार्मुकामित्यमरः ॥ शबरंभिल्लम् ॥ शंबरोनाम्ना ॥ धृष्टोदृप्तोनिर्लज्जोवा ॥ सःशबरोमृगादनोपीत्यर्थः ॥४६॥ रोहितोमृगावांतरजातिभेदः ॥ कृष्णसाररुरुन्यंकुरंकुशंबररोहिषाः गोकर्णपृषतैणर्श्यरोहिताश्चमरोमृगाभेदाः इत्यमरः ॥ उद्धर्षतिसंस्पृशतिसंलुठातिनगणयतीत्यर्थः ॥ उद्धर्षतीतिपाठः ॥ निराकुलोनिःशंकः ॥ चमरीचमरस्यमृगविशेषस्यपत्नी ॥ शबरीशबरांगनाचंडालविशेषस्त्री ॥ किरातशबरपुलिन्दाम्लेच्छजातयइत्यमरः ॥ तस्याः केशैःस्ववालधिं स्वीयवालहस्तम् केशवल्लांगूलमितियावत् ॥ वालहस्तस्तुवालधिरित्यमरः ॥ संमिमीतेपरिमिनोति ॥ ४७ ॥ गवयोमृगविशेषः । गंधर्वः शरभोरामःसृमरो गवयःशशः इत्यादयोमृगेंद्राद्याइत्यमरः ॥ शल्यकःश्वावित् ॥ शल्य एव शल्यकः ॥ स्वार्थेकः ॥ श्वावित्तुशल्यइत्यमरः ॥ ४८ ॥

[1] निजमात्सर्यमितिप्रचुरःपाठः ।

Nepal Sanskrit University, Balmiki Campus...

CC-0. In Public Domain. Digitization by eGangotri

हुमितिशब्दंकृत्वायुद्धायडीयेतेइतिहुंडौमेषौतौमुण्डयुद्धायनसज्जेतेनप्रवर्त्तेते ॥ यद्वा हुंडौतीक्ष्णोद्यमौजन्तुविशेषौ ॥ हुंडस्तीक्ष्णोद्यमोहुंडावह्निघोषेतुकीर्तिताइतिरत्नमाला ॥ यद्वा हुंडौमदपूर्णौ मल्लौ ॥ हुंडास्याज्जलहस्तिन्यांमदिराजलहस्तयोः नलिन्यांशूरयोषायांहुंडःस्यान्मदनिर्भरइतिविश्वप्रकाशः ॥ मल्लयोर्मुंडयुद्धंतुशिरःशीर्ष्णोर्रसोरसावितिभागवतेप्रसिद्धम् ॥ हुंडौहुंडारावीति केचित् जयैषिणौजयकांक्षिणौ ॥ मृद्वयथास्यात् ॥ ४९ ॥ तृण्वंतिभक्षयंति ॥ तृणुअदनइतिधातुः ॥ तृणगुल्मादीन्तृणानिचगुल्मानिचतान्यादीनियेषांतान् ॥ श्वापदाव्याघ्रादयः शुनांआपदोयेभ्यस्तेश्वापदाइतिव्युत्पत्तिपुरस्कारेणपुंसिश्वापदसर्पयोरित्यादिदर्शनाददन्तत्वेननिपातनात् ॥ पाठांतरेसुष्ठुआपत्येभ्यस्तेतथाइतिव्याख्येयम् ॥ किमितिमांसभक्षणंविहायतृणादीनदंतितत्राह ॥ आपदास्पदंआपदांआस्पदंस्थानम् ॥ कुतोयतोलोकद्वयेदुःखदंयन्मांसस्यभक्षणंतद्धिगस्त्वित्यर्थः ॥ आपदांपदमितिक्वचित्पाठः ॥ तत्रपदंस्थानम् ॥ ५० ॥ लोकद्वयदुःखदत्वमेवप्रपंचयति ॥ यःस्वार्थमिति ॥ ५१ ॥ आकल्पंकल्पपर्यंतम् ॥ कल्पोत्रब्रह्मणोदिनम् ॥ तैरिति ॥ येषांप्राणैर्देहेंद्रियादिभिःस्वप्राणान्स्वदेहेंद्रियादीन्येपुष्णंतिपालयंतितेअमुत्रतैर्भु

हुंडौचमुंडयुद्धायनसज्जेतेजयैषिणौ ॥ एणशावंसृगालोपिमृदुस्पृशतिपाणिना॥४९॥तृण्वंतितृणगुल्मादीन्श्वापदास्त्वापदास्पदम्॥लोकद्वयेदुःखदंहिधिक्तन्मांसस्यभक्षणम् ॥ ५० ॥ यःस्वार्थंमांसपचनंकुरुतेपापमोहितः ॥ यावंत्यस्यतुरोमाणितावत्सनरकेवसेत् ॥५१॥परप्राणैस्तुयेप्राणान्स्वान्पुष्णंतिहिदुर्धियः ॥ आकल्पंनरकान्भुक्त्वातेभुज्यंतेत्रतैःपुनः ॥ ५२ ॥ जातुमांसंनभोक्तव्यंप्राणैःकंठगतैरपि ॥ भोक्तव्यंतर्हिभोक्तव्यंस्वमांसंनेतरस्यच ॥ ५३ ॥ वरमेतेश्वापदावैमैत्रावरुणिसेवया ॥ येषांनहिंसनेबुद्धिर्नतुहिंसापरानराः ॥ ५४ ॥ बकोपिपल्वलेमत्स्यान्नाश्नात्यग्रेचरानपि ॥ नमहांतोप्यमहतोमत्स्यामत्स्यानदंतिवै ॥ ५५ ॥ एकतःसर्वमांसानिमत्स्यमांसंतथैकतः ॥ स्मृतिःस्मृतेतिकिंत्वेभिरतोमत्स्याञ्जहत्यमी ॥ ५६ ॥ श्येनोपिवर्तिकांदृष्ट्वाभवत्येषपराङ्मुखः ॥ चित्रमत्रापिमधुपाभ्रमंतिमलिनाशयाः ॥ ५७ ॥ सुचिरंनरकान्भुक्त्वामदिरापानलंपटाः ॥ मधुपाएवगायंतेभ्रांतिभाजः पुनःपुनः ॥ ५८ ॥

ज्यंतइत्यर्थः ॥ तथाचमनुः ॥ समांखादयितापुत्रयस्यमांसमिहाद्म्यहम् एतन्मांसस्यमांसत्वंप्रवदंतिमनीषिणइति ॥ ५२ ॥ ५३ ॥ वरंश्रेष्ठाः ॥ ५४ ॥ बकःकह्वः ॥ पल्वलेऽल्पोदकेसरसि ॥ वेशंतःपल्वलंचाल्पसरइत्यमरः ॥ अमहतोऽणीयसः ॥ ५५ ॥ एभिर्बकादिभिः ॥ किंस्मृतेतिविमर्शः॥ तत्रस्मृतैवेतिनिश्चित्यतत्रहेतुमाह ॥ अतइति ॥ यतो मत्स्यान्जहतिअतःस्मृतःस्मृतैवेत्यर्थः॥ अथवाकिंस्मृतेतिकाकूत्तयास्मृतैवेति ॥ अतोतःकारणात्मत्स्यान् जहतित्यजंतीति ॥ ५६ ॥ श्येनःपत्री ॥ पत्रीश्येनइत्यमरः ॥ वर्त्तिकांवर्तकाख्यंपक्षिविशेषंवनचटकामितियावत् ॥ नाववांटयीतिगौडेप्रसिद्धम् ॥ वर्तकावर्तिकादयइत्यमरः ॥ चित्रमित्यर्धमुत्तरश्लोकान्वयि ॥ ५७ ॥ सुचिरमिति ॥ सुचिरंनरकान्भुक्त्वात्रापिकाश्यामपिमलिनाशयामलिनांतःकरणाःसंतोभ्रमंतिअहोएतच्चित्रमिति ॥ तंत्रहेतुमाह ॥ मदिरेति ॥ मद्यपानासक्ताअभीक्ष्णमज्ञानमाश्रयंतोमधुपाएवभवंतीत्यर्थः ॥ वमंतिमधुनासयेतिक्वचित्पाठस्तदायमर्थः ॥ नरकजन्यंदुःखमस्माकमितःपरंमास्यादि

१ स्वापदाइत्येवंरूपे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिखेदेनपीतमपि मधुनासयानासारंध्रेणवमंतित्यजन्तीति ॥ अन्यत्पूर्ववत् ॥ ५८ ॥ हेतुमेवसाधयन्ते । अतएवेति ॥ पुराणज्ञैःपुराणोविश्वेशस्तज्ज्ञैरितिवक्ष्यमाणागाथापद्यंपरिगीयतइत्यन्वयः ॥ स्फुटार्थास्पष्टार्था ॥ विश्वेश्वरस्वरूपज्ञतामेवाहुः ज्ञात्वेति ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ ५९ ॥ गाथामेवपठति ॥ क्वमांसमिति ॥ हृदिस्थितोपीतिशेषः ॥ ६० ॥ विनेति ॥ प्रसादोनाममामयंजानात्वित्येवंरूपोऽनुग्रहः ॥ शिववर्जिताःशिवतत्त्वज्ञानरहिताः ॥ ६१ ॥ तिरोंऽचंतीतितिर्यंश्वः द्वितीयास्थानेप्रथमा ॥ पश्वादीनित्यर्थः ॥ तिरश्चइतिवापाठः ॥ अबोधिज्ञातः ॥ तुरेवार्थे ॥ अयंप्रभावःक्षेत्रजएव ॥ ६२ ॥ ६३ ॥ ज्ञात्वेति ॥ एवार्थेनतुशब्देनतारयतीत्यनेनसंबंधः ॥ तारयत्येवेत्यर्थः ॥ ६४ ॥ अविमुक्तेति ॥ तिर्यंञ्चोप्येतेमुच्यंतएवेत्यर्थः ॥ ६५ ॥ पक्षिकुलंपाक्षिसमूहम् ॥ ६६ ॥ सारसःपुष्कराह्वः ॥ पुष्कराह्वस्तुसारसइत्यमरः ॥ लक्ष्मणाकंठेयोषिद्ग्रीवायाम् ॥ मन्यामहइतिदेवानामुक्तिः ॥ उत्तरत्राप्येतस्ययथासंभवंसंबंधोज्ञेयः ॥ ६७ ॥ वरटाहंसस्यभार्या ॥ हंसस्ययोषिद्वरटासारसस्यतुलक्ष्मणेत्यमरः ॥ स्वचंचुपुटकोटिभिःस्वस्यचंचुःस्वचंचुःस्वत्रोटिरित्यर्थः ॥ चंचुस्त्रोटिरुभेस्त्रियामित्यमरः ॥ तस्यपुटंयुगलंतस्यकोटिभिरग्रभागैः॥

अतएवपुराणेषुगाथेतिपरिगीयते ॥ स्फुटार्थात्रपुराणज्ञैर्ज्ञात्वातत्त्वंपिनाकिनः ॥ ५९ ॥ क्वमांसंक्वशिवेभक्तिःक्वमद्यंक्वशिवार्चनम् ॥ मद्यमांसरतानांचदूरेतिष्ठतिशंकरः ॥ ६० ॥ विनाशिवप्रसादंहिभ्रांतिःक्वापिननश्यति ॥ अतएवभ्रमंत्येतेभ्रमराःशिववर्जिताः ॥ ६१ ॥ इत्याश्रमचरान्दृष्ट्वातिर्यञ्चोपिमुनीनिव ॥ अबोधिविबुधैरित्थंप्रभावः क्षेत्रजस्त्वयम् ॥ ६२ ॥ यतोविश्वेश्वरेणैतेतिर्यञ्चोप्यत्रवासिनः ॥ निधनावसरेमोच्यास्तारकस्योपदेशतः ॥ ६३ ॥ ज्ञात्वाक्षेत्रस्यमाहात्म्यंयोवसेत्कृतनिश्चयः ॥ तंतारयतिविश्वेशोजीवंतमथवामृतम् ॥ ६४ ॥ अविमुक्तरहस्यज्ञामुच्यंतेज्ञानिनोनराः ॥ अज्ञानिनोपितिर्यञ्चोमुच्यंतेगतकिल्बिषाः ॥ ६५ ॥ इत्याश्चर्यपरादेवायावद्यांत्याश्रमंमुनेः ॥ तावत्पक्षिकुलंदृष्ट्वाभृशंमुमुदिरेपुनः ॥ ६६ ॥ सारसोलक्ष्मणाकंठेकंठमाधायनिश्चलः ॥ मन्यामहेननिद्रातिध्यायेद्विश्वेश्वरंकिल ॥ ६७ कंडूयमानावरटास्वचंचुपुटकोटिभिः ॥ हंसंकामयमानंतुवारयेत्पक्षधूननैः ॥ ६८ ॥ निरुद्ध्यमानाचक्रेणचक्रीकेंकितभाषणैः ॥ वदतीतिकिमत्रापिकामिताकामिनांवर ॥ ६९ ॥ कलकंठःकिलोत्कंठंमंजुगुंजतिकुंजगः ॥ ध्यानस्थःश्रोष्यतिमुनिःपारावत्येतिवार्यते ॥ ७० ॥ केकीकेकांपरित्यज्यमौनंतिष्ठतितद्भयात् ॥ चकोरश्चंद्रिकाभोक्तानक्वत्रत मिवास्थितः ७१

चंचुपुटस्यद्वित्वेपितदग्रावयवानांबहुत्वाद्बहुवचनम् ॥ कंडूयमानाकंडूतिंकुर्वाणाहंसंकामयमानंरतिंप्रार्थयंतंपक्षधूननैःपक्षयोश्चलनैर्वारयेदित्यर्थः ॥ ६८ ॥ निरुध्यमानेति ॥ चक्रेणचक्रवाकेन ॥ ॥ कोकश्चक्रश्चक्रवाकोरथांगाह्वयनामकइत्यमरः ॥ केंकितभाषणैश्चक्रवाकजातिशब्दैश्चक्रीचक्रवाकीअत्यर्थंनिरुध्यमानाव्रियमाणासतीहेकामिनांवरश्रेष्ठेतिसोपहासोक्तिः ॥ अत्रापिआनंदकाननेतत्राप्यंतगृंहेतत्राप्यगस्त्यस्याश्रमइत्यपिशब्दार्थः ॥ कामिताकामभावइतिवक्तीत्यर्थः ॥ ६९ ॥ कलकंठइति ॥ कलोमधुरध्वनिःकंठोयस्यासौकलकंठःकलरवः पारावतइतियावत् ॥ उत्कंठंऊर्ध्वग्रीवंमंजुमनोहरंयथाभवतितथाकुंजगोलतादिपिहितोदरस्थःसन्गुंजतिअव्यक्तंशब्दंकरोतिसपारावतपत्न्यावार्यते ॥ गुंजन्निकुंजगइतिक्वचित्पाठः ॥ किलेत्युत्प्रेक्षायाम् ॥ वार्यतइव ॥ इतिनिश्चितेप्रसिद्धेवा ॥ कैःपक्षधूननैरित्यनुषंजनीयम् ॥ किमितिवार्यतेतत्राह ॥ ध्यानस्थोमुनिरगस्त्यः श्रोष्यतीतिहेतोरित्यर्थः ॥ ७० ॥ केकीमयूरः ॥ मयूरोबर्हिणोबर्ही

१ तेत्वकलमयाइत्यपिपाठः ।

CC-0. In Public Domain. Digitization by eGangotri

नीलकंठोभुजंगभुक् शिखावलःशिखीकेकीमेघनादानुलास्यपीत्यमरः ॥ केकांमयूरध्वनिम् ॥ तद्भयादगस्त्यभयात् ॥ चकोरःपक्षिविशेषः ॥ तेषांविशेषाहारीतोमद्गुःकारंडवःप्लवः तित्तिरिः कुक्कुभोलावोजीवंजीवश्चकोरकइत्यमरः ॥ चन्द्रिकाकौमुदी ॥ चन्द्रिकाकौमुदीज्योत्स्नेत्यमरः ॥ नक्तव्रतंरात्रिभोजनम् ॥ ७१ ॥ पठंतीति ॥ सारिकापक्षिविशेषः शालिकइतिप्रसिद्धः ॥ सारंपरमार्थंपठंतीशुकंकीरम् ॥ कीरशुकौसमावित्यमरः ॥ संबोधयति ॥ किंतत्सारंकथंवासंबोधयतितत्राह ॥ अहोइति ॥ अहोहेशुकअपारावारसंसारसिंधुपारप्रदःशिवइति ॥ पारंपरतीरं अवारमर्वाचीनंतीरम् ॥ पारावारेपरार्वाचीतीरेइतिवचनात् ॥ नविद्येतेपारावारेयस्यासावपारावारःसचासौसंसारएवासिन्धुःसमुद्रः ॥ देशेनदविशेषेब्धौसिंधुर्नासरितिस्त्रियामित्यमरः ॥ तस्य पारंसमाप्तिंप्रददातीतिसतथा ॥ यद्वा अपारावारःसंसारसमुद्रोयेषांतान्जीवान्पारयति मुक्तिप्रदानात्समाप्तकर्मणःकरोतीति ॥ यद्वा पारतीरसमाप्ताविति चौरादिकात्पारधातोःअपारावारसंसारपारः परमात्मातंप्रददातीतितथा ॥ आत्मप्रदःशिवइतिसारंभोशुकइतिसंबोधयतीत्यर्थः ॥ अपारपारेतिक्वचित्पाठः ॥ तत्रअनंतपारइत्यर्थः ॥ ७२ ॥ कोकिलइति ॥ कोकिलोवनप्रियः ॥ वनप्रियःपरभृतःकोकिलःपिकइत्यपीत्यमरः ॥ काकलींसूक्ष्मध्वनिंमधुरध्वनिंवा ॥ काकलीतुकलेसूक्ष्मेध्वनौतुमधुरास्फुटइत्यमरः ॥ कलयन्नुच्चारयन् ॥ कलिकालौकलिश्चकालश्चतौकाशी

पठंतीसारिकासारंशुकंसंबोधयत्यहो ॥ अपारावारसंसारसिंधुपारप्रदःशिवः ॥ ७२ ॥ कोकिलःकोमलालापैःकलयन्किलकाकलीम् ॥ कलिकालौकलयतःकाशीस्थान्नेतिभाषते ॥ ७३ ॥ मृगाणांपक्षिणामित्थंदृष्ट्वाचेष्टांत्रिविष्टपम् ॥ अकांडपातसंकष्टंनिनिंदुस्त्रिदशाबहु ॥ ॥ ७४ ॥ वरमेतेपक्षिमृगाःपशवःकाशिवासिनः ॥ येषांनपुनरावृत्तिर्नदेवानपुनर्भवाः ॥ ७५ ॥ काशीस्थैःपतितैस्तुल्यानवयंस्वर्गिणःक्वचित् ॥ काश्यांपाताद्भयंनास्तिस्वर्गेपाताद्भयंमहत् ॥ ७६ ॥ वरंकाशीपुरीवासोमासोपवसनादिभिः ॥ विचित्रच्छत्रसंछायंराज्यंनान्यत्रनीरिपु ॥ ७७ ॥ शशकैर्मशकैःकाश्यांयत्पदंहेलयाप्यते ॥ तत्पदंनाप्यतेऽन्यत्रयोगयुक्त्यापियोगिभिः ॥ ७८ ॥ वरंवाराणसीरंकोनिःशंकोयोयमादपि ॥ नवयं त्रिदशायेषांगिरितोपीदृशीदशा ॥ ७९ ॥ ब्रह्मणोदिवसाष्टांशेपदमैंद्रंविनश्यति ॥ सलोकपालंसार्कंचसचंद्रग्रहतारकम् ॥ ८० ॥

स्थान्नकलयतः नमारयतइतिवदतीत्यर्थः ॥ ७३ ॥ मृगाणामिति ॥ अकांडपातसंकष्टंअकांडेऽअवसरेहिरण्यकशिपुप्रमुखैःपाताद्भ्रंशात्सम्यक्कष्टंदुःखंयस्मिन्तत्तथा ॥ बहुयथाभवतितथा ॥ ७४ ॥ वरमिति ॥ वरंश्रेष्ठाइत्यर्थः ॥ ननुभवंतोप्यमरत्वात्पुनरावृत्त्यभावेनश्रेष्ठाएवेतिस्वयमाशंक्यस्वयमेवनिराकुर्वंति ॥ नदेवानपुनर्भवाइति ॥ देवावयंपुनर्भवाःपुनर्भवोजन्मयेषांपुन र्भवंतीतिवापुनर्भवानइतिनअपितुपुनर्भवाएव ॥ द्वौनञौप्रकृतार्थंगमयतइतिन्यायात् ॥ अमरत्वादिश्रवणंत्वापेक्षिकमतोवयंतुच्छाएवेत्यर्थः ॥ यद्वा देवावयंनइतिप्रथमनकारेणसंबंधमारचय्य पश्चाद्धेत्वन्वेषणायांननपुनर्भवाइतिसम्बन्धनीयम् ॥ नदेवायेपुनर्भवाइतिपाठस्त्वतिरोहितार्थःसपुनर्भवाइतिच ॥ ७५ ॥ ७६ ॥ नीरिपुनिर्गतारिपवोयस्मात्प्रस्मिन्निविवातद्राज्यंतथा ॥ ७७ ॥ योगयुक्त्यापि योगोऽष्टांगादिः ॥ युक्तिर्युंजनमनुष्ठानमितियावत् ॥ योगस्ययुक्तिस्तयापीत्यर्थः ॥ ७८ ॥ गिरितोविंध्यात् ॥ ईदृशीदशानाशदशा ॥ यज्ञादेरभावेनाप्यायना भावादित्यभिप्रायः ॥ ७९ ॥ ब्रह्मणइति ॥ ब्रह्मणोहिरण्यगर्भस्यदिवसस्यादिनस्याष्टांऽशेष्टभागेघटिकाचतुष्टयेस्थितेसायंकालइतियावत् ॥ ऐंद्रंपदंत्रैलोक्यम् ॥ सलोकपालंलोकाश्चतत्पालाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तःसहवर्तमानम् ॥ ८० ॥ परार्धद्वयेति ॥ पराधब्रह्मणः स्वमानेनपंचाशद्वर्षपरार्धद्वयंशतवर्षतस्य नाशोपिप्राकृतप्रलयेपि ॥ अपिःसमुच्चयार्थः ॥ यःकाशीस्थःसनविनश्यति यावज्जीवंकस्याप्युपद्रवस्याभावात् ॥ यथा वसरेशरीरपातेचसांद्रानंदाववोधब्रह्मत्वेनोपस्थानात् ॥ अतएवविंध्योन्नतेः सर्वस्मिन्जगतिभयद्रुतेपिकाशीस्थानांभयद्रवणाद्यभावाद्देवागमनंतीर्थे वासार्थिसंतर्पणंपंचरात्रमुषित्वेत्यादिकंचसर्वंसंगच्छतेइतिपूर्वमेवसकारणमुक्तम् ॥ यत्त्विदानीमन्यथादृश्यतेतत्प्राणिनांपापोपचयाद्विश्वेशप्रातिकूल्याच्च ॥ तथाचात्रैवोक्तम् ॥ कलौविघ्नाभविष्यंतिकाश्यांनिवसतांकिल ॥ येपापशीलाश्वशठाश्वमूर्खाः कुर्वंतिपापान्यविशंकमार्ये ॥ तेषामनंतंभवतीहदुःखमाचंद्रतारंनहिसंशयोत्र ॥ लब्धोपिसिद्धिंनोयायाद्यदिक्रुद्धश्चेत्रिलोचनइत्यादि ॥ ८१ ॥ विपक्षेवाधकमाह ॥ अस्तिचेदिति ॥ काशीवासाभिलाषुकाःकाशीवासाभीप्सवः ॥ ८२ ॥ तत्पुण्येति ॥ तच्चतत्पुण्यंचेतितत्पुण्यंतस्यपरिवर्तेनव्यत्ययेनविनिमयेनेत्यर्थः ॥ ८३ ॥ शरणंरक्षितारम् तंत्यक्त्वाक्वापिनगच्छेदितिभावः ॥ ८४ ॥ अखंडंसमग्रंपूर्णमितियावत् ॥ ८५ ॥ ८६ ॥ ८७ ॥ स्वर्धुनीदर्शनादित्यारभ्यपश्चम्यंतानांपदानांतृतीयांतानांचधर्मःस्यादुत्तरोत्तरइत्याग्रि

पराधर्द्वयनाशेपिकाशीस्थोयोननश्यति ॥ तस्मात्सर्वप्रयत्नेनकाश्यांश्रेयःसमाचरेत् ॥ ८१ ॥ यत्सुखंकाशिवासेत्रनतद्ब्रह्मांडमंडपे ॥ अस्तिचेत्तत्कथं सर्वकाशीवासाभिलाषुकाः ॥ ८२ ॥ जन्मांतरसहस्रेषुयत्पुण्यंसमुपार्जितम् ॥ तत्पुण्यपरिवर्तेनकाश्यांवासोऽत्रलभ्यते ॥ ८३ ॥ लब्धोपिसिद्धिंनोयायाद्यदिक्रुद्धश्चेत्रिलोचनः ॥ तस्माद्विश्वेश्वरंनित्यंशरण्यंशरणंव्रजेत् ॥ ८४ ॥ धर्मार्थकाममोक्षाख्यंपुरुषार्थचतुष्टयम् ॥ अखंडंहियथाकाश्यांनतथान्यत्रकुत्रचित् ॥ ८५ ॥ आलस्येनापियोयायाद्गृहाद्विश्वेश्वरालयम् ॥ अश्वमेधाधिकोधर्मस्तस्यस्याच्चपदेपदे ॥ ८६ ॥ यःस्नात्वोत्तरवाहिन्यांयातिविश्वेशदर्शने ॥ श्रद्धयापरयातस्यश्रेयसोंतोनाविद्यते ॥ ८७ ॥ स्वर्धुनीदर्शनात्स्पर्शात्स्नानादाचमनादपि ॥ संध्योपासनतोजप्यात्तर्पणाद्देवपूजनात् ॥८८॥ पंचतीर्थावलोकाच्चततोविश्वेश्वरेक्षणात् ॥ श्रद्धास्पर्शनपूजाभ्यांधूपदीपादिदानतः ॥ ८९ ॥ प्रदक्षिणैः स्तोत्रजपैर्नमस्कारैस्तुनर्त्तनैः ॥ देवदेवमहादेवशंभोशिवशिवेतिच ॥ ९० ॥ धूर्जटेनीलकंठेशपिनाकिञ्शशिशेखर ॥ त्रिशूलपाणेविश्वेशरक्षरक्षेतिभाषणैः ॥ ९१ ॥ मुक्तिमंडपिकायांचनिमेषार्धोपवेशनात् ॥ तत्रधर्मकथालापात्पुराणश्रवणादपि ॥ ९२ ॥ नित्यादिकर्मकरणात्तथातिथिसमर्चनैः ॥ परोपकरणाद्यैश्चधर्मस्स्यादुत्तरोत्तरः ॥ ९३ ॥ शुक्लपक्षेयथाचंद्रःकलयाकलयैधते ॥ एवंकाश्यांनिवसतांधर्मराशिःपदेपदे ॥ ९४ ॥

मेणसंबन्धः ॥ ८८ ॥ पंचतीर्थावलोकनात्कपालमोचनपापमोचनऋणमोचनकुलस्तंभवैतरण्यवलोकनात् ॥ यद्वा वरुणासंभेदासिसंभेदपंचनददशाश्वमेधमणिकर्णिकावलोकनात् यद्वा आदित्यद्रौपदीविष्णुदण्डपाणिमहेश्वरढुंढिविनायकज्ञानवापीनंदिकेशतारकेशमहाकालेशपुनर्दंडपाण्यवलोकनात् ॥ तथाचात्रैववादिष्यति ॥ आदित्यंद्रौपदींविष्णुंदंडपाणिंमहेश्वरम् ॥ नमस्कृत्यततोगच्छेद्द्रष्टुंढुंढिविनायकम् ॥ ज्ञानवापीमुपस्पृश्यनंदिकेशंततोर्चयेत् ॥ तारकेशन्ततोभ्यर्च्यमहाकालेश्वरंततः ॥ पश्येत्पुनर्दंडपाणिमित्येषापंचतीर्थिका ॥ चकारादन्येषामपि ॥ उत्तरोत्तरमित्येषापंचतीर्थिकेतिपारिभाषिकपंचतीर्थविधानात् ॥ यद्वा आदित्यादिमहेश्वरांतमेकम् ढुंढिविनायकमेकम् ज्ञानवाप्येकम् नन्दिकेशादित्रयमेकम् पुनर्दंडपाणिरेकम् एवंवापंचतीर्थिका ॥ चकारादन्येषामपि ॥८९॥९०॥९१॥९२॥ उत्तरोत्तरउपर्युपरिश्रेष्ठोवा ॥ उपर्युदीच्यश्रेष्ठेष्वप्युत्तरःस्यादित्यमरः ॥ प्रतिदिनंवर्धमानइत्यर्थः ॥९३॥ धर्मवृद्धिंसदृष्टांतमाह ॥ शुक्लपक्षइति ॥ पदेपदे

CC-0. In Public Domain. Digitization by eGangotri

क्षणेक्षणे ॥९४॥ वृक्षरूपेणधर्मस्तौति ॥ श्रद्धेति ॥ अयंश्रुतिस्मृतिभ्यांप्रतिपादितोधर्मवृक्षईडचस्तुत्यस्सेव्यइतियावदित्यन्वयः ॥ कथंभूतः ॥ श्रद्धाऽऽस्तिक्यबुद्धिर्बीजंयस्यसः ॥ पुनःकथंभूतः ॥ ब्राह्मणचरणजलैःसिक्तोमीढःक्षरितइतियावत् ॥ पुनःकथंभूतः॥यस्यधर्मवृक्षस्यताःप्रसिद्धाश्चतस्रोदशचतुर्दशसंख्याकाःशिक्षाकल्पज्योतिश्छंदोनिरुक्तव्याकरणऋग्यजुःसामाथर्वमीमांसान्यायपुराण धर्मशास्त्रलक्षणाअपिशब्दादायुर्वेदधनुर्वेदगांधर्ववेदार्थशास्त्रलक्षणाश्चशाखाःस्कंधायस्यसः ॥ तदुक्तंवैष्णवे ॥ अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः ॥ पुराणंधर्मशास्त्रंचविद्याह्येताश्चतुर्दश ॥ आयुर्वेदोधनुर्वेदोगांधर्वश्चैवतेत्रयः ॥ अर्थशास्त्रंचतुर्थंतुविद्याह्यष्टादशैवतिति ॥ पुनःकीदृशः ॥ यस्यधर्मवृक्षस्यार्थान्यायोपार्जितधनानिपुष्पाणिकुसुमानिसः ॥ पुनःकथंभूतः ॥ यस्यधर्मवृक्षस्यस्थूलसूक्ष्मेद्वेफलेसः ॥ केतेतत्राह ॥ मोक्षःकामइति ॥ सूक्ष्मंफलंमोक्षः स्थूलंफलंकामइत्यर्थः ॥ ९५ ॥ ढुंढिर्विघ्नाधिराजः ॥ मंत्रशब्दःप्रणवविषयःषडक्षररामसन्त्रविषयोवा ॥ ९६ ॥ काश्यांधर्मइति ॥ सचासौचतुष्पादरूपश्चेतितथासंपूर्णइत्यर्थः ॥ तेचपादाः सत्यंतपोदयादानमिति ॥ श्रेयःकैवल्यम् ॥ ९७ ॥ नैतच्चित्रमित्याह ॥ विश्वेश्वरइति ॥ धर्मश्चार्थश्चकामश्चामृतंकैवल्यंचतानितथातद्रूपेषुतेष्वभिमतंभाति प्रियत्वेनरूपंस्वरूपंयस्यसः ॥ तदुक्तम् ॥ अस्तिभातिप्रियंरूपंनामचेत्यर्थपंचकम् ॥ आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयमिति ॥ यद्वा धर्मार्थ

श्रद्धाबीजोविप्रपादांबुसिक्तःशाखाविद्यास्ताश्चतस्रोदशापि ॥ पुष्पाण्यर्थाद्वेफलेस्थूलसूक्ष्मेमोक्षःकामोधर्मवृक्षोयमीडचः ॥ ९५ ॥ सर्वार्थानामत्रदात्री भवानीसर्वान्कामान्पूरयेदत्रढुंढिः ॥ सर्वाञ्जंतून्मोचयेदंतकालेविश्वेशोत्रश्रोत्रमंत्रोपदेशात् ॥ ९६ ॥ काश्यांधर्मस्तच्चतुष्पादरूपःकाश्यामर्थःसोप्यनेकप्रकारः ॥ काश्यांकामःसर्वसौख्यैकभूमिःकाश्यांश्रेयस्तत्तुकिंनात्रयच्च ॥ ९७ ॥ विश्वेश्वरोयत्रनतत्रचित्रंधर्मार्थकामामृतरूपरूपः ॥ स्वरूपरूपःसहिविश्वरूपस्तस्मान्नकाशीसदृशीत्रिलोकी ॥ ९८ ॥ इतिब्रुवाणागीर्वाणाददृशुस्तूटजंमुनेः ॥ होमधूमसुगंधाढचंबटुभिर्बहुभिर्वृतम् ॥ ९९ ॥ श्यामाकांजलियाच्ञार्थमृषिकन्यानुयायिभिः ॥ धृतोपग्रहदर्भास्यैर्मृगशावैरलंकृतम् ॥ १०० ॥ सार्द्रवल्कलकौपीनैर्वृक्षशाखावलंबिभिः ॥ बद्धं विघ्नमृगान्दिक्षुवागुराभिरिवावृतम् ॥ १ ॥

कामामृतानांभक्तेभ्योरूपायरूपणायदानायरूपंशरीरंलीलाविग्रहो यस्यसः ॥ तर्हिशरीरसंबंधात्प्राप्तासंसारितातत्राह ॥ स्वरूपरूपः स्वरूपमखंडसच्चिदानंदलक्षणंरूपंस्वरूपंयस्यसः ॥ ननु तस्यप्रपंचेनसहभेदप्रतीतेःकथमखंडसच्चिदानंदात्मकत्वंतत्राह ॥ सहिविश्वरूपइति ॥ हियस्मात्तुविश्वंरूपंयस्यसविश्वंरूप्यतेप्रतीयतेयस्मिन्रज्ज्वामिवसर्पइतिवासः ॥ जडाजडप्रपंचस्यतत्राध्यस्तत्वान्नतेनभेदावहत्वमध्यस्तेनसर्पेणेवरज्ज्वाः ॥ तथाचश्रुतिः ॥ इदंसर्वंयदयमात्माआत्मैवेदंसर्वंब्रह्मैवेदंसर्वमित्यादिः ॥ अरूपरूपइतिपाठेवस्तुतोऽरूपरूपोमाययाविश्वरूपः ॥ त्रिलोकरूपः सहिविश्वरूपइतिक्वचित्पाठः ॥ प्रकृतमुपसंहरति ॥ तस्मान्नकाशीति ॥९८॥ ददृशुस्त्विति ॥ तुशब्दःसंभ्रमावद्योतकः॥नकेवलंमुनेरुटजंददृशुःपर्णशालांगणंपर्णशालापर्णकुटीतस्याअंगणंप्रांगणंवीक्ष्यसन्नेमुश्चेत्यग्रिमेणान्वयः ॥ भक्तिश्रद्धातिशयावद्योतकःसम्शब्दः ॥ उटजंविशिनष्टि ॥ अक्षरत्रितयाधिकैर्होमधूमैतित्रिभिः ॥ ९९ ॥ कथंभूतैर्बटुभिर्मृगशावैर्वा ॥ ऋषिकन्यानुयायिभिःऋषिकन्याअनुयातुंअनुगंतुंशीलंयेषांतेतथातैः ॥ ऋषिकन्यानुयानंकिमर्थमितिपृच्छायामाह ॥ श्यामाकांजलियाञ्चार्थंश्यामाकाख्यान्नप्रस्थयाञ्चार्थमित्यर्थः ॥ कथंभूतैर्मृगशावैः ॥ धृतोपग्रहदर्भास्यैर्धृताउपग्रहरूपादर्भाःकुशाः ॥ अस्त्रीकुशंकुथोदर्भःपवित्रमित्यमरः ॥ आस्येयेषांतथातैः ॥ १०० ॥ सार्द्रवल्कलान्येवकौपीनानितैरावृतमित्यन्वयः ॥ कथंभूतैर्वृक्षशाखावलंबिभिःतरु ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कंधाश्रयिभिः ॥ कैरिवविन्नाएवमृगाविघ्नमृगास्तान्बद्‌धुंधर्तुंवागुराभिर्मृगवंधनीभिरिवेत्युत्प्रेक्षा ॥ १ ॥ पतिव्रतानांशिरोरत्नंशिरोधार्यायालोपामुद्रातस्याअंघ्रीएवमुद्रामुद्रिकातयामुद्रितंचिह्नितम् ॥ ॥ २ ॥ धृताकर्णेअक्षमालिकाजपमालिकायेनसतथातम् ॥ अधिष्ठितमाश्रितंवृस्याः ॥ यतीनामासनंवृसीत्यमरः ॥ पृष्ठमुपरिभागोयेनसतथातम् ॥ परमेष्ठिवदुत्कटंहिरण्यगर्भवच्छ्रेष्ठम् ॥ ३ ॥ एवंभूतमगस्त्यंपुरोऽग्रतःसमालोक्यप्रोच्चैर्यथास्यात्तथा ॥ जयजयेतिचेतिचकारोनुक्तसमुच्चये ॥ प्रथमतःप्रणम्यपश्चाज्जयजयेतिप्रोचुरित्यर्थः ॥ अथवापूर्वोक्तविशेषणविशिष्टंपर्णशालांगणं वीक्ष्यागस्त्यंसन्नेमुर्जजययेतिचप्रोचुरित्येववायोजना ॥ जयसर्वोत्कर्षमाविष्कुरु ॥ वीप्सादरार्था ॥ ४ ॥ अभिनंद्यवर्धयित्वाहर्षयित्वेतियावत् ॥ ५ ॥ श्रोत्रादीनांफलमाह ॥ इदमित्यादिना ॥ ६ ॥ १०७ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखंडटीकायांतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ पतिव्रताशिरोरत्नलोपामुद्रानुवर्णनम् ॥ चतुर्थेवर्ण्यतेशेषपापरा

पतिव्रताशिरोरत्नलोपामुद्रांघ्रिमुद्रया ॥ मुद्रितंवीक्ष्यसन्नेमुःपर्णशालांऽगणंसुराः ॥ २ ॥ विसर्जितसमाधिंचधृतकर्णाक्षमालिकम् ॥ अधिष्ठितंवृसीपृष्ठं परमेष्ठिवदुत्कटम् ॥ ३ ॥ पुरोगस्त्यंसमालोक्यसर्वेदेवाःसवासवाः ॥ प्रहृष्टवदनाःप्रोचुःप्रोच्चैर्जयजयेतिच ॥ ४ ॥ मुनिरुत्थायतान्सर्वानुपावेश्ययथोचितम् ॥ आशीर्भिरभिनंद्याथपप्रच्छागमकारणम् ॥ ५ ॥ व्यासउवाच ॥ इदंपुण्यतमाख्यानंश्रुत्वाभक्तिसमन्वितः ॥ पठित्वापाठयित्वाचव्रतश्रद्धावतांपुरः ॥ ६ ॥ विधूयसर्वपापानिज्ञात्वाऽज्ञात्वाकृतान्यपि ॥ हंसवर्णेनयानेनगच्छेच्छिवपुरंध्रुवम् ॥ १०७ ॥ इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडे पूर्वार्द्धे अगस्त्याश्रमवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ❀ ॥ ॥ सूतउवाच ॥ ॥ मुनिपृष्टास्तदादेवाभगवंस्तेकिमब्रुवन् ॥ सर्वलोकहितार्थायतदाख्याहिमहामुने ॥ १ ॥ ॥ श्रीव्यासउवाच ॥ ॥ अगस्तिवचनंश्रुत्वाबहुमानपुरस्सरम् ॥ धिषणाधिपतेरास्यंविबुधाव्यालुलोकिरे ॥ २ ॥ वाक्पतिरुवाच ॥ शृण्वगस्तेमहाभागदेवागमनकारणम् ॥ धन्योसिकृतकृत्योसिमान्योसिमहतामपि ॥ ३ ॥ प्रत्याश्रमंप्रतिनगंप्रत्यरण्यंतपोधनाः ॥ किंनसंतिमुनिश्रेष्ठकाचिदन्यैवतेस्थितिः ॥ ४ ॥ तपोलक्ष्मीस्त्वयीहास्तिब्राह्मंतेजस्त्वयिस्थिरम् ॥ पुण्यलक्ष्मीस्त्वयिपरात्वय्यौदार्यमनस्त्वयि ॥ ५ ॥

शिप्रणाशनम् ॥ १ ॥ मुनिरुत्थायतान्सर्वानुपवेश्ययथोचितम् ॥ आशीर्भिरभिनंद्याथपप्रच्छागमकारणमित्युक्तंतत्रपृच्छाति ॥ मुनिपृष्टाइति ॥ १ ॥ अगस्तीति ॥ अगस्तिरगस्त्यइत्यनर्थान्तरम् ॥ धिषणाधिपतेर्बृहस्पतेः ॥ व्यालुलोकिरेऽपश्यन् ॥ देवानांवहूनांमध्येएकेनवक्तव्येयोमान्योमान्येष्वपिवहुपुयोगुरुर्गुरुष्वपियःसर्वशास्त्रार्थदर्शीतेष्वपियोवक्तातेनवक्तव्यम् ॥ अतएवंभूतत्वाद्बृहस्पतेस्तदास्यंदेवाव्यालुलोकिरेइत्यर्थः ॥ लोकृलोचृदर्शनइतिधातुः ॥ २ ॥ देवागमनकारणानुवादपूर्वकमगस्तिंस्तौति ॥ शृण्विति त्रिभिः ॥ ३ ॥ प्रत्याश्रममिति ॥ आश्रममाश्रमंप्रतिप्रत्याश्रमम् ॥ एवमुत्तरत्रापि ॥ नगंपर्वतम् ॥ शैलवृक्षौनगावित्यमरः ॥ स्थितिर्मर्यादा ॥ ४ ॥ तपइति ॥ ब्राह्मंतेजोवेदवर्चसम् ॥ उदारस्यभावऔदार्यंदातृत्वं महत्त्वंच ॥ उदारे

CC-0. In Public Domain. Digitization by eGangotri

दातृमहतोरितिवचनादित्यर्थः ॥ मनआत्मविषयमननाद्यन्मनस्तादित्यर्थः ॥ ५ ॥ लोपामुद्रांस्तौति ॥ पतिव्रतेयमित्यारभ्यइदमेवव्रतमित्यतःप्राक्तनग्रंथेन ॥ सधर्मिणीपत्नी ॥ पत्नी पाणिगृहीतीचद्वितीयासहधर्मिणीत्यमरः ॥ ६ ॥ अरुंधत्यादिभिःसहकर्त्रींभिर्वायथैषालोपामुद्राश्रेष्ठावर्ण्यतेतथान्याकापिनेतिनिश्चितमित्यन्वयः ॥ अरुंधतीवसिष्ठस्यपत्नीः सावित्रीब्रह्मणः अन सूयात्रेः शांडिलीकौशिकब्राह्मणपत्नीपतिव्रताशिरोमणिः अग्निमाताच सतीश्वरपत्नी दक्षदुहितालक्ष्मीर्विष्णोःशतरूपास्वायंभुवस्यमनोः ॥ ७ ॥ मेनाहिमवतः सुनीतिर्ध्रुवजननीउत्तानपादस्य भार्या संज्ञाविवस्वतः स्वाहाअग्नेरिति ॥ ८ ॥ तादृक्पतिव्रतात्वमेवाह ॥ भुंक्तइत्यादिना ॥ प्रथमंप्रतिबुध्यते तवप्रबोधादितिशेषः ॥ ९ ॥ क्वापिकस्मिंश्चिद्देशांतरेकालेवाप्रोषितेदेशांत

पतिव्रतेयंकल्याणीलोपामुद्रासधर्मिणी ॥ तवांगच्छाययातुल्यायत्कथापुण्यकारिणी ॥ ६ ॥ पतिव्रतास्वरुंधत्यासावित्र्याप्यनसूयया ॥ शांडिल्यया चसत्या चलक्ष्म्याचशतरूपया ॥ ७ ॥ मेनयाचसुनीत्याचसंज्ञयास्वाहयातथा ॥ यथैषावर्ण्यतेश्रेष्ठानतथान्येतिनिश्चितम् ॥ ८ ॥ भुंक्तेभुक्तेत्व यिमुनेतिष्ठतित्वयितिष्ठति॥विनिद्रितेचनिद्रातिप्रथमंप्रतिबुध्यते ॥ ९ ॥ अनलंकृतमात्मानंतवनोदर्शयेत्क्वचित् ॥ कार्यार्थंप्रोषितेक्वापिसर्वमंडनवर्जिता ॥१०॥ नचतेनामगृह्णीयात्तवायुष्यविवृद्धये ॥ पुरुषांतरनामापिनगृह्णातिकदाचन ॥ ११ ॥ आक्रुष्टापिनचाक्रोशेत्ताडितापिप्रसीदति ॥ इदंकुरुकृतं स्वामिन्मन्यतामितिवक्तिच ॥ १२ ॥ आहूतागृहकार्याणित्यक्त्वागच्छतिसत्वरम् ॥ किमर्थंव्याहृतानाथसप्रसादोविधीयताम् ॥ १३ ॥ नचिरंतिष्ठ तिद्वारिनद्वारमुपसेवते ॥ अदापितंत्वयाकिंचित्कस्मैचिन्नददात्यपि ॥ १४ ॥ पूजोपकरणंसर्वमनुक्तासाधयेत्स्वयम् ॥ नियमोदकबर्हींषिपत्रपुष्पाक्षता दिकम् ॥ १५ ॥ प्रतीक्षमाणावसरंयथाकालोचितंहियत् ॥ तदुपस्थापयेत्सर्वमनुद्विग्नातिहृष्टवत् ॥ १६ ॥ सेवतेभर्तुरुच्छिष्टमिष्टमन्नंफलादिकम् ॥ महाप्रसादइत्युक्त्वापीरदत्तंप्रतीच्छति ॥ १७ ॥ अविभज्यनचाश्नीयाद्देवपित्रातिथिष्वपि ॥ परिचारकवर्गेषुगोषुभिक्षुकुलेषुच ॥ १८ ॥ संयतो पस्करादक्षाहृष्टाव्ययपराङ्मुखी ॥ कुर्यात्त्वयाननुज्ञातानोपवासव्रतादिकम् ॥ १९ ॥ दूरतोवर्जयेदेषासमाजोत्सवदर्शनम् ॥ नगच्छेत्तीर्थयात्रादिवि वाहप्रेक्षणादिषु ॥२०॥ सुखसुप्तंसुखासीनंरममाणंयदृच्छया ॥ आंतरेष्वपिकार्येषुपतिंनोत्थापयेत्क्वचित् ॥ २१ ॥ स्त्रीधर्मिणीत्रिरात्रंतुस्वमुखंनैवदर्श येत् ॥ स्ववाक्यंश्रावयेन्नापियावत्स्नातानशुद्धितः ॥२२॥सुस्नाताभर्तृवदनमीक्षतेन्यस्यनक्वचित् ॥ अथवामनसिध्यात्वापतिंभानुंविलोकयेत् ॥२३॥

रंगतेत्वयिसकलभूषणरहिताभवति ॥ तदुक्तंयाज्ञवल्क्येन ॥ क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनम् ॥ हास्यंपरगृहेयानंत्यजेत्प्रोषितभर्तृकेति ॥ १० ॥ ११ ॥ १२ ॥ आगत्यचाकिमर्थंव्याहृ तेत्यादिवक्तिचेतिपूर्वक्रियायाअनुषंगः ॥ १३ ॥ नद्वारमुपसेवतेशयनादिनेतिशेषः ॥ १४ ॥ १५ ॥ १६ ॥ प्रतीच्छतिगृह्णाति ॥ १७ ॥ १८ ॥ संयतोपस्करासुनिर्णिक्तालंकारा ॥ १९ ॥ समाजोत्सवदर्शनंसमाजश्चउत्सवश्चतयोर्दर्शनम् ॥ दर्शनाभावमुक्त्वागमनाभावमावेदयति ॥ नगच्छेदिति ॥ २० ॥ आंतरेषुअंतरंगेषुरहस्येष्वितियावत ॥ २१ ॥ २२ ॥ अथवेति ॥ भर्तरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वापिगतइतिशेषः ॥ २३ ॥ कूर्पासकंचोलंकंचुकीतिप्रसिद्धम् ॥ २४ ॥ नदूरयेन्नत्यजेत् ॥ २५ ॥ रजक्यावस्त्रनिर्णेजकपत्न्याउदक्यययावा ॥ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी ॥ तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुद्ध्यतीतिवचनात् ॥ यावद्रजोनुवर्त्ततेतावत्तयासखित्वंनाचरेदित्यर्थः ॥ हैतुक्यासत्कर्मसुहेतुभिःसन्देहमापादयंत्या ॥ तदुक्तम् ॥ सन्देहकृद्धेतुभिर्यःसत्कर्मसुसहैतुक इति ॥ श्रमणयापाषंडमार्गकृताभ्यासयाकापालिक्येत्यर्थः ॥ यद्वा श्रमणयापरिव्राजिकयाबौद्धपत्न्येत्यर्थः ॥ दुर्भगयाभाग्यहीनयाप्राकृतयेत्यर्थः ॥ २६ ॥ २७ ॥ वर्धन्यांसंमार्जन्याम् ॥

हरिद्रांकुंकुमंचैवासिंदूरंकज्जलंतथा ॥ कूर्पासकंचतांबूलंमांगल्याभरणंशुभम् ॥२४॥ केशसंस्कारकबरीकरकर्णादिभूषणम् ॥ भर्त्तुरायुष्यमिच्छंतीदूरयेन्नपतिव्रता॥ २५ ॥ न रजक्यानहैतुक्यातथाश्रमणयानच ॥ नचदुर्भगयाक्वापिसखित्वंकुरुतेसती ॥ २६ ॥ भर्तृविद्वेषिणींनारींनैषासंभाषतेक्वचित् ॥ नैकाकिनीक्वचिद्भूयान्ननग्नास्नातिचक्वचित् ॥ २७ ॥ नोलूखलेनमुसलेनवर्द्धन्यांदृषद्यपि ॥ नयंत्रकेनदेहल्यांसतीचोपविशेत्क्वचित् ॥२८॥ विनाव्यवायसमयंप्रागल्भ्यंनक्वचिच्चरेत् ॥ यत्रयत्ररुचिर्भर्त्तुस्तत्रप्रेमवतीसदा ॥ २९ ॥ इदमेवव्रतंस्त्रीणामयमेवपरोवृषः ॥ इयमेकादेवपूजाभर्त्तुर्वाक्यंनलंघयेत् ॥ ३० ॥ क्लीबंवादुरवस्थंवाव्याधितंवृद्धमेववा ॥ सुस्थितंदुःस्थितंवापिपतिमेकंनलंघयेत् ॥ ३१ ॥ हृष्टाहृष्टेविषण्णास्याविषण्णास्येप्रियेसदा ॥ एकरूपाभवेत्पुण्यासंपत्सुचविपत्सुच ॥ ३२ ॥ सर्पिर्लवणतैलादिक्षयेपिचपतिव्रता ॥ पतिंनास्तीतिनब्रूयादायासेषुनयोजयेत्॥३३॥ तीर्थस्नानार्थिनीनारीपतिपादोदकंपिबेत् ॥ शंकरादपिविष्णोर्वापतिरेकोधिकःस्त्रियाः ॥ ३४ ॥ व्रतोपवासनियमंपतिमुल्लंघ्ययाचरेत् ॥ आयुष्यंहरतेभर्त्तुर्मृतानिरयमृच्छति ॥ ३५ ॥ उक्ताप्रत्युत्तरंदद्याद्यानारीक्रोधतत्परा ॥ सरमाजायतेग्रामेसृगालीनिर्जनेवने ॥ ३६ ॥ स्त्रीणांहिपरमश्चैकोनियमःसमुदाहृतः ॥ अभ्यर्च्यचरणौभर्त्तुर्भोक्तव्यंकृतनिश्चयम् ॥३७॥ उच्चासनंनसेवेतनव्रजेत्परवेश्मसु ॥ नत्रपाकरवाक्यानिवक्तव्यानिकदाचन ॥ ३८ ॥ अपवादोनवक्तव्यःकलहंदूरतस्त्यजेत् ॥ गुरूणांसन्निधौक्वापिनोच्चैर्ब्रूयान्नवाहसेत् ॥ ३९ ॥ याभर्तारंपरित्यज्यरहश्चरतिदुर्मतिः ॥ उलूकीजायतेक्रूरावृक्षकोटरशायिनी ॥ ४० ॥ ताडिताताडितुंचेच्छेत्साव्याघ्रीवृषदंशिका ॥ कटाक्षयतियाऽन्यंवैकेकराक्षीतुसाभवेत् ॥ ४१ ॥ याभर्तारंपरित्यज्यमिष्टमश्नातिकेवलम् ॥ ग्रामेवासूकरीभूयाद्वल्गुर्वापिश्वविड्भुजा ॥ ४२ ॥

दृषदिपेषिण्याम् ॥ अपिःसमुच्चये ॥ यन्त्रकेगोधूमादिचूर्णशिलायाम् ॥ देहल्यांगृहावग्रहण्याम् ॥ गृहावग्रहणीदेहलीत्यमरः ॥ गृहद्वाराद्बहिरुभयत्रोच्चभूम्यामित्यर्थः ॥ २८ ॥ २९ ॥ प्रसंगात्स्त्रीधर्मानाह ॥ इदमेवेत्यादिना ॥ ३० ॥ क्लीबंवीर्यहीनम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ सरमाशुनी ॥ सरमाशुनीत्यमरः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ रहोग्राम्यधर्मंचरतिआचरति ॥ जारेणसार्धमितिशेषः ॥ उलूकीपेचिका ॥ उलूकस्तुवायसारातिपेचकावित्यमरः ॥ ४० ॥ वृषदंशिकामार्जारीच ॥ व्याघ्रीवृषदंशिकेत्येकंपदंवा ॥ ४१ ॥ केकराक्षीतिर्यङ्ने

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

त्रावक्रनयनेतियावत् ॥ वल्गुर्नामोर्ध्वचरणोऽधःशिरावृक्षावलंबीपक्षिविशेषः ॥ स्वविड्भुजास्वविष्ठाभक्षिणी ॥ वल्गुलीवेतिपाठेसएवार्थः ॥४२॥ त्वंकृत्यत्वंकारंकृत्वा ॥ हुंकृत्येतिक्वचित्पाठः॥ ४३ ॥
विलुप्यवस्त्रादिनाछाद्यव्यवधायेत्येतत् ॥ भर्तृसंबंधिनीं दृष्टिंत्यक्त्वेतिवा ॥ ४४ ॥ वाह्यात्गृहवाह्यप्रदेशात् ॥ ४५ ॥ खेदसन्नोदनैर्दुःखापनोदनकर्तृभिः ॥ परैरन्यैः ॥ परैःश्रेष्ठैर्वा ॥ ४६—५० ॥
तदाशिषमित्यत्रतच्छब्दोमातृव्यतिरिक्तरंडाविषयः ॥ संन्यस्ताखिलकर्मापिपितुर्वंद्योहिमस्करी ॥ सर्ववंद्येनयतिनाप्रसूर्वंद्याप्रयत्नतइत्यत्रैववक्ष्यमाणत्वात् ॥ आशीविषोपमांसर्पोपमाम् ॥
सर्पःपृदाकुर्भुजगोभुजंगोहिर्भुजंगमः ॥ आशीविषोविषधरश्चक्रीव्यालःसरीसृपइत्यमरः ॥ ५१ ॥ ५२ ॥ भर्तेति ॥ स्त्रियाजीवन्मृतोवाभर्ताऽनुयातव्योऽनुगंतव्यइत्यर्थः ॥ अत्रानुगुणंदृष्टां

यात्वंकृत्याऽप्रियंब्रूतेमूकासाजायतेखलु ॥ यासपत्नींसदेर्ष्येतदुर्भगासापुनःपुनः ॥ ४३ ॥ दृष्टिंविलुप्यभर्तुर्यांकंचिदन्यंसमीक्षते ॥ काणाचवि
मुखीचापिकुरूपाचापिजायते ॥ ४४ ॥ बाह्यादायांतमालोक्यत्वरिताचजलाशनैः ॥ तांबूलैर्व्यजनैश्चैवपादसंवाहनादिभिः ॥ ४५ ॥ तथैवचाटुवचनैः
खेदसंनोदनैःपरैः ॥ याप्रियंप्रीणयेत्प्रीतात्रिलोकीप्रीणितातया ॥ ४६ ॥ मितंददातिहिपितामितंभ्रातामितंसुतः ॥ अमितस्यहिदातारंभर्त्तारंपूजये
त्सदा ॥ ४७ ॥ भर्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच ॥ तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत्[1] ॥ ४८ ॥ जीवहीनोयथादेहःक्षणादशुचितांव्रजेत् ॥
भर्तृहीनातथायोषित्सुस्नाताप्यशुचिःसदा ॥ ४९ ॥ अमंगलेभ्यःसर्वेभ्योविधवात्यक्तमंगला ॥ विधवादर्शनात्सिद्धिःक्वापिजातुनजायते ॥ ५० ॥
विहायमातरंचैकांसर्वमंगलवर्जिताम् ॥ तदाशिषमपिप्राज्ञस्त्यजेदाशीविषोपमाम् ॥ ५१ ॥ कन्याविवाहसमयेवाचयेयुरितिद्विजाः ॥ भर्तुःसहचरी
भूयाज्जीवतोऽजीवतोपिवा ॥ ५२ ॥ भर्तासदानुयातव्योदेहवच्छाययास्त्रिया ॥ चंद्रमाज्योत्स्नयायद्वद्विद्युत्वान्विद्युतायथा ॥ ५३ ॥ अनुव्रजति
भर्तारंगृहात्पितृवनंमुदा ॥ पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसंशयम् ॥ ५४ ॥ व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात् ॥ एवमुत्क्रम्यदूतेभ्यःपतिंस्वर्गं
नयेत्सती ॥ ५५ ॥ यमदूताःपलायंतेसतीमालोक्यदूरतः ॥ अपिदुष्कृतकर्माणंसमुत्सृज्यचतत्पतिम् ॥ ५६ ॥ नतथाबिभीमोवह्नेर्नतथाविद्युतो
यथा ॥ आपतंतींसमालोक्यवयंदूताःपतिव्रताम् ॥ ५७ ॥ तपनस्तप्यतेत्यंतंदहनोपिचदह्यते ॥ कंपंतेसर्वतेजांसिदृष्ट्वापातिव्रतंमहः ॥ ५८ ॥
यावत्स्वलोमसंख्यास्तितावत्कोटययुतानिच ॥ भर्त्रास्वर्गसुखंभुंक्तेरममाणापतिव्रता ॥ ५९ ॥

तत्रयमाह ॥ देहवदितिपादत्रयेण ॥ विद्युत्वान्मेघः ॥ ५३ ॥ पतिमनुव्रजंत्यनुगच्छंतीचितारोहार्थमितिशेषः ॥ पितृवनंश्मशानम् ॥ मुदेतिबलात्कारेणगमनंवार्यते ॥ ५४ ॥
पतिव्रतामाहात्म्यमाह ॥ व्यालग्राहीत्यारभ्यशीलभंगेनेत्यतःप्राक्तनेनग्रंथेन ॥ व्यालंसर्पंग्रहीतुंशीलंयस्यसव्यालग्राहीमनुष्यःपक्षिविशेषोवा ॥ उत्क्रम्यमोचयित्वा ॥ ५५ ॥ ॥ ५६ ॥
नाबिभीमःभयंनप्राप्नुमः ॥ ५७ ॥ दह्यतइतिकर्मकर्तर्यात्मनेपदम् ॥ महस्तेजः ॥ ५८ ॥ भर्त्रासहरममाणा भर्त्राकर्त्राक्रीडमानाइतिवा ॥ उक्तंच ॥ तिस्रःकोटयोऽर्धकोटीचया

१ सर्वदापतिमर्चयेदित्यपिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निलोमानिमानवे ॥ तावत्कालंवसेत्स्वर्गेभर्तारंयानुगच्छतीति ॥ ५९ ॥ केतेधन्यास्तत्राह ॥ येषांगेहेपतिव्रतेतिः ॥ ६० ॥ ६१ ॥ विकर्मस्थांनिंदति ॥ शीलभंगेनेत्येकेन ॥ ६२ ॥ पुनरपिपतिव्रतायामाहात्म्यमाह ॥ पतिव्रतायाइत्यष्टभिः ॥ पतिव्रतायाश्चरणोयत्रयत्रसुवंभूप्रदेशंस्पृशेत्स्पृशति तत्रेत्यत्रवीप्साबोद्धव्या ॥ तत्रतत्रभूमिरितिमन्यते ॥ किंतत्त दाह ॥ नात्रममभारोस्ति किंत्वनेनपादस्पर्शेनाहंपावनीपावित्र्यकर्त्रीपवित्रेतिवा ॥ ६३ ॥ बिभ्यद्भयंकुर्वाणः ॥ अर्थात्पापेभ्यइतित्रयाणांविशेषणम् ॥ ६४ ॥ जाड्यंजडत्वंअज्ञानंवा ॥ तुशब्दोऽवधारणार्थः ॥ अन्यपावनाअन्येषांपावनकर्त्र्यः ॥ ६५ ॥ एवंभूतातुभार्यादुर्लभेत्याह ॥ गृहेगृहेइति ॥ रूपलावण्यगर्विताः ॥ रूपमंगसौष्ठवंलावण्यंकांतिस्ताभ्यांगर्विताः ॥ ६६ ॥ ६७ ॥ परेइति ॥ भार्ययाद्वयंजीयतेइतिसामान्येनान्वयः ॥ पश्चात्किंतद्वयमित्याकांक्षायामाह ॥ परलोकोऽयंलोकइति ॥ देवपित्रतिथीज्यादिकर्मेत्यन्वयः ॥ ६८ ॥

धन्यासाजननीलोकेधन्योसौजनकःपुनः ॥ धन्यःसचपतिःश्रीमान्येषांगेहेपतिव्रता ॥ ६० ॥ पितृवंश्यामातृवंश्याःपतिवंश्यास्त्रयस्त्रयः ॥ पतिव्रतायाःपुण्येनस्वर्गसौख्यानिभुंजते ॥ ६१ ॥ शीलभंगेनदुर्वृत्ताःपातयंतिकुलत्रयम् ॥ पितुर्मातुस्तथापत्युरिहामुत्रचदुःखिताः ॥ ६२ ॥ पतिव्रतायाश्चरणोयत्रयत्रस्पृशेद्भुवम् ॥ तत्रेतिभूमिर्मन्येतनात्रभारोस्तिपावनी ॥ ६३ ॥ बिभ्यत्पतिव्रतास्पर्शंकुरुतेभानुमानपि ॥ सोमोगंधवहश्चापिस्वपावित्र्यायनान्यथा ॥ ६४ ॥ आपःपतिव्रतास्पर्शमभिलष्यंतिसर्वदा ॥ अद्यजाड्यविनाशोनोजातास्त्वद्याऽन्यपावनाः ॥ ६५ ॥ गृहेगृहेन किंनार्योरूपलावण्यगर्विताः ॥ परंविश्वेशभक्त्यैवलभ्यतेस्त्रीपतिव्रता ॥ ६६ ॥ भार्यामूलंगृहस्थस्यभार्यामूलंसुखस्यच ॥ भार्याधर्मफलावाप्त्यैभार्यासंतानवृद्धये ॥ ६७ ॥ परलोकस्त्वयंलोकोजीयतेभार्ययाद्वयम् ॥ देवपित्रतिथीज्यादिनाभार्यःकर्मचार्हति ॥ ६८ ॥ गृहस्थःसहिविज्ञेयोयस्यगेहेपतिव्रता ॥ ग्रसतेऽन्याप्रतिपदंराक्षस्याजरयाथवा ॥ ६९ ॥ यथागंगाऽवगाहेनशरीरंपावनंभवेत् ॥ तथापतिव्रतादृष्ट्वाचाशुभयापावनंभवेत् ॥ ७० ॥ अनुयातिनभर्तारंयदिदैवात्कथंचन ॥ तत्रापिशीलंसंरक्ष्यंशीलभंगात्पतत्यधः ॥ ७१ ॥ तद्वैगुण्यादपिस्वर्गात्पतिःपततिनान्यथा ॥ तस्याःपिताचमाताचभ्रातृवर्गस्तथैवच ॥ ७२ ॥ पत्यौमृतेचयायोषिद्वैधव्यंपालयेत्क्वचित् ॥ सापुनःप्राप्यभर्तारंस्वर्गभोगान्समश्नुते ॥ ७३ ॥ विधवाकबरीबंधोभर्तृबंधायजायते ॥ शिरसोवपनंतस्मात्कार्यंविधवयासदा ॥ ७४ ॥

अन्याऽपतिव्रता ॥ प्रतिपदंप्रतिक्षणम् ॥ प्रतिदिनमितिक्वचित्पाठः ॥ जरैवराक्षसीतयाजरयाराक्षस्याग्रस्यतइतिशेषः ॥ अथवेतिपक्षांतरे ॥ यथेतिपाठे जरानाम्न्याराक्षस्यावायथेति ॥ अन्याऽपतिव्रता ॥ दृष्टांतस्त्वेनव्याख्येयम् ॥ ६९ ॥ ७० ॥ सभर्तृकाणांपतिव्रतानांधर्मानुक्त्वाऽभर्तृकाणांधर्मान्वक्तुमुपक्रमते ॥ अनुयातिनभर्तारमिति ॥ शीलंपातिव्रत्यंस्वभावंसद्वृत्तंवा ॥ शीलंस्वभावे सद्वृत्तेइत्यमरः ॥ ७१ ॥ तद्वैगुण्यात्शीलवैगुण्यातभार्यावैगुण्याद्वा ॥ तथाचोक्तम् ॥ पतत्यर्धशरीरेणयस्यभार्यासुरांपिबेदिति ॥ तस्याःपित्रादयोपितथैवपतंतीत्याह ॥ तस्याइति ॥ ७२ ॥ भर्तृविहीनायाःपतिव्रतायाउभयलोककष्टशंकांशातयति ॥ पत्याविति ॥ ७३ ॥ विधवेति ॥ विधवायायःकबरीबंधः ॥ कबरीकेशवेशइत्यमरः ॥ बंधोव्यसनम् ॥ बंधकंव्यसन

CC-0. In Public Domain. Digitization by eGangotri

मित्यमरः ॥ सभर्तृवंधायभर्तृव्यसनायनरकायजायतइत्यर्थः ॥ ७४ ॥ ७५ ॥ चांद्रायणमथापिवेति ॥ चांद्रायणपराककृच्छ्रतप्तकृच्छ्राणांस्वरूपंचपराशरसंहितायामुक्तम् ॥ एकैकंवर्द्धये द्ग्रासंशुक्लेकृष्णेतुह्रासयेत् ॥ अमावास्यांनभुंजतिएषचांद्रायणोविधिः ॥ कुक्कुटस्यांडमात्रंतुग्रासंतुपरिकल्पयेत् ॥ अन्यथाभावदोषेणनधर्मोनचशुद्ध्यतीति ॥ यतात्मनोऽप्रमत्तस्यद्वादशाहमभोजनम् पराकोनामकृच्छ्रोयंसर्वपापप्रणोदनइति ॥ त्र्यहमुष्णंपिवेदापस्त्र्यहमुष्णंपयःपिवेत्॥ त्र्यहमुष्णंघृतंपीत्वावायुभक्ष्योदिनत्रयम् ॥ षट्पलंतुपिवेदापस्त्रिपलंतुपयःपिवेत् ॥ पलमेकंपिवेत्सर्पिस्तप्तकच्छ्रं प्रकीर्तितमिति ॥७६॥ ७७ ॥ पर्यंकेति ॥ अत्रापिचवक्ष्यति ॥ पर्यंकशायिनीखट्वाशायिनी ॥ ताच्छील्यप्रयोगात्कदाचित्कथंचिच्छयनेदोषोनास्तीतिध्वनितम् ॥७८॥७९॥८०॥८१॥८२॥

एकाहारःसदाकार्योनद्वितीयःकदाचन ॥ त्रिरात्रंपंचरात्रंवापक्षव्रतमथापिवा ॥ ७५ ॥ मासोपवासंवाकुर्याच्चांद्रायणमथापिवा ॥ कृच्छ्रंवराकंवा कुर्या त्तप्तकृच्छ्रमथापिवा ॥ ७६ ॥ यवान्नैर्वाफलाहारैःशाकाहारैःपयोव्रतैः ॥ प्राणयात्रांप्रकुर्वीतयावत्प्राणःस्वयंव्रजेत् ॥ ७७ ॥ पर्यंकशायिनीनारीवि धवापातयेत्पतिम् ॥ तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया ॥ ७८ ॥ नचांगोद्वर्तनंकार्यंस्त्रियाविधवयाक्वचित् ॥ गंधद्रव्यस्यसंयोगोनैवकार्य स्तयापुनः ॥ ७९ ॥ तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः ॥ तत्पितुस्तात्पितुश्चापिनामगोत्रादिपूर्वकम् ॥ ८० ॥ विष्णोस्तुपूजनंकार्यंपति बुद्ध्यानचान्यथा ॥ पतिमेवसदाध्यायेद्विष्णुरूपधरंहरिम् ॥ ८१ ॥ यद्यदिष्टतमंलोकेयच्चपत्युःसमीहितम् ॥ तत्तद्गुणवतेदेयंपतिप्रीणनकाम्यया ॥ ८२ ॥ वैशाखेकार्तिकेमाघेविशेषनियमांश्चरेत् ॥ स्नानंदानंतीर्थयात्रांविष्णोर्नामग्रहंमुहुः ॥ ८३ ॥ वैशाखेजलकुंभाश्चकार्तिकेघृतदीपकाः ॥ माघेधान्यतिलोत्सर्गःस्वर्गलोकेविशिष्यते ॥ ८४ ॥ प्रपाकार्याचवैशाखेदेवेदेयागलंतिका ॥ उपानद्व्यजनंछत्रंसूक्ष्मवासांसिचंदनम् ॥ ८५ ॥ सकर्पू रंचतांबूलंपुष्पदानंतथैवच ॥ जलपात्राण्यनेकानितथापुष्पगृहाणिच ॥ ८६ ॥ पानानिचविचित्राणिद्राक्षारंभाफलानिच ॥ देयानिद्विजमुख्येभ्यः पतिर्मेप्रीयतामिति ॥ ८७ ॥ ऊर्जेयवान्नमश्नीयादेकान्नमथवापुनः ॥ वृंताकंसूरणंचैवशूकशिंबिंचवर्जयेत् ॥ ८८ ॥ कार्तिकेवर्जयेत्तैलंकार्तिकेवर्जये न्मधु ॥ कार्तिकेवर्जयेत्कांस्यंकार्तिकेचापिसंधितम् ॥ ८९ ॥ कार्तिकेमौननियमेघंटांचारुप्रदापयेत् ॥ पत्रभोजीकांस्यपात्रंघृतपूर्णंप्रयच्छति ॥ ९० ॥ भूमिशय्याव्रतेदेयाशय्याश्लक्ष्णासतूलिका ॥ फलत्यागेफलंदेयंरसत्यागेचतद्रसम् ॥ ९१ ॥

॥ ८३ ॥ ८४ ॥ प्रपाजलशाला ॥ प्रपापानीयशालिकेत्यमरः ॥ गलंतिकादेवोपरिदीयमानाकुंभस्थाजलधारा ॥ ८५ ॥८६॥ द्राक्षामृद्वीका ॥ ऊर्जेकार्तिके ॥ वृंताकंप्रसिद्धम् ॥ सूरणमर्शोघ्नम् ॥ शुकशिंबिंशुकनासाकाराशिंबिःशुकशिंबिस्तांनिष्पावमितियावत् ॥ शुकशिंबीमितिपाठेदीर्घाकारांमृदुशिंबीमित्यर्थः ॥ वापिशब्दौसमुच्चयवाचिनौ ॥ ८७ ॥ ८८ ॥ संधितंसंधानंबिल्वामलका दीनाम् ॥ चुक्रसंधितमितिपाठेचुक्रंचसंधितंच चुक्रेणवृक्षाम्लेनअम्लेनवा ॥ चुक्रंवृक्षाम्लेचांगेर्यांस्त्रीपुंस्यम्लेऽम्लवेतसइतिमेदिनीकारः ॥ ८९ ॥ प्रयच्छतिप्रयच्छेत् ॥ ९० ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९२ ॥ ९३ ॥ किंचिदभ्युदितेअरुणोदयइत्यर्थः ॥ यथाशक्त्यायथाशक्ति ॥ ९४ ॥ वटकेति ॥ इंडरिकंइंडरीतिपुरुषोत्तमेऽत्यंतंप्रसिद्धम् ॥ आदिपदेनपूरिकाघर्वरीमंडकादयोगृह्यंते ॥ ९५ ॥ घृतपक्वैरितिगर्भेशर्करयापूर्णैरितियथासंभवंबोद्धव्यम् ॥९६॥ कंचुकशब्देनात्रपुरुषपरिधेयंशीतत्राणवस्त्रंगृह्यते ॥ सूपवीतिकांशोभनप्रावरणिकाम् ॥ ९७ ॥ मंजिष्ठारक्तवासांसिमंजिष्ठयारक्तवस्त्राणि ॥ ९८ ॥ ९९ ॥ घृतकंबलपूजाभिःघृतनिर्मितकंबलपूजाभिर्वदरिकाश्रमेश्रीनारायणेप्रसिद्धाभिः ॥ कर्मधारयोद्वंद्वोवा ॥ गर्भागारेअगारस्यगर्भंगर्भागारंतस्मिन्देवालयमध्येइत्यर्थः ॥ १०० ॥

धान्यत्यागेचतद्धान्यमथवाशालयःस्मृताः ॥ धेनूर्दद्यात्प्रयत्नेनसालंकाराःसकांचनाः ॥ ९२ ॥ एकतःसर्वदानानिदीपदानंतथैकतः ॥ कार्तिकेदीपदानस्यकलांनार्हतिषोडशीम् ॥ ९३ ॥ किंचिदभ्युदितेसूर्येमाघस्नानंसमाचरेत् ॥ यथाशक्त्याचनियमान्माघस्नायीसमाचरेत् ॥ ९४ ॥ पक्वान्नैर्भोजयेद्विप्रान्यतिनोपितपस्विनः ॥ लड्डुकैःफेणिकाभिश्चवटकेंडरिकादिभिः ॥ ९५ ॥ घृतपक्वैःसमरिचैःशुचिकर्पूरवासितैः ॥ गर्भेशर्करयापूर्णैर्नेत्रानंदैःसुगंधिभिः ॥ ९६ ॥ शुष्कैंधनानांभारांश्चदद्याच्छीतापनुत्तये ॥ कंचुकंतूलगर्भंचतूलिकांसूपवीतिकाम् ॥ ९७ ॥ मंजिष्ठारक्तवासांसितयातूलवतींपटीम् ॥ जातीफललवंगैश्चतांबूलानिबहून्यपि ॥ ९८ ॥ कंबलानिविचित्राणिनिर्वातानिगृहाणिच ॥ मृदुलाःपादरक्षाश्चसुगंध्युद्वर्त्तनानिच ॥९९॥ घृतकंबलपूजाभिर्महास्नानपुरःसरम् ॥ कृष्णागुरुप्रभृतिभिर्गर्भागारेप्रधूपनैः ॥ १०० ॥ स्थूलवर्तिप्रदीपैश्चनैवेद्यैर्विविधैस्तथा ॥ भर्तृस्वरूपोभगवान्प्रीयतामितिचोच्चरेत् ॥ १ ॥ एवंविधैश्चविधवाविविधैर्नियमैर्व्रतैः ॥ वैशाखान्कार्तिकान्माघानेवमेवातिवाहयेत् ॥ २ ॥ नाधिरोहेदनड्वाहंप्राणैःकंठगतैरपि ॥ कंचुकंनपरीदध्याद्वासोनविकृतंन्यसेत् ॥३॥ अपृष्ट्वातुसुतान्किंचिन्नकुर्याद्व्रततत्परा ॥ एवंचर्यापरानित्यंविधवापिशुभामता ॥ ४ ॥ एवंधर्मसमायुक्ताविधवापिपतिव्रता ॥ पतिलोकानवाप्नोतिनभवेत्क्वापिदुःखभाक् ॥५॥ नगंगयातयाभेदोयानारीपतिदेवता ॥ उमाशिवसमासाक्षात्तस्मात्तांपूजयेद्बुधः ॥६॥ बृहस्पतिरुवाच ॥ गंगास्नानफलंत्वेतद्यज्जातंतवदर्शनम् ॥ लोपामुद्रेमहामातर्भर्तृपादांबुजेक्षणे ॥ ७ ॥ इतिस्तुत्वामहाभागांराजपुत्रींपतिव्रताम् ॥ प्रणम्यचगुरुःप्राहमुनिंसर्वार्थकोविदः ॥ ८ ॥ प्रणवस्त्वंश्रुतिरियंक्षमैषात्वंस्वयंतपः ॥ सत्क्रियेयंफलंत्वंहिधन्योसीतिमहामुने ॥ ९ ॥ इदंपातिव्रतंतेजोब्रह्मतेजोभवान्परम् ॥ तत्राप्येतत्तपस्तेजःकिमसाध्यतमंतव ॥ ११० ॥

॥ १ ॥ २ ॥ अनड्वाहंबलीवर्दम् ॥ विकृतंविशेषेणकृतंचित्रमित्यर्थः ॥ न्यसेत्वसेदित्यर्थः ॥ वसेदित्येववापाठः ॥ ३ ॥ ४ ॥ उपसंहरति ॥ एवंधर्मेति ॥ ५ ॥ ६ ॥ लोपामुद्रांस्तौति ॥ गंगेति ॥ तवदर्शनंयज्जातमेतद्गंगास्नानफलंजातमितिसंबंधः ॥ तुशब्दोऽवधारणे ॥ जातमेवेत्यर्थः ॥ ७ ॥ प्रणतिपूर्वकंसभार्यमगस्त्यंस्तौति ॥ प्रणम्यचेति ॥ काकाक्षिन्यायेनप्रणम्येत्यस्योभयत्रसंबंधः ॥ चकारःसमुच्चयेसंभ्रमेवा ॥ ८ ॥ ९ ॥ कार्यंविज्ञापयितुंतस्यकिमप्यसाध्यंनास्तीत्याह ॥ इदमिति ॥ तेजोविशेषणत्वात्षंढत्वम् ॥ इयमितिवापाठः ॥ पतिव्रतायाइदंपाति

CC-0. In Public Domain. Digitization by eGangotri

व्रतम् ॥ ११० ॥ कार्यंनिवेदयितुंपरिपाटींरचयति ॥ तवेति ॥ ११ ॥ केतेदेवाइतिपृच्छायांप्राधान्येनाष्टलोकपालान्निर्दिशति ॥ अयमित्यादिना ॥ अयमितिभ्रूचालनेननिर्दिशति ॥ दृक्प्रसादं नेत्रावलोकप्रसादम् ॥ प्रतीक्षतेतवेतिशेषः ॥ १२ ॥ कामधेनुव्रजःकामधेनुसमूहः ॥ १३ ॥ चिंतामणिकर्कराःचिंतामणयएवातिसुलभत्वेनकर्कराःक्षुद्रपाषाणाः ॥ १४ ॥ श्रीदोधनेशः रुद्रईश एतौआदीयेषांतेतथा ॥ अमीइत्यंगुल्यानिर्दिशति ॥ तुशब्दःपादपूरणार्थः ॥ १९ ॥ याच्यएतैरितिशेषः ॥ नचतद्याच्ञापूरणंतवासाध्यमित्याह ॥ वाङ्मात्रेति ॥ १६ ॥ एवंपरिपाटींकृत्वासाक्षा देवकार्यंनिर्दिशति ॥ कश्चिदिति ॥ १७ ॥ ननुसन्मार्गवर्तिनस्तस्यकथंवृद्धिर्निवार्येत्यतआह ॥ येचेति ॥ वर्धितंअशुभंययासातथा ॥ १८ ॥ गुरोर्बृहस्पतेः ॥ तथेति ॥ तद्वृद्धिनिवारणंकर्तव्य

तवनाविदितंकिंचित्तथापिचवदाम्यहम् ॥ यदर्थमागतादेवास्तन्मुनेत्रनिशामय ॥ ११ ॥ अयंशतमखःश्रीमान्वृत्रहाकुलिशायुधः ॥ सिद्ध्यष्टकंहि यद्वारिदृक्प्रसादंसमीक्षते ॥ १२ ॥ यस्यपुर्याःपरिसरेकामधेनुव्रजश्चरेत् ॥ यत्पौराःकल्पवृक्षाणांनित्यंछायासुशेरते ॥ १३ ॥ यद्रथ्यासुचतिष्ठं तितेचिंतामणिकर्कराः ॥ अयमग्निर्जगद्योनिर्धर्मराजस्त्वयंपुनः ॥ १४ ॥ निर्ऋतिर्वरुणोवायुःश्रीदरुद्रादयस्त्वमी ॥ आराध्यंतेचचारित्रैःसर्वकामार्थ मीश्वराः ॥ १५ ॥ समभ्यर्थयितारोमीत्वयाच्यस्तुजगत्कृते ॥ वाङ्मात्रोद्यमसाध्यंतत्तवविश्वोपकारकम् ॥ १६ ॥ कश्चिच्छैलोविंध्यनामाभानुमार्गा वरोधकः ॥ वर्धितःस्पर्धयामेरोस्तद्वृद्धिंत्वंनिवारय ॥ १७ ॥ येचस्वभावकठिनायेचमार्गावरोधकाः ॥ येस्पर्धयावृद्धिमंतस्तद्वृद्धिर्वर्धिताऽशुभा ॥ १८ ॥ इतिश्रुत्वागुरोर्वाक्यमविचार्यमहामुनिः ॥ क्षणंमुनिःसमाधायतथेतिप्रत्युवाचह ॥ १९ ॥ साधयिष्यामिवःकार्यंविसर्ज्योतिदिवौकसः ॥ पुनश्चिंतापरो भूत्वाऽगस्तिर्ध्यानपरोभवत् ॥ १२० ॥ ॥ वेदव्यासउवाच ॥ ॥ इमंपतिव्रताध्यायंश्रुत्वास्त्रीपुरुषोपिवा ॥ पापकंचुकमुत्सृज्यशक्रलोकंप्रयास्यति ॥ १२१ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडे पूर्वार्द्धेपतिव्रताख्यानंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ पराशरउवाच ॥ ॥ ततोध्यानेनविश्वेशमालोक्यसमुनीश्वरः ॥ सूतप्रोवाचतांपुण्यांलोपामुद्रामिदंवचः ॥ १ ॥ अयिपश्यवरारोहेकिमेतत्समुप स्थितम् ॥ क्वतत्कार्यंक्वचवयंमुनिमार्गानुसारिणः ॥ २ ॥ येनगोत्रभिदागोत्राविपक्षाहेलयाकृताः ॥ भवेत्कुंठितसामर्थ्यःसकथंगिरिमात्रके ॥ ३ ॥

मित्येवंरूपंप्रत्युत्तरंदत्तवानित्यर्थः ॥ तत्प्रतीतिपाठेतद्वचःप्रत्युत्तरंदत्तवान् ॥ १९ ॥ किंतत्प्रत्युत्तरंतदाह ॥ साधयिष्यामीति ॥ अन्यस्मिन्पक्षेविसर्ज्येतिपृथग्वाक्यम् ॥ २० ॥ एतदध्याय श्रवणफलमाह ॥ इममिति ॥ पापकंचुकंपापमेवकंचुकोनिर्मोकस्तम् ॥ समौकंचुकनिर्मोकावित्यमरः ॥ अयंभावः ॥ यथासर्पोज्वरजीर्णांत्वचंमुंचतिएवंपुण्यज्वरजीर्णंपापकंचुकंत्यक्त्वेति ॥ २१ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ पंचमेवर्ण्यतेदेवैरिंद्राद्यैःस्वार्थसाधकैः ॥ अगस्त्यस्यसभार्यस्यप्रस्थानमाविमुक्ततः ॥ १ ॥ अगस्तिर्ध्यानपरोभवदित्युक्तंततःपरंकिंजातमित्याकांक्षायामाह ॥ ततइति ॥ सूतहेलोमहर्षण ॥ १ ॥ अयीतिसंबोधने ॥ वरारोहेश्रेष्ठजघने ॥ अपीतिक्वचित्पाठः ॥ २ ॥ गोत्रभिदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंद्रेण ॥ विपक्षाविगतपत्राः ॥ गरुत्पक्षच्छदाःपत्रंपतत्रंचतनूरुहमित्यमरः ॥ ३ ॥ कुलिशंवज्रम् ॥ ह्रादिनीवज्रमस्त्रीस्यात्कुलिशंभिदुरंपविरित्यमरः ॥ सिद्ध्यष्टकमणिमादिकंपद्मादिकंवा ॥ ४ ॥ दावाग्निनावनवह्निनाप्रलयवह्निनावाव्याकुलीक्रियंतएव ॥ दावाग्निनापीत्यपिशब्दार्थोऽवधारणम् ॥ येशैलाइत्यन्वयः ॥ तद्वृद्धिस्तंभनेतेषांशैलानांवृद्धिनिवारणे ॥ आशुशुक्षणेर्वह्नेः ॥ ५ ॥ दंडधरोयमः ॥ ग्रावमात्रेकपर्वतैकमात्रे ॥ अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाइत्यमरः ॥ मात्रंकार्त्स्न्येवधारणइतिच ॥ ६ ॥ आदित्याविष्णुशक्राद्याद्वादश ॥ वसवआपध्रुवाद्याअष्टौ ॥ रुद्रा अजैकपादाद्याएकादश ॥ तुषिताःषट्त्रिंशत् ॥ मरुतःपूतात्मप्रमुखाएकोनपंचाशत् ॥ विश्वेदेवाविष्कंभुप्रभृतयोदश ॥ दस्रौअश्विनीसुतौ ॥ ७ ॥ ८ ॥ समर्थैरपिदेवैर्विंध्यनिवारणेस्वस्मिन्प्रार्थिते हेतुंनिर्धारयति ॥ आज्ञातमिति ॥ आइतिस्मृतिद्योतकमव्ययम् ॥ स्मृतमनुवदति ॥ यद्वा आइतिसांतःपीडायांखेदइतियावत् ॥ आस्तुस्यात्कोपपीडयोरित्यमरः ॥ ९ ॥ वाक्यमेवनिर्दिशति ॥ अविमुक्तमिति ॥ सतामित्यनेनश्रेयांसिबहुविघ्नानिभवंतिमहतामपीतिन्यायसूचनपूर्वकमसतांविघ्नानभविष्यंतीतिध्वनितम् ॥ तत्कस्मात्तेषामीश्वरेणाधोनिनीषितत्वात् ॥ तमसाधुकर्मकारयतियमधो निनीषतीतिश्रुतेः ॥ अशनंवसनंवासःकाश्यांयेषाममार्गतः ॥ कीकटेनसमाकाशीसत्यंसत्यंखगेश्वरेत्यादिगरुडपुराणादिवचनदर्शनाच्च ॥ १० ॥ अंतरायोविघ्नः ॥ ११ ॥ काशीतोगंतव्यमितिकृत

कल्पवृक्षोंऽगणेयस्यकुलिशंयस्यचायुधम् ॥ सिद्ध्यष्टकंहियद्द्वारिससिद्ध्यैप्रार्थयेद्द्विजम् ॥ ४ ॥ क्रियंतेव्याकुलाःशैलाअहोदावाग्निनाप्रिये ॥ तद्वृद्धिस्तंभनेशक्तिःक्वगतासाऽऽशुशुक्षणेः ॥ ५ ॥ नियन्तासर्वभूतानांयोसौदण्डधरःप्रभुः ॥ सकिंदंडयितुंनालमेकंतंग्रावमात्रकम् ॥ ६ ॥ आदित्यावसवो रुद्रास्तुषिताःसमरुद्गणाः ॥ विश्वेदेवास्तथादस्रौयेचान्येपिदिवौकसः ॥ ७ ॥ येषांदृक्पातमात्रेणपतंतिभुवनान्यपि ॥ तेकिंसमर्थानोकांतेनगवृद्धि निषेधने ॥८॥ आज्ञातंकारणंतच्चस्मृतंवाक्यंसुभाषितम् ॥ काशीमुद्दिश्ययद्गीतंमुनिभिस्तत्त्वदर्शिभिः ॥९॥ अविमुक्तंनमोक्तव्यंसर्वथैवमुमुक्षुभिः ॥ किंतुविघ्नाभविष्यंतिकाश्यांनिवसतांसताम् ॥ १० ॥ उपस्थितेयंकल्याणिसोंऽतरायोमहानिह ॥ नशक्यतेऽन्यथाकर्तुंविश्वेशोविमुखोयतः ॥ ११ ॥ काशीद्विजाशीर्भिरहोयदाप्ताकस्तांमुमुक्षुर्यदिवामुमुक्षुः ॥ ग्रासंकरस्थंसविसृज्यहृद्यंस्वकूर्परंलेढिविमूढचेताः ॥ १२ ॥

निश्चयःसन् यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनइतिन्यायेनअन्यान्जिगमिषून्वारयन्काशींस्तौति ॥ काशीद्विजाशीर्भिरित्याद्येकोनविंशत्याश्लोकैः ॥ काशीद्विजाशीर्भिरित्यस्यायमर्थः ॥ अहोइत्याश्चर्ये खेदेवा ॥ यदियदाकाशीद्विजाशीर्भिर्ब्राह्मणाशीर्वादैःप्राप्तालब्धातदाताम् ॥ यदित्यव्ययम् ॥ यत् योमुमुक्षुरज्ञानतत्कार्यान्मोक्तुमिच्छुःसन्मुमुक्षुस्त्यक्तुमिच्छुर्भवतिसकोनकोप्यत्यंतमूढबुद्धिरित्यर्थः ॥ यद्वा अकइत्यकारप्रश्लेषः ॥ नविद्यतेकंसुखंयस्यसतथाप्रत्यग्ब्रह्मानंदरहितइत्यर्थः ॥ अत्रदृष्टांतमाह ॥ वेत्युपमायाम् ॥ उपमायांवितर्केवेत्यमरः ॥ वायथाग्रासंकवलंकरस्थंहस्तस्थंहृद्यंहृदोहितंतृप्ति करमित्यर्थः ॥ विसृज्यत्यक्त्वा ॥ कूर्परंकफोणिम् ॥ स्यात्कफोणिस्तुकूर्परइत्यमरः ॥ लेढिआस्वादयतिविमूढचेतामूढबुद्धिस्तद्वदित्यर्थः ॥ अत्रवायच्छब्दयोर्व्यवहितान्वयकल्पनासोढव्या ॥ यद्वा यदाद्विजाशीर्भिःकाशीप्राप्तालब्धातदातांमुमुक्षुरमुमुक्षुर्वासंसाराद्विरक्तोऽविरक्तोवायद्यस्त्यजेत्परित्यजेदित्यग्रिमश्लोकस्थक्रियायावचनविपरिणमय्यानुषंगः ॥ सकोनकोपीत्यर्थः ॥ सोऽकइतिवा ॥ शेषंपूर्ववत् ॥ यदिवामुमुक्षुरितिपाठेअव्ययत्वाद्वाशब्दउपमानार्थःसमुच्चयार्थोवाद्रष्टव्यः ॥ समुच्चयपक्षेपरार्थेप्रयुज्यमानाःशब्दावतिमंतरेणापिवत्यर्थंगमयंतीतिन्यायादुपमानार्थोद्रष्टव्यः ॥ यद्वा यत

CC-0. In Public Domain. Digitization by eGangotri

इवअमुमुक्षुरितिच्छेदः ॥ तत्रयोविमूढचेताइवतांमुमुक्षुःसोऽमुमुक्षुःसंसारान्मोक्षमनिच्छुरित्यर्थः ॥ शेषंतुल्यम् ॥ १२ ॥ अहोजनाइति ॥ अस्यायमर्थः ॥ अहोइतिखेदे ॥ बालिशवन्मूर्खवत् ॥ किंपृच्छायाम् ॥ एतांकाशींत्यजेयुः किंकिमर्थंत्यजेयुरितिपृच्छामीत्यर्थः॥जुगुप्सनेवा ॥ एतांकाशींत्यजेयुःकिम् ॥ काशींत्यजेयुरितियदेतज्जुगुप्सितमित्यर्थः ॥ किंपृच्छायांजुगुप्सनइत्यमरः ॥ त्यजेयुस्त्यक्त्वागच्छेयुः ॥ सुकृतानामेकोमुख्योराशिर्यस्यांसातथातांसुकृतैकपुंजरूपांवा ॥ ननुकाशींत्यक्त्वागतेपिपुनरागमनंभविष्यतिनेत्याह ॥ शालूककंदइति ॥ शालूकशब्देनात्र शालूकिनः सौगंधिकादयोलक्ष्यंते ॥ तेषांकंदोमूलम् ॥ शालूकमेषांकंदःस्यादित्यमरः ॥ यद्वा शालूकंजलतृणावांतरंतस्यकंदोमूलमित्यर्थः ॥ सकिंप्रतिमज्जनंलभेतप्राप्नुयात् ॥ तद्वत्तथात्यक्त्वागमनेप्राति वारंकिमेषासुलभासुप्राप्याऽपितुसुलभानैवेत्यर्थः ॥ इदमत्रतात्पर्यम् ॥ अतिनिकृष्टोपिशालूककंदःप्रतिमज्जनंनप्राप्नोतिकिंपुनर्वक्तव्यमेषाब्रह्मांडेऽपिदुर्लभासायुज्यैकोपायभूताप्रतिवारंत्यक्त्वागतेसाति नप्राप्येत्यतोनत्यक्तव्येति ॥ १३ ॥ भवांतरेति ॥ अस्यायमर्थः ॥ भवांतरायसंसारांतरायावर्जितआसमंताद्वर्जितोदूरीकृतःश्रीमहेशार्पितःपुण्यराशिःपुण्यपुंजोऽर्थात्पुण्यकर्तृभिर्यस्यांसातथाताम् ॥ तस्यांक्रियमाणःपुण्यसंचयोजन्मांतरायनभवतीत्यर्थः ॥ वक्ष्यतिच ॥ ऊषरःपुण्यपापानांधन्यावाराणसीपुरीति ॥ यद्वा भवांतरेभवस्वरूपेविश्वनाथेइत्यर्थः ॥ अन्तरशब्दस्यस्वरूपवाचित्वं रात्रौस्वप्नांतरेब्रह्मन्मयादृष्टौहराच्युतावित्यादिहरिवंशादौप्रसिद्धम् ॥ आवर्जितःअर्पितःपुण्यानांराशिर्यस्यांसातयाताम् ॥ अत्रत्यैर्जनैःपुण्यराशिरपिविश्वेश्वरेअर्प्यतेक्षुद्रफलाशयातदनुष्ठानंतस्यागश्च दूरइतिभावः ॥ यद्वा भवांतंभवस्यांतम् ॥ अंतशब्दस्यस्वरूपवाचित्वात् ॥ रातिददातीतिभवांतराअविद्यातयावर्जिताःपुण्यराशयःपुण्यपुंजाःपुण्यानांवाराशिर्येषांतेतथासुकृतिनइतिवायस्यांसा

अहोजनाबालिशवत्किमेतांकाशींत्यजेयुःसुकृतैकराशिम् ॥ शालूककंदःप्रतिमज्जनंकिंलभेततद्वत्सुलभाकिमेषा ॥ १३ ॥
भवांतरावर्जितपुण्यराशिंकृच्छ्रैर्महद्भिर्ह्यवगम्यकाशीम् ॥ प्राप्यापिकिंमूढधियोन्यतोवैयियासवोदुर्गतिसुधियासवः ॥ १४ ॥
क्वकाशिकाविश्वपदप्रकाशिकाक्वकार्यमन्यत्परितोतिदुःखम् ॥ तत्पंडितोन्यत्रकुतःप्रयातिकिंयातिकूष्मांडफलंह्यजास्ये ॥ १५ ॥

तथोक्ताताम् ॥ अविद्याविनाशकत्वात्तेषामितिभावः ॥ यद्वा भवांतरेषुआवर्जितानिसंपादितानिपुण्यानितेषांराशिंराशिभूतांअनेकजन्मांतरार्जितसुकृतैकपुण्यामित्यर्थः ॥ एवंभूतांकाशींवैप्रसिद्धः शास्त्रविद्वज्जनमुखादवगम्यज्ञात्वापश्चान्महद्भिःकृच्छ्रैर्वर्त्मश्रमशौल्किकतस्करजनितविविधैर्दुःखैःप्राप्यापिमूढधियोलुप्तविवेकाः संतोदुर्गतिमुद्दियासवोदुःखंप्राप्तुमिच्छवोन्यत्रकिंयियासवोगंतुमिच्छवः स्युःअपितुनस्युरेवेत्यर्थः ॥ कृच्छ्रैर्महद्भिर्विनिमय्यकाशीमितिपाठेकृच्छ्रैःकष्टसाध्यैर्महद्भिःपुण्यैर्विनिमय्यपरिवर्त्यप्राप्यापीतिव्याख्येयम् ॥ १४ ॥ क्वकाशिकेति ॥ अस्यायमर्थः ॥ काशिका क्वकुत्र ॥ काशिकात्वमेवव्युत्पादयति ॥ विश्वपदप्रकाशिकेति ॥ विश्वस्यप्रपंचस्यपदंस्थानमधिष्ठानमिति ॥ यद्वा विश्वस्यपदंत्राणंयस्मात्सत्तास्फूर्तिप्रदत्वेनेतिविश्वपदंपरमात्मा ॥ पदंव्यव सितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः ॥ विश्वंचतत्पद्यतेज्ञायतइतिपदंचेतिवाविश्वपदम् ॥ सर्वेगत्यर्थाज्ञानार्थाइतिन्यायात् ॥ सर्वथापिविश्वपदंपरंब्रह्मतस्यप्रकाशिकाभिव्यंजिकास्फोरिकेतिया वत् ॥ क्वकार्यंक्रियतइतिकार्यंव्यापारमात्रम् ॥ कथंभूतम् ॥ अन्यत्काशीस्थित्यनुकूलातिरिक्तम् ॥ पुनःकीदृशम् ॥ परितोतिदुःखं परितइहलोकेपरलोकेच ॥ यद्वा परितःसर्वदासाधनकालेफ लकालेचातिदुःखंयस्मिंस्तत्तथा ॥ अतितुच्छमितिक्वचित्पाठः ॥ एतादृशंकार्यंक्वकुत्र ॥ ततस्माद्यःपंडितोभवतिसोन्यत्रकुतःप्रयातिकथंगच्छतिनगच्छत्येवेत्यर्थः ॥ विदुषोऽविमुक्तंविहाया न्यत्रगत्यसंभावनायांदृष्टांतमाह ॥ किंयातिकूष्मांडफलंह्यजास्यइति ॥ कूष्मांडःकर्कारुलताविशेषः ॥ कूष्मांडकस्तुकर्कारुरित्यमरः ॥ तस्यफलंकूष्मांडफलंअजस्यच्छागस्यमुखेकिंयाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिप्रविशतीतिनयात्येवेत्यर्थः ॥ किंमातीतिपाठेसएवार्थः ॥ यथाकूश्मांडफलस्याजमुखेप्रवेशोनसंभवतितथाविदुषःकाशींविहायगमनमपीतिभावः ॥ यद्वा ननुप्राप्तापिकाशीत्यक्ताकैश्चिद्दृश्य
तेतत्राह ॥ किंयातीति ॥ अजावदल्पभाग्यस्यमुखेकिंप्रविशाति ॥ शेषंसमानम् ॥ १९ ॥ काशीमिति ॥ अस्यायमर्थः ॥ हाइतिविषादे ॥ हाविषादशुगर्तिष्वित्यमरः ॥ नरोमर्त्यः
काशींकिंविसृजेदित्यर्थः ॥ ननुतीर्थपर्यटनादिपुण्योपचयार्थंगच्छेदित्याशंक्यकाशींविशिनष्टि ॥ प्रकाशीकृतपुण्यराशिमिति ॥ प्रकाशीकृतःप्रकटीकृतःपुण्यानांराशिःपुंजोयस्यामर्थाद्विश्वेश्वरे
णशास्त्रेणवेतिसातथाताम् ॥ अन्यतीर्थादीनांक्षुद्रपुण्यहेतुत्वात्काश्याश्चक्षणेक्षणेपुण्यराशेर्निमित्तत्वात् ॥ तथाचवक्ष्यति ॥ प्रयागेमाघमासेतुसम्यक्स्नातस्ययत्फलम् ॥ तत्फलंकोटिगुणितंवारा
णस्यांक्षणेक्षणेइत्यादीनि ॥ नतदर्थंकाशींविहायान्यत्रगमनमितिभावः ॥ ननुसमुच्चयेकोविरोधइतिन्यायेनतीर्थपर्यटनादिपुण्यानिसंपाद्यपुनरत्रायास्यतीत्याशंक्यनरंविशिनष्टि ॥ शीघ्रनाशीति ॥
शीघ्रंनाशोस्यास्तीतिशीघ्रनाशी ॥ मरणस्यातिनियतत्वात्तथानकार्यमितिभावः ॥ शीघ्रनाशीमितिपाठेकाश्याविशेषणम् ॥ शीघ्रंसंसारंचंचलस्वभावत्वान्नाशयतीतिशीघ्रनाशीतामित्यर्थः ॥
अज्ञानांकाशींविहायगंतुमयोग्येपिअन्यत्रगमनेकारणमपीत्याह ॥ नूनमिति ॥ नूनंनिश्चितंएवंतर्क्यतइतिवा ॥ नूनंतर्केऽर्थनिश्चयइत्यमरः ॥ तदीयंतस्यकाशींविहायगंतुरिदंतदीयंतत्सं
बंधियत्सुकृतंतत्स्वनूनंसुष्ठुयथाभवतिअनुपश्चात् ॥ पश्चात्सादृश्ययोरन्वित्यमरः ॥ ऊनंन्यूनंक्षीणमित्येवंमदीयंचेतोंतःकरणंविवृणोतिविचारयतितर्कयतीत्यर्थः ॥ एतदुक्तंभवति ॥ पूर्वं
काशीप्रापकसुकृतेनकाशीप्राप्तेदानींसुकृतेपूर्णेसुकृतस्यक्षीणत्वात्काशींविसृजतीति ॥ सुनूनमितिपाठोवा ॥ तत्रापिसुसुष्ठु नुपृच्छायाम् ऊनंक्षीणमिति ॥ नुपृच्छायांविकल्पेचेत्यमरः ॥

काशींप्रकाशीकृतपुण्यराशिंहाशीघ्रनाशीविसृजेन्नरःकिम् ॥ नूनंस्वनूनंसुकृतंतदीयंमदीयमेवंविवृणोतिचेतः ॥ १६ ॥
नरोनरोगीयदिहाविहायसहायभूतांसकलस्यजंतोः ॥ काशीमनाशीसुकृतैकराशिमन्यत्रयातुंयततांनचान्यः ॥ १७ ॥

सुलूनमितिपाठेस्पष्टएवार्थः ॥ १६ ॥ नरोनरोगीति ॥ अस्यायमर्थः ॥ अन्यत्रयातुंगंतुम् ॥ काशीतइत्यर्थात् ॥ यततांयत्नंकुर्वतांजनानांमध्येयदियदा हेतिहर्षे यद्यदाइ
हजगतीतिवा ॥ काशीमविहाययोऽनाशीर्भवति नविद्यतेआशिषःकामायस्यसतथा ॥ इंद्रियचांचल्यंपरित्यज्यमोक्षैकपरोभवतीत्यर्थः ॥ सनरोनरोगीसंसाराख्यरोगवान्नभवतीत्यर्थः ॥ नचान्यः
काशींविहायान्यत्रयातुंयत्नवान्यःसनरोरोगीनचकिंतुरोग्येव ॥ किंवक्तव्यंवाराणसींविहाययोन्यत्रगतःसरोगीभवतीतिभावः ॥ काशींविशिनष्टि ॥ सहायभूतांसकलस्यजंतोरिति ॥ जरायुजां
डजस्वेदजोद्भिज्जलक्षणस्यप्राणिमात्रस्यधर्मार्थकाममोक्षेषुसाहाय्यकर्त्रींमित्यर्थः ॥ ननुकथमस्याएतादृशंसामर्थ्यंतत्राह ॥ सुकृतैकराशिमिति ॥ सुकृतंचअःवासुदेवाख्योमोक्षश्च ॥ अकारो
वासुदेवःस्यादितिकोशात् ॥ सुकृतौपुण्यकैवल्येतयोरेकोमुख्योराशिःपुंजोयस्यांसातथातद्राशिरूपावाताम् ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ यद्वा यदिहेत्यनंतरोकारोनिषेधेयततामित्यनेनसंब
ध्यते ॥ तथाचायमर्थः ॥ यःकाशींविहायविहातुंअयततांनयतते ॥ काशीस्थित्यनुकूलमेवचेष्टतइत्यर्थः ॥ सनरोनरोगीभवति ॥ अन्यत्पूर्ववत् ॥ किंत्वस्मिन्पक्षेव्यवहितयोजनालकारव्य
त्ययकल्पनाचसोढव्या ॥ यद्वा यद्यदाइहसंसारे ॥ यद्वा यदियदा हइतिपादपूरणे ॥ नरोनरोगीप्राणांतिकरोगवान्नभवतितदाआईषत्कदाचित्काशींविहायकाशीस्थित्यनुकूलयोगक्षेमार्थं
अन्यत्रयातुंयततांयत्नंकरोतु ॥ हाइतिखेदेवा ॥ नचान्यःप्राणांतिकरोगीत्यथः ॥ कथंभूतांकाशीम् ॥ अनाशीःसुकृतैकराशिंनिष्कामपुण्यैकपुंजामित्यर्थः ॥ शेषंपूर्ववत् ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

वित्रस्तपापामिति ॥ अस्यायमर्थः ॥ मुक्ताजीवन्मुक्ताःविमुक्तांकाशींनपरित्यजंतीत्यन्वयः ॥ कायवाङ्मनोभिर्यावज्जीवमितिपरेरर्थः ॥ तत्रहेतुगर्भाणिविशेषणान्याह ॥ वित्रस्ताविध्वस्तापापापापहेतुत्वादविद्या ॥ यद्वा वित्रस्तानिपापानिकायवाङ्मनोजन्यानिदशविधानिययासातथाताम् ॥ त्रिदशैर्ब्रह्मादिभिर्दुरापामप्राप्याम् ॥ गंगैवसब्रह्मतदेवापोजलानियस्यांसातथाताम् ॥ योसौनिरंजनोदेवश्चित्स्वरूपीजनार्दनः ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयइतिवचनात् ॥ गंगायाःसत्यआसमंतात्आपोयस्यामितिवा ॥ भवःसंसारःसएवपाशोबंधनरज्जुस्तस्यशापांशस्त्रींछेत्रीमित्यर्थः ॥ भवपाशपाशामितिपाठेभवपाशस्यपाशांप्रतिबंधिकांनाशिकामित्यर्थः ॥ सर्वत्रहेतुमाह ॥ शिवाविमुक्तांमहादेवेनपार्वतीपरमेश्वराभ्यांवाअत्यक्तामित्यर्थः ॥ तथाचहरिवंशेउमांप्रतिईश्वरवचनम् ॥ नाहंवेश्मविमोक्ष्यामिअविमुक्तंहिमेगृहामित्यादि ॥ अमृतस्यकैवल्यमुक्ताफलस्यएकांमुख्यांशुक्तिम् ॥ मुक्तास्फोटःस्त्रियांशुक्तिरित्यमरः ॥ विमुक्तांब्रह्मांडासंबद्धांकैवल्यरूपांवा ॥ विमुक्तश्चविमुच्यतइतिश्रुतेः ॥ मुक्ताविमुक्ताइतिपाठेमुक्ताअविमुक्ताश्चनपरित्यज्यंतीत्यर्थः॥ १८॥ हंहोकिमंहइति॥अस्यायमर्थः ॥ हंहोभोजनाःयूयमंहोनिचिताअंहोभिरघैर्निचिताव्याप्ताःकिंअपितुव्याप्ताएव ॥ अंहोदुःखव्यसनेष्वघमित्यमरः ॥ अतएवप्रलब्धावंचिताः सुकृतेनविधात्रावेतिशेषः ॥ :किमित्याकांक्षायामाह ॥ वंहीयसामहीयसा ॥ महीयसेतिवापाठः ॥ आयासभरेणदूरदेशागमदुर्गाध्वशौल्किकतस्करादिजनितश्रमस्यखेदस्यभरेणपूरेणकाशींप्राप्यापि ॥ अस्याःप्राप्तेःसंभावनैवनास्तितथापिकेनचिद्भाग्योदयेननातिमहताश्रमेणप्राप्यापीत्यपिशब्दार्थः ॥ क्वचकुत्रचिद्गंतुमुद्युक्तायतः ॥ कथंभूतांकाशीम् ॥ प्रभूतपुण्यद्रविणैकपण्यामिति ॥ प्रभूतानिबहूनिपुण्यानितैरेवैकैःकेवलैःपण्यांक्रेयांप्राप्यामित्यर्थः ॥ १९ ॥ अहोइति ॥ जडताअज्ञता ॥ स्मेतिविस्मये ॥ रेरेइतिसाधिक्षेपसंबोधने ॥ रेरेजनाःकाशींपरित्यज्यकिमर्थंसंवेसंलयेपिस्थितिसमयेपीत्यपिशब्दार्थः ॥ स्पष्टमन्यत् ॥ २० ॥ रेरेइति ॥ अस्यायमर्थः ॥

वित्रस्तपापांत्रिदशैर्दुरापांगंगांसदापांभवपाशशापाम् ॥ शिवाविमुक्तामभृतैकशुक्तिंमुक्ताविमुक्तानपरित्यजन्ति ॥ १८ ॥ हंहोकिमंहोनिचिताःप्रलब्धा
बंहीयसायासभरेणकाशीम् ॥ प्रभूतपुण्यद्रविणैकपण्यांप्राप्याापिहित्वाक्वचगंतुमुद्यताः ॥ १९ ॥ अहोजनानांजडताविहायकाशींयदन्यत्रनयंतिचेतः ॥
परिस्फुरद्भंगजलाभिरामांकामारिशूलाग्रधृतांलयेपि ॥ २० ॥ रेरेभवेशोकजलैकपूर्णेपापेस्मलोकाःपतिताब्धिमध्ये ॥ विद्राणनिद्राणविरोधिपापांकाशीं
परित्यज्यतरिंकिमर्थम्॥२१॥नसत्पथेनापि नयोगयुक्त्यादानैर्नवानैवतपोभिरुग्रैः ॥ काशीद्विजाशीर्भिरहोसुलभ्याकिंवाप्रसादेनचविश्वभर्तुः ॥२२॥

मदुर्गाध्वशौल्किकतस्करादिजनितश्रमस्यखेदस्यभरेणपूरेणकाशींप्राप्यापि ॥ अस्याःप्राप्तेःसंभावनैवनास्तितथापिकेनचिद्भाग्योदयेननातिमहताश्रमेणप्राप्यापीत्यपिशब्दार्थः ॥ क्वचकुत्रचिद्गंतुमुद्युक्तायतः ॥ कथंभूतांकाशीम् ॥ प्रभूतपुण्यद्रविणैकपण्यामिति ॥ प्रभूतानिबहूनिपुण्यानितैरेवैकैःकेवलैःपण्यांक्रेयांप्राप्यामित्यर्थः ॥ १९ ॥ अहोइति ॥ जडताअज्ञता ॥ स्मेतिविस्मये ॥ रेरेइतिसाधिक्षेपसंबोधने ॥ रेरेजनाःकाशींपरित्यज्यकिमर्थंसंवेसंलयेपिस्थितिसमयेपीत्यपिशब्दार्थः ॥ स्पष्टमन्यत् ॥ २० ॥ रेरेइति ॥ अस्यायमर्थः ॥ सारेलोकाआलोचनकर्तारोपियूयंपतिताइत्याक्रोशतीत्यर्थः ॥ कथंभूतेभवे ॥ अब्धिमध्येसमुद्रमध्यवत्दुस्तरेइत्यर्थः ॥ पतिताब्धिमध्यइत्यत्रसंधिरार्षः ॥ पतथेतिपाठस्तुस्पष्टार्थः ॥ शोकजलेनएकेनमुख्येनकेवलेनवापूर्णेव्याप्ते ॥ पापेपापरूपेपापहेतुत्वाद्वापापे ॥ विद्राणानिविद्रावितानिनिर्वाणविरोधीनिपापानिययासातथाताम् ॥ पुनःकथंभूताम् ॥ तरिंनावम् ॥ भवार्णवोत्तारणनौस्वरूपामित्यर्थः ॥ स्त्रियांनौस्तरणिस्तरिरित्यमरः ॥ २१ ॥ नसत्पथेनेति ॥ अस्यायमर्थः ॥ सत्पथादिनाकाशीनसुलभ्याकिंकिंतुद्विजाशीर्भिर्योविश्वेश्वरस्यानुग्रहस्तेनैवेति ॥ एवार्थेवाशब्दः ॥ स्वतंत्रतावोभयोः ॥ अतोविश्वेश्वरस्यानुग्रहाभावादन्यत्रयांतीतिभावः ॥ सत्पथेनसदाचारेणवेदोक्तकर्मानुष्ठानेनेतियावत् ॥ योगयुक्त्यायोगोऽष्टांगादिस्तस्ययुक्तिर्युंजनंतेनयोगाभ्यासेनेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पष्टमन्यत् ॥ २२ ॥ ननुपुरुषार्थंचतुष्टयस्यान्यत्रापिविद्यमानत्वात्किमितिकाशीनत्याज्येत्याग्रहस्तत्राह ॥ धर्मस्त्विति ॥ अस्यायमर्थः ॥ तुशब्दआशंकाव्यावृत्त्यर्थः ॥ अन्यत्रसंपत्तिभरैरर्थ समूहैर्योधर्मउह्यतेप्राप्यते ॥ तथान्यत्रबहुदानभोगकैर्बहुदानानांभोगकैराभोगैर्विस्तारैरर्थभरैःकृत्वाकामैःसहयोऽर्थउह्यतेतथान्यत्रयोमोक्षउह्यतेतत्सर्वमर्थादिकंसचमोक्षएकोमुख्यःसायुज्याख्यइत्यर्थः॥ अत्रकाश्यांयथातथान्यत्रनचेतियोजना ॥ २३ ॥ काश्यांयथाधर्मादिकंतथान्यत्रनेत्यत्रहेतुमाह ॥ क्षेत्रंपवित्रमिति ॥ अस्यायमर्थः ॥ हियस्मात्यथाऽविमुक्तंक्षेत्रंपवित्रंपवित्रयत्यविद्यातत्कार्या न्मोचयतीतितथातथानान्यत् ॥ अन्यत्क्षेत्रांतरंतथानेत्यर्थः ॥ तत्रहेतुमाह ॥ यच्छ्रुतिभिःप्रयुक्तंयद्यस्माच्छ्रुतिभिर्वेदैरेवप्रयुक्तंसर्वक्षेत्रेभ्योऽविमुक्तमधिकंप्रतिपादितमित्यर्थः ॥ श्रुतिभिःप्रयुक्तमित्यन्यस्यव्यावृत्तिमाह ॥ नचधर्मशास्त्रैरिति ॥ उपसंहरति ॥ तस्मादिति ॥ शरण्यंशरणायहितम् ॥ सदायावज्जीवम् ॥ २४ ॥ श्रुतिप्रयुक्त त्वमेवाह ॥ सहोवाचेतिसार्धद्वाभ्याम् ॥ तत्रप्रथमेनसार्धेनाविमुक्तस्यस्वरूपमुच्यतेद्वितीयेनक्षेत्रांतरेभ्यश्चाधिक्यमितिविभागः ॥ सहोवाचेत्यस्यायमर्थः ॥ सप्रसिद्धोजा बालिर्जाबालायाअपत्यंजाबालिःआरुणेहेआरुणेइतिशिष्यंसंबोध्यउवाचेत्यन्वयः ॥ किमुवाचतदाह ॥ असिरिडामतेति ॥ इडानाडीतिशेषः ॥ असिर्नामनदीवरुणापिनद्येव तदंतस्तयोर्मध्यइत्यर्थः ॥ अविमुक्तकंकाशी ॥ स्वार्थेकः ॥ सोऽविमुक्तःकस्मिन्प्रतिष्ठितइतिवरणायांनाश्यांचमध्येप्रतिष्ठितइतिश्रुतेः ॥ २५ ॥

धर्मस्तुसंपत्तिभरैःकिलोह्यतेप्यर्थोहिकामैर्बहुदानभोगकैः ॥ अन्यत्रसर्वंसचमोक्षएकःकाश्यांनचान्यत्रतथाययथात्र ॥ २३ ॥ क्षेत्रंपवित्रंहियथाऽवि मुक्तंनान्यत्तथायच्छ्रुतिभिःप्रयुक्तम् ॥ नधर्मशास्त्रैर्नचतैःपुराणैस्तस्माच्छरण्यंहिसदाऽविमुक्तम् ॥ २४ ॥ सहोवाचेतिजाबालिरारुणेसिरिडामता ॥ वरणापिंगलानाडीतदंतस्त्वविमुक्तकम् ॥ २५ ॥ सासुषुम्णापरानाडीत्रयंवाराणसीत्वसौ ॥ तदत्रोत्क्रमणेसर्वजंतूनांहिश्रुतौहरः ॥ २६ ॥ तारकंब्रह्मव्या चष्टेतेनब्रह्मभवंतिहि॥एवंश्लोकोभवत्येषआहुर्वैवेदवादिनः॥२७॥भगवानंतकालेऽत्रतारकस्योपदेशतः॥अविमुक्तेस्थितान्जन्तून्मोचयेन्नात्रसंशयः॥२८॥

किंतदविमुक्तंतत्राह ॥ सासुषुम्णेति ॥ अविमुक्तस्यैवसुषुम्णाशब्देनोच्यमानस्यसेतिस्त्रीलिंगेनपरामर्शः ॥ ननुकावैवरणाकाचनाशीतिसर्वानिंद्रियकृतान्दोषान्वारयतितेनवरणाभवति सर्वानिंद्रियकृतान्पापान्नाशयतितेननाशीभवतीत्याथर्वणश्रुतौनाशीतिश्रूयते अत्रत्वासिरतःश्रुतिविरोधात्पुराणस्याप्रामाण्यमितिचेत्तन्न ॥ अस्यतिसर्वाणिपापानिक्षयतिनाशयतीत्यर्थैक्योपपत्तेः ॥ नामविकल्पोवा ॥ एतत्त्रयमसौवाराणसीत्यंगुल्यानिर्दिश्यते ॥ शरणे[1] त्वियम् पुरीतिचस्थलत्रयेपाठांतरेऽयमर्थः ॥ शीर्यतेनश्यतीतिशरणंशरीरंतस्मिन्शरणेशरीरेऽध्यात्मेऽसिरिडेत्यादिपूर्ववत् ॥ अधिदैवेतुपुनरियंपुरीवाराणसीतिविशेषः ॥ अयंभावः ॥ अध्यात्मेतावदिडापिंगलासुषुम्णेत्येतत्त्रयमविमुक्तंवाराणसी ॥ आधिदैवेऽसिवरणाविमुक्तमित्येतत्त्रयंवाराणसीअविमुक्तमिति ॥ श्रुतौ दक्षिणेकर्णे ॥ मुमुक्षोर्दक्षिणेकर्णेइतिश्रुतेः ॥ २६ ॥ काशीस्थानिभूतमात्राण्यंतकालेभगवान्मोचयतीत्यत्रब्रह्मविदांसंमतिमाह ॥ एवंश्लोकइति ॥ एवमुक्तार्थप्रतिपादकएषवक्ष्यमाणः श्लोकःपद्यंभवतीति वेदवादिनोवेदनंवेदःस्वप्रकाशश्चिदात्मातद्वादिनःपरमार्थनिरूपकाआहुरुक्तवंतइत्यर्थः ॥ २७ ॥ श्लोकंदर्शयति ॥ भगवानिति ॥ भगवान्श्रीरुद्रस्तारकस्यप्रणवस्य श्रीरा मषडक्षरमंत्रराजस्यवा ॥ तथाचाथर्वणश्रुतौश्रीरामवाक्यंविश्वेश्वरंप्रति ॥ अथसहोवाचश्रीरामः क्षेत्रेऽत्रतवदेवेशयत्रकुत्रापिवामृताः कृमिकीटादयोप्याशुमुक्ताःसंतुनचान्यथा अविमुक्तेतवक्षेत्रेसर्वे

१ सहोवाचेतिपूर्वश्लोकार्धेजाबालिरारुणेइत्यत्रजाबालिःशरीरेइति द्वितीयश्लोकपूर्वार्धे त्रयमित्यस्यस्थानेत्वियमिति त्वसावित्यस्यस्थानेपुरीतिचेत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

षांमुक्तिसिद्धये अहंसंनिहितस्तत्रपाषाणप्रतिमादिषु क्षेत्रेस्मिन्योर्चयेद्भक्त्यामंत्रेणानेनमांशिव ॥ ब्रह्महत्यादिपापेभ्योमोक्षयिष्यामिमाशुचः॥ त्वत्तोवाब्रह्मणोवापियेलभंतेषडक्षरम् ॥ जीवंतोमंत्रसिद्धाः स्युर्मुक्तामांप्राप्नुवंतिते ॥ मुमूर्षोर्दक्षिणेकर्णेयस्यकस्यापिवास्वयम् ॥ उपदेक्ष्यासिमन्मंत्रंसमुक्तोभविताशिवेति ॥ २८ ॥ गतिराश्रयः ॥२९॥ अन्यांक्षुद्राम् ॥ गवेषयेदन्वेषयेत्प्रार्थयेदित्यर्थः ॥३०॥ इत्थमितिव्यासोक्तिः ॥ पुराणाच्चपुरातनाद्वेदादितिवा ॥ ३१ ॥ श्रीकालराजंश्रीकालभैरवम् ॥ आपृच्छनायान्यत्रगंतुमाज्ञायाचनाय ॥ काशीश्वरात्प्राथ्र्येतिचेत्तत्राह ॥ यतस्त्वमेवकाशीपुर्याः प्रभुरीश्वरइति ॥ तथाचपंचक्रोशयात्रामाहात्म्येपार्वतींप्रतिविश्वेश्वरवचनम् ॥ अस्मिन्क्षेत्रेक्षणंकाश्यांस्वातंत्र्यंनहिमेसदा ॥ श्रीकालभैरवःकाश्यांसएवप्रभुरुच्यते ॥ ब्रह्मवैवर्तेच ॥ मयापिसततंयत्रकालराजाद्विबिभ्यता ॥ स्थीयतेसावधानेनकाश्यामानंदभोगिनेति ॥ ३२ ॥ काशीत्यागखेदाद्विलपति ॥: हाकालराजेति ॥ हाकष्टे ॥ हेकालराज प्रतिभूतम् भूताचतुर्दशी भूतांभूतांप्रतिप्रति

नाविमुक्तसमंक्षेत्रंनाविमुक्तसमागतिः ॥ नाविमुक्तसमंलिंगंसत्यंसत्यंपुनःपुनः ॥ २९ ॥ अविमुक्तंपरित्यज्ययोन्यत्रकुरुतेरतिम् ॥ मुक्तिंकरतलान्मुक्त्वा सोन्यांसिद्धिंगवेषयेत् ॥३०॥ इत्थंसुनिश्चित्यसुनिर्महात्माक्षेत्रप्रभावंश्रुतितःपुराणात् ॥ श्रीविश्वनाथेनसमंनलिंगंपुरीनकाशीसदृशीत्रिकोट्याम्॥३१॥ श्रीकालराजंचततःप्रणम्यविज्ञापयामाससुनीशवर्यः ॥ आपृच्छनायाहमिहागतोस्मिश्रीकाशिपुर्यास्तुयतःप्रभुस्त्वम् ॥ ३२ ॥ हाकालराजप्रति भूतमत्रप्रत्यष्टमिप्रत्यवनीसुतार्कम् ॥ नाराधयेमूलफलप्रसूनैःकिंमय्यनागस्यपराधदृक्स्याः ॥ ३३ ॥ हाकालभैरवभवानभितोभयार्तान्माभैष्टचे तिभणनैःस्वकरंप्रसार्य ॥ मूर्तिंविधायविकटांकटुपापभोक्रींवाराणसीस्थितजनान्परिपातिकिंन ॥३४॥ हेयक्षराजरजनीकरचारुमूर्तेश्रीपूर्णभद्रसुतनाय कदंडपाणे ॥ त्वंवैतपोजनितदुःखमवैषिसर्वंकिंमांबहिर्नयसिकाशिनिवासिरक्षिन् ॥ ३५ ॥ त्वमन्नदस्त्वंकिलजीवदातात्वंज्ञानदस्त्वंकिलमोक्षदोपि ॥ त्वमंत्यभूषांकुरुषेजनानांजटाकलापैरुरगेंद्रहारैः ॥ ३६ ॥ गणौत्वदीयौकिलसंभ्रमोद्भ्रमावत्रस्थवृत्तांतविचारकोविदौ ॥ संभ्रांतिमुत्पाद्यपरामसाधून्क्षे त्रात्क्षणंदूरयतस्त्वमुष्मात् ॥ ३७ ॥ शृणुप्रभोढुंढिविनायकत्वंवाचंमदीयांतुरटाम्यनाथवत् ॥ त्वत्स्थाःसमस्ताःकिलविघ्नपूगाःकिमत्रदुर्वृ त्तवदास्थितोहम् ॥ ३८ ॥

भूतंप्रतिचतुर्दशीत्यर्थः ॥ प्रत्यष्टमि अष्टमीमंष्टमींप्रतिप्रत्यष्टमि ॥ प्रत्यवनीसुतार्कम् अवनीसुतोमंगलोऽर्कःसूर्यः ॥ ताभ्यांतयोर्वासरेलक्ष्येते ॥ अवनीसुतार्कौअवनीसुतार्कौप्रतिप्रत्यवनीसुतार्कम् प्रतिमंगलवासरंप्रतिरविवासरमित्यर्थः ॥ मूलफलपुष्पैःकिमहंनाराधयेआराधनंकिंनकृतवानस्मिअपितुकृतवानेव ॥ अतोऽनागसिअपराधशून्येमयिअपराधदृक्अपराधेदृक्दृष्टिर्यस्यसतथातथाभूतः किंस्याःभवेः ॥ काकाक्षिन्यायेनकिंशब्दस्योभयत्राप्यन्वयः ॥ केनदोषेणकाशीतोमांनिष्कासयसीत्यर्थः ॥ ३३ ॥ भणनैःशब्दैः ॥ विकटांभयंकराम् ॥ कटुपापभोक्रींतीव्रपापनाशिनीम् ॥ विकटोत्कटपापभोक्रीमितिक्वचित्पाठः ॥ नपरिपातिकिंअपितुपरिपात्येवेत्यर्थः ॥ ३४ ॥ एवंश्रीकालभैरवाग्रतोविलप्यश्रीदंडपाणेरग्रतोविलपति ॥ हेयक्षेति ॥ नायकहेश्रेष्ठ ॥ ३५ ॥ अन्नदश्चतुर्विधान्नदः ॥ अतएवजीवदाता ॥ अंत्यभूषांमर्त्यदेहत्यागावसरभूषाम् ॥ ३६ ॥ संभ्रांतिंसंमोहंउद्वेगंवा ॥ अमुष्मात्क्षेत्रादित्यन्वयः ॥ दूरयतोमनुष्यानितिक्वचित्पाठः ॥ ३७ ॥ श्रीगणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंप्रार्थयति ॥ शृण्विति ॥ शृणुष्वभोइतिपाठांतरेआत्मनेपदमार्षम् ॥ रटामिप्रलपामि ॥ विघ्नैस्त्वंदूरीक्रियसेकिंमयाशक्यमित्यतआह ॥ त्वत्स्थाइति ॥ त्वयितिष्ठंतीतित्वत्स्थास्त्वत्प्रेर्यास्त्वदधीना इत्यर्थः ॥ समस्ताःसमग्राः ॥ त्वच्छासनस्थाइतिक्वचित्पाठः ॥ विघ्नपूगा विघ्नसमूहाः ॥ अतस्तैःकिमर्थंमांबहिर्निष्कासयसीत्यभिप्रायः ॥ ननुदुर्वृत्तस्यविघ्नसमूहैर्मयाअन्येनवाक्रियमाणंनिष्कासनं युक्तमेवेत्यतआह ॥ किमत्रेति ॥ दुर्वृत्तवत्किमत्राविमुक्तेऽहमास्थितःस्थितोस्मिअपितुनैवेत्यर्थः ॥ ३८ ॥ मोदादिपंचविनायकांश्चिंतामण्यादींश्चप्रार्थयति ॥ शृण्वंत्वमीइति ॥ अमीमोद प्रमोदामोदसुमोददुर्मोदाः ॥ चिंतामण्यादयएववापंच ॥ आशागजइत्याख्याययोस्तावाशागजाख्यौ ॥ तौप्रसिद्धौ ॥ आशागजाघोरविनायकावितिपाठेगजश्चघोरश्चगजाघोरौ ॥ देवताद्वंद्वेचेति दीर्घः ॥ तौचतौविनायकौचतथातावित्यर्थः ॥ किंत्वस्मिन्पक्षेचिंतामणिरितिकपर्दिनोविशेषणम् ॥ भक्तानांचिंतामणिरिवचिंतामणिःसर्वार्थपूरकइत्यर्थः ॥ ३९ ॥ श्रोतव्यमाह ॥ परापवादइति ॥ एपक्काशीत्यागलक्षणःपाकःफलंकःकस्मात्पापाज्जातइत्यर्थः ॥ ४० ॥ ननुनिषिद्धाचरणाभावेपिविहिताकरणप्रत्यवायात्काशीत्यागइत्यतआह ॥ गंगेति ॥ सदाप्रत्यहंसर्वदावाध्यानादिनापरि सेविता ॥ त्ववगाहितेतिक्वचित्पाठः ॥ विशेषेणपापिनोनरकेषुपाचयतिविशेषेणपाकःपचनंवास्मादितिविपाकोऽत्राधर्मः ॥ ४१ ॥ विशालाक्ष्याद्यादेवताःप्रार्थयति ॥ मातरिति ॥ हेज्येष्ठेशिज्ये

शृण्वंत्वमीपंच विनायकाश्चचिंतामणिश्चापिकपर्दिनामा ॥ आशागजाख्यौचविनायकौतौशृणोत्वसौसिद्धिविनायकश्च ॥ ३९ ॥ परापवादोनमया किलोक्तःपरापकारोपिमयाकृतोन ॥ परस्वबुद्धिःपरदारबुद्धिःकृतामयानात्रकएषपाकः ॥ ४० ॥ गंगात्रिकालंपरिसेवितामयाश्रीविश्वनाथोपिसदाविलोकितः ॥ यात्राःकृतास्ताःप्रतिपर्वसर्वतःकोयंविपाकोममविघ्नहेतुः ॥ ४१ ॥ मातर्विशालाक्षिभवानिमंगलेज्येष्ठेशिसौभाग्यविधानसुंदरि ॥ विश्वेविधे विश्वभुजेनमोस्तुतेश्रीचित्रघंटेविकटेचदुर्गिके ॥ ४२ ॥ साक्षिण्यएताःकिलकाशिदेवताःशृण्वंतुनस्वार्थमहंव्रजाम्यतः ॥ अभ्यर्थितोदेवगणैःकरोमिकिंपरोपकारायनकिंविधीयते ॥ ४३ ॥ दधीचिरस्थीनिनकिंपुराददौजगत्त्रयंकिंनददेऽर्थिनेबलिः ॥ दत्तःस्मर्किंनोमधुकैटभौशिरोबभूवताक्ष्योंपिचविष्णुवाहनम् ॥ ४४ ॥ आपृच्छ्यसर्वान्समुनीन्मुनीश्वरःसबालवृद्धानपितत्रवासिनः ॥ तृणानिवृक्षांश्चलताःसमस्ताःपुरींपरिक्रम्यचनिर्ययौच ॥४५॥

ष्ठाचासौईशीचेतिज्येष्ठेशि ज्येष्ठयासहईशीतिवा ॥ तत्रज्येष्ठागौरी ॥ अलक्ष्मीरितिकेचित् ॥ ईशीईशानातस्याः संबोधनेहेज्येष्ठेशिहेज्येष्ठेहेईशिइत्यर्थः ॥ ज्येष्ठेसिइतिपाठेऽकारप्रश्लेषः ॥ अस्यानद्याअधिष्ठात्री देवताऽसीतस्याःसंबोधनेहेअसीति ॥ ज्येष्ठेन्नेतिपाठेप्यकारप्रश्लेषः ॥ तदान्नसौभाग्ययोर्विधानेसंपादनेसुंदरियोग्येदक्षेइतिज्येष्ठायाविशेषणम् ॥ चकारादन्यासांकाशीस्थ देवतानां संग्रहः ॥ ४२ ॥ किंतत्प्रार्थ्यंतदाह ॥ नस्वार्थमिति ॥ अतोऽविमुक्तात् ॥ ननुस्वप्रयोजनंचेन्नास्तिकिमितितर्हिगच्छसितत्राह ॥ अभ्यर्थितइति ॥ नन्वभ्यर्थितेनापिकिंकाशीत्या ज्यातत्राह ॥ परोपकारायेति ॥ ४३ ॥ परोपकारार्थमकर्तव्यमपिक्रियतइत्यत्रदृष्टांतमाह ॥ दधीचिरिति ॥ यद्वा काशीतोव्रजनेहेतुद्वयंअभ्यर्थनापरोपकारश्च तत्रोभयत्राकरणीयस्यापिकरणे दृष्टांतमाह ॥ दधीचिरिति ॥ उक्तंच ॥ त्वचंकर्णःशिबिर्मांसंजीवंजीमूतवाहनः ॥ ददौदधीचिरस्थीनिकिंनदेयंमहात्मनामिति ॥ अर्थिनेविष्णवेदत्तःस्मेत्यत्राप्यस्यान्वयः ॥ शेषपादेसइतिक्वचित्पाठः सचिंत्यः ॥ सताक्ष्यइतिवासंबंधः ॥ तत्राद्योदृष्टांतःप्रार्थनोपकारयोः ॥ अवशिष्टंत्रयंतुप्रार्थनामात्रेइतिभेदः ॥ ४४ ॥ उपसंहरति ॥ आपृच्छ्येति ॥ व्यासोक्तिरियम् ॥ पुरींपरिक्रम्यचक्षेत्रं

CC-0. In Public Domain. Digitization by eGangotri

प्रदक्षिणीकृत्य ॥ तथाचवक्ष्यतिकालराजाध्यायेऽत्रैव ॥ अतःप्रदीक्षणीकृत्यपूजनीयापुरीत्विरथीमीत ॥ वामनपुराणेप्रह्लादतीर्थयात्रायाम् ॥ प्रदक्षीणीकृत्यपुरींपूज्याविमुक्तकेशवौ ॥ लोलंदिवाकरं दृष्ट्वाततोमधुपुरींययाविति ॥ चकारादंतर्गृहयात्रांविधायेत्यर्थः ॥ अंतिमश्चकारः समुच्चयार्थआहचेतिसमुच्चिनोति ॥ निर्ययौवहिरितिक्वचित्पाठः ॥ ४५ ॥ यदाहतन्निर्दिशतिश्लोकद्वयेन ॥ प्रोषितस्येति ॥ चंद्रमौलिंचंद्रशेखरमवलोक्ययास्यतोगच्छतइहसंसारेकस्यजनस्यसिद्धिर्यमर्थमुद्दिश्यगच्छतितस्यार्थस्यसिद्धिर्नपरिस्फुरेन्नोल्लसेन्नभवेदपितुस्फुरेदेवेत्यन्वयः ॥ पुरःस्फुरेदिति क्वचित्पाठः ॥ कथंभूतस्य ॥ परितोलक्षणैःसर्वप्रकारैर्लक्षणैःसल्लक्षणैःशकुनादिलक्षणैर्वाप्रोषितस्यप्रदग्धस्यरहितस्येतियावत् ॥ प्रपूर्वस्यउषदाहइत्यस्यरूपम् ॥ प्रोज्झितस्येतिक्वचित्पाठः ॥ पुनःकथंभूतस्य ॥ नीचवर्त्मनिअसन्मार्गेपरिवर्तितुंशीलंयस्यसतंथातस्यापीत्यर्थः ॥ वाशब्दश्चार्थेसमुच्चयवाची ॥ ४६ ॥ गुल्मोगुच्छः ॥ पापंनचरंति अन्यत्रापिनचरंतिनयांतीत्यर्थः ॥ वयंचराणांजंगमानांप्रथमाःप्रथमोत्पन्नाब्राह्मणाःश्रेष्ठाइत्यर्थः ॥ एवंभूतानप्यस्मान्धिगस्तु ॥ कीदृशानस्मान् ॥ हाकष्टे वाराणसींविहायगच्छतोऽन्यत्रगमनंकुर्वतः ॥ गच्छतइत्यत्रयामइति क्वचित्पाठःसनच्छंदोभंगभियाकक्षीकर्तव्यः ॥ ४७ ॥ असिमितिव्यासोक्तिः ॥ उपस्पृश्याचम्यस्नात्वाच ॥ हिशब्दात्संगमेश्वरंप्रपूज्यवा ॥ प्रासादमालाः प्रासादसमूहान् ॥ किमुवाचतदाह ॥

प्रोषितस्यपरितोपिलक्षणैर्नीचवर्त्मपरिवर्तिनोपिवा ॥ चंद्रमौलिमवलोक्ययास्यतःकस्यसिद्धिरिहनोपरिस्फुरेत् ॥४६॥ वरंहिकाश्यांतृणवृक्षगुल्मकाश्चरं तिपापंनचरंतिनान्यतः ॥ वयंचराणांप्रथमाधिगस्तुनोवाराणसींहाद्यविहायगच्छतः ॥ ४७ ॥ असिंह्युपस्पृश्यपुनःपुनर्मुनिःप्रासादमालाःपरितोविलो कयन् ॥ उवाचनेत्रेसरलेप्रपश्यतंकाशींयुवांक्वकपुरीत्वियंबत ॥ ४८ ॥ स्वैरंहसंत्वद्यविधायतालिकांमिथःकरेणापिकरंप्रगृह्य ॥ सीमाचराभूतगणा व्रजाम्यहंविहायकाशींसुकृतैकराशिम् ॥ ४९ ॥ इत्थंविलप्यबहुशःसमुनिस्त्वगस्त्यस्तत्क्रौंचयुग्मवदहोअबलासहायः ॥ मूर्च्छामवापमहतींविरही वजलपन्हाकाशिकाशिपुनरेहिचदेहिदृष्टिम् ॥ ५० ॥

हेनेत्रेहेचक्षुषी ॥ कथंभूते ॥ सरलेस्निग्धेप्रसन्नेइतियावत् ॥ काशींप्रपश्यतंप्रकर्षेणावलोकयतम् ॥ यतोयुवांकइयंपुरीकाशीक्वकुत्र ॥ वतेतिखेदे ॥ पुनर्मेलनंतुदुर्घटमितितुशब्दस्यार्थः ॥ ४८ ॥ स्वैरमिति ॥ व्रजाम्यहंअहंगच्छामि ॥ व्रजत्यसाविविति क्वचित्पाठः ॥ ४९ ॥ इत्थमिति ॥ सोऽगस्त्योमुनिर्मननशीलोपिवहुश इत्थंविलप्यमूर्छामवापेत्यन्वयः ॥ किंकुर्वन् ॥ हाइतिखेदे ॥ हेकाशिहेकाशिपुनरेहिदृष्टिंदर्शनंचदेहीतिजल्पन् ॥ हाकासीतिक्वचित्पाठः ॥ कीदृशींदृष्टिम् ॥ महतींमहत्तराम् मुक्त्यैकसाधनमित्यर्थः ॥ यद्वा मूर्छांविशिनष्टि ॥ महतीमिति ॥ महत्त्वंद्योतयन्न गस्त्यंविशिनष्टि ॥ अवलासहायइति ॥ अयंभावः ॥ अन्योपिविरहीकांताविरहादेवमूर्छांप्राप्नोति अयंतुअवलासहायोपि अतोमहतींअचिकित्स्यामित्यर्थः ॥ वहुजल्पनेदृष्टांतस्तत्क्रौंचयुग्मवदिति ॥ २७ ॥ तच्चतत्क्रौंचयुग्मंक्रुङ्युग्मंचतत्तथातद्वदिति ॥ क्रुङ्क्रौंचोथेत्यमरः ॥ तच्छब्दोयंप्रसिद्धार्थाभिधायकः ॥ प्रसिद्धत्वंचास्ययत्क्रौंचमिथुनादित्यादिरामायणादौबोद्धव्यम् ॥ यथाचतत्रनिषादेनशरेण विद्धंभूमौपतितंक्रौंचंदृष्ट्वाक्रौंचीअत्यार्तस्वरंविललापतथाकाशीविरहाख्येनव्याधेनस्वोद्भूतेनशोकाख्येनशरेणपीडितंभूमौपतितंभर्तारंदृष्ट्वालोपामुद्राविललापेत्यर्थः ॥ तथाचरामायणे ॥ ततःसतमसातीरे विचरंतमभीतवत् ॥ ददर्शक्रौंचयोस्तत्रमिथुनंचारुदर्शनम् ॥ तस्माच्चमिथुनादेकमागत्यानुपलक्षितः ॥ जघानवद्धानुशयोनिषादोमुनिसंनिधौ ॥ तंशोणितपरीतांगंचेष्टमानंमहीतले ॥ दृष्ट्वाक्रौंचीरुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्ताकरुणंखेपरिस्रमेदिति ॥ मूर्छाप्राप्तौदृष्टांतमाह ॥ विरहीवेति ॥ ५० ॥ स्थित्वेतिव्यासोक्तिः ॥ यावोगच्छावइत्युवाचेतिशेषः ॥ कठिनतांस्मारयति ॥ किंनस्मरेरिति ॥ त्र्यक्षंप्रहित्यत्रिलोचन
मुद्दिश्यमदनंप्रस्थाप्य ॥ प्रत्दृत्येतिपाठेकामद्वारातद्बाणैर्विद्ध्वामदनंप्रतियदकारीतिव्याख्येयम् ॥ तैर्देवैः ॥ ५१ ॥ यावदिति ॥ खेदात्त्रिचतुराणिपदानियावन्मुनिर्गच्छेत्तावद्धरापृथिवीभयभरा
दिवभयमेवभरोभयभरस्तस्मादिवसंचुकोचसंकुचितासीदित्यन्वयः ॥ कथंभूतः ॥ प्रस्वेदोदकसीकरैरंचितःपूजितःशोभितोभालदेशोयस्यसः ॥ कस्मात्संचुकोचतत्राह ॥ प्रत्युद्गमेति ॥ अयंभावः ॥
एतावद्दिनंतावदयंकाश्यांस्थितवानधुनामय्यागतस्याभ्युत्थानाद्यकरणान्ममनाशोभविष्यतीतिभयभरादिवपृथ्वीसंकुचितावभूवेति ॥ तथाचमनुः ॥ ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआयति ॥ अभ्यु

स्थित्वाक्षणंशिवशिवेतिशिवेतिचोक्त्वायावःप्रियेतिकठिनाहिदिवौकसस्ते ॥ किंनस्मरेस्त्रिजगतीसुखदानदक्षंत्र्यक्षंप्रहित्यमदनंयदकारितैस्तु ॥ ६१ ॥
यावद्व्रजेत्त्रिचतुराणिपदानिखेदात्स्वेदोदबिंदुकणिकांचितभालदेशः ॥ प्रत्युद्गमाऽकरणतःकिलमेविनाशस्तावद्धराभयवरादिवसंचुकोच ॥ ६२ ॥
तपोयानमिवारुह्यनिमेषार्धेनवैमुनिः ॥ अग्रेददर्शतंविंध्यंरुद्धांबरमथोन्नतम् ॥ ६३ ॥ चकंपेचाचलस्तूर्णंदृष्ट्वेवाग्रस्थितंमुनिम् ॥ तमगस्त्यंसपत्नींकिंवाता
पीत्वलवैरिणम् ॥ ६४ ॥ तपःक्रोधसमुत्थाभ्यांकाशीविरहजन्मना ॥ प्रलयानलवत्तीव्रंज्वलंतंत्रिभिरग्निभिः ॥ ६५ ॥ गिरिःखर्वतरोभूत्वाविविक्षुरवनी
मिव ॥ आज्ञाप्रसादःक्रियतांकिंकरोस्मीतिचाब्रवीत् ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ विंध्यसाधुरसिप्राज्ञमांचजानासितत्त्वतः ॥ पुनरागमनंचेन्मे
तावत्खर्वतरोभव ॥ ६७ ॥ इत्युक्त्वादक्षिणामाशांसनाथामकरोन्मुनिः ॥ निजैश्चरणविन्यासैस्तयासाध्व्यातपोनिधिः ॥ ६८ ॥ गतेतस्मिन्मु
निवरेवेपमानस्तदागिरिः ॥ पश्यत्युत्कंठमिवचगतश्चेत्साध्वभूत्ततः ॥ ६९ ॥ अद्यजातःपुनरहंनशप्तोयदगस्तिना ॥ नमयासदृशोधन्यइतिमेने
सर्वैगिरिः ॥ ६० ॥ अरुणोपिचतत्कालेकालज्ञोऽश्वानकालयत् ॥ जगत्स्वास्थ्यमवापोच्चैःपूर्ववद्भानुसंचरैः ॥ ६१ ॥ अद्यश्वोवापरश्वोवाप्यागमिष्य
तिवैमुनिः ॥ इतिचिंतामहाभारैर्गिरिराक्रांतवत्स्थितः ॥ ६२ ॥ नाद्यापिमुनिरायातिनाद्यापिगिरिरेधते ॥ यथाखलजनानांहिमनोरथमहीरुहः ॥ ६३ ॥
विवर्धिपतियोनीचःपरासूयांसमुद्वहन् ॥ दूरेतद्वृद्धिवार्ताऽस्तांप्राग्वृद्धेरपिसंशयः ॥ ६४ ॥

त्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यतइति ॥ भरभयादिवेतिक्वचित्पाठः ॥ ५२॥ ५३ ॥ चकंपेचस्वेदरोमोद्गमादिकंचदधावितिचकारस्यार्थः ॥ ५४ ॥ तपइति ॥ पुनःकथंभूतम् ॥ त्रिभिरग्निभिर्ज्व
लंतम् ॥ केतेऽग्नयस्तानाह ॥ तपइति ॥ काशीविरहाज्जन्मयस्यतेनाग्निना ॥ ५५ ॥ ५६ ॥ साधुरसिप्राज्ञेतिचोपहासः ॥ चेद्यावत् ॥ ५७ ॥ ५८ ॥ उत्कंठमूर्ध्वग्रीवंयथास्यात्तथापश्यति
अपश्यत् ॥ पश्येदितिक्वचित्पाठः ॥ किमितिपश्यतितत्राह ॥ गतश्चेदिति ॥ चेद्यदि ॥ ततस्तदा ॥ उत्कंठइवचाहाद्येत्यन्यत्रपाठः ॥ ५९ ॥ यद्यस्मात् ॥ ६० ॥ अकालयत्अचालयत्
प्रेरयामासेतियावत् ॥ ६१ ॥ ६२ ॥ एवतेवर्धते ॥ मनोरथएवमहीरुहोवृक्षः ॥ ६३ ॥ अस्तुतावद्विंध्यस्यागंतुकीवृद्धिः प्रागवृद्धिरपिसंशयितेतिदृष्टांतेनाह ॥ विवर्धिषतीति ॥ विवर्धिष

CC-0. In Public Domain. Digitization by eGangotri

तिवर्धितुमिच्छति ॥ ६४ ॥ पूर्वसंशयमात्रमुक्तमिदानींदुष्टानांप्राक्सिद्धामनोरथानश्यंत्येवेत्याह ॥ मनोरथाइति ॥ फलितमाह ॥ तेनेति ॥ तेनखलानांमनोरथनाशनेन ॥ विश्वेशेनागस्त्या
दिरूपेणरक्षितंपालितम् ॥ ६५ ॥ पूर्वोक्तमर्थंसदृष्टांतंकथयन्प्रकृतंनिगमयति ॥ विधवानामितित्रयेण ॥ यथाविगतभर्तृकाणांकुचाउच्चैर्यथास्यात्तथाहृदिवार्धित्वातत्रैवहृदिविलीयंतएवनस्वेषांपरेषां
वाउपकारायभवंतितथाखलानांमनोरथाइत्यर्थः ॥६६ ॥ यथाकन्नदीकुत्सितानदीअल्पवृष्ट्याकूलंकषास्वतीरभंजिकाभवतितथाखलस्याल्पवर्षेणअल्पकामवृष्ट्यायाऋद्धिःसमृद्धिःसंपत्तिरितियावत् ॥
सास्वकुलंकषास्वकुलनाशिकाभवतीत्यर्थः ॥ कुन्नदीतिक्वचित्पाठःसचिंत्यः ॥ ६७ ॥ योऽन्यसामर्थ्यमविज्ञायस्वसामर्थ्यंदर्शयतिसयथोपहासंप्राप्नोतितथायंविंध्योपीत्यर्थः ॥ ६८ ॥
॥ ६९ ॥ उदीचींदिशंस्पृशतीत्युदीचीदिक्स्पृक्तम् ॥ उदीचीदिक्चरामितिक्वचित्पाठः ॥ मातरिश्वनंवायुम् ॥ ह्रस्वश्छांदसः ॥ पृच्छेत्पृच्छति ॥ ७० ॥ हेलोपामुद्रेवाराणस्याःसाप्रसिद्धामुद्रा

मनोरथानसिद्ध्येयुःसिद्धानश्यंत्यपिध्रुवम् ॥ खलानांतेनकुशलिविश्वंविश्वेशरक्षितम् ॥ ६५ ॥ विधवानांस्तनायद्वद्धृद्येवविलयंतिच ॥ उन्नम्यो
न्नम्यतत्रोच्चैस्तद्वत्खलमनोरथाः ॥ ६६ ॥ भवेत्कूलंकषायद्वदल्पवर्षेणकन्नदी ॥ खलर्धिरल्पवर्षेणतद्वत्स्यात्स्वकुलंकषा ॥ ६७ ॥ अविज्ञायान्यसा
मर्थ्यंस्वसामर्थ्यंप्रदर्शयेत् ॥ उपहासमवाप्नोतितथैवायमिहाचलः ॥ ६८ ॥ ॥ व्यासउवाच ॥ ॥ गोदावरीतटंरम्यंविचरन्नपिवैमुनिः ॥ नतत्याजचतं
तापंकाशीविरहजंपरम् ॥ ६९ ॥ उदीचीदिक्स्पृशमपिसमुनिर्मातरिश्वनम् ॥ प्रसार्यबाहूसंश्लिष्यकाश्याःपृच्छेदनामयम् ॥ ७० ॥ लोपामुद्रे
नसामुद्राकापीहजगतीतले ॥ वाराणस्याःप्रदृश्येततत्कर्तानयतोविधिः ॥ ७१ ॥ क्वचित्तिष्ठन्क्वचिज्जल्पन्क्वचिद्धावन्क्वचित्स्खलन् ॥ क्वचिचो
पविशंश्चेतिबभ्रामेतस्ततोमुनिः ॥ ७२ ॥ ततोव्रजन्ददर्शाग्रेपुण्यराशिस्तपोधनः ॥ चंचच्चंद्रशताभासांभाग्यवानिवसुश्रियम्[1] ॥ ७३ ॥ विजित्यभानु
नाभानुंदिवापिसमुदित्वराम् ॥ निर्वापयंतीमिवतांस्वचेतस्तापसंततिम् ॥ ७४ ॥

मुदंहर्षंरातीतिमुद्रारचनापरिपाटीकापिनिरुपमा ॥ क्वापीतिक्वचित् ॥ यद्वा मुद्रामुद्रिकालिंगंचिह्नमितियावत् ॥ इहब्रह्मांडमध्येजगतीतलेकुत्रापिनदृश्यते ॥ यतस्तस्याःकर्ताविधिर्ब्रह्मानेत्यर्थः ॥
तथाचवक्ष्यतिब्रह्मास्वयमेव ॥ मयासृष्टानिविप्रेंद्रभुवनानिचतुर्दश ॥ अस्याःपुर्याविनिर्मातास्वयंविश्वेश्वरःप्रभुरिति ॥ ७१ ॥ ७२ ॥ ततइति ॥ ततस्तदनंतरंतत्रगोदावरीतीरप्रदेशेव्रजंस्तपोधनोऽ
गस्त्योमहालक्ष्मींसुचिरंयथास्यात्तथास्थितांददृशेददर्शेतितृतीयेनान्वयः ॥ कथंभूताम् ॥ चंचच्चंद्रशताभासांचंचदुच्छलद्यच्चंद्रशतंतस्येवासमंततोभासोदीप्तिर्यस्याःसातथाताम् ॥ कांकइव ॥
सुश्रियंशोभनांलक्ष्मींभाग्यवानिव ॥ पुण्यवान्यथापश्यातितथेत्यर्थः ॥ अथवैवंयोजना ॥ ततस्तदनंतरंतपोधनोगस्त्याग्रेप्रेथमतःसुश्रियंशोभनप्रभांश्रीगात्रतेजःसमूहमित्यर्थः ॥ ददर्श
पश्चात्तत्रतस्यांसुश्रियांदृष्टायांसत्यामाधारभूतायांवाअगस्त्योमहालक्ष्मींददर्शेति शेषंपूर्ववत् ॥ पाठांतरेस्वीयांस्वेष्टदेवतांश्रियमितिव्याख्येयम् ॥ ७३ ॥ विजित्येति ॥ पुनःकथंभूताम् ॥

[1] स्वश्रियमित्येवंरूपे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भानुनादीधित्या ॥ भानुःकरोमरीचिःस्त्रीपुंसयोर्दीधितिःस्त्रियामित्यमरः ॥ भानुंसूर्यंविजित्यविशेषेणजित्वासमुदित्वरांसम्यगुदयंतींसम्यक्प्रकाशमानामित्यर्थः ॥ तांदैत्यास्त्रजनितांस्वचेतस्ता
पसंततिंस्वमनस्तापपरंपरांनिर्वापयंतींनिराकर्तुंप्रवर्तमानामिवेत्युत्प्रेक्षा ॥ निर्वापयितुमिच्छामिदैत्यास्त्रैस्तापितांतनुमित्यग्रेवक्ष्यमाणत्वात् ॥ अगस्त्यपरोवास्वशब्दस्तदातांकाशीवियोगजांस्वचेतस्ता
पसंततिमितिव्याख्येयम् ॥ ७४ ॥ ७५ ॥ रात्राविति ॥ तत्तस्मात्कारणात्तत्रकोलापुरेऽध्युषितांस्थितामिवेतिपुनरुत्प्रेक्षा ॥ तस्मात्कस्मात् ॥ क्षीरोदेपितुर्गृहेमंदरस्यपर्वतस्यामृतोत्पत्त्यर्थं
कृतमंथानदंडस्यत्रासात्तज्जनितशब्दत्रासात्तच्चूर्णनत्रासाद्वेत्यर्थः ॥ ननुतथापिपद्मालयत्वात्पद्मेस्थास्यतितत्राह ॥ रात्राविति ॥ रात्रौरात्रिविषयेपद्मेषुसंकोचोमुद्रीभावोयतः ॥ ननुतर्हिचंद्रम
सिस्थास्यतितत्राह ॥ दर्शेष्विति ॥ दर्शेष्वमावास्यासुअब्जश्चंद्रःक्वचिद्व्रजेदहश्यतांगच्छेदित्यर्थः ॥ अब्जोजैवातृकःसोमइत्यमरः ॥ अतस्तादृक्स्थानांतराभावात्तत्राध्युषितामिवेत्युत्प्रेक्षा
॥ ७६ ॥ यदारभ्येति ॥ यदित्यव्ययं तथातदित्यपि ॥ यत्यंकालमारभ्यएनांलक्ष्मींमानतःसंमानतोवक्षसिदधारभार्यात्वेनस्वीकृतवान् ॥ तत्रमानंसूचयन्दधारेत्यनेनाकांक्षितंकर्तारमाह ॥
माधवइति ॥ मालक्ष्मीस्तस्याधवोभर्तेत्यर्थः ॥ तत्तंकालमारभ्यनूनंनिश्चितंस्थिताम् ॥ सपत्नीसरस्वती ॥ नारायणमहंवंदेगरुडोयस्यवाहनम् ॥ शंखचक्रगदाहस्तेयस्यभार्यासरस्वतीतिव
चनात् ॥ ग्रोत्प्लुष्टाज्ञानकूटेहरिनिजदयितेदेविसंसारसारेइतिसरस्वतीस्तोत्रेपाद्मवचनाच्च ॥ धरणिर्वा ॥ यदाभूद्भार्गवोरामस्तदाभूद्धरणीत्वियमितिवैष्णवोक्तेः ॥ श्रियाशातकुंभद्युतिस्निग्ध

तत्रागस्त्योमहालक्ष्मींददृशेसुचिरंस्थिताम् ॥७५॥ रात्रावब्जेषुसंकोचोदर्शेष्वब्जःक्वचिद्व्रजेत्॥क्षीरोदेमंदरत्रासात्तदत्राध्युषितामिव ॥७६॥ यदारभ्यद
धारैनांमाधवोमानतःकिल ॥ तदारभ्यस्थितांनूनंसपत्नीर्ष्यावशादिव ॥७७॥त्रैलोक्यंकोलरूपेणत्रासयंतंमहासुरम् ॥ विनिहत्यस्थितांतत्ररम्येकोलापुरे
पुरे ॥७८॥ संप्राप्याथमहालक्ष्मींमुनिवर्यःप्रणम्यच ॥ तुष्टाववाग्भिरिष्टाभिरिष्टदांहृष्टमानसः ॥ ७९ ॥ अगस्तिरुवाच ॥ ॥ मातर्नमामिकमले
कमलायताक्षिश्रीविष्णुहृत्कमलवासिनि विश्वमातः ॥ क्षीरोदजेकमलकोमलगर्भगौरिलक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८० ॥ त्वंश्रीरुपेंद्रसदने
मदनैकमातर्ज्योत्स्नासिचंद्रमसिचंद्रमनोहरास्ये ॥ सूर्येप्रभासिचजगत्त्रितयेप्रभासिलक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८१ ॥

कांत्याधरण्याचदूर्वादलश्यामलांग्या ॥ कलत्रद्वयेनामुनातोपितायत्रिलोकीगृहस्थायविष्णोनमस्तइतिभगवत्पादीयवचनाच्च ॥ तस्याईर्ष्यावशादिवपैशून्यवशादिवेत्यर्थः ॥ मानतोवक्षसिधृता
याअपिसपत्न्योरीर्ष्यावशत्वंतयोर्भगवतामुखदंष्ट्राग्रयोर्धृतत्वादुन्नेयम् ॥ इलामितिपाठेऋजुरेवार्थः ॥ इलांपृथ्वींवाराहरूपेणदधार ॥ ७७ ॥ त्रैलोक्यमिति ॥ कोलरूपेणसूकरशरीरेण ॥
विनिहत्येति ॥ यद्यपिमंगलभूभृतैवसोसुरोघातितः ॥ तथाचोक्तंलक्ष्मीव्रतेभविष्येइंद्रंप्रतिनारदेन ॥ भल्लेनसोवधीत्क्रोडंवज्रेणाद्रिंयथाभवानिति ॥ समंगलः ॥ तथापिकल्पभेदा
भिप्रायेणैतदुक्तमित्यविरोधः ॥ कोलापुरेकोलापुरनाम्नि मंगलाख्यस्यराज्ञोमंगलपुरमेवकोलापुरम् ॥ एतदप्युक्तंलक्ष्मीव्रतेभविष्ये ॥ चोलदेवीश्रियःशापात्कोलास्यायत्रसाभवत् ॥
कोलापुरमितिख्यातंक्षितौतन्मंगलंपुरमिति ॥ ७८ ॥ ७९ ॥ पद्यैश्चित्रपदार्थौघैरष्टभिःश्रवणामृतैः ॥ महामुनिर्महालक्ष्मींतुष्टावजगदंबिकाम् ॥ मातर्नमामीति ॥ हेमातर्नमामित्वा
मित्यर्थात् ॥ हेकमलेहेकमलायताक्षिहेश्रीविष्णुहृत्कमलवासिनिश्रीनारायणहृदयपद्मेवसितुंशीलंयस्यास्तत्संबोधनंतथा ॥ तदुक्तंवैष्णवे ॥ विष्णोर्वक्षस्थलाश्रयइति ॥ हेविश्वमातः हेक्षीरो
दजेहेकमलकोमलगर्भगौरिहेलक्ष्मिसततंनमतांशरण्येआश्रययोग्येप्रसीदप्रसन्नाभवप्रसादंकुर्विति ॥ ८० ॥ निखिलप्रपंचस्यतत्पारतंत्र्यंवदन्परदेवतात्वेनस्तौति ॥ त्वंश्रीरितिसार्धेन ॥ महें

CC-0. In Public Domain. Digitization by eGangotri

द्रसदनेत्वंश्रीःसंपत्तिःशोभावातद्धेतुरित्यर्थः ॥ लक्ष्मीर्वा ॥ पुनश्चपद्माद्गुद्भूतायद्वादित्योभवद्धरिरितिवैष्णवोक्तेः ॥ हेमदनैकमातःकामैकप्रसूःप्रद्युम्नैकहेतोहेरुक्मिणीत्यर्थः ॥ तदुक्तंवैष्णवे ॥ रुक्मिणीकृष्णजन्मनीति ॥ ज्योत्स्नाकांतिरसि चंद्रमसिहेचंद्रमनोहरास्ये सूर्येप्रभासि ॥ चःसमुच्चये ॥ किंबहुना ॥ जगत्त्रितयेयाप्रभासात्वमसि ॥ तथाचश्रुतिः ॥ नतत्रसूर्योभाति नचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति ॥ हेलक्ष्मिप्रसीदसततंनमतांशरण्येइति ॥ ८१ ॥ त्वामिति ॥ त्वंजातवेदसिवह्नौसदादहनात्मशक्तिर्दाहस्वरूपाशक्तिः ॥ वेधाब्रह्मात्वयाऽभिन्ननिमित्तोपादानभूतयाइदंजगद्विविधंविदध्याद्विदधातिकरोतीत्यर्थः ॥ विश्वंभरःश्रीविष्णुरपिविभृयात्पालयेद्रक्षतीत्यर्थः ॥ अखिलंजगत् भवत्यात्वया ॥ हेलक्ष्मिप्रसीदसततंनमतांशरण्येइति ॥ ८२ ॥ त्वदिति ॥ हेअमलेत्वत्त्यक्तंत्वयानाधिष्ठितमेतज्जगच्छ्रीरुद्रोपिसंहरति ॥ अतस्त्वत्पारतंत्र्यात्सर्वस्यत्वमेवपासिहंसिविदधासिकरोषिचेति ॥ ननुतर्हिसृष्ट्यादिभेदस्यसत्त्वादद्वैतंगतमेवतत्राह ॥ परावरासि ॥ यद्वा पूर्वंनिमित्तकारणतामुक्त्वेदानीमुपादानकारणतामाह ॥ परावरासिकार्यकारणरूपास्थूलसूक्ष्मरूपापरेऽव्याकृतादयोऽवरेनिकृष्टायस्याइतिवाऽसि ॥ त्वद्रूपंत्वदधीनंचसर्वमितिभावः ॥ पुनःसगुणांस्तौति ॥ हेअमलेहरिरपिईड्यःस्तुत्यस्त्वदाप्त्यात्वत्प्राप्त्याबभूव ॥ यद्वा अज्ञानंतत्कार्यंचहरती

त्वंजातवेदसिसदादहनात्मशक्तिर्वेधास्त्वयाजगदिदंविविधंविदध्यात् ॥ विश्वंभरोपिविभृयादखिलंभवत्यालक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८२ ॥ त्वत्त्यक्तमेतदमलेहरतेहरोपित्वंपासिहंसिविदधासिपरावरासि ॥ ईड्योबभूवहरिरप्यमलेत्वदाप्त्यालक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८३ ॥ शूरःसएवसगुणीसबुधःसधन्योमान्यःसएवकुलशीलकलाकलापैः ॥ एकःशुचिःसहिपुमान्सकलेपिलोकेयत्रापतेत्तवशुभेकरुणाकटाक्षः ॥ ८४ ॥ यस्मिन्वसेःक्षणमहोपुरुषेगजेऽश्वेस्त्रैणेतृणेसरसिदेवकुलेगृहेऽन्ने ॥ रत्नेपतत्रिणिपशौशयनेधरायांसश्रीकमेवसकलेतदिहास्तिनान्यत् ॥ ८५ ॥ त्वत्स्पृष्टमेवसकलंशुचितांलभेतत्वत्त्यक्तमेवसकलंत्वशुचीहलक्ष्मि ॥ त्वन्नामयत्रचसुमंगलमेवतत्रश्रीविष्णुपत्निकमलेकमलालयेऽपि ॥ ८६ ॥

तिहरिस्तथाविधोपिवाङ्मनसयोरगोचरोपित्वदाप्त्यात्वदीक्षयात्वयिचिदाभासप्रदानेनेत्यर्थः ॥ सऐक्षतबहुस्यांप्रजायेयेतिश्रुतेः ॥ भक्तानामीड्यःस्तुत्योबभूव ॥ अयंभावः ॥ भगवतस्त्वदीक्षणाभावेसृष्ट्यादेरसंभवाज्जीवानांपुरुषार्थचतुष्टयंनसिध्येत्त्वदीक्षयापुनःसृष्ट्यादेःसंभवाद्भगवतःस्तुत्यादिनातच्चतुष्टयंसिद्ध्यतीतिभावः ॥ हेलक्ष्मिप्रसीदसततंनमतांशरण्यइति ॥ ८३ ॥ शूरइति ॥ हेशुभेयत्रपुरुषेतवकरुणाकटाक्षआपतेत्सएवशूरःससमर्थःसगुणीसबुधःसधन्योधनाययोग्यः कलाविद्या कुलशीलकलानांकलापैःसमूहैःसएवमान्यःपूज्यः सकलेपिलोकेसएकोमुख्यःशुचिःसएवहिपुमान् ॥ तदुक्तंवैष्णवे ॥ सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् ॥ सशूरःसचविक्रांतोयस्त्वयादेविवीक्षितइति ॥ ८४ ॥ यस्मिन्निति ॥ अहोहेलक्ष्मियस्मिंस्त्वंक्षणंक्षणमात्रंवसेःवससिसकलेइहजगतितदेवास्तिनान्यदित्यन्वयः ॥ तदेवास्तीतिकुतस्तत्राह ॥ सश्रीकंत्वदधिष्ठितमित्यर्थः ॥ यद्वा अन्यदपियत्सश्रीकंतदेवास्ति ॥ यद्वा यस्मिन्वससिसश्रीकंतदेवास्तीति ॥ यस्मिन्कस्मिन्नित्याकांक्षायामाह ॥ पुरुषइत्यादि ॥ पुरुषेयस्मिन्कस्मिंश्चिदित्यर्थः ॥ एवंगजेऽश्वेस्त्रैणेस्त्रीसमूहेतृणेसरसिदेवकुलेदेवगृहेऽन्नेरत्नेपतत्रिणिपक्षिणिपशौशयनेधरायामिति ॥ सकलेहेसर्वस्वरूपेइतिवा ॥ कमलेइतिवापाठः ॥ ८५ ॥ त्वत्स्पृष्टमिति ॥ हेलक्ष्मिइहजगतित्वत्स्पृष्टंत्वयाधिष्ठितमेवसकलंवस्त्वित्यर्थाच्छुचितांलभेत ॥ त्वत्त्यक्तमेवसकलंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरशुचि ॥ हेश्रीविष्णुपत्निहेकमलेकमलालये ॥ अपिःसमुच्चये ॥ अतीतिपाठेसुमंगलामित्यस्योपर्यतिशब्दोनेतव्यः ॥ यत्रवत्वन्नामातिसुमंगलमेवतत्रेति ॥ ८६ ॥ लक्ष्मीमिति ॥ इति सदाजपतांक्दुःखंनकुत्रापिदुःखमित्यर्थः ॥ इतिशब्दपरामृष्टमीप्सिततमंदर्शयति ॥ लक्ष्मींश्रियंकमलांकमलालयांपद्मांरमांनलिनयुग्मकरांकमलद्वयहस्तांमांक्षीरोदजांअमृतकुंभकरांइराम् ॥ अमृतकुंभकरांइरामितिपाठेकर्मधारयः ॥ शिवामितिक्वचित् ॥ विष्णुप्रियामिति ॥ पंचचशब्दाःसमुच्चयार्थाः ॥ ८७ ॥ साष्टांगं अष्टभिर्हस्तपादजानूरःशिरोदृङ्मनोवचोभिरंगैःसहितंयथा

लक्ष्मींश्रियंचकमलांकमलालयांचपद्मांरमांनलिनयुग्मकरांचमांच ॥ क्षीरोदजाममृतकुंभकरामिरांचविष्णुप्रियामितिसदाजपतांक्वदुःखम् ॥ ८७ ॥ इतिस्तुत्वाभगवतींमहालक्ष्मींहरिप्रियाम् ॥ प्रणनामसपत्नीकःसाष्टांगंदंडवन्मुनिः ॥ ८८ ॥ श्रीरुवाच ॥ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेमित्रावरुणसंभव ॥ पतिव्रतेत्वमुत्तिष्ठलोपामुद्रेशुभव्रते ॥ ८९ ॥ स्तुत्यानयाप्रसन्नाहंव्रियतांयद्धृदीप्सितम् ॥ राजपुत्रिमहाभागेत्वमिहोपविशामले ॥ ९० ॥ त्वदंगलक्षणैरेभिःसुपवित्रैश्चतेव्रतैः ॥ निर्वापयितुमिच्छामिदैत्यास्त्रैस्तापितांतनुम् ॥ ९१ ॥ इत्युक्त्वामुनिपत्नींतांसमालिंग्यहरिप्रिया ॥ अलंचकारचश्रीत्यावहुसौभाग्यमंडनैः ॥ ९२ ॥ पुनराहमुनेजानेतवहृत्तापकारणम् ॥ सचेतनंदुनोत्येवकाशीविश्लेषजोऽनलः ॥ ९३ ॥ यदासदेवोविश्वेशोमंदरंगतवान्पुरा ॥ तदाकाशीवियोगेनजातातस्येदृशीदशा ॥ ९४ ॥ तत्प्रवृत्तिंपुनर्ज्ञातुंब्रह्माणंकेशवंगणान् ॥ गणेश्वरंचदेवांश्चप्रेषयामासशूलधृक् ॥ ९५ ॥ तेचकाशीगुणान्सर्वेविचार्यचपुनःपुनः ॥ व्रजंत्यद्यापिनक्वापितादृगस्तिक्वचापुरी ॥ ९६ ॥ इतिश्रुत्वाथसमुनिःप्रत्युवाचश्रियंततः ॥ प्रणिपत्यमहाभागोभक्तिगर्भमिदंवचः ॥ ९७ ॥ यदिदेयोवरोमह्यंवरयोग्योस्म्यहंयदि ॥ तदावाराणसीप्राप्तिःपुनरस्त्वेषमेवरः ॥ ९८ ॥ येपठिष्यंतिचस्तोत्रंत्वद्भक्त्यामत्कृतंसदा ॥ तेषांकदाचित्संतापोमास्तुमास्तुदरिद्रता ॥ ९९ ॥ मास्तुचेष्टवियोगश्चमास्तुसंपत्तिसंक्षयः ॥ सर्वत्रविजयश्चास्तुविच्छेदोमास्तुसंततेः ॥ १०० ॥ ॥ श्रीरुवाच ॥ ॥ एवमस्तुमुनेसर्वंयत्त्वयापरिभाषितम् ॥ एतत्स्तोत्रस्यपठनंममसान्निध्यकारणम् ॥ १ ॥

भवतितथा ॥ तदुक्तम् ॥ दोर्भ्यांपदाभ्यांजानुभ्यामुरसाशिरसादृशा ॥ मनसावचसाचेतिप्रणामोष्टांगईरितइति ॥ ८८ ॥ ८९ ॥ राजपुत्रिवैदर्भराजकन्ये ॥ ९० ॥ त्वदंगलक्षणैःत्वदंगेवर्ततेयानिलक्षणानिसल्लक्षणानिपातिव्रत्यादिसंसूचकानितैरेभिःप्रत्यक्षसिद्धैः ॥ दैत्यास्त्रैःसूकररूपदैत्यस्यायुधैः ॥ ९१ ॥ बहूनिसौभाग्यानियेभ्यस्तानिचतानिमंडनानिभूषणानिचतैः ॥ ९२ ॥ दुनोतिव्यथते ॥ ९३॥९४॥ देवान्सूर्यादीन् ॥ द्वादशादित्यभेदेनवहुवचनम् ॥ देवीरितिपाठेमातृगणमित्यर्थः ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ संततेर्वंशस्य ॥ १०० ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालकर्णीराक्षसीविशेषःकाकविष्ठावा ॥ २ ॥ भूर्जपत्रेचार्मिपत्रे ॥ ३ ॥ इदमिति ॥ बीजरहस्यं बीजंश्रीबीजंततोपिरहस्यंगोप्यमतिमहत्तरामित्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ॥ ८ ॥ १०९ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांपंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ षष्ठेतीर्थप्रशंसांचभार्ययानोदितोमुनिः ॥ कथयामासकार्त्स्न्ये नमानसादिविभागतः ॥ १ ॥ श्रोतारंप्रोत्साहयति ॥ शृण्विति ॥ श्रुतिसहोदरांवेदतुल्यांश्रुतिसहमुदरंयस्याःसातथातांश्रुतिगर्भामित्यर्थः ॥ श्रुतिमनोहरामितिवापाठः ॥ वैनिश्चये ॥ १ ॥ श्रीदर्शनानंदएवसुधाधाराधुनीअमृतसंपातनदीताम् ॥ २ ॥ वह्निकुंडेति ॥ द्रौपदीधृष्टद्युम्नयोराग्निकुंडसमुत्पन्नयोर्द्रुपदाज्जातत्ववदग्निकुंडसमुत्पन्नस्यापिरोमहर्षणस्यब्राह्मण्यांक्षत्रियाज्जातत्वमविरुद्धम् ॥

अलक्ष्मीःकालकर्णीचतद्गेहेनविशेत्क्वचित् ॥ गजाश्वपशुशांत्यर्थमेतत्स्तोत्रंसदाजपेत् ॥ २ ॥ बालग्रहाभिभूतानांबालानांशांतिकृत्परम् ॥ भूर्जपत्रे लिखित्वातुबध्नीयात्कंठदेशतः ॥३॥ इदंबीजरहस्यंमेरक्षणीयंप्रयत्नतः ॥ श्रद्धाहीनेनदातव्यंनदेयंचाशुचौक्वचित् ॥ ४ ॥ अन्यच्चशृणुविप्रेंद्रभविष्ये द्वापरेभवान् ॥ एकोनत्रिंशकेब्रह्मन्सत्यंव्यासोभविष्यति ॥ ५ ॥ तदावाराणसींप्राप्यसिद्धिंप्राप्स्यस्यभीप्सिताम् ॥ व्यस्यवेदान्पुराणानिधर्मा न्समुपदिश्यच ॥ ६ ॥ हितं चतेवदाम्येकंसांप्रतं तत्समाचर ॥ पश्यकिंचिदितोगत्वास्कंदमग्रेस्थितंप्रभुम् ॥ ७ ॥ वाराणस्यारहस्यंचयथाव च्छिवभाषितम् ॥ तव तुष्टिकरंब्रह्मन्कथयिष्यतिषण्मुखः ॥ ८ ॥ इतिलब्ध्वावरंसोथमहालक्ष्मींप्रणम्यच ॥ ययावगस्तिर्यत्रास्तिकुमारःशि खिवाहनः ॥ १०९ ॥ ॥ इति श्रीस्कान्देमहापुराणेएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेअगस्त्यप्रस्थानंनामपंचमो ऽध्यायः ॥ ५ ॥ ॥ छ ॥ पाराशर्यउवाच ॥ शृणुसूतमहाभागकथांश्रुतिसहोदराम् ॥ यांवैहृदिनिधायेहपुरुषःपुरुषार्थभाक् ॥ १ ॥ ततःश्रीदर्श नानंदसुधाधाराधुनींमुनिः ॥ अवगाह्यसपत्नीकःपरांमुदमवापसः ॥ २ ॥ वह्निकुंडसमुद्भूतसूतनिर्मलमानस ॥ शृणुष्वैकंपुराविद्भिर्भाषितंयत्सुभा षितम् ॥ ३ ॥परोपकरणंयेषांजागर्तिहृदयेसताम् ॥ नश्यंतिविपदस्तेषांसंपदःस्युःपदेपदे ॥ ४ ॥ तीर्थस्नानैर्नसाशुद्धिर्बहुदानैर्नतत्फलम् ॥ तपो भिरुग्रैस्तन्नाप्यमुपकृत्यायदाप्यते ॥ ५ ॥

यद्वा वह्निकुंडसमुद्भूतवैन्यस्ययज्ञाग्निकुंडात्समुत्पन्न ॥ त्वंहिस्वायंभुवेयज्ञेसुत्याहेविततेसति ॥ संभूतःसांहितांवक्तुंस्वांशेनपुरुषोत्तमः ॥ तस्यतेसर्वरोमाणिवचसाह्लादितानिच ॥ द्वैपायनस्यतुभवांस्ततोसौ रोमहर्षणइतिकूर्मोक्तेः ॥ स्वायंभुवेस्वयंभुवाब्रह्मणाप्रवर्तिते ॥ स्वांशेनकलया ॥ वैन्यस्यहिपृथोर्यज्ञेवर्तमानेमहात्मनः॥ सुत्यायामभवत्सूतइतिवायूक्तेश्च ॥ ब्राह्मण्यांक्षत्रियाज्जातः सूतइत्यभिधीयते ॥ तत्साधर्म्याद्सावपितथा॥ तथाहि॥ तत्रहिपृथोर्यज्ञेवार्हस्पत्यंहविरैंद्रेणहविषासंपृक्तमभिभूतंचऐंद्रश्चरुर्मारुतेनहविषाततःसूतमागधौजाताविति पौराणिकीकथा॥अतएवतस्यपुराणादिप्रवचनमविरुद्धमि ति ॥ कल्पभेदकल्पनातुनचारुतरा॥प्रतिलोमजत्वात्प्रतिसंपराभवात्प्रातिलोमजंशरीरंविहायशरीरांतरंयज्ञाग्निकुंडेलोमहर्षणोवसिष्ठागस्त्याविवसाधयामासेतिमहाभारतटीकायामितिकोचित्॥ ३॥४॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ ७ ॥ ८ ॥ करिकर्णाग्रचपलंहस्तिकर्णाग्रचपलम् ॥ ९ ॥ यल्लक्ष्मीति ॥ याचासौलक्ष्मीश्चेतियल्लक्ष्मीस्तस्यानाममात्राख्यानाममात्रोच्चारणेननरोयःकश्चिदपिनोमातिनपरिमिनोति महत्तरोभवतीत्यर्थः ॥ कृतकृत्योभवेन्नरइतिक्वचित्पाठः ॥ १० ॥ ऐक्षतदृष्टवान् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ पत्याअननुज्ञाता भर्त्राऽदत्ताभ्यनुज्ञेत्यर्थः ॥ १५ ॥ १६ ॥ ॥ १७ ॥ इष्यतेवांछ्यतेस्वामिनेतिशेषः ॥ १८ ॥ वरारोहेवरौश्रेष्ठौआरोहौजघनेयस्याः सातथातस्याः संवोधनंहेश्रेष्ठजघनेइत्यर्थः ॥ १९ ॥ २० ॥ सर्वतीर्थानांकामिकंकामायहितम् ॥

परोपकृत्यायोधर्मोधर्मोदानादिसंभवः ॥ एकत्रतुलितौधात्रातत्रपूर्वोभवद्गुरुः ॥ ६ ॥ परिनिर्मथ्यवाग्जालंनिर्णीतमिदमेवहि ॥ नोपकारात्परोधर्मो नापकारादघंपरम् ॥ ७ ॥ उपकर्तुरगस्त्यस्यजातमेतन्निदर्शनम् ॥ क्वतादृक्काशिजंदुःखंक्वतादृक्श्रीमुखेक्षणम् ॥ ८ ॥ करिकर्णाग्रचपलंजीवितं विविधंवसु ॥ तस्मात्परोपकरणंकार्यमेकंविपश्चिता ॥ ९ ॥ यल्लक्ष्मीनाममात्राख्यानरोनोमातिकुत्रचित् ॥ साक्षात्समीक्ष्यतांलक्ष्मींकृतकृत्यो भवन्मुनिः ॥ १० ॥ गच्छन्यदृच्छयासोथदूराच्छ्रीशैलमैक्षत ॥ यत्रसाक्षान्निवसतिदेवःश्रीत्रिपुरांतकः ॥११॥ उवाचवचनंपत्नींतदाप्रीतमनामुनिः ॥ इहस्थितैवपश्यत्वंकांतिकांततरंपरम् ॥ १२ ॥ श्रीशैलशिखरंश्रीमदिदंतद्यद्विलोकनात् ॥ पुनर्भवोमनुष्याणांभवेत्रनभवेत्क्वचित् ॥ १३ ॥ गिरिश्चतुरशीत्यायंयोजनानांहिविस्तृतः ॥ सर्वलिंगमयोयस्मादतःकुर्यात्प्रदक्षिणम् ॥ १४ ॥ ॥ लोपामुद्रोवाच ॥ ॥ किंचिद्विज्ञप्तुमिच्छामियद्याज्ञा स्वामिनोभवेत् ॥ ब्रूतेहियाऽननुज्ञातापत्यासापतिताभवेत् ॥ १५ ॥ अगस्त्यउवाच ॥ ॥ किंवकुकामादेवित्वंब्रूहितत्त्वमशंकिता ॥ नत्वादृशी नांवाक्यंहिपत्युःखेदायजायते ॥ १६ ॥ ततः पप्रच्छसादेवीप्रणम्यमुनिमानता ॥ सर्वेषांचहितार्थायस्वसंदेहापनुत्तये ॥ १७ ॥ लोपामुद्रोवाच ॥ श्रीशैलशिखरंदृष्ट्वापुनर्जन्मनविद्यते ॥ इदमेवहिसत्यंचेत्किमर्थंकाशिरिष्यते ॥ १८ ॥ अगस्तिरुवाच ॥ ॥ आकर्णयवरारोहेसत्यंपृष्टंत्वयामले ॥ निर्णीतमसकृच्चैतन्मुनिभिस्तत्त्वचिंतकैः ॥ १९ ॥ मुक्तिस्थानान्यनेकानिकृतस्तत्रापिनिर्णयः ॥ तानितेकथयाम्यत्रदत्ताचित्ताभवक्षणम् ॥ २० ॥ प्रथमंतीर्थराजंतुप्रयागाख्यंसुविश्रुतम् ॥ कामिकंसर्वतीर्थानांधर्मकामार्थमोक्षदम् ॥ २१ ॥ नैमिषंचकुरुक्षेत्रंगंगाद्वारमवंतिका ॥ अयोध्यामथुराचैवद्वारकाप्यमरावती ॥ २२ ॥ सरस्वतीसिंधुसंगोगंगासागरसंगमः ॥ कांतीचत्र्यंबकंचापिसप्तगोदावरीतटम् ॥ २३ ॥ कालंजरंप्रभासश्चतथाबदरिकाश्रमः ॥ महालयस्तथोंकारक्षेत्रंवैपौरुषोत्तमम् ॥ २४ ॥

संवत्सरार्जितपापनाशकामनाविषयत्वात् ॥ २१ ॥ गंगाद्वारंमायापुरी ॥ अमरावतीगंगा पुरीविशेषोवा ॥ अमरावतीवाऽमरावतीतिद्वारकायावाविशेषणम् ॥ २२ ॥ सिंधुर्नदीतस्याःसंगःसंगमः ॥ सागरेणेतिशेषः ॥ कांतीपुरी ॥ कांचीतिक्वचित्पाठः ॥ त्र्यंवकंब्रह्मगिरिर्महाराष्ट्रेषुप्रसिद्धोयतोगौतमीनिःसृता ॥ सप्तगोदावरीतटंआंध्रदेशेप्रसिद्धम् ॥ २३ ॥ महालयोमहास्थानंगौडेप्रसिद्धम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐकारोऽमरकंटकम् ॥ महालयइति ॐकारस्यवाविशेषणम् ॥ वैप्रसिद्धम् ॥ २४ ॥ गोकर्णेति ॥ गोकर्णोनामतीर्थविशेषोद्रविडेषुप्रसिद्धः ॥ भृगुकच्छभृगुतुंगौगुर्जरदेशेप्रसिद्धौ ॥ यस्मिंस्तीर्थे धारयाजलंस्रवतितद्धारातीर्थंद्राविडेकुमारधारेतिप्रसिद्धम् ॥ यद्वा धारानामतीर्थविशेषः ॥ तदुक्तंवनपर्वणि ॥ धारानाममहाप्राज्ञसर्वपापप्रणाशिनी ॥ तत्रस्नात्वानरव्याघ्रनशोचतिनरःक्वचिदिति ॥ धारातीर्थंयुद्धमितिकेचित् ॥ २५ ॥ मानसानिमनःसंभवानिमानसानिब्रह्मात्मैकत्वलक्षणानिज्ञानानि ॥ बहुवचनंतुसगुणनिर्गुणभेदाभिप्रायेण ॥ कथंभूतानि ॥ तीर्थानिअविद्यातत्कार्ययोर्ना शकानीतियावत् ॥ ऋषिजुष्टजलानीतिवा ॥ निपानागमयोस्तीर्थमृषिजुष्टेजलेगुरावित्यमरः ॥ ज्ञानानामपिनिर्मलत्वसाधर्म्याज्जलत्वम् ॥ सलिलएकोद्रष्टेतिचश्रुतिः ॥ सत्यादिशब्देनार्जवदयादीनि गृह्यंते ॥ हिनिश्चितमवधारणार्थोवा ॥२६॥ पितामहानामित्युपलक्षणं पित्रादीनामित्यर्थः ॥ मुक्तास्तत्रश्राद्धकर्तारइतिशेषः ॥ तत्तनयाइत्यत्रतच्छब्देनश्राद्धकर्तारोगृह्यंते ॥ येषांपितॄणांमुक्तिदं तेषांतनयाअपिमुक्ताइतिवान्वयः ॥ २७ ॥ सधर्मिण्युवाचेति ॥ सधर्मिणीपत्नी ॥ सस्त्रीकोधर्ममाचरेदितिवचनात्तस्याअपितज्ज्ञानापेक्षत्वात्सधर्मिणीत्युक्तम् ॥ चकारात्सत्यादीनिचकानिकानीति

गोकर्णोभृगुकच्छश्चभृगुतुंगश्चपुष्करम् ॥ श्रीपर्वतादितीर्थानिधारातीर्थंतथैवच ॥ २५ ॥ मानसान्यपितीर्थानिसत्यादीनिचवैप्रिये ॥ एतानिमु क्तिदान्येवनात्रकार्याविचारणा ॥ २६ ॥ गयातीर्थंचयत्प्रोक्तंतात्पितॄणांहिमुक्तिदम् ॥ पितामहानामृणतोमुक्तास्तत्तनयाअपि ॥ २७ ॥ सध र्मिण्युवाच ॥ ॥ मानसान्यपितीर्थानियान्युक्तानिमहामते ॥ कानिकानिचतानीहह्येतदाख्यातुमर्हसि ॥ २८ ॥ ॥ अगस्त्यउवाच ॥ ॥ शृणुतीर्थानिगदतोमानसानिममानघे ॥ येषुसम्यङ्नरःस्नात्वाप्रयातिपरमांगतिम् ॥ २९ ॥ सत्यंतीर्थंक्षमातीर्थंतीर्थमिन्द्रियनिग्रहः ॥ सर्वभूतदयाती र्थंतीर्थमार्जवमेवच ॥ ३० ॥ दानंतीर्थंदमस्तीर्थंसंतोषस्तीर्थमुच्यते ॥ ब्रह्मचर्यंपरंतीर्थंतीर्थंचप्रियवादिता ॥ ३१ ॥ ज्ञानंतीर्थंधृतिस्तीर्थंतपस्तीर्थ मुदाहृतम् ॥ तीर्थानामपितत्तीर्थंविशुद्धिर्मनसःपरा ॥ ३२ ॥ नजलाप्लुतदेहस्यस्नानमित्यभिधीयते ॥ सस्नातोयोदमस्नातःशुचिःशुद्धमनोमलः ॥ ३३ ॥ योलुब्धः पिशुनःक्रूरोदांभिकोविषयात्मकः ॥ सर्वतीर्थेष्वपिस्नातःपापोमलिनएवसः ॥ ३४ ॥ नशरीरमलत्यागान्नरोभवतिनिर्मलः ॥ मानसेतुमलेत्यक्तेभवत्यंतःसुनिर्मलः ॥ ३५ ॥

बोद्धव्यम् ॥ २८ ॥ २९ ॥ मानसानितीर्थानिशृण्वितिप्रतिज्ञायसूचीकटाहन्यायेनतानिविहायसत्यादीनितीर्थान्याह ॥ सत्यमित्यारभ्यज्ञानपूतइत्यतःप्राक्तनेनग्रंथेन ॥ तत्रसत्यंयथार्थभाषणम् ॥ आक्रुष्टेताडितेवासहनंक्षमा ॥ इंद्रियनिग्रहोनिषिद्धविषयेभ्योत्यंतमंतःकरणनिवृत्तिः ॥ सर्वभूतदयाप्राणिमात्रेष्वनुकंपा ॥ आर्जवमवक्रत्वम् ॥ ३० ॥ दानमर्थिषुमुक्तहस्तता ॥ दमोनिषिद्ध विषयेभ्योवाह्येंद्रियाणांसर्वथानिवृत्तिः ॥ संतोषोयदृच्छयालाभेनाऽलंबुद्धिः ॥ ब्रह्मचर्यंयथायस्यविहितमष्टांगमैथुनपरित्यागादि ॥ प्रियवादितामधुरभाषिता ॥ ३१ ॥ ज्ञानंधर्माधर्मविषयं आत्माऽनात्मविवेकोवा ॥ धृतिर्देहेंद्रियाणामवसादेसत्युत्तंभनम् ॥ तपःकृच्छ्रचांद्रायणादि ॥ विशुद्धिर्विषयादिसंगराहित्यम् ॥३२॥ परत्वमेवान्वयव्यतिरेकमुखेनदर्शयति ॥ नजलाप्लुतेतित्रयेण ॥ दमस्नातः दम्यंतेइंद्रियाण्यनेनेतिदमंमनस्तत्रस्नातःनिःस्नातःप्रतिषिद्धविषयेभ्योत्यंतमनोनिग्रहरूपविशुद्धिमानित्यर्थः ॥ अतएवशुचिःरागादिरहितः ॥ अतएवशुद्धमनोमलोविगतविषयातिसंरागः॥ ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धाशुद्धमनोमलइतिक्वचित्पाठः ॥ शुद्धाशुद्धमनोमलइत्यन्यत्र ॥ ३३ ॥ ३४ ॥ ३५ ॥ शरीरमलत्यागान्निर्मलत्वाभावेदृष्टांतमाह ॥ जायंतइति ॥ जलमोकोयेषांतेतथा ॥ ३६॥ अज्ञातमलनैर्मल्ययोस्त्यागादेयतयोरयोगात्तयोःस्वरूपमाह ॥ विषयेष्विति ॥ ३७ ॥ वक्षोंतर्गतमंतःकरणंविषयाभिरागखचितंतीर्थावगाहनान्नशुद्ध्यतीतिसदृष्टांतमाह ॥ चित्तमिति ॥ बहिर्जलैर्धौतंसुराधिकरणंभांडं अतएवापवित्रम् ॥ ३८॥ अन्वयव्यतिरेकाभ्यांसिद्धंमनोविशुद्धेःपरंतीर्थत्वमुपसंहरति ॥ दानमितिद्वाभ्याम् ॥ इज्यायागः ॥ शौचंमृज्जलाभ्याम् ॥ तीर्थसेवातीर्थाटनम् ॥ श्रुतंश्रवणम् ॥ सर्वाण्येतानीत्यादीनिसर्वाणीत्यर्थः ॥ अतीर्थानिपवित्रत्वासाधकानि ॥ भावोंतःकरणंनिर्मलःशुद्धोयदिचेन्नेत्यर्थः ॥ पाठांतरेभावोयदिनिर्मलएवतदैवतानितीर्थानीति ॥ ३९ ॥ बहुवचनांतागणस्यसंसूचकाभवंतीतिन्यायात्पुष्कराणीतिबहुवचनेनगंगादीनिगृह्यंते ॥ ४० ॥ एवंविस्तरेणसत्यादीनितीर्थान्युक्त्वामानसतीर्थान्याह ॥ ज्ञानपूतइति ॥ अस्यायमर्थः ॥ यःस्नातिअवगाहतेसपरमांगतिंपरमनिवृत्तिंयातिप्राप्नोतीत्यन्वयः ॥ क्व मानसेमनसिभवंमानसंब्रह्मात्मज्ञानलक्षणंतस्मिन् ॥ कथंभूते ॥ तीर्थेऋषिभिर्जुष्टेजलेइवसेविते ॥ यद्वा तीर्थमिवतीर्थंअविद्यातत्कार्ययोर्विनाशकत्वात् तस्मिन् ॥ पुनःकथंभूते॥ज्ञानपूतेज्ञानंचतत्पूतंचेतिज्ञानपूतंस्वप्रकाशासंगमित्यर्थः॥ यद्वा ज्ञानेनपूतंज्ञानपूतंतत्त्वमस्यादिवाक्योत्थबुद्धिवृत्त्यानिवृत्ताशेषविरोध्यंशमित्यर्थः ॥ तस्मिन् ॥ ध्यानपूतइतिक्वचित्पाठः ॥ तत्रविजातीयप्रत्ययतिरस्कारेणसजातीयप्रत्ययोध्यानंतेनपूतमितिव्याख्येयम् ॥ पुनःकथंभूते ॥ ज्ञानजले ज्ञानंचतज्जलंस्वच्छंचज्ञानजलम् ॥ सलिलएकोद्रष्टेतिश्रुतेः ॥ ज्ञानमेवजलंयस्मिन्निति वा ॥ पुनःकथंभूते ॥ रागद्वेषमलापहे रागद्वेषमलानपहंतीतितथातस्मिन् ॥ तथाचभागवते वेदव्यासस्यस्मरणम् ॥ ज्ञानह्रदेध्यानजलेरागद्वेषमलापहे ॥ यःस्नातिमानसेतीर्थेसयातिपरमांगतिम् ॥ आत्मानदीसंयमतोयपूर्णासत्यह्रदाशीलतटादयोर्मिः ॥ तत्राभिषेकंकुरुपांडुपुत्रनवारिणाशुद्ध्यतिचांतरात्मेति॥भगवच्छंकराचार्यस्यच यस्मिन्वेदाश्चदेवाश्चपवित्रंकृत्स्नमेकताम् ॥ व्रजेत्तन्मानसंतीर्थंयस्मिन्स्नात्वाऽमृतोभवेदिति ॥ एकवचनमेकजीवाभिप्रायंवा ॥ ४१ ॥ ४२ ॥ यथेति ॥ उद्देशाउत्कृष्टादेशाअवयवाः ॥ ४३ ॥ ४४ ॥ मानसेषुचेतिचकारा

जायंतेचम्रियंतेचजलेष्वेवजलौकसः ॥ नचगच्छंतितेस्वर्गमविशुद्धमनोमलाः ॥ ३६ ॥ विषयेष्वतिसंरागोमानसोमलउच्यते ॥ तेष्वेवहिविरागोस्यनैर्मल्यंसमुदाहृतम् ॥ ३७ ॥ चित्तमंतर्गतंदुष्टंतीर्थस्नानान्नशुद्ध्यति ॥ शतशोथजलैर्धौतंसुराभांडमिवाशुचि ॥ ३८ ॥ दानमिज्यातपःशौचंतीर्थसेवाश्रुतंतथा ॥ सर्वाण्येतान्यतीर्थानियदिभावोननिर्मलः ॥ ३९ ॥ निगृहीतेंद्रियग्रामोयत्रैवचवसेन्नरः ॥ तत्रतस्यकुरुक्षेत्रंनैमिषंपुष्कराणिच ॥ ४० ॥ ज्ञानपूतेज्ञानजलेरागद्वेषमलापहे ॥ यःस्नातिमानसेतीर्थेसयातिपरमांगतिम् ॥ ४१ ॥ एतत्तेकथितंदेविमानसंतीर्थलक्षणम् ॥ भौमानामपितीर्थानांपुण्यत्वेकारणंशृणु ॥ ४२ ॥ यथाशरीरस्योद्देशाःकेचिन्मेध्यतमाःस्मृताः ॥ तथापृथिव्यामुद्देशाःकेचित्पुण्यतमाःस्मृताः ॥ ४३॥ प्रभावादद्भुताद्भूमेःसलिलस्यचतेजसः ॥ परिग्रहान्मुनीनांचतीर्थानांपुण्यतास्मृता ॥ ४४ ॥ तस्माद्भौमेषुतीर्थेषुमानसेषुचनित्यशः ॥ उभयेष्वपियःस्नातिसयातिपरमांगतिम् ॥ ४५ ॥

१ तदैवतानितीर्थानियदिभावोस्तिनिर्मलइत्येवंरूपे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सत्यादिषुच ॥ उभयेष्वपीत्यपिशब्दात्तेष्वपि ॥ ४५ ॥ ४६ ॥ ४७ ॥ यस्येति ॥ यस्यहस्तादिसुसंयतंस्यात्सतीर्थफलमश्नुतइत्यन्वयः ॥ तत्रहस्तसंयमःप्रतिग्रहपरपीडनादिनिवृत्तिः ॥ पादसंयमोदृष्टिपूतेप्रदेशेपादप्रक्षेपादिः ॥ मनःसंयमोऽनिष्टचिंतनाभावः ॥ विद्यामंत्रोपासनादिलक्षणा ॥ तपःस्वधर्मादच्युतिः ॥ कीर्तिःपरैःसाधुतयावर्णनम् ॥ एतत्रितयंचयस्यस्यादिति ॥ ४८ ॥ ४९ ॥ दंभोधर्मध्वजित्वम् ॥ नविद्यतेदंभोयस्यसतथा ॥ स्वार्थेकः ॥ अदांभिकइतिक्वचित्पाठः ॥ ५० ॥ ५१ ॥ तीर्थान्यनुसरन्धीरइति ॥ धीरःधर्माधर्मौविद्वान् ॥ ५२ ॥ तिर्यग्योनिमिति ॥ तिर्यग्योनिंनवैगच्छेत्तीर्थान्यनुसरन्नित्येव ॥ ५३ ॥ अश्रद्दधानइति ॥ अश्रद्दधानःश्रद्धामकुर्वाणः ॥ पापात्माबैडालव्रतिकः ॥ नास्तिकःपाखंडः ॥ अच्छिन्नसंशयः

अनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच ॥ अदत्त्वाकांचनंगाश्चदरिद्रोनामजायते ॥ ४६ ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः ॥ नतत्फलमवाप्नोतितीर्थाभिगमनेनयत् ॥ ४७ ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयतम् ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ ४८ ॥ प्रतिग्रहादुपावृत्तः संतुष्टोयेनकेनचित् ॥ अहंकारविमुक्तश्चसतीर्थफलमश्नुते ॥ ४९ ॥ अदंभकोनिरारंभोलघ्वाहारोजितेंद्रियः ॥ विमुक्तःसर्वसंगैर्यःसतीर्थफलमश्नुते ॥५०॥ अकोपनोऽमलमतिःसत्यवादीदृढव्रतः ॥ आत्मोपमश्चभूतेषुसतीर्थफलमश्नुते ॥ ५१ ॥ तीर्थान्यनुसरन्धीरःश्रद्दधानःसमाहितः ॥ कृतपापोविशुद्ध्येताकिंपुनःशुद्धकर्मकृत् ॥ ५२ ॥ तिर्यग्योनिंनवैगच्छेत्कुदेशेनैवजायते ॥ नदुःखीस्यात्स्वर्गभाक्चमोक्षोपायंचविंदति ॥ ५३ ॥ अश्रद्दधानः पापात्मानास्तिकोऽच्छिन्नसंशयः ॥ हेतुनिष्ठश्चपंचैतेनतीर्थफलभागिनः ॥ ५४ ॥ तीर्थानिचयथोक्तेनविधिनासंचरंतिये ॥ सर्वद्वंद्वसहाधीरास्तेनराः स्वर्गभागिनः ॥ ५५ ॥ तीर्थयात्रांचिकीर्षुःप्राग्विधायोपोषणंगृहे ॥ गणेशंचपितॄन्विप्रान्साधूञ्छक्त्याप्रपूज्यच ॥ ५६ ॥ कृतपारणकोहृष्टोगच्छेन्नियमधृक्पुनः ॥ आगत्याभ्यर्च्यचपितॄन्यथोक्तफलभाग्भवेत् ॥ ५७ ॥ नपरीक्ष्योद्विजस्तीर्थेष्वन्नार्थीभोज्यएवच ॥ सक्तुभिःपिंडदानंचचरुणापायसेनच ॥ ५८ ॥ कर्तव्यमृषिभिर्दिष्टंपिण्याकेनगुडेनच ॥ श्राद्धंतत्रप्रकर्तव्यमर्घ्यावाहनवर्जितम् ॥ ५९ ॥ अकालेप्यथवाकालेतीर्थेश्राद्धंचतर्पणम् ॥ अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेत् ॥ ६० ॥ तीर्थंप्राप्यप्रसंगेनस्नानंतीर्थेसमाचरेत् ॥ स्नानजंफलमाप्नोतितीर्थयात्राश्रितंनच ॥ ६१ ॥

नच्छिन्नोननष्टःसंशयोयस्यसतथासंशयात्मेत्यर्थः ॥ हेतुनिष्ठोहैतुकः ॥ तदुक्तंगीतायाम् ॥ अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति ॥ नायंलोकोस्तिनपरोनसुखंसंशयात्मनइति ॥ वैष्णवेच ॥ पाखंडिनोविकर्मस्थान्बैडालव्रतमास्थितान् ॥ हैतुकान्बकवृत्तींश्चवाङ्मात्रेणापिनार्चयेदिति ॥ बैडालव्रतिकादीनांचेदंलक्षणम् ॥ यस्यधर्मध्वजोनित्यंसुराध्वजइवोच्छ्रितः ॥ प्रच्छन्नानिचपापानिबैडालंनामतद्व्रतम् ॥ भ्रष्टःस्वधर्मात्पाखंडोविकर्मस्थोनिषिद्धकृत् ॥ संदेहकृद्धेतुभिर्यःसत्कर्मसुसहैतुकइत्यादि ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ मण्डरहितंभक्तंचरुः ॥ ५८ ॥ पिण्याकमत्रतिलपिष्टम् ॥ ५९ ॥ ६० ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६२ ॥ प्रसंगेन कार्यांतराण्युद्दिश्येत्यर्थः ॥ ६३ ॥ कुशप्रतिकृतिमितिजीवतांदूरदेशस्थानां मृतानांतुतर्पणादिनाकृतार्थत्वात् ॥ ६४ ॥ ६५ ॥ श्राद्धदइति ॥ श्राद्धादिकृत्वापारणंकुर्यादित्यर्थः ॥ ६६ ॥ ६७ ॥ :६८ ॥ सर्वतश्चतुरशीतियोजनपरिमितः ॥ ६९ ॥ ७० ॥ प्राप्यापिमुच्येत ॥ अपिरेवार्थे ॥ मुच्येतैवेत्यर्थः ॥ विमुच्येतेतिवापाठः ॥ ७१ ॥ गणैरितिद्विवचनस्थानेबहुवचनंछांदसंपूजार्थंवा ॥ ७२ ॥ ७३ ॥ ७४ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥

नृणांपापकृतांतीर्थेपापस्यशमनंभवेत् ॥ यथोक्तफलदंतीर्थंभवेच्छुद्धात्मनांनृणाम् ॥ ६२ ॥ षोडशांशंसलभतेयःपरार्थंचगच्छति ॥ अर्धंतीर्थफलंतस्ययःप्रसंगेनगच्छति ॥ ६३ ॥ कुशप्रतिकृतिंकृत्वातीर्थवारिणिमज्जयेत् ॥ मज्जयेच्चयमुद्दिश्यसोष्टमांशंलभेतवै ॥ ६४ ॥ तीर्थोपवासःकर्तव्यःशिरसोमुंडनंतथा ॥ शिरोगतानिपापानियांतिमुंडनतोयतः ॥ ६५ ॥ यदह्नितीर्थप्राप्तिःस्यात्ततोह्नःपूर्ववासरे ॥ उपवासस्तुकर्तव्यःप्राप्तेह्निश्राद्धदोभवेत् ॥ ६६ ॥ तीर्थप्रसंगात्तीर्थांगमप्युक्तंत्वत्पुरोमया ॥ स्वर्गसाधनमेवैतन्मोक्षोपायश्चवैभवेत् ॥ ६७ ॥ काशीकांतीचमायाख्यात्वयोध्याद्वारवत्यपि ॥ मथुरावंतिकाचैताःसप्तपुर्योत्रमोक्षदाः ॥ ६८॥ श्रीशैलोमोक्षदःसर्वःकेदारोपिततोऽधिकः ॥ श्रीशैलाच्चापिकेदारात्प्रयागंमोक्षदंपरम् ॥६९॥ प्रयागादपितीर्थाग्र्यादविमुक्तंविशिष्यते ॥ यथाविमुक्तेनिर्वाणंनतथाक्वाप्यसंशयम् ॥ ७० ॥ अन्यानिमुक्तिक्षेत्राणिकाशीप्राप्तिकराणिच ॥ काशींप्राप्यापिमुच्येतनान्यथातीर्थकोटिभिः ॥ ७१ ॥ अत्रार्थेकथयिष्येहमितिहासंपुरातनम् ॥ यथाविष्णुगणैरुक्तंद्विजायशिवशर्मणे ॥ ७२ ॥ तीर्थाध्यायमिमंश्रुत्वानरोनियतमानसः ॥ श्रावयित्वाद्विजांश्चापिश्रद्धाभक्तिसमन्वितान् ॥ ७३ ॥ क्षत्रियान्धर्मनिरतान्वैश्यान्सन्मार्गवर्तिनः ॥ शूद्रान्द्विजेषुभक्तांश्चनिष्पापोजायतेद्विजः ॥ ७४ ॥ इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेतीर्थाध्यायोनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ अगस्तिरुवाच ॥ ॥ मथुरायांद्विजःकश्चिदभूद्भूदेवसत्तमः ॥ तस्यपुत्रोमहातेजाःशिवशर्मेतिविश्रुतः ॥ १ ॥ अधीत्यवेदान्विधिवदर्थंविज्ञायतत्त्वतः ॥ पठित्वाधर्मशास्त्राणिपुराणान्यधिगम्यच ॥ २ ॥ अंगान्यभ्यस्यतर्कांश्चपरिलोड्यसमंततः ॥ मीमांसाद्वयमालोक्यधनुर्वेदंविगाह्यच ॥ ३ ॥

काश्ययोध्याद्वारकाचमायाकांत्याववंतिका ॥ मथुराचप्रशस्यंतेपुरःसप्तात्रसप्तमे ॥ १ ॥ अत्रार्थेकथयिष्येहमितिहासंपुरातनमित्युक्तंतमेवेतिहासंदर्शयति ॥ मथुरायामिति ॥ १ ॥ अधीत्यवेदानित्यादीनांद्वितीयांतपदघटितानांल्यबंतानांचिंतामवापमहतींशिवशर्माद्विजोत्तमइतिषष्ठेनान्वयः ॥ अर्थंवेदानामितिशेषः ॥ २ ॥ अंगानिशिक्षाकल्पव्याकरणनिरुक्तच्छंदोज्योतींषि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्कान्न्यायादीन् ॥ धर्मब्रह्मलक्षणेमीमांसेद्वे ॥ ३ ॥ नाट्यवेदेगांधर्ववेदे भरतादिमुनिप्रणीतनृत्यगीतादिविषये ॥ अर्थशास्त्राणिऔशनसबार्हस्पत्यादीनि ॥ अश्वगजचेष्टितंघोटकहस्तिचेष्टाप्रतिपादकंशास्त्रमित्यर्थः ॥ ४ ॥ कलासुचतुःषष्टिकलानांमध्येउक्तावशिष्टासु ॥ मंत्रशास्त्रंगारुडादिशास्त्रमागमशास्त्रंवा ॥ लिपीर्लिंवीः ॥ लिपिर्लिविरुभेस्त्रियावित्यमरः ॥ अक्षराणीत्यर्थः ॥ ५ ॥ ६ ॥ लोकैःकथितांश्रुतिंश्रवणेंद्रियंश्रितांप्राप्तांजरांदृष्ट्वाज्ञात्वा ॥ ७ ॥ ८ ॥ ९ ॥ तमस्तोमहरोऽज्ञानपूगहरोंऽधकारसमूहहरोवा ॥ भवबंधहृत्संसारबंधनहंत्री ॥ भवबं

आयुर्वेदंविचार्यापिनाटचवेदेकृतश्रमः ॥ अर्थशास्त्राण्यनेकानिप्राप्याश्वगजचेष्टितम् ॥ ४ ॥ कलासुचकृताभ्यासोमन्त्रशास्त्रविचक्षणः ॥ भाषाश्चनानादेशानांलिपीर्ज्ञात्वाविदेशजाः ॥ ५ ॥ अर्थानुपार्ज्यधर्मेणभुक्त्वाभोगान्यदृच्छया ॥ उत्पाद्यपुत्रान्सुगुणांस्तेभ्योह्यर्थंविभज्यच ॥ ६ ॥ यौवनंगत्वरंज्ञात्वाजरांदृष्ट्वाश्रितांश्रुतिम् ॥ चिन्तामवापमहतींशिवशर्माद्विजोत्तमः ॥ ७ ॥ पठतोमेगतःकालस्तथोपार्जयतोधनम् ॥ नाराधितोमहेशानःकर्मनिर्मूलनक्षमः ॥ ८ ॥ नमयातोषितोविष्णुःसर्वपापहरोहरिः ॥ सर्वकामप्रदोनॄणांगणेशोनार्चितोमया ॥ ९ ॥ तमस्तोमहरःसूर्योनार्चितोवैमयाक्वचित् ॥ महामायाजगद्धात्रीनध्याताभवबंधहृत् ॥ १० ॥ नप्रीणितामयादेवायज्ञैःसर्वैःसमृद्धिदाः ॥ तुलसीवनशुश्रूषानकृतापापशांतये ॥ ११ ॥ नमयातर्पिताविप्रामृष्टान्नैर्मधुरैरसैः ॥ इहापिचपरत्रापिविपदामनुतारकाः ॥ १२ ॥ बहुपुष्पफलोपेताःसुच्छायाःस्निग्धपल्लवाः ॥ पथिनारोपितावृक्षाइहामुत्रफलप्रदाः ॥ १३ ॥ दुकूलैःस्वानुकूलैश्चचोलैःप्रत्यंगभूषणैः ॥ नालंकृताःसुवासिन्यइहामुत्रसुवासदाः ॥ १४ ॥ द्विजायनोर्वरादत्तायमलोकनिवारिणी ॥ सुवर्णंनसुवर्णायदत्तंदुरितहृत्परम् ॥ १५ ॥ नालंकृतासवत्सागौःपात्रायप्रतिपादिता ॥ इहपापापहंत्र्याशुसप्तजन्मसुखावहा ॥ १६ ॥ ऋणापनुत्तयेमातुःकारितोनजलाशयः ॥ नातिथिस्तोषितःक्वापिस्वर्गमार्गप्रदर्शकः ॥ १७ ॥

धकृदितिपाठेअभक्तानांसंसारबंधनकर्त्री ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ चोलैःकूर्पासकैःकंचुकैरितियावत् ॥ ऊढाऽनूढावापितृगृहेस्थिताःसयौवनाःसुवासिन्यश्चिरंटचइतियावत् ॥ चिरंटीतुसुवासिनीत्यमरः ॥ सुवासिन्यांचिरंटीस्याद्द्वितीयवयसिस्त्रियामितिचरुद्रः ॥ १४ ॥ उर्वरासर्वसस्याढ्याभूमिरितिशेषः ॥ उर्वरासर्वसस्याढ्येत्यमरः ॥ १५ ॥ १६ ॥ जलाशयः जलान्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेरतेऽस्मिन्निितिजलाशयोवापीकूपतडागादिः ॥ १७ ॥ कुंडिकाकुंडीकमंडलुरित्यर्थः ॥ अस्त्रीकमंडलुःकुंडीत्यमरः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ श्रीसूक्तं हिरण्यवर्णांहरिणींसुवर्णरजतस्रजामित्यादि ॥ पावमानीस्वादिष्ठयामदिष्ठयापवस्वसोमधारयेत्याद्या ॥ ब्राह्मणोब्राह्मणंअग्निर्वैदेवानामवमोविष्णुःपरमइत्यादि ॥ मण्डलानियदेतन्मंडलंतपतित न्महइत्यादीनि ऋग्वेदेप्रसिद्धानिदशमंडलानिइतिवा ॥ पुरुषसूक्तंसहस्रशीर्षेत्यादि ॥ शतरुद्रियंअथातःशतरुद्रियंजुहोतिअत्रैषसर्वोग्निसंस्कृतइत्यादि ॥ पापारीतिसर्वेषांविशेषणम् ॥ ॥ २६ ॥ आर्कंअर्कदिनम् ॥ भृगोर्दिनेशुक्रवासरे ॥ २७ ॥ प्रतूलिकाप्रकृष्टातूलिकाबहुमूल्येत्यर्थः ॥ कीदृशी ॥ दीपीदीप्ताउज्ज्वलेत्यर्थः [१] ॥ दर्पणेतिशयनीयविशेषणम् ॥ दीप

छत्रोपानत्कुंडिकाश्चनाध्वगायसमर्पिताः ॥ यास्यतःसंयमिन्यांहिस्वर्गमार्गसुखप्रदाः ॥ १८ ॥ नचकन्याविवाहार्थंवसुक्तापिमयार्पितम् ॥ इहसौख्यसमृद्ध्यर्थंदिव्यकन्यार्पकंदिवि ॥ २९ ॥ नवाजपेयावभृथेस्नातोलोभवशादहम् ॥ इहजन्मनिचान्यस्मिन्बहुमृष्टान्नपानदे ॥ २० ॥ नमयास्थापितंलिंगंकृत्वादेवालयंशुभम् ॥ यस्मिन्संस्थापितेलिंगेविश्वंसंस्थापितंभवेत् ॥ २१ ॥ विष्णोरायतनंनैवकृतंसर्वसमृद्धिदम् ॥ नचसूर्यगणेशानांप्रतिमाःकारितामया ॥ २२ ॥ नगौरीनमहालक्ष्मीश्चित्रेपिपरिलेखिते ॥ प्रतिमाकरणेचैषांनकुरूपोनदुर्भगः ॥ २३ ॥ सुसूक्ष्माणिविचित्राणिनोज्ज्वलान्यंबराण्यपि ॥ समर्पितानिविप्रेभ्योदिव्यांबरसमृद्धये ॥ २४ ॥ नतिलाश्चघृतेनाक्ताःसुसमिद्धेहुताशने ॥ हुतावैमन्त्रपूताश्चसर्वपापापनुत्तये ॥ २५ ॥ श्रीसूक्तंपावमानीचब्राह्मणोमंडलानिच ॥ जप्तंपुरुषसूक्तंनपापारिशतरुद्रियम् ॥ २६ ॥ अश्वत्थसेवानकृतात्यक्त्वाचार्कंत्रयोदशीम् ॥ सद्यःपापहरासाहिनरात्रौनभृगोर्दिने ॥ २७ ॥ शयनीयंनचोत्सृष्टंमृदुलाचप्रतूलिका ॥ दीपीदर्पणसंयुक्तंसर्वभोगसमृद्धिदम् ॥ २८ ॥ अजाश्वमहिषीमेषीदासीकृष्णाजिनंतिलाः ॥ सकरंभास्तोयकुंभानासनंमृदुपादुके ॥ २९ ॥ पादाभ्यंगंदीपदानंप्रपादानंविशेषतः ॥ व्यजनंवस्त्रतांबूलंतथान्यन्मुखवासकृत् ॥ ३० ॥ नित्यश्राद्धंभूतबलिंतथाऽतिथिसमर्चनम् ॥ विशंत्यन्यानिदत्त्वाचप्रशस्यानियमालये ॥ ३१ ॥

दर्पणसंयुक्तमितिक्वचित्पाठः ॥ २८ ॥ सकरंभादध्युपसिक्तसक्तुसहिताः ॥ करंभोदधिसक्तवइत्यमरः ॥ मृदुपादुकेइति ॥ छत्रोपानदित्यत्रनाध्वगायसमर्पिताइत्युक्तंइहतुसाधारणेभ्यइत्यपौनरुक्त्यम् ॥ २९ ॥ वस्त्रतांबूलमित्येकवद्भावः ॥ तत्रवस्त्रंसाधारणमन्यथानसूक्ष्माणीत्यनेनपुनरुक्तेः ॥ तांबूलंगुवाकादित्रितयम् ॥ पादाभ्यंगंब्राह्मणानामितिशेषः ॥ अन्यल्लवंगादि ॥ इत्यंतानांनचोत्सृष्टमितिपूर्वक्रिययैवसंबंधः ॥ ३० ॥ नित्यश्राद्धमिति ॥ नित्यश्राद्धादीनिदत्त्वाकृत्वान्यानिचप्रशस्यानिद्रव्याणिदत्त्वायमादीन्नपश्यंतियमालयेपिनविशंतीत्यर्थः ॥ कुतोयतस्तेपुण्यभाजइति ॥ यद्वा नित्यश्राद्धादीन्यन्यानिचद्रव्याणिदत्त्वायमालयेप्रशस्यानिसद्मानिविशंति ॥ यमंक्रोधाविष्टमित्यादिपूर्ववत् ॥ यामीर्यमसंबंधिनीः ॥ फलितमाह ॥ नैत

१ नपश्यंतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिति ॥ ३१ ॥ ३२ ॥ कृच्छ्रेति ॥ कच्छ्रंचचांद्रायणंचतेआर्दीयेषामतिकृच्छ्रपराकादीनांतानितथा ॥ कृच्छ्रोतिकृच्छ्रस्वरूपंचोक्तंपराशरसंहितायाम् ॥ नवाहंयतिकृच्छ्रःस्यात्पाणिपूरान्नभोजनम् ॥ त्रिरात्रमुपवासःस्यादतिकृच्छ्रंतदुच्यतइति ॥ ३३ ॥ गवाह्निकं गवांअह्निअह्निदेयमाह्निकंगवाह्निकंप्रतिदिवसदेयंगोग्रासमित्यर्थः ॥ गवानीकमितिपाठेगोसमूहमित्यर्थः ॥ ३४ ॥ प्रार्थितैर्याचितैः ॥ प्राकृतैरितिपाठेसाधारणैरपीत्यर्थः ॥ देहिदेहीतिजलपाकःदेहिदेहिप्रयच्छप्रयच्छेतिप्रार्थनाशीलः ॥ ३५ ॥ ३६ ॥ शिवशर्माइतिएवंप्रकारेणममक्षेमतरंकल्याणतरंभवेत्स्यादितिनिश्चिकायनिश्चितवानित्यर्थः ॥ क्षेमकरमितिपाठेक्षेमंकरंकर्मेत्यर्थः ॥३७॥ तमेवनिश्चयंदर्शयति ॥ यावदिति ॥ ३८ ॥ एवमेवंविचारयन्नित्यर्थः ॥ पंचषाणिपंचषड्वासराणीत्यर्थः ॥ लग्नवलेलग्नेइत्यर्थः ॥

नयमंयमदूतांश्चनयामीरपियातनाः ॥ पश्यन्तितेपुण्यभाजोनैतच्चापिकृतंमया ॥ ३२ ॥ कृच्छ्रचांद्रायणादीनितथानक्तव्रतानिच ॥ शरीरशुद्धिकारीणिनकृतानिकचिन्मया ॥ ३३ ॥ गवाह्निकं च नोदत्तंगोकंडूतिर्नवकृता ॥ नोद्धृतापंकमग्नागौर्गोलोकसुखदायिनी ॥ ३४ ॥ नार्थिनःप्रार्थितैरर्थैः कृतार्थाहिमयाकृताः ॥ देहिदेहीतिजल्पाकोभविष्याम्यन्यजन्मनि ॥ ३५ ॥ नवेदानचशास्त्राणिनार्थोदारानपुत्रकः ॥ नक्षेत्रंनचहर्म्यादिमायांतमनुयास्यति ॥ ३६ ॥ शिवशर्मेतिसंचिंत्यबुद्धिंसंधायसर्वतः ॥ निश्चिकायमनस्येवंभवेत्क्षेमतरंमम ॥ ३७ ॥ यावत्स्वस्थोस्तिमेदेहोयावन्नेन्द्रियविक्लवः ॥ तावत्स्वश्रेयसांहेतुंतीर्थयात्रांकरोम्यहम् ॥ ३८ ॥ दिनानिपंचषाण्येवमतिवाह्यगृहेद्विजः ॥ शुभेतिथौशुभेवारेशुभलग्नबलेद्विजः ॥ ३९ ॥ उपोष्यरजनीमेकांप्रातःश्राद्धंविधायच ॥ गणेशान्ब्राह्मणान्नत्वाभुक्त्वाप्रस्थितवान्सुधीः ॥ ४० ॥ इतिनिश्चित्यनिर्वाणपदनिःश्रेणिकांपराम् ॥ सर्वेषामेवजंतूनांतत्रसंस्थितिकारिणाम् ॥ ४१ ॥ अथपंथानमाक्रम्यकियंतमपिसद्विजः ॥ मुहूर्तंपथिविश्रम्याचिंतयत्प्राक्क्वयाम्यहम् ॥ ४२ ॥ भुवितीर्थान्यनेकानिलोलमायुश्चलंमनः ॥ ततःसप्तपुरीर्यायांसर्वतीर्थानितत्रयत् ॥ ४३ ॥ अयोध्यांचपुरींगत्वासरयूमवगाह्यच ॥ तत्तत्तीर्थेषुसंतर्प्यपितॄन्पिंडप्रदानतः ॥ ४४ ॥

स्वार्थेवलच्प्रत्ययः ॥ ३९ ॥ ४० ॥ इतिनिश्चित्येति ॥ इतितीर्थपर्यटनमेवसर्वजंतूनांनिर्वाणपदनिःश्रेणिकांकैवल्यपदसोपानपरंपरामुत्कृष्टांनिश्चित्यअवधार्यप्रस्थितवानितिपूर्वक्रियययैवान्वयः ॥ कथंभूतानाम् ॥ तत्रसंस्थितिकारिणांतत्रनिर्वाणपदेतीर्थपर्यटनेवासम्यक्स्थितिंकर्तुंशीलंयेषांतेतथातेषाम् ॥ ४१ ॥ अथेति ॥ अचिंतयदालोचितवान् ॥ चिंतयदितिक्वचित्पाठस्तत्राडभाव आर्षः ॥४२॥ भुवीति ॥ ततस्तस्मात्सप्तपुरीरयोध्याद्यामोक्षदातृत्वेनप्रसिद्धाः ॥ तदुक्तम् ॥ अयोध्यामथुरामायाकाशीकांतीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामोक्षदायकाइति ॥ यायांगच्छेयम् ॥ आदाविविशेषः ॥ यद्यतस्तत्रतासुसर्वतीर्थानीति ॥ ४३ ॥ इतिनिश्चित्यसविप्रःपुराऽयोध्यांगत्वाप्रयागमगमदितिद्वितीयश्लोकनान्वयः ॥ मथुरातोमध्येप्रयागसुलंध्यायोध्यायांगमनंमार्गशीर्षेनिर्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यप्रयागेमाघस्नानानुरोधार्थमितिज्ञातव्यम् ॥ तथाचाग्रेवक्ष्यति ॥ तत्रमाघमुषित्वेति ॥ ४४ ॥ ४५ ॥ प्रयागंविशिनष्टि ॥ सिताऽसितेइत्यादिकाशीत्यतःप्राक्तनेनग्रंथेन ॥ सितासितेगंगाय सुनेस्तांभवतः ॥ सुरदुर्लभेदेवानामपिदुष्प्राप्ये ॥ तदुक्तम् ॥ प्रयागंतीर्थराजानंगच्छध्वममरोत्तमाः ॥ भवांभोजभवांभोजनयनानांसुदुर्लभमिति ॥४६॥४७॥ दमयंतींशमयंतीम्॥कलिकालंकलिं कालंच ॥ कलिंदतनयांकलिंदःपर्वतस्तस्यतनयांततोनिःसृतामित्यर्थः ॥ ४८ ॥ प्रकृष्टमिति ॥ यज्वनांयज्ञकर्तॄणाम् ॥ यज्विनामितिक्वचित्पाठः सचिंत्यः ॥ प्रयागार्द्रवर्ष्मणांप्रयागेऽर्थाद्वेणीजलेनार्द्रवर्ष्मशरीरंयेषांतेतथातेषाम् ॥ ४९ ॥ ५० ॥ यमारुह्येतिकल्पभेदाभिप्रायम् ॥ यद्वा यमारुह्येतिभगवदुदरस्थितस्यवटस्थेनभगवतासहवटस्याभेदविवक्षयातथेत्युक्तम् ॥ ५१ ॥

पंचरात्रमुषित्वातुब्राह्मणान्परिभोज्यच ॥ प्रयागमगमद्विप्रस्तीर्थराजंसुदृष्टवत् ॥ ४५ ॥ सिताऽसितेसरिच्छ्रेष्ठेयत्रास्तांसुरदुर्लभे ॥ यत्राप्लुतोनरः पापःपरंब्रह्माधिगच्छति ॥ ४६ ॥ क्षेत्रंप्रजापतेःपुण्यंसर्वेषामेवदुर्लभम् ॥ लभ्यतेपुण्यसंभारैर्नान्यथाऽर्थस्यराशिभिः ॥ ४७ ॥ दमयंतींकलिंकालं कलिंदतनयांशुभाम् ॥ आगत्यमिलितायत्रपुण्यास्वर्गतरंगिणी ॥ ४८ ॥ प्रकृष्टंसर्वयागेभ्यःप्रयागमितिगीयते ॥ यज्वनांपुनरावृत्तिर्नप्रयागार्द्र वर्ष्मणाम्॥४९॥यत्रस्थितःस्वयंसाक्षाच्छूलटंकोमहेश्वरः ॥ तत्राप्लुतानांजंतूनांमोक्षवर्त्मोपदेशकः॥५०॥ तत्राऽक्षय्यवटोऽप्यस्तिसप्तपातालमूलवान्॥ प्रलयेपियमारुह्यमृकंडतनयोवसत् ॥ ५१ ॥ हिरण्यगर्भोविज्ञेयःससाक्षाद्वटरूपधृक् ॥ तत्समीपेद्विजान्भक्त्यासंभोज्याक्षयपुण्यभाक् ॥ ५२ ॥ यत्रलक्ष्मीपतिःसाक्षाद्वैकुंठादेत्यमानवान् ॥ श्रीमाधवस्वरूपेणनयेद्विष्णोःपरंपदम् ॥ ५३ ॥ श्रुतिभिःपरिपठ्येतेसिताऽसितसरिद्वरे ॥ तत्राप्लुतां गाह्यमृतंभवंतीतिविनिश्चितम् ॥ ५४ ॥ शिवलोकाद्ब्रह्मलोकादुमालोकवरात्पुनः॥कुमारलोकाद्वैकुंठात्सत्यलोकात्समंततः ॥ ५५ ॥ तपोजनमहर्भ्यश्चसर्वेस्वर्लोकवासिनः ॥ भुवोलोकाच्चभूर्लोकान्नागलोकात्तथाऽखिलात् ॥ ५६ ॥ अचलाहिमवन्मुख्याःकल्पवृक्षादयोनगाः ॥ स्नातुंमाघेसमायां तिप्रयागमरुणोदये ॥ ५७ ॥ दिगंगनाःप्रार्थयंतियत्प्रयागानिलानपि ॥ तेपिनःपावयिष्यंतिकिंकुर्मःपंगवोवयम् ॥ ५८ ॥ अश्वमेधादियागाश्चप्रया गस्यरजःपुनः ॥ तुलितंब्रह्मणापूर्वंनतेतद्रजसासमाः ॥ ५९ ॥ मज्जागतानिपापानिबहुजन्मार्जितान्यपि ॥ प्रयागनामश्रवणात्क्षीयंतेऽतीवविह्वलम् ॥ ६० ॥ धर्मतीर्थमिदंसम्यगर्थतीर्थमिदंपरम् ॥ कामिकंतीर्थमेतच्चमोक्षतीर्थमिदंध्रुवम् ॥ ६१ ॥ ब्रह्महत्यादिपापानितावद्गर्जंतिदेहिषु ॥ यावन्मज्जं तिनोमाघेप्रयागेपापहारिणि ॥ ६२ ॥

॥ ५२ ॥ परंपदंकैवल्यम् ॥ ५३ ॥ तत्रप्रमाणमाह ॥ श्रुतिभिरिति ॥ तथाचश्रुतयः ॥ सितासितेसरितेयत्रसंगथेतत्राप्लुतासोदिवमुत्पतंतीत्याद्याः ॥ ५४ ॥ वराच्छ्रेष्ठात् ॥ ५५ ॥ ५६ ॥ ५७॥ यत्प्रयागानिलानपियश्चासौप्रयागश्चेतियत्प्रयागस्तत्स्पर्शिनोयस्यप्रयागस्यसंबंधिनोवायूनपीत्यर्थः ॥ किमितिप्रार्थयंतितत्राह ॥ तेपीति ॥ स्वयमेवतत्रकिमितिनयांतितत्राह ॥ किंकुर्मइति ॥ ॥ ५८ ॥ ५९ ॥ मज्जागतानिअस्थिस्नाय्वोरंतर्वर्तिस्वच्छंजलंमज्जा ॥ अथवा अस्थ्यंतर्गतोधातुर्मज्जातद्गतानीत्यर्थः ॥ ६० ॥ कामिकंकामायहितम् ॥ ६१ ॥ गर्जंतिस्वफलदानायपरस्परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलहायंते ॥ धार्यंतीतिक्वचित्पाठःसंचित्यः ॥ मज्जंतिदेहिनइतिशेषः ॥ ६२ ॥ तद्विष्णोरिति ॥ विष्णोस्तत्प्रसिद्धंपरमंपदंसच्चिदानंदलक्षणंसदासूरयोविद्वांसःपश्यंतिऐक्येनानुभवंति एतद्यत्पुनः पुनर्वेदेपठ्यतेकथ्यते ॥ प्रथतइतिक्वचित्पाठः ॥ तत्प्रयागंतत्प्राप्त्युपायत्वादिति ॥ ६३ ॥ सरस्वतीरजोरूपारजोगुणोपाधिहिरण्यगर्भरूपा ॥ तमोरूपातमोगुणोपाधिरुद्ररूपा ॥ सत्त्वरूपासत्त्वगुणोपाधिविष्णुरूपेत्यर्थः॥६४॥इयंवेणीगंगायमुनयोःसंभेदः॥ निःश्रेणीसोपानपरंपरा॥श्रद्धाऽश्रद्धाप्लुतस्यास्तिक्यबुद्ध्यानास्तिक्यबुद्ध्यावास्नातस्यचकाराद्बलात्स्नापितस्यापीत्यर्थः ॥ ६५ ॥ इदानीं प्रयागमारभ्यकाश्याःसीमानंवदन्स्त्रीरूपाकारेणकाशींनिरूपयति ॥ काशीति ॥ काशीतिकाचिदबलाऽस्तीतिशेषः॥काचिदनिर्वचनीयगुणेगणेत्यर्थः॥इयंयाऽत्रप्रयागेगदिताकथितावेणीत्वेनेतिशेषः॥ सातदीयाकाशीसंबंधिनीवेणीप्रवेणीप्रोषितभर्तृकादिभिर्यानिबध्यतइत्यर्थः ॥ वेणिःप्रवेणिःशीर्षण्यशिरस्यौविशदेकचेइत्यमरः ॥ कथंभूता ॥ भुवनेषुलोकेषुरूढाप्रख्याता ॥ लोलार्ककेशवावेवं विलोलेचंचलेविलोचनेविशिष्टेलोचनेयस्याःसातथा ॥ तस्याहस्तयुगलंचवरणानदीअसिश्च ॥ अक्षयशर्मभूमिरक्षयंयत्सुखंब्रह्मानंदैकलक्षणंतस्यभूमिरधिष्ठानम् ॥ तथाचवामनपुराणेमहेश्वरं

तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ एतद्यत्पठ्यतेवेदेतत्प्रयागंपुनःपुनः ॥ ६३ ॥ सरस्वतीरजोरूपातमोरूपाकलिंदजा ॥ सत्त्वरूपाचगंगात्र नयंतिब्रह्मनिर्गुणम् ॥ ६४ ॥ इयंवेणीहिनिःश्रेणीब्रह्मणोवर्त्मयास्यतः ॥ जंतोर्विशुद्धदेहस्यश्रद्धाऽश्रद्धाप्लुतस्यच ॥ ६५ ॥ काशीतिकाचिदबलाभु वनेषुरूढालोलार्ककेशवविलोलविलोचनाच ॥ तद्दोर्युगंचवरणासिरियंतदीयावेणीतियाऽत्रगदिताऽक्षयशर्मभूमिः ॥ ६६ ॥ ॥ अगस्तिरुवाच ॥ ॥ सुधर्मिणिगुणांस्तस्यकोत्रवर्णयितुंक्षमः ॥ तीर्थराजप्रयागस्यतीर्थैःसंसेवितस्यच ॥ ६७ ॥ पापिनांयानिपापानिप्रसह्यक्षालितान्यहो ॥ तच्छुद्ध्यैसेव्यतेतीर्थैःप्रयागमधिकंततः ॥ ६८ ॥ प्रयागस्यगुणान्ज्ञात्वाशिवशर्माद्विजःसुधीः ॥ तत्रमाघमुषित्वाऽथप्रापवाराणसींपुरीम् ॥ ६९ ॥ प्रवेशएवसंवीक्ष्यसदेहलिविनायकम् ॥ अन्वलिंपत्ततोभक्त्यासाज्यसिंदूरकर्दमैः ॥७०॥ निवेद्यमोदकान्पंचवंचयंतंनिजंजनम् ॥ महोपसर्गवर्गेभ्यस्ततो ऽतःक्षेत्रमाविशत् ॥७१॥ आगत्यदृष्ट्वामणिकर्णिकायामुदग्वहांस्वर्गतरंगिणींसः ॥ संक्षीणपुण्येतरपुण्यकर्मणांनृणांगणैःस्थाणुगणैरिवावृताम् ॥७२॥

प्रतिहरेर्वचनम् ॥ महेश्वरश्शृणुष्वेमांममवाचंकलस्वनाम् ॥ ब्रह्महत्याक्षयकरींशुभदांपुण्यवर्द्धनीम् ॥ योसौप्राङ्मंडलेपुण्येमदंशप्रभवोऽव्ययः ॥ प्रयागेवसतेनित्यंयोगशायीतिविश्रुतः ॥ चरणा द्दक्षिणात्तस्यविनियाताँसरिद्वरा ॥ विश्रुतावरणेत्येवसर्वपापहराशुभा ॥ सव्यादन्याद्द्वितीयाचअसिरित्येवविश्रुता ॥ तेउभेसरितांश्रेष्ठेलोकपूज्येबभूवतुः ॥ तयोर्मध्येतुयोदेशस्तत्क्षेत्रंयोगशायिनः ॥ त्रैलो क्यप्रवरंतीर्थंसर्वपापप्रमोचनम् ॥ नताद्दगस्तिगगनेभूम्यांनचरसातले ॥ तत्रास्तिनगरीपुण्याख्यातावाराणसीशुभा ॥ यस्यांहिभोगिनोनाशेप्रयांतिभवतोलयमिति ॥ ६६ ॥ प्रयागमाहात्म्यमुपसं हरति ॥ सुधर्मिणीतिद्वयेन ॥ शोभनाधर्माःपातिव्रत्यादिलक्षणायस्याः सा ॥ सधर्मिणीतिक्वचित्पाठः ॥ ६७ ॥ तच्छुद्ध्यैतेषांपापानांशुद्ध्यैनाशाय ॥ अहोहेकांते ॥ ६८ ॥ ६९ ॥ प्रवेशेति ॥ क्षेत्रप्रवेशसमयेएवसशिवशर्मादेहलीविनायकंवीक्ष्यप्रथमतःपंचमोदकान्निवेद्यततःपश्चात्साज्यसिंदूरकर्दमैर्घृताक्तसिंदूरपंकैरन्वलिंपल्लिप्तवानितिद्वयोरन्वयः ॥ कथंभूतंविनायकम् ॥ महोपसर्गवर्गे भ्योमहाविघ्नसमूहेभ्योनिजंजनंभक्तंवंचयंतंगोपायंतमित्यर्थः ॥ ७० ॥ निवेद्येतिपूर्वस्मिन्श्लोकेऽन्वयः ॥ ७१ ॥ आगत्येति ॥ सशिवशर्मामणिकर्णिकायामागत्यउदग्वहामुत्तरवाहिनींस्वर्गतरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिर्णीस्वर्नदींदृष्ट्वाविस्मितोवभूवेतिशेषइतितृतीयश्लोकेनान्वयः ॥ किमाकारोविस्मयस्तमाह ॥ मयाइदमविमुक्तमालोकिदृष्टंनवेति ॥ कथंभूतांस्वर्नदीम् ॥ संक्षीणानिपुण्येतराणिपापानिपुंण्यानिच
कर्माणियेषांतेषांनृणांगणैरावृताम् ॥ कैरिव ॥ स्थाणुगणैरिव ॥ स्थाणोःश्रीरुद्रस्ययेगणाःरुद्ररूपावागणास्तैरिवेति ॥ ७२ ॥ किंकृत्वा सचैलमाप्लुत्यसवस्त्रंनिमज्ज्य ॥ कुत्र ॥ जले ॥
कथंभूते ॥ अमले नविद्यतेऽविद्यातत्कार्यलक्षणोमलोयस्मात्तस्मिन्माणिकर्णिकइत्यर्थः :॥ तदुक्तम् ॥ यस्यामधोमज्जनमूर्ध्वगत्यैयत्पंकलेपोविमलत्वसिद्ध्यै ॥ यद्वारिसंसारतरोःप्रशांत्यैनमोऽ
स्तुतस्यैमणिकर्णिकायैइति ॥ हेअमलेशुद्धांतःकरणे ॥ अमलइतिपाठेनिष्पापइत्यर्थः ॥ अविलंबितंयथास्यात् आलंबिताशुद्धाबुद्धिर्येनसतथा ॥ पुनः किंकृत्वा ॥ संतर्प्यप्रीणयित्वा ॥ कान्देवान् ॥
देवाश्चब्रह्मादयः ऋषयश्चमधुच्छंदआदयः मनुष्याश्चसनकादयः दिव्यपितरश्चकव्यवाडादयस्तान्स्वान्पितॄंश्चस्वदेहजनकादीन् ॥ पूर्वोक्तानुष्ठानेतस्याक्रियाकांडवेत्तृत्वंहेतुमाह ॥ सहीति
॥ ७३ ॥ हियस्मात् ॥ द्राग्झटिति ॥ प्रागितिक्वचित्पाठः ॥ पुनःकिंकृत्वा ॥ पंचतीर्थिकांवरणासिसंभेदपंचनदमणिकर्णिकादशाश्वमेधात्मिकांविधाय ॥ एतेषुपंचसुस्नानादिकंकृत्वेत्यर्थः ॥
आदित्यादिरूपांवा ॥ यथास्वंस्वंधनमनतिक्रम्यवित्तशाठ्यमकृत्वेतियावत् ॥ विस्मयप्रकारमाह ॥ इदंमयालोकिनवेति ॥ इदमविमुक्तपुरंनवा ॥ ७४ ॥ पश्चादवलोकितमितिनिर्धार्यकाशींवर्णयति
नस्वःपुरीत्यष्टभिः ॥ सास्वःपुरीअमरावतीतुनिश्चितंअनयाकाश्यापुरापुर्यासमंसार्धंसमंजसापिसम्यक्तत्त्वदृशाविचारेणापि अपिशब्दाद्व्यवहारदृशाविचारेणापिप्रतिसाम्यंसमस्यभावःसाम्यं
साम्यंसाम्यंप्रतिप्रतिसाम्यं नआवहेन्नाप्राप्नुयादित्यन्वयः ॥ उभयदृशाविचारेसाम्याभावप्रदर्शनार्थंवीप्सांतरगर्भितप्रतिसाम्यशब्दप्रयोगः ॥ उभयदृशाविचारेणसाम्याभावायतंत्रेणउभय

सचैलमाप्लुत्यजलेऽमलेऽमलेऽविलंबमालंबितशुद्धबुद्धिः ॥ संतर्प्यदेवर्षिमनुष्यदिव्यपितॄन्पितॄन्स्वान्सहिकर्मकांडवित् ॥ ७३ ॥ विधायचद्राक्स
हिपंचतीर्थिकांविश्वेशमाराध्यततोयथास्वम् ॥ पुनःपुनर्वीक्ष्यपुरींपुरारेरिदंमयालोकिनवेतिविस्मितः ॥ ७४ ॥ नस्वःपुरीसात्वनयापुरासमं
समंजसापिप्रतिसाम्यमावहेत् ॥ प्रबंधभेदाद्व्यतिरिक्तपुस्तकप्रतिर्यथासल्लिपिभेदभंगतः ॥ ७५ ॥

निग्रहेतुमाह ॥ प्रबंधभेदादिति ॥ प्रबंधनंप्रबंधोरचनापरिपाटीतस्यभेदात् ॥ अमरावतीहिब्रह्मणाप्रतिदिनंरच्यतेइयंतुसकृदेवेति ॥ तत्रापिसाब्रह्मणारच्यते इयंतुस्वयमीश्वरेण ॥ साचक्षुद्ररत्न
निचयखचितालपोत्सेधाच इयंचानर्घ्यरत्नप्रचयनिर्मितागगनोत्सेधाच ॥ अथवा प्रबंधभेदात्प्रबंधयोर्भेदात् ॥ स्वःपुर्यांस्थितानांहिप्रकृष्टोबंधःप्रबंधःपुनःपुनर्जन्ममरणादिरूपः संसारःस्यात्काश्यां
स्थितानांतुप्रगतोबंधःप्रबंधोभवेदित्येवंप्रबंधयोर्भेदादित्यर्थः ॥ अथवा प्रकृष्टोबंधःप्रबंधस्तस्यभेदाद्बाहुल्यादमरावतीस्थितानांप्रकृष्टोबंधःप्रबंधस्तस्यभेदाद्विदारणात्काशीस्थानामित्यर्थः ॥ अम
रावतीकाश्याःसाम्यंनैवआवहेदित्यत्रदृष्टांतमाह ॥ व्यतिरिक्तपुस्तकेति ॥ अयमर्थः ॥ सर्वस्मादविद्यातत्कार्यादतिरिच्यतइत्यतिरिक्तंब्रह्मविगतमतिरिक्तंप्रतिपाद्यत्वेनयत्रतद्व्यरिक्तंअनात्मशास्त्रंतच्च
तरपुस्तकंचेतिव्यतिरिक्तपुस्तकंतेनसहयाप्रातिःप्रतिपुस्तिकावात्स्यायनादिप्रणीतियांद्युपजीव्यकामादिशास्त्रंप्रवृत्तंतच्चतत्पुस्तकंकिंचिदनात्मशास्त्रजातमित्यर्थः ॥ सायथा सद्ब्रह्म ओंतत्सदितिनिर्दे
शोब्रह्मणस्त्रिविधःस्मृतइतिस्मृतेस्तस्यालिपिस्तत्प्रतिपादिकालिपिर्यत्रतत्सल्लिपिअध्यात्मशास्त्रंतच्चताद्धियतइतिभेदोनानाप्रकारश्चतस्यभंगतोभंगेनखंडेनभागेनेतियावत् ॥ साम्यंनावहेत्तद्वदिति॥सल्लिपि
भेदभंगितइतिपाठेसतीसल्लिपयाचासौलिपिश्चेतिसल्लिपिस्तस्याभेदोनानात्वंतस्यभंगोभागएकदेशइतियावत् ॥ सवर्ततेयस्यतेनशास्त्रेणेतिव्याख्येयम् ॥ उभयपक्षेपितृतीयांतात्तसिल् ॥ अथवासल्लिपि
भेदभंगितइतितंत्रेणोच्चरितत्वात्काशीनिष्ठद्वितीयहेतुपरतयापिव्याकर्तव्यम् ॥ सतीलिपिःसल्लिपिर्विधात्राललाटेलिखितेतियावत् ॥ तदुक्तम् ॥ ललाटेलिखितंयत्रषष्ठीजागरवासरे ॥ नो[illegible]शंकरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माद्यन्यथा कर्तुमर्हतीति ॥ चित्रगुप्तलिखितावातस्याभेदभंगतोविशेषभंजनात्प्रारब्धातिरिक्तायालिपेर्नाशकत्वादित्यर्थः ॥ सन्येोलिपिभेदस्तस्यभंगतइतिवा ॥ पाठांतरेप्ययमेवार्थः ॥ स्वस्त्वनये तिक्वचित्पाठः ॥ स्वर्गतयेतिक्वचित्सचिंत्यः ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ ७५ ॥ पयोपीति ॥ यत्रत्यंयत्रकाश्यांभवंयत्रत्यंकाशीस्थमित्यर्थः ॥ पयोप्यचिंत्यवैभवम् ॥ अपिःसमुच्चये ॥ गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यमरः ॥ नकेवलंस्थलंअचिंत्यवैभवंजलमपीत्यर्थः ॥ नचिंत्यंतर्कयितुंयोग्यवैभवंकैवल्यदानसामर्थ्यंयस्यतत्तथा ॥ तथाचोक्तम् ॥ गंगायांचजलेमोक्षोवाराणस्यांजलेस्थलइति ॥ अतोदिविस्थितायासुधाऽमृतंसासाधुयथास्यात्सुधाव्यर्थंआप्यतेप्रार्थ्यतइत्यर्थः ॥ दिविस्थितैरितिपाठेआप्यतेपीयतेइत्यर्थः ॥ उभयत्रहेतुमाह ॥ इदंपयोयदिक्वचित्कदाचित्पीतंस्यात्तदाप्रसूतेर्जनन्याःपयोधरेयत्पयःस्तन्यंतयानपीयते ॥ तुशब्दोयथाशब्दार्थे ॥ पीतामृतैःपानानंतरंजन्मलब्ध्वायथापीयतेतथानेत्यर्थः ॥ प्रसूतोच्चपयोधरइतिक्वचित्पाठः ॥ तदाप्रकर्षेणसूतइतिप्रसूतामातेतिव्याख्येयम् ॥ उच्चपयोधरइत्यनेनोच्चस्तनस्यकठिनत्वात्पानेदुःखाधिक्यमितिसूचितम् ॥ ७६ ॥ अनामयाइति ॥ यत्रकाश्यांजनालोकाःनयेशितुर्नीतिशास्त्रोपदेष्टुर्नीयतेप्राप्यतेसर्वोर्थोऽनेनेतिनयोवेदस्तस्येशितुस्तत्प्रवर्त्तकस्यशास्त्रयोनेरितिवाचिंतनयाशुभानुध्यानेनामयास्त्रिविधतापरहिताः सत्कर्मकृतः सत्कर्मकुर्वाणाएवपिनाकिनाविनाविश्वेश्वरंविनाकर्ममनागल्पमपिनकुर्वतेकिंतुविश्वनाथार्पणेनैवकुर्वंतीत्यर्थः ॥ अतएवसर्वतःसर्वप्रकारेणशर्वगणान्शर्वस्येश्वरस्यगणान्नंदिभृंगिप्रमुखाननुकुर्वतेऽनुकुर्वंतीतितैस्तुल्याभवंतीत्यर्थः ॥ सर्वगणांश्चेतिपाठेपिसएवार्थः ॥ यद्वा

पयोपियत्रत्यमचिंत्यवैभवंदिविस्थितासाधुसुधाप्यतोसुधा ॥ तथाप्रसूतेस्तुपयोधरेपयोनपीयतेपीतमिदंयदिक्वचित् ॥ ७६ ॥ अनामयाश्चिंतनयानयेशितुर्जनामनाग्यत्रविनापिनाकिना ॥ नकर्मसत्कर्मकृतोपिकुर्वतेऽनुकुर्वतेशर्वगणांश्चसर्वतः ॥७७॥ नवर्ण्यतेकैःकिलकाशिकेयंजंतोःस्थितस्यात्रयतोंतकाले ॥ पचेलिमैःप्राक्कृतपुण्यभारैरोंकारमोंकारयतींदुमौलिः ॥ ७८ ॥ संसारिचिंतामणिरत्रयस्मात्तंतारकंसज्जनकर्णिकायाम् ॥ शिवोभिधत्तेसहसांऽतकालेतद्गीयतेसौमणिकर्णिकेति ॥ ७९ ॥ मुक्तिलक्ष्मीमहापीठमणिस्तच्चरणाब्जयोः ॥ कर्णिकेयंततःप्राहुर्यांजनामणिकर्णिकाम् ॥ ८० ॥

सर्वेचतेगणाश्चार्यादीश्वरस्येति ॥ न्यक्कुर्वतइतिक्वचित्पाठः ॥ तत्रतेषांगणानांसत्कर्माभावात्प्रयुतनिषिद्धाचरणाच्चन्यक्कुर्वंतेतिरस्कुर्वंतइवेतिव्याख्येयम् ॥७७॥ नवर्ण्यतइति॥ इयंकाशिका ॥ किलेतिप्रसिद्धौ ॥ कैर्नवर्ण्यतेस्तूयतेऽपितुसर्वैरेवेत्यर्थः॥तत्रहेतुमाह ॥ यतोयस्मादंतकालेपचेलिमैःफलदानोन्मुखैःप्राक्तनपुण्यभारैःप्राचीनपुण्यनिचयैर्हेतुभिरत्रास्थितस्यजंतोःप्राणिमात्रस्यइंदुमौलिश्चंद्रशेखरःओंकारंप्रणवंओंकारयतिस्वीकारयति उपदिशतीत्यर्थः ॥ ७८ ॥ मणिकर्णिकानामव्युत्पादयंस्तस्याअतिश्रेष्ठतामाह ॥ संसारिचिंतेति ॥ तत्तस्मादसौमणिकर्णिकेतिगीयतइत्यन्वयः ॥ तस्मात्कस्मात् ॥ यस्मात्संसारिणांप्राणिनांचिंतामणिरिवचिंतामणिर्विश्वनाथःसर्वपुरुषार्थप्रदत्वाच्छिवःकल्याणरूपस्तंतारकंप्रसिद्धमोंकारंषडक्षरंराममंत्रराजंवाअंतकालेसज्जनकर्णिकायामत्राम्रियमाणस्यदक्षिणकर्णेऽभिधत्तेकथयतीत्यर्थः ॥ तत्रश्रुतिरुक्तैव ॥ संसारचिंतामणिरितिक्वचित्पाठः ॥ तदासम्यक्सारःसरणंयेषांतेसंसाराःसंसारिणइत्यर्थः ॥ जीवानांसंसारचिंतामणिरित्यध्याहारोवा ॥ ७९ ॥ प्रकारांतरेणमणिकर्णिकाशब्दव्युत्पत्तिमाह॥ मुक्तिलक्ष्मीति ॥ ततोजनाःयांमणिकर्णिकांप्राहुःसाऽसावित्यध्याहृत्ययोजना ॥ ततःकुतः ॥ यतोमुक्तिलक्ष्मीर्मोक्षलक्ष्मीस्तस्यामहापीठंमहासिंहासनंमहत्स्थानंवातद्रूपोमणिः सर्वोत्कृष्टत्वान्मणिरिवमणिः ॥ यद्वा मुक्तिलक्ष्म्यामहापीठानिमहास्थानान्ययोध्यादीनिमणिकर्णिकास्थलंविहायकाश्यंतानितेषुमणिरिवमणिःसर्वोत्कृष्टाइयंस्थली॥सायुज्य

१ सुधासुधाप्यतइतिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तिर्मणिकर्णिकायामित्युक्तेः ॥ यद्वा मुक्तिलक्ष्मीमहापीठेषुमणिरिवमणिःकाशी ॥ अन्यानिपुण्यक्षेत्राणिकाशीप्राप्तिकराणीत्युक्तेः ॥ साचतस्यांमुक्तिलक्ष्मीमहापीठमणौकाश्यांवातच्चरणाब्जयो स्तस्यामोक्षलक्ष्म्याश्चरणाब्जयोःपादपद्मयोः कर्णिकाचेयंतेनमणिकर्णिकांप्राहुरित्यर्थः ॥ किंत्वंतिमपक्षेअध्यात्मत्वयोजनासोढव्या ॥ ८० ॥ जरायुजामनुष्यादयः अंडजाःपक्ष्यादयः उद्भिज्जा स्तरवः स्वेदजामत्कुणादयोऽत्रवासिनएतेत्रि दशैर्देवैःसमानभवंतिकिंतुतेभ्योधिकाइत्यर्थः ॥ तत्रहेतुमाह ॥ मोक्षभाजस्तइति ॥ देवैःकीदृशैः ॥ मुक्तिदुर्दशैर्मुक्तिर्दुर्दशादुष्प्रापदशायेषांतैस्तथातैः ॥ ॥ ८१ ॥ काशींदृष्ट्वाएतावान्कालोममवृथायातइत्यनुतपति ॥ ममजन्मेति ॥ यावन्मयाकाशिकानैक्षिष्टनैक्षिनादर्शीतियावत् ॥ तावन्ममजन्मवृथाजातमित्यन्वयः ॥ कथंभूतस्य ॥ दुर्वृत्तस्यदुश्चेष्टितस्यजडात्मनोऽज्ञस्य ॥ काशिकाकथंभूता ॥ मुक्तिकाशिकाकैवल्यप्रकाशिका ॥ ८२ ॥ पुनःपुनरितिव्यासोक्तिः ॥ अतिथीकृत्यविषयीकृत्य ॥ तृप्तिमलंबुद्धिम् ॥ ८३ ॥ काशींप्राप्याप्यवंत्यायाश्चतस्रोद्रष्टुंविमृशति ॥ सप्तानांचेतिद्वयेन ॥ धुरीणांश्रेष्ठाम् ॥ अवयामिजानामि ॥ सुनिर्वाणविश्राणनविचक्षणां सुष्ठुनिर्वाणंसुनिर्वाणंसायुज्यंकैवल्यमित्यर्थः ॥ तस्यय

जरायुजांडजोद्भिज्जाःस्वेदजाह्यत्रवासिनः ॥ नसमामोक्षभाजस्तेत्रिदशैर्मुक्तिदुर्दशैः ॥ ८१ ॥ ममजन्मवृथाजातंदुर्वृत्तस्यजडात्मनः ॥ नाद्ययावन्मयै क्षिष्टकाशिकामुक्तिकाशिका ॥ ८२ ॥ पुनःपुनश्चतत्क्षेत्रमतिथीकृत्यनेत्रयोः ॥ विचित्रंचपवित्रंचतृप्तिंनाधिजगामह ॥ ८३ ॥ सप्तानांचपुरीणांहिधुरी णामवयाम्यहम् ॥ वाराणसींसुनिर्वाणविश्राणनविचक्षणाम् ॥ ८४ ॥ तथापिनचतस्रोन्यामयादृग्गोचरीकृताः ॥ तासांप्रभावंविज्ञायाप्यागमिष्याम्य हंपुनः ॥ ८५ ॥ तीर्थयात्रांप्रतिदिनंकुर्वन्नूनंसवत्सरम् ॥ नप्रापसर्वतीर्थानितीर्थंकाश्यांतिलेतिले ॥ ८६ ॥ ॥ अगस्तिरुवाच ॥ ॥ जानन्न पिगुणान्देविक्षेत्रस्यास्यपरान्द्विजः ॥ नानाप्रमाणैःप्रवणोनिरगात्सतथाप्यहो ॥ ८७ ॥ किंकुर्वंतिहिशास्त्राणिसप्रमाणानिसुंदरि ॥ महामायांभवित्रींतां कोनिवारयितुंक्षमः ॥ ८८ ॥ कःसमुच्चलितंचेतस्तोयंवासंप्रतीपयेत् ॥ प्रोच्चस्थानस्थितमपिस्वभावोयच्चलस्तयोः ॥ ८९ ॥ शिवशर्माव्रजन्सोथदे शाद्देशांतरंक्रमात् ॥ महाकालपुरींप्रापकलिकालविवर्जिताम् ॥ ९० ॥ कल्पेकल्पेखिलंविश्वंकालयेद्यःस्वलीलया ॥ तंकालंकलयित्वायो महाकालोभवत्किल ॥ ९१ ॥

द्विश्राणनंवितरणमर्थाज्जीवानांतत्र विचक्षणांनिपुणांसमर्थामित्यर्थः ॥ ८४ ॥ एवंचेत्तर्ह्यलमन्यत्रगमनेनेतिस्वयमाशंक्याह ॥ तथापीति ॥ ८५ ॥ तिलेतिलेतिलपरिमितभूप्रदेशेतीर्थयतोऽ स्तीतिशेषः ॥ ८६ ॥ जानन्निति ॥ सशिवशर्मानानाप्रमाणैःक्षेत्रस्यगुणान्जानन्नपिनिरगात् निर्गतः ॥ काश्याइत्यर्थः ॥ प्रमाणैःकाश्यागुणज्ञानेहेतुमाह ॥ प्रवणइति ॥ अंतर्निष्ठइत्यर्थः ॥ ॥ ८७ ॥ तत्रभवितव्यरूपांमायांहेतूकरोति ॥ किंकुर्वंतीति ॥ हीतिनिश्चये ॥ ८८ ॥ संक्षुभितचित्तस्यापितत्रकारणत्वमाह ॥ कःसमुच्चलितमिति ॥ कःपुरुषःप्रोच्चस्थानस्थितंप्रोत्कृष्टस्थान स्थितमपिचित्तंप्रतीपयेत्प्रतिकूलयेन्निवर्तयेदित्यर्थः ॥ तत्रदृष्टांतमाह ॥ तोयंवेति ॥ वेत्युपमायाम् ॥ उभयत्रनिवर्तनाभावेहेतुमाह ॥ स्वभावोयच्चलस्तयोरिति ॥ यद्यतः ॥ चलश्चंचलः ॥ स्वभावेवेतिपाठेयतइत्यर्थेवाशब्दः ॥ ८९ ॥ महाकालपुरींमहाकालस्यपुरीम् ॥ कलिकालविवर्जितांकलिकालाभ्यामस्पृष्टाम् ॥ ९० ॥ महाकालनामनिर्वक्ति ॥ कल्पेकल्पइतिश्लोकेन ॥

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलयेत्भक्षयेत् ॥ कलयित्वाभक्षयित्वा ॥ सकालकालईश्वरोऽग्रसदितिश्रुतेः ॥ कालमूषकभक्षकइतिस्मृतेश्च ॥ तस्यपुरीमितिपूर्वेणैवान्वयः ॥ ९१ ॥ तस्याएवनामांतरंनिर्वक्ति ॥ पापादिति ॥ सामहाकालपुरी ॥ कलौतस्यानामांतरमाह ॥ युगेयुगइति ॥ उज्जयिनीति ॥ कल्पेकल्पेइतिक्वचित्पाठः ॥ तदुक्तम् ॥ प्राक्कल्पेसुवर्णशृंगाद्वितीयेचकुशस्थली ॥ तृतीयेऽवंतिनीप्रोक्ताचतुर्थे चामरावती॥पंचमेचूडामणिः प्रोक्तापष्ठेपद्मावतीस्मृता ॥ सप्तमेचोज्जयिनीपुरीति ॥ ९२ ॥ नसमुच्छ्रयतिउच्छूनतांनगच्छतीत्यर्थः ॥ ९३ ॥ परःकोटीनिकोटिभ्यःपराणिअसंख्यातानीत्यर्थः ॥ ॥ ९४ ॥ एकंलिंगमिति ॥ एकंज्योतिज्योंतिर्मयंलिंगमित्यग्रिमेणसंबंधः ॥ ९५ ॥ सिद्धवटेज्योतिरिति ॥ इहअवंत्यांयेद्विजास्त्रिवर्णास्तेसिद्धवटेज्योतिज्योंतिर्लिंगंपश्यंति ॥ सिद्धवटेयज्ज्योतिस्तज्ज्योतिःपश्यंतीतिवा ॥ स्थिताइतिक्वचित्पाठःसचिंत्यः ॥ अथवेति॥ श्रीमहाकालस्ययेद्रष्टारोऽतएवपुण्यराशयस्तेसर्वेपितज्ज्योतिर्लिंगंपश्यंतीत्यन्वयः॥९६॥ कष्टिभिःकष्टवद्भिःसंसारांगारपच्य

पापादवंतीसाविश्वमवंतीतिनिगद्यते ॥ युगेयुगेन्यनाम्नीसाकलावुज्जयिनीतिच ॥ ९२ ॥ विपन्नोयत्रवैजंतुःप्राप्यापिशवतांस्फुटम् ॥ नपूतिगंधमाप्नोतिसमुच्छ्रयतिनक्वचित् ॥ ९३ ॥ यमदूतानयस्यांहिप्रविशंतिकदाचन ॥ परःकोटीनिलिंगानितस्यांसंतिपदेपदे ॥ ९४ ॥ हाटकेशोमहाकालस्तारकेशस्तथैवच ॥ एकंलिंगंत्रिधाभूत्वात्रिलोकींव्याप्यसंस्थितम् ॥ ९५ ॥ ज्योतिःसिद्धवटेज्योतिस्तेपश्यंतीहयेद्विजाः ॥ अथवाश्रीमहाकालद्रष्टारःपुण्यराशयः ॥ ९६ ॥ महाकालस्यतल्लिंगंयैर्दृष्टंकष्टिभिःक्वचित् ॥ नस्पृष्टास्तेमहापापैर्नदृष्टास्तेयमोद्भटैः ॥ ९७ ॥ महाकालपताकाग्रैःस्पृष्टपृष्ठास्तुरंगमाः ॥ अरुणस्यकशाघातंक्षणंविश्रमयंतिखे ॥ ९८ ॥ महाकालमहाकालमहाकालेतिसंततम् ॥ स्मरतःस्मरतोनित्यंस्मरकर्तृस्मरांतकौ ॥ ९९ ॥ एवमाराध्यभूतेशंमहाकालंततोद्विजः ॥ जगामनगरींकांतींकांतांत्रिभुवनादपि ॥ १०० ॥ लक्ष्मीकांतःस्वयंसाक्षाज्जंतूस्तत्रनिवासिनः ॥ श्रीकांतानेवकुरुतेपरत्रेहचनिश्चितम् ॥ १ ॥ दृष्ट्वाकांतींकांतिमतींकांतिमद्भिर्निषेविताम् ॥ कांतिमानभवत्सोपिनाकांतिस्तत्रकस्यचित् ॥ २ ॥ तत्रकृत्यंचयत्कृत्यंतत्कृत्वासर्वकृत्यवित् ॥ सप्तरात्रमुषित्वातुययोद्वारवतींपुरीम् ॥ ३ ॥ चतुर्णामपिवर्गाणांयत्रद्वाराणिसर्वतः ॥ अतोद्वारवतीत्युक्ताविद्वद्भिस्तत्त्ववेदिभिः ॥ ४ ॥ अस्थीन्यपिचजंतूनांयत्रचक्रांकितान्यहो ॥ किंचित्रंतत्रयत्रस्युःशंखचक्रांकितैःकरैः ॥ ५ ॥

मानैरित्यर्थः ॥ दृष्टिभिरितिक्वचित्पाठः ॥ ९७ ॥ स्पृष्टपृष्ठाःस्पृष्टानिपृष्ठानियेषांतेतथा ॥ स्पृष्टाःपृष्ठेइतिक्वचित्पाठः ॥ कशाघातंअश्वनोदिन्यास्ताडनजंदुःखंविश्रमयंति ॥ महाकालप्रासादपताकाछायायांक्षणंविश्रम्यनाशयंतीत्यर्थः ॥ एतेनप्रासादस्यात्युच्छ्रितत्वंध्वनितम् ॥९८॥ स्मरतश्चिंतयतोध्यायतोभक्तानितियावत् ॥ स्मरतःकरुणार्द्रयादृशापश्यतइत्यर्थः ॥ स्मरकर्तृस्मरांतकौ श्रीकृष्णमहेश्वरौ ॥९९॥१००॥ निवासिनइतितत्रगतानामुपलक्षणम् ॥ श्रीकांतान्लक्ष्मीपतीन् ॥१॥ कांतीनाम्ना॥ कान्तीनामनिर्वक्ति ॥ कांतिमतीमिति॥कांचीमितिक्वचित्पाठः ॥२॥ तत्रेति॥ तत्रयत्कृत्यंकर्तव्यंतत्कृत्यंकृत्वेतिसंबंधः ॥ यत्कृत्यंनैत्यकंतत्रकांत्यांचयत्कृत्यंतत्सर्वंकृत्वेतिवा ॥ ३ ॥द्वारवतीनामनिर्वक्ति॥चतुर्णामिति ॥ वर्गाणांधर्मार्थकाममोक्षाणाम् ॥ वर्णानामितिपाठेअपि शब्दादन्येषामपि॥४॥अहोआश्चर्ये ॥ यत्रद्वारकायांजंतूनांप्राणिमात्राणामस्थीन्यपिचक्रांकितानिभवंतितत्रतस्यांशंखचक्रांकितैःशंखचक्राद्युपलक्षितैःकरैर्जंतवइतिशेषः ॥ विष्णुरूपाःस्युर्भवेयुरितिकिं ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रंनाकिंचित्॥यत्रत्याःसर्वेप्राणिनोभगवत्सारूप्यभाजइत्यर्थः ॥ तदुक्तम् ॥ संवत्सरंचषण्मासंमासंमासार्धमेवच ॥ द्वारकावासिनःसर्वेनरानार्यश्चतुर्भुजाइति ॥ ५॥६॥ तद्गोपीचंदनइत्यत्रतच्छब्दो
द्वारकाविषयः ॥ ७ ॥ ज्वलदिंगलवत्प्रदीप्ताग्निवत् ॥ ज्वलदंगारवदितिक्वचित्पाठः ॥ ८ ॥ प्रसंगात्तुलस्यामाहात्म्यमाह ॥ तुलसीति ॥ ९ ॥ मुषन्नपहरन् ॥ ११० ॥ ११ ॥ सशिवशर्मा ॥
अतंद्रितोऽनलसः ॥ १२ ॥ मायापुरीनामनिर्वक्ति ॥ यत्रसेति ॥ मायापाशैरहंकारममकाररज्जुभिर्नपाशयेन्नबध्नाति प्राणिनइतिशेषः ॥ १३ ॥ १४ ॥ प्रसंगाद्गंगामाहात्म्यंवदन्काशीतरा
भ्यःपुरीभ्यस्तस्याःश्रैष्ठ्यमाह ॥ यतइतिद्वयेन ॥ यद्वा गंगाद्वारंमोक्षद्वारंहरिद्वारमितिनामत्रयंनिर्वक्ति ॥ इतइति ॥ यन्नामेत्यत्रयच्छब्दोगंगाविषयः ॥ १५ ॥ वैकुंठस्यैकसोपानमित्यनेनमोक्षद्वार

अंतकःशिक्षयत्येवंनिजदूतान्मुहुर्मुहुः ॥ तेत्याज्यायैर्द्वारवत्यानामापिपरिगृह्यते ॥ ६ ॥ श्रीखंडेक्कसआमोदःस्वर्णेवर्णःक्कताहशः ॥ तत्पावित्र्यंक्कवै
तीर्थेतद्गोपीचंदनेयथा ॥ ७ ॥ दूताःशृण्वंतुयद्भालंगोपीचंदनलांछितम् ॥ ज्वलदिंगलवत्सोपिदूरेत्याज्यःप्रयत्नतः ॥ ८ ॥ तुलस्यलंकृतायेयेतुलसी
नामजापकाः ॥ तुलसीवनपालायेतेत्याज्यादूरतोभटाः ॥ ९ ॥ युगेयुगेद्वारवत्यारत्नानिपारितोमुषन् ॥ अब्धीरत्नाकरोद्यापिलोकेषुपरिगीयते
॥ ११० ॥ द्वारवत्यांम्रियंतेयेजंतवःकालनोदिताः ॥ चतुर्भुजाःस्युर्वैकुंठेतेपीतांबरधारिणः ॥ ११ ॥ तत्रापिसंतर्प्यपितॄन्ससदेवर्षिमानवान् ॥
तत्रतेषुचतीर्थेषुसस्नौसर्वेष्वतंद्रितः ॥ १२ ॥ ततोमायापुरींप्राप्तोदुष्प्रापांपापकारिभिः ॥ यत्रसावैष्णवीमायामायापाशैर्नपाशयेत् ॥ १३ ॥ केचिद्दूचुर्ह
रिद्वारंमोक्षद्वारंततःपरे ॥ गंगाद्वारंचकेप्याहुःकेचिन्मायापुरंपुनः ॥ १४ ॥ यतोविनिर्गतागंगाख्याताभागीरथीभुवि ॥ यन्नामोच्चारणात्पुंसांपापंया
तिसहस्रधा ॥ १५ ॥ वैकुंठस्यैकसोपानंहरिद्वारंजगुर्जनाः ॥ अत्राप्लुतानरायांतितद्विष्णोःपरमंपदम् ॥ १६ ॥ तीर्थोपवासंकंकृत्वानिशाजागरणं
तथा ॥ प्रातःस्नात्वाचगंगायांतर्प्यान्संतर्प्यसर्वतः ॥ १७ ॥ यावत्सपारणंकर्तुमियेषद्विजसत्तमः ॥ तावच्छीतज्वराक्रांतश्चकंपेऽत्यर्थमातुरः ॥ १८॥
वैदेशिकस्तथैकाकीतथाऽतिज्वरपीडितः ॥ चिंतामवापमहतींकिमेतत्समुपस्थितम् ॥ १९ ॥ चिंतार्णवेनिमग्नोभूत्त्यक्ताशोजीवितेधने ॥ सांयात्रि
कइवागाधेभिन्नपोतोमहार्णवे ॥ १२० ॥ क्वक्षेत्रंक्वकलत्रंमेक्वपुत्राःक्वचतद्वसु ॥ क्वतद्विचित्रंवैहर्म्यंक्वसापुस्तकसंभृतिः ॥ २१ ॥ अद्यापिनायुःपर्याप्तंप
लितंनतथामयि ॥ ज्वरोयंदारुणः प्राप्तःकालज्ञश्चातिदारुणः॥२२॥मृत्युर्मूर्ध्निकृतावासोवासोदूरेव्यवस्थितः ॥ अग्नौगृहोपरिप्राप्तेकूपंतुखनयेदिह॥२३॥

॥ मरणकालीनमोहोत्थचिंतामाह ॥
नाम्नोपिनिर्वचनं अत्राप्लुताइत्यनेनवा ॥ १६ ॥ तर्प्यान्तर्पणार्हान् ॥ १७ ॥ १८ ॥ १९ ॥ सांयात्रिकःपोतवणिक् ॥ भिन्नपोतोभग्ननौकः ॥ १२० ॥ क्वकाल
क्वक्षेत्रमितिसार्धद्वयेन ॥ पुस्तकसंभृतिःपुस्तकसंभारः पुस्तकसमूहइतियावत् ॥ २१ ॥ पलितंजराशौक्ल्यम् ॥ पलितंजरसाशौक्ल्यमित्यमरः ॥ कालमवसरंजानातीतिकालज्ञोमृत्युः ॥ कःकाल
ज्ञइतिवापाठः ॥ २२ ॥ तीर्थाटनेनशुद्धांतःकरणस्याविवेकनाशकंविवेकमाह ॥ अग्नावित्येकेन ॥ कूपंतुपुनःखनयेत् ॥ काकानखनयेदित्यर्थः ॥ कःखनयेदितिवापाठः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादेवंकरिष्यामीत्याह ॥ चिंतयामीति ॥ २४ ॥ मुक्त्युपायस्यसाधितत्वादपिचिंताव्यर्थेत्याह ॥ अथवेतिद्वयेन ॥ एकोमुख्यः ॥ संश्चासावनुष्ठितश्चेतितथासन्यथाभवतितथानुष्ठितइ
तिवा ॥ २५ ॥ संतापेनमनोदुःखेन चकाराद्रोगादिनाच ॥ पश्चात्तापेनतप्यतइतिपाठेअंतिमकालीनतापेनेत्यर्थः ॥ तयोर्मयासाधितत्वान्नतापोयुक्तइतिभावः ॥ २६ ॥ मुक्त्युपायानन्नु
ष्ठितत्वमंगीकृत्याप्याह ॥ अथवेति ॥ दुरवस्थयाऽनवस्थितया ॥ २७ ॥ रथ्यामितिकालाध्वनोरत्यंतसंयोगेद्वितीया ॥ रथ्यायामित्यर्थः ॥ म्रियेचेतिचकारात्पुर्यांच ॥ २८ ॥ २९ ॥
वृश्चिकःसविषकीटविशेषः ॥ १३० ॥ सप्तसप्तचतुर्दशदिनानि स्थित्वायावन्मरणंप्राप्तस्तावदित्यन्वयः ॥ सप्तपंचेतिक्वचित्पाठः ॥ ३१ ॥ ३२ ॥ ३३ ॥ किंकिणीजालमालितं

किमेभिश्चिंतनैर्व्यर्थैरतितापकरैर्मम ॥ चिंतयामिहृषीकेशंशिवदंशिवमेवच ॥ २४ ॥ अथवामुक्त्युपायोवैमयैकःसदनुष्ठितः ॥ मुक्तिपुर्यस्तुसप्तै
ताःस्वनेत्रविषयीकृताः ॥ २५ ॥ स्वर्गापवर्गयोरेकःसाध्योहिविदुषाध्रुवम् ॥ तयोरसाधनेपश्चात्संतापेनचतप्यते ॥ २६ ॥ अथवाचिंतयाकिंमे
त्वनयादुरवस्थया ॥ रणेवामरणंश्रेयस्तीर्थेवात्रयथामम ॥ २७ ॥ किमहंमंदभागीवरथ्यांकापिम्रियेधुना ॥ भागीरथ्यांम्रियेचाद्यकाचिंतामममूढवत्
॥ २८ ॥ चर्मास्थिसंचयेनाहमनेनवपुषाध्रुवम् ॥ प्राप्स्यामिनिधनादत्रसिद्धिंनैःश्रेयसींध्रुवम् ॥ २९ ॥ एवंचिंतयतस्तस्यपीडासीदतिदारुणा ॥
कोटिवृश्चिकदष्टस्ययावस्थातामवापसः ॥ १३० ॥ स्मर्तव्यंविस्मृतंसर्वंकाहंकोहंनवेत्तिच ॥ दिनानिसप्तसप्तेतिस्थित्वापंचत्वमागतः ॥ ३१ ॥
तावद्वैकुंठभुवनाद्विमानंससमुपस्थितम् ॥ तार्क्ष्योपलक्षितोयत्रध्वजश्चातिसमुच्छ्रितः ॥ ३२ ॥ अधिष्ठितंसुकन्यानांस्वर्णकौशेयवाससाम् ॥ चाम
रव्यग्रहस्तानांसहस्रेणातिविस्तृतम् ॥३३॥ पुण्यशीलसुशीलाभ्यांगणाभ्यांचविराजितम् ॥ चतुर्भुजाभ्यांस्वास्याभ्यांकिंकिणीजालमालितम् ॥३४॥
तद्विमानमथारुह्यपीतवासाश्चतुर्भुजः ॥ अलंचक्रेनभोवर्त्मसद्विजोदिव्यभूषणः ॥ १३५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां
चतुर्थेकाशीखंडेपूर्वार्द्धेसप्तपुरीवर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ लोपामुद्रोवाच ॥ ॥ जीवितेशकथामेतांपुण्यांपुण्यपुरीश्रिताम् ॥
नतृप्तिमधिगच्छामिश्रुत्वात्वच्छ्रीमुखेरिताम् ॥ १ ॥ मायापुर्यांमुक्तिपुर्यांशिवशर्माद्विजोत्तमः ॥ मृतोपिमोक्षंनैवापब्रूहितत्कारणंविभो ॥ २ ॥ ॥
अगस्त्यउवाच ॥ ॥ साक्षान्मोक्षोनचैतासुपुरीषुप्रियभाषिणि ॥ पुरोदिश्यामुमेवार्थमितिहासोमयाश्रुतः ॥ ३ ॥

क्षुद्रघंटिकासमूहेनसंजातमालमित्यर्थः ॥ ३४ ॥ १३५ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ पिशाचगुह्यगंधर्वविद्याधरप्रजाहृताम् ॥
आख्यायंतेऽष्टमेपंचलोकाःसंयमिनीमुखाः ॥ १ ॥ पूर्वाध्यायांतेतद्विमानमारुह्येत्यनेनशिवशर्मणःसारूप्यमुक्तिरुक्तासाऽघटमानेतितदुक्तायामाख्यायिकायामात्मनस्तृप्त्यभावमावेदयंतीतत्कारणं
पृच्छति ॥ जीवितेशेतिद्वयेन ॥ १ ॥ मोक्षंसायुज्यम् ॥ २ ॥ मोक्षःकैवल्यरूपः ॥ अमुमेवार्थंमायापुर्यादिषुसाक्षात्सायुज्यंनास्त्येवेत्येवंलक्षणम् ॥ इतिहासः इतिहेत्यव्ययमुपदेशपारंपर्याभिधा
यितस्याऽवस्थानमत्रेतीतिहासःपुरावृत्तम् ॥ आर्षः ॥ पूर्ववृत्तांताश्रयाइतिहासाइतिदेवलस्मरणात् ॥ धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ॥ पूर्ववृत्तकथायुक्तमितिहासंप्रचक्षतइतिवा ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ४ ॥ ५ ॥ आकृत्याआकारेणशोभयेतियावत् ॥ चकाराद्भगवद्भक्त्याच ॥ तथाचवक्ष्यतः ॥ भगवद्भक्तियुक्तानांकिमज्ञातमिति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ दिव्यद्विजःशिवशर्मा ॥ कएषइति ॥ एषलोकः कइत्यन्वयः ॥ अल्पश्रीकत्वेहेतुमाह ॥ अपुण्यजनाकृतिरपुण्यजनानांपुण्यवर्जितानांजनानांआकृतयःशरीराणियस्मिन्सतथा ॥ स्वल्पपुण्यजनाकृतिरितिक्वचित्पाठः ॥ १० ॥ पिशाचादयश्चत्वारोदेवयोनिविशेषाः ॥ विद्याधरेत्याद्यमरः ॥ ११ ॥ १२ ॥ ततस्तदनंतरं गच्छन्लोकंददर्शेत्यन्वयः ॥ कथंभूतम् ॥ लोकैर्गुह्यकैरध्युषितमधिष्ठितम् ॥ कथंभूतैः ॥ पिचंडिलैः

शृणुकांतेविचित्रार्थांकथांपापप्रणाशिनीम् ॥ पुण्यशीलसुशीलाभ्यांकथितांशिवशर्मणे ॥४॥ शिवशर्मोवाच ॥ अयिविष्णुगणौपुण्यौपुंडरीकदलेक्षणौ ॥ किंचिद्विज्ञप्तुकामोहंप्रबद्धकरसंपुटः ॥ ५ ॥ ननामयुवयोर्वांञ्छिवेद्म्याकृत्याचकिंचन ॥ पुण्यशीलसुशीलाख्यौयुवांभवितुमर्हथः ॥ ६ ॥ ॥ गणावूचतुः ॥ ॥ भगवद्भक्तियुक्तानांकिमज्ञातंभवादृशाम् ॥ एतदेवहिनौनामयदुक्तंश्रीमतात्वया ॥ ७ ॥ यदन्यदपितेचित्तेप्रष्टव्यंतदशंकितम् ॥ संपृच्छस्वमहाप्राज्ञप्रीत्यातत्प्रब्रवावहे ॥ ८ ॥ इतिश्रुत्वासवचनंभगवद्गणभाषितम् ॥ अतिप्रीतिकरंहृद्यंततस्तौप्रत्युवाचह ॥ ९ ॥ ॥ दिव्यद्विजउवाच ॥ ॥ कएषलोकोऽल्पश्रीकःस्वल्पपुण्यजनाकृतिः ॥ कइमेविकृताकाराब्रूतमेतन्ममाग्रतः ॥ १० ॥ ॥ गणावूचतुः ॥ ॥ अयंपिशाचलोकोत्रवसंतिपिशिताशनाः ॥ दत्त्वानुतापभाजोयेनोनोकृत्वाददत्यपि ॥ ११ ॥ शिवंप्रसंगतोभ्यर्च्यसकृत्त्वशुचिचेतसः ॥ अल्पपुण्याल्पलक्ष्मीकाःपिशाचास्तइमेसखे ॥ १२ ॥ ततोगच्छन्ददर्शाग्रेहृष्टपुष्टजनावृतम् ॥ पिचंडिलैःस्थूलवक्त्रैर्मेघगंभीरनिःस्वनैः ॥ १३ ॥ लोकैरध्युषितंलोकंश्यामलांगैश्चलोमशैः ॥ गणौकथयतांकेमीकोलोकःपुण्यतःकुतः ॥ १४ ॥ ॥ ॥ गणावूचतुः ॥ ॥ गुह्यकानामयंलोकस्त्वेतेवैगुह्यकाःस्मृताः ॥ न्यायेनोपार्ज्यवित्तानिगूहयंतिचयेभुवि ॥ १५ ॥ स्वमार्गगाधनाढ्याश्चशूद्रप्रायाःकुटुंबिनः ॥ संविभज्यचभोक्तारःक्रोधासूयाविवर्जिताः ॥ १६ ॥ नतिथिंनैववारंचसंक्रांत्यादिनपर्वच ॥ नाधर्मंनचधर्मंचविदंत्येतेसदासुखाः ॥ १७ ॥ एकमेवहिजानंतिकुलपूज्योहियोद्विजः ॥ तस्मैगाःसंप्रयच्छंतिमन्यंतेतद्वचःस्फुटम् ॥ १८ ॥ समृद्धिभाजोह्यत्रापितेनपुण्येनगुह्यकाः ॥ भुंजतेस्वर्गसौख्यानिदेववच्चाकुतोभयाः ॥ १९ ॥ ततोविलोकयामासलोकंलोचनशर्मदम् ॥ केऽमीजनास्त्वसौलोकःकिंनामावदतांगणौ ॥ २० ॥ ॥ गणावूचतुः ॥ ॥ गांधर्वस्त्वेषलोकोऽमीगंधर्वाश्चशुभव्रताः ॥ देवानांगायनाह्येतेचारणाःस्तुतिपाठकाः ॥ २१ ॥ गीतज्ञाअतिगीतेनतोषयंतिनराधिपान् ॥ स्तुवंतिचधनाढ्यांश्चधनलोभेनमोहिताः ॥ २२ ॥ राज्ञांप्रसादलब्धानिसुवासांसिधनान्यपि ॥ द्रव्याण्यपिसुगंधीनिकर्पूरादीन्यनेकशः ॥ २३ ॥

पिचंडउदरम् ॥ पिचंडकुक्षीजठरोदरंतुंदमित्यमरः ॥ सर्वतेयेषांतेपिचंडिलाः ॥ तुंदादिभ्यइलच्चेतिइलच्प्रत्ययः तैःस्थूलोदरैरित्यर्थः ॥ १३ ॥ १४ ॥ गूहयंतिगर्तंकृत्वास्थापयेतीत्यर्थः ॥ गूढयंतीतिपाठेसएवार्थः ॥ १५ ॥ स्वमार्गगाइत्यष्टानांस्पष्टोर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

श्रुतौगांधर्ववेदेइत्यर्थः ॥ स्तुताविति क्कचित्पाठः ॥ नाट्यशास्त्रकृतश्रमाश्चनाट्यशास्त्रेषुकृतःश्रमोयैस्तेतथा॥२४॥ तेनपुण्येनेति॥ गीतविद्यार्जितैर्धनैर्ब्राह्मणास्तोषिताइतियत् ॥ वैप्रसिद्धम्॥ पुण्यमि
तिशेषः ॥ तेनपुण्येनेतियोजना ॥ २५ ॥ गीतविद्याभ्यासेनमहत्त्वप्राप्तावुदाहरणमाहतुः ॥ गीतविद्येति ॥ यद्वा गीतविद्यायाःफलंप्रसिद्धमेवेत्याह ॥ गीतविद्येति ॥ २६ ॥ तुंबुरइत्यदंतोपिक्क
चित्पाठः॥अतिदुर्लभौवहुमान्यौ ॥ तत्रगीतविद्यायाःशिवस्वरूपत्वंवदन्हेतुमाह ॥ नादरूपीति ॥ नादरूपीगीतरूपीषड्जादिस्वरूपीत्यर्थः ॥२७॥ गीतविद्यायानिष्कामसकामभेदेनफलद्वयमाह ॥
यादिगीतामिति ॥ २८ ॥ द्वितीयंपक्षंस्पष्टयति ॥ गीतज्ञइति ॥ रुद्रस्येतिविष्णोरप्युपलक्षणम् ॥ २९ ॥ सदाकालंसर्वकालम् ॥ सदालोकमितिपाठेआलोकम् ॥ स्पष्टंयथास्यादित्यर्थः ॥ एषाय

ब्राह्मणेभ्यःप्रयच्छंतिगीतंगायंत्यहर्निशम् ॥ श्रुतावेवमनस्तेषांनाट्यशास्त्रकृतश्रमाः ॥ २४ ॥ तेनपुण्येनगांधर्वोलोकस्त्वेषांविशिष्यते ॥ ब्राह्मणास्तो
षितायद्वै गीतविद्यार्जितैर्धनैः ॥ २५ ॥ गीतविद्याप्रभावेनदेवर्षिर्नारदोमहान् ॥ मान्योवैष्णवलोकेवैश्रीशंभोश्चातिवल्लभः ॥ २६ ॥ तुंबुरुर्ना
रदश्चोभौदेवानामतिदुर्लभौ ॥ नादरूपीशिवःसाक्षान्नादतत्त्वविदौहितौ ॥ २७ ॥ यदिगीतंक्कचिद्गीतंश्रीमद्धरिहरांतिके ॥ मोक्षस्तुतत्फलंप्राहुःसा
न्निध्यमथवातयोः ॥ २८ ॥ गीतज्ञोयदिगीतेननाप्नोतिपरमंपदम् ॥ रुद्रस्यानुचरोभूत्वातेनैवसहमोदते ॥ २९ ॥ अस्मिँल्लोकेसदाकालंस्मृतिरे
षाप्रगीयते ॥ तद्गीतमालयापूज्यौदेवौहरिहरौसदा ॥ ३० ॥ इतिशृण्वन्क्षणात्प्रापपुनरन्यन्मनोहरम् ॥ शिवशर्माथपप्रच्छकिंसंज्ञंनगरंत्विदम्
॥ ३१ ॥ गणावूचतुः ॥ ॥ असौवैद्याधरोलोकोनानाविद्याविशारदाः ॥ एतेविद्यार्थिनामन्नमुपानद्वस्त्रकंबलम् ॥ ३२ ॥ औषधान्यपियच्छं
तितत्पीडाशमनानिहि ॥ नानाकलाःशिक्षयंतिविद्यागर्वविवर्जिताः ॥ ३३ ॥ शिष्यंपुत्रेणपश्यंतिवस्त्रतांबूलभोजनैः ॥ अलंकृताश्चसत्कन्याधर्मा
दुद्वाहयंतिच ॥ ३४ ॥ अभिलाषधियानित्यंपूजयंतीष्टदेवताः ॥ एतःपुण्यैर्वसंतीहविद्याधरवराइमे ॥३५॥ यावदित्थंकथांचक्रुस्तावत्संयमिनीपतिः ॥
धर्मराजोभिसंप्राप्तोदेवदुंदुभिनिःस्वनैः ॥३६॥ सौम्यमूर्तिर्विमानस्थोधर्मज्ञैःपरिवारितः ॥ सेवाकर्मसुचतुरर्भृत्यैस्त्रिचतुरैःसह ॥३७॥ धर्मराजउवाच ॥
साधुसाधुमहाबुद्धेशिवशर्मन्द्विजोत्तम ॥ कुलोचितंब्राह्मणानांभवताप्रतिपादितम् ॥ ३८ ॥ वेदाभ्यासःकृतःपूर्वंगुरवश्चापितोषिताः ॥ धर्मशास्त्रपुराणे
षुदृष्टोधर्मस्त्वयाऽऽदृतः ॥ ३९ ॥ क्षालितंमुक्तिपुर्यद्भिराशुगंतृशरीरकम् ॥ कोविदोऽस्तिभवानेवजीवितेजीवितेतरे ॥ ४० ॥

दिगीतामित्यादिलक्षणा ॥ फलितमाह ॥ तद्गीतेति ॥ तत्तस्मात्द्गीतमालयागीतनिकरेण ॥ अथवास्मृतिरेषेत्यनेनतद्गीतमालयेत्याद्येवोच्यते तदातच्छब्दःप्रसिद्धार्थः ॥३० ॥ ३१ ॥३२॥ तत्पी
डाशमनानिविद्यार्थिरोगनाशकानि ॥ अन्यदपियावदपेक्षितम् ॥ अपिहिशब्दार्थः ॥ ३३ ॥ धर्मात्धर्मनिमित्तात्धर्ममुद्दिश्येत्यर्थः ॥ ३४ ॥ अभिलाषधियाकामवांछया ॥ ३५ ॥ ३६ ॥
चतुरैर्दक्षैः ॥ सेवाकर्मसुसुष्ठुचतुरैरित्येकंपदंवा ॥३७॥३८॥ आदृतःआदरणीयः ॥३९॥ क्षालितंशोधितम् ॥ कोविदोपीत्यपिशब्दःसमुच्चये ॥ कोविदोस्तीतिक्कचित्पाठः ॥ जीवितेतरेमरणे॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतीर्थमेवपण्यंविक्रेयंद्रव्यंतेनसम्यग्विनिमितंपरिवार्तितम् ॥ एतदुक्तंभवति ॥ सुतीर्थगतपुण्यमादायशरीरगतंशरीरलक्षणंवापापंत्यक्तमित्यर्थः ॥ ४१ ॥ अतइति ॥ पांडित्यंसदसद्विवे
कबुद्धिमत्त्वम् ॥ विचक्षणाविद्वांसः ॥ केते ॥ हितेपुरुषार्थेक्षणमेकंक्षणमात्रंयथास्यात्तथाअहःक्षेपंदिनंव्यर्थतांनक्षिपंतिननयंतीत्यर्थः ॥ अहःक्षपांनक्षिपंतिक्षणमेकंहितेसुधांईतिकचित्पाठः ॥ हिनिश्चि
तम् ॥ येएवंविधास्तेबुधाइतिवा ॥ ४२ ॥ निमेषानिति ॥ पंचवाषड्वानिमेषान्पक्ष्मोन्मेषोपलक्षितान्कालान्व्याप्यमर्त्येमरणधर्मकेशरीरेप्राणिनोजंतवःप्राणंतिप्राणनव्यापारंकुर्वंतिचेष्टंतइत्यर्थः ॥
अतस्तत्रापिपंचषट्सुनिमेषेष्वपिअघकर्मणिपापकर्मणिअतएवगर्हितेनिंदिते ॥ अथकर्मणीतिवापाठः ॥ नप्रवर्तेयुः प्रवृत्तिंनकुर्युरित्यर्थः ॥ तत्रापिचेतिपाठेनिंदापरत्वेनव्याख्यातव्यम् ॥ ४३ ॥
स्थिरापायइति ॥ स्थिरोऽपायोनाशोयस्यकायस्यसस्थिरापायः ॥ सदाकायइतिवापाठः ॥ तत्तस्मात्प्रौढकार्येमहत्कार्येमोक्षैकप्रयोजनेइत्यर्थः ॥ ४४ ॥ ४५ ॥ सदिति ॥ सत्कर्मणोऽयंविपाकः

कलेवरंपूतिगंधिसदैवाशुचिभाजनम् ॥ सुतीर्थपुण्यपण्येनसम्यग्विनिमितंत्वया ॥ ४१ ॥ अतएवहिपांडित्यमाद्रियंतेविचक्षणाः ॥ अहःक्षेपंनाक्षिपं
तिक्षणमेकंहितेबुधाः ॥ ४२ ॥ निमेषान्पंचषान्मर्त्येप्राणंतिप्राणिनोध्रुवम् ॥ तत्रापिनप्रवर्तेयुरघकर्मणिगर्हिते ॥ ४३ ॥ स्थिरापायःसदाकायोनधनं
निधनेऽवति ॥ तन्मूढःप्रौढकार्येकिंनयतेतभवानिव ॥४४॥ सत्वरंगत्वरंचायुर्लोकःशोकसमाकुलः ॥ तस्माद्धर्मेमतिःकार्याभवतेवसुधार्मिकैः॥४५॥
सत्कर्मणोविपाकोऽयंतववंद्यौममाप्यहो ॥ यदेतौभगवद्भक्तौसखित्वंभवतोगतौ ॥ ४६ ॥ ममाज्ञादीयतांतस्मात्साहाय्यंकरवाणिकिम् ॥ यत्कर्तव्यं
मादृशैस्तेतत्कृतंभवतैवहि ॥ ४७ ॥ अद्यधन्यतरोस्मीहयद्दृष्टौभगवद्गणौ ॥ सेवासदैवमेज्ञाप्याश्रीमच्चरणसन्निधौ ॥ ४८ ॥ ततःप्रस्थापितस्ताभ्यां
प्राविशत्स्वपुरींयमः ॥ अप्राक्षीच्चततोविप्रस्तौगणौप्रस्थितेयमे ॥ ४९ ॥ ॥ शिवशर्मोवाच ॥ ॥ साक्षादयंधर्मराजोनतुसौम्यतराकृतिः ॥ धर्म्या
ण्येववचांस्यस्यमनःप्रीतिकराणिच ॥ ५० ॥ पुरीसंयमनीसेयमतीवशुभलक्षणा ॥ आकर्ण्ययस्यनामापिपापिनोऽतीवबिभ्यति ॥ ५१ ॥ यमरूपंवर्ण
यंतिमर्त्यलोकेऽन्यथाजनाः ॥ अन्यथाऽयंमयादृष्टोब्रूतंतत्कारणंगणौ ॥ ५२ ॥ केनपश्यंत्यमुंलोकंनिवसंतितथात्रके ॥ इदमेवास्यकिंरूपं
किंचान्यच्चनिवेद्यताम् ॥५३॥ ॥ गणावूचतुः ॥ ॥ शृणुसौम्यसुसौम्योऽसौदृश्यतेत्रभवादृशैः॥ धर्ममूर्तिः प्रकृत्यैवनिःशंकैःपुण्यराशिभिः ॥५४॥
अयमेवहिपिंगाक्षःक्रोधरक्तांतलोचनः ॥ दंष्ट्राकरालवदनोविद्युल्लोलनभीषणः ॥ ५५ ॥

फलम् ॥ किंतद्यदेतौभवतःसखित्वंगतावित्यन्वयः॥४६॥ किंचास्माभिःकर्तव्यमस्मत्कर्तव्यस्यत्वयैवकृतत्वादित्याह ॥ यत्कर्तव्यमिति॥४७॥भगवद्गणयोर्दर्शनात्स्वस्यापिकृतार्थतामाह ॥ अद्येति ॥
श्रीमच्चरणसन्निधौवैकुंठनाथसन्निधौ ॥ ४८ ॥ ४९ ॥ अतिरम्यतरंयमंयमपुरंवावीक्ष्यअतिविस्मयेनपृच्छति ॥ साक्षादिति ॥ अतिसौम्यतराकृतिःअतिशयेनशांतस्वभावइत्यर्थः ॥ ५० ॥
विस्मयमेवस्फोटयति ॥ आकर्ण्येति ॥ बिभ्यतिभीताभवंति ॥ ५१ ॥ अन्यथाऽयंमयादृष्टइत्यत्रइयं चान्यथादृष्टेतिबोद्धव्यम् ॥ ५२ ॥ अन्यदपिप्रश्नत्रयमाह ॥ केनेति ॥ ५३ ॥ प्रथमप्रश्न
स्योत्तरंवदंतौचरमप्रश्नस्योत्तरमाहतुः ॥ शृणुसौम्येत्यादिना ॥ ५४ ॥ अयमेवहियमइत्यादिजल्पनदुर्वृत्तैर्दूरतःश्रूयतेदृश्यतेचेतिपंचत्रिंशच्छ्लोकेनान्वयः ॥ यमंविशिनष्टि ॥ पिंगाक्षइत्यादिना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिंगाक्षःपिंगलनेत्रः ॥ क्रोधरक्तांतलोचनः क्रोधेनरक्तांतेरक्तप्रांतेरक्तमध्येवालोचनेयस्यसः ॥ विद्युल्ललनभीषणः विद्युदिवयल्ललनंरसनंजिह्वातयाभीषणः ॥ जिह्वाललनभीषणइतिपाठेजिह्वायाय ललनंविस्तारस्तेनभीषणइत्यर्थः ॥ ५५ ॥ भ्रुकुटीकुटिलाननःभ्रुकुटचावक्रभ्रुवाकुटिलमाननंयस्यसः ॥ ५६ ॥ जल्पनमाहतुः ॥ आनयेत्यादिना ॥ बधानपाशय ॥ तीव्रंघथास्यादयोघनैर्लोह मुद्गरैः ॥ द्रुघणोमुद्गरघनावित्यमरः ॥ ५७ ॥ ५८ ॥ गल्लौकपोलाधोभागौगंडावितियावत् ॥ समुल्लंबयभूमिस्पर्शोयथानभवतितथाअमुंपाशयेत्यर्थः ॥ ५९ ॥ करपत्रेणक्रकचेन ॥ क्रकचोस्त्रीकरपत्रमित्यमरः ॥ पार्ष्णिघातैर्गुल्फाधरताडनैः ॥ तद्ग्रंथीघुटिकेगुल्फौपुमान्पार्ष्णिस्तयोरधइत्यमरः ॥ घ्नतहिंसयताडयेत्यर्थः ॥ बहुवचनमार्षम् ॥ समुच्चूर्णयच ॥ ६० ॥ परदारप्रसृमरंपरस्त्रीधर्षकंकरमस्यपापिनश्छिधिद्विधाकुरु ॥ पिषिहिपापिनइतिक्वचित्पाठः ॥ विखंडयविशेषेणच्छेदय ॥ ६१ ॥ सूचिभिःरोमकूपेषुरोमगर्तेषुव्यधिहिताडय

ऊर्ध्वकेशोऽतिकृष्णांगःप्रलयांबुदनिःस्वनः ॥ कालदंडोद्यतकरोभ्रुकुटीकुटिलाननः ॥ ५६ ॥ आनयैनंपातयैनंबधानामुंचदुर्दम ॥ घातयैनंसुदुर्वृत्तंमूर्ध्नितीव्रमयोघनैः ॥ ५७ ॥ आताडयैनंदुर्वृत्तंधृत्वापादौशिलातले ॥ उत्पाटयास्यनेत्रेत्वंनिधायचरणंगले ॥ ५८ ॥ एतस्यगल्लावुत्फुल्लौक्षुरेणाशुविपाटय ॥ पाशेनकंठंबद्ध्वास्यसमुल्लंबयभूरुहे ॥ ५९ ॥ विदारयास्यमूर्धानंकरपत्रेणदारुवत् ॥ पार्ष्णिघातैर्घ्नतास्यास्यंसमुच्चूर्णयदारुणैः ॥ ६० ॥ परदारप्रसृमरंकरंछिंध्यस्यपापिनः ॥ परदारगृहंयातुःपादौचास्यविखंडय ॥ ६१ ॥ सूचीभीरोमकूपेषुतनुंव्यधिहिसर्वतः ॥ दातुःपरकलत्रांगेनखपंक्तीर्दुरात्मनः ॥ ६२ ॥ परदारमुखाघ्रातुर्मुखेनिष्ठीवयास्यहि ॥ वक्तुःपरापवादस्यकीलंतीक्ष्णंमुखेक्षिप ॥ ६३ ॥ भर्जयैनंचणकवत्तप्तवालुककर्परैः ॥ भ्राष्ट्रेविकटवक्त्रत्वंपरसंतापकारिणम् ॥ ६४ ॥ दोषारोपंसदाकर्तुरदोषेक्रूरलोचन ॥ निमज्जयास्यवदनंपूयशोणितकर्दमे ॥ ६५ ॥ अदत्तपरवस्तूनांगृह्णतःकरपल्लवम् ॥ आप्लुत्याप्लुत्यतलेनतप्तांगारेपचोत्कट ॥ ६६ ॥ अपवादंगुरोर्वक्तुर्निंदाकर्तुःसुपर्वणाम् ॥ तप्तलोहशलाकाश्चमुखेभीषणनिक्षिप ॥ ६७ ॥ परमर्मस्पृशश्चास्यपरच्छिद्रप्रकाशितुः ॥ सुतप्तायोमयाञ्छंकून्सर्वसंधिषुरोपय ॥ ६८ ॥ अन्येनदीयमानेस्वेनिषेद्धुःपापकारिणः ॥ आच्छेत्तुःपरवृत्तीनांजिह्वांछिंध्यस्यदुर्मुख ॥ ६९ ॥ देवस्वभोक्तुःक्रोडास्यब्राह्मणस्वस्यभोजिनः ॥ विदार्योदरमस्याशुविट्कीटैःपरिपूरय ॥ ७० ॥

भिंधीत्यर्थः ॥ पीपृहीतिपाठेपूरयेत्यर्थः ॥ ६२ ॥ निष्ठीवयथूत्कृत्यश्लेष्मप्रक्षेपंकुरु ॥ हिशब्दान्मूत्रयचेत्यर्थः ॥ कीलंशंकुंक्षिपप्रवेशय ॥ ६३ ॥ चणकवत्चणकाःप्रसिद्धास्तद्वत् ॥ तप्तवालुकर्कर्परैःसह ॥ तत्रकर्पराःकाकरइतिप्रसिद्धाःक्षुद्रपाषाणविशेषाइत्यर्थः ॥ खर्परैरितिक्वचित्पाठः ॥ भ्राष्ट्रेभर्जनपात्रे ॥ हेविकटवक्त्रेतिदूतसंबोधनम् ॥ ६४ ॥ क्रूरलोचनेतिदूतसंबोधनम् ॥ ६५ ॥ अदत्तपरवस्तूनामितिकर्मणिषष्ठी ॥ उत्कटहेउत्कट ॥ उत्कटमितिपाठेक्रियाविशेषणम् ॥ ६६ ॥ सुपर्वणांसुयशसांदेवानांवा ॥ सुपर्वाणःसुमनसस्त्रिदिवेशादिवौकसइत्यमरः ॥ भीषणेतिदूतसंबोधनम् ॥ ६७ ॥ सुतप्तायोमयान्अतितप्तलोहमयान्शंकून्रोपयनिर्वापय ॥ ६८ ॥ दुर्मुखेतिदतसंबोधनम् ॥ ६९ ॥ क्रोडास्यहेक्रोडास्य ॥ विट्कीटैर्विष्ठाकृमिभिः ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अंधकेतिदूतसंबोधनम् ॥ ७१ ॥ उग्रास्यहेउग्रास्य ॥ महारौरवरौरवमितिद्वंद्वैकवद्भावः ॥ ७२ ॥ ७३ ॥ कटाहोऽत्रतप्ततैलाधारपात्रम् ॥ ७४ ॥ आप्लुत्याप्लुत्यालोड्यालोड्य ॥ दुर्दंष्ट्रेतिदूतसंबोधनम् ॥ काकोलैर्द्रोणकाकैः द्रोणकाकस्तुकाकोलइत्यमरः ॥ कथंभूतैः ॥ लोहतुंडकैःलोहवद्दृढमुखैःसंतोद्यमानान् ॥ संताड्यमानानितिकचित्पाठः ॥ संतप्यमानानित्यन्यत्रपाठः ॥ ७५ ॥ हेकूटेतिदूतसंबोधनं कूटशाल्मलिर्वा ॥ रोचनः कूटशाल्मलिरित्यत्यमरः ॥ उल्लंबयअवलंबय ॥ ७६ ॥ महाभुजेतिदूतसंबोधनम् ॥ आशुचेतिचकारःसमुच्चये ॥ निपातयचेत्यग्रिमेसंबध्यते ॥ ७७ ॥ ७८ ॥ कूटसाक्ष्याभिवादिनंमिथ्यासाक्षित्ववदनशीलम् ॥ कूटसाक्षित्ववादिनमितिकचित्पाठः ॥ मानकूटंमानमुन्मानंकूटयतिवंचयतितथातम् ॥ एवंतुलाकूटमिति ॥

नदेवार्थेनविप्रार्थेनातिथ्यर्थेपचेत्कचित् ॥ तममुंस्वार्थपक्तारंकुंभीपाकेपचांधक ॥ ७१ ॥ उग्रास्यशिशुहंतारममुंविश्रंभघातिनम् ॥ कृतघ्नंनयवेगेनमहारौरवरौरवम् ॥ ७२ ॥ ब्रह्मघ्नंचांधतामिस्रेसुरापंपूयशोणिते ॥ कालसूत्रेहेमचौरमत्रीचैगुरुतल्पगम् ॥७३॥ तत्संसर्गिणमावर्षमासिपत्रवनेतथा ॥ एतान्महापातकिनस्तप्ततैलकटाहके ॥ ७४ ॥ आप्लुत्याप्लुत्यदुर्दंष्ट्रकाकोलैर्लोहतुंडकैः ॥ संतोद्यमानान्पापिष्ठान्नित्यंकल्पंनिवासय ॥ ७५ ॥ स्त्रीघ्नंगोघ्नंचमित्रघ्नंकूटशाल्मलिपादपे॥उल्लंबयचिरंकालमूर्ध्वपादमधोमुखम्॥७६॥त्वचमस्यचसंदंशैस्त्रोटयत्वंमहाभुज॥ आश्लेषितुर्मित्रपत्न्याभुजावुत्पाटयाशुच ॥७७॥ ज्वालाकीलेमहाघोरेनरकेऽमुंनिपातय ॥ योवह्निनादाहयतिपरक्षेत्रंपरालयम् ॥ ७८ ॥ कालकूटेचगरदंकूटसाक्ष्याभिवादिनम्॥मानकूटंतुलाकूटंकंठमोटेनिपातय ॥ ७९ ॥ लालापिबेचदुष्प्रेक्ष्यतार्थीप्सुष्ठीविनंनय ॥ आमपाकेचगर्भघ्नंशूलपाकेऽन्यतापिनम् ॥ ८० ॥ रसविक्रायिणंविप्रमिक्षुयंत्रेप्रपीडय ॥ प्रजापीडाकरंभूपमंधकूपेनिपातय ॥ ८१ ॥ गोतिलांश्चतुरंगांश्चविक्रेतारंद्विजाधमम् ॥ मातुलान्याःसुरायाश्चविक्रेतारंहलायुध ॥ ८२ ॥ मुसलोलूखलेवैश्यंकंडयैनंपुनःपुनः ॥ शूद्रंद्विजावमंतारंद्विजाग्रेमंचसेविनम् ॥ ८३ ॥ अधोमुखेचनरकेदीर्घग्रीवप्रपीडय ॥८४॥ शूद्रंब्राह्मणजेतारंवैश्यंब्राह्मणमानिनम् ॥ क्षत्रियंयाजकंचापिविप्रंवेदविवर्जितम् ॥ ८५ ॥ लाक्षालवणमांसानांसतैलविषसर्पिषाम् ॥ आयुधेक्षुविकाराणांविक्रेतारंद्विजाधमम् ॥ ८६ ॥ पाशपाणेकशापाणेबद्ध्वैतांश्चरणेदृढम् ॥ घातयंतौकशाघातैर्नयतंतप्तकर्दमे ॥ ८७ ॥ इमांस्त्रियंश्लेषयाशुपुंश्चलींकुलकल्मषाम् ॥ तेनोपपतिनासार्धंतप्तायसमयेनच ॥ ८८ ॥

कंठमोटेनवस्त्रवत्कंठनिष्पीडनेन ॥ कंठमोटंचेतिपाठेक्रियाविशेषणम् ॥ ७९ ॥ तीर्थाप्सुष्ठीविनंतीर्थजलेषुथूत्कृत्यश्लेष्मप्रक्षेपिणम् ॥ ८० ॥ ८१ ॥ गोतिलादीन्विक्रेतारमितिशीलार्थतृजंतत्वात्षष्ठ्यभावः ॥ द्विजाधमंविप्राणामधमंविप्राधमंवा ॥ मातुलान्याभंगाख्यायालतायाः ॥ मातुलानीतुभंगायामित्यमरः ॥ हलायुधेतिदूतसंबोधनम् ॥ ८२ ॥ ८३ ॥ मंचसेविनंउच्चपीठादिसेविनमित्यर्थः ॥ दीर्घग्रीवेतिदूतसंबोधनम् ॥ ८४ ॥ ८५ ॥ ८६ ॥ हेपाशपाणेहेकशापाणेएतान्ब्राह्मणजेतॄन्शूद्रादीन्घातयंतौसंतौ ॥ ८७ ॥ उपपतिनाजारेण ॥ तप्तायसमयेन

१ छलयतीतिकचित्पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

तंप्तलोहप्रतिमाकारेण ॥ ८८ ॥ ८९ ॥ ९० ॥ तृतीयप्रश्नस्योत्तरमाहतुः ॥ येप्रजाइत्यादिसप्तभिः ॥ औरसान्धर्मपत्न्यांस्वत्द्दयाज्जातान् ॥ पुत्रानेवेत्येवशब्दस्यपालयंतीत्यनेनसंबंधः ॥९१ ॥ ॥ ९२ ॥ दीनादिरूपालोकाइतिशेषः ॥ येषांराष्ट्रेनप्रदृश्यंतेतेभूपाअस्यधर्मराजस्यसभासदोभवंतीत्यर्थः ॥ ९३ ॥ लोकानेवंदर्शयंतौतेषामपितत्रवासमाहतुः ॥ ब्राह्मणाइति ॥ यद्वा नकेवलंभूपाएवअन्येपितत्रनिवसंतीत्याहतुः ॥ ब्राह्मणाइति ॥ अन्येशूद्राअपिशब्दादेतद्व्यतिरिक्ताअपि ॥ ९४ ॥ भूपानेवकांश्चित्प्राधान्येनदर्शयतः ॥ उशीनरइति ॥ उशीनरःशिविः ॥ ॥ ९५ ॥ रिपूणामपिमंगलंयस्मात्सरिपुमंगलः ॥ अरिपुमंगलइतिवा ॥ रिपुमर्दनइतिक्वचित्पाठः ॥ ९६ ॥ ९७ ॥ द्वितीयप्रश्नस्योत्तरमाहतुः ॥ अन्यच्चेति ॥ अन्यांश्चेतिक्वचित्पाठः ॥ भास्करिंयमदूतांश्चेतिलोकस्योपलक्षणमेतत् ॥ ९८ ॥ गोविंदेत्याद्येकादशश्लोकानांइत्थंधर्मराजःस्वभृत्यगणान्सदैवसंशिक्षयेत्संशिक्षयतीतिद्वादशेनान्वयः ॥ हेभटाइतियेसंततमामनंतितेत्याज्या

स्वयंगृहीत्वानियमंयस्त्यजेदजितेंद्रियः ॥ तंप्रापयदुराधर्षंबहुभ्रमरदंशके ॥ ८९ ॥ इत्यादिजल्पन्दुर्वृत्तैःश्रूयतेदूरतोयमः ॥ स्वकर्मशंकितैःपापै र्दृश्यतेतिभयंकरः ॥ ९० ॥ येप्रजाःपालयंतीहपुत्रानेवनिजौरसान् ॥ दंडयंतिचधर्मेणभूपास्तेऽस्यसभासदः ॥ ९१ ॥ वर्णाश्रमाश्चयद्राष्ट्रेऽनुतिष्ठं तिनिजांक्रियाम् ॥ कालेनापन्ननिधनाभूपास्तेऽस्यसभासदः ॥ ९२ ॥ नैवदीनोनदुर्वृत्तोनापद्ग्रस्तोनशोकभाक् ॥ येषांराष्ट्रेप्रदृश्यंतेभूपास्तेऽ स्यसभासदः ॥ ९३ ॥ ब्राह्मणाःक्षत्रियावैश्याःस्वधर्मनिरताःसदा ॥ अन्येपियेसंयमिनःसंयमिन्यांवसंतिते ॥ ९४ ॥ उशीनरःसुधन्वाचवृषपर्वा जयद्रथः ॥ रजिःसहस्रजित्कुक्षिर्दृढधन्वारिपुंजयः ॥ ९५ ॥ युवनाश्वोदंतवक्रोनाभागोरिपुमंगलः ॥ करंधमोधर्मसेनःपरमर्दःपरांतकः ॥ ९६ ॥ एतेचान्येचबहवोराजानोनीतिवर्तिनः ॥ धर्माधर्मविचारज्ञाःसुधर्मायांसमासते ॥ ९७ ॥ अन्यच्चतेप्रवक्ष्यावोयेनपश्यंतिभास्करिम् ॥ दंडपाशो द्यतकरान्दूतानुग्राननान्क्वचित् ॥९८॥गोविंदमाधवमुकुंदहरेमुरारेशंभोशिवेशशशिशेखरशूलपाणे ॥ दामोदराच्युतजनार्दनवासुदेवत्याज्याभटायइति संततमामनंति॥९९॥गंगाधरांधकरिपोहरनीलकंठवैकुंठकैटभरिपोकमठाब्जपाणे॥भूतेशखंडपरशोमृडचंडिकेशत्याज्याभटायइतिसंततमामनंति १००॥

भवद्भिरितिशेषः ॥ इतिसर्वत्रयोजना ॥ इतिशब्दपरामृष्टंकर्माह ॥ गोविंदेत्यादि ॥ सर्वत्रात्रार्थभेदाच्चपौनरुक्त्यंनोद्भावनीयम् ॥ गोविंदप्राप्तकामधेन्वैश्वर्य ॥ मालक्ष्मीःअविद्यावातस्याधवमाधव ॥ मुक्तिंददातीतिमुकुंदः ॥ मुचेर्डुकुदकुंदाविति डुकुंदप्रत्ययः ॥ हेमुक्तिदेत्यर्थः ॥ हरेभक्तपापहारिन् ॥ मुरारेमुरनाम्नोदैत्यस्यारे ॥ शंकल्याणंभवत्यस्मादितिशंभुस्तत्संबोधनंहेशंभो ॥ शिवसुख स्वरूप ॥ ईशसर्वनियंतः ॥ शशिशेखरचंद्रभूषण ॥ शूलपाणेत्रिशूलकर ॥ दामोदररज्जुकुक्षे ॥ स्वभावान्नच्यवतइत्यच्युत ॥ जनार्दनप्राणिमात्रस्यगते ॥ अर्दगतिहिंसादानेष्वितिधातुः ॥ वासुदेवसर्वांतर्यामिन् ॥ ९९ ॥ गंगाधरमंदाकिनीधर्तः ॥ अंधकरिपोतन्नामदैत्यस्यशत्रो ॥ हरसंसारहर ॥ नीलकंठक्षीरोदमथनोद्भूतकालकूटविषपानात्शक्रोणकुलिशाहननाद्वादक्षयज्ञयुद्धेप्रसह्य

१ इदंफलितार्थकथनंविग्रहस्तुमोचयतीतिमुकुंदइति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुनाकंठग्रहणाद्वा ॥ तथाचोक्तंस्कांदे ॥ इतितस्यवचःश्रुत्वामयागिरिवरात्मजे ॥ धृतंकंठेविषंघोरंततःश्रीकंठतामगमति ॥ हरिवंशेच॥दत्तःप्रहारःकुलिशेनपूर्वंतवेशानसुरराज्ञातिवीर्यं॥कंठेनैल्यंतेननते यत्प्रवृत्तंतस्मात्ख्यातस्त्वंनीलकंठेतिकल्पे ॥ ततःप्रसभमाप्लुत्यद्रुतंविष्णुःसनातनः ॥ जग्राहकंठेभगवान्नीलकंठस्ततोभवदिति॥वैकुंठविकुंठायाःपुत्र ॥ कैटभारिपोतन्नाम्नोऽसुरस्यशत्रो ॥ कमठकूर्म ॥ अब्जपाणेपद्महस्त ॥ भूतेशभूतगणस्वामिन् ॥ खंडपरशोभग्नकुठार ॥ बदरिकाश्रमेतपस्यतोनारायणस्यांकेकिलशिवःपरशुंप्राक्षिपत्सचतदंगमासाद्यखंडोद्विधाअभूत् ॥ यद्वा परान्शत्रून् अंधकादीनूर्ध्वीकृत्यधृतान्श्यतितनूकरोतीतिपरशुस्त्रिशूलम् ॥ तथाचोक्तंपद्मपुराणीयसहस्रनाम्नि ॥ शिवस्त्रिशूलविध्वंसीति ॥ हेखंडत्रिशूलेत्यर्थः ॥ मृडसुखदायक ॥ चंडिकेशपार्वतीपते ॥ ॥ १०० ॥ विष्णोव्यापनशील ॥ नृसिंहनरहरिरूप ॥ मधुसूदनतन्नाम्नोदैत्यस्यनाशन ॥ चक्रपाणेसुदर्शनहस्त ॥ गौरीपते उमाकांत ॥ गिरिशकैलाशयन ॥ शंकरसुखकर ॥ चंद्रचूडशशिमुकुट ॥ नारायणसर्वांतर्यामिन् ॥ असुरनिबर्हणदैत्यप्रहरण ॥ शार्ङ्गपाणेतन्नामधनुर्हस्त ॥ १ ॥ मृत्युंजयजितमृत्यो ॥ उग्रअनाधृष्य ॥ विषमेक्षणत्रिनेत्र ॥ कामशत्रोकंदर्पदहन ॥ श्रीकांतलक्ष्मीपते ॥ पीतवसनपीतांबर ॥ अंबुदनीलमेघश्याम ॥ शौरेसूर्यवंशोद्भव ॥ ईशानईश्वर ॥ कृत्तिवसनगजासुरचर्मवस्त्र ॥ त्रिदशैकनाथदेवमुख्यस्वामिन् ॥ २ ॥ लक्ष्मीपतेश्रीभर्तः ॥

विष्णोनृसिंहमधुसूदनचक्रपाणेगौरीपतेगिरिशशंकरचंद्रचूड ॥ नारायणासुरनिबर्हणशार्ङ्गपाणेत्याज्याभटायइतिसंततमामनंति ॥ १ ॥ मृत्युंजयोग्रविषमेक्षणकामशत्रोश्रीकांतपीतवसनांबुदनीलशौरे ॥ ईशानकृत्तिवसनत्रिदशैकनाथत्याज्याभटायइतिसंततमामनंति ॥ २ ॥ लक्ष्मीपतेमधुरिपोपुरुषोत्तमाद्यश्रीकंठदिग्वसनशांतपिनाकपाणे ॥ आनंदकंदधरणीधरपद्मनाभत्याज्याभटायइतिसंततमामनंति ॥ ३ ॥ सर्वेश्वरत्रिपुरसूदनदेवदेवब्रह्मण्यदेवगरुडध्वजशंखपाणे ॥ त्र्यक्षोरगाभरणबालमृगांकमौलेत्याज्याभटायइतिसंततमामनंति ॥ ४ ॥ श्रीरामराघवरमेश्वररावणारेभूतेशमन्मथरिपोप्रमथाधिनाथ ॥ चाणूरमर्दनहृषीकपतेमुरारेत्याज्याभटायइतिसंततमामनंति ॥ ५ ॥

मधुरिपोमधुसूदन ॥ पुरुषोत्तमक्षराक्षरातीत ॥ आद्यसर्वकारण ॥ श्रीकंठनीलकंठ ॥ दिग्वसनदिगंबर ॥ शांतनिष्क्रिय ॥ पिनाकपाणेआजगवकर ॥ आनंदश्चासौकंदोमूलंचेत्यानंदहेपरमानंदेत्यर्थः ॥ तथाचश्रुतिः ॥ सएषपरमानंदः॥ एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिच ॥ प्रपंचितंचैतद्बालबोधिनीटीकायामस्माभिः ॥ धरणीधरवराहस्वरूप ॥ पद्मनाभकमलोदर ॥३॥ सर्वेश्वरविश्वनियंतः ॥ त्रिपुरसूदनपुरत्रयारे ॥ देवदेवब्रह्मादिसेव्य ॥ ब्रह्मण्यदेवब्रह्मभ्योब्रह्माणेभ्योहितायेब्रह्मण्यास्तेषुमध्येदीव्यतिअतिशयेनराजते ॥ यद्वा ब्रह्मण्यश्चासौदेवश्चेतितत्संबोधनम् ॥ तथागरुडोध्वजेयस्यसतथातत्संबोधनंहेगरुडध्वज ॥ शंखपाणेपांचजन्यहस्त ॥ त्रीण्यक्षाणिनेत्राणिचंद्रसूर्यानलात्मकानियस्यहेत्रिनेत्रेत्यर्थः ॥ उरगाभरणसर्पभूषण ॥ बालहेकुमार ॥ कल्पादावात्मनस्तुल्यंसुतंप्रध्यायतस्ततः ॥ प्रादुरासीत्प्रभोरंकेकुमारोनीललोहितइतिवैष्णवोक्तेः ॥ मृगांकमौलेचंद्रमुकुट ॥ बालएककलात्मकश्चंद्रोमस्तकेयस्येत्येकंवानाम ॥ ४ ॥ श्रीराम श्रीसहितपरब्रह्म ॥ श्रियोरामोरमणंयस्मादितिवा ॥ राघवरघुवंशोद्भव ॥ रमेश्वरसीतापते ॥ रावणारेदशकंधरशत्रो ॥ भूतेशप्राणिमात्रेश ॥ आत्मेशेतिवापाठः ॥ मन्मथरिपोकामशत्रो ॥ प्रमथाधिनाथगणेश्वर ॥ चाणूरमर्दनतन्नामदैत्यसूदन ॥ हृषीकपतेइंद्रियनियंतः ॥ मुरारे मुरतिसंवेष्टयतिमूर्च्छयतीतिवामुराअविद्या ॥ मुरसंवेष्टने ॥ मूर्च्छामोहसमुच्छ्राययोरितिधातुः ॥

१ स्थलांतरेइत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याअरेशत्रो ॥ असुरारेइतिवापाठः ॥ ५ ॥ शूलिन्त्रिशूलास्त्रधारिन् ॥ गिरीश कैलासेश ॥ रजनीशस्यचंद्रस्यकलाअवतंसःशिरोभूषणंयस्यतत्संबोधनम् ॥ तथाकंसंप्रणाशयतीतिकंसप्रणाशन ॥ सनातनचिरंतन ॥ हेकालत्रयाबाध्येत्यर्थः ॥ सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः ॥ नित्यःसर्वगतःस्थाणुरचलोयंसनातनइतिस्मृतेश्च ॥ केशिनंनाशयतीतितथातत्संबोधनंहेकेशिनाश ॥ केशिनाशिन्निति क्वचित्पाठः ॥ भर्ग भर्जयतिदहतिकालाग्निरुद्ररूपेणप्रलयसमयेसर्वमितिभर्गस्तत्संबोधनंतथा ॥ भृजीभर्जनइतिधातुः ॥ त्रिनेत्रत्रिलोचन ॥ भवत्यस्मादितिभवःसर्वोपादानेत्यर्थः ॥ भूतपतेआकाशादिभूतस्रष्टः ॥ तस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिश्रुतेः ॥ पुरारेत्रिपुरारे ॥ ६ ॥ गोपीपतइति ॥ गोपीराधाद्या गोपायतिरक्षातिस्वकार्यजातमितिगोपीअविद्यावा तस्याःपतेगोपीपते ॥ यदुपतेयदुवंशस्वामिन् ॥ वसुदेवसूनोशौरितनय ॥ कर्पूरगौर कर्पूरवच्छुभ्र ॥ वृषभध्वजवृषकेतो ॥ भालनेत्रहेललाटनयन ॥ गोवर्धनोद्धरणतन्नामपर्वतधारक ॥ धर्मधुरीणगोपधर्मेषुधुरीणाधुर्यास्तान्गोपायतीतितत्संबोधनंतथा ॥ परित्राणायसाधूनांविनाशायचदुष्कृताम् ॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगइतिस्मृतेः ॥ धर्मधुरीण गोपेतिनामद्वयंवा ॥ अस्मिन्पक्षेबालमृगांकमौलइत्येकंनामज्ञातव्यम् ॥ ७ ॥ स्थानंस्थासर्वाधारः अणुरिंद्रियागोचरत्वात्सूक्ष्मः सचसचस्थाणुः ॥ स्थिरत्वाद्वास्थाणुः ॥

शूलिन्गिरीशरजनीशकलावतंसकंसप्रणाशनसनातनकेशिनाश ॥ भर्गत्रिनेत्रभवभूतपतेपुरारेत्याज्याभटायइतिसंततमामनंति ॥ ६ ॥ गोपीपतेयदुपतेवसुदेवसूनोकर्पूरगौरवृषभध्वजभालनेत्र ॥ गोवर्धनोद्धरणधर्मधुरीणगोपत्याज्याभटायइतिसंततमामनंति ॥ ७ ॥ स्थाणोत्रिलोचनपिनाकधरस्मरारेकृष्णानिरुद्धकमलाकरकल्मषारे ॥ विश्वेश्वरत्रिपथगार्द्रजटाकलापत्याज्याभटायइतिसंततमामनंति ॥ ८ ॥ अष्टोत्तराधिकशतेनसुचारुनाम्नां संदर्भितांललितरत्नकदंबकेन ॥ सन्नायकांदृढगुणांद्विजकंठगांयःकुर्यादिमांस्रजमहोसयमंनपश्येत् ॥ ९ ॥ इत्थंद्विजेंद्रनिजभृत्यगणान्सदैवसंशिक्षयेदवनिगान्सहिधर्मराजः ॥ अन्येपियेहरिहरांकधराधरायांतेदूरतःपुनरहोपरिवर्जनीयाः ॥ ११० ॥

स्थाःस्थावरः अनितीत्युणादावणुर्जंगमश्चराचररूपः स्थाणुः ॥ तपोमूलत्वात् स्थाणुरिवतिष्ठतीतिवास्थाणुस्तस्यसंबोधनंहेस्थाणो ॥ त्रिलोचनत्रिनेत्र ॥ पिनाकधरतन्नामधनुर्धर ॥ स्मरारेकामारे ॥ कृष्णभक्तपापकर्षण ॥ अनिरुद्धनकेनापिवशीकृत ॥ कमलाकरलक्ष्म्याश्रय ॥ कल्मषारे ॥ विश्वेश्वरसर्वेश्वर ॥ त्रिपथगार्द्रजटाकलापगंगाजलाप्लावितजटासमूहेति ॥ आमनंतीत्यस्यावृत्तिर्नामसंकीर्तनस्यप्राधान्यज्ञापनाय ॥ ८ ॥ अष्टोत्तरेति ॥ अहोद्विजशिवशर्मन्यइमांस्रजंमालांकंठगांकुर्यादावर्तयेत्सयमंनपश्येदित्यन्वयः ॥ इमांकामित्यपेक्षायांमालांविशिनष्टि ॥ सुचारुनाम्नां सुष्ठुचारूणिचतानिनामानिचेतिसुचारुनामानितेषामष्टोत्तराधिकशतेन अष्टौउत्तराणिअधिकानियस्मिंस्तदष्टोत्तराधिकंतच्चतच्छतंचेतितत्तथातेनसंदर्भितांग्रथितामितियावत् ॥ अत्रोत्तराधिकशब्दयोर्व्याख्येयव्याख्यानभावान्नपौनरुक्त्यम् ॥ यद्वा अष्टोत्तरंचतदधिकंचकृत्स्नाष्टोत्तरशतनामादिभ्योधिकमेतादितिव्याख्येयम् ॥ कथंभूतेन ॥ ललितान्येवपदलालित्यादीन्येवरत्नानितेषांकदंबःसमूहोयस्मिंस्तत्तथातेन ॥ कथंभूताम् ॥ सन्नायकां सन्सम्यग्वाहरिहरात्मकोभगवान्नायकोधारकोयस्याःसातथाताम् ॥ पुनःकथंभूताम् ॥ दृढगुणां दृढःअसाधारणोभगवदेकाश्रयोगुणोयस्याःसातथाताम् ॥ ९ ॥ इत्थमिति ॥ द्विजेंद्रहेत्रैवर्णिकश्रेष्ठ ॥ हरिहरांकधराहरिहरयोरंकानिशंखचक्ररुद्राक्षविभूत्यादीनिधरंतीतितथा ॥ अहोइतिसंभ्रमे ॥ ११० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योधर्मराजेति ॥ ललितप्रबंधां ललितोरम्यःप्रबंधोरचनापरिपाटीयस्यांसातथाताम् ॥ सकलकल्मषबीजहंत्रीं सकलकल्मषाणांकायवाङ्मनोजन्यानांदशविधानांपापानांबीजंयदज्ञानंवासनावातस्यहं त्रींछेत्रींयोधीरोजपेत्पठेत्समातुःस्तनंनपिबेत् ॥ मुक्तोभवतीत्यर्थः ॥ ११ ॥ इतीति ॥ प्रहृष्टवक्रोऽस्मत्स्वामिनोर्हरिहरयोर्नामकीर्तनमाहात्म्यमेवंभूतमितिविज्ञायप्रसन्नमुखः ॥ भुवना १४ दित्या १२ रुद्रा ११ रुद्रा ११ रुद्रा ११ ग्रहा ९ दिशो १० रुद्राः ११ ॥ वर्षाणि ९ दिशो १० दशसुश्लोकेष्वष्टोत्तरशतंनाम्नाम् ॥ ११२ ॥ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायामष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ नवमेऽप्सरसांलोकोमार्तंडस्यपरात्मनः ॥ लोकश्चवर्ण्यतेरम्योनानाश्चर्यविशेषवान् ॥ १ ॥ रूपलावण्यसौभाग्यनिधयः रूपंसौंदर्यं लावण्यंदीप्तिःसौभाग्यंशोभनादृष्टत्वं तेषांनिधयः ॥ तदाश्रयाइत्यर्थः ॥ १ ॥ वारविलासिन्योवारस्त्रियोवेश्याइत्यर्थः ॥ वारस्त्रीगणिकावेश्येत्यमरः ॥ यज्ञभाजांइंद्रादीनाम् ॥ २ ॥ कामकेलिकलाभिज्ञाःकामोभिलाषः पुंसामित्यर्थात् ॥ कामोभिलाषस्तर्षश्चेत्यमरः ॥ केलिःपरीहासः ॥ द्रवकेलिपरीहासाइत्यमरः ॥ कलाशिल्पम् ॥ कलाशिल्पेचकाम्रेचेत्यमरः ॥ एतेष्वभिज्ञाश्च

अगस्तिरुवाच ॥ योधर्मराजरचितांललितप्रबंधांनामावलिंसकलकल्मषबीजहंत्रीम् ॥ धीरोत्रकौस्तुभभृतःशशिभूषणस्यनित्यंजपेत्स्तनरसंसपिबेन्नमातुः ॥ ११ ॥ इतिशृण्वन्कथांरम्यांशिवशर्माप्रियेऽनघाम् ॥ प्रहृष्टवक्रःपुरतोददर्शाप्सरसांपुरीम् ॥ ११२ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेयमलोकवर्णनंनामाऽष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ शिवशर्मोवाच ॥ काइमारूपलावण्यसौभाग्यनिधयःस्त्रियः ॥ दिव्यालंकारधारिण्योदिव्यभोगसमन्विताः ॥ १ ॥ ॥ गणावूचतुः ॥ ॥ एतावारविलासिन्योयज्ञभाजांप्रियंकराः ॥ गीतज्ञानृत्यकुशलावाद्यविद्याविचक्षणाः ॥२॥ कामकेलिकलाभिज्ञाद्यूतविद्याविशारदाः ॥ रसज्ञाभाववेदिन्यश्चतुराश्चोचितोक्तिषु ॥ ३ ॥ नानादेशविशेषज्ञानानाभाषासुकोविदाः ॥ संकेतोदंतनिपुणानैकाःस्वैरचरामुदा ॥ ४ ॥ लीलानर्मसुसाभिज्ञाःसुप्रलापेषुपंडिताः ॥ यूनांमनांसिसततंस्वैर्हावैरमयंत्यमूः ॥५॥ निर्मथ्यमानात्क्षीरोदात्पूर्वमप्सरसस्त्वमूः ॥ निःसृतास्त्रिजगज्जेतुर्मोहनास्त्रंमनोभुवः ॥ ६ ॥ उर्वशीमेनकारंभाचंद्रलेखातिलोत्तमा ॥ वपुष्मतीकांतिमतीलीलावत्युत्पलावती ॥ ७ ॥

तुराइत्यर्थः ॥ रसज्ञाःशृंगारादिरसाभिज्ञाः ॥ भाववेदिन्योऽभिप्रायाभिज्ञाः ॥ ३ ॥ संकेतोदंतनिपुणाःरहस्यवृत्तांतदक्षाः ॥ वार्ताप्रवृत्तिर्वृत्तांतउदंतःस्यादथाह्वयइत्यमरः ॥ नैकाःसंघशःसंघशोवर्तमानाइत्यर्थः ॥ ४ ॥ लीलानर्मसुसाभिज्ञाः लीलाःशृंगारभावजाहावाः ॥ क्रियाइत्यर्थः ॥ स्त्रीणांविलासविव्वोकविभ्रमाललितंतथा ॥ हेलालीलेत्यमीहावाःक्रियाःशृंगारभावजाइत्यमरः ॥ नर्माणिक्रीडाकौतुकानीतियावत् ॥ तेषुसाभिज्ञाअभिज्ञानसहिताः ॥ हावैःशृंगारभावजैर्व्यापारैः ॥५॥ निःसृताउत्थिताः॥अनेनाप्सरसःशब्दनिरुक्तिर्दर्शिता ॥ तदुक्तंरामायणे ॥ अप्सुनिर्मंथ्यमानासुरसात्तस्माद्वरस्त्रियः ॥ उत्पेतुरंभसोयस्मात्तस्मादप्सरसोभवन्निति ॥ त्रिजगज्जेतुस्त्रैलोक्यजयिनोमनोभुवःकामस्य ॥ मुह्यतेऽनेनेतिमोहनंतच्चतदस्त्रंचेतिमोहनास्त्रम् ॥ वेदाःप्रमाणमितिवत्सामानाधिकरण्यम् ॥ ६ ॥ उर्वशीनारायणोरुमश्नातिस्वोत्पत्त्यर्थंभिनत्तीतितथा ॥ तथोक्तंहरिवंशे ॥ नारायणोरुंनिर्भिद्यसंभूतावरवर्णिनी ॥ ऐलस्यदयितादेवीयोषिद्रत्नंकिमुर्वशीति ॥ नचोभयत्रो

१ मनवो १४ रवयो १२ रुद्रा ११ रुद्रा ११ रुद्रा ११ ग्रहा ९ दिश १० श्चैव ॥ रुद्रा ११ ग्रहा ९ दिशो १० दिक्श्लोकेष्वष्टोत्तरंशतंनाम्नामितिपुस्तकांतरेपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपत्त्वाविरोधः ॥ केनचिन्निमित्तेनवसिष्ठस्येवतदुपपत्तेः ॥ रूपलावण्यसौभाग्यादिभिर्मेनकोर्वशीइत्यभिमानोयस्याःसामेनका ॥ रूपलावण्यादिभिर्जगद्रंभतिमोहयतीतिरंभा ॥ चंद्रवदर्धचंद्रवल्ललाटे लेखातिलकंयस्याःसाचंद्रलेखा ॥ रत्नानांतिलंतिलंसमानीयनिर्मितेतितिलोत्तमा ॥ तदुक्तमादिपर्वणि ॥ तिलंतिलंसमानीयरत्नानांयद्विनिर्मिता ॥ तिलोत्तमेतितत्तस्यानामचक्रेपितामहइति ॥ अन्यासामपियथायथंव्युत्पत्तिर्ज्ञेया ॥ ७ ॥ अलमत्यर्थंबुसमिवतुसमतिनिकृष्टायस्याःअर्थादन्यस्त्रीसाऽलंबुषा ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ सदास्खलितेत्युभयत्राकारप्रश्लेषः ॥ १३ ॥ ॥ १४ ॥ द्विकृत्वोवात्रिःकृत्वोवाइतिद्विवारंत्रिवारंवेत्यर्थः ॥ १५ ॥ १६ ॥ कामिकानिकामेभ्योहितानिकामसंसृष्टानीतिवा ॥ कामसंबद्धानीत्यर्थः ॥ १७ ॥ १८ ॥ विप्लवंतेव्यभिचरांति ॥

अलंबुषागुणवतीस्थूलकेशीकलावती ॥ कलानिधिर्गुणनिधिःकर्पूरतिलकोर्वरा ॥ ८ ॥ अनंगलतिकाचापितथामदनमोहिनी ॥ चकोराक्षीचंद्रकला तथासुनिमनोहरा ॥ ९ ॥ ग्रावद्रावातपोद्वेष्ट्रीचारुनासासुकर्णिका ॥ दारुसंजीविनीसुश्रीःक्रतुशुल्काशुभानना ॥ १० ॥ तपःशुल्कातीर्थशुल्कादानशुल्काहिमावती ॥ पंचाश्वमेधिकाचैवराजसूयार्थिनीतथा ॥ ११ ॥ अष्टाग्निहोमिकातद्वद्वाजपेयशतोद्भवा ॥ इत्याद्यप्सरसांश्रेष्ठंसहस्रंषष्टिसंमितम् ॥ १२ ॥ एतस्मिन्नप्सरोलोकेवसंत्यन्याअपिस्त्रियः ॥ सदास्खलितलावण्याःसदास्खलितयौवनाः ॥ १३ ॥ दिव्यांबरादिव्यमाल्यादिव्यगंधानुलेपनाः ॥ दिव्यभोगैःसुसंपन्नाःस्वेच्छाविधृतविग्रहाः ॥१४॥ कृत्वामासोपवासानिस्खलंतिब्रह्मचर्यतः ॥ सकृदेवद्विकृत्वोवात्रिःकृत्वोदैवयोगतः ॥१५॥ ताइमादिव्यभोगिन्योरूपलावण्यसंपदः॥निवसंत्यप्सरोलोकेसर्वकामसमन्विताः ॥१६॥ कृत्वाव्रतानिसांगानिकामिकानिविधानतः ॥ भवंतिस्वैरचारिण्योदेवभोग्याइहागताः ॥ १७ ॥ पतिव्रतधृतानार्योबलेनबलिनाधृताः ॥ भर्तृबुद्ध्यारमंतेतंकदाचित्ताइमाद्विज ॥१८॥ भर्तरिप्रोषितेयाश्चब्रह्मचर्यव्रताःसदा ॥ विप्लवंतेसकृद्दैवात्ताएतावामलोचनाः॥१९॥कुसुमानिसुगंधीनिसुवासंचंदनंतथा ॥ सुगौरंचापिकर्पूरंसुसूक्ष्माण्यंबराणिच ॥ २० ॥ पर्णानिऋजुताराणिजीर्णानिकठिनानिच ॥ साग्राणिस्वर्णवर्णानिस्थूलनीलशिराणिच ॥ २१ ॥ सुवासोपस्कराढ्यानिनागवल्ल्याद्विजोत्तम ॥ शय्याविचित्राभरणारतिशालोचितानिच ॥ २२ ॥ बहुकौतुकवस्तूनिसमर्च्यद्विजदंपती ॥ भोगदानमिदंकाम्यंप्रतिसंक्रमणंरवेः ॥ २३ ॥ किंवाप्रतिव्यतीपातमेकसंवत्सरावधि॥कोदादितिचमंत्रेणयादद्याद्वरवर्णिनी॥२४॥कामरूपधरोदेवःप्रीयतामितिवादिनी ॥ साश्रेष्ठाऽप्सरसांमध्येवसेत्कल्पमिहांगना ॥२५॥

वामलोचनाः सुंदरलोचनाः ॥ वामः सुंदरमूढयोरितिवचनात् ॥ १९ ॥ कुसुमानीत्यादीनांयादद्यात्साइहकल्पंवसेदित्यग्रिमश्लोकस्थेनसंबंधः ॥ २० ॥ पर्णानिनागवल्ल्याः पर्णानि ॥ ऋजुताराणिसमानिदीर्घाणिचेत्यर्थः ॥ जीर्णानिपक्वानि ॥ २१ ॥ सुवासोपस्कराढ्यानि सुष्ठुवासोगंधोयेषांतानिसुवासानितानिचतानिउपस्कराणिगुवाकफलादीनिच तैराढ्यानियुक्तानि ॥ नागवल्ल्यास्तांबूलवल्ल्याः ॥ २२ ॥ २३ ॥ प्रतिव्यतीपातंअमावास्यायुक्तोरविवासरोव्यतीपातोयोगविशेषोवा ॥ कोदादितिचमंत्रेण ॥ कोदात्कस्माअदात्कामायादात्कामोदाताकामः प्रतिग्रहीताकामैतत्त इतिमंत्रेणेत्यर्थः ॥ चशब्देनान्येपिमंत्रास्तद्दानसेमुच्चार्यंते ॥ २४ ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २६ ॥ तदेवदेवरूपेणमेलनमेववृत्तंचरित्रंध्यायंती ॥ नपुरुषांतराभिलाषंकुर्वतीत्यर्थः ॥ २७ ॥ निदानमिति ॥ अप्सरोलोकस्यनिदानंकारणंइतिशृण्वन्उक्तप्रकारेणनिशामयन् सूर्यलोकंप्राप्यसशिवशर्मादूरात्रविंविज्ञायकृतांजलिःसन् प्रणनामेत्यग्रिमेणान्वयः ॥ २८ ॥ सदृष्टांतंलोकंविशिनाष्टि ॥ यथेति ॥ किंजल्कैः केसरैः ॥ भानुभानुभिः सूर्यरश्मिभिः ॥ २९ ॥ रविंविशिनाष्टि ॥ दूरादिति ॥ धृततामरसद्वयंगृहीतलीलाकमलयुगलम् ॥ पुनः कीदृशम् ॥ अतिजविनाअतिवेगवतास्यंदनेनचरंतमितिशेषः ॥ उपलक्षितमितिवा ॥ स्यंदनंविशिनाष्टि ॥ नवभिरित्यादिना ॥ योजनानांक्रोशचतुष्टयानांनवभिः सहस्रैः संमितेनप्रमितेन ॥ तदुक्तंवैष्णवे ॥ योजनानांसहस्राणिभास्करस्यरथोनवेति ॥ धृतरश्मिनाधृतप्रग्रहेण ॥

कन्यारूपधराकाचिद्याभुक्ताकेनचित्क्वचित् ॥ देवरूपेणतंकालमारभ्यब्रह्मचारिणी ॥ २६ ॥ तदेववृत्तंध्यायंतीनिधनंयातिकालतः ॥ दिव्यरूपधरासेहजायतेदिव्यभोगभाक् ॥ २७ ॥ निदानमप्सरोलोकस्येतिशृण्वन्द्विजाग्रणीः ॥ सौरंलोकमथप्राप्यक्षणेनसविमानगः ॥ २८ ॥ यथाकदंबकुसुमंकिंजल्कैःसर्वतोवृतम् ॥ देदीप्यमानंहितथासमंताद्भानुभानुभिः ॥ २९ ॥ दूराद्रविंसविज्ञायधृततामरसद्वयम् ॥ नवभिर्योजनानांचसहस्रैःसंमितेनह ॥ ३० ॥ विचित्रेणैकचक्रेणसप्तसप्तियुतेनच ॥ अनूरुणाधिष्ठितेनपुरतोधृतरश्मिना ॥ ३१ ॥ अप्सरोमुनिगंधर्वसर्पग्रामणिनैर्ऋतैः ॥ स्यंदनेनातिजविनाप्रणनामकृतांजलिः ॥ ३२ ॥ तस्यप्रणामंदेवोपिभ्रूभंगेनानुमन्यच ॥ अतिदूरंनभोवर्त्मव्यतिचक्रामसक्षणात् ॥ ३३ ॥ प्रक्रांतेद्युमणौदूरंशिवशर्मातिशर्मवान् ॥ प्रोवाचभगवद्भक्तौकथंलभ्यंरवेःपदम् ॥ ३४ ॥ एतदिच्छाम्यहंश्रोतुमाचक्षाथांममाग्रतः ॥ सतांसाप्तपदीमैत्रीतन्मेमैत्र्याप्रणोदितौ ॥ ३५ ॥ ॥ गणावूचतुः ॥ शृणुद्विजमहाप्राज्ञत्वय्यकथ्यंनकिंचन ॥ सत्संगादेवसाधूनांसत्कथासंप्रवर्तते ॥ ३६ ॥ नियंतासर्वभूतानांयएकःकारणंपरम् ॥ अनामागोत्ररहितोरूपादिपरिवर्जितः ॥ ३७ ॥ आविर्भावतिरोभावौयद्भ्रूनर्तनवर्तिनौ ॥ सएववक्तिसततंसर्वात्मावेदपूरुषः ॥ ३८ ॥ योसावादित्यपुरुषःसोसावहमितिस्फुटम् ॥ अंधतमःप्रविशंतियेचैवान्यमुपासते ॥ ३९ ॥

चद्वयंसमुच्चये ॥ सप्तसप्तियुतेनसप्तभिरश्वैरन्वितेन ॥ अश्वानामयुतेनेतिक्वचित्पाठःसचिंत्यः ॥ अप्सरआदिभिरुपलक्षितेन ॥ तत्र ग्रामणिर्यक्षः ॥ नैर्ऋतोराक्षसः ॥ ३० ॥ ३१ ॥ ॥ ३२ ॥ तस्येति ॥ सदेवोपीत्यन्वयः ॥ भ्रूभंगेनकटाक्षेण ॥ ससूर्यः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ नियंतेति ॥ सर्वभूतानांयोनियंतासएववक्तीत्यन्वयः ॥ ३७ ॥ आविर्भावतिरोभावावुत्पत्तिप्रलयौजगतइतिशेषः ॥ यद्भ्रूनर्तनवर्तिनौ यस्यभ्रुवोर्नर्तनेनजृंभणेनवर्तितुंशीलंययोस्तौतथा ॥ सर्वात्मासर्वभूतांतर्यामी ॥ वेदप्रतिष्ठापकः पूरुषः शास्त्रयोनिरित्यर्थः ॥ देवपूरुषइतिक्वचित्पाठः ॥ सर्वस्मादेवपूरुषइतिक्वचित् ॥ तदासर्वस्मात्पुरुषादयमेवपुरुषोत्तमइत्यर्थः ॥ ३८ ॥ किंवक्तिइत्याकांक्षायामाह ॥ योसाविति ॥ तथाचश्रुतिः ॥ [1] योसावादित्ये-

---

१ इतआरभ्यश्लोकत्रयस्यसमुदितंव्याख्यानम् ।

CC-0. In Public Domain. Digitization by eGangotri

पुरुषः सोसावहमिति ॥ ३९ ॥ अतोंधतमइत्यादिकांश्रुतिं निश्चितार्थांनिश्चितोऽवाधितोर्थोयस्याः सानिश्चितार्थातामितिपुनःपुनर्निश्चित्यनिश्चयेनज्ञात्वातंप्रसिद्धंसूर्योपाधिमेकंकेवलंब्राह्मणा सोब्राह्मणाउपतिष्ठंते उपासतइत्यर्थः ॥ ४० ॥ उपलभ्येति ॥ योद्विजः कालेयथासमयेसावित्रींसवितृरूपापन्नांपरांपरदेवतामुपलभ्यप्राप्यत्रिकालंनोपतिष्ठतनोपास्तेससप्ताहात्पतेदित्यर्थः ॥ सावित्रीं सवितृदैवत्यामुपनयनाख्यांक्रियांप्राप्यार्थात्सूर्यात्मानंनोपतिष्ठेतेतिवा ॥ ४१ ॥ जपंस्तिष्ठेदित्यत्रादित्यसंमुखइत्यग्रिमश्लोकस्थोनुषज्यते ॥ प्रत्यक्पश्चिमांसंध्यामित्यर्थः ॥ आतारको दयान्नक्षत्रोदयपर्यंतम् ॥ ४२ ॥ पूर्वकालावधिमाह ॥ सादित्यामिति ॥ अस्तमनोन्मुखसूर्यसहितामित्यर्थः ॥ तृतीयांसंध्यामाह ॥ मध्यमामिति ॥ ४३ ॥ कालेक्रियमाणं कर्मफलती

निश्चितार्थांश्रुतिमिमांब्राह्मणासोद्विजोत्तम ॥ तमेकमुपतिष्ठंतेनिश्चित्येतिपुनःपुनः ॥ ४० ॥ उपलभ्यचसावित्रींनोपतिष्ठतयःपराम् ॥ कालेत्रिकालं सप्ताहात्सपतेन्नात्रसंशयः ॥४१॥ तावत्प्रातर्जपंस्तिष्ठेद्यावदर्धोदयोरवेः ॥ आसनस्थोजपेन्मौनीप्रत्यगातारकोदयात् ॥ ४२ ॥ सादित्यांमध्यमांसंध्यां जपेदादित्यसंमुखः ॥ काललोपोनकर्तव्यस्ततःकालंप्रतीक्षयेत् ॥ ४३ ॥ कालेफलंत्योषधयःकालेपुष्पंतिपादपाः ॥ वर्षंतितोयदाःकालेतस्मात्कालं नलंघयेत् ॥ ४४ ॥ मंदेहदेहनाशार्थमुदयास्तमयेरविः ॥ समीहतेद्विजोत्सृष्टंमंत्रतोयांजलित्रयम् ॥ ४५ ॥ गायत्रीमंत्रतोयाढ्यंदत्तंयेनांजलित्रयम् ॥ कालेसवित्रेकिंनस्यात्तेनदत्तंजगत्रयम् ॥ ४६ ॥ किंकिंनसवितासूतेकालेसम्यगुपासितः ॥ आयुरारोग्यमैश्वर्यंवसूनिसपशूनिच ॥ ४७ ॥ मित्रपुत्र कलत्राणिक्षेत्राणि विविधानिच ॥ भोगानष्टविधांश्चापिस्वर्गंचाप्यपवर्गकम् ॥ ४८ ॥ अष्टादशसुविद्यासुमीमांसातिगरीयसी ॥ ततोपितर्कशास्त्रा णिपुराणंतेभ्यएवच ॥ ४९ ॥ ततोपिधर्मशास्त्राणितेभ्योगुर्वीश्रुतिर्द्विज ॥ ततोप्युपनिषच्छ्रेष्ठागायत्रीचततोधिका ॥ ५० ॥ दुर्लभासर्वमंत्रेषुगायत्री प्रणवान्विता ॥ नगायत्र्याधिकंकिंचित्त्रयीषुपरिगीयते ॥ ५१ ॥ नगायत्रीसमोमंत्रोनकाशीसदृशीपुरी ॥ नविश्वेशसमंलिंगंसत्यंसत्यंपुनःपुनः ॥ ५२ ॥ गायत्रीवेदजननीगायत्रीब्राह्मणप्रसूः ॥ गातारंत्रायतेयस्माद्गायत्रीतेनगीयते ॥ ५३ ॥ वाच्यवाचकसंबंधोगायत्र्याःसवितुर्द्वयोः ॥ वाच्योसौसवितासाक्षाद्गायत्रीवाचिकापरा ॥ ५४ ॥

त्यत्रदृष्टांतमाह ॥ कालइति ॥ ४४ ॥ यथाकालमुपासितैवसंध्याफलंप्रयच्छतीत्यत्रहेतुमाह ॥ मंदेहेति ॥ मंत्रतोयांजलित्रयंमंत्राभिमंत्रितंजलांजलित्रयमित्यर्थः ॥ ४५ ॥ मंत्रतो यांजलित्रयमित्यत्राकांक्षितंमंत्रंप्रदर्शयंस्तद्दानफलमाह ॥ गायत्रीति ॥ त्रैलोक्यदानेयत्फलंभवतितदेतद्दानादित्यर्थः ॥ ४६ ॥ तदेवदर्शयति ॥ किंकिमिति ॥ ४७ ॥ भोगानष्टविधानणिम द्यैश्वर्याणि सौगंध्यवनितावस्त्रगीततांबूलभोजनवाहनमंदिराणिवा ॥ तदुक्तम् ॥ सौगंध्यंवनितावस्त्रंगीतंतांबूलभोजनम् ॥ वाहनंमंदिराणीतिह्यष्टौभोगाःप्रकीर्तिताइति ॥ अपवर्गमोक्षम् ॥ ४८ ॥ अष्टादशविद्याभ्योगायत्र्याःश्रैष्ठ्यमाह ॥ अष्टादशेत्यारभ्यगायत्रीतेनगीयतइत्यंतेन ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ सर्वाभ्योविद्याभ्योगायत्र्याःश्रेष्ठत्वेपिसूर्यस्यकिमायातंतद्वाच्यत्वेनपरम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रैष्ठचमागतमित्याह ॥ वाच्यवाचकसंबंधइति ॥ ९४ ॥ नचगायत्र्याःप्रभावःसाधनीयःप्रत्यक्षसिद्धत्वादित्याह ॥ प्रभवेणेति ॥ कौशिकोविश्वामित्रः ॥ ९५ ॥ अन्यद्भुवनेत्यार्षम् ॥ अव्ययं वान्यच्छन्दः ॥ अन्यदपूर्वसामर्थ्यमितिवा ॥ एवंतत्तत्कालेपूर्वोक्तप्रकारेण ॥ ९६ ॥ ९७ ॥ गायत्रीति ॥ वेदत्रयात्मकानांविष्णुरुद्रविरिंचानांगायत्रीस्वरूपत्वंयतोऽतोवेदत्रयी गायत्र्येवेत्यर्थः ॥ ९८ ॥ ततःकिंप्रकृते ॥ देवत्रयमिति ॥ येयंत्रयीतिक्वचित्पाठः ॥ कलयतीतिकालोनिमेषलवाद्यात्मकस्तदधिष्ठातावातत्प्रवर्तकश्च ॥ ९९ ॥अस्मल्लोकोवैकुंठस्तन्निवासिनः॥६०॥ तामेवश्रुतिंदर्शयतः ॥ एषोहदेवइति ॥ अस्यार्थः ॥ एषोहदेवस्त्रिष्टुभःसर्वाःसदसस्पतिमित्यस्यागायत्र्याःप्राक् ॥ इदानींस्वरूपंकथयति ॥ एषदेवःप्रदिशोदिशश्चसर्वाअनुव्याप्यप्रवर्ततेतिर्यगर्ध्व मधश्चैव ॥ पूर्वोहजातःअनादिनिधनःसंभूतः ॥ सउगर्भेअंतःसएवमातुरुदरेगर्भेव्यवतिष्ठते ॥ सएवचजातः ॥ सचजनिष्यमाणः ॥ तदुक्तम् ॥ सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीते

प्रभावेणैवगायत्र्याःक्षत्रियःकौशिकोवशी ॥ राजर्षित्वंपरित्यज्यब्रह्मर्षिपदमीयिवान्॥९५॥ सामर्थ्यंप्रापचात्युच्चैरन्यद्भुवनसर्जने ॥ किंकिंनदद्याद्गायत्री सम्यगेवमुपासिता ॥ ९६ ॥ नब्राह्मणोवेदपाठान्नशास्त्रपठनादपि ॥ देव्यास्त्रिकालमभ्यासाद्ब्राह्मणःस्याद्द्विनान्यथा ॥ ९७ ॥ गायत्र्येवपरं विष्णुर्गायत्र्येवपरःशिवः ॥ गात्र्येवपरोब्रह्मागायत्र्येवत्रयीततः ॥ ९८ ॥ देवत्रयंसभगवानंशुमालीदिवाकरः ॥ सर्वेषांमहसांराशिःकालःकालप्रवर्तकः ॥ ९९ ॥ अर्कमुद्दिश्यसततमस्मल्लोकनिवासिनः ॥ श्रुतिंह्युदाहरंतीमांसारासारविवेकिनः ॥६०॥ एषोहदेवःप्रदिशोनुसर्वाःपूर्वोहजातःसउगर्भेअंतः ॥ सएवजातःसजनिष्यमाणःप्रत्यङ्जानास्तिष्ठतिसर्वतोमुखः ॥ ६१ ॥ सदैवमुपतिष्ठेरन्सौरैःसूक्तैरतंद्रिताः ॥ येनमंत्यत्रतेविप्राविप्राभास्करसन्निभाः ॥ ६२ ॥ पुष्यार्केप्यथहस्तार्केमूलार्केप्यथवाद्विज ॥ उत्तरार्केऽथयत्कार्यंतत्फलत्येवनान्यथा ॥ ६३ ॥ पौषेमास्यर्कदिवसेयःस्नात्वाभास्करोदये ॥ दानंहोमंजपंकुर्यादर्चामर्कस्यसुव्रतः ॥ ६४ ॥ श्रद्धावानेकभक्तश्चकामक्रोधविवर्जितः ॥ सहाप्सरोभिर्द्युतिमान्सवसेदत्रभोगवान् ॥ ६५ ॥ अयनेविषुवेचापिषडशीतिमुखेषुवा ॥ विष्णुपद्यांचयेदद्युर्महादानानिसुव्रताः ॥ ६६ ॥

तिश्रुतौ ॥ प्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः प्रतिप्रदार्थंमंचन्नयस्तिष्ठति ॥ सर्वतोमुखः सर्वतोक्षिशिरोग्रीवपाणिपादःअचिंत्यशक्तिरित्यर्थः ॥ जनाइत्याद्युदात्तस्वरमपिसदामंत्रितमेवार्थस्याहिप्राप्त मेतद्वर्ततेहेजनाइति ॥ ६१ ॥ येसदेवमुक्तप्रकारैःसौरैःसूक्तैः उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यमित्याद्यैस्तंसूर्यमुपतिष्ठेरन् येचतंनमंतितेऽपिभास्करतुल्याइत्यर्थः ॥ येवसंत्यत्रते विप्रविप्राइतिक्वचित्पाठः ॥ ६२ ॥ पुष्यार्कइत्यादावर्कशब्दोर्कवासरविषयः ॥ फलत्येवफलवद्भवत्येवेत्यर्थः ॥ एवकारव्यावर्त्यमाह ॥ नान्यथेति ॥ फलत्येषइतिक्वचित्पाठः ॥ तत्रएषसूर्यस्त त्कार्यंफलतिफलवन्निष्पादयति ॥ सफलंकरोतीत्यर्थः ॥ ६३ ॥ ६४ ॥ अत्रसूर्यलोके ॥ ६५ ॥ अयन इति ॥ अयनेअयनद्वितयेमकरकर्कटसंक्रमणे ॥ विषुवेविषुवद्वितयेतुलामेषसंक्रमणे ॥ षडशी

१ पुष्येमासीतिप्रचुरःपाठः । २ द्वर्ण्यतेइत्यपिक्वचित्पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

तिसुखेषुधनुर्मिथुनकन्यामीनसंक्रमणेषु ॥ विष्णुपद्यांवृषवृश्चिकसिंहकुंभसंक्रांत्याम् ॥ ६६ ॥ ६७ ॥ विकर्तनसमप्रभाभवंतीतिशेषः ॥ ६८ ॥६९॥ कपिलाज्याप्लुतैः ॥ कपिलायाघृतेनप्रोक्षितैः॥ कपिलाज्याक्तसौत्तैलैरितिपाठेसत्तिलशब्देनशुक्लास्तिलागृह्यंते ॥ शुक्लैस्तुतर्पयेद्देवान्मनुष्यान्शबलैस्तिलैः॥कृष्णैस्तुतर्पयेत्पितॄन्श्रद्धावांस्तुसमाहितइतिवचनात्॥७०॥ विहीननयनाननाः विहीनानि विगतानिनयनानिनेत्राणियेषुतानिआननानिमुखानियेषांते ॥ विहीननयनानराइतिक्वचित्पाठः ॥ विच्छायनयनाननाइतिचाऽन्यत्र ॥ सपटच्चराजीर्णवस्त्रसहिताः ॥ पटच्चरंजीर्णवस्त्रमित्यमरः ॥ ॥ ७१ ॥ कृष्णलकेनगुंजात्मकेन ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ हंसइति ॥ हंति नाशयतिगच्छतिजानातिवासर्वमितिहंसः ॥ मंत्ररूपोवा ॥ हंसहंसेतिमंत्रोयंजीवोजपतिसर्वदेति

तिलाञ्जुहुवतिसाज्यांश्चब्राह्मणान्भोजयंतिच॥पितॄनुद्दिश्यचश्राद्धंयेकुर्वंतिविपश्चितः ॥ ६७ ॥ महापूजांचयेकुर्युर्महामंत्राञ्जपंतिच ॥ तेऽत्रवैकर्तनेनलोके
विकर्तनसमप्रभाः ॥६८॥ नदरिद्रानचदुःखार्ता नव्याधिपरिपीडिताः ॥ संक्रमेष्वर्कभक्तायेनविरूपानदुर्भगाः ॥६९॥ संक्रमेषुनयैर्दत्तंनस्नातंतीर्थवा
रिषु॥विशेषहोमोनकृतःकपिलाज्याप्लुतैस्तिलैः ॥ ७० ॥ तेदृश्यंतेप्रतिद्वारंविहीननयनाननाः ॥ देहिदेहीतिजल्पंतोदेहिनःसपटच्चराः ॥ ७१ ॥ समं
कृष्णलकेनापियोदद्यात्कांचनंकृती ॥ सूर्यग्रहेकुरुक्षेत्रेसवसेदत्रपुण्यभाक् ॥ ७२ ॥ सर्वंगंगासमंतोयंसर्वेब्रह्मसमाद्विजाः ॥ सर्वंदेयंस्वर्णसमंराहुग्रस्ते
दिवाकरे ॥ ७३ ॥ दत्तंजप्तंहुतंस्नातंयत्किंचित्सदनुष्ठितम्॥भानूपरागेश्राद्धादितद्धेतुर्ब्रध्नसंनिधेः ॥७४॥ रविवारेसंक्रमश्चेदुपरागोऽथवाभवेत् ॥ तदायद
र्जितंपुण्यंतदिहाक्षयमाप्यते ॥ ७५ ॥ भानुवारोयदाषष्ठ्यांसप्तम्यामथजायते ॥ तदायत्सुकृतंकर्मकृतंतदिहभुज्यते ॥ ७६ ॥ हंसोभानुःसहस्रां
शुस्तपनस्तापनोरविः ॥ विकर्तनोविवस्वांश्चविश्वकर्माविभावसुः ॥ ७७ ॥

वचनात् ॥ शुद्धसात्त्विकइतिवा ॥ वैष्णवोंशःपरःसूर्यइतिवचनात् १ ॥ भातीतिभानुःभाःनुदतिप्रेरयतीतिवा २ ॥ सहस्रंअपारिमिताअंशवोरश्मयोयस्यससहस्रांशुः ३ ॥ तपतीतितपनः ४ ॥ तापयतीतितापनः ५ ॥ लोकानवतिरक्षतीतिरविः ॥ उक्तंच ॥ अवेतिरक्षणेधातुःप्रत्ययेस्यरुडागमः ॥ अवतित्रीनिमांल्लोकांस्तेनासौरविरुच्यत इति ६ ॥ विशिष्टेतजस्त्वार्थंकर्तनात्तेजः शातनाद्वाविकर्तनः ७ ॥ विशिष्टंवसुतेजोवर्ततेयस्यसविवस्वान् ८ ॥ निपातनात्साधुत्वम् ॥ एवमन्यत्रापि ॥ चःसमुच्चये ॥ विश्वंकर्मयस्यविश्वस्यकर्मयस्मादितिवासविश्वकर्मा ९ ॥ विभावसुःअग्निस्वरूपः ॥ विविधप्रकारेणधातुपुभांतिवसवोरश्मयोयस्येतिवा १० ॥ ७७ ॥

१ कृष्णलकेनगुंजयासमंतत्परिमितमित्यर्थइत्यपेक्षितामितिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वस्मिन्विश्वंवारूपंयस्यसविश्वरूपः ११ ॥ विश्वकर्ताविश्वोत्पादकः १२ ॥ बुधशापाद्गर्भस्थोनमृतइतिमार्तंडः ॥ तथाचहरिवंशे ॥ नखल्वयंमृतोंडस्थइतिस्नेहादभाषत ॥ अजानन्कश्यपस्तस्मी
न्मार्तंडइतिचोच्यतेइति ॥ अचेतनेऽडेवैराजरूपेणप्रविष्टत्वाद्वामार्तंडः ॥ तदुक्तं भागवते ॥ मृतेंडएषएतस्मिन्यदभूत्ततोमार्तंडइतिव्यपदेशइति १३ ॥ मिहिंमिहिकांरातिगृह्णातिनाशयतीतिमिहिरः
१४ ॥ अंशुमान्रश्मिमान् १५ ॥ अदितेःपुत्रआदित्यः १६ ॥ चः समुच्चये ॥ उष्णगुस्तिग्मरश्मिः १७ ॥ उदमयंवसुसूतेइतिसूर्यः १८ ॥ अर्यमात्रयीमूर्तिः १९ ॥ कलाकाष्ठानिमेषादिक्रमेणसर्वं
जगद्वर्धयतीतिब्रध्नः २० ॥ दिवाकरोदिनकर्ता २१ ॥ ७८ ॥ द्वादशात्माद्विषण्मूर्तिः २२ ॥ सप्तहयःसप्ताश्वः २३ ॥ भास्करःप्रभाकरः २४ ॥ अहस्करोदिनकरः २५ ॥ खेआकाशेगच्छतीति
खगः २६ ॥ जगत्सूतइतिसूरः २७ ॥ प्रभाकरोदीप्तिकरः २८ ॥ श्रीमानितिविशेषणम् ॥ लोकचक्षुर्लोकप्रकाकइत्यर्थः २९ ॥ ग्रहेश्वरोग्रहाणांराजा ३० ॥ ७९ ॥ त्रिलोकेशोलोकत्रयानि
यन्ता ३१ ॥ लोकसाक्षीसर्वांतर्यामी ३२ ॥ तमोरिःअन्धकारशत्रुः ३३ ॥ शाश्वतोनित्यः ३४ ॥ शुचिःपवित्रः ३५ ॥ गभस्तिहस्तोरश्मिकरः ३६ ॥ तीव्रांशुस्तीक्ष्णरश्मिः ३७ ॥ तरणि
स्तारकः भक्तानांसंसारोत्तारकनौस्वरूपइतिवा ३८ ॥ सुमहःशोभनतेजःस्वरूपः ३९ ॥ अरणिः अरणिरिवाराणिःसर्वोत्पत्तिमतामभिव्यक्तिस्थानमित्यर्थः ॥ लोकप्रकाशकःश्रीमानितिसांबपुराणां
तर्गतसांबस्तवराजेएकविंशतिनामान्यथाऽनुपपत्त्याश्रीमानित्यस्यैकनामत्वेसुमहोरणिःप्रकृष्टतेजसामुद्भवस्थानमितिनामैकत्वेनव्यावर्त्यमिति ४० ॥ ८० ॥ दिवोमणिर्द्युमणिः ४१ ॥ हरिदश्वोहरि

विश्वरूपोविश्वकर्तामार्तंडोमिहिरोंऽशुमान् ॥ आदित्यश्चोष्णगुःसूर्योऽर्यमाब्रध्नोदिवाकरः ॥ ७८ ॥ द्वादशात्मासप्तहयोभास्करोहस्करःखगः ॥ सूरः
प्रभाकरःश्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ॥ ७९ ॥ त्रिलोकेशोलोकसाक्षीतमोरिःशाश्वतःशुचिः ॥ गभस्तिहस्तस्तीव्रांशुस्तरणिःसुमहोरणिः ॥८०॥ द्युमणिर्ह
रिदश्वोर्कोभानुमान्भयनाशनः ॥छंदोश्वोवेदवेद्यश्चभास्वान्पूषावृषाकपिः ॥ ८१ ॥ एकचक्ररथोमित्रोमंदेहारिस्तमिस्रहा ॥ दैत्यहापापहर्ताचधर्मोधर्म
प्रकाशकः ॥ ८२ ॥ हेलिकश्चित्रभानुश्चकलिघ्नस्ताक्ष्यवाहनः ॥ दिक्पतिःपद्मिनीनाथःकुशेशयकरोहरिः ॥ ८३ ॥ घर्मरश्मिर्दुर्निरीक्ष्यश्चंडांशुः
कश्यपात्मजः ॥ एभिःसप्ततिसंख्याकैःपुण्यैःसूर्यस्यनामभिः ॥ ८४ ॥

र्दश्वोघोटकः ४२ ॥ अतिशयेनारतिगच्छतीत्यर्कः ॥ तदुक्तम् ॥ ऋश्रृगतौस्मृतोधातुरस्यकःप्रत्ययःस्मृतः ॥ गतौयस्मात्परोनास्तितस्मादर्कःसउच्यतइति ॥ जगदर्च्यतमत्वाद्वाऽर्कः ४३ ॥ भानु
मान्रश्मिवान् ४४ ॥ भयनाशनोभवभयच्छेत्ता ४५ ॥ गायत्र्यादीनिसप्तच्छंदांसिअश्वायस्यसच्छंदोश्वः ४६ ॥ वेदवेद्यउपनिषदेकगम्यः ४७ ॥ चःसमुच्चये ॥ भास्वान्प्रकाशवान् ४८ ॥
वृष्ट्यादिद्वारेणसर्वंजगत्पुष्णातीतिपूषा ४९ ॥ वर्षतिपुण्यफलंआकंपयतिपापफलमितिवृषाकपिः ५० ॥ ८१ ॥ एकंचक्रंयस्मिंस्तथाविधोरथोयस्यसएकचक्ररथः ५१ ॥ मित्रः सर्वत्रमित्रस्वभावः
५२ ॥ मन्देहाराक्षसास्तेषामरिर्मंदेहारिः ५३ ॥ तमिस्रहातमोहर्ता ५४ ॥ दैत्यहामन्देहादिदैत्यहंता ५५ ॥ पापहर्ताभक्तानांपापहा ५६ ॥ चःसमुच्चये ॥ धारणाद्धर्मोधर्मस्वरूपोवा ५७ ॥ तस्यै
वधर्मस्यप्रकाशकोधर्मप्रकाशकः ५८ ॥८२॥ हेआकाशेलिंकतिगच्छतीतिहेलिकः ५९॥ चित्राःसप्तप्रकाराभानवोरश्मयोयस्यसचित्रभानुः६०॥ चःसमुच्चये॥कलिघ्नःकलेर्नाशकः ६१॥ताक्ष्यवाहनः
ताक्ष्योऽनूरुर्वाहनःसारथिर्यस्यसः उह्यतेअनेनेतिवाहनशब्दव्युत्पत्तेः ६२ ॥ दिशांपतिर्दिक्पतिः ६३ ॥ पद्मिनीनाथःकमलिनीनांप्रकाशकः ॥ तथाचोक्तम् ॥ अयमुदयतिमुद्राभंजनः पद्मिनीना
मिति ६४ ॥ कुशेशयकरःपद्महस्तः ६५ ॥ हरत्यज्ञानंतिमिरादिकंचेतिहरिः ६६ ॥८३॥ घर्मरश्मिरुष्णाकिरणः ॥ घर्मःस्वेदस्तज्जनकारश्मयोयस्यसइतिवा ६७ ॥ दुर्निरीक्ष्यःस्वाच्छंद्येनद्रष्टुमश

CC-0. In Public Domain. Digitization by eGangotri

क्यः ६८॥ चंडांशुस्तीक्ष्णकिरणः ६९॥ कश्यपात्मजोमारीचतनयः ७० ॥ एभिरिति॥ एभिरित्यादितृतीयांतानांपदानांदद्यादर्घ्यमनर्घ्यायेतिचतुर्थ्येनान्वयः॥८४॥८५॥८६॥८७॥उपमौलिशिरः समीपम् ॥ ८८ ॥ मंत्रंमंत्रंप्रतिमन्त्रम् ॥ पूर्वोक्तनामान्येवात्रमंत्राः ॥ मन्त्रमात्रत्वमितिभ्रमंनिराकुर्वन्नेतदनुष्ठानस्यफलमाह ॥ अनयेत्यादिना ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ॥ ९५ ॥ ९६ ॥ इतिश्रीरामानंदकृतायांकाशीखण्डटीकायांनवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥ सहस्राक्षस्यवह्नेश्चलोकावत्यंतसुंदरौ ॥ मनःप्रीतिकरौहृद्यौवर्ण्येतेदशमेऽद्भुतौ ॥ १ ॥ रमयंतीति ॥ इदमोद्विरभ्यासोऽन्वयभेदाभिप्रायेण ॥ अतीवेतिलोकोक्तिः ॥ एवार्थेइवशब्दः ॥ १ ॥ सुतीर्थफलितद्रुमं सुतीर्थस्यफलंसुतीर्थमेववाफलंतद्विद्यतेयस्यलोकस्यससुतीर्थफलितः ॥ तारकादित्वादितच् ॥

प्रणवादिचतुर्थ्यंतैर्नमस्कारसमन्वितैः ॥ प्रत्येकमुच्चरन्नामदृष्ट्वादृष्ट्वादिवाकरम् ॥ ८५ ॥ विगृह्यपाणियुग्मेनताम्रपात्रंसुनिर्मलम् ॥ जानुभ्यामवनिंगत्वापरिपूर्यजलेनच ॥ ८६ ॥ करवीरादिकुसुमैरक्तचंदनमिश्रितैः ॥ दूर्वांकुरैरक्षतैश्चनिक्षिप्तैःपात्रमध्यतः ॥ ८७ ॥ दद्यादर्घ्यमनर्घ्यायसवित्रेध्यानपूर्वकम् ॥ उपमौलिसमानीयतत्पात्रंनान्यदृङ्मनाः ॥ ८८ ॥ प्रतिमंत्रंनमस्कुर्यादुदयास्तमयेरविम् ॥ अनयानामसप्तत्यामहामंत्ररहस्यया ॥ ८९ ॥ एवंकुर्वन्नरोजातुनदारिद्रोनदुःखभाक् ॥ व्याधिभिर्मुच्यतेघोरैरपिजन्मांतरार्जितैः ॥ ९० ॥ विनौषधैर्विनावैद्यैर्विनापथ्यपरिग्रहैः ॥ कालेननिधनंप्राप्तःसूर्यलोकेमहीयते ॥ ९१ ॥ इत्येकदेशःकथितोभानुलोकस्यसत्तम ॥ महातेजोनिधेरस्यकोविशेषमवैत्यहो ॥ ९२ ॥ स्वकर्णविषयीकुर्वन्नितिपुण्यकथामिमाम् ॥ क्षणादालोकयांचक्रेमहेंद्रस्यमहापुरीम् ॥ ९३ ॥ ॥ अगस्तिरुवाच ॥ ॥ श्रुत्वासौरींकथामेतामप्सरोलोकसंयुताम् ॥ नदरिद्रोभवेत्क्वापिनाधर्मेषुप्रवर्तते ॥ ९४ ॥ ब्राह्मणैःसततंश्राव्यमिदमाख्यानमुत्तमम् ॥ वेदपाठेनयत्पुण्यंतत्पुण्यफलदायकम् ॥ ९५ ॥ ब्राह्मणाःक्षत्रियावैश्याः शृण्वंतोऽध्यायमुत्तमम् ॥ पातकानिविसृज्येहगतिंयास्यंत्यनुत्तमाम् ॥ ९६ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडेपूर्वार्धेअप्सरःसूर्यलोकवर्णनंनामनवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥ शिवशर्मोवाच ॥ ॥ रमयंतीमनोतीवकेयंकस्येयमीशितुः ॥ नयनानंदसंदोहदायिनीपूरनुत्तमा ॥ १ ॥ गणावूचतुः ॥ ॥ शिवशर्मन्महाभागसुतीर्थफलितद्रुम ॥ लोकोऽत्ररमतेविप्रसहस्राक्षपुरीत्वियम् ॥ २ ॥ तपोबलेनमहताविहिताविश्वकर्मणा ॥ दिवापिकौमुदीयस्याःसौधश्रेणीश्रियंश्रयेत् ॥ ३ ॥

सचासौद्रुमश्चतत्संबोधनंतथा ॥ विसर्गांतपाठेसुतीर्थफलितोद्रुमइतिचपाठेलोकएवद्रुमत्वेननिरूप्यते ॥ तत्रलोकशब्दस्यभुवनपरत्वेसुतीर्थफलितःसुतीर्थफलैःप्राप्यतइत्यर्थः ॥ सुतीर्थफलविद्रुमइतिक्वचित्पाठः ॥ तत्रसुतीर्थफलयुक्तोविशिष्टोद्रुमइत्यर्थः ॥ अत्ररमतेसहस्राक्षइतिशेषः ॥ उभयपक्षेप्यत्रकुत्रेत्याकांक्षायामाह ॥ सहस्राक्षेति ॥ तुशब्दोऽन्येभ्योलोकेभ्योविशेषद्योतनार्थः ॥ २ ॥ पुरींविशिनष्टि ॥ तपोबलेनेत्यादिसार्धद्वादशभिः ॥ एतेषुश्लोकेषुयदिदमादिशब्दानांसेयंपुरीइत्यनेनान्वयः ॥ दिवापीति ॥ यस्याइंद्रपुर्याःसौधश्रेणीश्रियंराजसदनपंक्तिशोभांदिवापिनकेवलंरात्रौदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसेपिकौमुदीचंद्रिकाश्रयेदाश्रयेत् ॥ चंद्रिकैवयस्याःसदासौधश्रेणिशोभेत्यर्थः॥किंच॥३॥यदेति॥ दर्शेअमावास्यायाम्॥ दर्शइत्युपलक्षणम्॥यदायदाऽदृश्यत्वंप्राप्नोतितदातदास्वप्रेयसींस्वस्यप्रियतमां ज्योत्स्नांसौधेषुनिगूहयेत्संचारयेदित्युत्प्रेक्षा ॥ सुश्रेयसीमितिपाठे सुश्रेयसींश्रेष्ठांश्रेयस्करीमितियावदर्थाल्लोकानामित्यर्थः ॥ ४ ॥ यदच्छेति ॥ यस्याअच्छभित्तौनिर्मलसौधभित्तौस्वंप्रतिबिंबंवीक्ष्या न्ययोषिद्विशंकिताअन्यस्यस्त्रीकांतेनानीताइतिविशंकिता ॥ विशंकायांहेतुः ॥ मुग्धामूढाऽविदग्धाकाचिदेवांगनाचित्रंयथास्यात्तथाईर्ष्यावशादिवस्वांचित्रशालिकांस्वीयंसौधविशेषंआशुझटितिनाविशेदित्यर्थः ॥ एतच्चित्रमितिवा ॥ ५ ॥ हर्म्येष्विति ॥ तमोंऽधकारः ॥ अपिशब्दात्प्रचन्द्रासुरात्रिष्वपीत्यर्थः ॥ उत्प्रेक्षेयम् ॥ ६ ॥ चंद्रेति ॥ तत्रपुर्याम् ॥ स्नुतमत्रतस्मादितिचपाठेएकंजल पदमध्याहर्तव्यम् ॥ ७ ॥ कुविंदास्तंतुवायाः ॥ पश्यतोहराअलंकरणनिर्मातारःस्वर्णकाराइत्यर्थः ॥ अलंकृतीःअलंकरणानि ॥ ८ ॥ चिन्तामणिस्तदधिष्ठात्रीदेवता ॥ चिकेतिजानातिगणयती

यदाकलानिधिःक्वापिदर्शेऽदृश्यत्वमावहेत् ॥ तदास्वप्रेयसींज्योत्स्नांसौधेष्वेषुनिगूहयेत् ॥ ४ ॥ यदच्छभित्तौवीक्ष्यस्वमन्ययोषिद्विशंकिता ॥ मुग्धानाशुविशेच्चित्रमपिस्वांचित्रशालिकाम् ॥ ५ ॥ हर्म्येषुनीलमणिभिर्निर्मितेष्वत्रनिर्भयम् ॥ स्वनीलिमानमाधायतमोहःस्वपितिष्ठति ॥ ६ ॥ चंद्रकांतशिलाजालस्नुतमात्रामलंजलम् ॥ तत्रचादायकलशैर्नेच्छंत्यन्यज्जलंजनाः ॥ ७ ॥ कुविंदानचसंत्यत्रनचतेपश्यतोहराः ॥ चैलान्यलंकृती रत्रयतःकल्पद्रुमोर्पयेत् ॥ ८ ॥ गणकानात्रविद्यंतेचिंताविद्याविशारदाः ॥ यतश्चिकेतिसर्वेषांचिंतांचिंतामणिर्द्रुतम् ॥ ९ ॥ सूपकारानसंत्यत्ररसकर्म विचक्षणाः॥दुग्धेसर्वरसानेकाकामधेनुरतोयतः ॥ १० ॥ कीर्तिरुच्चैःश्रवायस्यसर्वतोवाजिराजिषु ॥ रत्नमुच्चैःश्रवाःसोत्रहयानांपौरुषाधिकः ॥ ११ ॥ ऐरावतोदंतिवरश्चतुर्दंतोत्रराजते ॥ द्वितीयइवकैलासोजंगमस्फटिकोज्ज्वलः ॥ १२ ॥ तरुरत्नंपारिजातःस्त्रीरत्नंसोर्वशीत्विह ॥ नंदनंवनरत्नंचरत्नंमंदाकिनी ह्यपाम् ॥ १३ ॥ त्रयस्त्रिंशत्सुराणांयाकोटिःश्रुतिसमीरिता ॥ प्रतीक्षतेसाऽवसरंसेवायैप्रत्यहंत्विह ॥ १४ ॥

तिवा ॥ चिन्तामभिप्रेतांवांछामित्यर्थः ॥ ९ ॥ अतोऽस्याम् ॥ १० ॥ कीर्तिरिति ॥ सर्वतोवाजिराजिषुसकलेष्वश्वसमूहेषु ॥ उच्चैःश्रवःश्रवणंयस्याःसाकीर्तिर्यस्यसउच्चैःश्रवाः ॥ हयानांमध्येरत्नं श्रेष्ठोऽत्रास्यामित्यर्थः ॥ कथंभूतः ॥ पौरुषाधिकः पुरुषस्येदंपौरुषंबलंतेनाधिकः ॥ यद्वा पुरुषोविष्णुस्तस्यांशःपौरुषोविभूतिरित्यर्थः ॥ तेनाधिकःश्रेष्ठः ॥ उच्चैःश्रवसमश्वानामितिभगवद्वचनात् ॥ चात्रेतिपाठेसइत्यध्याहर्तव्यम् ॥ ११ ॥ १२ ॥ १३ ॥ त्रयस्त्रिंशदिति ॥ यद्यपित्रयस्त्रिंशदेवदेवाःश्रुतिप्रतिपादिताः ॥ तथाचश्रुतिः ॥ त्रयस्त्रिंशद्वैदेवाइति ॥ तथापितेष्वंतर्भूतान्देवान्गृहीत्वात्रय स्त्रिंशत्सुराणांयाकोटिरित्युक्तम् ॥ अवसरमवकाशम् ॥ तुशब्देनसंभ्रमोगृह्यते ॥ १४ ॥

॥ १५ ॥ अमरावत्यास्तौल्यपावित्र्ययोरभावमन्यस्याह ॥ अश्वमेधेति ॥ १६ ॥ अर्चिष्मतीति ॥ वह्नियमनिर्ऋतिवरुणवायुकुबेरेशानांसप्तानामर्चिष्मत्याद्याःसप्तपुर्यः ॥ ईशस्येयमैशी ॥१७॥ नान्यतइतिपाठेनान्यस्येत्यर्थः ॥ १८ ॥ १९ ॥ २० ॥ महेंद्रपदलिप्सवःअमरावतींप्राप्तुमिच्छवः ॥ २१ ॥ शक्रैश्वर्यजिघृक्षवःइंद्रश्रियंलब्धुमिच्छवः ॥ २२ ॥ तर्हिकिमितिनागृह्णं स्तत्राह ॥ निष्प्रत्यूहमिति ॥ २३ ॥ तर्हिसविघ्नक्रतुशतानांतदनुष्ठानंनिष्फलमेवनेत्याह ॥ असमाप्तेति ॥ २४ ॥ तुलेति ॥ तुलापुरुषादीनिचतानिमहादानानिचेतितथा ॥ आदिपदेन

स्वर्गेष्विंद्रपदादन्यन्नविशिष्येतकिंचन ॥ यद्यत्रिलोक्यामैश्वर्यंनतत्तुल्यमनेनहि ॥ १५ ॥ अश्वमेधसहस्रस्यलभ्यंविनिमयेनयत् ॥ किंतेनतुल्यमन्य त्स्यात्पवित्रमथवामहत ॥ १६॥ अर्चिष्मतीसंयमिनीपुण्यवत्यमलावती ॥ गंधवत्यलकेशीचनैतत्तुल्यामहर्धिभिः ॥ १७॥ अयमेवसहस्राक्षस्त्वयमे वदिवस्पतिः ॥ शतमन्युरयंदेवोनामान्येतानिनामतः ॥ १८॥ सप्तापिलोकपालायेतएनंसमुपासते ॥ नारदाद्यैर्मुनिवरैरयमाशीर्भिरीड्यते ॥ १९ ॥ एतत्स्थैर्येणसर्वेषांलोकानांस्थैर्यमिष्यते ॥ पराजयान्महेंद्रस्यत्रैलोक्यंस्यात्पराजितम् ॥ २० ॥ दनुजामनुजादैत्यास्तपस्यंत्युग्रसंयमाः ॥ गंधर्व यक्षरक्षांसिमहेंद्रपदलिप्सवः ॥ २१ ॥ सगराद्यामहीपालावाजिमेधविधायकाः ॥ कृतवंतोमहायत्नंशक्रैश्वर्यजिघृक्षवः ॥ २२ ॥ निष्प्रत्यूहंक्रतुशतं यःकश्चित्कुरुतेऽवनौ ॥ जितेंद्रियोमरावत्यांसप्राप्नोतिपुलोमजाम् ॥ २३ ॥ असमाप्तक्रतुशतावसंत्यत्रमहीभुजः ॥ ज्योतिष्टोमादिभिर्यागैर्येयजंत्य पितेद्विजाः ॥२४॥ तुलापुरुषदानादिमहादानानिषोडश ॥ येयच्छंत्यमलात्मानस्तेलभंतेऽमरावतीम् ॥ २५ ॥ अक्लीबवादिनोधीराःसंग्रामेष्वपरा ङ्मुखाः ॥ विक्रांतावीरशयनेतेऽत्रतिष्ठंतिभूभुजः ॥२६॥ इत्युद्देशात्समाख्यातामहेंद्रनगरीस्थितिः ॥ यायजूकावसंत्यत्रयज्ञविद्याविशारदाः ॥ २७ ॥ इमामर्चिष्मतींपश्यवीतिहोत्रपुरींशुभाम् ॥ जातवेदसियेभक्तास्तेवसंत्यत्रसुव्रताः ॥ २८ ॥ अग्निप्रवेशंयेकुर्युर्दृढसत्त्वाजितेंद्रियाः ॥ स्त्रियोवासत्त्वसं पन्नास्तेसर्वेअग्नितेजसः ॥ २९ ॥ अग्निहोत्ररताविप्रास्तथाग्निब्रह्मचारिणः ॥ पंचाग्निव्रतिनोयेवैतेऽग्निलोकेग्नितेजसः ॥ ३० ॥

हिरण्यगर्भादीनिगृह्यंते॥तानिचलैंगेदर्शितानि॥ तथाहि ॥ तुलाहिरण्यगर्भश्चब्रह्मांडाख्यंतृतीयकम् ॥ कल्पतरुर्गोसहस्रंनामधेयंतुपंचमम् ॥ हिरण्यकामधेनुश्चाहिरण्याश्वश्चसप्तमः ॥ हिरण्याश्वरथश्चैव हेमहस्तिरथस्तथा॥पंचलांगलदानंचधराख्यंविश्वचक्रकम्॥कल्पलताह्वयंचान्यत्सप्तसागरमेवच॥रत्नधेनुर्महाभूतघटेत्येतानिषोडश ॥ महादानानिसुतरांक्रमशःकथितानिवै ॥ सर्वाण्येतानिकृतवान्पुरा शंवरसूदनइति ॥ २५ ॥ २६ ॥ यायजूकायज्ञशीलाः ॥ २७ ॥ २८ ॥ २९ ॥ अग्निब्रह्मचारिणःसाग्निकाब्रह्मचारणः ॥ चतुर्दिक्षुचत्वारोऽग्नयउपरिसूर्यश्चपंचाग्नयस्तत्तापव्रतिनःपंचाग्नि

---

१ विक्रताइतिक्वचित्पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

व्रतिनः ॥ ३० ॥ इध्मभारान्काष्ठभारान् ॥ काष्ठंदार्विंधनंत्वेधइध्ममेधःसमित्स्त्रियामित्यमरः ॥ तपांसारत्वनीरसत्वख्यापनायतुशब्दः ॥ अग्निष्टिकांलोहादिनिर्मितान्याधारस्थालिकाम् ॥
॥ ३१ ॥ ३२ ॥ आग्नेयमग्निवृद्धिकरम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ अंतरात्माऽन्तःसाक्षी ॥ हिनिश्चये ॥ मांसपेशिकांमांसमयजरायुजांगर्भस्थबालतनुमितियावत् ॥

शीतेशीतापनुत्यैयस्त्विध्मभारान्प्रयच्छति ॥ कुर्यादग्निष्टिकांवाऽथसवसेदग्निसन्निधौ ॥ ३१ ॥ अनाथस्याग्निसंस्कारंयःकुर्याच्छ्रद्धयान्वितः ॥ अशक्तःप्रेरयेदन्यंसोग्निलोकेमहीयते ॥३२॥ जठराग्निविवृद्ध्यैयोदद्यादाग्नेयमौषधम् ॥ मंदाग्नयेसपुण्यात्मावह्निलोकेवसेच्चिरम् ॥ ३३ ॥ यज्ञोपस्करवस्तूनियज्ञार्थंद्रविणंतुवा ॥ यथाशक्तिप्रदद्याद्योह्यर्चिष्मत्यांवसेत्सवै ॥ ३४ ॥ अग्निरेकोद्विजातीनांनिःश्रेयसकरःपरः ॥ गुरुर्देवोव्रतंतीर्थंसर्वमग्निर्विनिश्चितम् ॥ ३५ ॥ अपावनानिसर्वाणिवह्निसंसर्गतःक्षणात् ॥ पावनानिभवंत्येवतस्माद्यःपावकःस्मृतः ॥ ३६ ॥ अपिवेदंविदित्वायस्त्यक्त्वावैजातवेदसम् ॥ अन्यत्रबध्नातिरतिंब्राह्मणोनसवेदवित् ॥३७॥ अंतरात्माह्ययंसाक्षान्निश्चितोह्याशुशुक्षणिः ॥ मांसग्रासान्पचेत्कुक्षौस्त्रीणांनोमांसपेशिकाम् ॥३८॥ तेजसीशांभवीमूर्तिःप्रत्यक्षादहनात्मिका ॥ कर्त्रीहंत्रीपालयित्रीविनैनांकिंविलोक्यते ॥ ३९ ॥ चित्रभानुरयंसाक्षान्नेत्रंत्रिभुवनेशितुः ॥ अंधंतमोमयेलोकेविनैनंकःप्रकाशकः ॥ ४० ॥ धूपप्रदीपनैवेद्यपयोदधिघृतैक्षवम् ॥ एतद्भुक्तंनिषेवंतेसर्वेदिविदिवौकसः ॥ ४१ ॥ शिवशर्मोवाच ॥ ॥ कोयंकृशानुःकस्यायंसूनुःकथमिदंपदम् ॥ आग्नेयंलब्धमेतेनब्रूतमेतन्ममाग्रतः ॥ ४२ ॥ ॥ गणावूचतुः ॥ ॥ आकर्णयमहाप्राज्ञवर्णयावोयथातथम् ॥ योयंयस्ययथाऽनेनप्रापिज्योतिष्मतीपुरी ॥ ४३ ॥ नर्मदायास्तटेरम्येपुरेनर्मपुरेपुरा ॥ पुरारिभक्तःपुण्यात्माऽभवद्विश्वानरोमुनिः ॥४४॥ ब्रह्मचर्याश्रमेनिष्ठोब्रह्मयज्ञरतःसदा ॥ शांडिल्यगोत्रःशुचिमान्ब्रह्मतेजोनिधिर्वशी ॥ ४५ ॥ विज्ञाताखिलशास्त्रार्थोलौकिकाचारचंचुरः ॥ कदाचिच्चिंतयामासहृदिध्यात्वामहेश्वरम् ॥ ४६ ॥

॥ ३८ ॥ तेजसइयंतैजसी ॥ शंभोरियंशांभवी ॥ अष्टमूर्तित्वादीश्वरस्य ॥ ३९ ॥ अंधंतमोमयेलोकइतिच्छांदसम् ॥ ४० ॥ ऐक्षवमिक्षुविकारम् ॥ ४१ ॥ ४२ ॥ प्रापिप्राप्ता ॥
॥ ४३ ॥ पुरारिभक्तस्त्रिपुरारिसेवकः ॥ ४४ ॥ ब्रह्मवेदःसएवयज्ञस्तत्ररतः ॥ वेदाध्ययनस्वरूपेऋषियज्ञेरतइत्यर्थः ॥ ४५ ॥ लौकिकाचारचंचुरःलौकिकव्यवहारेनिपुणःकुशलइतिया

---

१ कथयावइतिक्वचित्पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

विड्भोजनः विड्विष्ठाविशेषेण भोजनंयस्यसतथा ॥ ५२ ॥
वत् ॥ ४६ ॥ संक्षुण्णेसम्यङ्निष्पादितेचीर्णइत्यर्थः ॥ ४७ ॥ अलोड्यविचार्य ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ॥ कीदृक् ॥ कल्पनयाबंधनयाप्रतारणयेतियावत् उज्झितंत्यक्तम् ॥ यद्वैकल्याणयोजित
ब्रह्मचर्यंहीति ॥ गार्हस्थ्येगृहाश्रमेयादृग्ब्रह्मचर्यंतादृग्ब्रह्मचारिणिस्वभावचपलेचित्तेसतिकुत्रेत्यन्वयः ॥ हठादितिषड्भिः॥ हठाद्बलादधिकाराभावेप्याग्रहादि
मितिक्वचित्पाठः ॥ यद्वैकल्पेनयोजितमितिचान्यत्र॥५३॥ अनधिकारिणांतत्तदाश्रमनिंदापूर्वकमधिकारिणोगृहस्थस्यतत्तदाश्रमाच्छ्रैष्ठ्यमाह ॥

चतुर्णामप्याश्रमाणांकोतीवश्रेयसेसताम् ॥ यस्मिन्प्राप्नोतिसंक्षुण्णेपरत्रेहचवासुखम् ॥४७॥ इदंश्रेयस्त्विदंश्रेयस्त्विदंतुसुकरंभवेत् ॥ इत्थंसर्वंसमालो
ड्यगार्हस्थ्यंप्रशशंसह ॥ ४८ ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथभिक्षुकः ॥ एषामाधारभूतोसौगृहस्थोनान्यथेतिच ॥ ४९ ॥ देवैर्मनुष्यैःपितृभि
स्तिर्यग्भिश्चोपजीव्यते ॥ गृहस्थःप्रत्यहंयस्मात्तस्माच्छ्रेष्ठोगृहाश्रमी ॥५०॥ अस्नात्वाचाप्यहुत्वावाऽदत्त्वावाश्नातियोगृही ॥ देवादीनामृणीभूत्वानरकं
प्रतिपद्यते ॥ ५१ ॥ अस्नाताशीमलंभुंक्तेत्वजपीपूयशोणितम् ॥ अहुताशीकृमीन्भुंक्तेप्यदत्त्वाविड्भिोजनः ॥ ५२ ॥ ब्रह्मचर्यंहिगार्हस्थ्येयादृक्क
ल्पनयोज्झितम् ॥ स्वभावचपलेचित्तेक्कतादृग्ब्रह्मचारिणि ॥ ५३ ॥ हठाद्वालोकभीत्यावास्वार्थाद्वाब्रह्मचर्यभाक् ॥ संकल्पयतिचित्तेचेत्कृतमप्यकृतं
तदा ॥ ५४ ॥ परदारपरित्यागात्स्वदारपरितुष्टितः ॥ ऋतुकालाभिगामित्वाद्ब्रह्मचारीगृहीरितः ॥ ५५ ॥ विमुक्तरागद्वेषोयःकामक्रोधविवर्जितः ॥
साग्निःसदारःसगृहीवानप्रस्थाद्विशिष्यते ॥ ५६ ॥ वैराग्याद्गृहमुत्सृज्यगृहधर्मान्हृदिस्मरेत् ॥ सभवेदुभयभ्रष्टोवानप्रस्थोनवागृही ॥ ५७॥ अयाचितो
पस्थितयायोवृत्त्यावर्तते गृही ॥ येनकेनापिसंतुष्टोभिक्षुकात्सविशिष्यते ॥ ५८ ॥ प्रार्थयेद्यत्क्वचित्किंचिद्दुष्प्रापंवाभविष्यति ॥ अशनेषुनसंतुष्टः
सयतिःपतितोभवेत् ॥ ५९ ॥ गुणागुणंविचार्येत्थंसवैविश्वानरोद्विजः ॥ उद्वाहविधानेनस्वोचितांकुलकन्यकाम् ॥ ६० ॥ अग्निशुश्रूषणरतः
पंचयज्ञपरायणः ॥ षट्कर्मनिरतोनित्यंदेवपित्रातिथिप्रियः ॥ ६१ ॥ धर्मार्थकामान्युक्तात्मासोर्जयन्स्वस्वकालतः ॥ परस्परमसंकोचंदंपत्यो
रानुकूल्यतः ॥ ६२ ॥ पूर्वाह्णेदैविकंकर्मसोकरोत्कर्मकांडवित् ॥ मध्यंदिनेमनुष्याणांपितॄणामपराह्णके ॥६३॥ एवंबहुतिथेकालेगतेतस्याग्रजन्मनः ॥
भार्याशुचिष्मतीनामकामपत्नीवसुव्रता ॥ ६४ ॥

प्रार्थयेदिति ॥ योयतिःक्वचित्कदाचित्किंचित्प्रार्थयेत्प्रार्थ
त्यर्थः॥स्वार्थात्स्वप्रयोजननिमित्तात् संकल्पयतिचिंतयाति ब्रह्मचर्यविरोधिकर्मेतिशेषः॥कृतंब्रह्मचर्यमित्येव॥५४॥५५॥५६॥५७॥५८॥
यति॥दुष्प्रापंवायद्भविष्यतिभवतितदपिप्रार्थयति॥समीचीनमसमीचीनंवायाचतइत्यर्थः ॥ सपतितोभवेत्स्वाश्रमाद्भ्रष्टोभवतीत्यर्थः ॥५९॥६०॥६१॥६२॥ ६३ ॥ कामपत्नीरतिस्तद्वदिव ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंकुरंकारणंपुत्रमात्रमित्यर्थः॥शंकरंकल्याणकरमभीष्टदमित्यर्थः॥६५॥६६॥ अलंकृत्यातिशयंकृत्वा॥तान्यर्पितानापि ॥ तानपीतिवापाठः॥अलंकृतेतिपाठेअलंकरोतीत्यलंकृत्तयामयेत्यर्थः ॥६७॥ सुवासांसिशोभनवस्त्राणि ॥ सुवासाःशोभनगृहाः ॥ चकारःसमुच्चये ॥ सुशय्याशोभनकशिपुः ॥ सुनितंबिनीशोभनपरिचारिका ॥ स्रक्तांबूलान्नपानाश्चेत्यष्टौभोगाः ॥ विसंधिरार्षः ॥ स्वधर्मिणांस्वधर्मवताम् ॥ पाठांतरेशोभनधर्मवतामित्यर्थः ॥ सुतांबूलान्नपानाश्चेतिपाठेऽष्टावितिदुर्घटम् ॥ सुतांबूलान्नपानाद्याइतिक्वचित् ॥ समाहारपाठश्चान्यत्र ॥ एतेऽष्टौ भोगामयाभुक्ता

अपश्यंत्यंकुरमपिसंततेःस्वर्गसाधनम् ॥ विज्ञायशंकरंकांतंप्रणिपत्यव्यजिज्ञपत् ॥ ६५ ॥ ॥ शुचिष्मत्युवाच ॥ आर्यपुत्रार्यधिषणप्राणनाथप्रियव्रत ॥ नदुर्लभंममास्तीहकिंचित्त्वच्चरणार्चनात् ॥ ६६ ॥ येवैभोगाःसमुचिताःस्त्रीणांतेत्वत्प्रसादतः ॥ अलंकृत्यमयाभुक्ताःप्रसंगाद्बुद्धिमतान्यपि ॥६७॥ सुवासांसिसुवासाश्चसुशय्यासुनितंबिनी ॥ स्रक्तांबूलान्नपानाश्चअष्टौभोगाःस्वधर्मिणाम् ॥ ६८ ॥ एकंमेप्रार्थितंनाथचिरायहृदिसंस्थितम् ॥ गृहस्थानांसमुचितंतत्त्वंदातुमिहार्हसि ॥ ६९ ॥ विश्वानरउवाच ॥ किमदेयंहिसुश्रोणितवप्रियहितैषिणि ॥ तत्प्रार्थयमहाभागेप्रयच्छाम्यविलंबितम् ॥७०॥ महेशितुःप्रसादेनममकिंचिन्नदुर्लभम् ॥ इहामुत्रचकल्याणिसर्वकल्याणकारिणः ॥ ७१ ॥ इतिश्रुत्वावचःपत्युस्तस्यसापतिदेवता ॥ उवाचहृष्टवदनायदिदेयोवरोमम ॥७२॥ वरयोग्यास्मिचेन्नाथनान्यंवरमहंवृणे ॥ महेशसदृशंपुत्रंदेहिमाहेश्वरान्वय ॥ ७३ ॥ इतिस्यावचःश्रुत्वाशुचिष्मत्याःशुचिव्रतः ॥ क्षणंसमाधिमाधायहृद्येतत्समचिंतयत् ॥७४॥ अहोकिमेतयातन्व्याप्रार्थितंह्यतिदुर्लभम् ॥ मनोरथपथाद्दूरमस्तुवासहिसर्वकृत् ॥७५॥ तेनैवास्यामुखेस्थित्वावाक्स्वरूपेणशंभुना ॥ व्याहृतंकोऽन्यथाकर्तुमुत्सहेतभवेदिदम् ॥७६॥ ततःप्रोवाचतांपत्नीमेकपत्निव्रतेस्थितः ॥ विश्वानरसुनिःश्रीमानितिकांतेभविष्यति ॥ ७७ ॥ इत्थमाश्वास्यतांपत्नींजगामतपसेमुनिः ॥ यत्रविश्वेश्वरःसाक्षात्काशीनाथोधितिष्ठति ॥ ७८ ॥ प्राप्यवाराणसींतूर्णंदृष्ट्वाथमणिकर्णिकाम् ॥ तत्याजतापत्रितयमपिजन्मशतार्जितम् ॥ ७९ ॥ दृष्ट्वासर्वाणिलिंगानिविश्वेशप्रमुखानिच ॥ स्नात्वासर्वेषुकुंडेषुवापीकूटसरःसुच ॥ ८० ॥ नत्वाविनायकान्सर्वान्गौरीःसर्वाःप्रणम्यच ॥ संपूज्यकालराजंचभैरवंपापभक्षणम् ॥ ८१ ॥ दण्डनायकमुख्यांश्चगणान्स्तुत्वाप्रयत्नतः ॥ आदिकेशवमुख्यांश्चकेशवान्परितोष्यच ॥ ८२ ॥

इतिपूर्वेणान्वयः ॥ ६८ ॥ समुचितंयोग्यम् ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ सुलभत्वंभावयति ॥ अस्त्विति ॥ यतःसएवविश्वेश्वरएवसर्वकृत्सर्वकर्ता ॥ ७५ ॥ अतस्तेनव्याहृतंभवेद्भविष्यतीत्यन्वयः ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥

---

१ सुधर्मिणामित्यैर्थरूपे ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ८३ ॥ ८४ ॥ ८५ ॥ कृत्तिवासेश्वरमित्यार्षम् ॥ ८६ ॥ ८७ ॥ द्रुमत्यित्रद्रमत्यिपिदश्यते ॥ ८८ ॥ ८९ ॥ विभांडेश्वरस्तिलभांडेश्वरः ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥

लोलार्कमुख्यसूर्यांश्चप्रणम्यचपुनःपुनः ॥ कृत्वापिण्डप्रदानानिसर्वतीर्थेष्वतंद्रितः ॥ ८३ ॥ सहस्रभोजनाद्यैश्चयतीन्विप्रान्प्रतर्प्यच ॥ महापूजोपचारैश्चलिंगान्यभ्यर्च्यभक्तितः ॥ ८४ ॥ असकृच्चिन्तयामासकिंलिंगंक्षिप्रसिद्धिदम् ॥ यत्रनिश्चलतामेतितपस्तनयकाम्यया ॥ ८५ ॥ श्रीमदोंकारनाथंवाकृत्तिवासेश्वरंकिमु ॥ कालेशंवृद्धकालेशंकलशेश्वरमेवच ॥ ८६ ॥ केदारेशंतुकामेशंचन्द्रेशंवात्रिलोचनम् ॥ ज्येष्ठेशंजंबुकेशंवाजैगीषव्येश्वरंतुवा ॥ ८७ ॥ दशाश्वमेधमीशानंद्रुमिचंडेशमेवच ॥ दृक्केशंगरुडेशंचगोकर्णेशंगणेश्वरम् ॥ ८८ ॥ ढुंढ्याशागजसिद्धाख्यंधर्मेशंतारकेश्वरम् ॥ नन्दिकेशंनिवासेशंपत्रीशंप्रीतिकेश्वरम् ॥ ८९ ॥ पर्वतेशंपशुपतिंब्रह्मेशंमध्यमेश्वरम् ॥ बृहस्पतीश्वरंवाथविभांडेश्वरमेवच ॥ ९० ॥ भारभूतेश्वरंकिंवामहालक्ष्मीश्वरंतुवा ॥ मरुत्तेशंतुमोक्षेशंगंगेशंनर्मदेश्वरम् ॥ ९१ ॥ मार्कंडंमणिकर्णीशंरत्नेश्वरमथापिवा ॥ अथवायोगिनीपीठंसाधकस्यैवासिद्धिदम् ॥ ९२ ॥ यामुनेशंलांगलीशंश्रीमद्विश्वेश्वरंविभुम् ॥ अविमुक्तेश्वरंवाथविशालाक्षीशमेवच ॥ ९३ ॥ व्याघ्रेश्वरंवराहेशंव्यासेशंवृषभध्वजम् ॥ वरुणेशंविधीशंवावसिष्ठेशंशनीश्वरम् ॥ ९४ ॥ सोमेश्वरंकिमिन्द्रेशंस्वर्लीनंसंगमेश्वरम् ॥ हरिश्चंद्रेश्वरंकिंवाहरिकेशेश्वरंतुवा॥९५॥ त्रिसंध्येशंमहादेवमुपशांतिशिवंतथा॥ भवानीशंकपर्दीशंकंदुकेशंमखेश्वरम् ॥ ९६ ॥ मित्रावरुणसंज्ञंवाकिमेषामाशुपुत्रदम् ॥ क्षणंविचार्यसमुनिरितिविश्वानरःसुधीः ॥ ९७ ॥ आज्ञातंविस्मृतंतावत्फलितोमेमनोरथः ॥ सिद्धैःसंसेवितंलिंगंसर्वसिद्धिकरंपरम् ॥ ९८ ॥ दर्शनात्स्पर्शनाद्यस्यमनोनिर्वृतिभाग्भवेत् ॥ उद्घाटितंसदैवास्तेस्वर्गद्वारंहियत्रवै ॥ ९९ ॥ दिवानिशंपूजनार्थंविज्ञाप्यत्रिदशेश्वरम् ॥ पञ्चमुद्रेमहापीठेसिद्धिदेसर्वजंतुषु ॥ १०० ॥ यत्रसाविकटादेवीप्रकटासिद्धिरूपिणी ॥ यत्रस्थितानांभक्तानांसाक्षात्सिद्धिविनायकः ॥ १ ॥ निर्धूयविघ्नजालानिसर्वाःसिद्धीःप्रयच्छति ॥ अविमुक्तेमहाक्षेत्रेसिद्धिक्षेत्रंहितत्परम् ॥ २ ॥ यत्रवीरेश्वरंलिंगंमहागुह्यतमंमतम् ॥ तिलांतरापिनोकाश्यांभूमिर्लिंगंविनाक्वचित् ॥ ३ ॥ परंवीरेशसदृशंनलिंगंत्वाशुसिद्धिदम् ॥ धर्मदंचार्थदंसम्यक्कामदंमोक्षदंतथा ॥४॥ यथावीरेश्वरंलिंगंकाश्यांनान्यत्तथाध्रुवम् ॥ पंचस्वरोत्रगंधर्वःपरांसिद्धिमगात्पुरा॥५॥

मखेश्वरमित्यत्राजेश्वरमितिवा ॥ ९६ ॥ ९७ ॥ आज्ञातमित्याङितिस्मृतिद्योतकमव्ययम् ॥ ९८ ॥ ९९ ॥ पंचमुद्रयाविकटयाअधिष्ठिते ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

१ पहारैश्चेतिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ स्वफणामणिभिर्बहुनीराजनैरितिसंबंधः ॥ ११० ॥ ११ ॥ १२ ॥ विदेहजश्चेतिजयद्रथविशेषणम् ॥ १३ ॥ १४ ॥ वसुसुतोपमांउपरिचरवसोर्वीर्याज्जातसत्यवत्युपमाम् ॥ वसवोदेवास्तत्सुतोपमामितिवा ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ नेपथ्यंभूषणम् ॥ २४ ॥

विद्याधरःस्वच्छविद्योवसुपूर्णश्चयक्षराट् ॥ नृत्यंतीनिजभावेनपुराह्यत्राप्सरोवरा ॥ ६ ॥ सदेहाकोकिलालापालिंगमध्येलयंगता ॥ ऋषिर्वेदशिरानामजपन्वैशतरुद्रियम् ॥ ७ ॥ मन्त्रज्योतिर्मयेलिंगेसशरीरोविशत्पुरा ॥ चन्द्रमौलिभरद्वाजावुभौपाशुपतोत्तमौ ॥ ८ ॥ वीरेश्वरंसमभ्यर्च्यगायमानौलयंगतौ ॥ शंखचूडोहिनागेंद्रःस्वफणामणिभिर्निशि ॥ ९ ॥ षण्मासात्सिद्धिमगमद्बहुनीराजनैरिह ॥ किन्नरीहंसपद्यत्रभर्त्रावेणुप्रियेणवै ॥ ११० ॥ गायंतीसुस्वरंयातापरांनिर्वाणभूमिकाम् ॥ असंख्याताःसहस्राणिसिद्धाःसिद्धिमिहागताः ॥ ११ ॥ सिद्धलिंगमिहाख्यातंतस्माद्वीरेश्वरंपरम् ॥ १२ ॥ वीरेश्वरंसमाराध्यभ्रष्टराज्योजयद्रथः ॥ हत्वारिपूनस्खलितंराज्यंप्रापविदेहजः ॥ १३ ॥ विदूरथोऽथनृपतिरपुत्रःपुत्रवानभूत् ॥ वीरेश्वरप्रसादेनमगधाधिपतिर्वशी ॥ १४ ॥ वसुदत्तोत्रचवणिक्सुतांवसुसुतोपमाम् ॥ अब्दमभ्यर्च्यवीरेशंरत्नदत्तोप्यवाप्तवान् ॥ १५ ॥ अहमप्यत्रवीरेशंसमाराध्यत्रिकालतः ॥ आशुपुत्रमवाप्स्यामियथाभिलषितंप्रिया ॥ १६ ॥ इतिकृत्वामतिंधीरोविप्रोविश्वानरःकृती ॥ चन्द्रकूपजलैःस्नात्वाजग्राहनियमंव्रती ॥ १७ ॥ एकाहारोभवन्मासंमासंनक्ताशनोभवत् ॥ अयाचिताशनोमासंमासंत्यक्ताशनःपुनः ॥ १८ ॥ पयोव्रतोभवन्मासंमासंशाकफलाशनः ॥ मासंमुष्टितिलाहारोमासंपानीयभोजनः ॥ १९ ॥ पंचगव्याशनोमासंमासंचांद्रायणव्रती ॥ मासंकुशाग्रजलभुङ्मासंश्वसनभक्षणः ॥ १२० ॥ अथत्रयोदशेमासिस्नात्वात्रिपथगांभसि ॥ प्रत्यूषएववीरेशंयावदायातिसद्द्विजः ॥ २१ ॥ तावद्विलोकयांचक्रेमध्येलिंगंतपोधनः ॥ विभूतिभूषितंबालमष्टवर्षाकृतिंशुभम् ॥२२॥ आकर्णपूर्णनेत्रंचसुरक्तदशनच्छदम् ॥ चारुपिंगजटामौलिंनग्नंप्रहसिताननम् ॥ २३ ॥ शैशवोचितनेपथ्यधारिणंचित्तहारिणम् ॥ पठंतंश्रुतिसूक्तानिहसंतंचस्वलीलया ॥ २४ ॥ तमालोक्यस्तुतिंचक्रेरोमकंचुकितोमुदा ॥ प्रोच्चरद्गद्गदालापोनमोस्त्वितिपुनःपुनः ॥ २५ ॥ विश्वानरउवाच ॥ ॥ एकंब्रह्मैवाद्वितीयंसमस्तंसत्यंसत्यंनेहनानास्तिकिंचित् ॥ एकोरुद्रोनद्वितीयोवतस्थेतस्मादेकंत्वांप्रपद्येमहेशम् ॥ २६ ॥

॥ २५ ॥ अभिलाषप्रदैःपद्यैरष्टभिर्बालरूपिणम् ॥ तुष्टावपरमानंदंदेवंविश्वानरःकृती ॥ एकमिति ॥ समस्तंजगद्ब्रह्मेत्यन्वयः ॥ किंमृद्घटवदौपचारिकंनेत्याह ॥ सत्यंसत्यमिति ॥ निश्चयार्थावीप्सा ॥ बाधेसामानाधिकरण्यान्नोपचारइतिभावः ॥ तर्हिब्रह्मविष्णुरुद्रःसजातीयभेदोभविष्यतिनेत्याह ॥ एकमिति ॥ ननुकालाकाशादेःसत्यत्वेनप्रतीतेस्तेनवि

CC-0. In Public Domain. Digitization by eGangotri

जातीयभेदोभवेत्तत्राह ॥ अद्वितीयमिति ॥ तर्हिस्वगतभेदःस्यान्नेत्याह ॥ एकइति ॥ एकमेवाद्वितीयमितिश्रुतेरित्यर्थः ॥ नन्वस्मिन्ग्रामेएकएवपुरुषइतिवदेषाश्रुतिरुपचारपरेत्याशंक्याह ॥ नेहनानास्तिकिंचिदिति ॥ नेहनानास्तिकिंचनेतिश्रुतेरित्यर्थः ॥ भूयसीनांश्रुतीनामैक्यपरत्वावगमान्नोपचारत्वमेकमेवेत्यादिश्रुतेरितिभावः ॥ उपसंहरन्प्रणमति एकइति॥ यस्मादेकःकेवलःसजातीयस्वगतभेदरहितोऽद्वितीयोविजातीयभेदरहितः ॥ रुद्रःरुत्संसारदुःखंद्रावयतिनाशयतीतिरुद्रोऽवतस्थेऽवातिष्ठते ॥ एकएवरुद्रोवतस्थेनद्वितीयइतिश्रुतेः ॥ तस्मादेकंसजातीयविजातीयस्वगतभेदशून्यंमहेशंमहांतमीश्वरंत्वांशरणमाश्रयंरक्षितारंप्रपद्येभजेइत्यर्थः ॥ २६ ॥ जगत्कर्तृत्वोपाधिंभगवंतंस्तुवन्ननेककर्तारइतिमतंनिराकरोति ॥ एकःकर्तेति ॥ कथंतर्हिप्रतिशरीरंतद्भेदप्रतीतिस्तत्राह ॥ नानारूपेष्विति ॥ उपाधिभेदादेकस्यबहुधाभानेदृष्टांतमाह ॥ यद्वदिति ॥ अपोपःप्रतिप्रत्यप् तासुप्रत्यप्सु ॥ छांदसोऽयंप्रयोगः ॥ स्वर्कःशोभनोमेघाद्यनाच्छादितोऽर्कइति वा ॥ प्रत्यंब्विितिवापाठः ॥ तदुक्तम् ॥ एकएवीहभूतात्माभूतेभूतेव्यवस्थितः ॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवदिति ॥ चंद्रसमानन्यायत्वात्सूर्योपितथा ॥ २७ ॥ प्रत्यग्ब्रह्मण्यऽशेषप्रपंचस्यविवर्तरूपतांदृष्टांतपुरःसरमाह ॥ रज्जाविति ॥ यस्मिन्परमात्मनिज्ञातेएषोपरोक्षत्वेनप्रतीयमानःप्रपंचोविष्वक्सर्वतस्तद्वत्तथाभवतितंप्रपद्यइत्यन्वयः ॥ तद्वत्किंवत् ॥ रज्जौरज्ज्वां

एकःकर्तात्वंहिसर्वस्यशंभोनानारूपेष्वेकरूपोस्यरूपः ॥ यद्वत्प्रत्यप्स्वर्कएकोप्यनेकस्तस्मान्नान्यंत्वांविनेशंप्रपद्ये ॥२७॥ रज्जौसर्पःशुक्तिकायांचरूप्यंनैरःपूरस्तन्मृगाख्येमरीचौ ॥ यद्वत्तद्वद्विष्वगेषप्रपंचोयस्मिञ्ज्ञातेतंप्रपद्येमहेशम् ॥ २८ ॥ तोयेशैत्यंदाहकत्वंचवह्नौतापोभानौशीतभानौप्रसादः ॥ पुष्पेगंधोदुग्धमध्येपिसर्पिर्यत्तच्छंभोत्वंततस्त्वांप्रपद्ये ॥ २९ ॥ शब्दंगृह्णास्यश्रवास्त्वंहिजिघ्रेरघ्राणस्त्वंव्यंघ्रिरायासिदूरात् ॥ व्यक्षःपश्येस्त्वंरसज्ञोप्यजिह्वःकस्त्वांसम्यग्वेत्त्यतस्त्वांप्रपद्ये ॥ १३० ॥ नोवेदस्त्वामीशसाक्षाद्धिवेदनोवाविष्णुर्नोविधाताऽखिलस्य ॥ नोयोगींद्रानेंद्रमुख्याश्चदेवाभक्तोवेदत्वामतस्त्वांप्रपद्ये ॥ ३१ ॥

ज्ञातायांसर्पोयद्वत् यथाशुक्तिकायांमुक्तास्फोटेचज्ञातायांरौप्यंरजतंयथा ॥ सचासौमृगाख्यश्चेतितन्मृगाख्यस्तस्मिन्मृगाख्येमरीचौमृगतृष्णिकायाम् ॥ मृगतृष्णामरीचिकेत्यमरः ॥ सामान्यविशेषभावेनयोजनान्नपौनरुक्त्यम् ॥ तस्यांज्ञातायांनीराणामयंनैरःपूरःसमूहोयथा ॥ तद्वदिति ॥ रज्ज्वाद्यधिष्ठानेज्ञातेसर्पादिविवर्तोयथानिवर्तते तथाधिष्ठानभूतेप्रत्यग्ब्रह्मणित्वयिज्ञातेसर्वोऽपिप्रपंचोनश्यतीत्यर्थः ॥ अनेकदृष्टांतोपादानंस्वानुभवस्यात्यंतदाढर्चख्यापनाय ॥ चकारःसमुच्चये ॥ २८ ॥ सर्वशक्तिस्वरूपत्वेनस्तौति ॥ तोयेशैत्यमितिः॥ हेशंभोतत्त्वंततस्त्वांप्रपद्यइत्यन्वयः ॥ तत्किमितिपृच्छायामाह ॥ तोयेशैत्यमित्यादि ॥ भूमौस्थैर्यमितिक्वचित् ॥ भानौसूर्ये ॥ शीतभानौचंद्रे ॥ प्रसादआह्लादः ॥ चकारःसमुच्चये ॥ २९ ॥ शब्दमिति ॥ हिर्हेतौ सर्वत्रसंबध्यते ॥ यस्मादश्रवाःश्रवणेंद्रियरहितस्त्वंशब्दंगृह्णासिश्शृणोषि ॥ अघ्राणोनासिकेंद्रियरहितस्त्वंजिघ्रेःगंधंगृह्णासि ॥ व्यंघ्रिः पादरहितोदूरादायासिआगच्छसि ॥ व्यक्षोऽचक्षुस्त्वंरूपंपश्येःपश्यसि ॥ अजिह्वोरसनेंद्रियरहितस्त्वंरसज्ञोरसंजानासि ॥ तथाचश्रुतिः ॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसश्शृणोत्यकर्णइत्याद्या ॥ अतस्त्वांकःसम्यगपरोक्षतयावेत्तिजानातिनकोपीत्यर्थः ॥ १३० ॥ तर्हिवेदोज्ञास्यतिनेत्याह ॥ नोवेदइति ॥ हेईशस्वप्रकाशंत्वांवेदोनवेद ॥ यतोवाचोनिवर्तंतइतिश्रुतेः ॥ कथंतर्ह्यौपनिषदत्वमित्याशंकायामाह ॥ साक्षादिति ॥ लक्षणयातदुपपत्तिरितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हिविष्ण्वादयोज्ञास्यंतिनेत्याह ॥ नोवाविष्णुरित्यादि ॥ तर्ह्यधिकार्यभावाल्लक्षणयाप्यज्ञेयत्वमेवनेत्याह ॥ भक्तोवेदेति ॥ भक्त्यभावेविष्ण्वादेरपिदुर्ज्ञेयस्त्वमितिभावः ॥ ३१ ॥ अवर्णमजरममरम रूपमव्ययम् ॥ अनामागोत्रमित्यादिश्रुतिसिद्धंस्तौति ॥ नोतेगोत्रमिति ॥ नेशजन्मेत्यत्रनापिजन्मेतिक्वचित्पाठः ॥ पूरयेःपूरयसि॥३२॥यतोवाइमानिभूतानिजायंते त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवा कुमारी ॥ त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतोमुखः॥ सर्वंविष्णुमयंजगदित्यादिश्रुतिसिद्धेसर्वकारणत्वसर्वात्मत्वेदर्शयति ॥ त्वत्तःसर्वमिति ॥ त्वंहिसर्वमित्येतत्प्रपंचयाति॥त्वंगौरीशइत्यादिना॥

नोतेगोत्रंनेशजन्मापिनाख्यानोवारूपंनैवशीलंनदेशः ॥ इत्थंभूतोपीश्वरस्त्वंत्रिलोक्याःसर्वान्कामान्पूरयेस्तद्भजेत्वाम् ॥ ३२ ॥ त्वत्तःसर्वंत्वंहिसर्वं स्मरारेत्वंगौरीशस्त्वंचनग्नोऽतिशांतः ॥ त्वंवैवृद्धस्त्वंयुवात्वंचबालस्तत्त्वंयत्किंनास्यतस्त्वांनतोस्मि ॥ ३३ ॥ स्तुत्वेतिभूमौनिपपातविप्रःसदं डवद्यावदतीवहृष्टः ॥ तावत्सबालोखिलवृद्धवृद्धःप्रोवाचभूदेववरंवृणीहि ॥ ३४ ॥ ततउत्थायहृष्टात्मामुनिर्विश्वानरःकृती ॥ प्रत्यब्रवीत्किमज्ञातंसर्व ज्ञस्यतवप्रभो ॥ ३५ ॥ सर्वांतरात्माभगवान्सर्वःसर्वप्रदोभवान् ॥ याच्ञांप्रतिनियुंक्तेमांकिमीशोदैन्यकारिणीम् ॥ ३६ ॥ इतिश्रुत्वावचस्तस्यदेवो विश्वानरस्यह ॥ शुचेःशुचिव्रतस्याशुशुचिस्मित्वाब्रवीच्छिशुः ॥ ३७ ॥ बालउवाच ॥ त्वयाशुचेशुचिष्मत्यांयोभिलाषःकृतोहृदि ॥ अचिरेणैवकाले नसभविष्यत्यसंशयः ॥ ३८ ॥ तवपुत्रत्वमेष्यामिशुचिष्मत्यांमहामते ॥ ख्यातोगृहपतिर्नाम्नाशुचिःसर्वामरप्रियः ॥ ३९ ॥ अभिलाषाष्टकंपुण्यंस्तो त्रमेतत्त्वयेरितम् ॥ अब्दंत्रिकालपठनात्कामदंशिवसंनिधौ ॥ १४० ॥ एतत्स्तोत्रस्यपठनंपुत्रपौत्रधनप्रदम् ॥ सर्वशांतिकरंचापिसर्वापत्परिनाशनम् ॥ ४१ ॥ स्वर्गापवर्गसंपत्तिकारकंनात्रसंशयः ॥ प्रातरुत्थायसुस्नातोलिंगमभ्यर्च्यशांभवम् ॥ ४२ ॥ वर्षंजपन्निदंस्तोत्रमपुत्रःपुत्रवान्भवेत् ॥ वैशाखेकार्तिकेमाघेविशेषनियमैर्युतः ॥ ४३ ॥ यःपठेत्स्नानसमयेसलभेत्सकलंफलम् ॥ कार्तिकस्यतुमासस्यप्रसादादहमव्ययः ॥ ४४ ॥ तवपुत्रत्वमे ष्यामियस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदंनदेयंयस्यकस्यचित् ॥ ४५ ॥ गोपनीयंप्रयत्नेनमहावंध्याप्रसूतिकृत् ॥ स्त्रियावापुरुषेणापि नियमाल्लिंगसंनिधौ ॥ ४६ ॥ अब्दंजप्तमिदंस्तोत्रंपुत्रदंनात्रसंशयः ॥ इत्युक्त्वांतर्दधेबालःसोपिविप्रोगृहंगतः ॥ १४७ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेपूर्वार्द्धेइंद्राग्निलोकवर्णनंनामदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ अगस्तिरुवाच ॥ ॥ शृणुसुश्रो णिसुभगेवैश्वानरसमुद्भवम् ॥ पुण्यशीलसुशीलाभ्यांयथोक्तंशिवशर्मणे ॥ १ ॥

अन्वयमुखेनसर्वात्मत्वमुक्त्वाव्यतिरेकेणापितदाह ॥ तत्त्वमिति ॥ यत्त्वंनअसिनभवसितत्किंनास्तीत्यर्थः ॥ तत्किंयत्त्वंनासीतिपाठेपिसएवार्थः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ शुचिस्मित्वा शुचियथास्यात्तथाईषद्धास्यंकृत्वेत्यर्थः ॥ ३७॥३८॥ ३९॥१४०॥४१॥४२॥४३॥ कार्तिकमासाराधनेनतोषितत्वात्तत्प्रसादादित्युक्तम्॥४४॥तदभिलाषाष्टकंस्तोत्रम् ॥ ४५ ॥ ४६ ॥ १४७ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ एकादशेग्निलोकोतिविस्तरेणनिरुच्यते ॥ वैश्वानरसमुत्पत्तिर्वरप्राप्तिपुरःसरा ॥ १ ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथानंतरम्॥तद्योषित्तस्यविश्वानरस्यभार्याशुचिष्मती ॥ गर्भाधानाख्येकर्मणितेनविश्वानरेणविहितेसतिअंतर्वत्नीगर्भवतीबभूवेत्यर्थः ॥२॥ पुंसवनंगर्भस्यपुंस्त्वाधानम्॥स्पंदनात्प्राक्गर्भचलनात्प्राक् पूर्वम् ॥ गृह्योक्तविधिनावैदिकेनप्रकारेणेत्यर्थः ॥ पुंस्त्वविवृद्धयेपुंभाववृद्ध्यर्थम् ॥ गर्भस्यवीर्यातिशयायेत्यर्थः ॥३॥ अकारिकृतः ॥ चकारोभिन्नक्रमे ॥ सुखप्रसववृद्ध्यर्थंक्रियाचशोष्यंत्याख्याऽकारीत्यन्वयः ॥ वेत्तीतिवित्तेनविदाजानतेत्यर्थः ॥ ४ ॥ अथशब्दोमंगलार्थः ॥ अतोऽनंतरंसप्रसिद्धः ॥ नामप्राकाश्ये ॥ तस्यांशुचिष्मत्यांतनयःपुत्रोबभूवेतिद्वितीयेनान्वयः ॥ कथंभूतः ॥ ताराधिपवराननःचंद्रवत्प्रसन्नमुखः ॥ किंकुर्वन् ॥ अरिष्टममंगलंदीपयन्दहन्नाशयन्नित्यर्थः ॥ यद्वा अरिष्टंसूतिकागृहंदीपयन्प्रकाशयन् ॥ अरिष्टंसूतिकागृहमितिवचनात् ॥ तत्रहेतुगर्भविशेषणमाह ॥ दीप्त्यातेजसासर्वारिष्टविनाशकृदिति ॥ कस्मिन्सति ॥ शुभेलग्नेसमीचीनेराशीनामुदयेसति ॥ लग्नस्यशुभत्वमेवाह ॥ सुतारासुशोभनस्तारोध्वनिर्नामेतियावद्यासांतथाभूतासुतारासुशुभासु सतीष्वित्यर्थः ॥ सुतारासुशोभनतारास्वितिवा ॥ शततारास्वितिपाठेशतभिषास्वित्यर्थः ॥ तथागुरौबृहस्पतौ ॥ केंद्रेलग्नचतुर्थसप्तमदशमराशौस्थितेसतीत्यर्थः ॥ तथासुग्रहेष्वयुगेषुचसमीचीनेषु

अथकालेनतद्योषिदंतर्वत्नीबभूवह ॥ विधिवद्विहितेतेनगर्भाधानाख्यकर्मणि ॥ २ ॥ ततःपुंसवनंतेनस्पंदनात्प्राग्विपश्चिता ॥ गृह्योक्तविधिनासम्यक्कृतपुंस्त्वविवृद्धये ॥ ३ ॥ सीमन्तोथाष्टमेमासिगर्भरूपसमृद्धिकृत् ॥ सुखप्रसवसिद्ध्यैचतेनाकारिक्रियाविदा ॥ ४ ॥ अथातःसत्सुतारासुताराधिपवराननः ॥ केंद्रेगुरौशुभेलग्नेसुग्रहेष्वयुगेषुच ॥५॥ अरिष्टंदीपयन्दीप्त्यासर्वारिष्टविनाशकृत् ॥ तनयोनामतस्यांतुशुचिष्मत्यांबभूवह ॥६॥ सद्यःसमस्तसुखदोभूर्भुवःस्वर्निवासिनाम् ॥ गंधवाहागन्धवाहादिग्वधूमुखवासनाः ॥ ७ ॥ इष्टगन्धप्रसूनौघैर्ववर्षुस्तेघनाघनाः ॥ देवदुन्दुभयोनेदुः प्रसेदुःसर्वतोदिशः ॥८॥ परितःसरितःस्वच्छाभूतानांमानसैःसह ॥ तमोऽताम्यच्चनितरांरजोपिविरजोभवत् ॥ ९ ॥ सत्त्वाःसत्त्वसमायुक्तावसुधासीच्छुभातदा ॥ कल्याणीसर्वतोवाणीप्राणिनःप्रीणयंत्यभूत् ॥ १० ॥

ग्रहेष्वसमेष्वित्यर्थः ॥ चकारःसमुच्चये ॥ ५ ॥ ६ ॥ तनयस्यविशेषणांतरम् ॥ सद्यइति ॥ गंधवाहावायवः ॥ ॥ गंधवहाइतिक्वचित् ॥ कथंभूताः ॥ गंधंवहंतीतिगंधवाहायथार्थाख्याआसन्नित्यर्थः ॥ गंधवाहनवाहाश्चेतिपाठेघनानांविशेषणम् ॥ कथंभूताः ॥ दिग्वधूमुखवासनाः दिग्वधूनांमुखानिवासयंतिसुगंधीनिकुर्वंतीतितथा ॥ यद्वा दिग्वधूमुखानांवासनायेषुतेतथा ॥ दिगंगनाननामृतवासिताइत्यर्थः ॥ वाहनाइतिपाठेदिग्वधूमुखेभ्योवहंतीतितथातेप्रसिद्धाघनामेघाः ॥ ७ ॥ ववर्षुर्वृष्टिंचक्रुः ॥ कैः ॥ इष्टोगंधोयेषांतथाभूतानांप्रसूनानामोघैःसमूहैः ॥ घनानिविडाः ॥ घनाघनाइत्येकंवापदम् ॥ वर्षंतोमेघाइत्यर्थः ॥ ८ ॥ तमोऽज्ञानमंधकारोवा ॥ अताम्यदनशत् ॥ रजोपिविरजोविगतरजोऽभवदनशदित्येव ॥ ९ ॥ सत्त्वाःप्राणिनः ॥ पुंस्त्वमार्षम् ॥ सत्त्वसमायुक्ताःसत्त्वगुणसंपन्नाः ॥ शुभाःशोभनाः ॥ पाठांतरेसुष्ठुधारयमाणाऽमृततुल्यावा ॥ सुधातुल्यफलसस्यादिमतीत्यर्थः ॥ यदाबभूवतदेतिसर्वत्रसंबध्यते ॥ १० ॥

१ एतद्व्याख्यानेतारास्वितिपदमध्याद्दत्ययोजितमितिभाति परंत्वीदृशक्लेशबीजांकिमितिनाविद्मः । २ आर्षमेतत् । ३ सुधातदेत्येवंरूपे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलोत्तमेत्यादीनांतत्रविश्वानरगृहेमुदाहर्षेणाजग्मुरित्यग्रिमेणान्वयः ॥ वरांगनावराप्सरसः ॥ ११ ॥ किंकृत्वा ॥ क्वणत्कंकणपात्राणिकरतलेकृत्वा ॥ क्वणंतिशब्दंकुर्वंतिकंकणानियेषुतानिपात्राणि तथा ॥ क्वणत्कनकपात्राणीतिक्वचित् ॥ पात्राणिविशिनष्टि ॥ मुक्तमुक्ताफलाढ्यानीतित्रिभिः ॥ मुक्तानिप्रसृतानियानिमुक्ताफलानितैराढ्यानि ॥ मुक्तमुक्ताक्षताढ्यानीतिक्वचित् ॥ यक्षकर्दमवं तिकर्पूरागरुकस्तूरीकंकोलवंति ॥ १२ ॥ वज्रवैदूर्याएवदीपाःप्रदीपास्तैःसहवादीपायेषुतानितथा ॥ हरिद्रालेपनानीत्यत्रहरिद्राक्षोदवंतीतिपाठेहरिद्राचूर्णवंतीत्यर्थः ॥ गारुत्मतागरुडस्योद्गाराज्जाताम णयएकरूपाःश्रेष्ठरूपायेषुतानितथा ॥ गारुत्मतैकदूर्वाणीतिक्वचित् ॥ शंखादियुक्तानिदधीनियेषुतानि ॥ शंखेत्यत्रसक्तिक्वचित् ॥ १३ ॥ पद्मरागादयोमणिप्रभेदाः आख्येत्यत्राढ्येतिक्वचित् ॥

तिलोत्तमोर्वशीरंभाप्रभाविद्युत्प्रभाशुभा ॥ सुमंगलाशुभालापासुशीलाद्यावरांगनाः ॥११॥ क्वणत्कंकणपात्राणिकृत्वाकरतलेमुदा ॥ मुक्तमुक्ताफला ढ्यानियक्षकर्दमवंतिच ॥ १२ ॥ वज्रवैदूर्यदीपानिहरिद्रालेपनानिच ॥ गारुत्मतैकरूपाणिशंखशुक्तिदधीनिच ॥ १३ ॥ पद्मरागप्रवालाख्यरत्नकुं कुमवंतिच ॥ गोमेदपुष्परागेंद्रनीलसन्माल्यभांजिच ॥ १४ ॥ विद्याधर्यश्चकिन्नर्यस्तथाऽमर्यःसहस्रशः ॥ चामरव्यग्रहस्ताग्रमंगलद्रव्यपाणयः ॥ १५ ॥ गंधर्वोरगयक्षाणांसुवासिन्यःशुभस्वराः ॥ गायंत्योललितंगीतंतत्राजग्मुरनेकशः ॥ १६ ॥ मरीचिरत्रिःपुलहःपुलस्त्यःक्रतुरंगिराः ॥ वसिष्ठःकश्यपश्चाहंविभांडोमांडवीसुतः ॥ १७ ॥ लोमशोलोमचरणोभरद्वाजोथगौतमः ॥ भृगुस्तुगालवोगर्गोजातूकर्ण्यःपराशरः ॥ १८ ॥ आपस्तंबोयाज्ञवल्क्यदक्षवाल्मीकिमुद्गलाः ॥ शातातपश्चलिखितःशिलादःशंखउंछभुक् ॥ १९ ॥ जमदग्निश्चसंवर्तोमतंगोभरतोंशुमान् ॥ व्यासः कात्यायनःकुत्सःशौनकःसुश्रुतःशुकः ॥२०॥ ऋष्यशृंगोथदुर्वासारुचिर्नारदतुंबुरू ॥ उत्तंकोवामदेवश्चच्यवनोसितदेवलौ ॥२१॥ शालंकायनहारी तौविश्वामित्रोथभार्गवः ॥ मृकंडःसहपुत्रेणदाल्भ्यउद्दालकस्तथा ॥ २२ ॥ धौम्योपमन्युवत्साद्यामुनयोमुनिकन्यकाः ॥ तच्छांत्यर्थसमाजग्मुर्धन्यं विश्वानराश्रमम् ॥ २३ ॥ ब्रह्मावृहस्पतियुतोदेवोगरुडवाहनः ॥ नंदिभृंगिसमायुक्तोगौर्यासहवृषध्वजः ॥ २४ ॥ महेंद्रमुख्यागीर्वाणानागाःपातालवा सिनः ॥ रत्नान्यादायबहुशःससरित्कामहांब्धयः ॥ २५ ॥ स्थावराजंगमंरूपंधृत्वायाताःसहस्रशः ॥ महामहोत्सवेतस्मिन्बभूवाकालकौमुदी ॥२६॥

पद्मरागप्रवालाख्यरत्नरूपंयत्कुंकुमंतद्वंति ॥ गोमेदादिमयानिसन्माल्यानिविचित्रवर्णदामानिभजंतेतानि ॥ १४ ॥ अमर्योऽमरांगनाः ॥ १५ ॥ सुवासिन्यःस्त्रियः ॥ १६ ॥ मरीचिरिति ॥ तच्छां त्यर्थंतस्यगृहपतेरग्नेःशांत्यर्थंशांतिकर्मकरणार्थंविश्वानरगृहाश्रमंमरीच्यादयआजग्मुरितिसप्तमेनान्वयः ॥ अहमगस्त्यः ॥ मांडवीसुतोमांडव्यः ॥१७॥ लोमचरणोलोमपादः ॥ जातूकर्णइतिक्वचित ॥ १८ ॥ १९ ॥ २० ॥ उत्तंकइत्यत्रोदंकइतिचक्वचित् ॥ २१ ॥ सहपुत्रेणमार्कंडेयेनसह ॥ २२ ॥२३॥ ब्रह्मेति ॥ ब्रह्मादयआयाताइतितृतीयेनान्वयः ॥ २४ ॥ २५ ॥ अकालकौमुदीअकालेऽ

समयेचंद्ररहितेपिरात्र्यादौकौमुदीज्योत्स्नातास्मिन्महामहोत्सवेऽभूदित्यर्थः ॥ २६ ॥ जातेति ॥ स्वयंपितामहोब्रह्मातस्यबालस्यजातकर्मचक्रेकृतवान् ॥ किंकृत्वा ॥ तद्रूपांजातकर्मप्रतिपादिकांश्रुतिं विचार्य ॥२७॥ नामकर्मविधानेनएकादशोदिवसेनाम्नाऽयंगृहपतिरितिइयंदातुंयोग्यंनामचददावित्यर्थः ॥ किंकुर्वन् ॥ तदर्थंनामकरणार्थंश्रुतिंवेदमुच्चरन्नुच्चारयन् ॥२८॥ तामेवदर्शयति ॥ अयमग्निर्गृहपतिरितिसार्धेन ॥अस्यायमर्थः योऽयमग्निर्गृहपतिर्गार्हपत्याख्यःप्रजायाश्चातिशयेनधनस्यवोदितातमेतंयाचे ॥ हेअग्नेगृहपतेअभिद्युम्नंद्योततेर्यशोवाऽन्नंवा ॥ अभिसहइतिबलस्यनाम ॥ आयच्छस्व ॥ यमेरेतद्रूपम् ॥ एतदुक्तंभवति ॥ अस्मानभिअन्नंयशोवाबलंवागृह्णीष्वआगमयेत्यर्थः ॥ यद्वाऽस्मानभिद्युम्नमभिबलंवाआयच्छस्वस्थापयस्वसमर्पय ॥ आयतिःस्थापनार्थः ॥ २९ ॥ अग्नेगृहपतेस्थित्येतिशाखाभेदेनद्रष्टव्यम् ॥ चतुर्वेदोक्तमंत्रैराशीर्भिरभिनंद्यवर्धयित्वापितामहोजगामेतिद्वितीयेनान्वयः ॥ ३० ॥ ३१ ॥ अहोइत्यन्योन्यंस्तुवंतोयथागतंतथाजग्मुरितिचतुर्थेनान्वयः ॥

जातकर्मस्वयंचक्रेतस्यदेवःपितामहः ॥ श्रुतिंविचार्यतद्रूपांनाम्नागृहपतिस्त्वयम् ॥२७॥ इतिनामददौतस्मैदेयमेकादशेहनि ॥ नामकर्मविधानेनतदर्थं श्रुतिमुच्चरन् ॥ २८ ॥ अयमग्निर्गृहपतिर्गार्हपत्यःप्रजायावसुवित्तमः ॥ अग्नेगृहपतेभिद्युम्नमभिसहआयच्छस्व ॥ २९ ॥ अग्नेगृहपतेस्थित्यापरामपि निदर्शयन् ॥ चतुर्निगममंत्रोक्तैराशीर्भिरभिनंद्यच ॥ ३० ॥ कृत्वाबालोचितांरक्षांहरेणहरिणासह ॥ निर्ययौहंसमारुह्यसर्वेषांप्रपितामहः ॥ ३१ ॥ अहोरूपमहोतेजस्त्वहोसर्वांगलक्षणम् ॥ अहोशुचिष्मतीभाग्यमाविरासीत्स्वयंहरः ॥ ३२ ॥ अथवाकिमिदंचित्रंशर्वभक्तजनेष्वहो ॥ आविर्भवेत्स्वयंरुद्रोयतोरुद्रास्तदर्चकाः ॥ ३३ ॥ इतिस्तुवंतस्त्वन्योन्यंजग्मुःसर्वेयथागतम् ॥ विश्वानरंसमापृच्छ्यसंप्रहृष्टतनूरुहाः ॥ ३४ ॥ अतःपुत्रं समीहंतेगृहस्थाश्रमवासिनः ॥ पुत्रेणलोकाञ्जयतिश्रुतिरेषासनातनी ॥ ३५ ॥ अपुत्रस्यगृहंशून्यमपुत्रस्यार्जनंवृथा ॥ अपुत्रस्यान्वयश्छिन्नोनापवित्रं ह्यपुत्रतः ॥ ३६ ॥ नपुत्रात्परमोलाभोनपुत्रात्परमंसुखम् ॥ नपुत्रात्परमंमित्रंपरत्रेहचकुत्रचित् ॥ ३७ ॥ औरसःक्षेत्रजःक्रीतोदत्तःप्राप्तःसुतासुतः ॥ आपत्सुरक्षितश्चान्यःपुत्राःसप्तात्रकीर्तिताः ॥ ३८ ॥ एषामन्यतमःकार्योगृहस्थेनविपश्चिता ॥ पूर्वपूर्वःसुतःश्रेयान्हीनःस्यादुत्तरोत्तरः ॥ ३९ ॥ ॥ गणावूचतुः ॥ ॥ निष्क्रमोथचतुर्थेऽस्यमासिपित्राकृतोगृहात् ॥ अन्नप्राशनमब्दार्धेचूडाब्देचार्थवत्कृता ॥ ४० ॥

किंस्तुवंतइत्याकांक्षायामाह ॥ अहोरूपमिति ॥ ३२ ॥ रुद्रःस्वयमाविर्भवतीत्यत्रहेतुमाह ॥ यतइति ॥ रुद्रार्चकारुद्रस्वरूपाएवेतियतइतिभावः ॥ ३३ ॥ ३४ ॥ ३५ ॥ नापवित्रमिति ॥ अपुत्रतःपुत्राभावात्पुत्ररहितोगृहस्थःपवित्रंनानस्यादित्यर्थः ॥ यद्वा नानरोऽपुत्रतोऽपवित्रःस्यादित्यर्थः ॥ ३६ ॥ ३७ ॥ औरसइति ॥ अत्रलोकेसप्तपुत्राःकीर्तिताइत्यन्वयः ॥ केतेइत्यतआह ॥ औरसइत्यादिना ॥ औरसोधर्मपत्नीप्रभवः ॥ दत्तःकेनचित् ॥ प्राप्तःस्वयमेव ॥ सुतासुतःपुत्रिकाकरणेन ॥ ३८ ॥ भवंतुसप्तपुत्रास्तावताकिमित्यतआह ॥ एषामिति ॥ तत्र विशेषमाह ॥ पूर्वःपूर्वइति ॥ ३९ ॥ अब्दार्धेषष्ठेमासि ॥ चूडाकरणंअब्देवर्षे ॥ अर्थइतिपाठेकुसुमगर्भितस्निग्धकेशार्थइत्यर्थः ॥ अर्थवद्यथाविधीत्यर्थः ॥ कृतीइतिक्वचित् ॥ अस्याग्रिमेणा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वयः ॥ पूर्वत्रलिंगंविपरिणमय्यपूर्वक्रियैवसंबंधः ॥ ४० ॥ चूडाकर्मानंतरंव्रतमुपनयनम् ॥ ४१ ॥ उपाकर्मश्रावण्यांक्रियमाणंकर्म ॥ वेदान्ऋगादीन् ॥ कथंभूतान् ॥ सांगपदक्रमान् अंगानिचपदानिचक्रमश्चततसाहितान् ॥ अध्यैष्टअधीतवान्पठितवानित्यर्थः ॥ ४२ ॥ साक्षिमात्रान्निमित्तमात्रात् ॥ आचार्यवान्पुरुषोवेद ॥ आचार्याद्धैवगृहीताविद्यासाधिष्ठचंगमयतीत्यादिश्रुत्यर्थ ज्ञापनार्थमित्यर्थः ॥ ४३ ॥ दृष्ट्वाज्ञात्वा ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ तत्रविशेषमाह ॥ गर्भेति ॥ ४८ ॥ अभिषिच्याभिषेकंकृत्वा ॥ स्वमात्मानंदेहसंघातमित्यर्थः ॥ स्वर्धुनीति ॥ स्वर्धुन्यागंगायायत्शुद्धंकमुदकंतस्यबन्धाद्धारणादधिकशुद्धतामत्यंतपवित्रतांगंगास्नानादप्यधिकशुद्धिमित्यर्थः ॥ यद्वा स्वर्धुन्याःशुद्धंशोधकंकबंधंजलंतस्मादधिकशुद्धतांपावनतामित्यर्थः ॥ ४९ ॥ इतोपिमाताधिकेत्याह ॥ संन्यस्तेति ॥ मस्करीपरिव्राट् ॥ भिक्षुःपरिव्राट्कर्मंदीपाराशर्यपिमस्करी ॥ तपस्वीतापसःपारिकांक्षीवाचंयमोमुनिरित्यमरः ॥ अपिरत्रभिन्नक्रमे ॥ पितुरपिवंद्यइत्य

कर्णवेधंततःकृत्वाश्रवणर्क्षेसकर्मवित् ॥ ब्रह्मतेजोभिवृद्ध्यर्थंपंचमेऽब्देव्रतंददौ ॥ ४१ ॥ उपाकर्मततःकृत्वावेदानध्यापयत्सुधीः ॥ त्र्यब्दंवेदान्सविधिनाऽध्यैष्टसांगपदक्रमान् ॥ ४२ ॥ विद्याजातंसमस्तंचसाक्षिमात्राद्गुरोर्मुखात् ॥ विनयादिगुणानाविष्कुर्वन्ग्राहशक्तिमान् ॥ ४३ ॥ ततोथनवमेवर्षेपित्रोःशुश्रूषणेरतम् ॥ वैश्वानरंगृहपतिंदृष्ट्वाकामचरोमुनिः ॥ ४४ ॥ विश्वानरोटजंप्राप्यदेवर्षिर्नारदःसुधीः ॥ पप्रच्छकुशलंतत्रगृहीतार्घासनःक्रमात् ॥ ४५ ॥ ॥ नारदउवाच ॥ ॥ विश्वानरमहाभागशुचिष्मतिशुभव्रते ॥ कुरुतेयुवयोर्वाक्यमयंगृहपतिःशिशुः ॥ ४६ ॥ नान्यत्तीर्थंनवादेवोनगुरुर्नचसत्क्रिया ॥ विहायपित्रोर्वचनंनान्योधर्मःसुतस्यहि ॥ ४७ ॥ नपित्रोरधिकंकिंचित्त्रिलोक्यांतनयस्यहि ॥ गर्भधारणपोषाभ्यांपितुर्मातागरीयसी ॥ ४८ ॥ अंभोभिरभिषिच्यस्वंजननीचरणच्युतैः ॥ प्राप्नुयात्स्वर्धुनीशुद्धकबंधाधिकशुद्धताम् ॥ ४९ ॥ संन्यस्ताखिलकर्मापिपितुर्वंद्योहिमस्करी ॥ सर्ववंद्येनयतिनाप्रसूर्वंद्याप्रयत्नतः ॥ ५० ॥ इदमेवतपोत्युग्रमिदमेवपरंव्रतम् ॥ अयमेवपरोधर्मोयत्पित्रोःपरितोषणम् ॥ ५१ ॥ मन्येमान्योनाधमस्यतथान्यस्ययथायुवाम् ॥ सुखाकारैर्विनीतस्यशिशोर्गृहपतेरहम् ॥ ५२ ॥ वैश्वानरसमभ्येहिममोत्संगेनिषीदभो ॥ लक्षणानिपरीक्षेहंपाणिंदर्शयदक्षिणम् ॥ ५३ ॥ इत्युक्तोमुनिनाबालःपित्रोराज्ञामवाप्यसः ॥ प्रणम्यनारदंश्रीमान्भक्त्याप्रह्वउपाविशत् ॥ ५४ ॥

नेनसंबध्यते ॥ हीतिनिश्चितम् ॥ प्रसूर्माता ॥ अतएवोक्तंभगवत्पादैः ॥ आस्तांतावदियंप्रसूतिसमयेदुर्वारशूलव्यथानैरुच्येनिजशोषणंमलमयीशय्याचसांवत्सरी एकस्यापिनगर्भभारभरणक्लेशस्ययस्याःक्षमोदातुंनिष्कृतिमुन्नतोपितनयस्तस्यैजनन्यैनमइति ॥ अहंइतिमन्ये ॥ ५० ॥ ५१ ॥ मन्यइति ॥ अहमितिमन्ये ॥ किंतत् युवांयुवयोर्गृहपतेःशिशोर्यथाहंमान्योमाननीयःपूज्यइत्यर्थः ॥ तथान्यस्याधमस्यगृहस्थस्यशिशोर्नाहंमान्यइत्यहंमन्यइत्यर्थः ॥ यद्वा यथागृहपतेःशिशोर्युवांपितरौमान्यौतथाऽन्यस्याधमस्यशिशोःपित्रादिर्मान्योनइत्यहंमन्यइत्यर्थः ॥ कथंभूतस्यगृहपतेः ॥ सुखाकारैर्विनीतस्यसुखंक्षोभरहितमक्षुब्धंयथास्यात्तथाकारैःकार्यकारणसंघातैर्विनीतस्यनम्रस्य ॥ मुखाकारैरितिपाठेस्पष्टएवार्थः ॥ मन्येमान्योनधर्मस्यतथान्यस्ययथास्यवैइतिक्वचित्पाठः ॥ तत्रा

प्यस्यशिशोर्धर्मस्यधर्ममूर्तेरितिव्याकर्तव्यम् ॥ अन्यत्पूर्ववत् ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ परिममौगणितवान् ॥ ५६ ॥ तिर्यगिति ॥ हेद्विजतिर्यगूर्ध्वविस्तारोच्चमानेपरिमाणेअष्टोत्तरशतांगुलः अष्टौउत्तराअधिकाःशतमंगुलयोयत्रसोऽष्टोत्तरशतांगुलःसमस्तुल्योगणितोयोऽयन्तेवालःसयथायथावल्लोकपालोभवेत्भविष्यतीतियर्थः ॥ अर्चिष्मत्याःपुर्याःपतिरितितुहृदिस्थम् ॥ तिर्यक्प्रमाणंप्रसारिताभ्यांबाहुभ्यांज्ञातव्यम् ॥ ५७ ॥ पंचेति ॥ अयंतेबालोद्वात्रिंशल्लक्षणएवेतिविशेष्यंपूर्वश्लोकानुषज्ज्यान्वयः ॥ तान्येवद्वात्रिंशल्लक्षणानिषड्भिर्विशेषणैर्दर्शयति ॥ पञ्चसूक्ष्मः पञ्चत्वक्केशांगुलिदशनांगुलिपर्वाणिसूक्ष्माणियस्यसतथा ॥ पंचदीर्घःपञ्चभुजनेत्रहनुजानुनासादीर्घायस्यसतथा ॥ सप्तरक्तः सप्तपाणितलनेत्रांततालुजिह्वाअधरोष्ठनखारक्तायस्यसतथा ॥ षडुन्नतः षड्वक्षःकुक्ष्यलकस्कंधकरवक्त्राणिउन्नतानियस्यसतथा ॥ त्रिपृथुः त्रीणिललाटकटिवक्षांसिपृथूनिविस्तीर्णानियस्यसतथा ॥ लघुगंभीरः ॥ लघुश्चासौगंभीरश्चेतिलघुगंभीरः ॥ अत्रत्रिशब्दावध्याहर्तव्यौ ॥ त्रिलघुस्त्रिगंभीरइत्यर्थः ॥ त्रिलघुःत्रीणिग्रीवाजंघामेहनानिलघूनिह्रस्वानियस्यसतथा ॥ त्रिगंभीरः त्रयःस्वरसत्त्वनाभयोगंभीरायस्यसतथा ॥ सामुद्रिकेतुत्रिलघुरित्यत्रचतुर्ह्रस्वमित्यु

ततोदृष्ट्वास्यसर्वांगंतालुजिह्वाद्विजानपि ॥ आनीयकुंकुमारक्तंसूत्रंचत्रिगुणीकृतम् ॥ ५५ ॥ स्मृत्वाशिवौगणाध्यक्षमूर्ध्वीभूतसुदङ्मुखम् ॥ मुनिःपरिममौबालमापादतलमस्तकम् ॥ ५६ ॥ तिर्यगूर्ध्वंसमोमानेयोष्टोत्तरशतांगुलः ॥ सभवेत्पृथिवीपालोबालोऽयंतेयथाद्विज ॥ ५७ ॥ पंचसूक्ष्मःपंचदीर्घःसप्तरक्तःषडुन्नतः ॥ त्रिपृथुर्लघुगंभीरोद्वात्रिंशल्लक्षणास्त्विति ॥ ५८ ॥ पंचदीर्घाणिशस्यानियथादीर्घायुषोस्यवै ॥ भुजौनेत्रेहनुर्जानुनासाऽस्यतनयस्यते ॥ ५९ ॥ ग्रीवाजंघामेहनैश्चत्रिभिर्ह्रस्वोयमीडितः ॥ स्वरेणसत्त्वनाभिभ्यांत्रिगंभीरःशिशुःशुभः ॥ ६० ॥ त्वक्केशांगुलिदशनाःपर्वाण्यंगुलिजान्यपि ॥ तथास्यपंचसूक्ष्माणिदिक्पालपदभाग्यथा ॥ ६१ ॥ वक्षःकुक्ष्यलकंस्कंधकरंवक्त्रंषडुन्नतम् ॥ तथाऽत्रदृश्यतेबालेमहदैश्वर्यभाग्यथा ॥ ६२ ॥ पाण्योस्तलेचनेत्रांतेतालुजिह्वाधरौष्ठकम् ॥ सप्तारुणंचसनखमस्मिन्राज्यसुखप्रदम् ॥ ६३ ॥ ललाटकटिवक्षोभिस्त्रिविस्तीर्णोयथाह्यसौ ॥ सर्वतेजोतिरैश्वर्यंतथाप्राप्स्यतिनान्यथा ॥ ६४ ॥ कमठीपृष्ठकठिनावकर्मकरणौकरौ ॥ राज्यहेतूशिशोरस्यपादौचाध्वनिकोमलौ ॥६५॥

क्तम् ॥ तथाहि पंचदीर्घंचतुर्ह्रस्वंपञ्चसूक्ष्मंषडुन्नतम् ॥ सप्तरक्तंत्रिगंभीरंत्रिविस्तीर्णंप्रशस्यतइति ॥ ५८ ॥ क्रममनादृत्यश्लोकंव्याचष्टे ॥ पञ्चेत्यारभ्यकमठीपृष्ठकठिनावित्यतःप्राक्तनेन ॥ शस्यानिप्रशस्तानि ॥ हनुर्वदनैकदेशःकपोलयोःपरभागः ॥ अधःस्याच्चिबुकंगंडौकपोलौतत्पराहनुरित्यमरः ॥ जानुऊरुपर्व ॥ जंघाप्रसृता ॥ जंघातुप्रसृताजानूरुपर्वाष्ठीवदस्त्रियामित्यमरः ॥ ५९ ॥ मेहनंशिश्नः ॥ भगंयोनिर्द्वयोःशिश्नोमेढ्रोमेहनशेफसीइत्यमरः ॥ सत्त्वमन्तःकरणम् ॥ ६० ॥ ६१ ॥ वक्षोहृदयम् ॥ कुक्षिरुदरम् ॥ पिचण्डकुक्षीजठरोदरंतुंदमित्यमरः ॥ अलकंचूर्णकुंतलाः ॥ अलकाश्चूर्णकुंतलाइत्यमरः ॥ उभयत्रक्लीवत्वंछांदसम् ॥ यद्वा वक्षश्चकुक्षिश्चअलकाश्चवक्षःकुक्ष्यलकम् ॥ समाहारत्वादेकवद्भावः ॥ स्कंधंभुजाशिरःस्कंधोभुजशिरोंऽसोऽस्त्रीत्यमरः ॥ करंहस्तः ॥ बलिहस्तांशवःकराइत्यमरः ॥ अत्राप्युभयत्रक्लीवत्वंछांदसम् ॥ स्कंधकरवक्त्रमितिक्वचित्पाठस्तत्रसमाहारत्वादेकवद्भावउन्नेयः ॥ ६२ ॥ ६३ ॥ ६४ ॥ कमठीति ॥ अस्यशिशोःकरौराज्यहेतू

१ अत्रनखेतिक्वचित्पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

राजत्वकारणे ॥ पादौचेत्यन्वयः ॥ कथंभूतौतौकरौ ॥ कमठीपृष्ठकठिनौकमठीकूर्मस्यपत्नीडुलिरीतियावत् ॥ भेकस्यपत्नीवर्षाभ्वीकूर्मस्यकमठीडुलिरित्यमरः ॥ तस्याःपृष्ठवत्कठिनौदृढावित्यर्थः ॥ अकर्मकरणौकर्मकरणानर्हौ ॥ कर्मकरणंविनापिकठिनावित्यर्थः ॥ पादौचरणौ ॥ कथंभूतौ ॥ अध्वनिवर्त्मविषयेकोमलौमृदूइत्यर्थः ॥ ६५ ॥ अच्छिन्नेति ॥ अस्यशिशोर्हस्तेतथारेखादृश्यतेयथाऽस्यदीर्घायुष्यमर्पयेदित्यन्वयः ॥ कथंभूता ॥ कनिष्ठापृष्ठनिर्याता कनिष्ठायाअंगुल्याःपृष्ठात्पश्चान्निर्यातानिःसृतेत्यर्थः ॥ अवधिमाह ॥ तर्जनींव्याप्याच्छिन्नाऽविच्छिन्नेत्यर्थः ॥ ६६ ॥ पादादिति ॥ अस्यपादवैश्वर्यसूचकावैश्वर्यस्यप्रापकावित्यर्थः ॥ कथंभूतौ ॥ मांसलौबलवंतौसुबलिनावित्यर्थः ॥ बलवान्मांसलोंऽसलइत्यमरः ॥ समावक्रौसूक्ष्मौनातिस्थूलावित्यर्थः ॥ सुशोभनौसुन्दरौ ॥ समगुल्फौसमौगुल्फौघुटिकेययोस्तौसमगुल्फौ ॥ तद्ग्रंथीघुटिकेगुल्फावित्यमरः ॥ ६७ ॥ स्वल्पाभिरिति ॥ अयंतवाशिशुःराजराजोभविष्यति ॥ कीदृशः ॥ सदासुखी ॥ कैर्लक्षणैः ॥ कररेखाभिरिति ॥ लिंगेनचशेफसाशिश्नेनेत्यर्थः ॥ लिंगंचिह्नशेफसोरित्यमरः॥ कथंभूतेन ॥ कृशह्रस्वेन कृशंचतद्ध्रस्वंचेतितेन ॥ राजराजोलोकपालइत्यर्थः ॥ ६८ ॥ उत्कटेति ॥ अयंशिशुरुत्कटासनगुल्फस्फिक् उत्कटंमहत्तच्चतदासनंचेत्युत्काटासनम् तद्गुल्फेतद्योग्येस्फिचौकटिस्थमांसपिंडौयस्यसतथा ॥ स्त्रियांस्फिचौकटिप्रोथावित्यमरः ॥ अस्यगृहपतेर्नाभिर

अच्छिन्नातर्जनींव्याप्यतथारेखास्यदृश्यते ॥ कनिष्ठापृष्ठनिर्यातादीर्घायुष्यंयथार्पयेत् ॥ ६६ ॥ पादौसुमांसलौरक्तौसमौसूक्ष्मौसुशोभनौ ॥ समगुल्फौ स्वेदहीनौस्निग्धवैश्वर्यसूचकौ ॥६७॥ स्वल्पाभिःकररेखाभिरारक्ताभिःसदासुखी ॥ लिंगेनकृशह्रस्वेनराजराजोभविष्यति ॥ ६८ ॥ उत्कटासनगुल्फास्फिग्नाभिरस्यापिवर्तुला ॥ दक्षिणावर्तमरुणंमहदैश्वर्यसूचिका ॥ ६९॥ धारैकामूत्रयत्यस्मिन्दक्षिणावर्तिनीयदि ॥ गंधश्चमीनमधुनोर्यदिवीर्येतदानृपः ॥ ७० ॥ विस्तीर्णौमांसलौस्निग्धौस्फिचावस्यसुखोचितौ ॥ वामावर्तौसुप्रलंबौदोषौदिग्रक्षणोचितौ ॥७१॥ श्रीवत्सवज्रचक्राब्जमत्स्यकोदंडदंडभृत् ॥ तथास्यकरगारेखायथास्यात्त्रिदिवस्पतिः ॥ ७२ ॥ द्वात्रिंशद्दशनश्चायंकरकंबुशिरोधरः ॥ क्रौंचदुंदुभिहंसाभ्रस्वरःसर्वेश्वराधिकः ॥ ७३ ॥

पिवर्तुलाकारा ॥ कथंभूता ॥ दक्षिणावर्तमरुणंचयथाभवतितथामहदैश्वर्यसूचिकाप्रकाशिकेत्यर्थः ॥ ६९ ॥ धारैकेति ॥ अस्मिन्मूत्रयतिसतिएकाधारायदिदक्षिणावर्तिनीभवतिदक्षिणावर्तेननिःसरतीत्यर्थः ॥ यदिअस्यवीर्येमीनमधुनोर्मत्स्यक्षौद्रयोर्गंधश्चभवेत्तदाऽयंनृपइत्यर्थः ॥ ७० ॥ विस्तीर्णाविति ॥ अस्यस्फिचौकटिस्थमांसपिंडौसुखोचितौसुखयोग्यौ ॥ कथंभूतौ ॥ विस्तीर्णौविस्तृतौ ॥ मांसलौबलवंतौ अंसलावित्यर्थः ॥ स्निग्धौचिक्कणौ ॥ अस्यदोषौहस्तौदिग्रक्षणोचितौदिक्पालनयोग्यौ ॥ कथंभूतौ ॥ वामावर्तौ वामःसुंदरआवर्तआवर्तनमावलनंययोस्तौतथा ॥ वामःसुंदरमृढयोरितिवचनात् ॥ सुप्रलंबौआजानुदीर्घावित्यर्थः ॥ ७१ ॥ श्रीवत्सेति ॥ अस्यशिशोस्तादृशीकरगारेखाऽस्तीतिशेषः ॥ यथाऽयंत्रिदिवस्पतिःस्वर्गाधिपतिःस्यात् ॥ तादृशीकीदृशीत्याकांक्षायामाह ॥ श्रीवत्सेति ॥ श्रीवत्सश्चवज्रश्चचक्रंचअब्जंचमत्स्यश्चकोदंडश्चदंडश्चतान्बिभर्तीतितथा ॥ श्रीवत्सोनामात्रदक्षिणावर्तरेखावालिविशेषः ॥ कोदंडोधनुः ॥ ७२ ॥ द्वात्रिंशद्दशनइति ॥ अयंसर्वेश्वराधिकोभविष्यतीत्यन्वयः ॥ तत्रहेतुगर्भाणिविशेषणान्याह ॥ किंविशिष्टत्येन ॥ द्वात्रिंशद्दशनः द्वाभ्यामधिकात्रिंशद्दशनायस्यसः ॥ करकंबुशिरोधरः करःशुंडादंडः कंबुःशंखः॥ कंबुर्नावलयेशंखेइत्यमरः ॥ करवद्धस्तिशुंडादंडवत्सुवलिताकंबुवत्त्रिवारांकिताचशिरोधराग्रीवायस्यसः ॥ क्रौंचदुंदुभिहंसाभ्रस्वरः॥ क्रौंचादीनामिवस्वरोयस्यसः ॥

---

१ इदंविचारणीयम् । २ अत्रापितत्तुल्येइत्यपेक्षितमितिभाति । ३ अत्रउत्कटासनतुल्यास्फिगितिपाठोपेक्षितइतिभाति ।

CC-0. In Public Domain. Digitization by eGangotri

तत्रक्रौंचःकुञ्चाख्यःपक्षी ॥ दुंदुभिर्दमामाइतिलोकप्रसिद्धोवाद्यविशेषः ॥ हंसश्चक्रांगः ॥ हंसास्तुश्वेतगरुतश्चक्रांगामानसौकसइत्यमरः ॥ अभ्रंमेघः ॥ अभ्रंमेघोवारिवाहइत्यमरः ॥ ७३ ॥ मधुपिंगलनेत्रः मधुवत्पिंगलेनेत्रेयस्यसः ॥ पंचरेखायत्रतादृशंललाटंयस्यसः ॥ सिंहोदरः सिंहस्यउदरमिवउदरंयस्यसः ॥ ७४ ॥ ऊर्ध्वरेखांकितपदः ऊर्ध्वगामिनीभिःरेखाभिरंकितौचिह्नितौपादौ यस्यसः ॥ निःश्वसन्सन् ॥ अच्छिद्रपाणिः अच्छिद्रौनतोन्नतरहितौपाणीहस्तौयस्यसः ॥ अच्छिद्रौसंहतांगुलीहस्तौयस्येतिवा ॥ उपसंहरति ॥ महालक्षणवानिति ॥ सर्वलक्षणवानयमि त्यर्थः ॥ ७५ ॥ एवंगुणानुक्त्वाऽपमृत्युंदर्शयति ॥ किंत्विति ॥ सर्वलक्षणलक्षितमप्येनंविधिरदृष्टंविधातावापातयेदित्यन्वयः ॥ कमिव ॥ विधुवत् चंद्रमिव ॥ उपरागेराहुद्वारेत्यर्थः ॥ सर्वलक्षणलक्षितत्वेवादृष्टांतोविधुवदिति ॥ कथंभूतंविधुम् ॥ संपूर्णनिर्मलकलं संपूर्णाःषोडशनिर्मलाःकलायस्यसपूर्णिमाचंद्रइत्यर्थस्तम् ॥ तद्धितार्थोपसर्जनस्यापिविधोःसंपूर्णनिर्मलकल मितिविशेषणंछांदसम् ॥ पालयेदितिक्वचित्पाठस्तदापालयेत्पालयत्विति काकूक्त्याविघ्नःसूचितः ॥ ७६ ॥ उपसंहरन्पूर्वोक्तंविवृणोति ॥ तस्मादितिसार्धेन ॥ वक्रीभूतेविषमीभूतेप्रतिकूलेजा

मधुपिंगलनेत्रोऽसौनैनंश्रीस्त्यजतिक्वचित् ॥ पंचरेखललाटस्तुतथासिंहोदरःशुभः ॥७४॥ ऊर्ध्वरेखांकितपदोनिःश्वसन्पद्मगंधवान् ॥ अच्छिद्रपाणिः सुनखोमहालक्षणवानयम् ॥ ७५ ॥ किंतुसर्वगुणोपेतंसर्वलक्षणलक्षितम् ॥ संपूर्णनिर्मलकलंपातयेद्विधुवद्विधिः ॥ ७६ ॥ तस्मात्सर्वप्रयत्नेनरक्षणी यस्त्वसौशिशुः ॥ गुणोपिदोषतांयातिवक्रीभूतेविधातरि ॥ ७७ ॥ शंकेऽस्यद्वादशेवर्षेप्रत्यूहोविद्युदग्नितः ॥ इत्युक्त्वानारदोधीमान्सजगामयथागतम् ॥ ७८ ॥ विश्वानरःसपत्नीकस्तच्छ्रुत्वानारदेरितम् ॥ तदैवमन्यमानोभूद्वज्रपातंसुदारुणम् ॥ ७९ ॥ हाहतोस्मीतिवचसाहृदयंसमताडयत् ॥ मूर्च्छा मवापमहतींपुत्रशोकसमाकुलः ॥ ८० ॥ शुचिष्मत्यपिदुःखार्तारुरोदातीवदुःसहम् ॥ आर्तस्वरेणहारावैरत्यंतव्याकुलेंद्रिया ॥ ८१ ॥ हाशिशोहागुण निधेहापितुर्वाक्यकारक ॥ हाकुतोमंदभाग्यायाजठरेमेसमागतः ॥ ८२ ॥ त्वदेकपुत्रांहापुत्रकोऽत्रमांत्रायतेपुरा ॥ त्वदृतेत्वद्गुणोर्म्याढ्येपतितांशोकसा गरे ॥ ८३ ॥ हाबालहाविमलहाकमलायताक्षहालोकलोचनचकोरकुरंगलक्ष्मन् ॥ हातातताततनयनाब्जमयूखमालिन्हामातुरुत्सवसहस्रसुखैकहेतो ॥ ८४ ॥ हापूर्णचंद्रमुखहासुनखांगुलीकहाचाटुकारवचनामृतवीचिपूर ॥ दुःखैःकियद्भिरहहांगमयात्वमाप्तःकिंकिंकृतंगृहपतेनमयात्वदाप्त्यै ॥ ८५ ॥

तइत्यर्थः ॥ ७७ ॥ प्रत्यूहोविघ्नोऽपमृत्युरित्यर्थः ॥ विद्युदग्नितःवज्राग्नेरित्यर्थः ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ त्वदेकपुत्रामिति ॥ हाकष्टे ॥ पुत्रहेपुत्रपुरापूर्व मेवशोकसागरेपतितांमांकस्त्रायतेकस्त्रास्यतीत्यर्थः ॥ भयादितिक्वचित्पाठः ॥ अहमेवशोकसागरेत्रास्यामीतिचेत्तत्राह ॥ त्वदृतेत्वांविनेत्यर्थः ॥ मत्तोऽन्यःपुत्रस्त्रास्यतीत्याशंकाया मात्मानंविशिनष्टि ॥ त्वदेकपुत्रामिति ॥ कथंभूतेशोकसागरे ॥ त्वद्गुणोर्म्याढ्येत्वगुणास्त्वद्गुणास्तएवोर्मयस्तरंगास्तैराढ्येआकुले ॥ ८३ ॥ शोकाकुलासतीबहुधासंबोधयति ॥ हाबालेति ॥ सर्वत्रहाशब्दोविषादेशोकेअर्तौवा ॥ लोकेति ॥ लोकानांलोचनान्येवचकोराश्चंद्ररश्मिभोक्तारःपक्षिविशेषास्तेषांकुरंगलक्ष्मन् मृगलांछनचंद्रतुल्य ॥ मृगेकुरंगवातायुहरिणाजिनयो नयइत्यमरः ॥ हातातेति ॥ तातनयनाब्जमयूखमालिन्पितृनेत्राब्जसूर्य ॥ हाताततहानयनपद्मेतिक्वचित्पाठः ॥ ८४ ॥ चाटुकारेति ॥ मनोहरवाक्यसुधातरंगसमूहसमुद्रेतिवा ॥ अहहेतिखेदे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहहेत्यद्भुतेखेदइत्यमरः ॥ अंगहेपुत्र ॥ इहहांगेतिकचित् ॥ तान्येवदुःखान्याह ॥ किंकिंकृतामिति ॥ ८९ ॥ नोप्तइति ॥ नोप्तोनदत्तइतिनेत्यन्वयः ॥ बतेतिखेदे ॥ खेदानुकंपासंतोषाविस्मया मंत्रणेबतेत्यमरः ॥ अध्युषितानिसेवितानि ॥ तवकृतेत्वदर्थंकेकेमयानियमाऔषधानिमंत्रायंत्राश्चनसंसाधितानसेविताइत्यर्थः ॥ तथापिनतैस्त्वंप्राप्तइत्याह ॥ सुकृतैकलभ्य विश्वेश्वरेऽर्पितंयत्सु कृतंतेनकेवलेनलभ्य ॥ ८६ ॥ संसारेति ॥ संसारसमुद्रतारकनौस्वरूप ॥ निजवाक्सुधोक्षैः स्ववाक्यामृतसेकैः ॥ ८७ ॥ किंदेवतेति ॥ अहहखेदे ॥ अस्यशिशोर्जन्ममहोत्सवेऽस्यभाव्यनिष्टं ज्ञात्वाकिंकिमितियुगपन्मिलिताःकिमर्थमागताइत्यर्थः ॥ यद्वा अस्यभाविज्ञात्वामिलिताइत्येतत्किमितिपृच्छामीत्यर्थः ॥ मेलनेहेतुमाह ॥ एकस्थेति ॥ ८८ ॥ कालकालः कालेनयमेनकालः कालनंमारणमितियावत् ॥ ८९ ॥ हाहंतेति ॥ हाहंतविषादे ॥ हंतहर्षेऽनुकंपायांवाक्यारंभविषादयोरित्यमरः ॥ हंतेतिवाक्यारंभे हेविधेभवताकस्मादयंबालोविदधेऽकारि ॥ किंकृत्वा ॥ बहुभिः प्रयत्नैर्विशालगुणसिंधुंविस्तृतगुणरूपसमुद्रंविधाय ॥ अर्थादस्मिन्बालकइतिशेषइतिवा ॥ कथंभूतम् ॥ अगाधमध्यमनवगाहनीयमध्यमित्यर्थः ॥ सद्रत्नसारंसद्रत्नान्येवसाराणियत्रतम् ॥

नोप्तोबलिर्नबतकासुचदेवतासुतीर्थानिकानिनमयाध्युषितानिवत्स ॥ केकेमयाननियमौषधमंत्रयंत्राःसंसाधितास्तवकृतेसुकृतैकलभ्य ॥ ८६ ॥ संसारसागरतरेहरदुःखभारंसारंसुखेंदुमभिदर्शयसौख्यसिंधो ॥ पुन्नामतीव्रनरकार्णववाडवाग्नेस्संजीवयस्वपितरंनिजवाक्सुधोक्षैः ॥ ८७ ॥ किंदेवताअहहजन्ममहोत्सवेऽस्यज्ञात्वेतिभाविमिलितायुगपत्समस्ताः ॥ एकस्थसर्वगुणशीलकलाकलापसौंदर्यलक्षणपरीक्षणपूर्णहर्षाः ॥ ८८ ॥ शंभो महेशकरुणाकरशूलपाणेमृत्युंजयस्त्वमितिवेदविदोवदंति ॥ त्वद्दत्तबालतनयेयदिकालकालःस्यादेवमत्रवदकस्यभवेन्नपातः ॥ ८९ ॥ हाहंतहंतभवताभवतापहारीकस्माद्विधेऽत्रविदधेबहुभिःप्रयत्नैः ॥ बालोविशालगुणसिंधुमगाधमध्यंसद्रत्नसारमखिलंसविधंविधाय ॥ ९० ॥ हाकालबालकवतीकिमुतेनराज्ञीत्वत्कालतांनहृतवान्नसुताननेंदुः ॥ बालेतिकोमलमृणाललतांगलीलेदंभोलिनिष्ठुरकठोरकुठारदंष्ट्रः ॥ ९१ ॥ इत्थंविलप्यबहुशोनयनांबुधारासंपातजाततटिनीशतमुत्तरंगम् ॥ सातोकशोकजनितानलतापतप्ताप्रोच्छ्वस्यदीर्घविपुलोष्णमहोशुशोप ॥ ९२ ॥

अखिलंसंपूर्णम् ॥ सविधंसप्रकारम् ॥ किमित्याकांक्षयामाह ॥ भवतापहारीभवताकृत्वाऽपहारोवर्ततेयस्यसतथा ॥ सृष्ट्वापिमारणीयश्चेत्किमर्थंसृजसीत्यभिप्रायः ॥ भवतापहारीत्येकंवापदम् ॥ भवतापंहर्तुंशीलंयस्यसतथा ॥ अस्मिन्पक्षेयतोऽग्रेमारमिष्यसीतिशेषः ॥ ९० ॥ हाकालेति ॥ हाविषादे ॥ हेकालतेतवराज्ञीमहिषीकिमुबालकवतीनापितुबालकवत्येव ॥ तवसुताननेंदुःपुत्रवदन चंद्रस्त्वत्कालतांत्वत्कालनतांत्वत्कृतमारणतांनहृतवान्नदूरीकृतवान् अपितुकृतवानेव ॥ अतोऽस्मिन्बालेकिंकिमित्येवंभूतोऽसि ॥ कथंभूते ॥ कोमलायामृणाललतातस्यायदंगंतस्येवलीलायस्यस तथातस्मिन् ॥ कोमलमृणाललतांगवत्सुकुमारइत्यर्थः ॥ त्वंकथंभूतः ॥ दंभोलिर्वज्रंतद्वन्निष्ठुरस्तीक्ष्णःकठोरोभयंकरोयःकुठारस्तद्वद्दंष्ट्रायस्य सः ॥ स्वपुत्रस्यरक्षणंपरपुत्रस्यमारणमेतत्तवानुचित मितिभावः ॥ ९१ ॥ इत्थमिति ॥ अहोकष्टम् ॥ साशुचिष्मतीइत्थंविलप्यशुशोषशोषंप्राप्तवतीत्यन्वयः ॥ दीर्घंबहुकालव्यापिविपुलंगंभीरंउष्णंयथास्यात्तथाप्रोच्छ्वस्य ॥ तथानेत्रवार्यासारजनित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नदीनांशतमुत्तरंगंउच्छलद्भंगंयथास्यादिति ॥ ९२ ॥ आकर्ण्येति ॥ तस्यास्तानिकरुणवंतिपरिदेवितानिदृष्ट्वाश्रुत्वावाद्रुमाव्रततयःद्रुमाश्चव्रततयोलताश्च कुसुमान्येवाश्रुपातास्तैःपततां पक्षिणांविरुतानिवासितान्येवआरावाआर्तरावास्तैः असकृत्वारंवारंपवनच्छलेनवायुव्याजेनमौलिमस्तकमालोल्यप्रकंप्यप्रायोरुदंतिरुदंतीवेत्युत्प्रेक्षा ॥ ९३ ॥ रुण्णमिति ॥ तयाशुचि ष्मत्यामुक्तकंठंयथास्यात्तथार्तस्वरैरुण्णंरोदनंकृतम् ॥ छांदसोऽयंप्रयोगः ॥ यथाप्रतिरवस्यच्छलतोव्याजेनसर्वादिशोरुरुदुः ॥ कथंभूताः ॥ गिरिकंदराएवास्यानियासांतास्तथा ॥ पुनःकथंभूताः ॥ स्थगितपत्रिमृगागमाः स्थगिताःस्तंभिताः पत्रिणांमृगाणांचागमाआगमनानियासुतास्तथा ॥ यदाअचेतनाअपिवृक्षादयोरुरुदुस्तदासचेतनानांकाकथेतिहिशब्दार्थः ॥९४॥ श्रुत्वेति ॥ इत्यार्तनादंश्रुत्वासविश्वानरः ॥ ह्रस्वश्छांदसः ॥ पाठांतरेतुर्वितर्के उभयत्रव्यवधानमार्षम् ॥ किमित्यादिउच्चैर्वदन्मोहांहित्वोत्थितइत्यन्वयः ॥ तुशब्दोऽत्रसंभ्रमे ॥ अन्तरात्मानिलयः

आकर्ण्यतत्करुणवत्परिदेवितानितानिद्रुमाव्रततयःकुसुमाश्रुपातैः ॥ प्रायोरुदंतिपततांविरुतार्तरावैरालोल्यमौलिमसकृत्पवनच्छलेन ॥ ९३ ॥ रुण्णं तयाकिलतथाबहुमुक्तकंठमार्तस्वरैःप्रतिरवच्छलतोयथोच्चैः ॥ तद्दुःखतोनुरुरुदुर्गिरिकंदरास्याःसर्वादिशःस्थगितपत्रिमृगागमाहि ॥ ९४ ॥ श्रुत्वार्तनाद मितिविश्वनरोपिमोहंहित्वोत्थितःकिमितिकिंत्वितिकिंकिमेतत् ॥ उच्चैर्वदन्गृहपतिःक्वसमेबहिस्थःप्राणोंतरात्मनिलयःसकलेंद्रियेशः ॥ ९५ ॥ अगस्त्यउवाच ॥ ॥ ततोदृष्ट्वासपितरौबहुशोकसमावृतौ ॥ स्मित्वोवाचततोमातस्त्रासस्त्वीदृक्कुतोहिवाम् ॥९६॥ नमांक्ततवपुस्त्राणंभवच्चरणरेणुभिः ॥ कालःकलयितुंशक्तोवराकीचंचलालिपिका ॥ ९७ ॥ प्रतिज्ञांशृणुतंतातौयदिवांतनयोह्यहम् ॥ करिष्येहंतथातेनविद्युन्मत्तस्त्रसिष्यति ॥ ९८ ॥ मृत्युंजयंसमाराध्यसर्वज्ञंसर्वदंसताम् ॥ कालकालंमहाकालंकालकूटविषादिनम् ॥ ९९ ॥ इतिश्रुत्वावचस्तस्यजरितौद्विजदंपती ॥ अकालामृत वर्षौघशांततापौतदोचतुः ॥ १०० ॥ अपयोदपयोवृष्टिरदुग्धाब्धिःसुधोदयः ॥ अनिंदुःकौमुदीकांतिःकुतोनौसुखयत्यलम् ॥ १ ॥ पुनर्ब्रूहिपुनर्ब्रूहिकी दृक्कीदृक्पुनःपुनः ॥ कालःकलयितुंनालंवराकीचंचलालिपिका ॥२॥ आवयोस्तापनाशायमहोपायस्त्वयेरितः ॥ मृत्युंजयस्यदेवस्यसमाराधनलक्षणः॥ ॥३॥ तद्गच्छशरणंतातनातःपरतरंहितम् ॥ मनोरथपथातीतकारिणःकालहारिणः ॥ ४ ॥ किंनश्रुतंत्वयातातश्वेतकेतुंयथापुरा ॥ पाशितंकालपाशे नररक्षात्त्रिपुरांतकः ॥ ५ ॥ शिलादतनयंमृत्युग्रस्तमष्टाब्दमर्भकम् ॥ शिवोनिजजनंचक्रेनंदिनंविश्वनंदिनम् ॥ ६ ॥ क्षीरोदमथनोद्भूतंप्रलयानलसं निभम् ॥ पीत्वाहालाहलंघोरमरक्षद्भुवनत्रयम् ॥ ७ ॥

प्रत्यगात्मासकलेंद्रियेशःसमस्तेंद्रियाणांसाक्षी ॥ ९५ ॥ ततोदृष्ट्वेति ॥ तमोमोहः ॥ प्राधान्यान्मातुःसंबोधनम् ॥ तुशब्दात्ताततेतिच ॥ ९६ ॥ कलयितुंमारयितुम् ॥ चञ्चलाविद्युत् ॥ यत्रका लोपिकुंठितस्तत्रवराकीनिकृष्टाअल्पाअसमर्थाचपलाकालयितुंनशक्ताइतिकिंवाच्यमित्यभिप्रायः ॥ ९७ ॥ वांयुवयोः ॥ ९८ ॥ ९९ ॥ जरितौजरावंतौ ॥ ज्वरितावितिक्वचित्पाठः ॥ १०० ॥ किमूचतुस्तदाह ॥ अपयोदेति ॥ नविद्यतेपयोदोयस्यांसाचासौपयोवृष्टिश्चनदुग्धाब्धिःक्षीराब्धिर्यस्मिन्ससुधोदयः नविद्यतेइन्दुर्यस्यांसाकौमुदीकांतिःकुतःकस्मान्नौआवामलमत्यर्थंसुखयतिसुखि नौकरोतीत्यूचतुरिति ॥ १ ॥ पुनरितिवीप्सात्रितयमादरार्थम् ॥ पुनर्वदेतिक्वचित् ॥ कालइत्याद्यर्धमनुवादः ॥ २ ॥ ३ ॥ ४ ॥ पाशितंबद्धम् ॥ ५ ॥ ६ ॥ हालाहलंविषम् ॥ ७ ॥

१ श्रुत्वातुइत्येवंरूपे ।

CC-0. In Public Domain. Digitization by eGangotri

महान्दर्पोयस्यतम् ॥ महादैत्यमित्यपिक्वचित् ॥ ८ ॥ पत्रिणंवाणम् ॥ ९ ॥ वर्षायुतंदशसहस्रवषम् ॥ ११० ॥११॥१२ ॥ १३ ॥ सगृहपतिःकाशींसंप्राप्यप्राङ्मणिकर्णिकांलोचनाभ्यांदृष्टवान् यथावितिपंचमेनान्वयः ॥ काशींविशिनष्टि ॥ यल्लभ्यतइत्यतःप्राक्तनेनग्रंथेन ॥ महासंवर्तःप्राकृतोलयः ॥१४॥ कण्ठभूमिषुकाश्याःकण्ठस्थानीयासुभूमिषु ॥ नीहारोहिमम् ॥१५॥ वहुसंसारेति॥ दुःखमितिशेषः॥वहुसंसारसंतापमितिक्वचित् ॥ असिधारयाऽसिप्रवाहेण ॥१६ ॥ मणिकर्णिकांविशिनष्टि॥ यल्लभ्यतइत्येकेन ॥ कथंभूतांमणिकर्णिकाम् ॥ सुदृढोऽविप्लुतोयोष्टांगयोगस्तस्माल्लभ्यं तेयत्कैवल्यंतत्सम्यग्देहत्यागमात्रेणविकासयंतीमभिव्यंजयंतीम् ॥ बुधाःकाशिकांयांजगुस्तामिति ॥ १७ ॥ कथंभूताभ्यांनेत्राभ्याम् ॥ संसारतापतप्ताभ्याम् ॥ कर्णाकर्णप्रकीर्णाभ्याम् ॥ कर्णा

जालंधरंमहादर्पंहृतत्रैलोक्यसंपदम् ॥ चरणांगुष्ठरेखोत्थचक्रेणनिजघानयः ॥ ८ ॥ यएकेषुनिपातोत्थज्वलनैस्त्रिपुरंपुरा ॥ विधायपत्रिणंविष्णुंज्वा लयामासधूर्जटिः ॥ ९ ॥ अंधकंयस्त्रिशूलाग्रप्रोतंवर्षायुतंपुरा ॥ त्रैलोक्यैश्वर्यसंमूढंशोषयामासभानुना ॥ ११० ॥ कामंदृष्टिनिपातेनत्रैलोक्यविजयो र्जितम् ॥ निनायानंगपदवींवीक्षमाणेष्वजादिषु ॥ ११ ॥ तंब्रह्माद्येककर्तारंमेघवाहनमच्युतम् ॥ प्रयाहिपुत्रशरणंविश्वरक्षामणिंशिवम् ॥ १२ ॥ पित्रोरनुज्ञांप्राप्येतिप्रणम्यचरणौतयोः ॥ प्रदक्षिणमुपावृत्यबह्वाश्वास्यविनिर्ययौ ॥ १३ ॥ सप्राप्यकाशींदुष्प्रापांब्रह्मनारायणादिभिः ॥ महासंवर्तसं वृत्ततापाद्विश्वेशपालिताम् ॥ १४ ॥ फिरस्वर्धुन्याहारयष्टयेवराजितांकंठभूमिषु ॥ विचित्रगुणशालिन्याहारनीहारगौरया ॥ १५ ॥ बहुसंसारसंतापसं तप्तजनतोद्भवम् ॥ वारयंतींवरणयाछिंदंतीमसिधारया ॥ १६ ॥ यल्लभ्यतेचकैवल्यंसुदृढाष्टांगयोगतः ॥ विकासयंतींतत्सम्यक्काशिकांयांजगुर्बुधाः ॥ ॥ १७ ॥ संसारतापतप्ताभ्यांलोचनाभ्यांसदृष्टवान् ॥ कर्णाकर्णप्रकीर्णाभ्यांप्राग्ययौमणिकर्णिकाम् ॥ १८ ॥ तत्रस्नात्वाविधानेनदृष्ट्वाविश्वेश्वरंवि भुम् ॥ त्रैलोक्यप्राणिसंत्राणकारिणंप्रणनामह ॥ १९ ॥ आलोक्यालाक्यतल्लिंगंतुतोषहृदयेबहु ॥ परमानंदकंदाख्यंस्फुटमेतन्नसंशयः ॥ १२० ॥ अहोनमत्तोधन्योस्तित्रैलोक्येसचराचरे ॥ यदद्राक्षिषमद्याहंश्रीमद्विश्वेश्वरंविभुम् ॥२१॥ त्रिलोकीसारसर्वस्वंपिंडीभूतमिदंकिल ॥ किंवापीयूषपिंडो यमुद्गतःक्षीरनीरधेः ॥२२ ॥ आत्मावबोधमहसःकिमसौप्रथमांकुरः ॥ ब्रह्मानंदसुकंदोवाकिमुब्रह्मरसायनम् ॥ २३ ॥

भ्यांयआकर्णआकर्णनंश्रवणंतेनप्रकीर्णाभ्यांविस्तीर्णाभ्यामित्यर्थः ॥ आकर्ण्यमणिकर्णाभ्यामितिक्वचित् ॥ यद्वा कर्णःआकर्णनंतेनआकर्णप्रकीर्णाभ्यांकर्णपर्यंताभ्यामिति ॥ १८ ॥ पूजादिकंच विदधेइतिहकारार्थः ॥ १९ ॥ १२० ॥ यद्यस्मात् ॥ अद्राक्षिषंदृष्टवान् ॥ २१ ॥ सारसर्वस्वंवरसर्वधनम् ॥ सारोवलेस्थिरांशेचन्याय्येक्लीबंवरेत्रिष्वित्यमरः ॥ पिंडीभूतंलिंगाकारेणपरिणतम् ॥ किलेत्युत्प्रेक्षायाम् ॥२२॥ आत्मावबोधमहसःस्वप्रकाशप्रत्यग्ज्योतिषः ॥ सुकंदःशोभनंमूलम्॥ब्रह्मरसायनंब्रह्मचतद्रसश्चतदयनंचतत्तथा ॥ रसोवैसः रसंह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः ॥२३ ॥

योगीति ॥ योगिहृत्कमलाश्रयंअनाकारंप्रत्यग्भूतंयद्ब्रह्मोच्यतेतल्लिंगच्छलादाकारत्वंलिंगमूर्तित्वमापेदेप्रापकिमितिविमर्शः ॥ २४ ॥ फलंनित्यशुद्धबुद्धमुक्तस्वप्रकाशानंदस्वरूपम् ॥ २५ ॥ केशपाशश्चूडा ॥ शिखाचूडाकेशपाशइत्यमरः ॥ सुपुष्प्यतेइतिपाठेसुपुष्पितइत्यर्थः ॥ कैवल्यमल्लीवल्ल्याः कैवल्यमेवमल्लीवल्लीमल्लिकालतातस्याःस्तबकोगुच्छः ॥ सस्तावकानांस्तोतॄणां भक्तानामर्थदःपुरुषार्थचतुष्टयप्रदइत्यर्थः ॥२६॥ आनंदक्रीडनकंदुकः सुखक्रीडाकंदुकः॥आनंदइत्यत्रकम्रइतिवापाठः ॥ कमनीयइत्यर्थः॥२७॥कल्याणरमणीकल्याणसुंदरीतस्यारम्यःशृंगारस्यशोभायादर्शनार्थंदर्पणआदर्शः ॥२८॥ आज्ञातमिति ॥ आइतिस्मृतौ ॥ वीजपूरःफलपूरः ॥ अद्भुतआश्चर्यमयः॥२९॥आश्चर्यमयत्वेहेतुंदर्शयन्विश्वेश्वरलिंगमितिनामनिर्वक्ति॥विश्वेषामिति ॥ कर्माणी

योगिहृत्पद्मनिलयंयदनाकारमुच्यते ॥ तदाकारत्वमापेदेकिमिदंलिंगकैतवात् ॥ २४ ॥ ब्रह्मांडभांडमथवानानारत्नौघपूरितम् ॥ अथवामोक्षवृक्षस्यफलमेतन्नसंशयः ॥ २५ ॥ निर्वाणलक्ष्म्याःकिमथकेशपाशःसुपुष्पयुक ॥ कैवल्यमल्लीवल्ल्याःकिंस्तबकःस्तावकार्थदः ॥ २६ ॥ निःश्रेयसश्रियःकिंवाऽऽनंदक्रीडनकंदुकः ॥ अपवर्गोदयाद्रेःकिमुदियायसुधाकरः ॥ २७ ॥ संसारमोहतिमिरभिदुरःकिमसौरविः ॥ किमुकल्याणरमणीरम्यशृंगारदर्पणः ॥ २८ ॥ आज्ञातंनभवेदन्यत्सर्वेषांदेहधारिणाम् ॥ अनेककर्मबीजानांबीजपूरोऽयमद्भुतः ॥२९॥ विश्वेषांविश्वबीजानांकर्माख्यानांलयोयतः ॥ अस्मिन्निर्वाणदेलिंगेविश्वलिंगमिदंततः ॥ १३० ॥ ममभाग्योदयेनैवनारदेनमहर्षिणा ॥ तदागत्यतथोक्तंयत्कृतकृत्योस्म्यहंततः ॥ ३१ ॥ इत्यानंदामृतरसैर्विधायसहिपारणम् ॥ततःशुभेऽह्निसंस्थाप्यलिंगंसर्वहितप्रदम् ॥ ३२ ॥ जग्राहनियमान्घोरान्दुष्करानकृतात्मनाम् ॥ अष्टोत्तरशतैःकुंभैःपूर्णैर्गंगामृतद्रवैः ॥ ३३ ॥ संस्नाप्यवाससापूतैः पूतात्माप्रत्यहंशिवम् ॥ नीलोत्पलमयींमालांसमर्पयतिसोऽन्वहम् ॥ ३४ ॥ अष्टाधिकसहस्रैस्तुसुमनोभिर्विनिर्मिताम् ॥ सपक्षार्धेनषण्मासंकंदमूलफलाशनः॥३५॥शीर्णपर्णाशनःपक्षेत्वाषण्मासंबभूवसः ॥ षण्मासंवायुभक्षोभूत्षण्मासंजलबिंदुभुक्३६॥

तिआख्यायेषांतेषांकर्माख्यानांविश्वबीजानांविश्वेषांसर्वेषांबीजानांयतोयस्मादस्मिँल्लिंगेलयोनाशस्तस्मादिदंविश्वलिंगमिति ॥ पाठांतरेतुननुपरिच्छिन्नेकथंसर्वेषांकर्मरूपाणांबीजानांलयस्तत्राह ॥ ततमिति ॥ परिपूर्णमित्यर्थः ॥ परिच्छिन्नप्रतीतिस्तुभ्रांत्याश्रीकृष्णइवेत्यभिप्रायः ॥३०॥ तथोक्तंयत् शंकेस्यद्वादशेवर्षेप्रत्यूहोविद्युदग्नितइत्यादिलक्षणंततउक्तात् ॥ यद्यस्मात्तत्तस्मादितिवा ॥ ३१ ॥ इत्येवंप्रकारेणआनंदामृतरसैःसुखसुधाद्रवैः ॥ ३२ ॥ अकृतात्मनामजितेंद्रियाणाम् ॥३३॥ पूतात्माशुद्धात्मा ॥ अन्वहंप्रत्यहम् ॥३४॥ सुमनोभिर्नीलोत्पलपुष्पैः ॥ सपक्षेति॥सवैश्वानरः॥षण्मासंव्याप्यपक्षार्धेनपक्षार्धेनसार्धसप्तदिनैःसार्धसप्तदिनैःकंद मूलफलाशनोबभूव ॥ ३५ ॥ सषण्मासंव्याप्यपक्षेपक्षेशीर्णपर्णाशनोबभूवेत्युभयत्रवीप्सा ॥ अन्वयभेदाच्चतच्छब्दस्यावृत्तिरदोषः ॥ ३६ ॥

१ अमृतप्रदैरित्यपिपाठः । २ इदंततमित्येवरूप ।

CC-0. In Public Domain. Digitization by eGangotri

आसतस्तिष्ठतःसतोवर्त्तमानस्येतिवा॥ ३७॥कुलिशायुधइंद्ररूपेणशंकरएव॥इंद्ररूपेणमयैवत्वंहिभीषितइतिवक्ष्यमाणत्वात्॥यन्मनसिस्थितंतदित्यर्थः॥ ३८॥ ३९॥मधुरंसारम्॥कीरवत्शुकवत्॥ कुलिशपाणिनंवज्रपाणिम्॥ १४०॥ ४१॥वालिशत्वंमूर्खत्वम्॥वरमभिलाषम्॥वरंश्रेष्ठम्॥माचिरमितिक्कचित्पाठः ॥४२॥ नमत्तःशंकरोस्त्यन्यइत्याद्यखर्वगर्ववचनातसक्रोधःसन्नाह॥गच्छेति ॥४३॥ ४४ ॥ मुमूर्च्छमूर्च्छांगतवान् ॥४५॥ अथेति ॥ नकेवलमाविरासीत्उत्तिष्ठोत्तिष्ठभद्रंतेइतिवदन्निति शेषः ॥ स्पर्शैःकरस्पर्शैःसंजीवयामासचेत्यर्थः ॥४६॥ सवालकउत्थायनेत्रकमलेउन्मील्यविकचय्यविवृत्ये तियावत् ॥ अग्रेशंभुमपश्यदित्यन्वयः॥ कीदृशेइव ॥ दिवाक्षयेरात्रौसुप्तेमुद्रितेइव॥कीदृशंशंभुम् ॥ अर्कशताधिकंअपरिमितसूर्याधिकप्रकाशमित्यर्थः ॥४७॥ भालेइति ॥ सएतादृशंरूपंप्रथमतआलो

एवंवर्षद्वयंतस्यव्यतिक्रांतंतथासतः ॥ जन्मतोद्वादशेवर्षेतद्वचोनारदेरितम् ॥ ३७ ॥ सत्यंकरिष्यन्निवतमभ्यगात्कुलिशायुधः ॥ उवाचचवरंब्रूहिदद्मितन्मनसिस्थितम् ॥३८॥ अहंशतक्रतुर्विप्रप्रसन्नोस्मिशुभव्रतैः ॥ इत्याकर्ण्यमहेंद्रस्यवाक्यंमुनिकुमारकः॥३९॥उवाचमधुरंधीरःकीरवन्मधुराक्षरम्॥ मघवन्वृत्रशत्रोत्वांजानेकुलिशपाणिनम् ॥ १४० ॥ नाहंवृणेवरंत्वत्तः शंकरोवरदोस्तिमे ॥ ४१ ॥ इंद्रउवाच ॥ नमत्तःशंकरोस्त्यन्योदेवदेवोस्म्यहंशिशो ॥ विहायबालिशत्वंत्वंवरयाचस्वमांवरम् ॥ ४२ ॥ ब्राह्मणउवाच ॥ गच्छाहल्यापतेऽसाधोगोत्रारेपाकशासन ॥ नप्रार्थयेपशुपतेरन्यंदेवांतरंस्फुटम् ॥४३॥ इतितस्यवचःश्रुत्वाक्रोधसंरक्तलोचनः ॥ उद्यम्यकुलिशंघोरंभीषयामासबालकम् ॥४४॥ सदृष्ट्वाबालकोवज्रंविद्युज्ज्वालाशताकुलम् ॥ स्मरन्नारदवाक्यंचमुमूर्च्छभयविह्वलः ॥ ४५ ॥ अथगौरीपतिःशंभुराविरासीत्तमोनुदः ॥ उत्तिष्ठोत्तिष्ठभद्रंतेस्पर्शैःसंजीवयन्निव ॥ ४६ ॥ उन्मील्यनेत्रकमलेसुप्तेइवदिवाक्षये ॥ अपश्यदग्रेचोत्थायशंभुमर्कशताधिकम् ॥ ४७ ॥ भाललोचनमालोक्यकंठेकालंवृषध्वजम् ॥ वामांगसंनिविष्टाद्रितनयंचंद्रशेखरम् ॥ ४८ ॥ कपर्देनविराजंतंत्रिशूलाजगवायुधम् ॥ स्फुरत्कर्पूरगौरांगंपरिणद्धगजाजिनम् ॥४९॥ परिज्ञायमहादेवंगुरुवाक्यतआगमात् ॥ हर्षबाष्पाकुलःसन्नकंठोरोमांचकंचुकः ॥ १५० ॥ क्षणंस्थगितवत्तस्थौचित्रकृत्रिमपुत्रकः ॥ यथातथासुसंपन्नोविस्मृत्यात्मानमेवच ॥ ५१ ॥ नस्तोतुंननमस्कर्तुंकिंचिद्विज्ञप्तुमेवच ॥ यदासनशशाकालंतदास्मित्वाऽऽहशंकरः ॥ ५२ ॥ ईश्वरउवाच ॥ शिशोगृहपतेशक्राद्वज्रोद्यतपरादहो ॥ ज्ञातोभीतोसिमाभैषीर्जिज्ञासातेकृतामया ॥ ५३ ॥

क्यपश्चान्महादेवंपरिज्ञायक्षणंस्थगितवन्निश्चलवत्तस्थावितिचतुर्थेनान्वयः ॥ कीदृशंरूपंतदाह ॥ भालइतिसार्धेन ॥४८॥ कपर्देनजटाजटेन ॥ आजगवंपिनाकः॥परिणद्धंपरिहितंगजाजिनंगजासुरस्यचर्मयेनसतथातम् ॥ ४९ ॥ कथंभूतः ॥ आनंदवारिव्याप्तःअतएवसन्नकंठोनिरुद्धगलः ॥ रोम्णामश्चउद्गमःकंचुकोयस्यसः ॥ १५० ॥ चित्रेणरंगद्रव्येणाचित्रेभित्त्यादौवाकृत्रिमोलिखितःपुत्रकोयथातथासंपन्नोवृत्तःसन्इतिपादद्वयस्यपूर्वेणाग्रिमेणवान्वयः ॥ ५१ ॥ यदात्मानंविस्मृत्यचकारात्परंचाकिमपिकर्तुमलंनशशाकैवतदास्मित्वाईषद्धास्यंकृत्वाशंकरआहेत्यर्थः ॥ ५२ ॥ ५३ ॥

---

१ पुस्तकांतरे संजीवयन्निवेत्येवार्थेइवशब्दइतिपाठोदृश्यते । अयमेवयुक्तइतिभाति ।

CC-0. In Public Domain. Digitization by eGangotri

नांतकोपिनयमोपि ॥ चपलाऽपिचेतिक्वचित्पाठः ॥ ५४ ॥ ५५ ॥ दिगीशोर्दिगीश्वरयोः ॥ दिगीशस्त्वंभववा ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ वीरेश्वरस्येति ॥ वीरेश्वरस्यपूर्वेणपूर्वस्यां दिशियागंगातस्याःपश्चिमेतटेऽग्नीश्वरंसमाराध्येत्यन्वयः ॥ अतोवीरेश्वरस्यपूर्वस्यांदिशिकथमग्नीश्वरइतिनात्रकथंतेति ॥ १६० ॥ ६१ ॥ ६२ ॥ १६३ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायामेकादशोध्यायः ॥ ११ ॥ ॥ छ ॥ द्वादशेवर्ण्यतेलोकोनिर्ऋतेश्चमहर्धिमान् ॥ वरुणस्यतथाचैवलोकोऽत्यन्तमनोरमः ॥ १ ॥ पूर्वाध्यायांते इत्थमग्निस्वरूपंतेशिवशर्मन्प्रवर्णितम् ॥ किमन्यच्छ्रोतुकामोसिकथयावस्तदीरयेत्युक्तंतत्रपृच्छाति ॥ नैर्ऋतेति ॥ हेपुरुषोत्तममौनैर्ऋतादीन्लोकान्क्रमात्आख्यातंकथयतमित्यन्वयः ॥ पुरुषोत्तमत्वेहेतुमाह ॥ पुरुषोत्तमस्यचरणकमलरेणु

ममभक्तस्यनोशक्रोनवज्रंनांतकोपिवा ॥ प्रभवेदिंद्ररूपेणमयैवत्वंहिभाषितः ॥ ५४ ॥ वरंददामितेभद्रत्वमग्निपदभाग्भव ॥ सर्वेषामेवदेवानांवदनंत्वंभविष्यसि ॥५५॥ सर्वेषामेवभूतानांत्वमग्नेंऽतश्चरोभव ॥ धर्मराजेंद्रयोर्मध्येदिगीशोराज्यमाप्नुहि ॥५६॥ त्वयेदंस्थापितंलिंगंतवनाम्नाभविष्यति ॥ अग्नीश्वरइतिख्यातंसर्वतेजोभिवृंहणम् ॥ ५७ ॥ अग्नीश्वरस्यभक्तानांनभयंविद्युदग्निजम् ॥ अग्निमांद्यभयंनैवनाकालमरणंक्वचित् ॥ ५८ ॥ अग्नीश्वरंसमभ्यर्च्यकाश्यांसर्वसमृद्धिदम् ॥ अन्यत्रापिमृतोदैवादग्निलोकेमहीयते ॥५९॥ ततःकाशींपुनःप्राप्यकल्पांतेमोक्षमाप्नुयात् ॥ वीरेश्वरस्यपूर्वेणगंगायाःपश्चिमेतटे ॥ १६० ॥ अग्नीश्वरंसमाराध्यवह्निलोकेवसेन्नरः ॥ पितृभ्यांस्वजनैःसार्धंमित्रबंधुसमायुतः ॥ ६१ ॥ विमानमिदमारुह्यप्रयाह्येवदिशःपते ॥ इत्युक्तानीयतद्बंधून्पित्रोश्चपरिपश्यतोः ॥ दिक्पतित्वेऽभिषिच्याग्निंतत्रलिंगेशिवोविशत् ॥ ६२ ॥ गणावूचतुः ॥ ॥ इत्थमग्निस्वरूपंतेशिवशर्मन्प्रवर्णितम् ॥ किमन्यच्छ्रोतुकामोसिकथयावस्तदीरय ॥ १६३ ॥ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडेपूर्वार्द्धेवह्निलोकवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥छ॥ शिवशर्मोवाच ॥ नैर्ऋतादीन्क्रमाल्लोकानाख्यातंपुरुषोत्तमौ ॥ पुरुषोत्तमपादाब्जपरागोद्धूसरालकौ ॥ १ ॥ गणावूचतुः ॥ आकर्णयमहाभागसंयमिन्याःपुरींपराम् ॥ दिक्पतेर्निर्ऋतस्यासौपुण्यापुण्यजनोषिता ॥ २ ॥ राक्षसानिवसंत्यस्यामपरद्रोहिणःसदा ॥ जातिमात्रेणरक्षांसिवृत्तैःपुण्यजनाइमे ॥ ३ ॥ स्मृत्युक्तश्रुतिवर्त्मानोजातवर्णावरेष्वपि ॥ नाद्रियंतेऽन्नपानानामस्मृत्युक्तंकदाचन ॥ ४ ॥ परदारपरद्रव्यपरद्रोहपराङ्मुखाः ॥ जाताजातौनिकृष्टायामपिपुण्यानुसारिणः ॥ ५ ॥ द्विजातिभक्त्युत्पन्नार्थैरात्मानंपोषयंतिये ॥ सदासंकुचितांगाश्चद्विजसंभाषणादिषु ॥ ६ ॥

नोद्धूलिताआविलाश्चूर्णकुंतलाययोस्ताविति ॥ १ ॥ परामनंतरांपश्चिमदिग्भवांवा ॥ निर्ऋतस्यनिर्ऋतेः ॥ २ ॥ वृत्तैःसदाचारैः पुण्यजनाधार्मिकाः ॥ ३ ॥:वर्णाश्चतेअवराश्चेतितेष्वप्यधमवर्णेष्वपीत्यर्थः ॥ अस्मृत्युक्तंस्मृतिशास्त्रानुक्तमित्यर्थः ॥ भोजनपानामितिशेषः ॥ ४ ॥ ५ ॥ द्विजातयोब्राह्मणक्षत्रियवैश्यास्तेषांभक्त्याशुश्रूषयाउत्पन्नायेऽर्थास्तैरात्मानंयेपोषयंतितेऽत्रपुरोत्तमेवसंतीतिपंचमेनान्वयः ॥ तथाग्रेवक्ष्यमाणानामपितेनैवान्वयः ॥ ६ ॥

१ कथमित्यव्ययात्तल् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगोमान्य ॥ ७ ॥ ८ ॥ दमादयोऽस्तेयादयश्चसर्वेषांप्राणिमात्राणांमेतेधर्महेतवः ॥ पुण्यकारणानीत्यर्थः ॥ तन्मध्येशौचंद्विविधबाह्यमाभ्यंतरंच ॥ बाह्यंमृज्जलाभ्याम् ॥ अंतर्भावशुद्ध्या ॥ अस्तेयंकायवाङ्मनोभिःपरद्रव्याग्रहणम् ॥ अहिंसाकायवाङ्मनोभिःप्राणिमात्रस्यापीडा ॥ अन्यत्पूर्वंव्याख्यातम् ॥ ९ ॥ १० ॥ म्लेच्छाइति ॥ काशींविहायसुतीर्थेषुयेमृतास्तेम्लेच्छाअपि अत्रनैर्ऋतेलोकेभोगिनःस्युः ॥ आत्मघातेनापिसुतीर्थेषुमरणंभवतितंवारयति ॥ नात्मघातकाइति ॥ काशींविहायेत्युक्तंतत्रहेतुगर्भविशेषणमाह ॥ निर्वाणविश्राणामिति ॥ निर्वाणंकैवल्यंविश्राणं फलंयस्याः ॥ निर्वाणंवाविश्राणयतिददातीतिसातथाताम् ॥ तन्मरणस्यमोक्षहेतुत्वादितिभावः ॥ ११ ॥ नात्मघातकाइत्येतत्प्रपंचयति ॥ अंधंतमोविशेयुस्तइत्यादिना ॥ १२ ॥ उपसंहरति ॥ आत्मघातइति ॥ विपश्चिताइत्यनेनअविपश्चितांक्षत्रियादीनांप्रयागादावात्मघातोऽनुमन्यते ॥ तथाचोक्तंभगवतायुधिष्ठिरंप्रति ॥ नलोकवचनात्तातनवेदवचनादपि ॥ मतिरुत्क्रमणीयातेप्रयागमरणं

आहूतावस्त्रवदनावदंतिद्विजसंनिधौ ॥ जयजीवभगोनाथस्वामिन्नितिहिवादिनः ॥ ७ ॥ तीर्थस्नानपरानित्यंनित्यंदेवपरायणाः ॥ द्विजेषुनित्यंप्रणताः स्वनामाख्यानपूर्वकम् ॥ ८ ॥ दमदानदयाक्षांतिशौचेंद्रियविनिग्रहाः ॥ अस्तेयसत्याहिंसाश्चसर्वेषांधर्महेतवः ॥ ९ ॥ आवश्यषुसदोद्युक्तायेजाता यत्रकुत्रचित् ॥ सर्वभोगसमृद्धास्तेवसंत्यत्रपुरोत्तमे ॥ १० ॥ म्लेच्छाअपिसुतीर्थेषुयेमृतानात्मघातकाः ॥ विहायकाशींनिर्वाणविश्राणांतेऽत्रभोगिनः ॥ ॥ ११ ॥ अंधंतमोविशेयुस्तेयेचैवात्महनोजनाः ॥ भुक्त्वानिरयसाहस्रंतेचस्युर्ग्रामसूकराः ॥ १२ ॥ आत्मघातोनकर्तव्यस्तस्मात्क्वापिविपश्चिता ॥ इहापिचपरत्रापिनशुभान्यात्मघातिनाम् ॥ १३ ॥ यथेष्टमरणंकेचिदाहुस्तत्त्वावबोधकाः ॥ प्रयागेसर्वतीर्थानांराज्ञिसर्वाभिलाषदे ॥ १४ ॥ अंत्यजाअ पियेकेचिद्दयाधर्मानुसारिणः ॥ परोपकृतिनिष्ठास्तेवसंत्यत्रतुसत्तमाः ॥ १५ ॥ अस्यस्वरूपंवक्ष्यावोदिक्पतेःक्षणतःशृणु ॥ मध्येविंध्याटवि पुरापक्कणस्थजनाग्रणीः ॥ १६ ॥ पल्लीपतिरभूदुग्रःपिंगाक्षइतिविश्रुतः ॥ निर्विंध्यायास्तटेशूरःक्रूरकर्मपराङ्मुखः ॥ १७ ॥ घातयेद्दूरसंस्थो पियःपांथपरिपंथिनः ॥ व्याघ्रादीन्दुष्टसत्त्वांश्चसहिनस्तिप्रयत्नतः ॥ १८ ॥ जीवेन्मृगयुधर्मेणतत्रापिकरुणापरः ॥ नविश्वस्तान्पक्षिमृगा न्सुप्तान्नव्यवायिनः ॥ १९ ॥

प्रति ॥ ब्रह्मज्ञानेनमुच्यंतेप्रयागमरणेनवा ॥ अथवास्नानमात्रेणगोमत्यांकृष्णसंनिधाविति ॥ विपक्षेबाधकमाह ॥ इहापिचेति ॥ १३ ॥ तदेवाह ॥ यथेष्टमरणमिति ॥ यद्वा क्वापीत्येतत्संको चयति ॥ यथेष्टमरणमिति ॥ १४ ॥ १५ ॥ अस्यदिक्पतेरितिसंबंधः ॥ मध्येविंध्याटवीति ॥ पुरापूर्वंमध्येविंध्याटविविंध्यसंबंधिन्याअटव्यामध्ये पिंगाक्षःपिंगेअक्षिणीयस्यसपिंगाक्ष इतिविश्रुतोविख्यातोऽभूत्आसीदित्यन्वयः ॥ कीदृक् ॥ पक्कणस्थजनाग्रणीः पक्कणःशबरालयस्तत्स्थजनानांश्रेष्ठः ॥ १६ ॥ पल्लीपतिःशबरालयानांपतिश्च ॥ उग्रस्तीव्रपराक्रमः ॥ तंविशिनष्टि ॥ निर्विंध्यायाइत्यादिसार्धपंचश्लोकैः ॥ निर्विंध्याकाचिन्नदी ॥ १७ ॥ पांथपरिपंथिनःपथिकपरिरोधकान् ॥ १८ ॥ करुणापरोदयापरः ॥ दयापरत्वमेवदर्शयति ॥ नविश्वस्तानिति ॥ व्यवायिनो

ग्राम्यधर्मवतः ॥ १९ ॥ अंतर्वत्नित्वंगुर्विणीत्वंलक्षणंचिह्नंयेषांतान्नघातयतीत्यन्वयः ॥ ह्रस्वश्छांदसः ॥ २० ॥ उपानद्राहितेपथिकेउपानद्ःपादत्राणदः ॥ २१ ॥ कांतारेदुर्गमवर्त्मनि ॥ २२ ॥ आविंध्याटविविंध्याटवीपर्यंतम् ॥२३॥ आशीर्वादयंतिआशिषःप्रयच्छंति ॥२४॥ नगरायितानगरवज्जाताचेत्यर्थः॥ अध्वनीनेऽध्वगामिनीत्यर्थः॥ अध्वनीनइतिपाठेशौल्किकइत्यर्थः ॥ यद्वा समर्थोऽध्वनीनोऽध्वगोदुर्बलानध्वगान्नबाधतइत्यर्थः॥२५॥तत्पितृव्येणपिंगाक्षपितृभ्रात्रातारांक्षेण ॥ तारेउच्चेअक्षिणीयस्येतिव्युत्पत्तेः ॥ सार्थःसमूहः ॥ सार्थोऽर्थसहितः ॥२६॥ लुब्धकइति॥ तन्निधनोद्यत इत्यत्रतच्छब्दःकार्पटिकविषयःसार्थविषयोवा॥२७॥ निकषाशब्दःसमीपविषयः॥तन्मार्गेनिकषातन्मार्गस्यसमीपइत्यर्थः॥अध्युषितःउवास॥२८॥तत्रकारणमाह॥परप्राणेति॥एतद्विश्वमितिसंबंधः ॥

नतोयगृध्नून्नशिशून्नांतर्वत्नित्वलक्षणान् ॥ सघातयतिधर्मज्ञोजातिधर्मपराङ्मुखः ॥ २० ॥ श्रमातुरेभ्यःपांथेभ्यःसविश्रामंप्रयच्छति ॥ हरेत्क्षुधां क्षुधार्तानामुपानदोऽनुपानहे ॥ २१ ॥ मृगत्त्वचोतिमृदुलाविवस्त्रेभ्यातिसर्जति ॥ अनुव्रजतिकांतारेप्रांतरेपथिकान्पथि ॥ २२ ॥ नजिघृक्षतितेभ्योर्थ मभयंचेतियच्छति ॥ आविंध्याटविमेनामग्राह्यंदुष्टभयापहम् ॥ २३ ॥ नित्यंकार्पटिकान्सर्वान्सपुत्रेणप्रपश्यति ॥ तेपिचप्रतितीर्थंहितमाशीर्वादयं तिवै ॥२४॥ इतितिष्ठतिपिंगाक्षेसाटवीनगरायिता ॥ अध्वनीनेऽध्वगान्कोपिनरुणद्धिससाध्वसः ॥२५॥ कदाचित्तत्पितृव्येणसमीपग्रामवासिना ॥ श्रुतःकार्पटिकानांहिसार्थःसार्थोमहास्वनः ॥ २६ ॥ लुब्धकस्तद्धनेलुब्धःक्षुद्रस्तन्निधनोद्यतः ॥ सरुरोधतमध्वानमग्रेगत्वाऽतिगूढवत् ॥ २७ ॥ तदा युष्यस्यशेषेणपिंगाक्षोमृगयांगतः ॥ तस्मिन्नरण्येतन्मार्गेनिकषाध्युषितोनिशि ॥ २८ ॥ परप्राणद्रुहांपुंसांनसिद्ध्येयुर्मनोरथाः ॥ विश्वंकुशलितेनैत द्विश्वेशपरिरक्षितम् ॥ २९ ॥ नचिंतयेदनिष्टानितस्मात्कृष्टिःकदाचन॥ विधिदृष्टंयतोभाविकलुषंभाविकेवलम् ॥३०॥ तस्मादात्मसुखंप्रेप्सुरिष्टानिष्टंन चिंतयेत् ॥ चिंतयेच्चेत्तदाचिंत्योमोक्षोपायोनचेतरः ॥३१॥ व्युष्टायामथयामिन्यामभूत्कोलाहलोमहान् ॥ घातयध्वंपातयध्वंनग्रयध्वंद्रुतंभटाः ॥३२॥ मामारयध्वंत्रायध्वंभटाःकार्पटिकावयम् ॥ अनायासंलुंठयध्वंनयध्वंचयदस्तिनः ॥ ३३ ॥ वयंपांथाअनाथाःस्मोविश्वनाथपरायणाः ॥ सनाथास्ते नदूरंसनाथतांपथिकोऽपरः ॥ ३४ ॥ वयंपिंगाक्षविश्वासादस्मिन्मार्गेऽकुतोभयाः ॥ यातायातंसदाकुर्मःसचदूरइतोवनात् ॥३५॥ इतिश्रुत्वाऽथपिंगाक्षो भटःकार्पटिकेरितम् ॥ दूरान्माभैष्टमाभैष्टब्रुवन्नितिसमागतः ॥ ३६ ॥ तत्कर्मसूत्रैराकृष्टोभिल्लःकार्पटिकप्रियः ॥ तूर्णंतदायुष्यमिवतत्रोपस्थितवा न्क्षणात् ॥ ३७ ॥ कोयंकोयंदुराचारःपिंगाक्षेमयिजीवति ॥ उल्लुलुंठयिषुःपांथान्प्राणलिंगसमान्मम ॥ ३८ ॥

यस्माद्विश्वेशरक्षितंजगत्तस्मात्कुशलीत्यन्वयः॥२९॥ कृष्टिर्विद्वान्॥ केवलंकलुषंभाव्यनिष्टचिन्तनेइतिशेषः॥३०॥फलितमाह ॥ तस्मादिति॥३१॥व्युष्टायांप्रभातायाम्॥कोलाहलमाह ॥ घातयध्वमि तिसार्धत्रिभिः ॥३२॥३३॥ तत्रतेनविश्वनाथेनवयंसनाथाःसतुदूरम् ॥ नाथतांस्वत्राणार्थंयाचतामस्माकंकोऽपरोनाथइत्यर्थः ॥ अयंभावः ॥ यद्यपिविश्वनाथःसर्वगतस्तथाप्यस्मदुरदृष्टवशाद्दूरस्थित इवभातीत्यर्थः ॥३४॥ किंचवयमिति ॥३५॥ ३६ ॥ भिल्लःपिंगाक्षः ॥ आयुरेवायुष्यम् ॥३७॥ उत्उन्मुच्यअथवाउन्मूल्यमारयित्वेतियावत् ॥ लुलुंठयिषुःलुंठितुमिच्छुः ॥ प्राणलिंगसमान्जंग

मैर्धार्यमाणशिवलिंगतुल्यान् ॥३८॥३९॥ कुलपांसनःकुलदूषणः ॥ कुलपांसुलइतिक्वचित्तत्रापिसएवार्थः ॥ इतिचिरंमयाचिंतितंध्यातंअतोद्यामुंघातयिष्यामीत्यर्थः ॥४०॥ क्रुधाक्रोधेन ॥४१॥ तान्कार्पटिकान् ॥ सपिंगाक्षः ॥ स्वावसथांतिकंस्वगृहसमीपम् ॥४२॥ आछिन्नमिति॥यत्यद्यहंईश्वरःसमर्थोऽभविष्यंभूतःस्यांतत्तदाशरैराच्छिन्नंधनुर्बाणंधनुश्चबाणाश्चधनुर्बाणम् ॥ द्वंद्वैकवद्भावः॥ हिशब्दःपादपूरणे ॥ यथास्यात्तथाएतान्असूदयिष्यंसूदितवान्स्यामित्यर्थः ॥ यद्वा हियस्मादेतैर्ममशरैर्धनुर्बाणंतथासंनहनंछिन्नंअतोयद्यहमीश्वरोभूतःस्यांएतान्निषूदितवान्स्यामित्यर्थः ॥ ४३ ॥ इत्यभिलष्यन्अभिलषन् ॥ दैवादिकस्यवारूपम् ॥ सपिंगाक्षःपरार्थतःपरेषांनिमित्तंप्राणानत्याक्षीत्त्यक्तवानित्यर्थः ॥ तत्पल्लींतस्यपिंगाक्षस्यपल्लीमालयंपक्कणमितियावत् ॥ गतसाध्वसाविगत त्रासाः ॥ ४४ ॥ यामतिरिति ॥ मरणकालेयामतिर्यादृग्भावःस्यात्तदनुरूपतस्तादृग्भावानुसारेणगम्यतइतिगतिःफलंस्यादितियतोऽतोनैर्ऋत्यांदिशिभवानांनैर्ऋत्यानामीश्वरः ॥ सदिगीश्वरत्वंप्राप्त

इतितद्वाक्यमाकर्ण्यताराक्षस्तत्पितृव्यकः ॥ धनलोभेनपिंगाक्षेपापंपापोऽभ्यचिंतयत् ॥३९॥ कुलधर्मंव्यपास्यैषवर्ततेकुलपांसनः ॥ चिरंचिंतितमद्यामुं घातयिष्याम्यसंशयम् ॥ ४० ॥ विचार्येतिसदुष्टात्माभृत्यानाज्ञापयत्क्रुधा ॥ आदावेनंघातयंतुततःकार्पटिकानिमान् ॥ ४१ ॥ ततोऽयुध्यन्दुराचा रास्तेनैकेनचतेऽखिलाः ॥ यथाकथंचित्तानन्यत्सचस्वावसथांतिकम् ॥ ४२ ॥ आच्छिन्नंहिधनुर्बाणंछिन्नंसन्नहनंशरैः ॥ असूदयिष्यमेतांस्तदभविष्यं यदीश्वरः ॥ ४३ ॥ अभिलष्यन्नितिप्राणानत्याक्षीत्सपरार्थतः ॥ तेपिकार्पटिकाःप्रातास्तत्पल्लींगतसाध्वसाः ॥ ४४ ॥ यामतिस्त्वंतकालेस्याद्गति स्तदनुरूपतः ॥ दिगीशत्वमतःप्राप्तोनिर्ऋत्यांनैर्ऋतेश्वरः ॥ ४५ ॥ इत्थमस्यस्वरूपंतेआवाभ्यांसमुदीरितम् ॥ एतस्योत्तरतोलोकोवरुणस्यायमद्भुतः ॥४६॥ कूपवापीतडागानांकर्तारोनिर्मलैर्धनैः ॥ इहलोकेमहीयंतेवारुणेवरुणप्रभाः ॥४७॥ निर्जलेजलदातारःपरसंतापहारिणः ॥ अर्थिभ्योयेप्रयच्छं तिचित्रच्छत्रकमंडलून् ॥४८॥ पानीयशालिकाःकुर्युर्नानोपस्करसंयुताः ॥ दद्युर्धर्मघटांश्चापिसुगंधोदकपूरितान् ॥४९॥ अश्वत्थसेकंयेकुर्युःपथिपाद परोपकाः ॥ विश्रामशालाकर्तारःश्रांतसंतापनोदकाः ॥५०॥ ग्रीष्मोष्महंतिमायूरपिच्छादिरचितान्यपि ॥ चित्राणितालवृंतानिवितरंतितपागमे ॥५१॥

वानित्यर्थः ॥ यलोपआर्षः ॥ अण्प्रत्ययांतरूपंवा ॥ तदुक्तंभगवता ॥ यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरम् ॥ तंतमेवैतिकौंतेयसदातद्भावभावितइति ॥ ४५ ॥ नैर्ऋतलोकमुपसंहरन्वरुणलोकं निर्दिशति ॥ इत्थमिति ॥ ४६ ॥ कूपेति ॥ कूपादीनांकर्ताइहास्मिन्वारुणेलोकेमहीयतेइत्यन्वयः ॥ तत्रकूपोंऽधुः ॥ पुंस्येवांधुःप्रहिःकूपउदपानंतुपुंसिवेत्यमरः ॥ वापीदीर्घिका ॥ वापीतुदीर्घिकेत्यमरः ॥ तडागःपद्माकरः ॥ पद्माकरस्तडागोऽस्त्रीकासारःसरसीसरइत्यमरः ॥ ४७ ॥ निर्जलेनिर्गतंजलंयस्मात्तस्मिन्प्रदेशइतिशेषः ॥ ४८ ॥ पानीयशालिकाःप्रपाः ॥ नानोपस्कराणिविचित्रजलपान भाजनवासार्थलवंगकर्पूरादीनितैःसंयुताःसंयुक्ताः ॥ ४९ ॥ ५० ॥ ग्रीष्मोष्महंति निदाघकालजनिततापहंतितालवृंतानितालादिपत्ररचितव्यजनानीत्यर्थः ॥ धर्मघटान्वितरंतिप्रयच्छंति ॥

---

१ अक्षराधिक्यमार्षम् ।

CC-0. In Public Domain. Digitization by eGangotri

तपागमेग्रीष्मागमे ॥ ग्रीष्मउष्णकालः ॥ निदाघउष्णोपगमउष्णउष्मापगस्तपइत्यमरः ॥ ५१ ॥ तपर्तुषुग्रीष्मर्तुषु ॥ आतृप्तिपानकानितृप्तिपर्यंतंप्रपानकानीत्यर्थः ॥ ५२ ॥ ऐक्षवानइक्षुजन्यान् ॥ ५३ ॥ धारामंडपाःजलयंत्रगृहाः ॥ ५४ ॥ गलंतिकागौडेझराइतिप्रसिद्धाः ॥ तीर्थमार्गावनेजकास्तीर्थमार्गशोधकाःसंमार्जकाइत्यर्थः ॥ ५५ ॥ भयार्तेभ्यउद्यताःपाणयोयेषांतेतथा ॥ लसंतिचक्रीडंतिचेत्यर्थः ॥ ५६ ॥ विपाशयंतिविगतपाशान्कुर्वंतिमोचयंतीत्यर्थः ॥ कंठपाशितान्कंठेषुपाशादिभिर्बद्धानित्यर्थः ॥ पाशपाणेर्वरुणस्य ॥ प्रचेतावरुणःपाशीत्यमरः ॥ अकुतोभयाःनविद्यतेकुतश्चिद्भयंयेषांतेतथा ॥ ५७ ॥ नौकादीत्यादिपदेनउडुपादयोगृह्यंते ॥ अपिःसमुच्चयवाचीभिन्नक्रमे ॥ दुःखार्णवादपीत्यर्थः ॥ ५८ ॥ तोयार्थेतिपाठेतोयानिमित्तसुखासिद्ध्यर्थमित्यर्थः ॥ ५९ ॥ वितर्षयंतिविगततृष्णान्कुर्वंति ॥ सुखसंततिःसुखपरंपरातद्भागिनः ॥ ६० ॥ एकतमोमुख्यतमः ॥ यादसांजलजंतूनाम् ॥ साक्षीसर्वेषुकर्मस्विति ॥ तदुक्तम् ॥

रसवंतिसुगंधीनिहिमवंतितपर्तुषु ॥ विश्राणयंतिवातृप्तिपानकानिप्रयत्नतः ॥ ५२ ॥ इक्षुक्षेत्राणिसंकल्प्यब्राह्मणेभ्योददत्यपि ॥ तथानानाप्रकारांश्चविकारानैक्षवान्बहून् ॥ ५३ ॥ गोरसानांप्रदातारस्तथागोमहिषीप्रदाः ॥ धारामंडपकर्तारश्छायामंडपकारिणः ॥५४॥ देवालयेषुयेदद्युर्बहुधारागलंतिकाः ॥ तीर्थेवाकरहर्तारस्तीर्थमार्गावनेजकाः ॥ ५५ ॥ अभयंयेप्रयच्छंतिभयार्तोद्यतपाणयः ॥ निर्भयावारुणेलोकेतेवसंतिलसंतिच ॥ ५६ ॥ विपाशयंतियेपुण्याद्दुर्वृत्तैःकंठपाशितान् ॥ तेपाशपाणेर्लोकेस्मिन्निवसंत्यकुतोभयाः ॥ ५७ ॥ नौकाद्युपायैर्नद्यादौपांथान्येतारयंत्यपि ॥ तारयंत्यपिदुःखाब्धेस्तत्रनागरिकाद्विज ॥५८॥ घट्टान्पुण्यतटिन्यादेर्बंधयंतिशिलादिभिः ॥ तोयार्थिसुखसिद्ध्यर्थंयेनरास्तेत्रभोगिनः ॥ ५९ ॥ वितर्षयंतियेपुण्यास्तृषिताञ्शीतलैर्जलैः ॥ तेऽत्रवैवारुणेलोकेसुखसंततिभागिनः ॥ ६० ॥ जलाशयानांसर्वेषामयमेकतमःपतिः ॥ प्रचेतायादसांनाथःसाक्षीसर्वेषुकर्मसु ॥ ६१ ॥ अस्योत्पत्तिंशृणुपतेर्वरुणस्यमहात्मनः ॥ आसीन्मुनिरमेयात्माकर्दमस्यप्रजापतेः ॥ ६२॥ शुचिष्मानितिविख्यातस्तनयोविनयोचितः ॥ स्थैर्यमाधुर्यधैर्याद्यैर्गुणैरुपचितोहितः ॥ ६३ ॥ अच्छोदेसरसिस्नातुंसगतोबालकैःसह ॥ जलक्रीडनसंसक्तंशिशुमारोहरच्चतम् ॥६४॥ ततस्तस्मिन्मुनिसुतेहृतेऽत्याहितशंसिभिः ॥ तैःसमागत्यशिशुभिःकथितंतत्पितुःपुरः ॥ ६५ ॥

आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंयमश्च ॥ अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिजनस्यवृत्तमित्यादि ॥ ६१ ॥ अस्यपतेर्लोकपालस्येतिषष्ठ्यौसमानाधिकरणे ॥ अस्यलोकस्यपतेरितिव्याधिकरणेवा ॥ सखेइतिक्वचित् ॥ ६२ ॥ स्थैर्येति ॥ आदौभवाआद्याःस्थैर्यादयोयेषांतैः शांत्यादिभिर्गुणैरित्यर्थः ॥ उपचितोव्याप्तः ॥ हितोहितकारी ॥ सर्वेषामितिशेषः ॥ हिसइतिक्वचित् ॥ ६३ ॥ अच्छोदेनिर्मलोदकेसरसिपद्माकरे ॥ यद्वा अच्छोदानामग्निष्वात्तानांपितॄणांमानसीकन्यातस्याउत्थितमच्छोदम् ॥ तथाचपितृकल्पेहरिवंशे ॥ एतेषांमानसीकन्याअच्छोदानामविश्रुता ॥ अच्छोदंनामतद्दिव्यंसरोयस्याःसमुत्थितमिति ॥ शिशुंमारयतीतिशिशुमारोजलचरविशेषः ॥ तंशुचिष्मंतम् ॥ ६४ ॥ ततस्तदनंतरंतस्मिन्सरसिमुनिसुतेत्दृतेसत्यर्थाच्छिशुमारेणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिशेषइतिवा ॥ तैःशिशुभिःसमागम्यतत्पितुस्तस्यशुचिष्मतःपितुःकर्दमस्यपुरस्तद्धरणमितिवा ॥ कथंभूतैः ॥ अत्याहितशंसिभिः ॥ अतिशयेनाहितं अत्याहितमत्यनिष्टमित्यर्थः॥तच्छंसितुंकथितुं शीलंयेषांतैरिति ॥६५॥ श्रुतबालविपत्तेः ॥ श्रुताबालविपत्तिर्येनसतथातस्यमनोऽतःकरणम् ॥ हराद्विश्वेश्वरात् ॥६६॥ अधिकमिति ॥ अधिकंयथास्यात्तथाशीलयामासाचिंतयामासेत्यर्थः ॥ तेषां मध्येइत्यतःप्राक्तनानांद्वितीयातानांपदानांपश्यन्शीलयामासेत्यनेनैवान्वयः ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ईत्थंसंसक्तानासक्तान्बहुबालकान्मुनिकुमारांश्चपश्यन्नित्यन्वयः ॥ इत्थमि त्युक्तंप्रकारमभिनयेनदर्शयति ॥ करेति ॥ कराएवयंत्राणिजलनिषेकपात्राणितैर्विनिर्मुक्तास्त्यक्तायास्तोयधारास्ताभिरभिषेचनैरभिषेकैरित्यर्थः ॥ ७१ ॥ करैस्ताडितानियानिपानीया

हरार्चनोपविष्टस्यसमाधौनिश्चलात्मनः ॥ श्रुतबालविपत्तेश्चचचालनमनोहरात् ॥ ६६ ॥ अधिकंशीलयामाससससर्वज्ञंत्रिलोचनम् ॥ पश्यञ्शंभोः समीपेसभुवनानिचतुर्दश ॥ ६७ ॥ नानाभूतानिभूतानिब्रह्मांडांतर्गतानिच ॥ चंद्रसूर्यर्क्षताराश्चपर्वतान्सरितोद्रुमान् ॥ ६८ ॥ समुद्रानंतरीया णिह्यरण्यानीस्सरांसिच ॥ नानादेवनिकायांश्चबह्वीर्दिविषदांपुरीः ॥ ६९ ॥ वापीकूपतडागानिकुल्याः पुष्करिणीर्बहु ॥ एकस्मिन्कापिसरसिजलक्री डापरायणान् ॥ ७० ॥ बहून्मुनिकुमारांश्चमज्जनोन्मज्जनादिभिः ॥ करयंत्रविनिर्मुक्ततोयधाराभिषेचनैः ॥ ७१ ॥ करताडितपानीयशब्ददिङ्मुखना दिभिः ॥ जलखेलनकैरित्थंसंसक्तान्बहुबालकान् ॥७२॥ तेषांमध्येददर्शाथसमाधिस्थःसकर्दमः ॥ स्वंशिशुंशिशुमारेणनीयमानंसुविह्वलम् ॥ ७३ ॥ कयाचिज्जलदेव्याथतस्माच्चक्रूरयादसः ॥ प्रसह्यनीत्वोदधयेदृष्टवांस्तंसमर्पितम् ॥ ७४ ॥ निर्भर्त्स्यसरितांनाथंकेनचिद्रुद्ररूपिणा ॥ त्रिशूलपाणिने त्युक्तंक्रोधताम्राननेनच ॥ ७५ ॥ कुतोजलानामधिपशिवभक्तस्यबालकः ॥ प्रजापतेःकर्दमस्यमहाभागस्यधीमतः ॥ ७६ ॥ अज्ञात्वाशिवसामर्थ्यं भवताचिरमासितः ॥ भयत्रस्तेनतद्वाक्यश्रवणात्तमुदन्वता ॥७७॥ बालंरत्नैरलंकृत्यबद्धातंशिशुमारकम् ॥ समर्पितंसमानीयशंभुपादाब्जसंनिधौ ॥ ॥ ७८ ॥ नत्वाविज्ञापयत्तंचनापराध्याम्यहंविभो ॥ अनाथनाथविश्वेशभक्तापत्तिविनाशन ॥ ७९ ॥ भक्तकल्पतरोशंभोऽनेनायंदुष्टयादसा ॥ अना यिनमयानाथभवद्भक्तजनार्भकः ॥ ८० ॥

निजलानितैर्येशब्दास्तैर्दिङ्मुखनादिभिर्जलखेलनकैर्जलक्रीडनकैश्चेति ॥ ७२ ॥ तेषामिति ॥ अथानंतरं तेषांबालकानांमध्येशिशुमारेणस्वंशिशुंनीयमानंददर्श ॥ ७३ ॥ तस्मा च्छिशुमारात्कयाचिज्जलदेवतयाप्रसह्यहठान्नीत्वातंशिशुमुदधयेसमुद्रायसमर्पितमितिचदृष्टवानित्यन्वयः ॥ ७४ ॥ इत्युक्तंवक्ष्यमाणम् ॥ ७५ ॥ ७६ ॥ आसितोवासितः ॥ चिरकालम भिव्याप्यबद्धइतिवा ॥ भयेति ॥ उदन्वतासमुद्रेणतस्यरुद्ररूपिणोवाक्यश्रवणात्तंबालंरत्नैरलंकृत्यशंभोःपादाब्जसन्निधौसमर्पितमित्यन्वयः ॥ नपुंसकत्वंछांदसम् ॥ समर्पितमितिभावेवा निष्ठा ॥ पश्यन्नितिवान्वयः ॥ ७७ ॥ ७८ ॥ तंशंभुंनत्वाविज्ञापयद्व्यज्ञापयत् ॥ अडभावस्त्वार्षः ॥ विज्ञापनमाह ॥ नापराध्यामीति ॥ आपत्तिरापत् ॥ ७९ ॥ भोशंभो अनेनदुष्टयादसा

१ इदंपदत्रयमग्रिमश्लोकस्थम् ।

CC-0. In Public Domain. Digitization by eGangotri

अयंबालोऽनायिआनीतोनोमया ॥ मयानानीतइत्यर्थः ॥ हेनाथहेभव ॥ भवस्यतवभक्तजनार्भकइतिवा ॥ ८० ॥ तेनप्रसिद्धेनगणेन ॥ तद्यादः ॥ तंजलजंतुंशिशुमाराख्यम् ॥ ८१ ॥ गृहाणेतिसार्धद्वयंवाक्यम्॥पार्षदेशंकरस्याज्ञयाशुचिष्मंतंप्रतिहेवत्सस्वभवनंयाहिइतिब्रुवतिसतितथाकर्दमंप्रतिगृहाणेमंस्वंतनयमितिचब्रुवतिसतिकर्दमःसमाधिसमयेइतिपूर्वोक्तंशृण्वन्प्रणिधानमेकाग्रतां समाधिंविसृज्यनेत्रेउन्मील्यविकचय्ययावत्संपश्यतेसंपश्यतिपुरतःतावत्पार्श्वेशिशुंसमवैक्षतदृष्टवानित्यर्थः ॥ अलंकृतेकर्णिकेकर्णौयस्यतम् ॥ ८२ ॥ ८३ ॥ ८४ ॥ काकपक्षश्चूडाकरणात्प्राक्केशः

गणेनतेनविज्ञायशंभोरथमनोगतम् ॥ पाशेनबद्धातद्यादः शिशुहस्तेसमर्पितम् ॥ ८१ ॥ गृहाणेमंस्वतनयंपार्षदेशंकराज्ञया ॥ याहिस्वभवनंवत्सब्रु वतीतिसकर्दमः ॥ ८२॥ समाधिसमयेसर्वमितिशृण्वन्नुदारधीः॥उन्मील्यनयनेयावत्प्रणिधानंविसृज्यच ॥८३॥ संपश्यतेशिशुंतावत्पुरतःसमवैक्षत ॥ गृहीतशिशुमारंचपार्श्वेऽलंकृतकर्णिकम् ॥ ८४ ॥ तोयार्द्रकाकपक्षाग्रंकषायनयनांचलम् ॥ किंचिद्विरूक्षंत्वक्क्षोभंसंभ्रमापन्नमानसम् ॥ ८५ ॥ कृतप्रणाममालिंग्यजिघ्रंस्तन्मुखपंकजम् ॥ पुनर्जातमिवामंस्तपश्यंश्चापिमुहुर्मुहुः ॥ ८६ ॥ शतानिपंचवर्षाणिप्रणिधानस्थितस्यहि ॥ कर्दमस्यव्यती तानिशंभुमर्चयतस्तदा ॥ ८७ ॥ कर्दमोपिचतत्कालमज्ञासीत्क्षणसंगतम् ॥ यतोनप्रभवेत्कालोमहाकालस्यसंनिधौ ॥ ८८ ॥ ततस्तंतनयःपृष्ट्वा पितरंप्रणिपत्यच ॥ जगामतूर्णंतपसेश्रीमद्वाराणसींपुरीम् ॥ ८९ ॥ तत्रतप्त्वातपोघोरंलिंगंसंस्थाप्यशांभवम् ॥ पंचवर्षसहस्राणिस्थितःपाषाणनि श्चलः ॥ ९० ॥ आविरासीन्महादेवस्तुष्टस्तत्तपसाततः ॥ उवाचकार्दमेब्रूहिकिंददामिवरोत्तमम् ॥ ९१ ॥ कार्दमिरुवाच ॥ ॥ यदिनाथप्रसन्नोसिभक्ता नामनुकंपक ॥ सर्वासामाधिपत्यंमेदेह्यपांयादसामपि ॥ ९२ ॥ इतिश्रुत्वामहेशानःसर्वंचिंतितदःप्रभुः ॥ अभ्यषिंचततंतत्रवारुणेपरमेपदे ॥ ९३ ॥ रत्नानामब्धिजातानामब्धीनांसरितामपि ॥ सरसांपल्वलानांचवाप्यंबुस्रोतसांपुनः ॥ ९४ ॥ जलाशयानांसर्वेषांप्रतीच्याश्चापिवैदिशः ॥ अधीश्वरः पाशपाणिर्भवसर्वामरप्रियः ॥ ९५ ॥

शिखंडकइत्यर्थः ॥ काकपक्षःशिखण्डकइत्यमरः ॥ तोयेनार्द्रंकाकपक्षस्याग्रंयस्यतम् ॥ कषायनयनांचलंकषायंकषाययुक्तंनयनांचलंनयनमेवअंचलंवस्त्रंयस्य ॥ यद्वा कषाययुक्तंनयनयोरं चलंप्रांतोयस्यतम् ॥ किंचिद्यथास्यात्तथाविरूक्षंअस्निग्धमित्यर्थः ॥ त्वक्क्षोभंत्वचिक्षोभोयस्यतम् ॥ ८५ ॥ अमंस्तामन्यत ॥ ८६ ॥ ८७ ॥ क्षणसंगतंक्षणमात्रंसंगतंइत्यज्ञासीज्ज्ञातवानित्यर्थः ॥ तत्रहेतुः ॥ यतइति ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ सरसांपद्माकराणाम् ॥ पल्वलानामल्पसरसाम् ॥ वाप्यंबुस्रोतसांवाप्यंबूनांस्रोतसांचेत्यर्थः ॥ ९४ ॥ जलाशयानांजलाधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राणाम् ॥ जलाशयोजलाधारइत्यमरः ॥ प्रतीच्याःपश्चिमायाः ॥ प्राच्यवाचीप्रतीच्यस्ताःपूर्वदक्षिणपश्चिमाइत्यमरः ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ तृषस्तृष्णायाः ॥ ९९ ॥ १०० ॥ वरुणोपीति ॥ यद्यपिद्वादशादित्यानांमध्येवरुणएकआदित्यःकश्यपाददित्यामुत्पन्नइतिप्रसिद्धस्तथापिकल्पभेदाभिप्रायेणायमितिज्ञातव्यम् ॥ १ ॥ दुरपायैरपमृत्युभिः ॥ १०२ ॥ ॥ इति श्रीरामानंदकृतायांकाशीखंडटीकायांद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ त्रयोदशेजगत्प्राणगुह्यकेश्वरयोःपुरे ॥ गंधवत्यलकाख्येवैवर्ण्येतेसुमनोहरे ॥ १ ॥ क्रमप्राप्तांवायोःपुरींवर्णयतः ॥ इमामिति ॥ १ ॥ २ ॥ कश्यपएवकाश्यपः ॥ दायादःपुत्रः ॥ ३ ॥ ४ ॥ पापकंचुकंपापमेवकंचुकंनिर्मोकम् ॥ ५ ॥ तपसांफलदः ॥ फलमतउपपत्तेरितिब्रह्मसूत्रादित्यर्थः ॥ ज्योतीरूपः

ददामिवरमन्यंचसर्वेषांहितकारकम् ॥ त्वयैतत्स्थापितंलिंगंतवनाम्नाभविष्यति ॥ ९६ ॥ वरुणेशमितिख्यातंवाराणस्यांसुसिद्धिदम् ॥ मणिकर्णेश लिंगस्यनैर्ऋत्यांदिशिसंस्थितम् ॥ ९७ ॥ आराधितंसदापुंसांसर्वजाड्यविनाशकृत् ॥ वरुणेशस्ययेभक्तानतेषामम्भयंक्वचित् ॥ ९८ ॥ नसंतापभयं तेषांनापायमरणंक्वचित् ॥ जलोदरभयंनैवनभयंवैतृषःक्वचित् ॥ ९९ ॥ नीरसान्यन्नपानानिवरुणेश्वरसंस्मृतेः ॥ सरसानिभविष्यंतिनात्रकार्या विचारणा ॥ १०० ॥ इत्युक्त्वांतर्दधेशंभुर्वरुणोपिस्वबंधुभिः ॥ इमंलोकमलंकुर्वंस्तदारभ्यस्थितोद्विजः ॥ १ ॥ इदंवरुणलोकस्यस्वरूपंतेनिरूपितम् ॥ यच्छ्रुत्वाननरःक्वापिदुरपायैःप्रबाध्यते ॥ १०२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेनिर्ऋतिवरुणलो कवर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ गणावूचतुः ॥ ॥ इमांगंधवतींपुण्यांपुरींवायोर्विलोकय ॥ वारुण्याउत्तरेभागेमहाभाग्यनिधेद्विज ॥ १ ॥ अस्यांप्रभंजनोनामजगत्प्राणोदिगीश्वरः ॥ आराध्यश्रीमहादेवंदिक्पालत्वमवाप्तवान् ॥ २ ॥ पुराकश्यपदायादःपूतात्मेतिचविश्रुतः ॥ धूर्जटेराजधान्यांसचचारविपुलंतपः ॥ ३ ॥ वाराणस्यांमहाभागोवर्षाणामयुतंशतम् ॥ स्थापयित्वामहालिंगंपावनंपवनेश्वरम् ॥ ४ ॥ यस्यदर्शनमात्रे णपूतात्माजायतेनरः ॥ पापकंचुकमुत्सृज्यसवसेत्पावनेपुरे ॥ ५ ॥ ततस्तस्योग्रतपसातपसांफलदःशिवः ॥ आविरासीत्ततोलिंगाज्ज्योतीरूपोमहे श्वरः ॥ ६ ॥ उवाचचप्रसन्नात्माकरुणामृतसागरः ॥ उत्तिष्ठोत्तिष्ठपूतात्मन्वरंवरयसुव्रत ॥ ७ ॥ अनेनतपसोग्रेणलिंगस्याराधनेनच ॥ तवादेयंनपू तात्मंस्त्रैलोक्येसचराचरे ॥ ८ ॥ ॥ पूतात्मोवाच ॥ देवदेवमहादेवदेवानामभयप्रद ॥ ब्रह्मनारायणेंद्रादिसर्वदेवपदप्रद ॥ ९ ॥ वेदास्त्वांनचविंदंतिकि मात्मकइतिप्रभो ॥ प्राप्ताःशतपथत्वंचनेतिनेतीतिवादिनः ॥ १० ॥ ब्रह्मविष्ण्वोरपिगिरांगोचरोनचवाक्पतेः ॥ प्रमथेशंकथंस्तोतुंमादृशःप्रभवेत्प्रभो ॥ ११ ॥

प्रकाशबहुलोभास्वरइतियावत् ॥ ६ ॥ ७ ॥ ८ ॥ परमात्मत्वेनश्रीविश्वेश्वरंस्तौति ॥ देवदेवेति ॥ देवानांदेवत्वेपिपरिच्छिन्नत्वंजाड्यंवास्यादित्यतआह ॥ महांश्चासौदेवःस्वप्रकाशश्चेतिमहादेवस्तत्संबोधनंहे महादेव ॥ परिपूर्णानुभवरूपत्वेधिभक्ताभयप्रदत्त्वाश्रयप्रदत्वेआह ॥ देवानामित्यादिना ॥ ९ ॥ यतोवाचोनिवर्तंतइतिश्रुतिसिद्धअत्यविषयत्वमाह ॥ वेदास्त्वामिति ॥ किमात्मकः ॥ किंस्वरूपः ॥ शतपथत्वं प्राप्तावाजसनेयिनः ॥ बहुभिर्मार्गैर्यत्स्तंकुर्वंतोपिनवाप्राप्नुवंतीतिध्वनितम् ॥ १० ॥ वेदतद्वेत्तॄणामगोचरत्वेपिब्रह्मविष्ण्वोर्वाचस्पतेश्चगिरांगोचरोभविष्यतिनेत्याह ॥ ब्रह्मविष्ण्वोरिति ॥ अतःहेप्रभोप्रमथेशं

CC-0. In Public Domain. Digitization by eGangotri

प्रमथ्नातिप्रकर्षेणविलोडयतिसंसारेजीवानितिप्रमथमज्ञानंतस्येशंनियंतारंमादृशोऽज्ञःस्तोतुंकथंप्रभवेदित्यर्थः ॥ प्राकृतंव्याख्यानंसर्वत्रस्पष्टम् ॥ ११॥ यद्यप्येवंतथापिहेईशतवभक्तिस्तवस्तुतिकर्मणिमां प्रमिमीतेप्रवर्तयति ॥ प्रमिमीतेशइत्यत्रईलोपश्छांदसः ॥ हेजगन्नाथजगतांस्वामिन्किंकरोमियतोममेंद्रियाणिनवश्यानिनस्वतंत्राणीति ॥ यद्यपिममत्वत्स्तवनेसामर्थ्यंनास्तितथापित्वद्भक्तिप्रेरितः सन्स्तौमीत्यर्थः ॥ १२ ॥ विश्वंजगत्त्वम् ॥ ब्रह्मैवेदमित्यादिश्रुतेः ॥ नन्वहंचेद्विश्वंतर्हिविश्वस्यजडत्वदृश्यत्वाभ्यांममानात्मत्वविनाशित्वेप्रसज्जेयातांतत्राह ॥ नास्तिवैभेदइति ॥ वैप्रसिद्धंएवार्थेवा ॥ भेदोयथार्थतोनास्त्येव ॥ कुतः॥ यतस्त्वमेकः ॥ एकमेवाद्वितीयमित्यादिश्रुतेः॥ जानेत्वत्तोनभेदोस्तीतिक्वचित् ॥ जानेत्वमित्यन्यत्र ॥ सर्वगःपूर्णः ॥ स्तुत्यंस्तवनीयम् ॥ स्तोतास्तवकर्ता ॥ स्तुतिरारोप्यमाणगुणकीर्तनम् ॥ सगुणोनिर्गुणःसप्रपंचोपिनिष्प्रपंचश्चभवानिति ॥ १३ ॥ कदानिर्गुणइत्याकांक्षायामाह ॥ सर्गात्पुराभवानेकइति ॥ एकःसजातीयविजातीयस्वगतभेदशून्यः ॥ एकमेवाद्वितीयमितिश्रुतेः ॥ परमार्थतःशब्दाद्यगोचरत्वाद्यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतिश्रुतेरित्याशयः ॥ १४ ॥ कथंतर्हिवेदांतवेद्यतासगणेगृहीतशक्तिकतयानिर्गुणस्यलक्ष्यमाणत्वा

प्रसह्यप्रमिमीतेशभक्तिर्मांस्तुतिकर्मणि ॥ करोमिकिंजगन्नाथनवश्यानींद्रियाणिमे ॥ १२ ॥ विश्वंत्वंनास्तिवैभेदस्त्वमेकःसर्वगोयतः ॥ स्तुत्यंस्तोतास्तुतिस्त्वंचसगुणोनिर्गुणोभवान् ॥१३॥ सर्गात्पुराभवानेकोरूपनामविवर्जितः ॥ योगिनोपिनतेतत्त्वंविंदंतिपरमार्थतः ॥ १४ ॥ यदैकलोनशक्तोपिरंतुंस्वैरचरप्रभो ॥ तदिच्छातवयोत्पन्नासेव्याशक्तिरभूत्तव ॥ १५ ॥ त्वमेकोद्वित्वमापन्नःशिवशक्तिप्रभेदतः ॥ त्वंज्ञानरूपोभगवान्स्वेच्छाशक्तिस्वरूपिणी ॥ १६ ॥ उभाभ्यांशिवशक्तिभ्यांयुवाभ्यांनिजलीलया ॥ उत्पादिताक्रियाशक्तिस्ततःसर्वमिदंजगत् ॥ १७ ॥ ज्ञानशक्तिर्भवानीशइच्छाशक्तिरुमास्मृता ॥ क्रियाशक्तिरिदंविश्वमस्यत्वंकारणंततः ॥ १८ ॥ दक्षिणांगंतवविधिर्वामांगंतवचाच्युतः ॥ चंद्रसूर्याग्निनेत्रस्त्वंत्वन्निःश्वासःश्रुतित्रयम् ॥ १९ ॥ त्वत्स्वेदादंबुनिधयस्तवश्रोत्रंसमीरणः ॥ बाहवस्तेदशदिशोमुखंतेब्राह्मणाःस्मृताः ॥ २० ॥ राजन्यवर्यास्तेबाहूवैश्याऊरुसमुद्भवाः ॥ पद्भ्यांशूद्रस्तवेशानकेशास्तेजलदाःप्रभो ॥ २१ ॥

दित्याशयेनाह ॥ यदैकलइति ॥ स्वैरचरहेस्वतंत्र ॥ तत्तदा ॥ सेव्यासेवनीयास्वाश्रयेत्यर्थः ॥ १५ ॥ तर्हिशक्तिशक्तिमतोर्भेदाद्द्वैतक्षतिर्नेत्याह ॥ त्वमेकोद्वित्वमापन्नइति ॥ तत्रविभागमाह ॥ त्वामिति ॥ शिवशब्दार्थमाह ॥ ज्ञानरूपइति ॥ स्वेच्छास्वस्येच्छाईक्षणरूपेतियावत् ॥ सऐक्षतबहुस्यामितिश्रुतेः ॥ इच्छाशक्तीतिक्वचित् ॥१६॥ ततोद्वित्वभावानंतरंक्रियाशक्तिरुत्पादितेत्यन्वयः ॥ क्रियाशक्तिस्वरूपमाह ॥ सर्वमिदंजगदिति ॥ १७ ॥ पूर्वोक्तमेवाविवृणोति ॥ ज्ञानशक्तिरिति ॥ यतउभाभ्यांईशोमाभ्यांक्रियाशक्तिरुत्पादिता ॥ ततस्तस्याइत्यर्थः ॥ १८ ॥ इदानींविराड्रूपेणस्तौति ॥ दक्षिणांगमिति ॥ चन्द्रसूर्येति ॥ चक्षोःसूर्योअजायतइत्यादिश्रुतेः ॥ त्वन्निःश्वासइति ॥ तदेतन्महतोभूतस्यानिःश्वसितमेतद्यदृग्वेदोयजुर्वेदःसामवेदइतिश्रुतेः ॥१९॥ मुखंतइति ॥ ब्राह्मणोस्यमुखमासीदितिश्रुतेः ॥ २० ॥ राजन्येति ॥ बाहूराजन्यःकृतइतिश्रुतेः ॥ वैश्याइति ॥ ऊरूतदस्ययद्वैश्यइतिश्रुतेः ॥ पद्भ्यामिति ॥ पद्भ्यांशूद्रोअजायतेतिश्रुतेः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंप्रकृतिरूपेणपुरुषप्रधानशक्तिभ्यामित्यर्थः ॥ मध्येब्रह्मांडंब्रह्मांडस्यमध्ये॥२२॥उपसंहरति ॥ अतइति ॥२३॥ सगुणनिर्गुणयोर्दुर्ज्ञेयत्वात्केवलंनमस्याति ॥ नमस्तुभ्यमिति ॥ आदरार्थावीप्सा ॥ ज्ञानेच्छाक्रियाशक्तीनांवात्रयोनमस्काराः ॥ २४ ॥ २५ ॥ सर्वगोममरूपेणेत्यादीनामितिवरान्दत्त्वातस्मिन्लिंगेअन्तर्धानंययावित्यग्रिमेणान्वयः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ उपसंहरंतौकुबेरस्यपुरींदर्शयतः ॥ इतीति ॥ तस्याइति ॥ योभक्तियोगतःशंभोर्महेश्वरस्यसखित्वमापेदेऽस्याअलकायानाथश्चतस्यकुबेरस्य ॥ तस्याःगन्धवत्याः ॥ प्राच्यांपूर्वस्यांदिश्येषाऽलकापुरीत्यर्थः ॥ ३१ ॥ पद्ममुख्यानामिति ॥ पद्मोमुख्योआदिर्येषांपद्मादीनांतेतथा तेषामष्टानामित्यर्थः ॥ ३२ ॥ ३३ ॥ श्रुतिगोचरतांश्रवणेंद्रियगोचरताम् ॥ युवयोरिति ॥ युवयोर्वागेव

त्वंपुंप्रकृतिरूपेणब्रह्मांडमसृजःपुरा॥मध्येब्रह्मांडमखिलंविश्वमेतच्चराचरम् ॥ २२ ॥ अतस्त्वत्तोनमन्येऽहंकिंचिद्भिन्नंजगन्मय ॥ त्वयिसर्वाणिभूतानिसर्वभूतमयोभवान् ॥ २३ ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः ॥ अयमेववरोनाथत्वयिमेऽस्तुस्थिरामतिः ॥ २४ ॥ इत्युक्तवतिदेवेशस्तस्मिन्पूतात्मनिप्रभुः ॥ स्वमूर्तिंत्वंसमारोप्यदिक्पालपदमादधे ॥ २५ ॥ सर्वगोममरूपेणसर्वतत्त्वावबोधकः ॥ सर्वेषामायुषोरूपंभवानेवभविष्यति ॥ २६ ॥ तवलिंगमिदंदिव्यंयेद्रक्ष्यंतीहमानवाः ॥ सर्वभोगसमृद्धास्तेत्वल्लोकसुखभागिनः ॥ २७ ॥ पवमानेश्वरंलिंगंमध्येजन्मसकृन्नरः ॥ यथोक्तविधिनापूज्यसुगंधस्नपनादिभिः ॥ २८ ॥ सुगंधचंदनैःपुष्पैर्ममलोकेमहीयते ॥ ज्येष्ठेशात्पश्चिमेभागेवायुकुंडोत्तरेणतु ॥ २९ ॥ पावमानंसमाराध्यपूतोभवतितत्क्षणात् ॥ इतिदत्त्वावरान्देवस्तस्मिँल्लिंगेलयंययौ ॥३०॥ गणावूचतुः ॥ इतिगंधवतीपुर्याःस्वरूपंतेनिरूपितम् ॥ तस्याःप्राच्यांकुबेरस्यश्रीमत्येषालकापुरी ॥ ३१ ॥ शंभोःसखित्वमापेदेनाथोस्याभक्तियोगतः ॥ निधीनांपद्ममुख्यानांदाताभोक्ताहरार्चनात् ॥ ३२ ॥ ॥ शिवशर्मोवाच ॥ ॥ कोसौकस्यपुनःकीदृग्भक्तिरस्यसदाशिवे ॥ ययासखित्वमापन्नोदेवदेवस्यधूर्जटेः ॥ ३३ ॥ इतिश्रोतुंममनःश्रुतिगोचरतांगतम् ॥ युवयोर्वाक्सुधास्वादमेदुरोदरमंथरम् ॥ ३४ ॥ गणावूचतुः ॥ ॥ शिवशर्मन्महाप्राज्ञपरिशुद्धेंद्रियेश्वर ॥ सुतीर्थक्षालिताशेषजन्मजातमहामल ॥ ३५ ॥ सुहृदिप्रेमसंपन्नेत्वय्यनुद्यंनाकिंचन ॥ साधुभिःसहसंवादःसर्वश्रेयोऽभिवृद्धये ॥ ३६ ॥ आसीत्कांपिल्यनगरेसोमयाजिकुलोद्भवः ॥ दीक्षितोयज्ञदत्ताख्योयज्ञविद्याविशारदः ॥ ३७ ॥ वेदवेदांगवेदार्थान्वेदोक्ताचारचंचुरः ॥ राजमान्योबहुधनोवदान्यःकीर्तिभाजनम् ॥ ३८ ॥ आग्निशुश्रूषणरतोवेदाध्ययनतत्परः ॥ तस्यपुत्रोगुणनिधिश्चंद्रबिंबसमाकृतिः ॥ ३९ ॥

सुधातस्यायआस्वादस्तेनमेदुरंस्निग्धंतृप्तंयदुदरमध्यंतेनमंथरंस्थिरमित्यर्थः ॥ ३४ ॥ शिवेति ॥ परिशुद्धमिंद्रियाणामीश्वरंमनोयस्यतस्यसंबोधनंहेपरिशुद्धेंद्रियेश्वरेति ॥ अथवापरिशुद्धइंद्रियेश्वरःप्रत्यगात्मायस्यसतथातस्यसंबोधनम् ॥ सुतीर्थेषुमथुरादिक्षेत्रेषुप्रक्षालितमशेषजन्मसमूहस्यमहामलंमहत्पापंयेनसतथातत्संबोधनंसुतीर्थक्षालिताशेषजन्मजातमहामलेति ॥ ३५ ॥ अनुद्यमकथनीयम् ॥ ३६ ॥ ३७ ॥ वेदवेदांगवेदार्थान्वेदजानातीत्यर्थः ॥ ऐकपद्यपाठेऽर्थःस्पष्टएव ॥ उक्ताचारचंचुरःशास्त्रोक्ताचारेषुदक्षः ॥ वदान्योदाता ॥ कीर्तिभाजनंयशःपात्रम् ॥ ३८ ॥ ३९ ॥

१ वासिनइतिक्वचित्पाठः । २ वेदोक्ताचारचंचुरइति ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ४० ॥ ४१ ॥ ४२ ॥ पाखंडिनोवैडालव्रतिकाः ॥ भण्डाःप्रतारकाः ॥ तैःसहवद्धाप्रेमपरंपरायेनसः ॥ ४३ ॥ ४४ ॥ ४५ ॥ तदेति ॥ अनेहसंकालम् ॥ ४६ ॥ अधीत्यावर्त्यपूर्वपाठितं कंठतःकृत्वेतियावत् ॥ ४७ ॥ केशांतकर्मकृत्वेति ॥ अनुवादोयम् ॥ यद्वा षोडशाब्देक्रियमाणंगोदानाख्यंकर्मविशेषःकेशांतकर्म ॥ ४८ ॥ गृह्योक्तेन स्वशाखोक्तेन ॥ आश्वलायनप्रणीतसूत्रोक्त विधानेनेत्यर्थः॥पाणिग्राहंविवाहम्॥मृदुकोमलंयथास्यात् ॥४९॥ शास्तिशिक्षयति ॥ शिक्षामेवाह ॥ क्रोधनस्तइत्यारभ्यप्रतिक्षणमित्यतःप्राक्तनेनग्रंथेन ॥५०॥सदाचारैरित्यस्यव्यावृत्तिमाह ॥ नवै

कृतोपनयनःसोथविद्यांजग्राहभूरिशः ॥ अथपित्रानभिज्ञातोद्यूतकर्मरतोऽभवत् ॥ ४० ॥ आदायादायबहुशोधनंमातुःसकाशतः ॥ ददातिद्यूतकारेभ्योमैत्रींतैश्चचकारसः ॥ ४१ ॥ संत्यक्तब्राह्मणाचारःसंध्यास्नानपराङ्मुखः ॥ निंदकोवेदशास्त्राणांदेवब्राह्मणनिंदकः ॥४२॥ स्मृत्याचारविहीनस्तुगीतवाद्यविनोदभाक् ॥ नटपाखंडिभंडैश्चबद्धप्रेमपरंपरः ॥ ४३ ॥ प्रेरितोपिजनन्यासनयातिपितुरंतिकम् ॥ गृहकार्यांतरव्यग्रोदीक्षितोदीक्षितायिनीम् ॥ ४४ ॥ यदायदैवतांपृच्छेदयेगुणनिधिःसुतः ॥ नदृश्यतेमयागेहेक्कयातिविदधातिकिम् ॥ ४५ ॥ तदातदेतिसाब्रूयादिदानींसबहिर्गतः ॥ स्नात्वासमर्च्यवैदेवानेतावंतमनेहसम् ॥ ४६ ॥ अधीत्याध्ययनार्थंसद्विस्त्रैर्मित्रैःसमंययौ ॥ एकपुत्रेतितन्माताप्रतारयतिदीक्षितम् ॥ ४७ ॥ नतत्कर्मचतद्वृत्तंकिंचिद्वेत्तिसदीक्षितः ॥ सचकेशांतकर्मास्यकृत्वावर्षेऽथषोडशे ॥ ४८ ॥ गृह्योक्तेनविधानेनपाणिग्राहमकारयत् ॥ प्रत्यहंतस्यजननीसुतंगुणनिधिंमृदु ॥ ४९ ॥ शास्तिस्नेहार्द्रहृदयाक्रोधनस्तेपितेत्यलम् ॥ यदिज्ञास्यतितेवृत्तंत्वांचमांताडयिष्यति ॥५०॥ आच्छादयामितेनित्यंपितुरग्रेकुचेष्टितम् ॥ लोकमान्योस्तितेतातःसदाचारैर्नवैधनैः ॥ ५१ ॥ ब्राह्मणानांधनंपुत्रसद्विद्यासाधुसंगमः ॥ सच्छ्रोत्रियास्त्वनूचानादीक्षिताःसोमयाजिनः ॥ ॥ ५२ ॥ इतिरूढिमिहप्राप्तास्तवपूर्वपितामहाः ॥ त्यक्तादुर्वृत्तसंसर्गंसाधुसंगरतोभव ॥ ५३ ॥ सद्विद्यासुमनोधेहिब्राह्मणाचारमाचर ॥ तवानुरूपारूपेणवयसाकुलशीलतः ॥ ५४ ॥ ऊनविंशतिकोऽसित्वमेषाषोडशवार्षिकी ॥ तवपत्नीगुणनिधेसाध्वीमधुरभाषिणी ॥ ५५ ॥ एतांसंवृणुसद्वृत्तांपितृभक्तियुतोभव ॥ श्वशुरोपिहितेमान्यःसर्वत्रगुणशीलतः ॥ ५६ ॥ ततोऽपत्रपसेकिंनत्यजदुर्वृत्ततांशिशो ॥ मातुलास्तेऽतुलाःपुत्रविद्याशीलकुलादिभिः॥ ॥ ५७ ॥ तेभ्योपिनबिभेषित्वंशुद्धोस्युभयवंशतः ॥ पश्यैतान्प्रतिवेश्मस्थान्ब्राह्मणानांकुमारकान् ॥ ५८ ॥ गृहेपिशिष्यान्पश्यैतान्पितुस्तेविनयोचितान् ॥ राजापिश्रोष्यतियदातवदुश्चेष्टितंसुत ॥ ५९ ॥ श्रद्धांविहायतेतातेवृत्तिलोपंकरिष्यति ॥ बालचेष्टितमेवैतद्वदंत्यद्यापितेजनाः ॥ ६० ॥

धनैरिति॥नचाधमैरितिक्वचित्पाठः ॥ तत्राऽधमैरधमाचारैर्न ॥५१॥ सांगेप्रवचनेगुरोरधीतिनोऽनूचनाः ॥ अनूचानःप्रवचनेसांगेधीतीगुरोस्तुयइत्यमरः॥दीक्षिताःसोमयाजिनइतिव्याख्यानव्याख्येयभावान्नपौनरुक्त्यम् ॥ यष्टाचयजमानश्चससोमवतिदीक्षितइत्यमरः ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ संवृणुवरयभजस्वेत्यर्थः ॥ ५६ ॥ अपत्रपसेलज्जसे ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रंतातम् ॥ पित्रमितिपाठेपितरमित्यर्थः ॥ वप्रमितिवापाठः ॥ तत्रवप्रंपितरमित्येव ॥ यदाहामरः वप्रःपितरिकेदारइति ॥ मांचआक्षारयिष्यंतिदूषयिष्यंतितिस्करिष्यंतीतियावत् ॥ ६१ ॥
कैः ॥ मातुश्चरित्रंपुत्रोधत्तेइतिदुर्भाषणैर्दुष्टवचनैरिति ॥ निषिद्धाचरणानुभावमुक्त्वाविहिताचरणमाह ॥ श्रुतिस्मृतिपथीनंकिंश्रुतिस्मृत्युक्ताचारवान्किंनअपितुस्यादेवेत्यर्थः ॥ श्रुतिस्मृतिपथीनक
इतिक्वचित्पाठः ॥ तत्रपथीनकःपथी ॥ ६२॥६३॥ प्रतिक्षणमितिगणयोरुक्तिः ॥ ६४ ॥ दुर्बोधत्वेहेतुर्यतोव्यसनी॥दुर्बोध्यइतिवापाठः ॥ दुर्वार्यइतिवाक्वचित् ॥ युक्तमेवैतदित्याह ॥ मृगयेति ॥
दुरोदरंद्यूतम् ॥ पणेद्यूतेदुरोदरइत्यमरः॥६५॥सपारदारैः परदारानिमित्तंव्यसनंपारदारंतत्सहितैर्मृगयादिभिःसप्तभिर्व्यसनैरत्रजगतिकोनखंडितोज्ञानभ्रंशतांनप्रापितोअपितुसर्वोलोकःप्रापितएवेत्यर्थः॥

अनंतरंहसिष्यंतियुक्तंदीक्षितताऽस्त्विति ॥ सर्वेप्याक्षारयिष्यंतितवविप्रंचमांचवै ॥६१॥ मातुश्चरित्रंतनयोधत्तेदुर्भाषणैरिति ॥ पितापितेनपापीयाञ्छ्रु
तिस्मृतिपथीनकिम् ॥ ६२ ॥ तदंघ्रिलीनमनसोममसाक्षीमहेश्वरः ॥ नचर्तुस्नातयापीहमुखंदुष्टस्यवीक्षितम् ॥६३॥ अहोबलीयान्सविधिर्येनजातो
भवानिति ॥ प्रतिक्षणंजनन्येतिशिक्ष्यमाणोतिदुर्मदः ॥ ६४ ॥ नतत्याजचतद्धर्मंदुर्बोधोव्यसनीयतः ॥ मृगयामद्यपैशुन्यवेश्याचौर्यदुरोदरैः ॥ ६५ ॥
सपारदारैर्व्यसनैरेभिःकोत्रनखंडितः ॥ यद्यन्मध्येगृहेपश्येत्तत्तन्नीत्वासुदुर्मतिः ॥ ६६ ॥ अर्पयेद्द्यूतकाराणांसकुप्यंवसनादिकम् ॥ नवरत्नमयींमातुः
करतःपितुरूर्मिकाम् ॥ ६७ ॥ स्वपत्यास्त्वेकदाऽऽदायदुरोदरिकरेऽर्पयत् ॥ एकदागच्छताराजभवनान्निजमुद्रिका ॥ ६८ ॥ दीक्षितेनपरिज्ञातादे
वाद्द्यूतकृतःकरे ॥ उवाचदीक्षितस्तंचकुतोलब्धात्वयोर्मिका ॥ पृष्टस्तेनाथनिर्बंधादसकृत्प्रत्युवाचकिम् ॥ ६९ ॥ ममाक्षिपासिविप्रोच्चैःकिंमयाचौर्य
कर्मणा ॥ लब्धामुद्रात्वदीयेनपुत्रेणैषाममार्पिता ॥ ७० ॥ मममातुर्हिपूर्वेद्युर्जित्वानीतोहिशाटकः ॥ नकेवलंममाप्येतदंगुलीयंसमर्पितम् ॥ ७१ ॥
अन्येषांद्यूतकर्तॄणांभूरितेनार्पितंवसु ॥ रत्नकुप्यदुकूलानिभृंगारुप्रभृतीनिच ॥ ७२ ॥ भाजनानिविचित्राणिकांस्यताम्रमयानिच ॥ नग्नीकृत्यप्रति
दिनंबद्ध्यतेद्यूतकारिभिः ॥ ७३ ॥ नतेनसदृशःकश्चिदाक्षिकोभूमिमंडले ॥ अद्ययावत्त्वयाविप्रदुरोदरशिरोमणिः ॥ ७४ ॥ कथंनाज्ञायितनयो
ऽविनयानयकोविदः ॥ इतिश्रुत्वात्रपाभारविनम्रतरकंधरः ॥ ७५ ॥

मध्येगृहेगृहमध्ये ॥ ६६ ॥ कुप्यंस्वर्णरजतातिरिक्तताम्रादिभाजनंतत्सहितंवसनादिकंवस्त्रादिकम् ॥ सगुणनिधिरितिवा ॥ ऊर्मिकांमुद्रिकाम् ॥ ६७ ॥ दुरोदरंद्यूतंवर्ततेयस्यासौदुरोदरीतस्यकरेदत्त
वानिति ॥ ६८ ॥ हेविप्रकिंकिमर्थम् ॥ उत्तरत्रान्वयः ॥ ६९ ॥ ममम्माम् ॥ मामाक्षिपसीतिवापाठः ॥ उच्चैर्यथास्यात्तथाऽऽक्षिपसिकिम् ॥ मयामुद्रामुद्रिकाचौर्यकर्मणालब्धाऽपितुनलब्धेति ॥
किंमांक्षिपसीतिपाठेकिंकुत्सितंयथास्यात्तथाकिंकिमर्थंक्षिपसिआक्षिपसीत्यर्थः ॥ कथंतर्हिप्राप्तातत्राह ॥ त्वदीयेनेति ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ आक्षिकःअक्षेणव्यवहरतीत्या
क्षिकोद्यूतकारइत्यर्थः ॥ अद्ययावदद्यारभ्यतेनत्वत्पुत्रेणसदृशोद्यूतकारोनाभूदस्तीतिचेदितिशेषः ॥ अतोदुरोदरशिरोमणिर्द्यूतकारश्रेष्ठः ॥ ७४ ॥ कथंत्वयानाज्ञायिअद्ययावत्कथंनाज्ञायीतिवाकाका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्यायेनोभयत्रवासंबंधः ॥ कथंभूतः ॥ अविनयानयकोविदः ॥ नविनयोऽविनयःदुर्नयइत्यर्थः ॥ ननयोऽनयोदुर्नीतिरनीतिशास्त्रमितिवा ॥ तयोःकोविदःपंडितः ॥ व्यसनीचौर्यकोविदइतिक्वचित् ॥ ७५ ॥ आस्योपविश्यच ॥ ७६ ॥ ७७ ॥ मेममअंगुलितोंऽगुल्याःसकाशात्त्वयाहृता ॥ अंगुलिकाहृतेतिक्वचित् ॥ मयातवसमर्पितेतिचान्यत्र ॥ ७८ ॥ ७९ ॥ ॥ ८० ॥ ८१ ॥ हंहोइतिसंबोधने ॥ हंहोहेसत्पुत्रजननिइतिसक्रोधोपहासः ॥ ८२ ॥ सहयुनक्तीतिसयुक्सहितइत्यर्थः ॥ ८३ ॥ त्वत्तव ॥ सशाटकइतिक्वचित् ॥ तच्छाटकइत्यन्यत्र ॥ शाटकःस्थूलशाटकः ॥ भामासत्यभामेतिवत् ॥ वराशिरित्यर्थः ॥ वराशिःस्थूलशाटकइत्यमरः ॥ मंजिष्ठयाआरक्तोमांजिष्ठः ॥ तुनिश्चितम् ॥ वस्त्रधान्यांवस्त्राणिधीयन्तेऽस्यामितिवस्त्रधानीरज्वादिनिर्मितवस्त्रस्थानंतस्यांलंबतेस्मेत्यध्याहारः ॥ ८४ ॥ भृंगारुर्गडुकविशेषः ॥ त्रिगुणितापटीत्रिपटीअंगाच्छादनप्रतिष्ठावस्त्रमित्यर्थः ॥ ८५ ॥ दक्षिणस्यां

प्रावृत्यवाससामौलिंप्राविशन्निजमंदिरम् ॥ महापतिव्रतामास्यपत्नींप्रोवाचतामथ ॥ ७६ ॥ दीक्षितायिनिकुत्रासिक्कतेगुणनिधिः सुतः ॥ अथतिष्ठतुकिंतेनक्वसाममशुभोर्मिका ॥ ७७ ॥ अंगोद्वर्तनकालेयात्वयामेंऽगुलितोहृता ॥ नवरत्नमयींशीघ्रंतामानीयप्रयच्छमे ॥ ७८ ॥ इतिश्रुत्वाथतद्वाक्यंभीतासादीक्षितायिनी ॥ प्रोवाचसातुमाध्याह्नींक्रियांनिष्पादयत्वथ ॥ ७९ ॥ व्यग्रास्मिदेवपूजार्थमुपहारादिकर्मणि ॥ समयोयमतिक्रामेदतिथीनांप्रियातिथे ॥ ८० ॥ इदानीमेवपक्वान्नकरणव्यग्रयामया ॥ स्थापिताभाजनेक्वापिविस्मृतेतिनवेद्म्यहम् ॥ ८१ ॥ दीक्षितउवाच ॥ ॥ हंहोसत्पुत्रजननिनित्यंसत्यप्रभाषिणि ॥ यदायदात्वांसंपृच्छेतनयः क्वगतस्त्विति ॥ ८२ ॥ तदातदेतित्वंब्रूयानाथेदानींसनिर्गतः ॥ अधीत्याध्ययनार्थंचद्वित्रैर्मित्रैःसयुग्बहिः ॥ ८३ ॥ कुतस्त्वच्छाटकः पत्निमांजिष्ठोयोमयाऽर्पितः ॥ लंबतेवस्त्रधान्यांयस्तथ्यंब्रूहिभयंत्यज ॥ ८४ ॥ सांप्रतंनेक्ष्यतेसोपिभृंगारुर्मणिमंडितः ॥ पट्टसूत्रमयीसापित्रिपटीक्वनृपार्पिता ॥ ८५ ॥ क्वदाक्षिणात्यंतत्कांस्यंगौडीताम्रघटीक्वसा ॥ नागदंतमयीसाक्वसुखकौतुकमंचिका ॥ ८६ ॥ क्वसापर्वतदेशीयाचंद्रकांतशिलोद्भवा ॥ दीपिकाव्यग्रहस्ताग्रासालंकृच्छालभंजिका ॥ ८७ ॥ किंबहूक्तेनकुलजेतुभ्यंकुप्याम्यहंवृथा ॥ तदाभ्यवहरिष्येहमुपयंस्याम्यहंयदा ॥ ८८ ॥ अनपत्योस्मितेनाहंदुष्टेनकुलदूषिणा ॥ उत्तिष्ठानयदर्भांबुतस्मैदद्यांतिलांजलिम् ॥ ८९ ॥ अपुत्रत्वंवरंनॄणांकुपुत्रात्कुलपांसनात् ॥ त्यजेदेकंकुलस्यार्थेनीतिरेषासनातनी ॥ ९० ॥

दिशिभवंदाक्षिणात्यम् ॥ गौडदेशोद्भवागौडी ॥ नागोगजः ॥ मंचिकासूक्ष्मखट्वा ॥ ८६ ॥ पर्वतदेशीयापर्वतदेशोद्भवाशालभंजिकापुत्तलिका ॥ यासाक्वेत्यन्वयः ॥ कथंभूता ॥ चन्द्रकांतशिलोद्भवातन्निर्मितादीप्यतीतिदीपिकाउज्ज्वलेत्यर्थः ॥ अव्यग्रहस्ताग्रा ॥ वरंप्रार्थितुमुद्यतकराग्रेत्यर्थः ॥ अलंकृदलंकरणंतत्सहितायासासालंकृत् ॥ ८७ ॥ किंबहूक्तेनेति ॥ यदाहमुपयंस्यामिउद्वहिष्यामिविवाहांतरंकरिष्यामीतियावत् ॥ उपनेष्यामीतिपाठेपिसएवार्थः ॥ तदाहंअभ्यवहरिष्येभोक्ष्येभोजनंकरिष्यामीत्यर्थः ॥ ८८ ॥ ८९ ॥ कुलपांसनात् कुलदूषणात् ॥ कुलपांसुलादितिपाठेपिसएवार्थः ॥ कुललांछनादितिक्वचित्पाठः ॥ त्यजेदेकमिति ॥ तथाचोक्तम् ॥ त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् ॥ ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवीं ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यजेदिति ॥ भागवतेचधृतराष्ट्रंप्रतिविदुरवाक्यम् ॥ त्यजाश्वशैवंकुलकौशलायेति ॥ ९० ॥ सुतांप्राप्य ॥ प्रार्थ्येतिचक्कचित् ॥ ९१ ॥ समालोच्यविचार्य ॥ समालंब्येतिक्कचित् ॥ ९२ ॥ अस्तिधनः अस्तिविद्यमानंधनंयस्यसोऽस्तिधनः ॥ अस्तीतितिङंतप्रतिरूपकमव्ययम् ॥ ९३ ॥ देशांतरेऽस्तिधनदइतिक्कचित् ॥ अस्तिधनतइतिवान्यत्र ॥ नाहमभ्यस्तवेदोऽस्मिनचैवास्तिधनागमः ॥ देशांतरेयोधनवान्सविद्यःसुखमेधतइतिक्कचित्पाठःसस्पष्टार्थः ॥९४॥ यायजूककुलेइज्याशीलस्यवंशे ॥ इज्याशीलोयायजूकइत्यमरः ॥ अनुसंधयेद्योजयेत् ॥ ९५ ॥ नाधिगच्छामिनाभिजानामि ॥ परिचितःकश्चिज्जनइतिशेषः ॥ परिचितिरितिक्कचित् ॥ ९६ ॥ याचेप्रार्थये ॥ याचमेजननीसाइहनेतियोजना ॥ साचेतिवापाठः ॥ ९७ ॥ ९८ ॥ महोपहारान्महापूजासं

स्नात्वानित्यविधिं कृत्वातस्मिन्नेवाह्निकस्यचित् ॥ श्रोत्रियस्यसुतांप्राप्यपाणिंजग्राहदीक्षितः ॥ ९१ ॥ श्रुत्वातथासवृत्तांतंप्राक्तनंस्वंविनिंद्यच ॥ कांचिद्दिशंसमालोच्यनिर्ययौदीक्षितांगजः ॥९२॥ चिंतामवापमहतींकयामिकरवाणिकिम् ॥ नाहमभ्यस्तविद्योस्मिनचैवास्तिधनोस्म्यहम् ॥ ९३ ॥ देशांतरेह्यस्तिधनः सद्विद्यः सुखमेधते ॥ भयमस्तिधनेचौरात्सविद्यःसर्वतोऽभयः ॥ ९४ ॥ यायजूककुलेजन्मक्कक्कमेव्यसनंतथा ॥ अहोबलीयान्स विधिर्भाविकर्मानुसंधयेत् ॥९५॥ भिक्षितुंनाधिगच्छामिनमेपरिचितःक्वचित् ॥ नचपार्श्वेधनंकिंचित्किमत्रशरणंभवेत् ॥ ९६ ॥ सदानभ्युदितेभानौ प्रसूर्मेमृष्टभोजनम् ॥ दद्याद्द्यात्रकंयाचेयाचेहजननीनमे ॥९७॥ इतिचिंतयतस्तस्यभानुरस्ताचलंगतः ॥ एतस्मिन्नेवसमयेकश्चिन्माहेश्वरोनरः॥९८॥ महोपहारानादायनगराद्बहिरभ्यगात् ॥ समभ्यर्चितुमीशानंशिवरात्रावुपोषितः ॥ ९९ ॥ पक्वान्नगंधमाघ्रायक्षुधितःसतमन्वगात् ॥ इदमन्नंमयाग्राह्यं शिवायोपस्कृतंनिशि ॥ १०० ॥ इत्याशामवलंब्याथद्वारिशंभोरुपाविशत् ॥ ददर्शचमहापूजांतेनभक्तेननिर्मिताम् ॥ १ ॥ विधायनृत्यगीतादिभक्ताः सुप्ताःक्षणंयदा ॥ नैवेद्यंसतदाऽऽदातुंगर्भागारंविवेशह ॥ २ ॥ दीपंमंदप्रभंदृष्ट्वापक्वान्नावेक्षणायसः ॥ निजचैलांचलाद्वर्तिंदत्त्वासमुददीपयत् ॥ ३ ॥ ततःपक्वान्नमादायत्वरितंगच्छतोबहिः ॥ तस्यपादतलाघातात्प्रसुप्तःकोप्यबुध्यत ॥ ४ ॥ कोयंकोयंत्वरापन्नश्चोरोयंगृह्यतामिति ॥ यावद्ब्रूयात्समागत्य तावत्सपुररक्षकैः ॥ ५ ॥ पलायमानोनिहतःक्षणात्पंचत्वमागतः ॥ अभक्षयच्चनैवेद्यंभाविपुण्यबलान्नसः ॥ ६ ॥

भारान् ॥ ९९ ॥ तमन्वगात्तंमाहेश्वरमनुपश्चादगाद्गतवान् ॥ १०० ॥ १ ॥ गर्भागारंअगारस्यमध्यम् ॥ २ ॥ निजचैलांचलात्स्ववस्त्राग्रतोवर्तिंदशांसमुददीपयत्सम्यक्ज्वालयामास ॥ ३ ॥ ॥ ४ ॥ ५ ॥ अभक्षयच्चेति ॥ भाविपुण्यवशाद्भविष्यच्छिवरात्रोपोषणपुण्यवशात् ॥ निर्माल्यभक्षणेउपोषणनाशप्रसंगात् ॥ अतएवाशिवदूतावक्ष्यंति ॥ उपोषितेनभूतायामिति ॥ यत्तुशिवनिर्माल्यभोक्तारइत्यादितत्तुतेषांसूक्ष्मधर्मापरिज्ञानात् ॥ तथाचवक्ष्यंतिशिवदूताः ॥ किंकराःशिवधर्मायेसूक्ष्मास्तेवैभवादृशैरित्यादि ॥ यद्वा वाणलिंगाद्यतिरिक्तविषयंतद्यमदूतवचनम् ॥ तथाच ॥ वाणलिंगेस्वयंभूतेचंद्रकांतेहृदिस्थिते॥तत्रक्रतुशतंपुण्यंशंभोर्नैवेद्यभक्षणमिति ॥ तत्रवाणलिंगंनार्मदम् ॥ हृदिस्थितंप्राणलिंगम् ॥ हृत्प्रदेशेप्राणवच्छैवैर्धार्यमाणंलिंगमित्यर्थः॥हृदिध्यान

CC-0. In Public Domain. Digitization by eGangotri

विषयत्वेनस्थितंलिंगमितिवा ॥ रुद्रभुक्तंभुंजीतरुद्रपीतंपिबेद्रुद्राघ्रातंजिघ्रेदितिचजाबालिश्रुतिः ॥ ६ ॥ अथेति ॥ अनंतरंयावत्समागत्यविकटैर्भटैःसबद्धस्तावत्पारिषदास्तंनेतुंप्राप्ताइतिद्वितीयश्लोकेनान्वयः ॥ ७ ॥ किंकिणीजालमालितं क्षुद्रघंटिकानिवहसंजातमालमित्यर्थः ॥ शूलपाणयःरुद्रपारिषदाइत्यर्थः ॥ ८ ॥ शंभोर्गणान्समालोक्ययमकिंकरैरित्थमवाद्युक्तमित्यन्वयः ॥ किंतत् ॥ हेगणाअयंद्विजोदुर्वृत्तइति ॥९॥ दुर्वृत्तत्वमेवाह ॥ कुलेतिचतुर्भिः ॥ ११० ॥ आस्तामित्यत्रअकारलोपआर्षः॥ आसतामित्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ तत्तर्हि ॥ १४ ॥ इत्थमिति ॥

अथबद्धःसमागत्यपाशमुद्गरपाणिभिः ॥ निनीषुभिःसंयमिनींयाम्यैःसविकटैर्भटैः ॥ ७ ॥ तावत्पारिषदाःप्राप्ताःकिंकिणीजालमालितम् ॥ दिव्यंविमानमादायतंनेतुंशूलपाणयः ॥ ८ ॥ शंभोर्गणान्समालोक्यभीतैस्तैर्यमकिंकरैः ॥ अवादिप्रणतैरित्थंदुर्वृत्तोयंगणाद्विजः ॥ ९ ॥ कुलाचारप्रतीपोयंपित्रोर्वाक्यपराङ्मुखः ॥ सत्यशौचपरिभ्रष्टःसंध्यास्नानविवर्जितः ॥ ११० ॥ आस्तांदूरेऽस्यकर्माणिशिवनिर्माल्यहारकः ॥ प्रत्यक्षतोऽत्रवीक्षध्वमस्पृश्योयंभवादृशाम् ॥ ११ ॥ शिवनिर्माल्यभोक्तारःशिवनिर्माल्यलघंकाः ॥ शिवनिर्माल्यदातारःस्पर्शस्तेषांह्यपुण्यकृत् ॥१२॥ विषमालोड्यवापेयंश्रेयोवाऽनशनंपरम् ॥ सेवितव्यंशिवस्वंनप्राणैः कंठगतैरपि ॥ १३ ॥ यूयंप्रमाणंधर्मेषुयथानचतथावयम् ॥ अस्तिचेद्धर्मलेशोस्यगणास्तच्छृणुमोवयम् ॥ १४ ॥ इत्थंतद्वाक्यमाकर्ण्यप्रोचुःपारिषदास्ततः ॥ किंकराःशिवधर्मायेसूक्ष्मास्तेवैभवादृशैः ॥ १५ ॥ स्थूललक्ष्यैःकथंलक्ष्यालक्ष्यायेसूक्ष्मदृष्टिभिः ॥ अनेनानेनसाकर्मयत्कृतंश्रृणुतेहतत् ॥ १६ ॥ पतंतीलिंगशिरसिदीपच्छायानिवारिता ॥ स्वचैलांचलतोऽनेनदत्त्वादीपेदशांनिशि ॥१७॥ अपरोपिपरोधर्मोजातस्तत्रास्यकिंकराः ॥ श्रृण्वताशिवनामानिप्रसंगादपिगृह्णतः ॥ १८ ॥ भक्तेनविधिनापूजाक्रियमाणानिरीक्षिता ॥ उपोषितेनभूतायामनेनस्थिरचेतसा ॥ १९॥ कलिंगराजोभविताऽधुनाविधुतकल्मषः ॥ एषद्विजवरोदूतायूयंयातयथागताः ॥ १२० ॥ पार्षदैर्यमदूतेभ्योमोचितस्त्विवतिसद्विजः ॥ अरिंदमस्यतनयःकलिंगाधिपतेर्दमः ॥ २१ ॥ क्रमाद्राज्यमवाप्याथपितर्युपरतेयुवा ॥ नान्यंधर्मंविजानातिदुर्दमोभूपतिर्दमः ॥२२॥ शिवालयेषुसर्वेषुदीपदानादृतेद्विज॥ ग्रामाधीशान्समाहूयसर्वान्स्वविषयस्थितान् ॥२३॥ इत्थमाज्ञापयामासससमेदंडद्योभविष्यति ॥ यस्ययस्याभितोग्रामंयावंतश्चशिवालयाः ॥ २४ ॥

हेकिंकराःयेशिधवर्मास्तेभवादृशैःसूक्ष्माअलक्ष्याएव ॥ १५ ॥ एतदेवस्पष्टयति ॥ स्थूललक्ष्यैरिति ॥ सूक्ष्मदृष्टिभिर्येधर्मालक्ष्याज्ञेयाः ॥ स्थूलंलक्ष्यंयेषांतैःस्थूलदृष्टिभिःकथंलक्ष्याइत्यर्थः ॥ अथवाहेकिंकराःयेशिवधर्मास्तेअतीवसूक्ष्माएव ॥ अतःसूक्ष्मदृष्टिभिरित्यादिपूर्ववत् ॥ अनेनसानिष्पापेन ॥ १६ ॥ दशांवर्तिम् ॥ १७ ॥ शिवनामानिगृह्णतःपुरुषात्सकाशात्प्रसंगात्तानिश्रृण्वता ॥ ॥ १८ ॥ भक्तेनविहितापूजाअनेननिरीक्षिता ॥ भूतायांचतुर्दश्याम् ॥ १९ ॥ इतियतः ॥ अतःकलिंगराजोभवितेति ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ समेदंडद्योभविष्यतियस्तुममाज्ञांन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यतीतिशेषः ॥ आज्ञामेवाह ॥ यस्ययस्येति ॥ ग्राममभितः ग्रामस्यसमंततः ॥ २४ ॥ दण्डमेवाह ॥ ममाज्ञाभंगदोषेणेति ॥ २५ ॥ २६ ॥ २७ ॥ रत्नदीपशिखाश्रयःरत्नान्येवदीपास्तेषांशिखानामाश्रयः ॥ रत्नश्रेष्ठानांपतिरित्यर्थः ॥ २८ ॥ २९ ॥ स्वार्थेति ॥ स्वार्थंस्वप्रयोजनार्थंदीपवर्त्युद्दीप्त्यालिंगमस्तकांधकारंहरतीतिसः ॥ १३० ॥ प्राग्वासनोदयात्पूर्वसंस्कारस्फुरणात् ॥ अतिविस्मयेनाहतुः ॥ क्वैषेति ॥ हेशिवशर्मन्विलोकयपश्य ॥ किम् ॥ एषादिक्पालपदवीस्थानंक्व ॥ एषाकेत्याकांक्षायामाहतुः ॥ मनुष्यधर्मणाऽनेनगुणनिधिनासांप्रतंयाइहस्वर्गेभुज्यतेसावाक्वइतिशेषः ॥ ३१ ॥ नकेवलमलकायाःपतिरभूदीश्वरेणसार्धंमित्रतांचप्राप्तवानित्याहतुः ॥ सर्वदैवेत्यादिना ॥ संशृणुष्वसम्यक्शृणु ॥ आत्मनेपदमार्षम् ॥ पाठांतरेहेस्वस्वीयआत्मीयेतिशिवशर्मसंबोधनम् ॥ ३२ ॥ पाद्मेकल्पेलोकत्रयात्मकपद्मसृष्टौ ॥ वैश्रवणःविश्रवसःपुत्रःकुबेरइत्यर्थः ॥ ३३ ॥ ३४ ॥ तत्रपाद्मे ॥ मेघवाहनेरौद्रेकल्पइत्यनुषज्जते ॥

तत्रतत्रसदादीपोद्योतनीयोऽविचारितम् ॥ ममाज्ञाभंगदोषेणशिरश्छेत्स्याम्यसंशयम् ॥ २५ ॥ इतितद्भयतोदीप्तादीपाःप्रतिशिवालयम् ॥ अनेनैवसधर्मेणयावज्जीवंदमोनृपः ॥ २६ ॥ धर्मर्द्धिंमहतींप्राप्यकालधर्मवशंगतः ॥ सदीपवासनायोगाद्बहून्दीपान्प्रदीप्यवै ॥ २७ ॥ अलकायाःपतिरभूद्रत्नदीपशिखाश्रयः ॥ एवंफलतिकालेनशिवेऽल्पमपियत्कृतम् ॥ २८ ॥ इतिज्ञात्वाशिवेकार्यंभजनंस्वसुखार्थिभिः ॥ क्वसदीक्षितदायादः सर्वधर्मपराङ्मुखः ॥ २९ ॥ स्वार्थदीपदशोद्योतलिंगमौलितमोहरः ॥ कलिंगविषयेराज्यंप्राप्तोधर्मरतिःसदा ॥ १३० ॥ शिवालयेसमुद्दीप्यदीपान्प्राग्वासनोदयात् ॥ क्वैषादिक्पालपदवीशिवशर्मन्विलोकय ॥ मनुष्यधर्मणानेनसांप्रतंयेहभुज्यते ॥ ३१ ॥ गणावूचतुः ॥ ॥ सर्वदैवशिवेनासौसखित्वंचयथेयिवान् ॥ तदप्येकमनाविप्रसंशृणुष्वब्रवावहे ॥ ३२ ॥ पाद्मेकल्पेपुराविप्रब्रह्मणोमानसात्सुतात् ॥ पुलस्त्याद्विश्रवाजज्ञेतस्यवैश्रवणःसुतः॥३३॥ तेनेयमलकाभुक्तापुरीविश्वकृताकृता ॥ आराध्यंत्र्यंबकंदेवमत्युग्रतपसापुरा ॥ ३४ ॥ व्यतीतेतत्रकल्पेवैप्रवृत्तेमेघवाहने ॥ याज्ञदत्तिरसौश्रीदस्तपस्तेपेसुदुःसहम् ॥ ३५ ॥

तथाचोक्तंवासिष्ठे ॥ कदाचित्सृष्टयःशार्व्यःकदाचित्पद्मजोद्भवाः ॥ कदाचिद्वैष्णव्यःकदाचिन्मुनिनिर्मिताइति ॥ कथंरुद्रस्यमेघवाहनत्वमितिचेदुच्यते ॥ मेघवाहनइंद्रस्तद्रूपधारित्वान्महादेवस्यमेघवाहनता ॥ तच्चात्रैवोक्तम् ॥ यद्वा मेघमारुह्यश्रीकृष्णायवरंदत्तवानितिमेघवाहनइति ॥ दानधर्मे ॥ दिव्यंवर्षसहस्रंमेघोभूत्वाहरंविष्णुरवहदितिवातथोच्यते ॥ तथाचलैंगे ॥ ससर्जशंकरंध्यात्वाब्रह्माणंपरमेश्वरः॥जनार्दनोजगन्नाथःकल्पेवैमेघवाहने॥दिव्यंवर्षसहस्रंतुमेघोभूत्वाऽवहद्धरम् ॥ नारायणोमहादेवंबहुमानेनसादरम्॥ दृष्ट्वाभवंमहादेवोहरेःस्वात्मनिशंकरः॥प्रददौतस्यसकलंस्रष्टुंवैब्रह्मणासह ॥ तदातत्कल्पमाहुर्वैमेघवाहनसंज्ञयेति ॥ यद्वा देव्योक्तेनोपरिमेघानांकृतावासत्वान्मेघवाहनइतिपुराणांतरम् ॥ यद्वा भक्तानांफलसेचनान्मेघोवृषस्तद्वाहनत्वात् ॥ यद्वा सेचनतृप्तिसाम्यान्मे

१ स्वश्रृणुष्वेत्येवंरूपे ।

CC-0. In Public Domain. Digitization by eGangotri

घोवरस्तंप्रापयतीतिमेघवाहनः ॥ यद्वाऽष्टमूर्तित्वात्सूर्यरूपेणावहादिमेघान्प्रापयतीति ॥ यद्वा मेघवाहनइतिब्रह्मणःकल्पविशेषस्यनाम ॥ तथाचोक्तंलैंगे ॥ भवोद्भवस्तपश्चैवभव्यारंभःप्रभुःपुनः ॥ ऋतुर्वर्हिर्हव्यवाहःसावित्रस्तुतएवच ॥ उशिकःकुशिकश्चैवगांधारोमुनिसत्तमाः॥ ऋषभश्चतथापज्ञोगांधारीयश्चमध्यगः ॥ वैराजोवैनिषादश्चमुख्योवैमेघवाहनः॥पंचमश्चित्रकश्चैवआकृतिस्तानएवच ॥ मनश्चदर्शोबृंहश्चतथावैश्वेतलोहितः॥रक्तश्चपीतवासाश्च असितःसर्वरूपकः॥एवंकल्पास्तुसंख्याताब्रह्मणोव्यक्तजन्मनइति ॥ यज्ञदत्तस्यापत्यंयाज्ञदत्तिर्गुणानिधिरित्यर्थः॥ श्रीदोनिधिपतित्वात्संपत्तिदत्वात्संपत्तिदः ॥ सुदुःसहंसुदुष्करंतपस्तेपइत्यर्थः ॥ ३९ ॥ एतद्विवृणोति ॥ भक्तिप्रभावमित्यारभ्यततइत्यतःप्राक्तनेन ॥ शंभोर्भक्तिप्रभावंविज्ञायकाशिकांप्राप्यचित्तरत्नप्रदीपकमुद्बोध्यउज्ज्वाल्यशांभवंलिंगंशंभोर्लिंगंसंस्थाप्ययावत्तद्वर्ष्मत्वगस्थिपरिशेषितमस्थिचर्मावशिष्टंबभूवतावद्वर्षाणामयुतंशतंदशलक्षंतपस्ततापकृतवानितिपंचमेनान्वयः ॥ ३६ ॥ भक्तिप्रभावंविज्ञायेत्युक्तं तत्रेहेत्वन्वेषणायामाह ॥ तद्दीपमात्रतःतस्यप्रसिद्धस्यमाहेश्वरस्यकृतस्यदीपस्यमात्रतःदीपनंदीपउद्दीपनंउज्ज्वालनमितियावत् ॥ तन्मात्रतस्तदेकमात्रतइत्यर्थः ॥ कथंभूतंचित्तरत्नप्रदीपकम् ॥ शिवैकदशं

भक्तिप्रभावंविज्ञायशंभोस्तद्दीपमात्रतः ॥ पुरींपुरारेःसंप्राप्यकाशिकांचित्प्रकाशिकाम् ॥ ३६ ॥ शिवैकदशमुद्बोध्यचित्ररत्नप्रदीपकम् ॥ अनन्यभक्तिस्नेहाढ्यंतन्महोध्याननिश्चलम् ॥ ३७ ॥ शिवैक्यसुमहापात्रंतपोग्निपरिबृंहितम् ॥ कामक्रोधमहाविघ्नपतंगाघातवर्जितम् ॥ ३८ ॥ प्राणसंरोधनिर्वातंनिर्मलंनिर्मलेक्षणात् ॥ संस्थाप्यशांभवंलिंगंसद्भावकुसुमार्चितम् ॥ ३९ ॥ तावत्ततापसतपस्त्वगस्थिपरिशेषितम् ॥ यावद्बभूवतद्वर्ष्मवर्षाणामयुतंशतम् ॥ [1]४० ॥ ततःसहविशालाक्ष्यादेवोविश्वेश्वरः स्वयम् ॥ अलकापतिमालोक्यप्रसन्नेनांतरात्मना ॥ ४१ ॥ लिंगेमनःसमाधायस्थितंस्थाणुस्वरूपिणम् ॥ उवाच वरदोस्मीतितस्वालमलकापते ॥ ४२ ॥ उन्मीलयनयनेयावत्सपश्यतितपोधनः ॥ तावदुद्यत्सहस्रांशुसहस्राधिकतेजसम् ॥ ४३ ॥ पुरोददर्शश्रीकंठंचंद्रचूडसुमाधवम् ॥ तत्तेजःपरिभूताक्षितेजाः संमीलयलोचने ॥ ४४ ॥

शिवएवैकादशावर्तिकायस्मिंस्तम् ॥ पुनःकीदृशम् ॥ अनन्यभक्तिस्नेहाढ्यं अव्यभिचारिणीभक्तिरेवस्नेहोघृतादिस्तेनाढ्यम्॥ तन्महोध्याननिश्चलं तच्चतन्महश्चेतितन्महस्तद्ध्यानेननिश्चलम्॥ ३७॥ शिवैक्यसुमहापात्रं शिवेनसहयदैक्यंतादात्म्यंतदेवसुमहापात्रमाधारोयस्यतम् ॥ तपएवाग्निस्तेनपरिबृंहितंवर्धितम् ॥ कामक्रोधादयोमहाविघ्नास्तएवपतंगास्तेषामाघातेनापातेनपरिवर्जितम् ॥ ३८ ॥ प्राणसंरोधःप्राणायामएवनिर्वातोवाताभावोयत्रतम् ॥ निर्मलमसंभावनाविपरीतभावनारहितंयदीक्षणंज्ञानंतस्मान्निर्मलम् ॥ कथंभूतंलिंगम् ॥ सद्भावकुसुमार्चितं सद्भावःसद्भक्तिस्तदेवकुसुमंतेनार्चितम् ॥ यद्वा सद्भक्तिर्मनोवृत्तिस्तद्विशेषरूपाण्यहिंसादीनिपुष्पाणितैरर्चितम् ॥ तथाचोक्तम् ॥ अहिंसाप्रथमंपुष्पंपुष्पमिंद्रियनिग्रहः ॥ ध्यानपुष्पंतपःपुष्पंज्ञानपुष्पंतथैवच ॥ सर्वभूतदयापुष्पंक्षमापुष्पंविशेषतः ॥ सत्यंचाष्टविधंपुष्पंविष्णोःप्रीतिकरंपरमिति ॥ ध्यानपुष्पमित्यत्रध्यानशब्दोविवेकविषयः[2] ॥ अतोनिर्मलेक्षणादित्यनेननपौनरुक्त्यम् ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ उन्मीलयेति ॥ सधनदोनयनेउन्मीलयविवृत्ययावत्पश्यतितावच्छ्रीकंठंददर्शेत्यन्वयः ॥ ४३ ॥ तत्तेजइति ॥ सोऽलकापतिर्नेत्रेसंमीलयसम्यगविकचय्यहेदेवेतिसंबोध्यदेवेशंदेवदेवानांवैशंउवाचे

१ ततइत्यपिपाठः । २ ज्ञानपुष्पमित्यत्रज्ञानशब्दइतिपाठोपेक्षितइतिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यन्वयः ॥ कथंभूतः ॥ तस्यविश्वेश्वरस्यतेजसापरिभूतमाक्षितेजोयस्यसः ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ प्रेमपात्रमर्थादीश्वरस्य ॥ सौभाग्यश्रीःसौभाग्यसंपत ॥ ४९ ॥ क्रूरदृष्टिःसन्यावद्वीक्षतेतावत्तन्नेत्रम् ॥ तदित्यव्ययम् ॥ तस्यवामंचक्षुःपुस्फोटस्फुटितवदित्यर्थः ॥ वामनेत्रस्फोटनेहेतुमाह ॥ वामविलोकनात्क्रूरदृष्ट्याविलोकनात् ॥ वामनेत्रेणवाविलोकनात् ॥ स्फोटनेहेतुमाह ॥ क्रूरदृगिति ॥ वक्रदृष्टिरित्यर्थः ॥ दुष्टदृष्टिरितिवा ॥ १५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ अधिवर्णयेदधिकंकथयेत् ॥ अधिवर्णयीन्नितिकचित् ॥ ५४ ॥ निधीनांपद्मादीनामष्टानाम् ॥

उवाचदेवदेवेशंमनोरथपथातिगम् ॥ निजांघ्रिदर्शनेनाथदृक्सामर्थ्यंप्रयच्छमे ॥४५॥ अयमेववरोनाथयत्त्वंसाक्षान्निरीक्ष्यसे ॥ किमन्येनवरेणेशनमस्ते शशिशेखर ॥ ४६ ॥ इतितद्वचनंश्रुत्वादेवदेवउमापतिः ॥ ददौदर्शनसामर्थ्यंस्पृष्ट्वापाणितलेनतम् ॥ ४७ ॥ प्रसार्यनयनेपूर्वमुमामेवव्यलोकयत् ॥ शंभोःसमीपेकायोषिदेषासर्वांगसुंदरी ॥ ४८ ॥ अनयाकिंतपस्तप्तंममापितपसोधिकम् ॥ अहोरूपमहोप्रेमसौभाग्यश्रीरहोभृशम् ॥ ४९ ॥ क्रूरदृग्वीक्षतेयावत्पुनःपुनरिदंवदन् ॥ तावत्पुस्फोटतन्नेत्रंवामंवामाविलोकनात् ॥ १५० ॥ अथदेव्यब्रवीद्देवंकिमसौदुष्टतापसः ॥ असकृद्वीक्ष्यमांवक्तिन्यक्कुर्वन्मेतपःप्रभाम् ॥ ५१ ॥ असकृद्दक्षिणेनाक्ष्णापुनर्मामेवपश्यति ॥ असूयमानोमेरूपंप्रेमसौभाग्यसंपदः ॥ ५२ ॥ इतिदेवीगिरंश्रुत्वाप्रहस्यप्राहतांप्रभुः ॥ उमेत्वदीयःपुत्रोयंनचक्रूरेणचक्षुषा ॥ ५३ ॥ संपश्यतेतपोलक्ष्मींतवकिंत्वधिवर्णयेत् ॥ इतिदेवींसमाभाष्यतमीशःपुनरब्रवीत् ॥ ५४ ॥ वरान्ददामितेवत्सतपसानेनतोषितः ॥ निधीनामधिनाथस्त्वंगुह्यकानांभवेश्वरः ॥ ५५ ॥ यक्षाणांकिन्नराणांचराजाराज्ञांचसुव्रत ॥ पतिःपुण्यजनानांचसर्वेषांधनदोभव ॥ ५६ ॥ मयासख्यंचतेनित्यंवत्स्यामिचतवांतिके ॥ अलकांनिकषामित्रतवप्रीतिविवृद्धये ॥ ५७ ॥ आगच्छपादयोरस्याःपततेजननीतियम् ॥ इतिदत्त्वावरान्देवःपुनराहशिवांशिवः ॥ प्रसादंकुरुदेवेशितपस्विन्यंगजेऽत्रवै ॥ ५८ ॥ देव्युवाच ॥ ॥ वत्सतेनिश्चलाभक्तिर्भवेभवतुसर्वदा ॥ भवैकपिंगोनेत्रेणवामेनस्फुटितेनह ॥ ५९ ॥ देवेनदत्तायेतुभ्यंवराःसंतुतथैवते ॥ कुबेरोभवनाम्नात्वंममरूपेर्ष्ययासुत ॥ १६० ॥ त्वयेदंस्थापितंलिंगंतवनाम्नाभविष्यति ॥ सिद्धिदंसाधकानांचसर्वपापहरंपरम् ॥ ६१ ॥ नधनेनवियुज्येतनसख्यानचबांधवैः ॥ कुबेरेश्वरलिंगस्यकुर्याद्योदर्शनंनरः ॥ ६२ ॥ विश्वेशादक्षिणेभागेकुबेरेशंसमर्चयेत् ॥ नरोलिप्येतनोपापैर्नदारिद्र्येणनोऽसुखैः ॥ ६३ ॥ इतिदत्त्वावरानदेवोदेव्यासहमहेश्वरः ॥ धनदायाविवेशाथधामवैश्वेश्वरंपरम् ॥ ६४ ॥

तदुक्तम् ॥ पद्मश्चैवमहापद्मोमत्स्यकूर्मौतथोदकः ॥ नीलोमुकुंदःशंखश्चनिधयोष्टौप्रकीर्तिताइति ॥ ५५ ॥ किंनराणांकिंपुरुषाणामित्यर्थः ॥ यथाश्रुतानामेववा ॥ पुण्यजनानांराक्षसानाम् ॥ ५६ ॥ निकषामित्र निकषाराक्षसजातीनांमातातस्यामित्र ॥ यद्वा अलकांनिकषाअलकायाःसमीपेप्रीतिविवृद्धयेप्रीत्यतिशयार्थम् ॥ प्रीतिंविवर्धयन्नितिकचित् ॥ ५७ ॥ ५८ ॥ एकपिंगः एकंनेत्रंपिंगंस्फुटितंयस्यसः ॥ ५९ ॥ कुत्सितवेरःशरीरंयस्येतिकुबेरः ॥ १६० ॥ ६१ ॥ सख्यामित्रेण ॥ ६२ ॥ ६३ ॥ वैश्वेश्वरंस्वस्वरूपमानंदवनंवाकैलासंवा ॥ ६४ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरति ॥ इत्थमिति ॥ वैश्वेश्वरंधामेत्युक्तंकिंतद्धामेत्याकांक्षायामाह ॥ अलकांनिकषेति ॥ अलकायाःसमीपइत्यर्थः ॥ यद्वा कैलासंदृष्ट्वाकस्येयंपुरीतिपृच्छंतंशिवशर्माणंप्रत्याहतुरलका मिति ॥ ६५ ॥ यक्षेश्वराणामितिपूजायांबहुवचनम् ॥ यक्षाश्चतदीश्वराश्चतेषामितिवा ॥ कल्पभेदापेक्षयावा ॥ १६६ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांत्रयोदशोध्यायः ॥ १३ ॥ चतुर्दशेऽत्रवर्ण्यंतेलोकौद्वावतिसुंदरौ ॥ ईशानस्यतथाचैवचंद्रस्यामृतदीधितेः ॥ १ ॥ क्रमप्राप्तामैशानींपुरींदर्शयतोऽलकायाइति ॥ १ ॥ शिवसात्कृतंशिवेसमर्पितंसकलंकर्मयैस्तेशिवसात्कृत

॥ गणावूचतुः ॥ इत्थंसखित्वंश्रीशंभोःप्रापैषधनदःपरम् ॥ अलकांनिकषाचैषकैलासःशंकरालयः ॥ ६५ ॥ पुर्यायक्षेश्वराणांतेस्वरूपमितित्र र्णितम् ॥ यच्छ्रुत्वासर्वपापेभ्योनरोमुच्येदसंशयम् ॥१६६॥ ॥ इतिश्रीस्कांदेमहापुराणे एकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडे पूर्वार्द्धे गंधव त्यलकावर्णनंनामत्रयोदशोध्यायः ॥ १३ ॥ ॥ गणावूचतुः ॥ अलकायाःपुरोभागेपुरैशानीमहोदया ॥ अस्यांवसंतिसततंरुद्रभक्तास्तपोधनाः ॥१॥ शिवस्मरणसंसक्ताःशिवव्रतपरायणाः ॥ शिवसात्कृतकर्माणःशिवपूजारताःसदा ॥२॥ साभिलाषास्तपस्यंतिस्वर्गभोगेस्त्वितीहनः ॥ तेऽत्ररुद्रपुरेरम्ये रुद्ररूपधरानराः ॥ ३ ॥ अजैकपादहिर्बुध्न्यमुख्याएकादशापिवै ॥ रुद्राःपरिवृढाश्चात्रत्रिशूलोद्यतपाणयः ॥ ४ ॥ पुर्यष्टकंचदुष्टेभ्योदेवद्रुग्भ्योह्यवं तिते ॥ प्रयच्छंतिवरान्नित्यंशिवभक्तजनेवराः ॥ ५ ॥ एतैरपितपस्तप्तंप्राप्यवाराणसींपुरीम् ॥ ईशानेशंमहालिंगंपरिस्थाप्यशुभप्रदम् ॥ ६ ॥ ईशाने शप्रसादेनदिश्यैश्वर्यांहिदिगीश्वराः ॥ एकादशाप्येकचराजटामुकुटमंडिताः ॥ ७ ॥ भालनेत्रानीलगलाः शुद्धांगावृषभध्वजाः ॥ असंख्याताःसहस्रा णियेरुद्राअधिभूतलम् ॥ ८ ॥ तेऽस्यांपुरिवसंत्यैश्यांसर्वभोगसमृद्धयः ॥ ईशानेशंसमभ्यर्च्यकाश्यांदेशांतरेष्वपि ॥ ९ ॥ विपन्नास्तेनपुण्येनजायंते ऽत्रपुरोहिताः ॥ अष्टम्यांचचतुर्दश्यामीशानेशंयजंतिये ॥ १० ॥ तएवरुद्राविज्ञेयाइहामुत्राप्यसंशयम् ॥ कृत्वाजागरणंरात्रावीशानेश्वरसंनिधौ ॥११॥ उपोष्यभूतांयांकांचिन्नरोगर्भभाक्पुनः ॥ स्वर्गमार्गेकथामित्थंशृण्वन्विष्णुगणोदिताम् ॥ १२ ॥ शिवशर्मादिवाप्युच्चैरपश्यच्चंद्रचंद्रिकाम् ॥ आह्ला दयंतींबहुशःसमंसर्वेंद्रियैर्मनः ॥ १३ ॥ चमत्कृत्यचमत्कृत्यकोयंलोकोहरेर्गणौ ॥ पप्रच्छशिवशर्मातौप्रोचतुस्तंचतौद्विजम् ॥ १४ ॥

कर्माणः ॥ शिवसत्कृतकर्माणइतिपाठेपिसएवार्थः ॥२॥ ३॥ अहिर्बुध्न्यइति ॥ उकारयकारवत्पदम् ॥ अजोऽस्येकपादहिर्बुध्न्यइत्यस्यांश्रुतौतथादर्शनात् ॥ परिवृढाःप्रभवः॥४॥ देवेभ्योद्रुह्यंतियेते देवद्रुहस्तेभ्योदेवद्रुग्भ्यः ॥ वराःश्रेष्ठाः ॥ जनावनाइतिक्वचित् ॥ जनेऽवनाइतिचान्यत्र ॥ ५ ॥ ६ ॥ ७ ॥ भालनेत्राललाटचक्षुषः ॥ ८ ॥ ९ ॥: यजंतिपूजामात्रंकुर्वंति ॥ पुरोहिताःपुरोधसः ॥ पुरेहिताइतिपाठेहिताहितकारिणः ॥ १० ॥ ११ ॥ भूतांचतुर्दशीम् ॥ १२ ॥ दिवापिदिनेपि ॥ चंद्रचंद्रिकांचंद्रज्योत्स्नाम् ॥ समंसह ॥ १३ ॥ चमत्कृत्यचमत्कृत्येत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दरेवीप्सा ॥ अत्याश्चर्यंविधायमनआह्लादयंतीमितिपूर्वेणैवान्वयः ॥ १४ ॥१५॥१६॥ तदनुत्तरंतपइतिसंबंधः ॥ नविद्यतेउत्तरमधिकंयस्मात्तदनुत्तरंसर्वोत्कृष्टमित्यर्थः ॥१७॥ ऊर्ध्वंदेहस्योर्ध्वप्रदेश
माचक्रमेगतवत्यद्रेतस्ततसोमत्वमीयिवत्प्राप्तवदित्यर्थः ॥ सोमत्वंसोमतेजस्त्वजन्म अमृतत्वंवा ॥ अनुत्तरभावनायास्तत्फलत्वात् ॥१८॥ विधिनादिष्टाब्रह्मणाप्रेरिताः ॥ दृष्टाइतिपाठेविधिनादैवेन ॥
हृष्टाइतिपाठेपिसएवार्थः ॥ १९ ॥ सजूःसह ॥ २० ॥ २१ ॥ चकारकारयामास ॥ अमुंचन्द्रम् ॥ अमूमितिपाठेपृथ्वीमित्यर्थः ॥ २२ ॥ तथापृथिव्यांपतनप्रकारेण ॥ तेनेतिपाठेपृथिवींप्रा
प्तेनतेजसेत्यर्थः ॥ २३ ॥ पद्मानांदशदशतीःशतंवर्षपद्मशतसंख्यावच्छिन्नंकालम् ॥ २४ ॥ २५ ॥ २६ ॥ कुण्डमितिपाठेकुंडंकूपम् ॥ अज्ञानात्प्रमुच्यतेमायातोमुक्तोभवति ॥ ज्ञानेनयुज्यत

गणावूचतुः ॥ ॥ शिवशर्मन्महाभागलोकएषकलानिधेः ॥ पीयूषवर्षिभिर्यस्यकरैराप्याय्यतेजगत् ॥ १५ ॥ पितासोमस्यभोविप्रजज्ञेऽत्रिर्भगवानृ
षिः ॥ ब्रह्मणोमानसात्पूर्वंप्रजासर्गंविधित्सतः ॥ १६ ॥ अनुत्तरंनामतपोयेनतप्तंहितत्पुरा ॥ त्रीणिवर्षसहस्राणिदिव्यानीतीहनौश्रुतम् ॥ १७ ॥ ऊर्ध्वं
माचक्रमेतस्यरेतःसोमत्वमीयिवत् ॥ नेत्राभ्यांतच्चसुस्रावदशधाद्योतयद्दिशः ॥ १८ ॥ तंगर्भंविधिनादिष्टादशदेव्योदधुस्ततः ॥ समेत्यधारयामासुर्नै
वताःसमशक्नुवन् ॥ १९ ॥ यदानधारणेशक्तास्तस्यगर्भस्यतादिशः ॥ ततस्ताभिःसजूःसोमोनिपपातवसुंधराम् ॥२०॥ पतितंसोममालोक्यब्रह्मालो
कपितामहः ॥ रथमारोपयामासलोकानांहितकाम्यया ॥२१॥ सतेनरथमुख्येनसागरांतांवसुंधराम् ॥ त्रिःसप्तकृत्वोद्रुहिणश्चकारामुंप्रदक्षिणम् ॥२२॥
तस्ययत्स्रवितंतेजःपृथिवीमन्वपद्यत ॥ तथौषध्यःसमुद्भूतायाभिःसंधार्यतेजगत् ॥ २३ ॥ सलब्धतेजाभगवान्ब्रह्मणावर्धितःस्वयम् ॥ तपस्तेपेमहा
भागपद्मानांदशतीर्दश ॥ २४ ॥ अविमुक्तंसमासाद्यक्षेत्रंपरमपावनम् ॥ संस्थाप्यलिंगममृतंचंद्रेशाख्यंस्वनामतः ॥ २५ ॥ बीजौषधीनांतोयानां
राजाभूद्द्विजन्मनाम् ॥ प्रसादाद्देवदेवस्यविश्वेशस्यपिनाकिनः ॥ २६ ॥ तत्रकूपंविधायैकममृतोदमितिस्मृतम् ॥ यस्यांबुपानस्नानाभ्यांनरोऽज्ञाना
त्प्रमुच्यते ॥ २७ ॥ तुष्टेनदेवदेवेनस्वमौलौयोधृतःस्वयम् ॥ आदायतांकलामेकांजगत्संजीवनींपराम् ॥२८॥ पश्चाद्दक्षेणशप्तोपिमासोनेक्षयमाप्यच ॥
आप्याय्यतेसौकलयापुनरेवतयाशशी ॥ २९ ॥ सतत्प्राप्यमहाराज्यंसोमःसोमवतांवरः ॥ राजसूयंसमाजह्रेसहस्रशतदक्षिणम् ॥ ३० ॥ दक्षिणामद
दत्सोमस्त्रींल्लोकानितिनौश्रुतम् ॥ तेभ्योब्रह्मर्षिमुख्येभ्यःसदस्येभ्यश्चभोद्विज ॥ ३१ ॥ हिरण्यगर्भोब्रह्माऽत्रिर्भृगुर्यत्रर्त्विजोभवन् ॥ सदस्योभूद्ध
रिस्तत्रमुनिभिर्बहुभिर्युतः ॥ ३२ ॥

इतिकश्चित् ॥ २७ ॥ तुष्टेनेति ॥ तांप्रसिद्धामेकांकलामादाय एकयाकलयाउपलक्षितइत्यर्थः ॥ तुष्टेनदेवेनस्वमौलौयःस्वयंधृतः ॥ धृतःसदेतिवापाठः ॥ ससोमस्तन्महाराज्यंप्राप्यराजसू
यंसमाजह्रइतितृतीयेनान्वयः ॥ २८ ॥ मासश्चासावूनश्चेतिमासोनस्तस्मिन्मुख्येचांद्रेमासिसमाप्तेसतीत्यर्थः ॥ मासांतइतिपाठेपिसएवार्थः ॥ तयामहादेवेनशिरोधृतया ॥ अनयेतिपाठेपिस
एवार्थः ॥ ययेतिपाठेयथावदित्यर्थः ॥ २९ ॥ सोमवतांसोमयागवताममृतवतामितिवा ॥ वरःश्रेष्ठः ॥ ३० ॥ नौआवाभ्याम् ॥ ३१ ॥ हिरण्यगर्भोब्रह्माभूदित्यग्रिमक्रियानुषज्जते ॥

CC-0. In Public Domain. Digitization by eGangotri

अत्रिर्भृगुरितिमरीच्यादीनामुपलक्षणार्थम् ॥ अतएवर्त्विजोऽभवन्नितिबहुवचनम् ॥ ३२ ॥ सिनीसिनीवाली ॥ ३३ ॥ सोमनामनिर्वक्ति ॥ उमयेति ॥ ३४ ॥ ३५ ॥ ३६ ॥ तत्रैवाविमुक्तएव ॥ विलोचनपदंविशिष्टनेत्रपदम् ॥ ३७ ॥ ३८ ॥ त्वत्तव ॥ हस्तैःकरैरश्मिभिरितियावत् ॥ परीतंव्याप्तम् ॥ ३९ ॥ यद्यतः ॥ एवमग्रेपि ॥ ४० ॥ यन्नेत्यत्रयत्रेतिक्वचित्पाठो दृश्यतेतदात्वयात्रतपस्तप्तमित्युक्तम् ॥ अत्रकुत्रेत्याकांक्षायामाह ॥ यत्रक्रतुक्रियेति ॥ ४१ ॥ त्वन्नाम्नित्वन्नाम्नोपलक्षितेचंद्रेश्वरइत्यर्थः ॥ सोमहेसोमसोमार्धरूपधृक् ॥ उमयासहवर्ततइतिसोमं

तंसिनीचकुहूश्चैवद्युतिःपुष्टिःप्रभावसुः ॥ कीर्तिर्धृतिश्चलक्ष्मीश्चनवदेव्यःसिषेविरे ॥ ३३ ॥ उमयासहितंरुद्रंसंतर्प्याध्वरकर्मणा ॥ प्रापसोमइतिख्यातिंदत्तांसोमेनशंभुना ॥ ३४ ॥ तत्रैवतप्तवान्सोमस्तपःपरमदुष्करम् ॥ तत्रैवराजसूयंचचक्रेचंद्रेश्वराग्रतः ॥ ३५ ॥ तत्रैवब्राह्मणैःप्रीतैरित्युक्तोसौ कलानिधिः ॥ सोमोस्माकंब्राह्मणानांराजात्रैलोक्यदक्षिणः ॥ ३६ ॥ तत्रैवदेवदेवस्यविलोचनपदंगतः ॥ देवेनप्रीतमनसात्रैलोक्याह्लादहेतवे ॥ ३७ ॥ त्वंममास्यपरामूर्तिरित्युक्तस्तत्तपोबलात् ॥ जगत्तवोदयंप्राप्यभविष्यतिसुखोदयम् ॥ ३८ ॥ त्वत्पीयूषमयैर्हस्तैःस्पृष्टमेतच्चराचरम् ॥ भानुतापपरीतंचपरांग्लानिंविहास्यति ॥ ३९ ॥ एतदुक्त्वामहेशानोवरानन्यानदान्मुदा ॥ द्विजराजतपस्तप्तंयदत्युग्रंत्वयात्रवै ॥ ४० ॥ यच्चक्रतुक्रियोत्सर्गस्त्वयामह्यंनिवेदितः ॥ स्थापितंयत्त्विदंलिंगंममचंद्रेश्वराभिधम् ॥ ४१ ॥ ततोत्रलिंगेत्वन्नाम्निसोमसोमार्धरूपधृक् ॥ प्रतिमासंपंचदश्यांशुक्लायांसर्वगोप्यहम् ॥ ॥ ४२ ॥ अहोरात्रंवसिष्यामित्रैलोक्यैश्वर्यसंयुतः ॥ ततोत्रपूर्णिमायांतुकृतास्वल्पापिसत्क्रिया ॥ ४३ ॥ जपहोमार्चनध्यानदानब्राह्मणभोजनम् ॥ महापूजाचसानूनंममप्रीत्यैभविष्यति ॥ ४४ ॥ जीर्णोद्धारादिकरणंनृत्यवाद्यादिकार्पणम् ॥ ध्वजारोपणकर्मादितपस्वियतितर्पणम् ॥ ४५ ॥ चंद्रेश्वरेकृतंसर्वंतदानंत्यायजायते ॥ अन्यच्चतेप्रवक्ष्यामिशृणुगुह्यंकलानिधे ॥ ४६ ॥ अभक्तायचनाख्येयंनास्तिकायश्रुतिद्रुहे ॥ अमावास्यायदासोमजायतेसोमवासरे ॥ ४७ ॥

तच्चतदर्धंचतद्रूपधृक् ॥ उमार्धशरीरधृगित्यर्थः ॥ शुक्लायांपंचदश्यांपौर्णमास्यामित्यर्थः ॥ ४२ ॥ ततइति ॥ यतोऽत्रस्थानेऽहंनिवसिष्यामिततोऽत्रस्वल्पापिकृतासत्क्रियानूनंनिश्चितंममप्रीत्यै महापूजाभविष्यतीतिसार्धेनान्वयः ॥ ४३ ॥ सत्क्रियामेवदर्शयति ॥ जपहोमेति ॥ ४४ ॥ अर्पणंविश्वेश्वरेसमर्पणम् ॥ कारणमितिपाठेकरणमित्यर्थः ॥ ४५ ॥ ४६ ॥ श्रुतिद्रुहेवेदनिंदकाय ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतायांचतुर्दश्याम् ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ वसुरुद्रादितिसुतेतिअश्रद्धामलक्षालनायपित्रादित्रयाणांवस्वादिरूपकथनम् ॥ ५२ ॥ ५३ ॥ ५४ ॥ सर्वर्णात्संपूर्णार्हणात् ॥ क्षणात्पितृकृतादितिक्वचित्पाठः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ स्पृष्ट्वास्पर्शनंकृत्वा ॥ दृष्ट्वेतिक्वचित् ॥ ५९ ॥ सदर्शेऽमावास्यासहिते ॥ ऋणत्रयाद्दैवपित्र्यमानुषलक्षणादित्यर्थः ॥

तदोपवासःकर्तव्योभूतायांसद्भिरादरात् ॥ कृतानित्यक्रियःसोमत्रयोदश्यांनिशामय ॥ ४८ ॥ शनिप्रदोषेसंपूज्यलिंगंचंद्रेश्वराह्वयम् ॥ नक्तंकृत्वात्रयोदश्यांनियमंपरिगृह्यच ॥ ४९ ॥ उपोष्यचचतुर्दश्यांकृत्वाजागरणंनिशि ॥ प्रातःसोमकुहूयोगेस्नात्वाचंद्रोदवारिभिः ॥५०॥ उपास्यसंध्यांविधिवत्कृतसर्वोदकक्रियः ॥ उपचंद्रोदतीर्थेषुश्राद्धंविधिवदाचरेत् ॥५१॥ आवाहनार्घ्यरहितंपिंडान्दद्यात्प्रयत्नतः ॥ वसुरुद्रादितिसुतस्वरूपपुरुषत्रयम् ॥५२॥ मातामहांस्तथोद्दिश्यतथान्यानपिगोत्रजान् ॥ गुरुश्वशुरबंधूनांनामान्युच्चार्यपिंडदः ॥ ५३ ॥ कुर्वञ्छ्राद्धंचतीर्थेस्मिञ्छ्रद्धयोद्धरतेखिलान् ॥ गयायांपिंडदानेनयथातुष्यंतिपूर्वजाः ॥ ५४ ॥ तथाचंद्रोदकुंडेऽत्रश्राद्धैस्तृप्यंतिपूर्वजाः ॥ गयायांचयथामुच्येत्सर्वर्णात्पितृजान्नरः ॥ ५५ ॥ तथाप्रमुच्यतेचर्णाच्चंद्रोदेपिण्डदानतः ॥ यदाचंद्रेश्वरंद्रष्टुंयायात्कोपिनरोत्तमः ॥५६॥ तदानृत्यंतिमुदितास्तत्पूर्वप्रपितामहाः ॥ अयंचंद्रोदतीर्थेस्मिंस्तर्पणंनःकरिष्यति ॥ ५७ ॥ अस्माकंमंदभाग्यत्वाद्यदिनैवकरिष्यति ॥ तदातत्तीर्थसंस्पर्शादस्मत्तृप्तिर्भविष्यति ॥ ५८ ॥ स्पृशेन्नापियदामंदस्तदाद्रक्ष्यतितृप्तये ॥ एवंश्राद्धंविधायाथस्पृष्ट्वाचंद्रेश्वरंव्रती ॥ संतर्प्यविप्रांश्चयतीन्कुर्याद्वैपारणंततः ॥ ५९ ॥ एवंव्रतेकृतेकाश्यांसदर्शेसोमवासरे ॥ भवेदृणत्रयान्मुक्तोमृगांकमदनुग्रहात् ॥ ६० ॥ अत्रयात्रामहाचैत्र्यांकार्याक्षेत्रनिवासिभिः ॥ तारकज्ञानलाभायक्षेत्रविघ्ननिवर्तिनी ॥ ६१ ॥ चंद्रेश्वरंसमभ्यर्च्ययद्यन्यत्रापिसंस्थितः ॥ अघौघपटलींभित्त्वासोमलोकमवाप्स्यति ॥६२॥ कलौचंद्रेशमहिमानाभाग्यैरवगम्यते ॥ अन्यच्चतेप्रवक्ष्यामिपरंगुह्यंनिशापते ॥ ६३ ॥ सिद्धयोगीश्वरंपीठमेतत्साधकसिद्धिदम् ॥ सुरासुरेषुगंधर्वनागविद्याधरेष्वपि ॥ ६४ ॥ रक्षोगुह्यकयक्षेषुकिंनरेषुनरेषुच ॥ सप्तकोट्यस्तुसिद्धानामत्रसिद्धाममायतः ॥ ६५ ॥ षण्मासंनियताहारोध्यायन्विश्वेश्वरीमिह ॥ चंद्रेश्वरार्चनायातान्सिद्धान्पश्यतिसोऽग्रगान् ॥ ६६ ॥ सिद्धयोगीश्वरीसाक्षाद्वरदातस्यजायते ॥ तवापिमहतीसिद्धिःसिद्धयोगीश्वरीक्षणात् ॥ ६७ ॥ संतिपीठान्यनेकानिक्षितौसाधकसिद्धये ॥ परंयोगीश्वरीपीठाद्भूपृष्ठेनाशुसिद्धिदम् ॥ ६८ ॥ यत्रचंद्रेश्वरंलिंगंत्वयेदंस्थापितंशशिन् ॥ इदमेवहितत्पीठमदृश्यमकृतात्मभिः ॥ ६९ ॥ जितकामाजितक्रोधाजितलोभस्पृहास्मिताः ॥ योगीश्वरींप्रपश्यंतिममशक्तिंपरांहिताम् ॥ ७० ॥

तथाचश्रुतिः ॥ जायमानोहवैब्राह्मणस्त्रिभिर्ऋणवाञ्जायतइति ॥६०॥ महाचैत्र्यांचैत्रमासोद्भवायांमहापूर्णिमायांचित्रानक्षत्रयुक्तायामित्यर्थः ॥६१॥ संस्थितोमृतः ॥ अघौघपटलींपापसमूहपंक्तिम् ॥६२॥ ॥ ६३ ॥ ६४ ॥ ६५ ॥ विश्वेश्वरींसिद्धेश्वरीम् ॥ अयमेववापाठः ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ जितेति ॥ लोभश्चस्पृहाचास्मिताचतास्तथाजितालोभस्पृहास्मितायैस्तेतथा ॥ जितलोभाजित

CC-0. In Public Domain. Digitization by eGangotri

स्पृहाइतिक्वचित्पाठः ॥ स्पृहोज्झिताइतिचान्यत्र ॥ हितांहितकारिणीम् ॥ हिनिश्चितंतांप्रसिद्धामितिवा ॥ ७० ॥ भावोभक्तिस्तामिताःप्राप्ताभावितांभक्तियुक्ताइत्यर्थः ॥ ७१ ॥ ७२ ॥ ॥ ७३ ॥ अधिपःश्रेष्ठः ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ततःपंचदशेचात्रलोको नाक्षत्रसंज्ञकः ॥ तथाऽतिरम्योलोकोत्रबुधस्यापिनिगद्यते ॥ १ ॥ उडुलोककथांकथयितुंभार्यांसावधानयति ॥ श्रृणुपत्नीति ॥ १ ॥ उडुनक्षत्रम् ॥ ख्यातंकथयतम् ॥ विष्वगाख्यान

येतुप्रत्यग्रमिजनास्तथाप्रतिचतुर्दशि ॥ सिद्धयोगीश्वरीपीठेपूजयिष्यंतिभाविताः ॥ ७१ ॥ अदृष्टरूपांसुभगांपिंगलांसर्वसिद्धिदाम् ॥ धूपनैवेद्यदीपाद्यैस्तेषामाविर्भविष्यति ॥ ७२ ॥ इतिदत्त्वावराञ्छंभुस्तस्मैचंद्रमसेद्विज ॥ अंतर्हितोमहेशानस्तत्रवैश्वेश्वरेपुरे ॥ ७३ ॥ तदारभ्यचलोकेऽस्मिन्द्विजराजोधिपोभवत् ॥ दिशोवितिमिराःकुर्वन्निजैःप्रसृमरैःकरैः ॥ ७४ ॥ सोमवारव्रतकृतःसोमपानरतानराः ॥ सोमप्रभेणयानेनसोमलोकंव्रजंतिहि ॥ ॥ ७५ ॥ चंद्रेश्वरसमुत्पत्तिंतथाचांद्रमसंतपः ॥ यःश्रोष्यतिनरोभक्त्याचंद्रलोकेसइज्यते ॥ ७६ ॥ अगस्तिरुवाच ॥ ॥ शिवशर्मणिशर्मकारिणींपथिदिव्येश्रमहारिणींगणौ ॥ कथयंतौतुकथामिमांशुभामुडुलोकंपरिजग्मतुस्ततः ॥ ७७ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखंडेपूर्वार्द्धेसोमलोकवर्णनंनामचतुर्दशोऽध्यायः ॥१४॥ अगस्तिरुवाच ॥ श्रृणुपत्निमहाभागेलोपामुद्रेसधर्मिणि ॥ कथांविष्णुगणाभ्यांचकथितांशिवशर्मणे ॥ १ ॥ शिवशर्मोवाच ॥ अहोगणौविचित्रेयंश्रुताचांद्रमसीकथा ॥ उडुलोककथांख्यातंविष्वगाख्यानकोविदौ ॥ २ ॥ गणावूचतुः ॥ पुरासिसृक्षतःसृष्टिंस्रष्टुरंगुष्ठपृष्ठतः ॥ दक्षःप्रजाविनिर्माणेदक्षोजातःप्रजापतिः॥३॥षष्टिर्दुहितरस्तस्यतपोलावण्यभूषणाः ॥ सर्वलावण्यरोहिण्योरोहिणीप्रमुखाःशुभाः ॥ ४ ॥ ताभिस्तप्स्वातपस्तीव्रंप्राप्यवैश्वेश्वरींपुरीम् ॥ आराधितोमहादेवःसोमःसोमविभूषणः ॥ ५ ॥ यदातुष्टोयमीशानोदातुंवरमथाययौ ॥ उवाचचप्रसन्नात्मायाचध्वंवरमुत्तमम् ॥ ६ ॥ शंभोर्वाक्यमथाकर्ण्यऊचुस्ताश्चकुमारिकाः ॥ यदिदेयोवरोऽस्माकंवरयोग्याःस्मशंकर ॥ ७ ॥ भवतोपिमहादेवभवतापहरोहियः ॥ रूपेणभवतातुल्यःसनोभर्ताभवत्विति ॥ ८ ॥ लिंगंसंस्थाप्यसुमहन्नक्षत्रेश्वरसंज्ञितम् ॥ वारणायास्तटेरम्येसंगमेश्वरसान्निधौ ॥ ९ ॥

कोविदौसकलाख्यानेपंडितौ ॥ २ ॥ ३ ॥ तपोविषयेयल्लावण्यंप्रावीण्यंतद्भूषणंयासांतास्तथा ॥ रूपलावण्येतिक्वचित् ॥ तपोलावण्यसंयुताइतिचान्यत्र ॥ नकेवलंतदेकभूषणाःसर्वलावण्यरोहिण्यश्च ॥ सर्वेषुविषयेषुयानिलावण्यानितानिरोहितुमारोहितुंशीलंयासांतास्तथा ॥ सर्वकल्याणकारिण्यइतिपाठेस्पष्टएवार्थः ॥ ४ ॥ सोमउमयासहवर्तमानः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुषायितसंज्ञितंपुरुषवदाचरितंपुरुषायितंपुरुषैर्यादृशंतपोऽनुष्ठीयतेतादृशमित्यर्थः ॥ तत्संज्ञितंतन्नामकंतपः ॥ पुरुषामितसंज्ञितमितिक्वचित् ॥ पुरुषायुतसंज्ञितमितिचान्यत्र ॥ पाठद्वयेपि पुरुषेभ्योप्यतिशयितंयत्तपस्तत्संज्ञितमित्यर्थः ॥ अतएवोक्तम् ॥ पुरुषैरपिदुष्करमितिं ॥ १० ॥ एकस्यपत्न्यएकपत्न्यस्तासाम् ॥ तदेवाह ॥ एकत्रभर्तरि ॥ एकार्थेतिपाठेपिसएवार्थः ॥ ११ ॥ वरान्दास्यन्प्रथमतस्तासांनक्षत्रनामनिर्वक्ति ॥ नक्षांतमिति ॥ नक्षांतंनसोढमीर्ष्यावशादित्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अतिथित्व

दिव्यंवर्षसहस्रंतुपुरुषायितसंज्ञितम् ॥ तपस्तप्तंमहत्ताभिःपुरुषैरपिदुष्करम् ॥ १० ॥ ततस्तुष्टोहिविश्वेशोव्यतरद्वरमुत्तमम् ॥ सर्वासामेकपत्नीनामकत्रे स्थिरचेतसाम् ॥ ११ ॥ श्रीविश्वेश्वरउवाच ॥ ॥ नक्षांतंहितपोत्युग्रमेतदन्याभिरीदृशम् ॥ पुराऽबलाभिस्तस्माद्वोनामनक्षत्रमत्रवै ॥ १२ ॥ पुरुषायितसंज्ञेनतत्तयंत्तपसाधुना ॥ भवतीभिस्ततःपुंस्त्वमिच्छयावोभविष्यति ॥ १३ ॥ ज्योतिश्चक्रेसमस्तेऽस्मिन्नग्रगण्याभविष्यथ ॥ मेषादीनांचराशीनांयोनयोयूयमुत्तमाः ॥ १४ ॥ ओषधीनांसुधायाश्चब्राह्मणानांचयःपतिः ॥ पतिमत्योभवत्योपितेनपत्याशुभाननाः॥ १५ ॥ भवतीनामिदंलिंगंनक्षत्रेश्वरसंज्ञितम् ॥ पूजयित्वानरोगंताभवतीलोकमुत्तमम् ॥ १६ ॥ उपरिष्टान्मृगांकस्यलोकोवस्तुभविष्यति ॥ सर्वासांतारकाणांचमध्येमान्याभविष्यथ ॥ १७ ॥ नक्षत्रपूजकायेचनक्षत्रव्रतचारिणः ॥ तेवोलोकेवसिष्यंतिनक्षत्रसदृशप्रभाः ॥ १८ ॥ नक्षत्रग्रहराशीनांबाधास्तेषांकदाचन ॥ नभविष्यंतियेकाश्यांनक्षत्रेश्वरवीक्षकाः ॥ १९ ॥ अगस्त्यउवाच ॥ ॥ अतिथित्वमवापनेत्रयोर्बुधलोकःशिवशर्मणस्त्वथ ॥ गणयोर्भगणस्यसंकथांकथयित्रोरितिविष्णुचेतसोः ॥ २० ॥ शिवशर्मोवाच ॥ ॥ कस्यलोकोयमतुलोब्रूतंश्रीभगवद्गणौ ॥ पीयूषभानोरिवमेमनःप्रीणयतेतराम् ॥ २१ ॥ ॥ गणावूचतुः ॥ ॥ शिवशर्मञ्छृणुकथामेतांपापापहारिणीम् ॥ स्वर्गमार्गविनोदायतापत्रयविनाशिनीम् ॥ २२ ॥ योसौपूर्वंमहाकांतिरावाभ्यांपरिवर्णितः ॥ साम्राज्यपदमापन्नोद्विजराजस्तवाग्रतः ॥ २३ ॥ दक्षिणाराजसूयस्ययेनत्रिभुवनंकृता ॥ तपस्ततापयोत्युग्रंपद्मानांदशतीर्दश ॥२४॥ अत्रिनेत्रसमुद्भूतःपौत्रोवैद्रुहिणस्ययः ॥ नाथःसर्वौषधीनांचज्योतिषांपतिरेवच ॥ २५ ॥

मिति॥ इत्युक्तप्रकारेणभगणस्यनक्षत्रगणस्यसंकथांसमीचीनांकथांगणयोःकथयतोःसतोर्बुधलोकः शिवशर्मणोनेत्रयोरतिथित्वंनेत्रगोचरतामवापेत्यर्थः ॥२०॥ पीयूषभानोश्चन्द्रस्यलोकइवप्रीणयते तर्पयतिहर्षयतीतियावत् ॥ २१ ॥ २२ ॥ योसाविति ॥ योऽसौपूर्वंमहाकांतिरित्यादिभिःषड्भिःश्लोकैर्यएवंभूतश्चंद्रइत्यनूद्यसबृहस्पतेर्भार्यांजहारेतिसप्तमेनान्वयः ॥ २३ ॥ २४ ॥ द्रुहिणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणः ॥ २९ ॥ शेवधिर्निधिराश्रय इत्यर्थः ॥ स्वकरैःस्वरश्मिभिः ॥ गलहस्तयेत्गलेधृत्वानिस्सारयेन्नाशयेदित्यर्थः ॥२६॥ दिग्वध्विति ॥ दिग्वधूनांदिगंगनानांयेचारवःशृंगाराअलंकरणानिकुंकुमादिभिर्मंडनानिवातेपांदर्शनार्थमादर्शस्थानीयंदर्पणस्थानीयंमंडलंयस्यसः ॥ २७ ॥ किमन्यैरिति ॥ अन्यैर्गुणसंभारैर्वर्णितैःकिम् ॥ यतोऽतोपिवक्ष्यमाणात्कारणादस्यविधोःसमंनास्ति ॥ समोग्रह इतिक्वचित्पाठः ॥ तमसोरिपोरितिचान्यत्र ॥ अतइत्यनेनोक्तंहेतुंविवृणोति ॥ निजेति ॥ सर्वज्ञईश्वरोयस्यचंद्रस्यकलांनिजोत्तमांगेस्वशिरसिअवतंसयेच्छिरोभूषणंकुर्यादित्यर्थः ॥ द्वितीयांत पाठेनिजोत्तमांगंप्रतिभूषयेदिति ॥ २८ ॥ भ्रातुःपितृव्यपुत्रस्य ॥ अत्र्यंगिरसोर्भ्रातृत्वात् ॥ अतएवांगिरसस्येतिविशेषणमुक्तम् ॥ २९ ॥ रूपवान्रूपशालिनीमितिविशेषणाभ्यांपरस्परानुमते नैवहरणमितिसूचितम् ॥ मत्स्यपुराणेतथादर्शनात् ॥ तथाहि ॥ कदाचिदुद्यानगतामपश्यदनेकपुष्पाभरणोपशोभाम् ॥ बृहन्नितंवस्तनभारखेदात्पुष्पावभंगेप्यतिदुर्बलांगीम् ॥ भार्याचतांदेवगुरोरनंगवाणातुरामायतचारुनेत्राम् ॥ तारांसताराधिपतिःस्मरार्तःकेशेषुजग्राहविविक्तभूमौ ॥ सापिस्मरार्तासहतेनरेमेतद्रूपकांत्याहतमानसैव ॥ चिरंविहृत्याथजगामतारांविधुर्गृहीत्वास्वगृहंततोपीति ॥ वहुवहुवारंयथाभवतितथा ॥ ३० ॥ ननुकथमयंसात्त्विकोभूत्वावहुभिर्वार्यमाणोत्यंतनिषिद्धेकर्मणिप्रवृत्तइत्यतआह ॥ नायमिति ॥ नखंडितंवैक्लव्यंनप्रापितमपितुखंडितमेव ॥ ३१ ॥ ननुसन

निर्मलानांकलानांचशेवधिर्यश्चगीयते ॥ उद्यन्परोपतापंयःस्वकरैर्गलहस्तयेत् ॥ २६ ॥ मुदंकुमुदिनीनांयस्तनोतिजगतासह ॥ दिग्वधूचारुशृंगारदर्शनादर्शमंडलः ॥ २७ ॥ किमन्यैर्गुणसंभारैरतोपिनसमंविधोः ॥ निजोत्तमांगेसर्वज्ञःकलांयस्यावतंसयेत् ॥ २८ ॥ बृहस्पतेस्सवैभार्यामैश्वर्यमदमोहितः ॥ पुरोहितस्यापिगुरोर्भ्रातुरांगिरसस्यवै ॥ २९ ॥ जहारतरसातारांरूपवान्रूपशालिनीम् ॥ वार्यमाणोपिगीर्वाणैर्बहुदेवर्षिभिःपुनः ॥ ३० ॥ नायंकलानिधेर्दोषोद्विजराजस्यतस्यवै ॥ हित्वात्रिनेत्रंकामेनकस्यनोखंडितंमनः ॥३१॥ ध्वांतमेतदभितःप्रसारियत्तच्छमायविधिनाविनिर्मितम् ॥ दीपभास्करकरामहौषधंनाधिपत्यतमसस्तुकिंचन ॥ ३२ ॥ आधिपत्यमदमोहितंहितंशंसितंस्पृशतिनोहरेर्हितम् ॥ दुर्जनंविहिततीर्थमज्जनैःशुद्धधीरिवविरुद्धमानसम् ॥ ३३ ॥ धिग्धिगेतदधिकर्द्धिचेष्टितंचंक्रमेक्षणविलक्षितंयतः ॥ वीक्षतेक्षणमचारुचक्षुषाघातितेनविपदःपदेनच ॥ ३४ ॥

कादीनांमनसःकामाखंडितत्वंदृश्यते ॥ सत्यम् ॥ तेषामाधिपत्यतमोऽभावादित्याशयेनाह ॥ ध्वांतमिति ॥ एतद्यद्ध्वांतंतमः ॥ अभितःसर्वतःप्रसारिप्रसरणशीलंतच्छमायनाशायविधिनामहत् औषधंविनिर्मितम् ॥ किंतन्महौषधमित्याकांक्षायामाह ॥ दीपेति ॥ अधिपतेर्भावआधिपत्यमाधिपत्यतमसआधिपत्यजन्याविवेकज्ञानस्य तुपुनः किंचनकिंचिदप्यौषधंनविहितमित्यर्थः ॥ ३२ ॥ वार्यमाणोपिजहारेतियदुक्तंतत्रैवहेत्वंतरमाहः ॥ आधिपत्यमिति ॥ आधिपत्यमदेनमोहितमंतःकरणंपुरुषंवाकर्मभूतमितिशेषः ॥ हरेःसंबंधियद्धितंश्रवणादिनिषिद्धवर्जनादिकंतद्यतःशंसितं कथितंसत्कर्तृभूतंनस्पृशति ॥ आधिपत्यमदस्तुत्सार्यस्वार्थेस्थापयितुंनशक्नोतीत्यर्थः ॥ अत्रानुगुणंदृष्टांतमाह ॥ दुर्जनमिति ॥ तीर्थमज्जनैस्तीर्थस्नानादिभिः शुद्धानिर्मलावुद्धिर्यस्यसयथा विरुद्धमानसंदुष्टमानसंदुर्जनंवंचकंनस्पृशतितद्वदिति ॥ हरेर्द्धितमितिपाठेनकेवलंनोस्पृशतिअपितुहितंहरेत् ॥ क्रोधमुत्पाद्यानर्थंसंपादयेदित्यर्थः ॥ चतंहितैरितिस्थलद्वयपाठेतंचंद्रंहितैःसुहृद्भिः ॥ अन्यत्सर्वपूर्ववत् ॥ दुर्जनंविहिततीर्थमज्जनमितिक्वचित्पाठः ॥ ३३ ॥ आधिपत्यगर्वंनिंदति ॥ धिग्धिगिति ॥ अधिकर्द्धिचेष्टितंधिक्गर्हितंनिंदितमितियावत् ॥ गर्हाधिक्यसूचनार्थावीप्सा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिगर्द्धिचेष्टितामितिक्वचित्पाठः ॥ कुतइत्यतआह ॥ यतोयेनाधिकर्द्धिचेष्टितेनचंक्रमेक्षणविलक्षितंचंक्रमश्चंक्रमणंपरिभ्रमणंतेनयदीक्षणंपृथिवीभ्रमणादिदर्शनम् ॥ यदुक्तंभागवते ॥ यथा भ्रमरिकादृष्ट्याभ्राम्यतीवमहीपतइति ॥ तद्वद्विलक्षितंविपरीतंवीक्षतेपश्यति ॥ अहितमेवहितंमन्यतइत्यर्थः ॥ कथंभूतेनाधिकर्द्धिचेष्टितेन ॥ अचारुचक्षुषाऽविवेकात्मकेननेत्रेण ॥ पुनःकथंभूतेन ॥ क्षणंघातितेन क्षणंयथास्यात्तथाघातंघातकत्वमितेनप्राप्तेननाशकेनेत्यर्थः ॥ पुनःकथंभूतेन ॥ विपदःपदेनविपदामाश्रयेणेत्यर्थः ॥ ३४ ॥ कामाधिपत्यतमसीउपसंहरन्दृष्टांतत्वेनार्थांतराण्याह ॥ कःकामेनेति ॥ जगतांमध्ये ॥ त्रिजगतइतिक्वचित् ॥ भल्लोबाणः ॥ भल्लीतिपाठेपिसएवार्थः ॥ सल्लोचनोविद्यमाननेत्रः ॥ काचकामलादिदोषराहित्यंवासतोऽर्थः ॥ सल्लोचनःसद्विवेकवानितिवा ॥ ३५ ॥ उपदेशसारमाह ॥ आधिपत्येति ॥ आधिपत्यकमलाऐश्वर्यलक्ष्मीर्यासातिचंचलातांचपुनःप्राप्यसदसद्यदर्जितंतन्निश्चलंस्थिरतरंभवतिसुखदुःखप्रापकमवश्यंभवतीत्यर्थः ॥ तत्तस्मादार्याणांचरितमिवचरितंयेषांतैरुच्चकैर्यथास्यात्तथासदैवहितंसर्वदासदनुष्ठानमेवकार्यमिति ॥ किलेतिशास्त्रप्रसिद्धिंद्योतयति ॥ ३६ ॥ प्रासंगिकमुक्त्वाप्रकृतमाहतुः ॥ नयदेति ॥

कःकामेननिर्जितस्त्रिजगतांपुष्पायुधेनाप्यहोकःक्रोधस्यवशंगतोननचकोलोभेनसंमोहितः ॥ योषिल्लोचनभल्लभिन्नहृदयःकोनाप्तवानापदंकोराज्यश्रियमाप्यनांधपदवींयातोपिसल्लोचनः ॥ ३५ ॥ आधिपत्यकमलातिचंचलाप्राप्यतांचयदिहार्जितंकिल ॥ निश्चलंसदसदुच्चकैर्हितंकार्यमार्यचरितैः सदैवतत् ॥ ३६ ॥ नयदांगिरसेतारांसव्यसर्जयदुल्बणः ॥ रुद्रोथपार्ष्णिजग्राहगृहीत्वाजगवंधनुः ॥ ३७ ॥ तेनब्रह्मशिरोनामपरमास्त्रंमहात्मना ॥ उत्सृष्टंदेवदेवायतेनतन्नाशितंततः ॥ ३८ ॥ तयोस्तद्युद्धमभवद्घोरंवैतारकामयम् ॥ ततस्त्वकांडब्रह्मांडभंगाद्भीतोभवद्विधिः ॥३९॥ निवार्यरुद्रंसमरात्संवर्तानलवर्चसम् ॥ ददावांगिरसेतारांस्वयमेवपितामहः ॥४०॥ अथांतर्गर्भमालोक्यतारांप्राहबृहस्पतिः ॥ मदीयायांनतेयोनौगर्भोधार्यःकथंचन ॥४१॥

आंगिरसेआंगिरसायबृहस्पतये ॥ व्यसर्जयत्दत्तवान् ॥ उल्वणस्तीक्ष्णउद्भटइतियावत् ॥ पार्ष्णिपृष्ठरक्षांसाहाय्यंवाजग्राहकृतवान् ॥ अजस्यच्छागस्यगोश्चशृंगाभ्यांनिर्मितमाजगवम् ॥ ॥ ३७ ॥ तेनेति ॥ तेनचंद्रेण ॥ ब्रह्मइतिपदंशिरसियस्यतद्ब्रह्मशिरोब्रह्मास्त्रमस्त्रविशेषंवाब्रह्मशिरः ॥ अस्त्रंब्रह्मशिरश्चैवब्राह्ममस्त्रंतथैवचेतिनृसिंहप्रादुर्भावेहरिवंशेदर्शनात् ॥ देवदेवायरुद्रायोत्सृष्टम् ॥ ततस्तदनंतरंतद्ब्रह्मशिरोऽस्त्रंतेनदेवेननाशितम् ॥ ततइत्यत्रयशइतिपाठेतस्यचंद्रस्ययशोनाशितमित्यर्थः ॥ उद्धृत्यदेवानुत्सृष्टंयेनैषांनाशितंयशइतिक्वचित्पाठस्तदातेनेत्यनेनेश्वरस्यचन्द्रस्यवाऽभिधानम् ॥ उद्धृत्यउत्तोल्य ॥ देवान्प्रतिएषांदेवानाम् ॥ ३८ ॥ तारकामयन्तारानिमित्तम् ॥ ततोयुद्धात् ॥ कथंभूतात् ॥ अकांडब्रह्मांडभंगादनवसरजगत्प्रलयान्निमित्तात् ॥ विधिर्ब्रह्माभीतोऽभूत् ॥ भृशंभीतइतिपाठेततस्तदनंतरमितिवार्थः ॥ तुशब्दादन्येऽपिभीताअभूवन्नित्यर्थः ॥ ३९ ॥ संवर्तानलवर्चसं प्रलयाग्नितेजसम् ॥ आंगिरसेआंगिरसाय ॥ ४० ॥ अन्तर्गर्भमुदरस्थंगर्भमित्यर्थः ॥ अस्यामितिपाठेतारायामित्यर्थः ॥ अथात्रेतिपाठेपिसएवार्थः ॥ योनौगर्भेक्षेत्रइतिवा ॥ क्षेत्रेमदीयेगर्भोऽयंनधार्यःशशिनस्त्वये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिकचित्पाठः ॥ ४१ ॥ इषीकास्तंबमत्युच्छ्रिततृणविशेषगुच्छम् ॥ ऐषीकास्त्रमथादायेतिपाठश्चित्यः ॥ ४२ ॥ ४३ ॥ अतिसत्रपाअतिशयलज्जायुक्ता ॥ ४४ ॥ ४५ ॥ ससोमःप्रजापतिश्चेत्यन्वयः ॥ राजावनस्पतीनाम् ॥ तदातंतारागर्भमितिस्थलद्वयपाठेप्रजापतिर्ब्रह्माइत्येव ॥ ४६ ॥ ४७ ॥ निर्वाणराशिंकैवल्यपुंजम् ॥ ४८ ॥ उग्रंविश्वेश्वरंसंशीलयन् चिंतयन् ॥ अयुतंदशसहस्रम् ॥ ४९ ॥ ५० ॥ उवाचेति ॥ अन्यविबुधोत्तमोऽन्यदेवेषूत्तमस्त्वंवरंब्रूहीत्यन्वयः ॥ पाठांतरेसंबोधनम् ॥ ५१ ॥ ५२ ॥ इतीति ॥ इतिपूर्वोक्तप्रकारंवचः श्रुत्वासवालकोलोचनेउन्मील्ययावत्पुरःपश्यतितावल्लिंगेत्र्यंबकंददर्शेतिद्वितीयेनान्वयः ॥ मेघगंभीरनिःस्वनंयथास्यात्तथा ॥ कथंभूतम् ॥ अवग्रहेणवृष्टिप्रतिबंधेनपरिम्लानंपरिशुष्कंसस्यंतस्य

इषीकास्तंबमासाद्यगर्भंसाचोत्ससर्जह ॥ जातमात्रःसभगवान्देवानामाक्षिपद्वपुः ॥ ४२ ॥ ततःसंशयमापन्नास्तारामूचुःसुरोत्तमाः ॥ सत्यंब्रूहिसुतः कस्यसोमस्याथबृहस्पतेः ॥ ४३ ॥ पृच्छमानायदादेवैर्नाहताराऽतिसत्रपा ॥ तदासाशप्तुमारब्धाकुमारेणातितेजसा ॥ ४४ ॥ तंनिवार्यतदाब्रह्मातारां पप्रच्छसंशयम् ॥ प्रोवाचप्रांजलिःसातंसोमस्येतिपितामहम् ॥ ४५ ॥ तदासमूर्ध्न्युपाघ्रायराजागर्भंप्रजापतिः ॥ बुधइत्यकरोन्नामतस्यबालस्यधी मतः ॥ ४६ ॥ ततश्चसर्वदेवेभ्यस्तेजोरूपबलाधिकः ॥ बुधःसोमंसमापृच्छ्यतपसेकृतनिश्चयः ॥४७॥ जगामकाशींनिर्वाणराशिंविश्वेशपालिताम् ॥ तत्रलिंगंप्रतिष्ठाप्यसस्वनाम्नाबुधेश्वरम् ॥ ४८ ॥ तपश्चचारचात्युग्रमुग्रंसंशीलयन्हृदि ॥ वर्षाणामयुतंबालोबालेंदुतिलकंशिवम् ॥ ४९ ॥ ततोवि श्वपतिःश्रीमान्विश्वेशोविश्वभावनः ॥ बुधेश्वरान्महालिंगादाविरासीन्महोदयः ॥ ५० ॥ उवाचचप्रसन्नात्माज्योतीरूपोमहेश्वरः ॥ वरंब्रूहिमहाबुद्धे बुधान्यविबुधोत्तमः ॥ ५१ ॥ तवानेनातितपसालिंगसंशीलनेनच ॥ प्रसन्नोस्मिमहासौम्यनादेयंत्वयिविद्यते ॥ ५२ ॥ इतिश्रुत्वावचःसोथमेघगंभीर निःस्वनम् ॥ अवग्रहपरिम्लानसस्यसंजीवनोपमम् ॥ ५३ ॥ उन्मील्यलोचनेयावत्पुरःपश्यतिबालकः ॥ तावल्लिंगेददर्शाथत्र्यंबकंशशिशेखरम् ॥५४॥ बुधउवाच ॥ ॥ नमःपूतात्मनेतुभ्यंज्योतीरूपनमोस्तुते ॥ विश्वरूपनमस्तुभ्यंरूपातीतायतेनमः ॥५५ ॥ नमःसर्वार्तिनाशायप्रणतानांशिवात्मने ॥ सर्वज्ञायनमस्तुभ्यंसर्वकर्त्रेनमोस्तुते ॥ ५६ ॥

संजीवनमुपमायत्रतत्तथा ॥ ५३॥५४॥ सोमंविश्वेश्वरंदेवंदृष्ट्वातिकरुणाकरम् ॥ अष्टभिःपरमप्रीतःपद्यैरस्तौद्बुधःशिवम् ॥ नमइति ॥ पूतात्मनेपूतात्माख्यवाय्वात्मनेऽष्टमूर्तित्वादीश्वरस्य ॥ पवित्रा त्मनेइतिवा ॥ पवित्राणांपवित्रंयइतिस्मृतेः ॥ सर्वात्मनइतिक्वचित् ॥ पूर्णात्मनइतिचान्यत्र ॥ हेज्योतीरूपस्वप्रकाशतेतुभ्यंनमोस्तु ॥ अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतेः ॥ आत्मास्वप्रका शश्चिद्रूपत्वाद्धर्वभिमतज्ञानवदित्यनुमानाच्च ॥ प्रपंचितमेतद्बालबोधिनीटीकायामस्माभिः ॥ विश्वरूपहेप्रपंचात्मन् ॥ इदंसर्वंयदयमात्मेतिश्रुतेः ॥ विश्वंविष्णुर्वषट्कारइतिस्मृतेश्च ॥ रूपातीता यरूपाण्यतीत्यवर्तमानाय ॥ अगोत्रमस्पर्शमरूपमव्ययमितिश्रुतेः ॥ ५५ ॥ प्रणतानांसर्वार्तिनाशायभक्तानामाध्यात्मिकाधिदैविकाधिभौतिकतापत्रितयनाशायेत्यर्थः ॥ भिद्यतेहृदयग्रंथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिश्रुतेः ॥ प्रणतार्तिप्रभंजनः विशोकःशोकनाशनइतिस्मृतेश्च ॥ कथंभूताय ॥ शिवात्मनेमंगलस्वरूपाय ॥ स्मृतेसकलकल्याणभाजनंयत्रजायते ॥ मंगलानांचमंगलमितिस्मृतेः ॥ सर्वंजानातीतिसर्वश्चासौज्ञश्चेतिवासर्वज्ञःस्वाध्यस्तंसर्वमवभासयतीत्यर्थः ॥ तदुक्तमुपदेशसहस्र्यांभगवत्पादैः ॥ सर्वज्ञोप्यतएवस्यात्स्वेनभासावभासयन् ॥ सर्वमिति ॥ यःसर्वज्ञःसर्ववित् साक्षीचेताइत्यादिश्रुतेश्च ॥ सर्वकर्त्रेसर्वेषांब्रह्मादिस्तंबपर्यंतानांकर्त्रेउत्पादयित्रे ॥ सर्वासांक्रियाणांहेतुत्वाद्वासर्वकर्त्रे ॥ तदुक्तं तस्यांतैरेवाक्षरचतुष्टयन्यूनेनपूर्वस्यैवार्धेन ॥ सर्वं सर्वक्रियाहेतोःसर्वकृत्त्वंतथात्मनइति ॥ यतोवाइमानिभूतानिजायंते एषसर्वज्ञइत्यादिश्रुतेः ॥ करणंकारणंकर्तेत्यादिस्मृतेश्च ॥ ५६ ॥ कृपालवेदयालवे ॥ ततोऽन्यंकंवादयालुंशरणंव्रजेम इतिस्मृतेः ॥ भक्तिगम्यायभक्त्येकलभ्याय ॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ यमेवैषवृणुतेतेनलभ्यइतिश्रुतेः ॥ भक्त्यातुतोषभगवान्गजयूथपायेतिस्मृतेश्च ॥ फलदात्रेकर्मफलदात्रे पर मार्थफलदात्रेवा ॥ रातेर्दातुःपरायणमित्यादिश्रुतेः ॥ कैवल्यपतयेनमइतिस्मृतेश्च ॥ तपसांतपस्विनांतपोरूपायवाज्ञानदायेत्यर्थः ॥ ज्ञानंयस्यपरन्तपइतिश्रुतेः ॥ तेतुभ्यंनमः ॥ ५७ ॥ शंसुखंभवत्य

कृपालवेनमस्तुभ्यंभक्तिगम्यायतेनमः ॥ फलदात्रेचतपसांतपोरूपायतेनमः ॥ ५७ ॥ शंभोशिवशिवाकांतशांतश्रीकंठशूलभृत् ॥ शशिशेखरशर्वे शशंकरेश्वरधूर्जटे ॥ ५८ ॥ पिनाकपाणेगिरिशशितिकंठसदाशिव ॥ महादेवनमस्तुभ्यंदेवदेवनमोस्तुते ॥ ५९ ॥ स्तुतिंकर्तुंनजानामिस्तुतिप्रियम हेश्वर ॥ तवपादांबुजद्वंद्वेनिर्द्वंद्वाभक्तिरस्तुमे ॥ ६० ॥ अयमेववरोनाथप्रसन्नोसियदीश्वर ॥ नान्यंवरंवृणेत्वत्तःकरुणामृतवारिधे ॥ ६१ ॥ ततःप्राहमहे शानस्तत्स्तुत्यापरितोषितः ॥ रौहिणेयमहाभागसौम्यसौम्यवचोनिधे ॥ ६२ ॥ नक्षत्रलोकादुपरितवलोकोभविष्यति ॥ मध्येसर्वग्रहाणांचसपर्यां लप्स्यसेपराम् ॥ ६३ ॥ त्वयेदंस्थापितंलिंगंसर्वेषांबुद्धिदायकम् ॥ दुर्बुद्धिहरणंसौम्यत्वल्लोकवसतिप्रदम् ॥ ६४ ॥ इत्युक्त्वाभगवाञ्छंभुस्तत्रैवांतरधी यत ॥ बुधःस्वर्लोकमगमद्देवदेवप्रसादतः ॥ ६५ ॥ गणावूचतुः ॥ ॥ काश्यांबुधेश्वरसमर्चनलब्धबुद्धिःसंसारसिंधुमधिगम्यनरोह्यगाधम् ॥ मज्जेन्नस ज्जनविलोचनचंद्रकांतिःकांताननस्त्वधिवसेच्चबुधेऽत्रलोके ॥ ६६ ॥

स्मादितिशंभुस्तत्संबोधनंहेशंभो ॥ शिवसुखस्वरूप ॥ सत्यंज्ञानमानंदंब्रह्मेतिश्रुतेः॥शिवाकांतपार्वतीनाथ॥शांतनिर्विकार॥ नजायतेनम्रियतेअविनाशीवाअरेऽयमात्मेत्यादिश्रुतेः ॥ श्रीकण्ठनीलकंठ ॥ इतितस्यवचःश्रुत्वामयागिरिवरात्मजे ॥ धृतंकंठेविषंघोरंततःश्रीकण्ठताममेतिस्मृतेः ॥ शूलभृत्त्रिशूलभृत् ॥ शशिशेखरचंद्रावतंसचंद्रमौलेइत्यर्थः ॥ सर्वेशब्रह्मादिस्तंबपर्यंतानांनियन्तः ॥ शंकल्या णंकरोतीतिशंकर ॥ ईश्वरईशनशील ॥ धूर्जटेधूर्भारस्तद्रूपाजटायस्यतत्संबोधनंतथा ॥ ५८ ॥ पिनाकपाणेआजगवहस्त ॥ गिरौकैलासेशेतइतिगिरिश ॥ शितिकण्ठनीलग्रीव ॥ सदाशिवंकल्याणं यस्मात्सर्वदैकसुखस्वरूपेतिवा ॥ देवनंदेवः महांश्चासौदेवश्चेतितथा ॥ देवानांदेवेतिदेवदेवहेदेवेतिवा ॥ आदरेवीप्सा ॥ ५९ ॥ ६० ॥ करुणामृतवारिधेदयासुधासिंधो ॥ ६१ ॥ रौहिणेयेति ॥ यद्यपितारेयोऽयन्तथापिचन्द्रपत्नीनां मध्येतस्याःप्राधान्यात्सपत्नमातृत्वाद्वातयापुष्टत्वाद्वातथाभिधानमितिज्ञातव्यम् ॥ सौम्यसौम्येत्यादरेवीप्सा ॥ वचोनिधेवाग्मिन् ॥ सौम्यवचोनिधेमधुरवचसांशे वधेआश्रयेतिवा ॥ ६२ ॥ सपर्यांपूजाम् ॥ ६३ ॥ बुद्धिदायकंज्ञानकारकम् ॥ बुद्धिवर्धनमितिकिंचित् ॥ ६४ ॥ ६५ ॥ काश्यामिति ॥ काश्यांबुधेश्वरसमर्चनेनलब्धबुद्धिःप्राप्तज्ञानोऽत्रबुधेलोकेनि

CC-0. In Public Domain. Digitization by eGangotri

वसेदित्यन्वयः ॥ ज्ञानप्राप्तेःपरमंफलंदर्शयाति ॥ संसारसमुद्रंप्राप्यापिनमज्जेन्नब्रुडेत् ॥ सज्जनविलोचनानांचन्द्रकांतिदर्शनीयश्चभवतीत्यर्थः ॥ कांतंकमनीयमाननंयस्यसः ॥ ६६ ॥ ६७ ॥ ६८ ॥
इतिश्रीरामानंदकृतायांकाशीखण्डटीकायांपंचदशोध्यायः ॥ १५ ॥ ॥ छ ॥ षोडशेजीवसद्रत्नंपुरवर्यंनिरूप्यते ॥ भार्गवस्यासुरेंद्राणांगुरोरतुलतेजसः ॥ १ ॥ क्रमप्राप्तंभृगुलोकंवर्णयतः ॥
शिवशर्मन्निति ॥ १ ॥ कणाःकंडितास्तंदुलतुषास्तज्जन्यंधूमंकणधूमम् ॥ २ ॥ दुष्करांदुष्प्राप्याम् ॥ वाक्पतिश्चेतिकाचित् ॥ ३ ॥४॥ अचाक्षाथांकथयतम् ॥५ ॥ अपमृत्युभ्योऽपमरणेभ्यः ॥

चंद्रेश्वरात्पूर्वभागेदृष्ट्वालिंगंबुधेश्वरम् ॥ नबुद्ध्याहीयतेजंतुरंतकालेपिजातुचित् ॥६७॥ गणौयावत्कथामित्थंचक्रातेबुधलोकगाम् ॥ तावद्विमानंसंप्राप्तं शुक्रलोकमनुत्तमम् ॥ ६८ ॥ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडेपूर्वार्द्धेनक्षत्रबुधलोकयोर्वर्णनंनामपंचदशोध्यायः ॥ १५ ॥ ॥ गणावूचतुः ॥ शिवशर्मन्महाबुद्धेशुक्रलोकोयमद्भुतः ॥ दानवानांचदैत्यानांगुरुरत्रवसेत्कविः ॥ १ ॥ पीत्वावर्षसहस्रं वैकणधूमंसुदुःसहम् ॥ यःप्राप्तवान्महाविद्यांमृत्युसंजीविनींहरात् ॥ २ ॥ इमांविद्यांनजानातिदेवाचार्योतिदुष्कराम् ॥ ऋतेमृत्युंजयात्स्कंदात्पार्वत्यागजवक्त्रतः ॥ ३ ॥ शिवशर्मोवाच ॥ ॥ कोसौशुक्रइतिख्यातोयस्यायंलोकउत्तमः ॥ कथंतेनचविद्यात्तामृत्युसंजीविनीहरात् ॥ ४ ॥ आचक्षाथामिदंदेवौयदिप्रीतिर्मयिप्रभू ॥ ततस्तौस्माहतुर्देवौशुक्रस्यपरमांकथाम् ॥५॥ यांश्रुत्वाचापमृत्युभ्योहीयंतेश्रद्धयायुताः ॥ भूतप्रेतपिशाचेभ्योनभयंचापिजायते ॥ ६ ॥ आजौप्रवर्तमानायामंधकांधकवैरिणोः ॥ अनिर्भेद्यगिरिव्यूहवज्रव्यूहाधिनाथयोः ॥७॥ अपसृत्यततोयुद्धादंधकःशुक्रसंनिधिम् ॥ अधिगम्यबभाषेदमवरुह्यरथात्ततः ॥ ८ ॥ भगवंस्त्वामुपाश्रित्यवयंदेवांश्चसानुगान् ॥ मन्यामहेतृणैस्तुल्यान्रुद्रोपेंद्रादिकानपि ॥ ९ ॥ कुंजराइव सिंहेभ्योगरुडेभ्यइवोरगाः ॥ अस्मत्तोबिभ्यतिसुरागुरोयुष्मदनुग्रहात् ॥ १० ॥ वज्रव्यूहमनिर्भेद्यंविविशुर्दैत्यदानवाः ॥ विधूयप्रमथानीकंद्वदंतापार्दिताइव ॥ ११ ॥ वयंत्वच्छरणंभूत्वापर्वताइवनिश्चलाः ॥ स्थित्वाचरामनिःशंकाब्राह्मणेंद्रमहाहवे ॥ १२ ॥

पापमृत्युभ्यइतिकचित् ॥ हीयन्तेमुच्यन्ते ॥ ६ ॥ अन्धकांधकवैरिणोराजौसंग्रामेप्रवृत्तेसतिअंधकोरणादपसृत्यरथादवरुह्यशुक्रसंनिधिमधिगम्यइदंवक्ष्यमाणंवाक्यंबभाषइतिद्वितीयेनान्वयः ॥ ७ ॥
बभाषेदमितिसंधिरार्षः ॥ ८ ॥ तदेववचनंदर्शयाति इत्यंधकवचःश्रुत्वेत्यतःप्राक्तनेनग्रंथेन ॥ ९ ॥ १० ॥ ११ ॥ त्वच्छरणमितिकर्मधारयः ॥ [त्वत्]तवशरणंगृहमाश्रयंसाहाय्यमित्येतादिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्थः ॥ भूत्वाप्राप्येत्यर्थः ॥ प्राप्त्यर्थस्यभवतेःसकर्मकत्वात् ॥ त्वच्छरणाइतिपाठेस्पष्टएवार्थः ॥ १२ ॥ १३ ॥ यदर्थंशुश्रूषणंतद्वचनक्ति ॥ अभिरक्षेति ॥ पश्यहुंडमित्यादीनांद्वितीयांतानां प्रमथैःक्रांतंपश्येतिद्वितीयेनान्वयः ॥ १४ ॥ १५ ॥ द्राविडैर्द्रविडदेशोद्भवैर्जनैः ॥ १६ ॥ एवंसतिकिंमयाकर्तुंशक्यतइतिचेदतआह ॥ यापीत्वेति ॥ शरदांसंवत्सराणाम् ॥ १७ ॥ अथअतः ॥ अद्येतिकचित् ॥ १८ ॥ किंचित्स्मितंतदाकृत्वेति ॥ यस्येश्वरस्यप्रसादान्मयाविद्यालब्धातयैवतस्यपराभववांछत्ययंधृष्टइतिईषद्धास्यंकृत्वेत्यर्थः ॥ १९ ॥ २० ॥ २१ ॥ ग्लानानि शुष्काणि ॥ २२ ॥ २३ ॥ इत्युक्तेति ॥ अंधकमित्युक्त्वाकविःशुक्रएकैकंदैत्यमुद्दिश्यविद्यामावर्तयन् आवर्तयतिस्मजपतिस्मेत्यर्थः ॥ यानुद्दिश्यविद्यांजजापतेधृतायुधाउत्तस्थुरिति ॥

आत्मभावेनचवयंपादौतवसुखप्रदौ ॥ सदाराःससुताश्चैवशुश्रूषामोदिवानिशम् ॥ १३ ॥ अभिरक्षाभितोविप्रप्रसन्नःशरणागतान् ॥ पश्यहुंडंतुहुंडंचकुजं भंजंभमेवच ॥ १४ ॥ पाकंकार्तस्वनंचैवविपाकंपाकहारिणम् ॥ तंचन्द्रदमनंशूरंशूरामरविदारणम् ॥१५॥ प्रमथैर्भीमविक्रांतैःक्रांतंमृत्युप्रमाथिभिः ॥ सूदितान्पतितांश्चैवद्राविडैरिवचंदनान् ॥ १६॥ यापीत्वाकणधूमंवैसहस्रंशरदांपुरा ॥ वराविद्यात्वयाप्राप्तातस्याःकालोयमागतः ॥१७॥ अथविद्याफलं तत्तेदैत्यान्संजीवयिष्यतः ॥ पश्यंतुप्रमथाःसर्वेत्वयासंजीवितानिमान् ॥१८॥इत्यंधकवचःश्रुत्वास्थिरधीर्भार्गवोमुनिः ॥ किंचित्स्मितंतदाकृत्वादानवा धिपमब्रवीत् ॥ १९ ॥ दानवाधिपतेसर्वंतथ्यंयद्भाषितंत्वया ॥ विद्योपार्जनमेतद्धिदानवार्थंमयाकृतम् ॥ २० ॥ पीत्वावर्षसहस्रंवैकणधूमंसुदुः सहम् ॥ एषाप्राप्तेश्वराद्विद्याबांधवानांसुखावहा ॥ २१ ॥ एतयाविद्ययासोहंप्रमथैर्मथितान्रणे ॥ उत्थापयिष्येग्लानानिधान्यान्यंबुधरोयथा ॥२२॥ निर्व्रणान्नीरुजःस्वस्थान्सुप्त्वेवपुनरुत्थितान् ॥ अस्मिन्मुहूर्तेद्रष्टासिदानवानुत्थितान्नृप ॥ २३ ॥ इत्युक्त्वादानवपतिंविद्यामावर्तयत्कविः ॥ एकैकंदैत्यमु द्दिश्यतउत्तस्थुर्धृतायुधाः ॥ २४ ॥ वेदाइवसदभ्यस्ताःसमयेत्रायथांबुदाः ॥ ब्राह्मणेभ्योयथादत्ताःश्रद्धयार्थामहापदि ॥ २५॥ उज्जीवितांस्तुतान्दृष्ट्वातुहुं डाद्यान्महासुरान् ॥ विनेदुःपूर्वदेवास्तेजलपूर्णाइवांबुदाः ॥ २६ ॥ शुक्रेणोज्जीवितान्दृष्ट्वादानवांस्तान्गणेश्वराः ॥ विज्ञाप्यमेवदेवेशेह्येवंतेऽन्यो न्यमब्रुवन् ॥ २७ ॥ आश्चर्यरूपेप्रमथेश्वराणांतस्मिंस्तथावर्ततियुद्धयज्ञे ॥ अमर्षितोभार्गवकर्मदृष्ट्वाशिलादपुत्रोभ्यगमन्महेशम् ॥ २८ ॥

आवर्तयदितिपाठेस्पष्टएवार्थः ॥ २४ ॥ तत्रसात्त्विकतामसराजसभेदेदृष्टांतत्रयमाह ॥ वेदाइवेति ॥ यथावेदाअनभ्यस्यमानाउच्छिन्नसंप्रदायंतयानष्टाःसंतःसद्भिरभ्यस्ताआवर्तिता अभिव्यक्ता भवंति ॥ यथामेघाःप्रावृषःपूर्वंनष्टाःसंतःप्रावृड्ऋतौपर्जन्येननियुक्ताःगगनेउत्तिष्ठंति ॥ यथाब्राह्मणेभ्यःश्रद्धयादत्ताअर्थामहापदिदातॄणांफलदानायउत्तिष्ठंति ॥ महापदिदत्ताइतिवा ॥ तद्व दित्यर्थः ॥२५॥ पूर्वदेवाअसुराः ॥२६॥ विज्ञाप्यमेवमेवंप्रकारंविज्ञापनीयम् ॥ विज्ञाप्यमेतदितिकचित् ॥ एवमब्रुवन्नित्यन्वयभेदान्नपौनरुक्त्यम् ॥२७॥ वर्ततिवर्तमाने ॥ शिलादपुत्रोनंदी ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जययोर्निजयस्ययोर्निकारणम् ॥ वक्तव्यमाह ॥ गणेश्वराणामितिसार्धत्रयेण ॥ २९ ॥ सहेलंसलीलंयथास्यात् ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ आनयस्वेत्यात्मनेपदमार्षम् ॥ हेस्वआत्मीयेतिवा ॥ लावकंलावमेवलावकंपक्षिविशेषम् ॥ तित्तिरिःकुक्कुभोलावइत्यमरः ॥ अण्डजातमण्डेउत्पन्नंशावकमित्यर्थः ॥ अथवालावकमित्यस्यच्छेदनकर्तृव्यावृत्त्यर्थमण्ड जातमितिविशेषणम् ॥ अण्डजमित्यर्थः ॥ ३४ ॥ वृषसिंहनादःश्रेष्ठसिंहशब्दः ॥ ३५ ॥ विक्षोभ्यविचाल्य ॥ शरभोऽष्टापदः ॥ इभंगजम् ॥ ३६ ॥ मोचयिष्यंतइव ॥ वस्तुतोमोचनंनास्त्येवे त्यभिप्रायः ॥ अथवाविमोचयिष्यंतइवेतिलोकोक्तिः ॥ सिंहरवान्वीरगर्जितशब्दान्॥वीराणांगर्जितंशब्दंसिंहनादंविदुर्बुधाइतिवचनात् ॥ ३७ ॥ दंभोलीति ॥ वज्रत्रिशूलखड्गकुठाराणांतथाउद्दंडानां

जयेतिचोक्ताजययोनिमुग्रमुवाचनंदीकनकावदातम् ॥ गणेश्वराणांरणकर्मदेवदेवैश्चसेंद्रैरपिदुष्करंयत् ॥ २९ ॥ तद्भार्गवेणाद्यकृतंवृथानःसंजीव्यतानाजिन्हतान्विपक्षान् ॥ आवर्त्यविद्यांमृतजीवदात्रीमेकैकमुद्दिश्यसहेलमीश ॥ ३० ॥ तुहुंडहुंडादिकजंभजंभविपाकपाकादिमहासुरेंद्राः ॥ यमालयाद्यपुनर्निवृत्ताविद्रावयंतःप्रमथांश्चरंति ॥ ३१ ॥ यदिह्यसौदैत्यवरान्निरस्तान्संजीवयेदत्रपुनःपुनस्तान् ॥ जयःकुतोनोभवितामहेशगणेश्वराणांकुतएवशांतिः ॥ ३२ ॥ इत्येवमुक्तःप्रमथेश्वरेणसनंदिनावैप्रमथेश्वरेशः ॥ उवाचदेवःप्रहसंस्तदानींतंनंदिनंसर्वगणेशराजम् ॥ ३३ ॥ नंदिन्प्रयाहित्वरितोतिमात्रंद्विजेंद्रवर्यंदितिनंदनानाम् ॥ मध्यात्समुद्धृत्यतथानयाशुश्येनोयथालावकमंडजातम् ॥ ३४ ॥ सएवमुक्तोवृषभध्वजेनननादनंदीवृषसिंहनादः ॥ जगामतूर्णंचविगाह्यसेनांयत्राभवद्भार्गववंशदीपः ॥ ३५ ॥ तंरक्ष्यमाणंदितिजैःसमस्तैःपाशासिवृक्षोपलशैलहस्तैः ॥ विक्षोभ्यदैत्यान्बलवाञ्जहारकाव्यंसनंदीशरभोयथेभम् ॥ ३६ ॥ स्रस्तांबरंविच्युतभूषणंचाविमुक्तकेशंबलिनागृहीतम् ॥ विमोचयिष्यंतइवानुजग्मुःसुरारयःसिंहरवान्सृजंतः ॥ ३७ ॥ दंभोलिशूलासिपरश्वधानामुद्दंडचक्रोपलकंपनानाम् ॥ नंदीश्वरस्योपरिदानवेंद्रावर्षंववर्षुर्जलदाइवोग्रम् ॥ ३८ ॥ तंभार्गवंप्राप्यगणाधिराजोमुखाग्निनाशस्त्रशतानिदग्ध्वा ॥ आयात्प्रवृद्धेऽसुरदेवयुद्धेभवस्यपार्श्वेव्यथितारिसैन्यः ॥ ३९ ॥ अयंसशुक्रोभगवन्नितीदंनिवेदयामासभवायशीघ्रम् ॥ जग्राहशुक्रंसचदेवदेवोयथोपहारंशुचिनाप्रदत्तम् ॥ ४० ॥ नकिंचिदुक्तासहिभूतगोप्ताचिक्षेपवक्त्रेफलवत्कवींद्रम् ॥ हाहारवस्तैरसुरैःसमस्तैरुच्चैर्विमुक्तोहहहेतिभूरि ॥ ४१ ॥

चवहूनांचक्रपाषाणकंपनाख्यास्त्रविशेषाणांवायव्यास्त्राणांवावर्षंदानवेंद्रानंदिकेश्वरस्योपरिउग्रंयथास्यादुग्रंवर्षमितिवाअंबुदाइववत्रृषुरित्यर्थः ॥ इवागमितिपाठेअंबुदायथापर्वतंववृषुस्तथेत्यर्थः ॥ ३८ ॥ प्रवृद्धेअतिशयिते ॥ प्रवृत्तइतिक्वचित् ॥ व्यथितानिअरिसैन्यानियेनयस्मादितिवासः ॥ ३९ ॥ उपहारंबलिम् ॥ बलिःपूजोपहारेस्यादित्यमरः ॥ ४० ॥ फलवदामलकादिफलवत् ॥ हाहारवइति ॥ हहहेतिहकारत्रयंखेदे ॥ भूरिअतिशयेनखेदोयथाभवतीतितथाहाहारवोहाहाशब्दस्तैःसमस्तैरसुरैर्विमुक्तोविशेषणत्यक्तइत्यर्थः ॥ हाहारवैरितिपाठेहाहाइतिरवोयेषांतैरसुरैः ॥ हहहेतिखेदातिशयप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपादकःशब्दः ॥ भूरियथास्यात्तथाविमुक्तोहाहाहहहेत्येवंरूपःशब्दोवहुविधःकृतइत्यर्थः ॥ ४१ ॥ हस्तैःशुंडादंडैः ॥ ४२ ॥ ४३ ॥ योषाःस्त्रियः ॥ मार्गणौघाबाणसमूहाः ॥ श्रुतान्यध्ययनानि ॥ ४४ ॥ विनेति ॥ विभोर्विश्वेश्वरस्येयंवैभवी वैभवीचासौशक्तिश्चेतिवैभवशक्तिस्ताम् ॥ वैप्रसिद्धांभवशक्तिमितिवा ॥ भवभक्तिमितिक्वचित् ॥ एकांमुख्याम् ॥ ४५ ॥ विषादिनारुद्रेण ॥ ४६ ॥४७॥ अद्यतेननंदिनासर्वेषांनोऽस्माकंतनूःशरीराणिविनाविहायप्राणाहृतानाशिताः ॥ प्राणैर्हीनदेहाः संपादिताइत्यर्थः ॥ कृताइतिपाठेपिसएवार्थः ॥ धैर्यंपांडित्यम्आपद्यपिमनःस्वास्थ्यमित्यर्थः ॥ वीर्यंशूरत्वम् ॥ गतिर्ज्ञानम् ॥ कीर्तिर्यशः ॥ सत्त्वमुत्साहः ॥ तेजःप्रागल्भ्यम् ॥ पराक्रमउद्योगः ॥ ४८ ॥ धिगिति ॥ यैरस्माभिर्गुरुर्नत्रातस्तानस्मान्प्रतिधिगित्यर्थः॥ कुलसत्तमोविप्र

काव्येनिगीर्णेगिरिजेश्वरेणदैत्याजयाशारहिताबभूवुः ॥ हस्तैर्विमुक्ताइववारणेंद्राःशृंगैर्विहीनाइवगोवृषाश्च ॥ ४२ ॥ शरीरहीनाइवजीवसंघाद्विजायथाचाध्ययनेनहीनाः ॥ निरुद्यमाःसत्त्वगुणायथावैयथोद्यमाभाग्यविवर्जिताश्च ॥ ४३ ॥ पत्याविहीनाश्चयथैवयोषायथाविपक्षाइवमार्गणौघाः ॥ आयूंपिहीनानियथैवपुण्यैर्वृत्तेनहीनानियथाश्रुतानि ॥ ४४ ॥ विनायथावैभवशक्तिमेकांभवंतिहीनाःस्वफलैःक्रियौघाः ॥ तथाविनातंद्विजवर्यमेकंदैत्याजयाशाविमुखाबभूवुः ॥ ४५ ॥ नंदिनापहृतेशुक्रेगिलितेचविषादिना ॥ विषादमगमन्दैत्याहीयमानरणोत्सवाः ॥ ४६ ॥ तान्वीक्ष्यविगतोत्साहानंधकःप्रत्यभाषत ॥ कविंविक्रम्यनयतानंदिनावंचितावयम् ॥ ४७ ॥ तनूर्विनाहृताःप्राणाःसर्वेषामद्यतेननः ॥ धैर्यंवीर्यंगतिःकीर्तिःसत्त्वंतेजःपराक्रमः ॥४८॥ युगपन्नोहृतंसर्वमेकस्मिन्भार्गवेहृते ॥ धिगस्मान्कुलपूज्योयैरेकोपिकुलसत्तमः ॥ गुरुःसर्वसमर्थश्चत्रातात्रातोनचापदि ॥ ४९ ॥ तद्धैर्यमवलंब्येहयुध्यध्वमारिभिःसह ॥ सूदयिष्याम्यहंसर्वान्प्रमथान्सहनंदिना ॥ ५० ॥ अद्यैतान्विवशान्हत्वासहदेवैःसवासवैः ॥ भार्गवंमोचयिष्यामिजीवंयोगीवकर्मतः ॥ ५१ ॥ सचापियोगीयोगेनयदिनामस्वयंप्रभुः ॥ शरीरात्तस्यनिर्गच्छेदस्माकंशेषपालिता ॥ ५२ ॥ इत्यंधकवचःश्रुत्वादानवामेघनिःस्वनाः ॥ प्रमथानर्दयामासुर्मर्तव्येकृतनिश्चयाः ॥ ५३ ॥ सत्यायुषिननोजातुशक्ताःस्युःप्रमथाबलात् ॥ असत्यायुषिकिंगत्वात्यक्त्वास्वामिनमाहवे ॥ ॥ ५४ ॥ येस्वामिनंविहायाजौबहुमानधनाजनाः ॥ यांतितेयांतिनियतमंधतामिस्रमालयम् ॥ ५५ ॥ अयशस्तमसाख्यातिंमलिनीकृत्यभूरिशः ॥ इहामुत्रापिसुखिनोनस्युर्भग्नारणाजिरात् ॥ ५६ ॥ किंदानैःकिंतपोभिश्चकिंतीर्थपरिमज्जनैः ॥ धरातीर्थेयदिस्नातंपुनर्भवमलापहे ॥ ५७ ॥

कुलेषुश्रेष्ठः ॥ द्विजसत्तमइतिक्वचित् ॥ ४९ ॥ तत्तस्मात्सूदयिष्यामिनाशयिष्यामि ॥ ५० ॥ विवशानस्वतंत्रान् ॥ इवयथाकश्चिद्योगीजीवंस्वात्मानंकर्मतःकर्मभ्योधर्माधर्मलक्षणेभ्योमोचयतितद्वादित्यर्थः ॥५१॥ सचेति ॥ सचापिसोपिचयोगीभार्गवोयदिकथंचिद्योगेनतस्यविश्वेश्वरस्यशरीरान्निर्गच्छेन्निर्गमिष्यतितदाशेषपालिताशेषाणामवशिष्टानामस्माकंपालितापालयितापालयिष्यतीत्यर्थः॥ अस्माकंसेव्यतात्रकेतिक्वचित् ॥ शेषशालितेतिचशेषशालिनामितिचान्यत्र ॥ पाठद्वयेक्रमेणावशेषवत्त्वंतदाभद्रंस्यादित्यर्थः ॥ ५२ ॥ ५३ ॥ ५४ ॥ बहुमानएवधनंयेषांतेबहुमानधनाः ॥ ५५ ॥ अयशएवतमोंधकारस्तेनअयशस्तमसा ॥ ख्यातिंकीर्तिम् ॥ भग्नास्त्यक्तरणाः ॥ भंगादितिपाठेपलायनादित्यर्थः ॥ ५६ ॥ धरातीर्थेयुद्धभूमिरूपेतीर्थे ॥ धारातीर्थइतिपाठेशस्त्रधारापातरूपेतीर्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः ॥ ५७ ॥ ५८ ॥ कटंकटशिलामयैःकटंकटशब्दयुक्तयंत्रपाषाणैः ॥ भुशुंडीति ॥ भुशुंडयश्चभिंदिपालाश्चभुशुंडीभिंदिपालास्तैः ॥ तत्रभुशुंडयःसर्वत्रलोहकंटकव्याप्ताअयःक्रमोत्सेधाः ॥ तदुक्तम् ॥ भुशुंडीसर्वतोलोहकंटकानुक्रमोन्नतेति ॥ अयोगोलकयष्टयइतिकेचित ॥ भिंदिपालैःसृगैर्लोहबद्धदंडैरितियावत् ॥ यदाहामरः ॥ भिंदिपालःसृगस्तुल्याविति ॥ परश्वधैःकुठारैः ॥ यदाहामरः ॥ द्वयोःकुठारःस्वधितिःपरशुश्चपरश्वधइति ॥ ५९ ॥ खट्वांगंखट्वायाःखुराकारोस्त्रविशेषः ॥ पट्टिशादयोऽस्त्रविशेषाः ॥ एतैश्चालमत्यर्थंकदनंदुःखम् ॥ ६० ॥ विकृष्टानांटंकारितानाम् ॥ क्ष्वेडितानांक्ष्वेडंविषंतद्विद्यतेयासांताःक्ष्वेडिताः ॥ तारकादित्वादस्त्यर्थेइतच् ॥ तासाम् ॥ ६१ ॥ ६२ ॥ ६३ ॥ गजानांवाजिनांचमहारावैःस्फुटंतःस्फुटमानाःशब्दग्रहाः

संप्रधार्येतितेऽन्योन्यंदैत्यास्तेदनुजास्तथा ॥ ममंथुःप्रमथानाजौरणभेरीर्निनाद्यच ॥ ५८ ॥ तत्रबाणासिवज्रौघैःकटंकटशिलामयैः ॥ भुशुंडीभिंदिपालैश्चशक्तिभल्लपरश्वधैः ॥ ५९ ॥ खट्वांगैःपट्टिशैःशूलैर्लकुटैर्मुसलैरलम् ॥ परस्परमभिघ्नंतःप्रचक्रुःकदनंमहत् ॥ ६० ॥ कार्मुकाणांविकृष्टानां पततांचपतत्रिणाम् ॥ भिंदिपालभुशुंडीनांक्ष्वेडितानांरवोऽभवत् ॥ ६१ ॥ रणतूर्यनिनादैश्चगजानांबहुबृंहितैः ॥ हेषारवैर्हयानांचमहान्कोलाहलोऽभवत् ॥६२॥ प्रतिस्वनैरवापूरिद्यावाभूम्योर्यदंतरम् ॥ अभीरूणांचभीरूणांमहारोमोद्गमोऽभवत् ॥ ६३ ॥ गजवाजिमहारावस्फुटच्छब्दग्रहाणिच ॥ भग्नध्वजपताकानिक्षीणप्रहरणानिच ॥ ६४ ॥ रुधिरोद्गारचित्राणिव्यश्वहस्तिरथानिच ॥ पिपासितानिसैन्यानिमुमूर्छुरुभयत्रवै ॥ ६५ ॥ दृष्ट्वासैन्यंचप्रमथैर्भज्यमानमितस्ततः ॥ दुद्रावरथमास्थायस्वयमेवांधकोगणान् ॥ ६६ ॥ शरवज्रप्रहारैस्तैर्वज्राघातैर्नगाइव ॥ प्रमथानेशिरेवातैर्निस्तोयाइवतोयदाः ॥ ६७ ॥ यांतमायांतमालोक्यदूरस्थंनिकटास्थितम् ॥ प्रत्येकंरोमसंख्याभिर्व्यधाद्बाणैस्तदांधकः ॥ ६८ ॥ विनायकेनस्कंदेननंदिनासोमनंदिना ॥ नैगमेयेनशाखेनविशाखेनबलीयसा ॥ ६९ ॥ इत्याद्यैस्तुगणैरुग्रैरंधकोप्यंधकीकृतः ॥ त्रिशूलशक्तिबाणौघधारासंपातपातिभिः ॥ ७० ॥ ततःकोलाहलोजातःप्रमथासुरसैन्ययोः ॥ तेनशब्देनमहताशुक्रःशंभूदरेस्थितः ॥ ७१ ॥ छिद्रान्वेषीभ्रमन्सोथविनिःकेतोयथानिलः ॥ सप्तलोकान्सपालान्सरुद्रदेहेव्यलोकयत् ॥७२॥ ब्रह्मनारायणेंद्राणामादित्याप्सरसांतथा ॥ भुवनानिविचित्राणियुद्धंचप्रमथासुरम् ॥ ७३ ॥ सवर्षाणांशतंकुक्षौभवस्यपरितोभ्रमन् ॥ नतस्यददृशेरंध्रंशुचेरंध्रंखलोयथा ॥ ७४ ॥

कर्णायेषांतानितथा ॥ ६४ ॥ मुमूर्छुर्मूर्छांप्रापुः ॥ ६५ ॥ ६६ ॥ शराएववज्रास्तेषांप्रहारैः ॥ प्रमथानेशिरेअदर्शनंलेभिरे ॥ ६७ ॥ व्यधादताडयत् ॥ ६८ ॥ विनायकेनेति ॥ इत्याद्यैर्गणैरंधकोप्यंधकीकृतइत्यन्वयः ॥ केतइत्याकांक्षायामाह ॥ विनायकेनेत्यादि ॥ ६९ ॥ कैरित्याकांक्षायामाह ॥ त्रिशूलेति ॥ त्रिशूलादयश्चधारापातेनपातोवर्ततेयेषांतेचतैः ॥ ७० ॥ ॥ ७१ ॥ केतःकेतनंमार्गइतियावत् ॥ विनिर्गतःकेतोनिर्गममार्गोयस्यसोऽनिलोयथेति ॥ ७२ ॥ प्रमथानामसुराणांचवृत्तंयुद्धंप्रमथासुरम् ॥ ७३ ॥ रंध्रंछिद्रम् ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांभवेनशंभुप्रसादलब्धेनयोगेनोपायेन ॥ शुक्र रूपेणवीर्यरूपेण शुक्रंयथोपस्थच्छिद्रेणवहिर्निःसरतितेनप्रकारेणेत्यर्थः ॥ चस्कंदजगामवहिर्निर्गतइत्यर्थः ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ कोसौशुक्रइतिप्रश्नोत्तरमुपसंहरति ॥ इत्थंनाम्नाऽभवच्छुक्रइति ॥ ८० ॥ कथंतेनचविद्याप्राप्तेतिप्रश्नस्यानुवादपूर्वकंप्रत्युत्तरमनुजानाति ॥ यथाचविद्यामिति ॥ ८१ ॥ पुरेति ॥ असौशुक्रोवहुकालं तपस्तेपेनिराहारःस्थितवानितिद्वितीयेनान्वयः ॥ ८२ ॥ ८३ ॥ नकेवलंतपस्तेपेकिंतुसभार्गवःप्रत्येकंराजचंपकाद्यैःपुष्पैःकिसलयैरपिलक्षपरिमितैःपत्रैश्चशंकरंसमानर्चपूजयामासेतिसप्तमेनान्वयः ॥ यद्वा तपस्तेपेनियमंगृहीतवान्इत्यस्यैवार्थमाह ॥ राजचंपकेति ॥ तत्रराजचंपकश्चंपकावांतरजातिविशेषः ॥ धत्तूरउन्मत्तः ॥ करवीरःप्रतीहासः ॥ कुशेशयंपद्मम् ॥ वापुंसिपद्मंनलिनमरविंदंमहोत्पलम्॥सहस्रपत्रंकमलंशतपत्रंकुशेशयमित्यमरः ॥ मालतीजातिः ॥ कर्णिकारोद्रुमोत्पलः ॥ कदंवोहलिप्रियः ॥ वकुलःकेसरः ॥ उत्पलंकुवलयम् ॥ स्यादुत्पलंकुवलयमित्यमरः ॥

शांभवेनाथयोगेनशुक्ररूपेणभार्गवः ॥ चस्कंदाथननामापिततोदेवेनभाषितः ॥ ७५ ॥ शुक्रवन्निःसृतोयस्मात्तस्मात्त्वंभृगुनंदन ॥ कर्मणानेनशुक्रस्त्वं ममपुत्रोसिगम्यताम् ॥ ७६ ॥ जठराग्निर्गतेशुक्रेदेवोपिसुमुदेतराम् ॥ भ्रमञ्छ्रेयोभवद्यन्मेनसृतोजठरेद्विजः ॥ ७७ ॥ इत्येवमुक्तोदेवेनशुक्रोर्कसदृशद्युतिः ॥ विवेशदानवानीकंमेघमालांयथाशशी ॥ ७८ ॥ शुक्रोदयान्मुदंलेभेसदानवमहार्णवः ॥ यथाचंद्रोदयेहर्षमूर्मिमालीमहोदधिः ॥ ७९ ॥ अंधकांधकहंत्रोर्वैवर्तमानेमहाहवे ॥ इत्थंनाम्नाभवच्छुक्रःसवैभार्गवनंदनः ॥ ८० ॥ यथाचविद्यांतांप्रापमृतसंजीवनींपराम् ॥ शंभोरनुग्रहात्काव्यस्तन्निशामय सुव्रत ॥ ८१ ॥ ॥ गणावूचतुः ॥ ॥ पुराऽसौभृगुदायादोगत्वावाराणसींपुरीम् ॥ अंडजस्वेदजोद्भिज्जजरायुजगतिप्रदाम् ॥ ८२ ॥ संस्थाप्यलिंगं श्रीशंभोःकूपंकृत्वातदग्रतः ॥ वहुकालंतपस्तेपेध्यायन्विश्वेश्वरंप्रभुम् ॥ ८३ ॥ राजचंपकधत्तूरकरवीरकुशेशयैः ॥ मालतीकार्णिकारैश्चकदंबैर्बकुलोत्पलैः ॥ ८४ ॥ मल्लिकाशतपत्रीभिःसिंदुवारैःसकिंशुकैः ॥ अशोकैःकरुणैःपुष्पैःपुन्नागैर्नागकेसरैः ॥ ८५ ॥ क्षुद्राभिर्माधवीभिश्चपाटलाबिल्वचंपकैः ॥ नवमल्लीविचिंकिलैःकुंदैःसमुचुकुंदकैः ॥ ८६ ॥ मंदारैर्बिल्वपत्रैश्चद्रोणैर्मरुबकैर्बकैः ॥ ग्रंथिपर्णैर्दमनकैःसुरभूचूतपल्लवैः ॥ ८७ ॥

॥ ८४ ॥ मल्लिकातृणशून्यम् ॥ शतपत्रीपुष्पविशेषः ॥ कुंकुमारुणवर्णाभांगंधाढ्यांशतपत्रिकाम् ॥ योददातिजगन्नाथेश्वेतद्वीपेवसेत्सदेत्युक्तेः ॥ सिंदुवारःपुष्पविशेषः॥किंशुकःपलाशः ॥ अशोको वंजुलः ॥ करुणोवृक्षभेदः ॥ पुष्पैःपुष्पलताभिः ॥ पुन्नागोदेववल्लभः ॥ नागकेसरोहेमपुष्पः ॥ ८५ ॥ क्षुद्राभिरितिमाधवीविशेषणम् ॥ माधवीवासंतीलता ॥ पाटलापाटलिः ॥ बिल्वःश्रीफलः ॥ चंपकोहेमपुष्पकः ॥ नवमल्लीपुष्पविशेषः ॥ विचिकिलश्चारुपुटः ॥ कुंदंमाघ्यम् ॥ मुचकुंदोमुकुंदःपालंक्येत्यर्थः ॥ अथपालंक्यांमुकुंदःकुंदकुंदुरूइत्यमरः ॥ ८६ ॥ मंदारःपारिभद्रकः ॥ द्रोणः पुष्पविशेषः॥द्रोणपुष्पसहस्रेभ्यःखादिरंवैविशिष्यतइत्युक्तेः ॥ मरुवकःप्रस्थपुष्पः ॥समीरणोमरुवकःप्रस्थपुष्पःफणिज्जकइत्यमरः॥ वकःपुष्पविशेषः॥वकपुष्पसहस्राद्धिनंद्यावर्तंविशिष्यतइत्युक्तेः ॥

CC-0. In Public Domain. Digitization by eGangotri

ग्रंथिपर्णः पुष्पविशेषः ॥ दमनकः प्रसिद्धः ॥ सुरभूः पुष्पविशेषः ॥ चूतआम्रः ॥८७॥ तुलसीसुरसा ॥ देवगंधारीपुष्पविशेषः ॥ बृहत्पत्रीपुष्पविशेषः ॥ कुशांकुरैः कुशपुष्पैः ॥ पालाशपुष्पसहस्रात्तु कुशपुष्पंविशिष्यतइत्युक्तेः ॥ नंद्यावर्तस्तगरः ॥ अगस्त्यः प्रसिद्धः ॥ सालः सर्जः ॥ देवदारुः शक्रपादपः ॥८८॥ कुरवकः पुष्पविशेषः ॥ कुरंटकः पुष्पविशेषः ॥ अपरैरितिकुसुमपल्लवपत्राणांविशेषणम् ॥ प्रत्येकमेभिः पूर्वोक्तैः कुसुमपल्लवपत्रैरपरैरपीत्यर्थः ॥ ८९ ॥ ९० ॥ यक्षकर्दमैः कर्पूरादीनांचतुर्णांमिश्रीभावैः ॥ ९१ ॥ सुगंधोद्वर्तनान्यनुसुगंधैर्द्रव्यैरभ्यंगानिविधायानुपश्चाच्चंदनैर्यक्षकर्दमैश्चसम्यगालिलिंपेत्यर्थः ॥ ९२ ॥ सहस्रमिति ॥ सहस्रंपंचशरदांवर्षाणांपंचसहस्रमित्यर्थः ॥ इत्थंसमर्चयन्यदावरदानायोन्मुखंमनागपिईषदपिनाललोकेनापश्यत्तदाऽन्यमतीवदुःसहंघोरंनियमंजग्राहेतिसार्धेनान्वयः ॥ ९३ ॥ ९४ ॥ तमेवघोरंनियमंदर्शयति ॥ प्रक्षाल्येति ॥ चेतसोंऽतःकरणस्यचांचल्याख्यंमहामलंप्रक्षाल्यदूरीकृत्यकविः शुक्रः शरदांसहस्रंव्याप्यकणधूमौघं

तुलसीदेवगंधारीबृहत्पत्रीकुशांकुरैः ॥ नंद्यावर्तैरगस्त्यैश्चसशालैर्देवदारुभिः ॥ ८८ ॥ कांचनारैःकुरबकैर्दूर्वांकुरकुरंटकैः ॥ प्रत्येकमेभिःकुसुमैःपल्लवैरपरैरपि ॥८९॥ पत्रैःशतसहस्रैश्चससमानर्चशंकरम् ॥ पंचामृतैर्द्रोणमितैर्लक्षकृत्वःप्रयत्नतः ॥९०॥ स्नपयामासदेवेशंसुगंधस्नपनैर्बहु ॥ सहस्रकृत्वोदेवेशंचंदनैर्यक्षकर्दमैः ॥९१॥ समालिलिंपदेवेशंसुगंधोद्वर्तनान्यनु ॥ गीतनृत्योपहारैश्चश्रुत्युक्तस्तुतिभिर्बहु ॥९२॥ नाम्नांसहस्रैरन्यैश्चस्तोत्रैस्तुष्टावशंकरम् ॥ सहस्रंपंचशरदामित्थंशुक्रःसमर्चयन् ॥ ९३ ॥ यदादेवंनालुलोकेस्मनागपिवरोन्मुखम् ॥ तदान्यंनियमंघोरंजग्राहातीवदुःसहम् ॥ ९४ ॥ प्रक्षाल्यचेतसोत्यंतंचांचल्याख्यंमहामलम् ॥ भावनावार्भिरसकृदिंद्रियैःसहितस्यच ॥ ९५ ॥ निर्मलीकृत्यतच्चेतोरत्नंदत्त्वापिनाकिने ॥ प्रपपौकणधूमौघंसहस्रंशरदांकविः ॥९६॥ प्रससादततदादेवोभार्गवायमहात्मने ॥ तस्माल्लिंगाद्विनिर्गत्यसहस्रार्काधिकद्युतिः ॥ ९७ ॥ उवाचचविरूपाक्षःसाक्षाद्दाक्षायणीपतिः ॥ तपोनिधेप्रसन्नोस्मिवरंवरयभार्गव ॥ ९८ ॥ निशम्येतिवचःशंभोरंभोजनयनोद्विजः ॥ उद्यदानंदसंदोहरोमांचांचितविग्रहः ॥ ९९ ॥ तुष्टावाप्रतनुंतुष्टःप्रफुल्लनयनांचलः ॥ मौलावंजलिमाधायवदञ्जयजयेतिच ॥ १०० ॥ भार्गवउवाच ॥ ॥ त्वंभाभिराभिरभिभूयतमःसमस्तमस्तंनयस्यभिमतानिनिशाचराणाम् ॥ देदीप्यसेदिनमणेगगनेहितायलोकत्रयस्यजगदीश्वरतन्नमस्ते ॥ १०१ ॥

व्रीहितुषधूमसमूहंप्रपपौप्रकर्षेणपीतवानितिद्वयोरन्वयः ॥ कैः ॥ भावनाध्यानानितान्येववारिवारीणितैः ॥ सकृत्क्षालनंनिराकरोति ॥ असकृदिति ॥ नैरंतर्येणेत्यर्थः ॥ नन्विंद्रियस्यैंद्रियस्यार्थेरागद्वेषौव्यवस्थितावितिस्मृतेरिंद्रियेषुविषयोन्मुखेषुसत्सुमनःक्षालनमकिंचित्करमित्याशंक्याह ॥ इंद्रियैःसहितस्यचेति ॥ ९५ ॥ पुनःकिंकृत्वा ॥ एवमुक्तैःसाधनैस्तच्चेतोरत्नंनिर्मलीकृत्यरागद्वेषादिरहितंकृत्वेतियावत् ॥ पिनाकिनेविश्वनाथायदत्त्वातदेकनिष्ठंकृत्वेत्यर्थः ॥ ९६ ॥ ९७ ॥ ९८ ॥ अंभोजनयनःपद्मनेत्रः ॥ प्रसन्ननयनइतिक्वचित् ॥ उद्यदानंदसंदोहरोमांचांचितविग्रहः उद्गच्छत्सुखनिवहोद्धरलोमव्याप्तदेहः ॥ ९९ ॥ प्रफुल्लनयनांचलोविकसितनेत्रपक्ष्मा ॥ १०० ॥ सूर्येंदुवाय्वग्निपयोऽवकाशपृथ्व्यात्ममूर्तिंभगवन्तमीशम् ॥ क्रमेणतुष्टावभृगुप्रवीरःपद्येनतावद्द्विचतुष्टयेन ॥ त्वंभाभिरिति ॥ हेजगदीश्वरहेदिनमणेतत्तस्मात्तेतुभ्यंनमोऽस्तुकरोमीतिवाशेषः ॥ यस्मात्त्वंभाभिःप्रसिद्धाभिःसुषुम्नहरिकेशविश्वकर्मविश्वव्यचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांवसुसंश्रवसंज्ञैःसप्तभीरश्मिभिःसमस्तंतमोंऽधकारमभिभूयतिरस्कृत्यनिशाचराणांराक्षसादीनां तंत्रेणचनिशाऽविद्या यानिशासर्वभूतानामितिभगवद्वचनात् तस्यांचरंतीतिनिशाचरारागद्वेषलोभादयस्तेषांचाभिमतानिस्वस्वकार्यकरणसामर्थ्यान्यस्तंनाशंनयसिप्रापयसि ॥ किंच ॥ लोकत्रयस्यभूर्भुवःस्वर्लोकस्य अथच लोकत्रयस्यविश्वादिनामजनत्रयस्यजीवत्रयस्येत्यर्थः ॥ हितायगगने भूताकाशेचित्ताकाशेचदेदीप्यसेऽतिशयेनराजसइत्यर्थः ॥ अयमर्थः ॥ यतस्त्वंगगनेभूताकाशेराजसेऽतोबहिस्तमोनिहत्यराक्षसादीनामभिमतानिनाशयसि ॥ पक्षांतरेच यतस्त्वंगगनेचित्ताकाशेप्रमाणवृत्त्यारूढःसन्प्रकाशसेऽतोंतस्तमोनिराकृत्यनिशाचराणांकामलोभादीनामभिमतानिनाशयसीत्यर्थः ॥ १ ॥ लोकेइति ॥ हेहिमांशोशिशिरदीधिते ॥ हेपीयूषपूरपरिपूरितसुधानिवहपरिपूर्ण ॥ तत्तस्मात्तेतुभ्यंनमइतिपूर्ववत् ॥ यस्माल्लोकेऽतिवेलंप्रतिक्षणम् ॥ आतिक्रांतावेलातीरंसीमायैस्तान्यतिवेलानितानिचतानिमहामहांसिचतैः कौमुदमुदं कुमुदानामियंकौमुदी ॥ कुमुदशब्दोऽत्ररात्रिविकसितानामुपलक्षणम् ॥ साचमुद्धर्षश्चकौमुदमुत्॥तांकौमुदमुदम् ॥ चकारोभिन्नक्रमे ॥ सप्रसिद्धश्चंद्रस्त्वंमुत्समुद्रंप्रीत्यर्णवंचानिर्मासिं॥ अयमर्थः॥ अपरिमितैःस्वीयैःशीतकिरणैरात्रिविकसितानामुल्लासंप्राणिमात्राणामपरिमितप्रमोदंचददासीति ॥ मुदासहवर्तमानंसमुद्रंसमुत्समुद्रमिति ॥ लोकेहिचन्द्रोदयेऽतिविततकिरणैःप्राणिमात्राणांसमुद्रोहर्षकरोभवतीतिसर्वेषांप्रसिद्धम् ॥ कथंभूतस्त्वम् ॥ विद्राविताखिलतमाःविनाशिताखिलांधकारोविद्राविताखिलाऽज्ञानोवा ॥ पुनःकथंभूतः ॥ सुतमःसुष्ठुतमःशोभनतमइत्यर्थः ॥ सुतमामितिपाठेसुतमांसुष्ठुतमांशोभनतमाम् ॥

लोकेतिवेलमतिवेलमहामहोभिर्निर्मासिकौमुदमुदंचसमुत्समुद्रम् ॥ विद्राविताखिलतमाःसुतमोहिमांशोपीयूषपूरपरिपूरिततन्नमस्ते ॥ २ ॥ त्वंपावनेपथिसदागतिरस्युपास्यःकस्त्वांविनाभुवनजीवनजीवतीह ॥ स्तब्धप्रभंजनविवर्धितसर्वजंतोसंतोषिताहिकुलसर्वगतन्नमस्ते ॥ ३ ॥ विश्वैकपावकनतावकपावकैकशक्तेर्ऋतेऽमृतवतामृतदिव्यकार्यम् ॥ प्राणित्यदोजगदहोजगदंतरात्मंस्तत्पावकप्रतिपदंशमदंनमस्ते ॥ ४ ॥ पानीयरूपपरमेशजगत्पवित्रचित्रंविचित्रसुचरित्रकरोपिनूनम् ॥ विश्वंपवित्रममलंकिलविश्वनाथपानावगाहनतएतदतोनतोस्मि ॥ ५ ॥

हिमांशोइत्येकंपदम् ॥ २ ॥ त्वंपावनइति ॥ अपरिमितसूर्याधिकप्रकाशंभगवंतंदृष्ट्वोद्रिक्तभक्तेर्बहुधासंबोधनानि ॥ एवमुपर्यपि ॥ हेस्तब्धप्रभंजन स्तब्धाननम्रान्प्रभनक्तिआमर्दयतीतितथा ॥ विवर्धितसर्वजंतो विवर्धितावृद्धिंप्रापिताःसर्वेजंतवोयेनसतथा ॥ संतोषिताहिकुलसंतोषितमहीनांसर्पाणांकुलंयेनवाय्वाहारत्वात्तेषांसतथा ॥ तेषांसंबोधनानितथा ॥ तत्तस्मात्तेतुभ्यंत्वांप्रतिनमः ॥ कथंभूतम् ॥ यस्त्वम् ॥ यद्वा यस्मात्त्वंपावनेपथिवेदमार्गेउपास्यःपूज्यः ॥ वायव्यंश्वेतमालभेतेतिश्रुतेः ॥ अपिशब्दाद्व्रतादिविषयेपि ॥ अप्युदास्सइतिपाठेसदागतिरपित्वंपावनेपथिआवहइत्यादिसप्तवायुमार्गप्रभेदेतदूर्ध्वमास्सेमूर्तिमान्भूत्वातिष्ठसीत्यर्थः ॥ नमस्कारेहेतुः॥त्वंपावनइत्यादि ॥ हेभुवनजीवनसर्वेषांप्राणरूप ॥ त्वांविनेहकोजीवतिनकोपीत्यर्थः॥३॥विश्वैकेति ॥ वतअहोहेविश्वैकपावकजगदेकपवित्र हे अमृतब्रह्मस्वरूप मरणादिषड्भावविकाररहितेतिवा हेजगदन्तरात्मन्विश्वांतर्यामिन् हेपावकहेवह्ने यस्मात्तावकपावकैकशक्तेर्ऋतेत्वत्संबंधिपवित्रमुख्यसामर्थ्यंविनाऽदोजगन्नप्राणितिप्राणव्यापारंनकरोतिनचेष्टतइत्यर्थः ॥ तावकपाचकैकशक्तेरितिपाठेपाचकशक्तित्वंजाठराग्न्युज्ज्वालनेनबोद्धव्यम्॥कथंभूतंजगत्॥अमृतदिव्यकार्यम् अमृतादेवाश्चदिव्यानींद्रियाणिचकार्याणिभूतानिच॥एकवद्भावादमृतदिव्यकार्यमधिदैवाध्यात्माधिभूतमित्यर्थः॥हेनतावकभक्तरक्षक॥पावकाएकाशक्तिर्यस्यतस्मात्त्वदृतेइतिवा ॥ किंत्वस्मिन्पक्षेऽदोजगत्प्राणितिअपितुनप्राणितीतिकाक्वाव्याख्येयम्॥तत्तस्मात्प्रतिपदंप्रतिक्षणंशमदंशांतिदंसुखदंयथास्यात्तथातेतुभ्यंनमः ॥ प्रतिक्षणंशमदंयथास्यात्तथाजगत्प्राणितीतिवा॥४॥ पानीयेति ॥ हेपानीयस्वरूपहेपरमेशहेजगत्पवित्रहेविचि

CC-0. In Public Domain. Digitization by eGangotri

त्रसुचरित्रहेविश्वनाथअतोऽस्माद्धेतोस्त्वांनतोस्मि॥ यस्मादेतद्विश्वंचित्रंविचित्रमध्यात्माधिभूताधिदैवभेदेनजरायुजांडजस्वेदजोद्भिज्जरूपेणवानूनंनिश्चितंपानावगाहनतःपवित्रमतोऽमलंबाह्यतःकरोषि॥
सबाह्याभ्यंतरंजगत्पुनासीत्यर्थः ॥ ५ ॥ आकाशेति ॥ हेआकाशरूपाव्याकृताकाशस्वरूप ॥ अव्याकृतस्वरूपमेवाह ॥ हेईश्वर हेसदय ततःकारणात्त्वामहंनतोस्मि ॥ यस्मादिहाविद्यादशायामेत
द्विश्वंविकस्वरंविकसनस्वभावंदृश्यमितियावत् ॥ बहिरंतरुत उतअप्यर्थे बहिरंतरपीत्यर्थः ॥ बहिरंतउतेतिपाठेप्ययमेवार्थः ॥ अवकाशदानात्क्रियाशक्तिमत्सूत्रात्मनाप्रवर्तनात्॥ त्वत्तःसदासंश्वसितिप्रा
णितिजायतइत्यर्थः ॥ सदासदयेतिवान्वयः ॥ तथाभवतःसकाशात्संकोचंनाशमेतिचगच्छतिप्राप्नोतीत्येतत् ॥ तत्रनिमित्तकारणमाह ॥ स्वभावादिति ॥ स्वस्यभावःस्वभावोऽविद्यातस्मादित्यर्थः ॥
तथाचोक्तंभगवता॥स्वभावस्तुप्रवर्ततइति॥भूताकाशपक्षेस्पष्टएवार्थः॥६॥विश्वंभरेति ॥ हेविश्वंभरात्मकहेपृथ्वीस्वरूप हेविश्वनाथ हेतमोऽरेऽज्ञानारे हेहिमजाहिभूष हिमजायाउमायाअहीनांसर्पाणांचभू
षायस्मात्तत्संबोधनंतथाहेहिमजाहिभूष परपर पराणांब्रह्मादीनांपरश्रेष्ठ अत्रजगतिब्रह्मांडेएतद्विश्वंजगद्भवतःसकाशादन्यतमःकोविभर्तिनकोपि ॥ यतएवंतत्तस्माच्छमिनांक्षमावतांसहिष्णूनामित्येतत्
मध्येत्वांविनापरःस्तव्योनेत्यर्थः ॥ ततस्त्वांप्रणतोस्मीति ॥ क्षमिणामितिपाठेपंचमंगुर्वार्षम् ॥ ७ ॥ आत्मस्वरूपेति ॥ हेआत्मस्वरूपव्यापकस्वभाव ॥ यद्वा हेआदानकर्तः ॥ यद्वा हेविषयाद ॥

आकाशरूपबहिरंतरुतावकाशदानाद्विकस्वरमिहेश्वरविश्वमेतत् ॥ त्वत्तःसदासदयसंश्वसितिस्वभावात्संकोचमेतिभवतोस्मिनतस्ततस्त्वाम् ॥ ६ ॥
विश्वंभरात्मकबिभर्तिविभोऽत्रविश्वंकोविश्वनाथभवतोन्यतमस्तमोरे ॥ तत्त्वांविनानशमिनांहिमजाहिभूषस्तव्योऽपरःपरपरप्रणतस्ततस्त्वाम् ॥ ७ ॥
आत्मस्वरूपतवरूपपरंपराभिराभिस्ततंहरचराचररूपमेतत् ॥ सर्वांतरात्मनिलयप्रतिरूपरूपनित्यंनतोस्मिपरमात्मतनोऽष्टमूर्ते ॥ ८ ॥ इत्यष्टमूर्तिभि
रिमाभिरुमाभिवंद्यवंद्यातिवंद्यभवविश्वजनीनमूर्ते ॥ एतत्ततंसुविततंप्रणतप्रणीतसर्वार्थसार्थपरमार्थततोनतोस्मि ॥ ९ ॥ अष्टमूर्त्यष्टकेनेत्थंपरिष्टूये
तिभार्गवः ॥ भर्गभूमिमिलन्मौलिःप्रणनामपुनःपुनः ॥ ११० ॥

यद्वा हेनिरंतरसत्तावन् ॥ तथाचोक्तंमोक्षधर्मे ॥ यच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह ॥ यच्चास्यसंततोभावस्तस्मादात्मेतिकथ्यतइति ॥ हेहर हेअज्ञानतत्कार्यनाशक सर्वांतरात्मनिलय सर्वेषामंत
रात्मानोऽतःकरणानिनिलयमाश्रयोयस्यतत्संबोधनंतथा ॥ हेप्रतिरूपरूप रूपंरूपंप्रतीतिप्रतिरूपंप्रत्युपाधिरूपंचिदाभासलक्षणंयस्यतत्संबोधनंतथा ॥ तथाचश्रुतिः ॥ यथाग्नेःक्षुद्राविस्फुलिंगाव्यु
च्चरंत्येवमेवास्मादात्मनः ॥ रूपंरूपंप्रतिरूपोबभूव ॥ तदस्यरूपंप्रतिचक्षणायेत्यादिः ॥ हेपरमात्मतनोपरब्रह्मस्वरूप ॥ हेअष्टमूर्ते अष्टौसूर्यचंद्रवायुवह्निपानीयाकाशपृथ्व्यात्मानोमूर्तयोयस्य
तत्संबोधनंतथा ॥ आभिरात्मस्वरूपाभिस्तवरूपपरंपराभिर्मूर्तिसंततिभिरेतत्परिदृश्यमानंचराचररूपंजगत्ततंव्याप्तमतोनित्यंत्वांप्रणतोस्मीति ॥ नित्यंनतामितिवान्वयः ॥ ८ ॥ उपसंहरति ॥
इत्यष्टमूर्तिभिरिति ॥ हेउमाभिवंद्य हेवंद्यातिवंद्य ॥ वंद्याभिवंद्येतिक्वचित् ॥ हेभव हेविश्वजनीनमूर्ते विश्वजनैकमुख्य हेप्रणतप्रणीतभक्तैकप्राप्य हेसर्वार्थपरमार्थसार्थसर्वेषामर्थसमूहानांमध्येपर
मार्थस्वरूप ॥ यतइमाभिरनंतरोक्तसूर्यादिभिरष्टमूर्तिभिरेतज्जगत्ततंव्याप्तम् ॥ कथंभूतंजगत् ॥ सुविततंविस्तृतंविशालमितियावत् ॥ ततःकारणात्त्वांनतोस्मीति ॥ ९ ॥ अष्टेतिगणयोर्वाक्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्गवः शुक्रो भर्गं विश्वनाथं पुनःपुनः प्रणनामेत्यन्वयः ॥ कथंभूतः ॥ भूमिमिलन्मौलिर्भूमौ मिलंती पतंती भूमिं स्पृशंतीति वा मौलिर्यस्य स तथा ॥ किं कृत्वा ॥ इति परिष्टूय ॥ इतिशब्दोक्तं प्रकारमाह ॥ अष्टमूर्त्यष्टकेनेति ॥ स्तोत्रेणेति शेषः ॥ अष्टमूर्तिप्रतिपादकान्यष्टौ पद्यानि यत्र तत्तथा तेन स्तोत्रेणेत्यर्थः ॥ नन्वन्यान्देवान्विहाय किमिति विश्वेश्वरमेवास्तौषीत्तत्राह ॥ इष्टमिति ॥ परमप्रेमास्पदत्वेन निरुपाधिसुखरूपमित्यर्थः॥१०॥११॥१२॥१३॥ सुताभ्यां गणेशकार्तिकेयाभ्यां तुल्यमिति शेषः ॥१४॥ वरेंद्रियमुपस्थः॥ मेहनेंद्रियमार्गेणेति वा पाठः॥ममेंद्रियेति क्वचित्॥तन्मार्गे

इतिस्तुतो महादेवो भार्गवेणातितेजसा ॥ उत्थाप्य भूमेर्बाहुभ्यां धृत्वा तं प्रणतं द्विजम् ॥ ११ ॥ उवाच दशनज्योत्स्नाप्रद्योतितदिगंतरः ॥ अनेनात्युग्रतपसा ह्यनन्याचरितेन च ॥ १२ ॥ लिंगस्थापनपुण्येन लिंगस्याराधनेन च ॥ चित्तरत्नोपहारेण शुचिना निश्चलेन च ॥१३॥ अविमुक्तमहाक्षेत्रे पवित्राचरणेन च ॥ त्वां सुताभ्यां प्रपश्यामि तवादेयं न किंचन ॥ १४ ॥ अनेनैव शरीरेण ममोदरदरीं गतः ॥ मद्वरेंद्रियमार्गेण पुत्रजन्मत्वमेष्यसि ॥ १५ ॥ अन्यं वरं प्रयच्छामि दुष्प्रापं पार्षदैरपि ॥ हरौ हिरण्यगर्भेपि प्रायशोऽहं जुगोप याम् ॥ १६ ॥ मृतसंजीवनी नाम विद्या या मम निर्मला ॥ तपोबलेन महता मयैव परिनिर्मिता ॥ १७ ॥ त्वां तां तु प्रापयाम्यद्य मंत्ररूपां महाशुचे ॥ योग्यता तेऽस्ति विद्याया स्तस्याः शुचितपोनिधे ॥ १८ ॥ यं यमुद्दिश्य नियतमेतामावर्तयिष्यसि ॥ विद्यां विद्येश्वरश्रेष्ठ स स प्राणिष्यति ध्रुवम् ॥१९॥ अत्यर्कमत्यग्निच ते तेजो व्योम्न्यतितारकम् ॥ देदीप्यमानं भविता ग्रहाणां प्रवरो भव ॥२०॥ अभित्वां ये करिष्यंति यात्रां नार्यो नरोपि वा ॥ तेषां त्वद्दृष्टिपातेन सर्वकार्यं प्रणंक्ष्यति ॥ २१ ॥ तवोदये भविष्यंति विवाहादीनि सुव्रत ॥ सर्वाणि धर्मकार्याणि फलवंति नृणामिह ॥ २२ ॥ सर्वाश्च तिथयो मंदास्तव संयोगतः शुभाः ॥ तव भक्ता भविष्यंति बहुशुक्रा बहुप्रजाः ॥ २३ ॥

णच्छिद्रेण ॥ अंतिमपाठे संधिर्न विवक्षितः॥ पुत्रजन्मत्वमेष्यसि प्राप्स्यसीति॥ अत एव पूर्वोक्तमुदरप्रवेशादिकमेतदनंतरमिति ज्ञातव्यम्॥१५॥ जुगोप गुप्तवान् ॥१६॥१७॥१८॥ आवर्तयिष्यसि जपिष्यसि एतां विद्यामित्यन्वयः ॥ प्राणिष्यति जीविष्यति ॥ १९ ॥ अत्यर्केति ॥ अर्कादीनतिक्रम्य वर्तमानं ते तेजो भविष्यति यतो ग्रहाणां त्वं श्रेष्ठो भवेत्यर्थः ॥ २० ॥ अभित्वामिति ॥ त्वामभिलक्षीकृत्य संमुखीकृत्येति यावत् ॥ नरो नराः ॥ नृशब्दस्य बहुवचने रूपम् ॥ २१ ॥ २२ ॥ मन्दा अमंगलाः ॥ नन्दा इति पाठे प्रतिपत्षष्ठ्येकादश्यो नन्दाः ॥ तथा चाहुर्ज्योतिर्विदः ॥ भृगुनंदासिद्धियोग

CC-0. In Public Domain. Digitization by eGangotri

इति ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ पुंस्त्वंपुंभावःपौरुषंसामर्थ्यमितियावत् ॥ २७ ॥ २८ ॥ २९ ॥ अंगारोमंगलस्तदीयंलोकमांगारकम् ॥ आलुलोकेऽपश्यत् ॥ ३० ॥ इतिश्रीरा
मानंदकृतायांकाशीखण्डटीकायांषोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ माहेयगुरुसावर्णिलोकाअत्यंतदुर्लभाः ॥ सप्ताधिकदशेध्यायेवर्ण्यंतेऽत्रयथाक्रमम् ॥ १ ॥ आंगारकंलोकमित्युक्तंतत्रोक्ता
नुवादेनात्मनःश्रोत्रयोःप्रीतिमाविष्कुर्वंस्तमेवपृच्छति ॥ शुक्रेति ॥ हेदेवौ ॥ अश्राविश्रुता ॥ प्रीणितेतर्पिते ॥ १ ॥ एषः तुपुनः ॥ भवतांस्ताम् ॥ २ ॥ ननुउक्तयैवकथयाऽलंमन्यस्वेतिचेत्त

त्वयेदंस्थापितंलिंगंशुक्रेशमितिसंज्ञितम् ॥ येऽर्चयिष्यंतिमनुजास्तेषांसिद्धिर्भविष्यति ॥ २४ ॥ आवर्षंप्रतिशुक्रंयेनक्तव्रतपरानराः ॥ तत्रदिनेशुक्रकू
पेयेकृतसर्वोदकक्रियाः ॥ २५ ॥ शुक्रेशमर्चयिष्यंतिशृणुतेषांतुयत्फलम् ॥ अवंध्यशुक्रास्तेमर्त्याःपुत्रवंतोऽतिरेतसः ॥ २६ ॥ पुंस्त्वसौभाग्यसं
पन्नाभविष्यंतिनसंशयः ॥ व्यपेतविघ्नास्तेसर्वेजनाःस्युःसुखवासिनः ॥ इतिदत्त्वावरान्देवस्तत्रलिंगेलयंययौ ॥२७॥ गणावूचतुः ॥ ॥ शुक्रेश्वरस्यये
भक्ताःशुक्रलोकेवसंतिते ॥ विश्वेश्वराद्दक्षिणतःशुक्रेशोस्तिपरंतप ॥ २८ ॥ तस्यदर्शनमात्रेणशुक्रलोकेमहीयते ॥ इत्येषाशुक्रलोकस्यस्थितिरुक्ता
महामते ॥ २९ ॥ अगस्त्यउवाच ॥ ॥ इत्थंसधर्मिणिकथांशुक्रलोकस्यसुव्रते ॥ शृण्वन्नांगारकंलोकमालुलोकेऽथसद्विजः ॥ ३० ॥ इति श्रीस्कां
दे महापुराणे चतुर्थे काशीखंडेपूर्वार्धे शुक्रलोकवर्णनंनामषोडशोऽध्यायः ॥१६॥ ॥ शिवशर्मोवाच ॥ ॥ शुक्रसंबंधिनीदेवौकथाश्राविमयाशुभा ॥
यस्याःश्रवणमात्रेणप्रीणितेश्रवणेमम ॥ १ ॥ कस्यपुण्यनिधेर्लोकःशोकहृत्त्वेषनिर्मलः ॥ एतदाख्यातुमुद्युक्तौभवंतौभवतांमम ॥ २ ॥ धयित्वाश्रो
त्रपात्राभ्यांवाणीममृतरूपिणीम् ॥ नतृप्तिमधिगच्छामिभवन्मुखसुखोद्गताम् ॥३॥ ॥ गणावूचतुः ॥ ॥ लोहितांगस्यलोकोयंशिवशर्मन्निबोधह ॥
उत्पत्तिंचास्यवक्ष्यावोभूसुतोयंयथाभवत् ॥ ४ ॥ पुरातपस्यतःशंभोर्दाक्षायण्यावियोगतः ॥ भालस्थलात्पपातैकःस्वेदबिंदुर्महीतले ॥ ५ ॥ ततः
कुमारःसंजज्ञेलोहितांगोमहीतलात् ॥ स्नेहसंवर्धितःसोथधात्र्याधात्रीस्वरूपया ॥ ६ ॥ माहेयइत्यतःख्यातिंपरामेषगतःसदा ॥ ततस्तेपेतपोत्युग्रमु
ग्रपुर्यांपुरानघ ॥ ७ ॥ असिश्चवरणाचापिसरितौयत्रशोभने ॥ द्युनद्योत्तरवाहिन्यामिलितेऽत्रजगद्धिते ॥ ८ ॥

त्राह ॥ धयित्वेति ॥ धयित्वापीत्वा ॥ श्रोत्रेश्रवणेंद्रियेएवपात्रेताभ्यांतृप्तिमलंप्रत्ययम् ॥ भवदिति ॥ भवतोर्मुखात्सुखेननिःसृताम् ॥ ३ ॥ लोहितांगस्यांगारकस्यमंगलस्येतियावत् ॥ अंगारकः
कुजोभौमोलोहितांगोमहीसुतइत्यमरः ॥ ४ ॥ दाक्षायण्यादक्षसुतायाःसत्याइत्यर्थः ॥ भालस्थलाल्ललाटात् ॥ ५ ॥ लोहितांगः लोहितान्यंगानियस्यसः ॥ धात्र्यापृथिव्या ॥ कथंभूतया ॥
धात्रीस्वरूपयाउपमातृस्वरूपयेत्यर्थः ॥ धात्रीस्यादुपमातापीत्यमरः ॥ ६ ॥ माहेयोमह्याःपुत्रः ॥ उग्रपुर्यांत्रिपुरारेराजधान्याम् ॥ ७ ॥ उग्रपुरींविशिनष्टि ॥ असिश्चेतिचतुर्भिः ॥ सरितौनद्यौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्रउग्रपुर्याम् ॥ द्युनद्यागंगया ॥ अत्रब्रह्मांडे ॥ सांधिरार्षः ॥ यत्रात्रेतिसामानाधिकरण्यंवा ॥ ८ ॥ कालोज्झितस्ववर्ष्मणांयथावसरत्यक्तस्वदेहानाम् ॥९॥ अमृतंकैवल्यम् ॥ १० ॥ सांख्यमात्माना त्मविवेकः॥योगोऽष्टांगः ॥११॥ संस्थाप्ययावज्ज्वलदंगारवत्तेजःस्वशरीरान्निःसृतंतावत्तेनभौमेनतपस्तप्तमितिद्वितीयेनान्वयः ॥ पांचमुद्रेमहास्थानेतन्नाम्निमहापीठे ॥ पंचानांभूतानामविद्याऽस्मिता रागद्वेषाभिनिवेशानांवामुद्रामुद्रणंविनाशोयस्मिंस्तत्स्थानंतथेतिवा॥कंबलाश्वतरयोर्नागयोरुत्तरेउत्तरस्मिन्पार्श्वे ॥ १२ ॥ १३॥१४॥१५॥१६॥ उपरागसमंग्रहणसमम् ॥ पर्वपुण्यकालः ॥ १७ ॥ ॥ १८ ॥ अंगारकचतुर्थ्याउपरागपर्वसमत्वेहेत्वंतरमाह ॥ अंगारकचतुर्थीतिवति ॥ तुशब्दात्पूर्वस्माद्धेतोराधिक्यंसूच्यते ॥ १९ ॥ २० ॥ २१ ॥ गुरोःपुरींकथयितुंप्रस्तावयति ॥

सर्वगोपिहिविश्वेशोयत्रनित्यंप्रकाशते ॥ मुक्तयेसर्वजंतूनांकालोज्झितस्ववर्ष्मणाम् ॥ ९ ॥ अमृतंहिभवंत्येवमृतायत्रशरीरिणः ॥ अनुग्रहंसमासाद्यप रंविश्वेश्वरस्यह ॥ १० ॥ अपुनर्भवदेहास्तेयेऽविमुक्तेतनुत्यजः ॥ विनासांख्येनयोगेनविनानानाव्रतादिभिः ॥ ११ ॥ संस्थाप्यलिंगंविधिनास्वनाम्नां गारकेश्वरम् ॥ पांचमुद्रेमहास्थानेकंबलाश्वतरोत्तरे ॥ १२ ॥ ज्वलदंगारवत्तेजोयावत्तस्यशरीरतः ॥ विनिर्ययौतपस्तावत्तेनतप्तंमहात्मना ॥ १३ ॥ ततोंगारकनाम्नासस्सर्वलोकेषुगीयते ॥ तस्यतुष्टोमहादेवोददौग्रहपदंमहत् ॥ १४ ॥ अंगारकचतुर्थ्यांयेस्नात्वोत्तरवहांभसि ॥ अभ्यर्च्यांगारकेशानं नमस्यंतिनरोत्तमाः ॥१५ ॥नतेषांग्रहपीडाचकदाचित्क्वापिजायते॥ अंगारकेनसंयुक्ताचतुर्थीलभ्यतेयदि ॥१६॥ उपरागसमंपर्वतदुक्तंकालवेदिभिः ॥ तस्यांदत्तंहुतंजप्तंसर्वंभवतिचाक्षयम् ॥१७॥ श्रद्धयाश्राद्धदायेवैचतुर्थ्यंगारयोगतः ॥ तेषांपितॄणांभवितातृप्तिर्द्वादशवार्षिकी ॥ १८ ॥ अंगारकचतुर्थ्यां तुपुराजज्ञेगणेश्वरः ॥ अतएवतुतत्पर्वप्रोक्तंपुण्यसमृद्धये ॥ १९॥ एकभक्तव्रतीतत्रसंपूज्यगणनायकम् ॥ किंचिद्दत्त्वातमुद्दिश्यनविघ्नैरभिभूयते ॥ २० ॥ अंगारेश्वरभक्तायेवाराणस्यांनरोत्तमाः ॥ तेऽस्मिन्नंगारकेलोकेवसंतिपरमर्द्धयः ॥२१॥ अगस्त्यउवाच ॥ ॥ इत्थंकथयतोरेवरम्यांपुण्यवतींकथाम् ॥ भगवद्गणयोःप्रापनेत्रातिथ्यंगुरोःपुरी ॥ २२ ॥ नेत्रानंदकरींदृष्ट्वाशिवशर्माऽथतांपुरीम् ॥ पप्रच्छाचार्यवर्यस्यकस्येयंपूरनुत्तमा ॥ २३ ॥ ॥ गणा वूचतुः ॥ ॥ सखेसुखंसमाख्यावोनानाख्येयंतवाग्रतः ॥ अध्वखेदापनोदायपुनरस्याःपुरःकथाम्॥ २४ ॥ विधेर्विधित्सतःपूर्वंत्रिलोकीरचनांमुदा ॥ आविरासुःसुताःसप्तमानसाःस्वस्यसंनिभाः ॥ २५ ॥ मरीच्यत्र्यंगिरोमुख्याःसर्वेसृष्टिप्रवर्तकाः ॥ प्रजापतेरंगिरसस्तेष्वभूद्देवसत्तमः ॥ २६ ॥ सुतश्चां गिरसोनामबुद्ध्याविबुधसत्तमः ॥ शांतोदांतोजितक्रोधोमृदुवाङ्निर्मलाशयः ॥ २७ ॥

इत्थमिति ॥ कथयतोःसतोः ॥ नेत्रातिथ्यंनेत्रगोचरताम् ॥ शिवशर्मणइतिशेषः ॥ २२ ॥ नेत्रेति ॥ आचार्यवर्यस्यबृहस्पतेस्तांपुरींदृष्ट्वाकस्येयमनुत्तमापूरितिशिवशर्मापप्रच्छेत्यन्वयः ॥ कस्यपूज्यस्यश्रेष्ठस्येतियावदितिवा ॥ २३ ॥ २४ ॥ विधेरिति ॥ लोकत्रयसृष्टिंविधातुमिच्छतोहिरण्यगर्भस्यात्मनस्तुल्याःसप्तपुत्रामानसाआविरभवन्नित्यर्थः ॥ २५ ॥ मरीचिश्चात्रिश्चांगिरा श्चतेमुख्याःप्रधानाआद्यावायेषांसप्तानांपुलस्त्यादीनांवातेतथा ॥ तेषुमध्ये ॥ २६ ॥ अंगिरसोऽपत्यमांगिरसः ॥ पितृनाम्नाप्रख्यातइत्यर्थः ॥ तंविशिनष्टिसार्धत्रयेण ॥ बुद्ध्येति ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri

कलासुचतुःषष्टिकलासुशैवतंत्रप्रसिद्धासु ॥ यथा—गीतम्, वाद्यम्, नृत्यम्, नाट्यम्, आलेख्यम्, विशेषकच्छेद्यम्, तंडुलकुसुमबलिविकाराः, पुष्पास्तरणम्, दशनवसनांगरागाः, मणिभूमिकाकर्म, शयनरचनम्, उदकवाद्यमुदकघातः, चित्रयोगाः, माल्यग्रथनविकल्पाः, शेखरापीडयोजनम्, नेपथ्ययोगाः, कर्णपत्रभंगी, गंधयुक्तिः, भूषणयोजनम्, ऐंद्रजालम्, कौतुमारयोगाः, हस्तलाघवम्, चित्रशाकापूपभक्ष्यविकारक्रिया, पानकरसरागासवयोजनम्, सूचीवामकर्म, सूत्रक्रीडा, वीणाडमरुकवाद्यानि; प्रहेलिका, प्रतिमाला, दुर्वचकयोगाः, पुस्तकवाचनम्, नाटकाख्यायिकादर्शनम्, काव्यसमस्यापूरणम्, पट्टिकावेत्रवाणविकल्पाः, तर्ककर्माणि, तक्षणम्, वास्तुविद्या, रूप्यरत्नपरीक्षा, धातुवादः, मणिरागज्ञानम्, आकरज्ञानम्, वृक्षायुर्वेदयोगाः, मेषकुक्कुटलावकयुद्धविधिः, शुकसारिकाप्रलापनम्, उत्सादनम्, केशमार्जनकौशलम्, अक्षरमुष्टिकाकथनम् , म्लेच्छितकविकल्पाः, देशभाषाज्ञानम् , पुष्पशकटिका, निमित्तज्ञानम्, यंत्रमातृकामंत्रमातृकाधारणमातृकासंवाच्यम्, मानसीकाव्यक्रिया, अभिधानकोशाः, छंदोज्ञानम्, क्रियाविकल्पाः, छलितकयोगाः, वस्त्रगोपनानि, द्यूतविशेषाः, आकर्षक्रीडा, बालक्रीडनकानि, वैनायिकानां वैजयिकानां वैया

वेदवेदार्थतत्त्वज्ञःकलासुकुशलोऽमलः ॥ पारदृश्वातुसर्वेषांशास्त्राणांनीतिवित्तमः ॥ २८ ॥ हितोपदेष्टाहितकृदहितात्यहितःसदा ॥ रूपवान्छीलसंपन्नो गुणवान्देशकालवित् ॥ २९ ॥ सर्वलक्षणसंभारसंभृतोगुरुवत्सलः ॥ ततापतापसींवृत्तिंकाश्यांसमहतींदधत् ॥ ३० ॥ महल्लिंगंप्रतिष्ठाप्यशंभोर्भवभूरिभावनः ॥ अयुतंशरदांदिव्यंदिव्यतेजामहातपाः ॥३१॥ ततःप्रसन्नोभगवान्विश्वेशोविश्वभावनः ॥ आविर्भूयततोलिंगान्महसांराशिरब्रवीत् ॥३२॥ प्रसन्नोस्मिवरंब्रूहियत्तेमनसिवर्तते ॥ इतिशंभुंसमालोक्यतुष्टावेतिसहृष्टवान् ॥ ३३ ॥ ॥ आंगिरसउवाच ॥ ॥ जयशंकरशांतशशांकरुचेरुचिरार्थदसर्वदसर्वशुचे ॥ शुचिदत्तगृहीतमहोपहृतेहृतभक्तजनोद्धततापतते ॥ ३४ ॥

सिकानांचविद्यानांज्ञानम् ॥ इतिचतुःषष्टिकलाः ॥ अमलोऽज्ञानमलरहितः ॥ पारदृश्वासमाप्तिंगतः ॥ २८ ॥ अहितात्यहितःसदा सदासर्वदाऽहितमत्यहितम् अतिक्रांतंयेनसः आहितस्यातिशयेनाहितइतिवा ॥ अहितानामपिक्षमीतिकश्चित् ॥ २९ ॥ सब्रूहस्पतिः ॥ ३० ॥ महल्लिंगंमहतोभूतस्यविश्वेश्वरस्य ॥ अस्यमहतोभूतस्यनिश्वसितमेतदित्यादिश्रुतेः ॥ लिंगं महल्लिंगमितिकर्मधारयोवा ॥ प्रतिष्ठाप्यसंवत्सराणांदिव्यंदशसहस्रंव्याप्यमहतींतापसींतापससंबंधिनींतपोयोग्यांवावृत्तिंधारयंस्ततापेत्यर्थः ॥ ३१ ॥ ३२ ॥ प्रसन्नोस्मीति ॥ यत्यः ॥ यइत्येववापाठः ॥ इतिएवंप्रकारेण ॥ ३३ ॥ पद्यैरष्टभिरुत्कृष्टैर्देवाचार्योमहेश्वरम् ॥ तुष्टावोद्रिक्तयाभक्त्यासोमंसोमार्धशेखरम् ॥ जयेति ॥ हेशंकरकल्याणकर ॥ हेशांतएकरूप ॥ हेशशांकरुचेचन्द्रकांते ॥ हेरुचिरकमनीय॥ हेअर्थद ॥ हेरुचिरार्थदेत्येकंपदंवा॥रुचिरान्नदेतिकश्चित् ॥ हेसर्वदपुरुषार्थचतुष्टयप्रद॥ प्रलयकालेसर्वावखंडकसर्वनाशकेतिवा॥ हेसर्वसर्वस्वरूप॥ हेशुचेपवित्र॥ सर्वेषुचयोयस्मात्तत्संबोधनंतथाइतिवा ॥ तथाचोक्तम् ॥ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिरिति ॥ सर्वजनस्यशुचेइतिकश्चित्पाठः ॥ शुचिभिर्दत्तासमर्पितागृहीतामहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पहृतिर्महोपहारोमहापूजायेनतत्संबोधनंतथा ॥ हृताभक्तजनानामुद्धताउद्धटातापततिःसन्तापपरंपरायेनतत्संबोधनंतथा ॥ जयोत्कर्षमाविष्कुरु ॥ ३४ ॥ ततेति ॥ ततंविस्तृतंव्याप्तंसर्वेषांहृदंवरं हृदयाकाशंयेनतत्संबोधनंतथा ॥ हेवरद ॥ हेनतेनतनम्रस्वरूप ॥ कर्तरिक्तिन् ॥ सक्षेतुर्विधृतिरितिवत् ॥ [१]वरदानांब्रह्मादीनांनतिर्यस्मैतत्संबोधनंतथेतिवा ॥ नतानांप्रणतानांवृजिनानिपापान्येवमहावनानितेषांदाहकृतेभस्मकर्तः ॥ कृतंविविधंचरित्रंसृष्ट्यादिलक्षणंययासातनुर्यस्यतत्संबोधनंतथा ॥ ततविविधचरित्रतनोइतिक्वचित् ॥ पवित्रतनोइतिचान्यत्र ॥ सुतनोहेशोभनतनो ॥ तनूनिकोमलानिपुष्पाणीत्येतत् विशिखावाणायस्यसकंदर्पस्तथातंविशोषयतिनाशयतितस्यविशोषणंयस्मादितिवातत्संबोधनंतथा ॥ हेधैर्यनिधेधैर्यसमुद्र ॥ तनुविशिखेनयद्विशोषणंदाहस्तत्रधैर्यनिधेइत्येकंवापदम् ॥ जयेत्यनुषज्जते ॥ एवमुत्तरत्रापि ॥ ३५ ॥ निधनेति ॥ निधनादिविवर्जितमरणादिषड्भावविकाररहित :॥ कृतःसंपादितोनतिकृत्प्रणतोभक्तोयेनतत्संबोधनंतथा ॥ निधनादिविवर्जिताः कृतानतिकृतोभक्तायेनेत्येकंवापदम् ॥ कृतिनेविदुषेज्ञानिनेइतियावत् ॥ विहितोदत्तोमनोरथोमोक्षोयेनतत्संबोधनंतथा ॥ हेपन्नगभृत्सर्पधारिन् ॥ नगभर्तृसुतापार्वतीअर्पितास्थापितावामवपुषिवामांगेअर्पितास्वीकृतावामवपुर्वामांगंवायेनतत्संबोधनंतथा ॥ नगभर्तृसुतयाऽर्पितंव्याप्तंवामंवपुर्वामांगंयस्यअर्पितंदत्तंवामवपुर्मनोहरंशरीरंयस्माइतिवातत्संबोधनंतथेतिवा ॥ स्ववपु

ततसर्वहृदंबरवरदनतेनतवृजिनमहावनदाहकृते ॥ कृतविविधचरित्रतनोसुतनो[१]तनुविशिखविशोषणधैर्यनिधे ॥ ३५ ॥ निधनादिविवर्जितकृतनतिकृत्कृतिविहितमनोरथपन्नगभृत् ॥ नगभर्तृसुतार्पितवामवपुःस्ववपुःपरिपूरितसर्वजगत् ॥ ३६ ॥ त्रिजगन्मयरूपविरूप[२]सुदृग्दृगुदंचनकुंचनकृतहुतभुक् ॥ भवभूतपतेप्रमथैकपतेपतितेष्वपिदत्तकरप्रसृते ॥ ३७ ॥ प्रसृताखिलभूतलसंवरणप्रणवध्वनिसौधसुधांशुधर ॥ धरराजकुमारिकयापरयापरितःपरितुष्टनतोस्मिशिव ॥ ३८ ॥

पास्वस्वरूपेणब्रह्मरूपेणेतियावत् ॥ परिपूरितंपरितोव्याप्तंसर्वंजगद्येनतत्संबोधनंतथा ॥ परिनिर्मितेतिक्वचित् ॥ ३६ ॥ त्रिजगदिति ॥ त्रिजगन्मयरूपहेत्रिजगद्विवर्तस्वरूप ॥ ब्रह्मैवेदमित्यादिश्रुतेः ॥ वस्तुतोविरूपहेप्रपंचरूपरहित ॥ तत्रहेतुः ॥ सुदृक्सुशोभनाखंडसच्चिदानंदैकलक्षणादृक्चिच्छक्तिर्यस्यतत्संबोधनंतथा ॥ प्राकृतंव्याख्यानंपदद्वयेपिस्पष्टम् ॥ दृशांनेत्राणामुदंचनमुद्धर्तनंचालनमितियावत् ॥ तेनकुंचनंसंकोचनंप्रलयंकरोतीतितत्संबोधनंतथा ॥ मृगचन्दनकुंचनकृदितिक्वचित्पाठः ॥ तत्रमृगमदेनमिश्रितंचन्दनंमृगचन्दनंतेनकुंचनकृदालेपकृदितिव्याख्येयम् ॥ अकारश्रवणमार्षम् ॥ हुतभुक्इंद्रादिरूपेणचरुपुरोडाशादिभुक् ॥ कृतभुगितिपाठेजीवरूपेणकृतस्वर्गादिफलभुक् ॥ पाठद्वयेपितत्संबोधनंतथा ॥ दृगुदंचनकुंचनेकृतःहुतभुक्येनेत्येकंवापदम् ॥ भवत्यस्मादितिभवहेसर्वोत्पादक ॥ भूतविशेषाणांप्राणिमात्राणांवापतेहेभूतपते ॥ प्रमथानांगणविशेषाणांमुख्यस्वामिन्प्रमथैकपते ॥ अत्रभूतप्रमथानामवांतरभेदोद्रष्टव्यः ॥: पतितेष्वपिभवार्णवेनिमग्नेष्वपिदत्तःकरोरश्मिःकरइवकरोज्ञानम्॥अज्ञानांधकारनाशकत्वात्॥तस्यप्रसृतिःप्रसरणंप्राप्तिर्येनतत्संबोधनंतथा॥पतितेष्वपिभक्तेषुदत्ताकरप्रसृतिर्हस्तावलंबनंयेनतत्संबोधनंतथेतिवा ॥३७॥ प्रसृतेति ॥ प्रसृतंगतमखिलभूतलेपुसंवरणंसम्यग्वृतिर्व्याप्तिरावरणंवायस्यतत्संबोधनंतथा ॥ येनसर्वमिदंततम् ॥ मृत्युनैवेदमावृतमासीदित्यादिस्मृतिश्रुतिभ्यः ॥ प्रणवध्वनिरेवसौधंधवलगृह

१ अतनोःअनंगस्यबाणविशोषण ! तत्कर्मणिधैर्यनिधे वा । २ हेसुविरूपाक्ष ! अथवा हेविरूपस्वक्ष ! विरूपापिसुष्ठुतराद्दृग्यस्येति ।

CC-0. In Public Domain. Digitization by eGangotri

माश्रयोयस्यतत्संबोधनंतथा ॥ सुधांशुःसुधामयश्चंद्रस्तंधरतीतिसःतत्संबोधनंतथा ॥ प्रणवस्यॐकारस्यषडक्षरात्मकस्ययोध्वनिर्नादःषष्ठाक्षरःपरापश्यंतीमध्यमावैखर्याख्याअवस्थाअनुभूय स्वरवर्णपदात्मकस्तस्यसौधंगृहमाश्रयइत्यर्थः ॥ तत्संबोधनंतथा ॥ सुधांशुधरहेचन्द्रावतंसेतिवा ॥ हेधरराजकुमारिकयाधराधरराजकन्ययाऽपर्णयापरयाचिद्रूपयापरितःसर्वतःपरितुष्टअतिशयेन प्राप्ततोष ॥ हेशिवकल्याणरूप ॥ नतोस्मित्वामितिशेषः ॥ ३८ ॥ शिवेति ॥ हेशिवमहेश्वररूप ॥ हेदेवस्वप्रकाश ॥ हेगिरीशगिरोर्वेदलक्षणायाःसरस्वत्यावाईशनियन्तः ॥ गिरेः केलासस्येतिवा ॥ हेमहेशमहांश्चासावीशश्चेतितत्संबोधनंतथा ॥ हेविभोसमर्थविशेषेणभवतीतिविभुस्तत्संबोधनंवातथा ॥ हेविभवप्रदऐश्वर्यप्रद ॥ हेगिरिशगिरौकैलासेशेतइतितत्संबोधनं तथा ॥ हेशिवेशशिवायाउमायाभर्तः ॥ हेमृडसुखजनकसुखस्वरूपेतिवा ॥ उडुपतिंचंद्रंधरतीत्युडुपतिध्रस्तत्संबोधनंतथा ॥ उडुपतिलकेतिक्वचित् ॥ उडुपतिकेतिचान्यत्र ॥ पाठद्वयमपिच्छंदोभं गादक्षराधिक्याच्चनांगीकर्तव्यमिति ॥ उडुपतीकेतिपाठेउडुपतिमिकतिशिरोभूषणत्वेनस्वीकरोतीतियावत्तत्संबोधनंतथा ॥ धातूनामनेकार्थत्वात् ॥ कृतादत्तायन्त्रणापीडायेनतत्संबोधनंतथा ॥ केषामित्याकांक्षायामाह ॥ भक्तिविघातकृतांकामक्रोधलोभादीनांत्रिपुरांधकजलंधरादीनांचेत्यर्थः ॥ जगत्रितयंमृडयसुखय ॥ अस्मिन्श्लोकेद्वितीयपादेछन्दोभंगोऽक्षराधिक्यंचार्षम् ॥ ३९ ॥

शिवदेवगिरीशमहेशविभोविभवप्रदगिरिशशिवेशमृड ॥ मृडयोडुपतिध्रजगत्रितयंकृतयंत्रणभक्तिविघातकृताम् ॥ ३९ ॥ नकृतांततएषबिभेमिहरप्र
हराशुमहाघममोघमते ॥ नमतांतरमन्यदवैमिशिवंशिवपादनतेःप्रणतोस्मिततः ॥ ४० ॥ विततेऽत्रजगत्यखिलेऽघहरंहरतोषणमेवपरंगुणवत् ॥
गुणहीनमहीनमहावलयंप्रलयांतकमीशनतोस्मिततः ॥ ४१ ॥ इतिस्तुत्वामहादेवंविरारामांगिरःसुतः ॥ व्यतरच्चमहेशानःस्तुत्यातुष्टोवरान्बहून् ॥४२॥
॥ श्रीमहादेवउवाच ॥ ॥ बृहतातपसानेनबृहतांपतिरेध्यहो ॥ नाम्नाबृहस्पतिरितिग्रहेष्वर्च्योभवद्विज ॥ ४३ ॥ अस्माल्लिंगार्चनान्नित्यंजीवभूतो
सिमेयतः ॥ अतोजीवइतिख्यातिंत्रिषुलोकेषुयास्यसि ॥४४॥ वाचांप्रपंचैश्चतुरैर्निष्प्रपंचोयतःस्तुतः ॥ अतोवाचांप्रपंचस्यपतिर्वाचस्पतिर्भव ॥४५॥

नेति ॥ हेहरअज्ञाननाशकभक्तपापहरप्रलयकालेसर्वसंहारकेतिवा ॥ हेअमोघमतेअप्रतिहतज्ञान ॥ ज्ञानमप्रतिघंयस्येतिश्रुतेः ॥ एषोऽहंकृतांततोयमादपिनबिभेमित्वद्दर्शनादितिशेषः ॥ अतआशुशीघ्रं महाघंमहत्पापंमहामोहंवाप्रहरदूरीकुरुनाशयेत्यर्थः ॥ ननुतत्त्वज्ञानादेवाहमज्ञानंनाशयामीतिचेत्तत्राह ॥ शिवपादनतेःशिवस्यतवपादनतेर्नमस्कारादन्यन्मतांतरंशिवंकल्याणरूपंनावैमिनजाना मिततस्त्वांप्रणतोस्मीतिनमस्कारमात्रेणैवज्ञानंसंपाद्यअज्ञानंनिवर्तयेतिभावः ॥४०॥ विततइति ॥ अतःकारणादहमीशंत्वांनतोस्मि ॥ ईशंकथंभूतम् ॥ गुणहीनंप्रपंचातीतमित्यर्थः॥ पुनःकीदृशम् ॥ अहीनमहावलयम्अहीनमहिसंबधिमहावलयंमहत्कंकणंयस्यतम् ॥ अहीनांसर्पाणामिनईश्वरोऽहीनोवासुकिर्नागानामिनोनंतोवासमहद्वलयंयस्येतिवा ॥ पुनःकीदृशम् ॥ प्रलयांतकंप्रलयकालेसर्व संहारकमित्यर्थः ॥ यतोऽत्रजगति ॥ कीदृशे ॥ वितते ॥ अस्यैवव्याख्यानमखिलइति ॥ हरतोषणमेवाघहरंपरंमुख्यंगुणवदिति ॥ ४१ ॥ व्यतरद्दत्तवान् ॥ ४२ ॥ वरान्प्रयच्छन्नामात्रि तयंनिर्वक्ति ॥ बृहतेतिश्लोकत्रयेण ॥ बृहतांपतिरेधिइंद्रादीनांदेवानांगुरुर्भवेत्यर्थः ॥ ४३ ॥ ४४ ॥ प्रपंचैर्विस्तारैश्चतुरैर्निपुणैःसुश्राव्यैरित्यर्थः ॥ भवस्याः ॥ भवानितिक्वचित् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाग्गुदियाच्चयमिति ॥ अस्यस्तोत्रस्यपठनात्पाठाद्यंपुरुषंप्रतिवाक्सरस्वतीउदियाद्गुदिताभवतितस्यसंस्कृतावाणीचस्यादित्यन्वयः ॥ श्रवणादपिभावतइतिपाठेएतत्स्तोत्रंभावतोभक्त्यात्रिकालतस्त्रिकालंयःपठतियश्चशृणोतितस्यसंस्कृतावाणीस्यादित्यर्थः ॥ अपिवाऽसुमहात्मनः अपिवाऽगुणवांश्चयइतिपाठद्वयेप्यकारःप्रश्लेष्टव्यः ॥ अर्थस्तुपूर्वोक्तरीत्यानुसंधेयः ॥ ४६ ॥ वायव्याख्यंवायुःसूत्रात्मा ॥ वायुर्वैगौतमतत्सूत्रमितिश्रुतेः ॥ तत्प्रापकंवायव्यंहिरण्यगर्भपदप्रापकमित्यर्थः ॥ वायुपुराणेप्रोक्तंवायुनावाप्रोक्तंवायव्यम् ॥ यद्वा वायुरेववायव्यम् ॥ स्वार्थेष्यञ् ॥ वायुर्य

अस्यस्तोत्रस्यपठनादपिवाग्गुदियाच्चयम् ॥ तस्यस्यात्संस्कृतावाणीत्रिभिर्वर्षैस्त्रिकालतः ॥ ४६ ॥ समुत्पन्नेमहाकार्येनसबुद्ध्याप्रहीयते ॥ यःपठिष्यत्यदःस्तोत्रंवायव्याख्यंदिनेदिने ॥ ४७ ॥ अस्यस्तोत्रस्यपठनान्नियतंममसंनिधौ ॥ नदुर्वृत्तौप्रवृत्तिःस्यादविवेकवतांनृणाम् ॥ ४८ ॥ अदःस्तोत्रंपठञ्जंतुर्जातुपीडांग्रहोद्भवाम् ॥ नप्राप्स्यतितततोजप्यमिदंस्तोत्रंममाग्रतः ॥ ४९ ॥ नित्यंप्रातःसमुत्थाययःपठिष्यतिमानवः ॥ इमांस्तुतिंहरिष्येऽहंतस्यबाधाःसुदारुणाः ॥ ५० ॥ त्वत्प्रतिष्ठितलिंगस्यपूजांकृत्वाप्रयत्नतः ॥ इमांस्तुतिमधीयानोमनोवांछामवाप्स्यति ॥ ५१ ॥ इतिदत्त्वावराञ्छंभुःपुनर्ब्रह्माणमाह्वयत् ॥ सेंद्रान्देवगणान्सर्वान्सयक्षोरगकिंनरान् ॥ ५२ ॥ तानागतान्समालोक्यशिवोब्रह्माणमब्रवीत् ॥ विधेविधेहिमद्वाक्यादमुंवाचस्पतिंमुनिम् ॥ ५३ ॥ गुरुंसर्वसुरेंद्राणांपरितःस्वगुणैर्गुरुम् ॥ अभिषिंचविधानेनदेवाचार्यपदेमुदे ॥ ५४ ॥ अतीवधिषणाधीशोममप्रीतोभविष्यति ॥ महाप्रसादइत्याज्ञांशिरस्याधायतत्क्षणात् ॥ ५५ ॥ सुरज्येष्ठःसुराचार्यंचकारांगिरसंतदा ॥ देवदुंदुभयोनेदुर्ननृतुश्चाप्सरोगणाः ॥ ५६ ॥ गुरुपूजांव्यधुःसर्वेगीर्वाणामुदिताननाः ॥ अभिषिक्तोवसिष्ठाद्यैर्मंत्रपूतेनवारिणा ॥ ५७ ॥ पुनरन्यंवरंप्रादाद्गिरीशःपतयेगिराम् ॥ शृण्वांगिरसधर्मात्मन्देवेज्यकुलनंदन ॥ ५८ ॥ त्वयातास्थापितंलिंगंसुबुद्धिपरिवर्धनम् ॥ बृहस्पतीश्वरइतिख्यातंकाश्यांभविष्यति ॥ ५९ ॥ गुरुपुष्यसमायोगेलिंगमेतत्समर्च्यच ॥ यत्करिष्यंतिमनुजास्तत्सिद्धिमधियास्यति ॥ ६० ॥ बृहस्पतीश्वरंलिंगंमयागोप्यंकलौयुगे ॥ अस्यसंदर्शनादेवप्रतिभाप्रतिलभ्यते ॥ ६१ ॥ चंद्रेश्वराद्दक्षिणतोवीरेशान्नैर्ऋतेस्थितम् ॥ आराध्यधिषणेशंवैगुरुलोकेमहीयते ॥ ६२ ॥ गुर्वंगनागमनजंपापंपण्माससेवनात् ॥ अवश्यंविलयंयातितमःसूर्योदयाद्यथा ॥ ६३ ॥ अतएवहिगोप्तव्यंमहापातकनाशनम् ॥ बृहस्पतीश्वरंलिंगंनाख्येयंयस्यकस्यचित् ॥ ६४ ॥ इतिदत्त्वावरान्देवस्तत्रैवांतर्हितोभवत् ॥ द्रुहिणोगुरुणासार्धंसेंद्रोपेंद्रोबृहस्पतिम् ॥ ६५ ॥

याक्षिप्रकारीतथाशीघ्रफलदमित्यर्थः ॥ तदाख्यंतन्नामकम् ॥ उकारःशंकरःप्रोक्तः अकारोवासुदेवःस्यादाकारश्चपितामहइत्येकाक्षरकोशाद्वारुद्रविष्णुब्रह्माणस्तान्यौतिमिश्रीकरोतीतिवायवंवायवमेववायव्यंतदाख्यंस्तोत्रमितिवा ॥ अलमतिविस्तरेण ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ मुदेसर्वेषांप्रीतये ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ पतयेगिरांवाचस्पतयेइत्यर्थः ॥ ५८ ॥ सुबुद्धिपरिवर्धनंशोभनज्ञानजनकम् ॥ ५९ ॥ यत्कर्मतत्कर्तृभूतम् ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ अंतर्हितोंऽतर्धानंगतः ॥ अंतरित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिपाठेपिसएवार्थः ॥ गुरुणादैत्यगुरुणाशुक्रेणेत्यर्थः ॥ यद्वा गुरुणात्रैलोक्यगुरुणाश्रीविष्णुनेत्यर्थः ॥ ६५ ॥ स्वलोकंसुमेरोरुपरिस्थंलोकंसत्यलोकंवा ॥ ६६ ॥ शनिलोककथांप्रस्तावयति ॥ अतिक्रम्येति ॥ ६७ ॥ तेनद्विजेनपृष्टावित्यन्वयः ॥ प्रददर्शतुर्विशेषेणदर्शयामासतुरित्यर्थः ॥ प्रशशंसतुरितिपाठेप्रकर्षेणकथयामासतुरित्यर्थः ॥ ६८ ॥ दाक्षायण्यांदक्षकन्यायामदित्यामितियावत् ॥ उष्णगुःउष्णागावोरश्मयोयस्यसस्सूर्यस्तथा ॥ ६९ ॥ ७० ॥ आदित्यस्येति ॥ आदित्यस्यसूर्यस्यतद्रूपंतेजःपुंजमंडलस्यतेजसोपलक्षितंगात्रेषुसासंज्ञापरिदध्यौपरिदधौधृतवतीकिंतुतस्यागात्रंनातिकांतंनातिक्रमनीयमिवाभवदित्यर्थः ॥ नातिक्रांतुमितिपाठेअतिक्रांतुमतिशयेनधर्तुमतिक्रमितुंवेवनाभवत्समर्थानजातेत्यर्थः ॥ लोकोक्त्यभिप्रायेणेवशब्दएवार्थेवा ॥ गात्रेषु

आस्मिन्पुरेभिषिच्याथविसृज्येंद्रादिकान्सुरान् ॥ अलंचकारस्वंलोकंविष्णुनाऽनुमतोद्विज ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ अतिक्रम्यगुरोर्लोकंलोपामुद्रेददर्शसः ॥ शिवशर्मापुरींसौरेःप्रभामंडलमंडिताम् ॥ ६७ ॥ पृष्टौतेनचतौतत्रतांपुरींप्रददर्शतुः ॥ द्विजेनद्विजवर्यायगणवर्यौशुचिस्मिते ॥६८॥ गणावूचतुः ॥ ॥ मारीचेःकश्यपाज्जज्ञेदाक्षायण्यांद्विजोष्णगुः ॥ तस्यभार्याभवत्संज्ञापुत्रीत्वष्टुःप्रजापतेः ॥ ६९ ॥ भर्तुरिष्टाततस्तस्माद्रूपयौवनशालिनी ॥ संज्ञाबभूवतपसासुदीप्तेनसमन्विता ॥ ७० ॥ आदित्यस्यहितद्रूपंमंडलस्यतुतेजसा ॥ गात्रेषुपरिदध्यौवैनातिकांतमिवाभवत् ॥ ७१ ॥ नखल्वयमृतोंऽडस्थइतिस्नेहादभाषत ॥ तदाप्रभृतिलोकेयंमार्तंडइतिचोच्यते ॥ ७२ ॥ तेजस्त्वभ्यधिकंतस्यसाऽसहिष्णुर्विवस्वतः ॥ येनातितापयामासत्रैलोक्यंतिग्मरश्मिभृत् ॥ ७३ ॥ त्रीण्यपत्यानिभोब्रह्मन्संज्ञायांमहसांनिधिः ॥ आदित्योजनयामासकन्यांद्वौचप्रजापती ॥ ७४ ॥ वैवस्वतंमनुंज्येष्ठंयमंचयमुनांततः ॥ नातितेजोमयंरूपंसोढुंसाऽलंविवस्वतः ॥ ७५ ॥ मायामयींततश्छायांसवर्णांनिर्ममेस्वतः ॥ प्रांजलिःप्रणताभूत्वासंज्ञांछायातदाब्रवीत् ॥ ७६ ॥ तवाज्ञाकारिणींदेविशाधिमांकरवाणिकिम् ॥ संज्ञोवाचततश्छायांसवर्णेशृणुसुंदरि ॥ ७७ ॥

परिदग्धावैनातिक्रांतमनाभवदितिपाठश्चित्यः ॥ ७१ ॥ प्रणयकोपितायाभार्यायावचसामार्तंडनामनिरुक्तिर्नखल्विति ॥ अयंसूर्यः ॥ अंडस्थोगर्भस्थः स्नेहात्प्रणयकोपात् ॥ यद्वा प्रसंगात्सूर्यस्यनामनिरुक्तिर्नखल्विति ॥ अभाषतकश्यपइतिशेषः ॥ द्रुतंभिक्षामलभमानेनवुधेनशापान्मृतांडस्थस्यकश्यपानुग्रहात्प्रतीकारइतिमोक्षधर्मांतर्गर्भिणीकथा ॥ तदुक्तंहरिवंशे ॥ अजानन्कश्यपस्तस्मादितितृतीयश्चरणः चरणत्रयंश्लोकोक्तमेव ॥ ७२ ॥ येनतेजसा ॥ तिग्मरश्मिभृत्तीक्ष्णकिरणभृत् ॥ ७३ ॥ महसांतेजसांनिधिराश्रयः ॥७४॥ मनुंमन्वंतराधिपम् ॥ मनुश्रेष्ठमितिक्वचित् ॥ सोढुंधर्तुम् ॥७५॥ मायामयींसवर्णांतन्नाम्नीमित्यन्वयः ॥ छाययानिर्मितत्वाच्छायेत्यपितस्यानामातएवाग्रेवक्ष्यतिसंज्ञांछायातदाब्रवीदिति ॥ छायाप्रतिबिंबम् ॥ स्वतःस्वेच्छया ॥ ७६ ॥ ७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७८ ॥ यमौयमजौ ॥ तांविवाह ॥ यमुनेति ॥ ७९॥८०॥ आकचग्रहणात्कचग्रहणपर्यंतम् ॥ आशापाच्चशापपर्यंतंच ॥८१॥ तथेत्युक्तातथाकरिष्यामीतिसवर्णयाप्रत्युदिताकथितासतीत्यर्थः ॥ तथेत्युक्तेतिपाठश्चित्यः ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ प्रांतेवाधक ॥ शैशवादित्रिषुपित्रादित्रितयाद्यथासंख्यंभयंस्यादित्यर्थः ॥ ८६ ॥ मौग्ध्यान्मौढ्यात् ॥ मौढ्यादित्येववापाठः ॥ एवमग्रेपि ॥ दुर्वृत्तयाऽसमीक्ष्यकारिण्या ॥ ८७ ॥ साहम् ॥ अत्रापतुर्गृहे ॥ ८८ ॥ भयंकरोभयकर्ताभविष्यतीत्यर्थः ॥ ८९ ॥ स्वकरांगारकर्षणंस्वहस्तेन

अहंयास्यामिसदनंत्वष्टुस्त्वंपुनरत्रमे ॥ भवनेवसकल्याणिनिर्विशंकंममाज्ञया ॥ ७८ ॥ मनुरेषयमश्चैवतौयमुनायमसंज्ञकौ ॥ स्वापत्यदृष्टयाद्रष्टव्यमे
तद्बालत्रयंत्वया ॥ ७९ ॥ अनाख्येयमिदंवृत्तंत्वयापत्यौशुचिस्मिते ॥ इत्याकर्ण्यार्थसात्वाष्ट्रीदेवींछायाजगादह ॥ ८० ॥ आकचग्रहणान्नाहमाशापा
चकदाचन ॥ आख्यास्यामिचरित्रंतेयाहिदेवियथासुखम् ॥ ८१ ॥ इत्यादिश्यसवर्णांसातथेत्युक्तासवर्णया ॥ पितुरंतिकमासाद्यनत्वात्वष्टारमब्रवीत् ॥
॥ ८२ ॥ पितःसोढुंनशक्नोमितेजस्तेजोनिधेरहम् ॥ तीव्रंतस्यार्यपुत्रस्यकाश्यपस्यमहात्मनः ॥ ॥ ८३ ॥ निशम्योदीरितंतस्याःपित्रानिर्भर्त्सिता
बहु ॥ भर्तुःसमीपंयाहीतिनियुक्तासापुनःपुनः ॥ ८४ ॥ चिंतामवापमहतींस्त्रीणांधिक्चेष्टितंत्विति ॥ निनिंदबहुधात्मानंस्त्रीत्वंचातिनिनिंदसा ॥८५॥
स्वातंत्र्यंनक्वचित्स्त्रीणांधिगस्वातंत्र्यजीवितम् ॥ शैशवेयौवनेप्रांतेपितृभर्तृसुताद्भयम् ॥८६॥ त्यक्तंभर्तृगृहंमौग्ध्याद्धंतदुर्वृत्तयामया ॥ अविज्ञातापिचे
द्यायामथपत्युर्निकेतनम् ॥८७ ॥ तत्रास्तिसासवर्णावैपरिपूर्णमनोरथा ॥ अथावतिष्ठेसात्रैवपित्रानिर्भर्त्सिताप्यहम् ॥ ८८ ॥ ततोतिचंडश्चंडांशुःपित्रो
रतिभयंकरः ॥ अहोयदुच्यतेलोकैरुपाख्यानमिदंहितत् ॥ ८९ ॥ स्फुटंदृष्टंमयाद्येतिस्वकरांगारकर्षणम् ॥ नष्टंभर्तृगृहंमौग्ध्याच्छ्रेयोवानपितुर्गृहम् ॥
॥ ९० ॥ वयश्चप्रथमंचारुरूपंत्रैलोक्यकांक्षितम् ॥ सर्वाभिभवनंस्त्रीत्वंकुलंचातीवनिर्मलम् ॥ ९१ ॥ पतिश्चतादृक्सर्वज्ञोलोकचक्षुस्तमोपहः ॥
सर्वेषांकर्मणांसाक्षीसर्वःसर्वत्रसंचरः ॥ ९२ ॥ मह्यंश्रेयःकथंवास्यादितिसापरिचिंत्यच ॥ अगच्छद्वडवाभूत्वातपसेपर्यनिंदिता ॥ ९३ ॥ उत्तरां
श्चकुरूनप्राप्यचरंतीनीरसंतृणम् ॥ व्युत्तेपेचतपस्तीव्रंपतिमाधायचेतसि ॥ तपोबलेनतत्पत्युःसहिष्येतेजइत्यलम् ॥ ९४ ॥

ज्वलदंगारग्रहणम् ॥ वर्षणमितिपाठेत्यागइत्यर्थः ॥ पितुर्गृहंश्रेयोहेतुर्नभवतीत्यर्थः ॥ वाशब्दोवितर्के ॥ गृहेइतिक्वचित् ॥ ९० ॥ ९१ ॥ सर्वःसर्वात्मकः ॥ परात्मत्वात्सूर्यस्य ॥ ईश्वररूपोवाऽष्टमूर्तित्वाचस्य ॥ सदेतिपाठेसदासर्वकाले ॥ सर्वत्रसर्वदेशे ॥ ९२ ॥ मह्यंमम ॥ सत्यमितिपाठेसत्यंपरमार्थम् ॥ वडवाऽश्वा ॥ पर्यनिंदितासर्वतोनिन्दाशून्या ॥ कृतनिश्चयेति क्वचित् ॥ ९३ ॥ उत्तरान्कुरून्उत्तरसमुद्रसंलग्नंवर्षम् ॥ चरंतीभक्षयन्ती ॥ व्युत्तेपेविशेषेणउत्कृष्टतयासोत्तेपेतप्तवती ॥ तादृक्तेपइतिपाठेतपोबलेनेत्यस्योपरियाहगितिज्ञातव्यं तादृगनिर्व

CC-0. In Public Domain. Digitization by eGangotri

चनीयमतिमहत्तरामितियावत् ॥ तदलमतिशयितंतेजः ॥ :तत्तेजोऽलंसाहिष्येइतिवा ॥ ९४ ॥ ९५ ॥ भद्रामिततितपत्यानामांतरम् ॥ यद्वा भद्रांसद्वृत्तांनाम्नातपतीमितिपुराणांतरादवगं तव्यम् ॥ ९६ ॥ ९७ ॥ गौरवाद्गुरुत्वात् ॥ ९८ ॥ पदापादेन ॥ संज्ञायाःसमानंरूपंवर्ततेयस्याःसासंज्ञासरूपिणीताम् ॥ ९९ ॥ यद्यस्मात्समुद्यतउत्थापितः ॥ तत्तस्मात् ॥ एषपादः ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ अस्मात्पदात् ॥ ६ ॥ ७ ॥ अर्यीतिसंबोधने ॥ भामिनिकोपने ॥ भाविनीतिक्वचित् ॥ अनादिषुकनिष्ठेषु ॥ नादिष्वितिपाठेआदि

मन्यमानोथतांसंज्ञांसवर्णायांतदारविः ॥ सावर्णिंजनयामासमनुमष्टममुत्तमम् ॥ ९५ ॥ शनैश्चरंद्वितीयंचसुतांभद्रांतृतीयिकाम् ॥ सवर्णास्वेष्वपत्ये पुसापत्न्यात्स्त्रीस्वभावतः ॥ ९६ ॥ चकाराभ्यधिकंस्नेहंनतथापूर्वजेष्वथ ॥ मनुस्तत्क्षांतवाञ्ज्येष्ठोभक्ष्यालंकारलालने ॥ ९७ ॥ कनिष्ठेष्वधिकंदृष्ट्वा सावर्ण्यादिषुनोयमः ॥ कदाचिद्रोषतोबाल्याद्भाविनोर्थस्यगौरवात् ॥ ९८ ॥ पदासंतर्जयामासयमःसंज्ञासरूपिणीम् ॥ तंशशापचसाक्रोधात्सावर्णेर्ज ननीतदा ॥ ९९ ॥ जिघांसतात्वयापापमांयदंघ्रिःसमुद्यतः ॥ अचिरात्तत्पतत्वेषतवेतिभृशदुःखिता ॥ १०० ॥ मातृशापपरित्रस्तोयमोपिपितुरग्रतः ॥ शशंससर्वंतद्वृत्तंरक्षरक्षेत्युवाचच ॥ १ ॥ मात्रासुतेषुसर्वेषुवर्तनीयंसमंयतः ॥ तस्यांमयोद्यतःपादोनदेहेपरिपातितः ॥ २ ॥ बाल्याद्वायदिवामोहा त्तद्भवान्क्षंतुमर्हसि ॥ गोपतेशापतोमातुर्मापतत्वंघ्रिरेषमे ॥ ३ ॥ ॥ विवस्वानुवाच ॥ ॥ अपराधसहस्रेपिजननीनशपेत्सुतम् ॥ तस्मात्किमपिभोबालभ विष्यत्यत्रकारणम् ॥ ४ ॥ येनत्वांसाऽशपत्क्रोधाद्धर्मज्ञंसत्यवादिनम् ॥ मातृशापोन्यथाकर्तुंनशक्यःकेनचित्क्वचित् ॥ ५ ॥ कृमयोमांसमादाययास्यं त्यस्मान्महीतलम् ॥ इत्थंतुचरितार्थःस्याच्छापस्त्रातोभवानपि ॥ ६ ॥ इतिपुत्रंसमाश्वास्यरविंतःपुरंययौ ॥ चिरमालोक्यतांभार्यामुवाचसविता वचः ॥ ७ ॥ अयिभामिनिबालेषुसमेष्वपिकुतस्त्वया ॥ विधीयतेऽधिकःस्नेहःसावर्ण्यादिष्वनादिषु ॥ ८ ॥ नाचचक्षेयदासाऽथभास्वतेपरिपृच्छते ॥ तदात्मानंसमाधायसोज्ञासीत्सर्वमेवहि ॥ ९ ॥ ततोभगवतेशप्तुमुद्यतेसाशशंसह ॥ यथावृत्तंतथातथ्यंतुतोषभगवानपि ॥ ११० ॥ तथ्यभाषणत स्तांतुरविर्ज्ञात्वानिरागसम् ॥ नशशापचसंक्रुद्धोययौचत्वष्टुरंतिकम् ॥ ११ ॥ त्वष्टापिचयथान्यायंसान्वयंतिग्मतेजसम् ॥ निर्दग्धुकामंकोपेनप्रागानर्च सुदातदा ॥ विज्ञायतदभिप्रायंत्वष्टोवाचाऽशुतंरविम् ॥ १२ ॥ त्वष्टोवाच ॥ ॥ तवातितेजसोभीताप्राप्योत्तरकुरूनृरवे ॥ वडवारूपमास्थायवनेचर तिशाद्वले ॥ १३ ॥ द्रष्टाहितांभवानद्यस्वांभार्यामार्यचारिणीम् ॥ अधृष्यांसर्वभूतानांतेजसांनियमेनच ॥ १४ ॥

पुश्राद्धदेवादिषु ॥ ८ ॥ आत्मानमन्तःकरणंसमाधायस्थिरीकृत्य ॥ मनसाध्यानंविधायेत्येतत् ॥ ९ ॥ ११० ॥ ११ ॥ अनुपश्चादयन्तीत्यन्वयामाठरपिंगलादयस्तत्स हितंसान्वयम् ॥ सांत्वयन्निति क्वचित् ॥ १२ ॥ १३ ॥ आर्यचारिणीमार्यवच्चतुंशीलंयस्यास्ताम् ॥ नियमेनचेतिचकारस्तेजसामित्यनेनसंबध्यते ॥ तेजसेतिवापाठः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यस्मात्तक्षितस्तनूकरणत्वंप्रापितः ॥ भ्रमिंकुंदम् ॥ भ्रमोंऽम्बुनिर्गमेभ्रांतौकुंदाख्येशिल्पयंत्रकइतिविश्वप्रकाशस्तस्यार्थपरत्वाद्भ्रमिरपितथा ॥ १५ ॥ अरंद्रुतम् ॥ अथेतिकचित् ॥ १६ ॥ वृण्वंतीमावृण्वंतींभक्षयंतीमितियावत् ॥ वृण्वंतीमितिकंचित् ॥ १७ ॥ अनेनसंनिष्पापाम् ॥ हरिःसूर्यः ॥ हरिरूपेणाश्वरूपेण ॥ हरिरूपोऽभूदितिक्वचित्तदाक्रियाभेदादन्वयभेदः ॥ समभावयत्सं गमकरोत् ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ निर्वृत्तिंस्वास्थ्यम् ॥ निर्वृतिमितिपाठेसुखम् ॥ युक्तमेतदित्याह ॥ दुष्प्रापमिति ॥ २२ ॥ २३ ॥ महोज्योतिः ॥ २४ ॥

त्वष्ट्रायत्तक्षितःसूर्यस्तस्यैवानुमतेनच ॥ भ्रमिमारोप्ययत्नेनसोतिकांततरोऽभवत् ॥ १५ ॥ लब्धानुज्ञोऽथसवितागत्वोत्तरकुरूनरम् ॥ साक्षात्तपोमयीं लक्ष्मींचरंतींचतपोमहत् ॥ १६ ॥ ददर्शवडवारूपांवाडवानलतेजसम् ॥ नीरसानितृणान्येववृण्वंतींयोगमायया ॥ १७ ॥ अनेनसंसविज्ञायतांत्वाष्ट्री मश्वरूपिणीम् ॥ सहारिर्हरिरूपेणमुखेनसमभावयत् ॥ १८ ॥ त्वरमाणाचपारितःपरपूरुषशंकया ॥ सातन्निरवमच्छुक्रंनासिकाभ्यांविवस्वतः ॥ १९ ॥ देवौतस्मादजायेतामश्विनौभिषजांवरौ ॥ स्वरूपमनुरूपंचद्युमणिस्तामदर्शयत् ॥ १२० ॥ तुतोषसापितंदृष्ट्वामित्रंनेत्रमुदावहम् ॥ पतिंपतिव्रताकां तंस्वांतसंतापहारिणम् ॥ २१ ॥ निर्वृत्तिंचपरांप्रापदुष्प्रापंतपसाथकिम् ॥ तपएवपरंश्रेयस्तपएवपरंधनम् ॥ २२ ॥ तपएवहिदेवत्वेकारणंपरमंमतम् ॥ शिवशर्मन्यदेतद्वैदृश्यतेचातिदीप्तिमत् ॥ २३ ॥ ज्योतिश्चक्रस्वरूपंचव्योम्न्युपर्यधएवच ॥ तत्सर्वमिहजानीहिसुमहत्तापसंग्रहः ॥२४॥ एवंशनैश्चरो जज्ञेसवर्णायांविवस्वतः ॥ सोऽथवाराणसींगत्वासर्वत्रिदशवंदिताम् ॥ २५ ॥ तत्त्वातपोऽतिविपुलंलिंगंसंस्थाप्यशांकरम् ॥ इमंलोकमवापोच्चैर्ग्रहत्वं चहरार्चनात् ॥२६॥ शनैश्चरेश्वरंदृष्ट्वावाराणस्यांसुशोभनम् ॥ शनिबाधानजायेतशनिवारेतदर्चनात् ॥२७॥ विश्वेशाद्दक्षिणेभागेशुक्रेशादुत्तरेणहि ॥ शनैश्चरेशमभ्यर्च्यलोकेऽत्रपरिमोदते ॥ २८ ॥ श्रुत्वाऽध्यायमिमंपुण्यंग्रहपीडानजायते ॥ नोपसर्गभयंतस्यकाश्यांनिवसतःसतः ॥ १२९ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे भौमगुरुशनिलोकवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अगस्तिरुवाच ॥ ॥ इति शृण्वन्कथांरम्यांशिवशर्माऽथमाथुरः ॥ मुक्तिपुर्यांसुसंस्नातोमायापुर्यांगतासुकः ॥१॥ नेत्रयोःप्राघुणीचक्रेततःसप्तर्षिमंडलम् ॥ व्रजन्सवैष्णवंलोकमंतेविष्णुपुरीक्षणात् ॥ २ ॥

॥ २५ ॥ २६ ॥ २७ ॥ शुक्रेशादुत्तरेणशुक्रेश्वरस्योत्तरइत्यर्थः ॥ दक्षिणेनेतिपाठश्चित्यः ॥ २८ ॥ एतदध्यायश्रवणफलमाह ॥ श्रुत्वेति ॥ १२९ ॥ इतिश्रीरामानन्दविरचितायांकाशीखण्डटीकायांसप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ अष्टादशेमरीच्यत्रिपुलस्त्यपुलहक्रतु ॥ वसिष्ठांगिरसांलोकोवर्ण्यतेत्यन्तउज्ज्वलः ॥ ॥ १ ॥ इतीति ॥ अथानन्तरंशिवशर्माइतिइत्थंकथांशृण्वन्सप्तर्षिमण्डलंनेत्रयोःप्राघुणीचक्रेप्रत्यक्षीचकारेतिसार्धेनान्वयः ॥ व्रजन्निति ॥ सशिवशर्मावैष्णवंलोकंव्रजन्गच्छन्हेदेवौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्यायमतुलोलोकइत्युवाचपप्रच्छेतिचतुर्थेनान्वयः ॥ २ ॥ चकारःसमुच्चये ॥ नकेवलंव्रजन्व्रजतिउवाचचेत्यर्थः ॥ मागधैर्देवप्रभेदैः ॥ ३ ॥ स्थितास्विति ॥ वयंमन्दभाग्याएवेतितासुदेवकन्यासुनिःश्वस्यस्थितासुसतीषुअसौशिवशर्मापुण्यतमान्सप्तर्षिलोकान्गतोगतवान् ॥ यतोऽसौपुण्यवतांमध्येश्रेष्ठइत्यगस्त्यवाक्यम् ॥ इतितिष्ठतिष्ठेत्यादिवचनानिशृण्वन्नित्यन्वयः ॥ असौपुण्यतमान्लोकान्गतोयतोऽसौपुण्यकृत्तमोवयंमन्दभाग्याःस्वल्पपुण्याइतितासुनिःश्वस्यस्थितासुसतीषुउवाचेतिपूर्वेणैवान्वयः ॥ गन्तेतिपाठेगमिष्यतीत्यर्थः ॥ ४ ॥ ५ ॥ सदाशिवामंगलरूपाशिवेवामतिर्यस्य॥शिवगतइतिपाठेशिवएवगतिर्यस्य ॥ शेषंपूर्ववत् ॥ उभयपाठेतत्संबोधनंतथा ॥ सदेत्यत्रापीतिक्वचित्पाठः ॥ ६ ॥ प्रजासृजाब्रह्मणा ॥ ७ ॥ सुताःपुत्राः ॥ प्रजाइतिपाठेपिसएवार्थः ॥ ८ ॥

उवाचचप्रसन्नात्मास्तुतश्चारणमागधैः ॥ प्रार्थितोदेवकन्याभिस्तिष्ठतिष्ठेतिचक्षणम् ॥३॥ स्थितासुतासुनिःश्वस्यमंदभाग्यावयंत्विति ॥ गतःपुण्यतमाँल्लोकानसौयत्पुण्यवत्तमः ॥ ४ ॥ इतिशृण्वन्मुखात्तासांवचनानिविमानगः ॥ देवौकस्यायमतुलोलोकस्तेजोमयःशुभः ॥ ५ ॥ इतिद्विजवचःश्रुत्वाप्रोचतुर्गणसत्तमौ ॥ शिवशर्मञ्छिवमतेसदासप्तर्षयोमलाः ॥६॥ वसंतीहप्रजाःस्रष्टुंविनियुक्ताःप्रजासृजा ॥ मरीचिरत्रिःपुलहःपुलस्त्यःक्रतुरंगिराः ॥ ७ ॥ वसिष्ठश्चमहाभागोब्रह्मणोमानसाःसुताः ॥ सप्तब्रह्माणइत्येतेपुराणेनिश्चयंगताः ॥ ८ ॥ संभूतिरनसूयाचक्षमाप्रीतिश्चसन्नतिः ॥ स्मृतिरूर्जाक्रमादेषांपत्न्योलोकस्यमातरः ॥९॥ एतेषांतपसाचैतद्धार्यतेभुवनत्रयम् ॥ उत्पाद्यब्रह्मणापूर्वमेतेप्रोक्तामहर्षयः ॥ १० ॥ प्रजाःसृजतरेपुत्रानानारूपाःप्रयत्नतः॥ ततःप्रणम्यब्रह्माणंतपसेकृतनिश्चयाः ॥ ११ ॥ अविमुक्तंसमासाद्यक्षेत्रंक्षेत्रज्ञधिष्ठितम् ॥ मुक्तयेसर्वजंतूनामविमुक्तंशिवेनयत् ॥ १२ ॥ प्रतिष्ठाप्यचलिंगानितेस्वनाम्नांकितानिच ॥ शिवेतिपरयाभक्त्यातेपुरुग्रंतपोभृशम् ॥ १३ ॥ तुष्टस्तत्तपसाशंभुःप्राजापत्यपदंददौ ॥ लिंगान्यत्रीश्वरादीनिदृष्ट्वाकाश्यांप्रयत्नतः ॥ १४ ॥ प्राजापत्येऽत्रतेलोकेवसंत्युज्वलतेजसः ॥ गोकर्णेशस्यसरसःप्रत्यक्तीरेप्रतिष्ठितम् ॥ १५ ॥ लिंगमत्रीश्वरंदृष्ट्वाब्रह्मतेजोभिवर्धते ॥ कर्कोटवाप्याईशानेमरीचेःकुंडमुत्तमम् ॥ १६ ॥ तत्रस्नात्वानरोभक्त्याभ्राजतेभास्करोयथा ॥ मरीचीश्वरसंज्ञंतुतत्रलिंगंप्रतिष्ठितम् ॥ १७ ॥ तल्लिंगदर्शनाद्विप्रमारीचंलोकमाप्नुयात् ॥ कांत्यामरीचिमालीवशोभतेपुरुषर्षभः ॥ १८ ॥ पुलहेशपुलस्त्येशौस्वर्गद्वारस्यपश्चिमे ॥ तौदृष्ट्वामनुजोलोकेप्राजापत्येमहीयते ॥ १९ ॥ हरिकेशवनेरम्येदृष्ट्वैवांगिरसेश्वरम् ॥ इहलोकेवसेद्विप्रतेजसापरिबृंहितः ॥ २० ॥ वरणायास्तटेरम्येदृष्ट्वावासिष्ठमीश्वम् ॥ क्रत्वीश्वरंचतत्रैवलभतेवसतिंत्विह ॥ २१ ॥ काश्यामेतानिलिंगानिसेवितानिशुभैषिभिः ॥ मनोभिवांछितंदद्युरिहलोकेपरत्रच ॥ २२ ॥

ऊर्जाअरुंधती ॥ ९ ॥ १० ॥ ततइति ॥ ततआज्ञादानानंतरंतेमुनयोऽविमुक्तंसमासाद्यतत्रस्वनाम्नालिंगानिप्रतिष्ठाप्यशिवेपरयाभक्त्याऽतिअत्यर्थमुक्तंतपस्तेपुरित्यग्रिमेणान्वयः ॥ ११ ॥ कीदृशमविमुक्तम् ॥ क्षेत्रज्ञेनईश्वरेणाधिष्ठितमाश्रितमित्यर्थः ॥ विष्ठितमितिपाठेविशेषेणाधिष्ठितमित्यर्थः ॥ अविमुक्तनामनिरुक्तिर्मुक्तयइति ॥ सकलप्राणिनांमुक्त्यैशिवेनाविमुक्तंनत्यक्तंयत्तदविमुक्तमित्यर्थः ॥ यद्यस्मादितिवा ॥ १२ ॥ १३ ॥ १४ ॥ प्राजापत्ये प्रजापतीनांमरीच्यादीनांसंबंधिनि ॥ गोकर्णेशस्यसरसःप्रत्यक्तीरेपश्चिमेतीरेप्रतिष्ठितंप्रतिष्ठाविधिनास्थापितमित्यर्थः ॥ गोकर्णस्यास्येतिपाठेबुद्धिसन्निहितत्वादस्येतिनिर्देशः ॥ १५ ॥ १६ ॥ १७ ॥ मरीचिमालीसूर्यः ॥ १८ ॥ १९ ॥ २० ॥ इहवाराणस्यांसप्तर्षिमंडलेवा ॥ २१ ॥ शुभैषिभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैवल्येप्सुभिः ॥ २२ ॥ वसिष्ठस्याप्यरुंधतीमितिभागवतोक्तेरपिशब्दाद्वसिष्ठस्यान्यापत्न्यस्तिसाप्यत्रतिष्ठतीत्याहतुः ॥ पतिव्रतेति ॥ २३ ॥ २४ ॥ २५ ॥ हेकमलेहेभामिनिपतिव्रतासुमध्येययाऽरुंधत्याविमलाशयोऽस्ति विमलश्चासावाशयश्चेतिविमलाशयःशुद्धांतःकरणमित्यर्थः ॥ नतथाकुत्रांप्यन्यस्याःकस्याश्चिदित्यर्थः ॥ २६ ॥ नतदितिश्लोकद्वयंवाक्यम् ॥ हेदेविहेप्रियेअरुंधत्यां यथारूपादीनितथाऽन्यासांनसंतीत्यर्थः ॥ तत्प्रसिद्धम् ॥ शुश्रूषणंनवेतिक्वचित्पाठः ॥ २७ ॥ आर्यपरितोषणंश्वशुरादीनांशुश्रूषणम् ॥ २८ ॥ धन्याइति ॥ याःस्त्रियःप्रसंगेऽवसरेऽरुंधत्यानामापिनाममात्रमपिपरिगृह्णतेपरिगृह्णंतितायोषितोधन्याइत्यर्थः ॥ प्रसंगेनयन्नामपरिगृह्यतइतिक्वचित्पाठस्तत्रारुंधत्याःप्रसंगेनयन्नामयासांनामपरिगृह्यतेतायोषितइत्यादिपूर्ववत् ॥ २९ ॥ यदेति ॥ अस्मद्भवनेवैकुंठेयदापतिव्रतानांकथाभवेत्तदाप्राथमिकींरेखामेषाऽरुंधतीसतीपतिव्रताऽलंकुरुते ॥ पतिव्रतानांगणनायांयदारेखाध्रियंतेतदाप्रथमारेखाएतन्नाम्नाध्रियते ॥ सर्वपतिव्रतानांमध्ये श्रेष्ठत्वादस्याइतिभावः ॥ ३० ॥ ब्रुवतोरिति ॥ ततस्तदनंतरंवैष्णवयोर्गणयोर्नयनातिथ्यंनेत्रगोचरंध्रुवलोकउपागतःप्राप्तइत्यन्वयः ॥ कीदृशोर्गणयोः ॥ इत्युक्तप्रकारांसंकथांसमीचीनां

गणावूचतुः ॥ ॥ शिवशर्मन्महाभागतिष्ठतेसात्रसुंदरी ॥ अरुंधतीमहापुण्यापतिव्रतपरायणा ॥ २३ ॥ यस्याःस्मरणमात्रेणगंगास्नानफलंलभेत् ॥ अंतःपुरचरैर्द्धिव्रैःपवित्रैःसहितोविभुः ॥ २४ ॥ सदानारायणोदेवोयस्याश्चक्रेकथांमुदा ॥ कमलायाःपुरोभागेपातिव्रत्यसुतोषितः ॥ २५ ॥ पतिव्रता स्वरुंधत्याःकमलेविमलाशयः ॥ यथास्तिनतथाऽन्यस्याःकस्याश्चित्क्वापिभामिनि ॥२६॥ नतद्रूपंनतच्छीलंनतत्कौलीन्यमेवच ॥ नतत्कलासुकौशल्यंपत्युःशुश्रूषणंनतत् ॥ २७ ॥ नमाधुर्यनगांभीर्यनचार्यपरितोषणम् ॥ अरुंधत्याययथादेवितथाऽन्यासांक्वचित्प्रिये ॥ २८ ॥ धन्यास्तायोषितो लोकेसभाग्याःशुद्धबुद्धयः ॥ अरुंधत्याःप्रसंगेयानामापिपरिगृह्णते ॥ २९ ॥ यदापतिव्रतानांतुकथास्मद्भवनेभवेत् ॥ तदाप्राथमिकींरेखामेषाऽलंकुरुते सती ॥ ३० ॥ ब्रुवतोरितिसंकथांतथागणयोर्वैष्णवयोर्मुदावहाम् ॥ ध्रुवलोकउपागतस्ततोनयनातिथ्यमतथ्यवर्जितः ॥ ३१ ॥ ॥ इतिश्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे सप्तर्षिलोकवर्णनंनामाष्टादशोऽध्यायः ॥१८॥ शिवशर्मोवाच ॥ तिष्ठन्नेकेनपादेनकोयंभ्रमतिसत्तमौ ॥ अनेकरशनाव्यग्रहस्ताग्रोव्यग्रलोचनः ॥१॥ त्रिलोकीमंडपस्तंभसन्निभोभाभिरावृतः ॥ अतुलंज्योतिषांराशितुलयातुलयन्निव ॥२॥

कथांब्रुवतोर्ब्रुवाणयोः ॥ कीदृशींकथाम् ॥ मुदावहाम् ॥ कथंभूतोलोकः ॥ अतथ्यवर्जितोदैनंदिनप्रलयरहितस्त्रैलोक्यनाशेप्यविनश्वरइतियावत् ॥ तथाचभागवतेभगवद्वचनम् ॥ स्थास्नुःपरस्तात्कल्पवासिनामिति ॥ ३१ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ एकोनविंशकेऽध्यायउपरिष्टात्त्रिलोकतः ॥ वर्ण्यतेऽत्यद्भुताकारोध्रुवलोकेध्रुवःपरः ॥ १ ॥ ध्रुवलोकउपागतस्ततोनयनातिथ्यमित्युक्तंतत्रतिष्ठन्नितिप्रथमश्लोकेनसंदिग्धत्वेनानूद्यत्रिलोकीत्यादिनासार्धद्वयेनमध्येचतुर्थोत्प्रेक्ष्यपश्चात्कोयमित्यर्धेन पृच्छति ॥ तिष्ठन्नेकेनेत्यादिना ॥ एकेनपादेनार्थादेकंपादमुत्तोल्येत्यर्थः ॥ यद्वा एकेनपादेनएकरूपत्वेनास्थितेनपादद्वयेनेत्यर्थः ॥ तिष्ठन्हेसत्तमौसतांमध्येश्रेष्ठौकोयंभ्रमति ॥ कथंभूतः ॥ अनेकरसनाव्यग्रहस्ताग्रोनानाविधवातमयरज्ज्वाकुलकरांगुलिः ॥ व्यग्रलोचनश्चंचलनेत्रः ॥ १ ॥ त्रिलोक्येवमंडपस्तस्यस्तंभसान्निभःस्थूणासदृशः ॥ भाभीरश्मिभिरावृतः ॥ एवंसंदेहास्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दत्वेनानूद्यचतुर्योत्प्रेक्षते ॥ अतुल्मपरिमितंज्योतिषांसूर्यादीनांराशिंतुलयापरिमाणपात्रेणतुलयन्निवपरिमापयन्निवेत्यर्थः ॥ २ ॥ व्योमव्यायामस्याकाशविस्तारस्यपरिमापकःपरिगणकोवा ॥ अग्रिमस्यवाशब्दस्यात्रानुषंगः ॥ कइव ॥ सूत्रधारइव ॥ यथागृहीतसूत्रःस्थपत्यादिर्गृहादिभूमिंपरिमापयतितद्वदित्यर्थः ॥ परिमाणकइतिपाठेपिसएवार्थः ॥ त्रिविक्रमोवामनस्तदीयस्त्रैविक्रमोंऽघ्रिदण्डःपाददंडोवा ॥ कथंभूतः ॥ प्रोद्दंडोमहत्तरइत्यर्थः ॥ गगनमेवांगणंप्रांगणंतास्मिन् ॥ ३॥ अथवांवरमाकाशमेवकासारःसरस्तत्रसारयूपस्वरूपधृक्श्रेष्ठयूपस्वरूपभृत् ॥ तदेवंचतुर्योत्प्रेक्ष्यपृच्छाति ॥ कोऽयमिति ॥ ४ ॥ निशम्येत्यगस्त्योक्तिः ॥ ध्रुवांध्रुवफलांनिश्चितफलांनिश्चितार्थामितियावत् ॥ ५ ॥ उत्तानचरणउत्तानपादः ॥ ६ ॥ अपरःकनिष्ठः ॥ मध्येसभंसभायामध्ये

सूत्रधारइवव्योमव्यायामपरिमापकः ॥ त्रैविक्रमोंऽघ्रिदंडोवाप्रोद्दंडोगगनांगणे ॥ ३ ॥ अथवांबरकासारसारयूपस्वरूपधृक् ॥ कोयंकथयतंदेवौकृपयापरयामम ॥ ४ ॥ निशम्येतिवचस्तस्यवयस्यस्यविमानगौ॥ प्रणयादाहतुस्तस्मैध्रुवांध्रुवकथांगणौ ॥५॥ ॥ गणावूचतुः ॥ ॥ मनोःस्वायंभुवस्यासीदुत्तानचरणःसुतः ॥ तस्यक्षितिपतेर्विप्रद्वौसुतौसंबभूवतुः ॥ ६ ॥ सुरुच्यामुत्तमोज्येष्ठःसुनीत्यांतुध्रुवोपरः ॥ मध्येसभंनरपतेरुपविष्टस्यचैकदा ॥ ७ ॥ सुनीत्याराजसेवायैनियुक्तोऽलंकृतोर्भकः ॥ ध्रुवोधात्रेयिकापुत्रैःसमंविनयतत्परः ॥ ८ ॥ सगत्वोत्तानचरणंक्षोणीशंप्रणनामह ॥ दृष्ट्वोत्तमंतदुत्संगेनिविष्टंजनकस्यवै ॥ ९ ॥ प्रोच्चसिंहासनस्थस्यनृपतेर्बाल्यचापलात् ॥ आरोढुकामस्त्वभवत्सौनीतेयस्तदाध्रुवः ॥ १० ॥ आरुरुक्षुमवेक्ष्यामुंसुरुचिर्ध्रुवमब्रवीत् ॥ दौर्भगेयकिमारोढुमिच्छेरंकंमहीपतेः ॥ ११ ॥ बालबालिशबुद्धित्वादभाग्याजठरोद्भव ॥ अस्मिन्सिंहासनेस्थातुंनत्वयासुकृतंकृतम् ॥ १२ ॥ यदिस्यात्सुकृतंतत्किंदुर्भगोदरगोऽभवः ॥ अनेनैवानुमानेनबुध्यस्वस्त्राल्पपुण्यताम् ॥ १३ ॥ भूत्वाराजकुमारोपिनालंकुर्याममोदरम् ॥ सुकुक्षिजममुंपश्यत्वमुत्तममनुत्तमम् ॥ १४ ॥ अधिजानुधराजानेर्मानेनपरिबृंहितम् ॥ प्रांशोःसिंहासनस्यास्यरुचिश्चेदधिरोहणे ॥ १५ ॥ कुक्षिंहित्वाकिमवसःसुरुचेश्वसुरोचिषम् ॥ मध्येभूपसभंबालस्तयेतिपरिभर्त्सितः ॥ १६ ॥ पतन्निपीतबाष्पांबुर्धैर्यान्किंचिन्नचोक्तवान् ॥ उचिताऽनुचितंकिंचिन्नोचिवान्सोपिपार्थिवः ॥ १७ ॥ नियंत्रितोमहिष्याश्चतस्याःसौभाग्यगौरवात् ॥ विसृज्यचसभालोकंशोकंसंमृज्यचेष्टितैः ॥ १८ ॥

॥ ७ ॥ नियुक्तःप्रेषितः ॥ धात्रेयिकापुत्रैरुपमातृकापुत्रैःसह ॥ ८ ॥ ९ ॥ आरोढुकामआरुरुक्षुमित्यत्रच अग्रिमस्यांकमित्यस्यानुषंगः ॥ १० ॥ दौर्भगेयदुर्भगायाःपुत्र ॥ ११ ॥ बालहेबालक॥बालिशबुद्धित्वान्मूर्खबुद्धित्वात्॥१२॥तत्तदा॥किंकथम् ॥ अभवोजातोसि ॥१३॥ नालंकुर्याःनालंकृतवानसि ॥ नविद्यतेउत्तमोयस्मात्सतथातमनुत्तमम्॥१४॥धराजानेःपृथ्वीपतेः ॥ परिबृंहितमुपलालितम् ॥ प्रांशोरिति ॥ अस्यप्रांशोरुच्चस्यसिंहासनस्याधिरोहणेरुचिश्चेत्तदासुरुचेर्मम कुक्षिमुदरंहित्वाकिंकिमर्थमवसोवसतिंकृतवानसि॥ सुनीतेःकुक्षाविविशेषः॥कथंभूतंकुक्षिम् ॥ सुरोचिषंसुष्ठुदीप्तिमन्तम् ॥ १५ ॥ १६ ॥ पतन्निर्गच्छन्निपीतंवाष्पांवुनेत्रजलंयेनसपतन्निपीतवाष्पांवुः ॥ उचितानुचितंभद्राभद्रम् ॥ १७ ॥ उचितानुचितानुक्तौहेतुस्तस्याःसुरुच्याःपट्टमहिष्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौभाग्यगौरवात्सौभाग्यातिशयेननियंत्रितोवशीकृतइति ॥१८॥ शैशवैःशिशुसंबन्धिभिश्चेष्टितैः ॥ शोकंसंमृज्यप्रकटमकृत्वासध्रुवःशिशुर्बालः ॥ शिशुभिःसहसाशिशुरितिवा ॥ १९ ॥ मुखलक्ष्म्यामु
खशोभयाम्लानमुखश्रियेत्यर्थः ॥ समवमानितंसम्यगवज्ञातम् ॥ २० ॥ किंचित्परिम्लानमिवमनाक्ग्लानमिव ॥ ससांत्वंसांत्वनसहितंयथास्यात्परिषस्वजेआलिंगितवती ॥ २१॥२२॥ दुकूलांचल
संपर्कैःपट्टवस्त्रांतसंघर्षणैः ॥ कथंभूतैः ॥ मृदुलैःकोमलैः ॥ २३ ॥ केनास्यमानितःकेनजनेनापमानितोऽवमानितस्तिरस्कृतोऽसिभवासिजातोसीत्येतत् ॥ सोपरोधंम्उपरोधसहितंयथास्यात् ॥
यद्वा सोपरोधमंतःपुरंनिभृतामित्येतत् ॥ सध्रुवस्तामितिपाठेतांमातरंपर्यभाषतपरितोभावेनपप्रच्छेत्यर्थः ॥ २४ ॥ भाषणमेवाह संपृच्छेइतिचतुर्भिः ॥ संपृच्छेपृच्छामि ॥ जननिहेमातः ॥

शैशवैःसशिशुर्नत्वानृपंस्वसदनंययौ ॥ सुनीतिर्नीतिनिलयमवलोक्याथबालकम् ॥ १९ ॥ मुखलक्ष्म्यैवचाज्ञासीद्ध्रुवंसमवमानितम् ॥ अभिसृत्यचतं
बालंमूर्ध्न्युपाघ्रायसासकृत् ॥ २० ॥ किंचित्परिम्लानमिवससांत्वंपरिषस्वजे ॥ अथदृष्ट्वासुनीतिंसरहोंतःपुरवासिनीम् ॥२१॥ दीर्घंनिःश्वस्यबहुशो
मातुरग्रेरुरोदह ॥ सांत्वयित्वाश्रुनयनावदनंपरिमार्ज्यच ॥ २२ ॥ दुकूलांचलसंपर्कैर्मृदुलैर्मृदुपाणिना ॥ पप्रच्छतनयंमातावदरोदनकारणम् ॥ वि
द्यमानेनरपतौशिशोकेनापमानितः ॥ २३ ॥ अपोथसमुपस्पृश्यतांबूलंपरिगृह्यच ॥ मात्रापृष्टःसोपरोधंध्रुवस्तांपर्यभाषत ॥२४॥ संपृच्छेजननित्वाहं
सम्यक्शंससममाग्रतः ॥ भार्यात्वेपिचसामान्येकथंसासुरुचिःप्रिया ॥ २५ ॥ कथंनभवतीमातःप्रियाक्षितिपतेरसि ॥ कथमुत्तमतांप्राप्तउत्तमःसुरुचेः
सुतः ॥ २६ ॥ कुमारत्वेपिसामान्येकथंत्वहमनुत्तमः ॥ कथंत्वंमंदभाग्यासिसुकुक्षिःसुरुचिःकथम् ॥२७॥ कथंनृपासनंयोग्यमुत्तमस्यकथंनमे ॥ कथं
मेसुकृतंतुच्छमुत्तमस्योत्तमंकथम् ॥ २८ ॥ इतिश्रुत्वावचस्तस्यसुनीतिर्नीतिमच्छिशोः ॥ किंचिदुच्छ्वस्यशनकैःशिशुकोपोपशांतये ॥ २९ ॥
स्वभावमधुरांवाणींवक्तुंसमुपचक्रमे ॥ सापत्नंप्रतिघंत्यक्त्वाराजनीतिविदांवरा ॥३०॥ ॥ सुनीतिरुवाच ॥ ॥ अयितातमहाबुद्धेविशुद्धेनांतरात्मना ॥
निवेदयामितेसर्वंमाऽपमानेमतिंकृथाः ॥ ३१ ॥ तयायदुक्तंतत्सर्वंतथ्यमेवनचान्यथा ॥ सापत्युर्महिषीराज्ञोराज्ञीनामतिवल्लभा ॥ ३२ ॥ तयाजन्मां
तरेतातयत्पुण्यंसमुपार्जितम् ॥ तत्पुण्योपचयाद्राजासुरुच्यांसुरुचिर्भृशम् ॥ ३३ ॥ मादृश्योमंदभाग्यायाःप्रमदासुप्रतिष्ठिताः ॥ केवलंराजपत्नी
त्ववादस्तासुनतद्रुचिः ॥ ३४ ॥ महासुकृतसंभारैरुत्तमश्चोत्तमोदरे ॥ उवासतस्याःपुण्यायानृपसिंहासनोचितः ॥ ३५ ॥

त्वात्वाम् ॥ सम्यक्शंससत्यंकथय ॥ २५ ॥ २६ ॥ अहंतेसुतइत्यनुषज्जते ॥ अनुत्तमोऽपकृष्टस्तुच्छइत्यर्थः ॥ २७ ॥ २८ ॥ नीतिमद्वचइत्यन्वयः ॥ नीतिमांश्चासौशिशुश्चेतिनीतिमच्छिशुः
नीतिमच्छिशोस्तस्यध्रुवस्यवचइतिवान्वयः ॥ २९ ॥ सापत्नंसपत्नीविषयंप्रतिघंप्रतिकूलंप्रतिपक्षमितियावत् ॥ ३० ॥ अयीतिसानुकंपसंबोधने ॥ कृथाःकुरु ॥ ३१ ॥ ३२ ॥ ३३ ॥
मादृश्यइति ॥ प्रमदासुमध्येप्रतिष्ठिताःस्थितामादृश्योयामंदभाग्यास्तास्वस्माकंकेवलंराजपत्नीत्ववादोनृपभार्यात्वकथनंमात्रंनंतद्रुचिः ॥ तस्योत्तानपादस्यराज्ञोरुचिःप्रीतिर्नास्तीत्यर्थः ॥३४॥३५॥

CC-0. In Public Domain. Digitization by eGangotri

आतपत्रंचेत्याद्यानांनियमैर्यमैरित्यंतानांद्वादशश्लोकानामेतैर्मनोरथफलैस्तपोद्रुमास्तपांस्येवद्रुमावृक्षाःफलंत्येवेतित्रयोदशेनान्वयः ॥ भद्रासनंराजसिंहासनम् ॥ सिंधुरागजाः ॥ मदोद्धुरामदोन्मत्ताः ॥ ३६ ॥ तुरंगमाअश्वाः ॥ तुरगाःशीघ्रगाः ॥ अनाधिव्याधि नविद्येतेआधिव्याधीमानसव्यथारोगौयस्मिंस्तज्जीवितम् ॥ तथाप्राज्यंप्रजासुखम् ॥ यद्वा प्राज्यंश्रेष्ठम् ॥ प्राच्यमितिपाठेप्राच्यंप्राचीदिग्भवमैश्वर्यम् ॥ एतच्चाग्न्यादिदिग्भवैश्वर्याणामुपलक्षणम् ॥ ३७ ॥ अपराजितंपरैःशत्रुभिरितिशेषः ॥ अरिश्चासौषड्वर्गइन्द्रियषड्वर्गश्चेत्यरिषड्वर्गस्तस्मिन् ॥ इंद्रियारिषड्वर्गस्यपराभवइत्यर्थः ॥ अरिषड्वर्गैरितिपाठेअजयइतिच्छेदः ॥ ३८ ॥ ३९ ॥ साप्रसिद्धा ॥ येतिवापाठः ॥ और्जस्वलाऔदार्यवती ॥ ४० ॥ सदोऽजिरेसभांगणे ॥४१॥ स्त्रीप्रयोगेषुस्त्रीविषयव्यवहारेषु ॥

आतपत्रंचचंद्राभंशुभेचापिचचामरे ॥ भद्रासनंतथोच्चंचसिंधुराश्चमदोद्धुराः ॥ ३६ ॥ तुरंगमाश्चतुरगास्त्वनाधिव्याधिजीवितम् ॥ निःसपत्नंशुभंराज्यंप्राज्यंहरिहरार्चनम् ॥ ३७ ॥ विपुलंचकलाज्ञानमधीतमपराजितम् ॥ तथाजयोरिषड्वर्गेस्वभावात्सात्त्विकीमतिः ॥ ३८ ॥ दृष्टिःकारुण्यसंपूर्णावाणीमधुरभाषिणी ॥ अनालस्यंचकार्येषुतथागुरुजनेनतिः ॥ ३९ ॥ सर्वत्रशुचितातातसापरोपकृतिःसदा ॥ और्जस्वलामनोवृत्तिःसदैवादीनवादिता ॥ ॥ ४० ॥ सदोजिरेचपांडित्यंप्रागल्भ्यंचरणांगणे ॥ आर्जवंबंधुवर्गेषुकाठिन्यंक्रयविक्रये ॥ ४१ ॥ मार्दवंस्त्रीप्रयोगेषुवत्सलत्वंप्रजासुच ॥ ब्राह्मणेभ्योभयंनित्यंवृद्धवृत्त्युपजीवनम् ॥ ४२ ॥ वासोभागीरथीतीरेतीर्थेवामरणंरणे ॥ अपराङ्मुखताऽर्थिभ्यःप्रत्यर्थिभ्योविशेषतः ॥ ४३ ॥ भोगःपरिजनैःसार्धंदानावंध्यदिनागमः ॥ विद्याव्यसनितानित्यंनित्यंपित्रोरुपस्थितिः ॥ ४४ ॥ यशसःसंचयोनित्यंनित्यंधर्मस्यसंचयः ॥ स्वर्गापवर्गयोःसिद्धिःसदाशीलस्यमंडनम् ॥ ४५ ॥ सद्भिश्चसंगतिर्नित्यंमैत्रीचपितृमित्रकैः ॥ इतिहासपुराणानामुत्कंठाश्रवणेसदा ॥ ४६ ॥ विपद्यपिपरंधैर्यंस्थैर्यंसंपत्समागमे ॥ गांभीर्यंवाग्विलासेषुऔदार्यंपात्रपाणिषु ॥ ४७ ॥ देहेपरैकाकृशतातपोभिर्नियमैर्यमैः ॥ एतैर्मनोरथफलैःफलंत्येवतपोद्रुमाः ॥ ४८ ॥ तस्मादल्पतपस्त्वाद्वैत्वंचाहंचमहामते ॥ प्राप्यापिराजसांनिध्यंराजलक्ष्म्यानभाजनम् ॥ ४९ ॥

वृद्धानांसदाचाराणांयावृत्तिर्वर्तनंतेनोपजीवनंजीवनसंपादनम् ॥ वृद्धवुद्ध्युपजीवनमितिक्वचित् ॥ ४२ ॥ वासोमरणमितितीर्थेरणेइत्युभयत्रसंवध्यते ॥ प्रत्यर्थिभ्यःप्रतिकूलार्थिभ्यःशत्रुभ्यइत्यर्थः ॥ ॥ ४३ ॥ दानावंध्योदानैरव्यर्थोदिनागमोदिवसागमनंप्रत्यहंदानमित्यर्थः ॥ उपस्थितिरुपस्थानमनुकूलाचरणमितियावत् ॥४४॥ शीलस्यसद्वृत्तस्यमंडनंभूषणंप्रत्यहंसद्वृत्ताचरणमित्यर्थः ॥४५॥ पितृमित्रकैःपितुर्मित्रैःसहापितृवद्यानिमित्राणितैःसहेतिवा ॥ इतिहासपुराणानाम् इतिहासामहाभारतादयः पुराणानिब्राह्मादीनितेषाम् ॥४६॥ वाग्विलासेषुवचनप्रयोगेषु ॥ औदार्यंदातृत्वम् ॥ ४७ ॥ परामुख्याकेवलावा ॥ एतैरातपत्रादिकृशतांतैर्मनोरथफलैर्मनोराज्यवत्फलत्वेनकल्पितैः मनोऽभिलषितफलैरितिवाकृत्वातपोद्रुमाःफलंतीति ॥ ४८ ॥ प्रस्तुतमुपसंहरति ॥ तस्मादिति ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वकृतंस्वेनकृतंकर्म ॥ स्वकृतांकृतिंस्वेनकृतंकर्मस्रष्टापितामपमार्ष्टुंनपरीष्टेनसमर्थइत्यर्थः ॥ सांत्वयति ॥ माशोचइति ॥ दिष्टंदैवम् समर्पयेत्प्रापयेत् ॥ समुन्नयेदितिपाठेपिसएवार्थः ॥ ५०॥
॥ ५१ ॥ ५२ ॥ ५३ ॥ अन्यैर्दुरासदंयत्पदन्तदासादितंविद्धीत्यन्वयः ॥५४ ॥ अनुज्ञादानमात्रंचेतिचकारोभिन्नक्रमे ॥ अनुज्ञादानमात्रंकुरुआशीर्भिरभिनन्दयचेत्यर्थः ॥ ५५ ॥ राजमानंभ्राज
मानम् ॥५६॥शय्यतेऽनेनेतिशयःपादः॥पादप्रसारणपूर्वकंहिसर्वेशेरतइतिसर्वेषामनुभवासिद्धम्॥उत्तानउच्चैःशयोयस्यसउत्तानशयउत्तानपादस्यांगज उत्तानशयांगज॥ हेउत्तानशयहेस्तनंधयेतिपृथग्वा
पदम् ॥ स्यादुत्तानशयोडिंभस्तनयश्चस्तनंधयइत्यमरः ॥ अनुत्तानशयेप्युत्तानशयपदप्रयोगस्त्वार्द्रचित्ततया ॥ आत्मजेतिक्वचित् ॥ साष्टैकवर्षदेशीयम्अष्टाभिःसहवर्ततइतिसाष्टंसाष्टंचतदेकवर्षंचे
तिसाष्टैकवर्षम्ईषदसमाप्तंसाष्टैकवर्षंयस्यससाष्टैकवर्षदेशीयः ॥ ईषदसमाप्तौकल्पब्देश्यदेशीयरइतिदेशीयर्प्रत्ययः ॥ सप्ताष्टदेश्यवर्षीयामितिपाठेईषदसमाप्तानिसप्तवाऽष्टवावर्षाणियस्यतामित्यर्थः ॥ एवंभू

मानापमानयोस्तस्मात्स्वकृतंकारणंपरम् ॥ स्रष्टापिनापमार्ष्टुंतत्परीष्टेस्वकृतांकृतिम् ॥ माशोचस्त्वमतःपुत्रदिष्टमिष्टंसमर्पयेत् ॥५० ॥ इत्याकर्ण्यसुनी
त्यास्तन्महावाक्यंसुनीतिमत् ॥ सौनीतेयोध्रुवोवाचमाददेवकुमुत्तरम् ॥ ५१ ॥ ध्रुवउवाच ॥ ॥ जनयित्रिसुनीतेमेशृणुवाक्यमनाकुलम् ॥ माबा
लइतिमत्वामामवमंस्थास्तपस्विनि ॥ ५२ ॥ यद्यहंमानवेवंशेजातोस्म्यत्यंतपावने ॥ उत्तानपादतनयस्त्वदीयोदरसंभवः ॥५३॥ तपएवहिचेन्मातः
कारणंसर्वसंपदाम् ॥ तत्तदासादितंविद्धिपदमन्यैर्दुरासदम् ॥ ५४ ॥ एकमेवहिसाहाय्यंकुरुमातरतंद्रिता ॥ अनुज्ञादानमात्रंचआशीर्भिरभिनंदय ॥
॥ ५५ ॥ सापिज्ञात्वामहावीर्यंकुमारंकुक्षिसंभवम् ॥ महत्योत्साहसंपत्त्याराजमानध्रुवाचतम् ॥ ५६ ॥ अनुज्ञातुंनशक्ताऽहंत्वामुत्तानशयांगज ॥
साष्टैकवर्षदेशीयन्तथापिकथयाम्यहम् ॥ ५७ ॥ सपत्नीवाक्यभल्लीभिर्भिन्नेमहतिमेहृदि ॥ तवबाष्पौघवारीणिनतिष्ठंतिकरोमिकिम् ॥ ५८ ॥ तानि
मन्येऽत्रमार्गेणस्रवंत्यविरतंशिशो ॥ स्रवंतीश्चचिकीर्षंतिप्रतिकूलजलाःकिल ॥ ५९ ॥ त्वदेकतनयातातत्वदाधारैकजीविता ॥ त्वमंगयष्टिरसिमे
त्वन्मुखासक्तलोचना ॥ ६० ॥ लब्धोसिकतिभिःकष्टैरिष्टाःसंप्रार्थ्यदेवताः ॥ त्वन्मुखेंदूदयेतातमन्मनःक्षीरनीरधिः ॥ ६१ ॥ आनन्दपयसापूर्य
कुचाद्युद्वेलितोभवेत् ॥ त्वदंगसंगसंभूतसुखसन्दोहशीतला ॥ ६२ ॥

तंत्वांयद्यप्यनुज्ञातुमाज्ञांदातुंनशक्नोमितथापिकथयाम्याज्ञांप्रयच्छामीत्यर्थः ॥ ५७ ॥ आज्ञानर्हेप्याज्ञादानेहेतुमाह ॥ सपत्नीति ॥ सपत्नीदुष्टवाक्यान्येवभल्ल्योबाणास्तैर्मेतवचहृदिभिन्नेस
तिबाष्पानिवहजलानिनतिष्ठंति ॥ तवत्वत्संबंधीनित्वन्निमित्तानिबाष्पौघवारीणीतिवा ॥ अतःकिंकरोमिएतदर्थमाज्ञांप्रयच्छामीत्यर्थः ॥ तत्तद्वाक्यौघवारीणीतिक्वचित् ॥ ५८ ॥ आज्ञादा
नेहेत्वंतरमाह ॥ तानीति ॥ किलप्रसिद्धौ ॥ हेशिशोतानिबाष्पौघवारीण्यविरतंनेत्रमार्गेणनेत्ररंध्रेणस्रवंति ॥ स्रवन्तीश्चनदीः ॥ स्रवन्तीनिम्नगापगाइत्यमरः ॥ चिकीर्षंतिकर्तुमिच्छंतिवां
छन्तीतियावत् ॥ कथंभूताः ॥ प्रतिकूलजलाःदुःखावहाइत्यर्थः ॥ आनन्दबाष्पौघधाराव्यावृत्त्यर्थंविशेषणम् ॥ नकेवलंस्रवंतिस्रवंतीश्चचिकीर्षंतीतिवाऽन्वयः ॥ प्रतिकूलजनाइतिव.पाठः ॥
किलेतिप्रसिद्धौ ॥ ५९ ॥ एवंकथंचिद्दास्यमानानुज्ञायाःपुत्रविश्लेषजनितखेदायाविलापमाहतुरथेत्यतःप्राक्तनेनग्रंथेन ॥ यष्टिर्लकुटः ॥६०॥ उद्वेलितोलंघिततीरमर्यादउर्तिसक्ततीरोवा ॥६१॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शयेशयनंकुर्वे ॥ सुशयनेशोभनशय्यायाम् ॥ अयइतिपाठेइदानींआ वृत्यास्तर्रीयेत्यर्थः ॥ पुलकएवांबरंवस्त्रंपुलकांबरम् ॥ अपइति ॥ अयानंतरम्अपः समुपस्पृश्यमुखंप्रक्षाल्याचम्येत्यर्थः ॥ ६३ ॥ त्वदास्येति ॥ हेसुधांशुवदनचंद्राननत्वदास्यस्यतवमुखस्ययदोष्ठपुटकंदंतच्छदद्वयंतदेवदुग्धवार्धिःक्षीरसमुद्रस्तेनवर्धितामुच्छलितांसुधांपीयूषंधयंतीपिबंतीचुंबनादिनानधिनोमितृप्तिंनप्राप्नोमीत्यर्थः ॥ अपिशब्दात्पश्यंत्यपश्यंत्यपि ॥ ६४ ॥ त्वदीयेति ॥ त्वदीयःशीतलालापःकोमलवचनंममश्रुतिपथंयदाप्रापतदैवसपत्नीवाक्यदवथुःसपत्नीवाक्यमेवदवथुस्तस्माद्वायोदवथुःकंपः सवेपथुः सकंपःस्यान्नश्येदित्यर्थः ॥ ६५ ॥ यदंगेति ॥ अंगहेपुत्रयद्यदात्वंचिरंनिद्रासिनिद्रांकरोषितदेतिवक्ष्यमाणंध्यायंत्यस्मिचिंतयंतीभवामि ॥ किंतत्तदाह ॥ कदाऽसौनिद्रादरिद्रः निद्राया दरिद्रःअभावोभविता ॥ निश्चेष्टत्वसाम्यात्सूर्योदयेऽरविंदवद्भविष्यति ॥ यथासूर्योदयेऽरविंदंविकसितंभवतितथासौनिद्राक्रांतनेत्रःकदाविकासंगमिष्यतीत्यर्थः ॥ निद्रादरिद्रोऽसौध्रुवइतिवा ॥ ॥ ६६ ॥ उपेयाउपगच्छसि ॥ अनर्घ्यार्घ्यममूल्यार्घ्यम् ॥ स्यातांभवेताम् ॥ उन्मुखौक्षरितचूचुकौ ॥ इवेत्युत्प्रेक्षायाम् ॥ ६७ ॥ यदेति ॥ यदात्वंसौधाद्राजसदनाद्विनिर्यायाःनिर्गच्छ

सुखंशयेसुशयनेप्रावृत्यपुलकांबरम् ॥ अपोऽथससुपस्पृश्यतांबूलंपरिगृह्य च ॥६३॥ त्वदास्यस्यौष्ठपुटकदुग्धवार्धिविवर्धिताम् ॥ सुधांसुधांशुवदनधयंत्यपिधिनोमिन ॥ ६४ ॥ त्वदीयःशीतलालापःप्रापश्रुतिपथंयदा ॥ सपत्नीवाक्यदवथुस्तदैवस्यात्सवेपथुः ॥६५॥ यदंगनिद्रासिचिरंध्यायंत्यस्मितदेत्यहम् ॥ कदानिद्रादरिद्रोसौभविताऽर्कोदयेऽब्जवत् ॥६६॥ यदोपेयागृहान्वत्सखेलित्वाबालखेलनैः ॥ तदानर्घ्यार्घ्यमुत्सृष्टुंस्तनौस्यातामिवोन्मुखौ ॥ ॥ ६७ ॥ यदासौधाद्विनिर्यायाःपद्मरेखांकितंपदम् ॥ प्राणानांतेयियासूनांतदातदवलंबनम् ॥ ६८ ॥ यद्यायदाबहिर्यासिपुत्रत्रिचतुरंपदम् ॥ तदातदाममप्राणःकंठप्राघुणिकीभवेत् ॥ ६९ ॥ चित्रंपुत्रत्वरयतियातुंमेमानसांडजः ॥ सुधाधाराधरइवबहिश्चिरयतित्वयि ॥ ७० ॥ अथतिष्ठंतुकठिनाः प्राणाःकंठाटवीतटे ॥ तपस्यंतोतिसंतप्तास्तपसेत्वयियास्यति ॥ ७१ ॥ इत्यनुज्ञामनुप्राप्यजननीचरणांबुजौ ॥ क्षणंमौलिजजंबालजडौकृत्वाध्रुवोययौ ॥ ७२ ॥ तयापिधैर्यसूत्रेणसुनीत्यापरिगुंफ्यच ॥ नेत्रेंदीवरजामालाध्रुवस्योपायनीकृता ॥ ७३ ॥ मात्रातन्मार्गरक्षार्थंतदातदनुगीकृताः ॥ पैररवार्यप्रसराःस्वाशीर्वादाःपरःशताः ॥ ७४ ॥

सितदायियासूनांगंतुमिच्छूनांप्राणानांधूलिकादिप्रदेशेपद्मरेखाचिह्नितंतवयत्पदंतदवलंबनमाश्रयोजीवनहेतुःस्यादित्यर्थः ॥ ६८ ॥ यदायदेति ॥ हेपुत्र त्रिचतुरं त्रयंचतुष्टयंवापदंयदात्वंवाहिर्यासितदातदाममप्राणःकंठप्राघुणिकीभवेत्कंठातिथिःकंठगतइत्यर्थः ॥ यथायथातथातथेतिक्वचित् ॥ ६९ ॥ चित्रमिति ॥ हेपुत्रएतच्चित्रम् ॥ किंतत् ॥ त्वयिवहिश्चिरायतिविलंबभाजिसति ममानसांडजोमानसंमनएवांडजश्चकोराख्यःपक्षीयातुंत्वरयतित्वरांकरोति ॥ कथंभूतेइवत्वयि ॥ सुधाधाराधरेइव सुधाधारामममृतधारांधरतीतितथातस्मिन्नमृतमयेचंद्रइवेत्यर्थः ॥ चकोराख्यांडजोपिचंद्ररश्म्यमृतंपातुंचंद्रनिकटेगंतुंत्वरयतेइतिलोकप्रसिद्धम् ॥ सुधाधाराधरमयइतिक्वचित्पाठः ॥ सुधाधाराधराकारइतिचान्यत्र ॥ पाठद्वयेपिपूर्वोक्तएवार्थः ॥ ७० ॥ कथंकथमप्यनुज्ञांददाति ॥ अथेति ॥ ७१ ॥ अनुअनंतरंपश्चाद्वा ॥ इवेतिपाठेस्पष्टएवार्थः ॥ मौलिजजंवालजडौ मौलिजाःकेशाएवजंबालाःपंकास्तैर्जडौवेष्टितावित्यर्थः ॥ निषद्वरस्तुजंबालःपंकोस्त्रीशादकर्दमावित्यमरः ॥ ७२ ॥ तयासुनीत्येतिसंबंधः ॥ परिगुंफ्यग्रथित्वा ॥ उपायनीकृताउपहारीकृता ॥ उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः ॥ ७३ ॥ तदनुगीकृतास्तस्यध्रुवस्यप

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्राद्धाःकृताः ॥ नवार्याःप्रसराःस्वकार्यक्षमतायेषांस्वाशीर्वादानांतेतथा ॥ सापेक्षत्वेपिसमासआर्षः ॥ शतात्परेपरःशताःअसंख्याताइत्यर्थः ॥ ७४ ॥ मरुतावायुना ॥ ७५ ॥ सइति ॥ मरुता वायुनायत्तरुशाखाग्राणांप्रसारणमांदोलनंतन्मिषेणव्याजेन ॥ वायुनातरुपल्लवाग्राणांप्रसारणंमिषंव्याजंयस्मिन्तेनवनेनेतिसामानाधिकरण्यंवा ॥ ७६ ॥ ७७ ॥ ७८ ॥ अरण्यान्यांमहारण्ये ॥ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ वैचित्र्यंविविधचित्रीकरणम् ॥ चित्रंचित्रीकरणमात्रम् ॥ चित्तमितिवापाठः ॥ कृतंकर्म ॥ तदुक्तम् ॥ नमस्तत्कर्मभ्योविधिरपिनयेभ्यःप्रभवतीति ॥ ८३ ॥

स्वसौधात्सविनिर्गत्यबालोऽबालपराक्रमः ॥ अनुकूलेनमरुतादर्शिताध्वाऽविशद्वनम् ॥ ७५ ॥ समरुत्तरुशाखाग्रप्रसारणमिषेणसः ॥ कृताहूतिरिवप्रे म्णावनेनवनमाविशत् ॥ ७६ ॥ समातृदैवतोभिज्ञःकेवलंराजवर्त्मनि ॥ नवेदकाननाध्वानंक्षणंदध्यौनृपात्मजः ॥ ७७ ॥ यावदुन्मीलयनयनेपुरः पश्यतिसध्रुवः ॥ तावद्ददर्शसप्तर्षीनतर्कितगतीन्वने ॥ ७८ ॥ बालिशेष्वसहायेषुभवेद्भाग्यंसहायकृत् ॥ अरण्यान्यांरणेगेहेततोभाग्यंहिकारणम् ॥ ॥७९॥ क्वराजतनयोबालोगहनंक्वचतद्वनम् ॥ बलात्स्वसात्प्रकुर्वत्यैनमस्तेभवितव्यते ॥८०॥ यत्रयस्यहियद्भाव्यंशुभंवाऽशुभमेवच ॥ आकृष्यभा विनीरज्जुस्तत्रतस्यहिदापयेत् ॥ ८१ ॥ अन्यथाविदधात्येषमानवोबुद्धिवैभवात् ॥ भगवत्याभवित्र्याऽसौविदध्याद्विधिरन्यथा ॥ ८२ ॥ नवयोनचवै चित्र्यंनाचित्रंविदधेहितम् ॥ नबलंनोद्यमःपुंसांकारणंप्राक्कृतंकृतम् ॥८३॥ अथदृष्ट्वाससप्तर्षीन्सप्तसप्त्यतितेजसः ॥ भाग्यसूत्रैरिवाकृष्योपनीतान्प्रमुमो दह ॥ ८४ ॥ तिलकांकितसद्भालान्कुशोपग्रहितांगुलीन् ॥ कृष्णाजिनोपविष्टांश्चयज्ञसूत्रैरलंकृतान् ॥ ८५ ॥ साक्षसूत्रकरान्किंचिद्विनिमीलितलो चनान् ॥ सुधौतसूक्ष्मकाषायवासःप्रावरणान्वितान् ॥ ८६ ॥ अकांडेपिमहाभागान्मिलितान्सप्तनीरधीन् ॥ चित्रंविपद्विनिर्मग्नानुद्दिधीर्षूनिवप्रजाः ॥ ८७ ॥ उपगम्यविनम्रःसप्रबद्धकरसंपुटः ॥ ध्रुवोविज्ञापयांचक्रेप्रणम्यललितंवचः ॥ ८८ ॥ ॥ ध्रुवउवाच ॥ ॥ अवैतमांमुनिवराःसुनी त्युदरसंभवम् ॥ उत्तानपादतनयंध्रुवंनिर्विण्णमानसम् ॥ ८९ ॥ इदंवनमनुप्राप्तंसनाथंयुष्मदंघ्रिभिः ॥ प्रायोनभिज्ञंसर्वत्रमहद्धर्युषितमानसम् ॥९०॥

सध्रुवःसप्तर्षीन्दृष्ट्वाप्रमुमोदह ॥ अनंतरंप्रणम्यललितंवचोविज्ञापयांचक्रइतिपश्चमेनान्वयः ॥ सप्तसप्त्यतितेजसः सूर्याधिकमहसः तद्वदतितेजसइतिवा ॥ ८४ ॥ ८५ ॥ ८६ ॥ अकांडइति ॥ पुनःकीदृशान् ॥ अकांडेऽनवसरेमिलितान् ॥ मेलनहेतोरभावेपिसमवेतानित्यर्थः ॥ अतएवचित्रमाश्चर्यम् ॥ कानिव ॥ विपद्विनिर्मग्नाःप्रजाउद्दिधीर्षूनुद्धर्तुमिच्छून् सप्तनीरधीन्सप्तसमुद्रानिव ॥ अभूतोपमेयम् ॥ यदासप्तसागराःप्रजाउद्दिधीर्षवस्तदायथामिलंतितथामिलितानित्यर्थः ॥ गुणरत्नाकरत्वागाधबोधादिनासमुद्रसाम्यम् ॥८७॥८८॥८९॥ महत्याऋद्ध्याउपितमध्युषितमाश्रितं

Nepal Sanskrit University, Balmeekі Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानसंयस्यसतथातम् ॥ ९० ॥ ऊर्जस्वलंतेजस्विनम् ॥ अनर्घ्यनयनेपथ्यमतिशयनीतिचतुरम् ॥ ९१ ॥ ९२ ॥ ९३ ॥ नीरुग्रोगरहितः ॥ ९४ ॥ तथावैराग्यवानित्यर्थः ॥ स्वभावभिन्न प्रकृतौ स्वभावान्मायातोभिन्नानानाप्रकृतिःस्वभावोवासनायस्यतस्मिन्लोके ॥ ९५ ॥ ९६ ॥ प्रांशुमनोरथउच्चाभिलाषः ॥ ९७ ॥ ९८ ॥ ९९ ॥ क्षात्रंक्षत्रियजातिंक्षत्रियस्वभावंवा ॥ तत्तदा ॥ तत्क्षात्रमितिवा ॥ अहोइत्याश्चर्ये ॥ १०० ॥ श्रवःश्रवणेंद्रियन्तद्गोचरीकुरु ॥ १ ॥ तत्प्रसिद्धम् ॥ भद्रासनंचक्रवर्तिसिंहासनम् ॥ २ ॥ उपदिश्यतइत्युपदेशउपायइत्यर्थः ॥ तत्तस्मात् ॥

तेदृष्ट्वोर्जस्वलंबालंस्वभावमधुराकृतिम् ॥ अनर्घ्यनयनेपथ्यंमृदुगंभीरभाषिणम् ॥ ९१ ॥ उपोपवेश्यशिशुकंप्रोचुर्वैविस्मिताभृशम् ॥ अहोबालविशालाक्षमहाराजकुमारक ॥ ९२ ॥ विचार्यापिनजानीमोवदनिर्वेदकारणम् ॥ अद्यतेह्यर्थचिंतानोक्वापमानःप्रसूर्गृहे ॥ ९३ ॥ नीरुक्छरीरसंपत्तिनिर्वेदेकिंनुकारणम् ॥ अनवाप्ताभिलाषाणांवैराग्यंजायतेनृणाम् ॥ ९४ ॥ सप्तद्वीपपतेराज्ञःकुमारस्त्वंतथाकथम् ॥ स्वभावभिन्नप्रकृतौलोकेस्मिन्नमनोगतम् ॥ ९५ ॥ अवगंतुंहिशक्येतयूनोवृद्धस्यवाशिशोः ॥ इतिश्रुत्वावचस्तेषांसहजप्रेमनिर्भरम् ॥ ९६ ॥ वाचंजग्राहसतदाशिशुःप्रांशुमनोरथः ॥ ध्रुवउवाच ॥ ॥ प्रेषितोराजसेवार्थंजनन्याऽहंमुनीश्वराः ॥ ९७ ॥ राजांकमारुरुक्षुर्हिसुरुच्यापरिभर्त्सितः ॥ उत्तमंचोत्तमीकृत्यमांचमन्मातरंतथा ॥९८॥ धिकृत्यप्रशशंसस्वंनिर्वेदेकारणंत्विदम् ॥ निशम्येतिशिशोर्वाक्यंपरस्परमवेक्ष्यते ॥९९॥ क्षात्रमेवशशंसुस्तदहोबालेपिनक्षमा ॥ १०० ॥ ऋषयऊचुः ॥ ॥ किमस्माभिरहोकार्यंकस्तवाऽस्तिमनोरथः ॥ ज्ञातोभवतुतावत्सनःश्रवोगोचरीकुरु ॥ १ ॥ ॥ ध्रुवउवाच ॥ ॥ मुनयोममयोवंधुरुत्तमश्चोत्तमोत्तमः ॥ पित्रादत्तंचसोऽध्यास्तांतद्भद्रासनमुत्तमम् ॥ २ ॥ भवत्कृतंहिसाहाय्यमेतदिच्छामिसुव्रताः ॥ प्रायोजानेनबालत्वादुपदेशस्तदुच्यताम् ॥ ३ ॥ अनन्यनृपभुक्तंयद्यदन्येभ्यःसमुच्छ्रितम् ॥ इंद्रादिदुरवापंयत्कथंलभ्यंदुरासदम् ॥ ४ ॥ पित्रोत्सृष्टंनकांक्षामिकांक्षामिस्वभुजार्जितम् ॥ मनोरथपथातीतंभवेद्यत्पितुरप्यहो ॥ ५ ॥ पितृसंपत्तिभोक्तारःप्रायशोनयशोधनाः ॥ नरोत्तमास्तुतेज्ञेयायेपित्राधिक्यदर्शिनः ॥ ६ ॥ उपार्जितंहिपित्रायेनाशयंतियशःश्रुतम् ॥ धनंनिधनमेवास्तुतेषांदुर्वृत्तचेतसाम् ॥ ७ ॥ इतिश्रुत्वावचस्तस्यमुनयःसुनयोर्जितम् ॥ यथार्थमेवंप्रत्यूचुर्मरीच्याद्यास्तथाध्रुवम् ॥ ८ ॥

उच्यतांकथ्यताम् ॥३ ॥ कस्योपदेशइत्यतआह ॥ अनन्येति ॥ समुच्छ्रितमत्युच्छ्रितमत्युच्चमितियावत् ॥ समुत्थितमितिपाठेपिसएवार्थः ॥ एतादृशंदुरासदंदुर्लभंयत्स्थानमितिशेषस्तत्कथंकेनप्रकारेणउपायेनलभ्यंसउपदेशउपायःकथ्यतामितिपूर्वेणैवान्वयः ॥ ४ ॥ ५ ॥ ६ ॥ श्रुतंप्रख्यातंधनंच ॥७॥ इतीति ॥ इत्येवंपूर्वोक्तप्रकारं सुनयोर्जितंशोभननयेनवर्धितं. यथार्थंपरमार्थं तस्यध्रुवस्यवचः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वामुनयोमननशीलाअपिमरीच्याद्यास्तथायथार्थंध्रुवंप्रत्यूचुःप्रत्युत्तरंदत्तवन्तइत्यर्थः ॥ ८॥ अनार्चितोति ॥ हेअंगध्रुवत्वंयथायादृशंपदमात्थकथयसितथातादृशंपदमनर्चिताच्युतपदःकथमापद्यतेन कथंचिदपिप्राप्नोति ॥ एतदहंनातथ्यंनमृषाकथयामीत्यर्थः ॥ यथायथेतिपाठेएकोयथाशब्दोयथावदित्यर्थे ॥ तथाशब्दोऽध्याहर्तव्योयत्तदोर्नित्यसंबंधात् ॥ ९ ॥ मरीच्यनुरूपमुपदेशमत्रिरुवाच ॥ अनास्वादितेति ॥ पदंस्थानम् ॥ फलमितिक्वचित्पाठः ॥ पथमितिपाठेपंथानमित्यर्थः ॥ अकारांतोवापथशब्दोवाटःपथश्चेतिवचनात् ॥ ११० ॥ अत्र्यनुरूपमुपदेशमंगिराअप्युवाच ॥ अदवीयइति ॥ अदवीयोमहदित्यर्थः ॥ निकटवर्तीतिवा ॥ कांतांघ्रिकमलेसुखसेव्यचरणपद्मेसुशीलयेच्छोभनप्रकारेणध्यायेत् ॥ ११ ॥ परमांतमात्यंतिकंनाशम् ॥ १२ ॥ प्रधानंप्रकृतिः ॥ पुरुषईश्वरः ॥ एकवद्भावादेकवचनम् ॥ तस्मात्परंयत्परमंब्रह्माहुःसोऽच्युतःसर्वंदास्यतीत्यन्वयः ॥ ननुसजातीयविजातीयस्वगतभेदात्कथंतस्यब्रह्मत्वंतत्राह ॥ यन्मायययायस्यमाययाऽपरंस

मरीचिरुवाच ॥ ॥ अनर्चिताच्युतपदःपदमापद्यतेकथम् ॥ यथातथात्वमात्थांगनातथ्यंकथयाम्यहम् ॥ ९ ॥ अत्रिरुवाच ॥ अनास्वादितगोविंदपदांबुजरजोरसः ॥ मनोरथपथातीतंस्फीतंनाकलयेत्पदम् ॥ ११० ॥ अंगिराउवाच ॥ ॥ अदवीयःपदंतस्यसर्वासांसंपदामिह ॥ कमलाकांतकांतांघ्रिकमलेयःसुशीलयेत् ॥ ११ ॥ ॥ पुलस्त्यउवाच ॥ ॥ यस्यस्मरणमात्रेणमहापातकसंततिः ॥ परमांतमवाप्नोतिसविष्णुःसर्वदोध्रुव ॥ १२ ॥ ॥ पुलहउवाच ॥ ॥ यदाहुःपरमंब्रह्मप्रधानपुरुषात्परम् ॥ यन्माययाततंसर्वंसर्वदास्यतिसोच्युतः ॥ १३ ॥ ॥ क्रतुरुवाच ॥ ॥ योयज्ञपुरुषोविष्णुर्वेदवेद्योजनार्दनः ॥ अंतरात्माऽस्यजगतःसतुष्टःकिंनयच्छति ॥ १४ ॥ ॥ वसिष्ठउवाच ॥ ॥ यद्भ्रूनर्तनवर्तिन्यःसिद्धयोऽष्टौनृपात्मज ॥ तमाराध्यहृषीकेशमपवर्गोप्यदूरतः ॥ १५ ॥ ध्रुवउवाच ॥ ॥ सत्यमुक्तंमुनीशानाविष्णोराराधनंप्रति ॥ कथंवाभगवानीज्यःसविधिश्चोपदिश्यताम् ॥१६॥ ॥ मुनयऊचुः ॥ ॥ तिष्ठतागच्छतावापिस्वपताजाग्रतातथा ॥ शयानेनोपविष्टेनजप्योनारायणःसदा ॥१७॥ द्वादशाक्षरमंत्रेणवासुदेवात्मकेनच॥ ध्यायंश्चतुर्भुजंविष्णुंजप्त्वासिद्धिंनकोगतः ॥ १८ ॥ अतसीपुष्पसंकाशंपीतवाससमच्युतम् ॥ क्षणंसर्वात्मकंपश्यन्कोनासिध्यतिभूतले ॥१९॥ पुत्रान्कलत्रमित्राणिराज्यंस्वर्गापवर्गकम् ॥ वासुदेवंजपन्मर्त्यःसर्वंप्राप्नोत्यसंशयम् ॥ १२० ॥

र्वमिति ॥ ततमितिपाठेयद्ब्रह्ममाययाततमित्यर्थः ॥ १३ ॥ सविष्णुः ॥ तुष्टो वेतिपाठेलोकोक्तिः ॥ १४ ॥ वर्तनंचालनम् ॥ सिद्धयोणिमाद्याः ॥ १५ ॥१६॥ तिष्ठतेति ॥ तदुक्तम् ॥ नदेशनियमश्चात्रनकालनियमस्तथा ॥ नोच्छिष्टादौनिषेधोस्तिहरेर्नामनिलुब्धकोति ॥ १७ ॥ मंत्रस्यैकदेशमुद्धरति ॥ वासुदेवात्मकेनेति ॥ ओंनमोभगवतेवासुदेवायेत्यनेनेत्यर्थः ॥ तथाचवैष्णवेयद्भाणि ॥ हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ॥ ओंनमोवासुदेवायशुद्धज्ञानस्वरूपिणइति ॥ तत्तुकल्पभेदाभिप्रायेणेतिबोद्धव्यम् ॥ जप्त्वाजपित्वा॥तप्त्वेतिपाठेआलोचयित्वाऽभेदेनध्यायन्नित्यर्थः ॥ विष्णुर्भूत्वायजेद्विष्णुमितिवचनात् ॥ सिद्धिंमोक्षाख्यांधर्मार्थकाममोक्षात्मिकांवा ॥ ध्येयमाह ॥ चतुर्भुजमित्यादि ॥ १८ ॥ अतसीलोकप्रसिद्धातत्पुष्पसदृशम् ॥ क्षणंसर्वात्मकंपश्यन्निति ॥ तथाचोक्तम् ॥ सर्वपापप्रसक्तोपिध्यायन्निमिषमच्युतम् ॥ द्विजस्तपस्वीभवतिपंक्तिपावनपावनइति ॥ सिद्ध्यतिधूतपाप्माभवति ॥ १९ ॥ नकेवलंसिध्यतिकिन्तुपुत्रानिति ॥ १२० ॥

CC-0. In Public Domain. Digitization by eGangotri

नोपस्पृशंतिनोपसर्पंति ॥ अयमेववापाठः ॥ २१ ॥ पितामहेनस्वायंभुवेन ॥ २२ ॥ २३ ॥ १२४ ॥ ॥ इतिश्रीरामानन्दविरचितायांकाशीखण्डटीकायामेकोनविंशतितमोऽध्यायः ॥ १९ ॥ सप्तर्ष्यादिष्टमार्गस्यध्रुवस्यामिततेजसः ॥ वर्ण्यतेविंशतितमेऽध्यायेचर्यातपःस्थितेः ॥ १ ॥ ध्रुवोपितपसेगतइत्युक्तंततःपरंकिंवृत्तमित्याकांक्षायामाहतुः ॥ औत्तानपादिरिति ॥ मधुनाम्नादैत्येनाधिष्ठितंवनंमधुवनम् ॥ तदुक्तंवैष्णवे ॥ पुनश्चमधुसंज्ञेनदैत्येनाधिष्ठितंयतः ॥ ततोमधुवनंनामख्यातमत्रमहीतलइति ॥ १ ॥ महत्त्वेहेतुराद्यमिति ॥ संसारंहरतिमेधायस्यसहरिमेधास्तस्य ॥ २ ॥ जपन्निितिवाच्यवाचकयोरभेदोपचारात् ॥ निरामयंसर्वोपद्रवरहितम् ॥ ध्यानेनस्तिमितेनिश्चलेलोचनेयस्यसतथा ॥ ३ ॥ वासुदेवमयत्वंप्रपंचयतोहरिरित्यादिनातस्येक्षणेइत्यतःप्राक्तनेनग्रंथेन ॥ हरित्सुदिशासु ॥ हरिमरीचिषुसूर्यरश्मिषु ॥ ४ ॥ शालूरोभेकः भेकेमंडूकवर्षाभूशालूरप्लवदर्दुराइत्यमरः ॥ मंदुरासुवाजिशालासु ॥ वाजिशालातुमंदुरेत्यमरः ॥ ५ ॥ अनंतःशेषः ॥

वासुदेवजपासक्तानपिपापकृतोजनान् ॥ नोपस्पृशंतिवैविघ्रायमदूताश्चदारुणाः ॥ २१ ॥ पितामहेनतेप्येषमहामंत्रउपासितः ॥ मनुनाराज्यकामेनवैष्णवेनमहर्द्धिना ॥ २२ ॥ त्वमप्येतेनमंत्रेणवासुदेवपरोभव ॥ यथाभिलषितामृद्धिंक्षिप्रमाप्नुहिसत्तम ॥ २३ ॥ इत्युक्त्वांऽतर्हिताःसर्वेमहात्मानोमुनीश्वराः ॥ वासुदेवमनाभूत्वाध्रुवोपितपसेगतः ॥ १२४ ॥ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडेपूर्वार्द्धे ध्रुवलोकवर्णनेध्रुवोपदेशोनामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ ॥ गणावूचतुः ॥ ॥ औत्तानपादिर्निर्गत्यततःकाननतोद्विज ॥ रम्यंमधुवनंप्रापयमुनायास्तटेमहत् ॥ १ ॥ आद्यंभगवतःस्थानंतत्पुण्यंहरिमेधसः ॥ पापोपिजंतुस्तत्प्राप्यनिष्पापोजायतेध्रुवम् ॥ २ ॥ जपन्सवासुदेवाख्यंपरंब्रह्मनिरामयम् ॥ अपश्यत्तन्मयंविश्वंध्यानस्तिमितलोचनः ॥ ३ ॥ हरिर्हरित्सुसर्वासुहरिर्हरिमरीचिषु ॥ शिवामृगमृगेंद्रादिरूपःकाननगोहरिः ॥ ४ ॥ जलेशालूरकूर्मादिरूपेणभगवान्हरिः ॥ हरिरश्वादिरूपेणमंदुरास्वपिभूभुजाम् ॥ ५ ॥ अनंतरूपःपातालेगगनेऽनंतसंज्ञकः ॥ एकोप्यनंततांयातोरूपभेदैरनंतकैः ॥ ६ ॥ देवेषुयोवसेन्नित्यंदेवानांवसतिर्हियः ॥ सवासुदेवःसर्वत्रदीव्येद्यद्वासनावशात् ॥ ७ ॥ विष्लृव्याप्तावयंधातुर्यत्रसार्थकतांगतः ॥ विष्णुनामस्वरूपेहिसर्वव्यापनशीलिनि ॥ ८ ॥ सर्वेषांचहृषीकाणामीशनात्परमेश्वरः ॥ हृषीकेशइतिख्यातोयःससर्वत्रसंस्थितः ॥ ९ ॥

शेषोऽनंतइत्यमरः ॥ अनंतसंज्ञकोऽपरिच्छिन्नरूपइत्यर्थः ॥ मूर्तिविशेषोवा ॥ यस्यव्रतमनंतव्रतमित्युच्यतेलोके ॥ अलक्ष्यसंज्ञकइतिकेचित् ॥ नन्वेकमेवाद्वितीयमित्यादिश्रुतेरखंडैकरसत्वावगमात्कथंतस्यनानारूपत्वंमाययेत्याह ॥ एकोपीति ॥ माययेतिशेषः ॥ अनंततांनानारूपताम् ॥ रूप्यतेऽनेनेतिरूपमज्ञानंतस्यभेदैःकार्यैरित्यर्थः ॥ ६ ॥ वासुदेवादिनामपंचकंपंचभिःश्लोकैर्निरुक्तं देवेष्वित्यादिना ॥ देवेषुदेवानामितिचोपलक्षणम् ॥ तथाचायमर्थः ॥ सर्वेषुयोनित्यंवसत्यंतर्यामिरूपेणसर्वेषांयोवसतिर्वसत्यस्यांसर्वमितिवसतिरधिष्ठानंसवासुदेवइत्यन्वयः ॥ कथंतथात्वंतत्राह ॥ यद्यस्माद्वासयत्यज्ञान्संसारेष्वितिवासनाऽविद्यातद्वशाद्दीव्येद्रच्छेदंतर्यामितयाऽधिष्ठानतयाचव्याप्नुयादित्यर्थः ॥ तथाचवैष्णवे ॥ सर्वत्रासौसमस्तंचवसत्यत्रेतिवैयतः ॥ ततःसवासुदेवेतिविद्वद्भिःपरिपठ्यतइति ॥ ७ ॥ सर्वव्यापनंशीलंस्वभावोयस्यास्तितस्मिन्सर्वव्यापनशीलिनि ॥ शालिनीतिकेचित् ॥ सर्वव्यापीविराजतइतिचान्यत्र ॥ ८ ॥ हृषीकाणामिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रियाणाम् ॥ ९ ॥ नच्यवंतेननश्यंति ॥ सांद्रानंदब्रह्मरूपेणविराजमानत्वात् ॥ भुशुंडादिवद्वा ॥ १० ॥ भृत्याभरणेन ॥ भूत्येतिपाठेऐश्वर्येणेत्यर्थः ॥ स्वरूपसंपत्त्याकैवल्यप्राप्त्याच ॥ अखिलंचराचरमित्यन्वयः ॥ ११ ॥ ईक्षणेनेत्रे ॥ नान्यदित्युपपादयतः ॥ हियस्मान्नियमतःपुंडरीकाक्षएवनिरीक्ष्योनितरांद्रष्टुंयोग्योऽतोनान्यइति ॥ १२ ॥ मुकुंदेत्यादिसंबोधनंविनातस्य ध्रुवस्यशब्दग्रहौ ॥ अपिःसमुच्चये ॥ नकेवलमीक्षणेअन्यन्ननिरीक्षेतेकर्णावप्यन्यशब्दग्रहौनजातावित्यर्थः ॥ १३ ॥ गोविंदचरणयोरर्थेऽर्चागोविंदचरणार्थार्चातां तस्यविष्णोःप्रियमन्यत्कर्मच विनातस्यध्रुवस्यकरौहस्तौकर्मकरौन ॥ एतद्विलक्षणान्यकर्मकरौनभवतइत्यर्थः ॥ १४ ॥ निर्द्वंद्वेति ॥ हरेर्निर्द्वंद्वं निर्गतंद्वंद्वमाध्यात्मिकादिदुःखत्रयंयस्ययस्मादितिवातत्तथातच्चतच्चरणद्वंद्वंचत न्निर्द्वंद्वचरणद्वंद्वं तन्मनस्तस्यध्रुवस्यमनोमनुते ॥ विजातीयप्रत्ययतिरस्कारिणसर्वदुःखनिवारकभगवच्चरणकमलयुगलमेवनिरंतरंभावयतीत्यर्थः ॥ किंकृत्वा ॥ अन्यदन्यविषयंसर्वंमननंचिंतनंहित्वा ॥ अतएवनिश्चलंस्थैर्यमवाप ॥ तन्मनःसध्रुव इतिशेषइतिवा ॥ १५ ॥ चरणाविति ॥ तस्यध्रुवस्यचरणौनारायणस्यांगणमजिरंहित्वाऽन्यत्रनोचरतोनगच्छतइत्यन्वयः ॥ कथंभूतौचरणौ ॥

नच्यवंतेपियद्भक्तामहतिप्रलयेसति ॥ अतोऽच्युतोऽखिलेलोकेसएकःसर्वगोऽव्ययः ॥ १० ॥ इदंचराचरंविश्वंयोबभारस्वलीलया ॥ भृत्यास्वरूपसं पत्त्यासोऽत्रविश्वंभरोऽखिलम् ॥ ११ ॥ तस्येक्षणेसमीक्षेतेनान्यद्विष्णुपदादृते ॥ निरीक्ष्यःपुंडरीकाक्षोनान्योनियमतोह्यतः ॥ १२ ॥ नान्यशब्दग्रहौ तस्यजातौशब्दग्रहावपि ॥ विनामुकुंदगोविंददामोदरचतुर्भुज ॥ १३ ॥ गोविंदचरणार्थार्चांतत्प्रियंकर्मवैविना ॥ शंखचक्रांकितौतस्यनान्यकर्मकरौकरौ ॥ १४ ॥ निर्द्वंद्वचरणद्वंद्वंतन्मनोमनुतेहरेः ॥ हित्वान्यन्मननंसर्वंनिश्चलत्वमवापह ॥ १५ ॥ चरणौविष्णुशरणौहित्वानारायणांगणम् ॥ तस्यनो चरतोन्यत्रचरतोविपुलंतपः ॥ १६ ॥ वाणीप्रमाणीक्रियतेगोविंदगुणवर्णने ॥ जोषंसमासतातेनमहासारंतपस्यता ॥ १७ ॥ नितांतंकमलाकांतनामधे यसुधारसम् ॥ रसयंतीनरसनातस्यान्यरससस्पृहा ॥ १८ ॥ श्रीमुकुंदपदद्वंद्वपद्मामोदप्रमोदितम् ॥ गंधांतरंनतद्घ्राणंपरिजिघ्रत्यशीघ्रगम् ॥ १९ ॥ त्वगिंद्रियंमधुरिपोःपरिस्पृश्यपदद्वयम् ॥ सर्वस्पर्शसुखंप्रापतस्यभूजानिजन्मनः ॥ २० ॥

विष्णुःशरणंरक्षितातययोस्तौ ॥ युक्तंचैतद्योहियच्छरणोभवतिसतंविहायान्यत्रनगच्छतीति ॥ कथंभूतस्यतस्य ॥ विपुलंतपश्चरतःकुर्वतइत्यर्थः ॥ १६ ॥ वाणीति ॥ तेनध्रुवेणगोविंदगुण वर्णने ॥ गुणेत्युपलक्षणम् ॥ गोविंदस्यगुणकर्मादिकथनेवर्णनेवाणीप्रमाणीक्रियते ॥ तस्यवागिंद्रियंभगवद्गुणकर्मादिकमेववक्तीत्यर्थः ॥ कीदृशेन ॥ जोषंसमासताविष्णोःसेवनंकुर्व तासीतिंप्राप्नुवतावा ॥ पुनःकीदृशेन ॥ महासारंमहाधैर्ययथास्यात्तथातपस्यतातपःकुर्वता ॥ अस्मिन्पद्येतृतीयेचरणेविष्णुरेवश्रुतस्तेनेतिकचित्पाठः ॥ सचनान्यशब्दग्रहावित्यनेनपौ नरुक्त्यात्याज्यः ॥ १७ ॥ नितांतेति ॥ तस्य ध्रुवस्यरसनारसनेंद्रियंनितांतंकेवलंकमलाकांतस्यनामधेयरूपंसुधारसंरसयंतीआस्वादयंतीअन्यरसेषुसस्पृहास्पृहायुक्तानभवतीत्यर्थः ॥ ॥ १८ ॥ श्रीति ॥ तद्घ्राणं तस्यघ्राणेंद्रियंश्रीमुकुंदस्यपादयुगलयोर्यआमोदस्तेनप्रमोदितमतिशयेनानंदितंसद्गंधांतरंनपरिजिघ्रतिगृह्णाति ॥ अशीघ्रगंस्थिरम् ॥ चरणकमलामोदेनप रिपूरितत्वात् ॥ १९ ॥ त्वगिति ॥ तस्यध्रुवस्यत्वगिंद्रियंमधुरिपोःपदद्वयंपरिस्पृश्यस्पृष्ट्वासर्वेषांस्रक्चंदनादीनांविषयाणांस्पर्शसुखंस्पर्शजन्यंसुखंप्रापप्राप्तमित्यर्थः ॥ कथंभूतस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूरेवजायायस्यसभूजानिरुत्तानपादस्तस्माज्जन्मयस्यतस्य ॥ २० ॥ उपसंहरति ॥ शब्देति ॥ संप्राप्यसम्यक्प्राप्य ॥ तंप्राप्येतिक्वचित् ॥ तत्रतंशब्दादीनांविषयाणामाधारमधिष्ठानं प्राप्येत्यन्वयः ॥ २१ ॥ लुप्तानीति ॥ चन्द्रादीनांतेजांसिलुप्तान्यभिभूतानिनष्टानीत्यन्वयः ॥ कदेत्याकांक्षायामाह ॥ तस्यध्रुवस्यतपएवतपनःसूर्यस्तस्योदयेसति ॥ कथंभूते ॥ प्रदीपितंसंक्षुब्धंजगत्रयंयेनतस्मिन् ॥ २२ ॥ समीरणोवायुः ॥ नैर्ऋतोनिर्ऋतिदिगधिष्ठाता ॥ निर्ऋतीतिपाठेउपचारात्सएवार्थः ॥ स्वपदेशंकाऽस्माकंपदंग्रहीष्यतीत्येवंरूपाजातायेषांतेस्वपदशंकिताः ॥ २३ ॥ विमानैश्चरंतीतिवैमानिकाः ॥ समुत्रेसुरतिशयेनत्रासंप्रापुः॥स्वाधिकारे स्वाधिकारनिमित्तेएधितोवर्धितआधिर्मानसीव्यथायेषांतेतथा ॥२४॥ मिनोतिप्रक्षिपति ॥ २९ ॥ अहोइति ॥ अहोआश्चर्ये ॥ तस्यध्रुवस्यांगसंगीनियानिजलानियमुनादिगतानिअन्यत्रान्यत्रस्थितान्यपीतिशेषः ॥ तानिसर्वाणिजलानिजाड्यंपदार्थांतरसंसर्गनिमित्तंकालुष्यंविहायरसवंतिपदस्थानिचस्वस्वरूपाणिनैसर्गिकस्वभावानीतियावत् ॥ सदच्छानीतिक्वचित् ॥ स्युर्भवेयुरित्यर्थः ॥ स्फुरंत्यन्यत्रेतिक्वचित् ॥ जडस्वभावान्यपिजाड्यंत्यजंतिअन्येषांकावार्तेतिपूर्वस्यापेरर्थः ॥ तद्भयादित्यत्रतच्छब्दोध्रुवपरस्तत्तपः

शब्दादिविषयाधारंसारंदामोदरंपरम् ॥ ध्रुवेंद्रियाणिसंप्राप्यकृतार्थान्यभवंस्तदा ॥ २१ ॥ लुप्तानिसर्वतेजांसितत्तपस्तपनोदये ॥ चंद्रसूर्यानलर्क्षाणां प्रदीपितजगत्रये ॥ २२ ॥ इंद्रचंद्राग्निवरुणसमीरणधनाधिपाः ॥ यमनैर्ऋतमुख्याश्चजाताःस्वपदशंकिताः ॥ २३ ॥ वैमानिकास्तथाऽन्येपिवसुमुख्यादिवौकसः ॥ ततोध्रुवात्समुत्रेसुःस्वाधिकारैधिताधयः ॥२४॥ यत्रयत्रध्रुवःपादंमिनोतिपृथिवीतले ॥ धरातस्यभराक्रांताविनमेत्तत्रतत्रवै ॥२५॥ अहोतदंगसंगीनित्यक्त्वाजाड्यंजलान्यपि ॥ रसवंतिपदस्थानिस्फुरंत्यन्यत्रतद्भयात् ॥ २६ ॥ यावंतिविष्वक्तेजांसिसिद्धरूपगुणानिच ॥ नेत्रातिथीनितावंतितत्तपस्तेजसाऽभवन् ॥ २७ ॥ अहोनिजगुणस्पर्शःसततंमातरिश्वना ॥ दूरदेशांतरस्थोपितत्त्वचोविषयीकृतः ॥ २८ ॥ व्योम्नापिशब्दगुणिनाध्रुवाराधनबुद्धिना ॥ शब्दजातस्त्वशेषोपितत्कर्णशरणीकृतः ॥२९॥ आराधितोऽनुदिवसंसंभूतैरपिपंचभिः ॥ तपएवपरंमेनेगोविंदार्पितमानसः ॥ ३० ॥ कौस्तुभोद्भासितहृदःपीतकौशेयवाससः ॥ ध्यानात्तेजोमयंविश्वंतेनैक्षिनृपसूनुना ॥ ३१ ॥

परोवा ॥ अथवातदंगसंगीनितच्छरीरस्थितानिपश्वीकृतानिजलानिअन्यत्रापिस्थितानियानिजलानीति ॥ शेषंसमानम् ॥ २६ ॥ यावंतीति ॥ तत्तपस्तेजसा तस्यध्रुवस्यतपसउत्थिततेजसातपोरूपतेजसावाविष्वक्सर्वत्रयावंतितेजांसिसिद्धरूपगुणानिच सिद्धानांयानिरूपाणिगुणाश्चतानिच ॥ षंढत्वमार्षम् ॥ सिद्धानांरूपाणिगुणाश्चप्रकाश्यत्वेनवर्ततेयेषुतानितेजांसितथेतिवा ॥ तावंति नेत्रातिथीनिनेत्रगोचराण्यभवन् ॥ तस्यध्रुवस्येतिशेषः॥२७॥अहोनिजेति ॥ अहोआश्चर्ये निजगुणश्चासौस्पर्शश्चेतिनिजगुणस्पर्शःसमातरिश्वनावायुनासततंतस्यध्रुवस्यत्वचस्त्वगिंद्रियस्यविषयीकृतोगोचरीकृतइत्यर्थः ॥ कथंभूतः ॥ दूरदेशांतरस्थोपियत्रतत्रस्थितोऽशेषःस्पर्शजातोपीत्यर्थः ॥२८॥ व्योम्नेति ॥ ध्रुवस्याराधनेबुद्धिर्यस्यसतथातेनव्योम्नाकाशेनापिशब्दगुणिनाशब्दगुणवताअशेषः शब्दजातोपितत्कर्णशरणीकृतः ॥ ध्रुवस्यश्रोत्रेंद्रियाश्रयीकृतइत्यर्थः ॥ अपिःसमुच्चयार्थे ॥ तुःसंभ्रमे ॥ २९ ॥ अनुक्तंसंगृह्णन्नुपसंहरति ॥ आराधितइति ॥ सध्रुवः ॥ अपिशब्दादन्यैरपि ॥ ३० ॥ ऐक्षिदृष्टम् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरुत्वताइन्द्रेण ॥ चिन्तामेवाह ॥ चेद्यदिध्रुवोमत्पदमाकांक्षिष्यदाकांक्षितवान्स्यात्तदाध्रुवंनिश्चितमहरिष्यद्धृतवान्स्यादित्यर्थः ॥ ३२ ॥ नियंतुंनिराकर्तुंनाशयितुमितियावत् ॥ अप्सरोवर्गोऽप्सरःसमूहः ॥ यूनितरुणे ॥ ३३ ॥ ३४ ॥ भूतानामालिंपंक्तिश्रेणीमित्यर्थः ॥ भूतान्निहिभीषणाकारानितिकचित् ॥ तद्धियेतस्यध्रुवस्यभयाय ॥ ३५ ॥ ३६ ॥ उष्ट्रस्येवलंबालंबायमानाशिरोधराग्रीवायस्यसः ॥ दुर्दर्शादशनायस्यसः ॥ पाठांतरेक्रियाविशेषणम् ॥ ३७ ॥ द्विपोहस्ती ॥ ३८ ॥ रयाद्वेगात् ॥ तुशब्दाद्रुधिरंचपिबन् ॥ ३९॥ महोक्षोमहावृषः ॥ ४० ॥

मरुत्वंतातिमहतीचिंताऽभात्तत्तपोभयात् ॥ मत्पदंचेदकांक्षिष्यदहरिष्यद्ध्रुवंध्रुवः ॥ ३२ ॥ समर्थस्त्वप्सरोवर्गोनियंतुंयमिनांयमान् ॥ सतुयूनिप्रभवतिनात्रबालेकरोमिकिम् ॥ ३३ ॥ तपस्विनांतपोहंतुंद्वौमत्साहाय्यकारिणौ ॥ कामक्रोधौनतावस्मिन्प्रभवेतांशिशौध्रुवे ॥ ३४ ॥ एकएवकिलोपायोबालेमेप्रभविष्यति ॥ भूतालिंभीषणाकारांप्रहिणोमिहितद्धिये ॥ ३५ ॥ बालत्वाद्भीषितोभूतैस्तपस्त्यक्ष्यत्यसौध्रुवम् ॥ इतिनिश्चित्यभूतालिंप्रेषयामासवासवः ॥ ३६ ॥ भल्लूकाकारसर्वांगउष्ट्रलंबशिरोधरः ॥ कश्चिद्दुर्दर्शदशनस्त्वभ्यधावत्तमर्भकम् ॥ ३७ ॥ तंव्याघ्रवदनःकश्चिद्व्यादायविकटाननम् ॥ द्विपोच्चदेहसंस्थानोमुहुर्गर्जन्समभ्यगात् ॥ ३८ ॥ रयात्तुमांसकंभुंजन्कश्चिद्विकटदंष्ट्रकः ॥ रोषात्तमभिदुद्रावदष्ट्वासंतर्जयन्निव ॥ ३९ ॥ अतितीक्ष्णैर्विषाणाग्रैस्तटानुच्चान्विदारयन् ॥ खुराग्रैर्दलयन्भूमिंमहोक्षोऽभिजगर्जतम् ॥ ४० ॥ कश्चिद्विपन्नगीभूयफटाटोपभयानकः ॥ अतिलोलद्विरसनःपुत्स्फूर्जनिकषाचितम् ॥ ४१ ॥ कश्चिच्चमहिषाकारःक्षिपन्श्रृंगाग्रतोगिरीन् ॥ लांगूलताडितधरःश्वसन्वेगात्तमाप्तवान् ॥ ४२ ॥ कश्चिद्दावानलालीढखर्जूरद्रुमसन्निभम् ॥ बिभ्रद्दूरूद्ध्वयंभूतोव्यात्तास्यस्तमभीषयत् ॥ ४३ ॥ मौलिजैरभ्रसंघर्षंकुर्वन्दीर्घकृशोदरः ॥ निमग्नपिंगनयनःकश्चिद्भीपयतिस्मतम् ॥ ४४ ॥ कृपाणपाणिर्भग्नास्योवामहस्तकपालधृत् ॥ प्रचंडंक्ष्वेडयन्कश्चिदभ्यधावत्तमर्भकम् ॥ ४५ ॥ विशालसालमादायकुर्वन्किलकिलारवम् ॥ कश्चित्तमभितोयातिकालोदंडधरोयथा ॥ ४६ ॥ तमःसंकेतसदनंव्याघ्रंवैवदनंमहत् ॥ कृतांतकंदराकारंबिभ्रत्कश्चित्तमभ्यगात् ॥ ४७ ॥ उलूकाकारतांधृत्वाफूत्कारैरतिदारुणैः ॥ हृदयाकंपनैःकश्चिद्भीपयामासतंध्रुवम् ॥ ४८ ॥

पन्नगीभूयसर्पोभूत्वा ॥ पन्नगोऽतीवेतिकचित् ॥ फटायाःफणायाआटोपोविस्तारस्तेनभयानकः ॥ अतिलोलद्विरसनोऽतिचंचलद्विजिह्वः ॥ पुत्स्फूर्जजगर्जफूत्कारंकृतवानित्यर्थः ॥ निकषासमीपे ॥ ॥ ४१ ॥ लांगूलताडितधरःपुच्छघातिताववनिः ॥ ४२ ॥ आलीढोदग्धः ॥ भूतोदेवयोनिभेदः ॥ भीतइतिपाठेभयजनकइत्यर्थः ॥ ४३ ॥ ४४ ॥ कृपाणपाणिःखड्गहस्तः ॥ प्रचंडंयथास्यात्तथाक्ष्वेडयन्क्ष्वेडांकुर्वन्खड्गमार्गंचरन्नित्यर्थः ॥ ४५ ॥ ४६ ॥ तमइति ॥ व्याघ्रंव्याघ्रमुखमिव ॥ व्यात्तमितिकचित् ॥ कृतांतकंदराकारंयममुखांतर्बिलाकारम् ॥ ४७ ॥ उलूकाकारतांपे

चकवेषम् ॥ ४८ ॥ मृणालवत्पद्मनालवत् ॥ ४९ ॥ ५० ॥ ५१ ॥ वेतालीभूतविशेषः ॥ भंक्त्वाप्रविभज्य ॥ मुक्तेतिकचित् ॥ ५२ ॥ वक्षोघातमुरस्ताडंयथास्यात्तथा ॥ ५३ ॥ कारुण्य पूर्णंकरुणाव्याप्तंवात्सल्यंवत्सलभावंस्निग्धत्वमितिवाआतन्वतीविस्तारयंती ॥ ५४ ॥ बतेतिखेदेसंबोधनेवा ॥ ५५ ॥ ५६ ॥ ५७ ॥ दुनोषिपरितप्यसे ॥ दूनास्मिपरितप्तास्मि ॥ ॥ ५८ ॥ त्वात्वाम् ॥ वियोगिनीत्वद्वियोगवती ॥ ५९ ॥ निद्रेति ॥ अहंमंदभाग्यायस्मान्मेममसर्वथानंदियत्तवाननंतत्स्वप्नेपिनविलोकयेपश्यामि ॥ स्वप्नोपितावन्नास्तीत्याह ॥ निद्रेति ॥ निद्रादरिद्रेनिद्रारहितेनयनेयस्याःसाहमिति ॥ ६० ॥ त्वदिति ॥ हेध्रुवत्वदाननप्रतिनिधिस्तवमुखप्रतिबिंबकल्पश्चंद्रउदित्वरोप्युदयशीलोपितापंत्यक्तुकामयामयानालोकिनावलोकितः ॥ तत्र

यक्षिणीकाचिदानीयरुदंतंकस्यचिच्छिशुम् ॥ अपिबद्रुधिरंकोष्ठाच्चखादास्थिमृणालवत् ॥ ४९ ॥ पिपासिताद्यरुधिरंतेपिपास्याम्यहंध्रुव ॥ यथा स्यबालस्यतथाचर्वित्वास्थीनिवादिनी ॥ ५० ॥ आनीयतृणदारूणिपरिस्तीर्यसमंततः ॥ दावाग्निंज्वालयामासकाचिद्वात्याविवर्धितम् ॥ ५१ ॥ वेतालीरूपमास्थायभंक्त्वाकाचित्तरून्गिरीन् ॥ रुरोधगगनाध्वानंकंपयंतीचतंभृशम् ॥ ५२ ॥ अन्यासुनीतिरूपेणतमभिप्रेक्ष्यदूरतः ॥ रुरोदातीवदुः खार्तावक्षोघातंमुहुर्मुहुः ॥ ५३ ॥ उवाचचवचश्चाटुबहुमायाविनिर्मितम् ॥ कारुण्यपूर्णवात्सल्यमतीवातन्वतीसती ॥ ५४ ॥ त्वदेकशरणांवत्सबतमृत्यु र्जिघांसति ॥ रक्षरक्षगतासुंमांशरणागतवत्सल ॥ ५५ ॥ प्रतिग्रामंप्रतिपुरंप्रत्यध्वंप्रतिकाननम् ॥ प्रत्याश्रमंप्रतिगिरिश्रांतात्वद्वीक्षणातुरा ॥ ५६ ॥ यदाप्रभृतिरेबालनिरगात्तपसेभवान् ॥ तदेवदिनमारभ्यनिर्गताऽहंत्वदीक्षणे ॥ ५७ ॥ तैस्तैःसपत्नीदुर्वाक्यैर्दुनोषित्वंयथार्भक ॥ तथाऽहमपिदूनास्मि नितरांतद्वचोऽग्निना ॥ ५८ ॥ ननिद्रामिनजागर्मिनाश्नामिनपिबाम्यहम् ॥ ध्यायामिकेवलंत्वाऽहंयोगिनीववियोगिनी ॥५९॥ निद्रादरिद्रनयनास्वप्ने पिनतवाननम् ॥ आनंदिसर्वथायन्मेमंदभाग्याविलोकये ॥ ६० ॥ त्वदाननप्रतिनिधिर्विधुर्विधुरयामया ॥ उदित्वरोपिनालोकितापंवैत्यक्तुका मया ॥ ६१ ॥ त्वदालापसमालापंकलयन्किलकाकलीम् ॥ कोकिलोपिमयाकर्णिनालकाकीर्णकर्णया ॥६२॥ त्वदंगसंगमधुरोध्रुवधूपितयामया ॥ नानिलोपिमयालिंगिक्तचिद्विश्रांतयाभृशम् ॥ ६३ ॥

हेतुर्विधुरयात्वद्वियोगिन्येत्यर्थः ॥ ६१ ॥ त्वदालापेति ॥ हेपुत्रकोकिलोपिमयानाकर्णिनंश्रुतः ॥ कीदृशः ॥ त्वदालापसमालापंयथास्यात्तथा ॥ पाठांतरेकोकिलविशेषणम् ॥ किलनि श्चितम् ॥ तथाकाकलींमधुरध्वनिंकलयन्नुच्चारयन् ॥ अनाकर्णनेहेतुंदर्शयंत्यात्मानंविशिनष्टि ॥ अलकाकीर्णकर्णयेति ॥ :अलकैःशोकादग्रथितैराकीर्णौकर्णौयस्याःसातथातया ॥ ६२ ॥ त्वदंगेति ॥ हेध्रुवानिलोपिमयाक्वचित्कदाचिन्नालिंगितोनाभिष्वक्तः ॥ कथंभूतः ॥ त्वदंगसंगमधुरस्त्वदवयवसंबंधाच्छीतलः त्वदंगसंगवत्कोमलइतिवा ॥ मयाकथंभूतया ॥ भृशमत्यर्थंविश्रांत याविशेषेणसंतप्तयाविगतश्रांतयासत्यावेत्यर्थः ॥ तत्रहेतुंवदंतीस्वात्मानंविशिनष्टि ॥ माशब्दस्यमायावाचकत्वान्मयामाययापुत्रस्नेहमय्याकृत्वाधूपितयात्वद्वियोगक्षुभितयेत्यर्थः ॥ धूपितमायये

CC-0. In Public Domain. Digitization by eGangotri

तिपाठेपुत्रस्नेहरूपेणोद्बुद्धमाययेत्यर्थः ॥ ६३ ॥ ६४ ॥ अश्रुवंध्रुवेणत्वयारहितम् ॥ अंधयष्टितामंधलकुटताम् ॥ ६५ ॥ परुषंतपःपरुषांगैःपुरुषैःसाध्यंक तवकोमलान्यमून्यंगानिकेत्यर्थः ॥ ॥ ६६ ॥ तपसाकीदृशेन ॥ अनेनसानविद्यतेएनः पापंयस्मात्तेनसर्वपापनिवर्तकेनेत्यर्थः ॥ ६७ ॥ सवयःशिशुभिःसमानवयस्कैर्बालैः ॥ ६८ ॥ कौमारंवयआसाद्येत्यन्वयः ॥ अभिध्यानशीलिनाऽनुसंधानशीलिनेत्यर्थः ॥ अध्ययनशीलिनेतिकश्चित् ॥ पारदृश्वनापारगेन ॥ ६९ ॥ चतुरंदक्षंयौवनम् ॥ यद्वा कौमारपौगंडकिशोरापेक्षयाचतुरंचतुर्थंवयइत्यर्थः ॥ अलोपआर्षः ॥

केदेशाःकाश्चसरितःकेशैलास्त्वत्कृतेध्रुव ॥ मयाचरणचारिण्याराजपत्न्यानलंघिताः ॥ ६४ ॥ अध्रुवंसर्वमेवैतत्पश्यंत्यंधीकृतास्म्यहम् ॥ धात्रींत्रायस्वमांपुत्रप्राप्यत्वंमेंऽधयष्टिताम् ॥ ६५ ॥ मृदुलानितवांगानिक्वेमानिक्वतपस्त्विदम् ॥ परुषंपुरुषैःसाध्यंपरुषांगैर्नरर्षभ ॥ ६६ ॥ अनेनतपसावत्सत्वयाऽऽप्यंकिमनेनसा ॥ धराधीशतनूजत्वादधिकंतद्वदाधुना ॥ ६७ ॥ अनेनवयसाबालखेलनीयंत्वयाऽनिशम् ॥ बालक्रीडनकैरन्यैःसवयःशिशुभिःसमम् ॥ ६८ ॥ ततःकौमारमासाद्यवयोऽभिध्यानशीलिना ॥ भवतासर्वविद्यानांभाव्यंवैपारदृश्वना ॥ ६९ ॥ वयोथचतुरंप्राप्ययोषास्रक्चंदनादिकान् ॥ निर्वेक्ष्यसिबहून्भोगानिंद्रियार्थान्कृतार्थयन् ॥ ७० ॥ उत्पाद्याथबहून्पुत्रान्गुणिनोधर्मवत्सलान् ॥ परिसंक्रामितश्रीकस्तेष्वथोत्वंतपश्चर ॥ ७१ ॥ इदानीमेवतपसिबाल्येवयसिकःश्रमः ॥ पादांगुष्ठकरीषाग्निःकदामौलिमवाप्स्यति ॥ ७२ ॥ विपक्षपरिभूतेनहृतमानेनकेनचित् ॥ परिभ्रष्टश्रियावापितत्तव्यंतेषुकोभवान् ॥ ७३ ॥ हृतमानेनतत्तव्यंनिशम्येतिवचोध्रुवः ॥ दीर्घमुष्णंहिनिःश्वस्यपुनर्दध्यौहरिंहृदि ॥ ७४ ॥ जनयित्रीमनाभाष्यभूतभीतिंविहायच ॥ ध्रुवोऽच्युतध्यानपरःपुनरेवबभूवह ॥ ७५ ॥ सापिभूतावलीभीतिंबहुभीषणभूषणा ॥ दर्शयंतीतमभितोऽद्राक्षीच्चक्रंसुदर्शनम् ॥ ७६ ॥ परितःपरिवेषाभंसूर्यस्येवोच्चैःस्फुरत्प्रभम् ॥ रक्षणायचरक्षोभ्यस्तस्याधोक्षजनिर्मितम् ॥ ७७ ॥ भूतावलीतमालोक्यस्फुरच्चक्रंसुदर्शनम् ॥ ज्वालामालाकुलंतीव्रंरक्षंतंपरितोध्रुवम् ॥ ७८ ॥ अतीवनिष्कंपहृदंगोविंदार्पितचेतसम् ॥ तपोंकुरमिवोद्भिद्यमेदिनींसमुदित्वरम् ॥ ७९ ॥ सापिप्रत्युतभीतातंध्रुवंध्रुवविनिश्चयम् ॥ नमस्कृत्ययथायातंयाताव्यर्थमनोरथा ॥ ८० ॥ गर्जत्कादंबिनीजालंव्योम्नीवैव्याकुलंयथा ॥ वृथाभवतिसंप्राप्यमनागनिललोलताम् ॥ ८१ ॥ अथजंभारिणासार्धंभीताःसर्वेदिवौकसः ॥ संमंत्र्यत्वरिताजग्मुर्ब्रह्माणंशरणंद्विज ॥ ८२ ॥ नत्वाविज्ञापयामासुःपरिष्टुत्यपितामहम् ॥ वचोऽवसरमालोक्यपृष्टागमनकारणाः ॥ ८३ ॥

तथाचोक्तम् ॥ कौमारंपंचमाब्दांतंपौगंडंदशमावधि ॥ आपंचदशात्कैशोरंयौवनंतुततःपरमिति ॥ निर्वेक्ष्यसिभोक्ष्यसि ॥ इंद्रियार्थान्विषयान् ॥ ७० ॥ ७१ ॥ इदानीमिति ॥ इदानीमेवबाल्येतपसिकःश्रमः ॥ बाल्यमारभ्यवार्धक्यपर्यंतंतपःकरणेऽनंतश्रमइत्यर्थः ॥ अनन्तश्रमेदृष्टांतः ॥ पादांगुष्ठेति ॥ करीषाग्निर्गोमयाग्निः ॥ मौलिंमस्तकम् ॥ ७२ ॥ ७३ ॥७४॥७५॥७६॥७७॥ ७८ ॥ समुदित्वरंसम्यगुत्थितम् ॥ ७९ ॥ साभूतावली ॥ आस्तांतावन्मोहकर्तृताप्रत्युतभीतेत्यर्थः ॥ ८० ॥ वैप्रसिद्धम् ॥ व्याकुलंसत् व्याकुलंयदीतिकश्चित् ॥ ८१ ॥ जंभारिणाइन्द्रेण ॥ ८२ ॥ ८३ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ८४ ॥ ८५ ॥ सुरुच्याःकुचेष्टितंज्ञात्वाविहस्य ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ पटलींसमूहम् ॥ इंद्रनीलेत्यनेनद्वयेनकृष्णउत्प्रेक्ष्यते ॥ यद्वा सामान्याकारेणैवपर्यालोकनमत्रोच्यते ॥ ९३ ॥ कामिवेत्याकांक्षायामाह ॥ प्रत्यग्रेति ॥ प्रत्यग्रंविकसंतिअत्यन्तप्रफुल्लानियान्युत्पलानितेषांनिकुरंबकैःसमूहैःप्रफुल्लितांप्रकर्षेणविकसिताम् ॥ समन्तात्सर्वतः ॥ रोदसीद्यावाभूमीतेएवसरसीसरस्तामिव ॥९४॥ कटाक्षितंविषयीकृतमित्यर्थः ॥ ९५ ॥ एवंसामान्यतउत्प्रेक्ष्यविशेषतःश्रीकृष्णंदृष्टवानित्याह ॥ प्रोद्यदित्यादिना ॥ कादंबिनीमेघमालाप्रस्फुरन्मेघमालानामन्तर्यद्विद्युद्दामतडिन्मालातत्समानारुग्दीप्तिर्यस्यसः ॥ तत्रकादंबिन्याशरीरसाम्यम् विद्युद्दाम्नामालायाःसाम्यमिति ॥ तेनध्रुवेणनेत्रातिथीकृतश्चक्षुर्गोचरीकृतः ॥ ९६ ॥

॥ देवाऊचुः ॥ ॥ धातरुत्तानपादस्यतनयेनसुवर्चसा ॥ तपतातापिताःसर्वेत्रिलोकीतलवासिनः ॥ ८४ ॥ सम्यक्संविद्महेतातध्रुवस्यनमनीषितम् ॥ पदंपरिजिहीर्षुःसकस्यास्मासुमहातपाः ॥ ८५ ॥ इतिविज्ञापितोदेवैर्विहस्यचतुराननः ॥ प्रत्युवाचाथतान्सर्वान्ध्रुवतोभीतमानसान् ॥ ८६ ॥ ॥ ब्रह्मोवाच ॥ ॥ नभेतव्यंसुरास्तस्माद्ध्रुवाद्ध्रुवपदैषिणः ॥ व्रजंतुविज्वराःसर्वेनसवःपदमिच्छति ॥ ८७ ॥ नतस्माद्भगवद्भक्ताद्भेतव्यंकेनचित्कचित् ॥ निश्चितंविष्णुभक्तायेनतेस्युःपरतापिनः ॥ ८८ ॥ आराध्यविष्णुंदेवेशंलब्ध्वातस्मात्स्वकांक्षितम् ॥ भवतामपिसर्वेषांपदानिस्थिरयिष्यति ॥ ८९ ॥ निशम्येतिचगीर्वाणाःप्रणीतंब्रह्मणोवचः ॥ प्रणिपत्यस्वधिष्ण्यानिप्रहृष्टाःपरिवव्रजुः ॥ ९० ॥ अथनारायणोदेवस्तंदृष्ट्वादृढमानसम् ॥ अनन्यशरणंबालंगत्वाताक्ष्यरथोऽब्रवीत् ॥ ९१ ॥ श्रीविष्णुरुवाच ॥ ॥ प्रसन्नोस्मिमहाभागवरंवरयसुव्रत ॥ तपसोऽस्मान्निवर्तस्वचिरंखिन्नोसिबालक ॥ ९२ ॥ वचोऽमृतंसमाकर्ण्यपर्युन्मील्यविलोचने ॥ इंद्रनीलमणिज्योतिःपटलींपर्यलोकयत् ॥ ९३ ॥ प्रत्यग्रविकसन्नीलोत्पलानांनिकुरंबकैः ॥ प्रोत्फुल्लितांसमंताच्चरोदसीसरसीमिव ॥ ९४ ॥ लक्ष्मीदेवीकटाक्षौघैःकटाक्षितमिवाखिलम् ॥ ध्रुवस्तदानिरैक्षिष्टद्यावाभूम्योर्यदंतरम् ॥ ९५ ॥ प्रोद्यत्कादंबिनीमध्यविद्युद्दामसमानरुक् ॥ पुरःपीतांबरःकृष्णस्तेननेत्रातिथीकृतः ॥ ९६ ॥ नभोनिकषपाषाणोमेरुकांचनरेखितः ॥ यथातथाध्रुवेणैक्षितदागरुडवाहनः ॥ ९७ ॥ सुनीलगगनंयद्वद्भूषितंतुकलावता ॥ पीतेनवाससायुक्तंसददर्शहरिंतदा ॥ ९८ ॥ दंडवत्प्रणिपत्याथपरितःपरिलुठ्यच ॥ रुरोददृष्ट्वेवचिरंपितरंदुःखितःशिशुः ॥९९॥ नारदेनसनंदेनसनकेनसुसंस्तुतः ॥ अन्यैःसनत्कुमाराद्यैर्योगिभिर्योगिनांवरः ॥१००॥ कारुण्यबाष्पनीरार्द्रपुंडरीकविलोचनः ॥ध्रुवमुत्थापयांचक्रेचक्रीधृत्वाकरेणतम्॥१॥हरिस्तुपरिपस्पर्शतदंगंधूलिधूसरम् ॥ कराभ्यांसुकठोराभ्यांनित्यंशस्त्रपरिग्रहात्॥२॥

नभआकाशएवनिकषपाषाणःस्वर्णपरीक्षापाषाणःसचासौमेरुरेवकांचनंस्वर्णंतेनरेखितोंकितश्चसयथादृश्यतेतथातदागरुडवाहनोहरिर्ध्रुवेणैक्षिदृष्टइत्यर्थः ॥ अत्रनभोनिकषपाषाणसाम्यंकृष्णस्य मेरुकांचनरेखितसाम्यंगरुडस्य ॥ ९७ ॥ सुनीलंसुष्ठुनीलंगगनंयद्वद्यथाकलावताचंद्रेणभूषितंपश्यतिजनस्तथासध्रुवःपीतेनवाससायुक्तंतदाहरिंददर्शेत्यर्थः ॥ पीतवस्त्रेणसादृश्यंत्वत्रचन्द्रस्यनिर्मलत्वेनैवसायंकालेउदयताचन्द्रेणेतिव्याख्येयम् ॥ ९८ ॥ पितरंसर्वस्यजनयितारम् ॥ पितरंदृष्ट्वादुःखितःशिशुर्यथारोदितितथातंदृष्ट्वेतिच ॥ ९९ ॥ १०० ॥ १ ॥ सुकठोराभ्यामतिकठिनाभ्याम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सइतिपाठेसकृष्णः ॥ २ ॥ १०३ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायां विंशतितमोऽध्यायः ॥ २० ॥ ॥ छ. ॥ एकाधिकतमेविंशेऽध्यायेवालोमहामनाः ॥ तुष्टावजगदीशानंलोका
प्तिस्तस्यवर्ण्यते ॥ १॥ सगुणागुणभेदेनतथाविश्वमयात्मना ॥ अस्तावीत्परमानंदंकृष्णंहृष्टमनाध्रुवः ॥ २ ॥ तत्रप्रथमतोब्रह्मरुद्रविष्णुरूपेणप्रणमाति नमोहिरण्यगर्भायेत्यादिना ॥ हिरण्यगर्भाय
हिरण्यवर्णांडाधाराय ॥ सृष्टिविषयंविज्ञानसामर्थ्यंवाहिरण्यंतद्गर्भेयस्यतस्माइतिवा ॥ सर्वसृष्टिविधायिनेआध्यात्मिकाधिभौतिकाधिदैविकसकलप्रपञ्चजनयित्रे ॥ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातः
पतिरेकआसीदितिश्रुतेः ॥ हिरण्यरेतसेहिरण्यंस्वर्णंरेतोवीर्यंयस्यतस्मै ॥ सुहिरण्यप्रदायिने शोभनंहिरण्यंज्ञानंकांचनंवातत्प्रदायिनेदात्रे ॥ सर्वसिद्धिविधायिनइतिपाठेसर्वेषांवृत्तिरूपसिद्धिविधा
यिनइत्यर्थः ॥ १ ॥ नमइति ॥ हरस्वरूपायरुद्ररूपाय ॥ भूतसंहारकारिणेप्राणिमात्रप्रलयकर्त्रे ॥ यद्वा हरत्वमेवव्युत्पादयाति ॥ भूतेति ॥ भूतानांसंहरणाद्धरइत्यर्थः ॥ तत्त्वमस्यादिवा
क्योत्थबुद्धिवृत्त्याभिव्यक्तःसन्नज्ञानंतत्कार्यंचहरतीतिहरस्तत्स्वरूपायेतिवा ॥ भूतेतिपूर्ववत् ॥ महाभूतात्मभूताय महाभूतात्मनापारिणतायाविवर्तमानायेतिवा ॥ यद्वा महाभूतानामात्माऽहंकारस्तद्रूपाय
तत्राधिष्ठातृत्वेनजातायेत्यर्थः ॥ भूतानांपतयेप्राणिमात्राणांनियंत्रे ॥ २ ॥ स्थितिंकरोतीतिस्थितिकृत्तस्मैस्थितिकृतेपालयित्रेइत्यर्थः ॥ विष्णवेव्यापकाय विशतेप्रविशतइतिवा ॥ प्रभविष्णवे

स्पर्शनाद्देवदेवस्यसुसंस्कृतमयीशुभा ॥ वाणीप्रवृत्तातस्यास्यात्तुष्टावाथध्रुवोहरिम् ॥ १०३ ॥ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यांसंहि
तायां चतुर्थे काशीखंडे पूर्वार्द्धे ध्रुवाख्यानेभगवद्दर्शनंनामविंशतितमोऽध्यायः ॥ २० ॥ ॥ ध्रुवउवाच ॥ ॥ नमोहिरण्यगर्भायसर्वसृष्टिविधायिने ॥
हिरण्यरेतसेतुभ्यंसुहिरण्यप्रदायिने ॥ १ ॥ नमोहरस्वरूपायभूतसंहारकारिणे ॥ महाभूतात्मभूतायभूतानांपतयेनमः ॥ २ ॥ नमःस्थितिकृतेतुभ्यं
विष्णवेप्रभविष्णवे ॥ तृष्णाहरायकृष्णायमहाभारसहिष्णवे ॥ ३ ॥ नमोदैत्यमहारण्यदाववह्निस्वरूपिणे ॥ दैत्यद्रुमकुठारायनमस्तेशार्ङ्गपाणये ॥४॥
नमःकौमोदकीव्यग्रकराग्रायगदाधर ॥ महादनुजनाशायनमोनंदकधारिणे ॥ ५ ॥ नमःश्रीपतयेतुभ्यंनमश्चक्रधरायच ॥ धराधरायवाराहरूपिणे
परमात्मने ॥ ६ ॥ नमःकमलहस्तायकमलावल्लभायते ॥ नमोमत्स्यादिरूपायनमःकौस्तुभवक्षसे ॥ ७ ॥ नमोवेदांतवेद्यायनमःश्रीवत्सधारिणे ॥
नमोगुणस्वरूपायगुणिनेगुणवर्जिते ॥ ८ ॥

भवनशीलाय ॥ तृष्णातर्षोविषयवासनावातद्धराय ॥ कृष्णायसदानंदरूपायेतिपुरुषार्थतादर्शिता ॥ कृषिर्भूर्वाचकःशब्दोणश्चनिर्वृतिवाचकः ॥ तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतइतिस्मृतेः ॥
महाभारसहिष्णवेवराहरूपेणकूर्मरूपेणशेषरूपेणवा ॥ ३ ॥ विष्णुत्वंप्रपंचयन्प्रणमाति ॥ नमोदैत्येत्यारभ्यजरायुजेत्यंतेन ॥ दैत्याएवमहारण्यानितेषुदवाग्निस्वरूपिणेवनाग्निरूपाय
दितेःपुत्रादैत्यास्तएवद्रुमास्तेषांकुठारायपरश्वधायच्छेत्रेइत्यर्थः॥शृंगैर्निर्मितंशार्ङ्गंधनुःपाणौयस्यसतस्मै॥४॥ कुमुदाख्यस्यदैत्यस्येयंकौमोदकीगदातस्याधारणार्थंव्यग्राणिउद्युक्तानिकराग्राण्यंगुलयोय
स्यतस्मै ॥ गदांकौमोदकींधरतीतिगदाधरः ॥ महादनुजाःदनोःकश्यपभार्यायाःजाताविप्रचित्तिप्रमुखास्तेषांनाशाय ॥ नन्दकस्तन्नामाखड्गस्तद्धारिणे ॥ ५ ॥ श्रयन्त्येतांयोगिनोऽयोगिनोवेति
श्रीर्ब्रह्मविद्याऽविद्यावातयोःपतयेऽधिष्ठात्रेनियंत्रेवा ॥ चक्रंसुदर्शनन्तद्धराय ॥ धराधरायपृथिव्याश्रयायतदुद्धर्त्रेवासुमेरवइतिवा ॥ मेरुःशिखरिणामहमितिभगवद्वचनात् ॥ वाराहरूपिणेसूकररूप
धारिणे ॥ परमात्मनेपरमेश्वराय ॥ ६ ॥ कमलहस्तायलीलाकमलधारिणे ॥ कमलावल्लभायलक्ष्मीकांताय ॥ मत्स्यादिरूपायमीनादिरूपिणे ॥ आदिशब्देनकूर्मादयोगृह्यंते ॥ कौस्तुभवक्षसेकौ
स्तुभनामामणिर्वक्षसियस्यतस्मै ॥ ७ ॥ वेदांतवेद्यायवेदैकगम्याय ॥ तंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः ॥ श्रीवत्सोभृगुपादलक्ष्मदक्षिणावर्तलोमावलिविशेषोवातद्धारिणे ॥ गुणस्वरूपायस

...Sanskrit University, Balmeeki Campus, Kathmandu

त्वादिरूपाय ॥ गुणिनेजीवात्मने प्रधानात्मनइतिवा ॥ गुणवर्जितेवस्तुतोगुणवर्जिताय ॥ विभक्तिव्यत्ययश्छांदसः ॥ गुणवर्जितइतिवापाठः ॥ ८ ॥ पद्मनाभाय भुवनात्मकंपद्मंनाभौयस्यतस्मै ॥ पंचजननामादैत्यस्तदंगप्रभवःशंखःपांचजन्यस्तद्धराय ॥ वासुदेवः वसुस्तेजोरूपोदेवःप्रकाशात्मावसुश्चासौदेवश्चेतितथावसुदेवएववासुदेवः ॥ स्वार्थेतद्धितः ॥ सर्वत्रासौवसतिसमस्तंवाऽस्मिन्व सतीतिवासुदेवः ॥ तदुक्तंवैष्णवे ॥ सर्वत्रासौसमस्तंचवसत्यत्रेतिवैयतः ॥ ततःसवासुदेवेतिविद्वद्भिःपरिपठ्यतइति ॥ वसुदेवस्यापत्यंवासुदेवइतिवातत्संबोधनंतथा ॥ देवकीनंदनाय दीव्यति सुखात्मनासंसारचक्रेणवाक्रीडतीतिविद्यादेवकपुत्रीवादेवकीतांनंदयतीतितथा ॥ ९ ॥ प्रद्युम्नाय प्रकृष्टंद्युम्नंतेजोयस्यतस्मै ॥ नकेनाप्यवतारादौरुद्धइत्यनिरुद्धस्तस्मै ॥ उभयत्रार्थांतरंस्पष्टम् ॥ कंसविनाशाय स्वकार्यंकंस्तेव्याप्नोतीतिकंसमज्ञानंकंसनामाऽसुरोवातद्विनाशाय ॥ चाणूरमर्दिने चश्चौरोविवेकापहारित्वादप्रबोधस्तेनाणुःसूक्ष्मतरःउःशिवस्तस्यरःप्रकाशोयत्रतच्चाणूरंजगत्तच्चाणू राख्योदैत्योवातन्मर्दिने ॥१०॥ दामबंधनंमायाउदरेंतर्यस्यमायाधिष्ठानत्वात्सतथा ॥ यशोदयाउलूखलेनास्योदरंदाम्नाबद्धंतेनवादामोदरस्तत्संबोधनंतथा ॥ हृषीकाणामिंद्रियाणामीशोनियंता ॥ चंद्रसूर्ययोरश्मयोहृष्टाःकेशायस्यसवाहृषीकेशस्तत्संबोधनंतथाहेहृषीकेश ॥ तथाचोक्तंभारते ॥ सूर्याचंद्रमसोःशश्वदंशुभिःकेशसंज्ञितैः ॥ बोधयन्स्वापयंश्चैवजगदुत्तिष्ठतेपृथक् ॥ बोधनात्स्वाप नाच्चैवजगतोहर्षणंभवेत् ॥ अग्नीषोममयैरेवंकर्मभिःपांडुनंदन ॥ हृषीकेशोहमीशानोवरदोलोकपावनइति ॥ गोविंद हेप्राप्तकामधेन्वैश्वर्य ॥ अच्युत स्वभावान्नप्रच्यवतइत्यच्युतस्तत्संबोधनंतथा ॥

नमस्तेपद्मनाभायपांचजन्यधरायच ॥ वासुदेवनमस्तुभ्यंदेवकीनंदनायच ॥ ९ ॥ प्रद्युम्नायनमस्तुभ्यमनिरुद्धायतेनमः ॥ नमःकंसविनाशायनम श्चाणूरमर्दिने ॥ १० ॥ दामोदरहृषीकेशगोविंदाच्युतमाधव ॥ उपेंद्रकैटभाऽरातेमधुहंतरधोक्षज ॥ ११ ॥ नारायणायनरकहारिणेपापहारिणे ॥ वामना यनमस्तुभ्यंहरयेशौरयेनमः ॥ १२ ॥ अनंतायनमस्तुभ्यमनंतशयनायच ॥ रुक्मिणीपतयेतुभ्यंरुक्मिप्रमथनायच ॥ १३ ॥ चैद्यहंत्रेनमस्तुभ्यं दानवारेसुरारये ॥ मुकुंदपरमानंदनंदगोपप्रियायच ॥ १४ ॥ नमस्तेपुंडरीकाक्षदनुजेंद्रनिषूदन ॥ नमोगोपालरूपायवेणुवादनकारिणे ॥ १५ ॥

मालक्ष्मीरविद्यावातयोर्धवनियंतःहेमाधव ॥ इंद्रस्योपरींद्रइत्युपेंद्रः ॥ तथाचहरिवंशे ॥ ममोपरियथेंद्रस्त्वंस्थापितोगोभिरीश्वरः ॥ उपेंद्रइतिलोकास्त्वांगास्यंतिभुविसर्वतइति ॥ तत्संबोधनंतथा ॥ इंद्रस्यउपसमीपेऽवरजत्वेनजातइतिवाउपेंद्रस्तत्संबोधनंतथा ॥ कैटभारातेकैटभनाम्नोदैत्यस्यारे ॥ मधुहंतर्मधुनाम्नोदैत्यस्यनाशकर्तः ॥ अधःइंद्रियेणपादेनावतारादौजायतइत्यधोक्षजः ॥ यद्वा अक्षजमैंद्रियकंज्ञानंतदधोऽर्वागेवयस्मात्तत्संबोधनंतथा ॥ ११ ॥ नराणांजीवानामाश्रयायनारायणाय ॥ पापिनोयेषुशास्यंतेतेनरकाःस्थानविशेषाः नरकनामासुरोवातद्धारिणे ॥ पापहारिणेऽधर्मनाशकर्त्रे ॥ वामयतिभक्तानांसंसारदुःखमितिवामनस्तस्मै ॥ अज्ञानंतत्कार्यंहरतीतिहरिस्तस्मै ॥ शूरस्यापत्यंशौरिस्तस्मै ॥ १२ ॥ अनंतायअनंतनागायत्रिविधपरिच्छेद शून्यायवा ॥ नारायणावतारेऽनंतशयनायशेषशायिने ॥ रुक्मिणीपतयेलक्ष्मीकांताय ॥ रुक्मिणीकृष्णजन्मनीतिपराशरवचनात् ॥ वैदर्भींभीष्मकसुतांश्रियोमात्रांस्वयंवरेइतिशुकोक्तेश्च ॥ रुक्मिणंरुक्मिण्याभ्रातरंप्रमथयतिधनुरादिकंछित्त्वाकेशश्मश्रूणिमुंडयतीतिरुक्मिप्रमथनस्तस्मै ॥ १३ ॥ चैद्यवंशेभवश्चैद्यःशिशुपालस्तद्धंत्रे ॥ दनोःपुत्रादानवास्तदरेतेषांशत्रो ॥ असुराणा मरयेनाशकाय ॥ मुकुंदभुक्तिमुक्तिद ॥ परमअविद्यातत्कार्यविनिर्मुक्त॥आनंदसुखरूप ॥ परमानंदेत्येकंपदंवा ॥ सपरमानंदइतिश्रुतेः ॥ नंदगोपस्यद्रोणवस्ववतारस्यप्रियायपुत्रायहितैषिणइतिवा ॥ ॥ १४ ॥ महादेवाराधनकालेपुंडरीकीकृतमक्षिनेत्रंयेनमहादेवात्प्राप्तपुंडरीकतुल्यनेत्रत्वाद्वापुंडरीकाक्षस्तत्संबोधनंतथा ॥ तथाचादित्यपुराणे ॥ एवमुक्त्वाददौचक्रमित्युपक्रम्यनेत्रंचपद्मसदृशं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णवेप्रभविष्णवइति ॥ यद्वा पुंडरीकेइवाक्षिणीयस्यसतथातत्संबोधनंतथा ॥ यद्वा पुंडरीकाक्षहेअक्षयपरमधाम ॥ पुंडरीकंपरंधामाक्षयमव्ययमुच्यतइतिवचनात् ॥ दनुजेंद्राःहिरण्यकशिपुप्रभृतयस्तेषांनिषूदननाशक ॥ गोपालरूपायस्फुरद्बर्हदलोद्बद्धादिरूपाय ॥ वेणुवादनकारिणेवेणुवाद्यकर्त्रे ॥ १९ ॥ गोप्योराधाप्रभृतयस्तासांप्रियाय ॥ केशिघ्नेकेशिनाम्नोदैत्यस्यहंत्रे ॥ गोवर्धनंधरतीतिगोवर्धनधरस्तस्मै ॥ योगिनोरमंतेअस्मिन्निितिरामः ॥ तथाचपाद्मे ॥ रमंतेयोगिनोनंतेसत्यानंदेचिदात्मनि ॥ इतिरामपदेनासौपरंब्रह्माभिधीयतेइति ॥ रमयतिनयनमनांसीतिवारामस्तस्मै ॥ रघुनाथायरघुवंशोद्भवानांस्वामिने ॥ राघवायरघुवंशोद्भवाय ॥ १६ ॥ रावणारेदशग्रीवस्यशत्रो ॥ विभीषणस्यशरणमेवशरण्यआश्रयस्तंददातीतितथातत्संबोधनंविभीषणशरण्यद ॥ अजायजन्मरहिताय ॥ जयरूपायजयस्वरूपाय ॥ रणांगणविचक्षणरणभूमौदक्ष ॥ १७ ॥ क्षणआदिर्यस्यसक्षणादिःकालस्तद्रूपाय ॥ नानारूपायप्रपंचात्मने ॥ शार्ङ्गंधनुर्वर्ततेयस्यतस्मैशार्ङ्गिणे ॥ गदाकौमोदक्याख्याऽस्यास्तीतिगदीतस्मैगादिने ॥ चक्रंसुदर्शनाख्यंवर्ततेऽस्येतिचक्रीतस्मै ॥ दैत्यानांचक्रंसमूहंविमर्दितुंशीलंयस्यतस्मैदैत्यचक्रविमर्दिने ॥ १८ ॥ बलाधिक्याद्बलःसंकर्षणस्तस्मैबलाय ॥ बलोच्छ्रयाद्बलभद्रःस एवतस्मैबलभद्राय ॥ बलस्यासुरस्यारातिःशत्रुरिंद्रस्तस्यप्रियाय ॥ बलियज्ञप्रमथन बलिनाम्नोऽसुरस्ययज्ञविध्वंसन ॥ भक्तानांबलप्रदभक्तबल

गोपीप्रियायकेशिघ्नेगोवर्धनधरायच ॥ रामायरघुनाथायराघवायनमोनमः ॥ १६ ॥ रावणारेनमस्तुभ्यंविभीषणशरण्यद ॥ अजायजयरूपायरणांगणविचक्षण ॥१७॥ क्षणादिकालरूपायनानारूपायशार्ङ्गिणे ॥ गादिनेचाक्रिणेतुभ्यंदैत्यचक्रविमर्दिने ॥१८॥ बलायबलभद्रायबलारातिप्रियायच ॥ बलियज्ञप्रमथननमोभक्तवरप्रद ॥ १९ ॥ हिरण्यकशिपोर्वक्षोविदारणरणप्रिय ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ २० ॥ नमस्तेधर्मरूपायनमःसत्त्वगुणायच ॥ नमःसहस्रशिरसेपुरुषायपरायच ॥ २१ ॥ सहस्राक्षसहस्रांघ्रिसहस्रकिरणायच ॥ सहस्रमूर्तेश्रीकांतनमस्तेयज्ञपुरुष ॥२२॥ वेदवेद्यस्वरूपायनमोवेदप्रियायच॥वेदायवेदगादिनेसदाचाराध्वगामिने ॥२३॥ वैकुंठायनमस्तुभ्यंनमोवैकुंठवासिने ॥ विष्टरश्रवसेतुभ्यंनमोगरुडगामिने ॥२४॥

प्रद ॥ अभक्तानांबलंप्रकर्षेणद्यतिखंडयतीतिवा ॥ दोऽवखंडनेइतिधातुः ॥ १९ ॥ हिरण्यकशिपोर्दैत्यस्यवक्षोवक्षःस्थलंविदारयतीतितथा ॥ रणप्रियसंग्रामोत्सुक ॥ ब्रह्मभ्योब्राह्मणादिभ्योहितोब्रह्मण्यःसचासौदेवश्चेतितस्मै ॥ ब्राह्मणरूपायेतिक्वचित् ॥ गवांब्राह्मणानांचहिताय ॥ २० ॥ चोदनालक्षणोऽर्थोधर्मस्तद्रूपाय ॥ तथाचपारमर्षसूत्रं चोदनालक्षणोर्थोधर्मइति ॥ धर्माख्यदेवतारूपायेतिवा ॥ सत्त्वंगुणोयस्मिंस्तस्मैशुद्धसत्त्वात्मकायेत्यर्थः ॥ सहस्रंशिरांस्यस्यतस्मै ॥ सहस्रशीर्षेत्यादिश्रुतेः ॥ पूर्णत्वात्पुरुषःपुरिशयनाद्वापुरुषः ॥ नवद्वारेपुरेशेतेपुरुषस्तेनचोच्यते ॥ कार्येकारणतयापूर्वमपिस्थितत्वाद्वापुरुषः ॥ तथाचश्रुतिः ॥ पूर्वमेवाहमिहासंतत्पुरुषस्यपुरुषत्वमिति ॥ तद्रूपाय ॥ परायपरमेश्वराय ॥ २१ ॥ सहस्रमक्षीणियस्यतत्संबोधनंतथा ॥ सहस्रमंघ्रयोयस्यतत्संबोधनंतथा ॥ सहस्रमपरिमिताःकिरणायस्यसूर्यरूपस्यतस्मै ॥ सहस्रमपरिमितामूर्तिर्यस्यतत्संबोधनंतथा ॥ श्रीकांतलक्ष्मीपते ॥ यज्ञपूरुषयज्ञाधिष्ठातृपुरुष ॥ २२ ॥ वेदवेद्योवेदैकवेद्यस्तत्स्वरूपाय ॥ वेदप्रियायवेदप्रवर्तकाय ॥ वेदायवेदस्वरूपाय ॥ वेदनंवेदःस्वप्रकाशश्चिदात्मातद्रूपायेतिवा ॥ वेदान्गदितुंकथयितुंव्यस्तुंवाशीलंयस्यतस्मैवेदव्यासरूपायेत्यर्थः ॥ सदाचाररूपोयोऽध्वामार्गस्तेनगंतुंशीलंयस्यतस्मैतत्प्रवर्तकायेत्यर्थः ॥२३॥ वैकुंठायविकुण्ठायाःपुत्राय ॥ पत्नीविकुण्ठाशुभ्रस्यवैकुंठैःसहितःसुरैः॥तस्यांसकलयाजज्ञेवैकुंठोभगवान्स्वय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति ॥ विकुण्ठामायातामधिष्ठायतिष्ठतीतिवैकुण्ठस्तस्माइतिवा ॥ वैकुण्ठेवस्तुंशीलंयस्यतस्मै ॥ विष्टंव्याप्तिंरांतिकीर्तयन्तीतिविष्टरायाज्ञवल्क्यादयस्तेभ्यःश्रूयतइतिविष्टरश्रवाः ॥ विष्टरेशब्दप्रपंच
मयेवेदेश्रूयतइतिवातस्मै ॥ गरुडेनगंतुंशीलंयस्यतस्मै ॥ २४ ॥ विष्वक्सेन विष्वगंचंतिपलायंतेदैत्यसेनायस्योद्योगमात्रेण ॥यद्वा॥ विष्वगंचतीसर्वतःप्रसर्पंतीकैश्चिदप्यनिवारितासेनायस्यतत्संबोध
नंतथा ॥ जगन्मयप्रपञ्चरूप ॥ इदंसर्वंयदयमात्मेतिश्रुतेः ॥ विरोधिलक्षणयाजनाःपुण्यजनाराक्षसास्तानर्दयतीतिदाशरथिरूपेणजनमात्रंवाअर्दयतिप्रलयकालइतितत्संबोधनंहेजनार्दन ॥ त्रिविक्र
मायेति ॥ २५ ॥ केशवाय केशिनामानंदैत्यंहतवानितिकेशवस्तस्मै ॥ तथाचहरिवंशे ॥ यस्मात्त्वयाहतःकेशीतस्मान्मच्छासनंशृणु ॥केशवोनामनाम्नात्वंख्यातोलोकेभविष्यसि॥ केशसंज्ञिताःसूर्या
दिसंक्रांताअंशवस्तद्वत्तयावाकेशवः ॥ अंशवोयेप्रकाशंतेममतेकेशसंज्ञिताः ॥ सर्वज्ञाःकेशवन्तस्मान्मामाहुर्द्विजसत्तमाइतिमहाभारते ॥ ब्रह्मविष्णुशिवाख्याताःशक्तयःकेशसंज्ञिताइत्यादौकेशशब्दः
शक्तिपर्यायः ॥ कोब्रह्मेतिसमाख्यातईशोहंसर्वदेहिनाम् ॥ आवांतवांकेसंभूतौततःकेशवनामवान्इतिहरिवंशे ॥ तत्संबोधनंवातथा ॥ मायाख्याशक्तिर्वर्ततेयस्यतस्मै ॥ ब्रह्मगायिनेवेदगायिने ॥
तपोरूपायतपःस्वरूपायआलोचनरूपायेतिवा ॥ तपसांतपस्विनांफलदायिनेकर्मफलदात्रे ॥ २६ ॥ स्तुत्यायस्तोत्रस्यविषयभूताय ॥ स्तुतिरूपायस्तोत्रस्वरूपाय ॥ भक्तस्तुतिरतायभक्तानां

विष्वक्सेननमस्तुभ्यंजगन्मयजनार्दन ॥ त्रिविक्रमायसत्यायनमःसत्यप्रियायच ॥ २५ ॥ केशवायनमस्तुभ्यंमायिनेब्रह्मगायिने ॥ तपोरूपायतप
सांनमस्तेफलदायिने ॥ २६ ॥ स्तुत्यायस्तुतिरूपायभक्तस्तुतिरतायच ॥ नमस्तेश्रुतिरूपायश्रुत्याचारप्रियायच ॥ २७ ॥ अंडजायनमस्तुभ्यंस्वे
दजायनमोस्तुते ॥ जरायुजस्वरूपायनमउद्भिज्जरूपिणे ॥ २८ ॥ देवानामिंद्ररूपोसिग्रहाणामसिभानुमान् ॥ लोकानांसत्यलोकोऽसिसिंधूनांक्षी
रसागरः ॥ २९ ॥ सुरापगाऽसिसरितांसरसांमानसंसरः ॥ हिमवानसिशैलानांधेनूनांकामधुग्भवान् ॥ ३० ॥ धातूनांहाटकमसिस्फटिकश्चोपले
ष्वसि ॥ नीलोत्पलंप्रसूनेषुवृक्षेषुतुलसीभवान् ॥ ३१ ॥ सर्वपूज्याशिलानांवैशालग्रामशिलाभवान् ॥ मुक्तिक्षेत्रेषुकाशीत्वंप्रयागस्तीर्थपंक्तिषु ॥३२॥

स्तुतौप्रीयमाणाय ॥ श्रुतिरूपायवेदरूपाय ॥ वेदरूपायेतिक्वचित् ॥ श्रुत्याचारप्रियायश्रुत्याचारेणप्रीयमाणाय ॥२७॥ अण्डजायपक्षिस्वरूपाय ॥ स्वेदजायमत्कुणादिरूपाय ॥ जरायुजस्वरूपा
यमानुषादिरूपाय ॥ उद्भिज्जरूपिणेतरुरूपिणे ॥ २८ ॥ विभूतिरूपेणस्तौति देवानामित्यारभ्यत्वामाहुर्जीवनेश्वरमित्यंतेन ॥ देवानांवस्वादित्यादीनामिंद्ररूपोऽसिभवसि ॥ देवानामस्मिवासव
इतिभगवद्वचनात् ॥ नवग्रहाणांमध्येभानुमान्सूर्योऽसि ॥ चतुर्दशलोकानांमध्येसत्यलोकोब्रह्मलोकोऽसि ॥ सप्तानांसिंधूनांसागराणांमध्येक्षीरसागरोऽसीतिसर्वत्रानुषज्जते ॥ २९ ॥ सरितां
नदीनांमध्येसुरापगागंगाऽसि ॥ स्रोतसामस्मिजाह्नवीतिभगवद्वचनात् ॥ सरसांसरोवराणांमध्येमानसंब्रह्मणोमनसोभवंसरोऽसि ॥ तथाचरामायणे ॥ कैलासेपर्वतेराममनसानिर्मितंसरः ॥
ब्रह्मणारघुशार्दूलमानसंनामतेनतदिति ॥ शैलानांपर्वतानांमध्येहिमवान्हिमालयोऽसि ॥ स्थावराणांहिमालयइतिभगवद्वचनात् ॥ धेनूनांमध्येकामधुक्सुरभिर्भवानस्ति ॥ धेनूनामस्मिकामधुगिति
भगवद्वचनात् ॥ ३० ॥ अष्टानांसुवर्णादीनांधातूनांमध्येहाटकंसुवर्णमसि ॥ उपलेषुपाषाणेषुमध्येस्फटिकरूपपाषाणोसि ॥ प्रसूनेषुपुष्पेषुनीलोत्पलंनीलपद्ममसि ॥ वृक्षेषुमध्येतुलसीसुरसा
भवानस्ति ॥ तुलसीसुरसागौरीभूतघ्नीबहुमंजरीतिधन्वंतरिः ॥ ३१ ॥ सर्वेषांसर्वावायाःपूज्यशिलास्तासांमध्येशालग्रामशिलाभवानस्ति ॥ मुक्तिक्षेत्रेषुमध्येकाशीत्वमसि ॥ तीर्थपंक्तिषुतीर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समूहेषुप्रयागस्त्वमसि ॥ ३२ ॥ वर्णेषुश्वेतरक्तपीतकृष्णेषुमध्येश्वेतवर्णोसि ॥ द्विपदांपदद्वययुक्तानांमध्येब्राह्मणोभवानस्ति ॥ अंडजेषुपक्षिषुमध्येगरुडोसि ॥ वैनतेयश्चपक्षिणामितिभगवद्वचनात् ॥ व्यवहारेषुलोकचर्यासुमध्येवाग्वाणीभवानस्तिं ॥ ३३ ॥ वेदेषुऋगादिषुचतुर्षुउपनिषद्रूपोवेदांतभागोभवानास्ति ॥ मंत्राणांगायत्र्यादीनांमध्येप्रणवओंकारोऽसि ॥ मंत्राणांप्रणवस्त्रिवृदितिभागवतोक्तेः ॥ अक्षराणामकारादीनांमध्येऽकारोऽसि ॥ अक्षराणामकारोस्मीतिभगवद्वचनात् ॥ यज्वनांयज्ञकर्तॄणांमध्येसोमरूपधृक्चंद्ररूपधृक् ॥ नक्षत्राणामहंशशीतिभगवद्वचनात् ॥ ३४ ॥ प्रतापिनांप्रतापवतांमध्येऽग्निरसि ॥ वसूनांपावकश्चास्मीतिभगवद्वचनात् ॥ क्षमावतांसहनशक्तिमतांक्षमासहनशक्तिरसि ॥ दातॄणांदानकर्तॄणांमध्येपर्जन्योमेघस्तदधिष्ठातृदेवोऽसि ॥ पवित्राणांमध्येपरोसिउत्कृष्टोऽसि ॥ हीतिप्रसिद्धौ ॥ एवमन्यत्रापि ॥ पवित्राणांपवित्रंयइतिस्मृतेः ॥ पयोह्यसीतिपाठेपयोजलम् ॥ ३५ ॥ सर्वशस्त्राणांमध्येचापोधनुरसि ॥ आयुधानांधनुरहमितिभगवदुक्तेः ॥ वेगवतांमध्येवातोऽसि ॥ पवनःपवतामस्मीतिभगवद्वचनात् ॥ इंद्रियवर्गेषुइंद्रियसमुदायेषुमध्येमनोऽसि ॥ इंद्रियाणांमनश्चास्मीतिभगवद्वचनात् ॥ निर्भयाणांमध्येकरोहस्तोह्यसि ॥ अतएवभयेप्रत्युपस्थितेकरमेवप्रसारयतिसर्वोलोकइति ॥ ३६ ॥ व्याप्तिमतांविभूनांपदार्थानांमध्येव्योमआकाशंत्वमसि ॥ वैइत्यपिप्रसिद्धौ ॥ एवमन्यत्रापि ॥ आत्मनांप्रत्यक्चैतन्यानांमध्येपरमा

वर्णेषुश्वेतवर्णोऽसिद्विपदांब्राह्मणोभवान् ॥ गरुडोस्यंडजेष्वीशव्यवहारेषुवाग्भवान् ॥ ३३ ॥ वेदेषूपनिषद्रूपामंत्राणांप्रणवोह्यसि ॥ अक्षराणामकारोसियज्वनांसोमरूपधृक् ॥ ३४ ॥ प्रतापिनामग्निरसिक्षमाऽसित्वंक्षमावताम् ॥ दातॄणामसिपर्जन्यःपवित्राणांपरोह्यसि ॥ ३५ ॥ चापोसिसर्वशस्त्राणांवातोवेगवतामसि ॥ मनोसींद्रियवर्गेषुनिर्भयाणांकरोह्यसि ॥ ३६ ॥ व्योमव्याप्तिमतांत्वंवैपरमात्माऽसिचात्मनाम् ॥ संध्योपास्तिर्भवान्देवसर्वनित्येषुकर्मसु ॥ ३७ ॥ क्रतूनामश्वमेधोसिदानानामभयंभवान् ॥ लाभानांपुत्रलाभोसिवसंतस्त्वमृतुष्वहो ॥३८॥ युगानांप्रथमोसित्वंतिथीनांत्वंकुहूर्ह्यसि ॥ पुष्योसिनक्षत्रगणेसंक्रमःसर्वपर्वसु ॥ ३९ ॥ योगेषुव्यतिपातस्त्वंतृणेषुहिकुशोभवान् ॥ उद्यमानांहिसर्वेषांनिर्वाणंत्वमसिप्रभो ॥ ४० ॥

त्मासि ॥ अहमात्मागुडाकेशसर्वभूताशयस्थितइतिभगवद्वचनात् ॥ अहमात्मोद्धवामीषांभूतानांसुहृदीश्वरइतिभागवतोक्तेश्च ॥ हेदेवसर्वेषुनित्येषुकर्मसुभवान्संध्योपास्तिःसंध्योपासनमस्ति ॥ ३७ ॥ क्रतूनांयागानांमध्येऽश्वमेधोऽसि ॥ दानानांतु लापुरुषादीनांमध्येभवानभयरूपंदानमस्ति ॥ लाभानांराज्यप्राप्त्यादीनांमध्येभवान्पुत्रलाभोस्तिपुत्रोत्पत्तिरूपोलाभोस्ति ॥ अहोभोदेवषड्ऋतुषुमध्येत्वंवसंतऋतुरसि ॥ ऋतूनांकुसुमाकरइतिभगवदुक्तेः ॥३८॥ युगानांसत्यत्रेताद्वापरकलीनांमध्येप्रथमोयुगःसत्ययुगस्त्वमसि ॥ तिथीनांप्रतिपदादिपंचदशानांमध्येकुहूरमावास्याऽसि ॥ नक्षत्रगणेनक्षत्रसमूहमध्येपुष्योनक्षत्रमसि ॥ पुंस्त्वंनक्षत्राणांस्त्रीपुंरूपत्वात् ॥ तथाचात्रैवोक्तम् ॥ पुरुषायितसंज्ञेनतप्तंयत्तपसाऽधुना ॥ भवतीभिस्ततःपुंस्त्वमिच्छयावोभविष्यतीति ॥ सर्वपर्वसुसर्वपुण्यकालेषुमध्येसंक्रमःसंक्रांतिरसि ॥ ३९ ॥ योगेषुसप्तविंशतिसंख्येषुव्यतिपाताख्योयोगस्त्वम् ॥ रविवासरसंयुक्ताऽमावास्याव्यतिपातइतिकेचित् ॥ तृणेषुमध्येभवान्कुशोऽसि ॥ कुशोस्मिदर्भजातीनामितिचभागवतोक्तेः ॥ उद्यम्यंतेप्रसाध्यंतइत्युद्यमाधर्मार्थकाममोक्षास्तेषांसर्वेषामुद्यमानांमध्येनिर्वाणमोक्षस्त्वमसि ॥ उपमानंहिसर्वेष्वितिपाठेसर्वेषुदार्ष्टांतिकेषुउपमानंदृष्टांतोभवानित्यर्थः ॥ ४० ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वासांकामादिबुद्धीनांमध्येइहजगतिहेअजधर्मबुद्धिर्भवानस्ति ॥ सर्ववृक्षेषुमध्येभवानश्वत्थवृक्षोस्ति ॥ अश्वत्थःसर्ववृक्षाणामितिभगवद्वचनात् ॥ लतासुमध्ये ॥ चःसमुच्चये ॥ एवमन्यत्रापि ॥ सोमवल्लीसोमलताभवानस्ति ॥ ४१ ॥ अहोहेविष्णोपवित्रेषुसाधनेषूपायेषुमध्येभवान्प्राणायामःप्राणसंयमोस्ति ॥ सर्वलिंगेषुमध्येसर्वदःश्रीमान्विश्वेश्वरोभवानस्ति ॥ ४२ ॥ मित्राणांमध्ये कलत्रंभार्यात्वमसि ॥ सर्वबंधूनांमध्येधर्मरूपोबंधुरसि ॥ अनुक्तसर्वसमुच्चयार्थमाह ॥ त्वत्तइति ॥ हेनारायणजीवानामाश्रयचराचरेजंगमस्थावरात्मकेऽस्मिन्जगतित्वत्तोऽन्यन्नास्तित्वमेवसर्वमि त्यर्थः ॥ ४३ ॥ त्वमेवमातेत्यादिश्लोकस्तुत्वत्तइत्यस्मात्पूर्वबोद्धव्यः ॥ अथवाकिंतदन्यन्मत्तोऽन्यन्नास्तीत्याकांक्षायामुपलक्षणार्थत्वेनकानिचिद्वस्तूनिदर्शयाति ॥ त्वमेवमाताजननी ॥ त्वंतातः पिता ॥ त्वंसुहृत्प्रत्युपकारमनपेक्ष्यहितकारी ॥ महाधनंनिधिरूपम् ॥ त्वमेवसौख्यसंपत्तिःसुखसंभारः ॥ त्वमायुर्जीवनंजीवनेश्वरोजीवश्चत्वम् ॥ एवकारावन्ययोगव्यावर्तकौसर्वत्रसंबध्येते

सर्वासामिहबुद्धीनांधर्मबुद्धिर्भवानज ॥ अश्वत्थःसर्ववृक्षेषुसोमवल्लीलतासुच ॥ ४१ ॥ प्राणायामोसिसर्वेषुसाधनेषुशुचिष्वहो ॥ सर्वदःसर्वलिंगेषुश्रीमान्विश्वेश्वरोभवान् ॥ ४२ ॥ मित्राणांहिकलत्रंत्वंधर्मस्त्वंसर्वबंधुषु ॥ त्वत्तोनान्यज्जगत्यस्मिन्नारायणचराचरे ॥ ४३ ॥ त्वमेवमातात्वंतातस्त्वंसुतस्त्वंमहाधनम् ॥ त्वमेवसौख्यसंपत्तिस्त्वमायुर्जीवनेश्वरः ॥ ४४ ॥ साकथायत्रतेनामतन्मनोयत्त्वदर्पितम् ॥ तत्कर्मयत्त्वदर्थंवैतत्तपोयद्भवत्स्मृतिः ॥४५॥ तद्धनंधनिनांशुद्धंयत्त्वदर्थेव्ययीकृतम् ॥ सएवसकलःकालोयस्मिञ्जिष्णोत्वमर्च्यसे ॥ ४६ ॥ तावच्चजीवितंश्रेयोयावत्त्वंहृदिवर्तसे ॥ रोगाःप्रशममायांतित्वत्पादोदकसेवनात् ॥ ४७ ॥ महापापानिगोविंदबहुजन्मार्जितान्यपि ॥ सद्योविलयमायांतिवासुदेवेतिकीर्तनात् ॥ ४८ ॥ अहोपुंसांमहामोहस्त्वहोपुंसांप्रमादता ॥ वासुदेवमनादृत्ययदन्यत्रकृतश्रमाः ॥ ४९ ॥ इदमेवहिमांगल्यमिदमेवधनार्जनम् ॥ जीवितस्यफलंचैतद्यद्दामोदरकीर्तनम् ॥ ५० ॥ अधोक्षजात्परोधर्मोनार्थोनारायणात्परः ॥ नकामःकेशवादन्योनापवर्गोहरिंविना ॥ ५१ ॥ इयमेवपराहानिरुपसर्गोयमेवहि ॥ अभाग्यंपरमंचैतद्वासुदेवंनयत्स्मरेत् ॥ ५२ ॥ हरेराराधनंपुंसांकिंकिंनकुरुतेबत ॥ पुत्रमित्रकलत्रार्थराज्यस्वर्गापवर्गदम् ॥ ५३ ॥ हरत्यघंध्वंसयतिव्याधीनाधीन्नियच्छति ॥ धर्मंविवर्धयेत्क्षिप्रंप्रयच्छतिमनोरथम् ॥ ५४ ॥ भगवच्चरणद्वंद्वंनिर्द्वंद्वध्यानमुत्तमम् ॥ पापिनापिप्रसंगेनविहितंस्वहितंपरम् ॥ ५५ ॥

॥ ४४ ॥ ४५ ॥ एवंब्रह्मरुद्रविष्णुरूपेणविभूतिरूपेणचस्तुत्वाइदानींनानाविधयास्तौति ॥ इत्युक्त्वेत्यतःप्राक्तनेनग्रंथेन ॥ सफलःसंपूर्णः ॥ सकलइतिक्वचित् ॥ ४६ ॥ ४७ ॥ महापापानिब्रह्महत्यादीनिवासुदेवेतिकीर्तनात्सद्योविलयमायांतीत्यन्वयः ॥ ४८ ॥ अहोइतिखेदे ॥ यद्येनमोहेनप्रमादेनवाऽन्यत्रकृतश्रमास्तेपुमांसः ॥ अन्यत्रकृतःश्रमोयैस्तेतथा ॥ पाठांतरेकृतश्चासौश्रमश्चे त्यर्थात्तैःपुंभिः ॥ ४९ ॥ ५० ॥ नार्थइतिनकारःकाकाक्षिन्यायेनोभयत्रसंबध्यते ॥ नाधोक्षजादितिवापाठः ॥ अपवर्गोमोक्षः ॥ ५१ ॥ उपसर्गउपद्रवः ॥ नरोनंतंनवेदयेदितिक्वचित् ॥ ५२ ॥ बतेत्याश्चर्ये ॥५३॥ आधीन्मानसीर्व्यथाः ॥ नियच्छतिनाशयति ॥५४॥ भगवदिति ॥ भगवच्चरणयोर्द्वंद्वेयुगलेनिर्द्वंद्वध्यानंनिश्चलंध्यानमतएवोत्तमंपापिनापिप्रसंगेनधनादिप्राप्त्यर्थंविहितंकृतंचेत्तर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्परंस्वहितमिति ॥ तथाचोक्तम्॥हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः॥अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः ॥ सर्वपापप्रसक्तोपिध्यायन्निमिषमच्युतम् ॥ द्विजस्तपस्वीभवतिपांक्तिपावनपावनइत्यादि ॥५५॥ महांत्युपपदानिउपसमीपेपदानिभजितुंशीलंयेषांतानिपापानितथा ॥ महापापान्यपीत्यर्थः ॥ सुलीनध्यानसंपन्नोनिश्चलध्यानसंबद्धः॥सुनीलध्यानसंपन्नइतिपाठेसुनीलःश्रीकृष्णस्तस्यध्याने नसंपन्नइतिव्याख्येयम् ॥ नामोच्चारोनामोच्चारणम् ॥५६॥ किंचप्रमादादपीति ॥ अनलकणोऽग्निविस्फुलिंगः॥अघंपापंसंसारंवा ॥ तथाचवैष्णवे ॥ अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः ॥ पुमान्सद्योविमुच्येतसिंहत्रस्तैर्वृकैरिव॥भागवते ॥ सांकेत्यंपारिहास्यंवास्तोभंहेलनमेववा॥ वैकुण्ठनामग्रहणमशेषाघहरंविदुः ॥ अत्रापिवक्ष्यति ॥ यदिजातुचिदन्यकद्विषस्तवनामौष्ठपुटाद्विनिःसृतम् ॥ शिव शंकरचंद्रशेखरेत्यसकृत्तस्यनसंसृतिःपुनरिति ॥ ५७ ॥ ५८ ॥ विष्णुपादांब्विात ॥ तदुक्तम् ॥ शालग्रामशिलातोयंयदिशंखस्थितंभवेत् ॥ तदाप्रयोजनंनास्तितीर्थैस्त्रैलोक्यसंभवैरिति ॥ ५९ ॥ उपहारंनैवेद्यम् ॥ पुरोडाशोनामयज्ञेषुदेवेभ्योदेयोद्रव्यप्रभेदोऽत्यंतपवित्रःपदार्थः ॥ तथाचोक्तम् ॥ सदापुरोडाशपवित्रिताधराइति ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ शंखचक्रांकिततनुरिति

पापिनांयानिपापानिमहोपपदभांज्यपि ॥ सुलीनध्यानसंपन्नोनामोच्चारोहरेर्हरेत् ॥५६॥ प्रमादादपिसंस्पृष्टोयथाऽनलकणोदहेत् ॥ तथौष्ठपुटसंस्पृष्टंहरिनामहरेदघम् ॥ ५७ ॥ नितांतंकमलाकांतेशांतंचित्तंविधाययः ॥ संशीलयेत्क्षणंनूनंकमलातत्रनिश्चला ॥५८॥ अयमेवपरोधर्मस्त्विदमेवपरंतपः ॥ इदमेवपरंतीर्थंविष्णुपादांबुयत्पिबेत् ॥ ५९ ॥ तवोपहारंभक्त्यायःसेवतेयज्ञपुरुष ॥ सेवितस्तेननियतंपुरोडाशोमहाधिया ॥ ६० ॥ सचैवावभृथस्नातः सचगंगाजलाप्लुतः ॥ विष्णुपादोदकंकृत्वाशंखेयःस्नातिमानवः ॥ ६१ ॥ शालग्रामशिलायेनपूजितातुलसीदलैः ॥ सपारिजातमालाभिःपूज्यते सुरसद्मनि ॥ ६२ ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिवेतरः ॥ विष्णभक्तिसमायुक्तोज्ञेयःसर्वोत्तमश्चसः ॥ ६३ ॥ शंखचक्रांकिततनुःशिरसामंजरीधरः ॥ गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतः ॥ ६४ ॥ प्रत्यहंद्वादशशिलाःशालग्रामस्ययोऽर्चयेत् ॥ द्वारवत्याःशिलायुक्ताःसवैकुंठेमहीयते ॥ ६५ ॥

गोपीचंदनादिनानतुदाहेन ॥ बृहन्नारदीयेदाहेनशंखचक्रधारणस्यनिषिद्धत्वात् ॥ तथाहि ॥ यस्तुसंतप्तशंखादिलिंगचिह्नतनुर्नरः ॥ ससर्वयातनाभोगीचांडालोजन्मकोटिभिः ॥ तंद्विजंतप्तशंखादिलिंगांकिततनुंनरः॥ संभाष्यरौरवंयातियावदिंद्राश्चतुर्दश ॥ चक्रांकिततनुर्यत्रतत्रकोपिनसंवसेत् ॥ यदितिष्ठेन्महापापीसहस्रब्रह्महाभवेत्॥गंगास्नानरतोवापिअश्वमेधरतोपिवा॥चक्रांकिततनुंदृष्ट्वापश्येत्सूर्यंजपन्नरः ॥ जपेच्चशतरुद्रीयमन्यथारौरवंव्रजेत् ॥ ब्राह्मणस्यतनुर्ज्ञेयासर्वदेवसमाश्रिता॥साचेत्संतापिताराजन्किमुवक्ष्यामहेततः॥ चक्रांकिततनुर्वापिराजँल्लिंगान्वितोपिवा॥नाधिकारीपरिज्ञेयःश्रौतस्मार्तेषुकर्मस्विति ॥ नचअतप्ततनूर्नतदा मोअश्नुतइतिश्रुतिविरोधेनस्मृतेरप्रामाण्यम् ॥ श्रुतेरर्थांतरपरत्वात् ॥ कृच्छ्रचांद्रायणादिनाऽतप्ततनुरसंतापितदेहोऽतएवामोऽपक्वोऽदग्धरागादिःपुमांस्तद्ब्रह्मनाश्नुतेनप्राप्नोतीतिश्रुतेरर्थः ॥ तुलस्यामंजरीधरः ॥ शिरसामस्तकेन ॥ सुरसामंजरीधरइतिपाठेसुरसातुलसी ॥ तदघमित्यत्रतच्छब्दोदृष्टविषयः ॥ ६४ ॥ शालग्रामस्यचंपकारण्यांतर्गत

CC-0. In Public Domain. Digitization by eGangotri

चक्रतीर्थस्य ॥ शालग्रामस्यशालग्रामाणांद्वादशशिलाइतिवा ॥ द्वारवत्याःशिलाद्वारकाचक्रम् ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ गायाभिगानंकरोमि ॥ श्रयामीतिकचित् ॥ ॥ ७२ ॥ ७३ ॥ स्त्रैणेस्त्रीसमूहे ॥ श्यामलतनुंश्रीकृष्णम् ॥ ७४ ॥ सर्वेषामिति ॥ हृदयेषुआवसतीतिहृदयावासोजीवरूपेण ॥ साक्षादपरोक्षः ॥ यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः ॥ साक्षीअंतर्यामी॥सर्वगंत्वांविनावहिरंतरन्यंनवेझित्वामेवसर्ववेझीत्यर्थः ॥ यदन्यदितिपाठेत्वांविनात्वत्तःसकाशाद्यदन्यत्तत्त्वमेवेत्यन्वयः ॥७५॥७६॥७७॥ अन्नादिति ॥ तद्वृष्टेः साचासौवृष्टिश्चेतितद्वृष्टिस्तस्याः

तुलसीयस्यभवनेप्रत्यहंपरिपूज्यते ॥ तद्गृहंनोपसर्पंतिकदाचिद्यमकिंकराः ॥ ६६ ॥ हरिनामाक्षरमुखंभालेगोपीमृदांकितम् ॥ तुलसीमालितोरस्कंस्पृशेयुर्नयमानुगाः ॥ ६७ ॥ गोपीमृत्तुलसीशंखःशालग्रामःसचक्रकः ॥ गृहेपियस्यपंचैतेतस्यपापभयंकुतः ॥ ६८ ॥ येमुहूर्ताःक्षणायेचयाःकाष्ठायेनिमेषकाः ॥ ऋतेविष्णुस्मृतेर्यातास्तेषुमुष्टोयमेनसः ॥ ६९ ॥ कद्व्यक्षरंहरेर्नामस्फुलिंगसदृशंज्वलत् ॥ महतीपातकानांचराशिस्तूलोपमाक्च ॥ ७० ॥ गोविंदंपरमानंदंमुकुंदंमधुसूदनम् ॥ त्यक्त्वान्यंनैवजानामिनभजामिस्मरामिन ॥ ७१ ॥ ननमामिनचस्तौमिनपश्यामीहचक्षुषा ॥ नस्पृशामिनयामिगायामिनहरिंविना ॥ ७२ ॥ जलेस्थलेचपातालेप्यनिलेचानलेऽचले ॥ विद्याधरासुरसुरेकिंनरेवानरेनरे ॥ ७३ ॥ तृणेस्त्रैणेचपाषाणेतरुगुल्मलतासुच ॥ सर्वत्रश्यामलतनुंवीक्षेश्रीवत्सवक्षसम् ॥ ७४ ॥ सर्वेषां हृदयावासःसाक्षात्साक्षीत्वमेवहि ॥ बहिरंतर्विनात्वांतुनह्यन्यंवेद्मिसर्वगम् ॥ ७५ ॥ इत्युक्त्वाविररामासौशिवशर्मन्ध्रुवस्तदा ॥ देवोपिभगवान्विष्णुस्तमुवाचप्रसन्नदृक् ॥ ७६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अयिबालविशालाक्षध्रुवध्रुवमतेऽनघ ॥ परिज्ञातोमयासम्यक्तवहृत्स्थोमनोरथः ॥ ७७ ॥ अन्नाद्भवंतिभूतानिवृष्टेरन्नसमुद्भवः ॥ तद्वृष्टेःकारणंसूर्यःसूर्याधारोध्रुवैधिभोः ॥७८॥ ज्योतिश्चक्रस्यसर्वस्यग्रहर्क्षादेःसमंततः ॥ गगनेभ्रमतोनित्यंत्वमाधारोभविष्यसि ॥ ७९ ॥ मेढीभूतस्तुवैसर्वान्वायुपाशैर्नियंत्रितान् ॥ आकल्पंतत्पदंतिष्ठभ्रामयञ्ज्योतिषांगणान् ॥ ८० ॥

सूर्यःकारणम् ॥ तदितिपृथक्पदंवा ॥ तत्तस्माद्धोहेध्रुवत्वंसूर्याधारएधिभवेत्यर्थः ॥ तथाचश्रुतिः ॥ अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ॥ ॥ ७८ ॥ ७९ ॥ धान्याक्रमणायभ्राम्यमाणानांपशूनांबंधनस्तंभोमेढीतत्सदृशोमेढीभूतइत्यर्थः ॥ आकल्पंकल्पपर्यंतम् ॥ कल्पोऽत्रब्रह्मणोदिनंपरार्धद्वितयंवा ॥ स्थास्नुःपरस्तात्कल्पवासिनामितिभागवतोक्तेः ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसादिप्राप्तम् ॥ आदायीतिपाठेगृहीतमित्यर्थः ॥ ८१ ॥ ८२ ॥ शक्राद्यैरपिदुर्लभैस्तैरपिप्राप्तुमशक्यमित्यर्थः ॥ तत्त्वरसात्त्वदधीनम् ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ महोपसर्गश मनीग्रहादिमहापीडानाशिनी ॥ ८८ ॥८९॥ ९०॥९१॥९२॥९३॥ अनेकानिदानानिदत्त्वानानाव्रतानिचकृत्त्वायथालाभानवाप्नोतितथाऽनयास्तुत्याऽन्नाप्नोति ॥ सर्वैर्दानव्रतादिभिर्यत्फलंलभ्यते

आराध्यश्रीमहादेवंपुरापदमिदंमया ॥ आसादियत्तदेतत्तेतपसाप्रतिपादितम् ॥ ८१ ॥ केचिच्चतुर्युगंयावत्केचिन्मन्वंतरंध्रुव ॥ तिष्ठंतित्वंतुवैकल्पंपदमे तत्प्रशास्यासि ॥ ८२ ॥ मनुनापिनयत्प्रापिकिमन्यैर्मानवैर्ध्रुव ॥ तत्पदंविहितंत्वत्साच्छक्राद्यैरपिदुर्लभम् ॥ ८३ ॥ अन्यान्वरान्प्रयच्छामिस्तवेनानेनतोषितः ॥ सुनीतिरपितेमातात्वत्समीपेचरिष्यति ॥ ८४ ॥ इदंस्तोत्रवरंयस्तुपठिष्यतिसमाहितः ॥ त्रिसंध्यंमनुजस्तस्यपापंयास्यतिसंक्षयम् ॥८५॥ नतस्यसदनंलक्ष्मीःपरित्यक्ष्यत्यसंशयम् ॥ नजनन्यावियोगश्चनबंधुकलहोदयः ॥ ८६ ॥ ध्रुवस्तुतिरियंपुण्यामहापातकनाशिनी ॥ ब्रह्महापिविशुद्ध्येतकाकथेतरपापिनाम् ॥ ८७ ॥ महापुण्यस्यजननीमहासंपत्तिदायिनी ॥ महोपसर्गशमनीमहाव्याधिविनाशिनी ॥ ८८ ॥ यस्याऽस्तिपरमाभक्तिर्मयिनिर्मलचेतसः ॥ ध्रुवस्तुतिरियंतेनजप्यामत्प्रीतिकारिणी ॥ ८९ ॥ समस्ततीर्थस्नानेनयत्फलंलभतेनरः ॥ तत्फलंसम्यगाप्नोतिजपन्स्तुत्यानयामुदा ॥ ९० ॥ संतिस्तोत्राण्यनेकानिममप्रीतिकराणिच ॥ ध्रुवस्तुतेर्नचैतस्याःकलामर्हंतिषोडशीम् ॥ ९१ ॥ श्रुत्वापीमांस्तुतिंमर्त्यःश्रद्धयापरयामुदा ॥ पातकैर्मुच्यतेसद्योमहत्पुण्यमवाप्नुयात् ॥ ९२ ॥ अपुत्रःपुत्रमाप्नोतिनिर्धनोधनमाप्नुयात् ॥ अभक्तोभक्तिमाप्नोतिकीर्तनाच्चध्रुवस्तुतेः ॥ ॥ ९३ ॥ दत्त्वादानान्यनेकानिकृत्वानानाव्रतानिच ॥ यथालाभानवाप्नोतितथास्तुत्याऽनयानरः ॥ ९४ ॥ त्यक्त्वासर्वाणिकार्याणित्यक्त्वाजप्यान्यनेकशः ॥ ध्रुवस्तुतिरियंजप्यासर्वकामप्रदायिनी ॥ ९५ ॥ श्रीभगवानुवाच ॥ ॥ ध्रुवावधेहिवक्ष्यामिहितंतवमहामते ॥ येनतेनिश्चलंसम्यक्पदमेतद्भविष्यति ॥ ९६ ॥ अहंजिगमिषुस्त्वासंपुरींवाराणसींशुभाम् ॥ साक्षाद्विश्वेश्वरोयत्रतिष्ठतेमोक्षकारणम् ॥ ९७ ॥ विपन्नानांचजंतूनांयत्रविश्वेश्वरः स्वयम् ॥ कर्णेजापंप्रकुरुतेकर्मनिर्मूलनक्षमम् ॥ ९८ ॥ अस्यसंसारदुःखस्यसर्वोपद्रवदायिनः ॥ उपायएकएवास्तिकाशिकानंदभूमिका ॥ ९९ ॥ इदंरम्यमिदंनेतिबीजंदुःखमहातरोः ॥ तस्मिन्काश्यग्निनादग्धेदुःखस्यावसरःकुतः ॥१००॥ प्राप्यंसंप्राप्यतेयेननभूयोयेनशोच्यते ॥ परायानिर्वृतेःस्थानंयत्तदानंदकाननम् ॥ १ ॥ अमृतायनमुत्सृज्यपुरुषोन्यत्रयोवसेत् ॥ आनंदकाननंशंभोःकुतस्तस्यसुखोदयः ॥ २ ॥

तत्सर्वमनयास्तुत्याप्राप्यतइत्यर्थः ॥ कामानितिक्वचित् ॥ नतथाकाममाप्नोतीतिपाठःस्पष्टार्थः ॥ ९४ ॥ ९५ ॥ अवधेहिश्रृणु ॥ येनहितेनहितानुष्ठानेन ॥ ९६ ॥ ९७ ॥ ९८ ॥ प्रसंगात्काशींस्तौति अस्येत्यादिपङ्क्तिः ॥ आनन्दभूमिकाआनंदरूपंस्थानम् ॥ ९९ ॥ काश्यग्निनाकाशीमरणनिमित्तरुद्रोपदिष्टज्ञानाग्निनेत्यर्थः ॥ १०० ॥ १ ॥ अमृतायनंकैवल्याश्रयम् ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

निर्गतारिपवोयस्मात्तद्राष्ट्रंनीरिपु ॥ ३ ॥ काशींकाशींप्रति ॥ कथंभूतंविश्वेशम् ॥ जगदर्च्यम् ॥ पाठांतरेकाशीविशेषणम् ॥ ४ ॥ सविश्वेश्वरःसुदर्शनचक्रदः ॥ ५ ॥ पुरेति ॥ पुरापूर्वंहरःपादांगुष्ठस्ययाऽग्ररेखातस्याउत्थमुत्पादितंचक्रंसृष्ट्वाप्रक्षिप्यजालंधरंदैत्यमहरन्मारितवानित्यर्थः ॥ कथंभूतम् ॥ ममापिपरिकंपनंकंपजनकम् ॥ पादांगुष्ठस्यरेखाधइतिक्वचित् ॥ पादांगुष्ठस्यरेखातइतिवान्यत्र ॥ पादांगुष्ठस्यरेखास्वितिचापरत्र ॥ पादांगुष्ठस्याग्रेणेतिकृत्वेतिचसर्वत्र ॥ ६ ॥ ससुदर्शनचक्रदइत्युक्तंतत्प्राप्तिमेवसकारणांदर्शयाति ॥ तच्चक्रमिति ॥ एवंहिश्रूयतेआदित्य

वरंशरावहस्तस्यचांडालागारवीथिषु ॥ भिक्षार्थमटनंकाश्यांराज्यंनान्यत्रनीरिपु ॥ ३ ॥ वैकुंठनगरात्काशींनित्यंविश्वेशमर्चितुम् ॥ अहमायामिनियमाज्जगदर्च्यंतदर्चिताम् ॥ ४ ॥ मयियापरमाशक्तिस्त्रिलोक्यारक्षणक्षमा ॥ तत्रहेतुर्महेशानःससुदर्शनचक्रदः ॥ ५ ॥ पुराजालंधरंदैत्यंममापिपारिकंपनम् ॥ पादांगुष्ठाग्ररेखोत्थंचक्रंसृष्ट्वाहरोऽहरत् ॥ ६ ॥ तच्चचक्रंमयालब्धंनेत्रपद्मार्चनाद्विभोः ॥ एतत्सुदर्शनाख्यंवैदैत्यचक्रप्रमर्दनम् ॥ ७ ॥ तन्मयातवरक्षार्थंभूतविद्रावणंपरम् ॥ तावत्प्रणुन्नंपुरतस्ततश्चाहमिहागतः ॥८॥ काशीमिदानींयास्यामिविश्वेश्वरविलोकने ॥ अद्ययात्राऽस्तिमहतीकार्तिक्यांबहुपुण्यदा ॥ ९ ॥ कार्तिकस्यचतुर्दश्यांविश्वेशंयोविलोकयेत् ॥ स्नात्वाचोत्तरवाहिन्यांनतस्यपुनरागतिः ॥ ११० ॥ इत्युक्त्वाताक्ष्यमारोप्यध्रुवमानंदमेदुरम् ॥ क्षणाद्वाराणसींप्रापहरिःस्मरहरोषिताम् ॥ ११ ॥ पंचक्रोश्याश्चसीमानंप्राप्यदेवोजनार्दनः ॥ वैनतेयादवारुह्यकरेधृत्वाध्रुवंततः ॥ १२ ॥ मणिकर्ण्यांपरिस्नायविश्वेशमभिपूज्यच ॥ ध्रुवंबभाषेभगवान्हितंतस्यचिकीर्षयन् ॥ १३ ॥ लिंगंस्थापययत्नेनक्षेत्रेऽत्रैवाविमुक्तके ॥ त्रैलोक्यस्थापनंपुण्यंयथाभवतितेऽक्षयम् ॥ १४ ॥ नियुतंयत्परिस्थाप्यलिंगानिफलमाप्यते ॥ अन्यत्रतदिहैकेनलिंगेनपरिलभ्यते ॥ १५ ॥ कालेनभंगमापन्नंजीर्णोद्धारंकरोतियः ॥ इहतस्यफलस्यांतःप्रलयेपिनजायते ॥ १६ ॥

पुराणे ॥ स्वर्णकमलसहस्रेणश्रीशंकरंश्रीकृष्णःप्रत्यहंपूजयतिस्म ॥ तत्रकदाचिच्छ्रीकृष्णस्यभावजिज्ञासयैकस्मिन्कमलेविश्वेश्वरेणहृतेएतद्वाक्यम् ॥ हृतेपुष्पेतदाविष्णुश्चिंतयन्किमिदंत्विति ॥ ज्ञात्वात्मनेत्रमुद्धृत्यपूजयामासशंकरम् ॥ ततस्तेनैवसंतुष्टस्यविश्वेश्वरस्यवाक्यम् ॥ दिव्यंददामितेचक्रमद्भुतंतत्सुदर्शनम् ॥ प्रीत्यर्थंसवदेवानांनिर्मितंयन्मयापुरा ॥ गृहीत्वातद्रणेदैत्याञ्जहिविष्णोममाज्ञया ॥ एवमुक्त्वाददौचक्रंसूर्यायुतसमप्रभमिति ॥ नेत्रमेवपद्मंनेत्रपद्मंतेनार्चनात्पूजनात् ॥७॥ प्रणुन्नंप्रेषितम् ॥ पुरतःपूर्वम् ॥ ८ ॥९॥११०॥११॥१२॥१३॥१४ ॥ १५ ॥ प्रसंगाज्जीर्णो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारादीनांफलमाह कालेनेत्यादिना ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ १३० ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ महर्जनस्तपःसत्यलोकाःकाश्याःस्तुतिस्तथा ॥ द्वाविंशतितमेऽध्यायेवर्ण्यंतेऽमरदुर्लभाः ॥ १ ॥ ध्रुवाख्यानमभिनंद

वित्तशाठ्यंपरित्यज्यप्रासादंयोऽत्रकारयेत् ॥ तेनदत्तोभवेत्सर्वोमेरुर्नियुतयोजनः ॥ १७ ॥ कूपवापीतडागानिशक्त्यायोऽत्रतुकारयेत् ॥ अन्यत्रकरणात्तस्यपुण्यंकोटिगुणाधिकम् ॥ १८ ॥ इज्यार्थमत्रयःकुर्यात्सुरम्यांपुष्पवाटिकाम् ॥ पुष्पेपुष्पेफलंतस्यसुवर्णकुसुमाधिकम् ॥ १९ ॥ अत्रब्रह्मपुरींकृत्वायोविप्रेभ्यःप्रयच्छति ॥ वर्षाशनेनसंयुक्तांतस्यपुण्यफलंशृणु ॥ १२० ॥ क्षीयंतेसलिलान्यब्धेर्भौमाश्चत्रसरेणवः ॥ क्षयोनतस्यपुण्यस्यशिवलोकेसमासतः ॥ २१ ॥ मठानपितपस्विभ्यःकारयित्वाऽत्रयोर्पयेत् ॥ जीवनोपायसंयुक्तान्सोपिपूर्वफलाश्रयः ॥ २२ ॥ कृत्वामहांतिपुण्यानियोऽत्रविश्वेश्वरेऽर्पयेत् ॥ नतस्यपुनरावृत्तिर्घोरेसंसारसागरे ॥२३॥ अनंतइतिवादोयंमयिलोकेऽत्रगीयते ॥ परंकाशीगुणानांहिमयाप्यंतोनलभ्यते ॥२४॥ तस्मात्प्रयत्नतःकाश्यांध्रुवश्रेयःसमाश्रयेत् ॥ काशीश्रेयःफलंपुंसामक्षयायोपजायते ॥२५॥ गणावूचतुः ॥ ॥ ध्रुवमित्युपदिश्याथजगामगरुडध्वजः ॥ ध्रुवोपिलिंगंसंस्थाप्यवैद्यनाथसमीपतः ॥ २६ ॥ प्रासादंसुमहत्कृत्वाकृत्वाकुंडंतदग्रतः ॥ विश्वेश्वरंसमभ्यर्च्यकृतकृत्योगृहंययौ ॥ २७ ॥ ध्रुवेश्वरंसमभ्यर्च्यध्रुवकुंडेकृतोदकः ॥ ध्रुवलोकमवाप्नोतिनरोभोगसमन्वितः ॥ २८ ॥ ध्रुवस्यपरमाख्यानंयःपठेत्पाठयेदपि ॥ सविष्णुलोकमासाद्यजायतेविष्णुवल्लभः ॥ २९ ॥ नरोध्रुवस्यचरितंप्रसंगेनस्मरन्नपि ॥ नपापैरभिभूयेतमहत्पुण्यमवाप्नुयात् ॥ १३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखंडे पूर्वार्द्धे ध्रुवस्तुतिर्नामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ शिवशर्मोवाच ॥ ध्रुवाख्यानमिदंरम्यंमहापातकनाशनम् ॥ महाश्चर्यकरंपुण्यंश्रुत्वातृप्तोस्मिभोगणौ ॥ १ ॥ ॥ अगस्त्यउवाच ॥ ॥ इत्थंयावद्द्विजोब्रूतेविमानंवायुवेगगम् ॥ तावत्प्रापमहर्लोकंस्वर्लोकात्परमाद्भुतम् ॥ २ ॥ द्विजोऽथलोकंसंवीक्ष्यसर्वतोमहसावृतम् ॥ तौगणौप्रत्युवाचेदंकोयंलोकोमनोहरः ॥ ३ ॥ तावूचतुस्ततोविप्रंनिशामयमहामते ॥ अयंसहिमहर्लोकःस्वर्लोकात्परमाद्भुतः ॥ ४ ॥ कल्पायुषोवसंत्यत्रतपसाधूतकल्मषाः ॥ विष्णुस्मरणसंक्षीणसमस्तक्लेशसंचयाः ॥५॥ निर्व्याजप्रणिधानेनदृष्टृतेजोमयंजगत् ॥ महायोगसमायुक्तावसंत्यत्रसुरोत्तमाः ॥ ६ ॥

स्तस्मिन्नात्मनोऽलंप्रत्ययाभावमाह ध्रुवाख्यानमित्यनेन ॥ १ ॥ २ ॥ महसातेजसा ॥ ३ ॥ ४ ॥ कल्पायुषोद्विपरार्धाभृग्वादयइत्यर्थः ॥ विष्णोःस्मरणेनध्यानेननष्टाःसमस्ताःसवासनाःक्लेशानामुअविद्यास्मितारागद्वेषाभिनिवेशानांसंचयाःसमूहायेषांतेतथा ॥ ५ ॥ निर्व्याजप्रणिधानेननिष्कपटसमाधिना ॥ तेजोमयंब्रह्मात्मकम् ॥ महायोगोऽत्रजीवपरयोरैक्य

CC-0. In Public Domain. Digitization by eGangotri

चिंतनम् ॥ ६ ॥ इत्थंपूर्वोक्तांकथांकथयतोःसतोः ॥ तत्प्रसिद्धम् ॥ निनायप्रापयामास ॥ ७ ॥ ८ ॥ द्वंद्वानिशीतोष्णादीनि ॥ ९ ॥ १० ॥ विराजाहिरण्यगर्भेणोत्पादितांवैराजाः ॥ किंच ॥ वासुदेवेइति ॥ ११ ॥ १२ ॥ शिलोंछेत्यादीनांप्रथमांतानांपदानांततपोलोकेऽकुतोभयावसंतीतिनवमेनान्वयः ॥ शिलोंछवृत्तयःपतितकणिशकणवृत्तयः ॥ दन्ताएवउलूखलंकंडनीयेषांते दंतोलूखलकाः ॥ १३ ॥ सूर्येणसहचतुर्दिक्षुचतुर्भिराग्निभिस्तपोयेषांतेपंचाग्नितपसः ॥ स्थंडिलेशयाभूशायिनःहेमंतशिशिरयोर्ऋत्वोर्धेपौषमाघौव्याप्यजलेक्षपारात्रीः क्षपयन्तीत्यर्थः ॥ १४ ॥ तृषिताअपिकुशाग्रनीराणांविप्रुषःकणानेवापिबन्नयथेष्टमितिभावः ॥ दीर्घश्छांदसः ॥ तत्रहेतुर्यतयोयत्नशीलास्तपएकनिष्ठानविषयपराइत्यर्थः ॥ अतिक्षुधिताअपिवाताशिनः ॥ पादांगुष्ठाग्रेणभुवंस्पृशंतीतिपादांगुष्ठाग्रभूस्पृशः ॥ १५ ॥ ऊर्ध्वदोषऊर्ध्वीकृतहस्ताः ॥ रविदृशःसूर्यगत्यनुसारिनेत्राः ॥ एकेनांघ्रिणापादेनस्थाणुवन्निश्चलाः ॥ दिवानिरुच्छ्वासाःसंपूर्णदिनंव्याप्यत्यक्तोच्छ्वासाः

इत्थंकथांकथयतोर्भगवद्गणयोःप्रिये ॥ क्षणार्धेनविमानंतज्जनलोकंनिनायतान् ॥ ७ ॥ निवसंत्यमलायत्रमानसाब्रह्मणःसुताः ॥ सनंदनाद्यायोगींद्राः सर्वेतेह्यूर्ध्वरेतसः ॥ ८ ॥ अन्येतुयोगिनोयेवैह्यस्खलद्ब्रह्मचारिणः ॥ सर्वद्वंद्वविनिर्मुक्तास्तेवसंत्यतिनिर्मलाः ॥९॥ जनलोकात्तपोलोकस्तेषांलोचनगोचरः ॥ कृतस्तेनविमानेनमनोवेगेनगच्छता ॥ १० ॥ वैराजायत्रतेदेवावसेयुर्दाहवर्जिताः ॥ वासुदेवेमनोयेषांवासुदेवार्पितक्रियाः ॥ ११ ॥ तपसातोष्यगोविंदमभिलाषविवर्जिताः॥तपोलोकमिमंप्राप्यवसंतिविजितेंद्रियाः ॥१२॥ शिलोंछवृत्तयोयेवैदंतोलूखलिकाश्चये ॥ अश्मकुट्टाश्चमुनयःशीर्णपर्णाशिनश्चये ॥ १३ ॥ ग्रीष्मेपंचाग्नितपसोवर्षासुस्थंडिलेशयाः ॥ हेमंतशिशिरार्धेयेक्षपंतिसलिलेक्षपाः ॥१४॥ कुशाग्रनीरविप्रूषस्तृषितायतयोऽपिबन् ॥ वाताशिनोतिक्षुधिताःपादाग्रांगुष्ठभूस्पृशः ॥ १५ ॥ ऊर्ध्वदोषोरविदृशस्त्वेकांघ्रिस्थाणुनिश्चलाः ॥ येवैदिवानिरुच्छ्वासामासोच्छ्वासाश्चयेपुनः ॥१६॥ मासोपवासव्रतिनश्चातुर्मास्यव्रताश्चये ॥ ऋत्वंततोयपानायेयेषण्मासोपवासकाः ॥ १७ ॥ येचवर्षनिमेषावैवर्षधारांबुतर्षकाः ॥ येचस्थाणूपमांप्राप्तामृगकंडूतिसौख्यदाः ॥ १८ ॥ जटाटवीकोटरांतःकृतनीडांडजाश्चये ॥ प्ररूढवामलूरांगाःस्नायुनद्धास्थिसंचयाः ॥ १९ ॥ लताप्रतानैःपरितोवेष्टितावयवाश्चये ॥ सस्यानिचप्ररूढानियदंगेषुचिरस्थिति ॥ २० ॥

कुम्भकपरायणाइत्यर्थः ॥ मासोच्छ्वासामासमभिव्याप्योच्छ्वासोयेषांतेतथारेचकपरायणाइत्यर्थः ॥ १६ ॥ ऋत्वंतेमासद्वयांतेतोयंपानंयेषांतेऋत्वंततोयपानाः ॥ १७ ॥ वर्षमध्येवर्षसमाप्तौवानिमेषोयेषांतेवर्षनिमेषाः ॥ वर्षधारांबुनिवर्षसंपातजलेतर्षस्तृष्णायेषांतेवर्षधारैकजलपानाइत्यर्थः ॥ येचस्थाणूपमंस्थाणुतुल्यतांप्राप्ताः ॥ स्थाणुसाम्योपमामितिक्वचित् ॥ स्थाणुसाम्योपसंप्राप्ताइतिचान्यत्र ॥ अतएवमृगकंडूतिसौख्यदाः सुखमेवसौख्यंमृगैःकृत्वाकंडूतिःसौख्यदायेषांतेतथा ॥१८॥ जटैवाटवीविपिनंतस्याःकोटरांतश्छिद्रमध्येकृतोनीडोवासोयैस्तथाभूताअण्डजायेषुतेतथा॥ प्ररूढावामलूरावल्मीकाअंगेषुयेषांतेतथा ॥ वामलूरश्चनाकुश्चवल्मीकंपुन्नपुंसकमित्यमरः ॥ प्ररूढतृणसर्वांगाइतिक्वचित् ॥ स्नायुनद्धोनाडीबद्धोऽस्थिसंचयोयेषांतेतथा ॥१९॥ लताप्रतानैर्वल्लीनांविस्तारैःसमूहै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीतिवा ॥ चिरस्थितियथास्यात् ॥ चिरस्थितेरीतिक्वचित् ॥ तत्रनिश्चलतयाचिरस्थितेर्हेतोरित्यर्थः ॥ २० ॥ इत्यादिषुपूर्वोक्तप्रकारेषुसुतपःसुशोभनतपस्यासुक्लिष्टानिक्षीणानिवर्ष्माणिशरीराणि येषांतेतथा ॥ कर्माणइतिपाठेइत्यादीनिसुतपांस्येवक्लिष्टानिकठोराणिकर्माणियेषांतेतथा ॥ ब्रह्मायुषोहिरण्यगर्भसमजीविनः ॥ तदुक्तम् ॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे ॥ परस्यांतेकृतात्मानस्ते विशंतिपरंपदामिति ॥ २१ ॥ शृणोतिकथामितिशेषः ॥ २२ ॥ तेनशिवशर्मणा ॥ २३ ॥ स्मृत्युक्ताचारचंचुः स्मृत्युक्ताचाराभिमुखस्तदुन्मुखइत्यर्थः ॥ चंचुपदंहंससादृश्यव्याख्या पनार्थम् ॥ सयथाक्षीरनीरेविवेचयतिविविच्यचक्षीरंपिबतितथाऽयमपिपापपुण्येविविच्यपापंविहायपुण्यमनुतिष्ठतीत्यर्थः ॥ यद्वा स्मृत्युक्ताचारेणचर्यतेज्ञायतइतिस्मृत्युक्ताचारचंचुः ॥ प्रतीपोविमुखः ॥ २४ ॥ ब्रह्माशिवशर्माणंसंबोधयति ॥ अयीति ॥ अपीतिपाठेनिश्चयेऽपिशब्दः ॥ हेशिवशर्मक दयायांकः ॥ २५ ॥ भूर्लोकमारभ्यसत्यलोकपर्यंतंसर्वंजगद्यदेतच्छब्दाभ्यांनिर्दिश्यते ॥ तत्रावांतरविशेषमाह ॥ दैनंदिनेति ॥ दिनेदिनेभवतीतिदैनंदिनःसचासौप्रलयश्चतस्माद्दैनंदिनप्रलयान्निमित्तादनंतरंवा ॥ आवैराजंमहर्लोकमूआमर्यादीकृत्यसीमानंविधायेत्येतत्पुनःपुनःसृजामि ॥

इत्यादिसुतपःक्लिष्टवर्ष्माणोयेतपोधनाः ॥ ब्रह्मायुषस्तपोलोकेतेवसंत्यकुतोभयाः ॥२१॥ यावदित्थंसपुण्यात्माशृणोतिगणयोर्मुखात् ॥ तावन्नेत्रातिथी भूतःसत्यलोकोमहोज्ज्वलः ॥ २२ ॥ त्वरावंतौगणौतत्रविमानादवरुह्यतौ ॥ स्रष्टारंसर्वलोकानांतेनसार्धंप्रणेमतुः ॥ २३ ॥ ब्रह्मोवाच ॥ गणावसौद्विजो धीमान्वेदवेदांगपारगः ॥ स्मृत्युक्ताचारचंचुश्चप्रतीपःपापकर्मसु ॥ २४ ॥ अयिद्विजमहाप्राज्ञजानेत्वांशिवशर्मक ॥ साधूकृतंत्वयावत्ससुतीर्थप्राणमो क्षणात् ॥ २५ ॥ सत्वरंगत्वरंसर्वंयच्चैतद्भवतेक्षितम् ॥ दैनंदिनप्रलयतःसृजामिचपुनःपुनः ॥ २६ ॥ आवैराजंप्रतिपदमुपसंहरतेहरः ॥ काकंथामशका भानांनृणांमरणधर्मिणाम् ॥ २७ ॥ चतुर्षुभूतग्रामेषुह्येकएवगुणोनृणाम् ॥ तस्मिन्वैभारतेवर्षेकर्मभूमौमहीयसि ॥ २८ ॥ चपलानिविनिर्जित्येंद्रिया णिमनसासह ॥ विहायवैरिणंलोभंविष्वग्गुणगणस्यच ॥ २९ ॥ धर्मवंशहरंकाममर्थसंचयहारिणम् ॥ जरापलितकर्तारंविनिष्कृत्यविचारतः ॥३०॥ जित्वाक्रोधरिपुंधैर्यात्तपसोयशसःश्रियः ॥ शरीरस्यापिहर्तारंनेतारंतामसींगतिम् ॥ ३१ ॥

भूरादिलोकत्रयमितिशेषः ॥ हरोरुद्रःप्रतिपदंप्रतिक्षणंप्रतिदिनमितियावत् ॥ पुनःपुनर्लोकत्रयमुपसंहरतेनाशयति ॥ महर्लोकादीनांतुप्राकृतप्रलयेद्विपरार्धावसानेसकारणकानांनाशःपुनरपितावतःकालस्यानंतरंसकारणकब्रह्मांडसृष्टिरितिबोद्धव्यम् ॥ यदादैनंदिनप्रलयतइत्यनेनविष्णोरेवदिनेदिनेप्रलयउच्यतेतदापुनःपुनःसृजामीतिविष्णुनासहाभेदविवक्षयेतियोज्यम् ॥ वैराजंसत्यलोकमभिव्याप्येतिवाव्याख्येयम् ॥ यद्वा हेवत्सशिवशर्मन्सुतीर्थप्राणमोक्षणनिमित्ततोयदेतत्सर्वंचराचरंतत्सत्वरमविलंबितमेवगत्वरंगमनशीलंविनाशशीलंविनाशीत्येतद्भवतेक्षितंदृष्टंतत्त्वयासाधुकृतंसम्यक्कृतम् ॥ सत्वरंगत्वरमेवकुतइत्याकांक्षायामाह ॥ दैनंदिनेति ॥ शेषंपूर्ववत् ॥ २६ ॥ २७ ॥ चतुर्षुजरायुजांडजोद्भिज्जस्वेदजेषुनृणामूएषवक्ष्यमाणएवतस्मिन्भारतेवर्षेगुणः ॥ कोऽसौगुणः ॥ धर्मसोपानमारुह्येहसत्यलोकमायांतीतियत्सइतिसप्तमेनान्वयः ॥ २८ ॥ कैःसाधनैर्यांतीत्याकांक्षायांसाधनान्याह ॥ चपलानीति ॥ चपलानींद्रियाणीत्यन्वयः ॥ विष्वग्गुणगण यःसर्वगुणसमुदायस्य ॥ विश्वेगुणगणस्येतिक्वचित्पाठः ॥ तत्रविश्वेविश्वस्मिन् ॥ २९ ॥ धर्मवंशहरंधर्मसंततिहरम् ॥ धर्मध्वंसकरमितिक्वचित् ॥ ३० ॥ धैर्याद्विवेकात् ॥ यथोक्तंवैष्णवे ॥ यशसस्तपसश्चै

CC-0. In Public Domain. Digitization by eGangotri

वक्रोधोनाशकरःपरइति ॥ तामसींनारकींगतिंनेतारमितिलोभादीनांत्रयाणांविशेषणम् ॥ तथाचसार्वज्ञंवचः ॥ त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः ॥ कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजे
दिति ॥ ३१ ॥ मदंदर्पम् ॥ सदापदमितिपाठेऽहंकारविशेषणम् ॥ ३२ ॥ दूषणेतिमोहविशेषणम् ॥ ३३ ॥ अंधीकरणंज्ञाननाशकम् ॥ अंधतामिस्रोनरकविशेषस्तद्दर्शकम् ॥ ३४ ॥ परिक्षुण्णं
सेवितम् ॥ ३५ ॥ यद्यस्मात् ॥ तत्रकर्मभूमौ ॥ पदेषुस्थानेषु ॥ उच्चावचेषूत्कृष्टापकृष्टेषुनानाविधेष्वित्यर्थः ॥ ३६ ॥ नार्यावर्तेति ॥ आर्यावर्तःपुण्यभूमिर्मध्यंविंध्यहिमालयोरिति ॥
ब्रह्मांडमेवमंडलंदेशस्तस्मिन् ॥ ब्रह्मांडमंडपइतिक्वचित् ॥ यद्यपिकाशीब्रह्मांडमध्यगानभवतितथापिप्रतीत्यभिप्रायेणोक्तमितिज्ञेयम् ॥ एवमग्रेपिज्ञातव्यम् ॥ ३७ ॥ एवंसामान्यतोऽधिकमुक्त्वा
विशेषतोपिवक्तुमाह ॥ संतीति ॥ सुखेतरंदुःखंतद्वर्जिताः ॥ ३८ ॥ स्वर्लोकादधिकंरम्यंसुंदरंनास्तीत्यत्रहेतुमाह ॥ सर्वेइति ॥ ३९ ॥ स्वर्गसदांदेवानांमध्ये ॥ ४० ॥ नागांगाभरणप्रोताः

सदामदंपरित्यज्यप्रमादैकपदप्रदम् ॥ प्रमादैकशरण्यंचसंपदांविनिवर्तकम् ॥ ३२ ॥ सर्वत्रलघुताहेतुमहंकारंविहायच ॥ दूषणारोपणेयत्नंकुर्वाणंसज्जने
ष्वपि ॥ ३३ ॥ हित्वामोहंमहाद्रोहरोपणंमतिघातिनम् ॥ अत्यंतमंधीकरणमंधतामिस्रदर्शकम् ॥ ३४ ॥ श्रुतिस्मृतिपुराणोक्तपरिक्षुण्णंमहाजनैः ॥
धर्मसोपानमारुह्ययदिहायांतिहेलया ॥ ३५ ॥ कर्मभूमिंसमीहंतेसर्वेस्वर्गौकसोद्विज ॥ यत्तत्रार्जितभोक्तारःपदेषूच्चावचेष्वमी ॥ ३६ ॥ नार्यावर्तसमोदे
शोनकाशीसदृशीपुरी ॥ नविश्वेशसमंलिंगंक्वापिब्रह्मांडमंडले ॥३७॥ संतिस्वर्गाबहुविधाःसुखेतरविवर्जिताः॥ सुकृतैकफलाःसर्वेयुक्ताःसर्वसमृद्धिभिः॥
॥ ३८ ॥ स्वर्लोकादधिकंरम्यंनहिब्रह्मांडगोलके ॥ सर्वेयतंतेस्वर्गायतपोदानव्रतादिभिः ॥ ३९ ॥ स्वर्लोकादपिरम्याणिपातालानीतिनारदः ॥
प्राहस्वर्गसदांमध्येपातालेभ्यःसमागतः ॥ ४० ॥ आह्लादकारिणःशुभ्रामणयोयत्रसुप्रभाः ॥ नागांगाभरणप्रोताःपातालंकेनतत्समम् ॥ ४१ ॥
दैत्यदानवकन्याभिरितश्चेतश्चशोभिते ॥ पातालेकस्यनप्रीतिर्विमुक्तस्यापिजायते ॥ ४२ ॥ दिवार्करश्मयस्तत्रप्रभांतन्वंतिनातपम् ॥ शशिनश्चनशी
तायनिशिद्योतायकेवलम् ॥ ४३ ॥ यत्रनज्ञायतेकालोगतोपिदनुजादिभिः ॥ वनानिनद्योरम्याणिसरांसिसरांसिच ॥ ४४ ॥ कलाःपुंस्को
किलालापाःसुचैलानिशुचीनिच ॥ भूषणान्यतिरम्याणिगंधाढ्यमनुलेपनम् ॥ ४५ ॥ वीणावेणुमृदंगादिनिस्वनाःश्रुतिहारिणः ॥ हाटकेशंमहालिंगंयत्र
वैसर्वकामदम् ॥ ४६ ॥ एतान्यन्यानिरम्याणिभोग्ययोग्यानिदानवैः ॥ दैत्योरगैश्चभुज्यंतेपातालांतरगोचरैः ॥ ४७ ॥

नागानामंगाभरणलक्षणालंकारेषुप्रोताग्रथितामणयोयत्रपातालेवर्ततेतत्पातालंकेनसमंनकेनापि ॥ सर्वोत्तमत्वात् ॥ नागाभरणभूषास्वितिपाठेपिसएवार्थः॥४१॥४२॥दिवार्केति॥यत्रपातालेदिवादिवसे
ऽर्करश्मयःप्रभामालोकमात्रंतन्वंतीतिनातपंघर्मंनविस्तारयंतीत्यर्थः ॥ शशिनश्चेतिचशब्दःसमासस्थमपिरश्मिपदमनुवर्तयति ॥ :चंद्रस्यचरश्मयोनिशिरात्रौनशीतायकिंतुकेवलद्योतायप्रकाशाय ॥
एतेनार्केंदुरश्मीनांपातालेप्यनुप्रवेशोविवक्ष्यते ॥ तथाचभविष्यपुराणे ॥ सूर्योगोभिर्जगत्सर्वमादीपयतिसर्वशः ॥ त्रीणिरश्मिशतान्यस्यभूर्लोकंद्योतयंतिवै ॥ त्रीणित्रीणितथाचान्यौद्वौलोकौभासयंत्यु
त ॥ शतंचापिअधस्तात्तुपातालंदीपयंत्युतेति ॥ सूर्याचंद्रमसावेतौगृहीतदेहांतरौतत्रस्तइतिकेचिद्व्याचक्षते ॥ ४३ ॥४४॥ कलाविद्याः ॥ ४५ ॥ ४६ ॥ भोग्ययोग्यानिभोग्यार्हाणि ॥ भोगयोग्यानी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिकचित् ॥ ४७ ॥ रत्नसानुंसुमेरुम् ॥ रत्नसारमितिपाठेपिसएवार्थः ॥ ४८ ॥ मृगीदृशोहरिणीनयनाः ॥ ४९ ॥ श्रेयोविनिमयार्जितापुण्यपरिवर्तनेनसंपादिता ॥ ५० ॥ अक्लीबभाषिभिरमिथ्याभाषिभिःसत्यवादिभिरित्यर्थः ॥ पुत्रक्षेत्रेआद्येयेषांगृहादीनांतिपुत्रक्षेत्राद्यास्तद्विहीनकैस्तद्रहितैरित्यर्थः ॥ ५१ ॥ सर्वेभ्योद्वीपेभ्योजंबूद्वीपस्यश्रैष्ठ्यमाह ॥ संतीति ॥ द्विर्गताआपोयस्मिन्सद्वीपः ॥ पारावारांतरस्थिताः ॥ शुद्धोदपरार्वाक्तीरयोरंतरेपात्रेस्थितामध्येस्थिताइत्यर्थः ॥ पारावारेपरार्वाचीर्तीरेपात्रंतदंतरमित्यमरः ॥ अथवापारावारांतरस्थितत्वंद्वीपानांदक्षिणोत्तरंसमुद्रतीरंपूर्वपश्चिमसमुद्रतीरंचापिज्ञातव्यम् ॥ ५२ ॥ नववर्षाणिभद्राश्वकेतुमालभारतोत्तरकुर्वाख्यानिपूर्वपश्चिमदक्षिणोत्तरतःसमुद्रलग्नानिचत्वारिवर्षाणि ॥ मेरोःसर्वतइलावृतंततउत्तरतोरम्यकंहिरण्मयंचदक्षिणतोहरिवर्षंकिंपुरुषंचेति ॥ तत्रतेषु नवसुवर्षेषुभारतंवर्षमजनाभंसद्भरतस्यर्षभपुत्रस्यनाम्नाविख्यातमुत्तमंश्रेष्ठमित्यर्थः ॥ तथाचोक्तंभागवते ॥ तस्यासीद्भरतोज्येष्ठोनारायणपरायणः ॥ आख्यातंवर्षमेतद्यन्नाम्नाभारतमद्भुतमिति ॥ ५३ ॥ ५४ ॥ इदंभारतमित्यन्वयः ॥ प्रथमंमुख्यम् ॥ ५५ ॥ हिमविंध्याद्रेर्हिमालयसहितविंध्यपर्वतस्येत्यर्थः ॥ हिमविंध्याद्र्योरिति

पातालेभ्योपिवैरम्यंद्विजवर्षमिलावृतम् ॥ रत्नसानुंसमाश्रित्यपरितःपरिसंस्थितम् ॥ ४८ ॥ सदासुकृतिनोयत्रसर्वभोगभुजोद्विज ॥ नवयौवनसंपन्नानित्यंयत्रमृगीदृशः ॥४९॥ भोगभूमिरियंप्रोक्ताश्रेयोविनिमयार्जिता ॥ भुज्यतेत्वद्विधैर्लोकैस्तीर्थाभित्यक्तदेहकैः ॥ ५० ॥ अक्लीबभाषिभिश्चापिपुत्रक्षेत्राद्यहीनकैः ॥ परोपकारसंक्षीणसुखायुर्धनसंचयैः ॥ ५१ ॥ संतिद्वीपाह्यनेकावैपारावारांतरस्थिताः ॥ जंबूद्वीपसमोद्वीपोनक्वापिजगतीतले ॥ ५२ ॥ तत्रापिनववर्षाणिभारतंतत्रचोत्तमम् ॥ कर्मभूमिरियंप्रोक्तादेवानामपिदुर्लभा ॥५३॥ अष्टौकिंपुरुषादीनिदेवभोग्यानितानितु ॥ तेषुस्वर्गात्समागत्यरमंतेत्रिदिवौकसः ॥ ५४ ॥ योजनानांसहस्राणिनवविस्तारतस्त्विदम् ॥ भारतंप्रथमंवर्षंमेरोर्दक्षिणतःस्थितम् ॥ ५५ ॥ तत्रापिहिमविंध्याद्रेरंतरंपुण्यदंपरम् ॥ गंगायमुनयोर्मध्येह्यंतर्वेदीभुवःपराः ॥ ५६ ॥ कुरुक्षेत्रंहिसर्वेषांक्षेत्राणामधिकंततः ॥ ततोपिनैमिषारण्यंस्वर्गसाधनमुत्तमम् ॥ ५७ ॥ नैमिषारण्यतोपीहसर्वास्मिन्क्षितिमंडले ॥ सर्वेभ्योपिहितीर्थेभ्यस्तीर्थराजोविशिष्यते ॥ ५८ ॥ स्वर्गदोमोक्षदश्चैवसर्वकामफलप्रदः ॥ प्रयागस्तन्महत्क्षेत्रंतीर्थराजइतिस्मृतः ॥ ५९ ॥ यागाःसर्वेमयापूर्वंतुलयाविधृताद्विज ॥ तच्चतीर्थवरंरम्यंकामिकंकामपूरणात् ॥ ६० ॥ दृष्ट्वाप्रकृष्टंयागेभ्यःपुष्टेभ्योदक्षिणादिभिः ॥ प्रयागमितितन्नामकृतंहरिहरादिभिः ॥ ६१ ॥

क्वचित्पाठः ॥ अंतर्वेदीभुवअंतर्वेदीनाम्न्योभुवःपराउत्कृष्टाः ॥ ५६ ॥ निमिषेणेदंदानवंबलमस्मिन्नरण्येमयानिहतमितिनैमिषारण्यम् ॥ तथाचगौरमुखमृषिंप्रतिवराहपुराणेविष्णोर्वाक्यम् ॥ एवंकृत्वाततोदेवोमुनिंगौरमुखंतदा ॥ उवाचनिमिषेणेदंनिहतंदानवंबलम् ॥ अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितमिति ॥ भविष्यतियथार्थंवैब्राह्मणानांविशेषकमितिपाठांतरे ॥ ब्रह्मणाविसृष्टस्यचक्रस्यनेमिःशीर्यतेयत्रतन्निमिशंनिमिशमेवनैमिशम् ॥ वायसराक्षसादिवत्स्वार्थेतद्धितः ॥ तथाचवायुपुराणे ॥ एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते ॥ यत्रास्यशीर्यतेनेमिःसदेशस्तपसःशुभः ॥ इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोमयम् ॥ प्रणिपत्यमहादेवंविससर्जपितामहः ॥ तेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुम् ॥ प्रययुस्तस्यचक्रस्ययत्रनेमिर्व्यशीर्यत ॥ तद्वनंतेनविख्यातंनैमिशंमुनिपूजितमिति ॥ ५७ ॥ ५८ ॥ कोऽसौतीर्थराजइत्याकांक्षायामाह ॥ स्वर्गदइति ॥ महदुत्कृष्टम् ॥ ममेतिक्वचित् ॥ ५९ ॥ प्रयागनामनिर्वक्ति यागाइतिद्वयेन ॥ ६० ॥ ६१ ॥

CC-0. In Public Domain. Digitization by eGangotri

 याागादिभ्यःप्रकृष्टत्वमेवदर्शयति ॥ नाममात्रेति ॥ ६२ ॥ कृतानियानिएनांसिपापानितेषांपरिशुद्धितोनाशादित्येवं ॥ ६३ ॥ ६४ ॥ सपापसंचयः ॥ ६५ ॥ पदांतरंस्थानांतरम् ॥ ६६ ॥
॥६७॥ त्वङ्मांसरुधिरस्नाय्वस्थिमज्जाशुक्राणीतिसप्तधातवस्तन्मयीभूततनौतत्स्वरूपशरीरइत्यर्थः ॥ वपनान्मुंडनात् ॥ ६८ ॥ सितासितेगंगायमुनयोःसंभेदेवेण्यामित्यर्थः ॥ अभिध्यायसंकल्प्य
अभिध्यायन्नितिक्वचित् ॥ ६९ ॥ ७० ॥ मोक्षमवाप्नोतिसत्त्वशुद्धिद्वाराविविदिषाद्वारावेत्यर्थः ॥ ७१ ॥ स्फुटंझटितीत्यर्थः ॥ ७२ ॥ ७३॥ ७४॥७५॥ यथाकथंचिदिति ॥ अनशनेनजलादिप्रवे

नाममात्रस्मृतेर्यस्यप्रयागस्यत्रिकालतः ॥ स्मर्तुःशरीरेनोजातुपापंवसतिकुत्रचित् ॥ ६२ ॥ संतितीर्थान्यनेकानिपापत्राणकराणिच ॥ नशक्तान्य
धिकंदातुंकृतैनःपरिशुद्धितः ॥ ६३ ॥ जन्मांतरेष्वसंख्येषुयःकृतःपापसंचयः ॥ दुष्प्रणोद्योहिनितरांव्रतैर्दानैस्तपोजपैः ॥ ६४ ॥ सतीर्थराजग
मनोद्यतस्यशुभजन्मनः ॥ अंगेषुवेपतेऽत्यंतंद्रुमोवातहतोयथा ॥ ६५ ॥ ततःक्रांताधर्ममार्गस्यप्रयागदृढचेतसः ॥ पुंसःशरीरान्निर्यातुमपेक्षेतपदांतरम् ॥
॥ ६६ ॥ भाग्यान्नेत्रातिथीभूतेतीर्थराजेमहात्मनः ॥ पलायतेद्रुततरंतमःसूर्योदयेयथा ॥ ६७ ॥ सप्तधातुमयीभूततनौपापानियानिवै ॥ केशेषुतानितिष्ठं
तिवपनाद्यांतितान्यपि ॥ ६८ ॥ एवंनिष्कलुषीभूयततःस्नायात्सितासिते ॥ यंयंकाममभिध्यायंस्तंतमाप्नोतिनान्यथा ॥ ६९ ॥ पुण्यराशिंचविपुलं
पुण्यान्भोगान्यथेप्सितान् ॥ स्वर्गंप्राप्नोतितत्पुण्यान्निष्कामोमोक्षमाप्नुयात् ॥ ७० ॥ स्नायाद्योभिलषन्मोक्षंकामानन्यान्विहायच ॥ सोपिमोक्षमवाप्नो
तिकामदात्तीर्थराजतः ॥ ७१ ॥ तीर्थराजंपरित्यज्ययोऽन्यस्मात्काममिच्छति ॥ भारताख्येमहावर्षेसकामंनाप्नुयात्स्फुटम् ॥ ७२ ॥ सत्यलोकेप्रयागे
चनांतरंवेद्म्यहंद्विज ॥ तत्रयेशुभकर्माणस्तेमल्लोकनिवासिनः ॥ ७३ ॥ तीर्थाभिलाषिभिर्मर्त्यैस्सेव्यंतीर्थांतरंनहि ॥ अन्यत्रभूमिवलयेतीर्थराजात्प्रया
गतः ॥७४॥ यथांतरंद्विजश्रेष्ठभूपेत्वितरसेवके ॥ दृष्टांतमात्रंकथितंप्रयागेतरतीर्थयोः ॥७५॥ यथाकथंचित्तीर्थेऽस्मिन्प्राणत्यागंकरोतियः ॥ तस्यात्म
घातदोषोनप्राप्नुयादीप्सितान्यपि ॥ ७६ ॥ यस्यभाग्यवतश्चात्रतिष्ठंत्यस्थीन्यपिद्विज ॥ नतस्यदुःखलेशोपिक्वापिजन्मनिजायते ॥ ७७ ॥
ब्रह्महत्यादिपापानांप्रायश्चित्तंचिकीर्षुणा ॥ प्रयागंविधिवत्सेव्यंद्विजवाक्यान्नसंशयः ॥ ७८ ॥ किंबहूक्तेनविप्रेंद्रमहोदयमभीप्सुना ॥ सेव्यंसिता
सितंतीर्थंप्रकृष्टंजगतीतले ॥ ७९ ॥

शेनवेत्यर्थः ॥ नचैतद्ब्राह्मणातिरिक्तविषयमितिमंतव्यम् ॥ यदिस्वंनविजानासिताततविष्णोरवस्थितिम् ॥ गत्वाप्रयागंतत्रैवसंत्यक्ष्यामःकलेवरमितिगर्गच्यवनादीनांवचनस्यप्रह्लादसंहितायांद्वारका
माहात्म्येदर्शनात् ॥ ७६ ॥ ७७ ॥ द्विजाःसनकादयोब्राह्मणाः ॥ द्वाभ्यांगुरुशिष्याभ्यांजायंतइतिद्विजावेदावातेषांवाक्यम् ॥ हेद्विजवाक्यंवचनमितिवा ॥ ७८ ॥ प्रयागमाहात्म्यमुपसंहरति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंवहूक्तेनेति ॥ ७९ ॥ यदर्थंस्वर्गादीनांरम्यत्वमुक्तंतदिदानींदर्शयति ॥ प्रयागतोपीति ॥ ८० ॥ अनायासेनमुक्तौहेतुंवदन्नतिरम्यत्वमाह ॥ प्रयागादिति ॥८१ ॥ अन्वयमुखेनातिरम्यत्वमुक्त्वाव्यतिरेकेणापितदाह ॥ अविमुक्तादिति ॥ महाक्षेत्रत्वेहेतुर्विश्वेशेति ॥ ८२ ॥ तर्हिब्रह्मांडस्थितत्वाविशेषादयोध्यादिक्षेत्रवदिदंक्षेत्रंस्यादित्यतआह ॥ अविमुक्तमिति ॥ ८३ ॥ कथंतर्हिदैनंदिनप्रलयेप्राकृतप्रलयेचात्रकाशीतिष्ठेत्तत्राह ॥ यथायथाहीति ॥ ८४ ॥ कथंतर्हिनिराश्रयमिदंतिष्ठेदित्यतआह ॥ क्षेत्रमेतदिति ॥ कथंतर्हितथासर्वेनपश्यंतितत्राह ॥ नेक्षंतइति ॥ ८५ ॥ महापर्वग्रहणादि ॥ नशुक्रगुर्वोर्ग्रहयोरस्तमनोदयाभ्यांकृतोग्रहास्तोदयकृतः ॥ ८६ ॥ सौम्यायनंप्रशस्तमयनमुत्तरायणमित्यर्थः ॥ ८७ ॥ नन्वयोध्यादिक्षेत्रस्यापिचक्रादिधृतत्वप्रतीतेःकोविशेषइतिचेत्तत्राह ॥ तथेति ॥

प्रयागतोपितीर्थेशात्सर्वेषुभुवनेष्वपि ॥ अनायासेनवैमुक्तिःकाश्यांदेहावसानतः ॥८०॥ प्रयागादपिवैरम्यमविमुक्तंनसंशयः ॥ यत्रविश्वेश्वरःसाक्षात्स्वयंसमधितिष्ठति ॥ ८१ ॥ अविमुक्तान्महाक्षेत्राद्विश्वेशसमधिष्ठितात् ॥ नचकिंचित्क्वचिद्रम्यमिहब्रह्मांडगोलके ॥ ८२ ॥ अविमुक्तमिदंक्षेत्रमपिब्रह्मांडमध्यगम् ॥ ब्रह्मांडमध्येनभवेत्पंचक्रोशप्रमाणतः ॥ ८३ ॥ यथायथाहिवर्धेतजलमेकार्णवस्यच ॥ तथातथोन्नयेदीशस्तत्क्षेत्रंप्रलयादपि ॥ ८४ ॥ क्षेत्रमेतत्त्रिशूलाग्रेशूलिनस्तिष्ठतिद्विज ॥ अंतरिक्षेनभूमिष्ठंनेक्षंतेमूढबुद्धयः ॥ ८५ ॥ सदाकृतयुगंचात्रमहापर्वसदाऽत्रवै ॥ नग्रहाऽस्तोदयकृतोदोषोविश्वेश्वराश्रमे ॥८६॥ सदासौम्यायनंतत्रसदातत्रमहोदयः ॥ सदैवमंगलंतत्रयत्रविश्वेश्वरस्थितिः ॥८७॥ यथाभूमितलेविप्रपुर्यःसंतिसहस्रशः ॥ तथाकाशीनमंतव्याक्वापिलोकोत्तरात्वियम् ॥ ८८ ॥ मयासृष्टानिविप्रेंद्रभुवनानिचतुर्दश ॥ अस्याःपुर्याविनिर्मातास्वयंविश्वेश्वरःप्रभुः ॥ ८९ ॥ पुरायमस्तपस्तप्त्वाबहुकालंसुदुष्करम् ॥ त्रैलोक्याधिकृतिंप्राप्तस्त्यक्त्वावाराणसींपुरीम् ॥ ९० ॥ चराचरस्यसर्वस्ययानिकर्माणितानिवै ॥ गोचरेचित्रगुप्तस्यकाशीवासिकृताद्दते ॥ ९१ ॥ प्रवेशोयमदूतानांनकदाचिद्द्विजोत्तम ॥ मध्येकाशीपुरीक्वापिरक्षिणस्तत्रतद्गणाः ॥ ९२ ॥ स्वयंनियंताविश्वेशस्तत्रकाश्यांतनुत्यजाम् ॥ तत्रापिकृतपापानांनियंताकालभैरवः ॥ ९३ ॥ तत्रपापंनकर्तव्यंदारुणारुद्रयातना ॥ अहोरुद्रपिशाचत्वंनरकेभ्योपिदुःसहम् ॥ ९४ ॥

भूमितलेभूम्यादितलेइत्यर्थः ॥ तथामननहेतुमाह ॥ काशीति ॥ तुशब्दइतराभ्योऽस्याआधिक्यंद्योतयति ॥ तदेवाह ॥ इयंकाशीलोकोत्तराचतुर्दशलोकादूर्ध्वेतियावत् ॥ ८८ ॥ तत्रहेतुमाह ॥ मयेति ॥ एतत्तुप्राकृतप्रलयानंतरंसृष्टावितिज्ञातव्यम् ॥ तथाचस्कांदेसूतसंहितायाम् ॥ तानिभूतानिसूक्ष्माणिपंचीकृत्यशिवाज्ञया ॥ तेभ्यएवसुराःसृष्टंब्रह्मांडाख्यमिदंमयेति ॥ अयंभावः ॥ अयोध्यादिक्षेत्राणांचक्रादिभिर्धृतत्वेपिचतुर्दशभुवनांतःपातित्वाद्ब्रह्मणासृष्टत्वाच्चाभ्योऽस्याश्चतुर्दशभुवनबहिर्भूतत्वाद्विश्वेश्वरसृष्टत्वाच्चाधिक्यमिति ॥ ८९ ॥ ९० ॥ काशीवासिकृतात्कर्मणःऋते विना ॥ ९१ ॥ तद्गणाःश्रीमद्रुद्रगणाः ॥ ९२ ॥ नियंतातत्त्वज्ञानोपदेष्टा ॥ तत्रापितनुत्यजामपिमध्ये ॥ नियंताशासकः ॥ ९३ ॥ तत्रकाश्याम् ॥ यत्रकृतात्पापादितिशेषः ॥ रुद्रयातना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यागादिभ्यःप्रकृष्टत्वमेवदर्शयति ॥ नाममात्रेति ॥ ६२ ॥ कृतानियानिएनांसिपापानितेषांपरिशुद्धितोनाशादित्येवं ॥ ६३ ॥ ६४ ॥ सपापसंचयः ॥ ६५ ॥ पदांतरंस्थानांतरम् ॥ ६६ ॥ ॥६७॥ त्वङ्मांसरुधिरस्नाय्वस्थिमज्जाशुक्राणीतिसप्तधातवस्तन्मयीभूततनौतत्स्वरूपशरीरइत्यर्थः ॥ वपनान्मुंडनात् ॥ ६८ ॥ सितासितेगंगायमुनयोःसंभेदेवेण्यामित्यर्थः ॥ अभिध्यायसंकल्प्य अभिध्यायन्नितिक्वचित् ॥ ६९ ॥ ७० ॥ मोक्षमवाप्नोतिसत्त्वशुद्धिद्वाराविविदिषाद्वारावेत्यर्थः ॥ ७१ ॥ स्फुटंझटितीत्यर्थः ॥ ७२ ॥ ७३॥ ७४॥७५॥ यथाकथंचिदिति ॥ अनशनेनजलादिप्रवे

नाममात्रस्मृतेर्यस्यप्रयागस्यत्रिकालतः ॥ स्मर्तुःशरीरेनोजातुपापंवसतिकुत्रचित् ॥ ६२ ॥ संतितीर्थान्यनेकानिपापत्राणकराणिच ॥ नशक्तान्यधिकंदातुंकृतैनःपरिशुद्धितः ॥ ६३ ॥ जन्मांतरेष्वसंख्येषुयःकृतःपापसंचयः ॥ दुष्प्रणोद्योहिनितरांव्रतैर्दानैस्तपोजपैः ॥ ६४ ॥ सतीर्थराजगमनोद्यतस्यशुभजन्मनः ॥ अंगेषुवेपतेऽत्यंतंद्रुमोवातहतोयथा ॥ ६५ ॥ ततःक्रांताधमार्गस्यप्रयागदृढचेतसः ॥ पुंसःशरीरान्निर्यातुमपेक्षेतपदांतरम् ॥ ॥ ६६॥ भाग्यान्नेत्रातिथीभूतेतीर्थराजेमहात्मनः ॥ पलायतेद्रुततरंतमःसूर्योदयेयथा ॥ ६७ ॥ सप्तधातुमयीभूततनौपापानियानिवै ॥ केशेषुतानितिष्ठंतिवपनाद्यांतितान्यपि ॥ ६८ ॥ एवंनिष्कलुषीभूयततःस्नायात्सितासिते ॥ यंयंकाममभिध्यायंस्तंतमाप्नोतिनान्यथा ॥ ६९ ॥ पुण्यराशिंचविपुलंपुण्यान्भोगान्यथेप्सितान् ॥ स्वर्गंप्राप्नोतितत्पुण्यान्निष्कामोमोक्षमाप्नुयात् ॥ ७० ॥ स्नायाद्योभिलषन्मोक्षंकामानन्यान्विहायच ॥ सोपिमोक्षमवाप्नोतिकामदात्तीर्थराजतः ॥ ७१ ॥ तीर्थराजंपरित्यज्ययोऽन्यस्मात्काममिच्छति ॥ भारताख्येमहावर्षेसकामंनाप्नुयात्स्फुटम् ॥ ७२ ॥ सत्यलोकेप्रयागेचनांतरंवेद्म्यहंद्विज ॥ तत्रयेशुभकर्माणस्तेमल्लोकनिवासिनः ॥ ७३ ॥ तीर्थाभिलाषिभिर्मर्त्यैस्सेव्यंतीर्थांतरंनहि ॥ अन्यत्रभूमिवलयेतीर्थराजात्प्रयागतः ॥७४॥ यथांतरंद्विजश्रेष्ठभूपेत्वितरसेवके ॥ दृष्टांतमात्रंकथितंप्रयागेतरतीर्थयोः ॥७५॥ यथाकथंचित्तीर्थेऽस्मिन्प्राणत्यागंकरोतियः ॥ तस्यात्मघातदोषोनप्राप्नुयादीप्सितान्यपि ॥ ७६ ॥ यस्यभाग्यवतश्चात्रतिष्ठंत्यस्थीन्यपिद्विज ॥ नतस्यदुःखलेशोपिक्वापिजन्मनिजायते ॥ ७७ ॥ ब्रह्महत्यादिपापानांप्रायश्चित्तंचिकीर्षुणा ॥ प्रयागंविधिवत्सेव्यंद्विजवाक्यान्नसंशयः ॥ ७८ ॥ किंबहूक्तेनविप्रेंद्रमहोदयमभीप्सुना ॥ सेव्यंसितासितंतीर्थंप्रकृष्टंजगतीतले ॥ ७९ ॥

शेनवेत्यर्थः ॥ नचैतद्ब्राह्मणातिरिक्तविषयमितिमंतव्यम् ॥ यदित्वंनविजानासितातविष्णोरवस्थितिम् ॥ गत्वाप्रयागंतत्रैवसंत्यक्ष्यामःकलेवरमितिगर्गच्यवनादीनांवचनस्यप्रह्लादसंहितायांद्वारकामाहात्म्येदर्शनात् ॥ ७६ ॥ ७७ ॥ द्विजाःसनकादयोब्राह्मणाः ॥ द्वाभ्यांगुरुशिष्याभ्यांजायंतइतिद्विजावेदावातेषांवाक्यम् ॥ हेद्विजवाक्यंवचनमितिवा ॥ ७८ ॥ प्रयागमाहात्म्यमुपसंहरति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंवहूक्तेनेति ॥ ७९ ॥ यदर्थंस्वर्गादीनांरम्यत्वमुक्तंतदिदानींदर्शयति ॥ प्रयागतोपीति ॥ ८० ॥ अनायासेनमुक्तौहेतुंवदन्नतिरम्यत्वमाह ॥ प्रयागादिति ॥ ८१ ॥ अन्वयमुखेनातिरम्यत्वमुक्त्वाव्य
तिरेकेणापितदाह ॥ अविमुक्तादिति ॥ महाक्षेत्रत्वेहेतुर्विश्वेशेति ॥ ८२ ॥ तर्हिब्रह्मांडस्थितत्वाविशेषादयोध्यादिक्षेत्रवदिदंक्षेत्रंस्यादित्यतआह ॥ अविमुक्तमिति ॥ ८३ ॥ कथंतर्हिदैनंदिनप्रलये
प्राकृतप्रलयेचात्रकाशीतिष्ठेत्तत्राह ॥ यथायथाहीति ॥ ८४ ॥ कथंतर्हिनिराश्रयमिदंतिष्ठेदित्यतआह ॥ क्षेत्रमेतदिति ॥ कथंतर्हितथासर्वेनपश्यंतितत्राह ॥ नेक्षंतइति ॥ ८५ ॥ महापर्वग्रहणादि ॥
नशुक्रगुर्वोर्ग्रहयोरस्तमनोदयाभ्यांकृतोग्रहास्तोदयकृतः ॥ ८६ ॥ सौम्यायनंप्रशस्तमयनमुत्तरायणमित्यर्थः ॥ ८७ ॥ नन्वयोध्यादिक्षेत्रस्यापिचक्रादिधृतत्वप्रतीतेःकोविशेषइतिचेत्तत्राह ॥ तथेति ॥

प्रयागतोपितीर्थेशात्सर्वेषुभुवनेष्वपि ॥ अनायासेनवैमुक्तिःकाश्यांदेहावसानतः ॥८०॥ प्रयागादपिवैरम्यमविमुक्तंनसंशयः ॥ यत्रविश्वेश्वरःसाक्षात्स्वयं
समधितिष्ठति ॥ ८१ ॥ अविमुक्तान्महाक्षेत्राद्विश्वेशसमाधिष्ठितात् ॥ नचकिंचित्क्वचिद्रम्यमिहब्रह्मांडगोलके ॥ ८२ ॥ अविमुक्तमिदंक्षेत्रमपिब्रह्मां
डमध्यगम् ॥ ब्रह्मांडमध्येनभवेत्पंचक्रोशप्रमाणतः ॥ ८३ ॥ यथायथाहिवर्धेतजलमेकार्णवस्यच ॥ तथातथोन्नयेदीशस्तत्क्षेत्रंप्रलयादपि ॥ ८४ ॥
क्षेत्रमेतत्त्रिशूलाग्रेशूलिनस्तिष्ठतिद्विज ॥ अंतरिक्षेनभूमिष्ठंनेक्षंतेमूढबुद्धयः ॥ ८५ ॥ सदाकृतयुगंचात्रमहापर्वसदाऽत्रवै ॥ नग्रहाऽस्तोदयकृतोदोषोविश्वे
श्वराश्रमे ॥८६॥ सदासौम्यायनंतत्रसदातत्रमहोदयः ॥ सदैवमंगलंतत्रयत्रविश्वेश्वरस्थितिः ॥८७॥ यथाभूमितलेविप्रपुर्यःसंतिसहस्रशः ॥ तथाकाशी
नमंतव्याक्वापिलोकोत्तरात्वियम् ॥ ८८ ॥ मयासृष्टानिविप्रेंद्रभुवनानिचतुर्दश ॥ अस्याःपुर्याविनिर्मातास्वयंविश्वेश्वरःप्रभुः ॥ ८९ ॥ पुरायमस्त
पस्तप्त्वाबहुकालंसुदुष्करम् ॥ त्रैलोक्याधिकृतिंप्राप्तस्त्यक्त्वावाराणसींपुरीम् ॥ ९० ॥ चराचरस्यसर्वस्ययानिकर्माणितानिवै ॥ गोचरेचित्रगुप्तस्यकाशी
वासिकृताहते ॥ ९१ ॥ प्रवेशोयमदूतानांनकदाचिद्द्विजोत्तम ॥ मध्येकाशीपुरींक्वापिरक्षिणस्तत्रतद्गणाः ॥ ९२ ॥ स्वयंनियंताविश्वेशस्तत्रकाश्यां
तनुत्यजाम् ॥ तत्रापिकृतपापानांनियंताकालभैरवः ॥ ९३ ॥ तत्रपापंनकर्तव्यंदारुणारुद्रयातना ॥ अहोरुद्रपिशाचत्वंनरकेभ्योपिदुःसहम् ॥ ९४ ॥

भूमितलेभूम्यादितलेइत्यर्थः ॥ तथामननहेतुमाह ॥ काशीति ॥ तुशब्दइतराभ्योऽस्याआधिक्यंद्योतयति ॥ तदेवाह ॥ इयंकाशीलोकोत्तराचतुर्दशलोकादूर्ध्वेतियावत् ॥ ८८ ॥ तत्रहेतुमाह ॥
मयेति ॥ एतत्तुप्राकृतप्रलयानंतरंसृष्टावितिज्ञातव्यम् ॥ तथाचस्कांदेसूतसंहितायाम् ॥ तानिभूतानिसूक्ष्माणिपंचीकृत्यशिवाज्ञया ॥ तेभ्यएवसुराःसृष्टंब्रह्मांडाख्यमिदंमयेति ॥ अयंभावः ॥
अयोध्यादिक्षेत्राणांचक्रादिभिर्धृतत्वेपिचतुर्दशभुवनांतःपातित्वाद्ब्रह्मणासृष्टत्वाच्चाभ्योऽस्याश्चतुर्दशभुवनवहिर्भूतत्वाद्विश्वेश्वरसृष्टत्वाच्चाधिक्यमिति ॥ ८९ ॥ ९० ॥ काशीवासिकृतात्कर्मणःऋते
विना ॥ ९१ ॥ तद्गणाःश्रीमद्रुद्रगणाः ॥ ९२ ॥ नियंतातत्त्वज्ञानोपदेष्टा ॥ तत्रापितनुत्यजामपिमध्ये ॥ नियंताशासकः ॥ ९३ ॥ तत्रकाश्याम् ॥ यत्रकृतात्पापादितिशेषः ॥ रुद्रयातना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलंकाशीकृतात्पापाद्रुद्रयातनामात्रंकिंतुसुदुःसहंरुद्रपिशाचत्वमपिभवतीत्याह ॥ अहोइतिखेदे ॥ ९४ ॥ ९५ ॥ ननुकामातुराणांनभयंनलज्जेत्यादिदर्शनात्किमितिपापिभिःकाशीत्याज्ये त्याशंक्यसदृष्टांतमाह ॥ अपीति ॥ कामातुरोपीत्यर्थः ॥ अपिपापकृतापापकृतापीत्यर्थः ॥ दृष्टांतदार्ष्टांतिकयोर्यत्तच्छब्दावध्याहर्तव्यौ ॥ तथापापकृतेतिक्वचित् ॥ ९६ ॥ विपक्षेबाधकमाह ॥ परापवादेति ॥ ९७ ॥ पापिभिःकाशीनवस्तव्येत्येतत्कैमुत्यन्यायेनाह ॥ अभिलष्यंतीति ॥ धनंचेतिचकारेणवस्त्रादिकंगृह्यते ॥ युक्तारंतुमितिपाठेयुक्ताउद्युक्ताःकृताध्यवसायाइत्यर्थः ॥ भोक्तुमन्नंप्रतिग्रहैरितिचक्वचित् ॥ ९८ ॥ ९९ ॥ काशीवासाऽनधिकारिणोदर्शयति ॥ त्यक्त्वेतिपंचभिः ॥ १०० ॥ हेविप्रहेशिवशर्मन् ॥ १ ॥ प्रतीपाःप्रतिकूलाः ॥ २ ॥

पापमेवहिकर्तव्यंमतिरस्तियदीदृशी ॥ सुखेनान्यत्रकर्तव्यंमहीह्यस्तिमहीयसी ॥ ९५ ॥ अपिकामातुरोजंतुरेकांरक्षतिमातरम् ॥ अपिपापकृताकाशी
रक्ष्यामोक्षार्थिनैकिका ॥ ९६ ॥ परापवादशीलेनपरदाराभिलाषिणा ॥ तेनकाशीनसंसेव्याक्वकाशीनिरयःक्वसः ॥ ९७ ॥ अभिलष्यंतियेनित्यंधनं
चात्रप्रतिग्रहैः ॥ परस्वंकपटैर्वापिकाशीसेव्यानतैर्नरैः ॥ ९८ ॥ परपीडाकरंकर्मकाश्यांनित्यंविवर्जयेत् ॥ तदेवचेत्किमत्रस्यात्काशीवासोदुरात्मनाम् ॥
॥ ९९ ॥ त्यक्त्वाविश्वेश्वरींभक्तिंयेऽन्यदेवपरायणाः ॥ सर्वथातैर्नवस्तव्याराजधानीपिनाकिनः ॥ १०० ॥ अर्थार्थिनस्तुयेविप्रयेचकामार्थिनोनराः ॥
अविमुक्तंनतैःसेव्यंमोक्षक्षेत्रमिदंयतः ॥ १ ॥ शिवनिंदापरायेचवेदनिंदापराश्चये ॥ वेदाचारप्रतीपायेसेव्यावाराणसीनतैः ॥ २ ॥ परद्रोहधियोयेचपरे
र्ष्याकारिणश्चये ॥ परोपतापिनोयेवैतेषांकाशीनसिद्धये ॥ ३ ॥ मनसापिनयेकाशीमभिनंदंतिदुर्धियः ॥ तेषांनिर्वाणवार्तापिदूरेदुर्वृत्तचेतसाम् ॥ ४ ॥
ज्ञानेननविनामोक्षःक्वचिदस्तीहभूतले ॥ तज्ज्ञानंनव्रतैर्लभ्यमपिचांद्रायणादिभिः ॥ ५ ॥ तुलापुरुषमुख्यैश्चदानैश्चश्रद्धयान्वितैः ॥ देशेकालेच
विधिनापात्रेभ्यःप्रतिपादितैः ॥ ६ ॥ नयमैर्ब्रह्मचर्याद्यैर्नियमैर्नार्चनादिभिः ॥ शरीरशोषणैरुग्रैर्नतपोभिर्द्विजोत्तम ॥ ७ ॥ नमहामंत्रजप्यैश्चगुरुभिः
प्रतिपादितैः ॥ नस्वाध्यायैर्यथोक्तैश्चनाग्निशुश्रूषणैः परैः ॥ ८ ॥ नसेवयागुरूणांचनश्राद्धैर्देवतार्चनैः ॥ ननानातीर्थयात्राभिर्ज्ञानंसमधिगम्यते ॥
॥ ९ ॥ नयोगेनविनाज्ञानंयोगस्तत्त्वार्थशीलनम् ॥ गुरूपदिष्टमार्गेणसदाभ्यासवशेनच ॥ ११० ॥ तस्यांतरायाबहवःसुदूरश्रवणादयः ॥ अतो
नप्राप्यतेज्ञानंयोगादेकेनजन्मना ॥ ११ ॥

तेषांकाशीनसिद्धयेतेषांनिर्वाणवार्तापिदूरइत्येतद्द्वयंतेषामंतकालेकाशीप्राप्त्यभावाभिप्रायेणेतिबोद्धव्यम् ॥ अथवांतकालेकाशीप्राप्तावपिझटित्यनायासेनकैवल्याभावाभिप्रायेण ॥ तथाचोक्तंपद्मपुराणे काशीमाहात्म्ये ॥ केवलंधर्मसाक्षेपःकर्णेजपतितद्वचः ॥ अधर्मिष्ठस्यतत्क्षेत्रेयातनांतेदिशेन्मतिम् ॥ काश्यांयोनिजधर्मेणमुमुक्षुस्तिष्ठतिद्विजः ॥ अनायासाविलंबाभ्यांसएवलभतेफलमिति ॥ ३ ॥ ४ ॥ काश्यामेकेनैवजन्मनामोक्षःप्राप्यतइतिवक्तुंज्ञानादिसाधनस्यैकेनजन्मनादुर्लभतामाह ज्ञानेनेतियावत्समाप्ति ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ योगेनचित्तवृत्तिनिरोधेन ॥ तथाच पातंजलंसूत्रम् ॥ योगश्चित्तवृत्तिनिरोधइति ॥ तत्त्वानुशीलनहेतुत्वाद्योगएवतत्त्वार्थशीलनंनिदिध्यासनम् ॥ ११० ॥ ननुयोगानुष्ठानोत्पन्नबोधाभावेपिश्रवणादिभिर्ज्ञानं भविष्यतिनेत्याह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदूरेति ॥ श्रवणमादिर्येषांश्रवणादीनांतेश्रवणादयःश्रवणमननिदिध्यासनानिसमासार्थः ॥ चित्तवृत्तिनिरोधाभावेश्रवणादयएवनोत्पद्येरन्निति भावः ॥ यद्वा दूरश्रवणदूरदर्शनादयो विघ्नाः ॥११॥ ॥१२॥ तच्चतच्छ्रेयश्चेतितच्छ्रेयस्तस्यउदर्कउत्तरकालीनंफलम् ॥१३॥ अजोब्रह्मा ॥ महतिविष्णौमनोयस्यसमहामनाः ॥ ११४ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांद्वाविंशतितमोऽध्यायः ॥२२॥ ॥छ॥ ॥ त्र्यधिकेविंशतितमेऽध्यायेचारुमनोहरः ॥ वर्ण्यतेकमलाजानेरभिषेकमहोत्सवः ॥ १ ॥ तच्छ्रेयसोप्युदर्कस्तेमहानस्तीत्युक्ततत्रप्रष्टुंविज्ञापयति ॥ सत्यलोकइति ॥ किंचित्कैवल्यामितिहृदिस्थम् ॥ १ ॥ भगवल्लोकप्राप्तावस्यकथाव्यासंगेनाविलंबःकारितोमयेत्यनुचितंमन्वानोऽतःपरंतन्माभूदित्याशयेनाह ॥ यत्त्वमिति ॥ पिपृच्छिषुःप्रष्टुमिच्छुः ॥

विनातपोजपाद्यैश्चविनायोगेनसुव्रत ॥ निःश्रेयोलभ्यतेकाश्यामिहैकेनैवजन्मना ॥१२॥ त्वयाशुद्धधियाकाश्यांयच्छ्रेयःसमुपार्जितम् ॥ तच्छ्रेयसोप्युदर्कस्तेमहानास्तिद्विजोत्तम ॥ १३ ॥ उक्त्वेतिविरराामाजःशृण्वतोर्गणयोस्तयोः ॥ सोपिप्रमुदितश्चाभूच्छिवशर्मामहामनाः ॥ ११४ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे ब्रह्मकृतकाशीप्रशंसानामद्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ शिवशर्मोवाच ॥ ॥ सत्यलोकेश्वरविधेसर्वेषांप्रपितामह ॥ किंचिद्विज्ञप्तुकामोस्मिनभयाद्वक्तुमुत्सहे ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ यत्त्वंप्रष्टुमनाविप्रज्ञातंतेतन्मनोगतम् ॥ पिपृच्छिषुस्त्वंनिर्वाणंगणौतत्कथयिष्यतः ॥२॥ नैतयोर्विष्णुगणयोरगोचरमिहास्तिहि ॥ सर्वमेतौविजानीतोयत्किंचिद्ब्रह्मगोलके ॥ ३ ॥ इत्युक्तासत्कृतास्तेवैब्रह्मणाभगवद्गणाः ॥ प्रणम्यलोककर्तारंतेऽपिहृष्टाःप्रतस्थिरे ॥ ४ ॥ पुनःस्वयानमारुह्यवैकुंठमभितोययुः ॥ गच्छतापिपुनस्तत्रद्विजेनापृच्छितौगणौ ॥ ५ ॥ ॥ शिवशर्मोवाच ॥ ॥ कियद्दूरंवयंप्राप्तागंतव्यंचकियत्पुनः ॥ पृच्छाम्यन्यच्चवांभद्रौब्रूतंप्रीत्यातदप्यहो ॥ ॥ ६ ॥ कांच्यवंतीद्वारवतीकाश्ययोध्याचपंचमी ॥ मायापुरीचमथुरापुर्यःसप्तविमुक्तिदाः ॥ ७ ॥ विहायषट्पुरीश्चान्याःकाश्यामेवप्रतिष्ठिता ॥ मुक्तिर्विश्वसृजातत्किममसुक्तिर्नसंप्रति ॥ ८ ॥ इतिसर्वममपुरःप्रसादाद्वक्तुमर्हतम् ॥ इतितद्वाक्यमाकर्ण्यगणावूचतुरादरात् ॥ ९ ॥ ॥ गणावूचतुः ॥ यथार्थंकथयावस्तेयत्पृष्टंभवतानघ ॥ विष्णुप्रसादाज्जानीवोभूतंभाविभवत्तथा ॥ १० ॥ विप्रावभासतेयावत्किरणैःपुष्पवंतयोः ॥ तावतीभूःसमुद्दिष्टासससमुद्राद्रिकानना ॥ ११ ॥

तन्निर्वाणम् ॥ २ ॥ तत्कथनेऽस्सामर्थ्यमेतयोर्नमंतव्यमित्याह ॥ नैतयोरिति ॥ ३ ॥ प्रतस्थिरेप्रचलिताः ॥ ४ ॥ अपृच्छिपृष्टम् ॥ तौगणौप्रति ॥ ५ ॥ ६ ॥ अन्यच्चेति यदुक्तंतदाह ॥ कांचीति ॥ तथाचोक्तम् ॥ अयोध्यामथुरामायाकाशीकांचीह्यवंतिका॥पुरीद्वारवतीचैवसप्तैतामुक्तिदायिकाइति ॥ ७ ॥ मुक्तिःकैवल्यम् ॥ विश्वसृजाब्रह्मणाप्रोक्ता ॥ यथाभूमितले विप्रपुर्यःसंतिसहस्रशः ॥ तथाकाशीनमंतव्याकापिलोकोत्तरात्वियम् ॥ त्वयाशुद्धधियाकाश्यांयच्छ्रेयःसमुपार्जितम् ॥ तच्छ्रेयसोप्युदर्कस्तेमहानास्तिद्विजोत्तमेतिच ॥ वदतेतिशेषः ॥ तत्तस्मात्संप्रतिममविदेहलक्षणामुक्तिःकिंनास्तीतितृतीयःप्रश्नः ॥ ८ ॥ अर्हतमर्हथोयोग्यौभवथइतियावत् ॥ इतीत्यगस्त्यवाक्यम् ॥ ९ ॥ भूतमतीतं भाविभविष्यत् भवद्वर्तमानम् ॥ १० ॥ कियद्दूरंवयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्ताइतिप्रथमप्रश्नस्योत्तरंवक्तुंप्रसंगात्पृथिव्यंतरिक्षयोःप्रमाणमाहतुः विप्रेतिसार्धेन ॥ हेविप्रपुष्पवंतयोःसूर्याचंद्रमसोः ॥ एकयोक्त्यापुष्पवंतौदिवाकरनिशाकरावित्यमरः ॥ ११ ॥ विस्तार
परिमंडलंयथास्यात् ॥ तत्रविस्तारोदैर्घ्यम् ॥ परिमंडलंवर्तुलाकारता ॥ भूमेःसकाशादुपरीत्यग्रिमस्यानुषंगः ॥ योजनानांनियुतेलक्षे ॥ एकंशतसहस्रंतुनियुतंप्रोच्यतेबुधैरितिब्रह्मांडदर्शनात् ॥
॥ १२ ॥ लक्ष्योदृश्यः ॥ लक्षयोजनंयथास्याल्लक्षयोजनमंभिव्याप्येतिवा ॥ उच्छ्रितमुच्चम् ॥१३॥ सौम्योबुधः ॥ भौमोमंगलः ॥ १४ ॥ सुरेज्योदेवानांपूज्योबृहस्पतिः ॥ नियुतद्वयेलक्षद्वितये ॥
द्विलक्षयोजनेनप्रमाणेनउत्सेधःउच्चः ॥ सौरिःशनिः ॥१५॥ दशायुतंलक्षंतावत्समुच्छ्रायमुच्चमित्यर्थः ॥ सहस्राणांशताल्लक्षात् ॥ १६ ॥ भूर्लोकस्यस्वरूपमाह ॥ पादगम्यंहीति ॥१७॥१८॥१९॥
उपरिष्टादिति ॥ एतेनाष्टकोटियोजनपरिमितंवर्त्मवयमतिक्रांताइतिसूचितम् ॥ २० ॥ गंतव्यंचाकियत्पुनरित्यस्यद्वितीयप्रश्नस्योत्तरमाहतुः ॥ सत्यादुपरीति ॥ एतेनाष्टकोटियोजनमार्गोगंतव्योऽस्ती

वियच्चतावदुपरिविस्तारपरिमंडलम् ॥ योजनानांचनियुतेभूमेर्भानुर्व्यवस्थितः ॥ १२ ॥ भानोःसकाशादुपरिलक्षेलक्ष्यःक्षपाकरः ॥ नक्षत्रमंडलंसो
माल्लक्षयोजनमुच्छ्रितम् ॥ १३ ॥ उडुमंडलतःसौम्यउपरिष्टाद्विलक्षतः ॥ द्विलक्षेतुबुधाच्छुक्रःशुक्राद्भौमोद्विलक्षके ॥ १४ ॥ माहेयादुपरिष्टाच्चसुरेज्यो
नियुतद्वये ॥ द्विलक्षयोजनोत्सेधःसौरिर्देवपुरोहितात् ॥ १५ ॥ दशायुतसमुच्छ्रायंसौरेःसप्तर्षिमंडलम् ॥ सप्तर्षिभ्यःसहस्राणांशतादूर्ध्वंध्रुवःस्थितः ॥
॥ १६ ॥ पादगम्यंहियत्किंचिद्वस्त्वस्तिधरणीतले ॥ तद्भूर्लोकइतिख्यातःसाब्धिद्वीपाद्रिकाननम् ॥ १७ ॥ भूर्लोकाच्चभुवर्लोकोब्रध्नावधिरुदाहृतः ॥
आदित्यादाध्रुवंविप्रस्वर्लोकइतिगीयते ॥ १८ ॥ महर्लोकःक्षितेरूर्ध्वमेककोटिप्रमाणतः ॥ कोटिद्वयेतुसंख्यातोजनोभूर्लोकतोजनैः ॥ १९ ॥
चतुष्कोटिप्रमाणस्तुतपोलोकोऽस्तिभूतलात् ॥ उपरिष्टात्क्षितेरष्टौकोट्यःसत्यमीरितम् ॥ २० ॥ सत्यादुपरिवैकुंठोयोजनानांप्रमाणतः ॥ भूर्लोकात्प
रिसंख्यातःकोटिषोडशसंमितः ॥ २१ ॥ यत्रास्तेश्रीपतिःसाक्षात्सर्वेषामभयप्रदः ॥ ततस्तुषोडशगुणःकैलासोऽस्तिशिवालयः ॥ २२ ॥ पार्वत्यास
हितःशंभुर्गजास्यस्कंदनंदिभिः ॥ यत्रतिष्ठतिविश्वेशःसकलःसपरःस्मृतः ॥ २३ ॥ तस्यदेवस्यखेलोऽयंस्वलीलामूर्तिधारिणः ॥ सविश्वेशइतिख्यात
स्तस्याज्ञाकृदिदंजगत् ॥ २४ ॥ सर्वेषांशासकश्चासौतस्यशास्तानचापरः ॥ स्वयंसृजतिभूतानिस्वयंपातितथात्तिच ॥ २५ ॥ सर्वज्ञएकःसप्रोक्तःस्वे
च्छाधीनविचेष्टितः ॥ तस्यप्रवर्तकःकोपिनहिनैवनिवर्तकः ॥ २६ ॥

तिध्वनितमितिभावः ॥ यद्यपिवैकुंठलोकोब्रह्मांडाद्बहिर्भागवतादौवर्ण्यतेतथाप्यत्रकल्पभेदेनवैकुंठलोकांतर्भेदेनवात्रोच्यतइतिज्ञातव्यम् ॥ २१ ॥ प्रसंगाद्भूर्लोकात्कैलासप्रमाणमाहतुः ॥ ततइति ॥
ततोवैकुंठात्षोडशगुणःषोडशकोटिसंमितः ॥ २२ ॥ कैलासंविशिनष्टि ॥ पार्वत्येति ॥ कलामायाभवानीवातत्सहितःसकलःसर्वस्वरूपोवा ॥२३॥ तस्यखेलोलीलारूपोऽयंप्रपंचः ॥ तस्यविशेषणंस
विश्वेशइत्यारभ्यतस्येत्यतः प्राक्तनेनग्रंथेन ॥ विश्वेशोयमितिक्वचित्पाठः ॥ तस्यकीदृशस्य ॥ स्वलीलामूर्तिधारिणःस्वलीलयामाययाशरीरधारिणः ॥ तस्याज्ञाकृदिदंजगत् ॥ तथाचश्रुतिः ॥
भीषास्माद्वातःपवतेभीषोदेतिसूर्यः ॥ भीषास्मादिंद्रश्चाग्निश्चमृत्युर्धावतिपंचमइति ॥ मद्भयाद्वातिवातोयमितिस्मृतेश्च॥२४॥२५॥ तस्यशास्तानचापरइत्येतदेवविवृणोति ॥ तस्यप्रवर्तकइति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माययासमूर्तम् ॥ श्रुतिचोदितंश्रुत्याप्रतिपादितम् ॥ यद्वा ॥ अमूर्तंवाय्वाकाशरूपम् ॥ मूर्तंपृथिव्यप्तेजोलक्षणंपरंब्रह्मचयत्तत्सइत्यर्थः ॥ तथाचश्रुतिः ॥ द्वेवावब्रह्मणोरूपेमूर्तंचामूर्तंचेति॥ ब्रह्मणोविशे
षणंसर्वव्यापीतिसार्धद्वयम् ॥ २७ ॥ सर्वेभ्यः कारणेभ्योमहदादिभ्योयत्परंप्रधानंतस्मादपिपरतरमतिदूरमतएवपरम् ॥ किंतस्यरूपंकिंवातत्रप्रमाणंतत्राह ॥ आनंदमिति ॥ श्रुतयश्चसत्यंज्ञानमनंतं
ब्रह्मेत्याद्याः ॥ २८ ॥ तर्हिमानेनविषयीकृतत्वादनात्मत्वमनित्यत्वंचस्यादित्यतआहतुः ॥ संविदंतइति ॥ नसंविदतेनविषयीकुर्वते ॥ संविदंतीतिक्वचित् ॥ अतन्निरसनद्वारावृत्तिविषयत्वद्वारावावेदवि
षयत्वमतोनायंदोषइतिभावः ॥ किमत्रप्रमाणंवेदएवेत्याह ॥ यतइति ॥ २९ ॥ यस्मादेतादृग्ब्रह्मसशंभुस्तस्मात्सस्वयंवेद्यःस्वभानान्यानपेक्षः ॥ तत्रहेतुः ॥ परंज्योतिःस्वयंज्योतिरित्यर्थः ॥ अत्रायं
पुरुषःस्वयंज्योतिरितिश्रुतेः॥प्रमाणानिकेवलंगोचरेयस्यसप्रमाणैकगोचरः प्रमाणानांमुख्यप्रकाशकइत्यर्थः ॥ चक्षुषश्चक्षुरित्यादिश्रुतेः ॥ पूर्वोक्तरीत्यावेदांतैकवेद्यइतिवा ॥ ३० ॥ माययानानारूपो
पिवस्तुतोऽरूपः ॥ गोचरोविषयः ॥ अंतकवपुरंतकस्वरूपः ॥ यद्वा वस्तुतोऽनंतोपिमाययापरिच्छिन्नस्वरूपः ॥ अंतकृच्चैवेतिक्वचित् ॥३१॥ ननुतर्ह्येवंविधस्यसर्वव्यापिनाश्चिद्घनैकरसस्यकुतःकैलासाव

अमूर्तंयत्परंब्रह्मसमूर्तंश्रुतिचोदितम् ॥ सर्वव्यापिसदानित्यंसत्यंद्वैतविवर्जितम् ॥ २७॥ सर्वेभ्यःकारणेभ्यश्चपरात्परतरंपरम् ॥ आनंदंब्रह्मणोरूपंश्रुतयो
यत्प्रचक्षते ॥ २८ ॥ संविदंतेनयंवेदाविष्णुर्वेदनवैविधिः ॥ यतोवाचोनिवर्तंतेह्यप्राप्यमनसासह ॥ २९ ॥ स्वयंवेद्यःपरंज्योतिःसर्वस्यहृदिसंस्थितः ॥
योगिगम्यस्त्वनाख्येयोयःप्रमाणैकगोचरः ॥ ३० ॥ नानारूपोप्यरूपोयःसर्वगोपिनगोचरः ॥ अनंतोप्यंतकवपुःसर्ववित्कर्मवर्जितः ॥३१॥ तस्येदमै
श्वरंरूपंखंडचंद्रावतंसकम् ॥ तमालश्यामलगलंस्फुरद्भालविलोचनम् ॥ ३२ ॥ लसद्वामार्धनारीकंकृतशेषशुभांगदम् ॥ गंगातरंगसत्संगसदाधौ
तजटातटम् ॥ ३३ ॥ स्मरांगजरजःपुंजपूजितावयवोज्वलम् ॥ विचित्रगात्रविधृतमहाव्यालविभूषणम् ॥ ३४ ॥ महोक्षस्यंदनगमंविरुताजगवायुधम्॥
गजाजिनोत्तरासंगंदशार्धवदनंशुभम् ॥ ३५ ॥ उत्त्रासितमहामृत्युमहाबलगणावृतम् ॥ शरणार्थिकृतत्राणंनतनिर्वाणकारणम् ॥ मनोरथपथातीतं
वरदानपरायणम् ॥ ३६ ॥ तस्यतत्त्वस्वरूपस्यरूपातीतस्यभोद्विज ॥ परावरेरुद्ररूपेसर्वव्याप्यावतिष्ठतः ॥ ३७ ॥ निराकारोपिसाकारःशिवएवहि
कारणम् ॥ मुक्तयेभुक्तयेवापिनशिवान्मोक्षदोपरः ॥ ३८ ॥ यथातेनाखिलंह्येतत्पार्वतीपतिसात्कृतम् ॥ इदंचराचरंसर्वंदृश्यादृश्यमरूपिणा ॥ ३९ ॥

स्थितत्वंतत्राहतुः ॥ तस्येदमिति ॥ ऐश्वरमीश्वरसंबंधि ॥ तदेवरूपंविशिनष्टि ॥ खंडचंद्रेतिपादाधिकपंचभिः ॥ चंद्रस्यखंडःखंडचंद्रश्चंद्रकलेत्यर्थः ॥ सोऽवतंसःशिरोभूषणंयस्यतत् ॥
भालंललाटम् ॥ ३२ ॥ शेषोऽनंतः ॥ गंगातरंगानांयःसत्संगःसमीचीनसंगस्तेनधौतंप्रक्षालितंजटानांतटंयस्मिंस्तत् ॥ तरंगसंदोहेतिक्वचित् ॥ ३३ ॥ स्मरःकामस्तदंगादृग्धाज्जा
तोयोरजःपुंजोभस्मराशिस्तेनपूजिताउद्धूलीकृतायेऽवयवास्तैरुज्ज्वलम् ॥ व्यालाःसर्पाः ॥ ३४ ॥ महानुक्षावलीवर्दएवस्यंदनस्तेनगमोगमनंयस्यतत् ॥ गजासुरस्याजिनंचर्मैवउत्तरासंगमु
त्तरीयंवस्त्रंयस्यतत् ॥ ३५ ॥ उच्चैस्त्रासितोमहामृत्युर्येनतत् ॥ सकालकालःकालमूषिकभक्षकइतिश्रुतिस्मृतिभ्याम् ॥ ३६ ॥ उपसंहरतस्तस्येतिद्वाभ्याम् ॥ सर्वव्याप्यावतिष्ठतस्तस्य
परावरेसगुणनिर्गुणेरुत्संसारदुःखंतद्द्रातिनाशयतीतिरुद्रंतद्रूपेसंसारदुःखनाशकेरूपेइत्यर्थः ॥ रुद्रसंज्ञकेइतिवा ॥ ३७ ॥ ३८ ॥ ननुसगुणनिर्गुणेरुद्रस्यैवरूपेचेत्तर्हिकथंजगदीश्वरत्वंविष्णोः

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रख्यातमित्याशंकायामाहतुः ॥ यथेति ॥ तेनारूपिणासर्वेश्वरेण ॥ अखिलमग्रिमंसर्वमिति॥चपदद्वयंसंकोचव्यावृत्त्यर्थम् ॥ इदंजगद्यथापार्वतीपतिसात्कृतंमृडानीपत्यधीनंकृतं हिप्रसिद्धौ ॥ ३९ ॥ तथामृडानीकांतेनविष्णुसाद्विष्ण्वधीनमखिलंजगद्विधायकृत्वास्वच्छंदलीलयाहेविप्र ॥ यद्वा विनापक्षिणागरुडेनप्रातिगच्छतीतितथाहेगरुडगामिन्निितिभाविगरुडवाहनत्वंसूच्यते ॥ तेनह्यनाख्येयमितिपाठेवक्तुमप्यशक्यमइदंचराचरमित्यर्थः ॥ ४० ॥ तर्हिशिवविष्णवोस्तरतमभावेनवैषम्यान्मुमुक्षुभिश्चनैयत्येनकआश्रयणीयइतिपृच्छायामाहतुः॥ यथाशिवइति ॥:तथाचहरिवंशे ॥ योवैविष्णुःसवैरुद्रइति॥भविष्येच ॥ यथाशिवस्तथाविष्णुरिति ॥ ४१ ॥ विष्णुसादखिलंजगद्विधायक्रीडचतइत्युक्तं तदेवप्रपंचयाति आहूयपूर्वमित्यारभ्यइतितइत्यतःप्राक्तनेनग्रंथेन ॥ आहूयेत्यादिल्यवंतत्वां

तथामृडानीकांतेनविष्णुसादखिलंजगत् ॥ विधायक्रीड्यतेविप्रनित्यंस्वच्छंदलीलया ॥ ४० ॥ यथाशिवस्तथाविष्णुर्यथाविष्णुस्तथाशिवः ॥ अंतरं शिवविष्ण्वोश्चमनागपिनविद्यते ॥ ४१ ॥ आहूयपूर्वंब्रह्मादीन्समस्तान्देवतागणान् ॥ विद्याधरोरगादींश्चसिद्धगंधर्वचारणान् ॥ ४२ ॥ निजसिंहासनसमंकृत्वासिंहासनंशुभम् ॥ उपवेश्यहरिंतत्रच्छत्रंकृत्वामनोहरम् ॥४३॥ श्लक्ष्णंकोटिशलाकंचविश्वकर्मविनिर्मितम् ॥ पांडुरंरत्नदंडंचस्थूलमुक्तावलंबितम् ॥ ४४ ॥ कलशेनविचित्रेणह्युपरिष्टाद्विराजितम् ॥ सहस्रयोजनायामंसर्वरत्नमयंशुभम् ॥४५॥ पट्टसूत्रमयैरम्यैश्चामरैश्चपरिष्कृतम् ॥ राजाभिषेकयोग्यैश्चद्रव्यैःसर्वौषधादिभिः ॥ ४६ ॥ प्रत्यक्षतीर्थपाथोभिःपंचकुंभैर्मनोहरैः ॥ सिद्धार्थाक्षतदूर्वाभिर्मंत्रैःस्वयमुपस्थितैः ॥ ४७ ॥ देवानांचतथर्षीणांसिद्धानांफणिनामपि ॥ आनीयमंगलकराःकन्याःषोडशषोडश ॥ ४८ ॥ वीणामृदंगाब्जभेरीमरुडिंडिमझर्झरैः ॥ आनकैःकांस्यतालाद्यैर्वाद्यैर्ललितगायनैः ॥४९॥ ब्रह्मघोषमहारावैरापूरितनभोंगणे ॥ शुभेतिथौशुभेलग्नेताराचंद्रबलान्विते ॥५०॥ आबद्धमुकुटंरम्यंकृतकौतुकमंगलम् ॥ मृडानीकृतशृंगारंसुश्रियासुश्रियायुतम् ॥५१॥ अभिषिच्यमहेशेनस्वयंब्रह्मांडमंडपे ॥ दत्तंसमस्तमैश्वर्यंयन्नितंनान्यगामिच ॥ ५२ ॥ ततस्तुष्टावदेवेशःप्रमथैःसहशार्ङ्गिणम् ॥ ब्रह्माणंलोककर्तारमुवाचचवचस्त्विदम् ॥ ५३ ॥ ममवंद्यस्त्वयंविष्णुःप्रणमत्वममुंहरिम् ॥ इत्युक्त्वाथस्वयंरुद्रोननामगरुडध्वजम् ॥ ५४ ॥ ततोगणेश्वरैःसर्वैर्ब्रह्मणाचमरुद्गणैः ॥ योगिभिःसनकाद्यैश्चासिद्धैर्देवर्षिभिस्तथा ॥ ५५ ॥ विद्याधरैःसगंधर्वैर्यक्षरक्षोप्सरोगणैः ॥ गुह्यकैश्चारणैर्भूतैःशेषवासुकितक्षकैः ॥ ५६ ॥ पतत्रिभिःकिंनरैश्चसर्वैःस्थावरजंगमैः ॥ ततोजयजयेत्युक्त्वानमोस्त्वितिनमोस्त्विति ॥ ५७ ॥ ततोहरिर्महेशेनसंसदिद्युसदांतदा ॥ एतैर्महारवैरम्यैश्चानर्चिपरमार्चिषा ॥ ५८ ॥

तपदानांतृतीयांतानांचकेषांचित्पदानामभिषिच्यमहेशेनेत्यग्रिमेणसंबंधः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ प्रत्यक्षतीर्थपाथोभिःप्रत्यक्षाणियानितीर्थानितेषांपाथोभिर्जलैःप्रत्यक्षैस्तीर्थैरेवानीतैःपाथोभिरित्यर्थः॥प्रत्यक्षफलजनकतीर्थपाथोभिरितिवा ॥ प्रक्षाल्यतीर्थैतिक्वचित्पाठः ॥ सिद्धार्थःश्वेतसर्षपः ॥४७॥४८॥ अब्जःशंखः॥मरुर्डमरुः ॥४९॥५०॥ मृडानीकृतशृंगारंभवानीरचितवेषम् ॥ सुश्रियापद्मयुतंशोभनयाश्रियासमेतम् ॥ कथंभूतयासुश्रिया ॥ शोभनकांतिमत्या ॥५१॥५२॥५३॥ ततस्तुष्टावेत्युक्तामेवस्तुतिंलेशतोदर्शयंतोइदंतयानिर्दिष्टंवचनमाहतुः॥ ममवंद्यस्त्विति॥ तुशब्दएवार्थे ॥ अयंविष्णुर्ममवंद्यएवनानुज्ञेयोऽतस्त्वमप्यमुंहरिंकेवलंप्रणमेत्यर्थः॥५४॥५५॥५६॥५७॥ संसदिद्युसदांदेवानांसभायाम्॥आनर्चिपूजितः॥परमार्चिषाउपलक्षितोहरिः ॥ परमाशिषेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पाठेपरमाशिषाऽनर्चीत्यर्थः ॥ ५८ ॥ तामेवाशिषमाहतुस्त्वंकर्तेत्यादिना ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ अवांतरप्रकृतमुपसंहरतोवैकुंठेतिद्वाभ्याम् ॥ ६५ ॥ ६६ ॥ परम
प्रकृतमुपसंहरतः॥ इतितइति ॥६७॥ एतदध्यायश्रवणपठनजपफलमाहेदंत्वित्यादिना॥६८॥६९॥७०॥७१॥७२॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांत्रयोविंशातितमोऽध्यायः ॥२३॥
चतुर्भिरधिकेविंशेऽध्यायेऽत्यंतमनोरमे ॥ कैवल्यंपरमानंदंवर्ण्यतेशिवशर्मणः ॥१॥ इदानींकथयिष्यावस्तवनिर्वाणकारणमित्युक्तंपूर्वंतदेवसप्रपंचंकथयतः ॥ शिवशर्मन्निति॥उदर्कमुत्तरकालभाविसुकृत

त्वंकर्तासर्वभूतानांपाताहर्तात्वमेवच ॥ त्वमेवजगतांपूज्यस्त्वमेवजगदीश्वरः ॥ ५९ ॥ दाताधर्मार्थकामानांशास्तादुर्नयकारिणाम् ॥ अजेयस्त्वंचसं
ग्रामेममापिहिभविष्यसि ॥ ६० ॥ इच्छाशक्तिःक्रियाशक्तिर्ज्ञानशक्तिस्तथोत्तमा ॥ शक्तित्रयमिदंविष्णोगृहाणप्रापितंमया ॥ ६१ ॥ त्वद्वेष्टारोहरेनूनं
मयाशास्याःप्रयत्नतः ॥ त्वद्भक्तानांमयाविष्णोदेयंनिर्वाणमुत्तमम् ॥ ६२ ॥ मायांचापिदुग्रहाणेमांदुष्प्रणोद्यांसुरासुरैः ॥ ययासंमोहितंविश्वमकिंचिज्ज्ञंभ
विष्यति ॥ ६३ ॥ वामबाहुर्मदीयस्त्वंदक्षिणोसौपितामहः ॥ अस्यापिहिविधेःपाताजनितापिभविष्यसि ॥ ६४ ॥ वैकुंठेश्वर्यमासाद्यहरेरित्थंहरः
स्वयम् ॥ कैलासेप्रमथैःसार्धंस्वैरंक्रीडत्युमापतिः ॥ ६५ ॥ तदाप्रभृतिदेवोसौशार्ङ्गधन्वागदाधरः ॥ त्रैलोक्यमखिलंशास्तिदानवांतकरोहरिः ॥६६॥
इतितेकथिताविप्रलोकानांचपरिस्थितिः ॥ इदानींकथयिष्यावस्तवनिर्वाणकारणम् ॥ ६७ ॥ इदंतुपरमाख्यानंशृणुयाद्यःसमाहितः ॥ स्वर्लोकम
भिगम्याथकाश्यांनिर्वाणमाप्नुयात् ॥ ६८ ॥ यज्ञोत्सवेविवाहेचमंगलेष्वखिलेष्वपि ॥ राज्याभिषेकसमयेदेवस्थापनकर्मणि ॥ ६९ ॥ सर्वाधिकारदाने
पुनर्ववेश्मप्रवेशने॥पठितव्यंप्रयत्नेनतत्कार्यपरिसिद्धये ॥७०॥ अपुत्रोलभतेपुत्रमधनोधनवान्भवेत् ॥ व्याधितोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् ॥७१॥
जप्यमेतत्प्रयत्नेनसततंमंगलार्थिना ॥ अमंगलानांशमनंहरनारायणप्रियम् ॥७२॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे
काशीखंडे पूर्वार्द्धे चतुर्भुजाभिषेकोनामत्रयोविंशातितमोऽध्यायः ॥ २३ ॥ ॥ छ ॥ गणावूचतुः ॥ ॥ शिवशर्मन्नुदर्कंतेकथयावोनिशामय ॥
त्वमत्रवैष्णवेलोकेभुक्त्वाभोगान्सुपुष्कलान् ॥ १ ॥ ब्रह्मणोवत्सरंपूर्णंरममाणोऽप्सरोगणैः ॥ सुतीर्थमरणोपात्तपुण्यशेषेणवैपुनः ॥ २ ॥ भविष्यसिमही
पालोनगरेनंदिवर्धने ॥ राज्यंप्राप्यासपत्नंचसमृद्धबलवाहनम् ॥३॥ कृष्टिभिर्हृष्टपुष्टैश्चरम्यहाटकभूषणैः ॥ संजुष्टमिष्टापूर्तानांधर्माणांनित्यकर्तृभिः॥४॥

फलमित्यर्थः ॥ त्वमत्रेति ॥ वैष्णवेवैकुंठे ॥ १ ॥ २ ॥ भविष्यसीति ॥ राज्यंप्राप्यमहीपालःसन्नंदिवर्धनेहर्षजनकेतन्नाम्निनगरेभविष्यसीत्यन्वयः ॥ ३ ॥ राज्यंविशिनष्टि चतुरक्षरन्यूनसा
र्द्धाष्टादशभिः॥कृष्टिभिःपंडितैःसंजुष्टंसंसेवितमित्यन्वयः॥ वर्णैश्चेतिक्वचित् ॥ हाटकंसुवर्णम्॥इष्टानिअंतर्वेद्यांदीयमानानिदानानिपूर्तानिवापीकूपतडागादिनिर्माणानितेषांकर्मणांनित्यकर्तृभिः ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

सदासंपन्नानिसस्यानियस्मिंस्तत् ॥ अतएवसूर्वरक्षेत्रसंकुलंसूर्वराणिशोभनफलसस्याढ्यभूमीनियानिक्षेत्राणितैःसंकुलंव्याप्तम् ॥५॥ राजिभिःपंक्तिभिः ॥ यत्रराज्ये ॥६॥ सुपुष्पेति ॥ भूमयोऽत्र विशेष्याअन्यानिविशेषणानि ॥ ससदाफलपादपाःसदाफलानियेषांतैःपादपैःसहवर्तमानाः ॥ कासाराःसरांसि ॥ ७ ॥ सदंभोयस्याःसासदंभानिम्नगाराजिर्नदीवृंदम् ॥ पक्षांतरेसदंभाद्दंभोधर्मध्वजित्वंतत्सहिताजनताजनसमूहोयत्रनेत्यर्थः ॥ सर्वत्रशब्दश्लेषालंकारोयम् ॥ कुलानिगोत्राणितान्येवकुलीनानिकुलीनशब्दवाच्यानि ॥ कौपृथिव्यांलीनानिकुलीनानीत्यन्यायधनपक्षेव्याकर्तव्यम्॥ ॥ ८ ॥ नारीषुविभ्रमोनामसौरतभावप्रकाशनम् ॥ विद्वत्सुविभ्रमोऽज्ञानम् ॥ कुटिलगामिन्योवक्रगामिन्यः ॥ प्रजापक्षेविमार्गगामिन्यः ॥ विषयेदेशे ॥ ९ ॥ तमोयुक्ताअंधकारमिश्राःक्षपारात्रयः ॥ वहुलेषुकृष्णपक्षेषु ॥ पक्षांतरेतमोगुणयुक्ताः ॥ रजोयुजःऋतुकालीनशोणितयुक्ताः ॥ पक्षांतरेरजोगुणयुजः ॥ १०॥ अनंधोऽगर्विष्ठः ॥ पक्षांतरेंऽधोऽन्नंभक्तमितियावत्तद्रहितमनंधोभोजनंभुजिक्रिया ॥ नविद्यतेऽयोलोहंयत्रतत्स्यंदनंतथा ॥ सुवर्णादिमयमित्यर्थः ॥ पक्षांतरेनयोनीतिस्तद्रहितोऽनयः ॥ ११ ॥ दंडोनालंदांडाइतिप्रसिद्धः ॥ परशुःकुठारः ॥ वालव्यजनंचाम

सदासंपन्नसस्यंचसूर्वरक्षेत्रसंकुलम् ॥ सुदेशंसुप्रजंसुस्थंसुतृणंबहुगोधनम् ॥ ५ ॥ देवतायतनानांचराजिभिःपरिराजितम् ॥ सुयूपायत्रवैग्रामाःसुवित्तर्द्धिविराजिताः ॥ ६ ॥ सुपुष्पकृत्रिमोद्यानाःससदाफलपादपाः ॥ सपद्मिनीककासारायत्रराजंतिभूमयः ॥ ७ ॥ सदंभानिम्नगाराजिर्नयत्रजनताक्वचित् ॥ कुलान्येवकुलीनानिनचान्यायधनानिच ॥ ८ ॥ विभ्रमोयत्रनारीषुनविद्वत्सुचकर्हिचित् ॥ नद्यःकुटिलगामिन्योनयत्रविषयेप्रजाः ॥ ९ ॥ तमोयुक्ताःक्षपायत्रबहुलेषुनमानवाः ॥ रजोयुजःस्त्रियोयत्रनधर्मबहुलानराः ॥ १० ॥ धनैरनंधोयत्रास्तिमनोनैवचभोजनम् ॥ अनयःस्यंदनंयत्रनचवैराजपूरुषः ॥ ११ ॥ दंडःपरशुकुद्दालवालव्यजनराजिषु ॥ आतपत्रेषुनान्यत्रक्वचित्क्रोधापराधजः ॥१२॥ अन्यत्राक्षिकवृंदेभ्यःक्वचिन्नपरिदेवनम् ॥ आक्षिकाएवदृश्यंतेयत्रपाशकपाणयः ॥ १३ ॥ जाड्यवार्ताजलेष्वेवस्त्रीमध्याएवदुर्बलाः ॥ कठोरहृदयायत्रसीमंतिन्योनमानवाः ॥ १४ ॥ औषधेष्वेवयत्रास्तिकुष्ठयोगोनमानवे ॥ वेधोप्यंतःसुरत्नेषुशूलंमूर्तिकरेषुवै ॥ १५ ॥

रम् ॥ पक्षांतरेक्रोधादपराधाद्वाजातोधनग्रहणादिरूपोदंडः ॥ १२ ॥ अक्षैःसारिभिर्व्यवहरंतीत्याक्षिकास्तेषांवृंदेभ्यःसमूहेभ्यः ॥ परिदेवनंद्यूतक्रीडा ॥ पक्षांतरे परिदेवनंप्रलापः ॥ आक्षिकाएवपाशकपाणयः ॥ पक्षांतरेपाशाएवपाशकारज्जवस्तेपाणिषुयेषांतेतथा ॥ यत्रचानृतवादिनइतिक्वचित्पाठःसंचित्यः ॥ १३ ॥ जाड्यंशैत्यम् ॥ पक्षांतरेजाड्यंमौर्ख्यम् ॥ स्त्रीमध्याःस्त्रीणांमध्यप्रदेशादुर्बलाःकृशाः ॥ पक्षांतरेदुर्बलाधनादिबलहीनाः ॥ कठोरंक्षुरधाराभंहृदयंयासांताःकठोरहृदयाःसीमंतिन्योनार्यः ॥ तथाचभागवते ॥ शरत्पद्मोत्सवंवक्त्रंवचश्चश्रवणामृतम् ॥ हृदयंक्षुरधाराभंस्त्रीणांकोवेदचेष्टितमिति ॥ स्वभावत्वान्नायंविगुणः ॥ यद्वा कठोरहृदयाःकठिनस्तनाइत्यर्थः॥पक्षांतरेसमानएवार्थः ॥१४॥कुष्ठयोगःकुष्ठइतिप्रसिद्धस्यऔषधविशेषस्यकुष्ठशब्दस्यप्रयोगः ॥ पक्षांतरेकुष्ठस्यश्वित्रापरपर्यायस्यरोगस्ययोगःसंवंधः ॥ वेधोप्यंतःसुरत्नेषुशोभनरत्नेष्वेवांतर्मध्येवेधश्छिद्रम् ॥ पक्षांतरेवेधस्ताडनम् ॥ वेधोप्यनःसुरत्नेष्वितिक्वचित्पाठः॥तत्रानःसुशकटेषु ॥ शूलंमूर्तिकरेषुच ॥ मूर्तयोविश्वेश्वरप्रतिकृतयः ॥ यद्वा मूर्तयोमूर्तिमंतस्तासांकरेष्वेवशूलम् ॥ पक्षांतरेशूलंरोगविशेषः ॥ वेधस्तिथिषुनक्षत्रेशूलोयोगचयेषुवै इतिपाठेतिथिषुवेधोदशमीविद्धैकादश्यादिरूपः ॥ नक्षत्रवेधएक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यांतिथौनक्षत्रयोःसंबंधः ॥ शूलःशूलयोगःअन्येषांयोगानांचयेषु॥पक्षांतरेवेधस्ताडनमित्युक्तमेव ॥१५॥ सात्त्विकभावोभक्तिःस्वभर्तृषुस्त्रीणांस्वस्त्रीषुचपुंसाम् ॥ संज्वरःकामजनितप्रक्षोभः ॥ पक्षांतरेसंज्वरोधनादिनिमित्तःसंतापः ॥ कलुषस्यपापस्यदारिद्र्यंनधनादेः ॥१६॥ नविद्यतेकंसुखंयस्मात्तदकंपापंतस्यसदादुर्लभत्वंनपुण्यस्य ॥ सुकृतेनचवस्तुनः सुकृतेपुण्यनिमित्तेवस्तुनोऽर्थस्यदुर्लभत्वं नचनास्ति ॥ पुण्यार्थंसर्वेपिधनंव्ययंतीत्यर्थः ॥ दुर्लभत्वंसदैकस्यसुकृतेतरवस्तुनइतिपाठेसुकृतेतरवस्तुनःपापस्येतिव्याकर्तव्यम् ॥ इभागजाएवप्रमत्तानजनाः ॥ वीच्योस्तरंगयोरेवजलाशयेसरोवरादौ युद्धंनतुपरस्परस्पर्धयाजनानाम् ॥१७॥ दानहानिर्मदोदकत्यागः॥पक्षांतरेदानहानिर्दानाभावः ॥ द्रुमेष्वेवाहिकंटकाः॥ पक्षांतरेऽन्यत्रकंटकाःकंटकतुल्यादुःखदाइत्यर्थः॥जनेष्वेवविहरणंविहाराक्रीडा॥ स्त्रीत्वमार्षम् ॥ विहरणानिविहाराइतिवहुवचनंवा ॥ पक्षांतरेविगतहाराविहारा ॥ १८ ॥ बाणेष्वेवगुणविश्लेषोज्यापरित्यागः ॥ पक्षांतरेऽन्यत्रगुणानामुदारतादीनांविश्लेषोविच्छेदोनेत्यर्थः ॥ पुस्तकेपुस्तिकायामेवदृढावंधोक्तिःपुस्तकंदृढंबंधनीयमितिवचनम् ॥ तथाचोक्तम् ॥ तैलाद्रक्षजलाद्रक्षरक्षमांश्लथबंधनात् ॥ आखुभ्यःपरहस्तेभ्यएवंवदतिपुस्तकमिति ॥ पक्षांतरेऽन्यत्रायंदृढं

कंपःसात्त्विकभावोत्थोनभयात्कापिकस्यचित् ॥ संज्वरःकामजोयत्रदारिद्र्यंकलुषस्यच ॥ १६ ॥ दुर्लभत्वंसदाकस्यसुकृतेनचवस्तुनः ॥ इभाएवप्रमत्तावैयुद्धंवीच्योर्जलाशये ॥ १७ ॥ दानहानिर्गजेष्वेवद्रुमेष्वेवहिकंटकाः ॥ जनेष्वेवविहाराहिनकस्यचिदुरःस्थली ॥ १८ ॥ बाणेषुगुणविश्लेषोबंधोक्तिःपुस्तकेदृढा ॥ स्नेहत्यागःसदैवास्तियत्रपाशुपतेजने ॥ १९ ॥ दंडवार्तासदायत्रकृतसंन्यासकर्मणाम् ॥ मार्गणाश्चापकेष्वेवभिक्षुका ब्रह्मचारिणः ॥ २० ॥ यत्रक्षपणकाएवदृश्यंतेमलधारिणः ॥ प्रायोमधुव्रताएवयत्रचंचलवृत्तयः ॥ २१ ॥ इत्यादिगुणवद्देशेत्वयिराज्यंप्रशासति ॥ धर्मेणराजधर्मज्ञशौंडीर्यगुणशालिनि ॥ २२ ॥

बध्यतामितिवचनंनास्तीत्यर्थः ॥ अपराधाभावात् ॥ पाशुपतेपाशुपतयोगयुक्तेपरमहंसेएव स्नेहत्यागोममताभावः ॥ यद्वा पाशुपतेसंन्यासिन्येवस्नेहत्यागःस्नेहद्रव्याभ्यंगस्नेहाक्तभैक्षादित्यागः ॥ तथाचश्रुतिः ॥ प्राणसंधारणार्थंयथामेदोवृद्धिर्नजायते ॥ औषधवदशनमाचरेत् ॥ हिंसातैलादिमैथुनंचप्रातिषिद्धानि ॥ अभ्यंगंचैवतांबूलंवर्जयेत्परदारवदित्यादिः ॥ पक्षांतरेऽन्यत्रस्नेहस्यदयायाःस्नेहद्रव्यस्यघृतादेर्वात्यागोनास्तीत्यर्थः ॥१९॥ कृतसंन्यासकर्मणामेकदंडित्रिदंडिनामेवदंडवार्तावंशदंडधारणकथा ॥ पक्षांतरेऽन्यत्रराजदंडवार्ताराजदंडकथानास्तीत्यर्थः ॥ चापकेषुचापेषुधनुःष्विति यावत् ॥ एवंमार्गणाबाणाः ॥ पक्षांतरेऽन्यत्रमार्गणायाचकानसंतीत्यर्थः ॥ ब्रह्मचारिणएवभिक्षाहारोपजीविनः ॥ संन्यासिनांत्वत्यादरेणनिमंत्रणमेवंभवतातिभावः ॥ २० ॥ क्षपणकाअवधूता एवमलधारिणोदेहमलधारिणोदृश्यंते ॥ पक्षांतरेनान्येइत्यर्थः ॥ मधुव्रताभ्रमराएवचंचलवृत्तयः ॥ पक्षांतरेनान्यइत्यर्थः ॥ भ्रमरेष्वपिकेचनचंचलवृत्तयोनभवंतीतिप्रायोग्रहणम् ॥ २१ ॥ उपसंहरति ॥ इत्यादीति ॥ पूर्वोक्तप्रकारगुणवतिदेशेधर्मेणन्यायेनराज्यंराज्ञःकर्मप्रजापालनादित्वयिप्रशासतिकुर्वतिसतिलावण्येनांगसौंदर्येणार्जिताप्राप्ताशोभनाश्रीर्याभिस्तासांराज्ञीनासमुतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशसहस्रंतासुचकुमाराणांशतत्रयंभाविभविष्यतीतितृतीयेनान्वयः ॥ राजानंविशेषयतः शौंडीर्येतिसपादसार्धेन ॥ शौंडीर्यंशूरता ॥ सौंदर्येतिकचित् ॥ तत्रसौंदर्यंशोभातिशयः ॥ रूपंकरच रणादिघटनसौष्ठवंलावण्यमितियावत् ॥ शौर्यंदाक्ष्यम् ॥ औदार्यंदातृत्वंमहत्त्वंवा ॥ २२ ॥ २३ ॥ वृद्धकालइतिसार्धपंचकंवाक्यम् ॥ नाम्नावृद्धकालइतिख्यातस्त्वंमध्येराजसभंराजसभायामध्ये दूरात्कार्पटिकैरक्तवस्त्रधारितपस्विविशेषैर्दृष्टःसन्पश्चात्तैःसर्वैःकार्पटिकैरनेकशःशोभनाशीर्वादैरभिनंदितआनंदेनसंवर्धितोभविष्यसीत्यन्वयः ॥ कथंभूतैःस्वाशीर्वादैः ॥ तत्कर्मभाविसदृशैस्तद्योग्यैर्कुंठमो गावसानपुण्यंकर्मतस्यभावियत्फलंतत्सदृशैस्तद्योग्यैर्यथार्थैरित्यर्थः ॥ त्वद्भाविकर्मसदृशैरितिपाठेपिसएवार्थः ॥ त्वंकथंभूतः ॥ उग्रःप्रतापवान् ॥ २४ ॥ श्रियाधनसंपत्त्यासंतर्पितामार्गणायाच कायेनसः ॥ श्रीसमर्पितेतिपाठेपिसएवार्थः ॥ २५ ॥ संततमवभृथेनयज्ञसमाप्त्यनंतरंक्रियमाणेनस्नानेनक्लिन्नाआर्द्रामूर्धजाःकेशायस्यसः ॥ सत्तीर्थोदकसंक्लिन्नेतिपाठेसत्तीर्थान्युत्कृष्टानियानिका

सौभाग्यभाजिरूपाढ्येशौर्यौदार्यगुणान्विते ॥ सीमंतिनीनांरम्याणांलावण्यार्जितसुश्रियाम् ॥ २३ ॥ राज्ञीनामयुतंभाविकुमाराणांशतत्रयम् ॥ वृद्धकालइतिख्यातउग्रःपरपुरंजयः ॥ २४ ॥ विजितानेकसमरःश्रीसंतर्पितमार्गणः ॥ अनेकगुणसंपूर्णःपूर्णचंद्रनिभद्युतिः ॥ २५ ॥ संतता वभृथक्लिन्नमूर्धजःक्षितिपर्षभः ॥ प्रजापालनसंपन्नःकोशप्रीणितभूसुरः ॥ २६ ॥ पदारविंदंगौविंदंहृदिध्यायन्नतंद्रितः ॥ वासुदेवकथालापप रिक्षिप्तदिनक्षपः ॥ २७ ॥ कदाचिदुपविष्टःसन्मध्येराजसभंद्विज ॥ दूरात्कार्पटिकैर्दृष्टोवाराणस्याःसमागतैः ॥ २८ ॥ तत्कर्मभाविसदृशै स्तदात्वमभिनंदितः ॥ तैःसर्वैराजशार्दूलस्वाशीर्वादैरनेकशः ॥ २९ ॥ श्रीमद्विश्वेश्वरोदेवोविश्वेषांजगतांगुरुः ॥ काशीनाथस्तुतेकुर्यात्कुमते रपवर्जनम् ॥ ३० ॥ नैःश्रेयसींचसंपत्तिंयोदेयात्स्मरणादपि ॥ काशीनाथःसतेदिश्याज्ज्ञानंमलविवर्जितम् ॥ ३१ ॥ येनपुण्येनतेप्राप्तं राज्यंप्राज्यमकंटकम् ॥ तत्पुण्यशेषतोभूयाद्विश्वनाथेमतिस्तव ॥ ३२ ॥

वेरीतुंगभद्राकृष्णावेणागौतम्यादीनि ॥ तथाचोक्तम् ॥ कावेरीतुंगभद्राचकृष्णावेणाचगौतमी ॥ भागीरथीतिविख्याताःपंचगंगाःप्रकीर्तिताइति ॥ तेषामुदकैःसंक्लिन्नामूर्धजायस्यसइत्यर्थः ॥ कोशेन कोशस्थेनन्यायार्जितधनेनप्रीणितास्तर्पिताभूसुराब्राह्मणायेनसः ॥ २६॥ गोविंदस्येदंगौविंदम् ॥ पदारविंदेकृष्णस्येतिपाठेपदारविंदेइतिद्वितीयाद्विवचनम् ॥ वासुदेवकथालापेनपरिक्षिप्तेनिर्वाहितेदिन क्षपेदिवसरात्रीयेनसः ॥ २७ ॥ २८ ॥ २९ ॥ स्वाशीर्वादमेवाहतुः ॥ श्रीमद्विश्वेश्वरइतिपंचकेन ॥ कुमतेरज्ञानस्यअपवर्जनंनाशनम् ॥ ३० ॥ नचात्रसाधनप्रयासइत्याह ॥ नैःश्रेयसींकैवल्या ख्याम् ॥ स्मरणादपिशब्दादुच्चारणादपि ॥ तथाच सकृदुच्चारितंयेनहरिरित्यक्षरद्वयम् ॥ बद्धःपरिकरस्तेनमोक्षायगमनंप्रतीति ॥ नन्वज्ञानंज्ञानेनैवनिवर्त्यमतस्तदभावात्कथंतस्यापवर्जनंतत्राहुः ॥ काशीनाथःसइति॥ सम्प्रसिद्धः॥ दिश्याद्दुपदिशतु॥ ननुतथापिसार्वज्ञ्यादिज्ञानदानेसदोषस्तदवस्थएवेत्याशंक्याहुर्मलविवर्जितमज्ञानतत्कार्ययोर्नाशकामित्यर्थः॥ ३१॥ननुपुण्यंविनाकथंविश्वनाथस्मरणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटेततत्राहुः ॥ येनपुण्येनेति ॥ प्राज्यमुत्कृष्टंप्रजासुसुखम् ॥ तत्रहेतुरकंटकंशत्रुराहितम् ॥ ३२ ॥ ननुतथापिप्रसन्नःसन्नेकमेवफलंदद्यान्नचिरजीवनमारभ्यमोक्षावसानमित्यत्राहुः ॥ यस्यप्रसादा दिति ॥ अंबरंवस्त्रम् ॥ अंगनाउत्तमास्त्री ॥ वरांगनाइतिवापाठः ॥ समृद्धयोराज्यादिविभूतयः ॥ परमकारुणिकत्वात्तस्येतिभावः ॥ ३३ ॥ ३४ ॥ त्वमिति ॥ इतिआशीःपरंपरांपूर्वोक्तामाशी र्वादधारांश्रुत्वा ॥ इदमूइमम् ॥ अयंचासौवृत्तांतश्चेतिवा इदंवृत्तांतआवाभ्यामिदानींकथ्यमानस्तत्त्वंस्मरिष्यसीत्यर्थः ॥३५॥ आकारेतिसार्धवाक्यम् ॥ आकारगोपनमभिप्रायसंगोपनम् ॥ सुमुहूर्तं

यस्यप्रसादात्सुलभमायुःपुत्रांबरांगनाः ॥ समृद्धयःस्वर्गमोक्षौसविश्वेशःप्रसीदतु ॥ ३३ ॥ नामश्रवणमात्रेणयस्यविश्वेशितुर्विभोः ॥ महापातकविच्छेदः सविश्वेशोऽस्तुतेहृदि ॥ ३४ ॥ त्वंवृद्धकालोभूपालःश्रुत्वेत्याशीःपरंपराम् ॥ स्मरिष्यसीदंवृत्तांतंपुलकांकवपुस्तदा ॥ ३५ ॥ आकारगोपनंकृत्वातेभ्यो दत्त्वाधनंबहु ॥ सुमुहूर्तमनुप्राप्यसुतेराज्यंविधायच ॥ ३६ ॥ अनंगलेखयाराज्याततःकाशींगमिष्यसि ॥ दत्त्वादानानिभूरीणिप्रीणयित्वाऽर्थिनोजनान् ॥ ३७ ॥ स्वनाम्नातत्रसंस्थाप्यालिंगंनिर्वाणकारणम् ॥ प्रासादंतत्रकृत्वोच्चैस्तदग्रेकूपमुत्तमम् ॥ ३८ ॥ विधायविधिवत्तत्रकलशारोपणादिकम् ॥ मणिमाणिक्यचांपेयदुकूलेभाश्वगोधनम् ॥ ३९ ॥ महाध्वजपताकाश्चच्छत्रचामरदर्पणम् ॥ देवोपकरणंभूरिविश्राण्यश्रमवर्जितः ॥ ४० ॥ व्रतो पवासानियमैःपरिक्षीणकलेवरः ॥ मध्याह्नेनिर्जनेतत्रद्रक्ष्यस्येकंतपोधनम् ॥ ४१ ॥ अतीवजीर्णवपुषंपारिपिंगजटान्वितम् ॥ मूर्तिमंतमिवप्रांशुंधर्मं जनमनोहरम् ॥ ४२ ॥ भारंशरीरयष्टेश्चदृढयष्ट्यांसमर्प्यच ॥ गर्भागाराद्विनिष्क्रम्याभ्यायांतंरंगमंडपे ॥४३॥ उपविश्यसमीपेतेप्रक्ष्यत्येवमनुक्रमात् ॥ कोसित्वंकिमिहासित्वंद्वितीयइवकस्त्वयम् ॥ ४४ ॥ प्रासादःकारितःकेनजानास्येषततोवद ॥ अस्यलिंगस्यकिंनामप्रायोजानेनवार्धकात् ॥ ४५ ॥ पृष्टस्त्वमितितेनाथतदावृद्धतपस्विना ॥ कथयिष्यस्यहंराजावृद्धकालइतिश्रुतः ॥ ४६ ॥ दाक्षिणात्यइहप्राप्तस्त्वेतयासहकांतया ॥ ध्यायामिलिंगमे तच्चप्रार्थयामिनकिंचन ॥ ४७ ॥

शोभनंलग्नम् ॥ ३६ ॥ दत्त्वेतिसार्धश्लोकंवाक्यम् ॥ तत्रक्कांतल्यवंतानांपदानांतत्रकाश्यांद्रक्ष्यस्येकंतपोधनमित्यनेनान्वयः ॥ ३७ ॥ ३८ ॥ चांपेयदुकूलंपीतवस्त्रम् ॥ ३९ ॥ विश्राण्यदत्त्वा ॥ श्रमवर्जितःकार्पण्यजन्यखेदरहितः ॥ ४० ॥ ४१ ॥ मूर्तिमंतंधर्ममिवेत्यन्वयः ॥ प्रांशुमुच्चंमहांतंधर्ममितिवा ॥ ४२ ॥ गर्भागाराच्छिवालयात् ॥ ४३ ॥ उपविश्येत्यर्धवाक्यम् ॥ सतपोधनइति शेषः ॥ प्रक्ष्यतिप्रश्नंकरिष्यति ॥ प्रश्नमेवाहतुः कोसीतिसार्धेन ॥ द्वितीयइवकस्त्वयमित्यनंगलेखामुद्दिश्य ॥ अनेनसम्यग्दृष्टिबलाभावःसूचितः ॥ ४४ ॥ ४५ ॥ ४६ ॥ दाक्षिणात्योदक्षिण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशोद्भवः ॥ एतयाऽनंगलेखया ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ भवानितिगणवाक्यम् ॥ ५१ ॥ ५२ ॥ जोषंतूष्णीम् ॥ ५३ ॥ नुन्नःप्रेरितःप्रार्थितइतियावत् ॥ ५४ ॥ तदंब्विति ॥ भूयाद्भ
विष्यति ॥ सुपार्वणशशिप्रभःशोभनपूर्णिमाचंद्रसदृशः ॥ कोशोन्मुक्तोरगोनिर्मोकरहितसर्पः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ अन्यानिपुण्यक्षेत्राणिकाशीप्राप्तिकराणीतिवक्तुंतयोःपूर्वजन्मवृत्तांत

प्रासादस्यास्यजटिलस्वयंकारयिताशिवः ॥ विशेषतोऽस्यलिंगस्यनामनोवेद्मिनिश्चितम् ॥ ४८ ॥ इतिश्रुत्वानरपतेर्वाक्यंप्राहजटाधरः ॥ सत्यमुक्तंत्व
यैकंहिलिंगनामनवेत्सियत् ॥ ४९ ॥ पश्येयंत्वामहंनित्यमुपविष्टंमनिश्चलम् ॥ श्रुतोभविष्यतितवप्रासादोयेनकारितः ॥ ५० ॥ ममाग्रेतत्समा
चक्ष्वयदिजानासितत्त्वतः ॥ आकर्ण्येतिवचस्तस्यपुनःप्राहभवानिति ॥ ५१ ॥ कर्ताकारयिताशंभुःकिमतथ्यंब्रवीम्यहम् ॥ अथवाचिंतयाकिंमेतप
स्विन्ननयाविभो ॥ ५२ ॥ इतित्वयिस्थितेजोषंसपुनर्वृद्धतापसः ॥ पिपासुरस्मिपानीयमानीयाशुप्रयच्छम ॥ ५३ ॥ इतितेनचनुन्नस्त्वंवार्यानी
यचकूपतः ॥ पाययिष्यसितंवृद्धंतापसंतत्क्षणाच्चसः ॥ ५४ ॥ तदंबुपानतोभूयात्सुपार्वणशाशप्रभः ॥ तरुणोरूपसंपन्नःकोशोन्मुक्तोरगोयथा ॥ ५५ ॥
जाताश्चर्येणभवतापुनरेवाभ्यभाषिसः ॥ कःप्रभावोहिभगवन्नेषयेनभवान्पुनः ॥ ५६ ॥ परित्यज्यात्रजरसंनवोभ्राजसिसांप्रतम् ॥ अस्तिचेदवकाशस्ते
ततोब्रूहितपोधन ॥ ५७ ॥ तपोधनउवाच ॥ ॥ वृद्धकालक्षितिपतेजानेत्वांसुमहामते ॥ इमामपिचजानेऽहंतवपत्नींपतिव्रताम् ॥ ५८ ॥ जन्मनोऽस्मा
दियंराजन्नासीद्विप्रस्यकन्यका ॥ तुर्वसोर्वेदवपुषःशुभाचाराशुभानना ॥ ५९ ॥ तेनदत्ताविवाहार्थंनैध्रुवायमहात्मने ॥ सचकालवशंप्राप्तोनैध्रुवोऽप्राप्तयौ
वनः ॥ ६० ॥ वैधव्यंपालयंत्येषामृताऽवंत्यांशुभव्रता ॥ तेनपुण्येनसंजातापांड्यस्यनृपतेःसुता ॥ ६१ ॥ परिणीतात्वयाराजन्पतिव्रतरतासदा ॥
त्वयासहेहसंप्राप्तामुक्तिंप्राप्स्यत्यनुत्तमाम् ॥ ६२ ॥ अयोध्यायामथावंत्यांमथुरायामथापिवा ॥ द्वारवत्यांचकांच्यांवामायापुर्यामथोनृप ॥ ६३ ॥
अपिपातकिनोयेचकालेननिधनंगताः ॥ तेहिस्वर्गादिहागत्यकाश्यांमोक्षमवाप्नुयुः ॥ ६४ ॥ अवैमित्वामपिनृपद्विजोऽभूःपूर्वजन्मनि ॥ माथुरः
शिवशर्माख्योमायापुर्यांभवान्मृतः ॥ ६५ ॥

माह जन्मनोऽस्मादियमित्यादिना ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ नन्ववंत्यांमोक्षपुर्यांमृतायाःकथंपुनर्जन्मतत्राह ॥ अयोध्यायामित्यादि ॥ ६३ ॥ ६४ ॥ एवंभार्यायाःपूर्ववृत्तांत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तातस्याप्याह अवैमीत्यादिना ॥ ६५ ॥ ६६ ॥ ६७ ॥ अन्यच्चेति ॥ स्फुटंनिश्चितम् ॥ एतदेवयुक्तमितिभावः ॥ ६८ ॥ तदेवदर्शयति ॥ सुकृतंनैवेति ॥ ६९ ॥ तस्मादिति ॥ निधानवन्निधिवत् ॥ ७० ॥ निश्चितमिति ॥ हिहकारावत्यंतनिश्चयार्थौ ॥ प्रसादाद्यपीतिक्वचित् ॥ ७१ ॥७२॥७३॥ कूपइति ॥ कालंजराव्याधिविघातकमुदकंयस्यसः ॥ तदेवदर्शयति ॥ जराव्याधिविघातकृदिति ॥ कालदमइतिपाठेकालंमृत्युंदमयतीतितथा ॥७४॥७५॥ नकुष्ठमिति ॥ कालदमोदकात्पीतात्स्पृष्टाद्वाकुष्ठादयोरोगानप्रतिष्ठंतीत्यन्वयः॥तत्रकुष्ठंश्वित्रम् ॥ कुष्ठंश्वित्रमित्यमरः ॥ विस्फो

तत्पुण्यात्प्राप्यवैकुंठंभुक्त्वाभोगान्मनोरमान् ॥ तत्पुण्यशेषात्क्षितिपोजातस्त्वंनंदिवर्धने ॥ ६६ ॥ वृद्धकालावनीपालतेनैवसुकृतेनच ॥ मोक्षक्षेत्रमिदंप्राप्तोमुक्तिंप्राप्स्यस्यनुत्तमाम् ॥ ६७ ॥ अन्यच्चशृणुराजेंद्रत्वयायत्समुदीरितम् ॥ कर्ताकारयिताशंभुःप्रासादस्येतितत्स्फुटम् ॥ ६८ ॥ सुकृतंनैवसततमाख्यातव्यंकदाचन ॥ कृतंमयेतिकथनात्पुण्यंक्षयातितत्क्षणात् ॥ ६९ ॥ तस्मात्सर्वप्रयत्नेनगोपनीयंनिधानवत् ॥ सुकृतंकीर्तनाद्व्यर्थंभवेद्धस्महुतंतथा ॥ ७० ॥ निश्चितंविश्वनाथेनप्रेरितेनत्वयाऽनघ ॥ कृतंहिकृतकृत्येनप्रासादादिहवेद्म्यहम् ॥ ७१ ॥ वृद्धकालेश्वरंनामलिंगमेतन्महीपते ॥ जानीह्यनादिसंसिद्धंनिमित्तंकिंतुवैभवान् ॥ ७२ ॥ दर्शनात्स्पर्शनात्तस्यपूजनाच्छ्रवणान्नतेः ॥ वृद्धकालेशलिंगस्यसर्वंप्राप्नोतिवांछितम् ॥ ७३ ॥ कूपःकालोदकोनामजराव्याधिविघातकृत् ॥ यदीयजलपानेनमातुःस्तन्यमपानवान् ॥ ७४ ॥ कृतकूपोदकस्नानःकृतैतल्लिंगपूजनः ॥ वर्षेणसिद्धिमाप्नोतिमनोभिलषितांनरः ॥ ७५ ॥ नकुष्ठंनचविस्फोटानरंघानविचर्चिका ॥ पीतात्स्पृष्टात्प्रतिष्ठंतिकफःकालतमोदकात् ॥ ७६ ॥ नाग्निमांद्यंनैवशूलंनमेहोनप्रवाहिका ॥ नमूत्रकृच्छ्रंनापामापानायस्यास्यसेवनात् ॥ ७७ ॥ भूतज्वराश्चयेकेचिद्येकेचिद्विषमज्वराः ॥ तेक्षिप्रमुपशाम्यंतिह्येतत्कूपोदसेवनात् ॥ ७८ ॥ तवाग्रतोममजरापलितंचयथाविधि ॥ एतत्कूपोदपानेनक्षणान्नष्टंनवोऽभवम् ॥ ७९ ॥ वृद्धकालेश्वरोलिंगेसेवितेनदरिद्रता ॥ नोपसर्गानवारोगानपापंनावजंफलम् ॥ ८० ॥ उत्तरेकृत्तिवासस्यवाराणस्यांप्रयत्नतः ॥ वृद्धकालेश्वरंलिंगंद्रष्टव्यंसिद्धिकाम्यकैः ॥ ८१ ॥

टःपिटकः ॥ विस्फोटःपिटकःस्त्रियामित्यमरः ॥ रंघारंघणीरोगविशेषः ॥ विचर्चिकाकिलासम् ॥ किलाससिध्मेकच्छ्वांतुपामपामेविचर्चिकेत्यमरः ॥७६॥ मेहोव्याधिविशेषः ॥ व्याधिभेदाविद्रधिःस्त्रीज्वरमेहभगंदराइत्यमरः ॥ प्रवाहिकाग्रहणी ॥ ग्रहणीरुक्प्रवाहिकेत्यमरः ॥ मूत्रकृच्छ्रमश्मरी ॥ अश्मरीमूत्रकृच्छ्रंस्यादित्यमरः ॥ पामविचर्चिकयोरवांतरभेदः ॥७७॥७८॥७९॥८०॥८१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सानंगलेखाराज्ञीकमनंगलेखयाराज्ञ्यासहितम् ॥ ८२ ॥ ८३ ॥ ८४ ॥ स्वमुदर्कस्वीयमुत्तरकालीनंफलम् ॥ ८५ ॥ ८६ ॥ भौमानीति ॥ सुंदरानंधपंग्वादिरहितान् ॥ सद्गुणानितिकचित् ॥ ८७ ॥ विश्वेश्वरमिति ॥ निर्वाणपदंकैवल्यस्थानमीयिवान्प्राप्तवान् ॥ ८८ ॥ ८९ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांचतुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥ छ ॥ पंचाधिकतमेविंशेऽध्यायेकलशजन्मनः ॥ वर्ण्यतेत्रसभार्यस्यशिखिवाहनदर्शनम् ॥ १ ॥ एवंतावत्प्रथमतोऽध्यायत्रयेणवृंदारकहिरण्यगर्भसंवादद्वारेणकाशीमाहात्म्यंमनाक्प्रपंच्यततोऽप्यगस्त्यमहालक्ष्मीलोपामुद्रासंवादद्वारेणाधिकतरंप्रपंच्यततोप्यगस्त्यकार्तिकेयसंवादेनाधिकतमंप्रपंचयितुमुपक्रमते ॥ शृण्विति ॥ विरजाविगतरजोगुणःशुद्धसत्त्वइत्यर्थः ॥ १ ॥

इत्युक्त्वातंमहीपालंहस्तेधृत्वातपोधनः ॥ सानंगलेखाराज्ञीकंतस्मिँल्लिंगेलयंययौ ॥ ८२ ॥ महाकालमहाकालमहाकालेतिकीर्तनात् ॥ शतधामुच्यते पापैर्नात्रकार्याविचारणा ॥ ८३ ॥ इत्थंभवित्रीतेमुक्तिःकैटभारातिदर्शनात् ॥ भोगान्भुक्त्वाबहुविधान्वैकुंठनगरेशुभे ॥ ८४ ॥ इतिसंहृष्टतनूरुहःसविप्रोभगवत्तद्वचस्ततोनिशम्य ॥ स्वमुदर्कमथार्ककोटिरम्यंहरिलोकंपरिलोकयांचकार ॥ ८५ ॥ ॥ मैत्रावरुणिरुवाच ॥ ॥ लोपामुद्रेसविप्रेंद्रोभोगान्भुक्त्वामनोरमान् ॥ मायापुर्यांकृतप्राणत्यागपुण्यबलेनच ॥ ८६ ॥ वैकुंठलोकादागत्यपत्तनेनंदिवर्धने ॥ भौमानिभुक्त्वासौख्यानिपुत्रानुत्पाद्यसुंदरान् ॥ ॥ ८७ ॥ तेषुराज्यंविनिक्षिप्यप्राप्यवाराणसींपुरीम् ॥ विश्वेश्वरंसमाराध्यनिर्वाणपदमीयिवान् ॥ ८८ ॥ एतत्पुण्यतमाख्यानंविप्रस्यशिवशर्मणः ॥ श्रुत्वापापविनिर्मुक्तोज्ञानंपरममृच्छति ॥ ॥ ८९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे शिवशर्मनिर्वाणप्रापणंनामचतुर्विंशोध्यायः ॥ २४ ॥ ॥ व्यासउवाच ॥ ॥ शृणुसूतप्रवक्ष्यामिकथांकलशजन्मनः ॥ यामाकर्ण्यनरोभूयाद्विरजाज्ञानभाजनम् ॥ १ ॥ गिरिंप्रदक्षिणीकृत्यश्रीसंज्ञंकलशोद्भवः ॥ सपत्नीकोददर्शाथरम्यंस्कंदवनंमहत् ॥ २ ॥ सर्वर्तुकुसुमाढ्यंचरसवत्फलपादपम् ॥ सुसेव्यकंदमूलाढ्यंसुवल्कलमहीरुहम् ॥ ३ ॥ निवीतश्वापदगणंससरित्पल्वलावृतम् ॥ स्वच्छगंभीरकासारंसारंसर्वभुवःपरम् ॥ ४ ॥ नानापतत्रिसंघुष्टंनानामुनिजनोषितम् ॥ तपःसंकेतनिलयमिवैकंसंपदांपदम् ॥ ५ ॥ लोहितोनामतत्रास्तिगिरिःस्वर्णगिरिप्रभः ॥ सुकंदरप्रस्रवणःस्वसानुशिखरप्रभः ॥६॥

गिरिमिति ॥ कलशोद्भवःकुंभसंभवःकार्तिकेयवनंदृष्टवान् ॥ तत्रचवनेषडाननमद्राक्षीदित्यग्रिमेणान्वयः ॥ २ ॥ गिरिंविशिनष्टिचतुर्भिः ॥ सर्वेति ॥ सौगंधिकानांकंदःशालूकंमूलमितियावत् ॥ तद्व्यतिरिक्तमन्यन्मूलम् ॥ यद्वा कंदोवर्तुलाकारआर्द्रकहरिद्रासूरणादिः ॥ मूलमधःसूक्ष्ममुपरिविस्तृताकारंमूलकादिताभ्यामाढ्यम् ॥ ३ ॥ नितरांवीतोगतःश्वापदानांहिंस्रस्वभावानांव्याघ्रादीनांगणोयत्रतत्तथा ॥ विनीतेतिपाठेविनीतस्त्यक्तक्रौर्यःश्वापदानांगणोयत्रतत्तथा ॥ सारिद्भिःसहितानियानिपल्वलान्यल्पोदकसरांसितैरावृतम् ॥ स्वच्छानिनिर्मलानिगंभीराण्यगाधानिसरोवराणियस्मिंस्तत्स्वच्छगंभीरकासारम् ॥ ४ ॥ तपःसंकेतनिलयंतपसोरहस्यस्थानमिवेत्युत्प्रेक्षा ॥ एकंमुख्यम् ॥ ५ ॥ किंचलोहितोलोहितगिरिरितिदक्षिणायांप्रसिद्धःपर्वतस्तत्रवनेऽस्ति ॥ स्वर्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरिप्रभः सुमेरुरिवसुंदरः ॥ शोभनाःकंदरादर्यःप्रस्रवणानिचनिर्झरायत्रसः ॥ सानवःप्रस्थाःपर्वतैकदेशसमभागाः ॥ शिखराणिश्रृंगाणि ॥ स्वानांस्वसंबंधिनांसानुशिखराणामेभिर्वाप्रभाशो भायत्रसः ॥ सुइतिकचित् ॥ सुसानुशिखरीत्यन्यत्र ॥ ६ ॥ एकशाकलमेकखंडमूइहवनेउच्चैर्यथास्यात्तथातपस्तप्तुमागतमिवेत्युत्प्रेक्षा ॥ ७ ॥ साक्षाद्ब्रह्म ॥ यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः ॥ तदेवषडाननम् ॥ भक्तानुजिघृक्षयागृहीतलीलाशरीरमित्यर्थः ॥ ८ ॥ ९ ॥ सगुणागुणभेदेनभक्त्यापरमयामुदा ॥ पद्यैरष्टाभिरस्तौषीदगस्त्योगिरिजासुतम् ॥ षडाननायनमोस्त्वित्यन्वयः ॥ षडाननं विशिनष्टि वृंदारकेत्यारभ्येत्थमित्यतःप्राक्तनेनग्रंथेन ॥ वृंदारकवृंदैर्देवसमूहैर्वंद्येअभिवंद्येपादारविंदेचरणकमलेयस्यतस्मै ॥ सुधाकरायामृताब्धयेपरमानंदायेत्यर्थः ॥ सएषपरमानंदइत्यादिश्रुतेः ॥ षडाननायषण्णामृतूनामाननंप्रापणंयेनतस्मैसंवत्सरादिकालरूपायेत्यर्थः ॥ षण्मुखायेतिवा ॥ अमितविक्रमायानंतपराक्रमायेत्यर्थः ॥ गौरीब्रह्मविद्यानिर्मलत्वात्तयाहृदानंदस्यहृदयाभिव्यंग्यानंदस्यसमुद्भवोयस्माद्बुद्धिवृत्त्यभिव्यंग्यत्वात्तस्मै ॥ तथाचश्रुतिः ॥ दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरिति ॥ पार्वत्याहृदयाह्लादजनकायेतिवा ॥ १० ॥ प्रणतानांभक्तानांवाआर्तिहंत्रेसंसारदुःखनाशकाय ॥ समस्तभक्तवृंदस्यमनोरथानांमनोभिलषितानांधर्मार्थकाममोक्षाणांकर्त्रेसंपादयित्रे ॥ परतारकस्यपरवंचकस्यरथानांमनोरथानांदात्रेखंडयित्रे ॥ नतानामितिपाठेनतानांसमस्तस्य

कैलासस्यैकशकलंकर्मभूमाविहागतम् ॥ तपस्तप्तुमिवप्रोच्चैर्नानाश्चर्यसमन्वितम् ॥ ७ ॥ तत्राद्राक्षीन्मुनिश्रेष्ठोऽगस्त्यःसाक्षात्षडाननम् ॥ प्रणम्यदंडवद्भूमौसपत्नीकोमहातपाः ॥ ८ ॥ तुष्टावगिरिजासूनुंसूक्तैःश्रुतिसमुद्भवैः ॥ तथास्वकृतयास्तुत्याप्रबद्धकरसंपुटः ॥ ९ ॥ अगस्तिरुवाच ॥ ॥ नमोस्तुवृंदारकवृंदवंद्यपादारविंदायसुधाकराय ॥ षडाननायामितविक्रमायगौरीहृदानंदसमुद्भवाय ॥ १० ॥ नमोस्तुतुभ्यंप्रणतार्तिहंत्रेकर्त्रेसमस्तस्यमनोरथानाम् ॥ दात्रेरथानांपरतारकस्यहंत्रेप्रचंडासुरतारकस्य ॥ ११ ॥ अमूर्तमूर्तायसहस्रमूर्तयेगुणायगुण्यायपरात्पराय ॥ अपारपारायपरापरायनमोस्तुतुभ्यंशिखिवाहनाय ॥ १२ ॥ नमोस्तुतेब्रह्मविदांवरायदिगंबरायांबरसंस्थिताय ॥ हिरण्यवर्णायहिरण्यबाहवेनमोहिरण्यायहिरण्यरेतसे ॥ १३ ॥

प्रपंचस्यकर्त्रेछेदकायेतिव्याकर्तव्यम् ॥ परतारकस्यप्रचंडस्यासुरस्यतारकस्यहंत्रेनाशयित्रे ॥ अथवापरंप्रतारकंज्ञानंप्रणवरूपषडक्षररामसंत्रराजरूपंवानतानांतद्दात्रे ॥ शेषंपूर्ववत् ॥ ११ ॥ अमूर्तमूर्तायअमूर्तेवाय्वाकाशेमूर्तानिपृथिव्यप्तेजांसि ॥ मूर्तंचामूर्तंचेतिश्रुतेः ॥ तद्रूपायापंचीकृतभूतपंचकात्मकाहिरण्यगर्भायेत्यर्थः ॥ सहस्रमूर्तयेपंचीकृतभूतपंचकात्मकविराड्रूपायेत्यर्थः ॥ गुणायरजःसत्त्वतमआत्मकायाकारप्रश्लेषंविना अगुणायनिर्गुणायेतिवा ॥ गुण्यायगुणेभ्योहितंगुण्यंप्रधानंतस्यात्रिगुणात्मकत्वात्तद्रूपाय ॥ गुणाग्रगण्यायेतिपाठेगुणाएवअग्रेगण्यायस्यतस्मैनिर्दोषायेत्यर्थः ॥ परात्परायप्रधानादपिश्रेष्ठायदूरायेतिवा ॥ प्रधानात्परतःपरइतिश्रुतेः ॥ अपारोऽगम्यःपारोऽवधिर्यस्यसतथातस्मै ॥ अपरिच्छिन्नायेत्यर्थः ॥ अपाराजीवास्तान्ज्ञानदानेनपारयतीत्यपारपारस्तस्माइतिवा ॥ परापरायमाययाकार्यकारणरूपाय ॥ शिखिवाहनायमयूररथाय ॥ १२ ॥ ब्रह्मविदांवरायतत्त्वज्ञानिनामादिगुरवे ॥ दिगंबरायदिग्वाससे ॥ अम्बरसंस्थितायाकाशवासाय ॥ यद्वांऽबरसंस्थितायअम्बरशरीरत्वेनस्थिताय ॥ आकाशशरीरंब्रह्मेतिश्रुतेः ॥ हिरण्यवर्णायस्वर्णकांतये ॥ तथाचोक्तम् ॥ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुण्डलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रइति ॥ हिरण्यबाहवे हिरण्यानिस्वर्णमयानिकेयूरादीनिबाहुषुहस्तादिषुयस्यतस्मै ॥ हिरण्यायस्वर्णरूपाय ॥ शुद्धसत्त्वात्मकायेतिवा ॥ हिरण्यंरेतोयस्यतस्मैअग्नि

१ 'रथौस्यन्दनवानीरौ' इत्यजयात्, रथानां वेतसानांदात्रेवेतसशस्त्रेणताडकायेतिवा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपायरुद्ररूपायवेत्यर्थः ॥ तथाचभागवते ॥ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः ॥ तानिरूप्यस्यहेम्नश्चक्षेत्राण्यासन्महीपतेःइति ॥ १३ ॥ तपःस्वरूपायसाक्षात्तपोरूपाय ॥ तपोधनाय
तपएवधनमैश्वर्यंयस्यतस्मै ॥ तपोधनानांतपसःफलानांप्रतिपादकायप्रदायकाय ॥ सदाकुमारायसर्वदापञ्चषडब्दार्भकरूपाय ॥ हिप्रसिद्धौ ॥ सनत्कुमारायेतिवा ॥ मारमारिणेकामजेत्रे ॥
एतत्तुकल्पभेदाभिप्रायेणवोद्धव्यम् ॥ देवसेनायागंधर्वकन्यायावनपर्वणिपरिणेतृत्वदर्शनाद्गुहस्य ॥ वैष्णवेच ॥ श्रीर्देवसेनामैत्रेयदेवसेनापतिर्हरिरिति ॥ यद्वा ब्रह्मणोवरदानात्सदाकुमारत्वम् ॥
तदुक्तंस्कांदे ॥ पुत्रस्तेभवितादेविमहायोगवलान्वितः ॥ सदावालोऽथसुभगोधर्मज्ञोधर्मवत्सलइति ॥ मारयंतीतिमाराःदुष्टास्तेषांमारिणइतिवा ॥ माररूपिणइतिपाठेकोटिकन्दर्पसुभगायेत्यर्थः ॥
तृणीकृतमैश्वर्यंयेन विरागोऽस्यास्तीतिविरागी सचसचतस्मै ॥ १४ ॥ शरजन्मनेशरस्तंबोत्पत्तये ॥ शरस्तंबेनिक्षिप्ताद्भवयोर्वीर्यात्कार्तिकेयस्यजन्मेतिप्रसिद्धम् ॥ प्रभातसूर्यारुणदन्तपंक्तये
प्रातःकालीनसूर्यसदृशदंतराजये ॥ वालायवालवत्प्रतीयमानाय ॥ अथवाऽवालपराक्रमाय अःविष्णुःसचासौवालश्चेत्यवालःश्रीकृष्णरामवामनादिस्तस्येवपराक्रमोयस्यतस्मै ॥ प्राकृतंव्याख्यानं

तपःस्वरूपायतपोधनायतपःफलानांप्रतिपादकाय ॥ सदाकुमारायहिमारमारिणेतृणीकृतैश्वर्यविरागिणेनमः ॥ १४ ॥ नमोस्तुतुभ्यंशरजन्मनेविभो
प्रभातसूर्यारुणदंतपंक्तये ॥ बालायचाबालपराक्रमायषाण्मातुरायालमनातुराय ॥ १५ ॥ मीढुष्टमायोत्तरमीढुषेनमोनमोगणानांपतयेगणाय ॥
नमोस्तुतेजन्मजरातिगायनमोविशाखायसुशक्तिपाणये ॥ १६ ॥ सर्वस्यनाथस्यकुमारकायक्रौंचारयेतारकमारकाय ॥ स्वाहेयगांगेयचकार्तिकेयशै
वेयतुभ्यंसततंनमोऽस्तु ॥ १७ ॥ इत्थंपरिष्टुत्यसकार्तिकेयंनमोनमस्त्वित्यभिभाषमाणः ॥ द्विस्त्रिःपरिक्रम्यपुरोविवेशस्थितोमुनीशोपविशेतिचोक्तः
॥ १८ ॥ ॥ कार्तिकेयउवाच ॥ ॥ क्षेमोस्तिकुंभजमुनेत्रिदशैकसहायकृत् ॥ जानेत्वामिहसंप्राप्तंतथाविंध्याचलोन्नतिम् ॥ १९ ॥ अविमुक्तेमहाक्षे
त्रेक्षेमंत्र्यक्षेणरक्षिते ॥ यत्रक्षीणायुषांसाक्षाद्विरूपाक्षोऽस्तिमोक्षदः ॥ २० ॥

स्पष्टम् ॥ षण्णांकृत्तिकानांमातॄणामपत्यंषाण्मातुरस्तस्मै ॥ अलमनातुरायात्यन्तदक्षाय ॥ १५ ॥ मीढुष्टमायसकामेषुफलसेचनकर्तॄणांमध्येश्रेष्ठाय ॥ उत्तरमीढुषेभाविफलानांदात्रे ॥ गणा
नांरुद्रपार्षदानांदेवसेनानांवापतयेस्वामिने ॥ जन्मजरेअतिक्रम्यगच्छतीतिजन्मजरातिगस्तस्मैषड्भावविकाररहितायेत्यर्थः ॥ विशाखायविशाखोनामकुमारस्यानुजस्तस्मै ॥ तथाचवैष्णवे ॥ अ
ग्निपुत्रः कुमारस्तुशरस्तंबेव्यजायत ॥ तस्यशाखोविशाखश्चनगमेयश्चपृष्ठजइति ॥ सुशक्तिपाणये शोभनाशक्तिरस्त्रविशेषःपाणौयस्यतस्मै ॥ १६ ॥ सर्वस्यनाथस्येतिव्याधिकरणेषष्ठ्यौ ॥ विश्व
नाथस्यापत्यायेत्यर्थः ॥ १७ ॥ इत्थमिति ॥ सोऽगस्त्यइत्थंपूर्वोक्तप्रकारेणपरिष्टुत्यस्तुत्वानमोनमइत्यभिभाषमाणः ॥ तुशब्दोभक्तिश्रद्धातिशयद्योतनार्थः ॥ द्विस्त्रिःपरिक्रम्यपंचवारान्प्र
दक्षिणीकृत्यपुरःस्थितःपश्चाद्धेमुनीशउपविशेतिकुमारेणोक्तःसन्निवेशचेत्यर्थः ॥ १८ ॥ अग्रेकाशीमाहात्म्यकथनविश्वासायकुशलप्रश्नपूर्वकंत्वत्प्राप्त्यादिकंसर्वज्ञतयाजानामीत्याह ॥ क्षेमोस्तीति ॥
हेत्रिदशैकसहायकृत् ॥१९॥ ननुकाश्याःकुशलंत्यक्त्वाकिमितिममैवकुशलंपृच्छयेततत्राह ॥ अविमुक्तइति ॥ क्षेमंक्षेममेव ॥ तत्रहेतुः ॥ त्र्यक्षेणेति ॥ त्र्यक्षीशेतिपाठेत्र्यक्षश्चासौईशश्चेतित्र्यक्षीशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदन्तताभावश्छांदसः ॥ किंचकुशलस्यकावार्तामोक्षोपियत्रातिसुलभइत्याह ॥ यत्रेति ॥ २० ॥ अतएवक्कचिदपिभूर्भुवःस्वस्तलादौतादृक्क्षेत्रंमयाऽन्विष्यतापिनदृष्टम् ॥ तवतुमननशील
त्वादेवदर्शनाभावःसंभाव्यतइतिसूचयाति ॥ हेमुनेइति ॥ यांदृगितिपाठे यादृगिदंक्षेत्रंतादृक्क्षेत्रंकुत्रापिनदृष्टमित्यर्थः ॥ २१ ॥ काश्यांकृतवासत्वात्त्वंमत्तोपिश्रेष्ठइत्याशयेनाह ॥ अहमेकेति ॥ २२ ॥
तत्क्षेत्रम् ॥ २३ ॥ ईश्वरेति ॥ सुदुर्लभोपिकाशीवासईश्वरानुग्रहादेवसुलभःस्यादित्यर्थः ॥ २४ ॥ अन्यैवेति ॥ विधातुर्याऽतिरेकिणीहिरण्यगर्भस्यसृष्टेर्याभिन्नेत्यर्थः ॥ अतिकारिणीतिपाठेऽधिकेत्यर्थः
॥ २५ ॥ तर्ह्येतादृक्क्षेत्रंकिमितिसर्वैर्नसेव्यतेतत्राह ॥ अहोइति ॥ अहोइतिखेदे ॥ दौर्बल्यंमांद्यम् ॥ दौर्विधंकुत्सितत्वम् ॥ माहात्म्यंधाष्टर्यम् ॥ २६ ॥ ननुतथापिवृद्धावस्थायामेवकाशीसे
व्यानयौवनेमरणस्यानियतत्वादित्याह शरीरमितित्रिभिः ॥ आयुरेवमृगःसमृत्युनामृगयुनालुब्धकेनकृतलक्ष्यःकृतश्चासौलक्ष्यश्चेतितथालक्षीकृतइत्यर्थः ॥ २७ ॥ चपलाचपलंविद्युदिवास्थिरम् ॥

भूर्भुवःस्वस्तलेवापिनपातालतलेमलम् ॥ नोर्ध्वलोकेमयादृष्टंतादृक्क्षेत्रंक्वचिन्मुने ॥ २१ ॥ अहमेकचरोप्यत्रतत्क्षेत्रप्रातयेमुने ॥ तप्येतपांसिनाद्या
पिफलेयुर्मेमनोरथाः ॥ २२ ॥ नतत्पुण्यैर्नतद्दानैर्नतपोभिर्नतज्जपैः ॥ नलभ्यंविविधैर्यज्ञैर्लभ्यमैशादनुग्रहात् ॥ २३ ॥ ईश्वरानुग्रहादेवकाशीवासः
सुदुर्लभः ॥ सुलभःस्यान्मुनेनूनंनवैसुकृतकोटिभिः ॥ २४ ॥ अन्यैवकाचित्सासृष्टिर्विधातुर्याऽतिरेकिणी ॥ नतत्क्षेत्रगुणान्वक्तुमीश्वरोऽपीश्वरो
यतः ॥ २५ ॥ अहोमतेःसुदौर्बल्यमहोभाग्यस्यदौर्विधम् ॥ अहोमोहस्यमाहात्म्यंयत्काशीहनसेव्यते ॥२६॥ शरीरंजीर्यतेनित्यंसंजीर्यंतींद्रियाण्यपि ॥
आयुर्मृगोमृगयुनाकृतलक्ष्योहिमृत्युना ॥ २७ ॥ सापदंसंपदंज्ञात्वासापायंकायमुच्चकैः ॥ चपलाचपलंचायुर्मत्वाकाशींसमाश्रयेत् ॥ २८ ॥
यावन्नेत्यायुपश्चांतस्तावत्काशीनमुच्यते ॥ कालःकलालवस्यापिसंख्यातुंनैवविस्मरेत् ॥ २९ ॥ जरानिकटनिक्षिप्ताबाधंतेव्याधयोभृशम् ॥ तथा
पिदेहोनानेहोनाहोकाशींसमीहते ॥ ३० ॥ तीर्थस्नानेनजप्येनपरोपकरणोक्तिभिः ॥ विनार्थलभ्यतेधर्मोधर्मादर्थःस्वयंभवेत् ॥ ३१ ॥ विनैवार्थार्जनो
पायंधर्मादर्थोभवेद्ध्रुवम् ॥ अतोऽर्थचिंतामुत्सृज्यधर्ममेकंसमाश्रयेत् ॥ ३२ ॥ धर्मादर्थोऽर्थतःकामःकामात्सर्वसुखोदयः ॥ स्वर्गोपिसुलभोधर्मात्काश्ये
कादुर्लभापरम् ॥ ३३ ॥ उपायत्रयमेवात्रस्थाणर्निर्वाणकारणम् ॥ शर्वाण्यग्रेबभाणाद्धापरिनिर्णीयसर्वतः ॥ ३४ ॥

॥ २८ ॥ नचकाशींप्राप्यपुनरपिकुत्रचिद्गंतव्यमित्याह ॥ यावदिति ॥ २९ ॥ एवंमरणस्यानियतत्वाद्बालकावस्थायामेवाविमुक्तमाश्रयणीयमित्युक्तंपूर्वमिदानींवृद्धावस्थायामपियेकाशींनस
माश्रयंतितेऽतिमंदाइत्याह ॥ जरेति ॥ नानेहोनानाव्यापारवान्सन् ॥ अहोखेदे ॥ ३० ॥ नन्वर्थस्यधर्महेतुत्वात्तदीहांपरित्यज्यकिमितिकाश्येवाश्रयणीयातत्राह ॥ तीर्थेति ॥ ३१ ॥ धर्मादर्थः
स्वयंभवेदित्येतद्विवृण्वन्नुपसंहरति ॥ विनैवेति ॥ तदुक्तंभारतसावित्र्याम् ॥ ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे॥ धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यतइति ॥३२ ॥ ननुतर्हिधर्मएवयत्रकुत्राप्यनुष्ठे
यस्ततएवकाश्याप्तिरपिसेत्स्यतीतितत्राह ॥ धर्मादिति ॥ परंकेवलम् ॥ ३३ ॥ उपायेति ॥ स्थाणुर्विश्वेशःसर्वतःपरिनिर्णीयसर्वशास्त्रार्थदृढंनिश्चित्यशर्वाण्यग्रेपार्वत्याःसंमुखेउपायत्रयंसाधनत्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेवअद्धासाक्षान्निर्वाणकारणंकैवल्यहेतुंवभाणकथितवान् ॥ परंपरयाअप्युपायाःसंतीतिभावः ॥ ३४ ॥ यद्यपिब्रह्मात्मैक्यज्ञानमेवसाक्षान्मुक्तेःकारणंतथापिज्ञानदूरीभावादेतत्त्रयस्यसाक्षान्मोक्षहे
तुत्वमुक्तमितितदेवत्रयंदर्शयाति ॥ पूर्वपाशुपतोयोगइति ॥ पाशुपतोयोगोनामविभूत्यात्रिपुंड्रधारणंविभूत्युद्धूलनंच ॥ सितासितंप्रयागम् ॥ अनायासं नविद्यतेमोक्षदानेआयासोयस्मिंस्तदविमुक्त
मानंदकाननम् ॥ अनायासंयथास्याद्यथावसरदेहपातमात्रेणविमुक्तिदमितिवा ॥ एतेनसितासिततीर्थेबुद्धिपूर्वकदेहत्यागेनैवमोक्षदमित्यायातम् ॥ अन्यथानायासमितिविशेषणवैयर्थ्यापत्तेः ॥
तथाचोक्तम् ॥ ब्रह्मज्ञानेनमुच्यंतेप्रयागमरणेनवा ॥ अथवास्नानमात्रेणगोमत्यांकृष्णसन्निधाविति ॥ ३५ ॥ ननुश्रीशैलशिखरंदृष्ट्वापुनर्जन्मनविद्यते ॥ पथिश्मशानेगृहमंडपेवारथ्याप्रदेशेष्वपि
यत्रतत्र ॥ इच्छन्ननिच्छन्पुरुषोत्तमाख्येदेहावसानेलभतेचमोक्षमित्यादिवचनैःश्रीशैलादीनामपिमोक्षहेतुत्वंश्रूयते सत्यं तत्तथैवेत्याह श्रीशैलेत्यारभ्यैतानीत्यतःप्राक्तनेन ॥ आद्यपदेनमंदरादयो
गृह्यंते ॥ नानान्यायतनानिचनानायान्यन्यान्यायतनानिपुरुषोत्तमादीनितानिचेत्यर्थः ॥ ३६ ॥ सिंधूनांनदीनांसंभेदाःसंगमाः ॥ अरण्यानिनव ॥ तदुक्तम् ॥ सैंधवंदंडकारण्यंजंबूमार्गश्चपुष्क

पूर्वंपाशुपतोयोगस्ततस्तीर्थंसितासितम् ॥ ततोप्येकमनायासमविमुक्तंविमुक्तिदम् ॥ ३५ ॥ श्रीशैलहिमशैलाद्यानानान्यायतनानिच ॥ त्रिदंडधारणं चापिसंन्यासःसर्वकर्मणाम् ॥ ३६ ॥ तपांसिनानारूपाणिव्रतानिनियमायमाः ॥ सिंधूनामपिसंभेदाअरण्यानिबहून्यपि ॥ ३७ ॥ मानसान्यपिभौमा निधारातीर्थादिकानिच ॥ ऊषराश्चापिपीठानिह्यच्छिन्नाम्नायपाठनम् ॥ ३८ ॥ जपश्चापिमनूनांचतथाऽग्निहवनानिच ॥ दानानिनानाक्रतवोदेवतो पासनानिच ॥ ३९ ॥ त्रिरात्रंपंचरात्राणिसांख्ययोगादयस्तथा ॥ विष्णोराराधनंश्रेष्ठंमुक्तयेऽभिहितंकिल ॥ ४० ॥ पुर्यश्चापिसमाख्याताऽनृतजंतुविमु क्तिदाः ॥ कैवल्यसाधनानीहभवंत्येवविनिश्चितम् ॥ ४१ ॥ एतानियानिप्रोक्तानिकाशीप्राप्तिकराणिच ॥ प्राप्यकाशींभवेन्मुक्तोजंतुर्नान्यत्रकुत्र चित् ॥ ४२ ॥ अतएवहितत्क्षेत्रंपवित्रमतिचित्रकृत् ॥ विश्वेशितुःप्रियनित्यंविष्वग्ब्रह्मांडमंडले ॥ ४३ ॥ इदमेवहितत्क्षेत्रंकुशलप्रश्नकारणम् ॥ एह्योहिदेहिमेस्पर्शंनिजगात्रस्यसुव्रत ॥ ४४ ॥

रम् ॥ उत्पलारण्यमारण्यंनैमिषंकुरुजांगलम् ॥ हेमदमर्बुदंचैवनवारण्याःप्रकीर्तिताइति ॥ ३७ ॥ मानसानिमनःकार्याणिधृत्यादीनि ॥ भौमानिभूसंबंधीनि ॥ धारातीर्थंकौमारतीर्थं
दक्षिणदेशेप्रसिद्धम् ॥ ऊषरारेणुकादयोनव ॥ तदुक्तम् ॥ यथाकालखलंसारंवदरीकंतथैवच ॥ रेणुकासूकरःकाशीकालीकालवटेश्वरः ॥ कालंजरोमहाकालऊषरानवकीर्तिताइति ॥ काशीत्यन्या
काचित् ॥ ऊषराणांमहोषरामितिवचनात् ॥ ३८ ॥ ३९ ॥ सांख्यमात्मानात्मविवेकः ॥ योगोऽष्टांगः ॥ आदिपदेनोपासनादयः ॥ ४० ॥ पुरीति॥पुर्यश्चायोध्याद्याःकाशीव्यतिरिक्ताः ॥ ४१ ॥
ननुएतान्यपिकैवल्यसाधनानिचेत्तर्हिकाश्याःकोविशेषः सत्यम् ॥ कैवल्यसाधनत्वमेषांसाक्षाद्विवक्षितंपरंपरयांवाऽत्यश्चेदोमितिब्रूमः ॥ आद्यश्चेत्तन्नेत्याह ॥ एतानीति ॥ मुक्तोविदेहमुक्तः ॥ ४२ ॥
अतइति ॥ यतोऽन्यत्सर्वंकाशीप्राप्तिकरमतइत्यर्थः ॥ अतिचित्रंकैवल्यम् ॥ ४३ ॥ इदमिति ॥ क्षेमोस्तिकुंभजमुनइतियःकुशलप्रश्नस्तस्यकारणमिदन्तत्क्षेत्रमेव ॥ हिंनिश्चितम् ॥ तत्क्षेत्रात्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मागतइतिकृत्वैवकुशलंपृच्छयतइत्यर्थः ॥ अतएहिएहिआगच्छागच्छ ॥ आदरेवीप्सा ॥ ४४ ॥ काश्याःसकाशात्समागच्छतःस्पर्शोवर्ततेयस्यसकाश्याःसमागच्छत्स्पर्शवान्समागच्छन्स्पर्शवान्वायुर्वातस्यापिस्पर्शइष्यतेकिंपुनस्तवसाक्षात्ततआगतस्येतिभावः ॥ ४५ ॥ पुनन्ति तृणगुल्मादीनपीतिशेषः ॥ ४६ ॥ ४७ ॥ तवकृतार्थतायाःकिंवक्तव्यमित्याशयेनाह ॥ तवतत्रेति ॥ ४८ ॥ ४९ ॥ अमृतंसुधातद्देवसरोवारिसरोजलंतद्विगाह्यालोड्य ॥ तद्वात्रस्पर्शजनितामृतसलिलेनस्नात्वेत्यर्थः ॥ ५० ॥ जयेति ॥ हेविश्वेशजयइतिवदन्नपि ॥ वदन्निवितीतिपाठेइतिवदन्ने

अपिकाश्याःसमागच्छत्स्पर्शवत्स्पर्शइष्यते ॥ मयात्रतिष्ठतानित्यंकिंतुत्वंततआगतः ॥ ४५ ॥ त्रिरात्रमपियेकाश्यांवसंतिनियतेंद्रियाः ॥ तेषांपुनंतिनियतंस्पृष्टाश्चरणरेणवः ॥ ४६ ॥ त्वंतुतत्रकृतावासःकृतपुण्यमहोच्चयः ॥ उत्तरप्रवहास्नानजातपिंगलमूर्धजः ॥ ४७ ॥ तवतत्रतुयत्कुंडमगस्तीश्वरसंनिधौ ॥ तत्रस्नात्वाचपीत्वाचकृतसर्वोदकक्रियः ॥ ४८ ॥ पितॄन्पिंडैःसमभ्यर्च्यश्रद्धाश्राद्धविधानतः ॥ कृत्यकृत्योभवेज्जंतुर्वाराणस्याःफलंलभेत् ॥ ४९ ॥इत्युक्त्वासर्वगात्राणिस्पृष्ट्वाकुंभोद्भवस्यच ॥ स्कंदोऽमृतसरोवारिविगाह्यसुखमाप्तवान् ॥५०॥ जयविश्वेशनेत्राणिविनिमील्यवदन्नपि ॥ ततःकिंचित्क्षणंदध्यौगुहःस्थाणुरिवनिश्चलः ॥ ५१ ॥ स्कंदेविसर्जितध्यानेसुप्रसन्नमनोमुखे ॥ प्रतीक्ष्यवागवसरंपप्रच्छाथमुनिर्गुहम् ॥ ५२ ॥ ॥ अगस्तिरुवाच ॥ ॥ स्वामिन्यथाभगवताभगवत्यैपुराऽकथि ॥ वाराणस्यास्तुमहिमाहिमशैलसुवेमुदा ॥ ५३ ॥ त्वयायथासमाकर्णितदुत्संगनिवासिना ॥ तथाकथयषड्वक्तत्क्षेत्रंमेऽतिरोचते ॥ ५४ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुष्वमैत्रावरुणेयथाभगवताऽकथि ॥ तत्क्षेत्रस्याविमुक्तस्यममातुःपुरःपुरा ॥ ५५ ॥ श्रुतंचयत्तदुत्संगेस्थितेनस्थिरचेतसा ॥ माहात्म्यंतच्छृणुमुनेकथ्यमानंमयाऽनघ ॥ ५६ ॥ गुह्यानांपरमंगुह्यमविमुक्तमिहेरितम् ॥ तत्रसंनिहितासिद्धिस्तत्रनित्यंस्थितोविभुः ॥ ५७ ॥ भूर्लोकेनैवसंलग्नंतत्क्षेत्रंत्वंतरिक्षगम् ॥ अयोगिनोनवीक्षंतेपश्यंत्येवचयोगिनः ॥ ॥ ५८ ॥ यस्तत्रनिवसेद्विप्रसंयतात्मासमाहितः ॥ त्रिकालमपिभुंजानोवायुभक्षसमोभवेत् ॥ ५९ ॥ निमेषमात्रमपियोह्यविमुक्तेऽतिभक्तिभाक् ॥ ब्रह्मचर्यसमायुक्तंतेनतप्तंमहत्तपः ॥ ६० ॥

त्राणिविनिमील्यमुद्रयित्वा ॥ षडाननत्वान्नेत्राणीतिबहुवचनम् ॥ किंचिद्वाङ्मनसयोरगोचरंयत्स्वरूपंतत्क्षणंदध्यौचिंतितवानित्यर्थः ॥ ५१ ॥ ५२ ॥ विस्तरेणकाशीमाहात्म्यंश्रोतुंपृच्छति ॥ स्वामिन्निति ॥ ५३ ॥ अतिरोचतेऽतिशयेनरुचिजननम् ॥ अतिपावनमितिकचित् ॥ ५४ ॥ उक्तानुवादपूर्वकंश्रावयति ॥ शृणुष्वेति ॥ आत्मनेपदमार्षम् ॥ यथाऽकथि ॥ माहात्म्यमित्यनुषज्यते ॥ शृणुष्वश्रृण्वित्यन्वयभेदान्नपौनरुक्त्यम् ॥ ५५ ॥ ५६ ॥ तत्राविमुक्तेसिद्धिःसन्निहिता ॥ तत्रहेतुस्तत्रनित्यमिति ॥ यत्रेतिकचित् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ब्रह्मचर्यसमायुक्तंब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चर्येणसम्यगायुक्तम् ॥ ६० ॥ ६१ ॥ अपरस्वविपुष्टांगःनपरस्वेनाविपुष्टमंगंयस्यसः ॥ परस्वपारिपुष्टांगइतिपाठेऽन्यत्रपरस्वपरिपुष्टांगोपीत्यर्थः ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ प्रकृतिरविद्या ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ननुयावज्जीवंकाशीवासेपापमपिस्यात्तथाचरुद्रपिशाचत्वंदुर्वारम् ॥ यथाक्रमेलकस्य॥सत्यम् ॥ तथापिकाशीप्राप्तौतद्भोगानंतरंमुक्तेरवश्यंभावित्वात्तदपिसाध्यपक्षे निक्षिप्याह ॥ कृत्वेति ॥ व्यतिरेकमाह ॥ काशींविनाक्रतुशतप्राप्यःस्वर्गःकिमपिवरंनात्वित्यर्थः ॥ स्वर्गभोगानंतरमधःपातादित्यर्थः ॥ क्रतुशतंप्राप्यस्वर्गेइतिक्वचित्पाठः ॥ ७१ ॥ ७२ ॥

यस्तुमासंवसेद्धीरोलघ्वाहारोजितेंद्रियः ॥ सर्वंतेनव्रतंचीर्णंदिव्यंपाशुपतंभवेत् ॥ ६१ ॥ संवत्सरंवसंस्तत्राजितक्रोधोजितेंद्रियः ॥ अपरस्वविपुष्टांगःपरान्नपरिवर्जकः ॥ ६२ ॥ परापवादरहितःकिंचिद्दानपरायणः ॥ समाःसहस्रमन्यत्रतेनतप्तंमहत्तपः ॥ ६३ ॥ यावज्जीवंवसेद्यस्तुक्षेत्रमाहात्म्यविन्नरः ॥ जन्ममृत्युभयंहित्वासयातिपरमांगतिम् ॥ ६४ ॥ नयोगैर्योगतिर्लभ्याजन्मांतरशतैरपि ॥ अन्यत्रहेलयासाऽत्रलभ्येशस्यप्रसादतः ॥६५॥ ब्रह्महायोऽभिगच्छेद्दैवाद्वाराणसींपुरीम् ॥ तस्यक्षेत्रस्यमाहात्म्याद्ब्रह्महत्यानिवर्तते ॥ ६६ ॥ आदेहपतनंयावद्योविमुक्तंनमुंचति ॥ नकेवलंब्रह्महत्याप्रकृतिश्चनिवर्तते ॥ ६७ ॥ अनन्यमानसोभूत्वातत्क्षेत्रंयोनमुंचति ॥ समुंचतिजरामृत्युंगर्भवासंसुदुःसहम् ॥ ६८ ॥ अविमुक्तंनिषेवेतदेवर्षिगणसेवितम् ॥ यदीच्छेन्मानवोधीमान्नपुनर्जननंभुवि ॥ ६९ ॥ अविमुक्तंनमुंचेतसंसारभयमोचनम् ॥ प्राप्यविश्वेश्वरंदेवंनसभूयोऽभिजायते ॥ ७० ॥ कृत्वापापसहस्राणिपिशाचत्वंवरंत्विह ॥ नतुक्रतुशतप्राप्यःस्वर्गःकाशापुरींविना ॥ ७१ ॥ अंतकालेमनुष्याणांभिद्यमानेषुमर्मसु ॥ वातेनातुद्यमानानांस्मृतिर्नैवोपजायते ॥ ७२ ॥ तत्रोत्क्रमणकालेतुसाक्षाद्विश्वेश्वरःस्वयम् ॥ व्याचष्टेतारकंब्रह्मयेनासौतन्मयोभवेत् ॥ ७३ ॥ अशाश्वतमिदंज्ञात्वामानुष्यंबहुकिल्बिषम् ॥ अविमुक्तंनिषेवेतसंसारभयनाशनम् ॥ ७४ ॥ विघ्नैरालोड्यमानोपियोऽविमुक्तंनमुंचति ॥ नैःश्रेयसींश्रियंप्राप्यदुःखांतंसोधिगच्छति ॥ ७५ ॥ महापापौघशमनींपुण्योपचयकारिणीम् ॥ भुक्तिमुक्तिप्रदामंतेकोनकाशींसुधीःश्रयेत् ॥ ७६ ॥ एवंज्ञात्वातुमेधावीनाविमुक्तंत्यजेन्नरः ॥ अविमुक्तप्रसादेनविमुक्तोजायतेयतः ॥ ७७ ॥ अविमुक्तस्यमाहात्म्यंषड्भिर्वक्त्रैःकथमया ॥ वक्तुंशक्यंनशक्नोतिसहस्रास्योपियत्परम् ॥ ७८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे स्कंदागस्त्यदर्शनंनामपंचविंशतितमोऽध्यायः ॥ २५ ॥ ॥ अगस्तिरुवाच ॥ ॥ प्रसन्नोसियदिस्कंदमयिप्रीतिरनुत्तमा ॥ तत्समाचक्ष्वभगवंश्चिरंयन्मेहृदिस्थितम् ॥ १ ॥ अविमुक्तमिदंक्षेत्रंकदारभ्यभुवस्तले ॥ परांप्रथितिमापन्नंमोक्षदंचाभवत्कथम् ॥ २ ॥

क्षेत्रवासिनांतथामरणेभगवतोदयालुतामाह ॥ तत्रोत्क्रमणकालइति ॥ तारकंप्रणवंषडक्षरंरामंमंत्रराजंवा ॥ ७३ ॥ ७४ ॥ ७५ ॥ अंतेअंतकालेपि ॥ ७६ ॥ ७७ ॥ सहस्रास्योऽनंतः ॥ यत्परंमाहात्म्यमित्यन्वयः ॥ ७८ ॥ ॥ इतिश्रीरामानंदकृतायांटीकायांपंचविंशतितमोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ षड्विंशतितमेऽध्यायेकाश्याविर्भावउच्यते ॥ आख्यानंमणिकर्ण्याश्चसर्वपापहरंपरम् ॥ १ ॥ एवंसंक्षेपेणकाशीमाहात्म्यंश्रुत्वाविस्तरेणश्रोतुंप्रार्थयते ॥ प्रसन्नोसीति ॥ १ ॥ अविमुक्तमिति ॥ इदंक्षेत्रंकदारभ्यकंकालमारभ्यपरांप्रथितिंप्रसिद्धिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मापन्नम् ॥ अविमुक्तंनामचकथमापन्नम् ॥ मोक्षदंचकथमभवदितिप्रश्नत्रयम् ॥ २ ॥ कथमेषेतिचतुर्थः ॥ ईड्यास्तुत्या॥तत्रासीदितिपंचमः ॥ तत्रक्षेत्रेकिंपुरासीदितिषष्ठः ॥ ३ ॥ वाराणसीत्यादि प्रश्नचतुष्टयम् ॥ ४ ॥ इतिचेतिचकारादानंदकाननमितिच ॥ एवंतावदेकादशप्रश्नाः ॥ ५ ॥ यद्यप्येषांप्रश्नानांप्रत्युत्तरंदुर्घटंतथापिजगन्मातुःप्रश्नानन्तरंयथैवेश्वरेणप्रत्युत्तरितंतथैवाहंकथयामिमातुः क्रोडेस्थित्वोभयोर्मेश्रुतत्वादित्याह ॥ प्रश्नभारोयमिति ॥ ६ ॥ ७ ॥ प्रथमप्रश्नोत्तरमाह महाप्रलयेत्यारभ्यस्कंदेत्यतःप्राक्तनेनग्रंथेन ॥ महाप्रलयकालेप्राकृतप्रलयसमयेसर्वंविश्वंतमोमयमासी दित्यन्वयः ॥ महाप्रलयकालस्वरूपमाह ॥ नष्टेस्थावरजंगमइति ॥ नष्टेऽदर्शनंगते ॥ तमोमयमज्ञानस्वरूपम् ॥ तमःशब्देनगुणैकदेशवाचिनातत्समुदायरूपाप्रकृतिरुक्ता ॥ तमसश्चोक्तिस्तत्काले विश्वस्यमूढात्मकत्वेनतस्यसुप्रतिपादत्वात् ॥ तथाचमनुः ॥ आसीदिदंतमोभूतमिति॥यद्वा तमोमयं तमसाआवरणात्मकेनअज्ञानेनव्याप्तमावृतमित्यर्थः॥तथाचश्रुतिः॥मृत्युनैवेदमावृतमासीदिति ॥ तमोमयमंधकारमयमितितुव्याख्यानंनचारुतरम्॥नाहोनरात्रिर्ननभोनभूमिर्नासीत्तमोज्योतिरभून्नचान्यदित्यादिविरोधात्॥अनर्केत्यादिद्वादशपदानिक्रियाविशेषणानि ॥८॥अप्रधानंविक्षेपात्मकाज्ञान

कथमेषात्रिलोकीड्यागीयतेमणिकर्णिका ॥ तत्रासीत्किंपुरास्वामिन्यदानामरनिम्नगा ॥ ३ ॥ वाराणसीतिकाशीतिरुद्रावासइतिप्रभो ॥ अवापनामधे यानिकथमेतानिसापुरी ॥ आनंदकाननंरम्यमविमुक्तमनंतरम् ॥ ४ ॥ महाश्मशानइतिचकथंख्यातंशिखिध्वज ॥ एतदिच्छाम्यहंश्रोतुंसंदेहंमेऽपनो दय ॥ ५ ॥ ॥ स्कंदउवाच ॥ प्रश्नभारोयमतुलस्त्वयायःसमुदाहृतः ॥ कुंभयोनेऽमुमेवार्थमप्राक्षीदंबिकाहरम् ॥ ६ ॥ यथाचदेवदेवेनसर्वज्ञेननिवे दितम् ॥ जगन्मातुःपुरस्ताच्चतथैवकथयामिते ॥ ७ ॥ महाप्रलयकालेचनष्टेस्थावरजंगमे ॥ आसीत्तमोमयंसर्वमनर्कग्रहतारकम् ॥ ८ ॥ अचं द्रमनहोरात्रमनग्न्यनिलभूतलम् ॥ अप्रधानंवियच्छून्यमन्यतेजोविवर्धितम् ॥ ९ ॥ द्रष्टृत्वादिविहीनंचशब्दस्पर्शसमुज्झितम् ॥ व्यपेतगंधरूपं चरसत्यक्तमदिङ्मुखम् ॥ १० ॥ इत्थंसत्यंधतमसिसूचीभेद्येनिरंतरे ॥ तत्सद्ब्रह्मेतियच्छ्रुत्यासदैकंप्रतिपाद्यते ॥ ११ ॥ अमनोगोचरोवाचांविषयं नकथंचन ॥ अनामरूपवर्णंचनस्थूलंनचयत्कृशम् ॥ १२ ॥

हीनमस्वतंत्रंवा ॥ अन्यतेजोविवर्धितंसाक्षिचैतन्यभास्यम्॥अन्यतेजोविवर्जितमितिचपाठः॥९॥ द्रष्टृत्वादीत्यादिपदेनश्रोतृत्वादयोगृह्यंते॥द्रष्टृधात्रितिपाठेधातृपदेनधर्तुःपोष्टुर्वाग्रहणम् ॥ अदिङ्मुखंपूर्वा दिदिग्विभागरहितम् ॥१०॥इत्यमिति ॥ इत्थमंधंतमसिगाढांधकारेआवरणात्मकेऽज्ञानेसतितत्प्रसिद्धंसतसद्रूपंकालत्रयाबाध्यमित्येतद्ब्रह्मासीदितिपूर्वक्रियायाअनुषंगः ॥ पश्चात्सृष्टिसमयेतस्यैकलस्यै कस्याद्वितीयेच्छाभवत्किलेतिसप्तमेनान्वयः ॥ सऐक्षतबहुस्यांप्रजायेय सद्वितीयमैच्छदित्यादिश्रुतिप्रसिद्धिंद्योतयितुंकिलेत्युक्तम् ॥ आवरणात्मकस्याज्ञानस्यांधतमःपदेनोपादानंब्रह्मविद्यामन्तरे णदुर्भेद्यत्वाभिप्रायेण ॥ अतएवसूचीभेद्येइतिविशेषणम् ॥ भेदकत्वसाम्यात्सूचीवत्सूचीब्रह्मविद्यातयाभेद्येनाश्यइत्यर्थः ॥ निरंतरेव्यवधानरहिते ॥ किंतद्ब्रह्मेत्याकांक्षायांतद्विशिनष्टि ॥ यच्छ्रु त्येत्यादिना ॥ यद्ब्रह्मसदासर्वदाकालत्रयेएकंसजातीयविजातीयस्वगतभेदशून्यम् ॥ एकमेवाद्वितीयमित्यादिश्रुत्याप्रतिपाद्यते ॥ ११ ॥ अमनोगोचरःमनोविषयोनभवतीत्यर्थः ॥ वाचांविषयंवि षयः ॥ पंदत्वमार्षम् ॥ कथंचनमुख्ययावृत्त्याफलव्याप्यत्वेनवानेत्यर्थः ॥ यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतिश्रुतेः ॥ अनामरूपवर्णंनामरूपवर्णरहितम् ॥ स्थूलंकृशप्रतियोगि ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रस्वंचदीर्घंचह्रस्वदीर्घंनह्रस्वदीर्घमह्रस्वदीर्घम् ॥ ह्रस्वमत्रदीर्घप्रतियोगि ॥ लघुगुरुप्रतियोगि ॥ अनामगोत्रंतदेतत् ॥ गार्ग्यस्थूलमनण्वह्रस्वदीर्घमित्यादिश्रुतेः ॥ उपचयोवृद्धिः ॥ अपचयोऽपक्षयः ॥ चकाराभ्यांजन्मास्तित्वपरिणामाविनाशानांनिरासः ॥ नजायतेम्रियतेवेत्यादिश्रुतेःस्मृतेश्च ॥ १३ ॥ ननुश्रुत्याप्रातिपाद्यत्ववाचामविषयत्वंचयदुक्तंतत्परस्परविरुद्धमित्याशंकायामाह ॥ अभिधत्तइति ॥ सचकितंसशंकितंयथास्यात्तथा ॥ पुनःयद्ब्रह्मअस्तित्वेनलक्षणयावृत्त्यावृत्तिव्याप्यत्वेनवाश्रुतिरभिधत्तेकथंचिद्बोधयतीत्यर्थः ॥ तथाचश्रुतिः ॥ अस्तीत्येवोपलब्धव्यमिदमप्रमेयंध्रुवमित्यादि ॥ तथामहिम्नस्तोत्रेच ॥ अतीतःपंथानंतवचमहिमावाङ्मनसयोरतद्व्यावृत्त्यायश्चकितमभिधत्तेश्रुतिरपीति ॥ पुनःकीदृशंब्रह्म ॥ यस्यसंज्ञोदितस्यसंज्ञयावेदांतादौव्यवह्रियमाणस्य ॥ वैप्रसिद्धम् ॥ संज्ञोज्झितस्यवैइतिपाठेसंज्ञयावार्जितस्यापि सत्यंज्ञानमित्याद्याःसंज्ञाःसंविकल्प्यन्ते परिकल्प्यंतइतिपाठेपिकल्पनयोच्यंतेइतितृतीयेनान्वयः ॥ तत्रसत्यंकालत्रयाबाध्यम् ॥ ज्ञानंजडविरोधि ॥ अनंतंत्रिविधपरिच्छेदराहितम् ॥ आनंदम्आनन्दः ॥ परमविद्यातत्कार्यरहितम् ॥ महोज्योतिःस्वप्रकाशमितियावत् ॥ परंमहइतिवा ॥ १४ ॥ अप्रमेयंप्रमाणाविषयम् ॥

अह्रस्वदीर्घमलघुगुरुत्वपरिवर्जितम् ॥ नयत्रोपचयःकश्चित्तथाचापचयोपिच ॥ १३ ॥ अभिधत्तेसचकितंयदस्तीतिश्रुतिःपुनः ॥ सत्यंज्ञानमनंतंचयदानंदंपरंमहः ॥ १४ ॥ अप्रमेयमनाधारमविकारमनाकृति ॥ निर्गुणंयोगिगम्यंचसर्वव्याप्येककारणम् ॥ १५ ॥ निर्विकल्पंनिरारंभंनिर्मायंनिरुपद्रवम् ॥ यस्येत्थंसंविकल्प्यंतेसंज्ञाःसंज्ञोदितस्यवै ॥ १६ ॥तस्यैकलस्यचरतोद्वितीयेच्छाभवत्किल ॥ अमूर्तेनस्वमूर्तिश्चतेनाकल्पिस्वलीलया ॥ १७ ॥ सर्वैश्वर्यगुणोपेतासर्वज्ञानमयीशुभा ॥ सर्वगासर्वरूपाचसर्वदृक्सर्वकारिणी ॥ १८ ॥ सर्वैकवंद्यासर्वाद्यासर्वदासर्वसंकृतिः ॥ परिकल्प्येतितांमूर्तिमीश्वरींशुद्धरूपिणीम् ॥ १९ ॥ अंतर्दधेपराख्यंयद्ब्रह्मसर्वगमव्ययम् ॥ २० ॥ अमूर्तंयत्पराख्यंवैतस्यमूर्तिरहंप्रिये ॥ अर्वाचीनपराचीनाईश्वरंमांजगुर्बुधाः ॥२१॥ ततस्तदैकलेनापिस्वैरंविहरतामया ॥ स्वविग्रहात्स्वयंसृष्टास्वशरीरानपायिनी ॥ २२ ॥ प्रधानंप्रकृतिंत्वांचमायांगुणवतींपराम् ॥ बुद्धितत्त्वस्यजननीमाहुर्विकृतिवर्जिताम् ॥ २३ ॥

अनाधारमन्याधाररहितम् ॥ अविकारंषड्भावविकाररहितम् ॥ अनाकृत्यशरीरम् ॥ निर्गुणंसुखादिगुणानामाश्रयाभिन्नम् ॥ योगिगम्यंज्ञानिप्राप्यम् ॥ सर्वव्यापिसर्वव्यापकम् ॥ एकंकारणंमुख्यंकारणम् ॥ अभिन्ननिमित्तोपादानंवा ॥ १५ ॥ निर्विकल्पंनिर्भेदम् ॥ निर्गताआरभ्यंतइत्यारंभाव्यापारायस्मिंस्तन्निरारंभंसृष्ट्यादिव्यापारहीनमित्यर्थः ॥ निर्मायंमायारहितम् ॥ निरुपद्रवंसर्वानर्थशून्यम्॥१६ ॥ द्वितीयेच्छाभवनानन्तरंकिंवृत्तमित्याकांक्षायामाह ॥ अमूर्तेनेति॥ अमूर्तेनतेनब्रह्मणास्वलीलयास्वमाययास्वमूर्तिरकल्पिकल्पिता॥१७॥स्वमूर्तिंविशिनष्टि सर्वैश्वर्येतिसार्धेन ॥१८॥ सर्वस्यसम्यक्कृतिर्यस्याःसासर्वसंकृतिः ॥ ततःकिंकृतवांस्तत्राह ॥ परिकल्प्येति ॥ १९ ॥ २० ॥ एतावताप्रस्तुतेकिमायातमित्याशंक्यानुवादपूर्वकंतदाह ॥ अमूर्तमिति ॥ यद्वा कासाशुद्धस्वात्ममूर्तिरित्याशंक्यानुवादपूर्वकंतामाह ॥ अमूर्तमिति ॥ अर्वाचीनपराचीनाइदानींतनपूर्वतनाः ॥ द्वितीयांतपाठेकार्यकारणात्मकमीश्वरंमांबुधाजगुरित्यर्थः ॥ २१ ॥ ततःकिंवृत्तमित्याशंकायामाह ॥ ततइति ॥ ततोब्रह्मणोऽतर्धानानंतरंस्वेच्छयाक्रीडतामयास्वशरीरानपायिनीमच्छरीराव्यभिचारिणीकाचिन्मूर्तिःसृष्टा ॥ २२ ॥ तामाह प्रधानमित्येकेन ॥ तांचत्वामाहुरितिसंबंधः ॥ कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतांताम् ॥ प्रधानंप्रधीयतेऽर्प्यतेप्रलयकालेकार्यजातमत्रेतिप्रधानम् ॥ नानाविधकार्याकारेणपरिणामित्वंसूचयति ॥ प्रकृतिमिति ॥ महदादिरूपेणपरिणतामित्यर्थः ॥ तस्याश्चप्रतिभासमात्रशरीरत्वमेवनवस्तुतत्त्वमित्याह ॥ मायामिति ॥ ननुकथमीश्वरस्यनित्यशुद्धबुद्धमुक्तस्वभावस्यमाययास्वभावविपरीतजन्मादितत्राह ॥ गुणवतीमिति ॥ सिसृक्षितदेहादिवैषम्यार्थमिदंविशेषणमितिद्रष्टव्यम् ॥ ननुकथंतर्हिकैवल्येनावस्थानंतत्राह ॥ परामिति ॥ ब्रह्मविद्यामित्यर्थः ॥ अयमभिप्रायः ॥ यावदविद्यात्मनावरणविक्षेपौकरोतितावन्नोपरमाति ॥ यदातुसैवविद्यारूपेणपरिणतातदाऽज्ञानंतत्कार्यंचदग्ध्वानिरिंधनाग्निवत्स्वयमुपरमेदिति ॥ बुद्धितत्त्वस्यहैरण्यगर्भबुद्धेर्बुद्धिबुद्धिमतोरभेदोपचाराद्वाहिरण्यगर्भस्यजननीमुत्पादयित्रीम् ॥ विकृतिवर्जितांविवर्ताधिष्ठानभूतामित्यर्थः ॥२३॥ युगपदिति ॥ युगपदेकदैवत्वयाशक्त्याप्रकृत्याकालस्वरूपिणाकालेनपुरुषेणचसाकमेतत्क्षेत्रंमयाविनिर्मितम् ॥ प्रलयकालेऽकिंचित्करतयास्थितानांतत्तत्कार्यकारणसामर्थ्योत्पादनमेवैतेषांविनिर्मितत्वम् ॥ तथाचप्रकृत्यादिवदस्यक्षेत्रस्यानादित्वंसाधितंभवतीति ॥ २४ ॥ अनुवादपूर्वकमविमुक्तनामचकथमापन्नमितिद्वितीयप्रश्नस्योत्तरमाह ॥ साशक्तिरितित्रयेण ॥ तस्मिन्क्षेत्रेरममाणा

युगपच्चत्वयाशक्त्यासाककालस्वरूपिणा ॥ मयाऽऽद्यपुरुषणैतत्क्षेत्रंचापिविनिर्मितम् ॥२४॥ स्कंदउवाच ॥ ॥ साशक्तिःप्रकृतिःप्रोक्तासपुमानीश्वरःपरः ॥ ताभ्यांचरममाणाभ्यांतस्मिन्क्षेत्रेघटोद्भव ॥ २५ ॥ परमानंदरूपाभ्यांपरमानंदरूपिणी ॥ पंचक्रोशपरीमाणेस्वपादतलनिर्मिते ॥ २६ ॥ मुनप्रलयकालेपिनतत्क्षेत्रंकदाचन ॥ विमुक्तंहिशिवाभ्यांयदविमुक्तंततोविदुः ॥ २७ ॥ नयदाभूमिवलयंनयदाऽपांसमुद्भवः ॥ तदाविहर्तुमीशेनक्षेत्रमेतद्विनिर्मितम् ॥ २८ ॥ इदंरहस्यंक्षेत्रस्यवेदकोपिनकुंभज ॥ नास्तिकायनवक्तव्यंकदाचिच्चर्मचक्षुषे ॥ २९ ॥ श्रद्धालवेविनीतायत्रिकालज्ञानचक्षुषे ॥ शिवभक्तायशांतायवक्तव्यंचमुमुक्षवे ॥ ३० ॥ अविमुक्तंतदारभ्यक्षेत्रमेतदुदीर्यते ॥ पर्यकभूतंशिवयोर्निरंतरसुखास्पदम् ॥ ३१ ॥ अभावःकल्प्यतेमूढैर्यदाचशिवयोस्तयोः ॥ क्षेत्रस्यास्यतदाभावःकल्प्योनिर्वाणकारिणः ॥ ३२ ॥ अनाराध्यमहेशानमनवाप्यचकाशिकाम् ॥ योगाद्युपायविज्ञोपिननिर्वाणमवाप्नुयात् ॥ ३३ ॥

भ्यांताभ्यांशिवाभ्यांतत्क्षेत्रंप्रलयकालेपिनविमुक्तंयतस्ततोऽविमुक्तंविदुरित्यन्वयः ॥ २५ ॥ कथंभूतेक्षेत्रे ॥ स्वपादतलनिर्मितेमायावच्छिन्नैकदेशविनिर्मिते ॥ तथाश्रुतिः ॥ पादोऽस्यविश्वाभूतानीति ॥ २६ ॥ २७ ॥ एतत्क्षेत्रंभौतिकंभूतारब्धत्वेनप्रतीयमानत्वात्संप्रतिपन्नवदित्याशंक्यस्मृतिबाधितत्वेनपरिहरति ॥ नयदेति ॥ यद्वा युगपच्चेत्यादिनेदंक्षेत्रंविनिर्मितमित्युक्तंतत्कदेत्यपेक्षायामाह ॥ नयदेति ॥ भूमिवलयंभूमिमण्डलम् ॥ २८ ॥ इदमिति ॥ भूतानारब्धत्वंक्रीडार्थमीश्वरेणविनिर्मितत्वंचेदंशब्दार्थः ॥ २९ ॥ ३० ॥ ३१ ॥ ननुनैयायिकादिभिरनुमानात्कार्यमात्रस्याभावःप्रलयेस्वीक्रियते ॥ तथाचास्यापिकार्यत्वाविशेषात्प्रलयेनाकिंभाव्यं नेत्याह ॥ अभावइति ॥ स्मृतिविरोधान्नानुमानमुदेतिनरशिरःकपालानुमानवदित्यर्थः ॥ स्मृतिवचनानितुपूर्वमेवलिखितानि ॥ नचनाहोनरात्रिर्ननभोनभूमिरितिविष्णुपुराणवचनविरोधः ॥ तस्यसामान्यविषयत्वात् ॥ नचतद्वेदंतर्ह्यव्याकृतमासीदितिश्रुतिविरोधः ॥ एवकाराभावात् ॥ नचसदेवसौम्येदमग्रआसीदितिश्रुतिवचनएवकारविरोधः ॥ एवकारस्यस्वायोगव्यवच्छेदकत्वात् ॥ अन्यथाप्रकृतेरप्यभावापातः ॥ अथवापुराणप्रक्रियानुसारेणैतदुच्यतइतिसंतोष्टव्यम् ॥ ३२ ॥ अनाराध्येति ॥ महेशम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेश्चालनात् ॥ यस्मात्कर्णान्मणिकर्णिकापपात ॥ मणिकर्णिकेत्येतदेवव्युत्पादयति ॥ मणिभिर्मुक्तादिभिःखचिताव्याप्तारम्यामणिकर्णिकेतिपूर्वस्यानुषंगः ॥ तस्मान्नाम्नामणिकर्णिका
स्त्वित्यर्थः ॥ कर्णिकाकर्णालंकारविशेषःकुण्डलमितिवा ॥ ६३ ॥ तर्हिचक्रपुष्कारिणीतिलोकैःकथमुच्यतेतत्राह ॥ चक्रेति ॥ ६४ ॥ अन्यंवरंप्रयच्छामीतियदुक्तंतत्कथयन्कथमेषेति चतु
र्थप्रश्नमुपसंहरति ॥ ममेति ॥ ६५ ॥ त्रिलोकीडचेतियद्विशेषणमुक्तंतदर्थंदर्शयितुमाह ॥ मुक्ताकुंडलेति ॥ इहमुक्ताकुंडलपातेनेत्यन्वयः ॥ वैप्रसिद्धम् ॥ ६६ ॥ काशतइति ॥ तत्प्र
सिद्धम् ॥ अनाख्येयंवाचामगोचरम् ॥ एतेनकाशीतिनामधेयंकथमापेतिसप्तमप्रश्नस्योत्तरमुक्तंभवति ॥ ६७ ॥ अविचारितंयथास्यात् ॥ ६८ ॥ चतुर्षुजरायुजांडजस्वेदजोद्भिज्जेषु ॥ ६९ ॥
मणिश्रवणभूषणंमणियुक्तंश्रवणभूषणंपतितंयत्रतत्तीर्थवरंतथातस्मिन् ॥ संध्यामित्यादिश्लोकचतुष्टयमेकंवाक्यम् ॥ संध्यादिकर्मयोऽत्रकरोतितस्यकर्मणोविपाकःफलमक्षयाएकाविदेहकैवल्यरू

चक्रपुष्कारिणीतीर्थंपुराख्यातमिदंशुभम् ॥ त्वयाचक्रेणखननाच्छंखचक्रगदाधर ॥ ६४ ॥ ममकर्णात्पपातेयंयदाचमणिकर्णिका ॥ तदाप्रभृतिलोके ऽत्रख्यातास्तुमणिकर्णिका ॥६५॥ ॥ श्रीविष्णुरुवाच ॥ ॥ मुक्ताकुंडलपातेनतवाद्रितनयाप्रिय ॥ तीर्थानांपरमंतीर्थंमुक्तिक्षेत्रमिहास्तुवै ॥६६॥ काशतेऽत्रयतोज्योतिस्तदनाख्येयमीश्वरः ॥ अतोनामापरंचास्तुकाशीतिप्रथितंविभो ॥ ६७ ॥ अन्यंवरंवरेदेवदेयःसोप्यविचारितम् ॥ सतेपरोपकारार्थं जगद्रक्षामणेशिव ॥ ६८ ॥ आब्रह्मस्तंबपर्यंतंयत्किंचिज्जंतुसंज्ञितम् ॥ चतुर्षुभूतग्रामेषुकाश्यांतन्मुक्तिमाप्स्यतु ॥६९॥ अस्मिंस्तीर्थवरेशंभोमणिश्रव णभूषणे ॥ संध्यांस्नानंजपंहोमंवेदाध्ययनमुत्तमम् ॥ तर्पणंपिंडदानंचदेवतानांचपूजनम् ॥ ७० ॥ गोभूतिलहिरण्याश्वदीपान्नांबरभूषणम् ॥ कन्या दानंप्रयत्नेनसततंतूननेकशः ॥ ७१ ॥ व्रतोत्सर्गंवृषोत्सर्गंलिंगादिस्थापनंतथा ॥ करोतियोमहाप्राज्ञोज्ञात्वायुःक्षणगत्वरम् ॥ ७२ ॥ विपत्तिंविपुलां चापिसंपत्तिमतिभंगुराम् ॥ अक्षयामुक्तिरेकास्तुविपाकस्तस्यकर्मणः ॥७३॥ अन्यच्चापिशुभंकर्मयदत्रश्रद्धयायुतम् ॥विनात्मघातमीशानत्यक्त्वाप्रायो पवेशनम् ॥७४॥ नैःश्रेयस्याःश्रियोहेतुस्तदस्तुजगदीश्वर ॥ नानुशोचतिनाख्यातिकृत्वाकालांतरेपियत् ॥७५॥ तदिहाक्षयतामेतुतस्येशत्वदनुग्रहात्॥ तवप्रसादात्तस्येशसर्वमक्षयमस्तुतत् ॥ ७६ ॥ यदस्तियद्भविष्यच्चयद्भूतंचसदाशिव ॥ तस्मादेतच्चसर्वस्मात्क्षेत्रमस्तुशुभोदयम् ॥ ७७ ॥ यथासदा शिवत्वत्तोनकिंचिदधिकंशिवम् ॥ तथानंदवनादस्मात्किंचिन्मास्त्वधिकंक्वचित् ॥ ७८ ॥ विनासांख्येनयोगेनविनास्वात्मावलोकनम् ॥ विनाव्रततपो दानैःश्रेयोऽस्तुप्राणिनामिह ॥ ७९ ॥

पामुक्तिरस्तुइतिसर्वत्रप्रार्थना ॥ ७० ॥ गोभूतिलादीनांभूषणांतानांदानम् ॥ सप्ततंतून्अग्निष्टोमादीन् ॥ तदुक्तम् ॥ अग्निष्टोमस्तथात्यग्निष्टोमउक्थोथषोडशी ॥ वाजपेयोऽतिरात्रोऽप्तोर्यामः
संस्थाइमेक्रमादिति ॥ ७१ ॥ लिंगादीत्यादिपदेनप्रतिमादयोगृह्यंते ॥ महाप्राज्ञइतिविशेषणस्यतात्पर्यमाह ॥ ज्ञात्वायुरितिपादत्रयेण ॥ ७२ ॥ ७३ ॥ अनुक्तंसंगृह्णाति ॥ अन्यच्चेति ॥
श्रद्धयायुतंयद्दत्तंचतन्नैःश्रेयस्याःश्रियोहेतुरस्त्वित्यग्रिमेणान्वयः ॥ तर्हिआत्मघातस्यापिकिंकैवल्यफलंनेत्याह ॥ विनेति ॥ तर्हिकिंकैवल्यमुद्दिश्यप्रायोपवेशनेनापिनात्मघातोविधेयोनेत्याह ॥
त्यक्त्वेति ॥ प्रायोपवेशनंत्यक्त्वाप्रकारांतरेणयआत्मघातस्तंविनेत्यर्थः ॥ ७४ ॥ नैःश्रेयस्याःकैवल्याख्यायाः ॥ ७५ ॥ ७६ ॥ ७७ ॥ शिवंकल्याणरूपम् ॥ ७८ ॥ सांख्येनात्मानात्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवेकेन ॥ योगेनाष्टांगेन ॥ आत्मावलोकनंजीवब्रह्मणोरैक्यानुसंधानम् ॥ ७९ ॥ प्राणिनांश्रेयोऽस्त्वित्येतद्विवृणोति ॥ शशकाइति ॥ निर्वाणेकैवल्येदीक्षिताः ॥ ८० ॥ एनसःपापस्य ॥ ८१ ॥ कृतयुगंसत्ययुगम् ॥ सतामितिशत्रंतंपदम् ॥ ८२ ॥ ८३ ॥ ८४ ॥ श्रद्धाकाशीनिषेवणाच्छ्रद्धयाकाशीवासात् ॥ प्राणायामायुतस्ययदितिपाठेप्राणायामेनईषद्युतस्ययुक्तस्यजनस्य

शशकामशकाःकीटाःपतंगास्तुरगोरगाः ॥ पंचक्रोश्यांमृताःकाश्यांसंतुनिर्वाणदीक्षिताः ॥ ८० ॥ नामापिगृह्णतांकाश्याःसदैवास्त्वेनसःक्षयः ॥ ८१ ॥ सदाकृतयुगंचास्तुसदाचास्तूत्तरायणम् ॥ सदामहोदयश्चास्तुकाश्यांनिवसतांसताम् ॥ ८२ ॥ यानिकानिपवित्राणिश्रुत्युक्तानिसदाशिव ॥ तेभ्योऽधिकतरंचास्तुक्षेत्रमेतत्त्रिलोचन ॥ ८३ ॥ चतुर्णामपिवेदानांपुण्यमध्ययनाच्चयत् ॥ तत्पुण्यंजायतांकाश्यांगायत्रीलक्षजाप्यतः ॥ ८४ ॥ अष्टांगयोगाभ्यासेनयत्पुण्यमपिजायते ॥ तत्पुण्यंसाधिकंभूयाच्छ्रद्धाकाशीनिषेवणात् ॥ ८५ ॥ कृच्छ्रचांद्रायणाद्यैश्चयच्छ्रेयःसमुपार्ज्यते ॥ तदेकेनोपवासेनभवत्वानंदकानने ॥ ८६ ॥ अन्यत्रयत्तपस्तप्त्वाश्रेयःस्याच्छरदांशतम् ॥ तदस्तुकाश्यांवर्षेणभूमिशय्याव्रतेनहि ॥ ८७ ॥ आजन्ममौनव्रततोयदन्यत्रफलंस्मृतम् ॥ तदस्तुकाश्यांपक्षाहःसत्यवाक्परिभाषणात् ॥ ८८ ॥ अन्यत्रदत्त्वासर्वस्वंसुकृतंयत्समीरितम् ॥ सहस्रभोजनात्काश्यांतद्भूयादयुताधिकम् ॥ ८९ ॥ मुक्तिक्षेत्राणिसर्वाणियत्संसेव्योदितंफलम् ॥ पंचरात्रात्तदत्रास्तुनिषेव्यमणिकर्णिकाम् ॥ ९० ॥ प्रयागस्नानपुण्येनयत्पुण्यंस्याच्छिवप्रदम् ॥ काशीदर्शनमात्रेणतत्पुण्यंश्रद्धयास्त्विह ॥ ९१ ॥ यत्पुण्यमश्वमेधेनयत्पुण्यंराजसूयतः ॥ काश्यांतत्पुण्यमाप्नोतुत्रिरात्रशयनायमी ॥ ९२ ॥ तुलापुरुषदानेनयत्पुण्यंसम्यगाप्यते ॥ काशीदर्शनमात्रेणतत्पुण्यंश्रद्धयास्तुवै ॥ ९३ ॥ इतिविष्णोर्वरंश्रुत्वादेवदेवोजगत्पतिः ॥ उवाचचप्रसन्नात्मातथाऽस्तुमधुसूदन ॥ ९४ ॥ ॥ श्रीमहादेवउवाच ॥ ॥ शृणुविष्णोमहाबाहोजगतःप्रभवाप्यय ॥ विधेहिसृष्टिंविविधांयथावत्त्वंश्रुतीरिताम् ॥ ९५ ॥ पितेवसर्वभूतानांधर्मतःपालकोभव ॥ विध्वंसनीयाविविधाधर्मध्वंसविधायिनः ॥ ९६ ॥ धर्मेतरपथस्थानामुपसंहृतयेहरे ॥ हेतुमात्रंभवान्यस्मात्स्वकर्मनिहताहिते ॥ ९७ ॥ यथापरिणतंसस्यंपतेत्प्रसवबंधनात् ॥ तेपरीणतपाप्मानःपतिष्यंतितथास्वयम् ॥ ९८ ॥ येचत्वामवमन्यंतेदर्पिताःस्वतपोबलैः ॥ तेषांचैवोपसंहृत्यैप्रभविष्याम्यहंहरे ॥ ९९ ॥ उपपातकिनोयेचमहापातकिनश्चये ॥ तेपिकाशींसमासाद्यभविष्यंतिगतैनसः ॥ १०० ॥ इदंममप्रियंक्षेत्रंपंचक्रोशीपरीमितम् ॥ ममाज्ञाप्रभवेदत्रनान्याज्ञाप्रभवेदिह ॥ १ ॥

साधिकंतत्पुण्यंभूयादित्यर्थः ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ शिवप्रदंमोक्षप्रदंकल्याणप्रदंवा ॥ ९१ ॥ यमीसंयमवान् ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ प्रसवबंधनाद्वृंतात् ॥ परीणतपाप्मानःफलोन्मुखपापाः ॥ ९८ ॥ ९९ ॥ १०० ॥ इदमिति ॥ यत्त्विदानीमन्याज्ञापिप्रभवतीतिप्रतीयतेतत्त्वीश्वरेच्छयैवेतिभावः ॥ यद्वात्रमूर्तिमतःसतोममा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञैवेहप्रभवेन्नान्यस्यअन्तर्धानेत्वन्यस्याप्याज्ञाप्रभवतीति ॥ अथवामोक्षप्रदानरुद्रपिशाचभोगादौममाज्ञैवप्रभवेदिहनान्यस्यब्रह्मविष्णुधर्मराजादेरिति ॥ एतदेववदिष्यति पापिनामित्यादिना ॥ १ ॥ अत्युग्रतेजसाकृत्वायत्तेजस्तेनभ्रमान्वितस्ततःप्रसरन् ॥ त्रैलोक्यस्यविभ्रमआश्चर्यबुद्धिर्यस्मात्सः ॥ अत्युग्रतपसांतेजोविभ्रत्त्रैलोक्यविभ्रममितिक्वचित्पाठः ॥ अत्युग्रतेजसामितिचान्यत्र ॥ सचस्पष्टएव ॥ २ ॥ पापिनामपीत्यपिशब्दोधार्मिकान्समुच्चिनोति ॥ तत्रधार्मिकाणांशासनंकैवल्यप्रापणमेवपापिनांरुद्रपिशाचभोगप्रापणमितिविवेकः ॥ ३ ॥ ४ ॥ प्रियस्येत्यादिकर्माणि षष्ठीत्रयम् ॥ ५ ॥ ६ ॥ तत्पुण्यादन्तकालेकाशीस्मरणपुण्यात् ॥ ७ ॥ ८ ॥ ९ ॥ विष्णोइति ॥ अस्यायमर्थः ॥ हेविष्णोऽविमुक्तेयःसंवासोनिवासः ॥ कीदृशः ॥ कर्मनिर्मूलनक्षमः कर्मवासनोत्पाटनदक्षः ॥ सनिर्वाणायसायुज्यायविश्वेश्वरचतुर्भुजादिमूर्त्यधिष्ठात्रापरमात्मनैक्यायविदेहकैवल्यायवाजायते ॥ इहकाश्यांदेहत्यागद्वारेतिशेषः ॥ केषामित्यतआह ॥ द्विजाणांहिप वित्राणामिति ॥ पवित्राणांदौर्लभ्यसूचनार्थंद्विजाणामित्युक्तम् ॥ पापिनांत्वत्रैवरुद्रपिशाचभोगानंतरंनिर्वाणंशशकमशकादीनांचतारतम्येनसालोक्यसामीप्यसारूप्यसार्ष्टिलक्षणामुक्तिरितिहिश

पुनर्विष्णुर्मयाप्रोक्तोमृडानिशुभलोचने ॥ अत्युग्रतेजसातेजोभ्रमंत्रैलोक्यविभ्रमः ॥ २ ॥ पापिनामपिजंतूनामविमुक्तनिवासिनाम् ॥ नान्यःशास
यिताविष्णोतेषांशास्ताऽहमेवहि ॥ ३ ॥ योजनानांशतस्थोपियाऽविमुक्तंस्मरेद्धृदि ॥ बहुपातकपूर्णोपिनसपापैःप्रबाध्यते ॥४॥ ममप्रियस्यक्षेत्रस्ययो
ऽविमुक्तस्यसंस्मरेत् ॥ प्राणप्रयाणसमयेदूरगोप्यघवानपि ॥५॥ सपापपूगमुत्सृज्यस्वर्गभोगान्समश्नुते ॥ काशीस्मरणपुण्येनस्वर्गाद्भ्रष्टोहिजायते॥६॥
पृथिव्यामेकराड्भूत्वाभुक्त्वाभोगाननेकशः ॥ प्राप्याविमुक्तंतत्पुण्यान्निर्वाणपदभाग्भवेत् ॥ ७ ॥ बहुकालमुषित्वाऽत्रनियतेंद्रियमानसः ॥ यद्यन्यत्र
विपद्येतदैवयोगाच्छुचिस्मिते ॥ ८ ॥ सोपिस्वर्गसुखंभुक्त्वाभूत्वाक्षितिपतीश्वरः ॥ पुनःकाशीमवाप्याथविंदेन्नैःश्रेयसींश्रियम् ॥ ९ ॥ विष्णोऽविमुक्तेसं
वासःकर्मनिर्मूलनक्षमः ॥ द्विजाणांहिपवित्राणांनिर्वाणायेहजायते ॥ ११० ॥

ब्दार्थः ॥ तत्रसालोक्यमेकस्मिँल्लोकेऽवस्थानम् ॥ सामीप्यंसमीपेऽवस्थानम् ॥ सारूप्यंतुल्यरूपप्राप्तिः ॥ सार्ष्टिर्जगत्सृष्ट्यादिवर्जंतुल्यप्रभावइतिभेदः ॥ इतोऽन्यथाव्याख्यानेपुराणांतरविरोधः पूर्वापरविरोधश्च ॥ यद्वा द्विजाणांपवित्राणामविमुक्तेयःसंवासःसम्यग्वसतिःससंवासएवयत्रकुत्रापिमृतानांतेषांद्विजाणांपवित्राणामिहास्मिन्जन्मन्येवनिर्वाणायभवति ॥ यथा घण्टाकर्णह्रदेस्ना त्वादृष्ट्वाविश्वेश्वरंविभुम् ॥ यत्रकुत्रमृतोवापिवाराणस्यांमृतोभवेत्तद्वदिति ॥ अत्रमरणानंतरंसर्वेषांमुक्तिःस्थिरैव ॥ अथवाऽविमुक्तेयःसंवासःसर्वेषांमरणद्वाराकर्मनिर्मूलनक्षमःसइहजीवदवस्थायां द्विजाणांपवित्राणांनिर्वाणायजीवन्मुक्तयेजायतइत्यर्थः ॥ यद्वा हेविष्णोऽविमुक्तेयःसंवासोमरणावधिवासःसद्विजाणांपवित्राणांहिएवानिश्चितंवानिर्वाणायकैवल्यायइहमरणाऽव्यवधानसमयेसत्वरंजायते ॥ पापिनांतुकालभैरवयातनानंतरंमोक्षायभवतीत्यर्थः ॥ अन्यत्सर्वंपूर्ववत् ॥ तथाचोक्तंपाद्मे ॥ अस्यांनिवासोनिर्वाणंसाधयत्यंजसामुने ॥ केवलंधर्मसापेक्षःकर्णेजपातितद्वचः ॥ अधर्मिष्ठस्यतत्क्षेत्रे यातनांतेदिशेन्मतिम् ॥ वाराणस्यांनिवसतिरपवर्गफलप्रदा ॥ द्विजाणांचपवित्राणांकल्प्यतेसत्वरंवलइति ॥ ११० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११ ॥ १२ ॥ महिमनिमहत्त्वे ॥ १३ ॥ १४ ॥ भयात्त्रासात् ॥ केषामित्यतआह ॥ त्रिशूलेति ॥ १५ ॥ १६ ॥ १७ ॥ स्वशाखावारुणैःस्वशाखोक्तस्नानसंबंधिभिः ॥ अपामार्गः प्रसिद्धःशैखरिकापरपर्यायः ॥ अपामार्गःशैखरिकोधामार्गवमयूरकौ ॥ प्रत्यक्पर्णीकीशपर्णीकिणिहीखरमंजरीत्यमरः ॥ १८ ॥ १९ ॥ १२० ॥ बर्हींषिकुशाः ॥ २१ ॥ २२ ॥

विष्णुरुवाच ॥ ॥ देवेशक्षेत्रमाहात्म्यंयोनजानातितत्त्वतः ॥ नश्रद्दधातिम्रियतेमृतेतस्येहकागतिः ॥ ११ ॥ ॥ शिवउवाच ॥ ॥ अन्यत्रकृत्वापापानिबहूनिसुमहांतिच ॥ अश्रद्दधानोऽतत्त्वज्ञोयद्यत्रचविपद्यते ॥ १२ ॥ महिमन्यनभिज्ञोपिक्षेत्रस्यास्यजनार्दन ॥ तस्ययागतिरुद्दिष्टातांनिशामयसुव्रत ॥ १३ ॥ पंचक्रोशींप्रविशतस्तस्यपातकसंततिः ॥ बहिरेवप्रतिष्ठेतनांतर्निविशतेक्वचित् ॥ १४ ॥ भयाद्बहिःस्थितायांचतस्यपातकसंततौ ॥ त्रिशूलपाशपाणीनांगणानांसीमचारिणाम् ॥ १५ ॥ प्रवेशमात्रादनघसर्वैरेनोभिरुज्झितः ॥ संस्नायमणिकर्णिक्यांपुण्यंप्राप्नोत्यनुत्तमम् ॥ १६ ॥ सर्वतीर्थेषुसंस्नानाद्यत्पुण्यंसमवाप्यते ॥ तत्पुण्यमाप्यतेसम्यङ्मणिकर्ण्येकमज्जनात् ॥ १७ ॥ विधिनातत्रसंस्नायमृद्गोमयकुशादिभिः ॥ स्वशाखावारुणैर्मंत्रैर्दूर्वापामार्गदर्भकैः ॥ १८ ॥ सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलम् ॥ मणिकर्ण्यांविधिस्नातःश्रद्धयातदवाप्नुयात् ॥ १९ ॥ अश्रद्धयापियःस्नातोमणिकर्ण्यांविधानतः ॥ सोपिपुण्यमवाप्नोतिस्वर्गप्रातिकरंपरम् ॥ १२० ॥ श्रद्धयाविधिवत्स्नात्वाकृत्वादेवादितर्पणम् ॥ तिलबर्हिर्यवैःसम्यक्सर्वयज्ञफलंलभेत् ॥ २१ ॥ श्रद्दधानोविधिस्नातःकृतसर्वोदकक्रियः ॥ जपन्देवान्समभ्यर्च्यसर्वमंत्रफलंलभेत् ॥ २२ ॥ स्नात्वामौनेनविश्वेशदर्शनान्नियतेंद्रियः ॥ सर्वव्रतकृतंश्रेयोलभेद्वाचयमःशिवे ॥ २३ ॥ स्नानेदेवार्चनेजप्येमलमूत्रविसर्जने ॥ मौनंकुर्यात्प्रयत्नेनदंतधावनहोमयोः ॥ २४ ॥ विश्वेश्वरंसमभ्यर्च्यसूपचारैर्विधानतः ॥ यावज्जीवंशिवार्चायाः फलमाप्नोतिवैसकृत् ॥ २५ ॥ दत्त्वाल्पमपिदेवेशिन्यायेनोपार्जितंधनम् ॥ अविमुक्तेमहाक्षेत्रेनदरिद्रोभवेत्क्वचित् ॥ २६ ॥ विविधंधनमावर्ज्ययोऽविमुक्तेनयच्छति ॥ संप्राप्यनिधनंमूढोऽन्यत्रशोचतिसर्वदा ॥ २७ ॥ रम्याणियानिरत्नानिगोगजाश्वांबराण्यपि ॥ कृतानितानिश्रेयोर्थमविमुक्तनिवासिनाम् ॥ २८ ॥

सर्वव्रतकृतमशेषव्रतैःसंपादितम् ॥ सर्वयज्ञकृतमितिक्वचित् ॥ श्रेयःफलम् ॥ वाचंयमोमौनी ॥ शिवेहेपार्वति ॥ वाचंयमाच्चतानितिक्वचित् ॥ अत्रवाङ्नियमस्यमहत्फलांतरमाह ॥ वाचामिति ॥ वाचंयमान्मौनात्तान्पूर्वोक्तान्सर्वान्कामान्लभतइत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ रम्याणीति ॥ यानिरम्याणिरत्नादीनितान्यविमुक्तनिवासिनांश्रेयोर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतानिदानद्वाराविधात्रेतिशेषः ॥ २८ ॥ तर्हिकिंस्वर्गाद्यर्थमेवतद्धनंनेत्याह ॥ विश्वेशप्रीणनार्थायैवेति ॥ तत्रदृष्टांतः ॥ निधनंवायथेत्यर्थः ॥ २९ ॥ १३० ॥ ३१ ॥ ३२ ॥
॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ प्राकृतैःप्रकृतिकार्यैः ॥ ३८ ॥ पाशान्कथयन्कैमुत्यन्यायमाह ॥ चतुर्विंशतिभिरिति ॥ चतुर्विंशतिभिःप्रकृतिमहदहंकारपंचतन्मात्रषो
डशविकारैः ॥ त्रिगुणैस्तमोरजःसत्त्वात्मकैः ॥ क्रिययाधर्मार्थकामादिलक्षणया ॥ दृढैरच्छेद्यैः ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ प्राज्यमुत्कृष्टम् ॥ ४३ ॥ ४४ ॥ नपापेभ्यो

विश्वेशप्रीणनार्थायधनंनिधनमेववा ॥ न्यायेनकाश्यांयःकुर्यात्सधन्यःसचधर्मवित् ॥ २९ ॥ योसौविश्वेश्वरोदेवःकाशीपुर्यामुमेस्थितः ॥
लिंगरूपधरःसाक्षान्ममश्रेयास्पदंहितत् ॥ १३० ॥ अविमुक्तंमहत्क्षेत्रंपंचक्रोशपरीमितम् ॥ ज्योतिर्लिंगंतदेकंहिज्ञेयंविश्वेश्वराभिधम् ॥ ३१ ॥
एकदेशस्थितमपियथामार्तंडमंडलम् ॥ दृश्यतेसर्वगंसर्वैःकाश्यांविश्वेश्वरस्तथा ॥ ३२ ॥ निष्प्रत्यूहेनयोगेननानाजन्मार्जितेनच ॥ यत्फलंलभ्य
तेऽन्यत्रतत्काश्यांत्यजतस्तनुम् ॥ ३३ ॥ तप्त्वातपांसिसर्वाणिबहुकालंजितेंद्रियैः ॥ यत्फलंलभ्यतेऽन्यत्रतत्काश्यामेकरात्रतः ॥ ३४ ॥ अक्षेत्रम
हिमज्ञोपिश्रद्धाहीनोपिकालतः ॥ काशीप्रवेशादनघोऽमृतत्वंलभतेमृतः ॥ ३५ ॥ कृत्वाप्येनांसिचोग्राणिकालात्प्राप्याथकाशिकाम् ॥ त्यक्कातनुंप्रसादा
न्मेमामेवप्रतिपद्यते ॥ ३६ ॥ विनाममप्रसादंवैकःकाशींप्रतिपद्यते ॥ विनाब्रध्नंविशालाक्षिदिनकृत्कइहोच्यते ॥ ३७ ॥ अप्राप्यकाशींकोदेविनिरंतरसुखं
लभेत् ॥ ब्रह्माद्याःप्राकृतैःपाशैर्यतोबद्धानिरंतरम् ॥ ३८ ॥ चतुर्विंशतिभिःपाशैस्त्रिगुणैःक्रिययादृढैः ॥ कंठेबद्धाविमुच्यंतेकथंकाशींविनाजनाः ॥
॥ ३९ ॥ बहूपसर्गोयोगोयंकृच्छ्रसाध्यंतपोहियत् ॥ योगाद्भ्रष्टस्तपोभ्रष्टोगर्भक्लेशसहःपुनः ॥ १४० ॥ कृत्वापिकाश्यांपापानिकाश्यामेवम्रियेतचेत् ॥
भूत्वारुद्रपिशाचोपिपुनर्मुक्तिमवाप्स्यति ॥ ४१ ॥ काश्यांमृतानांजंतूनांदैवात्पापकृतामपि ॥ नपातोनरकेतेषांतेषांशास्ताहमेवयत् ॥ ४२ ॥
कार्यंविज्ञायसापायंस्मृत्वागर्भस्यवेदनाम् ॥ त्यक्काराज्यमपिप्राज्यंसेव्याकाशीनिरंतरम् ॥ ४३ ॥ अतर्कितंसमभ्येत्ययमदूताःसुदारुणाः ॥ बद्धापाशैर्हि
निष्यंतिक्षिप्रंकाशींततःश्रयेत् ॥ ४४ ॥ नपापेभ्योभयंयत्रनभयंयत्रवैयमात् ॥ नगर्भवासभीर्यत्रतांकाशींकोनसंश्रयेत् ॥ ४५ ॥

भयंयत्रेति ॥ अत्रकृतानांपापानांपंचक्रोशयात्रादिनाविनाशात् ॥ तथाचपाद्मे ॥ संचितंयद्बहिःक्षेत्राद्वाराणस्यांतथैवच ॥ अंतर्गृहेकृतंयच्चजन्मांतरकृतंचयत् ॥ इत्युपक्रम्य ब्रह्महत्यादिपापानिप्रदक्षिण
पदेपदे ॥ नश्यंतिसकलान्येवमत्क्षेत्रस्यप्रदक्षिणादिति ॥ अन्यत्रजन्मांतरेवाकृतानांप्रवेशदर्शनादिनाक्षयात् ॥ तथाचात्रैवोक्तम् ॥ पंचक्रोशींप्रविशतइति ॥ ब्रह्मवैवर्तेच ॥ कालाद्भयंनास्तियत्रयत्र
पापभयंनहि ॥ जन्मांतरसहस्रेषुकृतंनश्यतिदर्शनादिति॥यत्तुपाद्मपुराणेकाशीमाहात्म्येपंचाध्याय्यांभृगुणोक्तंकाशीकृतमहापातकोपपातकानांभोगादेवक्षयइति तत्तुपंचक्रोश्यादियात्राव्यतिरेकेगेतिज्ञात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यम् ॥ अन्यथापंचक्रोश्यादियात्राविधायकशास्त्रंपीडयेत ॥ ४९ ॥ प्राप्यंप्राप्तव्यम् ॥ प्राप्तमितिक्वचित् ॥ ४६ ॥ ४७ ॥ ४८ ॥ दूरमिति ॥ अहंयुवामरणंममदूरेइतिचित्तेनधार्यंनधारणं
कर्तव्यम् ॥ तुशब्दादेतादृशंवचनंनश्रोतव्यमित्यर्थः ॥ किंतुनिभृतंनिश्चलंगुप्तंवायथास्यात्तथायममहिषग्रीवाभरणघंटारवोविषयांतरव्यासंगंविहायश्रोतव्यः ॥ घंटाग्रीवंमहिषमारुह्ययमोमांनेतुमागत
इतिसदाभावनीयमित्यर्थः ॥ तस्मान्नैकटचाच्छीघ्रमेववार्धकमप्राप्येतियावत् ॥ प्रकर्षेणोत्कटा अधिकायाश्रमघटाश्रमसमूहस्तामप्राप्यजीर्णांपर्णकुटींहित्वाजीर्णपर्णकुटीसदृशंतुच्छंगृहंहित्वापटुमतिः
सुबुद्धिर्धूर्जटेःपुरींगच्छेदित्यर्थः ॥ प्रकटोत्कटइतिपाठेकाशीप्राप्तावत्युत्कंठावानित्यर्थः ॥ प्रकटोत्कटश्रुतिपुटीमितिपाठेकाशीविशेषणम् ॥ गुणवर्णनादिश्रवणेच्छयाप्रकटोत्कटमतिशयोत्कटंश्रुतिपुटं
श्रवणयुगलंयस्यांतामिति ॥ ४९ ॥ १५० ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांपड्विंशोध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ सप्ताधिकतमे

अद्यप्रातःपरश्वोवामरणंप्राप्यमेवच ॥ यावत्कालविलंबोस्तितावत्काशींसमाश्रयेत् ॥ ४६ ॥ प्राप्तेतुमरणेपुंसांपुनर्जन्मपुनर्मृतिः ॥ अपुनर्भवभू
मिंचतस्मात्काशींश्रयेद्बुधः ॥ ४७ ॥ पुत्रक्षेत्रकलत्राख्यांत्यक्त्वामायांहिवैष्णवीम् ॥ भवांतरेनेकरूपांभवघ्नींकाशिकांश्रयेत् ॥४८॥ ॥ स्कंदउवाच ॥
दूरंमेमरणंयुवाहमधुनाधार्यंनचित्तेत्विति श्रोतव्योनिभृतंकृतांतमहिषग्रैवेयघंटारवः ॥ नैकट्यात्प्रकटोत्कटश्रमघटामप्राप्यहित्वाद्रुतंजीर्णांपर्णकुटींततः
पटुमतिर्गच्छेत्पुरींधूर्जटेः ॥ ४९ ॥ व्यासउवाच ॥ अगस्त्यस्यपुरःसूतकथयित्वाकथामिमाम् ॥ सर्वपापप्रशमनींपुनःस्कंदउवाचह ॥ १५० ॥
इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडेपूर्वार्द्धेमणिकर्णिकाख्यानंनामषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥
स्कंदउवाच ॥ वाराणसीतिप्रथितंयथाचानंदकाननम् ॥ तथाचकथयामीहदेवदेवेनभाषितम् ॥ १ ॥ ॥ ईश्वरउवाच ॥ ॥ निशामयमहाबाहोवि
ष्णोत्रैलोक्यसुंदर ॥ प्राप्तंवाराणसीत्याख्यामविमुक्तंयथातथा ॥ २ ॥ निर्दग्धान्सागरान्श्रुत्वाकपिलक्रोधवह्निना ॥ अश्वमेधाश्वसंयुक्तान्पूर्व
जान्स्वान्भगीरथः ॥ ३ ॥ सूर्यवंशेमहातेजाराजापरमधार्मिकः ॥ आरिराधयिषुर्गंगांतपसेकृतनिश्चयः ॥४॥ हिमवंतंनगश्रेष्ठममात्यन्यस्तराज्यधूः ॥
जगामयशसांराशिरुद्दिधीर्षुःपितामहान् ॥ ५ ॥ ब्रह्मशापाग्निनिर्दग्धान्महादुर्गतिगानपि ॥ विनात्रिमार्गगांविष्णोकोजंतून्त्रिदिवंनयेत् ॥ ६ ॥

विंशेध्यायेपापप्रमोदनः ॥ सुखमोक्षप्रदायाःश्रीगंगायामहिमोच्यते ॥ १ ॥ अतीतेऽध्यायेइदंक्षेत्रंयंकालमारभ्यपरांप्रथितिमापन्नमानंदकाननमविमुक्तंकाशीतिनाम्नात्रितयादिकंचनिरूप्यात्र
प्रथमतोवाराणसीतिपक्षप्रश्नस्योत्तरंवक्तुंप्रतिजानीते ॥ वाराणसीति ॥ १ ॥ २ ॥ निर्दग्धानिति ॥ भगीरथःकपिलस्ययःक्रोधस्तेनजातोयस्तेषांस्वदेहजोऽग्निस्तेन ॥ यथाश्रुतव्याख्यानेनसाधुवादो
मुनिकोपभर्जिताइत्यादिभागवतवचनविरोधात् ॥ सागरान्सगरस्यपुत्रान्स्वस्यपूर्वजान्पितामहान्निर्दग्धान्श्रुत्वातपसेकृतनिश्चयःसन्हिमवंतंजगामेतितृतीयेनान्वयः ॥ अश्वमेधस्यांगभूतेऽश्वेरक्षणार्थं
संयुक्तान्पित्रानियुक्तान् ॥ संसक्तानितिपाठेसंलग्नानित्यर्थः ॥ ३ ॥ ४ ॥ अमात्येपुन्यस्तानिक्षिप्ताराज्यधूःराज्यभारोयेनसतथा ॥ ५ ॥ ननुपितॄणामुद्धारार्थमन्यदेवंकिंचित्साधनमनुष्ठेयंकिंहिमालयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वागंगाराधनेनतत्राह ॥ ब्रह्मशापेति ॥ ६ ॥ ननुकथंतस्याजलमय्याएतादृशंसामर्थ्यंतत्राह ॥ ममैवेति ॥ ७ ॥ तिस्रइच्छाज्ञानक्रियारूपाःसत्त्वरजस्तमोरूपावाशक्तयोयस्याःसात्रिशक्तिः ॥ आनंदाऽमृतरूपासुखात्मककैवल्यस्वरूपा ॥ धर्मस्यशुद्धत्वंनिर्व्याजत्वम् ॥ अविद्यातत्कार्ययोर्धारणाद्धर्मः ॥ शुद्धश्चासौधर्मश्चेतिशुद्धधर्मःपरमात्मातत्स्वरूपिणीशुद्धधर्मस्वरूपिणी ॥ ८ ॥ किमत्रप्रमाणमहमेवेश्वरइत्याह ॥ यामेतामिति ॥ यद्वा कासेत्यपेक्षायामंगुल्यानिर्दिशति ॥ यामेतामिति ॥ स्वलीलयास्वस्यक्रीडया ॥ स्वमौलिनेतिक्वचित् ॥ परब्रह्मस्वरूपिणींपरब्रह्मस्वरूपपरिपूर्णाम् ॥९॥१०॥ सांगापडंगसहिता ॥ तानिचपडंगानिशिक्षाकल्पोव्याकरणंछन्दोनिरुक्तज्योतींषि ॥ चतुर्विधाचतुष्प्रकाराऋग्यजुःसामाथर्वरूपेत्यर्थः ॥ चतुर्मितेतिपाठेचतुर्द्धामितापरिमितागंगाऽलकनंदाचक्षुर्भद्रे

ममैवसापरामूर्तिस्तोयरूपाशिवात्मिका ॥ ब्रह्मांडानामनेकानामाधारःप्रकृतिःपरा ॥ ७ ॥ शुद्धविद्यास्वरूपाचत्रिशक्तिःकरुणात्मिका ॥ आनंदामृतरूपाचशुद्धधर्मस्वरूपिणी ॥ ८ ॥ यामेतांजगतांधात्रींधारयामिस्वलीलया ॥ विश्वस्यरक्षणार्थायपरब्रह्मस्वरूपिणीम् ॥ ९ ॥ त्रैलोक्येयानितीर्थानिपुण्यक्षेत्राणियानिच ॥ सर्वत्रसर्वेयेधर्माःसर्वेयज्ञाःसदक्षिणाः ॥ १० ॥ तपांसिविष्णोसर्वाणिश्रुतिःसांगाचतुर्विधा ॥ अहंचत्वंचकश्चापिदेवतानांगणाश्चये ॥ ॥ ११ ॥ पुरुषार्थाश्चसर्वेवैशक्तयोविविधाश्चयाः ॥ गंगायांसर्वएवैतेसूक्ष्मरूपेणसंस्थिताः ॥ १२ ॥ सस्नातःसर्वतीर्थेषुसर्वक्रतुषुदीक्षितः ॥ चीर्णसर्वव्रतःसोपियस्तुगंगांनिषेवते ॥ १३ ॥ तपांसितेनतप्तानिसर्वदानप्रदःसच ॥ सम्प्राप्तयोगनियमोयस्तुगंगांनिषेवते ॥१४॥ सर्ववर्णाश्रमेभ्यश्चवेदविद्भ्यश्चवैतथा ॥ शास्त्रार्थपारगेभ्यश्चगंगास्नायीविशिष्यते ॥ १५ ॥ मनोवाक्कायजैर्दोषैर्दुष्टोबहुविधैरपि॥ वीक्ष्यगंगांभवेत्पूतःपुरुषोनात्रसंशयः ॥१६॥ कृतेसर्वत्रतीर्थानित्रेतायांपुष्करंपरम् ॥ द्वापरेतुकुरुक्षेत्रंकलौगंगैवकेवलम् ॥ १७ ॥ पूर्वजन्मांतराभ्याससवासनावशतोहरे ॥ गंगातीरेनिवासःस्यान्मदनुग्रहतःपरात् ॥ १८ ॥ ध्यानंकृतेमोक्षहेतुस्त्रेतायांतच्चवैतपः ॥ द्वापरेतद्द्वयंयज्ञाःकलौगंगैवकेवलम् ॥ १९ ॥ योदेहपतनाद्यावद्गंगातीरंनमुंचति ॥ सहिवेदांतविद्योगीब्रह्मचर्यव्रतीसदा ॥ २० ॥ कलौकलुषचित्तानांपरद्रव्यरतात्मनाम् ॥ विधिहीनक्रियाणांचगतिर्गंगांविनानहि ॥ २१ ॥ अलक्ष्मीःकालकर्णीचदुःस्वप्नोदुर्विचिंतितम् ॥ गंगागंगेतिजपनात्तानिनोपविशंतिहि ॥ २२ ॥ गंगाहिसर्वभूतानामिहामुत्रफलप्रदा ॥ भावानुरूपतोविष्णोसदासर्वजगद्धिता ॥ २३ ॥

तिपरिगणितेतियावत् ॥ कश्चापिब्रह्मापि ॥ अयमेवपाठः ॥ गणामरुदादयः ॥ ११ ॥ पुरुषार्थाधर्मार्थकाममोक्षाः ॥ मूर्तिमंतोप्येतेसूक्ष्मरूपेणादृश्यरूपेणसंस्थिताइत्यर्थः ॥ १२ ॥ ॥ १३ ॥ सर्वदानप्रदःसर्वदानंप्रकर्षेणददातीतितथा ॥ सर्वदानव्रतइतिपाठेसर्वाणिदानानिव्रतानिचयस्यसः ॥ १४ ॥ १५ ॥ पूतोमुक्तः ॥ मुक्तिस्त्वद्दर्शनाद्देवीत्युक्तत्वात् ॥ पवित्रोवा ॥ दृष्टाजन्मशतंपापंहंतिगंगेत्युक्तेः ॥ १६ ॥ १७ ॥ १८ ॥ तच्चवैतपःतद्ध्यानंतपश्चमोक्षहेतुरितिसर्वत्रान्वेति ॥ कलौगंगैवेति ॥ तथाचोक्तम् ॥ अग्निहोत्रादिकर्माणिसापायानिकलौयुगे ॥ गंगास्नानंहरेर्नामनिरपायमिदंद्वयमिति ॥ १९ ॥ २० ॥ २१ ॥ कालकर्णीकाकविष्ठाराक्षसीविशेषोवा ॥ दुःस्वप्नंदुष्टस्वप्नः ॥ षंढत्वमार्षम् ॥ दुःस्वप्नइत्येववापाठः ॥ २२ ॥ भावानुरूपतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्त्यनुसारेण ॥ २३ ॥ २४ ॥ गंगायांतत्तीरइत्यर्थः ॥ २५ ॥ २६ ॥ श्रद्धेति ॥ श्रद्धासाध्यत्वाच्छ्रद्धाधर्मइत्युपचारः ॥ एवमग्रेपि ॥ तथाचोक्तंगीतायाम् ॥ श्रद्धावाँल्लभतेज्ञानमिति ॥ श्रद्धयाग्निःसमिद्ध्यतइतिश्रुतेश्च ॥ २७ ॥ २८ ॥ ब्रह्मांडवाह्यस्थमिति ॥ तथाचभागवते ॥ यज्ञलिंगस्यविष्णोर्विचक्रमतोवामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टायाबाह्यजलधारेति ॥

यज्ञदानतपोयोगजपाःसनियमायमाः ॥ गंगासेवासहस्रांशंनलभंतेकलौहरे ॥ २४ ॥ किमष्टांगेनयोगेनकिंतपोभिःकिमध्वरैः ॥ वासएवहिगंगायां ब्रह्मज्ञानस्यकारणम् ॥ २५ ॥ अपिदूरस्थितस्यापिगंगामाहात्म्यवेदिनः ॥ अयोग्यस्यापिगोविंदभक्त्यागंगाप्रसीदति ॥ २६ ॥ श्रद्धाधर्मःपरः सूक्ष्मःश्रद्धाज्ञानंपरंतपः ॥ श्रद्धास्वर्गश्चमोक्षश्चश्रद्धयासाप्रसीदति ॥ २७ ॥ अज्ञानरागलोभाद्यैःपुंसांसंमूढचेतसाम् ॥ श्रद्धानजायतेधर्मेगंगायां चविशेषतः ॥ २८ ॥ बहिःस्थितंजलंयद्वन्नारिकेलांतरेस्थितम् ॥ तथाब्रह्मांडबाह्यस्थंपरब्रह्मांबुजाह्नवी ॥ २९ ॥ गंगालाभात्परोलाभःक्वचिदन्योन विद्यते ॥ तस्माद्गंगामुपासीतगंगैवपरमःपुमान् ॥ ३० ॥ शक्तस्यपंडितस्यापिगुणिनोदानशीलिनः ॥ गंगास्नानविहीनस्यहरेजन्मनिरर्थकम् ॥ ३१ ॥ वृथाकुलंवृथाविद्यावृथायज्ञावृथातपः ॥ वृथादानानितस्येहकलौगंगांनयोभजेत् ॥ ३२ ॥ गुणवत्पात्रपूजायांनस्याद्दैतादृशंफलम् ॥ यथागंगाजलस्नानपूजनेविधिनाफलम् ॥ ३३ ॥ ममतेजोग्निगर्भेयंममवीर्यातिसंवृता ॥ दाहिकासर्वदोषाणांसर्वपापविनाशिनी ॥ ३४ ॥ स्मरणादेवगंगायाःपापसंघातपंजरम् ॥ शतधाभेदमायातिगिरिर्वज्रहतोयथा ॥ ३५ ॥ गंगांगच्छतियस्त्वेकोयस्तुभक्त्यानुमोदयेत् ॥ तयोस्तुल्यंफलंप्राहुर्भक्तिरेवात्रकारणम् ॥ ॥ ३६ ॥ गच्छंस्तिष्ठञ्जपन्ध्यायन्भुंजञ्जाग्रत्स्वपन्वदन् ॥ यःस्मरेत्सततंगंगांसहिमुच्येतबंधनात् ॥ ३७ ॥ पितॄनुद्दिश्ययोभक्त्यापायसंमधुसंयुतम् ॥ गुडसर्पिस्तिलैःसार्धंगंगांभसिविनिक्षिपेत् ॥ ३८ ॥ तृप्ताभवंतिपितरस्तस्यवर्षशतंहरे ॥ यच्छंतिविविधान्कामान्परितुष्टाःपितामहाः ॥ ॥ ३९ ॥ लिंगेसंपूजितेसर्वमर्चितंस्याज्जगद्यथा ॥ गंगास्नानेनलभतेसर्वतीर्थफलंतथा ॥ ४० ॥ गंगायांतुनरःस्नात्वायोलिंगंनित्यमर्चति ॥ एकेनजन्मनामुक्तिंपरांप्राप्नोतिसध्रुवम् ॥ ४१ ॥ अग्निहोत्रंचयज्ञाश्चव्रतदानतपांसिच ॥ गंगायांलिंगपूजायाःकोट्यंशेनापिनोसमाः ॥ ४२ ॥

तथाभगवत्पादीयवचनंच ॥ ब्रह्मांडंखंडयंतीहरशिरसिजटावल्लिमुल्लासयंतीस्वर्लोकादापतंतीकनकगिरिगुहागंडशैलात्स्खलंती ॥ क्षोणीपृष्ठेलुठंतीदुरितचयचमूंनिर्भरंभर्त्सयंतीपाथोधिंपूरयंतीसुरनगरसरित्पावनीनःपुनात्विति ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ममवीर्यातिसंवृताममप्रभावातिशयेनसंपन्नामत्सदृशीत्यर्थः ॥ अभिसंवृतेतिपाठेपिसएवार्थः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ हैतुकाःसत्क्रियासुहेतुभिःसंदेहोत्पादकाः ॥ बहुसंशयाइष्टादृष्टकर्मसुनानासंशयवंतः ॥ ५४ ॥ ५५ ॥ ५६ ॥ सिद्धयोऽणिमाद्याः ॥ सिद्धिलिंगानिसिद्धिदानिलिंगानितत्यक्षमाहात्म्यभाजीतिवा ॥ स्पर्शलिंगानियत्संपर्केणलोहादयःसुवर्णा

गंगांगंतुंविनिश्चित्यकृत्वाश्राद्धादिकंगृहे ॥ स्थितस्यसम्यक्संकल्पात्तस्यनंदंतिपूर्वजाः ॥ ४३ ॥ पापानिचरुदंत्याशुहाक्वयास्यामइत्यलम् ॥ लोभमोहादिभिःसार्धंमंत्रयंतिपुनःपुनः ॥ ४४ ॥ यथानगंगांयात्येषतथाविघ्नंप्रकुर्महे ॥ गंगांगतोयथाचैषनउच्छित्तिंविधास्यति ॥ ४५ ॥ गृहाद्गंगावगाहार्थंगच्छतस्तुपदेपदे ॥ निराशानिव्रजंत्येवपापान्यस्यशरीरतः ॥ ४६ ॥ पूर्वजन्मकृतैःपुण्यैस्त्यक्त्वालोभादिकंहरे ॥ व्युदस्यसर्वविघ्नौघान्गंगांप्राप्नोतिपुण्यवान् ॥ ४७ ॥ अनुषंगेणमौल्येनवाणिज्येनापिसेवया ॥ कामासक्तोपिवामर्त्योगंगास्नातोदिवंव्रजेत् ॥ ४८ ॥ अनिच्छयापिसंस्पृष्टोदहनोहियथादहेत् ॥ अनिच्छयापिसंस्नातागंगापापंतथादहेत् ॥ ४९ ॥ तावद्भ्रमतिसंसारेयावद्गंगांनसेवते ॥ संसेव्यगंगांनोजंतुर्भवक्लेशंप्रपश्यति ॥ ५० ॥ योगंगांभसिनिस्नातोभक्त्यासंत्यक्तसंशयः ॥ मनुष्यचर्मणानद्धःसदेवोनात्रसंशयः ॥ ५१ ॥ गंगास्नानार्थमुद्युक्तोमध्येमार्गंमृतोयदि ॥ गंगास्नानफलंसोपितदाप्नोतिनसंशयः ॥ ५२ ॥ माहात्म्यंयेचगंगायाःशृण्वंतिचपठंतिच ॥ तेप्यशेषैर्महापापैर्मुच्यंतेनात्रसंशयः ॥ ५३ ॥ दुर्बुद्धयोदुराचाराहैतुकाबहुसंशयाः ॥ पश्यंतिमोहिताविष्णोगंगामन्यनदीमिव ॥ ५४ ॥ जन्मांतरकृतैर्दानैस्तपोभिर्नियमैर्व्रतैः ॥ इहजन्मनिगंगायांनृणांभक्तिःप्रजायते ॥ ५५ ॥ गंगाभक्तिमतामर्थेमहेंद्रादिपुरेषुच ॥ हर्म्याणिरम्यभोगानिनिर्मितानिस्वयंभुवा ॥ ५६ ॥ सिद्धयःसिद्धिलिंगानिस्पर्शलिंगान्यनेकशः ॥ प्रासादारत्नरचिताश्चिंतामणिगणाअपि ॥ ५७ ॥ गंगाजलांतस्तिष्ठंतिकलिकल्मषभीतितः ॥ अतएवहिसंसेव्याकलौगंगेष्टसिद्धिदा ॥ ५८ ॥ सूर्योदयेतमांसीववज्रपातभयान्नगाः ॥ तार्क्ष्येक्षणाद्यथासर्पामेघावाताहताइव ॥ ५९ ॥ तत्त्वज्ञानाद्यथामोहःसिंहंदृष्ट्वायथामृगाः ॥ तथासर्वाणिपापानियांतिगंगेक्षणात्क्षयम् ॥ ६० ॥ दिव्यौषधैर्यथारोगालोभेनचयथागुणाः ॥ यथाग्रीष्मोष्मसंपत्तिरगाधह्रदमज्जनात् ॥ ६१ ॥

निभवंतितादृशपाषाणघटितानिलिंगानीत्यर्थः ॥ स्पर्शमात्रेणधर्मार्थकाममोक्षसाधकानिलिंगानीतिवा ॥ रत्नरचितारत्नैर्विनिर्मिताः ॥ रत्नखचिताइतिपाठेरत्नैर्निबद्धाइत्यर्थः ॥ ॥ ५७ ॥ अतएवेति ॥ यतःसिद्धादयःपापभीतितस्तद्बाधापरिहारार्थंगंगाजलमध्येतिष्ठंत्यतःसर्वोत्कृष्टत्वाद्गंगैवसंसेव्येत्यर्थः ॥ ५८ ॥ ५९ ॥ ६० ॥ संपत्तिःसंपन्नतासंप्राप्तिर्वा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संततिरितिकाचित् ॥ ६१ ॥ ६२ ॥ ६३ ॥ दंभोधर्मध्वजित्वम् ॥ कौटिल्यंमत्सरः ॥ मायावंचनापरप्रतारणमित्येतत् ॥ ६४ ॥ ६५ ॥ ६६ ॥ नास्तिकास्त्यक्तवेदप्रामाण्यावौद्धादिप्रभे दाइत्यर्थः ॥ ६७ ॥ दिवःकांतिमत्याःस्वप्रकाशपरमसुखस्वरूपायानिर्वृतेरित्यर्थः ॥ सोपानमारोहमार्गम् ॥ ६८ ॥ श्रीमतीजाह्नवीत्यत्रपुंवद्भावाभावआर्षः ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ शिवभक्तस्यलक्षणमाह ॥ हरेयइति ॥ ७४ ॥ वात्याचक्रवातः ॥ पुण्यरूपंतोयंवोढुंशीलंयस्याःसापुण्यवाहिनी ॥ ७५ ॥ ७६ ॥ ७७ ॥ तदालयकरस्तयोःशिववि

तूलशैलःस्फुलिंगेनयथानश्यतितत्क्षणात् ॥ तथादोषाःप्रणश्यंतिगंगांभःस्पर्शनाद्ध्रुवम् ॥ ६२ ॥ क्रोधेनचतपोयद्वत्कामेनचयथामतिः ॥ अनये नयथालक्ष्मीर्विद्यामानेनवैयथा ॥ ६३ ॥ दंभकौटिल्यमायाभिर्यथाधर्मोविनश्यति ॥ तथानश्यंतिपापानिगंगायादर्शनेनतु ॥ ६४ ॥ मानुष्यंदुर्लभं प्राप्यविद्युत्संपातचंचलम् ॥ गंगांयःसेवतेसोत्रबुद्धेःपारंपरंगतः ॥ ६५ ॥ विधूतपापायेमर्त्याःपरंज्योतिःस्वरूपिणीम् ॥ सहस्रसूर्यप्रतिमांगंगांपश्यं तितेभुवि ॥ ६६ ॥ साधारणांभसापूर्णांसाधारणनदीमिव ॥ पश्यंतिनास्तिकागंगांपापोपहतलोचनाः ॥ ६७ ॥ संसारमोचकश्चाहंजनानामनुकंपया ॥ गंगातरंगरूपेणसोपानंनिर्ममेदिवः ॥ ६८ ॥ सर्वएवशुभःकालःसर्वोदेशस्तथाशुभः ॥ सर्वोजनोदानपात्रंश्रीमतीजाह्नवीतटे ॥ ६९ ॥ यथाश्वमेधो यज्ञानांनगानांहिमवान्यथा ॥ व्रतानांचयथासत्यंदानानामभयंयथा ॥ ७० ॥ प्राणायामश्चतपसांमंत्राणांप्रणवोयथा ॥ धर्माणामप्यहिंसाचकाम्यानां श्रीर्यथावरा ॥ ७१ ॥ यथात्मविद्याविद्यानांस्त्रीणांगौरीयथोत्तमा ॥ सर्वदेवगणानांचयथात्वंपुरुषोत्तम ॥ ७२ ॥ सर्वेषामेवपात्राणांशिवभक्तोयथा वरः ॥ तथासर्वेषुतीर्थेषुगंगातीर्थंविशिष्यते ॥ ७३ ॥ हरेयश्चावयोर्भेदंनकरोतिमहामतिः ॥ शिवभक्तःसविज्ञेयोमहापाशुपतश्चसः ॥ ७४ ॥ पापपां सुमहावात्यापापद्रुमकुठारिका ॥ पापेंधनदवाग्निश्चगंगेयंपुण्यवाहिनी ॥ ७५ ॥ नानारूपाश्चपितरोगाथागायंतिसर्वदा ॥ अपिकश्चित्कुलेस्माकंगं गास्नायीभविष्यति ॥ ७६ ॥ देवर्षीन्परिसंतर्प्यदीनानाथांश्चदुःखितान् ॥ श्रद्धयाविधिनास्नात्वादास्यतेसलिलांजलिम् ॥ ७७ ॥ अपिनःसकुले भूयाच्छिवेविष्णौचसाम्यदृक् ॥ तदालयकरोभक्त्यातस्यसंमार्जनादिकृत् ॥ ७८ ॥ अकामोवासकामोवातिर्यग्योनिगतोपिवा ॥ गंगायांयोमृतोमर्त्यो नरकंसनपश्यति ॥ ७९ ॥ तीर्थमन्यत्प्रशंसंतिगंगातीरेस्थिताश्चये ॥ गंगांनबहुमन्यंतेतेस्युर्निरयगामिनः ॥ ८० ॥ मांचत्वांचैवयोद्वेष्टिगंगांचपुरुषाधमः ॥ स्वकीयैःपुरुषैःसार्धंसघोरंनरकंव्रजेत् ॥ ८१ ॥ षष्टिर्गणसहस्राणिगंगांरक्षंतिसर्वदा ॥ अभक्तानांचपापानांवासेविघ्नंप्रकुर्वते ॥ ८२ ॥ कामक्रोधमहामो हलोभादिनिशितैःशरैः ॥ घ्नंतितेषांमनस्तत्रस्थितिंचापनयंतिच ॥ ८३ ॥

ष्ण्वोःप्रासादकर्ता ॥ तस्यतयोरालयस्यसंमार्जनादिकृद्रजोवारणादिकृत् ॥ आदिपदेनोक्षणलेपनादीनिगृह्यंते ॥ ७८ ॥ तिर्यग्योनिगतोपिवेत्यपिशब्दाज्जलजंत्वादीनिगृह्यंते ॥ मर्त्योमरण धर्मायःकश्चिदपीत्यर्थः ॥ ७९ ॥ गंगांनबहुमन्यंतेसर्वतीर्थाधिकांनमन्यंतइत्यर्थः ॥ ८० ॥ ८१ ॥ ८२ ॥ मोहोऽविवेकस्तस्यमहत्त्वंनामतत्त्वज्ञानमंतरेणापारिच्छेद्यत्वम् ॥ घ्नंत्युच्चाटयंति ॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रगंगातीरे ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥८८ ॥ तिथिनक्षत्रपूर्वादियत्संकल्पवाक्यंतन्नापेक्ष्यमित्यर्थः ॥ पर्वादीतिपाठेआदिपदेनादिनादिकंगृह्यते ॥८९॥ भागीरथीतीरंसिद्धिक्षेत्रम् ॥ तथाचोक्तम् ॥ गंगातीरेवसेन्नित्यंभिक्षुर्मोक्षपरायणः॥ सिद्धिक्षेत्रंतुतज्ज्ञेयंयावद्धनुःशतत्रयमिति ॥ यस्तुभागीरथींगंगांसुखसेव्यांनसेवतइतिक्वचित्पाठस्तदातुगंगामित्युक्तेकावेर्यादावतिप्रसंगःस्यादेतदुक्तंभागीरथीमिति ॥ कावेरीतुंगभद्राचकृष्णावेणीचगौतमी ॥ भागीरथीतिविख्याताःपंचगंगाःप्रकीर्तिताइति॥तासामपिगंगात्वात् ॥ भागीरथीमित्युक्तेभगीरथेनाधिष्ठितांभागीरथीमित्ययोध्यापुर्यादावपियातितद्व्यवच्छेदार्थमाह ॥ गंगामिति ॥ ९० ॥ ९१ ॥ प्रतिकृतेःप्रतिमायाः ॥ ९२ ॥ वाचकप्रीणनाद्धनैर्द्रव्यैर्वाचकस्यसन्तर्पणादित्यर्थः ॥ ९३ ॥ ९४ ॥ मंत्रजप्तैःॐनमःशिवायेत्यने

गंगांसमाश्रयेद्यस्तुसमुनिःसचपंडितः ॥ कृतकृत्यःसविज्ञेयःपुरुषार्थचतुष्टये ॥ ८४ ॥ गंगायांचसकृत्स्नातोहयमेधफलंलभेत् ॥ तर्पयंश्चपितॄंस्तत्र तारयेन्नरकार्णवात् ॥ ८५ ॥ नैरंतर्येणगंगायांमासंयःस्नातिपुण्यवान् ॥ शक्रलोकेसवसतियावच्छक्रःसपूर्वजः ॥ ८६ ॥ अब्दंयःस्नातिगंगायांनैरंतर्येणपुण्यभाक् ॥ विष्णोर्लोकंसमासाद्यससुखंसंवसेन्नरः ॥ ८७ ॥ गंगायांस्नातियोमर्त्योयावज्जीवंदिनेदिने ॥ जीवन्मुक्तःसविज्ञेयोदेहांतेमुक्तएवसः ॥ ॥८८॥ तिथिनक्षत्रपर्वादिनापेक्ष्यंजाह्नवीजले ॥ स्नानमात्रेणगंगायांसंचिताघंविनश्यति ॥ ८९ ॥ पंडितोपिसमूर्खःस्याच्छक्तियुक्तोप्यशक्तिकः ॥ यस्तुभागीरथीतीरंसुखसेव्यंनसंश्रयेत् ॥ ९० ॥ किंवायुषाप्यरोगेणविकासिन्याथकिंश्रिया ॥ किंवाबुद्ध्याविमलयायदिगंगांनसेवते ॥ ९१ ॥ यःकारयेदायतनंगंगाप्रतिकृतेर्नरः ॥ भुक्त्वासभोगान्प्रेत्यापियातिगंगासलोकताम् ॥ ९२॥ शृण्वंतिमहिमानंयेगंगायानित्यमादरात् ॥ गंगास्नानफलं तेषांवाचकप्रीणनाद्धनैः ॥९३॥ पितॄनुद्दिश्ययोलिंगंस्नपयेद्गांगवारिणा ॥ तृप्ताःस्युस्तस्यपितरोमहानिरयगाअपि ॥ ९४ ॥ अष्टकृत्वोमंत्रजप्तैर्वस्त्रपूतैः सुगंधिभिः ॥ प्रोचुर्गांगजलैःस्नानंघृतस्नानाधिकंबुधाः ॥ ९५ ॥ अष्टद्रव्यविमिश्रेणगंगातोयेनयःसकृत् ॥ मागधप्रस्थमात्रेणताम्रपात्रस्थितेनच ॥ ९६ ॥ भानवेऽर्घंप्रदद्याच्चस्वकीयपितृभिःसह ॥ सोतितेजोविमानेनसूर्यलोकेमहीयते ॥ ९७ ॥ आपःक्षीरंकुशाग्राणिघृतंमधुगवांदधि ॥ रक्तानि करवीराणिरक्तचंदनमित्यपि ॥ ९८ ॥ अष्टांगार्घोयमुद्दिष्टस्त्वतीवरवितोषणः ॥ गांगैर्वाभिःकोटिगुणोज्ञेयोविष्णोऽन्यवारितः ॥ ९९ ॥ गंगातीरे स्वशक्त्यायःकुर्याद्देवालयंसुधीः ॥ अन्यतीर्थप्रतिष्ठातोभवेत्कोटिगुणंफलम् ॥ १०० ॥ अश्वत्थवटचूतादिवृक्षारोपेणयत्फलम् ॥ कूपवापीतडागादिप्रपासत्रादिभिस्तथा ॥ १ ॥

नवक्ष्यमाणांविंशत्यक्षरगंगामंत्रेणवाभिमंत्रितैः ॥ स्नानंलिंगादेरितिशेषः ॥ ९५ ॥ अष्टद्रव्यविमिश्रेणेतिश्लोकद्वयंवाक्यम् ॥ अष्टद्रव्याण्यापइत्यनेनस्वयंव्याकरिष्यति ॥ मागधप्रस्थमात्रेणसार्धद्वादशपलपरिमितेन ॥९६॥९७॥ अष्टद्रव्याण्येवाह ॥ आपइतिसार्धेन ॥ क्षीरंघृतंदधीतित्रयाणांगवामित्यनेनसंबंधः ॥९८॥ गांगैरित्यर्धवाक्यम् ॥ कोटिगुणोऽर्घइतिशेषः ॥९९॥ गंगातीरइति ॥ अन्यतीर्थप्रतिष्ठातःपुण्यतीर्थेषुप्रतिष्ठापनात्करणादित्येतत् ॥ देवालयस्येतिशेषः ॥१००॥ अश्वत्थेतिसार्धवाक्यम् ॥ चूतादीत्यादिपदेनापिचुमंदादयोगृह्यंते ॥ तथाचोक्तम् ॥ अश्वत्थमेकंपिचुमंदमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंन्यग्रोधमेकंदशतिंतिणीश्च ॥ कपित्थविल्वामलकत्रयंचपंचाम्रवापीनरकंनपश्येदिति ॥ कूपउदपानः ॥ वापीदीर्घिका॥तडागःपद्माकरः ॥ आदिपदेनकासारादयोगृह्यंते ॥ प्रपापानीयशालिका ॥ सत्रंयज्ञःसदान्नदानंवा ॥ आदिपदेनब्राह्मणतर्पणादीनिगृह्यंते ॥ १ ॥ पुष्पवाट्यादीत्यादिशब्देनाम्रवाट्यादयोगृह्यंते ॥ २ ॥ गंगागंडूषपानतःगंगाजलस्यचुलुकमात्रपानात् ॥ ३ ॥ ४ ॥ अक्षयश्चिरकालावस्थायि॥अपीतिनिश्चये ॥ ५ ॥ पादुकायुग्मंस्थंडिलादौचंदनादिनिर्मितम् ॥ ६ ॥ ७ ॥ ८ ॥ गंगाभजनशीलस्येतिश्लोकद्वयंवाक्यम् ॥९॥ दुःखसंकटेदुःखसंबाधे ॥ ११० ॥ दीर्घायुष्यमित्यादिद्वितीयांतेषुचतुर्षुपदेषुप्राप्नोतीतिशेषः ॥ लभेदिति वैक्रिययावान्वयः ॥ वासोभिरित्यादितृतीयांतेषुचतुर्षुपदेषुचगंगातटइत्यनुषज्जते ॥ वासोभिर्दत्तैरितिशेषः ॥११॥१२ ॥ धेनुमि

अन्यत्रयद्भवेत्पुण्यंतद्गंगादर्शनाद्भवेत् ॥ पुष्पवाट्यादिभिश्चापिगंगास्पर्शंततोऽधिकम् ॥ २ ॥ कन्यादानेनयत्पुण्यंयत्पुण्यंगोऽन्नदानतः ॥ तत्पुण्यंस्याच्छतगुणंगंगागंडूषपानतः ॥ ३ ॥ चांद्रायणसहस्रेणयत्पुण्यंस्याज्जनार्दन ॥ ततोऽधिकफलंगंगाऽमृतपानादवाप्नुयात् ॥ ४ ॥ भक्त्यागंगावगाहस्य किमन्यत्फलमुच्यते ॥ अक्षयःस्वर्गवासोपिनिर्वाणमथवाहरे ॥ ५ ॥ गंगायाःपादुकायुग्मंनित्यमर्चंतियोनरः ॥ आयुःपुण्यंधनंपुत्रान्स्वर्गमोक्षौच विंदति ॥ ६ ॥ नास्तिगंगासमंतीर्थंकलिकल्मषनाशनम् ॥ नास्तिमुक्तिप्रदंक्षेत्रमविमुक्तसमंहरे ॥ ७ ॥ गंगास्नानरतंमर्त्यंदृष्ट्वैवयमकिंकराः ॥ दिशोदशपलायंतेसिंहंदृष्ट्वायथामृगाः ॥ ८ ॥ गंगाभजनशीलस्यगंगातटनिवासिनः ॥ अर्चांकृत्वायथान्यायमश्वमेधफलंलभेत् ॥ ९ ॥ गोभूहिरण्यदानेन भक्त्यागंगातटेशुभे ॥ नरोनजायतेभूयःसंसारेदुःखकंटके ॥११० ॥ दीर्घायुष्यंचवासोभिर्ज्ञानंपुस्तकदानतः ॥ अन्नदानेनसंपत्तिकीर्तिकन्याप्रदानतः ॥ ११ ॥ अन्यत्रयत्कृतंकर्मव्रतंदानंजपस्तपः ॥ गंगातटेतुतत्सर्वंहरेकोटिगुणंभवेत् ॥ १२ ॥ धेनुंसवत्सांयोदद्याद्गंगातीरेविधानतः ॥ गोरोमसंख्ययाविष्णोयुगान्सर्वसमृद्धिमान् ॥ १३ ॥ गोलोकेममलोकेवाकामधेनुप्रदानतः ॥ भुंजानःसर्वकामांस्तुदिव्यान्नानाविधान्बहून् ॥ १४ ॥ देवानामप्यलभ्यांश्चभुक्तातुसहबांधवैः ॥ पितृभिश्चसुहृद्भिश्चसर्वरत्नविभूषितः ॥ १५ ॥ जायतेसत्कुलेपश्चाद्धनधान्यसमाकुले ॥ रत्नकांचनसंपन्नेशीलविद्यासमन्विते ॥ १६ ॥ भुक्त्वासविपुलान्भोगान्पुत्रपौत्रसमन्वितः ॥ पुनर्गंगांसमासाद्यकाश्यामुत्तरवाहिनीम् ॥ १७ ॥ विश्वेश्वरंसमाराध्यप्राग्जनुर्वासनावशात् ॥ कालादेहांतमासाद्यब्रह्मसंपद्यतेततः ॥ १८ ॥

तिपड्भिःश्लोकैर्वाक्यम् ॥ सवत्सांवत्ससहिताम् ॥ योनैचिकीमितिक्वचित्पाठस्तत्रनैचिकींगोषुमध्येउत्तमाम् ॥ उत्तमागोषुनैचिकीत्यमरः ॥ योद्विमुखीमितिचान्यत्र ॥ तत्रद्विमुखींप्रसूयमानाम् ॥ पयस्विनीमितिचापरत्र ॥ तत्रपयस्विनींवहुदुग्धदोग्ध्रीम् ॥ १३ ॥ कामधेनुप्रदानतःपूर्वोक्तायाःकामधेनोर्दानात् ॥ कामधेनुव्रजावृतइतिक्वचित् ॥ तत्रगोलोकेकामधेनुसमूहेनवृतःममलोकेचेन्मदीयैर्गणैर्वृतइतिज्ञेयम्॥उभयत्रवातथा ॥१४॥१५॥ शीलंसदाचारः विद्याउपासनादिरूपा ताभ्यांसमन्विते ॥१६॥१७॥ प्राग्जनुर्वासनावशात्पूर्वजन्मसंस्काराभ्यासात् ॥ ब्रह्मविदेहकैवल्यम् ॥१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवर्तनद्वयमितिपंचभिःश्लोकैर्वाक्यम् ॥ विवर्तनद्वयंनिवर्तनद्वयमित्यर्थः ॥ अयमेववापाठः ॥ षष्टिदंडप्रमाणमप्यंशमित्यर्थः ॥ तदुक्तम् ॥ चतुर्हस्तोभवेद्दंडस्त्रिंशद्दंडानिवर्तनामिति ॥ १९ ॥
॥ १२० ॥ २१ ॥ मोचयित्वामोक्षंदापयित्वापांचभौतिकींपंचभूताकारेणपरिणतामविद्यांछित्वादेहेऽभिमानंत्यक्त्वेत्यर्थः ॥ पंचपर्विकामितिपाठेतमोमोहोमहामोहस्तामिस्रोह्यंधसंज्ञितइतिविष्णु
पुराणोक्तानिपंचपर्वाणियस्यास्तामित्यर्थः ॥ २२ ॥ युंजानोघटयन्कुर्वन्नित्येतत् ॥ योगंजीवपरमात्मनोरैक्यम् ॥ अष्टांगयोगव्यवच्छेदार्थमुत्तममितिविशेषणम् ॥ अथवाऽविमुक्तप्राप्यदेहावसाने
परंकैवल्यंगच्छतीति ॥ २३ ॥ सुवर्णेतिश्लोकचतुष्टयंवाक्यम् ॥ सुवर्णमात्रमपिअशीतिरक्तिकामात्रमपिसुवर्णंस्वर्णंसुवर्णायशोभनवर्णायब्राह्मणायेत्यर्थः ॥ सुवर्णंशोभनवर्णमत्युत्कृष्ट
मित्यर्थः ॥ २४ ॥ खचितेसंबद्धे ॥ २५ ॥ ब्रह्मांडांतरसंस्थेषुसर्वलोकेष्वितिसंबंधः ॥ यावदाभूतसंप्लवंभूतानांप्रलयावधिपर्यंतमित्यर्थः ॥ यावदाहूतसंप्लवमितिपाठेआहूतपदेनाहुतिकार्यंजगदु

विवर्तनद्वयमपिभूमेर्भागीरथीतटे ॥ नरोददातियोभक्त्यातस्यपुण्यफलंशृणु ॥ १९ ॥ तद्भूमित्रसरेणूनांसंख्ययायुगमानया ॥ महेंद्रचंद्रलोकेषुभुक्त्वाभो
गान्मनःप्रियान् ॥ १२० ॥ सप्तद्वीपपतिर्भूत्वामहाधर्मपरायणः ॥ नरकस्थान्पितन्सर्वान्प्रापयेत्रिदिवंहरे ॥२१॥ स्वर्गस्थांश्चपितॄन्सर्वान्मोचयित्वाम
हाद्युतिः ॥ अंतेज्ञानासिनाछित्त्वाह्यविद्यांपांचभौतिकीम् ॥ २२ ॥ परंवैराग्यमापन्नोयुंजानोयोगमुत्तमम् ॥ प्राप्याथवाविमुक्तंचपरंब्रह्माधिगच्छति ॥
॥ २३ ॥ सुवर्णमात्रमपियःसुवर्णंसंप्रयच्छति ॥ सुवर्णायसुवर्णंचहरेभागीरथीतटे ॥ २४ ॥ सहेमरत्नखचितेविमानेसर्वगेशुभे ॥ सर्वैश्वर्यसमायुक्तःसर्व
लोकेषुपूजितः ॥ २५ ॥ ब्रह्मांडांतरसंस्थेषुभुंजन्भोगान्मनोरमान् ॥ सर्वैःसंपूजितोविष्णोयावदाभूतसंप्लवम् ॥ २६ ॥ एकराट्चततोभूत्वाजंबूद्वीपे
प्रतापवान् ॥ ततोऽविमुक्तमासाद्यपदंनिर्वाणमृच्छति ॥ २७ ॥ जन्मर्क्षेतुकृतेस्नानेगंगायांभक्तिपूर्वकम् ॥ जन्मप्रभृतिपापौघात्संचितान्मुच्यतेक्षणात्
॥ २८ ॥ वैशाखेकार्तिकेमाघेगंगास्नानंसुदुर्लभम् ॥ दर्शेशतगुणंपुण्यंसंक्रांतौचसहस्रकम् ॥२९॥ चंद्रसूर्यग्रहेलक्षंव्यतीपातेत्वनंतकम् ॥ अयुतंविषुवे
चैवनियुतंत्वयनद्वये ॥ १३० ॥ सोमग्रहःसोमदिनेरविवाररवग्रहः ॥ तच्चूडामणिपर्वाख्यंतत्रस्नानमसंख्यकम् ॥ ३१ ॥ स्नानंदानंजपोहोमो
यद्यच्चूडामणौकृतम् ॥ तदक्षयंसर्वमिहविष्णोभागीरथीतटे ॥ ३२ ॥ श्रद्धयाभक्तियुक्तस्तुगंगास्नात्वाविधानतः ॥ ब्रह्महापिविशुद्ध्येतकिंपुनस्त्वं
न्यपातकी ॥ ३३ ॥ कृमिकीटपतंगाद्यायेमृताजाह्नवीतटे ॥ कूलात्पतंतियेवृक्षास्तेपियांतिपरांगतिम् ॥ ३४ ॥ ज्येष्ठेमासिसितेपक्षेदशम्यांहस्तसं
युते ॥ गंगातीरेतुपुरुषोनारीवाभक्तिभावतः ॥ ३५ ॥

च्यते ॥ दीर्घश्छांदसः ॥ तथाचश्रुतिः ॥ अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायुतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ॥ आहुतिकार्यप्रलयपर्यंतमित्यर्थः ॥ २६ ॥ एकएवराजतइत्येक
राट्चक्रवर्तीत्यर्थः ॥ २७ ॥ २८ ॥ दर्शेऽमावास्यायाम् ॥ २९ ॥ अमावास्यायुक्तोरविवासरोव्यतीपातोयोगविशेषोवा ॥ अयुतंविषुवेचेति ॥ विषुवेमेषसंक्रमणे ॥ अक्षयंवैधृतौचैवेतिपाठेवै
धृतिरपियोगविशेषएव ॥ नियुतंलक्षम् ॥ एकंशतसहस्रंतुनियुतंलक्षमुच्यतइतिब्रह्मांडदर्शनात् ॥ १३० ॥ असंख्यकमसंख्यातफलजनकमित्यर्थः ॥ ३१ ॥ इहजगतिभागीरथीतटेभागीरथ्यांतच्च
टेचेत्यर्थः ॥ तत्रतीरंधनुःशतत्रयपरिमितमितिज्ञातव्यम् ॥ गंगातीरेवसेन्नित्यंभिक्षुर्मोक्षपरायणः ॥ सिद्धिक्षेत्रंतुतज्ज्ञेयंयावद्धनुःशतत्रयमितिवचनादित्युक्तमेव ॥ ३२ ॥ ३३ ॥ ३४ ॥ ज्येष्ठइतिस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादश्लोकोवाक्यम् ॥ हस्तसंयुतेहस्तनक्षत्रसंयुक्तइतिज्येष्ठमासस्यसितपक्षस्यवाविशेषणम् ॥ हस्तसंयुतेहस्तसंयुतायामितिवा ॥ ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुतेतिभविष्यदर्शनात् ॥ ३५ ॥ गंगा
मितिपादोनश्लोकद्वयंवाक्यम् ॥ गंगांदशविधैर्दशप्रकारैःपुष्पादिभिर्दशकृत्वोदशवारान्पूजयेदित्यन्वयः ॥ कथंभूतैःपुष्पादिभिः ॥ दशदशोन्मितैः प्रतिवारंदशदशसंख्ययापरिमितैः ॥ ३६ ॥
दशांगधूपानांलक्षणंचैतत् ॥ षड्भागकुष्ठोद्विगुणोगुडश्चलाक्षात्रयंपञ्चनखस्यभागाः ॥ हरीतकीसर्जरसश्चमांसीभागत्रयंचैवतुशैलजस्य ॥ घनस्यचत्वारिपुरस्यचैकोदशांगधूपःकथितोमुनींद्रैरि
ति ॥ ३७ ॥ प्रसृतीरत्रांजलीन् ॥ मन्त्रतोमंत्रेण ॥ ३८ ॥ मंत्रंदर्शयन्मन्त्रमुद्धरति नमइतिसार्धेन ॥ ३९ ॥ मनुनामंत्रेण ॥ ४० ॥ ४१ ॥ पंचामृतेनविशोधितांस्नापिताम् ॥ ध्यानमाह
चतुर्भुजामितिसार्धत्रयेण ॥ ततोध्यायेदितिद्वितीयश्लोकस्यप्रथमंचरणंप्रथमतोज्ञातव्यम् ॥ ४२ ॥ लावण्यंसौंदर्यंतदेवामृतंतस्यनिष्पंदःस्रवणम् ॥ निष्यंदेतिपाठेपिसएवार्थस्तेनसंशीलंती

निशायांजागरंकुर्याद्गंगांदशविधैर्हरे ॥ पुष्पैःसुगंधैर्नैवेद्यैःफलैर्दशदशोन्मितैः ॥३६॥ प्रदीपैर्दशभिर्धूपैर्दशांगैर्गरुडध्वज ॥ पूजयेच्छ्रद्धयाधीमान्दशकृत्वो
विधानतः ॥ ३७ ॥ साज्यांस्तिलान्क्षिपेत्तोयेगंगायाःप्रसृतीर्दश ॥ गुडसक्तुमयान्पिंडान्दद्याच्चदशमंत्रतः ॥ ३८ ॥ नमःशिवायैप्रथमंनारायण्यैपदं
ततः ॥ दशहरायैपदमितिगंगायैमंत्रएववै ॥ ३९ ॥ स्वाहांतःप्रणवादिश्चभवेद्विंशाक्षरोमनुः ॥ पूजादानंजपोहोमोऽनेनैवमनुनास्मृतः ॥ ४० ॥
हेम्नारूप्येणवाशक्त्यागंगामूर्तिंविधायच ॥ वस्त्राच्छादितवक्त्रस्यपूर्णकुंभस्यचोपरि ॥ ४१ ॥ प्रतिष्ठाप्यार्चयेद्देवींपंचामृतविशोधिताम् ॥ चतुर्भुजांत्रिने
त्रांचनदीनदनिषेविताम् ॥ ४२ ॥ लावण्यामृतनिष्पंदसंशीलद्गात्रयष्टिकाम् ॥ पूर्णकुंभसितांभोजवरदाभयसत्कराम् ॥ ४३ ॥ ततोध्यायेत्सुसौम्यां
चचंद्रायुतसमप्रभाम् ॥ चामरैर्वीज्यमानांचश्वेतच्छत्रोपशोभिताम् ॥ ४४ ॥ सुधाप्लावितभूपृष्ठांदिव्यगंधानुलेपनाम् ॥ त्रैलोक्यपूजितपदांदेवर्षिभिर
भिष्टुताम् ॥ ४५ ॥ ध्यात्वासमर्च्यमंत्रेणधूपदीपोपहारतः ॥ मांचत्वांचविधिंब्रध्नंहिमवंतंभगीरथम् ॥ ४६ ॥ प्रतिमाग्रेसमभ्यर्च्यचंदनाक्षतनिर्मितान् ॥
दशप्रस्थतिलान्दद्याद्दशविप्रेभ्यआदरात् ॥ ४७ ॥ पलंचकुडवःप्रस्थआढकोद्रोणएवच ॥ धान्यमानेनबोद्धव्याःक्रमशोमीचतुर्गुणाः ॥ ४८ ॥
मत्स्यकच्छपमंडूकमकरादिजलेचरान् ॥ हंसकारंडवबकचक्रटिट्टिभसारसान् ॥ ४९ ॥

गात्रमेवयष्टिकायस्यास्ताम् ॥ पूर्णकुम्भसिताम्भोजाभ्यांसहितावरदाभयाभक्तानांभयनिवारकाःसंतःकरायस्यास्ताम् ॥ ४३ ॥४४॥ ४५ ॥ विधिंब्रह्माणम् ॥ ब्रध्नंसूर्यम् ॥ ४६ ॥ ४७ ॥ प्रस्थस्य
मानन्दर्शयन्पलादीनांचतुर्णामपिमानमाह ॥ पलंचेति ॥ अमीपलादयः ॥ धान्यमानेनमुष्टिपरिमितधान्यप्रमाणेन ॥ पलद्वयंतुप्रसृतिर्मुष्टिरेकंपलंस्मृतम् ॥ अष्टमुष्टिभवेत्किंचित्किंचिदष्टौतुपुष्क
लमितिस्मृतेः ॥ क्रमाच्चतुर्गुणाबोद्धव्याज्ञातव्याइत्यर्थः ॥ अयमर्थः ॥ मुष्टिपरिमितंधान्यमेकंपलम् ॥ चतुर्भिःपलैरेकःकुडवः ॥ चतुर्भिःकुडवैरेकःप्रस्थः ॥ यद्यपिपलद्वयंतुप्रसृतिरित्यु
क्तंतथापिमतभेदादयंपरिमाणभेदइतिज्ञातव्यम् ॥ चतुर्भिःप्रस्थैरेकआढकः ॥ चतुर्भिराढकैरेकोद्रोणइति ॥ ४८ ॥ कारंडवःपक्षिविशेषः ॥ चक्रश्चक्रवाकः ॥ टिट्टिभःपक्षिविशेषः ॥ सारसः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुष्करः ॥ ४९ ॥ स्वर्णरूप्यताम्रपृष्ठविनिर्मितान्स्वर्णादिमयपात्रोपरिचन्दनादिलिखितानित्यर्थः ॥ पिष्टविनिर्मितानितिक्वचित् ॥ १५० ॥ ५१ ॥ ५२ ॥ परुषमेवपारुष्यंकठोरवचनमित्यर्थः ॥
असंबद्धप्रलापोनिष्प्रयोजनवाग्व्यवहारः ॥ ५३ ॥ वितथाभिनिवेशोमिथ्याभूतेषुकार्येष्वाग्रहः ॥ ५४ ॥ ५५ ॥ उद्धरेदिति ॥ घोरान्नरकादित्यन्वयः ॥ ५६ ॥ स्तोत्रमेवाह ॥ ॐनमइति ॥ मंग
लार्थेॐकारः ॥ शिवायैनिःश्रेयसरूपिण्यै ॥ भगीरथःस्वर्गाद्गामानीतवानितिगंगा ॥ तदुक्तंभविष्ये ॥ यस्माद्भगीरथोदेविस्वर्गाद्गांत्वामिहानयत् ॥ अतस्त्वंमुनिभिःसर्वैर्गंगेतिपरिगीयसइति ॥
शिवदायैनिःश्रेयसदायै ॥ नमोनमइत्यादरेवीप्सा ॥ विष्णुरूपिण्यैवैष्णव्यै ॥ ब्रह्ममूर्त्यैसावित्र्यै ॥ ५७ ॥ रुद्ररूपिण्यैमाहेश्वर्यै ॥ विष्ण्वादित्रितयरूपिण्याइतिवार्थः ॥ शंकरसंबंधिन्यै
शांकर्यै ॥ सर्वदेवस्वरूपिण्यैसर्वदेवतामय्याइत्यर्थः ॥ भेषजमूर्तयेसंसाररोगस्येतिशेषः ॥ यद्वा ॥ रोगमात्रस्यौषधमूर्तये ॥ उक्तंच ॥ शरीरेजर्जरीभूतेव्याधिभिःपरिपीडिते ॥ औषधंजाह्नवी
तोयंवैद्योनारायणोहरिरिति ॥ ५८ ॥ नकेवलंसंसाररोगस्यरोगमात्रस्यवाऔषधरूपायैकिंतुसर्वस्यप्राणिमात्रस्यसर्वेषांरोगाणांभिषक्छ्रेष्ठचैश्रेष्ठवैद्यरूपायै ॥ स्थास्नुभ्योवृक्षादिभ्योजंगमे

यथाशक्तिस्वर्णरूप्यताम्रपृष्ठविनिर्मितान् ॥ अभ्यर्च्यगंधकुसुमैर्गंगायांप्रक्षिपेद्व्रती ॥ १५० ॥ एवंकृत्वाविधानेनवित्तशाठ्यविवर्जितः ॥ उपवासीवक्ष्यमाणैर्दशपापैःप्रमुच्यते ॥ ५१ ॥ अदत्तानामुपादानंहिंसाचैवाविधानतः ॥ परदारोपसेवाचकायिकंत्रिविधंस्मृतम् ॥ ५२ ॥ पारुष्यमनृतंचैवपैशुन्यंचैवसर्वशः ॥ असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधम् ॥ ५३ ॥ परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनम् ॥ वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतम् ॥ ॥ ५४ ॥ एतैर्दशविधैःपापैर्दशजन्मसमुद्भवैः ॥ मुच्यतेनात्रसंदेहःसत्यंसत्यंगदाधर ॥ ५५ ॥ उद्धरेन्नरकात्पूर्वान्दशघोराद्दशावरान् ॥ वक्ष्यमाणमिदंस्तोत्रंगंगाग्रेश्रद्धयाजपेत् ॥ ५६ ॥ ॐनमःशिवायैगंगायैशिवदायैनमोनमः ॥ नमस्तेविष्णुरूपिण्यैब्रह्ममूर्त्यैनमोस्तुते ॥ ५७ ॥ नमस्तेरुद्ररूपिण्यैशांकर्यैतेनमोनमः ॥ सर्वदेवस्वरूपिण्यैनमोभेषजमूर्त्तये ॥ ५८ ॥ सर्वस्यसर्वव्याधीनांभिषक्श्रेष्ठ्यैनमोस्तुते ॥ स्थास्नुजंगमसंभूतविषहंत्र्यैनमोस्तुते ॥ ५९ ॥ संसारविषनाशिन्यैजीवनायैनमोस्तुते ॥ तापत्रितयसंहंत्र्यैप्राणेश्यैतेनमोनमः ॥ १६० ॥ शांतिसंतानकारिण्यैनमस्तेशुद्धमूर्तये ॥ सर्वसंशुद्धिकारिण्यैनमःपापारिमूर्तये ॥६१॥ भुक्तिमुक्तिप्रदायिन्यैभद्रदायैनमोनमः ॥ भोगोपभोगदायिन्यैभोगवत्यैनमोस्तुते ॥ ६२ ॥ मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः ॥ नमस्त्रैलोक्यभूषायैत्रिपथायैनमोनमः ॥ ६३ ॥

भ्यःसर्पादिभ्यश्चसंभूतंयद्विषंतस्यहंत्र्यै ॥ ५९ ॥ संसारेयद्विषंसंसारएववाविषंतस्यनाशिन्यै ॥ जीवनायैजीवयतीतिजीवनाजलस्वरूपावातस्यैजीवनरूपायाइतिवा ॥ तापत्रितयसंहंत्र्यै
आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयस्यसम्यक्छेत्र्यै ॥ प्राणेश्यैजीवरूपायैअंतर्यामिरूपायैइतिवा ॥ प्राणस्यप्राणइतिश्रुतेः ॥ १६० ॥ शांतिरारोग्यम् ॥ संतानोवंशः अथवाशांतेः
संतानःशांतिपरंपरातत्कारिण्यैशांतिसंतानकारिण्यै ॥ शुद्धमूर्तयेनिर्मलमूर्तये ब्रह्ममूर्तयइतिवा ॥ शुद्धमपापविद्धमितिश्रुतेः ॥ सर्वस्यप्राणिमात्रस्यसंशुद्धिकारिण्यै ॥ पापस्यपापमात्रस्यशत्रुमूर्तये ॥
॥ ६१ ॥ भुक्तिमुक्तिप्रदायिन्यैसुखमोक्षप्रदायिन्यै ॥ भद्रदायैकल्याणदायै ॥ भुज्यतेनेनेतिभोगःसाधनम् उपभोगःसुखंफलमित्येतत् वैपरीत्यंवा ॥ यद्वा भोगऐहिकउपभोगःपारलौकिकस्तद्दा
यिन्यै ॥ रातेर्दातुःपरायणमितिश्रुतेः ॥ भोगवत्यैपातालांतर्गतसरिद्रूपिण्यै ॥ भोगवतीतिचाप्यइतिभागवतदर्शनात् ॥ ६२ ॥ मंदाकिन्यैवियद्गंगायै ॥ स्वर्गदायैआनंददात्र्यै ॥ त्रैलोक्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुशुक्लेषुशुद्धेषुगंगाद्वारप्रयागसागर
भूपायैत्रैलोक्यस्यालंकरणरूपायै ॥ त्रिपथायैत्रिपुलोकेषुपंथामार्गोयस्याःसातथा त्रयाणांधर्मार्थकाममोक्षाणांपंथामार्गभूताइतिवातद्रूपायै ॥ ६३ ॥
संगमेषुसम्यक्स्थासंस्थास्थितिर्यस्यास्तस्यै ॥ तदुक्तंवाराहे ॥ सर्वत्रसुलभागंगात्रिषुस्थानेषुदुर्लभा ॥ गंगाद्वारेप्रयागेचगंगासागरसंगमइति ॥ यद्वा त्रिषुकालेषुशुक्लेनशुद्धेनब्रह्मरूपेणेतियावत
सम्यक्स्थितिर्यस्यास्तस्यै ॥ तदुक्तम् ॥ योऽसौनिरंजनोदेवश्चित्स्वरूपीजनार्दनः ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयइति ॥ यद्वा महेश्वरचंद्रमंडलहिमालयेषुकैलासेषुवात्रिशुक्लेषुसंस्थायै ॥
यद्वा त्रिशुक्लवच्छंखकुंदेंदुवत्संस्थाआकृतिर्यस्यास्तस्यै ॥ तथाचश्रूयतेगंगास्तोत्रे॥ शंखकुंदेंदुधवलामहापातकनाशिनीति॥क्षमावत्यैक्षमाकर्त्र्यै ॥ त्रिहुताशनसंस्थायैदक्षिणाग्निर्गार्हपत्याहवनीयौत्रयो
त्रयस्तेषुसंस्थायै ॥ तेजोवत्यैदीप्तिमत्यै ॥ ६४ ॥ नंदायैअलकनंदायै ॥ भामासत्यभामेतिवत् ॥ लिंगधारिण्यैशिवलिंगधारिण्यै ॥ सिद्धयःसिद्धलिंगानिस्पर्शलिंगान्यनेकशः ॥ गंगाजलं
तस्तिष्ठंतीत्यत्रैवोक्तिः ॥ सुधाधारात्मनेअमृतस्रोतोरूपायै ॥ विश्वमुख्यायैब्रह्मांडश्रेष्ठायै ॥ रेवत्यैनक्षत्ररूपायै रेवतराजपुत्र्यैइतिवा ॥ ६५ ॥ बृहत्यैपरिपूर्णायै ॥ लोकधात्र्यै
प्राणिमात्रजनन्यैपुष्टिकारिण्याइतिवा ॥ विश्वमित्रायैप्राणिमात्रस्यहितायै ॥ नंदिन्यैसमृद्धिकारिण्यैवसिष्ठकामधेनुरूपायैइतिवा ॥ ६६ ॥ पृथ्व्यैभूमिरूपायै ॥ शिवामृतायैनिर्मलजलायै ॥

नमस्त्रिशुक्लसंस्थायैक्षमावत्यैनमोनमः ॥ त्रिहुताशनसंस्थायैतेजोवत्यैनमोनमः ॥ ६४ ॥ नंदायैलिंगधारिण्यैसुधाधारात्मनेनमः ॥ नमस्तेविश्वमुख्या
यैरेवत्यैतेनमोनमः ॥ ६५ ॥ बृहत्यैतेनमस्तेस्तुलोकधात्र्यैनमोस्तुते ॥ नमस्तेविश्वमित्रायैनंदिन्यैतेनमोनमः ॥ ६६ ॥ पृथ्व्यैशिवामृतायैचसुवृषायै
नमोनमः ॥ परापरशताढ्यायैतारायैतेनमोनमः ॥ ६७ ॥ पाशजालनिकृंतिन्यैअभिन्नायैनमोस्तुते ॥ शांतायैचवरिष्ठायैवरदायैनमोनमः ॥६८॥ उग्रायै
सुखजग्ध्यैचसंजीविन्यैनमोस्तुते ॥ ब्रह्मिष्ठायैब्रह्मदायैदुरितघ्न्यैनमोनमः ॥ ६९ ॥ प्रणतार्तिप्रभंजिन्यैजगन्मात्रेनमोस्तुते ॥ सर्वापत्प्रतिपक्षायैमं
गलायैनमोनमः ॥ ७० ॥ शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते ॥ ७१ ॥ निर्लेपायैदुर्गहंत्र्यैदक्षायैतेनमोनमः ॥
परापरपरायैचगंगेनिर्वाणदायिनि ॥ ७२ ॥

सुवृषायैशोभनधर्मरूपायै ॥ परेब्रह्मादयःअपरेऽस्मदादयस्तेषांशतैराढ्याव्याप्ताऽपरिमितसमष्टिव्यष्टिजीवाधारेत्यर्थः ॥ यद्वा परेब्रह्माणोऽपरेअनुत्कृष्टायेभ्यस्तादृशानांपरमहंसानांब्रह्मविदांशतै
राढ्याव्याप्तासेवितेतियावत्तस्यै ॥ तारायैतारयतीतितारामप्रणवोवातारस्तद्रूपायै ॥ तेतुभ्यम् ॥ ६७ ॥ पाशश्चतुर्विंशतितत्त्वान्येवजालमानायोबंधनहेतुत्वात्तन्निकृंतिन्यै ॥ अभिन्नायैभेदरहितायै ॥
शांतायैनिरुपद्रवायै ऋष्यशृंगभार्यारूपायैवा ॥ वरिष्ठायैसर्वश्रेष्ठायै ॥ वरदायैभक्तेभ्योऽभीष्टदात्र्यै ॥ ६८ ॥ उग्रायैप्रलयकालेसर्वसंहर्त्र्यै कालरात्र्यैइत्यर्थः ॥ उस्रायैइतिपाठेतेजोरूपायै
इत्यर्थः ॥ सुखजग्ध्यैसुखभोक्त्र्यै ॥ सुखजग्ध्यैइतिपाठेपिसएवार्थः ॥ संजीविन्यैसम्यग्जीवितुंजीवयितुंवाशीलंयस्यास्तस्यै ॥ पाठांतरेसम्यग्जीवयतीतिसंजीवनीतस्यैइति ॥ ब्रह्मिष्ठायैब्रह्मण्यायै
ब्राह्मणभक्तायैइतियावत् ॥ ब्रह्मनिष्ठायैइतिवा ॥ ब्रह्मदायैवेददात्र्यैकैवल्यदायैइतिवा ॥ दुरितघ्न्यैअज्ञाननाशिन्यैपापमात्रनाशिन्यैइतिवा ॥ ६९ ॥ प्रणतार्तिप्रभंजिन्यैभक्तपीडोपशमायित्र्यै ॥
जगन्मात्रेप्रपंचजनयित्र्यैजगद्धितैषिण्यैइतिवा ॥ सर्वापत्प्रतिपक्षायैभक्तानांसर्वापन्निरासकर्त्र्यै ॥ मंगलायैकल्याणरूपिण्यैमंगलागौरीरूपायैइतिवा ॥ ७० ॥ शरणागताश्चदीनाश्चआर्ताश्चतेषांपरि
त्राणंसंरक्षणंतत्रपरायणेदक्षे ॥ दर्शनादिनासर्वस्यप्राणिमात्रस्यार्तिहरे ॥ नारायणिजलायनेनारायणशक्तिरूपेवा ॥ ७१ ॥ निर्लेपायैअविद्यातत्कार्यरहितायै ॥ दुर्गहंत्र्यैदुर्गनाम्नोऽसुरस्यनाशिन्यै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षायैअघटितघटनापटीयस्यै ॥ परापरपरायैक्षराक्षराभ्यामतीतायैसर्वोत्तमायैइत्यर्थः ॥ हेगंगेनिर्वाणदायिनिकैवल्यदे ॥ ७२ ॥ हेगंगेममाग्रतःसंमुखेभूयाभव ॥ हेगंगेमेपृष्ठतःपश्चाद्गागेतिष्ठ ॥ हेगंगेमेपार्श्वयोर्दक्षिणवामभागयोरेधिभव ॥ हेगंगेत्वयिमेस्थितिःस्थैर्यमस्तु ॥ गंगापदस्यावृत्तिर्नामसुप्राधान्यख्यापनाय ॥ ७३ ॥ किंवहुना ॥ आदाविति ॥ आदौत्वंकारणत्वेनअंतेत्वमवधित्वे नमध्येचाकिंचित्सत्तास्फूर्तिप्रदत्वेनतत्सर्वंत्वमेवेत्यर्थः ॥ गांगंतेहेगंगेइत्यर्थः ॥ शिवेपरमसुखस्वरूपे ॥ किंचत्वमिति ॥ मूलप्रकृतिरविद्यात्वम् ॥ पुमान्पुरुषः ॥ परईश्वरः ॥ हेगंगेशिवःसुखरूपः परमात्माचत्वमित्यर्थः ॥ शिवेहेशिवशक्ते ॥ हीतितत्त्वमासिसर्वंखल्विदंब्रह्मेत्यादिप्रामाण्यंसूचयति ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ तस्यांप्रसिद्धायांज्येष्ठेमासिशुक्लपक्षे

गंगेममाग्रतोभूयागंगेमेतिष्ठपृष्ठतः ॥ गंगेमेपार्श्वयोरेधिगंगेत्वय्यस्तुमेस्थितिः ॥ ७३ ॥ आदौत्वमंतेमध्येचसर्वंत्वंगांगतेशिवे ॥ त्वमेवमूलप्रकृतिस्त्वं पुमान्परएवहि ॥ गंगेत्वंपरमात्माचशिवस्तुभ्यंनमःशिवे ॥ ७४ ॥ यइदंपठतेस्तोत्रंशृणुयाच्छ्रद्धयापियः ॥ दशधामुच्यतेपापैःकायवाक्चित्तसंभवैः ॥ ७५ ॥ रोगस्थोरोगतोमुच्येद्विपद्भ्यश्चविपद्युतः ॥ मुच्यतेबंधनाद्बद्धोभीतोभीतेःप्रमुच्यते ॥ ७६ ॥ सर्वान्कामानवाप्नोतिप्रेत्यचत्रिदिवंव्रजेत् ॥ दिव्यं विमानमारुह्यदिव्यस्त्रीपरिवीजितः ॥ ७७ ॥ गृहेपिलिखितंयस्यसदातिष्ठतिधारितम् ॥ नाग्निचौरभयंतस्यनसर्पादिभयंक्वचित् ॥ ७८ ॥ ज्येष्ठेमासे सितेपक्षेदशमीहस्तसंयुता ॥ संहरेत्त्रिविधंपापंबुधवारेणसंयुता ॥ ७९ ॥ तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः ॥ यःपठेद्दशकृत्वस्तुदरिद्रोवापि चाक्षमः ॥ ८० ॥ सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतः ॥ पूर्वोक्तेनविधानेनयत्फलंसंप्रकीर्तितम् ॥ ८१ ॥ यथागौरीतथागंगातस्माद्गौर्यास्तुपूजने ॥ योविधिर्विहितःसम्यक्सोपिगंगाप्रपूजने ॥ ८२ ॥ यथाऽहंत्वंतथाविष्णोयथात्वंतुतथाह्युमा ॥ उमायथातथागंगाचतूरूपंनभिद्यते ॥ ८३ ॥ विष्णुरुद्रां तरंचैवश्रीगौर्योरंतरंतथा ॥ गंगागौर्यंतरंचैवयोब्रूतेमूढधीस्तुसः ॥ ८४ ॥ इति श्रीस्कांदेमहापुराणेएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धे गंगामहिमवर्णनपूर्वकदशहरास्तोत्रकथनंनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥

जातायामित्यर्थः ॥ ८० ॥ ८१ ॥ तर्हिमत्तोपिसाश्रेष्ठेतिदेव्याआशयमालक्ष्याहभगवान् ॥ यथागौरीति ॥ यतएवमतस्तस्माद्गौर्यास्त्विति ॥ ८२ ॥ तर्ह्यहमेवसर्वनिकृष्टइतिविष्णो राशयमालक्ष्यब्रूतेविश्वेश्वरः ॥ यथाहंत्वमिति ॥ ८३ ॥ एतदेवव्यतिरेकमुखेनद्रढयति ॥ विष्णुरुद्रेति ॥ अन्तरंभेदम् ॥ तथाचभागवतंवाक्यम् ॥ नतेमय्यच्युतेऽजेचभिदामण्वपिचक्षतइति ॥ यथामतियथाशक्तिरामानंदोमुनिर्महान् ॥ व्याकरोद्गवत्पद्याःस्तोत्रंदशहराभिधम् ॥ ८४ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांसप्तविंशतितमोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥११८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अष्टाधिकतमेविंशेवाहीकाख्यानपूर्वकम् ॥ गंगायाभूरिमाहात्म्यंवर्ण्यतेशंभुनाहरिम् ॥ १ ॥ अतीताध्यायादिभागेविष्णुंसंबोध्यनिर्दग्धान्सगरान्श्रुत्वागंगामाराराधयिषुर्भगीरथोहिमवंतंजगामे
त्याद्युक्तमीश्वरेणतत्रप्राकृतानांसंदेहापनुत्तयेसंदिहानेवभवानीविश्वेशंपरिपृच्छति किंचिदितिद्वयेन ॥ १ ॥ २ ॥ भाविनिभूतवदुपचारइतिन्यायेनभाव्यपिभूतवन्निर्दिश्यतइत्यभिप्राये
णप्रत्युत्तरयति ॥ संदेहोत्रेतिसार्धेन ॥ ३ ॥ कृथाःकुरु ॥ ४ ॥ यद्वद्यथा ॥ ५ ॥ ६ ॥ त्रिषुलोकेषुस्रोतोयस्याःसात्रिस्रोतास्तांत्रिस्रोतसम् ॥ ७ ॥ पितृकर्मणितर्पणादौ ॥ ८ ॥

उमोवाच ॥ ॥ किंचित्प्रष्टुमनानाथस्वसंदेहापनुत्तये ॥ वदखेदोयदिनतेत्रिकालज्ञानकोविद ॥ १ ॥ तदाभगीरथोराजाकक्भागीरथीतदा ॥ यदा
विष्णुस्तपस्तेपेचक्रपुष्करिणीतटे ॥ २ ॥ ॥ शिवउवाच ॥ ॥ संदेहोऽत्रनकर्तव्योविशालाक्षिसदामले ॥ श्रुतौस्मृतौपुराणेषुकालत्रयमुदीर्यते ॥
॥ ३ ॥ भूतंभाविभवच्चापिसंशयंमावृथाकृथाः ॥ इत्युक्त्वापुनराहेशोगंगामाहात्म्यमुत्तमम् ॥४॥ ॥ अगस्त्यउवाच ॥ पार्वतीनंदनपुनर्ब्रुनद्याःपरितो
वद ॥ महिमोक्तोहरौयद्वद्देवदेवेनवैतदा ॥ ५ ॥ स्कंदउवाच ॥ मुनऽत्रमैत्रावरुणेयथादेवेनभाषितम् ॥ शृणुत्रिपथगामिन्यामाहात्म्यंपातकापहम् ॥६॥
त्रिस्रोतसंसमासाद्यसकृत्पिंडान्ददातियः ॥ उद्धृताःपितरस्तेनभवांभोधेस्तिलोदकैः ॥ ७ ॥ यावंतश्चतिलामर्त्यैर्गृहीताःपितृकर्मणि ॥ तावद्वर्षसहस्राणि
पितरःस्वर्गवासिनः ॥ ८ ॥ देवाःसपितरोयस्माद्गंगायांसर्वदास्थिताः ॥ आवाहनंविसर्गंचतेषांतत्रततोनहि ॥ ९ ॥ पितृवंशेमृतायेचमातृवंशेतथैवच ॥
गुरुश्वशुरबंधूनांयेचान्येबांधवामृताः ॥ १० ॥ अजातदंतायेकेचिद्येचगर्भेप्रपीडिताः ॥ अग्निविद्युच्चोरहताव्याघ्रदंष्ट्रिभिरेवच ॥ ११ ॥ उद्बंधनमृताये
चपतिताआत्मघातकाः ॥ आत्मविक्रयिणश्चोरायेतथाऽयाज्ययाजकाः ॥ १२ ॥ रसविक्रयिणोयेचयेचान्येपापरोगिणः ॥ अग्निदागरदाश्चैवगोघ्नाश्चै
वस्ववंशजाः ॥ १३ ॥ असिपत्रवनेयेचकुंभीपाकेचयेगताः ॥ रौरवेप्यंधतामिस्रेकालसूत्रेचयेगताः ॥१४॥ जात्यंतरसहस्रेषुभ्राम्यंतेयेस्वकर्मभिः ॥
येतुपक्षिमृगादीनांकीटवृक्षादिवीरुधाम् ॥ १५ ॥ योनिंगतास्त्वसंख्याताःसंख्यातानामशोभनाः ॥ प्रापितायमलोकंतुसुघोरैर्यमकिंकरैः ॥ १६ ॥
येऽबांधवाबांधवावायेऽन्यजन्मनिबांधवाः ॥ येपिचाज्ञातनामानोयेचापुत्राःस्वगोत्रजाः ॥ १७ ॥

॥ ९ ॥ पितृवंशेमृतायेचेत्यादीनामेतान्मंत्रान्समुच्चार्येत्यग्रिमेणान्वयः ॥ १० ॥ ११ ॥ १२ ॥ पापरोगिणःकुष्ठरोगवंतःपापनिमित्तरोगिणइतिवा ॥ १३ ॥ असिपत्राद्याःपंचनरकविशेषाः ॥
॥ १४ ॥ १५ ॥ संख्यातानामशोभनाःसंख्यातानामपिपश्वादीनांमध्येयेऽशोभनानिकृष्टाइत्यर्थः ॥ स्वकर्मभिरशोभनाइतिपाठेस्पष्टएवार्थः ॥ १६ ॥ येअबांधवाइतिच्छेदः ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ एतानिति ॥ एतान्पितृवंशेइत्यारभ्यमुक्तिमाप्नुयुरित्यंतान् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ यत्रत्यामृतसंतृप्ताःकाश्युत्तरवहाभवजलेनसंहृष्टाः ॥ स्यामत्वमृतामिति ॥ स्यामभवेम ॥ तुनिश्चितम् ॥ अमृतंकैवल्यम् ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ खंडस्फुटितसंस्कारंदेवालयादीनामितिशेषः ॥ तत्रखंडंभग्नंस्फुटितंविदीर्णंतयोः

विषेणचमृतावैयेयेवैशृंगिभिराहताः ॥ कृतघ्नाश्चगुरुघ्नाश्चयेचमित्रद्रुहस्तथा ॥ १८ ॥ स्त्रीबालघातकायेचयेचविश्वासघातकाः ॥ असत्यहिंसानिरताः सदापापरताश्चये ॥ १९ ॥ अश्वविक्रयिणोयेचपरद्रव्यहराश्चये ॥ अनाथाःकृपणादीनामानुष्यंप्राप्तुमक्षमाः ॥ २० ॥ तर्पिताजाह्नवीतोयैर्नरेणविधिनासकृत् ॥ प्रयांतिस्वर्गंतेतेपिस्वर्गिणोमुक्तिमाप्नुयुः ॥२१॥ एतान्मंत्रान्समुच्चार्ययःकुर्यात्पितृतर्पणम् ॥ श्राद्धंपिंडप्रदानंचसविधिज्ञइहोच्यते ॥ २२॥ कामप्रदानितीर्थानित्रैलोक्येयानिकानिचित् ॥ तानिसर्वाणिसेवंतेकाश्यामुत्तरवाहिनीम् ॥ २३ ॥ स्वःसिंधुःसर्वतःपुण्याब्रह्महत्यापहारिणी ॥ काश्यां विशेषतोविष्णोयत्रचोत्तरवाहिनी ॥ २४ ॥ गायंतिगाथामेतांवैदेवर्षिपितरोगणाः ॥ अपिदृग्गोचरानःस्यात्काश्यामुत्तरवाहिनी ॥२५॥ यत्रत्यामृतसंतृप्तास्तापत्रितयवर्जिताः ॥ स्यामत्वमृतमेवाद्धाविश्वनाथप्रसादतः ॥ २६ ॥ गंगैवकेवलामुक्त्यैनिर्णीतापरितोहरे ॥ अविमुक्तेविशेषेणममाधिष्ठानगौरवात् ॥ २७ ॥ ज्ञात्वाकलियुगंघोरंगंगाभक्तिःसुगोपिता ॥ नविंदंतिजनागंगांमुक्तिमार्गैकदायिकाम् ॥ २८ ॥ अनेकजन्मनियुतंभ्राम्यमाणस्तुयोनिषु ॥ निर्वृतिंप्राप्नुयात्कोत्रजाह्नवीभजनंविना ॥ २९ ॥ नराणामल्पबुद्धीनामेनोविक्षिप्तचेतसाम् ॥ गंगैवपरमंविष्णोभेषजंभवरोगिणाम् ॥ ३० ॥ खंडस्फुटितसंस्कारंगंगातीरेकरोतियः ॥ ममलोकेचिरंकालंतस्याक्षयसुखंहरे ॥ ३१॥ गंतुमुद्दिश्ययोगंगांपरार्थंस्वार्थमेववा ॥ नगच्छतिपरंमोहात्सपतेत्पितृभिःसह ॥ ३२ ॥ सर्वाणियेषांगांगेयैस्तोयैःकृत्यानिदेहिनाम् ॥ भूमिस्थाअपितेमर्त्याअमर्त्याएववैहरे ॥ ३३ ॥ चरमेपिवयोभागेस्वःसिंधुंयोनिषेवते ॥ कृत्वाप्येनांसिबहुशःसोपियायाच्छुभांगतिम् ॥३४॥ यावदस्थिमनुष्याणांगंगातोयेषुतिष्ठति ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥३५॥ विष्णुरुवाच ॥ ॥ देवदेवजगन्नाथजगतांहितकृत्प्रभो ॥ कीकसंचेत्पतेद्दैवाद्दुर्वृत्तस्यदुरात्मनः ॥३६॥ जलेह्युनद्यानिष्पापेकथंतस्यपरागतिः ॥ अपमृत्युविपन्नस्यतदीशविनिवेद्यताम् ॥ ३७ ॥ ॥ महेश्वरउवाच ॥ ॥ अत्रार्थेकथयिष्यामिपुरावृत्तमधोक्षज ॥ शृणुष्वैकमनाविष्णोवाहीकस्यद्विजन्मनः ॥ ३८ ॥ पुराकलिंगविषयेद्विजोलवणविक्रयी ॥ संध्यास्नानविहीनश्चवेदाक्षरविवर्जितः ॥ ३९ ॥ वाहीकोनामतोयज्ञसूत्रमात्रपरिग्रहः ॥ परिग्रहश्चतस्यासीत्कौविंदीविधवानवा ॥ ४० ॥

संस्कारःसंधानमित्यर्थः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ लोकानुजिघृक्षयाऽजानन्निवभगवान्परिपृच्छति ॥ देवदेवेति ॥ कीकसमस्थि ॥ ३६ ॥ ३७ ॥ लोकविश्रंभणायाख्यायिकयोत्तरमाह ॥ अत्रार्थइति ॥ वाहीकस्यनाम्नेतिशेषः ॥ ३८ ॥ कलिंगविषयेउत्कलाद्दक्षिणस्यांदिशि ॥ ३९॥ परिग्रहोभार्या ॥ कौविंदीतंतुवायपत्नी ॥ विधवाविगतभर्तृका ॥ नवानूतनवयस्का ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहेइतिकचित् ॥ ४० ॥ दुर्भिक्षेति ॥ वृषलीसाकुविंदीप्राणाधारंप्राणजीवनोपायंविनादुर्भिक्षपीडितेनपतिनावाहीकेनसहदेशाद्देशांतरंगतवतीत्यर्थः ॥ यद्वा तेनप्रसिद्धेनान्येनकेनचिद्वृषलीपतिनासार्धं सवाहीकोययावित्यन्वयः ॥ ४१ ॥ अथसंगवर्जितःसन् तत्रमध्येदंडकारण्यंदंडकारण्यस्यमध्येव्याघ्रेणघातितःसइत्यन्वयः ॥ ४२ ॥ गृध्रोदाक्षायणः ॥ तस्यवाहीकस्य ॥ ४३ ॥ गृध्रयोरितिश्लोकद्वयंवाक्यम् ॥ आमिषंगृध्न्वोराकांक्षतोः ॥ पादगुल्फंचरणग्रंथिः ॥ षंढत्वमार्षम् ॥ कंकोत्रगृध्रएव ॥ ४४ ॥ मध्येगंगंगंगायामध्येऽपतदित्यन्वयः ॥ द्वंद्वकारिणोर्युद्धकारिणोःसतोः ॥ ४५ ॥ द्वीपीव्याघ्रः ॥ ४६ ॥ कशाभिरश्वप्रणोदिनीभिः ॥ आराभिर्मर्मभेदिकाभिःपरितोदितःसमंततोभेदितःसर्वांगेव्यथितइतिवा ॥ ४७ ॥ आपृच्छिपृष्टः ॥ मापतेलक्ष्मीपते ॥

दुर्भिक्षपीडितेनाथवृषलीपतिनाविना ॥ प्राणाधारंतदातेनदेशाद्देशांतरंययौ ॥ ४१ ॥ मध्येऽथदंडकारण्यंक्षुत्क्षामःसंगवर्जितः ॥ व्याघ्रेणघातितस्तत्र नरमांसप्रियेणसः ॥ ४२ ॥ तस्यवामपदंगृध्रोगृहीत्वोदपतत्ततः ॥ मांसाशिनाऽन्यगृध्रेणतस्ययुद्धमभूद्दिवि ॥ ४३ ॥ गृध्रयोरामिषंगृध्न्वोःपरस्परजयैषिणोः ॥ अवापतत्पादगुल्फंकंकचंचुपुटात्तदा ॥ ४४ ॥ तस्यवाहीकविप्रस्यव्याघ्रव्यापादितस्यह ॥ मध्येगंगंदैवयोगादपतद्द्वंद्वकारिणोः ॥ ४५ ॥ यदैवहतवान्द्वीपीतंवाहीकमरण्यगम् ॥ तस्मिन्नेवक्षणेबद्धःसपाशैःक्रूरकिंकरैः ॥ ४६ ॥ कशाभिर्घातितोत्यंतमाराभिःपरितोदितः ॥ वमन्रुधिरमास्ये ननीतस्तैःस्वयमाग्रतः ॥ ४७॥ आपृच्छिधर्मराजेनचित्रगुप्तोथमापते ॥ धर्माधर्मंविचार्यास्यकथयाशुद्विजन्मनः ॥ ४८ ॥ वैवस्वतेनपृष्टोथचित्रगुप्तो विचित्रधीः ॥ सर्वदासर्वजंतूनांवेदितासर्वकर्मणाम् ॥ ४९ ॥ जगादयमुनाबंधुंवाहीकस्यद्विजन्मनः ॥ जन्मकर्मदिनारभ्यदुर्वृत्तस्यशुभेतरम् ॥ ५० ॥ चित्रगुप्तउवाच ॥ ॥ गर्भाधानादिकंकर्मप्राक्कृतंनास्यकेनचित् ॥ जातकर्मकृतंनास्यपित्राऽज्ञानवताहरे ॥ ५१ ॥ गर्भैनःशमनेहेतुःसमस्तायुःसुखप्रदम् ॥ एकादशेह्निनामास्यनकृतंविधिपूर्वकम् ॥५२॥ ख्यातःस्याद्येनविधिनासर्वत्रविधिपावनम् ॥ नाकार्षीन्निर्गमंचास्यचतुर्थेमासिमंदधीः ॥५३॥ जनकःशुभतिथ्यादौविदेशगमनापहम् ॥ षष्ठेऽन्नप्राशनंमासिनकृतंविधिपूर्वकम् ॥ ५४ ॥ सर्वदामिष्टमश्नातिकर्मणायेनभास्करे ॥ नचूडाकरणंचास्य कृतमब्देयथाकुलम् ॥ ५५ ॥ कर्मणायेनकेशाःस्युःस्निग्धाःकुसुमवर्षिणः ॥ नाकारिकर्णवेधोस्यजनित्रासमयेशुभे ॥ ५६ ॥ सुवर्णग्राहिणौयेनकर्णौ स्यातांचसुश्रुती ॥ मौंजीबंधोप्यभूदस्यव्यतीतेब्देऽष्टमेहरे ॥ ब्रह्मचर्याभिवृद्ध्यैयोब्रह्मग्रहणहेतुकः ॥ ५७ ॥ मौंजीमोक्षणवार्तापिकृतानास्यजनुःकृता ॥ गार्हस्थ्यंप्राप्यतेयस्मात्कर्मणोऽनंतरंवरम् ॥ ५८ ॥

किंपृष्टंतदाह ॥ धर्मेति ॥ धर्मश्चाधर्मश्चधर्माधर्मम् ॥ समाहारत्वादेकवचनम् ॥ लेखकइतिपाठेपापपुण्यलेखनकर्तेत्यर्थः ॥ ४८ ॥ ४९ ॥ यमुनायाबंधुंभ्रातरंयमम् ॥ जन्मकर्मदिनारभ्य जन्मैवकर्मजन्मकर्मतद्दिनमारभ्येत्यर्थः ॥ कर्मजन्मदिनारभ्येतिपाठःसुगमः ॥ शुभेतरमशुभंपापमित्येतत् ॥ ५० ॥ अज्ञानवताऽज्ञेन ॥ ५१ ॥ ५२ ॥ येननामकरणेन ॥ ५३ ॥ ॥५४॥ येनान्नप्राशनकर्मणा॥५५॥ येनचूडाकरणेन॥५६॥येनकर्णवेधेन ॥ सुश्रुतीशोभनाश्रुतिःश्रवणंययोस्तौकर्णौतथा ॥ योमौंजीबंधः॥५७॥जनुःकृता जन्मकर्त्रापित्रेत्यर्थः॥रमापतइतिकचित्॥

CC-0. In Public Domain. Digitization by eGangotri

यस्मान्मौंजीमोक्षणात्॥५८॥ऊढाविवाहिता ॥ त्यक्तकुलाध्वगापरित्यक्तकुलाचारात्यक्तकुलाध्वानंशीघ्रंवागच्छतीतितथाव्यभिचारिणीत्यर्थः॥ त्यक्तकुलाऽध्वगेतिपदद्वयंवा॥ त्यक्ताइतिपाठेयथाकथं चिदूढाकुलाध्वगासाध्व्यपिवृषलीपतिनातेनत्यक्तेत्यर्थः ॥ ५९ ॥ दुरोदरपरायणोद्यूतैकरतः ॥ ६० ॥ रुमायामिति ॥ रुमायांलवणाकरेभूप्रदेशे ॥ हताताडितासतीगौर्मृतेत्यन्वयः ॥ ६१ ॥ ॥६२॥६३॥ भक्षयदभक्षयत् ॥ अयमेववापाठः ॥ ६४ ॥ सौरेहेसूर्यज ॥:कवलीकृतोग्रासीकृतोभक्षितइतियावत् ॥ प्रोतोविद्धः ॥ ६५ ॥ दंदशूकैःसर्पैः ॥ शुकैरितिपाठेशुकैर्वृश्चिकैरित्यर्थः ॥ सदा कृतमनिष्टंयेनसदाकृतानिष्टः ॥ अवश्यसापेक्षत्वात्समासाभावाभावः ॥ कस्येत्याकांक्षायामाह ॥ आत्मनइति ॥ ६६ ॥ आस्फालितंताडितंकुट्टितमित्येतत् ॥ कराभ्यामितिशेषः ॥ काष्ठेष्टलो

यथाकथंचिदूढाऽथपत्नीत्यक्तकुलाध्वगा ॥ वृषलीपतिनातेनपरदारापहारिणा ॥५९॥ आरभ्यपंचमाद्वर्षात्परस्वस्यापहारकः ॥ अभूदेषदुराचारोदुरोदरपरायणः ॥ ६० ॥ रुमायांवसताऽनेनहतागौरेकवार्षिकी ॥ एकदादृढदंडेनलिहंतीलवणंमृता ॥ ६१ ॥ जननींपादघातेनबहुशोऽसावताडयत् ॥ कदाचिदपिनोवाक्यंपितुःकृतमनेनवै ॥ ६२ ॥ विषंभक्षितवानेषबहुशःकलहप्रियः ॥ जनोपतापशीलोसौकृतोदरविदारणः ॥ ६३ ॥ धत्तूरकरवीरादिबहुधोपविषाणिच ॥ क्रीडाकलहमात्रेणभक्षयच्चैषदुर्मतिः ॥ ६४ ॥ दग्धोसावग्निनासौरेश्वभिश्चकवलीकृतः ॥ शृंगिभिःपरितःप्रोतोविषाणाग्रैरसौबहु ॥ ६५ ॥ दंदशूकैर्भृशंदष्टोदुष्टःशिष्टैर्विगर्हितः ॥ काष्ठेष्टलोष्टैःपापिष्ठःकृतानिष्टःसदात्मनः ॥ ६६ ॥ आस्फालितंशिरोनेनासकृच्चापिदुरात्मना ॥ यदर्च्यतेसदासद्भिरुत्तमांगमनेकधा ॥ ६७ ॥ असौहिब्राह्मणोमंदोगायत्रीमपिवेदन ॥ कामतोमत्स्यमांसानिजग्धान्येतेनदुर्धिया ॥ ६८ ॥ आत्मार्थंपायसमसौपर्यपाक्षीदनेकधा ॥ लाक्षालवणमांसानांसपयोदधिसर्पिषाम् ॥६९॥ विषलोहायुधानांचदासीगोवाजिनामपि ॥ विक्रेताऽसौसदासूदस्तथावैकेशचर्मणाम् ॥ ७० ॥ शूद्रान्नपरिपुष्टांगःपर्वण्यहनिमैथुनी ॥ पराङ्मुखोदैवपित्र्यकर्मण्येषदुरात्मवान् ॥ ७१ ॥ पक्षिणोघातितानेनमृगाश्चापिपरःशतम् ॥ अकारणद्रुमच्छेदीसदानिर्दयमानसः ॥ ७२ ॥ उद्वेगजनकोनित्यंनिजबंधुजनेष्वपि ॥ असत्यवादीसततंसदाहिंसापरायणः ॥ ७३ ॥ अदत्तदानःपिशुनःशिश्नोदरपरायणः ॥ किंबहूक्तेनरविजसाक्षात्पातकमूर्तिमान् ॥ ७४ ॥ रौरवेप्यंधतामिस्रेकुंभीपाकेऽतिरौरवे ॥ कालसूत्रेकृमिभुजिपूयशोणितकर्दमे ॥ ७५ ॥ असिपत्रवनेघोरेयंत्रपीडेसुदंष्ट्रके ॥ अधोमुखेपूतिगंधेविष्ठागर्त्तेष्वभोजने ॥७६॥ सूचीभेद्येऽथसंदंशेलालापेक्षुरधारके ॥ प्रत्येकंनरकेत्वेषपात्यतांकल्पसंख्यया ॥ ७७ ॥ धर्मराजःसमाकर्ण्यचित्रगुप्तमुखादिति ॥ निर्भर्त्स्यतंदुराचारंकिंकरानादिदेशह ॥ ७८ ॥

ष्टैरितिवानुषंजनीयम् ॥ ६७ ॥ कामतोजग्धानिभक्षितानि ॥ अनेनाकामतोभक्षणेनदोषइतिध्वनितम् ॥ तथाचाहमनुः ॥ देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदुष्यतीत्यादि ॥ ६८ ॥ पायसंपरमान्नम् ॥ पर्यपाक्षीत्पक्तवान् ॥ लाक्षेति ॥ लाक्षालवणादीनांविक्रेतेत्यग्रिमेणान्वयः ॥ ६९ ॥ केशाश्चामराणि ॥ ७० ॥ अहनिदिवसेच ॥ ७१ ॥ शतात्परेपरःशतमसंख्याताइत्यर्थः ॥ ७२ ॥ ७३ ॥ उपसंहरन्नशास्तिंदर्शयाति ॥ किंवहूक्तेनेति ॥ ७४ ॥ रौरवाद्यानरकविशेषाः ॥ ७५ ॥ ७६ ॥ कल्पसंख्ययाब्रह्मणोदिनगणनया ॥ ७७ ॥ आदिदेशाज्ञप्तवान् ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आदेशप्रकारमाह ॥ भ्रूसंज्ञयाहृतैर्भ्रूचालनेनोक्तैरित्यर्थः ॥ भ्रूसंज्ञयाथतैरीतिक्वचित्पाठः ॥ तत्रभ्रूसंज्ञयाऽऽदिदेशेत्यन्वयः ॥ ७९ ॥ ८० ॥ तत्पादगुल्फम् ॥ ८१ ॥ ८२ ॥८३॥ काप्येषानिरंजन चित्स्वरूपा ॥ योऽसौनिरंजनोदेवश्चित्स्वरूपीजनार्दनः ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयइति ॥ सदाशिवस्येयंसादाशिवी ॥ ८४ ॥ निरंजनस्यकथंद्रवरूपेणप्रवृत्तिरित्याशंकायामाह ॥ करुणेति ॥ ८५ ॥ अतएवएषानान्यसरित्समेत्याह ॥ यथाऽन्याइति ॥ ८६ ॥ श्रुत्यक्षराणीति ॥ हेमुनेश्रुत्यक्षराणिउपनिषदक्षराणिनिश्चोत्यानिष्पीड्यउपनिषदर्थान्निश्चित्येत्येतत् ॥ तद्द्रवैस्ते

भ्रूसंज्ञयाहृतैर्नीतःसबद्ध्वानिरयालयम् ॥ आक्रंदरावोयत्रोच्चैःपापिनांरोमहर्षणः ॥ ७९ ॥ ॥ ईश्वरउवाच ॥ ॥ यातनास्वतितीव्रासुवाहीकेसंस्थिते तदा ॥ तत्कालपुण्यफलदेगाङ्गेयांभसिनिर्मले ॥ ८० ॥ पतितंतद्विगृध्रास्याद्वाहीकस्यद्विजन्मनः ॥ हरेर्विमानंतत्कालमापन्नंसुरसद्मतः ॥ ८१ ॥ घंटावलंबितंदिव्यंदिव्यस्त्रीशतसंकुलम् ॥ आरुह्यदेवयानंसदिव्यवेषधरोद्विजः ॥ ८२ ॥ वीज्यमानोऽप्सरोवृंदैर्दिव्यगंधानुलेपनः ॥ जगामस्वर्गभुवनं गंगास्थिपतनाद्धरे ॥ ८३ ॥ स्कंदउवाच ॥ ॥ वस्तुशक्तिविचारोयमद्भुतःकोपिकुंभज ॥ द्रवरूपेणकाप्येषाशक्तिःसादाशिवीपरा ॥ ८४ ॥ करुणामृतपूर्णेनदेवदेवेनशंभुना ॥ एषाप्रवर्तितागंगाजगदुद्धरणायवै ॥ ८५ ॥ यथान्याःसरितोलोकेवारिपूर्णाःसहस्रशः ॥ तथैषानानुमंतव्यासद्भिस्त्रिपथगामिनी ॥८६॥ श्रुत्यक्षराणिनिश्चोत्यकारुण्याच्छंभुनामुने ॥ निर्मितातद्द्रवैरेषागंगागंगाधरेणवै ॥ ८७ ॥ योगोपनिषदामेतंसारमाकृष्यशंकरः ॥ कृपयासर्वजंतूनांचकारसरितांवराम् ॥ ८८ ॥ अकलानिधयोरात्र्योविपुष्पाश्चैवपादपाः ॥ यथातथैवतेदेशायत्रनास्त्यमरापगा ॥ ८९ ॥ अनयाः संपदोयद्वन्मखायद्वददक्षिणाः ॥ तद्वद्देशादिशःसर्वाहीनागंगांभसाहरे ॥ ९० ॥ व्योमांगणमनर्कंचनक्तेऽदीपंयथागृहम् ॥ अवेदाब्राह्मणायद्वद्गंगाहीनास्तथादिशः ॥ ९१ ॥ चान्द्रायणसहस्रंतुयःकुर्याद्देहशोधनम् ॥ गंगामृतंपिबेद्यस्तुतयोर्गंगांबुपोऽधिकः ॥ ९२ ॥ पादेनैकेनयस्तिष्ठेत्सहस्रंशरदां शतम् ॥ अब्दंगंगांबुपोयस्तुतयोर्गंगांबुपोऽधिकः ॥ ९३ ॥ अवाक्शिराःप्रलंबेद्यःशतसंवत्सरान्नरः ॥ भीष्मसूवालुकातल्पशयस्तस्माद्वरोहरे ॥ ९४ ॥ पापतापाभितप्तानांभूतानामिहजाह्नवी ॥ पापतापहरायद्वद्गंगानान्यत्तथाकलौ ॥ ९५ ॥ तार्क्ष्यवीक्षणमात्रेणफणिनोनिर्विषायथा ॥ निष्प्रभाणितथैनांसिभागीरथ्यवलोकनात् ॥ ९६ ॥ गंगातटोद्भवांमृत्स्नांयोमौलौबिभृयान्नरः ॥ बिभर्तिसोऽर्कबिंबंवैतमोनाशायनिश्चितम् ॥ ९७ ॥

पामुपनिषदक्षराणांद्रवैरसैस्तत्प्रतिपाद्यैर्ब्रह्मानंदैरित्यर्थः ॥ रसोवैसःरस ँ ह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः ॥ कारुण्याच्छंभुनासर्वेषामानंदकारणेनगंगाधरेणएषागंगाविनिर्मितेत्यर्थः ॥ ८७ ॥ एतदेवविवृणोति ॥ योगोपनिषदामिति ॥ योगोब्रह्मात्मनोरैक्यंतत्प्रतिपादकोपनिषदामित्यर्थः ॥ एतंब्रह्मानंदम् ॥ ८८ ॥ अकलानिधयश्चंद्ररहिताः ॥ ८९ ॥ अनयानीतिरहिताः ॥ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ भीष्मसूवालुकातल्पशयः भीष्मंसूतइतिभीष्मसूर्गंगातस्यावालुकाएवतल्पंशय्यातत्रशेतइतितथा ॥ ९४ ॥ ९५ ॥ ९६ ॥ गंगातटोद्भवांगंगातीरेजाताम् ॥

CC-0. In Public Domain. Digitization by eGangotri

गंगातटोत्तरामितिपाठेगंगातीरादुत्तरउत्तरणमुद्धारोयस्याःसातथातामित्यर्थः ॥ तमोनाशायपापनाशायपरंपरयाऽज्ञाननाशायेतिवा ॥ ९७ ॥ ९८ ॥ वंशद्वयंमातृवंशंपितृवंशंचेत्यर्थः ॥ ९९ ॥ कीर्तनादिति ॥ कीर्तनाद्गंगेत्यादिनामकीर्तनाद्दर्शनात्स्पर्शात्पानावगाहनात्पानादवगाहनाच्चपुण्यापुण्यर्द्धिनाशयोर्धर्मोपचयाधर्मनाशयोर्गंगादशोत्तरगुणाज्ञेयाइत्यन्वयः ॥ अयमर्थः ॥ गंगायाः कीर्तनाद्यावान्पुण्योपचयोभवत्यपुण्यनाशश्चतावतोपिदशगुणोदर्शनात् एवंतावतोपिदशगुणःस्पर्शात् एवंतावतोपिदशगुणः पानात् एवंतावतोपिदशगुणोऽवगाहनादिति ॥ १०० ॥ १ ॥ २ ॥ श्रुतिमृइरावतीमित्यादिकाम् ॥ विनिश्चितार्थामसंदेहार्थाम् ॥ ३ ॥ श्रुतिमेवदर्शयति ॥ इरावतीमित्यादिनाविशुद्धिकामइत्यंतेन ॥ गंगांश्रितासःश्रिताआश्रिताइत्यर्थः ॥ मृतासइतिपाठे

व्यसनैरभिभूतस्यधनहीनस्यपापिनः ॥ गंगैवकेवलंतस्यगतिरुक्तानचान्यथा ॥ ९८ ॥ श्रुताभिलषितादृष्टास्पृष्टापीताऽवगाहिता ॥ पुंसांवंशद्वयं गंगातारयेन्नात्रसंशयः ॥ ९९ ॥ कीर्तनाद्दर्शनात्स्पर्शाद्गंगापानावगाहनात् ॥ दशोत्तरगुणाज्ञेयापुण्यापुण्यर्द्धिनाशयोः ॥ १०० ॥ नसुतैर्नचवावित्तैर्नान्येनापिसुकर्मणा ॥ तत्फलंप्राप्यतेमर्त्यैर्गंगामाप्ययदाप्यते ॥ १ ॥ जात्यंधाःपंगवस्तेवैजीवंतोप्यथतेमृताः ॥ समर्थाअपियेगंगांनस्नायुर्मोक्षगमिणीम् ॥ २ ॥ श्रुतिंनिशामयहरेगंगामाहात्म्यभाषिणीम् ॥ विनिश्चितार्थांश्रुत्वाश्रयेद्गंगांनरोत्तमः ॥ ३ ॥ इरावतींमधुमतींपयस्विनीममृतरूपामूर्जस्वतीम् ॥ त्रिदिवप्रसूतांगंगांश्रितासस्त्रिदिवंव्रजंति ॥ ४ ॥ ऋषिजुष्टांविष्णुपदींपुराणांसुपुण्यधारांमनसाहिलोके ॥ सर्वात्मनाजाह्नवींयेप्रपन्नास्ते ब्रह्मणःसदनंसंप्रयांति ॥५॥ लोकानिमान्नयतियाजननीवपुत्रान्स्वर्गंसदासर्वगुणोपपन्ना ॥ स्थानमिष्टंब्राह्ममभीप्समानैर्गंगासदैवात्मवशैरुपास्या ॥६॥ उस्त्रैर्जुष्टामिषतींविश्वरूपामिरावतींजनयित्रींगुहस्य ॥ शिष्टैःसेव्याममृतांब्रह्मकांतांगंगांश्रयेदात्मविशुद्धिकामः ॥ ७ ॥ गंगायांतुनरःस्नात्वाब्रह्मचारी समाहितः ॥ विधूतपापोभवतिवाजपेयंचविंदति ॥ ८ ॥ अशुभैःकर्मभिर्ग्रस्तान्मज्जमानान्महार्णवे ॥ पततोनिरयेगंगासंश्रितानुद्धरेत्सदा ॥ ९ ॥ ब्रह्मलोकस्तुलोकानांसर्वेषामुत्तमोयथा ॥ सरितांसरसांवापिवरिष्ठाजाह्नवीतथा ॥ ११० ॥ अन्यत्रसम्यक्संकल्प्यतपःकृत्वासमात्रयम् ॥ यत्फलं तद्भवेद्भक्त्यागंगायांघटिकाऽर्धतः ॥ ११ ॥ स्वर्गस्थस्यनसाप्रीतिर्भुंजतःसुखमक्षयम् ॥ यास्याद्गंगातटेपुंसांरात्रौचंद्रोदयेसति ॥ १२ ॥ जरारोगाभिपन्नंतुकुणपंजाह्नवीजले ॥ धैर्येणतृणवत्त्यक्त्वाप्रविशेदमरावतीम् ॥ १३ ॥ वार्योघैःसततंयस्याःप्लाव्यतेशशिमंडलम् ॥ भूयोधिकतरांशोभांबिभर्तितदहःक्षये ॥ १४ ॥ आप्लुतस्यजलेयस्याःसद्योनश्यतिपातकम् ॥ महतःश्रेयसःप्राप्तिस्तत्क्षणादेवजायते ॥१५॥ पितृभ्यःश्रद्धयायत्रदत्तास्त्वापःस्ववंशजैः ॥ प्रयच्छंतिपरांतृप्तिंशरदांत्रयमच्युत ॥ १६ ॥ तारयेत्क्षितियान्मर्त्यानधःस्थांश्चसरीसृपान् ॥ स्वर्गेस्वर्गसदोविष्णोर्गंगात्रिपथगाततः ॥ १७ ॥

गंगायांमृताःसंतस्त्रिदिवंसुखात्मकंकैवल्यंव्रजन्तीत्यर्थः ॥ तथाचोक्तम् ॥ गंगायांचजलेमोक्षइति ॥ इरावत्यादयःपंचनदीप्रभेदास्तदात्मिकाम् ॥ अर्थांतरत्वेस्पष्टएवार्थः ॥ ४ ॥ ब्रह्मणःसदनं वैकुण्ठम् ॥ ५ ॥ ६ ॥ उस्त्रैर्देवैस्तेजोमयत्वात् ॥ इषतीमिच्छतीमिच्छांकुर्वतीमित्यर्थः ॥ इरावतीमिराभूवागाद्यातद्वतीम् ॥ ब्रह्मकांतांब्राह्मणानांकमनीयामभिलाषितांसावित्रीरूपांवा ॥७॥८॥ ॥ ९ ॥११०॥११॥१२॥१३॥ यस्यावार्योघैःशशिमंडलंप्लाव्यतेइत्यादीनांसातीर्थानांपरमंतीर्थमित्यग्रेणान्वयः ॥ तच्छशिमंडलम् ॥ अहःक्षयेरात्रौ ॥१४॥१५॥१६॥ क्षितौयांतिगच्छंतीतिक्षिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यास्तान् ॥ क्षितिजानिर्तिवापाठः ॥ त्रिपथगानामनिर्वक्ति ॥ तारयोदिति ॥ त्रीन्पथःत्रयश्चतेपंथानश्चतान्वागच्छतीतितथा ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ १२४ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ नमोभगवतेतस्मैब्रह्मविष्णुशिवात्मने ॥ परब्रह्मस्वरूपिण्यैगंगायैचनमोनमः ॥ ॥ १ ॥ एकोनत्रिंशदध्यायेगंगानामसहस्रकम् ॥ वर्ण्यतेभूरिमाहात्म्यंसर्वाघौघविदारणम् ॥ २ ॥ पूर्वोक्तापरिमितगुणगणायागंगायाःस्नानमंतरेणनृणांजन्मव्यर्थंस्यादतोऽशक्तदूरदेशस्थितानांयेनोपायांतरेणतद्भवतितत्किमस्तीतिसर्वलोकोपकारायपृच्छति विनेतिद्वाभ्याम् ॥ १ ॥ २ ॥ उपायांतरमेवविकल्पानुपृच्छति दानंवेतिद्वयेन ॥ मंत्रस्तोत्रमितिपाठेएकवद्भावः ॥ ३ ॥

तीर्थानामुत्तमंतीर्थंसरितामुत्तमासरित् ॥ स्वर्गदासर्वजंतूनांमहापातकिनामपि ॥ १८ ॥ अध्युष्टाःकोटयोविष्णोसंतितीर्थानिसर्वतः ॥ दिविभुव्यंतरिक्षेचजाह्नव्यांतानिकृत्स्नशः ॥ १९ ॥ ज्ञात्वाज्ञात्वाचगंगायांयःपंचत्वमवाप्नुयात् ॥ अनात्मघातीस्वर्गीस्यान्नरकान्सनपश्यति ॥ १२० ॥ गंगैवसर्वतीर्थानिगंगैवचतपोवनम् ॥ गंगैवसिद्धिक्षेत्रंहिनात्रकार्याविचारणा ॥ २१ ॥ यत्रकामफलावृक्षामहीयत्रहिरण्मयी ॥ जाह्नवीस्नायिनस्तत्रनिवसंतिघटोद्भव ॥ २२ ॥ धेनुंभागीरथीतीरेसुशीलांचपयस्विनीम् ॥ वासोरत्नैरलंकृत्वाब्राह्मणायददातियः ॥ २३ ॥ यावंतितस्यालोमानिमुनेतत्संततेरपि ॥ तावद्वर्षसहस्राणिसस्वर्गसुखभुग्भवेत् ॥ १२४ ॥ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखंडेपूर्वार्द्धे गंगामहिमानामाष्टाविंशतितमोऽध्यायः ॥२८॥ ॥ अगस्त्यउवाच ॥ ॥ विनास्नानेनगंगायांनृणांजन्मनिरर्थकम् ॥ उपायांतरमस्त्यन्यद्येनस्नानफलंलभेत् ॥१॥ अशक्तानांचपंगूनामालस्योपहतात्मनाम् ॥ दूरदेशांतरस्थानांगंगास्नानंकथंभवेत् ॥ २ ॥ दानंवाऽथव्रतंवाऽथमंत्रःस्तोत्रंजपोऽथवा ॥ तीर्थांतराभिषेकोवादेवतोपासनंतुवा ॥ ३ ॥ यद्यस्तिकिंचित्षडक्रगंगास्नानफलप्रदम् ॥ विधानांतरमात्रेणतद्वदप्रणतायमे ॥ ४ ॥ त्वत्तोनवेदस्कंदान्योगंगागर्भसमुद्भव ॥ परंस्वर्गतरंगिण्यामहिमानंमहामते ॥ ५ ॥ ॥ स्कंदउवाच ॥ ॥ संतिपुण्यजलानीहसरांसिसरितोमुने ॥ स्थानेस्थानेचतीर्थानिजितात्माध्युषितानिच ॥६॥ दृष्टप्रत्ययकारीणिमहामहिमभांज्यपि ॥ परंस्वर्गतरंगिण्याःकोट्यंशोपिनतत्रवै ॥ ७ ॥ अनेनैवानुमानेनबुद्ध्यस्वकलशोद्भव ॥ दध्रेगंगोत्तमांगेनदेवदेवेनशंभुना॥८॥स्नानकालेऽन्यतीर्थेषुजप्यतेजाह्नवीजनैः ॥ विनाविष्णुपदींक्वान्यत्समर्थमघमोचने॥९॥गंगास्नानफलंब्रह्मन्गंगायामेवलभ्यते॥यथाद्राक्षाफलस्वादोद्राक्षायामेवनान्यतः ॥१०॥ अस्त्युपायइहत्वेकःस्याद्येनाविकलंफलम्॥स्नानस्यदेवसरितोमहागुह्यतमोमुने॥११॥

विधानांतरमात्रेणकेवलानुष्ठानांतरेण ॥ विधानांतरमत्रेशेतिकचित् ॥ ४ ॥ अन्यएवकश्चित्प्रष्टव्यइतिनवाच्यमित्याह ॥ त्वत्तइति ॥ यतस्त्वंगंगागर्भसमुद्भवोऽतस्त्वत्तःपरोगंगामाहात्म्यंनजानातीत्यर्थः ॥ ५ ॥ यद्यपिपृथिव्यांमध्येमध्येप्रत्यक्षफलजनकानिमुनिभिरध्युषितानिमहामहिमयुक्तान्यपितीर्थानिसंतितथापिगंगायाःकोट्यंशस्यांशोपितेषुनास्त्यतोगंगास्नानजंफलंगंगायामेवलभ्यतेनान्यत्रेतिसदृष्टांतमुत्तरमाह संतिपुण्यजलानीतिपंचभिः ॥ ६ ॥ प्रतीयतइतिप्रत्ययःफलम् ॥ ७ ॥ ८ ॥ ९ ॥ द्राक्षागोस्तनी ॥ १० ॥ तर्ह्यंधपंग्वादीनांकथंनिस्तारइत्यतआह ॥

CC-0. In Public Domain. Digitization by eGangotri

अस्त्युपायइति ॥ ११ ॥ १२ ॥ इदंनाम्नांसहस्रमित्यन्वयः ॥ १३ ॥ शिवसंतोषसंततिशिवसंतोषस्यसंततिः परंपरायत्रतत्तथा ॥ संतोषकृदितिक्वचित् ॥ १४ ॥ स्तवेषुमध्येराजंतइति स्तवराजास्तेषुशोभनंशोभायमानंचारुतरमित्यर्थः ॥ वेदोपनिषदावेदांतेनतज्जन्यविद्ययावा ॥ १५ ॥ १६ ॥ प्रथमतोगंगानामसहस्रंवक्ष्यन्मंगलमाचरति ॥ ॐनमोगंगादेव्याइति ॥ नन्वत्रा काराद्यादिक्षकाराद्यंतानिनामानिक्रमेणदृश्यंतेतत्किमितिमध्येऋॠऌॡअःङञठणथादीनिनामानिनोपलभ्यंतइति ॥ नचपतितानीतिवाच्यम् ॥ बहुपुस्तकेष्वदृष्टेः ॥ गणनायांकृतायांकिंचिद धिकानिनवशतान्येवलभ्यंतइति ॥ अत्रोच्यते ॥ संपूर्णसहस्रनाम्नांकीर्तनादिनासद्यएवसशरीराणांप्राणिमात्राणांवैकुंठशिवलोकादिप्राप्तेरकांडएवसृष्ट्याद्युच्छेदादृकारादिनववर्णानांकियतांनाम्नां संगोपनंगंगयैवकृतमिति ॥ यथादर्शनमात्रेणसर्वजंतूनांसशरीराणांसद्योवैकुंठलोकप्राप्तिवारणायपुरुषोत्तमाख्येक्षेत्रेऽगवैकल्यंश्रीपुरुषोत्तमस्ययथावाबदरिकाश्रमेश्रीनारायणस्येति ॥ नचतर्हि सांगाभावात्फलाभावः ॥ अग्निहोत्रादिकर्माणिसापायानिकलौयुगे ॥ गंगास्नानंहरेर्नामनिरपायमिदंद्वयम् ॥ नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयादित्यादिस्मृ तेर्यथाकथंचित्कृतस्यापिगंगास्नानस्यहरिहरगंगादिनामोच्चारणस्यचफलावश्यंभावात्॥ अस्तुवायथातथाकिमस्माकंवराकाणांतच्चिंतया॥ यथास्थितिनाम्नांसहस्रस्यसमावेशोयथाभवतितथाव्याख्यायत इति ॥ अत्रोंकाररूपिणीत्यादिशब्दानां पुनरुक्तानामपिवृत्तिभेदान्नपौनरुक्त्यम॥गणनाथांबिकाढुंढिविघ्नेशजननीत्यादीनांवृत्त्येकत्वेपिशब्दभेदान्नपौनरुक्त्यम्॥अर्थैक्यपौनरुक्त्यंनदोषाय॥योऽसौनिरंज

शिवभक्तायशांतायविष्णुभक्तिपरायच ॥ श्रद्धालवेत्वास्तिकायगर्भवासमुमुक्षवे ॥ १२ ॥ कथनीयंनचान्यस्यकस्यचित्केनचित्क्वचित् ॥ इदंरहस्यं परमंमहापातकनाशनम् ॥ १३ ॥ महाश्रेयस्करंपुण्यंमनोरथकरंपरम् ॥ द्युनदीप्रीतिजनकंशिवसंतोषसंतति ॥ १४ ॥ नाम्नांसहस्रंगंगायाःस्तवराजेषुशो भनम् ॥ जप्यानांपरमंजप्यंवेदोपनिषदासमम् ॥ १५ ॥ जपनीयंप्रयत्नेनमौनिनावाचकंविना ॥ शुचिस्थानेषुशुचिनासुस्पष्टाक्षरमेवच ॥ १६ ॥ स्कंदउवाच ॥ ॥ ॐनमोगंगादेव्यै ॥ ॐकाररूपिण्यजराऽतुलाऽनंताऽमृतस्रवा ॥ अत्युदाराऽभयाऽशोकाऽलकनंदाऽमृताऽमला ॥ १७ ॥

नोदेवश्चित्स्वरूपीजनार्दनः ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयइतिस्मृतेर्गंगायाःपरब्रह्मरूपत्वात्सैवात्रविशिष्यते ॥ तत्रापिस्त्रीलिंगशब्दागंगायानपुंसकशब्दागंगांभसःपुँल्लिंगशब्दाजनार्दनस्यविशेषण मितिद्रष्टव्यम् ॥ तत्रोंकारस्याकारोकारमकारात्मकत्वादोंकाररूपिणीत्यस्याकारादित्वंबोद्धव्यम् ॥ यद्वा ॐकारस्यसर्ववर्णात्मकत्वान्मांगलिकत्वाच्चादावुपादानंयुक्तमितितदादित्वम् ॥ तदुक्तम् ॥ ॐकारप्रभवावेदाॐकारप्रभवाःसुराः ॥ ॐकारप्रभवंसर्वंत्रैलोक्यंसचराचरम् ॥ ॐकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा ॥ कंठंभित्त्वाविनिर्यातौतस्मान्मांगलिकावुभौ ॥ स्रवत्यनोंकृतंपूर्वंपरस्माच्चविशीर्य तेइत्यादि ॥ ॐकाररूपिणीति ॥ यद्यपिब्रह्मादिशब्दाःपरदेवतायावाचकास्तथापिश्रुतिप्रामाण्यात्परदेवतायानेदिष्ठमभिधानमोंकारः ॥ अतएवपरदेवताप्रतिपत्ताविदंपरंसाधनम् ॥ तच्चाद्विप्रका रेणप्रतीकत्वेनाभिधानत्वेनच ॥ तथाविष्ण्वादिप्रतिमाभेदेन ॥ एवमोंकाररूपिणीपरादेवताप्रतिपत्तव्या ॥ तथाह्योंकारालंबनस्यपरादेवताप्रसीदाति ॥ एतदालंबनंश्रेष्ठमेतदालंबनंपरम् ॥ एतदालंबनं ज्ञात्वाब्रह्मलोकेमहीयतइतिश्रुतेः॥तथाचायमर्थः॥ॐकाररूपिणी ॐकारप्रतीकाॐकारवाचकासर्वात्मकत्वात्प्रणवस्वरूपाचेत्यर्थः॥नविद्यतेजराऽपक्षयलक्षणापंचमीविकृतिर्यस्याःसाऽजरा॥ नविद्यतेतुला परिमाणंयस्याःसाऽतुला ॥ नविद्यतेदेशतःकालतोवस्तुतोंतःपरिच्छेदःषष्ठोविकारोविनाशोवायस्याःसाऽनंता ॥ अमृतंधर्मद्रवात्मकंतोयंस्रवतिवहतिमोहिनीरूपेणदेवेभ्योवाऽमृतंसुधांददातीत्यमृतस्रवा॥ अतिशयेनोदारादात्रीमहतीत्यातिक्रांताउदारादातारोमहांतोवाययासाअत्युदारा ॥ नविद्यतेभयंयस्यायस्याःसकाशादितिवासाऽभया ॥ अद्वितीयत्वात् ॥ द्वितीयाद्वैभयंभवतीतिश्रुतेः ॥ नविद्यतेशोकौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यायस्याःसकाशादितिवासाऽशोका ॥ तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिश्रुतेः ॥ अलकनंदाभारतवर्षगागंगा ॥ साचसप्तधा ॥ तदुक्तंवैष्णवे ॥ समंताद्ब्रह्मणःपुर्यागंगा पततिवैदिवः ॥ सातत्रपतितादिक्षुचतुर्धाप्रतिपद्यते ॥ सीताचालकनंदाचचक्षुर्भद्राचवैक्रमादित्यादि ॥ अमृतासुधास्वरूपा ॥ नविद्यतेमृतंमरणंयस्यायस्याःसकाशादितिवासाऽमृतेतिवा ॥ नजायते म्रियतेवाविपश्चिदित्यादिश्रुतेः॥ अमलानिर्मलाशुद्धसत्त्वेत्यर्थः ॥ नविद्यतेसंसारलक्षणंमलंयस्यायस्याःसकाशादितिवासाऽमलाइतिवा ॥१७॥ अःविष्णुर्नाथोयेषांतेऽनाथाविष्णुभक्तास्तेषुसंसारांगारपा पच्यमानेषुवत्सलास्निग्धाऽनाथवत्सला ॥ अमोघानामतःशांतनोर्भार्यावस्थायाम् ॥ ब्रह्मपुत्रमहाभागशांतनोःकुलनंदन ॥ अमोघागर्भसंभूतगृहाणार्घ्यंनमोस्तुतइतिस्मृतेः ॥ नविद्यतेमोघाव्यर्थाधर्मा र्थकाममोक्षायस्यायस्याःसकाशादितिवा साऽमोघाऽव्यर्थापरमार्थेतियावदितिवा ॥ सत्यंज्ञानमनंतमित्यादिश्रुतेः॥अपामपंचीकृतानांजलानांयोनिःकारणम् ॥ ताआपऐक्षतेतिश्रुतेः ॥ अपएवससर्जादा वितिस्मृतेश्च ॥ समुद्रात्मकत्वाद्वाऽपांयोनिःकारणम् ॥ यथासर्वासामपांसमुद्रएकायोनिरितिश्रुतेः ॥ अमृतंमोक्षंभक्तेभ्यःप्रददात्यभक्तेभ्योवाप्रकर्षेणखंडयतीत्यमृतप्रदा ॥ नकेनापिप्रमाणेनव्य ज्यतइत्यव्यक्तंब्रह्म ॥ येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासतइतिस्मृतेः ॥ प्रकृतिर्वाऽव्यक्तम् ॥ नारायणःपरोऽव्यक्तादितिस्मृतेः ॥ तल्लक्षणातत्स्वरूपाऽव्यक्तलक्षणा ॥ नकेनापिक्षोभ्यतइत्यक्षोभ्या कूटस्थेत्यर्थः ॥ नकेनाप्यऽवच्छिद्यतइत्यनवच्छिन्नात्रिविधपरिच्छेदशून्येत्यर्थः ॥ एकमेवाद्वितीयमितिश्रुतेः ॥ नविद्यतेपरउत्कृष्टोयस्याःसाऽपरा ॥ अवतारादिषुकदापिकेनचिन्नजितेत्य

अनाथवत्सलाऽमोघाऽपांयोनिरमृतप्रदा ॥ अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराजिता ॥ १८ ॥ अनाथनाथाऽभीष्टार्थसिद्धिदाऽनंगवर्धिनी ॥
अणिमादिगुणाऽधाराग्रगण्याऽलीकहारिणी ॥ १९ ॥ अचिंत्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी ॥ अद्रिराजसुताऽष्टांगयोगसिद्धिप्रदाऽच्युता ॥ २० ॥

जिता ॥ अपराजितेत्यत्रयद्यप्येकनामप्रतिभातितथापिसहस्रसंख्यापरिपूर्त्यर्थमेवव्याख्यायतइत्येवमेतादृशेस्थलेअग्रेपिबोद्धव्यम् ॥ १८ ॥ अःविष्णुर्नाथोयेषांतैरनाथैर्वैष्णवैःसंसारांगारदंदह्यमानै र्वानाथ्यतेप्रार्थ्यतेइत्यनाथनाथा ॥ भक्तानांयेऽभीष्टाऽर्थास्तेषांसिद्धिदातत्प्रापिका ॥ अभक्तानांसिद्धिखंडिकावेत्यभीष्टार्थसिद्धिदेत्यर्थः ॥ अनंगवर्धिनीकामवर्धिनीकामच्छेत्रीवा ॥ वृधुच्छेदने इतिधातुः ॥ नविद्यतेअंगंयस्यासावनंगःपरमात्मातंवर्धयितुंप्रापयितुंशीलंयस्याःसाऽनंगवर्धिनीतिवा ॥ अणिमाआदिर्येषांतेअणिमादयः ॥ आदिपदेनमहिमागरिमालघिमेशित्ववशित्वप्राप्तिप्राका म्यानिगृह्यंते ॥ तेगुणायस्याःसाऽणिमादिगुणा ॥ अःविष्णुराधारोयस्याःसाआधारातदेकाश्रयेत्यर्थः ॥ तत्पादपद्मनिःसृतत्वात् ॥ अग्रेप्रथमतोगण्यतइत्यग्रगण्यासर्वेषांमध्येश्रेष्ठेत्यर्थः ॥ एषसर्वे श्वरइत्यादिश्रुतेः ॥ अलीकंमिथ्याभूतमनिर्वचनीयमज्ञानंतत्कार्यंहर्तुंशीलंयस्याःसाऽलीकहारिणी॥ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिश्रुतेः॥१९॥ अचिंत्याशक्तिर्मायाख्यायस्याऽचिंत्यादुर धिगम्याचसाशक्तिश्चिच्छक्तिश्चेतिवासाऽचिंत्यशक्तिः ॥ ममममायादुरत्ययेतिस्मृतेः ॥ नविद्यतेऽघमज्ञानंतत्कार्यलक्षणंपापलक्षणंवायस्यायस्याःसकाशादितिवासाऽनघा ॥ निरवद्यंनिरंजनमिति श्रुतेः ॥ गंगातारयतेपुंसामुभौवंशौभवार्णवादितिस्मृतेश्च ॥ अद्भुतमाश्चर्यरूपंयस्याःसाऽद्भुतरूपा ॥ आश्चर्योऽस्यवक्ताकुशलोऽस्यमन्ता ॥ आश्चर्यवत्पश्यतिकश्चिदेनमित्यादिश्रुतिस्मृतिभ्याम् ॥ अघंहर्तुंशीलंयस्याःसाऽघहारिणी ॥ तदुक्तम् ॥ दृष्टाजन्मशतंपापंस्पृष्टाजन्मशतानिच ॥ स्नानाजन्मसहस्राणिहंतिगंगाकलौयुगइति ॥ अद्रिराजस्याहिमवतःसुताकन्याऽद्रिराजसुता ॥ तथाच

१–अतःविष्णुतःधारायस्याःसाअधारा–विष्णुधारेत्यर्थः । अकारादिनामत्वात् ।

CC-0. In Public Domain. Digitization by eGangotri

वालकांडेरामायणे ॥ शैलेंद्रोहिमवान्नामरत्नानामाकरोमहान् ॥ तस्यकन्याद्वयंनामरूपेणाप्रतिमंभुवीत्यादि॥अष्टौयमनियमासनप्राणसंरोधप्रत्याहारधारणाध्यानसमाधिलक्षणान्यंगानिसाधनत्वेनय स्मिन्सचासौजीवात्मनोरैक्यचिंतनयोगश्चतस्यसिद्धिप्रदामुक्तिप्रदेत्यर्थः ॥ स्वस्वरूपान्नच्यवतइत्यच्युता॥२०॥अक्षुण्णाअखंडिताचासौशक्तिश्चअक्षुण्णाऽकुंठिताशक्तिर्यस्याइतिवा साऽक्षुण्णशक्तिः ॥ असून्प्राणान्ददातिप्रवर्तयतिखंडयतीतिवासुदा ॥ प्राणस्यप्राणमितिश्रुतेः ॥ अनंतानितीर्थानियस्यांसाऽनंततीर्था ॥ सर्वतीर्थमयीगंगेतिस्मृतेः ॥ अमृतममृतवत्स्वादुअमृतनिमित्तंवाउदकं यस्याःसाऽमृतोदका ॥ अनंतोऽपरिच्छिन्नोमहिमामहत्त्वंयस्याःसाऽनंतमहिमा ॥ नविद्यतेपारोऽवधिर्यस्याःसाऽपारा ॥ सुखमेवसौख्यम् अनंतंसौख्यंब्रह्मसुखंप्रददातीत्यनन्तसौख्यप्रदा ॥ अन्नं ददातीत्यन्नदाभुक्तिप्रदेत्यर्थः ॥ २१ ॥ अशेषाःसमग्रादेवतामूर्तौयस्याःसाअशेषदेवतामूर्तिः ॥ सर्वदेवमयोहरिरितिस्मृतेः ॥ नघोराअघोराशांतस्वभावेत्यर्थः ॥ सरस्वतीरजोरूपातमोरूपा कलिंदजा ॥ सत्त्वरूपाचगंगात्रनयंतिब्रह्मनिर्गुणमित्युक्तेः ॥ अमृतरूपिणीकैवल्यरूपा ॥ तदेतद्ब्रह्मामृतमभयमितिश्रुतेः ॥ अमृतवर्षिणीतिक्वचित्पाठः ॥ अविद्यैवजालमावरकत्वात्तस्याःशमनी नाशकर्त्रीअविद्याजालशमनी ॥ अप्रतर्क्यावाङ्मनसयोरगम्यांगतिंप्रत्यग्ब्रह्मैक्यरूपांप्रददातीतिअप्रतर्क्यगतिप्रदा ॥ हिनिश्चये ॥ एवमग्रेपि ॥ २२ ॥ अशेषाणांविघ्नानाममंगलानामाधिदैविका धिभौतिकाध्यात्मिकानांसंहर्त्रीअशेषविघ्नसंहर्त्री ॥ एवार्थेतुशब्दः ॥ एवमग्रेपि ॥ अशेषैर्गुणैःसर्वज्ञत्वादिलक्षणैर्गुंफिताग्रथिताव्याप्ताअशेषगुणगुंफिता ॥ अज्ञानमेवतिमिरंतमस्तस्यज्योतिर्नाश

अक्षुण्णशक्तिरसुदाऽनंततीर्थाऽमृतोदका ॥ अनंतमहिमाऽपाराऽनंतसौख्यप्रदाऽन्नदा ॥ २१ ॥ अशेषदेवतामूर्तिरघोराऽमृतरूपिणी ॥ अविद्याजालश मनीह्यप्रतर्क्यगतिप्रदा ॥ २२ ॥ अशेषविघ्नसंहर्त्रीत्वशेषगुणगुंफिता ॥ अज्ञानतिमिरज्योतिरनुग्रहपरायणा ॥ २३ ॥ अभिरामाऽनवद्यांग्यनंतसारा ऽकलंकिनी ॥ आरोग्यदाऽऽनंदवल्लीत्वापन्नार्तिविनाशिनी ॥ २४ ॥ आश्चर्यमूर्तिरायुष्याह्याढ्याऽऽद्याऽऽप्राऽऽर्यसेविता ॥ आप्यायिन्याप्तविद्याऽऽ ख्यात्वानंदाऽऽश्वासदायिनी ॥ २५ ॥

कम् ॥ आश्रयत्वविषयत्वयोःप्रदानेनतत्प्रकाशकमितिवा ॥ भक्तानामनुग्रहायपरायणाव्यग्राअनुग्रहपरायणा ॥२३॥ अभिरमंत्यस्यांयोगिनइत्यभिरामा ॥ रमंतेयोगिनोऽनन्तेसत्यानंदेचिदात्मनि ॥ इतिरामपदेनासौपरंब्रह्माभिधीयतइतिस्मृतेः ॥ नावद्यंदुष्टमंगंस्वरूपंयस्याःसानवद्यांगी ॥ निर्दोषंहिसमंब्रह्मेतिस्मृतेः ॥ अनन्तःसारःस्थिरोंऽशोयस्याःसाऽनंतसारा ॥ अनंतेप्रपंचेसारभूताइतिवा ॥ नविद्यतेकलंकोयस्याःसाऽकलंकिनी ॥ आरोग्यंददातीत्यारोग्यदा ॥ रोगएवरोग्यम्आसमन्ताद्रोग्यंद्यतिखण्डयतीतिवाआरोग्यदा ॥ आनन्दवल्लीसुखलतिका ॥ सएषपरमानंदइतिश्रुतेः ॥ आप न्नार्तिविनाशिनीभक्तपीडोपशमनी ॥ २४ ॥ आश्चर्यामूर्तिःस्वरूपंयस्याःसाआश्चर्यमूर्तिः ॥ आश्चर्यरूपिणीतिक्वचित्पाठः ॥ आयुर्भ्योहिताआयुष्या ॥ आढ्यापरिपूर्णेत्यर्थः ॥ आदौभवा आद्या ॥सर्वकारणमित्यर्थः ॥ आसमंतात्प्रातिपूरयतीत्याप्रा ॥ प्रापूरणइतिधातुः ॥ तदुक्तंवैष्णवे ॥ समंताद्ब्रह्मणःपुर्यांगंगापततिवैदिवः ॥ सातत्रपतितादिक्षुचतुर्धाप्रतिपद्यतइत्यादि ॥ पृथोर्भयाद्गोरूपासतीआसमंताच्चतुःसमुद्रान्व्याप्नोतीतिवाआप्रा ॥ सर्वात्मकत्वाद्गंगायाः ॥ तदुक्तंकालिदासेन ॥ पयोधरीभूतचतुःसमुद्रांजुगोपगोरूपधरामिवोर्वीमिति ॥ आप्तेतिक्वचित्पाठः ॥ आर्यैः पूज्यैर्विश्वेश्वरादिभिःसेविताउपासिताआर्यसेविता॥आप्यायितुंतुप्तिंजनयितुं शीलंयस्याःसाआप्यायिनी ॥ आप्ताचासौविद्याचेतिआप्तविद्या॥स्वतोऽपरोक्षब्रह्मात्मैकत्वविद्येत्यर्थः॥आप्ताप्राप्ताविद्याययेति वा ॥ आसमन्तात्ख्याप्रकथनंयस्याःसाआख्याप्रसिद्धेत्यर्थः ॥ प्रसिद्धत्वंचास्याः सितासितेसरितेयत्रसंगते ॥ इमंमेगंगेयमुनेसरस्वतिइत्याद्ययाश्रुत्याबोद्धव्यम् ॥ आनन्दासुखस्वरूपा ॥ विज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमानंदंब्रह्मेतिश्रुतेः ॥ आश्वासंनिर्भयंदातुंशीलंयस्याःसाआश्वासदायिनी ॥२५॥ अलसस्यभावआलस्यन्तद्धंतुंशीलंयस्याःसाआलस्यघ्नी॥आलस्यमूलकामक्रोधादिसर्वदोषहंत्रीत्यर्थः ॥ आपदांहंत्री
आपदामाध्यात्मिकाधिदैविकाधिभौतिकानांदुःखानांहंत्रीनाशयित्री ॥ तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिश्रुतेः॥आनंदंब्रह्मसुखममृतंसुधातद्वर्षंभक्तेभ्योवर्षितुंशीलंयस्याःसाआनंदामृतवर्षिणी॥
आनन्दामृतवाहिनीतिपाठेआनंदात्मकंयदमृतंजलंतद्वोढुंशीलंयस्याःसातथा ॥ योऽसौनिरंजनोदेवइत्यादिस्मृतेः ॥ इरावतीनदीप्रभेदस्तद्रूपेरावती ॥ इराइंदिरालक्ष्मीस्तद्वतीतिवा ॥ तथाचात्रैवोक्तम् ॥
इरावतींमधुमतीमित्यादि ॥ इष्टान्ददातीतीष्टदात्री ॥ इष्टाऽभिप्रेतापरमप्रेमास्पदेत्यर्थः ॥ इष्टापूज्येतिवा ॥ तु इष्टंहुतंपूर्तंवापीकूपतडागादिनिर्माणंतयोःफलंप्रददातीतिइष्टापूर्तफलप्रदा ॥ २६ ॥
इतिहासःपुरावृत्तंश्रुतिर्वेदस्ताभ्यामीड्यःस्तुत्योऽर्थःप्रयोजनंपुरुषार्थोवायस्याःसाइतिहासश्रुतीड्यार्था ॥ इदमपिकथंननामद्वयंस्वीकृतम् ॥ तु इहास्मिँल्लोकेऽमुत्रचपरलोकेशुभंसुखंमोक्षंचप्रददाती
तिइहामुत्रशुभप्रदा ॥ सुखदामोक्षदागंगागंगैवपरमागतिरितिस्मृतेः ॥ इज्यायांशीलंस्वभावोयेषांतेइज्याशीलाः समंब्रह्म ॥ निर्दोषंहिसमंब्रह्मेतिस्मृतेः ॥ तद्वर्तंतेयेषांतेसमिनस्तेषुज्येष्ठाकर्मिणां
ज्ञानिनांचोभयेषांमध्येवापूज्येत्यर्थः ॥ समीइतिपाठेदैर्घ्यंछांदसम् ॥ तुइंद्रादिपरिवंदितादेवेंद्रादिभिर्नुतास्तुताचेत्यर्थः ॥ २७ ॥ इलापृथ्वीतस्याअलंकरणरूपामाला ॥ तथाचोक्तम् ॥
वसुधाशृंगारहारावलीति ॥ इद्धादीप्तास्वप्रकाशेत्यर्थः ॥ अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतेः ॥ आत्मास्वप्रकाशः सच्चिद्रूपत्वात् ॥ प्रभाकराभिमतसंविद्वदित्यनुमानाच्च ॥ तु इंदिरालक्ष्मीः
सारम्यंमंदिरमाश्रयोयस्याःसाइंदिरारम्यमंदिरा ॥ इंदिरायावारम्यमंदिररूपा ॥ अयनमित् ॥ संपदादित्वाद्भावेक्किप् ॥ इत्ज्ञानस्वरूपेत्यर्थः ॥ सर्वेगत्यर्थाज्ञानार्थाइतिन्यायात् ॥ इंदिरादिसं

आलस्यघ्न्यापदांहंत्र्यानंदामृतवर्षिणी ॥ इरावतीष्टदात्रीष्टात्विष्टापूर्तफलप्रदा ॥ २६ ॥ इतिहासश्रुतीड्यार्थात्विहामुत्रशुभप्रदा ॥ इज्याशीलसमिज्येष्ठात्विंद्रादिपरिवंदिता ॥ २७॥ इलालंकारमालेद्धात्विंदिरारम्यमंदिरा ॥ इदिंदिरादिसंसेव्यात्वीश्वरीश्वरवल्लभा ॥ २८ ॥ ईतिभीतिहरेड्याचत्वीडनीयचरित्रभृत् ॥ उत्कृष्टशक्तिरुत्कृष्टोडुपमंडलचारिणी ॥२९॥ उदितांबरमार्गोस्रोरगलोकविहारिणी ॥ उक्षोर्वरोत्पलोत्कुंभाउपेंद्रचरणद्रवा ॥३०॥

सेव्यालक्ष्म्यादिभिःसेवनीया ॥ आदिपदेनभवानीप्रमुखागृह्यंते ॥ माहेश्वरीरूपेणमौलिधृतत्वादिप्रतीतेः ॥ तु ईश्वरीईशनशीलासर्वनियंत्रीपरादेवतेतियावत् ॥ एषसर्वेश्वरइत्यादिश्रुतेः ॥
ईश्वरवल्लभाईश्वरस्यविश्वेश्वरस्यवल्लभाकांता ॥ मातःशैलसुतासपत्निवसुधेत्यादिस्मृतेः ॥ वल्लभाइष्टाऽभिप्रेतावेत्यर्थः ॥ २८ ॥ ईतीनामातिवृष्ट्यनावृष्टिशलभमूषकशुकप्रत्यर्थिनृपाणांभीति
स्तांहरतीतितथा ॥ ईड्यास्तुत्या ॥ तु ईडनीयानिचरित्राणितानिबिभर्तीतिईडनीयचरित्रभृत् ॥ उत्कृष्टाशक्तिर्यस्याउत्कृष्टस्यविष्णोःशक्तिर्वाउत्कृष्टशक्तिः ॥ उत्कृष्टाउत्तमा ॥ उडुपश्चं
द्रस्तस्यमंडलंलोकंचर्तुंशीलंयस्याःसाउडुपमंडलचारिणी ॥ प्लावयित्वेंदुमंडलमित्युक्तेः ॥ २९ ॥ उदितउदयंप्रापितोंऽबरमार्गोययासाउदितांबरमार्गा ॥ उस्रादेवीद्योतनात्मिकेतियावत् ॥
तेजोरूपत्वात् ॥ उरगलोकेविहर्तुंशीलंयस्याःसाउरगलोकविहारिणी ॥ भोगावतीचपातालइत्युक्तेः ॥ उक्षतिफलसेकंकरोतीतिउक्षा ॥ उर्वराफलसस्याढ्याभूस्तत्स्वरूपा ॥ यद्वा उरुर्महां
श्चासौअः विष्णुश्चेतिउर्वोमहाविष्णुस्तंरातिप्रापयतीतिउर्वरा ॥ उत्पलाउत्पलस्वरूपा ॥ सर्वात्मकत्वाद्गंगायाः ॥ यद्वा उत्कृष्टंपातीत्युत्पोनारायणस्तंलातिप्रापयतीत्युत्पला ॥ उत्उत्कृष्टाःकुंभा
यस्याःसाउत्कुंभा ॥ यत्संबंधादपवित्राअपिकुंभाःपवित्राभवंति ॥ तदुक्तम् ॥ अपिचांडालभांडस्थंयज्जलंपावनंमहत् ॥ सेयंगंगाकुरुश्रेष्ठयथेष्टमवगाह्यताम् ॥ उच्छब्देनगर्गरीषुपूर्यमाणासुजायमा
नाध्वनयउच्यंते ॥ उत्एवंविधैर्ध्वनिभिर्युक्ताःकुंभायस्यांसातथेतिवा ॥ उद्दंभेतिपाठेउद्गतोदंभोयस्याःसाउद्दंभेत्यर्थः ॥ गंगानामसहस्रेऽस्मिन्विवृतेप्रथमेशते ॥ यद्दृष्टमभूदत्रताद्दि

CC-0. In Public Domain. Digitization by eGangotri

श्वेशेसमर्पितम् ॥ १ ॥ उपेंद्रचरणद्रवावामनपादावनेजनजला ॥ ३० ॥ उदन्वत्पूर्तिहेतुः उदन्वतःसमुद्रस्यपूर्तेःपूरणस्यहेतुःकारणम् ॥ चःसमुच्चये ॥ एवमग्रेपि ॥ उदारादात्रीमहती तिवा ॥ उत्साहप्रवर्धिनीम्रियमाणानांदर्शनादिनाहर्षकारिणी ॥ उद्वेगंदौस्थ्यंहंतीत्युद्वेगघ्नी ॥ उष्णशमनीतापनाशिनीतृप्तिदायिनीतियावत् ॥ तदुक्तंवासिष्ठे ॥ गंगाजलाभिषेकेणयथातृप्तिर्भवेन्मम ॥ तथात्वद्दर्शनात्प्रीतिरंतःशीतयतीवमामिति ॥ उष्णरश्मिसुतायाःसूर्यकन्यायायमुनायाःप्रियाअभीष्टाउष्णरश्मिसुताप्रिया ॥ ३१ ॥ उत्पत्तिस्थितिसंहारकारिणीब्रह्मविष्णुशिवरूपिणीत्यर्थः ॥ उपरिपृथिव्याःस्वर्गलोकस्यब्रह्मांडस्यवाउपरिचर्तुशीलंयस्याःसाउपरिचारिणी ॥ ऊर्जंवहंतीऊर्जंवहंतीरमृतंघृतमित्यादिमन्त्ररूपा ॥ ऊर्जंबलंप्राणंवाधरतीत्यूर्जंधरा ॥ ऊर्जाबलधारणाप्राणधारणावातद्वतीऊर्जावतीच ॥ ऊर्मयस्तरंगास्तेषांमालावर्ततेयस्याःसाऊर्मिमालिनी ॥ ३२ ॥ ऊर्ध्वरेतसांभिक्षुकाणांप्रियाऽभीष्टाऊर्ध्वरेतःप्रिया ॥ तथाचोक्तम् ॥ गंगातीरेवसेन्नित्यंभिक्षुर्मोक्षपरायणः ॥ सिद्धिक्षेत्रंतुतज्ज्ञेयंयावद्धनुःशतत्रयमिति ॥ ऊर्ध्वमध्वामार्गोयस्याःसाऊर्ध्वाध्वा ॥ त्रिपादूर्ध्वउदैत्पुरुषइतिश्रुतेः ॥ ऊर्मीस्तरंगान्शोकमोहजरामृत्युक्षुत्पिपासादीन्वादेहाध्यासंवालातिगृह्णातीत्यूर्मिला ॥ ऊर्ध्वगतिप्रदास्वर्गमोक्षादिगतिप्रदेत्यर्थः ॥ ऋषिसमूहैःस्तुताऋषिवृन्दस्तुता ॥ ऋद्धिःसमृद्धिरूपाकौबेरीशक्तिरूपावा ॥ देवर्षिपितृणामृणत्रयंविनाशयितुंशीलंयस्याःसाऋणत्रयविनाशिनी ॥ चऋणेतिविसंधिरार्षएव ॥ एवमुत्तरत्रापि ॥ ३३ ॥ ऋतंसत्यंब्रह्मबिभर्तीतिऋतंभरा ॥ ऋद्धिदात्रीसमृद्धिदात्रीच ॥ ऋक्स्वरूपाऋग्वे

उदन्वत्पूर्तिहेतुश्चोदारोत्साहप्रवर्धिनी ॥ उद्वेगघ्न्युष्णशमनीउष्णरश्मिसुताप्रिया ॥३१॥ उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी ॥ ऊर्जंवहंत्यूर्जधरोर्जावतीचोर्मिमालिनी ॥ ३२ ॥ ऊर्ध्वरेतःप्रियोर्ध्वाध्वाह्यूर्मिलोर्ध्वगतिप्रदा ॥ ऋषिवृंदस्तुतर्द्धिश्चऋणत्रयविनाशिनी ॥ ३३ ॥ ऋतंभरर्द्धिदात्री चऋक्स्वरूपाऋजुप्रिया ॥ ऋक्षमार्गवहर्क्षार्चिर्ऋजुमार्गप्रदर्शिनी ॥ ३४ ॥ एधिताऽखिलधर्मार्थात्वेकैकाऽमृतदायिनी ॥ एधनीयस्वभावैज्यात्वेजिताशेषपातका ॥ ३५ ॥ ऐश्वर्यदैश्वर्यरूपाह्यैतिह्यंह्यैंदवीद्युतिः ॥ ओजस्विन्योषधीक्षेत्रमोजोदौदनदायिनी ॥ ३६ ॥ ओष्ठामृतौन्नत्यदात्रीत्वौषधंभवरोगिणाम् ॥ औदार्यचंचुरौपेंद्रीत्वौग्रीह्यौमेयरूपिणी ॥ ३७ ॥

दात्मिका ॥ ऋजुप्रियाअकुटिलप्रिया ॥ ऋक्षाणांचन्द्रादिनक्षत्राणांमार्गंवहतीतिऋक्षमार्गवहा ॥ ऋक्षाणांचन्द्रादीनामिवार्चिर्दीप्तिर्यस्यास्तेषांवाऽर्चिर्दीप्तिर्यस्याःसकाशात्साऋक्षार्चिः ॥ शंखकुंदेंदुधवलेतिवाराहोक्तेः ॥ तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेश्च ॥ ऋजुमार्गप्रदर्शिनीमोक्षमार्गप्रकाशिनी ॥ ३४ ॥ एधितौवर्धितावखिलौसमग्रौधर्मार्थौययासाएधिताखिलधर्मार्था ॥ तु एकामुख्याऽनुपमेतियावत् अद्वितीयेतिवा ॥ एकमेवाद्वितीयमितिश्रुतेः ॥ एकामृतदायिनीएकमद्वितीयंयद्ब्रह्मामृतंतद्दायिनी ॥ एधनीयस्वभावा एधनीयोवर्धनीयःस्वभावोयस्याःसाएधनीयस्वभावा ॥ पापानिएजंतिकंपंतेयेभ्यस्तेएजास्तेषुसाध्वीएज्यापूज्या ॥ एजितानिकंपितान्यशेषपातकानिययासाएजिताशेषपातका ॥ ३५ ॥ ऐश्वर्यंददातीत्यैश्वर्यदा ॥ ऐश्वर्यरूपाईश्वरधर्मस्वभावा ॥ हिऐतिह्यंप्रमाणविशेषरूपा॥हिऐंदवीद्युतिश्चांद्रमसीकांतिः॥कांतिस्तेजःप्रभासत्ताचंद्राग्न्यर्कर्क्षविद्युतामितिभागवतोक्तेः ॥ ओजइंद्रियसामर्थ्यंतद्वतीओजस्विनी ॥ ओषधीनांफलपाकांतानांक्षेत्रंभूरूपम् ॥ ओजइंद्रियसामर्थ्यंददातीत्योजोदा ॥ ओजदेतिपाठेसकाराभावआर्षः ॥ ओदनदायिनीअन्नदात्रीअन्नपूर्णेत्यर्थः ॥ ३६ ॥ ओष्ठेऽमृतंयस्याःसाओष्ठामृताऽमृतवदनामधुरभाषिणीतियावत् ॥ उन्नतेर्भावऔन्नत्यंतद्दात्रीऔन्नत्यदात्री॥तु औषधंभवरोगिणांसंसाररोगवतामगदस्वरूपं संसाररोगनिवर्तकमित्यर्थः ॥ उदारस्यभावऔदार्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपेंद्रचरणावनेजनीरूपावा ॥ तु उग्रस्येयमौग्री संहारकारिणी
तत्रचंचुरादक्षा ॥ उपेंद्रोवामनस्तस्येयंपत्नीऔपेंद्रीलक्ष्मीरूपेत्यर्थः ॥ यदाहपराशरः ॥ पुनश्चपद्माद्वुद्भूतायदा।दित्योभवद्धरिरिति ॥ उमायथातथागंगेतिवचनात् ॥ ३७ ॥ अम्बरा
शक्तिरित्यर्थः ॥ हि औमेयोगणेशःकार्तिकेयोवातद्रूपिणी ॥ यद्वा उमायाइदमौमेयन्तच्चतद्रूपंचेत्यौमेयरूपंतद्वर्ततेयस्याइत्यौमेयरूपिणी ॥ विप्रान्मूर्द्धाभिषिक्तोहिक्षत्रियायां
ध्ववहाआकाशमार्गगा ॥ अंविष्णुंवांतिगच्छंत्यंवावैष्णवाः ॥ विभक्तेरलोपआर्षः ॥ तेषुभक्तेषुतिष्ठतीत्यंवष्ठा ॥ वैश्यायांभार्यायांब्राह्मणोत्पन्नजातिविशेषावा ॥
विशःस्त्रियाम् ॥ अंवष्ठःशूद्र्यांनिषादोजातःपारशवोपिवाइतियाज्ञवल्क्योक्तेः॥अम्बरस्यमाअंवरमाआकाशशोभातांलातिकरोतीत्यंवरमाला अंवरस्यमालेवांवरमाला॥ अंवुजान्येवईक्षणानिअंवुजेइववा
ईक्षणेयस्याःसांवुजेक्षणा ॥ अंविकादुर्गामातृस्वरूपावा ॥ अंवुमहायोनिरपांमूलकारणम् ॥ अपएवससर्जादाविितिस्मृतेः ॥ तदपोऽसृजतइतिश्रुतेश्च ॥ अंधोन्नंददातीत्यंधोदा ॥ अन्धकहा
रिणीअन्धकनामानंदैत्यंहर्तुंशीलंयस्याःसांधकहारिणी ॥ अन्धयतीत्यंधकमज्ञानंतद्धारिणीतिवा ॥ त्वन्धहारिणीतिपाठेप्ययमेवार्थः ॥ ३८ ॥ अंशूनांतेजसांमालासमूहोयस्यांसांशुमाला ॥
हिअंशुमतीतेजोवती ॥ तु अंगीकृतःपुत्रत्वेनषडाननोययासांऽगीकृतषडानना ॥ अंकीकृतेतिवापाठः ॥ स्वाहेयगांगेयेत्याद्यत्रैवोक्तेः ॥ अन्धतामिस्रंनरकविशेषस्तद्धंत्री ॥ अन्धुर्धर्मकूपस्तत्स्व
रूपाकूपमात्ररूपावा ॥ अञ्जतीत्यंजनाऽविद्यातत्स्वरूपा ॥ हनुमज्जनयित्रीरूपावा ॥ हि अञ्जनावतीअविद्यावती ॥ ३९ ॥ कल्याणकारिणीशुभकारिणी ॥ काम्यतइतिकाम्या ॥ कम

अंवराध्ववहांऽवष्ठांवरमालांवुजेक्षणा ॥ अंविकांवुमहायोनिरंधोदांधकहारिणी ॥ ३८ ॥ अंशुमालाह्यंशुमतीत्वंगीकृतषडानना ॥ अंधतामिस्रहंत्र्यंधुरं
जनाह्यंजनावती ॥ ३९ ॥ कल्याणकारिणीकाम्याकमलोत्पलगंधिनी ॥ कुमुद्वतीकमलिनीकांतिःकल्पितदायिनी ॥ ४० ॥ कांचनाक्षीकामधेनुः
कीर्तिकृत्क्लेशनाशिनी ॥ क्रतुश्रेष्ठाक्रतुफलाकर्मबंधविभेदिनी ॥ ४१ ॥ कमलाक्षीक्लमहराकृशानुतपनद्युतिः ॥ करुणार्द्राचकल्याणीकलिकल्मषना
शिनी ॥ ४२ ॥कामरूपाक्रियाशक्तिःकमलोत्पलमालिनी ॥ कूटस्थाकरुणाकांताकूर्मयानाकलावती ॥ ४३ ॥

कमलानिवर्ततेयस्यांसाकमलिनी ॥ कांतिश्चंद्रतेजोरूपा ॥
लानामुत्पलानांचगंधोवर्ततेयस्यःसाकमलोत्पलगंधिनी ॥ कुमुदानिवर्ततेयस्यांसाकुमुद्वती ॥ कुमुदशब्दस्याकारलोपश्छांदसः ॥ कामधेनुःकामधुक्सुरभिरितियावत् ॥ धेनूनामस्मिकामधुगितिभगवद्व
शीतभानौप्रसादइत्यत्रैवोक्तेः ॥ कल्पितदायिन्यभीष्टदायिनी ॥ ४० ॥ कांचनेइवाक्षिणीयस्याःसाकांचनाक्षी ॥ कुतोऽवीचिवींचिस्तवयदिगतालोचन
चनात् ॥ कीर्तिकृद्यशःकर्त्री ॥ अविद्याऽस्मितारागद्वेषाभिनिवेशाःपंचक्लेशास्तन्नाशिनी ॥ क्रतुभ्यःश्रेष्ठाक्रतुश्रेष्ठा अश्वमेधादियागाधिकफलप्रदेत्यर्थः ॥ कर्मैववंधःकर्मबंधस्तद्विभेदिनी
पथंत्वमापीतापीतांवरपुरनिवासंवितरसि ॥ त्वदुत्संगेगंगेयदिपततिकायस्तनुभृतांतदामातःशातक्रतवपदलाभोप्यतिलघुरित्याद्युक्तेः ॥ क्रतूनांफलंयस्यांसाक्रतुफला ॥ करुणाद्राकरुण
भेत्री ॥ ४१ ॥ कमलेइवाक्षिणीयस्याःसाकमलाक्षी ॥ क्लमहराश्रांतिहरा ॥ कृशानुर्वह्निस्तपनःसूर्यस्तयोरिवद्युतिर्यस्याःसाकृशानुतपनद्युतिः ॥ सूर्यकोटिप्रतीकाशइत्यादिस्मृतेः ॥ कामामिच्छैवरूपंयस्याःकामेन
यार्द्रास्निग्धाव्याप्तेतियावत् ॥ चकल्याणंवर्ततेयस्याःसाकल्याणी ॥ कलिकल्मषनाशिनीकलिकालोत्पन्नानांपापानांनाशिनी ॥ कलौगंगैवकेवलमितिस्मृतेः ॥४२॥ कूटयतिच्छलत्या
स्वेच्छयावारूपंयस्याःसाकामरूपा॥क्रियायांशक्तिर्यस्याःसाक्रियाशक्तिःसूत्रात्मकस्वरूपेत्यर्थः ॥ क्रियाशक्तिरूपावा ॥ कमलोत्पलानांमालावर्ततेयस्याःसाकमलोत्पलमालिनी ॥ यद्वा कालत्रयव्यापकतयाएक
त्मानमानंदत्वादिकमावृत्यसंसारेपातयतीतिकूटोऽज्ञानंतत्रतिष्ठतितदध्यक्षतया॥ यद्वा कूटस्याज्ञानस्यस्थास्थितिर्यस्यांसा॥यद्वा कूटोगिरिशृंगंतद्वन्निष्क्रियतयातिष्ठति ॥

CC-0. In Public Domain. Digitization by eGangotri

रूपाषड्भावविकाररहिताकूटस्था॥करुणादयास्वरूपा॥कांताकमनीया॥कूर्मोयानंकूर्मवत्कूर्मेणलक्षणविशेषेणवायानंगमनंयस्याः साकूर्मयाना ॥ कलाश्चतुःषष्टिकलावर्ततेयस्याःसाकलावती ॥४३ ॥ कमलालक्ष्मीरूपा ॥ कल्पलतिकाकल्पलतातिमिकासर्वकामपूरणीत्यर्थः ॥ कालीकालिकारूपा ॥ कलुषवैरिणीपातकनाशिनी ॥ कमनीयजलानिर्मलपानीया ॥ जह्नुंप्रतीपंशांतनुंकामितवती तिकम्राकामुकेत्यर्थः॥ तथाचादिपर्वहरिवंशयोः ॥ पतिलोभेनयंगंगापातित्वेऽभिससारह ॥ त्वामहंकामयेराजन्कुरुश्रेष्ठभजस्वमाम्॥ भविष्यामिमहीपालमहिषीतेवशानुगेति ॥ कपर्दिसुकपर्दगाशिवस्य शोभनजटाजूटगा ॥ ४४ ॥ कालकूटंसमुद्रमथनोत्पन्नंविषंतस्यकालाऽज्ञानयोर्वानाशिनीकालकूटप्रशमनी ॥ कदंबकुसुमानिप्रियाणियस्याःसाकदंबकुसुमप्रिया ॥ गंगानामसहस्रेऽस्मिन्द्वितीयेविवृतेशते ॥ यदहृष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ २ ॥ कलिंदःपर्वतस्तद्भवाकालिंदीयमुनातद्रूपा ॥ केलिःक्रीडातयातस्यांवामनोहराकेलिललिता ॥ कलामधुरायेकल्लोलास्तद्भनयः ॥ मनोहरास्तरंगावातेषांमालावर्ततेयस्यांसाकलकल्लोलमालिका ॥४५॥ क्रांतंव्याप्तिमतिक्रांतंवालोकत्रयंययासाक्रांतलोकत्रया ॥ सभूमिंसर्वतःस्पृत्वाऽत्यतिष्ठद्दशांगुलमितिश्रुतेः ॥ कंडूयतेकुट्टत्यविद्यां तत्कार्यमितिकंडूः कंडूतिरूपावा ॥ कंडूर्मृकंडुः ॥ भीमोभीमसेनइतिवत् ॥ तस्यतनयस्यमार्कंडेयस्यवत्सलास्निग्धा ॥ खड्गोऽस्याअस्तीतिखड्गिनी॥खड्ग धारायाइवाभादीप्तिर्यस्याःसाखड्गधाराभा ॥ पापकाननच्छेत्रीत्वान्निर्मलत्वसादृश्याद्वा ॥ खेआकाशेगच्छतीतिखगा ॥ खंडेंदुधारिणीशकलचंद्रधारिणी चंद्रकलावतंसेत्यर्थः ॥ ४६ ॥ खेआकाशेखेलेनलीलयागच्छतीतिखेखेलगामिनी ॥

कमलाकल्पलतिकाकालीकलुषवैरिणी ॥ कमनीयजलाकम्राकपर्दिसुकपर्दगा ॥ ४४ ॥ कालकूटप्रशमनीकदंबकुसुमप्रिया ॥ कालिंदीकेलिललिता कलकल्लोलमालिका ॥ ४५ ॥ क्रांतलोकत्रयाकंडूःकंडूतनयवत्सला ॥ खड्गिनीखड्गधाराभाखगाखंडेंदुधारिणी ॥ ४६ ॥ खेखेलगामिनीखस्थाखंडेंदुतिलकप्रिया॥ खेचरीखेचरीवंद्याख्यातिःख्यातिप्रदायिनी ॥४७॥ खंडितप्रणताघौघाखलबुद्धिविनाशिनी ॥ खातैनःकंदसंदोहाखड्गखट्वांगखेटिनी॥ ॥ ४८ ॥ खरसंतापशमनीखनिःपीयूषपाथसाम् ॥ गंगागंधवतीगौरीगंधर्वनगरप्रिया ॥ ४९ ॥

खेआकाशेब्रह्मणिवा॥कंब्रह्मखंब्रह्मेतिश्रुतेः ॥ तिष्ठतीतिखस्था ॥ खंडेंदुतिलकप्रियाविश्वेश्वरकांता ॥ खेआकाशेचरतीतिखेचरी ॥ खेचरीणांसिद्धांगनानांवंद्याखेचरीवंद्या ॥ ख्यातिःप्रख्यातिःप्रतिष्ठेतियावत् ॥ आख्यात्यन्यथाख्यात्यसत्ख्यात्यात्मख्यात्यनिर्वचनीयख्यात्येतत्पंचकख्यातिर्वातद्रूपा ॥ ख्यातिप्रदायिनीप्रतिष्ठाकारिणी ॥ ४७ ॥ खंडितोदूरीकृतःप्रणतानांभक्तानामघौघोयया साखंडितप्रणताघौघा ॥ खलानांबुद्धिःखलरूपावाबुद्धिस्तस्याविनाशिनी ॥ खाताउत्खाताउत्पाटिताइतियावत् ॥ एनसांपापानांकंदसंदोहोमूलकारणनिकरोययासाखातैनःकंदसंदोहा ॥ खड्गश्चखट्वांगंचलोहादेनिर्मितद्वादशांगंखट्वायाःखुराकारोवाऽस्त्रविशेषःखेटंचायुधविशेषश्चर्मवा एतानिवर्ततेयस्याःसाखड्गखट्वांगखेटिनी ॥ खड्गखट्वांगाभ्यांखेटितुंक्रीडितुंशीलंयस्याःसाइतिवा ॥ अस्मिन्पक्षेडकारस्यटकारआर्षः ॥ ४८ ॥ खरसंतापशमनीतीक्ष्णसंतापनाशिनी ॥ दुष्टजन्यसंतापशमनीतिवा ॥ खनिःपीयूषपाथसाममृततुल्योदकानाममृतोदकयोर्वाखनिःआकरस्थानम् ॥ गंगानिरंजनचित्स्वरूपा ॥ योऽसौनिरंजनोदेवश्चित्स्वरूपीजनार्दनः ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयइतिस्मृतेः ॥ स्वर्गाद्गंगांभगीरथःपृथ्वीमानीतवानितिवागंगा ॥ तदुक्तंभविष्ये ॥ यस्माद्भगीरथोदेविस्वर्गाद्गांत्वामिहानयत् ॥ अतस्त्वंमुनिभिःसर्वैर्गंगेतिपरिकीर्त्यसइति ॥ गंधवतीपृथ्वीरूपा ॥ गौरीपार्वतीनदीप्रभेदोवाजलेशमहिषीवा ॥ नदीभेदेपिगौरीस्याज्जलेशस्योपियाषितीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनात् ॥ गंधर्वनगरेतत्तुल्येप्रपंचेप्रियाऽभीष्टासारभूतेत्यर्थः ॥ तदुक्तम् ॥ असारेखलुसंसारेसारमेतच्चतुष्टयम् ॥ काश्यांवासःसतांसंगोगंगांभःशिवपूजनमिति ॥ गंधर्वाणांयानिनगराणितत्स्थानांजनानांवाप्रियागंधर्वनगरप्रिया ॥ ४९ ॥ गंभीरमनवगाह्यमंगंस्वरूपंयस्याःसागंभीरांगी ॥ गुणमयीत्रिगुणात्मिकामायासर्वज्ञत्वादिगुणावा ॥ गतआतंकःसंत्रासोयस्यायस्याःसकाशादितिवासागतातंका ॥ गतेर्ज्ञानात्मनोविश्वनाथस्यप्रियागतिप्रिया ॥ गतिर्ज्ञानंप्रियंयस्याःसागतिप्रियेतिवा ॥ चतुर्विधाभजंतेमामित्युपक्रम्यज्ञानीत्वात्मैवमेमतमितिभगवदुक्तेः ॥ गम्यतइतिगतिःफलंसाचासौप्रियापरमप्रेमास्पदाचेतिगतिप्रियाइतिवा ॥ गतिप्रदेतिक्वचित् ॥ गणनाथोगणेशस्तस्यांबिकामातागणनाथांबिका ॥ गीयतइतिगीता ॥ वेदेरामायणेचैवपुराणेभारतेतथा ॥ आदौमध्येतथाचांतेहरिःसर्वत्रगीयतइतिस्मृतेः ॥ भगवद्गीतारूपावा ॥ गद्यपद्यैश्चपरिष्टुतागद्यपद्यपरिष्टुता ॥ ५० ॥ गांधारयतीतिगांधारी ॥ विभक्तेरलोपश्चार्षः ॥ वाराहीशक्तिरित्यर्थः ॥ धृतराष्ट्रपत्नीरूपावा ॥ गर्भशमनीजन्मशातनी ॥ गतिभ्रष्टानांपतितानामपिगतिप्रदा ॥ तदुक्तंभविष्ये ॥ मातापिसंत्यजेत्पुत्रंब्रह्महत्यादिकारिणम् ॥ त्वंपुनर्गर्हितंमग्नंपुनीषेदीनवत्सलेति ॥ गतिभ्रष्टागतिप्रदेतिपाठेसविशेषणमेकंनाम ॥ गतेर्देवत्वगतेर्भ्रष्टामानुषत्वंप्राप्तेत्यर्थः ॥ तथाचोक्तम् ॥ ब्रह्महस्तात्परिभ्रष्टे

गंभीरांगीगुणमयीगतातंकागतिप्रिया ॥ गणनाथांबिकागीतागद्यपद्यपरिष्टुता ॥ ५० ॥ गांधारीगर्भशमनीगतिभ्रष्टगतिप्रदा ॥ गोमतीगुह्यविद्यागौर्गोप्त्रीगगनगामिनी ॥ ५१ ॥ गोत्रप्रवर्धिनीगुण्यागुणातीतागुणाग्रणीः ॥ गुहांबिकागिरिसुतागोविंदांघ्रिसमुद्भवा ॥ ५२ ॥ गुणनीयचरित्राचगायत्रीगिरिशप्रिया ॥ गूढरूपागुणवतीगुर्वीगौरववर्धिनी ॥ ५३ ॥ ग्रहपीडाहरागुंद्रागरघ्नीगानवत्सला ॥ घर्महंत्रीघृतवतीघृततुष्टिप्रदायिनी ॥ ५४ ॥

ति ॥ हरिवंशेच ॥ इयमप्यायतापांगीगंगासर्वांगशोभना ॥ रूपिणीवैसरिच्छ्रेष्ठातत्रत्वामुपयास्यतीति ॥ स्वयंगतिभ्रष्टाऽन्येषांगतिप्रदेतिविरुद्धालंकारोऽयम् ॥ द्वारकास्थानैमिषारण्यस्थावानदीगोमतीतद्रूपा ॥ गुह्यविद्याब्रह्मविद्या ॥ गौःपृथ्वीरूपागोरूपावेदरूपावाणीरूपावास्वर्गरूपावा गोप्त्रीपालयित्री ॥ गगनेगंतुंशीलंयस्याःसागगनगामिनीआकाशगामिनीत्यर्थः ॥ ५१ ॥ गांत्रायतइतिगोत्रोभगीरथःपर्वतवृन्दंवातेनप्रवर्धितुंशीलंयस्याःसागोत्रप्रवर्धिनी भक्तानांगोत्रप्रवर्तयित्रीतिवा ॥ गुणेभ्योहितागुण्या ॥ गुणानतीतागुणातीतानिर्गुणेत्यर्थः ॥ गुणाग्रणीःगुणानांनियंत्री ॥ गुहांबिकाकार्तिकेयजननी ॥ गिरिसुतागिरेर्हिमवतःप्रसूतापार्वतीरूपावा ॥ गोविंदस्यांघ्रेःसमुद्भवोयस्याःसागोविंदांघ्रिसमुद्भवा ॥ ५२ ॥ गुणनीयानिगणनयोग्यानिविचारणीयानिचरित्राणियस्याःसागुणनीयचरित्रा ॥ च गातारंत्रायतइतिगायत्री ॥ गिरिशस्येश्वरस्यप्रियागिरिशप्रिया ॥ गूढंप्रच्छन्नंरूपंयस्याःसागूढरूपा ॥ गुणाःशांत्यादयस्तद्वतीगुणवती ॥ गुर्वीमहती ॥ गौरवंमहत्त्वंवर्धयितुंगौरवेणवावर्धितुंशीलंयस्याःसागौरववर्धिनी ॥ ५३ ॥ ग्रहपीडांहरतीतिग्रहपीडाहरा ॥ गुंद्रामुस्तातद्रात्मिका ॥ सर्वात्मकत्वात् ॥ गूहतिस्वरूपमितिगुरविद्यातांद्रातिकुत्सतेनाशयतीत्येतत्गुंद्राइतिवा ॥ विभक्तेःश्रवणमार्षम् ॥ गरघ्नीविषघ्नी ॥ गानवत्सलागीतप्रियेत्यर्थः ॥ घर्महंत्रीसन्तापहंत्री॥घृतंघृततुल्यमुदकमास्तियस्याःसाघृत

CC-0. In Public Domain. Digitization by eGangotri

वती ॥ घृतेनयातुष्टिस्तांप्रदातुंशीलंयस्याःसाघृततुष्टिप्रदायिनी ॥ ५४ ॥ घंटारवःप्रियोयस्याः साघण्टारवप्रिया ॥ घोरोयोऽघौघस्तद्विध्वंसकारिणी घोराघौघविध्वंसकारिणी॥घ्राणेंद्रियस्यघ्राणमा त्रेणवातुष्टिकरीघ्राणतुष्टिकरी ॥ घोषानितंबपादभूषणकांच्यःकिंकिण्यश्चतावर्ततेयस्याःसाघोषा ॥ अर्शआदित्वादच् ॥ तरंगस्रोतोभ्यांघोषयतीति आभीरपल्लीरूपावेतिघोषा ॥ घनएकर सोयआनंदस्तत्स्वरूपा ॥ स्त्रीत्वंछांदसंबहुव्रीहिर्वा ॥ राहोःशिरइतिवद्भेदोपचारात् ॥ सएषपरमानंदइतिश्रुतेः ॥ अतएवघनप्रियानिबिडप्रिया ॥ परमप्रेमास्पदत्वात् ॥ घनानांमेघानांवाप्रियाघन प्रिया ॥ आकाशगंगारूपेणतेषांप्लावनात् ॥५५॥ सर्वेषांपापानामज्ञानतत्कार्यस्यवाघातुकानाशिका ॥ घूर्णितानिजलानियस्याःसाघूर्णितजला ॥ घृष्टाघूर्णितापातकसंततिर्ययासाघृष्टपातकसंततिः ॥ घटकोटिभिःप्रपीताआपोयस्याःसाघटकोटिप्रपीतापा ॥ घटितंसंपादितमशेषमंगलंययासाघटिताशेषमंगला ॥ ५६ ॥ घृणावतीदयावती ॥ घृणनिधिर्दयासमुद्रः ॥ ह्रस्वआर्षः ॥ घस्मरासर्वभक्षण शीला ॥ सकालकालइतिश्रुतेः ॥ कालमूषिकभक्षकइतिस्मृतेश्च ॥ घूकानांवकानांनादोविद्यतेयस्याःसाघूकनादिनी ॥ घुसृणेनदेवांगनानामंगरागेणापिंजराईषत्पीतवर्णातनुर्यस्याःसाघुसृणापिंज रतनुः ॥ घर्घरनामाह्रदविशेषस्तत्स्वरूपिणी ॥ घर्घरइतिध्वनिर्यस्याःघर्घरनाम्नाह्रदेनतत्संगमनिमित्तेनस्वनोयस्याइतिवासाघर्घरस्वना ॥ ५७ ॥ चंद्रिकाज्योत्स्नारूपा ॥ चंद्रकांतमणिरिवां

घंटारवप्रियाघोराऽघौघविध्वंसकारिणी ॥ घ्राणतुष्टिकरीघोषाघनानंदाघनप्रिया ॥५५॥घातुकाघूर्णितजलाघृष्टपातकसंततिः ॥ घटकोटिप्रपीतापाघ टिताशेषमंगला ॥ ५६ ॥ घृणावतीघृणनिधिर्घस्मराघूकनादिनी ॥ घुसृणापिंजरतनुर्घर्घराघर्घरस्वना ॥५७॥ चंद्रिकाचंद्रकांतांबुश्चंचदापाचलद्युतिः॥ चिन्मयीचितिरूपाचचंद्रायुतशतानना ॥५८॥ चांपेयलोचनाचारुश्चार्वंगीचारुगामिनी ॥ चार्याचारित्रनिलयाचित्रकृच्चित्ररूपिणी ॥ ५९ ॥ चंपूश्चंदनशुच्यंबुश्चर्चनीयाचिरस्थिरा ॥ चारुचंपकमालाढ्याचमिताशेषदुष्कृता ॥ ६० ॥

बुयस्याःसाचंद्रकांतांबुः ॥ चंचंत्यः स्फुरंत्यआपोयस्याःसाचंचदापा ॥ चंचलापेतिक्वचित्पाठः ॥ तत्रापिसएवार्थः ॥ चलंतीस्फुरंतीद्युतिर्यस्याःसाचलद्युतिः ॥ चिन्मयीज्ञानस्वरूपा ॥ सत्यं ज्ञानमनंतंब्रह्मेतिश्रुतेः ॥ चितिरूपाज्ञानस्वभावा ॥ चंद्राणामयुतशतमिवाननंयस्याःसाचंद्रायुतशतानना ॥ चंद्रायुतसितानतेतिक्वचित्पाठस्तत्रसितत्वंशुभ्रत्वम् ॥ ५८ ॥ चांपेयपुष्पेइवलोचने यस्याःसाचांपेयलोचना ॥ चारुर्मनोहरा ॥ चारूण्यंगानियस्याःसाचार्वंगी ॥ चारुयथास्यात्तथागंतुंशीलंयस्याःसाचारुगामिनी ॥ चरणंचारोज्ञानंतदर्हतिचार्यतेज्ञायतेवाचार्या ॥ उपनिषत्प्रति पाद्येत्यर्थः ॥ चरित्राण्येवचारित्राणितेषांनिलया सच्चारित्राश्रयेत्यर्थः ॥ चित्रंविचित्रंजगत्करोतीतिचित्रकृत् ॥ तदुक्तंवासिष्ठे ॥ कश्चव्योमनिचित्रकृदिति ॥ चित्रंविचित्रंरूपमस्याअस्तीति चित्ररूपिणी ॥ ५९ ॥ चंपूश्चंपकवृक्षस्तत्पुष्पंवातद्रूपा ॥ गद्यपद्यमयंकाव्यंचंपूरित्यभिधीयतइतिवचनात्तद्रूपावाचंपूः ॥ चंदनमिवशुचिसुगंधिनिर्मलंचांबुयस्याःसाचंदनशुच्यंबुः ॥ चर्च नीयाविचारणीयाचिंतनीयेतियावत् ॥ चिरकालंव्याप्यस्थिराचिरस्थिरा अनादिरित्यर्थः ॥ गंगानामसहस्रेऽस्मिंस्तृतीयेविवृतेशते ॥ यदद्दष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ ३ ॥ चारुचं पकपुष्पाणांयामालास्ताभिराढ्याव्याप्ताचारुचंपकमालाढ्या ॥ चमितानिसंत्रासंप्रापितानिभक्षितानीत्येतदशेषदुष्कृतानियया साचमिताशेषदुष्कृता ॥ चमुअदनइतिधातुः ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिदेवाकाशश्चिदाकाशस्तंवहतिप्रापयतीतिचिदाकाशवहा ॥ चिंत्याध्येया ॥ ध्येयःसदासवितृमण्डलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः॥केयूरवान्मकरकुण्डलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रइतिस्मृतेः ॥ चंचत्स्फुरत्स्वप्रकाशमित्यर्थः ॥ अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतेः ॥ चामरवीजितावालव्यजनैःसेवितेत्यर्थः ॥ चोरितान्यशेषवृजिनानियासाचोरिताशेषवृजिना ॥ चरितान्यशेषमण्डलानिब्रह्मलोकादिस्थानानियासाचरिताशेषमंडला॥६१॥छेदिताखिलपापौघा छेदिताश्छिन्नाअखिलाःपापौघाययासाछेदिताखिलपापौघा॥छद्मघ्नीछद्मकपटमज्ञानंरोगविशेषंवाहंतीतिछद्मघ्नी॥छलंकपटंछलयतीतिछलमज्ञानंवातद्धारिणी ॥ छन्नंव्याप्तंत्रिविष्टपतलंस्वर्गभुवनंययासाछन्नत्रिविष्टपतला ॥ छोटितानिदूरीकृतान्यशेषवंधनानियासाछोटिताशेषवंधना ॥ छेदितेतिक्वचित्पाठः ॥ ६२ ॥ छुरितःक्षरितोऽमृतधाराणांजलप्रवाहाणामोघोययासाछुरितामृतधारौघा ॥ छिन्नानिच्छेदितान्येनांसिवृजिनानियासाछिन्नैनाः ॥ छातैनाइतिक्वचित्पाठः ॥ छंदगामिनीस्वच्छंदचारिणीस्वतंत्रेत्यर्थः ॥ छत्रीकृतोमरालौघोहंससमूहोययासाछत्रीकृतमरालौघा ॥ छटीकृतानिछटांप्रापितानिप्रकटीकृतान्येतत् ॥ निजामृतानिस्वस्वरूपभूतानिजलानियासाछटीकृतानिजामृता ॥६३॥ जह्नोरपत्यंजाह्नवी ॥ तथाचहरिवंशे ॥ राजर्षिणाततःपीतांगंगांदृष्ट्वामहर्षयः ॥ उपनिन्युर्महाभागांदुहितृत्वेनजाह्नवीमिति ॥ ज्याधनुर्गुणइवप्रतीयमाना ॥ तदुक्तम् ॥ लोलार्ककेशवौकोटीगंगाज्यानगरंधनुः ॥ कालिर्लक्ष्यःशरोविष्णुःशिवोधन्वीपुनातुमामिति ॥ जगतांमाताजगन्माताविश्वयोनिरित्यर्थः ॥ जप्याजपविषया ॥ जंघालादीर्घावीच्यस्तरंगायस्याःसाजंघालवीचिका ॥

चिदाकाशवहाचिंत्याचंचच्चामरवीजिता ॥ चोरिताशेषवृजिनाचरिताशेषमंडला ॥ ६१ ॥ छेदिताखिलपापौघाछद्मघ्नीछलहारिणी ॥ छन्नत्रिविष्टपतलाछोटिताशेषवंधना ॥ ६२ ॥ छुरितामृतधारौघाछिन्नैनाश्छंदगामिनी ॥ छत्रीकृतमरालौघाछटीकृतनिजामृता ॥६३॥ जाह्नवीज्याजगन्माताजप्याजंघालवीचिका ॥ जयाजनार्दनप्रीताजुषणीयाजगद्धिता ॥६४॥ जीवनंजीवनप्राणाजगज्ज्येष्ठाजगन्मयी ॥ जीवजीवातुलतिकाजन्मिजन्मनिबर्हिणी ॥ ॥ ६५ ॥ जाड्यविध्वंसनकरीजगद्योनिर्जलाविला ॥ जगदानंदजननीजलजाजलजेक्षणा ॥ ६६ ॥

जयतिसर्वोत्कर्षेणवर्ततइतिजयापार्वतीसखिरूपावा ॥ तथाचात्रैवेदेवीवाक्यम् ॥ सुलक्षणाशुभाचारासखीमेऽस्तुशुभोदया ॥ यथाजयाचविजयेत्यादि ॥ जनार्दनस्यप्रीताजनार्दनोवाप्रीतोयस्याःसाजनार्दनप्रीता ॥ जुषणीयाश्रीरुद्रादिभिःसेवनीया ॥ तथाचभागवते ॥ यत्पादनिःसृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिकृतेनशिवःशिवोभूदिति ॥ जगतांहिताजगद्धिता ॥ ६४ ॥ जीवनंजीवनहेतुः ॥ जीवनेनजलेनप्राणिनांप्राणायस्याःसा जीवनेनप्राणयतिचेष्टयतीतिवाजीवनप्राणाब्रह्मस्वरूपा ॥ कोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यादितिश्रुतेः ॥ जगदिति ॥ नित्यःपरस्मात्पुरुषान्नभिन्नमिदंजगदित्यभिधीयतेब्रह्म ॥ ब्रह्मैवेदंविश्वमिदंवरिष्ठंपुरुषएवेदंविश्वमित्यादिश्रुतेः ॥ विश्वंविष्णुरितिस्मृतेश्च ॥ यद्वा गच्छतिसर्वंव्याप्नोतीतिजगत् ॥ नित्यःसर्वगतःस्थाणुरितिस्मृतेः ॥ ज्येष्ठाआद्यामूलकारणत्वात् ॥ जगन्मयीजगत्स्वरूपास्वाध्यस्तविश्वेत्यर्थः ॥ जीवजीवातुलतिका जीवानांप्राणिनांजीवनौषधरूपा ॥ यदाहामरः ॥ जीवातुर्जीवनौषधमिति ॥ जन्मिजन्मनिवर्हिणी जन्मिनामुत्पत्तिमतामुत्पत्तिनिराकर्त्री ॥ ६५ ॥ जाड्यस्याज्ञानस्यसन्तापस्यवाविध्वंसनंकर्तुंशीलंयस्याःसाजाड्यविध्वंसनकरी ॥ जगद्योनिर्जगतांकारणम् ॥ जलानांजडानामज्ञानामित्येतत् ॥ आविलेवलुपितेवआवृतेवेतिवाजलाविला ॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवइतिभगवदुक्तेः ॥ जलैर्धर्मद्रवरूपैराविलाव्याप्ताइ

CC-0. In Public Domain. Digitization by eGangotri

तिवा ॥ जगदानंदजननीदर्शनादिनाजनमात्रस्यसुखकर्त्री ॥ जलमिवजलंविष्णुः ॥ सलिलएकोद्रष्टेतिश्रुतेः ॥ तस्माज्जाताजलजा ॥ जलजेक्षणा कमलेक्षणा ॥ ६६ ॥ जनलोचनपीयूषाप्रा णिमात्रनेत्रामृता ॥ जटातटविहारिणीईश्वरस्यजटाप्रदेशविहारिणी ॥ गंगाजलप्लावितकेशदेशेतिस्मृतेः ॥ जयंतीजयनशीला ॥ शक्रात्मजाऋषभकांतारूपावा ॥ अथाहभगवान्ऋषभदे वइत्यारभ्यजयंत्यामिंद्रदत्तायामितिभागवतोक्तेः ॥ जंजपूकानिपापानिहंतीतिजंजपूकघ्नी ॥ जन्तुपापघ्नीतिक्वचित्पाठः ॥ उत्पादितंज्ञानशरीरंययासाजनितज्ञानविग्रहा ॥ ६७ ॥ झल्लरी वाद्यकुशलाझल्लर्यावाद्येऽभिज्ञा ॥ झलज्झा लशब्दोजलशब्दानुकरणे झांकारझर्झराशब्दावपि ॥ झलज्झालशब्दायमानेनजलेनावृता ॥ झिंटीशेनमहादेवस्यमूर्तिविशेषेणश्रीकंठादिन्यासप्र सिद्धेनवंद्याझिंटीशवंद्या ॥ तथाचोक्तंशारदातिलके ; ॥ श्रीकंठानंतसूक्ष्माश्चत्रिमूर्तिरमरेश्वरः ॥ अर्धीशोभारभूतिश्चातिथीशःस्थाणुकोहरः ॥ झिंटीशोभौतिकःसद्योजातश्चानुग्रहेश्वरः ॥ अक्रूरश्चमहासेनःषोडशेश्वरमूर्तयइति ॥ झांका रशब्दंकर्तुंशीलंयस्याःसाझांकारकारिणी ॥ झर्झराइतिजलशब्दोवर्ततेयस्याःसाझर्झरावती ॥ ६८ ॥ टीकितंसेवितमशेषंपातालंभोगावतीरूपे णययासाटीकिताशेषपाताला ॥ एनांस्येवा द्रयस्तेषांपाटनेविदारणेटंकिकापाषाणविदारणशस्त्रविशेषरूपिणी ॥ टंकारशब्दोयथास्यात् टंकारशब्देनवानृत्यंतःकल्लोलायस्यांसाटंकारनृत्यत्कल्लो ला ॥ टीकनीयःस्वतरंगैःसेवनीयोमहांस्तटोयस्याःसाटीकनीयमहातटा ॥ ६९ ॥ डंबरमाडंबरंवेगवत्तरमित्येतत् यथास्यात्तथाप्रवहतीतिडंबरप्रवहा ॥ डीनान्युड्डीयमानानियानिराजहं

जनलोचनपीयूषाजटातटविहारिणी ॥ जयंतीजंजपूकघ्नीजनितज्ञानविग्रहा ॥ ६७ ॥ झल्लरीवाद्यकुशलाझलज्झालजलावृता ॥ झिंटीशवंद्याझांकारका रिणीझर्झरावती ॥ ६८ ॥ टीकिताशेषपातालाटंकिकैनोद्रिपाटने ॥ टंकारनृत्यत्कल्लोलाटीकनीयमहातटा ॥६९॥ डंबरप्रवहाडीनराजहंसकुलाकुला॥ डमड्डमरुहस्ताचडामरोक्तमहांडका ॥७०॥ ढौकिताशेषनिर्वाणाढक्कानादचलज्जला ॥ ढुंढिविघ्नेशजननीढणड्ढुणितपातका ॥७१॥ तर्पणीतीर्थतीर्था चत्रिपथात्रिदशेश्वरी॥त्रिलोकगोप्त्रीतोयेशीत्रैलोक्यपरिवंदिता॥७२॥तापत्रितयसंहर्त्रीतेजोबलविवर्धिनी॥त्रिलक्ष्यातारणीतारातारापतिकरार्चिता ७३

सानांकुलानितैराकुलाव्याप्ताडीनराजहंसकुलाकुला ॥ डमदितिशब्दायमानोडमरुर्हस्तेयस्याःसाडमड्डमरुहस्ताच ॥ डामरोडामरकल्पोनवाक्षरदेवीमंत्रस्यप्रतिपादकोग्रंथोमहाराष्ट्रेषुप्रसिद्धस्तत्रो क्तंप्रतिपादितंमहांडकंमंत्रमयंमहच्छरीरंयस्याः साडामरोक्तमहांडका ॥ गंगागौर्योरभेदात् ॥ ७० ॥ ढौकितंभक्तेभ्यःसेवितंप्रापितमितियावत् ॥ः अशेषनिर्वाणंसालोक्यसामीप्यसा रूप्यसार्ष्टिसायुज्यलक्षणंपंचविधंकैवल्यंययासाढौकिताशेषनिर्वाणा ॥ ढक्कावाद्यविशेषस्तस्यानादवन्नादंवंतिचलंतिजलानियस्याःसाढक्कानादचलज्जला ॥ ढुंढिश्चासौविघ्नेशश्चेतितथातस्यजननी ढुण्ढिविघ्नेशजननी ॥ ढणदितिशब्दानुकरणे ॥ ढणच्छब्दोयथास्यात्तथाढुणितानिदूरीकृतानिपातकानियस्याःसाढणड्ढुणितपातका ॥ ७१ ॥ सर्वांस्तर्पयतीतितृप्यंत्यस्यामनयेतिवासर्वेइतितर्पणी ॥ तीर्थानांनिपानागमर्षिजुष्टजलगुरूणांतीर्थंतीर्थत्वंययासातीर्थतीर्था ॥ यदाहामरः ॥ निपानागमयोस्तीर्थमृषिजुष्टेजलेगुराविति ॥ त्रिपथा त्रिषुलोकेषुपंथामार्गोयस्याःसात्रिपथा ॥ त्रिदशानांदेवा नामीश्वरीत्रिदशेश्वरी ॥ त्रिदिवेश्वरीतिक्वचित्पाठः ॥ त्रिलोकंगोपायतीतित्रिलोकगोप्त्री ॥ तोयेशीजलानांतदधिष्ठातॄणामीश्वरी ॥ त्रिलोकस्थैर्जनैःपरितोऽभिवादितास्तुतावेतित्रैलोक्यपरिवंदिता ॥ ॥ ७२ ॥ अध्यात्मिकाधिदैविकाधिभौतिकतापत्रयंसंहरतीतितापत्रितयसंहर्त्री ॥ तेजोबलेविवर्धयितुंशीलंयस्याःसातेजोबलविवर्धिनी ॥ त्रिषुलोकेषुलक्ष्यतेरूपंयस्याइतित्रिलक्ष्या ॥ तारयतिसर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तरंत्यनयाऽस्यामितिवासर्वेइतिवारणी ॥ तारयतिभक्तानितितारामणवरूपानक्षत्ररूपावा ॥ अहल्याद्रौपदीसीतातारामंदोदरीतथेत्यत्रोक्ततारारूपावा ॥ तारापतिकरार्चिताचंद्ररश्मिभिःपूजिता ॥
अथवातारापतयेचंद्रायशिरोधारणेनकंसुखंरातीतितारापतिकरोरुद्रस्तेनार्चिता ॥७३॥ त्रैलोक्यपावनीपुण्या त्रैलोक्यंपावयंतीतित्रैलोक्यपावन्योगौतमीप्रमुखानद्यस्तासांमध्येपुण्यापुण्यातिशयहेतुः ॥
तुष्टिदासुखदा ॥ तुष्टिरूपिणीतुष्टिस्वरूपा ॥ तृष्णाइच्छातस्याश्छेत्रीतृष्णाछेत्री ॥ तीर्थमात्राणांसप्तानांवाब्रह्मपुत्राणांमातातीर्थमाता ॥ त्रिविक्रमपदोद्भवा त्रिविक्रमोवामनस्तस्यपादावनेजना
ज्जाता ॥ ७४ ॥ तपइंद्रियमनसामैकाग्र्यम् ॥ मनसश्चेंद्रियाणांचऐकाग्र्यंपरमंतपइत्युक्तेस्तन्मयीतपोमयीआलोचनमयीत्यर्थः ॥ तपोरूपाकृच्छ्रचांद्रायणादिरूपा ॥ तपःस्तोमफलप्रदातपोनिकर
फलदात्री ॥ त्रैलोक्यंव्याप्तुंशीलंयस्याःसात्रैलोक्यव्यापिनी ॥ सर्वव्यापिकेत्यर्थः ॥ तृप्तिस्तृप्तिस्वरूपा ॥ तृप्तिंसुखंकरोतीतितृप्तिकृत् ॥ तत्त्वरूपिणीचतुर्विंशतितत्त्वरूपिणी परमार्थरूपिणीतिवा ॥
॥ ७५ ॥ त्रैलोक्येसुंदरंसौंदर्यंयस्याःसात्रैलोक्यसुंदरी त्रैलोक्यमनोहरेतिवा ॥ तुर्याऽवस्थात्रयातीता ॥ तदुक्तम् ॥ अहंभावानहंभावौत्यक्त्वासदसतीतथा ॥ यदसक्तंसमंस्वच्छंस्थितंतत्तुर्यमुच्यत
इति ॥ तुर्यस्यापिप्रतियोग्यधीननिरूप्यत्वेनकल्पितत्वात्तदतीतमतिक्रांतंयत्पदंपरंब्रह्मतत्प्रददातीतितुर्यातीतपदप्रदा ॥ त्रैलोक्यलक्ष्मीस्त्रैलोक्यसंपत् ॥ त्रैलोक्यस्यलक्ष्मीर्यस्याःसकाशादितिवा ॥
त्रीणिपदान्यस्याइतित्रिपदी ॥ त्रीणिपदाविचक्रमइतिश्रुतेः ॥ त्रिषुलोकेषुपदंस्थानमस्याइतिवा ॥ तथ्याकालत्रयाबाध्या ॥ सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः ॥ तीर्थेषुसाध्वीतीथ्याइतिवापाठः ॥

त्रैलोक्यपावनीपुण्यातुष्टिदातुष्टिरूपिणी ॥ तृष्णाछेत्रीतीर्थमातात्रिविक्रमपदोद्भवा ॥ ७४ ॥ तपोमयीतपोरूपातपःस्तोमफलप्रदा ॥ त्रैलोक्यव्यापिनी
तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ॥ ७५ ॥ त्रैलोक्यसुंदरीतुर्यातुर्यातीतपदप्रदा ॥ त्रैलोक्यलक्ष्मीस्त्रिपदीतथ्यातिमिरचंद्रिका ॥ ७६ ॥ तेजोगर्भातपःसारा
त्रिपुरारिशिरोगृहा ॥ त्रयीस्वरूपिणीतन्वीतपनांगजभीतिनुत् ॥७७॥ तरिस्तरणिजामित्रंतर्पिताशेषपूर्वजा ॥ तुलाविरहितातीव्रपापतूलतनूनपात् ॥
॥ ७८ ॥ दारिद्र्यदमनीदक्षादुष्प्रेक्षादिव्यमंडना ॥ दीक्षावतीदुरावाप्याद्राक्षामधुरवारिभृत् ॥ ७९ ॥

तिमिरमंधकारंतत्रचंद्रिकाकौमुदीवोज्ज्वला ॥ तिमिरमज्ञानंतस्यचंद्रिकानाशिकेत्यर्थइतिवा ॥ ७६ ॥ ईश्वरस्यतेजोवीर्यमग्निनात्यक्तंगर्भेयस्याःसातेजोगर्भा ॥ तपसांसारोबलंयस्याःसातपः
सारा ॥ तपसांसारभूतेतिवा ॥ त्रिपुरारेःशिरोगृहंयस्याःसात्रिपुरारिशिरोगृहा ॥ त्रयीस्वरूपिणीवेदत्रयरूपा ॥ तनोतिप्रपंचजातमितितन्वी ॥ उकारश्छांदसः ॥ सुंदरीतिवा ॥ गंगानामसहस्रे
स्मिश्चतुर्थेविवृतेशते ॥ यद्दृष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ ४ ॥ तपनांगजस्ययमस्यभीतिमपनुदतीतितपनांगजभीतिनुत् ॥ ७७ ॥ तरत्यज्ञानंतत्कार्यमितितरिःभक्तानांसं
सारार्णवनौस्वरूपेतिवा ॥ तरणिजोयमस्तस्यामित्रम् ॥ तदधिकारखंडनात् ॥ तरणिजायायमुनायामित्रमितिवा ॥ तर्पितास्तृप्तिंप्रापिताअशेषाभगीरथस्यपूर्वजाःप्रपितामहाअशेषाणां
जनानांपूर्वजाःपितृपितामहाद्याययेतिवासातर्पिताशेषपूर्वजा ॥ तुलाविरहितापरिमाणमतीतेत्यर्थः ॥ तीव्रपापान्येवतूलानितेषुतनूनपाद्वह्निस्तद्दाहिकेत्यर्थः ॥ ७८ ॥ दारिद्र्यदमनी
दौर्गत्यच्छेत्री ॥ दक्षाभुक्तिमुक्तिप्रदानेचतुरा ॥ दक्षभार्याप्रसूतिरूपावा ॥ प्रसूतिंमानवींदक्षउपयेमेह्यजात्मजइतिभागवतोक्तेः ॥ दीक्षेतिक्वचित् ॥ दुष्प्रेक्षाभक्तिमन्तरेणद्रष्टुमश
क्या ॥ दिव्यमलौकिकंमंडनंभूषणंयस्याःसादिव्यमंडना ॥ वैदिकीतांत्रिकीचदीक्षावर्ततेयस्याःसादीक्षावती ॥ दुरावाप्याज्ञानमन्तरेणप्राप्तुमशक्या ॥ तमेवविदित्वाऽतिमृत्युमेतिनान्यः

पंथाविद्यतेऽयनायेतिश्रुतेः ॥ द्राक्षामृद्वीकातद्वन्मधुरंवारिविभर्तीतिद्राक्षामधुरवारिभृत् ॥ ७९ ॥ दर्शितंप्रकाशितंमायाविनेवगंधर्वनगरादिकमनेकंनानाविधंकुतुकंकौतुकंजगल्लक्षणमाश्चर्यंयया
सादर्शितानेककुतुका ॥ दुष्टानियानिदुर्जयदुःखानितानिहरतीतितथा ॥ दुष्टदुर्जयदुःखकृदितिपाठेदुष्टानांदुर्जयदुःखकृदित्यर्थः ॥ दैन्यंकार्पण्यंहरतीतिदैन्यहृत् ॥ दैत्यहृदितिपाठेदैत्यान्हराति
नाशयतीत्यर्थः ॥ दुरितानिहन्तीतिदुरितघ्नीच ॥ दनोरपत्यानिदानवास्तेषामरेर्विष्णोःपदाब्जात्पादपद्माज्जातादानवारिपदाब्जजा ॥ विष्णुपादार्घ्यसंभूतेतिस्मृतेः ॥ ८० ॥ :दन्दशूकाः
सर्पास्तेषांविषंहंतीतिदंदशूकविषघ्नीच ॥ दारिताविदारिताऽघौघसंततिःपापपरंपराययासादारिताघौघसंततिः ॥ द्रवतीतिद्रुतावेगगामिनीतियावत् ॥ मन्दारपारिजातसंतानकल्पवृक्षहरिचंदनैर्व्याप्तादे
वद्रुमच्छन्ना ॥ दुर्वाराणिप्रायश्चित्तादिभिश्छेत्तुमशक्यान्यघानिपापानिविघातयितुंशीलंयस्याःसादुर्वाराघविघातिनी ॥ उक्तंच ॥ प्रायश्चित्तंयदिस्यात्तवजलकणिकाब्रह्महत्यादिपापेकस्त्वांस्तो
तुंसमर्थस्त्रिजगदघहरेदेविगंगेनमस्तेइति ॥ ८१ ॥ दमग्राह्यादमादिसाधनचतुष्टयैःप्राप्या ॥ तथाचश्रुतिः ॥ शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्येदिति ॥ देवमाताऽ
दितिस्वरूपा ॥ देवलोकप्रदर्शिनीब्रह्मलोकादिप्रापयित्री ॥ देवःस्वप्रकाशःसएवलोक्यतइतिलोकस्तत्प्रदर्शिनीतिवा ॥ देवदेवप्रियाविश्वेश्वरवल्लभा ॥ देवीद्योतमानास्वप्रकाशेत्यर्थः ॥

दर्शितानेककुतुकादुष्टदुर्जयदुःखहृत् ॥ दैन्यहृद्दुरितघ्नीचदानवारिपदाब्जजा ॥ ८० ॥ दंदशूकविषघ्नीचदारिताघौघसंततिः ॥ द्रुतादेवद्रुमच्छन्नादुर्वा
राघविघातिनी ॥ ८१ ॥ दमग्राह्यादेवमातादेवलोकप्रदर्शिनी ॥ देवदेवप्रियादेवीदिक्पालपददायिनी ॥ ८२ ॥ दीर्घायुःकारिणीदीर्घादोग्ध्रीदूषणव
र्जिता ॥ दुग्धांबुवाहिनीदोह्यादिव्यादिव्यगतिप्रदा ॥ ८३ ॥ द्युनदीदीनशरणंदेहिदेहनिवारिणी ॥ द्राघीयसीदाघहंत्रीदितपातकसंततिः ॥ ८४ ॥
दूरदेशांतरचरीदुर्गमादेववल्लभा ॥ दुर्वृत्तघ्नीदुर्विगाह्यादयाधारादयावती ॥ ८५ ॥

दिक्पालपददायिनीइंद्रादिपदप्रापयित्रीत्यर्थः ॥ ८२ ॥ दीर्घमायुःकर्तुंशीलंयस्याःसादीर्घायुःकारिणी ॥ दीर्घाऽनवच्छिन्ना ॥ दोग्ध्रीधर्मार्थकाममोक्षप्रसवा ॥ दूषणवर्जिताअविद्यात
त्कार्यरहितेत्यर्थः ॥ दुग्धमेवांबुवहितुंशीलंयस्याःसातथा ॥ गोरूपधरापृथ्वीस्वरूपेत्यर्थः ॥ साहिदुग्धांबुनाचतुःसमुद्रंपूरितवती ॥ अतएवकालिदासोपिकथयतिस्म ॥ पयोधरीभूतचतुःसमु
द्रांजुगोपगोरूपधरामिवोर्वीमिति ॥ धर्मार्थकाममोक्षान्दुह्यतीतिदोह्या ॥ धर्मार्थकाममोक्षायस्याःप्राप्यन्तइत्यर्थः ॥ दिविभवादिव्याऽलौकिकीत्यर्थः ॥ दिव्यगतिप्रदाऽलौकिकपदप्रदेत्यर्थः ॥
॥ ८३ ॥ :दिवोनदीद्युनदीस्वर्गंगेत्यर्थः ॥ दीनशरणं दीनानांमहापातकिनामपिशरणंरक्षित्री ॥ तदुक्तम् ॥ मातापिसंत्यजेत्पुत्रंब्रह्महत्यादिकारिणम् ॥ त्वंपुनर्गर्हितंमग्नंपुनीषेदीनवत्सलेइति ॥
देहिदेहनिवारिणी अविद्यानिरासेनजीवोपाधिभूतदेहद्वयविनाशिनीत्यर्थः ॥ द्राघीयसीदीर्घामहत्तरेतियावदित्यर्थः ॥ महांतंविभुमात्मानम् महतोमहीयानित्यादिश्रुतेः ॥ दाघहंत्रीसन्तापच्छेत्री ॥
दिताखंडितापातकसंततिःपापपरंपराययासादितपातकसंततिः ॥ ८४ ॥ दूरदेशांतरेचर्तुंशीलंयस्याःसादूरदेशांतरचरी ॥ दूरदेशस्थितापिस्वस्मर्तॄणांसर्वपापनाशिनीत्यर्थः ॥ श्रद्धाभक्तिध्यान
यमाद्यैर्विनानगम्यतइतिदुर्गमा ॥ तदुक्तम् ॥ श्रद्धाभक्तिध्यानयमाद्यैर्यतमानैर्ज्ञातुंशक्योदेवइहैवाशुयईशः ॥ दुर्विज्ञेयोजन्मशतैश्चापिविनातैस्तंसंसारध्वांतविनाशंहरिमीडइति ॥ देवानामभी

CC-0. In Public Domain. Digitization by eGangotri

ष्टादेववल्लभा ॥ देवःश्रीविष्णुःश्रीरुद्रोवावल्लभोयस्याःसातथोतिवा ॥ दुर्वृत्तान्दुष्टान्पाप्मनोवाहंतीतिदुर्वृत्तघ्नी ॥ दुर्विगाह्याऽनुग्रहमंतरेणप्राप्तुमशक्या ॥ दुर्विगाहेतिपाठेपिसएवार्थः ॥ दयाधाराकृपाधिकरणम् ॥ दयावतीकृपायुक्ता ॥ ८५ ॥ दुर्दुःखेनासदनमासादनंज्ञानंप्राप्तिर्वायस्याःसा ॥ दानेपुरुषार्थचतुष्टयप्रदानेशीलंस्वभावोयस्याःसादानशीला ॥ द्रवितुंनिरंतरंगंतुंपापसंघान्द्रावयितुंशीलंस्वभावोयस्याःसाद्राविणी ॥ द्रुहिणेनब्रह्मणास्तुताद्रुहिणस्तुता ॥ दैत्यदानवयोःसंशुद्धिंकर्तुंशीलंयस्याःसादैत्यदानवसंशुद्धिकर्त्री ॥ दुष्टांबुद्धिंहर्तुंशीलंयस्याःसादुर्बुद्धिहारिणी ॥ ८६ ॥ सरणंसारः दानेनसारोज्ञानंयस्याःसादानसारा ॥ तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेनेतिश्रुतेः ॥ दययासारोज्ञानंयस्याःसादयासारा ॥ द्यांदिवंभूमिंचविगाहितुंशीलंयस्याःसाद्यावाभूमिविगाहिनी ॥ दृष्टंफलमैहिकसुखादिअदृष्टंफलंपारलौकिकंस्वर्गमोक्षादितयोःप्राप्तिर्यस्याःसादृष्टादृष्टफलप्राप्तिः ॥ देवसमूहैरभिवंदितास्तुत्यावादेवतावृंदवंदिता ॥ सर्वदेवैर्नमस्कृतेतिवाराहोक्तेः ॥ ८७ ॥ दीर्घंमहद्व्रतंसंकल्पःसृष्ट्यादिलक्षणंयस्याःसादीर्घव्रता ॥ दीर्घादृष्टिर्ज्ञानंयस्याःसादीर्घदृष्टिरपरिच्छिन्नज्ञानस्वरूपावा ॥ दीप्तंशंखकुंदेंदुवदुज्ज्वलंतोयंयस्याःसादीप्ततोया ॥ तदुक्तंवाराहे ॥ शंखकुंदेंदुधवलेति ॥ दुःखेनालभनंप्राप्तिर्यस्याःसादुरालभा ॥ दुर्लभेत्यर्थः ॥ दंडयित्रीदंडकर्त्रीकारयित्रीतिवा ॥ दंडनीतिरर्थशास्त्ररूपा ॥ दुष्टेषुपापेषुदंडंधारयंतियेतेदुष्टदंडधराराजादयस्तैरर्चिता ॥८८॥ दुरोदरंद्यूतादिदुर्वृत्तंतद्धंतुंशीलंयस्याःसादुरोदरघ्ना ॥ दावोवनाग्निस्तद्वदर्चिर्दीप्तिर्यस्याःसादावार्चिः ॥ द्रवतीतिद्रवत्स्वकार्येव्याप्नुवत्परिपूर्णमित्यर्थः ॥ द्रव्याणां

दुरासदादानशीलाद्राविणीद्रुहिणस्तुता ॥ दैत्यदानवसंशुद्धिकर्त्रीदुर्बुद्धिहारिणी ॥८६॥ दानसारादयासाराद्यावाभूमिविगाहिनी ॥ दृष्टादृष्टफलप्राप्तिर्देवतावृंदवंदिता ॥ ८७ ॥ दीर्घव्रतादीर्घदृष्टिर्दीप्ततोयादुरालभा ॥ दंडयित्रीदंडनीतिर्दुष्टदंडधरार्चिता ॥ ८८ ॥ दुरोदरघ्नीदावार्चिर्द्रवद्द्रव्यैकशेवधिः ॥ दीनसंतापशमनीदात्रीदवथुवैरिणी ॥ ८९ ॥ दरीविदारणपरादांतादांतजनप्रिया ॥ दारिताद्रितटादुर्गादुर्गारण्यप्रचारिणी ॥ ९० ॥ धर्मद्रवाधर्मधुराधेनुर्धीराधृतिर्ध्रुवा ॥ धेनुदानफलस्पर्शाधर्मकामार्थमोक्षदा ॥ ९१ ॥

सर्वपदार्थानामेकःशेवधिर्मुख्यानिधिर्मुख्यआश्रयइत्यर्थः ॥ द्रव्यैकशेवधिः ॥ दीनानांसंसारांगारेपापच्यमानानांसंतापानाध्यात्मिकादितापान्शमयितुंशीलंयस्याःसादीनसंतापशमनी ॥ दीनसंतापशमनेतिपाठेपिसएवार्थः ॥ दात्रीपुरुषार्थचतुष्टयदानकर्त्री ॥ दवथुवैरिणीसंसारभयजन्यकंपनाशिनी ॥ ८९ ॥ दरीविदारणंपरंतात्पर्यंयस्याःसादरीविदारणपरा ॥ तदुक्तंवाराहे ॥ विंध्यपाषाणभेदिनीति ॥ दांतावशीकृतेंद्रिया ॥ दांतजनानांप्रियादांतजनावाप्रियायस्याःसादांतजनप्रिया॥दारितमद्रितटंययासादारिताद्रितटा ॥ दुर्गनामानंदैत्यंहतवतीतिदुर्गागौरी ॥ तथाचात्रैवदेवीवाक्यम् ॥ अद्यप्रभृतिमेनामदुर्गेतिख्यातिमेष्यति ॥ दुर्गदैत्यस्यसमरेघातनादितिदुर्गमादिति ॥ तद्रूपा ॥ गंगागौर्यंतरंयच्चयोर्ब्रूतेमूढधीस्तुसइतिभाविष्येदर्शनात् ॥ दुर्गारण्येदुर्गमेवनेदुर्गासुरएवारण्यंसुडभयत्रप्रचर्तुंप्रहर्तुंचशीलंयस्याःसादुर्गारण्यप्रचारिणी ॥ ९० ॥ धर्मरूपोद्रवोयस्याधर्मात्मकद्रवस्वरूपावासाधर्मद्रवा ॥ तथाचवाराहे ॥ धर्मस्तुद्रवरूपेणब्रह्मणानिर्मितःपुरा ॥ तद्वैगंगेतिविख्यातेति ॥ धर्मधुराधर्मश्रेष्ठासर्वोत्कृष्टधर्मरूपेत्यर्थः ॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमितियाज्ञवल्क्योक्तेः ॥ धेनुःकामधेनुस्वरूपा ॥ धेनूनामास्मिकामधुगितिभगवद्वचनात् ॥ धीराविदुषी ॥ यद्वाधियमद्वैतबुद्धिंरातिददातीतिधीरा ॥ उक्तंच ॥ ईश्वरानुग्रहादेवपुंसामद्वैतवासनेति ॥ धृतिर्धारिका ॥ ससेतुर्विधृतिर्लोकानामसंभेदायेतिश्रुतेः ॥ ध्रुवानित्यानिश्चलावा ॥ एतदप्रमेयंध्रुवमितिश्रुतेः ॥

CC-0. In Public Domain. Digitization by eGangotri

कूटस्थमचलंध्रुवमितिस्मृतेश्च ॥ धेनुदानस्यफलंयस्मात्तादृशःस्पर्शोधेनुदानस्ययत्फलंपुण्यंतेनवास्पर्शोयस्याःसाधेनुदानफलस्पर्शा ॥ धेनुदानध्रुवस्पर्शेतिक्कचित्पाठः ॥ धर्मकामार्थमोक्षदापुरुषार्थ चतुष्टयदात्री ॥ ९१ ॥ धर्मरूपाएवोर्मयस्तद्वाहिनीधर्मोर्मिवाहिनी ॥ धुर्याश्रेष्ठा ॥ धात्रीजनयित्रीपोष्ट्रीपृथ्वीतिवा ॥ धात्रीविभूषणंपृथ्व्याअलंकरणम् ॥ धात्रीविभूषणेतिक्कचित्पाठः ॥ धर्मिणीजगदुत्पत्त्यादिधर्मवती पुण्यवतीतिवा ॥ धर्मेधर्मएववाशीलंस्वभावोयस्याःसाधर्मशीला ॥ धन्विनांकोटिभिःकृतमवनंयस्यास्तत्कोटीनांवाकृतमवनंययासाधन्विकोटिकृतावना ॥ तथा चोक्तम् ॥ धनुषांकोटिभिर्ब्रह्मतदर्धंजाह्नवीजलम् ॥ तदर्धंचहरेर्नामतदर्धंस्नानदानयोरिति ॥ ९२ ॥ ध्यातुःपुरुषस्यपापहराध्यातृपापहरा ॥ धातृपापहरेतिक्कचित्पाठः ॥ ध्येयाबुभुक्षुभिर्मुमुक्षुभिश्च चिंत्या ॥ धावनीपवित्रकारिणीगमनशीलावा ॥ धूतंविधूतंनाशितमित्येतत् कल्मषंययासाधूतकल्मषा ॥ गंगानामसहस्रेऽस्मिन्पंचमेविवृतेशते ॥ यदृष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥५॥ धर्मं रूपाधारा ॥ धर्मंध्रियतइतिवाधर्मधारा ॥ धर्माणांमध्येसाराश्रेष्ठाधर्मसारा ॥ धनंददातीतिधनदा ॥ धनवर्धिनीधनवृद्धिकर्त्री ॥ धृतिवर्द्धिनीतिक्कचित्पाठः ॥ ९३ ॥ धर्माधर्मलक्षणौयौगुणौतयो श्छेत्रीभेत्रीधर्माधर्मगुणच्छेत्री ॥ धत्तूरकुसुमानिप्रियाणियस्याःसाधत्तूरकुसुमप्रिया ॥ धर्मेशीतन्नियंत्री ॥ धर्मशास्त्रंजानातीतिधर्मशास्त्राद्वाज्ञानंबोधनंयस्याःसाधर्मशास्त्रज्ञा ॥ धनंचधान्यंचधन धान्येतयोर्वृद्धिकर्त्रीधनधान्यसमृद्धिकृत् ॥ ९४ ॥ धर्मलभ्यायोगैकप्राप्या ॥ धर्मस्वरूपंजलंयस्याःसाधर्मजला ॥ धर्मस्यप्रसवोयस्याःसाधर्मप्रसवा ॥ धर्मोदेयत्वेनवर्ततेयस्याःसाधर्मिणी

धर्मोर्मिवाहिनीधुर्याधात्रीधात्रीविभूषणम् ॥ धर्मिणीधर्मशीलाचधन्विकोटिकृतावना ॥ ९२ ॥ ध्यातृपापहराध्येयाधावनीधूतकल्मषा ॥ धर्मधाराधर्म साराधनदाधनवर्धिनी ॥ ९३ ॥ धर्माधर्मगुणच्छेत्रीधत्तूरकुसुमप्रिया ॥ धर्मेशीधर्मशास्त्रज्ञाधनधान्यसमृद्धिकृत् ॥ ९४ ॥ धर्मलभ्याधर्मजलाधर्म प्रसवधर्मिणी ॥ ध्यानगम्यस्वरूपाचधरणीधातृपूजिता ॥ ९५ ॥ धूर्धूर्जटिजटासंस्थाधन्याधीर्धारणावती॥नंदानिर्वाणजननीनंदिनीनुन्नपातका ॥ ॥ ९६ ॥ निषिद्धविघ्ननिचयानिजानंदप्रकाशिनी ॥ नभोंगणचरीनूतिर्नम्यानारायणीनुता ॥ ९७ ॥ निर्मलानिर्मलाख्यानानाशिनीतापसंप दाम् ॥ नियतानित्यसुखदानानाश्चर्यमहानिधिः ॥ ९८ ॥

साचसाचेतिसाविशेषणंनामैकम् ॥ धर्मस्यप्रसवलक्षणोधर्मोवर्ततेयस्याःसाधर्मप्रसवधर्मिणीतिवा ॥ ध्यानेनगम्यंस्वरूपंयस्याःसाध्यानगम्यस्वरूपाच ॥ धरणीपृथ्वीरूपा ॥ धातृपूजिताब्रह्मा चिंता ॥ ९५ ॥ धूनयतिपापानीतिधूः ॥ धूर्जटेरीश्वरस्यजटायांसंस्थासंस्थितिर्यस्याःसाधूर्जटिजटासंस्था ॥ धन्याकृतार्थाधनायहिताधन्येतिवा ॥ धीःसामान्यात्मिकाबुद्धिः ॥ धारणा वतीतद्विशेषरूपा ॥ नन्दातन्नाम्नी ॥ तदुक्तं नन्दाचालकनंदाचेति ॥ निर्वाणजननीकैवल्यसंपादयित्री ॥ नंदयितुंशीलंयस्याःसानंदिनी वसिष्ठधेनुरूपावा ॥ नुन्नानिदूरीकृतानि पातकानिययासानुन्नपातका ॥ ९६ ॥ निषिद्धाउत्सादिताविघ्ननिचयाययासानिषिद्धविघ्ननिचया ॥ निजानंदोब्रह्मानंदस्तंप्रकाशयितुंशीलंयस्याःसानिजानन्दप्रकाशिनी ॥ नभोंगणचरी आकाशमार्गवहा ॥ नूतिःस्तुतिस्वरूपा ॥ दीर्घत्वमार्षम् ॥ नम्यावंद्या ॥ नारायणीनारायणशक्तिः ॥ नुताब्रह्मेंद्रादिभिःस्तुता ॥ ९७ ॥ निर्गतःसंसाररूपोमलोयस्याःसानिर्मला ॥ निर्मलं संसारनाशकमाख्यानंकथनंयस्याःसानिर्मलाख्याना ॥ नाशिनीतापसंपदांतापपरंपराणांविघातिनी ॥ नियताएकरूपा ॥ नितरांयतासंयताइतिवा ॥ नित्यसुखंददातीतिनित्यसुखदा ॥ नानाश्चर्यमहानिधिःनानाश्चर्यंजगत्तस्यमहानिधिःपरममधिष्ठानमित्यर्थः ॥ ९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीसद्रिपा ॥ नंदसरोमातानंदानांसरसांचजनयित्री ॥ नायिकाश्रेष्ठासर्वनियन्त्रीत्यर्थः ॥ नृत्यकर्त्रीस्वरूपावेत्यर्थः ॥ नाकदीर्घिकास्वर्गवापीस्वरूपा ॥ नष्टानांसंसारेपतितानामुद्धरणे मोचनेवीरादक्षानष्टोद्धरणधीराच ॥ नंदयतिसमृद्धान्करोतीतिनन्दना ॥ नंदमानन्दंसमृद्धिंवादातुंशीलंयस्याःसानंददायिनी ॥ ९९ ॥ निर्णिक्तंपवित्रीकृतमशेषंभुवनंययासानिर्णिक्ताशेषभुवना निर्गतःसंगःसंबंधोयस्याःसानिःसंगा ॥ असंगोनहिसज्जतइतिश्रुतेः ॥ निर्गतउपद्रवआध्यात्मिकादिलक्षणोयस्याःसानिरुपद्रवा ॥ निर्गतआलंबआश्रयोयस्याःसानिरालंबा ॥ स्वमहिमप्रति ष्ठितेत्यर्थः ॥ सभगवान्कस्मिन्प्रतिष्ठितःस्वेमहिम्नीतिश्रुतेः ॥ निष्प्रपंचाप्रपंचातीता ॥ एकमेवाद्वितीयमितिश्रुतेः ॥ निःशेषेणनाशितंमहामलमज्ञानंययासानिर्णाशितमहामला ॥ १०० ॥ निर्मल ज्ञानजननीब्रह्मात्मैकत्वज्ञानोत्पादिनी ॥ निःशेषायेप्राणितापाआध्यात्मिकादिलक्षणास्तान्हरतीतिनिःशेषप्राणितापहृत् ॥ नित्यउत्सवोयस्याःसानित्योत्सवा ॥ नित्येनसुखेनस्वरूपानंदेनानित्यं सर्वदावातृप्तानित्यतृप्ता ॥ नमस्कार्यानमस्कारविषया ॥ अंजनमज्ञानंतद्रहितानिरंजना ॥ १ ॥ निष्ठाकाष्ठानियमइतियावत् तद्वतीतिनिष्ठावती ॥ निर्निर्गतआतंकआशंकायस्याःसानिरा तंका ॥ तत्रकोमोहःकःशोकइतिश्रुतेः ॥ निर्निर्गतःपापलेपोयस्याःसानिर्लेपा ॥ शुद्धमपापविद्धमितिश्रुतेः ॥ निश्चलःकूटस्थआत्मायस्याःसानिश्चलात्मिका ॥ निर्गतमवद्यंदूषणंयस्याःसानिर

नदीनंदसरोमातानायिकानाकदीर्घिका ॥ नष्टोद्धरणधीराचनंदनानंददायिनी ॥ ९९ ॥ निर्णिक्ताशेषभुवनानिःसंगानिरुपद्रवा ॥ निरालंबानिष्प्रप चानिर्णाशितमहामला ॥ १०० ॥ निर्मलज्ञानजननीनिःशेषप्राणितापहृत् ॥ नित्योत्सवानित्यतृप्तानमस्कार्यानिरंजना ॥ १ ॥ निष्ठावतीनिरातंका निर्लेपानिश्चलात्मिका ॥ निरवद्यानिरीहाचनीललोहितमूर्धगा ॥ २ ॥ नंदिभृंगिगणस्तुत्यानागानंदानगात्मजा ॥ निष्प्रत्यूहानाकनदीनिरयार्णवदीर्घनौः ॥ ३ ॥ पुण्यप्रदापुण्यगर्भापुण्यापुण्यतरंगिणी ॥ पृथुःपृथुफलापूर्णाप्रणतार्तिप्रभंजिनी ॥ ४ ॥ प्राणदाप्राणिजननीप्राणेशीप्राणरूपिणी ॥ पद्मालयापराशक्तिःपुरजित्परमप्रिया ॥ ५ ॥

वद्या ॥ निरवद्यंनिरंजनमितिश्रुतेः ॥ निरीहाचेष्टारहिता ॥ कूटस्थमचलंध्रुवमितिस्मृतेः ॥ च नीललोहितमूर्धगाविश्वेश्वरमस्तकगा ॥ २ ॥ नंदिभृंगिगणैस्तुत्या नंदाचभृंगीचगणाश्चनं दिभृंगिगणास्तैस्तावेववागणौताभ्यांस्तुत्यास्तुत्यर्हा ॥ नागानागस्वरूपा ॥ नंदयतीतिनंदासमृद्धिदेत्यर्थः ॥ नगात्मजाहिमवतोदुहिता ॥ हिमाचलकृताश्रयेतिस्मृतेः ॥ निष्प्रत्यूहाविघ्नरहिता निर्गतःप्रत्यूहोयस्याइतिवा ॥ नाकनदीस्वर्गनदी ॥ निरयार्णवस्यपापसमुद्रस्यदीर्घानौः पारप्रापिकामहतीनौकेत्यर्थः ॥ ३ ॥ पुण्यंप्रददातीतिपुण्यप्रदा ॥ पुण्यंगर्भेयस्याःसापुण्यगर्भा ॥ पुण्यापुण्यस्वरूपा ॥ तद्धेतुत्वात् ॥ पुण्यरूपास्तरंगाविद्यंतेयस्याःसापुण्यनदीतिवापुण्यतरंगिणी ॥ पृथुर्महतीपरिपूर्णेत्यर्थः ॥ पृथ्ववतारूपावा ॥ पृथूनिमहांतिफलानियस्याःसापृथुफला ॥ पूर्णासर्वव्यापिका अनवच्छिन्नप्रवाहरूपावा ॥ प्रणतानामार्तिप्रभंजितुंशीलंयस्याःसाप्रणतार्तिप्रभंजिनी ॥ ४ ॥ प्राणान्ददातिभक्तानामभक्तानांखंडयतीतिवा प्राणदा ॥ प्राणिजननीजंतूत्पा दिनी ॥ प्राणेशीप्राणानांनियंत्री ॥ प्राणोहिरण्यगर्भःसमष्टिरूपस्तद्रूपंवर्ततेयस्याःसाप्राणरूपिणी ॥ हिरण्यगर्भःसमवर्तताग्रेइत्यादिश्रुतेः ॥ पद्ममालयोयस्याःसापद्मालयालक्ष्मीस्वरूपे त्यर्थः ॥ पराशक्तिर्मायाख्यातद्रूपा ॥ परास्यशक्तिर्विविधैवश्रूयतइतिश्रुतेः ॥ पुरजितस्त्रिपुरारेःपरमाचासौप्रियाचेतिपुरजित्परमप्रिया ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

परासर्वोत्कृष्टा ॥ नतत्समश्चाप्यधिकश्चदृश्यतइतिश्रुतेः ॥ परफलस्यकैवल्यस्यप्राप्तिर्यस्याःसापरफलप्राप्तिः ॥ त्वमापीतापीतांवरपुरनिवासंवितरसीत्युक्तेः ॥ पावनीसर्वपापशोधनी ॥ प्रायश्चित्तं यदिस्यात्तवजलकणिकाब्रह्महत्यादिपापेइत्युक्तेः ॥ च पयस्विनीप्रशस्तजलवतीपुण्यतोयेत्यर्थः ॥ परआनंदोययापरानंदस्वरूपावासापरानंदा ॥ स्त्रीत्वमार्षम् ॥ प्रकृष्टोऽर्थोयस्याःसाप्रकृष्टार्था ॥ प्रतितिष्ठत्यस्यांसर्वमितिप्रतिष्ठा ॥ पालनीपालनकर्त्री ॥ परापरस्वरूपा पूरयतीतिवापरा ॥ ६ ॥ पुराणेषुपठितापुराणपठितातत्प्रतिपाद्या ॥ अथवापुराणःपरमात्मातद्रूपत्वेनपठिताकथितेत्यर्थः ॥ प्रीतासर्वेषांप्रियतमा सर्वान्प्रीणातीतिवा ॥ प्रणवाक्षरम्ॐकारस्तद्रूपिणी ॥ पार्वतीभवानीरूपा ॥ प्रेमसंपन्नाप्रीतिसंयुक्तापरप्रेमास्पदेत्यर्थः ॥ पशूनांजीवानांपाशाश्चतुर्विंशतितत्त्वानितेषांविमोचनी पशुपाशविमोचनी ॥ विनाशिनीतिपाठेपिसएवार्थः ॥ गंगानामसहस्रेस्मिन्विवृतेद्विस्त्रिकेशते ॥ यदहृष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥६ ॥ ७ ॥ परमात्मस्वरूपाचपरब्रह्मैकलक्षणाच ॥ परब्रह्मप्रकाशिनीपरब्रह्मप्रकाशकारिणी ॥ परमानंदस्यनितरांस्पंदश्चलनंतद्वृत्त्यभिव्यक्तिर्यस्याःपुण्यकर्महेतुत्वात्सापरमानंदनिष्पंदा ॥ प्रायश्चित्तस्वरूपिणीसर्वपापैकप्रायश्चित्तरूपा ॥ प्रायश्चित्तंतुनत्रैवयत्र गंगानविद्यतइतिस्मृतेः ॥ ८ ॥ पानीयरूपनिर्वाणाजलस्वरूपकैवल्यमेवजलस्वरूपेणतिष्ठतीत्यर्थः ॥ परित्राणपरायणाभक्तरक्षणेपराश्रयरूपा ॥ पापान्येवेंधनानितेषुदवज्वालावनाग्निशिखा ॥ पापारिःपापानांशत्रुः ॥ पापानिनाम्नानुदतीतिपापनामनुत् ॥ ९ ॥ परमैश्वर्यजननीअणिमाद्यैश्वर्यदात्री ॥ प्रकृष्टाज्ञाप्रज्ञास्वप्रकाशज्ञानैकस्वभावा ॥ प्राज्ञानविद्यतेज्ञोयस्याःसाऽज्ञाप्रकृष्टाऽ

परापरफलप्राप्तिःपावनीचपयस्विनी ॥ परानंदाप्रकृष्टार्थप्रतिष्ठापालनीपरा ॥ ६ ॥ पुराणपठिताप्रीताप्रणवाक्षररूपिणी ॥ पार्वतीप्रेमसंपन्नापशुपाश
विमोचनी ॥ ७ ॥ परमात्मस्वरूपाचपरब्रह्मप्रकाशिनी ॥ परमानंदनिष्पंदाप्रायश्चित्तस्वरूपिणी ॥ ८ ॥ पानीयरूपनिर्वाणापरित्राणपरायणा ॥
पापेंधनदवज्वालापापारिःपापनामनुत् ॥ ९ ॥ परमैश्वर्यजननीप्रज्ञाप्राज्ञापरापरा ॥ प्रत्यक्षलक्ष्मीःपद्माक्षीपरव्योमामृतस्रवा ॥ ११० ॥ प्रसन्नरूपाप्र
णिधिःपूताप्रत्यक्षदेवता ॥ पिनाकिपरमप्रीतापरमेष्ठिकमंडलुः ॥ ११ ॥ पद्मनाभपदार्घ्येणप्रसूतापद्ममालिनी ॥ परर्द्धिदापुष्टिकरीपथ्यापूर्तिः
प्रभावती ॥ १२ ॥ पुनानापीतगर्भघ्नीपापपर्वतनाशिनी ॥ फलिनीफलहस्ताचफुल्लांबुजविलोचना ॥ १३ ॥

ज्ञाप्राज्ञा विदुषीतिवा ॥ परापराकार्यकारणरूपा ॥ परावराइतिपाठेपरेहिरण्यगर्भादयःअवरानिकृष्टायस्याःसातथा ॥ प्रत्यक्षालक्ष्मीरपरोक्षानिर्वाणश्रीर्यस्याःसाप्रत्यक्षलक्ष्मीः साक्षाल्लक्ष्मीस्वरूपेतिवा ॥ पद्मेपद्मपत्रेइवाऽक्षिणीयस्याःसापद्माक्षी ॥ परव्योमपरमाकाशरूपममृतंमरणरहितंस्वरूपंभक्तेभ्यःस्रवतिप्रयच्छतीतिपरव्योमामृतस्रवा ॥ आकाशस्तल्लिंगादितिन्यायात् ॥ ११० ॥ प्रसन्नमज्ञानं तत्कार्यरूपमलेननसंस्पृष्टंरूपंस्वरूपंयस्याःसाप्रसन्नरूपा ॥ प्रकर्षेणनिधीयतेकार्यजातंप्रलयकालेऽस्यामितिप्रणिधिः ॥ पुनातीतिपूतापरमपवित्रस्वरूपा ॥ पवित्राणांपवित्रंयइतिस्मृतेः ॥ प्रत्यक्षदेवताऽपरोक्षप्रत्यक्चैतन्यरूपा ॥ यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः ॥ पिनाकिपरमप्रीताविश्वेश्वरस्यात्यंतवल्लभा ॥ परमेष्ठिनोब्रह्मणःकमंडलुराश्रयत्वेनयस्याःसापरमेष्ठिकमंडलुः ॥ आदावादिपितामहस्यनियमव्यापारपात्रेजलमित्युक्तेः ॥ ११ ॥ पद्मनाभपदार्घ्येणप्रसूताविष्णुपादार्घ्येणसंभूता ॥ पश्चात्पन्नगशायिनोभगवतःपादोदकंपावनम् ॥ विष्णुपादार्घ्यसंभूतेत्याद्युक्तेः ॥ पद्मनाभपदाघातप्रसूतेतिवापाठः ॥ पद्मानांमालावर्ततेयस्याःसापद्ममालिनी ॥ परामृद्धिंददातीतिपरर्द्धिदा ॥ पुष्टिंकरोतीतिपुष्टिकरी ॥ पथ्यासंसाररोगस्यपथ्यस्वरूपा ॥ पूर्तिःपरिपूर्णरूपाउदरादिभरणरूपावा ॥ प्रभावतीप्रकाशवती ॥ ॥ १२ ॥ पुनातीतिपुनाना ॥ पीतानांपानकर्तॄणांपीतासतीतिवागर्भान्हंतीतिपीतगर्भघ्नी ॥ पापान्येवपर्वतास्तान्नाशितुंशीलंयस्याःसापापपर्वतनाशिनी ॥ फलंदेयत्वेनवर्ततेयस्याःसाफलिनी ॥ भक्तेभ्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दातुंफलंहस्तेइवयस्याःसाफलहस्ता फलंमातुलिंगादिफलंहस्तेयस्याइतिवा ॥ च फुल्लांबुजानीवविकासितानिलोचनानियस्याःसाफुल्लांबुजविलोचना ॥ १३ ॥ फालितंखंडितमेनसांपापानांमहाक्षेत्रं ययासाफालितैनोमहाक्षेत्रा ॥ भोगवतीरूपेणसर्पलोकभूषणरूपाफणिलोकविभूषणम् ॥ फेनच्छलेनप्रणुन्नानिदूरीकृतानिएनांसिपापानिययासाफेनच्छलप्रणुन्नैनाः ॥ फुल्लंविकासितंयत्कैरवंकुमुदंतद्गंधइवगंधस्तद्गंधोवावर्ततेयस्याःसाफुल्लकैरवगंधिनी ॥१४॥ फेनिलंफेनयुक्तंयदच्छमंबुतस्ययाधाराप्रवाहस्तेनाभादीप्तिर्यस्यास्तत्स्वरूपावा साफेनिलाच्छांबुधाराभा ॥ फुडितिशब्दानुकरणम् ॥ फुडितिशब्देनोच्चाटितंपातकंययासाफुडुच्चाटितपातका ॥ फाणितंपक्वान्नविशेषमिवस्वादुसलिलंयस्याःसाफाणितस्वादुसलिला ॥ फांटंतक्रंतद्वत्पथ्यंयज्जलंतेनाविलासाफांण्टपथ्यजलाविला ॥ १५ ॥ विश्वेषांमाताविश्वमाताच ॥ विश्वेशीसर्वेश्वरीत्यर्थः ॥ विश्वासर्वस्वरूपा ॥ विश्वेश्वरस्यप्रियाविश्वेश्वरोवाप्रियोयस्याःसाविश्वेश्वरप्रिया ॥ ब्रह्मणेपरमात्मनेहिरण्यगर्भायवेदायब्राह्मणायवाहिता ब्रह्मण्या ॥ [illegible]ण्यगर्भादीन्करोतीतिब्रह्मकृत् ॥ ब्रह्मणःशक्तिर्ब्राह्मी ब्रह्मणिभवानैष्कर्म्यलक्षणस्थितिरूपावा ॥ ब्रह्मिष्ठास्वमहिमस्थेत्यर्थः ॥ ब्राह्मणभक्तावा ॥ विगतंमलंपापंयस्मात्तथाभूतमुदकंयस्याःसाविमलोदका ॥ १६ ॥ विभावरीरात्रिरूपा भूरिद्युम्नभार्यारूपावा ॥ तथाचपाद्मे ॥ भूरिद्युम्नोमहाराजःक्षमामंडलपालकः॥ तस्यासञ्छतसाहस्राःप्रमदाःकमलेक्षणाः ॥ तासांविभावरीश्रेष्ठाबभूवतनुमध्यमेति ॥ च विरजाविगतंरजोयस्याःसाविरजाः ॥ शुद्धसत्त्वेत्यर्थः ॥ विक्रांतंव्याप्तमनेकंविष्टपंभुवनंययासाविक्रांतानेकविष्टपा ॥ विश्वमित्रंजगद्धितैषिणी ॥ विष्णुपदादुद्भूता

फालितैनोमहाक्षेत्राफणिलोकविभूषणम् ॥ फेनच्छलप्रणुन्नैनाःफुल्लकैरवगंधिनी ॥ १४ ॥ फेनिलाच्छांबुधाराभाफुडुच्चाटितपातका ॥ फाणितस्वादुसलिलाफांटपथ्यजलाविला ॥ १५ ॥ विश्वमाताचविश्वेशीविश्वाविश्वेश्वरप्रिया ॥ ब्रह्मण्याब्रह्मकृद्ब्राह्मीब्रह्मिष्ठाविमलोदका ॥ १६ ॥ विभावरीचविरजाविक्रांतानेकविष्टपा ॥ विश्वमित्रंविष्णुपदीवैष्णवीवैष्णवप्रिया ॥ १७ ॥ विरूपाक्षप्रियकरीविभूतिर्विश्वतोमुखी ॥ विपाशावैबुधीवेद्यावेदाक्षररसस्रवा ॥ १८ ॥ विद्यावेगवतीवंद्याबृंहणीब्रह्मवादिनी ॥ वरदाविप्रकृष्टाचवरिष्ठाचविशोधनी ॥ १९ ॥ विद्याधरीविशोकाचवयोवृंदनिषेविता ॥ बहूदकाबलवतीव्योमस्थाविबुधप्रिया ॥ १२० ॥

विष्णुपदी ॥ विष्णोरियंवैष्णवी ॥ वैष्णवानांविष्णुभक्तानांप्रियवैष्णवप्रिया ॥ १७ ॥ विरूपाक्षेत्रिनेत्रेप्रियंकरोतीतिविरूपाक्षप्रियकरी ॥ विभूतिरणिमाद्यष्टैश्वर्यरूपा ॥ विश्वतःसर्वतोमुखानि यस्याःसाविश्वतोमुखी ॥ सर्वतःपाणिपादंतत्सर्वतोऽक्षिशिरोमुखमितिस्मृतेः ॥ विगतःपाशोबंधनंसंसाररूपंयस्याःसाविपाशानदीविशेषरूपावा ॥ तथाचभीष्मपर्वणि॥ दृषद्वतींविपाशांचविपापांस्थूलवालुकामिति ॥ विबुधस्यविष्णोरियंवैबुधीदेवलोकभवावा ॥ वेद्यावेत्तुंयोग्या ॥ वैद्येतिचान्यत्र ॥ वेदाक्षरेभ्योवेदांतेभ्योब्रह्मानंदरसंस्रवतिब्रह्मानंदरसस्यवास्रवोयस्याःसाब्रह्मानंदरसस्रवा ॥ १८ ॥ विद्याब्रह्मविद्यारूपा ॥ वेगवतीस्रोतोगामिनी ॥ वंद्याऽभिवंद्यास्तुत्यावा ॥ बृंहणीदेहेन्द्रियादीनांपरिणामयित्री ॥ ब्रह्मवदितुंशीलंयस्याःसाब्रह्मवादिनी ॥ वरंददातीतिवरदा ॥ विशेषेणप्रकृष्टाविप्रकृष्टासर्वोत्तमेत्यर्थः ॥ वरिष्ठाश्रेष्ठाच ॥ वौपक्षिणिहंसेशेतइतिविर्शोब्रह्माउःशंकरःदधातिधारयतिपोषयतीतिवाधोविष्णुस्तान्ब्रह्मरुद्रविष्णून्नयतिप्रापयतीतिविशोधनी विशेषेणशोधयतिपवित्रयतीतिवा ॥ १९ ॥ विद्यांधरतीतिविद्याधरी विद्याधरस्त्रीरूपिणीतिवा ॥ स्त्रीनाम्निकमलोद्भवेतिवैष्णवोक्तेः ॥ विगतःशोकोयस्याःसाविशोका ॥ वयोवृंदैःपक्षिसमूहैर्नितरांसेवितावयोवृंदनिषेविता ॥ बहून्युदकानियस्याःसाबहूदका ॥ बलंविद्यतेयस्याःसाबलवती ॥ व्योमस्थाभूताकाशस्था ॥ परमेव्योम्निस्तिष्ठतीतिवाव्योमस्था ॥ परमेव्योमन्नित्यादिश्रुतेः ॥ विबुधानांदेवानांविश्वेश्वरस्य

CC-0. In Public Domain. Digitization by eGangotri

वाग्प्रियाविबुधप्रिया ॥ १२० ॥ वाणीवचनरूपासरस्वतीस्वरूपावा ॥ वेदःप्रतिपादकत्वेनवर्ततेयस्याःसावेदवती कुशध्वजदुहितृरूपावा वेदवतीहरणेउत्तरकांडेप्रसिद्धा रामायणे ॥ कृतेयुगेवेदवतींत्रेतायांजनकात्मजा ॥ द्वापरेद्रौपदीज्ञेयातेनकृष्णात्रिहायनीतिवचनाच्च॥ वित्ताज्ञानस्वरूपा ॥ ब्रह्मविद्यारूपस्तरंगोवर्ततेयस्याःसाब्रह्मविद्यातरंगिणी ब्रह्मविद्यानदीस्वरूपावा॥ ब्रह्मांडकोटिंकोटिपरिमितब्रह्मांडानिव्याप्तमंवपुर्यस्याःसाब्रह्मांडकोटिव्याप्तांबुः ॥ ब्रह्महत्यापहारिणीब्राह्मणवधापहरणशीला ॥ २१ ॥ ब्रह्मेशविष्णुरूपाहिरण्यगर्भविश्वनाथनारायणरूपाच ॥ बुद्धिरंतःकरणभेदस्तद्रूपा ॥ बुद्धिर्बुद्धिमतामस्मीतिभगवद्वचनात् ज्ञानस्वरूपावा ॥ विभवमैश्वर्यं विगतोभवोयस्मिंस्तंमोक्षंवा वर्धयितुंशीलंयस्याःसाविभववर्धिनी ॥ विशेषेणलसितुंशीलंयस्यतादृशंसुखंविलासिनांवासुखंददातीतिविलासिसुखदा ॥ वैश्यावैश्यजातिरूपातत्स्त्रीरूपावा ॥ वश्याइतिपाठेईश्वराधीनेत्यर्थः ॥ तथाचभागवते ॥ स्रवंतिसरितोभीताइति ॥ विश्वाइतिपाठेविश्वबाहुकाकाशीस्थादेवताविशेषरूपेत्यर्थः ॥ व्यापिनीव्यापनशीलाच ॥ वृषारणिर्धर्मोत्पत्तेःकारणम् ॥ २२ ॥ वृषांकस्यवृषभध्वजस्यमौलिर्मस्तकंनिलयआश्रयोयस्याःसावृषांकमौलिनिलया ॥ विपन्नानांविपद्ग्रस्तानांस्वजलेमृतानांवाआर्तिपीडांप्रभंजितुंशीलंयस्याःसाविपन्नार्तिप्रभंजिनी ॥ विभिःपक्षिभिर्नीताप्राप्ताव्याप्तेतियावत् विनययुक्ताइतिवा ॥ विनताविशेषेणनतानम्रेत्यर्थः ॥ : गरुडमातृरूपावा ॥ ब्रध्नतनयागोरूपा ॥ सूर्यसुताहिगावइतिश्रुतेः ॥ यमुनारूपावा ॥ गंगानामसहस्रेऽस्मिन्विवृतेसप्तमेशते ॥ यदृष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ ७ ॥ विनयेनयुक्ताविनयान्विता वीनांपक्षि

वाणीवेदवतीवित्ताब्रह्मविद्यातरंगिणी ॥ ब्रह्मांडकोटिव्याप्तांबुर्ब्रह्महत्यापहारिणी ॥ २१ ॥ ब्रह्मेशविष्णुरूपाचबुद्धिर्विभववर्धिनी ॥ विलासिसुखदावैश्याव्यापिनीचवृषारणिः ॥ २२ ॥ वृषांकमौलिनिलयाविपन्नार्तिप्रभंजिनी ॥ विनीताविनताब्रध्नतनयाविनयान्विता ॥ २३ ॥ विपंचीवाद्यकुशलावेणुश्रुतिविचक्षणा ॥ वर्चस्करीबलकरीबलोन्मूलितकल्मषा ॥ २४ ॥ विपाप्माविगतातंकाविकल्पपरिवर्जिता ॥ वृष्टिकर्त्रीवृष्टिजलाविधिर्विच्छिन्नबंधना ॥ २५ ॥ व्रतरूपावित्तरूपाबहुविघ्नविनाशकृत् ॥ वसुधारावसुमतीविचित्रांगीविभावसुः ॥ २६ ॥ विजयाविश्वबीजंचवामदेवीवरप्रदा ॥ वृषाश्रिताविषघ्नीचविज्ञानोर्म्यंशुमालिनी ॥ २७ ॥

णांनयेनसमुदायेनवाऽन्विता ॥ २३ ॥ विपंचीवीणातद्रूपा ॥ वीणावेणुमृदंगादिवाद्यरूपायतेनमइत्यत्रैवोक्तेः ॥ वाद्यकुशलावादनमात्रेदक्षा ॥ वेणोःश्रुतौश्रवणेरागविशेषविज्ञानेविचक्षणानिपुणा ॥ वर्चस्करीतेजस्करी ॥ बलकरीसामर्थ्यकरी ॥ बलेनज्ञानेनसामर्थ्येनवाउन्मूलितानिकल्मषाणियस्यासाबलोन्मूलितकल्मषा ॥ २४ ॥ विगतःपाप्मायस्याःसाविपाप्मा ॥ विशेषेणगतआतंकोभयंयस्याःसाविगतातंका ॥ विकल्पपरिवर्जिताअशेषभेदरहिता ॥ वृष्टिकर्त्रीसवितृस्वरूपा ॥ आदित्याज्जायतेवृष्टिरितिस्मृतेः ॥ वृष्टिजला वृष्टेःकारणभूतंजलंयस्याःसा ॥ इंद्रकरिणीहिशुंडाभिर्गंगाजलमुद्धृत्यमेघेसंचारयातितदेववृष्टिरूपंजायतइतिलोकप्रसिद्धिः ॥ :विदधातीतिविधिर्हिरण्यगर्भरूपेत्यर्थः ॥ विशेषेणच्छिन्नंभक्तानांबंधनंययासाविच्छिन्नबंधना ॥ २५ ॥ भक्तानांव्रतस्यसंकल्पस्यानुसारेणरूपंयस्याःसाव्रतरूपा एकादश्यादिव्रतस्वरूपावा ॥ वित्तरूपाधनस्वरूपा ॥ बहूनांविघ्नानांविनाशंकरोतीतिबहुविघ्नविनाशकृत् ॥ बहुविघ्नविनाशहृदितिक्वचित् ॥ वसुधारावसोर्धारारूपा वसून्भीष्मादीन्मातृरूपेणधरतीतिवा ॥ वसुमतीस्वर्णादिमती पृथ्वीरूपावा ॥ विचित्राण्यंगानियस्याःसाविचित्रांगी ॥ विभावसुःसूर्यरूपावह्निरूपावा ॥ २६ ॥ विशेषेणजयतीतिविजया भवान्याःसखिरूपावा ॥ विश्वबीजंजगदुपादाननिमित्तम् ॥ वामामनोहराचसादेवीचेतिवामदेवी वामदेवस्यपत्नीतिवा ॥ वरान्प्रददातीतिवरप्रदा ॥ वृषोधर्मआश्रितोयया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मेणाश्रितेतिवावृषाश्रिता ॥ विषंसंसारदुःखंहंतीतिविषंघ्नी ॥ तथाचोक्तम् ॥ संसारविषनाशिन्याइति ॥ च विज्ञानान्येवोर्मयोंऽशवश्चतेषांमालावर्ततेयस्याःसाविज्ञानोर्म्यंशुमालिनी विज्ञानोर्मिश्चासावंशुमालिनीचेतिवा ॥ २७ ॥ भवायोद्भवायहिताभव्यासमीचीनेतिवा ॥ भोगोवर्ततेयस्याःसाभोगवती ॥ भागवतीतिपाठेभगवत्संबंधिनीविष्णुपदीत्यर्थः ॥ भद्रामंगलरूपा ॥ भवानीभवपत्नी ॥ भूतानिभावयत्युत्पादयतिपालयतीतिवाभूतभाविनी ॥ भूतानांचतुर्विधानांपोष्ट्रीपालयित्रीतिवा भूतधात्री ॥ भयंसंसारभयंहरतीतिभयहरा ॥ भक्तानांदारिद्र्यंहंतुंशीलंयस्याःसाभक्तदारिद्र्यघातिनी ॥ २८ ॥ भुक्तिमुक्तिप्रदाभोगमोक्षप्रदा ॥ सुखदामोक्षदागंगागंगैवपरमागतिरितिस्मृतेः ॥ भेशीनक्षत्राणांनियंत्री ॥ चांद्रमसीशक्तिरित्यर्थः ॥ भाचासौईशीचेतिवा ॥ भक्तानांस्वर्गापवर्गौददातीतिभक्तस्वर्गापवर्गदा ॥ भगीरथेनानीतेतिभागीरथी ॥ भातीतिभानुःश्रीकृष्णउत्पादकतयावर्ततेयस्याःसाभानुमती तेजस्विनीतिवा ॥ भानुमतीहरणेहरिवंशेप्रसिद्धासहदेवपत्नीयादवस्यभानोःकन्यारूपावा ॥ तथाचहरिवंशे ॥ कन्यांभानुमतींनामभानोर्दुहितरंनृप ॥ एवंभानुमतीवीरसहदेवायदीयतामिति ॥ भाग्यंनियतिरूपम् ॥ भोगवतीपातालगासरित् ॥ भोगवतीतिचाधइतिस्मृतेः ॥ बिभर्तीतिभृतिर्भरणस्वरूपावा ॥ २९ ॥ भवप्रियारुद्रकांताभवएवप्रियोयस्याभवस्याभीष्टेतिवासातथा. ॥ भवद्वेष्ट्रीसंसारनाशिनी ॥ तथाचश्रूयते ॥ त्वांभवःशिरसिसादरंदधेत्वंपुनर्भवकथांविलुंपसि ॥ वैपरीत्यमिहतेसुरापगेयेमृतास्तदमरत्वमीहसइति ॥ भूतिदाऐश्वर्यदा ॥ भूतिर्भूषणंयस्याःसाभूतिमैश्वर्यंवाभूषयतीतिभूतिभूषणा ॥ भूति

भव्याभोगवतीभद्राभवानीभूतभाविनी ॥ भूतधात्रीभयहराभक्तदारिद्र्यघातिनी ॥ २८ ॥ भुक्तिमुक्तिप्रदाभेशीभक्तस्वर्गापवर्गदा ॥ भागीरथीभानुमती भाग्यंभोगवतीभृतिः ॥ २९ ॥ भवप्रियाभवद्वेष्ट्रीभूतिदाभूतिभूषणा ॥ भाललोचनभावज्ञाभूतभव्यभवत्प्रभुः ॥ १३० ॥ भ्रांतिज्ञानप्रशमनीभिन्नब्रह्मांडमंडपा ॥ भूरिदाभक्तिसुलभाभाग्यवद्दृष्टिगोचरी ॥ ३१ ॥ भंजितोपप्लवकुलाभक्ष्यभोज्यसुखप्रदा ॥ भिक्षणीयाभिक्षुमाताभावाभावस्वरूपिणी ॥ ॥ ३२ ॥ मंदाकिनीमहानंदामातामुक्तितरंगिणी ॥ महोदयामधुमतीमहापुण्यामुदाकरी ॥ ३३ ॥

दक्षिणेतिपाठेभक्तेभ्यऐश्वर्यदानेसमर्थेत्यर्थः ॥ भवभूषणेतिक्वचित् ॥ त्रिलोचनस्याभिप्रायंजानातीतिभाललोचनभावज्ञा ॥ भूतंचभव्यंचभवच्चभूतभव्यभवंतितेषांप्रभुः ॥ १३० ॥ भ्रांतिज्ञानप्रशमनीमूलाज्ञाननाशनेनभ्रांतिज्ञानच्छेत्री ॥ भिन्नोविदारितोब्रह्मांडमंडपोययासाभिन्नब्रह्मांडमंडपा ॥ भूरिददातीतिभूरिदा ॥ भक्त्यासुखेनलभ्यतइतिभक्तिसुलभा ॥ भाग्यवद्दृष्टिगोचरीशुभादृष्टवतांनेत्रविषयः ॥ टावंतत्वंक्वचित् ॥ ३१ ॥ भंजितंनाशितंभक्तोपप्लवानामुपद्रवाणांकुलंसमूहोययासाभंजितोपप्लवकुला ॥ भक्ष्यंपक्वान्नंभोज्यंसिद्धान्नंताभ्यांसुखंप्रददातीतिभक्ष्यभोज्यसुखप्रदा ॥ भिक्षणीयावुभुक्षुभिर्मुमुक्षुभिश्चयाचनीया ॥ भिक्षूणांपरमहंसानांमातामोक्षस्तनदात्री ॥ भावयत्युत्पादयतीतिभावा ॥ भावस्वरूपिणीपदार्थस्वरूपिणी ॥ सर्वंखल्विदंब्रह्मइदंसर्वंयदयमात्मेतिश्रुतेः ॥ ३२ ॥ मन्दाकिनीस्वर्गंगा ॥ महानानंदोयस्याःसामहानंदा महांश्चासावानंदश्चेतिवा ॥ अस्मिन्पक्षेस्त्रीत्वमार्षम् ॥ माताप्रमातासर्वहितैषिणीतिवा ॥ पापानांमुक्त्यैतरंगोयस्याअस्तिसामुक्तितरंगिणी ॥ कुतोवीचिर्वीचिस्तवयदिगतालोचनपथमित्युक्तेः ॥ मुक्तिरूपास्तरंगावायस्याःसातथा ॥ महानुदयोयस्याःसामहोदया महोदयस्वरूपावा ॥ मधुमधुरंजलंयस्याअस्तिसामधुमती नदीविशेषरूपावा ॥ इरावतीमधुमतीत्यत्रैवोक्तेः ॥ महत्पुण्यंययासामहापुण्यामहापुण्यस्वरूपावा ॥ मुदाकरी मुदाहर्षस्याकरीआश्रयभूता ॥ टावंतत्वं

CC-0. In Public Domain. Digitization by eGangotri

कचित् ॥ ३३ ॥ मुनिभिःस्तुतामुनिस्तुता ॥ मुनिभिःपूजितासैर्वैरितिस्मृतेः ॥ मोहहंत्रीअनाद्यज्ञानच्छेत्री ॥ महांतितीर्थानियस्यांसामहातीर्था ॥ सर्वतीर्थमयीगंगेत्युक्तेः ॥ महातीर्थहपावा ॥ मधुमधुरसुरकंसवतीतिमधुस्रवा ॥ मामायालक्ष्मीर्वातयोर्नियंत्रीधवरूपावामाधवी ॥ तथाचहरिवंशे ॥ मायाऽविद्याहरेप्रोक्तातस्याईशोयतोभवान् ॥ तस्मान्माधवनामासिधवःस्वामीतिशब्दितइति ॥ माधवस्येयंमाधवीमधुवंशोद्भवासुभद्रारूपामधुविद्यावबोध्यत्वाद्वा ॥ मननाद्ध्यानयोगाच्चविद्धिभारतमाधवमितिव्यासवचनात् ॥ मानःपूजावर्ततेयस्याःसामानिनी ॥ प्रेमसंरंभोवामानः शांतनुभार्यावस्थायांसवर्ततेयस्याइतिवा ॥ मान्यापूज्या ॥ मनोरथपथमतिक्रम्यगच्छतीतिमनोरथपथातिगा सर्वव्यापिकेत्यर्थः ॥ ३४ ॥ मोक्षंददातिभक्तेभ्योऽभक्तेभ्यःखंडयतीतिवामोक्षदा ॥ मातिदाज्ञानदा ॥ मुख्याश्रेष्ठा ॥ महद्भाग्यंयेषांतैर्जनैःसेवितामहाभाग्यजनाश्रिता ॥ महान्वेगोवर्ततेयस्याःसामहावेगवती ॥ मेध्यापवित्रा ॥ पवित्राणांपवित्रंयइतिस्मृतेः ॥ महाउत्सवरूपा ॥ महउद्धवउत्सवइतिवचनात् ॥ महिमानोभूषणानियस्याःसामहिम्नोवाभूषयतीतिमहिमभूषणा ॥ महिमभिर्वाभूष्यतइतितथा ॥ ३५ ॥ महान्प्रभावोयस्याःसामहाप्रभावा ॥ महती अपरिच्छिन्ना ॥ मीनाइवमीनाएववाचंचलानिलोचनानियस्याःसामीनचंचललोचना ॥ महताकारुण्येनकरुणयासंपूर्णाव्याप्तामहाकारुण्यसंपूर्णा ॥ महतीऋद्धिर्यस्याःसामहर्द्धिः ॥ च महांत्युत्पलानियस्यांसामहोत्पला ॥ ३६ ॥ मूर्तिमत्प्रत्यक्षशरीरवत् ॥ पश्यध्वंतदिमांगंगांप्रत्यक्षांपुरतःस्थितामित्युक्तेः ॥ मुंक्तिरमणीमुक्तिरूपारमणीसुंदरीस्त्री ॥ मणयोमाणिक्या

मुनिस्तुतामोहहंत्रीमहातीर्थामधुस्रवा ॥ माधवीमानिनीमान्यामनोरथपथातिगा ॥ ३४ ॥ मोक्षदामतिदामुख्यामहाभाग्यजनाश्रिता ॥ महावेगवतीमेध्यामहामहिमभूषणा ॥ ३५ ॥ महाप्रभावामहतीमीनचंचललोचना ॥ महाकारुण्यसंपूर्णामहर्द्धिश्चमहोत्पला ॥ ३६ ॥ मूर्तिमन्मुक्तिरमणीमणिमाणिक्यभूषणा ॥ मुक्ताकलापनेपथ्यामनोनयननंदिनी ॥ ३७ ॥ महापातकराशिघ्नीमहादेवार्धहारिणी ॥ महोर्मिमालिनीमुक्तामहादेवीमनोन्मनी ॥ ॥ ३८ ॥ महापुण्योदयप्राप्यामायातिमिरचंद्रिका ॥ महाविद्यामहामायामहामेधामहौषधम् ॥ ३९ ॥ मालाधरीमहोपायामहोरगविभूषणा ॥ महामोहप्रशमनीमहामंगलमंगलम् ॥ १४० ॥

निचभूषणानियस्यास्तेषांवाभूषणरूपासामणिमाणिक्यभूषणा ॥ मुक्तासमूहैर्मुक्तासमूहावानेपथ्यमलंकरणंयस्याःसामुक्ताकलापनेपथ्या ॥ मनांसिनयनानिचनंदयितुशीलयस्याःसामनोनयननंदिनी ॥ ३७ ॥ महापातकराशिघ्नीमहापातकसमूहानांछेत्री ॥ महादेवस्यार्धशरीरंहर्तुशीलंयस्याःसामहादेवार्धहारिणी गौरीरूपेत्यर्थः ॥ महतीऊर्मिमालावर्ततेयस्याःसामहोर्मिमालिनी ॥ मुक्तामुक्तस्वरूपा ॥ गंगानामसहस्रेऽस्मिन्नष्टमेविवृतेशते ॥ यदृष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ ८ ॥ महतीचासौदेवीचेतिमहादेवी ॥ मनांसिउन्मन्यतेउत्कृष्टज्ञानयुक्तानिकरोतीतिमनोन्मनी ॥ सत्त्वशुद्धिकारिणीत्यर्थः ॥ संधिरार्षः ॥३८॥ महतांपुण्यानामुदयेनफलेनप्राप्यागम्यामहापुण्योदयप्राप्या ॥ मायैवतिमिरमंधकारस्तस्यचंद्रिका नाशिकामायातिमिरचंद्रिका ॥ महतीचासौविद्याचेतिमहाविद्याब्रह्मविद्यास्वरूपेत्यर्थः ॥ महतीचासौमायाचेतिमहामाया ॥ स्वकार्यव्यापकत्वंमहत्त्वम् ॥ महतीमेधायस्याःसामहामेधा ब्रह्माकारबुद्धिरूपावा ॥ महच्चतदौषधंचमहौषधम् ॥ महामोहमहौषधमितिपाठेद्वंद्वः॥महान्मोहोयस्याःसामहामोहा ॥ अत्रापिमहत्त्वंस्वकार्यव्यापकत्वमेव ॥ साचमहौषधंचेतितथा ॥ अत्रमहत्त्वंसंसाररोगनिवर्तकत्वम् ॥ अस्मिन्पक्षेनामद्वयमिदम् ॥ ३९ ॥ मालांवैजयंतीरूपांधरतीतिमालाधरी मालाकारपत्नीरूपावा ॥ महानुपायःप्राप्तिसाधनश्रवणादिलक्षणोयस्याःसामहोपाया पुरुषार्थचतुष्टयेमहोपायस्वरूपावा ॥ महांतउरगावासुकिप्रभृतयोविभूषणानियस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामहोरगविभूषणा ॥ महामोहंप्रशमयतीतिमहामोहप्रशमनी ॥ महामंगलानामपिमंगलंमहामंगलमंगलम् ॥ मंगलानांचमंगलमितिस्मृतेः ॥ १४० ॥ सूर्यमंडलेचरतीतिमार्तंडमंडलचरी आकाशगंगारूपेणसूर्यमण्डलेचरतीतिवा ॥ महतीचासौलक्ष्मीश्चेतिमहालक्ष्मीः ॥ महत्त्वंनिरतिशयसाम्यत्वम् ॥ मदउज्झितोययामदेनवाउज्झितामदोज्झिता ॥ यशोब्रह्महत्याविदारिणी तिवर्ततेयस्याःसायशस्विनी ॥ यशोददातीतियशोदा नंदपत्नीरूपावा ॥ च योग्या योगायहितायोगगम्येतिवा ॥ युक्तआत्मायेषांतैःसेवितायुक्तात्मसेविता ॥ ४१ ॥ योगानांषडंगादीनां सिद्धिप्रदायोगसिद्धिप्रदा ॥ याज्यापूज्यायजमानस्वरूपावा ॥ यज्ञेशेनपरिपूरिताव्याप्ताऽधिष्ठितेतियावत् ॥ यज्ञेशपरिपूजितेतिक्कचित्पाठः ॥ तत्रयज्ञेशःपरिपूजितोययासायज्ञेशपरिपूजिता ॥ यद्वा यज्ञेशःश्रीकृष्णस्तेनपरिपूजितेतीतिव्याख्येयम् ॥ तथाचहरिवंशेपारिजातहरणे ॥ अथाययौविष्णुपदीस्मृताकृष्णेनभारत ॥ संपूज्यतांततःकृष्णःकृत्वास्नानमधोक्षजइति ॥ यज्ञेशीयज्ञाधिष्ठात्रीदेवता ॥ स्मृतायज्ञफलंददातीतियज्ञफलदा ॥ अभक्तानांखंडयतीतिवा ॥ यजनीयापूजनीया ॥ यशस्करीभक्तानांकीर्तिकरी ॥ ४२ ॥ यमिसेव्याजितेन्द्रियैःसेवनीया ॥ योगेनमायासंबंधेनयोनिःकारणंयोगयोनिः ॥ योगस्यषडंगादेर्हेतुरितिवा ॥ योगोजीवात्मनोरैक्यचिंतनंवर्ततेयस्याःसायोगिनी योगिनीगणरूपावा ॥ युक्ताबुद्धिर्ब्रह्मात्मैकत्वज्ञानंतद्ददातीतियुक्तबुद्धिदा ॥ युक्तेभ्योजितेन्द्रियेभ्योवाबुद्धिदा ॥ युक्तसिद्धिदेतिपाठेजीवन्मुक्तिरूपसिद्धिदेत्यर्थः ॥ योगश्चज्ञानंचयोगेनवाज्ञानंतत्प्रददातीतियोगज्ञानप्रदा ॥ युक्तासंयताजितेन्द्रियेतियावत् ॥ पुंश्चल्यापहृतंचेतः

मार्तंडमंडलचरीमहालक्ष्मीर्मदोज्झिता ॥ यशस्विनीयशोदाचयोग्यायुक्तात्मसेविता ॥ ४१ ॥ योगसिद्धिप्रदायाज्यायज्ञेशपरिपूरिता ॥ यज्ञेशीयज्ञफलदायजनीयायशस्करी ॥४२॥ यमिसेव्यायोगयोनिर्योगिनीयुक्तबुद्धिदा ॥ योगज्ञानप्रदायुक्तायमाद्यष्टांगयोगयुक् ॥४३॥ यंत्रिताघौघसंचारायमलोकनिवारिणी॥ यातायातप्रशमनीयातनानामकृंतनी ॥४४॥ यामिनीशहिमाच्छोदायुगधर्मविवर्जिता॥ रेवतीरतिकृद्रम्यारत्नगर्भारमारतिः ॥४५॥ रत्नाकरप्रेमपात्रंरसज्ञारसरूपिणी॥रत्नप्रासादगर्भाचरमणीयतरंगिणी॥४६॥रत्नार्चीरुद्ररमणीरागद्वेषविनाशिनी॥रमारामारम्यरूपारोगिजीवातुरूपिणी ॥४७॥

कोनिवारयितुंक्षमः ॥ आत्मारामेश्वरस्मृतेभगवंतमधोक्षजमितिवचनात् ॥ यमाद्यष्टांगयोगंयुनक्तीतियमाद्यष्टांगयोगयुक् ॥ ४३ ॥ यंत्रितोनिराकृतोऽघौघानांपापसमूहानांसंचारोययासायंत्रिताघौघसंचारा ॥ यमलोकंनिवारयितुंशीलंयस्याःसायमलोकनिवारिणी ॥ यातायातेमरणजन्मनीप्रशमयतीतियातायातप्रशमनी ॥ यातनानांनाममात्रंकृंततीतियातनानामकृंतनी ॥ यातनामूलकृंतनीतिपाठेयातनानांमूलंपापम् ॥ यातनानांनिकृंतनीतिचक्कचित् ॥ ४४ ॥ यामिनीशहिमाच्छोदाचंद्ररश्मिवन्निर्मलोदका ॥ युगधर्मैर्हिंसानृतादिभिर्विवर्जितायुगधर्मविवर्जिता ॥ रेवतीग्रहविशेषोबलदेवकांतावानक्षत्रविशेषावातद्रूपारेवती ॥ रतिंरमणंतत्कर्त्रीरातिकृत् ॥ रम्यारमणीया ॥ रत्नानिगर्भेयस्याःसारत्नगर्भासमुद्ररूपावा ॥ रमालक्ष्मीरूपा ॥ रतिःरमणंकामांगनावा ॥ ४५ ॥ रत्नाकरप्रेमपात्रंसमुद्रस्यस्नेहाश्रयःकांतेत्यर्थः ॥ रसंब्रह्मरसंजानातीतिरसज्ञा ॥ रसोवैसइतिश्रुतेः ॥ षड्रसज्ञावा ॥ रसरूपिणीब्रह्मरूपिणी षड्रसस्वरूपावा ॥ रत्ननिर्मितादेवालयागर्भेयस्याःसारत्नप्रासादगर्भा ॥ प्रासादरत्नखचिताश्चितामणिगणाअपि ॥ गंगाजलांतस्तिष्ठंतिकलिकल्मषभीतितइत्यत्रैवोक्तेः ॥ रत्नप्रसादगर्भेतिपाठेउत्कृष्टप्रसादगर्भेत्यर्थः ॥ च रमणीयास्तरंगावर्ततेयस्याःसारमणीयतरंगिणी ॥ ४६ ॥ रत्नानामिवार्चिर्दीप्तिर्यस्याःसारत्नार्चिः ॥ रुद्रंरमयतीतिरुद्ररमणी ॥ रागद्वेषविनाशिनीरागद्वेषयोर्हंत्री ॥ रमयतिनयनमनांसीतिरमा ॥ रामाउत्तमास्त्रीस्वरूपा

CC-0. In Public Domain. Digitization by eGangotri

सांबपत्नीकुंभांडदुहितावा॥तथा चवाणासुरयुद्धेहरिवंशे ॥ सांबायदीयतांरामाकुंभांडदुहिताशुभेति॥रमंतेऽस्यांयोगिनइतिवारामा ॥ तदुक्तम् ॥ रमंतेयोगिनोऽनंतेसत्यानंदेचिदात्मनि ॥ इतिरामपदे नासौपरंब्रह्माभिधीयतइति ॥ रम्यंमनोहररूपंयस्याःसारम्यरूपा ॥ रोगिजीवातुरूपिणीसंसाररोगग्रस्तानांजीवनौषधिरूपिणी ॥ ४७ ॥ रुचिंकरोतीतिरुचिकृत् ॥ रोचयतीतिरोचनी ॥ रमालक्ष्मी स्तस्यैहितारम्या ॥ रुचिंरातीतिरुचिरामनोहरावा ॥ रोगंसंसाररोगमात्रंवाहर्तुंशीलंयस्याःसारोगहारिणी ॥ राजतेहंसायस्यांसाराजहंसा ॥ रत्नवतीअनेकरत्नसंयुक्ता ॥ रववतीतिपाठेसरय्वाः संगमेनयोरवोध्वानिःसवर्ततेयस्याःसारववतीतिव्याख्येयम् ॥ तथाचवालकांडे ॥ ततारसरितंपुण्यांसरयूंसागरंगमाम् ॥ राघवस्तुसरिन्मध्येपप्रच्छमुनिपुंगवम् ॥ः वारीणांभिद्यमानानांकिमेषवि मलोध्वनिः ॥ राघवस्यतुतच्छुत्वाजातकौतूहलःसच ॥ कथयामासधर्मात्मातस्यशब्दस्यनिश्चयम् ॥ कैलासेपर्वतेराममनसानिर्मितंसरः ॥ ब्रह्मणारघुशार्दूलमानसंनामतेनतत् ॥ तस्मात्प्रसू तासरयूःसाऽयोध्यामभ्यभावयत् ॥ सरःप्रसूतासरयूःपुण्याब्रह्मसरश्च्युता ॥ शब्दोऽयंविपुलस्तस्याजाह्नव्यामभिवर्तते ॥ वारिसंघर्षजोरामप्रणामंप्रयतःकुर्विति ॥ राजतांराजमानानांकल्लोलानां राजिर्यस्याःसाराजत्कल्लोलराजिका ॥ राजकल्लोलेतिपाठेपिसएवार्थः ॥ ४८ ॥ रमणीयाएवरामणीयकारेखाजलधाराःसामुद्रोक्तावाकरचरणयोर्यस्याःसारामणीयकरेखा ॥ः रामणीयक कवेशाचेतिकचित्पाठः ॥ तत्रवेशःशोभा ॥ च रुजांरोगाणामरीरुजारिः ॥ रोगेरोषोवर्ततेयस्याःसारोगरोषिणी ॥ रोषशोषिणीतिक्वचित्पाठः ॥ रोगशोषिणीतिचान्यत्र ॥ राकापूर्णचंद्रापौ

रुचिकृद्रोचनीरम्यारुचिरारोगहारिणी ॥ राजहंसारत्नवतीराजत्कल्लोलराजिका ॥ ४८ ॥ रामणीयकरेखाचरुजारीरोगरोषिणी ॥ राकारंकार्तिशमनी रम्यारोलंबराविणी ॥ ४९ ॥ रागिणीरंजितशिवारूपलावण्यशेवधिः ॥ लोकप्रसूर्लोकवंद्यालोलत्कल्लोलमालिनी ॥ १५० ॥ लीलावतीलो कभूमिर्लोकलोचनचंद्रिका ॥ लेखस्रवंतीलटभालघुवेगालघुत्वहृत् ॥ ५१ ॥ लास्यत्तरंगहस्ताचललितालयभंगिगा ॥ लोकबंधुर्लोकधात्रीलो कोत्तरगुणोर्जिता ॥ ५२ ॥ लोकत्रयहितालोकालक्ष्मीर्लक्षणलक्षिता ॥ लीलालक्षितनिर्वाणालावण्यामृतवर्षिणी ॥ ५३ ॥

र्णमासीतत्स्वरूपा ॥ रंकानांदरिद्राणामार्तिं पीडांशमयतीतिरंकार्तिशमनी ॥ रम्यारमणीया ॥ रम्यःरमणीयःअःविष्णुराश्रयत्वेनवर्ततेयस्याःसेतिवा ॥ रोलंबानांभ्रमराणांरावोवर्ततेयस्याः सारोलंबराविणी ॥ ४९ ॥ सृष्टिस्थितिसंहोरच्छारूपोरागोऽस्याअस्तीतिरागिणी रागमात्राश्रयावा ॥ रंजितमभिव्यक्तीकृतंशिवंकैवल्यं रंजितोऽनुरंजितःशिवईश्वरोवायथासारंजितशिवा ॥ रूपलावण्ययोःसौंदर्यांगसौष्ठवयोःशेवधिर्निधिराश्रयइत्यर्थः ॥ लोकप्रसूर्लोकानांजनयित्री ॥ लोकवंद्याजनैःस्तव्याऽभिवाद्यावा ॥ लोलतांलोलंतीवाकल्लोलानांमालावर्ततेयस्याःसालोलत्कल्लो लमालिनी ॥ १५० ॥ लीलासृष्टिस्थितिसंहाररूपावर्ततेयस्याःसालीलावतीदिवोदासमहिषीवा॥एकदाऽऽवसरंप्राप्यदिवोदासस्यभूभुजः॥ राज्ञीलीलावतीनामराज्ञेतंविन्यवेदयदित्यत्रैवोक्तेः ॥ लोकभू मिर्भुवनानामधिष्ठानम् ॥ लोकलोचनचंद्रिकाजनमात्रनेत्राणामाह्लादयित्री ॥ लेखंशास्त्रंस्रवंतीउत्पादयंतीलेखस्रवंती ॥ तथाचपारमार्षसूत्रम्॥शास्त्रयोनित्वादिति॥देवनदीतिवा॥ लटस्यलंपटस्यजनस्ये वभादीप्तिःप्रतीतिर्जह्नुब्रह्मसभाप्रतीपस्थानादौयस्याःसालटभा ॥ लटभीरितिपाठेलंपटानांभीर्भयंयस्याइतिव्याख्येयम् ॥ सर्वनियंतृत्वात् ॥ लघुर्मथरोवेगोयस्याःसालघुवेगा ॥ लघुत्वहृद्रक्तानां लघुत्वहारिणी ॥ ५१ ॥ लास्यंतोनृत्यंतस्तरंगाएवहस्तायस्याःसालास्यत्तरंगहस्ता ॥ च ललितामनोहरालिताख्याकाशीस्थादेवीवा ॥ लयभंग्यागमनपरिपाट्यागच्छतीतिलयभंगिगा ॥ लोकबंधुर्लोकमात्रहितैषिणी ॥ लोकधात्रीजनमात्रस्यपोष्ट्री ॥ लोकोत्तरगुणोर्जितालोकातिक्रांतगुणैरुद्रिक्ता ॥ ५२ ॥ लोकत्रयाणांहितंययासालोकत्रयहिता ॥ लोक्यतेआलोच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुमुक्षुभिरितिलोकालोकस्वरूपावा ॥ लक्ष्मीर्लक्ष्मीस्वरूपा ॥ लक्षणैःसत्यज्ञानानंदादिस्वरूपलक्षणैर्जगज्जन्मादितटस्थलक्षणैःकरुणत्वादिगुणैःसमीचीनैःसामुद्रिकोक्तस्त्रीलक्षणैर्वालक्षिताऽन्विता लक्षणलक्षिता ॥ लीलाभगवत्क्रीडास्वरूपा पद्मराजमहिषीरूपावा ॥ तथाचवासिष्ठे ॥ आसीदस्मिन्महापीठेकुलपद्मोविकासवान् ॥ पद्मोनामेत्युपक्रम्यतस्यासीत्सुभगा भार्यालीलानामविलासिनीति ॥ लक्षितंदर्शितंनिर्वाणंययासालक्षितनिर्वाणा ॥ लावण्यमेवामृतंतद्वर्षिणी लावण्यामृतवर्षिणी ॥ यद्वा लवणार्णवस्यइदंलावण्यंरत्नादिसंपदमृतंकैवल्यंतेवर्षितुंशीलंयस्याःसातथा ॥ ॥ ९३ ॥ वैश्वानरीआग्नेयीशक्तिःस्वाहादाहिकावातद्रूपा ॥ गंगानामसहस्रेऽस्मिन्विवृतेनवमेशते ॥ यदद्दष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ ९ ॥ वासवेडचाइंद्रस्यस्तुत्या ॥ वंध्यत्वंपरिहर्तुं शीलंयस्याःसावंध्यत्वपरिहारिणी ॥ वासुदेवस्यांघ्र्योःरेणून्हंतुंहर्तुंशीलंयस्याःसावासुदेवांघ्रिरेणुघ्नी ॥ इंद्रस्यकुलिशंनिवारयितुंशीलंयस्याःसावज्रिवज्रनिवारिणीच्यवनादिरूपेण ॥ ९४ ॥ शुभानिआसमंताद्वर्तंतेयस्याःसाशुभावती ॥ शुभंफलंयस्याःशुभंवाफलतीतिशुभफला ॥ शांतिर्नैष्कर्म्यस्वरूपाशमरूपावाशांतिकर्मरूपावा ॥ शांतनोःसमुद्रांशस्यवल्लभाभार्याशांतनुवल्लभा ॥ शन्तनुरिति पाश्चात्त्यादाक्षिणात्याश्चपठंति ॥ शूलमस्त्रमस्याअस्तीतिशूलिनी ॥ शैशवंशिशुसंबंधिवयोयस्याःसाशैशववयाः ॥ शीतलंयदमृतंजलंतद्वोढुंशीलंयस्याःसाशीतलामृतवाहिनी ॥ ९५ ॥

वैश्वानरीवासवेडयावंध्यत्वपरिहारिणी ॥ वासुदेवांघ्रिरेणुघ्नीवज्रिवज्रनिवारिणी ॥ ९४ ॥ शुभावतीशुभफलाशांतिःशांतनुवल्लभा ॥ शूलिनीशैशववयाः शीतलाऽमृतवाहिनी ॥ ९५ ॥ शोभावतीशीलवतीशोषिताशेषकिल्बिषा ॥ शरण्याशिवदाशिष्टाशरजन्मप्रसूःशिवा ॥ ९६ ॥ शक्तिःशशांकविमलाश मनस्वसृसंमता ॥ शमाशमनमार्गघ्नीशितिकंठमहाप्रिया ॥ ९७ ॥ शुचिःशुचिकरीशेषाशेषशायिपदोद्भवा ॥ श्रीनिवासश्रुतिःश्रद्धाश्रीमतीश्रीःशुभव्रता ॥ ॥ ९८ ॥ शुद्धविद्याशुभावर्ताश्रुतानंदाश्रुतिस्तुतिः ॥ शिवेतरघ्नीशबरीशांबरीरूपधारिणी ॥ ९९ ॥

शोभावर्ततेयस्याःसाशोभावती ॥ शीलंवर्ततेयस्याःसाशीलवती ॥ शेोषितमशेषंकिल्विषंययासाशोषिताशेषकिल्बिषा ॥ शरण्याआश्रययोग्या ॥ शिवदाशिवंकल्याणंमोक्षंवाददातीतिशिवदा ॥ शिष्टासदाचारा शिष्टावशिष्टाऽवधिभूतावा ॥ शरजन्मप्रसूःकार्तिकेयजननी ॥ शिवाकल्याणरूपामोक्षरूपाईश्वरीरूपावा ॥ ९६ ॥ शक्तिर्मायाह्लादिनीवा ॥ शशांकविमलाचन्द्रवदाह्लादकारिणीचंद्रवन्निर्मलेतिवा ॥ शमनस्वसुर्यमुनायाःसंमताभिमताशमनस्वसृसंमता ॥ शमयतिनाशयत्यज्ञानंतत्कार्यंचेतिशमा ॥ शमनमार्गघ्नीयममार्गनिवारिणी ॥ शितिकंठमहाप्रियारुद्रस्यात्यंतवल्लभा ॥ ९७ ॥ शुचिःपवित्रा ॥ शुचिकरीपवित्रकरी ॥ शेषा अवधिभूता अनंतशक्तिर्मंदिरारेवतीतिवा ॥ शुग्घ्नीतिपाठेशोकनाशिनीत्यर्थः ॥ शेषशायिपदोद्भवाअनंतशायिचरणोत्पन्ना ॥ श्रीनिवासोविष्णुस्तद्रूपेणश्रूयतइतिश्रीनिवासश्रुतिः ॥ श्रद्धाआस्तिक्यबुद्धिरूपा ॥ श्रीर्वर्ततेयस्याःसाश्रीमती ॥ श्रयंत्येतांयोगिनइतिश्रीर्ब्रह्मविद्यालक्ष्मीरूपावा॥ शुभानिव्रतानियस्याःसाशुभव्रता ॥ ॥ ९८ ॥ शुद्धाचासौविद्याचेतिशुद्धविद्या ॥ शुभविद्येतिक्वचित् ॥ शुभआवर्तोऽम्भसांभ्रमोयस्याःसाशुभावर्ता ॥ श्रुतोज्ञातआनंदोययासाश्रुतानंदा ॥ श्रुतिभिर्वेदैःस्तुतिर्यस्याःसाश्रुतिस्तुतिः ॥ तथाचभागवते ॥ जयजयजह्नुजामित्यादि ॥ शिवेतरंपापंतन्नाशिनीशिवेतरघ्नी ॥ शवरीशवरांगनाकिरातरूपधारिणोमहेश्वरस्यपत्नीत्वेन ॥ शंबरोमृगस्तत्पत्नीशांबरी ॥ ब्रह्मणाकामितायाःसर

CC-0. In Public Domain. Digitization by eGangotri

स्वत्यामृगीरूपत्वेनतस्यारूपंधर्तुंशीलंयस्याःसाशांवरीरूपधारिणी ॥ ५९ ॥ श्मशानंशोधयतीतिश्मशानशोधनी ॥ यस्यांमृतानांपुनःश्मशानसंबंधोनभवतीत्यर्थः ॥ श्मशानंमहाश्मशानं काशीतच्छोधनीतिवा ॥ तथाचात्रैवोक्तम् ॥ गंगासंगात्ततोधिकेति ॥ शांताशांतस्वभावा दशरथात्मजायाऋष्यश्रृंगपत्नीतद्रूपावा ॥ तथाचहरिवंशे ॥ अथचित्ररथस्यापिपुत्रोदशरथोऽभवत् ॥ लोमपादइतिख्यातोयस्यशांतासुताऽभवदिति ॥ शश्वन्नित्या ॥ शतधृतिस्तुताब्रह्मणाभिवंदिता ॥ शालतेशोभतइतिशालिनी ॥ शालिर्धान्यावांतररूपंतेनयाशोभातयाढ्याव्याप्ताशालिशोभाढ्या ॥ शिखिवाहनःकार्तिकेयस्तद्रूपंगर्भंविभर्तीतिशिखिवाहनगर्भभृत् ॥ १६० ॥ शंसनीयानिस्तुत्यर्हाणिचरित्राणियस्याःसाशंसनीयचरित्रा ॥ च शातितानिनाशितान्यशेषपातकानिययासाशातिताशेषपातका ॥ षड्गुणैश्वर्यसंपन्नाऐश्वर्यादिगुणषट्कान्विता ॥ षडंगानिशिक्षादीनिचश्रुतिश्चतदुभयरूपिणी ॥ ६१ ॥ षंढताऽवीर्यतातद्धारिसलिलंयस्याःसाषंढताहारिसलिला ॥ ष्टचायन्नदनदीशताष्टचायत्संघातंप्राप्नुवन्नदनदीनांशतंयस्यांसातथा ॥ ष्टचैस्त्यैशब्दसंघातयोरितिधातुः ॥ सरिद्वरानदीनांमध्येश्रेष्ठा ॥ सुरसानागमातृरूपा ॥ यद्वा शोभनोरसोयस्याः साशोभनब्रह्मरसरूपेत्यर्थः ॥ शोभनाप्रभायस्याःसासुप्रभा ॥ सुरदीर्घिकादेववापी ॥ ६२ ॥ स्वःसिंधुःस्वर्नदी ॥ सर्वदुःखघ्नीतापत्रयोन्मूलिनी ॥ सर्वव्याधिमहौषधंसर्वरो

श्मशानशोधनीशांताशश्वच्छतधृतिष्टुता ॥ शालिनीशालिशोभाढ्याशिखिवाहनगर्भभृत् ॥ १६० ॥ शंसनीयचरित्राचशातिताशेषपातका ॥ षड्गुणैश्वर्यसंपन्नाषडंगश्रुतिरूपिणी ॥ ६१ ॥ षंढताहारिसलिलाष्टचायन्नदनदीशता ॥ सरिद्वराचसुरसासुप्रभासुरदीर्घिका ॥ ६२ ॥ स्वःसिंधुःसर्वदुःखघ्नीसर्वव्याधिमहौषधम् ॥ सेव्यासिद्धिःसतीसूक्तिःस्कंदसूश्चसरस्वती ॥६३॥ संपत्तरंगिणीस्तुत्यास्थाणुमौलिकृतालया ॥ स्थैर्यदासुभगासौख्यास्त्रीषुसौभाग्यदायिनी ॥ ६४ ॥ स्वर्गनिःश्रेणिकासूक्ष्मास्वधास्वाहासुधाजला ॥ समुद्ररूपिणीस्वर्ग्यासर्वपातकवैरिणी ॥ ६५ ॥ स्मृताघहारिणीसीतासंसाराब्धितरंडिका ॥ सौभाग्यसुंदरीसंध्यासर्वसारसमन्विता ॥ ६६ ॥ हरप्रियाहृषीकेशीहंसरूपाहिरण्मयी ॥ हृताघसंघाहितकृद्धेलाहेलाघगर्वहृत् ॥६७॥

गाणांनिवर्तकम् ॥ सेव्यासेवनीया ॥ सिद्धिःकैवल्याऽणिमादिसिद्धिस्वरूपा ॥ सतीपतिव्रता भवपत्नीदाक्षायणीतिवा ॥ सूक्तिःशोभनोक्तिस्वरूपापुरुषसूक्तादिरूपावा ॥ स्कंदसूः कार्तिकेयजननी ॥ च सरस्वतीवाणीतदधिष्ठात्रीदेवतावा ॥ ६३ ॥ संपद्रपास्तरंगायस्याःसासंपत्तरंगिणी ॥ स्तुत्यास्तुतेर्विषयः ॥ स्थाणुमौलिकृतालयारुद्रशिरःकृतावासा ॥ स्थैर्यदाभक्तेभ्यः स्वतीरैकस्थितिदा ॥ सुभगाशोभनकीर्तिमर्तांप्रेयसीतिवा ॥ सौख्यासुखायहिता ॥ स्त्रीषुसौभाग्यंदातुंशीलंयस्याःसास्त्रीषुसौभाग्यदायिनी ॥ ६४ ॥ स्वर्गनिःश्रेणिकास्वर्गैकसोपाना ॥ तदुक्तंकाशीसारे ॥ याह्येषासर्वजंतूनांयास्वर्गसरणिर्नृणामिति ॥ सूक्ष्माइंद्रियाद्यगोचरा ॥ स्वधापितृपत्नीमंत्ररूपावा ॥ स्वाहाग्निभार्यामंत्ररूपावा ॥ सुधाऽमृतंतत्तुल्यंजलंयस्याःसासुधाजला ॥ समुद्ररूपिणीसमुद्रपत्नीतद्रूपावा ॥ समुद्रपूरणीतिक्वचित्पाठः ॥ स्वर्ग्यास्वर्गायहिता ॥ सर्वपातकवैरिणीब्रह्महत्यादिनाशिनी ॥ ६५ ॥ स्मृतासतीस्मृतानांवाऽघहारिणीस्मृताघहारिणी ॥ सीतालांगलपद्धतिः गंगाप्रभेदोविष्णोर्मायाजानकीतिवा ॥ संसाराऽब्धितरंडिकाभवसमुद्रेतरंडिका ॥ तरंडकमितिक्वचित् ॥ सौभाग्यरूपाचासौसुंदरीचसौभाग्येनवासुंदरीसौभाग्यसुंदरी ॥ सम्यग्ध्यासंध्याब्रह्मज्ञानस्वरूपासंध्यारूपावा ॥ सर्वसारसमन्वितासर्वशक्तियुक्तेत्यर्थः ॥ ६६ ॥ हरप्रियाशिवकांता ॥ हृषीकेशीइंद्रियाणांनियंत्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृषीकेशपत्नीतिवा ॥ हंसरूपाशुद्धस्वरूपाहंसरूपधारिणीतिवा ॥ तस्याहंहंसरूपेणसकाशमगमंतदेतिभागवतोक्तेः ॥ हिरण्मयीज्ञानस्वरूपास्वर्णमयीतिवा ॥ हृताघसंघाक्षपितपापसमूहा ॥ हितकृद्धितैषिणी ॥ हेलाशृंगारभावरूपा ॥ हईश्वरइलाभूमिराश्रयोयस्याःसेतिवा ॥ हेलाघगर्वहृत्लीलयापापमदनाशिनी ॥ अघंचगर्वश्चाघगर्वौहेलयातौहरतीतिवा ॥ ६७ ॥ क्षेमदाकल्याणदा ॥ क्षालिताघौघानाशितपापसंचया ॥ क्षुद्रविद्राविणीदुष्टानांविघातिनी ॥ क्षमापृथ्वीरूपासहनस्वभावावा १००० ॥ गंगानामसहस्रेऽस्मिन्विवृतेदशमेशते ॥ यदहष्टमभूदत्रतद्विश्वेशेसमर्पितम् ॥ ॥ १० ॥ ६८ ॥ ६९ ॥ श्रद्धयापठितंसदितिशेषः ॥ १७० ॥ ७१ ॥ वाडवब्राह्मण हेतत्त्वज्ञेत्यर्थः ॥ सब्राह्मणः केनस्यादितिश्रुतेः ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥

क्षेमदाक्षालिताघौघाक्षुद्रविद्राविणीक्षमा ॥ इतिनामसहस्रंहिगंगायाःकलशोद्भव ॥ कीर्तयित्वानरःसम्यग्गंगास्नानफलंलभेत् ॥६८॥ सर्वपापप्रशमनंसर्वविघ्नविनाशनम् ॥ सर्वस्तोत्रजपाच्छ्रेष्ठंसर्वपावनपावनम् ॥६९॥ श्रद्धयाभीष्टफलदंचतुर्वर्गसमृद्धिकृत् ॥ सकृज्जपादवाप्नोतिह्येकक्रतुफलंमुने ॥१७०॥ सर्वतीर्थेषुयःस्नातःसर्वयज्ञेषुदीक्षितः ॥ तस्ययत्फलमुद्दिष्टंत्रिकालपठनाच्चतत् ॥७१॥ सर्वव्रतेषुयत्पुण्यंसम्यक्चीर्णेषुवाडव ॥ तत्फलंसमवाप्नोतित्रिसंध्यंनियतःपठन् ॥ ७२ ॥ स्नानकालेपठेद्यस्तुयत्रकुत्रजलाशये ॥ तत्रसन्निहितानूनंगंगात्रिपथगामुने ॥ ७३ ॥ श्रेयोर्थीलभतेश्रेयोधनार्थीलभतेधनम् ॥ कामीकामानवाप्नोतिमोक्षार्थीमोक्षमाप्नुयात् ॥७४॥ वर्षंत्रिकालपठनाच्छ्रद्धयाशुचिमानसः ॥ ऋतुकालाभिगमनादपुत्रःपुत्रवान्भवेत् ॥ ७५ ॥ नाकालमरणंतस्यनाग्निचोराहिसाध्वसम् ॥ नाम्नांसहस्रंगंगायायोजपेच्छ्रद्धयामुने ॥ ७६ ॥ गंगानामसहस्रंतुजप्त्वाग्रामांतरंव्रजेत् ॥ कार्यसिद्धिमवाप्नोतिनिर्विघ्नोगेहमाविशेत् ॥७७॥ तिथिवारर्क्षयोगानांनदोषःप्रभवेत्तदा ॥ यदाजप्त्वाव्रजेदेतत्स्तोत्रंग्रामांतरंनरः ॥ ७८॥ आयुरारोग्यजननंसर्वोपद्रवनाशनम् ॥ सर्वसिद्धिकरंपुंसांगंगानामसहस्रकम् ॥ ७९ ॥ जन्मांतरसहस्रेषुयत्पापंसम्यगर्जितम् ॥ गंगानामसहस्रस्यजपनात्तत्क्षयंव्रजेत् ॥ १८० ॥ ब्रह्मघ्नोमद्यपःस्वर्णस्तेयीचगुरुतल्पगः ॥ तत्संयोगीभ्रूणहंतामातृहापितृहामुने ॥ ८१ ॥ विश्वासघातीगरदःकृतघ्नोमित्रघातकः ॥ अग्निदोगोवधकरोगुरुद्रव्यापहारकः ॥ ८२ ॥ महापातकयुक्तोपिसंयुक्तोप्युपपातकैः ॥ मुच्यतेश्रद्धयाजप्त्वागंगानामसहस्रकम् ॥ ८३ ॥

॥ ७८ ॥ ७९ ॥ १८० ॥ ८१ ॥ ८२॥ उपपातकैर्गोवधादिभिः ॥ इत्यादिवहुवचनांताःशब्दागणस्यसंसूचकाभवंतीतिन्यायाद्बहुवचनेनजातिभ्रंशकरणसंकलीकरणापात्रीकरणमलिनीकरणानि गृह्यंते ॥ तानिचमनुनोक्तानि ॥ ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः ॥ महांतिपातकान्याहुःसंसर्गश्चापितैःसह ॥ गोवधोऽयाज्यसंयाज्यंपारदार्यात्मविक्रयौ ॥ गुरुमातृपितृत्यागः स्वाध्यायाग्न्योःसुतस्यच॥परिवित्तिताऽनुजेनपरिवेदनमेवच॥तयोर्दानंचकन्यायास्तयोरेवचयाजनम्॥कन्यायादूषणंचैववार्धुषित्वंव्रताच्च्युतिः॥तडागारामदाराणामपत्यस्यचविक्रयः॥ व्रात्यताबांधवत्यागोभृतकाध्यापनंतथा॥भृतादध्ययनंदानमपत्यानांचविक्रयः॥ सर्वाकरेष्वधीकारोमहायंत्रप्रवर्तनम् ॥ हिंसौषधीनांस्त्रीजीवोभिचारोमूलकर्मच ॥ इंधनार्थमशुष्काणांद्रुमाणामवपातनम् ॥ आत्मार्थंचाक्रियारंभोनिंदिता

CC-0. In Public Domain. Digitization by eGangotri

न्नादनंतथा॥अनाहिताग्नितास्तैन्यमृणानामनपक्रिया॥धान्यकुप्यपशुस्तेयमपत्यस्त्रीनिषेवणम्॥स्त्रीशूद्रविट्क्षत्रवधोनास्तिक्यंचोपपातकम्॥ ब्राह्मणस्यरुजःकृत्याघ्रातिरघ्रेयमद्ययोः॥ जैह्म्यंपुंसिचमैथु
न्यंजातिभ्रंशकरंस्मृतम्॥खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा॥संकलीकरणंज्ञेयंमीनाहिमहिषस्यच॥ निंदितेभ्योधनादानंवाणिज्यंशूद्रसेवनम्॥ अपात्रीकरणंज्ञेयमसत्यस्यचभाषणम्॥ःकृमिकीटवयो
हत्यामद्यानुगतभोजनम् ॥ फलैधःकुसुमस्तेयमधैर्यंचमलावहमिति ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ १९० ॥ वेदपारायणात् उपवासपूर्वकंसमग्रायाःस्वशाखायाःपाठात् ॥

आधिव्याधिपरिक्षिप्तोघोरतापपरिप्लुतः ॥ मुच्यतेसर्वदुःखेभ्यःस्तवस्यास्यानुकीर्तनात् ॥ ८४ ॥ संवत्सरेणयुक्तात्मापठन्भक्तिपरायणः ॥ अभी
प्सितांलभेत्सिद्धिंसर्वैःपापैःप्रमुच्यते ॥ ८५ ॥ संशयाविष्टचित्तस्यधर्मविद्वेषिणोपिच ॥ दांभिकस्यापिहिंस्रस्यचेतोधर्मपरंभवेत् ॥८६॥ वर्णाश्रमपथी
नस्तुकामक्रोधविवर्जितः ॥ यत्फलंलभतेज्ञानीतदाप्नोत्यस्यकीर्तनात् ॥ ८७ ॥ गायत्र्ययुतजप्येनयत्फलंसमुपार्जितम् ॥ सकृत्पठनतःसम्यक्तदशे
षमवाप्नुयात् ॥८८॥ गांदत्त्वावेदविदुषेयत्फलंलभतेकृती ॥ तत्पुण्यंसम्यगाख्यातंस्तवराजसकृज्जपात् ॥८९॥ गुरुशुश्रूषणंकुर्वन्यावज्जीवंनरोत्तमः॥
यत्पुण्यमर्जयेत्तद्भाग्वर्षंत्रिषवणंजपन् ॥१९०॥ वेदपारायणात्पुण्यंयदत्रपरिपठ्यते ॥ तत्षण्मासेनलभतेत्रिसंध्यंपरिकीर्तनात् ॥ ९१ ॥ गंगायाःस्तव
राजस्यप्रत्यहंपरिशीलनात् ॥ शिवभक्तिमवाप्नोतिविष्णुभक्तोऽथवाभवेत् ॥ ९२ ॥ यःकीर्तयेदनुदिनंगंगानामसहस्रकम् ॥ तत्समीपेसहचरीगंगादेवी
सदाभवेत् ॥ ९३ ॥ सर्वत्रपूज्योभवतिसर्वत्रविजयीभवेत् ॥ सर्वत्रसुखमाप्नोतिजाह्नवीस्तोत्रपाठतः ॥ ९४ ॥ सदाचारीसविज्ञेयःसशुचिस्तुसदैवहि ॥
कृतसर्वसुरार्चःसकीर्तयेद्यइमांस्तुतिम् ॥९५॥ तस्मिंस्तृप्तेभवेत्तृप्ताजाह्नवीनात्रसंशयः ॥ तस्मात्सर्वप्रयत्नेनगंगाभक्तंसमर्चयेत् ॥ ९६ ॥ स्तवराजमिमं
गांगंशृणुयाद्यश्चवैपठेत् ॥ श्रावयेदथतद्भक्तान्दंभलोभविवर्जितः ॥९७॥ मुच्यतेत्रिविधैःपापैर्मनोवाक्कायसंभवैः ॥ क्षणान्निष्पापतामेतिपितॄणांचप्रियो
भवेत् ॥९८॥ सर्वदेवप्रियश्चापिसर्वर्षिगणसंमतः ॥ अंतेविमानमारुह्यदिव्यस्त्रीशतसंवृतः ॥ ९९ ॥ दिव्याभरणसंपन्नोदिव्यभोगसमन्वितः ॥ नंदना
दिवनेस्वैरंदेववत्सप्रमोदते ॥ २०० ॥ भुज्यमानेषुविप्रेषुश्राद्धकालेविशेषतः ॥ जपन्निदंमहास्तोत्रंपितॄणांतृप्तिकारकम् ॥ १ ॥ यावंतितत्रसिक्थानि
यावंतोऽबुकणाःस्थिताः ॥ तावंत्येववहिवर्षाणिमोदंतेस्वःपितामहाः ॥ २ ॥ यथाप्रीणंतिपितरोगंगायांपिंडदानतः ॥ तथैवतृप्नुयुःश्राद्धेस्तवस्यास्यानुसं
श्रवात् ॥ ३ ॥ एतत्स्तोत्रंगृहेयस्यलिखितंपरिपूज्यते ॥ तत्रपापभयंनास्तिशुचितद्भवनंसदा ॥ ४ ॥ अगस्तेकिंबहूक्तेनशृणुमेनिश्चितंवचः ॥ संशयो
नात्रकर्तव्यःसंदेग्धरिफलंनहि॥५॥यावंतिमर्त्यैस्तोत्राणिमंत्रजालान्यनेकशः ॥ तावंतिस्तवराजस्यगांगेयस्यसमानिन॥६॥ यावज्जन्मजपेद्यस्तुनाम्नामे
तत्सहस्रकम् ॥ सकीकटेष्वपिमृतोनपुनर्गर्भमाविशेत् ॥७॥ नित्यंनियमवानेतद्योजपेत्स्तोत्रमुत्तमम् ॥ अन्यत्रापिविपन्नःसगंगातीरेमृतोभवेत् ॥ ८ ॥

अत्रजगाति ॥ ९१ ॥ ९२ ॥ सहचरीसखी ॥ तन्निकटेकृतवासेत्यर्थः ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ स्वैरंस्वेच्छया ॥ २०० ॥ भुज्यमानेष्विति ॥ इदंसहस्र
नामयोजपन्भवतितस्यपितॄणामिदंस्तोत्रंतृप्तिकारकंभवतीत्यर्थः ॥ १ ॥ सिक्थानिअन्नलेशाःकणाइतियावत् ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ कीकटेषुगयाप्रदेशेषु ॥ ७ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तीति॥मुक्तेःकैवल्यस्यबीजभूतानियान्यक्षराणितेषामास्पदमाश्रयः मोक्षकारणभूतब्रह्मास्पदंवा मुक्तिबीजंचतदक्षरस्यब्रह्मणआस्पदंचेतिवा ॥९॥ प्रतिनिधिस्तुल्यम् ॥ सिस्नासुर्गंगायांमज्जनस्नान मंतरेणापिगंगास्नानेच्छुः ॥ मातापिसंत्यजेत्पुत्रमितिशास्त्रप्रमाणतः ॥ त्राहिमांत्रिजगन्मातर्गंगेविष्णुपदोद्भवे ॥ २१० ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥छ॥ अथत्रिंशत्तमेऽध्यायेरहस्यंश्रुतिसंमितम् ॥ धनंजयकथागर्भंवर्ण्यतेकाशिजंमहत् ॥ १ ॥ मणिकर्ण्यांगंगायाःसमागमात्क्षेत्रस्याधिक्यंवक्तुंगंगागमनप्रकारंश्रावयाति ॥ शृण्विति ॥ सप्रसिद्धोभगीरथोगंगांभूमिमानिनायेतिद्वितीयेनान्वयः ॥ १ ॥ २ ॥ तर्हिऋजुमार्गेणपितामहायत्रमृतास्तत्रनेतव्याकिंवक्रगत्यामणिकर्ण्यामानयनेनतत्राह ॥ त्रयाणामिति ॥ ३ ॥ एतदेवस्पष्टयति ॥ आनंदकाननमिति ॥ आनंदकाननंप्रतिहरेःसंबंधिनीचक्रपुष्करिणी ॥ दैलीपिर्दिलीपस्यापत्यंभगीरथोगंगांसमानैषीत्प्रापयामासेत्यग्रिमेणान्वयः ॥ आनंदकाननंप्राप्ययाहरेश्चक्रपु

एतत्स्तोत्रवरंरम्यंपुराप्रोक्तंपिनाकिना ॥ विष्णवेनिजभक्तायमुक्तिबीजाक्षरास्पदम् ॥ ९ ॥ गंगास्नानप्रतिनिधिःस्तोत्रमेतन्मयेरितम् ॥ सिस्नासुर्जाह्नवीं तस्मादेतत्स्तोत्रंजपेत्सुधीः ॥ २१० ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेगंगासहस्रनामकथनंनामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यमहाभागसचराजाभगीरथः ॥ आराध्यश्रीमहादेवमुद्दिधीर्षुःपितामहान् ॥१॥ ब्रह्मशाप विनिर्दग्धान्सर्वान्राजर्षिसत्तमः ॥ महतातपसाभूमिमानिनायत्रिवर्त्मगाम् ॥ २ ॥ त्रयाणामपिलोकानांहितायमहतेनृपः ॥ समानैषीत्ततोगंगांयत्रासीन्मणिकर्णिका ॥ ३ ॥ आनंदकाननंशंभोश्चक्रपुष्करिणीहरेः ॥ परब्रह्मैकसुक्षेत्रंलीलामोक्षसमर्पकम् ॥ ४ ॥ प्रापयामासतांगंगांदैलीपिःपुरतश्चरन् ॥ निर्वाणकाशनाद्यत्रकाशीतिप्रथितापुरी ॥ ५ ॥ अविमुक्तंमहाक्षेत्रंनमुक्तंशंभुनाक्वचित ॥ प्रागेवहिमुनेऽनर्घ्यंजात्यंजांबूनदंस्वयम् ॥ ६ ॥ पुनर्वारितरेणापिहीरेणयदिसंगतम् ॥ चक्रपुष्करिणीतीर्थंप्रागेवश्रेयसांपदम् ॥७॥ ततःश्रेष्ठतरंशंभोर्मणिश्रवणभूषणात् ॥ आनंदकाननेतस्मिन्नविमुक्तेशिवालये॥ ॥ ८ ॥ प्रागेवमुक्तिःसंसिद्धागंगासंगात्ततोधिका ॥ यदाप्रभृतिसागंगामणिकर्ण्यांसमागता ॥ ९ ॥ तदाप्रभृतितत्क्षेत्रंदुष्प्रापंत्रिदशैरपि ॥ कृत्वाकर्माण्यनेकानिकल्याणानीतराणिवा ॥ १० ॥ तानिक्षणात्समुत्क्षिप्यकाशीसंस्थोऽमृतोभवेत् ॥ तस्यांवेदांतवेद्यस्यनिदिध्यासनतोविना ॥ ११ ॥

ष्करिणीतामितिवा ॥ गांपयोदोग्धीतिवद्विकर्मकतावा ॥ आनंदकाननेगंगांप्रापयामासेत्यर्थः ॥ आनंदकाननंविशिनष्टि ॥ परब्रह्मैकसुक्षेत्रमित्यर्धेन ॥ परब्रह्मैवेतिकेचित् ॥४॥ पुनरपितदेवविशेषयन्पूर्वोक्तनामद्वयनिर्वचनमनुवदतिनिर्वाणकाशनादित्येकेन॥यत्रानंदवने॥यद्वा गंगांविशिनष्टि ॥ निर्वाणेति ॥ यत्रयस्यांगंगायांकाश्यामुत्तरवाहिन्यांनिमित्तभूतायांनिर्वाणकाशनात्कैवल्यस्यप्रकाशनात्काशीतिपुरीप्रथितातांगंगांसमानैषीदितिपूर्वेणैवान्वयः ॥५॥ अविमुक्तंचप्रथितमितिविपरिणम्यान्वयः ॥ तत्रहेतुर्नमुक्तमिति ॥ तदुक्तंमात्स्ये ॥ विमुक्तंनमयायस्मान्मोक्ष्यतेनकदाचन ॥ महत्क्षेत्रमिदं तस्मादविमुक्तमितिस्मृतमिति ॥ यदर्थमनूदितंतद्दृष्टांतपुरःसरमाह प्रागेवेत्यारभ्यकृत्वाकर्माणीत्यतःप्राक्तनेन ॥ हेमुनेऽगस्त्यजांबूनदंसुवर्णंजात्यंसुजातंस्वयमनर्घ्यंपुनर्वारितरेणहीरकेणसंगतंसद्यथाऽनर्घ्यंभवतीत्यर्थः ॥ तथागंगासंगाच्चक्रपुष्करिणीतियोज्यम् ॥६॥७॥८॥९॥ इतराणिपापानि ॥ १० ॥ संस्थोमृतः ॥ तदुक्तंलैंगे ॥ नाविमुक्तेनरःकश्चिन्नरकंयातिकिल्बिषी ॥ ईश्वरानुग्रहादेवसर्वे

CC-0. In Public Domain. Digitization by eGangotri

यांतिपरांगतिमिति ॥ काशीकृतानांपापानांपंचक्रोशयात्रादिनाक्षयादितिभावः ॥ निदिध्यासनतोनिदिध्यासनामित्यर्थः ॥ निदिध्यासनतामितिक्वचित् ॥ ११ ॥ सांख्येनात्मानात्मविवेकेन ॥ योगेनाष्टांगेन ॥ काश्यांसंस्थासंस्थितिर्मृतिःसम्यङ्मरणपर्यंतावस्थितिर्यस्यसतथा ॥ कंठेकालइत्यादिवद्लुक्समासः ॥ विनाज्ञानेनदेहत्यागाव्यवहितसमयात्प्राक्साक्षात्कारंविनेत्यर्थः ॥ ज्ञानादेवतुकैवल्यमितिश्रुतेः ॥ १२ ॥ एतदेवस्फुटयति ॥ यत्नतोऽयत्नतोवाशमादेरनुष्ठानादननुष्ठानाद्वेत्यर्थः ॥ १३ ॥ प्राकृतैर्गुणैःप्रकृतिगुणकार्यैःसंसारपाशैः ॥ १४ ॥ असिसंभेदयोगेनअस्याऽसिसंज्ञयानद्यासंभेदःसंभेदनंछेदनमितियावत् ॥ अर्थात्पाशानांसएवयोगउपायस्तेन ॥ असिधारयेत्युक्तेः ॥ यद्वा अस्यासहसंभेदोयस्यतदसिसंभेदंगंगांभस्तत्संबंधेनेत्यर्थः ॥ गंगासंगात्ततोऽधिके त्युक्तेः ॥ प्राकृतंव्याख्यानमसिसंभेदस्यप्राशस्त्यमात्रविवक्षया ॥ असिसंभेदसंयोगेइतिक्वचित् ॥ १५ ॥ १६ ॥ स्वंदेहम् ॥ १७ ॥ पुरःकाश्याः ॥ रक्षामेवाह असिमितित्रयेण ॥ पापिना

विनासांख्येनयोगेनकाश्यांसंस्थोऽमृतोभवेत् ॥ कर्मनिर्मूलनवताविनाज्ञानेनकुंभज ॥ १२ ॥ शशिमौलिप्रसादेनकाशीसंस्थोऽमृतोभवेत् ॥ यत्नतोऽयत्नतोवापिकालात्त्यक्त्वाकलेवरम् ॥ १३ ॥ तारकस्योपदेशेनकाशीसंस्थोऽमृतोभवेत् ॥ अनेकजन्मसंसिद्धैर्बद्धोऽपिप्राकृतैर्गुणैः ॥ १४ ॥ असिसंभेदयोगेनकाशीसंस्थोऽमृतोभवेत् ॥ देहत्यागोऽत्रवैदानंदेहत्यागोत्रवैतपः ॥ १५ ॥ देहत्यागोऽत्रवैयोगःकाश्यांनिर्वाणसौख्यकृत् ॥ प्राप्योत्तरवहांकाश्यामतिदुष्कृतवानपि ॥ १६ ॥ यायात्स्वंहेलयात्यक्त्वातद्विष्णोःपरमंपदम् ॥ यमेंद्राग्निमुखादेवादृष्ट्वामुक्तिपथोन्मुखान् ॥ १७ ॥ सर्वान्सर्वेसमालोक्यरक्षांचक्रुःपुरापुरः ॥ असिंमहासिरूपांचपाप्यसन्मतिखंडनीम् ॥ १८ ॥ दुष्टप्रवेशंधुन्वानांधुनींदेवाविनिर्ममुः ॥ वरणांचव्यधुस्तत्रक्षेत्रविघ्ननिवारिणीम् ॥ १९ ॥ दुर्वृत्तसुप्रवृत्तेश्चनिवृत्तिकरणींसुराः ॥ दक्षिणोत्तरदिग्भागेकृत्वाऽसिंवरणांसुराः ॥ २० ॥ क्षेत्रस्यमोक्षनिक्षेपरक्षांनिर्वृतिमाप्नुयुः ॥ क्षेत्रस्यपश्चाद्दिग्भागेतंदेहलिविनायकम् ॥ २१ ॥ स्वयंव्यापारयामासरक्षार्थंशशिशेखरः ॥ अनुज्ञातप्रवेशानांविश्वेशेनकृपावता ॥ २२ ॥ तेप्रवेशंप्रयच्छंतिनान्येषांहिकदाचन ॥ इत्यर्थेकथयिष्येऽहमितिहासंपुरातनम् ॥ आश्चर्यकारिपरमंकाशीभक्तिप्रवर्धनम् ॥ २३ ॥ ॥ स्कंदउवाच ॥ ॥ दक्षिणाब्धितटेकश्चित्सेतुबंधसमीपतः ॥ वणिग्धनंजयोनाममातृभक्तिसमन्वितः ॥ २४ ॥ पुण्यमार्गार्जितधनोधनतोषितमार्गणः ॥ मार्गणस्फारितयशायशोदातनयार्चकः ॥ २५ ॥

मसन्मतिमस्यतिखंडयतीत्यसिशब्दार्थंनिर्वक्ति ॥ पापीति ॥ १८ ॥ असिंविशिनष्टि ॥ धुनीमिति ॥ दुष्टानांप्रवेशनंधुनोतिनिवारयतीतिधुनीशब्दार्थमाह ॥ दुष्टेति ॥ व्यधुश्चक्रुः ॥ सर्वान्क्षेत्रविघ्नान्वारयतीतिवरणाशब्दार्थंनिर्वक्ति ॥ क्षेत्रेति ॥ १९ ॥ निर्वचनांतरमाह ॥ दुर्वृत्तसुप्रवृत्तेश्चेति ॥ दुर्वृत्तस्यसुप्रवृत्तेरितिक्वचित् ॥ पाठद्वयेप्येकएवार्थः ॥ दक्षिणेति ॥ दक्षिणदिग्भागेऽसिमुत्तरदिग्भागेवरणामित्यर्थः ॥ २० ॥ तेविशिनष्टि ॥ क्षेत्रस्यमोक्षेति ॥ क्षेत्रस्यकैवल्यदानसंपादयित्रीमित्यर्थः ॥ निर्वाणस्थाप्यरक्षाकर्त्रींमितिवा ॥ तंप्रसिद्धम् ॥ २१ ॥ व्यापारयामासस्थापयामास ॥ फलितमाह ॥ अनुज्ञातेति ॥ २२ ॥ तेऽस्यादयः ॥ विश्वेशेनानुज्ञातानांधर्मानुषंगात्काशींप्राप्यापिवहिर्निर्गमइत्यस्मिन्नर्थेइतिहासमाह ॥ इत्यर्थइति ॥ २३ ॥ दक्षिणार्णवतीरेरामसेतुनिकटेधनंजयोनामवणिग्बभूवेतिशेषः ॥ तंविशिनष्टि मातृभक्तीतिपादाधिकपंचभिः ॥ २४ ॥ मार्गणायाचकाः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपत्तिर्धनादिसमृद्धिः ॥ आकारगोपकःस्वगुणाप्रख्यापकः ॥ २६ ॥ संपूर्णाश्चतुःषष्टिसंख्याकाःकलाविद्यायस्यससंपूर्णकलः ॥ निर्गतःकलंकोयस्मात्सउदयोयस्यसनिष्कलंकोदयः ॥ संपूर्ण कलोपिचंद्रोमृगलांछनाद्गुरुदाराभिमर्शाद्वासकलंकोदयएवेतितस्मादस्याधिक्यंध्वनितम् ॥ २७ ॥ सत्यानृतंवाणिज्यम् ॥ वर्णेतरोपिचतुर्वर्णेभ्योऽन्योपिसुवर्णेनशोभनब्राह्मणादिनावर्णेनकृतावर्ण नास्तुतिर्यस्यसः ॥ हीनवर्णोपिब्राह्मणवत्सदाचारइत्यर्थः ॥ पक्षांतरेसुवर्णस्यकृतेनकरणेनघटनेनेतियावत् ॥ वर्णनंकथनंयस्यसतथास्वर्णकारइत्यर्थः ॥ २८ ॥ सुखयानचरोनौकायानचारी ॥ नीरैःपानंपानंनौभिर्यानंयानम् ॥ शिशुभिर्लीलालीलाअन्यदपानमयानमलीलेतिदर्शनात् ॥ २९ ॥ ३० ॥ प्रावृण्नदीपूरसमंवर्षातरंगिण्योघसमम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ अधोमुखस्योर्ध्वपादस्यवृक्षेऽवलंबमानस्यगेदुराइतिप्रसिद्धस्यपक्षिविशेषस्यपत्नीवल्गुली ॥ उलूकीपेचिका ॥ ३५ ॥ दुःस्पर्शाद्दुष्टसंश्लेशात् दुःखात्मकात्स्पर्शादित्यर्थः ॥ ननुदुःस्पर्शेकुतःप्रवृत्ति स्तत्राह ॥ सुखाभासात्मकात् सुखमिवभासतइतिसुखाभासस्तदात्मकादित्यर्थः ॥ ३६ ॥ पातिव्रत्यभंगेदोषमुक्त्वातद्रक्षणेगुण माह ॥ अनेनैवशरीरेणेति ॥ अनेनैवशरीरेणरक्तमांसतयाप्रतीते

समुन्नतोपिसंपत्त्याविनयानतकंधरः ॥ आकरोपिगुणानांहिगुणिष्वाकारगोपकः ॥ २६ ॥ रूपसंपदुदारोपिपरदारपराङ्मुखः ॥ ससंपूर्णकलोप्यासी न्निष्कलंकोदयःसदा ॥ २७ ॥ ससत्यानृतवृत्तिश्चप्रायःसत्यप्रियोमुने ॥ वर्णेतरोप्यभूल्लोकेसुवर्णकृतवर्णनः ॥ २८ ॥ सदाचरणगोप्येषसुखयानचरः कृती ॥ अदरिद्रोपिमेधावीसोभूत्पापदरिद्रधीः ॥ २९ ॥ तस्यैवंवर्तमानस्यकदाचित्कालपर्ययात् ॥ जननीनिधनंप्राप्ताव्याधिताऽतिजरातुरा ॥ ३० ॥ तयाचयौवनंप्राप्यमेघच्छायातिचंचलम् ॥ प्रावृण्नदीपूरसमंस्वपतिःपरिवंचितः ॥ ३१ ॥ दिनत्रिचतुरस्थायियानारीप्राप्ययौवनम् ॥ भर्तारंवंचये न्मोहात्साऽक्षयंनरकंव्रजेत् ॥ ३२ ॥ शीलभंगेननारीणांभर्ताधर्मपरोपिहि ॥ पतेद्दुःखार्जितात्स्वर्गाच्छीलंरक्ष्यंततःस्त्रिया ॥ ३३ ॥ विष्ठागर्तेचनिरये स्वयंपततिदुर्मतिः ॥ आभूतसंप्लवंयावत्ततःस्याद्ग्रामसूकरी ॥३४॥ स्वविष्ठापायिनीचाथवल्गुलीवृक्षलंबिनी ॥ उलूकीवादिवांधास्याद्वृक्षकोटरवासिनी ॥ ॥ ३५ ॥ रक्षणीयंमहायत्नादिदंसुकृतभाजनम् ॥ वपुःपरस्यदुःस्पर्शात्सुखाभासात्मकात्स्त्रिया ॥ ३६ ॥ अनेनैवशरीरेणभर्तृसाद्धिहितेनहि ॥ किंस तीनचतस्तंभभानुमुद्यंतमाज्ञया ॥ ३७ ॥ अत्रिपत्न्यनसूयाकिंभर्तृभक्तिप्रभावतः ॥ दधारनत्रयींगर्भेपतिव्रतपरायणा ॥ ३८ ॥

नेत्यर्थः ॥ सतीपतिव्रताउद्यंतमुद्गच्छंतंभानुंकिंनतस्तंभस्तंभितंकिंनचकारअपितुस्तंभितवत्येवेत्यर्थः ॥ कथंभूतेनशरीरेण ॥ भर्तृसाद्धिहितेनभर्त्रधीनसंपादितेनेत्यर्थः ॥ तथाचश्रूयतेमार्कंडेयपुराणे ॥ कदाचिच्चोराननुधावंतोराजभटामांडव्यस्यऋषेस्तपश्चरतोमौनव्रतधारिणआश्रमेतान्संप्राप्यतेनसार्धंवद्ध्वानीयराज्ञेनिवेद्यतदाज्ञयासर्वाञ्छूलेष्वारोपयामासुः ॥ तदैवांधकारभूतायांरजन्यांवेश्याभिला षुकंभर्तारंस्कंधमारोप्यतद्गृहंनयंतीपातिव्रताशूलस्थमांडव्यमज्ञानात्संघट्टयामास ॥ ततोदुःखाक्रांतेनतेनोक्तंयस्यप्रियंचिकीर्षत्यात्वयैवंकृतंसतुसूर्योदयेम्रियतांतच्छ्रुत्वाऽतिदुःखितयातयोक्तंयद्यहंपति व्रतास्यांतदासूर्योनोदेतु तदातदाज्ञयासूर्योनोदयंचकारेति ॥ ३७ ॥ त्रयींवेदत्रयात्मिकां ब्रह्मविष्णुशिवांशसोमदत्तात्रेयदुर्वासोभिधामित्यर्थः ॥ एवंहिश्रूयतेतत्रैव ॥ पतिव्रतायावाक्यात्सू र्यानुदयेसृष्टिलोपमाकलय्यसेंद्रैर्देवैःसहिताब्रह्मविष्णुरुद्राअत्रिपत्नीमनसूयामूचुः ॥ पतिव्रतायाःशापभयात्सूर्योनोदेतितदभावाच्चजगन्नश्यत्यतःपतिव्रताशिरोमण्याभवत्याप्रसादनीयायथासूर्योद्गमा

CC-0. In Public Domain. Digitization by eGangotri

यसास्वाच्छंदंददाति ॥ तदातयोक्तंतदेवंमयासंपाद्यतेयदिभवंतोममपुत्राभवेयुः ॥ तथैवतैःस्वीकृतेतयाचतथासाधितेसोमदत्तदुर्वाससोब्रह्मविष्णुरुद्रांशास्त्रयःपुत्राःसवभूवुरिति ॥३८॥ नकेवलंपाति व्रत्यरक्षणंगुणमात्रंपरमसुखलाभश्चेत्याह ॥ इहकीर्तिश्चेति ॥ ३९ ॥ प्रस्तुतमाह ॥ साद्दुर्वृत्त्येति ॥ साधनंजयमातादुर्वृत्त्यापतिधर्मंपरित्यज्येतिसंबंधः ॥ साद्दुर्वृत्तेतिक्वचित् ॥ ४० ॥ ननु निकृष्टजातौजातस्यधनंजयस्यकथंपूर्वोक्तगुणत्वंतत्राह ॥ धनंजयोपिचेति ॥ अपिचेतिसमुच्चये ॥ शिवयोगिनासार्धंतपोदयात् शिवयोगिनःसंगमात्तपसउदयादित्यर्थः ॥ विसर्गलोपेऽपिसंधिरार्षः ॥ तपश्चदयाचतपोदयंतस्मादितिवा ॥ इत्थंपूर्वोक्तप्रकारेण इत्थंकेनापिभाग्योदयेनेतिवा ॥ ४१ ॥ इत्थंप्रसक्तानुप्रसक्तमुक्त्वाप्रस्तुतमाह ॥ धनंजयोपीति ॥ गंगामार्गस्थितोऽभवत् गंगामार्गेण गंगाद्वारमार्गेणसेतुबंधाद्येनमार्गेणहरिद्वारंगम्यतेतेनमार्गेणप्रस्थानंकृतवानित्यर्थः ॥ यद्वा गंगाःकावेर्याद्याःपंच ॥ तदुक्तम् ॥ कावेरीतुंगभद्राचकृष्णावेण्याचगौतमी ॥ भागीरथीतिविख्याताःपंच गंगाःप्रकीर्तिताइति ॥ तासांमार्गेवर्त्मनिस्थितःप्रस्थितोऽभूत् ॥ श्रीरंगानंतशायिराजमहेंद्रसिंहाद्रिकूर्मपुरुषोत्तमभागीरथीसंगमपथाप्रस्थानंकृतवानित्यर्थः ॥ त्रिस्थलींकर्तुमितिशेषः ॥ ४२ ॥

इहकीर्तिश्चविपुलास्वर्गेवासस्तथाऽक्षयः ॥ पातिव्रत्यात्स्त्रियालभ्यंसखित्वंचश्रियासह ॥ ३९ ॥ साद्दुर्वृत्त्यापरित्यज्यपतिधर्मंसनातनम् ॥ स्वच्छंदचा रिणीभूत्वामृतानिरयमुद्ययौ ॥ ४० ॥ धनंजयोपिचसुनेकेनचिच्छिवयोगिना ॥ सार्धंतपोदयादित्थंसोऽभवद्धर्मतत्परः ॥४१॥ धनंजयोपिधर्मात्मामा तृभक्तिपरायणः ॥ आदायास्थीन्यथोमातुर्गंगामार्गस्थितोऽभवत् ॥४२॥ पंचगव्येनसंस्नाप्यततःपंचामृतेनवै ॥ यक्षकर्दमलेपेनलिप्त्वापुष्पैःप्रपूज्यच ॥ ४३ ॥ आवेष्ट्यचनेत्रवस्त्रेणततःपट्टांबरेणवै ॥ ततःसुरसवस्त्रेणततोमांजिष्ठवाससा ॥४४॥ नेपालकंबलेनाथमृदाचाऽथविशुद्धया ॥ ताम्रसंपुटकेकृत्वा मातुरंगान्यहोवणिक् ॥ ४५ ॥ अस्पृष्टहीनजातिःसशुचिष्मान्स्थंडिलेशयः ॥ आनयन्ज्वरितोप्यासीन्मध्येमार्गंधनंजयः ॥४६॥ भारवाहःकृतस्तेनक श्चिद्दत्त्वोचितांभृतिम् ॥ किंबहूक्तेनघटजकाशीप्राप्ताऽथतेनवै ॥ ४७ ॥ धृत्वासंभृतिरक्षार्थंभारवाहंधनंजयः ॥ जगामापणमानेतुंकिंचिद्वस्त्वशनादिकम् ॥ ४८ ॥ भारवाह्यंतरंप्राप्यतस्यसंभृतिमध्यतः ॥ ताम्रसंपुटमादायधनंज्ञात्वागृहंययौ ॥ ४९ ॥

पंचगव्येनेत्यादिपंचभिर्वाक्यम् ॥ अहोकष्टेहर्षेवा ॥ वणिग्धनंजयोमातुरंगान्यस्थीनिताम्रसंपुटेकृत्वानयन्मध्येमार्गंमार्गस्यमध्येज्वरितोज्वरेणव्याप्तोऽपिशब्दात्सार्थहीनश्चासीदित्यन्वयः ॥ अथोव णिगितिपाठेआनयन्सन्अथोअनंतरंज्वरितआसीदित्यर्थः ॥ पुनःकिंकृत्वा ॥ यक्षकर्दमलेपेनकर्पूरागुरुकस्तूरीकंकोलपिष्टलेपेन ॥ यद्वा लिप्यतेऽनेनेतिलेपोयक्षकर्दमरूपोलेपस्तेनलिप्त्वा ॥ अथानं तरंविशुद्धयामृदागोपीचन्दनप्रमुखयाचलिप्त्वा ॥ पुनःकिंकृत्वा ॥ नेत्रवस्त्रेणगौडैर्नैनूइतिप्रसिद्धेनवस्त्रेणवेष्टयित्वा ॥ अस्याग्रेपिचतुर्षुपदेषुसंबंधः ॥ सुरसवस्त्रेणाचिक्कणकार्पासवस्त्रेण ॥ मांजिष्ठ वाससामंजिष्ठेनरक्तवाससा ॥ नेपालकंबलेननेपालदेशोद्भवेनकंबलेन ॥ शुचिष्मान्पावित्र्यवान् ॥ स्थंडिलेशयोभूमिशायी ॥ भृतिःकर्ममूल्यम् ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ संभृ तिरक्षार्थंसामग्रीरक्षार्थम् ॥ आपणंपण्यवीथिकाम् ॥ अश्यतेभुज्यतइत्यशनंतदादिकंवस्तु ॥ आदिपदेनस्नानश्राद्धविश्वेश्वरादिदेवपूजाद्रव्यंगृह्यते ॥ ४८ ॥ अन्तरंछिद्रमवसरंवा ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संभृतिंसामग्रीम् ॥ ताम्रसंपुटवर्जितांताम्रसमुद्गकरहिताम् ॥ ५० ॥ चक्रंदअरोदीत् ॥ तदनुसारतः तस्यभारवाहकस्यानुसारतोऽनुसारायान्वेषणायेत्यर्थः ॥ ५१ ॥ संवसथंगृहम् ॥ ५२ ॥
भारंवहतीतिभारवाट् ॥ अरण्यान्यांमहारण्ये ॥ तानिअस्थीनि ॥ ५३ ॥ चैलशकलंयेनवस्त्रखंडेनसंछाद्यास्थीन्यानीतानितच्चैलशकलमित्यर्थः ॥ अन्तरेमध्येउपरीतिवा ॥ ५४ ॥
आशयाऽस्थीनिप्राप्तव्यानीतिवांछया ॥ आश्वस्यविश्रम्य विश्वासंकृत्वेतिवा ॥ आश्वास्येतिपाठेतत्पत्नींविश्वासंजनयित्वापृष्टवानित्यर्थः ॥ ५५ ॥ आश्वासमेवाह इत्युक्तेत्यतःप्राक्तनेन ॥ वसुध
नम् ॥ ५६ ॥ अस्थ्नामाधारसंपुटोऽस्थिसंपुटः ॥ अथसंपुटइतिपाठेपिसएवार्थः ॥ ५७ ॥ भोभिल्लिहेशबरि ॥ ५८ ॥ ५९ ॥ अधिकंबहु ॥ ६० ॥ अरण्यानींमहारण्यम् ॥ शबरोभिल्लः ॥ ६१ ॥

वासस्थानमथागत्यतमदृष्ट्वाधनंजयः ॥ त्वरावान्संभृतिंवीक्ष्यताम्रसंपुटवर्जिताम् ॥ ५० ॥ हाहेत्याताड्यहृदयंचक्रंदबहुशोभृशम् ॥ इतस्ततस्तमालोक्यगतस्तदनुसारतः ॥ ५१ ॥ अकृत्वाजाह्नवीस्नानमनवेक्ष्यजगत्पतिम् ॥ तस्यसंवसथंप्राप्तोभारवोढुर्धनंजयः ॥ ५२ ॥ भारवाडप्यरण्यान्यांताम्रसंपुटमध्यतः ॥ दृष्ट्वास्थीनिविनिःश्वस्यतानित्यक्त्वागृहंययौ ॥ ५३ ॥ वणिक्चतद्गृहंप्राप्यशुष्ककंठोष्ठतालुकः ॥ दृष्ट्वाऽथचैलशकलंतृणकुड्यंतरेतदा ॥ ५४ ॥ आशयाकिंचिदाश्वस्यतत्पत्नींपरिपृष्टवान् ॥ सत्यंब्रूहिनभेतव्यंदास्याम्यन्यदपिध्रुवम् ॥ ५५ ॥ वसुक्तेगतोभर्तामातुरस्थीनिमेऽपय ॥ वयंकार्पटिकाभद्रेभवामोनचदुःखदाः ॥ ५६ ॥ अज्ञात्वालोभवशतस्तेननीतोऽस्थिसंपुटः ॥ तस्यैषदोषोनोभद्रेमातुर्मेकर्मताहृशम् ॥ ५७ ॥ अथवानप्रसूदोषोमंदभाग्योऽस्मितत्सुतः ॥ सुतेनकृत्यंयत्कृत्यंतत्प्राप्तिर्नास्तिभिल्लिमे ॥ ५८ ॥ उद्यमंकृतवानस्मिनसिद्ध्येन्मंदभाग्यतः ॥ आयातुसत्यवाक्यान्मेमाबिभेतुवनेचरः ॥ ॥ ५९ ॥ अस्थीनिदर्शयत्वाशुधनंदास्येऽधिकंततः ॥ इत्युक्तातेनसाभिल्लीव्याजहारनिजंपतिम् ॥ ६० ॥ लज्जानम्रशिराःसोऽथवृत्तांतंविनिवेद्यच ॥ निनायतामरण्यानींशबरस्तंधनंजयम् ॥ ६१ ॥ वनेचरोऽथतत्स्थानंदैवाद्विस्मृतवान्मुने ॥ दिग्भ्रांतिंसमवाप्याथपरिबभ्रामकानने ॥ ६२ ॥ इतोरण्यात्ततोयातिततोरण्यादितोव्रजेत् ॥ वनाद्वनांतरंभ्रांत्वाखिन्नःसोपिवनेचरः ॥ ६३ ॥ विहायमध्येऽरण्यानितंययौचस्वपक्कणम् ॥ द्वित्राण्यहानिसंभ्रम्यसकार्पटिकसत्तमः ॥ ६४ ॥ क्षुत्क्षामःशुष्ककंठोष्ठोहाहेतिपरिदेवयन् ॥ पुनःकाशीपुरींप्रातःपरिम्लानमुखोवणिक् ॥ ६५ ॥ तन्मंदभाग्यतांश्रुत्वालोकात्कार्पटिकोमुने ॥ कृत्वागयांप्रयागंचततःस्वविषयंययौ ॥ ६६ ॥ काश्यांप्रवेशंप्राप्यापितदस्थीनिघटोद्भव ॥ विनावैश्वेश्वरीमाज्ञांबहिर्यातानितत्क्षणात् ॥ ॥ ६७ ॥ एवंकाश्यांप्रविश्यापिपापीधर्मानुषंगतः ॥ नक्षेत्रफलमाप्नोतिबहिर्भवतितत्क्षणात् ॥ ६८ ॥

॥ ६२ ॥ वनादिति ॥ विहायमध्येरण्यानिसर्वेष्वरण्येषुमध्येयेष्वस्थीनिप्रक्षिप्तानितान्यरण्यानिविहाय वनाद्वनांतरंभ्रांत्वाखिन्नःसन्तंप्रसिद्धंस्वपक्कणंस्वीयंशबरालयंययावित्यन्वयः ॥ ६३ ॥
द्वेचत्रीणिचद्वित्राणिअहानिपंचदिनानीत्यर्थः ॥ ६४ ॥ परिदेवयन्परितापंकुर्वन् ॥ ६५ ॥ तन्मंदभाग्यतांतस्यामातुःपरपुरुषगामिताम् ॥ कर्पटेनरक्तवासआदिनाव्यवहरतीतिकार्पटिकः ॥
स्वविषयंस्वीयंदेशम् ॥ ६६ ॥ दृष्टांतंविनिगमयद्दार्ष्टांतिकेविनिगमयति काश्यामितिद्वयेन ॥ ६७ ॥ धर्मानुषंगतःप्राक्तनपुण्यवशादित्यर्थः ॥ क्षेत्रफलंकैवल्यम् ॥ तत्रहेतुर्बहिर्भवतीति ॥ ६८ ॥

CC-0. In Public Domain. Digitization by eGangotri

परमप्रकृतमुपसंहरति ॥ तस्मादिति ॥ वाराणसीनामनिर्वक्ति ॥ असिश्चेतिसार्धेन ॥ यत्रयस्मिन्काननेअसिर्वरणाचद्वेनद्यौक्षेत्ररक्षाकृतौकृते क्षेत्ररक्षांकुरुतइतिक्षेत्ररक्षाकृतौ ॥ क्षेत्ररक्षाकरणेनिमित्त इतिवा ॥ कृतेदेवैःसंपादिते ॥ ६९ ॥ तदारभ्यतंकालमारभ्यहेमहामुनेऽगस्त्यअसेश्चवरणायाश्चसंगमंप्राप्यकाशिकावाराणसीतिविख्याताप्रख्यातेत्यर्थः ॥ ७० ॥ अतिहर्षेणपुनरपिकाशींवर्णयति वाराणसीहेत्यारभ्यारुद्ररुद्राक्षेत्यतःप्राक्तनेनग्रंथेन ॥ इहजगतियावाराणसीसाकरुणामयदिव्यमूर्तिः करुणामयीचासौदिव्याऽलौकिकीमूर्तिश्च करुणामयीदिव्यामूर्तिर्यस्याःसातथेतिवा ॥ उभयत्रहेतुमाह ॥ उत्सृज्ययत्रेति ॥ यत्रयस्यांवाराणस्यांतनुभृत्प्राणिमात्रंसुखेनतुसुखेनैवतनुमुत्सृज्ययद्यस्माद्विश्वेशदृङ्महसिविश्वस्येशोविश्वेशोविश्वश्चासावीशश्चेतिवासचासौदृग्ज्ञानंचतच्चतन्महःस्वप्रकाशंचतस्मिन्विश्वेशदृङ्महसिलक्ष्येतत्पदार्थइत्यर्थः ॥ सहसातत्क्षणाद्देहत्यागाव्यवहितसमयइत्यर्थः ॥ रूपेणाखंडसच्चिदात्मकेनलक्ष्येणत्वंपदार्थेनप्रविश्यप्रत्यग्ब्रह्मणोरैक्यमनुभूयेत्येतत् ॥ तांप्रसिद्धांवितनुतांपदवींविगतदेहभावांकैवल्याख्यांमुक्तिंदधातिधारयतिप्राप्नोतीत्यर्थः ॥ ७१ ॥ जातइति ॥ वाराणसीतिनिगदतीत्यन्वयः ॥ किंनिगदति ॥ रेहेजंतोबहुपुतीर्थवरेषुनिमज्ज्यस्नानादिकंविधायत्वंजातोमृतश्चषड्भावविकारादीन्प्राप्तवानसीत्यर्थः ॥ जातुकदाचिदपितवशांतिर्नाभूत् ॥ अतोऽधुनाइहअस्यांमयिमृतःसन्नमृतत्वंप्राप्यसायुज्यंलब्ध्वास्मरशासनःस्याःविश्वेश्वरोभूयाः ॥

तस्माद्विश्वेश्वराज्ञैवकाशीवासेऽत्रकारणम् ॥ असिश्चवरणायत्रक्षेत्ररक्षाकृतौकृते ॥ ६९ ॥ वाराणसीतिविख्यातातदारभ्यमहामुने ॥ असेश्चवरणायाश्चसंगमंप्राप्यकाशिका ॥ ७० ॥ वाराणसीहकरुणामयदिव्यमूर्तिरुत्सृज्ययत्रतुतनुंतनुभृत्सुखेन ॥ विश्वेशदृङ्महसियत्सहसाप्रविश्यरूपेणतांवितनुतांपदवींदधाति ॥ ७१ ॥ जातोमृतोबहुपुतीर्थवरेषुरेत्वंजंतोनजातुतवशांतिरभून्निमज्ज्य ॥ वाराणसीनिगदतीहमृतोऽमृतत्वंप्राप्याधुनाममबलात्स्मरशासनःस्याः ॥ ७२ ॥ अन्यत्रतीर्थसलिलेपतितोद्विजन्मादेवादिभावमयतेनतथातुकाश्याम् ॥ चित्रंयदत्रपतितःपुनरुत्थितिंनप्राप्नोतिपुल्कसजनोपिकिमग्रजन्मा ॥ ७३ ॥ सैषापुरीसंसृतिरूपपारावारस्यपारंपुरहापुरारिः ॥ यस्यांपरंपौरुषमर्थमिच्छन्सिद्धिंनयेत्पौरपरंपरांसः ॥ ७४ ॥

तत्रहेतुर्ममबलादिति ॥ स्मरशासनस्येतिपाठेममस्मरशासनस्यचबलादमृतत्वंप्राप्यतवशांतिर्भवितेतिशेषइत्यर्थः ॥ अथवैवमन्वयः ॥ बहुपुतीर्थवरेषुनिमज्ज्यमृतः अंतर्जलेत्यक्तप्राणोपित्वंजातइत्यर्थः ॥ अन्यत्समानम् ॥ ७२ ॥ एतद्विवृणोति ॥ अन्यत्रेति ॥ अन्यत्रायोध्यादौतीर्थसलिलेपतितोमृतःसन्द्विजन्मादेवादिभावंवैकुंठादिसालोक्यभावमयतेप्राप्नोतिकाश्यांतुतथानेत्यर्थः ॥ तुशब्दोक्तंविशेषंदर्शयति ॥ चित्रमिति ॥ अहोएतच्चित्रम् ॥ किंतत् ॥ अत्रकुत्रापिपुल्कसजनोपिपतितःसन्पुनरुत्थितिंपुनर्देहसंबंधंनप्राप्नोति ॥ अग्रजन्माब्राह्मणोनप्राप्नोतीतिकिंवक्तव्यमितियत् ॥ यद्वातुशब्दोक्तविशेषमेवहेतुमाह ॥ चित्रमिति ॥ यद्यस्मात् ॥ शेषंपूर्ववत् ॥ ७३ ॥ सैवेति ॥ साएषाकाशीपुरी ॥ साकेत्याकांक्षायामाह ॥ यस्यांकाश्यांसप्रसिद्धःपुरारिस्त्रिपुरारिः परंपौरुषमर्थमिच्छन्पुरुषकारप्राप्यंपरमर्थंकैवल्यंदातुंवांछन्नित्यर्थः ॥ पौरपरंपरांपुरसंबंधिप्राणिसमुदायंसंसृतिरूपपारावारस्यसंसाररूपसमुद्रस्यपारमवधिमधिष्ठानंसमाप्तिंवायथास्यात्तथासिद्धिंतारकोपदेशरूपांब्रह्मविद्यामित्यर्थः ॥ नयेत्प्रापयेत् ॥ अर्थसिद्धिंनित्यमितिपाठेपरंपौरुषमितिक्रियाविशेषणम् ॥ नित्यंपारंनयेदित्येवंसंबंधः ॥ कथंभूतः ॥ पुरहातत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्यादिवाक्योत्थबुद्धिवृत्त्यभिव्यक्तःसन्जाग्रत्स्वप्नसुषुप्तिलक्षणंपुरंहंतीतितथा ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ पुरुषइतिपाठेपूर्णइत्यर्थः ॥ ७४ ॥ तीर्थांतराणीति ॥ कलुषितांपापसंबद्धां तनुंवाराणसीपरिसरेवाराणस्याःपर्यंतभुवि यत्रकुत्रापिप्रदेशइत्यर्थः ॥ हित्वात्यक्त्वादेहदशाप्तयेपिसायुज्यादिमुक्तिप्राप्तयेपिसंदेहभाग्भवतिकिमुतसामान्यदेवतांतरप्राप्त्यै ॥ विदेहकैवल्यमेवप्रायेणप्राप्नोतीतिभावः ॥ तथाचोक्तम् ॥ काश्यामवश्यंत्यजतांशरीरंशरीरिणांनास्तिपुनःशरीरम् ॥ यद्यस्तिकंठेगरलंललाटेत्रिलोचनंचंद्रकलाचमौलाविति ॥ अतएवसंदेहभाग्भवतीत्युक्तम् ॥ ७५ ॥ वाराणसीति ॥ यावाराणसीसायोगादष्टांगरूपाज्जीवब्रह्मणोरैक्यचिंतनरूपात्समरसीकरणादृतेपिसमंब्रह्मतत्ररसोरागस्तत्करणादृतेपि ब्रह्माभ्यासंविनापीत्यर्थः ॥ अयोगिजनतांजनतापहंत्रीयोगरहितजनसमुदायस्यअज्यतेऽनेनेत्यंजनमुपाधिरज्ञानमित्येतत् ॥ अजनेतिपाठेअजामेकामित्यादिश्रुतेरजनमज्ञानमेवजननंजनोजन्मेतिवा ॥ अस्मिन्पक्षेजन्मांतरभावित्वादाध्यात्मिकादितापत्रयस्यतत्कृतत्वमितिज्ञातव्यम् ॥ तत्कृताध्यात्मिकादितापत्रयच्छेत्रीत्यर्थः ॥ अयोगिजनतामज्ञजनसमूहंतद्ब्रह्मदर्शयतीतिवान्वयः ॥ तर्हितमेवविदित्वाऽतिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेत्यादिश्रुतिविरोधइत्याशंक्याह ॥ तत्प्रसिद्धंतारकंप्रणवंषडक्षररामंत्रराजंवाश्रवणगोचरतांप्रापयंतीतद्ब्रह्मदर्शयति ॥ कीदृशंब्रह्म ॥ येनब्रह्मदर्शनेनज्ञानात्मकेनब्रह्मणापुनर्भवोनभवतितादृशमित्यर्थः ॥ यद्य

तीर्थांतराणिमनुजःपरितोऽवगाह्यहित्वातनुंकलुषितांदिविदैवतंस्यात् ॥ वाराणसीपरिसरेतुविसृज्यदेहंसंदेहभाग्भवतिदेहदशाप्तयेपि ॥ ७५ ॥ वाराणसी समरसीकरणादृतेपियोगादयोगिजनतांजनतापहंत्री ॥ तत्तारकंश्रवणगोचरतांनयंतीतद्ब्रह्मदर्शयतियेनपुनर्भवोन ॥ ७६ ॥ वाराणसीपरिसरेतनुमिष्टदात्रींधर्मार्थकामनिलयामहहाविसृज्य ॥ इष्टंपदंकिमापिहृष्टतरोभिलष्यलाभोस्तुमूलमपिनोयदवापशून्यम् ॥ ७७ ॥ आःकाशिवासिजनतानतुवंचिताभूद्भालेविलोचनवतावनितार्धभाजा ॥ आदाययत्सुकृतभाजनमिष्टदेहंनिर्वाणमात्रमपवर्जयतापुनर्भु ॥ ७८ ॥ वाराणसीस्फुरदसीमगुणैकभूमिर्यत्र स्थितास्तनुभृतःशशिभृत्प्रभावात् ॥ सर्वेगलेगरलिनोऽक्षियुजोललाटेवामार्धवामतनवोऽतनवस्ततोंऽते ॥ ७९ ॥

पिविश्वेशएवतारकोपदेष्टातथापिकाश्यांमृतानामेवोपदिशतीतिसैवदर्शयतीत्युच्यतइति ॥ ७६ ॥ वाराणसीति ॥ अहहेतिखेदे ॥ योजनःकिमपिवाङ्मनसयोरगोचरमिष्टंपदंस्थानमभिलष्यवाराणसीपरिसरेइष्टदात्रींतनुम् ॥ इष्टदातृत्वेहेतुर्धर्मार्थकामनिलयाम् ॥ चतुर्णांनिलयत्वेपिमोक्षस्यसिद्धत्वादेवमुक्तम् ॥ आविसृज्यसवासनंकारणंत्यक्त्वेत्यर्थः ॥ हृष्टतरोहर्षवत्तरोभवति ॥ तस्यजनस्यलाभोस्तुलाभस्तावत्तिष्ठतुमूलमपिनोस्वयमपिनतिष्ठतीत्यर्थः ॥ यद्यतःशून्यंशून्यसदृशम् ॥ तथाच भागवते ॥ स्थिरचरजातयःस्युरजयोत्थनिमित्तयुजोविहरउदीक्षयायदिपरस्यविमुक्ततत‌ः ॥ नहिपरमस्यकश्चिदपरोनपरश्चभवेद्वियतइवापदस्यतवशून्यतुलांदधतइति ॥ अवापप्राप्तवान् ॥ विरोधालंकारोयम् ॥ ७७ ॥ एतद्विवृणोति ॥ आइति ॥ आःकोपेपीडायांवा ॥ भालेललाटेविलोचनवताविशिष्टनेत्रवता वनितार्धभाजावनितायाभवान्याअर्धदेहंभजतइतिवनितार्धभाजातेनविश्वेश्वरेणकाशिवासिजनताननुनिश्चितंवंचिताऽभूत् ॥ कुतइत्याशंक्यहेतुपूर्वकंतंविशिनष्टि ॥ यद्यस्मात्सुकृतस्यभाजनंपात्रमभिलषितदेहमादायगृहीत्वानिर्वाणमात्रमपवर्जयताप्रयच्छता ॥ कथंभूतंनिर्वाणमात्रम् ॥ अपुनर्भु नविद्यतेपुनर्भूर्जन्मयस्मिंस्तत् ॥ ७८ ॥ वाराणसीति ॥ यावाराणसीसास्फुरदसीमगुणैकभूमिःस्फुरंतश्चतेऽसीमगुणायेनिरवधिकागुणाःकरुणामयत्वमोक्षदातृत्वाद्यास्तेषामेकभूमिर्मुख्यमधिष्ठानम् ॥ तत्रहेतुर्यत्रस्थिताइत्यादिः ॥ यत्रयस्यांवाराणस्यांस्थितामरणपर्यंतंकृतवसतयः त्यक्तदेहा

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः ॥ यद्वा स्थिताःसंस्थितामृताइत्येतत् ॥ वामार्धवामतनवःत्र्यर्धोत्तरदेहास्ततस्तदनंतरमंतेसारूप्यमुक्तिभोगाऽवसानेऽतनवःकैवल्यभाजोभवंतीत्यर्थः ॥ यद्वा स्थिताःकृतवसतयोयेजीवंत एवेत्यर्थः ॥ तथाचोक्तम् ॥ काश्यांतिष्ठंतियेकेचित्तान्पश्यंतिसुरोत्तमाः ॥ चतुर्भुजांस्त्रिनयनान्गंगोद्भासितमूर्धजानिति ॥ अस्मिन्पक्षेंऽतेदेहावसाने ॥ ७९ ॥ आनंदकाननमिति ॥ चक्रसरसी चक्रनिर्मितंसरइतिमणिकर्णिविशेषणम् ॥ स्वःसिंधुसंगतिर्गंगामेलनम् ॥ परमास्पदंमुख्यआश्रयः ॥ इहानंदकाननेविमुक्तयेयन्नतत्किंनकिंचिदपितुसर्वंविमुक्तयइत्यर्थः ॥ ८० ॥ वाराणसीहेति ॥ इहसंसारेयावाराणस्यस्तिहस्फुटंतामिमांविहायमूढजंतुः ॥ उवितर्केकिंसीदतिकिमर्थंगच्छतिअवसीदतीतिवा ॥ विहायागमनेहेतुगर्भाणिविशेषणान्याह ॥ वारणासिसरिद्भ्यांदक्षिणोत्तरतः सीमरूपाभ्यांवरिष्ठाश्रेष्ठा ॥ तथाचोक्तम् ॥ असीवरणयोर्मध्येपंचक्रोशंमहत्तरम् ॥ देवामरणमिच्छंतिकाकथाइतरेजनाइति ॥ सम्यग्भेदःसंभेदस्तत्खेदस्यतन्नाशस्यजननीकर्त्रीत्यर्थः ॥ दमनीतिवा पाठः ॥ ऐकपद्यपाठेवरिष्ठोदृढोयःसंभेदस्तस्येत्यादिपूर्ववत् ॥ यद्वा वरिष्ठोयःसंभेदःसंगमस्तेनखेदजननीपापस्यसंसारस्यवेत्यर्थादिति ॥ द्युनद्यागंगयालसंतीश्रीर्यस्याःसातथा ॥ अमलायामोक्षलक्ष्म्या विश्रामभूर्विश्रमणस्थानम् ॥ मोक्षलक्ष्म्याअमलत्वंनामस्वप्रकाशत्वम् ॥ अचलाप्रलयेपिनाशरहिता ॥ ८१ ॥ किमिति ॥ अहहखेदे ॥ भवतागर्भजमामनस्यंदुःखम् ॥ कृतांतोय

आनंदकाननमिदंसुखदंपुरैवतत्रापिचक्रसरसीमणिकर्णिकाऽथ ॥ स्वःसिंधुसंगतिरथोपरमास्पदंचविश्वेशितुःकिमिहतन्नविमुक्तयेयत् ॥ ८० ॥ वाराणसी
ह्यवरणासिसरिद्वरिष्ठासंभेदखेदजननीद्युनदीलसच्छ्रीः ॥ विश्रामभूमिरचलाऽमलमोक्षलक्ष्म्याहैनांविहायकिमुसीदतिमूढजंतुः ॥ ८१ ॥ किंविस्मृतं
त्वहहगर्भजमामनस्यंकार्तांतदूतकृतबंधनताडनंच ॥ शंभोरनुग्रहपरिग्रहलभ्यकाशींमूढोविहायकिमुयातिकरस्थमुक्तिम् ॥ ८२ ॥ तीर्थांतराणिकलुषा
णिहरंतिसद्यःश्रेयोददत्यपिबहुत्रिदिवंनयंति ॥ पानावगाहनविधानतनुप्रहाणैर्वाराणसीतुकुरुतेबतमूलनाशम् ॥८३॥ काशीपुरीपरिसरेमणिकर्णिकायां
त्यक्त्वातनुंतनुभृतस्तनुमाप्नुवंति ॥ भालेविलोचनवतींगलनीललक्ष्मींवामार्धबंधुरवधूंविधुरावरोधाः ॥ ८४ ॥ ज्ञात्वाप्रभावमतुलंमणिकर्णिकायांयः
पुद्गलंत्यजतिचाशुचिपूयगंधि ॥ स्वात्मावबोधमहसासहसामिलित्वाकल्पांतरेष्वपिसनैवपृथक्त्वमेति ॥ ८५ ॥

मस्तदीयाःकार्तांतायेदूतास्तत्कृतवंधनंताडनंचकिंविस्मृतमेव ॥ विस्मरणेहेतुमाह ॥ शंभोरनुग्रहस्यदयायाःपरिग्रहेणप्राप्त्यालभ्याचासौकाशीचेतितांविहायभवान्किमुयातिकिमर्थंयाति ॥ विस्मरणाभावेएतन्नघटतइतिभावः ॥ कथंभूताम् ॥ करस्थमुक्तिमिति साधनेसाध्योपचारः ॥ करस्थामुक्तिर्यस्यामितिबहुव्रीहिर्वा ॥ अतोभवान्मूढइति ॥ ८२ ॥ ननुतीर्थांतरकरणेना पिमुक्तिर्भविष्यत्यतस्तदर्थंयातीत्याशंक्याह ॥ तीर्थांतराणीति ॥ श्रेयःपुत्रपशुधनादि ॥ बतेतिखेदेहर्षेवा ॥ भवमूलनाशमितिवापाठः ॥ ८३ ॥ अधिकारिभेदमतमादायाह ॥ काशीपुरीति ॥ अन्यथासायुज्यमुक्तिर्मणिकर्णिकायामित्यनेनविरोधापत्तेः ॥ लक्ष्मींशोभाम् ॥ वामार्धेबंधुरासुन्दरीवधूर्भवानीयस्यास्ताम् ॥ विधुरावरोधागतावरोधागतावरणाज्ञानाइत्यर्थः ॥ स्वतन्त्राइ तिवा ॥ विबुधावरोधाइतिपाठेविबुधादेवाअवरोधोऽतःपुरंयेषांतेतथा ॥ विधुरावबोधाइतिपाठेविधुरोऽवबोधोऽज्ञानंदेहगेहादिविषयंयेषांतेतथा ज्ञानैकस्वभावाइत्यर्थः ॥ ८४ ॥ क्षेत्रप्रभावज्ञा नामधिकारिणांविशेषमाह ॥ ज्ञात्वेति ॥ प्रभावंमाहात्म्यंक्षेत्रस्यमणिकर्णिकायावेत्यर्थात् ॥ मणिकर्णिकायांपुद्गलंशरीरंयस्त्यजति ॥ कथंभूतम् ॥ विपूयगंधिपूयंपक्वशोणितम् ॥ विशेषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णपूयगंधोवर्ततेयत्रतत्तथा ॥ स्वात्मावबोधमहसास्वरूपभूतप्रकाशचैतन्येनसहसातत्क्षणादेवमिलित्वाएकभावंप्राप्यपृथक्त्वंपृथग्भावंनैवेतिनैवप्राप्नोतीत्यर्थः ॥ ८५ ॥ ननु काशीवासयुगान्यष्टौदिनैकंपुरु षोत्तमे ॥ तदेवाष्टगुणंपुण्यंविरजामुखदर्शने ॥ यागतिर्योगयुक्तस्यवाराणस्यांमृतस्यच ॥ सागतिर्घटिकार्धेनपुरुषोत्तमदक्षिणे ॥ सिंहाचलसमक्षेत्रंसमंताद्योजनत्रयम् ॥ गयाप्रयागकाशीभ्यःसत्यंशत गुणाधिकमित्यादिवचनात्काशीतोपिमहत्तरंतीर्थांतरंश्रूयते तत्किमर्थमतिस्तुतिःक्रियतइत्याशंक्याह ॥ रागादीति ॥ काशीपुरीमपरतीर्थसमामन्यतीर्थसमांन्यूनामित्यर्थः ॥ येकल्पयंतिसमंतात्सर्वतः सर्वत्रेत्यर्थः ॥ तैःसहनसंभाषणीयमित्यन्वयः ॥ कथंभूताः ॥ रागादिदोषैःपरिपूराणिपरिपूरितानिमनोहृषीकाणिअंतरिंद्रियबहिरिंद्रियाणियेषांतेतथा ॥ पाठान्तरे परिभूतान्यवशीकृतानिमनो हृषीकाणियेषांतइत्यर्थः ॥ समस्ताइतिपाठेयेसर्वेइत्यर्थः ॥ कुतस्तैःसहनपरिभाषणीयमित्यतआह ॥ तेपापिनइति ॥ शतमप्यंधानांनपश्यतीतिन्यायादितिभावः ॥ कथंभूताम् ॥ अतुलः परिमाणरहितोदिव्योऽलौकिकोमहाप्रभावोऽतिशयसामर्थ्यंयस्यास्ताम् ॥ विषयाभिमुखानांरागिणांतैस्तैर्वचनैस्तत्तत्तीर्थकरणेतुव्युत्पादनमात्रंक्रियतेनतुकाश्यादिभ्योऽधिकत्वमन्येषांतीर्थानांविधी यते अन्यथातत्रतत्रविरोधप्रसंगात् ॥ ८६ ॥ वाराणसीमिति ॥ प्रायेणस्पष्टम् ॥ कुतःकस्मान्निमित्तात् ॥ राज्यादिलक्ष्मीप्राप्त्यर्थमितिचेत्तत्राह ॥ प्राप्येति ॥ अजोब्रह्मा ॥ आदिपदेनेन्द्रादयो गृह्यंते ॥ तैरप्यसुलभामित्यपिशब्दस्योभयत्रसंबंधः ॥ स्थिरमोक्षलक्ष्मींस्वरूपावस्थानकैवल्यश्रियःसाधनभूतामितिसाधनेसाध्योपचारइत्यर्थः॥स्थिरमोक्षलक्ष्मीस्वरूपांवाराणसीमितिवा॥ किमुकाम

रागादिदोषपरिपूरमनोहृषीकाःकाशीपुरीमतुलदिव्यमहाप्रभावाम् ॥ येकल्पयंत्यपरतीर्थसमांसमंतात्तेपापिनोनसहतैःपरिभाषणीयम् ॥ ८६ ॥
वाराणसींस्मरहरप्रियराजधानींत्यक्त्वाकुतोव्रजसिमूढदिगंतरेषु ॥ प्राप्याप्यजाद्यसुलभांस्थिरमोक्षलक्ष्मींलक्ष्मींस्वभावचपलांकिमुकामयेथाः ॥ ८७ ॥
विद्याधनानिसदनानिगजाश्वभृत्याःस्रक्चंदनानिवनिताश्चनितांतरम्याः ॥ स्वर्गोप्यगम्यइहनोद्यमभाजिपुंसिवाराणसीत्वसुलभाशलभादिमुक्तिः ॥ ८८ ॥
धात्राधृतानितुलयातुलनामवेतुंवैकुंठमुख्यभुवनानिचकाशिकाच ॥ तान्युद्ययुर्लघुतयान्यगियंगुरुत्वात्तस्थौपुरीहपुरुषार्थचतुष्टयस्य ॥ ८९ ॥ काशी
पुरीमधिवसन्निहनरोनरोपिह्यारोप्यमाणइहमान्यइवैकरुद्रः ॥ नानोपसर्गजनिसर्गजदुःखभारैःकर्मापनुद्यसविशेत्परमेशधाम्नि ॥ ९० ॥

येथाःकिमर्थंवांछेथाः ॥ केनापिभाग्योदयेनस्थिरमोक्षलक्ष्मींवाराणसींसाक्षादनायासेनलब्ध्वाचंचलायाराज्यादिलक्ष्म्याःप्राप्त्यर्थमन्यत्रगमनमनुचितमितिभावः ॥ ८७ ॥ अजाद्यसुलभामित्येतद्विवृ णोति ॥ विद्येति ॥ अगम्यःअप्राप्यः ॥ पूर्वार्धेपियथायोग्यंविपरिणमय्यानयैवक्रिययासंबंधः ॥ तुशब्दःपूर्वोक्तवैलक्षण्यार्थः ॥ तदेववैलक्षण्यमाह ॥ शलभादिमुक्तिः शलभादीनामपिमुक्तिस्वरूपाशल भादीनांमुक्तिर्यस्यांसेतिवा ॥ ८८ ॥ अन्यानिक्षेत्राणिकाशीसमानिनभवंतीतिकैमुत्यन्यायेनाह ॥ धात्रेति ॥ तुलयातुलनपात्रेण ॥ तुलनांपरिमाणम् ॥ वैकुंठमुख्यमादिर्येषांसत्यादीनांभुवनानांता नितथाउद्ययुरूर्ध्वंययुः ॥ लघुतयाऽल्पत्वेन ॥ इयंकाशीन्यक्अधस्तस्थावित्यन्वयः ॥ ८९ ॥ काशीस्थोयःकश्चिदपिविश्वेश्वरइवमाननीयइत्याह ॥ काशीपुरीमिति ॥ इहकाश्यामारोप्यमाणःस्थाप्य मानोऽर्थादीश्वरेण काशीपुरीमधिवसन्काश्यांतिष्ठन्नरःअनरोवापशुस्थावरादिर्योभवतिसएकरुद्रःकेवलविश्वेश्वरइवमान्योमाननीयः ॥ तत्रहेतुमाह ॥नानोपसर्गैर्जनिरुत्पत्तिर्येषांसर्गजदुःखभाराणांतैः ॥ यद्वा नानोपसर्गाआध्यात्मिकादितापाश्चनिसर्गःस्वभावश्चवासनेतियावत् ॥ तज्जनितैर्दुःखभारैःक्लेशनिवहैःकर्मपापकर्मापनुद्यज्ञानद्वारापरमात्मज्योतिषिप्रविशेदिति ॥ ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्य कर्मणइतिश्रुतेः ॥ साधारण्येनवापुण्यपापलक्षणकर्मापनुद्य ॥ ९० ॥

CC-0. In Public Domain. Digitization by eGangotri

स्थिरापद्रस्तेनदेहेनस्वप्रकाशंपरानंदवपुरयंजनःकथंनगृह्णातीत्यनुक्रोशन्निवाह ॥ स्थिरापायमिति ॥ स्थिरापायंनिश्चलापदम् ॥ तत्रहेतुर्जननेति ॥ बुद्धिस्थत्वादस्यामितिनिर्देशः ॥ काशीस्थस्य विश्वेश्वरस्यदेव्याअग्रेकथनानुवादरूपत्वाद्वा ॥ अहहेत्यनुतापेऽप्रहर्षेआक्रोशेवा ॥ काश्यांकायंविहायस्वप्रकाशमत्यंतनिश्चलंस्वात्मानंदरूपंपदंवपुःस्वरूपंब्रह्मअसौविमूढोलोकःकथंकुतोनपरिगृह्णीत ॥ निकृष्टस्यत्यागेउत्कृष्टस्यचप्राप्तौदृष्टांतमाह ॥ स्फुटितंभग्नंकांस्यपात्रादिकंविनिमयन्परिवर्तयन्यथादृढतरंसमुज्ज्वलंपात्रादिकंगृह्णातितद्वत् ॥ काश्यांविनिमयन्नितिपाठेकाश्यामित्यस्यदृष्टांतेनसंबंधान्नपौनरुक्त्यम् ॥ ९१ ॥ पुनरप्याक्रोशन्निवाह ॥ अहोइति ॥ विपद्भारैर्विपत्तिसमूहैः ॥ सारैर्दृढैः ॥ ध्वंसितधनैर्विनाशितार्थैः ॥ क्षितावितिप्रतीत्यभिप्रायेण ॥ कथंभूतायाम् ॥ यत्रकाश्यां शिवोनिधनेमरणावसरेश्रुतौदक्षिणकर्णेकिंचिद्वाङ्मनसातीतंवस्तुकथयति ॥ ततःकिमतआह ॥ प्रविशतिनयेनेति ॥ उदरदरीमुदररूपांकंदराम् ॥ ९२ ॥ नन्वन्यत्रगत्वावनवाससमीरभक्षणादिनाकैवल्यंसाधनीयंकिंकाशीनत्याज्येत्याग्रहेणतत्राह ॥ काशिवासिनीति ॥ काशीवासिवनेचरयोर्यथासंख्यंद्वित्रीत्यादिविशेषणानि ॥ वनेचरोवानप्रस्थादिः ॥ अहोइत्याश्चर्ये ॥ तयोर्मध्ये पूर्वोक्तविशेषणविशिष्टेकाशीवासिनिजनेविशिष्टताश्रेष्ठत्वम् ॥ वनवासादेःकैवल्यासाधकत्वात्काशीवासस्यदुष्कृतिनोपिकैवल्यहेतुत्वात्काशीनत्याज्येतिभावः ॥ अविशिष्टेतिपाठेकाशीवासिनितन्नगरवासिनिजनेवनेचरेकाशीस्थवनचरेइत्यादीतिबोद्धव्यम् ॥ ९३ ॥ विशिष्टतायांहेतुमाह ॥ नास्तीति ॥ अंतंमरणंकुर्वंतितेंऽतकृतस्तेषांप्राप्तमरणानामित्यर्थः ॥ विशेषगत्यभावेहेतुमाह ॥ यद्य

स्थिरापायंकायंजननमरणक्लेशनिलयंविहायास्यांकाश्यामहहपरिगृह्णीतनकुतः ॥ वपुस्तेजोरूपंस्थिरतरपरानंदसदनंविमूढोऽसौजंतुःस्फुटितमिवकांस्यंविनिमयन् ॥ ९१ ॥ अहोलोकःशोकंकिमिहसहतेहंतहतधीर्विपद्भारैःसारैर्नियतनिधनैर्ध्वंसितधनैः ॥ क्षितौसत्यांकाश्यांकथयतिशिवोयत्रनिधने श्रुतौकिंचिद्भूयःप्रविशतिनयेनोदरदरीम् ॥ ९२ ॥ काशिवासिनिजनेवनेचरेद्वित्रिभुज्यपिसमीरभोजने ॥ स्वैरचारिणिजितेंद्रियेप्यहोकाशिवासिनिजनेविशिष्टता ॥ ९३ ॥ नास्तीहदुष्कृतकृतांसुकृतात्मनांवाकाचिद्विशेषगतिरंतकृतांहिकाश्याम् ॥ बीजानिकर्मजनितानियदूषरायांनांकूरयंति हरदृग्ज्वलितानितेषाम् ॥ ९४ ॥ शशकामशकाबकाःशुकाःकलविंकाश्ववृकाःसजंबुकाः ॥ तुरगोरगवानरानरागिरिजेकाशिमृताःपरामृतम् ॥ ९५ ॥

स्मादूषरायामूषरवत्यांकाश्यांपुण्यपापकर्ममात्रजनितानि वीजान्यदृष्टानितषांनांकूरयंतिनारोहंत्युद्भवंतीत्यर्थः ॥ ऊषरायांहेतुंवदन्वीजानिविशिनष्टि ॥ हरदृग्ज्वलितानिहरचक्षुर्दग्धानि हरोपदिष्टज्ञानज्वलितानीतिवा ॥ नन्वेतत्काश्यांकृतपापानांकालभैरवयातनाश्रवणेनविरुध्यते ॥ न ॥ पापेप्रवृत्तिर्माभूदित्यभिप्रायेणविभीषिकामात्रंतत् ॥ तथाचोक्तम् ॥ ऊषरापुण्यपापानांधन्यावाराणसीपुरीति ॥ पाद्मेच ॥ उपपातकिनश्चैवमहापातकिनश्चये ॥ तेषांतत्क्षेत्रसामर्थ्यादघानिक्षयमाप्नुयुः ॥ लगोपि ॥ नाविमुक्तेनरःकश्चिन्नरकंयातिकिल्बिषी ॥ ईश्वरानुगृहीताहिसर्वेयांतिपरांगतिमिति ॥ काश्यनधिकरणपापकृद्विषयत्वाद्वैतस्य ॥ रुद्रयातनाप्रापककर्मातिरिक्तपुण्यपापकर्मदाहेनमुक्त्यभिप्रायेणवैतद्वचनम् ॥ तथाचकाशीकृतेभ्योऽकृतप्रायश्चित्तेभ्यःपापकर्मभ्योऽतिरिक्तकर्ममात्राणिकर्मजनितानीत्यत्रकर्मशब्देनविवक्षितानि ॥ क्षीयंतेचास्यकर्माणीत्यत्रप्रारब्धातिरिक्तानिकर्माणितत्त्वज्ञानेननाश्यानीतिवत् ॥ ९४ ॥ अधिकारिविशेषाणामेवात्रकैवल्यंनपश्वादीनामितिमतंनिराकुर्वन्नाह ॥ शशकाइति ॥ कलविंकाश्चटकाः ॥ चटकःकलविंकःस्यादित्यमरः ॥ परामृतंपरब्रह्मस्वरूपाभवंतीत्यर्थः ॥ अत्रयद्यपिमरणस्यसर्वेषामविशेषेणपरममुक्तिःफलत्वेनश्रूयतेतथापिशुचीनांपरमात्मभक्तानांतदर्पितकर्मणांपरममुक्तिस्तदपकृष्टानामग्निप्रवेशादीनांसामीप्यंतिर्यक्प्रभृतीनामत्यंतपापीयसांचसारूप्यंततोप्यधमानांपतितानांसालोक्यमितिकेचित् ॥ चतुर्विधपरिमाणायांकाश्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथायथायोगपीठादिप्रकर्षस्तथामरणफलापकर्षइतिचान्ये॥तथाचपाद्मे ॥ परिमाणंचवक्ष्यामितन्निबोधतसत्तमाः॥मध्यमेश्वरमारभ्ययावद्देहलिविघ्नपम्॥सूत्रंसंस्थाप्यतद्दिक्षुभ्रामयेन्मंडलाकृति ॥ तत्र याजायतेरेखातन्मध्येक्षेत्रमुत्तमम्॥काशीतियद्विदुर्वेदास्तत्रमुक्तिःप्रतिष्ठिता॥काश्यंतःपरमंक्षेत्रंविशेषफलसाधनम्॥वाराणसीतियत्ख्यातंतन्मानंनिगदामिवः॥दक्षिणोत्तरयोर्नद्योर्वरणासिश्चपूर्वतः॥ जाह्नवीपश्चिमेचापिपाशपाणिर्गणेश्वरः॥तस्यामंतःस्थितंदिव्यंविशेषफलसाधनम्॥अविमुक्तमितिख्यातंतन्मानंचब्रवीमिवः॥विश्वेश्वराच्चतुर्दिक्षुधनुःशतयुगोन्मितम्॥ अविमुक्ताभिधंक्षेत्रंमुक्तिस्तत्रनसंशयः ॥ गोकर्णेशःपश्चिमेपूर्वतश्चगंगामध्यमुत्तरेभारभूतः ॥ ब्रह्मेशानौदक्षिणेसंप्रादिष्टस्तत्तुप्रोक्तंभवनंविश्वभर्तुरिति ॥ अस्तुवायथातथातथापिपरंपरयाकैवल्योपपत्तेः ॥ तथाचसति काश्यामवश्यंत्यजतांशरीरं शरीरिणांनास्तिपुनःशरीरम् ॥ यद्यस्तिकंठेगरलंललाटेत्रिलोचनंचंद्रकलाचमौलावित्यादिवचनंचसमंजसंभवति ॥ ९५ ॥ एवंकाश्यांमृतानांकैवल्यमुक्त्वाजीवतांरुद्रसारूप्यमाह अरुद्रेति द्वाभ्याम् ॥ अथवारुद्रावासइतिनामनिर्वक्तुंप्रथमंतावत्काशीस्थानांजंतुमात्राणांरुद्ररूपतामाह ॥ अरुद्रेति ॥ हेगिरींद्रजेनिरंतरंसर्वदाकाशिनिवासिनोजनाममपारिषदागणामताःसंमताइत्यन्वयः ॥ ननुत्वत्पार्षदाअंतरिक्षेलोकेतिष्ठंतीतिप्रसिद्धंतत्राह ॥ धरांगताःकर्मभूमिंप्राप्तास्ततोप्येतेऽधिकाइत्यर्थः ॥ प्रसिद्धपारिषदसारूप्यमाह ॥ अरुद्राअभयंकराःशोभनाइतियावत् ॥ रुद्राक्षाएव फणींद्राःशेषादयोभूषणानियेषांतेतथा ॥ यद्वा प्रसिद्धारुद्रानभवंतीत्यरुद्रास्तेचतेरुद्राक्षफणींद्रभूषणाश्च ॥ त्रिपुंड्रंनामांगुलित्रयेणललाटेदीयमानाविभूतिस्तदेवचंद्रार्धंधरंतीतितथा ॥ अथवारूपकभंतेरणयथाश्रुतएवार्थः ॥ तथाचपाद्मे ॥ काश्यांवसंतियेजीवास्तान्पश्यंतिसुरोत्तमाः ॥ चतुर्भुजांस्त्रिनयनान्गंगोद्भासितमूर्धजानिति ॥९६॥ तर्हिकिंजनामनुष्याएवात्ररुद्रशरीरामत्स्यसृगालाद्याने

अरुद्ररुद्राक्षफणींद्रभूषणास्त्रिपुंड्रचंद्रार्धधराधरांगताः ॥ निरंतरंकाशिनिवासिनोजनागिरींद्रजेपारिषदामतामम ॥ ९६ ॥ यावंतएवानिवसंतिचजंतवोऽत्र काश्यांजलस्थलचराझषजंबुकाद्याः ॥ तावंतएवमदनुग्रहरुद्रदेहादेहावसानमधिगम्यमयिप्रविष्टाः ॥ ९७ ॥ येतुवर्षेषवोरुद्रादिविदेविप्रकीर्तिताः ॥ वातेषवोंऽतरिक्षेयेयेभुव्यन्नेषवःप्रिये ॥ ९८ ॥ रुद्रादशदशप्राच्यवाचीप्रत्यगुदक्स्थिताः ॥ ऊर्ध्वदिक्स्थाश्चयेरुद्राःपठ्यंतेवेदवादिभिः ॥ ९९ ॥

त्यतआह ॥ यावंतइति ॥ जलस्थलयोश्चरंतीतितथा ॥ एतस्यैवविवरणंझषजंबुकाद्याइति ॥ मत्स्यसृगालादयइत्यर्थः ॥ सर्वेषामविशेषेणकैवल्यावधिमाह ॥ देहावसानमिति ॥ मयिपरमात्मनिईश्वरशरीरेवा ॥ ९७ ॥ एवंकाशीमाहात्म्यंनिर्वर्ण्यरुद्रावासंनामनिर्वक्ति येत्वितिसार्धत्रयेण ॥ अथवैवंश्लोकद्वयेनभूमिकामारचय्यरुद्रावासंनामनिर्वक्ति येत्विितिसार्धत्रयेण ॥ वर्षेषवो वर्षाण्येवेषवोबाणायेषांतेतथा ॥ वातेषवोवाताएवइषवोयेषांतेतथा ॥ अन्नेषवोऽन्नमेवेषवोबाणायेषांतेतथा ॥९८॥ रुद्राइत्यस्यावृत्तिःसर्वत्रान्वयार्था ॥ दशदशेत्युपलक्षणंयेकेचनेत्यर्थः ॥ चकारादधोदिक्स्थाविदिक्स्थाश्चगृह्यंते ॥ वेदवेदिभिःश्रुत्यभिज्ञैः ॥ तथाचवेदवचनम् ॥ अथत्रीणियजूंष्युच्यंते नमोरुद्रेभ्योयेपृथिव्यांयेंतरिक्षेयेदिवियेषामन्नंवातोवर्षमिषवस्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामीति ॥ अस्याःश्रुतेरयमर्थः ॥ अथपृथिव्यादिलोकत्रयभेदेनोद्दिष्टलोकभेदात्त्रयजुस्त्रयंद्रष्टव्यम् ॥ तदाएवंपाठःसंपद्यते ॥ नमोरुद्रेभ्यइत्युपक्रम्ययेपृथिव्यांयेषामन्नमिषवइत्याद्योमंत्रः ॥ येंऽतरिक्षेयेषांवातइषवइतिद्वितीयोमंत्रः ॥ येदिवियेषांवर्षमिषवइतितृतीयोमंत्रः ॥ तेभ्योदशप्राचीरित्यादिसर्वत्रसमानम् ॥ येरुद्राः पृथिव्यांवर्ततेतेष्वपिरुद्रेषुयेषांरुद्रविशेषाणामन्नमेवेषवोबाणाअपथ्यान्नभक्षणेप्रवर्त्यवाअन्नार्थंचौर्यंकारयित्वावायान्हिंसंतितान्प्रातिहिंसकानांरुद्राणामन्नमेवेषवस्तेभ्यः पृथिव्यांस्थितेभ्योऽन्नबाणकेभ्यश्चरुद्रेभ्योनमः ॥ तथायेरुद्राअंतरिक्षेवर्ततेतेषांमध्येपियेषांवातएवेषवस्तीव्रवायुनारोगानुत्पाद्यहिंसंतितेभ्योंऽतरिक्षवर्तिभ्योवातेषुभ्यश्चरुद्रेभ्योनमोऽस्तु ॥ तथायेरुद्रादिविवर्ततेतेष्वपियेषांरुद्रविशेषाणां

CC-0. In Public Domain. Digitization by eGangotri

वर्षमेवेषवोबाणाअतिवृष्टयनावृष्टिभ्यांप्राणिनोहिंसंतितेभ्योदिविस्थितेभ्योवर्षेषुभ्यश्चरुद्रेभ्योनमोऽस्तु ॥ दशप्राचीः ॥ दशेत्युपलक्षणम् ॥ येकेचनरुद्राःपूर्वोक्तेष्वेवप्राचीःप्राचीदिग्जाः। प्रतीचीःप्रतीचीदिग्जाः ॥ विभक्तिव्यत्ययेनोपचारात् ॥ तेभ्योनमोस्त्वित्यग्रिमेणनमःपदेनसंबंधः ॥ एवंदशदक्षिणादिषुदशोर्ध्वाऽतेषुयोज्यम् ॥ दशोर्ध्वाइत्यधोदिक्स्थानांविदिक्स्थानांचोपलक्षणम् ॥ यत्रक्वचित्स्थितेभ्योरुद्रेभ्योनमइतिवाक्यार्थः ॥ अत्रकेचित् ॥ कीदृशोनमस्कारइतिसएवविशिष्यते ॥ दशप्राचीःप्राङ्मुखत्वेनांजलिकरणेदशांगुलयःप्रागग्राभवंति ॥ एवंदक्षिणादिपूर्ध्वांतेषुयोज्यम् ॥ ईदृशैरंजलिविशेषैस्तेभ्योरुद्रेभ्योनमोऽस्तु ॥ यद्वा तेभ्योरुद्रेभ्योदशप्राचीरंगुलीःकरोमिनमस्कारार्थमितिसर्वत्रसंबद्ध्यते ॥ दशदक्षिणादशप्रतीचीर्दशउदीचीर्दशऊर्ध्वास्तेभ्यस्तेभ्योनमोस्त्वितिव्याचक्षते ॥ तेषांमते ॥ रुद्रादशदशप्राच्यवाचीप्रत्यगुदक्स्थिताः ॥ ऊर्ध्वदिक्स्थाश्चयेरुद्राःपठ्यंतेवेदवादिभिरितिस्कांदवचनंविरुध्यते ॥ अतोविचार्ययद्युक्तंतदेवविद्वद्भिर्ग्राह्यमिति ॥ तेचरुद्रानोऽस्मान्मृडयंतुसुखयंतुतेवयंनमस्कृतरुद्राःसंतोयंवैरिणंतूष्णीमवस्थितमपिद्विष्मःयश्चवैरीनोऽस्माँस्तूष्णीमवस्थितानपिद्वेष्टितदुभयविधंवैरिणंहेरुद्रावोयुष्माकंजंभेविदारितास्येदधामिस्थापयामीति ॥ ९९ ॥ पूर्वोक्तान्रुद्राननूद्यनामनिर्वचनमाह ॥ असंख्याताइति ॥ अधिभूतलइत्यंतरिक्षादीनामुपलक्षणम् ॥ तेचतेसर्वेचतेभ्यः ॥ १०० ॥ नामनिर्वचनप्रयोजनमाह ॥ तस्मादिति ॥ वर्णान्ब्राह्मणादीन् ॥

असंख्याताःसहस्राणियेरुद्राअधिभूतले ॥ तत्सर्वेभ्योऽधिकाःकाश्यांजंतवोरुद्ररूपिणः ॥१००॥ रुद्रावासस्ततःप्रोक्तमविमुक्तंघटोद्भव ॥ तस्मात्समर्च्य काशिस्थान्वर्णान्वर्णेतराश्रमान् ॥ १ ॥ श्रद्धयेश्वरबुद्ध्याचरुद्रार्चाफलभाङ्नरः ॥ २ ॥ श्मशब्देनशवःप्रोक्तःशानंशयनमुच्यते ॥ निर्वचंतिश्मशानार्थं मुनेशब्दार्थकोविदाः ॥ ३ ॥ महांत्यपिचभूतानिप्रलयेसमुपस्थिते ॥ शेरतेऽत्रशवाभूत्वाश्मशानंतुततोमहत् ॥ ४ ॥ अप्सुभूरिहलयेलयंव्रजेदापऔर्ववदनोग्रकंदरे ॥ मातरिश्वनिमहातनूनपाद्व्योम्निसंक्षयतिवैसदागतिः ॥ ५ ॥ व्योमचापिलयमेत्यहंकृतौसापिषोडशविकारसंयुता ॥ लीयतेमहतिबुद्धिसंज्ञकेहामहान्प्रकृतिमध्यगोभवेत् ॥ ६ ॥ सागुणत्रयमयीचनिर्गुणंतंपुमांसमवगुह्यतिष्ठति ॥ पंचविंशतितमःपरःपुमान्देहगेहपतिरेषजीवकः ॥ ७ ॥

वर्णेतराश्चरजकादयः ॥ आश्रमानिति ॥ आसमंताच्छ्रमंकुर्वंतीत्याश्रमाश्च पशुपक्षिरूपादयः ॥ यद्वा आश्रमाश्चब्रह्मचर्याद्याश्रमवंतः ॥ यद्वा वर्णेभ्यइतरेयेआश्रमाःआश्रमवंतस्तान् ॥ वर्णत्वेनाश्रमित्वेनचसमर्च्येत्यर्थः ॥ १ ॥ नरोमनुष्यमात्रोरुद्रार्चाफलभाग्भवेदित्यर्थः ॥ २ ॥ महाश्मशाननामनिर्वक्ति श्मशब्देनेतिद्वाभ्याम् ॥ श्मशानार्थंश्मशानशब्दयोरर्थम् ॥ ३ ॥ एवंश्मशानशब्दयोरर्थं प्रदर्श्यनिर्वचनमाह ॥ महांत्यपीति ॥ अपिशब्देनाहंकारादयोगृह्यंते ॥ शवामृताः ॥ शेरतेलीयंते ॥ अत्रकाश्यांशवीभूय ॥ ४ ॥ शयनमेव ॥ तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुत्युक्तसृष्टिप्रातिलोम्येनदर्शयति अप्सुभूरितिचतुर्भिः ॥ इहाविमुक्ते ॥ और्वशब्देनात्रतेजोगृह्यते ॥ तस्यवदनोग्रकंदरेमुखवर्तिमहादर्यातेजसीत्यर्थः ॥ मातरिश्वनिवायौमहातनूनपात् महाभूतलक्षणंतेजइत्यर्थः ॥ वशब्दःश्रुतिप्रसिद्धिद्योतनार्थः ॥ संक्षयतिलीयते ॥ सदागतिर्वायुः ॥ ५ ॥ एतिप्राप्नोति ॥ अहंकृतौ अहंकारे ॥ साअहंकृतिः ॥ अधिष्ठातृदेवैःसहेंद्रियाणामभेदविवक्षयाविकाराणांषोडशत्वम् ॥ तेचैकादशेन्द्रियपंचमहाभूतरूपास्ततसंयुताहैरण्यगर्भीसमष्टिबुद्धिर्महत्तत्त्वमितिवेदांतिमतंगृहीत्वामहांतंविशिनष्टि ॥ बुद्धिसंज्ञकइति ॥ आधिदैवाध्यात्मभेदेनवापदद्वयम् ॥ हाकष्टे ॥ प्रकृतिमध्यगःप्रकृतौलीनइत्यर्थः ॥ ६ ॥ तंप्रसिद्धंप्रकृत्यधिष्ठातारमितियावत् ॥ तमेवपुमांसंविशिनष्टि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचविंशतितमइति ॥ पंचविंशतेः पूरणः परः पुमान्प्रकृतेः परः पुरुषइत्यर्थः ॥ देहएवगेहंतस्यदेहदैहिकयोर्वापतिः ॥ देहेंद्रियादीन्जीवयतीतिजीवकः ॥ ७ ॥ प्राकृतः प्रकृतिकार्यमात्रसंबंधी ॥ कीदृशः ॥ हंसयानहरिरुद्राणांवर्जितंवर्जनंयस्मिन्सतथा ॥ हंसयानोब्रह्मा ॥ तथाचोक्तं विष्णोःसामान्यलक्षणेपरेऽहमेवासमित्यस्मिन्श्लोकेकैवल्यदीपिकाकारेण ॥ नचसगुणेषुचतुर्ष्वव्याप्तिस्तेषामपिस्वरूपातिरोधानात् ॥ यत्तु ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे ॥ परस्यांतेकृतात्मानआविशंतिपरंपदमितितत्त्वश्वमेधादिनाहिरण्यगर्भत्वप्राप्तपरमितिज्ञातव्यम् ॥ कल्पभेदाभिप्रायेणवैतद्वचनम् ॥ यद्वा हंसैः परमहंसैर्यानंज्ञानंप्राप्तिर्वायस्य ॥ यद्वा हंतिविपक्षमितिहंसोगरुडः सयानंयस्यसतथा ॥ हंसयानश्चासौहरिश्चेतिव्याख्येयम् ॥ अथवा हंसयानहरिरुद्रैरपिवर्जितोरहितइत्यर्थः ॥ तथाचवासिष्ठे ॥ परमेष्ठ्यपिनिष्ठावान्हीयतेहरिरप्यजः ॥ भवोप्यभावमायातिकैवास्थामादृशेजनइति ॥ प्रकृत्यधिष्ठातुरपिपुरुषस्यपरमात्मनिलयमाह ॥ कालमूर्तिरित्यर्धेन ॥ कालमूर्तिः सर्वसंहारकः ॥ कलयतिसंहरत्यात्मसात्करोतीत्यर्थः ॥ परईश्वरः परमात्मेत्यर्थः ॥ तथाचश्रुतिरीश्वरोग्रइति ॥ ८ ॥ ईश्वरस्वरूपंदर्शयन्माधवोमाधवयोरैक्यमाह ॥ सवैइति ॥ वैशब्दः

प्राकृतः प्रलयएषउच्यतेहंसयानहरिरुद्रवर्जितः ॥ कालमूर्तिरथतंचपूरुषंहेलयाकलयतीश्वरः परः ॥ ८ ॥ सवैमहाविष्णुरितीर्यतेबुधैस्तंवैमहादेवमुदाहरंति ॥ सोंऽतादिमध्यैः परिवर्जितः शिवः सश्रीपतिः सोपिहिपार्वतीपतिः ॥ ९ ॥ दैनंदिनेऽथप्रलयेत्रिशूलकोटौसमुत्क्षिप्यपुरींहरः स्वाम् ॥ बिभर्तिसंवर्तमहास्थिभूषणस्ततोहिकाशीकलिकालवर्जिता ॥ ११० ॥ ॥ स्कंदउवाच ॥ ॥ वाराणसीतिकाशीतिरुद्रावासइतिद्विज ॥ महाश्मशानमित्येवंप्रोक्तमानंदकाननम् ॥ ११ ॥ इतिदेवीपुरः प्रोक्तंदेवदेवेनशंभुना ॥ यथाविष्णोः पुराख्यातंतथैवचमयाश्रुतम् ॥ तच्चत्वदग्रेकथितंरहस्यंकाशिजंमहत् ॥ १२ ॥

प्रसिद्धावद्योती ॥ वेवेष्टिव्याप्नोतीतिविष्णुः ॥ जीवकालाकाशादिव्यावृत्त्यर्थंमहेतिविशेषणम् ॥ यद्वा विशतिव्याप्नोतीतिविष्णुः ॥ विशतेर्व्याप्नोतेर्वेतियास्कवचनात् ॥ यद्वा महाविर्महापक्षी जीवात्मा ॥ परमात्मनइवआत्मनोपिद्वासुपर्णेत्यादिश्रुत्योपचारवृत्त्यापक्षित्वस्याभिधानात् ॥ महावेर्जीवात्मनोजटायोर्वाकरुणामृतंस्नुतंयेनसमहाविष्णुः ॥ तथाचहनुमद्वाक्यम् ॥ योमहान्पूजितोव्यापीमहावेः करुणामृतम् ॥ स्नुतंयेनजटायोश्चमहाविष्णुंनमाम्यहमिति ॥ देवनंदेवः स्वप्रकाशस्तस्यमहस्त्वंनामब्रह्मादिनियंतृत्वम् ॥ शिवआनंदरूपः ॥ ९ ॥ एवमर्थात्प्राकृतप्रलयेविश्वेश्वरस्यक्रीडाधिष्ठानत्वेनकाश्याः स्थितिमभिधायदैनन्दिनेपिस्थितिप्रकारमाह ॥ दैनंदिनइति ॥ अथवा ननुप्राकृतप्रलयेकाश्याअपिकिंलयेनभाव्यंनेत्याह ॥ दैनन्दिनइति ॥ अथोऽपिदैनन्दिनप्रलयेतावद्बिभर्त्येवंप्राकृतप्रलयेपिबिभर्तीत्यर्थः ॥ संवर्तमहास्थिभूषणः प्रलयकालीनवद्वस्थ्यलंकरणः ॥ कलिश्चकालश्चमृत्युस्ताभ्यांवर्जितारहिताअथवाताभ्यांमुक्तिप्रतिबंधहीनेत्यर्थः ॥ ११० ॥ वाराणस्यादिनामनिर्वचनमुपसंहरति ॥ वाराणसीति ॥ ११ ॥ काशीरहस्यकथनमुपसंहरति ॥ इतिदेवीपुरइति ॥ पुरोऽग्रतः ॥ यथाविष्णोः पुराख्यातंकथितंदेव्याः पुरः प्रोक्तंतथैवचतादृशमेवमातु

CC-0. In Public Domain. Digitization by eGangotri

रुत्संगस्थितेनमयाश्रुतमित्यर्थः ॥ १२ ॥ अध्यायपाठादेःफलमाह ॥ जप्त्वेति ॥ पठित्वेत्यर्थः ॥ १३ ॥ अत्यौत्सुक्येनप्रश्नकरणेस्वच्छंदयति ॥ अतःपरमिति ॥ ११४ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांत्रिंशत्तमोऽध्यायः ॥ ३० ॥ एकत्रिंशत्तमेऽध्यायेमहापुण्यप्रदंनृणाम् ॥ वर्ण्यतेकालराजस्यमाहात्म्यंजन्मनासह ॥ १ ॥ एतादृक्तपःप्रभाववानप्यहंश्रीकालराजेनकाश्यानिष्कासितइतिमनसिनिधायपरमसंभ्रमेणश्रीकालभैरवकथांप्रष्टुमुक्तानुवादपूर्वकंपूर्वोक्तांकथामात्मनस्तृप्त्यभावावेदनेनाभिनन्दति ॥ सर्वज्ञेति ॥ स्कंदितःशोषितोमारितस्तारकनामाऽसुरोयेनतत्संबोधनंतथा ॥ १ ॥ २ ॥ भैरवसंकथनमेवविस्तरेणपृच्छति ॥ कोसाविति ॥ कोसावित्यर्धेनैकःप्रश्नः ॥ अत्रअस्याम् ॥ किंरूपमित्यर्धेनप्रश्नत्रयम् ॥ ३ ॥ कथमाराधितइत्यर्धेनैकः ॥ आराधितइत्यर्द्धेनैकइतिषट्प्रश्नाः ॥ ४ ॥ भैरवकथांकथयिष्यन्प्रथमंप्रष्टारंस्तौति ॥ वाराणस्यामिति ॥ प्रेमभक्तिः ॥ वर्ततेजायते ॥ यथाप्रेमप्रवर्ततेइतिक्वचित् ॥ तवेतिशेषः ॥ कस्यचिदित्यत्रान्येतिच ॥ यथातेप्रेमवर्धतेइतिपाठेस्पष्टएवार्थः ॥ ५ ॥ श्रोतॄन्प्रोत्साहयति ॥ प्रादुर्भावमिति ॥ ६ ॥ श्रीभैरवाविर्भाववक्तुंजगद्रक्षांप्रार्थयानोमंगलार्थंतंपूजयति ॥ पाणिभ्यामिति ॥ महा

जप्त्वाध्यायमिमंपुण्यंमहापातकनाशनम् ॥ श्रावयित्वाद्विजान्सम्यक्छिवलोकेमहीयते ॥ १३ ॥ अतःपरंकलशजकिंशुश्रूषसितद्वद ॥ काशीकथा कथ्यमानाममापिपरितोषकृत् ॥ ११४ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेवाराणसीमहिमवर्णनंनाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ ॥ अगस्त्यउवाच ॥ ॥ सर्वज्ञहृदयानंदस्कंदस्कंदिततारक ॥ नतृप्तिमधिगच्छामिशृण्वन्वाराणसीकथाम् ॥ १ ॥ अनुग्रहोयदिमयियोग्योस्मिश्रवणेयदि ॥ तदाकथयमेनाथकाश्यांभैरवसंकथाम् ॥ २ ॥ कोसौभैरवनामात्रकाशिपुर्यांव्यवस्थितः ॥ किंरूपमस्य किंकर्मकानिनामानिचास्यवै ॥ ३ ॥ कथमाराधितश्चैवसिद्धिदःसाधकस्यवै ॥ आराधितःकुत्रकालेक्षिप्रंसिद्ध्यतिभैरवः ॥ ४ ॥ ॥ स्कंदउवाच ॥ ॥ वाराणस्यांमहाभागयथातेप्रेमवर्तते ॥ तथानकस्यचिन्मन्येततोवक्ष्याम्यशेषतः ॥ ५ ॥ प्रादुर्भावंभैरवस्यमहापातकनाशनम् ॥ यच्छ्रुत्वाकाशिवासस्यफलंनिर्विघ्नमाप्नुयात् ॥ ६ ॥ पाणिभ्यांपरितःप्रपीड्यसुदृढंनिश्चोत्यनिश्चोत्यचब्रह्मांडंसकलंपचेलिमरसालोच्चैःफलाभंमुहुः ॥ पायंपायमपायत्रिजगतीसुन्मत्तवत्तैरसैर्नृत्यंस्तांडवडंबरेणविधिनापायान्महाभैरवः ॥ ७ ॥

भैरवोऽपायतोऽज्ञानतत्कार्यलक्षणात्त्रिजगतींत्रिजगतीस्थंलोकंब्रह्मांडांतर्वर्तियत्किंचित्प्राणिजातमित्येतत् ॥ पायाद्रक्षतुमोचयत्वित्यन्वयः ॥ किंकुर्वन् ॥ तांडवाडंबरेणाविधिनानृत्याटोपप्रकारेण नृत्यन्नृत्यंकुर्वन् ॥ सामान्यविशेषभावादपौनरुक्त्यम् ॥ कइव ॥ उन्मत्तवदुन्मत्तइव ॥ तत्रहेतुः ॥ तैरसैर्ब्रह्मांडांतर्वर्तितत्तद्भूतास्वादनरसैरित्यर्थः ॥ किंकृत्वेत्यपेक्षायांरसाधिकरणमाह ॥ सुदृढं यथास्यात्तथासकलंसंपूर्णम् ॥ यद्वा कलामायातत्सहितम् ॥ पाणिभ्यांपरितःसर्वतःप्रपीड्यातिशयेननिष्पीड्यनिश्चोत्यनिश्चोत्यचसंचुष्यसंचुष्य ॥ चकारःसमुच्चये ॥ नकेवलंप्रपीड्यनिश्चोत्य निश्चोत्यचेत्यर्थः ॥ पायंपायंपीत्वापीत्वा ॥ मुहुर्वारंवारमतिशयेनेत्यर्थः ॥ कीदृशम् ॥ पचेलिमंपक्वशीलम् ॥ यद्रसालोच्चैःफलंमहदाम्रफलंतदाभंतत्तुल्यम् ॥ यद्वा पाणिभ्यांकरवन्निर्भयदास्यामनुभवनित्यबोधाभ्यांमायासहितंब्रह्मांडंप्रपीड्यसंकुच्य ॥ तथाचोक्तम् ॥ नित्यबोधपरिपीडितंजगद्विभ्रमंतुदतिवाक्यजामतिः ॥ वासुदेवनिहतंधनंजयोहंतिकौरवकुलंयथापुनरिति ॥ निश्चोत्यनिश्चोत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चमननिदिध्यासनाभ्यांक्षरणतामापाद्यचपीत्वापीत्वाअत्यंतंनाशंनीत्वासर्वसंहरणात्कालः कुयोगिनांभयंकरत्वाद्भैरवःपरमात्मातत्त्वमस्यादिवाक्योत्थबुद्धिवृत्त्यभिव्यक्तस्तैरसैःप्रसिद्धैर्ब्रह्मानंदानुभवैर्नृ त्यंस्त्रिजगतीस्थंलोकंपायादित्यन्यत्समानम् ॥ योवारंवारंसकलंब्रह्मांडंपायंपायंवर्ततेसइदानींत्रिजगतींपायादित्यध्याहृत्ययोजनेतितुप्राकृतंव्याख्यानम् ॥ ७ ॥ महादेवस्वरूपाऽज्ञानाद्गर्वंकुर्वतोहिरण्य गर्भस्यशिरश्छेत्तुंकालभैरवमुत्पादितवानीश्वरइतिप्रथमप्रश्नस्योत्तरंवक्तुंब्रह्मादीनांतदज्ञानमाह ॥ कुंभयोनेइति ॥ ८ ॥ तयोरप्यवेदनेहेतुमाह ॥ नचित्रमिति ॥ ९ ॥ तर्ह्यनिर्मोक्षोदुर्ज्ञेयत्वादित्या शंक्याह ॥ वेदयेदिति ॥ १० ॥ ननुसर्वगत्वात्सर्वैर्दृश्यतामित्यतआह ॥ ससर्वगइति ॥ ननुदेवत्वेनसर्वैर्ज्ञायतएवेत्यतआह ॥ देववद्दृश्यतेमूढैरिति ॥ देववत्साधारणदेवतावत् ॥ ११ ॥ एत

कुंभयोनेनवेत्त्येवमहिमानंमहेशितुः ॥ चतुर्भजोपिवैकुंठश्चतुर्वक्रोपिविश्वकृत् ॥ ८ ॥ नचित्रमत्रभूदेवभवमायादुरत्यया ॥ तयासंमोहिताःसर्वेनावयं त्यपितंपरम् ॥ ९ ॥ वेदयेद्यदिचात्मानंसएवपरमेश्वरः ॥ तदाविंदंतिब्रह्माद्याःस्वेच्छयैवनतंविदुः ॥ १० ॥ ससर्वगोपिनेक्ष्येतस्वात्मारामोमहेश्वरः ॥ देववद्दृश्यतेमूढैरतीतोयोमनोगिराम् ॥ ११ ॥ पुरापितामहंविप्रमेरुशृंगेमहर्षयः ॥ प्रोचुःप्रणम्यलोकेशंकिमेकंतत्त्वमव्ययम् ॥ १२ ॥ समाययामहे शस्यमोहितोलोकसंभवः ॥ अविज्ञायपरंभावमात्मानंप्राहवर्षिणम् ॥ १३ ॥ जगद्योनिरहंधातास्वयंभूरेकईश्वरः ॥ अनादिमदहंब्रह्मामामनर्च्यनमु च्यते ॥ १४ ॥ प्रवर्तकोहिजगतामहमेकोनिवर्तकः ॥ नान्योमदधिकःसत्यंकश्चित्कोपिसुरोत्तमाः ॥ १५ ॥ तस्यैवंब्रुवतोधातुःक्रतुर्नारायणांशजः ॥ प्रोवाचप्रहसन्वाक्यंरोषताम्रविलोचनः ॥ १६ ॥ अविज्ञायपरंतत्त्वंकिमेतत्प्रतिपाद्यते ॥ अज्ञानंयोगयुक्तस्यनचैतदुचितंतव ॥ १७ ॥ अहंकर्ताहिलो कानांयज्ञोनारायणःपरः ॥ नमामनादृत्यविधेजीवनंजगतामज ॥ १८ ॥ अहमेवपरंज्योतिरहमेवपरागतिः ॥ मत्प्रेरितेनभवतासृष्टिरेषाविधीयते ॥ ॥ १९ ॥ एवंविप्रकृतौमोहात्परस्परजयैषिणौ ॥ पप्रच्छतुःप्रमाणज्ञानागमांश्चतुरोपितौ ॥ २० ॥ ॥ विधिक्रतूऊचतुः ॥ ॥ वेदाःप्रमाणंसर्वत्रप्रति ष्ठांपरमामिताः ॥ यूयमेवनसंदेहःकिंतत्त्वंप्रतितिष्ठत ॥ २१ ॥ श्रुतयऊचुः ॥ ॥ यदिमान्यावयंदेवौसृष्टिस्थितिकरौविभू ॥ तदाप्रमाणंवक्ष्यामो भवत्संदेहभेदकम् ॥ २२ ॥

देवदर्शयितुमितिहासमाह ॥ पुरेति ॥ तत्त्वंवस्तु ॥ १२ ॥ वर्षिणंश्रेष्ठम् ॥ १३ ॥ श्रेष्ठत्वमेवाह जगद्योनिरितिद्वयेन ॥ अनर्च्यापूज्याज्ञात्वेतिवा ॥ १४ ॥ १५ ॥ क्रतुर्यज्ञोयज्ञाधि ष्ठाताविष्णुरितियावत् ॥ यज्ञोवैविष्णुरितिश्रुतेः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ एवमितिस्कंदोक्तिः ॥ विप्रकृतौविरुद्धौ ॥ आगमान्मूर्तिधरान्वेदान् ॥ चतुरश्चतुःसंख्याकान् ॥ ॥ २० ॥ तयोःप्रश्नमेवदर्शयति ॥ वेदाःप्रमाणमिति ॥ तर्हिकिंप्रत्यक्षादीनामिवप्रामाण्यमस्माकंनेत्याह ॥ परमांप्रतिष्ठांयूयमेवेताः प्राप्ताइति ॥ अपौरुषेयत्वात्तर्काप्रतिष्ठानादितिन्यायोपबृंहित व्याससूत्राच्चेतिभावः ॥ प्रतितिष्ठतप्रतिजानीतआश्रयतेतिवा ॥ प्रतितिष्ठथेतिपाठेपिसएवार्थः ॥ प्रतितिष्ठतीतिचक्वचित्पाठः ॥ २१ ॥ श्रुतीनांप्रतिवचनमाह ॥ यदीति ॥

CC-0. In Public Domain. Digitization by eGangotri

हेदेवौ ॥ प्रमाणंयथार्थम् ॥ २२ ॥ श्रुत्युक्तमिति ॥ श्रुतीःप्रतिवेदान्प्रति ॥ किमूचतुस्तदाह ॥ युष्मदुक्तंप्रमाणंनाविति ॥ अयंभावः ॥ वेदवचनमेवतावन्निर्दुष्टत्वात्स्वतः प्रमाणंकिंपुनर्वक्तव्यंतदधिष्ठातॄणांमूर्तिमतांभवतामिति ॥ २३ ॥ चतुर्णांवेदानांचत्वारिवचनानिक्रमेणदर्शयति ॥ यदिति ॥ यदंतःस्थानिप्रलयकाले ॥ यतःसर्वंप्रवर्ततेसृष्टिसमये ॥ ॥ २४ ॥ योगेनचाष्टांगेनज्ञानयोगेनवा ॥ २५ ॥ भासतेस्फुरति ॥ तथाचश्रुतिः ॥ नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोऽयमग्निः ॥ तमेवभांतमनुभातिसर्वंयस्यभासासर्वमिदंविभातीति ॥ २६ ॥ २७ ॥ स्मित्वाईषद्धास्यंकृत्वा ॥ क्रतुर्विधीयज्ञब्रह्माणौ ॥ मोहांध्येनांकितौ मोहेनाज्ञानेनजातंयदांध्यमज्ञत्वंतेनांकितौचिह्नितौयुक्तावितियावत् ॥ २८ ॥ कथमिति ॥ कथमसौपरंब्रह्मत्वमापन्नःप्राप्तइतिद्वितीयेनान्वयः ॥ विटंकवेशःकुत्सितालंकारःकुत्सिताकारइतिवा ॥ तदेवाह प्रमथनाथइत्यादिना ॥ पितृवनेश्मशानेशिवयाताद्दग्रूपयारममाणइतिसंबंधः ॥ तद्ब्रह्मकचकीदृ

श्रुत्युक्तमिदमाकर्ण्यप्रोचतुस्तौश्रुतीःप्रति ॥ युष्मदुक्तंप्रमाणंनौकिंतत्त्वंसम्यगुच्यताम् ॥ २३ ॥ ऋगुवाच ॥ ॥ यदंतःस्थानिभूतानियतःसर्वंप्रवर्तते ॥ यदाहुस्तत्परंतत्त्वंसरुद्रस्त्वेकएवहि ॥ २४ ॥ ॥ यजुरुवाच ॥ ॥ योयज्ञैरखिलैरीशोयोगेनचसमिज्यते ॥ येनप्रमाणंहिवयंसएकःसर्वदृक्छिवः ॥२५॥ ॥ सामोवाच ॥ ॥ येनेदंभ्राम्यतेविश्वंयोगिभिर्योविचिंत्यते ॥ यद्भासाभासतेविश्वंसएकस्त्र्यंबकःपरः ॥ २६ ॥ ॥ अथर्वोवाच ॥ ॥ यंप्रपश्यंतिदेवेशंभक्त्यानुग्रहिणोजनाः ॥ तमाहुरेकंकैवल्यंशंकरंदुःखतस्करम् ॥ २७ ॥ श्रुतीरितंनिशम्येत्थंतावतीवविमोहितौ ॥ स्मित्वाहतुःक्रतुर्विधीमोहांध्येनांकितौमुने ॥ २८ ॥ कथंप्रमथनाथोसौरममाणोनिरंतरम् ॥ दिगंबरःपितृवनेशिवयाधूलिधूसरः ॥ २९ ॥ विटंकवेशोजटिलोवृषगोव्यालभूषणः ॥ परंब्रह्मत्वमापन्नःक्वचतत्संगवर्जितम् ॥ ३० ॥ तदुदीरितमाकर्ण्यप्रणवात्मासनातनः ॥ अमूर्तोमूर्तिमान्भूत्वाहसमानउवाचतौ ॥ ३१ ॥ प्रणवउवाच ॥ नह्येषभगवाञ्छक्त्यास्वात्मनोव्यतिरिक्तया ॥ कदाचिद्रमतेरुद्रोलीलारूपधरोहरः ॥ ३२ ॥ असौहिभगवानीशः स्वयंज्योतिःसनातनः ॥ आनंदरूपातस्यैषाशक्तिर्नागंतुकीशिवा ॥ ३३ ॥

शम् ॥ संगवर्जितमसंगम् ॥ असंगोनहिसज्जतइतिश्रुतेः ॥ संगवार्जिनामितिपाठेसंगवर्जिनांपरमहंसानांप्राप्यंतद्ब्रह्मक्क क्वचैतादृक्संगवानयमतिशेषोतस्तत्परंब्रह्मकथमयंप्राप्तइत्यर्थः ॥ २९ ॥ ३० ॥ तदुदीरितमिति ॥ प्रणवात्माप्रणवोनामेश्वरादुत्पन्नोभगवतोबोधकोवेदोत्पत्तिहेतुस्तदात्मातत्स्वरूपः ॥ तदुक्तंभागवते ॥ ततोभूत्त्रिवृदोंकारोयोव्यक्तप्रभवःस्वराट् । यत्तल्लिंगंभगवतोब्रह्मणःपरमात्मन इति ॥ गीतासारेच ॐकारप्रभवावेदा ॐकारप्रभवाःस्वराः ॥ ॐकारप्रभवंसर्वंत्रैलोक्यंसचराचरमिति ॥ ब्रह्मनारायणयोरपिमोहइति ॥ हसमानोहसन् ॥ असहमानइतिक्वचित् ॥ ३१ ॥ प्रणववचनमाह ॥ नह्येषइति ॥ स्वात्मनोव्यतिरिक्तयाभिन्नयाशक्त्या एषकदाचिदपिरमतइतिनाहिकिंत्वभिन्नयैवेत्यर्थः ॥ ३२ ॥ तर्हिकीदृगस्यस्वरूपंशक्तेर्वेतिपृच्छायांतदाह ॥ असौहीति ॥ नागंतुकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्येत्यर्थः ॥ ३३ ॥ इत्येवमिति ॥ अजस्यहिअजस्यच ॥ ३४ ॥ ३५ ॥ ज्योतिरिति ॥ ददृशेदृष्टोविधिक्रतुभ्यामितिशेषः ॥ ३६ ॥ संभावयेद्वितर्कयेत् ॥ ३७ ॥ भालाक्षोललाटनेत्रः ॥ नागोडुपविभूषणःसर्पागदचंद्रावतंसः ॥ ३८ ॥ ३९ ॥ ॥ ४० ॥ अथेति ॥ अथानंतरंसईश्वरःपद्मयोनेर्गिरंश्रुत्वाकोपतःपुरुषमुत्पाद्यतंप्राहेतिद्वितीयेनान्वयः ॥ स्वकोपतइतिक्वचित्पाठः ॥ किंरूपमितिद्वितीयप्रश्नस्योत्तरमाह ॥ भैरवाकृतिमिति ॥ ४१ ॥ कानिनामानीतिचतुर्थस्यप्रश्नस्योत्तरमाह ॥ कालेति ॥ ४२ ॥ कालराजनामसान्वयमुक्त्वाकालभैरवनामनिर्वक्ति ॥ विश्वमिति ॥ ४३ ॥ पुनरपिनामद्वयंनिर्वक्ति आमर्दयिष्यतीतिद्वयेन ॥ आमर्दयिष्यतिपीडयिष्यति ॥ तुष्टःप्रायश्चित्तरूपत्वात्पीडायाः ॥ रुष्टइतिवापाठः ॥ ४४ ॥ ४५ ॥

इत्येवमुक्तेपितदामखमूर्तेरजस्यहि ॥ नाज्ञानमगमन्नाशंश्रीकंठस्यैवमायया ॥ ३४ ॥ प्रादुरासीत्ततोज्योतिरुभयोरंतरेमहत् ॥ पूरयन्निजयाभासाद्यावा भूम्योर्यदंतरम् ॥ ३५ ॥ ज्योतिर्मंडलमध्यस्थोददृशेपुरुषाकृतिः ॥ प्रजज्वालाथकोपेनब्रह्मणःपंचमंशिरः ॥ ३६ ॥ आवयोरंतरंकोसौबिभृयात्पुरु षाकृतिम् ॥ विधिःसंभावयेद्यावत्तावत्सहिविलोकितः ॥ ३७ ॥ स्रष्टाक्षणेनचमहान्पुरुषोनीललोहितः ॥ त्रिशूलपाणिर्भालाक्षोनागोडुपविभूषणः ॥ ३८ ॥ हिरण्यगर्भस्तंप्राहजानेत्वांचंद्रशेखरम् ॥ भालस्थलान्ममपुरारुद्रःप्रादुरभूद्भवान् ॥ ३९ ॥ रोदनाद्रुद्रनाम्नापियोजितोसिमयापुरा ॥ मामे वशरणंयाहिपुत्ररक्षांकरोमिते ॥ ४० ॥ अथेश्वरःपद्मयोनेःश्रुत्वागर्ववतींगिरम् ॥ सकोपतःसमुत्पाद्यपुरुषंभैरवाकृतिम् ॥ ४१ ॥ प्राहपंकजजन्मासौ शास्यस्तेकालभैरव ॥ कालवद्राजसेसाक्षात्कालराजस्ततोभवान् ॥ ४२ ॥ विश्वंभर्तुंसमर्थोऽसिभरणाद्भैरवःस्मृतः ॥ त्वत्तोभेष्यतिकालोपिततस्त्वं कालभैरवः ॥ ४३ ॥ आमर्दयिष्यतिभवांस्तुष्टोदुष्टात्मनोयतः ॥ आमर्दकइतिख्यातिंततःसर्वत्रयास्यति ॥ ४४ ॥ यतःपापानिभक्तानांभक्षयिष्य तितत्क्षणात् ॥ पापभक्षणइत्येवतवनामभविष्यति ॥ ४५ ॥ यामेमुक्तिपुरीकाशीसर्वाभ्योपिगरीयसी ॥ आधिपत्यंचतस्यास्तेकालराजसदैवहि ॥ ४६ ॥ तत्रयेपापकर्तारस्तेषांशास्तात्वमेवहि ॥ शुभाशुभंनतत्कर्मचित्रगुप्तोलिखिष्यति ॥ ४७ ॥ एतान्वरान्प्रगृह्याऽथतत्क्षणात्कालभैरवः ॥ वामांगुलिनखाग्रे णचकर्तचशिरोविधेः ॥ ४८ ॥ यदंगमपराध्नोतिकार्यंतस्यैवशासनम् ॥ अतोयेनकृतानिंदातच्छिन्नंपंचमंशिरः ॥ ४९ ॥ यज्ञमूर्तिधरोविष्णुस्ततस्तुष्टा वशंकरम् ॥ भीतोहिरण्यगर्भोपिजजापशतरुद्रियम् ॥ ५० ॥ आश्वास्यतौमहादेवःप्रीतःप्रणतवत्सलः ॥ प्राहस्वांमूर्तिमपरांभैरवंतंकपर्दिनम् ॥ ५१ ॥

कालभैरवायवरान्ददाति ॥ यामेइतिद्वाभ्याम् ॥ अनेनकिंकर्मास्येतितृतीयप्रश्नस्योत्तरमुक्तम् ॥ आधिपत्यंपालकत्वम् ॥ अतएवोक्तंकालभैरवाष्टकेऽस्माभिः ॥ ईश्वरदत्तनिजस्थलपालं कुंकुमचंदनमंडितभालम् ॥ भूतपिशाचपुरस्कृततालंनौमिसदाशिवभैरवदेवमिति ॥ ४६ ॥ ४७ ॥ एतानिति ॥ वामांगुलिनखाग्रेणवामकनिष्ठिकांगुलिनखाग्रेणेत्यर्थः ॥ ४८ ॥ ननुब्रह्मणःपंच शिरस्त्वखावितिमित्येकमेवशिरोऽच्छिनत्तत्राह ॥ यदंगमिति ॥ ४९ ॥ तुष्टावशतरुद्रियेणेत्यग्रिमस्यविपरिणमय्यानुषंगः ॥ शतरुद्रियंनमस्तेरुद्रमन्यवइत्यादिस्तोत्रम् ॥ ५० ॥ स्वांस्वीयाम् ॥

CC-0. In Public Domain. Digitization by eGangotri

अतएवनीललोहितेत्यादिभेदेननिर्देशः ॥ तामेवापरांमूर्तिंदर्शयति ॥ भैरवमिति ॥ ५१ ॥ वैधसंवेधसःसंबंधि ॥ ५२ ॥ व्रतंचभिक्षाटनादिरूपंधारय ॥ धृतिंलोकायदर्शयन्निति क्वचित् ॥ तत्रधृतिंधैर्यम् ॥ एतदेवदर्शयति ॥ चरत्वमिति ॥ कापालव्रतंकपालधारणरूपंव्रतंसंकल्पम् ॥ संकल्पपूर्वंकंकपालधारणंक्तत्वेत्यर्थः ॥ तथाचस्मृतिः ॥ शिरःकपालध्वजवान्भिक्षाशीकर्मवेदय न्नित्यादि ॥ अन्तर्हितोभैरवस्येतिशेषः ॥ ५३ ॥ सर्वात्मनांऽतर्धानमाह उत्पाद्येतिपंचभिः ॥ एकांकन्यामुत्पाद्यकालंकालभैरवमनुगच्छेतितांनियोज्यततोऽन्तर्धानंगतइतिपंचमेनान्वयः ॥ कन्यांस्त्रियम् ॥ तांविशिनष्टि रक्तांबरधरामितिसार्धद्वयेन ॥ रक्तस्रग्रक्तसमूहःसैवगंधःसएवलेपनमनुलेपनंयस्यास्ताम् ॥ ५४ ॥ ललंत्याबहिर्निःसरंत्याजिह्वयाऽतिशयभीषणामतिशयेनभयंकराम् ॥५५॥ कर्त्रीकरकविशेषस्तस्याःकर्परंखण्डंहस्ताग्रेयस्यास्तां हस्ताग्रकृतभग्नकरकामित्यर्थः ॥ यद्वा कर्त्रीदात्रविशेषः ॥ कर्परंरक्तपात्रम् ॥ दात्रेणच्छित्त्वारुधिरंग्रहीतुंतदुभयहस्ताग्रामित्यर्थः ॥ स्फुरंत्यौपिंगेउग्रेतारकेकनीनिकेयस्यास्ताम् ॥ गर्जयंतींभर्त्सयंतीम् ॥ महान्वेगोयस्यास्ताम् ॥ भैरवस्यापिभीषणांभीतिहेतुंजनयंतीम् ॥ महोद्वेगंभैरवस्यापिभीषणमितिक्वचित्पाठः ॥ ५६ ॥

मान्योऽध्वरोसौभवतातथाशतधृतिस्त्वयम् ॥ कपालंवैधसंचापिनीललोहितधारय ॥ ५२ ॥ ब्रह्महत्यापनोदायव्रतंलोकायदर्शयन् ॥ चरत्वंसततंभिक्षांकापालव्रतमास्थितः ॥ इत्युक्त्वांऽतर्हितोदेवस्तेजोरूपस्तदाशिवः ॥ ५३ ॥ उत्पाद्यकन्यामेकांतुब्रह्महत्येतिविश्रुताम् ॥ रक्तांबरधरांरक्तांरक्तस्रग्गंधलेपनाम् ॥ ५४ ॥ दंष्ट्राकरालवदनांललज्जिह्वातिभीषणाम् ॥ अंतरिक्षैकपादाग्रांपिबंतींरुधिरंबहु ॥५५॥ कर्त्रीकर्परहस्ताग्रांस्फुरत्पिंगोग्रतारकाम् ॥ गर्जयंतींमहावेगांभैरवस्यापिभीषणाम् ॥ ५६ ॥ यावद्वाराणसींदिव्यांपुरीमेषगमिष्यति ॥ तावत्त्वंभीषणेकालमनुगच्छोग्ररूपिणि ॥ ५७ ॥ सर्वत्रतेप्रवेशोस्तित्यक्त्वावाराणसींपुरीम् ॥ नियोज्यतामितिशिवोप्यंतर्धानंगतस्ततः ॥ ५८ ॥ तत्सान्निध्याद्भैरवोपिकालोभूत्कालकालतः ॥ सदेवदेववाक्येनबिभ्रत्कापालिकंव्रतम् ॥ ५९ ॥ कपालपाणिर्विश्वात्माचचारभुवनत्रयम् ॥ नात्याक्षीच्चापितंदेवंब्रह्महत्यासुदारुणा ॥ ६० ॥ सत्यलोकेपिवैकुंठेमहेंद्रादिपुरीष्वपि ॥ त्रिजगत्पतिरुग्रोपिव्रतीत्रिजगतीश्वरः ॥६१॥ प्रतितीर्थंभ्रमन्नापिविमुक्तोब्रह्महत्यया ॥६२॥ अनेनैवानुमानेनमहिमात्ववगम्यताम् ॥ ब्रह्महत्यापनोदिन्याःकाश्याःकलशसंभव ॥ ६३ ॥

यावदिति ॥ यावदेषकालभैरवोवाराणसींप्रवेक्ष्यतितावदनुगच्छेत्यर्थः ॥ ५७ ॥ तत्रहेतुमाह ॥ सर्वत्रेति ॥ ५८ ॥ तत्सान्निध्यादिति ॥ तस्याब्रह्महत्यायाःसान्निध्यात्तयाभिभूतत्वादित्यर्थः ॥ भैरवोपिकालस्यभयजनकोपि ॥ एतदेवाह ॥ कालकालतः ॥ प्रथमांतात्तसिल् ॥ कालकालोपीत्यर्थः ॥ कालकालनइतिवापाठः ॥ कालःकृष्णवर्णोऽभूदित्यर्थः ॥ अतएवोक्तंकालभैरवाष्टकेऽस्माभिः ॥ कज्जलसुन्दरदेहमनाथंमृत्युयमांतकभीषणकायम् ॥ नामविघूर्णितपापकदंबंनौमिसदाशिवभैरवदेवमिति ॥ अथवाअन्यंब्रह्महंतारमिवकिमितितंनाक्रमेत्तत्राह ॥ तत्सान्निध्याद्विश्वेश्वरसान्निध्याद्भैरवोपिकालकालतःकालस्यापिभक्षकःकालःकलयतिजनयतिप्रकाशयतीतिवाकालःपरब्रह्मस्वरूपोऽभूदित्यर्थः ॥ अनुगमनंतुलोकसंग्रहार्थंकाश्यामहत्त्वख्यापनार्थंचेतिभावः ॥ एतदेवाह ॥ सदेवदेववाक्येनेति ॥ ५९ ॥ विश्वस्यात्माकारणभूतःप्रकाशकइत्यर्थः ॥ सत्यलोकादिभ्यःसर्वतीर्थेभ्यश्चकाश्याःश्रेष्ठतामाह नात्याक्षीदितिपंचभिः ॥ सुदारुणाऽतिभयंकरा ॥ अतिदारुणेतिपाठेपि सएवार्थः ॥६०॥ वैकुंठेपि ॥ त्रिजगत्पतिस्त्रिजगतांपालकः ॥ त्रिजगतीश्वरस्त्रिजगत्यानियंता ॥६१॥ भ्रमन्नापीत्यपिशब्दोभिन्नक्रमे ॥ प्रतितीर्थंभ्रमन्नपिब्रह्महत्ययानविमुक्तइत्यर्थः ॥६२॥६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयतनानिक्षेत्राणि ॥ चकारात्सत्यलोकादयःसंगृह्यंते ॥ अधित्रिलोकित्रिलोकीमध्यइत्यर्थः ॥ नोनिषेधे ॥ ६४ ॥ पापाचलाशनेःपापपर्वतवज्रस्यतन्नाशकस्येत्यर्थः ॥ ६५ ॥ वैकुंठेपिनात्या क्षीदितियदुक्तंतद्दर्शयति ॥ निकेतनंवैकुंठम् ॥ यद्वा नारायणनिकेतनंश्वेतद्वीपंमहाकालपुरंवा ॥ ६६ ॥ अथायांतमितिरुद्रस्यपरमोविष्णुर्विष्णोश्चपरमःशिवइतिहरिवंशोक्तभूतंरुद्रमेवकाल भैरवंदृष्ट्वाविष्णोर्दंडवद्भूमौपतनंनाश्चर्यमितिविष्णुभक्तैर्मनोनखेदनीयम् ॥ अतएवमहादेवाभेदेनस्तोष्यतिभगवान्अयंधातेत्यादिना :॥ एवंविष्णुंदृष्ट्वाशिवस्यापिनत्यादिकंनाश्चर्यमितिशिवभक्तैःसंतो ष्टव्यमिति ॥ ६७ ॥ भूमौतत्स्थाने ॥ देवादयश्चनिपेतुर्दंडवत्पतिताइत्यर्थः ॥ ६८ ॥ दंडपातानंतरंकिमकरोद्भगवानित्याकांक्षायामाह ॥ प्रणिपत्येति ॥ प्रणिपत्यसत्कृत्य ॥ ६९ ॥ ७० ॥

संतितीर्थान्यनेकानिबहून्यायतनानिच ॥ अधित्रिलोकिनोकाश्याःकलामर्हंतिषोडशीम् ॥ ६४ ॥ तावद्गर्जंतिपापानिब्रह्महत्यादिकान्यलम् ॥ याव
न्नामनशृण्वंतिकाश्याःपापाचलाशनेः ॥ ६५ ॥ प्रमथैःसेव्यमानोऽयंत्रिलोकींविचरन्हरः ॥ कापालिकोययौदेवोनारायणनिकेतनम् ॥ ६६ ॥
अथायांतंमहाकालंत्रिनेत्रंसर्पकुंडलम् ॥ महादेवांशसंभूतंभैरवंभीषणाकृतिम् ॥ ६७ ॥ पपातदंडवद्भूमौदृष्ट्वातंगरुडध्वजः ॥ देवाश्चमुनयश्चैवदेवनार्यः
समंततः ॥ ६८ ॥ निपेतुःप्रणिपत्यैनंप्रणतःकमलापतिः ॥ शिरस्यंजलिमारोप्यस्तुत्वाबहुविधैःस्तवैः ॥६९॥ क्षीरोदमथनोद्भूतांप्राहपद्मालयांहरिः ॥
प्रियेपश्याऽब्जनयनेधन्याऽसिसुभगेनघे ॥ ७० ॥ धन्योऽहंदेविसुश्रोणियत्पश्यावोजगत्पतिम् ॥ अयंधाताविधाताचलोकानांप्रभुरीश्वरः ॥ ७१ ॥
अनादिःशरणःशांतःपरःषड्विंशसंमितः ॥ सर्वज्ञःसर्वयोगीशःसर्वभूतैकनायकः ॥७२॥ सर्वभूतांतरात्माऽयंसर्वेषांसर्वदःसदा ॥ यंविनिद्राविनिःश्वासाः
शांताध्यानपरायणाः ॥ ७३ ॥ धियापश्यंतिहृदयेसोयमद्यसमीक्ष्यताम् ॥ यंविदुर्वेदतत्त्वज्ञायोगिनोयतमानसाः ॥ ७४ ॥ अरूपोरूपवान्भूत्वासो
यमायातिसर्वगः ॥ अहोविचित्रंदेवस्यचेष्टितंपरमेष्ठिनः ॥७५॥ यस्याख्यांब्रुवतांनित्यंनदेहःसोपिदेहधृक् ॥ यंदृष्ट्वानपुनर्जन्मलभ्यतेमानवैर्भुवि ॥७६॥
सोयमायातिभगवांस्त्र्यंबकःशशिभूषणः ॥ पुंडरीकदलायामेधन्येमेऽद्यविलोचने ॥ ७७ ॥ धिग्धिक्पदंतुदेवानांपरंदृष्ट्वाऽत्रशंकरम् ॥ लभ्यतेयन्ननिर्वाणं
सर्वदुःखांतकृत्तुयत् ॥ ७८ ॥

अयमित्यंगुल्यानिर्दिशति ॥ स्वयमितिकचित् ॥ धाताधर्तापोष्टासामान्यतोंऽतर्यामिरूपेण ॥ विधाताविशेषतोमात्रादिरूपेणभृगोःपुत्रद्वयरूपोवा ॥ सर्वात्मकत्वात्कालराजस्य ॥७१॥ षड्विंशसंमितः परमात्मतयानिरूपितः ॥ ७२ ॥ सर्वभूतांतरात्मासर्वप्राणिनामंतर्यामी ॥ विनिःश्वासाजितप्राणाइत्यर्थः ॥ ७३ ॥ वेदतत्त्वंब्रह्मतज्ज्ञावेदतत्त्वज्ञाः ॥ ७४ ॥ ७५ ॥ ७६ ॥ त्र्यंबकस्त्रिनेत्रः ॥ पुंडरीकदलायामेपद्मपत्रवदायतेविस्तृतेइतियावत् ॥७७॥ परंपरमे वरंकेवलमितिवा ॥ किंतन्निर्वाणंतदाह ॥ सर्वदुःखांतकृत्तुयदिति ॥ अशेषानर्थोच्छित्तिकृद्देवयदित्यर्थः ॥ सर्वदुःखांतकर्तृयदितिकचित् ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वदुःखांतकर्तृवदितिचान्यत्र ॥ तत्रकर्मकर्तृवदितिसाधर्म्यैवैधर्म्यैवादृष्टांतः ॥७८॥ एतदेवविवृणोति ॥ देवत्वादिति ॥ भारतवर्षस्यैववाहुल्येनमोक्षादिस्थानत्वादितिभावः ॥७९॥८०॥८१॥८२॥ शक्तिपहेमायानियंतः ॥८३॥८४॥ यदप्रातिघंतदघस्यप्रतिहंतृ ॥८५॥ स्मित्वाअहोईश्वरलीलेतिविस्मयेनईषद्धास्यंकृत्वा ॥ सर्वविष्टपनायकअशेषलोकपते॥८६॥ छादयितुंवंचयितुम् ॥ मायात्वमेव दर्शयति नाभीत्यादिना ॥८७॥८८॥ मदादयइत्यतद्गुणसंविज्ञानोबहुव्रीहिः॥ तदेवदर्शयति ॥ यथावादिति ॥ यद्वा मदादयोऽहंविष्णुरादिर्येषांते मदादयस्तवमाययामोहिताः॥अतस्तवचेष्टितंयथावत्पर मार्थमिवावगच्छामि ॥ ८९ ॥ नचैतत्संगच्छतइत्याह ॥ संहारेति ॥ ९० ॥ ९१ ॥ अस्थ्नांस्रक्कीकसानांमाला ॥ तदातदातस्मिंस्तस्मिन्संहारकाले ॥ कृकुत्र ॥ नुपृच्छायाम् ॥ गताप्राप्ता

देवत्वादशुभंकिंचिद्देवलोकेनविद्यते ॥ दृष्ट्वापिसर्वदेवेशंयन्मुक्तिंनलभामहे ॥ ७९ ॥ एवमुक्ताहृषीकेशःसंप्रहृष्टतनूरुहः ॥ प्रणिपत्यमहादेवमिदमाहवृषध्वजम् ॥ ८० ॥ किमिदंदेवदेवेनसर्वज्ञेनत्वयाविभो ॥ क्रियतेजगतांधात्रासर्वपापहराऽव्यय ॥ ८१ ॥ क्रीडेयंतवदेवेशत्रिलोचनमहामते ॥ किंकारणंविरूपाक्षचेष्टितंतेस्मरार्दन ॥ ८२ ॥ किमर्थंभगवञ्छंभोभिक्षांचरसिशक्तिप ॥ संशयोमेजगन्नाथनतत्रैलोक्यराज्यद ॥ ८३ ॥ एवमुक्तस्ततःशंभुर्विष्णुमेतदुदाहरत् ॥ ब्रह्मणस्तुशिरश्छिन्नमंगुल्यग्रनखेनह ॥ ८४ ॥ तदघप्रतिघंविष्णोचराम्येतद्व्रतंशुभम् ॥ एवमुक्तोमहेशेनपुंडरीकविलोचनः ॥ ८५ ॥ स्मित्वाकिंचिन्नतशिराःपुनरेवंव्यजिज्ञपत् ॥ यथेच्छसितथाक्रीडसर्वविष्टपनायक ॥ ८६ ॥ माययामांमहादेवनच्छादयितुमर्हसि ॥ नाभीकमलकोशात्तुकोटिशःकमलासनान् ॥ ८७ ॥ कल्पेकल्पेसृजामीशत्वन्नियोगबलाद्विभो ॥ त्यजमायामिमांदेवदुस्तरामकृतात्मभिः ॥ ८८ ॥ मदादयोमहादेवमाययातवमोहिताः ॥ यथावदवगच्छामिचेष्टितंतेशिवापते ॥ ८९ ॥ संहारकालेसंप्राप्तेसदेवानखिलान्मुनीन् ॥ लोकान्वर्णाश्रमवतोहरिष्यसियदाहर ॥ ९० ॥ तदाक्वतेमहादेवपापंब्रह्मवधादिकम् ॥ पारतंत्र्यंनतेशंभोस्वैरंक्रीडेत्ततोभवान् ॥ ९१ ॥ अतीतब्रह्मणामस्थ्नांस्रक्कंठेतवभासते ॥ तदातदाक्वनुगताब्रह्महत्यातवानघ ॥ ९२ ॥ कृत्वापिसुमहत्पापंत्वांयःस्मरतिभावतः ॥ आधारंजगतामीशंतस्यपापंविलीयते ॥ ९३ ॥ यथातमोनतिष्ठेतसंनिधावंशुमालिनः ॥ तथानभवभक्तस्यपापंतस्यव्रजेत्क्षयम् ॥ ९४ ॥ यश्चिंतयतिपुण्यात्मातवपादांबुजद्वयम् ॥ ब्रह्महत्यादिकमपिपापंतस्यव्रजेत्क्षयम् ॥ ९५ ॥ तवनामानुरक्तावाग्यस्यपुंसोजगत्पते ॥ अप्यद्रिकूटतुलितंनैनस्तमनुबाधते ॥ ९६ ॥ रजसातमसाविवर्धितंक्वनुपापंपरितापदायकम् ॥ क्वचतेशिवनाममंगलंजनजीवातुजगद्रुजापहम् ॥ ९७ ॥

आगतेतिवा ॥ ९२ ॥ कैमुत्यन्यायेनसदृष्टांतंपापाभावमाह कृत्वापीतिद्वयेन ॥ भावतोभक्त्या ॥ ९३ ॥ भवस्यतवभक्तोभवभक्तस्तस्यसन्निधौपापंनतिष्ठेदित्यस्यार्थमाह ॥ पापंतस्येति ॥ तथानतवभक्तस्याप्यघंसान्निध्यमृच्छतीतिपाठेऋजुरेवार्थः ॥ ९४ ॥ ९५ ॥ पुनरपिकैमुत्यन्यायमभिप्रेत्याह, तवेतित्रिभिः ॥ अद्रिकूटतुलितंपर्वतश्रृंगसदृशंपर्वतसमूहतुल्यंवा ॥ एनः पापम् ॥ ९६ ॥ विवर्धितंविशेषेणवर्धितम् ॥ विभावितमितिपाठेविशेषेणभावितंसंपादितमित्यर्थः ॥ जनजीवातुजनानांजीवनौषधम् ॥ जीवातुर्जीवनौषधमितिवचनात् ॥ नकेवलंजीवनमात्रस्यौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्धांकिंतुजगद्रुजापहंसंसाररोगनाशकंच ॥ पूर्वपदेषंढत्वमार्षंकर्मधारयोवा ॥ ९७ ॥ यंदीति ॥ हेशिवयस्यपुरुषस्यजातुकदाचिदपिअंधकद्विषस्तवशिवशंकरचंद्रशेखरेतिनामओष्ठपुटाद्विनिःसृतं तस्यपुनरसकृत्पुनःपुनर्जायमानासंसृतिर्न ॥ तन्नहीतिपाठेतत्तस्यनहिनैवेत्यर्थः ॥ ९८ ॥ इतःपरमन्यच्छ्रेयोनास्तीतिबहुधासंबोधयन्प्रकृतमुपसंहराति ॥ परमात्मन्निति ॥ ९९ ॥ १०० ॥ ननुवैकुंठकैवल्यपतेस्तवकथमयंप्रलापस्तत्राह ॥ त्वद्दृष्टीति ॥ तृणंतुच्छम् ॥ परमितिपाठेपरंदूरंनिकृष्टमितियावत् ॥ १ ॥ विमलाशुद्धापवित्रेतियावत् ॥ मनोरथवतीअभीष्टवतीअमृतकल्पेत्यर्थः ॥ २ ॥ भिक्षाटनायेति ॥ अन्यत्रापिभिक्षाटनायनिरगान्निर्गंतुमुद्यतइत्यर्थः ॥ ३ ॥ अनेनमिषेणव्याजेनभवदर्शनंशिवदर्शनं भवस्यसंसारस्यदर्शनमितिवा ॥ ४ ॥ स्मेरास्यःप्रह

यदिजातुचिदंधकद्विषस्तवनामौष्ठपुटाद्विनिःसृतम् ॥ शिवशंकरचंद्रशेखरेत्यसकृत्तस्यनसंसृतिःपुनः ॥ ९८ ॥ परमात्मन्परंधामस्वेच्छाविधृतविग्रह ॥ कुतूहलंतवेशेदंक्कपराधीनतेश्वरे ॥ ९९ ॥ अद्यधन्योस्मिदेवेशयंनपश्यंतियोगिनः ॥ पश्यामितंजगन्मूलंपरमेश्वरमक्षयम् ॥ १०० ॥ अद्यमेपरमो लाभस्त्वद्यमेमंगलंपरम् ॥ त्वद्दृष्टयमृततृप्तस्यतृणंस्वर्गापवर्गदम् ॥ १ ॥ इत्थंवदतिगोविंदेविमलापद्मयातया ॥ मनोरथवतीनामभिक्षापात्रेसमर्पिता ॥ २ ॥ भिक्षाटनायदेवोपिनिरगात्परयामुदा ॥ दृष्ट्वाऽनुयायिनींतांतुसमाहूयजनार्दनः ॥ संप्रार्थयद्ब्रह्महत्यांविमुंचत्वंत्रिशूलिनम् ॥ ३ ॥ ॥ ब्रह्महत्योवाच ॥ ॥ अनेनापिमिषेणाऽहंसंसेव्यामुंवृषध्वजम् ॥ आत्मानंपावयिष्यामिक्कपुनर्भवदर्शनम् ॥ ४ ॥ सातत्याजनतत्पार्श्वंव्याहृतापिमुरारिणा ॥ तमूचेऽथहरिंशंभुःस्मेरास्योवचनंशुभम् ॥ ५ ॥ त्वद्वाक्पीयूषपानेनतृप्तोस्मिबहुमानद ॥ वरंवृणीष्वगोविंदवरदोऽस्मितवानघ ॥ ६ ॥ नमाद्यंतियथाभैक्षैर्भिक्षवोप्यतिसंस्कृतैः ॥ यथामानसुधापानैर्नुन्नभिक्षाटनज्वराः ॥ ७ ॥ महाविष्णुरुवाच ॥ ॥ एषएववरःश्लाघ्योयदहंदेवताधिपम् ॥ पश्यामित्वां देवदेवंमनोरथपथातिगम् ॥ ८ ॥ अनभ्रेयंसुधावृष्टिरनायासोमहोत्सवः ॥ अयत्नोनिधिलाभोयद्वीक्षणंहरतेसताम् ॥ ९ ॥ अवियोगोऽस्तुमेदेवत्वदंघ्रियुगलेनवै ॥ एषएववरःशंभोनान्यंकंचिद्वरंवृणे ॥ १० ॥ ईश्वरउवाच ॥ ॥ एवंभवतुतेऽनंतयत्त्वयोक्तंमहामते ॥ सर्वेषामपिदेवानांवरदस्त्वंभविष्यसि ॥ ११ ॥ अनुगृह्येतिदैत्यारिंकेंद्रादिभुवनेचरन् ॥ भेजेविमुक्तिजननींनाम्नावाराणसींपुरीम् ॥ १२ ॥

सितवदनः ॥ स्मेराक्षइतिपाठेविकसितनेत्रइत्यर्थः ॥ ५ ॥ ६ ॥ ननुमनोरथवतींभिक्षांत्यक्त्वाकिमितिवाक्सुधापानेनैवतृप्तिरावेद्यतेतत्राह ॥ नमाद्यंतीति ॥ नमाद्यंतिनहृष्यंति ॥ नुन्नभिक्षाटनज्वरागतभिक्षाटनक्लेशाः ॥ ननुभिक्षाटनज्वराइतिपाठे ननुनचविद्यतेभिक्षाटनज्वरोभिक्षाटनकृतोज्वरोयेषांतेतथेत्यर्थः ॥ ७ ॥ ८ ॥ ननुवरान्विहायकिमितिदर्शनमेवमृग्यतेतत्राह ॥ अनभ्रेति ॥ हेहरतेसतांत्वद्भक्तानाम् ॥ यद्वा सतांशिवविष्णवोरभेददर्शिनां तेतवयद्दर्शनं सतांतवचदर्शनमितिवा ॥ इयमनभ्रासुधावृष्टिर्वृष्टचपेक्षितसमयेमेघरहिताजलवृष्टिः ॥ निधिलाभःशेवधिलाभः ॥ ९ ॥ यतएवमतोऽवियोगोस्त्विवाति ॥ अथवातथापिममसंतोषार्थंकश्चिद्वरःप्रार्थ्यतामितिचेत्तत्राह ॥ अवियोगोस्त्विवाति ॥ अप्रार्थितमपिददाति ॥ सर्वेषामिति ॥ ११० ॥ ११ ॥ केंद्रादिभुवनेब्रह्मेंद्रादीनां

CC-0. In Public Domain. Digitization by eGangotri

लोके ॥ १२ ॥ प्रसंगात्काशींस्तौति यत्रस्थितानामित्यारभ्यक्षेत्रेप्रविष्टइत्यतःप्राक्तनेन ॥ पदानिसत्यलोकादिस्थानानि ॥ नार्हतीत्यत्रहेतुगर्भंविशेषणमाह ॥ विपदांपदमाश्रयः ॥ १३ ॥ जटीपाशुपतादिः ॥ मुंडीएकदंडयादिः ॥ दिगंबरोऽवधूतादिः ॥ १४ ॥ अन्यतोऽन्यत्र ॥ तद्भिक्षाशीवाराणसीभिक्षाभोजी ॥ १५ ॥ भिक्षेति ॥ यत्रकाश्यांसंन्यासिभ्यआमलकपरिमिता पिदत्तायाभिक्षासामेरुणातुलितातुलनार्थमुन्मानपात्रेधृतासतीवाराणस्यांभिक्षागुरुर्गुर्वीस्यादित्यर्थः ॥१६ ॥ सीदत्कुटुंबिनेक्षुधापीडितकलत्रादिमते ॥ इज्यतेदेवैरितिशेषः ॥१७॥ निरुपायिनेजीवनो पायरहिताय ॥ तृट्क्षुधासंपन्नंदुःखम् ॥ यद्वा तृदक्षुधास्तृषःक्षुधाश्चतदुभयजन्यंसामान्यंवादुःखंनोभुंक्तेनप्राप्नोतीत्यर्थः ॥ १८ ॥ संवासयितुःसम्यग्वासंकारयितुः ॥ तुएवअविकलमेवसमग्रमेवभवे

यत्रस्थितानांजंतूनांकलांनार्हतिषोडशीम् ॥ अपिब्रह्मादिदेवानांपदानिविपदांपदम् ॥ १३ ॥ वरंवाराणसीवासीजटीमुंडीदिगंबरः ॥ नान्यत्रच्छत्रसं छन्नवसुधामंडलेश्वरः ॥ १४ ॥ वरंवाराणसीभिक्षानलक्षाधिपताऽन्यतः ॥ लक्षाधीशोविशेद्गर्भंतद्भिक्षाशीनगर्भभाक् ॥ १५ ॥ भिक्षापियत्रभिक्षुभ्यो दत्तामलकसंमिता ॥ सुमेरुणापितुलितावाराणस्यांगुरुर्भवेत् ॥ १६ ॥ वर्षाशनंहियोदद्यात्काश्यांसीदत्कुटुंबिने ॥ यावंत्यब्दानितावंतियुगानिसदिवी ज्यते ॥ १७ ॥ वाराणस्यांवर्षभोज्यंयोदद्यान्निरुपायिने ॥ सकदाचित्तृट्क्षुधानोदुःखंभुंक्तेनरर्षभः ॥ १८ ॥ वाराणस्यांनिवसतांयत्पुण्यमुपजायते ॥ तदेवसंवासयितुःफलंत्वविकलंभवेत् ॥ १९ ॥ ब्रह्महत्यादिपापानियस्यानाम्नोपिकीर्तनात् ॥ त्यजंतिपापिनंकाशीसाकेनेहोपमीयते ॥ १२० ॥ क्षेत्रे प्रविष्टमात्रेऽथभैरवेभीषणाकृतौ ॥ हाहेत्युक्त्वाब्रह्महत्यापातालतलमाविशत् ॥ २१ ॥ कपालंब्रह्मणोरुद्रःसर्वेषामेवपश्यताम् ॥ हस्तात्पतितमालोक्यन नर्तपरयामुदा ॥ २२ ॥ विधेःकपालंनामुंचत्करमत्यंतदुःसहम् ॥ हरस्यभ्रमतःक्वापितत्काश्यांक्षणतोऽपतत् ॥ २३ ॥ शूलिनोब्रह्मणोहत्यानापैतिस्म चयाक्वचित् ॥ साकाश्यांक्षणतोनष्टाकथंकाशीनदुर्लभा ॥२४॥ अतःप्रदक्षिणीकार्यापूजनीयापुरीत्वियम् ॥ २५ ॥ वाराणसीतिकाशीतिमहामंत्रमिमं जपन् ॥ यावज्जीवंत्रिसंध्यंतुजंतुर्जातुनजायते ॥ २६ ॥ अविमुक्तंमहाक्षेत्रंस्मरन्प्राणांस्तुयस्त्यजेत् ॥ दूरदेशांतरस्थोपिसोपिजातुनजायते ॥ २७ ॥ आनंदकाननेयस्यचित्तंसंस्मरतेसदा ॥ तत्क्षेत्रनामश्रवणान्नसभूयोऽभिजायते ॥ २८ ॥ रुद्रावासेवसेन्नित्यंनरोनियतमानसः ॥ एनसामपिसंभारंकृत्वा कालाद्विमुच्यते ॥ २९ ॥

दित्यर्थः ॥ १९ ॥ नाम्नोपिकीर्तनात् ॥ किंपुनःप्रवेशनादिकादितिभावः ॥ १२० ॥ २१ ॥ रुतसंसारदुःखंभक्तानांद्रावयतीतिरुद्रःकालभैरवः ॥ २२ ॥ पुनरपिकाशींवर्णयति विधेरित्यारभ्यकपाल मोचनमित्यतःप्राक्तनेन ॥ २३ ॥ २४ ॥ २५ ॥ अविमुक्तस्यमंत्रद्वयमाह ॥ वाराणसीति ॥२६॥२७॥ आनंदेति ॥ काश्यांयस्यचित्तंसंस्मरतेसम्यक्स्मरतिकालभैरवमितिशेषः ॥ सतत्क्षेत्रनाम श्रवणादानंदकाननेतिनामश्रवणादपिभूयोनजायतइत्यर्थः ॥ आनंदकाननंतत्क्षेत्रनामस्मरणादितिचस्थलद्वयेपाठेस्पष्टएवार्थः ॥ २८ ॥ नियतमानसत्वंदुःशकमित्याशंक्यपक्षांतरमाह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एनसामपीति ॥ कालात्कालयतिक्षेत्रस्थानिपापानीतिकालंपंचक्रोश्यादिप्रदक्षिणंतस्मात् ॥ यद्वा कालाद्रुद्रपिशाचभोगानंतरमित्यर्थः ॥ २९ ॥ १३० ॥ कपालमोचनमिति ॥ इहकाश्या मन्यत्रापिकृतंयत्पातकंतत्सर्वमित्यर्थः ॥ ३१ ॥ तीर्थप्रवरेकपालमोचने ॥ ३२ ॥ ३३ ॥ अनिर्वाच्यावागगोचरा ॥ ३४ ॥ मुच्यंतेविदेहकैवल्यंप्राप्नुवंतीत्यर्थः ॥ योगेनब्रह्मात्मनोरैक्यज्ञानेन ॥ ॥ ३५ ॥ परंपदमित्यादिसाधनेसाध्योपचारात् ॥ ३६ ॥ विरुणद्धिविशेषेणावृणोतिपीडयतीतियावत् ॥ निरुणद्धीतिपाठेपिसएवार्थः ॥ अत्रोषित्वापीशभक्तैर्विरोधंचाचरेत्तुयइतिक्वचित्पाठः ॥ ३७ ॥ पापभक्षणामर्दकेतिनामद्वयंनिर्वक्ति कपालमोचनमितित्रिभिः ॥ तत्रैवमंदाकिन्यादक्षिणतटप्रदेशएव ॥ इदमायतनंश्रेष्ठंमणिमाणिक्यनिर्मितम् ॥ श्रीमतःकालराजस्यकलिकालार्तिहारिणः ॥ निज भक्तजनंपातियःपापात्पापभक्षणः॥क्षेत्रविघ्नकरान्पापान्यातयन्यातनाशतैः॥इयंमंदाकिनीरम्यातपस्तप्तुमिहागता॥काशीवाससुखंप्राप्यनाद्यापिदिवमीहतेइत्यग्रेवक्ष्यमाणत्वात्॥ कालोदतीर्थस्यात्रैवसर्व

महाश्मशानमासाद्ययदिदैवाद्विपद्यते ॥ पुनःश्मशानशयनंनक्वापिलभतेपुमान् ॥ १३० ॥ कपालमोचनंकाश्यांयेस्मरिष्यंतिमानवाः ॥ तेषांविनंक्ष्य तिक्षिप्रमिहान्यत्रापिपातकम् ॥ ३१ ॥ आगत्यतीर्थप्रवरेस्नानंकृत्वाविधानतः ॥ तर्पयित्वापितॄन्देवान्मुच्यतेब्रह्महत्यया ॥ ३२ ॥ अशाश्वतमिदं ज्ञात्वावाराणस्यांवसंतिये ॥ देहांतेतत्परंज्ञानंतेषांदास्यतिशंकरः ॥ ३३ ॥ इयंकाशीपुरीविप्रसाक्षाद्ब्रह्मतनुःपरा ॥ अनिर्वाच्यापरानंदादुष्प्राप्येशविरो धिभिः ॥ ३४ ॥ अस्यास्तत्त्वमहंजानेशिवभक्तिपरोपिवा ॥ मुच्यंतेजंतवोऽत्रैवयथायोगेनयोगिनः ॥ ३५ ॥ परंपदमियंकाशीपरानंदइयंपुरी ॥ इयमेवपरंज्ञानंसेव्याऽसौमोक्षकांक्षिभिः ॥ ३६ ॥ अत्रोषित्वापीशभक्तान्विरुणद्धितुयःकुधीः ॥ पुर्यैद्रुह्यतिवामूढस्तस्यान्यत्रात्रनोगतिः ॥ ३७ ॥ कपालमोचनंतीर्थंपुरस्कृत्यातुभैरवः ॥ तत्रैवतस्थौभक्तानांभक्षयन्नघसंततिम् ॥ ३८ ॥ पापभक्षणमासाद्यकृत्वापापशतान्यपि ॥ कुतोबिभेतिपापेभ्यः कालभैरवसेवकः ॥ ३९ ॥ आमर्दयतिपापानिदुष्टानांचमनोरथान् ॥ आमर्दकइतिख्यातस्ततोऽसौकालभैरवः ॥ ४० ॥ कलिंकालंकलयतिसदाकाशी निवासिनाम् ॥ अतःख्यातिंपरांप्राप्तःकालभैरवसंज्ञिताम् ॥ ४१ ॥ सदैवयस्यभक्तेभ्योयमदूताःसुदारुणाः ॥ परमांभीरुतांप्राप्तास्ततोसौभैरवःस्मृतः ॥ ४२ ॥ मार्गशीर्षासिताष्टम्यांकालभैरवसंनिधौ ॥ उपोष्यजागरंकुर्वन्महापापैःप्रमुच्यते ॥ ४३ ॥

लोकाऽनादिसिद्धत्वात् ॥ कुलस्तंभस्थलंतुयातनास्थलम् ॥ एतदप्युक्तंतत्रैव ॥ अयंसहिकुलस्तंभोयत्रश्रीकालभैरवः॥क्षेत्रपापकृतःशास्तिदर्शयंस्तीव्रयातनामिति ॥ ३८ ॥ ३९ ॥ ४० ॥ प्रकारां तरेणकालभैरवनामनिर्वक्ति ॥ कलिमिति ॥ काशीनिवासिनांकलिंकलिनामानंकालंयुगंकलयतिनाशयतिअतोसौकालःस्मृतइतिशेषः ॥ अतःख्यातिमित्यर्धंततोसौभैरवःस्मृतइतिद्वितीयश्लोकस्यां नंतरंज्ञातव्यम् ॥ यद्वा ननुयथाश्रुतव्युत्पत्त्यनुसारेणकालसंज्ञितामितिवक्तव्येकथंकालभैरवसंज्ञितामित्युक्तं तत्राह ॥ सदैवेति ॥ अग्रेवक्ष्यमाणस्यप्रथमंसिद्धवन्निर्दिष्टत्वान्नायंदोषइतिभावः ॥ अथवाकलयतिभीरुतांप्रापयतीत्यर्थः ॥ तदाऋजुरेवार्थःश्लोकस्य ॥ ४१ ॥ इदानींप्रकारांतरेणभैरवनामव्युत्पादयति ॥ सदैवेति ॥ भक्तेभ्यएवबिभ्यतिकिंपुनस्तस्मादितिभावः ॥ ४२ ॥ कथ माराधितश्चेपश्चाराधितःकुत्रकालइतिपंचमषष्ठप्रश्नयोरुत्तरमाह मार्गशीर्षेत्यादिना ॥ मार्गशीर्षाऽसिताष्टम्यामाग्रहायणिककृष्णाष्टम्याम् ॥ महापापैःकाश्यांकृतैः ॥ बहिःकृतानांप्रवेशमात्रेण

CC-0. In Public Domain. Digitization by eGangotri

नाशात् ॥ ४३ ॥ यत्किंचित्काशीकृतमित्येव ॥ दर्शनादत्र ॥ ४४ ॥ ४५ ॥ वार्षिकंविघ्नमितिसाधारणम् ॥ क्षेत्रस्थंबहिःस्थंचेत्यर्थः ॥ ४६ ॥ भूमिजोमंगलस्तस्यचवासरे ॥ ४७ ॥ ४८ ॥
॥ ४९ ॥ अत्वरस्त्वराराहितः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ प्रतिभूताष्टमीकुजामिति ॥ भूताचचतुर्दशीअष्टमीचकुजश्चमंगलवासरस्तेतथाभूताष्टमीकुजाःभूताष्टमीकुजान्प्रतीतिप्रति
भूताष्टमीकुंजंनभजेदित्यन्वयः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकात्रिंशोध्यायः ॥ ३१ ॥ ॥छ॥ ॥ द्वाविंशतितमेध्यायेसर्वपापैकनाशके ॥ हरिके

यत्किंचिदशुभंकर्मकृतंमानुषबुद्धितः ॥ तत्सर्वंविलयंयातिकालभैरवदर्शनात् ॥४४॥ अनेकजन्मनियुतैर्यत्कृतंजंतुभिस्त्वघम् ॥ तत्सर्वंविलयत्याशुका लभैरवदर्शनात् ॥ ४५॥ कृत्वाचविविधांपूजांमहासंभारविस्तरैः ॥ नरोमार्गासिताष्टम्यांवार्षिकंविघ्नमुत्सृजेत् ॥ ४६ ॥ अष्टम्यांचचतुर्दश्यांरविभूमिज वासरे ॥ यात्रांचभैरवींकृत्वाकृतैःपापैःप्रमुच्यते ॥ ४७ ॥ कालभैरवभक्तानांसदाकाशीनिवासिनाम् ॥ विघ्नंयःकुरुतेमूढःसदुर्गतिमवाप्नुयात् ॥ ४८ ॥ विश्वेश्वरेपियेभक्तानोभक्ताःकालभैरवे ॥ काश्यांतेविघ्नसंघातंलभंतेतुपदेपदे ॥ ४९ ॥ तीर्थेकालोदकेस्नात्वाकृत्वातर्पणमत्वरः ॥ विलोक्यकालराजं चनिरयादुद्धरेत्पितॄन् ॥ ५० ॥ अष्टौप्रदक्षिणीकृत्यप्रत्यहंपापभक्षणम् ॥ नरोनपापैर्लिप्येतमनोवाक्कायसंभवैः ॥५१॥ तस्मिन्नामर्दकेपीठेजप्त्वास्वाभी ष्टदेवताम् ॥ षण्मासंसिद्धिमाप्नोतिसाधकोभैरवाज्ञया ॥ ५२ ॥ वाराणस्यामुषित्वायोभैरवंनभजेन्नरः ॥ तस्यपापानिवर्धंतेशुक्लपक्षेयथाशशी ॥५३॥ यंयंसंचिंतयेत्कामंपापभक्षणसेवया ॥ बलिपूजोपहारैश्चतंतंससमवाप्नुयात् ॥ ५४ ॥ कालराजंनयःकाश्यांप्रतिभूताष्टमीकुजम् ॥ भजेत्तस्यक्षयेत्पुण्यं कृष्णपक्षेयथाशशी ॥ ५५ ॥ श्रुत्वाध्यायमिमंपुण्यंब्रह्महत्यापनोदकम् ॥ भैरवोत्पत्तिसंज्ञंचसर्वपापैःप्रमुच्यते ॥ ५६ ॥ बंधनागारसंस्थोपिप्राप्तोपि विपदंपराम् ॥ प्रादुर्भावंभैरवस्यश्रुत्वामुच्येतसंकटात् ॥ ५७॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेभैरवप्रादुर्भा वोनामैकत्रिंशोध्यायः ॥ ३१ ॥ ॥ अगस्त्यउवाच ॥ ॥ बर्हियानसमाचक्ष्वहरिकेशसमुद्भवम् ॥ कोसौकस्यसुतःश्रीमान्कीदृगस्यतपोमहत् ॥ १ ॥ कथंचदेवदेवस्यप्रियत्वंसमुपेयिवान् ॥ काशीवासिजनीनोभूत्कथंवादंडनायकः ॥ २ ॥ एतदिच्छाम्यहंश्रोतुंप्रसादंकुरुमेविभो ॥ अन्नदत्वंचसंप्राप्तः कथमेषमहामतिः ॥ ३ ॥

शसमुत्पात्तिर्वर्ण्यतेऽतिमनोहरा ॥ १ ॥ एवंभूतोजितेंद्रियोप्यहंक्षेत्राद्बहिर्निष्कासितःकालराजवदनेनापीतिपरमाश्चर्येणदंडपाणेरप्युत्पत्त्यादिकंपृच्छाति बर्हीतिचतुर्भिः ॥ बर्हियानमयूररथ ॥ १ ॥
समुपेयिवान्प्राप्तवान् ॥ काशीवासिजनीनोऽभूत्काशीवासिजनेषुप्रख्यातोभूत् ॥ काशीवासिजनेष्वासीदितिक्वचित्पाठः ॥ दंडनायकोदंडधर्ता ॥ २ ॥ अन्नदत्वंचकाशीवासिजनेष्वित्येव ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृणामित्युपलक्षणंक्षेत्रवैरिमात्राणामित्यर्थः ॥ तत्रप्रथमश्लोकेप्रश्नचतुष्टयंद्वितीयेद्वयंतृतीयेएकश्चतुर्थेचैकइत्यष्टौप्रश्नाः ॥ ४ ॥ प्रश्नमभिनंदति ॥ सम्यगिति ॥ सम्यगासमंताद्धितंसमा हितम् ॥ सदाहितमितिक्वचित् ॥ कथानकमाभाषणंकथेत्यर्थः ॥ कथात्मकामितिपाठेकथारूपामित्यर्थः ॥ ५ ॥ कथानकमेवविशेषयन्श्रोतृप्ररोचनायतच्छ्रवणफलमाह ॥ यदाकर्ण्येति ॥ नरोमनुष्यमात्रः ॥ हेप्राज्ञेतिसाभिप्रायसंबोधनम् ॥ एतादृक्प्रश्नःपंडितस्यतवोचितइतिभावः ॥ ६ ॥ प्रथमप्रश्नत्रयस्यप्रत्युत्तरंवक्तुमाख्यायिकामाह ॥ रत्नभद्रइति ॥ यक्षोदेवयोनिविशेषः ॥ सुकृतंलक्षयतीतिसुकृतलक्षातथाविधाश्रीर्यस्यसतथोक्तः ॥ तत्रहेतुः ॥ परमधार्मिकइति ॥ ७ ॥ ८ ॥ शांभवेनशिवध्यानात्मकेन ॥ शांताःसर्वेंद्रियार्थाविषयायस्यसशांतसर्वेंद्रियार्थकः ॥ स्वार्थकः ॥ त्यक्तेतिक्वचित् ॥ ९ ॥ पितरीति ॥ पितरिमृतेऽनंतरंसपूर्णभद्रोऽपत्यंविनासर्वान्मनोरथाँल्लेभइत्यग्रिमेणान्वयः ॥ कथंभूतः महायशाबृहत्कीर्तिः ॥ पुनःकीदृशः ॥ सुकृतेनोपात्ताये

संभ्रमोविभ्रमश्चोभौकथंतदनुगामिनौ ॥ विभ्रांतिकारिणौक्षेत्रवैरिणांसर्वदानृणाम् ॥ ४ ॥ ॥ स्कंदउवाच ॥ ॥ सम्यगापृच्छिभवताकाशीवासिसमा हितम् ॥ कुंभसंभवविप्रर्षेदंडपाणिकथानकम् ॥ ५ ॥ यदाकर्ण्यनरःप्राज्ञकाशीवासस्ययत्फलम् ॥ निष्प्रत्यूहंतदाप्नोतिविश्वभर्तुरनुग्रहात् ॥ ६ ॥ रत्नभद्रइतिख्यातःपर्वतेगंधमादने ॥ यक्षःसुकृतलक्षश्रीःपुरापरमधार्मिकः ॥ ७ ॥ पूर्णभद्रंसुतंप्राप्यसोऽभूत्पूर्णमनोरथः ॥ वयश्चरममासाद्यभुक्त्वाभो गाननेकशः ॥ ८ ॥ शांभवेनाथयोगेनदेहमुत्सृज्यपार्थिवम् ॥ आससादाशवंशांतंशांतसर्वेंद्रियार्थकः ॥ ९ ॥ पितर्युपरतेसोऽथपूर्णभद्रोमहायशाः ॥ सुकृतोपात्तविभवभवसंभोगभुक्तिभाक् ॥ १० ॥ सर्वान्मनोरथाँल्लेभेविनास्वर्गैकसाधनम् ॥ गार्हस्थ्याश्रमनेपथ्यंपथ्यंपैतामहंमहत् ॥ ११ ॥ संसार तापसंतप्तावयवामृतसीकरम् ॥ अपत्यंपततांपोतंबहुक्लेशमहार्णवे ॥ १२ ॥ पूर्णभद्रोऽथसंवीक्ष्यमंदिरंसर्वसुंदरम् ॥ तद्बालकोमलालापविकलंत्यक्तमं गलम् ॥ १३ ॥ शून्यंदारिद्र्यहृदिवजीर्णारण्यमिवाथवा ॥ पांथवत्प्रांतरमिवखिन्नोऽतीवानपत्यवान् ॥ १४ ॥ आहूयगृहिणींसोऽथयक्षःकनककुंडलाम् ॥ उवाचयक्षिणींश्रेष्ठांपूर्णभद्रोघटोद्भव ॥ १५ ॥ नहर्म्यंसुखदंकांतेदर्पणोदरसुंदरम् ॥ मुक्तागवाक्षसुभगंचंद्रकांतशिलाजिरम् ॥ १६ ॥ पद्मरागेंद्रनीला र्चिरर्चिताट्टालकंक्वणत् ॥ विद्रुमस्तंभशोभाढ्यंस्फुरत्स्फटिककुड्यवत् ॥ १७ ॥

विभवाःसमृद्धयस्तैर्येभवसंभोगाःसांसारिकाभोगास्तेषांभुक्तिंभजतइतितथा ॥ १० ॥ अपत्यंविशिनष्टि स्वर्गैकसाधनमिति षडक्षराधिकेनसार्धेन ॥ नेपथ्यंभूषणम् ॥ पैतामहंमहत्पथ्यंपितामहादी नामत्यंतहितकरमित्यर्थः ॥११॥ संसारतापैःसंतप्ताअवयवायेषांतेषाममृतसीकरंसुधाकणम् ॥ पततांबहुक्लेशमहार्णवेसंसारसागरेमज्जतांपोतंनावम् ॥१२॥ पूर्णभद्रइति॥ पूर्णभद्रःस्वर्गैकसाधनमपत्यं विनामंदिरंसंवीक्ष्यकनककुंडलामाहूयोवाचेतितृतीयेनान्वयः ॥ तत्प्रसिद्धंमंदिरमित्यन्वयः ॥ विकलंरहितम् ॥१३॥ शून्यमितिदृष्टांतत्रयेणसंबध्यते ॥ पांथवत्पांथस्येव ॥१४॥ पूर्णभद्रइतिपुनरुक्तिर न्वयार्था ॥ पूर्णंसंपूर्णभद्रंयस्यसतथेतिवा ॥ १५ ॥ किमुवाचतदाह ॥ नहर्म्यमिति ॥ हर्म्यंविशिनष्टि दर्पणेत्यादिना।गर्भरूपेत्यतःप्राक्तनेनग्रंथेन ॥ गवाक्षंभित्तिच्छिद्रम् ॥ अजिरमंगणम् ॥ ॥ १६ ॥ पद्मरागाणामिंद्रनीलानांचार्चिर्भिर्दीप्तिभिरर्चिताअत्युज्ज्वलाअट्टालकायस्मिंस्तत् ॥ क्वणत्शब्दायमानंप्रतिस्वनवदित्यर्थः ॥ विद्रुमःप्रवालः ॥ कुड्यंभित्तिः ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रेंखत्पताकानिकरंप्रेंखंतीनांचलंतीनांपताकानांनिकरःसमूहोयस्मिंस्तत् ॥ कृष्णागुरुभिःकालागुरुभिर्योमहाधूपस्तेनजातोयोबहुलामोदोमहान्गंधस्तेनमोदितमामोदितम् ॥१८॥ पर्यंकानिखट्वाः ॥ अर्गलानिपरिघाः ॥ १९ ॥ राजिःसमूहः ॥ क्वणदित्युक्तंविवृणोति किंकिणीनादनादितमित्यादिना ॥ यद्वा क्वणदितिवेदाध्ययनादिभिरितिज्ञातव्यम् ॥ २० ॥ नूपुरारावेणसोत्कंठायेकेकिनो मयूरास्तेषांकेकारवैराकुलंव्याप्तम् ॥ गुरुमहत् ॥ सारिसारीकाक्रीडापक्षिणी ॥ शुकसारीतिक्वचित् ॥ २१ ॥ खेलत्क्रीडत्मरालयुगलंहंसयुग्मंयस्मिंस्तत् ॥ जीवंजीवकैश्चकोरैःकांतिमत्शो भायुक्तम् ॥ माल्यानांगंधैराकृष्टत्वाद्भ्रमराणांमाल्याहूतद्विरेफाणामित्युक्तम् ॥ तेषांमंजुगुंजैर्मनोहराव्यक्तैरासमंताद्रवैरावृतम् ॥ २२ ॥ कर्पूरैणमदयोर्यआमोदस्तेनसहितमुदरंयस्यतेनानिले नवीजितम् ॥ क्रीडावानरैर्दंष्ट्राग्रीकृतानिमणिमाणिक्यान्येवमणिमाणिक्यमयानिवादाडिमानियस्मिन् ॥ अथवाखेलावलीमुखैर्दंष्ट्राग्रीकृतानिमाणिक्यानिदाडिमफलानीवयस्मिन् ॥ २३ ॥

प्रेंखत्पताकानिकरंमणिमाणिक्यमालितम् ॥ कृष्णागुरुमहाधूपबहुलामोदमोदितम् ॥ १८ ॥ अनर्घ्यासनसंयुक्तंचारुपर्यंकभूषितम् ॥ रम्यार्गलकपाटाढ्यंदुकूलच्छन्नमंडपम् ॥ १९ ॥ सुरम्यरतिशालाढ्यंवाजिराजिविराजितम् ॥ दासदासीशताकीर्णंकिंकिणीनादनादितम् ॥ २० ॥ नूपुरारावसोत्कंठकेकिकेकारवाकुलम् ॥ कूजत्पारावतकुलंगुरुसारीकथावरम् ॥ २१ ॥ खेलन्मरालयुगलंजीवंजीवककांतिमत् ॥ माल्याहूतद्विरेफाणांमंजुगुंजारवावृतम् ॥ २२ ॥ कर्पूरैणमदामोदसोदरानिलवीजितम् ॥ क्रीडामर्कटदंष्ट्राग्रीकृतमाणिक्यदाडिमम् ॥ २३ ॥ दाडिमीबीजसंभ्रांतशुकतुंडात्तमौक्तिकम् ॥ धनधान्यसमृद्धंचपद्मालयमिवापरम् ॥ २४ ॥ कमलामोदगर्भंचगर्भरूपंविनाप्रिये ॥ गर्भरूपमुखंप्रेक्ष्येकथंकनककुंडले ॥ २५ ॥ यद्युपायोऽस्तितद्ब्रूहिधिगपुत्रस्यजीवितम् ॥ सर्वशून्यमिवाभातिगृहमेतदनंगजम् ॥ २६ ॥ धिगेतत्सौधसौंदर्यंधिगेतद्धनसंचयम् ॥ विनापत्यंप्रियतमेजीवितंचधिगावयोः ॥ २७ ॥ प्रलपंतमिवप्रोच्चैःप्रियंकनककुंडला ॥ बभाषेंऽतर्विनिःश्वस्ययक्षिणीसापतिव्रता ॥ २८ ॥ ॥ कनककुंडलोवाच ॥ ॥ किमर्थंखिद्यसेकांतज्ञानवानसियद्भवान् ॥ अत्रोपायोऽस्त्यपत्यास्त्यैविस्रब्धमवधारय ॥ २९ ॥ किमुद्यमवतांपुंसांदुर्लभंहिचराचरे ॥ ईश्वरार्पितबुद्धीनांस्फुरंत्यग्रेमनोरथाः ॥ ३० ॥ दैवंहेतुंवदंत्येवंभृशंकापुरुषाःपते ॥ स्वयंपुराकृतंकर्मदैवंतच्चनहीतरत् ॥३१॥ ततःपौरुषमालंब्यतत्कर्मपरिशांतये ॥ ईश्वरंशरणंयायात्सर्वकारणकारणम् ॥ ३२ ॥

दाडिमीबीजानीतिसंभ्रांतैःशुकैस्तुंडैःकृत्वाआत्तानिगृहीतानिमौक्तिकानियस्मिंस्तत् ॥ एतेनविशेषणद्वयेनमाणिक्यानांमुक्ताफलानांचबाहुल्यंसूचितम् ॥ २४ ॥ कमलानांकमलायावाआमोदआमोदोहर्षोवायस्मिन् ॥ गर्भरूपमुखंपुत्रमुखम् ॥ गर्भस्यापत्यस्यरूपयुक्तंमुखमितिवा ॥ २५ ॥ यद्युपायोऽस्तिपुत्रोत्पत्ताविति शेषः ॥ नविद्यतेंगजःपुत्रोयस्मिंस्तत् ॥ २६ ॥ २७ ॥ प्रलपंतमितिलोकोक्तिः ॥ प्रोच्चैरिवेतिवान्वयः ॥ अन्तर्मनसि ॥ २८ ॥ यद्यतः ॥ २९ ॥ ३० ॥ नन्वदृष्टमेवफलसिद्धौकारणंकिमुद्यमेनतत्राह ॥ दैवमिति ॥ दैवमेवहेतुरितियद्वदंतीत्यर्थः ॥ एवमिति ॥ दैवंहेतुरेवंकापुरुषावदंतीत्यन्वयः ॥ एवंवदनेकुतस्तेषांकुत्सितपुरुषत्वंतत्राह ॥ तच्चतत्पुनर्दैवंहियस्मात्पुराश्वयंकृतंकर्मनेतरदिति ॥ ३१ ॥ पुरुषकारस्यकारणत्वेरिथतेफ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लितमाह ॥ ततइति ॥ तत्पापपुण्यलक्षणंकर्मयस्मात्तत्तत्कर्मअज्ञानंपुराकृतंकर्मेतिवातस्यपरिशांतयेनाशायईश्वरंशरणंयायाद्गच्छेदिति ॥ ३२ ॥ नकेवलमेतावदपित्वपत्यमिति ॥ ३३ ॥ विधातुरिति ॥ शांभवींभक्तिंविधातुःकर्तुर्यस्यकस्यचिदित्यर्थः ॥ ३४ ॥ तदेवदर्शयति नारायणोपीत्यादिना ॥ ३५ ॥ ३६ ॥ मृत्युंजयतीतिमृत्युंजयंसुतंनंदिनंशिलमत्तीतिशिलादःकश्चि द्दषिर्लेभेलब्धवानिति ॥ शंभोरनुग्रहादित्यनुषज्जते ॥ उत्तरत्राप्यस्ययथासंभवमन्वयः ॥ एवंहिलैंगेश्रूयते ॥ शालंकायनात्मजःशिलादनामामुनिर्बहुकालंतपस्तेपे ततस्तपसातुष्टेनदेवराजेनागत्यवरं वरयेत्यभिहितम् ॥ शिलादोप्ययोनिजंमृत्युहीनंसुव्रतंपुत्रंवव्रे॥तच्छ्रुत्वेंद्रेणाभ्यधायि ॥ योनिजंमृत्युसंयुतंपुत्रंदास्याम्यन्यंनदास्यामियतोऽयोनिजामृत्युहीनानसंति यतःपितामहोप्ययोनिजोमृत्युहीनश्च नभवतिसोपिअंडजःपद्मजोमहादेवांगजोभवान्यास्तनयःपरार्धद्वयनाशेनश्यतिचेतिश्रूयते किमुतान्यस्यवार्ता किंतुयदिदेवेश्वरोरुद्रःप्रसीदतितदामृत्युहीनोऽयोनिजःपुत्रोदुर्लभोनभवति अन्यथामयावा ब्रह्मणावाविष्णुनावैतादृशःपुत्रोदातुंनशक्यइत्येवंतमनुगृह्यमहेंद्रोययौ॥ ततोमहेंद्रेगतेभवमाराधयतःशिलादस्यदिव्यंवर्षसहस्रत्रयंक्षणमिवगतम् ततोवल्मीकेनावृतांगंतक्षिस्त्रीगणैर्वज्रसूचीमुखैश्चान्यैरक्त स्त्रीभिश्वसर्वतोनिर्मांसरुधिरत्वचंविज्ञायसगणःसोमःप्रादुरभूत् तपसाऽलंसर्वज्ञंसर्वशास्त्रार्थपारगंपुत्रंदास्यामीतिचोक्तवान् ततोभवंप्रणम्यशिलाशनउवाचायोनिजंमृत्युहीनंसुव्रतंपुत्रमिच्छामीति ततः श्रीरुद्रःप्राह पुराममावतारार्थंब्रह्मणामुनिभिर्देवैश्चाहमाराधितोऽतोहमेवायोनिजोमृत्युहीनोनंदिनामातवपुत्रोभविष्यामीति ततोयज्ञांगणंकर्षतःशिलादस्यशंभोराज्ञयानंदिकेश्वरोजातइति ॥ तथाहि ॥

अपत्यंद्रविणंदाराहाराहर्म्यंहयागजाः ॥ सुखानिस्वर्गमोक्षौचनदूरेशिवभक्तितः ॥ ३३ ॥ विधातुःशांभवींभक्तिंप्रियसर्वेमनोरथाः ॥ सिद्धयोष्टौगृहद्वारंसे वंतेनात्रसंशयः ॥ ३४ ॥ नारायणोपिभगवानंतरात्माजगत्पतिः ॥ चराचराणामविताजातःश्रीकंठसेवया ॥ ३५ ॥ ब्रह्मणःसृष्टिकर्तृत्वंदत्तंतेनैवशंभुना ॥ इंद्रादयोलोकपालाजाताःशंभोरनुग्रहात् ॥ ३६ ॥ मृत्युंजयंसुतंलेभेशिलादोप्यनपत्यवान् ॥ श्वेतकेतुरपिप्रापजीवितंकालपाशतः ॥ ३७ ॥ क्षीरार्ण वाधिपतितामुपमन्युरवाप्तवान् ॥ अंधकोप्यभवद्भृंगीगाणपत्यपदोर्जितः ॥ ३८ ॥

सनत्कुमारंप्रतिनंदिकेश्वरवाक्यम् ॥ प्रजाकामःशिलादोऽभूत्पितामममहामुने ॥ सोपीहसुचिरंकालंतपस्तेपेसुदुश्चरामित्यादि ॥ ग्रंथगौरवभयात्समग्रंनलिख्यते ॥ एवमग्रेपि ॥ श्वेतकेतुरितितस्यैव नामांतरम् ॥ कालपाशितःकालेनपाशेनबद्धः ॥ एवंहिश्रूयतेतत्रैव ॥ श्वेतोनामकश्चिन्मुनिर्गतायुर्गिरिगह्वरेमहादेवमभ्यर्च्यस्तौतिस्म ततश्चप्राप्तकालंतंनेतुंकालःसान्निध्यमकरोत् तदाप्राप्तकालोपि श्वेतस्तंकालंदृष्ट्वाविश्वेशमभ्यर्चतोमेवराकःकालःकिंकरिष्यति यतोमृत्योरपिमृत्युरहंस्थितोऽस्मीतिभावयन्शंकरमनुस्मरन्शंकरंपूजयामास तंतादृशंनिर्भयंदृष्ट्वाकालःसस्मितमाह हेविप्रएह्येहिकिमन यापूजया यतोममाग्रतस्त्वांब्रह्मविष्णुमहेश्वराअपिपरित्रातुंनशक्नुवंति अनेनरुद्रेणममकिम् विधिवशादेवयस्माद्गतासुस्त्वंतस्मात्त्वांनेतुमहमुद्यतइति ततस्तस्यधर्ममिश्रितंभयंकरमेवंश्रुत्वासमुनिर्हारुद्रेति विललाप पश्चादेकयादृशाबाष्पमिश्रयासंप्रेक्ष्योवाचास्मिँल्लिंगेममवृषध्वजःस्वस्त्यस्तिचेत्त्वयाविधिनावाकिम् तस्माद्यथागतंतथागच्छ तदनंतरंतद्वचनंश्रुत्वातीक्ष्णदंष्ट्रोभयंकरःकालःपाशहस्तःसिंहनादं कृत्वामुहुर्मुहुरास्फोटचकालप्राप्तंतंमुनिंबबंधआहच मयात्वंबद्धोसियमालयंनेतुंतवरुद्रेणममाकिंकृतमद्यक्कवासरुद्रस्तवभक्तिर्वाकुत्रपूजावाकुत्रपूजाफलंवाकुत्राहंवाक्कममभीतिर्वाक्कातोऽस्मिँल्लिंगेचेत्तवशंक रःकथंनिश्चेष्टइतिकथय तदनंतरंनंदिनागणेश्वरैश्चसहद्विजंनिहंतुमागतंकालंनिहंतुं भगवान्लिंगात्प्रादुर्बभूव ततश्चकालस्तंरुद्रंनिरीक्ष्यक्षणाज्जीवितंविससर्जपपातचेति ॥ तथाहि ॥ श्वेतोनाममुनिः श्रीमान्गतायुर्गिरिगह्वरइत्यादि ॥३७॥ क्षीरार्णवाधिपतितामिति ॥ एवंहिमहाभारतेश्रूयते ॥ उपमन्युःकिलदुग्धंपिबतोमुनिकुमारान्दृष्ट्वामातरंदुग्धंनिर्बंधेनयाचितवान् तन्माताचदारिद्र्यवशाद्दुग्धा

CC-0. In Public Domain. Digitization by eGangotri

भावात्पिष्टेनदुग्धंनिर्मायादात् तत्पीत्वासौननर्त्त तदेतत्सर्वंज्ञात्वावालाजहसुः ततोहास्यकारणंपृष्टवतेतस्मैस्वदारिद्र्यंमातान्यवेदयत् ॥ तज्ज्ञात्वाश्रीमहादेवमाराध्यदुग्धसागराधिपत्यंसलेभइति॥अंधकी
पीति ॥ एवंहिवामनपुराणेश्रूयते ॥ अंधकोहिंदैत्याधिपस्तत्संनिधौनारदःसमागम्यवहुधातंस्तुत्वोवाच त्वंपुरुषरत्नंत्वत्सदृशंतवस्त्रीरत्नंनास्ति ततस्तेनोक्तम् तर्हिंब्रह्मन्कथयकुत्रमत्सदृशंस्त्रीरत्नंवि
द्यतइति तदानारदेनोक्तंब्रह्मांडेत्रयमेवस्त्रीरत्नंविद्यते ॥ सत्यलोकेसावित्री वैकुंठेलक्ष्मीः मर्त्यभूमौकैलासेचपार्वतीति ॥ तत्रत्वंसामर्थ्यंचेन्निकटवर्त्तित्वात्पार्वतींसमानयेति ॥ ततःसकामाभिभूतःपार्वती
मभिलष्यप्रमथैःसार्धंवारंवारंवहुयुद्धंकुर्वन्नेकदेश्वरेणवर्षाणामयुतंत्रिशूलाग्रेप्रोतआतपेनातिशुष्कईश्वरध्यानेननिष्पापःसन्नीश्वरंतुष्टाव ततोमहेशेनानुगृहीतःपुत्रंपरिकल्प्यदेव्यादत्तस्ततःसगणानामाधिप
त्येपदेऊर्जितउद्रिक्तोभृंगीशोनामवभूवेति ॥ ३८ ॥ जिगायशार्ङ्गिणमिति ॥ अत्रैवंकथालैंगे ॥ ब्रह्मणःक्षुतसंभवस्यलब्धवज्रस्यस्वकार्यार्थमिंद्रप्रेरणयास्वेच्छयैवनरशरीरेणसंजातनरपालस्यक्षुप
स्यच्यवनात्मजस्यदधीचस्यचक्षत्रियएवश्रेष्ठोविप्रएवश्रेष्ठइतिमित्रभावेनचिरप्रसंगाद्विवादोऽभूत्ततः कदाचिदष्टलोकपालानांवपुर्वयोधारयतोऽहमिंद्रोहंवह्निरहंयमादिरीश्वरइतित्वयाच्यावनेनाहंनावमंतव्यः
किंतुसदासंपूजनीयइतितस्यक्षुपस्यमतंश्रुत्वादधीचआत्मनोमहत्त्वाद्वाममुष्ट्याक्षुपंमूर्ध्निन्यताडयत् ततश्चक्रोधात्क्षुपोवलवांस्तपोऽन्वितोवज्रधरतुल्योवज्रेणदधीचंचिच्छेद ततोदधीचोभूमौनिपपात पति
त्वाचदुःखाच्छुक्रंसस्मार शुक्रोप्यागत्यदधीचस्यदेहंयोगवलात्संधयामास आहच भोदधीचोमापतिंसमाराध्यावध्योभव मयापिमृतसंजीवनीविद्याततएवलब्धा शंभुभक्तानांमृत्युभयंनास्त्येव मृतसं
जीवनीमपितुभ्यमहंददामीतिमृतसंजीवनमंत्रंकथितवान् तस्यतद्वाक्यंश्रुत्वातपसाशंकरमाराध्यवज्रास्थित्वमवध्यत्वंचावाप एवंपरमेश्वरमाराध्यावध्यत्वंवज्रास्थित्वंचप्राप्यपादमूलेनराजेंद्रंसभायांमूर्ध्नि
प्रयत्नतोऽताडयत् ततःक्षुपोदधीचंपुनरपिवज्रेणताडयामास तत्ताडनंतस्यवज्रबद्धशरीरस्यपरमेशस्यप्रभावान्मनागपिदुःखायनाभूत् तदादधीचस्यावध्यत्वमहीनत्वंचदृष्ट्वाक्षुपोविष्णुंपूजयामास पूजया

जिगायशार्ङ्गिणंसंख्येदधीचिःशंभुसेवया ॥ प्राजापत्यपदंप्रापदक्षः संशील्यशंकरम् ॥ ३९ ॥

चसंतोषेणदत्तदर्शनंभगवंतंतुष्टावच स्तुत्याप्रत्यक्षीभूतस्यचविष्णोरग्रेतस्यकेभ्योपिभयाभावंचवामपादताडनादिकंचकथयित्वायथाऽहंतंजेष्यामितथाकर्तुमर्हतिभवानितिकथितवान् ॥ तदाविष्णुनोक्तं
ब्राह्मणमात्रस्यतावत्कस्यापिभयंनास्तिशिवभक्तानांतुप्राणिमात्राणाम् दधीचस्यतदुभयरूपत्वाद्भयंनास्तीतिकिंवक्तव्यम् तस्मात्तवविजयोनास्ति तथापि दक्षयज्ञेतस्यशापेनसुरैःसार्धंममविनाशोभविता
पुनरुत्थानंचेति ॥ ससुरस्यमेशापार्थंतस्यदुःखंकरोमिसर्वंयत्नेनतमेत्यतवविजयाययत्नंकरिष्यामि तदातथास्त्वितिक्षुपेणाभिहितेब्राह्मणवेषंकृत्वादधीचस्याश्रमंप्राप्यतमभिवंद्यप्राह भोदधीचत्वत्तोह
मेकंवरंवृणेतंदातुमर्हसीति ॥ ततस्तेनोक्तंतवाभिप्रेतंमयाज्ञातंब्राह्मणरूपेणक्षुपार्थंतेनाराधितोभक्तवात्सल्येनत्वंविष्णुरेवागतोसितथाप्यहंनाबिभेमि रुद्रार्चकस्यभीतिरस्तिचेत्तर्हिसर्वज्ञस्त्वंवद देवदैत्यद्विजा
दप्येतस्मिन्जगतिनाहंबिभेमीति तदाविष्णुर्दधीचस्यवचःश्रुत्वाद्विजतांक्षणाद्विहायस्वरूपंगृहीत्वासस्मितंप्राह भवार्चनरतस्यतवभयंनास्त्येवसर्वज्ञएवभवांस्तथापिममनियोगात्सदसिक्षुपंप्रतिजयस्तवप
रंतुत्वत्तोहंबिभेमीतिसकृद्वक्तुमर्हसीति एवंसांत्वंविष्णोर्वाक्यंश्रुत्वापिनाबिभेमीतितंप्राह ततस्तस्यतादृशंवचःश्रुत्वाकुपितोहरिस्तंदिधक्षुश्चक्रंमुमोच ततोदधीचस्यप्रभावात्सुदारुणमपितच्चक्रंक्षुपस्यसंनिधा
वेवकुंठितधारमभवत् कुंठितधारंतच्चक्रंदृष्ट्वादधीचआह शिवस्यएतच्चक्रंततस्त्वयालब्धंमांनजिघांसति अतोब्राह्माद्यैरस्त्रैर्मांहंतुंप्रयत्नंकुर्विति तस्यतद्वचःश्रुत्वासर्वाण्यस्त्राणितस्मैससर्जदेवाअपिवि
ष्णोःसाहाय्यंचक्रुः तदाकुशमुष्टिमादायभवंसंस्मरन्दधीचिःससर्ज सचकुशमुष्टिर्दिव्यंकालाग्निसदृशप्रभंत्रिशूलमभवत् तेनचदेवान्दग्धुंसमतिंचक्रे तदस्त्रप्रभावान्नारायणादिभिस्त्यक्तान्यस्त्रा
णिचप्रणेशुर्देवाश्चदुद्रुवुः ततआत्मनःसदृशान्दिव्यान्लक्षायुतान्गणान्सभगवान्ससर्ज तान्सर्वानेकदैवसमुनिसत्तमोददाह ततस्तस्यविस्मापनार्थायहरिर्विश्वमूर्तिरभूत्तंदृष्ट्वादधीचेनोक्तंहेमहाविष्णो ॥१४९॥
मायांत्यजममाप्येतादृशंविश्वरूपंत्वंपश्येत्युक्त्वास्वतनौविश्वरूपंदर्शयामास आहच हरिमनयामाययाकिम् तस्मान्मायांत्यक्त्वायोद्धुमर्हसीति एवंतस्यवचःश्रुत्वोत्तमंमाहात्म्यंचदृष्ट्वादेवाश्चभूयोपिदुद्रुवुर्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रायणंचनिश्चेष्टंब्रह्मावारयामास ततोब्रह्मणोवचनंनिशम्यतेननिर्जितस्तंमहामुनिंप्रणिपत्यभगवान्ययौ ततःक्षुपोपिदुःखातुरोभूत्वादधीचंब्राह्मणाएवश्रेष्ठाःमयाऽपराद्धंक्षमस्वेतिप्रार्थयामास ततोदधीचस्तंराजानमनुगृह्यसुरोत्तमान्दक्षयज्ञेविष्णुनागणैश्चसमंहेदेवाःध्वस्ताभवतेतिशशाप क्षुपंसंबोध्यब्राह्मणाएवपूज्याइत्याद्युक्त्वास्वोटजंप्रविवेश दधीचमभिवंद्यक्षुपोपिविस्मितःसन्जगामेति ॥ तथाहि॥ ब्रह्मपुत्रोमहातेजाराजाक्षुपइतिश्रुतः ॥ अभून्मित्रंदधीचस्यमुनींद्रस्यनरेश्वरइत्यादि ॥ संशील्यसम्यग्ध्यात्वा ॥ एतत्त्वीश्वरद्वेषात्पूर्वंपश्चाद्वाज्ञातव्यम् ॥३९॥ किंबहुनासंक्षेपतःशृण्वित्याह॥मनइति ॥ मनोरथपथातीतंवाचामगोचरंयत्पदंकैवल्यंतद्गोचरःप्रत्यक्षीभूतःसन्मृडःक्षणतस्तत्क्षणएवगोचरीकुर्यात्प्रत्यक्षीकुर्याद्दद्यादित्यर्थः ॥ ४० ॥ अन्वयमुक्त्वाव्यतिरेकमाह ॥ अनाराध्येति ॥ ४१ ॥

मनोरथपथातीतंयच्चवाचामगोचरम् ॥ गोचरोगोचरीकुर्यात्तत्पदंक्षणतोमृडः ॥ ४० ॥ अनाराध्यमहेशानंसर्वदंसर्वदेहिनाम् ॥ कोपिक्कापिकिमप्यत्रनलभेतेतिनिश्चितम् ॥ ४१ ॥ तस्मात्सर्वप्रयत्नेनशंकरंशरणंव्रज ॥ यदिच्छसिप्रियंपुत्रंप्रियसर्वजनीनकम् ॥ ४२ ॥ इतिश्रुत्वावचःपत्न्याःपूर्णभद्रःसयक्षराट् ॥ आराध्यश्रीमहादेवंगीतज्ञोगीतविद्यया ॥ ४३ ॥ दिनैःकतिपयैरेवपरिपूर्णमनोरथः ॥ पुत्रकाममवापोच्चैस्तस्यांपत्न्यांदृढव्रतः ॥ ४४ ॥ नादेश्वरंसमभ्यर्च्यकैःकैर्नापिस्वचिंतितम् ॥ तस्मात्काश्यांप्रयत्नेनसेव्योनादेश्वरोनृभिः ॥ ४५ ॥ अंतर्वत्न्यथकालेनतत्पत्नीसुषुवेसुतम् ॥ तस्यनामपिताचक्रेहरिकेशइतिद्विज ॥ ४६ ॥ प्रीतिदायंददौचाथभूरिपुत्राननेक्षणात् ॥ पूर्णभद्रस्तथागस्त्यहृष्टाकनककुंडला ॥ ४७ ॥ बालोऽपिपूर्णचंद्राभवदनोमदनोपमः ॥ वृद्धिंप्रतिक्षणंप्रापशुक्लपक्षइवोडुराट् ॥ ४८ ॥ यदाष्टवर्षदेशीयोहरिकेशोऽभवच्छिशुः ॥ नित्यंतदाप्रभृत्येवंशिवमेकममन्यत ॥ ४९ ॥ पांसुक्रीडनसक्तोपिकुर्याल्लिंगंरजोमयम् ॥ शाद्वलैःकोमलतृणैःपूजयेच्चसकौतुकम् ॥ ५० ॥ आकारयतिमित्राणिशिवनाम्नाऽखिलानिसः ॥ चंद्रशेखरभूतेशमृत्युंजयमृडेश्वर ॥ ५१ ॥ धूर्जटेखंडपरशोमृडानीशत्रिलोचन ॥ भर्गशंभोपशुपतेपिनाकिन्नुग्रशंकर ॥ ५२ ॥ श्रीकंठनीलकंठेशस्मरारेपार्वतीपते ॥ कपालिन्भालनयनशूलपाणेमहेश्वर ॥ ५३ ॥ अजिनांबरदिग्वासःस्वर्धुनीक्लिन्नमौलिज ॥ विरूपाक्षाहिनेपथ्यगृणन्नामावलीमिमाम् ॥ ५४ ॥ सवयस्कानितिमुहुःसमाह्वयतिलालयन् ॥ शब्दग्रहैर्नगृह्णीतस्तस्यान्याख्यांहरादृते ॥ ५५ ॥ पद्यांनपद्यतेचान्यद्दृतेभूतेश्वराजिरात् ॥ द्रष्टुंरूपांतरंतस्यवीक्षणेनविचक्षणे ॥ ५६ ॥

फलितमुपसंहरति ॥ तस्मादिति ॥ हेप्रियसर्वजनीनकंसर्वलोकश्रेष्ठमतिप्रसिद्धमित्यर्थः ॥ ४२ ॥ ४३ ॥ काम्यतइतिकामः पुत्ररूपंकामंपुत्रकामंपुत्ररूपमभिलाषामित्यर्थः ॥ पुत्ररूपंवरंवा ॥ ४४ ॥ नादेश्वरमूँकारम् ॥ ४५ ॥ ४६ ॥ प्रीतिदायंहर्षेणदेयंवस्त्रालंकरणादिकमित्यर्थः ॥ हृष्टाभूदितिशेषः ॥ हृष्टासतीददावितिपूर्वक्रियायावानुषंगः ॥ ४७ ॥ ४८ ॥ एवंवक्ष्यमाणप्रकारेण ॥ ४९ ॥ तमेवप्रकारंदर्शयति ॥ पांस्विति ॥ शाद्वलैर्हरिततृणैः ॥ ५० ॥ शिवनाम्नेत्युक्तंतदेवनामदर्शयाति चंद्रशेखरेतिसप्तदशत्रयेण ॥ ५१ ॥ खंडपरशोभग्नकुठार ॥ ५२ ॥ ५३ ॥ अहिनेपथ्यसर्पभूषण ॥ ५४ ॥ सवयस्कान्समानवयसोमित्राणीत्येतत् ॥ पूर्वस्यायमनुवादोऽन्वयार्थः ॥ शब्दग्रहौकर्णौ ॥ ५५ ॥ पद्यतेगम्यते ॥ वीक्ष

CC-0. In Public Domain. Digitization by eGangotri

णेविशिष्टेचक्षुषी ॥ विचक्षणेनिपुणेचतुरेइतियावत् ॥ ५६ ॥ रसयेदास्वादयेत् ॥ रसनाजिह्वा ॥ शिवांघ्रिकमलामोदादन्यदितिशेषः ॥ घ्राणंघ्राणेंद्रियम् ॥ जिघृक्षतिग्रहीतुमिच्छति ॥
॥ ५७ ॥ तत्कौतुककरौतत्सपर्याकरावित्यर्थः ॥ मनतिचिंतयाति ॥ शिवसात्कृत्यशिवायसमर्प्य ॥ एतेनतस्यबाणलिंगाद्यन्यतमलिंगपूजकत्वंसूचितम् ॥ तथाचवचनम् ॥ बाणलिंगेस्वयं
भूतेचंद्रकांतेहृदिस्थिते ॥ तत्रक्रतुशतंपुण्यंशंभोर्नैवेद्यभक्षणमिति ॥ सद्धियाशोभनधिया ॥ ५८ ॥ त्र्यक्षप्रत्यक्षगानित्रिलोचनाग्रेआनीयसमर्पितानीत्यर्थः ॥ अपिर्भिन्नक्रमेभक्ष्याणीत्यनेनसंब
ध्यते ॥ ५९ ॥ ऐक्षिष्टअपश्यत् ॥ भावंपदार्थम् ॥ चिकेतिज्ञानविषयीकरोतिजानातीत्येतत् ॥ कितज्ञानइतिधातुः ॥ ६० ॥ क्षणदासुरात्रिषु ॥ ६१ ॥ ६२ ॥ शिक्षामेवाह एतदित्या

रसयेत्तस्यरसनाहरनामाक्षरामृतम् ॥ शिवांघ्रिकमलामोदाद्घ्राणंनैवजिघृक्षति ॥ ५७ ॥ करौतत्कौतुककरौमनोमनतिनापरम् ॥ शिवसात्कृत्यपेया
निपीयंतेतेनसद्धिया ॥ ५८ ॥ भक्ष्यंतेसर्वभक्ष्याणित्र्यक्षप्रत्यक्षगान्यपि ॥ सर्वावस्थासुसर्वत्रनसपश्येच्छिवंविना ॥ ५९ ॥ गच्छन्गायन्स्वपंस्तिष्ठ
न्च्छयानोऽदन्पिबन्नपि ॥ परितस्त्र्यक्षमैक्षिष्टनान्यंभावंचिकेतिसः ॥ ६० ॥ क्षणदासुप्रसुप्तोपिक्वयासीतिवदन्मुहुः ॥ क्षणंत्र्यक्षप्रतीक्षस्वबुध्यती
तिसबालकः ॥ ६१ ॥ स्पष्टांचेष्टांविलोक्येतिहरिकेशस्यतत्पिता ॥ अशिक्षयत्सुतंसोऽथगृहकर्मरतोभव ॥ ६२ ॥ एतेतुरंगमावत्सतवैतेऽश्वकिशो
रकाः ॥ चित्राणीमानिवासांसिसूक्ष्मदुकूलान्यमूनिच ॥ ६३ ॥ रत्नान्याकरशुद्धानिनानाजातीन्यनेकशः ॥ कुप्यंबहुविधंचैतद्गोधनानिमहांतिच ॥६४॥
अमत्राणिमहार्हाणिरौप्यकांस्यमयानिच ॥ पणनीयानिवस्तूनिनानादेशोद्भवान्यपि ॥ ६५ ॥ चामराणिविचित्राणिगंधद्रव्याण्यनेकशः ॥ एतान्य
न्यानिबहुशस्त्वनेकेधान्यराशयः ॥ ६६ ॥ एतत्त्वदीयंसकलंवस्तुजातंसमंततः ॥ अर्थोपार्जनविद्याश्चसर्वाःशिक्षस्वपुत्रक ॥ ६७ ॥ चेष्टास्त्यजदरि
द्राणांधूलिधूसरिणाममूः ॥ अभ्यस्यविद्याःसकलाभोगान्निर्विश्यचोत्तमान् ॥ ६८ ॥ तांदृशांचरमांप्राप्यभक्तियोगंततश्चर ॥ असकृच्छिक्षितःपित्रेत्यव
मन्यगुरोर्गिरम् ॥ ६९ ॥ रुष्टदृष्टिंचजनकंकदाचिदवलोक्यसः ॥ निर्जगामगृहाद्भीतोहरिकेशउदारधीः ॥ ७० ॥ ततश्चिंतामवापोच्चैर्दिग्भ्रांतिमपि
चाप्तवान् ॥ अहोबालिशबुद्धित्वात्कुतस्त्यक्तंगृहंमया ॥ ७१ ॥ क्वयामिक्वस्थितेशंभोममश्रेयोभविष्यति ॥ पित्रानिर्वासितश्चाहंनचवेद्म्यथकिंचन
॥ ७२ ॥ इतिश्रुतंमयापूर्वंपितुरुत्संगवर्तिना ॥ गदतस्तातपुरतःकस्यचिद्वचनंस्फुटम् ॥ ७३ ॥

रम्यासकृदित्यतःप्राक्तनेनग्रंथेन ॥ अश्वकिशोरकास्तरुणाश्वाबालाश्वावेत्यर्थः ॥ ६३ ॥ आकरशुद्धानिजन्मशुद्धानि ॥ कुप्यंस्वर्णरजतातिरिक्तंस्फाटिकादिभाजनम् ॥ ६४ ॥ अमत्राणिपात्रा
णि ॥ पणनीयानिविक्रयार्हाणि ॥ ६५ ॥ ६६ ॥ ६७ ॥ निर्विश्यभुक्त्वा ॥ ६८ ॥ ६९ ॥ भीतःपितुःसकाशात् ॥ स्नातइतिपाठेभोजनायकृतस्नानइत्यर्थः ॥ ७० ॥ चिंतामेव
विलापद्वारास्पष्टयत्यहोइतिसार्धेन ॥ अहोइत्यादीनांहरिकेशोविचार्येति यातोवाराणसीमितित्रयोदशेनान्वयः ॥ ७१ ॥ ७२ ॥ कुत्रगच्छामिकुत्रवास्थितेममश्रेयोभविष्यतीत्येतद्द्वयंनिश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोति श्रुतमित्यादिना ॥ ७३ ॥ तेषांपूर्वोक्तानांसर्वेषामपीत्यर्थः ॥ अग्रेपितेषामित्यत्रापिशब्दोद्रष्टव्यः ॥ येषांक्कापिगतिर्नास्तीत्येतस्यावृत्तिर्वाराणस्याअतिकारुणिकताद्योतनार्था ॥ ७४ ॥
॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ आनंददंचेतिचकारादपमाननाशकमित्यपिज्ञेयम् ॥ ८१ ॥ रुचिरभिरुचिः ॥ वैनिश्चितम् ॥ आनंदजोदयःसुखजन्योल्लासवि
शेषोदयः ॥ सततमितिपाठश्चित्यः ॥ तेनस्वानंदजोदयइतिपाठेतेनाविश्वेशानुग्रहेण ॥ ८२ ॥ प्रकारांतरेणमहाश्मशाननामनिर्वचनंकुर्वन्नगतीनांगतित्वंविशेषतःसाधयति ॥ : भज्यंतइति ॥
कर्मवीजानिकर्माणिवीजानितद्वासनासहितान्यज्ञानानिचेत्यर्थः ॥ ८३ ॥ यातोगतः ॥ ८४ ॥ तनुद्वेषीकाशीस्थानांतनुभृन्मात्राणांतनुमात्रद्वेषीप्रलयकालेवातनुमात्रद्वेषीविश्वनाथः ॥
वाराणसीमागत्यकिंकृतवानित्यत्राहानंदवनमिति ॥ सहरिकेशः ॥ ८५ ॥ कीदृशमस्यतपोमहदितितृतीयप्रश्नस्यप्रत्युत्तरंविशदयितुंप्रसंगमाह ॥ अथेति ॥ अथेतिवाक्यारंभे ॥ ८६ ॥

मात्रापित्रापरित्यक्तायेत्यक्तानिजबंधुभिः ॥ येषांक्कापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७४ ॥ जरयापरिभूतायेयेव्याधिविकलीकृताः ॥ येषांक्कापि गतिर्नास्तितेषांवाराणसीगतिः ॥ ७५ ॥ पदेपदेसमाक्रांतायेविपद्भिरहर्निशम् ॥ येषांक्कापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७६ ॥ पापराशि भिराक्रांतायेदारिद्र्यपराजिताः ॥ येषांक्कापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७७ ॥ संसारभयभीतायेयेबद्धाःकर्मबंधनैः ॥ येषांक्कापिगतिर्नास्ति तेषांवाराणसीगतिः ॥ ७८ ॥ श्रुतिस्मृतिविहीनायेशौचाचारविवर्जिताः ॥ येषांक्कापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७९ ॥ येचयोगपरिभ्रष्टास्तपो दानविवर्जिताः ॥ येषांक्कापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ८० ॥ मध्येबंधुजनेयेषामपमानंपदेपदे ॥ तेषांमानंददंचैकंशंभोरानंदकाननम् ॥८१॥ आनंदकाननेयेषांरुचिर्वैवसतांसताम् ॥ विश्वेशानुगृहीतानांतेषामानंदजोदयः ॥ ८२ ॥ भज्यंतेकर्मबीजानियत्रविश्वेशवह्निना ॥ अतोमहाश्मशानं तदगतीनांपरागतिः ॥ ८३ ॥ हरिकेशोविचार्येतियातोवाराणसींपुरीम् ॥ यत्राविमुक्तेजंतूनांत्यजतांपार्थिवींतनुम् ॥ ८४ ॥ पुनर्नोतनुसंबंधस्तनुद्वे षिप्रसादतः ॥ आनंदवनमासाद्यसतपःशरणंगतः ॥ ८५ ॥ अथकालांतरेशंभुःप्रविश्यानंदकाननम् ॥ पार्वत्यैदर्शयामासनिजमाक्रीडकाननम् ॥ ८६ ॥ अमंदामोदमंदारंकोविदारपरिष्कृतम् ॥ चारुचंपकचूताढ्यंप्रोत्फुल्लनवमाल्लिकम् ॥ ८७ ॥ विकसन्मालतीजालंकरवीरविराजितम् ॥ प्रस्फुटत्केतकिवनंप्रोद्यत्कुरबकोर्जितम् ॥ ८८ ॥

आक्रीडंविशेषयन्नेतदेवविवृणोति अमंदेतिचतुर्विंशतिभिः ॥ एतेषांश्लोकानांदर्शयन्नित्थमाक्रीडंदेव्यैदेवोऽविशद्वनमित्यग्रिमेणान्वयः ॥ इत्थमेवंभूतम् ॥ एवंभूतत्वमेवाह ॥ अमंदेति ॥ अमं दामोदाःमहापरिमलामंदाराःपारिजातायस्मिन् कोविदारैश्चमारिकैःपरिष्कृतंभूषितम् ॥ चारुभ्यांचंपकचूताभ्यामाढ्यंपरिपूर्णमित्यर्थः ॥ प्रोत्फुल्लाविकसितानवानूतनामल्लिकास्तृणशून्यानियत्र ॥ ॥ ८७ ॥ विकसंतीनांमालतीनांजातीनांजालानिसमूहायत्र ॥ करवीरैःप्रतीहासैर्विराजितंप्रकाशितम् ॥ प्रस्फुटंतीनांविकसंतीनांकेतकीनांतृणजातिभेदानांवनानियत्र ॥ थाकारौस्त्रीकृतौहस्वौ काचिदितिह्रस्वः ॥ दीर्घएववापाठः ॥ प्रोद्यंतियानिकुरवकानिअम्लानस्यवृक्षस्यशोणकुसुमानितैरूर्जितमुद्रिक्तम् ॥ अम्लानस्तुमहासहा ॥ तत्रशोणेकुरवकस्तत्रपीतेकुरंटकइत्यमरः ॥ ८८ ॥

CC-0. In Public Domain. Digitization by eGangotri

जृंभतासुज्जृंभतांविकसतामितियावत् ॥ विचकिलानांद्रुमविशेषाणामामोदोयस्मिन् ॥ लसंतीनांकंकेलीनामशोकानांपल्लवायस्मिन् ॥ नवमालतीनांनूतनमालतीनांपरिमलैर्गंधैराकृष्टैराकर्षितैः षट्पदैर्नादितंनादयुक्तम् ॥ ८९ ॥ पुष्पेषुहिताःपुष्प्याः पुष्प्याणांपुन्नागाणांदेववल्लभानांनिकरःसमूहोयस्मिन् ॥ पुष्प्यदितिपाठेपुष्प्यतांपुष्पाणिजनयतांपुन्नागानामित्यर्थः ॥ वकुलानांकेसराणामामोदैर्मोदितंसुगंधितम् ॥ मेदस्विनोवपावंतोऽतःस्निग्धाइत्यर्थः ॥ येपाटलास्तेषामामोदैःसदामोदितानिदिशांमुखानियत्र ॥ ९० ॥ वहुशःशाखादिषुलंविनांरोलंवानांभ्रमराणाम् ॥ रोलंवोमधुलंपटइतिरत्नमाला ॥ मालयासमूहेनमालितंसंजातमालंभूतलंयत्र ॥ चलत्सुचन्दनशाखाग्रेषुरममाणैःपिकैःकोकिलैराकुलंव्याप्तम् ॥ ९१ ॥ गुरुणामहताऽगुरुणाकालागुरुणामत्ताभद्रजातयोउत्कृष्टजातयोविहंगमायत्र ॥ नागकेसराणांशा खासुकौतुकार्थंविश्वकर्मणानिर्मिताःक्रीडार्थमागतावासुरांगनाएवयाःशाकास्थाःशालभंजयःपुत्तलिकास्ताभिर्विनोदितंविलासयुक्तम् ॥ अतएवपूर्वमुक्तंनिजमाक्रीडकाननमिति ॥ ९२ ॥ मेरुतुंगनमेरु स्थच्छायासुमेरूच्चरुद्राक्षवृक्षजातच्छायासुक्रीडिताःक्रीडायुक्ताःकिंनरायत्र ॥ किंनरीमिथुनानांकिंनरपत्नीयुगलानांस्थानेस्थानेऽद्गुच्चैर्गीतंयत्र ॥

जृंभद्विचकिलामोदंलसत्कंकेलिपल्लवम् ॥ नवमल्लीपरिमलाकृष्टषट्पदनादितम् ॥ ८९ ॥ पुष्प्यपुन्नागनिकरंबकुलामोदमोदितम् ॥ मेदस्विपाटलामोदसदामोदितदिङ्मुखम् ॥ ९० ॥ बहुशोलंबिरोलंबमालामालितभूतलम् ॥ चलच्चंदनशाखाग्ररममाणपिकाकुलम् ॥ ९१ ॥ गुरुणाऽगुरुणामत्तभद्रजातिविहंगमम् ॥ नागकेसरशाखास्थशालभंजिविनोदितम् ॥ ९२ ॥ मेरुतुंगनमेरुस्थच्छायाक्रीडितकिंनरम् ॥ किंनरीमिथुनोद्गीतंगानवच्छुककिंशुकम् ॥ ९३ ॥ कदंबानांकदंबेषुगुंजद्रोलंबयुग्मकम् ॥ जितसौवर्णवर्णोच्चकर्णिकारविराजितम् ॥ ९४ ॥ शालतालतमालालीहिंतालीलकुचावृतम् ॥ लसत्सप्तच्छदामोदंखर्जूरीराजिराजितम् ॥ नारिकेलतरुच्छन्नंनारंगीरागरंजितम् ॥ ९५ ॥ फलिजंबीरनिकरंमधूकमधुपाकुलम् ॥ शाल्मलीशीतलच्छायंपिचुमंदमहावनम् ॥ ९६ ॥ मधुरामोददमनच्छन्नंमरुबनोदितम् ॥ लवलीलोललीलाभृन्मंदमारुतलोलितम् ॥ ९७ ॥ भिल्लीहल्लीसकप्रीतिझिल्लीरावविराविणम् ॥ क्वचित्सरःपरिसरक्रीडत्क्रोडकदंबकम् ॥ ९८ ॥

गानवंतोमधुरध्वनयःशुकाःकीरायेषुतथाभूताःकिंशुकाः पलाशायत्र ॥ ९३ ॥ कदंवानांहलिप्रियाणांकदंवेषुसमूहेषुगुंजंत्यव्यक्तशब्दवंतिरोलंवयुग्मकानिभ्रमरयुगलानियत्र ॥ जितःसौवर्णःसुवर्णसंवंधीवर्णोयैस्तेचतेउच्चकर्णिकारामहापारिव्याधास्तैर्विराजितम् ॥ ९४ ॥ लसद्भिःसप्तच्छदैर्विशालत्वग्भिरामोदोयत्र ॥ खर्जूरीणांतृणद्रुमावांतरजातीनांराजिभिःपंक्तिभीराजितंशोभितम् ॥ नारिकेलतरुभिर्लांगलिवृक्षैश्छन्नंव्याप्तम् ॥ ऐरावतापरपर्याया यानागरंगाएवनारंग्यस्तासांरागैरंजितंव्याप्तमितियावत् ॥ नागेतिपाठेनागैःसमूहैरित्यर्थः ॥ ९५ ॥ फलिनांफलवतांजंवीराणांसमीरणानांनिकराःसमूहायत्र ॥ मधूकेषुगुडपुष्पेषुयेमधुपाःभ्रमरास्तैराकुलम् ॥ शाल्मलीनांपिच्छिलानांशीतलाश्छायायत्र ॥ पिचुमन्दानांनिंवानांमहावनंयत्र ॥ ९६ ॥ मधुरोरम्यआमोदोयेषांतैर्दमनकैराच्छन्नम् ॥ मरुवेणमरुवकेनपिंडीतकेननोदितमुच्छलितंमरूणांमरुवकानांवावनैरुदितंप्रकाशितम् ॥ मरुवमोदिनमितिपाठेस्पष्टएवार्थः ॥ लवल्यामुक्ताफलायालवालीतिगौडेप्रसिद्धायालोलांचंचलांचालनरूपामितियावत् लीलांविभर्त्तीतिलीलाभृत् योमंदमारुतस्तेनलोलितमांदोलितम् ॥ ९७ ॥ भिल्लीनांशवरस्त्रीणांहल्लीसकप्रीतौप्रीयतेऽनेनेतिप्रीतिःक्रीडनकंहल्लीसकाख्येनृत्यक्रीडनके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाद्यस्थानीयोझिल्लीनांभृंगारीणांकठोरध्वनिसूक्ष्मकीटानाम् ॥ भृंगारीचीरिकाचीरीझिल्लीकाचसमाइमाइत्यमरः ॥ रावःशब्दस्तेनविराविणंशब्दयुक्तम् ॥ क्वचित्कुत्रचित्सरसांपरिसरेषुपर्यंतभू मिषुक्रीडतांक्रोडानांसूकराणांकदंबःसमूहोयत्र ॥ ९८ ॥ मरालीनांहंसीनांगलनालीस्थेषुविसेषुपद्मिनीतंतुष्वासक्ताःसितच्छदाहंसायत्र ॥ हंसीकंठसंसक्तहंसमित्यर्थः ॥ विशोकस्यशोकर हितस्यकोकमिथुनस्यचक्रवाकयुग्मस्यक्रीडाक्रेंकाराभ्यांलीलातज्जातिशब्दाभ्यांसुंदरंमनोहरम् ॥ ९९ ॥ बकशावकानांबकपोतानांसंचारोयत्र ॥ लक्ष्मणासुसारसयोषित्स्वासक्ताःसारसाःपुष्करा ह्वायत्र ॥ मत्तैर्बर्हिणैर्मयूरैःसंघुष्टंसंनादितम् ॥ कपिंजलानांकपिञ्जलानालभेतेतिश्रुतिप्रसिद्धपक्षिविशेषाणांकुलैराकुलंव्याप्तम् ॥ १०० ॥ जीवंजीवैःपक्षिविशेषैर्लसन्तउल्लसंतोजीवाःप्राणिनो यस्मिन् ॥ क्वणद्भिःशब्दायमानैःकारंडवैःपक्षिविशेषैरुत्कटमुच्चैर्व्याप्तमित्यर्थः ॥ दीर्घिकावारिसंचारिणावाप्युदकप्रसरणवताशीतेनवातेनवीजितंसेवितमित्यर्थः ॥ १ ॥ मंदांदोलितक ह्लाराणामीषच्चलितसौगंधिकानांपरागैरजोभिःपरिपिंगलमत्यंतंपिंजरम् ॥ इदानींपुंरूपेणनिरूपयति ॥ उल्लसदिति ॥ विकसत्पद्मंवक्त्रंयस्यतत् ॥ नीलेंदीवरेपद्मेएवलोचनेयस्यतत् ॥ २ ॥ तमालःकालस्कन्धःकवरीभारःकेशपाशसमूहोयस्यतत् ॥ कवर्याएकत्वेपितदवयवानांवहुत्वाद्भारग्रहणम् ॥ विलसंत्योदाडिम्योरदादंतायस्यतत् ॥ विदलदितिपाठेविदलंत्योविदारं

मरालीगलनालीस्थबिसासक्तसितच्छदम् ॥ विशोककोकमिथुनक्रीडाक्रेंकारसुंदरम् ॥ ९९ ॥ बकशावकसंचारंलक्ष्मणासक्तसारसम् ॥ मत्तबर्हिणसंघुष्टंकपिंजलकुलाकुलम् ॥ १०० ॥ जीवंजीवलसज्जीवंक्वणत्कारंडवोत्कटम् ॥ दीर्घिकावारिसंचारिशीतमारुतवीजितम् ॥ १ ॥ मंदांदोलितकह्लारपरागपरिपिंगलम् ॥ उल्लसत्पंकजमुखंनीलेंदीवरलोचनम् ॥ २ ॥ तमालकबरीभारंविलसद्दाडिमीरदम् ॥ भ्रमरालीलसद्भ्रूकंशुकनासाविराजितम् ॥ ३ ॥ महांधुश्रवणंदूर्वाश्मश्रुभिःपरिशोभितम् ॥ कमलामोदनिःश्वासंबिंबीफलरदच्छदम् ॥ ४ ॥ सुपद्मपत्रवसनंकर्णिकारविभूषणम् ॥ कम्रकंबुलसत्कंठंशंकरस्कंधबंधुरम् ॥ ५ ॥ गंधसारसमासक्ताहीनदोर्दंडमंडितम् ॥ अशोकपल्लवांगुष्ठंकेतकीनखरोज्वलम् ॥ ६ ॥

प्राप्नुवत्यइत्यर्थः ॥ भ्रमराल्यौभ्रमरपंक्तीलसंत्यौभ्रुवौयस्यतत् ॥ शुकःकीरएवशुकानांवायानासातयाविराजितम् ॥ ३ ॥ महान्तौअंधूकूपौश्रवणेयस्यतत् ॥ दूर्वाःशतपर्विकाएव ॥ दूर्वातुशतपर्विकेत्यमरः ॥ श्मश्रूणिपुंमुखरूढलोमानितैःपरिशोभितम् ॥ कमलस्यामोदोनिःश्वासोयस्यतत् ॥ बिंबीफलवत्गौडेप्रसिद्धलोलाकुचाफलवद्रदच्छदौयस्यतत् ॥ ४ ॥ शोभनंपद्मपत्रंवसनंयस्यतत् ॥ कर्णिकाराःपरिव्याधाःसुपुष्पितवृक्षविशेषाविभूषणानियस्यतत् ॥ कम्रकंबुःकमनीयशुक्तिःशोभनवृक्षविशेषःसएवलसञ्छोभमानःकंठोयस्यतत् ॥ शुक्तिःशंखःखुरः कोलदलंनखमित्यमरः ॥ यद्वा कम्रःकामुकोयःकंबुःशंखःसएवलसत्कंठोयस्यतत् ॥ कामातुरोहिशंखशब्दंकुर्वाणोभवतिसएवलसत्कंठत्वेनोत्प्रेक्ष्यतइत्यर्थः ॥ कामुकेकमितानुकःकम्रःकामयिता भीकःकमनःकामनोभिकइत्यमरः ॥ शंकरः[1]शिवाख्योवितुन्नकापरपर्यायःकालानुसार्यापरपर्यायोवावृक्षविशेषः ॥ अथवितुन्नकः झटामलाझटातालीशिवातामलकीतिच । कालानुसार्यवृक्षाश्मपुष्प शीतशिवानितु ॥ शैलेयमित्यमरः ॥ सएवस्कंधवंधुरेस्कंधस्थेवंधुरेउन्नतानतेयस्मिंस्तत् ॥ वंधुरंतून्नतानतमित्यमरः ॥ अथवाक्रीडार्थमागतःशंकरईशादिरुद्रएवमूर्त्तिभेदेनस्कंधबंधुरस्कंधस्थंमूल प्ररोहस्थंवंधुरमुन्नतादनतंयस्मिंस्तत् ॥ ५ ॥ गंधसोरचंदनेसमासक्तःसँल्लग्नोयःअहीनोगहिश्रेष्ठःसएवदोर्दंडोहस्तस्तेनमंडितम् ॥ अशोकपल्लवौवंजुलपल्लवावंगुष्ठौयस्यतत् ॥ केतक्यस्तृणद्रुम

१ शंकरःस्थाणुः ।

CC-0. In Public Domain. Digitization by eGangotri

विशेषास्तएवनखरानखास्तैरुज्ज्वलम् ॥ ६ ॥ लसन्कंठीरवःसिंहएवउरोयस्यतत् ॥ गंडशैलोगिरेश्च्युतः पाषाणःसएवपृथुविस्तीर्णमुदरंयस्यतत् ॥ जलावर्तोऽम्भसांभ्रमएवलसन्नाभिर्यस्यतत् ॥ तरूएवजंघायुगेताभ्यामन्वितम् ॥ ७ ॥ स्थलभाजौपद्मौचरणौयस्यतत् ॥ मत्तमातंगेनगंतुंशीलंयस्यतत् ॥ पुंस्त्वमार्षम् ॥ लसत्कदलीनांकेदारेषुवप्रेषु ॥ पुंनपुंसकयोर्वप्रःकेदारःक्षेत्रमित्यमरः ॥ दलंतःसंमर्दंतोयेचीनाहरिणविशेषाः॥ कदलीकंदलीचीनश्चमूरुप्रियकावपि ॥ समूरुश्चेतिहरिणाअमीअजिनयोनयइत्यमरः ॥ तएवांशुकानिवस्त्राणितैरावृतम् ॥ यद्वा लसत्कदलीक्षेत्रेषुयानिदलानिक दलीपत्राणितान्येवचीनांशुकानिचीनदेशोद्भववस्त्राणितैरावृतम् ॥ ८ ॥ विविधपुष्पस्रग्भिर्मालितंसंजातमालम् ॥ समंततःसर्वत्र ॥ चकारःसमुच्चये ॥ अकंटकिभिःकंटकरहितैस्तरुभिश्छन्नम् ॥ महिषैःश्वापदैश्चव्याघ्रादिभिर्मित्रैरिवैकत्रस्थितैरावृतम् ॥ ऐकपद्यपाठेकर्मधारयः ॥ अकंटकिनस्तरवोयस्मिंस्तत्तथा ॥ छन्नाःप्रच्छन्नाआवृतावैरंविहायएकत्रस्थिताइतियावत् ॥ येमहिषश्वापदास्तैरावृत

लसत्कंठीरवोरस्कंगंडशैलपृथूदरम् ॥ जलावर्तलसन्नाभितरुजंघायुगान्वितम् ॥ ७ ॥ स्थलभाक्पद्मचरणंमत्तमातंगगामिनम् ॥ लसत्कदलिके दारदलच्चीनांशुकावृतम् ॥ ८ ॥ नानासुकुममालाभिर्मालितंचसमंततः ॥ अकंटकितरुच्छन्नंमहिषश्वापदावृतम् ॥ ९ ॥ चंद्रकांतशिलासुप्तकृष्णैणहरितोडुपम् ॥ तरुप्रकीर्णकुसुमजितस्वर्लोकतारकम् ॥ दर्शयन्नित्थमाक्रीडंदेव्यैदेवोविशद्वनम् ॥ १(१)० ॥ ॥ देवदेवउवाच ॥ ॥ यथाप्रियतमा देविममत्वंसर्वसुंदरि ॥ तथाप्रियतरंचैतन्मेसदानंदकाननम् ॥ ११ ॥ अत्रानंदवनेदेविमृतानांमदनुग्रहात् ॥ वपुस्त्वमृततांप्राप्तमपुनर्भवविनस्तुते ॥ १२ ॥ भविनोयेविपद्यंतेवाराणस्यांममाज्ञया ॥ तेषांबीजानिदग्धानिश्मशानज्वलदग्निना ॥ १३ ॥ महाश्मशानेयेप्राप्तादीर्घनिद्रांगिरींद्रजे ॥ नपुनर्गर्भशयनेतेस्वपंतिकदाचन ॥ १४ ॥ ब्रह्मज्ञानेनमुच्यंतेनान्यथाजंतवःक्वचित् ॥ ब्रह्मज्ञानमयेक्षेत्रेप्रयागेवातनुत्यजः ॥ १५ ॥ ब्रह्मज्ञानंतदे वाहंकाशीसंस्थितिभागिनाम् ॥ दिशामितारकंप्रांतेमुच्यंतेतेतुतत्क्षणात् ॥ १६ ॥ गृह्णीयुःपापकर्माणिकाशीमृतविनिंदकाः ॥ सुकृतानिस्तुतिकृतो मुच्यंतेतेऽत्रजंतवः ॥ १७ ॥

मितिवा ॥ अकंटकिभिस्तरुभिश्छन्नाआच्छादितायेमहिषादयस्तैरावृतमितिवा ॥ ९ ॥ चंद्रकांतशिलासुप्तेनकृष्णसारेणहरितोहरिद्वर्णीकृतःकलंकितइतियावत् ॥ उडुपतिर्बिंबीभूतश्चंद्रोयत्रतत् ॥ तरुषुप्रकीर्णानियानिकुसुमानितैर्जिताःस्वर्लोकस्थास्तारकायेनतत् ॥ ११० ॥ काननंप्रविश्यकिमकरोत् ॥ काशींवर्णयामासेत्याह ॥ देवदेवउवाचेति ॥ यथाप्रियतमेत्यादीनामितिब्रुवाणोदेवेशो हरिकेशमवेक्षतेत्याग्रिमेणान्वयः ॥ मेमम ॥ सदैवेतिक्वचित् ॥ ११ ॥ अत्रेति ॥ हेदेविअत्रानंदकाननेयेषांममानुग्रहान्मृतानांजंतूनांवपुःशरीरममृततांपुनर्मरणाभावंप्राप्तंतेपुनर्भविनएवपुनःसंसा रिणोनभवंत्येवेत्यर्थः ॥ १२ ॥ श्मशानंकाशीसएवज्वलदग्निः ॥ यद्वा श्मशानेकाश्यांज्वलदग्निर्विश्वेशस्तेन ॥ १३ ॥ एतदेवविवृणोति ॥ महाश्मशानइति ॥ १४ ॥ ब्रह्मज्ञानमयेब्रह्मज्ञानप्राप्ति साधने ॥ १५ ॥ संस्थितिर्मरणंसम्यक्स्थितिर्वा ॥ १६ ॥ काशीमरणादमुक्तिमुक्तीकथयतोदोषगुणावाह ॥ गृह्णीयुरिति ॥ अत्रयेजंतवोम्रियंतेतेनमुच्यंतेइतिकाशीमृतविनिंदकाःपापानिगृह्णीयुर्गृ

१ अमरमालायामाक्रीडशब्दस्यनपुंसकत्वमुक्तंतदभिप्रायेणेयंटीकाकृदुक्तिःसंगच्छते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्लंति ॥ तेमुच्यंतइतिस्तुतिकृतःसुकृतानिगृह्लंतिप्राप्नुवंतीत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ अंतंमरणंकुर्वंतीत्यंतकृतोमरणंप्राप्ताइत्यर्थः ॥ १२० ॥ २१ ॥ सम्यगभ्यासःसमभ्यासस्तस्मात् ॥ कृताभ्यासादितिकचित ॥ २२ ॥ ननुकेचिद्योगेनतपसावामुच्यंतइतिश्रूयते सत्यं तत्तुकलौनसिध्यतीत्याह ॥ नासध्यतााात ॥ न्यायार्जितधनस्योत्सर्गस्त्यागोयस्यसनरः ॥ परइतिपाठेपरः केवलःसद्यःसिध्येदिति ॥ २३ ॥ उक्तमेवविवृणोति ॥ नव्रतमिति ॥ मुक्त्यैपरंपरयेत्यर्थः ॥ तदेवाह ॥ काशीदानैरित्यादिना ॥ २४ ॥ २५ ॥ प्राप्येप्राप्तुंयोग्ये ॥ प्राप्तइतिपाठेप्राप्त

ब्रह्मज्ञानंकुतोदेविकलिनोपहतात्मनाम् ॥ स्वभावचंचलाक्षाणांतद्ब्रह्मेहादिशाम्यहम् ॥ १८ ॥ योगिनोयोगविभ्रष्टाःपतंत्यैश्वर्यमोहिताः ॥ काश्यांप तित्वानपुनःपतंत्यपिमहालये ॥ १९ ॥ ब्रह्मज्ञानंनविंदंतियोगैरेकेनजन्मना ॥ जन्मनैकेनमुच्यंतेकाश्यामंतकृतोजनाः ॥ १२० ॥ यथेहमुच्यतेजं तुर्गिरिजेमदनुग्रहात् ॥ अविमुक्तेमहाक्षेत्रेनतथान्यत्रकुत्रचित् ॥ २१ ॥ बहुजन्मसमभ्यासाद्योगीमुच्येतवानवा ॥ मृतमात्रोविमुच्येतकाश्यामे केनजन्मना ॥ २२ ॥ नसिध्यतिकलौयोगोनसिध्यतिकलौतपः ॥ न्यायार्जितधनोत्सर्गःसद्यःसिध्येत्कलौनरः ॥ २३ ॥ नव्रतंनतपोनेज्यानजपो नसुरार्चनम् ॥ दानमेवकलौमुक्त्यैकाशीदानैरवाप्यते ॥ २४ ॥ कलौविश्वेश्वरोदेवःकलौवाराणसीपुरी ॥ कलौभागीरथीगंगाकलौदानंविशिष्यते ॥ २५ ॥ गंगोत्तरवहाकाश्यांलिंगंविश्वेश्वरंमम ॥ उभेविमुक्तिदेपुंसांप्राप्येदानबलात्कलौ ॥ २६ ॥ पुण्यवानितरोवापिममक्षेत्रस्यसेवया ॥ मुक्तो भवतिदेवेशिनात्रकार्याविचारणा ॥ २७ ॥ अविमुक्तस्यमाहात्म्यात्पुण्यपापेनकर्मणा ॥ देविप्रभवतःपुंसामपिजन्मशतार्जिते ॥ २८ ॥ अविमुक्तंनमो क्तव्यंतस्माद्देविमुमुक्षुणा ॥ हन्यमानेनबहुधाह्युपसर्गशतैरपि ॥ २९ ॥ विधायक्षेत्रसंन्यासंयेवसंतीहमानवाः ॥ जीवन्मुक्तास्तुतेदेवितेषांविघ्नंहराम्य हम् ॥ १३० ॥ नयोगिनांहृदाकाशेनकैलासेनमंदरे ॥ तथावासरतिर्मेऽस्तियथाकाश्यांरतिर्मम ॥ ३१ ॥ काशीवासिजनोदेविममगर्भेवसेत्सदा ॥ अतस्तंमोचयाम्यंतेप्रतिज्ञेयंयतोमम ॥ ३२ ॥ तामसींप्रकृतिंप्राप्यकालोभूत्वाचराचरम् ॥ ग्रसामिलीलयादेविकाशींरक्षामियत्नतः ॥ ३३ ॥

व्येइत्यर्थः ॥ २६ ॥ ननुभवतुपुण्यवतांदानेनकाश्यादिप्राप्त्यामोक्षइतरेषांतुकावार्तातत्राह ॥ पुण्यवानिति ॥ २७ ॥ २८ ॥ उपसर्गशतैर्विघ्नशतैः ॥ २९ ॥ १३० ॥ ३१ ॥ काशीस्थप्राणिमात्रमोचनेहेतुमाह ॥ काशीवासीति ॥ हेदेविकाशीवासिजनःकाशीस्थप्राणिमात्रोयतःसदाममगर्भेवसेत् ॥ प्राणेभ्योपिप्रियोममेतिकचित् ॥ अतस्तंकाशीवासिनंजनमंतेमोच यामि ॥ मोचयाम्येवेतिकचित् ॥ विपक्षेबाधकमाह ॥ यतइयंकाशीस्थप्राणिमात्रमोचनरूपा ॥ ममप्रतिज्ञा ॥ दृढाममेतिकचित् ॥ ३२ ॥ यतःकाशीममगर्भभूताऽतस्तामसीमिति ॥

CC-0. In Public Domain. Digitization by eGangotri

तामसींतमोगुणोद्रेकाम् ॥ प्रकृतिंमायाम् ॥ तामसस्वभावंवा ॥ ३३ ॥ लयेकाशीरक्षणेहेत्वंतरमाह ॥ प्रेमपात्रमिति ॥ ३४ ॥ निर्वाणंविदेहकैवल्यम् ॥ ३५ ॥ ब्रह्मांडेति ॥ ब्रह्मांडमध्येहेलयाऽनायासेनकाश्यांयद्वद्यथामुक्तिर्व्यवस्थितातथाऽन्यतोन्यत्राष्टांगयोगस्ययुक्त्यायुंजनेनअभ्यासेनापिनेत्यर्थः ॥ ३६ ॥ कीदृगस्यतपोमहदितिचतुर्थस्यप्रश्नस्यप्रत्युत्तरंदातुंविश्वनाथेनदृष्टंहरिकेशंविशिनाष्टि इतिब्रुवाणइत्यष्टभिः ॥ मध्येवनंवनमध्ये ॥ ३७ ॥ शुष्कस्नायुभिर्नीरसनाडीभिर्देहःपिनद्धश्छन्नोऽस्थिसंचयोयस्यतम् ॥ निश्चलाकृतिंनिश्चलशरीरम् ॥ वल्मीककीटावामलूरकीटाः ॥ वामलूरश्चनाकुश्चवल्मीकंपुंनपुंसकमित्यमरः ॥ तएवकीटकास्तेषामासमंतात्कोटचाशोषितमसृक्शोणितंयासांताअसृग्धराःशिरायस्यतम् ॥ ३८ ॥ निर्मांसोमांसरहितःकीकसचयोऽस्थिसमूहोयस्यतम् ॥ स्फटिकोपलनिश्चलंस्फटिकमयपर्वतवत्पाषाणवद्वास्थिरम् ॥ शंखादीनामिवलसंतीश्रीःशोभायस्यतम् ॥ तत्रमहाशंखःशुक्तिर्नरास्थिवा ॥ ३९ ॥ सत्वेंऽतः

प्रेमपात्रद्वयंदेविनितरांनेतरन्मम ॥ त्वंवातपोधनेगौरिकाशीवानंदभूमिका ॥ ३४ ॥ विनाकाशींनमेस्थानंविनाकाशींनमेरतिः ॥ विनाकाशींननिर्वाणंसत्यंसत्यंवदाम्यहम् ॥ ३५ ॥ ब्रह्मांडगोलकेयद्वन्मुक्तिःकाश्यांव्यवस्थिता ॥ अष्टांगयोगयुक्त्यावानतथाहेलयाऽन्यतः ॥ ३६ ॥ इतिब्रुवाणोदेवेशोहरिकेशमवैक्षत ॥ मध्येवनंतपस्यंतमशोकतरुमूलगम् ॥ ३७ ॥ शुष्कस्नायुपिनद्धास्थिसंचयंनिश्चलाकृतिम् ॥ वल्मीककीटकाकोटिशोषितासृगसृग्धरम् ॥३८॥ निर्मांसकीकसचयंस्फटिकोपलनिश्चलम् ॥ शंखकुंदेंदुतुहिनमहाशंखलसच्छ्रियम् ॥ ३९ ॥ सत्वावलंबितप्राणमायुःशेषेणरक्षितम् ॥ निःश्वासोच्छ्वासपवनवृत्तिसूचितजीवितम् ॥ १४० ॥ निमेषोन्मेषसंचारपिशुनीकृतजंतुकम् ॥ पिंगतारस्फुरद्रश्मिनेत्रदीपितदिङ्मुखम् ॥ ४१ ॥ तत्तपोग्निशिखादावचुंबितम्लानकाननम् ॥ तत्सौम्यदृक्सुधावर्षसंसिक्ताऽखिलभूरुहम् ॥ ४२ ॥

करणेऽवलंबिताःस्थिताःप्राणायस्यतम् ॥ आयुःशेषेणप्रारब्धेनकर्मणारक्षितम् ॥ निःश्वासोच्छ्वासपवनस्यप्राणस्यवृत्तिभ्यांसूचितंज्ञापितंजीवितंजीवनंयस्यतम् ॥ १४० ॥ निमेषोन्मेषसंचारेणप्राणिधर्मेणअपिशुनाःपिशुनागुणेषुदोषारोपकाःकृताजंतवोव्याघ्रादयोयेनतम् ॥ तेषामस्मिन्व्याधबुद्धिर्जातेतिभावः ॥ पिंगेपिंगलेतारेकनीनिकेययोःस्फुरंतोरश्मयोययोस्तेचतेनेत्रेचताभ्यांदीपितानिदिशांमुखानियेनतम् ॥ ४१ ॥ सम्प्रसिद्धश्चासौतपोऽग्निश्चतस्यशिखैवदावोवनाग्निस्तेनचुंवितानिसंलग्नानिअतएवम्लानानिकाननानियेनतम् ॥ तत्तपोग्निशिखादावस्यचुंवितेनसंबंधेनम्लानानिकाननानियस्मादितिवा ॥ तेप्रसिद्धेचसौम्यदृशौचशांतनेत्रेतयोःसुधावर्षेणसंसिक्ताअखिलभूरुहायेनतम् ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नराकृतिंमनुष्यशरीरंधृत्वासाक्षात्तपइवतपस्यंतम् ॥ किंकृत्वेत्यपेक्षायामाह ॥ निराकांक्षंयथास्यात्तथानिराकृतिमाकारशून्यामनिर्वाच्यांकांचनभक्तिंकृत्वाविधाय ॥ निराकांक्षंयथास्यादिति यद्यपितथापिनिराकृतिंकांचनाकांक्षांकृत्वेत्यर्थः ॥ ४३ ॥ कुरंगशावैर्मृगपोतैर्गणशोयूथशोभ्रमद्भिःपरिवारितंवेष्टितम् ॥ नितांतमतिशयेनभीषणान्यास्यानियेषांतथाभूतैःपंचास्यैःसिंहैरीश्वर प्रयुक्तैःपरिरक्षितम् ॥ ४४ ॥ तंतथेति ॥ तंपूर्वोक्तंप्रसिद्धंवाहरिकेशंतथाभूतंपूर्वोक्तविशेषणविशिष्टमालोक्यदेवीभवानीदेवंविश्वेश्वरंव्याजिज्ञपद्विज्ञापयामास ॥ विज्ञापनप्रकारमाह ॥ हेईशामुं निजभक्तंतपस्विनंवरेणवरदानेनछंदयइच्छांपूरयअनुग्रहंकुर्वित्यर्थः ॥ ४५ ॥ एतदेवविवृणोति ॥ त्वदेकेति ॥ स्पष्टम् ॥ ४६ ॥ अवरुह्यावतीर्य शैलादिनानंदिनादत्तःकरावलंबो यस्यसः ॥ समाधिनासंकोचितंमुद्रितंनेत्रमेवपत्रंपद्मपत्रंयस्यतम् ॥ ४७ ॥ समक्षंप्रत्यक्षम् ॥ हर्षेणाकुलंगद्गदंचाक्षरंयथास्यात्तथाजगाद ॥ ४८ ॥ किंजगादेतदाह ॥ जयेति ॥ जयो त्कर्षमाविष्कुरु ॥ इतःपरमन्यच्छ्रेयोनास्तीतिवहुधासंवोधयति ॥ हेकृपालोदयालो ॥ तवहस्तपंकजंप्राप्यामृतीभूतातनूलतादेहवल्लीयस्यतथाभूतोहमभवंजातोस्मि ॥ कथंभूतंहस्तपंकजम् ॥

साक्षात्तपस्यंतमिवतपोधृत्वानराकृतिम् ॥ निराकृतिंनिराकांक्षंकृत्वाभक्तिंचकांचन ॥४३॥ कुरंगशावैर्गणशोभ्रमद्भिःपरिवारितम् ॥ नितांतभीषणास्यै श्चपंचास्यैःपरिरक्षितम् ॥ ४४ ॥ तंतथाभूतमालोक्यदेवीदेवंव्यजिज्ञपत् ॥ वरेणच्छंदयेशामुंनिजभक्तंतपस्विनम् ॥ ४५ ॥ त्वदेकचित्तंत्वदधीनजी वितंत्वदेककर्माणमसुंत्वदाश्रयम् ॥ तीव्रैस्तपोभिःपरिशुष्कविग्रहंकुरुष्वयक्षस्यवैरनुग्रहम् ॥ ४६ ॥ देवोवृषेंद्रादवरुह्यदेव्याशैलादिनादत्तकरावलंबः ॥ समाधिसंकोचितनेत्रपत्रंपस्पर्शहस्तेनदयार्द्रचेताः ॥ ४७ ॥ ततःसयक्षोविनिमीलयचक्षुषीत्र्यक्षंपुरोवीक्ष्यसमक्षमात्मनः ॥ उद्यत्सहस्रांशुसहस्रतेजसं जगादहर्षाकुलगद्गदाक्षरम् ॥ ४८ ॥ जयेशशंभोगिरिजेशशंकरत्रिशूलपाणेशशिखंडशेखर ॥ स्पर्शात्कृपालोतवपाणिपंकजंप्राप्यामृतीभूततनूलतो ऽभवम् ॥ ४९ ॥ श्रुत्वोदितांतस्यमहेश्वरोगिरंमृद्वीकयासाम्यमुपेयुषींमृदु ॥ भक्तस्यधीरस्यमहातपोनिधेददौवराणांनिकरंतदामुदा ॥ १५० ॥ क्षेत्रस्ययक्षास्यममप्रियस्यमेभवाधुनादंडधरोवरान्मम ॥ स्थिरस्त्वमद्यादिदुरात्मदंडकःसुपालकःपुण्यकृतांचमत्प्रियः ॥ ५१ ॥ त्वंदंडपाणिर्भ वनामतोऽधुनासर्वान्गणान्छाधिममाज्ञयोत्कटान् ॥ गणाविमौत्वामनुयायिनौसदानाम्नायथार्थौनृषुसंभ्रमोद्भ्रमौ ॥ ५२ ॥

स्पर्शात्ममस्पर्शंकुर्वत् ॥ स्पर्शात्कृपालोतवपाणिपद्मजमितिपाठेपाणिपद्माज्जातंस्पर्शंप्राप्येत्यर्थः ॥ ४९ ॥ कथंचदेवदेवस्येत्यादिप्रश्नचतुष्टयस्योत्तरंदातुंप्रक्रमते ॥ श्रुत्वेति ॥ हेमहातपोनिधे अगस्त्य ॥ विसर्गांतपाठेहरिकेशविशेषणम् ॥ महेश्वरस्तस्यहरिकेशस्यमृदुयथास्यात्तथागिरंश्रुत्वावराणांनिकरंप्रादादित्यन्वयः ॥ मृदुमितिपाठेगिरोविशेषणम् ॥ कथंभूताम् ॥ मृद्वीकयाद्राक्षय- मधुरसयेतियावत् ॥ साम्यंसमभावमुपेयुषींप्राप्नुवतीम् ॥१५०॥ वरसमूहमेवदर्शयति क्षेत्रस्येत्यादिना ॥ भोहरिकेशत्वंममप्रियस्यास्यक्षेत्रस्यममवराद्दंडनायकोदंडधारकोभव॥ अद्यदिनमादिंअद्या दितद्यथास्यात्तथास्थिरःसन्नित्यर्थः ॥ दंडधारकत्वमेवदर्शयति ॥ दुरात्मनांदुष्टानांदंडकोदुरात्मदंडकः ॥ पुण्यकृतांसुपालकःसुष्ठुरक्षकः ॥ अनुपालकइतिक्वचित्पाठः ॥ तृतीयपादादौक्षेत्रस्थिता न्पाहीतिच ॥ ५१ ॥ शाधिनियमय ॥ उत्कटानुद्भटानपि ॥ त्वामनुयायिनौत्वदनुवर्तिनौभविष्यतः ॥ यथाअवाधितोऽर्थोययोस्तौ ॥ तमेवाह ॥ सम्यग्भ्रमोयस्मादित्येकः उत्उत्कृष्टो

CC-0. In Public Domain. Digitization by eGangotri

भ्रमोयस्मादित्यपरस्तौ ॥ ५२ ॥ अपृष्टमपिकथयाति ॥ त्वमिति ॥ काशीवासिनांजनानांत्वमंत्यभूषामंतिमकालीनामलंकृतिंकुरु ॥ गलेसुनीलंयस्याम् ॥ कंठेकालइत्यादिवदलुक् ॥ भुजगेंद्राःकंकणानिकरभूषणानियस्याम् ॥ भालेपुशोभनानिनेत्राणियस्याम् ॥ करिणांगजानांकृत्तयश्चर्माणिवासांसियस्याम् ॥ वामेमनोहरेईक्षणेनेत्रेयासांताभिरुपलक्षितोवामभागोयस्याम् ॥५३॥ मौलौमस्तकेलसतांकांतिमतांपिंगकपर्दानांपिंगलजटाजूटानांभारोवर्त्ततेयस्याम् ॥ विभूतिभिरग्निहोत्रजभस्मभिःसंक्षालितःपुण्योविग्रहोयस्याम् ॥ अहःस्वपिहिमांशोश्चंद्रस्यकलयालसंतीश्रीर्यस्याम् ॥ अहोइत्याश्चर्येसंबोधनेवा ॥ वृषेंद्रस्यलीलागत्यामंदंगंतुंशीलंयस्यास्ताम् ॥ ५४ ॥ त्वमन्नदइति ॥ अत्राधिकोक्तिर्व्युत्क्रमोक्तिश्चभक्तिरसावेशेनेतिवोद्धव्यम् ॥ ननुत्वमेवतारकोपदेशान्मोक्षदः कथमहमितिचेत्तत्राह ॥ मन्मुखसूपदेशतोमन्मुखनिःसृतशोभनोपदेशान्निमित्तात्त्वमेकएवमोक्षदइत्यर्थः ॥ हीत्यनेनशास्त्रसिद्धिंद्योतयाति ॥ सद्वसतिंसम्यङ्निवासम् ॥ ५५ ॥ विघ्नपूगैः

त्वमंत्यभूषांकुरुकाशिवासिनांगलेसुनीलांभुजगेंद्रकंकणाम् ॥ भालेसुनेत्रांकरिकृत्तिवाससंवामेक्षणालक्षितवामभागाम् ॥ ५३ ॥ मौलौलसत्पिंगकप र्दभारिणींविभूतिसंक्षालितपुण्यविग्रहाम् ॥ अहोहिमांशोःकलयालसच्छ्रियंवृषेंद्रलीलागतिमंदगामिनीम् ॥ ५४ ॥ त्वमन्नदःकाशिनिवासिनांसदा त्वंप्राणदोज्ञानदएकएवहि ॥ त्वंमोक्षदोमन्मुखसूपदेशतस्त्वंनिश्चलांसद्वसतिंविधास्यसि ॥ ५५ ॥ त्वंविघ्नपूगैःपरिपीड्यपापिनःसंभ्रांतिमुत्पाद्यविने ष्यसेबहिः ॥ आनीयभक्तान्क्षणतोपिदूरतोमुक्तिंपरांदापयितासिपिंगल ॥ ५६ ॥ त्वत्सात्कृतेक्षेत्रवरेहियक्षराट्कस्त्वामनाराध्यविमुक्तिभाजनम् ॥ सभाजनंपूर्वतएवतेचरेत्ततःसमर्चांममभक्तआचरेत् ॥ ५७ ॥ त्वंग्रामवासप्रदएवमेपुरेऽध्यक्षस्त्वमेधीहचदंडनायकः ॥ दुष्टान्समुद्घाट्यकाशिवैरिणः काशींपुरींरक्षसदासुदान्वितः ॥ ५८ ॥ पूर्णभद्रसुतदंडनायकत्र्यक्षयक्षहरिकेशपिंगल ॥ काशिवासवसतांसदान्नदज्ञानमोक्षदगणाग्रणीर्भव ॥ ५९ ॥ मद्भक्तियुक्तोपिविनात्वदीयांभक्तिंनकाशीवसतिंलभेत ॥ गणेषुदेवेषुहिमानवेषुतदग्रमान्योभवदंडपाणे ॥ १६० ॥ ज्ञानोदतीर्थेविहितोदकक्रियोयस्त्वां समाराधयितागणेशम् ॥ सएवलोकेकृतकृत्यतामगान्ममातुलानुग्रहतोऽत्रपुण्यवान् ॥ ६१ ॥ त्वंदक्षिणस्यांदिशिदंडपाणेसदैवमेनेत्रसमक्षमत्र ॥ त्वंदं डयन्प्राणभृतोदुरीहानिहास्वनॄन्स्वानभयंदिशन्वै ॥ ६२ ॥

प्रत्यूहसमूहैः ॥ पिंगलहेतपसापिंगलमूर्ते सूर्यपारिपार्श्वकस्यपिंगलस्यावतारत्वाद्वातथासंबोध्यते ॥ ५६ ॥ त्वदिति ॥ यक्षराट्हेयक्षराजक्षेत्रवरेऽस्मिन्नविमुक्तेत्वत्सात्त्वदधीनेकृतेसतिकस्त्वा मनाराध्यापूजयित्वामुक्तिभाजनंमुक्तेःपात्रंस्यात् ॥ अतःपूर्वतएवप्रथममेवतेतवसभाजनंपूजनंचरेत् ॥ ततस्तदनंतरंममसमर्चांममभक्तआचरेत्कुर्यात् ॥ अन्यथाकृतेममभक्तएवनस्यादितिभावः॥५७॥ दंडनायकस्त्वमेधिभव ॥ ५८ ॥ ५९ ॥ तत्तस्मादग्रमान्यःप्रथमतएवपूज्यः ॥ १६० ॥ गणेशंगणानांनियंतारंत्वामिति ॥ ६१ ॥ हेदंडपाणेत्वमिहक्षेत्रेसदैवमेममनेत्रसमक्षंप्रत्यक्षमास्वतिष्ठे त्यन्वयः ॥ कुत्रेत्याकांक्षायामाह ॥ मेदक्षिणस्यांदिशीति ॥ किंकुर्वन् ॥ दुश्चेष्टान्प्राणभृतःप्राणिनोदंडयन् ॥ पुनःकिंकुर्वन् ॥ स्वान्भक्तान्नॄन्मनुष्यान्प्रतिअभयंदिशन् ॥ वैनिश्चये ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशपरिचचार ॥ ६३ ॥ निदेशतईश्वराज्ञया ॥ चद्रुष्टतइतिक्वचित्पाठः ॥ ६४ ॥ अहमिति ॥ तदनुसूययातद्गुणदोषाविष्कारेण ॥ गुणेषुदोषाविष्करणमेवाह ॥ वसन्नपीति ॥ काश्यांवसन्नपिसमयानसंभावितोयतःअतस्तदनुसूययाहमप्यत्रवसतिंचक्रइत्यर्थः ॥ त्वयेतिपाठोबाहुल्येननदृश्यतेसंचिंत्यः ॥ ६५ ॥ मुनेइति ॥ हेमुनेएवंविधोवशीजितेन्द्रियोपिक्षेत्रंयस्त्वमत्याक्षीस्त्यक्तवानसि ॥ यदात्याक्षीरितिपाठेआसमंततःसर्वात्मनेत्यर्थः ॥ तत्रत्यागेकामंनिराबाधंतस्यैवदंडपाणेरेवविक्रियांप्रातिकूल्यंहेतुमहंशंकेआशंकइत्यर्थः ॥ ६६ ॥ तद्विक्रियायांहेतुंदर्शयन्पूर्वोक्तमेवविवृणोति ॥ मनागिति ॥ निर्वृतिःसुखम् ॥ ६७ ॥ ६८ ॥ अतःस्वयमपिकाशीवासायोद्रिक्तभक्तिस्तमेवप्रार्थयते ॥ रत्नभद्रेति ॥ उत्तमश्रेष्ठ ॥ शिवाप्तयेमोक्षाय ॥ ६९ ॥

॥ स्कंदउवाच ॥ ॥ इतिदत्त्वावरान्विप्रगिरीशोदंडपाणये ॥ वृषेंद्रमधिरुह्याथविवेशानंदकाननम् ॥ ६३ ॥ कुंभोद्भवतदारभ्ययक्षराड्दंडनायकः ॥ पुरींवाराणसींसम्यगनुशास्तिनिदेशतः ॥ ६४ ॥ अहमप्यत्रवसतिंचक्रेतदनुसूयया ॥ वसन्नपिमयाकाश्यांयतःसंभावितोनसः ॥ ६५ ॥ मुनेक्षेत्रंयदत्याक्षीस्त्वमप्येवंविधोवशी ॥ शंकेतत्राहमेवाद्धाकामंतस्यैवविक्रियाम् ॥ ६६ ॥ मनाग्विरुद्धाचरणंयदिद्विजविलक्षयेत् ॥ हरिकेशस्तदाकाश्यांक्वस्थितिःक्वचनिर्वृतिः ॥ ६७ ॥ दंडपाणिमनाराध्यकःकाश्यांसुखमाप्नुयात् ॥ प्रविविक्षुरहंकाशींदूरगोपिभजामितम् ॥ ६८ ॥ रत्नभद्रांगजोद्भूतपूर्णभद्रसुतोत्तम ॥ निर्विघ्नंकुरुमेयक्षकाशीवासंशिवाप्तये ॥ ६९ ॥ धन्योयक्षःपूर्णभद्रोधन्याकांचनकुंडला ॥ ययोर्जठरपीठेभूर्दंडपाणेमहामते ॥ १७० ॥ जययक्षपतेधीरजयपिंगललोचन ॥ जयपिंगजटाभारजयदंडमहायुध ॥ ७१ ॥ अविमुक्तमहाक्षेत्रसूत्रधारोग्रतापस ॥ दंडनायकभीमास्यजयविश्वेश्वरप्रिय ॥ ७२ ॥ सौम्यानांसौम्यवदनभीषणानांभयानक ॥ क्षेत्रपापधियांकालमहाकालमहाप्रिय ॥ ७३ ॥ जयप्राणदयक्षेंद्रकाशीवासान्नमोक्षद ॥ महारत्नस्फुरद्रश्मिचयचर्चितविग्रह ॥ ७४ ॥ महासंभ्रांतिजनकमहोद्भ्रांतिप्रदायक ॥ अभक्तानांचभक्तानांसंभ्रांत्युद्भ्रांतिनाशक ॥ ७५ ॥ प्रांतनेपथ्यचतुरजयज्ञाननिधिप्रद ॥ जयगौरीपदाब्जालेमोक्षेक्षणविचक्षण ॥ ७६ ॥

बुद्ध्याप्रत्यक्षीकृत्यतंस्तोतुमुपक्रमते ॥ धन्यइति ॥ हेदंडपाणेहेमहामतेययोर्जठरपीठेभवतीतिभूस्त्वंसपूर्णभद्रोधन्यःसाचकनककुंडलाधन्येति ॥ १७० ॥ स्तुतिमाह जयेत्यष्टभिः ॥ दंडएवमहायुधंयस्य ॥ ७१ ॥ सूत्रधारस्थपते ॥ ७२ ॥ महान्प्रियोमहाप्रियः ॥ ७३ ॥ महारत्नानांस्फुरतारश्मिचयेनचर्चितोविग्रहोयस्य ॥ ७४ ॥ अभक्तानांचेत्यस्यपूर्वेणान्वयः ॥ ७५ ॥ प्रांतनेपथ्यचतुरअंतिमकालीनालंकरणेदक्ष ॥ गौरीपदाब्जालेभवानीपादपद्मभ्रमर ॥ मोक्षस्येक्षणेमोक्षइदानींभविष्यतीतिज्ञानेविचक्षणनिपुणमोक्षेक्षणविचक्षण ॥ मोक्षेषणेतिक

CC-0. In Public Domain. Digitization by eGangotri

चित् ॥ ७६ ॥ स्वफलमाह ॥ यक्षेति ॥ ७७ ॥ परफलमाह ॥ दंडपाणीतिद्वाभ्याम् ॥ श्रद्धयाजपन्निितिसंबंधः ॥ ७८ ॥ विपत्तिमरणम् ॥ ७९ ॥ एतदध्यायश्रवणपठनफलमाह ॥ श्रुत्वेति ॥ १८० ॥ इतिश्रीरामानंदकृतायांकाशीखण्डटीकायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ चिद्वाप्यावर्णनंचित्रंचित्रकाशीक्षणांतरम् ॥ त्रयस्त्रिंशत्तमेऽध्यायेतथ्यंसंकथ्यतेध्रुवम् ॥ १ ॥ ज्ञानोदतीर्थेविहितोदकक्रियइत्युक्तंतत्रपृच्छति ॥ स्कन्देति ॥ विशेषतएतत्प्रश्नेहेतुमाह ॥ ज्ञानवापीमिति ॥ स्वर्गौकसोदेवाअपि ॥ अलमत्यर्थम् ॥ १ ॥ २ ॥ अनादीति ॥ देवयुगेसत्ययुगे ॥ ईशानःपूर्वोत्तरांतरालदिगधिष्ठाताऽष्टानांरुद्राणांमध्येएकतमः॥तथाचोक्तंवैष्णवेनीललोहितंरुद्रमुपक्रम्य ॥ भवंशर्वंमहेशानंतथाभूतपतिंद्विज ॥ भीममुग्रंमहादेवमुवाचसपितामहइति ॥ निर्वाणकमलायामोक्षलक्ष्म्याःक्षेत्रमानंदकाननंप्राप्तइति तृतीयेनान्वयः ॥ ३ ॥ कदाप्राप्तइत्याकांक्षायांकालंनिर्दिशति नवर्षतियदेतिद्वाभ्याम् ॥ ४ ॥ क्षारस्वादुनीउदेउदकेययोस्तौक्षारस्वादूदौलवण

यक्षराजाष्टकंपुण्यमिदंनित्यंत्रिकालतः ॥ जपामिमैत्रावरुणेवाराणस्याप्तिकारणम् ॥ ७७ ॥ दंडपाण्यष्टकंधीमाञ्जपन्विघ्नैर्नजातुचित् ॥ श्रद्धयापरिभूयेतकाशीवासफलंलभेत् ॥ ७८ ॥ प्रादुर्भावंदंडपाणेःशृण्वन्स्तोत्रमिदंगृणन् ॥ विपत्तिमन्यतःप्राप्यकाशींजन्मांतरेलभेत् ॥ ७९ ॥ श्रुत्वाध्यायमिमंपुण्यंदंडपाणिसमुद्भवम् ॥ पठित्वापाठयित्वापिनविघ्नैरभिभूयते ॥ १८० ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धे दंडपाणिप्रादुर्भावोनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ अगस्त्यउवाच ॥ ॥ स्कंदज्ञानोदतीर्थस्यमाहात्म्यंवदसांप्रतम् ॥ ज्ञानवापींप्रशंसंतियतःस्वर्गौकसोप्यलम् ॥१॥ ॥ स्कंदउवाच ॥ ॥ घटोद्भवमहाप्राज्ञशृणुपापप्रणोदिनीम् ॥ ज्ञानवाप्याःसमुत्पत्तिंकथ्यमानांमयाधुना ॥२॥ अनादिसिद्धेसंसारेपुरादेवयुगेमुने ॥ प्राप्तःकुतश्चिदीशानश्चरन्स्वैरमितस्ततः ॥ ३ ॥ नवर्षतियदाप्राणिनप्रावर्ततनिम्नगाः ॥ जलाभिलाषोनयदास्नानपानादिकर्माणि ॥ ४ ॥ क्षारस्वादूदयोरेवयदासीज्जलदर्शनम् ॥ पृथिव्यांनरसंचारेवर्तमानेक्वचित्क्वचित् ॥ ५ ॥ निर्वाणकमलाक्षेत्रंश्रीमदानंदकाननम् ॥ महाश्मशानंसर्वेषांबीजानांपरमूषरम् ॥ ६ ॥ महाशयनसुप्तानांजंतूनांप्रतिबोधकम् ॥ संसारसागरावर्तपतज्जंतुतरंडकम् ॥ ७ ॥ यातायातातिसंखिन्नजंतुविश्राममंडपम् ॥ अनेकजन्मगुणितकर्मसूत्रच्छिदाक्षुरम् ॥ ८ ॥ सच्चिदानंदनिलयंपरब्रह्मरसायनम् ॥ सुखसंतानजनकंमोक्षसाधनसिद्धिदम् ॥ ९ ॥ प्रविश्यक्षेत्रमेतत्सईशानोजटिलस्तदा ॥ लसत्त्रिशूलविमलरश्मिजालसमाकुलः ॥ १० ॥

जलार्णवौतयोः ॥ ५ ॥ क्षेत्रंविशिनष्टि निर्वाणेतित्रिभिः ॥ महांतिभूतानिश्मशवीभूयशानंशेरतेऽस्मिन्निितिमहाश्मशानम् ॥ तदुक्तम् ॥ श्मशब्देनशवःप्रोक्तःशानंशयनमुच्यतइति ॥ वीजानांकर्मणामूषरमनुद्भवहेतुम् ॥ ६ ॥ महाशयनसुप्तानामात्माज्ञानजृंभितानांजंतूनांप्रतिबोधकंज्ञानजनकम् ॥ संसारसागरावर्तेसंसाररूपस्यसमुद्रस्यजलस्थानीयानांरागादीनामावर्तेभ्रमेपततांजंतूनांतरंडकंवेलारूपमित्यर्थः ॥ यद्वा तरंडकंमहानौकास्वरूपंपढमंभाषयातरंडोनामअँपिंगलोजयइतिदर्शनात् (?) ॥ ७ ॥ गमनागमनाभ्यामतिसंखिन्नानांजंतूनांविश्राममंडपंकैवल्यैकगृहम् ॥ अनेकजन्मभिर्गुणितानिग्रथितानियानिकर्मरूपाणिसूत्राणितेषांछिदायाश्छेदनस्यक्षुरमतितीक्ष्णधारंशस्त्रविशेषः ॥ विच्छेदकमित्यर्थः ॥ ८ ॥ सच्चिदानंदलक्षणस्यविश्वेश्वरस्यनिलयमाश्रयम् ॥ परब्रह्मचासौरसश्चेति ॥ रसोवैसः रसंह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः ॥ तमयतेप्रापयतितस्यायनंप्राप्तिर्यस्मादितिवातत् ॥ ९ ॥ प्रविश्येति ॥ सप्रसिद्धःपूर्वोक्तोवा ॥ एततपूर्वोक्तविशेषणावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिष्टमेतत्क्षेत्रंप्रविश्यमहालिंगमालुलोकेददर्शेतिद्वितीयेनान्वयः ॥ कथंभूतोजटिलोजटावान् ॥ शोभमानत्रिशूलस्यनिर्मलरश्मिसमूहेनव्याप्तः ॥ १० ॥ किंतल्लिंगंयद्वैकुंठपरमेष्ठिनोर्यज्ञहिरण्यगर्भयोर्महाहमहमिकायांमहानहंमहानहमितिसंरब्धक्रियायाम् ॥ आदितःकालभैरवाध्यायेपूर्वमितिवा ॥ प्रादुरासप्रादुरभूत् ॥ ११ ॥ लिंगंविशिनष्टि ज्योतिरितिचतुर्भिः ॥ ज्योतिर्मयीभिर्मालाभिर्दीप्यमानाभिःपुष्पादिमालाभिस्तेजःपुंजैर्वाचतुर्दिक्षुव्याप्तमित्यर्थः ॥ वृंदारकादेवाऋषयश्चतेषांवृंदैःसमूहैर्निरंतरमर्च्यमानमित्यन्वयः ॥ १२ ॥ सिद्धानांकपिलादीनांयोगिनांचसनकादीनांस्तोमैःसमूहैश्चनिरंतरमर्च्यमानम् ॥ गंधर्वैर्निरंतरंगीयमानंचचारणैर्देवानांस्तुतिपाठकैर्निरंतरंस्तूयमानंचेत्यर्थः ॥ १३ ॥ अंगहारैर्नृत्यैरुर्वश्यादिभिरनेकधासेव्यमानम् ॥ नागकन्याभिर्मणिदीपकैर्मणिरूपैःप्रदीपैःसततंनीराज्यमानंनीराजनंप्राप्यमाणम् ॥ १४ ॥ विद्याधरकिन्नरांगनाभिःकालत्रयंव्याप्यकृतंमंडनंभूषणंयस्य कृतानिमंडनानिसर्वतोभद्रादीनिवायस्मैतत् ॥ अमरीभिर्देवस्त्रीभिश्चमरीराजिभिश्चामरपंक्तिभिर्वीज्यमानंदेवांगनाभिश्चामरव्यजनैःसेव्यमानमित्यर्थः ॥१५॥ अस्येतिअस्यप्रकृतस्यईशानस्यतल्लिंगंदृष्ट्वाइतिएतादृशीइच्छाभवत्॥कीदृशीत्याकांक्षायामाह॥

आलुलोकेमहालिंगंवैकुंठपरमेष्ठिनोः ॥ महाहमहमिकायांप्रादुरासयदादितः ॥ ११ ॥ ज्योतिर्मयीभिर्मालाभिःपरितःपरिवेष्टितम् ॥ वृंदैर्वृंदारकर्षीणां गणानांचनिरंतरम् ॥ १२ ॥ सिद्धानांयोगिनांस्तोमैरर्च्यमानंनिरंतरम् ॥ गीयमानंचगंधर्वैःस्तूयमानंचचारणैः ॥ १३ ॥ अंगहारैरप्सरोभिःसेव्यमानमनेकधा ॥ नीराज्यमानंसततंनागीभिर्मणिदीपकैः ॥ १४ ॥ विद्याधरीकिन्नरीभिस्त्रिकालंकृतमंडनम् ॥ अमरीचमरीराजिवीज्यमानमितस्ततः ॥ १५ ॥ अस्येशानस्यतल्लिंगंदृष्ट्वेच्छेत्यभवत्तदा ॥ स्नपयामिमहल्लिंगंकलशैःशीतलैर्जलैः ॥ १६ ॥ चखानचत्रिशूलेनदक्षिणाशोपकंठतः ॥ कुंडं प्रचंडवेगेनरुद्रोरुद्रवपुर्धरः ॥ १७ ॥ पृथिव्यावरणांभांसिनिष्क्रांतानितदामुने ॥ भूप्रमाणाद्दशगुणैर्यैरियंवसुधावृता ॥ १८ ॥ तैर्जलैःस्नापयांचक्रेत्वस्पृष्टैरन्यदेहिभिः ॥ तुषारैर्जाड्यविधुरैर्जंजपूकौघहारिभिः ॥ १९ ॥ सन्मनोभिरिवात्यच्छैरनच्छैर्व्योमवर्त्मवत् ॥ ज्योत्स्नावदुज्ज्वलच्छायैः पावनैःशंभुनामवत् ॥ २० ॥ पीयूषवत्स्वादुतरैःसुखस्पर्शैर्गवांगवत् ॥ निष्पापधीवद्गंभीरैस्तरलैःपापिशर्मवत् ॥ २१ ॥ विजिताब्जमहागंधैःपाटलामोदमोदिभिः ॥ अदृष्टपूर्वलोकानांमनोनयनहारिभिः ॥ २२ ॥

स्नपयामीति ॥ १६ ॥ चखानकुंडंखनितवान् ॥ कुत्र ॥ विश्वेशस्थानाद्दक्षिणाशायाउपकंठतःकंठस्यसमीपमुपकंठंतस्मिन्विश्वेश्वरस्यदाक्षिणस्यांदिश्यतिसमीपइत्यर्थः ॥ १७ ॥ पृथिव्यावरणांभांसिपृथिव्याद्वितीयावरणांभांसि ॥ कथंभूतानि ॥ भूप्रमाणात्पंचाशत्कोटिलक्षणाद्दशगुणैर्यैरंभोभिर्जलैरियंवसुधावृतातानि ॥ १८ ॥ तैर्जलैःस्नापयांचक्रेइत्यन्वयः ॥ जलानिविशिनष्टि त्वस्पृष्टैरितिपादोनसप्तभिः ॥ तुएवअन्यप्राणिभिरस्पृष्टैरेवेत्यर्थः ॥ तुषारैस्तत्तुल्यैःशीतलैरित्यर्थः ॥ जाड्यविधुरैःजडस्यभावोजाड्यंतद्विधुरैर्ज्ञानैकस्वरूपैः ॥ जंजपूकौघहारिभिःपापनिकरध्वंसिभिः ॥ १९ ॥ सतांमनोभिःसंतिसमीचीनानियानिमनांसितैरिवात्यच्छैरत्यंतनिर्मलैः ॥ अनच्छैर्नीलीसदृशैर्व्योमवर्त्मवदाकाशमार्गैरिव ॥ नविद्यमानमच्छंयेभ्यस्तैरितिवा ॥ अतुच्छैरितिकश्चित् ॥ ज्योत्स्नावत्ज्योत्स्नाभिरिवोज्ज्वलाच्छायाकांतिर्येषांतैः ॥ पावनैःपवित्रैःशंभुनामवत्शिवनामभिरिव ॥ २० ॥ पीयूषवत्अमृतैरिवस्वादुतरैरत्यंतसुस्वादैः ॥ सुखस्पर्शोयेषांतैःगवांगवद्गवामंगैरिव ॥ निष्पापधीवत्निष्कलुषबुद्धिभिरिवगंभीरैरगाधैः ॥ तरलैश्चंचलैःपापिशर्मवत्पापिनांसुखैरिव ॥ २१ ॥ विजितास्तिरस्कृतोऽब्जानांपद्मानांमहागंधोयैः ॥ पाटलायाःपाटले

CC-0. In Public Domain. Digitization by eGangotri

रिवायआमोदोहर्षोगन्धोवातेनतस्मादपिवामोदितुंशीलंयेषांतैः ॥ नदृष्टानिपूर्वंयैस्तेऽदृष्टपूर्वास्तेचतेलोकाश्चतेषांमनोनेत्रहरणशीलैः ॥ २२ ॥ अज्ञानरूपतापसन्तप्तप्राणिप्राणानांमुखयरक्षणशीलैः ॥
दधिदुग्धघृतमधुशर्कराणांकुंभैर्यत्स्नानंततोप्यतिफलंप्रददतीतितथातैः ॥ २३ ॥ श्रद्धयोपस्प्रष्टुमाचमितुंशीलंयेषांतेषांहृदयेषुलिंगत्रितयहेतुभिर्लिंगत्रितयजनकैः ॥ अज्ञानमविद्यातदेवतिमिरमंधका
रस्तत्रार्कैस्तन्नाशकैरित्यर्थः ॥ ज्ञानस्यदानेप्रदानेनितरांदायकैःप्रदायकैः ॥ निदानकैरितिपाठेआदिकारणैरित्यर्थः ॥२४॥ विश्वभर्तुर्विश्वेशस्यकांतायाउमायाःपार्वत्याःस्पर्शेनसुखादप्यातिसुखमतिश
यितंसुखंकर्तुंशीलंयेषांतैः ॥ महावभृथसुस्नानेभ्योमहावभृथशोभनस्नानात्सकाशाद्यामहतींशुद्धिंविधातुंशीलंयेषांतैः ॥ २५ ॥ सहस्रधारैरसंख्याताधाराश्छिद्रैः ॥ सहस्रमुखावयवधारैरितिवा ॥ सहस्र

अज्ञानतापसंतप्तप्राणिप्राणैकरक्षिभिः ॥ पंचामृतानांकलशैःस्नपनातिफलप्रदैः ॥ २३ ॥ श्रद्धोपस्पर्शिहृदयलिंगत्रितयहेतुभिः ॥ अज्ञानतिमिरार्का
भैर्ज्ञानदाननिदायकैः ॥ २४ ॥ विश्वभर्तुरुमास्पर्शसुखातिसुखकारिभिः ॥ महावभृथसुस्नानमहाशुद्धिविधायिभिः ॥ २५ ॥ सहस्रधारैःकलशैःसई
शानोघटोद्भव ॥ सहस्रकृत्वःस्नपयामाससंहृष्टमानसः ॥ २६ ॥ ततःप्रसन्नोभगवान्विश्वात्माविश्वलोचनः ॥ तमुवाचतदेशानंरुद्रंरुद्रवपुर्धरम् ॥ २७ ॥
तवप्रसन्नोस्मीशानकर्मणानेनसुव्रत ॥ गुरुणानन्यपूर्वेणममातिप्रीतिकारिणा ॥ २८ ॥ ततस्त्वंजटिलेशानवरंब्रूहितपोधन ॥ अदेयंनतवास्त्यद्यमहो
द्यमपरायण ॥ २९ ॥ ॥ ईशानउवाच ॥ ॥ यदिप्रसन्नोदेवेशवरयोग्योस्म्यहंयदि ॥ तदेतदतुलंतीर्थंतवनाम्नास्तुशंकर ॥ ३० ॥ ॥ विश्वेश्वरउवाच ॥
त्रिलोक्यांयानितीर्थानिभूर्भुवःस्वःस्थितान्यपि ॥ तेभ्योखिलेभ्यस्तीर्थेभ्यःशिवतीर्थमिदंपरम् ॥ ३१ ॥ शिवंज्ञानमितिब्रूयुःशिवशब्दार्थचिंतकाः ॥
तच्चज्ञानंद्रवीभूतमिहमेमहिमोदयात् ॥ ३२ ॥ अतोज्ञानोदनामैतत्तीर्थंत्रैलोक्यविश्रुतम् ॥ अस्यदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ ३३ ॥ ज्ञानोदती
र्थसंस्पर्शादश्वमेधफलंलभेत् ॥ स्पर्शनाचमनाभ्यांचराजसूयाश्वमेधयोः ॥ ३४ ॥ फल्गुतीर्थेनरःस्नात्वासंतर्प्यचपितामहान् ॥ यत्फलंसमवाप्नोति
तदत्रश्राद्धकर्मणा ॥ ३५ ॥ गुरुपुष्यासिताष्टम्यांव्यतीपातोयदाभवेत् ॥ तदात्रश्राद्धकरणाद्गयाकोटिगुणंभवेत् ॥ ३६ ॥ यत्फलंसमवाप्नोतिपितॄन्सं
तर्प्यपुष्करे ॥ तत्फलंकोटिगुणितंज्ञानतीर्थेतिलोदकैः ॥ ३७ ॥ सन्निहत्यांकुरुक्षेत्रेतमोग्रस्तेविवस्वति ॥ यत्फलंपिंडदानेनतज्ज्ञानोदेदिनेदिने ॥३८॥
पिंडनिर्वपणंयेषांज्ञानतीर्थेसुतैःकृतम् ॥ मोदंतेशिवलोकेतेयावदाभूतसंप्लवम् ॥ ३९ ॥ अष्टम्यांचचतुर्दश्यामुपवासीनरोत्तमः ॥ प्रातःस्नात्वाथपी
तांभस्त्वंतर्लिंगमयोभवेत् ॥ ४० ॥

धारैःकलशैरितिव्यधिकरणेवातृतीये ॥ धारासमानार्थोधारशब्दोप्यस्ति ॥२६॥२७॥ अनेनकुंडोद्धृतजलस्नानेन ॥ गुरुणामहत्तरेण ॥ नविद्यतेऽन्यस्त्वत्तःपूर्वोयस्मिंस्तेनपूर्वंत्वदन्येनानाहृतेनेत्यर्थः॥
यद्वा नविद्यतेऽन्यत्पूर्वंयस्मात्प्रथमोत्पन्नेनेत्यर्थः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ शिवशब्दार्थंकथयन्ज्ञानोदमितिनामांतरंनिर्दिशति शिवमितिसार्धेन ॥ ३२ ॥ ३३ ॥ ३४ ॥ फल्गुतीर्थे
गयांतर्गते ॥३५॥ अमावास्यायुक्तोरविवासरोव्यतीपातोयोगविशेषोवा ॥ गुरुपुष्यासिताष्टम्यांव्यतीपातोयोगोयदाभवेदित्येकंवाक्यम् ॥३६॥ पुष्करेचित्रकूटदेशांतर्गतपारियात्रपर्वताविदूरे ॥३७॥
सन्निहत्यांरामह्रदे ॥ सप्तम्यर्थेद्वितीया ॥ सन्निहत्यांप्राप्येतिशेषइतिवा ॥३८॥३९॥ पीतमंभोयेनेतिपीतांभः॥ आकाराभावश्छांदसः ॥ पीत्वेतिवापाठः ॥ तुएवअंतर्लिंगमयोभवेदेवेत्यर्थः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चुलुकत्रयंगंडूषत्रयम् ॥ ४१ ॥ ईशानतीर्थेईशानकृतेतीर्थेज्ञानोदे ॥ विशेषाद्विशेषेण ॥ ४२ ॥ श्रीलिंगंविश्वेशमीशानेश्वरंवाज्ञानेश्वरंवा ॥ ४३ ॥ ४४ ॥ तारयतीतितारकंतदाख्यंतन्नामकम् ॥ ४५ ॥ क्षयेत्नश्येत् ॥ ज्ञानोदेक्षीयतइतिपाठेज्ञानोदविषयेस्मरणान्नश्यतीत्यर्थः ॥ ४६ ॥ शाकिनीडाकिन्यवांतरभेदः ॥ झोटिंगाःप्रेतविशेषाः ॥ मोटिंगाइतिपाठेसएवार्थः ॥ गुर्जरदेशेप्रसिद्धाः ॥ कालकर्णीराक्षस्यवांतरभेदः ॥ ४७ ॥ द्वितीयकचतुर्थकाःद्व्याहिकचतुर्थाहिकज्वरविशेषाः ॥ उक्षणादभ्युक्षणात् ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१॥ निर्वृतिंब्रह्मानंदमाप्तवान् जीवन्मुक्तोवभूवेत्यर्थः ॥ ५२ ॥ ईशानस्यतज्जलप्राशनद्वारास्वानंदावाप्तिरित्येतन्नातिचित्रंप्राकृतानामपितद्दर्शनादितिकथयितुमितिहासमवतारयति ॥ कलशोद्भवेति ॥ ५३ ॥ तन्यतेवंशोऽनयेतितनया ॥

एकादश्यामुपोष्यात्रप्राश्नातिचुलुकत्रयम् ॥ हृदयेतस्यजायंतेत्रीणिलिंगान्यसंशयम् ॥४१॥ ईशानतीर्थेयःस्नात्वाविशेषात्सोमवासरे ॥ संतर्प्यदेवर्षिपितॄन्दत्त्वादानंस्वशक्तितः ॥ ४२ ॥ ततःसमर्च्यश्रीलिंगंमहासंभारविस्तरैः ॥ अत्रापिदत्त्वानानार्थान्कृतकृत्योभवेन्नरः ॥ ४३ ॥ उपास्यसंध्यांज्ञानोदेयत्पापंकाललोपजम् ॥ क्षणेनतदपाकृत्यज्ञानवाञ्जायतेद्विजः ॥ ४४ ॥ शिवतीर्थमिदंप्रोक्तंज्ञानतीर्थमिदंशुभम् ॥ तारकाख्यमिदंतीर्थंमोक्षतीर्थमिदंध्रुवम् ॥ ४५ ॥ स्मरणादपिपापौघोज्ञानोदस्यक्षयेद्ध्रुवम् ॥ दर्शनात्स्पर्शनात्स्नानात्पानाद्धर्मादिसंभवः ॥ ४६ ॥ डाकिनीशाकिनीभूतप्रेतवेतालराक्षसाः ॥ ग्रहाःकूश्मांडझोटिंगाःकालकर्णीशिशुग्रहाः ॥ ४७ ॥ ज्वरापस्मारविस्फोटद्वितीयकचतुर्थकाः ॥ सर्वेप्रशममायांतिशिवतीर्थजलेक्षणात् ॥ ॥ ४८ ॥ ज्ञानोदतीर्थपानीयैर्लिंगंयःस्नापयेत्सुधीः ॥ सर्वतीर्थोदकैस्तेनध्रुवंसंस्नापितंभवेत् ॥ ४९ ॥ ज्ञानरूपोहमेवात्रद्रवमूर्तिंविधायच ॥ जाड्यविध्वंसनंकुर्यांकुर्यांज्ञानोपदेशनम् ॥ ५० ॥ इतिदत्त्वावराञ्छंभुस्तत्रैवांतरधीयत ॥ कृतकृत्यमिवात्मानंसोप्यमंस्तत्रिशूलभृत् ॥ ५१ ॥ ईशानोजटिलोरुद्रस्तत्प्राश्यपरमोदकम् ॥ अवाप्तवान्परंज्ञानंयेनानिर्वृतिमाप्तवान् ॥ ५२ ॥ ॥ स्कंदउवाच ॥ ॥ कलशोद्भवचित्रार्थमितिहासंपुरातनम् ॥ ज्ञानवाप्यांहियद्वृत्तंतदाख्यामिनिशामय ॥ ५३ ॥ हरिस्वामीतिविख्यातःकाश्यामासीद्द्विजःपुरा ॥ तस्यैकातनयाजातारूपेणाऽप्रतिमाभुवि ॥ ५४ ॥ नसमाशीलसंपत्त्यातस्याःकाचनभूतले ॥ कलाकलापकुशलास्वरेणजितकोकिला ॥ ५५ ॥ ननारीतादृगस्तीहनामरीकिन्नरीनच ॥ विद्याधरीननोनागीगंधर्वीनासुरीनच ॥ ५६ ॥ सर्वसौंदर्यनिलयासर्वलक्षणसत्खनिः ॥ अधिशेतेध्रुवंध्वांतंतन्मौलिंब्रध्नसाध्वसात् ॥५७॥ तदास्यंशरणंयातोमन्येदर्शभयाच्छशी ॥ दिवापिनत्यजेत्तांतुत्रस्तश्चंडमरीचितः ॥ ५८ ॥ तद्भ्रूभ्रमरराजीवगंडपत्रलतांतरे ॥ उदंचन्न्यंचदुड्डीनगतेरभ्यासभाजिनी ॥ ५९ ॥

तांविशिनष्टि रूपेणेतिसपादपंचदशभिः ॥ ५४ ॥ ५५ ॥ तादृगितिसर्वत्रसंबध्यते ॥ किन्नरीतिचेतिपाठेइतिचेतिपक्षांतरे ॥ ५६ ॥ खनिर्गर्तःआश्रयइत्यर्थः ॥ तन्मौलिंतत्केशमित्यर्थः ॥ एतेनकेशानांनीलतासूचिता ॥ ब्रध्नसाध्वसात्सूर्यभयात् ॥ ५७ ॥ दर्शभयादमावास्यायांनाशभयादित्यर्थः ॥ दिवापिअपिशब्दान्नक्तमपि ॥ चंडमरीचितःसूर्यात् ॥ ५८ ॥ तस्याभ्रूर्हशोरूर्ध्वस्थरोमालीगंडयोःकपोलयोर्यत्पत्रमलंकरणविशेषस्तदेवलतातस्याअभ्यंतरेमध्येउदंचंतीऊर्ध्वंगच्छंतीन्यंचंतीअधोगच्छंतीचयाउड्डीनगतिःखगगतिक्रियाविशेषस्तस्याअभ्यासभाजिनीसादृश्यभा

CC-0. In Public Domain. Digitization by eGangotri

जिनीआवृत्तिभाजिनीतिवा ॥ भ्रमरराजीव भ्रमरपंक्तिरिवेतिसर्वत्रोत्प्रेक्षा ॥ उदंचदित्यादिपृथग्वा ॥ उदंचदित्यादिभाजिनीवेत्यर्थः ॥ ५९ ॥ तच्चारुलोचनक्षेत्रेतस्याश्चारुलोचनयोःक्षेत्रम् उपनासामूलंतस्मिंस्तत्समीपइत्यर्थः ॥ खंजनौखंजरीटौ ॥ शारदींशरत्संबंधिनीम् ॥ निर्विंशतेप्राप्नुतः ॥ एतेनलोचनयोराह्लादकारित्वंसूचितम् ॥ यद्वा कंब्रह्मखंब्रह्मेतिश्रुतेः खंब्र ह्मानंदसुखंरूपदर्शनेनजनयतइतिखंजनौसर्वेषांलोचनेतस्याश्चारुरूपेक्षेत्रेविचरंतौपश्यंतौसदैवशारदींप्रीतिंप्राप्नुतइत्यर्थः ॥ ६० ॥ शोभनादंतायस्याःसासुदतीतस्यारदनश्रेणीछिदेषुदंतपंक्तिरूपेषुपत्रे षुविषमेषुणाकामेनयादृशीकांचनीरेखाविहिताइंदौचंद्रेएतावतीईदृशीकिलारेखाक्केत्यर्थः ॥ ६१ ॥ तस्यारदनवाससीद्वेओष्ठौप्रायोबाहुल्येनमदनभूपालस्यहर्म्येगृहेयानिरत्नानितान्यंतरेययोस्तेतथैवे तिलुप्तोपमेत्यर्थः ॥ ६२ ॥ तस्याःकंबुवत्कंठरेखात्रितयस्यव्याजेनछलेनकामःस्वर्गादौत्रियामेषारेखाक्कचिन्नेतितस्याःसर्वाधिक्यार्थंशपथंकरोतीवेत्यर्थः ॥ ६३ ॥ तस्यावक्षोरुहद्वयं मदनमहीपतेर्लसत्पटकुटीद्वयंशोभमानवस्त्रगृहद्वयमितिशंकेआशंके ॥ वस्त्रेणाच्छादितत्वात् ॥ कथंभूतम् ॥ अनर्घ्यरत्नकोशाढ्यममूल्यसुखरत्नसंचयसंपूर्णम् ॥ ६४ ॥ नतभ्रुवस्तस्या

तच्चारुलोचनक्षेत्रेविचरंतौचखंजनौ ॥ सदैवशारदींप्रीतिंनिर्विशेतेनिजेच्छया ॥ ६० ॥ सुदत्यारदनश्रेणीछेदेषुविषमेषुणा ॥ विहिताकांचनीरेखाक्केंदावे तावतीकला ॥ ६१ ॥ प्रायोमदनभूपालहर्म्यरत्नांतरेशुभे ॥ जितप्रवालसुच्छायेतस्यारदनवाससी ॥६२॥ स्वर्गेमर्त्येचपातालेनैषारेखाक्कचित्स्त्रियाम्॥ तत्कंठरेखात्रितयव्याजेनशपतेस्मरः ॥ ६३ ॥ शंकेचित्तभुवोराज्ञोलसत्पटकुटीद्वयम् ॥ अनर्घ्यरत्नकोशाढ्यंतस्यावक्षोरुहद्वयम् ॥ ६४ ॥ अनंगभू नियमतोऽदृश्यमध्येनतभ्रुवः ॥ रोमालीलक्षिकामूर्ध्वामिवयष्टिंविधिर्व्यधात् ॥ ६५ ॥ तस्यानाभीदरींप्राप्यकंदर्पोऽनंगतांगतः ॥ पुनःप्राप्तुमिवांगा नितप्यतेपरमंतपः ॥ ६६ ॥ गुरुणैतन्नितंबेनमहामन्मथदीक्षया ॥ भुविकेकेयुवानोनस्वाधीनाःप्रापितादृशाम् ॥ ६७ ॥ ऊरुस्तंभेनचैतस्याःस्तंभव त्कस्यनोमनः ॥ तत्स्तंभेनमुनेर्वापिसुवृत्तेनसुवर्तनम् ॥ ६८ ॥ पादांगुष्ठनखज्योतिःप्रभयाकस्यनप्रभा ॥ विवेकजनिताऽध्वंसिमुनेतस्यामृगीदृशः ॥ ॥ ६९ ॥ साप्रत्यहंज्ञानवाप्यांस्नायंस्नायंशिवालये ॥ संमार्जनादिकर्माणिकुरुतेऽनन्यमानसा ॥ ७० ॥ तत्पादप्रतिबिंबेषुरेखाशष्पांकुरंचरन् ॥ नान्यद्वनांतरंयातिकाश्यांयूनांमनोमृगः ॥ ७१ ॥

अनंगभूनियमतःकामस्यस्थानपरिचयार्थंसप्तावितास्तिपरिमितंस्यंशरीरस्यमध्येयदृश्यंवरांगंभगःतस्मिन्रोमाल्यारोमपंक्तयालक्षिकामूर्ध्वांयष्टिमिवविधिर्ब्रह्माव्यधात् ॥ यथांधकारेस्थितंवस्तुयष्ट्या लक्ष्यतेतथाऽदृश्यंवरांगंलक्षितुंरोमावल्यायष्टिंव्यधादित्यर्थः ॥ ६५ ॥ नाभीदरींनाभिगुहाम् ॥ अनेननिम्ननाभित्वंसूचितम् ॥ ६६ ॥ गुरुणाएतस्यानितंबेनमहान्योमन्मथःकामस्त स्यदीक्षयातद्विषयदीक्षानिमित्तेनभूलोंकेयुवानोदृशांनेत्राणांस्वाधीनाःसुष्ठ्वधीनतांनप्रापितानकारिताअपितुसर्वएवप्रापिताः ॥ तन्नितंबैकदृष्टयोयुवानोबभूवुरित्यर्थः ॥ दशामितिपाठेदशांकाम दशाम् ॥ स्वाधीनाःस्वनितंबैकनिष्ठाइत्यर्थः ॥ कामदशांप्रापिताइत्येववा ॥ अन्यत्सर्वंपूर्ववत् ॥ ६७ ॥ ऊरुरेवस्तंभऊरुस्तंभःकदल्यादिरूपस्तेनमुनेर्मननशीलस्यापिकस्यमनोनतस्तंभे ॥ ब्रह्मा कारादिवृत्तिवृत्तान्नस्तंभितंननिवर्तितमपितुस्तंभितमेवस्तंभवत् ॥ यथास्तंभेनस्थाण्वादिनागमनादिप्रतिबध्यतेतद्वत् ॥ कीदृशेन ॥ सुवृत्तेनसुष्ठुवर्तुलेन ॥ कथंभूतंमनः ॥ सुवर्तनंशोभनवृत्तम् ॥६८॥ अध्वंसिध्वंसिता ॥ शृंगाररसानिमग्नोमाभूदितिसंबोधयतिमुनेहेऽगस्त्येति ॥ ६९ ॥ स्नायंस्नायंस्नात्वास्नात्वा ॥ ७० ॥ तत्पादेति ॥ काश्यांयूनांतरुणानांमनएवमृगोमनोमृगस्तस्याः ॥१५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुशीलायाःपादप्रतिबिंबेषुवालुकादिप्रदेशोत्थितेषुरेखाशष्पांकुररेखात्मकपद्मवज्रादिरूपकोमलतृणांकुरंचरन्आनंदकाननंरेखाशष्पांकुरवनंवाविहायान्यद्वनांतरंस्थानंनसंयातीत्यर्थः ॥ ७१ ॥ तदास्येति ॥ तस्याआस्यपंकजंमुखपद्मंहित्वायूनांनेत्राण्येवालयस्तेषांमालयासमूहेनलतांतरंनासेविनसेवितम् ॥ कथंभूतम् ॥ अप्यामोदप्रसूनयुक्आमोदप्रसूनैःसुगंधिपुष्पैर्युनक्तीतितथाताद्दशमपीत्यर्थः ॥ आसेवीतितिविसंधिरार्षः ॥ ७२ ॥ प्रेक्षेतपश्यति ॥ शोभनंश्रवःश्रवणेन्द्रियंश्रवणंवायस्याःसासुश्रवाः ॥ नादत्तेनगृह्णातिनशृणोतीतियावत् ॥ ७३ ॥ सुशीलानाम्ना ॥ तदेवार्थतोनिर्वक्ति ॥ शीलसंपन्नेति ॥ रहएकांते ॥ तद्विरहातुरैस्तत्प्राप्त्यभावेनकातरैः ॥ बबंधचकार ॥ ७४ ॥ शीलेनसुचारित्रेणसहोर्जिताश्रीःशोभायस्याःसा ॥ ७५ ॥ ७६ ॥

तदास्यपंकजंहित्वायूनांनेत्रालिमालया ॥ नलतांतरमासेविअप्यामोदप्रसूनयुक् ॥ ७२ ॥ सुलोचनापिसाकन्याप्रेक्षेतास्यंनकस्यचित् ॥ सुश्रवाअपिसाबालानादत्तेकस्यचिद्वचः ॥ ७३ ॥ सुशीलाशीलसंपन्नारहस्तद्विरहातुरैः ॥ प्रार्थितापिसुरूपाढ्यैर्नाभिलाषंबबंधसा ॥ ७४ ॥ धनैस्तस्याजनेतापियुवभिःप्रार्थितोबहु ॥ नाशकत्तांसुलीलांसदातुंशीलोर्जितश्रियम् ॥ ७५ ॥ ज्ञानोदतीर्थभजनात्सासुशीलाकुमारिका ॥ बहिरंतस्तदाऽद्राक्षीत्सर्वंलिंगमयंजगत् ॥ ७६ ॥ कदाचिदेकदातांतुप्रसुप्तांसदनांगणे ॥ मोहितोरूपसंपत्त्याकश्चिद्विद्याधरोऽहरत् ॥ ७७ ॥ व्योमवर्त्मनितांरात्रौयावन्मलयपर्वतम् ॥ सनिनीषतितावच्चविद्युन्मालीसमागतः ॥ ७८ ॥ राक्षसोभीषणवपुःकपालकृतकुंडलः ॥ वसारुधिरलिप्तांगःश्मश्रुलःपिंगलोचनः ॥ ७९ ॥ राक्षसउवाच ॥ ॥ ममदृग्गोचरंयातोविद्याधरकुमारक ॥ अद्यत्वामेतयासार्धंप्रेषयामियमालयम् ॥८०॥ इतिश्रुत्वाथसावाक्यंव्याघ्राघ्रातामृगीयथा ॥ चकंपेऽतीवसंभीताकदलीदलवन्मुहुः ॥ ८१ ॥ निजघानत्रिशूलेनरक्षोविद्याधरंचतम् ॥ विद्याधरकुमारोपिनितरांमधुराकृतिः ॥ ८२ ॥ तद्भीषणत्रिशूलेनभिन्नोरस्कोमहाबलः ॥ जघानमुष्टिघातेनवज्रपातोपमेनतम् ॥ ८३ ॥ नरमांसवसामत्तंविद्युन्मालिनमाहवे ॥ चूर्णितोमुष्टिपातेनसोऽपतद्वसुधातले ॥ ८४ ॥ राक्षसोमृत्युवशगोवज्रेणेवमहीधरः ॥ विद्याधरोपितच्छूलघातेनविकलीकृतः ॥ ८५ ॥ उवाचगद्गदंवाक्यंविघूर्णितविलोचनः ॥ प्रियेसुधासमानीतासुशित्यर्धोक्तिमुच्चरन् ॥ ८६ ॥ जहौप्राणान्रणेवीरस्तांप्रियांपरितःस्मरन् ॥ ८७ ॥ अनन्यपूर्वसंस्पर्शसुखंसमनुभूयसा ॥ तमेवचपतिंमत्वाचक्रेशोकाग्निसात्तनुम् ॥ ८८ ॥

सदनांगणेगृहाजिरे ॥ कदाचिदेकदाकस्मिंश्चित्कालइत्यर्थः ॥ सुप्तांमत्तांप्रमत्तांवारहोयत्रोपगच्छति ॥ सपापिष्ठोविवाहानांपैशाचःकथितोऽष्टमइतिपैशाचविवाहस्यनिन्दितत्वान्नामग्रहणमकृत्वाकश्चिदित्युक्तम् ॥ ७७ ॥ ७८ ॥ वसामेदः ॥ श्मश्रुलोदीर्घचिबुकलोमा ॥ ७९ ॥ ममविद्युन्मालिनोदृग्गोचरंनेत्रविषयंयातोगतः ॥ दृग्गोचरंचिरंयातइतिपाठेचिरंबहुकालेन ॥ ८० ॥ व्याघ्रेणाघ्राताभक्षणार्थंविषयीकृता ॥ ८१ ॥ रक्षोराक्षसः ॥ चकारोऽप्यर्थे रक्षइत्यनेनसंबध्यते ॥ ८२ ॥ ८३ ॥ चूर्णितश्चूर्णयामास ॥ ८४ ॥ ८५ ॥ स्वैर्व्यंजनैश्चमिलित्वापडक्षरनाम्नोऽर्धोक्तिःसुश् ॥ उच्यतेतामुच्चरन्ब्रुवन् ॥ प्राणान्जहौ ॥ सुशीतीतिपाठश्चित्यः ॥ ८६ ॥ परितःसर्वतोभावेन ॥ ८७ ॥ नविद्यतेऽन्यःपूर्वोयस्मात्सः

CC-0. In Public Domain. Digitization by eGangotri

अनन्यपूर्वःसचासौसंस्पर्शश्चतज्जन्यंसुखम् ॥ यद्वा नविद्यतेऽन्यत्पूर्वंयस्मात्संस्पर्शसुखात्तत्तथातच्चतत्संस्पर्शसुखंचेतितथा ॥ अनन्यपूर्वपुंस्पर्शेतिक्वचित् ॥ चकारादेवंच ॥ शोकाग्निसाच्छोकाग्नौतनुं शरीरंचक्रेचकार ॥ शोकेनजहावित्यर्थः ॥ ८८ ॥ ८९ ॥ पणीकृतोग्लहत्वेनदत्तःप्राणोयेनसतथा ॥ जनुर्जन्म ॥ मलयकेतुतस्तन्नाम्नःपितृतः ॥९०॥ कर्णाटेविद्यानगरे ॥९१॥ माल्यकेतुर्नाम्ना ॥ अनंगःकामस्तस्येवश्रीःशोभायस्यसः ॥ कामदेवइवातिसुन्दरइत्यर्थः ॥ पित्राकर्णाटेश्वरेण ॥ नाम्नाकलावती ॥ ९२ ॥ मलयजक्षोदंचंदनचूर्णम् ॥ बह्वमंस्तबहुमेने ॥९३॥ नेपथ्यमलंकरणम् ॥ अनर्घ्यममूल्यम् ॥ गर्भसुन्दरीसाहाजिकरूपवती ॥ ९४ ॥ ९५ ॥ औदीच्यउत्तरदिगुत्पन्नः ॥ ९६ ॥ ९७ ॥ प्राणदेवताविश्वनाथस्तल्लिंगाधारत्वात्पटच्यपितथाताम् ॥ स्वंदेहम् ॥ अपिर्निश्चये ॥

लिंगत्रयशरीरिण्यास्तस्याःसान्निध्यतःसहि ॥ दिव्यंवपुःसमासाद्यराक्षसस्त्रिदिवंययौ ॥ ८९ ॥ रणेपणीकृतप्राणोविद्याधरसुतोपिसः ॥ अंतेप्रियांस्मरन्प्रापजनुर्मलयकेतुतः ॥ ९० ॥ ध्यायंतीसापितंबालाविद्याधरकुमारकम् ॥ विरहाग्नौविसृष्टासुःकर्णाटेजन्मभागभूत् ॥९१॥ सुतोमलयकेतोस्तांकालेनपरिणीतवान् ॥ माल्यकेतुरनंगश्रीःपित्रादत्तांकलावतीम् ॥ ९२ ॥ सापिप्राग्वासनायोगाल्लिंगार्चनरतासती ॥ हित्वामलयजक्षोदंविभूतिंबह्वमंस्तवै ॥ ॥ ९३ ॥ मुक्तावैदूर्यमाणिक्यपुष्परागेभ्यएवसा ॥ मेनेरुद्राक्षनेपथ्यमनर्घ्यंगर्भसुंदरी ॥ ९४ ॥ कलावतीमाल्यकेतुंपतिंप्राप्यपतिव्रता ॥ अपत्यत्रितयंलेभेदिव्यभोगसमृद्धिभाक् ॥ ९५ ॥ एकदाकश्चिदौदीच्योमाल्यकेतुंनरेश्वरम् ॥ चित्रकृच्चित्रपटिकांचित्रांदर्शितवानथ ॥ ९६ ॥ तांतुचित्रपटींराजाकलावत्यैसमर्पयत् ॥ साथचित्रपटींरम्यांसंप्रहृष्टतनूरुहा ॥ ९७ ॥ मुहुर्मुहुःप्रपश्यंतीरहसिप्राणदेवताम् ॥ विसस्मारस्वमपिचसमाधिस्थेवयोगिनी ॥ ९८ ॥ क्षणमुन्मील्यनयनेकृत्वानेत्रातिथिंपटीम् ॥ तर्जन्यग्रमथोत्क्षिप्यस्वात्मानंसमबोधयत् ॥९९॥ संभेदोयमसेरम्यउपलोलार्कमग्रतः ॥ उपश्रीकेशवपदंवरणैषासरिद्वरा ॥१००॥ स्वर्गेप्रार्थितसंस्पर्शासैषास्वर्गतरंगिणी ॥ उदग्वहाभिलष्यंतियांदिवोद्युसदःसदा ॥१॥ अलक्ष्यामोक्षलक्ष्मीर्यावेदांतेपरिपठ्यते ॥ विमुक्तयेसतांसैषाश्रीमतीमणिकर्णिका ॥ २ ॥ मरणंमंगलंयत्रसफलंयत्रजीवितम् ॥ स्वर्गस्तृणायतेयत्रसैषाश्रीमणिकर्णिका ॥ ॥ ३ ॥ यत्रसंपत्तिसंभारान्विश्राण्यनिधनेच्छया ॥ यतिव्रतंसमालंब्यतिष्ठतेमूलकंदभुक् ॥ ४ ॥

चकाराद्गृहादिकंच ॥ ९८ ॥ उन्मील्यविकचय्य ॥ नेत्रातिथिंनेत्रगोचरम् ॥ ९९ ॥ उपलोलार्कलोलार्कसमीपे ॥ उपश्रीकेशवपदंश्रीकेशवस्थानस्यसमीपे ॥ १०० ॥ स्वर्गेप्रार्थितसंस्पर्शेत्यस्यायंभावः ॥ यद्यपिस्वर्गतरंगिणीगंगास्वर्गेवर्ततएवतथापिकाश्यधिकरणिकायाउदग्वहायाअतिशयितत्वेनदुर्लभत्वात्स्वर्गेप्रार्थितसंस्पर्शेत्युक्तमिति ॥ उदग्वहाउत्तरवाहिनी ॥ दिवोद्युसदःस्वर्गसंबंधिनोदेवाइत्यर्थः ॥ १ ॥ अलक्ष्यावाङ्मनसयोरगोचरा ॥ सतांतस्यामुत्सृष्टदेहानाम् ॥ सतीतिक्वचित्पाठः ॥ २ ॥ मंगलहेतुत्वान्मंगलम् ॥ सफलंमुक्तिलक्षणफलहेतुत्वात् ॥ ३ ॥ यत्रयस्यांस्थल्यांस्थानेवासंपत्तिसंभारान्धनस्तोमान्निधनेच्छयामरणवांछयाविश्राण्यदत्त्वायतिव्रतंविरागाहिंसादिलक्षणंसमालंब्याश्रित्यमूलकंदभुकुमुक्तीजनस्तिष्ठतेतिष्ठतिसैषाश्रीमाणिकर्णिकेतिपूर्वेणान्वयेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वापंचानामन्वयः ॥ तत्रमूलकंदयोरपिंडापिंडाकारतयाभेदः ॥ तिष्ठंतेमोक्षकामुकाइतिक्वचित्पाठः ॥ ४ ॥ यत्रमृतान्प्रतिमुक्तिमार्गंदर्शयन्हरोवर्ततइतिशेषः ॥ कथंभूतः ॥ स्वमौलिबालचं द्रेणसहगंगांमार्गमाणः ॥ अधिकारिभेदेनसारूप्यमुक्तिदानार्थंस्वशिरःस्थंचंद्रादिकंवाऽन्विष्यमाणइत्यर्थः ॥ मार्गमाणोध्रियमाणइतिवा ॥५॥ दुर्वारन्तत्त्वज्ञानमंतरेणाविनश्वरंप्रतारयति नाशयति ॥ शंकल्याणंकरोतीतिशंकरः ॥ तदेवाह ॥ यतःकर्णधारात्सन्मार्गप्रापकान्मृताअप्यमृतायंतेमुक्ताभवंति ॥ विरुद्धालंकारोयम् ॥ मृत्वापुनर्नजायन्तइत्यर्थः ॥ मृतानराइत्यन्वयः ॥ नराइ त्यधिकारप्रदर्शनार्थंनत्वन्येषांपरिसंख्यार्थम् ॥ कृमिकीटानामपिमुक्तिश्रवणात् ॥ ६ ॥ संसारसारपदवीसंसाररूपदृढमार्गःयत्रादवीयसीअदूरेस्यात् ॥ तत्रहेतुमाह ॥ कर्णेजपादिति ॥ कर्णे दक्षिणकर्णेतारकंजपतीतिकर्णेजपस्तस्मात् ॥ पुनःकीदृशात् ॥ करुणावरुणालयात्दयासमुद्रात् ॥ ७ ॥ तेनराइत्यन्वयः ॥ भवंमहादेवम् ॥ ८ ॥ यद्बलेनयस्याःप्रभावात् ॥ कृतांतंयमम् ॥ ९ ॥ अर्धोवाएषआत्मनोयत्पत्नीति ॥ आत्मावैजायतेपुत्रइतिचश्रुतेर्निजंदेहमित्यनेनस्त्रीपुत्रदेहयोरपिसंग्रहः ॥ अतएवसपत्नीकइत्युक्तम् ॥ पुत्रस्यत्वत्यंतबालत्वादेवानुल्लेखः ॥ व्यक्रीणात्विक्रीतवान् ॥

यत्रत्रिमार्गगांगंगांमार्गमाणोमृतान्हरः ॥ स्वमौलिबालचंद्रेणमुक्तिमार्गंप्रदर्शयन् ॥ ५ ॥ संसारंयत्रदुर्वारंप्रतारयतिशंकरः ॥ मृताअप्यमृतायंतेकर्णधारा द्यतोनराः ॥ ६ ॥ संसारासारपदवीयत्रस्याददवीयसी ॥ कर्णेजपान्महेशानात्करुणावरुणालयात् ॥ ७ ॥ अनेकभवसंभूतप्रभूतसुकृतैर्नराः ॥ कर्णेजपं भवंयत्रलभंतेतेभवापहम् ॥ ८ ॥ स्वीकृत्यक्षेत्रसंन्यासंयद्बलेनमहाधियः ॥ तृणंकृतांतंमन्यंतेसेयंश्रीमणिकर्णिका ॥ ९ ॥ तृणीकृत्यनिजंदेहंयत्रराज र्षिसत्तमः ॥ हरिश्चंद्रःसपत्नीकोव्यक्रीणाद्भूरियंहिसा ॥ ११० ॥ अभिलष्यंतियत्रत्यमपिवैकुण्ठवासिनः ॥ सैकतंमृदुलंतल्पंसैषाश्रीमणिकर्णिका ॥ ॥ ११ ॥ अनेकजन्मजनितकर्मसूत्रनियंत्रणम् ॥ उन्मुच्ययत्रमुक्ताःस्युःसैषाश्रीमणिकर्णिका ॥ १२ ॥ सत्यलोकेऽपियेलोकास्तेऽर्थयंतिनिरंत रम् ॥ यामहोदीर्घनिद्रायैसेयंश्रीमणिकर्णिका ॥ १३ ॥ अयंहिसकुलस्तंभोयत्रश्रीकालभैरवः ॥ क्षेत्रपापकृतःशास्तिदर्शयंस्तीव्रयातनाम् ॥ १४ ॥ अन्यत्रविहितंपापंनश्येत्काशीनिरीक्षणात् ॥ काश्यांकृतानांपापानांदारुणेयंतुयातना ॥१५॥ कपालमोचनंतीर्थमेतत्तदपिपावनम् ॥ कपालंपतितंयत्र विधेर्भैरवपाणितः ॥ १६ ॥ ऋणत्रयाद्विमुच्यंतेयत्रस्नातानरोत्तमाः ॥ तीर्थंविशुद्धिजनकंतदेतदृणमोचनम् ॥ १७ ॥

हीत्यनेनमार्कंडेयादिपुराणागमप्रसिद्धिंद्योतयति ॥ ११० ॥ यत्रत्यंयत्रस्थंसैकतंवालुकामयंमृदुलंकोमलंतल्पंशयनमित्यर्थः ॥ ११ ॥ नियंत्रणंबंधनम् ॥१२॥ अर्थयंतिप्रार्थयंति ॥ अहोआश्चर्ये ॥ दीर्घनिद्रायैकैवल्यावाप्त्यै ॥ १३ ॥ क्षेत्रपापकृतःक्षेत्रेपापकारिणोमनुष्यान् ॥ बहिःकृतानांपापानांक्षेत्रप्रवेशमात्रेणैवोपक्षयात् ॥ १४ ॥ ननु नाविमुक्तेनरःकश्चिन्नरकंयातिकिल्बिषी ॥ ईश्वरानुगृ हीताहिसर्वेयांतिपरांगतिमितिलैंगोक्तेःकथमिदंसंगच्छतइतिस्वयमेवाशंक्याहान्यत्रेति ॥ तुशब्दाद्यमयातनातोपीयंयातनाऽधिकेतिध्वनितम् ॥ दारुणारुद्रयातनेतिक्वचित् ॥ तत्ररुद्रःकालभैरवएव ॥ लैंगवचनेतुकिल्बिषीत्यत्रान्यत्रेतिज्ञातव्यम् ॥ यमयातनाविषयोवानरकशब्दः ॥ १५ ॥ तदपीत्यपिशब्दादन्यदपितीर्थांतरंपावनमितिध्वनितम् ॥ १६ ॥ ऋणत्रयाद्देवर्षिपितॄणामृणादित्यर्थः ॥ विशुद्धिजनकमंतःकरणशोधकम् ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रणवाख्यमितिवाच्यवाचकयोरभेदोपचारात् ॥ अकारोकारमकारबिंदुनादाः पंचायतनानितैरुपेतस्तदाश्रयः ॥ १८ ॥ एतदेवाह ॥ अश्चेत्येकेन ॥ १९ ॥ मत्स्योदरीनदी ॥ तथाचब्राह्मे ॥ अथासावपिमूर्वस्तुनंदीमत्स्योदरींमुने ॥ जगामाथददर्शासौस्नायमानामथोर्वशीमिति ॥ यत्स्नातोयस्यांस्नातः ॥ जातुकदाचित् ॥ १२० ॥ त्रिलोचनंसारूप्यमुक्तिभाजम् ॥ तुशब्दआश्चर्ये ॥ अपिभिन्नक्रमेदेशांतरस्थितमित्यनेनसंबध्यते ॥ २१ ॥ दुर्वासाअपिअक्षांतिसारसर्वस्वोप्यतिक्रोधनोपीत्यर्थः ॥ तथाचोक्तंवैष्णवे ॥ अक्षांतिसारसर्वस्वंदुर्वाससमवेहिमामिति ॥ अनेनक्रोधाद्या विष्टानामनधिकारिणामप्यत्रफलंभवतीतिध्वनितम् ॥ २२ ॥ निर्वचनपूर्वकंस्वर्लीनेशंकथयाति ॥ स्वयमिति ॥ २३ ॥ २४ ॥ २५ ॥ विनायकाविघ्नहेतवः ॥ २६ ॥ इयमिति ॥ क्षेत्राधिष्ठात्री

प्रणवाख्यंपरंब्रह्मयत्रनित्यंप्रकाशते ॥ सपंचायतनोपेतॐकारेशोयमद्भुतः ॥ १८ ॥ अश्चउश्चमकारश्चनादोबिंदुश्चपंचमः ॥ पंचात्मकंपरंब्रह्मयत्रनित्यं प्रकाशते ॥१९॥ एषामत्स्योदरीरम्यायत्स्नातोमानवोत्तमः ॥ मातुर्जातूदरदरींनविशेदेषनिश्चयः ॥१२०॥ त्रिलोचनोयंभगवान्कुर्यादेवत्रिलोचनम् ॥ निजभक्तंकृपायुक्तस्त्वपिदेशांतरस्थितम् ॥ २१ ॥ असौकामेश्वरोदेवोयःकामान्पूरयेत्सताम् ॥ दुर्वासाअपियत्रापनिजकाममहोदयम् ॥ २२ ॥ स्वयं लीनोमहेशोत्रभक्तकामसमृद्धये ॥ तस्मात्स्वर्लीनसंज्ञास्यदेवदेवस्यशूलिनः ॥ २३ ॥ वाराणस्यांमहादेवोयःपुराणेषुपठ्यते ॥ क्षेत्राभिमानीभगवां स्तत्प्रासादोयमद्भुतः ॥ २४ ॥ असौस्कंदेश्वरोदेवःश्रद्धयायद्विलोकनात् ॥ आजन्मब्रह्मचर्यस्यफलमाप्नोतिमानवः ॥ २५ ॥ विनायकेश्वरश्चायंसर्व सिद्धिप्रदायकः ॥ यत्सेवयाप्रणश्यंतिनृणांसर्वेविनायकाः ॥२६॥ इयंवाराणसीदेवीसाक्षान्मूर्त्तिमयीशुभा ॥ यस्याविलोकनात्पुंसांभूयोनोगर्भसंभवः॥ ॥२७॥ पार्वतीश्वरलिंगस्यमहदायतनंत्विदम् ॥ यत्रनित्यंमहेशानोगौर्यासहविमुक्तिदः ॥२८॥ एषभृंगीश्वरःश्रीमान्महापातकनाशनः ॥ जीवन्मुक्तो ऽभवद्भृंगीयस्यलिंगस्यसेवया ॥ २९ ॥ चतुर्वेदेश्वरश्चैषचतुर्वेदधरोविधिः ॥ लभेद्यद्वीक्षणाद्विप्रोवेदाध्ययनजंफलम् ॥ १३० ॥ यज्ञैःसंस्थापितंचैत ल्लिंगंयज्ञेश्वराभिधम् ॥ यदर्चनाल्लभेन्मर्त्यःसर्वयागफलंमहत् ॥ ३१ ॥ पुराणेश्वरनामैतल्लिंगमष्टादशांगुलम् ॥ अष्टादशानांविद्यानांस्यादाधारोयदी क्षणात् ॥ ३२ ॥ धर्मशास्त्रेश्वरश्चायंस्मृतिभिश्चप्रतिष्ठितः ॥ स्मृत्यध्ययनजंपुण्यंयद्विलोकनतोभवेत् ॥ ३३ ॥

देवतेत्यर्थः ॥ २७ ॥ आयतनंस्थानंगृहमितियावत् ॥ २८ ॥ जीवन्मुक्तोऽभवद्भृंगीति ॥ तथाचवासिष्ठंवचनम् ॥ एतद्व्रतत्रयंरामपुराचंद्रार्धमौलिना ॥ भृंगीशायतुसंप्रोक्तंयेनासौविज्वरःस्थित इति ॥ २९ ॥ चतुरोवेदान्धरतीतितथा ॥ चतुर्वक्त्रधरइतिकेचित् ॥ विदधातीतिविधिःसर्वोत्पादकइत्यर्थः ॥ १३० ॥ ३१ ॥ अष्टादशांगुलंतिर्यगूर्ध्वमष्टादशांगुलपरिमितमित्यर्थः ॥ तदुपयोग माहाष्टादशेति ॥ ३२ ॥ प्रतिष्ठितःस्थापितः ॥ प्रलंबितइतिपाठेआश्रितइत्यर्थः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गभस्तीशइतिपुंस्त्वमार्षम् ॥ दिव्यमहःस्वप्रकाशंज्योतिस्तत्प्रदम् ॥ मृकंडुसूनुनामार्कंडेयेन ॥ ५४ ॥ ५५ ॥ किरणमालिनः सूर्यस्य ॥ पातकधावनंपापस्यशोधनंनाशकमितियावत् ॥ ५६ ॥
॥ ५७ ॥ ५८ ॥ कपयोवानराः ॥ ५९ ॥ १६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ निर्वचनपूर्वकंरत्नेश्वरलिंगंदर्शयति ॥ यानीति ॥ ६४ ॥ ६५ ॥ कृत्तिवासेश्वरस्येत्यत्रादंतत्वमार्षम् ॥ ६६ ॥ लिंगात्म

गभस्तीशोमहालिंगमेतद्दिव्यमहःप्रदम् ॥ मृकंडुसूनुनाप्यत्रतपस्तप्तंपुरामहत् ॥ ५४ ॥ लिंगंसंस्थाप्यपरमंस्वनाम्नायुःप्रदंपरम् ॥ किरणेश्वरनामैत
ल्लिंगंत्रैलोक्यविश्रुतम् ॥ ५५ ॥ सकृन्नतमिदंलोकंनयेत्किरणमालिनः ॥ धौतपापेश्वरंलिंगमेतत्पातकधावनम् ॥ ५६ ॥ निर्वाणनरसिंहोयंभक्त
निर्वाणकारणम् ॥ मणिप्रदीपनागोयंमहामणिविभूषणः ॥ ५७ ॥ यदर्चनान्नरोजातुननागैःपरिभूयते ॥ कपिलेशमिदंलिंगंकपिलेनप्रतिष्ठितम् ॥
॥ ५८ ॥ मुच्यंतेकपयोप्यस्यदर्शनात्किमुमानवाः ॥ प्रियव्रतेश्वरंलिंगंमहदेतत्प्रकाशते ॥५९॥ यस्यार्चनाल्लभेज्जंतुःप्रियत्वंसर्वजन्तुषु ॥ इदमायतनं
श्रेष्ठंमणिमाणिक्यनिर्मितम् ॥ १६० ॥ श्रीमतःकालराजस्यकलिकालार्तिहारिणः ॥ निजभक्तंजनंपातियःपापात्पापभक्षणः ॥ ६१ ॥ क्षेत्रवि
घ्नकरान्पापान्यातयन्यातनाशतैः ॥ इयंमंदाकिनीरम्यातपस्तप्तुमिहागता ॥ ६२ ॥ काशीवाससुखंप्राप्यनाद्यापिदिवमीहते ॥ स्नात्वात्रसंतर्प्यपि
तृन्छ्राद्धंकृत्वाविधानतः ॥ ६३ ॥ नरोननरकंपश्येदपिदुष्कृतकर्मकृत् ॥ यानिकानिचलिंगानिकाश्यांसंतिसहस्रशः ॥ ६४ ॥ रत्नभूतमिदंतेषुलिंगं
रत्नेश्वराभिधम् ॥ रत्नेश्वरप्रसादेनभुक्तारत्नान्यनेकशः ॥ ६५ ॥ पुरुषार्थमहारत्नंनिर्वाणंकोनलब्धवान् ॥ कृत्तिवासेश्वरस्यैषामहाप्रासादनिर्मितिः ॥
॥ ६६ ॥ यांदृष्ट्वापिनरोदूरात्कृत्तिवासःपदंलभेत् ॥ सर्वेषामपिलिंगानांमौलित्वंकृत्तिवाससः ॥ ६७ ॥ ॐकारेशःशिखाज्ञेयालोचनानित्रिलोचनः ॥
गोकर्णभारभूतेशौतत्कर्णौपरिकीर्तितौ ॥६८॥ विश्वेश्वराविमुक्तौचद्रावेतौदक्षिणौकरौ ॥ धर्मेशमणिकर्णेशौद्वौकरौदक्षिणेतरौ ॥ ६९ ॥ कालेश्वरकपर्दी
शौचरणावतिनिर्मलौ ॥ ज्येष्ठेश्वरोनितंबश्चनाभिर्वैमध्यमेश्वरः ॥ १७० ॥ कपर्दोस्यमहादेवःशिरोभूषाश्रुतीश्वरः ॥ चंद्रेशोहृदयंतस्यआत्मावीरेश्वरः
परः ॥ ७१ ॥ लिंगंतस्यतुकेदारःशुक्रंशुक्रेश्वरंविदुः ॥ अन्यानियानिलिंगानिपरःकोटिशतानिच ॥ ७२ ॥ ज्ञेयानिनखलोमानिवपुषोभूषणान्यपि ॥
यावेतौदक्षिणौहस्तौनित्यनिर्वाणदौहितौ ॥ ७३ ॥

कंविश्वेश्वरशरीरंकथयति सर्वेषामित्यारभ्य यावेतावित्यतःप्राक्तनेनग्रन्थेन ॥ ६७ ॥ ६८ ॥ धर्मेशमणिकर्णेशावित्यत्रांतिमपदेटाबंतत्वमार्षम् ॥ ६९ ॥ १७० ॥ आत्माऽहंकारः ॥ ७१ ॥ कोटि
शतेभ्यःपराणिपरःकोटिशतानि अनंतानीत्यर्थः ॥ ७२ ॥ यावेतौविश्वेश्वराऽविमुक्तेश्वरावित्युक्ताऽनुवादोऽन्यत्प्रष्टुम् ॥ तदेवाह नित्येतिपादत्रयेण ॥ स्थितिसमयेऽभयंनविद्यतेभयंयस्मात्तत्तारकं

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषांजाडचमज्ञानंतद्विनाशकृत् ॥ यद्वा सर्वजाडचंमूलाविद्यातूलारूपंतद्विनाशकृदिति ॥ विशुद्धिदमंतःकरणशुद्धिदमित्यर्थः ॥ ३४ ॥ विभर्तिधारयाति ॥ ३५ ॥ ३६ ॥ पुरायुगेसत्ययुगे ॥३७॥ त्रिपुरेशस्यात्रिपुरस्थेशस्येत्यर्थः ॥ त्रिपुरैःत्रिपुरस्थैः ॥ ३८ ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ हइतिप्रसिद्धौ ॥ हीतिपाठेपिसएवार्थः ॥ ४३ ॥ ४४ ॥ खर्वविनायकःखर्वनामागणाधिपः ॥ तर्हिखर्वत्वात्खर्वफलदएवकिंनेत्याह ॥ अखर्वसिद्धिदइति ॥ शेषेणानंतेन ॥ ४५ ॥ संवर्तवह्निनासंकर्षणमुखानलेन ॥ शंखंपंचजननामानमसुरम् ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

सारस्वतमिदंलिंगंसर्वजाडचविनाशकृत् ॥ सर्वतीर्थेश्वरंलिंगमेतत्सद्योविशुद्धिदम् ॥३४॥ शैलेश्वरस्यलिंगस्यमंडपोयंमहाद्भुतः ॥ सर्वेषांरत्नजातानां योबिभर्तिपरांश्रियम् ॥ ३५ ॥ सप्तसागरसंज्ञंवैलिंगमेतन्मनोहरम् ॥ यद्वीक्षणाल्लभेन्मर्त्यःसप्ताब्धिस्नानजंफलम् ॥ ३६ ॥ असौमंत्रेश्वरःश्रीमान्मंत्रजाप्यफलप्रदः ॥ सप्तकोटिमहामंत्रैःस्थापितोयःपुरायुगे ॥३७॥ त्रिपुरेशस्यलिंगस्यपुरःकुंडमिदंमहत् ॥ त्रिपुरैःखानितंपूर्वंत्रिपुरारिप्रियंपरम् ॥३८॥ इदंबाणेश्वरंलिंगंसहस्रभुजपूजितम् ॥ द्विभुजस्यापिबाणस्यसहस्रभुजहेतुकम् ॥ ३९ ॥ वैरोचनेश्वरश्चैषपुरःप्रह्लादकेशवात् ॥ बलिकेशवनामासावेषनारदकेशवः ॥ १४० ॥ आदिकेशवपूर्वेणत्वयमादित्यकेशवः ॥ भीष्मकेशवनामासौदत्तात्रेयेश्वरस्त्वयम् ॥ ४१ ॥ दत्तात्रेयेश्वरात्पूर्वमेषआदिगदाधरः ॥ भृगुकेशवनामासावेषवामनकेशवः ॥ ४२ ॥ नरनारायणावेतौयज्ञवाराहकेशवः ॥ विदारनारसिंहोयंगोपीगोविंदएषह ॥ ४३ ॥ एषलक्ष्मीनृसिंहस्यप्रासादोरत्नकेतनः ॥ यस्यप्रसादात्प्रह्लादःपदमैंद्रमवाप्तवान् ॥ ४४ ॥ अखर्वसिद्धिदःपुंसामेषखर्वविनायकः ॥ शेषमाधवनामासौशेषेणस्थापितःपुरा ॥४५॥ यस्यभक्तानदह्यंतेत्वपिसंवर्तवह्निना ॥ शंखमाधवनामासौशंखंहत्वात्रसंस्थितः ॥४६॥ इदंसारस्वतंस्रोतःपरंब्रह्मरसायनम् ॥ सरस्वत्यामहानद्याःसंगमोयत्रगंगया ॥ ४७ ॥ यत्राप्लुतानराभूयःसंभवंतिनभूतले ॥ श्रीबिंदुमाधवस्त्वेषसाक्षाल्लक्ष्मीपतिःपरः ॥ ४८ ॥ श्रद्धयायंनमन्मर्त्योनवसेद्गर्भवेश्मनि ॥ नदारिद्र्यमवाप्नोतिव्याधिभिर्नाभिभूयते ॥ ४९ ॥ बिंदुमाधवभक्तोयस्तंयमोपिनमस्यति ॥ प्रणवात्मायएकोऽस्तिनादबिंदुस्वरूपधृक् ॥१५०॥ अमूर्तंयत्परंब्रह्मबिंदुमाधवएवसः ॥ एतत्पंचनदंतीर्थंपंचब्रह्मात्मसंज्ञकम् ॥५१॥ यत्रस्नातोनगृह्णीयाच्छरीरंपांचभौतिकम् ॥ एषासामंगलागौरीकाश्यांपरममंगलम् ॥ ५२ ॥ यत्प्रसादादवाप्नोतिनरोऽत्रचपरत्रच ॥ मयूखादित्यसंज्ञोयंरश्मिमालीतमोपहः ॥ ५३ ॥

॥ १५० ॥ पंचनदपदार्थमाह ॥ पञ्चेति ॥ अकारोकारमकारबिंदुनादाः किरणाधूतपापासरस्वतीगंगायमुनानद्योवा सद्योजातवामदेवाघोरतत्पुरुषेशानसंज्ञावा पंचब्रह्माणस्तदात्मकंतत्संज्ञकंतत्स्वरूपनामकम् ॥ ५१ ॥ ५२ ॥ यस्याःप्रसादान्नरःपरममंगलमाप्नोतिसैषामंगलागौरीत्यन्वयः ॥ रश्मिमालीसूर्यः ॥ तमोपहोऽज्ञाननाशकः अंधकारध्वंसकोवा ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वादत्त्वा ॥ नित्यंयन्निर्वाणं तद्दौनित्यंसर्वदावानिर्वाणप्रदावित्युत्तरेणान्वयः ॥ हीतिश्रुतिप्रसिद्धिंद्योतयति ॥ ७३ ॥ पितृलिंगंपित्रीश्वरम् ॥ ७४ ॥ ईशीईश्वरीचित्रघण्टाचासावीशीचेत्येकं पदंवा ॥ ७५ ॥ ७६ ॥ विश्वभुजाविश्वबाहुकावंदीनाम्ना ॥ ७७ ॥ ७८ ॥ स्रोतस्तीर्थंगंगायांप्रवाहरूपंवा ॥ ७८ ॥ ७९ ॥ १८० ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांत्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ छ ॥ ॥ चतुस्त्रिंशत्तमेऽध्यायेसर्वपापैकहारके ॥ ज्ञानवापीप्रशंसाचवर्ण्यतेमरदुर्लभा ॥ १ ॥ ज्ञानवाप्याःप्रशंसांवक्तुंपुनरपिचित्रपटीदर्शनमेवप्रस्तावयति ॥ पुनरिति ॥ १ ॥ मणिकर्णिकायाआधिक्यद्योतनार्थंपुनःप्रशंसामाह संसारेत्यादिना ॥ अपसव्येनदक्षिणेन ॥ अपसर्पेणेतिपाठेउपदेश्यानांभयराहितितयांतःकरणस्वास्थ्यार्थंदूरीकृतसर्पेणहस्तेन श्रुतिंदाक्षिणकर्णं

जंतूनामभयंदत्त्वापततांमोहसागरे ॥ इयंदुर्गाभगवतीपितृलिंगमिदंपरम् ॥ ७४ ॥ इयंहिचित्रघंटेशीघंटाकर्णह्रदस्त्वयम् ॥ इयंसाललितागौरीविशालाक्षीयमद्भुता ॥ ७५ ॥ आशाविनायकस्त्वेषधर्मकूपोयमद्भुतः ॥ यत्रपिंडान्नरोदत्त्वापितॄन्ब्रह्मपदंनयेत् ॥ ७६ ॥ एषाविश्वभुजादेवीविश्वैकजननीपरा ॥ असौवंदीमहादेवीनित्यंत्रैलोक्यवंदिता ॥ ७७ ॥ निगडस्थानपिजनान्पाशान्मोचयतिस्मृता ॥ दशाश्वमेधिकंतीर्थमेतत्त्रैलोक्यवंदितम् ॥ ७८ ॥ यत्राहुतित्रयेणापिअग्निहोत्रफलंलभेत् ॥ प्रयागाख्यमिदंस्रोतःसर्वतीर्थोत्तमोत्तमम् ॥७९॥ अशोकाख्यमिदंतीर्थंगंगाकेशवएषवै॥मोक्षद्वारमिदंश्रेष्ठंस्वर्गद्वारमिदंविदुः ॥ १८० ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेज्ञानवापीवर्णनंनामत्रयस्त्रिंशत्तमोऽध्यायः ॥३३॥

॥ स्कंदउवाच ॥ ॥ पुनर्ददर्शतन्वंगीचित्रपट्यांघटोद्भव ॥स्वर्गद्वारात्पुरोभागेश्रीमतींमणिकर्णिकाम् ॥ १ ॥ संसारसर्पदष्टानांजंतूनांयत्रशंकरः ॥ अपसव्येनहस्तेनब्रूतेब्रह्मस्पृशञ्छ्रुतिम् ॥ २ ॥ नकापिलेनयोगेननसांख्येननचव्रतैः ॥ यागतिःप्राप्यतेपुंभिस्तांदद्यान्मोक्षभूरियम् ॥ ३ ॥ वैकुंठेविष्णुभवनेविष्णुभक्तिपरायणाः ॥ जपेयुःसततंमुक्त्यैश्रीमतींमणिकर्णिकाम् ॥४॥ हुत्वाग्निहोत्रमपिचयावज्जीवंद्विजोत्तमाः ॥ अंतेश्रयंतेमुक्त्यैयांसेयंश्रीमणिकर्णिका ॥ ५ ॥ वेदान्पठित्वाविधिवद्ब्रह्मयज्ञरताभुवि ॥ यांश्रयंतिद्विजामुक्त्यैसेयंश्रीमणिकर्णिका ॥ ६ ॥ इष्ट्वाक्रतूनपिनृपाबहून्पर्याप्तदक्षिणान् ॥ श्रयंतेश्रेयसेधन्याःप्रांतेऽधिमणिकर्णिकम् ॥ ७ ॥ सीमंतिन्योपिसततंपतिव्रतपरायणाः ॥ मुक्त्यैपतिमनुव्रज्यश्रयंतिमणिकर्णिकाम् ॥ ८ ॥ वैश्याअपिचसेवंतेन्यायोपार्जितसंपदः ॥ धनानिसाधुसात्कृत्वाप्रांतेश्रीमणिकर्णिकाम् ॥ ९ ॥

स्पृशन्ब्रह्मब्रह्मज्ञानंब्रूते ॥ कथयतीत्यर्थः ॥ २ ॥ कपिलेनदेवहूत्यैस्वमात्रेश्रीकपिलप्रोक्तेनसांख्येनात्मानात्मविवेकेन ॥ ३ ॥ यांमणिकर्णिकांजपेयुःसेयंमोक्षभूरितिपूर्वक्रियायाअनुषंगः ॥ ४ ॥ ॥ ५ ॥ ब्रह्मयज्ञरताज्ञानयज्ञरताः ॥ अतएवशंकराचार्यप्रभृतीनांमणिकर्ण्याश्रयणंश्रूयते ॥ यद्वा ब्रह्मवेदस्तद्यज्ञरताइत्यर्थः ॥ ६ ॥ मणिकर्णिकायाआधिंअधिमणिकर्णिकंतदुपरीत्यर्थः ॥ ७ ॥ सीमन्तिन्योनार्यःपतिमनुव्रज्यमृतंभर्तारमनुपश्चाद्गत्वाऽग्नावनुमरणंसहमरणंवाकृत्वेत्यर्थः ॥ ८ ॥ प्रांतेसाधुसात्कृत्वासत्पात्रेभ्योदत्त्वायांसेवन्तेसेयंमोक्षभूरितिशेषः ॥ प्रांतेसेवन्तइतिवान्वयः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

भजेयुर्भजन्ति ॥ १० ॥ ११ ॥ देवयज्ञपितृयज्ञमनुष्ययज्ञभूतयज्ञब्रह्मयज्ञाइतिपञ्चयज्ञाः ॥ त्यजेयुस्त्यजंति ॥ १२ ॥ मणिकर्णीमुपासतेइत्यादिषुयथायोग्यंयांयासेयंमोक्षभूरितिवा इमामितिवा बोद्धव्यम् ॥१३॥ अनन्यसाधनांस्वतःसिद्धांस्वप्रकाशामितिवा ॥ मणिकर्णिकामंतरेणनविद्यतेऽन्यत्साधनंयस्याःसातथातामितिवा ॥१४॥ दंडयित्वेति ॥ तत्र मनोदण्डःप्राणायामः ॥ वाचोदंडो मौनम् ॥ कायदण्डोवृथाव्यापारराहित्यम् ॥ तथाचभागवतेभगवद्वचनम् ॥ मौनाऽनीहानिलायामादण्डावाग्देहचेतसाम् ॥ नह्येतेसन्तियस्यांगवेणुभिर्नभवेद्यातिरिति ॥ नैःश्रेयसींचकैवल्यसंबंधिनीम् ॥ १५ ॥ संन्यस्तेति ॥ अस्यविद्वद्विषयत्वादनन्येत्यस्यात्रिविदिषुविषयत्वादपौनरुक्त्यम् ॥ १६ ॥ अनन्येत्यादिश्लोकत्रयोक्तमुपसंहरति ॥ शिखीति ॥ शिखीत्रिदंडी ॥ मुंडीएकदंडी ॥ जटीपाशुपतादिः ॥ कौपीनीकेवलकौपीनमात्रग्राही ॥ मुमुक्षुरितिसर्वेषांविशेषणम् ॥ अन्योवायःकश्चिन्मुमुक्षुः ॥ १७ ॥ १८ ॥ तुशब्दोक्तविशेषमाह ॥ हेलयेति ॥ १९ ॥ उभाभ्यामनशनव्रत

त्यक्त्वापुत्रकलत्रादिसच्छूद्रान्यायमार्गगाः ॥ निर्वाणप्राप्तयेचैनांभजेयुर्मणिकर्णिकाम् ॥ १० ॥ यावज्जीवंचरंतोपिब्रह्मचर्यंजितेंद्रियाः ॥ निःश्रेयसेश्रयंत्येनांश्रीमतींमणिकर्णिकाम् ॥ ११ ॥ अतिथीनपिसंतर्प्यपंचयज्ञरताअपि ॥ गृहस्थाश्रमिणोनेमांत्यजेयुर्मणिकर्णिकाम् ॥१२॥ वानप्रस्थाश्रमयुजो ज्ञात्वानिर्वाणसाधनम् ॥ सन्नियम्येंद्रियग्राममंमणिकर्णीमुपासते ॥ १३ ॥ अनन्यसाधनांमुक्तिंज्ञात्वाशास्त्रैरनेकधा ॥ मुमुक्षुभिस्त्वेकदंडैःसेव्यतेमणिकर्णिका ॥ १४ ॥ दंडयित्वामनोवाचंकायंनित्यंत्रिदंडिनः ॥ नैःश्रेयसींश्रियंप्राप्तुंश्रयंतेमणिकर्णिकाम् ॥ १५ ॥ संन्यस्ताखिलकर्माणोदंडयित्वाचलंमनः ॥ एकदंडव्रतामुक्त्यैभजेयुर्मणिकर्णिकाम् ॥ १६ ॥ शिखीमुंडीजटीवापिकौपीनीवादिगंबरः ॥ मुमुक्षुःकोनसेवेतमुक्तिदांमणिकर्णिकाम् ॥१७॥ तपःकर्तुंनशक्तायेदानंवादातुमक्षमाः ॥ योगाभ्यासविहीनायेतेषामेषाविमुक्तिदा ॥ १८ ॥ संत्युपायाःसहस्रंतुमुक्तयेनतथामुने ॥ हेलयैषायथादद्यान्निर्वाणंमणिकर्णिका ॥ १९ ॥ अनशनव्रतभृतेत्रिकालाभ्यवहारिणे ॥ प्रांतेदद्यात्समांमुक्तिमुभाभ्यांमणिकर्णिका ॥ २० ॥ यथोक्तमाचरेदेकोनिष्ठापाशुपतंव्रतम् ॥ निरंतरंस्मरेदेकोह्यद्येनांमणिकर्णिकाम् ॥ २१ ॥ दृष्टात्रवपुषःपातेद्वयोश्चसदृशीगतिः ॥ तस्मात्सर्वंविहायाशुसेव्यैषामणिकर्णिका ॥ ॥ २२ ॥ स्वर्गद्वारेविशेयुर्येविगाह्यमणिकर्णिकाम् ॥ तेषांविधूतपापानांक्वापिस्वर्गोनदूरतः ॥ २३ ॥ स्वर्गद्वाःस्वर्गभूरेषामोक्षभूर्मणिकर्णिका ॥ स्वर्गापवर्गावत्रैवनोपरिष्टान्नचाप्यधः ॥२४॥ दत्त्वादानान्यनेकानिविगाह्यमणिकर्णिकाम् ॥ स्वर्गद्वारंप्रविष्टायेनतेनिरयगामिनः ॥२५॥ स्वर्गापवर्गयोरर्थःकोविदैश्चनिरूपितः ॥ स्वर्गःसुखंसमुद्दिष्टमपवर्गोमहासुखम् ॥ २६ ॥

त्रिकालाभ्यवहारिभ्याम् ॥ चतुर्थ्याद्विवचनमेतत् ॥ २० ॥ यथोक्तमितिसार्धवाक्यम् ॥ निष्ठातात्पर्यंतत्पूर्वकंपाशुपतव्रतंनियमम् ॥ कीदृशम् ॥ यथोक्तंसनत्कुमारसंहितायांयथावत्प्रोक्तंविभूतिभिस्त्रिपुंड्रधारणादिरूपमेकआचरेदनुतिष्ठेत् ॥ एकोनिरंतरंह्यद्येनांमणिकर्णिकांस्मरेत्तयोर्द्वयोरत्रमणिकर्ण्यांवपुषःपातेसदृशीगतिर्दृष्टेत्यर्थः ॥ २१ ॥ फलितमाह तस्मादित्यर्धेन ॥ २२ ॥ २३ ॥ स्वर्गद्वाःस्वर्गस्यद्वाररूपास्वर्गभूर्मोक्षभूश्चैषामणिकर्णिकेत्यर्थः ॥ तस्मात्स्वर्गापवर्गावत्रैवमणिकर्णिकायामेवनतूपरिष्टादप्यधःक्वापीत्यर्थः ॥ स्वर्गदेतिपाठेस्वर्गंसुखंतद्ददातीतितथा ॥ अत्रैवेत्यस्यायंभावः ॥ अत्रैवस्वर्गमोक्षौप्राप्यापितत्प्राप्त्यैमूढाअन्यत्रयांत्यत्रकस्मान्नायांतीत्यनुक्रोशतिभगवान्कार्त्तिकेयइति ॥ २४ ॥ २५ ॥ स्वर्गापवर्गावत्रैवेतिस्वानुभवेनदर्शयितुंस्वर्गापवर्गयोरर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माह ॥ स्वर्गापवर्गयोरिति ॥ २६ ॥ इदानींतौदर्शयति मणिकर्णीतिद्वाभ्याम् ॥ २७ ॥ २८ ॥ ब्रह्मनालिकायामणिकर्णिकायाश्चिह्नमाह ॥ स्वर्गद्वारादिति ॥ सौभाग्यंसौंदर्यंभाग्यमैश्वर्यादिषाड्गुण्यंतयोरेकनिधिर्मुख्यआश्रयःकाचिदपरिमेयगुणगहना ॥ एकामुख्या ॥ २९ ॥ द्रुहिणाश्चतुर्मुखाः ॥ जग्मुर्गताः ॥ नैत्येषाएषामणिकर्णिकानएतिनगच्छतीत्यर्थः ॥ ॥ ३० ॥ सन्तीति ॥ मणिकर्णिकांपरितोव्याप्यवेष्टयित्वेत्यर्थः ॥ तावंतितीर्थानिसंतियावद्भिस्तीर्थैस्तिलमात्रापिएकतिलपरिमितापिभूमिर्नविरलीकृताननिरवकाशीकृतेत्यर्थः ॥ ३१ ॥ कोपिपुंजीवःस्त्रीजीवोवेत्यर्थः ॥ ३२ ॥ ३३ ॥ स्थूलमणिकर्णिकायाःप्रमाणमाह ॥ आमध्यादिति ॥ ३४ ॥ नगच्छतिनप्राप्नोति ॥ तत्रहेतुमाह ॥ एतदिति ॥ त्रिलोक

मणिकर्ण्युपविष्टस्ययत्सुखंजायतेसतः ॥ सिंहासनोपविष्टस्यतत्सुखंक्कशतक्रतोः ॥ २७ ॥ महासुखंयदुद्दिष्टंसमाधौविस्मृतात्मनाम् ॥ श्रीमत्यांमणिकर्ण्यांतत्सहजेनैवजायते ॥ २८ ॥ स्वर्गद्वारात्पुरोभागेदेवनद्याश्चपश्चिमे ॥ सौभाग्यभाग्यैकनिधिःकाचिदेकामहास्थली ॥ २९ ॥ यावंतोभास्वतःस्पर्शाद्भासंतेसैकताःकणाः ॥ तावंतोद्रुहिणाजग्मुर्नैत्येषामणिकर्णिका ॥ ३० ॥ संतितीर्थानितावंतिपरितोमणिकर्णिकाम् ॥ यावद्भिस्तिलमात्रापिनभूमिर्विरलीकृता ॥ ३१ ॥ यदन्वयेकोपिमुक्तःसंप्राप्यमणिकर्णिकाम् ॥ तद्वंश्यास्तत्प्रभावेणमान्याःस्वर्गौकसामपि ॥ ३२ ॥ तर्पिताःपितरोयेनसंप्राप्यमणिकर्णिकाम् ॥ सप्तसप्ततथासप्तपूर्वजास्तेनतारिताः ॥ ३३ ॥ आमध्याद्देवसरितआहरिश्चंद्रमंडपात् ॥ आगंगाकेशवादाचस्वर्द्वारान्मणिकर्णिका ॥ ॥ ३४ ॥ एतद्रजःकणतुलांत्रिलोक्यापिनगच्छति ॥ एतत्प्राप्त्यैप्रयततेत्रिलोकस्थोऽखिलोभवी ॥ ३५ ॥ कलावतीचित्रपटींपश्यंतीत्थंमुहुर्मुहुः ॥ ज्ञानवापींददर्शाथश्रीविश्वेश्वरदक्षिणे ॥ ३६ ॥ यदंबुसततंरक्षेद्दुर्वृत्ताद्दंडनायकः ॥ संभ्रमोविभ्रमश्चासौदत्त्वाभ्रांतिंगरीयसीम् ॥ ३७ ॥ योष्टमूर्तिर्महादेवःपुराणेपरिपठ्यते ॥ तस्यैषांबुमयीमूर्तिर्ज्ञानदाज्ञानवापिका ॥ ३८ ॥ नेत्रयोरतिथीकृत्यज्ञानवापींकलावती ॥ कदंबकुसुमाकारांबभारक्षणतस्तनुम् ॥ ॥ ३९ ॥ अंगानिवेपथुंप्रापुःस्विन्नाभालस्थलीभृशम् ॥ हर्षबाष्पांबुकलिलेजातेतस्याविलोचने ॥ ४० ॥ तस्तंभगात्रलतिकासुखंवैवर्ण्यमापच ॥ स्वरोथगद्गदोजातोव्यभ्रंशत्तत्करात्पटी ॥ ४१ ॥

स्थस्त्रिलोकेवर्तमानः ॥ त्रिलोकीस्थइतिक्वचित् ॥ अखिलोभवीकृत्स्नःसंसारी ॥ अवनीमितिपाठेत्रिलोकस्थस्त्रिजगतीस्थोजनएतत्प्राप्त्यर्थमवनींप्रयततेपर्यटतीत्यर्थः ॥ ३५ ॥ ३६ ॥ ॥ ३७ ॥ रक्षणेहेतुमाह ॥ योष्टमूर्तिरिति ॥ पंचभूतसोमसूर्यात्मनःआत्मानंतयज्वादीक्षितब्राह्मणांतावाष्टौमूर्तयः ॥ ३८ ॥ कदंबकुसुमाकारांकदंबकुसुमवद्रोमांचिताम् ॥ ३९ ॥ स्विन्नास्वेदार्द्राश्लथद्रूपावा ॥ हर्षवाष्पांबुनाकलिलेव्यामिश्रे ॥ वाष्पांबुनेतिसामान्यविशेषभावान्नपौनरुक्त्यम् ॥ विलोचनेविशिष्टेलोचनेइतिद्विवचनम् ॥ ४० ॥ तस्तंभनिश्चलाभूत् ॥

१ जन्मी–शरीरधारी ।

CC-0. In Public Domain. Digitization by eGangotri

व्यभ्रंशदधःपपात ॥ ४१ ॥ स्वंदेहम् ॥ सौषुप्तायांसुषुप्तसंबंधिन्याम् ॥ ४२ ॥ ४३ ॥ साकदंबकुसुमाकारत्वादिरूपावस्थायस्याःसातदवस्याताम् ॥ विज्ञायतामवस्यामितिशेषः ॥ ४४ ॥ ऐक्षिद्दष्टम् ॥ ४५ ॥ अयेतिचेदर्थे ॥ इत्थंनचेत्कथमियमकांडादनवसरात् ॥ ल्यब्लोपेपंचमी ॥ अकांडंप्राप्यपर्यमूमुहत्सर्वतोभावेनमोहंप्राप्तवतीत्यर्थः ॥ अतिपटीयसीमतिशयेनपटुतराम् ॥४६॥ तन्मोहस्यनिदानंसचासौमोहश्चतस्यांवामोहस्तन्मोहस्तस्यकारणम् ॥ उपचर्यतेएभिरित्युपचाराव्यजनादयस्तैरनाकुलमनावाधंययास्यात्तथाउपचेरुरुपचारांश्चक्रुः ॥ ४७ ॥ उपचारानेवदर्शयति

साक्षणंस्वंविसस्मारकाहंकाहंनवेत्तिच ॥ सौषुप्तायांदशायांचपरमात्मेवनिश्चला ॥ ४२ ॥ अथतत्परिचारिण्यस्त्वरमाणाइतस्ततः ॥ किंकिंकिमेतदेतत्किंपृच्छंतिस्मपरस्परम् ॥ ४३ ॥ तदवस्थांसमालोक्यतांताश्चतुरचेतसः ॥ विज्ञायसात्त्विकैर्भावैरिदमूचुःपरस्परम् ॥ ४४ ॥ भवांतरप्रेमपात्रमेतयैक्षितुकिंचन ॥ चिरात्तेनचसंगत्यसुखमूर्च्छामवापह ॥ ४५ ॥ अथनेत्थंकथमियमकांडात्पर्यमूमुहत् ॥ प्रेक्षमाणारहश्चित्रपटीमतिपटीयसीम् ॥ ४६ ॥ तन्मोहस्यनिदानंताःसम्यगेवविचार्यच ॥ उपचेरुर्महाशांतैरुपचारैरनाकुलम् ॥ ४७ ॥ काचित्तांवीजयांचक्रेकदलीतालवृंतकैः ॥ बिसिनीवलयैरन्याधन्यांतांपर्यभूषयत् ॥ ४८ ॥ अमंदैश्चंदनरसैरभ्यषिंचदमुंपरा ॥ अशोकपल्लवैरस्याःकाचिच्छोकमनीनशत् ॥ ४९ ॥ धारामंडपधारांबुसीकरैस्तत्तनूलताम् ॥ इष्टार्थविरहग्लानांसिंचयामासकाचन ॥ ५० ॥ जलार्द्रवाससाकाचिदेतस्यास्तनुमावृणोत् ॥ कर्पूरक्षोदजालेपैरन्यास्तामन्वलेपयत् ॥ ५१ ॥ पद्मिनीदलशय्यांचकाचिद्व्यरचयन्मृदुम् ॥ काचित्कुलिशनेपथ्यंदूरीकृत्यतदंगतः ॥ ५२ ॥ मुक्ताकलापंरचयांचक्रेवक्षोजमंडले ॥ काचिच्छशिमुखीतांतुचंद्रकांतशिलातले ॥ ५३ ॥ स्वापयामासतन्वंगींस्वच्छीतांबुशीतले ॥ दृष्ट्वोपचार्यमाणांतामित्थंबुद्धिशरीरिणी ॥ ५४ ॥ अतितापपरीतांगीताःसखीःप्रत्यभाषत ॥ एतस्यास्तापशांत्यर्थंजानेहंपरमौषधम् ॥ ५५ ॥ उपचारानिमान्सर्वान्दूरीकुरुतमाचिरम् ॥ अपतापांकरोम्येनांसद्यःपश्यतकौतुकम् ॥५६॥ दृष्ट्वाचित्रपटीमेषासद्योविह्वलतामगात् ॥ अत्रैवकाचिदेतस्याःप्रेमभूरस्तिनिश्चितम् ॥५७॥ अतश्चित्रपटीस्पर्शात्परितापंविहास्यति ॥ वाक्याद्बुद्धिशरीरिण्यास्ततस्तत्परिचारिकाः ॥ ५८ ॥ निधायतत्पुरःप्रोचुःपटींपश्यकलावति ॥ तवानंदकरीयत्रकाचिदस्तीष्टदेवता ॥ ५९ ॥ सापीष्टदेवतानाम्नातत्पटीदर्शनेनच ॥ सुधासेकमिवप्राप्यमूर्छांहित्वोत्थिताद्रुतम् ॥ ६० ॥ अवग्रहपरिम्लानावर्षासारैरिवौषधीः ॥ पुनरालोकयांचक्रेज्ञानदांज्ञानवापिकाम् ॥ ६१ ॥

काचिदित्यारभ्यसापीष्टेत्यतःप्राक्तनेन ॥ वृंतकैर्व्यजनैः ॥ बिसिनीवलयैःपद्मिनीकटकैः ॥ पर्यभूषयद्भूषयांचकार ॥ ४८ ॥ अमंदैःस्निग्धैः ॥ अनीनशन्नाशयामास ॥ ४९ ॥ ५० ॥ कर्पूरक्षोदजालेपैःकर्पूरचूर्णजैरालेपैः ॥ ५१ ॥ कुलिशनेपथ्यंवज्रालंकरणम् ॥ ५२ ॥ ५३ ॥ बुद्धियुक्तंशरीरंवर्ततेयस्याःसाबुद्धिशरीरिणीतिसान्वयासंज्ञा ॥ ५४ ॥ ५५ ॥ माचिरंशीघ्रम् ॥ सत्वरमितिक्वचित् ॥ ५६ ॥ ५७ ॥ तत्परिचारिकाःकलावत्याःसख्यः ॥ ५८ ॥ ५९ ॥ ६० ॥ अवग्रहेणवृष्टिप्रतिघातेनसूर्यतापेनेतियावत् ॥ परिम्लानाईषच्छुष्काः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओषधीरोषध्यः ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ उपविश्वेश्वरंविश्वेश्वरसमीपे ॥ ६६ ॥ मध्येमार्गंमार्गस्यमध्ये ॥ उपमलयाचलंमलयाचलसमीपे ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ॥ ७२ ॥ ७३ ॥ निर्वेक्ष्यामोतितरांप्राप्स्यामः ॥ महाभोगादितिपाठेनिर्वेक्ष्यामोनिर्विण्णाभविष्यामइत्यर्थः ॥ ७४ ॥ साभक्तेभ्योज्ञानमुप्यतेदीयतेऽनयेतिज्ञानवापीनाम्नायथार्थाख्याभवितुमर्हती

स्पृष्ट्वाकलावतीतांतुवापींचित्रगतामपि ॥ लेभेभवांतरज्ञानंयथासीत्पूर्वजन्मनि ॥ ६२ ॥ पुनर्विचारयांचक्रेवापीमाहात्म्यमुत्तमम् ॥ अहोचित्रगतापीयंसं स्पृष्टाज्ञानवापिका ॥ ६३ ॥ ज्ञानंमेजनयामासभवांतरसमुद्भवम् ॥ अथतासांपुरोहृष्टाकथयामाससुंदरी ॥ ६४ ॥ निजंप्राग्भववृत्तांतंज्ञानवापीप्रभावजम् ॥ ॥ कलावत्युवाच ॥ ॥ एतस्माज्जन्मनःपूर्वमहंब्राह्मणकन्यका ॥ ६५ ॥ उपविश्वेश्वरंकाश्यांज्ञानवाप्यांरमेमुदा ॥ जनकोमेहरिस्वामीजनयित्रीप्रियं वदा ॥ ६६ ॥ आख्यामममुशीलेतिमांचविद्याधरोऽहरत् ॥ मध्येमार्गंनिशीथेथतदोपमलयाचलम् ॥ ६७ ॥ रक्षसासहतोवीरोराक्षसंसजघानह ॥ रक्षो पिमुक्तंशापात्तुदिव्यंवपुरवापह ॥ ६८ ॥ अवापजन्मगंधर्वस्त्वसौमलयकेतुतः ॥ कर्णाटनृपतेःकन्याबभूवाहंकलावती ॥ ६९ ॥ इतिज्ञानंममोद्भूतं ज्ञानवापीक्षणात्क्षणात् ॥ इतितस्यावचःश्रुत्वासापिबुद्धिशरीरिणी ॥ ७० ॥ ताश्चतत्परिचारिण्यःप्रहृष्टास्यास्तदाऽभवन् ॥ प्रोचुस्तांप्रणिपत्याथपुण्य शीलांकलावतीम् ॥ ७१ ॥ अहोकथंहिसालभ्यायत्प्रभावोयमीदृशः ॥ धिग्जन्मतेषांमर्त्येऽस्मिन्यैर्नैक्षिज्ञानवापिका ॥ ७२ ॥ कलावतिनमस्तुभ्यं कुरुनोपिसमीहितम् ॥ जनिंसफलयास्माकंनयनःप्रार्थ्यभूपतिम् ॥ ७३ ॥ अयंचनियमोस्माकमद्यारभ्यकलावति ॥ निर्वेक्ष्यामोमहाभोगान्दृष्ट्वातां ज्ञानवापिकाम् ॥ ७४ ॥ अवश्यंज्ञानवापीसानाम्नाभवितुमर्हति ॥ चित्रंचित्रगतापीहयातवज्ञानदायिनी ॥ ७५ ॥ ॐकृत्यतासांवाक्यंसास्वाकारंपरि गोप्यच ॥ प्रियाणिकृत्वाभूभर्तुःप्रस्तावज्ञाव्यजिज्ञपत् ॥ ७६ ॥ कलावत्युवाच ॥ जीवितेशनमेत्वत्तःकिंचित्प्रियतरंक्वचित् ॥ त्वामासाद्यपतिं राजन्प्राप्ताःसर्वेमनोरथाः ॥ ७७ ॥ एकोमनोरथःप्रार्थ्योममास्त्यत्रार्यपुत्रक ॥ विचारपथमापन्नस्तवापिसमहाहितः ॥ ७८ ॥ ममतुत्वदधीनायाः सुदुष्प्रापतरोमहान् ॥ तवस्वाधीनवृत्तेस्तुसिद्धप्रायोमनोरथः ॥ ७९ ॥ प्राणेशकिंबहूक्तेनयदिप्राणैःप्रयोजनम् ॥ तदाभिलषितंदेहिप्राणायास्यंत्यथा न्यथा ॥ ८० ॥ प्राणेभ्योपिगरीयस्यास्तस्यावाक्यंनिशम्यसः ॥ उवाचवचनंराजातस्याःस्वस्यापिचप्रियम् ॥ ८१ ॥ राजोवाच ॥ ॥ नाहंप्रिये तवादेयमिहपश्यामिभामिनि ॥ प्राणाअपिममक्रीतास्त्वयाशीलकलागुणैः ॥ ८२ ॥

त्यर्थः ॥ ७५ ॥ ॐकृत्यस्वीकृत्यस्वाकारंपटीदर्शनेनसात्विकभावेनविःशंशरीरंपरिगोप्याच्छाद्यपूर्ववत्कृत्वेत्यर्थः ॥ व्यजिज्ञपद्विज्ञापयामास ॥ ७६ ॥ ७७ ॥ आपन्नःप्राप्तः ॥ ७८ ॥ ७९ ॥ अन्यथाभिलषितस्यादानेऽथानन्तरमेवप्राणायास्यंतीत्यन्वयः ॥ मेऽन्यथेतिक्वचित् ॥ ८० ॥ गरीयस्याअधिकायाः ॥ ८१ ॥ क्रीताःस्वाधीनाःकृताइत्यर्थः ॥ क्रांतइतिवापाठः ॥ कैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलकलागुणैः शीलंसत्स्वभावःकलाश्चतुःषष्टिविधाःगुणाःपातिव्रत्याद्यास्तैः ॥ ८२ ॥ ८३ ॥ प्रार्थ्यप्रार्थनीयप्रार्थयितॄणामभावादपितवाप्राप्यंनास्तीत्याह ॥ कइति ॥ प्रार्थ्योयाच्यः ॥ पृथग्जनवत्प्राकृतलोकवत् ॥ नौआवयोः ॥ ८४ ॥ उक्तंविवृणोति ॥ देशइति ॥ देशोजनपदः ॥ कोशोभांडागारः ॥ बलंहस्त्यश्वरथपादातम् ॥ दुर्गंवार्क्षंपार्वतमौदकंकृत्रिमंच ॥ तत्रवार्क्षंवृक्षानिर्मितम् ॥ पार्वतंपर्वतनिर्मितम् पर्वतभवंवा ॥ औदकमुदकनिर्मितम् ॥ कृत्रिमंप्राकारादि ॥ यदन्यच्छत्रचामरादितत्सर्वंत्वदीयमेवमेममनाकिंचित्किंतुस्वामिनइदंस्वाम्यंतन्मात्रमेवममास्ति ॥ ८५ ॥ तच्चममस्वाम्यंत्वद्दतेत्वांविनाऽन्यत्र ॥ अहमपित्वदीयएवेत्यर्थः ॥ ८६. ॥ महीजानेःपृथ्वीभर्तुः ॥ ८७ ॥ ८८ ॥ जनिर्जन्म ॥ ८९ ॥ ९० ॥ ९१ ॥ नवि

अविलंबितमाचक्ष्वकृतंविद्धिकलावति ॥ भवद्विधानांसाध्वीनांमन्येऽप्राप्यंनकिंचन ॥ ८३ ॥ कःप्रार्थ्यःप्रार्थनीयंकिंकोवाप्रार्थयिताप्रिये ॥ नपृथग्जनवत्किंचिद्वर्तनंनौकलावति ॥ ८४ ॥ देशःकोशोबलंदुर्गंयदन्यदपिभामिनि ॥ तत्त्वदीयंनमेकिंचित्स्वाम्यमात्रमिहास्तिमे ॥ ८५ ॥ तच्चस्वाम्यंममान्यत्रत्वद्दतेजीवितेश्वरि ॥ राज्यंत्यजेयंत्वद्वाक्यात्तृणीकृत्यापिमानिनि ॥ ८६ ॥ माल्यकेतोर्महीजानेरितिवाक्यंनिशम्यसा ॥ प्राहगंभीरयावाचावचश्चारुकलावती ॥ ८७ ॥ कलावत्युवाच ॥ नाथप्रजासृजापूर्वंसृष्टानानाविधाःप्रजाः ॥ प्रजाहितायसंसृष्टंपुरुषार्थचतुष्टयम् ॥ ८८ ॥ तद्विहीनाजनिरपिजलबुद्बुदवन्मुधा ॥ तस्मादेकोपिसंसाध्यःपरत्रेहचशर्मणे ॥ ८९ ॥ यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्धते ॥ यदुच्यतेपुराविद्भिरितितत्तथ्यमीक्षितम् ॥ ९० ॥ मद्विधानांतुदासीनांशतंतेऽस्तीहमंदिरे ॥ तथापिनितरांप्रेमस्वामिनोमयिदृश्यते ॥ ९१ ॥ तवदास्यपिभोगाढ्याकिंसुतांकस्थलीचरी ॥ तत्राप्यनन्यसंपत्तिस्तत्रस्वाधीनभर्तृता ॥ ९२ ॥ विपश्चित्संचयेदर्थानिष्टापूर्तायकर्मणे ॥ तपोर्थमायुर्निर्विघ्नंदारांश्चापत्यलब्धये ॥ ९३ ॥ तवैतत्सर्वमस्तीहविश्वेशानुग्रहात्प्रिय ॥ पूरणीयोऽभिलाषोमेयदितद्वच्म्यहंशृणु ॥ ९४ ॥ तूर्णंप्रहिणुमांनाथविश्वनाथपुरींप्रति ॥ प्राणाःप्रयाताःप्रागेववपुःशेषास्मिकेवलम् ॥ ९५ ॥ माल्यकेतुःकलावत्याइत्याकर्ण्यवचःस्फुटम् ॥ क्षणंविचार्यस्वहृदिराजाप्रोवाचतांप्रियाम् ॥ ९६ ॥ प्रियेकलावतियदितवगंतव्यमेवहि ॥ राज्यलक्ष्म्यानयाकिंमेचलयात्वद्विहीनया ॥ ९७ ॥ नराज्यंराज्यमित्याहूराज्यश्रीःप्रेयसीध्रुवम् ॥ सप्तांगमपितद्राज्यंतयाहीनंतृणायते ॥ ९८ ॥ निःसपत्नंकृतंराज्यंभुक्ताभोगानिरंतरम् ॥ हृषीकार्थाःकृतार्थाश्चविधृताआधृतिःप्रिये ॥ ९९ ॥

द्यतेऽन्यायस्याःसाअनन्याअनन्याचासौसंपत्तिश्चेतितथा ॥ अपत्यसंपत्तिरितिक्वचित्पाठः ॥ ९२ ॥ ९३ ॥ ९४ ॥ प्रहिणुप्रस्थापय ॥ ९५ ॥ स्वहृदिस्वांतःकरणे ॥ सहृदीतिक्वचित् ॥ सुहृदीतिचान्यत्र ॥ ९६ ॥ ९७ ॥ प्रेयसीप्रेमवतीमहिषी ॥ सप्तांगमिति ॥ स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिचेतिसप्तांगानि ॥ तृणायतेतृणवदाचरति ॥ ९८ ॥ निरंतरंभोगान्भुक्त्वाहृषीकार्थाइंद्रियार्थाश्चविषयाःकृतार्थाःकृताइतिबहुवचनेनपरिणमय्यपूर्वक्रियया संबन्धः ॥ जाताइतिशेषइतिवा ॥ भुक्ताभोगास्त्वयासहेतिक्वचित् ॥ आधृतिरासमंताद्धैर्यंविशेषेणधृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधृतेत्यर्थः ॥ ९९ ॥ १०० ॥ प्रकृतीःपौरश्रेणीः ॥ १ ॥ पुत्राद्रत्नजातमर्थंप्रगृह्येतिसंबन्धः ॥ पुत्रदत्तमितिपाठेस्पष्टएवार्थः ॥ २ ॥ ३ ॥ अवैत्ज्ञातवती ॥ ४ ॥ ५ ॥
व्रजंसमूहम् ॥ दुकूलानिपट्टवस्त्राणि ॥ ६ ॥ दीपोऽस्यास्तीतिदीपीदीपाधारयष्टिरित्यर्थः ॥ दीप्यादीनांत्रयाणांद्वंद्वः ॥ दीर्घत्वमार्षम् ॥ ध्वजस्तंभयुक्ताःपताकाध्वजस्तंभपताकाः ॥
उल्लोचकानिचंद्रातपानि ॥ ७ ॥ न्यायार्जितंधनंसद्धनमुत्कृष्टंधनंवा ॥ ८ ॥ तौर्यत्रिकमहोत्सवैःनृत्यगीतवादित्रपूर्वकैर्महोत्सवैः ॥ ९ ॥ आचमक्रियाआचमनक्रिया ॥ राज्ञ्याकलावत्या ॥ ११० ॥

अपत्यान्यपिजातानिकिंकर्तव्यमिहास्तिमे ॥ अवश्यमेवगंतव्याऽऽवाभ्यांवाराणसीपुरी ॥ १०० ॥ माल्यकेतुःप्रियामित्थमाश्वास्यकृतनिश्चयः ॥
समाहूयचदैवज्ञान्प्रकृतीःपरिपूज्यच ॥ १ ॥ पुत्रेराज्यंनिधायाथराजाकाशींप्रतस्थिवान् ॥ रत्नजातंकियदपिपुत्रादर्थंप्रगृह्यच ॥ २ ॥ दृष्ट्वाविश्वेश्वरपुरीं
हृष्टरोमानरेश्वरः ॥ मेनेकृतार्थमात्मानंसंसारांबुधिपारगम् ॥ ३ ॥ प्राग्जन्मवासनायोगात्सापिराज्ञीकलावती ॥ ग्रामांतरादागतेवपुरीमार्गानवैत्स्वयम्
॥ ४ ॥ मणिकर्ण्यामथस्नात्वाभूरिदत्त्वाततोवसु ॥ विश्वेशमर्चयित्वाथरत्नजातैरनेकशः ॥ ५ ॥ दत्त्वातत्रापिरत्नानिगजानश्वान्गवांव्रजम् ॥ दुकूलानि
विचित्राणिपूजोपकरणानिच ॥ ६ ॥ सुवर्णरूप्यकलशान्दीपीदर्पणचामरान् ॥ ध्वजस्तंभपताकाश्चविचित्रोल्लोचकानिच ॥ ७ ॥ अथप्रदक्षिणी
कृत्यमुक्तिमंडपमाविशत् ॥ तत्रधर्मकथांश्रुत्वादत्त्वातत्रापिसद्धनम् ॥ ८ ॥ सायंतनींमहापूजांपुनःकृत्वाक्षितीश्वरः ॥ तत्रजागरणंकृत्वातौर्यत्रिकमहो
त्सवैः ॥९॥ अथप्रातःसमुत्थायकृत्वाशौचाचमक्रियाम् ॥ राज्ञ्याविनिर्दिष्टपथाज्ञानवापींनृपोययौ ॥११०॥ नृपःसार्धंकलावत्यातत्रसस्नौप्रहृष्टवत् ॥
अथपिंडान्सानिर्वाप्यसंतर्प्यश्रद्धयापितॄन् ॥ ११ ॥ तत्ररूप्यसुवर्णादिपात्रेभ्यःप्रतिपाद्यच ॥ दीनांधकृपणानाथान्महार्हैरत्नजातकैः ॥ १२ ॥ प्रीण
यित्वानरपतिःपारणांकृतवांस्ततः ॥ संस्कार्यरत्नसोपानैर्ज्ञानवापींकलावती ॥ १३ ॥ आबबंधरतिंतत्रसहभर्त्रातपस्विनी ॥ एकांतरोपवासैश्चकदा
चित्त्र्यहोव्रतैः ॥ १४ ॥ षडहोभोजनैश्चापिपक्षार्धनियमैरथ ॥ पक्षांतरोपवासैश्चमासोपवसनादिभिः ॥ १५ ॥ चांद्रायणव्रतैःकृच्छ्रैर्भर्तुःशुश्रूषणैरपि ॥
निनायक्षणवत्कालमायुःशेषस्यसानघा ॥ १६ ॥ एकदाज्ञानवाप्यांतुप्रातःस्नात्वोपविष्टयोः ॥ आगत्यजटिलःकश्चिद्विभूतिंदत्तवान्करे ॥ १७ ॥
उवाचचप्रसन्नास्यआशीर्भिरभिनंद्यच ॥ उत्तिष्ठतंप्रकुरुतंमहानेपथ्यमद्यवै ॥ १८ ॥ तारकोदयसंप्राप्तिर्भावित्रीवांक्षणादिह ॥ यावदित्थंसमाचष्टजटिलो
ऽथेतयोर्वचः ॥ १९ ॥ तावद्विमानमापन्नंसक्कणत्किंकिणीगणम् ॥ पश्यतांसर्वलोकानांचन्द्रमौलिरथोरथात् ॥ १२० ॥ उत्तीर्यतच्छ्रुतिपुटेकिमपि
स्वयमादिशत् ॥ अनाख्येयंयत्परंज्योतिरुच्चक्रामचतत्क्षणात् ॥ २१ ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ महानेपथ्यंमहदलंकरणम् ॥ १८ ॥ १९ ॥ क्वणताशब्दवताकिंकिणीगणेनसहितंसक्वणत्किंकिणीगणम् ॥ प्रक्वणत्किंकिणी
गणमितिक्वचित् ॥ १२० ॥ उत्तीर्यावतीर्यकिमपिवाङ्मनसयोरगोचरंयद्ब्रह्मात्मैकत्वंतदादिशदुपदिष्टवान् ॥ उपदेशानंतरमनाख्येयंयत्परंज्योतिर्वाङ्मनसातीतंस्वप्रकाशंब्रह्मतत्क्षणाच्छीघ्रमेव।

CC-0. In Public Domain. Digitization by eGangotri

चक्राममप्रासवान् ॥ अर्यात्सकलावतीकोमाल्यकेतुरित्यर्थः ॥ अथवाअनाख्यमित्यादेःपूर्वेणैवान्वयः ॥ उपदेशानंतरंतद्विमानंक्षणादुच्चक्रामऊर्ध्वमगमत् ॥ २१ ॥ तर्हिकिंदेवोऽत्रैवस्थितवान् नहीत्याह ॥ उद्द्योतयन्निति ॥ तेनैवविमानेननभोवर्त्मद्योतयन्देवश्चंद्रमौलिःस्वालयंकैलासंययावित्यर्थः ॥ यद्वा नभोवर्त्मउद्द्योतयद्विमानमुच्चक्रामेत्यन्वयः ॥ तर्हिदेवःकिंकृतवांस्तत्राह ॥ देवोपि स्वालयंवैश्वेश्वरलिंगंययौस्वप्रकाशज्योतिर्मयवैश्वेश्वरलिंगेएकीभावंप्राप्तवानित्यर्थः ॥ स्पष्टमन्यत् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ १२७ ॥ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायांचतुस्त्रिंशत्तमोध्यायः ॥ ३४ ॥ ॥ छ ॥ पंचत्रिंशत्तमेऽध्यायेसदाचारोनिरूप्यते ॥ सामान्येनचतुर्वर्णाश्रमाणांचविशेषतः ॥:१ ॥ ज्ञानवाप्याःकथाश्रवणजनितानंदकंद

उद्योतयन्नभोवर्त्मदेवोपिस्वालयंययौ ॥ ॥ स्कन्दउवाच ॥ ॥ तदाप्रभृतिलोकेऽत्रज्ञानवापीविशिष्यते ॥ २२ ॥ सर्वेभ्यस्तीर्थमुख्येभ्यःप्रत्यक्ष ज्ञानदामुने ॥ सर्वज्ञानमयीचैषासर्वलिंगमयीशुभा ॥ २३ ॥ साक्षाच्छिवमयीमूर्तिर्ज्ञानकृज्ज्ञानवापिका ॥ सन्तितीर्थान्यनेकानिसद्यःशुचिकराण्य पि ॥ २४ ॥ परंतुज्ञानवाप्याहिकलांनार्हंतिषोडशीम् ॥ ज्ञानवाप्याःसमुत्पत्तिंयःश्रोष्यतिसमाहितः ॥ नतस्यज्ञानविभ्रंशोमरणेजायतेक्वचित् ॥ २५ ॥ महाख्यानमिदंपुण्यंमहापातकनाशनम् ॥ महादेवस्यगौर्याश्चमहाप्रीतिविवर्धनम् ॥ २६ ॥ पठित्वापाठयित्वावाश्रुत्वावाश्रद्धयान्वितः ॥ ज्ञानवाप्याः शुभाख्यानंशिवलोकेमहीयते ॥ १२७ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेज्ञानवापीप्रशंसनंनामचतु स्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ ॥ कुंभयोनिरुवाच ॥ ॥ अविमुक्तंमहाक्षेत्रंपरंनिर्वाणकारणम् ॥ क्षेत्राणांपरमंक्षेत्रंमंगलानांचमंगलम् ॥ १ ॥ श्मशा नानांचसर्वेषांश्मशानंपरमंमहत् ॥ पीठानांपरमंपीठमूषराणांमहोषरम् ॥ २ ॥ धर्माभिलाषिबुद्धीनांधर्मराशिकरंपरम् ॥ अर्थार्थिनांशिखिरथपरमार्थ प्रकाशकम् ॥ ३ ॥ कामिनांकामजननंमुमुक्षूणांचमोक्षदम् ॥ श्रूयतेयत्रयत्रैतत्तत्रतत्रपरामृतम् ॥ ४ ॥ क्षेत्रैकदेशवर्तिन्याज्ञानवाप्याःकथांपराम् ॥ श्रुत्वेमामितिमन्येहंगौरीहृदयनंदन ॥ ५ ॥ अणुप्रमाणमपियामध्येकाशिविकासिनी ॥ महीमहीयसीज्ञेयासासिद्धचैनमुधाक्वचित् ॥ ६ ॥ कियंतिसं तितीर्थानिनेहक्षोणीतलेऽखिले ॥ परंकाशीरजोमात्रतुलासाम्यंक्वतेष्वपि ॥ ७ ॥ कियंत्योनस्रवंत्योत्ररत्नाकरसमुदावहाः ॥ परंस्वर्गतरंगिण्याःकाश्यां कासाम्यमुद्वहेत् ॥ ८ ॥ कियंतिसंतिनोभूम्यांमोक्षक्षेत्राणिषण्मुख ॥ परंमन्येऽविमुक्तस्यकोट्यंशोपिनतेष्वहो ॥ ९ ॥

वेनात्यौत्सुक्यादुक्तानुवादपूर्वकमविमुक्तंस्तुत्वाऽविमुक्तप्रापकंसदाचारंपृच्छाति अविमुक्तमित्यादिना ॥ १ ॥ २ ॥ शिखिरथमयूरवाहन ॥ ३ ॥ यत्रयत्रत्वयाकथ्यमानेआख्याने ॥ एतदविमुक्तम् ॥ ४ ॥ क्षेत्रेति ॥ अणुप्रमाणंयथास्यात्तथामध्येकाशिकाशीमध्येयाविकासिनीप्रख्याताप्रकाशिनीतिवाअर्थात्कैवल्यस्य अतएवमहीयसीमहत्तरामहीवर्तते ॥ सासिद्धचैमुक्तयेइ तिक्वचित् ॥ कदाचिदपिमुधामिथ्यानेतिज्ञानवाप्याइमांकथांश्रुत्वाहंमन्येइतिद्वयोरन्वयः ॥ ५ ॥ ६ ॥ ७ ॥ रत्नाकरस्यसमुद्रस्यमुदंहर्षमावहंतीतिरत्नाकरसमुदावहाः ॥ ८ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काशीमूर्तिमतीक्षेत्राधिष्ठात्रीदेवता ॥ यतोयस्मिन्क्षेत्ररूपेऽविमुक्ते ॥ १० ॥ त्रयाणांगंगाविश्वेश्वरकाशीनांसमाहारस्त्रयी ॥ नियतमवश्यंयथास्यात्तथेत्यर्थः ॥ ११ ॥ त्वतःतुएवअतएवमोक्षःकुतः ॥
तपआदेरभावात्सत्त्वशुद्ध्यभावादित्यर्थः ॥ १२ ॥ तर्हिकलौतपआदेरभावान्मोक्षोनास्त्येवकिंनेत्याह ॥ विनापीति ॥ १३ ॥ अतःकाशीप्राप्त्युपायंवदेतिपृच्छति ॥ किंकिमिति ॥ तत्रतावन्म
नोरथमात्राणांसदाचारप्राप्यत्वात्तत्स्तुतिपूर्वकंसदाचारमेवप्रथमंवदेत्याह मन्यइतिसार्धद्वाभ्याम् ॥ १४ ॥ १५ ॥ एकमुखत्वादन्यैरेतद्वक्तुंनशक्यमितिद्योतयन्संबोधयति ॥ षण्मुखेति ॥ नच
स्वयमूहित्वासंक्षेपेणवाकथनीयमित्याह ॥ देवदेवइति ॥ १६ ॥ सदाचारंवक्तुंप्रतिजानीते ॥ मित्रावरुणजेति ॥ देवपुत्रत्वात्तवैवैतच्छ्रवणेऽधिकारइतिद्योतयन्संबोधयति ॥ मित्रेति ॥ सदा
चारंशिष्टाचारंसतांसाधूनांहितंहितकरम् ॥ शिवोदितमितिक्वचित् ॥ १७ ॥ सदाचारशीलिनासततंभाव्यमितिवक्तुंतद्विमुखाःपातकिनोऽनुभूतनानानरकास्तद्विपाकशेषेणतामसादिगुणत्रयसंकर
तारतम्यानुबंधभिन्नानिस्थावरादिजन्मानियावन्मोक्षंक्रमेणवाप्नुवंतीत्याह स्थावराइतिश्लोकाभ्याम् ॥ स्थावरावृक्षादयः ॥ कृमयःपिपीलिकाद्याअनस्थिमंतः ॥ अब्जामत्स्यादयः ॥ पक्षिणो
मयूरादयः ॥ पशवोगवादयः ॥ नरामनुष्याः ॥ एतेसर्वेक्रमेणस्थावरेभ्यःकृमयःकृमिभ्योऽब्जाइत्यादिक्रमेणधार्मिकाः ॥ अप्यर्थेतुशब्दोभिन्नक्रमे एतेभ्यअनेनसंबध्यते ॥ एतेभ्योपिसुराधार्मि

गंगाविश्वेश्वरःकाशीजागर्तित्रितयंयतः ॥ तत्रनैःश्रेयसीलक्ष्मीर्लभ्यतेचित्रमत्रकिम् ॥ १० ॥ कथमेषात्रयीस्कंदप्राप्यतेनियतंनरैः ॥ तिष्येयुगेविशेषेण
नितरांचचलेंद्रियैः ॥ ११ ॥ तपस्ताहक्क्ववातिष्येतिष्येयोगःक्वताहशः ॥ क्वाव्रतंक्वदानंतिष्येमोक्षस्त्वतःकुतः ॥ १२ ॥ विनापितपसास्कंदविनायो
गेनषण्मुख ॥ विनाव्रतैर्विनादानैःकाश्यांमोक्षस्त्वयेरितः ॥ १३ ॥ किंकिमाचरतास्कंदकाशीप्राप्येततद्वद ॥ मन्येविनासदाचारंनसिद्धयेयुर्मनोरथाः
॥ १४ ॥ आचारःपरमोधर्मआचारःपरमंतपः ॥ आचाराद्वर्धतेह्यायुराचारात्पापसंक्षयः ॥ १५ ॥ आचारमेवप्रथमंतस्मादाचक्ष्वषण्मुख ॥ देवदेवो
यथाप्राहतवाग्रेत्वंतथावद ॥ १६ ॥ ॥ स्कंदउवाच ॥ ॥ मित्रावरुणजाख्यामिसदाचारंसतांहितम् ॥ यदाचरन्नरोनित्यंसर्वान्कामानवाप्नुयात् ॥ १७ ॥
स्थावराःकृमयोऽब्जाश्चपक्षिणःपशवोनराः ॥ क्रमेणधार्मिकास्त्वेतेह्येतेभ्योधार्मिकाःसुराः ॥ १८ ॥ सहस्रभागःप्रथमाद्वितीयोनुक्रमात्तथा ॥ सर्वएते
महाभागायावन्मुक्तिसमाश्रयाः ॥ १९ ॥

काइत्यर्थः ॥ १८ ॥ विशेषस्त्वमीषामुत्तरोत्तरमल्पीयस्त्वमित्याह ॥ सहस्रेति ॥ प्रथमात्प्रथमनिर्दिष्टात्स्थावरादिरूपाद्द्वितीयस्तदनन्तरंनिर्दिष्टःकृम्यादिरूपोऽनुक्रमात्सहस्रभागःप्रथमनिर्दिष्टाद्रूपा
द्वितीयोनिर्दिष्टरूपःसहस्रस्यसहस्रस्यएकैकोंशइत्यर्थः ॥ सहस्रभागाद्द्वितीयादितिपाठेसहस्रंभागमंशमत्तिभजतीतिसहस्रभागात् ॥ तथा ॥ द्वितीयंद्वितीयत्वंप्रथमनिर्दिष्टादनन्तरनिर्दिष्टत्वंकृम्या
दिरूपत्वमत्तिभजतइतिद्वितीयादितिपूर्वोक्तएवार्थः ॥ सर्वएतेमहाभागाःमहान्भागोभाग्यंयेषांतेतथा ॥ कियत्कालपर्यंतमेतेएवंरूपाभवंतीतिपृच्छायामाह ॥ यावन्मुक्तीति ॥ यावन्मुक्तिमुक्तिपर्यंतं
समस्तुल्यःसंसारलक्षणआश्रयोयेषांतेस्युरित्यर्थः ॥ एतेनपापिनांबाहुल्यंधार्मिकाणामल्पत्वंमोक्षिणामल्पतमत्वंचोक्तम् ॥ तथाचोक्तंविष्णुपुराणे ॥ स्थावराःकृमयोब्जाश्चपक्षिणः पशवोनराः ॥ धा
र्मिकास्त्रिदशास्तद्वन्मोक्षिणश्चयथाक्रमम् ॥ सर्वेप्येतेमहाभागायावन्मुक्तिसमाश्रयाः ॥ सहस्रभागःप्रथमाद्द्वितीयोनुक्रमात्तथेति ॥ यद्वा विशेषतस्त्वमीषामुत्तरोत्तरंमहाभागत्वमित्याह ॥ सहस्रेति ॥
अथवापूर्वोक्तमेवविवृणोति ॥ सहस्रभागेति ॥ प्रथमात्स्थावरादिरूपाद्द्वितीयोनुक्रमात्कृम्याद्यनुक्रमात्सहस्रभागात्सहस्रभागेनसहस्रगुणेनेतियावत् ॥ सर्वएतेमहाभागाइत्यादिपूर्ववत् ॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणेनसदाचारोऽवश्यमनुष्ठेयइतिवक्तुंसर्वेभ्योब्राह्मणानांश्रेष्ठ्यमाह. चतुर्णामित्यादिना ॥ चतुर्णांजरायुजांडजस्वेदजोद्भिज्जानांप्राणिनश्रेष्ठावंतः कृम्यादयोबुद्ध्युपजीविनोज्ञानपूर्वकोपजीविनो हितानुसन्धानाःपश्वादयः ॥२०॥मतिमद्भ्योज्ञानवद्भ्योबुद्ध्युपजीविभ्यइतियावत् ॥ वाडवाब्राह्मणाः॥विद्वांसः शास्त्रार्थज्ञाः॥ कृतासंपादिताइदमित्थमितिबुद्धिर्निश्चयात्मिकायैस्तेकृतबुद्धयः ॥२१॥ कर्तारोनुष्ठातारः ॥ ब्रह्मतत्पराःपरमात्मैकनिष्ठाः ॥ २२ ॥ तपआलोचनम् ॥ यस्यज्ञानमयंतपइतिश्रुतेः ॥ विद्याब्रह्मविद्याताभ्यामविशेषतोऽविशेषात् ॥ २३ ॥ तर्हिकिंसाधारण्येनसर्वएवब्राह्मणोजगद्गतंवस्त्वर्हतिनेत्याह ॥ सदाचारइति ॥ यस्मादेवंतस्मात् ॥ २४ ॥ सदाचारस्यलक्षणमाह ॥ विद्वेषेति ॥ यंक्रियाकलापम् ॥ धर्ममूलंपुण्यस्यहेतुम् ॥२५॥ सदाचारानुष्ठानस्यफलमाह ॥ लक्षणैरिति ॥ अनसूयुर्गुणेषुदोषाविष्करणहीनः ॥ समाइत्यत्यंतसंयोगेद्वितीया ॥ २६ ॥ उदितंकथितम् ॥ २७ ॥ सदाचारंस्तुत्वादुराचारंनिन्दति ॥ दुराचाररतइति ॥ द्वेषरागयुक्ताःपुरुषाअधर्म

चतुर्णामपिभूतानांप्राणिनोऽतीवचोत्तमाः ॥ प्राणिभ्योपिमुनेश्रेष्ठाःसर्वेबुद्ध्युपजीविनः ॥ २० ॥ मतिमद्भ्योनराःश्रेष्ठास्तेभ्यःश्रेष्ठास्तुवाडवाः ॥ विप्रेभ्योपिचाविद्वांसोविद्वद्भ्यःकृतबुद्धयः ॥ २१ ॥ कृतधीभ्योपिकर्तारःकर्तृभ्योब्रह्मतत्पराः ॥ नतेषामर्चनीयोऽन्यस्त्रिषुलोकेषुकुंभज ॥ २२ ॥ अन्योन्यमर्चकास्तेवैतपोविद्याऽविशेषतः ॥ ब्राह्मणोब्रह्मणासृष्टःसर्वभूतेश्वरोयतः ॥ २३ ॥ अतोजगत्स्थितंसर्वंब्राह्मणोऽर्हतिनापरः ॥ सदाचारोहिसर्वार्होनाचाराद्विच्युतःपुनः ॥ तस्माद्विप्रेणसततंभाव्यमाचारशीलिना ॥ २४ ॥ विद्वेषरागरहिताअनुतिष्ठंतियंमुने ॥ विद्वांसस्तंसदाचारंधर्ममूलंविदुर्बुधाः ॥२५॥ लक्षणैःपरिहीनोपिसम्यगाचारतत्परः ॥ श्रद्धालुरनसूयुश्चनरोजीवेत्समाःशतम् ॥ २६ ॥ श्रुतिस्मृतिभ्यामुदितंस्वेषुस्वेषुचकर्मसु ॥ सदाचारंनिषेवेतधर्ममूलमतंद्रितः ॥ २७ ॥ दुराचाररतोलोकेगर्हणीयःपुमान्भवत् ॥ व्याधिभिश्चाभिभूयेतसदाल्पायुःसुदुःखभाक् ॥ २८ ॥ त्याज्यंकर्मपराधीनंकार्यमात्मवशंसदा ॥ दुःखीयतःपराधीनःसदैवात्मवशःसुखी ॥ २९ ॥ यस्मिन्कर्मण्यंतरात्माक्रियमाणेप्रसीदति ॥ तदेवकर्मकर्तव्यंविपरीतंनचक्रचित् ॥ ३० ॥ प्रथमंधर्मसर्वस्वंप्रोक्तायन्नियमायमाः ॥ अतस्तेष्वेववैयत्नःकर्तव्योधर्ममिच्छता ॥ ३१ ॥ सत्यंक्षमार्जवंध्यानमानृशंस्यमहिंसनम् ॥ दमःप्रसादोमाधुर्यंमृदुतेतियमादश ॥ ३२ ॥ शौचंस्नानंतपोदानंमौनेज्याध्ययनंव्रतम् ॥ उपोषणोपस्थदंडौदशैतेनियमाःस्मृताः ॥ ३३ ॥

स्यमूलंयंक्रियाकलापंकुर्वंतिसदुराचारः ॥ २८ ॥ परायत्तंधर्म्यमपित्याज्यमित्याह ॥ त्याज्यमिति ॥२९॥ स्वाधीनमपिकर्मनसर्वंकार्यमित्याह ॥ यस्मिन्निति ॥ अन्तरात्मामनः ॥ तथाचमनुः ॥ मनःपूतंसमाचरेदिति ॥ ३० ॥ यद्यस्माद्धर्मसर्वस्वंप्रथमंयमानियमाश्चप्रोक्ताअतस्तेष्वेवयमनियमेष्वेवधर्ममिच्छतायत्नःकर्तव्यइत्यर्थः ॥ प्रोक्तमितिक्वचित्पाठः ॥ ३१ ॥ तत्रक्रमम नाहत्यश्लोकाभ्यांयमनियमावाह सत्यमितिद्वाभ्याम् ॥ सत्यंयथादृष्टस्ययथाश्रुतस्यवाआत्मानुभवस्यपरबुद्धिसंक्रांतयेतथैवोच्चार्यमाणावाक्सत्यमुच्यते ॥ क्षमाआक्रुष्टस्यताडितस्यवाऽविकृतचित्तता ॥ आर्जवंमृदुताअवक्रतेतियावत् ॥ ध्यानंशिवस्यविष्णोर्वाचिन्तनम् ॥ आनृशंस्यममारात्मकता ॥ अहिंसाप्राणिमात्राणामपीडा ॥ दमोबाह्येंद्रियोपशमइंद्रियमात्रस्यवा ॥ प्रसादःप्रसन्नतास्वच्छतेतियावत् ॥ माधुर्यंमधुरतामधुरस्वभावइतियावत् ॥ मृदुताकोमलताअकाठिन्यमितियावत् ॥ एतेदशयमाः ॥ ३२ ॥ शौचंद्विविधंबाह्याभ्यंतरभेदेन ॥ तत्रबाह्यंमृज्जलादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्भावशुद्ध्या ॥ स्नानंगंगादौमज्जनादि ॥ तपःकृच्छ्रचांद्रायणादि ॥ दानंद्रविणादेःसंत्यागः ॥ मौनंवृथावाचामनुच्चारणम् ॥ इज्यापंचयज्ञाद्यनुष्ठानम् ॥ अध्ययनंवेदपाठः॥व्रतंचातुर्मास्यादि ॥ उपोषणमेकादश्याद्युपवासः ॥ उपस्थदंडःपरदारादिपराङ्मुखता ॥ एतेदशनियमाःस्मृताः ॥ ३३ ॥ उपादेयकर्तव्यतामुक्त्वाहेयनिरोधनंदर्शयातिकाममित्येकेन ॥ ३४ ॥ शनैरिति ॥ वल्मीकश्रृंगंवामलूरकूटंयथावल्मीककीटाःक्रमेणसंवर्धयन्तितथाकायवाङ्मनोभिःपरपीडामकुर्वाणःशनैःशनैःपरलोकसहायभूतंधर्मसंचिनुयाद्वर्धयेदित्यर्थः ॥ ३५ ॥ धर्मस्यैवसहायित्वंप्रत्यक्षमवलंब्याह ॥ धर्मएवेति ॥ परिच्छदःकरितुरगप्रासादादिः ॥ वंधुःप्रीतिभाक् ॥ आदिपदेनदासादयोगृह्यंते॥३६॥ एकएवएकलः ॥ स्वार्थेलः ॥ ३७ ॥ धर्मएवसहायीस्यादित्येतद्विवृणोति ॥ देहमिति ॥३८॥ ननुयथाधर्मोनुगच्छतितथापापमपि ॥ सत्यम् ॥ तत्तुनकर्तव्यमित्याशयेनाह ॥ कृतीति ॥ तमोदुःखंसंसारंवा अज्ञानंवा ॥ धर्मानुष्ठानात्सत्त्वशुद्ध्याज्ञानोत्पत्तेः ॥३९॥ किंचश्रेष्ठेनैवधर्मोऽनुष्ठेयइति

कामंक्रोधंमदंमोहंमात्सर्यंलोभमेवच ॥ अमून्षड्वैरिणोजित्वासर्वत्रविजयीभवेत् ॥ ३४ ॥ शनैःशनैःसंचिनुयाद्धर्मंवल्मीकश्रृंगवत् ॥ परपीडामकुर्वाणः परलोकसहायिनम् ॥ ३५ ॥ धर्मएवसहायीस्यादमुत्रनपरिच्छदः ॥ पितृमातृसुतभ्रातृयोषिद्बंधुजनादिकः ॥ ३६ ॥ जायतेचैकलःप्राणीम्रियते तथैकलः ॥ एकलःसुकृतंभुंक्तेभुंक्तेदुष्कृतमेकलः ॥ ३७ ॥ देहंपंचत्वमापन्नंत्यक्त्वाकौकाष्ठलोष्ठवत् ॥ बांधवाविमुखायांतिधर्मोयांतमनुव्रजेत् ॥३८॥ कृतीसंचिनुयाद्धर्मंततोऽमुत्रसहायिनम् ॥ धर्मसहायिनंलब्ध्वासंतरेद्दुस्तरंतमः ॥ ३९ ॥ संबंधानाचरेन्नित्यमुत्तमैरुत्तमैःसुधीः ॥ अधमानधमां स्त्यक्त्वाकुलमुत्कर्षतांनयेत् ॥ ४० ॥ उत्तमानुत्तमानेवगच्छन्हीनांश्ववर्जयन् ॥ ब्राह्मणःश्रेष्ठतामेतिप्रत्यवायेनशूद्रताम् ॥ ४१ ॥ अनध्ययनशील चसदाचारविलंघिनम् ॥ सालसंचदुरन्नादंब्राह्मणंबाधतेंऽतकः ॥ ४२ ॥ ततोऽभ्यसेत्प्रयत्नेनसदाचारंसदाद्विजः ॥ तीर्थान्यप्यभिलष्यंतिसदाचारिस मागमम् ॥ ४३ ॥ रजनीप्रांतयामार्धंब्राह्मःसमयउच्यते ॥ स्वहितंचिंतयेत्प्राज्ञस्तस्मिन्श्चोत्थायसर्वदा ॥ ४४ ॥ गजास्यंसंस्मरेदादौततईशंसहांबया॥ श्रीरंगंश्रीसमेतंतुब्रह्माण्याकमलोद्भवम् ॥ ४५ ॥ इंद्रादीन्सकलान्देवान्वसिष्ठादीन्मुनीनपि ॥ गंगाद्याःसरितःसर्वाःश्रीशैलाद्यखिलान्गिरीन् ॥ ४६ ॥ क्षीरोदादीन्समुद्रांश्चमानसादिसरांसिच ॥ वनानिनंदनादीनिधेनूःकामदुघादिकाः ॥ ४७ ॥

श्रेष्ठत्वसंपादनप्रकारमाह ॥ संबंधानित्येकेन ॥ ४० ॥ फलितमाह ॥ उत्तमानिति ॥ प्रत्यवायेननीचसंबन्धाचरणादिजनितपापेनेत्यर्थः ॥ ४१ ॥ अनध्ययनेति ॥ तथाचमनुः ॥ अनभ्यासाच्चवेदानामाचारस्यतुलंघनात् ॥ आलस्यादन्नदोषाच्चमृत्युर्विप्राञ्जिघांसतीति ॥ ४२ ॥ ततइति ॥ यतःसदाचारविलंघिनंमृत्युर्बाधतेततइत्यर्थः ॥ सदाचारानुष्ठायिनांमाहात्म्यमाह ॥ तीर्थानीति ॥ ४३ ॥ प्रतिदिनंब्राह्मंमुहूर्तमारभ्यधर्मोऽनुष्ठेयइत्येतदर्थंब्राह्मंमुहूर्तंलक्षयति रजनीत्यर्धेन ॥ रजनीप्रांतेयामार्धंघटिकाचतुष्टयम् ॥ यदर्थंब्राह्मोमुहूर्तोलक्षितस्तदाह ॥ स्वहितमिति ॥ स्वस्यहितंयस्मात्स्वहितंचिंतयेत् ॥ ४४ ॥ स्वहितमेवाह गजास्यमित्यारभ्यततआवश्यकमित्यतःप्राक्तनेनग्रंथेन ॥ अंबयाअंबिकया ॥ श्रीरंगंश्रीरंगपर्वतशायिनंविष्णुमित्यर्थः ॥ श्रीरंगशायिनिहरौरमतां मनोममइतिवचनात् ॥ श्रियोलक्ष्म्यारंगोहर्षोयस्मादितिवा ॥ अतएवश्रीसमेतमितिविशेषणम् ॥ ब्रह्माण्यासावित्र्या ॥ ४५॥४६॥ नंदनादीनीत्यादिपदेनचैत्ररथादीनिगृह्यंते ॥ कामदुघाकपिला ॥

CC-0. In Public Domain. Digitization by eGangotri

आदिपदेनसुरभ्यादयोगृह्यंते ॥ ४७ ॥ कल्पवृक्षादीत्यादिपदेनाश्वत्थादयोगृह्यंते ॥ कांचनमुख्यतःसुवर्णमुख्यान् ॥ उर्वशीमुख्यास्तत्प्रधानारंभातिलोत्तमाद्याः ॥ गरुडादीनित्यादिपदेनजटायुःप्रमुखागृह्यंते ॥ ४८ ॥ शेषोऽनंतस्तत्प्रमुखांस्तदादीनित्यर्थः ॥ ऐरावतादिकानित्यादिपदेनपुंडरीकादयोगृह्यंते ॥ ४९ ॥ ५०[1] ॥ ५१ ॥ ५२ ॥ वदान्यान्दातॄन् ॥ ५३ ॥ नैर्ऋतींयामीवारुण्योर्मध्याम् ॥ ५४ ॥ ५५ ॥ कर्णेउपवीतंवर्ततेयस्यसतथा ॥ ५६ ॥ रथ्याचसेव्यभूतलंचतस्मिन् ॥ ५७ ॥ अमलमित्यनेनसमलस्यालोकनेनदोषः ॥ ५८ ॥ नाकुलांनकुलाज्जातामि

कल्पवृक्षादिवृक्षांश्चधातून्कांचनमुख्यतः ॥ दिव्यस्त्रीरुर्वशीमुख्यागरुडादीन्पतत्रिणः ॥ ४८ ॥ नागांश्चशेषप्रमुखान्गजानैरावतादिकान् ॥ अश्वानुच्चैःश्रवोमुख्यान्कौस्तुभादीन्मणीञ्छुभान् ॥ ४९ ॥ स्मरेदरुंधतीमुख्याःपतिव्रतवतीर्वधूः ॥ नैमिषादीन्यरण्यानिपुरीःकाशीपुरीमुखाः ॥ ५० ॥ विश्वेशादीनिर्लिंगानिवेदान्नृक्प्रमुखानपि ॥ गायत्रीप्रमुखान्मंत्रान्योगिनःसनकादिकान् ॥ ५१ ॥ प्रणवादिमहाबीजंनारदादींश्चवैष्णवान् ॥ शिवभक्तांश्चबाणादीन्प्रह्लादादीन्दृढव्रतान् ॥ ५२ ॥ वदान्यांश्चदधीच्यादीन्हरिश्चंद्रादिभूपतीन् ॥ जननीचरणौस्मृत्वासर्वतीर्थोत्तमोत्तमौ ॥ ५३ ॥ पितरंचगुरूंश्चापिहृदिध्यात्वाप्रसन्नधीः ॥ ततश्चावश्यकंकर्तुंनैर्ऋतींदिशमाश्रयेत् ॥ ५४ ॥ ग्रामाद्धनुःशतंगच्छेन्नगराच्चचतुर्गुणम् ॥ तृणैराच्छाद्यवसुधांशिरःप्रावृत्यवाससा ॥ ५५ ॥ कर्णोपवीत्युदग्वक्त्रोदिवसेसंध्ययोरपि ॥ विण्मूत्रेविसृजेन्मौनीनिशायांदक्षिणामुखः ॥ ५६ ॥ नतिष्ठन्नाप्सुनोविप्रगोवह्न्यनिलसंमुखः ॥ नफालकृष्टेभूभागेनरथ्यासेव्यभूतले ॥ ५७ ॥ नालोकयेद्दिशोभागाञ्ज्योतिश्चक्रंनभोमलम् ॥ वामेनपाणिनाशिश्नंधृत्वोत्तिष्ठेत्प्रयतवान् ॥ ५८ ॥ अथोमृदंसमादायजंतुकर्करवर्जिताम् ॥ विहायमूषकोत्खातांशौचोच्छिष्टांचनाकुलाम् ॥ ५९ ॥ गुह्येदद्यान्मृदंचैकांपायौपंचांबुसांतराः ॥ दशवामकरेचापिसप्तपाणिद्वयेमृदः ॥ ६० ॥ एकैकांपादयोर्दद्यात्तिस्रःपाण्योर्मृदस्तथा ॥ इत्थंशौचंगृहीकुर्याद्गंधलेपक्षयावधि ॥ ६१ ॥ क्रमाद्द्वैगुण्यमेतस्माद्ब्रह्मचर्यादिषुत्रिषु ॥ दिवाविहितशौचस्यरात्रावर्धंसमाचरेत् ॥ ६२ ॥ रुज्यर्धंचतदर्धंचपथिचौरादिबाधिते ॥ तदर्धंयोषितांचापिसुस्थेन्यूनंनकारयेत् ॥ ६३ ॥ अपिसर्वनदीतोयैर्मृत्कूटैश्चापिगोमयैः ॥ आपादमाचरञ्छौचंभावदुष्टोनशुद्धिभाक् ॥ ६४ ॥ आर्द्रधात्रीफलोन्मानामृदःशौचेप्रकीर्तिताः ॥ सर्वाश्चाहुतयोप्येवंग्रासाश्चांद्रायणेपिच ॥ ६५ ॥ प्रागास्यउदगास्योवासूपविष्टःशुचौभुवि ॥ उपस्पृशेद्विहीनायांतुषांगारास्थिभस्मभिः ॥ ६६ ॥

त्यर्थः ॥ नाकुलीमितिपाठेस्पष्टएवार्थः ॥ ५९ ॥ ६० ॥ तिस्रःपाण्योर्मृदस्तथेति ॥ एतेनपूर्वोक्ताभिःसप्तभिर्मिलित्वाद्वयोर्हस्तयोर्दशमृदोदातव्याइत्यर्थः ॥ ६१ ॥ क्रमादिति ॥ एतस्माद्गृहस्थशौचाद्ब्रह्मचारिणोद्विगुणम् ॥ ब्रह्मचारिशौचाद्वानप्रस्थस्यद्विगुणम् ॥ वानप्रस्थशौचात्संन्यासिनोद्विगुणंशौचमित्यर्थः ॥ ६२ ॥ ६३ ॥ निर्मलांतःकरणएवशौचफलभाक्नदुष्टांतःकरणइत्याहापिसर्वेति ॥ ६४ ॥ शौचमृदःपरिमाणमाह :आर्द्रधात्रीत्यर्धेन ॥ अथधात्रीतिपाठेऽथशब्दोऽर्थांतरे ॥ प्रसंगादाहुतिचांद्रायणग्रासयोरपिपरिमाणमाह सर्वाश्चेतिपादद्वयेन ॥ ६५ ॥ ६६ ॥

१ अत्रामलमितिपदच्छेदोन, मलंविष्टांपश्येदित्यर्थएवयुक्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मतीर्थेनांगुष्ठमूलेन ॥ ६७ ॥ ६८ ॥ शिरइति ॥ जलेजलमध्ये ॥ शुष्कंवस्त्रंपरिधायेत्यर्थः ॥ ६९ ॥ आचमनप्रकारमाह ॥ त्रिःपीत्वेति ॥ खानिइंद्रियाणिविशोधयेत्विशेषेणशुद्धानिकुर्यादित्यर्थः ॥ एतदेवविवृणोति अंगुष्ठेत्यादिना ॥ ७० ॥ ७१ ॥ ७२ ॥ सांवुयथास्यात्तथासर्वत्रसंस्पृशेदित्यर्थः ॥ तथाचदक्षः ॥ प्रक्षाल्यपादौहस्तौचत्रिःपिवेदंवुवीक्षितम् ॥ संवृत्यांगुष्ठमूलेनद्विःप्रमृज्यात्ततोमुखम् ॥ संहताभिस्त्रिभिःपूर्वमास्यंतुसमुपस्पृशेत् ॥ अंगुष्ठेनप्रदेशिन्याघ्राणंपश्चादनन्तरम् ॥ अंगुष्ठानामिकाभ्यांतुचक्षुःश्रोत्रेपुनःपुनः ॥ कनिष्ठांगुष्ठयोर्नाभिंहृदयंतुतलेनवै ॥ सर्वाभिस्तुशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेदिति ॥ ७३ ॥ द्विराचमननिमित्तान्याह आचांतःपुनराचामेदितिद्वयेन ॥ ७४ ॥ ७५ ॥ सहेतुकंदंतधावनप्रकारमुत्थापयति ॥ अथेति ॥ विपक्षेवाधक

अनुष्णाभिरफेनाभिरद्भिर्हृद्गाभिरत्वरः ॥ ब्राह्मणोब्राह्मतीर्थेनदृष्टिपूताभिराचमेत् ॥ ६७ ॥ कंठगाभिर्नृपःशुद्ध्येत्तालुगाभिस्तथोरुजः ॥ स्त्रीशूद्रावास्यसंस्पर्शमात्रेणापिविशुद्ध्यतः ॥ ६८ ॥ शिरःप्रावृत्यकंठंवाजलेमुक्तशिखोऽपिच ॥ अक्षालितपदद्वंद्वआचांतोप्यशुचिर्मतः ॥ ६९ ॥ त्रिःपीत्वांवुविशुद्ध्यर्थंततःखानिविशोधयेत् ॥ अंगुष्ठमूलदेशेनद्विर्द्विरोष्ठाधरौस्पृशेत् ॥ ७० ॥ अंगुलीभिस्त्रिभिःपश्चात्पुनरास्यंस्पृशेत्सुधीः ॥ तर्जन्यंगुष्ठकोष्ठ्याचघ्राणरंध्रेपुनःपुनः ॥ ७१ ॥ अंगुष्ठानामिकाग्राभ्यांचक्षुःश्रोत्रेपुनःपुनः ॥ कनिष्ठांगुष्ठयोगेननाभिरंध्रमुपस्पृशेत् ॥ ७२ ॥ स्पृष्ट्वातलेनहृदयंसमस्ताभिःशिरःस्पृशेत् ॥ अंगुल्यग्रैस्तथास्कंधौसांबुसर्वत्रसंस्पृशेत् ॥ ७३ ॥ आचांतःपुनराचामेत्कृतेरथ्योपसर्पणे ॥ स्नात्वाभुक्त्वापयःपीत्वाप्रारंभेशुभकर्मणाम् ॥ ७४ ॥ सुप्त्वावासःपरीधायतथादृष्ट्वाप्यमंगलम् ॥ प्रमादादशुचिंस्पृष्ट्वाद्विराचांतःशुचिर्भवेत् ॥ ७५ ॥ अथोमुखविशुद्ध्यर्थंगृह्णीयाद्दंतधावनम् ॥ आचांतोप्यशुचिर्यस्मादकृत्वादंतधावनम् ॥ ७६ ॥ प्रतिपद्दर्शषष्ठीषुनवम्यांरविवासरे ॥ दंतानांकाष्ठसंयोगोदहेदासप्तमंकुलम् ॥ ७७ ॥ अलाभेदंतकाष्ठानांनिषिद्धेवाथवासरे ॥ गंडूषाद्द्वादशग्राह्यामुखस्यपरिशुद्धये ॥ ७८ ॥ कनिष्ठाग्रपरीमाणंसत्वचंनिर्व्रणंऋजुम् ॥ द्वादशांगुलमानंचसार्धंस्याद्दंतधावनम् ॥ ७९ ॥ एकैकांगुलह्रासेनवर्णेष्वन्येषुकीर्तितम् ॥ आम्राम्रातकधात्रीणांकंकोलखदिरोद्भवम् ॥ ८० ॥ शम्यपामार्गखर्जूरीशेलुश्रीपर्णिपीलुजम् ॥ राजादनंचनारंगंकषायकटुकंटकम् ॥ ८१ ॥ क्षीरवृक्षोद्भवंवापिप्रशस्तंदंतधावनम् ॥ जिह्वोल्लेखनिकांचापिकुर्याच्चापाकृतिंशुभाम् ॥ ८२ ॥ अन्नाद्यायव्यूहध्वंसोमोराजायमागमत् ॥ समेमुखंप्रमाक्ष्यतेयशसाचभगेनच ॥ ८३ ॥

माह ॥ आचांतइति ॥ ७६ ॥ सहेतुकंदंतधावनकाष्ठनिषेधसमयमाह ॥ प्रतिपदिति ॥ ७७ ॥ ननुतर्हिदंतकाष्ठानामभावेप्रतिषिद्धदिनेवाकिंविधेयंतत्राह ॥ अलाभइति ॥ ७८ ॥ दंतकाष्ठस्यमानमाह ॥ कनिष्ठेति ॥ कनिष्ठाग्रपरीमाणमितिविस्तरेण ॥ द्वादशांगुलमानंचेतिदैर्घ्येण ॥ ७९ ॥ अन्येषुक्षत्रियादिषुकीर्तितंकथितम् ॥ नूदितमितिक्वचित् ॥ किंवृक्षोद्भवंदंतकाष्ठंविधेयमित्यत्राह ॥ आम्रेति ॥ ८० ॥ राजादनमित्यर्धंकार्यकारणयोरभेदाभिप्रायेण ॥ ८१ ॥ जिह्वाधावनमाह ॥ जिह्वेति ॥ जिह्वाउल्लिख्यतेशोध्यतेययासाजिह्वोल्लेखनिका ॥ चापाकृतिंधनुराकाराम् ॥ ८२ ॥ दंतधावनमंत्रद्वयमाह ॥ अन्नाद्यायेति ॥ तत्रप्रथममंत्रस्यायमर्थः ॥ अन्नाद्यायअन्नादनायभक्षणायनिर्मलतांप्राप्यव्यूहध्वंस्थिरपंक्त्याढ्ढीभवत ॥ यतःसोमोराजाचंद्रोयंकाष्ठरूपं

CC-0. In Public Domain. Digitization by eGangotri

वनस्पतिंप्रत्यागतःसमेदीप्तिकारीशोभनकृत् भेममसुखमास्यंप्रमार्क्ष्यतेप्रमार्क्ष्यतिशोधयिष्यतीत्यर्थः ॥ केन ॥ यशसाकीर्त्याभगेनभाग्येनच ॥ दंतधावनस्यनित्यकाम्यत्वादुभयथाफलसंबंधः ॥ सोमोवनस्पतीनामितिश्रुतेः ॥ वनस्पतीनामाधिपत्येयमग्निःसूर्यंचप्रतिसोमोराजागतोभक्ष्यतया ॥ अथवाहेदंताव्यूहध्वंमलाद्विभक्तानिर्मलाभवत ॥ यतोयंवनस्पतिर्मेदंतकाष्ठरूपःसोमोराजाआगत इत्याकारप्रश्लेषेणव्याख्येति ॥ ८३ ॥ द्वितीयोमंत्रःस्पष्टएव ॥ ८४ ॥ ८५ ॥ ८६ ॥ उपवासेपीति ॥ दंतधावनमित्यनेनद्वादशगंडूषादिभिर्दंतानांशोधनमेवात्रविवक्षितंनतुदंतकाष्ठानांभक्षणम् ॥ प्रतिपद्दर्शषष्ठीषुनवम्येकादशीषुच ॥ व्रतश्राद्धोपवासेषुदंतकाष्ठंनभक्षयेदितिनिषेधात् ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ प्राजापत्योव्रतविशेषः ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ॥ ९६ ॥ उपग्रहीप्रगृहीतकुशइत्यर्थः ॥ उरुंहीति ॥ उरुंहिराजावरुणश्चकारसूर्यायपंथामन्वेतवाउ ॥ अपदेपादाप्रतिधातवेऽकरुतापवक्ताहृदयाविधश्चित् ॥ नमोवरुणायाभिष्ठितोवरुणस्यपाश

आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते ॥ ८४ ॥ मंत्रावेतौसमुच्चार्ययःकुर्याद्दंतधावनम् ॥ वनस्पतिगतःसोमस्तस्यनित्यंप्रसीदति ॥ ८५ ॥ सुखेपर्युषितेयस्माद्भवेदशुचिभाङ्नरः ॥ ततःकुर्यात्प्रयत्नेनशुद्ध्यर्थंदंतधावनम् ॥ ८६ ॥ उपवासेपिनोदुष्येद्दंतधावनमंजनम् ॥ गंधालंकारसद्वस्त्रपुष्पमालानुलेपनम् ॥ ८७ ॥ प्रातःसंध्यांततःकुर्याद्दंतधावनपूर्विकाम् ॥ प्रातःस्नानंचरित्वाचशुद्धेतीर्थेविशेषतः ॥ ८८ ॥ प्रातःस्नानाद्यतःशुद्ध्येत्कायोयंमलिनःसदा ॥ छिद्रितोनवभिश्छिद्रैःस्रवत्येवदिवानिशम् ॥ ८९ ॥ उत्साहमेधासौभाग्यरूपसंपत्प्रवर्तकम् ॥ मनःप्रसन्नताहेतुःप्रातःस्नानंप्रशस्यते ॥ ९० ॥ प्रस्वेदलालाद्याक्लिन्नोनिद्राधीनोयतोनरः ॥ प्रातःस्नानात्ततोर्हःस्यान्मंत्रस्तोत्रजपादिषु॥९१॥ प्रातःप्रातस्तुयत्स्नानंसंजातेचारुणोदये ॥ प्राजापत्यसमंप्राहुस्तन्महाघविघातकृत् ॥ ९२ ॥ प्रातःस्नानंहरेत्पापमलक्ष्मींग्लानिमेवच ॥ अशुचित्वंचदुःस्वप्नंतुष्टिंपुष्टिंप्रयच्छति ॥ ९३ ॥ नोपसर्पंतिवैदुष्टाःप्रातःस्नायिजनंक्वचित् ॥ दृष्टादृष्टफलंयस्मात्प्रातःस्नानंसमाचरेत् ॥ ९४ ॥ प्रसंगतःस्नानविधिंवक्ष्यामिकलशोद्भव ॥ विधिस्नानंयतःप्राहुःस्नानाच्छतगुणोत्तरम् ॥ ९५ ॥ विशुद्धांमृदमादायबर्हींषितिलगोमयम् ॥ शुचौदेशेपरिस्थाप्यत्वाचम्यस्नानमाचरेत् ॥ ९६ ॥ उपग्रहीबद्धशिखोजलमध्येसमाविशेत् ॥ उरुंहीतिमंत्रेणतोयमावर्त्यसुष्ठितः ॥ ९७ ॥ येतेशतंततोजप्त्वातोयस्यामंत्रणायच ॥ सुमित्रियानोमंत्रेणपूर्वंकृत्वाजलांजलिम् ॥ क्षिपेद्द्वेष्यंसमुद्दिश्यजपन्दुर्मित्रियाइति ॥ ९८ ॥

इतिमंत्रस्यशेषः ॥ उरुंविस्तीर्णंहिअतिशयेनराजावरुणःचकारकृतवान् ॥ सूर्याय षष्ठ्यर्थेचतुर्थी सूर्यस्यपंथानम् ॥ अन्वेतवैयःअन्वहमागमनाय ॥ अपदेपादाप्रतिधातवेकःयत्रपदंदत्तंप्रतिमुद्रान्यायेननोपलक्ष्यतेअस्मिन्अपदेअंतरिक्षलोके पादापादानाम् षष्ठीबहुवचनस्थानेआकारः ॥ प्रतिधातवेप्रतिनिधानायअकःकृतवान्आलंबनमितिशेषः ॥ सूर्यस्येव ॥ उतापवक्ताहृदयाविधश्चित् ॥ उतापिचापवक्ताअपवदिताक्षेप्ताहृदयाविधाश्चित् ॥ चिच्छब्दोऽप्यर्थे ॥ हृदयंयोविध्यतिमर्माण्युच्चार्यपिशुनःतस्याप्यपवक्ताऽपवदिताकिमुतान्येषामितिशेषः ॥ यइत्थंभूतोवरुणःसोऽवभृथायतीर्थंददात्वितिशेषः ॥ अपउच्चक्रमयन्नाचयति ॥ नमोवरुणायनमोस्तुवरुणायाभिष्ठितआक्रांतोवरुणस्यपाशेनालंबंधनायेति ॥ ९७ ॥ येतेशतमिति ॥ वरुणयेसहस्रंयज्ञियाः पाशावितामहांतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेभिर्नोद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काइतिमंत्रशेषः ॥ शतसहस्रशब्दावत्रबहुत्वार्थौ ॥ तथाचायमर्थः ॥ भोवरुणयेतवशतंसहस्रमसंख्यातायज्ञियायज्ञकालेभवायज्ञियाःश्रेयःप्रत्यूहाःपाशाः कर्मावरोधकाबंधनप्रकाराःविततविस्तृतामहांतोबृहत्तरास्तेभिस्तैः तेभ्यःसकाशादित्यर्थः ॥ नोऽस्मान्अद्यइदानींसवितासर्वेषांप्रसविताउतापिचविष्णुर्व्यापकःविश्वेसर्वेमुंचंतुमोचयंतुमरुतोदेवाः स्वर्काःसुरोचनाःस्वंचनाःस्वर्चनावेति ॥ सुमित्रियानइति ॥ आपओषधयःसंत्वितिमंत्रशेषः ॥ अस्यार्थः ॥ सुमित्रियाःसाधुमित्रत्वेनावस्थितानोऽस्माकमापओषधयश्चसंतिवति ॥ दुर्मित्रिया इति॥तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मइतिमंत्रशेषः ॥ अस्यार्थः ॥ दुर्मित्रियादुष्टमित्रत्वेनावस्थिताआपओषधयश्चेत्यनुवर्तते तस्मैसंतुयोऽस्मान्द्वेष्टियंचशत्रुंद्विष्मोवयमिति ॥९८॥ इदंविष्णुरिति ॥ विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपांसुरइतिमंत्रशेषः ॥ अस्यार्थः ॥ इदंजगत्विष्णुर्विचक्रमेविक्रांतवान् ॥ सर्वप्राणिनांभूतेंद्रियमनोजीवभावेनविशतीतिविष्णुः ॥ किंचत्रेधानिदधेपदंपद्यते ज्ञायतेऽनेनेतिपदंभूम्यंतरिक्षद्युलोकेषुअग्निवायुसूर्यरूपेणत्रेधानिहितवान्पदम् ॥ किंचसमूढमस्यपांसुरे लुप्तोपमैतत् ॥ अस्यैवविष्णोरन्यत्पदांतरंविज्ञानघनानंदमजमद्वैतमक्षरमित्येवंलक्षणंसमूढमंत हितमविज्ञातमकृतात्मभिःपांसुरेपांसुलेप्रदेशेनिहितमिवनदृश्यतेतद्द्रष्टव्यमितिवाक्यशेषः ॥ ९९ ॥ आपोअस्मानिति ॥ मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु ॥ विश्वंहिरिप्रंप्रवहंतिदेवीरितिमंत्रशेषः ॥ अस्यार्थः ॥ आपोअस्मान्मातरःशुंधयंतुआपउच्यंतेयाएताआपोजगतोनिर्मात्र्यस्ताअस्मान्शुंधयंतुशोधयंतु ॥ किंचघृतेननोऽस्मान्घृतप्वः घृतेनयाःपुनंतिताघृतप्वः घृतंह्यपांपरमंतेजःपवित्रंचतद्धे सुपूतंयद्घृतेनपुनंतीतिश्रुतेः ॥ सुवर्णप्राशोघृतप्राशइतिमेध्यानीतिगौतमः ॥ पुनंतुयज्ञयोग्यंकुर्वंतु ॥ स्तुतिपूर्वंहियाचनादिक्रियतेनचात्रस्तुतिरतआह ॥ विश्वंहिरिप्रंप्रवहंतिदेवीः॥हिशब्दोयस्मादर्थे ॥

इदंविष्णुरिमंजप्त्वालिंपेदंगानिमृत्स्नया ॥ मृदैकयाशिरःक्षाल्यद्वाभ्यांनाभेस्तथोपरि ॥ ९९ ॥ नाभेरधस्तुतिसृभिःपादौषड्भिर्विशोधयेत् ॥ मज्जे त्प्रवाहाभिमुखआपोअस्मानिमंजपन् ॥१००॥ उदिदाभ्यःशुचिरितिमंत्रउन्मज्जनेमतः ॥ मानस्तोकइमंजप्त्वालिंपेद्गात्राणिगोमयैः ॥ १ ॥ इमंमे वरुणेत्यादिमंत्रःस्वात्माभिषेचनम् ॥ तत्त्वायामितथात्वन्नःसत्वंनश्चाप्युदुत्तमम् ॥ २ ॥

तयोरिप्रमितिपापनामनीभवतःयस्मात्स्वभावतएवसर्वपापंप्रकर्षेणवहंतिदेव्यइति ॥ १०० ॥ उदिदाभ्यःशुचिरिति ॥ आपूतएमीतिमंत्रशेषः ॥ अस्यार्थः ॥ उदेमिउद्गच्छामि ॥ इच्छब्दोऽनर्थकः ॥ आभ्योऽद्भ्यःशुचिःसन्नापूतश्चयावदिति ॥ मानस्तोकइति॥तनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामिनोवधीर्हविष्मंतःसदमित्त्वाहवामहइतिमंत्रशेषः ॥ अस्यार्थः॥मारीरिषः रिषतिर्हिंसाकर्मा ॥ माहिंसीः ॥ नोऽस्माकंतोकेपुत्रविषयेतनयेपौत्रविषयेमाहिंसीः ॥ नोऽस्माकमायुषिविषयभूते मानोगोषुमाहिंसीःनोऽस्माकंगोषुविषयभूतासुमानोअश्वेषुमाहिंसीःनोस्माकमश्वेषु विषयभूतेषु ॥ यद्वा विभक्तिव्यत्ययेनव्याख्यानम् ॥ मारीरिषःअस्माकंतोकंतनयमायुर्गाअश्वान् ॥ मानोवीरान्रुद्रभामिनोवधीर्मावधीर्नोस्माकंवीरान्हेरुद्र ॥ भामिनः भामःक्रोधःक्रोधसंयुक्तान् ॥ कःप्रत्युपकारइतिचेद्धविष्मंतःहविषासंयुक्ताःसंतःसदंसदाकालमूइत् इच्छब्दएवार्थे त्वामेवहवामहेआह्वयामः ॥ यागार्थमनन्यशरणावयमित्यभिप्रायः ॥१॥ इमंमेवरुणेत्यादीति ॥ आदिशब्देनश्रुधी हवमद्याचमृडय ॥ त्वामस्युराचकेइतिमन्त्रशेषोगृह्यते ॥ अस्यार्थः ॥ इमंमेममहेवरुणश्रुधिश्रृणुहवमात्मानमद्यास्मिन्मृडयसुखयमाकालांतरमपेक्षस्व ॥ किंकारणम् ॥ यतस्त्वामहमाचके आचकइतिकांतिकर्मा ॥ कामये ॥ कथंभूतः ॥ अवस्युरात्मनोऽवनंपालनमिच्छन्निति ॥ तत्त्वायामीति ॥ ब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशंसमा नआयुःप्रमोषीरितिमन्त्रशेषः ॥ अस्यार्थः ॥ तत्त्वातदाशास्तइतिश्रवणादिहपदप्रयोगः ॥ त्वात्वांयामियाचामि ॥ ब्रह्मणात्रयीलक्षणेनवंदमानः ॥ हविर्भिरप्युपायैः ॥ अतआह ॥ अहे

CC-0. In Public Domain. Digitization by eGangotri

इमानःअक्रुध्यन् हेवरुणइहकर्मणिवर्तमानःअस्माकंप्रयोजनंयज्ञसमाप्तिलक्षणंवोधिवुध्यस्व ॥ बुद्ध्वाचउरुशंसहवहुसस्तेव्यं मानआयुःप्रमोषीर्माऽस्माकमायुरखंडयेति ॥ त्वन्नइति ॥ अग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषा ँ सिप्रमुमुग्ध्यस्मादितिमन्त्रशेषः ॥ अस्यार्थः ॥ हेअग्नेत्वंनःअस्मान्प्रतिविद्वान्जानानःवरुणस्यदेवस्यहेडःक्रोधःअवयासिसीष्ठाः ॥ यसुउपक्षये ॥ अस्यण्यंतस्यलिङ्चेतद्रूपमवपूर्वस्य ॥ अपगमय ॥ यस्माच्चत्वंयाजिष्ठोयज्ञकृत्तमोवाह्नितमोवोढृतमोहविषाशोशुचानोदेदीप्यमानोभवासितस्मात्प्रार्थये ॥ विश्वाविश्वानिद्वेषांसिसर्वाणिदौर्भाग्यानिप्रमुमुग्धिविमुंचअस्मदस्मत्तइति ॥ सत्वंनइति ॥ अग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोवरुण ँ रराणोवीहिमृडीक ँ सुवहोनएधीतिमन्त्रशेषः ॥ अस्यार्थः ॥ सत्वमेवंप्रार्थ्यमानोनोऽस्माकंहेअग्नेअवमःअवितृतमःपालयितृतमोभव ॥ उतीउत्याऽवनेन नेदिष्ठश्चांतिकतमःअस्याउषसोव्युष्टौव्युष्टिकालेऽस्मिन्नेवाहनीत्यभिप्रायः ॥ ततोऽवयक्ष्व अवपूर्वोयजिर्नाशनेवर्ततेइहतुधात्वर्थयोगात्स्वकीयमेवार्थंब्रवीति ॥ अवगत्ययज ॥ नोऽस्माकंवरुणंरराणोरादानेददद्धाहविस्ततोब्रवीमिवीहिमृडीकंभक्षयपुरोडाशंसुखकरम् ॥ ततःसुहवःस्वाह्वानःअस्माकमेधीति ॥ उदुत्तममिति ॥ वरुणपाशमस्मदवाधमंविमध्यम ँ श्रथाय ॥ अथावयमादित्यव्रतेतवानागसोअदितयेस्यामेतिमन्त्रशेषः ॥ अस्यार्थः ॥ उदित्ययमुपसर्गःश्रथायेति संवध्यते ॥ हेवरुणउत्तमन्तावत्पाशमुत्श्रथाय श्लथशैथिल्ये ॥ श्लथीकृत्यउत्ऊर्ध्वंनयास्मदस्मत्तः ॥ अवाधममधर्मंचपाशमवाचीनंश्लथय विमध्यमंस्थानस्थितमेवश्लथय ॥ अथैवंकृतेसाति वयंहेआदित्यअदितेःपुत्रतवकर्मणिवर्तमानाअनागसोऽनपराधाःसंतोऽदितयेऽदीनतायैस्यामेति ॥ २ ॥ धाम्नोधाम्नइति ॥ राजंस्ततोवरुणनोमुंचेतिमन्त्रशेषः ॥ अस्यार्थः ॥ हेवरुणराजन्धाम्नो धाम्नः धामशब्दःस्थानवचनः ॥ यतोयतःपाशसमन्वितात्स्थानाद्बिभीमस्ततस्ततोनोऽस्मान्विमुंचेति ॥ मापोमौषधीरिति ॥ हिंसीरित्येवशेषः ॥ अस्यार्थः ॥ हृदयशूलमुपगूहतिमापोमौष

धाम्नोधाम्नस्तथामापोमौषधीरितिसंजपेत् ॥ यदाहुरघ्न्यामुंचंतुमेतिचावभृथेतिच ॥ ३ ॥

धीरिदंवैपशोःसंज्ञप्यमानस्येत्युपक्रम्यहृदयशूलंशुक्समवैतीत्युक्तम् ॥ अतएवमुच्यते ॥ माहिंसीरपोमाचौषधीर्हिंसीरिति ॥ यदाहुरघ्न्याइति ॥ वरुणेतिशपामहेततोवरुणनोमुञ्चेतिमन्त्रशेषः ॥ अस्यार्थः ॥ अघ्न्याइतिगोनामप्रकरणात् ॥ इहानुवंध्याविषयंवहुवचनमनुवंध्यावहुत्वेऽर्थवत् ॥ एकानुवंध्यापक्षेतुपूजार्थम् ॥ यद्वेदेश्लोकमन्त्रवाक्यान्याहुरहन्तव्याअघ्न्याअवंध्याःवंद्याःपूजनीयाइतिकरणोवाक्यस्यार्थमभिनयेनदर्शयति ॥ वयंहेवरुणशपामहे ॥ इतिकरणःप्रदर्शनार्थः ॥ शपतिर्हिंसार्थः ॥ एवमनेनविधिनाऽहिंस्याअघ्न्याअतएववयंत्वांशपामहे ॥ ततोवरुणनोमुंचततस्तस्मादेनसःवरुणनोऽस्मान्विमुंचेति ॥ मुंचंतुमेति ॥ शपथ्यादथोवरुण्यादुत ॥ अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात्इतिमंत्रशेषः ॥ अस्यार्थः ॥ मुंचंतुमाशपथ्यात्शपथेभवःशपथ्यस्तस्माच्छपथ्यात्शपथनिमित्तात्किल्बिषादोषधयोमामांमुंचंतु ॥ अथोअपिचवरुण्यात्वरुणेभवोवरुण्यस्तस्माद्वरुण्यात्वरुणनिवंधनात्किल्बिषान्मांमुंचंतु ॥ उतअपिचयमस्ययमयतिनियमयतिसर्वंजगदितियमस्तस्ययमस्यसंवंधिनः पड्वीशात् पड्वीशशब्दोवंधनवचनः ॥ वंधनाद्वंधननिमित्तात्किल्बिषान्मांमुंचंतु ॥ अथोऽपिचदेवकिल्बिषाद्देवतापराधनिमित्तात्किल्बिषान्मांमुंचंतु ॥ किंचात्रवहुनोक्तेनसर्वस्मात्किल्बिषाद्ब्रह्महत्यादिपापान्मांमुंचंत्विति ॥ अवभृथेति ॥ निचुंपुणनिचेरुरसिनिचुंपुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पाहीतिमंत्रशेषः ॥ अस्यार्थः ॥ अवभृथोयज्ञः हेअवभृथवयमवाचीनंपात्राण्यस्मिन्भ्रियंतइत्यवभृथः ॥ निचुंपुनःनीचैःक्कणत्वांशुअवभृथेष्ट्याचरंतीतिश्रुतेः ॥ यस्त्वंनीचैश्चरणोऽसिनीचैःक्कणंश्चतंत्वांप्राप्यैवअवदेवैर्देवकृतमेनोयासिषंकृतमेनोयासिषंकृतवान् ॥ अवनीतवान् ॥ किमवनीतवान् ॥ एनःपापम् ॥ कैःसखिभूतैर्देवैः ॥ किंविषयंदेवकृतंदेवविषयेयत्कृतम् ॥ अवमर्त्यैर्मर्त्यकृतमवनीतवांश्चमर्त्यैर्मनुष्यैरृत्विग्भिःसखिभूतैः मर्त्यकृतंमनुष्यविषयेकृतंपापम् ॥ अतस्त्वंहेअवभृथदेवरिषःपाहि ऋषतिर्हिंसार्थः ॥ रिषहिंसायांक्विवंतस्तस्यपंचमीरिषःवंधात्पाहिगोपाय ॥ कथंभूताद्वंधात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुराव्णः ॥ रादाने ॥ बहुकर्मोपभोगसंतानदातुःसंसारलक्षणाद्बंधात् ॥ यद्वा पुरुशब्देनरुवंतिप्राणिनोऽस्मिन्संसार्यमाणाःपुरुराव्णइतिचेति ॥ ३ ॥ आपोदेवतायेषांतेतथा ॥ महाव्याहृतिभिर्भूर्भुवःस्वर्महर्जनस्तपःसत्यमितिसप्तभिः ॥ ४ ॥ गायत्र्यागायत्रीमन्त्रेणेत्यर्थः ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयादितिगायत्रीमंत्रः ॥ अस्यार्थः ॥ तदितिषष्ठ्याविपरिणम्यते तस्यसवितुःसर्वस्यप्रसवदातुरादित्यांतरपुरुषस्यदेवस्यहिरण्यगर्भोपाध्यवच्छिन्नस्यदेवस्यवाविज्ञानानंदस्वभावस्यब्रह्मणोवरेण्यंवरणीयंभर्गः भर्गशब्दोवीर्यवचनः वरुणाद्धवाअभिषिंचनाद्भर्गोऽपचक्रामवीर्यंवैभर्गइतिश्रुतिः ॥ तेनहिपाप्मानंभृज्जतिदहति ॥ भृजीभर्ज्जने ॥ अथवाभर्गस्तेजोवचनः ॥ यद्वा मंडलंपुरुषोरश्मयइत्येतत्रितयमभिप्रेयते ॥ देवस्य देवनादिगुणयुक्तस्यधीमहि ध्यैचिंतायाम्अस्यछांदसंसंप्रसारणम् ॥ ध्यायामश्रितयामोनिदिध्यासनंतद्विषयंकुर्मइतियावत् ॥ धियोयोनः धीशब्दोबुद्धिवचनःकर्मवचनोवा ॥ बुद्धिःकर्माणिवायःसवितानोऽस्माकंप्रचोदयात् ॥ चुदसंचोदने ॥ प्रकर्षेणचोदयतिप्रेरयति ॥ तस्यसवितुःसंबंधिवीर्यंतेजोवाध्यायामइतिसंबंधः ॥ वाक्यभेदेनवायोजना ॥ तत्सवितुर्वरणीयंवीर्यंतेजोवादेवस्यध्यायामः ॥ यश्चबुद्धीःप्रचोदयात्प्रेरयत्यस्माकंतंचध्यायामः ॥ सचसवितैवभवति ॥ लिंगव्यत्ययेनवायोजना ॥ तत्सवितुर्वरणीयंभर्गोदेवस्यध्यायामः ॥ धियोयोभर्गःअस्माकंप्रेरयतीति ॥ आपोहिष्ठेतितिसृभिःकंडिकाभिरितिशेषः ॥ तत्रमयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवो यस्यक्षयायजिन्वथ ॥ आपोजनयथाचनइतिमंत्रशेषः ॥ अस्यार्थः ॥ द्वितीयपादेतच्छ्रवणात्यदोऽध्याहारः ॥ हेआपःयायूयंमयोभुवःमयइतिसुखनाम सुखेनभावयित्र्यःस्थभवथसर्वप्राणिनाम् ॥

अब्दैवताइमेमंत्राःप्रोक्ताःस्वात्माभिषेचने ॥ प्रणवेनततोविप्रोमहाव्याहृतिभिस्ततः ॥ ४ ॥ आत्मानंपावयेद्विद्वान्गायत्र्याचततःकृती ॥
आपोहिष्ठेतितिसृभिःप्रत्यृचंपावनंस्मृतम् ॥ ५ ॥ एतेपिपावनामंत्राइदमापोहविष्मतीः ॥ देवीरापअपोदेवाद्रुपदादिवसंज्ञकाः ॥ ६ ॥

छन्दसःपरिपूर्तिकरोहिशब्दः ॥ तानोऽस्मान्ऊर्जेऽन्नायदधातनस्थापयत ॥ यथावयंसर्वस्यभोक्तारोभवेमतथाकुरुतेत्यभिप्रायः ॥ महेमहतेईरणायरमणीयायचक्षसेदर्शनायाऽस्मान्दधातनइत्यनुवर्तते ॥ एतदुक्तंभवति ॥ महच्चयदर्शनंपरब्रह्मलक्षणंरमणीयंतदस्माकंकुरुतेति ॥ अथवाहिशब्दोयस्मादर्थे कृत्वाव्याख्यायते ॥ नहिवेदेमात्रामात्रस्यानर्थक्यमिष्यतेसंभवेसति ॥ आपोहिआपःयस्मात्कारणान्मयोभुवःतानऊर्जेताशब्दस्यपंचम्यासन्नेतितस्माद्धेतोरस्मान्अन्नायस्थापयतमहतेरमणीयायचक्षसेदर्शनीयाय ॥ योवःयश्चवोयुष्माकंशिवतमःशांततमोरसस्तस्यभाजयतभागिनःकुरुतइहैवस्थितानस्मान्उशतीरिव ॥ वशकांतौ ॥ कृतसंप्रसारणस्यैतद्रूपम् ॥ कामयमानाइवमातरः मातृशब्दःसंबंधवचनः यथाकामयमानामातरःपुत्रस्यकल्याणंतैस्तैरर्थैर्भाजयेयुरेवंभाजयत ॥ तस्माअरम् ॥ अलमितिप्राप्तेलकारस्यरेफश्छांदसः ॥ हेआपस्तस्यचरसस्याधस्तनमंत्रयाचितस्यवोयुष्मत्संबंधिनःअलंपर्याप्तंगमामगच्छामवयम् ॥ पर्याप्तंनामरसविषयेवैतृष्ण्यंसदातृप्तिर्वा ॥ यस्यक्षयायजिन्वथ क्षयोनिवासइत्याद्युदात्तः ॥ षष्ठ्यर्थेचतुर्थी ॥ यस्येतिसामानाधिकरण्यादेशः ॥ यस्याहुतिपरिमाणभूतस्यक्षयस्यनिवासस्यएकदेशेनजिन्वथ ॥ जिन्वथिःप्रीतिकर्मा ॥ तर्पयथ पंचाहुतिपरिणामक्रमेणेदंब्रह्मादिस्तंबपर्यंतंजगत् ॥ तत्रचहेआपःजनयथालंबनम्अस्मत्तःनोऽस्मान्भोक्तृत्वेनपानदेवत्वमाशास्यतेति ॥ प्रत्यृचमृचमृचंप्रतिपावनंपावित्र्यंस्मृतंब्रह्मविद्भिरितिशेषः ॥ परमितिपाठेपरमुत्कृष्टम् ॥ ५ ॥ एतेवक्ष्यमाणा अपिमन्त्राःपावनाःपावित्र्यजनकाः ॥ इदमापइति ॥ प्रवहतावद्यंचमलंचयत् ॥ यच्चाभिदुद्रोहानृतंयच्चशेपेअभीरुणम् ॥ आपोमातस्मादेनसःपवमानश्चमुंचत्विवितिमंत्रशेषः ॥ अस्यार्थः ॥ हेआपइदंपङ्कसंज्ञपननिमित्तंपापंप्रवहतअपनयत ॥ किंचावद्यमवदनीयंचयदभिशापादि मलंचयत्यच्चमलंशरीरसंलग्नंमूत्रपुरीषादिप्रसिद्धंतच्चप्रवहतअपन

CC-0. In Public Domain. Digitization by eGangotri

यत॥ यच्चाभिदुद्रोहानृतम् द्रुहजिघांसायाम्॥यदपि चाभिद्रुग्धवानस्मि असत्यमुच्चार्यम्॥यच्चशेपेअभीरुणम्॥शपआक्रोशे यच्छपितवानस्मिअभीरुणमपराधिनमनपराधीतिनविभेतियद्वाऽभिलुनातिछिन
त्तिमर्माणियदुच्चरितंतत् ॥ यच्चाभीरुणम् ॥ आपःमा मांतस्मादेनसःपापात्पवमानःसोमोवायुर्वामुंचतुपृथक्करोत्विति ॥ हविष्मतीरिति ॥ इमाआपोहविष्मांआविवासति ॥ हविष्मान्देवोअध्व
रोहविष्मांअस्तुसूर्यइतिमंत्रशेषः ॥ अस्यार्थः ॥ लिंगोक्ताहविष्मतीहविषासंयुक्ताइमाआपः हविष्मान्हविषासंयुक्तोयजमानआविवासति ॥ आविपूर्वोवसतिः ॥ परिचरतीत्यर्थः ॥ यजमानोहविः
प्रदानायपरिचरति ॥ हविष्मानध्वरोयज्ञःस्वशरीरनिष्पत्त्यर्थंहविष्मान्भवतुहविःसंपन्नोस्तु ॥ सुशोभनतयाईरणात्सूर्योदेवोयजमानस्यफलदानायस्वतृप्त्यर्थंहविष्मान्भवतुहविःसंपन्नोऽस्त्विति ॥
देवीरापइति ॥ अपान्नपाद्योवऊर्मिर्हविष्यः ॥ इंद्रियावान्मदिन्तमइतिमंत्रशेषः ॥ अस्यार्थः ॥ हेदेव्यआपःअपान्नपात्संज्ञकोयोवऊर्मिस्तरंगःकल्लोलोहविष्यःहवियोंग्यःयज्ञियः इंद्रियावान् दीर्घ
श्छांदसः ॥ वीर्यवान् मदिंतमः मदयितृतमइति ॥ अपोदेवाइति ॥ मधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥ याभिर्मित्रावरुणावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरातीरितिमंत्रशेषः ॥
अस्यार्थः ॥मधुमतीःमधुरतयास्वादुरसोपेतामधुमत्यस्तामधुमतीःऊर्जस्वतीर्विशिष्टान्नरसवतीः राजस्वःराजसुवः ॥ षुञ्प्राणिप्रसवे॥ राजानंसुवतेजनयंतीतिराजसुवःचितानादेवतात्वमनेनचेतयमानाः
परिहृश्चारिण्यःअब्देवताः ॥ भकारश्छांदसः ॥ अगृभ्णन्गृहीतवंतः ॥ अपोविशिनष्टि ॥ याभिर्मित्रावरुणाविति ॥ याभिरद्भिर्मित्रावरुणौदेवाअभ्यषिंचन् मित्रावरुणयोरभिषेकंकृतवंतः ॥
याभिरिंद्रमनयन्याभिरिंद्रंदेवराजम्अतिअरातीरदानशीलाः शत्रुसेनाअनयन् शत्रूनतीत्यअतिक्रम्यअधःकृत्यानयन्आनीतवंतः ताअपोगृभ्णन्नितिशेषइति ॥ द्रुपदादिवसंज्ञकाइति ॥ मुमुचानः
स्विन्नःस्नातोमलादिव ॥ पूतंपवित्रेणेवाज्यमापः शुंधंतुमैनसइतिमंत्रशेषः ॥ अस्यार्थः ॥ द्रोःपादोद्रुपदः ॥ द्रुशब्दोवृक्षवचनः ॥ द्रुपदोवृक्षमयःपादःपादुकः ॥ एकवचनमविवक्षितम् गमन

शन्नोदेवीरपोदेवीस्तथापांरसमित्यपि ॥ पुनंतुमेतिचनवपावमान्यःप्रकीर्तिताः ॥ ७ ॥

साधनत्वेनपादुकाभ्याम् ॥ मुमुचानोमुच्यमानोयथापुमान्गमनावसानेक्लेशेनमुच्यते स्विन्नःस्वेदंप्राप्तःपुमांस्तन्निवृत्त्यर्थंस्नातोमलादिवयथामलाद्विमुच्यते ॥ पूतंपवित्रेणेवाज्यंयथापवित्रेणपूतमाज्यं
पवित्राद्विमुच्यतेपृथक्क्रियतेतथाआपःशुंधंतुमैनसःमामांयथाउपासिताआपएनसःपापात्सकाशाच्छुंधंतु प्रस्विन्नस्यकृतस्नान्मलात्तापादिकृतःअतःशुद्धिविशेषतोमेपापनिवृत्तिशंधंतु पृथक्कुर्वंत्विति ॥
॥ ६ ॥ शन्नोदेवीरिति ॥ अभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनइतिमंत्रशेषः ॥ अस्यार्थः ॥ नोस्माकंदेवीर्देव्यआपोऽभिष्टयेऽभिषेकायाभीष्टायवापीतयेपानायचशंसुखरूपाभवंतु ॥
शंयोरभिस्रवंतुनःयोरोगाणांपृथक्करणहेतोःशंसुखरूपाःसत्यआपोनोऽस्मानभिस्रवंत्विति ॥ आपोदेवीरिति ॥ उपसृजमधुमतीरयक्ष्मायप्रजाभ्यः ॥ तासामास्थानादुज्जिहतामोषधयःसुपिप्पला
इतिमंत्रशेषः ॥ अस्यार्थः ॥ सिंधुद्वीपआपिन्यंकुमारिणीबृहती ॥ विधूममग्नइत्यानंतर्यादत्रकर्तृत्वेनाग्निर्विवक्ष्यतेद्यौर्वा ॥ प्रजाभ्यः ॥ अत्रविभक्तिव्यत्ययः ॥ प्रजानामयक्ष्मायक्ष्माव्याधिरयक्ष्मा
र्थंमधुमतीर्देवीरापउपसृजेतिसंबंधः ॥ देवीर्देवनादिगुणसंयुक्तामधुमतीःरसवतीर्वृष्टिरूपाआपउपसृजनिक्षिप ॥ तासांभूमिगतानामपामास्थानादपांरससंबंधितयाअपांरससंपृक्तमुज्जितंक्षेत्रलक्षणस्था
नात्सुपिप्पलाःसुष्ठुपिप्पलंफलंयासामोषधीनांताः सुपिप्पलाः फलपाकांताओषधयःशाल्यादयउज्जिहताम् ओहाङ्गतौ उद्गच्छंत्विति ॥ अपांरसमिति ॥ उद्वयसंसूर्येसंतंसमाहितम् ॥ अपांरसः
स्ययोरसस्तंवोगृह्णाम्युत्तमिमितिमंत्रशेषः ॥ अस्यार्थः ॥ रसःसारःसोऽपांवायुः ॥ एषवाअपांरसोयोयंपवतेइतिश्रुतिः ॥ उद्वयसम्उद्गतंवयोऽन्नंयस्माद्वायोस्तमुद्वयसंवायुंसूर्येसंतंसमाहितमित्यनयोः
पदयोर्व्यत्ययोऽर्थसंबंधात्सूर्येसमाहितंसंतंसमारोपितंस्थापितंसंतंगृह्णामीतिवक्ष्यमाणेनसंबंधः ॥ अपांरसस्ययोरसस्तंवोगृह्णाम्युत्तमम् अपांरसोवायुस्तस्यापिरसःसारःप्रजापतिःसहियज्ञलोककालाग्नि
वायुसूर्यऋग्यजुःसामादिवपुस्तंवयःशब्देनाह॥अपोगृह्णामिउत्तममुत्कृष्टतमम्॥यद्वा वयःशब्दोऽनर्थकः॥अपांरसस्यवायोर्योरसःप्रजापतिस्तंगृह्णामीतितस्मिन्पक्षेयोजना॥पुनंतुमेतीति ॥ पावमान्यःपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वित्र्यकर्त्र्यःऋचइत्यर्थः॥तत्रपुनंतुमापितरःसोम्यासःपुनंतुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषेतिप्रथमोमंत्रः॥ पुनंतुमापितरःसोम्यासः सोमार्हाःसोम्याःसोमसंपादिनोवासोम्याःसोम्याए वसोम्यासःपितरोमामांयजमानंपुनंतुशोधयंतु॥पित ामहाःपितुःपितरोमामांपुनंतु तत्पितरःप्रपितामहाःपुनंतु॥ केनपुनंतु पवित्रेणपवनहेतुभूतेनशतायुषा येनपवित्रेणपूतःशतायुर्भवतितत्पवित्रंशतायुस्तेन शतायुषापवित्रेणमांपुनंतु पावनंचपापनोदनम् शुद्धिफलग्रहणयोग्यताशुद्धिमापादयंत्विति ॥ पुनंतु मापितामहाःपुनंतुप्रपितामहाः ॥ पवित्रेणशतायुषाविश्वमायुर्व्यश्नवैइतिद्वितीयोमंत्रः ॥ अस्यार्थः ॥ पुनंतुमामांपितामहाश्चपुनंतुशतायुषापवित्रेणपुनंतु प्रपितामहाश्चपुनंतुविश्वमायुरेतैःसर्वैर्दत्तंविश्वंसर्वमायुर्व्यश्नवै ॥ अशूङ्व्याप्तौ ॥ अहंव्यश्नवैव्यश्नुयामिति ॥ अग्नआयूꣳषिपवसआसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनामितितृतीयोमंत्रः ॥ अस्यार्थः ॥ आग्नेयीगायत्रीवैश्वानरः ॥ हेश्रीभगवन्नग्नेनोऽस्मान्प्रति आयूंषिआयुःप्रापकानिकर्माणिपवसे अंतर्गतणिजर्थोयं पावयसेगमयासि ॥ किंचआसु वोर्जमिषंचनः इषंव्रीह्यादिकमूऊर्जंदधिक्षीराद्युपसेच नंनोऽस्मभ्यमासुवअभ्यनुजानीहि ॥ आरेदूरेव्यवस्थितंसंतंदुच्छुनांदुच्छुदौर्गत्यंव्याधयश्च ॥ दुर्जनप्रभृतयोलक्ष्यंतेतान्बाधस्वेत्यर्थः ॥ पुनंतुमादेव जनाःपुनंतुमनसाधिया ॥ पुनंतुविश्वाभूतानिजातवेदःपुनीहिमेतिचतुर्थोमंत्रः ॥ अस्यार्थः ॥ लिंगोक्तदेवत्यानुष्टुप्॥देवजना देवानुगाजनामामांपुनंतु पुनंतुमनसाधियःमनसाविवेकेनसंपन्नेनमनसासं जाताधियोदेवताविषयज्ञानानिकर्माणिवामांपुनंतु ॥ विश्वानिभूतानिमांपुनंतु ॥ हेश्रीजातवेदःमांपुनीहीति ॥ आग्नेयीगायत्री ॥ पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूꣳरनुइतिपंचमो मंत्रः ॥ हेदेवदीद्यत्दीप्यमानश्रीभगवन्नग्नेशुक्रेणशुद्धेनपवित्रेणमांपुनीहीति ॥ यत्तेपवित्रमर्चिष्यग्नेविततमंतरा ॥ ब्रह्मतेनपुनातुमाइतिषष्ठोमंत्रः ॥ अस्यार्थः ॥ आग्नेयीब्राह्मीचगायत्रीतृतीयःपादो ब्रह्मदेवत्यः ॥ हेश्रीभगवन्नग्नेयत्तेपवित्रमर्चिषिपरमतेजसिअंतरामध्येविततंतेतवयत्पवित्रंपवनहेतुभूतंविततमतिविस्तृतरूपंपवित्रेतिष्ठतितेनपवित्रेणमांपुनीहि ॥ ब्रह्मतेनपुनातुमांवेदलक्षणंयद्ब्रह्मपरंयद्ब्रह्म

ततोऽघमर्षणंजप्त्वाद्रुपदांचततोजपेत् ॥ प्राणायामंचविधिवदथवांतर्जलेजपेत् ॥ ८ ॥

तेनब्रह्मणामांपुनातु ॥ यद्वा अर्चिषिविततंयत्पवित्रंतेनपवित्रेणाभ्यनुज्ञातेनब्रह्मणापुनात्विति ॥ पवमानःसोअद्यनःपवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमेतिसप्तमोमंत्रः ॥ अस्यार्थः ॥ सोमदेव त्यागायत्रीतृतीयःपादोवायव्यः ॥ पवमानःससोमःअद्यास्मिन्नहनिनोऽस्मान्पवित्रेणपावनेनविचर्षणिर्द्रष्टाकृताकृतंप्रत्यवेक्ष्यामि ॥ कोमांपुनातु ॥ यःस्वभावतःपोतापवनकर्तावायुःसमांपुनात्विति ॥ उभाभ्यांदेवसवितःपवित्रेणसवेनच ॥ मांपुनीहिविश्वतइत्यष्टमोमंत्रः ॥ अस्यार्थः ॥ सवितृदेवतागायत्री ॥ हेदेवसवितःपवित्रेणसवेनचअनेनपवित्रेणसवेनानेन यागेनचेत्युभाभ्यांपवित्रसवाभ्यांमांपुनी हिविश्वतःसर्वतोमांपावयेति ॥ वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमावह्व्यस्तन्वोवीतपृष्ठाः ॥ तयामदंतःसधमादेषुवयꣳस्यामपतयोरयीणामितिनवमोमंत्रः॥अस्यार्थः॥ वैश्वदेवीत्रिष्टुप्॥वैश्वदेवीविश्वदेवत्या सुराकुंभी पुनतीपावनंकुर्वाणा देवीदेवताआगात्आगता यस्यांदेव्यामिमावह्व्यस्तन्वोबहुशरीराणि वीतपृष्ठाःवीतापरभागानिरंतरधारावह्व्यःसंति तयासुराकुंभ्यादेव्यामदंतोमोदमानाःसधमादेषुसहर्ष प्राप्तिस्थानेषुवयंरयीणांधनानांपतयःस्यामभवेम ॥ ७ ॥ ततोऽघमर्षणमिति ॥ ऋतंचसत्यंचाभीद्धात्तपसोऽध्यजायत ॥ ततोरात्र्यजायतततःसमुद्रोअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः इत्यघमर्षणमंत्रः ॥ अस्यार्थः ॥ ऋतंसत्यमितिपरब्रह्मोच्यते ॥ तथाचश्रुतिः ॥ ऋतमेकाक्षरंब्रह्मसत्यंज्ञानमनंतंब्रह्मेति ॥ आसीदित्यध्याहार्यम् ॥ तदयमर्थः ॥ ऋतंचसत्यंचासीत् परब्रह्मासीत्॥एतेनमहाप्रलयावस्थाप्रतिपादिता॥ महाप्रलयसमयेकेवलंब्रह्ममात्रमासीदित्यर्थः ॥ ततोमहाप्रलयावस्थायामेवरात्र्यजायतरात्रिःसमुत्पन्ना केवलमंधकारमयमासीदित्यर्थः ॥ तथाचस्मृतिः ॥ अपएवससर्जादाविति ॥ किंभूतात्तपसः ॥ अभीद्धात्अभिसर्वतोभावेनसमृद्धात् ॥ लब्धप्रलयसमयेहिऋद्धवदहष्टंभवति ॥ ततःसमुद्रादर्णवाद्धातास्रष्टाअजायत ॥ किंभूतः ॥ मिषतःप्रकटीभवतोविश्वस्यवशीप्रभुः ॥ महाप्रलयेविलुप्तसृष्टजगतोनिर्माणेप्रभुरित्यर्थः ॥ सधाताय

CC-0. In Public Domain. Digitization by eGangotri

थापूर्वंयथाक्रमंसूर्याचंद्रमसावकल्पयत् ॥ किंभूतौ ॥ अहोरात्राणिविदधत्कुर्वाणौ ततःसूर्यचंद्रयोरुत्पत्त्यनंतरंसंवत्सरोऽजायत ॥ सूर्यचंद्रोत्पत्तौरात्रिदिनविभागकल्पनयासंवत्सरःसृष्टः॥अथानंतरंदिवं स्वर्गंपृथिवींमहीमंतरिक्षमाकाशंस्वर्नक्षत्रलोकोपरिस्थितंस्वर्गलोकंसएवधाताऽकल्पयत् ॥ चराचरात्मकंसकललोकंसएवसृष्टवानिति ॥ द्रुपदाभितिप्रतीकग्रहणाभिप्रायेण ॥८॥९॥११०॥११॥१२॥ चतुःस्रक्तिरिति ॥ नाभिर्ऋतस्यसप्रथाः ॥ सनोविश्वायुःसप्रथाः ॥ सनःसर्वायुःसप्रथाः ॥ अपद्वेषोअपह्वरोऽन्यव्रतस्यसश्चिमेतिमंत्रशेषः ॥ अस्यार्थः ॥ चतुःस्रक्तिर्दिशोयश्चवीरस्यस्रक्तयःकोणेषु चतुःस्रक्तिर्यश्चनाभिर्नहनमृतस्यसप्रथाः ॥ अभ्यासेभूयांसमर्थंमन्यंते॥ त्वत्प्रसादाच्चापद्वेषःअपगच्छतुद्वेषोऽस्मत्तः ॥ वीतरागाःस्यामेत्यभिप्रायः ॥ अपह्वरः भरह्वरचलने अपगच्छतुचलनमस्मत्तः ॥ जनित्वाम्रियतेमृत्वाजायतइत्येतच्चलनमभिप्रेतम् ॥ अन्यव्रतस्यसश्चिममन्यद्व्रतंकर्मयस्यमनुष्यकर्मणःसकाशादार्तानुग्रहात्मकंसतथोक्तस्तस्यकर्मवयंसेवामहेसाधुवयंप्राप्ताःसंतइति ॥ १३ ॥ १४ ॥

प्रणवंत्रिर्जपेद्वापिविष्णुंवासंस्मरेत्सुधीः ॥ स्नात्वेत्थंवस्त्रमापीड्यगृह्णीयाद्धौतवाससी ॥ ९ ॥ आचम्यचततःकुर्यात्प्रातःसंध्यांकुशान्विताम् ॥ योनसंध्यामुपासीतब्राह्मणोहिविशेषतः ॥ ११० ॥ सजीवन्नेवशूद्रस्तुमृतःश्वाजायतेध्रुवम् ॥ संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु ॥ ११ ॥ यदन्यत्कुरुते कर्मनतस्यफलभाग्भवेत् ॥ प्रणवंप्राग्दिशिस्मृत्वाततोदत्त्वाकुशासनम् ॥ १२ ॥ चतुःस्रक्तिरिमंमंत्रंपठित्वानान्यहृङ्मनाः ॥ १३ ॥ प्राङ्मुखोबद्धचूडोवाप्युपविष्टउदङ्मुखः ॥ प्रदक्षिणंस्वमभ्युक्ष्यप्राणायामंसमाचरेत् ॥ १४ ॥ गायत्रींशिरसासार्धंसप्तव्याहृतिपूर्विकाम् ॥ त्रिर्जपेत्सदशोंकारःप्राणायामोयमुच्यते ॥१५॥ प्राणायामांश्चरन्विप्रोनियतेंद्रियमानसः ॥ अहोरात्रकृतैःपापैर्मुक्तोभवतितत्क्षणात् ॥१६॥ दशद्वादशसंख्यावाप्राणायामाःकृतायदि ॥ नियम्यमानसंतेनतदात्तप्तंमहत्तपः ॥ १७ ॥ सव्याहृतिप्रणवकाःप्राणायामास्तुषोडश ॥ अपिभ्रूणहनंमासात्पुनंत्यहरहःकृताः ॥ १८ ॥ यथापार्थिवधातूनांदह्यंतेधमनान्मलाः ॥ तथेंद्रियैःकृतादोषाज्ज्वाल्यंतेप्राणसंयमात् ॥ १९ ॥ एकंसंभोज्यविधिवद्ब्राह्मणंयत्फलंलभेत् ॥ प्राणायामैर्द्वादशभिस्तत्फलंश्रद्धयाप्यते ॥ १२० ॥ वेदादिवाङ्मयंसर्वंप्रणवेयत्प्रतिष्ठितम् ॥ ततःप्रणवमभ्यस्येद्वेदादिंवेदजापकः ॥ २१ ॥ प्रणवेनित्ययुक्तस्यसप्तसुव्याहृतिष्वपि ॥ त्रिपदायांतुगायत्र्यांनभयंजायतेक्वचित् ॥२२॥ एकाक्षरंपरंब्रह्मप्राणायामःपरंतपः ॥ गायत्र्यास्तुपरंनास्तिपावनंकलशोद्भव ॥ २३ ॥ कर्मणामनसावाचायद्रात्रौकुरुतेत्वघम् ॥ उत्तिष्ठन्पूर्वसंध्यायांप्राणायामैर्विशोधयेत् ॥ २४ ॥

गायत्रीमिति ॥ शिरसासार्धम्आपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरोमित्यनेनसहसहितामित्यर्थः ॥ सप्तव्याहृतयोभूरादयःपूर्वंप्रथमंयस्यास्ताम् ॥ ॐभूःॐभुवःॐस्वःॐमहःॐजनःॐतपःॐसत्यं ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात्॥ॐआपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरोमित्येवंभूतांगायत्रींत्रिर्वारत्रयंजपेत्॥सोयंदशोंकारोदशोंकारसहितोवाऽयंप्राणायामउच्यतइत्यर्थः ॥ ॥ १५ ॥ १६ ॥ १७ ॥ भ्रूणहनंगर्भहंतारंश्रेष्ठब्राह्मणहंतारंवा ॥ १८ ॥ दह्यंतेदाहकर्तृभिरितिशेषः ॥ धमनादग्निसंयोगात् ॥ ज्वाल्यंतेनाश्यंतेप्राणायामकर्तृभिरितिशेषः ॥ प्राणसंयमात्प्राणायामात् ॥ १९ ॥ १२० ॥ वेदादिरूपंयद्वाङ्मयंतत्सर्वंयस्मात्प्रणवेप्रतिष्ठितंततस्तस्माद्वेदजापकःप्रणवमभ्यसेत् ॥ कथंभूतम् ॥ वेदादिंवेदादेःकारणम् ॥ तथाचोक्तम् ॥ ॐकारप्रभवावेदाॐकारप्रभवाःस्वराः ॥ ॐकारप्रभवंसर्वंत्रैलोक्यंसचराचरमिति ॥२१॥२२॥ भयाभावेहेतुमाह ॥ एकाक्षरमिति॥ एकाक्षरंप्रणवम् ॥२३॥ उत्तिष्ठन्शयनात् ॥ अथवापूर्वसंध्यायामुत्तिष्ठन्उत्कर्षेणतिष्ठंस्तां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वन्नित्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ गायत्र्यभ्यासमात्रःगायत्रीसारमात्रः ॥ जितेंद्रियःसुयंत्रितः ॥ तथाचमनुः ॥ गायत्रीसारमात्रोपिवरंविप्रःसुयंत्रितः ॥ नायंत्रित स्त्रिवेदोपिसर्वाशीसर्वविक्रयीति ॥ १३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ उपर्देव्याःप्रातःकालोपास्यायागायत्र्याः ॥ ३४ ॥ सूर्यश्चेतीति ॥ मामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंताम् ॥ यद्रात्र्यापापमकार्षं मनसावाचाहस्ताभ्याम् पद्भ्यामुदरेणशिश्ना अहस्तदवलुंपतु यत्किंच दरितंमयि इदमहंमाममृतयोनौ सूर्येज्योतिषिपरमात्मनिजुहोमिस्वाहेतिमंत्रशेषः ॥ अस्यार्थः ॥ मामां रक्षंताम् ॥ के सूर्यश्चमन्युश्चमन्युर्यज्ञः ॥ केभ्यःपापेभ्यः ॥ किंभूतेभ्योमन्युकृतेभ्यःअसांगयज्ञकृतेभ्यः ॥ तथामन्युपतयोयज्ञपतयोमन्युःक्रोधोवाक्रोधपतयइंद्रियाणिक्रोधकृतेभ्यःपापेभ्यःक्रोधो रक्षतामितिकिमुक्तंस्यात्॥ ममैतादृशःक्रोधोमाभवतुयेनाहमकार्यंनकरोमीति ॥ किंचयत्पापंरात्र्याकार्षंकेन मनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नाशिश्नेन तत्पापमहर्दिवसोऽवलुंपतुखंडयतु यत्किं

यदह्नाकुरुतेपापंमनोवाक्कायकर्मभिः ॥ आसीनःपश्चिमांसंध्यांतत्प्राणायामतोहरेत् ॥ २५ ॥ पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् ॥ पश्चिमां तुसमासीनःसम्यगृक्षविभावनात् ॥ २६ ॥ पूर्वांसंध्यांजपंस्तिष्ठन्नैशमेनोव्यपोहति ॥ पश्चिमांतुसमासीनोमलंहंतिदिवाकृतम् ॥ २७ ॥ नोपतिष्ठेत्तुयः पूर्वांनोपास्तेयस्तुपश्चिमाम् ॥ सशूद्रवद्बहिष्कार्यःसर्वस्माद्द्विजकर्मणः ॥ २८ ॥ अपांसमीपमासाद्यनित्यकर्मसमाचरेत् ॥ गायत्रीमप्यधीयीतग त्वारण्यंसमाहितः ॥ २९ ॥ गृहाद्बहुगुणायस्मात्संध्याबहिरुपासिता ॥ गायत्र्यभ्यासमात्रोपिवरंविप्रोजितेंद्रियः ॥ १३० ॥ त्रिवेद्यपिचनोमान्यः सर्वभुक्सर्वविक्रयी ॥ सवितादेवतायस्यामुखमग्निस्त्रिपाच्चया ॥ ३१ ॥ विश्वामित्रऋषिश्छंदोगायत्रीसाविशिष्यते ॥ गायत्रीमुपसिध्यायेद्धोहितां ब्रह्मदैवताम् ॥ ३२ ॥ हंसारूढामष्टवर्षांरक्तस्रगनुलेपनाम् ॥ ऋक्स्वरूपामभयदामक्षमालावलंबिनीम् ॥ ३३ ॥ व्यासर्षिणास्तूयमानांछं दसानुष्टुभायुताम् ॥ एतद्ध्यानादुपर्देव्यानैशमेनोव्यपोहति ॥ ३४ ॥ सूर्यश्चेतिचमंत्रेणस्यादाचमनमुत्तमम् ॥ आपोहिष्ठेतितिसृभिर्मार्जनंतुततश्चरेत् ॥ ३५ ॥ भूमौशिरसिचाकाशआकाशेभुविमस्तके ॥ मस्तकेचतथाकाशेभूमौचनवधाक्षिपेत् ॥ ३६ ॥ भूमिशब्देनचरणावाकाशंहृदयंस्मृतम् ॥ शिरस्येवशिरःशब्दोमार्जनज्ञैरुदाहृतः ॥ ३७ ॥ वारुणादपिचाग्नेयाद्वायव्यादपिचैंद्रतः ॥ मंत्रस्नानादपिपरंब्राह्मंस्नानमिदंपरम् ॥ ३८ ॥

चमयिमदाश्रितंदुरितंपापंतदिदमहंसूर्येजुहोमि॥ किंभूते ॥ ज्योतिषिहृत्पद्ममध्यस्थितप्रकाशस्वरूपे॥परमात्मनिपरमात्मस्वरूपे॥अमृतयोनौचेतनात्मकारणे ॥ पानीयरूपेणतत्पापंजुहोमिस्वाहासुहुतं भवत्विति ॥३५॥ आपोहिष्ठेतितिसृभिर्व्याख्यातंब्राह्मंस्नानमाह भूमावित्यादिद्वाभ्याम् ॥ ३६ ॥ भूमावितिश्लोकगतंपादत्रयंस्वयमेवव्याचष्टे ॥ भूमिशब्देनेति ॥ ३७ ॥ वारुणादिति ॥ इदंभूमा वित्यादिनोक्तंब्राह्मंस्नानंवारुणादित्यादिपंचस्नानात्परंभिन्नंपरंश्रेष्ठंचेत्यन्वयः ॥ तत्रवारुणंजलजम् ॥ आग्नेयमग्निहोत्रविभूतिजम् ॥ वायव्यंवायुनानीयमानगोरजोजम् ॥ ऐंद्रमभ्रंविनाऐरावतकरो ज्झितवारिजम् ॥ मांत्रंमूलमंत्रजंवैदिकमंत्रजंवा ॥ तथाचोक्तम् ॥ मांत्रंभौमंतथाग्नेयंवायव्यंदिव्यमेवच ॥ वारुणंमानसंचैवसप्तधैवंप्रकीर्तितमिति ॥ तत्रभौमंमृदालंबनंतिलकादिधारणमितियावत् ॥ दिव्यमैंद्रम् ॥ मानसंसगुणनिर्गुणभेदेनहरिहरयोश्चिंतनम् ॥ तथाचब्राह्मादपिस्नानान्मानसंस्नानमधिकमितिदर्शितंभवति ॥ यद्वा भूमावित्यादिश्लोकद्वयंमार्जनविशेषपरंतदावारुणादित्यस्यायमर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

वारुणादिपंचस्नानादित्युपलक्षणंभौमस्नानादपिब्राह्मंस्नानंयदिदंपरंभिन्नंपरंश्रेष्ठंचेत्यर्थः ॥ अस्मिन्पक्षेब्राह्मंमानसमेव ॥ ३८ ॥ तत्स्तौति ॥ ब्राह्मस्नानेनेति ॥ ३९ ॥ ननुवारुणाग्नेययोरेवश्रेष्ठत्वंप्रतिभातिप्रायशःसर्वैः क्रियमाणत्वादित्याशंक्यनिराकरोति नक्तमितिद्वयेन ॥ १४० ॥ रासभागर्दभाः ॥ ४१ ॥ एवंस्थितेफलितमाह ॥ सस्नातइति ॥ ४२ ॥ तर्हितत्कथंस्यादित्याकांक्षापूर्वकंसहेतुकमाह ॥ तदेवेति ॥ ४३ ॥ समाश्रयेच्चिंतयेत् ॥ मनोमलाःकामाः ॥ ४४ ॥ ४५ ॥ ननुविश्वेशानुग्रहएवकुतःस्यात्तत्राह ॥ विश्वेशानुग्रहइति ॥ तंसदाचारम् ॥ ४६ ॥

ब्राह्मस्नानेनयःस्नातःसबाह्याभ्यंतरेशुचिः ॥ सर्वत्रचार्हतामेतिदेवपूजादिकर्मणि ॥३९ ॥ नक्तंदिनंनिमज्ज्याप्सुकैवर्ताःकिमुपावनाः ॥ शतशोपितथा स्नातानशुद्धाभावदूषिताः ॥ १४० ॥ अंतःकरणशुद्धायेतान्विभूतिःपवित्रयेत् ॥ किंपावनाःप्रकीर्त्यंतेरासभाभस्मधूसराः ॥ ४१ ॥ सस्नातःसर्वतीर्थेषुससर्वमलवर्जितः ॥ तेनक्रतुशतैरिष्टंचेतोयस्येहनिर्मलम् ॥ ४२ ॥ तदेवनिर्मलंचेतोयथास्यात्तन्मुनेशृणु ॥ विश्वेशश्चेत्प्रसन्नःस्यात्तदास्यान्नान्यथाक्वचित् ॥ ४३ ॥ तस्माच्चेतोविशुद्ध्यर्थंकाशीनाथंसमाश्रयेत् ॥ तदाश्रयेणानियतंसंक्षीयंतेमनोमलाः ॥ ४४ ॥ संक्षीणमानसमलोविश्वेशानुग्रहात्परात् ॥ इदंशरीरमुत्सृज्यपरंब्रह्माधिगच्छति ॥ ४५ ॥ विश्वेशानुग्रहेहेतुःसदाचारोमतोनृणाम् ॥ श्रुतिस्मृतिभ्यामुदितंतस्मात्तमनुसंश्रयेत् ॥ ॥ ४६ ॥ द्रुपदांतुततोजप्त्वाजलमादायपाणिना ॥ कुर्यादृतंचमंत्रेणाविधिज्ञस्त्वघमर्षणम् ॥ ४७ ॥ निमज्ज्याप्सुचयोविद्वाञ्जपेत्त्रिरघमर्षणम् ॥ यथाश्वमेधावभृथस्तस्यस्यात्तत्तथाध्रुवम् ॥ ४८ ॥ जलेवापिस्थलेवापियःकुर्यादघमर्षणम् ॥ तस्याघौघोविनश्येतयथासूर्योदयेतमः ॥ ४९ ॥ इमंमंत्रंततश्चोक्त्वाकुर्यादाचमनंद्विजः ॥ आचार्याःकेचिदिच्छंतिशाखाभेदेनचापरे ॥ १५० ॥ अंतश्चरसिभूतेषुगुहायांविश्वतोमुखः ॥ त्वंयज्ञस्त्वंवषट्कार आपोज्योतीरसोऽमृतम् ॥ ५१ ॥ गायत्रींशिरसाहीनांमहाव्याहृतिपूर्विकाम् ॥ प्रणवाद्यांजपंस्तिष्ठन्क्षिपेदंभोंजलित्रयम् ॥ ५२ ॥ तेनवज्रोदकेनाशुमंदेहानामराक्षसाः ॥ सूर्यारयःप्रलीयंतेशैलावज्रहताइव ॥५३॥ विवस्वतःसहायार्थंयोद्विजोनांजलित्रयम् ॥ क्षिपेन्मंदेहनाशायसोपिमंदेहतांव्रजेत्॥५४॥ प्रातस्तावज्जपंस्तिष्ठेद्यावत्सूर्यस्यदर्शनम्॥ उपविष्टोजपेत्सायमृक्षाणामाविलोकनात्॥५५॥ काललोपोनकर्तव्योद्विजेनस्वहितेप्सुना॥ अर्घोदयास्तसमयेतस्माद्वज्रोदकंक्षिपेत् ॥५६ ॥ विधिनापिकृतासंध्याकालातीताऽफलाभवेत् ॥ अयमेवहिदृष्टांतोवंध्यास्त्रीमैथुनंयथा ॥५७॥ जलंवामकरेकृत्वायासंध्याचरिताद्विजैः ॥ वृषलीसापरिज्ञेयारक्षोगणमुदावहा ॥५८॥ उद्वयंतमुदुत्यंचचित्रंदेवेतितत्परम् ॥ तच्चक्षुरित्युपस्थानमंत्राब्रह्मस्यासिद्धिदाः ॥५९॥

द्रुपदामितिऋतंचेतिमंत्रद्वयंपूर्वमेवव्याख्यातमितिप्रतीकतयाएकदेशग्रहणाभिप्रायेण ॥ ४७ ॥ ४८ ॥ ४९ ॥ इममिमंमेवरुणेतिमंत्रम् ॥ आचार्याइति ॥ केचिदपरेआचार्याःशाखाभेदेनांतश्चरसीत्याचमनमंत्रमिच्छंतीतिशेषः ॥ इमंवक्ष्यमाणंमंत्रमुक्त्वाऽऽचमनंकुर्यादित्यत्रहेतुमाह ॥ आचार्याइति ॥ मन्त्रमेवदर्शयति ॥ अंतश्चरसीत्येवंवान्वयः ॥ गुहायांबुद्धौ ॥ विश्वतोमुखःसर्वत्राननः ॥ रसआनंदःअमृतंषड्विकाररहितम् ॥ १५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ उद्वयंतमित्यनुस्वारआर्षः ॥ प्रतीकाभिप्रायोवा ॥ मसः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिस्वःपश्यंतउत्तरम् ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तममितिमंत्रशेषः ॥ अस्याऽर्थः ॥ ततूवयंतमसःपरि तमःप्रचुरादस्माल्लोकात्तमसःपाप्मनोवापरिउपरिस्वःस्वर्गेलोकेदेवत्रादेवेषुउत्तरंदेवं देवनादिगुणयुक्तमुत्तमंसर्वज्योतिर्भ्यउत्तममुत्कृष्टतमंसूर्यंसर्वप्रेरकंपश्यंतःशास्त्रदृष्ट्यासाक्षात्कुर्वंतःसूर्यंज्योतिःउत् अगन्मवहतास्मेति (?) ॥उदुत्यमिति ॥ जातवेदसंदेवंवहंतिकेतवः॥दृशेविश्वायसूर्यमिति मंत्रशेषः ॥ अस्यायमर्थः ॥ उदित्युपसर्गः ॥ उइतिचनिपातः ॥ त्यच्छब्दस्यरूपंत्यमिति ॥ त्यंजातवेदसंजातंजातंवेत्तिवेदयतीतिजातवेदास्तंजातवेदसंसर्वज्ञंदेवंदेवनादिगुणयुक्तम् ॥ सूर्यम् ॥ चितीज्ञाने ॥ केतवःप्रज्ञानात्मकाअसंख्यातारश्मयःउएवउद्वहंतिविश्वायविश्वस्यसर्वस्यजगतःदृशेदर्शनायसर्वलोकस्यदर्शनादिव्यवहारसिद्ध्यर्थंवहंतीउद्वहंतीतिसंबंधइति॥चित्रंदेवेति ॥ नामुदगादनीकं चक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअन्तरिक्षंसूर्यआत्माजगतस्तस्थुषश्चेतिमन्त्रशेषः ॥ अस्यायमर्थः ॥ चित्रमितिक्रियाविशेषणम् ॥ चित्रंविचित्रंयथाभवतितथोदगात् ॥ आश्चर्यंहि स्वकीयेनज्योतिषाशार्वरंतमोपहत्यान्येषांचज्योतिषांज्योतिरादायगच्छतीति ॥ यद्वा चित्रंचायनीयंदर्शनायउदगात् ॥ देवानांरश्मीनामनीकंमुखंप्रथममुदगात् ॥ ततोदेवानांरश्मीनामनीकंर श्मिसंघातश्चित्रंविचित्रंचायतनीयमादित्यमंडलमुदगादित्यर्थः ॥ तच्चमित्रस्यवरुणस्याग्नेरित्येतेषांचक्षुर्दृष्टिःसदेवमनुष्यस्यजगतोयच्चक्षुस्तदादित्यमंडलमाप्राद्यावापृथिवीअंतरिक्षं प्रापूरणे द्यावा पृथिवीतन्मध्यमंतरिक्षंचस्वकीयेनप्रकाशेनआसमंतात्प्राः पुरुषव्यत्ययः ॥ अप्रात्आपूरितवान् ॥ सूर्योदयेहिरूपादयोऽभिव्यज्यंते कालस्यापिविशिष्टक्रियाहेतुत्वंयजमानानांचविशिष्टक्रियाकर्तृ

सहस्रकृत्वोगायत्र्याःशतकृत्वोथवापुनः ॥ दशकृत्वोथदेव्यैवकुर्यात्सौरीमुपस्थितिम् ॥ १६० ॥ सहस्रपरमांदेवींशतमध्यांदशावराम् ॥ गायत्रींयोजपे द्विप्रोनसपापैःप्रलिप्यते ॥ ६१ ॥ विभ्राडित्यनुवाकंवासूक्तंवापौरुषंजपेत् ॥ शिवसंकल्पमथवाब्राह्मणंमंडलंतुवा ॥ ६२ ॥ एतानिचोपस्थानानिरवि प्रीतिकराणिच ॥ रक्तचंदनमिश्राद्भिरक्षतैःकुसुमैःकुशैः ॥६३॥ वेदोक्तैरागमोक्तैर्वामंत्रैरर्घ्यंप्रदापयेत् ॥ अर्चितःसवितायेनतेनत्रैलोक्यमर्चितम् ॥६४॥ अर्चितःसवितासूतेसुतान्पशुवसूनिच ॥ व्याधीन्हरेद्ददात्यायुःपूरयेद्वांछितान्यपि ॥ ६५ ॥ अयंहिरुद्रआदित्योहरिरेषदिवाकरः ॥ रविर्हिरण्यगर्भोसौ त्रयीरूपोयमर्यमा ॥ ६६ ॥

त्वंदेवानांचविशिष्टपूजाविषयत्वमित्यादिकंसर्वंसूर्योदयायत्तमित्यर्थः ॥ सएवसूर्यआत्माजगतस्तस्थुषःअस्यजगतःजगंतिगच्छतीतिजगत्तस्यजगतोजंगमस्यतस्थुषःस्थितिशीलस्यस्थावरस्यसूर्यःसर्व प्रेरकोभगवान्आत्मासर्वस्यप्रत्यगात्मभूतः ॥ परमात्मदृष्ट्यासूर्यःस्तूयतेइति ॥ तत्परमुदुत्यमित्यस्मात्परम् ॥ तच्चक्षुरिति ॥ देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतंजीवेमशरदः शतंशृणुयामशरदःशतमितिमंत्रशेषः ॥ अस्यायमर्थः ॥ तच्चक्षुरादित्यात्मकंचक्षुर्देवहितंदेवेनश्रीभगवताहितंप्रतिष्ठितंदेवेभ्योऽर्थायवाहितंपुरस्तात्प्राच्यांदिशिशुक्रंपाप्मभिरसंस्पृष्टमुच्चरदुदेति ॥ पश्येमसर्वाणिपुरुषार्थसाधनानिपश्येम ॥ शरदःशतमितिवहुकालंजीवेम ॥ शरदःशतंशतसंवत्सरपरिमितंकालम् ॥ शृणुयामश्रीभगवन्माहात्म्यप्रभाववादिनीःश्रुतीः ॥ शरदःशतंकल्पेनशृणु यामेति ॥ ५९ ॥ सहस्रकृत्वःसहस्रवारान् ॥ एवमग्रेपि ॥ वाशब्दोविकल्पार्थः ॥ १६० ॥ सौर्युपस्थितेःफलमाह ॥ सहस्रपरमांदशशतेनोत्तमाम् ॥ शतवारजपेनमध्यांमध्यमां दशवारजपेनअवरांलघ्वीम् ॥ ६१ ॥ विभ्राडिति ॥ विभ्राड्बृहत्पिबत्वित्यादिचतुर्दशानुवाकंवाजपेत् पौरुषंसूक्तंसहस्रशीर्षेत्यादिषोडशर्चंवाजपेत् शिवसंकल्पंयज्जाग्रतइतिषड्ऋचंवाजपेत् मंडलं ब्राह्मणंयदेतन्मंडलमित्यादित्रयोविंशतिकंडिकात्मकंवाजपेत् ॥ एतेषांस्वरूपंसंहितादौ ॥ व्याख्यानंचगुणविष्णवादौद्रष्टव्यम् ॥ एवमग्रेपि ॥ ६२ ॥ ६३ ॥ वेदोक्तैर्हंसःशुचिषदित्याद्यैः ॥ आगमोक्तैःएहिसूर्यसहस्रांशोइत्याद्यैः ॥ ६४ ॥ ६५ ॥ अयंहीति ॥ अयमादित्योरुद्रः एषदिवाकरोहरिः असौरविर्हिरण्यगर्भः तस्मादयमर्यमात्रयीरूपोरुद्रहरिर्हिरण्यगर्भस्वरूपइति ॥

CC-0. In Public Domain. Digitization by eGangotri

तथाचस्मृतिः ॥ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयायत्रिगुणात्मधारिणेविरिंचिनारायणशंकरात्मनइति ॥ ६६ ॥ यतएवमतोरवेस्त्विति ॥ ६७ ॥ ६८ ॥
॥ ६९ ॥ अन्वारब्धेनसव्येनदक्षिणहस्तसंलग्नेनवामेनहस्तेन ॥ षड्विनायकान्चंडप्रचंडधर्मविनायकविघ्नराजमहागणपतीन् ॥ १७० ॥ ७१ ॥ निवीतीकंठलग्नयज्ञोपवीती ॥ ७२ ॥
प्राचीनावीतिकोदक्षिणस्कंधयज्ञोपवीतवान् ॥ ७३ ॥ तिलतर्पणस्यनिषेधमाह ॥ रवाविति ॥ ७४ ॥ तत्रापियादृच्छिकप्रतिप्रसवमाह ॥ यदीति ॥ चतुर्दशेति ॥ यमायधर्मराजायमृत्यवचां

रवेस्तुतोषणात्तुष्टाब्रह्मविष्णुमहेश्वराः ॥ इंद्रादयोखिलादेवामरीच्याद्यामहर्षयः ॥ ६७ ॥ मानवामनुमुख्याश्चसोमपाद्याःपितामहाः ॥ रवेरर्चांविधाये
त्थंततस्तर्पणमारभेत् ॥ ६८ ॥ दर्भानगर्भानादायनवसप्तचपंचवा ॥ साग्रान्समूलानच्छिन्नान्द्विजोदक्षिणपाणिना ॥ ६९ ॥ अन्वारब्धेनसव्येनतर्प
येत्षड्विनायकान् ॥ ब्रह्मादीनखिलान्देवान्मरीच्यादींस्तथामुनीन् ॥ १७० ॥ चंदनागुरुकस्तूरीगंधवत्कुसुमैरपि ॥ तर्पयेच्छुचिभिस्तोयैस्तृप्य्यं
त्वितिसमुच्चरन् ॥ ७१ ॥ सनकादीन्मनुष्यांश्चनिवीतीतर्पयेद्यवैः ॥ अंगुष्ठद्वयमध्येतुकृत्वादर्भानृजून्द्विजः ॥ ७२ ॥ कव्यवाडनलादींश्चपितॄन्दिव्या
न्प्रतर्पयेत् ॥ प्राचीनावीतिकोदर्भैर्द्विगुणैस्तिलमिश्रितैः ॥ ७३ ॥ रवौशुक्रेत्रयोदश्यांसप्तम्यांनिशिसंध्ययोः ॥ श्रेयोर्थीब्राह्मणोजातुनकुर्यात्तिलतर्प
णम् ॥ ७४ ॥ यदिकुर्यात्ततःकुर्याच्छुक्लैरेवतिलैःकृती ॥ चतुर्दशयमान्पश्चात्तर्पयेन्नाममुच्चरन् ॥ ७५ ॥ ततःस्वगोत्रमुच्चार्यतर्पयेत्स्वपितॄन्मुदा ॥
सव्यजानुनिपातेनपितृतीर्थेनवाग्यतः ॥ ७६ ॥ एकैकमंजलिंदेवाद्वौद्वौतुसनकादिकाः ॥ पितरस्त्रीन्प्रवांछंतिस्त्रियएकैकमंजलिम् ॥ ७७ ॥ अंगुल्य
ग्रेभवेद्दैवमार्षमंगुलिमूलगम् ॥ ब्राह्ममंगुष्ठमूलेतुपाणिमध्येप्रजापतेः ॥ ७८ ॥ मध्येंगुष्ठप्रदेशिन्योःपित्र्यंतीर्थंप्रचक्षते ॥ नवर्चमुच्चरन्विद्वान्विदध्या
त्पितृतर्पणम् ॥ ७९ ॥ उदीरतामंगिरसआयंतुनइतीष्यते ॥ ऊर्जंवहंतीपितृभ्यःस्वधायिभ्यस्ततःपठेत् ॥ १८० ॥

तकायच ॥ वैवस्वतायकालायसर्वभूतक्षयायच ॥ औदुंबरायदध्नायनीलायपरमेष्ठिने॥वृकोदरायचित्रायचित्रगुप्तायवैनमइत्येवंभूतान् ॥ ७५ ॥ पितृतीर्थेनांगुष्ठप्रदेशिन्योर्मध्येन ॥ ७६ ॥ ७७ ॥
दैवादितीर्थान्याह अंगुल्यग्रइतिसार्धेन ॥ ७८ ॥ पितृतर्पणमंत्रानाह ॥ नवर्चमिति ॥ ७९ ॥ नवर्चमेवोदाहृत्यदर्शयति उदीरतामितिपादोनद्वयेन ॥ उदीरतामित्येकाकंडिका ॥
अंगिरसइतिद्वे आयंतुनइतितिस्रः ऊर्जंवहंतीतिचतस्रः पितृभ्यःस्वधायिभ्यःइतिपंच येचेहेतिषट् मधुवाताइतिकंडिकात्रयम् इतिनवर्चमुक्त्वापितृतर्पणंविदध्यादितिपूर्वेणैवान्वयः ॥ १८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृस्मंत्रकंसंतर्प्यमातामहतर्पणमाह ॥ नमोवइति ॥ ८१ ॥ आब्रह्मेतिमंत्रत्रयंपठन्भुविजलंसिंचेदितिसपादत्रयाणामन्वयः ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ उपसंहरति ॥ प्रातः
कृत्यमिति ॥ ८७ ॥ प्रातःस्नानाशक्तान्प्रत्याह ॥ अथवेति ॥ ८८ ॥ ८९ ॥ १९० ॥ ९१ ॥ ९२ ॥ त्र्यक्षरांप्रणवात्मिकाम् ॥ ९३ ॥ पचनाग्निंवैश्वदेवार्थमग्निम् ॥ ९४ ॥ निष्पावान्
शिंबीः वल्लावल्लहाइतिगौडेप्रसिद्धाः ॥ कोद्रवान्कोरदूषकान् ॥ माषान्प्रख्यातान् ॥ कलायान्सूक्ष्मान्वाटुलाइतिप्रसिद्धान् ॥ चणकान्हरिमंथकान् ॥ पक्वान्नंसर्वंलवणयुक्लवणसंबद्धंसर्वं

येचेहपितरस्तद्वन्मधुवाताइतितृचम् ॥ नमोवःपितरश्चोक्तापठन्सिंचेज्जलंभुवि ॥ ८१ ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतुपितरःसर्वेमातृ
मातामहादयः ॥ ८२ ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् ॥ ८३ ॥ येचास्माकंकुलेजाताअपुत्रागो
त्रिणोमृताः ॥ सर्वेतेतृप्तिमायांतुवस्त्रनिष्पीडनोदकैः ॥ ८४ ॥ अग्निकार्यंततःकृत्वावेदाभ्यासंततश्चरेत् ॥ श्रुत्यभ्यासःपंचधास्यात्स्वीकारोर्थविचारणम्
॥ ८५ ॥ अभ्यासश्चजपश्चापिशिष्येभ्यःप्रतिपादनम् ॥ लब्धस्यप्रतिपालार्थमलब्धस्यचलब्धये ॥ ८६ ॥ दातारंसमुपेयाद्वैस्वगुरुत्वंचवर्धयेत् ॥
प्रातःकृत्यमिदंप्रोक्तंद्विजातीनांद्विजोत्तम ॥ ८७ ॥ अथवाप्रातरुत्थायकृत्वावश्यकमेवच ॥ शौचाचमनमादायभक्षयेद्दंतधावनम् ॥ ८८ ॥ विशो
ध्यसर्वगात्राणिप्रातःसंध्यांसमाचरेत् ॥ वेदार्थानधिगच्छेच्चशास्त्राणिविविधान्यपि ॥ ८९ ॥ अध्यापयेच्छुचीञ्शिष्यान्हितान्मेधासमन्वितान् ॥
उपेयादीश्वरंचैवयोगक्षेमादिसिद्धये ॥ १९० ॥ ततोमध्याह्नसिद्धयर्थंपूर्वोक्तंस्नानमाचरेत् ॥ स्नात्वामाध्याह्निकांसंध्यामुपासीतविचक्षणः ॥ ९१ ॥
नवयौवनभिन्नांगींशुद्धस्फटिकनिर्मलाम् ॥ त्रिष्टुप्छंदःसमायुक्तांसावित्रींरुद्रदैवताम् ॥ ९२ ॥ कश्यपर्षिसमायुक्तांयजुर्वेदस्वरूपिणीम् ॥ त्र्यक्षरां
वृषभारूढांभक्ताभयकरांपराम् ॥ ९३ ॥ देवतांपरिपूज्याथनैत्यिकंविधिमाचरेत् ॥ पचनाग्निंसमुज्वाल्यवैश्वदेवंसमाचरेत् ॥ ९४ ॥ निष्पावान्को
द्रवान्माषान्कलायांश्चणकांस्त्यजेत् ॥ तैलपक्वंचपक्वान्नंसर्वंलवणयुक्त्यजेत् ॥ ९५ ॥ आढकीश्चमसूरांश्चवर्तुलान्वरटांस्तथा ॥ भुक्तशेषंपर्युषितंवै
श्वदेवेविवर्जयेत् ॥ ९६ ॥ दर्भपाणिःसमाचम्यप्राणायामंविधायच ॥ पृष्ठोदिवीतिमंत्रेणपर्युक्षणमथाचरेत् ॥ ९७ ॥ प्रदक्षिणंचपर्युक्ष्यत्रिःपरिस्तीर्य
वैकुशान् ॥ एषोहदेवमंत्रेणकुर्याद्वह्निंसुसंमुखम् ॥ ९८ ॥ वैश्वानरंसमभ्यर्च्यसाज्यपुष्पाक्षतैरथ ॥ भूराद्याश्चाहुतीस्तिस्रःस्वाहांताःप्रणवादिकाः
॥ ९९ ॥ ॐभूर्भुवःस्वःस्वाहेतिविप्रोदद्यात्तथाहुतिम् ॥ तथादेवकृतस्याद्याजुहुयाच्चषडाहुतीः ॥ २०० ॥

पक्वान्नंसिद्धमन्नंत्यजेदित्यर्थः ॥ ९५ ॥ आढकीःतुवरीः ॥ मसूरान्सूक्ष्मकलायसदृशान्रक्तवर्णान् ॥ वर्तुलान्स्थूलकलायान् ॥ वरटान्वर्वटीतिप्रसिद्धान् ॥ ९६ ॥ पृष्ठोदिविपृष्ठोअग्निरित्यादिमंत्रेण
पर्युक्षणमभ्युक्षणंमंत्रपूर्वकंजलेनाग्निवेष्टनंवा ॥ ९७ ॥ सुसंमुखंतृतीयरेखोपर्येकीकृत्यस्थापितम् ॥ प्राङ्मुखोदेवममसंमुखोभवेत्येवंरूपंवा ॥ ९८ ॥ ९९ ॥ देवकृतस्याद्याइति ॥ एनसोवय

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनमासिस्वाहामनुष्यकृतस्यैनसोवयजनमसीत्यादयआदिपदेनगृह्यंते ॥ २०० ॥ स्विष्टकृतीद्वयमग्नयेस्विष्टकृतेस्वाहेत्याहुतिद्वयम् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ अनूचानःसांगाधीतीः ॥ ॥ ६ ॥ ७ ॥ तर्हिकिमध्वगाद्यष्टौविहायान्येभ्योऽन्नंनदेयम् केनोक्तमित्याह ॥ अन्नार्थिनीति ॥ किंतुशुनामिति ॥ ८ ॥ तत्रकाकबलिमंत्रमाह ॥ ऐंद्रेति ॥ ९ ॥ श्वबलिमंत्रमाह ॥ द्वाविति ॥

यमायतूष्णीमेकांचतथास्विष्टकृतीद्वयम् ॥ विश्वेभ्यश्चापिदेवेभ्योभूमौदद्यात्ततोबलिम् ॥ १ ॥ सर्वेभ्यश्चापिभूतेभ्योनमोदद्यात्तदुत्तरे ॥ तद्दक्षिणेपि तृभ्यश्चप्राचीनावीतिकोददेत् ॥ २ ॥ निर्णेजनोदकान्नंचैशान्यांवैयक्ष्मणेऽर्पयेत् ॥ ततोब्रह्मादिदेवेभ्योनमोदद्यात्तदुत्तरे ॥ ३ ॥ निवीतीसनकादिभ्यः पितृभ्यस्त्वपसव्यवान् ॥ हंतःषोडशभिर्ग्रासैश्चतुर्भिःपुष्कलंस्मृतम् ॥ ४ ॥ ग्रासमात्राभवेद्भिक्षागृहस्थसुकृतप्रदा ॥ अध्वगःक्षीणवृत्तिश्चविद्यार्थी गुरुपोषकः ॥ ५ ॥ यतिश्चब्रह्मचारीचषडेतेधर्मभिक्षुकाः ॥ अतिथिःपथिकोज्ञेयोऽनूचानःश्रुतिपारगः ॥ ६ ॥ मान्यावेतौगृहस्थानांब्रह्मलोकमभी प्सताम् ॥ अपिश्वपाकेशुनिवानैवान्नंनिष्फलंभवेत् ॥ ७ ॥ अन्नार्थिनिसमायातेपात्रापात्रंनचिंतयेत् ॥ शुनांचपतितानांचश्वपचांपापरोगिणाम् ॥ ८ ॥ काकानांचकृमीणांचबहिरन्नंकिरेद्भुवि ॥ ऐंद्रवारुणवायव्याःसौम्यावैनैर्ऋताश्चये ॥ ९ ॥ प्रतिगृह्णंत्विमंपिंडंकाकाभूमौमयार्पितम् ॥ द्वौश्वानौ श्यामशबलौवैवस्वतकुलोद्भवौ ॥ २१० ॥ ताभ्यांपिंडंप्रदास्यामिस्यातामेतावहिंसकौ ॥ देवामनुष्याःपशवोरक्षोयक्षोरगाःखगाः ॥ ११ ॥ दैत्याःसिद्धाःपिशाचाश्चप्रेताभूताश्चदानवाः ॥ तृणानितरवश्चापिमद्दत्तान्नाभिलाषुकाः ॥ १२ ॥ कृमिकीटपतंगाद्याःकर्मबद्धाबुभुक्षिताः ॥ तृप्त्यर्थमन्नं हिमयादत्तंतेषांमुदेस्तुवै ॥ १३ ॥ इत्थंभूतबलिंदत्त्वाकालंगोदोहमात्रकम् ॥ प्रतीक्ष्यातिथिमायांतंविशेद्भोज्यगृहंततः ॥ १४ ॥ अदत्त्वावायसबलिं नित्यश्राद्धंसमाचरेत् ॥ नित्यश्राद्धेस्वसामर्थ्यात्त्रीन्द्वावेकमथापिवा ॥ १५ ॥ भोजयेत्पितृयज्ञार्थंदद्यादुद्धृत्यदुर्बलः ॥ नित्यश्राद्धंदैवहीनंनियमा दिविवर्जितम् ॥ १६ ॥ दक्षिणारहितंत्वेतद्दातृभोक्तृव्रतोज्झितम् ॥ पितृयज्ञंविधायेत्थंस्वस्थबुद्धिरनातुरः ॥ १७ ॥ अदुष्टासनमध्यास्यभुंजीत शिशुभिःसह ॥ सुगंधिःसुमनाःस्रग्वीशुचिवासोद्वयान्वितः ॥ १८ ॥ प्रागास्यउदगास्योवाभुंजीतपितृसेवितम् ॥ १९ ॥ विधायान्नमनग्नंतदुपरि ष्टादधस्तथा ॥ आपोशनविधानेनकृत्वाश्नीयात्सुधीर्द्विजः ॥२२०॥ प्रदद्याद्भुवःपतयेभुवनपतयेतथा॥भूतानांपतयेस्वाहेत्युक्त्वाभूमौबलित्रयम् ॥२१॥

॥ २१० ॥ भूतबलिमंत्रमाह देवाइतिसार्धद्वयेन ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ दद्यादुद्धृत्यदुर्बलइति ॥ दरिद्रश्चसर्वस्मात्स्वभोज्यात्किंचित्किंचिदुद्धृत्यसर्वेभ्यएकंबलिंदद्या दित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ विधायेति ॥ आपोशनविधानेनकृत्वातदन्नमधउपरिष्टाच्चानग्नतांविधायसुधीर्द्विजोऽश्नीयादित्यन्वयः ॥ २२० ॥ आपोशनविधानक्रमंदर्शयति ॥ प्रदद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिति ॥ २१ ॥ सकृदिति ॥ अमृतोपस्तरणमसीतिमंत्रेणसकृदाचम्येत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ २३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

सकृच्चापउपस्पृश्यप्राणाद्याहुतिपंचकम् ॥ दद्याज्जठरकुंडाग्नौदर्भपाणिःप्रसन्नधीः ॥ २२ ॥ दर्भपाणिस्तुयोभुंक्तेतस्यदोषोनविद्यते ॥ केशकीटादिसंभूतस्तदश्नीयात्सदर्भकः ॥ २३ ॥ यावद्भुच्यन्नमश्नीयान्नब्रूयात्तद्गुणागुणान् ॥ भुंजतेपितरस्तावद्यावन्नोक्ताःगुणागुणाः ॥ २४ ॥ अतोमौनेनयोभुंक्तेसभुंक्तेकेवलामृतम् ॥ अनुपीयततःक्षीरंतक्रंपानीयमेववा ॥ २५ ॥ अमृतापिधानमसीत्येवंप्राश्योदकंसकृत् ॥ पीतशेषंक्षिपेद्भूमौतोयंमंत्रमिमंपठन् ॥ २६ ॥ अप्रक्षालितहस्तस्यदक्षिणांगुष्ठमूलतः ॥ रौरवेऽपुण्यनिलयेपद्मार्बुदनिवासिनाम् ॥ २७ ॥ उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् ॥ ॥ २८ ॥ पुनराचम्यमेधावीशुचिर्भूत्वाप्रयत्नतः ॥ हस्तेनोदकमादायमंत्रमेतमुदीरयेत् ॥२९॥ अंगुष्ठमात्रःपुरुषस्त्वंगुष्ठंचसमाश्रितः ॥ ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्वभुक् ॥ २३० ॥ इत्यन्नंपरिसंकल्प्यप्रक्षाल्यचरणौकरौ ॥ ततोन्नपरिणामार्थमंत्रानेतानुदीरयेत् ॥ ३१ ॥ अग्निराप्याययन्धातून्पार्थिवान्पवनेरितः ॥ दत्तावकाशोनभसाजरयत्वस्तुमेसुखम् ॥३२॥ प्राणापानसमानानामुदानव्यानयोस्तथा ॥ अन्नंपुष्टिकरंचास्तुममास्त्वव्याहतंसुखम् ॥ ३३ ॥ समुद्रोवडवाग्निश्चब्रह्मोब्रह्मस्यनंदनः ॥ मयाभ्यवहृतंयत्तदशेषंजरयंत्विमे ॥ ३४ ॥ मुखशुद्धिंततःकृत्वापुराणश्रवणादिभिः ॥ अतिवाह्यादिवाशेषंततःसंध्यांसमारभेत् ॥ ३५ ॥ गृहेगोष्ठेनदीतीरेसंध्यादशगुणाक्रमात् ॥ संभेदेस्याच्छतगुणाह्यनंताशिवसन्निधौ ॥ ३६ ॥ उपासिताबहिःसंध्यादिवामैथुनपातकम् ॥ शमयेदनृतोक्ताघंमद्यगंधजमेवच ॥ ३७ ॥ सामवेदस्वरूपांचवसिष्ठर्षिसमायुताम् ॥ कृष्णांगींकृष्णवसनांमनाक्स्खलितयौवनाम् ॥ ३८ ॥ सरस्वतींताक्ष्र्यंयानांविप्रर्षींविष्णुदैवताम् ॥ जगतीच्छंदसायुक्तांध्यायेदेकाक्षरांपराम् ॥ ३९ ॥ अग्निश्चेतिचमंत्रेणविधायाचमनंसुधीः ॥ पश्चिमास्योजपेत्तावद्यावन्नक्षत्रदर्शनम् ॥ २४० ॥ अतिथिंसायमायांतमपिवाग्भूतृणोदकैः ॥ संभाव्यपरिकल्प्येत्थंनिशःप्राक्प्रहरंसुधीः ॥ ४१ ॥ इत्थंदिवाकर्मकृत्वाश्रुतेःपठनपाठनैः ॥ एककाष्ठमयींशय्यांनातितृप्तोथसंविशेत् ॥ ४२ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ अग्निश्चेतिमंत्रःसूर्यश्चमामन्युश्चमंत्रेणैवव्याख्यातप्रायः ॥ १४० ॥ ४१ ॥ तत्तस्मात् एककाष्ठमयीमेकजातीयकाष्ठमयीम् ॥ अखंडकाष्ठमयींवा ॥४२॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरति ॥ उद्देशतइति ॥ कथनस्यफलमाह ॥ इत्थमिति ॥ २४३ ॥ वेदपाठार्थयोरोधाद्यदत्रस्खलितंमम ॥ क्षंतव्यंतद्विशेषेणवेदवेदार्थपारगैः ॥ १ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायांपंचत्रिंशोध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ षट्त्रिंशत्तमकेऽध्यायेपावनेत्यंतशोभने ॥ प्रथमाश्रमिणांतावत्सदाचारोनिरूप्यते ॥ १ ॥ एवंसाधारण्येनधर्मानुक्त्वाप्रथमाश्रमिणां धर्मान्वक्तुमुपक्रमते ॥ पुनर्विशेषमिति ॥ १ ॥ २ ॥ निषेकोगर्भाधानम् ॥ श्मशानमंत्येष्टिः ॥ ३ ॥ स्पंदनाद्गर्भस्थबालस्यचलनात्षष्ठान्मासादर्वाक्पुंसवनंगर्भस्यपुंस्त्वाधानंकर्म ॥ सीमंतो

उद्देशतःसमाख्यातोह्येषनित्यतमोविधिः ॥ इत्थंसमाचरन्विप्रोनावसीदतिकर्हिचित् ॥ २४३ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडेपूर्वार्द्धेसदाचारोनामपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ स्कंदउवाच ॥ ॥ पुनर्विशेषंवक्ष्यामिसदाचारस्यकुंभज ॥ यंश्रुत्वापिनरोधीमान्नाज्ञानतिमिरंविशेत् ॥ १ ॥ ब्राह्मणाःक्षत्रियावैश्यास्त्रयोवर्णाद्विजाःस्मृताः ॥ प्रथमंमातृतोजाताद्वितीयंचोपनायनात् ॥ २ ॥ एषांक्रियानिषेकादिश्मशानांताचवैदिकी ॥ आदधीतसुधीर्गर्भमृतौमूलंमघांत्यजेत् ॥ ३ ॥ स्पंदनात्प्राक्पुंसवनंसीमंतोन्नयनंततः ॥ मासिषष्ठेऽष्टमेवापिजातेथेजातकर्मच ॥ ४ ॥ नामाह्न्येकादशेगेहाच्चतुर्थेमासिनिष्क्रमः ॥ मासेन्नप्राशनंषष्ठेचूडाब्देवायथाकुलम् ॥ ५ ॥ शममेनोव्रजेदेवंबैजंगर्भजमेवच ॥ स्त्रीणामेताःक्रियास्तूष्णींपाणिग्राहस्तुमंत्रवान् ॥ ६ ॥ सप्तमेथाष्टमेवाब्देसावित्रींब्राह्मणोर्हति ॥ नृपस्त्वेकादशेवैश्योद्वादशेवायथाकुलम् ॥ ७ ॥ ब्रह्मतेजोभिवृद्ध्यर्थंविप्रोब्देपंचमेर्हति ॥ षष्ठेबलार्थीनृपतिर्मौंजींवैश्योष्टमेध्रियेत् ॥ ८ ॥ महाव्याहृतिपूर्वंचवेदमध्यापयेद्गुरुः ॥ उपनीयचतंशिष्यंशौचाचारेचयोजयेत् ॥ ९ ॥ पूर्वोक्तविधिनाशौचंकुर्यादाचमनंतथा ॥ दंतान्जिह्वांविशोध्याथकृत्वामलविशोधनम् ॥ १० ॥ स्नात्वांबुदैवतैर्मंत्रैःप्राणानायम्ययत्नतः ॥ उपस्थानंरवेःकृत्वासंध्ययोरुभयोरपि ॥ ११ ॥ अग्निकार्यंततःकृत्वाब्राह्मणानभिवादयेत् ॥ ब्रुवन्नमुकगोत्रोहमभिवादयइत्यपि ॥ १२ ॥ अभिवादनशीलस्यवृद्धसेवारतस्यच ॥ आयुर्यशोबलंबुद्धिर्वर्धतेऽहरहोधिकम् ॥ १३ ॥ अधीतेगुरुणाहूतःप्राप्तंतस्मैनिवेदयेत् ॥ कर्मणामनसावाचाहितंतस्याचरेत्सदा ॥ १४ ॥ अध्याप्याधर्मतोनार्थात्साध्वाप्तज्ञानवित्तदाः ॥ शक्ताःकृतज्ञाःशुचयोऽद्रोहकाश्चानसूयकाः ॥ १५ ॥ धारयेन्मेखलादंडोपवीताजिनमेवच ॥ अनिंद्येषुचरेद्भैक्ष्यंब्राह्मणेष्वात्मवृत्तये ॥ १६ ॥ ब्राह्मणक्षत्रियविशामादिमध्यावसानतः ॥ भैक्ष्यचर्याक्रमेणस्याद्भवच्छब्दोपलक्षिता ॥ १७ ॥

न्नयनंकर्मविशेषःषष्ठेऽष्टमइतिकुलाचारभेदेन ॥ ४ ॥ ५ ॥ एनःपापम् ॥ पाणिग्राहोविवाहः ॥ ६ ॥ ७ ॥ काम्योपनयनमाह ॥ ब्रह्मेति ॥ बलार्थीसामर्थ्यार्थी ॥ धनार्थीतिक्वचित् ॥ ध्रियेद्धारयेत्कृष्यादिवृत्त्यभिवृद्ध्यर्थमितिशेषः ॥ धियेइतिपाठेकृष्यादिवृत्तिविज्ञानायेत्यर्थः ॥ ८ ॥ शौचाचारेचेतिचकारःसमुच्चये ॥ योजयेन्नियोजयेत्प्रेरयेदितियावत् ॥ निमंत्रयेदितिपाठेपिसएवार्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ अनिंद्येषुअभिशप्तपतितवर्जितेषु ॥ ब्राह्मणेष्वितिसर्वेषांसाधारण्येन ॥ १६ ॥ विशेषमाह ॥ ब्राह्मणेति ॥ ब्राह्मणानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतिभिक्षांदेहीति क्षत्रियाणांभिक्षांभवतिदेहीति वैश्यानांभिक्षांदेहिभवतीतिक्रमेणेत्यर्थः ॥ १७ ॥ एकान्नमेकस्यान्नंनसमश्नीयात् ॥ आपदिपुनरेकान्नंश्राद्धेचाश्नीयादित्यन्वयः ॥ १८ ॥ ॥ १९ ॥ अग्निहोत्रविधानविदग्निहोत्रानुष्ठानज्ञः ॥ अग्निहोत्रविधानवानितिपाठेपिसएवार्थः ॥ २० ॥ भास्करालोकनवर्जनंतूदयादिपु ॥ तथाचमनुः ॥ नेक्षेतोद्यंतमादित्यमित्यादि ॥ पर्युषितंचोच्छिष्टंचेत्येकवद्भावः ॥ २१ ॥ उपनयनग्रहणसमयस्यमुख्यपक्षमुक्त्वागौणपक्षावधिमाह ॥ औपनायनिकइति ॥ २२ ॥ २३ ॥ एणरुर्वोरवांतरभेदः ॥ वस्तश्छागः ॥ २४ ॥ शाणंशणतंतुविनिर्मितम् ॥ क्षौमंदुकूलम् ॥ आविकंमेषरोमनिर्मितम् ॥ मौंजीमुंजसंबंधिनी ॥ मूरुस्तृणावांतरभेदोयेनधनुर्ज्याक्रियतेतत्संबंधिनीमौर्वी ॥ शणतांतवीशणतंतुनिर्मिता ॥ त्रिवृत्त्रिगुणा ॥

वाग्यतोगुर्वनुज्ञातोभुंजीतान्नमकुत्सयन् ॥ एकान्नंनसमश्नीयाच्छ्राद्धेऽश्नीयात्तथापदि ॥ १८ ॥ अनारोग्यमनायुष्यमस्वर्ग्यंचातिभोजनम् ॥ अपुण्यंलोकविद्विष्टंतस्मात्तत्परिवर्जयेत् ॥ १९ ॥ नाद्विर्भुंजीतचैकस्मिन्दिवाक्वापिद्विजोत्तमः ॥ सायंप्रातर्द्विजोऽश्नीयादग्निहोत्रविधानवित् ॥ २० ॥ मधुमांसंप्राणिहिंसांभास्करालोकनांजने ॥ स्त्रियंपर्युषितोच्छिष्टंपरिवादंविवर्जयेत् ॥ २१ ॥ औपनायनिकःकालोब्रह्मक्षत्रविशांपरः ॥ आषोडशाद्द्वाविंशादाचतुर्विंशदब्दतः ॥ २२ ॥ इतोप्यूर्ध्वंनसंस्कार्याःपतिताधर्मवर्जिताः ॥ व्रात्यस्तोमेनयज्ञेनतत्पातित्यंपरिव्रजेत् ॥ २३ ॥ सावित्रीपतितैःसार्धसंबंधंनसमाचरेत् ॥ ऐणंचरौरवंबास्तंक्रमाच्चर्मद्विजन्मनाम् ॥२४॥ वसीरन्नानुपूर्व्येणशाणक्षौमाविकानिच ॥ द्विजस्यमेखलामौंजीमौर्वीचभुजजन्मनः ॥ भवेत्त्रिवृत्समाश्लक्ष्णाविशस्तुशणतांतवी ॥ २५ ॥ मुंजाभावेविधातव्याकुशाश्मंतकबल्वजैः ॥ ग्रंथिनैकेनसंयुक्तात्रिभिःपंचभिरेववा ॥ २६ ॥ उपवीतंक्रमेणस्यात्कार्पासंशाणमाविकम् ॥ त्रिवृदूर्ध्ववृतंतच्चभवेदायुर्विवृद्धये ॥ २७ ॥ बिल्वपालाशयोर्दंडोब्राह्मणस्यनृपस्यतु ॥ न्यग्रोधबालदलयोःपीलूदुंबरयोर्विशः ॥ २८ ॥ आमौलिंवाऽऽललाटंवाऽऽनासमूर्ध्वप्रमाणतः ॥ ब्रह्मक्षत्रविशांदंडस्त्वगाढचोनाग्निदूषितः ॥ २९ ॥ प्रदक्षिणंपरीत्याग्निमुपस्थायदिवाकरम् ॥ दंडाजिनोपवीताढ्यश्चरेद्भैक्ष्यंयथोदितम् ॥ ३० ॥ मातृमातृष्वसृस्वसृपितृस्वसृपुरःसराः ॥ प्रथमंभिक्षणीयाःस्युरेतायाचननोवदेत् ॥ ३१ ॥

समासमगुणत्रयनिर्मिता ॥ श्लक्ष्णास्निग्धस्पर्शा ॥ अत्रत्रिवृत्समाश्लक्ष्णेतितिसृणांविशेषणंगम्यते ॥ मनौतुत्रिवृत्समाश्लक्ष्णेतिमौंज्याएवेति ॥ तथाचमनुः ॥ मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमेखला ॥ क्षत्रियस्यतुमौर्वीज्याविश्यस्यशणतांतवीति ॥ तत्रत्रैगुण्यंसाधारणमेव ॥ त्रिगुणप्रदक्षिणामेखलेतिसाधारण्येनप्रचेतसात्रैगुण्याभिधानात् ॥ २५ ॥ मुंजाभावइति ॥ मुंजाद्यभावइत्यर्थः ॥ विधातव्याइतिबहुवचनांतोवापाठः ॥ पंचभिर्वेतिवाशब्दप्रयोगान्नविप्रादिभिःक्रमेणसंबंधःकिंतुसर्वत्रयथाकुलाचारसंबंधः ॥ अश्मंतकःमालूयातृणम् ॥ बल्वजःबागयीतिप्रसिद्धः ॥ ॥ २६ ॥ ऊर्ध्ववृतंदक्षिणावर्त्तितम् ॥ २७ ॥ बालदलःखदिरः ॥ पीलुर्गुडफलः ॥ २८ ॥ २९ ॥ यथोदितंपूर्वोक्तप्रकारेणोक्तम् ॥ ३० ॥ ननोवदेन्नास्तीतिनब्रूयात् ॥ याचैनंनावमानये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दितिपाठेएनंब्रह्मचारिणंनावमानयेत्प्रत्याख्यानेन ॥ एनामितिपाठेएनांभिक्षाम् ॥ ३१ ॥ वेदव्रतानिगुरुशुश्रूषादीनि ॥ ऊर्ध्वंवेदपाठसमाप्त्यनंतरम् ॥ ३२ ॥ असौपूर्वोक्तः ॥ ३३ ॥ ॥ ३४ ॥ ३५ ॥ ३६ ॥ वेदश्चयज्ञश्चादिर्यस्यलिंगस्यचिह्नस्यतत्तथा ॥ वेदयष्ट्यादीतिपाठश्चित्यः ॥ ३७ ॥ उपलक्षणंचिह्नम् ॥ ३८ ॥ ३९ ॥ केशांतंसमावर्तनम् ॥ ४० ॥ एकामुख्या केवला ॥ ४१ ॥ ४२ ॥ ४३ ॥ बहिर्नदीतीरादौ ॥ ४४ ॥ अत्यब्दमिति ॥ इत्यनेनप्रकारेण ॥ अत्यब्दंकिंचिदधिकंसंवत्सरम् ॥ अत्यब्दमेतदितिक्वचित्पाठः ॥ प्रतिघस्रंप्रतिदिनम् ॥

यावद्वेदमधीतेचचरन्वेदव्रतानिच ॥ ब्रह्मचारीभवेत्तावदूर्ध्वंस्नातोगृहीभवेत् ॥ ३२ ॥ प्रोक्तोसावुपकुर्वाणोद्वितीयस्तत्रनैष्ठिकः ॥ तिष्ठेत्तावद्गुरुकुले यावत्स्यादायुषःक्षयः ॥ ३३ ॥ गृहाश्रमंसमाश्रित्ययःपुनर्ब्रह्मचर्यभाक् ॥ नासौयतिर्वनस्थोवास्यात्सर्वाश्रमवर्जितः ॥ ३४ ॥ अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजः ॥ आश्रमंतुविनातिष्ठन्प्रायश्चित्तीयतोहिसः ॥३५॥ जपंहोमंव्रतंदानंस्वाध्यायंपितृतर्पणम् ॥ कुर्वाणोथाश्रमभ्रष्टोनासौतत्फलमाप्नुयात् ॥ ॥ ३६॥ मेखलाजिनदंडाश्चलिंगंस्याद्ब्रह्मचारिणः ॥ गृहिणोवेदयज्ञादिनखलोमवनस्थितेः ॥ ३७ ॥ त्रिदंडादियतेरुक्तमुपलक्षणमत्रवै ॥ एतल्लक्षणहीनस्तुप्रायश्चित्तीदिनेदिने ॥ ३८ ॥ जीर्णंकमंडलुंदंडमुपवीताजिनेअपि ॥ अप्स्वेवतानिनिक्षिप्यगृह्णीतान्यच्चमंत्रवत् ॥ ३९ ॥ विदध्यात्षोडशेवर्षे केशांतंकर्मचक्रमात् ॥ द्वाविंशेचचतुर्विंशेगार्हस्थ्यप्रातिपत्तये ॥ ४० ॥ तपोयज्ञव्रतेभ्यश्चसर्वस्माच्छुभकर्मणः ॥ द्विजातीनांश्रुतिर्ह्येकाहेतुर्निःश्रेयसश्रियः ॥ ४१ ॥ वेदारंभेविसर्गेचविदध्यात्प्रणवंसदा ॥ अफलोऽनोंकृतोयस्मात्पठितोपिनसिद्धये ॥ ४२ ॥ वेदस्यवदनंप्रोक्तंगायत्रीत्रिपदापरा ॥ तिसृभिःप्रणवाद्याभिर्महाव्याहृतिभिःसह ॥ ४३ ॥ सहस्रंसाधिकंकिंचित्रिकमेतज्जपन्यमी ॥ मासंबहिःप्रतिदिनंमहाघादपिमुच्यते ॥ ४४ ॥ अत्यब्दमितियोभ्यस्येत्प्रतिघस्रमनन्यधीः ॥ सव्योममूर्तिःशुद्धात्मापरंब्रह्माधिगच्छति ॥ ४५ ॥ त्रिवर्णमयमोंकारंभूर्भुवःस्वरीतित्रयम् ॥ पादत्रयंचसावित्र्यास्त्रयोवेदाअदूदुहन् ॥ ४६ ॥ एतदक्षरमेनांचजपेद्व्याहृतिपूर्विकाम् ॥ संध्ययोर्वेदविद्विप्रोवेदपुण्येनयुज्यते ॥ ४७ ॥ विधिक्रतोर्दशगुणंजपस्यफलमश्नुते ॥ विधिक्रतोर्दशगुणोजपक्रतुरुदीरितः ॥ ४८ ॥ उपांशुस्तच्छतगुणःसहस्रोमानसस्ततः ॥ ४९ ॥ अधीत्यवेदान्वेदौवावेदंवाशक्तितोद्विजः ॥ सुवर्णपूर्णधरणीदानस्यफलमश्नुते ॥ ५० ॥ श्रुतिमेवसदाभ्यस्येत्तपस्तप्तुंद्विजोत्तमः ॥ श्रुत्यभ्यासोहिविप्रस्यपरमंतपउच्यते ॥ ५१ ॥ हित्वाश्रुतेरध्ययनंयोन्यत्पठितुमिच्छति ॥ सदोग्ध्रींधेनुमुत्सृज्यग्रामक्रोडींदुधुक्षति ॥ ५२ ॥

व्योममूर्तिः शुद्धशरीरःपरिपूर्णरूपोवा ॥ ४५ ॥ ४६ ॥ ४७ ॥ विधिक्रतोरिति ॥ विधिनानुष्ठितःक्रतुर्विधिक्रतुर्दर्शपौर्णमासादिस्तस्यदशगुणंफलंप्रणवादीनांजपस्ययत्तदश्नुतेप्राप्नोतीत्यर्थः ॥ तत्रहेतुमाह ॥ विधीति ॥ ४८ ॥ ततउपांशुजपक्रतोः ॥ उपांशुरस्पष्टः ॥ स्मृतइतिक्वचित् ॥ ४९ ॥ ५० ॥ तपस्तप्तुंतपःकर्त्तुम् ॥ तपस्तप्यन्नितिक्वचित् ॥ ५१ ॥ ग्रामक्रोडींग्रामसूकरीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुधुक्षतिदोग्धुमिच्छति ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ आहवनीयाद्यग्न्युत्पादकंकर्मअग्न्याधेयम् ॥ पाकयज्ञान्पक्कनवसस्यनिमित्तान्अष्टकादीन्वा ॥ ५६ ॥ ५७ ॥ ५८ ॥ कृत्तिमय श्चर्ममयः ॥ ५९ ॥ द्विजोविप्रादिः ॥ विप्रइतिपाठेविप्रइतिक्षत्रियवैश्ययोरुपलक्षणम् ॥ पुनर्मामित्यृचमिति ॥ पुनर्मामैत्विंद्रियमित्येतामृचंवारत्रयंजपेत् ॥ ६० ॥ वेश्मसुगृहस्थाश्रमेषु ॥ ६१ ॥ अवकीर्णिव्रतंप्रायश्चित्तम् ॥ ६२ ॥ अविशेषणंविशेषणरहितंकेवलमित्यर्थः ॥ ६३ ॥ ६४ ॥ परिभोक्ताअग्रतोभोक्ता ॥ ६५ ॥ ज्ञातृणाज्ञात्रा ॥ ज्ञानिनेतिक्कचित् ॥ जानतेतिचान्यत्र ॥ पक्षत्रये

उपनीयचवैशिष्यंवेदमध्यापयेद्द्विजः ॥ सकल्पंसरहस्यंचतमाचार्यंविदुर्बुधाः ॥ ५३ ॥ योध्यापयेदेकदेशंश्रुतेरंगान्यथापिवा ॥ वृत्त्यर्थंसउपाध्यायो विद्वद्भिःपरिगीयते ॥ ५४ ॥ यथाविधिनिषेकादियःकर्मकुरुतेद्विजः ॥ संभावयेत्तथान्नेनगुरुःसइहकीर्त्यते ॥ ५५ ॥ अग्न्याधेयंपाकयज्ञानग्निष्टोमादि कान्मखान् ॥ यःकरोतिवृतोयस्यसतस्यर्त्त्विगिहोच्यते ॥ ५६ ॥ उपाध्यायाद्दशाचार्यआचार्यात्तुशतंपिता ॥ सहस्रंतुपितुर्मातागौरवेणातिरिच्यते ॥ ५७ ॥ विप्राणांज्ञानतोज्यैष्ठ्यंबाहुजानांतुवीर्यतः ॥ वैश्यानांधान्यधनतःपज्जातानांतुजन्मतः ॥ ५८ ॥ यथादारुमयोहस्तीयथाकृत्तिमयोमृगः ॥ तथाविप्रोऽनधीयानस्त्रयोऽमीनामधारिणः ॥ ५९ ॥ स्वप्नेसिक्त्वाब्रह्मचारीद्विजःशुक्रमकामतः ॥ स्नात्वार्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेत् ॥ ६० ॥ स्वधर्मनिरतानांचवेदयज्ञक्रियावताम् ॥ ब्रह्मचारीचरेद्भैक्ष्यंवेश्मसुप्रयतोऽन्वहम् ॥ ६१ ॥ अकृत्वाभैक्ष्यचरणमसमिध्यहुताशनम् ॥ अनातुरःसप्तरात्र मवकीर्णिव्रतंचरेत् ॥ ६२ ॥ यथेष्टचेष्टोनभवेद्गुरोर्नयनगोचरे ॥ ननामपरिगृह्णीयात्परोक्षेप्यविशेषणम् ॥ ६३ ॥ गुरुनिंदाभवेद्यत्रपरिवादस्तुयत्रच ॥ श्रुतीपिधायवास्थेयंयातव्यंवाततोन्यतः ॥ ६४ ॥ खरोगुरोःपरीवादाच्छ्वाभवेद्गुरुनिंदकः ॥ मत्सरीक्षुद्रकीटःस्यात्परिभोक्ताभवेत्कृमिः ॥ ६५ ॥ नाभिवाद्यागुरोःपत्नीस्पृष्ट्वांघ्रीयुवतीसती ॥ कापिविंशतिवर्षेणज्ञातृणागुणदोषयोः ॥ ६६ ॥ स्वभावश्चंचलःस्त्रीणांदोषःपुंसामतःस्मृतः ॥ प्रमदासुप्रमाद्यं तिकश्चिन्नैवविपाश्चितः ॥ ६७ ॥ विद्वांसमप्यविद्वांसंयतस्ताधर्षयंत्यलम् ॥ स्ववशंवापिकुर्वंतिसूत्रबद्धशकुंतवत् ॥ ६८ ॥ नमात्रानदुहित्रावानस्वस्त्रैकां तशीलता ॥ बलवंतींद्रियाण्यत्रमोहयंत्यपिकोविदान् ॥ ६९ ॥ प्रयत्नेनखनन्यद्वद्भूमेर्वार्यधिगच्छति ॥ शुश्रूषयागुरोस्तद्वद्विद्यांशिष्योधिगच्छति॥७०॥ शयानमभ्युदयतेप्रभ्रश्चेद्ब्रह्मचारिणम् ॥ प्रमादादथनिम्लोचेज्जपन्नुपवसेद्दिनम् ॥ ७१ ॥ सुतस्यसंभवेक्लेशंसहेतेपितरौचयत् ॥ शक्यावर्षशतेनापिनो कर्तुंतस्यनिष्कृतिः ॥ ७२ ॥ अतस्तयोःप्रियंकुर्याद्गुरोरपिचसर्वदा ॥ त्रिषुतेषुसुतुष्टेषुतपःसर्वंसमाप्यते ॥ ७३ ॥ तेषांत्रयाणांशुश्रूषापरमंतपउच्यते ॥ तानतिक्रम्ययःकुर्यात्तन्नसिद्ध्येत्कदाचन ॥ ७४ ॥

पिशुणदोषयोरितिकर्मणिषष्ठी ॥ ६६ ॥ अतश्चंचलस्वभावात् ॥ प्रमाद्यंतिविश्वासयंतीत्यर्थः ॥ ६७ ॥ विश्वासागमनेहेतुर्विद्वांसमिति ॥ धर्षयंतिक्षोभयंति ॥ अलंसर्वप्रकारेण ॥ तदेवाह ॥ स्ववश मिति ॥ ६८ ॥ एकांतशीलताएकत्रास्थितिर्नकर्तव्येतिशेषः ॥ ६९ ॥ ७० ॥ जपन्गायत्रीमितिशेषः ॥ ७१ ॥ ७२ ॥ ७३ ॥ तान्पित्रादीन् ॥ तानीतिपाठेतेषांशुश्रूषादीनीत्यर्थः ॥ ७४ ॥

CC-0. In Public Domain. Digitization by eGangotri

सुधीर्धार्मिकः ॥ सदेतिपाठेसदासमाराध्येतिसंबंधः ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ऋच्छतिप्राप्नोति ॥ ८० ॥ ८१ ॥ ८२ ॥ ततआनुकूल्यात्तदेतिवा ॥ एवमग्रेपि ॥ ८३ ॥ साचेति ॥ साचभार्यायाविनीतातथाचसतित्रिवर्गोविनयश्चध्रुवंस्यादित्यर्थः ॥ विनीताचेदितिक्वचित्पाठः ॥ त्रिवर्गस्तत्रवैइतिक्वचित् ॥ त्रिवर्गंविनयेदितिचान्यत्र ॥ तत्रविनयेद्विशेषेणप्रापयेदित्यर्थः

त्रीनेवामून्समाराध्यत्रीँल्लोकान्सजयेत्सुधीः ॥ देववद्दिविदीव्येततेषांतोषंविवर्धयन् ॥ ७५ ॥ भूर्लोकंजननीभक्त्याभुवर्लोकंतथापितुः ॥ गुरोःशुश्रूषणा त्तद्वत्स्वर्लोकंचजयेत्कृती ॥ ७६ ॥ एतदेवनृणांप्रोक्तंपुरुषार्थचतुष्टयम् ॥ यदेतेषांहिसंतोषउपधर्मोन्यउच्यते ॥ ७७ ॥ अधीत्यवेदान्वेदौवावेदंवापि क्रमाद्द्विजः ॥ अप्रस्खलद्ब्रह्मचर्योगृहाश्रममथाश्रयेत् ॥ ७८ ॥ अविप्लुतब्रह्मचर्योविश्वेशानुग्रहाद्भवेत् ॥ अनुग्रहश्चवैश्वेशःकाशीप्रातिकरःपरः ॥ ७९ ॥ काशीप्राप्त्याभवेज्ज्ञानंज्ञानान्निर्वाणमृच्छति ॥ निर्वाणार्थंप्रयत्नोहिसदाचारस्यधीमताम् ॥ ८० ॥ सदाचारोगृहेयद्वन्नतथास्त्याश्रमांतरे ॥ विद्याजातंप ठित्वांतेगृहस्थाश्रममाश्रयेत् ॥ ८१ ॥ गृहाश्रमात्परंनास्तियदिपत्नीवशंवदा ॥ आनुकूल्यंहिदंपत्योस्त्रिवर्गोदयहेतवे ॥ ८२ ॥ आनुकूल्यंकलत्रंचेत्त्रिदि वेनापिकिंततः ॥ प्रातिकूल्यंकलत्रंचेन्नरकेणापिकिंततः ॥ ८३ ॥ गृहाश्रमःसुखार्थायभार्यामूलंचतत्सुखम् ॥ साचभार्याविनीतायात्रिवर्गोविनयोध्रुवम् ॥ ८४ ॥ जलौकयोपमीयंतेप्रमदामंदबुद्धिभिः ॥ मृगीदृशांजलौकानांविचारान्महदंतरम् ॥ ८५ ॥ जलौकाकेवलंरक्तमाददानातपस्विनी ॥ प्रमदासर्वं दादत्तेचित्तंवित्तंबलंसुखम् ॥ ८६ ॥ दक्षाप्रजावतीसाध्वीप्रियवाक्चवशंवदा ॥ गुणैरमीभिःसंयुक्तासाश्रीःस्त्रीरूपधारिणी ॥ ८७ ॥ गुरोरनुज्ञयास्नात्वाव्रतं वेदंसमाप्यच ॥ उद्वहेतततोभार्यांसवर्णांसाधुलक्षणाम् ॥ ८८ ॥ जनेतुरसगोत्रायामातुर्याप्यसपिंडका ॥ दारकर्मणियोग्यासाद्विजानांधर्मवृद्धये ॥८९॥ स्त्रीसंबंधेप्यपस्मारिक्षयिश्वित्रिकुलंत्यजेत् ॥ अभिशस्तिसमायुक्तंतथाकन्याप्रसूंत्यजेत् ॥९०॥ रोगहीनांभ्रातृमतींस्वस्मात्किंचिल्लघीयसीम् ॥ उद्वहेत द्विजोभार्यांसौम्यास्यांमृदुभाषिणीम् ॥९१॥ नपर्वतर्क्षवृक्षाह्वांननदीसर्पनामिकाम् ॥ नपक्ष्यहिप्रेष्यनाम्नींसौम्याख्यामुद्वहेत्सुधीः ॥९२॥ नचातिरिक्तहीनांगींनातिदीर्घांनवाकृशाम् ॥ नालोमिकांनातिलोमांनास्निग्धस्थूलमौलिजाम् ॥ ९३ ॥ मोहात्समुपयच्छेतकुलहीनांनकन्यकाम् ॥ हीनोपयमनाद्या तिसंतानमपिहीनताम् ॥९४॥ लक्षणानिपरीक्ष्यादौततःकन्यांसमुद्वहेत् ॥ सुलक्षणासदाचारापत्युरायुर्विवर्धयेत् ॥९५॥ ब्रह्मचारिसमाचारइतितेसमुदी रितः ॥ घटोद्भवप्रसंगेनस्त्रीलक्षणमथब्रुवे॥९६॥इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेषट्त्रिंशत्तमोऽध्यायः ॥३६॥

॥ ८४ ॥ ८५ ॥ तपस्विनीसंतप्ताऽऽहाराभावेनजलवासाद्वा ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ पर्वतश्चऋक्षंचनक्षत्रंचऋक्षश्चभल्लूकइतिवा वृक्षश्चतदाह्वांतदाख्यामित्यर्थः ॥ सर्पाह्यो र्निष्फणसफणत्वेनावांतरभेदस्तत्राहयोनागाः ॥ प्रेष्यनाम्नींदास्यसूचकनाम्नीम् ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ इतिश्रीकाशीखंडटीकायांषट्त्रिंशत्तमोध्यायः ॥ ३६ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशत्तमेथसप्तोर्ध्वेऽध्यायेतीवमनोरमे ॥ लक्षणंवर्ण्यतेस्त्रीणांमृगीदृग्भिर्हृतात्मनाम् ॥ १ ॥ ननुनिवृत्तिमार्गंविहायकिमित्यतिवीभत्सितंब्रह्मज्ञानप्रतिकूलंस्त्रीयोन्यादिवर्णनंनिरूप्यतेभगवताव्यासेन ॥ तथाचोक्तंभाष्यकारेण ॥ स्त्रीपिंडसंपर्ककलुषितचेतसोब्रह्मनजानंतीति ॥ सत्यम् ॥ किंतुगुडजिह्विकान्यायेनवहिर्मुखानांविश्वेश्वरकथायांप्रवृत्त्यर्थमितिब्रूमः ॥ तथाचभागवतेमैत्रेयंप्रतिविदुरवचनम् ॥ मुनिर्विवक्षुर्भगवद्गुणानांसखापितेभारतमाहकृष्णः॥यस्मिन्नृणांग्राम्यसुखानुवादैर्मतिर्गृहीतातुहरेःकथायामिति॥अपिरत्रभिन्नक्रमेभारतमपीत्यनेनसंवध्यमानःपुराणानिसमुच्चिनोति ॥ हरेरित्यर्थपरोनिर्देशः ॥ पूर्वाध्यायांतेस्त्रीलक्षणमथब्रुवइत्युक्तमतस्तदेवसहेतुकमनुक्रामति ॥ सदागृहीति ॥ १ ॥ तत्रप्रथमंलक्षणाधिकरणंनिर्दिशति ॥ वपुरिति ॥ वपुर्ह्रस्वाद्यवयवरहितम् ॥ आवर्तःपाणिनाभ्यादौरोम्णांदक्षिणावर्तः ॥ छायाकांतिः ॥ सत्त्वमंतःकरणंपरपुरुषोपस्थितौमनोनिवारणकारणंगुणविशेषोवा ॥ वर्णोगौरादिः ॥ अष्टधाऽष्टप्रकारालक्षणभूमिकालक्षणस्थानम् ॥ २ ॥ वपुषोलक्षणंवक्तुंप्रतिजानीते ॥ आपादेति ॥ यावन्मौलिरुहंयावत्केशंम् ॥ ३ ॥ शरीरस्यप्रत्यंगंलक्षणंवक्तुमंगानिकथयाति आदावितिषड्भिः ॥ योषिदेवंभूतेतिषष्ठेनान्वयः ॥ कथंभूताषडुत्तरापष्टिःपडधिकषष्टयवयवयुक्तेत्यर्थः ॥ कासेत्यतआह ॥ अंगलक्षणसत्वनिःशुभाशुभांगलक्षणसत्स्थानंसमीचीनाभूमिरित्यर्थः ॥ यद्वा षष्टिरेवविशेष्याषडधिकषष्टयवयवेत्यर्थः ॥ कासेत्यतआहांगलक्षणसत्वनिरिति ॥ तान्येवषडधिकानिषष्टयंगानिलक्षणस्थानानिदर्शयाति पादतलमित्यादिना ॥ पादश्चतलंचेतिपादतलमित्येकवद्भावः ॥ पादतलेइतिपाठेद्विवचनम् ॥ रेखादिपंचकंपादस्यैव ॥ अंगुष्ठश्चांगुलीचनखश्चेतितेतथा ॥ गुल्फद्वयंपादग्रंथिद्वयम् ॥ पार्ष्णीप्रायोगुल्फयोरधःपादयोःपश्चाद्भागौ ॥ जंघेप्रसृतेजानुनोरधोभागौ ॥ जानुनीऊरूपर्वाणौआवुइतिख्यातावि

स्कंदउवाच ॥ ॥ सदागृहीसुखंभुंक्तेस्त्रीलक्षणवतीयदि ॥ अतःसुखसमृद्ध्यर्थमादौलक्षणमीक्षयेत् ॥ १ ॥ वपुरावर्तगंधाश्चच्छायासत्वंस्वरोगतिः ॥ वर्णश्चेत्यष्टधाप्रोक्तावुधैर्लक्षणभूमिका ॥ २ ॥ आपादतलमारभ्ययावन्मौलिरुहंक्रमात् ॥ शुभाशुभानिवक्ष्यामिलक्षणानिमुनेशृणु ॥ ३ ॥ आदौपादतलंरेखास्ततोंगुष्ठांगुलीनखाः ॥ पृष्ठंगुल्फद्वयंपार्ष्णीजंघेरोमाणिजानुनी ॥ ४ ॥ ऊरूकटीनितंबस्फिग्भगोजघनबस्तिके ॥ नाभिःकुक्षिद्वयंपार्श्वोदरमध्यवलित्रयम् ॥ ५ ॥ रोमालीहृदयंवक्षोवक्षोजद्वयचूचुकम् ॥ जत्रुस्कंधांसकक्षादोर्मणिबंधकरद्वयम् ॥ ६ ॥

त्यर्थः ॥ तद्ग्रंथीघुटिकेगुल्फौपुमान्पार्ष्णिस्तयोरधः ॥ जंघातुप्रसृताजानूरुपर्वाष्ठीवदस्त्रियामित्यमरः ॥ ४ ॥ ऊरूसक्थिनीजानुनोरुपरिभागौ ॥ कटीउन्नतमांसखंडेश्रोण्याविितियावत् ॥ नितंबौचस्त्रीकटयोःपश्चाद्भागौकटिःश्रोणिःककुद्मती ॥ पश्चान्नितंवःस्त्रीकट्याइत्यमरः ॥ स्फिचौकटिप्रोथौ ॥ स्त्रियांस्फिचौकटिप्रोथावित्यमरः ॥ नितंवश्चस्फिक्चेतिसमाहारत्वादेकवद्भावः ॥ भगोभगंयोनिरित्यर्थः ॥ भगंयोनिर्द्वयोरित्यमरः ॥ नितंवस्फिग्भगाइतिक्वचित्पाठः ॥ जघनंस्त्रीकट्याःपुरोभागः ॥ स्त्रीकट्याःक्लीवेतुजघनंपुरइत्यमरः ॥ वस्तिर्नाभेरधोभागः ॥ वस्तिर्नाभेरधोद्वयोरित्यमरः ॥ जघनंचवस्तिश्चतेतथा ॥ नाभिःप्रसिद्धा ॥ कुक्षिद्वयंजठरद्वयम् ॥ पिचंडकुक्षीजठरोदरंतुंदमित्यमरः ॥ पार्श्वंचवाहुमूलस्याधोभागः ॥ पार्श्वमस्त्रीतयोरधइत्यमरः ॥ उदरंच ॥ यद्यपिकुक्ष्युदरयोःपर्यायत्वंतथापिमध्यप्रदेशउदरंतदुभयपार्श्वप्रदेशःकुक्षिरितिज्ञातव्यम् ॥ अतएवकुक्षिद्वयमितिद्वयपदंप्रागुक्तम् ॥ मध्यंचमध्यमम् ॥ मध्यमंचावलग्नंचमध्योस्त्रीद्वौपरौद्वयोरित्यमरः ॥ वलित्रयंच ॥ त्रयपदंशुभलक्षणाभिप्रायेणनोद्देशमात्रापेक्षया ॥ समाहारत्वादेकवद्भावः ॥ ५ ॥ रोमालीरोमपंक्तिः ॥ हृदयंहृदाधारउदरादूर्ध्वप्रदेशः ॥ वक्षउरः ॥ उरोवत्सचवक्षश्चेत्यमरः ॥ वक्षोजद्वयंस्तनद्वयम् ॥ चूचुकंकुचाग्रम् ॥ चूचुकंतुकुचाग्रंस्यादित्यमरः ॥ वक्षोजद्वयंचूचुकंचेत्येकवद्भावः ॥ जत्रुस्कन्धस्यसन्धिः ॥ संधीतस्यैवजत्रुणीत्यमरः ॥ स्कन्धश्चभुजशिरः ॥ स्कन्धोभुजशिरोंसोऽस्त्रीत्यमरः ॥ अंसश्चतस्यैवोपरिभागइत्यवांतरभेदान्नपौनरुक्त्यम् ॥ कक्षश्चवाहुमूलम् ॥ वाहुमूलेउभेकक्षावित्यमरः ॥ तेतथा ॥ दोर्हस्तः ॥ भुजवाहू

CC-0. In Public Domain. Digitization by eGangotri

मवेष्ठोदोरित्यमरः ॥ मणिवंधकरद्वयंतत्पर्यन्तहस्तद्वयमित्यर्थः ॥ ६ ॥ पृष्ठिःपृष्ठम् ॥ कृकाटिकाचअवटुःपृष्ठवंशस्योपरिभागोघाटइतिगौडेप्रसिद्धः ॥ अवटुर्घाटाकृकाटिकेत्यमरः ॥ कंठश्वगलः ॥ कंठोगलइत्यमरः ॥ तेतथा ॥ क्लीवत्वमार्षम् ॥ कृकाटिकाकंठइतिपाठेपृथक्पदम् ॥ चिबुकमधरस्याधोभागः ॥ अधस्ताच्चिबुकमित्यमरः ॥ हनुःकपोलयाःपरभागः ॥ तत्पराहनुरित्यमरः ॥ ७ ॥ कपोलौगण्डौ ॥ गण्डौकपोलावित्यमरः ॥ अधरश्चउत्तरोष्ठश्चअधरोत्तरोष्ठौरदनच्छदौ ॥ उत्तरपदंतुस्पष्टार्थम् ॥ यद्वा अधरोत्तरौचयावोष्ठौ ॥ ओष्ठाधरौतुरदनच्छदौदशनवाससीइत्यमरः ॥ द्विजादंताश्वजिह्विकाचजिह्वातास्तथा ॥ घण्टिकाजिह्वायाअधोभागः ॥ तालुकाकुदंजिह्वातउपरिप्रदेशः ॥ तालुतुकाकुदमित्यमरः ॥ हसितंहास्यम् ॥ क्षुतंक्षुत ॥ स्त्रीक्षुत्क्षुतंक्षवःपुंसीत्यमरः ॥ ८ ॥ पक्ष्मनेत्ररक्षकम् ॥ भ्रूर्दृशउपरिवर्तमानावयवविशेषः ॥ ऊर्ध्वंदृग्भ्यांभ्रुवौस्त्रियामित्यमरः ॥ कर्णौचभालंचललाटंतानितथा ॥ मौलिश्वशिरःसीमन्तश्चसिंदूराधारकेशवेशविस्तारविशेषः ॥ मौलिजाश्वकेशास्तेतथा ॥९॥ तन्त्रेणपादतलयोःशुभाशुभेलक्षणेआह स्त्रीणामितिद्वयेन ॥ मांसलंमांसयुक्तंमांसैःसुललितमित्यर्थः ॥ १० ॥ खण्डितप्रतिबिंबकंवालुकादावजाताचिह्नम्॥

पाणिपृष्ठंपाणितलंरेखांगुष्ठांगुलीनखाः ॥ पृष्ठिःकृकाटिकाकंठेचिबुकंचहनुद्वयम् ॥ ७ ॥ कपोलौवक्रमधरोत्तरोष्ठौद्विजजिह्विकाः ॥ घंटिकातालुहसितं नासिकाक्षुतमक्षिणी ॥ ८ ॥ पक्ष्मभ्रूकर्णभालानिमौलिसीमंतमौलिजाः ॥ षष्टिःषड्डुत्तरायोषिदंगलक्षणसत्खनिः ॥ ९ ॥ स्त्रीणांपादतलंस्निग्धंमांसलंमृदुलंसमम् ॥ अस्वेदमुष्णमरुणंबहुभोगोचितंस्मृतम् ॥ १० ॥ रूक्षंविवर्णंपरुषंखंडितप्रतिबिंबकम् ॥ शूर्पाकारंविशुष्कंचदुःखदौर्भाग्यसूचकम् ॥ ११ ॥ चक्रस्वस्तिकशंखाब्जध्वजमीनातपत्रवत् ॥ यस्याःपादतलेरेखासाभवेत्क्षितिपांगना ॥ १२ ॥ भवेदखंडभोगायोर्द्ध्वामध्यांगुलिसंगता ॥ रेखाखुसर्पकाकाभादुःखदारिद्र्यसूचिका ॥ १३ ॥ उन्नतोमांसलोंगुष्ठोवर्तुलोतुलभोगदः ॥ वक्रोह्रस्वश्चचिपिटःसुखसौभाग्यभंजकः ॥ १४ ॥ विधवाविपुलेनस्याद्दीर्घांगुष्ठेनदुर्भगा ॥ मृदवोंगुलयःशस्ताघनावृत्ताःसमुन्नताः ॥१५॥ दीर्घांगुलीभिःकुलटाकृशाभिरतिनिर्धना ॥ ह्रस्वायुष्याचह्रस्वाभिर्भुग्नाभिर्भुग्नवर्तिनी ॥ १६ ॥ चिपिटाभिर्भवेद्दासीविरलाभिर्दरिद्रिणी ॥ परस्परंसमारूढाःपादांगुल्योभवंतिहि ॥ १७ ॥ हत्वाबहूनपिपतीन्परप्रेष्यातदाभवेत् ॥ यस्याःपथिसमायांत्याःरजोभूमेःसमुच्छलेत् ॥ १८ ॥ सापांसुलाप्रजायेतकुलत्रयविनाशिनी ॥ यस्याःकनिष्ठिकाभूमिंनगच्छंत्याःपरिस्पृशेत् ॥ १९ ॥ सानिहत्यपतिंयोषाद्वितीयंकुरुतेपतिम् ॥ अनामिकाचमध्याचयस्याभूमिंनसंस्पृशेत् ॥ २० ॥ पतिद्वयंनिहंत्याद्याद्वितीयाचपतित्रयम् ॥ पतिहीनत्वकारिण्यौहीनेतेद्वेइमेयदि ॥ २१ ॥ प्रदेशिनीभवेद्यस्याअंगुष्ठाव्यतिरेकिणी ॥ कन्यैवकुलटासास्यादेषएवविनिश्चयः ॥ २२ ॥

एवंशुभाशुभलक्षणद्वयमुक्तम् ॥११॥ पादतलेरेखायाःशुभाशुभेलक्षणेआह चक्रेतिद्वाभ्याम् ॥ स्वस्तिकंत्रिकोणरेखाविशेषः ॥ क्षितिपांगनाराजपत्नी ॥ तदुक्तंसामुद्रिके ॥ यस्याःपाणितलेपद्मंपादेचैवविशेषतः॥चामरंशंखचक्रंचसापिराज्ञीभविष्यतीति ॥१२॥ ऊर्ध्वाऊर्ध्वगामिनी ॥ आखुर्मूषकश्चसर्पश्चकाकश्चतेषामाभाआकारोयस्याःसारेखादुःखदारिद्र्यसूचिकेत्यन्वयः ॥ नख्यहीतिपाठेनखीजंतुविशेषः ॥ १३ ॥ पादांगुष्ठस्यशुभेलक्षणेआह उन्नतइतिसार्धेन॥चिपिटःचिपिटकाकारः ॥ चेमढइतिलोकेप्रसिद्धइत्यर्थः ॥१४॥ अंगुलीनांशुभाशुभेलक्षणेआह मृदवइतिसार्द्धैरष्टभिः ॥ १५ ॥ भुग्नाभिःकुटिलाभिः ॥ भुग्नवर्तिनीकुटिलव्यवहारवर्तिनी ॥ १६ ॥ १७ ॥ परप्रेष्यापराधीना॥समुच्छलेदूर्ध्वंगच्छेत् ॥ १८ ॥ पांसुलाव्यभिचारिणी ॥ नपरिस्पृशेदित्यन्वयः ॥ १९ ॥ २० ॥ आद्याऽनामिकाऽस्पृष्टभूमिका ॥ द्वितीयामध्यमाऽस्पृष्टभूमिका ॥ तेअनामिकामध्येहीनेरहितेन्यूनेवा ॥ २१ ॥ अंगुष्ठाव्यतिरेकिणीअंगुष्ठेनसंबद्धा ॥ अंगुष्ठव्यतिरेकिणीतिपाठे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंगुष्ठेनात्यंतभिन्नाविरला ॥ अंगुष्ठादतिरेकिणीतिपाठेऽंगुष्ठादपिदीर्घेत्यर्थः ॥ कन्यैवाऽविवाहितैव ॥ कुलटापुंश्चली ॥ २२ ॥ पादनखानांशुभलक्षणमाह ॥ स्निग्धाइति ॥
एतद्विपरीताअशुभाइत्यर्थः ॥ एतदुक्तंभवति ॥ एवमन्यत्रापियत्रयत्राशुभलक्षणंनोक्तंतत्रतत्रार्थाज्ज्ञातव्यम् ॥ २३ ॥ पादपृष्ठस्यशुभाशुभलक्षणेआह राज्ञीत्वेतिद्वयेन ॥ २४ ॥
॥ २५ ॥ पादग्रंथ्यपरपर्यायस्यगुल्फस्यशुभाशुभलक्षणेआह गूढावित्येकेन ॥ स्थपुटौनिम्नौ ॥ सुपुष्टावितिपाठेस्थूलावित्यर्थः ॥ दृश्यौप्राकृतौकुत्सितावितियावत् ॥ यद्वा दृशौनेत्रेपश्यतस्तनूकुरुत
इतिदृश्यौनेत्रयोर्व्रीडाजनकावित्यर्थः ॥ २६ ॥ पादपश्चाद्भागस्यपार्ष्णेःशुभाशुभेलक्षणेआह समपार्ष्णिरित्येकेन ॥ २७ ॥ जानुगुल्फमध्यमभागस्यजंघाख्यस्यशुभलक्षणमाह ॥ रोमहीन
इति ॥ यस्याःजंघेरोमहीनेभवतःसाराजपत्नीभवतीतिसंबंधः ॥ क्रमवर्तुलेअधोभागमारभ्योपर्युपरिकिंचित्किंचिदधिकस्थूलेइत्यर्थः ॥ समवर्तुलेइतिपाठेसमेउच्चनीचरहितेचतेवर्तुलेचेतितथा ॥

स्निग्धाःसमुन्नतास्ताम्रावृत्ताःपादनखाःशुभाः ॥ २३ ॥ राज्ञीत्वसूचकंस्त्रीणांपादपृष्ठंसमुन्नतम् ॥ अस्वेदमशिराढ्यंचमसृणंमृदुमांसलम् ॥ २४ ॥ दरिद्रामध्यनम्रेणशिरालेनसदाध्वगा ॥ रोमाढ्येनभवेद्दासीनिर्मांसेनचदुर्भगा ॥ २५ ॥ गूढौगुल्फौशिवायोक्तावशिरालौसुवर्तुलौ ॥ स्थपुटौशिथिलौ दृश्यौस्यातांदौर्भाग्यसूचकौ ॥ २६ ॥ समपार्ष्णिःशुभानारीपृथुपार्ष्णिश्चदुर्भगा ॥ कुलटोन्नतपार्ष्णिस्याद्दीर्घपार्ष्णिश्चदुःखभाक् ॥ २७ ॥ रोमहीने समेस्निग्धेयज्जंघेक्रमवर्तुले ॥ साराजपत्नीभवतिविशिरेसुमनोहरे ॥ २८ ॥ एकरोमाराजपत्नीद्विरोमाचसुखावहा ॥ त्रिरोमारोमकूपेषुभवेद्वैधव्यदुःखभाक् ॥ २९ ॥ वृत्तंपिशितसंलग्नंजानुयुग्मंप्रशस्यते ॥ निर्मांसंस्वैरचारिण्यादरिद्रायाश्चविश्लथम् ॥ ३० ॥ विशिरैःकरभाकारैरूरुभिर्मसृणैर्घनैः ॥ सुवृत्तैरोमरहितैर्भवेयुर्भूपवल्लभाः ॥ ३१ ॥ वैधव्यंरोमशैरुक्तंदौर्भाग्यंचिपिटैरपि ॥ मध्यच्छिद्रैर्महादुःखंदारिद्र्यंकठिनत्वचैः ॥ ३२ ॥ चतुर्भिरंगुलैःशस्ताकटिर्विंशतिसंयुतैः ॥ समुन्नतनितंबाढ्याचतुरस्रामृगीदृशाम् ॥ ३३ ॥ विनताचिपिटादीर्घानिर्मांसासंकटाकटिः ॥ ह्रस्वारोमयुतानार्यादुःखवैधव्यसूचिका ॥ ३४ ॥ नितंबबिंबोनारीणामुन्नतोमांसलःपृथुः ॥ महाभोगायसंप्रोक्तस्तदन्योऽशर्मणेमतः ॥ ३५ ॥ कपित्थफलवद्वृत्तौमृदुलौमांसलौ घनौ ॥ स्फिचौवलिविनिर्मुक्तौरतिसौख्यविवर्धनौ ॥ ३६ ॥

अर्थादेतद्विपरीतमशुभलक्षणमित्युक्तमेव ॥ २८ ॥ कूपोत्थस्यरोम्णःशुभाशुभेलक्षणेआह एकरोमेत्येकेन ॥ रोमकूपेष्वितित्रिष्वपिसंबध्यते ॥ २९ ॥ जानुनःशुभाशुभेलक्षणेआह
वृत्तमित्येकेन ॥ वृत्तंवर्तुलम् ॥ पिशितसंलग्नंमांसपिंडितम् ॥ विश्लथमदृढम् ॥ ३० ॥ अवयवाः १२ ॥ ऊरोःशुभाशुभेलक्षणेआह विशिरैरितिद्वयेन ॥ करभाकारैर्मणिबंधादाकनिष्ठाद्धस्तस्य
बहिर्भागसदृशैर्हस्तिशुंडाकारैरितिवा ॥ मसृणैश्चिक्कणैः ॥ घनैर्निबिडैः ॥ सुवृत्तैःसुवर्तुलैः ॥ ३१ ॥ चिपिटैर्निम्नैः ॥ मध्यच्छिद्रैर्मध्येशिरालैः मध्येछिद्राणिनिम्नस्थानानियेषांतैरितिवा ॥
॥ ३२ ॥ कट्याःशुभाशुभेलक्षणेआह चतुर्भिरितिद्वयेन चतुरस्राचतुःकोणाआयतेत्यर्थः ॥ ३३ ॥ विनतानम्रा ॥ संकटासम्यककठिनासंकीर्णावा ॥ ३४ ॥ नितंबस्यशुभाशुभेलक्षणेआह
नितंबेत्येकेन ॥ तदन्यस्तद्विपरीतः ॥ अशर्मणेदुःखाय ॥ ३५ ॥ कटिप्रोथापरपर्यायायाःस्फिचःशुभलक्षणमाह कपित्थेत्येकेन ॥ कपित्थफलंश्रीफलाकारफलविशेषः ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

भगस्यशुभाशुभेलक्षणेआह शुभइतिपंचभिः॥कमठपृष्ठाभः कूर्मपृष्ठवन्निविडोदृढइतियावत्॥ गजस्कंधोपमःकरिस्कंधवदुन्नतः॥कन्याजःकन्याजनकः॥पुत्रजःपुत्रजनकः ॥३७॥ आखूनांमूषकानामिव पिंगलानिरोमाणियस्यसतथा॥गूढोमणिरिवमणिर्वरांगत्वान्मध्यभागविशेषोयस्यसतथा॥सुश्लिष्टःसुनिविडः॥संहतोदृढः॥पृथुर्विस्तीर्णः॥ तुंगउच्चः॥कमलपर्णाभःपद्मपत्राकारः ॥ कमलवर्णाभइतिक्वचित् ॥ कमलगर्भाभइतिचान्यत्र ॥ अश्वत्थदलाकृतिःपिप्पलपत्रसदृशः ॥३८॥ कुरंगखुररूपोहरिणशंफतुल्यः॥तथाचश्रूयते॥अन्यत्रभीष्माद्गांगेयादन्यत्रचहनूमतः॥हरिणीखुरमात्रेणचर्मणामोहितंजगदिति ॥ चुल्लिकोदरसन्निभःपाकाग्न्याधारमध्यसदृशः ॥ रोमशोरोमवहुलः॥विवृतास्योऽतिविस्तीर्णमुखः ॥ दृश्यास्थूलास्पष्टावानासायस्यसतथा ॥ अत्रनासानामाक्षतायायोनेर्मध्यप्रदेशः ॥ अतिदुर्भगोऽतिकुत्सितः ॥ अतिदुर्भगत्वेहेतुर्वा ॥ ३९ ॥ शंखावर्तःशंखसदृशःशंखवत्त्रिरेखाद्यंकितइतिवा ॥ गर्भंनेच्छतिवंध्याभवतीत्यर्थः ॥ खर्पराकारः भग्नघटखर्पराकारः ॥ तस्मैवहेयमुदकंघटखर्परेणेत्युक्तेः ॥ कर्पटाकारइतिपाठेवस्त्रविशेषाकारइत्यर्थः ॥ तथाचदृश्यते ॥ करेकर्पटकेचैवआयसेताम्रभाजने ॥ भुंजन्भिक्षर्नलिप्येतलिप्यतेतुपरिग्रहादिति ॥ ४० ॥ वंशवेतसपत्राभःवंशः

शुभःकमठपृष्ठाभोगजस्कंधोपमोभगः ॥ वामोन्नतस्तुकन्याजःपुत्रजोदक्षिणोन्नतः ॥३७॥ आखुरोमागूढमणिःसुश्लिष्टःसंहतःपृथुः ॥ तुंगःकमलपर्णाभः शुभोश्वत्थदलाकृतिः ॥ ३८ ॥ कुरंगखुररूपोयश्चुल्लिकोदरसन्निभः ॥ रोमशोविवृतास्यश्चदृश्यनासोतिदुर्भगः ॥ ३९ ॥ शंखावर्तोभगोयस्याःसागर्भमिहनेच्छति ॥ चिपिटःखर्पराकारःकिंकरीपददोभगः ॥४०॥ वंशवेतसपत्राभोगजरोमोच्चनासिकः ॥ विकटःकुटिलाकारोलंबगल्लस्तथाऽशुभः॥४१॥ भगस्यभालंजघनंविस्तीर्णंतुंगमांसलम् ॥ मृदुलंमृदुलोमाढ्यंदक्षिणावर्तमीडितम् ॥ ४२ ॥ वामावर्तंचनिर्मांसंभुग्नंवैधव्यसूचकम् ॥ संकटस्थपुटंरूक्षं जघनंदुःखदंसदा ॥ ४३ ॥ बस्तिःप्रशस्ताविपुलामृद्वीस्तोकसमुन्नता ॥ रोमशाचशिरालाचरेखांकानैवशोभना ॥ ४४ ॥ गंभीरादक्षिणावर्तानाभीस्यात्सुखसंपदे ॥ वामावर्तासमुत्तानाव्यक्तग्रंथिर्नशोभना ॥ ४५ ॥ सूतेसुतान्बहून्नारीपृथुकुक्षिःसुखास्पदम् ॥ क्षितीशंजनयेत्पुत्रंमंडूकाभेनकुक्षिणा ॥ ४६ ॥ उन्नतेनवलीभाजासावर्तेनापिकुक्षिणा ॥ वंध्याप्रव्रजितादासीक्रमाद्योषाभवेदिह ॥ ४७ ॥

प्रसिद्धोवेतसोवानीरस्तयोःपत्रसदृशः ॥ गजस्येवरोमाणियस्यसतथा ॥ उच्चनासिकोदीर्घनासिकः ॥ विकटःकुत्सितः ॥ कुटिलाकारोवक्राकारः॥ लंवगल्लःदीर्घमुखाऽधोभागः ॥ अशुभइतिच्छेदः ॥ ४१ ॥ जघनस्यशुभाशुभेलक्षणेआह भगस्येतिद्वाभ्याम् ॥ भालंललाटंभगस्योपरिभागइत्यर्थः ॥ तुंगमांसलंतुंगंचतन्मांसलंमांसयुक्तंचतत्तथा ॥ मृदुलंकोमलम् ॥ दक्षिणावर्तंयथास्यात्तथामृदुलोमाढ्यमित्यन्वयः ॥ ईडितंस्तुतंशुभमित्यर्थः ॥ ४२ ॥ वामावर्तंचरेखाणांरोम्णामित्येववा ॥ भुग्नंकुटिलंविश्लिष्टावयवमित्यर्थः ॥ संकटस्थपुटंसंकटंसंकुचितंचतत्स्थपुटंनिम्नंचेतितथा ॥ ४३ ॥ वस्तेःशुभाशुभेलक्षणेआह वस्तिरित्येकेन ॥ मृद्वीकोमला ॥ स्तोकसमुन्नताईषदुन्नता ॥ रेखांकारेखांकिता ॥ ४४ ॥ नाभेःशुभाशुभेलक्षणेआह गंभीरेत्येकेन ॥ गंभीरानिम्ना ॥ दक्षिणावर्तारोमभीरेखाभिर्वेतिज्ञेयम् ॥ समुत्तानाउच्चा ॥ व्यक्ताअभिव्यक्ताग्रंथिर्ग्रंथनंमध्यभागोयस्याःसातथा ॥ ४५ ॥ अवयवाः २० ॥ कुक्षेःशुभाशुभेलक्षणेआह सूतइतिद्वयेन ॥ सुखस्यास्पदंसुखास्पदंसुखभाजनमित्यर्थः ॥ मण्डूकाभेनभेकोदरतुल्येन ॥ ४६ ॥ वलीभाजाश्लथचर्मभाजा ॥ सावर्तेनावर्तसहितेन ॥ क्रमादिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उन्नतेनकुक्षिणावंध्या ॥ वलीभाजाप्रव्रजितापरिव्राजिका ॥ आवर्तसहितेनदासीभवेदिति ॥ ४७ ॥ पार्श्वस्यशुभाशुभेलक्षणेआह समैरितिद्वयेन ॥ योषित्स्त्रीसमैरित्यादिविशेषणविशिष्टैः ॥ पार्श्वैःसौभाग्यसुखयोर्निधानमाश्रयःस्यादितियोजना ॥ पार्श्वयोरवांतरभेदविवक्षयापार्श्वैरितिवहुवचनम् ॥ यद्वा योषिदितिजातावेकवचनम् ॥ पार्श्वैरितिव्यक्ताविति ॥ ४८ ॥ दुःखानांशेवधिर्निधिर्दुःखानामाश्रयइत्यर्थः ॥ ४९ ॥ उदरस्यशुभाशुभेलक्षणेआह उदरेणेतित्रिभिः ॥ अतितुच्छेनातिसूक्ष्मेणेत्यर्थः ॥ ५० ॥ दरिद्रायाःस्त्रियाःकुंभाकारादिरूपमुदरंजायतइत्यन्वयः ॥ ५१ ॥ देवरंभर्तृभ्रातरम् ॥ ५२ ॥ मध्यस्यशुभलक्षणमाह मध्येतिपादेन ॥ वलेःशुभलक्षणमाह भोगाढ्येतिपादेन ॥ अंगावयवसंकीर्तनेत्रयपदंशुभलक्षणाभिप्रायेण ॥ रोमाल्याः

समैःसमांसैर्मृदुभिर्योषिन्मग्नास्थिभिःशुभैः ॥ पार्श्वैःसौभाग्यसुखयोर्निधानंस्यादसंशयम् ॥ ४८ ॥ यस्याहश्यशिरेपार्श्वेउन्नतेरोमसंयुते ॥ निरपत्याचदुःशीलासाभवेद्दुःखशेवधिः ॥ ४९ ॥ उदरेणातितुच्छेनविशिरेणमृदुत्वचा ॥ योषिद्भवतिभोगाढ्यानित्यंमिष्टान्नसेविनी ॥ ५० ॥ कुंभाकारंदरिद्रायाजठरंचमृदंगवत् ॥ कूष्मांडाभंयवाभंचदुष्पूरंजायतेस्त्रियाः ॥ ५१ ॥ सुविशालोदरीनारीनिरपत्याचदुर्भगा ॥ प्रलंबजठराहंतिश्वशुरंचापिदेवरम् ॥ ५२ ॥ मध्यक्षामाचसुभगाभोगाढ्यासवलित्रया ॥ ऋज्वीतन्वीचरोमालीयस्याःसाशर्मनर्मभूः ॥ ५३ ॥ कपिलाकुटिलास्थूलाविच्छिन्नारोमराजिका ॥ चौरवैधव्यदौर्भाग्यंविदध्यादिहयोषिताम् ॥ ५४ ॥ निर्लोमहृदयंयस्याःसमंनिम्नत्ववर्जितम् ॥ ऐश्वर्यंचाप्यवैधव्यंप्रियप्रेमचसालभेत् ॥ ५५ ॥ विस्तीर्णहृदयायोषापुंश्चलीनिर्दयातथा ॥ उद्भिन्नरोमहृदयापतिंहंतिविनिश्चितम् ॥ ५६ ॥ अष्टादशांगुलततमुरःपीवरमुन्नतम् ॥ सुखायदुःखायभवेद्रोमशंविषमंपृथु ॥ ५७ ॥ घनौवृत्तौदृढौपीनौसमौशस्तौपयोधरौ ॥ स्थूलाग्रौविरलौशुष्कौवामोरूणांनशर्मदौ ॥ ५८ ॥ दक्षिणोन्नतवक्षोजापुत्रिणीत्वग्रणीर्मता ॥ वामोन्नतकुचासूतेकन्यांसौभाग्यसुंदरीम् ॥ ५९ ॥ अरघट्टघटीतुल्यौकुचौदौःशील्यसूचकौ ॥ पीवरास्यौसांतरालौपृथूपांतौनशोभनौ ॥ ६० ॥ मूलेस्थूलौक्रमकृशावग्रेतीक्ष्णौपयोधरौ ॥ सुखदौपूर्वकालेतुपश्चादत्यंतदुःखदौ ॥६१॥ सुदृढंचूचुकयुगंशस्तंश्यामंसुवर्तुलम् ॥ अंतर्मग्नंचदीर्घंचकृशंक्लेशायजायते ॥ ६२ ॥ पीवराभ्यांचजत्रुभ्यांधनधान्यनिधिर्वधूः ॥ श्लथास्थिभ्यांचनिम्नाभ्यांविषमाभ्यांदरिद्रिणी ॥ ६३ ॥

शुभाशुभेलक्षणेआह ऋज्वीतिसार्धेन ॥ शर्मनर्मभूःसुखक्रीडयोःस्थानम् ॥ ५३ ॥ चौरादीनांत्रयाणामेकवद्भावः ॥ तत्रचौरंचौर्यम् ॥ ५४ :॥ हृदयस्यशुभाशुभेलक्षणेआह निर्लोमेतिद्वाभ्याम् ॥ ५५ ॥ ५६ ॥ वक्षसःशुभाशुभेलक्षणेआह अष्टादशेत्येकेन ॥ ५७ ॥ वक्षोजस्यशुभाशुभेलक्षणेआह घनावितिचतुर्भिः ॥ शस्तौप्रशस्तौ ॥ ५८ ॥ तुएव ॥ अग्रणीःश्रेष्ठा ॥ स्वग्रणीरितिक्वचित् ॥ पुत्रिणीस्वग्रणीरितिचान्यत्र ॥ ५९ ॥ अरघट्टोघटीयन्त्रंरहट्टइतिगुर्जरदेशेप्रसिद्धम् ॥ तत्रस्थायाघटीतत्तुल्यौ ॥ ६० ॥ ६१ ॥ चूचुकस्यशुभाशुभेलक्षणेआह सुदृढमित्येकेन ॥ सुदृशामितिक्वचित् ॥६२॥ अवयवाः ३० ॥ जत्रुणःशुभाशुभेलक्षणेआह पीवराभ्यामित्येकेन ॥ श्लथान्यस्थीनिययोस्ताभ्याम् ॥ श्लथाभ्यांचैवेतिक्वचित् ॥६३॥

CC-0. In Public Domain. Digitization by eGangotri

स्कंधस्यशुभाशुभेलक्षणेआहावद्धावित्येकेन ॥ प्रैष्यंदास्यम् ॥ ६४ ॥ अंसस्यशुभाशुभेलक्षणेआह निगूढेत्येकेन ॥ समुच्चाग्रौउन्नताग्रौ ॥ ६५ ॥ कक्षयोःशुभाशुभेलक्षणेआह कक्षेइत्येकेन ॥ शिरालेशिरायुक्ते ॥ स्वेदमेदुरेस्वेदास्निग्धे ॥ ६६ ॥ दोषःशुभाशुभेलक्षणेआह स्यातामितिद्वयेन ॥ गूढौआस्थिग्रंथीययोस्तौगूढास्थिग्रंथीतौचतौकोमलौचेतितथा ॥ ६७ ॥ ॥ ६८ ॥ मणिवंधावधिकरस्यशुभलक्षणमाहांभोजेत्येकेन ॥ अंगुष्ठोंऽगुलयश्वसम्यङ्मुखंयस्यतत्तथा ॥ ६९ ॥ क्रममनादृत्यपाणितलस्यशुभाशुभेलक्षणेआह मृदुमध्योन्नतमितिद्वयेन ॥ ७० ॥

अबद्धावनतौस्कंधावदीर्घावकृशौशुभौ ॥ वक्रौस्थूलौचरोमाढ्यौप्रैष्यवैधव्यसूचकौ ॥ ६४ ॥ निगूढसंधीस्रस्ताग्रौशुभावंसौसुसंहतौ ॥ वैधव्यदौसमुच्चाग्रौनिर्मांसावतिदुःखदौ ॥ ६५ ॥ कक्षेसुसूक्ष्मरोमेतुतुंगेस्निग्धेचमांसले ॥ शस्तेनशस्तेगंभीरेशिरालेस्वेदमेदुरे ॥ ६६ ॥ स्यातांदोषौसुनिर्दोषौगूढास्थिग्रंथिकोमलौ ॥ विशिरौचविरोमाणौसरलौहरिणीदृशाम् ॥ ६७ ॥ वैधव्यंस्थूलरोमाणौह्रस्वौदौर्भाग्यसूचकौ ॥ परिक्लेशायनारीणांपरिदृश्यशिरौभुजौ ॥ ६८ ॥ अंभोजमुकुलाकारमंगुष्ठांगुलिसंमुखम् ॥ हस्तद्वयंमृगाक्षीणांबहुभोगायजायते ॥ ६९ ॥ मृदुमध्योन्नतंरक्तंतलंपाण्योररंध्रकम् ॥ प्रशस्तंशस्तरेखाढ्यमल्परेखंशुभश्रियम् ॥ ७० ॥ विधवाबहुरेखेणविरेखेणदरिद्रिणी ॥ भिक्षुकीसुशिराढ्येननारीकरतलेनवै ॥ ७१ ॥ विरोमविशिरंशस्तंपाणिपृष्ठंससुन्नतम् ॥ वैधव्यहेतुरोमाढ्यंनिर्मांसंस्नायुमत्त्यजेत् ॥ ७२ ॥ रक्ताव्यक्तागभीराचस्निग्धापूर्णाचवर्तुला ॥ कररेखांगनायाःस्याच्छुभाभाग्यानुसारतः ॥ ७३ ॥ मत्स्येनसुभगानारीस्वस्तिकेनवसुप्रदा ॥ पद्मेनभूपतेःपत्नीजनयेद्भूपतिंसुतम् ॥ ७४ ॥ चक्रवर्तिस्त्रियाःपाणौनंद्यावर्तःप्रदक्षिणः ॥ शंखातपत्रकमठानृपमातृत्वसूचकाः ॥ ७५ ॥ तुलामानाकृतीरेखेवणिक्पत्नीत्वहेतुके ॥ गजवाजिवृषाकाराःकरेवामेमृगीदृशाम् ॥ ७६ ॥ रेखाप्रासादवज्राभाब्रूयुस्तीर्थकरंसुतम् ॥ कृषीवलस्यपत्नीस्याच्छकटेनयुगेनवा ॥ ७७ ॥ चामरांकुशकोदंडैराजपत्नीभवेद्ध्रुवम् ॥ अंगुष्ठमूलान्निर्गत्यरेखायातिकनिष्ठिकाम् ॥ ७८ ॥ यदिसापतिहंत्रीस्याद्दूरतस्तांत्यजेत्सुधीः ॥ त्रिशूलासिगदाशक्तिदुंदुभ्याकृतिरेखया ॥ नितंबिनीकीर्तिमतीत्यागेनपृथिवीतले ॥ ७९ ॥

॥ ७१ ॥ पाणिपृष्ठस्यशुभाशुभेलक्षणेआह विरोमेत्येकेन ॥ ७२ ॥ हस्तरेखायाःशुभाशुभेलक्षणेआह रक्तेत्यादिसार्धाष्टभिः ॥ ७३ ॥ स्वस्तिकेनत्रिकोणांकितरेखाविशेषेण ॥ ७४ ॥ नंद्यावर्तःस्वस्तिकः॥ सौधोऽस्त्रीराजसदनमुपकार्योपकारिका ॥ स्वस्तिकःसर्वतोभद्रोनंद्यावर्तादयोपिचेत्यमरः ॥७५॥७६॥ तीर्थकरंसुतंतीर्थपर्यटनकर्तारंशास्त्रकर्तारंवापुत्रमित्यर्थः॥तीर्थकरंशुभमिति क्वचित् ॥ तीर्थकरेशुभमितिचान्यत्र ॥ तत्रकरेरेखाइत्यन्वयः ॥ युगेनबलीवर्दस्कंधनिक्षिप्तेनकाष्ठेन ॥ ७७ ॥ अंकुशस्तोत्रम् ॥ कोदंडोधनुः ॥ ७८ ॥ दुंदुभिर्वाद्यभांडविशेषः ॥ त्यागेनदानेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादेनेतिपाठेपदमेवपादंतेनव्यवसायेन ॥७९॥ ८० ॥ अंगुष्ठस्यशुभलक्षणमाह शुभदइत्यर्धेन ॥ सरलऋजुः ॥ वृत्तोवर्तुलः ॥ वृत्तनखोवर्तुलनखः ॥८१॥ अंगुलीनांशुभाशुभेलक्षणेआहांगुल्यइति द्वयेन ॥ कृशाइत्यस्यानंतरंशुभाइतिशेषः॥ चिपिटाअत्रह्रस्वाः ॥ स्थपुटानिम्नाः ॥८२॥ बहुपर्वसमन्विताःविस्तृतपर्वसमन्विताइत्यर्थः ॥८३॥ नखानांशुभाशुभेलक्षणेआहारुणाइतिसार्धेन ॥ सुदृशां शोभनाक्षीणाम् ॥ ८४ ॥ प्रसंगात्पुरुषाणामपिनखानामशुभलक्षणमाह ॥ परुषाइत्यर्धेन ॥ पुष्पितैःश्वेतपुष्पवर्णैरित्यर्थः ॥ ८५ ॥ पृष्टेःशुभाशुभेलक्षणेआहांतरितिसार्धेन ॥ अंतर्निमग्नंतिर्यग्वंशाकारम स्थियस्यांसांतर्निमग्नवंशास्थिः ॥८६॥ कृकाटिकायाःशुभाशुभेलक्षणेआह ऋज्वीत्येकेन ॥ ८७ ॥ कंठस्यशुभाशुभेलक्षणेआह मांसलइतिसार्धद्वयेन ॥ ८८ ॥ ८९ ॥ ९० ॥ चिबुकस्यशुभाशु

कंकजंबूकमंडूकवृकवृश्चिकभोगिनः ॥ रासभोष्ट्रबिडालाःस्युःकरस्थादुःखदाःस्त्रियाः ॥ ८० ॥ शुभदःसरलोंगुष्ठोवृत्तोवृत्तनखोमृदुः ॥ ८१ ॥ अंगुल्यश्चसुपर्वाणोदीर्घावृत्ताःक्रमात्कृशाः ॥ चिपिटाःस्थपुटारूक्षाःपृष्ठरोमयुजोऽशुभाः ॥ ८२ ॥ अतिह्रस्वाःकृशावक्राविरलारोगहेतुकाः ॥ दुःखायांगुलयःस्त्रीणांबहुपर्वसमन्विताः ॥ ८३ ॥ अरुणाःसशिखास्तुंगाःकरजाःसुदृशांशुभाः ॥ निम्नाविवर्णाःशुक्त्याभाःपीतादारिद्र्यदायकाः ॥ ८४ ॥ नखेषुबिंदवःश्वेताःप्रायःस्युःस्वैरिणीस्त्रियाः ॥ पुरुषाअपिजायंतेदुःखिनःपुष्पितैर्नखैः ॥ ८५ ॥ अंतर्निमग्नवंशास्थिःपृष्ठिःस्यान्मांसलाशुभा ॥ पृष्ठेनरोमयुक्तेनवैधव्यंलभतेध्रुवम् ॥ ८६ ॥ भुग्नेनविनतेनापिसशिरेणापिदुःखिता ॥ ऋज्वीकृकाटिकाश्रेष्ठासमांसाचसमुन्नता ॥ ८७ ॥ शुष्काशिरालारोमाढ्याविशालाकुटिलाशुभा॥ मांसलोवर्तुलःकंठःप्रशस्तश्चतुरंगुलः ॥ ८८ ॥ शस्ताग्रीवात्रिरेखांकात्वव्यक्तास्थिःसुसंहता ॥ निर्मांसाचिपिटादीर्घास्थपुटानशुभप्रदा ॥ ८९ ॥ स्थूलग्रीवाचविधवावक्रग्रीवाचकिंकरी ॥ वंध्याहिचिपिटग्रीवाह्रस्वग्रीवाचनिःसुता ॥ ९० ॥ चिबुकंद्व्यंगुलंशस्तंवृत्तंपीनंसुकोमलम् ॥ स्थूलंद्विधासंविभक्तमायतंरोमशंत्यजेत् ॥ ९१ ॥ हनुश्चिबुकसंलग्नानिर्लोमासुघनाशुभा ॥ वक्रास्थूलाकृशाह्रस्वारोमशानशुभप्रदा ॥ ९२ ॥ शस्तौकपोलौवामाक्ष्याःपीनौवृत्तौसमुन्नतौ ॥ रोमशौपरुषौनिम्नौनिर्मांसौपरिवर्जयेत् ॥ ९३ ॥ समंसमांसंसुस्निग्धंस्वामोदंवर्तुलंमुखम् ॥ जनेतृवदनच्छायंधन्यानामिहजायते ॥ ९४ ॥ पाटलोवर्तुलःस्निग्धोलेखाभूषितमध्यभूः ॥ सीमंतिनीनामधरोधराजानिप्रियोभवेत् ॥ ९५ ॥ कृशःप्रलंबःस्फुटितोरूक्षोदौर्भाग्यसूचकः ॥ श्यावःस्थूलोऽधरोष्ठःस्याद्वैधव्यकलहप्रदः ॥ ९६ ॥

भेलक्षणेआह चिबुकमित्येकेन ॥ त्यजेत्स्थूलादिचिबुकवतींनोद्वहेदित्यर्थः ॥ एवमग्रेपिद्रष्टव्यम् ॥ ९१ ॥ हनोःशुभाशुभेलक्षणेआह हनुरित्येकेन ॥ ९२ ॥ कपोलयोःशुभाशुभेलक्षणेआह शस्तावित्येकेन ॥ वामाक्ष्याःशोभननेत्रायाः ॥ ९३ ॥ वक्रस्यशुभलक्षणमाह सममित्येकेन ॥ ९४ ॥ अधरोष्ठस्यशुभाशुभेलक्षणेआह पाटलइतिद्वयेन ॥ पाटलःपाटलपुष्पवर्णः ॥ लेखाभूषितमध्यभूः रेखालंकृतमध्यस्थानः ॥ रश्रुतेर्लश्रुतिरितिन्यायेनरेफस्यलकारः ॥ धराजायायस्यसधराजानिर्नृपतिस्तस्यप्रियः ॥ एवंविधोष्ठवतीसानृपतेर्भार्याभवतीत्यर्थः ॥ ९५ ॥ श्यावःकपिशः ॥ ९६ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्कंधस्यशुभाशुभेलक्षणेआहावद्धावित्येकेन ॥ प्रैष्यंदास्यम् ॥ ६४ ॥ अंसस्यशुभाशुभेलक्षणेआह निगूढेत्येकेन ॥ समुच्चाग्रौउन्नताग्रौ ॥ ६५ ॥ कक्षयोःशुभाशुभेलक्षणेआह कक्षेइत्येकेन ॥ शिरालेशिरायुक्ते ॥ स्वेदमेदुरेस्वेदस्निग्धे ॥ ६६ ॥ दोषःशुभाशुभेलक्षणेआह स्यातामितिद्वयेन ॥ गूढौआस्थिग्रंथीययोस्तौगूढास्थिग्रंथीतौचतौकोमलौचेतितथा ॥ ६७ ॥ ॥ ६८ ॥ मणिबंधावधिकरस्यशुभलक्षणमाहांभोजेत्येकेन ॥ अंगुष्ठोऽगुलयश्चसम्यङ्मुखंयस्यतत्तथा ॥ ६९ ॥ क्रममनादृत्यपाणितलस्यशुभाशुभेलक्षणेआह मृदुमध्योन्नतमितिद्वयेन ॥ ७० ॥

अबद्धावनतौस्कंधावदीर्घावक्रशौशुभौ ॥ वक्रौस्थूलौचरोमाढ्यौप्रैष्यवैधव्यसूचकौ ॥ ६४ ॥ निगूढसंधीस्रस्ताग्रौशुभावंसौसुसंहतौ ॥ वैधव्यदौसमुच्चाग्रौनिर्मांसावतिदुःखदौ ॥ ६५ ॥ कक्षेसुसूक्ष्मरोमेतुतुंगेस्निग्धेचमांसले ॥ शस्तेनशस्तेगंभीरेशिरालेस्वेदमेदुरे ॥ ६६ ॥ स्यातांदोषौसुनिर्दोषौगूढास्थिग्रंथिकोमलौ ॥ विशिरौचविरोमाणौसरलौहरिणीदृशाम् ॥ ६७ ॥ वैधव्यंस्थूलरोमाणौह्रस्वौदौर्भाग्यसूचकौ ॥ परिक्लेशायनारीणांपरिदृश्यशिरौभुजौ ॥ ६८ ॥ अंभोजमुकुलाकारमंगुष्ठांगुलिसंमुखम् ॥ हस्तद्वयंमृगाक्षीणांबहुभोगायजायते ॥ ६९ ॥ मृदुमध्योन्नतंरक्तंतलंपाण्योररंध्रकम् ॥ प्रशस्तंशस्तरेखाढ्यमल्परेखंशुभश्रियम् ॥ ७० ॥ विधवाबहुरेखेणविरेखेणदरिद्रिणी ॥ भिक्षुकीसुशिराढ्येननारीकरतलेनवै ॥ ७१ ॥ विरोमविशिरंशस्तंपाणिपृष्ठंससुन्नतम् ॥ वैधव्यहेतुरोमाढ्यंनिर्मांसंस्नायुमत्त्यजेत् ॥ ७२ ॥ रक्ताव्यक्तागभीराचस्निग्धापूर्णाचवर्तुला ॥ कररेखांगनायाःस्याच्छुभाभाग्यानुसारतः ॥ ७३ ॥ मत्स्येनसुभगानारीस्वस्तिकेनवसुप्रदा ॥ पद्मेनभूपतेःपत्नीजनयेद्भूपतिंसुतम् ॥ ७४ ॥ चक्रवर्तिस्त्रियाःपाणौनंद्यावर्तःप्रदक्षिणः ॥ शंखातपत्रकमठानृपमातृत्वसूचकाः ॥ ७५ ॥ तुलामानाकृतीरेखेवणिक्पत्नीत्वहेतुके ॥ गजवाजिवृषाकाराःकरेवामेमृगीदृशाम् ॥ ७६ ॥ रेखाप्रासादवज्राभाब्रूयुस्तीर्थकरंसुतम् ॥ कृषीवलस्यपत्नीस्याच्छकटेनयुगेनवा ॥ ७७ ॥ चामरांकुशकोदंडैराजपत्नीभवेद्ध्रुवम् ॥ अंगुष्ठमूलान्निर्गत्यरेखायातिकनिष्ठिकाम् ॥ ७८ ॥ यदिसापतिहंत्रीस्याद्दूरतस्तांत्यजेत्सुधीः ॥ त्रिशूलासिगदाशक्तिदुंदुभ्याकृतिरेखया ॥ नितंबिनीकीर्तिमतीत्यागेनपृथिवीतले ॥ ७९ ॥

॥ ७१ ॥ पाणिपृष्ठस्यशुभाशुभेलक्षणेआह विरोमेत्येकेन ॥ ७२ ॥ हस्तरेखायाःशुभाशुभेलक्षणेआह रक्तेत्यादिसार्धाष्टभिः ॥ ७३ ॥ स्वस्तिकेनत्रिकोणांकितरेखाविशेषेण ॥ ७४ ॥ नंद्यावर्तःस्वस्तिकः॥ सौधोऽस्त्रीराजसदनमुपकार्योपकारिका ॥ स्वस्तिकःसर्वतोभद्रोनंद्यावर्तादयोपिचेत्यमरः ॥७५॥७६॥ तीर्थकरंसुतंतीर्थपर्यटनकर्तारंशास्त्रकर्तारंवापुत्रमित्यर्थः॥तीर्थकरंशुभमिति क्वचित् ॥ तीर्थकरेशुभमितिचान्यत्र ॥ तत्रकरेरेखाइत्यन्वयः ॥ युगेनबलीवर्दस्कंधनिक्षिप्तेनकाष्ठेन ॥ ७७ ॥ अंकुशस्तोत्रम् ॥ कोदंडोधनुः ॥ ७८ ॥ दुंदुभिर्वाद्यभांडविशेषः ॥ त्यागेनदानेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादेनेतिपाठेपदमेवपादंतेनव्यवसायेन ॥७९॥ ८० ॥ अंगुष्ठस्यशुभलक्षणमाह शुभदइत्यर्धेन ॥ सरलऋजुः ॥ वृत्तोवर्तुलः ॥ वृत्तनखोवर्तुलनखः ॥८१॥ अंगुलीनांशुभाशुभेलक्षणेआहांगुल्यइति द्वयेन ॥ कृशाइत्यस्यानंतरंशुभाइतिशेषः॥ चिपिटाअत्रह्रस्वाः ॥ स्थपुटानिम्नाः ॥८२॥ बहुपर्वसमन्विताःविस्तृतपर्वसमन्विताइत्यर्थः ॥८३॥ नखानांशुभाशुभेलक्षणेआहारुणाइतिसार्धेन ॥ सुदृशां शोभनाक्षीणाम् ॥ ८४ ॥ प्रसंगात्पुरुषाणामपिनखानामशुभलक्षणमाह ॥ परुषाइत्यर्धेन ॥ पुष्पितैःश्वेतपुष्पवर्णैरित्यर्थः ॥ ८५ ॥ पृष्ठेःशुभाशुभेलक्षणेआहांतरितिसार्धेन ॥ अंतर्निमग्नंतिर्यग्वंशाकारम स्थियस्यांसांतर्निमग्नवंशास्थिः ॥८६॥ कृकाटिकायाःशुभाशुभेलक्षणेआह ऋज्वीत्येकेन ॥ ८७ ॥ कंठस्यशुभाशुभेलक्षणेआह मांसलइतिसार्धद्वयेन ॥ ८८ ॥ ८९ ॥ ९० ॥ चिबुकस्यशुभाशु

कंकजंबूकमंडूकवृकवृश्चिकभोगिनः ॥ रासभोष्ट्रबिडालाःस्युःकरस्थादुःखदाःस्त्रियाः ॥ ८० ॥ शुभदःसरलोंगुष्ठोवृत्तोवृत्तनखोमृदुः ॥ ८१ ॥ अंगुल्यश्चसुपर्वाणोदीर्घावृत्ताःक्रमात्कृशाः ॥ चिपिटाःस्थपुटारूक्षाःपृष्ठरोमयुजोऽशुभाः ॥ ८२ ॥ अतिह्रस्वाःकृशावक्राविरलारोगहेतुकाः ॥ दुःखायां गुलयःस्त्रीणांबहुपर्वसमन्विताः ॥ ८३ ॥ अरुणाःसशिखास्तुंगाःकरजाःसुदृशांशुभाः ॥ निम्नाविवर्णाःशुक्त्याभाःपीतादारिद्र्यदायकाः ॥ ८४ ॥ नखेषुबिंदवःश्वेताःप्रायःस्युःस्वैरिणीस्त्रियाः ॥ पुरुषाअपिजायंतेदुःखिनःपुष्पितैर्नखैः ॥ ८५ ॥ अंतर्निमग्नवंशास्थिःपृष्ठिःस्यान्मांसलाशुभा ॥ पृष्ठे नरोमयुक्तेनवैधव्यंलभतेध्रुवम् ॥ ८६ ॥ भुग्नेनविनतेनापिसशिरेणापिदुःखिता ॥ ऋज्वीकृकाटिकाश्रेष्ठासमांसाचसमुन्नता ॥ ८७ ॥ शुष्काशिरालारोमाढ्याविशालाकुटिलाशुभा ॥ मांसलोवर्तुलःकंठःप्रशस्तश्चतुरंगुलः ॥ ८८ ॥ शस्ताग्रीवात्रिरेखांकात्वव्यक्तास्थिःसुसंहता ॥ निर्मांसाचिपिटादीर्घा स्थपुटानशुभप्रदा ॥ ८९ ॥ स्थूलग्रीवाचविधवावक्रग्रीवाचकिंकरी ॥ वंध्याहिचिपिटग्रीवाह्रस्वग्रीवाचनिःसुता ॥ ९० ॥ चिबुकंद्व्यंगुलंशस्तंवृत्तंपीनं सुकोमलम् ॥ स्थूलंद्विधासंविभक्तमायतंरोमशंत्यजेत् ॥ ९१ ॥ हनुश्चिबुकसंलग्नानिर्लोमासुघनाशुभा ॥ वक्रास्थूलाकृशाह्रस्वारोमशानशुभप्रदा ॥ ९२ ॥ शस्तौकपोलौवामाक्ष्याःपीनौवृत्तौसमुन्नतौ ॥ रोमशौपरुषौनिम्नौनिर्मांसौपरिवर्जयेत् ॥ ९३ ॥ समंसमांसंसुस्निग्धंस्वामोदंवर्तुलंमुखम् ॥ जनेतृवदनच्छायंधन्यानामिहजायते ॥ ९४ ॥ पाटलोवर्तुलःस्निग्धोलेखाभूषितमध्यभूः ॥ सीमंतिनीनामधरोधराजानिप्रियोभवेत् ॥ ९५ ॥ कृशः प्रलंबःस्फुटितोरूक्षोदौर्भाग्यसूचकः ॥ श्यावःस्थूलोऽधरोष्ठःस्याद्वैधव्यकलहप्रदः ॥ ९६ ॥

भेलक्षणेआह चिबुकमित्येकेन ॥ त्यजेत्स्थूलादिचिबुकवर्तीनोद्वहेदित्यर्थः ॥ एवमग्रेपिद्रष्टव्यम् ॥ ९१ ॥ हनोःशुभाशुभेलक्षणेआह हनुरित्येकेन ॥ ९२ ॥ कपोलयोःशुभाशुभेलक्षणेआह शस्ता वित्येकेन ॥ वामाक्ष्याःशोभननेत्रायाः ॥ ९३ ॥ वक्त्रस्यशुभलक्षणमाह सममित्येकेन ॥ ९४ ॥ अधरोष्ठस्यशुभाशुभेलक्षणेआह पाटलइतिद्वयेन ॥ पाटलःपाटलपुष्पवर्णः ॥ लेखाभूषितमध्यभूः रेखालंकृतमध्यस्थानः ॥ रश्रुतेर्लश्रुतिरितिन्यायेनरेफस्यलकारः ॥ धराजायायस्यसधराजानिर्नृपतिस्तस्यप्रियः ॥ एवंविधोष्ठवतीसानृपतेर्भार्याभवतीत्यर्थः ॥ ९५ ॥ श्यावःकपिशः ॥ ९६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अवयवसंख्या ५०॥ उत्तरोष्ठस्यशुभाशुभेलक्षणेआह मसृणइत्येकेन ॥ विपरीतःकुत्सितःपूर्वस्माद्विपरीतोवा ॥ ९७ ॥ द्विजानांशुभाशुभेलक्षणेआह गोक्षीरेतित्रिभिः ॥ स्तोकसमुन्नताई पटुच्चाः ॥ ९८ ॥ ९९ ॥ १०० ॥ जिह्वायाःशुभाशुभेलक्षणेआह जिह्वेतिसार्धद्वयेन ॥ शोणाशोणवर्णा ॥ १ ॥ २ ॥ क्रमप्रमनाहृत्यतालुनःशुभाशुभेलक्षणेआह स्निग्धमितिसार्धेन ॥ कोकनदाभासंशोणच्छविम् ॥ ३ ॥ ४ ॥ घण्टिकायाःशुभाशुभेलक्षणेआह कंठइत्येकेन ॥ तीक्ष्णासूक्ष्मा ॥ ५ ॥ हसितस्यशुभलक्षणमाह अलक्षितेत्येकेन ॥ ६ ॥ नासिकायाः

मसृणोमत्तकाशिन्याश्चोत्तरोष्ठःशुभोगदः ॥ किंचिन्मध्योन्नतोऽरोमाविपरीतोविरुद्धकृत् ॥ ९७ ॥ गोक्षीरसन्निभाःस्निग्धाद्वात्रिंशद्दशनाःशुभाः ॥ अधस्तादुपरिष्टाच्चसमाःस्तोकसमुन्नताः ॥ ९८ ॥ पीताःश्यावाश्चदशनाःस्थूलादीर्घाद्विपंक्तयः ॥ शुक्त्याकाराश्चविरलादुःखदौर्भाग्यकारणम् ॥ ९९ ॥ अधस्तादधिकैर्दंतैर्मातरंभक्षयेत्स्फुटम् ॥ पतिहीनाचविकटैःकुलटाविरलैर्भवेत् ॥ १०० ॥ जिह्वेष्टमिष्टभोक्त्रीस्याच्छोणामृद्वीतथासिता ॥ दुःखायमध्यसंकीर्णापुरोभागसविस्तरा ॥ १ ॥ सितयातोयमरणंश्यामयाकलहप्रिया ॥ दरिद्रिणीमांसलयालंबयाऽभक्ष्यभक्षिणी ॥ २ ॥ विशालया रसनयाप्रमदातिप्रमादभाक् ॥ स्निग्धंकोकनदाभासंप्रशस्तंतालुकोमलम् ॥ ३ ॥ सितेतालुनिवैधव्यंपीतेप्रव्रजिताभवेत् ॥ कृष्णेऽपत्यवियोगार्ता रूक्षेभूरिकुटुंबिनी ॥ ४ ॥ कंठेस्थूलासुवृत्ताचक्रमतीक्ष्णासुलोहिता ॥ अप्रलंबाशुभावंटीस्थूलाकृष्णाचदुःखदा ॥ ५ ॥ अलक्षितद्विजंकिंचित्किंचित्फुल्लकपोलकम् ॥ स्मितंप्रशस्तंसुदृशामनिमीलितलोचनम् ॥ ६ ॥ समवृत्तपुटानासालघुच्छिद्राशुभावहा ॥ स्थूलाग्रामध्यनम्राचनप्रशस्तासमुन्नता ॥ ७ ॥ आकुंचितारुणाग्राचवैधव्यक्लेशदायिनी ॥ परप्रेष्याचचिपिटाह्रस्वादीर्घाकलिप्रिया ॥ ८ ॥ दीर्घायुःकृत्क्षुतंदीर्घंयुगपद्द्वित्रिपिंडितम् ॥ ललनालोचनेशस्तेरक्तांतेकृष्णतारके ॥ ९ ॥ गोक्षीरवर्णविशदेसुस्निग्धेकृष्णपक्ष्मणी ॥ उन्नताक्षीनदीर्घायुर्वृत्ताक्षीकुलटाभवेत् ॥ ११० ॥ मेषाक्षीमहिषाक्षीचकेकराक्षीनशोभना ॥ कामगृहीलानितरांगोपिंगाक्षीसुदुर्वृता ॥ ११ ॥ पारावताक्षीदुःशीलारक्ताक्षीभर्तृघातिनी ॥ कोटरानयनादुष्टागजनेत्रानशोभना ॥ १२ ॥ पुंश्चलीवामकाणाक्षीवंध्यादक्षिणकाणिका ॥ मधुपिंगाक्षीरमणीधनधान्यसमृद्धिभाक् ॥ १३ ॥ पक्ष्मभिःसुघनैःस्निग्धैःकृष्णैःसूक्ष्मैःसुभाग्यभाक् ॥ कपिलैर्विरलैःस्थूलैर्निंद्याभवतिभामिनी ॥ १४ ॥ भ्रुवौसुवर्तुलेतन्व्याःस्निग्धेकृष्णेअसंहते ॥ प्रशस्तेमृदुरोमाणौसुभ्रुवःकार्मुकाकृती ॥ १५ ॥

शुभाशुभेलक्षणेआह समवृत्तपुटेतिद्वयेन ॥ समेदीर्घादिवैषम्यरहितेवृत्तेवर्तुलेपुटेपार्श्वेसमौवृत्तपुटौसंचारमार्गौवायस्याःसातथा ॥ ७ ॥ ८ ॥ क्षुतस्यशुभलक्षणमाह दीर्घायुःकृदित्यर्धेन ॥ द्वित्रिपिंडितंद्विवारंत्रिवारंचेत्यर्थः ॥ अक्ष्णोःशुभाशुभेलक्षणेआह ललनेतिसार्धैश्चतुर्भिः ॥ ९ ॥ कृष्णपक्ष्मणीश्यामनेत्रतारके ॥ ११० ॥ गृहीलागृद्धिनी ॥ ११ ॥ कोटरानयनाकोटरवद्वृक्षाच्छिद्रवदासमंतान्नयनेयस्याःसातथानिम्ननेत्रेत्यर्थः ॥ १२ ॥ १३ ॥ पक्ष्मणःशुभाशुभेलक्षणेआह पक्ष्मभिरित्येकेन ॥१४॥ अवयवसंख्या ६० ॥ भ्रुवःशुभाशुभेलक्षणेआह भ्रुवावितिद्वयेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्मुकाकृतीधनुराकारे ॥ शोभनेभ्रुवौयस्यास्सासुभ्रूस्तस्याःसुभ्रुवः ॥ १५ ॥ १६ ॥ कर्णयोःशुभाशुभेलक्षणेआह लंबावित्येकेन ॥ १७ ॥ भालस्यशुभाशुभेलक्षणेआह भालइतिसार्ध द्वयेन ॥ १८ ॥ १९ ॥ प्रांशुनाउच्चेन ॥ प्रांशुलारोगिणीतिक्वचित्पाठः ॥ १२० ॥ क्रममनादृत्यसीमंतस्यशुभलक्षणमाह ॥ सीमंतइतिपादेन ॥ मौलेःशुभाशुभेलक्षणेआह मौलिरितिपादो नद्वयेन ॥ २१ ॥ २२ ॥ मौलिजानांशुभाशुभेलक्षणेआह केशाइतिद्वयेन ॥ अलिकुलच्छायाःभ्रमरकदंबवश्यामाः ॥ २३ ॥ लघवोह्रस्वाः ॥ २४ ॥ अंगानि ६६ ॥ एवंषट्षष्टीनामंगानांशुभा

खररोमाचपृथुलाविकीर्णासरलास्त्रियाः ॥ नभ्रूःप्रशस्तामिलितादीर्घरोमाचापिंगला ॥ १६ ॥ लंबौकर्णौशुभावर्तौसुखदौचशुभप्रदौ ॥ शष्कुलीरहितौनिंद्यौशिरालौकुटिलौकृशौ ॥ १७ ॥ भालःशिराविरहितोनिर्लोमार्धेंदुसन्निभः ॥ अनिम्नस्त्र्यंगुलोनार्याःसौभाग्यारोग्यकारणम् ॥ १८ ॥ व्यक्तस्वस्तिकरेखंचललाटंराज्यसंपदे ॥ प्रलंबंमस्तकंयस्यादेवरंहन्तिसाध्रुवम् ॥ १९ ॥ रोमशेनशिरालेनप्रांशुनारोगिणीमता ॥ १२० ॥ सीमन्तःसरलःशस्तोमौलिःशस्तःसमुन्नतः ॥ गजकुंभनिभावृत्तैःसौभाग्यैश्वर्यसूचकैः ॥ २१ ॥ स्थूलमूर्धाचविधवादीर्घशीर्षाचबंधकी ॥ विशालेनापिशिरसाभवेद्दौर्भाग्यभाजनम् ॥ २२ ॥ केशाअलिकुलच्छायाःसूक्ष्माःस्निग्धाःसुकोमलाः ॥ किंचिदाकुंचिताग्राश्चकुटिलाश्चातिशोभनाः ॥ २३ ॥ परुषाःस्फुटिताग्राश्चविरलाश्चाशिरोरुहाः ॥ पिंगलालघवोरूक्षादुःखदारिद्र्यबंधदाः ॥ २४ ॥ भ्रुवोरन्तर्ललाटेवामशकोराज्यसूचकः ॥ वामेकपोलेमशकःशोणोमिष्टान्नदःस्त्रियाः ॥ २५ ॥ तिलकंलांछनंवापिहृदिसौभाग्यकारणम् ॥ यस्यादक्षिणवक्षोजेशोणेतिलकलांछने ॥ २६ ॥ कन्याचतुष्टयंसूतेसूतेसाचसुतत्रयम् ॥ तिलकंलांछनंशोणंयस्यावामेकुचेभवेत् ॥ २७ ॥ एकंपुत्रंप्रसूयादौततःसाविधवाभवेत् ॥ गुह्यस्यदक्षिणेभागेतिलकंयदियोषितः ॥ २८ ॥ तदाक्षितिपतेःपत्नीसूतेवाक्षितिपंसुतम् ॥ नासाग्रेमशकःशोणोमहिष्याएवजायते ॥ २९ ॥ कृष्णःसएवभर्तृघ्न्याःपुंश्चल्याश्चप्रकीर्तितः ॥ नाभेरधस्तात्तिलकंमशकोलांछनंशुभम् ॥ १३० ॥ मशकस्तिलकंचिह्नंगुल्फदेशेदरिद्रकृत् ॥ करेकर्णेकपोलेवाकण्ठेवामेभवेद्यदि ॥ ३१ ॥ एषांत्रयाणामेकंतुप्राग्गर्भेपुत्रदंभवेत् ॥ भालगेनत्रिशूलेननिर्मितेनस्वयंभुवा ॥ ३२ ॥ नितंबिनीसहस्राणांस्वामित्वंयोषिदाप्नुयात् ॥ सुप्तापरस्परंयातुदंतान्किटिकिटायते ॥ ३३ ॥ सुलक्ष्मापिनसाशस्तायाकिंचित्प्रलपेत्तथा ॥ पाणौप्रदक्षिणावर्तोधर्म्योवामोनशोभनः ॥ ३४ ॥

शुभेलक्षणेउक्त्वाप्रसंगान्मशकतिलकलांछनानामपितेआह भ्रुवोरित्यष्टभिः ॥ तत्रमशकोमशकाकारश्चिह्नविशेषःचिपिटाकारइतिवा ॥ २५ ॥ तिलकस्तिलकाकारःपिप्लुतिरितिवा ॥ तिलकस्तिलकाकारोमशकश्चिपिटोसतः॥जडुलःकालकःपिप्लुस्तिलकास्तिलकालकइतिवचनात् ॥ लांछनंपद्मवज्रांकुशध्वजात्रिशूलादि ॥ २६ ॥ २७ ॥ २८ ॥ महिष्याःकृताभिषेकायाराज्ञ्याः ॥ २९ ॥ ॥ १३० ॥ ३१ ॥ ३२ ॥ सर्वलक्षणसंपन्नापिदोषविशेषेणत्याज्येत्याह सुप्तेत्येकेन ॥ किटिकिटायतेदंतघर्षणजंशब्दंकरोतीत्यर्थः ॥ ३३ ॥ वपुषःशुभाशुभेलक्षणेअभिधायक्रमप्राप्तस्यावर्त

३१

CC-0. In Public Domain. Digitization by eGangotri

स्यतेआह पाणावित्यारभ्यसुलक्षणेत्यतःप्राक्तनेनग्रंथेन ॥ प्रदक्षिणावर्तोरोम्णामितिशेषः ॥ धर्म्योधर्मार्हः ॥ वामोवामावर्तः ॥ ३४ ॥ श्रुतौकर्णे ॥ ईडितःस्तुतः ॥३५॥ अंतःपृष्ठंपृष्ठमध्ये ॥ नाभिसमःनाभिवद्वर्तुलाकारः ॥ भगमौलौयोनेरुपरिभागे ॥ भगमूलइतिकश्चित् ॥ ३६ ॥ सप्रदक्षिणावर्तः॥शकटभंगःशकटतुल्यः ॥ गुह्यवेधेनतत्पर्यंतेन ॥ ३७ ॥ उदरवेधेनउदरपर्यंतंप्राप्तेन ॥ ॥ ३८ ॥ ३९ ॥ मध्येकृकाटिकंकृकाटिकामध्ये ॥ १४० ॥ ४१ ॥ ४२ ॥ गंधादीनांषण्णांशुभाशुभलक्षणानिरतिशास्त्रादौद्रष्टव्यानि ॥ तथाच ॥ पद्मिनीपद्मगंधाचमीनगंधाच चित्रिणी ॥ शंखिनीक्षारगंधाचमदगंधाचहस्तिनी ॥ हंसपुन्नागवर्णाभायानारीरक्तलोचना ॥ अष्टौजनयतेपुत्रान्प्राप्नोतिपरमंसुखम् ॥ काकस्वराकाकजंघातथैवोर्ध्वस्वरातथा ॥ लंबोष्ठीलंबवदना तांकन्यांपरिवर्जयेत् ॥ हंसतुल्यगतिर्नारीराजपत्नीचसाभवेत् ॥ यस्यागमनमात्रेणभूमिकंपःप्रजायते ॥ सास्त्रीदैन्यकरीज्ञेयासामुद्रवचनंयथा ॥ आवर्तःप्रजनेयस्यामध्येचैवप्रदक्षिणः ॥ एकंसाज

नाभौश्रुतावुरसिवादक्षिणावर्तईडितः ॥ सुखायदक्षिणावर्तःपृष्ठवंशस्यदक्षिणे ॥ ३५ ॥ अन्तःपृष्ठंनाभिसमोबह्वायुःपुत्रवर्धनः ॥ राजपत्न्याःप्रदृश्ये तभगमौलौप्रदक्षिणः ॥ ३६ ॥ सचेच्छकटभंगःस्याद्बह्वपत्यसुखप्रदः ॥ कटिगोगुह्यवेधेनपत्यपत्यनिपातनः ॥ ३७ ॥ स्यातामुदरवेधेनपृष्ठावर्तौनशो भनौ ॥ एकेनहंतिभर्तारंभवेदन्येनपुंश्चली ॥ ३८ ॥ कण्ठगोदक्षिणावर्तोदुःखवैधव्यहेतुकः ॥ सीमन्तेथललाटेवात्याज्योदूरात्प्रयत्नतः ॥ ३९ ॥ सापतिंहंतिवर्षेणयस्यामध्येकृकाटिकम् ॥ प्रदक्षिणोवावामोवारोम्णामावर्त्तकःस्त्रियाः ॥ १४० ॥ एकोवामूर्धनिद्वौवावामेवामगतीयदि ॥ आदशाहं पतिघ्नौतौत्याज्यौदूरात्सुबुद्धिना ॥ ४१ ॥ कट्यावर्ताचकुलटानाभ्यावर्तापतिव्रता ॥ पृष्ठावर्त्ताचभर्तृघ्नीकुलटावाथजायते ॥ ४२ ॥ स्कंदउवाच ॥ सुलक्षणापिदुःशीलाकुलक्षणशिरोमणिः ॥ अलक्षणापिसासाध्वीसर्वलक्षणभूस्तुसा ॥ ४३ ॥ सुलक्षणासुचारित्रास्वाधीनापतिदेवता ॥ विश्वेशानुग्रहा देवगृहेयोषिदवाप्यते ॥ ४४ ॥ अलंकृताःस्ववासिन्योयाभिःप्राक्तनजन्मनि ॥ नानाविधैरलंकारैस्ताःसुरूपाभवंतिहि ॥ ४५ ॥ सुतीर्थेषुवपुर्याभिःक्ष यितंवाविहायितम् ॥ तालावण्यतरंगिण्योभवंतीहसुलक्षणाः ॥ ४६ ॥ अर्चिताजगतांमातायाभिर्मृडवधूरिव ॥ ताभवंतिसुचारित्रायोषाःस्वाधीनभ र्तृकाः ॥ ४७ ॥ स्वाधीनपतिकानांचसुशीलानांमृगीदृशाम् ॥ स्वर्गापवर्गावत्रैवसुलक्षणफलंहितत् ॥ ४८ ॥ सुलक्षणैःसुचरितैरपिमंदायुषंपतिम् ॥ दीर्घायुषंप्रकुर्वंतिप्रमदाःप्रमदास्पदम् ॥ ४९ ॥

नयेत्पुत्रंराजानंपृथिवीपतिमित्यादीनीति ॥ ४३ ॥ ननुतर्हिसुलक्षणत्वादिगुणविशिष्टासाध्वीस्त्रीकस्माल्लभ्यतेतत्राह ॥ सुलक्षणेति ॥ ४४ ॥ स्त्रीणांसुरूपत्वलावण्यसुचारित्र्यस्वाधीनभर्तृत्व प्राप्तौहेतूनाह अलंकृताइतित्रिभिः ॥ ऊढाअनूढावापितृगृहेसयौवनाःस्त्रियः ॥ स्ववासिन्यः ॥ स्वेषुज्ञातिषुवस्तुंशीलंयासामितिव्युत्पत्तेः ॥ सुवासिन्यइतिपाठेपिसएवार्थः ॥ चिरंटयइत्यर्थः ॥ स्ववासिनीचिरंटीस्याद्द्वितीयवयसिस्त्रियामितिरुद्रः ॥ चिरिंटीतुसुवासिनीतिचामरः ॥ ४५ ॥ सुतीर्थेषुप्रयागादिषु ॥ क्षयितंक्षयंनीतम् ॥ क्षालितमितिपाठेस्नापितमित्यर्थः ॥ विहायितंत्यक्तम् ॥ लावण्यतरंगिण्यःअंगसौष्ठवोर्मिमत्यः ॥ नद्यइवेत्यर्थः ॥ ४६ ॥ मृडवधूरिवेत्यत्रेवकारोऽवधारणार्थः ॥ इहेतिवापाठः ॥ शोभनंचारित्र्यंपातिव्रत्यादिलक्षणंयासांताःसुचारित्राः ॥ स्वाधीनः शुश्रूषादिभिर्वशीकृतःसंतोषितोनतुस्त्रीजितोभर्तायासांतास्तथा ॥ ४७ ॥ सुलक्षणवतीनांफलंदर्शयति ॥ स्वाधीनेति ॥ ४८ ॥ सुलक्षणैरिति ॥ तर्हिकिंतमुपजीव्योपपतिभिःसहरमितुमित्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंक्यपतिंविशिनष्टि ॥ प्रमदास्पदंप्रकृष्टहर्षाश्रयम् ॥ प्रसिद्धंचैतद्वनपर्वणि॥ पतिव्रतयासाविञ्यासत्यवतोदीर्घायुष्यंप्रहर्षाश्रयत्वंच ॥ ४९ ॥ लक्षणविचारप्रयोजनमाहातइति ॥ यतोऽल्पायुषंपतिं सुलक्षणाःस्त्रियश्चिरंजीविनंकुर्वंतिअतइत्यर्थः ॥ सु लक्षणाःपरिणेयाइत्यस्यव्यावर्त्यमाह ॥ हित्वेति ॥ अपीतिनिश्चये ॥ ५० ॥ उक्तानुवादपूर्वकमुत्तराध्यायार्थंप्रस्तावयति ॥ लक्षणानीति ॥ ॥ ५१ ॥ ॥ इतिश्रीरामानंदविरचितायांकाशीखंडटीकायांसप्तत्रिंशोध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ अथाष्टत्रिंशकेधर्म्येऽध्यायेतीवसुशोभने ॥ क्रियतेसमुदाचारात्सद्धर्मपरिवर्णनम् ॥ १ ॥ पूर्वाध्यायांतेविवाहान्वक्ष्यामीत्युक्तमतस्तानेवदर्शयति ॥ विवाहाइति ॥ ब्राह्मदैवार्षाविवाहाउच्यंतेप्राजापत्यासुरौचविवाहावुच्येते ॥ इतिवचनंविपरिणमय्यउच्यतइत्यस्याःक्रियायाएवानुषंगः ॥ तत्रब्राह्मोवरमाहूयदानम् ॥ दैवऋत्विजेदानम् ॥ आर्षोगोमिथुनादानेनदानम् ॥ प्राजापत्यःसहोभौचरतांधर्ममित्यभिधायदानम् ॥ आसुरःशुल्कंगृहीत्वादानम् ॥ गांधर्वःसमयान्मिथः ॥ राक्षसोभित्त्वाच्छित्त्वाहरणम् ॥ पैशाचःसुप्तायांमत्तायांवागमनम् ॥ तथाचमानवानिवचनानि ॥ आच्छाद्यचार्हयित्वाचश्रुतशीलवतेस्वयम् ॥ आहूयदानंकन्यायाब्राह्मोधर्मःप्रकीर्तितः ॥ यज्ञे

अतःसुलक्षणायोषापरिणेयाविचक्षणैः ॥ लक्षणानिपरीक्ष्यादौहित्वादुर्लक्षणान्यपि ॥ १५० ॥ लक्षणानिमयोक्तानिसुखायगृहमेधिनाम् ॥ विवाहानपिवक्ष्यामितन्निबोधघटोद्भव ॥ १५१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेस्त्रीलक्षणवर्णनंनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ स्कंदउवाच ॥ विवाहाब्राह्मदैवार्षाःप्राजापत्यासुरौतथा ॥ गांधर्वोराक्षसश्चापिपैशाचोऽष्टमउच्यते ॥ १ ॥ सब्राह्मोवरमाहूययत्रकन्यास्वलंकृता ॥ दीयतेतत्सुतःपूयात्पुरुषानेकविंशतिम् ॥ २ ॥ यज्ञस्थायर्त्विजेदैवस्तज्जःपातिचतुर्दश ॥ वरादादायगोद्वंद्वमार्षस्तज्जःपुनातिषट् ॥ ३ ॥ सहोभौचरतांधर्ममित्युक्त्वादीयतेर्थिने ॥ यत्र कन्याप्राजापत्यस्तज्जोवंशान्पुनातिषट् ॥ ४ ॥ चत्वारएतेविप्राणांधर्म्याःपाणिग्रहाःस्मृताः ॥ आसुरःक्रयणाद्द्रव्यैर्गांधर्वोन्योन्यमैत्रतः ॥ ५ ॥ प्रसह्यकन्याहरणाद्राक्षसोनिंदितःसताम् ॥ छलेनकन्याहरणात्पैशाचोगर्हितोऽष्टमः ॥ ६ ॥ प्रायःक्षत्रविशोरुक्तागांधर्वासुरराक्षसाः ॥ अष्टमस्त्वेषपापिष्ठःपापिष्ठानांचसंभवेत् ॥ ७ ॥

तुवितत्तेसम्यगृत्विजेकर्मकुर्वते ॥ अलंकृत्यसुतादानंदैवंधर्मंप्रचक्षते ॥ एकंगोमिथुनंद्वेवावरादादायधर्मतः ॥ कन्याप्रदानंविधिवदार्षोधर्मःसउच्यते ॥ सहोभौचरतांधर्ममितिवाचानुभाष्यतु ॥ कन्याप्रदानमभ्यर्च्यप्राजापत्योविधिःस्मृतः॥ज्ञातिभ्योद्रविणंदत्त्वाकन्यायाश्चैवशक्तितः ॥ कन्याप्रदानंस्वाच्छंद्यादासुरोधर्मउच्यते ॥ इच्छयान्योन्यसंयोगःकन्यायाश्चवरस्यच ॥ गांधर्वःसतुविज्ञेयोमैथुन्यःकामसंभवः ॥ हत्वाच्छित्वाचभित्त्वाचक्रोशंतींरुदतींगृहात् ॥ प्रसह्यकन्याहरणंराक्षसोविधिरुच्यते ॥ सुप्तांमत्तांप्रमत्तांवारहोयत्रोपगच्छति ॥ सपापिष्ठोविवाहानांपैशाचःकथितोऽष्टमइति ॥ १ ॥ एतानेवलक्षणतोविवृण्वन्यस्यवर्णस्ययोविवाहोधर्म्यो यस्यविवाहस्ययौगुणदोषौतत्तद्विवाहोत्पन्नापत्येषुचयेगुणाअगुणाश्चतत्सर्वंदर्शयति सब्राह्मइत्यादिनासवर्णइत्यतःप्राक्तनेनग्रंथेन ॥ २ ॥ ३ ॥ यत्रविवाहेकन्यादीयतेसविवाहःप्राजापत्यइत्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥ प्रायइति ॥ क्षत्रियस्यराक्षसएवधर्म्यः वैश्यशूद्रयोरासुरएवधर्म्यः प्राजापत्यः क्षत्रियादीनांजघन्यः गांधर्वश्चतुर्णांजघन्यः

CC-0. In Public Domain. Digitization by eGangotri

राक्षसोवैश्यशूद्रयोर्जघन्यइत्यादिसर्वप्रायोग्रहणेनसूच्यते ॥ तथाचमनुः ॥ चतुरोब्राह्मणस्याद्यान्प्रशस्तान्कवयोविदुः ॥ राक्षसंक्षत्रियस्यैकमासुरंवैश्यशूद्रयोः ॥ ७ ॥ सवर्णयेति ॥ चतुर्णामपिव र्णानांविवाहेषुसवर्णयाभार्ययाकरोग्राह्यः ॥ क्षत्रियापाणिग्रहणस्थानेब्राह्मणविवाहेषुक्षत्रिययाशरोब्राह्मणहस्तपरिगृहीतदंडैकदेशोग्राह्यइत्यर्थः ॥ वैश्ययाब्राह्मणक्षत्रियविवाहेब्राह्मणक्षत्रियीवधृततामे दैकदेशोग्राह्यः ॥ शूद्रयापुनर्द्विजातित्रयविवाहेप्रावृतवस्त्रदशाग्राह्या ॥ ८ ॥ असवर्णइति ॥ असवर्णोऽसवर्णसंबन्धीएषविधिः धार्यःक्षत्रिययाशरइत्यादिप्रकारएव ॥ वेदनेविवाहेविद्यतेज्ञाय तेऽनेनेतिवेदनंशास्त्रंतस्मिन्नितिवा ॥ स्मृतोदृष्टश्चेत्यर्थः ॥ असवर्णास्वेषइतिकाचित् ॥ सवर्णयाकरोग्राह्यइत्युक्तंस्पष्टयति ॥ सवर्णाभिस्त्विति ॥ ९ ॥ मंदानिभाग्यधनायूंषियेषांतेतथा ॥१०॥ ऋत्विति ॥ स्त्रीणांवरंगर्भानुपघातसंभोगम् ॥ तदुक्तंभागवते॥शश्वत्कामवरेणांहस्तुरीयंजगृहुःस्त्रियः ॥ तथाचमनुः॥ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा ॥पर्ववर्जंव्रजेच्चैनांतद्व्रतोरतिकाम्ययेति॥

सवर्णयाकरोग्राह्योधार्यःक्षत्रिययाशरः ॥ प्रतोदोवैश्ययाधार्योवासोंतःपज्जयातथा ॥ ८ ॥ असवर्णस्त्वेषविधिःस्मृतोदृष्टश्चवेदने ॥ सवर्णाभिस्तुसर्वाभिःपाणिर्ग्राह्यस्त्वयंविधिः ॥ ९ ॥ धर्म्यैर्विवाहैर्जायंतेधर्म्याएवशतायुषः ॥ अधर्म्यैर्धर्मरहितामंदभाग्यधनायुषः ॥ १० ॥ ऋतुकालाभिगमनंधर्मोयंगृहिणःपरः ॥ स्त्रीणांवरमनुस्मृत्ययथाकाम्यथवाभवेत् ॥ ११ ॥ दिवाभिगमनंपुंसामनायुष्यंपरंमतम् ॥ श्राद्धाहःसर्वपर्वाणियत्नात्त्याज्यानिधीमता ॥ १२ ॥ तत्रगच्छन्स्त्रियंमोहाद्धर्मात्प्रच्यवतेपरात् ॥ १३ ॥ ऋतुकालाभिगामीयःस्वदारनिरतश्चयः ॥ ससदाब्रह्मचारीचविज्ञेयःसद्गृहाश्रमी ॥ १४ ॥ ऋतुःषोडशयामिन्यश्चतस्रस्तासुगर्हिताः ॥ पुत्रास्तास्वपियायुग्माअयुग्माःकन्यकाप्रजाः ॥ १५ ॥ त्यक्त्वाचंद्रमसंदुःस्थंमघांपौष्णंविहायच ॥ शुचिःसन्निर्विशेत्पत्नींपुन्नामर्क्षेविशेषतः ॥ शुचिंपुत्रंप्रसूयेतपुरुषार्थप्रसाधकम् ॥ १६ ॥ आर्षेविवाहेगोद्वंद्वंयदुक्तंतन्नशस्यते ॥ शुल्कमण्वपिकन्यायाःकन्याविक्रयपापकृत् ॥ १७ ॥ अपत्यविक्रयीकल्पंवसेद्विट्कृमिभोजने ॥ अतोनाण्वपिकन्यायाउपजीवेत्पिताधनम् ॥ १८ ॥ स्त्रीधनान्युपजीवंतियेमोहादिहबांधवाः ॥ नकेवलंनिरयगास्तेषामपिह्निपूर्वजाः ॥ १९ ॥ पत्यातुष्यतियत्रस्त्रीतुष्येद्यत्रस्त्रियापतिः ॥ तत्रतुष्टामहालक्ष्मीर्निवसेद्दानवाऽरिणा ॥ २० ॥ वाणिज्यंनृपतेःसेवावेदानध्यापनंतथा ॥ कुविवाहःक्रियालोपःकुलेपतनहेतवः ॥ २१ ॥

यथायथावत् ॥ यथाभिलषितमित्यर्थः ॥ ११ ॥ तत्रापिनिषेधविशेषमाह ॥ सर्वपर्वाणीति ॥ तदुक्तम् ॥ कुहूपूर्णेंदुसंक्रांतिचतुर्दश्यष्टमीषुच ॥ नरश्चांडालयोनिःस्यात्स्त्रीतैलमांससेवनादिति ॥ ॥ १२ ॥ १३ ॥ ऋतुकालेऽभिगंतुंशीलंयस्यसतथा ॥ तथाचश्रुतिः ॥ ऋतौभार्यामुपेयादिति ॥ १४ ॥ कन्यकाःप्रजाःयाभ्यस्तथा ॥ १५ ॥ दुःस्थंराहुणाग्रस्तम् ॥ पुन्नामर्क्षं श्रवणहस्तपुनर्वसुमूलपुष्यमृगशीर्षाणि ॥ १६ ॥ आर्षइति ॥ आर्षेविवाहेगोद्वंद्वंगोमिथुनंशुल्कंयदुक्तंकैश्चित्तन्नशस्यतेप्रशस्यते ॥ यतःकन्यायाअण्वपिअपेशब्दाद्बह्वपिवाशुल्कंकन्याविक्रयेयत्पापंतत्कृदेवेत्यर्थः ॥ नन्वेवंचेत्स्वमतपरमतयोर्लक्षणैक्याद्विरोधापत्तिः ॥ न ॥ आर्षेविवाहेगोमिथुनंशुल्कमुत्कोचरूपमित्यन्येषांमतम् ॥ स्कन्दस्यतुनेदंमतंकिंत्वार्षविवाहसंपत्त्यैअवश्यकर्तव्ययागादिसिद्ध्येकन्यायैवादातुंशास्त्रीयंधर्मार्थमेतद्गृह्यतइति ॥ अतएवार्षलक्षणमापद्येतज्जःपुनातिषडित्युक्तम् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ वाणिज्यमिति ॥ वेदानध्यापनंवेदानामपाठनम् ॥ वेदानध्ययनंतथे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिक्वचित् ॥ विवाहप्रकरणंसमाप्तम् ॥ २१ ॥ इदानींवैवाहिकाग्निसंपाद्यंमहायज्ञानुष्ठानमाह ॥ कुर्यादिति ॥ विवाहेभवोवैवाहिकःतस्मिन्नग्नौगृह्यंगृह्योक्तंकर्मसायंप्रातर्होमाष्टकादिअग्निसंपाद्यपञ्च यज्ञांतर्गतवैश्वदेवाद्यनुष्ठानंप्रतिदिनसंपाद्यंचपाकंगृहस्थःकुर्यादित्यर्थः ॥ २२ ॥ गृहस्थेति ॥ पशुवधस्थानंसूना सूनेवसूना हिंसास्थानत्वगुणयोगात् ॥ कंडन्यादयःपंचगृहस्थस्यबीजादिहिं सास्थानानि ॥ कंडनीउलूखलमुसले ॥ पेषणीदृषदुपलयुगलात्मिका ॥ चुल्लीउंधानम् ॥ उदकुम्भोजलाधारकलशः ॥ मार्जनीवर्धन्यपरपर्यायगृहोपकरणसंमार्जनादिकर्त्री ॥ २३ ॥ तासामिति ॥ तासांकंडन्यादिसूनानांयथाक्रमंनिष्कृत्यर्थंतदुत्पन्नपापनाशनार्थंगृहिणांपंचमहायज्ञामन्वादिभिरनुष्ठेयतयानिर्दिष्टाः ॥ २४ ॥ तानेवपंचयज्ञान्निर्दिशति ॥ पाठनमिति ॥ पाठन

कुर्याद्वैवाहिकेवह्नौगृह्यंकर्मान्वहंगृही ॥ पंचयज्ञक्रियांचापिपक्तिंदैनंदिनीमपि ॥ २२ ॥ गृहस्थाश्रमिणःपंचसूनाकर्मदिनेदिने ॥ कंडनीपेषणीचुल्ली ह्युदकुंभस्तुमार्जनी ॥ २३ ॥ तासांचपंचसूनानांनिराकरणहेतवः ॥ क्रतवःपंचनिर्दिष्टागृहिश्रेयोभिवर्धनाः ॥ २४ ॥ पाठनंब्रह्मयज्ञःस्यात्तर्पणंचपि तृक्रतुः ॥ होमोदैवोबलिर्भौतोऽतिथ्यर्चानृक्रतुःक्रमात् ॥ २५ ॥ पितृप्रीतिंप्रकुर्वाणःकुर्वीतश्राद्धमन्वहम् ॥ अन्नोदकपयोमूलैःफलैर्वापिगृहाश्रमी॥२६॥ गोदानेनचयत्पुण्यंपात्रायविधिपूर्वकम् ॥ सत्कृत्यभिक्षवेभिक्षांदत्त्वातत्फलमाप्नुयात् ॥ २७ ॥ तपोविद्यासमिद्धेतेहुतंविप्रास्यपावके ॥ तारयेद्विघ्नसंघे भ्यःपापाब्धेरपिदुस्तरात् ॥ २८ ॥ अनर्चितोऽतिथिर्गेहाद्भग्नाशोयस्यगच्छति ॥ आजन्मसंचितात्पुण्यात्क्षणात्सहिबहिर्भवेत् ॥ २९ ॥ सांत्वपूर्वा णिवाक्यानिशय्यार्थेभूस्तृणोदके ॥ एतान्यपिप्रदेयानिसदाभ्यागततुष्टये ॥ ३० ॥ गृहस्थःपरपाकादीप्रेत्यतत्पशुतांव्रजेत् ॥ श्रेयःपरान्नपुष्टस्यगृह्णी यादन्नदोयतः ॥ ३१ ॥ आदित्योढोऽतिथिःसायंसत्कर्तव्यःप्रयत्नतः ॥ असत्कृतोन्यतोगच्छन्दुष्कृतंभूरियच्छति ॥ ३२ ॥ भुंजानोऽतिथिशेषान्न मिहायुर्धनभाग्भवेत् ॥ प्रणोद्यातिथिमन्नाशीकिल्बिषीचगृहाश्रमी ॥ ३३ ॥ वैश्वदेवांतसंप्राप्तःसूर्योढोवातिथिःस्मृतः ॥ नपूर्वकालआयातोनचदृष्टचरः क्वचित् ॥ ३४ ॥ बलिपात्रकरेविप्रेयद्यन्योतिथिरागतः ॥ अदत्त्वातंबलिंतस्मैयथाशक्त्यान्नमर्पयेत् ॥ ३५ ॥ कुमाराश्चस्ववासिन्योगर्भिण्योऽतिरुजा न्विताः ॥ अतिथेरादितोप्येतेभोज्यानात्रविचारणा ॥ ३६ ॥ पितृदेवमनुष्येभ्योदत्त्वाश्नात्यमृतंगृही ॥ स्वार्थंपचन्नघंभुंक्तेकेवलंस्वोदरंभरिः ॥ ३७ ॥

मध्यापनम् ॥ होमोदैवोदेवक्रतुः ॥ बलिर्भौतोभूतक्रतुः ॥ अतिथ्यर्चाऽतिथीनांसत्कारोनृक्रतुर्मनुष्ययज्ञः ॥ क्रमात्कंडन्यादीनांपंचसूनानांक्रमेणपंचपापनिवर्तकाइमेपंचयज्ञाइत्यर्थः ॥ चतुर्थेपा देनृयज्ञोऽतिथिसत्क्रियेतिक्वचित्पाठः ॥ २५ ॥ अन्नमदनीयम् ॥ अर्थमितिक्वचित् ॥ अर्घ्यैतिचान्यत्र ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ परपाकान्नमत्तुंशीलंयस्य परपाकस्यान्नस्यादोऽदनं वास्यास्तीतिपरपाकादी ॥ तत्पशुतांयस्यपाकमत्तितस्यपशुतामित्यर्थः ॥ ३१ ॥ आदित्योढआदित्येनास्तमितेनसहोढःप्राप्तइत्यर्थः ॥३२॥ प्रणोद्यत्यक्त्वादूरीकृत्येतियावत् ॥ ३३ ॥ अतिथेर्ल क्षणमाह वैश्वदेवेत्येकेन ॥३४॥ बलिपात्रकरेभूतबलिपात्रहस्तइत्यर्थः ॥३५॥ स्ववासिन्यश्चिरिंटचः ॥ ३६ ॥ अघमघहेतुत्वात् ॥ तथाचोक्तंभगवता ॥ भुंजतेतेत्वघंपापायेपचंत्यात्मकारणादिति॥

CC-0. In Public Domain. Digitization by eGangotri

स्वार्थंपचान्नित्यस्यार्थमाह ॥ केवलामिति ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ तेइतिपाठेयेइत्यर्थात् ॥ येइतिपाठेतेइति ॥ अथजन्मान्तरे ॥ ४१ ॥ ४२ ॥ भगेयोनौ ॥४३॥ उपसृष्टंग्रस्तम् ॥४४॥
नवीक्षेतेति ॥ असकृदितिज्ञेयम् ॥ वत्सतंत्रींबंधनेनवत्ससम्बद्धांरज्जुंवत्सबंधनरज्जुमात्रामितिवा ॥४५॥ मृदंगोपीचन्दनादिरूपाम् ॥४६॥ चैत्यवृक्षमातपादिसमयेसेव्यमानंवृक्षं पूज्यंवृक्षंवायस्याध
स्तात्पूजाक्रियतेतंवृक्षंवा ॥ सिद्धार्थसर्षपम् ॥४७॥ पीठाद्यंतरेणासनमुत्कटासनंतस्मिन् ॥४८॥ अश्नंतींभोजनंकुर्वतीम् ॥४९॥ पक्वान्नंलड्डुकादिकम् ॥ नोमांसमितिपृथग्वाक्यम् ॥ दीर्घकालंजिजी

माध्याह्निकंवैश्वदेवंगृहस्थःस्वयमाचरेत् ॥ पत्नीसायंबलिंदद्यात्सिद्धान्नैर्मंत्रवर्जितम् ॥ ३८ ॥ एतत्सायंतनंनामवैश्वदेवंगृहाश्रमे ॥ सायंप्रातर्भवेदेवंवैश्व
देवंप्रयत्नतः ॥ ३९ ॥ वैश्वदेवेनयेहीनाआतिथ्येनविवर्जिताः ॥ सर्वेतेवृषलाज्ञेयाःप्राप्तवेदाअपिद्विजाः ॥ ४० ॥ अकृत्वावैश्वदेवंतुभुंजतेयेद्विजाधमाः ॥
इहलोकेन्नहीनाःस्युःकाकयोनिंव्रजंत्यथ ॥ ४१ ॥ वेदोदितंस्वकंकर्मनित्यंकुर्यादतंद्रितः ॥ तद्धिकुर्वन्यथाशक्तिप्राप्नुयात्सद्गतिंपराम् ॥ ४२ ॥
षष्ठ्यष्टम्योर्वसेत्पापंतैलेमांसेसदैवहि ॥ पंचदश्यांचतुर्दश्यांतथैवचभगेक्षुरे ॥ ४३ ॥ उदयंतंनचेक्षेतनास्तंयंतंनमध्यगम् ॥ नराहुणोपसृष्टंचनांबुसंस्थं
दिवाकरम् ॥ ४४ ॥ नवीक्षेतात्मनोरूपमाशुधावेन्नवर्षति ॥ नोल्लंघयेद्वत्सतंत्रींननग्नोजलमाविशेत् ॥ ४५ ॥ देवतायतनंविप्रंधेनुंमधुमृदंघृतम् ॥
जातिवृद्धंवयोवृद्धंविद्यावृद्धंतपस्विनम् ॥ ४६ ॥ अश्वत्थंचैत्यवृक्षंचगुरुंजलभृतंघटम् ॥ सिद्धान्नंदधिसिद्धार्थंगच्छन्कुर्यात्प्रदक्षिणम् ॥ ४७ ॥ रजस्वलां
नसेवेतनाश्नीयात्सहभार्यया ॥ एकवासानभुंजीतनभुंजीतोत्कटासने ॥ ४८ ॥ नाश्नंतींस्त्रींसमीक्षेततेजस्कामोद्विजोत्तमः ॥ असंतर्प्यपितॄन्देवान्नाद्यादन्नं
नवंक्वचित् ॥ ४९ ॥ पक्वान्नंचापिनोमांसंदीर्घकालंजिजीविषुः ॥ नमूत्रंगोव्रजेकुर्यान्नवल्मीकेनभस्मनि ॥ ५० ॥ नगर्तेषुससत्वेषुनतिष्ठन्नव्रजन्नपि ॥
गोविप्रसूर्यवाय्वग्निचंद्रर्क्षांबुगुरूनपि ॥ ५१ ॥ अभिपश्यन्नकुर्वीतमलमूत्रविसर्जनम् ॥ तिरस्कृत्यावनिंलोष्टकाष्ठपर्णतृणादिभिः ॥ ५२ ॥ प्रावृत्यवा
ससामौलिंमौनीविण्मूत्रमुत्सृजेत् ॥ यथासुखमुखोरात्रौदिनेच्छायांधकारयोः ॥ ५३ ॥ भीतिषुप्राणबाधायांकुर्यान्मलविसर्जनम् ॥ मुखेनोपधमेन्ना
ग्निंनग्नांनेक्षेतयोषितम् ॥ ५४ ॥

विषुःपितॄनभ्यचर्यानभ्यर्च्यवामांसंनोअद्यादित्यर्थः ॥ पश्विष्टिंचविनेतिपाठेपश्वालंभनंयागंविनादीर्घकालंजिजीविषुर्देवान्पितॄन्सन्तर्प्यासन्तर्प्यवामांसंनाद्यादित्यन्वयः ॥ वल्मीकेवामलूरोद्धृतमृत्पुंजे ॥
॥ ५० ॥ ससत्वेषुप्राणिव्याप्तेषु ॥ तिष्ठन्नुत्तिष्ठन् ॥ ५१ ॥ मलमूत्रयोर्विसर्जनंत्यागम् ॥ मलोच्चारेतिपाठेपिसएवार्थः ॥ तिरस्कृत्याच्छाद्य ॥ अवनिंपृथ्वीम् ॥ ५२ ॥ मौलिंमस्तकम् ॥ ५३ ॥
मलविसर्जनंमलेत्युपलक्षणंमलमूत्रयोर्विसर्जनमित्यर्थः ॥ मुखेनोपधमेन्मुखवायुनाप्रज्वालयेत् ॥ एतत्तुलौकिकाग्निविषयंनवैदिकाग्निविषयम् ॥ नशूर्पेणधमेदग्निंनवस्त्रेणनपाणिना ॥ मुखेनो

१ नपश्येदात्मनश्छायामितिमनूक्तेरभिप्रायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पधमेदग्निमुखादग्निरजायतेतिवचनात् ॥ ५४ ॥ ५५ ॥ संविशेत्स्वपेत् ॥ प्रत्यक्सौम्यशिराःपश्चिमोत्तरमस्तकः ॥ प्रत्यग्याम्यशिराइतिपाठश्चित्यः ॥ विण्मूत्रादीनामेकवद्भावः ॥ ष्ठीवनंथूत्कृत्य श्लेष्मविक्षेपः ॥ ५६ ॥ नाचक्षीतनकथयीत ॥ धयंतींभक्षयंतींपिबंतींवा ॥ शयानंज्येष्ठंनप्रबोधयेत् ॥ ५७ ॥ अंजलिनाकरपुटेन ॥ उद्धृतसारंदूरीकृतनवनीतादि ॥ उद्धृतसारंगतस्नेहंपिण्याकादी तिवा ॥ ५८ ॥ तौर्यत्रिकप्रियःगीतनृत्यवाद्यप्रियः ॥ नधावयेन्नक्षालयेत् ॥ ५९ ॥ ६० ॥ नासीतनोपविशेत् ॥ ६१ ॥ प्रेतधूमंशवदाहधूमम् ॥ सरित्तरंनदीतरणंबाहुभ्यामितिशेषः ॥ नबाहुभ्यां नदींतरेदितिमनूक्तेः ॥ बालातपंप्रातःकालीनसूर्यातपम् ॥ ६२ ॥ स्नात्वानमार्जयेद्गात्रंकरस्नानवस्त्राभ्यामितिशेषः ॥ करेणनोत्सृजेद्गात्रंस्नानवस्त्रेणवापुनः॥शुनोच्छिष्टंभवेद्गात्रंपुनःस्नानेनशुद्ध्यती

नाग्नींप्रतापयेदग्नौनवस्त्वशुचिनिक्षिपेत् ॥ प्राणिहिंसांनकुर्वीतनाश्नीयात्संध्ययोर्द्वयोः ॥५५॥ नसंविशेतसंध्यायांप्रत्यक्सौम्यशिराअपि ॥ विण्मूत्रष्ठीवनंनाप्सुकुर्याद्दीर्घजिजीविषुः ॥५६॥ नाचक्षीतधयंतींगांनेंद्रचापंप्रदर्शयेत् ॥ नैकःसुप्यात्क्वचिच्छून्येनशयानंप्रबोधयेत् ॥ ५७ ॥ पंथानंनैकलोयाया न्नवार्यंजलिनापिबेत् ॥ नदिवोद्धृतसारंचभक्षयेद्दधिनोनिशि ॥ ५८ ॥ स्त्रीधर्मिण्यानाभिवदेन्नाद्यादातृप्तिरात्रिषु ॥ तौर्यत्रिकप्रियोनस्यात्कांस्येपादौ नधावयेत् ॥ ५९ ॥ श्राद्धंकृत्वापरश्राद्धेयोऽश्नीयाज्ज्ञानवर्जितः ॥ दातुःश्राद्धफलंनास्तिभोक्ताकिल्बिषभुग्भवेत् ॥ ६० ॥ नधारयेदन्यभुक्तंवासश्चो पानहावपि ॥ नभिन्नभाजनेश्नीयान्नासीताग्न्यादिदूषिते ॥ ६१ ॥ आरोहणंगवांपृष्ठेप्रेतधूमंसरित्तरम् ॥ बालातपंदिवास्वापंत्यजेद्दीर्घंजिजीविषुः ॥ ६२ ॥ स्नात्वानमार्जयेद्गात्रंविसृजेन्नशिखांपथि ॥ हस्तौशिरोनधुनुयान्नाकर्षेदासनंपदा ॥ ६३ ॥ नोत्पाटयेल्लोमनखंदशनेनकदाचन ॥ करजैः करजच्छेदंतृणच्छेदंविवर्जयेत् ॥ ६४ ॥ शुभायनयदायत्यांत्यजेत्तत्कर्मयत्नतः ॥ अद्वारेणनगंतव्यंस्ववेश्मपरवेश्मनोः ॥ ६५ ॥ क्रीडेन्नाक्षैःसहासी तनधर्मघ्नैर्नरोगिभिः ॥ नशयीतक्वचिन्नग्नःपाणौभुंजीतनैवच ॥ ६६ ॥ आर्द्रपादकरास्योऽश्नन्दीर्घकालंचजीवति ॥ संविशेन्नार्द्रचरणोनोच्छिष्टःक्व चिद्व्रजेत् ॥ ६७ ॥ शयनस्थोनचाश्नीयान्नपिबेन्नजपेद्द्विजः ॥ सोपानत्कश्चनाचामेन्नतिष्ठन्धारयापिबेत् ॥ ६८ ॥ सर्वंतिलमयंनाद्यात्सायंशर्मा भिलापुकः ॥ ननिरीक्षेतविण्मूत्रेनोच्छिष्टःसंस्पृशेच्छिरः ॥ ६९ ॥

तिवचनात् ॥ तर्पणात्पूर्वमित्येकेनाकर्षेद्गुपवेशनार्थंनानयेदित्यर्थः ॥६३॥ करजैर्नखैःकरजच्छेदंनखच्छेदंच ॥ दंतैश्छेदंविवर्जयेदितिपाठेदंतैश्चेत्यर्थः॥करेणैवविवर्जयेदितिपाठेकरेणापीत्यर्थः ॥६४॥ आयत्यामुत्तरकाले ॥ स्ववेश्मपरवेश्मनोर्द्वारेणमुख्यद्वारंविहायद्वारांतरेणनगंतव्यमित्यर्थः ॥ परवेश्मचेतिक्वचित्पाठः ॥ ६५ ॥ पाणावितियत्यन्यविषयम् ॥ करेकर्पटकेचैवआयसेताम्रभाजने ॥ भुंजन्भिक्षुर्नलिप्येतलिप्यंतेगृहमेधिनइतिवचनात् ॥ ६६ ॥ अर्द्राणिपादकरास्यानियस्यसः ॥ संविशेत्स्वपेत् ॥६७॥ शय्यतेऽस्मिन्नितिशयनंशय्यातत्रस्थः ॥ सोपानत्कःउपानद्भ्यांपादुकाभ्यां युक्तः ॥ चःसमुच्चये ॥ नतिष्ठन्नित्यनेनसंबध्यते ॥ तिष्ठंश्चउत्तिष्ठन् ॥ धारयाहस्ताभ्यांपानपात्रधारणमंतरेणधारयापानपात्रमुखधारयेतिवा ॥ ६८ ॥ सर्वंतिलमयंयत्किंचित्तिलसंबद्धंकृसरमो

दकादीत्यर्थः ॥ ६९ ॥ तुषादिकंचनाधितिष्ठेन्नस्पृशेत् ॥ तुषादीनधिष्ठायनतिष्ठेदितिवा ॥ कपालिकाभग्नखर्परादिखंडाः ॥ ७० ॥ वैदिकंमंत्रंनश्रावयेदित्यनेनतंत्राद्युक्तंश्रावयेदित्यभ्यनुजानाति॥ ॥ ७१ ॥ धर्मोपदेशोब्राह्मणकर्तृकःशूद्रकर्तृकोवा ॥ स्वश्रेयइत्यत्रस्वशब्दउपदेष्टृपरः ॥ द्वितीयेश्रोतृपरोपि ॥ ७२ ॥ कराभ्यामित्यस्याग्रेपिसंबंधः ॥ ७३ ॥ सान्वयोवंशसहितः ॥ ७४ ॥ अकालविद्युत्स्तनितेवर्षर्तेतिरिक्तकाले मेघगर्जितेविद्युत्सहितगर्जितइतिवा ॥ ७५ ॥ वृषलस्याधार्मिकस्यवाउपांतेसमीपे ॥ राज्ञोराहोश्वसूतकेनृपस्यसूतकेराहोश्वसूतकेग्रहणइत्यर्थः ॥ ७६ ॥

नाधितिष्ठेत्तुषांगारभस्मकेशकपालिकाः ॥ पतितैःसहसंवासःपतनायैवजायते ॥ ७० ॥ श्रावयेद्वैदिकंमंत्रंनशूद्रायकदाचन ॥ ब्राह्मण्याद्धीयतेविप्रः शूद्रोधर्माच्चहीयते ॥ ७१ ॥ धर्मोपदेशःशूद्राणांस्वश्रेयःप्रतिघातयेत् ॥ द्विजशुश्रूषणंधर्मःशूद्राणांहिपरोमतः ॥ ७२ ॥ कंडूयनंहिशिरसःपाणिभ्यां नशुभंमतम् ॥ आताडनंकराभ्यांचक्रोशनंकेशलुंचनम् ॥ ७३ ॥ अशास्त्रवर्तिनोभूपाल्लुब्धात्कृत्वाप्रतिग्रहम् ॥ ब्राह्मणःसान्वयोयातिनरकानेकविंशतिम् ॥ ७४ ॥ अकालविद्युत्स्तनितेवर्षर्तौपांसुवर्षणे ॥ महावातध्वनौरात्रावनध्यायाःप्रकीर्तिताः ॥ ७५ ॥ उल्कापातेचभूकंपेदिग्दाहेमध्यरात्रिषु ॥ संध्ययोर्वृषलोपांतेराज्ञोराहोश्चसूतके ॥ ७६ ॥ दर्शाष्टकासुसूतायांश्राद्धिकंप्रतिगृह्यच ॥ प्रतिपद्यपिपूर्णायां[1]गजोष्ट्राभ्यांकृतांतरे ॥ ७७ ॥ खरोष्ट्रक्रोष्टृविरुतेसमवायेरुदत्यपि ॥ उपाकर्मणिचोत्सर्गेनाविमार्गेंतरौजले ॥ ७८ ॥ आरण्यकमधीत्यापिबाणसाम्नोरपिध्वनौ ॥ अनध्यायेषुचैतेषुनाधीयीत द्विजःक्वचित् ॥ ७९ ॥ कृतांतरायोनपठेद्भेकाखुश्वाहिबभ्रुभिः ॥ भूताष्टम्योःपंचदश्योर्ब्रह्मचारीसदाभवेत् ॥ ८० ॥ अनायुष्यकरंचैवपरदारोपसर्पणम् ॥ तस्मात्तद्दूरतस्त्याज्यंवैरिणांचोपसेवनम् ॥ ८१ ॥ पूर्वर्द्धिभिःपरित्यक्तमात्मानंनावमानयेत् ॥ सदोद्यमवतांयस्माच्छ्रियोविद्यानदुर्लभाः ॥ ८२ ॥ सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियम् ॥ प्रियंचनानृतंब्रूयादेषधर्मोघटोद्भव ॥ ८३ ॥ भद्रमेववदेन्नित्यंभद्रमेवविचिंतयेत् ॥ भद्रैरेवेहसंसर्गोनाभद्रैश्चकदाचन ॥ ८४ ॥ रूपवित्तकुलैर्हीनान्सुधीर्नाधिक्षिपेन्नरान् ॥ पुष्पवंतौनचेक्षेततत्रशुचिर्ज्योतिषांगणम् ॥ ८५ ॥

श्राद्धिकंश्राद्धनिमंत्रणंश्राद्धसंबंधिद्रव्यंवा ॥ पूर्णायांषड्दंडपरिमितायांप्रतिपद्यपिनतुन्यूनायाम् ॥ ७७ ॥ उत्सर्गेऋगादीनाम् ॥ ७८ ॥ बाणसाम्नोः शरसामवेदयोर्ध्वनौश्रूयमाणे ॥ अपिशब्दादार्तस्वनेपि ॥ ७९ ॥ बभ्रुर्नकुलः भूताचतुर्दशी ॥ पंचदश्योः पूर्णिमामावास्ययोः ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ इहमनुष्ययोनौ संसर्गः कार्यइतिशेषः ॥ ८४ ॥ पुष्पवंतौचन्द्रसूर्यौ ॥ सूर्या

१ पूर्णायां—पूर्णिमायां—नन्दाभद्राजयारिक्तापूर्णाश्चतिथयःक्रमात् ।

सोमावितिक्वचित्पाठः ॥ ८५ ॥ उत्कोचद्रव्यंनामभयादिकंप्रदर्श्ययद्गृह्यते ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ विनम्रधमनिः प्रणतनाडिकः ॥ विनम्रकंधरइतिक्वचित् ॥ विनम्रधर्मनिष्ठःस्या दितिचान्यत्र ॥ यस्मादयंविनम्रधमन्यादिर्भवेत्तस्मात्ताननुयायादित्यन्वयः ॥ ९० ॥ ९१ ॥ ९२ ॥ सान्वयोवंशसहितः ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ सुप्रजाःशोभनपुत्रः ॥ ९७ ॥

वाचोवेगंमनोवेगंजिह्वावेगंचवर्जयेत् ॥ उत्कोचद्यूतदौत्यार्तद्रव्यंदूरात्परित्यजेत् ॥८६॥ गोब्राह्मणाग्नीनुच्छिष्टपाणिनानैवसंस्पृशेत् ॥ नस्पृशेदनिमित्ते नखानिस्वानित्वनातुरः ॥ ८७ ॥ गुह्यजान्यपिलोमानितत्स्पर्शादशुचिर्भवेत् ॥ पादधौतोदकंमूत्रमुच्छिष्टान्नोदकानिच ॥ ८८ ॥ निष्ठीवनंच श्लेष्माणं गृहाद्दूरंविनिक्षिपेत् ॥ अहर्निशंश्रुतेर्जाप्याच्छौचाचारनिषेवणात् ॥ अद्रोहवत्याबुद्ध्याचपूर्वंजन्मस्मरेद्द्विजः ॥ ८९ ॥ वृद्धान्प्रयत्नाद्वंदेतदद्यात्तेषांस्वमा सनम् ॥ विनम्रधमनिस्तस्मादनुयायात्ततश्चतान् ॥ ९० ॥ श्रुतिभूदेवदेवानांनृपसाधुतपस्विनाम् ॥ पतिव्रतानांनारीणांनिंदांकुर्यान्नकर्हिचित् ॥ ९१ ॥ नमनुष्यस्तुतिंकुर्यान्नात्मानमपमानयेत् ॥ अभ्युद्यतंनप्रणुदेत्परमर्माणिनोच्चरेत् ॥ ९२ ॥ अधर्मदंधतेपूर्वंविद्विष्टूनपिसंजयेत् ॥ सर्वतोभद्रमाप्यापिततो नश्येच्चसान्वयः ॥ ९३ ॥ उद्धृत्यपंचमृत्पिंडान्स्नायात्परजलाशये ॥ अनुद्धृत्यचतत्कर्तुरेनसःस्यात्तुरीयभाक् ॥ ९४ ॥ श्रद्धयापात्रमासाद्ययत्किं चिद्दीयतेवसु ॥ देशेकालेचविधिनातदानंत्यायकल्पते ॥ ९५ ॥ भूप्रदोमंडलाधीशःसर्वत्रसुखिनोन्नदाः ॥ तोयदातासदातृप्तोरूपवान्रूप्यदोभवेत् ॥ ९६ ॥ प्रदीपदोनिर्मलाक्षोगोदाताऽर्यमलोकभाक् ॥ स्वर्णदाताचदीर्घायुस्तिलदःस्यात्सुप्रजाः ॥ ९७ ॥ वेश्मदोऽत्युच्चसौधेशोवस्त्रदश्चंद्रलो कभाक् ॥ हयप्रदोदिव्ययानोलक्ष्मीवान्वृषभप्रदः ॥ ९८ ॥ सुभार्यःशिबिकादातासुपर्यंकप्रदोपिच ॥ धान्यैःसमृद्धिमान्नित्यमभयप्रदईशिता ॥९९॥ ब्रह्मदोब्रह्मलोकेज्योब्रह्मदःसर्वदोमतः ॥ उपायेनापियोब्रह्मदापयेत्सोपितत्समः ॥ १०० ॥ श्रद्धयाप्रतिगृह्णातिश्रद्धयायःप्रयच्छति ॥ स्वर्गिणौ तावुभौस्यातांपततोऽश्रद्धयात्यधः ॥ १ ॥ अनृतेनक्षरेद्यज्ञस्तपोविस्मयतःक्षरेत् ॥ क्षरेत्कीर्तनतोदानमायुर्विप्रापवादतः ॥ २ ॥ गंधपुष्पकुशाञ्छय्यां शाकंमांसंपयोदधि ॥ मणिमत्स्यगृहंधान्यंग्राह्यमेतदुपस्थितम् ॥ ३ ॥ मधूदकंफलंमूलमेधांस्यभयदक्षिणा ॥ अभ्युद्यतानिग्राह्याणित्वेतान्यपिनि कृष्टतः ॥ ४ ॥ दासनापितगोपालकुलमित्रार्धसीरिणः ॥ भोज्यान्नाःशूद्रवर्गेमीतथात्मविनिवेदकः ॥ ५ ॥ इत्थमानृण्यमासाद्यदेवर्षिपितृजादृणात् ॥ माध्यस्थ्यमाश्रयेद्गेहेसुतेविष्वग्विसृज्यच ॥ ६ ॥

॥ ९८ ॥ शिबिकानरयानम् ॥ पर्यंकःखट्वा ईशिताशास्ताईश्वरइत्यर्थः ॥९९॥१००॥ अत्यधःअतिशयेनाधः ॥ १ ॥ विस्मयतोगर्वात् ॥ २ ॥ ग्राह्यंनिकृष्टतइत्यग्रिमेणान्वयः ॥ ३ ॥ ४ ॥ अर्धसीरिणोऽर्धहालिकाः ॥ आत्मनिवेदकोऽत्यन्तभक्तः ॥ ५ ॥ माध्यस्थ्यमौदासीन्यमाश्रयेत् ॥ किंकृत्वा ॥ विष्वक्सर्वतोगृहव्यापारान्सुतेविसृज्यचकाराद्भार्यादींश्च ॥ आश्रयेदेहीतिक्वचित्पाठः ॥

CC-0. In Public Domain. Digitization by eGangotri

सुतेभारमितिकाशीवासंचेतिशेषः ॥ ६ ॥ उभयत्रक्रमेणहेतुमाह ॥ सम्यगिति ॥ ७ ॥ अंतिमपक्षस्यसुलभत्वेनाधिक्यमाह ॥ सम्यगिति ॥८॥ शतात्परंपरःशतंन्तस्माच्चेन्म्रियतइतिशेषः ॥ ९ ॥ सदाचारंनिरूपणफलमाह ॥ साचेति ॥ यस्यांशरीरत्यागमात्रतोध्रुवामुक्तिःसेत्यर्थः ॥११०॥११ ॥ १२॥१३॥ काशीतियद्द्व्यक्षरंतदेवपीयूषंकेवलंपिबामि ॥ हीतिनिश्चये ॥ चकारोऽवधारणे ॥ पीयूषाधारोजीवामीतिकचित् ॥१४॥११९॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टत्रिंशोध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ त्रिंशेनवाधिकेपुण्येऽध्यायेत्यंतमनोरमे ॥ वाराणसीदिवोदासा विमुक्तमहिमोच्यते ॥ १ ॥ पूर्वाध्यायांतेऽविमुक्तस्यमाहात्म्यंवक्तुंसमपचक्रमेइत्युक्तमतस्तदेवप्रस्तावयति ॥ शृण्वगस्त्येति ॥ नैश्रेयस्यामोक्षरूपायाः ॥ १ ॥ काश्यामहिमानमाह ॥ परमिति ॥

गेहेपिज्ञानमभ्यस्येत्काशींवाथसमाश्रयेत् ॥ सम्यग्ज्ञानेनवामुक्तिःकिंवाविश्वेशवेश्मनि ॥ ७ ॥ सम्यग्ज्ञानंभवेत्पुंसांकुतएकेनजन्मना ॥ वाराणस्यां ध्रुवामुक्तिःशरीरत्यागमात्रतः ॥ ८ ॥ अद्यश्वोवापरश्वोवाकालाद्वाथपरःशतात् ॥ सत्वरोगत्वरोदेहःकाश्यांचेदमृतीभवेत् ॥ ९ ॥ साचवाराणसीलभ्या सदाचारवतासदा ॥ मनसापिसदाचारमतोविद्वान्नलंघयेत् ॥ ११० ॥ आकर्ण्येतिततोगस्त्यःपुनःप्राहषडाननम् ॥ पुनःकाशींसमाचक्ष्वसदाचारे णयाप्यते ॥ ॥ ११ ॥ कानिकानिचलिंगानिस्कंदज्ञानप्रदानिच ॥ वाराणस्यांपरिब्रूहितानिमेपरिपृच्छतः ॥ १२ ॥ विनाकाशींनमेप्रीतिर्विनाकाशीं नमेरतिः ॥ चित्रपुत्रकवच्चास्मिविनाकाशींषडानन ॥ १३ ॥ ननिद्रामिनजागर्मिनाश्नामिनपिबाम्यपः ॥ काशींद्व्यक्षरपीयूषंपिबामिहिचकेवलम् ॥ १४ ॥ इतिश्रुत्वावचःस्कंदोमैत्रावरुणिभाषितम् ॥ अविमुक्तस्यमाहात्म्यंवक्तुंसमुपचक्रमे ॥ ११९ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यां संहितायां काशीखंडेपूर्वार्द्धेसदाचारवर्णनंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ स्कंदउवाच ॥ शृण्वगस्त्यमहाभागकथांपापप्रणाशिनीम् ॥ नैःश्रेयस्याः श्रियोहेतुमविमुक्तसमाश्रयाम् ॥ १ ॥ परंब्रह्मयदाम्नातंनिष्प्रपंचंनिरात्मकम् ॥ निर्विकल्पंनिराकारमव्यक्तंस्थूलसूक्ष्मवत् ॥ २ ॥ तदेतत्क्षेत्रमापूर्य स्थितंसर्वगमप्यहो ॥ किमन्यत्रनशक्तोसौजंतून्मोचयितुंभवात् ॥ ३ ॥ भवोध्रुवंयदत्रैवमोचयेत्तंनिशामय ॥ महत्यायोगयुक्त्यावामहादानैरकामिकैः ॥ ४ ॥ सुमहद्भिस्तपोभिर्वाशिवोन्यत्रविमोचयेत् ॥ योगयुक्तिंनमहतींनदानानिमहांतिच ॥ ९ ॥ नतपांस्यतिदीर्घाणिकाश्यांमुक्त्यैशिवोर्थयेत् ॥ वियुनक्तिनयत्काश्याउपसर्गेमहत्यपि ॥ ६ ॥

यत्परंब्रह्मवेदांतेष्वाम्नातंतदेतत्क्षेत्रमापूर्यस्थितमित्यग्रेणसंबंधः ॥ निरात्मकंशरीरद्वयरहितम् ॥ निर्विकल्पंभेदरहितम्॥निष्प्रपंचामित्यादीनांयथेष्टंहेतुमत्त्वम् ॥ स्थूलसूक्ष्मवत्कार्यकारणरूपम् ॥२॥ अहोआश्चर्येहर्षेवा ॥ काश्यामेवमोचयतिनान्यत्रेत्यभिनयपूर्वकंदर्शयति ॥ किमन्यत्रेति ॥ भवात्संसारात् ॥ भवेदितिकचित् ॥ ३ ॥ अकामिकैर्निष्कामैरित्युभयत्रसंबध्यते ॥ ४ ॥ ९ ॥ अतिदीर्घकालमारभ्यकृतानिअतिदीर्घाणि ॥ अतितीव्राणीतिकचित् ॥ अर्थयेत् प्रार्थयेत् ॥ किमितिनप्रार्थयेत् अन्यथैवतत्रितयस्यजातत्वादित्याह ॥ वियुनक्तीति ॥ उपसर्गेपीडायाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काश्याःसकाशान्नवियुनक्तिपृथग्भवतीतियदयमेवमहायोगइत्यन्वयः ॥ काशीमितिक्वचित् ॥ ६ ॥ ७ ॥ सुमनोवृत्त्यानिष्कामेनविश्वेश्वरबुद्ध्यावा ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ भूतायां चतुर्दश्याम् ॥१२॥१३॥१४॥१५॥ वर्षमिति ॥ यद्व्रतीत्यत्रयत्फलमितिक्वचित्पाठः ॥ तत्फलमित्युत्तरार्धेपि स्फुटंस्यात्शिवरात्रौतत्काश्यामविकलंफलमितिच ॥१६॥ चुलुकेनगंडूषेण ॥१७॥ विपत्तिमिच्छतोमरणंप्राप्नुवतः ॥ १८ ॥ कर्णेजपमेवाभिनयपूर्वकंफलसहितंदर्शयति ॥ शंभुस्तदिति ॥ १९ ॥ अविमुक्तमहिमवर्णनार्थमेवदिवोदासमहिमानंवक्तुंप्रस्तावयति ॥ स्मारंस्मारमिति ॥

अयमेवमहायोगउपयोगस्त्विहापरः ॥ नियमेनतुविश्वेशेपुष्पंपत्रंफलंजलम् ॥ ७ ॥ यद्दत्तंसुमनोवृत्त्यामहादानंतदत्रवै ॥ मुक्तिमंडपिकायांचक्षणंय त्स्थिरमास्यते ॥ ८ ॥ स्नात्वागंगामृतेशुद्धेतपएतदिहोत्तमम् ॥ सत्कृत्यभिक्षवेभिक्षायत्काश्यांपरिदीयते ॥ तुलापुरुषएतस्याःकलांनार्हतिषोडशीम् ॥ ९ ॥ हृदिसंचिंत्यविश्वेशंक्षणंयद्विनिमील्यते ॥ देवस्यदक्षिणेभागेमहायोगोयमुत्तमः ॥ १० ॥ इदमेवतपोत्युग्रंयदिंद्रियविलोलताम् ॥ निषिध्यस्थी यतेकाश्यांक्षुत्तापाद्यवमन्यच ॥ ११ ॥ मासिमासियदाप्येतव्रताच्चांद्रायणात्फलम् ॥ अन्यत्रतदिहाप्येतभूतायांनक्तभोजनात् ॥ १२ ॥ मासोपवा सादन्यत्रयत्फलंसमुपार्ज्यते ॥ श्रद्धयैकोपवासेनतत्काश्यांस्यादसंशयम् ॥१३॥ चातुर्मास्यव्रतात्प्रोक्तंयदन्यत्रमहाफलम् ॥ एकादश्युपवासेनतत्काश्यां स्यादसंशयम् ॥ १४ ॥ षण्मासान्नपरित्यागाद्यदन्यत्रफलंलभेत् ॥ शिवरात्र्युपवासेनतत्काश्यांजायतेध्रुवम् ॥ १५ ॥ वर्षंकृत्वोपवासानिलभेदन्यत्र यद्व्रती ॥ तत्फलंस्यात्त्रिरात्रेणकाश्यामविकलंमुने ॥ १६ ॥ मासिमासिकुशाग्रांबुपानादन्यत्रयत्फलम् ॥ काश्यामुत्तरवाहिन्यामेकेनचुलुकेनतत् ॥ १७ ॥ अनंतोमहिमाकाश्याःकस्तंवर्णयितुंप्रभुः ॥ विपत्तिमिच्छतोजंतोर्यत्रकर्णेजपःशिवः ॥ १८ ॥ शंभुस्तत्किंचिदाचष्टेम्रियमाणस्यजन्मिनः ॥ कर्णेऽक्षरंयदाकर्ण्यमृतोप्यमृततांव्रजेत् ॥ १९ ॥ स्मारंस्मारंस्मररिपोःपुरींत्वमिवशंकरः ॥ अद्युनोन्मंदरंयातोबहुशस्तदवाप्तये ॥२०॥ अगस्त्यउवाच ॥ स्वकार्यनिपुणैःस्वामिन्गीर्वाणैरतिदारुणैः ॥ त्याजितोहंपुरींकाशींहरोत्याक्षीत्कुतःप्रभुः ॥ २१ ॥ पराधीनोहमिवकिंदेवदेवःपिनाकवान् ॥ काशिकां सोऽत्यजत्कस्मान्निर्वाणमणिराशिकाम् ॥ २२ ॥ ॥ स्कंदउवाच ॥ ॥ मित्रावरुणसंभूतकथयामिकथामिमाम् ॥ तत्याजचयथास्थाणुःकाशीं विध्युपरोधतः ॥ २३ ॥ प्रार्थितस्त्वंयथालेखैःपरोपकृतयेमुने ॥ द्रुहिणेनतथारुद्रःस्वरक्षणविचक्षणः ॥ २४ ॥

स्मारंस्मारंस्मृत्वास्मृत्वा ॥ २० ॥ विश्वेश्वरस्यकाशींविहायान्यत्रगमनंसुष्ठुदुर्घटमितिमन्वानःपृच्छति स्वकार्येतिद्वाभ्याम् ॥ २१ ॥ उक्तमेवस्पष्टयति ॥ परेति ॥ पिनाकवानाजगववान् ॥ पिना कधृगितिक्वचित् ॥ एवंविधनिर्वाणाभिप्रायेणकाशिकामित्युक्तम् ॥ २२ ॥ विध्युपरोधतोहिरण्यगर्भप्रार्थनया ॥ २३ ॥ लेखैर्देवैः ॥ स्वरक्षणविचक्षणोभक्तरक्षणचतुरःस्वांशभूतानांजीवानांमोक्ष

CC-0. In Public Domain. Digitization by eGangotri

दानेनरक्षणविचक्षणइतिवा ॥ २४ ॥ २५ ॥ पाद्मेकल्पेविष्णोर्नाभिपद्मेभूरादिलोकत्रयकल्पनास्पष्टौमनोरन्तरे ॥ कथंभूते ॥ स्वायंभुवेस्वायंभुवमनुसम्बन्धिनिस्वायंभुवस्यमनोरन्तरइत्यर्थः ॥ प्रकंपिनीप्रचालिनीइतस्ततोनेत्रीत्यर्थः ॥२६॥२७॥ कच्छेषुपर्वतप्रान्तेषु ॥ मुनिवृत्त्याफलमूलाद्याहारेण ॥ अरण्यानीमहारण्यम्॥ग्रामाभृगुप्रोक्ताः ॥ विप्राश्चविप्रभृत्याश्चयत्रचैववसन्तिते ॥ सतुग्रामइतिप्रोक्तःशूद्राणांवासएवचेति ॥ खर्वटागिरितटग्रामाभृगुप्रोक्तावा ॥ एकतोयत्रतुग्रामोनगरंचैकतःस्थितम् ॥ मिश्रंतुखर्वटंनामनदीगिरिसमाश्रयमिति ॥२८॥ क्रव्यादामांसात्तारः ॥ अभ्रंलिहोमेघपर्यं

॥ अगस्त्यउवाच ॥ ॥ कथंसभगवान्रुद्रोद्रुहिणेनकृपांबुधिः ॥ प्रार्थितोभूत्किमर्थंचतन्मेब्रूहिषडानन ॥ २५ ॥ ॥ स्कंदउवाच ॥ ॥ पाद्मेकल्पे पुरावृत्तेमनोःस्वायंभुवेंतरे ॥ अनावृष्टिरभूद्विप्रसर्वभूतप्रकंपिनी ॥ २६ ॥ तयातुषष्टिहायिन्यापीडिताःप्राणिनोऽखिलाः ॥ केचिदंबुधितीरेषुगिरिद्रोणीषुकेचन ॥ २७ ॥ महानिम्नेषुकच्छेषुमुनिवृत्त्याजनाःस्थिताः ॥ अरण्यान्यवनिर्जाताग्रामखर्वटवर्जिता ॥ २८ ॥ क्रव्यादाएवसर्वेषुनगरेषुपुरेषुच ॥ आसन्नभ्रंलिहोवृक्षाःसर्वत्रक्षोणिमंडले ॥ २९ ॥ चौराएवमहाचौरैरुल्लुठ्यंतइतस्ततः ॥ मांसवृत्त्योपजीवंतिप्राणिनःप्राणरक्षिणः ॥ ३० ॥ अराजके समुत्पन्नेलोकेऽत्याहितशंसिनि ॥ प्रयत्नोविफलस्त्वासीत्सृष्टेःसृष्टिकृतस्तदा ॥ ३१ ॥ चिंतामवापमहतींजगद्योनिःप्रजाक्षयात् ॥ प्रजासुक्षीयमाणासुक्षीणायज्ञादिकाःक्रियाः ॥ ३२ ॥ तासुक्षीणासुसंक्षीणाःसर्वेयज्ञभुजोऽभवन् ॥ ततश्चिंतयतास्रष्ट्राद्दष्टोराजर्षिसत्तमः ॥ ३३ ॥ अविमुक्तेमहाक्षेत्रेतपस्यन्निश्चलेंद्रियः ॥ मनोरन्वयजोवीरःक्षात्रोधर्मइवोदितः ॥ ३४ ॥ रिपुंजयइतिख्यातोराजापरपुरंजयः ॥ अथब्रह्मातमासाद्यबहुगौरवपूर्वकम् ॥ ३५ ॥ उवाचवचनंराजन्रिपुंजयमहामते ॥ इलांपालयभूपालससमुद्राद्रिकाननाम् ॥ ३६ ॥ नागकन्यांनागराजःपत्न्यर्थंतेप्रदास्यति ॥ अनंगमोहिनींनाम्नावासुकिःशीलभूषणाम् ॥ ३७ ॥ दिवोपिदेवादास्यंतिरत्नानिकुसुमानिच ॥ प्रजापालनसंतुष्टामहाराजप्रतिक्षणम् ॥ ३८ ॥ दिवोदासइतिख्यातमतोनामत्वमाप्स्यसि ॥ मत्प्रभावाच्चनृपतेदिव्यंसामर्थ्यमस्तुते ॥ ३९ ॥ परमेष्ठिवचःश्रुत्वाततोसौराजसत्तमः ॥ वेधसंबहुशःस्तुत्वावाक्यंचेदमुवाचह ॥ ४० ॥

तमुच्चाः ॥ तेपिशुष्काइतिशेषः ॥२९॥ उल्लुठ्यन्तेउदुच्चैर्लुंठ्यंतेनिःस्वीक्रियंतइत्यर्थः ॥३०॥ अत्याहितमत्यनिष्टंभयंतच्छंसिनि ॥ सृष्टेःप्रयत्नइतिसम्बन्धः ॥ सृष्टिसम्बन्धीत्यर्थः ॥३१॥३२॥ ॥ ३३ ॥ मनोःस्वायंभुवस्य ॥ क्षात्रःक्षत्रियजात्यधिष्ठितः ॥ ३४ ॥ रिपुंजयाख्यायांहेतुमाह ॥ परपुरमिति ॥ परमधार्मिकइतिक्वचित् ॥ ३५ ॥ इलांपृथ्वीम् ॥ इमामितिपाठेपिसएवार्थः ॥ ॥ ३६ ॥ अनंगमोहिनींकामस्यापिक्षोभकर्त्रीमितिसान्वयंसंज्ञाभिप्रायेण ॥ ३७ ॥ रिपुंजयस्यसान्वयंभाविसंज्ञान्तरंसंदिशति दिवोपीतिसार्धेन ॥ ३८ ॥ ३९ ॥ वेधसंब्रह्माणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुत्वास्तोत्रेणसन्तोष्य ॥ ४० ॥ कथंकिंकिमर्थम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ दिविषदइतिसाभिप्रायंविशेषणम् ॥ अतोनपौनरुक्त्यम् ॥ ४६ ॥ एतावन्निर्बन्धेप्रयोजनंदर्शयति ॥ देवेष्विति ॥ ४७ ॥ पटहंढक्काम् ॥ व्रजंतुइतिशब्दमुच्चार्य ॥ व्रजंत्वितइतिपाठेइतिशब्दोऽध्याहर्तव्यः ॥ ४८ ॥ नराःसर्वेप्राणिनः ॥ प्रजाइतिक्वचित् ॥ इतोऽन्यत्र ॥ उभयत्रसाटोपंहेतुमाह ॥ मयीति ॥ सुराइतिनागानामुपलक्षणम् ॥ स्वस्थाःस्वर्गस्थाइतिपातालस्थानाम् ॥ स्वस्थानेस्थिताइतिवा ॥४९॥५०॥ कुशद्वीपात्तृतीयाद्वीपात् ॥ तप्येतकरोतीत्यर्थः ॥५१॥ तपस्यतेतपःकुर्वते ॥

॥ राजोवाच ॥ ॥ पितामहमहाप्राज्ञजनाकीर्णेमहीतले ॥ कथंनान्येचराजानोमांकथंकथ्यतेत्वया ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्वयिराज्यंप्रकुर्वाणेदेवोवृष्टिंविधास्यति ॥ पापनिष्ठेचवैराज्ञिनदेवोवर्षतेपुनः ॥ ४२ ॥ ॥ राजोवाच ॥ ॥ पितामहमहामान्यत्रिलोकीकरणक्षम ॥ महाप्रसादइत्याज्ञांत्वदीयां मूर्ध्न्युपाददे ॥ ४३ ॥ किंचिद्विज्ञप्तुकामोहंतन्मदर्थंकरोषिचेत् ॥ ततःकरोम्यहंराज्यंपृथिव्यामसपत्नवत् ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ अविलंबेनतद्ब्रूहिक्रुतंमन्यस्वपार्थिव ॥ यत्तेहृदिमहाबाहोतवादेयंनकिंचन ॥ ४५ ॥ ॥ राजोवाच ॥ ॥ यद्यहंपृथिवीनाथःसर्वलोकपितामह ॥ तदादिविषदोदेवादिवितिष्ठंतुमाभुवि ॥ ४६ ॥ देवेषुदिवितिष्ठत्सुमयितिष्ठतिभूतले ॥ असपत्नेनराज्येनप्रजासौख्यमवाप्स्यति ॥ ४७ ॥ तथेतिविश्वसृक्प्रोक्तोदिवोदासोनरेश्वरः ॥ पटहंघोषयांचक्रेदिवंदेवाव्रजंत्विति ॥ ४८ ॥ मागच्छंत्विहवैनागानराःस्वस्थाभवंत्वितः ॥ मयिप्रशासतिक्षोणींसुराःस्वस्थाभवंत्विति ॥ ४९ ॥ एतस्मिन्नंतरेब्रह्माविश्वेशंप्रणिपत्यह ॥ यावद्विज्ञप्तुकामोभूत्तावदीशोब्रवीद्विधिम् ॥ ५० ॥ लोकेश्वरसमायाहिमंदरोनामभूधरः ॥ कुशद्वीपादिहागत्यतपस्तप्येतदुष्करम् ॥ ५१ ॥ यावस्तस्मैवरंदातुंबहुकालंतपस्यते ॥ इत्युक्त्वापार्वतीनाथोनंदिभृंगिपुरोगमः ॥ ५२ ॥ जगामवृषमारुह्यमंदरोयत्रतिष्ठति ॥ उवाचचप्रसन्नात्मादेवदेवोवृषध्वजः ॥५३॥ उत्तिष्ठोत्तिष्ठभद्रंतेवरंब्रूहिधरोत्तम ॥ सोथश्रुत्वामहेशानंदेवदेवंत्रिलोचनम् ॥ ५४ ॥ प्रणम्यबहुशोभूमावद्रिरेतद्व्यजिज्ञपत् ॥ लीलाविग्रहभृच्छंभोप्रणतैककृपानिधे ॥ ५५ ॥ सर्वज्ञोपिकथंनाममनवेत्थममवांछितम् ॥ शरणागतसंत्राणसर्ववृत्तांतकोविद ॥ ५६ ॥ सर्वेषांहृदयानंदशर्वसर्वगसर्वकृत् ॥ यदिदेयोवरोमह्यंस्वभावाद्दृषदात्मने ॥ ५७ ॥ याचकायातिशोच्यायप्रणतार्तिप्रभंजक ॥ ततोऽविमुक्तक्षेत्रस्यसाम्यंह्यभिलषाम्यहम् ॥ ५८ ॥ कुशद्वीपउमासार्धंनाथाद्यसपरिच्छदः ॥ मन्मौलौविहितावासःप्रयात्वेषवरोमम ॥ ५९ ॥

॥ ५२ ॥ ५३ ॥ ५४ ॥ लीलाविग्रहंक्रीडाशरीरंबिभर्तिगृह्णातीतितथा ॥ कृदितिक्वचित् ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ अविमुक्तसाम्यमेवदर्शयति ॥ कुशद्वीपइति ॥ उमासार्धंपार्वत्यासह ॥ कुशद्वीपेमयासार्धमितिपाठेउकारलोपआर्षः ॥ श्रीगौर्योरभेदान्माशब्दस्यमायावाचकत्वान्मायात्मकत्वाच्चमयापार्वत्येतियथाश्रुतएववार्थः ॥ प्रयातुयातुभवानितियावत् ॥ ५९ ॥

व्यजिज्ञपद्विज्ञापयामास ॥ ६० ॥ व्यापारितोनियुक्तः ॥ चतुर्विधांजरायुजांडजस्वेदजोद्भिज्जरूपाम् ॥ ६१ ॥ ६२ ॥ इदंजगन्महद्यथास्यात्तथाऽराजकमासीदतएवदुरवस्थमतीवदुःस्थितमभू
दित्यन्वयः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ नाडीद्वयंघटिकाद्वयम् ॥ ६७ ॥ निमेषार्धनिमेषिणांममनिमेषार्धनिमेषितुंशीलंयेषांतेतथातेषाम् ॥ ६८ ॥ विधेश्चब्रह्मणोपि ॥
॥ ६९ ॥ ७० ॥ सर्वसिद्धीनामणिमादीनाम् ॥ कर्मणिषष्ठी ॥ समर्पितुंदातुम् ॥ समर्पकमितिक्वचित् ॥ ७१ ॥ नैःश्रेयसींनिर्वाणसंबंधिनीम् ॥ इहकाश्यांसंस्थानांसम्यक्

सर्वेषांसर्वदःशंभुःक्षणंयावद्विचिंतयेत् ॥ विज्ञातावसरोब्रह्माताव्च्छंभुंव्यजिज्ञपत् ॥ प्रणम्याग्रेसरोभूत्वामौलौबद्धकरद्वयः ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ ॥
विश्वेशजगतांनाथपत्याव्यापारितोस्म्यहम् ॥ कृतप्रसादेनविभोसृष्टिंकर्तुंचतुर्विधाम् ॥ ६१ ॥ प्रयत्नेनमयासृष्टासासृष्टिस्त्वदनुज्ञया ॥ अवृष्ट्याषष्टिहा
यिन्यातत्रनष्टाऽप्रजाभुवि ॥ ६२ ॥ अराजकंमहच्चासीद्दुरवस्थमभूज्जगत् ॥ ततोरिपुंजयोनामराजर्षिर्मनुवंशजः ॥ ६३ ॥ मयाभिषिक्तोराजर्षिःप्रजाः
पातुंनरेश्वरः ॥ चकारसमयंसोपिमहावीर्योमहातपाः ॥६४॥ तवाज्ञयाचेत्स्थास्यंतिसर्वेदिविषदोदिवि ॥ नागलोकेतथानागास्ततोराज्यंकरोम्यहम् ॥
॥ ६५ ॥ तथेतिचमयाप्रोक्तंप्रमाणीक्रियतांतुतत् ॥ मंदरायवरोदत्तोभवेदेवंकृपानिधे ॥ ६६ ॥ तस्यराज्ञःप्रजास्त्रातुंभूयाच्चैषमनोरथः ॥ ममनाडीद्वयं
राज्यंतस्यापिचशतक्रतोः ॥ ६७ ॥ मर्त्यानांगणनाक्केहनिमेषार्धनिमेषिणाम् ॥ देवोपिनिर्मलंमत्वामंदरंचारुकंदरम् ॥६८॥ विधेश्चगौरवंरक्षंस्तथोरी
कृतवान्हरः ॥ जंबूद्वीपेयथाकाशीनिर्वाणपददासदा ॥६९॥ तथाबहुतिथंकालंद्वीपोभूत्सोपिमंदरः ॥ यियासुनाचदेवेनमंदरंचित्रकंदरम् ॥७०॥ निजमू
र्तिमयंलिंगमविज्ञातंविधेरपि ॥ स्थापितंसर्वसिद्धीनांस्थापकेभ्यःसमर्पितुम् ॥ ७१ ॥ विपन्नानांचजंतूनांदातुंनैःश्रेयसींश्रियम् ॥ सर्वेषामिहसंस्थानांक्षे
त्रंचैवाभिरक्षितुम् ॥ ७२ ॥ मंदराद्रिंगतेनापिक्षेत्रंनैतत्पिनाकिना ॥ विमुक्तंलिंगरूपेणअविमुक्तमतःस्मृतम् ॥ ७३ ॥ पुरानंदवनंनामक्षेत्रमेतत्प्रकी
र्तितम् ॥ अविमुक्तंतदारभ्यनामास्यप्रथितंभुवि ॥ ७४ ॥ नामाविमुक्तमभवदुभयोःक्षेत्रलिंगयोः ॥ एतद्द्वयंसमासाद्यनभूयोगर्भभाग्भवेत् ॥ ७५ ॥
अविमुक्तेश्वरंलिंगंदृष्ट्वाक्षेत्रेऽविमुक्तके ॥ विमुक्तएवभवतिसर्वस्मात्कर्मबंधनात् ॥ ७६ ॥ अर्चंतिविश्वेविश्वेशंविश्वेशोर्चतिविश्वकृत् ॥ अविमुक्तेश्वरंलिंगं
भुविमुक्तिप्रदायकम् ॥ ७७ ॥ पुरानस्थापितंलिंगंकस्यचित्केनचित्क्वचित् ॥ किमाकृतिभवेल्लिंगंनैतद्वेत्त्यपिकश्चन ॥ ७८ ॥

स्थितानांसदाचाराणामित्यर्थः ॥ संज्ञानमितिपाठेसम्यक्ज्ञानंयस्मादितिक्षेत्रविशेषणम् ॥ ७२ ॥ काश्यामविमुक्तनामनिर्वचनमाह मंदराद्रिमितिद्वयेन ॥ ७३ ॥ ७४ ॥ लिंगेपितन्नामा
तिदिशति ॥ नामाविमुक्तमिति ॥ ७५ ॥ ७६ ॥ विश्वेसर्वे ॥ भुवीत्युपलक्षणम् ॥ भुक्तीतिक्वचित् ॥ ७७ ॥ ७८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ कुतःकदाचिदपि ॥ पुनरितिक्वचित् ॥ ८५ ॥ स्तुत्वेति ॥ अविमुक्तेकाश्याम् ॥ यथाशक्तियथामतिस्तुत्वार्चयित्वानत्वानरास्तिष्ठातेसिस्तूय
तेऽर्च्यतेनम्यतेदेवैरितिशेषइत्यर्थः ॥ ८६ ॥ ८७ ॥ चतुर्दशींकृष्णाम् ॥ ८८ ॥ भूतायांचतुर्दश्याम् ॥ ८९ ॥ ९० ॥ ९१ ॥ यःपापिपापशैलोनामसंभृतोनाम्नानाशायसंभृतोलक्षीकृतःक्षयेन्नाशं
गच्छेत्सक्केत्यर्थः ॥ अनादिपापेतिपाठेएकएवक्वशब्दउभयत्रयोजनीयः ॥ नामसंभृतइत्यत्रनाम्निसंस्मृतइतिक्वचित्पाठः ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ इतिश्रीरामानन्दकृता

आकारमविमुक्तस्यदृष्ट्वाब्रह्माच्युतादयः ॥ लिंगंसंस्थापयामासुर्वसिष्ठाद्यास्तथर्षयः ॥ ७९ ॥ आदिलिंगमिदंप्रोक्तमविमुक्तेश्वरंमहत् ॥ ततोलिंगांतरा
ण्यत्रजातानिक्षितिमंडले ॥ ८० ॥ अविमुक्तेशनामापिश्रुत्वाजन्मार्जितादघात् ॥ क्षणान्मुक्तोभवेन्मर्त्योनात्रकार्याविचारणा ॥ ८१ ॥ अविमुक्तेश्वरं
लिंगंस्मृत्वादूरगतोपिच ॥ जन्मद्वयकृतात्पापात्क्षणादेवविमुच्यते ॥८२॥ अविमुक्तेमहाक्षेत्रेऽविमुक्तमवलोक्यच ॥ त्रिजन्मजनितंपापंहित्वापुण्यमयो
भवेत् ॥ ८३ ॥ यत्कृतंज्ञानविभ्रंशादेनःपंचसुजन्मसु ॥ अविमुक्तेशसंस्पर्शात्तत्क्षयेदेवनान्यथा ॥ ८४ ॥ अर्चयित्वामहालिंगमविमुक्तेश्वरंनरः ॥
कृतकृत्योभवेदत्रनचस्याज्जन्मभाक्कुतः ॥ ८५ ॥ स्तुत्वानत्वार्चयित्वाचयथाशक्तियथामति ॥ अविमुक्तेविमुक्तेशंस्तूयतेनम्यतेऽर्च्यते ॥८६॥ अना
दिमदिदंलिंगंस्वयंविश्वेश्वरार्चितम् ॥ काश्यांप्रयत्नतःसेव्यमविमुक्तंविमुक्तये ॥ ८७ ॥ संतिलिंगान्यनेकानिपुण्येष्वायतनेषुच ॥ आयांतितानिलिंगा
निमाघींप्राप्यचतुर्दशीम् ॥ ८८ ॥ कृष्णायांमाघभूतायामविमुक्तेशजागरात् ॥ सदाविगतनिद्रस्ययोगिनोगतिभाग्भवेत् ॥ ८९ ॥ नानायतनलिंगा
निचतुर्वर्गप्रदान्यपि ॥ माघकृष्णचतुर्दश्यामविमुक्तमुपासते ॥ ९० ॥ किंबिभेतिनरोधीरःकृतादघशिलोच्चयात् ॥ अविमुक्तेशलिंगस्यभक्तिवज्रधरो
यदि ॥ ९१ ॥ क्वाविमुक्तंमहालिंगंचतुर्वर्गफलोदयम् ॥ क्वपापिपापशैलोऽल्पोयःक्षयेन्नामसंभृतः ॥ ९२ ॥ अविमुक्तेमहाक्षेत्रेविश्वेशसमधिष्ठिते ॥ यैर्न
दृष्टंविमूढास्तेऽविमुक्तंलिंगमुत्तमम् ॥ ९३ ॥ द्वारमविमुक्तस्यदृष्ट्वादंडधरोयमः ॥ दूरादेवप्रणमतिप्रबद्धकरसंपुटः ॥ ९४ ॥ धन्यंतन्नेत्रनिर्माणंकृतकृत्यौ
तुतौकरौ ॥ अविमुक्तेश्वरंयेनयाभ्यामैक्षिष्टयःस्पृशेत् ॥ ९५ ॥ त्रिसंध्यमविमुक्तेशंयोजपेन्नियतःशुचिः ॥ दूरदेशविपन्नोपिकाशीमृतफलंलभेत् ॥ ९६ ॥
अविमुक्तंमहालिंगंदृष्ट्वायामांतरंव्रजेत् ॥ लब्धाशुकार्यसंसिद्धिंक्षेमेणप्रविशेद्गृहम् ॥९७॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशी
खंडेपूर्वार्द्धेअविमुक्तेशाविर्भावोनामैकोनचत्वारिंशोध्यायः ॥३९॥ ॥ स्कंदउवाच ॥ ॥ अविमुक्तेशमाहात्म्यंवर्णितंतेग्रतोमया ॥ अथोकिमसिशुश्रूषुः
कथयिष्यामितत्पुनः ॥ १ ॥ ॥ अगस्त्यउवाच ॥ ॥ अविमुक्तेशमाहात्म्यंश्रावंश्रावंश्रुतीमम ॥ अतीवसुश्रुतेजातेतथापिनधिनोम्यहम् ॥ २ ॥

यांकाशीखण्डटीकायामेकोनचत्वारिंशोध्यायः ॥ ३९ ॥ ॥ छ ॥ चत्वारिंशेतिविस्तीर्णेईशप्रीतिकराःशुभाः ॥ गृहस्थधर्मावर्ण्यंतेनिषेधविधिगोचराः ॥ १ ॥ उक्तानुवादपूर्वकंश्रवणान्त
रेऽगस्त्यंस्वच्छन्दयति ॥ अविमुक्तेशेति ॥ १ ॥ श्रुतानुवादपूर्वकमात्मनस्तृप्त्यभावमावेदयन्पृच्छाति अविमुक्तेशेतिद्वाभ्याम् ॥ श्रावंश्रावंश्रुत्वाश्रुत्वा ॥ सुश्रुतेशोभनेश्रवणेंद्रिये ॥ नधिनोमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलंप्रत्ययंनयामि ॥ २ ॥ ३ ॥ स्वश्रेयःकैवल्यम् ॥ सुश्रेयइतिपाठेप्ययमेवार्थः ॥ अविमुक्तस्येत्यनेनतंत्रेणलिंगक्षेत्रयोर्ग्रहणम् ॥ ४ ॥ पुण्यभारतःपुण्यगौरवात्पुण्यसमूहाद्वा ॥ श्रुतिवर्त्मसभाजनाद्वेदमार्गसंसेवनात् ॥ वेदधर्मेतिक्वचित् ॥ ५ ॥ श्रुतीति ॥ छिद्रंपापावसरंप्राप्ययौकलिकालौप्राणिनोजिघांसतोनाशयतस्तौवेदमार्गसेवमानस्यपुंसःसंस्पर्शनान्नश्यतइत्यन्वयः ॥ पाठान्तरेवेदमार्गसेवमानस्यकैवल्यंफलमुक्त्वास्मृतिवर्त्मजुषःपुंसःफलमाह ॥ स्मृतीति ॥ प्रथमपाठेश्रुतिमूलत्वात्स्मृतेस्तस्याःपृथगनुल्लेखइतिभावः ॥ ६ ॥ उत्तरार्धंविवृणोति ॥ वर्जितस्येति ॥ चःसमुच्चये ॥ वैइतिपाठेपिसएवार्थः ॥ अकरणेयतइतिपाठेतुसहेतुकंव्यतिरेकमाह ॥ वर्जितस्येति ॥ हतोनाशयतः ॥ रंध्रदर्शनात्छिद्रदर्शनात् ॥ ७ ॥ ८ ॥ पलांडुंरक्तलशुनभेदंप्याजइतिप्रसिद्धम् ॥ विड्वराहंपुरीषभुजंग्राम्यसूकरम् ॥ शेलुंवहुवारकंश्लेष्मातकफलमित्यर्थः ॥ लशुनंशुक्लवर्णंप्रसिद्धमेव ॥ गृंजनंहरितमूलकंगाजरइतिलोकेप्रसिद्धम् ॥ गोःपीयूषमनिर्दशायागोःक्षीरंपीयूषमितिमन्वादौदृश्यते ॥ तंडुलीयंविष्ठाप्रभवमल्पमारिषम् ॥ तंडुलीयोऽल्पमारिषइत्यमरः ॥ तथाचमनुः ॥ अभक्ष्याणिद्विजातीनाममेध्यप्रभवाणिचेति ॥ विड्जातानीतियाज्ञवल्क्यवचनाच्च ॥ कवकंछत्राकं

अविमुक्तेश्वरंलिंगंक्षेत्रंचाप्यविमुक्तकम् ॥ एतयोस्तुकथंप्राप्तिर्भवेत्षण्मुखतद्वद ॥ ३ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुकुंभजवक्ष्यामियथाप्राप्तिर्भवेदिह ॥ स्वश्रेयोदातुरेतस्याविमुक्तस्यमहामते ॥ ४ ॥ समीहितार्थसंसिद्धिर्लभ्यतेपुण्यभारतः ॥ तच्चपुण्यंभवेद्विप्रश्रुतिवर्त्मसभाजनात् ॥५॥ श्रुतिवर्त्मजुषःपुंसःसंस्पर्शान्नश्यतोमुने ॥ कलिकालावपिसदाछिद्रंप्राप्यजिघांसतः ॥६॥ वर्जितस्यविधानेनप्रोक्तस्याकरणेनवै ॥ कलिकालावपिहतोब्राह्मणंरंध्रदर्शनात् ॥ ७ ॥ निषिद्धाचरणंतस्मात्कथयिष्येतवाग्रतः ॥ तद्दूरतःपरित्यज्यनरोनानिरयीभवेत् ॥ ८ ॥ पलांडुंविड्वराहंचशेलुंलशुनगृंजने ॥ गोपीयूषंतंडुलीयंवर्ज्यंचकवकंसदा ॥ ९ ॥ व्रश्चनान्वृक्षनिर्यासान्पायसापूपशष्कुलीः ॥ अदेवपित्र्यंपललमवत्सागोपयस्त्यजेत् ॥ १० ॥ पयऐकशफंहेयंतथाक्रामेलकाविकम् ॥ रात्रौनदधिभोक्तव्यंदिवाननवनीतकम् ॥ ११ ॥ टिट्टिभंकलविंकंचहंसंचक्रंप्लवंबकम् ॥ त्यजेन्मांसाशिनःसर्वान्सारसंकुक्कुटंशुकम् ॥ १२ ॥ जालपादान्खंजरीटान्बुडित्वामत्स्यभक्षकान् ॥ मत्स्याशीसर्वमांसाशीतन्मत्स्यान्सर्वथात्यजेत् ॥ १३ ॥

गौडेप्राकृतैर्यस्यशाकःक्रियते ॥ ९ ॥ व्रश्चनान्व्रश्चनंछेदनंतत्प्रभवानित्यर्थः ॥ तथाचमनुः ॥ लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथेति ॥ पायसापूपशष्कुलीः ॥ अदेवपित्र्याइत्यग्रिमपदस्यविभक्तिविपरिणमय्यानुषंगः ॥ तत्रपायसंपरमान्नम् ॥ अपूपामंडकादयः ॥ शष्कुल्यस्तैलपक्वविशेषाः ॥ देवेभ्यःपितृभ्यश्चसाधुउपकल्पितंयन्नभवतितददेवपित्र्यम् ॥ पललंमांसम् ॥ १० ॥ एकशफमश्वाद्येकखुरसंबंधि ॥ क्रामेलकमुष्ट्रसंबंधि ॥ आविकंमेषसंबंधि ॥ दिवादिवसे ॥ नवनीतंनवोद्धृतम् ॥ ११ ॥ टिट्टिभंपक्षिविशेषम् ॥ कलविंकंचटकम् ॥ हंसंश्वेतगरुतम् ॥ चक्रंचक्रवाकम् ॥ प्लवंजलकुक्कुटम् ॥ बकंकंकम् ॥ मांसाशिनःमांसादान् ॥ सारसंपुष्कराह्वयम् ॥ कुक्कुटंचरणायुधम् ॥ शुकंकीरम् ॥१२॥ जालपादान्हंसविशेषान् ॥ शरारिप्रभृतीनितिमनटीकाकारः ॥

१ पेहंस 'इतिप्रसिद्धम्' प्रसवानंतरप्रथमदुग्धमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खंजरीटान्खंजनान् ॥ बुडित्वामत्स्यभक्षकान्बुडित्वाजलेनिमज्ज्ययेमत्स्यान्खादंतितान्मद्गुप्रभृतीनित्यर्थः ॥ तथाचमनुः ॥ निमज्जतश्चमत्स्यादानिति ॥ तत्तस्मात् ॥१३॥ हव्यानिकव्यानिचदेवानांपितॄणांचान्नानितेषुनियुक्तौविहितौपाठीनरोहितौ पाठीनःसहस्रदंष्ट्रोवोपालइतिगौडेप्रसिद्धः रोहितोमत्स्यभेदःप्रसिद्धस्तौ ॥ शशोमृगभेदः ॥ शल्लकःश्वावित् ॥ कच्छपःकूर्मः ॥ १४ ॥ श्वाविदिति ॥ संबोधलक्षणार्थंश्वाविधःपुनर्ग्रहणम् ॥ ज्ञाताःशिष्टपरंपरयाभक्ष्यत्वेनप्रख्याताहरिणकपिंजलादयःप्रशस्ताः ॥ १५ ॥ अखंडस्नेहवर्जितंनिःशेषस्नेहरहितमित्यर्थः ॥ पाठांतरेखंडस्नेहाभ्यां

हव्यकव्यनियुक्तौतुभक्ष्यौपाठीनरोहितौ॥मांसाशिभिस्त्वमीभक्ष्याःशशशल्लककच्छपाः ॥१४॥ श्वाविद्गोधेप्रशस्तेचज्ञाताश्चमृगपक्षिणः ॥ आयुष्कामैः स्वर्गकामैस्त्याज्यंमांसंप्रयत्नतः ॥ १५ ॥ यज्ञार्थंपशुहिंसायासास्वर्ग्यानेतराक्वचित् ॥ त्यजेत्पर्युषितंसर्वमखंडस्नेहवर्जितम् ॥ १६ ॥ प्राणात्ययेक्रतौ श्राद्धेभेषजेविप्रकाम्यया ॥ अलौल्यमित्थंपललंभक्षयन्नैवदोषभाक् ॥ १७ ॥ नताहृशंभवेत्पापंमृगयावृत्तिकांक्षिणः ॥ याहृशंभवतिप्रेत्यलौल्यान्मांसोपसेविनः ॥ १८ ॥ मखार्थंब्रह्मणासृष्टाःपशुद्रुममृगौषधीः ॥ निघ्नन्नहिंसकोविप्रस्तासामपिशुभागतिः ॥ १९ ॥ पितृदेवक्रतुकृतेमधुपर्कार्थमेवच ॥ तत्रहिंसाप्यहिंसास्याद्धिंसान्यत्रसुदुस्तरा ॥ २० ॥ योजंतूनात्मपुष्टयर्थंहिनस्तिज्ञानदुर्बलः ॥ दुराचारस्यतस्येहनामुत्रापिसुखंक्वचित् ॥ २१ ॥ भोक्तानुमंतासंस्कर्ताक्रयिविक्रयिहिंसकाः ॥ उपहर्ताघातयिताहिंसकाश्चाष्टधास्मृताः ॥ २२ ॥ प्रत्यब्दमश्वमेधेनशतंवर्षाणियोयजेत् ॥ अमांसभक्षकोयश्चतयोरंत्योविशिष्यते ॥ २३ ॥ यथैवात्मापरस्तद्वद्द्रष्टव्यःसुखमिच्छता ॥ सुखदुःखानितुल्यानियथात्मनितथापरे ॥ २४ ॥ सुखंवायदिवाचान्यद्यत्किंचित्क्रियतेपरे ॥ तत्कृतंहिपुनःपश्चात्सर्वमात्मनिसंभवेत् ॥ २५ ॥ नक्लेशेनविनाद्रव्यमर्थहीनेकुतःक्रियाः ॥ क्रियाहीनेकुतोधर्मोधर्महीनेकुतःसुखम् ॥ ॥ २६ ॥ सुखंहिसर्वैराकांक्ष्यंतच्चधर्मसमुद्भवम् ॥ तस्माद्धर्मोत्रकर्तव्यश्चातुर्वर्ण्येनयत्नतः ॥ २७ ॥ न्यायागतेनद्रव्येणकर्तव्यंपारलौकिकम् ॥ दानंचविधिनादेयंकालेपात्रेचभावतः ॥ २८ ॥ विधिहीनंतथाऽपात्रेयोददातिप्रतिग्रहम् ॥ नकेवलंहितद्यातिशेषंतस्यचनश्यति ॥ २९ ॥ व्यसनार्थंकुटुंबार्थंयद्दृणार्थेचदीयते ॥ तदक्षयंभवेदत्रपरत्रचनसंशयः ॥३०॥ मातापितृविहीनंयोमौंजीपाणिग्रहादिभिः ॥ संस्कारयेन्निजैरर्थैस्तस्यश्रेयस्त्वनंतकम् ॥ ॥ ३१ ॥ अग्निहोत्रैर्नतच्छ्रेयोनाग्निष्टोमादिभिर्मखैः ॥ यच्छ्रेयःप्राप्यतेमर्त्यैर्द्विजेचैकेप्रतिष्ठिते ॥ ३२ ॥ योह्यनाथस्यविप्रस्यपाणिंग्राहयतेकृती ॥ इहसौख्यमवाप्नोतिसोक्षयंस्वर्गमाप्नुयात् ॥ ३३ ॥ पितृगेहेतुयाकन्यारजःपश्येदसंस्कृता ॥ भ्रूणहातत्पिताज्ञेयोवृषलीसापिकन्यका ॥ ३४ ॥ यस्तांपरिणयेन्मोहात्सभवेद्वृषलीपतिः ॥ तेनसंभाषणंत्याज्यमपाङ्क्तेयेनसर्वदा ॥ ३५ ॥

निर्मितंयन्नभवतितदखंडस्नेहनिर्मितम् ॥ १६ ॥ भेषजेऔषधे ॥ अलौल्यमलोभंयथास्यात्तथा ॥ पललंमांसम् ॥ १७॥ १८ ॥ १९ ॥ मधुपर्कार्थंगृह्योक्तकर्मविशेषार्थम् ॥२०॥२१॥ स्मृताविद्वद्भिरितिशेषः॥अष्टधाऽधमाइतिवापाठः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ चतुर्वर्णाएवचातुर्वर्ण्यंतेन ॥२७॥ भावतोभक्तितः ॥२८॥ शेषमन्यदपिपुण्यम् ॥२९॥ अक्षयंबहुकालस्थायितत्फलंभवतीत्यर्थः ॥ ३० ॥ श्रेयःपुण्यम् ॥ ३१ ॥ ३२ ॥ पाणिग्राहयतेविवाहंकारयति ॥ ३३ ॥ भ्रूणहाश्रेष्ठब्राह्मणहन्ता ॥ गर्भस्थब्राह्मणबालहंतेतिवा ॥ वृषलीशूद्री ॥ ३४ ॥ ३५ ॥

University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चाद्रजोदर्शनस्यार्वाक्पूर्वमित्यर्थः ॥३६॥३७॥ पूर्वंस्त्रियइति ॥ भुक्ताविवाहानन्तरंक्रमेणत्रिषुदिवसेषु॥तथाचश्रुतिः ॥ सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः ॥ तृतीयोऽग्निष्टेपतिस्तुरीयस्तेमनुष्यजा इत्यादि ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ अनग्निकामग्न्यादिनाऽभुक्तांरजआदिकालइत्यर्थः ॥ कन्यांभुंक्तेरजःकालइतिपूर्वमुक्तेः ॥ ४२ ॥ ४३ ॥ कुणपंकुणपशब्देनखड्गपात्रादि ॥ स्त्रीमुखंभोगकाले ॥ तथाचमनुः ॥ नित्यमास्यंशुचिस्त्रीणामिति ॥ नदुष्यन्तिनदूषयंतिदुष्टबुद्ध्यानपश्यन्तीत्यर्थः ॥ ४४ ॥ ४५ ॥ ४६ ॥ त्यागोनविधीयते ॥ पोषणावेक्षणेकार्येइतिभावः ॥ यथाश्रुतेऽर्थे

विज्ञायदोषमुभयोःकन्यायाश्चवरस्यच ॥ संबंधंरचयेत्पश्चादन्यथादोषभाक्पिता ॥ ३६ ॥ स्त्रियःपवित्राःसततंनैतादुष्यंतिकेनचित् ॥ मासिमासिरजस्तासांदुष्कृतान्यपकर्षति ॥ ३७ ॥ पूर्वंस्त्रियःसुरैर्भुक्ताःसोमगंधर्ववह्निभिः ॥ भुंजतेमानुषाःपश्चान्नैतादुष्यंतिकेनाचित् ॥ ३८ ॥ स्त्रीणांशौचंददौसोमःपावकःसर्वमेध्यताम् ॥ कल्याणवाणींगंधर्वास्तेनमेध्याःसदास्त्रियः ॥ ३९ ॥ कन्यांभुंक्तेरजःकालेऽग्निःशशीलोमदर्शने ॥ स्तनोद्भेदेषुगंधर्वास्तत्प्रागेवप्रदीयते ॥४०॥ दृश्यरोमात्वपत्यघ्नीकुलघ्न्युद्गतयौवना ॥ पितृघ्न्याविष्कृतरजास्ततस्ताःपरिवर्जयेत् ॥४१॥ कन्यादानफलप्रेप्सुस्तस्माद्द्यादनग्निकाम् ॥ अन्यथानफलंदातुःप्रतिग्राहीपतेदधः ॥४२॥ कन्यामभुक्तांसोमाद्यैर्ददद्दानफलंलभेत् ॥ देवभुक्तांददद्दातानस्वर्गमधिगच्छति ॥४३॥ शयनासनयानानिकुणपंस्त्रीमुखंकुशाः॥ यज्ञपात्राणिसर्वाणिनदुष्यंतिबुधाःक्वचित् ॥ ४४ ॥ वत्सःप्रस्रवणेमेध्यःशकुनिःफलपातने ॥ नार्योरतिप्रयोगेषुश्वामृगग्रहणेशुचिः ॥ ४५ ॥ अजाश्वयोर्मुखंमेध्यंगावोमेध्यास्तुपृष्ठतः ॥ पादतोब्राह्मणामेध्याःस्त्रियोमेध्यास्तुसर्वतः ॥ ४६ ॥ बलात्कारोपभुक्तावाचोरहस्तगतापिवा ॥ नत्याज्यादयितानारीनास्यास्त्यागोविधीयते ॥ ४७ ॥ आम्लेनताम्रशुद्धिःस्याच्छुद्धिःकांस्यस्यभस्मना ॥ संशुद्धीरजसानार्यास्तटिन्यावेगतःशुचिः ॥४८॥ मनसापिहियानेहचिंतयेत्पुरुषांतरम् ॥ सोमयासहसौख्यानिभुंक्तेचात्रापिकीर्तिभाक् ॥४९॥ पितापितामहोभ्रातासकुल्योजननीतथा ॥ कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः ॥ ५० ॥ अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ ॥ स्वयंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरम् ॥ ॥ ५१ ॥ हृताधिकारांमलिनांपिंडमात्रोपजीविनीम् ॥ परिभूतामधःशय्यांवासयेद्व्यभिचारिणीम् ॥ ५२ ॥ व्यभिचाराद्दतौशुद्धिर्गर्भेत्यागोविधीयते ॥ गर्भभर्तृवधादौतुमहत्यपिचकल्मषे ॥ ५३ ॥ शूद्रस्यभार्याशूद्रैवसाचस्वाचविशःस्मृते ॥ तेचस्वाचैवराज्ञस्तुताश्चस्वाचाग्रजन्मनः ॥ ५४ ॥

गृह्यमाणेरावणहस्तगतायाम्बलात्कारोपभोगशंकितायालक्ष्म्याविष्णुनात्यागायोगात् ॥ ४७ ॥ रजसासंशुद्धिर्मनोव्यभिचारेसतीत्यर्थः ॥ यथाश्रुतमितितैर्भुक्तास्तन्नरजसास्त्रीमनोदुष्टेतियाज्ञवल्क्यवचनविरोधात् ॥ शुचिःशुचित्वम् ॥ तटिनीतिवापाठः ॥ ४८ ॥ उमयापार्वत्या ॥ चकारोभिन्नक्रमे ॥ अत्रापिचेत्यर्थः ॥ ४९ ॥ सकुल्यःसमानकुलोत्पन्नः ॥ प्रकृतिस्थःस्वभावस्थः ॥ ५० ॥ ॥ ५१ ॥ परिभूतांतिरस्कृताम् ॥ अधःशय्याशय्यायावाहिः ॥ ५२ ॥ व्यभिचारान्मानसव्यभिचारात् ॥ महतिकल्मषेमहापातके ॥ ५३ ॥ शूद्रस्येति ॥ शूद्रस्यशूद्रैवभार्याभवतिनतूत्कृष्टावैश्यादय

१ नेपालदेशीयंकंबलमितिसुटीकायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तिस्रः ॥ विशोवैश्यस्यशूद्रावैश्याचभार्यामन्वादिभिःस्मृते ॥ क्षत्रियस्यवैश्याशूद्रेक्षत्रियाच॥ब्राह्मणस्यक्षत्रियावैश्याशूद्राब्राह्मणीच ॥ ५४ ॥ आरोप्यशूद्रामिति ॥ सवर्णामपरिणीयदैवाच्छूद्रापरिणेतुर्ब्राह्मणस्यगमननिषेधोयम् ॥ जनयित्वासुतंतस्यामितिऋतुकालनिषेधपरम् ॥ ब्राह्मण्यादेवहीयतइतिदोषभूयस्त्वार्थम् ॥ दैवेति ॥ ५५ ॥ यदिकथंचित्सवर्णोत्क्रमणेनवाशूद्रापरिणीयतेतदाभार्यात्वेनप्रसक्तानितत्कर्तृकाणिदैवादीन्यनेननिषिध्यन्ते ॥ दैवंहोमादि ॥ पित्र्यंश्राद्धादि ॥ आतिथेयमतिथिभोजनादिव्रतानियस्यशूद्रासम्पाद्यानितद्धव्यंकव्यंपितृदेवानाश्नंतिनचतेनातिथ्येनसगृहीस्वर्गंयाति ॥ ५६ ॥ जामयइति ॥ यानिगेहानिजामयोज्ञातिभार्याभगिनीपत्नीदुहितृस्नुषाद्याअपूजिताःसत्योऽभिशपंतिइदमनिष्टमेषामस्त्वितितान्यभिचारहतानीवधनपश्वादिसहितानिनश्यंतियस्मात् ॥ ५७ ॥ तदभ्यर्च्याइति ॥ तत्तस्मात्सत्कारेषुकौतुकादिषुउत्सवेषूपनयनादिष्वाभ्युदयिकेषुसुवासिन्योजामयः सदापूजनीयाइति ॥५८ ॥ ५९ ॥ यत्रेति ॥ भर्त्रास्त्रीतिहेतौतृतीया ॥ यत्रवेश्मनिभार्यास्वामिना

आरोप्यशूद्रांशयनेविप्रोगच्छेदधोगतिम् ॥ उत्पाद्यपुत्रंशूद्रायांब्राह्मण्यादेवहीयते ॥ ५५ ॥ दैवपित्र्यातिथेयानितत्प्रधानानियस्यतु ॥ देवाद्यास्तन्नचाश्नंतिसचस्वर्गंनगच्छति ॥ ५६ ॥ जामयोयानिगेहानिशपंत्यप्रतिपूजिताः ॥ कृत्याभिर्निहतानीवनश्येयुस्तान्यसंशयम् ॥ ५७ ॥ तदभ्यर्च्याः सुवासिन्योभूषणाच्छादनाशनैः ॥ भूतिकामैर्नरैर्नित्यंसत्कारेषूत्सवेषुच ॥५८॥ यत्रनार्यःप्रमुदिताभूषणाच्छादनाशनैः ॥ रमंतेदेवतास्तत्रस्युस्तत्रसफलाः क्रियाः ॥ ५९ ॥ यत्रतुष्यतिभर्त्रास्त्रीस्त्रियाभर्ताचतुष्यति ॥ तत्रवेश्मनिकल्याणंसंपद्येतपदेपदे ॥६०॥ अहुतंचहुतंचैवप्रहुतंप्राशितंतथा ॥ ब्राह्मंहुतंपंचमंचपंचयज्ञाइमेशुभाः ॥ ६१ ॥ जपोऽहुतोहुतोहोमःप्रहुतोभौतिकोबलिः ॥ प्राशितंपितृसंतृप्तिर्हुतंब्राह्मंद्विजार्चनम् ॥ ६२ ॥ पंचयज्ञानिमान्कुर्वन्ब्राह्मणोनावसीदति ॥ एतेषामननुष्ठानात्पंचसूनाअवाप्नुयात् ॥ ६३ ॥ ब्राह्मणंकुशलंपृच्छेद्बाहुजातमनामयम्॥वैश्यंसुखंसमागम्यशूद्रंसंतोषमेवच ॥ ६४ ॥ जातमात्रःशिशुस्तावद्यावदष्टौसमाःस्मृताः ॥ भक्ष्याभक्ष्येषुनोदुष्येद्यावन्नैवोपनीयते ॥ ६५ ॥ भरणंपोष्यवर्गस्यदृष्टादृष्टफलोदयम् ॥ प्रत्यवायोह्यभरणे भर्तव्यस्तत्प्रयत्नतः ॥ ६६ ॥ मातापितागुरुपत्नीःत्वपत्यानिसमाश्रिताः ॥ अभ्यागतोतिथिश्चाग्निःपोष्यवर्गाअमीनव ॥ ६७ ॥ सजीवतिपुमान्योऽत्रबहुभिश्चोपजीव्यते ॥ जीवन्मृतोथविज्ञेयःपुरुषःस्वोदरंभरिः ॥ ६८ ॥ दीनानाथविशिष्टेभ्योदातव्यंभूतिकाम्यया ॥ अदत्तदानाजायंतेपरभाग्योपजीविनः ॥६९॥ विभागशीलसंयुक्तोदयावांश्चक्षमायुतः ॥ देवतातिथिभक्तस्तुगृहस्थोधार्मिकःस्मृतः ॥७०॥ शर्वरीमध्ययामौयोहुतशेषंचयद्धविः ॥ तत्रस्वपंस्तदश्नंश्चब्राह्मणोनावसीदति ॥ ७१ ॥

प्रीताभवतिकलहादिकंनकरोतिभार्ययाचभर्ताप्रीतोभवतिद्व्यंतराभिलाषंनकरोतितास्मिन्गृहेक्षणेक्षणेकल्याणंसंपद्यते ॥ गृहग्रहणान्नकेवलंभार्यापतीकिंतुतद्गेहेपुत्रपौत्रादिसंततिरपिश्रेयोभागिनीभवतीत्यर्थः ॥६०॥६१॥ अहुतंचेतिश्लोकंव्याचष्टे ॥ जपोऽहुतइति ॥ अहुतशब्देनब्रह्मयज्ञाख्योजपउच्यते ॥ हुतशब्देनदेवयज्ञाख्योहोमः ॥ प्रहुतशब्देनभूतयज्ञाख्योबलिः ॥ ब्राह्महुतशब्देनमनुष्ययज्ञाख्याब्राह्मणस्यार्चा ॥ प्राशितशब्देनपितृयज्ञाख्यंनित्यश्राद्धम् ॥ ६२ ॥ एतेषांपंचयज्ञानाम् ॥ एतस्याइतिपाठेपंचेष्टेरित्यर्थः ॥ पंचसूनाःपंचानांहिंसाःवधानित्यर्थः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ॥ ६६ ॥ ६७ ॥ स्वोदरंभरिःस्वीयोदरमात्रपूरकः ॥ ६८ ॥ परभाग्योपजीविनःपरान्नाद्युपजीविनइत्यर्थः ॥ ६९ ॥ विभागोविभजनंशीलंसदाचारःसत्स्वभावोवाताभ्यांसंयुक्तः ॥ ७० ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुधाव्ययानिसुधातुल्यान्यव्ययानिकुशलानीत्येकम् ॥ यत्सौम्यमितिवाक्यादीनांविशेषणम् ॥ ७२ ॥ इहायातआगच्छतेतिस्नेहपूर्वंभाषणमित्येकम् ॥ उपासनंपादसंवाहनादि ॥ गृहस्थानामुन्नतिहितवेवृद्धिहेतवे ॥ ७३ ॥ तथेति ॥ एतानिवक्ष्यमाणानि ॥ यथाशक्त्येतिसर्वत्रसंबध्यते ॥ ७४ ॥ तृणस्योपयोगःशय्याया अधस्तादास्तरणेऽग्नितापनेवेतिज्ञातव्यम् ॥ ७५ ॥ पैशुन्यंक्रौर्यम् ॥ द्रोहोहिंसा ॥ क्रोधादीनांद्वंद्वैक्यम् ॥ द्वेषःपरोत्कर्षासहनम् ॥ दंभोधर्मध्वजित्वम् ॥ मायाकपटम् ॥ स्वर्गमार्गार्गलानिस्वर्गमार्गनिषेधकानीत्यर्थः ॥ ७६ ॥ नवेति ॥ स्वाध्यायो वेदाध्ययनम् ॥ ७७ ॥ ७८ ॥ जन्मर्क्षंजन्मनोनक्षत्रम् ॥ धनंचापमानंचेतिद्वंद्वैक्यम् ॥७९॥ अकुत्सितंसध्रीचीनम् ॥ प्रायोग्यंप्रयोगसंबंधि ॥ ऋणशुद्धिरधमर्णस्थानित्वापाकरणमित्यर्थः ॥८०॥

नवैतानिगृहस्थस्यकार्याण्यभ्यागतेसदा ॥ सुधाव्ययानियत्सौम्यंवाक्यंचक्षुर्मनोमुखम् ॥ ७२ ॥ अभ्युत्थानमिहायातसस्नेहंपूर्वभाषणम् ॥ उपासनमनुव्रज्यागृहस्थोन्नतिहेतवे ॥ ७३ ॥ तथेषद्व्ययुक्तानिकार्याण्येतानिवैनव ॥ आसनंपादशौचंचयथाशक्त्याशनंक्षितिः ॥ ७४ ॥ शय्यातृणजलाभ्यंगदीपागार्हस्थ्यसिद्धिदाः ॥ तथानवविकर्माणित्याज्यानिगृहमेधिनाम् ॥७५॥ पैशुन्यंपरदाराश्चद्रोहःक्रोधानृताप्रियम् ॥ द्वेषोदंभश्चमायाचस्वर्गमार्गार्गलानिहि ॥ ७६ ॥ नवावश्यककर्माणिकार्याणिप्रतिवासरम् ॥ स्नानंसंध्याजपोहोमःस्वाध्यायोदेवतार्चनम् ॥ ७७ ॥ वैश्वदेवंतथातिथ्यंनवमंपितृतर्पणम् ॥ नवगोप्यानियान्यत्रमुनेतानिनिशामय ॥ ७८ ॥ जन्मर्क्षंमैथुनंमंत्रोगृहच्छिद्रंचवंचनम् ॥ आयुर्धनापमानंस्त्रीनप्रकाश्यानिसर्वथा ॥ ७९ ॥ नवैतानिप्रकाश्यानिरहःपापमकुत्सितम् ॥ प्रायोग्यमृणशुद्धिश्चसान्वयःक्रयविक्रयौ ॥ कन्यादानंगुणोत्कर्षोनान्यत्केनापिकुत्रचित् ॥ ८० ॥ पात्रमित्रविनीतेषुदीनानाथोपकारिषु ॥ मातापितृगुरुष्वेतन्नवकंदत्तमक्षयम् ॥ ८१ ॥ निष्फलंनवसूत्सृष्टंचाटचारणतस्करे ॥ कुवैद्येकितवेधूर्तेशठेमल्लेचवंदिनि ॥ ८२ ॥ आपत्स्वपिनदेयानिनववस्तूनिसर्वथा ॥ अन्वयेसतिसर्वस्वंदारांश्चशरणागतान् ॥ ८३ ॥ न्यासाधीकुलवृत्तिंचनिक्षेपंस्त्रीधनंसुतम् ॥ योददातिसमूढात्माप्रायश्चित्तैर्विशुध्यति ॥ ८४ ॥ एतन्नवानांनवकंज्ञात्वाप्रियमवाप्नुयात् ॥ अन्यच्चनवकंवच्मिसर्वेषांस्वर्गमार्गदम् ॥ ८५ ॥

पात्रेति ॥ पात्रादिषुनवसुदत्तंयदेतन्नवकंनवसंख्यापरिमितंद्रव्यंतदक्षयमित्यर्थः ॥ यदिलवकमितिपाठःस्यात्तदाल्पमपीत्यर्थः ॥ ८१ ॥ निष्फलमिति ॥ चाटोवाचालः चारणःस्तुतिपाठकः तस्करश्चौरःत्रयाणांद्वंद्वैकवद्भावः ॥ चाटचारणाभ्यांसहितस्तस्करइतिवा ॥ कितवेवंचके ॥ धूर्तेधृष्टे ॥ शठेदुष्टे ॥ वंदिनिप्रस्तावसदृशोक्तावमलप्रज्ञे ॥ ८२ ॥ आपत्स्विति ॥ अन्वयेसंततौ ॥ ॥ ८३ ॥ आसमंताद्धीयतइत्याधिर्बंधकः ॥ न्यासश्चाधिश्चेतिन्यासाधी ॥ तत्रन्यासोल्पकालस्थायीनिक्षेपश्चिरस्थायीतिभेदः ॥ ८४ ॥ एतदिति ॥ नवानांपूर्वोक्तानांमध्ये ॥ प्रियंसुखम् ॥

१ उपासनं–स्वसमीपएवोपवेशनमितिकथन्न ? । २ न्यासोऽनन्यस्थापितःस्वपूर्वजैःस्थापितोवा–निक्षेपोऽन्यस्थापितःपुनःप्रदेयोनेतित्रोध्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

श्रियमितिक्वचित्पाठः ॥ ८५ ॥ सत्यामिति ॥ दमइंद्रियनिग्रहः ॥ कथंचिद्विषयेषुपरापततामिंद्रियाणांप्रत्याहरणमिंद्रियाणामाकोचःप्रत्याहारइत्यर्थः ॥ ८६ ॥ दशभिर्नवकैर्मिलित्वानवतिम् ॥
॥ ८७ ॥ ८८ ॥ ८९ ॥ समर्घमल्पमूल्यम् ॥ महर्घंबहुमूल्यम् ॥ उभयत्रयकारवान्पाठोदृश्यते ॥ ९० ॥ अग्रइति ॥ अग्रेमध्येअन्तेचदृष्ट्वेतिसर्वेषांसंबन्धः ॥ श्राद्धेइतिशेषः ॥ ९१ ॥ स्वयमे
वव्याचष्टे महिषीतिद्वयेन ॥ कामयतेतस्यादूषणमनादृत्यतामुपगच्छतीत्यर्थः ॥ यद्वा कामयतेऽभिलाषमात्रंकरोतीत्यर्थः ॥ ९२ ॥ स्ववृषंस्वपतिम् ॥ परवृषेपरपतौवृषायतेपरपतिंवांछतीत्यर्थः ॥

सत्यंशौचमहिंसाचक्षांतिर्दानंदयादमः ॥ अस्तेयमिंद्रियाकोचःसर्वेषांधर्मसाधनम् ॥ ८६ ॥ अभ्यस्यनवतिंचैतांस्वर्गमार्गप्रदीपिकाम् ॥ सतामभिमतां
पुण्यांगृहस्थोनावसीदति ॥ ८७ ॥ जिह्वाभार्यासुतोभ्राता मित्रदाससमाश्रिताः ॥ यस्यैतेविनयाढ्याश्चतस्यसर्वत्रगौरवम् ॥ ८८ ॥ पानंदुर्जनसंसर्गः
पत्याचविरहोटनम् ॥ स्वप्नोन्यगृहवासश्चनारीणांदूषणानिषट् ॥८९॥ समर्घंधान्यमुद्धृत्यमहर्घंयःप्रयच्छति॥सहिवार्धुषिकोनामतस्यान्नंनैवभक्षयेत् ॥
॥९०॥ अग्रेमाहिषिकंदृष्ट्वामध्येचवृषलीपतिम् ॥ अंतेवार्धुषिकंचैवनिराशाःपितरोगताः ॥ ९१ ॥ महिषीत्युच्यतेनारीयाचस्याद्व्यभिचारिणी ॥ तांदुष्टां
कामयेद्यस्तुसवैमाहिषिकःस्मृतः ॥९२॥ स्ववृषंयापरित्यज्यपरवृषेवृषायते ॥ वृषलीसाहिविज्ञेयानशूद्रीवृषलीभवेत् ॥ ९३ ॥ यावदुष्णंभवत्यन्नंयावन्मौ
नेनभुज्यते ॥ तावदश्नंतिपितरोयावन्नोक्ताहविर्गुणाः ॥ ९४ ॥ विद्याविनयसंपन्नेश्रोत्रियेगृहमागते ॥ क्रीडंत्यौषधयःसर्वायास्यामःपरमांगतिम् ॥ ९५॥
भ्रष्टशौचव्रताचारेविप्रेवेदविवर्जिते ॥ रोदित्यन्नंदीयमानंकिंमयादुष्कृतंकृतम् ॥ ९६ ॥ यस्यकोष्ठगतंचान्नंवेदाभ्यासेनजीर्यति ॥ सतारयतिदातारं
दशपूर्वान्दशापरान् ॥ ९७ ॥ नस्त्रीणांवपनंकार्यंनचगाःसमनुव्रजेत् ॥ नचरात्रौवसेद्गोष्ठेनकुर्याद्वैदिकींश्रुतिम् ॥ ९८ ॥ सर्वान्केशान्समुद्धृत्यच्छे
दयेदंगुलद्वयम् ॥ एवमेवतुनारीणांशिरसोमुंडनंभवेत् ॥ ९९ ॥ राजावाराजपुत्रोवाब्राह्मणोवाबहुश्रुतः ॥ अकारयित्वावपनंप्रायश्चित्तंविनिर्दिशेत् ॥
॥ १०० ॥ केशानांरक्षणार्थायद्विगुणंव्रतमादिशेत् ॥ द्विगुणादक्षिणादेयाब्राह्मणेवेदपारगे ॥ १ ॥ योऽगृहीत्वाविवाहाग्निंगृहस्थइतिमन्यते ॥ अन्नंतस्य
नभोक्तव्यंवृथापाकोहिसस्मृतः ॥ २ ॥ दाराग्निहोत्रदीक्षांचकुरुतेयोऽग्रजेस्थिते ॥ परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजः ॥ ३ ॥

तथाचमनुः ॥ वृषस्यंतीतुकामुकीति ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ यस्येति ॥ दशपूर्वान्दशापरान्दातुरितिशेषः ॥ ९७ ॥ नस्त्रीणामिति ॥ नचगाःसमनुव्रजेद्गोरक्षणवृत्तिर्नभवेदित्यर्थः ॥
॥ ९८ ॥ तर्हिकिंनारीणांवपनंनास्त्येवतत्राह ॥ सर्वानिति ॥ ९९ ॥ राजावेति ॥ अधिराजेतिपाठेऽधिराजपुत्रोमहाराजपुत्रः ॥ तान्वपनमकारयित्वा ॥ १०० ॥ १ ॥ योऽगृहीत्वेत्यत्राकार
प्रश्लेषः ॥ २ ॥ दाराग्निहोत्रेति ॥ अग्निहोत्रशब्दोयमग्निहोत्राद्याधानपरः ॥ यःसोदर्येज्येष्ठभ्रातरिअनूढेऽनग्निकेचदारपरिग्रहणंश्रौतस्मार्ताग्निग्रहणंचकुरुतेसपरिवेत्ता ॥ पूर्वजोज्येष्ठःपरिवित्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्भवति ॥ ३ ॥ प्रसंगात्परिवेदनसम्बन्धिनांपंचानामप्यनिष्टंफलमाह ॥ परिवित्तिरिति ॥ परिवित्तिःपरिवेत्तायया चकन्ययापरिवेदनंक्रियतेसाकन्याप्रदातायाजकश्चतद्विवाहहोमकर्तासपंचमोयेषांते सर्वेनरकंयांति ॥ ४ ॥ परिवेदनेविवाहे ॥ ९ ॥ अर्थकारणेऽर्थादिप्राप्त्यर्थम् ॥ ६ ॥ प्रसंगात्स्त्रीलम्पटंभिक्षुंनिन्दति ॥ यस्त्विति ॥ ७ ॥ ८ ॥ शूद्रान्नमानीयतेननिर्वापंपचन्ति ॥ निरूप्यतइति निर्वापंचरुपुरोडाशादिकम् ॥ ९ ॥ ११० ॥ ११ ॥ विट्समंपुरीषतुल्यम् ॥ १२ ॥ अंगुल्यादन्तकाष्ठंकेवलयांगुल्यैवदन्तशोधनमित्यर्थः ॥ तर्ज्जन्यावा ॥ शणशाकंमृतमांसंकरेणमथितंदधि ॥

परिवित्तिःपरिवेत्तायया चपरिविद्यते ॥ सर्वेतेनरकंयांतिदातृयाजकपंचमाः ॥ ४ ॥ क्लीबेदेशांतरस्थेचमूकेप्रव्रजितेजडे ॥ कुब्जेखर्वेचपतितेनदोषः परिवेदने ॥ ५ ॥ वेदाक्षराणियावंतिनियुंज्यादर्थकारणे ॥ तावतीर्वैभ्रूणहत्यावेदविक्रयकृद्भवेत् ॥ ६ ॥ यस्तुप्रव्रजितोभूत्वासेवतेमैथुनंपुनः ॥ षष्टिर्वर्ष सहस्राणिविष्ठायांजायतेकृमिः ॥ ७ ॥ शूद्रान्नंशूद्रसंपर्कःशूद्रेणचसहासनम् ॥ शूद्राद्विद्यागमःकश्चिज्ज्वलंतमपिपातयेत् ॥ ८ ॥ शूद्राद्दाहृत्यनिर्वापंये पचंत्यबुधाद्विजाः ॥ तेयांतिनरकंघोरंब्रह्मतेजोविवर्जिताः ॥ ९ ॥ माक्षिकंफाणितंशाकंगोरसंलवणंघृतम् ॥ हस्तदत्तानिभुक्तानिदिनमेकमभोजनम् ॥ ॥ ११० ॥ हस्तदत्ताश्चयेस्नेहालवणंव्यंजनानिच ॥ दातारंनोपतिष्ठंतेभोक्ताभुंक्तेतुकिल्बिषम् ॥ ११ ॥ आयसेनैवपात्रेणयदन्नमुपदीयते ॥ भोक्तात द्विट्समंभुंक्तेदाताचनरकंव्रजेत् ॥ १२ ॥ अंगुल्यादंतकाष्ठंचप्रत्यक्षंलवणंचयत् ॥ मृत्तिकाभक्षणंयच्चसमंगोमांसभक्षणैः ॥ १३ ॥ पानीयंपायसंभैक्षं घृतंलवणमेवच ॥ हस्तदत्तंनगृह्णीयात्तुल्यंगोमांसभक्षणैः ॥ १४ ॥ अग्रतोनिवसेन्मूर्खोदूरतश्चगुणान्वितः ॥ गुणान्वितायदातव्यंनास्तिमूर्खेव्य तिक्रमः ॥१५॥ ब्राह्मणातिक्रमोनास्तिविप्रेवेदविवर्जिते ॥ ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयते ॥ १६ ॥ सन्निकृष्टमधीयानंब्राह्मणंयोव्यतिक्रमेत् ॥ भोजनेचैवदानेचदहेदासप्तमंकुलम् ॥ १७ ॥ गोरक्षकान्वाणिजकांस्तथाकारुकुशीलवान् ॥ प्रेष्यान्वार्धुषिकांश्चैवविप्राञ्शूद्रवदाचरेत् ॥१८॥ देवद्रव्य विभागेनब्रह्मस्वहरणेनच ॥ कुलान्याशुविनश्यंतिब्राह्मणातिक्रमेणच ॥ १९ ॥ मादेहीतिचयोब्रूयाद्गवाग्निब्राह्मणेषुच ॥ तिर्यग्योनिशतंगत्वाचांडालेष्व भिजायते ॥ १२० ॥ वाचायच्चप्रतिज्ञातंकर्मणानोपपादितम् ॥ ऋणंतद्धर्मसंयुक्तमिहलोकेपरत्रच ॥ २१ ॥

तर्जनीदंतधावश्चसद्योगोमांसभक्षणमितिवचनात् ॥ प्रत्यक्षलवणंकेवललवणम् ॥ चक्षुर्दृश्यलवणमितिकेचित् ॥ मृत्तिकाभक्षणमपक्वमृद्भक्षणंसामान्यमृद्भक्षणंवा ॥ मृत्तिकायाभक्षणमिति ॥ १३ ॥ ॥ १४ ॥ १५ ॥ अग्रतोनिवसेदित्येतदेवहेतुतउपपादयति ॥ ब्राह्मणेति ॥ १६ ॥ सन्निकृष्टमिति ॥ चएवशब्दौभिन्नक्रमौदहेदित्यस्यानंतरंयथासंख्यंयोजनीयौ ॥ १७ ॥ कारवःकटादि क्रियोपजीविनः ॥ कुशीलवावुद्ध्युपजीविनोमूल्यकर्मकारास्तान्कारुकुशीलवान् ॥ १८ ॥ देवेति ॥ विभागेनविभज्यग्रहणेन ॥ १९ ॥ मादेहीति ॥ गवाग्नीतिछांदसम् ॥ १२० ॥ २१ ॥

१ निर्वापो दानमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विघसाशीत्यर्धस्वयंव्याचष्टे यज्ञशेषइत्यर्धेन ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ गणान्नंबहुभिरेकत्रपक्कंभक्तम् ॥ गणिकान्नंवेश्यान्नम् ॥ स्त्रीणांप्रथमगर्भेषुसीमंतोन्नयनादिषु ॥२६॥२७॥ २८ ॥ अजीर्णेऽभ्युदितेजाते ॥२९॥ चैत्यवृक्षंग्राम्यजनपूज्यंतरुम् ॥ शिवनिर्माल्यभोजिनमितिवाणादिलिंगव्यतिरेकेणबोद्धव्यम् ॥ १३०॥३१॥३२॥ ३३ ॥ यातुधानाइति ॥ मंडलेनविवर्जितंभोजनंय

विघसाशीभवेन्नित्यंनित्यंचामृतभोजनः ॥ यज्ञशेषोऽमृतंभुक्तशेषंतुविघसंविदुः ॥ २२ ॥ सव्यादंसात्परिभ्रष्टेनाभिदेशेव्यवस्थिते ॥ वस्त्रेसएकवासास्तं दैवेपित्र्येचवर्जयेत् ॥ २३ ॥ यदेवतर्पयत्यद्भिःपितॄन्स्नात्वाद्विजोत्तमः ॥ तेनैवसर्वमाप्नोतिपितृयज्ञक्रियाफलम् ॥ २४ ॥ हस्तौप्रक्षाल्यगंडूषंयःपिबेद्द्विजोत्तमः ॥ दैवंपित्र्यंतथात्मानंत्रयंसउपघातयेत् ॥ २५ ॥ गणान्नंगणिकान्नंचयदन्नंग्रामयाजके ॥ स्त्रीणांप्रथमगर्भेषुभुक्त्वाचांद्रायणंचरेत् ॥ २६ ॥ पक्षेवायदिवामासेयस्यगेहेत्तिनद्विजः ॥ भुक्तादुरात्मनस्तस्यचरेच्चांद्रायणव्रतम् ॥ २७ ॥ सत्रिणांदीक्षितानांचयतीनांब्रह्मचारिणाम् ॥ एतेषांसूतकंनास्तिऋत्विजांकर्मकुर्वताम् ॥ २८ ॥ अजीर्णेऽभ्युदितेवांतेश्मश्रुकर्मणिमैथुने ॥ दुःस्वप्नेदुर्जनस्पर्शेस्नानमेवविधीयते ॥ २९ ॥ चैत्यवृक्षंचितिंयूपं शिवनिर्माल्यभोजिनम् ॥ वेदविक्रयिणंस्पृष्ट्वासचैलोजलमाविशेत् ॥ १३० ॥ अग्न्यगारेगवांगोष्ठेदेवब्राह्मणसन्निधौ ॥ स्वाध्यायेभोजनेपानेपादुकेवैविसर्जयेत् ॥ ३१ ॥ खलक्षेत्रगतंधान्यंकूपवापीषुयज्जलम् ॥ अग्राह्यादपितद्ग्राह्यंयच्चगोष्ठगतंपयः ॥ ३२ ॥ यद्वेष्टितशिराभुंक्तेयोभुंक्तेदक्षिणामुखः ॥ सोपानत्कश्चयद्भुंक्तेतद्वैरक्षांसिभुंजते ॥ ३३ ॥ यातुधानाःपिशाचाश्चराक्षसाःक्रूरकर्मिणः ॥ हरंतिरसमन्नस्यमंडलेनविवर्जितम् ॥३४॥ ब्रह्माद्याश्चसुराःसर्वेवसिष्ठाद्यामहर्षयः ॥ मंडलंचोपजीवंतिततःकुर्वीतमंडलम् ॥ ३५ ॥ ब्राह्मणेचतुरस्रंस्यात्त्र्यस्रंवैबाहुजन्मनः ॥ वर्तुलंचविशःप्रोक्तंशूद्रस्याभ्युक्षणं स्मृतम् ॥ ३६ ॥ नोत्संगेभोजनंकृत्वानोपाणौनैवकर्पटे ॥ नासनेनचशय्यायांभुंजीतनमलार्दितः ॥ ३७ ॥ धर्मशास्त्ररथारूढावेदखड्गधराद्विजाः ॥ क्रीडार्थमपियद्ब्रूयुःसधर्मःपरमःस्मृतः ॥ ३८ ॥ रात्रौधानादधियुतंधर्मकामोनभक्षयेत् ॥ अश्नतोधर्महानिःस्याद्व्याधिभिश्चोपपीड्यते ॥ ३९ ॥ फाणितंगोरसंतोयंलवणंमधुकांजिकम् ॥ हस्तेनब्राह्मणोदत्त्वाकृच्छ्रंचांद्रायणंचरेत् ॥ १४० ॥ गंधाभरणमाल्यानियःप्रयच्छतिधर्मवित् ॥ ससुगंधिःसदाहृष्टोयत्रयत्रोपजायते ॥ ४१ ॥ नीलीरक्तंतुयद्वस्त्रंदूरतःपरिवर्जयेत् ॥ स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति ॥ ४२ ॥

दिस्यादितिशेषः ॥ यद्वा मंडलेनविवर्जितंयदन्नंतस्यान्नस्यरसंहरंतीत्यर्थः ॥ ३४ ॥ ३५॥३६॥३७॥ ३८ ॥ धानादधियुतंलाजदधिभ्यांमिश्रितमन्नादीत्यर्थः ॥ ३९ ॥ फाणितंफेणीतिप्रसिद्धम् ॥ कंजिकैवकांजिका ॥ मधुचकांजिकाचमधुकांजिकमित्येकवद्भावः ॥ यद्वा कांजिकंकंजिकासंबन्धिद्रव्यांतरंयदायोब्राह्मणोवादद्यात्तदासकृच्छ्रंचांद्रायणंकुर्यादित्यर्थः ॥ १४० ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ालनान्नील्याइत्यर्थात् ॥ तद्वृत्तेर्नीलीक्रयणविक्रयणवृत्तेरित्यर्थः ॥ ४३ ॥ तपःकृच्छ्रचांद्रायणादि ॥ जपइतिकचित् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ अमृतमिति ॥ यतःऋग्यजुः
ामसंस्कृतंविप्रान्नंतेनहेतुनाचतदमृतमित्यन्वयः ॥ ४९ ॥ व्यवहारेति ॥ तेनार्जनेनक्षत्रियस्यान्नमितिशेषः ॥ पयःपयोवत्पवित्रमित्यर्थः ॥ १५० ॥ प्रहरमात्रमभिव्याप्यआसन्नयग्व्यवहारेण

पालनाद्विक्रयाच्चैवतद्वृत्तेरुपजीवनात् ॥ अपवित्रोभवेद्विप्रस्त्रिभिःकृच्छ्रैर्विशुध्यति ॥ ४३ ॥ स्नानंदानंतपोहोमःस्वाध्यायःपितृतर्पणम् ॥ वृथातस्यम
हायज्ञानीलीवासोबिभर्तियः ॥ ४४ ॥ नीलीरक्तंयदावस्त्रंविप्रःस्वांगेषुधारयेत् ॥ तंतुसंततिसंख्याकेनरकेसवसेद्ध्रुवम् ॥ ४५ ॥ अहोरात्रोषितोभूत्वापं
चगव्येनशुध्यति ॥ ४६ ॥ नीलीरक्तेनवस्त्रेणयदन्नमुपकल्पयेत् ॥ भोक्ताविष्ठासमंभुंक्तेदाताचनरकंव्रजेत् ॥ ४७ ॥ अमृतंब्राह्मणस्यान्नंक्षत्रियान्नंपयः
स्मृतम् ॥ वैश्यस्यचान्नमेवान्नंशूद्रस्यरुधिरंस्मृतम् ॥ ४८ ॥ वैश्वदेवेनहोमेनदेवताभ्यर्चनैर्जपैः ॥ अमृतंतेनविप्रान्नमृग्यजुःसामसंस्कृतम् ॥ ४९ ॥
व्यवहारानुरूपेणन्यायेनतुयदर्जनम् ॥ क्षत्रियस्यपयस्तेनप्रजापालनतोभवेत् ॥ १५० ॥ प्रहरानद्धवाहाद्यदन्नमुत्पाद्ययच्छति ॥ सीतायज्ञविधानेनवै
श्यान्नंतेनसंस्कृतम् ॥ ५१ ॥ अज्ञानतिमिरांधस्यमद्यपानरतस्यच ॥ रुधिरंतेनशूद्रान्नंवेदमंत्रविवर्जितम् ॥ ५२ ॥ नवृथाशपथंकुर्यात्स्वल्पेप्यर्थेनरो
त्तमः ॥ वृथाहिशपथंकुर्वन्प्रेत्यचेहविनश्यति ॥ ५३ ॥ कामिनीषुविवाहेचगवांभुक्तेधनक्षये ॥ ब्राह्मणाभ्युपपत्तौचशपथैर्नास्तिपातकम् ॥५४॥ सत्ये
नशापयेद्विप्रंक्षात्रियंवाहनायुधैः ॥ गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः ॥५५॥ अग्निंवाहारयेदेनमप्सुचैनंनिमज्जयेत् ॥ स्पर्शयेत्पुत्रदाराणांशिरांस्येनं
चवापृथक् ॥ ५६ ॥ नयमंयममित्याहुरात्मावैयमउच्यते ॥ आत्मासंयमितोयेनतंयमःकिंकरिष्यति ॥ ५७ ॥ ननिस्त्रिंशस्तथातीक्ष्णःफणीवादुरति
क्रमः ॥ रिपुर्वानित्यसंक्रुद्धोयथात्मादुरधिष्ठितः ॥ ५८ ॥ एकःक्षमावतांदोषोनद्वितीयःकथंचन ॥ यदेनंक्षमयायुक्तमशक्तंमन्यतेजनः ॥ ५९ ॥ नश
ब्दशास्त्राभिरतस्यमोक्षोनचैवरम्यावसथप्रियस्य ॥ नभोजनाच्छादनतत्परस्यनलोकवित्तग्रहणेरतस्य ॥ १६० ॥ एकांतशीलस्यसदैवतस्यसर्वेंद्रियप्री
तिनिवर्तकस्य ॥ स्वाध्याययोगेगतमानसस्यमोक्षोध्रुवंनित्यमहिंसकस्य ॥ ६१ ॥ कैकांतशीलत्वमिहास्तिपुंसःक्वचेंद्रियप्रीतिनिवृत्तिरस्ति ॥ क्वयो
गयुक्तिःक्वचदैवतेज्याकाश्यांविनैभिःसहजेनमुक्तिः ॥ ६२ ॥ विश्वेशसंशीलनमेवयोगस्तपश्चविश्वेशपुरीनिवासः ॥ व्रतानिदानंनियमायमाश्चस्नानं
द्युनद्यांयदुदग्वहायाम् ॥६३॥ ॥ स्कंदउवाच ॥ ॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोतिथिप्रियः ॥ श्राद्धकृत्सत्यवादीचगृहस्थोपीहमुच्यते ॥६४॥

कर्षणार्थमानद्धाद्धाद्वाहाद्बलीवर्दात्सीतालांगलपद्धतिस्ततसंबंधियज्ञविधानेनान्नमुत्पाद्ययतोयच्छतिवैश्यस्तेनहेतुनातदन्नंसंस्कृतंपवित्रमित्यर्थः ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥
एनंशूद्रम् ॥ ५६ ॥ ५७ ॥ दुराधिष्ठितोऽवशः ॥ ५८ ॥ ५९ ॥ वित्तग्रहणेधनादाने ॥ चित्तग्रहणइतिपाठेचित्तानुरंजनइत्यर्थः ॥ १६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ न्यायेति ॥ इहजगति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मनिवासुच्यते ॥ सत्त्वशुद्धिद्वारेणेत्यर्थः ॥ ६४ ॥ ६९ ॥ ६६ ॥१६७॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांचत्वारिंशोध्यायः ॥ ४० ॥ ॥ छ ॥ एकेनाधिकचत्वारिंशकेऽध्याये सुशोभने ॥ उच्यंतेविविधायोगाधर्माश्रयतिवानगाः ॥ १ ॥ क्रमप्राप्तान्वनस्थधर्मानाह ॥ उषित्वैवमिति ॥ वलीत्वचःश्लथतापलितंजरसाशौक्ल्यं ताभ्यांयुतः ॥ १ ॥ अपत्येति ॥ वनवासमनिच्छंतींभार्यांपुत्रेषुसमर्प्यइच्छंत्यातुसहवनंगच्छेदित्यर्थः ॥ २ ॥ प्रगेप्रातः ॥ स्नानद्वयंमाध्याह्निकस्नानस्योपलक्षणम् ॥ उपस्पृशंस्त्रिषवणमितिमनुवचनात् ॥ ३ ॥ ४ ॥ अनादाताऽगृहीता ॥ गार्हपत्यकुण्डस्थानामग्नीनामाहवनीयदक्षिणाग्निकुण्डयोर्विहारोवितानन्तद्भवंवैतानिकम् ॥५॥ मुन्यन्नैर्नीवारादिभिः ॥ ६ ॥ शेलुशिग्रूशेलुश्चशिग्रुश्चशोभांजनःतौ ॥ कवकंछत्राकम् ॥ पललंमांसम् ॥

दीनांधकृपणार्थिभ्योदत्त्वान्नानिविशेषतः ॥ कृत्वागार्ह्याणिकर्माणिगृहस्थःश्रेयआप्नुयात् ॥ ६९ ॥ इत्थमाचरतांपुंसांकाशीनाथःप्रसीदति ॥ काशीनाथप्रसादेनकाशीप्राप्तिस्तुमोक्षकृत् ॥ ६६ ॥ ससर्वतीर्थसुस्नातःससर्वक्रतुदीक्षितः ॥ सदत्तसर्वदानस्तुकाशीयेननिषेविता ॥ १६७ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेगृहस्थधर्माख्यानंनामचत्वारिंशोध्यायः ॥४०॥ ॥छ॥ ॥ स्कंदउवाच ॥ ॥ उषित्वैवंगृहेविप्रोद्वितीयादाश्रमात्परम् ॥ वलीपलितसंयुक्तस्तृतीयाश्रममाविशेत् ॥ १ ॥ अपत्यापत्यमालोक्यग्राम्याहारान्विसृज्यच ॥ पत्नींपुत्रेषुसंत्यज्य पत्न्यावावनमाविशेत् ॥ २ ॥ वसानश्चर्मचीराणिसाग्निर्मुन्यन्नवर्तनः ॥ जटीसायंप्रगेस्नायीश्मश्रुलोमनखलोमभृत् ॥३॥ शाकमूलफलैर्वापिपंचयज्ञान्नहापयेत् ॥ अम्मूलफलभिक्षाभिरर्चयेद्भिक्षुकातिथीन् ॥ ४ ॥ अनादाताचदाताचदांतःस्वाध्यायतत्परः ॥ वैतानिकंचजुहुयादग्निहोत्रंयथाविधि ॥ ५ ॥ मुन्यन्नैःस्वयमानीतैःपुरोडाशांश्चनिर्वपेत् ॥ स्वयंकृतंचलवणंखादेत्स्नेहंफलोद्भवम् ॥ ६ ॥ वर्जयेच्छेलुशिग्रूचकवकंपललंमधु ॥ मुन्यन्नमाश्विनेमासित्यजेद्यत्पूर्वसंचितम् ॥७॥ ग्राम्याणिफलमूलानिफालजान्नंचसंत्यजेत् ॥ दंतोलूखलकोवास्यादश्मकुट्टोथवाभवेत् ॥ ८ ॥ सद्यःप्रक्षालकोवास्यादथवामाससंचयी ॥ त्रिषड्द्वादशमासान्नफलमूलादिसंग्रही ॥९॥ नक्ताश्येकांतराशीवाषष्ठकालाशनोपिवा ॥ चांद्रायणव्रतीवास्यात्पक्षभुग्वाथमासभुक् ॥ ॥१०॥ वैखानसमतस्थस्तुफलमूलाशनोपिवा ॥ तपसाशोषयेद्देहंपितॄन्देवांश्चतर्पयेत् ॥ ११ ॥ अग्निमात्मनिचाधायविचरेदनिकेतनः ॥ भिक्षयेत्प्राणयात्रार्थंतापसान्वनवासिनः ॥ १२ ॥ ग्रामादानीयवाश्नीयादष्टौग्रासान्वसन्वने ॥ इत्थंवनाश्रमीविप्रोब्रह्मलोकेमहीयते ॥ १३ ॥

शेलुकवकादीनांद्विजातिविषयेपूर्वाध्यायेनिषेधेसत्यापिपुनर्निषेधःसमप्रायश्चित्तविधानार्थः ॥ ७ ॥ फालजान्नमुत्सृष्टमपिफालकृष्टप्रदेशेजातंस्वामिनोपेक्षितमपिव्रीह्यादिसन्त्यजेन्नाद्यात् ॥ ८ ॥ सद्यःप्रक्षालकःएकाहमेवजीवनोचितमात्रसंग्राहकइत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ अशक्तंवैराग्यहीनंप्रत्याह॥अग्निमिति ॥ श्रौतमग्निंवैखानसशास्त्रविधानेनभस्मपानादिनास्वात्मनिसमारोप्यानिकेतनोलौकिकाग्निवद्गृहशून्योविचरेत् ॥ भिक्षयेदिति ॥ तापसान्वानप्रस्थान्तदभावेऽन्यान्वावनवासिनोगृहस्थान्द्विजान् ॥ १२ ॥ तदभावेग्रामादानीयग्राम्यस्यान्नस्याष्टौग्रासान्पर्णपुटेनशरावादिखण्डेनवापाणिनैववागृहीत्वावानप्रस्थोभुंजीत ॥ तथाचमनुः ॥ तापसेष्वेवविप्रेषुयात्रिकंभैक्ष्यमाहरेत् ॥ गृहवासिषुचान्येषुद्विजेषुवनवासिषु ॥ ग्रामादाहृत्यवाश्नीयादष्टौग्रासान्वनेवसन् ॥ प्रतिगृह्यपुटेनैवपाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशकलेनवेति ॥ आश्रमधर्मानुष्ठानफलमाह ॥ इत्थमिति ॥ ब्रह्मलोकेतपोलोके ॥ १३ ॥ शक्तंविरक्तंप्रत्याह॥अतिवाह्येति ॥ इत्येवंप्रकारेण ॥ १४ ॥ आश्रमसमुच्चयपक्षमाश्रित्याह ॥ ऋण त्रयमिति ॥ ऋषिपितृदेवानामृणत्रयमसंशोध्य ॥ एतदेवविवृण्वन्नृणत्रयमेवदर्शयति ॥ अनुत्पाद्येति ॥ अपिशब्दाद्वेदाननधीत्य ॥ तथाचमनुः ॥ अनधीत्यद्विजोवेदाननुत्पाद्यतथासुतान् ॥ अनि ष्ट्वाचैवयज्ञैश्चमोक्षमिच्छन्व्रजत्यधइति॥ एतदप्यसमंजसमेवब्रह्मचर्यादेवप्रव्रजेत्॥यदहरेवविरजेत्तदहरेवप्रव्रजेदित्यादिश्रुतिविरोधात्॥तथाचसुरेश्वरवार्तिकम् ॥ ब्रह्मचर्यादेवेत्यादिवाक्यानिशतशःश्रुतौ॥ श्रूयंतेतुऋणवचोविरोधात्स्यादपस्मृतिरित्यादि ॥ अथवैतदुभयंस्मृतिवाक्यमविरक्तपरम् ॥ १५ ॥ १६ ॥ अनग्निःलौकिकाग्निरहितः ॥ शास्त्रीयाग्नित्यागस्यपूर्वमुक्तत्वात् ॥ अनिकेतनोगृहशून्यः ॥ सिद्ध्यर्थंमोक्षार्थमसहायःसहायशून्यः ॥ १७ ॥ यतिःसंन्यासी ॥ यमीतिपाठश्चेत्यः ॥ प्रकृत्यन्तरंवा ॥ किंतुकालमेवस्वकर्माधीनंमरणकालमेवप्रतीक्षेत ॥ निर्दिश्यतेइतिनिर्देशोभृतिस्तत्परि

अतिवाह्यायुषोभागंतृतीयमितिकानने ॥ आयुषस्तुतुरीयांशेत्यक्त्वासंगान्परिव्रजेत् ॥ १४ ॥ ऋणत्रयमसंशोध्यत्वनुत्पाद्यसुतानपि ॥ तथायज्ञाननि ष्ट्वाचमोक्षमिच्छन्व्रजत्यधः ॥ १५ ॥ मनागपिनभूतानांयस्मादुत्पद्यतेभयम् ॥ सर्वभूतानितस्येहप्रयच्छंत्यभयंसदा ॥ १६ ॥ एकएवचरेन्नित्यमनग्नि रनिकेतनः ॥ सिद्ध्यर्थमसहायःस्याद्ग्राममन्नार्थमाश्रयेत् ॥१७॥ जीवितंमरणंवाथनाभिकांक्षेत्क्वचिद्यतिः ॥ कालमेवप्रतीक्षेतानिर्देशंभृतकोयथा॥१८॥ सर्वत्रममताशून्यःसर्वत्रसमतायुतः ॥ वृक्षमूलनिकेतश्चमुमुक्षुरिहशस्यते ॥१९॥ ध्यानंशौचंतथाभिक्षानित्यमेकांतशीलता ॥ यतेश्चत्वारिकर्माणिपंचमं नोपपद्यते ॥ २० ॥ वार्षिकांश्चतुरोमासान्विहरेन्नयतिःक्वचित् ॥ बीजांकुराणांजंतूनांहिंसातत्रयतोभवेत् ॥ २१ ॥ गच्छेत्परिहरन्जंतून्पिबेत्कंवस्त्रशो धितम् ॥ वाचंवदेदनुद्वेगांनक्रुध्येत्केनचित्क्वचित् ॥ २२ ॥ चरेदात्मसहायश्चनिरपेक्षोनिराश्रयः ॥ नित्यमध्यात्मनिरतोनीचकेशनखोवशी ॥ २३ ॥ कुसुंभवासादंडाढ्योभिक्षाशीख्यातिवर्जितः ॥ अलाबुदारुमृद्वेणुपात्रंशस्तंनपंचमम् ॥ २४ ॥ नग्राह्यंतैजसंपात्रंभिक्षुकेणकदाचन ॥ वराटकेसंगृहीते तत्रतत्रादिनेदिने ॥२५॥ गोसहस्रवधंपापंश्रुतिरेषासनातनी ॥ हृदिसस्नेहभावेनचेद्वीक्षेतस्त्रियमेकदा ॥ २६ ॥ कोटिद्वयंब्रह्मकल्पंकुंभीपाकीनसंशयः ॥ एककालंचरेद्भैक्षंनकुर्यात्तत्रविस्तरम् ॥ २७ ॥

शो धनकालमिवभृतकःकर्मकारः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ कंजलम् ॥ २२ ॥ अध्यात्मरतोब्रह्मध्यानपरइत्यर्थः ॥ नीचकेशनखःअसंस्कृतकेशनखरइत्यर्थः ॥ २३ ॥ कुसुम्भवासाःकुसुं भाक्तवासाः ॥ गैरिकाद्यक्तवस्त्रादेरुपलक्षणमेतत् ॥ ख्यातिवर्जितःश्रैष्ठ्याख्यापकः ॥ वेणुपात्रंवंशादिदलखंडनिर्मितम् ॥ २४ ॥ वराटकेकपर्दमात्रे ॥ २५ ॥ हृदिअन्तःकरणेस्नेहभावेनकामुकतया एकदापियोयतिःस्त्रियंद्रक्षेतपश्येत्ससंन्यासीकोटिद्वय ब्रह्मकल्पंकुंभीपाकेनरकविशेषपच्यतइतितथाविधस्तिष्ठतीतिशेषइत्युत्तरेणान्वयः ॥ सस्नेहभावेनकामसहितेनाभिप्रायेणेतिवा ॥ कोटिद्वयंब्राह्मकल्प मितिपाठेब्राह्मकल्पंब्रह्मकल्पभवंकोटिद्वयंयुगानामितिशेषः ॥२६॥ एककालमिति ॥ एककालमेकवारंप्राणधारणार्थंभैक्षंचरेत् ॥ तत्रापिविस्तरंप्रचुरभिक्षाप्रसक्तिंनकुर्यात् ॥ यतोबहुभक्षणेसक्तोयति श्चरमधातुवृद्ध्याव्याध्यादिविषयेष्वपिप्रसज्जतीत्यर्थः ॥ तथाचमनुः ॥ एककालंचरेद्भैक्षंप्रसज्जेत्तुनविस्तरे॥भैक्षप्रसक्तोहियतिर्विषयेष्वपिसज्जतीति ॥ अत्रत्वर्धपद्यमेवदृश्यते ॥ एतत्त्वकुटीचकबहूदकादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयम्॥एकवारंद्विवारंवाभुंजीतपरहंसकः ॥ येनकेनप्रकारेणज्ञानाभ्यासोभवेत्सदेतिवचनात् ॥२७॥ विधूमइति ॥ विधूमेविगतपाकधूमे सन्नमुसलेनिवृत्तावहननकुट्टनदंडे भुक्तवज्जनेगृहस्थपर्यंतेजने भुक्तवति वृत्तेशरावसंपातेभोजनोच्छिष्टशरावेत्यक्तेःसर्वदायतिर्भिक्षांचरेत् ॥ एतच्चदिनशेषमुहूर्तत्रयरूपसायाह्नोपलक्षणम् ॥ तदाहयाज्ञवल्क्यः ॥ अप्रसक्तश्चरेद्भैक्षंसायाह्नेनाभिसंधितइति ॥ २८ ॥ ॥ २९ ॥ अनेकतंत्रेणानेकशास्त्रोक्तविधानेनेत्यर्थः ॥ ३० ॥ निर्धक्ष्यतिभस्मसात्करिष्यतीत्यर्थः ॥ ३१ ॥ दृष्ट्वेत्यादिद्वितीयांतपदानां दृष्ट्वामुक्तयेयत्नंकुर्वीतेत्यग्रिमेणान्वयः ॥ ३२ ॥ ॥ ३३ ॥ एवंपूर्वोक्तप्रकारेणनृणामनेकधागतिःफलतोदृष्ट्वेत्यर्थः ॥ गतीर्नृणामनेकधेतिपाठश्चेत्तर्हिंऋजुरेवार्थः ॥ दृष्ट्वेतिपदस्यावृत्तिःसर्वत्रान्वयार्था ॥ ३४ ॥ ३५ ॥ ३६ ॥ प्रकृतमुपसंहरति ॥ आश्रमानिति ॥ ३७ ॥ असंयतइति ॥ आत्माआत्मोपाधिर्देहेंद्रियादिसंघातः ॥ धीमद्भिर्विवेकिभिः ॥ संयतोवशीकृतः ॥ पदंकैवल्यम् ॥ अनामयंसर्वोपद्रवशून्यम् ॥ ३८ ॥ श्रुतीति ॥

विधूमेसन्नमुसलेव्यंगारेभुक्तवज्जने ॥ वृत्तेशरावसंपातेभिक्षांनित्यंचरेद्यतिः ॥ २८ ॥ अल्पाहारोरहःस्थायीत्विंद्रियार्थेष्वलोलुपः ॥ रागद्वेषविनिर्मुक्तो भिक्षुर्मोक्षायकल्पते ॥ २९ ॥ आश्रमेतुयतिर्यस्यमुहूर्तमपिविश्रमेत् ॥ किंतस्यानेकतंत्रेणकृतकृत्यःसजायते ॥ ३० ॥ संचितंयद्गृहस्थेनपापमामरणां तिकम् ॥ निर्धक्ष्यतिहितत्सर्वमेकरात्रोषितोयतिः ॥३१॥ दृष्ट्वाजराभिभवनमसह्यंरोगपीडितम् ॥ देहत्यागंपुनर्गर्भंगर्भक्लेशंचदारुणम् ॥३२॥ नानायो निनिवासंचवियोगंचप्रियैःसह ॥ अप्रियैःसहसंयोगमधर्माद्दुःखसंभवम् ॥ ३३ ॥ पुनर्निरयसंवासंनानानरकयातनाः ॥ कर्मदोषसमुद्भूतानृणांगतिरने कधा ॥ ३४ ॥ देहेष्वनित्यतांदृष्ट्वानित्यतांपरमात्मनः ॥ कुर्वीतमुक्तयेयत्नंयत्रयत्राश्रमेरतः ॥ ३५ ॥ करपात्रीतिविख्याताभिक्षापात्रविवर्जिता ॥ तेषां शतगुणंपुण्यंभवत्येवदिनेदिने ॥ ३६ ॥ आश्रमांश्चतुरस्त्वेवंक्रमादासेव्यपंडितः ॥ निर्द्वंद्वस्त्यक्तसंगश्चब्रह्मभूयायकल्पते ॥ ३७ ॥ असंयतःकुबुद्धी नामात्माबंधायकल्पते ॥ धीमद्भिःसंयतःसोपिपदंदद्यादनामयम् ॥३८॥ श्रुतिस्मृतिपुराणंचविद्योपनिषदस्तथा ॥ श्लोकाःसूत्राणिभाष्याणियच्चान्यद्वा ङ्मयंक्वचित् ॥ ३९ ॥ वेदानुवचनंज्ञात्वाब्रह्मचर्यंतपोदमः ॥ श्रद्धोपवासःस्वातंत्र्यमात्मनोज्ञानहेतवः ॥ ४० ॥ सहिसर्वैर्विजिज्ञास्यआत्मैवाश्रमव र्तिभिः ॥ श्रोतव्यस्त्वथमंतव्योद्रष्टव्यश्चप्रयत्नतः ॥४१॥ आत्मज्ञानेनमुक्तिःस्यात्तच्चयोगादृतेनहि ॥ सचयोगश्चिरंकालमभ्यासादेवसिध्यति ॥ ४२ ॥

श्रुतिस्मृत्यादीनियानिस्वातंत्र्यंयथास्यादात्मनोज्ञानेहेतवोवर्ततेतानिसर्वाणिज्ञात्वाप्रसिद्धआत्मासर्वैराश्रमवर्तिभिर्विजिज्ञास्योविचारणीयइतितृतीयेनान्वयः ॥ यज्ञाइतिपाठेश्रुत्यादयोयेज्ञानहेतवस्तै स्सर्वैर्विजिज्ञास्यइत्यर्थः ॥ तत्रविद्याउपासना ॥ वाङ्मयंवात्स्यायनादिप्रणीतंशास्त्रम् ॥ अपिवात्स्यायनादीनांब्रह्मण्येवसमन्वयइतिवचनात् ॥ ३९ ॥ वेदानुवचनंवेदपाठः ॥ वेदांतवचनमितिपाठे उपनिषत्स्वेवकश्चिद्भागविशेषः ॥ ४० ॥ विचारमेवश्रवणपरंसांगंदर्शयन्नुपलक्षणत्वेनोपनिषदंदर्शयति श्रोतव्यइत्यर्धेन ॥ अस्यायमर्थः ॥ आत्मावाअरेद्रष्टव्योदर्शनार्होदर्शनविषयमापादयितव्यः ॥ श्रोतव्यःपूर्वमाचार्यतआगमतश्च ॥ पश्चान्मंतव्यस्तर्कतस्ततोनिदिध्यासितव्योनिश्चयेनध्यातव्यइति ॥ ४१ ॥ कलौतत्त्वज्ञानसाधनानांयोगादीनांदुःसंपाद्यत्वान्मुक्त्येकसाधनस्याविमुक्तेदेहत्याग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यात्तयेवाराणसीसमाश्रयणीयेतिवक्तुंज्ञानसाधनभूतान्योगान्दर्शयति आत्मज्ञानेनेत्यारभ्यैकेनजन्मनेत्यतःप्राक्तनेनग्रंथेन ॥ ४२ ॥ व्यतिरेकमाह ॥ नारण्येति ॥ ४३ ॥ ४४ ॥ चिरंकालम भ्यासादितिविवृणोति अभियोगादितित्रयेण ॥ अभियोगादध्यवसायात् ॥ सदाभ्यासात्सदानुष्ठानात् ॥ ब्रह्मणःआसमंतादभ्यासादितिवा ॥ पुनःपुनरनिर्वेदादवैराग्यादवैतृष्ण्यादित्यर्थः ॥ ४५ ॥ आत्ममिथुनस्यपरमात्मैक्यभावमापन्नस्य ॥४६॥४७॥ जीवपरमात्मनोरैक्यमेवमुख्योयोगशब्दार्थइतिवक्तुंमुख्यादियोगत्रयमाह ॥ संयोगस्त्विति ॥ तथाचकथयंति ॥ आत्मामनसासंयुज्यतइति ॥ समायोगोमेलनंकुम्भकइत्यर्थः ॥ ४८ ॥ अर्थपंडितैरितिपाठेअर्थविषयेविषयभोगविषयेपंडितैरित्यर्थः ॥ तर्ह्यतैरेवज्ञानंमोक्षश्चस्यात ॥ तथाचश्रुतिः ॥ कामोऽकार्षीत्कामःकरोतिकामःकर्ताकामःकार यितेत्यादिरित्याशंक्यांतिमपक्षस्यतयोरसाधकत्वमाह विषयेत्यर्धेन ॥ ४९ ॥ पूर्वयोस्तत्साधकत्वमाह दुर्निवारेत्येकेन ॥ दुर्निवारायामनोवृत्तिःसायावन्ननिवर्ततेतावद्योगस्यजीवब्रह्मणोरैक्य लक्षणस्यनेदीयसीनिकटवर्तिनीअल्पापिकिंवदन्तीवार्ताकुतइत्यन्वयः ॥ ५० ॥ मुख्यंयोगशब्दार्थमाह ॥ वृत्तिहीनामिति ॥ क्षेत्रज्ञेशोधितत्वंपदार्थस्वरूपेपरमात्मनिवृत्तिहीनंमनएकीकृत्यतदात्मनैवप्र

नारण्यसंश्रयाद्योगोननानाग्रंथचिंतनात् ॥ नदानैर्नव्रतैर्वापिनतपोभिर्नवामखैः ॥ ४३ ॥ नचपद्मासनाद्योगोनवाघ्राणाग्रवीक्षणात् ॥ नशौचेननमौने ननमंत्राराधनैरपि ॥ ४४ ॥ अभियोगात्सदाभ्यासात्तत्रैवचविनिश्चयात् ॥ पुनःपुनरनिर्वेदात्सिध्येद्योगोनचान्यथा ॥ ४५ ॥ आत्मक्रीडस्यसततं सदात्ममिथुनस्यच ॥ आत्मन्येवसुतृप्तस्ययोगसिद्धिर्नदूरतः ॥ ४६ ॥ अत्रात्मव्यतिरेकेणद्वितीयंयोनपश्यति ॥ आत्मारामःसयोगींद्रोब्रह्मीभूतोभवे दिह ॥ ४७ ॥ संयोगस्त्वात्ममनसोर्योगइत्युच्यतेबुधैः ॥ प्राणापानसमायोगोयोगइत्यपिकैश्चन ॥ ४८ ॥ विषयेंद्रियसंयोगोयोगइत्यप्यपंडितैः ॥ विषयासक्तचित्तानांज्ञानंमोक्षश्चदूरतः ॥ ४९ ॥ दुर्निवारामनोवृत्तिर्यावत्सानननिवर्तते ॥किंवदंत्यपियोगस्यतावन्नेदीयसीकुतः ॥ ५० ॥ वृत्तिहीनंमनः कृत्वाक्षेत्रज्ञेपरमात्मनि ॥ एकीकृत्यविमुच्येतयोगयुक्तःसउच्यते ॥ ५१ ॥ बहिर्मुखानिसर्वाणिकृत्वाखान्यंतराणिवै ॥ मनस्यवेंद्रियग्राममंमनश्चात्म नियोजयेत् ॥ ५२ ॥ सर्वभावविनिर्मुक्तंक्षेत्रज्ञंब्रह्मणिन्यसेत् ॥ एतद्ध्यानंचयोगश्चशेषोन्योग्रंथविस्तरः ॥ ५३ ॥ यन्नास्तिसर्वलोकेषुतदस्तीति विरुध्यते ॥ कथ्यमानंतदन्यस्यहृदयेनावतिष्ठते ॥ ५४ ॥

विलाप्ययोविमुच्येतमुक्तोभवतिसयोगयुक्तोमुख्ययोगयुगुच्यतइत्यर्थः ॥ ५१ ॥ एतदेवविवृणोति बहिर्मुखानीतिद्वाभ्याम् ॥ बहिर्मुखानींद्रियाणिचक्षुरादीनिबहिरिंद्रियाणीत्यर्थः ॥ अन्तराणि खानिबुद्ध्यहंकारचित्तान्यन्तरिंद्रियाणिचमनस्येवकृत्वाविषयेभ्यःप्रत्याहृत्यततइन्द्रियग्रामंबहिरन्तरिंद्रियसमुदायंमनश्चआत्मनियोजयेत् ॥ प्रत्यगात्मनिक्षेत्रज्ञेप्रविलापयेदित्यर्थः ॥ ५२ ॥ तंक्षेत्रज्ञं सर्वभावविनिर्मुक्तंसाक्षित्वद्रष्टृत्वप्रत्यक्त्वादिसर्वविकाररहितंशुद्धंत्वंपदार्थंब्रह्मणिशुद्धेतत्पदार्थेसजातीयविजातीयस्वगतभेदरहितेपरमानन्दस्वरूपेन्यसेदेकीकुर्यादित्यर्थः ॥ उपसंहरति ॥ एतद्ध्यान मिति ॥ ५३ ॥ ननुयद्येताहृशंध्यानंयोगश्चवर्ततेतर्हिसर्वेषांचेतसिकिमितिनभूयात्तत्राह ॥ यन्नास्तीति ॥ सर्वलोकेषुयत्प्रत्यग्ब्रह्मैक्यंनास्तिनस्फुरतितदस्तीतितत्त्वज्ञेनकथ्यमानंविरुध्यतेमूर्खेषुअतस्तद न्यस्यप्राकृतस्यहृदयेनावतिष्ठतेनोल्लसतीत्यर्थः ॥ तथाचाहुःप्राकृताः ॥ बाधितमर्थंवेदोपिनबोधयतिकंचन॥असंभाव्यंनवक्तव्यंप्रत्यक्षंदृश्यतेयदि ॥ शिलातरतिपानीयंगीतंगायतिवानरइत्यादि ॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवंसदृष्टांतंस्पष्टयति ॥ स्वसंवेद्यमिति ॥ तत्प्रत्यग्ब्रह्मस्वसंवेद्यंपुण्यकर्मादिनाशुद्धांतःकरणेयोगाभ्यासेनयोगिभिःस्वयमेवज्ञेयम् ॥ तत्रदृष्टांतः ॥ कुमारीस्त्रीसुखंयथेति ॥ कुमारीयथास्त्रीसुखं भर्तृसंगजंस्त्रीभिःकथ्यमानमपिस्वसंवेद्यत्वान्नजानातितथातत्स्वसंवेद्यंप्रत्यग्ब्रह्मायोगीनैववेत्तिनजानाति ॥ अत्रापिदृष्टांतः ॥ जात्यंधोवर्तिकांदीपदशामिवेति ॥ वर्णिकामितिपाठेचित्रिकामिवेत्यर्थः ॥ ॥ ५५ ॥ ननुयोगाभ्यासवंतोपिसर्वेतन्नजानंतीतिदृश्यतेतत्राह ॥ नित्येति ॥ यदाकदाचिदभ्यासवतानलभ्यतइतिभावः ॥ तत्किमित्याकांक्षायामाह ॥ तत्सूक्ष्मत्वादिति ॥ तत्परंब्रह्मएकंक्षणमपि स्थिरतांनेयान्नगच्छेदित्यन्वयः ॥ तत्रहेतुरनिर्देश्यंवागादिभिर्निर्देष्टुमशक्यम् ॥ वाङ्मनसयोरविषयइत्यर्थः ॥ तत्रापिहेतुःसूक्ष्मत्वादिति ॥ ५६ ॥ बहिरंतरंगभावेनास्थिरत्वेदृष्टांतद्वयमाह ॥ वाताहतमुदकंयथायथाचित्तमितिच ॥ तस्मात्तस्यब्रह्मणोनविश्वसेत्तद्वत्तत्प्रतिविश्वासंनकुर्यादित्यर्थः ॥ ५७ ॥ किंचाचलस्यापिब्रह्मणोऽस्थिरत्वंचित्ताधीनंयतोताश्चित्तस्यस्थैर्यार्थंवायुंस्थिरीकुर्या त्तस्यचस्थिरीकरणार्थंषट्आसनादीन्यंगानियस्यतंयोगंसमभ्यसेत्आवृत्त्याकुर्यादिति ॥५८॥ तान्येवांगानिदर्शयति ॥ आसनमिति ॥५९॥ आसनानीति ॥ यावंतोजीवयोनयोजीवोत्पादनकारणा

स्वसंवेद्यंहितद्ब्रह्मकुमारीस्त्रीसुखंयथा ॥ अयोगीनैवतद्वेत्तिजात्यंधइववर्तिकाम् ॥ ५५ ॥ नित्याभ्यसनशीलस्यस्वसंवेद्यंहितद्भवेत् ॥ तत्सूक्ष्मत्वादनिर्दे श्यंपरंब्रह्मसनातनम् ॥ ५६ ॥ क्षणमप्येकमुदकंयथानस्थिरतामियात् ॥ वाताहतंयथाचित्तंतस्मात्तस्यनविश्वसेत् ॥ ५७ ॥ अतोऽनिलंनिरुंधीतचि त्तस्यस्थैर्यहेतवे ॥ मरुन्निरोधनार्थायषडंगंयोगमभ्यसेत् ॥ ५८ ॥ आसनंप्राणसंरोधःप्रत्याहारश्चधारणा ॥ ध्यानंसमाधिरेतानियोगांगानिभवंति षट् ॥ ५९ ॥ आसनानीहतावंतियावंत्योजीवयोनयः ॥ सिद्धासनमिदंप्रोक्तंयोगिनोयोगसिद्धिदम् ॥६०॥ एतदभ्यसनान्नित्यंवर्ष्मदार्ढ्यमवाप्नुयात् ॥ ॥ ६१ ॥ दक्षिणंचरणंन्यस्यवामोरूपरियोगवित् ॥ याम्योरूपरिवामंचपद्मासनमिदंविदुः ॥ ६२ ॥ कराभ्यांधारयेत्पश्चादंगुष्ठौदृढबंधवित् ॥ भवेत्पद्मा सनादस्मादभ्यासाद्दृढविग्रहः ॥ ६३ ॥

नितावंत्येवासनानिसिद्धासनस्ययोनिघटितत्वाद्यावंत्योजीवयोनयस्तावत्येवसिद्धासनानीत्यर्थः ॥ एतदेवविनिर्दिशति॥सिद्धासनमिति ॥ तथाचोक्तंहठयोगप्रदीपिकायाम् ॥ योनिद्धारकमंघ्रिमूलघटितं कृत्वादृढंविन्यसेन्मेढ्रेपादमथैकमेवहृदयेधृत्वासमंविग्रहम् ॥ स्थाणुःसंयमितेंद्रियोऽचलदृशापश्येद्भ्रुवोरंतरमेतन्मोक्षकपाटभेदजनकंसिद्धासनंप्रोच्यते॥मतांतरेतु मेढ्राद्दुपरिविन्यस्यवामगुल्फंतथोपरि ॥ गुल्फांतरंचनिक्षिप्यसिद्धासनमिदंभवेत्॥पूर्वोक्तमेवमत्स्यासनम्॥एतत्सिद्धासनंप्राहुरन्येवज्रासनंविदुः॥ मुक्तासनंवदंत्यन्येप्राहुर्गुह्यासनंपरइति॥सिद्धासनंचपद्माख्यमितिपाठेपद्मासनमेवसिद्धासनम् ॥ तथासत्यासनानीहतावंतियावंत्योजीवयोनयइत्यासनानामानंत्यमात्रमुक्तमितिज्ञेयम् ॥६०॥ सिद्धासनस्यावांतरफलमाह ॥ एतदिति ॥६१॥ पद्मासनस्वरूपमाह दक्षिणमितिद्वयेन ॥ याम्योरूपरिद क्षिणोरूपरि॥६२॥अस्यफलमाह॥भवेदिति॥दृढविग्रहोव्याधिरहितदेहोभवेदित्यर्थः॥एतदप्युक्तंतस्यामेव ॥ वामोरूपरिदक्षिणंचचरणंसंस्थाप्यवामंतथादक्षोरूपरिपश्चिमेनविधिनाधृत्वाकराभ्यांदृढम्॥ अंगुष्ठौहृदयेनिधायचिबुकंनासाग्रमालोकयेदेतद्व्याधिविनाशनंचयमिनांपद्मासनंप्रोच्यते॥मतांतरेतु ॥ उत्तानौचरणौकृत्वाऊरुसंस्थौप्रयत्नतः॥ऊरुमध्येतथोत्तानौपाणीकृत्वाततोदृशौ॥ नासाग्रेविन्यसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्राजदंतमूलंचाजिह्वया॥ उत्तम्यचिबुकंवक्षस्युत्थाप्यपवनंशनैः॥ इदंपद्मासनंप्रोक्तंयोगिनांसर्वसिद्धिदम्॥दुर्लभंयेनकेनापिधीमतालभ्यतेभुवीति॥६३॥ योगाभ्यासेआसनेनियमाभावमाह॥ अथवेति॥ यस्मिन्स्वास्तिकादाविितिसंबंधः॥ आदिशब्देनवीरासनकूर्मासनकुक्कुटासनधनुरासनमत्स्यासनादीनिगृह्यंते॥ एतेषामपिलक्षणानितस्यामेवोक्तानि॥ जानूर्वोरंतरेसम्यक्कृत्वापादतलेउभे॥ ऋजुकायः समासीनःस्वस्तिकंतत्प्रचक्षते॥सव्येदक्षिणगुल्फंतुसव्येपार्श्वेनियोजयेत्॥ दक्षिणेतुतथासव्यंगोमुखंगोमुखंयथा॥ एकपादंतथैकस्मिन्विन्यसेदूरुसंस्थितम्॥ इतरस्मिंस्तथाचोरुंवीरासनमितीरितम्॥ गुदंनिरुध्यगुल्फाभ्यांव्युत्क्रमेणसमाहितः॥कूर्मासनंभवेदेतदितियोगविदोविदुः॥पद्मासनंतुसंयोज्यजानूर्वोरंतरेकरौ॥ निवेश्यभूमौसंस्थाप्यव्योमस्थंकुक्कुटासनम्॥ कुक्कुटासनबंधस्थोदोर्भ्यांसंबध्यकं धराम्॥भवेत्कूर्मवदुत्तानेमतदुत्तानकूर्मकम्॥पादांगुष्ठौतुपाणिभ्यांगृहीत्वाश्रवणावधि॥धनुराकर्षणंकृत्वाधनुरासनमीरितम्॥वामोरुमूलार्पितदक्षजानुरंतर्बहिर्वेष्टितदक्षदोर्भ्याम्॥ प्रगृह्यातिष्ठन्परिवर्तितांगः श्रीमत्स्यनाथोदितमासनंस्या दित्यादीनि॥६४॥ निषेधमुखेनयोगस्थानंनिर्दिशति नतोयेतिद्वयेन॥ दंशोमक्षिकाकारस्ततःस्थूलःकीटविशेषः॥ चैत्येग्रामस्थपूज्यवृक्षे॥महावृक्षाश्रयदेवकुलइत्यर्थः॥

अथवाह्यासनेयस्मिन्सुखमस्योपजायते॥ स्वस्तिकादौतदध्यास्ययोगंयुंजीतयोगवित्॥ ६४॥ नतोयवह्निसामीप्येनजीर्णारण्यगोष्ठयोः॥ नदंशमशकाकीर्णेनचैत्येनचचत्वरे॥ ६५॥ केशभस्मतुषांगारकीकसादिप्रदूषिते॥ नाभ्यसेत्पूतिगंधाढ्येनस्थानेजनसंकुले॥ ६६॥ सर्वबाधाविरहितेसर्वेंद्रियसुखावहे॥ मनःप्रसादजननेस्रग्धूपामोदमोदिते॥ ६७॥ नातितृप्तःक्षुधार्तोननविण्मूत्रप्रबाधितः॥ नाध्वखिन्नोनचिंतार्तोयोगंयुंजीतयोगवित्॥ ॥ ६८॥ ऊरुस्थोत्तानचरणःसव्येन्यस्योत्तरंकरम्॥ उत्तानंकिंचिदुन्नम्यवक्त्रंविष्टभ्यचोरसा॥ ६९॥ निमीलिताक्षःसत्त्वस्थोदंतैर्दंतान्नसंस्पृशेत्॥ तालुस्थाचलजिह्वश्चसंवृतास्यःसुनिश्चलः॥ ७०॥ सन्नियम्येंद्रियग्रामंनातिनीचोच्छ्रितासनः॥ मध्यमंचोत्तमंचाथप्राणायाममुपक्रमेत्॥ ७१॥ चलेऽनिलेचलंसर्वंनिश्चलेतत्रनिश्चलम्॥ स्थाणुत्वमाप्नुयाद्योगीततोऽनिलनिरुंधनात्॥ ७२॥ यावद्देहेस्थितःप्राणोजीवितंतावदुच्यते॥ निर्गतेतत्रमरणंततःप्राणंनिरुंधयेत्॥ ७३॥ यावद्बद्धोमरुद्देहेयावच्चेतोनिराश्रयम्॥ यावद्दृष्टिर्भ्रुवोर्मध्येतावत्कालभयंकुतः॥७४॥ कालसाध्वसतोब्रह्माप्राणायामंसदाचरेत्॥ योगिनःसिद्धिमापन्नाःसम्यक्प्राणनियंत्रणात्॥ ७५॥

चत्वरेप्रांगणे॥ ६५॥ कीकसमास्थिआदिपदेनशोणितादीनिगृह्यंते॥ ६६॥ निषेधमुखेनोक्त्वाविधिमुखेनाप्याह सर्वेत्येकेन॥ ६७॥ किंविशिष्टोयोगंकुर्यादितिपृच्छायांयोगिनंनिर्दिशति॥ नातितृप्तइति॥६८॥ आसनस्थानाधिकारिणोनिरूप्यएवंभूतःसन्प्राणायामंकुर्यादित्याह ऊरुस्थेतित्रयेण॥ ऊरुस्थौउत्तानौचरणौयस्यसः॥ सव्येऊराविितिशेषः॥ उत्तानमूर्ध्वीकृतांगुलम् उत्तानं किंचिदुन्नमय्येतिवा॥ विष्टभ्यसंयोज्य॥ ६९॥ निमीलितेमुद्रितेअक्षिणीयेनसः॥ तालुस्थाककुत्स्थाअचलाजिह्वायस्यसः॥ ७०॥ मध्यमंचोत्तमंचेतिचकाराल्लघुंच॥ तदुक्तंमार्कंडेयपुराणे॥ लघुर्द्वादशमात्रस्तुद्विगुणः सतुमध्यमः॥ त्रिगुणाभिस्तुमात्राभिरुत्तरीयउदाहृतइति॥ अत्राप्यग्रेवक्ष्याति॥ ७१॥ चलइति॥ अनिलेचलेचंचलेसतिसर्वशरीरंचंचलंभवति॥ तत्रतस्मिन्निश्चलेनिश्चलंभवति॥ ततोवायुनिरोधाद्योगीस्थिरतांप्राप्नोतीत्यर्थः॥ ७२॥ यावद्देहइति॥ प्राणोवायुः॥ तत्रतस्मिन्प्राणे॥७३॥ यावदिति॥ मरुत्पवनः॥ निराश्रयंबाह्यविषयाकारशून्यम्॥ ७४॥ अत्रशिष्टाचारंप्रमाणयति॥ कालेति॥ साध्वसतोभयात्॥ ब्रह्माचतुराननः॥ उक्तंच॥ ब्रह्मादयोपित्रिदशाःपवनाभ्यासयोगतः॥ तेनसिद्धिंगतास्तेचतस्मात्पवनमभ्यसेदिति॥ योगिनउद्दालकवीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हव्यसुशुंडप्रभृतयःसनकादयोवा ॥ ७५ ॥ मध्यममितियदुक्तंतद्दर्शयति ॥ मंदइति ॥ लघ्वक्षराद्ध्रस्वाक्षराः ॥ ततःपूर्वात् ॥ ७६ ॥ स्वेदमिति ॥ क्रमशोयथासंख्यम् ॥ असौत्रिविधःप्राणा
यामः ॥ तदुक्तम् ॥ कनीयसिभवेत्स्वेदःकंपोभवतिमध्यमे ॥ उत्तिष्ठत्युत्तमप्राणवंधेपद्मासनेदृढइति ॥ प्रथमतोयैःप्राणायामैर्येस्वेदादयोजायंतेतैरेवशनैस्तेषांजयःकर्तव्यइत्याह प्रथमेनेतिपाद
त्रयेण ॥ ७७ ॥ अथानंतरंसिद्धःप्राणोयोगिनःक्रमात्सन्निरुद्धोनिश्चलोभवतिअथानंतरंयोगिनाक्रमेणसेव्यमानःसिद्धःप्राणोयत्रासौयोगीगंतुमिच्छतितंतत्रनयतेप्रापयत्येवेत्यर्थः ॥ ७८ ॥ अयंच
प्राणसंरोधःशनैःशनैरनुष्ठेयोनातिद्रागित्याह ॥ हठादिति ॥ निःसरेन्निर्गच्छेत् ॥ निःसरन्नितिक्वचित् ॥ ७९ ॥ तत्तस्मादसौप्राणःप्रत्याययितव्योलालयितव्यःक्रमेणसंरोध्यइतियावत् ॥
उपलक्षणीकृत्यअरण्यहस्तिवदितिदृष्टांतंविवृणोति ॥ वन्यइति ॥ गजारिःसिंहः ॥ ८० ॥ मृदुतायांसत्यांयद्भवतितदाह ॥ करोतीति ॥ शास्तायंताहस्तिपकइत्यर्थः ॥ तस्यनिर्देशंशास्तृनिर्दे
शंतदाज्ञामित्यर्थः ॥ तंनिर्देशंशास्तारंवा ॥ परिलंघयेदाक्रमयेत् ॥ दार्ष्टांतिकमाह ॥ तथेति ॥ ८१ ॥ वायोःप्राणनामनिर्वक्ति ॥ षडिति ॥ हंसोवायुर्बहिःप्रयाणंकुरुतेअतएवसव्यापसव्य
मार्गेणइडापिंगलानाडीभ्यांवहिःप्रयाणाद्गमनात्प्राणउच्यतेकथ्यते ॥ शरीराद्बहिःप्रयाणावधिंदर्शयन्हंसंविशिनष्टि ॥ षट्त्रिंशदंगुलःषड्भिरधिकास्त्रिंशदंगुलाःशरीराद्बहिर्गम्यप्रदेशायस्यसः ॥ तत्ररे

मंदोद्वादशमात्रस्तुमात्रालघ्वक्षरामता ॥ मध्यमोद्विगुणःपूर्वादुत्तमस्त्रिगुणस्ततः ॥७६॥ स्वेदंकंपंविषादंचजनयेत्क्रमशस्त्वसौ ॥ प्रथमेनजयेत्स्वेदंद्वितीयेनतुवेपथुम् ॥७७॥ विषादंहितृतीयेनासिद्धःप्राणोथयोगिनः ॥ भवेत्क्रमात्सन्निरुद्धःसिद्धःप्राणोथयोगिना ॥ क्रमेणसेव्यमानोसौनयतेयत्रचेच्छति ॥ ७८ ॥ हठान्निरुद्धप्राणोयंरोमकूपेषुनिःसरेत् ॥ देहंविदारयत्येषकुष्ठादिजनयत्यपि ॥ ७९ ॥ तत्प्रत्याययितव्योसौक्रमेणारण्यहस्तिवत् ॥ वन्योगजोगजारिर्वाक्रमेणमृदुतामियात् ॥ ८० ॥ करोतिशास्तृनिर्देशंनचतंपरिलंघयेत् ॥ तथाप्राणोहृदिस्थोयंयोगिनाक्रमयोगतः ॥ गृहीतःसेव्यमानस्तुविश्रंभमुपगच्छति ॥ ८१ ॥ षट्त्रिंशदंगुलोहंसःप्रयाणंकुरुतेबहिः ॥ सव्यापसव्यमार्गेणप्रयाणात्प्राणउच्यते ॥ ८२ ॥ शुद्धिमेतियदासर्वंनाडीचक्रमनाकुलम् ॥ तदैवजायतेयोगीक्षमःप्राणनिरोधने ॥ ८३ ॥

चक्रपूरककुंभकानांप्रत्येकंद्वादशांगुलपर्यंतंवहिर्व्यापनात्षट्त्रिंशदंगुलत्वंप्राणस्यज्ञातव्यम् ॥ तदुक्तंवासिष्ठे ॥ द्वादशांगुलपर्यंतंबाह्यमाक्रमणंततः ॥ प्राणानामंगसंस्पर्शोयःसपूरकउच्यते॥द्वादशांगुल
पर्यंतेनासाग्रसमसंमुखे॥व्योम्निनित्यमपानस्यतंविदुःकुंभकंबुधाः ॥ यत्तदंतर्मुखत्वंस्यादपानस्योदयंविना ॥ तंबाह्यरेचकंविद्याच्चिंत्यमानंविमुक्तिदमिति ॥ ८२ ॥ अधिकारार्थंभूतशुद्धिंसूचयति ॥
शुद्धिमेतीति॥सायथा॥ वामनासापुटेयमितिवायुवीजंधूम्रवर्णंध्यात्वायंवीजोत्थवायुनासमस्तंशरीरंयंवीजस्यैवषोडशवारजपेनप्रपूर्यतेनैववायुनासमस्तंशरीरंसंशोध्यदक्षिणनासापुटेनयंबीजस्यैवद्वात्रिंशद्वा
रजपेनवहिर्वायुंरेचयेत् ॥ ततोदक्षिणनासापुटेनलीनमारुतंरमितिवह्निवीजंरक्तवर्णंविचिंत्यदक्षिणनासापुटेनरमित्यस्यैववह्निवीजस्यषोडशवारजपेनवायुंपूरयित्वारंवीजोत्थवह्निनासमस्तंशरीरंदग्ध्वारं
वीजस्यैवद्वात्रिंशद्वारजपेनवामनासापुटेनभस्मनासहवहिर्वायुंरेचयेत्॥ततोवामनासापुटेवमितिशुक्लवर्णचंद्रवीजंसंस्मृत्यवमित्यस्यषोडशवारजपेनवंवीजरूपंचंद्रंललाटचंद्रंनयेत् ॥ तस्माल्ललाटचंद्राद्वमित्य
स्यचतुःषष्टिवारजपेनकुंभकयोगेनामृतवृष्टिमकारादिक्षकारांतमयीमुत्पाद्यतेनामृतेनसमस्तंशरीरंपुनरुत्पन्नंविचिंत्यतेनैवांभसासंप्लाव्यलमितिपृथ्वीवीजेनपीतवर्णेनसमस्तंशरीरंदृढंचिंतयेदिति ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणायामंदर्शयति ॥ दृढेति ॥ चंद्रेणचंद्रदैवतेनेडाख्येनमार्गेणपूरयेत्पूरकाख्यंप्राणायामंकुर्यात् ॥ रेचयेत्रेचकाख्यंप्राणायामंकुर्यात् ॥ सूर्येणसूर्यदैवतेनपिंगलाख्येनमार्गेणप्राणायामोरेचकपूरकाख्याद्विविधोयमनंतरोक्तउच्यतेकथ्यते ॥ वामायामइतिपाठेशोभनप्राणायामइत्यर्थः ॥ ८४ ॥ कुंभकाख्यप्राणायाममाह ॥ स्रवदिति ॥ योगींद्रःप्राणायामेनकुंभकाख्येनतत्क्षणात्सुखंप्राप्नोति ॥ किंकुर्वन् ॥ स्रवंतीनांपीयूषधाराणामोघंचिंतयन् ॥ कथंभूतम् ॥ चंद्रसमन्वितंचंद्रेणतद्बीजेनवाउकारेणलकारेणवासंयुक्तम् ॥ वामायामेनेतिक्वचित्पाठः ॥८५॥ पूर्वंरेचकपूरककुंभकक्रमेणप्राणायामाउक्ताः ॥ इदानींपूरककुंभकरेचकक्रमेणमार्गवैपरीत्येनैवतानाहरविणेतिश्लोकेन ॥ ८६ ॥ ध्येयंदर्शयन्ध्यानमेतत्त्रिविधप्राणायामस्यचफलंदर्शयाति ॥ ज्वलदिति ॥ प्रदीप्तवह्निराशिसदृशमुष्मगुंसूर्याधिष्ठानंश्रीविश्वेश्वरंश्रीनारायणंवा ॥ हृदिंद्रियाण्यसुर्व्योमवायुरग्निर्जलंमही ॥ सूर्यश्चंद्रस्तपश्चैवस्थानान्येकादशैवते ॥ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसान्निविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रइतिवचनात् ॥ हृदिस्थेसूर्यमंडलेशीलयंश्चिंतयन्योगींद्रोनेनानंतरोक्तेनयम्यंतइतियाम्याःप्राणास्तेषामायामेनेत्यर्थः ॥ शर्मभागब्रह्मानंदभाग्भवेदित्यर्थः ॥ ८७ ॥ इत्थमिति ॥ इत्थंभूतशुद्धिपूर्वंकंपूर्वोक्तप्रकारेणमासत्रयंव्याप्याभ्यासोयस्मिंस्तस्मादुभयायामसेवनात्दृढासनोयथाशक्तीत्यादिनोक्तद्विविधप्राणायामसे

दृढासनोयथाशक्तिप्राणंचंद्रेणपूरयेत् ॥ रेचयेदथसूर्येणप्राणायामोयमुच्यते ॥ ८४ ॥ स्रवत्पीयूषधारौघंध्यायंश्चंद्रसमन्वितम् ॥ प्राणायामेनयोगींद्रःसुखमाप्नोतितत्क्षणात् ॥ ८५ ॥ रविणाप्राणमाकृष्यपूरयेदौदरींदरीम् ॥ कुंभयित्वाशनैःपश्चाद्योगीचंद्रेणरेचयेत् ॥ ८६ ॥ ज्वलज्ज्वलनपुंजाभंशीलयन्नुष्मगुंहृदि ॥ अनेनयाम्यायामेनयोगींद्रःशर्मभाग्भवेत् ॥ ८७ ॥ इत्थंमासत्रयाभ्यासादुभयायामसेवनात् ॥ शुद्धनाडीगणोयोगीसिद्धप्राणोभिधीयते ॥ ८८ ॥ यथेष्टंधारणंवायोरनलस्यप्रदीपनम् ॥ नादाभिव्यक्तिरारोग्यंभवेन्नाडीविशोधनात् ॥ ८९ ॥ प्राणोदेहगतोवायुरायामस्तन्निबंधनम् ॥ एकश्वाससमयीमात्राप्राणायामोनिरुच्यते ॥ ९० ॥ प्राणायामेऽधमेघर्मःकंपोभवतिमध्यमे ॥ उत्तिष्ठेदुत्तमेदेहोबद्धपद्मासनोमुहुः ॥ ९१ ॥ प्राणायामैर्दहेद्दोषान्प्रत्याहारेणपातकम् ॥ मनोधैर्यंधारणयाध्यानेनेश्वरदर्शनम् ॥९२॥ समाधिनालभेन्मोक्षंत्यक्त्वाधर्मंशुभाशुभम् ॥ आसनेनवपुर्दार्ढ्यंषडंगमितिकीर्तितम् ॥ ९३ ॥ प्राणायामद्विषट्केनप्रत्याहारउदाहृतः ॥ प्रत्याहारैर्द्वादशभिर्धारणापरिकीर्तिता ॥ ९४ ॥

वनाच्छुद्धनाडीसमूहोयोगीसिद्धप्राणोवशीकृतवायुरभिधीयतेकथ्यतइत्यर्थः ॥ सिद्धनाडीतिक्वचित् ॥ तत्रापिसएवार्थः ॥ ८८ ॥ नाडीविशोधनस्यफलमाह ॥ यथेष्टमिति ॥ नाडीनांविशोधनाद्वायोर्यथेष्टंधारणंस्वेच्छयाधारणम् अनलस्यजाठरस्यप्रदीपनंनादाभिव्यक्तिराधारचक्रस्थायाःपराख्यायाःवाचःश्रवणम् ॥ तथाचश्रुतिः चत्वारिवाक्परिमितापदानीत्यादिः ॥ आरोग्यंरोगाभावश्चभवेदित्यर्थः ॥ पाठांतरेडलयोरेकत्वमित्युन्नेयम् ॥ ८९ ॥ प्रकारान्तरेणप्राणायामनामनिर्वक्ति ॥ प्राणइति ॥ तन्निवन्धनंप्राणघटितंप्राणनियंत्रणंवा ॥ तदेवाह ॥ एकश्वाससमयीमात्रेति ॥ मात्राह्रस्वाक्षरोच्चार्यमाणःकालः ॥ ९० ॥ प्राणायामइति ॥ उत्तिष्ठेद्भूमिंपरित्यज्यांतरिक्षंगच्छेदित्यर्थः ॥ तथाचोक्तंहठयोगप्रदीपिकायाम् ॥ कनीयसिभवेत्स्वेदःकंपोभवतिमध्यमे॥ उत्तिष्ठत्युत्तमेप्राणरोधेपद्मासनेदृढइति ॥ ९१ ॥ फलसहितंषडंगंदर्शयति प्राणायामैरितिद्वयेन ॥ ९२ ॥ धर्मंशुभाशुभम् ॥ धर्मेत्यधर्मस्योपलक्षणम् ॥ धर्माधर्मेपुण्यपापेशुभाशुभेतज्जन्यशुभाशुभादृष्टेचत्यक्त्वेत्यर्थः ॥ कर्मेतिपाठेस्पष्टएवार्थः ॥ षडंगमितिजातावेकवचनम् ॥ ९३ ॥ प्रत्याहारादीनांपारिभाषिकीःसंज्ञादर्शयाति प्राणायामेतिद्वाभ्याम् ॥ द्विषट्केनद्वादशभिः ॥ प्रत्याहारैर्द्वादशभिश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुश्चत्वारिंशदधिकशतप्राणायामैरित्यर्थः ॥ ९४ ॥ ईश्वरसंगत्यैब्रह्माप्त्यैद्वादशधारणमष्टाविंशत्यधिकसप्तशतोत्तरसहस्रप्राणायामायस्मिंस्तद्ध्यानंभवेत् ॥ ध्यानद्वादशकेनषट्त्रिंशदधिकसप्तशतोत्तरविंशतिसहस्रेणप्राणायामात्मकेन ॥ ९५ ॥ षडंगयोगप्राप्यंदर्शयति ॥ समाधेरिति ॥ ज्योतिःस्फुरद्रूपंब्रह्म अनन्तंमृत्युरहितंदेशकालवस्तुपरिच्छेदशून्यंवा ॥ स्वप्रकाशकंस्वयमेवभासमानम् ॥ अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतेः ॥ पुरुषार्थतामाह ॥ तस्मिन्निति ॥ क्रियाकांडंतत्प्रतिपाद्यंकर्म ॥ यातायातंयातंस्वर्गादिगमनमायातंमनुष्यादावागमनम् ॥ :यद्वा यातंमरणंआयातंजन्मतन्निवर्तते ॥ ९६ ॥ पवनइति ॥ पवनेप्राणवायौव्योमब्रह्मरन्ध्रंसंप्राप्तेसतिघंटादीनांप्रकृष्टवाद्यानांमहान्ध्वनिरुत्पद्यतेततोध्वनेरनन्तरमदूरतोनिकटएवसिद्धिर्योगफलमित्यर्थः ॥ ९७ ॥ प्राणायामेनेति ॥ युक्तेनयथावदनुष्ठितेन ॥ अयुक्ताभ्यासयोगेनासम्यगनुष्ठितेनाम्रेडितेनप्रयोगेणव्युत्क्रमाभ्यासेनयोगेनवेतिवा ॥ तदुक्तंहठयोगप्रदीपिकायाम्॥ प्राणायामेनयुक्तेनसर्वपापपरिक्षयः॥ अयुक्ताभ्यासयोगेनसर्वरोगसमुद्भवइति ॥ ९८ ॥ उक्तंविवृणोति ॥ हिक्केति ॥ हिक्काउत्काशिका ॥ व्यतिक्रमादयुक्ताभ्यासात् ॥ ९९ ॥ तर्हिकीदृशंयोगमभ्यस्यन्सिध्यतितमाह ॥ युक्तंयुक्तमिति ॥ युक्तंयुक्तंपरिमितंपरिमितमित्यर्थः ॥ बध्नीयात्स्थिरीकुर्यात्कुंभयेदित्यर्थः ॥ तथाचहठयोगप्रदीपिकायाम् ॥ पादत्रयंयथाश्लोकमेव॥ एवंसिद्धिमवाप्नुयादिति ॥१००॥ प्रत्याहारादीनांपारिभाषिकीःसंज्ञाः

भवेदीश्वरसंगत्यैध्यानंद्वादशधारणम् ॥ ध्यानद्वादशकेनैवसमाधिरभिधीयते ॥ ९५ ॥ समाधेःपरतोज्योतिरनंतंस्वप्रकाशकम् ॥ तस्मिन्दृष्टेक्रियाकांडंयातायातंनिवर्तते ॥ ९६ ॥ पवनेव्योमसंप्राप्तेध्वनिरुत्पद्यतेमहान् ॥ घंटादीनांप्रवाद्यानांततःसिद्धिरदूरतः ॥ ९७ ॥ प्राणायामेनयुक्तेनसर्वव्याधिक्षयोभवेत् ॥ अयुक्ताभ्यासयोगेनसर्वव्याधिसमुद्भवः ॥ ९८ ॥ हिक्काश्वासश्चकासश्चशिरःकर्णाक्षिवेदनाः ॥ भवंतिविविधादोषाःपवनस्यव्यतिक्रमात् ॥ ९९ ॥ युक्तंयुक्तंत्यजेद्वायुंयुक्तंयुक्तंचपूरयेत् ॥ युक्तंयुक्तंचबध्नीयादित्थंसिध्यतियोगवित् ॥ १०० ॥ इंद्रियाणांहिचरतांविषयेषुयदृच्छया ॥ यत्प्रत्याहरणंयुक्त्याप्रत्याहारःसउच्यते ॥ १ ॥ प्रत्याहरतियःखानिकूर्मोंगानीवसर्वतः ॥ प्रत्याहृतिविधानेनसस्याद्विगतकल्मषः ॥ २ ॥ नाभिदेशेवसेद्भानुस्तालुदेशेचचंद्रमाः ॥ वर्षत्यधोमुखश्चंद्रोग्रसेदूर्ध्वमुखोरविः ॥ ३ ॥ करणंतच्चकर्तव्यंयेनसाप्राप्यतेसुधा ॥ ऊर्ध्वंनाभिरधस्तालुरूर्ध्वंभानुरधःशशी ॥ करणंविपरीताख्यमभ्यासादेवजायते ॥ ४ ॥ काकचंचुवदास्येनशीतलंशीतलंपिबेत् ॥ प्राणंप्राणविधानज्ञोयोगीभवतिनिर्जरः ॥५॥

प्रदर्शयित्वाइदानींसान्वयाःसंज्ञादर्शयति ॥ इंद्रियाणामिति ॥ प्रत्याहरणंव्यावर्त्यानयनम् ॥ युक्त्या विषयदोषदर्शनेन ॥ १ ॥ प्रत्याहारस्यफलमाह ॥ प्रत्याहरतीति ॥ प्रत्याहृतिविधानेनविषयेषुदोषाद्यनुसन्धानेन ॥ २ ॥ महामुद्रादीनांदशमुद्राणांमध्येविपरीताख्यांकरणींमुद्रांवक्तुंप्रस्तावयति ॥ नाभीति तदुक्तं हठयोगप्रदीपिकायाम् ॥ महामुद्रामहाबन्धोमहावेधश्चखेचरी ॥ उड्डीयानंमूलबन्धोबन्धोजालंधराभिधः ॥ करणीविपरीताख्यावज्रोलीशक्तिचालनम् ॥ एतद्धिमुद्रादशकंजरामरणवर्जितमिति ॥ वर्षतिसुधामितिशेषः ॥ एवंग्रसेदित्यत्रापि॥तदुक्तंतस्यामेव ॥ यत्किञ्चित्स्रवतेचन्द्रादमृतंदिव्यरूपिच ॥ तत्सर्वंग्रसतेसूर्यस्तेनतस्यविनाशितेति ॥ ३ ॥ तद्योगशास्त्रप्रसिद्धंकरणांविपरीताख्यम् ॥ तदुक्तंतस्यामेव ॥ तत्रास्तिकरणंदिव्यंसूर्यस्यमुखबन्धनम् ॥ गुरूपदेशतोज्ञेयंनतुशास्त्रस्यकोटिभिरिति ॥ यथावस्थितस्यनाभ्योर्द्वैपरीत्येनावस्थानंविपरीताख्यंकरणमित्यर्थः ॥ एतदपितस्यामुक्तम् ॥ पादद्वयंयथाश्लोकमेव॥ करणीविपरीताख्यागुरुवाक्येनलभ्यतइति ॥ ४ ॥ विपरीताख्यंतत्करणविशेषमेवतत्फलसहितंदर्शयति काकेत्यारभ्यासनेनेत्यतःप्राक्तनेग्रन्थेन ॥ काकचंचुवदास्येनकाकत्रोटितुल्येनमुखेन ॥ शीतलंशीतलमत्यन्तशीतलमित्यर्थः ॥ प्राणविधानज्ञः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणायामानुष्ठानज्ञानवान् ॥ ५ ॥ धयन्नपिबन् ॥ लिहन्नितिक्वचित् ॥ ६ ॥ ७ ॥ संपीड्येति ॥ राजद्दीप्तिमत् ॥ अंतर्बिलंजिह्वायामूलभागस्थंछिद्रम् ॥८॥ अमृतेति ॥ अणिमादिगुणानामुदयो यस्मात्तद्रेतस्तथा ॥ अणिमादिगुणोदयंयथास्यादितिक्रियाविशेषणंवा ॥ ९ ॥ १० ॥ ११ ॥ धारणायाःपारिभाषिकलक्षणांतरमाह हृदयइत्येकेन ॥ १२ ॥ तामेवधारणांदर्शयति हरितालेतिपंचभिः ॥ सलकारांपृथ्वीवीजेनलकारेणसहिताम् ॥ सवेधसम्ब्रह्मदैवताम् ॥ १३ ॥ कण्ठइति ॥ अम्बुतत्त्वंजलपदार्थम् ॥ वकारोवीजंयस्यतत्तथाअंबुजयेज्जलतत्त्वविलक्षणमात्मानंभावयेदेवमग्रेपि ॥ यद्वा जलादिष्वप्रतिहतगतित्वंक्लेदाद्यभावंचाप्नुयादित्यर्थः ॥१४॥ तालुस्थमिति ॥ इंद्रगोपाभंवर्षर्तौदृश्यमानरक्तवर्णकीटविशेषाभम् ॥ रेफेणसंयुतंवह्निवीजेनसहितम् ॥१५॥१६॥

रसनांतालुविवरेनिधायोर्ध्वमुखोऽमृतम् ॥ धयन्निर्जरतांगच्छेदाषण्मासान्नसंशयः ॥ ६ ॥ ऊर्ध्वजिह्वःस्थिरोभूत्वासोमपानंकरोतियः ॥ मासार्धेननसंदेहोमृत्युंजयतियोगवित् ॥ ७ ॥ संपीड्यरसनाग्रेणराजदंतार्बिलंमहत् ॥ ध्यात्वासुधामयींदेवींषण्मासेनकविर्भवेत् ॥ ८ ॥ अमृतापूर्णदेहस्ययोगिनो द्वित्रिवत्सरात् ॥ ऊर्ध्वंप्रवर्ततेरेतोह्यणिमादिगुणोदयम् ॥ ९ ॥ नित्यंसोमकलापूर्णंशरीरंयस्ययोगिनः ॥ तक्षकेणापिदष्टस्यविषंतस्यनसर्पति ॥ १० ॥ आसनेनसमायुक्तःप्राणायामेनसंयुतः ॥ प्रत्याहारेणसंपन्नोधारणामथचाभ्यसेत् ॥ ११ ॥ हृदयेपंचभूतानांधारणांयःपृथक्पृथक् ॥ मनसोनिश्चलत्वेनधारणासाभिधीयते ॥ १२ ॥ हरितालनिभांभूमिंसलकारांसवेधसम् ॥ चतुष्कोणांहृदिध्यायेदेषास्यात्क्षितिधारणा ॥ १३ ॥ कंठेऽबुतत्त्वमर्धेंदुनिभंविष्णुसमन्वितम् ॥ वकारबीजंकुंदाभंध्यायन्नंबुजयेदिति ॥ १४ ॥ तालुस्थमिंद्रगोपाभंत्रिकोणंरेफसंयुतम् ॥ रुद्रेणाधिष्ठितंतेजोध्यात्वावह्निंजयेदिति ॥ १५ ॥ वायुतत्त्वंभ्रुवोर्मध्येवृत्तमंजनसन्निभम् ॥ यंबीजमीशदैवत्यंध्यायन्वायुंजयेदिति ॥ १६ ॥ आकाशंचमरीचिवारिसदृशंयद्ब्रह्मरंध्रस्थितंयन्नाथेनसदाशिवेनसहितंशांतंहकाराक्षरम् ॥ प्राणंतत्रविनीयपंचघटिकंचिंतान्वितंधारयेदेषामोक्षकपाटपाटनपटुःप्रोक्तानभोधारणा ॥ १७ ॥ स्तंभनीप्लावनीचैवदहनीभ्रामणीतथा ॥ शमनीचभवंत्येताभूतानांपंचधारणाः ॥ १८ ॥ ध्यैचिंतायांस्मृतोधातुश्चिंतातत्त्वेसुनिश्चला ॥ एतद्ध्यानमिहप्रोक्तंसगुणंनिर्गुणंद्विधा ॥ १९ ॥

आकाशंचेति ॥ एषानभोधारणाप्रोक्तेत्यन्वयः ॥ कासेत्याकांक्षायामाह ॥ आकाशंयद्वर्ततेतत्रप्राणंविनीयविशेषेणनीत्वाधारयेदिति ॥ यत्कीदृशम् ॥ मरीचिवारिसदृशंसूर्यसदृशंसदाशिवेनेश्वरेण सहितंशान्तंनिरुपद्रवंबीजत्वेनहकारमक्षरंयत्रतत्तथा ॥ तत्राकाशतत्त्वेपंचघटिकंकालंयथास्यादभिव्याप्येतिवा ॥ यद्वा पंचघटिकंपंचात्मकंचित्तान्वितंमनःसहितम् ॥ चिंतान्वितमितिपाठेआत्मानुसंन्धानसहितमित्यर्थः ॥ कीदृशीधारणा ॥ मोक्षकपाटपाटनपटुःमोक्षद्वारेपिहितंयत्कपाटंतस्यपाटनमुद्घाटनंतत्रपटुर्दक्षा ॥ १७ ॥ उक्तानांधारणानांनामविशेषानाह स्तम्भनीत्येकेन ॥ १८ ॥ ध्यानस्वरूपमाह ॥ ध्याइति ॥ ध्यैधातुश्चिंतायांस्मृतः कथितः ॥ तथाचपठन्तिध्यैचिंतायामिति ॥ चिंतातत्त्वेपदार्थेसुनिश्चलाएकाग्रतारूपा ॥ एतद्ध्यानमपिरूपारूपभेदेनसमंत्रामन्त्रभेदेनवाद्विविध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्याहएतद्ध्यानमितिसार्धेन ॥ १९ ॥ वर्णभेदेनरूपभेदेन ॥ केवलंरूपादिरहितम् ॥ १२० ॥ ध्यानमुद्रामाहांतश्चेतइति ॥ सुखासनंशरीरस्यसमत्वंचावस्थाप्यचेतोंऽतर्नीयतेचक्षुश्चबहिःक्रियते इतियदेषाऽतिसिद्धिदाध्यानमुद्रेत्यर्थः ॥ २१ ॥ ध्यानफलमाहनाश्वमेधेनेत्येकेन ॥ तथाचोक्तम् ॥ सर्वपापप्रसक्तोपिध्यायन्निमिषमच्युतम् ॥ यतिस्तपस्वीभवतिपंक्तिपावनपावनइति ॥ २२ ॥ ध्यानसमाध्योर्विभागमाह ॥ शब्दादीनांचेति ॥ तन्मात्रासूक्ष्मावस्था ॥ अतःपरंतन्मात्रोपलब्धेःपरम् ॥ २३ ॥ धारणाध्यानसमाधीनांकालकृतविभागमप्याह ॥ धारणेति ॥ पंचनाड्यः पंचद शलघूनिअवच्छेदककालोयस्याःसाधारणापंचनाडिका ॥ नद्यूतश्चेत्यनेनकप् ॥ षष्टिर्नाड्योऽवच्छेदककालोयस्मिंस्तद्ध्यानंतथा ॥ इहयोगमार्गेशास्त्रेवा ॥ २४ ॥ एवंप्रसंगागतंकालकृतंधारणा दीनांविभागमभिधायस्यात्समाधिरतःपरमित्यत्रोक्तंसमाधिंदर्शयति जलसैंधवयोरितित्रिभिः॥सिंधौभवःसैंधवोलवणखंडः ॥ जलसैंधवयोर्यथायोगतोमेलनात्साम्यमैक्यंभवतितथात्ममनसोरैक्यंसाम्यं बहिर्विषयंपरित्यज्यात्मन्येवलग्नंसन्मनस्तिष्ठतीतियत्तत्समाधिरिहभण्यते ॥ अथवाऽत्मापरोमनोमनउपाधिर्जीवस्तयोरैक्यमिति ॥२५॥ यदेति ॥ मानसंमनः ॥ समरसत्वमेकरसंपरमानंदत्वमर्थाद्यो

सगुणंवर्णभेदेननिर्गुणंकेवलंमतम् ॥ समंत्रंसगुणंविद्धिनिर्गुणंमंत्रवर्जितम् ॥ १२० ॥ अंतश्चेतोबहिश्चक्षुरवस्थाप्यसुखासनम्॥ समत्वंचशरीरस्यध्यानमुद्रातिसिद्धिदा ॥ २१ ॥ नाश्वमेधेनतत्पुण्यंनचवैराजसूयतः ॥ यत्पुण्यमेकध्यानेनलभेद्योगीस्थिरासनः ॥ २२ ॥ शब्दादीनांचतन्मात्रायावत्कर्णादिषुस्थिता ॥ तावदेवस्मृतंध्यानंस्यात्समाधिरतःपरम् ॥ २३ ॥ धारणापंचनाडीकाध्यानंस्यात्षष्टिनाडिकम् ॥ दिनद्वादशकेनस्यात्समाधिरिहभण्यते ॥ २४ ॥ जलसैंधवयोःसाम्यंयथाभवतियोगतः ॥ तथात्ममनसोरैक्यंसमाधिरिहभण्यते ॥ २५ ॥ यदासंक्षीयतेप्राणोमानसंचप्रलीयते ॥ तदासमरसत्वंयत्ससमाधिरिहोच्यते ॥ २६ ॥ यत्समत्वंद्वयोरत्रजीवात्मपरमात्मनोः ॥ सनष्टसर्वसंकल्पःसमाधिरभिधीयते ॥ २७ ॥ नात्मानंनपरंवेत्तिनशीतंनोष्ममेवच ॥ समाधियुक्तोयोगींद्रोनसुखंनसुखेतरत् ॥ २८ ॥ काल्यतेनैवकालेनलिप्यतेनैवकर्मणा ॥ भिद्यतेनचशस्त्रैर्योगीयुक्तःसमाधिना ॥ २९ ॥ युक्ताहारविहारश्चयुक्तचेष्टोहिकर्मसु ॥ युक्तनिद्रावबोधश्चयोगीतत्त्वंप्रपश्यति ॥ १३० ॥ तत्त्वंविज्ञानमानंदंब्रह्मब्रह्मविदोविदुः ॥ हेतुदृष्टांतरहितंवाङ्मनोभ्यामगोचरम् ॥ ३१ ॥

गिनः॥ रसोवैसः॥ रसंह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः ॥ २६ ॥ तत्रप्रथमश्लोकेनससाधनयोस्तत्त्वंपदार्थयोरैक्यमुक्तंद्वितीयेनानिषेधमुखेनतृतीयेनाविधिमुखेनेतिद्रष्टव्यम् ॥ २७ ॥ समाधिफलमाह नात्मानमितिद्वाभ्याम्॥आत्मानंस्वदेहम् ॥ सुखंविषयजम् ॥ सुखेतरदुःखम् ॥२८॥ काल्यतेनीयतेचाल्यतइत्यर्थः॥ कंपतइतिपाठेकालेनहेतुनानकंपतेभीतोनभवतीत्यर्थः ॥२९॥ योगिनोभोजनविहारादिनियमंदर्शयन्योगफलं दर्शयति युक्ताहारेत्येकेन ॥ युक्तशब्दोत्रपरिमितवाची ॥ तदुक्तंभगवता॥युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु ॥ युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहेति ॥ १३० ॥ तत्त्वशब्दार्थमाह ॥ तत्त्वमिति ॥ विज्ञानंविशिष्टज्ञानंस्वप्रकाशंचैतन्यमित्यर्थः ॥ प्रपंचितमितिशेषः ॥ प्रपंचितमेतद्बालबोधिनीटीकायामस्माभिः ॥ आनंदंसुखंब्रह्मबृहद्देशकालवस्तुपरिच्छेदशून्यं हेतुःकारणं दृष्टांतोनिदर्शनं तद्रहितम् ॥ वाङ्मनोभ्यामगोचरंतयोरविषयम् एतादृशंवस्तुतत्त्वंतत्त्वशब्दवाच्यंब्रह्मब्रह्मविदोविदुरित्यर्थः ॥ विज्ञानमानंदंब्रह्म ॥ यतोवाचोनिवर्ततेअप्राप्यमनसासहेत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतेः ॥ उभयोरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिरितिस्मृतेश्च ॥ ३१ ॥ तत्रेति ॥ निरातंकेनिर्भये ॥ ३२ ॥ यथेति ॥ तत्रब्रह्मणि ॥ ३३ ॥ अनसंजातपानीयैःनसंजातंपानीयंयेषुविभूत्यादिषुतै द्रव्यैःशरीरमर्दनंविदध्यात् ॥ नकारश्रवणमार्षम् ॥ यद्वा नसंजातानिअसंजातानिनासंजातानिअनसंजातानिप्राणायामश्रमोत्पन्नानीत्यर्थः ॥ यानिपानीयानितैरंगमर्दनंविदध्यादिति॥अप्रसंजातपानी येरितिकश्चित् ॥ कदुष्णमीषदुष्णम् ॥ यद्वा कदुष्णंकुत्सितोष्णमत्युष्णमत्यल्पमुष्णंचेत्यर्थः ॥ क्षीरभोजीपायसभोजीदुग्धभोजीतिवा॥३४॥ योगिमात्रस्यलक्षणमाह ॥ ब्रह्मचारीति ॥ अष्टविधमै थुनपरित्यागी ॥ तदुक्तम् ॥ दर्शनंस्पर्शनंकेलिःप्रेक्षणंगुह्यभाषणम् ॥ संकल्पोध्यवसायश्चक्रियानिर्वृत्तिरेवच॥एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः॥विपरीतंब्रह्मचर्यमेतदेवात्रकीर्तितमिति॥ विमत्सरीपर गुणासहिष्णुत्वहीनः ॥ ३५ ॥ सिद्धिभाजोयोगिनःस्वरूपमाह ॥ महामुद्रामिति ॥ एतासांपंचानांलक्षणंस्वयमेवानंतरंवक्ष्यति ॥ महामुद्रांखेचरीमुद्राम् ॥ ३६ ॥ तत्रमहामुद्रायालक्षणमाह ॥

तत्रयोगीनिरालंबेनिरातंकेनिरामये ॥ षडंगयोगविधिनापरेब्रह्मणिलीयते ॥३२॥ यथाघृतेघृतंक्षिप्तंघृतमेवहितद्भवेत् ॥ क्षीरेक्षीरंतथायोगीतत्रतन्मयतां व्रजेत् ॥ ३३ ॥ अनसंजातपानीयैर्विदध्यादंगमर्दनम् ॥ त्यजेत्कदुष्णंलवणंक्षीरभोजीसदाभवेत् ॥ ३४ ॥ ब्रह्मचारीजितक्रोधोजितलोभोविमत्सरः ॥ अब्दमित्थंसदाभ्यासात्सयोगीतिनिगद्यते ॥ ३५ ॥ महामुद्रांनभोमुद्रामुड्डीयानंजलंधरम् ॥ मूलबंधंतुयोवेत्तिसयोगीयोगसिद्धिभाक् ॥ ३६ ॥ शोधनंनाडीजालस्यघटनंचंद्रसूर्ययोः ॥ रसानांशोषणंसम्यङ्महामुद्राभिधीयते ॥ ३७ ॥ योनिंवामांघ्रिणाऽऽपीड्यकृत्वावक्षस्थलेहनुम् ॥ हस्ताभ्यां प्रसृतंपादंधारयेद्दक्षिणंचिरम् ॥ ३८ ॥ प्राणेनकुक्षिमापूर्यचिरंसंरेचयेच्छनैः ॥ एषाप्रोक्तामहामुद्रामहाघौघविनाशिनी ॥ ३९ ॥ चंद्रांगेतुसमभ्यस्य सूर्यांगेपुनरभ्यसेत् ॥ यावत्तुल्याभवेत्संख्याततोमुद्रांविसर्जयेत् ॥ १४० ॥ नहिपथ्यमपथ्यंवारसाःसर्वेपिनीरसाः ॥ अपिघोरंविषंपीतंपीयूषमिवजी र्यति ॥ ४१ ॥ क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ॥ तस्यदोषाःक्षयंयांतिमहामुद्रांचयोभ्यसेत् ॥ ४२ ॥

शोधनमिति ॥ नाडीजालस्यपूरककुंभकरेचकैःशोधनम् ॥ घटनंयोजनम् ॥ प्राणापानाभ्यांसह ॥ रसानांविकारहेतूनाम् ॥ ३७ ॥ लक्षणांतरमाह योनिमितिद्वाभ्याम् ॥ वामांघ्रिणावाम पादेनयोनिंशिश्नमापीडयधृत्वावक्षस्थलेहृदयेहनुंचिबुकंकृत्वाहस्ताभ्यांप्रसृतंप्रसारितंदक्षिणंपादंचिरंधारयेत् ॥ ३८ ॥ प्राणेनवायुनाकुक्षिमुदरमापूर्यपश्चाच्छनैःसंरेचयेदितियदेषाश्रीमहामुद्राप्रोक्ता ॥ कथंभूता ॥ सर्वपापप्रणाशिनी ॥ ३९ ॥ मुद्रायास्त्यागावधिमाह ॥ चंद्रांगमिति ॥ एवंप्रथमतश्चंद्रांगेइडायांसमभ्यस्यपश्चात्सूर्यांगेपिंगलायांपुनरभ्यसेत् ॥ यावत्संख्यामात्रातुल्या ॥ यस्य प्राणस्ययावतीमात्रासंख्याविहिताभवेत्तावतीवास्यात् ॥ पूरककुंभकरेचकाणांतुल्यामात्रासंख्यायावत्स्यात्तावत्पर्यंतमित्यर्थः ॥ ततोमुद्रांविसर्जयेत्त्यजेत् ॥ १४० ॥ महामुद्राभ्यासस्यफलमाह नही तिद्वाभ्याम् ॥ एतांमुद्रामभ्यसतःपथ्यमपथ्यंवानास्ति॥यत्किंचिद्भुज्यतेततसर्वंपथ्यमित्यर्थः ॥ विकारहेतवोयेरसास्तेसर्वेपिनीरसाइत्यर्थः॥४१॥ क्षयेति॥गुदावर्तोऽर्शः ॥ तदुक्तंहठयोगप्रदीपिकायाम् ॥ ॥१९८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादमूलेनवामेनयोनिंसंपीडयचदक्षिणम् ॥ पादंप्रसारितंकृत्वाकराभ्यांपूरयेन्मुखम् ॥ कंठेबंधंसमारोप्यधारयेद्वायुमूर्ध्वतः॥ यथादण्डहतःसर्पोदण्डाकारःप्रजायते॥ऋज्वीभूतातथाशक्तिःकुण्डलीसहसाभ वेत्॥तथासौमरणावस्थांहरतेद्विपुटाश्रयाम् ॥ नहिपथ्यमपथ्यंवारसाःसर्वेपिनीरसाः ॥ अपिभुक्तंविषंघोरंपीयूषमिवजीर्यते ॥ चन्द्रांगेतुसमभ्यस्यसूर्यांगेतुसमभ्यसेत् ॥ क्षयःकुष्ठोगुदावर्तोगुल्माजीर्णपुरो गमाः॥तस्यदोषाःक्षयंयान्तिमहामुद्रांतुयोभ्यसेत्॥कथितेयंमहामुद्राजरामृत्युविनाशिनी॥गोपनीयाप्रयत्नेननदेयायस्यकस्यचिदिति॥४२॥नभोमुद्रायाःस्वरूपमाह॥कपालेति॥कपालकुहरेकपालस्या भ्यन्तरेछिद्रेविपरीतगाविपर्यस्ताविपरीतंगतासतीप्रविष्टाजिह्वादृष्टिश्चभ्रुवोरन्तर्गतायदातदाखेचरीमुद्राभवति ॥ तथाचोक्तंहठयोगप्रदीपिकायाम् ॥ कपालकुहरेत्यादियथाश्लोकमेव ॥ ४३ ॥ एतन्मुद्रा ज्ञानस्यफलमाह ॥ नपीड्यतइति ॥ एतदपिस्फुटंतस्यामेव ॥ पीड्यतेनेत्यादियथाश्लोकमेव ॥४४॥ नभोमुद्रायाएवखेचरीनामनिर्वक्ति ॥ चित्तंचरतीति ॥ एतदपितस्यामेवोक्तम् ॥ चित्तमित्यादि यथाश्लोकमेव ॥ तेनस्मृतेतिविशेषः ॥ ४५ ॥ परंपरयाखेचरीमुद्रायामरणाभावहेतुतामाह ॥ यावद्बिंदुरिति ॥ बिंदुश्चरमोधातुः ॥ ४६ ॥ उड्डीयानंबंधंवक्तुमादौतन्नामनिर्वक्ति ॥ उड्डीनमिति ॥ महाखगोमहाप्राणः ॥ महत्त्वंदेहेंद्रियाधारकत्वम् ॥४७॥ तत्रउड्डीयानबंधमेवाह॥ जठरइति॥ पश्चिमंतानंहस्ताग्राभ्यां मध्येधृत्वाप्रसारितस्यपादद्वयस्यमध्यंयथाभवतितथाजठरेनाभेरूर्ध्वंचधारयेदितिय

कपालकुहरेजिह्वाप्रविष्टाविपरीतगा॥ भ्रुवोरंतर्गतादृष्टिर्मुद्राभवतिखेचरी ॥ ४३ ॥ नपीड्यतेशरोघेणनचलिप्यतेकर्मणा ॥ बाध्यतेनसकालेनयोमुद्रांवेत्तिखेचरीम् ॥ ४४ ॥ चित्तंचरतिखेयस्माजिह्वाचरतिखेगता ॥ तेनैषाखेचरीनाममुद्रासिद्धैर्निषेविता ॥ ४५ ॥ यावद्बिंदुःस्थितोदेहेतावन्मृत्युभयंकुतः ॥ यावद्बद्धानभोमुद्रातावद्बिंदुर्नगच्छति ॥ ४६ ॥ उड्डीनंकुरुतेयस्मादहोरात्रंमहाखगः ॥ उड्डियानंततःप्रोक्तंतत्रबंधोविधीयते ॥ ४७ ॥ जठरेपश्चिमंतानंनाभेरूर्ध्वंचधारयेत् ॥ उड्डीयानोह्ययंबंधोमृत्योरपिभयंत्यजेत् ॥ ४८ ॥ बध्नातिहिशिराजालमधोगामिनभोजलम् ॥ एषजालंधरोबंधःकंठेदुःखौघनाशनः ॥ ४९ ॥ जालंधरेकृतेबंधेकंठसंकोचलक्षणे ॥ नपीयूषंपतत्यग्नौनचवायुःप्रधावति ॥१५०॥ पार्ष्णिभागेनसंपीड्ययोनिमाकुंचयेद्गुदम् ॥ अपानमूर्ध्वमाकृष्यमूलबंधोविधीयते ॥ ५१ ॥ अपानप्राणयोरैक्यंक्षयोमूत्रपुरीषयोः ॥ युवाभवतिवृद्धोपिसततंमूलबंधनात् ॥ ५२ ॥

देषउड्डीयानबंधः ॥ अस्माद्बंधान्मृत्योरपिभयंत्यजेत् ॥ तदेतदुक्तंहठयोगप्रदीपिकायाम् ॥ बद्धोयेनसुषुम्नायांप्राणस्तूड्डीयतेयतः ॥ तस्मादुड्डीयनाख्योयंयोगिभिःसमुदाहृतः ॥ उड्डीनंकुरुतेयस्माद विश्रांतंमहाखगः ॥ उड्डीयानंतदेवस्यात्तत्रबंधोभिधीयते ॥ उदरेपश्चिमंतानंनाभेरूर्ध्वंतुकारयेत् ॥ उड्डीयानोह्ययंबंधोमृत्युमातंगकेसरीति ॥ ४८ ॥ निर्वचनपूर्वकंजालंधरबंधमाह ॥ बध्नातीति ॥ बध्नातिधारयति ॥ शिराजालंनाडीसमूहम् ॥ नभोजलंशरीरांतर्गततच्छिद्रजलम् ॥ ४९ ॥ अस्यबंधस्यफलांतरमाह ॥ जालंधरइति ॥ कंठसंकोचलक्षणेकंठमाकुंच्यहृदयेस्थापनलक्षणेऽर्थाद्द्वयोःपीयूषममृतंललाटस्थचंद्रमंडलेस्थितम् ॥ अग्नौजाठरेप्रधावतिप्रकुप्यति ॥ तदेतदुक्तंहठयोगप्रदीपिकायाम् ॥ कंठमाकुंच्यहृदयेस्थापयेद्दृढमिच्छया॥बंधोजालंधराख्योयममृताख्योपकारकः॥ बध्नातिहि शिराजालमधोगामिनभोजले ॥ ततोजालंधरोबंधःकंठेदुःखौघनाशनः॥जालंधरेकृतेबंधेकंठसंकोचलक्षणे॥नपीयूषंपतत्यग्नौनचवायुःप्रकुप्यतीति ॥१५०॥ मूलबंधस्वरूपमाह ॥ पार्ष्णिभागेनेति ॥ पार्ष्णिभागेनपादमूलभागेन ॥ आकुंचयेत्संकोचयेत् ॥ ५१ ॥ अस्यबंधस्यफलमाहापानेति ॥ सततंसर्वदामूलबंधनाद्धेतोरपानप्राणयोरैक्यादापोभवंतीत्यर्थः॥अपानप्राणयोरैक्येइतिक्वचित् ॥ तदेत दुक्तंहठयोगप्रदीपिकायाम्॥पार्ष्णिभागेनसंपीड्ययोनिमाकुंचयेद्गुदम् ॥ अपानमूर्ध्वमाकृष्यमूलबंधोयमुच्यते॥अधोगतमपानंवैऊर्ध्वगंकुरुतेहठात्॥ आकुंचनेनतंप्राहुर्मूलबंधंतुयोगिनः॥गुदंपार्ष्ण्यातुसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पीडयवायुमाकुंचयेद्बलात् ॥ वारंवारंतथाचोर्ध्वंसमायातिसमीरणः॥प्राणापानौनादबिंदूमूलबंधेनचैकताम् ॥ गत्वायोगस्यसंसिद्धिंगच्छतोनात्रसंशयः॥अपानप्राणयोरैक्यंक्षयोमूत्रपुरीषयोः॥ युवाभव
तिवृद्धोपिसततंमूलबंधनादिति ॥ ९२ ॥ नन्वात्मनःकूटस्थत्वाद्विकाराभावाद्योगेनकिंक्रियतेतत्राह ॥ प्राणापानेति ॥ प्राणापानवशस्तदायत्तस्तदुपाधिरित्यर्थः ॥ वामदक्षिणमार्गेणइडापिंगलानाडी
द्वयेन ॥ अतएवचंचलःसन्स्थितिंनलभेन्नभजेत् ॥ अयमेववापाठः ॥ ९३ ॥ सदृष्टांतमाह ॥ गुणबद्धइति ॥ गुणेनरज्ज्वागुणकार्यंयावारज्ज्वाबद्धइत्यर्थः ॥ गुणैःसत्त्वरजस्तमोभिस्तत्कार्यैर्वाकार्य
कारणसंघातैः ॥ ९४ ॥ अतोयोगविज्जीवस्यनिश्चलतयाऽवस्थानार्थंप्राणापानयोरैक्यंकरोतीत्याह ॥ अपानइति ॥ ९५ ॥ हकारेणेति ॥ हकारेणाकाशबीजेनबहिर्गच्छतीति ॥ यद्वाहकारेणपुरुष
बीजेनसकारेणप्रकृतिबीजेनपुनर्विशेत् ॥ पुंप्रकृत्यात्मकोहंसावितिशारदातिलकवचनात् ॥ अतोहेतोर्हंसहंसेतिमंत्रंजीवःसर्वदाजपति ॥ तथाचश्रुतिः ॥ हंसहंसेतिसदायःसर्वदेहेषुव्याप्तोवर्ततेयथाह्यग्निः
काष्ठेषुतिलेषुतैलमिवविदित्वानमृत्युमेतीति ॥ लैंगेचब्रह्मणोवचनम् ॥ःएवंव्याहृत्यविश्वात्मास्वरूपमकरोत्तदा ॥ वाराहमहमप्याशुहंसत्वंप्राप्तवान्सुराः॥ तदाप्रभृतिमामाहुर्हंसोहंसोविराडिति ॥ हंसहंसे

प्राणापानवशोजीवऊर्ध्वाधःपरिधावति ॥ वामदक्षिणमार्गेणचंचलोनास्थितिंलभेत् ॥ ९३ ॥ गुणबद्धोयथापक्षीगतोप्याकृष्यतेपुनः ॥ गुणैर्बद्धस्तथाजी
वःप्राणायामेनकृष्यते ॥ ९४ ॥ अपानःकर्षतिप्राणंप्राणोपानंचकर्षति ॥ ऊर्ध्वाधःसंस्थितावेतौसंयोजयतियोगवित् ॥ ९५ ॥ हकारेणबहिर्यातिसका
रेणविशेत्पुनः ॥ हंसहंसेत्यतोमंत्रंजीवोजपतिसर्वदा ॥ ९६ ॥ षट्शतानिदिवारात्रौसहस्राण्येकविंशतिः ॥ एतत्संख्यान्वितंमंत्रंजीवोजपतिसर्वदा ॥
॥ ९७ ॥ अजपानामगायत्रीयोगिनांमोक्षदायिनी ॥ अस्याःसंकल्पमात्रेणनरःपापैःप्रमुच्यते ॥ ९८ ॥ अंतरायाभवंतीहयोगिनोयोगहानिदाः ॥
श्रूयतेदूरगावार्तादूरस्थंदृश्यतेपुरः ॥ ९९ ॥ योजनानांशतंयातुंशक्तिःस्यान्निमिषार्धतः ॥ अचिंतितानिशास्त्राणिकंठपाठीभवंतिहि ॥१६०॥ धारणाश
क्तिरत्युग्रामहाभारोलघुर्भवेत् ॥ क्षणंकृशःक्षणंस्थूलःक्षणमल्पःक्षणंमहान् ॥ ६१ ॥ परकायंप्रविशतितिरश्चांवेत्तिभाषितम् ॥ दिव्यगंधंतनौधत्तेदिव्यां
वाणींप्रवक्तिच ॥ ६२ ॥ प्रार्थ्यतेदिव्यकन्याभिर्दिव्यंधारयतेवपुः ॥ इत्यादयोंऽतरायाःस्युर्योगसांसिद्धिसूचकाः ॥ ६३ ॥

तियोब्रूयान्मांहंसःसभविष्यतीति ॥ भागवतेच ॥ हंसस्वरूप्यवददच्युतमात्मयोगमिति ॥ अस्यमंत्रस्यचऋष्यादयःश्रुतावेवोक्ताः ॥ तथाहि॥अस्यहंसऋषिरव्यक्तंछंदःपरमहंसोदेवताभवतीति॥९६॥
रात्रिदिनमध्येकियद्वारंजपतीतिपृच्छायामाह ॥ षट्शतानीति ॥ सर्वदादिवारात्रौचषट्शतान्येकविंशतिसहस्राणिचयासंख्याभवतिएतत्संख्यान्वितंषट्शताधिकैकविंशतिसहस्रसंख्यान्वितंमन्त्रंहं
सहंसेतिस्वरूपंजीवोजपतीत्यर्थः ॥ तथाचश्रुतिः ॥ षट्संख्याहोरात्रयोरेकविंशतिसहस्राणिषट्शताधिकानिभवन्तीति ॥ अस्यायमर्थः ॥ मन्त्रजपसंख्यामाह ॥ षट्संख्याषष्टिघटिकात्मकोहि
दिवसःषोढाभिन्नःषट्संख्यातस्मिन्संवत्सराहोरात्राणांप्रतिघटिकंगणनयासंख्याषट्संख्याघटिकादशकेत्रिसहस्रंषट्शताधिकंभवतीत्यर्थः ॥ किंबहुनाअहोरात्रयोःअहनिरात्रौचएकविंशतिसहस्राणिष
ट्शतान्यधिकानिस्पष्टम् ॥ अतोनश्रुतिविरोधः ॥ ९७ ॥ अस्यमन्त्रस्यनामकथयति ॥ अजपेति ॥ ९८ ॥ योगंयुंजतोयोगिनोविघ्नरूपाःसिद्धयआयांतिताउपेक्ष्यब्रह्मण्येवमनोधेयमित्याहांतराया
इत्यारभ्ययत्प्राप्येत्यतःप्राक्तनेनग्रन्थेन ॥ अन्तरायानेवसंक्षेपतोदर्शयति श्रूयतइतिचतुर्भिः ॥ पुरोऽग्रतः ॥ ९९ ॥१६०॥ ६१ ॥ तिरश्चांपश्वादीनाम् ॥६२॥ दिव्यकन्याभिरप्सरोभिः ॥६३॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्यतेक्षोभ्यते ॥ अस्ययोगिनः ॥ इहभोगभूमौ ॥ तद्ब्रह्म ॥ तदेवमुमुक्षुभिःपद्यतेज्ञायतइतिपदम् ॥ ६४ ॥ तदेवपदंदर्शयन्योगफलमुपसंहराति ॥ यत्प्राप्येति ॥ ६५ ॥ ६६ ॥
॥ ६७ ॥ ६८ ॥ दयावार्धिःकृपासमुद्रः ॥ ६९ ॥ १७० ॥ काश्यामिति ॥ सदासर्वदा ॥ इहसंसारे ॥ सइतिपृथक्पदंवा ॥ अंतिमकालीनइत्यर्थः ॥ समोव्यावर्त्यमाह ॥ मुच्यतेनेहेति ॥
॥७१॥ ननुयोगेनान्तेतनुंत्यजेत् ॥ योगश्चित्तवृत्तिनिरोधः ॥ शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनइत्यादिवचनाद्योगादेवकैवल्यंमन्यंतेतत्कथंकाश्यांदेहत्यागमात्रेणमुक्तिरित्याशंकायांतुष्यतुदुर्जन

यद्येभिरंतरायैर्नक्षिप्यतेऽस्येहमानसम् ॥ तदग्रेतत्समाप्नोतिपदंब्रह्मादिदुर्लभम् ॥ ६४ ॥ यत्प्राप्यननिवर्तेतयत्प्राप्यनचशोचति ॥ तल्लभ्यतेषडंगेनयो
गेनकलशोद्भव ॥ ६५ ॥ एकेनजन्मनायोगःकथमित्थंप्रसिध्यति ॥ ऋतेचयोगसंसिद्धेःकथंमुक्तिरिहाप्यते ॥ ६६ ॥ उभेएवहिनिर्वाणवर्त्मनीकिलकुं
भज ॥ किंवाकाश्यांतनुत्यागःकिंवायोगोयमीदृशः ॥६७॥ चंचलेंद्रियवृत्तित्वात्कालिकल्मषजृंभणात् ॥ अल्पायुषांतथानृणांक्केहयोगमहोदयः ॥६८॥
अतएवहिजंतूनांमहोदयपदप्रदः ॥ सदैवसदयावार्धिःकाश्यांविश्वेश्वरःस्थितः ॥ ६९ ॥ काश्यांसुखेनकैवल्यंयथालभ्येतजंतुभिः ॥ योगयुक्त्याद्युपायै
श्चनतथान्यत्रकुत्रचित् ॥ १७० ॥ काश्यांस्वदेहसंयोगःसम्यग्योगउदाहृतः ॥ मुच्यतेनेहयोगेनक्षिप्रमन्येनकेनचित् ॥ ७१ ॥ विश्वेश्वरोविशालाक्षी
द्युनदीकालभैरवः ॥ श्रीमान्ढुंढिर्दंडपाणिःषडंगोयोगएषवै ॥ ७२ ॥ एतत्षडंगंयोयोगंनित्यंकाश्यांनिषेवते ॥ संप्राप्ययोगनिद्रांसदीर्घाममृतमश्नुते
॥ ७३ ॥ ओंकारःकृत्तिवासाश्चकेदारश्चत्रिविष्टपः ॥ वीरेश्वरोथविश्वेशःषडंगोयमिहापरः ॥ ७४ ॥ पादोदकासिसंभेदज्ञानोदमणिकर्णिकाः ॥ षडंगोयं
महायोगोब्रह्मधर्मह्रदावपि ॥ ७५ ॥ षडंगसेवनादस्माद्वाराणस्यांनरोत्तम ॥ नजातुजायतेजंतुर्जननीजठरेपुनः ॥ ७६ ॥ गंगास्नानंमहामुद्रामहा
पातकनाशनी ॥ एतन्मुद्राकृताभ्यासोप्यमृतत्वमवाप्नुयात् ॥७७॥ काशीवीथिषुसंचारोमुद्राभवतिखेचरी॥खेचरोजायतेनूनंखेचर्यामुद्रयानया ॥७८॥

इतिन्यायेनसुखसाध्यमन्यमेवषडंगयोगंदर्शयति ॥ विश्वेश्वरइति ॥ ७२ ॥ योगःसमाधिस्तद्रूपांनिद्रांबहिर्वृत्त्यभावसाम्यात्ताम् ॥ ७३ ॥ द्वितीयंषडंगंदर्शयति ॥ ओंकारइति ॥ त्रिविष्टपस्त्रिलो
चनः ॥ ७४ ॥ तृतीयषडंगमाह ॥ पादोदकेति ॥ पादोदकंवरणा ॥ संभेदःसंगमः ॥ ज्ञानोदंज्ञानवापी ॥ ब्रह्मधर्महदौब्रह्महृदोब्रह्मनालंब्रह्मेश्वरसमीपेब्रह्मकुंण्डं[1] धर्मह्रदःपांचनदेधूतपा
पाशापेनधर्मस्यैवह्रदत्वात् ॥ ब्रह्मावर्तेतिपाठेआवर्तोपिह्रदविशेषोज्ञातव्यः ॥ ७५ ॥ ७६ ॥ तथासुखसाध्याःअन्याएवमुद्रादर्शयति ॥ गंगास्नानमिति ॥७७॥ काशीवीथिषुकाश्यामार्गेषु ॥ खेब्रह्म

१ ब्रह्मकुण्डंदशाश्वमेधतीर्थस्थम्, ब्रह्मनालस्योपरिवर्तमानत्वात्। तत्रचतीर्थत्वाभावादितिचिन्त्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिचरतीतिखेचरोत्रह्मनिष्ठः ॥ कम्ब्रह्मखंब्रह्मेतिश्रुतेः ॥ ७८ ॥ ७९ ॥ १८० ॥ ८१॥ द्विविधंयोगमुपसंहराति ॥ इतियोगइति ॥ समुद्रोमुद्रासहितः ॥८२॥८३॥ उत्तमंयोगंजीवब्रह्मणोरैक्यलक्षणम् ॥ ८४ ॥ कालंमरणकालम् ॥ ८९ ॥ ८६ ॥ आतिथ्येऽनेहसिअतिथिसमर्चनवेलायाम् ॥ कालंमरणसमयम् ॥ आयान्तमागच्छन्तम् ॥ ८७ ॥ त्रिकण्टकंकण्टकवत्कण्टकंसंसारानर्थदायीत्यर्थः ॥ ८८ ॥ १८९ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ द्विचत्वारिंशकेऽध्यायेकाशीमाहात्म्यमिश्रिताः ॥ कालस्यवं

उड्डीयसर्वतोदेशाद्यानंवाराणसींप्रति ॥ उड्डीयानोमहाबंधएषमुक्त्यैप्रकल्पते ॥ ७९ ॥ जलस्यधारणंमूर्ध्निविश्वेशस्नानजन्मनः ॥ एषजालंधरोबंधः समस्तसुरदुर्लभः ॥ १८० ॥ वृतोविघ्नशतेनापियन्नकाशींत्यजेत्सुधीः ॥ मूलबंधःस्मृतोह्येषदुःखमूलनिकृंतनः ॥ ८१ ॥ इतियोगःसमाख्यातोमयाते द्विविधोमुने ॥ सषडंगःसमुद्रश्चमुक्तयेशंभुभाषितः ॥ ८२ ॥ यावन्नेंद्रियवैकल्यंयावद्व्याधिर्नबाधते ॥ यावत्कालविलंबोस्तितावद्योगरतोभवेत् ॥ ८३ ॥ उभयोर्योगयोर्मध्येकाशीयोगोयमुत्तमः ॥ काशीयोगंसमभ्यस्यप्राप्नुयाद्योगमुत्तमम् ॥ ८४ ॥ आधिव्याधिसहायिन्याजरयामृत्युलिंगया ॥ कालं निकटतोज्ञात्वाकाशीनाथंसमाश्रयेत् ॥ ८९ ॥ काशीनाथंसमाश्रित्यकुतःकालभयंनृणाम् ॥ क्रुद्धोपिजीवहृत्कालस्तच्चकाश्यांसुमंगलम् ॥ ८६ ॥ आतिथ्येनेहसियथाप्रतीक्षेतातिथिंकृती ॥ काश्यांकालंतथायांतंभाग्यवान्संप्रतीक्षते ॥ ८७ ॥ कलिःकालःकृतंकर्मत्रिकंटकमितीरितम् ॥ एतत्रयं नप्रभवेदानंदवनवासिनाम् ॥८८॥ अन्यत्रातर्कितःकालःकलयिष्यत्यसंशयम् ॥ कालादभयमिच्छेच्चेत्ततःकाशींसमाश्रयेत् ॥ १८९ ॥ इतिश्रीस्कांदे महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेयोगाख्यानंनामैकचत्वारिंशोऽध्यायः ॥४१ ॥ ॥ अगस्तिरुवाच ॥ ॥ कथंनिकटतः कालोज्ञायतेहरनंदन ॥ तानिचिह्नानिकतिचिद्ब्रूहिमेपरिपृच्छतः ॥ १ ॥ ॥ कुमारउवाच ॥ ॥ वदामिकालचिह्नानिजायंतेयानिदेहिनाम् ॥ मृत्यौनिकटमापन्नेमुनेतानिनिशामय ॥ २ ॥ याम्यनासापुटेयस्यवायुर्वातिदिवानिशम् ॥ अखंडमेवतस्यायुःक्षयत्यब्दत्रयेणहि ॥ ३ ॥ द्व्यहोरात्रं त्र्यहोरात्रंरविर्वहतिसंततम् ॥ अब्दमेकंचतस्येहजीवनावधिरुच्यते ॥ ४ ॥ वहेन्नासापुटयुगेदशाहानिनिरंतरम् ॥ वातश्चेत्सहसंक्रांतिस्तयाजीवेद्दिनत्रयम् ॥ ९ ॥ नासावर्त्मद्वयंहित्वामातरिश्वामुखाद्वहेत् ॥ शंसेद्दिनद्वयादर्वाक्प्रयाणंतस्यचाध्वनि ॥ ६ ॥ अकस्मादेवयत्कालेमृत्युःसन्निहितो भवेत् ॥ चिंतनीयःप्रयत्नेनसकालोमृत्युभीरुणा ॥ ७ ॥ सूर्येसप्तमराशिस्थेजन्मर्क्षस्थेनिशाकरे ॥ पौष्णःसकालोद्रष्टव्योयदायाम्येरविर्वहेत् ॥ ८ ॥

चनोपायाउच्यन्तेतिसुखप्रदाः ॥ १ ॥ कालंनिकटतोज्ञात्वाकाशीनाथंसमाश्रयेदित्युक्तंतत्रपृच्छति ॥ कथमिति ॥ कतिचित्कियंति ॥ १ ॥ २ ॥ याम्यनासापुटेदक्षिणनासाछिद्रे ॥ अखण्डंनिश्छिद्रम् ॥ ३ ॥ रविर्दक्षिणनाडी ॥ तस्यांवायुर्वहतीत्यर्थः ॥ ४ ॥ कथंभूतोवातः ॥ सहसंक्रांतिःसम्यक्क्रांतिःसंक्रातिरुत्क्रांतिरित्यर्थः ॥ तयासहवर्तमानः ॥ तयासंक्रांत्या ॥ तदेतिवापाठः ॥९॥ नासेति ॥ मुखान्मुखद्वारा ॥ अध्वनियममार्गे ॥ ६ ॥ एतदेवस्पष्टयति ॥ अकस्मादिति ॥ ७ ॥ सूर्यइतिश्लोकद्वयंवाक्यम् ॥ पौष्णःसूर्यदेवताकः ॥ याम्येदक्षिणनासापुटे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रविर्वायुः ॥ ८ ॥ तस्मिन्नेवपौष्णकालएव ॥ अरूपंरूपांतरमुक्तम् ॥ ९ ॥ यस्योति ॥ वीजंशुक्रम् ॥ मलंपुरीपम् ॥ मूत्रमेतात्रितयंवा ॥ इहसंसारे ॥ सहेतिपाठेअत्यव्यवहितसमयइत्यर्थः ॥१०॥ इंद्रेति॥प्रसृमरमितस्ततोगमनशीलम् ॥ ११ ॥ व्यभ्रेइति ॥ फूत्कृत्यफूत्कारशब्दंकृत्वेतिपूर्वेणान्वयः ॥ पूत्कृत्येतिपाठेपिसएवार्थः ॥ १२ ॥ १३ ॥ अरुंधतीमितिश्लोकंस्वयमेवव्याचष्टे ॥ अरुंधतीभवेदिति ॥ १४ ॥ वेत्तीति ॥ अकस्माच्चक्षुर्दोषज्वरादिकंविनेत्यर्थः ॥ १५ ॥ षण्मासेति ॥ षण्मासान्मृत्युर्यस्यतस्यमर्त्यस्यकंठश्चओष्ठश्चरसनाजिह्वाचरदादन्ताश्चतालुपंचमाए

अकस्माद्वीक्षतेयस्तुपुरुषंकृष्णपिंगलम् ॥ तस्मिन्नेवक्षणेऽरूपंसजीवेद्वत्सरद्वयम् ॥ ९ ॥ यस्यबीजंमलंमूत्रंक्षुतंमूत्रंमलंतुवा ॥ इहैकदापतेद्यस्यअब्दं तस्यायुरिष्यते ॥ १० ॥ इंद्रनीलनिभंव्योम्निनागवृंदंयईक्षते ॥ इतस्ततःप्रसृमरंषण्मासंनसजीवति ॥११॥ व्यभ्रेह्निवारिपूर्णास्यःपृष्ठीकृत्यदिवाकरम् ॥ फूत्कृत्याश्विंद्रचापंनपश्येत्षण्मासजीवितः ॥ १२ ॥ अरुंधतींध्रुवंचैवविष्णोस्त्रीणिपदानिच ॥ आसन्नमृत्युर्नोपश्येच्चतुर्थमातृमंडलम् ॥१३॥ अरुंधती भवेज्जिह्वाध्रुवोनासाग्रमुच्यते ॥ विष्णोःपदानिभ्रूमध्येनेत्रयोर्मातृमंडलम् ॥ १४ ॥ वेत्तिनीलादिवर्णंस्यकटम्लादिरसस्यहि ॥ अकस्मादन्यथाभावं षण्मासेनसमृत्युभाक् ॥१५॥ षण्मासमृत्योर्मर्त्यस्यकंठोष्ठरसनारदाः ॥ शुष्यंतिसततंतद्वद्विच्छायास्तालुपंचमाः ॥१६॥ रेतःकरजनेत्रांतानीलिमानं भजंतिचेत् ॥ तर्हिकीनाशनगरींषष्ठेमासिव्रजेन्नरः ॥ १७ ॥ संप्रवृत्तेनिधुवनेमध्येतेक्षौतिचेन्नरः ॥ निश्चितंपंचमेमासिधर्मराजातिथिर्भवेत् ॥ १८ ॥ द्रुतमारुह्यशरठस्त्रिवर्णोयस्यमस्तके ॥ प्रयातियातितस्यायुःषण्मासेनपरिक्षयम् ॥ १९ ॥ सुस्नातस्यापियस्याशुहृदयंपरिशुष्यति ॥ चरणौचकरौ वापित्रिमासंतस्यजीवितम् ॥ २० ॥ प्रतिबिंबंभवेद्यस्यपदखंडपदाकृति ॥ पांसौवाकर्दमेवापिपंचमासान्सजीवति ॥ २१ ॥ छायाप्रकंपतेयस्यदेहबंधे पिनिश्चले ॥ कृतांतदूतावध्नंतिचतुर्थेमासितंनरम् ॥ २२ ॥ निजस्यप्रतिबिंबस्यनीराज्यमुकुरादिषु ॥ उत्तमांगंनयःपश्येत्समासेनविनश्यति ॥ २३ ॥ मतिर्भ्रश्येत्स्खलेद्वाणीधनुरैंद्रंनिरीक्षते ॥ रात्रौचंद्रद्वयंचापिदिवाद्वौचदिवाकरौ ॥ २४ ॥ दिवाचतारकाचक्रंरात्रौव्योमवितारकम् ॥ युगपच्चचतुर्दिक्षुशाक्रंकोदंडमंडलम् ॥ २५ ॥

तेशुष्यंतितद्वत्तयाविच्छायाश्चभवन्तीत्यर्थः ॥ १६ ॥ रेतइति ॥ कीनाशोऽन्त्रयमः ॥ १७ ॥ संप्रवृत्तइति ॥ निधुवनेमैथुने ॥ क्षौतिक्षुतंकरोति ॥ १८ ॥ द्रुतमिति ॥ सरठः कृकलासः ॥ त्रयोनीलरक्तपीतवर्णायस्यसत्रिवर्णः ॥ १९ ॥ २० ॥ प्रतिविम्बमिति ॥ खण्डपदाकृतिअर्द्धादिचरणाकारम् ॥ २१ ॥ २२ ॥ निजस्येति ॥ नीराज्यमुकुरादिषु दृष्टिप्रतिवन्धकरहितजलघृतदर्पणादिषु ॥ २३ ॥ मातिरितिश्लोकत्रयंवाक्यम् ॥ २४ ॥ तारकमित्यनेनएकस्यद्वयोर्वादर्शनेनास्तिदोषइतिध्वनितम् ॥ शाक्रमिन्द्रसम्बन्धिकोदंडमंडलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनुःसमूहः ॥ २९ ॥ गंधर्वनगरालयमाकाशेऽकस्माद्दृश्यमानंनगराकारमाश्रयम् ॥ पंचत्वहेतवोमृत्युहेतवः ॥ हेतवेइतिकचित् ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ प्रोह्यतइतिश्लोकद्वयं वाक्यम् ॥ प्रोह्यतेपृष्ठादौस्थापयित्वानीयते ॥ गोमायुःशृगालः ॥ ३० ॥ करभैरुष्ट्रैः ॥ कीशैर्वानरैः ॥ श्येनैःशीचानइतिप्रसिद्धैःपक्षिविशेषैः ॥ अश्वतरैर्गर्दभैः ॥ ३१ ॥ गंधेति ॥ शोणै रक्तवर्णैः ॥ अनितिजीवतीत्यर्थः ॥ अहोइत्यगस्त्यसंबोधनम् ॥ ३२ ॥ पांस्विति ॥ वल्मीकंवामलूरम् ॥ ३३ ॥ ३४ ॥ स्वप्नौलाविति ॥ स्वप्नगःस्वप्नभूमिष्ठः ॥ स्वप्नतइतिपाठेस्वप्नइत्यर्थः ॥ ॥ ३५ ॥ ३६ ॥ कालीति ॥ बध्नीयादालिंगेत् ॥ शमनोषितांयमेनाधिष्ठिताम् ॥ ३७ ॥ नरइति ॥ स्वपन्स्वप्नंपश्यन्सन् ॥ ३८ ॥ कृपणइति ॥ वदान्यउदारोदातेतियावत् ॥ प्रकृतेर्विकृतिः

भूरुहेभूधराग्रेचगंधर्वनगरालयम् ॥ दिवापिशाचनृत्यंचएतेपंचत्वहेतवः ॥२६॥ सर्वेष्वेतेषुचिह्नेषुयद्येकमपिवीक्षते ॥ तदामासावधिंमृत्युःप्रतीक्षेतनचाधिकम् ॥ २७ ॥ करावरुद्धश्रवणःशृणोतिनयदाध्वनिम् ॥ स्थूलःकृशःकृशःस्थूलस्तदामासान्निवर्तते ॥ २८ ॥ यःपश्येदात्मनश्छायांदक्षिणाशासमाश्रिताम् ॥ दिनानिपंचजीवित्वापंचत्वमुपयातिसः ॥ २९ ॥ प्रोह्यतेभक्ष्यतेवापिपिशाचासुरवायसैः ॥ भूतैःप्रेतैःश्वभिर्गृध्रैर्गोमायुखरसूकरैः ॥ ३० ॥ रासभैःकरभैःकीशैःश्येनैरश्वतरैर्बकैः ॥ स्वप्नेसजीवितंत्यक्त्वावर्षांतेयममीक्षते ॥ ३१ ॥ गंधपुष्पांशुकैःशोणैःस्वांतनुंभूषितांनरः ॥ यःपश्येत्स्वप्नसमयेसोऽष्टौमासाननित्यहो ॥ ३२ ॥ पांसुराशिंचवल्मीकंयूपदंडमथापिवा ॥ योधिरोहतिवैस्वप्नेसषष्ठेमासिनश्यति ॥ ३३ ॥ रासभारूढमात्मानंतैलाभ्यक्तंचमुंडितम् ॥ नीयमानंयमाशांयःस्वप्नेपश्येत्स्वपूर्वजान् ॥ ३४ ॥ स्वप्नौलौस्वतनौवापियःपश्येत्स्वप्नगोनरः ॥ तृणानिशुष्ककाष्ठानिषष्ठेमासिनतिष्ठति ॥ ३५ ॥ लोहदंडधरंकृष्णंपुरुषंकृष्णवाससम् ॥ स्वयंयोग्रेस्थितंपश्येत्सत्रीन्मासान्नलंघयेत् ॥ ३६ ॥ कालीकुमारीयंस्वप्नेबध्नीयाद्बाहुपाशकैः ॥ समासेनसमीक्षेतनगरींशमनोषिताम् ॥ ३७ ॥ नरोयोवानरारूढोयायात्प्राचींदिशंस्वपन् ॥ दिनैःसपंचभिरेवपश्येत्संयमिनींपुरीम् ॥३८॥ कृपणोपिवदान्यःस्याद्वदान्यःकृपणोयदि ॥ प्रकृतेर्विकृतिश्चेत्स्यात्तदापंचत्वमृच्छति ॥३९॥ एतानिकालचिह्नानिसंत्यन्यानिबहून्यपि ॥ ज्ञात्वाभ्यसेन्नरोयोगमथवाकाशिकांश्रयेत् ॥ ४० ॥ नकालवंचनोपायंमुनेन्यमवयाम्यहम् ॥ विनामृत्युंजयंकाशीनाथंगर्भावरोधकम् ॥ ४१ ॥ तावद्गर्जंतिपापानितावद्गर्जेद्यमोनृपः ॥ यावद्विश्वेशशरणंनरोननिरतोव्रजेत् ॥ ४२ ॥ प्राप्तविश्वेश्वरावासःपीतोत्तरवहापयाः ॥ स्पृष्टविश्वेशसल्लिंगःकश्चयातिनवंद्यताम् ॥ ४३ ॥ करिष्येत्कुपितःकालःकिंकाशीवासिनांनृणाम् ॥ कालेशिवःस्वयंकर्णेयत्रमंत्रोपदेशकः ॥ ४४ ॥

स्वभावस्यत्यागइत्यर्थः ॥ ३९ ॥ कालचिह्नान्युपसंहरन्कालवंचनोपायेद्वेगतीआह ॥ एतानीति ॥ ४० ॥ तत्राप्यंतिमगतेःश्रेष्ठत्वमाह ॥ नकालेति ॥ ४१ ॥ श्रेष्ठत्वमेवदर्शयाति ॥ तावदिति ॥ विश्वेशमेवशरणंरक्षितारंविश्वेशस्यशरणमावासमविमुक्तमितियावदितिवा ॥ निरतोनितरांरतः ॥ नियतइतिवापाठः ॥ ४२ ॥ प्राप्तेति ॥ पीतमुत्तरवहायागंगायाःपयोयेनसपीतोत्तरवहापयाः ॥ वंद्यतांदेवादीनामितिशेषः ॥ कस्येतिपाठेकस्यदेवादेर्वंद्यतांनायातिअपितुसर्वस्येत्यर्थः ॥ ४३ ॥ ननुस्वाधिकारोल्लंघनेनकालोऽरिष्टंकरिष्यतिनेत्याह ॥ करिष्येदिति ॥ यद्वा ननुकाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवभजनीयोमारकत्वात्तत्राह ॥ करिष्येदिति ॥ करिष्येत्करिष्यति ॥ कालेमरणाव्यवहितसमये ॥ ४४ ॥ सानुभवंप्रकृतंसारमुपसंहरति यथेतिद्वाभ्याम् ॥ ४५ ॥ सर्वंपुत्रकलत्रादि ॥ फल्गुरूप मनिर्वचनीयरूपंतुच्छरूपंवा ॥ ४६ ॥ अहोभाग्यंलोकानामित्यनुक्रोशति ॥ अन्यानीति ॥ लक्ष्माणिचिह्नानि ॥ लक्षाणीतिवापाठः ॥ एवमग्रेपि ॥ ४७ ॥ जराकृतान्दोषानाह पराभूतइति त्रिभिः ॥ हृतंतारुण्यमेवमाणिक्यंयस्यसः ॥ ४८ ॥ रहःसंबंधवस्तुदूरेप्रेमापिमुंचतीत्यर्थः ॥ ४९ ॥ एतदेवसोत्प्रेक्षंप्रपंचयति ॥ आश्लिष्टमिति ॥ ५० ॥ जरानिंदामुपसंहरति ॥ नजरेति ॥ ५१ ॥ ननुतर्ह्यन्यत्रस्थित्वैवकालजयःकर्तव्यस्तत्राह ॥ नजीयतइति ॥ चिरेणदेहत्यागपर्यंतेन ॥ अचिरेणेतिपदच्छेदेकाशीवासान्मरणपर्यंतादित्यर्थः ॥ ५२ ॥ ननुतर्हिसर्वोपिलोकःकिमितिवार्धकेकाश्यां

यथाप्रयातिशिशुताकौमारंचयथागतम् ॥ सत्वरंगत्वरंतद्वद्यौवनंचापिवार्धकम् ॥ ४५ ॥ यावन्नहिजराक्रांतिर्यावन्नेंद्रियवैक्लवम् ॥ तावत्सर्वंफल्गुरूपं हित्वाकाशींश्रयेत्सुधीः ॥ ४६ ॥ अन्यानिकाललक्ष्माणितिष्ठंतुकलशोद्भव ॥ जरैवप्रथमंलक्ष्मचित्रंतत्रापिभीर्नहि ॥ ४७ ॥ पराभूतोहिजरयासर्वैश्चप रिभूयते ॥ हृततारुण्यमाणिक्योधनहीनःपुमानिव ॥ ४८ ॥ सुतावाक्यंनकुर्वंतिपत्नीप्रेमापिमुंचति ॥ बांधवानैवमन्यंतेजरसाश्लेषितंनरम् ॥ ४९ ॥ आश्लिष्टंजरयादृष्ट्वापरयोषिद्विशंकिता ॥ भवेत्पराङ्मुखीनित्यंप्रणयिन्यपिकामिनी ॥ ५० ॥ नजरासदृशोव्याधिर्नदुःखंजरयासमम् ॥ कारयित्र्यपमा नस्यजरैवमरणंनृणाम् ॥ ५१ ॥ नजीयतेतथाकालस्तपसायोगयुक्तिभिः ॥ यथाचिरेणकालेनकाशीवासाद्विजीयते ॥ ५२ ॥ विनायज्ञैर्विनादानैर्वि नाव्रतजपादिभिः ॥ विनातिपुण्यसंभारैःकःकाशींप्राप्तुमीहते ॥ ५३ ॥ काशीप्राप्तिरयंयोगःकाशीप्राप्तिरिदंतपः ॥ काशीप्राप्तिरिदंदानंकाशीप्राप्तिःशि वैकता ॥ ५४ ॥ कःकलिःकोथवाकालःकाजराकिंचदुष्कृतम् ॥ कारुजःकैंतरायावाश्रितावाराणसीयदि ॥ ५५ ॥ कलिस्तानेवबाधेतकालस्तांश्च जिघांसति ॥ ५६॥ एनांसितांश्चबाधंतेयेनकाशींसमाश्रिताः ॥ काशीसमाश्रितायैश्चयैश्चविश्वेश्वरोर्चितः ॥ तारकंज्ञानमासाद्यतेमुक्ताःकर्मपाशतः ॥ ॥ ५७ ॥ धनिनोनतथासौख्यंप्राप्नुवंतिनराःक्वचित् ॥ यथानिधनतःकाश्यांलभंतेसुखमव्ययम् ॥ ५८ ॥ वरंकाशीसमावासीनासीनोद्युसदांपदम् ॥ दुःखांतंलभतेपूर्वःसुखांतंलभतेपरः ॥ ५९ ॥

नायातितत्राह ॥ विनायज्ञैरिति ॥ ५३ ॥ अतोमहताप्रयत्नेनकाश्यांमरणमेवसंपादनीयमित्याह ॥ काशीप्राप्तिरिति ॥ योगादीनांयत्फलंतद्दावृत्वात्काशीप्राप्तेःकाश्यांमरणमेवयोगादिरित्यर्थः ॥ ॥ ५४ ॥ ननुकाश्यामाश्रितायामपिकलिप्रभृतयोविघ्नान्करिष्यंतिनेत्याह ॥ कःकलिरिति ॥ यदिवाराणसीश्रितामरणावध्याश्रितातदाकालादयःकेवराकाइत्यर्थः ॥ ५५ ॥ एतदेवाह ॥ कलिस्तानिति ॥ ५६ ॥ नकेवलंकाश्याश्रितानांकलिकालादीनांबाधाद्यभावमात्रंकिंतुमोक्षोपितेषांसुलभएवेत्याह ॥ काशीति ॥ ५७ ॥ इतोपिहेतोःकाशीसमाश्रयणीयेत्याह धनिनइतिद्वा भ्याम् ॥ ५८ ॥ वरमिति ॥ काश्यांसम्यग्यथाशास्त्रमावासःस्थितिर्यस्यास्तिसनरश्रेष्ठः ॥ वरमित्ययंश्रेष्ठवाची ॥ द्युसदांदेवानांपदंस्वर्गमासीनआश्रितोयःसनरोनवरमित्यर्थः ॥ तत्रहेतुमाह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पूर्वः काशीसमावासीयः सदुःखांतं मोक्षं लभते॥ परोद्युसदां पदमासीनोयः संसुखस्यांतंनाशं लभते ॥ ५९ ॥ विश्वनाथस्यापि काशी परमानंदजनिका किमुतान्येषामित्याह ॥ स्थितोपीति ॥ ६० ॥ ॥ इतिश्रीरामानंद० का० द्विचत्वारिंशोध्यायः ॥ ४२ ॥ ॥ त्रिचत्वारिंशकेऽध्यायेनानाश्चर्यसुधालये ॥ दिवोदासस्य भूजानेः प्रतापस्तावदुच्यते ॥१॥ स्थितोपिभगवानीशो मंदरंचारुकंदरम् ॥ काशीं विनारतिंनापदिवोदासनृपोपितामित्यनंतरश्लोकेमंदरेत्यभावाद्दिवोदासं नृपतिं च्यावयित्वा भगवान्काश्यामगादित्यर्थादुक्तं तत्र पृच्छति ॥ दिवोदासमिति ॥ सार्धश्लोकं वाक्यम् ॥ भगोहेपूज्य ॥ १ ॥ तत्रप्रथमतो भगवतो मंदरगमने कारणमाह मंदरमिति श्लोकेन ॥ तस्य शाकद्वीपस्थस्य ॥ २ ॥ नकेवलं भगवानेवगतवानपितु सर्वे देवाइत्याह ॥ गतइति ॥ गिरिसुंदरं पर्वतेषु मध्ये मनोहरम् ॥ चारुकंदरमितिक्वचित् ॥ ३ ॥ एतदेवप्रपंचयति क्षेत्राणीतित्रिभिः ॥ इहकाश्यांकाशीतोऽन्यत्र क्षितेरपि क्षेत्राणि ॥ सर्वत्रात्र क्षितिशब्दो जंबूद्वीपविषयः ॥४॥ ५ ॥ सूरः सूर्यः ॥ अरमत्यर्थम् ॥ निर्जरादेवाः ॥

स्थितोपिभगवानीशोमंदरंचारुकंदरम् ॥ काशींविनारतिंनाऽऽपदिवोदासनृपोषिताम् ॥ ६० ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडेपूर्वार्द्धे कालवंचनोपायोनामद्विचत्वारिंशोध्यायः ॥ ४२ ॥ ॥ अगस्तिरुवाच ॥ ॥ दिवोदासंनरपतिंकथंदेवस्त्रिलोचनः ॥ काशींसंत्याजयामासकथमागाच्चमंदरात् ॥ एतदाख्यानमाख्याहिश्रोतॄणांप्रमुदेभगोः ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ मंदरंगतवान्देवोब्रह्मणोवाक्यगौरवात् ॥ तपसातस्यसंतुष्टोमंदरस्यैवभूभृतः ॥ २ ॥ गतेविश्वेश्वरेदेवेमंदरंगिरिसुंदरम् ॥ गिरिशेनसमंजग्मुरपिसर्वेदिवौकसः ॥ ३ ॥ क्षेत्राणिवैष्णवानीहत्यक्त्वाविष्णुरपिक्षितेः ॥ प्रयातोमंदरंयत्रदेवदेवउमाधवः ॥ ४ ॥ स्थानानिगाणपत्यानिगणेशोपिततोव्रजत् ॥ हित्वाहमपिविप्रेंद्रगतवान्मंदरंप्रति ॥ ५ ॥ सूरः सौराणिसंत्यज्यगतश्चायतनादरम् ॥ स्वंस्वंस्थानंक्षितौत्यक्त्वाययुरन्येपिनिर्जराः ॥ ६ ॥ गतेषुदेवसंघेषुपृथिव्याःपृथिवीपतिः ॥ चकारराज्यंनिर्द्वंद्वंदिवोदासःप्रतापवान् ॥ ७ ॥ विधायराजधानींसवाराणस्यांसुनिश्चलाम् ॥ एधांचक्रेमहाबुद्धिःप्रजाधर्मेणपालयन् ॥ ८ ॥ सूर्यवत्सप्रतपिताद्दुर्हृदांहृदिनेत्रयोः ॥ सोमवत्सुहृदामासीन्मानसेषुस्वकेष्वऽपि ॥ ९ ॥ अखंडमाखंडलवत्कोदंडंकलयन्रणे ॥ पलायमानैरालेकिशत्रुसैन्यबलाहकैः ॥ १० ॥ सधर्मराजवज्जातोधर्माधर्मविवेचकः ॥ अदंड्यान्मण्डयन्राजादंड्यांश्चपरिदंडयन् ॥ ११ ॥ धनंजयइवाधाक्षीत्पराराण्यान्यनेकशः ॥ पाशीवपाशयांचक्रेवैरिचक्रंविदूरगः ॥ १२ ॥

आयतनात्स्वस्थानात् ॥ परमितिपाठेपरंमंदरंविश्वेश्वरंवा ॥६॥ ततश्चगतेष्विति ॥७॥ सुनिश्चलांसुस्थिराम् ॥ सुनिश्चलमितिपाठेक्रियाविशेषणम् ॥ धर्मेणपालयन्प्रजाःएधांचक्रेवर्धयामास ॥ ८ ॥ सूर्यादीनांदशलोकपालानांसाधर्म्यमाह सूर्यवदितिषड्भिः ॥ प्रतपिताप्रकृष्टतापकर्ता॥ततापसूर्यइवसइतिक्वचित्पाठः ॥९॥ अखंडमिति ॥ सराजाशत्रुसैन्यान्येवबलाहकामेघाःवृष्टिवच्छरप्रक्षेपकास्तैरालोकिदृष्टः ॥ कथंभूतैः ॥ पलायमानैःपलायनंकुर्वद्भिः ॥ किंकुर्वन्दृष्टः ॥ अखंडंसमग्रमवैकल्यंवायथास्यात् लीलयेत्येतत् ॥ तथाकोदंडंधनुःकलयंष्टंकारयन्विस्फूर्जयन्नित्यर्थः ॥ कीदृशंधनुः ॥ आखंडलवत्इंद्रधनुरिवेत्यर्थः ॥१०॥ सइति ॥ सराजाधर्मराजवज्जातइत्यन्वयः ॥११॥ धनंजयोऽग्निः॥अधाक्षीद्ददाह ॥ परेशत्रवस्तएवारण्यानिपराराण्यानि ॥ पाशीवरुणः॥पाशयांचक्रेवबंध॥विदूरगे

CC-0. In Public Domain. Digitization by eGangotri

ऽतिदूरस्थोपि ॥ १२ ॥ पुण्यजनाधार्मिकाजनास्तेषामधीशःश्रेष्ठः ॥ पक्षांतरेपुण्यजनाराक्षसास्तेषामधीशोनिर्ऋतिः ॥ रिपवोराक्षसास्तेषांवर्धनश्छेदकः ॥ वृधुच्छेदनइतिधातुः ॥ पक्षांतरेऽरिष्विति वाछेदः॥ तेषांवर्धनोवृद्धिकारकः ॥ श्लेषालंकारोयम्॥जगत्प्राणोवायुस्तत्समानः ॥ तत्रहेतुर्जगत्प्राणनतत्परइति ॥ वायुरपितथा ॥१३॥ राजराजःकुबेरः॥प्रैक्षिष्टदृष्टः ॥१४॥१५॥ अन्येभ्योदेवेभ्य आधिक्यमाह ॥ असाध्योऽजेयः॥साध्यानांदेवानाम् ॥ वसुभ्योदेवेभ्यः ॥ वसुनाधनेन ॥ विग्रहधरःसंग्रामकर्ता॥अनिष्टकरणेनिवारकइत्यर्थः॥ शरीरधरइतिवा ॥ दस्रतोऽश्वनीकुमाराभ्याम् ॥ अजस्र रूपभाकअधिकरूपभागित्यर्थः ॥ दस्रयोश्चस्वरूपभागितिपाठेस्पष्टएवार्थः ॥ १६ ॥१७॥ निजगीतिभिःस्वकीयैर्गीतैः ॥ स्वर्गसोदरंस्वर्गसमानम् ॥ १८ ॥ नागवलीयसोगजेभ्यःसर्पेभ्योवावालि ष्ठस्य ॥ दनुजादनोःपुत्रादानवाइत्यर्थः ॥ १९ ॥ गुह्यचरारहस्यकार्येषुचराः ॥ गुह्यतराइतिपाठेपिसएवार्थः ॥ गुह्यकादेवयोनिविशेषाः॥सम्मिति॥ हेराजन्वयमसुराःस्ववैभवैस्त्वांसंसेविष्यामइतियंप्रो

सोभूत्पुण्यजनाधीशोरिपुराक्षसवर्धनः ॥ जगत्प्राणसमानश्चजगत्प्राणनतत्परः ॥१३॥ राजराजःसएवाभूत्सर्वेषांधनदःसताम् ॥ सएवरुद्रमूर्तिश्चप्रैक्षिष्ट रिपुभीरणे ॥ १४ ॥ विश्वेषांसहिदेवानांतपसारूपधृग्यतः ॥ विश्वेदेवास्ततस्तंतुस्तुवंतिचभजंतिच ॥ १५ ॥ असाध्यःसहिसाध्यानांवसुभ्योवसुनाधिकः ॥ ग्रहाणांविग्रहधरोदस्रतोऽजस्ररूपभाक् ॥ १६ ॥ मरुद्गणानगणयंस्तुषितांस्तोषयन्गुणैः ॥ सर्वविद्याधरोयस्तुसर्वविद्याधरेष्वपि ॥ १७ ॥ अगर्वानेवगंधर्वान्यश्चक्रेनिजगीतिभिः ॥ ररक्षुर्यक्षरक्षांसितद्दुर्गंस्वर्गसोदरम् ॥ १८ ॥ नागानागांसिचक्रुश्चतस्यनागबलीयसः ॥ दनुजामनुजाकारं कृत्वातंचसिषेविरे ॥ १९ ॥ जातागुह्यचरायस्यगुह्यकाःपरितोनृषु ॥ संसेविष्यामहेराजन्नसुरास्त्वांस्ववैभवैः ॥ २० ॥ वयंयतस्त्वद्विषयेसुरावासोऽपिदुर्लभः ॥ अशिक्षयत्क्षितिपतेरिहयस्यतुरंगमान् ॥ आशुगश्चाशुगामित्वंपावमानेपथिस्थितः ॥ २१ ॥ अगजान्यस्यतुगजान्नगवर्ष्मसुवर्ष्मणः ॥ अजस्रदानिनोदृष्ट्वाभवन्नन्येपिदानिनः ॥ २२ ॥ सदोजिरेचबोद्धारोयोद्धारश्चरणाजिरे ॥ नयस्यशास्त्रैर्विजितानशस्त्रैःकेनचित्क्वचित् ॥ २३ ॥ ननेत्रविषयेजाताविषयेयस्यभूभृतः ॥ सदानष्टपदाद्वेष्यास्तदाऽनष्टपदाःप्रजाः ॥ २४ ॥ कलावानेकएवास्तित्रिदिवेपिदिवौकसाम् ॥ तस्यक्षोणिभृतःक्षोण्यांजनाःसर्वेकलालयाः ॥ २५ ॥

चुरितिशेषः ॥ २० ॥ स्वर्गंविहायात्रस्थित्वाकिमितिमांसेविष्यथतत्राह ॥ यतइति ॥ यतस्त्वद्राष्ट्रेसुराणामप्यावासःस्थितिर्दुर्लभाकुतस्तत्रास्माकमितिभावः ॥ आशुगोवायुःपावमानेपथिअश्वगतिशिक्षारूपेशास्त्रेपावमानेवायुमार्गेस्थितोपीतिवा ॥ २१ ॥ अगजान्पर्वतजान् ॥ नविद्यन्तेप्रतिपक्षभूतागजायेषांतानितिवा ॥ नगवर्ष्मसुवर्ष्मणः पर्वतदेहेभ्योपिशोभनदेहान्स्थूलदेहानित्यर्थः ॥ अजस्रदानिनोनिरन्तरमदस्राविणः ॥ २२ ॥ बोद्धारोविचारकाः ॥ यस्यसदोजिरेसभांगणेरणांगणेचबोद्धारोयोद्धारश्चशास्त्रैःशस्त्रैश्चयथासंख्यंनकेनचित्कुत्रापिनविजिताइत्यर्थः ॥ २३ ॥ ननेत्रेति ॥ यस्यभूभृतोविषयेराज्येसदासर्वदानष्टपदानष्टाश्रयानष्टत्राणावाकेनचिद्द्वेष्याश्चप्रजाश्चक्षुर्गोचरेनजाताःकिन्तुतदातस्मिन्राजनिअनष्टपदाअद्वेष्याएवप्रजाजाताः ॥ २४ ॥ कलावांश्चन्द्रः ॥

१ वर्ष्मदेहप्रमाणयोरित्यमरः । पर्वतोपमस्थूलदेहानित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलालयाश्चतुःषष्टिकलाश्रयाः ॥ २५ ॥ सांगोपांगाःअंगानिमुख्यावयवाउपांगानिचतदवयवास्तत्सहिताः ॥ पक्षांतरेसांगोपांगाःसमग्राः ॥२६॥ उपवर्ततेऽस्मिन्नित्युपवर्तनंराज्यंतस्मिन् ॥ २७ ॥ आकर्णिश्रुतः ॥ दृष्टस्यकावार्तेतिभावः ॥ २८ ॥ अनवग्रहाःवृष्टिप्रतिघातशून्याः ॥ २९ ॥ ३० ॥ सदंशुकाःसंतोंऽशवःकांतयोयेषांतेतथा ॥ प्रतिदिनंसर्वदा ॥ प्रतिगृहमितिवापाठः ॥ ३१ ॥ यथास्वर्भूःसदप्सराःसत्योप्सरसोयस्यांसातथातत्पुरीअपिकिंसदप्सराःअपितुताभ्योप्यधिकसदप्सरोभिर्मंडितेत्यर्थः ॥ पद्माकालक्ष्म्यालयाः ॥ पक्षांतरेपद्माकरास्तडागाः ॥ ३२ ॥ नविद्यंतेईतयोऽतिवृष्ट्यनावृष्टिशलभमूषकशुकस्वचक्रप्रतिकूलराजलक्षणायेषुतेग्रामास्तथा ॥ धनदाधनदातारः ॥ नाकेस्वर्गे ॥ अलकापतिःकुबेरः ॥ सर्वत्रायंशब्दश्लेषालंकारः ॥ ३३ ॥ प्रस्तुतमाह ॥

एकएवहिकामोस्तिस्वर्गेसोप्यंगवर्जितः ॥ सांगोपांगाश्चसर्वेषांसर्वेकामाहितद्भुवि ॥२६॥ तस्योपवर्तनेप्येकोनश्रुतोगोत्रभित्क्वचित् ॥ स्वर्गेस्वर्गसदामीशोगोत्रभित्परिकीर्तितः ॥ २७ ॥ क्षयीचतस्यविषयेकोप्याकर्णिनकेनाचित् ॥ त्रिविष्टपेक्षपानाथःपक्षेपक्षेक्षयीष्यते ॥ २८ ॥ नाकेनवग्रहाःसंतिदेशास्तस्याऽनवग्रहाः ॥ २९ ॥ हिरण्यगर्भःस्वर्लोकेप्येकएवप्रकाशते ॥ हिरण्यगर्भाःसर्वेषांतत्पौराणामिहालयाः ॥ ३० ॥ सप्ताश्वएकःस्वर्लोकेनितरांभासतेंऽशुमान् ॥ सदंशुकाःप्रतिदिनंबह्वश्वास्तत्पुरौकसः ॥ ३१ ॥ सदप्सरायथास्वर्भूस्तत्पुर्यपिसदप्सराः ॥ एकैवपद्मावैकुंठेतस्यपद्माकराःशतम् ॥ ॥ ३२ ॥ अनीतयश्चतद्ग्रामानाराजपुरुषाःक्वचित् ॥ गृहेगृहेत्रधनदानाकएकोऽलकापतिः ॥ ३३ ॥ दिवोदासस्यतस्यैवंकाश्यांराज्यंप्रशासतः ॥ गतंवर्षदिनप्रायंशरदामयुताष्टकम् ॥ ३४ ॥ गीर्वाणाविप्रतीकारमथतस्यचिकीर्षवः ॥ गुरुणामंत्रयांचक्रुर्धर्मवर्त्मानुयायिनः ॥३५॥ भवादृशामिवमुनेप्रायशोधर्मचारिणाम् ॥ विबुधाविदधत्येवमहतीरापदांततीः ॥३६॥ यद्यप्यसौधराधीशोव्याधिनोद्दुर्धराध्वरैः ॥ तानध्वरभुजोऽत्यंततथापिसुहृदोनते ॥ ३७ ॥ स्वभावएवह्युसदांपरोत्कर्षासहिष्णुता ॥ बलिबाणदधीच्याद्यैरपराद्धंकिमत्रतैः ॥३८॥ अंतरायाभवंत्येवधर्मस्यापिपदेपदे ॥ तथापिननिजोधर्मोधर्मधीभिर्विमुच्यते ॥ ३९ ॥ अधर्मिणःसमेधंतेधनधान्यसमृद्धिभिः ॥ अधर्मादेवचपरंसमूलंयांत्यधोगतिम् ॥ ४० ॥ प्रजाःपालयतस्तस्यपुत्रानिवनिजौरसान् ॥ रिपुंजयस्यनाल्पोपिबभूवाधर्मसंग्रहः ॥४१॥ षाड्गुण्यवेदिनस्तस्यत्रिशक्त्यूर्जितचेतसः ॥ चतुरोपायवित्तस्यनरंध्रंविविदुःसुराः ॥ ४२ ॥

दिवोदासस्येति ॥ तस्यपूर्वोक्तगुणवतःशरदामयुताष्टकमशीतिसहस्रंवर्षदिनप्रायंदिनमात्रप्रायंगतमेव ॥ एकदिनप्रायमितिक्वचित् ॥ ३४ ॥ विप्रतीकारमपकारम् ॥ गुरुणाबृहस्पतिनासह ॥ ॥ ३५ ॥ प्रत्यक्षसिद्धदृष्टांतमाह ॥ भवादृशामिवेति ॥ ततीःपरंपराः ॥३६॥ व्याधिनोत्आराधितवान्पूजितवानित्यर्थः ॥ सुहृदोनतस्येतिशेषः ॥ ३७ ॥ पूजकेऽसुहृद्भावेहेतुमाह ॥ स्वभावइति ॥ हेतुमेवतर्केणसाधयति ॥ बलीति ॥ अत्रतेषुदेवेषु ॥ ३८ ॥ तर्हिविघ्नशंकयाधर्मस्त्याज्यएवनेत्याह ॥ अंतरायाइति ॥ श्रेयांसिबहुविघ्नानीतिन्यायादित्यर्थः ॥ ३९ ॥ विपक्षेबाधकमाह ॥ अधर्मिणइति ॥ परंकेवलंपश्चादितिवा ॥ ४० ॥ ४१ ॥ षाड्गुण्यवेदिनइति ॥ संधिविग्रहयानासनद्वैधीभावसंश्रयाःषड्गुणास्तेषांभावःषाड्गुण्यंतद्वेदिनः ॥ बुद्धिबलतेजोरूपास्तिस्रःशक्तयस्ताभिरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्जितंमहत्तरंचेतोयस्यतस्य ॥ चतुर्णांधर्मार्थकाममोक्षाणामुपायेषुवित्तंज्ञानंयस्यतस्य ॥ वेदनंवित्तम्॥भवेनिष्ठा॥उकारस्थानेओकारश्रवणमार्षम् ॥ चतुराणांनिपुणानामुपायानांवित्तंयस्येतिवा॥४२॥ विप्रतीकर्तुमपकर्तुम् ॥ तदीशितुःकाशीपतेर्दिवोदासस्येत्येतत् ॥ सचासौईशिताचतत्तदेतिवा ॥ ४३ ॥ पुनरपितद्राष्ट्रगुणाननुवर्णयति एकपत्नीत्यारभ्यइत्थमित्यतःप्राक्तनेनग्रंथेन ॥ एकस्यां पत्न्यांपाणिगृहीतायांव्रतंसंकल्पोयेषांतेतथा ॥ परस्त्रीषुविमुखाइत्यर्थः ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ वनवृत्तिकृतादराःवनवृत्तावरण्यवर्तनेकृतआदरोयैस्ते ॥ ४९ ॥ ५० ॥ अनुलोमजन्मानःमूर्धावसिक्तांवष्ठकरणाः ॥ प्रतिलोमभवाःसूतमागधवैदेहाः ॥ ५१ ॥ ५२ ॥ चाटाश्चंचलाः ॥ वाचाटाबहुभाषिणः ॥ भंडाभंडकाः ॥ शौंडिकामद्यविक्रेतारः ॥ ५३ ॥

बुद्धिमंतोपिविबुधाविप्रतीकर्तुमुद्यताः ॥ मनागपिनसंशेकुरपकर्तुंतदीशितुः ॥ ४३ ॥ एकपत्नीव्रताःसर्वेपुमांसस्तस्यमंडले ॥ नारीषुकाचिन्नैवासीदप तिव्रतधर्मिणी ॥ ४४ ॥ अनधीतोनविप्रोभूदशूरोनैवबाहुजः ॥ वैश्योनभिज्ञोनैवासीदर्थोपार्जनकर्मसु ॥४५॥ अनन्यवृत्तयःशूद्राद्विजशुश्रूषणंप्रति ॥ तस्यराष्ट्रेसमभवन्दिवोदासस्यभूपतेः ॥ ४६ ॥ अविप्लुतब्रह्मचर्यास्तद्राष्ट्रेब्रह्मचारिणः ॥ नित्यंगुरुकुलाधीनावेदग्रहणतत्पराः ॥ ४७ ॥ आतिथ्यधर्म प्रवणाधर्मशास्त्रविचक्षणाः ॥ नित्यंसाधुसमाचारागृहस्थास्तस्यसर्वतः ॥ ४८ ॥ तृतीयाश्रमिणोयस्मिन्वनवृत्तिकृतादराः ॥ निःस्पृहाग्रामवार्तासुवे दवर्त्मानुसारिणः ॥ ४९ ॥ सर्वसंगविनिर्मुक्तानिर्मुक्तानिष्परिग्रहाः ॥ वाङ्मनःकर्मदंडाढ्यायतयोयत्रानिःस्पृहाः ॥ ५० ॥ अन्येनुलोमजन्मानःप्रतिलो मभवाअपि ॥ स्वपारंपर्यतोदृष्टंमनाग्वर्त्मनतत्यजुः ॥ ५१ ॥ अनपत्यानतद्राष्ट्रेधनहीनोपिकोपिन ॥ अवृद्धसेवीनोकश्चिदकांडमृतिभाक्वचन ॥ ५२ ॥ नचाटानैववाचाटावंचकानोनहिंसकाः ॥ नपाषंडानवैभंडानरंडानचशौंडिकाः ॥५३॥ श्रुतिघोषोहिसर्वत्रशास्त्रवादःपदेपदे ॥ सर्वत्रसुभगालापासुदामं गलगीतयः ॥ ५४ ॥ वीणावेणुप्रवादाश्चमृदंगामधुरस्वनाः ॥ सोमपानंविनान्यत्रपानगोष्ठीनकर्णगा ॥५५॥ मांसाशिनःपुरोडाशेनैवान्यत्रकदाचन ॥ नदुरोदरिणोयत्रनाधमर्णानतस्कराः ॥ ५६ ॥ पुत्रस्यपित्रोःपदयोःपूजनंदेवपूजनम् ॥ उपवासोव्रतंतीर्थंदेवताराधनंपरम् ॥ ५७ ॥ नारीणांभर्तृपद योरर्चनंतद्वचःश्रुतिः ॥ समर्चयंतिसततंमनुजानिजमग्रजम् ॥ ५८ ॥ सपर्ययंतिमुदिताभृत्याःस्वामिपदांबुजम् ॥ हीनवर्णैरग्रवर्णोवर्ण्यतेगुणगौरवैः ॥ ॥ ५९ ॥ वरिवस्यंतिभूयोपित्रिकालंकाशिदेवताः ॥ सर्वत्रसर्वेविद्वांसःसमर्च्यंतेमनोरथैः ॥ ६० ॥

श्रुतिघोषोवेदघोषः ॥ पदेपदेक्षणेक्षणे ॥ ५४ ॥ सोमेति॥ सोमपानंविनाऽन्यत्रपानगोष्ठीमद्यादिपानवार्तानकर्णगाश्रोत्रेंद्रियंनप्राप्तेत्यर्थः॥ कर्मगाइतिपाठेकर्मणिक्रियमाणेनजायतइत्यर्थः ॥ ५५ ॥ यज्ञस्यप्रथमसमयेपुरोडाशेऽग्निपक्वेमांसखंडेहूयमानेमांसाशिनः ॥ अन्यत्रपुरोडाशंविहायनैवेत्यर्थः ॥ दुरोदरिणोद्यूतकराः ॥ अधमर्णःऋणग्रहीता ॥ ५६ ॥ ५७ ॥ अग्रजंज्येष्ठभ्रातरम् ॥ ५८ ॥ सपर्ययंतिपूजयंति ॥ ५९ ॥ वरिवस्यंतीत्येतस्यापिसएवार्थः ॥ काशिदेवताःकाशींतद्देवताश्चेत्यर्थः ॥ भूमिदेवताइतिपाठेब्राह्मणानित्यर्थः ॥ समर्च्यंतेपूज्यंतेसाधारणैर्जनैः ॥ अस्याःक्रियाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्रेपिसंबंधः ॥ ६० ॥ शिवयोगिनःशिवैकशरणाः ॥ पाशुपताइतिकेचित् ॥ ६१ ॥ वाडवानांब्राह्मणानाम् ॥६२॥६३॥ मृगयुसौनिकान्मृगयवोलुब्धकाःसौनिकाःपशुघातकाश्चतान् ॥६४॥ इत्थमिति ॥ इत्थंतस्यसमनंतरवर्णितंगुणवतोदिवोदासस्यमहीजानेर्महीजायाभार्यायस्यसतथातस्यसर्वत्रशुचिरूपेणप्रवर्तमानस्य ॥ अनिमिषानिमेषरहितादेवाउन्मिषंतोपिउच्चैर्मिषंतोप्युन्मेषपूर्वकं विचारयंतोपीत्यर्थः ॥ ईषदप्यवकाशंछिद्रंनलेभिरेइति ॥ ६५ ॥ अथेति ॥ अपचिकीर्षुकानपकारंकर्तुमिच्छुकान् ॥ मंत्रवेदिषुमध्येवरिष्ठे ॥ ६६ ॥ संधिश्चविग्रहश्चयानंचआसनंचसं श्रयंचेतिपंचानामेकवद्भावः ॥ ६७ ॥ चतुर्षुसामदानभेददंडेषुमध्ये ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ समाकर्ण्येतिसार्धंवाक्यंबृहस्पतीरितंवाक्यंसमाकर्ण्यतेदेवास्तस्माद्देवाक्यात्तस्यवाक्य

विद्वद्भिश्चतपोनिष्ठास्तपोनिष्ठैर्जितेंद्रियाः ॥ जितेंद्रियैर्ज्ञाननिष्ठाज्ञानिभिःशिवयोगिनः ॥ ६१ ॥ मंत्रपूतंमहार्हंचविधियुक्तंसुसंस्कृतम् ॥ वाडवानां मुखाग्नौचहूयतेऽहर्निशंहविः ॥ ६२ ॥ वापीकूपतडागानामारामाणांपदेपदे ॥ शुचिभिर्द्रव्यसंभारैःकर्तारोयत्रभूरिशः ॥ ६३ ॥ यद्राष्ट्रेहृष्टपुष्टाश्चदृश्यं तेसर्वजातयः ॥ अनिंद्यसेवासंपन्नाविनामृगयुसौनिकान् ॥ ६४ ॥ इत्थंतस्यमहीजानेःसर्वत्रशुचिवर्तिनः ॥ उन्मिषंतोप्यनिमिषामनाक्छिद्रंनलेभिरे ॥ ६५ ॥ अथोवाचामरगुरुर्देवानपचिकीर्षुकान् ॥ तस्मिन्राजनिधर्मिष्ठेवरिष्ठेमंत्रवेदिषु ॥६६॥ ॥ गुरुरुवाच ॥ ॥ संधिविग्रहयानास्तिसं श्रयंद्वैधभावनम् ॥ यथासराजासंवेत्तिनतथात्रापिकश्चन ॥ ६७ ॥ उपायोप्येकएवास्तिचतुर्ष्विहदिवौकसः ॥ भेदोनामसचेत्तिसिध्येत्तपोबलिनित त्राहि ॥६८॥ तेनयद्यपिभूभर्त्राभूमेर्देवाविवासिताः ॥ तथापिभूरिशस्तत्रसंत्यस्मत्पक्षपातिनः ॥ ६९ ॥ कालोनिमिषमात्रोपियान्विनानसुखंव्रजेत् ॥ अस्माकमपितस्याप्सिंतितेतत्रमानिताः ॥ ७० ॥ अंतर्बहिश्चरानित्यंसर्वविश्रंभभूमयः ॥ समागतेषुतेष्वत्रसर्वंनःसेत्स्यतिप्रियम् ॥ ७१ ॥ समा कर्ण्यचतेसर्वेत्रिदशागीष्पतीरितम् ॥ निर्णीतवंतस्तस्यार्थंतस्मादंतर्बहिश्चरान् ॥ अभिनंद्याथतंसर्वेप्रोचुरित्थंभवेदिति ॥ ७२ ॥ ततःशक्रःसमाहूयवी तिहोत्रंपुरःस्थितम् ॥ ऊचेमधुरयावाचाबहुमानपुरःसरम् ॥ ७३ ॥ हव्यवाहनयामूर्तिस्तवतत्रप्रतिष्ठिता ॥ तासुपासंहरक्षिप्रंविषयात्तस्यभूपतेः ॥ ॥ ७४ ॥ समागतायांतन्मूर्तौसर्वानष्टाग्नयःप्रजाः ॥ हव्यकव्यक्रियाशून्याविरजिष्यंतिराजनि ॥ ७५ ॥ प्रजासुचविरक्तासुराज्यकामदुघासुवै ॥ कृच्छ्रेणोपार्जितोऽपार्थोराजशब्दोभविष्यति ॥ ७६ ॥ प्रजानांरंजनाद्राजायेयंरूढिरुपार्जिता ॥ तस्यांरूढ्यांप्रनष्टायांराज्यमेवविनंक्ष्यति ॥ ७७ ॥ प्रजाविरहितोराजाकोशदुर्गबलादिभिः ॥ समृद्धोप्यचिरान्नश्येत्कूलसंस्थइवद्रुमः ॥ ७८ ॥ त्रिवर्गसाधनाहेतुःप्राक्प्रजैवमहीपतेः ॥ क्षीणवृत्त्यां प्रजायांवैत्रिवर्गःक्षीयतेस्वयम् ॥ ७९ ॥

स्यार्थंनिर्णीतवंतः ॥ अर्थमेवाह ॥ अंतर्बहिश्चरानिति ॥ अथानंतरमभिनंद्यइत्थंभवेदितिप्रोचुः ॥ यदाह्यंतरितिपाठेतदेत्यर्थात् ॥ ७२ ॥ वीतिहोत्रमग्निम् ॥ ७३ ॥ हव्येति ॥ तत्रपृथिव्याम् ॥ तांमत्तइतिपाठेमत्तोमन्निमित्तान्मद्गौरवादित्यर्थः ॥ ७४ ॥ ततःकिंतदाह ॥ समागतायामिति ॥ ७५ ॥ ततोपिकिंतत्राह ॥ प्रजास्विति ॥ अपार्थोऽपगतोऽर्थोस्येत्यपार्थोर्थशून्यइत्यर्थः ॥ ॥ ७६ ॥ अस्तुतथातावताकिंस्यात्तत्राह ॥ प्रजानामिति ॥ ७७ ॥ मास्तुप्रजानामनुरागस्तावताकिम् ॥ यद्वा राज्यनाशेपिकिंतत्राह ॥ प्रजेति ॥ ७८ ॥ किंच त्रिवर्गेति ॥ साधनाइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीत्वमार्षम् ॥ त्रिवर्गसाधनेआहेतुःसम्यग्घेतुरितिवा ॥ त्रिवर्गसाधयतीतित्रिवर्गसाधनाऽतएवहेतुरितिवा ॥ साधनइतिपाठेस्पष्टएवार्थः ॥ ७९ ॥ प्रघट्टकार्थमुपसंहरति क्षीणइत्यर्धेन ॥ ८० ॥
अह्नायशीघ्रम् ॥ तथेतिस्वीकृत्येतिवा ॥ अव्ययोयंशब्दःमूर्तिंतैजसीम् ॥ ८१ ॥ त्रेतामाहवनीयगार्हपत्यदक्षिणाग्निरूपामित्यर्थः ॥ निजशक्तिःपाकार्हाणामन्नादीनांदाहिकाशक्तिस्तत्समन्वितम् ॥
॥ ८२ ॥ ८३ ॥ महानसेऽधिकृतिरधिकारोवर्ततेयेषांतेतथापाकशालाधिकारिणइत्यर्थः ॥ क्षुधार्तमपितस्मिन्समयेविज्ञापनानर्हमपीत्यर्थः ॥ अतएवाप्यकांडइतिवक्ष्यति ॥ व्यजिज्ञपन्विज्ञापया
मासुः ॥ ८४ ॥ अत्येतिश्लोकद्वयंवाक्यम् ॥ अत्यतिक्रांतमहस्करस्यसूर्यस्यतेजोयेनतत्संबोधनंहेअत्यहस्करतेजस्क ॥ अकांडेऽनवसरेपि ॥८५॥ विश्राणयेत्प्रयच्छेत् ॥ ८६॥८७ ॥ कुसृत्याथक

क्षीणेत्रिवर्गेसंक्षीणागतिर्लोकद्वयात्मिका ॥ ८० ॥ इतींद्रवचनाद्वह्निरह्नायक्षोणिमंडलात् ॥ आचकर्षनिजांमूर्तिंयोगमायाबलान्वितः ॥ ८१ ॥ निन्ये नकेवलंत्रेतांजाठराग्निमपिप्रभुः ॥ वज्रिणोवचसावह्निर्निजशक्तिसमन्वितम् ॥ ८२ ॥ वह्नौस्वर्लोकमापन्नेजातेमध्यंदिनेनृपः ॥ कृतमाध्याह्निकस्तूर्णं प्राविशद्भोज्यमंडपम् ॥ ८३ ॥ महानसाधिकृतयोवेपमानास्ततोमुहुः ॥ क्षुधार्तमपिभूपालमिदंमंदंव्यजिज्ञपन् ॥ ८४ ॥ सूपकाराऊचुः ॥ अत्यहस्क रतेजस्कप्रतापविजितानल ॥ किंचिद्विज्ञप्तुकामाःस्मोप्यकांडेरणपंडित ॥ ८५ ॥ यदिविश्राणयेद्राजन्भवानभयदक्षिणाम् ॥ तदाविज्ञापयिष्यामः प्रबद्धकरसंपुटाः ॥ ८६ ॥ भ्रूसंज्ञयाकृतादेशाःप्रशस्तास्येनभूभुजा ॥ मृदुविज्ञापयांचक्रुःपाकशालाधिकारिणः ॥ ८७ ॥ नजानीमोवयंनाथत्वत्प्रता पभयार्दितः ॥ कुसृत्याथकयाविद्वान्नष्टोवैश्वानरःपुरात् ॥ ८८ ॥ कृशानौकृशतांप्राप्तेकथंपाकक्रियाभवेत् ॥ तथापिसूर्यपाकेनसिद्धापक्तिर्हिकाचन ॥ ८९ ॥ प्रभोरादेशमासाद्यतामिहैवानयामहे ॥ मन्यामहेचभूजानेपक्तिरद्यतनीशुभा ॥ ९० ॥ श्रुत्वांधसिकवाक्यंसमहासत्त्वोमहामतिः ॥ नृप तिश्चिंतयामासदेवानांवैकृतंत्विदम् ॥ ९१ ॥ क्षणंसंशीलयंस्तत्रददर्शतपसोबलात् ॥ नकेवलंजहौगेहंहुतभुक्चौदरीर्दरीः ॥ ९२ ॥ अप्यहासीदितोलो कान्नगामचसुरालयम् ॥ भवत्विहहिकाहानिरस्माकंज्वलनेगते ॥ ९३ ॥ तेषामेवविचाराच्चहानिरेषासुपर्वणाम् ॥ तद्बलेनचकिंराज्यंमयेदमुररीकृतम् ॥ ९४ ॥ पितामहेनमहतोगौरवात्प्रतिपादितम् ॥ इतिचिंतयतस्तस्यमध्यलोकशतक्रतोः ॥ ९५ ॥ पौराःसमागताद्वारिसहजानपदैर्नरैः ॥ द्वास्थे नचाज्ञयाराज्ञस्ततस्तेंतःप्रवेशिताः ॥ ९६ ॥

याकयापिकुसृत्येत्यर्थः ॥ अविद्वान्मूर्खःतवमहिमानमजानन्नितिवा ॥ ८८ ॥ कृशानौवह्नौकृशतांक्षीणतांनाशमितिवा ॥ ८९ ॥ मन्यामहइत्यर्धंवाक्यम् ॥ दिनांतरेवह्निपाकेनयापक्तिस्तस्याःसका
शात्सूर्यपाकेनजाताऽद्यतनीपक्तिःशुभोत्कृष्टेतिवयंमन्यामहइत्यर्थः ॥ ९० ॥ अंधसान्नेनव्यवहरंतीत्यांधसिकाःपाककर्तारस्तेषांवाक्यम् ॥ विरुद्धाकृतिर्विकृतिस्तस्याजातंवैकृतमिदंगेहादग्नेर्गमनम् ॥
वैइतिपृथक्पदम् ॥ कृतंकर्म ॥९१॥ क्षणमितिसार्धश्लोकंवाक्यम् ॥ संशीलयन्ध्यायन् ॥ गेहंपाकादिगृहम् ॥ औदरीरुदरसंबंधिनीर्दरीर्गुहाश्चेतिचकारस्यान्वयः ॥९२॥९३॥ विचाराद्यज्ञाद्यकरणे
नतेषामेवक्षतेः ॥ सुपर्वणांदेवानाम् ॥ तद्बलेनदेवानांबलेन ॥ उररीकृतंस्वीकृतम् ॥९४॥ महतासर्वोत्तमेन ॥ महतइतिपाठेगौरवविशेषणम् ॥ मध्यलोकशतक्रतोःधरातलेंद्रस्य ॥ ९५ ॥ पौराःपुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबंधिनः ॥ जानपदैर्देशस्थैः॥९६॥ उपसमीपेदीयतइत्युपदमुपढौकनम्॥ उपदामितिपाठेपिसएवार्थः॥आदरस्यसोदरयासमानगर्भया दरसोदरयाशंखध्वनितुल्पयेतिवा॥९७॥समुदाहर्षसहितया ॥ विसर्जितेतिश्लोकद्वयंवाक्यम् ॥ ९८ ॥ तेपौरजानपदाभेजिरेधिष्ठिताआसनानीत्यर्थः ॥ विसर्जितासनाइतिपूर्वमुक्तत्वात् ॥ क्कत्रअजिरेप्रांगणे ॥ अजिरंविशिनष्टि रत्नार्चिरितिसपादेनश्लोकेन ॥ सुरानोकहसौरभैःसुरद्रुमामोदैःकृत्वाविजितामोदसंदोहेतिरस्कृता न्यगंधसमूहे ॥ यद्वा ते अन्तःप्रवेशिताइत्युक्तंतदेवान्तःपुरंविशिनष्टि ॥ रत्नार्चिरिति ॥ शेषंसमानम् ॥ अभेअजिरेइतिवापदच्छेदः ॥ नविद्यतेभादीप्तिर्यस्मात्तस्मिन्नत्युज्ज्वलेइत्यर्थः ॥ भेजिरेभेजिरेइतिपाठोयद्यप्यपपाठस्तथापिव्याख्यायते ॥ भेजिरेशिरसाभिवन्दनात् ॥ अभेजिरेइतिच्छेदः ॥ अशब्दोनिषेधे ॥ नभेजिरे साक्षादनधिष्ठितत्वात् ॥ ९९ ॥ विशामिति ॥ विशांपतिःराजातदभिप्रायंतेषांपौरादीनामभिप्रायंज्ञात्वोवाच ॥ अभिप्रायज्ञानेहेतुगर्भंविशेषणमाह ॥ तन्मुखच्छाययेरितंतेषांमुखकांत्यासूचि

दत्त्वोपदंयथार्हंतेप्रणेमुःक्षोणिवज्रिणम् ॥ केचित्संभाषिताराज्ञादरसोदरयागिरा ॥ ९७ ॥ केचिच्चसमुदादृष्ट्याकेचिच्चकरसंज्ञया ॥ विसर्जितासनाराज्ञा बहुमानपुरःसरम् ॥ ९८ ॥ तेजिरेभेजिरेसर्वेरत्नार्चिःपरिसेविते ॥ विजितामोदसंदोहेसुरानोकहसौरभैः ॥ राज्ञःशतशलाकस्यच्छत्रस्यच्छाययाशुभे ॥ ९९ ॥ विशांपतिरथोवाचतन्मुखच्छाययेरितम् ॥ विज्ञायतदभिप्रायमलंभीत्यापुरौकसः ॥ १०० ॥ विकारकारिभिर्लेखैर्यदिनीतोऽनलोभुवः ॥ एतावतैवाकिंसिद्ध्येन्मयितेषांपराभवः ॥ १ ॥ चिकीर्षुरहमेवासंपौराःकार्यमिदंपुरा ॥ परंह्युपेक्षितप्रायंदिष्ट्यातैःस्मारितंचिरात् ॥ २ ॥ गतोऽनलोऽभवद्द्रद्रंजगत्प्राणोपियात्वितः ॥ वरुणःपुष्पवंताभ्यामविलंबंप्रयात्वितः ॥ ३ ॥ अहमेवहिपर्जन्योभविष्यामितपोबलात् ॥ मुदेजनपदानांचसर्वसस्यसमृद्धिदः ॥ ४ ॥ तपोयोगबलेनाहमात्मानंपरिकल्प्यच ॥ त्रिधावह्निस्वरूपेणपक्तीष्टिव्युष्टिकृत्तमः ॥ ५ ॥ अंतर्बहिश्चयोद्वेधानभस्वत्पदवींदधत् ॥ सर्वेषामेववेत्स्यामित्वंतःकरणचेष्टितम् ॥ ६ ॥ विधायचांभसींमूर्तिंसर्वजीवैकजीवनीम् ॥ प्रजाःसंजीवयिष्यामिकिंजडैर्विषयेमम ॥ ७ ॥ यदाखेतमसापौराग्रस्येतेशशिभास्करौ ॥ तदानांकिंविनाताभ्यांजीवामःक्षितिमंडले ॥ ८ ॥ श्रियंचांद्रमसींप्राप्यह्लादयिष्याम्यहंप्रजाः ॥ निशाचरेणकिमिहक्षयिणाचकलंकिना ॥ ९ ॥

तम् ॥ किमुवाचतदाह ॥ अलम्भीत्योति ॥ १०० ॥ विकारकारिभिरपकारकारिभिर्लेखैर्देवैः ॥ तेषांपराभवस्तैःकृतोभिभवइत्यर्थः ॥ १ ॥ स्मारितन्तुतदितिवापाठः ॥ २ ॥ जगत्प्राणोवायुः ॥ पुष्पवन्ताभ्यांचन्द्रसूर्याभ्यांसह ॥ ३ ॥ पर्जन्यइन्द्रः ॥ ४ ॥ पक्तीष्टिव्युष्टिकृत्तमःपाकयज्ञदाहकृत्तमः ॥ तत्रपाकोमहानसादौ यज्ञोऽग्निहोत्रादिरूपः दाहःशीतापनयनादौ ॥ ५ ॥ अन्तरिति ॥ अन्तर्वहिश्चयोद्वेधावर्ततेतस्यनभस्वतोवायोःपदवींदधत्सन्नित्यर्थः ॥ अन्तर्वहिश्चरइतिपाठेअन्तर्वहिश्चरोद्वेधाभूत्वानभस्वतोवायोःपदवींदधत्सन्नित्यर्थः ॥ ६ ॥ आम्भसींजलाधिष्ठात्रींवारुणीमित्यर्थः ॥ जडैर्जाड्यगुणयुक्तैर्जलैरित्यर्थः ॥ जडैर्जलैरितिवाडलयोरेकत्वात् ॥ ७ ॥ यदेति ॥ खेआकाशे ॥ अग्रइतिपाठेअग्रेसंमुखेप्रत्यक्षमित्यर्थः ॥ तमसाराहुणानैहारादिरूपेणांधकारेणवा ॥ पौराइतिप्राधान्यात्केषांचित्सम्बोधनम् ॥ ८ ॥ निशाचरेणचन्द्रेण ॥ शब्दच्छलेनराक्षससादृश्यंध्वनितम् ॥ किंचक्षयिणादक्षशापात्क्षयरोगवता ॥ कलंकिनागुर्वंगनागमनकलंकव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताच॥ ९ ॥ एवंसामान्यतःकोपावेशेनसर्वेषामेवस्वाविषयाद्गमनमनुज्ञायपश्चाद्विमृश्यकस्याचिदन्यथयाति ॥ अस्मादिति ॥ ११० ॥ ननुतथाभूतोपिसयद्यनिष्टकारीतर्हिकथंस्थापनीयस्तत्राह ॥ सएकइति ॥ सर्वेषामात्मत्वाद्विशेषात्कुलदैवतत्वाच्चसोऽपकर्तुंनजानात्येव ॥ किंचतस्येदमपकारकरणाज्ञानमुत्तमंव्रतंपरमःसंकल्पः ॥ ११ ॥ इतीति ॥ पौरवर्गइत्युपलक्षणम् ॥ आधिमुक्तचित्तोमानस्याव्यथयाराहितांतःकरणः ॥ १२ ॥ क्षितिपतिरिति ॥ तदग्न्यादिकर्म ॥ तथापूर्ववत् ॥ अतिवह्नचर्कंवह्नचर्कौअतिक्रम्यवर्ततइत्यतिवह्नचर्कम् ॥ द्युसदांदेवानाम् ॥ शल्यंकीलकंहृदीतिशेषः॥ ॥ ११३ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांत्रिचत्वारिंशोध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ चतुर्भिरधिकेचत्वारिंशकेध्यायउत्तमे ॥ विश्वेशविरहांतस्थंकाशीवर्णनमुच्यते ॥ ॥ १ ॥ कथमागाच्चमंदरादितिप्रश्नस्योत्तरंवक्ष्यन्त्रागमनकारणंकाशीवियोगजातमानन्दाभावमीश्वरस्यदर्शयाति ॥ अथेति ॥ श्लोकद्वयंवाक्यम् ॥ अथबहुकालस्थित्यनन्तरंशंकरःशर्मसुखंनलभते स्मनालभत॥ किंकुर्वन् ॥ निवसन्निवासंकुर्वन्॥ क्व मन्दरस्यपर्वतस्यकन्दरोदरेउल्लसंतिउच्चरंतिस्फुरन्तीतियावत्॥असमद्युतीनिनिविद्यतेसमानाद्युतिःकांतिर्येषांतानिरत्नानियस्मिंस्तन्मंदरकंदरोदरोल्ल

अस्मत्कुलेमूलभूतोभास्करोमान्यएवनः ॥ सतिष्ठतुसुखेनात्रयातायातंकरोतुच ॥ ११० ॥ सएकोजगतामात्माविशेषात्कुलदेवता ॥ सोपकर्तुंनवेत्त्येवतस्येदंव्रतमुत्तमम् ॥ ११ ॥ इतिनरपतिवाक्सुधारसौघंश्रुतिपुटकैःपरिपीयपौरवर्गः ॥ विकसितवदनांबुजोजगामनिजनिजमालयमाधिमुक्तचित्तः ॥ १२ ॥ क्षितिपतिरपितत्तथाविधायतपसोसाध्यमिहास्तिकिंत्रिलोक्याम् ॥ अतिवह्नचर्कमसौदधच्चतेजोद्युसदांशल्यमिवोच्चकैर्बभूव ॥ १३ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेदिवोदासप्रतापवर्णनंनामत्रिचत्वारिंशोध्यायः ॥४३॥ ॥ स्कंदउवाच ॥ अथमंदरकंदरोदरोल्लसदसमद्युतिरत्नमंदिरे ॥ परितःसमधिष्ठितामरेनिजशिखरैर्वसनीकृतांबरे ॥ १ ॥ निवसञ्जगदीश्वरोहरःकृशरजनीशकलामनोहरः ॥ लभतेस्मनशर्मशंकरःप्रसरत्काशिवियोगजज्वरः ॥ २ ॥ विरहानलशांतयेतदासमलेपित्रिपुरारिणापियः ॥ मलयोद्भवपंकएषसप्रतिपेदेह्यधुनापिपांसुताम् ॥ ३ ॥ परितापहराणिपद्मिनीनांमृदुलान्यपिकंकणीकृतानि ॥ गदितानियदीश्वरेणसर्पास्तदभूत्सत्यमहोमहेश्वरेच्छा ॥ ४ ॥ यदुदुग्धनिधिंनिमथ्यदेवैर्मृदुसारःसमकर्पिपूर्णचंद्रः ॥ सबभूवकृशोवियोगतप्तेश्वरमूर्धोष्मपरिक्षरच्छरीरः ॥ ५ ॥

सदसमद्युतिरत्नंतच्चतन्मंदिरंचेतितस्मिन् ॥ परितःसर्वतःसम्यगधिष्ठिताअमरायस्मिन् ॥ वसनीकृतंवस्त्रीकृतमंबरंयस्मिन् अत्युच्चेइत्यर्थः ॥ १ ॥ जगदीश्वरस्यप्रलयकालेसर्वहरस्यबालचन्द्रकलया मनोहरस्यापि ॥ शर्मालभनेहेतुमाह ॥ प्रसरदिति ॥ प्रसरन्त्रुद्रच्छन्काशीवियोगजोज्वरोयस्यसः ॥ २ ॥ भगवद्गात्रसंलग्नंपांसुमुत्प्रेक्षमाणःकाशीविरहज्वरस्यतीव्रतामाह ॥ विरहेति॥ तदात्रिपुरहरेणविरहाग्निशान्त्यर्थंसचन्दनरसःस्वगात्रेसम्यक्अलेपिलिप्तःसएवाधुनापिपांसुतांधूलितांभस्मतांवाप्रतिपेदेप्रापेत्यर्थः॥ ३॥भगवद्गात्रस्थिताःसर्पाउत्प्रेक्ष्यंते॥परितापेति ॥ कंकणीकृतानियानिपद्मिनीनांमृणालानिइतिशेषः॥कथंभूतानि॥ परितापहराणिमृदुलानिकोमलान्यपितानियद्यस्मात्सर्पाइतिईश्वरेणगदितानितत्तस्मात्कारणात्सत्यंयथास्यात्तथातान्येवसर्पाःअभूवन्नित्यर्थः॥ ईश्वरेणसर्पाइतिगदितानियत्तत्तदनमेवसत्यमभूदितिवा ॥ अहोखेदेआश्चर्येवा ॥ तत्रहेतुमाह ॥ महेश्वरेच्छेति ॥ तदुक्तंविषमप्यमृतंक्वचिद्भवेदमृतंवाविषमीश्वरेच्छयेति ॥ ४ ॥ यद्दुग्धनिधिमिति ॥ यत्पयःउविस्मये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवैर्दुग्धनिधिंनिमथ्यमृदुसारःशितलःपूर्णचन्द्रःसमकर्षिआकृष्टउद्धृतइतियावत् ॥ सकृशःकलामात्रावशिष्टोवभूव ॥ तत्रहेतुगर्भविशेषणमाह ॥ काशीवियोगतप्तस्यईश्वरस्यमस्तकेतापेनक्षीणशरीरः ॥ ५ ॥ यद्दीधरदिति ॥ यद्यतएषहरःकाशीवियोगाज्जाततापःसंस्तदानींपरितापहरांद्युनदींमौलिजटाएवनिकुञ्जस्तस्यकोणेविस्तीर्णेदधारततएवहेतोरधुनापितांनोज्जहीतेनत्यजति ॥ यत्रयामितिवा ॥ ६ ॥ महतइति ॥ तस्यमहतोविरहस्यशंकरोवश्यपिवशंगतःसन्सभास्थैरपिसुरैर्नविविदेनज्ञातः ॥ तत्रहेतुगर्भविशेषणमाह ॥ संवीतसुतापवेष्टितःअप्रकटात्यन्तततापव्याप्तः ॥ काशीविरहजन्यत्वमेवतापस्यशोभनत्वम् ॥ ७ ॥ अतिचित्रमिति ॥ इदमतिचित्रम् ॥ किंतत् ॥ जगत्त्रयेश्वरोपिशुचिःपवित्रोपि ॥ यद्वा प्रलयकालेसर्वसन्तापकोपिसंकर्षणमुखानलेत्थकालाग्निरुद्ररूपत्वात्परिताप्येतेतियत् ॥ परितप्येतेतिक्वचित् ॥ केन ॥ कृपीटयोनिनावह्निना ॥ कथंभूतेन ॥ आत्मनास्वस्यैवमूर्त्या ॥ अष्टमूर्तित्वान्महेश्वरस्य ॥ पुनःकथंभूतेन ॥ काशीवियोगादुत्थितेन ॥ ८ ॥ निजभालतलमिति॥ यस्यकलानिधेश्चन्द्रस्यकलयारेखयायईश्वरोनिजभालतलमलंकरोतिसकलानिधिःतदीश्वरमपिसचासावीश्वरश्चेतितदीश्वरस्तमप्यतापयत्संतप्तंचकारअतएकएवविधुर्विपरीतः ॥ त्वित्याश्चर्ये ॥ कलानिधिरितिपाठेतस्येत्यर्थात् ॥ ९ ॥ गरलमिति ॥ एतदद्भुतम् ॥ किंतत् ॥ अस्यगलनालिकातलेकण्ठेगरलंकालकूटंविलसेत्स्फुरेत्तेनायंनतापितस्तापंनप्रापितः ॥ अमृतांशुतुषारदीधितिप्रचयैश्चन्द्रशीतलरश्मिसमूहैस्त्वेषतापितइति ॥ १० ॥ अन्यच्चाद्भुतंशृण्वित्याह ॥ विलसदिति ॥ तद्विरहापनुत्तयेकाश्याविरहनाशायहृदयाहितयावक्षःस्थलार्पितयाविलसद्धरिचन्दनोदकच्छटयाप्येषोऽदूयततापमनुभूतवान् ॥ प्रसरद्भोगिफटाभवैःप्रस्फुरत्सर्पफणाजातैर्विषैरितिशेषः ॥ नदूयतइति ॥ ११ ॥ सकलभ्रममिति ॥ एषविश्वेश्वरःसकलभ्रमंजगद्भ्रमंनाशयेत् ॥ कथंभूतम् ॥ स्रगहित्वाद्यपदेशजंस्रक्सर्पत्वातिदृष्टांतसिद्धम् ॥ तथाचप्रयोगः ॥ जगद्भ्रमरूपंदृश्यत्वात्स्रक्सर्पादिवदिति ॥ आदिपदेनशुक्तिरजतस्थाणुपुरुषादयोगृह्यन्ते ॥ एतादृशस्यास्यस्फुटमाल्येस्पष्टमालायामपिमहाहेःसंभवरूपोभ्रमइतियदिदमद्भुतमिति ॥ १२ ॥ स्मृतिमात्रपथमिति ॥ स्मृतिमात्रपथंस्मरणैकविषयंगतोपियास्त्रिविधमाध्यात्मिकाधिदैविकाधिभौतिकतापमपाकरोतिनाशयतिसहिसएवकाशीवियोगात्तप्तःसन्किंचिद्वक्ष्यमाणलक्षणमजल्पत्व्यलपत् ॥ अजोजन्मादिषड्भावविकारशून्यइत्यर्थः ॥ १३ ॥ विलापमेवाहापीतिषड्भिः ॥

यद्दीधरदेषजाततापःपृथुलेमौलिजटानिकुंजकोणे ॥ परितापहरांहरस्तदानींद्युनदींतामधुनापिनोज्जिहीते ॥ ६ ॥ महतोविरहस्यशंकरःप्रसभंतस्यवशीवशंगतः ॥ विविदेनसुरैःसदोगतैरपिसंवीतसुतापवेष्टितः ॥ ७ ॥ अतिचित्रमिदंयदात्मनाशुचिरप्येपकृपीटयोनिना ॥ स्वपुरीविरहोद्भवेनवैपरिताप्येतजगत्त्रयेश्वरः ॥ ८ ॥ निजभालतलंकलानिधेःकलयानित्यमलंकरोतियः ॥ सतदीश्वरमप्यतापयद्विधुरेकोविपरीतएवतु ॥ ९ ॥ गरलंगलनालिकातलेविलसेदस्यनतेनतापितः ॥ अमृतांशुतुषारदीधितिप्रचयैरेवतुतापितोऽद्भुतम् ॥ १० ॥ विलसद्धरिचंदनोदकच्छटयातद्विरहापनुत्तये ॥ हृदयाहितयाप्यदूयतप्रसरद्भोगिफटाभवैर्नतु ॥ ११ ॥ सकलंभ्रममेषनाशयेत्स्रगहित्वाद्यपदेशजंहरः ॥ इदमद्भुतमस्ययद्भ्रमःस्फुटमाल्येपिमहाहिसंभवः ॥ १२ ॥ स्मृतिमात्रपथंगतोपियस्त्रिविधंतापमपाकरोत्यलम् ॥ सहिकाशिवियोगतापितःस्वगतंकिंचिदजल्पदित्यजः ॥ १३ ॥ अपिकाशिसमागतोऽनिलोयदिगात्राणिपरिष्वजेन्मम ॥ दवथुःपरिशांतिमेतितन्नहिमानीपरिगाहनैरपि ॥ १४ ॥

१ विधुरेदुःखेकएवअविपरीतःअविरुद्धःअर्थात्दुःखेतुसर्वएवविरुद्धोभवतीतिवा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काशीस्पर्शनन्तावद्दूरेतिष्ठतुकाशीतःसमागतोऽनिलोपियदिममगात्राणिपरिष्वजेदालिंगेत्तदामेदवथुर्विरहकंपःशांतिमेति॥अन्यथाहिमानीहिमसंहतिस्तस्याःपरिगाहनैःसंस्पर्शैरपिशान्तिंनैतीत्यर्थः॥१४॥ अगमिष्यदिति॥ अहोइतिखेदे॥ममदक्षांगजयासत्यादक्षरोषात्त्यक्तदेहयायस्तापएधितोवर्धितःसतापोयदिझटितिहिमाद्रिजापार्वतीहिनिश्चितंनाभविष्यन्नजाताचस्यात्तदाकथमगमिष्यत्कथंगतःस्यान्नकथंचिदित्यर्थः॥ कथंभूतादक्षांगजापार्वतीवा॥ ममजीवातुलताजीवनौषधिरूपालता॥१५॥किंतुनतथेति॥दक्षोद्भवयाममममनस्तथानादुनोदुपतप्तमभूत्॥ कथंभूतया॥उज्झितदेहयात्यक्तशरीरया॥ अविमुक्तस्यवियोगेनजन्मयस्यतेनमहोष्मणामहाविरहाग्निनायथापरिदूयेतपरितप्येत॥ हुतभुग्धुतदेहयायेतिपाठेतयेत्यर्थात्॥ हुतभुजिहुतो देहोययासातथातया॥ १६॥१७॥ अमृतांशुश्चंद्रस्तत्कलातोमृदुद्रवैःशीतलामृतैः॥ १८॥ तर्ह्यधुनापिकाशीवियोगजतापशांत्यर्थमन्यदेवोपायांतरंचिंत्यतांतत्राहागमदिति॥ हिमवत्सुतैवौषधंतेनसतीवियोगजःकंपोमेऽगमत्प्राक्अधुनायदिकाशींनपश्यामितर्हिकाशीविरहानलस्यशांतिंनैवेयांनप्राप्नोमीत्यर्थः॥ १९॥ मनसेति॥ तदाजगदंबिकयाजगतांमात्रापार्वत्याधियांसमष्टिव्यष्टिबुद्धीनांजनन्यासाक्षिण्यापरदेवतयाकथमपिकेनापिपदार्थेनएषोहंवियुक्तो

अगमिष्यदहोकथंसतापोननुदक्षांगजयायएधितः॥ ममजीवातुलताझटित्यलंह्यभविष्यन्नहिमाद्रिजायदि॥ १५॥ नतथोज्झितदेहयातयाममदक्षोद्भवयामनोऽदुनोत्॥ अविमुक्तवियोगजन्मनापरिदूयेतयथामहोष्मणा॥ १६॥ अयिकाशिमुदाकदापुनस्तवलप्स्येसुखमंगसंगजम्॥ अतिशीतलितानियेनमेऽद्भुतगात्राणिभवंतितत्क्षणात्॥ १७॥ अयिकाशिविनाशिताघसंघेतवविश्लेषजआशुशुक्षणिः॥ अमृतांशुकलामृदुद्रवैरतिचित्रंहविषेववर्धते॥ १८॥ अगमन्ममदक्षजावियोगजोदवथुःप्राग्घिमवत्सुतौषधेन॥ अधुनाखलुनैवशांतिमीयांयदिकाशींनविलोकयेहमाशु॥ १९॥ मनसेति गृणंस्तदाशिवःसुतरांसंवृततापवैकृतः॥ जगदंबिकयाधियांजनन्याकथमप्येषवियुक्तइत्यमानि॥ २०॥ प्रिययावपुषोर्धयानयाप्यपरिज्ञातवियोगकारणः॥ वचनैरुपचर्यतेस्मसप्रणतप्राणिनिदाघदारणः॥ २१॥ ॥ श्रीपार्वत्युवाच॥ ॥ तवसर्वगसर्वमस्तिहस्तेविलसद्योगवियोगएवकस्ते॥ तवभूतिरहोविभूतिदात्रीसकलापत्कलिकापिभूतधात्री॥ २२॥ त्वदनीक्षणतःक्षणाद्विभोप्रलयंयांतिजगंतिशोच्यवत्॥ च्यवतेभवतःकपालवादितरोपीशनयस्त्वयोंकृतः॥ २३॥

विरहितइत्यमानिअलक्षितज्ञातइत्यर्थः॥कीदृशः॥ मनसेतिगृणन्पूर्वोक्तंविलपन्॥ शिवःसुखस्वरूपः॥ सुतरामतिशयेनसंवृतोऽस्पष्टोयस्तापस्तेनवैकृतःविकृतिंनीतइत्यर्थः॥ विमुक्तइतिपाठेपिसएवार्थः॥२०॥एवंसामान्यविरहकारणज्ञानानंतरंयत्कृतंतदाह॥ प्रिययेति॥अनयाप्रिययावपुषोर्धरूपयापिनपरिज्ञातंविशेषतोवियोगस्यकारणंयस्यसतथा॥ प्रणतस्यप्राणिमात्रस्यनिदाघदारणःसंतापनाशनः॥ एतादृशःसशिवस्तथैवप्रिययाउपचर्यतेस्मसेवितइत्यर्थः॥२१॥ तदेवपरिचरणमाह तवेतिचतुर्भिः॥ हेसर्वगहेविलसद्योगविलसन्योगोयस्यतत्संबोधनंतथा॥तवहस्तेसर्वमस्त्येवत्वदधीनमेवसर्वमित्यर्थः॥ अतस्तेतवकोवियोगोविरहः॥ विलसद्योगेनकृत्वावियोगस्तेकइतिवान्वयः॥अहोआश्चर्ये॥तवभूतिर्विभूतिर्ब्रह्मादीनांविभूतिदात्री॥भूतधात्रीप्राणिमात्रस्यधारिकासर्वापत्कलिकासर्वासामापदांनाशिकापीत्यर्थः॥ २२॥ त्वदिति॥ हेविभोत्वदनीक्षणतस्तवकरुणादृष्ट्यभावात्क्षणादेवजगंतिप्रलयंयांति॥ हेईशकपालवात्कपालेशेनयस्त्वयानोंकृतःसेवकत्वेननस्वीकृतःसभवतइतरोपित्वत्प्रतियोगीब्रह्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिरपिच्यवतेभ्रश्यतेसंसरतीत्यर्थः॥२३॥तापहेत्वभावादपितवतापोनसंभवतीत्याह॥ भवतइति॥हेत्रिनेत्रइंद्रादयस्तवपरितापहेतवोनभवंति यतस्तेऽमीतवनयनानिप्रणयिनीप्रियाचगंगामौलौमस्तकेऽस्ति॥ कथंभूता॥लसज्जलालसत्कमनीयंब्रह्मजलंयस्याःसातथा॥ तथाचोक्तम्॥ योसावित्यादि॥ शोभनजलावा ॥२४॥ भुजगाइति ॥ तेप्रसिद्धाअमीभुजगाःशेषादयस्तेभुजगाहस्तगाःअंगदादिरूपेणास्थितत्वात् ॥ अतस्तेषांविषंनसंक्रमतेत्वयिनप्रभवति ॥ नीलकंठेतिसंबोधनस्यायंभावः ॥ः कालकूटभक्षणेपितवशोभैवजातानकाचिद्धानिरतोवराकाणामेषांविषैस्तवकिमिति ॥ हेवामदेवतववामंवपुर्वामशरीरमहमस्मि ॥ कथंभूता ॥ वामाशोभना ॥ रामेतिपाठेसुंदरीत्यर्थः ॥ चित्तयुक्ताचित्तानुसारिणी ॥२५॥ इतिसंस्तुतिसंबीजजननन्यासंस्तुतेःसम्यग्बीजंमूलकारणमज्ञानंमहत्तत्त्वंवातज्जननीअभक्तानांतदुत्पादयित्रीतया ॥ इत्थंपूर्वोक्तप्रकारंयथास्यात्तथाहितेभिहितेसतिगिरिशोऽथानंतरंगिरंवक्तुमाददेउपक्रमंकृतवान् ॥ कथंभूतेहिते ॥ गिरांनिगुंफेगिरांवचसांनितरामतिशयेनगुंफोगुंफनंग्रथनंयत्रतस्मिन् ॥ वक्तुमपीत्यत्रगद्गदामितिक्वचित्पाठः ॥ २६ ॥ तामेवगिरंदर्शयति ॥ अयीति ॥ अयिहेकाशित्वयाकाश्याहरोऽहंहृतोवियोगद्वारासंतापितइतिशिवयापार्वत्याऽज्ञायिज्ञातः ॥ कीदृशोहरोऽष्टमूर्तिःपंचभूतचंद्रसूर्यात्मानोमूर्तयोयस्यसः ॥ भवत्यस्मादितिभवः ॥ भाव्यंतेजायंतेपदार्थाएभिरितिभावाःप्रमाणानिभावाश्चतेऽष्टौचप्रत्यक्षानुमानोपमानशब्दार्थापत्त्यैतिह्यानुपलब्धिसं

भवतःपरितापहेतवोनभवंतींदुदिवाकराग्नयः ॥ नयनानियतस्त्रिनेत्रतेऽमीप्रणयिन्यस्तिलसज्जलाचमौलौ ॥ २४ ॥ भुजगाभुजगाःसदैवतेऽमीनविषंसंक्रमतेचनीलकंठ ॥ अहमस्मिचवामदेववामातववामंवपुरत्रचित्तयुक्ता ॥२५॥ इतिसंस्तुतिसंबीजजननन्याभिहितेहिते ॥ गिरांनिगुंफेगिरिशोवक्तुमप्याददेगिरम् ॥ २६ ॥ ॥ ईश्वरउवाच ॥ ॥ अयिकाशीत्यष्टमूर्तिर्भवोभावाष्टकोभवत् ॥ सत्वरंशिवयाज्ञायिध्रुवंकाश्याहृतोहरः ॥२७॥ अथबालसखीभूततत्तत्काननवीरुधम् ॥ शिवाप्रस्तावयांचक्रेविमुक्तांमुक्तिदांपुरीम् ॥२८॥ ॥ पार्वत्युवाच ॥ ॥ गगनतलमिलितसलिलेप्रलयेपिभवत्रिशूलपरिविधृताम् ॥ कृतपुंडरीकशोभांस्मरहरकाशींपुरींयावः ॥२९॥ धराधरेंद्रस्यधरातिसुंदरानमांतथास्यापिधिनोतिधूर्जटे॥धरागतापीहनयाध्रुवंधरापुरीधुरीणातवकाशिकायथा॥३०॥नयत्रकाश्यांकलिकालजंभयंनयत्रकाश्यांमरणात्पुनर्भवः॥नयत्रकाश्यांकलुषोद्भवंभयंकथंविभोसानयनातिथिर्भवेत् ॥३१॥

भवाइतिभावाष्टौतत्स्वरूपोभावाष्टकः ॥ तथाचोक्तंब्रह्मविद्भिः ॥ वृत्त्यारूढःप्रमाणमिति ॥ भवत्सद्रूपएतादृशोपीत्यर्थः ॥ २७ ॥ काश्याहृतोहरइतिभगवन्मुखादेवाकर्ण्यपार्वतीभवस्याग्रेकाशींप्रस्तावितवतीत्याह ॥ अथेति ॥ अथानंतरंबालकालेसखीभूतास्तत्तत्काननसंबंधिन्योवीरुधोलतायस्यांताम् ॥ २८ ॥ प्रस्तावनमेवाह गगनतलमित्यारभ्यप्रमथाधिपेत्यतःप्राक्तनेनग्रंथेन ॥ हेस्मरहरआवांकाशींपुरींयावोगच्छावइत्यन्वयः ॥ कथंभूताम् ॥ कृतपुंडरीकशोभामुत्पादितपद्मशोभाम् ॥ गगनतलेमिलितंसलिलंयस्मिंस्तस्मिन्दैनंदिनप्रलयेत्रिशूलस्योपरिविशेषेणधृताम् ॥ उकारलोपश्छांदसः ॥ त्रिशूलेनपरिसर्वतोविधृतामितिवा ॥ अपिशब्दात्प्राकृतप्रलयादावपि ॥ २९ ॥ धरेति ॥ पूर्वोपिशब्दोभिन्नक्रमे ॥ अस्यधराधरेंद्रस्यापिधरामत्पितुरपिधरानधरातथामांनधिनोत्युपतापयतितवपुरीकाशिकाधुरीणाश्रेष्ठायथाधिनोति ॥ कीदृशी ॥ धरागतापियाध्रुवंनिश्चितंधरानभवति त्रिशूलाग्रेस्थितत्वात् ॥ यद्वा धरागताधरारूपतांप्राप्तापियाधरानभवतिकिंतुध्रुवंब्रह्मैवेत्यर्थः ॥ ३० ॥ नयत्रेति ॥ हेविभोकथंसाकाशीनयनातिथिर्नेत्रविषयःस्यात् ॥ कीदृशी ॥ यस्यांकलिकालजंभयंनास्तिकलेस्त्राप्रवेशात् ॥ प्रवेशेवातस्याकिंचित्कर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात् ॥ यत्त्विदानींकलिधर्मादृश्यन्तेतेषांरुद्ररूपाणांकाश्येकनिवासानांप्रारब्धत्वात् ॥ नयत्रकाश्यांमरणात्पुनर्भवः॥जन्ममरणाव्यवहितसमयेतत्त्वज्ञानेनकैवल्यप्राप्तेः॥नयत्रकाश्यांकलुषोद्भवंभयं पाप
स्यात्रफलानुत्पादकत्वात् ॥ तथाचश्रूयते ॥ ऊषरःपुण्यपापानांधन्यावाराणसीपुरीति ॥ लैंगेच ॥ नाविमुक्तेनरःकश्चिन्नरकंयातिकिल्बिषी ॥ ईश्वरानुग्रहादेवसर्वेयान्तिपरांगतिमिति ॥ नचकालभैर
वयातनाशास्त्रविरोधस्तस्याःपश्चाद्भावित्वात् ॥ तथाचब्रह्मवैवर्तेकाशीविश्वेश्वरयोर्वाक्यानि ॥ प्रतिज्ञाममदेवेशस्थावराजंगमाजनाः ॥ तारणीयाःसर्वतोमेसागच्छतिकलौशुभा ॥ तत्रापिमनुजादेवधर्मा
धर्माधिकारिणः॥नचान्येत्रिविधाजीवाःपूर्वकर्मोपजीविनः ॥ परदाररताःकेचित्केचिद्द्रव्यपरायणाः॥परापवादपैशुन्यपरद्रोहरताःखलाः॥केचिद्गोवधकर्तारःकेचिन्मद्यपरायणाः॥ केचित्पाखण्डकुशलावं
चकाःसूचकाःपरे॥तीर्थद्रोहकरालिंगविष्णुब्राह्मणविड्वाम् ॥ द्रोहिणोनिवसन्त्येवद्वापरान्तेकलौतथा॥अन्यान्यपिचपापानिबहूनिसुमहान्त्यपि॥कुर्वंत्येवंनराःसर्वेमय्येवचविशेषतः॥अद्ययावत्तारितास्तेप्र
तिज्ञारक्षणायमे ॥ अतःपरंत्वच्छरणंगतास्मिशिवशंकर ॥ विश्वेश्वरवाक्यम् ॥ पुण्यंकृत्वाकाशियेकाशिकांत्वांप्राप्ताःप्राप्तास्तेतुतद्वस्तुनित्यम् ॥ पापंकृत्वाक्षेत्रमध्येमृतायेतेषांमुक्तिर्यातनान्तेभवेद्धि ॥
धर्मःकाश्यांशुद्धिहेतुःप्रदिष्टःपापंपुनर्दुःखमालादिमूलम् ॥ तस्मात्प्रतिज्ञातवसिद्धरूपामुक्तिर्भवत्येवमलावसानेइत्यादि ॥ यद्वाभयत्रमोक्षप्रतिबन्धनिमित्तंभयमितिवार्थः ॥ ३१ ॥ किमत्रेति ॥ पदेपदे

किमत्रनोसंतिपुरःसहस्रशःपदेपदेसर्वसमृद्धिभूमयः ॥ परंनकाशीसदृशीदृशोःपदंक्वचिद्गतामेभवताशपेशिव ॥ ३२ ॥ त्रिविष्टपेसंतिनकिंपुरःशतं
समस्तकौतूहलजन्मभूमयः ॥ तृणीभवंतीहचताःपुरःपुरःपदंपुरारेभवतोभवद्विषः ॥३३॥ नकेवलंकाशिवियोगजोज्वरःप्रबाधतेत्वांतुतथायथात्रमाम् ॥
उपायएपोत्रनिदाघशांतयेपुरीतुसावाममजन्मभूरथ ॥ ३४ ॥ मयानमेनेममजन्मभूमिकावियोगजन्मापरिदावईशितः ॥ अवाप्यकाशींपरितः
प्रशांतिदांसमस्तसंतापविघातहेतुकाम् ॥ ३५ ॥ नमोक्षलक्ष्म्योत्रसमक्षमीक्षितास्तनूभृताकेनचिदेवकुत्रचित् ॥ अवैम्यहंशर्मदसर्वशर्मदासरूपिणी
मुक्तिरसौहिकाशिका ॥ ३६ ॥

स्थानेस्थानेऽत्रपृथिव्यांसहस्रशोऽसंख्याताःपुरःकिन्नसन्त्यपितुसन्त्येव ॥ कथंभूताः ॥ सर्वसमृद्धिभूमयःसर्वैश्वर्यस्थानानि ॥ परंकेवलंकिंतुवाकाशीसदृशीपुरीमेदृशोर्नेत्रयोःपदंविषयंनगतानयाता ॥
हेशिवास्मिन्नर्थेभवताशपे ॥ एतच्चेदहंमिथ्यावदेत्तदाभवतःशपथंकरोमीत्यर्थः ॥ ३२ ॥ ननुतर्हिस्वर्गेएतादृक्पूःस्थास्यतितत्राह ॥ त्रिविष्टपइति ॥ त्रिविष्टपेस्वर्गेशतंपुरःअनेकाःपुर्यःकिंनसन्त्यपि
तुसन्त्येव ॥ कथंभूताः ॥ समस्तेति ॥ समस्ताश्चर्योत्पत्तिस्थानानि ॥ किंतुहेपुरारेभवद्विषःसंसारद्वेष्टुर्भवतइहपुरःकाश्याःपदमेकमपिप्रदेशमासाद्येतिशेषः ॥ ताः पुरस्तृणीभवन्तिचकारान्नश्यंतिच ॥
पुरःपुरःपुरइतिपाठेभवतः पुरःपुर्याःपुरःपुरस्तात् ॥ शेषंपूर्ववत् ॥ ३३ ॥ नकेवलमिति ॥ नकेवलंकाशीवियोगजोज्वरस्त्वामेवप्रबाधतेकिंत्वत्रमन्दरेयथात्वांप्रबाधतेतथामामपीतियोजना ॥ किंतु
निदाघशान्तयेकाशीवियोगजज्वरनाशायात्रजगत्येषउपायःकोसौ॥पुरीतुसावाअथअथवाममजन्मभूरिति ॥ ३४ ॥ किंच॥मयेति ॥ हेईशितःहेनियन्तःमयानिजजन्मभूमिकायाःवियोगाज्जन्मयस्यसप
रिदाघस्तापोनमेनेनज्ञातोनानुभूतइतियावत् ॥ तत्रहेतुमाहावाप्येति ॥ परितःसर्वतःप्रशांतिदामिहलोकेजीवन्मुक्तिदांपरलोकेविदेहमुक्तिदामित्यर्थः ॥ अतएवसमस्तानामाध्यात्मिकाधिदैविकाधिभौ
तिकानांसन्तापानांविघातेनाशेहेतुकांकारणभूताम् ॥ ३५ ॥ नमोक्षेति ॥ हेशर्मदानंददकेनचिदपितनुभृताकुत्रचिदपिमोक्षलक्ष्म्योऽत्रजगतिसमक्षंप्रत्यक्षंयथास्यात्तथानेक्षितानदृष्टानानुभूताइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किन्तुसर्वेषांशर्मदासरूपिणीमूर्तिमतीकाशिकाहिनिश्चितमसौप्रत्यक्षामुक्तिरित्यहमवैमिजानामीतियोजना ॥ ३६ ॥ नमुक्तिरिति॥यथाकाश्यांविग्रहंशरीरंपरिहायमुक्तिरस्तिनतथाइहजगतिसमाध्यादिनामु क्तिरितियोजना ॥ कथम्भूतेन ॥ समाध्यादिनाअस्थिरेंद्रियत्वेनचञ्चलेंद्रियवृत्त्याउज्झितस्त्यक्तस्तत्समाधिर्ब्रह्मसमाधानंयस्मिंस्तेनसमाधिनासमाध्यभावेनेत्यर्थः ॥ क्रतुक्रियाभिर्यज्ञाद्यनुष्ठानैः ॥ वेदविद्ययाउपासनादिरूपया ॥ ३७ ॥ ननाकेति ॥ काश्यांतनुमात्रधारिणिदेहभृन्मात्रेयादृक्सुखंतादृक्सुखंनाकलोकेस्वर्लोकेनास्ति ॥ अतोतिसुन्दरेपिपातालतले ॥ स्वर्लोकादपिरम्याणिपातालानी तिनारदःप्राह ॥ स्वर्गसदांमध्येपातालेभ्योगतोदिवीत्यादिदर्शनात् ॥ कुतस्तादृक्सुखम् ॥ यदास्वर्गेपातालेचतादृक्सुखंनास्तितदामर्त्येमनुष्यलोकेसुखसंश्रयावार्तापिकवा ॥ वाशब्दः कटाक्षे ॥ नकापीत्यर्थः ॥ ३८ ॥ क्षेत्रइति ॥ हेत्रिशूलिन्भवतोऽविमुक्तेक्षेत्रेतत्रान्यत्रवास्थितोयोमनोपियुंक्तेमनोवृत्तिमात्रमपिप्रयच्छतिससदैवषडंगयोगंयुंक्तेयुनक्ति ॥ मनःसंयोजनेहेतुः प्राणिवरोऽतीवपुण्यकृदित्यर्थः ॥ अविमुक्तनामनिर्वक्ति॥विमुक्तिलक्ष्म्येति ॥ ३९ ॥ किंच ॥ षडंगेति ॥ हेशिवनृभिर्नरैस्तादृशीशरीरेणसिद्धिःषडङ्गयोगसिद्धिर्निश्चितमत्रलोकेनलभ्यते ॥ काशीं समवाप्यत्वयिक्षणंदृशौनेत्रेस्थिरीकृत्यसुखेनयादृशीलभ्यतइति ॥ ४० ॥ वरमिति ॥ हिनिश्चितम् ॥ अपीतिवा ॥ तिर्यक्त्वंपशुत्वमपिवरंश्रेष्ठम् ॥ कीदृशम् ॥ नविद्यतेबुद्धेर्वैभवमात्मानातम

नमुक्तिरस्तीहतथासमाधिनास्थिरेंद्रियत्वोज्झिततत्समाधिना ॥ क्रतुक्रियाभिर्ननवेदविद्ययायथाहिकाश्यांपरिहायविग्रहम् ॥३७॥ ननाकलोकेसुखम स्तितादृशंकुतस्तुपातालतलेऽतिसुंदरे ॥ वार्तापिमर्त्येसुखसंश्रयाक्ववाकाश्यांहियादृक्तनुमात्रधारिणि ॥ ३८ ॥ क्षेत्रेत्रिशूलिन्भवतोऽविमुक्तेविमुक्ति लक्ष्म्यानकदापिमुक्ते ॥ मनोपियःप्राणिवरःप्रयुंक्तेषडंगयोगंससदैवयुंक्ते ॥ ३९ ॥ षडंगयोगान्नहितादृशीनृभिःशरीरसिद्धिःसहसात्रलभ्यते ॥ सुखे नकाशींसमवाप्ययादृशीदृशौस्थिरीकृत्यशिवत्वयिक्षणम् ॥ ४० ॥ वरंहितिर्यक्त्वमबुद्धिवैभवंनमानवत्वंबहुबुद्धिभाजनम् ॥ अकाशिसंदर्शननिष्फलो दयंसमंततःपुष्करबुद्बुदापमम् ॥ ४१ ॥ दृशौकृतार्थेकृतकाशिदर्शनेतनुःकृतार्थाशिवकाशिवासिनी ॥ मनःकृतार्थंधृतकाशिसंश्रयंसुखंकृतार्थंकृतका शिसंमुखम् ॥ ४२ ॥ वरंहितत्काशिरजोतिपावनंरजस्तमोध्वंसिशशिप्रभोज्ज्वलम् ॥ कृतप्रणामैर्मणिकर्णिकामुवेललाटगंयद्बहुमन्यतेसुरैः ॥ ४३ ॥

विवेकविस्तारोयस्मिंस्तत् ॥ बह्वीनांबुद्धीनांभाजनंयोग्यमपिमानवत्वंमनुष्यत्वंनवरम् ॥ तत्रहेतुगर्भविशेषणमाह ॥ अकाशिसंदर्शननिष्फलोदयंकाशीदर्शनाभावेनफलोदयशून्यम् ॥ ननुकाशीसन्द र्शनंविनापियत्रकुत्रापिसुखेनस्थातव्यंततःसमयांतरेदर्शनादिकंविधेयंतत्राह ॥ पुष्करबुद्बुदोपमंपुष्करशब्देनात्रपद्मपत्रंलक्ष्यते ॥ बुद्बुदशब्देनजललवः ॥ तथाचोक्तमाचार्यैः ॥ नलिनीदलगत जललवतरलंतद्वज्जीवनमतिशयचपलमिति ॥ पुष्करञ्जलमितिवा ॥ ४१ ॥ अदर्शनऽकृतार्थतामुक्त्वादर्शनेकृतार्थतामाह ॥ दृशाविति ॥ कृतंकाश्यादर्शनंयाभ्यांतेदृशौनेत्रेकृतार्थेकृ तोर्थःपुरुषार्थोयाभ्यान्तेतथा ॥ शिवाचासौकाशीचशिवकाशीतस्यांवस्तुंशीलंयस्याःसातनुःशरीरंकृतार्था ॥ शिवेतिसंबोधनंवा ॥ यत्रकुत्रापिगमनंपरित्यज्यधृतःकाश्येवसंश्रयआश्रयोयेनत न्मनःकृतार्थम् ॥ कृताकाशीसंमुखायेनतन्मुखंकृतार्थमिति ॥ ४२ ॥ वरमिति ॥ तत्काश्यारजोधूलिर्वरंश्रेष्ठम् ॥ श्रेष्ठत्वेहेतवः ॥ हियस्मादतिपावनंरजस्तमसीध्वंसितुंशीलंयस्यतत्तथा ॥ शशि प्रभोज्ज्वलंचन्द्रतेजोवच्छुक्लम् अतएवमणिकर्णिकामुवेकृतप्रणामैःसुरैःस्वकीयललाटगंयद्बहुमन्यतेतत्सर्वोत्कृष्टंमन्यते ॥ यद्वा कृतायेप्रणामास्तैःकृत्वाकाशीस्थानांललाटगम् ॥ यद्वाषष्ठचर्थेतृतीया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मणिकर्णिकासुवेकृतप्रणामानांललाटगंसुरैर्यद्भुमन्यतइति ॥ ४३ ॥ नदेवेति ॥ देवलोकादिर्मणिकर्णिकायास्तुलांसाम्यंनव्रजेन्नगच्छेत् ॥ कुतः ॥ यत्रयस्यांमणिकर्णिकायांमहाप्रयाणकृच्छ्
तिर्मरणकृतांश्रवणेंद्रियंब्रह्मैवरसायनंरसरूपआश्रयस्तदास्पदंतदाश्रयम् ॥ यद्वा अयतेज्ञायतेब्रह्मरसोनेनेत्ययनंप्रणवःषडक्षररामन्त्रराजोवा ॥ ब्रह्मरसायनस्यप्रणवस्यराममन्त्रराजस्यवाऽऽस्पदमा
श्रयोभवतीत्यर्थः ॥ ४४ ॥ महेति ॥ मणिकर्णिकास्थलीमहामहोभूःपरिपूर्णतेजःस्थानम् ॥ कुतः ॥ यत्रयस्यांमणिकर्णिकास्थल्यांसातमस्ततिरंधकारपरम्पराआवरकत्वसाम्यादज्ञानपरंपरेत्यर्थः॥
संक्षयंसमेति ॥ समुपसर्गाभ्यामत्यन्तंनाशंप्राप्नोतीतिसूचितम् ॥ साका ॥ यापरःशतैःशतात्परैरसंख्यातैर्जन्मभिरेधितावर्द्धिताघनीभूतेत्यर्थः ॥ साधनान्तरैरविनाशतामाह ॥ दिवाकेरति ॥
अनिग्रहाऽविनाशा ॥ यस्यांजीवितानामेवाज्ञानसन्ततिर्नश्यतिकिंपुनर्मृतानांश्रीरुद्रोपदेशेनेतिभावः ॥ ४५ ॥ किम्विति ॥ किंप्रश्नेउवितर्के ॥ उत्प्रेक्षायांवाकिमुशब्दः ॥ निर्वाणंकैवल्यमेवपदंस्था
नंयस्यतस्यपरमेश्वरस्य अथवानिर्वाणस्यकैवल्यचक्रवर्तिनःपदस्यपादस्यभद्रपीठंसिंहासनंकिमुमणिकर्णिकास्थलीतिसर्वत्रान्वेति ॥ अयोअथवा॥नुनिश्चितम्॥ मोक्षलक्ष्म्यामृदुलंतल्पंकोमलाशय्या ॥

नदेवलोकोनचसत्यलोकोननागलोकोमणिकर्णिकायाः ॥ तुलांव्रजेद्यत्रमहाप्रयाणकृच्छ्रुतिर्भवेद्ब्रह्मरसायनास्पदम् ॥४४॥ महामहोभूर्मणिकर्णिकास्थ
लीतमस्ततिर्यत्रसमेतिसंक्षयम् ॥ परःशतैर्जन्मभिरेधितापियादिवाकराग्नींदुकैरनिग्रहा ॥ ४५ ॥ किम्मुनिर्वाणपदस्यभद्रपीठंमृदुलंतल्पमथोनुमो
क्षलक्ष्म्याः ॥ अथवामणिकर्णिकास्थलीपरमानंदसुकंदजन्मभूमिः ॥ ४६ ॥ समतीतविमुक्तजंतुसंख्याक्रियतेयत्रजनैःसुखोपविष्टैः ॥ विलसद्द्युति
सूक्ष्मशर्कराभिःस्ववपुःपातमहोत्सवाभिलाषैः ॥ ४७ ॥ ॥ स्कंदउवाच ॥ ॥ अपर्णापरिवर्ण्येतिपुरींवाराणसींमुने ॥ पुनर्विज्ञापयामासकाशीप्राप्त्यैपि
नाकिनम् ॥ ४८ ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ प्रमथाधिपसर्वेशनित्यस्वाधीनवर्तन ॥ यथानंदवनंयायांतथाकुरुवरप्रद ॥ ४९ ॥ स्कन्द उवाच ॥ ॥
जितपीयूषमाधुर्यांकाशीस्तवनसुंदरीम् ॥ अथाकर्ण्याहमुदितोगिरिशोगिरिजांगिरम् ॥ ५० ॥ श्रीदेवदेवउवाच ॥ ॥ अयिप्रियतमेगौरित्वद्वा
गमृतसीकरैः ॥ आप्यायितोस्मिनितरांकाशीप्राप्त्यैयतेधुना ॥ ५१ ॥

सुखोपविष्टैर्जनैःसमतीतायेविमुक्ताजंतवस्तेषांसंख्यागणनाक्रियते ॥ कथम्भूतैः ॥ स्ववपुःपातएवमहोत्सवस्तत्रैवाभिलाषोयेषान्तैः ॥ तथाचात्रैवोक्तम् ॥ यत्रसर्वेप्रतीक्षन्तेमृत्युंप्रियमिवातिथिमिति ॥ ... ॥ ४६ ॥ समतीतेति ॥ यत्रयस्यांमणिकर्णिकास्थल्यांसु
अथवापरमानन्दएवसुकन्दःशोभनंमूलंकारणम् ॥ परमानन्दस्यवासुकन्दःशोभनंमूलंकारणंतारकोपदेशस्तस्यजन्मनोभूःस्थानमिति ॥ ४६ ॥ समतीतेति ॥ यत्रयस्यांमणिकर्णिकास्थल्यांसु
खोपविष्टैर्जनैःसमतीतायेविमुक्ताजंतवस्तेषांसंख्यागणनाक्रियते ॥ कथम्भूतैः ॥ स्ववपुःपातएवमहोत्सवस्तत्रैवाभिलाषोयेषान्तैः ॥ तथाचात्रैवोक्तम् ॥ यत्रसर्वेप्रतीक्षन्तेमृत्युंप्रियमिवातिथिमिति ॥
कैः ॥ विलसन्तीद्युतिर्यासांताविलसद्द्युतयश्चताःसूक्ष्मशर्कराश्चक्षुद्रपाषाणास्ताभिः ॥ ४७ ॥ अपर्णेति ॥ अपर्णेत्यनेनशुद्धसत्त्वायास्तस्याःकाशीगुणवर्णनेऽधिकारोस्तीतिध्वन्यते॥ पार्वतीतिकांचित
॥ ४८ ॥ प्रमथाधिपेत्यादिसम्बोधनचतुष्टयेनतवकिमप्यशक्यंनास्तीतिसूचयति ॥ ४९ ॥ जितेति ॥ गिरिशएवंभूतांपूर्वोक्तांगिरमाकर्ण्यमुदितःसन्नथानन्तरंगिरिजांप्राहेत्यन्वयः ॥ कथम्भू
ताम् ॥ जितंपीयूषस्यामृतस्यमाधुर्यंययासातथाताम् ॥ तत्रहेतुगर्भविशेषणमाह ॥ काशीस्तवनेसुन्दरींशोभनाम् ॥ ५० ॥ अयीतिसम्बोधने ॥ त्वद्वागमृतसीकरैस्तववचनपीयूषकणैः ॥ यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्नंकरोमि ॥ ५१ ॥ त्वमिति ॥ उपाश्नामिभुञ्जेसेवइत्यर्थः ॥ ५२ ॥ तर्हिकाश्याअन्यैराधिपत्येनानाश्रितत्वात्सिद्धंनःसमीहितंनेत्याह ॥ पितामहस्येति ॥ ५३ ॥ तर्हिबलान्निःसारणीय
स्तत्राह ॥ कथमिति ॥ ५४ ॥ तर्हिविघ्नमुत्पाद्योत्कृष्टव्योनेत्याह ॥ अधर्मेति ॥ तस्मात्त्वहेईशेयेनकेनापिप्रकारेणयस्तंकाश्यावियोजयेत्तंकंप्रेषयामीतियोजना ॥ ५५ ॥ नतुविघ्नमुत्पाद्यनिःसरणेको
दोषस्तत्राह ॥ धर्मेति ॥ ५६ ॥ तर्हिच्छिद्रंविनैवबाहिर्नेतव्योनेत्याह ॥ विनेति ॥ तत्रहेतुर्मयैवेति ॥ धर्मरूपांधुरंभारंधरन्तीतिधर्मधुरन्धराः ॥ ५७ ॥ किंच ॥ नजरेति ॥ धर्मवर्त्मधर्म
मार्गंविभर्तीतिधर्मवर्त्मभृत् ॥ अत्रकर्मभूमौ ॥ तथाचमनुः ॥ आलस्यादन्नदोषाच्चमृत्युर्विप्रान्जिघांसतीति ॥ ५८ ॥ इतिपूर्वोक्तम् ॥ योगिनीनांचक्रंसमूहम् ॥ अतिमहाप्रौढमतिशयेनदक्ष

त्वंजानासिमहादेविममयत्तन्महद्व्रतम्॥अभुक्तपूर्वमन्येनवस्तूपाश्नामिनेतरत् ॥५२॥ पितामहस्यवचनाद्दिवोदासेमहीपतौ ॥धर्मेणशासतिपुरींकउपायो
विधीयताम् ॥५३॥ कथंसराजाधर्मिष्ठःप्रजापालनतत्परः ॥ वियोज्यतेपुरःकाश्यादिवोदासोमहीपतिः॥५४॥अधर्मवर्तिनोयस्माद्विघ्नःस्यान्नेतरस्यतु ॥
तस्मात्कंप्रेषयामीशेयस्तंकाश्यावियोजयेत् ॥ ५५ ॥ धर्मवर्त्मानुसरतांयोविघ्नंसमुपाचरेत् ॥ तस्यैवजायतेविघ्नःप्रत्युतप्रेमवर्धिनि ॥५६ ॥ विनाच्छिद्रे
णतंभूपंनोत्सादयितुमुत्सहे ॥ मयैवहियतोरक्ष्याःप्रियेधर्मधुरंधराः ॥ ५७ ॥ नजरातमतिक्रामेन्नतंमृत्युर्जिघांसति ॥ व्याधयस्तंनबाधंतेधर्मवर्त्म
भृदत्रयः ॥ ५८ ॥ इतिसंचिंतयन्देवोयोगिनीचक्रमग्रतः ॥ ददर्शातिमहाप्रौढंगाढकार्यस्यसाधनम् ॥५९॥ अथदेव्यासमालोच्यव्योमकेशोमहामुने ॥
योगिनीवृंदमाहूयजगौवाक्यमिदंहरः ॥ ६० ॥ सत्वरंयातयोगिन्योममवाराणसींपुरीम् ॥ यत्रराजादिवोदासोराज्यंधर्मेणशास्त्यलम् ॥ ६१ ॥ स्वधर्म
विच्युतःकाशींयथातूर्णंत्यजेन्नृपः ॥ तथोपचरतप्राज्ञायोगमायाबलान्विताः ॥६२॥ यथापुनर्नवीकृत्यपुरींवाराणसीमहम् ॥ इतःप्रयामियोगिन्यस्तथा
क्षिप्रंविधीयताम् ॥ ६३ ॥ इतिप्रसादमासाद्यशासनंशिरसावहन् ॥ कृतप्रणामोनिर्यातोयोगिनीनांगणस्ततः ॥ ६४ ॥ ययुराकाशमाविश्यमनसोप्य
तिरंहसा ॥ परस्परंभाषमाणायोगिन्यस्तामुदान्विताः ॥६५॥ अद्यधन्यतराःस्मोवैदेवदेवेनयत्स्वयम्॥कृतप्रसादाःप्रहिताःश्रीमदानंदकाननम् ॥६६॥

मतएवगाढकार्यस्यदृढक्रियायाःसाधनकारणम् ॥ ५९ ॥ अथदेव्यासमालोच्येत्यस्यायंभावः ॥ यद्यप्यन्यद्वारास्वधर्मच्यावनमप्यन्याय्यंतथापिसर्वःस्वार्थंसमीहतेस्वकार्यमुद्धरेत्प्राज्ञइत्या
दिन्यायात्काशीप्राप्त्यन्यथानुपपत्त्याचस्वधर्मादन्यद्वाराव्युत्थाप्यकाशींत्याजयित्वासहगणेनावाभ्यान्तत्रगन्तव्यमितिदेव्यासहपर्यालोचनंकृत्वेति ॥ जगौ उवाच ॥ इदंवक्ष्यमाणम् ॥ ६० ॥
॥ ६१ ॥ उपचरतसमाचरत ॥ तस्माद्विभीमइतिचेत्तत्राह ॥ योगेति ॥ ६२ ॥ ६३ ॥ ततोमन्दरात् आज्ञानन्तरंवा ॥ ६४ ॥ अतिरंहसातिशयितवेगेन ॥ ६५ ॥ परस्परंभाषणमेवाहअद्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिद्वाभ्याम् ॥ ६६ ॥६७॥ इतीति ॥ इतीत्थंपरस्परंसंकथयन् ॥ तुसंभ्रमे ॥ अथानन्तरंसयोगिनीनांनिकुरंबःसमूहस्तांपुरींनयनातिथ्यंनेत्रगोचरमलंभयत्प्रापयदित्यन्वयः ॥ मुदितंमनोयस्यसः ॥ मन्दराद्रिरेवकुञ्जःतस्मिन्वायःकुञ्जस्तस्मात् ॥ ६८ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांचतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ चत्वारिंशेऽथपञ्चोर्ध्वेऽध्यायेतीवसुशोभने ॥ योगिनीनांसमूहस्यागमनंवर्ण्यतेस्फुटम् ॥ १ ॥ पूर्वाध्यायांतेयोगिनीनांनिकुरंबस्तांपुरींनयनातिथ्यमलंभयदित्युक्तंतदनन्तरंकिंवृत्तमित्यपेक्षायामाह ॥ अथेति ॥ अथपुर्यानेत्रविषयप्राप्त्यनन्तरंतद्योगिनीनांवृन्दंदूरादेवदृष्टिंप्रसार्यस्वचक्षुषोर्दैर्घ्यनिर्माणंफलान्वितंप्रशशंसेत्यन्वयः ॥ १ ॥ दिव्यप्रासादमालानांपताकाश्चप्रशशंसेत्यनुषज्जते ॥ कथम्भूताश्चलाश्चपलाःपल्लवाअग्राणियासांतास्तथा ॥ ताउत्प्रेक्षन्ते ॥ सादरमिति ॥ सादरंयथास्यात्तथादूरमार्गस्थान्पांथान्पथिकानाह्वयतीराकारयतीरिवेति ॥२॥ चञ्चदिति ॥ सुनीलंतमालश्यामलमपिव्योमाकाशंसुनिर्मलंशुक्लंभास्वरन्तेजो

अद्यसद्योमहालाभावभूतांनोतिदुर्लभौ ॥ त्रिनेत्रराजसंमानस्तथाकाशीविलोकनम् ॥ ६७ ॥ इतिमुदितमनाःसयोगिनीनांनिकुरंबस्त्वथमंदराद्रिकुंजात् ॥ नभसिलघुकृतप्रयाणवेगोनयनातिथ्यमलंभयत्पुरींताम् ॥ ६८ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेकाशीवर्णनंनामचतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ ॥ स्कंद उवाच ॥ ॥ अथतद्योगिनीवृंदंदूराद्दृष्टिंप्रसार्यच ॥ स्वनेत्रदैर्घ्यनिर्माणंप्रशशंसफलान्वितम् ॥ १ ॥ दिव्यप्रासादमालानांपताकाश्चलपल्लवाः ॥ सादरंदूरमार्गस्थान्पांथानाह्वयतीरिव ॥२॥ चंचत्प्रासादमाणिक्यैर्विजृंभितमरीचिभिः ॥ सुनीलमपिचव्योमवीक्ष्यमाणंसुनिर्मलम् ॥ ३ ॥ देवत्वंमाययाच्छाद्यवेषंकार्पटिकोचितम् ॥ विधायकाशीमविशद्योगिनीचक्रमक्रमम् ॥ ४ ॥ काचिच्चयोगिनीभूताकाचिज्जातातपस्विनी ॥ काचिद्भूत्सैरंध्रीकाचिन्मासोपवासिनी ॥५॥ मालाकारवधूःकाचित्काचिन्नापितसुंदरी ॥ सूतिकर्मविचारज्ञाऽपराभैषज्यकोविदा ॥ ६ ॥ वैश्याचकाचिदभवत्क्रयविक्रयचंचुरा ॥ व्यालग्राहिण्यभूत्काचिद्दासीधात्रीचकाचन ॥ ७ ॥ एकाचनृत्यकुशलात्वन्यागानविशारदा ॥ अपरावेणुवादज्ञापरावीणाधराभवत् ॥ ८ ॥ मृदंगवादनज्ञान्याकाचित्तालकलावती ॥ काचित्कार्मणतत्त्वज्ञाकाचिन्मौक्तिकगुंफिका ॥ ९ ॥ गंधभागविधिज्ञान्याकाचिदक्षकलालया ॥ आलापोल्लासकुशलाकाचिच्चत्वरचारिणी ॥ १० ॥

भास्वरंवावीक्ष्यमाणंदृश्यमानंप्रशशंसेतिपूर्वक्रिययैवसंवन्धः ॥ कैः ॥ चञ्चंतःस्फुरन्तोयेप्रासादास्तत्रस्थैर्माणिक्यैःकृत्वाविजृम्भितादेदीप्यमानायेमरीचयस्तैरित्यर्थः ॥३॥ देवत्वमिति ॥ रक्तवस्त्रादिधारिणस्तपस्विविशेषाःकार्पटिकास्तेषांवेषंविधायाऽक्रमंयथास्यात्तथायोगिनीचक्रंकाशीमविशदित्यन्वयः ॥ ४ ॥ एवंप्रथमतःप्रविश्यपश्चान्नानारूपंकृतवदित्याह काचित्यादिना ॥ योगिनीअष्टांगयोगयुक्ताकापालिकीवा ॥ तपस्विनीचान्द्रायणादिव्रतपरा ॥ सैरन्ध्रीपरवेश्मस्था ॥ ५ ॥ भैषज्यकोविदवैद्यकर्मणिनिपुणा ॥ ६ ॥ क्रयविक्रयविषयेचंचुरादक्षा ॥ व्यालःसर्पस्तद्ग्राहिणी ॥ धात्रीउपमाता ॥ ७ ॥ वीणाधनेतिपाठेवीणैवधनंधनसाधनंयस्याःसातथावीणावादनपरेत्यर्थः ॥ ८ ॥ तालएवकलाविद्यातद्वती ॥ कार्मणतत्त्वज्ञावशीकरणकर्मतत्त्वज्ञेत्यर्थः ॥ मौक्तिकगुंफिकामुक्तामालाग्रथिका ॥ ९ ॥ गंधभागविधिज्ञागंधविभागप्रकारज्ञा ॥ अक्षकलालयाद्यूतविद्याश्रयभूता ॥ आलापस्योल्लासेविलासेचातुर्यइतियावत् ॥ कुशला ॥ चत्वर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारिणीभिक्षुकीरूपेणप्रांगणचारिणी ॥ १० ॥ वंशस्यऊर्ध्वीकृत्यधृतस्योपर्यधिरोहणेदक्षा ॥ इतराउभयपार्श्वेऊर्ध्वीकृत्यबद्धायारज्ज्वामार्गेणतदुपरिगमनेइतरादक्षेतरपदयोःपरस्परमुभयत्रान्वयः ॥ पथिचीवरवेष्टनापथिपतितंयच्चीवरंवस्त्रखंडंतत्परिधानेत्यर्थः ॥ ११ ॥ परान्येत्युभयत्रसंबध्यते ॥ लक्षणानिसामुद्रिकोक्तानि ॥ चिकेतिजानातिकथयतिवेत्यर्थः ॥ किज्ञानइतिकिधातोरूपमिदम् ॥ १२ ॥ नैपुण्याद्दाक्ष्यात् ॥ १३ ॥ पुरुषस्यस्त्रियास्त्रियावापुरुषेणरहःसंबंधेजायमानेययावीर्यंनक्षरतिसागुटिका ॥ गुटिकातस्सिद्धिदाकाचित् ॥ चक्षुषोरंजनस्पर्शमात्रेणाभीष्टदेशप्राप्त्यादर्शनादिसिद्धिरंजनसिद्धिस्तद्दाकाचित् ॥ धातुवादेसुवर्णादिसिद्धिकथनेऽन्याविदग्धानिपुणा ॥ पादुकायाःपादस्पर्शमात्रेणाभीष्टदेशप्राप्तिःपादुकासिद्धिस्तद्दापरा ॥ १४ ॥ अग्निस्तंभादिषुत्रिषुपरेत्यनुषज्जते ॥ खेचरीत्वमाकाशगामित्वम् ॥ अदृश्यत्वंचक्षुष्मतःसंमुखेपिदर्शनानर्हत्वम् ॥ १५ ॥ आकर्षणीसिद्धिर्नामइच्छयास्त्रियाःपुरुषस्यबलादानयनम् ॥ उच्चाटनंसुस्थस्यापिदौस्थ्यापादनम् ॥ निजांगस्यसौंदर्येणलावण्येनयूनांचित्तस्यविमोहिनीक्षोभकर्त्री ॥१६॥ चिंतितार्थप्रदाऽभीष्टार्थप्रदा॥ज्योतिःकलाज्योतिर्विद्यातद्वती॥उपसंहरति ॥इत्यादीति॥अनुकृत्यात्मानंरचयित्वेत्यर्थः ॥ ॥ १७ ॥ गणःसमूहः ॥ जनइतिकचित् ॥ १८ ॥ वंध्यंव्यर्थंवांछितंयासांतास्तथा ॥ १९ ॥ प्रभ्विति ॥ प्रभोःकार्यमनिष्पाद्याकृत्वासदःसंभावनैधितःसदसिसभायांसंभावनयाकार्यकरणेदक्षतया एधितोवर्धितोऽक्षतविग्रहःसन्जीवन्सन्नित्यर्थः ॥ स्वामिनोऽग्रेकःस्थातुंशक्नुयान्नकोपीत्यर्थः ॥ २० ॥ किंचान्यच्चेति ॥ इदंशब्दार्थमेवाह प्रभुंविनापीतिसार्धेन ॥ २१ ॥ सद्भृत्यत्वंनामयथाशक्तिकार्यकारित्वम् ॥ २२ ॥ नाद्यापीतिस्कंदोक्तिः ॥ हेमहामुनेतदारभ्यतंकालमारभ्यजगत्त्रयंचरंत्योपियोगिन्योऽद्यापिकाशींविहायान्यत्रनैवतिष्ठंति ॥ यत्रकुत्रापिगत्वाकाश्यामेवागत्यतिष्ठंती

वंशाधिरोहणेदक्षारज्जुमार्गेणचेतरा ॥ काचिद्वातुलचेष्टाऽभूत्पथिचीवरवेष्टना ॥ ११ ॥ अपत्यदाऽनपत्यानांपरातत्रपुरेऽवसत् ॥ काचित्करांघ्रिरेखाणां लक्षणानिचिकेतिच ॥ १२ ॥ चित्रलेखननैपुण्यात्काचिज्जनमनोहरा ॥ वशीकरणमंत्रज्ञाकाचित्तत्रचचारह ॥ १३ ॥ गुटिकासिद्धिदाकाचित्काचिदंजनसिद्धिदा ॥ धातुवादविदग्धान्यापादुकासिद्धिदापरा ॥ १४ ॥ अग्निस्तंभंजलस्तंभंवाक्स्तंभंचाप्यशिक्षयत् ॥ खेचरीत्वंददौकाचिददृश्यत्वंपराददौ ॥ १५ ॥ काचिदाकर्षणींसिद्धिंददावुच्चाटनंपरा ॥ काचिन्निजांगसौंदर्ययुवचित्तविमोहिनी ॥ १६ ॥ चिंतितार्थप्रदाकाचित्काचिज्ज्योतिःकलावती ॥ इत्यादिवेषभाषाभिरनुकृत्यसमंततः ॥ १७ ॥ प्रत्यंगणंप्रतिगृहंप्राविशद्योगिनीगणः ॥ इत्थमब्दंचरंत्यस्तायोगिन्योऽहर्निशंपुरि ॥ १८ ॥ नच्छिद्रंलेभिरेकापिनृपविघ्नचिकीर्षवः ॥ ततःसमेत्यताःसर्वायोगिन्योवंध्यवांछिताः ॥ तस्थुःसंमंत्र्यतत्रैवनगतामंदरंपुनः ॥ १९ ॥ प्रभुकार्यमनिष्पाद्यसदःसंभावनैधितः ॥ कःपुरःशक्नुयात्स्थातुंस्वामिनोक्षतविग्रहः ॥ २० ॥ अन्यच्चचिंतितंताभिर्योगिनीभिरिदंमुने ॥ प्रभुंविनापिजीवामोनतुकाशींविनापुनः ॥ २१ ॥ प्रभूरुष्टोपिसद्भृत्येजीविकामात्रहारकः ॥ काशीहरेत्कराद्भ्रष्टापुरुषार्थचतुष्टयम् ॥ २२ ॥ नाद्यापिकाशींसंत्यज्यतदारभ्यमहामुने ॥ योगिन्योन्यत्रतिष्ठंतिचरंत्योपिजगत्त्रयम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थः ॥ २३ ॥ पुनरपितासामेवर्चिंतितमाह प्राप्यापीतिपंचभिः ॥ तितिक्षातित्यक्तुमिच्छति ॥ किंपुनर्यस्त्यजतित्यक्तवान्वा यइति ॥ २४ ॥ मोक्षरूपस्यनिक्षेपस्यकलशीमाश्रयमित्यर्थः ॥२५॥ विमुखोपीश्वरोयदास्माकंसंमुखोभवितातदावयंकृतकृत्याःस्मेत्यन्वयः ॥ कथंभूतईश्वरः ॥ पुण्यंपुण्यहेतुःपुण्यस्वरूपोवा ॥२६ ॥ २७॥ कुतोनरमतेतत्राह ॥ शंभोरिति ॥२८॥२९॥ इत्थमितिश्लोकद्वयेनप्रश्नचतुष्टयम् ॥३० ॥३१॥ सर्वेषांप्रश्नानांप्रत्युत्तरंप्रत्यभिज्ञापयतिभगवान्व्यासः ॥ श्रुत्वेति ॥३२॥ फलसहितंप्रथमप्रश्नप्रत्युत्तरंप्रतिजानातिस्कंदः॥नामधेयानीति ॥ क्षयंतिनश्यंति॥३३॥ नामान्याह गजाननेत्यष्टभिः ॥ तत्रप्रचण्डाचण्डविक्रमेतिसविशेषणमेकंनाम ॥ तापनीशोषणीदाष्टिरीतिनामद्वयम् ॥ तापनीदृष्टिःशोषणीदृष्टिरितिवा ॥ तापनीशोषण्यौदृष्टीयस्याःसात।पनी

प्राप्यापिश्रीमतींकाशींयस्तितिक्षतिदुर्मतिः ॥ सएवप्रत्युतत्यक्तोधर्मकामार्थमुक्तिभिः ॥२४॥ कःकाशींप्राप्यदुर्बुद्धिरपरत्रयियासति ॥ मोक्षनिक्षेपकलशींतुच्छश्रीकृतमानसः ॥ २५ ॥ विमुखोपीश्वरोस्माकंकाशीसेवनपुण्यतः ॥ संमुखोभवितापुण्यंकृतकृत्याःस्मतद्वयम् ॥ २६ ॥ दिनैःकतिपयैरेवसर्वज्ञोपिसमेष्यति ॥ विनाकाशींनरमतेयतोऽन्यत्रत्रिलोचनः ॥ २७ ॥ शंभोःशक्तिरियंकाशीकाचित्सर्वैरगोचरा ॥ शंभुरेवहिजानीयादेतस्याःपरमंसुखम् ॥ ॥ २८ ॥ इतिनिश्चित्यमनसिशंभोरानंदकानने ॥ अतिष्ठद्योगिनीवृंदंकयाचिन्माययावृतम् ॥ २९ ॥ व्यासउवाच ॥ ॥ इत्थंसमाकर्ण्यमुनिःपुनःपप्रच्छषण्मुखम् ॥ कानिकानिचनामानितासांतानिवदेश्वर ॥ ३० ॥ भजनाद्योगिनीनांचकाश्यांकिंजायतेफलम् ॥ कस्मिन्पर्वणिताःपूज्याःकथंपूज्याश्चतद्वद ॥ ३१ ॥ श्रुत्वेतिप्रश्नमौमेयोयोगिनीसंश्रयंततः ॥ प्रत्युवाचमुनेवच्मिशृणोत्ववहितोभवान् ॥ ३२ ॥ ॥ स्कंदउवाच ॥ ॥ नामधेयानिवक्ष्यामियोगिनीनांघटोद्भव ॥ आकर्ण्ययानिपापानिक्षयंतिभविनांक्षणात् ॥३३॥ गजाननासिंहमुखीगृध्रास्याकाकतुंडिका ॥ उष्ट्रग्रीवाहयग्रीवावाराहीशरभानना ॥३४॥ उलूकिकाशिवारावामयूरीविकटानना ॥ अष्टवक्राकोटराक्षीकुब्जाविकटलोचना ॥३५॥ शुष्कोदरीललज्जिह्वाश्वदंष्ट्रावानरानना ॥ ऋक्षाक्षीकेकराक्षीचबृहत्तुंडासुराप्रिया ॥ ३६ ॥ कपालहस्तारक्ताक्षीशुकीश्येनीकपोतिका ॥ पाशहस्तादंडहस्ताप्रचंडाचंडविक्रमा ॥ ३७ ॥ शिशुघ्नीपापहंत्रीचकालीरुधिरपायिनी ॥ वसाधयागर्भभक्षाशवहस्तांत्रमालिनी ॥३८॥ स्थूलकेशीबृहत्कुक्षिःसर्पास्याप्रेतवाहना ॥ दंदशूककराक्रौंचीमृगशीर्षावृषानना ॥ ३९ ॥ व्यात्तास्याधूमनिःश्वासाव्योमैकचरणोर्ध्वदृक् ॥ तापनीशोषणीदृष्टिःकोटरीस्थूलनासिका ॥ ४० ॥ विद्युत्प्रभाबलाकास्यामार्जारीकटपूतना ॥ अट्टाट्टहासाकामाक्षीमृगाक्षीमृगलोचना ॥४१॥ नामानीमानियोमर्त्यश्चतुःषष्टिंदिनेदिने ॥ जपेत्त्रिसंध्यंतस्येहदुष्टबाधाप्रशाम्यति ॥ ४२ ॥ नडाकिन्योनशाकिन्योनकूष्मांडानराक्षसाः ॥ तस्यपीडांप्रकुर्वंतिनामानीमानियःपठेत् ॥ ४३ ॥

शोषणीदृष्टिरितिचैकंनाम ॥ तदाप्रचण्डाचण्डविक्रमेतिनामद्वयम् ॥ पूर्वस्मिन्पक्षेप्रतिश्लोकमष्टावष्टौनामानि ॥ अपरस्मिन्पक्षेचतुर्थश्लोकेनवनामानि ॥ सप्तमश्लोकेसप्तेतिविशेषः ॥ ३४ ॥ अष्टौअवयवावक्रायस्याःसातथा ॥ अष्टवक्रेतिक्वचित् ॥ कोटरेइवाक्षिणीयस्याःसातथा ॥ ३५ ॥ ३६ ॥ ३७ ॥ वसाधयावसान्धयतिपिबतीतिवसाधयामेदःपायिनीत्यर्थः ॥ ३८ ॥ दंदशूककरासर्पहस्तासर्पाकारहस्तेतिवा ॥ ३९ ॥ कोटरीकोटरवद्गम्भीरास्थूलोदरेत्यर्थः ॥ पुरुषोत्तमदेशेप्रसिद्धादेव्यामूर्तिविशेषरूपावा ॥ ४० ॥ ४१ ॥ ४२ ॥ डाकिन्यःशाकिन्यश्चदुष्टग्रहविशेषाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कूष्मांडागणविशेषाः॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८॥ भूतायांचतुर्दश्याम् ॥ ४९ ॥ ५० ॥ लघुकोलिप्रमाणतःसूक्ष्मवदरीफलप्रमाणेन ॥५१॥५२॥ ५३ ॥ ५४ ॥ ॥ इति श्रीरामानन्दकृतायांकाशिखण्डटीकायांपंचचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ षट्चत्वारिंशकेध्यायेसर्वपापैकनाशने ॥ लोलार्कमहिमातावद्वर्ण्यतेऽतिमनोहरः ॥ १ ॥ काशीस्थानद्वा

शिशूनांशांतिकारीणिगर्भशांतिकराणिच ॥ रणेराजकुलेवापिविवादेजयदान्यपि ॥ ४४ ॥ लभेदभीप्सितांसिद्धिंयोगिनीपीठसेवकः ॥ मंत्रांतराण्यपिजपंस्तत्पीठेसिद्धिभाग्भवेत् ॥ ४५ ॥ बलिपूजोपहारैश्चधूपदीपसमर्पणैः ॥ क्षिप्रंप्रसन्नायोगिन्यःप्रयच्छेयुर्मनोरथान् ॥ ४६ ॥ शरत्कालेमहापूजांतत्रकृत्वाविधानतः ॥ हवींषिहुत्वामंत्रज्ञोमहतींसिद्धिमाप्नुयात् ॥ ४७ ॥ आरभ्याश्वयुजःशुक्लांतिथिंप्रतिपदंशुभाम् ॥ पूजयेन्नवमींयावन्नरःसिंचातितमाप्नुयात् ॥ ४८ ॥ कृष्णपक्षस्यभूतायामुपवासीनरोत्तमः ॥ तत्रजागरणंकृत्वामहतींसिद्धिमाप्नुयात् ॥ ४९ ॥ प्रणवादिचतुर्थ्यंतैर्नामभिर्भक्तिमान्नरः ॥ प्रत्येकंहवनंकृत्वाशतमष्टोत्तरंनिशि ॥ ५० ॥ ससर्पिषागुग्गुलुनालघुकोलिप्रमाणतः ॥ यांयांसिद्धिमभीप्सेततांतांप्राप्नोतिमानवः ॥५१॥ चैत्रकृष्णप्रतिपदितत्रयात्राप्रयत्नतः ॥ क्षेत्रविघ्नप्रशांत्यर्थंकर्तव्यापुण्यकृज्जनैः ॥ ५२ ॥ यात्रांचसांवत्सरिकींयोनकुर्यादवज्ञया ॥ तस्यविघ्नंप्रयच्छंतियोगिन्यःकाशिवासिनः ॥ ५३ ॥ अग्रेकृत्वास्थिताःसर्वास्ताःकाश्यांमणिकर्णिकाम् ॥ तन्नमस्कारमात्रेणनरोविघ्नैर्नबाध्यते ॥ ५४ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेचतुःषष्टियोगिन्यागमनंनामपंचचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ स्कंदउवाच ॥ ॥ गतेथयोगिनीवृंदेदेवदेवोघटोद्भव ॥ काशीप्रवृत्तिजिज्ञासुःप्राहिणोदंशुमालिनम् ॥१॥ देवदेवउवाच ॥ ॥ सप्ताश्वत्वरितोयाहिपुरींवाराणसींशुभाम् ॥ यत्रास्तिसदिवोदासोधर्ममूर्तिर्महीपतिः ॥ २ ॥ तस्यधर्मविरोधेनयथातत्क्षेत्रमुद्वसेत् ॥ तथाकुरुष्वभो क्षिप्रंमावमंस्थाश्चतंनृपम् ॥ ३ ॥ धर्ममार्गप्रवृत्तस्यक्रियतेयावमानना ॥ साभवेदात्मनोनूनंमहदेनश्चजायते ॥ ४ ॥ तवबुद्धिविकासेनच्यवतेचेत्सधर्मतः ॥ तदासानगरीभानोत्वयोद्वास्याऽसहैःकरैः ॥ ५ ॥ कामक्रोधौलोभमोहौमत्सराहंकृतीअपि ॥ तेतत्रनभवेतांयत्तत्कालोपिनतंजयेत् ॥ ६ ॥ यावद्धर्मेस्थिराबुद्धिर्यावद्धर्मेस्थिरंमनः ॥ तावद्विघ्नोदयःक्वास्तिविपद्यपिरवेनृषु ॥ ७ ॥

दशादित्यान्वक्तुंप्रस्तावयति ॥ गतेऽथेति ॥ अंशुमालिनंसूर्यम् ॥ १ ॥ २ ॥ उद्वसेदुच्छिन्नंभवेत् ॥३॥ एनःपापम् ॥४॥ असहैर्दुःसहैःकरैरश्मिभिः ॥ पक्षान्तरेमूर्तिभेदेनकरैर्हस्तैः ॥ ५ ॥ कामक्रोधाविति ॥ यद्यस्मात्तत्रराजनितेप्रसिद्धेमत्सराहंकृतीतौकामक्रोधौतौलोभमोहौचनभवेतांनसंभवतइत्यर्थः ॥ तत्तस्मात्कालोपिनतंजयेदित्यन्वयः ॥ ६ ॥ विपद्यपिआपत्कालेपि ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्रहेसूर्ययस्मात्त्वंसर्वेषांचेष्टितंवेत्स्यतएवजगच्चक्षुर्जगत्प्रकाशकोधर्माधर्मबोधकइतिवाकार्यसिद्धयेव्रज ॥ ८ ॥ देवस्याज्ञांरविरादायनभोध्वानमाकाशमार्गंगच्छतीतिनभोध्वगामन्यांमूर्तिंप्रकल्प्याहोरात्रंदिननक्तमभिव्याप्यकाशीमभिमुखोऽभवत् काशींप्राप्तुंप्रवृत्तइत्यर्थः ॥९॥ त्वरयाकाश्यभिमुखत्वेहेतुमाह॥ मनसेति ॥ लोलःक्षुब्धआकुलइतियावत् ॥ आनंदितइतिवा॥ नैकपादतांबहुपादतामित्यर्थः ॥ १० ॥ हंसत्वमिति ॥ तस्यसदासर्वदानभोध्वनीनस्यनभोमार्गगामिनःसूर्यस्यहंसत्वंहंतिगच्छतीतिहंसस्तस्यभावोहंसत्वंसफलतामगात् फलवज्जातमित्यर्थः ॥ तत्रहेतुगर्भंविशेषणमाह॥काशींप्रतियियासतोगंतुमिच्छतः ॥११॥ अथेत्यानंतर्येमंगलेवा ॥ धर्मध्वस्तिंधर्मलोपम् ॥१२॥ विभावसुःसूर्यः॥ अवसरंछिद्रम् ॥ स्वधर्मिणिस्वधर्मनिष्ठे ॥ सुधर्मणीतिक्वचित् ॥१३॥ नानारूपमेवदर्शयति कदाचिदित्यादिना ॥ १४ ॥ दीनतांदरिद्रताम् ॥ १५ ॥ वेदबाह्यांपाषंडात्मिकाम् ॥ दृष्टःप्रत्ययोज्ञानंयस्यतद्दृष्टप्रत्ययंप्रत्यक्षज्ञानविषयमैहिकमेववस्तुजातम् ॥ चार्वा

सर्वेषामिहजंतूनांत्वंवेत्सिब्रध्नचेष्टितम् ॥ अतएवजगच्चक्षुर्व्रजत्वंकार्यसिद्धये ॥ ८ ॥ रविरादायदेवाज्ञांमूर्तिमन्यांप्रकल्प्यच ॥ नभोध्वगामहोरात्रंकाशीमभिमुखोऽभवत् ॥ ९ ॥ मनसातीवलोलोऽभूत्काशीदर्शनलालसः ॥ सहस्रचरणोप्यैच्छत्तदाखेनैकपादताम् ॥ १० ॥ हंसत्वंतस्यसूर्यस्यतदासफलतामगात् ॥ सदानभोध्वनीनस्यकाशींप्रतियियासतः ॥ ११ ॥ अथकाशींसमासाद्यरविरंतर्बहिश्चरन् ॥ मनागपिनतद्भूपेधर्मध्वस्तिमवैक्षत ॥१२॥ विभावसुर्वसन्काश्यांनानारूपेणवत्सरम् ॥ क्वचिन्नावसरंप्रापतत्रराज्ञिसुधर्मिणि ॥ १३ ॥ कदाचिदतिथिर्भूतोदुर्लभंप्रार्थयन्रविः ॥ नतस्यराज्ञोविषयेदुर्लभंकिंचिदैक्षत ॥ १४ ॥ कदाचिद्याचकोजातोबहुदोपिकदाप्यभूत् ॥ कदाचिद्दीनतांप्राप्तःकदाचिद्व्रणकोप्यभूत् ॥ १५ ॥ वेदबाह्यांक्रियांचापिकदाचित्प्रत्यपादयत्॥कदाचित्स्थापयामासदृष्टप्रत्ययमैहिकम् ॥१६॥ कदाचिज्जटिलोजातःकदाचिच्चदिगंबरः ॥ सकदाचिज्जांगुलिकोविषविद्याविशारदः॥ ॥ १७ ॥ सर्वपाषंडधर्मज्ञःकदाचिद्ब्रह्मवाद्यभूत् ॥ ऐंद्रजालिकआसीच्चकदाचिद्भ्रामयञ्जनान् ॥ १८ ॥ नानाव्रतोपदेशैश्चकदाचित्सपतिव्रताः ॥ क्षोभयामासबहुशःसदृष्टांतकथानकैः ॥ १९ ॥ कापालिकव्रतधरःकदाचिच्चाभवद्द्विजः ॥ कदाचिदपिविज्ञानीधातुवादीकदाचन ॥ २० ॥ क्वचिद्विप्रःक्वचिद्राजपुत्रोवैश्योंत्यजःक्वचित ॥ ब्रह्मचारीक्वचिदभूद्गृहीवनचरःक्वचित् ॥ २१ ॥ यतिःकदाचिदितिसरूपैरभ्रामयज्जनान् ॥ सर्वविद्यासुकुशलःसर्वज्ञश्चाभवत्क्वचित् ॥ २२ ॥

काणांमतंस्थापयामासेत्यर्थः ॥ तथाचश्रूयते ॥ प्रत्यक्षमेकंचार्वाकाइति ॥ १६ ॥ जटिलःपाशुपतोजटामात्रधारीवा ॥ जांगुलिकोवैद्यविशेषः ॥ एतस्यैवार्थमाह ॥ विषविद्याविशारदइति ॥ ॥ १७ ॥ सर्वःश्रीरुद्रस्तेननिर्मितःपाषंडधर्मोवेदविरुद्धशैवागमोक्तधर्मस्तंजानातीतिसर्वपाषंडधर्मज्ञः ॥ तथाचपाद्मे ॥ स्वागमैःकल्पितैस्त्वंचजनान्मद्विमुखान्कुर्वितिभगवद्वचनम् ॥ ब्रह्मवादी वेदवादी ॥ इंद्रजालंकुहकंतेनव्यवहरतीत्यैंद्रजालिकः॥१८॥ सदृष्टांतकथानकैर्दृष्टांतसहिताभिःकथाभिः ॥१९॥ कापालिकःशैवविशेषो लोकेयोगीतिप्रासिद्धस्तद्व्रतधरः ॥ द्विजःपक्षी ॥ द्विजोब्राह्मणःसन्कापालिकव्रतधरइतिवा ॥ विज्ञानीब्रह्मज्ञानी ॥ धातुवादीस्वर्णादिसिद्धिवादी ॥ २०॥ अथवाकदाचिदभवद्द्विजइत्येतत्प्रपंचयति क्वचिद्विप्रइतिसार्धपादेन ॥२१॥ अभ्रामयद्भ्रामयामास ॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ चिंतयार्तःपीडितः ॥ २४ ॥ चिंतामेवाह मंदरमितिचतुर्भिः ॥ तत्तदा ॥ २५ ॥ उररीकृत्यस्वीकृत्य ॥ तस्यविश्वेश्वरस्यपुरःकथंतिष्ठेस्थास्यामि ॥ २६ ॥ ओंकृत्यस्वीकृत्य ॥ अवहेलमवज्ञाम् ॥ चएवार्थे ॥ यामिचेतिसंवध्यते ॥ २७ ॥ प्रतंगतांशलभताम् ॥ २८ ॥ यस्मादेवंतत्तस्मादत्रैवस्थास्यामीति ॥ एवकारार्थमेवाह ॥ नत्यक्ष्यामीति ॥ २९ ॥ तर्हिकार्यानिवेदने पापंस्यान्नेत्याह ॥ पुरइति ॥ कार्यरूपमर्थंकार्यार्थमगोचरयित्वा इहकाश्यांतिष्ठतोमेयत्पापंभाविभविष्यतितस्यपापस्यकाशीनिष्कृतिःप्रायश्चित्तम् ॥ काशीवासइतिक्वचित्पाठः ॥३०॥ नकेवलमेतस्यैवपापस्यकाशीनिष्कृतिःकिंत्वन्येषामपीत्याह ॥ अन्यान्यपीति ॥ सतामितिनप्रविशतांविशेषणंकिंतुकाशीप्रविष्टानांतथात्वात्तथोक्तम् ॥ ३१ ॥ किंच बुद्धीति ॥ आशासिशासितोहंकिंधर्मोहिरक्ष्यता

इतिनानाविधैरूपैश्वरन्काश्यांग्रहेश्वरः ॥ नकदापिजनेक्वापिच्छिद्रंप्रापकदाचन ॥ २३ ॥ ततोनिनिंदचात्मानंचिंतार्तःकश्यपात्मजः ॥ धिक्परप्रेष्यतांयस्यांयशोलभ्येतनक्वचित् ॥ २४ ॥ ॥ मार्तंडउवाच ॥ ॥ मंदरंयदियाम्यद्यसद्यस्तत्क्रुद्ध्यतीश्वरः ॥ अनिष्पादितकार्यार्थेमयिसामान्यभृत्यवत् ॥ ॥ २५ ॥ कोपमप्युररीकृत्ययदियायांकथंचन ॥ कथंतिष्ठेपुरस्तस्यतर्हिवैमूढभृत्यवत् ॥ २६ ॥ अथोंकृत्यावहेलंवायामिचेच्चकथंचन ॥ क्रोधाग्निरीक्षेत्त्यक्षोमांविवंपेयंतदामया ॥ २७ ॥ हरकोपानलेनूनंयदियातःपतंगताम् ॥ पितामहोपिमांत्रातुंतदाशक्ष्यतिनस्फुटम् ॥ २८ ॥ स्थास्याम्यत्रैवतन्नित्यंनत्यक्ष्यामिकदाचन ॥ क्षेत्रसंन्यासविधिनावाराणस्यांकृताश्रमः ॥ २९ ॥ पुरःपुरारेःकार्यार्थमनिवेद्येहतिष्ठतः ॥ यत्पापंभाविमेतस्यकाशीपापस्यनिष्कृतिः ॥३०॥ अन्यान्यपिचपापानिमहांत्यल्पानियानिच ॥ क्षयंतितानिसर्वाणिकाशींप्रविशतांसताम् ॥३१॥ बुद्धिपूर्वंमयाचैतन्नपापंसमुपार्जितम् ॥ पुरारिणैवहिपुराऽऽशासिधर्मोहिरक्ष्यताम् ॥ ३२ ॥ धर्मोहिरक्षितोयेनदेहेसत्वरगत्वरे ॥ त्रैलोक्यंरक्षितंतेनकिंकामार्थैःसुरक्षितैः ॥ ३३ ॥ रक्षणीयोयदिभवेत्कामःकामारिणाकथम् ॥ क्षणादनंगतांनीतोबहूनांसुखकार्यपि ॥३४॥ अर्थश्चेत्सर्वथारक्ष्यइतिकैश्चिदुदाहृतम् ॥ तत्कथंनहरिश्चंद्रोऽरक्षत्कुशिकनंदने ॥ ३५ ॥ धर्मस्तुरक्षितःसर्वैरपिदेहव्ययेनत्र ॥ शिबिप्रभृतिभूपालैर्दधीचिप्रमुखैर्द्विजैः ॥ ३६ ॥ अयमेवहिवैधर्मःकाशीसेवनसंभवः ॥ रुषितादपिरुद्रान्मांरक्षिष्यतिनसंशयः ॥ ३७ ॥ अवाप्यकाशींदुष्प्रापांकोजहातिसचेतनः ॥ रत्नाकरस्थमुत्सृज्यकःकाचंसंजिघृक्षति ॥ ३८ ॥

मिति ॥ रक्षतेतिपाठेधर्मंरक्षतात्रिपुरारिणाधर्मोऽशासिरक्षितव्यइत्युक्तमित्यर्थः ॥ ३२ ॥ धर्मरक्षणेनापिकिंतत्राह ॥ धर्मोहीति ॥ सुरक्षितैःशोभनप्रकारेणरक्षितैरपिकामार्थैःकिं नकिमपीत्यर्थः ॥३३॥ कामार्थयोरक्षणाभावंतर्केणोपपादयति रक्षणीयइतिद्वयेन ॥ ३४ ॥ अरक्षदर्थमितिशेषः ॥ कुशिकनंदनेविश्वामित्रे ॥३५॥ एवंकामार्थयोररक्षणंतर्केणोपपाद्यधर्मस्यरक्षणंसाधयति ॥ धर्मस्त्विति ॥ शिबिर्हिशरणागतकपोतत्राणायस्वमांसंददाविति भारतेप्रसिद्धम् ॥ दधीचिस्तुयाचकेभ्योदेवेभ्यःस्वास्थीन्यददादितिचभागवते ॥ प्रभृतिप्रमुखशब्दाभ्यांकर्णजीमूतवाहनादयोगृह्यन्ते ॥ तथाचश्रूयते ॥ त्वचंकर्णःशिबिर्मांसंजीवंजीमूतवाहनः ॥ ददौदधीचिरस्थीनिकिंनदेयंमहात्मनामिति ॥३६॥ नन्वेवमपिरुद्रस्यरोषादनिष्टंभविष्यतितत्रा॥अयमिति ॥३७॥ ननुतथाप्येता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतानिर्वंधेनालमित्याशंक्यकाशीमाहात्म्यंवर्णयन्काशीं प्राप्यप्राणिमात्रस्यगमनाभावंद्रढयति अवाप्येतिचतुर्भिः ॥ संजिघृक्षतिग्रहीतुमिच्छति ॥ ३८ ॥ यियासतिगन्तुमिच्छति ॥ किंपु
नर्योगतइतिभावः ॥ निधानंनिधिम् ॥ ३९ ॥ ४० ॥ ४१ ॥ अनिष्टंस्वीकृत्यापिगमनाभावमाह कुपितइतिद्वाभ्याम् ॥ स्वात्मावबोधजंस्वस्यआत्मनाआत्मत्वेनेतियावत् ॥ योऽवबोधोज्ञानंतस्मा
ज्जातम् ॥ स्वस्यात्मनोयोऽवबोधोनित्यशुद्धमुक्तस्वरूपत्वेनज्ञानंतस्माज्जातमितिवा ॥ ४२ ॥ खद्योताभानिरात्रौप्रकाशमानःक्षुद्रकीटविशेषःखद्योतो जुनीतिगौडेप्रसिद्धस्ततसदृशानि ॥४३॥ ४४ ॥

वाराणसींसमुत्सृज्ययस्त्वन्यत्रयियासति ॥ हत्वानिधानंपादेनसोर्थमिच्छतिभिक्षया ॥ ३९ ॥ पुत्रमित्रकलत्राणिक्षेत्राणिचधनानिच ॥ प्रतिजन्मे
हलभ्यंतेकाश्येकानैवलभ्यते ॥ ४० ॥ येनलब्धापुरीकाशीत्रैलोक्योद्धरणक्षमा ॥ त्रैलोक्यैश्वर्यंदुष्प्रापंतेनलब्धंमहासुखम् ॥ ४१ ॥ कुपितोपिहिमे
रुद्रस्तेजोहानिंविधास्यति ॥ काश्यांचलप्स्येतत्तेजोयद्वैस्वात्मावबोधजम् ॥ ४२ ॥ इतराणीहतेजांसिभासंतेतावदेवहि ॥ खद्योताभानियावन्नोजृंभते
काशिजंमहः ॥ ४३ ॥ इतिकाशीप्रभावज्ञोजगच्चक्षुस्तमोनुदः ॥ कृत्वाद्वादशधात्मानंकाशीपुर्यांव्यवस्थितः ॥ ४४ ॥ लोलार्कउत्तरार्कश्चसांबादि
त्यस्तथैवच ॥ चतुर्थोद्रुपदादित्योमयूखादित्यएवच ॥ ४५ ॥ खखोल्कश्चारुणादित्योवृद्धकेशवसंज्ञकौ ॥ दशमोविमलादित्योगंगादित्यस्तथैवच ॥
॥ ४६ ॥ द्वादशश्चयमादित्यःकाशिपुर्यांघटोद्भव ॥ तमोऽधिकेभ्योदुष्टेभ्यःक्षेत्रंरक्षंत्यमीसदा ॥ ४७ ॥ तस्यार्कस्यमनोलोलंयदासीत्काशिदर्शने ॥
अतोलोलार्कइत्याख्याकाश्यांजाताविवस्वतः ॥ ४८ ॥ लोलार्कस्त्वसिसंभेदेदक्षिणस्यांदिशिस्थितः ॥ योगक्षेमंसदाकुर्यात्काशीवासिजनस्यच ॥
॥ ४९ ॥ मार्गशीर्षस्यसतम्यांषष्ठ्यांवारविवासरे ॥ विधायवार्षिकींयात्रांनरःपापैःप्रमुच्यते ॥ ५० ॥ कृतानियानिपापानिनरैःसंवत्सरावधि ॥ नश्यं
तिक्षणतस्तानिषष्ठ्यर्केलोलदर्शनात् ॥ ५१ ॥ नरःस्नात्वासिसंभेदेसंतर्प्यपितृदेवताः ॥ श्राद्धंविधायविधिनापित्रानृण्यमवाप्नुयात् ॥५२॥ लोलार्कसं
गमेस्नात्वादानंहोमंसुरार्चनम् ॥ यत्किंचित्क्रियतेकर्मतदानंत्यायकल्पते ॥ ५३ ॥ सूर्योपरागेलोलार्केस्नानदानादिकाःक्रियाः ॥ कुरुक्षेत्राद्दशगुणाभवं
तीहनसंशयः ॥ ५४ ॥ लोलार्केरथसतम्यांस्नात्वागंगासिसंगमे ॥ सप्तजन्मकृतैःपापैर्मुक्तोभवतितत्क्षणात् ॥ ५५ ॥

॥ ४५ ॥ ४६ ॥ तमोधिकेभ्यआत्यन्तिकतामसेभ्यः ॥ ४७ ॥ लोलार्कनामनिर्वक्ति ॥ तस्यार्कस्येति ॥ लोलमानन्दितम् ॥ ४८ ॥ ४९ ॥ ५० ॥ षष्ठ्यर्केषष्ठ्यायुक्तेऽर्कदिने ॥
॥५१॥५२॥ लोलार्कसङ्गमेलोलार्कसमीपेसङ्गमोलोलार्केणवासङ्गमःलोलार्कसंगमस्तस्मिन्न ॥ लोलार्कसम्भवइतिपाठे लोलार्कस्यसम्भवोयस्मिन्संगमेतस्मिन्नित्यर्थः ॥ ५३ ॥ ५४ ॥ रथसप्तम्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माघशुक्लसप्तम्याम् ॥ ५५ ॥ ५६ ॥ पामाविचर्चिकयोरवान्तरभेदः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ आप्येतआप्यते ॥ ६१ ॥ नन्वादित्योवैयूपोयजमानःप्रस्तरइत्यादिवदर्थवादोभविष्यतिनेत्याह ॥ नार्थवादोयमिति ॥ यथाऽयमर्थवादोनभवतितथापूर्वमेवव्याख्यातमिति ॥ ६२ ॥ ६३ ॥ अर्थवादवक्तॄणांदोषंस्वयमेवाह ॥ उदाहरतीति ॥ ६४ ॥ ६५ ॥ ॥ ६६ ॥ किंच तस्यांदिशिदुष्टानांप्रवेशोप्यत्रनास्तीत्याह ॥ लोलार्केति ॥ लोलार्कस्यकैरैरश्मिभिर्निष्टप्तादग्धाअसिर्नदीतस्याधारयाप्रवाहेणविखंण्डितागतिवैकल्यम्प्रापिताःमहामलाअपिका

प्रत्यर्कवारंलोलार्कंयःपश्यतिशुचिव्रतः ॥ नतस्यदुःखंलोकेस्मिन्कदाचित्संभविष्यति॥५६॥ नतस्यदुःखंनोपामानदद्रुर्नविचर्चिका ॥ लोलार्कमर्केयः पश्येत्तत्पादोदकसेवकः ॥ ५७ ॥ वाराणस्यामुषित्वापियोलोलार्कंनसेवते ॥ सेवंतेतंनरंनूनंक्लेशाःक्षुद्व्याधिसंभवाः ॥ ५८ ॥ सर्वेषांकाशितीर्थानांलोलार्कःप्रथमंशिरः ॥ ततोऽगान्यन्यतीर्थानितज्जलप्लावितानिहि ॥ ५९ ॥ तीर्थांतराणिसर्वाणिभूमीवलयगान्यपि ॥ असिसंभेदतीर्थस्यकलांनार्हंतिषोडशीम् ॥ ६० ॥ सर्वेषामेवतीर्थानांस्नानाद्यल्लभ्यतेफलम् ॥ तत्फलंसम्यगाप्येतनरैर्गंगासिसंगमे ॥ ६१ ॥ नार्थवादोयमुदितःस्तुतिवादोनवैमुने ॥ सत्यंयथार्थवादोयंश्रद्धेयःसद्भिरादरात् ॥ ६२ ॥ यत्रविश्वेश्वरःसाक्षाद्यत्रस्वर्गतरंगिणी ॥ मिथ्यातत्रानुमन्यंतेतार्किकाश्चानुसूयकाः ॥ ६३ ॥ उदाहरंतियेमूढाःकुतर्कबलदर्पिताः ॥ काश्यांसर्वेर्थवादोयंतेविट्कीटायुगेयुगे ॥ ६४ ॥ कस्यचित्काशितीर्थस्यमहिम्नोमहतस्तुलाम् ॥ नाधिरोहेन्मुने नूनमपित्रैलोक्यमंडपः ॥ ६५ ॥ नास्तिकावेदबाह्याश्चशिश्नोदरपरायणाः ॥ अंत्यजाताश्चयेतेषांपुरःकाशीनवर्ण्यताम् ॥ ६६ ॥ लोलार्ककरनिष्टप्ताअसिधारविखंडिताः ॥ काश्यांदक्षिणदिग्भागेनविशेयुर्महामलाः ॥६७॥ महिमानमिमंश्रुत्वालोलार्कस्यनरोत्तमः ॥ नदुःखीजायतेक्वापिसंसारेदुःखसागरे ॥ ६८ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेलोलार्कवर्णनंनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ स्कंदउवाच ॥ ॥ अथोत्तरस्यामाशायांकुंडमर्काख्यमुत्तमम् ॥ तत्रनाम्नोत्तरार्केणरश्मिमालीव्यवस्थितः ॥ १ ॥

शीस्थद्वेषिणोवानविशेयुर्नप्रविशन्तीतिपक्षांतरेलोलार्काणांतत्सदृशानांतेजस्विनांशूराणांकरैर्हस्तैर्निष्टप्तानितरान्ताडितास्तेषामेवासिधारयाखड्गधारयाविखण्डिताविशेषेणखण्डिताःखड्गच्छेदंप्रापिताय थानविशन्तीतिशब्दश्लेषालङ्कारोयम् ॥ ६७ ॥ ६८ ॥ ॥ इतिश्रीरामानन्दविरचितायांकाशीखण्डटीकायांषट्चत्वारिंशोध्यायः ॥ ४६ ॥ चत्वारिंशेथसप्तोर्ध्वेऽध्यायेपरमपावने ॥ उत्तरार्कस्यमाहात्म्यंवर्ण्यतेऽतिमनोहरम् ॥ १ ॥ लोलार्कउत्तरार्कश्चेत्यादिनाद्वादशादित्याउपक्षिप्तास्तत्रलोलार्कस्यसम्भवंमाहात्म्यंचोक्त्वोत्तरार्कस्यापितेआह ॥ अथेति ॥ रश्मिमालीसूर्यः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्यकृत्यमाह ॥ तापयन्निति ॥ २ ॥ ३ ॥ शुभव्रतानाम्ना ॥ ४ ॥ सुलक्षणांनाम्ना ॥ ५ ॥ मूलर्क्षस्यमूलनक्षत्रस्यप्रथमेपादेतथावृहस्पतौकेंद्रेलग्नचतुर्थदशमसप्तमान्यतमास्मिन्राशौस्थितेसति ॥ ६ ॥ ७ ॥ समैधिष्टअवर्धत ॥ ८ ॥ ९ ॥ कस्मैदत्तासतीयंसुखंलभेत् ॥ दत्त्वासुखंलभइतिकाचित् ॥ १० ॥ ११ ॥ तन्मूलर्क्षविपाकेनकन्यायामूलनक्षत्रफलेन ॥ तत्तदे

तापयन्दुःखसंघातंसाधूनाप्याययन्रविः ॥ उत्तरार्कोमहातेजाःकाशींरक्षतिसर्वदा ॥ २ ॥ तत्रेतिहासोयोवृत्तस्तंनिशामयसुव्रत ॥ विप्रःप्रियव्रतोनामकश्चिदात्रेयवंशजः ॥ ३ ॥ आसीत्काश्यांशुभाचारःसदातिथिजनप्रियः ॥ भार्याशुभव्रतातस्यबभूवातिमनोहरा ॥ ४ ॥ भर्तृशुश्रूषणरतागृहकर्मसुपेशला ॥ तस्यांसजनयामासकन्यामेकांसुलक्षणाम् ॥ ५ ॥ मूलर्क्षप्रथमेपादेतथाकेंद्रेबृहस्पतौ ॥ ववृधेसागृहेपित्रोःशुक्लेपक्षेयथाशशी ॥ ६ ॥ सुरूपाविनयाचारापित्रोश्चप्रियकारिणी ॥ अतीवनिपुणाजातागृहोपस्करमार्जने ॥ ७ ॥ यथायथासमैधिष्टसाकन्यापितृमंदिरे ॥ तथातथापितुस्तस्याश्चितासंववृधेतराम् ॥ ८ ॥ कस्मैदेयावराकन्यासुरम्येयंसुलक्षणा ॥ अस्याअनुगुणोलभ्यःकमयावरउत्तमः ॥ ९ ॥ कुलेनवयसाचापिशीलेनापिश्रुतेनच ॥ रूपेणार्थेनसंयुक्तःकस्मैदत्तासुखंलभेत् ॥ १० ॥ इतिचिंतयतस्तस्यज्वरोभूदतिदारुणः ॥ यश्चिंताख्योज्वरःपुंसामौषधैर्नापिशाम्यति ॥ ११ ॥ तन्मूलर्क्षविपाकेनचिंताख्येनज्वरेणच ॥ सविप्रःपंचतांप्राप्तस्त्यक्त्वासर्वंगृहादिकम् ॥ १२ ॥ पितर्युपरतेतस्याःकन्यायाःसाजनन्यपि ॥ शुभव्रतापरित्यज्यतांकन्यांपतिमन्वगात् ॥ १३ ॥ धर्मोयंसहचारिण्याजीवताजीवतापिवा ॥ पत्यासहैवस्थातव्यंपतिव्रतयुजासदा ॥ १४ ॥ नापत्यंपातिनोमातानपितानैवबांधवाः ॥ पत्युश्चरणशुश्रूषापायाद्वैकेवलंस्त्रियम् ॥ १५ ॥ सुलक्षणापिदुःखार्तापित्रोःपंचत्वमाप्तयोः ॥ और्ध्वदैहिकमापाद्यदशाहंविनिवर्त्यच ॥ १६ ॥ चिंतामवापमहतीमनाथादैन्यमागता ॥ कथमेकाकिनीपित्रामात्राहीनाभवांबुधेः ॥ १७ ॥ दुस्तरंपारमाप्स्यामिस्त्रीत्वंसर्वाभिभावियत् ॥ नकस्मैचिद्वरायाहंपितृभ्यांप्रतिपादिता ॥ १८ ॥ तददत्ताकथंस्वैरमहमन्यंवरंवृणे ॥ वृतोपिनकुलीनश्चेद्गुणवान्नचशीलवान् ॥ १९ ॥ स्वाधीनोपिनतत्तेनवृतेनापिहिकिंभवेत् ॥ इतिसंचिंतयंतीसारूपौदार्यगुणान्विता ॥ २० ॥ युवभिर्बहुभिर्नित्यंप्रार्थितापिमुहुर्मुहुः ॥ नकस्यापिददौबालाप्रवेशंनिजमानसे ॥ २१ ॥ पित्रोरुपरतिंदृष्ट्वावात्सल्यंचतथाविधम् ॥ निनिंदबहुधात्मानंसंसारंचनिनिंदह ॥ २२ ॥ याभ्यामुत्पादिताचाहंयाभ्यांचपरिपालिता ॥ पितरौकुत्रतौयातौदेहिनोधिगनित्यताम् ॥ २३ ॥

तिवा ॥ पंचतांमरणम् ॥ १२ ॥ पतिमन्वगाद्दत्ताग्निंपतिदेहमनुस्वयमग्नौविवेशेत्यर्थः ॥ १३ ॥ अनुगमनेहेतुमाह ॥ धर्मोयमिति ॥ १४ ॥ पत्यासहैवस्थातव्यमित्यत्रापिहेतुमाह ॥ नापत्यमिति ॥ १५ ॥ और्ध्वदैहिकम् ॥ द्वादशाहपिंडादि ॥ १६ ॥ १७ ॥ सर्वैरभिभवितुंशीलंयस्यतत्सर्वाभिभावि ॥ १८ ॥ गुणवान्नचेदित्यनुषज्जते ॥ १९ ॥ तत्तदा ॥ २० ॥ २१ ॥ २२ ॥ देहिनोधिगनित्यतां

CC-0. In Public Domain. Digitization by eGangotri

देहिनोजीवस्यानित्यतांप्रतिधिगस्त्वित्यर्थः ॥ २३ ॥ अहोइति ॥ अहोखेदे ॥ खेदातिशयार्थावीप्सा ॥ यथाममपुरोऽग्रतःपित्रोरंगत्वंत्वप्रत्ययोऽत्राविवक्षितः ॥ अंगमित्यर्थः ॥ तथाममापिदेहोवि
नाशीत्यर्थः ॥ अयंदेहोप्यहोगंतेतिपाठेस्पष्टएवार्थः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ पंचषासुपंचसुषट्सुवासमासुसंवत्सरेषु ॥ २८ ॥ २९ ॥ करुणाआत्मानियस्यास्तयादयास्वरूपयेतिवा ॥
यादेवीसर्वभूतेषुदयारूपेणसंस्थितेत्युक्तेः ॥ करुणायुक्तात्मनेतिव्यधिकरणंवा ॥ ३० ॥ ३१ ॥ ३२ ॥ सुखपीयूषवर्षिणीमास्यामृतस्राविणीम् ॥ उदमीलयत्व्यकासयत् ॥ ३३ ॥ ३४ ॥

अहोदेहोप्यहोंगत्वंयथापित्रोःपुरोमम ॥ इतिनिश्चित्यसाबालाविजितेंद्रियमानसा ॥ २४ ॥ ब्रह्मचर्यंदृढंकृत्वातपउग्रंचचारह ॥ उत्तरार्कस्यदेवस्यसमी
पेस्थिरमानसा ॥२५॥ तस्यांतपस्यमानायामेकाच्छागीलघीयसी ॥ तत्रप्रत्यहमागत्यातिष्ठेत्तत्पुरतोऽचला ॥२६॥ तृणपर्णादिकंकिंचित्सायमभ्यवहृ
त्यसा ॥ तत्कुंडपीतपानीयास्वस्वामिसदनंव्रजेत् ॥ २७ ॥ ततइत्थंव्यतीतासुपंचषासुसमासुच ॥ लीलयाविचरन्देवस्तत्रदेव्यासहागतः ॥ २८ ॥
सन्निधावुत्तरार्कस्यतपस्यंतींसुलक्षणाम् ॥ स्थाणुवन्निश्चलांस्थाणुरद्राक्षीत्तपसाकृशाम् ॥२९॥ ततोगिरिजयाशंभुर्विज्ञप्तःकरुणात्मना ॥ वरेणानुगृहाणे
मांबंधुहीनांसुमध्यमाम् ॥ ३० ॥ शर्वाणीगिरमाकर्ण्यततःशर्वःकृपानिधिः ॥ समाधिमीलिताक्षींतामुवाचवरदोहरः ॥ ३१ ॥ सुलक्षणेप्रसन्नोस्मिवरं
वरयसुव्रते ॥ चिरंखिन्नासितपसाकस्तेऽस्तीहमनोरथः ॥३२॥ सापिशंभोर्गिरंश्रुत्वासुखपीयूषवर्षिणीम् ॥ महासंतापशमनींलोचनेउदमीलयत् ॥३३॥
त्र्यक्षंप्रत्यक्षमावीक्ष्यवरदानोन्मुखंपुरः ॥ देवींचवामभागस्थांप्रणनामकृतांजलिः ॥ ३४ ॥ किंवृणेयावदित्थंसाचिंतयेच्चारुमध्यमा ॥ तावत्तयानिरै
क्षिष्टवराकीबर्करीपुरः ॥ ३५ ॥ आत्मार्थंजीवलोकेस्मिन्कोनजीवतिमानवः ॥ परंपरोपकारार्थंयोजीवतिसजीवति ॥ ३६ ॥ अनयामत्तपोवृत्तिसा
क्षिण्याबह्वनेहसम् ॥ असेव्यहंतदेतस्यैवरयामिजगत्पतिम् ॥ ३७ ॥ परामृश्यमनस्येतत्प्राहत्र्यक्षंसुलक्षणा ॥ कृपानिधेमहादेवयदिदेयोवरोमम ॥
॥ ३८ ॥ अजशावीवराक्येषार्ताहिप्रागनुगृह्यताम् ॥ वक्तुंपशुत्वान्नोवेत्तिकिंचिन्मद्भक्तिपेशला ॥ ३९ ॥ इतिवाचंनिशम्येशःपरोपकृतिशालिनीम् ॥
सुलक्षणायानितरांतुतोषप्रणतार्तिहा ॥ ४० ॥ देवदेवस्ततःप्राहदेविपश्यगिरींद्रजे ॥ साधूनामीदृशीबुद्धिःपरोपकरणोर्जिता ॥ ४१ ॥ तेधन्याःसर्वलो
केषुसर्वधर्माश्रयाश्चते ॥ यतंतेसर्वभावेनपरोपकरणाययेे ॥४२॥ संचयाःसर्ववस्तूनांचिरंतिष्ठंतिनोक्वचित् ॥ सुचिरंतिष्ठतेचैकंपरोपकरणंप्रिये ॥४३॥
धन्यासुलक्षणाचैषायोग्याऽनुग्रहकर्मणि ॥ ब्रूहिदेविवरोदेयःकोऽस्यैच्छाग्यैचकःप्रिये ॥ ४४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ सर्वसृष्टिकृतांकर्तःसर्वज्ञप्रणता
र्तिहन् ॥ सुलक्षणाशुभाचारासखीमेस्तुशुभोद्यमा ॥ ४५ ॥ यथाजयाचविजयायथाचैवजयंतिका ॥ शुभानंदासुनंदाचकौमुदीचयथोर्मिला ॥ ४६ ॥ ॥२१४॥

निरैक्षिष्टदृष्टा ॥ वराकीतुच्छा ॥ बर्करीच्छागी ॥ ३५ ॥ ३६ ॥ बह्वनेहसंबहुकालम् ॥ असेविसेविता ॥ अहंसुलक्षणा ॥ तत्तस्मात् ॥ एतस्यैएतदर्थम् ॥ ३७ ॥ ३८ ॥ अजशावीच्छाग
सुता ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ अनुग्रहकर्मणिअनुकूलकार्येयोग्या ॥ अस्यैसुलक्षणायै ॥ ४४ ॥ शुभायोद्यमोयस्याःसाशुभोद्यमा ॥ ४५ ॥ जयतिसर्वोत्कर्षेणतिष्ठतीतिजया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषेणजयतिविजया ॥ अन्यासामपियथायथंनामनिर्वचनंज्ञेयम् ॥ ४६ ॥ ४७ ॥ ४८ ॥४९॥५० ॥ ५१ ॥ समयामांमत्समीपे ॥ चंचच्चामरधारिणीस्फुरद्वालव्यजनहस्ता ॥५२॥ एषापिवर्करी तिसंबंधः ॥ इहकाश्याम् ॥ अत्रैवकाश्यामेवेतिशब्देनेश्वरीच्छयाभगवतईश्वरस्यवरदानाच्चकाश्यांमृतायाअपिवर्कर्यादेहसंबंधइतिद्योत्यते ॥ नह्यघटितघटनापटीयस्यास्तस्याःकर्तुमकर्तुमन्यथाकर्तुं समर्थस्यतस्यचनकिमप्यशक्यमितिभावः ॥ केनचिन्निमित्तेनक्षेत्राद्बहिर्निःसृत्यमृतासत्यत्रोत्पन्नेतिवाज्ञेयम् ॥ ५३ ॥ अक्षुब्धाचित्तयास्थिरांतःकरणया ॥ ५४ ॥ ५५ ॥ वर्करीकुंडमिति ॥ तुशब्देन

यथाचंपकमालाचयथामलयवासिनी ॥ कर्पूरलतिकायद्वद्गंधधारायथाशुभा ॥ ४७ ॥ अशोकाचविशोकाचयथामलयगंधिनी ॥ यथाचंदननिःश्वासायथामृगमदोत्तमा ॥ ४८ ॥ यथाचकोकिलालापायथामधुरभाषिणी ॥ गद्यपद्यनिधिर्यद्वदनुक्तज्ञायथाचसा ॥ ४९ ॥ दृगंचलेंगितज्ञाचयथाकृतमनोरथा ॥ गानचित्तहरायद्वत्तथास्त्वेषासुलक्षणा ॥ ५० ॥ अतिप्रियाभवित्रीमेयद्बालब्रह्मचारिणी ॥ अनेनैवशरीरेणदिव्यावयवभूषणा ॥ ॥ ५१ ॥ दिव्यांबरादिव्यगंधादिव्यज्ञानसमन्विता ॥ समयामांसदैवास्तांचंचच्चामरधारिणी ॥ ५२ ॥ एषापिकाशिराजस्यकुमार्यस्त्विहबर्करी ॥ अत्रैवभोगान्संप्राप्यमुक्तिंप्राप्स्यत्यनुत्तमाम् ॥ ५३ ॥ अनयात्वर्ककुंडेस्मिन्पुष्येमासिरवेर्दिने ॥ स्नातंत्वनुदितेसूर्येशीतादक्षुब्धचित्तया ॥ ५४ ॥ राजपुत्रीततःपुण्यादस्त्वेषाशुभलोचना ॥ वरदानप्रभावेणतवविश्वेश्वरप्रभो ॥ ५५ ॥ बर्करीकुंडमित्याख्यात्वर्ककुंडस्यजायताम् ॥ एतस्याःप्रतिमापूज्याभविष्यत्यत्रमानवैः ॥ ५६ ॥ उत्तरार्कस्यदेवस्यपुष्येमासिरवेर्दिने ॥ कार्यासांवत्सरीयात्रानतैःकाशीफलेप्सुभिः ॥५७॥ मृडान्याभिहितंसर्वंकृत्वेतद्विश्वगोविभुः ॥ विश्वनाथोविवेशाथप्रासादंस्वमतर्कितः ॥ ५८ ॥ ॥ स्कंदउवाच ॥ ॥ लोलार्कस्यचमाहात्म्यमुत्तरार्कस्यचद्विज ॥ कथितंतेमहाभागसांबादित्यंनिशामय ॥ ५९ ॥ श्रुत्वैतत्पुण्यमाख्यानंशुभंलोलोत्तरार्कयोः ॥ व्याधिभिर्नाभिभूयेतनदारिद्र्येणबाध्यते ॥ ६० ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेउत्तरार्कवर्णनंनामसप्तचत्वारिंशोध्यायः ॥ ४७ ॥ स्कंदउवाच ॥ ॥ शृणुष्वमैत्रावरुणेद्वारवत्यांयदूद्वहः ॥ दानवानांवधार्थायभुवोभारापनुत्तये ॥ १ ॥

कुंडांतरादस्यकुंडस्याधिक्यंद्योत्यते ॥ एतस्याःवर्कर्याः ॥ ५६ ॥ नतैर्नम्रैर्भक्तैरितियावत् ॥ नरैरितिवापाठः ॥ ५७ ॥ ५८ ॥ ५९ ॥ श्रुत्वेति ॥ एतदध्यायद्वयेनोक्तम् ॥ लोलार्कस्यात्रकथनंश्रवणफलख्यापनाय ॥ ६० ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्तचत्वारिंशोध्यायः ॥ ४७ ॥ ॥ छ ॥ अष्टाधिकेथचत्वारिंशकेध्यायेमनोरमे ॥ सांबादित्यस्यमहिमावर्ण्यतेतिस्फुटःशुभः ॥ १ ॥ सांबादित्योत्पत्तिंवक्तुंश्रोतॄनभिमुखीकुर्वन्नुपोद्घातंरचयति ॥ शृणुष्वेति ॥ आत्मनेपदमार्षम् ॥ श्लोकचतुष्टयंवाक्यम् ॥ द्वारवत्यांस्वयंकृष्णःसदानंदरूपोदेवक्यांवसुदेवतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

सकाशाद्वासुदेवनाम्ना जगद्धामजगतामाश्रयआविरासीत्तस्यसाशीतिलक्षमशीत्यासहलक्षंसाशीतिलक्षंकुमाराआसन्नित्यन्वयः ॥ एकषष्टिसहस्रंचान्यद्बोद्धव्यम् ॥ किमर्थमाविरासीत्तदाह ॥ दानवानामिति ॥ १ ॥ २ ॥ कुमारान्विशिनष्टि स्वर्गेपीतिसार्धेन ॥ ३ ॥ ४ ॥ यस्यांद्वारकायामाविरासीत्तांद्वारकांद्रष्टुंनारदआजगामेतिचतुर्थेनान्वयः ॥ तानितिपाठेतान्बालकान्द्रष्टुमित्यर्थः ॥ नारदंविशिनष्टि मानसःपुत्रोब्रह्मणइत्यादिना ॥ तपसांनिधिराश्रयः ॥ कृतंवल्कलेनकौपीनंयेनसः॥ कृतंकृष्णाजिनमेवांबरंयेनसः ॥ ५ ॥ गृहीतोब्रह्मदंडोब्रह्मचारियोग्योदंडोयेनसः ॥ त्रिवृत्त्रिगुणितामौंजीमुंजनिर्मितामेखलायस्यसः ॥ उरस्थलेउरस्थलेनवालसंतीयातुलसीमालातयासमलंकृतः ॥ उरस्थलस्थेतिक्वचित्पाठः ॥ लसज्जलस्थेतिपाठेलसंतीयाजलस्थाऽऽर्द्रातुलसीमालातयेत्यर्थः ॥ ६ ॥ गोपीचंदननिर्यासेनरसेनगोपीचंदननिर्यासएववालसदंगविलेपनंयस्यसः ॥ मूर्तश्चासावुत्कृष्टोज्वलनश्चेतिमूर्तोज्ज्वलनस्तद्वत् ॥ मूर्तोज्वलनवदितिपाठेतद्धितार्थोपसर्जनस्यापिज्वलनस्यमूर्तइति

आविरासीत्स्वयंकृष्णःकृष्णवर्त्मप्रतापवान् ॥ वासुदेवोजगद्धामदेवक्यांवसुदेवतः ॥२॥ साशीतिलक्षंतस्यासन्कुमाराअर्कवर्चसः॥स्वर्गेपिताहशाबालाःसुशीलानहिकुंभज ॥ ३ ॥ अतीवरूपसंपन्नाअतीवसुमहाबलाः ॥ अतीवशस्त्रशास्त्रज्ञाअतीवशुभलक्षणाः ॥ ४ ॥ तांद्रष्टुंमानसःपुत्रोब्रह्मणस्तपसांनिधिः ॥ कृतवल्कलकौपीनोधृतकृष्णाजिनांबरः ॥ ५ ॥ गृहीतब्रह्मदंडश्चत्रिवृन्मौंजीसुमेखलः ॥ उरस्थलस्थतुलसीमालयासमलंकृतः ॥ ६ ॥ गोपीचंदननिर्यासलसदंगविलेपनः ॥ तपसाकृशसर्वांगोमूर्तोज्वलनवज्वलन् ॥७॥ आजगामांबरचरोनारदोद्वारकांपुरीम् ॥ विश्वकर्मविनिर्माणांजितस्वर्गपुरीश्रियम् ॥८॥ तंदृष्ट्वानारदंसर्वेविनम्रतरकंधराः ॥ प्रबद्धमूर्धांजलयःप्रणेमुर्वृष्णिनंदनाः ॥ ९ ॥ सांबःस्वरूपसौंदर्यगर्वसर्वस्वमोहितः ॥ ननतामसुनिंतत्रहसंस्तद्रूपसंपदम् ॥ १० ॥ सांबस्यतमभिप्रायंविज्ञायसमहामुनिः ॥ विवेशसुमहारम्यंनारदःकृष्णमंदिरम् ॥ ११ ॥ कृष्णोथदृष्ट्वाऽऽगच्छंतंप्रत्युद्गम्यचनारदम् ॥ मधुपर्केणसंपूज्यस्वासनेचोपवेशयत् ॥ १२ ॥ कृत्वाकथाविचित्रार्थास्ततएकांतवर्तिनः ॥ कृष्णस्यकर्णेऽकथयन्नारदःसांबचेष्टितम् ॥ १३ ॥ अवश्यंकिंचिदत्राऽस्तियशोदानंदवर्धन ॥ प्रायशस्तन्नघटतेऽसंभाव्यंनाथवास्त्रियाम् ॥ १४ ॥ यूनांत्रिभुवनस्थानांसांबोऽतीवसुरूपवान् ॥ स्वभावचंचलाक्षीणांचेतोवृत्तिःसुचंचला ॥ १५ ॥ अपेक्षंतेनमुग्धाक्ष्यःकुलंशीलंश्रुतंधनम् ॥ रूपमेवसमीक्षंतेविषमेषुविमोहिताः ॥१६॥ अथवाविदितंनोतेबह्वीनांविचेष्टितम् ॥ विनाष्टौनायिकाःकृष्णकामयंतेऽबलाह्यमुम् ॥ १७ ॥ वामभ्रुवांस्वभावाच्चनारदस्यचवाक्यतः ॥ विज्ञाताऽखिलवृत्तांतस्तथ्यंकृष्णोप्यमन्यत ॥ १८ ॥

विशेषणंछांदसम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ उपवेशयदुपावेशयत् ॥ अडभावआर्षः ॥ १२ ॥ १३ ॥ अवश्यमिति ॥ हेयशोदानंदवर्धनअत्रांतःपुरेकिंचिदस्तिकिंतुप्रायशस्तन्नघटते ॥ अथवास्त्रियामसंभाव्यंनापितुसर्वंसंभाव्यमित्यर्थः ॥ १४ ॥ किंचिच्छब्दोक्तमेवदर्शयति यूनामितिद्वयेन ॥ इवैवार्थे ॥ शोभनरूपवानेवेत्यर्थः ॥ सरूपवानितिपाठेससांबः ॥ १५ ॥ विषमेषुःकामस्तेनमोहिताः ॥ १६ ॥ एवंसामान्येनोक्तंविशेषतोभिनयेनदर्शयाति ॥ बह्व्योत्रनार्यः ॥ अतएवगोपालस्तवराजेबह्वीनंदनमित्यत्रवल्लभामित्यपिकेचनपठंति ॥ अथवागोपवेषधारित्वाद्बल्लवःश्रीकृष्णस्तत्पत्न्योबल्लव्यस्तासांतवभार्याणामित्यर्थः ॥ अष्टौरुक्मिणीसत्यानाग्नजितीसुनंदामित्रविंदासुदक्षिणाजांबवतीसुशीलानायिकाःपट्टमहिषीः ॥ अमुंसांबम् ॥ १७ ॥ वामभ्रुवामितिस्कंद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यम् ॥ १८ ॥ तावदितिश्लोकत्रयंवाक्यम् ॥ विजनस्थोयावदर्थीप्रार्थकोनभवेत्तावदेवधैर्यंचेतोविवेकिताच ॥ विविक्तेऽर्थिनिसातितद्द्वयंनकिंत्वन्यथाअधैर्यमविवेकित्वंचेत्यर्थः ॥ १९ ॥ विवेचयंश्चिंतयन् ॥ क्रोधएवनदीतस्यारयंवेगंविवेकएवसेतुबंधस्तेनाऽऽस्तभ्यनिवार्य ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ चिंतामेवाह कथमितिसार्धैश्चतुर्भिः ॥ स्त्रीणांसमूहःस्त्रैणंसएवसखायस्यतम् ॥ २४ ॥ २५ ॥ क्रीडितउपहासितः ॥ २६ ॥ अत्याहितंमहाभीतिःतच्चतदागोद्वयंचापराधद्वयंतद्दर्शनात् ॥ २७ ॥ दावदग्धवद्वनाग्निदग्धइव ॥ २८ ॥ इतीति ॥ इतिक्षणंध्यात्वाससांबःपितुरंतःपुरमविशत् ॥ ततोमध्येस्त्रैणसभंस्त्रैणसभामध्येकृष्णंयावद्विज्ञप्तिंचकारतावन्नारदस्तंसांबमन्वगच्छदितिद्वयोरन्वयः ॥ स्त्रैणसखमितिक्वचित् ॥ २९ ॥

तावद्धैर्यंचलाक्षीणांतावच्चेतोविवेकिता ॥ यावन्नार्थीविविक्तस्थोविविक्तेर्थिनिनान्यथा ॥ १९॥ इत्थंविवेचयंश्चित्तेकृष्णःक्रोधनदीरयम् ॥ विवेकसेतुनाऽऽस्तभ्यनारदंप्राहिणोत्सुधीः ॥२०॥ सांबस्यवैकृतंकिंचित्क्वचित्कृष्णोनवैक्षत ॥ गतेदेवमुनौतस्मिन्वीक्षमाणोप्यहर्निशम् ॥२१॥ कियत्यपिगतेकालेपुनरप्याययौमुनिः ॥ मध्येलीलावतीनांचज्ञात्वाकृष्णमवस्थितम् ॥ २२ ॥ बहिःक्रीडंतमाहूयसांबमित्याहनारदः ॥ याहिकृष्णांतिकंतूर्णंकथयागमनंमम ॥२३॥ सांबोपियामिनोयामिक्षणमित्थमचिंतयत् ॥ कथंरहःस्थंपितरंयामिस्त्रैणसखंप्रति ॥ २४ ॥ नयामिचकथंवाक्यादस्याहंब्रह्मचारिणः ॥ ज्वलदंगारसंकाशस्फुरत्सर्वांगतेजसः ॥ २५ ॥ प्रणमत्सुकुमारेषुक्रीडितोयंमयैकदा ॥ इदानीमपिनोयामिअस्यवाक्यान्महामुनेः ॥ २६ ॥ अत्याहितंतदस्तीहतदागोद्वयदर्शनात् ॥ पितुःकोपोपिसुश्लाघ्योमयिनोब्राह्मणस्यतु ॥ २७॥ ब्रह्मकोपाग्निनिर्दग्धाःप्ररोहंतिनजातुचित् ॥ अपराग्निविनिर्दग्धारोहंतेदावदग्धवत् ॥ २८॥ इतिध्यात्वाक्षणंसांबोऽविशदंतःपुरंपितुः ॥ मध्येस्त्रैणसभंकृष्णंयावज्जांबवतीसुतः ॥ २९ ॥ दूरात्प्रणम्यविज्ञप्तिंसचकारसशंकितः ॥ तावत्तमन्वगच्छच्चनारदःकार्यसिद्धये ॥ ३० ॥ ससंभ्रमोथकृष्णोपिदृष्ट्वासांबंचनारदम् ॥ समुत्तस्थौपरिदधत्पीतकौशेयमंबरम् ॥ ३१ ॥ उत्थितेदेवकीसूनौताःसर्वाअपिगोपिकाः ॥ विलज्जिताःसमुत्तस्थुर्गृह्णंत्यःस्वंस्वमंबरम् ॥ ३२ ॥ महार्हशयनीयेतंहस्तेधृत्वामहामुनिम् ॥ समुपावेशयत्कृष्णःसांबश्चक्रीडितुंययौ ॥ ३३ ॥ तासांस्खलितमालोक्यतिष्ठंतीनांपुरोमुनिः ॥ कृष्णलीलाद्रवीभूतवरांगानांजगौहरिम् ॥ ३४ ॥ पश्यपश्यमहाबुद्धेदृष्ट्वाजांबवतीसुतम् ॥ इमाःस्खलितमापन्नास्तद्रूपक्षुब्धचेतसः ॥ ३५ ॥ कृष्णोपिसांबमाहूयसहसैवाशपत्सुतम् ॥ सर्वाजांबवतीतुल्याःपश्यंतमपिदुर्विधेः ॥ ३६ ॥ यस्मात्त्वद्रूपमालोक्यगोपाल्यःस्खलिताइमाः ॥ तस्मात्कुष्ठीभवक्षिप्रमकांडागमनेनच ॥ ३७ ॥

सशंकितःशंकयायुक्तः ॥ कार्यसिद्धयेसांबस्यशापदानाय ॥३०॥३१॥ गोपिकाइति ॥ गाइंद्रियाणिपांतीतिगोपादेवास्तदीयाभोग्याःस्त्रियोगोपिकाः ॥ अष्टावक्रस्यवरदानेनरुक्मिण्याद्यष्टमहिषीव्यतिरिक्तषोडशसहस्रैकशताप्सरसांभार्यात्वात् ॥ प्रसिद्धंचैतद्विष्णुपुराणादिषु ॥ द्वारकायांगोपस्त्रीणांकृष्णसंगत्यभावाच्चगोपिकाशब्दस्ययथोक्तएवार्थः ॥ ३२ ॥ ३३ ॥ तासामिति ॥ तासांस्खलितंवीर्यच्युतिमालोक्यनारदःकृष्णंजगावित्यन्वयः ॥ तासांस्खलनेहेतुगर्भंविशेषणमाह ॥ कृष्णलीलेति ॥ कृष्णेनसहलीलयाक्रीडयाद्रवीभूतानिआर्द्राणिजातानिवरांगानियोनयोयासांतासाम् ॥ ३४ ॥ किमुक्तवांस्तदाह ॥ पश्यपश्येति ॥ ३५ ॥ दुर्विधेर्दुरदृष्टाद्धेतोः ॥ ३६ ॥ गोपाल्यइत्यस्यपूर्ववदेवार्थः ॥ यद्वा गोपालरूपस्यभगवतःपत्न्यइतितुबल्लवीनामित्यत्रैवव्याख्यात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति ॥ अकांडागमनेनानवसरागमनेन ॥ चःसमुच्चये ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ प्राकृतेभ्यःप्रकृतिकार्येभ्यः ॥ ४२ ॥ ४३ ॥ तत्त्वेरितंसत्यत्वेनकथितम् ॥ त्वरितमिति कचित् ॥ शापान्निमित्तान्निर्वृतिःसुखम् ॥ शापनिष्कृतिरितिक्वचित् ॥ ४४ ॥ ततइति ॥ ततःकृष्णमनुज्ञाप्यनारदोव्योममार्गेणययौ ॥ कीदृशः ॥ कृतंकृत्यंयेनतथाविधःसन्नित्यर्थः ॥

वेपमानोमहाव्याधिभयात्सांबोपिदारुणात् ॥ कृष्णंप्रसादयामासबहुशःपापशांतये ॥ ३८ ॥ कृष्णोप्यनेनसंजानन्सांबंस्वसुतमौरसम् ॥ अब्रवीत्कुष्ठमो क्षायव्रजवैश्वेश्वरींपुरीम् ॥ ३९ ॥ तत्रब्रध्नंसमाराध्यप्रकृतिंस्वामवाप्स्यसि ॥ महैनसांक्षयोन्यत्रनास्तिवाराणसींविना ॥ ४० ॥ यत्रविश्वेश्वरःसाक्षाद्य त्रस्वर्गापगाचसा ॥ येषांमहैनसांदृष्टामुनिभिर्नैवनिष्कृतिः ॥ तेषांविशुद्धिरस्त्येवप्राप्यवाराणसींपुरीम् ॥ ४१ ॥ नकेवलंहिपापेभ्योवाराणस्यांवि मुच्यते ॥ प्राकृतेभ्योपिपापेभ्योमुच्यतेशंकराज्ञया ॥ ४२ ॥ पुरापुरारिणासृष्टमविमुक्तंविमुक्तये ॥ सर्वेषामेवजंतूनांकृपयांतेतनुत्यजाम् ॥ ४३ ॥ तत्रानंदवनेशंभोस्तवशापनिराकृतिः ॥ सांबतत्त्वेरितंयाहिनान्यथाशापनिर्वृतिः ॥ ४४ ॥ ततःकृष्णंसमापृच्छ्यकर्मनिर्मुक्तचेष्टितः ॥ नारदःकृतकृत्यः सन्ययावाकाशवर्त्मना ॥ ४५ ॥ सांबोवाराणसींप्राप्यसमाराध्यांशुमालिनम् ॥ कुंडंतत्पृष्ठतःकृत्वानिजांप्रकृतिमातवान् ॥ ४६ ॥ सांबादित्यस्तदार भ्यसर्वव्याधिहरोरविः ॥ ददातिसर्वभक्तेभ्योऽनामयाःसर्वसंपदः ॥ ४७ ॥ सांबकुंडेनरःस्नात्वारविवारेऽरुणोदये ॥ सांबादित्यंचसंपूज्यव्याधिभिर्ना भिभूयते ॥ ४८ ॥ नस्त्रीवैधव्यमाप्नोतिसांबादित्यस्यसेवनात् ॥ वंध्यापुत्रंप्रसूयेतशुद्धरूपसमन्वितम् ॥ ४९ ॥ शुक्लायांद्विजसप्तम्यांमाघेमासिरवे र्दिने ॥ महापर्वसमाख्यातंरविपर्वसमंशुभम् ॥ ५० ॥ महारोगात्प्रमुच्येततत्रस्नात्वारुणोदये ॥ सांबादित्यंप्रपूज्यापिधर्ममक्षयमाप्नुयात् ॥ ५१ ॥ सन्निहत्यांकुरुक्षेत्रेयत्पुण्यंराहुदर्शने ॥ तत्पुण्यंरविसप्तम्यांमाघेकाश्यांनसंशयः ॥ ५२ ॥ मधौमासिरवेर्वारेयात्रासांवत्सरीभवेत् ॥ अशोकैस्तत्रसं पूज्यकुंडेस्नात्वाविधानतः ॥ ५३ ॥ सांबादित्यंनरोजातुनशोकैरभिभूयते ॥ संवत्सरकृतात्पापाद्बहिर्भवतितत्क्षणात् ॥ ५४ ॥ विश्वेशात्पश्चिमाशा यांसांबेनात्रमहात्मना ॥ सम्यगाराधितामूर्तिरादित्यस्यशुभप्रदा ॥ ५५ ॥

ननुपरानिष्टकरणेननारदस्यप्रत्यवायोभवेत्तत्राह ॥ कर्मनिर्मुक्तचेष्टितइति ॥ कर्मणाशुभाशुभादृष्टेननिर्मुक्तानिचेष्टितानियस्यसः ॥ तस्यजीवन्मुक्तत्वादितिभावः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ सेवनात्पूजनात् ॥ अयमेववापाठः ॥ ४९ ॥ सूर्यपर्वसमंसूर्यग्रहणसमम् ॥ ५० ॥ ५१ ॥ ५२ ॥ मधौचैत्रे ॥ माघेमासीतिवापाठः ॥ अशोकैरशोकपुष्पैः ॥ ५३ ॥ ५४ ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टौप्रदक्षिणाश्चकृत्वा ॥ प्रदक्षिणमितिपाठेपिसएवार्थः ॥ ९६ ॥ हेमहामतेबृहद्बुद्धे ॥ महामुनेइतिकचित् ॥ ९७ ॥ ९८ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टचत्वारिंशो ध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ एकेनोनेथपंचाशेऽध्यायेपरमपावने ॥ द्रौपदादित्यमायूखादित्ययोर्वर्ण्यतेकथा ॥ १ ॥ अनंतराध्यायावसानेइदानींद्रौपदादित्यंकथयिष्यामीत्युक्तंतत्र द्रौपद्याभविष्यत्वात्तदानींतयाराधनस्यासंभवादाक्षिपति ॥ पाराशर्येति ॥ १ ॥ पुराणेषुकालत्रयसंबंधिनोऽर्थस्यकथनान्नायंदोषइतिपरिहरति ॥ पुराणेति ॥ पुराणसंहितापुराणरूपधर्मशास्त्र

इयंभविष्यातन्मूर्तिरगस्तेत्वत्पुरोऽकथि ॥ तामभ्यर्च्यनमस्कृत्यकृत्वाष्टौचप्रदक्षिणाः ॥ नरोभवतिनिष्पापःकाशीवासफलंलभेत् ॥ ९६ ॥ सांबा दित्यस्यमाहात्म्यंकथितंतेमहामते ॥ यच्छ्रुत्वापिनरोजातुयमलोकंनपश्यति ॥ ९७ ॥ इदानींद्रौपदादित्यंकथयिष्यामितेनघ ॥ तथाद्रौपदआदित्यः संसेव्योभक्तसिद्धिदः ॥ ९८ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेसांबादित्यमाहात्म्यकथनंनामाष्टचत्वा रिंशोध्यायः ॥४८॥ सूत उवाच ॥ ॥ पाराशर्यमुनेव्यासकुमारःकुंभजन्मने ॥ यदावदत्कथामेतांतदाकद्रुपदात्मजा ॥ १ ॥ ॥ व्यासउवाच ॥ ॥ पुराणसंहितांसूतब्रूतेत्रैकालिकींकथाम् ॥ संदेहोनात्रकर्तव्योयतस्तद्गोचरोखिलम् ॥२॥ ॥ स्कंदउवाच ॥ ॥ आकर्णयमुनेपूर्वंपंचवक्त्रोहरःस्वयम् ॥ पृथिव्यांपंचधाभूत्वाप्रादुरासीज्जगद्धितः ॥३॥ उमापिचजगद्धात्रीद्रुपदस्यमहीभुजः ॥ यजतोवह्निकुंडाच्चप्रादुश्चक्रेतिसुंदरी ॥ ४ ॥ पंचापिपांडुतनयाः साक्षाद्रुद्रवपुर्धराः ॥ अवतेरुरिहस्वर्गाद्दुष्टसंहारकारकाः ॥ ५ ॥ नारायणोपिकृष्णत्वंप्राप्यतत्साहचर्यकृत् ॥ उद्वृत्तवृत्तशमनःसद्वृत्तस्थितिकारकः ॥ ॥ ६ ॥ प्रतपंतःपृथिव्यांतेपार्थाश्चेरुःपृथक्पृथक् ॥ उदयानुदयौतस्मिन्संपदांविपदामपि ॥ ७ ॥ कदाचित्तेमहावीराभ्रातृव्यप्रतिपादिताम् ॥ विप त्तिमाप्यमहतींबभूवुःकाननौकसः ॥ ८ ॥ पांचाल्यपिचतत्पत्नीपतिव्यसनतापिता ॥ धर्मज्ञाप्राप्यतन्वंगीब्रध्नमाराधयद्भृशम् ॥ ९ ॥

मित्यर्थः ॥ त्रैकालिकींभूतभविष्यद्वर्तमानकालसंबंधिनीम् ॥ तद्गोचरस्तस्याःपुराणसंहितायाविषयः ॥ तद्गोचरेइतिकचित् ॥ २ ॥ ३ ॥ प्रादुश्चक्रेप्रादुर्भावंचकार प्रादुरभूदित्यर्थः ॥ ४ ॥ दुष्टानांसंहारकारकाः ॥ संहारकारिणइतिकचित् ॥ ५ ॥ तस्मिन्समयइतिशेषः ॥ ६ ॥ उदयानुदयौचेरुःप्रापुरित्यन्वयः ॥ ७ ॥ भ्रातृव्यप्रतिपादितांशत्रुभिःसंपादिताम् ॥ ८ ॥ तापितातप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युता ॥ काशिताइतिक्वचित् ॥ प्राप्यकाशीमितिशेषः ॥ ९ ॥ चालनाद्यर्थपात्रविशेषोदर्वींतत्सहितांस्थालींपाकपात्रविशेषम् ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ अन्यदेशादागतानामपिकाश्यांस्थितत्वात्काशीस्थितानामित्युक्तम् ॥ १८॥ १९ ॥ २० ॥ २१ ॥ नव्याधिजमिति ॥ हेद्रौपदिहेधर्मप्रियेहेअनघेकाश्यांतवेक्षणतोदर्शनात्क्वापिव्याधिजंभयंक्षुत्तृषावेव दोषस्तत्संभवंचभयंनेत्यन्वयः ॥ २२ ॥ इतीति ॥ इतिपूर्वोक्तान् ॥ एवमितिपाठेएवंभूतान्वरान् ॥ धर्मंयुधिष्ठिरम् ॥ २३ ॥ एनःपापम् ॥ २४ ॥ उक्तानुवादपूर्वकंमयूखादित्यस्यमाहात्म्यं

आराधितोथसवितातयाद्रुपदकन्यया ॥ सदर्वींसपिधानांचस्थालिकामक्षयांददौ ॥ १० ॥ उवाचचप्रसन्नात्माभास्करोद्रुपदात्मजाम् ॥ आराधयंतीं भावेनसर्वत्रशुचिमानसाम् ॥ ११ ॥ स्थाल्यैतयामहाभागेयावंतोऽन्नार्थिनोजनाः ॥ तावंतस्तृप्तिमाप्स्यंतियावच्चत्वंनभोक्ष्यसे ॥ १२ ॥ भुक्तायांत्व यिरिक्तैषापूर्णभक्ताभविष्यति ॥ रसवद्व्यंजननिधिरिच्छाभक्ष्यप्रदायिनी ॥ १३ ॥ इत्थंवरस्तयालब्धःकाश्यामादित्यतोमुने ॥ अपरश्चवरोदत्तस्तस्यै देवेनभास्वता ॥ १४ ॥ ॥ रविरुवाच ॥ ॥ विश्वेशाद्दक्षिणेभागेयोमांत्वत्पुरतःस्थितम् ॥ आराधयिष्यतिनरःक्षुद्बाधातस्यनश्यति ॥ १५ ॥ अन्यश्चमेवरोदत्तोविश्वेशेनपतिव्रते ॥ तपसापरितुष्टेनतंनिशामयवच्मिते ॥ १६ ॥ प्राग्वेत्वांसमाराध्ययोमांद्रक्ष्यतिमानवः ॥ तस्यत्वंदुःखति मिरमपानुदनिजैःकरैः ॥ १७ ॥ अतोधर्मप्रियेनित्यंप्राप्यविश्वेश्वराद्वरम् ॥ काशीस्थितानांजंतूनांनाशयाम्यघसंचयम् ॥ १८ ॥ येमामत्रभजिष्यंति मानवाःश्रद्धयान्विताः ॥ त्वद्वरोद्यतपाणिंचतेषांदास्यामिचिंतितम् ॥ १९ ॥ भवतींमत्समीपस्थांयुधिष्ठिरपतिव्रताम् ॥ विश्वेशाद्दक्षिणेभागेदंडपाणेः समीपतः ॥ २० ॥ येर्चयिष्यंतिभावेनपुरुषावास्त्रियोपिवा ॥ तेषांकदाचिन्नोभाविभयंप्रियवियोगजम् ॥ २१ ॥ नव्याधिजंभयंक्वापिनक्षुत्तृड्दोषसं भवम् ॥ द्रौपदीक्षणतःकाश्यांतवधर्मप्रियेनवे ॥ २२ ॥ इतिदत्त्वावरान्देवआदित्यःसर्वदःसताम् ॥ शंभुमाराधयामासधर्मंद्रौपद्युपाययौ ॥ २३ ॥ आदित्यस्यकथामेतांद्रौपद्याराधितस्यवै ॥ यःश्रोष्यतिनरोभक्त्यातस्यैनःक्षयमेष्यति ॥ २४ ॥ स्कंदउवाच ॥ ॥ द्रौपदादित्यमाहात्म्यंसंक्षेपात्कथितं मया ॥ मयूखादित्यमाहात्म्यंशृणुविदानींघटोद्भव ॥ २५ ॥ पुरापंचनदेतीर्थेत्रिषुलोकेषुविश्रुते ॥ सहस्ररश्मिर्भगवांस्तपस्तेपेसुदारुणम् ॥ २६ ॥ प्रति ष्ठाप्यमहालिंगंगभस्तीश्वरसंज्ञितम् ॥ गौरींचमंगलानाम्नींभक्तमंगलदांसदा ॥ २७ ॥ दिव्यंवर्षसहस्रंतुशतेनगुणितंमुने ॥ आराधयन्शिवंसोमंसोमार्ध कृतशेखरम् ॥ २८ ॥ स्वरूपतस्तुतपनस्त्रिलोकीतापनक्षमः ॥ ततोतितीव्रतपसाजज्वालनितरांमुने ॥ २९ ॥ मयूखैस्तत्रसवितुस्त्रैलोक्यदहनक्षमैः ॥ ततंसमस्तंतत्कालेद्यावाभूम्योर्यदंतरम् ॥ ३० ॥ वैमानिकैर्विष्णुपदेतत्यजेचगतागतम् ॥ तीव्रेपतंगमहसिपतंगत्वभयादिव ॥ ३१ ॥

श्रावयति ॥ द्रौपदेति ॥ २५ ॥ २६ ॥ मंगलानाम्नींमंगलाह्वयाम् ॥ मंगलवतीमितिपाठेभक्तेभ्योदेयंमंगलमस्याअस्तीतिमंगलवती ॥ एतदेवाह ॥ भक्तमंगलदामिति ॥ २७ ॥ शतेन गुणितंग्रथितंसंबद्धमित्यर्थः ॥ दिव्यलक्षवर्षमितिसमुदायार्थः ॥ सोममुमयासहितम् ॥ सोमार्धेनार्धचंद्रेणकृतःशेखरःशिरोभूषणंयेन ॥ २८ ॥ २९ ॥ ३० ॥ वैमानिकैरिति ॥ वैमानिकैर्देवै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंष्णुपदेध्रुवलोकेगतागतंगमनागमनंतत्यजेत्यक्तम् ॥ किमिति ॥ तीव्रेतीक्ष्णेपतंगमहसिसूर्येतेजसिपतंगत्वभयादिवपतंगनिमित्तत्त्वभयादिवेत्यर्थः ॥ तथाचायमर्थः ॥ यथापतंगानामग्नौपातान्नाशए वमस्माकंचनाशोभविष्यतीतिभयादिवेति ॥ ३१ ॥ मयूखाइति ॥ मयूखारश्मयः ॥ कीदृशस्यादित्यस्य ॥ नीपपुष्पस्यकदंबकुसुमस्येवस्थितिर्यस्यतस्य ॥ समासांतर्निविष्टस्यापीवशब्दस्यबाहिर्निर्देशश्छांदसः ॥ यथाकदंबकुसुमस्ययाकर्णिकासानदृश्यतेकिंतुकलिकाएवतद्वदितिभावः ॥ ३२ ॥ तस्येति ॥ तपोर्चिषांतपोज्वालानांसाध्वसाद्भयाच्चकंपेसंचचाल ॥ ३३ ॥ कंपनहेतुप्रतिपादकं लोकानाभेवहिवाक्यमाह ॥ सूर्यइति ॥ तथाचश्रुतिः ॥ योसावादित्येपुरुषःसोसावहमिति ॥ चेद्यदि ॥ ३४ ॥ अन्यएवकश्चित्त्राताश्रयणीयोनेत्याह जगच्चक्षुरितित्रयेण ॥ जगदात्मत्वेहेतुमाह ॥ जगद्यइति ॥ यद्यस्मात् ॥ ३५ ॥ तमएवांधकूपस्तत्रपतितम् ॥ उद्यन्उद्गच्छन् ॥ एषसूर्यः ॥ प्रसार्यविस्तार्य ॥ परितःसर्वतः ॥ पाणीन्रश्मीन् ॥ प्राणिजातंजीवसमूहंसमुद्धरेत् ॥

मयूखाएवदृश्यंतेतिर्यगूर्ध्वमधोपिच॥ आदित्यस्यनचादित्योनीपपुष्पस्थितेरिव ॥३२॥ तस्यवैमहसांराशेस्तपोराशेस्तपोर्चिषाम् ॥ चकंपेसाध्वसात्त्रात्रैलोक्यंसचराचरम् ॥ ३३ ॥ सूर्यआत्मास्यजगतोवेदेषुपरिपठ्यते ॥ सएवचेज्ज्वालयिताकोनस्त्राताभवेदिह ॥ ३४ ॥ जगच्चक्षुरसौसूर्योजगदात्मैपभास्करः ॥ जगद्योयन्मृतप्रायंप्रातःप्रातःप्रबोधयेत् ॥ ३५ ॥ तमोंधकूपपतितमुद्यन्नेषदिनेदिने ॥ प्रसार्यपरितःपाणीन्प्राणिजातंसमुद्धरेत् ॥ ३६ ॥ उदितेऽत्रोदिमोनित्यमस्तंयात्यस्तमाप्नुमः ॥ उदयेऽनुदयेतस्मादस्माकंकारणंरविः ॥ ३७ ॥ इतिव्याकुलितंविश्वंपश्यन्विश्वेश्वरःस्वयम् ॥ विश्वत्रातावरंदातुंसंजग्मेतिग्मरश्मये ॥ ३८ ॥ मयूखमालिनंशंभुरालोक्यातिसुनिश्चलम् ॥ समाधिविस्मृतात्मानंविसिस्मायतपःप्रति ॥ ३९ ॥ उवाचचप्रसन्नात्माश्रीकंठःप्रणतार्तिहृत् ॥ अलंतप्त्वावरंब्रूहिद्युमणेमहसांनिधे ॥ ४० ॥ निरुद्धेंद्रियवृत्तित्वाद्ध्रुवोध्यानसमाधिना ॥ नजग्राहवचःशंभोर्द्विस्त्रिरुक्तोप्यकर्णवत् ॥ ४१ ॥ काष्ठीभूतंतुतंज्ञात्वाशिवःपस्पर्शपाणिना ॥ महातपःसमुद्भूतसंतापामृतवर्षिणा ॥ ४२ ॥ ततउन्मीलयांचक्रेलोचनेविश्वलोचनः ॥ तस्योदयमिवप्राप्यप्रगेपंकजिनीवनी ॥४३॥ परिव्यपेतसंतापस्तपनःस्पर्शनाद्विभोः ॥ अवग्रहितसस्यश्रीरुल्लासयथांबुदात् ॥ ४४ ॥

॥ ३६ ॥ अत्रास्मिन्सूर्येअत्रजगतीतिवा ॥ उदितेर्थात्सूर्यइति ॥ वयंनित्यमुदिमउदयंप्राप्नुमः ॥ अस्तंयातिसत्यस्तंप्राप्नुमः ॥ उपसंहरति ॥ उदयइति ॥ ३७ ॥ इत्येवंप्रकारेण ॥ अतिव्याकुलितमितिक्वचित् ॥ संजग्मेसंजगाम ॥ ३८ ॥ विसिस्मायविस्मयंचक्रे ॥ ३९ ॥ ४० ॥ अकर्णवद्बधिरवत् ॥ अकर्णयदितिपाठेनकेवलंसकृदुक्तःसन्वचोनजग्राहद्विस्त्रिरुक्तोपिनाकर्णयदित्यर्थः ॥ ४१ ॥ पाणिना कथंभूतेन ॥ महातपसःसकाशात्संमुद्भूतायःसंतापस्तत्रामृतवर्षिणा तन्निवर्तकामृतवर्षिणेत्यर्थः ॥ ४२ ॥ विकासनमात्रेदृष्टांतस्तस्योति ॥ तस्यसूर्यस्यप्रगेप्रातःकाले उदयंप्राप्यपंकजिनीवनीजलस्थपद्मिनीयथेति ॥ वनशब्दस्यजलवाचकत्वात् ॥ पंकजिनीवनीपद्मिनीनांवनमितिवा ॥ ४३ ॥ परीति ॥ अवग्रहोवृष्टिप्रतिबंधोयस्यास्तीत्यवग्रहितंसस्यंतस्य श्रीर्यथांबुदान्मेघादुल्लासेतितथाविभोःस्पर्शात्तपनउल्लासउज्जृंभितवानित्यर्थः ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्रःसूर्यः ॥ प्रत्यक्षंमूर्तिमंतम् ॥ उच्चैस्तुष्टाव ॥ चःसमुच्चये ॥ ४५ ॥ स्तुतिमेवाह देवदेवेत्यष्टभिः ॥ इतःपरमन्यच्छ्रेयोनास्तीतिबहुधासंबोधयाति ॥ देवानांदेवहेजगतांपतेहेविभोहे भर्गहेभीमहेभवहेचंद्रभूषणहेभूतनाथहेभवभीतिहारकहेनतवांछितप्रदत्वांनतोस्मीति ॥ ४६ ॥ हेचंद्रचूडहेमृडहेधूर्जटेहेहरहेत्र्यक्षहेदक्षशततंतुशातनदक्षयज्ञविध्वंसनहेशांतहेशाश्वतनित्यहेशिवापतेहे शिवहेनतवांछितप्रदत्वांनतोस्मीति ॥ ४७ ॥ हेनीललोहितहेसमीहितार्थदहेद्व्येकलोचनत्रिनेत्रहेविरूपलोचनहेव्योमकेशहेपशुपाशनाशनजीवानांसंसारनाशनहेनतवांछितप्रदत्वांनतोस्मीति ॥ ॥ ४८ ॥ हेवामदेवहेशितिकंठहेशूलभृत्हेचन्द्रशेखरहेफणींद्रभूषणहेकामकृत्कामच्छेदकहेपशुपतेहेमहेश्वरहेनतवांछितप्रदत्वांनतोस्मीति ॥ ४९ ॥ हेत्र्यम्बकहेत्रिपुरसूदनहेईश्वरहेत्राणकृत हेत्रिनयनहेत्रयीमयहेकालकूटदलनहेअन्तकान्तकहेनतवांछितप्रदत्वांनतोस्मीति ॥ ५० ॥ हेशर्वरीरहितमायाविनिर्मुक्तहेशर्वहेसर्वगहेस्वर्गमार्गसूर्यात्मन्हेसुखदस्वर्गमार्गसुखदेतिवा ॥ हेअप

मित्रोनेत्रातिथीकृत्यत्र्यक्षंप्रत्यक्षमग्रतः ॥ दंडवत्प्रणनामोच्चैस्तुष्टावचपिनाकिनम् ॥ ४५ ॥ ॥ रविरुवाच ॥ ॥ देवदेवजगतांपतेविभोभर्गभीमभवचंद्रभूषण ॥ भूतनाथभवभीतिहारकत्वांनतोस्मिनतवांछितप्रद ॥ ४६ ॥ चंद्रचूडमृडधूर्जटेहरत्र्यक्षदक्षशततंतुशातन ॥ शांतशाश्वतशिवापतेशिवत्वांनतोस्मिनतवांछितप्रद ॥ ४७ ॥ नीललोहितसमीहितार्थदद्व्येकलोचनविरूपलोचन ॥ व्योमकेशपशुपाशनाशनत्वांनतोस्मिनतवांछितप्रद ॥ ४८ ॥ वामदेवशितिकंठशूलभृच्चंद्रशेखरफणींद्रभूषण ॥ कामकृत्पशुपतेमहेश्वरत्वांनतोस्मिनतवांछितप्रद ॥ ४९ ॥ त्र्यंबकत्रिपुरसूदनेश्वरत्राणकृत्त्रिनयनत्रयीमय ॥ कालकूटदलनांतकांतकत्वांनतोस्मिनतवांछितप्रद ॥ ५० ॥ शर्वरीरहितशर्वसर्वगस्वर्गमार्गसुखदापवर्गद ॥ अंधकासुररिपोकपर्दभृत्त्वांनतोस्मिनतवांछितप्रद ॥ ५१ ॥ शंकरोग्रगिरिजापतेपतेविश्वनाथविधिविष्णुसंस्तुत ॥ वेदवेद्यविदिताऽखिलेंगितत्वांनतोस्मिनतवांछितप्रद ॥ ५२ ॥ विश्वरूपपररूपवर्जितब्रह्मजिह्मरहितामृतप्रद ॥ वाङ्मनोविषयदूरदूरगत्वांनतोस्मिनतवांछितप्रद ॥ ५३ ॥ इत्थंपरीत्यमार्तंडोमृडंदेवंमृडानिकाम् ॥ अथतुष्टावप्रीतात्माशिववामार्धहारिणीम् ॥ ५४ ॥ रविरुवाच ॥ ॥ देवित्वदीयचरणांबुजरेणुगौरींभालस्थलींवहतियःप्रणतिप्रवीणः ॥ जन्मांतरेपिरजनीकरचारुलेखातांगौरयत्यतितरांकिलतस्यपुंसः ॥ ५५ ॥

वर्गदहेअन्धकासुररिपोहेकपर्दभृत्हेनतवांछितप्रदत्वांनतोस्मीति ॥ ५१ ॥ हेशंकरहेउग्रहेगिरिजापतेहेपतेस्वामिन्हेविश्वनाथहेविधिविष्णुसंस्तुतहेवेदवेद्यहेविदिताऽखिलेंगितहेनतवांछितप्रदत्वांनतोस्मीति ॥ ५२ ॥ हेविश्वरूपहेपरहेरूपवर्जितहेब्रह्मस्वरूपहेजिह्मरहितनिर्मायहेअमृतप्रदहेवाङ्मनोऽविषयहेदूरवाङ्मनोविषयदूरेतिवा हेदूरगहेनतवांछितप्रदत्वांनतोस्मीति ॥ नतवांछितप्रदेत्येतस्यावृत्तिर्भक्तानांप्राधान्यख्यापनाय ॥ ५३ ॥ इत्थमिति ॥ परीत्यप्रदक्षिणपूर्वकंस्तुत्वेत्यर्थः ॥ परीडचेतिवापाठः ॥ अथानन्तरंमृडानिकांतुष्टावास्तौत् ॥ स्तुतौहेतुः ॥ शिववामार्धहारिणीमिति ॥ ५४ ॥ स्तुतिमेवाह देवीत्यष्टभिः ॥ हेदेविस्वप्रकाशेद्योतमानेइतिवा ॥ यस्त्वदीयचरणाम्बुजेरणुभिर्गौरींगौरवर्णांभालस्थलींललाटस्थलींवहतिधारयीततस्यपुनस्तांभालस्थलींजन्मांतरेरजनीकरचारुलेखानितरांगौरयातिक्षोभयतीत्यन्वयः ॥ वहनेप्रकारंदर्शयंस्तंविशिनष्टि ॥ प्रणतौदण्डवत्प्रणिपातेप्रवीणोदक्षइति ॥ अपिशब्दादिहजन्मानिच ॥ बाणांधकादीनांतथादर्शनात् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्त्युद्रेकाद्बहुधासम्बोधयाति ॥ हेश्रीमंगलेश्रीयुक्तमूर्तिमन्मंगले ॥ हेसकलमंगलजन्मभूमे ॥ श्रियोलक्ष्म्याःमंगलंयस्यास्ततसम्वोधनंहेश्रीमंगले हेसकलकल्मषतूलवह्ने अयंत्येनांयोगिनइति श्रीर्ब्रह्मविद्यातस्यामंगलंयस्यास्तत्सम्बोधनंहेश्रीमंगले ॥ श्रीमंगलेइत्यस्यावृत्तिर्मंगलनाम्नःप्राधान्यख्यापनाय ॥ हेसकलदानवदर्पहंत्रि अयन्त्येतामविवेकिनइतिश्रीरविद्यातस्याःमंगलंसौभाग्यं यस्यास्ततसम्बोधनंहेश्रीमंगले अखिलमिदंविश्वंपरिपाहिपरिपालय ॥ परिपासीतिक्वचित् ॥ ९६ ॥ ब्रह्मविष्णुमहेश्वररूपेणस्तौति ॥ हेविश्वेश्वरिसर्वनियन्त्रिविश्वजनस्यत्वंकर्त्र्यसि तथात्वंपालयित्र्यसि शक्तिशक्तिमतोरभेदात् ॥ अपिःसमुच्चये ॥ त्वन्नामकीर्तनेमवत्वन्नामसंकीर्तनेनवासमुल्लसन्तीयाअच्छपुण्यास्रोतस्विनी ॥ स्रोतस्वतीतिक्वचित्पाठः ॥ सापातकान्येवकूलस्थवृक्षास्तान्हरतीति ॥ ९७ ॥ हेमातर्हेभवानिहेभवतीव्रदुःखसम्भारहारिणिसंसारदुःखौघनाशिनिइहजगतिभवत्येवशरण्यंशरण्यमस्तिनान्या येषुतवशुभःकरुणाकटाक्षःस्फुरेदुल्लसेत् भुवनेषुमध्येतएवधन्यास्तएवमान्याइति ॥ ९८ ॥ येजनास्त्वांसततंस्मरंतितान्स्मरहरःस्मरेदित्यन्वयः ॥ कथंभूताम् ॥ सहजप्रकाशांस्वप्रकाशामित्यर्थः ॥ काशीपुर्यांस्थितिमतींकृतनिवासामित्यर्थः ॥ नतानांमोक्षल

श्रीमंगलेसकलमंगलजन्मभूमेश्रीमंगलेसकलकल्मषतूलवह्ने ॥ श्रीमंगलेसकलदानवदर्पहंत्रिश्रीमंगलेऽखिलमिदंपरिपाहिविश्वम् ॥९६॥ विश्वेश्वरित्वम सिविश्वजनस्यकर्त्रीत्वंपालयित्र्यसितथाप्रलयेपिहंत्री ॥ त्वन्नामकीर्तनसमुल्लसदच्छपुण्यास्रोतस्विनीहरतिपातककूलवृक्षान् ॥९७॥ मातर्भवानिभवती भवतीव्रदुःखसंभारहारिणिशरण्यमिहास्तिनान्या ॥ धन्यास्तएवभुवनेषुतएवमान्यायेषुस्फुरेत्तवशुभःकरुणाकटाक्षः ॥ ९८ ॥ येत्वांस्मरंतिसततंसहजप्रकाशांकाशीपुरीस्थितिमतींनतमोक्षलक्ष्मीम् ॥ तान्संस्मरेत्स्मरहरोधृतशुद्धबुद्धीन्निर्वाणरक्षणविचक्षणपात्रभूतान् ॥९९॥ मातस्तवांघ्रियुगलंविमलंहृदिस्थंयस्यास्तितस्यभुवनंसकलंकरस्थम् ॥ योनामतेजपतिमंगलगौरिनित्यंसिद्ध्यष्टकंनपरिमुंचतितस्यगेहम् ॥ ६० ॥ त्वंदेविवेदजननीप्रणवस्वरूपागायत्र्यसित्वमसिवैद्विजकामधेनुः ॥ त्वंव्याहृतित्रयमिहाऽखिलकर्मसिद्ध्यैस्वाहास्वधासिसुमनःपितृतृप्तिहेतुः ॥ ६१ ॥ गौरित्वमेवशशिमौलिनिवेधसित्वंसावित्र्यसित्वमसिचक्रिणिचारुलक्ष्मीः ॥ काश्यांत्वमस्यमलरूपिणिमोक्षलक्ष्मीस्त्वंमेशरण्यमिहमंगलगौरिमातः ॥ ६२ ॥

क्ष्मीर्यस्यास्तां मोक्षलक्ष्मीस्वरूपामितिवा ॥ तान्कीदृशान् ॥ धृतासम्पादिताशुद्धाबुद्धिर्यैस्तान् निर्वाणरक्षणेकैवल्यधारणायामित्यर्थः ॥ विचक्षणपात्रभूतान्निपुणाधिकारिणइत्यर्थः ॥ ९९ ॥ हेमातस्तवांघ्रियुगलंयस्यहृदिस्थमस्तिसकलंभुवनंतस्यकरस्थमेवस्वाधीनमेवसतुसर्वज्ञइतिवा ॥ हेमंगलागौरि ह्रस्वत्वंछांदसम् ॥ मंगलयुक्तागौरीमंगलगौरीतिवा ॥ यस्तेनामानित्यंजपतितस्यगेहं सिद्ध्यष्टकंपद्माद्यष्टनिधिरूपमणिमाद्यष्टसिद्धिरूपंवानविमुंचतीति ॥ ६० ॥ हेदेवित्वंवेदजननीप्रणवस्वरूपाओंकारस्वरूपाच ॥ प्रणवस्वरूपावेदजननीगायत्रीवासि ॥ कथंभूता ॥ द्विजकामधेनुर्द्विजातीनांकामदोग्ध्री ॥ त्वंव्याहृतित्रयंभूर्भुवःस्वरितिरूपम् ॥ इहजगतिअखिलकर्मसिद्ध्यै सुमनःपितृतृप्तिहेतुस्त्वंस्वाहास्वधासिसुमनसांदेवानांतृप्तिहेतुःस्वाहासिपितॄणांतृप्तिहेतुःस्वधासीत्यर्थः ॥ ६१ ॥ हेमातर्हेमंगलगौरित्वंमेइहशरण्यंशरणम् ॥ शशिमौलिनिमहादेवेयात्वमेवगौरी ॥ वेधसिब्रह्मणिसावित्र्यसि ॥ चक्रिणिविष्णौचारुलक्ष्मीरसि ॥ हेअमलरूपिणिशुद्धस्वरूपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काश्यांत्वंमोक्षलक्ष्मीरसीति ॥ ६२ ॥ स्तुत्वेति ॥ स्मरहरार्धशरीरस्यशोभायस्यास्तांशोभारूपांवा ॥ श्रीमंगलाष्टकंचतन्महास्तवनंचमहास्तोत्रंतेनपरितःप्रणम्यप्रदक्षिणीकृत्यनत्वा ॥ ६३ ॥ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ एतच्चतुःषष्ट्यात्मकंमंगलाष्टकंचस्तोत्रवरंस्तवश्रेष्ठम् ॥ स्तोत्रद्वयमितिक्वचित् ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ एषचराचररूपःप्रपंचआव

स्तुत्वेतितांस्मरहरार्धशरीरशोभांश्रीमंगलाष्टकमहास्तवनेनभानुः ॥ देवींचदेवमसकृत्परितःप्रणम्यतूष्णींबभूवसविताशिवयोःपुरस्तात् ॥ ६३ ॥ ॥ देवदेवउवाच ॥ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेप्रसन्नोस्मिमहामते ॥ मित्रमन्नेत्रगोनित्यंप्रपश्येतच्चराचरम् ॥ ६४ ॥ ममर्मूर्तिर्भवान्सूर्यसर्वज्ञोभवसर्वगः ॥ सर्वेषांमहसांराशिःसर्वेषांसर्वकर्मवित् ॥ ६५ ॥ सर्वेषांसर्वदुःखानिभक्तानांत्वंनिराकुरु ॥ त्वयानाम्नांचतुःषष्ट्यायदष्टकमुदीरितम् ॥ ६६ ॥ अनेनमांप रिष्टुत्यनरोमद्भक्तिमाप्स्यति ॥ अष्टकंमंगलागौर्यामंगलाष्टकसंज्ञकम् ॥ ६७ ॥ अनेनमंगलागौरींस्तुत्वामंगलमाप्स्यति ॥ चतुःषष्ट्यष्टकंस्तोत्रंमं गलाष्टकमेवच ॥ ६८ ॥ एतत्स्तोत्रवरंपुण्यंसर्वपातकनाशनम् ॥ दूरदेशांतरस्थोपिजपन्नित्यंनरोत्तमः ॥६९॥ त्रिसंध्यंपरिशुद्धात्माकाशींप्राप्स्यतिदुर्ल भाम् ॥ अनेनस्तोत्रयुग्मेनजप्तेनप्रत्यहंनृभिः ॥७०॥ ध्रुवंदैनंदिनंपापंक्षालितंनात्रसंशयः ॥ नतस्यदेहिनोदेहेजातुचित्किल्बिषस्थितिः ॥७१॥ त्रिका लंयोजपेन्नित्यमेतत्स्तोत्रद्वयंशुभम् ॥ किंजप्तैर्बहुभिःस्तोत्रैश्चंचलश्रीप्रदैर्नृणाम् ॥ ७२ ॥ एतत्स्तोत्रद्वयंदद्यात्काश्यांनैःश्रेयसींश्रियम् ॥ तस्मात्सर्व प्रयत्नेनमानवैर्मोक्षकांक्षिभिः ॥ ७३ ॥ एतत्स्तोत्रद्वयंजप्यंत्यक्त्वास्तोत्राण्यनेकशः ॥ प्रपंचआवयोरेवसर्वएषचराचरः ॥ ७४ ॥ तदावयोःस्तवादस्मा न्निष्प्रपंचोजनोभवेत् ॥ समृद्धिमाप्यमहतींपुत्रपौत्रवतीमिह ॥ ७५ ॥ अंतेनिर्वाणमाप्नोतिजपन्स्तोत्रमिदंनरः ॥ अन्यच्चशृणुसत्ताश्वग्रहराजदिवाकर ॥ ॥ ७६ ॥ त्वयाप्रतिष्ठितंलिंगंगभस्तीश्वरसंज्ञितम् ॥ सेवितंभक्तिभावेनसर्वसिद्धिसमर्पकम् ॥ ७७ ॥ त्वयागभस्तिमालाभिश्चांपेयांबुजकांतिभिः ॥ यदर्चितंवैश्वरंलिंगंसर्वभावेनभास्कर ॥ ७८ ॥ गभस्तीश्वरइत्याख्यांततोलिंगमवाप्स्यति ॥ अर्चयित्वागभस्तीशंस्नात्वापंचनदेनरः ॥ ७९ ॥ नजातुजायतेमातुर्जठरेधूतकल्मषः ॥ इमांचमंगलागौरींनारीवापुरुषोपिवा ॥ ८० ॥ चैत्रशुक्लतृतीयायामुपोषणपरायणः ॥ महोपचारैःसंपूज्यदु कूलाभरणादिभिः ॥ ८१ ॥ रात्रौजागरणंकृत्वागीतनृत्यकथादिभिः ॥ प्रातःकुमारीःसंपूज्यद्वादशाच्छादनादिभिः ॥ ८२ ॥ संभोज्यपरमान्नाद्यैर्द त्त्वान्येभ्योपिदक्षिणाम् ॥ होमंकृत्वाविधानेनजातवेदसइत्यृचा ॥ ८३ ॥

योरावाभ्यांविरचितः ॥ ७४ ॥ तत्तस्मात् ॥ आवयोरस्मात्तवस्तवादित्यन्वयः ॥ ७५ ॥ नरोमनुष्यमात्रः ॥ ७६ ॥ गभस्तीश्वरनामनिर्वक्ति ॥ त्वयेति ॥ ७७ ॥ चांपेयश्चंपकःअंबुजं पद्मंतद्वत्कांतिभिः ॥ तुशब्देनश्रेष्ठचंद्योत्यते ॥ ७८ ॥ ७९ ॥ धूतकल्मषोविगतपापः ॥ ८० ॥ ८१ ॥ ८२ ॥ जातवेदसइत्यृचाकंडिकया ॥ जातवेदसेसुनवामसोममरातीयतोनिदहाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निरितिमंत्रशेषः ॥ ८३ ॥ प्रगेप्रातःकाले ॥ ८४ ॥ ८५ ॥ ८६ ॥ जातुचित्कदाचिदित्यर्थः ॥ नापुरुषः ॥ ८७ ॥ ८८ ॥ ॥ ८९ ॥ ९० ॥ तस्यांतिथौशुक्लतृतीयायाम् ॥ ९१ ॥ मयूखादित्यनामनिर्वक्ति अपरमितिसार्धेन ॥ ९२ ॥ ९३ ॥ ९४ ॥ भूतोभूतवान् ॥ जातइतिवापाठः ॥ ९५ ॥ अध्यायश्रवणफलमाह ॥ श्रुत्वाख्यानमिति ॥ ९६ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायामेकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ अध्यायेत्वथपंचाशेनानाश्चर्यमनोहरे ॥ खखोल्कादित्यता

अष्टोत्तरशताभिश्चतिलाज्याहुतिभिःप्रगे ॥ एकंगोमिथुनंदत्त्वाब्राह्मणायकुटुंबिने ॥८४॥ श्रद्धयासमलंकृत्यभूषणैर्द्विजदंपती ॥ भोजयित्वामहार्हान्नैः प्रीयेतांमंगलेश्वरौ ॥ ८५ ॥ इतिमंत्रंसमुच्चार्यप्रातःकृत्वाथपारणम् ॥ नदुर्भगत्वमाप्नोतिनदारिद्र्यंकदाचन ॥ ८६ ॥ नवैसंतानविच्छित्तिंभोगोच्छित्तिंनजातुचित् ॥ स्त्रीवैधव्यंनचाप्नोतिननायोषिद्वियोगभाक् ॥ ८७ ॥ पापानिविलयंयांतिपुण्यराशिश्चलभ्यते ॥ अपिवंध्याप्रसूयेतकृत्वैतन्मंगलाव्रतम् ॥ ८८ ॥ एतद्व्रतस्यकरणात्कुरूपत्वंनजातुचित् ॥ कुमारीविंदतेत्यंतंगुणरूपयुतंपतिम् ॥८९॥ कुमारोपिव्रतंकृत्वाविंदतिस्त्रियमुत्तमाम् ॥ संतिव्रतानिबहुशोधनकामप्रदानिच ॥९०॥ नाप्नुयुर्जातुचित्तानिमंगलाव्रततुल्यताम् ॥ कर्तव्याचाब्दिकीयात्रामधौतस्यांतिथौनरैः ॥ ९१ ॥ सर्वविघ्नप्रशांत्यर्थंसदाकाशीनिवासिभिः ॥ अपरंद्युमणेवच्मितवचात्रतपस्यतः ॥ ९२ ॥ मयूखाएवखेदृष्टानचदृष्टंकलेवरम् ॥ मयूखादित्यइत्याख्याततस्तेदितिनंदन ॥ ९३ ॥ त्वदर्चनान्नृणांकश्चिन्नव्याधिःप्रभविष्यति ॥ भविष्यतिनदारिद्र्यंरविवारेत्वदीक्षणात् ॥ ९४ ॥ इत्थंमयूखादित्यस्यशिवोदत्त्वाबहून्वरान् ॥ तत्रैवांतर्हितोभूतोरविस्तत्रैवतस्थिवान् ॥ ९५ ॥ श्रुत्वाख्यानमिदंपुण्यंमयूखादित्यसंश्रयम् ॥ द्रौपदादित्यसहितंनरोननिरयंव्रजेत् ॥९६॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेपूर्वार्द्धेद्रौपदादित्यमयूखादित्ययोर्वर्णनंनामैकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ ॥ ॥ स्कंदउवाच ॥ ॥ वाराणस्यांतथादित्यायेचान्येतान्वदाम्यतः ॥ कलशोद्भवतेप्रीत्यासर्वेसर्वाघनाशनाः ॥ १ ॥ खखोल्कोनामभगवानादित्यःपरिकीर्तितः ॥ त्रिविष्टपोत्तरेभागेसर्वव्याधिविघातकृत् ॥ २ ॥ यथाखखोल्कइत्याख्यातस्यादित्यस्यतच्छृणु ॥ पुराकद्रूश्चविनतादक्षस्यतनयेशुभे ॥ ॥३॥ कश्यपस्यचतेपत्न्यौमारीचेःप्राक्प्रजापतेः ॥ क्रीडंत्यावेकदान्योन्यंमुनेतेऊचतुस्त्विति ॥ ४ ॥ ॥ कद्रूरुवाच ॥ ॥ विनतेत्वंविजानासियदितद्ब्रूहिमेग्रतः॥अखंडितागतिस्तेस्तियतोगगनमंडले ॥ ५ ॥ योसावुच्चैःश्रवावाजीश्रूयतेसवितूरथे ॥ किंरूपःसोस्तिशबलोधवलोवावदाशुभे ॥ ६ ॥

र्येशकथामस्तूयतेऽद्भुता ॥ १ ॥ अवशिष्टानादित्यान्वक्तुंप्रतिजानीते ॥ वाराणस्यामित ॥ कथनफलमाह ॥ सर्वइति ॥ सर्वेषामघानांसर्वेषांयदघंतस्यवानाशनाः ॥ १ ॥ खखोल्कइति ॥ मध्येमूर्द्धन्यपकारवानपिक्वचिद्दृश्यते ॥ त्रिविष्टपंत्रिलोचनस्थानंतस्योत्तरेउत्तरप्रदेशे ॥ २ ॥ ३ ॥ ४ ॥ विजानासिविशेषेणजानासि ॥ तुजानासीतिक्वचित् ॥ ५ ॥ सवितूरथेप्रतिमासंपृथगधिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रित्वेनसूर्यभावापन्नस्येंद्रस्यरथेइत्यर्थः ॥ शवलःकर्बुरः ॥ ६ ॥ पणंजयानन्तरंज्ञेयम् ॥ नयातुंमागच्छतु ॥ नयातीतिक्वचित् ॥ ७ ॥ ८ ॥ ९ ॥ क्रुधःक्रोधस्य ॥ खेलस्यक्रीडायाःपणेपणानिमित्ते ॥ १० ॥ पवनाशिनिहेसर्पिणि ॥ सर्पाकारत्वात्कद्राः ॥ ११ ॥ १२ ॥ पतत्रिणीपक्षिणी पक्ष्याकारत्वाद्विनतायाः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ कल्मापयतकल्मपवर्णमिवकुरुत ॥ ॥ १७ ॥ वालधिलांगूलम् ॥ कृष्णकुन्तलतांकृष्णकेशताम् ॥ तथातदंगलोमान्यध्यास्यविधत्त कर्बुरतामितिशेषः ॥ कैर्विषसीत्कृतैर्विषसहितैस्सीत्कृतैर्विषोद्गारध्वनिभिरित्यर्थः ॥ विषसीत्कृतैर्विष

पणंचकुरुकल्याणितुभ्यंयोरोचतेनघे ॥ एवमेवनयात्येषकालःक्रीडनकंविना ॥७॥ ॥ विनतोवाच ॥ ॥ किंपणेनभगिन्यत्रकथयाम्येवमेवहि ॥ त्वज्जयेकाचमेप्रीतिर्मज्जयेकिंनुतेसुखम् ॥ ८ ॥ ज्ञात्वापणोनकर्तव्योमिथःस्नेहमभीप्सता ॥ ध्रुवमेकस्यविजयेक्रोधोन्यस्येहजायते ॥९॥ कद्रूरुवाच ॥ क्रीडेयंनात्रभगिनिकारणंकिमपिक्रुधः ॥ खेलस्यव्यवहारोयंपणेयत्किंचिदुच्यते ॥ १० ॥ ॥ विनतोवाच ॥ ॥ तथाकुरुयथाप्रीतिस्तवास्तिपवनाशिनि ॥ अथतां विनतामाहकद्रूःकुटिलमानसा ॥ ११ ॥ तस्यास्तुसाभवेद्दासीपराजीयेतयायया ॥ अस्मिन्पणेइमाःसर्वाःसख्यःसाक्षिण्यएवनौ ॥ १२ ॥ इत्यन्योन्यंपणीकृत्यसर्पिण्यपिपतत्रिणी ॥ उवाचकर्बुरंकद्रूरश्वंश्वेतंगरुत्मती ॥ १३ ॥ कदागंतव्यमितिचचक्रातेतेगमावधिम् ॥ जग्मतुश्चविरम्याथक्रीडनात्स्वंस्वमालयम् ॥ १४ ॥ विनतायांगतायांतुकद्रूराहूयचांगजान् ॥ उवाचयातवैपुत्राद्रुतंवचनतोमम ॥ १५ ॥ तुरंगमुच्चैःश्रवसं प्रोद्भूतंक्षीरनीरधेः ॥ सुरासुरैर्मथ्यमानान्मंदराघातसाध्वसात् ॥ १६ ॥ कार्यंकारणरूपस्यसादृश्यमधिगच्छति ॥ अतस्तंक्षीरवर्णाभंकल्माषयतपुत्रकाः ॥ १७ ॥ तस्यवालधिमध्यास्यकृष्णकुंतलतांगताः ॥ तथातदंगलोमानिविधत्तविषसीत्कृतैः ॥ १८ ॥ इतिश्रुत्वावचोमातुःकाद्रवेयाःपरस्परम् ॥ संमंत्र्यमातरंप्रोचुःकद्रूंकद्रूपमागताः ॥ १९ ॥ ॥ नागाऊचुः ॥ ॥ मातर्वयंत्वदाह्वानाद्विहायक्रीडनंबलात् ॥ प्राप्ताःप्रहृष्टामृष्टान्नंदास्यत्यग्रप्रसूरिति ॥ २० ॥ मृष्टंतिष्ठतुतद्दूरंविषादप्यधिकंकटु ॥ तत्त्वयावादियन्मंत्रैरौषधैर्नोपशाम्यति ॥ २१ ॥ वयंनयामोयद्भाव्यंतदस्माकंभवत्विह ॥ इतिप्रोक्तंविषास्यैस्तैस्तदाकुटिलगामिभिः ॥ २२ ॥ ॥ स्कंदउवाच ॥ ॥ अन्येपियेकुटिलगाःपररंध्रनिषेविणः ॥ अकर्णाःक्रूरहृदयाःपितरौव्रीडयंतिते ॥ २३ ॥ पित्रोर्गिरंनिराकृत्ययेतिष्ठेयुःसुदुर्मदाः ॥ अत्याहितमिहप्राप्यगच्छेयुस्तेऽचिराल्लयम् ॥ २४ ॥

फूत्कृतैरितिवा ॥ यद्वा विषसीत्कृतैरितिविशेषणेतृतीया ॥ विषोद्गारविशिष्टान्यंगलोमानिविधत्तेत्यर्थः ॥ १८ ॥ कद्रूपंकुत्सितंरूपम् ॥१९॥२०॥ अवादिउक्तम् ॥२१॥२२॥अकर्णाःकर्णरहिताः ॥ पित्रोर्वाक्यंश्रृण्वंतोप्यश्रृण्वंतइत्यर्थः ॥ व्रीडयंतिउपहसंतितिरस्कुर्वंतिअवज्ञयंतीतियावत् ॥ चाटयंतीतिपाठेसएवार्थः ॥ २३ ॥ अत्याहितंमहाभीतिम् ॥ अचिराल्लयंशीघ्रंमरणम् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उरगीकद्रूः ॥ आगःसमागतान्अपराधंप्राप्तान् ॥ २५ ॥ २६ ॥२७ ॥ पुच्छमौच्चैःश्रवसमुच्चैःश्रवसःपुच्छमित्यर्थः॥पुच्छगोच्चैरितिपाठेविसर्गलोपेपिसंधिरार्षः ॥ सुनीलचिकुराभासमतिकृष्णकेश
सदृशम् ॥ २८ ॥ तत्क्ष्वेडानलधूमौघैस्तेषांसर्पाणांविषाग्निधूम्रसमूहैः ॥ फूत्कारभरनिःसृतैःफूत्कारसमूहनिर्गतैः ॥ ननुसूर्यनैकट्यात्किमितितद्रश्मिभिस्तेनदग्धास्तत्राह ॥ मात्रिति ॥ २९ ॥
॥ ३० ॥ विस्रब्धंविनम्रंयथास्यादधोभूयेत्यर्थः ॥ विस्रब्धंकृतविश्वासंयथास्यादितिवा ॥ ३१ ॥ उष्णगोःसूर्यस्य ॥ उष्णगोभिस्तीक्ष्णरश्मिभिः ॥ विस्रब्धानिरपेक्षा ॥ ३२ ॥ सापेक्षत्वमे

तेषांवचनमाकर्ण्यनयामइतिसोरगी ॥ शशापतान्क्रुधाविष्टानागांश्चागःसमागतान् ॥ २५ ॥ तार्क्ष्यस्यभक्ष्याभवतयूयंमद्वाक्यलंघनात् ॥ जातमात्रां
श्चसर्पिण्योभक्षयंतुस्वबालकान् ॥ २६ ॥ इतिशापानलाद्भीतैःकैश्चित्पातालमाश्रितम् ॥ जिजीविषुभिरन्यैश्चद्वित्रैश्चक्रेप्रसूवचः ॥ २७ ॥ तेपुच्छमौ
च्चैःश्रवसमधिगम्यमहाधियः ॥ सुनीलचिकुराभासंचक्रुरंगंचकर्बुरम् ॥ २८ ॥ तत्क्ष्वेडानलधूमौघैःफूत्कारभरनिःसृतैः ॥ मातृवाक्कृतिजाद्धर्मान्नदग्धा
भानुभानुभिः ॥ २९ ॥ विनतापृष्ठमारुह्यकद्रूःस्नेहवशात्ततः ॥ वियन्मार्गमलंकृत्यददर्शोष्णांशुमंडलम् ॥ ३० ॥ तिग्मरश्मिप्रभावेणव्याकुली
भूतमानसा ॥ कद्रूस्ततःखगींप्राहविस्रब्धंविनतेव्रज ॥ ३१ ॥ उष्णगोरुष्णगोभिर्मेताप्यतेनितरांतनुः ॥ विस्रब्धाहंस्वभावेनत्वंसापेक्षाहिसर्वतः ॥
॥ ३२ ॥ स्वरूपेणपतंगीत्वंपतंगोसौसहस्रगुः ॥ अतएवनतेबाधागगनेतापसंभवा ॥ ३३ ॥ वियत्सरसिहंसोयंभवतीहंसगामिनी ॥ चंडरश्मिप्रतापा
ग्निस्त्वामतोनेहबाधते ॥ ३४ ॥ खगीमुद्वीयमानांखेपुनरूचेबिलेशया ॥ त्राहित्राहिभगिन्यत्रयावोन्यत्रावियत्पथः ॥ ३५ ॥ विनतेविनतांमांत्वंकिंनाव
सिपतत्रिणी ॥ तवदासीभविष्यामित्वदुच्छिष्टनिषेविणी ॥ ३६ ॥ यावज्जीवमहंभूयांत्वत्पादोदकपायिनी ॥ खखोल्कानिपतेदेषाभृशंगद्गदभाषिणी ॥
॥ ३७ ॥ मूर्च्छांगतवतीपक्षपुटौधृत्वाबिडोरगी ॥ सख्युल्कानिपतेदेषावक्तव्येत्वितिसंभ्रमात् ॥ ३८ ॥ खखोल्केतियदुक्तागीःकद्र्वासंभ्रांतचेतसा ॥
तदाखखोल्कनामार्कःस्तुतोविनतयाबहु ॥ ३९ ॥ मनागतिग्मतांप्राप्तेखेप्रशातिविवस्वति ॥ ताभ्यांतुरंगमोदर्शिकिंचित्किर्मीरवान्रथे ॥ ४० ॥

वदर्शयति स्वरूपेणेतिद्वयेन ॥ पतंगीपक्षिणी ॥ पतंगशब्देनसूर्योप्युच्यते ॥ शब्दश्लेषेणसापेक्षत्वंतत्रोन्नेयम् ॥ ३३ ॥ वियदेवसरस्तस्मिन् ॥ ३४ ॥ ऊचेउक्तवती ॥ बिलेशयासर्पिणी ॥
॥ ३५ ॥ अवसिरक्षसि ॥ ३६ ॥ खखोल्कनामत्वेअर्कस्यहेतुमाह खखोल्केतिद्वयेन ॥ ३७ ॥ बिडोरगीबिलसर्पिणी ॥ डलयोरैक्यात्बिलाश्रयत्वात्सूर्यस्यातपंसोढुमक्षमेतिबिडपदस्यता
त्पर्यम् ॥ पूर्वार्धेविवृण्वन्हेतुमेवस्पष्टयति ॥ सखीति ॥ तुशब्दोत्रभिन्नक्रमे ॥ इतितुवक्तव्येसंभ्रमादित्यन्वयः ॥ ३८ ॥ यद्यदा ॥ गीर्वाणी ॥ ३९ ॥ किर्मीरवान्कर्बुरवर्णवान् ॥ किर्मीरित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिपाठेकिर्मीरःकर्बुरवर्णोयस्यसंजातः ॥ इतच्प्रत्ययः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ विनताधाराविनम्रतायाआधारभूता ॥ विनताचारेतिक्वचित् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ दूनासिउपतप्तासि ॥ कृतसाध्वसेकृतभये ॥ ४८ ॥ ४९ ॥ येषांमातायन्माता ॥ चकारात्तत्पुत्रानपि ॥ ५० ॥ ५१ ॥ सक्रूरचेतसइतिपाठेक्रूरचित्तयुक्तायाइत्यर्थः ॥ ५२ ॥

उक्ताविनतयैवैषातापोपहतलोचना ॥ क्रूरासरीसृपीसत्यवादिन्याविश्वमान्यया ॥ ४१ ॥ कद्रुत्वयाजितंभद्रेयतउच्चैःश्रवाहयः ॥ चंद्ररश्मिप्रभोप्ये पकल्माषइवभासते ॥ ४२ ॥ विधिर्बलीयान्भुजगिचित्रंजयपराजये ॥ क्रूरोपिविजयीक्कापित्वक्रूरोपिपराजयी ॥ ४३ ॥ विनताविनताधारावदंतीति यथागतम् ॥ कद्रूनिवेशनंप्राप्तातस्यादास्यमचीकरत् ॥४४॥ कदाचिद्विनतादर्शिसुपर्णेनाश्रुलोचना ॥ विच्छायामलिनादीनादीर्घनिःश्वासवत्यपि ॥ ॥ ४५ ॥ सुपर्णउवाच ॥ ॥ प्रातःप्रातरहोमातःक्कयासित्वंदिनेदिने ॥ सायमायासिचकुतोविच्छायादीनमानसा ॥ ४६ ॥ कुतोनिःश्वसिसिप्रोच्चै रश्रुपूर्णविलोचना ॥ यथाक्लीबसुतायोषिद्यथापतितिरस्कृता ॥४७॥ ब्रूहिमातर्झटित्यद्यकुतोदूनासिपत्रिणि ॥ मयिजीवतितेबालेकालेपिकृतसाध्वसे॥ ॥ ४८ ॥ अश्रुनिर्माणकरणेकारणंकिंतपस्विनि ॥ सुचरित्रासुनारीषुनामंगलमिहेष्यते ॥ ४९ ॥ धिक्तांश्चपुत्रान्यन्मातातेषुजीवत्सुदुःखभाक् ॥ वरंवं ध्यैवसायस्याःसुतावंध्यमनोरथाः ॥ ५० ॥ इत्यूर्जस्वलमाकर्ण्यवचःसूनोर्गरुत्मतः ॥ विनताप्राहतंपुत्रंमातृभक्तिसमन्वितम् ॥ ५१ ॥ अहंदास्यस्मिरे बालकद्राश्चक्रूरचेतसः ॥ पृष्ठेवहामितांनित्यंतत्पुत्रानपिपुत्रक ॥५२॥ कदाचिन्मंदरंयामिकदाचिन्मलयाचलम् ॥ कदाचिदंतरीपेषुचरेयंतदुदन्वताम् ॥ ॥ ५३ ॥ यत्रयत्रनयेयुस्तेकाद्रवेयाःसुदुर्मदाः ॥ व्रजेयंतत्रतत्राहंतदधीनायतःसुत ॥ ५४॥ गरुडउवाच ॥ ॥ दासीत्वकारणंमातःकिंतेजातंसुलक्षणे ॥ दक्षप्रजापतेःपुत्रिकश्यपस्यप्रियेऽनघे ॥ ५५ ॥ विनतोवाचगरुडंपुरावृत्तमशेषतः ॥ दासीत्वकारणंयद्वदादित्याश्वविलोकनम् ॥ ५६ ॥ श्रुत्वेतिगरुडः प्राहमातरंसत्वरंव्रज॥पृच्छाद्यमातस्तान्दुष्टान्काद्रवेयानिदंवचः ॥५७॥ यद्दुर्लभंहिभवतांयत्रात्यंतरुचिश्चवः॥मद्दासीत्वविमोक्षायतद्याचध्वंददाम्यहम् ॥ ॥ ५८ ॥ तथाकरोच्चविनतातेपिश्रुत्वातदीरितम् ॥ सर्पाःसंमंत्र्यतांप्रोचुर्विनतांहृष्टमानसाः ॥ ५९ ॥ मातृशापविमोक्षाययदिदास्यतिनःसुधाम् ॥ तदासमीहितंतेस्तुनदास्यत्यथदास्यसि ॥ ६० ॥

अन्तरीपेषुमध्यवर्तिजलगर्भितद्वीपेषु ॥ केषां तदुदन्वतान्तेषांप्रसिद्धानांलवणादीनांसमुद्राणाम् ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ संमन्त्र्यमात्रासार्धमितिशेषः ॥ ५९ ॥ मातृशापविमोक्षायतार्क्ष्यस्यभक्ष्याभवतेतिमात्राकद्रादत्तस्यशापस्यनाशाय ॥ अमृतेपीतेऽमरत्वेनगरुडभक्ष्यत्वाभावादित्यभिप्रायः ॥ यद्वा गरुडोमातुर्विनतायाःशापविमोक्षार्थमितिवा ॥ दास्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीत्युभयत्रगरुडएवभवतीतिवा ॥ दास्यसीतिवापाठः ॥ नदास्यतिसुधामित्यनुषज्जते ॥ अथचेद्दास्यसिदासीभवसि ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ निषादाश्चाण्डालाः ॥ वेलातटानिवा
साःसमुद्रजलतीरवासिनःसमुद्रतीरोच्चप्रदेशनिवासाइतिवा ॥ वेलाकूलनिवासाइतिपाठेपिसएवार्थः ॥ ६४ ॥ शासनीयाःमारणीयाः ॥ ६५ ॥ ६६ ॥ ६७ ॥ मत्स्यादीनांमत्स्यभक्षका
णाम् ॥ मत्स्याशिनामितिक्वचित् ॥ आत्थकथय ॥ लकारव्यत्ययश्छान्दसः ॥ ६८ ॥ ६९ ॥ नीवीपरिधानवस्त्रम् ॥ ७० ॥ ७१ ॥ लक्ष्मचिह्नम् ॥ ७२ ॥ प्रसूर्हेमातः ॥ ७३॥ खदिरांगारव

इत्योंकृत्यसमापृच्छ्यकद्रूंद्रुतगतिःखगी ॥ गरुत्मंतंसमाचष्टहृष्टासंहृष्टमानसम् ॥ ६१ ॥ नागांतकस्ततःप्राहमातरंचिंतयातुराम् ॥ आनीतंविद्धिपी
यूषंमातर्मेदेहिभोजनम् ॥ ६२ ॥ विनताप्राहतंपुत्रंसंप्रहृष्टतनूरुहा ॥ भोःसुपर्णार्णवंतूर्णंयाहिमंगलमस्तुते ॥ ६३ ॥ संतितत्रापिबहुशोनिषादामत्स्यघा
तिनः ॥ वेलातटनिवासाश्चतान्भक्षयदुरात्मनः ॥ ६४ ॥ परप्राणैर्निजप्राणान्येपुष्णंतीहदुर्धियः ॥ शासनीयाःप्रयत्नेनश्रेयस्तच्छासनंपरम् ॥ ६५ ॥
बहुहिंसाकृतांहिंसाभवेत्स्वर्गस्यसाधनम् ॥ विहिंसितेषुदुष्टेषुरक्ष्यंतेभूरिशोयतः ॥६६॥ निषादेष्वपिचेद्विप्रःकश्चिद्भवतिपुत्रक ॥ सरक्षणीयोयत्नेनभक्षणी
योनकर्हिचित् ॥ ६७ ॥ ॥गरुडउवाच ॥ ॥ मत्स्यादिनांवसन्मध्येकथंज्ञेयोद्विजोमया ॥ अभक्ष्योयस्त्वयाप्रोक्तस्तच्चिह्नंकिंचनात्थमे ॥ ६८ ॥ ॥
विनतोवाच ॥ ॥ यज्ञसूत्रंगलेयस्यसोत्तरीयंसुनिर्मलम् ॥ नित्यधौतानिवासांसिभालंतिलकलांछितम् ॥६९॥ सपवित्रौकरौयस्ययन्नीवीकुशगर्भिणी॥
यन्मौलिःसशिखाग्रंथिःसज्ञेयोब्राह्मणस्त्वया ॥ ७० ॥ उच्चरेदृग्यजुःसाम्नामृचमेकामपीहयः ॥ गायत्रीमात्रमंत्रोपिसविज्ञेयोद्विजस्त्वया ॥ ७१ ॥
गरुडउवाच ॥ मध्येसदानिषादानांयोवसेज्जननिद्विजः ॥ तस्यैतेष्वेकमप्येवनमन्येलक्ष्मबोधकम् ॥ ७२ ॥ लक्ष्मांतरंसमाचक्ष्वद्विजबोधकरंप्रसूः ॥
येनविज्ञायतंविप्रंत्यजेयमपिकंठगम् ॥ ७३ ॥ तच्छ्रुत्वाविनताप्राहयस्तेकंठगतोऽगज ॥ खदिरांगारवद्यात्तमपाकुरुदूरतः ॥ ७४ ॥ द्विजमात्रे
पियाहिंसासाहिंसाकुशलायन ॥ देशंवंशंश्रियंस्वंचनिर्मूलयतिकालतः ॥ ७५ ॥ निशम्यकाश्यपिरितिप्रसूपादौप्रणम्यच ॥ गृहीताशीर्ययौशीघ्रंखमार्गे
णखगेश्वरः ॥७६॥ दूरादालोकयांचक्रेनिषादान्मत्स्यजीविनः ॥ पक्षौविधूयपक्षींद्रोरजसापूर्यरोदसी ॥ ७७ ॥ अंधीकृत्यदिशोभागानब्धिरोधस्युपा
विशत् ॥ व्यादायवदनंघोरंमहाकंदरसन्निभम् ॥ ७८ ॥ कांदिशीकानिषादास्तुविविशुस्तत्रचस्वयम् ॥ मन्वानेष्वथपंथानंतेषुकंठंविशत्स्वपि ॥ ७९ ॥
जज्वालेंगलसंस्पर्शोद्विजस्तत्कंठकंदलीम् ॥ प्राक्प्रविष्टानयोताक्ष्योंनिषादानौदरींदरीम् ॥ ८० ॥

त्वदिरकाष्ठस्यज्वलदंगारवदित्यर्थः ॥ ७४ ॥ द्विजमात्रेपिब्राह्मणमात्रेयाहिंसाहिंसामात्रंप्राणनाशोवासकुशलायहितायनकिंतुदेशामिति ॥ स्वंधनम् ॥ कालतःकालक्रमेण ॥ ७५ ॥ ७६ ॥
विधूयप्रकंप्य ॥ रोदसीद्यावाभूमी ॥ ७७ ॥ अब्धिरोधसिसमुद्रतीरे ॥ कन्दरसन्निभन्दरीतुल्यम् ॥ ७८ ॥ कांदिशीकाभयद्रुताः ॥ ७९ ॥ इंगलसंस्पर्शोवह्नितुल्यसंपर्कः ॥ कण्ठएवकन्दलीकन्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

री ॥ रल्योरेकत्वात् ॥ कण्ठकंदलमितिपाठेपिसएवार्थः ॥ पंढत्वमार्षम् ॥ यद्वाकन्दलीगुल्मविशेषः ॥ कलध्वनौकंदलीतुमृगगुल्मप्रभेदयोरितिमेदिनीकारः ॥ ८० ॥ उदगिरदुद्गीर्णवान्मुखान्नि
ष्काशितवानित्यर्थः ॥ ८१ ॥ निगदकथय ॥ ८२ ॥ ८३ ॥ प्रेष्यप्रस्थापयित्वा ॥ ८४ ॥ बिभ्युर्भयंप्रापुः ॥ ८५ ॥ वर्मभृतःकवचधारिणः ॥ ८६ ॥ तिर्यग्गतीतिश्लोकत्रयंवाक्यम् ॥ रविर्नायं
यतस्तिर्यग्गतिः ॥ नायमग्निर्यतःसोग्निर्धूमवान् ॥ क्षणप्रभाविद्युदसौन्न तस्याअस्थिरत्वात् ॥ अस्यचस्थिरप्रभावत्वादित्यर्थः ॥ ८७ ॥ आकृतिराकारः ॥ ८८ ॥ दुधावअकंपयत् ॥ ८९ ॥
पार्णतार्णवत्पर्णैस्तृणैश्चनिर्मिताःपुरुषप्रतिकृतयोयथावायुनानीयंतेतद्वत् ॥ स्वार्थेवातद्धितः ॥ तृणपर्णवदित्यर्थः ॥ ९० ॥ प्रणष्टेष्वदर्शनंगतेषु ॥ ९१ ॥ आधूयउत्सार्यदूरीकृत्येतियावत् ॥

प्रवेश्यकंठतालुस्थंतंविज्ञायद्विजंस्फुटम् ॥ भयादुदगिरत्तूर्णंमातृवाक्येनयंत्रितः ॥ ८१ ॥ तमुद्गीर्णंनरंदृष्ट्वापक्षिराट्समभाषत ॥ कस्त्वंजात्यासिनि
गदममकंठविदाहकृत् ॥ ८२ ॥ सतदाहेतिविप्रोहंपृष्टःसन्गरुडाग्रतः ॥ वसाम्येषुनिषादेषुजातिमात्रोपजीवकः ॥ ८३ ॥ तंप्रेष्यगरुडोदूरंभक्षयि
त्वाथभूरिशः ॥ नभोविक्षोभयांचक्रेप्रलयानिलसन्निभः ॥ ८४ ॥ तंदृष्ट्वातिग्मतेजस्कंज्वालाततदिगंतरम् ॥ ज्वलद्दावानलंशैलमिवबिभ्युर्दिवौकसः ॥
॥ ८५ ॥ तेसन्नह्यंतयुद्धायसज्जीकृतबलायुधाः ॥ अध्यास्यवाहनान्याशुसर्वेवर्मभृतःसुराः ॥ ८६ ॥ तिर्यग्गतीरविर्नायंनायमग्निःसधूमवान् ॥
क्षणप्रभाप्यसौनैवकोनःसम्मुखएत्यसौ ॥ ८७ ॥ नदैत्येषुप्रभेदस्स्यान्नाकृतिर्दानवेष्वियम् ॥ महासाध्वसदःकोयमस्माकंहृत्प्रकंपनः ॥ ८८ ॥ यावत्सं
भावयंतीतिनीतिज्ञाअपिनिर्जराः ॥ तावद्दुधावस्वौपक्षौपक्षिराजोमहाबलः ॥ ८९ ॥ निपेतुःपक्षवातेनसायुधाश्चसवाहनाः ॥ नज्ञायंतेक्वसंप्राप्तावात्य
यापार्णतार्णवत् ॥ ९० ॥ अथतेषुप्रणष्टेषुबुद्ध्याविज्ञायपक्षिराट् ॥ कोशागारंसुधायाःसतत्रापश्यच्चरक्षिणः ॥ ९१ ॥ शस्त्रास्त्रोद्यतपाणींस्तान्सुराना
धूयसर्वशः ॥ ददर्शकर्तरीयंत्रममृतोपरिसंस्थितम् ॥ ९२ ॥ मनःपवनवेगेनभ्रममाणंमहारयम् ॥ अपिस्पृशंतंमशकंयत्खंडयतिकोटिशः ॥ ९३ ॥
उपोपविश्यपक्षींद्रस्तस्ययंत्रस्यनिर्भयः ॥ क्षणंविचारयामासकिमत्रकरवाण्यहो ॥ ९४ ॥

कर्तरीयंत्रंकर्तनशीलंयंत्रम् ॥ कर्तनंकर्तस्तंरातुंशीलंयस्येतिव्युत्पत्तेः ॥ यकारागमाभावोदैर्घ्यंचार्षम् ॥ यद्वा कर्तःकर्तनंछेदनंकर्तस्यछेदनस्यरादानंविद्यतेयस्मिन् ॥ व्रीह्यादिभ्यश्चेत्यनकारांतादिनिः ॥
स्त्रीत्वमार्षम् ॥ यद्वा कर्तनंरायतेकारणत्वेनगच्छतीतिकर्तरी ॥ रीङ्गतावितिधातुः ॥ कर्तरीकेशादिच्छेत्रीशस्त्रविशेषस्तदाकारंयंत्रमिति ॥ तद्वच्छेदकंयंत्रमितिकेचित् ॥ .९२ ॥ यत्कर्तरीयंत्रम् ॥
खंडयतिखंडंकरोतिच्छिनत्तीतियावत् ॥ ९३ ॥ उपोपविश्यतस्यकर्तरीयंत्रस्यसमीपेउपविश्य ॥ क्वचिदुपसर्गस्यापिद्विर्वचनम् ॥ तथाचश्रूयते ॥ प्रप्रपूज्यमहादेवंसंसंयम्यमनःसदा ॥ उपोपहाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसर्गनिर्निर्गतःसतापसइति ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥ देहंचेतिश्लोकद्वयंवाक्यम् ॥ पूर्वार्धमेवविवृणोति परमाण्वित्यर्धेन ॥ २ ॥ देहस्यलाघवाल्लघुत्वा त्कर्तरीयंत्रमधःप्रविश्य ॥ किंकुर्वन् ॥ तद्यंत्रतस्तस्माद्यंत्रात् ॥ विभ्यद्भयंप्राप्नुवन् ॥ देहंवंचयन्तिरश्चीनोभूत्वातस्माद्रक्षयन् ॥ कथंभूताद्यंत्रात् ॥ वायुखंडनाद्वायोरपिगतिवैकल्यकर्तुरित्यर्थः ॥ ॥ ३ ॥ मूलमुत्पाटचयस्मिंस्तदमृतभाजनंस्थापितंतदुत्पाटचामृतभाजनंगृहीत्वास्वर्गसद्मसुदेवेषुक्रोशत्सुसत्सुअमृतंहरतीत्यार्तस्वरंकुर्वाणेषुसत्सुपावनेमार्गेआवहप्रवहादिवायुमार्गेनिर्ययाविति ॥

स्प्रष्टुंनलभ्यतेचैतद्वात्यानप्रभवेदिह ॥ कउपायोत्रकर्तव्योवृथाजातोममोद्यमः ॥ ९५ ॥ नबलंप्रभवेदत्रनकिंचिदपिपौरुषम् ॥ अहोप्रयत्नोदेवानामे तत्पीयूषरक्षणे ॥९६॥ यदिमेशंकरेभक्तिर्निर्द्वंद्वातीवनिश्चला ॥ तदासदेवदेवोमांवियुनक्तुमहाऽधिया ॥९७॥ यद्यहंमातृभक्तोस्मिस्वामिनःशंकरादपि ॥ तदामेबुद्धिरत्रास्तुपीयूषहरणक्षमा ॥ ९८ ॥ आत्मार्थंनोद्यमश्चायंहृत्स्थोवेत्तीतिविश्वगः ॥ मातुर्दास्यविमोक्षाययतेहममृतंप्रति ॥ ९९ ॥ जरितौ पितरौयस्यबालापत्यश्चयःपुमान् ॥ साध्वीभार्याचतत्पुष्ट्यैदोषोऽकृत्येपितस्यन ॥ १०० ॥ इतिचिंतयतस्तस्यबुद्धिरासीन्महात्मनः ॥ १ ॥ देहं चकारसोत्यंतमणीयांसमणोरपि ॥ परमाणुसहस्रांशंकृत्वारूपंमहाद्भुतम् ॥ २ ॥ प्रविश्यकर्तरीयंत्रमधोदेहस्यलाघवात् ॥ बिभ्यत्तद्यंत्रतोदेहंवं चयन्वायुखंडनात् ॥ मूलमुत्पाट्यतरसागृहीत्वाऽमृतभाजनम् ॥ ३ ॥ निर्ययौपावनेमार्गेक्रोशत्सुस्वर्गसद्मसु ॥ ४ ॥ तथावैकुंठनाथंतेगत्वाप्रोचुः सुधाभुजः ॥ निर्जित्यनीयतेचक्रिन्सुधानोजीवितंपरम् ॥ ५ ॥ इत्याकर्ण्यहरिस्तेभ्योऽभयंदत्त्वात्वरायुतः ॥ कृत्वायुद्धंचसुमहद्विंशार्कघटिकाद्वयम् ॥ ॥ ६ ॥ शुंभदेव्योर्यथासूतगरुडस्तत्रचाधिकः ॥ तदाप्रसन्नोभगवान्महायुद्धेनसर्वदः ॥ ७ ॥ गत्वागरुडमाहेदंप्रसन्नोस्मिखगेश्वर ॥ वरंवृणीहिभद्रंते जितवृंदारवृंदक ॥ ८ ॥ हसित्वागरुडःप्राहविश्वरूपंजनार्दनम् ॥ अहमेवप्रसन्नोस्मित्वंप्रार्थयवरद्वयम् ॥ ९ ॥ ततःकैटभजित्प्राहवैनतेयंमुदान्वितः ॥ वृतंवृतंमहोदारदेहिदेहिवरद्वयम् ॥ ११० ॥ इतिविष्णूदितंश्रुत्वाप्रहसन्नाहपक्षिराट् ॥ किंविलंबेनतद्ब्रूहिदत्तंदत्तंवरद्वयम् ॥ ११ ॥ अलब्धलाभे संजातेद्यूतादिविजयोदये ॥ दातव्यंसुधियापात्रेसदालाभजयौक्वचा ॥ १२ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ बलवानसिपक्षींद्रतन्मेवाहनतांव्रज ॥ एकोवरोयंवरदद्वितीयंश्रृणुकाश्यप ॥ १३ ॥

॥ ४ ॥ ५ ॥ विंशार्कघटिकाद्वयंविंशोविंशतिःअर्कोद्वादशविंशार्कौचताघटिकाश्चतासांद्वयंचतुःषष्टिदंडाः ॥ दंडचतुष्टयाधिकाहोरात्रमित्यर्थः ॥ ६ ॥ तत्रविष्णुगरुडयोर्मध्ये ॥ ७ ॥ ८ ॥ ९ ॥ वृतंवृतमितिहर्षेद्विरुक्तिः ॥ ११० ॥ दत्तंदत्तमित्यौत्सुक्ये ॥ ११ ॥ औत्सुक्येनरिपवेवरद्वयदानेस्वयमेवहेतुमाह ॥ अलब्धलाभइति ॥ १२ ॥ द्वयंप्रार्थयति बलवानितिसार्धद्वाभ्याम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजिह्वेभ्यइतिभाविस्वरूपंजानताभगवतोक्तम् ॥ द्राग्झटिति ॥ १४ ॥ दिवःस्वर्गात् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ इवशब्दोभिन्नक्रमेदेवेभ्योऽर्थात्तेषांजीवित मितिवेति ॥ २१ ॥ २२ ॥ २३ ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥ अन्येइति ॥ बुभुक्षंतिभोक्तुमिच्छंति ॥ अन्यायलब्धान्नमितिवापाठः ॥ परिणतिंपरिपाकम् ॥ २४ ॥ २५ ॥ एवमु

दर्शयित्वामृतंप्राज्ञमातृदास्यविमोक्षकम् ॥ द्विजिह्वेभ्यःकुरुतथाद्रागश्नंतिनतेयथा ॥ १४ ॥ देयासुधासुधाभुग्भ्योद्वितीयोस्तुवरोमम ॥ तथेतिसप्र तिज्ञायनिर्ययौपक्षिराड्दिवः ॥ १५ ॥ समातरंविनिर्मोच्यदास्यात्काश्यपनंदनः ॥ नागानांपुरतोधृत्वामहामृतकमंडलुम् ॥ १६ ॥ अमृतंपातुकामां स्तानित्याचष्टमहामतिः ॥ नागाःशुचित्वमासाद्यभोक्तव्यैषासुधाशुभा ॥ १७ ॥ नोचेदशुचिभिःस्पृष्टास्नानादिपरिवर्जितैः ॥ यास्यत्यदृश्यतामे षासुधाऽनिमिषरक्षिता ॥ १८ ॥ सामान्यमपियद्रक्ष्यंस्पृश्यतेऽशुचिभिःक्वचित् ॥ हरंतितद्रसंदेवास्तच्चतिष्ठतिनीरसम् ॥ १९ ॥ इत्युक्त्वासहितो मात्रावैनतेयोविनिर्ययौ ॥ कुशासनेचतैरुक्तोधृत्वापीयूषभाजनम् ॥ १२० ॥ यावत्स्नातुंगताःसर्पास्तावत्पीयूषभाजनम् ॥ आदायविष्णुनादत्तंदेवे भ्यइवजीवितम् ॥ २१ ॥ आगत्यभुजगाःस्नात्वानदृष्ट्वामृतभाजनम् ॥ अहोप्रतारितानीतममृतंचेतिचुक्रुशुः ॥ २२ ॥ ततःपर्यलिहन्दर्भान्पीयूषस्पर्श कांक्षिणः ॥ आस्तांतावत्सुधादूरंजिह्वास्तेषांद्विधाभवन् ॥ २३ ॥ अन्येप्यन्यायलब्धार्थंयेबुभुक्षंतिकेवलम् ॥ तन्नोपरिणतिंगच्छेद्भोक्तुंवातैर्नलभ्यते ॥ ॥ २४ ॥ न्यायाध्वस्थेनतार्क्ष्येणसुधाप्राप्तातिदुर्लभा ॥ लब्धाप्यन्यायतोनागैर्दृष्टमात्राक्षणाद्गता ॥२५॥ अथदास्याद्विनिर्मुक्ताविनतोवाचखेचरम् ॥ पुत्रकाशींप्रयास्यामिदास्यपापापनुत्तये ॥ २६ ॥ तावत्पापानिजृंभंतेनानाजन्मार्जितान्यपि ॥ यावत्काशीनहृत्संस्थापुनर्भवविघातिनी ॥ २७ ॥ काशीस्मरणमात्रेणकिंचित्रंयदघंव्रजेत् ॥ गर्भवासोपिनश्येतविश्वेशानुग्रहात्परात् ॥ २८ ॥ यत्रविश्वेश्वरःसाक्षात्तारापतिविभूषणः ॥ तारयेत्तारकद्रो ण्यादुस्तराद्भवसागरात् ॥ २९ ॥ विश्वेशानुगृहीतानांविच्छिन्नाखिलकर्मणाम् ॥ भवेत्काशींप्रतिमतिर्नेतरेषांकदाचन ॥ १३० ॥ काशींप्रतिमनोयेषां निःशेषक्षालितैनसाम् ॥ तएवमानवालोकेसत्यंनृपशवोपरे ॥ ३१ ॥ तैरेवकालोविजितस्तएवहिगतैनसः ॥ अपुनर्गर्भवासास्तेप्राप्तावाराणसीहयैः ॥ ॥ ३२ ॥ श्रेयसांभाजनंचैतन्नृजन्मनमुधानयेत् ॥ देवानामपिदुष्प्राप्यंकाशीसंदर्शनादृते ॥ ३३ ॥ कःकलिःकोथवाकालःकिंवाकर्माण्यनेकधा ॥ परानं दप्रदंक्षेत्रमविमुक्तंयदीक्षितम् ॥ ३४ ॥ तेगर्भवासेतिष्ठंतिपुनस्तेगर्भवासिनः ॥ येनगर्भवनच्छेत्रींसेवंतेवरणामसिम् ॥ ३५ ॥

पोद्घातमारचय्यप्रस्तुतंवक्तुमाह अथेत्यतआरभ्यउभावपीत्यतःप्राक्तनेनग्रंथेन ॥ २६ ॥ २७ ॥ २८ ॥ तारापतिविभूषणश्चंद्रलांछनः ॥ तारकद्रोण्यातारकःप्रणवःषडक्षररामंत्रराजोवासएव द्रोणीनौकाविशेषस्तयेत्यर्थः ॥ द्रोणीकाष्ठांबुवाहिनीत्यमरः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ गर्भएववनंतच्छेत्रीम् ॥ गर्भवासच्छेत्रीमितिपाठेछंदोभंगआर्षः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ भेदद्दग्भेदज्ञानम् ॥ चकारएवार्थे ॥ मास्त्वेवेत्यर्थः ॥ नौआवयोः ॥ ४४ ॥ पततिगच्छतीतिपत्रंयानम् ॥ सत्पत्रंतांसद्वाहनता

निशम्येतिवचःप्राहताक्ष्योंनत्वाथमातरम् ॥ अहमप्यागमिष्यामिकाशींद्रष्टुंशिवार्चिताम् ॥ ३६॥ मातुराज्ञामथप्राप्यजनन्यासहपक्षिराट् ॥ क्षणाद्वाराणसींप्रापमोक्षनिक्षेपभूमिकाम् ॥ ३७॥ उभावपिचतेपातेतपउग्रंमहामती ॥ संस्थाप्यशांभवंलिंगंपतत्रींद्रोऽचलेंद्रियः ॥ ३८ ॥ नाम्नाखखोल्कमादित्यंसंस्थाप्यविनताशुभम् ॥ अचिरेणैवकालेनमहतस्तपसस्तयोः ॥३९॥ काश्यांप्रसन्नौसंजातौदेवौशंकरभास्करौ ॥ गरुडस्थापिताल्लिंगादाविरासीदुमापतिः ॥ १४० ॥ गरुडायवरान्प्रादात्सुबहूनतिदुर्लभान् ॥ खगेंद्रममभक्तोसितवज्ञानंभविष्यति ॥ ४१ ॥ वेत्स्यसित्वंरहस्यंमेयन्नज्ञातंसुरैरपि ॥ त्वयैतत्स्थापितंलिंगंगरुडेश्वरसंज्ञितम् ॥ ४२ ॥ परमज्ञानदंपुंसांदृष्टंस्पृष्टंसमर्चितम् ॥ अन्यच्चशृणुपक्षींद्रहितंतेवच्मिसांप्रतम् ॥ ४३ ॥ असावहंसवैविष्णुर्मास्तुतेभेदद्दक्चनौ ॥ एवंतस्यैवपक्षींद्रदैत्येंद्रबलहारिणः ॥ ४४ ॥ प्राप्यसत्पत्रतांपत्रिंस्त्वमप्यर्च्योभविष्यसि ॥ इतिदत्त्वावरंशंभुःस्वभक्तायगरुत्मते ॥ ४५ ॥ तत्रैवांतर्हितोजातोगरुडोपिहरिंययौ ॥ हरेरथत्वंसंप्राप्यसोपिपूज्योऽभवद्भुवि ॥ ४६ ॥ तपस्यंतीमथालोक्यकदाचिद्विनतांप्रभुः ॥ शिवस्यैवपरामूर्तिःखखोल्कोनामभास्करः ॥ ४७ ॥ दत्त्वावरंचपापघ्नंशिवज्ञानसमन्वितम् ॥ काशीवासिजनानेकभवपापक्षयंकरः ॥ ४८ ॥ विनतादित्यइत्याख्यःखखोल्कस्तत्रसंस्थितः ॥ इत्थंखखोल्कआदित्यःकाशीविघ्नतमोहरः ॥ ४९ ॥ तस्यदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ काश्यांपैशंगिलेतीर्थेखखोल्कस्यविलोकनात् ॥ नरश्चिंतितमाप्नोतिनीरोगोजायतेक्षणात् ॥ १५० ॥ नरःश्रुत्वैतदाख्यानंखखोल्कादित्यसंभवम् ॥ गरुडेशेनसहितंसर्वपापैःप्रमुच्यते ॥ १५१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेपूर्वार्द्धेखखोल्कादित्यगरुडेशयोर्वर्णनंनामपंचाशत्तमोऽध्यायः ॥ ५० ॥ इतिकाशीखंडपूर्वार्धंसमाप्तम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

मित्यर्थः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ पैशंगिलेपिलिपिलातीर्थे ॥ १५० ॥ १५१ ॥ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यभगवत्पूज्यपादशिष्यश्रीरामेंद्रवनशिष्येण रामानंदेनकृतायांकाशीखंडपूर्वार्धटीकायांपंचाशत्तमोध्यायःसमाप्तः ॥ ५० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

इदं पुस्तकं खेमराजश्रीकृष्णदासश्रेष्ठिना मुंबय्यां स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणालये
मुद्रयित्वा प्रकाशितम् । शके १८३० संवत १९६५.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीकाशीखंडपूर्वार्द्धं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीकाशीखंडोत्तरार्धं प्रारभ्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ रामंनमामिपरमात्मसुखप्रकाशंविश्वस्ययज्जननपालनभंगमेकम् ॥ स्वेच्छावतारमतसीकुसुमावभासंश्रीजानकीसमुपलालितपादपद्मम् ॥ १ ॥ यत्कृपातरणिंप्राप्य निस्तीर्णोहंभवार्णवम् ॥ सदयंतंगुरुंवंदेश्रीरामेंद्रवनाभिधम् ॥ २ ॥ गुणरत्नोदधिःसर्वदोषकारणघस्मरः ॥ जयतात्सच्चिदानन्दःसदाशिवकृतीश्वरः ॥ ३ ॥ अरुणवृद्धकेशवादित्याविमलगंगायमा दित्याश्च ॥ वर्ण्यन्तेत्रषडनुक्रमादेकपञ्चाशत्तमेध्याये ॥ ४ ॥ अतीतेध्यायेकद्रूाःकाद्रवेयानांचश्रुतंविनतायादास्यमघटमानंमन्वानःपृच्छति पार्वतीत्यादिना ॥ १ ॥ २ ॥ पुत्रशापाद्दासीत्वंप्राप्त वतीतिवक्तुंतदुक्तमनूद्यतदाख्यानम्प्रतिजानीते ॥ हंजिकात्वमिति ॥ हांजिकात्वंदासीत्वम् ॥ यदाहामरः ॥ हंडेहंजेहलाह्वानेनीचांचेटींसखींप्रतीति ॥ हंतदास्यमितिक्वचित् ॥ दासिक्यंत्विततिचा न्यत्र ॥ ३ ॥ उलूकःपेचकः ॥ ४ ॥ कौशिकोपिसएवतैःपक्षिभिः सकौशिकइत्यन्वयः ॥ स्वराज्यादितिवापाठः ॥ अवरोपितोनिराकृतः ॥ ५ ॥ निराकरणेहेतुमाह क्रूराक्षोयमित्यक्षरद्वय

श्रीगणेशायनमः ॥ ॥ अगस्तिरुवाच ॥ ॥ पार्वतीहृदयानंदसर्वज्ञांगभवप्रभो ॥ किंचित्प्रष्टुमनाःस्वामिंस्तद्भवान्वक्तुमर्हति ॥ १ ॥ दक्षप्रजापतेः पुत्रीकश्यपस्यपरिग्रहः ॥ गरुत्मतःप्रसूःसाध्वीकुतोदास्यमवापसा ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ हंजिकात्वंयथाप्राप्ताविनतासातपस्विनी ॥ तदप्यहंसमाख्यामिनिशामयमहामते ॥ ३ ॥ कद्रूरजीजनत्पुत्रान्शतंकश्यपतःपुरा ॥ उलूकमरुणंतार्क्ष्यमसूतविनतात्रयम् ॥ ४ ॥ कौशिको राज्यमाप्यापिश्रेष्ठत्वात्पक्षिणांमुने ॥ निर्गुणत्वाच्चतैःसर्वैःसराज्यादवरोपितः ॥ ५ ॥ क्रूराक्षोयंदिवांधोयंसदावक्रनखस्त्वसौ ॥ अतीवोद्वेगजनकंसर्वे षामस्यभाषणम् ॥ ६ ॥ इत्थंतस्यगुणग्रामान्विकथ्यबहुशःखगाः ॥ नाद्यापिवृण्वतेराज्येकमपिस्वैरचारिणः ॥ ७ ॥ कौशिकेथतथावृत्तेपुत्रवीक्षणला लसा ॥ अंडंप्रस्फोटयामासमध्यमंविनतातदा ॥ ८ ॥ पूर्णेवर्षसहस्रेतुप्रस्फोटचघटसंभव ॥ तदभेदितयौत्सुक्यादंडमष्टमकेशते ॥ ९ ॥ तावत्सर्वा णिगात्राणितस्यातिमहसःशिशोः ॥ ऊर्वोरुपरिसिद्धानितदंडांतर्निवासिनः ॥ १० ॥ अंडान्निर्गतमात्रेणक्रोधारुणमुखश्रिया ॥ अर्धनिष्पन्नदेहेनाशिशु नाशापिताप्रसूः ॥ ११ ॥ जनयित्रित्वयाद्दृष्टाकाद्रवेयान्स्वलीलया ॥ खेलतोमातुरुत्संगेयदंडंव्याधिताद्विधा ॥ १२ ॥ तदनिष्पन्नसर्वांगःशपामित्वां विहंगमे ॥ तेषामेवैधिदासीत्वंसपत्न्यंगभुवामिह ॥ १३ ॥ वेपमानाथतच्छापादिदंप्रोवाचपक्षिणी ॥ अनूरोब्रूहिमेशापावसानंमातुरंगज ॥ १४ ॥ ॥ अनूरुरुवाच ॥ अंडंतृतीयंमाभिंधिह्यनिष्पन्नंममेवहि ॥ अस्मिन्नंडेभविष्योयःसतेदास्यंहरिष्यति ॥ १५ ॥ इत्युक्त्वासोरुणोगच्छदुड्डीयानंदकान नम् ॥ यत्रविश्वेश्वरोदद्यादपिपंगोःशुभांगतिम् ॥ १६ ॥

न्यूनेनसार्धेन ॥ ६ ॥ विकथ्यकथयित्वा ॥ विकर्ण्येतिपाठेआलोच्येत्यर्थः ॥ व्यकत्थन्नितिपाठेव्यकत्थयन्निंदितवंतइत्यर्थः ॥ अतएवाद्यापिस्वैरचारिणस्तेखगाअन्यंवानिर्गुणंकमपिराजत्वेनवृण्वत इतिपूर्वेणैवान्वयः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ यद्यस्मात् ॥ व्याधिअव्याधि ॥ अडभावआर्षः ॥ अभेदीत्यर्थः ॥ बाधितंद्विधेतिक्वचित्पाठः ॥ स्फोटितंत्वितिचान्यत्र ॥ १२ ॥ तत्तस्मात् ॥ एधिभव ॥ एहीतिपाठेआसमन्ताद्गच्छेत्यर्थः ॥ सपत्न्यंगभुवांकद्रूदरजातानाम् ॥ सपत्नीचतदंगभुवश्चतेषामितिवा ॥ सपत्न्यंगभुवासहेतिपाठेसपत्न्याःकद्र्वाय दंगंशरीरंतद्भुवापुत्रेणसहेतिव्याख्येयम् ॥ १३ ॥ १४ ॥ १५ ॥ प्रासंगिकमुक्त्वाप्रस्तुतानेवषडादित्यानाह ॥ इत्युक्त्वेति ॥ पंगोःश्रोणस्य ॥ यदाहामरः ॥ श्रोणःपंगाविति ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ अनूरुररुणइतिनामद्वयंनिर्वक्ति ॥ अनूरुत्वादिति ॥ यःअनूरुत्वाज्जान्वोरुपरिभागरहितत्वादनूरुः ॥ यतोयस्मात्क्रोधेनअरुणईषल्लोहितवर्णइतिकृत्वारुणश्चकथ्यते ॥ तेनवाराणस्यांतपस्तप्त्वासूर्यआराधितइत्यर्थः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अरुणायससूर्यायसूर्यसहिताय ॥ अरुणोदयसूर्यायेतिक्वचित्पाठः ॥ २५ ॥

एतत्तेपृच्छतःख्यातंविनतादास्यकारणम् ॥ मुनेप्रसंगतोवच्मिअरुणादित्यसंभवम् ॥ १७ ॥ अनूरुत्वादनूरुर्योरुणःक्रोधारुणोयतः ॥ वाराणस्यांतपस्तप्त्वातेनाराधिदिवाकरः ॥ १८ ॥ सोपिप्रसन्नोदत्त्वाथवरांस्तस्माअनूरवे ॥ आदित्यस्तस्यनाम्नाभूदरुणादित्यइत्यपि ॥ १९ ॥ ॥ अर्कउवाच ॥ तिष्ठानूरोममरथेसदैवविनतात्मज ॥ जगतांचहितार्थायध्वांतंविध्वंसयन्पुरः ॥ २० ॥ अत्रत्वत्स्थापितांमूर्तिंयेभजिष्यंतिमानवाः ॥ वाराणस्यांमहादेवोत्तरेतेषांकुतोभयम् ॥ २१ ॥ येर्चयिष्यंतिसततमरुणादित्यसंज्ञकम् ॥ मामत्रतेषांनोदुःखंनदारिद्र्यंनपातकम् ॥ २२ ॥ व्याधिभिर्नाभिभूयंतेनोपसर्गैश्चकैश्चन ॥ शोकाग्निनानदह्यंतेह्यरुणादित्यसेवनात् ॥ २३ ॥ अथस्यंदनमारोप्यनीतवानरुणंरविः ॥ अद्यापिसरथेसौरेप्रातरेवसमुद्यति ॥ २४ ॥ यःकुर्यात्प्रातरुत्थायनमस्कारंदिनेदिने ॥ अरुणायससूर्यायतस्यदुःखभयंकुतः ॥ २५ ॥ अरुणादित्यमाहात्म्यंयःश्रोष्यतिनरोत्तमः ॥ नतस्यदुष्कृतंकिंचिद्भविष्यतिकदाचन ॥ २६ ॥ स्कंदउवाच ॥ वृद्धादित्यस्यमाहात्म्यंशृणुतेकथयाम्यहम् ॥ यस्यश्रवणमात्रेणनरोनोदुष्कृतंभजेत् ॥ २७ ॥ पुरात्रवृद्धहारीतोवाराणस्यांमहातपाः ॥ महातपःसमृद्ध्यर्थंसमाराधितवान्रविम् ॥ २८ ॥ मूर्तिंसंस्थाप्यशुभदांभास्वतःशुभलक्षणाम् ॥ दक्षिणेनविशालाक्ष्याद्दढभक्तिसमन्वितः ॥ २९ ॥ तुष्टस्तस्मैवरंप्रादाद्ब्रध्नोवृद्धतपस्विने ॥ अलंविलंब्ययाचस्वकस्तेदेयोवरोमया ॥ ३० ॥ सोथप्रसन्नाद्द्युमणेरवृणीतवरंमुनिः ॥ यदिप्रसन्नोभगवान्युवत्वंदेहिमेपुनः ॥ ३१ ॥ तपःकरणसामर्थ्यंस्थविरस्यनमेयतः ॥ पुनस्तारुण्यमाप्तोहंचरिष्याम्युत्तमंतपः ॥ ३२ ॥ तपएवपरोधर्मस्तपएवपरंवसु ॥ तपएवपरःकामोनिर्वाणंतपएवहि ॥ ३३ ॥ ऋतेनतपसःक्वापिलभ्याऐश्वर्यसंपदः ॥ पदंध्रुवादिभिःप्रापिकेवलंतपसोबलात् ॥ ३४ ॥ ततस्तपश्चरिष्यामिलोकद्वयमहत्त्वदम् ॥ प्राप्यत्वद्वरदानेनयौवनंसर्वसंमतम् ॥ ३५ ॥ धिग्जरांप्राणिनामत्रययासर्वोविरज्यति ॥ जरातुरेंद्रियग्रामेस्त्रियोपिनयतःस्वसात् ॥ ३६ ॥

॥ २६ ॥ २७ ॥ वृद्धश्चासौनाम्नागोत्रतोवाहारीतश्चवृद्धहारीतः ॥ २८ ॥ भास्वतःसूर्यस्य ॥ दक्षिणेनविशालाक्ष्याः ॥ विशालाक्ष्यादक्षिणेइत्यर्थः ॥ २९ ॥ ब्रध्नःसूर्यः ॥ ३० ॥ द्युमणेःसूर्यात् ॥ युवत्वंतारुण्यम् ॥ ३१ ॥ ३२ ॥ वसुधनम् ॥ निर्वाणंमोक्षः ॥ ३३ ॥ ऋतेविना ॥ ३४ ॥ ३५ ॥ जरयाआतुरइंद्रियग्रामोयस्यतस्मिन् ॥ जरातुरेंद्रियग्रामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नितिकचित् ॥ स्वसात्आत्मसात्स्वाधीनाइत्यर्थः ॥ ३६ ॥ ३७ ॥ धियंज्ञानम् ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ उपाविशदुपसमीपेविवेश ॥ किमर्थ माविशदित्याकांक्षायामाह ॥ निःशब्दइति ॥ स्वस्थोनिरुद्विग्नः ॥ ४६ ॥ अवसरमवकाशम् ॥ ४७ ॥ स्वाभ्याशेस्वसमीपे ॥ आसयामासउपवेशयामास ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

वरंमरणमेवास्तुमाजरास्त्वतिशोच्यकृत् ॥ क्षणंदुःखंचमरणंजरादुःखंक्षणेक्षणे ॥३७॥ कांक्षंतिदीर्घतपसेचिरमायुर्जितेंद्रियाः ॥ धनंदानायपुत्रायकलत्रं मुक्तयेधियम् ॥ ३८ ॥ वृद्धस्यवार्धकंब्रध्नस्तत्क्षणादपहृत्यवै ॥ ददौचचारुताहेतुंतारुण्यंपुण्यसाधनम् ॥३९॥ एवंसवृद्धहारीतोवाराणस्यांमहामुनिः ॥ संप्राप्ययौवनंब्रध्नात्तपउग्रंचचारह ॥४०॥ वृद्धेनाराधितोयस्माद्धारीतेनतपस्विना ॥ आदित्योवार्धकहरोवृद्धादित्यस्ततःस्मृतः ॥ ४१ ॥ वृद्धादित्यं समाराध्यवाराणस्यांघटोद्भव ॥ जरादुर्गतिरोगघ्नंबहवःसिद्धिमागताः ॥ ४२ ॥ वृद्धादित्यंनमस्कृत्यवाराणस्यांरवौनरः ॥ लभेदभीप्सितांसिद्धिंनक्व चिद्दुर्गतिंलभेत् ॥ ४३ ॥ ॥ स्कंदउवाच ॥ ॥ अतःपरंशृणुमुनेकेशवादित्यमुत्तमम् ॥ यथातुकेशवंप्राप्यसविताज्ञानमाप्तवान् ॥ ४४ ॥ व्योम्निसं चरमाणेनसप्ताश्वेनादिकेशवः ॥ एकदादर्शिभावेनपूजयँल्लिंगमैश्वरम् ॥ ४५ ॥ कौतुकादिवउत्तीर्यहरेरवि रुपाविशत् ॥ निःशब्दोनिश्चलःस्वस्थो महाश्चर्यसमन्वितः ॥ ४६ ॥ प्रतीक्षमाणोवसरंकिंचित्प्रष्टुमनाहरिम् ॥ हरिंविसर्जितार्चंचप्रणनामकृतांजलिः ॥ ४७ ॥ स्वागतंतेहरिःप्राहबहुमान पुरःसरम् ॥ स्वाभ्याशआसयामासभास्वंतंनतकंधरम् ॥ ४८ ॥ अथावसरमालोक्यलोकचक्षुरधोक्षजम् ॥ नत्वाविज्ञापयामासकृतानुज्ञोऽसुरारिणा ॥ ४९ ॥ ॥ रविरुवाच ॥ ॥ अंतरात्मासिजगतांविश्वंभरजगत्पते ॥ तवापि पूज्यःकोप्यस्तिजगत्पूज्यात्रमाधव ॥ ५० ॥ त्वत्तश्चाविर्भवेदेतत्त्व यिसर्वंप्रलीयते ॥ त्वमेवपातासर्वस्यजगतोजगतांनिधे ॥ ५१ ॥ इत्याश्चर्यंसमालोक्यप्राप्तोस्म्यत्रतवांतिकम् ॥ किमिदंपूज्यतेनाथभवताभव तापहृत् ॥ ५२ ॥ इतिश्रुत्वाहृषीकेशःसहस्रांशोरुदीरितम् ॥ उच्चैर्माशंससप्ताश्वंवारयन्करसंज्ञया ॥ ५३ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ देवदेवो महादेवोनीलकंठउमापतिः ॥ एकएवहिपूज्योत्रसर्वकारणकारणम् ॥ ५४ ॥ अत्रत्रिलोचनादन्यंसमर्चयतियोल्पधीः ॥ सलोचनोपिविज्ञेयोलोचना भ्यांविवर्जितः ॥५५॥ एकोमृत्युंजयःपूज्यो जन्ममृत्युजराहरः ॥ मृत्युंजयंकिलाभ्यर्च्यश्वेतोमृत्युंजयोभवत् ॥ ५६ ॥ कालकालंसमाराध्यभृंगीकालं जिगायवै ॥ शैलादिमपितत्याजमृत्युर्मृत्युंजयार्चकम् ॥५७॥ विजिग्येत्रिपुरंयस्तुहेलयैकेषुमोक्षणात ॥ तंसमभ्यर्च्यभूतेशंकोनपूज्यतमोभवेत् ॥५८॥

भवतापहत्संसारदुःखनाशकः ॥ ५२ ॥ करसंज्ञयाहस्तचालनेनउच्चैर्यथास्यात्तथामाशंसेतिसप्ताश्वंवारयन् ॥ श्रीविष्णुरुवाचेत्यन्वयः ॥ ५३ ॥ महादेवइति ॥ महत्त्वंत्रिविधपरिच्छेदशून्यत्वम् ॥ देवत्वंस्वप्रकाशत्वम् ॥ सर्वेषांप्रकृत्यादीनांकारणानामपिकारणंसर्वकारणकारणम् ॥ सर्वेषांसर्वकारणमितिक्वचित ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ विजिग्येजितवान् ॥ जिगायेतिक

CC-0. In Public Domain. Digitization by eGangotri

चित् ॥ ५८ ॥ त्रिजगदिति ॥ त्रिजगज्जयशीलस्यहेतोःकारणस्यत्र्यक्षस्याराधनंपरंपरमपुरुषार्थप्राप्तिसाधनमित्यर्थः ॥ अतःसारस्यविश्वेशस्य ॥ स्मरस्येतिक्वचित्पाठःसचिंत्यः ॥ स्मरविद्विषः कामशत्रोःकोनाराधयतिआराधनंनकरोतिअपितुसर्वएवकरोतीत्यर्थः ॥ कर्मणिवाषष्ठ्यौ॥ हेतुरितिप्रथमांतपाठेत्रिजगज्जयिनोममअन्यस्यवायस्यकस्यचित्रिलोचनस्यश्रेष्ठमाराधनमेवजयहेतुरित्यर्थः ॥

त्रिजगज्जयिनोहेतोस्त्र्यक्षस्याराधनंपरम् ॥ कोनाराधयतिब्रह्मसारस्यस्मरविद्विषः ॥ ५९ ॥ यस्याक्षिपक्ष्मसंकोचाज्जगत्संकोचमेत्यदः ॥ विकस्वरं विकासाच्चकस्यपूज्यतमोनसः ॥ ६० ॥ शंभोर्लिंगंसमभ्यर्च्यपुरुषार्थचतुष्टयम् ॥ प्राप्नोत्यत्रपुमान्सद्योनात्रकार्याविचारणा ॥ ६१ ॥ समर्च्यशांभवं लिंगमपिजन्मशतार्जितम् ॥ पापपुंजंजहात्येवपुमानत्रक्षणाद्ध्रुवम् ॥ ६२ ॥ किंकिंनसंभवेदत्रशिवलिंगसमर्चनात् ॥ पुत्राःकलत्रक्षेत्राणिस्वर्गोमोक्षो प्यसंशयम् ॥ ६३ ॥ त्रैलोक्यैश्वर्यसंपत्तिर्मयाप्राप्तासहस्रगो ॥ शिवलिंगार्चनादेकात्सत्यंसत्यंपुनःपुनः ॥ ६४ ॥ अयमेवपरोयोगस्त्विदमेवपरंतपः ॥ इदमेवपरंज्ञानंस्थाणुलिंगंयदर्च्यते ॥ ६५॥ यैर्लिंगंसकृदप्यत्रपूजितंपार्वतीपतेः ॥ कुतोदुःखभयंतेषांसंसारेदुःखभाजने ॥ ६६ ॥ सर्वंपरित्यज्यरवेयो लिंगंशरणंगतः ॥ नतंपापानिबाधंतेमहांत्यपिदिवाकर ॥ ६७ ॥ लिंगार्चनेभवेद्बुद्धिस्तेषामेवात्रभास्कर ॥ येषांपुनर्भवच्छेदंचिकीर्षतिमहेश्वरः ॥६८॥ नलिंगाराधनात्पुण्यंत्रिषुलोकेषुचापरम् ॥ सर्वतीर्थाभिषेकःस्याल्लिंगस्नानांबुसेवनात् ॥ ६९ ॥ तस्माल्लिंगंत्वमप्यर्कसमर्चयमहेशितुः ॥ संप्राप्तुं परमांलक्ष्मींमहातेजोभिजृंभणीम् ॥ ७० ॥ इतिश्रुत्वाहरेर्वाक्यंतदारभ्यसहस्रगुः ॥ विधायस्फाटिकंलिंगंमुनेद्यापिसमर्चयेत् ॥ ७१ ॥ गुरुत्वे नतदाकल्यविवस्वानादिकेशवम् ॥ तत्रोपतिष्ठतेद्यापिउत्तरेणादिकेशवात् ॥ ७२ ॥ अतःसकेशवादित्यःकाश्यांभक्ततमोनुदः ॥ समर्चितःसदादेयान्म नसोवांछितंफलम् ॥ ७३ ॥ केशवादित्यमाराध्यवाराणस्यांनरोत्तमः ॥ परमंज्ञानमाप्नोतियेननिर्वाणभाग्भवेत् ॥ ७४ ॥ तत्रपादोदकेतीर्थेकृतसर्वो दकक्रियः ॥ विलोक्यकेशवादित्यंमुच्यतेजन्मपातकैः ॥ ७५ ॥ अगस्तेरथसप्तम्यांरविवारोयदाप्यते ॥ तदापादोदकेतीर्थेआदिकेशवसन्निधौ ॥७६॥ स्नात्वोषसिनरोमौनीकेशवादित्यपूजनात् ॥ सप्तजन्मार्जितात्पापान्मुक्तोभवतितत्क्षणात् ॥ ७७॥ यद्यज्जन्मकृतंपापंमयासप्तसुजन्मसु ॥ तन्मेरोगंचशो कंचमाकरीहंतुसप्तमी ॥ ७८ ॥

तयाचवक्ष्यति ॥ त्रैलोक्यैश्वर्यसंपत्तिर्मयाप्राप्तासहस्रगो॥शिवलिंगार्चनादेकादिति ॥ शेषंपूर्ववत् ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ एकात्मुख्यात्केवलाद्वा ॥ ६४ ॥ ६५ ॥ ६६॥६७॥ ॥ ६८ ॥ ६९ ॥ महेशितुर्महेश्वरस्य ॥ ७० ॥ ७१ ॥ उत्तरेणउत्तरस्याम् ॥ ७२ ॥ ७३ ॥ ७४॥ पादोदकेगंगावरुणयोःसंभेदे ॥७५॥ रथसप्तमीअचलासप्तमी ॥७६॥ ७७ ॥ तत्रस्नानस्यपूर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गंमंत्रत्रयमाह ॥ यद्यदित्यादि ॥ जन्मसुकृतंजन्मकृतंजन्मारभ्ययत्पापंकृतमित्यर्थः ॥ माकरीमकरसंबंधिनीमाघीत्यर्थः॥७८॥ मनोवाक्कायजादीनिपापानिभंविष्यज्जन्मविषयाण्यपीतिज्ञातव्यानि ॥७९॥ सप्तसप्तयोऽश्वाःयस्याःसासप्तसप्तिकासौरीशक्तिरित्यर्थः तस्याःसंबोधनंहेसप्तसप्तिके ॥८०॥८१॥८२॥८३॥ उच्चदेशेपर्वतदेशेतन्नाम्नीतिवा॥बाहुजःक्षत्रियः॥बाहूराजन्यःकृतइतिश्रुतेः ॥८४॥

एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितम् ॥ मनोवाक्कायजंयच्चज्ञाताज्ञातेचयेपुनः ॥ ७९ ॥ इतिसप्तविधंपापंस्नानान्मेसप्तसप्तिके ॥ सप्तव्याधिसमायुक्तं हरमाकरिसप्तमि ॥ ८० ॥ एतन्मंत्रत्रयंजप्त्वास्नात्वापादोदकेनरः ॥ केशवादित्यमालोक्यक्षणान्निष्कलुषोभवेत् ॥ ८१ ॥ केशवादित्यमाहात्म्यं शृण्वञ्श्रद्धासमन्वितः ॥ नरोनलिप्यतेपापैःशिवभक्तिंचविंदति ॥ ८२ ॥ ॥ स्कंदउवाच ॥ ॥ अतःपरंशृणुमुनेविमलादित्यमुत्तमम् ॥ हरिकेशवने रम्येवाराणस्यांव्यवस्थितम् ॥ ८३ ॥ उच्चदेशेभवत्पूर्वंविमलोनामबाहुजः ॥ सप्राक्तनात्कर्मयोगाद्विमलेपथ्यपिस्थितः ॥ ८४ ॥ कुष्ठरोगमवाप्यो च्चैस्त्यक्त्वादारान्गृहंवसु ॥ वाराणसींसमासाद्यत्रभमाराधयत्सुधीः ॥ ८५ ॥ करवीरैर्जपाभिश्चगंधकैःकिंशुकैःशुभैः ॥ रक्तोत्पलैरशोकैश्चससमानर्च भास्करम् ॥ ८६ ॥ विचित्ररचनैर्माल्यैःपाटलाचंपकोद्भवैः ॥ कुंकुमागुरुकर्पूरमिश्रितैःशोणचंदनैः ॥ ८७ ॥ देवमोहनधूपैश्चबह्वामोदततांबरैः ॥ कर्पूरवर्तिदीपैश्चनैवेद्यैर्घृतपायसैः ॥ ८८ ॥ अर्घदानैश्चविधिवत्सौरैःस्तोत्रजपैरपि ॥ एवंसमाराधयतस्तस्यार्कोवरदोभवत् ॥ ८९ ॥ उवाचचवरंब्रू हिविमलामलचेष्टित ॥ कुष्ठश्चतेप्रयात्वेषप्रार्थयान्यंवरंपुनः ॥ ९० ॥ आकर्ण्यविमलश्चेत्थमालापंरश्मिमालिनः ॥ प्रणतोदंडवद्भूमौसंप्रहृष्टतनूरुहः ॥ ९१ ॥ शनैर्विज्ञापयांचक्रएकचक्ररथंरविम् ॥ जगच्चक्षुरमेयात्मन्महाध्वांतविधूनन ॥ ९२ ॥ यदिप्रसन्नोभगवन्यदिदेयोवरोमम ॥ तदात्वद्भक्ति निष्ठायेकुष्ठंमास्तुतदन्वये ॥ ९३ ॥ अन्येपिरोगामासंतुमास्तुतेषांदरिद्रता ॥ मास्तुकश्चनसंतापस्त्वद्भक्तानांसहस्रगो ॥ ९४ ॥

॥८५॥ गंधकैर्गंधयुक्तैरितिसर्वेषांविशेषणम् ॥ बंधूकैरितिवापाठः ॥ ८६ ॥ शोणचंदनैरक्तचंदनैः ॥ ८७ ॥ बह्वामोदततांबरैःबहुलगंधानेकवस्त्रैः ॥ बहुनाआमोदेनततंव्याप्तमंबरमाकाशंयैस्तैर्देवमो हनधूपैरितिवा ॥ बहुभिर्देवतापरैरितिक्वचित्पाठः ॥ तदादेवतैकोद्देशेनसंपादितैरित्यर्थः ॥ घृतपायसैर्घृतालोडितपरमान्नैः ॥ घृतसाधितैरितिक्वचित्पाठः ॥ ८८ ॥८९॥९०॥९१॥९२॥९३॥९४॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ प्रत्यष्ठात्स्थापितवान् ॥ ८ ॥ ९ ॥ ११० ॥ ११ ॥
अभिलष्यंत्याकांक्षंति ॥ किंतदाह ॥ भौमइति ॥ मंगलवासरेभरण्यांभरणीनक्षत्रयुक्तायांचतुर्दश्याम् ॥ भरण्यांभूतायामितिव्यधिकरणेवासप्तम्यौ ॥ काश्यांयमतीर्थेस्नात्वानो

॥ श्रीसूर्यउवाच ॥ ॥ तथास्त्विवतिमहाप्राज्ञशृण्वन्यंवरमुत्तमम् ॥ त्वयेयंपूजितामूर्तिरेवंकाश्यांमहामते ॥ ९५ ॥ अस्याःसान्निध्यमत्राहंनत्यक्ष्या
मिकदाचन ॥ प्रथितातवनाम्नाचप्रतिमैषाभविष्यति ॥९६॥ विमलादित्यइत्याख्याभक्तानांवरदासदा ॥ सर्वव्याधिनिहंत्रीचसर्वपापक्षयंकरी ॥९७॥
इतिदत्त्वावरान्सूर्यस्तत्रैवांतरधीयत ॥ विमलोनिर्मलतनुःसोपिस्वभवनंययौ ॥ ९८ ॥ इत्थंसविमलादित्योवाराणस्यांशुभप्रदः ॥ तस्यदर्शनमात्रेणकु
ष्ठरोगःप्रणश्यति ॥९९॥ यश्चैतांविमलादित्यकथांवैशृणुयान्नरः ॥ प्राप्नोतिनिर्मलांशुद्धिंत्यज्यतेचमनोमलैः ॥१००॥ ॥ स्कंदउवाच ॥ ॥ गंगादित्यो
स्तितत्रान्योविश्वेशाद्दक्षिणेनवै ॥ तस्यदर्शनमात्रेणनरःशुद्धिमियादिह ॥ १ ॥ यदागंगासमायाताभगीरथपुरस्कृता ॥ तदागंगांपरिष्टोतुंरविस्तत्रैवसं
स्थितः ॥ २ ॥ अद्याप्यहर्निशंगंगां संमुखीकृत्यभास्करः ॥ परिष्टौतिप्रसन्नात्मागंगाभक्तवरप्रदः ॥ ३ ॥ गंगादित्यंसमाराध्यवाराणस्यांनरोत्तमः ॥
दुर्गतिं जातु न क्वापिलभतेनचरोगभाक् ॥ ४ ॥ स्कंदउवाच ॥ अन्यच्छृणुमहाभागयमादित्यस्यसंभवम् ॥ यच्छ्रुत्वापिनरोजातुयमलोकंनपश्यति
॥ ५ ॥ यमेशात्पश्चिमेभागेवीरेशात्पूर्वतोमुने ॥ यमादित्यंनरोदृष्ट्वायमलोकंनपश्यति ॥ ६ ॥ यमतीर्थेनरःस्नात्वाभूतायांभौमवासरे ॥ यमेश्वरंवि
लोक्याशुसर्वैःपापैः प्रमुच्यते ॥ ७ ॥ यमतीर्थेयमःपूर्वंतप्त्वासुविमलंतपः ॥ यमेशंचयमादित्यंप्रत्यष्ठाद्भक्तसिद्धिदम् ॥ ८ ॥ यमेनस्थापितोयस्मा
दादित्यस्तत्रकुंभज ॥ अतःसहियमादित्योयामींहरतियातनाम् ॥ ९ ॥ यमेशंचयमादित्यंयमेनस्थापितंनमन् ॥ यमतीर्थेकृतस्नानोयमलोकंन
पश्यति ॥ ११० ॥ यमतीर्थेचतुर्दश्यांभरण्यांभौमवासरे ॥ तर्पणंपिंडदानंचकृत्वापितृनृणीभवेत् ॥ ११ ॥ अभिलष्यंतिसततंपितरोनरकौकसः ॥
भौमेभरण्यांभूतायांयदियोगोयमुत्तमम् ॥ १२ ॥

स्माकंमुक्तयेयःकश्चिदपिसतिलंतर्पणमपिकिंकुर्यात्करिष्यतीत्यग्रिमेणान्वयः ॥ ननुतर्पणमात्रेणकथंनरकान्मुक्तिःस्यात्तत्राह : ॥ यदियोगोयमिति ॥ यदीतिनिश्चये ॥ योगस्त्रयाणांमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लनम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ ११८ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायामेकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ द्विपञ्चाशत्तमेयानंविधेर्मंदरगो त्रतः ॥ काश्यांदशाश्वमेधस्यमाहात्म्यंचोपवर्ण्यते ॥१॥१॥ तिग्मास्तीक्ष्णागावोरश्मयोयस्यसतिग्मगुः ॥ २ ॥ योगिन्यस्तिग्मगुश्चानन्दवनंप्राप्यकाशीवृत्तान्तंनिवेदयितुंनायांत्येतन्नचित्रमित्याह ॥ किमत्रेति ॥ ३ ॥ अपिशब्दार्थंविवृण्वन्पूर्वोक्तमेवस्फुटयाति ॥ अधाक्षिषमिति ॥ अधाक्षिषंदग्धवानस्मि ॥ त्रिजगज्जित्वरंत्रिजगज्जयशीलम् ॥ दृशानेत्रेण ॥ काश्यभिलाषाख्यःकामइतिशेषः ॥

काश्यांकश्चिद्यमेतीर्थेकृत्वास्नानंमहामतिः ॥ अपियस्तर्पणंकुर्यात्सतिलंनोविमुक्तये ॥ १३ ॥ किंगयागमनैःपुंसांकिंश्राद्धैर्भूरिदक्षिणैः ॥ यदिकाश्यां यमेतीर्थेयोगेस्मिन्श्राद्धमाप्यते ॥ १४ ॥ श्राद्धंकृत्वायमेतीर्थेपूजयित्वायमेश्वरम् ॥ यमादित्यंनमस्कृत्यपितॄणामनृणोभवेत् ॥१५॥ ॥ स्कंदउवाच ॥ ॥ इतितेद्वादशादित्याःकथिताःपापनाशनाः ॥ यत्संभवंसमाकर्ण्यनरोननिरयीभवेत् ॥ १६ ॥ अन्येपिसंतिघटजरविभक्तैरनेकशः ॥ काश्यांसंस्था पिताःसूर्यागुह्यकार्कादयःकिल ॥ १७ ॥ श्रुत्वाध्यायानिमान्पुण्यान्द्वादशादित्यसूचकान् ॥ श्रावयित्वापिनोमर्त्योदुर्गतिंयातिकुत्रचित् ॥ ११८ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायामुत्तरार्द्धेचतुर्थेकाशीखण्डेअरुणवृद्धकेशवविमलगंगायमादित्यवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ॥ ५१ ॥ ॥ छ ॥ स्कंदउवाच ॥ ॥ गभस्तिमालिनिगतेकाशीं त्रैलोक्यमोहिनीम् ॥ पुनश्चिंतामवापोच्चैर्मंदरस्थोमुनेहरः ॥ १ ॥ नाद्याप्यायां तियोगिन्योनाद्याप्यायातितिग्मगुः ॥ प्रवृत्तिरपिमेकाश्याश्चित्रमत्यंतदुर्लभा ॥२॥ किमत्रचित्रंयत्काशीमदीयमपिमानसम् ॥ निश्चलंचंचलयतिगण नाकेतरेसुरे ॥३॥ अधाक्षिषमहंकामंत्रिजगज्जित्त्वरंदृशा ॥ अहोकाश्यभिलाषोत्रमामेवदुनुयात्तराम् ॥४॥ काशीप्रवृत्तिमन्वेष्टुंकंवाप्रहिणुयामितः ॥ ज्ञातुंकएवनिपुणोयतःसचतुराननः ॥ ५ ॥ इत्याहूयविधातारंबहुमानपुरःसरम् ॥ तत्रोपवेश्यश्रीकंठःप्रोवाचचतुराननम् ॥ ६ ॥ योगिन्यःप्रेषिताःपूर्वं प्रेपितोथसहस्रगुः ॥ नाद्यापितेनिवर्तंतेकाश्याःकलशसंभव ॥ ७ ॥

दुनुयात्तरामतिशयेनतापयति॥दहत्तेतरामितिक्वचित्॥४॥ काशीति॥काश्यावृत्तान्तमन्वेष्टुंकञ्जनं वावितर्के प्रहिणुयांप्रस्थापयामि॥ यद्वा वानिश्चये कंब्रह्माणमेवप्रहिणुयामिति॥तत्रहेतुः॥ज्ञातुमिति ॥ ज्ञातुंकाशीप्रवृत्तिमित्यनुषज्जते ॥ ब्रह्मैवदक्ष[1]॥तत्रहेतुर्यतःसचतुराननइति ॥ ५ ॥ तत्रपार्श्वे ॥ उपोपवेश्योतिवापाठः ॥ ६ ॥ कलशसम्भवेतिअगस्त्यंप्रातिगुहस्यसंबोधनम् ॥ कमलसंभवेतिपाठेब्रह्म

१ चतुरइतिपाठस्तुमनोहरः ।

CC-0. In Public Domain. Digitization by eGangotri

णःसंवोधनम् ॥ ७ ॥ ८ ॥ अरतौदृष्टान्तः ॥ अनच्छेति ॥ अल्पपल्वलेअल्पेसरसि ॥ ९ ॥ नाबाधिष्टनबाधितवान् ॥ १० ॥ ११ ॥ ईहितेचेष्टितेकार्येइतियावत् ॥ १२ ॥ तद्वेत्सीति ॥ तद्वा
क्यगौरवंमन्दरवरप्रदानंचतच्छब्दार्थः ॥ मन्दोमूर्खः ॥ १३ ॥ तर्हीश्वररयतवगमनप्रतिबन्धकाभावात्स्वयमेवकिमितिनगम्यतेतत्राह॥अद्यैवेति ॥ स्वमाययास्वशक्त्यापार्वत्यासहेत्यर्थः ॥१४॥
विधेइति ॥ हेविधेहेविधातर्यतःसर्वकार्याणित्वमेवविदधासिकरोष्यतोऽखिलमितिचेतिचेवंत्वयाकर्तव्यमितियद्वक्तव्यंतत्त्वय्यपार्थमपगतार्थंव्यर्थमित्यर्थः ॥ त्वयापार्थमितिपाठःसुगमः ॥ कर्तव्यंत्वयी
तिपाठेअपार्थमव्यर्थमितिकाकाव्याख्येयमिति ॥ १५ ॥ रिष्टंशुभाभावःअरिष्टंतदभावःशुभंयथास्यात्तथागच्छ ॥ रिष्टंक्षेमेशुभाभावेपुंसिखङ्गेचफेनिलइतिमेदिनीकारः ॥ शुभोदर्कःशुभोत्तरफलः

सास्रमुत्सुकयेत्काशीलोकेशमममानसम् ॥ प्राकृतस्यजनस्येवचंचलाक्षीवकाचन ॥ ८ ॥ मंदरेत्ररतिर्मेनभृशंसुंदरकंदरे ॥ अनच्छतुच्छपानीयेनक्र स्येवाल्पपल्वले ॥ ९ ॥ नाबाधिष्टतथामांसतापोहालाहलोद्भवः ॥ काशीविरहजन्मात्रयथामामतिबाधते ॥ १० ॥ शीतरश्मिःशिरःस्थोपिवर्षन्पीयू षसीकरैः ॥ काशीविश्लेषजंतापंनाहोगमयितुंप्रभुः ॥ ११ ॥ विधेविधेहिमेकार्यमार्यधुर्यमहामते ॥ याहिकाशीमितस्तूर्णंयतस्त्वचममेहिते ॥ १२ ॥ ब्रह्मंस्त्वमेवतद्वेत्सिकाशीत्यजनकारणम् ॥ मंदोपिनत्यजेत्काशींकिमुयोवेत्तिकिंचन ॥१३॥ अद्यैवकिंनगच्छेयंकाशींब्रह्मन्स्वमायया ॥ दिवोदासंस्व धर्मस्थंनतूल्लंघितुमुत्सहे ॥ १४॥ विधेसर्वविधेयानित्वमेवविदधासियत् ॥ इतिचेतिचवक्तव्यंत्वय्यपार्थमतोखिलम् ॥१५॥ अरिष्टंगच्छपंथास्तेशुभो दर्कोभवत्वलम् ॥ आदायाज्ञांविधिर्मूर्ध्निययौवाराणसींमुदा ॥१६॥ सितहंसरथस्तूर्णंप्राप्यवाराणसींपुरीम् ॥ कृतकृत्यमिवात्मानममन्यततदात्मभूः ॥ ॥ १७ ॥ हंसयानफलंमेद्यजातंकाशीसमागमे ॥ काशीप्राप्तौयतःप्रोक्ताअंतरायाःपदेपदे ॥ १८ ॥ दृशिधातुरभूदद्यमदृशौप्राप्यसान्वयः ॥ स्पष्टंदृष्टिपथं प्रातायदेषाऽऽनंदवाटिका ॥ १९ ॥ स्वयंसिंचातियामद्भिःस्वाभिःस्वर्गतरंगिणी ॥ यत्रानंदमयावृक्षायत्रानंदमयाजनाः ॥ २० ॥ निर्विशंतिसदाकाश्यां फलान्यानंदवंत्यपि ॥ सदैवानंदभूःकाशीसदैवानंददःशिवः ॥ २१ ॥ आनंदरूपाजायंतेतेनकाश्यांहिजंतवः ॥ चरणौचरितुंवित्तस्तावेवकृतिनामिह ॥ ॥ २२ ॥ चरणौविचरेतांयौविश्वभर्तृपुरीभुवि ॥ तावेवश्रवणौश्रोतुंसंविदातेबहुश्रुतौ ॥ २३ ॥ इहश्रुतिमतांपुंसांयाभ्यांकाशीश्रुतासकृत् ॥ तदेवमनु तेसर्वंमनस्त्विहमनस्विनाम् ॥ २४ ॥ येनानुमन्यतेचैषाकाशीसर्वप्रमाणभूः ॥ बुद्धिर्बुध्यतिसासर्वमिहबुद्धिमतांसताम् ॥ ययैतद्धूर्जटेर्धामध्रुवंस्व विषयीकृतम् ॥ २५ ॥ वरंतृणानिधान्यानितानिवात्याहतान्यपि ॥ काश्यांयान्यापतंतीहनजनाःकाश्यदर्शनाः ॥ २६ ॥

॥ १६ ॥ सिताःशुभ्राःहंसायस्मिन्सरथोयस्यसः ॥ १७ ॥ १८ ॥ दृशिरिति ॥ दृशिरप्रेक्षणेइतिदृशिधातुः ॥ दृश्यतेऽनयेतिदृक्चक्षुः ॥ मद्दृशौमच्चक्षुषी ॥ सान्वयःसार्थकः ॥ यद्यस्मात् ॥१९॥
आनन्दवाटिकांविशिनष्टि ॥ स्वयमिति ॥ स्वाभिःस्वकीयाभिः ॥ ताभिरितिपाठेप्रसिद्धाभिरित्यर्थः ॥ २० ॥ वृक्षाणामानंदमयत्वंकैमुत्यन्यायेनदर्शयति ॥ निर्विशन्तीति ॥ अन्यत्रस्थितान्य
पिफलानिकाश्यांनिर्विशंतिसंतिआनन्दवंतिभवन्तीति ॥ काशीस्थितानांवृक्षाणामानन्दमयत्वंकिंवक्तव्यमितिभावः ॥ यत्रानन्दमयाजनाइत्यत्रकारणमाह ॥ सदैवेति ॥ २१ ॥ वित्तोजानीतः ॥
॥ २२ ॥ संविदातेविजानीतः ॥ २३ ॥ मनुतेध्यायति ॥ २४ ॥ बुध्यतिनिश्चिनोति ॥ २५ ॥ वात्याहतानिवातचक्रेणांदोलितानि ॥ काशींनपश्यन्तिकाश्याःनदर्शनंयेषामिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाकाश्यदर्शनाः ॥ २६ ॥ २७ ॥ २८ ॥ बृहत्तरैःफलैरित्यन्वयः ॥ २९ ॥ व्यधायिअकारि ॥ विश्वेशस्यनिर्मितिर्निर्माणंयस्याःसाविश्वेशनिर्मितिः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ शतेभ्यःपरेपरःशताअसंख्याताराजानोमयादृष्टाः ॥ परंकेवलंतेष्वेषुराजसुमध्येतवसद्गुणाद्विन्नाःपवित्रायेतेप्रायशोममदृशंनगताइतिपंचमेनान्वयः ॥ यायजूकाइज्याशीलाः ॥ ३५ ॥ विनिष्कृतारि षड्वर्गानिर्जितशत्रुभूतषडिंद्रियवर्गाः ॥ श्रुतस्यपारदृश्वानःअध्ययनस्यपारगामिनः ॥ राजनीतिविचक्षणाःसंधिविग्रहयानासनद्वैधाश्रयेषुनिपुणाः ॥ ३६ ॥ ३७ ॥ रयोवेगः ॥ ३८ ॥

अद्यमेसफलंचायुःपरार्धद्वयसंमितम् ॥ यस्मिन्सतिमयाप्रापिदुष्प्रापाकाशिकापुरी ॥ २७ ॥ अहोमेधर्मसंपत्तिरहोमेभाग्यगौरवम् ॥ यदद्राक्षिषमद्याहं काशींसुचिरचिंतिताम् ॥ २८ ॥ अद्यमेस्वतपोवृक्षोमनोरथफलैरलम् ॥ शिवभक्त्यंबुनासिक्तःफलितोतिबृहत्तरैः ॥ २९ ॥ मयाव्यधायिबहुधासृष्टिःसृष्टिंवितन्वता ॥ परमन्यादृशीकाशीस्वयंविश्वेशनिर्मितिः ॥ ३० ॥ इतिहृष्टमनावेधादृष्ट्वावाराणसींपुरीम् ॥ वृद्धब्राह्मणरूपेणराजानंचददर्शह ॥ ३१ ॥ जलार्द्राक्षतपाणिश्चस्वस्त्युक्त्वापृथिवीभुजे ॥ कृतप्रणामोराज्ञाथभेजेतद्दत्तमासनम् ॥३२॥ कृतमानोनृपतिनासोभ्युत्थानासनादिभिः ॥ विप्रोव्यजिज्ञपद्भूपंपृष्टागमनकारणम् ॥ ३३ ॥ ॥ ब्राह्मणउवाच ॥ ॥ भूपालबहुकालीनोस्म्यहमत्रचिरंतनः ॥ त्वंतुमांनैवजानासिजानेत्वांहिरिपुंजयम् ॥ ॥ ३४ ॥ परःशतामयादृष्टाराजानोभूरिदक्षिणाः ॥ विजितानेकसंग्रामायायजूकाजितेंद्रियाः ॥ ३५ ॥ विनिष्कृतारिषड्वर्गाःसुशीलाःसत्त्वशालिनः ॥ श्रुतस्यपारदृश्वानोराजनीतिविचक्षणाः ॥ ३६ ॥दयादाक्षिण्यनिपुणाःसत्यव्रतपरायणाः ॥ क्षमयाक्ष्मयातुल्यागांभीर्यजितसागराः ॥ ३७ ॥ जितरोपरयाःशूराःसौम्यसौंदर्यभूमयः ॥ इत्यादिगुणसंपन्नाःसुसंचितयशोधनाः ॥३८॥ परंद्विन्नाःपवित्रायेराजर्षेतवसद्गुणाः ॥ तेष्वेषुराजसुममप्रायशोनदृशंगताः ॥ ३९ ॥ प्रजानिजकुटुंबस्त्वंत्वंतुभूदेवदैवतः ॥ महातपःसहायस्त्वंयथानान्येतथानृपाः ॥ ४० ॥ धन्योमान्योसिचसतांपूजनीयोसिसद्गुणैः ॥ देवाअपिदिवोदासत्वत्त्रासान्नविमार्गगाः ॥ ४१ ॥ किंनःस्तुत्यातवनृपाद्विजानामस्पृहावताम् ॥ किंकुर्मस्त्वद्गुणग्रामाःस्तावकान्नःप्रकुर्वते ॥४२॥ गोष्ठीतिष्ठत्वियंतावत्प्रस्तुतंस्तौमिसांप्रतम् ॥ यष्टुकामोस्म्यहंराजंस्त्वांसहायमतोवृणे ॥४३॥ त्वयाराजन्वतीचैषाऽवनिःसर्वार्धिभाजनम् ॥ अहंचास्तिधनोराजन्न्यायोपात्तमहाधनः ॥४४॥ इयंचराजधानीतेकर्मभूमावनुत्तमा ॥ यस्यांकृतानांकार्याणांसंवर्तेपिनसंक्षयः ॥४५॥ संचितंयद्धनंपुंभिर्नयसन्मार्गगामिभिः ॥ तत्काश्यांविनियुज्येतक्लेशायेतरथाभवेत् ॥४६॥ महिमानंपरंकाश्याःकोपिवेदनभूपते ॥ ऋतेत्रिनयनाच्छंभोःसर्वज्ञानप्रदायिनः ॥४७॥

दृशंनेत्रंज्ञानंवा ॥ ३९ ॥ सद्गुणत्वमेवाह ॥ प्रजेति ॥ ४० ॥ ४१ ॥ अस्पृहावतांस्पृहारहितानाम् ॥ निरीहस्यतृणंनृपाइतिन्यायादित्यर्थः ॥ स्तावकान्स्तुतिंकुर्वाणान् ॥ ४२ ॥ गोष्ठीवार्ता ॥ स्तौमिकथयामि ॥ ४३ ॥ अहंचास्तिधनइति ॥ अस्तिशब्दःसुबंतप्रतिरूपकः ॥ अस्तिधनंयस्यसोस्तिधनः ॥ अस्तिधनीतिक्वचित् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

॥४८॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ जोषंतूष्णीम् ॥ ५४ ॥ यियक्षमाणस्ययज्ञंकरिष्यतः ॥ ५५ ॥ सप्तांगेस्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलरूपे ॥ ५६ ॥ ५७ ॥ ५८॥ पूर्वःप्रजा
संतापजः ॥ ५९ ॥ ६० ॥ ६१ ॥ एकोभिलाषः ॥ तंदर्शयाति ॥ मार्गणइति ॥ मार्गणोयाचकः ॥ स्वतनोःस्वशरीरस्य ॥ ६२ ॥ ६३ ॥ यज्ञान्विपुलदक्षिणान्यजकुरु ॥

मन्येधन्यतरोसित्वंबहुजन्मशतार्जितैः ॥ सुकृतैःपासियत्काशींविश्वभर्तुःपरांतनुम् ॥ ४८॥ काशीत्रिजगतीसारस्त्रिवेदीसारएववै ॥ त्रिवर्गोत्तरसारश्च
निर्णीतेतिमहर्षिभिः ॥ ४९॥ विश्वेशानुग्रहेणैवत्वयैषापाल्यतेपुरी ॥ एकस्याप्यवनात्काश्यांत्रैलोक्यमवितंभवेत् ॥५०॥ अन्यच्चतेहितंवच्मियदितेरो
चतेऽनघ ॥ प्रीणनीयःसदैवैकोविश्वेशःसर्वकर्मभिः ॥ ५१ ॥ अन्यदेवधियाराजन्विश्वेशंपश्यमाक्वचित् ॥ ब्रह्मविष्ण्विंद्रचंद्रार्काःक्रीडेयंतस्यधूर्जटेः ॥
॥ ५२ ॥ विप्रैरुदर्कमिच्छद्भिःशिक्षणीयायतोनृपाः ॥ अतस्तवहितंख्यातंकिंवामेचिंतयानया ॥ ५३ ॥ इतिजोषंस्थितंविप्रंप्रत्युवाचनृपोत्तमः ॥ सर्वं
मयाहृदिधृतंयत्त्वयोक्तंद्विजोत्तम ॥ ५४ ॥ ॥ राजोवाच ॥ ॥ अहंयियक्षमाणस्यतवसाहाय्यकर्मणि ॥ दासोस्मियज्ञसंभारान्नयमेकोशतोऽ
खिलान् ॥ ५५ ॥ यदस्तिमेखिलंतत्रसप्तांगेपिभवान्प्रभुः ॥ यजस्वैकमनाब्रह्मन्सिद्धंमन्यस्ववांछितम् ॥ ५६ ॥ राज्यंकरोमियद्ब्रह्मन्स्वार्थंतन्नमनाग
पि ॥ पुत्रैःकलत्रैर्देहेनपरोपकृतयेयते ॥ ५७ ॥ राज्ञांक्रतुक्रियाभ्योपितीर्थेभ्योपिसमंततः ॥ प्रजापालनमेवैकोधर्मःप्रोक्तोमनीषिभिः ॥ ५८ ॥ प्रजासं
तापजोवह्निर्वज्राग्नेरपिदारुणः ॥ द्विरात्रान्दहतिवज्राग्निःपूर्वोराज्यंकुलंतनुम् ॥ ५९ ॥ यदावभृथसिस्नासुर्भवेयंद्विजसत्तम ॥ तदाविप्रपदांभोभिरभिषे
कंकरोम्यहम् ॥ ६० ॥ हवनंब्राह्मणमुखेयत्करोमिद्विजोत्तम ॥ मन्येक्रतुक्रियाभ्योपितद्विशिष्टंमहामते ॥६१॥ अभिलाषेषुसर्वेषुजागर्त्येकोहृदीहमे ॥
अद्यापिमार्गणःकोपिद्रष्टव्यःस्वतनोरपि ॥ ६२ ॥ अहोअहोभिर्बहुभिःफलितोमेमनोरथः ॥ यत्त्वंमेद्यगृहेप्राप्तःकिंचित्प्रार्थयितुंद्विज ॥ ६३ ॥
एकाग्रमानसोविप्रयज्ञान्विपुलदक्षिणान् ॥ बहून्यजकृतंविद्धिसाहाय्यंसर्ववस्तुषु ॥ ६४ ॥ इतिराज्ञोमहाबुद्धेर्धर्मशीलस्यभाषितम् ॥ श्रुत्वातुष्टमनाः
स्रष्टाक्रतुसंभारमाहरत् ॥ ६५ ॥ साहाय्यंप्राप्यराजर्षेर्दिवोदासस्यपद्मभूः ॥ इयाजदशभिःकाश्यामश्वमेधैर्महामखैः ॥६६ ॥ अद्यापिहोमधूमौघैर्य
द्व्याप्तंगगनांतरम् ॥ तदाप्रभृतिनव्योमनीलिमानंजहात्यदः ॥ ६७ ॥

अयमेववापाठः ॥ ६४ ॥ ६५ ॥ ६६ ॥ अद्येति ॥ यद्यदाप्रभृतियंकालमारभ्यहोमधूमौघैर्गगनांतरंव्याप्तंतदाप्रभृति अद्यापिनीलिमानंतमालश्यामलत्वमदोनभोनजहातीत्यन्वयः ॥ ६७ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रयज्ञवाटे ॥ तस्येतिपाठेतस्यब्रह्मणःसंबंधितत्तीर्थमितिपूर्वेणैवान्वयः ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ प्रभावमाह ॥ परातनुरिति ॥ अस्याःपुरःपुर्याइत्यन्वयः ॥ ॥ ७४ ॥ कःप्राप्येति ॥ मूर्खोपिकाशींप्राप्यपुनस्त्यक्तुंकईहतेकश्चेष्टेतनकोपीत्येतत् ॥ स्थानेयुक्तमित्यन्वयः ॥ ७५ ॥ तत्रहेतुमाह ॥ विश्वंसंतापेति ॥ ७६ ॥ ७७ ॥ ईशस्यायमैशस्तस्मात् ॥

तीर्थंदशाश्वमेधाख्यंप्रथितंजगतीतले ॥ तदाप्रभृतितत्रासीद्वाराणस्यांशुभप्रदम् ॥ ६८ ॥ पुरारुद्रसरोनामतत्तीर्थंकलशोद्भव ॥ दशाश्वमेधिकंपश्चाज्जातं विधिपरिग्रहात् ॥ ६९ ॥ स्वर्धुन्यथततःप्राप्ताभगीरथसमागमात् ॥ अतीवपुण्यवज्जातमतस्तत्तीर्थमुत्तमम् ॥७०॥ विधिर्दशाश्वमेधेशंलिंगंसंस्थाप्य तत्रवै ॥ स्थितवान्नगतोद्यापिक्वापिकाशींविहायतु ॥ ७१ ॥ राज्ञोधर्मरतेस्तस्यच्छिद्रंनावापकिंचन ॥ अतःपुरारेःपुरतोव्रजित्वाकिंवदेद्विधिः ॥ ७२ ॥ क्षेत्रप्रभावंविज्ञायध्यायन्विश्वेश्वरंशिवम् ॥ ब्रह्मेश्वरंचसंस्थाप्यविधिस्तत्रैवसंस्थितः ॥ ७३ ॥ परातनुरियंकाशीविश्वेशस्येतिनिश्चितम् ॥ अस्याः संसेवनाच्छंभुर्नकुप्यतिपुरोमयि ॥ ७४ ॥ कःप्राप्यकाशींदुर्मेधाःपुनस्त्यक्तुमिहेहते ॥ अनेकजन्मजनितकर्मनिर्मूलनक्षमाम् ॥ ७५ ॥ विश्वसंतापसं हर्तुःस्थानेविश्वपतेस्तनुः ॥ संताप्यतेतरांकाश्याविश्लेषजमहाग्निना ॥ ७६ ॥ प्राप्यकाशींत्यजेद्यस्तुसमस्ताघौघनाशिनीम् ॥ नृपशुःसपरिज्ञेयोमहासौ ख्यपराङ्मुखः ॥ ७७ ॥ निर्वाणलक्ष्मींयःकांक्षेत्त्यक्तासंसारदुर्गतिम् ॥ तेनकाशीनसंत्याज्यायद्यात्तैशादनुग्रहात् ॥ ७८ ॥ यःकाशींसंपरित्यज्यगच्छे दन्यत्रदुर्मतिः ॥ तस्यहस्ततलाद्गच्छेच्चतुर्वर्गफलोदयः ॥ ७९ ॥ निबर्हणीमघौघस्यसुपुण्यपरिबृंहिणीम् ॥ कःप्राप्यकाशींदुर्मेधास्त्यजेन्मोक्षसु खप्रदाम् ॥ ८० ॥ सत्यलोकेकृतत्सौख्यंक्वसौख्यंवैष्णवेपदे ॥ यत्सौख्यंलभ्यतेकाश्यांनिमेषार्धनिषेवणात् ॥ ८१ ॥ वाराणसीगुणगणान्निर्णीयद्रु हिणस्त्विति ॥ व्यावृत्यमंदरगिरिंनपुनःप्रत्यगान्मुने ॥८२॥ ॥ स्कंदउवाच ॥ ॥ मित्रावरुणयोःपुत्रमहिमानंब्रवीमिते ॥ काश्यांदशाश्वमेधस्यसर्व तीर्थशिरोमणेः ॥ ८३ ॥ दशाश्वमेधिकंप्राप्यसर्वतीर्थोत्तमोत्तमम् ॥ यत्किंचित्क्रियतेकर्मतदक्षयमिहेरितम् ॥ ८४ ॥ स्नानंदानंजपोहोमःस्वाध्यायोदे वतार्चनम् ॥ संध्योपास्तिस्तर्पणंचश्राद्धंपितृसमर्चनम् ॥८५॥ दशाश्वमेधिकेतीर्थेसकृत्स्नात्वानरोत्तमः ॥ दृष्ट्वादशाश्वमेधेशंसर्वपापैःप्रमुच्यते ॥८६॥ ज्येष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिम् ॥ दशाश्वमेधिकेस्नात्वामुच्यतेजन्मपातकैः ॥ ८७ ॥ ज्येष्ठेशुक्लद्वितीयायांस्नात्वारुद्रसरोवरे ॥ जन्मद्वय कृतंपापंतत्क्षणादेवनश्यति ॥ ८८ ॥

त्यक्तासंत्यज्य ॥ भुंजन्नितिक्वचित् ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ निर्णीयन्निश्चित्य ॥ निर्गायन्नितिक्वचित् ॥ ८२ ॥ ८३ ॥ ८४ ॥ पितृसमर्चनमितिश्राद्धविशेषणम् ॥८५॥८६॥८७॥८८॥

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ क्रमस्नायीतीतिथिवृद्ध्यास्नायीतिप्रतिजन्माघं दशम्यांदशजन्माघमितिक्रमेणेत्यर्थः ॥ ८९ ॥ यामींयमसंबंधिनीम् ॥ ९० ॥ ९१ ॥ ९२ ॥ पक्षंपक्षमात्रम् ॥ स्नात्वेतिशेषः ॥ स्नात्वेतिकचित्पाठः ॥ ९३ ॥ ९४ ॥ ९५ ॥ ब्रह्मेश्वरंब्रह्मणास्वनाम्नास्थापितंलिंगम् ॥ ९६ ॥ ९७ ॥ ब्रह्मशालांवेदमण्डपम् ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांद्विपञ्चाशत्तमोध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ त्रिपञ्चाशत्तमेऽध्यायेकाश्यांप्रेषणमुच्यते ॥ शंकुकर्णमुखानांचकाश्याश्रमहिमातथा ॥

एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः ॥ आशुक्लपक्षदशमिप्रतिजन्माघमुत्सृजेत् ॥ ८९ ॥ तिथिंदशहरांप्राप्यदशजन्माघहारिणीम् ॥ दशाश्वमेधिकेस्नातोयामींपश्येन्नयातनाम् ॥९०॥ लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ ॥ दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंशयः ॥ ९१ ॥ स्नातोदशहरायांयःपूजयेल्लिंगमुत्तमम् ॥ भक्त्यादशाश्वमेधेशंनतंगर्भदशास्पृशेत् ॥९२॥ ज्येष्ठेमासिसितेपक्षेपक्षंरुद्रसरेनरः ॥ कुर्वन्वैवार्षिकींयात्रांनविघ्नैरभिभूयते ॥९३॥ दशाश्वमेधावभृथैर्यत्फलंसम्यगाप्यते ॥ दशाश्वमेधेतन्नूनंस्नात्वादशहरातिथौ ॥ ९४ ॥ स्वर्धुन्याःपश्चिमेतीरेनत्वादशहरेश्वरम् ॥ नदुर्दशामवाप्नोतिपुमान्पुण्यतमःक्वचित् ॥ ९५ ॥ यत्काश्यांदक्षिणद्वारमंतर्गेहस्यकीर्त्यते ॥ तत्रब्रह्मेश्वरंदृष्ट्वाब्रह्मलोकेमहीयते ॥ ९६ ॥ इतिब्राह्मणवेषेणवाराणस्यांमहाधिया ॥ द्रुहिणेनस्थितंतावद्यावद्विश्वेश्वरागमः ॥ ९७ ॥ दिवोदासोपिराजेंद्रोवृद्धब्राह्मणरूपिणे ॥ ब्रह्मणेकृतयज्ञायब्रह्मशालामकल्पयत् ॥ ९८ ॥ ब्रह्मेश्वरसमीपेतुब्रह्मशालामनोहरा ॥ ब्रह्मातत्रावसद्व्योमब्रह्मघोषैर्निनादयन् ॥ ९९ ॥ इतितेकथितोब्रह्मन्महिमातिमहत्तरः ॥ दशाश्वमेधतीर्थस्यसर्वाघौघविनाशनः ॥ १०० ॥ श्रुत्वाध्यायमिमंपुण्यंश्रावयित्वातथैवच ॥ ब्रह्मलोकमवाप्नोतिश्रद्धयामानवोत्तमः ॥ १०१ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायामुत्तरार्द्धेचतुर्थेकाशीखंडेदशाश्वमेधवर्णनंनामद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥छ॥ ॥ अगस्तिरुवाच ॥ ॥ अपूर्वेयंकथाख्याताब्रह्मणोब्रह्मवित्तम ॥ किंचकारपुनःशंभुस्तत्रब्रह्मण्यपिस्थिते ॥ १ ॥ ॥ स्कंदउवाच ॥ शृण्वगस्त्यमहाभागकाश्यांब्रह्मण्यपिस्थिते ॥ गिरिशश्चिंतयामासभृशमुद्विग्नमानसः ॥ २ ॥ पुरीसायादृशीकाशीवशीकरणभूमिका ॥ नतादृशीदृशीहासीत्क्वचिन्मेप्रायशोध्रुवम् ॥ ३ ॥ योयोयातिपुरींतांतुसस‍तत्रैवतिष्ठति ॥ अभूवन्ननुयोगिन्योऽयोगिन्यःकाशिसंगताः ॥ ४ ॥ अकिंचित्करतांप्राप्तःससहस्रकरोप्यरम् ॥ विधिर्विधानदक्षोपिनमेससविधोभवत् ॥ ५ ॥

॥ १ ॥ १ ॥ २ ॥ दृशिदृग्विषये ॥ ३ ॥ अयोगिन्योयोगरहिताःत्यक्तयोगादराइत्यर्थः ॥ यद्वा अयोगिन्यउपायरहिताः ॥ अकाराप्रश्लेषेकाश्याख्येनमुख्ययोगेनयुक्ताइत्यर्थः ॥ भोगिन्यइतिकचित्पाठः ॥ ४ ॥ अकिंचित्करतांकिंचिदपिकर्तुमक्षमताम् ॥ अपिनिष्करतामितिपाठेसरविःसहस्रकरोप्यनन्तरश्मिरपिनिष्करतांतेजोरहिततामपिकिंप्राप्तइत्यर्थः ॥ अरमत्यर्थम् ॥ सविधःसवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानोमत्कार्यविधानक्षमोनाभवदित्यर्थः ॥ ५ ॥ ६ ॥ वित्तजानीत ॥ ७ ॥ एवंप्रथमतःसामान्येनोक्त्वापश्चान्नामग्रहणपूर्वकमाहेत्याह नामग्राहमित्यादिना ॥ ८ ॥ ९ ॥ द्रमिचण्डेत्येकंनाम ॥ द्रमिचण्डेतिक्वचित्पाठः ॥ १० ॥ ११ ॥ स्वकार्यंकर्तुंतान्प्रोत्साहयति ॥ भवंतइति ॥ १२ ॥ १३ ॥ तत्तस्मात् ॥ भवत्सुमध्येद्वौअमूशंकुकर्णमहाकालौयातंगच्छतमित्यन्वयः ॥ यद्वा भवत्सु ममांतरंगेषुविद्यमानेषुममसमीपेतिष्ठत्सुकाशीप्रवृत्तिंराज्ञश्चप्रवृत्तिनजानामीत्ययुक्तमितिशेषः ॥ तत्तस्मात् हेशंकुकर्णमहाकालौयुवांद्वावेवयातम् ॥ तद्वैइतिक्वचित्पाठः ॥१४॥ आयातमागच्छतम् ॥

चिंतयन्निति देवेशोगणानाहूयभूरिशः ॥ प्रेषयामासभोयातक्षिप्रंवाराणसींपुरीम् ॥६॥ किंकुर्वंतितुयोगिन्यःकिंकरोतिसभानुमान् ॥ गत्वावित्तत्वरायुक्ता विधिश्चविदधातिकिम् ॥ ७ ॥ नामग्राहंततःप्रैषीद्बहुमानपुरःसरम् ॥ शंकुकर्णमहाकालघंटाकर्णमहोदर ॥८॥ सोमनंदिन्नंदिषेणकालपिंगलकुक्कुट ॥ कुंडोदरमयूराक्षबाणगोकर्णतारक ॥ ९ ॥ तिलपर्णस्थूलकर्णद्रमिचंडप्रभामय ॥ सुकेशविंदतेच्छागकपर्दिन्पिंगलाक्षक ॥ १० ॥ वीरभद्रकिराताख्यच तुर्मुखनिकुंभक ॥ पंचाक्षभारभूताख्यत्र्यक्षक्षेमकलांगलिन् ॥११॥ विराधसुमुखाषाढेभवंतोममसूनवः ॥ यथेमौस्कंदहेरंबौनैगमेयोयथात्वयम् ॥१२॥ यथाशाखविशाखौचयथेमौनंदिभृंगिणौ ॥ भवत्सुविद्यमानेषुमहाविक्रमशालिषु ॥ १३ ॥ काशीप्रवृत्तिंनोजानेदिवोदासनृपस्यच ॥ योगिन्यर्कवि धीनांचतद्वौयातंभवत्स्वमू ॥ १४ ॥ शंकुकर्णमहाकालौकालस्यापिप्रकंपनौ ॥ ज्ञातुंवाराणसीवार्तामायातंचत्वरान्वितौ ॥ १५ ॥ कृतप्रतिज्ञौ तौतूर्णं प्राप्यवाराणसींपुरीम् ॥ शंकुकर्णमहाकालौविस्मृत्यशांभवींगिरम् ॥ १६ ॥ यथैंद्रजालिकींदृष्ट्वामायामिहविचक्षणः ॥ क्षणेनमोहमायातिकाशींवी क्ष्यतथैवतौ ॥ १७ ॥ अहोमोहस्यमाहात्म्यमहोभाग्यविपर्ययः ॥ निर्वाणराशिंयत्काशींप्राप्ययांत्यन्यतोऽबुधाः ॥ १८ ॥ तत्यजेयैरियंकाशी महाशीर्वादभूमिका ॥ तेषांकरतलान्मुक्तिःप्राप्तापिपरितोगता ॥ १९ ॥ यत्रसर्वावभृथतःस्नानमात्रंविशिष्यते ॥ अप्युष्णीकृतपानीयैस्तां काशींकःपरित्यजेत् ॥ २० ॥

॥१५॥ विस्मृत्येति॥भगवद्वाक्यंविस्मृत्यतत्रैवतस्थतुरितिशेषः ॥ विस्मृतावितिपाठेविस्मृतवंतावित्यर्थः ॥१६॥ विस्मरणेदृष्टांतमाह॥ यथेति ॥ दृष्टांतगतमर्थंदार्ष्टांतिकेयोजयाति॥काशीमिति॥ मोहं प्राप्ताविितिशेषः॥यद्वा काशींवीक्ष्यशांभवींगिरंविस्मृत्यतथैवतौमोहमायातावित्यन्वयः॥ १७॥अहोमोहस्येत्यादीनांतावित्थंपरिनिश्चित्यतत्रैवसंस्थितिंप्राप्तावितिनवमश्लोकगतेनान्वयः ॥१८॥१९॥२०॥

दशसौवर्णिकंदशसुवर्णदानजन्यम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ विश्वेशाद्वायुदिग्भागइति ॥ विश्वानितदीशांश्चात्तीतिविश्वेशात यमः ॥ वायोर्दिग्यस्मात् सवायुदिक्वरुणस्तयोर्भागेमध्येनैर्ऋत्यांदिशीत्यर्थः ॥ अथवा विश्वेशाद्विश्वनाथाद्यावायोर्दिक्तस्याभागेसमानसूत्रप्रदेशइत्यर्थः ॥ अथवा विश्वेशात्सकाशाद्वैप्रसिद्धेउदिग्भागे ॥ उशब्दस्याव्ययत्वम् ॥ नैर्ऋतादिग्भागइत्यर्थः ॥ यथाश्रुतव्याख्यानेपूर्वापरविरोधापत्तेः ॥ २८ ॥ २९ ॥ ज्ञात्वेति ॥ अस्मत्कार्यमनिष्पाद्यक्षेत्रमाहात्म्यंज्ञात्वातत्रैवतौतस्थतुरितिज्ञात्वेत्यर्थः ॥ तज्ज्ञानेकारणमाह ॥

यत्रैकपुष्पदानेनाशिवलिंगस्यमूर्धनि ॥ दशसौवर्णिकंपुण्यंकस्तांकाशींपरित्यजेत् ॥ २१ ॥ यत्रदंडप्रणामेनअप्येकेनाशिवाग्रतः ॥ तुच्छमैंद्रपदंप्राहु
स्तांकाशींकोविमुंचति ॥ २२ ॥ यत्रैकद्विजमात्रंतुभोजयित्वायथेच्छया ॥ वाजपेयाधिकंपुण्यंतांकाशींकोविमुंचति ॥ २३ ॥ एकांगांयत्रदत्त्वावैवि
धिवद्ब्राह्मणायवै ॥ लभेदयुतगोपुण्यंकस्तांकाशींत्यजेत्सुधीः ॥ २४ ॥ एकंलिंगंप्रतिष्ठाप्ययत्रसंस्थापितंभवेत् ॥ अपित्रैलोक्यमखिलंतांकाशींकः
समुज्झति ॥ २५ ॥ परिनिश्चित्यतावित्थंलिंगेसंस्थाप्यपुण्यदे ॥ तत्रैवसंस्थितिंप्राप्तौकाशींनाद्यापिमुंचतः ॥ २६ ॥ शंकुकर्णेश्वरंलिंगंशंकुकर्णग
णार्चितम् ॥ दृष्ट्वानजायतेजंतुर्जातुमातुर्महोदरे ॥ २७ ॥ विश्वेशाद्वायुदिग्भागेशंकुकर्णेश्वरंनरः ॥ संपूज्यनविशेदत्रघोरेसंसारसागरे ॥ २८ ॥
महाकालेश्वरंलिंगंमहाकालगणार्चितम् ॥ अर्चयित्वाचनत्वाचस्तुत्वाकालभयंकुतः ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ शंकुकर्णेमहाकालेचिरंतनविलं
बिते ॥ ज्ञात्वासर्वज्ञनाथोथप्राहैषीदपरौगणौ ॥ ३० ॥ घंटाकर्णत्वमागच्छमहोदरमहामते ॥ काशींयातंयुवांतूर्णंज्ञातुंतत्रत्यचेष्टितम् ॥ ३१ ॥ इत्यगस्ते
गणौतौतुगत्वाकाशींमहापुरीम् ॥ व्यावृत्याद्यापिनोयातौक्वापितत्रैवसंस्थितौ ॥ ३२ ॥ घंटाकर्णेश्वरंलिंगंघंटाकर्णगणोत्तमः ॥ काश्यांसंस्थाप्यवि
धिवत्स्वयंतत्रैवनिर्वृतः ॥ ३३ ॥ कुंडंतत्रैवसंस्थाप्यलिंगस्नपनकर्मणे ॥ नाद्यापिसंत्यजेत्काशींध्यायँल्लिंगंतथैवहि ॥ ३४ ॥ महोदरोपितत्प्राच्यां
शिवध्यानपरायणः ॥ महोदरेश्वरंलिंगंध्यायेदद्यापिकुंभज ॥ ३५ ॥ महोदरेश्वरंदृष्ट्वावाराणस्यांद्विजोत्तम ॥ कदाचिदपिवैमातुःप्रविशेन्नोदरींदरीम् ॥
॥ ३६ ॥ घंटाकर्णह्रदेस्नात्वादृष्ट्वाव्यासेश्वरंविभुम् ॥ यत्रकुत्रविपन्नोपिवाराणस्यांमृतोभवेत् ॥ ३७ ॥ घंटाकर्णेमहातीर्थेश्राद्धंकृत्वाविधानतः ॥ अपिदुर्ग
तिमापन्नानुद्धरेत्सप्तपूर्वजान् ॥ ३८ ॥ निमज्ज्याद्यापितत्कुंडेक्षणंयोवहितोभवेत् ॥ विश्वेश्वरमहापूजाघंटारावाञ्शृणोतिसः ॥ ३९ ॥ वदंतिपितरःकाश्यां
घंटाकर्णेमलेजले ॥ दातातिलोदकस्यापिवंशेनःकोपिजायते ॥ ४० ॥ यद्वंश्यासुनयःकाश्यांघंटाकर्णेमहाह्रदे ॥ कृतोदकक्रियाःप्राप्ताःपरांसिद्धिंघटोद्भव ॥ ४१ ॥

सर्वज्ञनाथइति ॥ प्राहैषीत्प्रेषयामास ॥ ३० ॥ ३१ ॥ ३२ ॥ निर्वृतःसुखितः सुस्थितइत्यर्थः ॥ ३३ ॥ ३४ ॥ ३५ ॥ औदरीमुदरभवाम् ॥ दरींगुहाम् ॥ ३६ ॥ व्यासेश्वरमित्यत्रविश्वेश्वरमितिक्वचित्पाठः ॥ ३७ ॥ ३८ ॥ अवहितोध्यानस्थः ॥ ३९ ॥ वदंतीति ॥ नोऽस्माकंवंशेतिलोदकस्यापिदाताकःकश्चिदपिकिंजायतेजनिष्यतीतिपितरोवदंतीत्यर्थः ॥ ४० ॥ ननुतथासतिकिंस्यात्त

CC-0. In Public Domain. Digitization by eGangotri

किमर्थंवातेवदंतीत्याकांक्षायामाह ॥ यद्दंश्याइति ॥ यस्यघंटाकर्णह्रदेतिलोदकदातुर्वंश्यायद्दंश्याः ॥ घंटाकर्णेमहाह्रदेकृताउदकक्रियायेभ्योवंशेभ्यस्तेतथामुनयःसंतःपरांसिद्धिंप्राप्ताःतथावयमपि प्राप्स्यामइत्यभिप्रायेणवदंतीति ॥ ४१ ॥ ४२ ॥ ४३ ॥ तुपुनःइयंकाशीमहामोहनभूरितिपुनर्नजानंतीत्यर्थः ॥ ४४ ॥ ४५ ॥ यावान्परिच्छदःपरिकरस्तावंतंप्रेषयिष्यामीत्यर्थः ॥ सर्वां श्चेन्मोहयिष्यामिकिंप्रेषणेनतत्राह ॥ नोद्यमादिति ॥ ४६ ॥ एतद्विवृणोति ॥ नोद्यमादिति ॥ पुरुषकारस्यफलमाह ॥ प्रतिकूलइति ॥ प्रतिपक्षभूतोपिविधिर्दैवंतेषांविचक्षणानांसततोद्यमात्खिद्ये तनिर्वंधंदृष्ट्वासोऽनुकूलोभवेदित्यर्थः॥४७॥ प्रतिवंधेपिउद्यमाभावाभावेदृष्टांतमाह॥ शीतेति ॥ शीतोष्णाभानवोरश्मयोययोस्तौचंद्रसूर्यौस्वर्भानुनाराहुणाग्रस्तावप्युद्यारभ्यापिगतिंनत्यजतोनमुञ्चतः ॥

॥ स्कंदउवाच ॥ ॥ घंटाकर्णेगणेयातेप्रयातेचमहोदरे ॥ विसिस्मायस्मरद्वेष्टामौलिमांदोलयन्मुहुः ॥४२॥ उवाचचमनस्येवहरःस्मित्वापुनःपुनः ॥ महामोहनविद्यासिकाशित्वांपर्यवैम्यहम् ॥ ४३ ॥ पुराविदःप्रशंसंतित्वांमहामोहहारिणीम् ॥ काशींत्वितिनजानंतिमहामोहनभूरियम् ॥ ४४ ॥ प्रेष यिष्याम्यहंसर्वान्भवतीमोहयिष्यति ॥ इतिसम्यग्विजानामिकाशित्वांमोहनौषधिम् ॥ ४५ ॥ तथापिप्रेषयिष्यामियावान्मेस्तिपरिच्छदः ॥ नोद्यमाद्वि रमंतीहज्ञानिनःसाध्यकर्मणि ॥ ४६ ॥ नोद्यमाद्विरतिःकार्याक्वापिकार्येविचक्षणैः ॥ प्रतिकूलोपिखिद्येतविधिस्तत्सततोद्यमात् ॥ ४७ ॥ शीतोष्णभानू स्वर्भानुग्रस्तावपिनभोंगणे ॥ गतिंनत्यजतोद्यापिप्रक्रांतव्यकृतोद्यमौ ॥ ४८ ॥ एकत्रहंतिकार्याणिप्रातिकूल्याद्विधिर्मुहुः ॥ एकत्रकरणीयानिसेत्स्यं त्यत्रभृशोद्यमात् ॥ ४९ ॥ दैवंपूर्वकृतंकर्मकथ्यतेनेतरत्पुनः ॥ तन्निराकरणेयत्नःस्वयंकार्योविपश्चिता ॥ ५० ॥ भाजनोपस्थितंदैवाद्भोज्यंनास्यंस्वयं विशेत् ॥ हस्तवक्त्रोद्यमात्तच्चप्रविशेदौदरींदरीम् ॥ ५१ ॥ इत्युद्यमंसमर्थ्यैशोनिश्चितंदैवजित्वरम् ॥ पुनश्चप्रेषयांचक्रेगणान्पंचमहारयान् ॥ ५२ ॥ सोमनंदीनंदिषेणःकालपिंगलकुक्कुटाः ॥ तेद्यापिननिवर्तंतेकाश्यांजीवामृतायथा ॥५३॥ तेपिस्वनाम्नालिंगानिशंभुसंतुष्टिकाम्यया॥ प्रतिष्ठाप्यस्थिताः काश्यांविश्वनिर्वाणजन्मनि ॥ ५४ ॥ सोमनंदीश्वरंदृष्ट्वालिंगंनंदवनेपरम् ॥ सोमलोकेपरानंदंप्राप्नुयाद्भक्तिमान्नरः ॥ ५५ ॥ तदुत्तरेविलोक्याथनंदिषे णेश्वरंनरः ॥ आनंदसेनांसंप्राप्यजयेन्मृत्युमपिक्षणात् ॥ ५६ ॥ कालेश्वरंमहालिंगंगंगायाःपश्चिमोत्तरे ॥ प्रणम्यकालपाशेननोबध्येतकदाचन ॥ ॥ ५७ ॥ पिंगलेश्वरमभ्यर्च्यकालेशात्किंचिदुत्तरे ॥ लभतेपिंगलज्ञानंयेनतन्मयतांव्रजेत् ॥ ५८ ॥

किमिति ॥ प्रक्रांतव्येगमनेकृतउद्यमोयाभ्यांतौ ॥ ४८ ॥ तर्हिकुत्रापिकार्यप्रतिवंधोनस्यादित्याशंक्यविभागमाह ॥ एकत्रेति ॥ मुहुःप्रातिकूल्यादित्यन्वयः ॥ अत्रजगति ॥ अंतइतिपाठे अंतेततोवहूद्यमानन्तरमित्यर्थः ॥ ४९ ॥ ननु ललाटेलिखितंयत्तुषष्ठीजागरवासरे ॥ नोहरिःशंकरोब्रह्मान्यथातत्कर्त्तुमर्हतीत्यादिदर्शनात्कथंदैवमन्यथयितव्यमित्याशंक्याह ॥ दैवमिति ॥ कर्मणाक र्मनिर्हारसंभवात् ॥ निषेधवचनस्यत्वनुद्यमवत्पुरुषविषयत्वादितिभावः ॥ ५० ॥ उद्यमंविनादैवमाकिंचित्करमित्याह ॥ भाजनेति ॥ ५१ ॥ प्रयत्नसमर्थनमुपसंहरंस्तस्यफलमाह ॥ इत्युद्यम मिति ॥ समर्थ्यसंसाध्य ॥ उद्यमंविशिनष्टि ॥ निश्चितंयुक्त्यादृढीकृतम् ॥ दैवजित्वरमदृष्टजयनशीलम् ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६॥५७॥ पिंगलज्ञानंपिंगलेश्वरस्वरूपज्ञानम् ॥५८॥

CC-0. In Public Domain. Digitization by eGangotri

कुक्कुटांडस्येवाकृतिराकारोयस्यसकुक्कुटाण्डाकृतिस्तस्य ॥ ५९ ॥ ६० ॥ ६१ ॥ मायावीर्यमहत्सुमायावीर्याभ्यांमहत्तरेषु ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥
॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ स्नापयित्वेति ॥ यत्त्वग्राह्यंशिवनिर्माल्यंपत्रंपुष्पंफलंजलमित्यादिनिषेधवचनंतत्त्वज्ञानपूर्वकंकाश्यंतिरिक्तस्थानाविषयंशेष्णुपादोदकासंसर्गविषयंवा ॥ शालग्राम

कुक्कुटेश्वरालिंगस्ययेत्रभाक्तिंवितन्वते ॥ कुक्कुटांडाकृतेस्तस्यनतेगर्भमवाप्नुयुः ॥ ५९ ॥ ॥ स्कंदउवाच ॥ ॥ सोमनंदिप्रभृतिषुमुनेपंचगणेष्वपि ॥
आनंदकाननंप्राप्यास्थितेषुस्थाणुरब्रवीत् ॥ ६० ॥ कार्यमस्माकमेवैतद्यदिसम्यग्विमृश्यते ॥ अनेनोपाधिनाप्येतेतत्रतिष्ठंतुमामकाः ॥ ६१ ॥ प्रमथे
षुप्रविष्टेषुमायावीर्यमहत्स्वपि ॥ अहमेवप्रविष्टोस्मिवाराणस्यांनसंशयः ॥ ६२ ॥ क्रमेणप्रेषयिष्यामियोस्तिमेस्वपरिच्छदः ॥ तत्रसर्वेषुयातेषुततो
यास्याम्यहंपुनः ॥ ६३ ॥ संप्रधार्येतिहृदयेदेवदेवेनशूलिना ॥ प्रैषिष्टप्रमथानांतुततोगणचतुष्टयम् ॥ ६४ ॥ कुंडोदरोमयूराख्योबाणोगोकर्णएवच ॥
मायाबलंसमाश्रित्यकाशींप्रविविशुर्गणाः ॥ ६५ ॥ कृत्वोपायशतंतैस्तुदिवोदासस्यसंभ्रमे ॥ यदैकोपिसमर्थोनतदातत्रैवसंस्थितम् ॥६६॥ अपराधशते
ष्वीशःकेनतुष्यतिकर्मणा ॥ संप्रधार्येतितेचक्रुर्लिंगाराधनमुत्तमम् ॥ ६७ ॥ एकस्मिन्शांभवेलिंगेविधिनात्रसमर्चिते ॥ क्षमेत्त्र्यक्षोपराधानांशतंमोक्षं
चयच्छति ॥६८॥ नतुष्यतितथाशंभुर्यज्ञदानतपोव्रतैः ॥ यथातुष्येत्सकृल्लिंगेविधिनाभ्यर्चितेसति ॥ ६९ ॥ लिंगार्चनविधानज्ञोलिंगार्चनरतःसदा ॥
त्र्यक्षएवसविज्ञेयःसाक्षाद्व्यक्षोपिमानवः ॥ ७० ॥ नगोशतप्रदानेननस्वर्णशतदानतः ॥ तत्फलंलभ्यतेपुंभिर्यत्सकृल्लिंगपूजनात् ॥ ७१ ॥ अश्वमेधा
दिभिर्यागैर्नतत्फलमवाप्यते ॥ यत्फलंलभ्यतेमर्त्यैर्नित्यंलिंगप्रपूजनात् ॥ ७२ ॥ स्नापयित्वाविधानेनयोलिंगस्नपनोदकम् ॥ त्रिःपिबेत्त्रिविधंपापं
तस्येहाशुप्रणश्यति ॥ ७३ ॥ लिंगस्नपनवार्भिर्यःकुर्यान्मूर्ध्न्यभिषेचनम् ॥ गंगास्नानफलंतस्यजायतेत्रविपाप्मनः ॥ ७४ ॥ लिंगंसमर्चितंदृष्ट्वायःकुर्या
त्प्रणातिंसकृत् ॥ संदेहोजायतेतस्यपुनर्देहनिबंधने ॥ ७५ ॥ लिंगंयःस्थापयेद्भक्त्यासतजन्मकृतादघात् ॥ मुच्यतेनात्रसंदेहोविशुद्धःस्वर्गभाग्भवेत् ॥
॥ ७६ ॥ विचार्येतिगणैःकाश्यांस्वामिद्रोहोपशांतये ॥ प्रतिष्ठितानिलिंगानिमहापातकभिद्यपि ॥ ७७ ॥ कुंडोदरेश्वरंलिंगंदृष्ट्वालोलार्कसन्निधौ ॥
सर्वपापविनिर्मुक्तःशिवलोकेमहीयते ॥७८॥ कुंडोदरेश्वराल्लिंगात्प्रतीच्यामसिरोधसि ॥ मयूरेश्वरमभ्यर्च्यनगर्भंप्रतिपद्यते ॥७९॥ मयूरेशप्रतीच्यांचलिं
गंबाणेश्वरंमहत् ॥ तस्यदर्शनमात्रेणसर्वैःपापैःप्रमुच्यते ॥ ८० ॥ गोकर्णेशंमहालिंगमंतर्गेहस्यपश्चिमे ॥ द्वारेसमर्च्यवैकाश्यांनविघ्नैरभिभूयते ॥ ८१ ॥

शिलातोयात्सर्वयातिपवित्रतामित्युक्तेः ॥ शिवाऽभक्तविषयंवा ॥ शिवविष्ण्वोर्भेददर्शिमूढविषयंवेतिदिक् ॥ वस्तुतस्तुबाणलिंगादिव्यतिरिक्तविषयमेवतदितिपूर्वोक्तंनप्रस्मर्तव्यम् ॥ ७३ ॥
॥ ७४ ॥ देहएवनितरांबन्धनंदेहबन्धनंतास्मिन् ॥ ७५ ॥ ७६ ॥ महापातकानिभिंदन्तीतिमहापातकभिंदि ॥ ७७ ॥ ७८ ॥ असिरोधसिअस्यानद्यास्तीरे ॥ ७९ ॥ ८० ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचत्वसमयेमरणावसरे ॥ तर्हिकिंकाश्यामेवनेत्याह ॥ क्वचिदपीति ॥ यत्रकुत्राप्यंतंमृत्युमृच्छतःप्राप्नुवतोज्ञानभ्रंशोनजायतइत्यर्थः ॥ ८२ ॥ गणेश्वरइत्यत्रमहेश्वरइतिक्वचित्पाठः ॥ ॥ ८३ ॥ मोहकत्वमात्रेणमाययैकत्वाभिधानंनतुतत्कार्यकरत्वेन ॥ ८४ ॥ तदेवाह ॥ अपास्येति ॥ ८५ ॥ ननुस्वामिनंविहायतिष्ठंतःकुतस्तेनबिभ्युस्तत्राह ॥ मरणादिति ॥ ८६ ॥ कुत्रक्व ॥ केनेतिवापाठः ॥ ८७ ॥ निर्वाणंकैवल्यमेवरमणीसुंदरीनिर्वाणरमणी ॥ प्रकर्षेणांतेदेहत्यागावसरेभवतीतिप्रांत्यस्तारकोपदेशस्तदेवभूषणंयस्यसतथातम् ॥ यद्वा प्रांतेभवंप्रांत्यंमरणंतदेवभूषणंमंगलं

गोकर्णेश्वरभक्तस्यपंचत्वसमयेसति ॥ ज्ञानभ्रंशोनजायेतक्वचिदप्यंतमृच्छतः ॥८२॥ ॥ स्कंदउवाच ॥ ॥ चिरयत्सुगणेष्वेषुचतुर्ष्वपिगणेश्वरः ॥ महिमानंमहत्त्वंतुतत्काश्याःपर्यवर्णयत् ॥ ८३ ॥ वैष्णव्यामाययाविश्वंभ्राम्येतात्रयया खिलम् ॥ ध्रुवंमूर्तिमतीसैषाकाशीविश्वैकमोहिनी ॥ ८४ ॥ अपास्यसोदरान्दारान्पुत्रक्षेत्रंगृहंवसु ॥ अप्यंगीकृत्यनिधनंसर्वेकाशीमुपासते ॥ ८५॥ मरणादपिनोकाश्यांभयंयत्रमनागपि ॥ गणास्तत्रतुतिष्ठंतःकुतो मत्तोपिविभ्यति ॥ ८६ ॥ मरणंमंगलंयत्रविभूतिर्यत्रभूषणम् ॥ कौपीनंयत्रकौशेयंकाशीकुत्रोपमीयते ॥ ८७ ॥ निर्वाणरमणीयत्ररंकंवाऽरंकमेववा ॥ ब्राह्मणंवाश्वपाकंवावृणीतेप्रांत्यभूषणम् ॥ ८८ ॥ मृतानांयत्रजंतूनांनिर्वाणपदमृच्छताम् ॥ कोप्यंशेनापिनसमाअपिशक्रादयःसुराः ॥ ८९ ॥ यत्रकाश्यांमृतोजंतुर्ब्रह्मनारायणादिभिः ॥ प्रबद्धमूर्धांजलिभिर्नमस्येतातियत्नतः ॥ ९० ॥ यत्रकाश्यांशवत्वेपिजंतुर्नाशुचितांव्रजेत् ॥ अतस्तत्कर्णसं स्पर्शंकरोम्यहमपिस्वयम् ॥ ९१ ॥ यस्तुकाशीतिकाशीतिद्विस्त्रिर्जपतिपुण्यवान् ॥ अपिसर्वपवित्रेभ्यःसपवित्रतरोमहान् ॥ ९२ ॥ येनकाशीहृदि ध्यातायेनकाशीहसेविता ॥ तेनाहंहृदिसंध्यातस्तेनाहंसेवितःसदा ॥ ९३ ॥ काशींयःसेवतेजंतुर्निर्विकल्पेनचेतसा ॥ तमहंहृदयेनित्यंधारयामि प्रयत्नतः ॥ ९४ ॥ स्वयंवस्तुमशक्तोपिवासयेत्तीर्थवासिनम् ॥ अप्येकमपिमूल्येनसवस्तुःफलभाग्ध्रुवम् ॥ ९५ ॥ काश्यांवसंतियेधीराआपंचत्वविनि श्चयाः ॥ जीवन्मुक्तास्तुतेज्ञेयावंद्याःपूज्यास्तएवहि ॥ ९६ ॥ इत्थंविमृश्यबहुशःस्थाणुर्वाराणसीगुणान् ॥ गणानन्यान्समाहूयप्राहिणोत्प्रीतिपूर्वकम् ॥ ॥९७॥ तारकत्वंसमागच्छगच्छातिस्वच्छमानस ॥ दिवोदासोवृषावासोयामधीष्टेवरांपुरीम् ॥९८॥ तिलपर्णस्थूलकर्णद्रुमिचंडप्रभामय ॥ सुकेशविंदते छागकपर्दिन्पिंगलाक्षक ॥९९॥ वीरभद्रकिराताख्यचतुर्मुखनिकुंभक ॥ पंचाक्षभारभूताख्यत्र्यक्षक्षेमकलांगलिन् ॥ १०० ॥ विराधसुमुखाषाढेयांतुसर्वे पृथक्पृथक् ॥ एतेगणामहाभागाःस्वामिभक्तादृढव्रताः ॥१॥ कृत्वामायाबहुविधाबहुरूपाविचक्षणाः ॥ अनिमेषेक्षणास्तस्थुःक्षोणीशच्छिद्रकांक्षिणः ॥२॥

यस्यतम् ॥ मरणंमंगलंयत्रेत्युक्तेः ॥ यत्रकाश्यांशवत्वेपिजंतुर्नाशुचितांव्रजेदित्युक्तत्वात् ॥ शावंनालोकयेदित्यादिमनुवचनंतुकाश्यतिरिक्तविषयंद्रष्टव्यम् ॥ ८८ ॥ ८९ ॥ ९० ॥ शवत्वेपिअपिशब्दाज्जी वत्वेपि ॥ अतएवतस्यजंतोर्मरणाव्यवहितसमयेतारकोपदेशार्थंकर्णसंस्पर्शंकरोमि ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ मूल्येनजीविकया ॥ वस्तुर्वासकर्तुर्यावत्फलंतावत्फलंभजतइत्यर्थः ॥ ९५ ॥ ॥ ९६ ॥ ९७ ॥ वृषावासोधर्माश्रयः ॥ अधीष्टेअधिकंयथास्यात्तथाईष्टेशास्तीत्यर्थः ॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥ निमेषराहितानीक्षणानियेषांतेऽनिमेषेक्षणाः ॥ अत्यंतंसावधाना

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः ॥ २ ॥ नपरिज्ञातंतस्यराज्ञश्छिद्रंयैस्तेऽपरिज्ञाततच्छिद्राः ॥ विद्रावितंदूरीकृतंयशोलक्षणंधनंयेपांतेविद्रावितयशोधनाः ॥ आःक्रोधे ॥ अहोखेदे ॥ ३ ॥ एकंमनुष्यमात्रमपियःकश्चिदेको
मनुष्योवापिनवशीकृतम् ॥ तस्यनरेंद्रस्यवशीकरणंतुदूरतएवनिरस्तमित्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥ स्वामिकार्यासावधानानांकिमितिनरकप्राप्तिस्तत्राहुरकृतेति ॥ ७ ॥ भंगुरानाशशीलाः ॥ ८ ॥ ९ ॥

अपरिज्ञाततच्छिद्राविद्रावितयशोधनाः॥आःकिमेतदहोजातंनिनिंदुःस्वमितीहते ॥३॥ गणाऊचुः ॥ ॥ धिगस्मान्स्वामिनानित्यंकृतसंभावनान्मुहुः ॥
मनुष्यमात्रमप्यत्रयैरेकंनवशीकृतम् ॥ ४ ॥ बहुमानेनदानेनसौहार्देनमहीयसा ॥ कृतप्रसादांऽच्यक्षेणधिङ्नस्तत्कार्यवंचकान् ॥५॥ कागतिर्नोभवित्री
हस्वामिकृत्यप्रमादिनाम् ॥ अंधंतमोमयेलोकेध्रुवंवासोभविष्यति ॥ ६ ॥ अकृतस्वामिकार्याणामहोजीवितधारिणाम्॥ अक्षतेंद्रियवृत्तीनांदुर्गतिश्चपदे
पदे ॥ ७ ॥ लब्धसंभावनानांचन्यकृतस्वामिकर्मणाम् ॥ भृत्यानांभूरिभाजांचभंगुराःस्युर्मनोरथाः ॥ ८ ॥ अनिष्पादितकार्यार्थायेमुखंप्रेक्षयंत्यहो ॥
अपत्रपाःपुरोभर्तुस्तैर्भूर्भारवतीत्वियम् ॥९॥ नाद्रीणांनसमुद्राणांनद्रुमाणांमहीयसाम् ॥ भूतधात्र्यास्तथाभारोयथास्वामिद्रुहांमहान् ॥ १० ॥ अहोपौरा
णिकीगाथास्मृतास्माभिरनिंदिता ॥ तदर्थमवलंब्येहस्थास्यामःकृतनिश्चयाः ॥ ११ ॥ अनाकलितपुण्यानांपरिक्षीणधनायुषाम् ॥ सर्वोपायविहीनानां
गतिर्वाराणसीपुरी ॥ १२ ॥ अपुण्यभारखिन्नानांपश्चात्तापमुपेयुषाम् ॥ विष्वगूर्ध्वगतीनांचगतिर्वाराणसीपुरी ॥ १३ ॥ स्वामिद्रुहःकृतघ्नाश्चयेचविश्रं
भघातकाः ॥ तेषांक्कापिगतिर्नास्तिमुक्त्वावाराणसींपुरीम् ॥ १४ ॥ इत्थंनिश्चित्यगाथार्थंप्रमथाअत्रतास्थिरे ॥ अविज्ञातस्वरूपाश्चदिवोदासेनभूभुजा ॥
॥ १५ ॥ नबुबोधसभूपालोनितरांबुद्धिमानपि ॥ विबुधान्विविधाकारैःस्थितानीशप्रभावतः ॥ १६ ॥ चित्रंनचित्रगुप्तोपिवेत्तिवाराणसीस्थितान् ॥
जंतून्कागणनान्येषांमर्त्यलोकनिवासिनाम् ॥ १७ ॥ अविच्छिन्नप्रभावाणामपरिच्छिन्नतेजसाम् ॥ कृतलिंगप्रतिष्ठानांनांतंप्राप्नोतिधर्मराट् ॥ १८ ॥
इतितेप्रमथाःसर्वेघटोद्भवमहामुने ॥ कृतलिंगार्चनाःकाशींनाद्याप्युज्झंतिशर्मदाम् ॥ १९ ॥ तारकेशंमहालिंगंतारकाख्योगणोत्तमः ॥ तारकज्ञानदंपुं
सांमुनेऽद्यापिसमर्चयेत् ॥ २० ॥ तारकेश्वरलिंगस्यकृत्वाभक्तिंसुनिश्चलाम् ॥ सुखेनतारकज्ञानंलभ्यतेतैर्नरोत्तमैः ॥२१॥ तिलपर्णेश्वरंलिंगंतिलपर्ण
प्रतिष्ठितम् ॥ तिलप्रमाणमप्यत्रदृष्ट्वापापंनसंभवेत् ॥ २२ ॥ स्थूलकर्णेश्वरंलिंगंपरिपूज्यनरोत्तमः ॥ नदुर्गतिमवाप्नोतिपुण्यमाप्नोतिचोत्तमम् ॥
॥ २३ ॥ हमिचंडेश्वरंलिंगंतथालिंगंप्रभामयम् ॥ आराध्यतत्प्रतीच्यांचनपापैरभिभूयते ॥ २४॥ प्रभामयेश्वरंलिंगंदृष्ट्वान्यत्रापिसंस्थितः ॥ प्रभामये
नयानेनशिवलोकेव्रजेत्सुधीः ॥ २५ ॥ सुकेशेश्वरमभ्यर्च्यहरिकेशवनेनरः ॥ षाट्कौशिकमयंदेहंधारयेन्नपुनःपुनः ॥ २६ ॥

महीयसांमहत्तराणाम् ॥ महीजुषामितिपाठेमहींसेवमानानांतदुत्पन्नानामित्यर्थः ॥ ११० ॥ ११ ॥ १२ ॥ विष्वक्सर्वतःऊर्ध्वंचगतिर्येषांतेविष्वगूर्ध्वगतयःतेषांविष्वगूर्ध्वगतीनांसर्वत्रोद्भ्रान्ताना
मित्यर्थः ॥ विष्वग्रुद्धगतीनामितिक्कचित्पाठः ॥१३॥१४॥१५॥१६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥२३॥२४॥२५॥ त्वङ्मांसरुधिरस्नायवस्थिमज्जाइतिषट्कोशास्तैर्निर्मितंषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्कौशिकम् ॥ २६ ॥ २७॥ २८ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांत्रिपञ्चाशत्तमोध्यायः ॥ १३ ॥ ॥ ७ ॥ कपर्दीशस्यलिंगस्यमाहात्म्याख्यानपूर्वकम् ॥ चतुष्पं
चाशकेध्यायेपैशाचाख्यानमुच्यते ॥ १ ॥ १ ॥ गणपोगणमुख्यः ॥ गणकइतिपाठेस्वार्थेकः ॥ २ ॥ ३ ॥ तज्जलस्पर्शमात्रेणवैमल्यंभवतीत्यत्रेतिहासमाह ॥ इतीति ॥ ४ ॥ ५ ॥ इदानीं
तस्यपाशुपतयोगावस्थानमाह ॥ एकदेति ॥ मार्गेमार्गशीर्षे ॥ ६ ॥ लिंगस्यदक्षिणेभागेइत्यादीनांसक्षणंसरस्तीरेउपविष्टःसन्राक्षसमद्राक्षीदितिषष्ठश्लोकगतेनान्वयः ॥ ७ ॥ न्यस्तमस्तकपांसु
रिति ॥ पुनःशिरसिभस्मधारणध्यानांगत्वायसम्यक्ध्यांसंध्यांजीवब्रह्मणोरैक्यानुसन्धानरूपताम् ॥ कथंभूताम् ॥ आध्यात्मिकीमात्मानंकार्यकारणसंघातमधिकृत्यजाताम् ॥ माध्याह्निकीमितिपा
ठेस्पष्टएवार्थः ॥ पञ्चाक्षरींविद्यांनमःशिवायेतिमन्त्रात्मिकाम् ॥ पंचात्मिकीमितिपाठेईशानतत्पुरुषाघोरवामदेवसद्योजातात्मिकामित्यर्थः ॥ ८ ॥ संहारमार्गेणवामावर्तेन ॥ तदुक्तम् ॥ अपसव्यं

विंदतीशंनरोभ्यर्च्यभीमचंडीसमीपतः ॥ त्यक्काप्रचंडमप्येनोमोक्षंविंदतिशाश्वतम् ॥ २७ ॥ छागलेशंमहालिंगंपित्रीश्वरसमीपगम् ॥ विलोक्यपशुव
त्कोपिनपापंप्राकृतंस्पृशेत् ॥ २८ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्द्धेवाराणसीवर्णनगणप्रेषणंनामत्रिपं
चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ स्कंदउवाच ॥ ॥ कुंभसंभववक्ष्यामिशृणोत्ववहितोभवान् ॥ कपर्दीशस्यलिंगस्यमहामाहात्म्यमुत्तमम् ॥ १ ॥
कपर्दीनामगणपःशंभोरत्यंतवल्लभः ॥ पित्रीशादुत्तरेभागेलिंगंसंस्थाप्यशांभवम् ॥२॥ कुंडंचखानतस्याग्रेविमलोदकसंज्ञकम् ॥ यस्यतोयस्यसंस्पर्शी
द्विमलोजायतेनरः ॥ ३ ॥ इतिहासंप्रवक्ष्यामितत्रत्रेतायुगेपुरा ॥ यथावृत्तंकुंभयोनेश्रवणात्पातकापहम् ॥ ४ ॥ एकःपाशुपतश्रेष्ठोवाल्मीकिरितिसं
ज्ञितः ॥ तपश्चचारसमुनिःकपर्दीशंसमर्चयन् ॥ ५ ॥एकदासहिहेमंतेमार्गेमासितपोधनः ॥ स्नात्वातत्रमहातीर्थेमध्याह्नेविमलोदके ॥ ६ ॥ चकारभ
स्मनास्नानमापादतलमस्तकम् ॥ लिंगस्यदक्षिणेभागेकृतमाध्याह्निकक्रियः ॥ ७ ॥ न्यस्तमस्तकपांसुश्चसंध्यामाध्यात्मिकींस्मरन् ॥ जपन्पंचाक्षरीं
विद्यांध्यायन्देवंकपर्दिनम् ॥ ८ ॥ कृत्वासंहारमार्गेणसप्रमाणंप्रदक्षिणम् ॥ हुडुंकृत्यहुडुंकृत्यहुडुंकृत्यत्रिरुच्चकैः ॥ ९ ॥

यतीनांतुसव्यंतुब्रह्मचारिणाम् ॥ सव्यासव्यंगृहस्थस्यशंभोर्नित्यंप्रदक्षिणमिति ॥ पाशुपतविशेषस्यनिर्वाणदीक्षयादीक्षितत्वाद्यतिसमानधर्मत्वंद्रष्टव्यम् ॥ यत्त्विदानींविश्वेश्वरादौस्त्राष्टिक्रमेणयतिभिः
प्रदक्षिणंक्रियतेतत्तुविष्णुसन्निधानात् ॥ तदप्युक्तम् ॥ सोमसूत्रद्वयंयत्रयत्रवाविष्णुमंदिरम् ॥ अपसव्यंनकुर्वीतकुर्यादेवप्रदक्षिणामिति ॥ स्वयंभुलिंगत्वाद्वा ॥ यत्तु वृषंचंडंवृषंचैवसोमसूत्रंपुनर्वृषम् ॥
चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषमित्युक्तम् ॥ तत्तु शनिप्रदोषप्रकरणेपठितत्वात्तद्दिनेसर्वलिंगेषुतथैवविधेयम् ॥ अत्रयःकश्चित्शनिवारसंबंधीप्रदोषः ॥ अतएवाष्टम्यांवृषंचंडमित्युक्तप्रकारेणविश्वेश्वरे
व्यासेनप्रदक्षिणाकृताइतिसनत्कुमारसंहितायांदृश्यते ॥ सोमसूत्रप्रमाणंचान्यत्रोक्तम् ॥ तथाहि ॥ प्रासादविस्तारसमानसूत्रंसोमस्यसूत्रंदिशिसोमसूत्रम् ॥ सूत्राद्बहिर्लंघनतोनदोषःसदोषमभ्यं
तरलंघनेत्विति ॥ सप्रमाणंशास्त्रीयप्रमाणसहितंयथास्यात् ॥ पाठांतरंस्पष्टम् ॥ एवंप्रसंगागतमुक्त्वापुनःपाशुपतयोगमेवानुक्रामति ॥ हुडुंकृत्येति ॥ हुडुंकारंविधाय ॥ हुडुकृत्येतिक्वचित् ॥ उच्चैर्य

CC-0. In Public Domain. Digitization by eGangotri

थास्यात्तथाओंहुडुंहुडुंहुडुमितिप्रणवपुरःसरंवारत्रयमुच्चायत्यथः ॥ ९ ॥ षड्जादीत्यादिपदेननिषादादयोगृह्यंते ॥ हस्तकान्वितंकरचालनयुक्तम् ॥ १० ॥ अंगानांहारैर्विहारैर्विक्षेपैर्मनोहर्तुंशीलं यस्यतन्मनोहारि ॥ चारीनृत्यचरणशीलः ॥ पाशुपतविशेषणंमंडलसंयुतंमंडलाकारेणसंवद्धम् ॥ अंगहारैर्मनोहारिमंडलसंवद्धंचयथास्यात्तथागीतंविधायसरस्तीरउपविष्टइत्यर्थः ॥ तथाचोक्त पाशुपतयोगविधौश्रीमहादेवेन ॥ भस्मनात्रिषवणंस्नायीत भस्मनिशयीत अनुस्नानंनिर्माल्यलिंगधारी आयतनवासी सहितगीतनृत्यहुडुंकारनमस्कारजप्योपहारेणोपतिष्ठेतमहादेवस्यदक्षिणामूर्ति मिति ॥ व्याख्यातंचैतत्सूत्रजातंपंचाध्याय्याम् ॥ नेहोच्यतेग्रंथगौरवभयादिति ॥ ११ ॥ कथंभूतंराक्षसंघोरम् ॥ तत्रहेतुमाह ॥ अतीवविकृताकृतिमिति ॥ विकृताकारत्वमाह शुष्के तिदशभिः ॥ शुष्कौशंखौ ललाटप्रांतौकपोलौतदधोभागौचयस्मिंस्तदास्यंमुखंयस्यतम् ॥ निमग्नेऽधःप्रविष्टेआपिंगेईषत्पीतवर्णेलोचनेयस्यतम् ॥ १२ ॥ रुक्षाणिशुष्काणिस्फुटितानिविदीर्णानिके शानामग्राण्यग्रभागायस्यतम् ॥ महतीस्थूलालंवायमानादीर्घाशिरोधराग्रीवायस्यतम् ॥ अतीवचिपिटंनिम्नंघ्राणंनासायस्यतम् ॥ शुष्कौओष्ठौयस्यतम् ॥ दंतुरान्अतिदंतुरस्तंमहादंतुरमित्यर्थः ॥ ॥ १३ ॥ महतीदीर्घाविशालविस्तृतामौलिर्मस्तकंयस्यतम् ॥ प्रकर्षेणऊर्ध्वीभूताउद्गताःशिरोरुहाःकेशायस्यतम् ॥ प्रलंवकर्णपालीकंलंवायमानश्रोत्रोपरिभागम् ॥ पिंगलानिपिंगलवर्णानियानिश्म

प्रणवंपुरतःकृत्वाषड्जादिस्वरभेदतः ॥ गीतंविधायसानंदंसनृत्यंहस्तकान्वितम् ॥ १० ॥ अंगहारैर्मनोहारिचारीमंडलसंयुतम् ॥ क्षणंतत्रसरस्तीरे उपविष्टोमहातपाः ॥ ११ ॥ अद्राक्षीद्राक्षसंघोरमतीवविकृताकृतिम् ॥ शुष्कशंखकपोलास्यंनिमग्नापिंगलोचनम् ॥ १२ ॥ रूक्षस्फुटितकेशाग्रंमहालंब शिरोधरम् ॥ अतीवचिपिटघ्राणंशुष्कौष्ठमतिदंतुरम् ॥ १३ ॥ महाविशालमौलिंचप्रोर्ध्वीभूतशिरोरुहम् ॥ प्रलंबकर्णपालीकंपिंगलश्मश्रुभीषणम् ॥ ॥ १४ ॥ प्रलंबितललज्जिह्वमत्युत्कटकृकाटिकम् ॥ स्थूलास्थिजत्रुसंस्थानंदीर्घस्कंधद्वयोत्कटम् ॥ १५ ॥ निमग्नकक्षाकुहरंशुष्कह्रस्वभुजद्वयम् ॥ विरलांगुलिहस्ताग्रंनतपीननखावलिम् ॥ १६ ॥ विशुष्कपांसुलोत्क्रोडंपृष्ठलग्नोदरत्वचम् ॥ कटीतटेनविकटंनिर्मांसत्रिकबंधनम् ॥ १७ ॥ प्रलंब स्फिग्युगयुतंशुष्कमुष्कालपमेहनम् ॥ दीर्घनिर्मांसलोरूकंस्थूलजान्वस्थिपंजरम् ॥ १८ ॥ अस्थिचर्मावशेषंचशिराजालितविग्रहम् ॥ शिरालंदी र्घजंघचस्थूलगुल्फास्थिभीषणम् ॥ १९ ॥

श्रूणितैर्भीषणम् ॥ १४ ॥ प्रलंवितादीर्घाललंतीचलंतीजिह्वायस्यतम् ॥ अत्युत्कटाऽतिविकृताकृकाटिकावटुर्घंटिकायावहिर्भागोयस्यतम् ॥ स्थूलेअस्थिनीययोस्तथाभूतेजत्रुसंस्थानेकंठाधोभागौ यस्यतम् ॥ दीर्घंयत्स्कंधद्वयंतेनोत्कटमुन्नतम् ॥ १५ ॥ निमग्नेकक्षाकुहरेवाहुमूलविवरेयस्यतम् ॥ विमग्नेतिक्वचित् ॥ शुष्कंरुक्षंह्रस्वंखर्वंभुजद्वयंयस्यतम् ॥ विरलाःपरस्परासंलग्नाअंगुलयोययो स्तेहस्ताग्रेयस्यतम् ॥ नताऽधोमुखापीनास्थूलाचनखावलिर्नखपंक्तिर्यस्यतम् ॥ १६ ॥ विशेषेणशुष्कोरुक्षःपांसुलोधूलिधूसरउत्उन्नद्धःक्रोडोयस्यतम् ॥ पृष्ठेलग्नाउदरसंवंधिनीत्वग्यस्यतम् ॥ कटीतटेनश्रोण्युपरिभागेनविकटंभयानकम् ॥ निर्मांसंमांसरहितंत्रिकरूपंबंधनंगुल्फजानुकूर्परलक्षणंयस्यतम् ॥ यद्वा त्रिकबंधनंतिहडाइतिलोकेप्रसिद्धंतन्निर्मांसंयस्यतम् ॥ १७ ॥ प्रलंवंलंवाय मानंयत्स्फिग्युगंकटियुगंतेनान्वितम् ॥ शुष्कोरुक्षोमुष्कोंडकोशोयस्य अल्पंमेहनंशिश्नोयस्यसचसचतम् ॥ अनेनविवस्त्रत्वंसूचितम् ॥ दीर्घौनिर्मांसलौमांसरहितौचऊरूसक्थिनीयस्यतम् ॥ स्वार्थेकः ॥ स्थूलेजानुनीयस्य ॥ अस्थ्नांपंजरमिवास्थिपंजरः ॥ पाठांतरेऽस्थिभिरेववध्यतइत्यस्थिबंधनःसचसचतम् ॥ १८ ॥ अस्थिचर्मणोरवशेषोयस्यतम् ॥ शिराजालितविग्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृनाडीसमूहयुक्तदेहम् ॥ शिरालंशिराभिरलंपर्याप्तंव्याप्तमित्यर्थः ॥ यद्वा शिरालंयथास्यात्तथादीर्घेजंघेयस्यतम् ॥ स्थूलानियानिगुल्फास्थीनिघुटिकिकीकसानितैर्भीषणम् ॥ १९ ॥ अतिविस्तृतौपादौचरणौयस्यतम् ॥ दीर्घावक्राअंगुलयोयस्यतम् ॥ अस्थिचर्मणोरवशेषेणकृत्वाशिराभिस्ताडितःप्रहारितइवविग्रहोयस्यतम् ॥ २० ॥ विकटंकुत्सितम् ॥ भीषणाकार भयजनकाकारम् ॥ विटंकमितिक्वचित् ॥ तत्रापिसएवार्थः ॥ क्षुत्क्षामंबुभुक्षयाकृशम् ॥ अतिलोमशंनिविडलोमवंतम् ॥ दावदग्धद्रुमाकारंवनाग्निभस्मीकृतवृक्षसदृशम् ॥ अतिचञ्चलेलोचने

अतिविस्तृतपादंचदीर्घवक्रकृशांगुलिम् ॥ अस्थिचर्मावशेषेणशिराताडितविग्रहम् ॥ २० ॥ विकटंभीषणाकारंक्षुत्क्षाममतिलोमशम् ॥ दावदग्धद्रु माकारमतिचंचललोचनम् ॥ २१ ॥ मूर्तंभयानकमिवसर्वप्राणिभयप्रदम् ॥ हृदयाकंपनंदृष्ट्वातंप्रेतंवृद्धतापसः ॥ अतिदीनाननंकस्त्वमितिधैर्येणपृष्ट वान् ॥ २२ ॥ कुतस्त्वमिहसंप्राप्तःकस्मात्तेगतिरीदृशी ॥ अनुक्रोशधियारक्षःपृच्छामिवदनिर्भयम् ॥ २३ ॥ अस्माकंतापसानांचनभयंत्वद्विधान्म नाक् ॥ शिवनामसहस्राणांविभूतिकृतवर्मणाम् ॥ २४ ॥ तापसोदीरितमितितद्रक्षःप्रीतिपूर्वकम् ॥ निशम्यप्रांजलिःप्राहतंकृपालुंतपोधनम् ॥ २५ ॥ ॥ राक्षसउवाच ॥ अनुक्रोशोस्तियदितेभगवंस्तापसोत्तम ॥ स्ववृत्तांतंतदावच्मिशृणुष्वावहितःक्षणम् ॥ २६ ॥ प्रतिष्ठानाभिधानोस्तिदेशोगोदावरी तटे ॥ तीर्थप्रतिग्रहरुचिस्तत्रासंब्राह्मणस्त्वहम् ॥ २७ ॥ तेनकर्मविपाकेनप्राप्तोस्मिगतिमीदृशीम् ॥ मरुस्थलेमहाघोरेतरुतोयविवर्जिते ॥ २८ ॥ गतोबहुतरःकालस्तत्रमेवसतोमुने ॥ क्षुधितस्यतृषार्तस्यशीततापसहस्यच ॥ २९ ॥ वर्षत्यपिमहामेघेधारासारैर्दिवानिशम् ॥ प्रावृट्कालेऽनिलेवाति किंचित्प्रावरणंनमे ॥ ३० ॥ पर्वण्यदत्तदानायेकृततीर्थप्रतिग्रहाः ॥ तइमांयोनिमृच्छंतिमहादुःखनिबंधनीम् ॥ ३१ ॥ गतेबहुतिथेकालेमरुभूमौमुने मया ॥ दृष्टोब्राह्मणदायादएकदाकश्चिदागतः ॥ ३२ ॥ सूर्योदयमनुप्राप्यसंध्याविधिविवर्जितः ॥ कृत्वामूत्रपुरीषेतुशौचाचमनवर्जितः ॥ ३३ ॥ मुक्तकच्छमशौचंचसंध्याकर्मविवर्जितम् ॥ तंदृष्ट्वातच्छरीरेहंसंक्रांतोभोगलिप्सया ॥ ३४ ॥ सद्विजोमंदभाग्यान्मेकेनचिद्वणिजासह ॥ अर्थलोभेनसं प्राप्तःपुरींपुण्यामिमांमुने ॥३५॥ अंतःपुरिप्रविष्टोभूत्सद्विजोमुनिसत्तम ॥ तच्छरीराद्बहिर्भूतस्त्वहंपापैःसमंक्षणात् ॥३६॥ प्रवेशोनास्तिचास्माकंप्रेतानां तपसांनिधे ॥ महतांपातकानांचवाराणस्यांशिवाज्ञया ॥३७॥ अद्यापितानिपापानितद्बहिर्निर्गमेच्छया॥बहिरेवहितिष्ठंतिसीम्निप्रमथसाध्वसात् ॥३८॥

यस्यतम् ॥ २१ ॥ किंबहुना मूर्तंमूर्तिमद्भयानकम्भयमिव ॥ अतएवप्राणिमात्रस्यभयप्रदम् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ गोदावरीतीरइतिप्रयागव्यावृत्त्यर्थमुक्तम् ॥ २७ ॥ २८ ॥ ॥ २९ ॥ वातिसति ॥ प्रावरणमाच्छादनम् ॥ ३० ॥ ३१ ॥ ३२॥३३॥ संक्रांतःप्रविष्टः ॥ ३४ ॥ ३५ ॥ पुर्यामित्यन्तःपुरीमध्यइत्यर्थः ॥३६॥३७॥ अद्यापीति ॥ सीम्निसीमनि ॥ सीमा

प्रमयेतिपाठेअदन्तोपिसीमाशब्दोद्रष्टव्यः ॥ अत्रेदन्तात्पर्यम्॥तच्छरीरप्रवेशमात्राशयाकेवलंतस्यवहिर्गमनेच्छयासीम्निपापानितिष्ठंतिनतुप्रवेशोस्तिवाराणस्यांप्रविष्टस्यपुनस्तेषांप्रवेशासंभवात् ॥ यद्वा यस्तुजितेंद्रियोभूत्वायथाविधिकाश्यामायातितस्यैवसर्वाणिपापानिनश्यंति ॥ तदुक्तम् ॥ यस्यहस्तौचपादौचमनश्चापिसुसंयतम्॥विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुतइति ॥ अयंचस्वतएवपापीअविधिनाप्रथमंवर्त्मनिपापमाचरन्नेवार्थलोभेनागतः ॥ यद्वा विभीषिकेयंकाश्यांप्रविष्टैर्बहिर्नगंतव्यामिति ॥ वाराणस्यांप्रविष्टोवहिर्नगच्छेदित्यादिविधेरर्थवादोयंसोऽरोदीदित्यादिवादिति ॥ अतएवएतदपिश्लो

अद्यश्वोवापरश्वोवासबहिर्निर्गमिष्यति ॥ इत्याशयास्थिताःस्मोवैयावदद्यतपोधन ॥ ३९ ॥ नाद्यापिसबहिर्गच्छेन्नाद्याप्याशाप्रयातिनः ॥ इत्यास्महे निराधाराआशापाशनियंत्रिताः ॥ ४० ॥ चित्रमद्यतनंवच्मितपस्विंस्तन्निशामय ॥ अतीवभाविकल्याणमितिमन्येऽधुनैवहि ॥ ४१ ॥ आप्रयागंप्रतिदिनंप्रयामःक्षुधितावयम् ॥ आहारकाम्ययाक्वापिपरंनोकिंचिदाप्नुमः ॥ ४२ ॥ संतिसर्वत्रफलिनःपादपाःप्रतिकाननम् ॥ जलाशयाश्चस्वच्छापाः संतिभूम्यांपदेपदे ॥ ४३ ॥ अन्यान्यपिचभक्ष्याणिसर्वेषांसुलभान्यहो ॥ पानान्यपिविचित्राणिसंतिभूयांसिसर्वतः ॥ ४४ ॥ परंनोदृग्गतान्येवदूरे दूरेव्रजंत्यहो ॥ दैवादद्यैकमायांतंदृष्ट्वाकार्पटिकंमुने ॥४५॥ तस्यांतिकमहंप्रातःक्षुधयापरिपीडितः ॥ प्रसह्यभक्षयाम्येनमितिमत्वात्वरान्वितः ॥ ४६ ॥ यावत्तंतुजिघृक्षामितावत्तद्वदनांबुजात् ॥ शिवनामपवित्रावाङ्निरगाद्विघ्नहारिणी ॥ ४७ ॥ शिवनामस्मरणतोमदीयमपिपातकम् ॥ मंदीभूतंततस्तेन प्रवेशंलब्धवानहम् ॥ ४८ ॥ सीमस्थैःप्रमथैर्नाहंसद्योदृग्गोचरीकृतः ॥ शिवनामश्रुतौयेषांतान्नपश्येद्यमोपियत् ॥ ४९ ॥ अंतर्गेहस्यसीमानंप्राप्तस्ते नसहाधुना ॥ सतुकार्पटिकोमध्यंप्रविष्टोहमिहास्थितः ॥ ५० ॥ आत्मानंबहुमन्येहंत्वांविलोक्याधुनामुने ॥ मामुद्धरकृपालोत्वंयोनेरस्मात्सुदारुणात् ॥ ५१ ॥ इतिप्रेतवचःश्रुत्वासकृपालुस्तपोधनः ॥ मनसाचिंतयामासधिङ्निजार्थोद्यमान्नरान् ॥ ५२ ॥ स्वोदरंभरयःसर्वेपशुपक्षिमृगादयः ॥ सएवधन्यःसंसारेयःपरार्थोद्यतःसदा ॥५३॥ तपसाद्यनिजेनाहंप्रेतमेतमघातुरम् ॥ मामेवशरणंप्राप्तमुद्धरिष्याम्यसंशयम् ॥ ५४ ॥ विमृश्येतिसवैचित्ते पिशाचंप्राहसत्तमः ॥ विमलोदेसरस्यस्मिन्स्नाहिरेपापनुत्तये ॥ ५५ ॥

कद्वयंकालभैरवोक्तंस्वल्पनारदीयस्थम् ॥ सीमायांतिष्ठतेदेवब्रह्महत्यासुदारुणा ॥ वस्तुमिच्छाम्यहंक्षेत्रेतवचक्रगदाधर॥सत्वांयाचेजगन्नाथदेहिक्षेत्रंसदैवमे ॥ ममनिर्गमनेहत्यापुनरेवप्रवर्त्ततेइत्यनयैवादिशानेयामितिसर्वमनवद्यम् ॥ ३८ ॥ ३९ ॥ ४० ॥ तर्हित्वंकथमत्रकाश्यांप्रविष्टोसीत्यतआह ॥ चित्रमिति ॥४१॥४२॥४३॥ दृग्गतानिसंतीत्यन्वयः ॥ पानानिप्रपानकादीनि ॥ पाकान्यपीतिक्वचित्पाठः ॥ तत्रपक्वानीत्येव ॥४४॥४५॥४६॥ ४७॥ ४८ ॥ नेत्रविषयाकरणेकैमुतिकंहेतुमाह ॥ शिवेति ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ सत्तमःसतांमध्येश्रेष्ठः ॥ तापस

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिकचित् ॥ ५५ ॥ ५६ ॥ ५७ ॥ यतोरक्षेयुः ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ विभूतिधारणमेवपाशुपतास्त्रम् ॥ ६२ ॥ दूरगमनमात्रेदृष्टांतः ॥ अस्थीति ॥ अस्थिध्वजांकितं शवकंकालाद्युपलक्षितम् ॥ ६३ ॥ शिवमंत्रैर्नमःशिवायेत्यादिभिः ॥ ६४ ॥ भालेवक्षसिदोर्मूलेशिरस्यपिवोद्धव्यम् ॥ शिरोललाटवक्षःस्कन्धेष्वितिश्रुतेः ॥ ६५ ॥ अग्निहोत्रादिदग्धस्यकरी

पिशाचतेपिशाचत्वंतीर्थस्यास्यप्रभावतः ॥ कपर्दीशेक्षणाद्यक्षणात्क्षीणंविनंक्ष्यति ॥ ५६ ॥ श्रुत्वेतिसमुनेर्वाक्यंप्रेतःप्राहप्रणम्यतम् ॥ प्रीतात्माप्रीतमनसंप्रबद्धकरसंपुटः ॥५७॥ पानीयंपातुमपिनोलभेयंमुनिसत्तम ॥ स्नानस्यकाकथानाथरक्षेयुर्जलदेवताः ॥५८॥ पानस्याप्यत्रकावार्ताजलस्पर्शोपिदुर्लभः ॥ इतिप्रेतोक्तमाकर्ण्यसभृशंप्रीतिमानभूत् ॥ ५९ ॥ उवाचचतपस्वीतंजगदुद्धरणक्षमः ॥ गृहाणेमांविभूतिंत्वंललाटफलकेकुरु ॥ ६० ॥ अस्माद्विभूतिमाहात्म्यात्प्रेतकोपिनकुत्रचित् ॥ बाधांकरोतिकस्यापिमहापातकिनोप्यहो ॥ ६१ ॥ भालंविभूतिधवलंविलोक्ययमकिंकराः ॥ पापिनोपिपलायंतेभीताःपाशुपतास्त्रतः ॥ ६२ ॥ अस्थिध्वजांकितंदृष्ट्वायथापांथाजलाशयम् ॥ दूरयंतितथाभस्मभालांकंयमकिंकराः ॥ ६३ ॥ कृतभूतितनुत्राणंशिवमंत्रैर्नरोत्तमम् ॥ नोपसर्पंतिनियतमपिहिंस्राःसमंततः ॥ ६४ ॥ भक्त्याबिभर्तियोभस्मशिवमंत्रपवित्रितम् ॥ भालेवक्षसिदोर्मूलेनतांहिंसंतिहिंसकाः ॥ ६५ ॥ सर्वेभ्योदुष्टसत्त्वेभ्योयतोरक्षेदहर्निशम् ॥ रक्षत्येषाततःप्रोक्ताविभूतिर्भूतिकृद्यतः ॥ ६६ ॥ भासनाद्भर्त्सनाद्भस्मपांसुःपांसुत्वदायतः ॥ पापानांक्षारणात्क्षारोबुधैरेवंनिरुच्यते ॥ ६७ ॥ गृहीत्वाधारमध्यात्सभस्मप्रेतकरेऽर्पयत् ॥ सोप्यादरात्समादायभालदेशेन्यवेशयत् ॥ ६८ ॥ विभूतिधारिणंवीक्ष्यपिशाचंजलदेवताः ॥ जलावगाहनपरंवारयांचक्रिरेनतम् ॥ ६९ ॥ स्नात्वापीत्वासनिर्गच्छेद्यावत्तस्माज्जलाशयात् ॥ तावत्पैशाच्यमगमद्दिव्यदेहमवापच ॥ ७० ॥ दिव्यमालांबरधरोदिव्यगंधानुलेपनः ॥ दिव्ययानंसमारुह्यवर्त्मप्राप्तोथपावनम् ॥ ७१ ॥ गच्छतातेनगगनेसतपस्वीनमस्कृतः ॥ प्रोच्चैःप्रोवाचभगवन्मोचितोस्मित्वयानघ ॥ ७२ ॥ तस्मात्कदर्ययोनित्वादतीवपरिनिंदितात् ॥ अस्यतीर्थस्यमाहात्म्याद्दिव्यंदेहमवाप्तवान् ॥७३॥ पिशाचमोचनंतीर्थमद्यारभ्यसमाख्यया ॥ अन्येषामपिपैशाच्यमिदंस्नानाद्धरिष्यति ॥७४॥ अस्मिंस्तीर्थेमहापुण्येयेस्नास्यंतीहमानवाः ॥ पिंडांश्चनिर्वपिष्यंतिसंध्यातर्पणपूर्वकम् ॥ ७५ ॥ दैवात्पैशाच्यमापन्नास्तेषांपितृपितामहाः ॥ तेपिपैशाच्यमुत्सृज्ययास्यंतिपरमांगतिम् ॥ ७६ ॥ अग्रशुक्लचतुर्दश्यांमार्गेमासितपोनिधे ॥ अत्रस्नानादिकंकार्यंपैशाच्यपरिमोचनम् ॥ ७७ ॥ इमांसांवत्सरींयात्रांयेकरिष्यंतिमानवाः ॥ तीर्थप्रतिग्रहात्पापान्निःसरिष्यंतितेनराः ॥ ७८ ॥

पादेर्नामपंचकंनिर्वक्ति सर्वेभ्यइतिद्वयेन ॥ ६६ ॥ भासनाज्जगत्प्रकाशनात् ॥ भर्त्सनादविघातत्कार्ययोस्तिरस्करणात् ॥ पांसुत्वदायतःपांसुत्वंपापत्वंद्यातिखण्डयति निपातनात्साधुत्वम् ॥ ॥ ६७ ॥ गृहीत्वेत्यस्यपूर्वमितिशब्दोज्ञातव्यः ॥ इतिएवंनिर्वचनंकृत्वा ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

CC-0. In Public Domain. Digitization by eGangotri

नरोनराः ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ वालग्रहाभिभूतानांवालग्रहाःपूतनाद्यास्तदभिभूतास्तदाक्रांतास्तेषांवालानाम् ॥८६॥८७॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ अध्यायेपंचपंचाशेमहिमानन्दकाननः ॥ पिंगलाद्यैर्गणेशैश्चलिंगाराधनमुच्यते ॥ १ ॥ १ ॥ उदगुत्तरस्याम् ॥ २ ॥ ३ ॥

पिशाचमोचनेस्नात्वाकपर्दीशंसमर्च्यच ॥ कृत्वातत्रान्नदानंचनरोन्यत्रापिनिर्भयाः ॥ ७९ ॥ मार्गशुक्लचतुर्दश्यांकपर्दीश्वरसंनिधौ ॥ स्नात्वान्यत्रापि मरणान्नपैशाच्यमवाप्नुयुः ॥ ८० ॥ इत्युक्त्वादिव्यपुरुषोभूयोभूयोनमस्यतम् ॥ तपोधनंमहाभागोदिव्यांगतिमवाप्तवान् ॥८१॥ तपोधनोपितद्दृष्ट्वामहाश्चर्यंघटोद्भव ॥ कपर्दीश्वरमाराध्यकालान्निर्वाणमाप्तवान् ॥ ८२ ॥ पिशाचमोचनंतीर्थंतदारभ्यमहामुने ॥ वाराणस्यांपरांख्यातिमगमत्सर्वपापहृत् ॥ ॥ ८३ ॥ पैशाचमोचनेतीर्थेसंभोज्यशिवयोगिनम् ॥ कोटिभोज्यफलंसम्यगेकैकपरिसंख्यया ॥ ८४ ॥ श्रुत्वाध्यायमिमंपुण्यंनरोनियतमानसः ॥ भूतैःप्रेतैःपिशाचैश्चकदाचिन्नाभिभूयते ॥ ८५ ॥ बालग्रहाभिभूतानांबालानांशांतिकारकम् ॥ पठनीयंप्रयत्नेनमहाख्यानमिदंपरम् ॥ ८६ ॥ इदमाख्यानमाकर्ण्यगच्छन्देशांतरंनरः ॥ चोरव्याघ्रपिशाचाद्यैर्नाभिभूयेतकुत्रचित् ॥ ८७ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेपिशाचमोचनमहिमाकथनंनामचतुष्पंचाशत्तमोऽध्यायः ॥५४॥ ॥ स्कंदउवाच ॥ अन्येपियेगणास्तत्रकाश्यांलिंगानिचक्रिरे ॥ तांश्चतेकथयिष्यामिकुंभयोनेनिशामय ॥ १ ॥ गणेनापिंगलाख्येनपिंगलाख्येशसंज्ञितम् ॥ लिंगंप्रतिष्ठितंशंभोःकपर्दीशादुदग्दिशि ॥२॥ तस्यदर्शनमात्रेणपापानांजायतेक्षयः ॥ वीरभद्रोमहाप्रीतोदेवदेवस्यशूलिनः ॥ ३ ॥ वीरभद्रेश्वरंलिंगंध्यायेद्यापिनिश्चलः ॥ तस्यदर्शनमात्रेणवीरसिद्धिःप्रजायते ॥ ४ ॥ अविमुक्तेश्वरात्पश्चाद्वीरभद्रेश्वरंनरः ॥ समर्च्यनरणेभंगंकदाचिदपिचाप्नुयात् ॥ ५ ॥ वीरभद्रःस्वयंसाक्षाद्वीरमूर्तिधरोमुने ॥ संहरेद्विघ्नसंघातमविमुक्तनिवासिनाम् ॥ ६ ॥ भद्रयाभद्रकाल्याचभार्ययाशुभयायुतम् ॥ वीरभद्रंनरोभ्यर्च्यकाशीवासफलंलभेत् ॥ ७ ॥ किरातेनाकिरातेशंलिंगंकाश्यांप्रतिष्ठितम् ॥ केदाराद्दक्षिणेभागेभक्तानामभयप्रदम् ॥ ८ ॥ चतुर्मुखोगणःश्रीमान्वृद्धकालेशसन्निधौ ॥ चतुर्मुखेश्वरंलिंगंध्यायेद्यापिनिश्चलः ॥ ९ ॥ भक्ताश्चतुर्मुखेशस्यचतुराननवद्दिवि ॥ पूज्यंतेसुरसंघातैःसर्वभोगसमन्विताः ॥ १० ॥ निकुंभेश्वरमालोक्यनिकुंभगणपूजितम् ॥ पूजयित्वात्रजन्ग्रामंकार्यसिद्धिमवाप्नुयात् ॥ कुबेरेशसमीपेतुशिवलोकेमहीयते ॥ ११ ॥ पंचाक्षेशंमहालिंगंमहादेवस्यदाक्षिणे ॥ समभ्यर्च्यनरःकाश्यांजातिस्मृतिमवाप्नुयात् ॥ १२ ॥ भारभूतेश्वरंलिंगंभारभूतगणार्चितम् ॥ अंतर्गृहोत्तरद्वारेध्यात्वाशिवपुरेवसेत् ॥ १३ ॥ भारभूतेश्वरंलिंगंयैःकाश्यांनविलोकितम् ॥ भारभूताःपृथिव्यास्तेऽवकेशिनइवद्रुमाः ॥ १४ ॥

॥ ४ ॥ ५ ॥ ६ ॥ शुभयाशुभकारिण्या ॥ ७ ॥ ८ ॥ वृद्धकालेशसन्निधौदक्षिणभागइत्यनुषज्जते ॥ ९ ॥ १० ॥ तथाकुबेरेशसमीपइति ॥ ११ ॥ १२ ॥ १३ ॥ अवकेशिनोऽफलाः ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गणेनत्र्यक्षसंज्ञेनलिंगंत्र्यक्षेश्वरंपरम् ॥ त्रिलोचनपुरोभागेशील्येताद्यापिकुंभज ॥ १५ ॥ तस्यलिंगस्ययेभक्तास्तेतुदेहावसानतः ॥ त्र्यक्षाएवप्रजायंते नात्रकार्याविचारणा ॥ १६ ॥ क्षेमकोनामगणपःकाश्यांमूर्तिधरःस्वयम् ॥ विश्वेश्वरंसर्वगतंध्यायेदद्यापिनिश्चलः ॥१७॥ क्षेमकंपूजयेद्यस्तुवाराणस्यां महागणम् ॥ विघ्नास्तस्यप्रलीयंतेक्षेमंस्याच्चपदेपदे ॥ १८ ॥ देशांतरंगतोयस्तुतस्यागमनकाम्यया ॥ क्षेमकःपूजनीयोत्रक्षेमेणाशुसआव्रजेत् ॥१९॥ लांगलीश्वरमालोक्यलिंगंलांगलिनार्चितम् ॥ विश्वेशादुत्तरेभागेननरोरोगभाग्भवेत् ॥ २० ॥ लांगलीशंसकृत्पूज्यपंचलांगलदानजम् ॥ फलंप्राप्नोत्य विकलंसर्वसंपत्करंपरम् ॥ २१ ॥ विराधेश्वरमाराध्यविराधगणपूजितम् ॥ सर्वापराधयुक्तोपिनापराध्यतिकुत्रचित् ॥ २२ ॥ दिनेदिनेपराधोयःक्रियते काशिवासिभिः ॥ सयातिसंक्षयंक्षिप्रंविराधेशसमर्चनात् ॥ २३ ॥ नैर्ऋतेदंडपाणस्तुविराधेशंप्रयत्नतः॥ नत्वासर्वापराधेभ्योमुच्यतेनात्रसंशयः॥२४॥ सुमुखेशंमहालिंगंसुमुखाख्यगणार्चितम् ॥ पश्चिमाभिमुखंलिंगंदृष्ट्वापापैःप्रमुच्यते ॥ २५ ॥ स्नात्वापिलिपिलातीर्थे सुमुखेशंविलोक्यच ॥ सदै वसुमुखंपश्येद्धर्मराजंनदुर्मुखम् ॥ २६ ॥ आषाढिनार्चितंलिंगमाषाढीश्वरसंज्ञकम् ॥ दृष्ट्वाषाढ्यांनरोभक्त्यासर्वैःपापैःप्रमुच्यते ॥ २७ ॥ उदी च्यांभारभूतेशादाषाढीशंसमर्चयन् ॥ आषाढ्यांपंचदश्यांवैनपापैःपरितप्यते ॥ २८ ॥ शुचिशुक्लचतुर्दश्यांपंचदश्यामथापिवा ॥ कृत्वासांवत्सरीं यात्रामनेनाजायतेनरः ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ मुनेगणेषुचैतेषुवाराणस्यांस्थितेष्विति ॥ स्वनाम्नास्थाप्यलिंगानिविश्वेशपरितुष्टये ॥ ॥ ३० ॥ विश्वेशश्चिंतयांचक्रेपुनःकाशीप्रवृत्तये ॥ कंवाहितंप्रहित्याद्यनिर्वृतिंपरमांभजे ॥ ३१ ॥ योगिन्यस्तिग्मगुर्वेधाःशंकुकर्णमुखागणाः ॥ व्यावृत्त्यनागताःकाश्याःसिंधुगाइवसिंधवः ॥ ३२ ॥ ध्रुवंकाश्यांप्रविष्टायेतेप्रविष्टाममोदरे ॥ तेषांविनिर्गमोनास्तिदीप्तेग्नौहविषामिव ॥ ३३ ॥ येषांहिसंस्थितिःकाश्यांलिंगार्चनरतात्मनाम् ॥ तएवममलिंगानिजंगमानिनसंशयः ॥ ३४ ॥ स्थावराजंगमाःकाश्यामचेतनसचेतनाः ॥ सर्वेममैव लिंगानितेभ्योद्रुह्यंतिदुर्धियः ॥ ३५ ॥ वाचिवाराणसीयेषांश्रुतौवैश्वेश्वरीकथा ॥ तएवकाशीलिंगानिवराण्यच्यार्न्यहंयथा ॥ ३६ ॥ वाराणसीतिकाशी तिरुद्रावासइतिस्फुटम् ॥ मुखाद्विनिर्गतंयेषांतेषांनप्रभवेद्यमः ॥ ३७ ॥

॥ ३८ ॥ ३९ ॥ सलक्ष्मीनिलयांलक्ष्म्याश्रयसहिताम् ॥ सल्लक्ष्मीतिक्वचित् ॥ सुलक्ष्मीतिचान्यत्र ॥ कुतःकस्याः ॥ धियःबुद्धेः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ अविच्छिन्नप्रमाणा अपरिमितप्रमाणासमृद्धिर्यस्याःसाअविच्छिन्नप्रमाणर्धिः ॥ षष्ठ्यन्तपाठेममेतयस्यविशेषणम् ॥ ४४ ॥ विश्रामभूमिकाविश्रामस्थानम् ॥ विश्रामभूरिवेतिक्वचित् ॥ ४९ ॥ फलितःसंजातफलः ॥

आनंदकाननंप्राप्ययेनिरानंदभूमिकाम् ॥ अन्यांहृदापिवांछंतिनिरानंदाःसदात्रते ॥ ३८ ॥ अद्यैववास्तुमरणंबहुकालांतरेपिवा ॥ कलिकालभियापुंसां काशीत्याज्यानकर्हिचित् ॥ ३९ ॥ अवश्यंभाविनोभावाभविष्यंतिपदेपदे ॥ सलक्ष्मीनिलयांकाशींतेत्यजंतिकुतोधियः ॥ ४० ॥ वरंविघ्नसहस्राणिसोढव्यानिपदेपदे ॥ काश्यांनान्यत्रनिर्विघ्नंवांछेद्राज्यमपिक्वचित् ॥ ४१ ॥ कियन्निमेषसंभोग्याःसंतिलक्ष्म्याःपदेपदे ॥ परंनिरंतरसुखाऽमुत्राप्यत्रापिकाशिका ॥ ४२ ॥ विश्वनाथोह्यहंनाथःकाशिकामुक्तिकाशिका ॥ सुधातरंगास्वर्गंगात्र्ययेषाकिन्नयच्छति ॥ ४३ ॥ पंचक्रोश्यापरिमितातनुरेषापुरीमम ॥ अविच्छिन्नप्रमाणर्धिर्भक्तनिर्वाणकारणम् ॥ ४४ ॥ संसारभारखिन्नानांयातायातकृतांसदा ॥ एकैवमेपुरीकाशीध्रुवंविश्रामभूमिका ॥ ४५ ॥ मंडपःकल्पवल्लीनांमनोरथफलैरलम् ॥ फलितःकाशिकाख्योयंसंसाराध्वजुषांसदा ॥ ४६ ॥ चक्रवर्तेरियंछत्रंविचित्रंसर्वतापहृत् ॥ काशीनिर्वाणराजस्यममशूलोच्चदंडवत् ॥ ४७ ॥ निर्वाणलक्ष्मींयेपुण्याःपरिवांछंतिलीलया ॥ निरंतरसुखप्राप्त्यैकाशीत्याज्यानतैर्नृभिः ॥ ४८ ॥ ममानंदवनेयेवैनिरंतरवनौकसः ॥ मोक्षलक्ष्मीफलान्यत्रसुस्वादूनिलभंतिते ॥४९॥ निर्ममंचापिनिर्मोहंयामामपिविमोहयेत् ॥ कैर्नसंस्मरणीयासाकाशीविश्वविमोहिनी ॥ ॥ ५० ॥ नामापिमधुरंयस्याःपरानंदप्रकाशकम् ॥ काश्याःकाशीतिकाशीतिसाकैःपुण्यैर्नजप्यते ॥ ५१ ॥ काशीनामसुधापानंयेकुर्वंतिनिरंतरम् ॥ तेषांवर्त्मभवत्येवसुधामवसुधामयम् ॥ ५२ ॥ ममतारहितस्यापिममसर्वात्मनोध्रुवम् ॥ तएवमामकालोकेयेकाशीनामजापकाः ॥ ५३ ॥ रहस्यमितिविज्ञायवाराणस्यागणेश्वरैः ॥ सब्रह्मयोगिनीव्रध्नैःस्थितंतत्रैवनान्यथा ॥ ५४ ॥ अन्यथाताश्चयोगिन्यःसरविःसपितामहः ॥ तेगणामांपरित्यज्यकथंतिष्ठेयुरन्यतः ॥ ५५ ॥ अतीवभद्रंसंजातंकाश्यांतिष्ठत्सुतेषुहि ॥ एकोपिभेदेप्रभवेद्राज्येराज्यांतरंविना ॥ ५६ ॥

॥ ४६ ॥ निर्वाणराजस्यचक्रवर्तेरितिसंबन्धः ॥ चक्रवर्तेरित्यार्षम् ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ राज्येपरराष्ट्रे ॥ राज्यान्तरंविमाराज्यांतरमप्राप्यश्र

CC-0. In Public Domain. Digitization by eGangotri

ष्ट्राज्योपीत्यर्थः ॥ राज्यांतरस्यनेतिपाठेनापुरुषोराज्यांतरस्यभेदेप्रभवोदित्यन्वयः ॥ राज्यांतरेष्वपीत्यन्यत्र ॥ ५६ ॥ यतोयस्मात् ॥ ततइतिक्कचित् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥
इतिश्रीरामानंदकृतायांकाशीखंडटीकायांपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ षडुत्तरेथपंचाशेप्यध्यायेत्यन्तपावने ॥ ढुंढेर्मायाप्रपंचश्चवर्ण्यतेतिसुखप्रदः ॥ १ ॥ अथेतिमंगलार्थः ॥ १ ॥
आशुस्यंदनगःशीघ्रगामिरथगः ॥ आखिवतिक्कचित् ॥ वाडवींमूर्तिंब्राह्मणमूर्तिम् ॥ वाडवंकरणेस्त्रीणांवोटकौघेनपुंसकम् ॥ पातालेनास्त्रियांपुंसिब्राह्मणेवडवानलइतिमेदिनीकारः ॥ शकुनैर्यात्रिकै

लब्धप्रवेशास्तावंतस्तेसर्वेमत्स्वरूपिणः ॥ यतिष्यंतियतोवश्यंमदागमनहेतवे ॥५७॥ अन्यानपिप्रेषयामिमत्पार्श्वपरिवर्तिनः ॥ येतेतत्रस्थिताःश्रेष्ठाअ
पिगंतास्म्यहंततः ॥ ५८ ॥ विचार्येतिमहादेवःसमाहूयगजाननम् ॥ प्राहिणोत्कथयित्वेतिगच्छकाशीमितःसुत ॥ ५९ ॥ तत्रस्थितोपिसंसिद्ध्यै
यतस्वसहितोगणैः ॥ निर्विघ्नंकुरुचास्माकंनृपेविघ्नंसमाचर ॥ ६० ॥ आधायशासनंमूर्ध्निगणाधीशोथधूर्जटेः ॥ प्रतस्थेत्वरितःकाशींस्थितिज्ञःस्थ
तिहेतवे ॥६१॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेकाशीवर्णनगणेशप्रेषणंनामपंचपंचाशत्तमोऽध्यायः॥५५॥
॥स्कंदउवाच॥ ॥ अथेशाज्ञांसमादायगजवक्त्रःप्रतस्थिवान् ॥ शंभोःकाश्यागमोपायंचिंतयन्मंदराद्रितः ॥ १ ॥ प्राप्यवाराणसींतूर्णमाशुस्यंदनगो
विभुः ॥ वाडवींमूर्तिमालंब्यप्राविशच्छकुनैःस्तुतः ॥ २ ॥ नक्षत्रपाठकोभूत्वावृद्धःप्रत्यवरोधगः ॥ चचारमध्येनगरंपौराणांप्रीतिमावहन् ॥३॥ स्वयमेव
निशाभागेस्वप्नंसंदर्शयन्नृणाम् ॥ प्रातस्तेषांगृहान्गत्वातेषांवक्तिबलाबलम् ॥ ४ ॥ भवद्भिरद्यरात्रौयद्दृष्टंस्वप्नविचेष्टितम् ॥ भवत्कौतूहलोत्पत्त्यैतदे
वकथयाम्यहम् ॥ ५ ॥ स्वपताभवतारात्रौतुर्येयामेमहाह्रदः ॥ अदर्शितत्रचभवान्मज्जन्मज्जंस्तटंगतः ॥ ६ ॥ तदंबुपिच्छिलेपंकेमग्नोन्मग्नोसिभू
रिशः ॥ दुःस्वप्नस्यास्यचमहान्विपाकोतिभयप्रदः ॥ ७ ॥ काषायवसनोमुंडःप्रेक्ष्यहोभवतापियः ॥ परितापंमहानेषजनयिष्यतिदारुणम् ॥ ८ ॥
रात्रौसूर्यग्रहोदृष्टोमहानिष्टकरोध्रुवम् ॥ ऐंद्रंधनुर्द्वयंरात्रौयदलोकिनतच्छुभम् ॥ ९ ॥ प्रतीच्यांरविरागत्यप्रोद्यंतंव्योम्निशीतगुम् ॥ पातयामासभूपृष्ठेतद्रा
ज्यभयसूचकम् ॥ १० ॥ युगपत्केतुयुगलंयुध्यमानंपरस्परम् ॥ यददर्शिनतद्द्वंद्वंराष्ट्रभंगायकेवलम् ॥ ११ ॥ विशीर्यत्केशदशनंनीयमानंचदक्षिणे ॥
आत्मानंयत्समद्राक्षीःकुटुंबस्यापिभीषणम् ॥ १२ ॥ प्रासादध्वजभंगोयस्त्वयैक्षतनिशाक्षये ॥ राज्यक्षयकरंविद्धिमहोत्पातायनिश्चितम् ॥ १३ ॥

मांगलिकैःसवत्सधेनुप्रमुखैरितियावत् ॥ स्तुतःस्तुतेर्विषयीकृतः ॥ सध्रीचीनेलग्नेकाश्यांप्रविष्टइत्यर्थः ॥ २ ॥ नक्षत्रपाठकोज्योतिर्वित् ॥ प्रत्यवरोधगःप्रत्यन्तःपुरगःप्रतिवेश्मगइत्यर्थः ॥ ३ ॥
॥ ४ ॥ ५ ॥ ६ ॥ मग्नश्चासौउन्मग्नश्चेतिमग्नोन्मग्नः ॥ मग्नोमग्नइतिक्कचित् ॥ विपाकःफलम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ ऐक्षतदृष्टः ॥ त्वयैवैक्षीतिक्कचित् ॥ यत्त्वयावीक्षितः

CC-0. In Public Domain. Digitization by eGangotri

पतन्निितिचान्यत्र ॥ १३ ॥ १४ ॥ १५ ॥ महिलास्त्री ॥ १६ ॥ १७ ॥ मृगाःकुक्करास्ततत्साधारणावातेषाम् ॥ यूथैःसमूहैः ॥ १८ ॥ आतायिश्चिल्लः यूकोघूकस्ततत्प्रतिपक्षभूतोवकोवा ॥ घूकेतिवापाठः ॥ गृध्रोदाक्षाय्यः ॥ एतेआद्यायेषांतैः ॥ आतायिघूकगृध्रौघैरितिक्वचित्पाठः ॥ अत्याहितंमहाभीतिः ॥ १९ ॥ २० ॥ ग्रहचारंग्रहगतिम् ॥ ग्रहचारमेवाह ॥ एकराशीति ॥ सौरिःशनिः ॥ सितःशुक्रः ॥ २१ ॥ सम्प्रसिद्धः ॥ यइतिवापाठः ॥ धूमग्रहःकेतुः ॥ २२ ॥ अतिचारगतोराशिमुल्लंघ्यगतः ॥ मंदःशनिः ॥ पापग्रहाराहुकेतुभौमास्तैःसमायुक्तः ॥ २३ ॥

नगरीप्लावितास्वप्नेतरंगैःक्षीरनीरधेः ॥ पक्षैस्त्रिचतुरैःशंकेमहाशकांपुरौकसाम् ॥ १४ ॥ स्वप्नेवानरयानेनयत्त्वमूढोसिदक्षिणाम् ॥ अतस्तद्वंचनोपायःपुरत्यागोमहामते ॥ १५ ॥ रुदतीयात्वयादृष्टामहिलैकानिशात्यये ॥ मुक्तकेशीविवसनासानारीश्रीरिवोद्गता ॥ १६ ॥ देवालयस्यकलशोयत्त्वयावीक्षितःपतन् ॥ दिनैःकतिपयैरेवराज्यभंगोभविष्यति ॥ १७ ॥ पुरीपरिवृतास्वप्नेमृगयूथैःसमंततः ॥ रोरूयमाणैरत्यर्थंमासेनैवोद्वसीभवेत् ॥ १८ ॥ आतायियूकगृध्राद्यैःपुरीमुपरिचारिभिः ॥ सूच्यतेत्याहितंकिंचिद्ध्रुवमत्रनिवासिनाम् ॥१९॥ स्वप्नोत्पातानितिबहून्शंसन्शंसन्नितस्ततः ॥ बहूनुच्चाट्यांचक्रेसविघ्नेशःपुरौकसः ॥ २० ॥ केषांचित्पुरतोवादीद्ग्रहचारंप्रदर्शयन् ॥ एकराशिस्थिताःसौरिसितभौमानशोभनाः ॥ २१ ॥ सोयंधूमग्रहोव्योम्निभित्त्वासप्तर्षिमंडलम् ॥ प्रयातःपश्चिमामाशांसनाशायविशांपतेः ॥ २२ ॥ अतिचारगतोमंदःपुनर्वक्राध्वसंस्थितः ॥ पापग्रहसमायुक्तोनयुक्तोयमिहेष्यते ॥ २३ ॥ व्यतीतेवासरेयोयंभूकंपःसमपद्यत ॥ कंपंजनयतेऽतीवहृदोमेपिपुरौकसः ॥ २४ ॥ उदीच्यादक्षिणाशायांयेयमुल्काप्रधाविता ॥ विलीनाचवियत्येवसनिर्घातंनसाशुभा ॥ २५ ॥ उन्मूलितोमहामूलोमहानिलरयेणयः ॥ चत्वरेचैत्यवृक्षोयंमहोत्पातंप्रशंसति ॥ २६ ॥ सूर्योदयमनुप्राप्यप्राच्यांशुष्कतरूपरि ॥ करटोरारटीत्येषकटूत्कटभयप्रदः ॥ २७ ॥ मध्येविपणियत्तूर्णंकौचिच्चारण्यचारिणौ ॥ मृगौमृगयतांयातौपौराणांपुरतोऽहितौ ॥२८॥ रसालशालमुकुलंवीक्ष्यतेयच्छरद्यदः ॥ महाकालभयंमन्येप्यकालेपिपुरौकसाम् ॥ २९ ॥ साध्वसंजनयित्वेतिकेचिदुच्चाटिताःपुरः ॥ तेनविघ्नकृतापौराःकपटद्विजरूपिणा ॥ ३० ॥

॥ २४ ॥ २५ ॥ चत्वरेचतुष्पथे ॥ चैत्यवृक्षःपूज्यतरुः ॥ २६ ॥ करटःकाकः ॥ रारटीतिअतिशयेनभाषते ॥ कटुयथास्यात् ॥ २७ ॥ पण्यवीथिकामध्येमध्येविपणि ॥ मृगयतामन्वेषणंकुर्वताम् ॥ अनादरेषष्ठी ॥ मृगयतोनादृत्य ॥ यद्यस्मायातौइतिवातूर्णंयातौमृगौतावग्रतोऽहितौअहितशंसकावित्यर्थः॥२८॥ रसालाआम्राःशालाःसर्जास्तेषांमुकुलंकुड्मलम् ॥२९॥पुरःपुर्यः॥३०॥

१ शरदिकृतावित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवरोधमन्तःपुरम् ॥ ३१ ॥ वाह्याल्यांवहिःसेतौ ॥ ३२ ॥ ३३ ॥ अलंकृतिरलंकारः ॥ ३४ ॥ ३५ ॥ गुणानिति ॥ तस्येतिशेषः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ कलाःशैवतंत्रोक्ताश्चतुःषष्टिलक्षणास्तासांकलापःसमूहस्तत्रकुशलः ॥ ४१ ॥ भोक्ताधर्माविरोधेनभोगवान् ॥ ४२ ॥ ४३ ॥ विन्यवेदयद्विशेषेण ज्ञापितवती ॥ ४४ ॥ गुणैर्वृद्धोमहत्तरः ॥ ब्रह्मनिधि

अथमध्येवरोधंसप्रविश्यनिजमायया ॥ दृष्टार्थमेवकथयन्स्त्रीणांविस्रंभभूरभूत् ॥३१॥ तवपुत्रशतंजज्ञेसत्तोनंशुभलक्षणे ॥ तेष्वेकस्तुरगारूढोबाह्यालयां पतितोमृतः ॥ ३२ ॥ अंतर्वत्नीत्वियंकन्यांजनयिष्यतिशोभनाम् ॥ एषाहिदुर्भगापूर्वसांप्रतंसुभगाऽभवत् ॥ ३३ ॥ असौहिराज्ञोराज्ञीनामत्यंत मिहवल्लभा ॥ मुक्तालंकृतिरेतस्यैराज्ञादत्तानिजोरसः ॥ ३४ ॥ पंचसप्तदिनान्येवजातानीतीहतर्क्यते ॥ अस्यैराज्ञाप्रसादेनग्रामौदातुमुदीरितौ ॥ ३५॥ इतिदृष्टार्थकथनैराज्ञीमान्योभवद्द्विजः ॥ वर्णयंतिचताराज्ञःपरोक्षेपिगुणान्बहून् ॥ ३६ ॥ अहोयादृगसौविप्रःसर्वत्रातिविचक्षणः ॥ सुशीलश्चसुरूपश्च सत्यवाङ्मितभाषणः ॥ ३७ ॥ अलोलुपउदारश्चसदाचारोजितेंद्रियः ॥ अपिस्वल्पेनसंतुष्टःप्रतिग्रहपराङ्मुखः ॥ ३८ ॥ जितक्रोधःप्रसन्नास्य स्त्वनसूयुरवंचकः ॥ कृतज्ञःप्रीतिसुमुखःपरिवादपराङ्मुखः ॥३९॥ पुण्योपदेष्टापुण्यात्मासर्वव्रतपरायणः॥शुचिःशुचिचरित्रश्चश्रुतिस्मृतिविशारदः ॥ ॥ ४० ॥ धीरःपुण्येतिहासज्ञःसर्वदृक्सर्वसंमतः ॥ कलाकलापकुशलोज्योतिःशास्त्रविदुत्तमः ॥ ४१ ॥ क्षमीकुलीनोऽकृपणोभोक्तानिर्मलमानसः ॥ इत्यादिगुणसंपन्नःकोपिक्कापिनदृग्गतः ॥ ४२ ॥ इत्थंतास्तद्गुणग्राममंवर्णयंत्यःपदेपदे ॥ कालंविनोदयंतिस्मअंतःपुरचराःस्त्रियः ॥ ४३॥ एकदावसरं प्राप्यदिवोदासस्यभूभुजः ॥ राज्ञीलीलावतीनामराज्ञेतंविन्यवेदयत् ॥ ४४ ॥ राजन्वृद्धोगुणैर्वृद्धोब्राह्मणःसुविचक्षणः ॥ एकोस्तिसतुद्रष्टव्योमूर्तो ब्रह्मनिधिःपरः ॥ ४५ ॥ राज्ञीराज्ञाकृतानुज्ञासखींप्रेष्यविचक्षणाम् ॥ आनिनायचतंविप्रंब्राह्मंतेजइवांगवत् ॥ ४६ ॥ राजापिदूरादायांतंतंविलोक्यमही सुरम् ॥ यत्राकृतिर्गुणास्तत्रजहर्षेतिवदन्हृदि ॥ ४७ ॥ पदैर्द्वित्रैर्नृपतिनाकृताभ्युत्थानसत्कृतिः ॥ चतुर्निगमजाभिःसतमाशीर्भिरनंदयत् ॥ ४८ ॥ कृतप्रणामोराज्ञासप्रसादरंदत्तमासनम् ॥ भेजेथकुशलंपृष्टःसराज्ञातेनभूपतिः ॥ ४९ ॥

र्वेदसमुद्रः ॥ ४५ ॥ अंगवत्शरीरवत् ॥ ४६ ॥ महीसुरंभूदेवंब्राह्मणमितियावत् ॥ यत्राकृतिःसम्यगाकारस्तत्रगुणाइतिहृदिवदन्हर्षंप्राप्तवानित्यन्वयः ॥४७॥ पदैरिति ॥ द्वित्रैःपंचभिःपदैर्गत्वाराज्ञाकृताऽभ्युत्थानपूर्विकासत्कृतिर्यस्यसः ॥ कृताभ्युत्थानगौरवइतिकचित् ॥ तंराजानंचतुर्वेदोक्ताशीर्भिःसमतोषयदित्यर्थः ॥ ४८ ॥ अथासनोपवेशनानन्तरंसब्राह्मणोराज्ञाकुशलंपृष्टस्तेनब्राह्मणेन

CC-0. In Public Domain. Digitization by eGangotri

चराजाकुशलंपृष्टइत्यर्थः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ शंससिस्तौषिकथयसीतिवा ॥ ५३ ॥ एषप्रष्टव्यइत्यन्वयः ॥ ५४ ॥ ५५ ॥ दुकूलंपट्टवस्त्रम् ॥ ५६ ॥ एकोमुख्यःकेवलोवेतिप्र तिभातीत्यत्रप्रतिभातीत्यस्योपरिष्टादितिशब्दोद्रष्टव्यः ॥५७॥५८॥ यावद्भूतिऐश्वर्यमनतिक्रम्य ॥ ५९ ॥ ६० ॥ अपरिकथ्येनकथनानर्हेणममार्किनकिंचित् ॥ मयेतिकचित् ॥ यदाहभागवते

परस्परंकुशलिनौकुशलौचकथागमे ॥ प्रश्नोत्तराभ्यांसंतुष्टौद्विजवर्यक्षमाभृतौ ॥ ५० ॥ कथावसानेराज्ञाथगेहंविससृजेद्विजः ॥ लब्धमानमहापूजः सस्वमाश्रममाविशत् ॥ ५१ ॥ गतेऽथस्वाश्रमंविप्रेदिवोदासोनरेश्वरः ॥ लीलावत्याःपुरोविप्रंवर्णयामासभूरिशः ॥ ५२ ॥ महादेविमहाप्राज्ञेलीलाव तिगुणप्रिये ॥ यथाशंसितथाविप्रस्ततोपिगुणवत्तरः ॥ ५३ ॥ अतीतंवेत्तिसकलंवर्तमानमवैतिच ॥ प्रष्टव्यःप्रातराहूयभविष्यंकिंचिदेषवै ॥ ५४ ॥ महा विभवसंभारैर्महाभोगैरनेकधा ॥ व्युष्टायांसनृपोरात्र्यांप्रातराहूतवाद्विजम् ॥ ५५ ॥ सत्कृत्यतंद्विजंभक्त्यादुकूलादिप्रदानतः ॥ एकांतेतंद्विजंराजापप्र च्छनिजहस्तिस्थितम् ॥५६॥ ॥राजोवाच॥ ॥ द्विजवर्योभवानेकःप्रतिभातीतिनिश्चितम् ॥ यथातत्त्ववतीतेधीर्नतथान्यस्यमेमतिः ॥५७॥ दृष्ट्वात्वां तुमहाप्राज्ञंशांतंदांतंतपोनिधिम् ॥ किंचित्प्रष्टुमनाविप्रतदाख्याहियथार्थवत् ॥ ५८ ॥ शासितेयंमयापृथ्वीनतथान्यैस्तुपार्थिवैः ॥ यावद्भूतिमयाभुक्ता दिव्याभोगाअनेकधा ॥५९॥ निजौरसेभ्योप्यधिकंरात्रिंदिवमतंद्रितम् ॥ विनिर्जित्यहठाद्दुष्टान्प्रजेयंपरिपालिता ॥६०॥ द्विजपादार्चनात्किंचित्सुकृतं वेद्मिनापरम् ॥ अनेनापरिकथ्येनकथितेनेहकिंमम ॥ ६१ ॥ निर्विस्ममिवमेचेतःसांप्रतंसर्वकर्मसु ॥ विचार्यार्यशुभोदर्कमतआख्याहिसत्तम ॥६२॥ ॥ द्विजउवाच ॥ ॥ अपिस्वल्पतरंकृत्यंयद्भवेद्भूभुजामिह ॥ एकांतेतत्तुपृष्टेनवक्तव्यंसुधियासदा ॥ ६३ ॥ अमात्येनाप्यपृष्टेननवक्तव्यंनृपाग्रतः ॥ महापमानभीतेनस्तोकमप्यत्रकिंचन ॥ ६४ ॥ पृष्टश्चेत्कथयामीहमातत्रकुरुसंशयम् ॥ तत्कृतेतवगंतावैमनोनिर्वेदकारणम् ॥६५॥ शृणुराजन्महाबुद्धे नायथार्थंब्रवीम्यहम् ॥ विक्रांतोस्यतिशूरोसिभाग्यवानसिसर्वदा ॥ ६६ ॥ पुण्येनयशसाबुद्ध्यासंपन्नोस्तिभवान्यथा ॥ मन्येतथामरावत्यांत्रिदशेशो पिनैवहि ॥ ६७ ॥ सुधियात्वांगुरुंमन्येप्रसादेनसुधाकरम् ॥ तेजसास्तिभवानर्कःप्रतापेनाशुशुक्षणिः ॥६८॥ प्रभंजनोबलेनासिश्रीदोसिश्रीसमर्पणैः ॥ शासनेनभवान्रुद्रोनिर्ऋतिस्त्वंरणांगणे ॥ ६९ ॥ दुष्टपाशयितापाशीयमोनियमनेऽसताम् ॥ इंदनात्त्वंमहेंद्रोसिक्षमयात्वमसिक्षमा ॥ ७० ॥ मर्या दयाभवानब्धिर्महत्त्वेहिमवानसि ॥ भार्गवोराजनीत्यासिराज्येनमनुनासमः ॥ ७१ ॥

भगवान् ॥ कृतस्यापरिकीर्तनमिति ॥६१॥ निर्विस्मंविरक्तम् ॥ ६२ ॥ तुपुनः ॥ ६३ ॥ ६४ ॥ तत्कृतेयन्मयाउच्यतेतस्मिन्कृतेसतीति ॥ त्वत्कृतइतिपाठेपूर्वेणैवान्वयः ॥ गंतागमिष्यति ॥६५॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ निर्ऋतिर्यमोमृत्युर्वा ॥ ६९ ॥ पाशीवरुणः ॥ असतामितिछेदः ॥ इंदनात्परमैश्वर्यात् ॥ इदिपरमैश्वर्येइतिधातुः ॥७०॥ भार्गवःशुक्रः ॥ राज्येनराजकर्मणा॥७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७२ ॥ ७३ ॥ अमृतमेवेतिसंवन्धः ॥ इवार्थेएवशब्दः ॥ ७४ ॥ किंबहुना तत्किमिति ॥ यत्किंचित्सारंवस्तुजातंतत्सर्वंत्वयिभूजानौपृथिवीपतौत्वयि ॥ तत्रहेतुः ॥ यतःसर्वदेवमयोह्यसि ॥ सर्वदेवमयेत्रनइतिपाठेस्पष्टएवार्थः ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ स्वयमागत्येतिगणेशस्तुतिप्रसंगाद्रुद्रागमनंभाव्यपिदर्शयाति ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥

संतापहर्ताम्बुदवत्पवित्रोगांगनामवत् ॥ सर्वेषामेवजंतूनांकाशीवसुगतिप्रदः ॥ ७२॥ रुद्रःसंहाररूपेणपालनेनचतुर्भुजः ॥ विधिवत्त्वंविधातासिभारतीते मुखांबुजे ॥ ७३ ॥ त्वत्पाणिपद्मेकमलात्वत्क्रोधेस्तिहलाहलः ॥ अमृतंतववागेवत्वद्भुजावाश्विनीसुतौ ॥ ७४ ॥ तत्किंयत्त्वयिभूजानौसर्वदेवमयो ह्यसि ॥ तस्मात्तवशुभोदर्कोमयाज्ञातोस्तितत्त्वतः ॥ ७५ ॥ आरभ्याद्यदिनाद्भूपब्राह्मणोऽष्टादशेहनि ॥ उदीच्यःकश्चिदागत्यध्रुवंत्वामुपदेक्ष्यति॥७६॥ तस्यवाक्यंत्वयाराजन्कर्तव्यमविचारितम् ॥ ततस्तेहृत्स्थितंसर्वंसेत्स्यत्येवमहामते ॥ ७७ ॥ इत्युक्त्वापृच्छ्यराजानंलब्धानुज्ञोद्विजोत्तमः ॥ विवेशस्वाश्रमंतुष्टोनृपोप्याश्चर्यवानभूत् ॥ ७८ ॥ इत्थंविघ्नजितासर्वापुरीस्वात्मवशीकृता ॥ सपौरासावरोधाचसनृपानिजमायया ॥ ७९ ॥ कृतकृत्य मिवात्मानंततोमत्वासविघ्नजित् ॥ विधायबहुधात्मानंकाश्यांस्थितिमवापच ॥ ८० ॥ यदासनदिवोदासःप्रागासीत्कुंभसंभव ॥ तदातनंनिजंस्थानम लंचक्रेगणाधिपः ॥ ८१ ॥ दिवोदासेनरपतौविष्णुनोच्चाटितेसति ॥ पुनर्नवीकृतायांचनगर्यांविश्वकर्मणा ॥ ८२ ॥ स्वयमागत्यदेवेनमंदरात्सुंदरां पुरीम् ॥ वाराणसींप्रथमतस्तुष्टुवेगणनायकम् ॥ ८३ ॥ ॥ अगस्त्यउवाच ॥ ॥ कथंस्तुतोभगवतादेवदेवेनविघ्नजित् ॥ कथंचबहुधात्मानं सचकारविनायकः ॥ ८४ ॥ केनकेनसवैनाम्नाकाशिपुर्यांव्यवस्थितः ॥ इतिसर्वंसमासेनकथयस्वषडानन ॥ ८५ ॥ इत्युदीरितमाकर्ण्यकुंभयोनेः षडाननः ॥ यथावत्कथयामासगणराजकथांशुभाम् ॥ ८६ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेगणेशमाया प्रपंचोनामषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ स्कंदउवाच ॥ ॥ विश्वेशोविश्वयासार्धमयाचमुनिसत्तम ॥ महाशाखविशाखाभ्यांनंदिभृंगिपुरो गमः ॥ १ ॥ नैगमेयेनसहितोरुद्रैःसर्वत्रसंवृतः ॥ देवर्षिभिःसमायुक्तःसनकाद्यैरभिष्टुतः ॥ २ ॥ समस्तायतनाधीशैर्दिक्पालैरभिनंदितः ॥ तीर्थैर्द र्शिततीर्थश्चगंधर्वैर्गीतमंगलः ॥ ३ ॥ कृतपूजोप्सरोभिश्चनृत्यद्धस्तकपल्लवैः ॥ वियत्यनाहतैर्वाद्यैःसमंतादनुमोदितः ॥ ४॥ ऋषीणांब्रह्मनिर्घोषैर्बधिरी कृतादिङ्मुखः॥ कृतस्तुतिश्चारणौघैर्विमानैरभितोवृतः ॥ ५ ॥

॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ छ ॥ ॥ अध्यायेसप्तपंचाशेमंदरादेत्यशंकरः ॥ अस्तौद्गजाननन्तस्यप्रादुर्भावश्चकीर्त्यते ॥ १ ॥ विश्वेशोविश्वयापार्वत्यासहवाराणसींपुरींप्रविवेशेतिदशमश्लोकगतेनान्वयः ॥ १ ॥ २ ॥ तीर्थैर्मूर्तिमद्भिः ॥ दर्शिततीर्थःप्रापितात्मीयजलः ॥ ३ ॥ ४ ॥ ब्रह्मवेदः ॥ बधिरीकृतंदिङ्मुखंदिशां

CC-0. In Public Domain. Digitization by eGangotri

समूहोयस्मैसः ॥ यत्तुष्टयइत्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ नीराजनाविधिःआरार्तिकविधानम् ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ विभवःसामर्थ्यम् ॥ १४ ॥ करस्थितंसंतम् ॥ १५ ॥ त्रयाणांस्वर्णरूप्यलोहमयानांसमाहारस्त्रिपुरीतस्याहर्ता ॥ पाठांतरेकर्मणिषष्ठी ॥ आनन्दवनसंप्राप्त्याहर्षनिर्भरमानसः ॥ चतुर्विंशतिभिःपद्यैरस्तौच्छंभुर्गजाननम् ॥ १६ ॥ जयउत्कर्षमाविष्कुरु सर्वोत्कर्षेणवर्तस्व ॥ आद्यकारण ॥ भक्तनिर्विघ्नकारकेत्यत्रहेतुमाह ॥ विघ्नेति ॥ अविघ्नादेःपदत्रयस्यक्रमेणविपर्ययेणवाहेतुहेतुमद्भावः ॥ १७ ॥ गणनातीताःसंतोगुणायस्यतत्संबोधनं तथा ॥ तृतीयान्तःक्वचित्पाठः ॥ १८ ॥ सर्वबुद्ध्येकशेवधेसर्वबुद्धितंद्वृत्तीनांमुख्याश्रय ॥ केवलप्रवर्तकेतिवा ॥ हेसर्वेतिपृथक्पदंवा ॥ १९ ॥ मांगल्यमंगलस्वरूप ॥ स्वार्थेष्यञ् ॥ मंगलानांचमंगल

त्रिविष्टपवधूमुष्टिप्रसृष्टैर्लाजैरितस्ततः ॥ अभिवृष्टोमहादेवःसंप्रहृष्टतनूरुहः ॥ ६ ॥ दत्तमाल्योपहारश्चबहुविद्याधरीगणैः ॥ यक्षगुह्यकसिद्धैश्चखेचरैरभिनंदितः ॥ ७ ॥ कृतप्रवेशशकुनोमृगैःशकुनिभिःपुरः ॥ किंनरीभिःप्रहृष्टास्यैःकिंनरैरुपवर्णितः ॥ ८ ॥ विष्णुनाचमहालक्ष्म्याब्रह्मणाविश्वकर्मणा ॥ नंदिनाथगणेशेनआविष्कृतमहोत्सवः ॥ ९ ॥ नागांगनाभिःपरितःकृतनीराजनाविधिः ॥ प्रविवेशमहादेवःपुरींवाराणसींशुभाम् ॥ १० ॥ पश्यतांसर्वदेवानामवरुह्यवृषेंद्रतः ॥ परिष्वज्यगणाधीशंप्रोवाचवृषभध्वजः ॥ ११ ॥ यदहंप्राप्तवानस्मिपुरींवाराणसींशुभाम् ॥ मयाप्यतीवदुष्प्राप्यांसप्रसादोस्यवैशिशोः ॥ १२ ॥ यद्दुष्प्रसाध्यंहिपितुरपित्रिजगतीतले ॥ तत्सूनुनासुसाध्यंस्यादत्रदृष्टांततामयि ॥ १३ ॥ अनेनगजवक्त्रेणस्वबुद्धिविभवैरिह ॥ काशीप्राप्तिर्यथामेस्यात्तथाकिंचिदनुष्ठितम् ॥ १४ ॥ पुत्रवानहमेवास्मियच्चमेचिरचिंतितम् ॥ स्वपौरुषेणकृतवानभिलाषंकरस्थितम् ॥ १५ ॥ इत्युक्तात्रिपुरीहर्तापुरुहूतादिभिःस्तुतः ॥ परितुष्टावसंहृष्टःस्पष्टगीर्भिर्गजाननम् ॥ १६ ॥ ॥ श्रीकंठउवाच ॥ ॥ जयविघ्नकृतामाद्यभक्तनिर्विघ्नकारक ॥ अविघ्नविघ्नशमनमहाविघ्नैकविघ्नकृत् ॥ १७ ॥ जयसर्वगणाधीशजयसर्वगणाग्रणीः ॥ गणप्रणतपादाब्जगणनातीतसद्गुण ॥ १८ ॥ जयसर्वगसर्वेशसर्वबुद्ध्येकशेवधे ॥ सर्वमायाप्रपंचज्ञसर्वकर्माग्रपूजित ॥ १९ ॥ सर्वमंगलमांगल्यजयत्वंसर्वमंगल ॥ अमंगलोपशमनमहामंगलहेतुक ॥ २० ॥ जयसृष्टिकृतांवंद्यजयस्थितिकृतानत ॥ जयसंहृतिकृत्स्तुत्यजयसत्कर्मसिद्धिद ॥ २१ ॥ सिद्धवंद्यपदांभोजजयसिद्धिविधायक ॥ सर्वसिद्ध्येकनिलयमहासिद्ध्यृद्धिसूचक ॥ २२ ॥ अशेषगुणनिर्माणगुणातीतगुणाग्रणीः ॥ परिपूर्णचरित्रार्थजयत्वंगुणवर्णित ॥ २३ ॥ जयसर्वबलाधीशबलारातिबलप्रद ॥ बलाकोज्ज्वलदंताग्रबालाबालपराक्रम ॥ २४ ॥

मितिस्मृतेः ॥ मंगल्येतिपाठेहेमंगलायाहित ॥ महामंगलंकैवल्यम् ॥ २० ॥ सृष्टिकृतांब्रह्मादीनाम् ॥ सृष्टिकृतेतिक्वचित् ॥ स्थितिकृताविष्णुनानतनमस्कृत ॥ पाठान्तरेस्थितौकृतमाननंमुखंदृष्टियेंनतत्सम्बोधनम् ॥ तथासंहृतिकृत्संहारकर्तः ॥ सत्यअवितथ ॥ स्तुत्येतिक्वचित्पाठः ॥२१॥ महासिद्धीनामणिमादीनामृद्धिःसमृद्धिरुत्कर्षइतियावत् ॥ तस्यसूचकतत्प्रदेत्यर्थः ॥ सिद्धार्थेतिक्वचित् ॥२२॥ अर्थार्थस्वरूपपरमार्थस्वरूपेतिवा ॥२३॥ बलाकावद्बकपंक्तिवदुज्ज्वलानिदन्ताग्राणियस्यतस्यसंबोधनंबलाकोज्ज्वलदन्ताग्र ॥ वालकेतिपाठेवालेषुरोमविवरेषुकाब्रह्माणोयस्यतत्सम्बो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनंतथा ॥ २४ ॥ धराधरःक्रौंचः ॥ एतत्तुकार्तिकेयेनसहैक्यविवक्षयागमयितव्यम् ॥ यद्वा गजाननोपिकदाचित्क्रौंचपर्वतंविदारितवानितिज्ञातव्यम् ॥ प्रलयसमयेदंताग्रेप्रोताग्रथितादिङ्नागादि ग्गजायेनतत्सम्बोधनंतथा ॥ २५ ॥ येत्वामिति ॥ हेकरुणामयहेदिव्यमूर्तेयेत्वांनमंतितेसर्वैनसांभुवआश्रयभूताअपिमुक्तिभाजोभवंतिपापान्मोक्षंलभन्तइत्यर्थः ॥ नकेवलमेतावदेवकिंत्विहसंसारे तेषामुपसर्गानाध्यात्मिकाधिभौतिकाधिदैविकदोषान्हरसि ॥ स्वर्गापवर्गमपिसकामनिष्कामत्वेनतेभ्यःप्रददासि ॥ स्वर्गश्चापवर्गश्चस्वर्गापवर्गम् ॥ समाहारत्वादेकवद्भावः ॥ २६ ॥ कटाक्षयतिकरुणाकटाक्षेणपश्यतीत्यर्थः ॥ सदाश्रयतीतिकचित्पाठः ॥ २७ ॥ प्रथिताविख्याताः ॥ २८ ॥ २९ ॥ हेपरमकारण ॥ अत्रहेतुस्त्वंकारणंकारणानांप्रकृतिपुरुषमहदादीनाम् ॥ तर्हिकार्यकारणयोःसत्त्वेद्वैतापत्तिरित्यतआह ॥ त्वमेकइति ॥ सजातीयविजातीयस्वगतभेदशून्यइत्यर्थः ॥ तत्रप्रमाणमाह ॥ सततंवेदविदुषांवेद्यइति ॥ तर्हिवेदांतिनांज्ञेयत्वेप्रत्यग्ब्रह्मणो

अनंतमहिमाधारधराधरविदारण ॥ दंताग्रप्रोतदिङ्नागजयनागविभूषण ॥ २५ ॥ येत्वांनमंतिकरुणामयदिव्यमूर्तेसर्वैनसामपिभुवोसुविमुक्तिभाजः॥ तेषांसदैवहरसीहमहोपसर्गान्स्वर्गापवर्गमपिसंप्रददासितेभ्यः ॥ २६ ॥ येविघ्नराजभवताकरुणाकटाक्षैःसंप्रेक्षिताःक्षितितलेक्षणमात्रमत्र ॥ तेषांक्षयं तिसकलान्यपिकिल्बिषाणिलक्ष्मीःकटाक्षयतितान्पुरुषोत्तमान्हि ॥ २७ ॥ येत्वांस्तुवंतिनतविघ्नविघातदक्षदाक्षायणीहृदयपंकजतिग्मरश्मे ॥ श्रूयं तएवतइहप्रथितानचित्रंचित्रंतदत्रगणपायदहोतएव ॥ २८ ॥ येशीलयंतिसततंभवतोंघ्रियुग्मंतेपुत्रपौत्रधनधान्यसमृद्धिभाजः ॥ संशीलितांघ्रिकमलाब हुभृत्यवर्गैर्भूपालभोग्यकमलांविमलांलभंते ॥ २९ ॥ त्वंकारणंपरमकारणकारणानांवेद्योसिवेदविदुषांसततंत्वमेकः ॥ त्वंमार्गणीयमसिकिंचनमूलवाचां वाचामगोचरचराचरदिव्यमूर्ते ॥ ३० ॥ वेदाविदंतिनयथार्थतयाभवंतंब्रह्मादयोपिनचराचरसूत्रधार ॥ त्वंहंसिपासिविदधासिसमस्तमेकःकस्तेस्तुतिव्य तिकरोमनसाप्यगम्य ॥ ३१ ॥ त्वद्दुष्टदृष्टिविशिखैर्निहतान्निहन्मिदैत्यान्पुरांधकजलंधरमुख्यकांश्च॥ कस्यास्तिशक्तिरिहयस्त्वदृतेपितुच्छंवांछेद्धिधातु मिहसिद्धिदकार्यजातम् ॥ ३२ ॥ अन्वेषणेढुंढिरयंप्रथितोस्तिधातुःसर्वार्थढुंढिततयातवढुंढिनाम ॥ काशीप्रवेशमपिकोलभतेत्रदेहीतोषंविनातव विनायकढुंढिराज ॥ ३३ ॥

ज्ञात्मत्वजडत्वेप्रसज्येयातामित्यत्राह ॥ त्वंमार्गणीयमसिकिंचनेति ॥ किंचनकिमपियन्मार्गणीयंनिषेधावधित्वेनान्वेषणीयंवृत्तिव्याप्यत्वेनवाबोधनीयंयद्ब्रह्मतत्त्वमित्यर्थः ॥ तत्रहेतुमाह ॥ हेवाचामगोचरेति ॥ कथंभूतानांवाचाम् ॥ मूलवाचांमूलंस्वकारणंशास्त्रयोनित्रह्मचकितमभिदधताम् ॥ अगोचरआविषय ॥ माययाहेचराचरजंगमस्थावरस्वरूप ॥ परमार्थतोदिव्यमूर्ते लौकिकस्वरूप ॥ ३० ॥ उक्तमेवविवृणोति ॥ वेदाइति ॥ चराचरसूत्रधारस्थावरजंगमात्मकस्थूलप्रपंचधारकोयःसूत्रात्माहिरण्यगर्भोवाय्वात्मातंधारयतीतितथातत्संबोधनम् ॥ चराचरसूत्रधार ॥ एकःसाधनांतरनिरपेक्ष ॥ कस्तेतवस्तुतिव्यतिकरःस्तवनरूपोव्यवहारःकथनमितियावत् ॥ नकोपीत्यर्थः ॥ अत्रहेतुमाह ॥ मनसाप्यगम्येति ॥ यतोवाचोनिवर्तंते अप्राप्यमनसासहेतिश्रुतेः ॥ ॥३१॥ त्वद्दुष्टदृष्टिविशिखैस्तवक्रोधदर्शनबाणैः ॥ दैत्यांन्विशिनष्टि ॥ पुरेति ॥ पुरंत्रिपुरम् ॥ लक्षणयातत्स्थादैत्यालक्ष्यंते ॥ पुरापूर्वमितिवा॥अपितुच्छंतुच्छमपीत्यर्थः ॥३२॥ ढुंढिनामनिर्वक्ति ॥

CC-0. In Public Domain. Digitization by eGangotri

अन्वेषणेढुंढिरिति ॥ अयंढुंढिरितिधातुःक्रियाप्रतिपादकोलोकेअन्वेषणेप्रथितःप्रसिद्धोस्ति ॥ अतोभक्तानांसर्वार्थढुंढिततयासर्वस्यार्थस्यढुंढितंढुंढनंयस्मात्ससर्वार्थढुंढितः ॥ यद्वा सर्वस्यार्थस्यढुंढनंढुंढःससंजातोऽस्येतिसर्वार्थढुंढितः ॥ तारकादित्वादितच् ॥ तस्यभावःसर्वार्थढुंढिततातयासर्वार्थालोचकतयाधर्मार्थकाममोक्षान्वेष्टृतयेत्यर्थः ॥ यद्वा साधारण्येनसर्वेषांसर्वार्थालोचकतया तवढुंढिनाम ॥ इदनुबंधत्वान्नुमागमः ॥ ढुंढिरितिसंज्ञेत्यर्थः ॥ हेविनायकहेअभक्तविघ्नहेतोहेढुंढिराजढुंढिश्चासौराजतइतिराजाचढुंढिराजस्तत्संबोधनंहेढुंढिराज अत्रजगतितवतोषंविनाकाशीप्रवेशमपिकोदेहीलभते ॥ काशीवासस्यकावार्तेत्यपिशब्दार्थः ॥ ३३ ॥ एवंब्रह्मत्वेनस्तुत्वावरदानेनानुगृह्णाति ॥ ढुंढइति॥पुराअंतिमावस्थायांप्राणनिर्गमात्पूर्वमेव ॥ भवस्यभावोभवतासंसारतेत्यर्थः ॥३४॥

ढुंढेप्रणम्यपुरतस्तवपादपद्मंयोमांनमस्यतिपुमानिहकाशिवासी ॥ तत्कर्णमूलमधिगम्यपुरादिशामितत्किंचिदत्रनपुनर्भवतास्तियेन ॥ ३४ ॥ स्नात्वानरःप्रथमतोमणिकर्णिकायामुद्धूलितांघ्रियुगलस्तुसचैलमाशु ॥ देवर्षिमानवपितॄनपितर्पयित्वाज्ञानोदतीर्थमभिलभ्यभजेत्ततस्त्वाम् ॥ ३५ ॥ सामोदमोदकभरैर्वरधूपदीपैर्माल्यैःसुगंधबहुलैरनुलेपनैश्च ॥ संप्रीण्यकाशिनगरीफलदानदक्षंप्रोक्त्वाथमांकइहसिध्यतिनैवढुंढे ॥ ३६ ॥ तीर्थांतराणिचततःक्रमवर्जितोपिसंसाधयन्निहभवत्करुणाकटाक्षैः ॥ दूरीकृतस्वहितघात्युपसर्गवर्गोढुंढेलभेदविकलंफलमत्रकाश्याम् ॥ ३७ ॥ यःप्रत्यहंनमतिढुंढिविनायकंत्वांकाश्यांप्रगेप्रतिहताखिलविघ्नसंघः ॥ नोतस्यजातुजगतीतलवर्तिवस्तुदुष्प्रापमत्रचपरत्रचकिंचनापि ॥ ३८ ॥ योनामतेजपतिढुंढिविनायकस्यतंवैजपंत्यनुदिनंहृदिसिद्धयोष्टौ ॥ भोगान्विभुज्यविविधान्विबुधोपभोग्यान्निर्वाणयाकमलयाव्रियतेसचांते ॥ ३९ ॥ दूरेस्थितोप्यहरहस्तवपादपीठंयःसंस्मरेत्सकलसिद्धिदढुंढिराज ॥ काशीस्थितेरविकलंसफलंलभेतनैवान्यथानवितथाममवाक्कदाचित् ॥ ४० ॥ जानेविघ्नानसंख्यातान्विनिहंतुमनेकधा ॥ क्षेत्रस्यास्यमहाभागनानारूपैरिहस्थितः ॥ ४१ ॥

उद्धूलितंधूलिधूसरितमंघ्रियुगलंयस्यसउद्धूलितांघ्रियुगलः ॥ अनेनमणिकर्ण्यांस्नात्वाविश्वेश्वरेयानादिनानगंतव्यमितिसूचितम् ॥ ३५ ॥ भरैःसमूहैर्भारैरितिवा ॥ प्रोक्त्वास्तुत्वा ॥ मामाम् ॥ प्राक्त्वाथमामितिवापाठः ॥ ३६ ॥ क्रमवर्जितःउल्लंघितक्रमः ॥ ३७ ॥ प्रगेप्रातःसमये ॥ ३८ ॥ सिद्धयोणिमाद्याः ॥ भुज्यंतइतिभोगाविषयास्तान्विभुज्यविष्वग्भुज्यभोजयित्वेत्यर्थः ॥ विभोग्येतिपाठांतरंचिंत्यम् ॥ निर्वाणयामोक्षस्वरूपया ॥ ३९ ॥ पादपीठंचरणाधारसिंहासनम् ॥ ४० ॥ नानारूपैस्त्वमिहस्थितइत्यहंजानेइत्यन्वयः ॥ स्थितौहेतुमाह ॥ विघ्नानिति ॥ ४१ ॥

---

१ पुनर्जन्मतेत्यर्थः ‘ भवःक्षेमेशसत्तायांसंसारेप्राप्तिजन्मनोः ’ इतिमेदिनी !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानितत्रेत्युभयत्रवीप्सावोद्धव्या ॥ ४२ ॥ आढुंढ्यान्विष्य ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ वैदिकोगणानांत्वेत्यादिः ॥ अवैदिकोगमित्यादिः ॥ ५१ ॥५२॥

यानियानिचरूपाणियत्रयत्रचतेनघ ॥ तानितत्रप्रवक्ष्यामिशृण्वंत्वेतेदिवौकसः ॥ ४२ ॥ प्रथमंढुंढिराजोसिममदक्षिणतोमनाक् ॥ आढुंढ्यसर्वभक्तेभ्यः सर्वार्थान्संप्रयच्छसि ॥ ४३ ॥ अंगारवासरवतीमिहयैश्चतुर्थींसंप्राप्यमोदकभरैःपरिमोदवद्भिः ॥ पूजाव्यधायिविविधातवगंधमाल्यैस्तानत्रपुत्रविदधामिगणान्गणेश ॥ ४४ ॥ येत्वामिहप्रतिचतुर्थिसमर्चयंतिढुंढेविगाढमतयःकृतिनस्तएव ॥ सर्वापदांशिरसिवामपदंनिधायसम्यग्गजाननगजाननतांलभंते ॥ ४५ ॥ माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः ॥ येत्वांढुंढेर्चयिष्यंतितेऽर्च्याःस्युरसुरद्रुहाम् ॥४६॥ विधायवार्षिकींयात्रांचतुर्थींप्राप्यतापसीम् ॥ शुक्लांशुक्लतिलैर्बद्धाप्राश्नीयाल्लड्डुकान्व्रती ॥ ४७ ॥ कार्यायात्राप्रयत्नेनक्षेत्रसिद्धिमभीप्सुभिः ॥ तस्यांचतुर्थ्यांत्वत्प्रीत्यैढुंढेसर्वोपसर्गहृत् ॥ ४८ ॥ तांयात्रांनात्रयःकुर्यान्नैवेद्यंतिललड्डुकैः ॥ उपसर्गसहस्रैस्तुसहंतव्योममाज्ञया ॥ ४९ ॥ होमंतिलाज्यद्रव्येणयःकरिष्यतिभक्तितः ॥ तस्यांचतुर्थ्यांमंत्रज्ञस्तस्यमंत्रःप्रसेत्स्यति ॥ ५० ॥ वैदिकोऽवैदिकोवापियोमंत्रस्तेगजानन ॥ जप्तस्त्वत्संनिधौढुंढेसिद्धिंदास्यतिवांछिताम् ॥ ५१ ॥ ॥ ईश्वरउवाच ॥ इमांस्तुतिंममकृतिंयःपठिष्यतिसन्मतिः ॥ नजातुतंतुविघ्नौघाःपीडयिष्यंतिनिश्चितम् ॥ ५२ ॥ ढौंढींस्तुतिमिमांपुण्यांयःपठेड्ढुंढिसंनिधौ ॥ सान्निध्यंतस्यसततंभजेयुःसर्वसिद्धयः ॥ ५३ ॥ इमांस्तुतिंनरोजप्त्वापरंनियतमानसः ॥ मानसैरपिपापैस्तैर्नाभिभूयेतकर्हिचित् ॥५४॥ पुत्रान्कलत्रंक्षेत्राणिवराश्वान्वरमंदिरम् ॥ प्राप्नुयाच्चधनंधान्यंढुंढिस्तोत्रंजपन्नरः ॥ ५५ ॥ सर्वसंपत्करंनामस्तोत्रमेतन्मयेरितम् ॥ प्रजप्तव्यंप्रयत्नेनमुक्तिकामेनसर्वदा ॥५६॥ जप्त्वास्तोत्रमिदंपुण्यंक्वापिकार्येगमिष्यतः ॥ पुंसःपुरःसमेष्यंतिनियतंसर्वसिद्धयः ॥५७॥ अन्यच्चकथयाम्यत्रशृण्वंत्वेतेदिवौकसः ॥ ढुंढिनाक्षेत्ररक्षार्थंयत्रयत्रस्थितिःकृता ॥ ५८ ॥ काश्यांगंगासिसंभेदेनामतोर्कविनायकः ॥ दृष्टोर्कवासरेपुंभिःसर्वतापप्रशांतये ॥ ५९ ॥ दुर्गोनामगणाध्यक्षःसर्वदुर्गतिनाशनः ॥ क्षेत्रस्यदक्षिणेभागेपूजनीयःप्रयत्नतः ॥ ६० ॥ भीमचंडीसमीपेतुभीमचंडविनायकः ॥ क्षेत्रनैर्ऋतदेशस्थोदृष्टोहंतिमहाभयम् ॥ ६१ ॥ क्षेत्रस्यपश्चिमेभागेसदेहलिविनायकः ॥ सर्वान्निवारयेद्विघ्नान्भक्तानांनात्रसंशयः ॥ ६२ ॥ क्षेत्रवायव्यदिग्भागेउद्दंडाख्योगजाननः ॥ उद्दंडानपिविघ्नौघान्भक्तानांदंडयेत्सदा ॥ ६३ ॥ काश्याःसदोत्तराशायांपाशपाणिर्विनायकः ॥ विनायकान्पाशयतिभक्त्याकाशीनिवासिनाम् ॥ ६४ ॥ गंगावरणयोःसंगेरम्यःखर्वविनायकः ॥ अखर्वानपिविघ्नौघान्भक्तानांखर्वयेत्सताम् ॥ ६५ ॥

॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ अर्कदुर्गभीमचण्डदेहल्युद्दण्डपाशपाणिखर्वसिद्धयोबाह्यावरणेगणपाःस्थिताः ॥ ५९ ॥६०॥ ६१ ॥ ६२ ॥ उद्दण्डान्बहून् ॥६३॥६४॥६५॥

CC-0. In Public Domain. Digitization by eGangotri

सिद्धोनार्दः ॥ यमतीर्थस्यगंगास्थस्य ॥ ६६ ॥ ६७ ॥ लंबोदरकूटदन्तशालकटंकटकूश्मांडमुण्डविकटद्विजराजपुत्रप्रणवाद्वितीयावरणस्थाः ॥ ६८ ॥ उत्तरेर्कविनायकांदि तिमध्यवर्त्यावरणाभिप्रायम् ॥ वस्तुतोलंबोदरोवायव्यादिग्भागएवास्ति ॥ ६९ ॥ ७० ॥ क्षेत्रंरक्षतीतिक्षेत्ररक्षोविशेषणमेतत् ॥ ७१ ॥ ७२ ॥ ७३ ॥ मुंडनामानिर्वक्तुमाह ॥ पाताल इति ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ :७८ ॥ वक्रतुण्डैकदन्तत्रिमुखपंचास्यहेरंबविघ्नराजवरदमोदकप्रियास्तृतीयावरणगाः ॥ ७९ ॥ उदग्वहायाउत्तरवाहिन्यारोधासितीरेयोलंबोदरस्तस्मा

प्राच्यांतुक्षेत्ररक्षार्थंसिद्धःसिद्धिविनायकः ॥ पश्चिमेयमतीर्थस्यसाधकक्षिप्रसिद्धिदः ॥ ६६ ॥ बाह्यावरणगाश्चैतेकाश्यामष्टौविनायकाः ॥ उच्चाटयंत्यभक्तांश्चभक्तानांसर्वसिद्धिदाः ॥ ६७ ॥ द्वितीयावरणेचैवयेरक्षंतिविनायकाः ॥ अविमुक्तमिदंक्षेत्रंतानहंकथयाम्यतः ॥ ६८ ॥ स्वर्धुन्याःपश्चिमेकूलेउत्तरेर्कविनायकात् ॥ लंबोदरोगणाध्यक्षःक्षालयेद्विघ्नकर्दमम् ॥६९॥ तत्पश्चिमेकूटदंतउदग्दुर्गविनायकात् ॥ दुर्गोपसर्गसंहर्तारक्षेत्क्षेत्रमिदंसदा ॥ ॥ ७० ॥ भीमचंडगणाध्यक्षात्किंचिदीशानदिग्गतः ॥ क्षेत्ररक्षोगणाध्यक्षःपूज्यःशालकटंकटः ॥ ७१ ॥ प्राच्यांदेहलिविघ्नेशात्कूश्मांडाख्योविनायकः ॥ पूजनीयःसदाभक्तैर्महोत्पातप्रशांतये ॥ ७२ ॥ उद्दंडाख्याद्गणपतेराशुशुक्षणिदिक्स्थितः ॥ महाप्रसिद्धःसंपूज्योभक्तैर्मुंडविनायकः ॥ ७३ ॥ पातालेतस्यदेहोऽस्तिमुंडंकाश्यांव्यवस्थितम् ॥ अतःसंगीयतेकाश्यांदेवोमुंडविनायकः ॥ ७४ ॥ पाशपाणेर्गणेशानाद्दक्षिणेविकटद्विजम् ॥ पूजयित्वागणपतिंगाणपत्यपदंलभेत् ॥ ७५ ॥ खर्वाख्यान्नैर्ऋतेभागेराजपुत्रोविनायकः ॥ भ्रष्टराज्यंचराजानंराजानंकुरुतेऽर्चितः ॥ ७६ ॥ गंगायाःपश्चिमेकूलेप्रणवाख्योगणाधिपः ॥ अवाच्यांराजपुत्राच्चप्रणतःप्रणयेद्दिवम् ॥ ७७ ॥ द्वितीयावरणेकाश्यामष्टावेतेविनायकाः ॥ उत्सादयेयुर्विघ्नौघान्काशीस्थितिनिवासिनाम् ॥ ७८ ॥ क्षेत्रेतृतीयावरणेक्षेत्ररक्षाकृतःसदा ॥ येविघ्नराजाःसंतीहतेवक्तव्यामयाधुना ॥ ७९ ॥ उदग्वहायाःस्वर्धुन्यारम्येरोधसिविघ्नराट् ॥ लंबोदराडुदीच्यांतुवक्रतुंडोघसंवहृत् ॥ ८० ॥ कूटदंताद्गणपतेरुदीच्यामेकदंतकः ॥ सदोपसर्गसंसर्गात्पायादानंदकाननम् ॥ ८१ ॥ काशीभयहरोनित्यमैश्यांशालकटंकटात् ॥ त्रिमुखोनामविघ्नेशःकपिसिंहद्विपाननः ॥८२॥ कूश्मांडात्पूर्वदिग्भागेपंचास्योनामविघ्नराट् ॥ पंचास्यस्यंदनवरःपातिवाराणसींपुरीम् ॥ ८३ ॥ हेरंबाख्यःसदाग्नेय्यांपूज्येोमुंडविनायकात् ॥ अंबावत्पूरयेत्कामान्सर्वेषांकाशिवासिनाम् ॥ ८४ ॥ अवाच्यामर्चयेद्धीमान्सिद्ध्यैविकटदंततः ॥ विघ्नराजंगणपतिंसर्वविघ्नविनाशनम् ॥ ८५ ॥ विनायकाद्राजपुत्रात्किंचिद्रक्षोदिशिस्थितः ॥ वरदाख्योगणाध्यक्षःपूज्योभक्तवरप्रदः ॥ ८६ ॥

दुदीच्यामुत्तरस्यामितिपूर्ववद्व्याख्येयम् ॥ दिशीतिशेषः ॥ एवमुत्तरत्रापि ॥ ८० ॥ ८१ ॥ ऐश्यामैशान्याम् ॥ कापिसिंहद्विपाइवतेषामाननानीवाननानिवायस्यसकपिसिंहद्विपाननः ॥ ८२ ॥ पंचास्यानियस्यसःपंचास्यःसएवस्यंदनवरः ॥ पंचास्ययुक्तंवास्यंदनवरंयस्यसपंचास्यस्यंदनवरः ॥ ८३ ॥ मुंडविनायकादाग्नेय्याम् ॥ ८४ ॥ विघ्नराजमितिविशेष्यम् ॥ ८५ ॥ रक्षोदिशिनैर्ऋ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यांदिशि ॥ ८६ ॥ याम्यामित्युत्तरवहाभिप्रायेण ॥ वस्तुतस्तुप्रणवात्प्रतीच्यांमोदकप्रियः ॥ ८७ ॥ अभयदसिंहतुंडकूणिताक्षक्षिप्रप्रसादनाः ॥ चिंतामणिदंतहस्तपिचिंडिलोद्दंडाश्चतुर्थावरणगाः ॥ ८८ ॥ ८९ ॥ सिंहतुंडःश्रेष्ठमुखः ॥ उपसर्गगजभयानकास्यइत्यर्थः ॥ सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठस्यवाचकाइतिवचनात् ॥ ९० ॥ कूणितेसंकुचितेआक्षिणीयस्य ॥ ९१ ॥

याम्यांप्रणवविघ्नेशाद्गणेशोमोदकप्रियः ॥ पूज्यःपिशंगिलातीर्थेदेवनद्यास्तटेशुभे ॥ ८७ ॥ चतुर्थावरणेकाश्यांभक्तविघ्नविनाशकाः ॥ द्रष्टव्याद्दृष्टचेतोभिःस्पष्टमष्टौविनायकाः ॥ ८८ ॥ वक्रतुंडादुदग्दिक्स्थःस्वःसिंधोरोधसिस्थितः ॥ विनायकोस्त्यभयदःसर्वेषांभयनाशनः ॥ ८९ ॥ कौबेर्यामेकदशनात्सिंहतुंडोविनायकः ॥ उपसर्गगजान्हंतिवाराणसिनिवासिनाम् ॥ ९० ॥ कूणिताक्षोगणाध्यक्षस्त्रितुंडादीशदिक्स्थितः ॥ महाश्मशानंसततंपायाद्दुष्टकुदृष्टितः ॥ ९१ ॥ प्राच्यांपंचास्यतःपायात्पुरींक्षिप्रप्रसादनः ॥ क्षिप्रप्रसादनार्चातः क्षिप्रंसिध्यंतिसिद्धयः ॥ ९२ ॥ हेरंबाद्वह्निदिग्भागेचिंतामणिविनायकः ॥ भक्तचिंतामणिःसाक्षाच्चिंतितार्थसमर्पकः ॥ ९३ ॥ विघ्नराजादवाच्यांतुदंतहस्तोगणेश्वरः ॥ लिखेद्विघ्नसहस्राणिनृणांवाराणसीद्रुहाम् ॥ ९४ ॥ वरदाद्यातुधान्यांचयातुधानगणावृतः ॥ देवःपिचिंडिलोनामपुरींरक्षेदहर्निशम् ॥ ९५ ॥ दृष्टःपिलिपिलातीर्थेदक्षिणेमोदकप्रियात् ॥ उद्दंडमुंडोहेरंबोभक्तेभ्यःकिंनयच्छति ॥ ९६ ॥ प्राकारेपंचमेकाश्यांद्विचतुष्कविनायकाः ॥ कुर्वंतिरक्षांक्षेत्रस्ययेतानत्रब्रवीम्यहम् ॥ ९७ ॥ तीरेस्वर्गतरंगिण्याउत्तरेचाभयप्रदात् ॥ स्थूलदंतोगणेशानःस्थूलाःसिद्धीर्दिशेत्सताम् ॥ ९८ ॥ सिंहतुंडादुदग्भागेकलिप्रियविनायकः ॥ कलहंकारयेन्नित्यमन्योन्यंतैर्थिकद्रुहाम् ॥ ९९ ॥ कूणिताक्षात्तथैशान्यांचतुर्दंतोविनायकः ॥ तस्यदर्शनमात्रेणविघ्नसंघःक्षयेत्स्वयम् ॥ १०० ॥ क्षिप्रप्रसादनादैंद्र्यांद्वितुंडोगणनायकः ॥ अग्रतःपृष्ठतश्चापिबिभर्तिसदृशींश्रियम् ॥ १ ॥ तस्यसंदर्शनात्पुंसांभवेच्छ्रीःसर्वतोमुखी ॥ ज्येष्ठोनामगणाध्यक्षोज्येष्ठोमेपुत्रसंपदि ॥ २ ॥ ज्येष्ठशुक्लचतुर्दश्यांसंपूज्योज्येष्ठताप्तये ॥ स्थितोवह्निदिशोभागेचिंतामणिविनायकात् ॥ ३ ॥ दंतहस्तात्प्रमाशायांपूज्योगजविनायकः ॥ तस्यसंपूजनाद्धत्त्यागजांताश्रीरवाप्यते ॥ ४ ॥ पिचिण्डिलाद्गणपतेर्याम्यांकालविनायकः ॥ भयंनकालकलितंतस्यसंसेवनान्नृणाम् ॥ ५ ॥ उद्दंडमुंडाद्गणपात्कीनाशदिशिसंस्थितम् ॥ नागेशंगणपंदृष्ट्वानागलोकेमहीयते ॥ ६ ॥

॥ ९२ ॥ ९३ ॥ दंतहस्तोहस्तगृहीतदंतइत्यर्थः ॥ ९४ ॥ ९५ ॥ ९६ ॥ प्रावारेआवरणे ॥ स्थूलदंतकलिप्रियकौतौचतुर्दशनद्वितुंडौ ॥ ज्येष्ठगजकालनागेशाःपंचमावरणगणेशाः ॥ ९७ ॥ ॥ ९८ ॥ तैर्थिकद्रुहांतीर्थसेविप्राणिहिंसकानाम् ॥ ९९ ॥ क्षयेन्नाशंगच्छेत् ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ उद्दंडोमहान्मुंडोयस्यसतथातस्मात् ॥ उद्दंडशुंडादितिक्वचित्पाठःसचिंत्यः ॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वत्रतथापाठकल्पनप्रमाणाभावात् ॥ प्राच्यादीनांदिशांप्रतियोगित्वेनस्थूलदंतादयोयथासंख्येनबोद्धव्याः ॥ ६ ॥ ७ ॥ मणिकर्णाशाविनायकसृष्टिविनायकयक्षविघ्नेशाः ॥ गजकर्णचित्रघंटस्थूलजंघमित्राःषष्ठावृतिगाः॥८॥९॥११०॥ शमयेच्छमिनामघमिति ॥ शमिनांशांतानाम् अघमितिरोगाद्युपलक्षणं शमयेच्छमयाति ॥ शमयेदघमत्स्थितिमितिपाठेअघमत्स्थितिमघमतांस्थानम् ॥११॥ यमतीर्थादुदीच्यांचेत्याद्यर्धपद्यंत्वनाकरम् ॥ अष्टाधिक्यापत्तेः ॥ षट्पंचाशद्गजमुखानेतान्यःसंस्मरिष्यतीत्युपसंहारविरोधाच्च ॥ यदिबहुपुस्तकानुरोधेनायंपाठःकक्षीकार्यस्तदाषडधिकापञ्चाशद्येषुतान्सप्तपञ्चाशद्गजाननानित्यर्थः ॥ दशधर्मायकायेंदोर्द्विषट्त्रिणवदत्तवानित्यत्रद्विगुणाःषड्यासुत्रयोदशेतिवदिति ॥ यद्वा एकस्यसिंहतुण्डत्वादन्येषांगजमुखत्वात्षट्पञ्चाशद्गजमुखानित्युक्तम् ॥ नतुतस्यस्मरणप्रभावाभिप्रायेणेति॥ यद्वा समकक्षत्वान्नवमस्यमित्रविनायकस्यप्रसंगादुक्तिरत्र ॥ ऐश्यामित्यत्रइमामितिपाठेस्थूलजंघइत्याद्येकःश्लोकोवाक्यम् ॥ तथाचायमर्थः ॥ सम्प्रसिद्धोमंगलविनायकःइमामैशींपुरींपायादित्यन्वयः ॥ कथंभूतः ॥ स्थूलेजंघेयस्यसः ॥ यद्वा मंगलोमंगलरूपइतिमित्रविनायकविशेषणम् ॥ तेनापियमतीर्थात्पूर्वदिक्स्थितादुदीच्यामैशान्यामितिसर्वमनवद्यम् ॥ १२ ॥ मोदाद्याःपंचविघ्नेशास्तथाज्ञानविनायकः ॥ तद्द्वाराविमुक्ताख्यौसप्तमावृतिगास्त्वमी ॥१३॥ सचाविमुक्तइतिसर्वोपलक्षणार्थः ॥ सर्वकष्टौघान्हरेद्धराति ॥ कष्टमुक्तविनायकइतिक्वचित्पाठः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ महदुदारमुत्सवितमुत्सवयुक्तंचेतोयस्यसमहोत्सवितमानसः ॥ १९ ॥ उचितचंचुरःयथायोग्यव्यवहारेदक्षः ॥ १२० ॥ २१ ॥

अथषष्ठावरणगाःप्रोच्यंतेविघ्ननायकाः ॥ तेषांनामश्रवादेवपुंसांसिद्धिःप्रजायते ॥ ७ ॥ मणिकर्णोगणपतिःप्राच्यांविघ्नविघातकृत् ॥ आशाविनायकोवह्न्यांभक्ताशांपूरयन्स्थितः ॥ ८ ॥ याम्यांसृष्टिगणेशश्चसृष्टिसंहारसूचकः ॥ नैर्ऋत्यांयक्षविघ्नेशःसर्वविघ्नहरःपरः ॥ ९ ॥ प्रतीच्यांगजकर्णश्चसर्वेषांक्षेमकारकः ॥ चित्रघंटोगणपतिर्वायव्यांपालयेत्पुरीम् ॥ ११० ॥ स्थूलजंघउदीच्यांचशमयेच्छमिनामघम् ॥ ऐश्यामैशींपुरींपायात्समंगलविनायकः ॥ ११ ॥ यमतीर्थादुदीच्यांचपूज्योमित्रविनायकः ॥ सप्तमावरणेयेचतांश्चवक्ष्येविनायकान् ॥ १२ ॥ मोदाद्याःपंचविघ्नेशाःषष्ठोज्ञानविनायकः ॥ सप्तमोद्वारविघ्नेशोमहाद्वारपुरश्चरः ॥ १३ ॥ अष्टमःसर्वकष्टौघानविमुक्तविनायकः ॥ अविमुक्तेममक्षेत्रेहरेत्प्रणतचेतसाम् ॥१४॥ षट्पंचाशद्गजमुखानेतान्यःसंस्मरिष्यति ॥ दूरदेशांतरस्थोपिसस्मृतोज्ञानमाप्नुयात् ॥ १५ ॥ ढुंढिस्तुतिंमहापुण्यांषट्पंचाशद्गजाननाम् ॥ यःपठिष्यतिपुण्यात्मातस्यसिद्धिःपदेपदे ॥ १६ ॥ इमेगणेश्वराःसर्वेस्मर्तव्यायत्रकुत्रचित् ॥ महाविपत्समुद्रांतःपतंतंपांतिमानवम् ॥१७॥ इतिस्तुतिंमहापुण्यांश्रुत्वाचैतान्विनायकान् ॥ जातुविघ्नैर्नबाध्येतपापेभ्योपिप्रहीयते ॥ १८ ॥ इत्युक्त्वादेवदेवोपिमहोत्सवितमानसः ॥ कृताभिषेकोब्रह्माद्यैस्तेभ्योदत्त्वाभिवांछितम् ॥ १९ ॥ संप्रसाद्ययथायोगंसर्वानुचितचंचुरः ॥ अविशद्राजसदनंविश्वकर्मविनिर्मितम् ॥ १२० ॥ स्कंदउवाच ॥ एवंस्तुतोभगवतादेवदेवेनविघ्नजित् ॥ इत्थंचबहुधात्मानंसचकारविनायकः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्तपश्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ अध्यायेचाष्टपञ्चाशेविष्णोर्गमनमुच्यते ॥ मन्दरादविमुक्तेचदिवोदासस्यनिर्वृतिः ॥ १ ॥ कृतकृत्यमिवात्मानंततोमत्वासविघ्नजित् ॥ विधायबहुधात्मानंकाश्यांस्थितिमवापचेत्युक्तंतत्रपृच्छाति ॥ किंचकारेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

एतानितस्यनामानिढुंढिराजस्यकुंभज ॥ जपित्वायानिमनुजोलप्स्यतेनिजवांछितम् ॥ २२ ॥ अन्येपितत्रवैभेदास्तस्यढुंढेर्गणेशितुः ॥ भक्तैःसमर्चिताभक्त्याह्यसंख्याताःसहस्रशः ॥ २३ ॥ भगीरथगणाध्यक्षोहरिश्चंद्रविनायकः ॥ कपर्दाख्योगणपतिस्तथाबिंदुविनायकः ॥ २४ ॥ इत्याद्यास्तत्रविघ्नेशाःप्रतिभक्तप्रतिष्ठिताः ॥ तेषामप्यर्चनात्पुंसांजायंतेसर्वसंपदः ॥ २५ ॥ श्रुत्वाध्यायमिमंपुण्यंनरःश्रद्धासमन्वितः ॥ सर्वविघ्नान्समुत्सृज्यलभतेवांछितंपदम् ॥ १२६ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्द्धेढुंढिविनायकप्रादुर्भावोनामसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ अगस्त्यउवाच ॥ किंचकारहरःस्कंदमंदराद्रिगतस्तदा ॥ विलंबमालंबयतितस्मिन्नपिगजानने ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यकथांपुण्यांकथ्यमानांमयाधुना ॥ वाराणस्येकविषयामशेषाघौघनाशिनीम् ॥ २ ॥ करींद्रवदनेतत्रक्षेत्रवर्येऽविमुक्तके ॥ विलंबभाजित्र्यक्षेणप्रैक्षिक्षिप्रमधोक्षजः ॥ ३ ॥ प्रोक्तोथबहुशश्चेतिबहुमानपुरःसरम् ॥ तथात्वमपिमाकार्षीर्यथाप्राक्प्रस्थितैःकृतम् ॥ ४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ उद्यमःप्राणिभिःकार्योयथाबुद्धिबलाबलम् ॥ परंफलंतिकर्माणित्वदधीनानिशंकर ॥ ५ ॥ अचेतनानिकर्माणिस्वतंत्राःप्राणिनोपिन ॥ त्वंचतत्कर्मणांसाक्षीत्वंचप्राणिप्रवर्तकः ॥ ६ ॥ किंतुत्वत्पादभक्तानांतादृशीजायतेमतिः ॥ ययात्वमेवकथयेःसाध्वनेनत्वनुष्ठितम् ॥ ७ ॥ यत्किंचिदिहवैकर्मस्तोकंवाऽस्तोकमेववा ॥ तत्सिद्ध्यत्येवगिरिशत्वत्पादस्मृत्यनुष्ठितम् ॥ ८ ॥ सुसिद्धमपिवैकार्यंसुबुद्ध्यापिस्वनुष्ठितम् ॥ अत्वत्पदस्मृतिकृतंविनश्यत्येवतत्क्षणात् ॥ ९ ॥ शंभुनाप्रेषितेनाद्यसूद्यमःक्रियतेमया ॥ त्वद्भक्तिसंपत्तिमतांसंपन्नप्रायएवनः ॥ १० ॥ अतीवयदसाध्यंस्यात्स्वबुद्धिबलपौरुषैः ॥ तत्कार्यंहिसुसिद्धंस्यात्त्वदनुध्यानतःशिव ॥ ११ ॥ यांतिप्रदक्षिणीकृत्ययेभवंतंभवंविभो ॥ भवंतितेषांकार्याणिपुरोभूतानितेभयात् ॥ १२ ॥ जातंविद्धिमहादेवकार्यमेतत्सुनिश्चितम् ॥ काशीप्रावेशिकश्चैत्यशुभलग्नोदयःपरम् ॥ १३ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ नोस्माकमुद्यमःसंपन्नप्रायःसिद्धप्रायइतियोगिन्याद्यानंतर्भाव्याह ॥ हीतिपाठेनिश्चितमित्यर्थः ॥ १० ॥ ११ ॥ १२ ॥ प्रावेशिकःप्रवेशयोग्यःकालइतिशेषः ॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वत्रतथापाठकल्पनप्रमाणाभावात् ॥ प्राच्यादीनांदिशांप्रतियोगित्वेनस्थूलदंतादयोयथासंख्येनबोद्धव्याः ॥ ६ ॥ ७ ॥ मणिकर्णाशाविनायकसृष्टिविनायकयक्षविघ्नेशाः ॥ गजकर्णचित्रघंटस्थूल जंघमित्राःषष्ठावृतिगाः॥८॥९॥११०॥ शमयेच्छमिनामघमिति ॥ शमिनांशांतानाम् अघमितिरोगाद्युपलक्षणं शमयेच्छमयाति ॥ शमयेदघमत्स्थितिमितिपाठेअघमत्स्थितिमघमतांस्थानम् ॥११॥ यमतीर्थादुदीच्यांचेत्याद्यर्धपर्यंतवनाकरम् ॥ अष्टाधिक्यापत्तेः ॥ षट्पंचाशद्गजमुखानेतान्यःसंस्मरिष्यतीत्युपसंहारविरोधाच्च ॥ यदिबहुपुस्तकानुरोधेनायंपाठःकक्षीकार्यस्तदाषडधिकापश्चा शद्वेषुतान्सप्तपश्चाशद्गजाननानित्यर्थः ॥ दशधर्मायकार्येदोर्द्विषट्त्रिणवदत्तवानित्यत्रद्विगुणाःषड्यासुत्रयोदशेतिवदिति ॥ यद्वा एकस्यसिंहतुण्डत्वादन्येषांगजमुखत्वात्षट्पञ्चाशद्गजमुखानित्यु

अथषष्ठावरणगाःप्रोच्यंतेविघ्ननायकाः ॥ तेषांनामश्रवादेवपुंसांसिद्धिःप्रजायते ॥ ७ ॥ मणिकर्णोगणपतिःप्राच्यांविघ्नविघातकृत् ॥ आशाविनायको वह्न्यांभक्ताशांपूरयन्स्थितः ॥ ८ ॥ याम्यांसृष्टिगणेशश्चसृष्टिसंहारसूचकः ॥ नैर्ऋत्यांयक्षविघ्नेशःसर्वविघ्नहरःपरः ॥ ९ ॥ प्रतीच्यांगजकर्णश्चसर्वेषां क्षेमकारकः ॥ चित्रघंटोगणपतिर्वायव्यांपालयेत्पुरीम् ॥ ११० ॥ स्थूलजंघउदीच्यांचशमयेच्छमिनामघम् ॥ ऐश्यामैशींपुरींपायात्समंगलविनायकः ॥ ११ ॥ यमतीर्थादुदीच्यांचपूज्योमित्रविनायकः ॥ सप्तमावरणेयेचतांश्चवक्ष्येविनायकान् ॥ १२ ॥ मोदाद्याःपंचविघ्नेशाःषष्ठोज्ञानविनायकः ॥ सप्तमोद्वारविघ्नेशोमहाद्वारपुरश्चरः ॥ १३ ॥ अष्टमःसर्वकष्टौघानविमुक्तविनायकः ॥ अविमुक्तेममक्षेत्रेहरेत्प्रणतचेतसाम् ॥१४॥ षट्पंचाशद्गजमुखाने तान्यःसंस्मरिष्यति ॥ दूरदेशांतरस्थोपिसस्मृतोज्ञानमाप्नुयात् ॥ १५ ॥ ढुंढिस्तुतिंमहापुण्यांषट्पंचाशद्गजाननाम् ॥ यःपठिष्यतिपुण्यात्मातस्यसिद्धिः पदेपदे ॥ १६ ॥ इमेगणेश्वराःसर्वेस्मर्तव्यायत्रकुत्रचित् ॥ महाविपत्समुद्रांतःपतंतंपांतिमानवम् ॥१७॥ इतिस्तुतिंमहापुण्यांश्रुत्वाचैतान्विनायकान् ॥ जातुविघ्नैर्नबाध्येतपापेभ्योपिप्रहीयते ॥ १८ ॥ इत्युक्त्वादेवदेवोपिमहोत्सवितमानसः ॥ कृताभिषेकोब्रह्माद्यैस्तेभ्योदत्त्वाभिवांछितम् ॥ १९ ॥ संप्रसा द्ययथायोगंसर्वानुचितचंचुरः ॥ अविशद्राजसदनंविश्वकर्मविनिर्मितम् ॥ १२० ॥ स्कंदउवाच ॥ एवंस्तुतोभगवतादेवदेवेनविघ्नजित् ॥ इत्थंचबहु धात्मानंसचकारविनायकः ॥ २१ ॥

क्तम् ॥ नतुतस्यस्मरणप्रभावाभिप्रायेणेति॥ यद्वा समकक्षत्वान्नवमस्यमित्रविनायकस्यप्रसंगादुक्तिरत्र ॥ ऐश्यामित्यत्रइमामितिपाठेस्थूलजंघइत्याद्येकःश्लोकोवाक्यम् ॥ तथाचायमर्थः ॥ सप्रसि द्धोमंगलविनायकःइमामैशींपुरींपायादित्यन्वयः ॥ कथंभूतः ॥ स्थूलेजंघेयस्यसः ॥ यद्वा मंगलोमंगलरूपइतिमित्रविनायकविशेषणम् ॥ तेनापियमतीर्थात्पूर्वदिक्स्थितादुदीच्यामैशान्यामितिसर्व मनवद्यम् ॥ १२ ॥ मोदाद्याःपंचविघ्नेशास्तथाज्ञानविनायकः ॥ तद्द्वाराविमुक्ताख्यौसप्तमावृतिगास्त्वमी ॥१३॥ सचाविमुक्तइतिसर्वोपलक्षणार्थः ॥ सर्वकष्टौघान्हरेद्धराति ॥ कष्टमुक्तविनायक इतिक्वचित्पाठः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ महद्द्दारमुत्सवितमुत्सवयुक्तंचेतोयस्यसमहोत्सवितमनसः ॥ १९ ॥ उचितचंचुरःयथायोग्यव्यवहारेदक्षः ॥ १२० ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्तपश्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ अध्यायेचाष्टपञ्चाशेविष्णोर्गमनमुच्यते ॥ मन्दराद्विमुक्तेचदिवोदासस्यनिर्वृतिः ॥ १ ॥ कृतकृत्यमिवात्मानंततोमत्वासविघ्नजित् ॥ विधायबहुधात्मानंकाश्यांस्थितिमवापचेत्युक्तंतत्रपृच्छति ॥ किंचकारेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

एतानितस्यनामानिढुंढिराजस्यकुंभज ॥ जपित्वायानिमनुजोलप्स्यतेनिजवांछितम् ॥ २२ ॥ अन्येपितत्रवैभेदास्तस्यढुंढेर्गणेशितुः ॥ भक्तैःसमर्चिताभक्त्याह्यसंख्याताःसहस्रशः ॥ २३ ॥ भगीरथगणाध्यक्षोहरिश्चंद्रविनायकः ॥ कपर्दाख्योगणपतिस्तथाबिंदुविनायकः ॥ २४ ॥ इत्याद्यास्तत्रविघ्नेशाःप्रतिभक्तप्रतिष्ठिताः ॥ तेषामप्यर्चनात्पुंसांजायंतेसर्वसंपदः ॥ २५ ॥ श्रुत्वाध्यायमिमंपुण्यंनरःश्रद्धासमन्वितः ॥ सर्वविघ्नान्समुत्सृज्यलभतेवांछितंपदम् ॥ १२६ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्द्धेढुंढिविनायकप्रादुर्भावोनामसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ अगस्त्यउवाच ॥ किंचकारहरःस्कंदमंदराद्रिगतस्तदा ॥ विलंबमालंबयतितस्मिन्नपिगजानने ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यकथांपुण्यांकथ्यमानांमयाधुना ॥ वाराणस्येकविषयामशेषाघौघनाशिनीम् ॥ २ ॥ करींद्रवदनेतत्रक्षेत्रवर्येऽविमुक्तके ॥ विलंबभाजित्र्यक्षेणप्रेक्षिप्रमधोक्षजः ॥ ३ ॥ प्रोक्तोथबहुशश्चेतिबहुमानपुरःसरम् ॥ तथात्वमपिमाकार्षीर्यथाप्राक्प्रस्थितैःकृतम् ॥ ४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ उद्यमःप्राणिभिःकार्योयथाबुद्धिबलाबलम् ॥ परंफलंतिकर्माणित्वदधीनानिशंकर ॥ ५ ॥ अचेतनानिकर्माणिस्वतंत्राःप्राणिनोपिन ॥ त्वंचतत्कर्मणांसाक्षीत्वंचप्राणिप्रवर्तकः ॥ ६ ॥ किंतुत्वत्पादभक्तानांतादृशीजायतेमतिः ॥ ययात्वमेवकथयेःसाध्वनेनत्वनुष्ठितम् ॥ ७ ॥ यत्किंचिदिहवैकर्मस्तोकंवाऽस्तोकमेववा ॥ तत्सिद्धयत्येवगिरिशत्वत्पादस्मृत्यनुष्ठितम् ॥ ८ ॥ सुसिद्धमपिवैकार्यंसुबुद्ध्यापिस्वनुष्ठितम् ॥ अत्वत्पदस्मृतिकृतंविनश्यत्येवतत्क्षणात् ॥ ९ ॥ शंभुनाप्रेषितेनाद्यसूद्यमःक्रियतेमया ॥ त्वद्भक्तिसंपत्तिमतांसंपन्नप्रायएवनः ॥ १० ॥ अतीवयदसाध्यंस्यात्स्वबुद्धिबलपौरुषैः ॥ तत्कार्यंहिसुसिद्धंस्यात्त्वदनुध्यानतःशिव ॥ ११ ॥ यांतिप्रदक्षिणीकृत्ययेभवंतंभवांविभो ॥ भवंतितेषांकार्याणिपुरोभूतानितेभयात् ॥ १२ ॥ जातंविद्धिमहादेवकार्यमेतत्सुनिश्चितम् ॥ काशीप्रावेशिकश्चैत्यशुभलग्नोदयःपरम् ॥ १३ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ नोस्माकमुद्यमःसंपन्नप्रायःसिद्धप्रायइतियोगिन्याद्यानंतर्भाव्याह ॥ हीतिपाठेनिश्चितमित्यर्थः ॥ १० ॥ ११ ॥ १२ ॥ प्रावेशिकःप्रवेशयोग्यःकालइतिशेषः ॥

CC-0. In Public Domain. Digitization by eGangotri

शुभलग्नोदयोवाविशेष्यते ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ दत्तंपादोदपानीयंदेवादिभ्योयेनतम् ॥ २२ ॥ २३ ॥ पादोदकस्यतीर्थस्याद्भिःशंखेनस्नापितस्ये त्यन्वयः ॥ २४ ॥ २५ ॥ सश्रियामित्यत्रसन्निभमितिक्वचित्पाठः ॥ २६ ॥ कृतानित्यक्रियाःसंध्यादिरूपायेनसतथा ॥ काश्यपिर्गरुडः ॥ उपसंहृत्यतांमूर्तिमितिश्लोकद्वयंवाक्यम् ॥ २७ ॥

अथवाकाशिसंप्राप्तौनचिंत्यंहिशुभाशुभम् ॥ तदैवहिशुभःकालोयदैवाप्येतकाशिका ॥ १४ ॥ शंभुंप्रदक्षिणीकृत्यप्रणम्यचपुनःपुनः ॥ प्रतस्थेऽथसलक्ष्मीकोमंदराद्गरुडध्वजः ॥ १५ ॥ द्वशोरतिथितांनीत्वाविष्णुर्वाराणसींततः ॥ पुंडरीकाक्षइत्याख्यांसफलीकृतवान्मुदा ॥ १६ ॥ गंगावरणयोर्विष्णुःसंभेदेस्वच्छमानसः ॥ प्रक्षाल्यपाणिचरणंसचैलःस्नातवानथ ॥१७॥ तदाप्रभृतितत्तीर्थंपादोदकमितीरितम् ॥ पादौयदादौशुभदौक्षालितौपीतवाससा ॥ १८ ॥ तत्रपादोदकेतीर्थेयेस्नास्यंतीहमानवाः ॥ तेषांविनश्यतिक्षिप्रंपापंसप्तभवार्जितम् ॥ १९ ॥ तत्रश्राद्धंनरःकृत्वादत्त्वाचैवतिलोदकम् ॥ सप्तसप्ततथासप्तस्ववंश्यांस्तारयिष्यति ॥ २० ॥ गयायांयादृशीतृप्तिर्लभ्यतेप्रपितामहैः ॥ तीर्थेपादोदकेकाश्यांतादृशीलभ्यतेध्रुवम् ॥ २१ ॥ कृतपादोदकस्नानंपीतपादोदकोदकम् ॥ दत्तपादोदपानीयंनरंनानिरयःस्पृशेत् ॥ २२ ॥ विष्णुपादोदकेतीर्थेप्राश्यपादोदकंसकृत् ॥ जातुचिज्जननीस्तन्यंनपिबेदितिनिश्चितम् ॥ २३ ॥ सचक्रशालग्रामस्यशंखेनस्नापितस्यच ॥ अद्भिःपादोदकस्यांबुपिबन्नमृततांव्रजेत् ॥ २४ ॥ विष्णुपादोदकेतीर्थेविष्णुपादोदकंपिबेत् ॥ यदितत्सुधयाकिंनुबहुकालीनयातया ॥ २५ ॥ काश्यांपादोदकेतीर्थेयैःकृतानोदकक्रियाः ॥ जन्मैवविफलंतेषांजलबुद्बुदसश्रियाम् ॥२६॥ कृतनित्यक्रियोविष्णुःसलक्ष्मीकःसकाश्यपिः ॥ उपसंहृत्यतांमूर्तिंत्रैलोक्यव्यापिनींतथा ॥ २७ ॥ विधायदार्षदींमूर्तिंस्वहस्तेनादिकेशवः ॥ स्वयंसंपूजयामाससर्वसिद्धिसमृद्धिदाम् ॥ २८ ॥ आदिकेशवनाम्नींतांश्रीमूर्तिंपारमेश्वरीम् ॥ संपूज्यमर्त्योवैकुंठंमन्यतेस्वगृहांगणम् ॥ २९ ॥ श्वेतद्वीपइतिख्याततंत्स्थानंकाशिसीमानि ॥ श्वेतद्वीपेवसंत्येवनरास्तन्मूर्तिसेवकाः ॥ ३० ॥ क्षीराब्धिसंज्ञंतत्रान्यत्तीर्थंकेशवतोग्रतः ॥ कृतोदकक्रियस्तत्रवसेत्क्षीराब्धिरोधसि ॥ ३१ ॥ तत्रश्राद्धंनरःकृत्वागांदत्त्वाचपयस्विनीम् ॥ यथोक्तसर्वाभरणांक्षीरोदेवासयेत्पितॄन् ॥ ३२ ॥ एकोत्तरशतंवंश्यान्नयेत्पायसकर्दमम् ॥ क्षीरोदरोधःपुण्यात्माभक्त्यातत्रैकधेनुदः ॥३३॥ बह्वीश्चनैचिकीर्दत्त्वाश्रद्धयात्रसदक्षिणाः ॥ शय्योत्तरांश्चप्रत्येकंपितॄंस्तत्रसुवासयेत् ॥३४॥ क्षीरोदाद्दक्षिणेतत्रशंखतीर्थमनुत्तमम् ॥ तत्रापिसंतर्प्यपितॄन्विष्णुलोकेमहीयते ॥ ३५ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ यथोक्तंस्वर्णशृंगरौप्यखुराद्याभरणंयस्याःसातथाताम् ॥ ३२ ॥ ३३ ॥ नैचिकीरुत्तमाधेनूः ॥ शय्याभोगसाधनमुत्तरमुदर्कफलंयेषांतान्पितॄन् ॥ तत्रक्षीरोदे ॥ यद्वा शय्यायाउत्तरेउपरिसुखसुप्तान् ॥ शय्योत्तरांश्चेत्यत्रशतोत्तरांश्चेतिक्वचित्पाठः ॥ ३४ ॥ गृहीतमूर्तिभिःशंखचक्रादिभिरधिष्ठितानितीर्थानिशंखादितीर्थानि ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥३६॥३७॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ नभस्यवहुलाष्टम्यांभाद्रकृष्णाष्टम्याम् ॥ ४३ ॥४४॥ प्राप्तवान्केशवादितिद्वितीयेनान्वयः ॥ यथाश्रुतयोजानिकायामग्रेनारदकेशवइतिसुसंश्लिष्टं

तद्याम्यांचक्रतीर्थंचपितृणामपिदुर्लभम् ॥ तत्रापिविहितश्राद्धोमुच्यतेपैतृकादृणात् ॥३६॥ तत्सन्निधौगदातीर्थंविष्वगाधिनिबर्हणम् ॥ तारणंचपितृणां वैकारणंचैनसांक्षये ॥ ३७ ॥ पद्मतीर्थंतदग्रेतुतत्रस्नात्वानरोत्तमः ॥ पितॄन्संतर्प्यविधिनापद्मयानैवहीयते ॥ ३८ ॥ तत्रैवचमहालक्ष्म्यास्तीर्थंत्रैलोक्य विश्रुतम् ॥ स्वयंयत्रमहालक्ष्मीःस्नातात्रैलोक्यहर्षदा ॥३९॥ तत्रतीर्थेकृतस्नानोदत्त्वारत्नानिकांचनम् ॥ पट्टांबराणिविप्रेभ्योनलक्ष्म्यापरिहीयते ॥४०॥ यत्रयत्रहिजायेततत्रतत्रसमृद्धिमान् ॥ पितरोपिहिसश्रीकास्तस्यस्युस्तीर्थगौरवात् ॥४१॥ तत्रास्तिहिमहालक्ष्म्यामूर्तिस्त्रैलोक्यवंदिता ॥ तांप्रणम्यनरो भक्त्यान्नरोगीजायतेक्वचित् ॥ ४२ ॥ नभस्यबहुलाष्टम्यांकृत्वाजागरणंनिशि ॥ समभ्यर्च्यमहालक्ष्मींव्रतीव्रतफलंलभेत् ॥ ४३ ॥ तार्क्ष्यतीर्थंहितत्रा स्तितार्क्ष्यकेशवसन्निधौ ॥ तत्रस्नात्वानरोभक्त्यासंसाराहिंनपश्यति ॥ ४४ ॥ तदग्रेनारदंतीर्थंमहापातकनाशनम् ॥ ब्रह्मविद्योपदेशंचप्राप्तवान्यत्रनारदः ॥४५॥ तत्रस्नातोनरःसम्यग्ब्रह्मविद्यामवाप्नुयात् ॥ केशवात्तेनतत्रोक्तःकाश्यांनारदकेशवः ॥४६ ॥ अर्चयित्वानरोभक्त्यादेवंनारदकेशवम् ॥ जनन्याज ठरंपीठमध्यास्तेनकदाचन ॥ ४७ ॥ प्रह्लादतीर्थंतस्याग्रेयत्रप्रह्लादकेशवः ॥ तत्रश्राद्धादिकंकृत्वाविष्णुलोकेमहीयते ॥ ४८ ॥ आंबरीषमहातीर्थ मघघ्नंतस्यसन्निधौ ॥ तत्रौदकींक्रियांकुर्वन्निष्कालुष्यंलभेन्नरः ॥४९॥ आदित्यकेशवःपूज्यआदिकेशवपूर्वतः ॥ तस्यसंदर्शनादेवमुच्यतेचोच्चपातकैः ॥ ॥ ५० ॥ दत्तात्रेयेश्वरंतीर्थंतत्रैवादिगदाधरः ॥ पितॄन्संतर्प्य तत्रैवज्ञानयोगमवाप्नुयात् ॥ ५१ ॥ भृगुकेशवपूर्वेणतीर्थंवैभार्गवंपरम् ॥ तत्रस्नातोनरःप्राज्ञो भवेद्भार्गववत्सुधीः ॥ ५२ ॥ तत्रवामनतीर्थंचप्राच्यांवामनकेशवात् ॥ पूजयित्वाचतंविष्णुंवसेद्वामनसन्निधौ ॥ ५३ ॥ नरनारायणंतीर्थंनरनाराय णात्पुरः ॥ तत्रतीर्थेकृतस्नानोनरोनारायणोभवेत् ॥ ५४ ॥ यज्ञवाराहतीर्थंचतदग्रेपापनाशनम् ॥ प्रतिमज्जनतस्तत्रराजसूयक्रतोःफलम् ॥ ५५ ॥ विदारनारसिंहाख्यंतत्रतीर्थंसुनिर्मलम् ॥ स्नातोविदारयेत्तत्रपापंजन्मशतार्जितम् ॥ ५६ ॥ गोपिगोविंदतीर्थंचगोपिगोविंदपूर्वतः ॥ स्नात्वातत्र समभ्यर्च्यविष्णुंविष्णुप्रियोभवेत् ॥ ५७ ॥ तीर्थंलक्ष्मीनृसिंहाख्यंगोपिगोविंददक्षिणे ॥ नलक्ष्म्यात्यज्यतेक्वापितत्तीर्थपरिमज्जनात् ॥ ५८ ॥ तदग्रेशेषतीर्थंचशेषमाधवसन्निधौ ॥ तर्पितानांपितृणांचयत्रतृप्तिर्नशिष्यते ॥ ५९ ॥ शंखमाधवतीर्थंचतदवाच्यांसुनिर्मलम् ॥ कृतोदकोनरस्त त्रभवेत्पापोपिनिर्मलः ॥ ६० ॥

नस्यात् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ मुच्यतेचेतिचकाराद्रोगैश्च ॥ ५० ॥ ५१ ॥ भार्गवमौशनसम् ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

CC-0. In Public Domain. Digitization by eGangotri

॥६१॥६२॥प्रसंगतइति ॥ एतानिपूर्वोक्तानिकानिचिन्नतुसाकल्येन ॥ तत्रहेतुर्यद्यस्मात्तत्रकाश्यांभूमौतिलांतरायांतिलमध्यप्रमाणायामनेकशःसलिंगानितीर्थानिसंति॥६३॥ विशेषतःकेषांचिन्निर्देश फलमाह ॥ उद्दिष्टानामिति ॥ ६४ ॥ प्रसंगागतंपरिसमाप्यप्रस्तुतमावेदयति ॥ इदानीमिति ॥६५॥ समावेश्यसम्यगावेश्यप्रवेश्य ॥ व्यापिनींतनुमितिशेषः ॥ ननुक्रियानामव्यापारःकथंसाविष्णो र्व्यापकस्येत्यतआह ॥ अंशःअंतर्यामीतस्यांशःपुरुषस्तस्यांशश्चतुर्भुजस्तेन ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ प्रतितस्थेस्थापिता ॥ ७० ॥ किंचिदिति ॥ किंचिद्दूरंयथास्याद्धर्मक्षेत्रंधर्मेशइतिलोक

तदग्रेचहयग्रीवंतीर्थंपरमपावनम् ॥ तत्रस्नात्वाहयग्रीवंकेशवंपरिपूज्यच ॥ ६१ ॥ पिंडंचतत्रनिर्वाप्यहयग्रीवस्यसन्निधौ ॥ हायग्रीवींश्रियंप्राप्यसमुच्येतसपूर्वजः ॥ ६२ ॥ ॥ स्कंदउवाच ॥ ॥ प्रसंगतोमयैतानितीर्थानिकथितानिते ॥ भूमौतिलांतरायांयत्तत्रतीर्थान्यनेकशः ॥ ६३ ॥ उद्दिष्टानांतुतीर्थानामेतेषांकलशोद्भव ॥ नाममात्रमपिश्रुत्वानिष्पापोजायतेनरः ॥ ६४ ॥ इदानींप्रस्तुतंविप्रशृणुवक्ष्यामितेग्रतः ॥ वैकुंठनाथोयच्चक्रेशंखचक्रगदाधरः ॥ ६५ ॥ तस्यांमूर्तौसमावेश्यकेशव्यामथकेशवः ॥ शंभोःकार्येकृतमनाअंशांशांशेननिर्गतः ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ अंशांशांशेननिश्चक्रेकुतोभोश्चक्रपाणिना ॥ क्वनिर्गतंचहरिणाप्राप्यकाशींषडानन ॥ ६७ ॥ ॥ स्कंदउवाच ॥ ॥ सामस्त्येनयदर्थंननिर्गतंविष्णुनामुने ॥ ब्रुवेतत्कारणमितिक्षणमात्रंनिशामय ॥ ६८ ॥ संप्राप्यपुण्यसंभारैःप्राज्ञोवाराणसींपुरीम् ॥ नत्यजेत्सर्वभावेनमहालाभैरपीरितः ॥ ६९ ॥ अतःप्रतिकृतिःस्वीयातत्रकाश्यांमुरारिणा ॥ प्रतितस्थेकलशजस्तोकांशेनचनिर्गतम् ॥ ७० ॥ किंचित्काश्याउदीच्यांचगत्वादेवेनचक्रिणा ॥ स्वस्थित्यैकलिपतंस्थानंधर्मक्षेत्रमितीरितम् ॥ ७१ ॥ ततस्तुसौगतंरूपंशिश्रायश्रीपतिःस्वयम् ॥ अतीवसुंदरतरंत्रैलोक्यस्यापिमोहनम् ॥ ७२ ॥ श्रीःपरिव्राजिकाजातानितरांसुभगाकृतिः ॥ यामालोक्यजगत्सर्वंचित्रन्यस्तमिवास्थितम् ॥ ७३ ॥ विश्वयोनिंजगद्धात्रींन्यस्तहस्ताग्रपुस्तकाम् ॥ गरुत्मानपितच्छिष्योजातोलोकोत्तराकृतिः ॥ ७४ ॥ अत्यद्भुतमहाप्राज्ञोनिःस्पृहःसर्ववस्तुषु ॥ गुरुशुश्रूषणपरोन्यस्तहस्ताग्रपुस्तकः ॥ ७५ ॥ अपृच्छत्परमंधर्मंसंसारविनिमोचकम् ॥ आचार्यवर्यंसौम्यास्यंप्रसन्नात्मानमुत्तमम् ॥ ७६ ॥ धर्मार्थशास्त्रकुशलंज्ञानविज्ञानशालिनम् ॥ सुस्वरंसुपदव्यक्तिसुस्निग्धमृदुभाषिणम् ॥ ७७ ॥ स्तंभनोच्चाटनाकृष्टिवशीकर्मादिकोविदम् ॥ व्याख्यानसमयाकृष्टपक्षिरोमांचकारिणम् ॥ ७८ ॥

प्रसिद्धम् ॥ ७१ ॥ सुगतोबुद्धस्तत्संबंधिसौगतम् ॥ शिश्रायाश्रितवान् ॥ ७२ ॥ परिव्राजिकाबौद्धांगना ॥ विष्णोर्देहानुरूपांवैकरोत्येषात्मनस्तनुमितिपराशरोक्तेः ॥ चित्रन्यस्तंचित्रलिखितम् ॥ मोहितम् ॥ तत्क्षणादिहेतिक्वचित्पाठः ॥ ७३ ॥ लोकोत्तराकृतिःसर्वोत्कृष्टमूर्तिः ॥ ७४ ॥ ७५ ॥ संसारविनिमोचकमितितन्मतमवलंब्योक्तम् ॥ प्रसन्नात्मानंसुस्थमनसम् ॥ ७६ ॥ ज्ञानंशास्त्रीयंविज्ञानमनुभवस्ताभ्यांशालतइतिज्ञानविज्ञानशालिनम् ॥ ७७ ॥ आकृष्टिराकर्षणम् ॥: व्याख्यानसमयेव्याख्यानंश्रोतुमायांत्यतोव्याख्यानसमयेनाकृष्टाआहूताःपक्षिणस्तेषांरोमांचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयकारिणम् ॥ ७८ ॥ महामोदभराक्रान्तेनघनतरप्रमोदभराक्रमणेनवातस्यचांचल्यंहर्तुंशीलंयस्यतम् ॥ ७९ ॥ पुण्यापुण्यजनिकाकीर्तिर्यस्यसपुण्यकीर्तिः ॥ ८० ॥ विनयेनकीर्तिर्यस्य
तम् ॥ तत्रहेतुगर्भंविशेषणमाहः॥ महाविनयभूषणमिति ॥ ८१ ॥ अनुवादपूर्वकंवक्तुंप्रतिजानीते ॥ त्वयेति ॥ सनातनःप्रवाहरूपेणनित्यः ॥ ८२ ॥ स्वभाववादमादायनिरीश्वरेश्वरवादौनिरस्य
ति ॥ अनादिसिद्धइति ॥ ८३ ॥ देहद्वयोपाधिजगदनूद्यसर्वदेहेष्वात्माभेदंप्रतिजानीते ॥ ब्रह्मादीति ॥ ब्रह्मादिस्तम्बपर्यंतंहिरण्यगर्भमारभ्यगुल्मावसानंजगदितिशेषः ॥ निबध्यतेऽनेनेतिनिबंध
नम् ॥ देहद्वयंस्थूलसूक्ष्मलक्षणंनिबन्धनंयत्तज्जगत् ॥ तथाआत्मैवैकेति ॥ तत्रजगतिआत्मैवैकःस्वतन्त्रस्तदीशितातन्नियामकईश्वरइत्यर्थः ॥ यद्वा वेदांतिमतंदूषयितुमवलम्ब्याह ॥ आत्मैवैकेति ॥
सजातीयविजातीयस्वगतभेदशून्यइत्यर्थः ॥ तदीशितेत्यत्र तच्छब्दोजगद्विषयः ॥ ८४ ॥ ननुब्रह्मविष्णुहराजगन्नियन्तारःसंतितत्राह ॥ ब्रह्मेति ॥ देहिनामस्मदादीनांयथापुण्यकीर्त्यादिराख्योच्य

पीततद्गीतपीयूषमृगपूगैरुपासितम् ॥ महामोदभराक्रांतवातचांचल्यहारिणम् ॥ ७९ ॥ वृक्षैरपिपतत्पुष्पच्छलैःकृतसमर्चनम् ॥ ततःप्रोवाचपुण्यात्मा पुण्यकीर्तिःससौगतः ॥ ८० ॥ शिष्यंविनयकीर्तिंतंमहाविनयभूषणम् ॥८१॥ ॥ पुण्यकीर्तिरुवाच ॥ ॥ त्वयाविनयकीर्तेयोधर्मःपृष्टःसनातनः ॥ वक्ष्याम्यहमशेषेणशृणुष्वत्वंमहामते ॥ ८२ ॥ अनादिसिद्धःसंसारःकर्तृकर्मविवर्जितः ॥ स्वयंप्रादुर्भवेदेषस्वयमेवविलीयते ॥ ८३ ॥ ब्रह्मादिस्तंबपर्यंतंयावद्देहनिबंधनम् ॥ आत्मैवैकेश्वरस्तत्रनद्वितीयस्तदीशिता ॥ ८४ ॥ यद्ब्रह्मविष्णुरुद्राद्यास्तथाख्यादेहिनामिमाः ॥ आख्यायथास्मदादीनांपुण्यकीर्त्यादिरुच्यते ॥ ८५ ॥ देहोयथ ास्मदादीनांस्वकालेनविलीयते ॥ ब्रह्मादिमशकांतानांस्वकालाल्लीयतेतथा ॥ ८६ ॥ विचार्यमाणेदेहेस्मिन्नकिंचिदधिकंक्वचित् ॥ आहारोमैथुनंनिद्राभयंसर्वत्रयत्समम् ॥ ८७ ॥ निजाहारपरीमाणंप्राप्यसर्वोपिदेहभृत् ॥ सदृशीमेवसंतृप्तिंप्राप्नुयान्नाधिकेतराम् ॥ ८८ ॥ यथा वितृपिताःस्यामपीत्वापेयंमुदावयम् ॥ तृषितास्तुतथान्येपिनविशेषोल्पकोधिकः ॥८९॥ संतुनार्यःसहस्राणिरूपलावण्यभूमयः ॥ परंनिधुवनेकालेह्येकैवेहोपयुज्यते ॥ ९० ॥ अश्वाःपरःशताःसंतुसंत्वनेकेप्यनेकपाः ॥ अधिरोहेतथाप्येकोनद्वितीयस्तथात्मनः ॥ ९१ ॥ पर्यंकशायिनांस्वापेसुखंयदुपपद्यते ॥ तदेवसौख्यंनिद्रायामिहभूशायिनामपि ॥ ९२ ॥ यथैवमरणाद्भीतिरस्मदादिवपुष्मताम् ॥ ब्रह्मादिकीटकांतानांतथामरणतोभयम् ॥ ९३ ॥ सर्वेतनुभृतस्तुल्यायदिबुद्ध्याविचार्यते ॥ इदंनिश्चित्यकेनापिनोहिंस्यःकोपिकुत्रचित् ॥ ९४ ॥ धर्मोजीवदयातुल्योनक्वापिजगतीतले ॥ तस्मात्सर्वप्रयत्नेनकार्याजीवदयानृभिः ॥ ९५ ॥

तेतथाब्रह्मादीनांचतुर्मुखचतुर्भुजपञ्चवक्राद्याउच्यते कल्प्यतइत्यर्थः ॥ वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः ॥ :काल्पनिकोनियम्यनियंतृभावोनवास्तवः स्वप्नेयथेत्यर्थः ॥ ८५ ॥
ब्रह्मादिमशकांतानांदेहानांसाम्यमाह ब्रह्मादिपदविरक्त्यै देहइत्यारभ्यइदंनिश्चित्येत्यतःप्राक्तनेनग्रंथेन ॥ ८६ ॥ ८७ ॥ अधिकेतरामाधिकयासहइतरान्यूनाअधिकेतरातामतिरिक्तां
न्यूनांचेत्यर्थः ॥ ८८ ॥ तत्रस्वानुभवंप्रमाणयति ॥ यथेति ॥८९॥ साधनभूयस्त्वाभूयस्त्वाभ्यांसुखस्याधिक्यन्यूनतांनिराकरोति ॥ संतुनार्यइति ॥ विधुवनेमैथुने ॥ परंतुमैथुनइतिक्वचित्पाठः ॥
॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ साम्यमुपसंहरति ॥ सर्वइति ॥ साम्यज्ञानफलमाह ॥ इदमिति ॥ ९४ ॥ एवमात्मभेदंसुखतारतम्यंचप्रत्याख्यायपृष्टमनूदितंपरमंधर्ममाह ॥ धर्मइति ॥ ९५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तद्वद्भवेदित्यर्थः ॥ फलितमाह ॥ तस्मादिति ॥ ९६ ॥ जीवदयातुल्योधर्मोनास्तीत्यत्रवेदांतिनांसंमतिमाह ॥ अहिंसेति ॥ नहिंस्यात्सर्वाभूतानीतिश्रुतेः ॥ यद्वा पूर्वसूरिभिःप्राक्तनैर्बौद्धाचार्यैरित्यर्थः ॥ अहिंसापरमोधर्मइत्युक्तेः ॥ ९७ ॥ ९८ ॥ ९९ ॥ तर्हिकिंभूताभयप्रदानादन्योधर्मोनास्त्येवतत्राह ॥ इहचत्वारीति ॥ १०० ॥ तान्येवदर्शयाति ॥ भीतेभ्यइति ॥ १ ॥ देहात्मवादमाह अविचिंत्येतिद्वाभ्याम् ॥ मणयश्चमंत्राश्चओषधयश्चतेषांयद्बलम् ॥ कथंभूतम् ॥ अविचिंत्यप्रभावंचिंतितुमशक्यःप्रभावोयस्यतत्तथातत् ॥ नानार्थोपार्जनायअनेकविधधनसंपादनार्थमभ्यस्यम् ॥ २ ॥ तेनाभ्यासेनवहूनर्थानुपार्ज्य ॥ परितःसमंततःसर्वैःप्रकारैरित्यर्थः ॥ द्वादशायतनानिकर्मेंद्रियज्ञानेंद्रियमनोबुद्धिलक्षणानिपरिपूज्यानिनिरंतरंसर्वदापूज्यानि ॥ : अन्यैरिंद्रादिभिःपूजितैःकिं नकिमपीत्यर्थः ॥ ३ ॥ द्वादशायतनानिस्वयमेवव्याचष्टे ॥ पंचेति ॥ ४ ॥ नन्वन्यदेवाभजनेनरकपातध्रौव्याद्भजनेचस्वर्गप्राप्तेःकथंनान्येपूजनीयाइत्याशंक्याह ॥ इहैवस्वर्गेति ॥

एकस्मिन्रक्षितेजीवेत्रैलोक्यंरक्षितंभवेत् ॥ घातितेघातितंतद्वत्तस्माद्रक्षेन्नघातयेत् ॥ ९६ ॥ अहिंसापरमोधर्मइहोक्तःपूर्वसूरिभिः ॥ तस्मान्नहिंसाकर्तव्यानरैर्नरकभीरुभिः ॥ ९७ ॥ नहिंसासदृशंपापंत्रैलोक्येसचराचरे ॥ हिंसकोनरकंगच्छेत्स्वर्गंगच्छेदहिंसकः ॥ ९८ ॥ संतिदानान्यनेकानिकिंतैस्तुच्छफलप्रदैः ॥ अभीतिदानसदृशंपरमेकमपीहन ॥९९॥ इहचत्वारिदानानिप्रोक्तानिपरमर्षिभिः ॥ विचार्यनानाशास्त्राणिशर्मणेत्रपरत्रच ॥१००॥ भीतेभ्यश्चाभयंदेयंव्याधितेभ्यस्तथौषधम् ॥ देयाविद्यार्थिनांविद्यादेयमन्नंक्षुधातुरे ॥ १ ॥ अविचिंत्यप्रभावंहिमणिमंत्रौषधीबलम् ॥ तदभ्यस्यंप्रयत्नेननानार्थोपार्जनायवै ॥ २ ॥ अर्थानुपार्ज्यबहुशोद्वादशायतनानिवै ॥ परितःपरिपूज्यानिकिमन्यैरिहपूजितैः ॥ ३ ॥ पंचकर्मेंद्रियाण्येवपंचबुद्धींद्रियाणिच ॥ मनोबुद्धिरिहप्रोक्तंद्वादशायतनंशुभम् ॥ ४ ॥ इहैवस्वर्गनरकौप्राणिनांनान्यतःक्वचित् ॥ सुखंस्वर्गःसमाख्यातोदुःखंनरकएवहि ॥ ५ ॥ सुखेषुभुज्यमानेषुयत्स्याद्देहाविसर्जनम् ॥ अयमेवपरोमोक्षोनमोक्षोऽन्यःक्वचित्पुनः ॥ ६ ॥ वासनासहितक्लेशसमुच्छेदेसतिध्रुवम् ॥ विज्ञानोपरमोमोक्षोविज्ञेयस्तत्त्वचिंतकैः ॥ ७ ॥ प्रामाणिकीश्रुतिरियंप्रोच्यतेवेदवादिभिः ॥ नहिंस्यात्सर्वभूतानिनान्याहिंसाप्रवर्तिका ॥ ८ ॥

॥ ५ ॥ ननुस्वर्गनरकयोःपारलौकिकयोरभावेपिमोक्षस्यसद्भावात्तदर्थंश्रवणाद्यनुष्ठानंविधेयमेवेत्याशंक्याह ॥ सुखेष्विति ॥ ६ ॥ प्रामाणिकसंमत्याउक्तंद्रढयति ॥ वासनासहितक्लेशेति ॥ वासयतिसंसारेप्रवर्तयतीतिवासनासंवृतिरविद्येतियावत् तत्सहिताःक्लेशाअविद्यास्मितारागद्वेषाभिनिवेशाः ॥ तत्रानित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्या ॥ आत्मानात्मनोस्तप्तायःपिंडवत्संश्लेषइवावभासोस्मिता ॥ सुखतत्साधनलोभोरागः ॥ दुःखतत्साधनजिहासाद्वेषः ॥ सर्वस्ययात्माशीर्मानभूवंभूयासमितिसोऽभिनिवेशइति ॥ तेषांसमुच्छेदेसतिविज्ञानोपरमःविज्ञायतइतिविज्ञानंसंवृतितत्कार्यंतस्योपरमोमोक्षः ॥ कैवल्यंतत्त्वचिंतकैस्तत्त्वविद्भिर्विज्ञेयइष्टइतिध्रुवंनिश्चितमित्यर्थः ॥ अयंभावः ॥ द्विविधोहिपरःपुरुषार्थः ॥ आनंदावाप्तिःसर्वानर्थोच्छित्तिश्च ॥ तत्रोपभुज्यमानसुखसमयेएवदेहद्वयस्यनाशेनानायासेनैवतदुभयस्यसिद्धत्वाच्छ्रवणादिकंव्यर्थमिति ॥ ७ ॥ अहिंसापरमोधर्मइत्युक्तंतच्छ्रुतिसंवादेनद्रढयति ॥ प्रामाणिकीति ॥ ननुहिंसानिवर्तकश्रुतिवद्धिंसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्तिकापिकाचिच्छ्रुतिर्भविष्यतिनेत्याह ॥ नान्येति ॥ श्रुतिरितिशेषः ॥ ८ ॥ नन्वग्नीषोमीयंपशुमालभेतवायव्यंश्वेतमालभेतेत्यादिकादृश्यंतइतिचेत्तत्राह ॥ अग्नीषोमीयमिति ॥ भ्रामिकाभ्रमजनिका असतामितिच्छेदः ॥ अग्नीषोमीयमितिवायव्यंश्वेतमालभेतेत्यादेरुपलक्षणम् ॥ पश्वालंभनंदेवतोद्देशेनपशुहननम् ॥ ९ ॥ श्रुतेरप्रामाण्यंयुक्त्यासाधयति ॥ वृक्षानिति ॥ वृक्षानश्वत्थादीन्समिदाहरणार्थंछित्त्वा ॥ चित्रमाश्चर्यम् ॥ अत्रैवंप्रयोगः ॥ क्रत्वंतर्वर्तिवृक्षादिच्छेदनादिनस्वर्गसाधनं वृक्षादिच्छेदनादित्वात् क्रतुबाह्यवृक्षादिच्छेदनादिवदिति ॥ नचनिषिद्धत्वमुपाधिस्तस्यानिरूप्यत्वादितिभावः ॥ ११० ॥ ११ ॥ समाकृष्टाःआकर्षण्याविद्ययास्वसमीपंप्रापिताइत्यर्थः ॥ विज्ञानकौमुदीति ॥ बौद्धाभिमतमालयादिरूपमाकर्षणवशीकरणादिरूपंचज्ञानंविज्ञानंतस्यकौमुदीवकौमुदीप्रकाशिकातयाविज्ञानकौमुद्या ॥ १२ ॥ १३ ॥ सर्वप्रकारेणसुखंसाधनीयमितिवक्ष्यंतीप्रथमंश्रुत्यवष्टंभेनसुखंसाधयति ॥ आनंदामात ॥ षंढत्वमार्षम् ॥ आनंदंब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितम् ॥ आनंदो

अग्नीषोमीयमितियाभ्रामिकासाऽसतामिह ॥ नसाप्रमाणंज्ञातृणांपश्वालंभनकारिका ॥ ९ ॥ वृक्षांश्छित्त्वापशून्हत्वाकृत्वारुधिरकर्दमम् ॥ दग्ध्वावह्नौतिलाज्यादिचित्रंस्वर्गोऽभिलष्यते ॥ ११० ॥ इत्येवंधर्मजिज्ञासांपुण्यकीर्तौप्रकुर्वति ॥ पारंपर्येणतच्छ्रुत्वापौरायात्रांप्रचक्रिरे ॥ ११ ॥ परिव्राजिकयाप्येवंसमाकृष्टाःपुरांगनाः ॥ तयाविज्ञानकौमुद्यासर्वविद्याविदग्धया ॥ १२ ॥ ततस्तासांपुरस्तात्साबौद्धधर्मानवीवदत् ॥ दृष्टार्थप्रत्ययकरान्देहसौख्यैकसाधनान् ॥ १३ ॥ ॥ विज्ञानकौमुद्युवाच ॥ ॥ आनंदंब्रह्मणोरूपंश्रुत्यैवंयन्निगद्यते ॥ तत्तथैवेहमंतव्यंमिथ्यानानात्वकल्पना ॥ १४ ॥ यावत्स्वस्थमिदंवर्ष्मयावन्नेंद्रियविक्लवः ॥ यावज्जराचदूरेस्तितावत्सौख्यंप्रसाधयेत् ॥ १५ ॥ अस्वास्थ्येंद्रियवैकल्येवार्धकेतुकुतःसुखम् ॥ शरीरमपिदातव्यमर्थिभ्योतःसुखेप्सुभिः ॥ १६ ॥ याचमानमनोवृत्तिप्रीणनेयस्यनोजनिः ॥ तेनभूर्भारवत्येषासमुद्रागद्रुमैर्नहि ॥ १७ ॥ सत्वरोगत्वरोदेहःसंचयाःसपरिक्षयाः ॥ इतिविज्ञायविज्ञातादेहेसौख्यंप्रसाधयेत् ॥ १८ ॥ श्ववायसकृमीणांचप्रांतेभोज्यमिदंवपुः ॥ भस्मांतंतच्छरीरंचवेदेसत्यंप्रपद्यते ॥ १९ ॥ मुधाजातिविकल्पोयंलोकेषुपरिकल्प्यते ॥ मानुष्येसतिसामान्येकोधमःकोथचोत्तमः ॥ १२० ॥ ब्रह्मादिसृष्टिरेषेतिप्रोच्यतेवृद्धपूरुषैः ॥ तस्यस्रष्टुःसुतौदक्षमरीचीचेतिविश्रुतौ ॥ २१ ॥

ब्रह्मेतिव्यजानात् ॥ सएषपरमानंदइत्यादिश्रुत्यायत्सुखंनिगद्यतेतत्तथैवमंतव्यंज्ञातव्यमिति ॥ ननुसुखस्यजन्मनाशदर्शनात्तारतम्यश्रवणात्कथंसुखरूपत्वंब्रह्मणस्तत्राह ॥ मिथ्यानानात्वेति ॥ औपाधिकमेवजन्मनाशतारतम्यादिकमित्यर्थः ॥ १४ ॥ तच्चसौख्यमस्मिन्नेवशरीरेसंपादनीयमितिबौद्धमतमवलंब्याह ॥ यावत्स्वस्थमिति ॥ १५ ॥ अस्वास्थ्यंचेंद्रियवैकल्यंचतस्मिन् ॥ अथास्येंद्रियवैकल्यइतिक्वचित्पाठः ॥ यतोवार्द्धकेसुखंनास्त्यतःसुखार्थिभिःशरीरमपिदातव्यंजरातःपूर्वमित्यर्थः ॥ १६ ॥ अगाःपर्वताः ॥ १७ ॥ १८ ॥ भस्मांतमिति ॥ तथाचश्रुतिः ॥ वायुरनिलममृतमथेदंभस्मांतंशरीरमित्याद्या ॥ १९ ॥ ननुशरीरदानेपिसंजातीयेभ्यएवदातव्यंनाधमेभ्यस्तत्राह ॥ मुधेति ॥ मृषात्वमेवदर्शयति ॥ मानुष्यइति ॥ १२० ॥ कारणैक्यादपिगम्यागम्यकल्पनावृथे

CC-0. In Public Domain. Digitization by eGangotri

त्याह ब्रह्मादिसृष्टिरित्यादिना ॥ २१ ॥ २२ ॥ २३ ॥ वर्णावर्णभेदोपिनघटत्इत्याह मुखेतिसार्धद्वयेन ॥ २४ ॥ २५ ॥ उपसंहरति ॥ अतइति ॥ २६ ॥ शरीराभेदकथनफलमाह ॥ विज्ञानेति ॥ २७ ॥ सफलीचक्रुर्विद्यामित्यनुषज्जते ॥ सफलमितिपाठेइंद्रियचक्रमितिशेषः ॥ २८ ॥ २९ ॥ १३० ॥ व्यधादकरोत् ॥ तिलकेऔषधंतिलकौषधम् ॥ तिलकरूपमौषधंतिलकौषधमितिवा ॥ ३१ ॥ दीक्षितावौद्धधर्मेप्रवेशंकारिताइत्यर्थः ॥ यंत्राणिताम्रादिपीठेषुनिर्मितानीत्यर्थः ॥ ३२ ॥ प्रोल्ललासप्रकर्षेणववृधे ॥ वृषोधर्मस्तदितरोऽधर्मोवृषेतरः ॥ ३३ ॥ अकृष्टपच्यत्वं

मारीचिनाकश्यपेनदक्षकन्याःसुलोचनाः ॥ धर्म्येणकिलमार्गेणपरिणीतास्त्रयोदश ॥ २२ ॥ अपीदानींतनैर्मर्त्यैरल्पबुद्धिपराक्रमैः ॥ अयंगम्यस्त्वगम्यो यंविचारःक्रियतेमुधा ॥ २३ ॥ मुखबाहूरुपज्जातंचातुर्वर्ण्यमिहोदितम् ॥ कल्पनेयंकृतापूर्वैर्नघटेतविचारतः ॥ २४ ॥ एकस्यांचतनौजाताएकस्माद्यदिवाक्वचित् ॥ चत्वारस्तनयास्तत्किंभिन्नवर्णत्वमाप्नुयुः ॥ २५ ॥ वर्णावर्णविवेकोयंतस्मान्नप्रतिभासते ॥ अतोभेदोनमंतव्योमानुष्येकेनचित्क्वचित् ॥ ॥ २६ ॥ विज्ञानकौमुदीवाणीमित्याकर्ण्यपुरांगनाः ॥ भर्तृशुश्रूषणवतींविजहुर्मतिमुत्तमाम् ॥ २७ ॥ अभ्यस्याकर्षणींविद्यांवशीकृतिमतीमपि ॥ पुरुषाःसफलीचक्रुःपरदारेषुमोहिताः ॥ २८ ॥ अंतःपुरचरानार्यस्तथाराजकुमारकाः ॥ पौराःपुरांगनाश्चापिसर्वेताभ्यांविमोहिताः ॥ २९ ॥ वंध्यानां चापिवंध्यात्वंसापरिव्राजिकाहरत् ॥ तैस्तैश्चकार्मणोपायैरसौभाग्यवतीःस्त्रियः ॥ १३० ॥ सौभाग्यभाग्यसंपन्नाव्यधाद्विज्ञानकौमुदी ॥ कस्यैचिदंजनंदत्तंकस्यैचित्तिलकौषधम् ॥ ३१ ॥ वशीकरणमंत्रैश्चतथाबह्वचोपिदीक्षिताः ॥ मंत्राञ्जपेयुःकाश्चिच्चयंत्राण्यन्यालिखंतिच ॥३२॥ काश्चिज्जुह्वतिकुंडाग्नौनानाद्रव्याणिनिश्चलाः ॥ एवंसर्वेषुपौरेषुनिजधर्मेषुसर्वथा ॥ पराङ्मुखेषुजातेषुप्रोल्ललासवृषेतरः ॥ ३३ ॥ सिद्धयोकृष्टपच्याद्यानष्टाएनःप्रवेशनात् ॥ आसीत्कुंठितसामर्थ्योनृपोपिसमनाङ्मनाक् ॥ ३४ ॥ दूरस्थितोपिविघ्नेशोनृपंनिर्विण्णमानसम् ॥ चकारराज्यकरणेढुंढिराजो रिपुंजयम् ॥ ३५ ॥ अजीगणद्दिवोदासोप्यष्टादशदिनावधिम् ॥ कदागंतासवैविप्रोयोमांसमुपदेक्ष्यति ॥ ३६ ॥ इत्थमष्टादशेप्राप्तेदिवसेदिवसेश्वरे ॥ प्राप्तेमध्यंनभोभागंद्वारंप्राप्तोद्विजोत्तमः ॥ ३७ ॥ सएवपुण्यकीर्त्याख्योधर्मक्षेत्राद्धोक्षजः ॥ द्विजवेषंसमालंब्यस्म्मायातोनृपांतिकम् ॥ ३८ ॥ द्वित्रैःपवित्रैर्बहुधाजयजीवेतिवादिभिः ॥ समेतःसइतोविप्रोमूर्तिमानिवपावकः ॥ ३९ ॥ विलोक्यतंसमायांतंदूरादुत्कंठितोनृपः ॥ मेनेभवेद्गुरुरयंयुक्तोमदुपदेशने ॥ १४० ॥ अभिगम्यचतंराजाप्रणम्यचपुनःपुनः ॥ गृहीतस्वस्तिवचनोनिनायांतःपुरंद्विजम् ॥ ४१ ॥

कर्षणंविनैवसस्यादिसंपन्नत्वम् ॥ आद्यशब्देनपुटकादौमध्वादिसंपत्तिर्गृह्यते ॥ सिद्धयोष्टावणीमाद्याइतिक्वचित्पाठः ॥ तत्रदीर्घश्छांदसः ॥ मनाङ्मनाक्शनैःशनैः ॥ ३४ ॥ निर्विण्णमानसंविरक्तचित्तम् ॥ ३५ ॥ अजीगणद्गणयामास ॥ ३६ ॥ ३७ ॥ समायातआगतः ॥ ३८ ॥ इतःआगतः ॥ ३९ ॥ उत्कंठितस्तद्दर्शनोत्सुकः ॥ १४० ॥ स्वस्तिवचनान्याशीर्वादाः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुपर्केणविधिनादधिमधुघृतानांसमाहारोमधुपर्कःसएवविधिःप्रकारस्तेनविधिना शास्त्रोक्तप्रकारेणमधुपर्केणचेतिवैयधिकरण्यंवा ॥ ४२ ॥ खाद्यवस्तूनिभक्ष्यद्रव्याणि ॥ कृतःकृत्यक्रियाविधिः कर्तव्यानुष्ठानप्रकारोयस्मैसतथातम्॥४३॥ खिन्नःपीडितः॥४४॥ पक्षद्वय्येवयातेति ॥ पक्षद्वय्येवमासमात्रमेवेत्यर्थः ॥ पक्षद्वयेवयातेतिपाठेपक्षद्वयेआत्मानात्मवस्तुनोर्मध्येऽवयाताप्राप्तामतिरितिशेषः ॥

मधुपर्केणविधिनातंसंपूज्यजनाधिपः ॥ व्यपेताध्वश्रमंस्वस्थंप्रोल्लसन्मुखपंकजम् ॥ ४२ ॥ निवेद्यखाद्यवस्तूनिकृतकृत्यक्रियाविधिम् ॥ परितृप्तं सुखासीनंपप्रच्छब्राह्मणंनृपः ॥ ४३ ॥ ॥ राजोवाच ॥ ॥ खिन्नोस्मिविप्रवर्याहंराज्यभारंसमुद्वहन् ॥ खेदोनास्त्येवहिपरंवैराग्यमिवजायते ॥ ४४ ॥ किंकरोमिक्कगच्छामिकथंमेनिर्वृतिर्भवेत् ॥ पक्षद्वय्येवयातेतिममचिंतयतोद्विज ॥४५॥ असीमंसुखसंतानंभुक्तंराज्यंमयाद्विज ॥ परिक्षीणविपक्षंचत्र्यक्षैश्वर्यमिवस्फुटम् ॥ ४६ ॥ स्वसामर्थ्यादहंजातःपर्जन्याग्न्यनिलात्मकः ॥ प्रजाश्चपालिताःसम्यक्पुत्राइवनिजौरसाः ॥ ४७॥ तर्पिताश्चापिभूदेवावसुभिश्चदिनेदिने॥ एकमेवापराद्धंचमयाराज्यंप्रशासता ॥ ४८ ॥ देवास्तृणीकृताःसर्वेस्वतपोबलदर्पतः ॥ तच्चप्रजोपकारार्थंनस्वार्थंभवताशपे ॥ ४९ ॥ अधुनागुरुरेधित्वंममभाग्योदयागतः ॥ राज्यंतुप्रकरोम्येवंन्यकृतांतकसाध्वसम् ॥ १५० ॥ अकालकालकलनंममराज्येनकुत्रचित् ॥ जराव्याधिदरिद्रेभ्योममराज्येपिनोभयम् ॥ ५१ ॥ कोपिधर्मेतरांवृत्तिंनश्रयेन्मयिशासति ॥ धर्मोदयाजनाःसर्वेसर्वेसंतिसुखोदयाः ॥ ५२ ॥ सद्विद्याव्यसनाः सर्वेसर्वेसन्मार्गचंचुराः ॥ अथवायदिकल्पांतंतिष्ठेदायुस्ततोपिकिम् ॥ ५३ ॥ सर्वेभोग्यास्तथाभांतियथाचर्वितचर्वणम् ॥ किंपिष्टपेषणेनात्रराज्येन द्विजपुंगव ॥ ५४ ॥ किमप्युपदिशप्राज्ञगर्भवासोपशांतये ॥ अथवात्वांप्रपन्नस्यममकिंचिंतनैरिमः ॥ ५५ ॥ यदेवकथयस्यद्यतत्करिष्याम्यसंशयम् ॥ त्वद्विलोकनमात्रेणसर्वएवमनोरथाः ॥ ५६ ॥ अन्येषामपिजायंतेजातप्रायाममैवतु ॥ जानेदेवविरोधेनकेकेनप्रलयंगताः ॥ ५७ ॥ अवंतोपिप्रजाः स्वीयानिजधर्ममनुव्रताः ॥ पुरातेत्रिपुराःशूराःशिवभक्तिपराअपि ॥ ५८ ॥ धरामयंरथंकृत्वाधनुःकृत्वाहिमाचलम् ॥ वेदांश्चवाजिनःकृत्वागुणंकृत्वाचवासुकिम् ॥ ५९ ॥ विरिंचिंसारथिंकृत्वाकृत्वाविष्णुंचपत्रिणम्॥ रथचक्रेपुष्पवंतौप्रतोदंप्रणवात्मकम् ॥ १६० ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ एधिभव ॥ न्यक्कृतांतकसाध्वसंतिरस्कृतयमभयम् ॥ १५० ॥ ५१ ॥ ५२ ॥ एवंस्वसामर्थ्यादिकंदर्शयित्वावैराग्यंप्रकटयाति ॥ अथवेति ॥ ५३ ॥ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ पुरातइति ॥ त्रिपुरास्त्रिपुरस्थादैत्याएकबाणपातेनहरेणभस्मसात्कृतादग्धाइतिपंचमेनान्वयः ॥ ५८ ॥ ५९ ॥ पुष्पवंतौसूर्याचन्द्रौ ॥ द्वितीयांतानांपदानांकृत्वे

CC-0. In Public Domain. Digitization by eGangotri

तिसम्बन्धः ॥ १६० ॥ कीलान्शंकून् ॥ वरूथंरथगुप्तिम् ॥ ६१ ॥ चक्षुःश्रवसःसर्पान् ॥ कालाग्निरुद्रोनामप्रलयकारकःसंकर्षणमुखानलः ॥ ६२ ॥ ६३ ॥ सुत्राम्णाइंद्रेण ॥ ६४ ॥ दधीचिरिति ॥ दधीचिर्दध्यङ्ङाथर्वणोऽथर्ववेदाविप्रेंद्रोपिश्रेष्ठब्राह्मणोप्यस्थिकृतेऽस्थिनिमित्तमात्रंकृत्वाहरेःपूर्ववैरमनुस्मृत्यहतः ॥ पूर्ववैरंदर्शयन्विष्णुंविशिनष्टि ॥ जयार्थंयुध्यतस्तेनैवदधीचिना ऽऽजौसंग्रामेविजितस्योति ॥ एतदाख्यानंद्वात्रिंशदध्यायोलिखितम् ॥ ६५ ॥ शिवभक्तस्येति ॥ यद्यपिश्रीकृष्णेनवाणभुजनिकृंतनंतत्कालापेक्षयापश्चाद्भावितथाप्यतीतश्रीकृष्णावतारापेक्षयैवमुक्तमिति

ताराग्रहमयान्कीलान्वरूथंगगनात्मकम् ॥ ध्वजदंडंसुमेरुंचप्रांशुकल्पतरुंध्वजम् ॥ ६१ ॥ योक्त्राणिचक्षुःश्रवसश्छंदांस्यंगानिरक्षकान् ॥ भल्लंकालाग्निरुद्राख्यंपुंखीकृत्यप्रभंजनम् ॥ ६२ ॥ हरेणैकेषुपातेनलीलयाभस्मसात्कृताः ॥ बलिर्यज्ञकृतांश्रेष्ठःकृत्वाकपटखर्वताम् ॥ ६३ ॥ पातालंगमितःपूर्वंहरिणाविक्रमैस्त्रिभिः ॥ वृत्तवानपिवैवृत्रःसुत्राम्णाविनिसूदितः ॥६४॥ दधीचिरपिविप्रेंद्रोदेवैरस्थिकृतेहतः ॥ पूर्ववैरमनुस्मृत्यजयार्थंयुध्यतोहरेः ॥ कुशास्त्रैर्विजितस्याजौतेनैवचदधीचिना ॥ ६५ ॥ शिवभक्तस्यबाणस्यदोःसहस्रंपुराहरिः ॥ चिच्छेदसंख्येकिंतेनापराद्धंसाधुवर्तिना ॥ ६६ ॥ तस्माद्विरोधेभद्रायनभवेद्दैवतैःसह ॥ देवेभ्योमद्भयंनास्तिसत्पथीनस्यवैमनाक् ॥ ६७ ॥ यज्ञैर्देवत्वमापन्नागीर्वाणावासवादयः ॥ यज्ञैर्दानैस्तपोभिश्चतेभ्योप्याधिक्यमास्तिमे ॥ ६८ ॥ अस्तुन्यूनतवमाधिक्यंकिमनेनाधुनामम ॥ इंद्रियोपरमःप्राप्तःसुखदस्तवदर्शनात् ॥ ६९ ॥ इदानींदिशमेतातकर्मनिर्मूलनक्षमम् ॥ उपायंत्वमुपायज्ञयेननिर्वृतिमाप्नुयाम् ॥ १७० ॥ ॥ स्कंदउवाच ॥ ॥ गणेशावेशवशतोराज्ञेतियदुदीरितम् ॥ तदाकर्ण्यहृषीकेशःप्राहब्राह्मणवेषभृत् ॥ ७१ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ साधुसाधुमहाप्राज्ञनृपचूडामणेऽनघ ॥ मयायदुपदेष्टव्यंतत्त्वयैवनिरूपितम् ॥ ७२ ॥ त्वमादावेवनिर्वृत्तःपरंमेमानदोह्यसि ॥ क्षालितेंद्रियपंकश्चसुतपःस्वच्छवारिभिः ॥ ७३ ॥ यदुक्तंभवताभूपतत्सर्वंतथ्यमेवहि ॥ तवशक्तिंचजानामिविरक्तिंचमहामते ॥ ७४ ॥ नभवत्सदृशोराजाभुविभूतोभविष्यति ॥ राज्यंभोक्तुंत्वयाज्ञायियुक्तंयत्तुमुमुक्षसि ॥ ७५ ॥ विरोधेपिहिदेवानांत्वयानापकृतंक्वचित् ॥ धर्मेतरप्रवेशश्चतवराष्ट्रेपिनोभवत् ॥ ७६ ॥ प्रवर्तिताभिर्भवताप्रजाभिर्यदनुष्ठितम् ॥ धर्मेधर्मस्वधर्मज्ञतेनतृप्तादिवौकसः ॥ ७७ ॥ एकएवहितेदोषोहृदिमेप्रतिभासते ॥ काश्याविश्वेश्वरोदूरंयत्कृतोभवताकिल ॥ ७८ ॥

ज्ञेयम् ॥ तथाचोक्तंवासिष्ठेभुशुण्डेन ॥ वसुदेवगृहेविष्णोर्भुवोभारनिवृत्तये ॥ अधुनाषोडशंजन्मभविष्यतिमुनीश्वरोति ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ १७० ॥ आवेशःप्रवेशः ॥ ७१ ॥ ७२ ॥ स्वच्छानिनिर्मलानि ॥ ७३ ॥ ७४ ॥ मुमुक्षसित्यक्तुमिच्छसि ॥ ७५ ॥ धर्मेतरोऽधर्मः ॥ ७६ ॥ धर्मेप्रवर्तिताभिरित्यन्वयः ॥ ७७ ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूर्जायायेषांतिभूजानयस्तेषांमध्येसत्तमश्रेष्ठभूजानिसत्तम ॥ वच्मिकथयामि ॥ ७९ ॥ १८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ त्वदभ्याशात्त्वत्सन्निधानात् ॥ ८७ ॥ स्मायंस्मायमिति ॥ पुनःपुनरीषद्धास्यंकृत्वेत्यर्थः ॥ ८८ ॥ यद्यस्मादखिलैर्ध्येयइतिसंबंधः ॥ ८९ ॥ उदर्कउत्तरकालीनंफलम् ॥ दवीयोऽल्पंनदवीयोदवीयोमहत्तरम् ॥ अदवीयोनिकटमितिवा ॥

महांतमपराधंतेजानेभूजानिसत्तम ॥ इमंतत्पापशांत्यैचवच्म्युपायंमहत्तरम् ॥ ७९ ॥ संख्यास्तियावतीदेहेदेहिनोरोमसंभवा ॥ तावंतोप्यपराधावैयां तिलिंगप्रतिष्ठया ॥ १८० ॥ एकंप्रतिष्ठितंयेनलिंगमत्रेशभक्तितः ॥ तेनात्मनासमंविश्वंजगदेतत्प्रतिष्ठितम् ॥ ८१ ॥ रत्नाकरेरत्नसंख्यासंख्याविद्भिरपी ष्यते ॥ लिंगप्रतिष्ठापुण्यस्यनतुसंख्येतिलिख्यते ॥ ८२ ॥ तस्मात्सर्वप्रयत्नेनकुरुलिंगंप्रतिष्ठितम् ॥ तयालिंगप्रतिष्ठित्याकृतकृत्योभविष्यासि ॥८३॥ इत्युक्त्वाब्राह्मणोदध्यौक्षणंनिश्चलमानसः ॥ उवाचचप्रहृष्टास्योराजानंपाणिनास्पृशन् ॥ ८४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ अन्यच्चकिंचित्पश्यामिभूपा लज्ञानचक्षुषा ॥ शृणुष्वावहितोभूत्वातदपिप्राज्ञसत्तम ॥ ८५ ॥ धन्योसिकृतकृत्योसिमान्योसिमहतामपि ॥ जप्यंचतवनामेहप्रातःशुभफलेप्सुना ॥ ॥ ८६ ॥ दिवोदासत्वदभ्याशादपिधन्यतरावयम् ॥ तेपिधन्यतरामर्त्येयेत्वदाख्यांप्रचक्षते ॥८७॥ स्मायंस्मायंजगौविप्रोमौलिमांदोलयन्मुहुः ॥ हृद्ये वबहुशोहृष्टःसंप्रहृष्टतनूरुहः ॥ ८८ ॥ अहोभाग्योदयश्चास्यअहोनैर्मल्यमस्यवै ॥ यदेनमनिशंध्यायेद्ध्येयोविश्वेश्वरोऽखिलैः ॥ ८९ ॥ अहोउदर्क एतस्यनकैश्चित्प्रतिपद्यते ॥ अस्माकमपियद्दूरमदवीयस्तदस्ययत् ॥ १९० ॥ हृद्यालोच्येतिविप्रोथवर्णयित्वाक्षितीश्वरम् ॥ आविश्चकारतत्सर्वंयत्स माधावलोकयत् ॥ ९१ ॥ ॥ ब्राह्मणउवाच ॥ ॥ राजंस्तवाद्यफलितोमनोरथमहाद्रुमः ॥ अनेनैवशरीरेणत्वंगंतासिपरंपदम् ॥ ९२ ॥ यथाविश्वे श्वरोनित्यंत्वामेवहृदिशीलयेत् ॥ तथास्मदादीनपिनद्विजांस्तत्पादलोचनान् ॥ ९३ ॥ कृतलिंगप्रतिष्ठंत्वांसप्तमेह्यद्यवासरात् ॥ दिव्यंविमानमागत्यने तुमेष्यतिशांभवम् ॥ ९४ ॥ राजंस्त्वंवेत्सिकस्यायंविपाकःसुकृतस्यते ॥ वाराणस्याःपुरःसम्यक्सेवनादित्यवैम्यहम् ॥ ९५ ॥ एकमप्यत्रयःपायाद्वारा णस्यांस्थितंजनम् ॥ तस्याप्येवंविपाकोस्तिदेहांतेराजसत्तम ॥ ९६ ॥ इतिश्रुत्वासराजर्षिर्दिवोदासःप्रतापवान् ॥ ब्राह्मणायसशिष्यायप्रादात्प्रीतोभिवां छितम् ॥९७॥ अथसंप्रीणितंविप्रंप्रणम्यचमुहुर्मुहुः॥प्रोवाचराजासंहृष्टस्तारितोस्मिभवार्णवात् ॥९८॥ ब्राह्मणोपिप्रहृष्टात्मापरिपूर्णमनोरथः ॥ समापृ च्छ्यमहीनाथंस्वेष्टंदेशंजगामह॥९९॥विलोक्यकाशींपरितोमायाद्विजवपुर्हरिः॥भूयोभूयोविचार्यापिकिमत्रातीवपावनम्॥२००॥ स्थानंयत्राहमध्यास्य निजभक्तानशेषतः ॥ नेष्यामिपरमंधामविश्वेशानुग्रहात्परात्॥१॥संप्रधार्येतिभगवान्दृष्ट्वापांचनदंह्रदम् ॥ तत्रकृत्वाविधिस्नानंततस्तत्रैवसंस्थितः ॥२॥

पदमितिशेषः ॥ उदर्कइतिवाविशेष्यते ॥ यद्यस्मात् ॥ १९० ॥ वर्णयित्वास्तुत्वा ॥ ९१ ॥ तच्छब्दार्थमेवदर्शयति ॥ राजन्निति ॥ गंतासिगमिष्यसीत्यर्थः ॥ ९२ ॥ ९३ ॥ ९४ ॥ विपाकः फलम् ॥ ९५ ॥ ९६ ॥ ९७ ॥ संप्रीणितंसंतोषितम् ॥ ९८ ॥ ९९ ॥ भूयइति ॥ भूयोभूयोवक्ष्यमाणंविचार्यपश्चादितिसंप्रधार्यतत्रैवसंस्थितइतिसार्धद्वयस्यान्वयः ॥ २०० ॥ १ ॥ २ ॥

मंक्षुद्रुतम्॥यदाहामरः ॥ सद्योद्राङ्मंक्षुसपदिद्रुतमिति ॥३॥ प्रकृतीर्मंत्रिणः ॥४॥ अध्यक्षान्विशिनष्टि ॥ कोशेति ॥ देशितानादिष्टान्नियोजितानित्यर्थः॥सर्वान्प्रोवाचेत्यतःप्राक्तनानांद्वितीयांतानां पदानामाहूयेत्यनेनसम्बन्धः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ पुनःकाशीमगादितिविष्णुवाक्यात्काशींत्यक्त्वातत्पूर्वदिग्भागेगोमतीतीरेसपरिवारोगतस्तत्रपुत्रंराज्येअभिषिच्यलिंगस्थापनद्वारारुद्रंप्रसा

प्रतीक्षमाणोलक्ष्मीशोमंक्षुत्र्यक्षसमागमम् ॥ तार्क्ष्यंप्रस्थापयांचक्रेराजवृत्तांतवेदिनम् ॥ ३ ॥ दिवोदासोपिराजेंद्रोविप्रेंद्रंपरिवर्णयन् ॥ आहूयप्रकृतीः सर्वाःसामात्यान्मंडलेश्वरान् ॥ ४ ॥ अध्यक्षानपिसर्वांश्चकोशाश्वेभादिदेशितान् ॥ पुत्रान्पंचशतंप्राग्र्यंसुतंचसमरंजयम् ॥ ५ ॥ पुरोहितंप्रतीहारमृत्विजोगणकान्द्विजान् ॥ सामंतान्राजपुत्रांश्चसूपकारांश्चिकित्सकान् ॥ ६ ॥ वैदेशिकानपिबहून्नानाकार्यसमागतान् ॥ सांतःपुरांचमहिषींवृद्धगोपालबालकान् ॥ ७ ॥ सर्वान्प्रोवाचहृष्टात्माप्रबद्धकरसंपुटः ॥ यथासब्राह्मणःप्राहदिनसप्तावधिस्थितिम् ॥ ८ ॥ आश्चर्यंतेषुशृण्वत्सुविषण्णवदनेषुच ॥ स्वयंराजगृहंनीत्वाकुमारंसमरंजयम् ॥ ९ ॥ अभिषिच्यमहाबुद्धिःपौराञ्जानपदानपि ॥ प्रसादीकृत्यपुण्यात्मापुनःकाशीमगान्नृपः ॥ २१० ॥ आगत्यकाशींमेधावीसभूपालोरिपुंजयः ॥ प्रासादंकारयामासस्वर्धुन्याःपश्चिमेतटे ॥ ११ ॥ रिपून्प्रमथ्यसमरेयावतीश्रीरुपार्जिता ॥ तावत्यासहिभूपालःशिवालयमचीक्लृपत् ॥ १२ ॥ भूपाललक्ष्मीरखिलायत्तत्रविनियोजिता ॥ भूपालश्रीरितिख्यातातत:साभूरभूच्छुभा ॥ ॥ १३ ॥ दिवोदासेश्वरंलिंगंप्रतिष्ठाप्यरिपुंजयः ॥ कृतकृत्यमिवात्मानममन्यतनरेश्वरः ॥ १४ ॥ अथैकस्मिन्दिनेराजातल्लिंगंविधिपूर्वकम् ॥ समभ्यर्च्यनमस्कृत्ययावत्तुष्टावतुष्टिदम् ॥ १५ ॥ तावन्नभोंगणादाशुदिव्यंयानमवातरत् ॥ पार्षदैःपरितःकीर्णंशूलखट्वांगपाणिभिः ॥ १६ ॥ अत्यादित्याग्नितेजोभिर्भालनेत्रैःकपर्दिभिः ॥ शुद्धस्फटिकसंकाशैरंगैर्दीप्तनभोंगणैः ॥ १७ ॥ विभूषाहिफणारत्नज्योतिःपूजितविग्रहैः ॥ नित्यप्रकाशसंत्रस्ततमःश्रितशिरोधरैः ॥ १८ ॥

दयितुमागतः ॥ तथाचोक्तंहरिवंशे ॥ विषयांतेपुरींरम्यांगोमत्यांसन्यवेशयादिति ॥ २१० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ यानंविशिनष्टि ॥ पार्षदैरिति ॥ पार्षदान्विशिनष्टि शूलेत्यादिसार्धद्वयेन ॥ खट्वांगमायुधविशेषः ॥ १६ ॥ अतिअतिक्रांतमादित्याग्नितेजोयैस्तेतथातैरत्यादित्याग्नितेजोभिः ॥ १७ ॥ नित्येति ॥ नित्यप्रकाशेनस्वप्रकाशेनसंत्रस्तैस्तमोभिराश्रि

CC-0. In Public Domain. Digitization by eGangotri

ताशिरोधराग्रीवायेषांतेतथातैर्नीलकण्ठैरित्यर्थः ॥ १८ ॥ १९ ॥ २२० ॥ २१ ॥ दिवंकैलासम् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २२९ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायामष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ एकोनषष्टिकेऽध्यायेश्रीमदानन्दकानने ॥ पंचानांसरितांपुण्यःप्रादुर्भावोनिरूप्यते ॥ १ ॥ अग्रिमंप्रष्टुंस्कन्दंप्रोत्साह

चामरव्यग्रहस्ताग्ररुद्रकन्याशतावृतम् ॥ अथपारिषदैराजादिव्यस्रगनुलेपनैः ॥१९॥ दिव्यैर्दुकूलनेपथ्यैरलंचक्रेमुदान्वितैः ॥ त्रिनेत्रीकृतसद्भालंश्यामीकृतशिरोधरम् ॥ २२० ॥ सुगौरीकृतसर्वांगंकपर्दीकृतमौलिजम् ॥ चतुर्भुजीकृततनुंभूषणीकृतपन्नगम् ॥ २१ ॥ चंद्रार्धीकृतमूर्धानंनिन्युस्तंपार्षदादिवम् ॥ २२ ॥ तदाप्रभृतितत्तीर्थंभूपालश्रीरितिश्रुतम् ॥ तत्रश्राद्धादिकंकृत्वादानंदत्त्वास्वशक्तितः ॥ २३ ॥ दिवोदासेश्वरंदृष्ट्वासमभ्यर्च्यचभक्तितः ॥ राज्ञश्चाख्यायिकांश्रुत्वाननरोगर्भमाविशेत् ॥ २४ ॥ आख्यानमेतन्नृपतेर्दिवोदासस्यपावनम् ॥ पठित्वापाठयित्वापिनरःपापैःप्रमुच्यते ॥ २५ ॥ दिवोदासशुभाख्यानंश्रुत्वायःसमरंविशेत् ॥ नजातुजायतेतस्यभयंवैरिकृतंक्वचित् ॥ २६ ॥ दिवोदासकथापुण्यामहोत्पातनिकृंतनी ॥ पठनीयाप्रयत्नेनसर्वविघ्नोपशांतये ॥ २७ ॥ नावृष्टिर्जायतेतत्रनाकालमरणाद्भयम् ॥ दैवोदासीकथायत्रसर्वपातकनाशिनी ॥ २८ ॥ अस्याख्यानस्यपठनाद्विष्णोरिवमनोरथाः ॥ संपूर्णतांगमिष्यंतिशंभोश्चिंतितकारिणः ॥२२९॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेदिवोदासनिर्वाणप्राप्तिर्नामाष्टपंचाशत्तमोऽध्यायः ॥५८॥ अगस्त्यउवाच ॥ ॥ सर्वज्ञहृदयानंदगौरीचुंबितमूर्धज ॥ तारकांतकषड्वक्रतारिणेभद्रकारिणे ॥ १ ॥ सर्वज्ञाननिधेतुभ्यंनमःसर्वज्ञसूनवे ॥ सर्वथाजितमारायकुमारायमहात्मने ॥२॥ कामारिमर्धनारीशंवीक्ष्यकामकृतंकिल ॥ योजिगायकुमारोपिमारंतस्मैनमोस्तुते ॥ ३ ॥ यदुक्तंभवतास्कंदमायाद्विजवपुर्हरिः ॥ काश्यांपंचनदंतीर्थमध्यासातीवपावनम् ॥ ४ ॥ भूर्भुवःस्वःप्रदेशेषुकाशीपरमपावनम् ॥ तत्रापिहरिणाज्ञायितीर्थंपंचनदंपरम् ॥ ५ ॥ कुतःपंचनदंनामतस्यतीर्थस्यषण्मुख ॥ कुतश्चसर्वतीर्थेभ्यस्तदासीत्पावनंपरम् ॥ ६ ॥ कथंचभगवान्विष्णुरंतरात्माजगत्पतिः ॥ सर्वेषांजगतांपाताकर्ताहर्ताचलीलया ॥ ७ ॥ अरूपोरूपमापन्नोह्यव्यक्तोव्यक्ततांगतः ॥ निराकारोपिसाकारोनिष्प्रपंचःप्रपंचभाक् ॥ ८ ॥ अजन्मानेकजन्माचत्वनामास्फुटनामभृत् ॥ निरालंबोऽखिलालंबोनिर्गुणोपिगुणास्पदम् ॥ ९ ॥ अहृषीकोहृषीकेशोप्यनंघ्रिरपिसर्वगः ॥ उपसंहृत्यरूपंस्वंसर्वव्यापीजनार्दनः ॥ १० ॥

यन्स्तौति ॥ सर्वज्ञेति ॥ तारितुंशीलमस्यास्तीतितारीतस्मै ॥ १ ॥ २॥३॥ अध्यासअधिअधिष्ठायआसस्थितवानित्यर्थः ॥४॥५॥६॥७॥ आपन्नइत्यत्रविसंधिरार्षः ॥८॥९॥ अहृषीकइंद्रियरहितो

CC-0. In Public Domain. Digitization by eGangotri

थचहृषीकेशइंद्रियाणांप्रवर्तकः ॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसश्रृणोत्यकर्णइत्यादिश्रुतेः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ ऊर्जेकार्तिके ॥ ॥ १७ ॥ १८ ॥ १९ ॥ रूपंसौंदर्यंलावण्यमंगसौष्ठवंतच्छालिनी ॥ २० ॥ परःश्रीकृष्णःसापितृत्वेनवर्ततेयस्यसपरीकामस्तेनक्षुब्धंक्षुभितंमुनेर्मनोबभूवेतिशेषः ॥ २१ ॥ २२ ॥ २३ ॥ मुनीनांमननशीलानांमानसंयत्तत्पद्मादपिमृदुकोमलमित्यन्वयः ॥ प्रायोग्रहणंदुर्वासःप्रभृतीनांव्यावृत्त्यर्थम् ॥ स्वभावात्क्षमिणांमृदुइतिक्वचित्पाठः ॥ स्वरूपेणैवस्वभावेनैव ॥ तथाचोर्वशीवचनम् ॥

स्थितःसर्वात्मभावेनतीर्थेपंचनदेपरे ॥ एतदाख्याहिषड्वक्त्रपंचवक्त्राद्यथाश्रुतम् ॥११॥ स्कंदउवाच ॥ ॥ कथयामिकथामेतांनमस्कृत्यमहेश्वरम् ॥ सर्वाघौघप्रशमनींसर्वश्रेयोविधायिनीम् ॥ १२ ॥ यथापंचनदंतीर्थंकाश्यांप्रथितिमागतम् ॥ यन्नामग्रहणादेवपापंयातिसहस्रधा ॥ १३ ॥ प्रयागोपिचतीर्थेशोयत्रसाक्षात्स्वयंस्थितः ॥ पापिनांपापसंघातंप्रसह्यनिजतेजसा ॥ १४ ॥ हरंतिसर्वतीर्थानिप्रयागस्यबलेनहि ॥ तानिसर्वाणितीर्थानिमाघेमकरगेरवौ ॥ १५ ॥ प्रत्यब्दंनिर्मलानिस्युस्तीर्थराजसमागमात् ॥ प्रयागश्चापितीर्थेंद्रःसर्वतीर्थार्पितंमलम् ॥ १६ ॥ महाविनांमहाघंचहरेत्पांचनदाद्बलात् ॥ यंसंचयतिपापौघमावर्षंतीर्थनायकः ॥ तमेकमज्जनादूर्जेत्यजेत्पंचनदेध्रुवम् ॥ १७ ॥ यथापंचनदोत्पत्तिस्तथाचकथयाम्यहम् ॥ निशामयमहाभागमित्रावरुणनंदन ॥ १८ ॥ पुरावेदशिरानाममुनिरासीन्महातपाः ॥ भृगुवंशसमुत्पन्नोमूर्तोवेदइवापरः ॥ १९ ॥ तपस्यतस्तस्यमुनेःपुरोदृग्गोचरंगता ॥ शुचिरप्सरसांश्रेष्ठारूपलावण्यशालिनी ॥ २० ॥ तस्यादर्शनमात्रेणपरिक्षुब्धंमुनेर्मनः ॥ चस्कंदसमुनिस्तूर्णंसाथभीतावराप्सराः ॥ २१ ॥ दूरादेवनमस्कृत्यतमृषिंसाभ्यभाषत ॥ अतीववेपमानांगीशुचिस्तच्छापभीतितः ॥ २२ ॥ नापराध्नोम्यहंकिंचिन्महोग्रतपसांनिधे ॥ क्षंतव्यंमेक्षमाधारक्षमारूपास्तपस्विनः ॥ २३ ॥ मुनीनांमानसंप्रायोयत्पद्मादपितन्मृदु ॥ स्त्रियःकठोरहृदयाःस्वरूपेणैवसत्तम ॥ २४ ॥ इतिश्रुत्वावचस्तस्याःशुचेरप्सरसोमुनिः ॥ विवेकसेतुनास्तंभीन्महारोषनदीरयम् ॥ २५ ॥ उवाचचप्रसन्नात्माशुचेशुचिरसिध्रुवम् ॥ नमेऽल्पोपिहिदोषोत्रनतेदोषोस्तिसुंदरि ॥ ॥ २६ ॥ वह्निस्वरूपाललनानवनीतसमःपुमान् ॥ अनभिज्ञावदंतीतिविचारान्महदंतरम् ॥ २७ ॥ स्निह्येदुद्धृतसारोपिवह्नेःसंस्पर्शमाप्यवै ॥ चित्रंस्त्र्याख्यासमादानात्पुमान्स्निह्यतिदूरतः ॥ २८ ॥ अतःशुचेनभेतव्यंत्वयाशुचिमनोगते ॥ अतर्कितोपस्थितयात्वयाचस्खलितंमया ॥ २९ ॥

क्वापिसख्यंनवैस्त्रीणांवृकाणांहृदयंयथेत्यादि ॥ २४ ॥ विवेकसेतुनाआत्मानात्मविवेकधृत्यामहान्योरोषएवनदीतस्यारयंवेगमस्तंभीत्स्तंभितवानित्यर्थः ॥ २५ ॥ २६ ॥ नवनीतसमःप्रथमोद्धृतघृततुल्यः ॥ इतिउदाहरणमितिशेषः ॥ अनभिज्ञत्वेहेतुमाह ॥ विचारादिति ॥ अंतरमसाम्यं दृष्टांतदार्ष्टांतिकयोरितिशेषः ॥ २७ ॥ साम्याभावमेवाह ॥ स्निह्येदिति ॥ उद्धृतश्चासौसारश्चेति उद्धृतसारोघृतम् ॥ स्त्रीइतिआख्यायस्यपदार्थस्यसख्याख्यस्तस्यासमादानादसंस्पर्शादित्यर्थः ॥ स्त्रीनामग्रहणादितिवा ॥ २८ ॥ शुचिःपवित्रामनोगतिरंतःकरणवृत्तिर्यस्याःसातयातस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबोधनंहेशुचिमनोगते ॥ रुचिमनोगतेइतिक्वचित् ॥ तत्रापिसएवार्थः ॥ नभेतव्यमित्यत्रहेतुंवदन्शुचिमनोगतत्वमेवाह ॥ अतर्कितोपस्थितयात्वयाचस्खलितंमयेति ॥ अतर्कितोपस्थितत्वं नाममद्दर्शनादस्यक्षोभोजायतामित्यननुसंधायागतत्वम् ॥ यञ्चस्खलेइतिक्वचित्पाठः ॥ यद्यस्माञ्चस्खलेस्खलितंक्षरितमितियावत् ॥ रेतइतिशेषः ॥ २९ ॥ कोपरयएवारिस्तस्मात्कोपरयादरेः ॥ कथंभूतात् ॥ क्षणेनांधीकरोतीतिक्षणांधीकरणस्तस्मात् ॥ ३० ॥ सुकृच्छ्रतःसुकष्टात् ॥ पुष्पवंतयोश्चंद्रसूर्ययोः ॥ ३१ ॥ अर्थानांपुरुषार्थानांपरिजृंभणंपरिस्फुरणंप्राप्तिरित्यर्थः ॥ उत्सेधोवर्धनम् ॥ ३२ ॥ ननुक्रोधाद्धर्मादीनामभावेपिस्त्र्यादिविषयःकामोभविष्यतितत्राह ॥ अमर्षेइति ॥ अमर्षेक्रोधे ॥ मनःकर्मभूतम् ॥ मनोभूःकामः ॥ उच्चैःसर्वग्रासे ॥ ३३ ॥ शांतितरोःशांतिवृक्षस्य॥

स्खलनान्नतथाहानिरकामात्तपसोमुनेः ॥ यथाक्षणांधीकरणाद्धानिःकोपरयादरेः ॥ ३० ॥ कोपात्तपःक्षयंयातिसंचितंयत्सुकृच्छ्रतः ॥ यथाभ्रपटलं प्राप्यप्रकाशःपुष्पवंतयोः ॥ ३१ ॥ अनर्थकारिणःक्रोधात्कार्थानांपरिजृंभणम् ॥ क्वाखलजनोत्सेधात्साधूनांपरिवर्धनम् ॥ ३२ ॥ अमर्षेकर्षतिमनो मनोभूसंभवःकुतः ॥ विधुंतुदेतुदत्युच्चैर्विधुंकुत्रास्तिकौमुदी ॥ ३३ ॥ ज्वलतोरोषदावाग्नेःक्वाशांतितरोःस्थितिः ॥ दृष्टाकेनापिकिंक्वापिसिंहात्कलभसुस्थता ॥ ३४ ॥ तस्मात्सर्वप्रयत्नेनप्रतीपःप्रतिघातुकः ॥ चतुर्वर्गस्यदेहस्यपरिहेयोविपश्चिता ॥ ३५ ॥ इदानींशृणुकल्याणिकर्तव्यंयत्त्वयाशुचे ॥ अमोघवीजाहिवयंतद्वीजमुररीकुरु ॥ ३६ ॥ एतस्मिन्रक्षितेवीर्येपरिस्कन्नेत्वदीक्षणात् ॥ त्वयातवभवित्रेकंकन्यारत्नंमहाशुचि ॥ ३७ ॥ इत्युक्तातेनमुनिनापुनर्जातेवसाप्सराः ॥ महाप्रसादइत्युक्त्वामुनेःशुक्रमजीगिलत् ॥ ३८ ॥ अथकालेनदिव्यस्त्रीकन्यारत्नमजीजनत् ॥ अतीवनयनानंदिनिधानं रूपसंपदाम् ॥ ३९ ॥ तस्यैववेदशिरसआश्रमेतांनिधायसा ॥ शुचिरप्सरसांश्रेष्ठाजगामचयथेप्सितम् ॥४०॥ तांचवेदशिराःकन्यांस्नेहेनसमवर्धयत् ॥ क्षीरेणस्वाश्रमस्थायाहरिण्याहरिणीक्षणाम् ॥४१॥ मुनिर्नामददौतस्यैधूतपापेतिचार्थवत् ॥ यन्नामोच्चारणेनापिकंपतेपातकावली ॥४२॥ सर्वलक्षणशोभाढ्यांसर्वावयवसुंदरीम् ॥ मुनिस्तत्याजनोत्संगात्क्षणमात्रमपिक्वचित् ॥ ४३ ॥ दिनेदिनेवर्धमानांतांपश्यन्मुमुदेभृशम् ॥ क्षीरनीरधिवद्रम्यांनिशिचांद्रमसींकलाम् ॥ ४४ ॥ अथाष्टवार्षिकींदृष्ट्वातांकन्यांसमुनीश्वरः ॥ कस्मैदेयेतिसंचिंत्यतामेवसमपृच्छत ॥ ४५॥ ॥ वेदशिराउवाच ॥ ॥ अयिपुत्रि महाभागेधूतपापेशुभेक्षणे ॥ कस्मैदद्यांवरायत्वांत्वमेवाख्याहितंवरम् ॥ ४६ ॥ अतिस्नेहार्द्रचित्तस्यजनेतुश्चेतिभाषितम् ॥ निशम्यधूतपापासाप्रोवाच विनतानना ॥ ४७ ॥ ॥ धूतपापोवाच ॥ ॥ जनेतर्यद्यहंदेयासुंदरायवरायते ॥ तदातस्मैप्रयच्छत्वंयमहंकथयामिते ॥ ४८ ॥ तुभ्यंचरोचतेतातशृणोत्ववहितोभवान् ॥ सर्वेभ्योतिपवित्रोयोयःसर्वेषांनमस्कृतः ॥ ४९ ॥

कलभोहस्तिशावकः ॥ अत्यंतास्वास्थ्यप्रतिपादनायकलभशब्दप्रयोगः ॥ ३४ ॥ प्रतीपःप्रतिकूलः ॥ प्रतिघइतिपाठेपिसएवार्थः ॥ प्रतिघातुकःप्रतिनाशकः ॥ चतुर्वर्गस्यदेहस्यचतुर्वर्गशरीरस्येत्यर्थः ॥ चत्वारोवर्गाधर्मादयोयस्मात्तस्यदेहस्येतिवा ॥ परिहेयःक्रोधइतिशेषः ॥ ३५ ॥ उररीकुरुस्वीकुरुजठरेधारयेत्यर्थः ॥ ३६ ॥ भवितृभविष्यति ॥ ३७ ॥ अजीगिलद्गिलितवती ॥ ३८ ॥ ॥३९॥यथेप्सितंयथारुचिजगाम ॥ त्रिदशालयमितिक्वचित् ॥ ४० ॥ ४१ ॥ नाम्नोर्थवत्त्वमेवदर्शयति ॥ यन्नामेति ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥५०॥५१॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ गरिम्णागरिष्ठत्वेन ॥५६॥५७॥५८॥५९॥ पण्यतेव्यवह्रियतेऽनेनेतिपणंद्रविणंतेनसक्रय्यःक्रेतव्यः प्राप्यइत्यर्थः ॥ सुतीर्थमेवविपणिःपण्यवीथिकात स्याम् ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ क्षेत्रेऽविमुक्ते ॥ परमपावनइतिविशेषणात् ॥ ६५ ॥ ६६ ॥ धाराअविच्छिन्नेनपतमानाआसाराःसीकरायासुतास्तथातासु ॥ ६७ ॥ आसारशीकरैर

सर्वेयमभिलष्यंतियस्मात्सर्वसुखोदयः ॥ कदाचिद्योननश्येतयःसदैवानुवर्तते ॥ ५० ॥ इहामुत्रापियोरक्षेन्महापदुदयाद्ध्रुवम् ॥ सर्वेमनोरथायस्मात्प रिपूर्णाभवंतिहि ॥ ५१ ॥ दिनेदिनेचसौभाग्यंवर्धतेयस्यसन्निधौ ॥ नैरंतर्येणयत्सेवांकुर्वतोनभयंक्वचित् ॥ ५२ ॥ यन्नामग्रहणादेवकेपिबाधांनकुर्वते ॥ यदाधारेणतिष्ठंतिभुवनानिचतुर्दश ॥ ५३ ॥ एवमाद्यागुणायस्यवरस्यवरचेष्टितम् ॥ तस्मैप्रयच्छमांतातममतेपीहशर्मणे ॥ ५४ ॥ एतच्छ्रुत्वापि तातस्याभृशंमुदमवापह ॥ धन्योस्मिधन्यामेपूर्वेयेषामेषासुतान्वये ॥ ५५ ॥ ध्रुवाहिधूतपापासौयस्याईदृग्विधामतिः ॥ ईदृग्विधैर्गुणगणैर्गरिम्णाको त्रवैभवेत् ॥ ५६ ॥ अथवासकथंलभ्योविनापुण्यभरोदयम् ॥ इतिक्षणंसमाधायमनःसमुनिपुंगवः ॥ ५७ ॥ ज्ञानेनतंसमालोच्यवरमीदृग्गुणोदयम् ॥ धन्यांकन्यांबभाषेथशृणुवत्सेशुभैषिणि ॥ ५८ ॥ ॥ पितोवाच ॥ ॥ वरस्ययेत्वयाप्रोक्तागुणाएतेविचक्षणे ॥ एषांगुणानामाधारोवरोस्तीतिविनि श्चितम् ॥ ५९ ॥ परंससुखलभ्योननितरांसुभगाकृतिः ॥ तपःपणेनसक्रय्यःसुतीर्थविपणौक्वचित् ॥ ६० ॥ नार्थभारैःससुलभोनकौलीन्येनकन्यके ॥ नवेदशास्त्राभ्यसनैर्नचैश्वर्यबलेनवै ॥ ६१ ॥ नसौंदर्येणवपुषानबुद्ध्यानपराक्रमैः ॥ एकयैवमनःशुद्ध्याकरणानांजयेनच ॥ ६२ ॥ महातपः सहायेनदमदानदयायुजा ॥ लभ्यतेसमहाप्राज्ञोनान्यथासदृशःपतिः ॥ ६३ ॥ इतिश्रुत्वाथसाकन्यापितरंप्रणिपत्यच ॥ अनुज्ञांप्रार्थयामासतपसेकृत निश्चया ॥ ६४ ॥ ॥ स्कंदउवाच ॥ ॥ कृतानुज्ञाजनेत्रासाक्षेत्रेपरमपावने ॥ तपस्ततापपरमंयदसाध्यंतपस्विभिः ॥ ६५ ॥ क्वसाबालातिमृद्वंगी क्वचतत्तादृशंतपः ॥ कठोरवर्ष्मसंसाध्यमहोसच्चेतसोधृतिः ॥ ६६ ॥ धारासारासुवर्षासुमहावातवतीष्वलम् ॥ शिलासुसावकाशासुसाबह्वीरनय न्निशाः ॥ ६७ ॥ श्रुत्वागर्जरवंघोरंदृष्ट्वाविद्युच्चमत्कृतीः ॥ आसारसीकरैःक्लिन्नानचकंपेमनाक्चसा ॥ ६८ ॥ तडित्स्फुरंतीत्वसकृत्तमिस्रासुतपोवने ॥ यातायातंकरोतीवद्रष्टुंतत्तपसःस्थितिम् ॥६९॥ तपर्तुरेवसाक्षाच्चकुमारीकैतवात्किल॥पंचाग्नीन्परिधायात्रतपस्यतितपोवने॥७०॥ जलाभिलाषिणीबा लानमनागपिसापिबत्॥कुशाग्रतोयपृषतंपंचाग्निपरितापिता॥७१॥रोमांचकंचुकवतीवेपमानतनुच्छदा॥पर्यक्षिपत्क्षपाःक्षामातपसाहैमनीश्वसा ॥७२॥

विच्छिन्नपतमानांबुकणैः ॥ ६८ ॥ ६९ ॥ तपर्तुर्ग्रीष्मऋतुः ॥ कैतवंव्याजम् ॥ ७० ॥ मनागपिईषदपिकदाचिदपीत्यर्थः ॥ तपोवधीतिवापाठः ॥ पृषतंबिंदुम् ॥ ७१ ॥ रोमांचेति ॥ साधूतपापाहैमनीर्हेमन्तऋतुसम्बंधिनीर्निशाःपर्यक्षिपत्सर्वतोभावेनक्षपयामास ॥ कथंभूता ॥ रोमांचएवकंचुकःस्तनपट्टिकातद्वती ॥ वेपमानंकंपमानंतनुच्छदंत्वगिंद्रियंयस्याःसातथा ॥ तपसाक्षामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृशा ॥ ७२ ॥ निशीथिनीष्विति ॥ साधूतपापासारसैःपुष्करैरद्यकेयंपद्मिनीसमुदपद्यतेतिमेनइत्यन्वयः ॥ किंकुर्वती ॥ शिशिरेशिशिरर्तौनिशीथिनीषुरात्रिषुसारसंरसंसारभूतंसम्यग्रसंतपोविषयं धर्मविषयंवा ॥ सारसानामयंसारसस्तंरसंवाश्रयंतीआश्रयंतीसेवमानेतियावत् ॥ पुष्कराद्वाहिशिशिरर्तौरजन्यांशिशिरभवंरसंसेवंतेइतिहिप्रसिद्धम् ॥ ७३ ॥ मनस्विनामिति ॥ मनस्विनांप्रशस्तमनसां मुनीनामपिमनोमधौवसंतेरागतामनुरागतांसृजतेसृजतिगृह्णातीत्यर्थः ॥ तदित्यव्ययंषष्ठ्यर्थे ॥ तत्तस्याःधूतपापायामनोगतोरागओष्ठपल्लवादोष्ठपल्लवद्वारावहिर्निर्गतोमाकन्दपल्लवैराम्रपल्लवैर्जह्नेहृतो गृहीतः ॥ एतेनांतर्वहीरागाभावेनमुनिभ्योप्यधिकातस्यास्तपश्चर्येतिध्वनितम् ॥ ७४ ॥ वसन्तइति ॥ सावालाधूतपापावसंतेमधौवनेनिवसंतीकोकिलाकाकलीरवंपिकायामधुरध्वनिंश्रुत्वापितपासित पोविषयेमनश्चक्रेकृतवतीत्यर्थः ॥ ७५ ॥ वंधुजीवेवन्धूके ॥ कलहंसेकादंवे ॥ कलागतीर्विलासरूपागतीः ॥ ७६ ॥ अपास्तेति ॥ विरुद्धालंकारोयम् ॥ क्षुद्बोधनिरासायभोगिनांसर्पाणांवृत्तिमा

निशीथिनीषुशिशिरेश्रयंतीसारसंरसम् ॥ मेनेसासारसैःकेयमुद्यताद्येतिपद्मिनी ॥ ७३ ॥ मनस्विनामपिमनोरागतांसृजतेमधौ ॥ तदोष्ठपल्लवाद्रागो जह्नेमाकंदपल्लवैः ॥ ७४ ॥ वसंतेनिवसंतीसावनेबालाचलंमनः ॥ चक्रेतपस्यपिश्रुत्वाकोकिलाकाकलीरवम् ॥ ७५ ॥ बंधुजीवेऽधररुचिंकलहंसे कलागतीः ॥ निक्षेपमिवसाक्षिप्वाशरद्यासीत्तपोरता ॥ ७६ ॥ अपास्तभोगसंपर्काभोगिनांवृत्तिमाश्रिता ॥ क्षुदुद्बोधनिरोधायधूतपापातपस्विनी ॥ ॥ ७७ ॥ शाणेनमणिवल्लीढाकृशाप्यायादनर्घताम् ॥ तथापितपसाक्षामादिदीपेतत्तनुस्तराम् ॥ ७८ ॥ निरीक्ष्यतांतपस्यंतींविधिःसंशुद्धमानसाम् ॥ उपेत्योवाचसुप्रज्ञेप्रसन्नोस्मिवरंवृणु ॥ ७९ ॥ साचतुर्वक्त्रमालोक्यहंसयानोपरिस्थितम् ॥ प्रणम्यप्रांजलिःप्रीताप्रोवाचाथप्रजापतिम् ॥ ८० ॥ ॥ धूतपापोवाच ॥ ॥ पितामहवरोमह्यंयदिदेयोवरप्रद ॥ सर्वेभ्यःपावनेभ्योपिकुरुमामतिपावनीम् ॥ ८१ ॥ स्रष्टातादिष्टमाकर्ण्यनितरांतुष्टमानसः ॥ प्रत्युवाचाथतांबालांविमलांविमलैषिणीम् ॥ ८२ ॥ ॥ ब्रह्मोवाच ॥ ॥ धूतपापेपवित्राणियानिसंत्यत्रसर्वतः ॥ तेभ्यःपवित्रमतुलंत्वमेधिवरतो मम ॥ ८३ ॥ तिस्रःकोट्योऽर्धकोटीचसंतितीर्थानिकन्यके ॥ दिविभुव्यंतरिक्षेचपावनान्युत्तरोत्तरम् ॥ ८४ ॥ तानिसर्वाणितीर्थानित्वत्तनौप्र तिलोमवै ॥ वसंतुममवाक्येनभवसर्वातिपावनी ॥ ८५ ॥ इत्युक्त्वांतर्दधेवेधाःसापिनिर्धूतकल्मषा ॥ धूतपापोटजंप्राप्ताथोवेदशिरसःपितुः ॥ ८६ ॥

स्थिताआसीदितिपूर्वक्रियायाअनुषंगः ॥ ७७ ॥ शाणेनशणसूत्रमयेनवस्त्रेणलीढाआच्छन्नाकृशातन्वीशाणेनलीढापीत्येवंवान्वयः ॥ अनर्घताममूल्यतामायादागतवतीमणिवत् ॥ यथाउत्कृष्टो मणिःकुत्सितवस्त्रादिनाछन्नोऽतिसूक्ष्मोमलिनवस्त्रादिनाछन्नोपिवाऽनर्घतामायातितद्वदित्यर्थः ॥ तथेतिवाक्यान्तरे ॥ तस्यास्तनुःशरीरंदिदीपेतरामतिशयेनदीप्तिंचकारेत्यर्थः ॥ अथवाशाणेनमणिघर्ष णपाषाणेनलीढाघर्षिताअतएवकृशापिमणिव्यक्तिर्यथाऽनर्घतामत्यन्तप्रकाशतामायातितथातपसाक्षामापितत्तनुस्तस्यास्तनुर्दिदीपेतरामतिशयेनदीप्तिंचकारेत्यर्थः ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ विमलंनिर्मलमेष्टुंशीलंयस्याःसाविमलैषिणीताम् ॥ ८२ ॥ एधिभव ॥ ८३ ॥ ८४ ॥ ८५ ॥ अथोनन्तरंपितुरुटजंपर्णशालांलक्ष्मीनृसिंहसमीपस्थांप्राप्तेत्यर्थः ॥ ८६ ॥

---

१ सरसइदंसारसं, २संजलम्—अर्थात् सरोवरजलंश्रयन्तीसेवमानासतीत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

उटजाजिरेपर्णशालांगणे ॥ आकृष्टआकर्षितोवशीकृतइतियावत् ॥ ८७ ॥ रहोग्राम्यधर्मम् ॥ रतिमितिवापाठः ॥ ८८ ॥ नज्ञातंनामयस्यतेनधर्मेणइत्येवं[प्र]कारेणासकृत्प्रार्थिता ॥ असकृत्प्रार्थनेहेतुमाह ॥ यतोग्रहःआग्रहःकामावेशइत्यर्थः ॥ ८९ ॥ पितुःकन्यादातृत्वेश्रुतिंप्रमाणयति ॥ पित्रिति ॥ यद्यस्मात् ॥ ९० ॥ गौरवाद्गुरुत्वाद्बलवत्तरत्वा

कदाचित्तांसमालोक्यखेलंतीमुटजाजिरे ॥ धर्मस्तत्तपसाकृष्टःप्रार्थयामासकन्यकाम् ॥ ८७ ॥ ॥ धर्मउवाच ॥ ॥ पृथुश्रोणिविशालाक्षिक्षामोदरि शुभानने ॥ क्रीतःस्वरूपसंपत्त्यात्वयाहंदेहिमेरहः ॥ ८८ ॥ नितरांबाधतेकामस्त्वत्कृतेमांसुलोचने ॥ अज्ञातनाम्नासातेनप्रार्थितेत्यसकृद्ग्रहः ॥ ८९ ॥ उवाचसापितादातातंप्रार्थयसुदुर्मते ॥ पितृप्रदेयायत्कन्याश्रुतिरेषासनातनी ॥ ९० ॥ निशम्येतिवचोधर्मोभाविनोर्थस्यगौरवात् ॥ पुनर्निर्बंधयांचक्रेऽपधृतिर्धृतिशालिनीम् ॥ ९१ ॥ ॥ धर्मउवाच ॥ ॥ नप्रार्थयेहंसुभगेपितरंतवसुंदरि ॥ गांधर्वेणविवाहेनकुरुमेत्वंसमीहितम् ॥ ९२ ॥ इतिनिर्बंधवद्वाक्यंसानिशम्यकुमारिका ॥ पितुःकन्याफलंदित्सुःपुनराहेतितंद्विजम् ॥ ९३ ॥ अरेजडमतेमात्वंपुनर्ब्रूहीतियाह्यतः ॥ इत्युक्तोपिकुमार्यासनातिष्ठन्मदनातुरः ॥ ९४ ॥ ततःशशापतंबालाप्रबलातपसोबलात् ॥ जडोसिनितरांयस्माज्जलाधारोनदोभव ॥ ९५ ॥ इतिशप्तस्तयासोथतांशशापक्रुधान्वितः ॥ कठोरहृदयेत्वंतुशिलाभवसुदुर्मते ॥ ९६ ॥ ॥ स्कंदउवाच ॥ ॥ इत्यन्योन्यस्यशापेनमुनेधर्मोनदोऽभवत् ॥ अविमुक्तेमहाक्षेत्रेख्यातोधर्मनदोमहान् ॥ ९७ ॥ साप्याहपितरंत्रस्तास्वशिलात्वस्यकारणम् ॥ ध्यानेनधर्मंविज्ञायमुनिःकन्यामथाब्रवीत् ॥ ९८ ॥ माभैःपुत्रिकरिष्यामितवसर्वंशुभोदयम् ॥ तच्छापोनान्यथाभूयाच्चंद्रकांतशिलाभव ॥ ९९ ॥ चंद्रोदयमनुप्राप्यद्रवीभूततनुस्ततः ॥ धुनीभवसुतेसाध्विधूतपापेतिविश्रुता ॥ १०० ॥ सचधर्मनदःकन्येतवभर्तासुशोभनः ॥ तैर्गुणैःपरिपूर्णांगोयेगुणाःप्रार्थितास्त्वया ॥ १ ॥ अन्यच्चशृणुसद्बुद्धेममापितपसोबलात् ॥ द्वैरूप्यंभवतोर्भाविप्राकृतंचद्रवंचवै ॥ २ ॥ इत्याश्वास्यपिताकन्यांधूतपापांपरंतप ॥ चंद्रकांतशिलाभूतामनुजग्राहबुद्धिमान् ॥३॥ तदारभ्यमुनेकाश्यांख्यातोधर्मनदोह्रदः ॥ धर्मोद्रवस्वरूपेणमहापातकनाशनः ॥ ४ ॥ धुनीचधूतपापासासर्वतीर्थमयीशुभा ॥ हरेन्महाघसंघातान्कूलजानिवपादपान् ॥ ॥ ५ ॥ तत्रधर्मनदेतीर्थेधूतपापासमन्विते ॥ यदानस्वर्धुनीतत्रतदाब्रध्नस्तपोव्यधात् ॥ ६ ॥ गभस्तिमालीभगवान्गभस्तीश्वरसन्निधौ ॥ शीलयन्मंगलांगौरींतपउग्रंचचारह ॥ ७ ॥ नाम्नामयूखादित्यस्यतीर्थेतत्रतपस्यतः ॥ किरणेभ्यःप्रववृतेमहास्वेदोतिखेदतः ॥ ८ ॥ किरणेभ्यःप्रवृत्तायामहास्वेदस्यसंततिः ॥ ततःसाकिरणानामजातापुण्यातरंगिणी ॥९॥ महापापांधतमसंकिरणाख्यातरंगिणी॥ ध्वंसयेत्स्नानमात्रेणमिलिताधूतपापया ॥११०॥

दित्यर्थः ॥ अपधृतिरपगतधैर्यः ॥ ९१ ॥ गान्धर्वेणकन्यावरयोर्मिथःसमयरूपेण ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ माभैर्माभैषीः ॥ ९९ ॥ धुनीनदी ॥ ॥ १०० ॥ १ ॥ प्राकृतंपूर्वरूपम् ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ शीलयन्ध्यायन् ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वतीर्थीकृतआत्मायययासातथातयासर्वतीर्थीकृतात्मना ॥ ११ ॥ एधितावर्धितासंपादितेत्येतत् ॥ अंधतांस्वकार्याक्षमताम् ॥ १२ ॥ किरणेति ॥ किरणाधूतपापेनद्यौतेतस्मिन्धर्मनदेतस्थतुरि
तिशेषः ॥ १३ ॥ दैलीपिनाभगीरथेन ॥ १४ ॥ अत्राविमुक्ते ॥ प्रकीर्तिताइतिक्वचित्पाठः ॥ १५ ॥ नापुरुषः ॥ १६ ॥ १७ ॥ कोटयंशेनापीत्यन्वयः ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥

आदौधर्मनदःपुण्योमिश्रितोधूतपापया ॥ ययाधूतानिपापानिसर्वतीर्थीकृतात्मना ॥ ११ ॥ ततोपिमिलितागत्यकिरणारविणैधिता ॥ यन्नामस्मरणा
देवमहामोहांधतांव्रजेत् ॥१२॥ किरणाधूतपापेचतस्मिन्धर्मनदेशुभे ॥ स्रवंत्यौपापसंहर्त्र्यौवाराणस्यांशुभद्रवे ॥ १३ ॥ ततोभागीरथीप्राप्तातेनदैली
पिनासह ॥ भागीरथीसमायातायमुनाचसरस्वती ॥ १४ ॥ किरणाधूतपापाचपुण्यतोयासरस्वती ॥ गंगाचयमुनाचैवपंचनद्योत्रकीर्तिताः ॥ १५ ॥
अतःपंचनदंनामतीर्थंत्रैलोक्यविश्रुतम् ॥ तत्राप्लुतोनगृह्णीयाद्देहंनापांचभौतिकम् ॥ १६ ॥ अस्मिन्पंचनदीनांचसंभेदेघौघभेदिनि ॥ स्नानमात्रात्प्र
यात्येवभित्त्वाब्रह्मांडमंडपम् ॥ १७ ॥ तीर्थानिसंतिभूयांसिकाश्यामत्रपदेपदे ॥ नपंचनदतीर्थस्यकोटयंशेनसमान्यपि ॥ १८ ॥ प्रयागेमाघमासे
तुसम्यक्स्नातस्ययत्फलम् ॥ तत्फलंस्याद्दिनैकेनकाश्यांपंचनदेध्रुवम् ॥ १९ ॥ स्नात्वापंचनदेतीर्थेकृत्वाचपितृतर्पणम् ॥ बिंदुमाधवमभ्यर्च्यनभूयो
जन्मभाग्भवेत् ॥ १२० ॥ यावत्संख्यास्तिलादत्ताःपितृभ्योजलतर्पणे ॥ पुण्येपंचनदेतीर्थेतृप्तिःस्यात्तावदाब्दिकी ॥ २१ ॥ श्रद्धयायैःकृतंश्राद्धंती
र्थेपंचनदेशुभे ॥ तेषांपितामहामुक्तानानायोनिगताअपि ॥ २२ ॥ यमलोकेपितृगणैर्गाथेयंपरिगीयते ॥ महिमानंपांचनदंदृष्ट्वाश्राद्धविधानतः ॥२३॥
अस्माकमपिवंश्योत्रकश्चिच्छ्राद्धंकरिष्यति ॥ काश्यांपंचनदंप्राप्ययेनमुच्यामहेवयम् ॥ २४ ॥ इयंगाथाप्रतिदिनंश्राद्धदेवस्यसन्निधौ ॥ पितृभिःपरिगी
येतकाश्यांपंचनदंप्रति ॥ २५ ॥ तत्रपंचनदेतीर्थेयत्किंचिद्दीयतेवसु ॥ कल्पक्षयेपिनभवेत्तस्यपुण्यस्यसंक्षयः ॥२६॥ वंध्यापिवर्षपर्यंतंस्नात्वापंचनदे
ह्रदे ॥ समर्च्यमंगलांगौरींपुत्रंजनयतिध्रुवम् ॥ २७ ॥ जलैःपांचनदैःपुण्यैर्वाससापरिशोधितैः ॥ महाफलमवाप्नोतिस्नपयित्वेष्टदेवताम् ॥ २८ ॥
पंचामृतानांकलशैरष्टोत्तरशतोन्मितैः ॥ तुलितोधिकतांयातोबिंदुःपंचनदांभसः ॥२९॥ पंचकूर्चेनपीतेनयात्रशुद्धिरुदाहृता ॥ साशुद्धिःश्रद्धयाप्राश्य
बिंदुंपांचनदांभसः ॥ १३० ॥ भवेदवभृथस्नानाद्राजसूयाश्वमेधयोः ॥ यत्फलंतच्छतगुणंस्नानात्पांचनदांभसा ॥३१॥ राजसूयाश्वमेधौचभवेतांस्वर्ग
साधनम् ॥ आब्रह्मघटिकाद्वंद्वंमुक्त्यैपांचनदाप्लुतिः ॥३२॥ स्वर्गराज्याभिषेकोपिनतथासंमतःसताम् ॥ अभिषेकःपांचनदोयथानल्पसुखप्रदः ॥३३॥
वरंवाराणसींप्राप्यभृत्यःपंचनदोक्षिणाम् ॥ नान्यत्रसेवकीभूतभूपकोटिर्नरेश्वरः ॥ ३४ ॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ पंचकूर्चेनपंचगव्येन ॥ १३० ॥ ३१ ॥ आब्रह्मघटिकाद्वंद्वंब्रह्ममुहूर्तद्वयमभिव्याप्यसीमानंकृत्वेतिवा ॥ पंचनदाप्लु
तिस्तत्स्नानंमुक्तये ॥ आब्रह्मघटिकाद्वंद्वमित्यस्यपूर्वेणवासंबंधः ॥ ३२ ॥ ३३ ॥ पंचनदोक्षिणांपांचनदजलसेकवताम् ॥ पंचनदेक्षिणामितिपाठेतत्पश्यताम् ॥ ३४ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥३५॥३६॥३७॥ इष्टानिअंतर्वेद्यांदीयमानानिदानानिपूर्तानिवापीकूपतडागादिनिर्माणानितेषुकृतेष्वन्यत्रयत्फलंस्यात्तद्धर्मनदाप्लवात्स्यादित्यन्वयः ॥३८॥३९॥ कृष्णलोन्मितंरक्तिकापरिमाणम् ॥ ॥१४०॥१४१॥ ४२ ॥ कोपिब्रह्मापियःकश्चिदितिवा ॥४३॥१४४॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकोनषष्टितमोध्यायः ॥ ५९ ॥ ॥छ॥ ॥ अथषष्टितमेध्यायेऽविमुक्तेमो

यैर्नपंचनदेस्नातंकार्तिकेपापहारिणि ॥ तेऽद्यापिगर्भेतिष्ठंतिपुनस्तेगर्भवासिनः ॥ ३५ ॥ कृतेधर्मनदंनामत्रेतायांधूतपापकम् ॥ द्वापरेबिंदुतीर्थंचकलौ पंचनदंस्मृतम् ॥ ३६ ॥ शतंसमास्तपस्तप्त्वाकृतेयत्प्राप्यतेफलम् ॥ तत्कार्तिकेपंचनदेसकृत्स्नानेनलभ्यते ॥ ३७ ॥ इष्टापूर्तेषुधर्मेषुयावज्जन्मकृते षुयत् ॥ अन्यत्रस्यात्फलंतत्स्याद्धूर्जेधर्मनदाप्लवात् ॥ ३८ ॥ नधूतपापसदृशंतीर्थंक्वापिमहीतले ॥ यदेकस्नानतोनश्येदघंजन्मत्रयार्जितम् ॥ ३९ ॥ बिंदुतीर्थेनरोदत्त्वाकांचनंकृष्णलोन्मितम् ॥ नदरिद्रोभवेत्क्वापिनस्वर्णेनवियुज्यते ॥ १४० ॥ गोभूतिलहिरण्याश्ववासोन्नस्रग्विभूषणम् ॥ यत्किंचि द्बिंदुतीर्थेत्रदत्त्वाक्षयमवाप्नुयात् ॥ ४१ ॥ एकामप्याहुतिंदत्त्वासमिद्धेग्नौविधानतः ॥ पुण्येधर्मनदेतीर्थेकोटिहोमफलंलभेत् ॥ ४२ ॥ नपंचनदतीर्थ स्यमहिमानमनंतकम् ॥ कोपिवर्णयितुंशक्तश्चतुर्वर्गशुभौकसः ॥ ४३ ॥ श्रुत्वाख्यानमिदंपुण्यंश्रावयित्वापिभक्तितः ॥ सर्वपापविशुद्धात्माविष्णुलो केमहीयते ॥ ४४ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेपंचनदाविर्भावोनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ स्कंदउवाच ॥ ॥ उक्तापंचनदोत्पत्तिर्मित्रावरुणनंदन ॥ इदानींकथयिष्यामिमाधवाविष्कृतिंपराम् ॥ १ ॥ यांश्रुत्वाश्रद्धयाधीमान्पापेभ्योमुच्यते क्षणात् ॥ नचाश्रियावियुज्येतसंयुज्येतवृषेणच ॥ २ ॥ आगत्यमंदरादद्रेरुपेंद्रश्चंद्रशेखरम् ॥ आपृच्छ्यताक्ष्यर्रथगःक्षणाद्वाराणसींपुरीम् ॥ ३ ॥ दिवो दासंमहीपालंसमुच्चाट्यस्वमायया ॥ स्थित्वापादोदकेतीर्थेकेशवाख्यस्वरूपतः ॥ ४ ॥ महिमानंपरंकाश्यांविचार्यसुविचार्यच ॥ दृष्ट्वापंचनदंतीर्थंपरां मुदमवापह ॥ ५ ॥ उवाचचप्रसन्नात्मापुंडरीकविलोचनः ॥ अगण्याअपिवैकुंठगुणाविगणितामया ॥ ६ ॥ क्षीरनीरधौसंतितावंतोनिर्मलागुणाः ॥ यावंतोविजयंतेत्रकाश्यांपंचनदेह्रदे ॥ ७ ॥ श्वेतद्वीपेपिसामग्रीक्वगुणानांगरीयसी ॥ ईदृशीयादृशीकाश्यांधूतपापेस्तिपावनी ॥ ८ ॥ मुदेकौमोदकी स्पर्शस्तथानममजायते ॥ धूतपापांबुसंपर्कोयथाभवतिसर्वथा ॥ ९ ॥ नक्षीरनीरधिजयासुखंमेश्लिष्टगात्रया ॥ तथाभवेद्यथात्रस्यात्स्पृष्टयाधूतपापया ॥ १० ॥ इत्थंपंचनदेतीर्थेक्षीरनीरधिजाधवः ॥ संप्रेष्यताक्ष्यर्त्र्यक्षाग्रेवृत्तांतंविनिवेदितुम् ॥ ११ ॥ आनंदकाननभवंदिवोदासक्षमापतेः ॥ संवर्ण यन्गुणग्रामंपुण्यंपांचनदोद्भवम् ॥ १२ ॥ सुखोपविष्टःसंहृष्टःसुदृष्टिर्विष्टरश्रवाः ॥ दृष्टवांस्तपसाजुष्टमपुष्टांगंतपोधनम् ॥ १३ ॥

क्षधामानि ॥ माधवाविष्कृतिःपुण्यावर्ण्यतेतिमनोहरा ॥ १ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ धूतपापेतीर्थे ॥ ८ ॥ मुदेहर्षाय ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ विष्टंव्याप्तंसिरातिकीर्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतीतिविष्टरायाज्ञवल्क्यादयस्तेभ्यःश्रूयते विष्टरेशब्दप्रपंचमयेवेदेश्रूयतइतिवाविष्टरश्रवाः ॥ विष्टरेस्वच्छेश्रवसीश्रवणेयस्येतिमधुमाधव्याममरटीकायाम् ॥ १३ ॥ उपोपाविष्टकमलमितिउपसर्ग
स्यद्विर्वचनम् ॥ तथाचश्रूयते ॥ मग्रपूज्यमहादेवंसंसंयम्यमनःसदा ॥ उपोपहायसंसर्गमुदुद्गतःसतापसइत्यादि ॥ उपविष्टंकमलंयेनसतथातम् ॥ यद्वा उपसमीपेउपविष्टाकमलालक्ष्मीर्यस्यतम् ॥
॥ १४॥ चंचच्छब्दः स्फुरणार्थः ॥१५॥ सुपाटलरदच्छदंशोभनपाटलपुष्पवदोष्ठम् ॥१६॥१७॥१८॥१९॥२०॥ वेदाःकर्मोपासनविषयाउपनिषदोदितंविद्यैकसमधिगम्यंनैवविदुः ॥२१॥२२॥
अध्यस्तविस्तीर्णशिलमाश्रितवृहत्पाषाणम् ॥ २३ ॥ २४ ॥ पद्यैरेकोनविंशत्याभक्त्यापरमयामुदा ॥ अस्तौषीन्माधवंदेवमग्निविन्दुर्द्विजोत्तमः ॥ बाह्यांतरिति ॥ तथाचोक्तम् ॥ अपवित्रःपवि

सऋषिस्तंसमभ्येत्यपुंडरीकाक्षमच्युतम् ॥ उपोपविष्टकमलंवनमालाविराजितम् ॥ १४ ॥ शंखपद्मगदाचक्रचंचत्करचतुष्टयम् ॥ कौस्तुभोद्भासितो
रस्कंपीतकौशेयवाससम् ॥ १५ ॥ सुनीलेंदीवररुचिंसुस्निग्धमधुराकृतिम् ॥ नाभीह्रदलसत्पद्मंसुपाटलरदच्छदम् ॥ १६ ॥ दाडिमीबीजदशनंकिरी
टद्योतितांबरम् ॥ देवेंद्रवंदितपदंसनकादिपरिष्टुतम् ॥ १७ ॥ दिव्यर्षिभिर्नारदाद्यैःपरिगीतमहोदयम् ॥ प्रह्लादाद्यैर्भागवतैःपरिनंदितमानसम् ॥ १८॥
धृतशार्ङ्गधनुर्दंडंदंडिताखिलदानवम् ॥ मधुकैटभहंतारंकंसविध्वंससूचकम् ॥ १९ ॥ कैवल्यंयत्परंब्रह्मनिराकारमगोचरम् ॥ तंपुंमूर्त्यापरिणतंभक्तानां
भक्तिहेतुतः ॥२०॥ वेदाविदुर्यदाकारंनैवोपानिषदोदितम् ॥ ब्रह्माद्यानचगीर्वाणाश्चक्रेनेत्रातिथिंसतम् ॥२१॥ प्रणनामसमुदायुक्तःक्षितिविन्यस्तमस्तकः ॥
सऋषिस्तंहृषीकेशमग्निबिंदुर्महातपाः ॥ २२ ॥ तुष्टावपरयाभक्त्यामौलिबद्धकरांजलिः ॥ अध्यस्तविस्तीर्णशिलंबलिध्वंसिनमच्युतम् ॥ २३ ॥ तत्रपं
चनदाभ्याशेमार्कंडेयादिसेविते ॥ गोविंदमग्निबिंदुःसस्तुतवांस्तुष्टमानसः ॥ २४ ॥ ॥ अग्निबिंदुरुवाच ॥ ॥ ओंनमःपुंडरीकाक्षबाह्यांतःशौचदा
यिने ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ २५ ॥ नमामितेपदद्वंद्वंसर्वद्वंद्वनिवारकम् ॥ निर्द्वंद्वयाधियाविष्णोजिष्णवादिसुरवंदित ॥ २६ ॥
यंस्तोतुंनाधिगच्छंतिवाचोवाचस्पतेरपि ॥ तमीष्टेकइहस्तोतुंभक्तिरत्रबलीयसी ॥ २७ ॥ अपियोभगवानीशोमनःप्राचामगोचरः ॥ समाहृशैरल्पधी
भिःकथंस्तुत्योवचःपरः ॥ २८ ॥ यंवाचोनविशंतीशंमनतीहमनोनयम् ॥ मनोगिरामतीतंतंकःस्तोतुंशक्तिमान्भवेत् ॥ २९ ॥ यस्यनिःश्वसितंवेदाः
सषडंगपदक्रमाः ॥ तस्यदेवस्यमहिमामहान्कैरवगम्यते ॥ ३० ॥

त्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरःशुचिरिति ॥ पुरुषसूक्ताद्यृचोऽर्धेनस्तौति ॥ सहस्रेति ॥ सहस्रशीर्षादिकंचसर्वात्मकत्वाज्ज्ञातव्यम् ॥ गतिोक्तविश्वरूपशरीरग्रहणाद्वा॥
क्षीराब्धिशायिश्रीनारायणचिद्घनलीलाशरीरपरिग्रहणाद्वा ॥ २५ ॥ द्वंद्वशब्देनात्राध्यात्मिकादितापत्रितयंगृह्यते ॥ निर्द्वंद्वयाऽप्रतिबद्धयाऽकुंठितयेतियावत् ॥ २६ ॥ २७ ॥ मनसःप्राचांब्रह्मादी
नाम् ॥ मनोवाचामितिकचित् ॥ २८ ॥ यंवाचइति ॥ यतोवाचोनिवर्ततेअप्राप्यमनसासहेतिश्रुतेः ॥ २९ ॥ यस्येति ॥ शिक्षाकल्पव्याकरणनिरुक्तछंदोज्योतींष्यंगानिपदक्रमाश्चतत्सहितावेद

CC-0. In Public Domain. Digitization by eGangotri

यस्यमहतोभूतस्यानिःश्वसितंनिःश्वासवदप्रयत्नेनाविर्भूताइत्यर्थः ॥ अस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदोयजुर्वेदइत्यादिश्रुतेः ॥ ३० ॥ अतंद्रितत्वमकुंठितत्वम् ॥ ३१ ॥ ३२ ॥ तमिति ॥ तंत्वांकोवेत्तीत्यन्वयः ॥ तत्रनित्यमित्युक्तेप्रध्वंसाभावेगच्छातितद्वारणार्थमजामित्युक्तम् ॥ तावन्मात्रेउक्तेप्रागभावेगच्छाति तद्वारणायोक्तंनित्यमिति ॥ माययाचराचर ॥ वस्तुतश्चराचरभिन्न ॥३३॥ मखोब्रह्मयज्ञः ॥ महतइतितद्विशेषणम् ॥ अश्वमेधविषयोवामहच्छब्दः ॥ महिमानमतोनरस्येतिक्वचित्पाठः ॥ तत्रमहिमरूपंफलमित्यर्थः ॥ ३४ ॥ विरजेतिसंधिरार्षः ॥ ३५ ॥ येत्वामिति ॥

अतंद्रितमनोबुद्धींद्रियायंसनकादयः ॥ ध्यायंतोपिहृदाकाशेनविंदंतियथार्थतः ॥ ३१ ॥ नारदाद्यैर्मुनिवरैराबालब्रह्मचारिभिः ॥ गीयमानचरित्रोपिनसम्यग्योधिगम्यते ॥ ३२ ॥ तंसूक्ष्मरूपमजमव्ययमेकमाद्यंब्रह्माद्यगोचरमजेयमनंतशक्तिम् ॥ नित्यंनिरामयममूर्तमचिंत्यमूर्तिंकस्त्वांचराचरचराचरभिन्नवेत्ति ॥ ३३ ॥ एकैकमेवतवनामहरेर्मुरारेजन्मार्जिताघमघिनांचमहापदाढ्यम् ॥ दद्यात्फलंचमहितंमहतोमखस्यजतंमुकुंदमधुसूदनमाधवेति ॥ ३४ ॥ नारायणेतिनरकार्णवतारणेतिदामोदरेतिमधुहेतिचतुर्भुजेति ॥ विश्वंभरेतिविरजेतिजनार्दनेतिक्वास्तीहजन्मजपतांक्वकृतांतभीतिः ॥ ३५ ॥ येत्वांत्रिविक्रमसदाहृदिशीलयंतिकादंबिनीरुचिररोचिषमंबुजाक्षम् ॥ सौदामनीविलसितांशुकवीतमूर्तेतेपिस्पृशंतितवकांतिमचिंत्यरूपाम् ॥ ३६ ॥ श्रीवत्सलांछनहरेच्युतकैटभारेगोविंदतार्क्ष्यरथकेशवचक्रपाणे ॥ लक्ष्मीपतेदनुजसूदनशार्ङ्गपाणेत्वद्भक्तिभाजिनभयंक्वचिदस्तिपुंसि ॥३७॥ यैरर्चितोसिभगवंस्तुलसीप्रसूनैर्दूरीकृतैणमदसौरभदिव्यगंधैः ॥ तानर्चयंतिदिविदेवगणाःसमस्तामंदारदामभिरलंविमलस्वभावान् ॥ ३८ ॥ यद्वाचिनामतवकामदमब्जनेत्रयच्छ्रोत्रयोस्तवकथामधुराक्षराणि ॥ यच्चित्तभित्तिलिखितंभवतोस्तिरूपंनीरूपभूपपदवीनहितैर्दुरापा ॥ ३९ ॥ येत्वांभजंतिसततंभुविशेषशायिंस्ताञ्छ्रीपतेपितृपतींद्रकुबेरमुख्याः ॥ वृंदारकादिविसदैवसभाजयंतिस्वर्गापवर्गसुखसंततिदानदक्ष ॥ ४० ॥ येत्वांस्तुवंतिसततंदिवितान्स्तुवंतिसिद्धाप्सरोमरगणालसदब्जपाणे ॥ विश्राणयत्यखिलसिद्धिदकोविनात्वांनिर्वाणचारुकमलांकमलायताक्ष ॥ ४१ ॥ त्वंहंसिपासिसृजसिक्षणतःस्वलीलालीलावपुर्धरविरिंचिनतांघ्रियुग्म ॥ विश्वंत्वमेवपरविश्वपतिस्त्वमेवविश्वस्यबीजमसितत्प्रणतोस्मिनित्यम् ॥ ४२ ॥

कादंबिनीमेघमाला ॥ निर्गुणोपासकास्तेतवकांतिंस्वप्रकाशांशोभांस्पृशंत्येवयेतूक्तविधाःसगुणोपासकास्तेपिप्राप्नुवंतीत्यपिशब्दार्थः ॥ ३६ ॥ ३७ ॥ दूरीकृतएणमदसौरभोमृगमदपरिमलः कस्तूरीगंधोयेनतादृशोदिव्योगंधोयेषांतैस्तुलसीप्रसूनैरिति ॥३८॥ निर्गतंरूपंयत्रतन्नीरूपंब्रह्मतदेवभूपस्तस्यपदवीस्थितिंःदुरापादुष्प्रापा॥३९॥४०॥ विश्राणयतिप्रयच्छति॥४१॥क्षणतःकालतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परहेपर ॥ तत्तस्मात् ॥ ४२ ॥ कृणुहिविक्षिपनाशयेत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ तिष्ठासुःस्थातुमिच्छुः ॥ समभ्यर्थिसम्यगभ्यर्थितः॥ अतःस्थास्यामीति ॥ ५३ ॥ सुदुर्मेधाःप्राकृतबुद्धिः ॥ अथचयदिज्ञानवान्काशीसर्वोत्कृष्टाकदापिनत्याज्येतिज्ञानवानित्यर्थः ॥ ५४ ॥ ५५ ॥ अमृतंकैवल्यम् ॥ नैर्जरमित्युपलक्षणं षड्भाव

स्तोतात्वमेवदनुजेंद्ररिपोस्तुतिस्त्वंस्तुत्यस्त्वमेवसकलंहिभवानिहैकः ॥ त्वत्तोनकिंचिदपिभिन्नमवैमिविष्णोतृष्णांसदाकृणुहिमेभवजांभवारे ॥ ४३ ॥ इतिस्तुत्वाहृषीकेशमग्निबिंदुर्महातपाः ॥ तस्थौतूष्णींततोविष्णुरुवाचवरदोमुनिम् ॥ ४४ ॥ श्रीविष्णुरुवाच ॥ अग्निबिंदोमहाप्राज्ञमहतांतपसां निधे ॥ वरंवरयसुप्रीतस्तवादेयंनकिंचन ॥४५॥ अग्निबिंदुरुवाच ॥ ॥ यदिप्रीतोसिभगवन्वैकुंठेशजगत्पते ॥ कमलाकांततद्देहियदिहप्रार्थयाम्यहम् ॥ ॥ ४६ ॥ कृतानुज्ञोथहरिणाभ्रूभंगेनसतापसः ॥ कृतप्रणामोहृष्टात्मावरयामासकेशवम् ॥ ४७ ॥ भगवन्सर्वगोपीहतिष्ठपंचनदेह्रदे ॥ हितायसर्वजं तूनांमुमुक्षूणांविशेषतः ॥ ४८ ॥ लक्ष्मीशेनवरोमह्यमेषदेयोऽविचारतः ॥ नान्यंवरंसमीहेहंभक्तिंचत्वपदांबुजे ॥ ४९ ॥ इतिश्रुत्वावरंतस्याग्निबिंदोर्म धुसूदनः ॥ प्रीतःपरोपकारार्थंतथेत्याहाब्धिजापतिः ॥ ५० ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ अग्निबिंदोमुनिश्रेष्ठस्थास्याम्यहमिहध्रुवम् ॥ काशीभक्तिमतां पुंसांमुक्तिमार्गंसमादिशन् ॥ ५१ ॥ मुनेपुनःप्रसन्नोस्मिवरंब्रूहिददामिते ॥ अतीवममभक्तोसिभक्तिस्तेस्तुदृढामयि ॥ ५२ ॥ आदावेवहितिष्ठासुरहम त्रतपोनिधे ॥ ततस्त्वयासमभ्यर्थिस्थास्याम्यत्रसदैवहि ॥ ५३ ॥ प्राप्यकाशींसुदुर्मेधाःकस्त्यजेज्ज्ञानवान्यदि ॥ अनर्घ्यंप्राप्यमाणिक्यंहित्वाकाचं कईहते ॥ ५४ ॥ अल्पीयसाश्रमेणेहवपुषोव्ययमात्रतः ॥ अनश्वरस्याशुयथामुक्तिस्तथाक्वहि ॥ ५५ ॥ विनिमय्यजराजीर्णंदेहंपार्थिवमत्रवै ॥ प्राज्ञाःकिमुनगृह्णीयुरमृतंनैर्जरंवपुः ॥ ५६ ॥ नतपोभिर्नवादानैर्नयज्ञैर्बहुदक्षिणैः ॥ अन्यत्रलभ्यतेमोक्षोयथाकाश्यांतनुव्ययात् ॥ ५७ ॥ अपियोगंहि युंजानायोगिनोयतमानसाः ॥ नैकेनजन्मनामुक्ताःकाश्यांमुक्तावपुर्व्ययात् ॥ ५८ ॥ इदमेवमहादानमिदमेवमहत्तपः ॥ इदमेवव्रतंश्रेष्ठंयत्काश्यांम्रियते तनुः ॥ ५९ ॥ सएवविद्वाञ्जगतिसएवविजितेंद्रियः ॥ सएवपुण्यवान्धन्योलब्ध्वाकाशींनयस्त्यजेत् ॥ ६० ॥ तावत्स्थास्याम्यहंचात्रयावत्काशीमुने त्विह ॥ प्रलयेपिननाशोस्याःशिवशूलाग्रसुस्थितेः ॥ ६१ ॥ इत्याकर्ण्यगिरंविष्णोरग्निबिंदुर्महामुनिः ॥ प्रहृष्टरोमाप्रोवाचपुनरन्यंवरंवृणे ॥ ६२ ॥ मापतेममनाम्नात्रतीर्थेपंचनदेशुभे ॥ अभक्तेभ्योपिभक्तेभ्यःस्थितोमुक्तिंसदादिश ॥ ६३ ॥ येत्रपंचनदेस्नात्वागत्वादेशांतरेष्वपि ॥ नराःपंचत्वमापन्नामु क्तिंतेभ्योपिवैदिश ॥ ६४ ॥ येतुपंचनदेस्नात्वात्वांभजिष्यंतिमानवाः ॥ चलाचलापिद्वैरूपामात्याक्षीच्छ्रीश्चतान्नरान् ॥ ६५ ॥

विकाररहितमित्यर्थः ॥ वपुःस्वरूपम् ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ द्विरूपैवद्वैरूपा ॥ द्वैरूप्यमेवाह ॥ चलाचलेति ॥ चलाविष्णिवतरेषु तस्मिन्न

CC-0. In Public Domain. Digitization by eGangotri

चला यद्वा चलासंपत् अचलानिर्वाणरूपा ॥ ६९ ॥ मयासहमालक्ष्मीस्तयासहमाधवइति ॥ ६६ ॥ एतदेवदर्शयति ॥ बिंदुमाधवइति ॥ ६७ ॥ सपर्ययिष्यंति पूजयिष्यंति ॥ ६८ ॥ वस्विति ॥ येषांपंचनदेस्थितानांसदाऽहंहृदिवर्ते ॥ पंचनदेसदाअहंतिष्ठामीतिवाहृदियेषाम् ॥ वसुस्वरूपिणीलक्ष्मीर्धनादिसंपन्निर्वाणसंज्ञिकालक्ष्मीर्मोक्षलक्ष्मीश्चतत्पार्श्वगतेषांवशवर्तिनीत्यर्थः ॥ ६९ ॥ ७० ॥

॥ श्रीविष्णुरुवाच ॥ ॥ एवमस्त्वग्निबिंदोत्रभवतायद्वृतंमुने॥त्वन्नाम्नोऽर्धेनमेनाममयासहभविष्यति ॥६६॥ बिंदुमाधवइत्याख्याममत्रैलोक्यविश्रुता ॥ काश्यांभविष्यतिमुनेमहापापौघघातिनी ॥ ६७ ॥ येमामत्रनराःपुण्याःपुण्येपंचनदेह्रदे ॥ सदासपर्ययिष्यंतितेषांसंसारभीःकुतः ॥ ६८ ॥ वसुस्वरूपिणीलक्ष्मीर्लक्ष्मीर्निर्वाणसंज्ञिका ॥ तत्पार्श्वगासदायेषांहृदिपंचनदेह्यहम् ॥ ६९ ॥ यैर्नपंचनदंप्राप्यवसुभिःप्रीणिताद्विजाः ॥ आशुलभ्यविपत्तीनां तेषांतद्वसुरोदिति ॥ ७० ॥ तएवधन्यालोकेस्मिन्कृतकृत्यास्तएवहि ॥ प्राप्ययैर्ममसांनिध्यंवसवोममसात्कृताः ॥ ७१ ॥ बिंदुतीर्थमिदंनामतवनाम्नाभविष्यति ॥ अग्निबिंदोमुनिश्रेष्ठसर्वपातकनाशनम् ॥ ७२ ॥ कार्तिकेबिंदुतीर्थेयोब्रह्मचर्यपरायणः ॥ स्नास्यत्यनुदितेभानौभानुजात्तस्यभीःकुतः॥७३॥ अपिपापसहस्राणिकृत्वामोहेनमानवः ॥ ऊर्जेधर्मनदेस्नातोनिष्पापोजायतेक्षणात् ॥ ७४ ॥ यावत्स्वस्थोस्तिदेहोयंयावन्नेंद्रियविक्लवः ॥ तावद्व्रतानिकुर्वीतयतोदेहफलंव्रतम् ॥ ७५ ॥ एकभक्तेननक्तेनतथैवायाचितेनच ॥ उपवासेनदेहोयंसंशोध्योशुचिभाजनम् ॥ ७६ ॥ कृच्छ्रचांद्रायणादीनिकर्तव्यानिप्रयत्नतः ॥ अशुचिःशुचितामेतिकायोयद्व्रतधारणात् ॥ ७७ ॥ व्रतैःसंशोधितेदेहेधर्मोवसतिनिश्चलः ॥ अर्थकामौसनिर्वाणौतत्रयत्रवृषस्थितिः ॥ ७८ ॥ तस्माद्व्रतानिसततंचरितव्यानिमानवैः ॥ धर्मसान्निध्यकर्तॄणिचतुर्वर्गफलेप्सुभिः ॥ ७९ ॥ सदाकर्तुंनशक्नोतिव्रतानियदिमानवः ॥ चातुर्मास्यमनुप्राप्यतदाकुर्यात्प्रयत्नतः ॥ ८० ॥ भूशय्याब्रह्मचर्यंचकिंचिद्भक्ष्यनिषेधनम् ॥ एकभक्तादिनियमोनित्यदानंस्वशक्तितः ॥ ८१ ॥ पुराणश्रवणंचैवतदर्थाचरणंपुनः ॥ अखंडदीपोद्बोधश्चमहापूजेष्टदैवते ॥ ८२ ॥ प्रभूतांकुरबीजाढ्येदेशेचापिगतागतम् ॥ यत्नेनवर्जयेद्धीमान्महाधर्मविवृद्धये ॥ ८३ ॥ असंभाष्यानसंभाष्याश्चातुर्मास्यव्रतस्थितैः ॥ मौनंचापिसदाकार्यंतथ्यंवक्तव्यमेववा ॥८४॥ निष्पावांश्चमसूरांश्चकोद्रवान्वर्जयेद्व्रती ॥ सदाशुचिभिरास्थेयंस्प्रष्टव्योनाव्रतीजनः ॥ ८५ ॥ दंतकेशांबरादीनिनित्यंशोध्यानियत्नतः ॥ अनिष्टचिंतानोकार्याव्रतिनाहृद्यपिक्वचित् ॥ ८६ ॥ द्वादशस्वपिमासेषुव्रतिनोयत्फलंभवेत् ॥ चातुर्मास्यव्रतभृतांतत्फलंस्यादखंडितम् ॥ ८७ ॥

वसवइतिपुंस्त्वमार्षम् ॥ विषयाइतिवापाठः ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ यापितानीता ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ अभ्यंगाद्यतइति ॥ अभ्यंगा

चतुर्ष्वपिचमासेषुनसामर्थ्यंव्रतेयदि ॥ तदोर्जेव्रतिनाभाव्यमप्यब्दफलमिच्छता ॥ ८८ ॥ अव्रतःकार्तिकोयेषांगतोमूढधियामिह ॥ तेषांपुण्यस्यलेशोपिनभवेत्सूकरात्मनाम् ॥ ८९ ॥ कृच्छ्रंवाचातिकृच्छ्रंवाप्राजापत्यमथापिवा ॥ संप्राप्तेकार्तिकेमासिकुर्याच्छक्त्यातिपुण्यवान् ॥ ९० ॥ एकांतरंव्रतंकुर्यात्त्रिरात्रव्रतमेववा ॥ पंचरात्रंसप्तरात्रंसंप्राप्तेकार्तिकेव्रती ॥ ९१ ॥ पक्षव्रतंवाकुर्वीतमासोपोषणमेववा ॥ नोर्जोवंध्योविधातव्योव्रतिनाकेनचित्कचित् ॥ ९२ ॥ शाकाहारंपयोहारंफलाहारमथापिवा ॥ चरेद्यवान्नाहारंवासंप्राप्तेकार्तिकेव्रती ॥९३॥ नित्यंनैमित्तिकंस्नानंकुर्यादूर्जेव्रतीनरः ॥ ब्रह्मचर्यंचरेदूर्जेमहाव्रतफलार्थवान् ॥ ९४ ॥ बाहुलंब्रह्मचर्येणयःक्षिपेच्छुचिमानसः ॥ समस्तंहायनंतेनब्रह्मचर्यंकृतंभवेत् ॥९५॥ यस्तुकार्तिकिकंमासमुपवासैःसमापयेत् ॥ अप्यब्दमपितेनेहभवेत्सम्यगुपोषितम् ॥ ९६ ॥ शाकाहारपयोहारैरूर्जोयैरतिवाहितः ॥ अखंडिताशरत्तेनतदाहारेणयापिता ॥ ९७ ॥ पत्रभोजीभवेदूर्जेकांस्यंत्याज्यंप्रयत्नतः ॥ योव्रतीकांस्यभोजीस्यान्नतद्व्रतफलंलभेत् ॥९८॥ कांस्यस्यनियमेदद्यात्कांस्यंसर्पिःप्रपूरितम् ॥ ऊर्जेनभक्षयेत्क्षौद्रमतिक्षुद्रगतिप्रदम् ॥ ९९ ॥ मधुत्यागेघृतंदद्यात्पायसंचसशर्करम् ॥ अभ्यंगेऽभ्यवहारेचतैलमूर्जेविवर्जयेत् ॥१००॥ भूयात्सनारकीदेहीतत्राभ्यंगाद्यतोनघ ॥ तैलत्यागेतिलान्दद्याद्द्रोणमात्रान्सकांचनान् ॥ १ ॥ कार्तिकेमत्स्यभोजीयःसतैमींयोनिमृच्छति ॥ बाहुलेमांसभोजीयःसकृमिःपूयशोणिते ॥ २ ॥ मांसाशिनोपियेभूपास्त्यजेयुस्तेपिकार्तिके ॥ मत्स्यमांसानिसंत्यज्यकार्त्तिकेव्रततत्परः ॥ ३ ॥ मत्स्यमांसादनाद्दोषाद्बहिर्भवतिनिश्चितम् ॥ नियमेमत्स्यमांसानांदद्यात्कार्तिकिकेव्रती ॥ कूश्मांडानिसमाषाणिदशस्वर्णयुतान्यपि ॥ ४ ॥ कार्तिकेमौनभोजीयःसोश्नात्यमृतमेवहि ॥ सुघंटांसतिलांमौनीसहिरण्यांप्रदापयेत् ॥ ५ ॥ कार्तिकेलवणंत्यक्तंयेनव्रतभृतासता ॥ त्यक्ताःसर्वेरसास्तेनतत्त्यागीगांप्रदापयेत् ॥ ६ ॥ भूशय्यांकार्तिकेकुर्वन्नभुवंसंस्पृशेद्व्रती ॥ पर्यंकंभूशयोदद्यात्सतूलंसोपधानकम् ॥ ७ ॥ दीपंयःकार्तिकेदद्यादखंडंघृतवर्तिकम् ॥ मोहांधतमसंप्राप्यसनगच्छातिदुर्गतिम् ॥८॥ यःकुर्यात्कार्तिकेमासेरजन्यांदीपकौमुदीम् ॥ तामिस्रंचांधतामिस्रंनसपश्येत्कदाचन ॥९॥ पापांधकारसंक्रुद्धःकार्तिकेदीपदानतः ॥ क्रोधांधकारितमुखंभास्करिंसनवीक्षते ॥ ११० ॥

दुद्वर्तनात् ॥ आद्यतः आद्यात् अभ्यवहाराच्चेत्यर्थः ॥ अभ्यंगाद्यतइतिद्विपदच्छेदः ॥ तत्राभ्यंगादित्यभ्यवहारोपलक्षणम् ॥ १ ॥ तैमींतिमिर्मत्स्यस्तदीयांयोनिम् ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ पापांधकारसंक्रुद्धः पापमेवांधकारस्तस्मैसंक्रुद्धः ॥ ११० ॥

---

१ अहिर्भवति इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ प्रबोधकरणीमुत्थानैकादशीम् ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

सउद्द्योतमयंपश्येत्त्रैलोक्यंसचराचरम् ॥ प्रबोधयेन्ममाग्रेयोदीपंसोज्ज्वलवर्तिकम् ॥ ११ ॥ पंचामृतानांकलशैरूर्जेमांस्नापयेन्नरः ॥ क्षीराब्धितट
मासाद्यवसेत्कल्पंसपुण्यवान् ॥ १२ ॥ प्रतिक्षपंकार्तिकिकेकुर्वञ्ज्योत्स्नांप्रदीपजाम् ॥ ममाग्रेभक्तिसंयुक्तोगर्भध्वांतंनसंविशेत् ॥ १३ ॥ आज्यव
र्तिकमूर्जेयोदीपंमेग्रेप्रबोधयेत् ॥ बुद्धिभ्रंशंनचाप्नोतिमहामृत्युभयेसति ॥ १४ ॥ कार्तिकेमासिमेयात्रायैःकृताभक्तितत्परैः ॥ बिंदुतीर्थेकृतस्नानैस्तेषांमु
क्तिर्नदूरतः ॥ १५ ॥ व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम ॥ दामोदरगृहाणार्घ्यंदनुजेंद्रनिषूदन ॥ १६ ॥ स्नानेनैमित्तिकेकृष्णकार्तिकेपापशो
षणे ॥ गृहाणत्वर्घ्यंमयादत्तंराधयासहितोभवान् ॥ १७ ॥ इमौमंत्रौसमुच्चार्ययोर्घ्यंमह्यंप्रयच्छति ॥ सुवर्णरत्नपुष्पांबुयुजाशंखेनपुण्यवान् ॥ १८ ॥
सुवर्णपूर्णपृथिवीसंकल्पोदकपूर्वकम् ॥ तेनदत्ताभवेत्सम्यक्सुपात्रायसुपर्वणि ॥ १९ ॥ एकादशींसमासाद्यप्रबोधकरणींमम ॥ बिंदुतीर्थकृतस्नानोरात्रौ
जागरणान्वितः ॥ १२० ॥ दीपान्प्रबोध्यबहुशोममालंकृत्यशक्तितः ॥ तौर्यत्रिकविनोदेनपुराणश्रवणादिभिः ॥ २१ ॥ महामहोत्सवंकृत्वायावत्पूर्णा
तिथिर्भवेत् ॥ तत्रान्नदानंबहुशःकृत्वामत्प्रीतयेनरः ॥ २२ ॥ महापातकयुक्तोपिनविशेत्प्रमदोदरम् ॥ बिंदुमाधवनामानंयोमामत्रसमर्चयेत् ॥ २३ ॥
बिंदुतीर्थकृतस्नानोनिर्वाणंसहिविंदति ॥ आदिमाधवनामाहंपूज्यःसत्ययुगेमुने ॥ २४ ॥ अनंतमाधवोज्ञेयस्त्रेतायांसर्वसिद्धिदः ॥ श्रीदमाधवसंज्ञोहं
द्वापरेपरमार्थकृत् ॥२५॥ कलौकलिमलध्वंसीज्ञेयोहंबिंदुमाधवः ॥ कलौकल्मषसंपन्नानमांविंदंतिमानवाः ॥२६॥ ममैवमाययामूढाभेदवादपरायणाः॥
ममभक्तिंप्रकुर्वाणायेविश्वेशंद्विषंतिवै ॥ २७ ॥ विद्विषोममतेज्ञेयाःपिशाचपदगामिनः ॥ पैशाचींयोनिमाप्यापिकालभैरवशासनात् ॥ २८ ॥ त्रिंशद्वर्ष
सहस्राणिउषित्वादुःखसागरे ॥ विश्वेशानुग्रहादेवततोमोक्षमवाप्नुयुः ॥ २९ ॥ तस्माद्द्वेषोनकर्तव्योविश्वेशेपरमात्मनि ॥ विश्वेशद्वेषिणांपुंसांप्रायश्चित्तं
यतोनहि ॥ १३० ॥ मनसापिहिविश्वेशंविद्विषंतीहयेऽधमाः ॥ अध्यासतेंधतामिस्रंभूतास्तेन्यत्रसंततम् ॥३१॥ शिवनिंदापरायेचयेपाशुपतनिंदकाः॥
विद्विषोममतेज्ञेयाःपतंतोनरकेऽशुचौ ॥ ३२ ॥ अष्टाविंशतिकोटीषुनरकेषुक्रमेणहि ॥ कल्पंकल्पंवसेयुस्तेयेविश्वेश्वरनिंदकाः ॥ ३३ ॥ विश्वेशानुग्रहं
प्राप्यमुनेहमपिमुक्तिदः ॥ मद्भक्तैस्तद्विशेषेणसेव्योविश्वेश्वरोऽनिशम् ॥ ३४ ॥ इयंवाराणसीज्ञेयामुनेपाशुपतस्थली ॥ तस्मात्पशुपतिःसेव्यःकाश्यां
निःश्रेयसार्थिभिः ॥ ३५ ॥ अत्रपंचनदेतीर्थेस्नातिविश्वेश्वरःस्वयम् ॥ ऊर्जेसदैवसगणःसस्कंदःसपरिच्छदः ॥ ३६ ॥

॥ २८ ॥ २९ ॥ १३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूतपापकइतितपऔदार्यख्यापनायोक्तम् ॥ धूतपापकोपलक्षितेधर्मनदइत्यर्थः ॥ ३७ ॥ ३८ ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ ४३ ॥४४॥ १४५ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखंडटी
कायांषष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ एकषष्टितमेऽध्यायेमहामाहात्म्यसूचकम् ॥ वैष्णवानांचतीर्थानांमाहात्म्यंहरिणाऽकथि ॥ १ ॥ अतीताध्यायेभगवन्नित्यादिना

ब्रह्मासवेदःसमखोब्रह्माण्याद्याश्चमातरः ॥ सताब्धयःससरितःस्नांत्यूर्जेधूतपापके ॥३७॥ सचेतनाहियावंतस्त्रैलोक्येदेहधारिणः ॥ तावंतःस्नातुमायांतिका
र्तिकेधूतपापके ॥ ३८ ॥ यैर्नपंचनदेस्नातंप्राप्यकार्तिकिकंशुभम् ॥ जलबुद्बुदवत्तेषांवृथाजन्मशरीरिणाम् ॥३९॥ आनंदकाननंपुण्यंपुण्यंपांचनदंततः ॥
ततोपिममसान्निध्यमग्निबिंदोमहामुने ॥ १४० ॥ अनेनैवानुमानेनविद्धिपंचनदस्यवै ॥ महिमानंमहाप्राज्ञसर्वतीर्थोत्तमोत्तमम् ॥ ४१ ॥ श्रुत्वापियं
महाप्राज्ञोमहापापैःप्रमुच्यते ॥ विष्णोर्मुखादितिश्रुत्वासोग्निबिंदुर्महामुनिः ॥ ४२ ॥ पुनःप्रणम्यपप्रच्छबिंदुमाधवमच्युतम् ॥४३॥ अग्निबिंदुरुवाच ॥
भगवञ्छ्रोतुमिच्छामिबिंदुमाधवतद्वद ॥ कतिधातवरूपाणिकाश्यांसंतिजनार्दन ॥ ४४ ॥ भविष्याण्यपिकानीहतानिमेकथयाच्युत ॥ यानिसंपूज्यते
भक्ताःप्राप्स्यंतिकृतकृत्यताम् ॥ १४५ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेबिंदुमाधवाविर्भावोनामष
ष्टितमोऽध्यायः ॥ ६० ॥ ॥ अगस्त्यउवाच ॥ ॥ षडास्यमाधवाख्यानंश्रुतंमेपापनाशनम् ॥ महिमापिश्रुतःश्रेयान्सम्यक्पंचनदस्यवै ॥ १ ॥
यदग्निबिंदुनापृच्छिमाधवोदैत्यसूदनः ॥ तस्योत्तरंसमाख्याहियथाख्यातंमधुद्विषा ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यमहर्षेत्वंकथ्यमानं
मयाधुना ॥ माधवेनयथाचक्षिमुनयेचाग्निबिंदवे ॥३॥ ॥ बिंदुमाधवउवाच ॥ आदौपादोदकेतीर्थेविद्धिमामादिकेशवम् ॥ अग्निबिंदोमहाप्राज्ञभक्तानां
मुक्तिदायकम् ॥ ४ ॥ अविमुक्तेऽमृतेक्षेत्रेयर्चयंत्यादिकेशवम् ॥ तेऽमृतत्वंभजंत्येवसर्वदुःखविवर्जिताः ॥ ५ ॥ संगमेशंमहालिंगंप्रतिष्ठाप्यादिकेशवः ॥
दर्शनादघहंनृणांमुक्तिमुक्तिंदिशेत्सदा ॥ ६ ॥ याम्यांपादोदकाच्छ्वेतद्वीपतीर्थंमहत्तरम् ॥ तत्राहंज्ञानदोनृणांज्ञानकेशवसंज्ञकः ॥ ७ ॥ श्वेतद्वीपेनरः
स्नात्वाज्ञानकेशवसन्निधौ ॥ नज्ञानाद्भ्रश्यतेक्कापिज्ञानकेशवपूजनात् ॥ ८ ॥ तार्क्ष्यकेशवनामाहंतार्क्ष्यतीर्थेनरोत्तमैः ॥ पूजनीयःसदाभक्त्यातार्क्ष्य
वत्तेप्रियामम ॥ ९ ॥ तत्रैवनारदतीर्थेस्म्यहंनारदकेशवः ॥ ब्रह्मविद्योपदेष्टाचतत्तीर्थप्लुतवर्ष्मणाम् ॥१०॥ प्रह्लादतीर्थंतत्रैवनाम्नाप्रह्लादकेशवः ॥ भक्तैः
समर्चनीयोहंमहाभक्तिसमृद्धये ॥ ११ ॥ तीर्थेऽबरीषेतत्राहंनाम्नैवादित्यकेशवः ॥ पातकध्वांतनिचयंध्वंसयामीक्षणादपि ॥ १२ ॥

अग्निबिंदुनापृष्टस्यप्रत्युत्तरमुक्तानुवादपूर्वकंपृच्छति ॥ षडास्येति ॥ १ ॥ २ ॥ आचक्षिअकथि ॥ ३ ॥४॥५॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥१३॥१४॥१५॥१६॥१७॥१८॥ गोपीगोविंदतीर्थेगोपीयुक्तश्रीकृष्णतीर्थम् ॥ १९ ॥ २० ॥ विशेषानुत्कृष्टाभिलषितपदार्थान् ॥ २१ ॥ २२ ॥ २३ ॥ भक्तियुक्तितःभक्तियोगेन ॥ २४ ॥

दत्तात्रेयेश्वराद्याम्यामहमादिगदाधरः ॥ हरामितत्रभक्तानांसंसारगदसंचयम् ॥ १३ ॥ तत्रैवभार्गवेतीर्थेभृगुकेशवनामतः ॥ काशीनिवासिनःपुंसो बिभर्मिचमनोरथैः ॥ १४ ॥ वामनाख्येमहातीर्थेमनःप्रार्थितदेशुभे ॥ पूज्योहंशुभमिच्छद्भिर्नाम्नावामनकेशवः ॥ १५ ॥ नरनारायणेतीर्थेनरनाराय णात्मकम् ॥ भक्ताःसमर्च्यमांस्युर्वैनरनारायणात्मकाः ॥ १६ ॥ तीर्थेयज्ञवराहाख्येयज्ञवाराहसंज्ञकः ॥ नरैःसमर्चनीयोहंसर्वयज्ञफलेप्सुभिः ॥१७॥ विदारनरसिंहोहंकाशीविघ्नविदारणः ॥ तत्राग्नितीर्थेसंसेव्यस्तीर्थोपद्रवशांतये ॥ १८ ॥ गोपीगोविंदतीर्थेतुगोपीगोविंदसंज्ञकम् ॥ समर्च्यमांनरोभक्त्या ममभायांनसंस्पृशेत् ॥ १९ ॥ मुनेलक्ष्मीनृसिंहोस्मितीर्थेतत्राग्निपावने ॥ दिशामिभक्तियुक्तेभ्यःसदानैःश्रेयसींश्रियम् ॥ २० ॥ शेषमाधवनामाहंशेषतीर्थेऽघहारिणि ॥ विश्राणयाम्यशेषांश्चविशेषान्भक्तचिंतितान् ॥ २१ ॥ शंखमाधवतीर्थेचस्नात्वामांशंखमाधवम् ॥ शंखोदकेनसंस्नाप्यभवेच्छंखनिधेः पतिः ॥२२॥ हयग्रीवेमहातीर्थेमांहयग्रीवकेशवम् ॥ प्रणम्यप्राप्नुयान्नूनंतद्विष्णोःपरमंपदम् ॥ २३ ॥ भीष्मकेशवनामाहंवृद्धकालेशपश्चिमे ॥ उपसर्गान्हरेभीष्मान्सेवितोभक्तियुक्तितः ॥ २४ ॥ निर्वाणकेशवश्चाहंभक्तनिर्वाणसूचकः ॥ लोलार्कादुत्तरेभागेलोलत्वंचेतसोहरे ॥ २५ ॥ वंद्यस्त्रिलोकसुंदर्यायाम्यांयोमांसमर्चयेत् ॥ काश्यांख्यातंत्रिभुवनकेशवंनसगर्भभाक् ॥ २६ ॥ ज्ञानवाप्याःपुरोभागेविद्धिमांज्ञानमाधवम् ॥ तत्रमांभक्तितोभ्यर्च्य ज्ञानंप्राप्नोतिशाश्वतम् ॥ २७ ॥ श्वेतमाधवसंज्ञोहंविशालाक्ष्याःसमीपतः ॥ श्वेतद्वीपेश्वरंरूपंकुर्यांभक्त्यासमर्चितः ॥ २८ ॥ उदग्दशाश्वमेधान्मां प्रयागाख्यंचमाधवम् ॥ प्रयागतीर्थेसुस्नातोदृष्ट्वापापैःप्रमुच्यते ॥ २९ ॥ प्रयागगमनेपुंसांयत्फलंतपसिश्रुतम् ॥ तत्फलंस्याद्दशगुणमत्रस्नात्वाममाग्रतः ॥ ३० ॥ गंगायमुनयोःसंगेयत्पुण्यंस्नानकारिणाम् ॥ काश्यांमत्सन्निधावत्रतत्पुण्यंस्याद्दशोत्तरम् ॥ ३१ ॥ दानानिराहुग्रस्तेर्केददतांयत्फलं भवेत् ॥ कुरुक्षेत्रेहितत्काश्यामत्रैवस्याद्दशाधिकम् ॥ ३२ ॥ गंगोत्तरवहायत्रयमुनापूर्ववाहिनी ॥ तत्संभेदंनरःप्राप्यमुच्यतेब्रह्महत्यया ॥ ३३ ॥ वपनं तत्रकर्तव्यंपिंडदानंचभावतः ॥ देयानितत्रदानानिमहाफलमभीप्सुना ॥ ३४ ॥ गुणाःप्रजापतिक्षेत्रेयेसर्वेसमुदीरिताः ॥ अविमुक्तेमहाक्षेत्रेऽसंख्याताश्चभवंतिहि ॥ ३५ ॥ प्रयागेशंमहालिंगंतत्रातिष्ठतिकामदम् ॥ तत्सान्निध्याच्चतत्तीर्थंकामदंपरिकीर्तितम् ॥ ३६ ॥

॥२५॥२६॥ २७ ॥ २८ ॥ उदगुत्तरे ॥ २९ ॥ तपसिमाघे ॥ ३० ॥ मत्सन्निधौप्रयागमाधवनिकटे ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ प्रयागेशंशूलटंकेश्वरम् ॥ ३६ ॥

१ प्रयागे तु गंगा नोत्तरवहा परं दक्षिणवाहिनीति विचारणीयमेतद्वाक्यम् । न चैतत्काशीस्थप्रयागविषयं तत्र संभेदाभावादिति । २ शूलटंकेश्वरोभिन्नः प्रयागेशादिति स्फुटम् । टीकाकारमतं नेह याथार्थ्येनावगम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३७ ॥३८॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ऊर्जेकार्तिके ॥ ४३ ॥ मामनुमांलक्षीकृत्यमत्समीपेचेत्यर्थः ॥ ४४ ॥ ४५ ॥ ४६ ॥४७॥ प्रहंत्येवप्रघ्नंत्येवेत्यर्थः ॥ दहंतीतिवापाठः ॥४८॥४९॥ ॥ ५० ॥ ५१ ॥ ५२ ॥ मणिकर्णिकायाःसमीपमुपमणिकर्णिकंमणिकर्णिकायामित्यर्थः ॥ ५३ ॥ वैकुंठादिति ॥ आगत्यमणिकर्णिकांसमासाद्येतिशेषः ॥ ५४ ॥ सकृदिति ॥ सकृ

काश्यांमाघःप्रयागेयैर्नस्नातोमकरार्कगः ॥ अरुणोदयमासाद्यतेषांनिःश्रेयसंकुतः ॥ ३७ ॥ काश्युद्भवेप्रयागेयेतपसिस्नांतिसंयताः ॥ दशाश्वमेधज नितंफलंतेषांभवेद्ध्रुवम् ॥३८॥ प्रयागमाधवंभक्त्याप्रयागेशंचकामदम् ॥ प्रयागेतपसिस्नात्वायेर्चयंत्यन्वहंसदा॥३९॥ धनधान्यसुतर्द्धींस्तेलब्ध्वाभो गान्मनोरमान् ॥ भुक्त्वेहपरमानंदंपरंमोक्षमवाप्नुयुः ॥ ४० ॥ माघेसर्वाणितीर्थानिप्रयागमधियांतिहि ॥ प्राच्युदीचीप्रतीचीतोदक्षिणाधस्तथोर्ध्वतः ॥ ॥ ४१ ॥ काशीस्थितानितीर्थानिमुनेयांतिनकुत्रचित् ॥ यदियांतितदायांतितीर्थत्रयमनुत्तमम् ॥ ४२ ॥ आयांत्यूर्जेपंचनदेप्रातःप्रातर्ममांतिकम् ॥ महाघौघप्रशमनेमहाश्रेयोविधायिनि ॥ ४३ ॥ प्राप्यमाघमघारिंचप्रयागेशसमीपतः ॥ प्रातःप्रयागेसंस्नांतिसर्वतीर्थानिमामनु ॥ ४४ ॥ समासाद्यच मध्याह्नमभियांतिचनित्यशः ॥ संस्नातुंसर्वतीर्थानिमुक्तिदांमणिकर्णिकाम् ॥ ४५ ॥ काश्यांरहस्यंपरममेतत्तेकथितंमुने ॥ यथातीर्थत्रयीश्रेष्ठास्व स्वकालेविशेषतः ॥ ४६ ॥ अन्यद्रहस्यंवक्ष्यामिनवाच्यंयत्रकुत्रचित् ॥ अभक्तेषुसदागोप्यंनगोप्यंभक्तिमज्जने ॥ ४७ ॥ काश्यांसर्वाणितीर्थानिएकै कादुत्तरोत्तरम् ॥ महैनांसिप्रहंत्येवप्रसह्यनिजतेजसा ॥ ४८ ॥ एतदेवरहस्यंतेवाराणस्याउदीर्यते ॥ उत्क्षिप्यैकांगुलिंतथ्यंश्रेष्ठैकामणिकर्णिका ॥४९॥ गर्जंतिसर्वतीर्थानिस्वस्वधिष्ण्यगतान्यहो ॥ केवलंबलमासाद्यसुमहन्माणिकर्णिकम् ॥ ५० ॥ पापानिपापिनांहत्वामहांत्यपिबहून्यपि ॥ काशीतीर्था निमध्याह्नेप्रायश्चित्तचिकीर्षया ॥ ५१ ॥ पर्वस्वपर्वस्वपिवानित्यंनियमवंत्यहो ॥ निर्मलानिभवंत्येवविगाह्यमणिकर्णिकाम् ॥ ५२ ॥ विश्वेशोवि श्वयासार्धंसदोपमणिकर्णिकम् ॥ मध्यंदिनंसमासाद्यसंस्नातिप्रतिवासरम् ॥ ५३ ॥ वैकुंठादप्यहंनित्यंमध्याह्नेमणिकर्णिकाम् ॥ विगाहेपद्मयासार्धं मुदापरमयामुने ॥ ५४ ॥ सकृन्ममाख्यांगृणतांनिर्हरन्यदघान्यहम् ॥ हरिनामसमापन्नस्तद्बलान्माणिकर्णिकात् ॥ ५५ ॥ सत्यलोकात्प्रतिदिनंहं सयानःपितामहः ॥ माध्याह्निकविधानायसमायान्मणिकर्णिकाम् ॥५६॥ इंद्राद्यालोकपालाश्चमरीच्याद्यामहर्षयः ॥ माध्याह्निकींक्रियांकर्तुंसमीयुर्म णिकर्णिकाम् ॥ ५७ ॥ शेषवासुकिमुख्याश्चनागावैनागलोकतः ॥ समायांतीहमध्याह्नेसंस्नातुंमणिकर्णिकाम् ॥ ५८ ॥

त्कदाचिन्ममाख्याम् ॥ गृणतामुच्चरतांयदहमघंनिर्हरन्निःशेषेणपापंहरामिनाशयामितन्माणिकर्णिकाद्बलात् मणिकर्णिकावगाहनादिजन्यसामर्थ्यादित्यर्थः ॥ निर्हरेदितिपाठेनिर्हरामीत्येव ॥ अतएवाहंहरिनामसमापन्नःभक्तानांसर्वाणिपापानिहरतीतिहरिः हरिरितिनामसमापन्नंयेनसोहंतथा ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥५९॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥६८॥६९॥७०॥७१ ॥ ७२ ॥ ७३ ॥ तत्रसूक्ष्मपरिमाणंवक्तुंप्रसंगात्स्थूलमणिकर्णिकायामवांतरतीर्थान्याह हरिश्चंद्रेत्यारभ्यचक्रपुष्करणी

चराचरेषुसर्वेषुयावंतश्चसचेतनाः ॥ तावंतःस्नांतिमध्याह्नेमणिकर्णीजलेमले ॥ ५९ ॥ केमाणिकर्णिकेयानांगुणानांसुगरीयसाम् ॥ शक्तावर्णयितुंविप्रा
ऽसंख्येयानांमदादिभिः ॥ ६० ॥ चीर्णान्युग्राण्यरण्येषुतैस्तपांसितपोधनैः ॥ यैरियंहिसमासादिमुक्तिभूर्मणिकर्णिका ॥ ६१ ॥ विश्राणितमहादाना
स्तएवनरपुंगवाः ॥ चरमेवयसिप्राप्तायैरेषामणिकर्णिका ॥ ६२ ॥ चीर्णसर्वव्रतास्तेतुयथोक्तविधिनाध्रुवम् ॥ यैःस्वतल्पीकृतामाणिकर्णिकेयीस्थली
मृदुः ॥६३॥ तएवधन्यामर्त्येस्मिन्सर्वक्रतुषुदीक्षिताः ॥ त्यक्त्वापुण्यार्जितांलक्ष्मीमैक्षियैर्मणिकर्णिका ॥६४॥ कृतानानाविधाधर्माइष्टापूर्तास्तुतैर्नृभिः ॥
वार्धकंसमनुप्राप्यप्रापियैर्मणिकर्णिका ॥ ६५ ॥ रत्नानिसदुकूलानिकांचनंगजवाजिनः ॥ देयाःप्राज्ञेनयत्नेनसदोपमणिकर्णिकम् ॥ ६६ ॥ पुण्येनो
पार्जितंद्रव्यमत्यल्पमपियैर्नरैः ॥ दत्तंतदक्षयंनित्यंमुनेधिमणिकर्णिकम् ॥ ६७ ॥ कुर्याद्यथोक्तमप्येकंप्राणायामंनरोत्तमः ॥ यस्तेनविहितोनूनंषडंगो
योगउत्तमः ॥ ६८ ॥ जप्त्वैकामपिगायत्रींसंप्राप्यमणिकर्णिकाम् ॥ लभेदयुतगायत्रीजपनस्यफलंस्फुटम् ॥ ६९ ॥ एकामप्याहुतिंप्राज्ञोदत्त्वोपम
णिकर्णिकम् ॥ यावज्जीवाग्निहोत्रस्यलभेदविकलंफलम् ॥ ७० ॥ इतिश्रुत्वाहरेर्वाक्यमग्निबिंदुर्महातपाः ॥ प्रणिपत्यमहाभक्त्यापुनःपप्रच्छमाधवम् ॥
॥ ७१ ॥ ॥ अग्निबिंदुरुवाच ॥ विष्णोकियत्परीमाणापुण्यैषामणिकर्णिका ॥ ब्रूहिमेपुंडरीकाक्षनत्वत्तस्तत्त्ववित्परः ॥ ७२ ॥ ॥ श्रीविष्णुरुवाच ॥
आगंगाकेशवादाचहरिश्चंद्रस्यमंडपात् ॥ आमध्याद्देवसरितःस्वर्द्वारान्मणिकर्णिका ॥ ७३ ॥ स्थूलमेतत्परीमाणंसूक्ष्मंचप्रवदामिते ॥ हरिश्चंद्रस्यती
र्थाग्रेहरिश्चंद्रविनायकः ॥ ७४ ॥ सीमाविनायकश्चात्रमणिकर्णीह्रदोत्तरे ॥ सीमाविनायकंभक्त्यापूजयित्वानरोत्तमः ॥ ७५ ॥ मोदकैःसोपचारै
श्चप्राप्नुयान्मणिकर्णिकाम् ॥ हरिश्चंद्रेमहातीर्थेतर्पयेयुःपितामहान् ॥७६॥ शतंसमाःसुतृप्ताःस्युःप्रयच्छंतिचवांछितम् ॥ हरिश्चंद्रेमहातीर्थेस्नात्वाश्रद्धा
न्वितोनरः ॥ ७७ ॥ हरिश्चंद्रेश्वरंनत्वानसत्यात्परिहीयते ॥ ततःपर्वततीर्थंचपर्वतेश्वरसंनिधौ ॥ ७८ ॥ अधिष्ठानंमहामेरोर्महापातकनाशनम् ॥
तत्रस्नात्वार्चयित्वेशंकिंचिद्दत्त्वास्वशक्तितः ॥ ७९ ॥ अध्यास्यमेरुशिखरंदिव्यान्भोगान्समश्नुते ॥ कंबलाश्वतरंतीर्थंपर्वतेश्वरदक्षिणे ॥८०॥ कंबला
श्वतरेशंचतत्तीर्थात्पश्चिमेशुभम् ॥ तस्मिंस्तीर्थेकृतस्नानस्तल्लिंगंयःसमर्चयेत् ॥ ८१ ॥ अपितस्यकुलेजातागीतज्ञाःस्युःश्रियान्विताः ॥ चक्रपुष्क
रिणीतत्रयोनिचक्रनिवारिणी ॥ ८२ ॥

यतःप्राक्तनेनग्रंथेन ॥७४॥७५॥७६॥ सुतृप्ताःस्युःतस्यतेपिता महाइतिशेषः ॥७७॥७८॥७९॥८०॥ तत्तीर्थात्पर्वतेश्वरतीर्थात् ॥ तस्मिंस्तीर्थेकंबलाश्वतरतीर्थे ॥८१॥ चक्रेति॥तत्रकम्बलाश्वतरेश्वर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे ॥ चक्रपुष्करणीसूक्ष्मोतिशेषः ॥ हरिश्चन्द्रादीनिकम्बलाश्वतरांतानितीर्थानितत्रेत्यभिलष्यन्तइतिकेचित् ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥८८॥ इंदीवरवतींनीलोत्पलवतीम् ॥ ॥ ८९ ॥ मातुलुंगफलं रुचकफलम् ॥ यदाहामरः ॥ रुचकोमातुलुंगकइति ॥ ९० ॥ ९१ ॥ प्रत्यग्रेति ॥ प्रत्यग्रंविकसितंनूतनंवायस्केतकीपुष्पंतेनलसन्धम्मिल्लःसंयताःकचायस्मिंस्तथाभूतंमस्तकंयस्याःसातथा ॥ ९२ ॥ ९३ ॥ मंत्रंमंत्रद्वयम् ॥ ९४ ॥ तत्रएकोमन्त्रःपञ्चदशाक्षरोद्वितीयश्चतुर्दशाक्षरस्तयोराद्यमुद्धरति वाग्भवेतिश्लोकेन ॥ बीजाधिक्यात्फलाधिक्यंझटितिफलप्रदत्वंच ॥ वाग्भववीजंसरस्वतीवीजम् ऐं मायावीजंभुवनेश्वरीवीजं ह्रीं लक्ष्मीविजं श्रीम् मदनवीजंकामवीजंक्लीं प्रणवओंकारः एतान्पूर्ववदेत्प्रथमंपठेत् ॥ अंतेभवोंत्योभस्यांत्योभांत्योमकारस्तम् ॥ भांतमितिवापाठः॥कथंभूतम् ॥ विंदूपेतम् ॥ मणिपदंमणीतिपदंमाणिपदम् ॥ पूर्वंपूर्वमित्युक्तत्वात्पश्चाद्वदत् ॥ अथानन्तरंसहृत्हृदाहृन्मंत्रेणनमसासहकर्णिकेकर्णिकेनमइतिवदेत् ॥ अनन्तरंप्रणवपुटःप्रणवा

संसारचक्रेगहनेयत्रस्नातोविशेन्नना ॥ चक्रपुष्करिणीतीर्थममाधिष्ठानमुत्तमम् ॥ ८३ ॥ समाःपरार्धसंख्यातास्तत्रतप्तंमहातपः ॥ तत्रप्रत्यक्षतांयातो
ममविश्वेश्वरःपरः ॥ ८४ ॥ तत्रलब्धंमयैश्वर्यमविनाशिमहत्तरम् ॥ चक्रपुष्करिणीचैवख्याताभून्मणिकर्णिका ॥ ८५ ॥ द्रवरूपंपरित्यज्यललनारूपधा
रिणी ॥ प्रत्यक्षरूपिणीतत्रमयैक्षिमणिकर्णिका ॥ ८६ ॥ तस्यारूपंप्रवक्ष्यामिभक्तानांशुभदंपरम् ॥ यद्रूपध्यानतःपुंभिराषण्मासंत्रिसंध्यतः ॥ ८७ ॥
प्रत्यक्षरूपिणीदेवीदृश्यतेमणिकर्णिका ॥ चतुर्भुजाविशालाक्षीस्फुरद्भालविलोचना ॥ ८८ ॥ पश्चिमाभिमुखीनित्यंप्रबद्धकरसंपुटा ॥ इंदीवरवतींमालां
दधतीदक्षिणेकरे ॥ ८९ ॥ वरोद्यतेकरेसव्येमातुलुंगफलंशुभम् ॥ कुमारीरूपिणीनित्यंनित्यंद्वादशवार्षिकी ॥ ९० ॥ शुद्धस्फटिककांतिश्चसुनील
स्निग्धमूर्द्धजा ॥ जितप्रवालमाणिक्यरमणीयरदच्छदा ॥ ९१ ॥ प्रत्यग्रकेतकीपुष्पलसद्धम्मिल्लमस्तका ॥ सर्वांगमुक्ताभरणाचंद्रकांत्यंशुकावृता ॥
॥ ९२ ॥ पुंडरीकमयींमालांसश्रीकांबिभ्रतीहृदि ॥ ध्यातव्यानेनरूपेणमुमुक्षुभिरहर्निशम् ॥ ९३ ॥ निर्वाणलक्ष्मीभवनंश्रीमतीमणिकर्णिका ॥
मंत्रंतस्याश्चवक्ष्यामिभक्तकल्पद्रुमाभिधम् ॥ यस्यावर्तनतःसिद्ध्येदपिसिद्धचष्टकंनृणाम् ॥ ९४ ॥ वाग्भवमायालक्ष्मीमदनप्रणवान्वदेत्पूर्वम् ॥ भांत्यं
विंदूपेतंमणिपदमथकर्णिकेसहृत्प्रणवपुटः ॥ ९५ ॥ मंत्रःसुरद्रुमसमःसमस्तसुखसंततिप्रदोजप्यः ॥ तिथिभिःपरिमितवर्णःपरमपदंदिशतिनिशित
धियाम् ॥ ९६ ॥ तारस्तारतृतीयोविंद्वंतोमणिपदंततःकर्णिके ॥ प्रणवात्मिपदंकेनमइतिमनुसंख्यवर्णमनुः ॥ ९७ ॥

भ्यांपुटःपुटितः आ द्यन्तयोःप्रणवपुटितोमन्त्रःपठितव्यइत्यर्थः ॥ तथाचैतादृशोमंत्रोभवति ॥ ओंऐंह्रींश्रींक्लीं ओंमंमणिकर्णिकेनमओमिति ॥ अत्रमन्त्राद्बहिस्तुभ्यामित्यध्याहर्तव्यम् ॥ चतुर्थ्यर्थेवाप्रथमा ॥ एवमुत्तरत्रापि ॥ ९५ ॥ मंत्रस्यादेयत्वंदर्शयन्वर्णपरिमितिंदर्शयति ॥ मंत्रइति ॥ निशितधियांशुद्धसत्त्वानामित्यर्थः ॥ ९६ ॥ द्वितीयमन्त्रमुद्धरति तारइतिपादत्रयेण ॥ तारःप्रणवःतारस्याऽकारोकारमकारात्मकस्यतृतीयस्तारतृतीयोमकारः ॥ कथंभूतः ॥ विंद्वंतोऽनुस्वारांतः ॥ मणिपदंमणीतिपदंततस्तदनन्तरंकर्णिकेइतिपदंप्रणवात्मिकेपदम् ॥ सच्चिदात्मिकेपदमितिकचित् ॥ केनमइतिचपदम् ॥ तथाचैतादृगयंमनुर्भवति ॥ ओंमंमणिकर्णिकेप्रणवात्मिकेनमइति ॥ मंत्राक्षरपरिमितिंदर्शयति ॥ मन्विति ॥ मनुश्चतुर्दशततसंख्यकावर्णाय

CC-0. In Public Domain. Digitization by eGangotri

स्मिन्सचासौमनुर्मंत्रश्चेतिमनुसंख्यवर्णमनुः ॥ अत्रयथाश्रुतस्यग्राह्यत्वादृष्यादिनियमोनावेक्ष्यः ॥ ९७ ॥ पुंभिरितिविशेषणात्स्त्रीणांजपोनिवारितः ॥ स्त्रीभिरितिपाठोमृतोदेशान्तरेष्वितिद र्शनादनादेयः ॥ ९८ ॥ पुण्डरीकैःपद्मैः ॥ सक्षौद्रेणसमधुना ॥ ९९ ॥ १०० ॥ नवरत्नसमन्वितानूतनैरत्नैरलंकृतेत्यर्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ समच्योंमणिकर्णिके श्वरइत्यर्थः ॥ ५ ॥ ६ ॥ आत्मानःपशवःप्रोक्ताःसर्वेसंसारवर्तिनः ॥ तेषांपतिरहंदेवःस्मृतःपशुपतिर्बुधैरिति ॥ निधिर्ब्रह्मा ॥ पशूनांपशुतुल्यानांजीवानांपाशहृदज्ञानहृत्पशुपाशहृत् ॥

अयंमंत्रोऽनिशंजप्यःपुंभिर्मुक्तिमभीप्सुभिः ॥ होमोदशांशकःकार्यःश्रद्धाबद्धादरैर्नृभिः ॥ ९८ ॥ परिप्लुतैःपुंडरीकैर्गव्येनहविषास्फुटैः ॥ सशर्करेणमे धावीसक्षौद्रेणसदाशुचिः ॥ ९९ ॥ त्रिलक्षमंत्रजप्येनमृतोदेशांतरेष्वपि ॥ अवश्यंमुक्तिमाप्नोतिमंत्रस्यास्यप्रभावतः ॥ १०० ॥ सौवर्णीप्रतिमाकार्या नवरत्नसमन्विता ॥ पूर्वोक्तरूपसंपन्नासंपूज्यासाप्रयत्नतः ॥ १ ॥ संपूज्यावासदागेहेनरैर्मोक्षैककांक्षिभिः ॥ मणिकर्ण्यामथाक्षेप्यासमभ्यर्च्यप्रयत्नतः ॥ २ ॥ संसारभीरुभिःपुंभिःश्रद्धाबद्धादरैरिह ॥ उपायःसमनुष्ठेयोह्यपिदूरनिवासिभिः ॥ ३ ॥ मणिकर्ण्यांकृतस्नानोमणिकर्णीशवीक्षणात् ॥ जननी जठरावासेवसतिंनलभेन्नरः ॥४॥ मणिकर्णीश्वरंलिंगंपुरासंस्थापितंमया ॥ प्राग्द्वारंतर्गृहस्यात्रसमच्योंमोक्षकांक्षिभिः ॥५॥ ततःपाशुपतंतीर्थमवाच्यां मणिकर्णितः ॥ कृतोदकक्रियस्तत्रपश्येत्पशुपतीश्वरम् ॥ ६ ॥ यत्रपाशुपतोयोगउपदिष्टःपिनाकिना ॥ ममापिविधिमुख्यानांसुराणांपशुपाशहृत् ॥ ॥ ७ ॥ अतःपशुपतिर्यत्रलिंगरूपधरःस्वयम् ॥ पशुपाशविमोक्षायनित्यंकाश्यांप्रकाशते ॥ ८ ॥ तत्रचैत्रचतुर्दश्यांशुक्लायांशुचिमानसैः ॥ कार्या यात्राप्रयत्नेनरात्रौजागरणंतथा ॥ ९ ॥ पूजयित्वापशुपतिमुपोषणपरायणाः ॥ पशुपाशैर्नबध्यंतेदर्शेविहितपारणाः ॥ ११० ॥ रुद्रावासस्ततस्ती र्थंतीर्थात्पाशुपतात्पुरः ॥ तत्रस्नात्वानरैरर्च्योरुद्रावासेश्वरोहरः ॥ ११ ॥ मणिकर्णीश्वराद्याम्यांरुद्रावासेश्वरंनरः ॥ समाराध्यवसेल्लोकेरुद्रावासेनसं शयः ॥ १२ ॥ विश्वतीर्थंततोयाम्यांविश्वैस्तीर्थैरधिष्ठितम् ॥ तत्रस्नात्वानरोभक्त्याविश्वनाथंविलोकयेत् ॥ १३ ॥ विश्वांगौरींचतदनुपूजयित्वा तिभक्तितः ॥ विश्वस्यपूज्योभवतिततोविश्वमयोभवेत् ॥ १४ ॥ मुक्तितीर्थंचतदनुतत्रापिकृतमज्जनः ॥ मोक्षेश्वरंततोभ्यर्च्यमोक्षमाप्नोत्यसंशयम् ॥ १५ ॥ अविमुक्तेश्वरात्पश्चान्मोक्षेशंवीक्ष्यमानवः ॥ नपुनर्मानवेलोकेयातायातंकरोत्यहो ॥ १६ ॥ अविमुक्तेश्वरंतीर्थंमुक्तितीर्थान्मनाक्परे ॥ तत्राप्लुत्याविमुक्तेशमर्चयित्वाविमुच्यते ॥ १७ ॥

पाश्यतेऽनेनेतिपाशमज्ञानंबंधोवापाशः॥पाशहृद्बंधहृत् ॥ तदुक्तम् ॥ बंधकोभवपाशेनभवपाशाच्चमोचकः ॥ कैवल्यदःपरंब्रह्माविष्णुरेवसनातनइति ॥ चतुर्विंशतितत्त्वमायाकर्मगुणक्लेशावा पाशाः ॥ तदुक्तमीश्वरगीतायांकूर्मपुराणे ॥ चतुर्विंशतितत्त्वानिमायाकर्मगुणाइति॥ एतेपाशाःपशुपतेःक्लेशाश्चपशुबंधनाइति ॥ तस्यहृदिति ॥ ७ ॥ ८ ॥ तत्रशुक्लचतुर्दश्यामितिपद्यंसांवत्सरयात्रा विषयम् ॥ पूजयित्वेतितुपद्यंप्रतिमासकृष्णचतुर्दशीविषयमितिभेदः ॥ ९ ॥ ११० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१८॥ १९ ॥ त्वङ्मांसरुधिरमितिमातृतःस्नाय्वस्थिमज्जाइतिपितृतइतिषट्कोशास्तत्प्रभावांषाट्कौशिकीम् ॥१२०॥२१॥२२॥२३॥२४॥२५॥२६॥ ससमुद्राससमुद्रैःसहिता ॥२७॥ तुष्टितत्परै रित्यत्रतुष्टीतिक्रियाविशेषणम् ॥ भक्तितत्परैरितिवापाठः ॥ २८॥ २९ ॥ १३० ॥३१॥३२॥३३॥३४॥३५॥३६॥ मातर्भवानीति ॥ हेमातर्भवानितवपादरजोऽहंभवानितव चरणधूलिरहंस्याम् ॥ हेमातर्भवानितवदासतरस्तवदासानांमध्येप्रकृष्टःसेवकोऽहंभवानि ॥ हेमातर्हेभवानियथाऽस्मिन्भवेसंसारेऽहंनभवानिनभवेयंनभविष्यामीत्यर्थः ॥ तथाऽनुदिनंप्रतिदिनंत्वद्भाक्त्वांभजतइतित्वद्भाक्ताहृशो

तत्परेतारकंतीर्थंयत्रविश्वेश्वरःस्वयम् ॥ आचष्टेतारकंब्रह्ममृतकर्णेमृतात्मकम् ॥ १८ ॥ सुस्नातस्तारके तीर्थेतारकेश्वरदर्शनात् ॥ संसारसागरंतीर्त्वा तारयेत्स्वपितॄनपि ॥ १९ ॥ तत्राभ्याशेस्कंदतीर्थंतत्राप्लुत्यनरोत्तमः ॥ दृष्ट्वाषडाननंचैवजह्यात्षाट्कौशिकींतनुम् ॥ १२० ॥ तारकेश्वरपूर्वेणदृष्ट्वादेवं षडाननम् ॥ वसेत्षडाननेलोकेकौमारंवपुरुद्वहन् ॥ २१ ॥ ढुंढितीर्थंततःपुण्यंनरस्तत्रकृतोदकः ॥ ढुंढिंगणपतिंस्तुत्वानविघ्नैरभिभूयते ॥ २२ ॥ भवानीतीर्थमतुलंढुंढितीर्थस्यदक्षिणे ॥ तत्रस्नात्वाविधानेनभवानींपरिपूज्यच ॥ २३॥ दुकूलैरत्नपथ्यैर्नैवेद्यैर्बहुविस्तरैः ॥ पुष्पैर्धूपैःप्रदीपैश्चभवानी शौप्रपूज्यच ॥ २४ ॥ समस्तमर्चितंतेनत्रैलोक्यंसचराचरम् ॥ भवानीशंकरौकाश्यामर्चितौश्रद्धयातुयैः ॥ २५ ॥ चैत्राष्टम्यांमहायात्रांभवान्याःकारये त्सुधीः ॥ अष्टाधिकाःप्रकर्तव्याःशतकृत्वःप्रदक्षिणाः ॥ २६ ॥ प्रदक्षिणीकृतातेनसप्तद्वीपवतीमही ॥ सशैलाससमुद्राचसाश्रमाचसकानना ॥ २७ ॥ अष्टौप्रदक्षिणादेयाःप्रत्यहंतुष्टितत्परैः ॥ नमनीयौप्रयत्नेनभवानीशंकरौसदा ॥ २८ ॥ भक्तानांकामदानित्यंभवानीवाससंप्रदा ॥ अतोभवानीसंपूज्या काश्यांतीर्थेनिवासिभिः ॥ २९ ॥ योगक्षेमंसदाकुर्याद्भवानीकाशिवासिनाम् ॥ तस्माद्भवानीसंसेव्यासततंकाशिवासिभिः ॥ १३० ॥ भिक्षणीयासदा भिक्षाभिक्षुणामोक्षकांक्षिणा ॥ यतोभिक्षाप्रदाकाश्यांविश्वेशस्यकुटुंबिनी ॥ ३१ ॥ गृहमध्येत्रविश्वेशोभवानीतत्कुटुंबिनी ॥ सर्वेभ्यःकाशिसंस्थेभ्योमो क्षभिक्षांप्रयच्छति ॥ ३२ ॥ दुष्प्रापमपियत्किंचित्काशीक्षेत्रनिवासिनाम् ॥ तत्सुप्राप्यंकरोत्येवभवानीपूजितानृभिः ॥ ३३ ॥ कुर्याज्जागरणंरात्रौमहा ष्टम्यांव्रतीनरः ॥ प्रातर्भवानीमभ्यर्च्यप्राप्नुयाद्वांछितंफलम् ॥ ३४ ॥ शुक्रेशात्पश्चिमाशायांभवानींयोऽभिवीक्षते ॥ सर्वेमनोरथास्तस्यसिद्ध्यंतीहनसं शयः ॥ ३५ ॥ काश्यांसदैववस्तव्यंस्नातव्योत्तरवाहिनी ॥ भवानीशंकरौसेव्यौप्राप्तव्येभुक्तिमुक्तिके ॥ ३६ ॥ मातर्भवानितवपादरजोभवानिमातर्भ वानितवदासतरोभवानि ॥ मातर्भवानिनभवानियथाभवेस्मिंस्त्वद्भाग्भवान्यनुदिनंनपुनर्भवानि ॥ ३७ ॥

भवानि ॥ तर्हिकिंप्रतिजन्मभद्भक्तोभूत्वाकल्पांतेमोक्षंवांछसिनेत्याह ॥ नपुनर्भवानीति ॥ यद्वा ननुतर्हिब्रह्मणःप्रतिदिनंजन्मलब्ध्वामद्भक्तःसन्भोगान्भुंक्ष्वब्रह्मणोमुक्तिसमयेमोक्षंदास्यामीतिचेन्ने त्याह ॥ अनुदिनंब्रह्मणःप्रतिदिनंनपुनर्भवानीति ॥ वर्तमानजन्मनित्वद्भक्तोभूत्वाएतज्जन्मानंतरमेवमुक्तःस्यामित्यर्थः ॥ यद्वा अस्मिन्भवेयथाहंनभवानिविधिनिषेधकिंकरोनस्यांतथात्वद्भाग्भवानि

१ वासानामित्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

शरीरपातानंतरंतुपुनर्नभवानि ॥ यद्वा तथाहमनुदिनंत्वद्धामभवानियथाऽस्मिन्भवेपुनर्नभवानिनभवानि ॥ अपुनर्भवस्यादरार्थावीप्सेत्यलमतिविस्तरेण ॥ ३७ ॥ ३८ ॥ ३९ ॥ १४० ॥ ४१ ॥ शैलादिर्नंदी ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ कीकसमात्रकमस्थिमात्रम् ॥ ५६ ॥

तिष्ठतागच्छतावापिस्वपताजाग्रतापिवा ॥ अयंमंत्रःसदाजप्यःसुखास्यैकाशिवासिना ॥ ३८ ॥ ईशानतीर्थंतत्रैवभवानीतीर्थसन्निधौ ॥ तत्रस्नातोयई शानमर्चयेन्नसजन्मभाक् ॥ ३९ ॥ ज्ञानतीर्थंचतत्रैवज्ञानदंसर्वदानृणाम् ॥ कृताभिषेकस्तत्तीर्थेदृष्ट्वाज्ञानेश्वरंशिवम् ॥ १४० ॥ ज्ञानवापीसमीपस्थो ज्ञानेशोयैःसमर्चितः ॥ ज्ञानभ्रंशोनतेषांस्यादपिपंचत्वमृच्छताम् ॥ ४१ ॥ शैलादितीर्थंतत्रैवपरमर्द्धिप्रकाशकम् ॥ तत्रश्राद्धादिकंकृत्वादत्त्वादानंस्वश क्तितः ॥ ४२ ॥ शैलादीश्वरमालोक्यज्ञानवाप्याउदग्दिशि ॥ लभेद्गणत्वपदवींनात्रकार्याविचारणा ॥ ४३ ॥ नंदितीर्थादवाच्यांतुविष्णुतीर्थंपरंमम ॥ तत्रपिंडान्विनिर्वाप्यपितॄणामनृणोभवेत् ॥ ४४ ॥ विष्णुतीर्थेकृतस्नानोयोमांविष्णुंविलोकयेत् ॥ विश्वेशाद्दक्षिणेपार्श्वेविष्णुलोकंसगच्छति ॥ ४५ ॥ यःप्रत्येकादशींप्राप्यशयनींबोधिनींतथा ॥ कुर्याज्जागरणंरात्रौममभूर्तिसमीपतः ॥ ४६ ॥ प्रातःसमर्च्यमांभक्त्याभोजयित्वाद्विजानपि ॥ दत्त्वागाः कां चनंभूमिंनभूयोभूमिभाग्भवेत् ॥४७॥ कृत्वातत्रव्रतोत्सर्गंवित्तशाठ्यविवर्जितः ॥ सम्यग्व्रतफलंधीमान्प्राप्नोत्येवममाज्ञया ॥४८॥ ममतीर्थादवाच्यांतुती र्थंपैतामहंशुभम् ॥ तत्रश्राद्धविधानेनतर्पयित्वापितामहान् ॥४९॥ पितामहेश्वरंलिंगंब्रह्मनालोपरिस्थितम् ॥ पूजयित्वानरोभक्त्याब्रह्मलोकमवाप्नुयात् ॥ ॥ १५० ॥ ब्रह्मस्रोतःसमीपेतुकृतंकर्मशुभाशुभम् ॥ परामक्षयतामेतिशुभमेवततश्चरेत् ॥ ५१ ॥ अत्यल्पमपियत्कर्मकृतमत्रशुभाशुभम् ॥ प्रलयेपि नतस्यास्तिप्रलयोमुनिसत्तम ॥ ५२ ॥ नाभितीर्थमिदंप्रोक्तंनाभिभूतंयतःक्षितेः ॥ अपिब्रह्मांडगोलस्यनाभिरेषाशुभोदया ॥५३॥ सामाणिकर्णिकेयी यंनाभिर्गाम्भीर्यभूमिका ॥ ब्रह्मांडगोलकंसर्वंयस्यामेतिलयोदयम् ॥ ५४ ॥ ब्रह्मनालंपरंतीर्थंत्रिषुलोकेषुविश्रुतम् ॥ तत्संगमेनरःस्नात्वाकोटिजन्ममलं हरेत् ॥ ५५ ॥ ब्रह्मनालेपतेद्येषामपिकीकसमात्रकम् ॥ ब्रह्मांडमंडपांतस्तेनविशंतिकदाचन ॥ ५६ ॥ ततोभागीरथेस्तीर्थंब्रह्मनालाच्चदक्षिणे ॥ तत्रस्नात्वानरःसम्यङ्मुच्यतेब्रह्महत्यया ॥ ५७ ॥ भागीरथीश्वरंलिंगंस्वर्गद्वारस्यसन्निधौ ॥ दर्शनाद्ब्रह्महत्यायाःपुरश्चरणमुच्यते ॥ ५८ ॥ अशुभांग तिमापन्नायस्यपूर्वेपितामहाः ॥ तेनभागीरथीतीर्थेतर्पणीयाःप्रयत्नतः ॥ ५९ ॥ तत्रभागीरथेतीर्थेश्राद्धंकृत्वाविधानतः ॥ ब्राह्मणान्भोजयित्वातुब्रह्मलो केनयेत्पितॄन् ॥ १६० ॥ तद्दक्षिणेमहातीर्थंखुरकर्तरिसंज्ञितम् ॥ गोलोकादागताभिश्चगोभिर्यत्खुरकोटिभिः ॥ ६१ ॥ स्थपुटीकृतभूभागंततस्तत्खुर कर्तरि ॥ तस्मिंस्तीर्थेकृतस्नानःकृतपिंडोदकक्रियः ॥ ६२ ॥

भागीरथेःभागीरथ्याः ॥ ५७ ॥ ५८ ॥ ५९ ॥ १६० ॥ ६१ ॥ स्थपुटीकृतभूभागंश्लथीकृतभूप्रदेशमाच्छादितभूभागंवा ॥ संपुटीतिपाठेपिसएवार्थः ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ खुरकर्तर्याइतिखुरकर्तरिणस्तीर्थादित्यर्थः ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ १७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ १८० ॥

खुरकर्तरीशंलिंगंदृष्ट्वागोलोकमाप्नुयात् ॥ गोधनैर्नविमुच्येततल्लिंगस्यसमर्चनात् ॥६३॥ दक्षिणेखुरकर्तर्यांमार्कंडंतीर्थमुत्तमम् ॥ कृतश्राद्धविधानश्चत
स्मिंस्तीर्थेऽघहारिणि ॥ ६४ ॥ मार्कंडेयेश्वरंलिंगंदृष्ट्वायुर्दीर्घमाप्नुयात् ॥ ब्रह्मतेजोभिवृद्धिंचकीर्तिंचपरमांभुवि ॥ ६५ ॥ वसिष्ठतीर्थपरमंमहापात
कनाशनम् ॥ तर्पयित्वापितॄंस्तत्रवसिष्ठेशंविलोक्यच ॥ ६६ ॥ नरोनलिप्यतेपापैर्जन्मत्रयसमर्जितैः ॥ वसिष्ठलोकेवसतिब्रह्मतेजःसमन्वितः ॥ ६७ ॥
तत्रैवारुंधतीतीर्थंस्त्रीणांसौभाग्यवर्धनम् ॥ पतिव्रताभिस्तत्तीर्थंगाहनीयंविशेषतः ॥ ६८ ॥ पौंश्चल्यजनितोदोषस्तत्तीर्थपरिमज्जनात् ॥ क्षणाद्विनाश
मागच्छेदरुंधत्याःप्रभावतः ॥ ६९ ॥ मार्कंडेयेश्वरात्प्राच्यांवसिष्ठेश्वरपूजनात् ॥ निष्पापोजायतेमर्त्योमहत्पुण्यमवाप्नुयात् ॥ १७० ॥ मूर्तीवसिष्ठारुं
धत्योस्तत्रपूज्येप्रयत्नतः ॥ नस्त्रीवैधव्यमाप्नोतिनपुमान्स्त्रीवियोगिताम् ॥७१॥ वसिष्ठतीर्थतोयाम्यांनर्मदातीर्थमुत्तमम् ॥ विधायश्राद्धंमेधावीनर्मदेशंविलो
क्यच ॥ ७२ ॥ तत्रदत्त्वामहादानंपञ्चयानविमुच्यते ॥ ततस्त्रिसंध्यंवैतीर्थंत्रिसंध्येश्वरपूर्वतः ॥ ७३ ॥ तत्रतीर्थेनरःस्नात्वाकृत्वासंध्यांविधानतः ॥
संध्याकालविलोपोत्थपातकैर्नाभिभूयते ॥ ७४ ॥ त्रिसंध्येश्वरमालोक्यकृतसंध्यस्त्रिकालतः ॥ त्रिवेदावर्तजंपुण्यंप्राप्नुयाच्छ्रद्धयाद्विजः ॥ ७५ ॥
ततोऽनुयोगिनीतीर्थंनरस्तत्रकृताप्लवः ॥ दृष्ट्वातुयोगिनीपीठंयोगसिद्धिमवाप्नुयात् ॥ ७६ ॥ अगस्तितीर्थंतत्रास्तिमहाघौघविघातकृत् ॥ तत्रस्नात्वा
प्रयत्नेनदृष्ट्वागस्तीश्वरंविभुम् ॥ ७७ ॥ अगस्तिकुंडेचततःसंतर्प्यचापितामहान् ॥ अगस्तिनासमेतांचलोपामुद्रांप्रणम्यच ॥ ७८ ॥ सर्वपापविनिर्मुक्तः
सर्वक्लेशविवर्जितः ॥ गच्छेत्सपूर्वजैःसार्धंशिवलोकंनरोत्तमः ॥७९॥ दक्षिणेऽगस्त्यतीर्थाच्चतीर्थमस्त्यतिपावनम् ॥ गंगाकेशवसंज्ञंचसर्वपातकनाशनम् ॥
॥१८०॥ तत्रमेशुभदांमूर्तिंमुनेतत्तीर्थसंज्ञिकाम् ॥ संपूज्यश्रद्धयाधीमान्ममलोकेमहीयते ॥८१॥ तत्रपिंडान्विनिर्वाप्यदत्त्वादानंस्वशक्तितः ॥ शतसां
वत्सरींतृप्तिंपितॄणांससमर्पयेत् ॥ ८२ ॥ मणिकर्णीपरीमाणमेतत्तेकीर्तितंमहत् ॥ सीमाविनायकाद्याम्यांसर्वविघ्नविघातनात् ॥ ८३ ॥ वैरोचने
श्वरात्प्राच्यामहंवैकुंठमाधवः ॥ तत्रमांभक्तितोभ्यर्च्यवैकुंठार्चामवाप्नुयात् ॥ ८४ ॥

॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ १९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ममेविष्णोः ॥ ९५ ॥ कंब्रह्माणंकालयतीतिकंकालःसचासौभैरवश्चेतिकंकालभैरवः ॥

वीरमाधवसंज्ञोहंवीरेशात्पश्चिमेमुने ॥ तत्रव्रतीसमभ्यर्च्यनयामींयातनांलभेत् ॥ ८५ ॥ कालमाधवनामाहंकालभैरवसन्निधौ ॥ कलिःकालोनकलये
न्मद्भक्तमितिनिश्चितम् ॥८६॥ मार्गशीर्षस्यशुक्लायामेकादश्यामुपोषितः ॥ तत्रजागरणंकृत्वायमंनालोकयेत्क्वचित् ॥ ८७ ॥ निर्वाणनरसिंहोहंपुलस्ती
श्वरदक्षिणे ॥ भक्तोनिर्वाणमाप्नोतितन्मूर्तिंनमनादपि ॥८८॥ महाबलनृसिंहोहमोंकारात्पूर्वतोमुने ॥ दूतान्महाबलान्याम्यान्नपश्येत्तुतदर्चकः ॥८९॥
प्रचंडनरसिंहोहंचंडभैरवपूर्वतः ॥ प्रचंडमप्यघंकृत्वानिष्पाप्मास्यात्तदर्चनात् ॥ १९० ॥ अहंगिरिनृसिंहोस्मितद्देहलिविनायकात् ॥ प्राच्यांप्रबलपापौ
घगजानांप्रविदारणः ॥ ९१ ॥ महाभयहरश्चाहंनरसिंहोमहामुने ॥ पितामहेश्वरात्पश्चाद्भक्तसाध्वससाध्वसः ॥ ९२ ॥ अत्युग्रनरसिंहोहंकलशेश्वरप
श्चिमे ॥ अत्युग्रमपिपापौघंहरामिश्रद्धयार्चितः ॥ ९३ ॥ ज्वालामालीनृसिंहोऽहंज्वालामुख्याःसमीपतः ॥ संज्वालयामिपापौघतृणानिपरिपूजितः ॥
॥ ९४ ॥ कोलाहलनृसिंहोस्मिदैत्यदानवमर्दनः ॥ ममनामसमुच्चारादघकोलाहलोयतः ॥ ९५ ॥ कंकालभैरवोयत्रकाशीरक्षणदक्षधीः ॥ तत्रमांभ
क्तितोभ्यर्च्यनोपसर्गैर्निरुध्यते ॥ ९६ ॥ विटंकनरसिंहोस्मिनलिकंठेश्वरादनु ॥ तत्रमांश्रद्धयापूज्यनरोभवतिनिर्भयः ॥९७॥ अनंतवामनश्चाहमनं
तेश्वरसन्निधौ ॥ अनंतान्यपिभक्तस्यकलुषाणिहरेऽर्चितः ॥ ९८॥ दधिवामनसंज्ञोहंभक्तानांदधिभक्तदः ॥ यन्नामस्मरणादेवनदरिद्रोनरोभवेत् ॥ ९९ ॥
त्रिविक्रमोस्म्यहंकाश्यामुदीच्यांचत्रिलोचनात् ॥ ददामिपूजितोलक्ष्मींहरामिवृजिनान्यपि ॥२००॥ बलिवामननामाहंबलिनापरिपूजितः ॥ बलिभद्रे
श्वरात्प्राच्यांभक्तानांबलवर्धनः ॥ १ ॥ दक्षिणेभवतीर्थाच्चताम्रद्वीपादिहागतः ॥ नाम्नाताम्रवराहोस्मिभक्तानांचिंतितार्थदः ॥ २ ॥ मुनेधरणिवाराहः
प्रयागेश्वरसन्निधौ ॥ स्नात्वावाराहतीर्थेत्रद्दष्ट्वामांकिटिरूपिणम् ॥३॥ संपूज्यबहुभावेननविशेद्योनिसंकटम् ॥ तत्राल्पमपिदत्त्वान्नंधरादानफलंलभेत् ॥
॥ ४ ॥ महाकलुषगंभीरसागरेनिपतज्जनः ॥ ममभक्त्युडुपंप्राप्यप्रलयेपिनमज्जति ॥ ५ ॥ अहंकोकावराहोस्मिकिटीश्वरसमीपतः ॥ तत्रमांपूज
यन्मर्त्योलभतेचिंतितंफलम् ॥ ६ ॥ नारायणाःशतंपंचशतंचजलशायिनः ॥ त्रिंशत्कमठरूपाणिमत्स्यरूपाणिविंशतिः ॥ ७ ॥ गोपालाश्चशतंसार्धं
बुद्धाःसंतिसहस्रशः ॥ त्रिंशत्परशुरामाश्चरामाएकोत्तरंशतम् ॥ ८ ॥

मांकोलाहलनृसिंहम् ॥ ९६ ॥ विटंकोभयंकरःअलंकृतोवा ॥ ॥ ९७ ॥ ९८ ॥ ९९ ॥ २०० ॥ १ ॥ २ ॥ किटिरूपिणंसूकररूपिणम ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ २१० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अग्निर्विंदोइति ॥ कथयामिस्वमूर्तिभेदानितिशेषः ॥ सृष्टिक्रमात्प्रदक्षिणक्रमात् ॥ १९ ॥ तत्राद्यदक्षिणकराद्यवामकरा धोवामकराऽधोदक्षिणकरक्रमेणशंखचक्रगदापद्मैःकेशवमधुहसंकर्षणदामोदरवामनप्रद्युम्नषट्कं विष्णुमाधवानिरुद्धपुरुषोत्तमाधोक्षजजनार्दनषट्कं गोविंदत्रिविक्रमश्रीधरहृषीकेशनृसिंहाच्युतषट्कं वासुदेवनारायणपद्मनाभोपेंद्रहरिकृष्णषट्कं मूर्तयोभवंति ॥ तत्रकेशवादिषण्मूर्तिषुआद्यदक्षिणकरेशंखएवआद्यवामकरेचक्रपद्मपद्मगदाचक्रगदाःअधोवामकरे गदाचक्रचक्रपद्मपद्मानिअधोदक्षिणकरे

विष्णुरूपोस्म्यहंचैकोमुक्तिमंडपमध्यतः ॥ मुनेकृतप्रसादेनविश्वेशेनाश्रितःस्वयम् ॥ ९ ॥ नारायणस्वरूपेणगणाश्चक्रगदोद्यताः ॥ कुर्वंतिरक्षांक्षेत्रस्यप रितोनियुतानिषट् ॥ २१० ॥ सोग्निर्विंदुरितिश्रुत्वासंप्रहृष्टतनूरुहः ॥ पुनःपप्रच्छमेधावीमूर्तिभेदान्वदप्रभो ॥ ११ ॥ हितायनिजभक्तानांममसंदेहशां तये ॥ कतितेमूर्तयोनंतकथंज्ञेयास्तथावद ॥ १२ ॥ इत्याकर्ण्यवचस्तस्याग्निर्विंदोस्तपसांनिधेः ॥ उवाचभगवान्विष्णुर्मूर्तिभेदाननुक्रमात् ॥ १३ ॥ याञ्श्रुत्वापिहिनोमर्त्योयमगोचरतांव्रजेत् ॥ केशवादींश्चतुर्विंशद्भेदानाहप्रजापतिः ॥ १४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ अग्निर्विंदोमहाप्राज्ञशृणुते कथयाम्यहम् ॥ आद्यदक्षिणहस्ताद्यविद्धिसृष्टिक्रमान्मुने ॥ १५ ॥ शंखचक्रगदापद्मैर्मूर्तिंजानीहिकैशवीम् ॥ पूजितायानृणांकुर्याच्चिंतितार्थमसंशयम् ॥ ॥ १६ ॥ मधुहापरिचेतव्यःशंखपद्मगदारिभिः ॥ वैरिणोनाशमायांतितन्मूर्तिपरिसेवनात् ॥ १७ ॥ संकर्षणःसमर्च्योत्रशंखाब्जारिगदायुधः ॥ तन्मू र्तिपूजनाज्जातुजंतुर्नस्यात्पुनर्भवी ॥ १८ ॥ शंखकौमोदकीचक्रपद्मैर्दामोदरोर्च्यते ॥ ददातिवित्तंपुत्रांश्चगोधनंधान्यमेवहि ॥ १९ ॥ वामनःशंखच क्राब्जगदाभिरुपलक्षितः ॥ लक्ष्मीवंतंजनंकुर्याद्गेहेपिपारिधारितः ॥ २२० ॥ पांचजन्यंगदांपद्मंचित्रमूर्तिसुदर्शनम् ॥ प्रद्युम्नःपूज्यतेमर्त्यैर्बहुद्युम्नंप्रय च्छति ॥ २१ ॥ ऊर्ध्ववामकरात्सृष्ट्याविष्णवाद्यंषट्कमुच्यते ॥ यस्यस्मरणमात्रेणविलीयंतेघराशयः ॥ २२ ॥ शंखारिभ्यांगदाब्जाभ्यांपूज्योविष्णुः श्रियेनरैः ॥ शंखपद्मगदाचक्रैर्माधवःपरमार्द्धिदः ॥ २३ ॥ ध्येयोऽनिरुद्धःसंसिद्ध्यैशंखाब्जारिगदोद्यतः ॥ शंखेनगदयाचक्रांबुजाभ्यांपुरुषोत्तमः ॥ ॥ २४ ॥ अधोक्षजोजनिहरःशंखार्यब्जगदोमुने ॥ शंखकौमोदकीपद्मचक्रैर्ध्येयोजनार्दनः ॥ २५ ॥ अधोवामकरात्सृष्ट्याषड्गोविंदादिमूर्तयः ॥ शंखंचक्रंगदांपद्मंगोविंदोबिभृयात्सदा ॥ २६ ॥

पद्मचक्रगदापद्मगदाचक्राणि विष्ण्वादिषण्मूर्तिषुआद्यवामकरेशंखएव गोविंदादिषण्मूर्तिषुअधोवामकरेशंखएववासुदेवादिषण्मूर्तिषुअधोदक्षिणकरेशंखएव ॥ अन्यत्सर्वंप्रादक्षिण्येनपूर्ववदेव ॥ तत्रके शवःस्वर्णवर्णः ॥ १६ ॥ मधुहार्जुनवर्णः ॥ १७ ॥ संकर्षणःस्वर्णवर्णः ॥ १८ ॥ दामोदरःक्षीरवर्णः ॥ १९ ॥ वामनोरक्तवर्णः ॥ २२० ॥ पांचजन्यमिति ॥ चित्राविचित्रामूर्तिर्यस्यसुदर्श नस्यतत्तथा ॥ एतच्चतुष्टयंबिभ्राणइतिशेषः ॥ प्रद्युम्नोववर्णः ॥ २१ ॥ २२ ॥ विष्णुरलक्तवर्णः ॥ माधवोजपावर्णः ॥ २३ ॥ अनिरुद्धःकृष्णवर्णः ॥ २४ ॥ २५ ॥ गोविंदोमनःशिला

CC-0. In Public Domain. Digitization by eGangotri

वर्णः ॥ २६ ॥ त्रिविक्रमोनीलपाषाणवर्णः ॥ श्रीधरःकुमुदवर्णः ॥ २७ ॥ हृषीकेशःकाश्मारवर्णः ॥ २८ ॥ २९ ॥ वासुदेवःस्फटिकवर्णः ॥ नारायणःक्षीरवर्णः ॥ २३० ॥ पद्मनाभोंजन वर्णः॥ तथाचोक्तम् ॥ शंखचक्रगदापद्मैःकेशवःकनकप्रभः॥ चक्रशंखगदापद्मैरर्जुनोमधुसूदनः ॥ अर्जुनोधवलः॥ संकर्षणोदराब्जारिगदाभिःकनकप्रभः॥दामोदरःशंखगदाचक्राब्जैःक्षीरसन्निभः॥ रक्तश्चक्रगदापद्मदरैर्वामनउच्यते॥शंखीगदीसाब्जचक्रःप्रद्युम्नोवज्रसन्निभः॥वज्रंहीरकम्॥सपद्मशंखारिगदोविष्णुश्चालक्तसप्रभः॥माधवश्चक्रशंखाब्जगदाहस्तोजपानिभः॥ गदीशंखीसाब्जचक्रस्त्वनि रुद्धोऽसितप्रभः ॥ मनःशिलाभोगोविंदोगदापद्मदरादिभिः॥मनःशिलाधातुविशेषः ॥ सचक्रशंखाब्जगदोनीलाश्माभस्त्रिविक्रमः॥ शंखचक्रगदापद्मैःश्रीधरःकुमुदप्रभः ॥ काश्मीराभोहृषीकेशः सच क्राब्जदरोगदी ॥ काश्मीरंकुंकुमम् ॥ स्फटिकाभोवासुदेवःशंखार्यब्जगदाधरः ॥ क्षीराभोब्जगदापद्मचक्रैर्नारायणःस्मृतः ॥ पद्मचक्रगदाशंखैःपद्मनाभोंजनद्युतिरिति ॥ अन्येषामपिरूपाणिआग

शंखपद्मगदाचक्रैरर्च्योलक्ष्म्यैत्रिविक्रमः ॥ शंखाब्जचक्रंबिभ्राणोगदावाञ्श्रीधरःश्रिये ॥ २७ ॥ हृषीकेशश्चशंखेनगदाचक्रांबुजैर्मतः ॥ नृसिंहःशंखच क्राभ्यांपद्मेनगदयोह्यते ॥२८॥ अच्युतःशंखभृन्नित्यंगदापद्मरथांगवान् ॥ दक्षिणाधःकरादूह्यावासुदेवादयश्चषट् ॥२९॥ वासुदेवश्चशंखारिगदाजलजभृ त्सदा॥शंखांबुजगदाचक्रीध्येयोनारायणोनृभिः ॥२३०॥ शंखीपद्मीपद्मनाभोज्ञेयश्चक्रीगदीमुने ॥ उपेंद्रःशंखवान्नित्यंगदारिकमलायुधः ॥ ३१ ॥ हरि र्हरेदघंशंखीचक्रीपद्मीगदीनृणाम् ॥ शंखेनगदयापद्मचक्राभ्यांकृष्णउच्यते ॥३२॥ एतेभेदामयाख्याताःस्वमूर्तीनांमहामुने ॥ यान्विज्ञायध्रुवंमर्त्योभु क्तिंमुक्तिंचविंदति ॥ ३३ ॥ एवंवदतिगोविंदेमुनयेचाग्निबिंदवे ॥ पक्षींद्रःपक्षविक्षिप्तविपक्षोऽक्षिपथंगतः ॥ ३४ ॥ प्राहचप्रणिपत्याशुत्र्यक्षस्यागमनं मुदा ॥ संभ्रमेणहृषीकेशःक्केशइत्यवदत्ततः ॥३५॥ ॥ गरुडउवाच ॥ ॥ प्रत्यक्षःक्रियतामेषमहावृषभकेतनः ॥ यस्यध्वजस्यरत्नार्चिःपूरयेद्रोदसी मिमाम् ॥ ३६ ॥ लोकलोचननिर्माणसफलीकरणक्षमम् ॥ कोटिमार्तंडविद्योतप्रद्योतितदिगाननम् ॥ ३७ ॥ निरीक्ष्यपुंडरीकाक्षत्र्यक्षस्यवृषभध्व जम् ॥ विमानिनांविमानौघैःपरीतगगनांगणम् ॥ ३८ ॥ महावाद्यनिनादौघैःप्रतिस्वानितकंदरम् ॥ विद्याधरीपरिक्षिप्तपुष्पांजलिसुगंधितम् ॥३९॥ प्रणम्यदूरादपिचसंप्रहृष्टतनूरुहः ॥ अभ्युत्थातुंमनश्चक्रेशंखचक्रगदाधरः ॥ २४० ॥ अग्निबिंदुमथप्राहमुक्तिदस्तुमुदांनिधिः ॥ इदंसुदर्शनं चक्रंस्पृशासव्येनपाणिना ॥ ४१ ॥

मपुराणादिषुद्रष्टव्यानि ॥ आयुधधारणभेदाश्चतुर्विंशतिषोडशमूर्त्योवुपासनभेदाभिप्रायेणद्रष्टव्याः ॥ ३१ ॥ ३२ ॥ ३३ ॥ पक्षेति ॥ पक्षाभ्यांविक्षिप्तानिरस्ताविपक्षायेनसः ॥ ३४ ॥ ३५ ॥ रोदसीद्यावापृथिव्योरन्तरालम् ॥ ३६ ॥ लोकेति ॥ पुण्डरीकाक्षत्र्यक्षस्यलोकेत्यादिविशेषणविशिष्टंवृषभध्वजंवृषभरूपोध्वजोवृषभध्वजःवृषभोवृषोध्वजोयस्मिन्रथइतिवातंनिरीक्ष्य दूरादपिचदूरा देव ॥ चकारःसंभ्रमे ॥ अभ्युत्थातुमभ्युत्थानेनगन्तुंमनश्चक्रेदूरादेवनिरीक्ष्येतिवान्वयः ॥ पंचभिर्विशेषणैरथंविशिनष्टि॥लोकलोचनेति॥कोटिमार्तंडानामिवयःप्रद्योतःप्रकृष्टाद्युतिस्तेनप्रद्योतितंदिशा माननंमुखंयेनसतथातम् ॥ ३७ ॥ विमानिनांदेवानांविमानौघैःरथसमूहैःपरितइतंव्याप्तंगगनांगणंयस्मैसतथातम् ॥ ३८ ॥ ३९ ॥२४०॥ असव्येनदक्षिणेनेत्यर्थः ॥ सव्येनेतिपाठेपिसएवार्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सव्यंदक्षिणवामयोरितिवचनात् ॥ ४१ ॥ शोभनंदर्शनंज्ञानंयस्यससुदर्शनः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ २५० ॥ २५१ ॥ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायामेकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ द्वियुक्षष्टितमेध्यायेसर्वाघौघविदारणः ॥ प्रादुर्भावोतिरम्योयंवर्ण्यतेवार्षभध्वजः ॥ १ ॥ प्रविवेशमहादेवःपुरींवाराणसीं

अग्निबिंदुरितिप्रोक्तःस्पृशेद्यावत्सुदर्शनम् ॥ तावत्सुदर्शनोजातःपरमानुग्रहाद्धरेः ॥ ४२ ॥ ॥ स्कंदउवाच ॥ ॥ ज्योतीरूपोथसमुनिःकौस्तुभेज्यो तिषांतनौ ॥ एकीभूतःकलशजबिंदुमाधवसेवनात् ॥ ४३ ॥ बिंदुमाधवपादाब्जभ्रमरीकृतमानसाः ॥ अग्निबिंदूपमांयांतिकलशोद्भवनिश्चितम् ॥ ४४ ॥ काश्यांसदैववस्तव्यंद्रष्टव्योबिंदुमाधवः ॥ श्रोतव्यमिदमाख्यानंजेतव्याजगतांगतिः ॥४५॥ पुण्यापंचनदोत्पत्तिःपुण्यामाधवसंकथा ॥ पुण्योवाराणसी वासःसंभवेत्पुण्यजन्मनाम् ॥ ४६ ॥ अग्निबिंदोःस्तुतिंयोत्रमाधवाग्रेपठिष्यति ॥ समृद्धसर्वकामःसमोक्षलक्ष्मीपतिर्भवेत् ॥ ४७ ॥ श्राद्धकालेसदाजप्य मिदमाख्यानमुत्तमम् ॥ द्विजानांभुंजमानानांपुरस्तात्परतृप्तये ॥ ४८ ॥ जप्तव्यमिदमाख्यानंपर्वकालेविशेषतः ॥ पुण्येपंचनदाभ्याशे पुण्यलक्ष्मीवि वृद्धये ॥ ४९ ॥ पठितव्यःप्रयत्नेनबिंदुमाधवसंभवः ॥ श्रोतव्यःपरयाभक्त्याभुक्तिमुक्तिसमृद्धये ॥२५०॥ संप्राप्तेवासरेविष्णोरात्रौजागरणान्वितः ॥ श्रुत्वाख्यानमिदंपुण्यंवैकुंठेवसतिंलभेत् ॥ २५१ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेबिंदुमाधवाविर्भा वोमाधवाग्निबिंदुसंवादवैष्णवतीर्थमाहात्म्यवर्णनंनामैकषष्टितमोध्यायः ॥ ६१ ॥ ॥ ॥छ॥ ॥ अगस्त्यउवाच ॥ श्रुत्वास्कंदनतृप्तोस्मितनव क्रेरितांकथाम् ॥ अत्याश्चर्यकरंप्रोक्तमाख्यानंबैंदुमाधवम् ॥ १ ॥ इदानींश्रोतुमिच्छामिदेवदेवसमागमम् ॥ तार्क्ष्याद्यक्षःसमाकर्ण्यदिवोदासस्यचे ष्टितम् ॥ २ ॥ विष्णुमायाप्रपंचंचकिमाहगरुडध्वजम् ॥ केकेचशंभुनासार्धंसमीयुर्मंदराद्गिरेः ॥३॥ ब्रह्मणेशःकथंदृष्टस्त्रपाकुलितचक्षुषा ॥ किमाहदे वब्रह्माणंकिमुक्तंभास्वतापिच ॥ ४॥ योगिनीभिःकिमाख्यायिगणाह्वीणाःकिमब्रुवन् ॥ एतदाख्याहिमेस्कंदमहत्कौतूहलंमयि ॥५॥ इमंप्रश्नंनिशम्यै शिर्मुनेःकलशजन्मनः ॥ प्रत्युवाचनमस्कृत्यशिवौप्रणतसिद्धिदौ ॥६॥ ॥ स्कंदउवाच ॥ ॥ मुनेशृणुकथामेतांसर्वपातकनाशिनीम् ॥अशेषविघ्नशमनीं महाश्रेयोभिवर्धिनीम् ॥ ७ ॥ अथदेवोऽसुरारिपुःश्रुत्वाशंभुसमागमम् ॥ द्विजराजायसम्मुदासमदात्पारितोषिकम् ॥ ८ ॥ आयानंशंसतेशंभोरुपवाराण सिप्रियम् ॥ ब्रह्माणमग्रतःकृत्वाततश्चाभ्युद्ययौहरिः ॥ ९ ॥ विवस्वतासमेतश्चतैर्गणैःपरितोवृतः ॥ योगिनीभिरनूयातोगणे शम्भुपसंस्थितः ॥ १० ॥

शुभामितिसप्तपञ्चाशत्तमेध्यायेश्रुतंविश्वेश्वरकाशीप्रवेशंविस्तरेणश्रोतुंकथाश्रवणजनितंस्वात्मानन्दंदर्शयन्वृत्तानुवादपूर्वकंतमेवपृच्छति श्रुत्वेत्यादिपंचभिः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ इममितिव्यासवाक्यम् ॥ ६ ॥ ७ ॥ सविष्णुः ॥ द्विजराजायगरुडाय ॥ शंभोरायानमागमनंशंसतेकथयते ॥ मुदापारितोषिकंपरितोषेजातेदेयंसमदादित्यन्वयः ॥ ८ ॥ ९ ॥ अनूयातःअनुग

CC-0. In Public Domain. Digitization by eGangotri

न्यमानइत्यर्थः ॥ परिवृतइतिक्वचित् ॥ गणेशमुपसंस्थितःगणेशेनसार्धंपरस्परंगृहीतहस्तइत्यर्थः ॥ गणेशेनचसंवृतइत्यपिक्वचित् ॥ १० ॥ मंक्षुद्रुतम् ॥ ११ ॥ प्रणतेननम्रेण ॥ प्रणम्यैनमिति क्वचित्पाठः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ उपसिंहासनंसिंहासनस्यसमीपे ॥ १७ ॥ संभाविताःसंमानिताः ॥ १८ ॥ १९ ॥ शतधृतिर्ब्रह्मा ॥ २० ॥ २१ ॥ २२ ॥ स्वरूपतः

अथनेत्रातिथीकृत्यदेवदेवंवृषध्वजम् ॥ मंक्षुताक्ष्यादवारुह्यप्रणनामश्रियःपतिः ॥ ११ ॥ पितामहोपिस्थविरोभृशंनम्रशिरोधरः ॥ प्रणतेनमृडेनैवप्रणमन्विनिवारितः ॥ १२ ॥ स्वस्त्वभ्युदितपाणिश्चरुद्रसूक्तैरमंत्रयत् ॥ अक्षतान्यथसार्द्राणिदर्शयन्सफलान्यजः ॥ १३ ॥ मौलिंपादाब्जयोःकृत्वागणेशःसत्वरोनतः ॥ मूर्ध्न्युपाजिघ्रयांचक्रेहरोहर्षाद्गजाननम् ॥ १४ ॥ अभ्युपावेशयच्चापिपरिष्वज्यनिजासने ॥ सोमनंदिप्रभृतयःप्रणेमुर्दंडवद्गणाः ॥ १५ ॥ योगिन्योपिप्रणम्येशंचक्रुर्मंगलगायनम् ॥ तरणिःप्रणनामाथप्रमथाधिपतिंहरम् ॥ १६ ॥ खंडेंदुशेखरश्चाथउपसिंहासनंहरिम् ॥ समुपावेशयद्वामपार्श्वेमानपुरःसरम् ॥ १७ ॥ ब्रह्माणंदक्षिणेभागेपरिविश्राणितासनम् ॥ दृष्ट्वासंभाविताःसर्वेशर्वेणप्रणतागणाः ॥ १८ ॥ मौलिचालनमात्रेणयोगिन्योपिप्रसादिताः ॥ संतोषितोरविश्चापिविशेषेतिकरसंज्ञया ॥ १९ ॥ अथशंभुंशतधृतिःप्रबद्धकरसंपुटः ॥ परिविज्ञापयांचक्रेप्रसन्नवदनांबुजम् ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ भगवन्देवदेवेशक्षंतव्यंगिरिजापते ॥ वाराणसींसमासाद्ययदहंनागतःपुनः ॥ २१ ॥ प्रसंगतोपिकःकाशींप्राप्यचंद्रविभूषण ॥ किंचिद्विधातुंशक्तोपित्यजेत्स्थावरतांदधत् ॥ २२ ॥ स्वरूपतोब्राह्मणत्वादपाकर्तुंनशक्यते ॥ अथशक्तोव्यपाकर्तुंकःपुण्येसंचिकीर्षति ॥ २३ ॥ विभोरपिसमाज्ञेयंधर्मवर्त्मानुसारिणि ॥ नकिंचिदपकर्तव्यंजानताकेनचित्क्वचित् ॥ २४ ॥ कस्तादृशिमहीजानौपुण्यवर्त्मन्यतंद्रिते ॥ काशीपालेदिवोदासेमनागपिविरुद्धधीः ॥२५॥ निशम्येतिवचस्तुष्टःश्रीकंठोतिविशुद्धधीः ॥ हसन्प्रोवाचधातारंब्रह्मन्सर्वमवैम्यहम् ॥२६॥ ॥ देवदेवउवाच ॥ ॥ आदौतावददोषंहिब्रह्मत्वंब्राह्मणस्यते ॥ वाजिमेधाध्वराणांचततोपिदशकंकृतम् ॥ २७ ॥ ततोपिविहितंब्रह्मन्भवतापरमंहितम् ॥ अपराधसहस्राणियल्लिंगंस्थापितंमम ॥२८॥ येनैकमपिमेलिंगंस्थापितंयत्रकुत्रचित् ॥ तस्यापराधलेशोपिनास्तिसर्वापराधिनः ॥ २९ ॥ अपराधसहस्रेपिब्राह्मणंयोपराध्नुयात् ॥ दिनैःकतिपयैरेवतस्यैश्वर्यंविनश्यति ॥ ३० ॥ इतिब्रुवतिदेवेशेप्यंतरुच्छ्वसितंगणैः ॥ समातृभिःसमंताच्चविलोक्यास्यंपरस्परम् ॥ ३१ ॥ अर्कोप्यवसरंज्ञात्वानत्वाशंभुंव्यजिज्ञपत् ॥ प्रसन्नास्यमुमाकांतंदृष्ट्वादृष्टचराचरः ॥ ३२ ॥ ॥ अर्कउवाच ॥ ॥ नाथकाशीमितोगत्वायथाशक्तिकृतोपधिः ॥ अकिंचित्करतांप्राप्तःसहस्रकरवानपि ॥ ३३ ॥

स्वभावतः ॥ अपाकर्तुमपकारंकर्तुम् ॥ सृष्टिकर्तुस्तवकिमशक्यमित्याशंक्याह ॥ अथेति ॥ २३ ॥ ममाज्ञयाकरणान्नदोषइतिचेत्तत्राह ॥ विभोरपीति ॥ २४ ॥ तथाप्यस्मत्कार्यगौरवेणराजाविरुद्धेनभाव्यमितिचेत्तत्राह ॥ कइति ॥ २५ ॥ २६ ॥ २७ ॥ अपराधसहस्राणिकृत्वापीतिशेषः ॥ २८ ॥ २९ ॥ ३० ॥ उच्छ्वसितमपराधजंभयंत्यक्तमित्यर्थः ॥ ३१ ॥ ३२ ॥ इतस्त्वत्सकाशात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतउपधिश्छलरूपउपायोयेनसः ॥ अकिंचिदितिविरुद्धालंकारः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ सूरंसूर्यम् ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ भर्गस्येश्वरस्य ॥ गर्भस्येतिपाठेगर्भस्यमहादेववाहस्येतियावत् ॥ तदूधांसितासांक्षीराशयाःपयोधराश्चस्तनाः ऊधांसीतिपंचम्यर्थेवा ॥ ४४ ॥ ४५ ॥ सद्ह्रदःपयःपयोधिरिवक्षीराब्धिरिवप्रैक्षिदृष्टः ॥ ४६ ॥

स्वधर्मपालकेतस्मिन्दिवोदासेधरापतौ ॥ निश्चितागमनंज्ञात्वादेवस्याहमिहस्थितः॥३४॥ प्रतीक्षमाणोदेवेशत्वदागमनमुत्तमम् ॥ विभज्यबहुधात्मानं त्वदाराधनतत्परः ॥ ३५ ॥ मनोरथद्रुमश्चाद्यफलितःश्रीमदीक्षणात् ॥ किंचिद्भक्तिलवांभोभिःसिक्तोध्यानेनपुष्पितः ॥ ३६ ॥ इत्युदीरितमाकर्ण्यरवेर्वैरं विलोचनः ॥ प्रोवाचदेवदेवेशोनापराध्यसिभास्कर ॥३७॥ ममैवकार्यंविहितंत्वंयदत्रव्यवस्थितः ॥ यस्यांसुरप्रवेशोनतस्मिन्राजनिशासति ॥ ३८॥ इतिसूरंसमाश्वास्यदेवदेवःकृपानिधिः ॥ गणानाश्वासयामासव्रीडानम्रशिरोधरान् ॥३९॥ योगिन्योपिसुहृद्दृष्ट्वाथशंभुनासंप्रसादिताः ॥ त्रपाभरसमाक्रांतकंधराइवसंगताः ॥ ४० ॥ ततोव्यापारयांचक्रेत्र्यक्षोनेत्राणिचक्रिणि ॥ हरिर्नेकिंचिदप्यूचेसर्वज्ञाग्रेमहामनाः ॥ ४१ ॥ ईशोपिश्रुतवृत्तांतस्तार्क्ष्यांद्रूणपशार्ङ्गिणोः ॥ मनसैवप्रसन्नोभून्नकिंचित्पर्यभाषत ॥ ४२ ॥ एतस्मिन्नंतरेप्राप्तागोलोकात्पंचधेनवः ॥ सुनंदासुमनाश्चापिसुशीलासुरभिस्तथा ॥ ॥ ४३ ॥ पंचमीकपिलाचापिसर्वाघौघविघाट्टिनी ॥ वात्सल्यदृष्ट्याभर्गस्यतासामूधांसिसुस्रुवुः ॥४४॥ ववर्षुःपयसांपूरैस्तदूधांसिपयोधराः ॥ धारासारैरविच्छिन्नैस्तावद्यावद्ध्रदोऽभवत् ॥४५॥ पयःपयोधिरिवसाद्वितीयःप्रैक्षिपार्षदैः ॥ देवेशसमधिष्ठानात्तत्तीर्थमभवत्परम् ॥४६॥ कपिलाह्रदइत्याख्यांचक्रेतस्यमहेश्वरः ॥ ततोदेवाज्ञयासर्वेस्नातास्तत्रदिवौकसः ॥ ४७ ॥ आविरासुस्ततस्तीर्थादथदिव्यपितामहाः ॥ तान्दृष्ट्वातेसुराःसर्वेतर्पयांचक्रिरेमुदा ॥ ४८ ॥ अग्निष्वात्ताबर्हिषदआज्यपाःसोमपास्तथा ॥ इत्याद्यादिव्यपितरस्तृप्ताःशंभुंव्यजिज्ञपन् ॥४९॥ देवदेवजगन्नाथभक्तानामभयप्रद ॥ अस्मिंस्तीर्थेत्वदभ्याशाज्जातानस्तृप्तिरक्षया ॥ ५० ॥ तस्माच्छंभोवरंदेहिप्रसन्नेनांतरात्मना ॥ इतिदिव्यपितॄणांसश्रुत्वावाक्यंवृषध्वजः ॥ ५१ ॥ शृण्वतांसर्वदेवानामिदंवचनमब्रवीत् ॥ शर्वःसर्वपितॄणांवैपरतृप्तिकरंपरम् ॥ ५२ ॥ ॥ श्रीदेवदेवउवाच ॥ ॥ शृणुविष्णोमहाबाहोशृणुत्वंचपितामह ॥ एतस्मिन्कापिलेतीर्थेकापिलेयपयोभृते ॥ ५३ ॥ योपिंडान्निर्वपिष्यंतिश्रद्धयाश्राद्धदानतः ॥ तेषांपितॄणांसंतृप्तिर्भविष्यतिममाज्ञया ॥५४॥ अन्यंविशेषंवक्ष्यामिमहातृप्तिकरंपरम् ॥ कुहूसोमसमायोगेदत्तंश्राद्धमिहाक्षयम् ॥५५॥ संवर्तकालेसंप्राप्तेजलराशिर्जलान्यपि ॥ क्षीयंतेनक्षयत्यत्रश्राद्धंसोमकुहूकृतम् ॥ ५६ ॥ अमासोमसमायोगेश्राद्धंयद्यत्रलभ्यते ॥ तीर्थेकापिलधारेस्मिन्गययापुष्करेणकिम् ॥ ५७ ॥ गदाधरभवान्यत्रयत्रत्वंच पितामह ॥ वृषध्वजोस्म्यहंयत्रफल्गुस्तत्रनसंशयः ॥ ५८ ॥

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ अमाअमावस्या ॥ ५७ ॥ गयापुष्कराभ्यांकृत्याभावेहेतुमाह ॥ गदाधरेति ॥ फल्गुर्नदी ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥५९॥६०॥६१॥ कृतंकृत्यंकार्यमात्रंययासाकृतकृत्या ॥ कृतकृत्येत्यत्रघृतकुल्योतिक्वाचित् घृतकुल्यांनिवापतइत्यग्रेदर्शनात् ॥६२॥ ६३ ॥ ६४ ॥६५॥६६॥ रोधसितीरे ॥६७॥६८॥ ६९ ॥

दिव्यांतरिक्षभौमानियानितीर्थानिसर्वतः ॥ तान्यत्रनिवसिष्यंतिदर्शेसोमदिनान्विते ॥ ५९ ॥ कुरुक्षेत्रेनैमिषेचगंगासागरसंगमे ॥ ग्रहणेश्राद्धतो यत्स्यात्तत्तीर्थेवार्षभध्वजे ॥ ६० ॥ अस्यतीर्थस्यनामानियानिदिव्यपितामहाः ॥ तान्यहंकथयिष्यामिभवतांतृप्तिदान्यलम् ॥६१॥ मधुस्रवेतिप्रथम मेषापुष्करिणीस्मृता ॥ कृतकृत्याततोज्ञेयाततोऽसौक्षीरनीरधिः ॥ ६२ ॥ वृषभध्वजतीर्थंचतीर्थंपैतामहंततः ॥ ततोगदाधराख्यंचपितृतीर्थंततःपरम् ॥ ॥ ६३ ॥ ततःकापिलधारंवैसुधाखानिरियंपुनः ॥ ततःशिवगयाख्यंचज्ञेयंतीर्थमिदंशुभम् ॥६४॥ एतानिदशनामानितीर्थस्यास्यपितामहाः ॥ भवतां तृप्तिकारीणिविनापिश्राद्धतर्पणैः ॥ ६५ ॥ सूर्येंदुसंगमेयेत्रपितृणांतृप्तिकासुकाः ॥ ब्राह्मणान्भोजयिष्यंतितेषांश्राद्धमनंतकम् ॥ ६६ ॥ श्राद्धेपितॄणां संतृप्त्यैदास्यंतिकपिलांशुभाम् ॥ येत्रतेषांपितृगणोवसेत्क्षीरोदरोधसि ॥ ६७ ॥ वृषोत्सर्गःकृतोयैस्तुतीर्थेस्मिन्वार्षभध्वजे ॥ अश्वमेधपुरोडाशैः पितरस्तेनतर्पिताः ॥ ६८ ॥ गयातोष्टगुणंपुण्यमस्मिंस्तीर्थेपितामहाः ॥ अमायांसोमयुक्तायांश्राद्धैःकापिलधारिके ॥ ६९ ॥ येषांगर्भेऽभवत्स्रावोयेऽ दंतजननामृताः ॥ तेषांतृप्तिर्भवेन्नूनंतीर्थेकापिलधारिके ॥ ७० ॥ अदत्तमौंजीदानायेयेचादारपरिग्रहाः ॥ तेभ्योनिर्वापितंपिंडमिहह्यक्षयतांव्रजेत् ॥ ॥ ७१ ॥ अग्निदाहमृतायेवैनाग्निदाहश्चयेषुवै ॥ तेसर्वेतृप्तिमायांतितीर्थेकापिलधारिके ॥ ७२ ॥ और्ध्वदैहिकहीनायेषोडशश्राद्धवर्जिताः ॥ तेतृप्तिम धिगच्छंतिघृतकुल्यांनिवापतः ॥ ७३ ॥ अपुत्राश्चमृतायेवैयेषांनास्त्युदकप्रदः ॥ तेपितृप्तिंपरांयांतिमधुस्रवासितर्पिताः ॥ ७४ ॥ अपमृत्युमृतायेवैचो रविद्युज्जलादिभिः ॥ तेषामिहकृतंश्राद्धंजायतेसुगतिप्रदम् ॥ ७५ ॥ आत्मघातेननिधनंयेषामिहविकर्मणाम् ॥ तेपितृप्तिंलभंतेत्रपिंडैःशिवगयाकृतैः॥ ॥ ७६ ॥ पितृगोत्रेमृतायेवैमातृपक्षेचयेमृताः ॥ तेषामत्रकृतःपिंडोभवेदक्षयतृप्तिदः ॥ ७७ ॥ पत्नीवर्गेमृतायेवैमित्रवर्गेचयेमृताः ॥ तेसर्वेतृप्तिमायां तितर्पितावार्षभध्वजे ॥ ७८ ॥ ब्रह्मक्षत्रविशांवंशेशूद्रवंशेंऽत्यजेषुच ॥ येषांनामगृहीत्वात्रदीयतेतेसमुद्धृताः ॥ ७९ ॥ तिर्यग्योनिमृतायेवैयेपिशाच त्वमागताः ॥ तेप्यूर्ध्वगतिमायांतितृप्ताःकापिलधारिके ॥ ८० ॥ येतुमानुषलोकेस्मिन्पितरोमर्त्ययोनयः ॥ तेदिव्ययोनयःस्युर्वैमधुस्रवासितर्पिताः ॥ ॥ ८१ ॥ येदिव्यलोकेपितरःपुण्यैर्देवत्वमागताः ॥ तेब्रह्मलोकेगच्छंतितृप्तास्तीर्थेवृषध्वजे ॥ ८२ ॥ कृतेक्षीरमयंतीर्थंत्रेतायांमधुमत्पुनः ॥ द्वापरेस र्पिषापूर्णंकलौजलमयंभवेत् ॥ ८३ ॥ सीमाबहिर्गतमपिज्ञेयंतीर्थमिदंशुभम् ॥ मध्येवाराणसिश्रेष्ठंममसान्निध्यतोनरैः ॥ ८४ ॥

॥७०॥७१ ॥ ७२ ॥ घृतकुल्यामिति ॥ घृतकुल्यायामित्यर्थः ॥ निवापतःप्रदानात्पिंडानामितिशेषः ॥७३॥७४॥७५॥७६॥७७॥७८॥७९॥८०॥८१॥८२॥८३॥ वाराणस्यामध्येमध्येवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राणसि ॥ दीर्घांतपाठेवाराणस्यांश्रेष्ठमित्यर्थः ॥ मध्यइत्यर्थात्तस्याएव ॥ नरैर्यतोऽदर्शीत्यन्वयः ॥ ८४ ॥ ८५॥८६॥ इतीतिकुमारवाक्यम् ॥ ८७ ॥ कंठीरवाःसिंहाः ॥ तेचात्रप्रकृत्याद्याः ॥ उक्ष्णांवलीवर्दानामष्टकम् ॥ तच्चधातुतस्त्वंत्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिशुक्राणीतिधात्वष्टकम् ॥ ८८ ॥ इभादिग्गजाः हयाइत्यत्रचित्ताहंकारबुद्धिपश्चज्ञानेंद्रियाणि ॥ यद्वा अन्तःकरणचतुष्टयमुपवेदचतुष्टयंचाविवक्षितम् ॥ कशाअश्वप्रचोदिनीमनोवृत्तिःसापाणौयस्यतन्मनस्तथा ॥ विवेक्यविवेकिभेदान्मनसोरपौनरुक्त्यंसमष्टिव्यष्टिभेदाद्वा ॥ ८९ ॥ गंगायमुनयोरीषेगंगायमुनेरथस्य दंडेइत्यर्थः ॥ चक्रेप्रतिचक्रंपवनदेवताऽधिष्ठात्रीदेवतेत्यर्थः ॥ चक्रयोःस्वरूपमाह ॥ सायमिति ॥ ९० ॥ अहीनांकुलेजाताआहेयाः ॥ उपनायकारथवन्धनानीत्यर्थः ॥ रथगुप्तयोवरूथाः ॥

काशीस्थितैर्यतोदर्शिध्वजोमेवृषलांछनः ॥ वृषध्वजेननाम्नातःस्थास्याम्यत्रपितामहाः ॥ ८५ ॥ पितामहेनसहितोगदाधरसमन्वितः ॥ रविणापार्षदैः सार्धंतुष्टयेवःपितामहाः ॥ ८६ ॥ इतियावद्वरंदत्तेपितृभ्योवृषभध्वजः ॥ तावन्नंदीसमागत्यप्रणम्येशंव्यजिज्ञपत् ॥८७॥ ॥ नंदिकेश्वरउवाच ॥ ॥ विहितःस्यंदनःसज्जस्ततोस्तुविजयोदयः ॥ अष्टौकंठीरवायत्रयत्रोक्ष्णामष्टकंशुभम् ॥ ८८ ॥ यत्रेभाःपरिभांत्यष्टौयत्राष्टौजविनोहयाः ॥ मनःसंयमनंयत्रकशापाणिव्यवस्थितम् ॥ ८९ ॥ गंगायमुनयोरीषेचक्रेपवनदेवता ॥ सायंप्रातर्मयेचक्रेछत्रंद्योर्मंडलंशुचि ॥९०॥ तारावलीमयाःकीलाआहेयाउपनायकाः ॥ श्रुतयोमार्गदर्शिन्यःस्मृतयोरथगुप्तयः ॥ ९१ ॥ दक्षिणाधूर्दृढायत्रमखायत्राभिरक्षकाः ॥ आसनंप्रणवोयत्रगायत्रीपादपीठभूः ॥ ९२ ॥ सांगाव्याहृतयोयत्रशुभाःसोपानवीथिकाः ॥ सूर्याचंद्रमसौयत्रसततंद्वाररक्षकौ ॥९३॥ अग्निर्मकरतुंडश्चरथभूःकौमुदीमयी॥ध्वजदंडोमहामेरुःपताकाहस्करप्रभा ॥ ९४ ॥ स्वयंवाग्देवतायत्रचंचच्चामरधारिणी ॥ ॥ स्कंदउवाच ॥ ॥ शैलादिनेतिविज्ञप्तोदेवदेवउमापतिः ॥ ९५ ॥ कृतनीराजनविधिरष्टभिर्देवमातृभिः ॥ पिनाकपाणिरुत्तस्थौदत्तहस्तोथशार्ङ्गिणा ॥ ९६ ॥ निनादोदिव्यवाद्यानांरोदसीपर्यपूरयत् ॥ गीतमंगलगीर्भिश्चचारणैरनुवर्धितः ॥ ९७ ॥ तेनदिव्यनिनादेनबधिरीकृतदिङ्मुखाः ॥ आहूताइवआजग्मुर्विष्वग्भुवनवासिनः ॥ ९८ ॥

॥ ९१ ॥ धूर्यानंमुखम् ॥ ९२ ॥ अंगानिशिक्षादीनि ॥ ९३ ॥ मकरतुण्डोमकराकारतुण्डः ॥ ९४ ॥ शैलादिनेतिस्कन्दोक्तिः ॥ ९५ ॥ तदेवमातृभिर्ब्रह्माणीत्यादिभिः ॥ तथाचवक्ष्यति ॥ ब्रह्माणीवैष्णवीरौद्रीवाराहीनारसिंहिका ॥ कौमारीअपिमाहेंद्रीचामुण्डाचैवचंडिकेति ॥ जयेत्यादिभिर्वा ॥ तथाचवासिष्ठे ॥ जयाचविजयाचैवजयंतीचापराजिता ॥ सिद्धारक्तालम्बुषाचउत्पलाचेतिदेवतेति ॥ ९६ ॥ ९७ ॥ ९८ ॥

CC-0. In Public Domain. Digitization by eGangotri

कोट्ययुतद्वयंविंशतिसहस्रकोट्यइत्यर्थः ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ नियुतानिलक्षाणि ॥ ४ ॥ शोभनानिपर्णानियेषांतेसुपर्णागरुडवंशीयावापक्षिणइत्यर्थः ॥ ५ ॥ नानारत्नोपदप्रदाःरत्नान्येवउपदीयन्तइत्युपदान्युपढौकनानितत्प्रदाः ॥ पंचायुतानिपञ्चाशत्सहस्राणि ॥ ६ ॥ ७ ॥ ८ ॥ मुदामुदः परमार्थानन्दास्तासामित्यर्थः ॥ त्रिविष्टपसमुत्कटांस्वर्गा

देवाःकोट्यस्त्रयस्त्रिंशद्गणाःकोटयुतद्वयम् ॥ नवकोटयस्तुचामुंडाभैरव्यःकोटिसंमिताः ॥ ९९ ॥ षडाननाःकुमाराश्चमयूरवरवाहनाः ॥ ममानुगाः समायाताःकोट्योष्टौमहाबलाः ॥ १०० ॥ आययुःकोटयःसप्तस्फुरत्परशुपाणयः ॥ पिचंडिलामहावेगाविघ्नविघ्नागजाननाः ॥ १ ॥ षडशीतिसहस्त्राणिमुनयोब्रह्मवादिनः ॥ तावंतोपिसमाजग्मुस्तत्रान्येगृहमेधिनः ॥ २ ॥ नागानांकोटयस्तिस्रःपातालतलवासिनाम् ॥ दानवानांचदैत्यानांद्वेद्वेकोटी शिवात्मनाम् ॥ ३ ॥ गंधर्वानियुतान्यष्टौकोट्यर्धयक्षरक्षसाम् ॥ विद्याधराणामयुतंनियुतद्वयसंयुतम् ॥ ४ ॥ तथाषष्टिसहस्राणिदिव्याश्चाप्सरसः शुभाः ॥ गोमातरोऽष्टौलक्षाणिसुपर्णान्ययुतानिषट् ॥ ५ ॥ सागराःसप्तसंप्राप्तानानारत्नोपदप्रदाः ॥ सरितांचसहस्राणित्रीणिपंचायुतानिच ॥ ६ ॥ गिरयोऽष्टौसहस्राणिवनस्पतिशतत्रयम् ॥ आजग्मुर्दिग्गजाअष्टौयत्रदेवःपिनाकधृक् ॥७॥ एतैःसमेतःसंतुष्टःपरिष्टुतइतस्ततः ॥ श्रीकंठोरथमारुह्यकाशीं प्राविशदुत्तमाम् ॥८॥ सगिरींद्रसुतश्च्यक्षोमुदांधाममुदांखनिः ॥ काशींप्रेक्षिष्टसंहृष्टस्त्रिविष्टपसमुत्कटाम् ॥९॥ ॥ स्कंदउवाच ॥ ॥ श्रुत्वाख्यानमिदं पुण्यंकोटिजन्माघनाशनम् ॥ पठित्वापाठयित्वाचशिवसायुज्यमाप्नुयात् ॥ ११० ॥ श्राद्धकालेविशेषेणपठनीयंप्रयत्नतः ॥ अक्षयंतद्भवेच्छ्राद्धंपितृतुष्टिकरंपरम् ॥ ११ ॥ वृषभध्वजमाहात्म्यंपठित्वाशिवसन्निधौ ॥ प्रत्यहंवर्षमात्रंतुह्यपुत्रःपुत्रवान्भवेत् ॥ १२ ॥ विश्वेशितुःसंप्रवेशोयःकाश्यां समुदाहृतः ॥ परमानंदकंदस्यबीजमेतत्सुनिश्चितम् ॥ १३ ॥ पठित्वैतन्मुदाख्यानंप्रविशेद्योनवंगृहम् ॥ ससर्वसौख्यनिलयोभवेदेवनसंशयः ॥१४॥ त्रैलोक्यानंदजनकमेतदाख्यानमुत्तमम् ॥ अस्यश्रवणमात्रेणविश्वेशःसंप्रसीदति ॥ १५ ॥ अलभ्यलाभोदेवस्यजातोत्रहियतःपरः ॥ ततःकाशीप्रवेशाख्यंजप्यमाख्यानमुत्तमम् ॥ ११६ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेवृषभध्वजप्रादुर्भावोनामद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥

दप्युत्कटाम् ॥ ९ ॥ ११० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ ११६ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ छ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्रियुक्षष्टितमेऽध्यायेपरमपावनी ॥ ज्येष्ठेशजैगीषव्यादिकथाप्रस्तूयतेऽद्भुता ॥ १ ॥ १ ॥ २ ॥ निरीक्षितोज्ञातः ॥ ३ ॥ अनेहसंकालम् ॥ ययौयये ॥ परस्मैपदमार्षम् ॥ ४ ॥ ५ ॥

अगस्त्यउवाच ॥ ॥ दृष्ट्वाकाशींदृगानंदांतारकारेपुरारिणा ॥ किमकारिसमाचक्ष्वप्राप्तांबहुमनोरथैः ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ पतिव्रतापते ऽगस्त्यशृणुवक्ष्याम्यशेषतः ॥ मृगांकलक्ष्मणोत्कंठंकाशीनेत्रातिथीकृता ॥ २ ॥ अथसर्वज्ञनाथेनभक्तवत्सलचेतसा ॥ जैगीषव्योमुनिश्रेष्ठोगुहां तस्थोनिरीक्षितः ॥ ३ ॥ यमनेहसमारभ्यमंदराद्रिंविनिर्ययौ ॥ अद्रींद्रसुतयासार्धंरुद्रेणोक्षेंद्रगामिना ॥ ४ ॥ तंवासरंपुरस्कृत्यजग्राहनियमंदृढम् ॥ जैगीषव्योमहामेधाःकुंभयोनेमहाकृती ॥५॥ विषमेक्षणपादाब्जंसमीक्षिष्येयदापुनः ॥ तदांबुविप्रुषमपिभक्षयिष्यामिचेत्यहो ॥६॥ कुताश्चिद्धारणायो गादथवाशंभ्वनुग्रहात् ॥ अनश्नन्नपिबन्योगीजैगीषव्यःस्थितोमुने ॥ ७ ॥ तंशंभुरेवजानातिनान्योजानातिकश्चन ॥ अतएवततःप्राप्तःप्रथमंप्रमथा धिपः ॥ ८ ॥ ज्येष्ठशुक्लचतुर्दश्यांसोमवारानुराधयोः ॥ तत्पर्वणिमहायात्राकर्तव्यातत्रमानवैः ॥ ९ ॥ ज्येष्ठस्थानंततःकाश्यांतदाभूदपिपुण्यदम् ॥ तत्रलिंगंसमभवत्स्वयंज्येष्ठेश्वराभिधम् ॥ १० ॥ तल्लिंगदर्शनात्पुंसांपापंजन्मशतार्जितम् ॥ तमोर्कोदयमाप्येवतत्क्षणादेवनश्यति ॥११॥ ज्येष्ठवाप्यां नरःस्नात्वातर्पयित्वापितामहान् ॥ ज्येष्ठेश्वरंसमालोक्यनभूयोजायतेभुवि ॥ १२ ॥ आविरासीत्स्वयंतत्रज्येष्ठेश्वरसमीपतः ॥ सर्वसिद्धिप्रदागौरीज्ये ष्ठाश्रेष्ठासमंततः ॥ १३ ॥ ज्येष्ठेमासिसिताष्टम्यांतत्रकार्योमहोत्सवः ॥ रात्रौजागरणंकार्यंसर्वसंपत्समृद्धये ॥ १४ ॥ ज्येष्ठांगौरींनमस्कृत्यज्येष्ठवापीप रिप्लुता ॥ सौभाग्यभाजनंभूयाद्योषासौभाग्यभागपि ॥ १५ ॥ निवासंकृतवाञ्शंभुस्तस्मिन्स्थानेयतःस्वयम् ॥ निवासेशइतिख्यातंलिंगंतत्रपरंततः ॥ ॥ १६ ॥ निवासेश्वरलिंगस्यसेवनात्सर्वसंपदः ॥ निवसंतिगृहेनित्यंनित्यंप्रतिपदंपुनः ॥ १७ ॥ कृत्वाश्राद्धंविधानेनज्येष्ठस्थानेनरोत्तमः ॥ ज्येष्ठांतृ प्तिंददात्येवपितृभ्योमधुसर्पिषा ॥ १८ ॥ ज्येष्ठतीर्थेनरःकाश्यांदत्त्वादानानिशक्तितः ॥ ज्येष्ठान्स्वर्गानवाप्नोतिनरोमोक्षंचगच्छति ॥ १९ ॥ ज्येष्ठेश्वरो चर्यःप्रथमंकाश्यांश्रेयोर्थिभिर्नरैः ॥ ज्येष्ठागौरीततोभ्यर्च्यासर्वज्येष्ठमभीप्सुभिः ॥ २० ॥ अथनंदिनमाहूयधूर्जटिःसकृपानिधिः ॥ शृण्वतांसर्वदेवाना मिदंवचनमब्रवीत् ॥ २१ ॥ ॥ ईश्वरउवाच ॥ ॥ शैलादेप्रविशाशुत्वंगुहास्त्यत्रमनोहरा ॥ तदंतरेस्तिमेभक्तोजैगीषव्यस्तपोधनः ॥ २२ ॥ महा नियमवान्नंदिंस्त्वगस्थिस्नायुशोषितः ॥ तमिहानयमद्भक्तंमद्दर्शनदृढव्रतम् ॥ २३ ॥ यदाप्रभृत्यगांकाश्यामंदरंसर्वसुंदरम् ॥ महानियमवानेषतदारभ्यो ज्झिताशनः ॥ २४ ॥ गृहाणलीलाकमलमिदंपीयूषपोषणम् ॥ अनेनतस्यगात्राणिस्पृशसद्यःसुबृंहिणा ॥ २५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ नित्यंपदमित्यन्वयः ॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥ सुबृंहिणाशोभनवृद्धिहेतुना ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २६ ॥ २७ ॥ शाल्मूरोभेकः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ पद्यैःसार्धचतुर्स्त्रिंशैःसोमंसोमकलाधरम् ॥ अस्तौन्मुनिरुदारात्मासगुणागुणभेदतः ॥ १ ॥ शिवाय सुखरूपाय ॥ शुभात्मनेमंगलस्वरूपाय ॥ शुभःआत्मायस्मात्तस्माइतिवा ॥ जगदानन्दकन्दायजगतांयआनन्दःसुखंतस्यकन्दायमूलायकारणायेत्येतत् ॥ सएषपरमआनन्दएतस्यैवानन्दस्यान्या निभूतानिमात्रामुपजीवंतीतिश्रुतेः ॥ ३२ ॥ विधयेचतुराननायभाम्यस्वरूपायेतिवा ॥ ३३ ॥ ३४ ॥ त्रैलोक्यकाम्यायत्रैलोक्यानांकाम्यायस्मात्तैर्वाकाम्यतइतितथातस्मै ॥ शेषांगदायअनन्तवल

ततोनंदीसमादायतल्लीलाकमलंविभोः ॥ प्रणम्यदेवदेवेशमाविशद्गह्वरांगुहाम् ॥२६॥ नंदीदृष्ट्वाथतंतत्रधारणादृढमानसम् ॥ तपोग्निपरिशुष्कांगंकमले नसमस्पृशत् ॥ २७ ॥ तपांतेवृष्टिसंयोगाच्छालूरइवकोटरे ॥ उल्ललाससयोगींद्रःस्पर्शमात्रात्तदब्जजात् ॥ २८ ॥ अथनंदीसमादायसत्वरंमुनिपुंगवम् ॥ देवदेवस्यपादाग्रेनमस्कृत्यन्यपातयत् ॥ २९ ॥ जैगीषव्योथसंभ्रांतःपुरतोवीक्ष्यशंकरम् ॥ वामांगसन्निविष्टाद्रितनयंप्रणनामह ॥ ३० ॥ प्रणम्यदंडवद्भूमौपरिलुंठचसमंततः ॥ तुष्टावपरयाभक्त्यासमुनिश्चंद्रशेखरम् ॥३१॥ ॥ जैगीषव्यउवाच ॥ ॥ नमःशिवायशांतायसर्वज्ञायशुभात्मने॥ जगदानंदकंदायपरमानंदहेतवे ॥ ३२ ॥ अरूपायसरूपायनानारूपधरायच ॥ विरूपाक्षायविधयेविधिविष्णुस्तुतायच ॥३३॥ स्थावरायनमस्तुभ्यं जंगमायनमोस्तुते ॥ सर्वात्मनेनमस्तुभ्यंनमस्तेपरमात्मने ॥ ३४ ॥ नमस्त्रैलोक्यकाम्यायकामांगदहनायच ॥ नमोशेषविशेषायनमःशेषांगदायते ॥ ॥ ३५ ॥ श्रीकंठायनमस्तुभ्यंविषकंठायतेनमः ॥ वैकुंठवंद्यपादायनमोऽकुंठितशक्तये ॥३६॥ नमःशक्त्यर्धदेहायविदेहायसुदेहिने ॥ सकृत्प्रणाममात्रेणदेहिदेहनिवारिणे ॥ ३७ ॥ कालायकालकालायकालकूटविषादिने ॥ व्यालयज्ञोपवीतायव्यालभूषणधारिणे ॥ ३८ ॥ नमस्तेखंडपरशोनमःखंडेंदुधारिणे ॥ खंडिताशेषदुःखायखड्गखेटकधारिणे ॥ ३९ ॥ गीर्वाणगीतनाथायगंगाकल्लोलमालिने ॥ गौरीशायगिरीशायगिरिशायगुहारणे ॥ ॥ ४० ॥ चंद्रार्धशुद्धभूषायचंद्रसूर्याग्निचक्षुषे ॥ नमस्तेचर्मवसननमोदिग्वसनायते ॥ ४१ ॥ जगदीशायजीर्णायजराजन्महरायते ॥ जीवायतेनमस्तुभ्यंजंजपूकादिहारिणे ॥ ४२ ॥

याय ॥ शेषांगदायिनेइतिपाठअनन्तवाहुवलयमयितुंप्राप्तुंशीलंयस्यसतथातस्मै ॥ ३५ ॥३६॥३७॥ कालकालायकालस्यापिमारकायेत्यर्थः ॥ सकालकालइतिश्रुतेः ॥ कालमूषकभक्षकइतिस्मृतेश्च ॥ ३८ ॥ नारायणगात्रेखंडितःकुंठितःपरशुःकुठारोयस्यसतथातत्सम्बोधनंहेखंडपरशो ॥ खेटकंचर्म ॥ ३९ ॥ ४० ॥ ४१ ॥ जीवयतीतिजीवईश्वरस्तस्मैक्षेत्रज्ञायेतिवा ॥ तेतुभ्यम् ॥ जीवातवइ

१ गुहस्यस्कन्दरूपाग्नेरराणिरुत्पादकः काष्ठविशेषस्तत्सम्बुद्धौ—हेगुहारणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपाठेजीवनौषधाय ॥ जंजपूकंपापंतदादिहारिणे ॥ आदिशब्देनाज्ञानंगृह्यते ॥ जंजपूकौघहारिणइतिवापाठः ॥ जंजपूकाघेतिपाठेजंजपूकोजपनशीलः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ परादव्यक्तात्परायतत्प्रवर्तकाय ॥ पारयतीतिपारस्तस्मै प्रलयावधिभूतायेतिवा ॥ परापराभ्यांकार्यकारणाभ्यांपरायभिन्नाय ॥ ५१ ॥ ५२ ॥ ५३ ॥

नमोडमरुहस्तायधनुर्हस्तायतेनमः ॥ त्रिनेत्रायनमस्तुभ्यंजगन्नेत्रायतेनमः ॥ ४३ ॥ त्रिशूलव्यग्रहस्तायनमस्त्रिपथगाधर ॥ त्रिविष्टपाधिनाथायत्रिवेदीपठितायच ॥ ४४ ॥ त्रयीमयायतुष्टायभक्ततुष्टिप्रदायच ॥ दीक्षितायनमस्तुभ्यंदेवदेवायतेनमः ॥ ४५ ॥ दारिताशेषपापायनमस्तेदीर्घदर्शिने ॥ दूरायदुरवाप्यायदोषनिर्दलनायच ॥ ४६ ॥ दोषाकरकलाधारत्यक्तदोषागमायच ॥ नमोधूर्जटयेतुभ्यंधत्तूरकुसुमप्रिय ॥४७॥ नमोधीरायधर्मायधर्मपालायतेनमः ॥ नीलग्रीवनमस्तुभ्यंनमस्तेनीललोहित ॥ ४८ ॥ नाममात्रस्मृतिकृतांत्रैलोक्यैश्वर्यपूरक ॥ नमःप्रमथनाथायपिनाकोद्यतपाणये ॥ ॥ ४९ ॥ पशुपाशविमोक्षायपशूनांपतयेनमः ॥ नामोच्चारणमात्रेणमहापातकहारिणे ॥ ५० ॥ परात्परायपारायपरापरपरायच ॥ नमोऽपारचरित्रायसुपवित्रकथायच ॥ ५१ ॥ वामदेवायवामार्धधारिणेवृषगामिने ॥ नमोभर्गायभीमायनतभीतिहरायच ॥ ५२ ॥ भवायभवनाशायभूतानांपतये नमः ॥ महादेवनमस्तुभ्यंमहेशमहसांपते ॥ ५३ ॥ नमोमृडानीपतयेनमोमृत्युंजयायते ॥ यज्ञारयेनमस्तुभ्यंयक्षराजप्रियायच ॥ ५४ ॥ यायजूकाययज्ञाययज्ञानांफलदायिने ॥ रुद्रायरुद्रपतयेकद्रुद्रायरमायच ॥ ५५ ॥ शूलिनेशाश्वतेशायश्मशानावनिचारिणे ॥ शिवाप्रियायशर्वायसर्वज्ञायनमोस्तुते ॥ ५६ ॥ हरायक्षांतिरूपायक्षेत्रज्ञायक्षमाकर ॥ क्षमायक्षितिहर्त्रेचक्षीरगौरायतेनमः ॥ ५७ ॥ अंधकारेनमस्तुभ्यमाद्यंतरहितायच ॥ इडाधारायईशायउपेंद्रेंद्रस्तुतायच ॥ ५८ ॥ उमाकांतायउग्रायनमस्तेऊर्ध्वरेतसे ॥ एकरूपायचैकायमहदैश्वर्यरूपिणे ॥ ५९ ॥ अनंतकारिणेतुभ्यमंबिकापतयेनमः ॥ त्वमोंकारोवषट्कारोभूर्भुवःस्वस्त्वमेवहि ॥६०॥ दृश्यादृश्यंयदत्रास्तिततत्सर्वंत्वमुमाधव ॥ स्तुतिंकर्तुंनजानामिस्तुतिकर्तात्वमेवहि ॥ ॥ ६१ ॥ वाच्यस्त्वंवाचकस्त्वंहिवाक्चत्वंप्रणतोस्मिते ॥ नान्यंवेद्मिमहादेवनान्यंस्तौमिमहेश्वर ॥ ६२ ॥

यज्ञारयेदक्षयज्ञहंत्रे ॥ दक्षयज्ञरक्षांकर्तुंमृगरूपंधृत्वातत्रैवपलायतोविष्णोर्वाशत्रवे ॥ यज्ञोवैविष्णुरितिश्रुतेः ॥ यक्षराजः कुबेरः ॥ यज्ञराजेतिपाठेयज्ञराजोऽश्वमेधः ॥ ५४ ॥ यायजूकाययाज्ञिकाय ॥ कत्कुत्सितंरुद्रोदनंद्रावयतीतिकद्रुद्रस्तस्मै ॥ रमयतीतिरमस्तस्मै ॥ रमाप्रदेतिवापाठः ॥५५॥ शाश्वतहेशाश्वत ॥ शाश्वतेशायेत्येकंपदंवा ॥ ५६ ॥ ५७॥ इडापृथ्वी॥५८॥५९॥६०॥६१॥६२॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ पंगुःखंजः ॥ ६४ ॥ ६५ ॥ ६६ ॥ उवाचचेतिचकारेणादरःसूचितः ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

नान्यंनमामिगौरीशनान्याख्यामाददेशिव ॥ मूकोन्यनामग्रहणेबधिरोन्यकथाश्रुतौ ॥६३॥ पंगुरन्याभिगमनेऽस्म्यंधोऽन्यपरिवीक्षणे॥एकएवभवानी शएकःकर्तात्वमेवहि॥ ६४ ॥ पाताहर्तात्वमेवैकोनानात्वंमूढकल्पना ॥ अतस्त्वमेवशरणंभूयोभूयःपुनःपुनः ॥६५॥ संसारसागरेमग्नंमामुद्धरमहेश्वर ॥ इतिस्तुत्वामहेशानंजैगीषव्योमहामुनिः ॥ ६६ ॥ वाचंयमोभवत्स्थाणोःपुरतःस्थाणुसन्निभः ॥ इतिस्तुतिंसमाकर्ण्यमुनेश्चंद्रविभूषणः ॥ उवाचच प्रसन्नात्मावरंब्रूहीतितंमुनिम् ॥ ६७ ॥ ॥ जैगीषव्यउवाच ॥ ॥ यदिप्रसन्नोदेवेशततस्तवपदांबुजात् ॥ माभवानिभवानीशदूरंदूरपदप्रद ॥६८॥ अपरश्चवरोनाथदेयोयमविचारतः ॥ यन्मयास्थापितंलिंगंतत्रसान्निध्यमस्तुते ॥६९॥ ॥ ईश्वरउवाच ॥ ॥ जैगीषव्यमहाभागयदुक्तंभवतानघ ॥ तदस्तुसर्वंतेभीष्टंवरमन्यंददामिच ॥ ७० ॥ योगशास्त्रंमयादत्तंतवनिर्वाणसाधकम् ॥ सर्वेषांयोगिनांमध्येयोगाचार्योऽस्तुवैभवान् ॥ ७१ ॥ रहस्यं योगविद्यायायथावत्त्वंतपोधन ॥ संवेत्स्यसेप्रसादान्मेयेननिर्वाणमाप्स्यसि ॥ ७२ ॥ यथानंदीयथाभृंगीसोमनंदीयथातथा ॥ त्वंभविष्यसिभक्तोमे जरामरणवर्जितः ॥ ७३ ॥ संतिव्रतानिभूयांसिनियमाःसंत्यनेकधा ॥ तपांसिनानासंत्यत्रसंतिदानान्यनेकशः ॥ ७४ ॥ श्रेयसांसाधनान्यत्रपापघ्नान्य पिसर्वथा ॥ परंहिपरमश्चैषनियमोयस्त्वयाकृतः ॥ ७५ ॥ परोहिनियमश्चैषमांविलोक्ययदश्यते ॥ मामनालोक्ययद्भुक्तंतद्भुक्तंकेवलंत्वघम् ॥ ७६ ॥ असमर्च्यचयोभुङ्क्तेपत्रपुष्पफलैरपि ॥ रेतोभक्षीभवेन्मूढःसजन्मान्येकविंशतिम् ॥ ७७ ॥ महतोनियमस्यास्यभवतानुष्ठितस्यवै ॥ नार्हंतिषोडशीं मात्रामप्यन्येनियमायमाः ॥ ७८ ॥ अतोमच्चरणाभ्याशेत्वंनिवत्स्यसिसर्वथा ॥ अतोनैःश्रेयसींलक्ष्मींतत्रैवप्राप्स्यसिध्रुवम् ॥ ७९ ॥ जैगीषव्येश्वरं नामलिंगंकाश्यांसुदुर्लभम् ॥ त्रीणिवर्षाणिसंसेव्यलभेद्योगंनसंशयः ॥ ८० ॥ जैगीषव्यगुहांप्राप्ययोगाभ्यसनतत्परः ॥ षण्मासेनलभेत्सिद्धिंवा ञ्छितांमदनुग्रहात् ॥ ८१ ॥ तवलिंगमिदंभक्तैःपूजनीयंप्रयत्नतः ॥ विलोक्याचगुहारम्यापरांसिद्धिमभीप्सुभिः ॥ ८२ ॥ अत्रज्येष्ठेश्वरक्षेत्रेत्वल्लिंगं सर्वसिद्धिदम् ॥ नाशयेदघसंघानिदृष्टंस्पृष्टंसमर्चितम् ॥ ८३ ॥

॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवयोगिनः शिवविष्ण्वोरभेददर्शिनः ॥ ८४ ॥ ८५ ॥ ७६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ उपसर्गाआध्यात्मिकाद्युपद्रवाः ॥ ९१ ॥ ॥ इतिश्रीरामानन्दकृतायां काशीखण्डटीकायांत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ छ ॥ ॥ चतुःषष्टितमेध्यायेकाश्याःक्षेत्रनिवासिनाम् ॥ पुरतःकथयामासरहस्यान्यद्रिजाधवः ॥ १ ॥ ददर्शब्राह्मणांस्तत्रसमेतान्क्षेत्रवासिनइत्युक्तं ज्येष्ठेशादिलिंगानिप्रादुर्भूतानीतिचोक्तं तत्रतान्दृष्ट्वाभगवतांकिमपृच्छिअन्यानिचकानिलिंगानितत्राभवान्नितिपृच्छाति ॥ दृष्ट्वेति ॥ भूदेवताःब्राह्मणाः ॥ १ ॥ २ ॥

अस्मिञ्ज्येष्ठेश्वरक्षेत्रेसंभोज्यशिवयोगिनः ॥ कोटिभोज्यफलंसम्यगेकैकपरिसंख्यया ॥ ८४ ॥ जैगीषव्येश्वरंलिंगंगोपनीयंप्रयत्नतः ॥ कलौकलुषबुद्धीनांपुरतश्चविशेषतः ॥ ८५ ॥ करिष्याम्यत्रसांनिध्यमस्मिँल्लिंगेतपोधन ॥ योगसिद्धिप्रदानायसाधकेभ्यःसदैवहि ॥८६॥ ददेश्शृणुमहाभागजैगीषव्यापरंवरम् ॥ त्वयेदंयत्कृतंस्तोत्रंयोगसिद्धिकरंपरम् ॥ ८७ ॥ महापापौघशमनंमहापुण्यप्रवर्धनम् ॥ महाभीतिप्रशमनंमहाभक्तिविवर्धनम् ॥ ८८ ॥ एतत्स्तोत्रजपात्पुंसामसाध्यंनैवकिंचन ॥ तस्मात्सर्वप्रयत्नेनजपनीयंमुसाधकैः ॥ ८९ ॥ इतिदत्त्वावरंतस्मैस्मरारिःस्मेरलोचनः ॥ ददर्शब्राह्मणांस्तत्रसमेतान्क्षेत्रवासिनः ॥ ९० ॥ ॥ स्कंदउवाच ॥ ॥ निशम्याख्यानमतुलमेतत्प्राज्ञःप्रयत्नतः ॥ निष्पापोजायतेमर्त्योनोपसर्गैःप्रबाध्यते ॥ ९१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धे ज्येष्ठेशाख्याननंनामत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ अगस्त्यउवाच ॥ दृष्ट्वाभूदेवताःशंभुंकिमाचख्युःषडानन ॥ कानिकानिचलिंगानितत्रतान्यपिचक्ष्वमे ॥ १ ॥ ज्येष्ठस्थानेमहापुण्येदेवदेवस्यवल्लभे ॥ आश्चर्यंकिमभूत्तत्रतदाचक्ष्वषडानन ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्ययथापृच्छिभवतातद्ब्रवीम्यहम् ॥ मंदराद्रियदादेवोगतवान्ब्रह्मगौरवात् ॥ ३ ॥ तदानिराश्रयाविप्राःक्षेत्रसंन्यासिनोनघाः ॥ उपाकृताश्चाविरतंमहाक्षेत्रप्रतिग्रहात् ॥ ४ ॥ खातंखातंचदंडाग्रैर्भूमिंकंदादिवृत्तयः ॥ चक्रुःपुष्करिणींरम्यांदंडखाताभिधांमुने ॥ ५ ॥ तत्तीर्थपरितःस्थाप्यमहालिंगान्यनेकशः ॥ महेशाराधनपरास्तपश्चक्रुःप्रयत्नतः ॥ ६ ॥ विभूतिधारिणोनित्यंनित्यंरुद्राक्षधारिणः ॥ लिंगपूजारतानित्यंशतरुद्रियजापिनः ॥ ७ ॥ तेश्रुत्वादेवदेवस्यपुनरागमनंमुने ॥ तपःकृशाअतितरामासुरानंदमेदुराः ॥ ८ ॥ द्विजाःपंचसहस्राणिचरंतोविपुलंतपः ॥ दंडखातान्महातीर्थादाजग्मुर्देवदर्शने ॥ ९ ॥ तीर्थान्मंदाकिनीनाम्नोद्विजाःपाशुपतव्रताः ॥ शिवैकाराधनपराःसमेताअयुतोन्मिताः ॥ १० ॥

॥ ३ ॥ उपाकृताउपरताः ॥ उपारताइतिक्वचित्पाठः ॥ अविरतंसन्ततम् ॥ ४ ॥ खातंखातंखात्वाखात्वेत्यर्थः ॥ खात्वाखात्वेतिचक्वचित्पाठः ॥ ५ ॥ स्थाप्यस्थापयित्वा ॥ ६ ॥ शतरुद्रियजापिनःनमस्तेरुद्रमन्यवइत्यादिस्तोत्रजापिनः ॥ ७ ॥ आसुर्बभूवुः ॥ आनन्दमेदुराःआनन्दस्निग्धाः ॥ आंतरानन्दमेदुराइतिक्वचित् ॥ ८ ॥ ९ ॥ अयुतोन्मिताःदशसह

CC-0. In Public Domain. Digitization by eGangotri

स्राणि ॥ १० ॥ एकादशशताधिकंशतंद्विशताधिकसहस्रमित्यर्थः ॥ ११ ॥ १२ ॥ अयुतार्धकंपंचसहस्राणि ॥ १३ ॥ आयासिषुरागतवंतः ॥ १४ ॥ १५ ॥ १६ ॥ नवतिःसशतत्रयानवत्य धिकाशतत्रयीत्यर्थः ॥ १७ ॥ १८ ॥ साग्रंशतंकिंचिदधिकंशतमित्यर्थः ॥ सपादशतंवा ॥ द्विशतीसशतत्रयापंचशतीत्यर्थः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ सार्द्रेति ॥

हंसतीर्थात्परिप्राप्ताअयुतंत्रिशतोत्तरम् ॥ शतंदुर्वाससस्तीर्थादेकादशशताधिकम् ॥ ११ ॥ मत्स्योदर्याःपरापेतुःसहस्राणिषडेवहि ॥ कपालमोचना त्सप्तशतान्यभ्यागताद्विजाः ॥ १२॥ ऋणमोचनतस्तीर्थात्सहस्रंद्विशताधिकम् ॥ वैतरण्याअपिमुनेद्विजानामयुतार्धकम् ॥१३॥ ततःपृथूदकात्कुंडा त्पृथुनापरिखानितात् ॥ अयासिषुर्द्विजानांचशतान्येवत्रयोदश ॥१४॥ तथैवाप्सरसःकुंडान्मेनकाख्याच्छतद्वयम् ॥ उर्वशीकुंडतःप्राप्ताःसहस्रंद्विशता धिकम् ॥ १५ ॥ तथैरावतकुंडाच्चब्राह्मणास्त्रिशतानिच ॥ गंधर्वाप्सरसःसप्तशतानिद्विशतानिच ॥ १६ ॥ वृषेशतीर्थादाजग्मुर्नवतिःसशतत्रया ॥ यक्षिणीकुंडतःप्राप्ताःसहस्रंत्रिशतोत्तरम् ॥ १७ ॥ लक्ष्मीतीर्थात्परंजग्मुःषोडशैवशतानिच ॥ पिशाचमोचनात्सप्तसहस्राणिद्विजोत्तमाः ॥ १८ ॥ पितृकुंडाच्छतंसाग्रंध्रुवतीर्थाच्छतानिषट् ॥ मानसाख्याच्चसरसोद्विशतीसशतत्रया ॥ १९ ॥ ब्राह्मणावासुकिह्रदात्सहस्राणिदशैवतु ॥ तथैवाष्टशतंद्रष्टुं जानकीकुंडतोद्विजाः ॥ २० ॥ काशीनाथमनुप्राप्ताःपरमानंददायिनम् ॥ तथागौतमकुंडाच्चशतानिनवचागताः ॥२१॥ तीर्थाद्दुर्गतिसंहर्तुर्ब्राह्मणाःप्र तिपेदिरे ॥ एकादशशतान्येवद्रष्टुंदेवमुमापतिम् ॥ २२ ॥ असीसंभेदमारभ्यगंगातीरस्थिताद्विजाः ॥ आसंगमेश्वरात्तत्रपरिप्राप्ताघटोद्भव ॥ २३ ॥ अष्टादशसहस्राणितथापंचशतान्यपि ॥ ब्राह्मणाःपंचपंचाशद्गंगातीरात्समागताः ॥ २४ ॥ सार्द्रदूर्वाक्षतकरैःसपुष्पफलपाणिभिः ॥ सुगंधमाल्यहस्तै श्चब्राह्मणैर्जयवादिभिः ॥ २५ ॥ स्तुतोमंगलसूक्तैश्चप्रणतश्चपुनःपुनः ॥ तेभ्योदत्ताभयःशंभुःपप्रच्छकुशलंमुदा ॥ २६ ॥ ततस्तेब्राह्मणाःप्रोचुः प्रबद्धकरसंपुटाः ॥ क्षेत्रेनिवसतांनाथसदानःकुशलोदयः ॥ २७ ॥ विशेषतःकृतोऽस्माभिःसाक्षान्नयनगोचरः ॥ त्वंयत्स्वरूपंश्रुतयोनविदुःपरमार्थतः ॥ २८ ॥ सदैवाकुशलंतेषांयेत्वत्क्षेत्रपराङ्मुखाः ॥ चतुर्दशापिवैलोकास्तेषांनित्यंपराङ्मुखाः ॥ २९ ॥ येषांहृदिसदैवास्तेकाशीत्वाशीविषांगद ॥ संसाराशीविषविषंनतेषांप्रभवेत्क्वचित् ॥ ३० ॥ गर्भरक्षामणिर्मंत्रःकाशीवर्णद्वयात्मकः ॥ यस्यकंठेसदातिष्ठेत्तस्याकुशलताकुतः ॥ ३१ ॥

ब्राह्मणैर्मंगलसूक्तैःपुनःपुनःस्तुतःप्रणतस्तेभ्योदत्ताभयःशंभुःकुशलंपप्रच्छेतिद्वितीयेनान्वयः ॥ चतुर्भिर्विशेषणैर्ब्राह्मणान्विशिनष्टिसार्द्रेत्यादिना ॥ २५ ॥ २६ ॥ २७ ॥ नन्वक्षिसन्निकृष्टंवस्तुनय नगोचरंभवत्येवकिमाश्चर्यंतत्राहुः ॥ यत्स्वरूपंश्रुतयोनविदुरिति ॥ परमार्थतोमुख्ययावृत्त्येत्यर्थः ॥ २८ ॥ २९ ॥ आशीविषांगदंसर्पबाहुवलयम् ॥ ३० ॥ गर्भरक्षामणिर्गर्भनाशकोमणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रित्यर्थः ॥ मंत्रश्च ॥ यद्वाकाशीतिवर्णद्वयात्मकोयोमंत्रःसगर्भरक्षामणिरित्यर्थः ॥ ३१ ॥ निर्निंतरांजरायस्यांसातथानिर्जरैवनैर्जरी ॥ नैर्जरीत्युपलक्षणम् ॥ षड्भावविकाररहितामित्यर्थः ॥ सुधैवामृतावस्थैवमोक्षावस्थैवेतियावत् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ बीजाक्षरयुगंतत्रककारःकामबीजंशकारःश्रीबीजमितिविवेक्तव्यम् ॥३७॥३८॥३९॥ क्षेत्रभक्तिविबृंहितंक्षेत्रभक्त्या विशेषेणवर्द्धितंतत्प्रतिपादकमित्यर्थः ॥ ४० ॥ नकेवलंतुतोषप्रोवाचचेतिचकारार्थः ॥ ४१ ॥ ४२ ॥ ४३ ॥ विरोधितःविरोधंप्रापितः ॥ ४४ ॥ ४५ ॥ निवसन्तीतिभिन्नंभिन्नंवाक्यम् ॥

सुधांपिबतियोनित्यंकाशीवर्णद्वयात्मिकाम् ॥ सनैर्जरींदशांहित्वासुधैवपरिजायते ॥ ३२ ॥ श्रुतंकर्णामृतंयेनकाशीत्यक्षरयुग्मकम् ॥ नसमाकर्णयत्येवसपुनर्गर्भजांकथाम् ॥ ३३ ॥ काशीरजोपियन्मूर्ध्निपतेदप्यनिलाहतम् ॥ चंद्रशेखरतन्मूर्धाभवेच्चंद्रकलांकितः ॥ ३४ ॥ प्रसंगतोपियन्नेत्रपथमानंदकाननम् ॥ यातंतेत्रनजायंतेनेक्षेरन्पितृकाननम् ॥३५॥ गच्छतातिष्ठतावापिस्वपताजाग्रताथवा ॥ काशीत्येषमहामंत्रोयेनजप्तःसनिर्भयः ॥ ३६ ॥ येनबीजाक्षरयुगंकाशीतिहृदिधारितम् ॥ अबीजानिभवंत्येवकर्मबीजानितस्यवै ॥ ३७ ॥ काशीकाशीतिकाशीतिजपतोयस्यसंस्थितिः ॥ अन्यत्रापिसतस्तस्यपुरोमुक्तिःप्रकाशते ॥ ३८ ॥ क्षेममूर्तिरियंकाशीक्षेममूर्तिर्भवान्भव ॥ क्षेममूर्तिस्त्रिपथगानान्यत्क्षेमत्रयंक्वचित् ॥ ३९ ॥ ब्राह्मणानामितिवचःक्षेत्रभक्तिविबृंहितम् ॥ निशम्यगिरिजाकांतस्तुतोषनितरांहरः ॥ ४० ॥ प्रोवाचचप्रसन्नात्माधन्यायूयंद्विजर्षभाः ॥ येषामिहेदृशीभक्तिर्ममक्षेत्रेतिपावने ॥ ४१ ॥ जानेसत्त्वमयाजाताःक्षेत्रस्यास्यनिषेवणात् ॥ नीरजस्कावितमसःसंसारार्णवपारगाः ॥ ४२ ॥ वाराणस्यास्तुयेभक्तास्तेभक्ताममनिश्चितम् ॥ जीवन्मुक्ताहितेनूनंमोक्षलक्ष्म्याकटाक्षिताः ॥ ४३ ॥ यैश्चकाशीस्थितोजंतुरल्पकोपिविरोधितः ॥ तैर्वैविश्वंभरासर्वामयासहविरोधिता ॥ ॥ ४४ ॥ वाराणस्याःस्तुतिमपियोनिशम्यानुमोदते ॥ अपिब्रह्मांडमखिलंध्रुवंतेनानुमोदितम् ॥४५॥ निवसंतिहियेमर्त्याअस्मिन्नानंदकानने ॥ ममांतःकरणेतेवैनिवसेयुरकल्मषाः ॥ ४६ ॥ निवसंतिममक्षेत्रेममभक्तिंप्रकुर्वते ॥ ममलिंगधरायेतुतानेवोपदिशाम्यहम् ॥ ४७ ॥ निवसंतिममक्षेत्रेममभक्तिंनकुर्वते ॥ ममलिंगधरायेनोनतानुपदिशाम्यहम् ॥४८॥ काशीनिर्वाणनगरीयेषांचित्तेप्रकाशते ॥ तेमत्पुरःप्रकाशंतेनैःश्रेयस्याश्रियावृताः ॥ ४९ ॥ मोक्षलक्ष्मीरियंकाशीनयेभ्यःपरिरोचते ॥ स्वर्लक्ष्मींकांक्षमाणेभ्यःपतितास्तेनसंशयः ॥ ५० ॥ काशींसंकांक्षमाणानांपुरुषार्थचतुष्टयम् ॥ पुरःकिंकरवत्तिष्ठेन्ममानुग्रहतोद्विजाः ॥ ५१ ॥ आनंदकाननेह्यत्रज्वलद्दावानलोस्म्यहम् ॥ कर्मबीजानिजंतूनांज्वालयेनप्ररोहये ॥ ५२ ॥

॥ ४६ ॥ ममलिंगधरावैदिकत्रिपुण्ड्रादिधारिणः ॥ ४७ ॥ उक्तमर्थंव्यतिरेकेणदर्शयति ॥ निवसन्तीति ॥ ननिवसन्तीत्यग्रिमोनकारोऽनुषज्जते ॥ एकवाक्यत्वेअभक्तेभ्योपिभक्तेभ्यःस्थितोमुक्तिसमादिशेतिविष्णुप्रार्थनानन्तरं भक्तानामप्यभक्तानांपुण्यपापकृतामपि ॥ मुक्तिदास्यामिसर्वेषांभक्तानामेवसानहीत्यादिविश्वेशवचनव्याकोपात् ॥ कीटाद्यमुक्तिप्रसंगाच्च ॥ ४८ ॥ ४९ ॥ मोक्षलक्ष्मीरिति ॥ येभ्यःस्वर्लक्ष्मींकांक्षमाणेभ्यइत्युभयत्ररुचिधातुयोगात्षष्ठ्यर्थेचतुर्थी ॥ पतिताःसंसारसागरइतिशेषः ॥ यद्वा पतिताःसंकरजाइत्यर्थः ॥ ५० ॥ ५१ ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ५३ ॥ प्राप्येति ॥ भक्त्यभावेकाशीत्यागप्रसक्तेर्मुक्तेरप्यभावइत्यर्थः ॥ ५४ ॥ धन्याइति ॥ यदितियेषांयुष्माकंचेतसोवृत्तेरंतःकरणज्ञानादहंनदूरेकाशिकाचदूरेइत्यर्थः ॥ वृत्तीरिति क्वचित् ॥ ५५ ॥ ५६ ॥ ५७ ॥ भवतापहृदितिकाशीविशेषणंविश्वेश्वरसंबोधनंवा ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ प्रतिनिधिःप्रतिरूपम् ॥ ६२ ॥ ६३ ॥ ६४ ॥ दमोदानंदये त्यत्रकर्तव्यमितिसामान्यनिर्देशः ॥ ६५ ॥ ६६ ॥ ६७ ॥ अन्यत्रपुण्यक्षेत्रे ॥ तदुक्तम् ॥ यत्रकुत्रकृतंपापंगंगातीरेविनश्यति॥गंगातीरेकृतंपापंगंगायांचप्रणश्यति॥ गंगायांचकृतंपापं पुण्यक्षेत्रेविनश्यति॥पुण्यक्षेत्रेकृतंपापंवाराणस्यांप्रणश्यति ॥ अन्यत्समानम् ॥ ६८ ॥ पिशाचेति ॥ यदिपैशाच्यनरकावहंपापंबहिरंतर्गेहाद्बहिःकाश्यांकृतंभवेत्तनपापेनपैशाचनरकप्राप्तिरन्तर्गेहे

वस्तव्यंसततंकाश्यांयष्टव्योहंप्रयत्नतः ॥ जेतव्यौकलिकालौचरंतव्यामुक्तिरंगना ॥५३॥ प्राप्यापिकाशींदुर्बुद्धिर्योनमांपरिसेवते॥ तस्यहस्तगताप्याशुकै वल्यश्रीःप्रणश्यति ॥ ५४ ॥ धन्यामद्भक्तिलक्ष्माणोब्राह्मणाःकाशिवासिनः ॥ यूयंयच्चेतसोवृत्तेर्नदूरेहंनकाशिका ॥ ५५ ॥ दातव्योवोवरःकोत्रव्रियतांमे यथारुचि ॥ प्रेयांसोमेयतोयूयंक्षेत्रसंन्यासकारिणः ॥ ५६ ॥ इतिपीत्वामहेशानमुखक्षीराब्धिजांसुधाम् ॥ परितृप्ताद्विजाःसर्वेवव्रुर्वरमनुत्तमम् ॥ ५७ ॥ ब्राह्मणाऊचुः ॥ ॥ उमापतेमहेशानसर्वज्ञवरएषनः ॥ काशीकदापिनत्याज्याभवताभवतापहृत् ॥ ५८ ॥ वचनाद्ब्राह्मणानांतुशापोमाप्रभवत्विह ॥ कदाचिदपिकेषांचित्काश्यांमोक्षांतरायकः ॥ ५९ ॥ तवपादांबुजद्वंद्वेनिर्द्वंद्वाभक्तिरस्तुनः ॥ आकलेवरपातंचकाशीवासोस्तुनोनिशम् ॥६०॥ किमन्ये नवरेणेशदेयएषवरोहिनः ॥ अवधेह्यंधकध्वंसिन्वरमन्यंवृणीमहे ॥ ६१ ॥ तवप्रतिनिधीकृत्यास्माभिस्त्वद्भक्तिभावितैः ॥ प्रतिष्ठितेषुलिंगेषुसान्निध्यं भवतोऽस्त्विह॥६२॥श्रुत्वेतितेषांवाक्यानितथास्त्वितिपिनाकिना ॥ प्रोचेऽन्योपिवरोदत्तोज्ञानंवश्चभविष्यति ॥६३॥ पुनःप्रोवाचदेवेशोनिशामयतभो द्विजाः॥ हितंवःकथयाम्यत्रतदनुष्ठीयतांध्रुवम् ॥ ६४ ॥ सेव्योत्तरवहानित्यंलिंगमर्च्यंप्रयत्नतः ॥ दमोदानंदयानित्यंकर्तव्यंमुक्तिकांक्षिभिः ॥ ६५ ॥ इदमेवरहस्यंचकथितंक्षेत्रवासिनाम् ॥ मतिःपरहिताकार्यावाच्यंनोद्वेगकृद्वचः ॥६६॥ मनसापिनकर्तव्यमेनोत्रविजिगीषुणा॥अत्रत्यमक्षयंयस्मात्सुकृतं सुकृतेतरम् ॥ ६७ ॥ अन्यत्रयत्कृतंपापंतत्काश्यांपरिणश्यति ॥ वाराणस्यांकृतंपापमंतर्गेहेप्रणश्यति ॥ ६८ ॥ अंतर्गेहेकृतंपापंपैशाच्यनरकावहम् ॥ पिशाचनरकप्राप्तिर्गच्छत्येवबहिर्यदि ॥ ६९ ॥ नकल्पकोटिभिःकाश्यांकृतंकर्मप्रमृज्यते ॥ किंतुरुद्रपिशाचत्वंजायतेऽत्रायुतत्रयम् ॥ ७० ॥

गच्छत्येवनभवत्येवेत्यर्थः ॥ एतेनोपपातकमेवकाश्यांकृतमंतर्गेहेनश्यतिनमहापातकमितिनिरस्तम् ॥ यद्वा पिशाचनरकप्राप्तिःपुरुषःबहिःकाश्याबहिर्गच्छत्येवपुनर्नायातीत्यर्थः ॥ तदाकाश्यां कृतंयत्पापंकल्पकोटिभिरपितत्पापंतेनभुज्यतेनसमाप्यतेतावताकालेनापितत्पापंननश्यतीत्यर्थः ॥ तद्बहिर्मृतविषयम् ॥ यद्वा अंतर्गेहेकृतपापोयदिबहिर्गच्छतितदातस्यपिशाचनरकप्राप्तिर्भवत्येव ॥ कियत्कालंभवतितत्राह ॥ नकल्पेति ॥ ६९ ॥ तर्ह्यत्रास्थितस्यकागतिस्तत्राह ॥ किंत्विति ॥ काश्यामंतर्गेहे ॥ तर्हिकिमंतर्गेहकृतपापानामिहान्यत्रतनुत्यजांपैशाच्यनरकप्राप्त्योःसाम्यमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनेत्याह ॥ अत्रेति ॥ अत्रकाश्यांमृतानामितिशेषः ॥ अयुतत्रयंत्रिंशत्सहस्रदिव्यवर्षाणि ॥ ७० ॥ ७१ ॥ अथरुद्रपिशाचभोगानंतरम् ॥ तेनज्ञानेन ॥ संप्रांतेसम्यग्भोगांते ॥ तेनज्ञाने ऽथसंप्राप्तइतिक्वचित्पाठः ॥ ७२ ॥ एवंकाश्यांमृतानांपापिनांगतिमभिधायान्यत्रमृतानांतेषांगतिमाह ॥ दुष्कृतानीत्यारभ्यतस्मादित्यतःप्राक्तनेनग्रंथेन ॥ ७३ ॥ ७४ ॥ अनूपप्रायां

वाराणस्यांस्थितोयोवैपातकेषुरतःसदा ॥ योनिंप्राप्यापिपैशाचींवर्षाणामयुतत्रयम् ॥ ७१ ॥ पुनरत्रैवनिवसञ्ज्ञानंप्राप्स्यत्यनुत्तमम् ॥ तेनज्ञानेनथसंप्रांतेमोक्षमाप्स्यत्यनुत्तमम् ॥ ७२ ॥ दुष्कृतानिविधायेहबहिःपंचत्वमागताः ॥ तेषांगतिंप्रवक्ष्यामिशृणुतद्विजसत्तमाः ॥ ७३ ॥ यामाख्यामेगणाः संतिघोराविकृतमूर्तयः ॥ मृषायांतेधमंत्यादौक्षेत्रदुष्कृतकारिणः ॥ ७४ ॥ नयंत्यनूपप्रायांचततःप्राचींदुरासदाम् ॥ वर्षाकालेदुराचारान्पातयंतिमहाजले ॥ ७५ ॥ जलौकाभिःसपक्षाभिर्दंदशूकैर्जलोद्भवैः ॥ दुर्निवारैश्चमशकैर्दश्यंतेतेदिवानिशम् ॥ ७६ ॥ ततोयामैर्हिमर्तौतेनीयंतेऽद्रौहिमालये ॥ अशनावरणैर्हीनाःक्लेश्यंतेतेदिवानिशम् ॥ ७७ ॥ मरुस्थलेततोग्रीष्मेवारिवृक्षविवर्जिते ॥ दिवाकरकरैस्तीव्रैस्ताप्यंतेतेपिपासिताः ॥ ७८ ॥ क्लेशितास्तेगणैरुग्रैर्यातनाभिःसमंततः ॥ इत्थंकालमसंख्यातमानीयंतेततस्त्विह ॥ ७९ ॥ निवेदयंतितेयामाःकालराजांतिकेततः ॥ कालराजोपितान्दृष्ट्वाकर्मसंस्मार्यदुष्कृतम् ॥ ८० ॥ विवस्त्रान्क्षुत्तृषार्तांश्चलग्नपृष्ठोदरत्वचः ॥ अन्यैरुद्रपिशाचैश्चसहसंयोजयत्यपि ॥ ८१ ॥ ततोरुद्रपिशाचास्तेभैरवानुचराः सदा ॥ सहंतेक्लमत्यर्थंक्षुत्तृष्णोग्रत्वसंभवम् ॥ ८२ ॥ आहारंरुधिरोन्मिश्रंतेलभंतेकदाचन ॥ एवंत्र्ययुतसंख्याकंकालंतत्रातिदुःखिताः ॥ ८३ ॥ श्मशानस्तंभमभितोनीयंतेकंठपाशिताः ॥ पिपासिताअपिनतेंऽबुस्पर्शमपिचाप्नुयुः ॥ ८४ ॥ अथसंक्षीणपापास्तेकालभैरवदर्शनात् ॥ इहैवदेहिनोभूत्वामुच्यंतेतेममाज्ञया ॥ ८५ ॥ तस्मान्नकामयेतात्रवाङ्मनःकर्मणाप्यघहम् ॥ शुचौपथिसदास्थेयंमहालाभमभीप्सुभिः ॥ ८६ ॥ नाविमुक्तेमृतःकश्चिन्नरकंयातिकिल्बिषी ॥ ममानुग्रहमासाद्यगच्छत्येवपरांगतिम् ॥ ८७ ॥ अनाशनंयःकुरुतेमद्भक्तइहसुव्रतः ॥ नतस्यपुनरावृत्तिः कल्पकोटिशतैरपि ॥ ८८ ॥

जलप्रायाम् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ यस्मादेवंतस्मादित्युपसंहारः ॥ ८६ ॥ नाविमुक्तइति ॥ अविमुक्तेमृतःकिल्बिषीयत्रकुत्रापीतिशेषः ॥ नरकंनयाति ॥ नरइतिपाठेमरणपर्यंतंनिवसन्नितिशेषः ॥ तत्रहेतुमाह ॥ ममेति ॥ गच्छत्येवपरांगतिमित्युक्तक्रमेणेत्यर्थः ॥ ८७ ॥ अशनमेवआशनंनआशन

CC-0. In Public Domain. Digitization by eGangotri

अशाश्वतमिदंज्ञात्वामानुष्यंबहुकिल्बिषम् ॥ अविमुक्तंसदासेव्यंसंसारभयमोचकम् ॥ ८९ ॥ नान्यत्पश्यामिजंतूनांमुक्त्वावाराणसींपुरीम् ॥ सर्वपाप प्रशमनींप्रायश्चित्तंकलौयुगे ॥ ९० ॥ जन्मांतरसहस्रेषुयत्पापंसमुपार्जितम् ॥ अविमुक्तंप्रविष्टस्यतत्सर्वंव्रजतिक्षयम् ॥ ९१ ॥ जन्मांतरसहस्रेषुयुंजन्यो गीयदाप्नुयात् ॥ तदिहैवपरोमोक्षोमरणादधिगम्यते ॥ ९२ ॥ तिर्यग्योनिगताःसत्त्वायेविमुक्तकृतालयाः ॥ कालेननिधनंप्राप्तास्तेपियांतिपरांगतिम् ॥ ९३ ॥ अविमुक्तंनसेवंतेयेमूढास्तमसावृताः ॥ विण्मूत्ररेतसांमध्येतेवसंतिपुनःपुनः ॥ ९४ ॥ अविमुक्तंसमासाद्ययोलिंगंस्थापयेत्सुधीः ॥ कल्पको टिशतैर्वापिनास्तितस्यपुनर्भवः ॥ ९५ ॥ ग्रहनक्षत्रताराणांकालेनपतनंध्रुवम् ॥ अविमुक्तेमृतानांतुपतनंनैवविद्यते ॥ ९६ ॥ ब्रह्महत्यांनरःकृत्वापश्चात्सं यतमानसः ॥ प्राणांस्त्यजतियःकाश्यांसमुक्तोनात्रसंशयः ॥ ९७ ॥ स्त्रियःपतिव्रतायाश्चममभक्तिसमाहिताः ॥ अविमुक्तेमृताविप्रायांतिताःपरमांग तिम् ॥ ९८ ॥ अत्रोत्क्रमणकालेहंस्वयमेवद्विजोत्तमाः ॥ दिशामितारकंब्रह्मदेहीस्याद्येनतन्मयः ॥ ९९ ॥ मन्मनाममभक्तश्चमयिसर्वार्पितक्रियः ॥ यथामोक्षमिहाप्नोतिनतथान्यत्रकुत्रचित् ॥ १०० ॥ मरणंनिश्चितंज्ञात्वागतिंचासुखरूपिणीम् ॥ चलमागंतुकंसर्वंततःकाशींसमाश्रयेत् ॥ १ ॥ काशीसमाश्रितायैस्तुमनोवाक्कायकर्मभिः ॥ तानत्रनिर्मलधियोनिर्वाणश्रीःसमाश्रयेत् ॥ २ ॥ काशीस्थितैकमपियःप्रीणयेन्न्यायजैर्धनैः ॥ तेनत्रैलो क्यमखिलंप्रीणितंतुमयासह ॥ ३ ॥ यःप्रीणयतिपुण्यात्मानिर्वाणनगरीनरम् ॥ पुमर्थेनास्थितेर्नित्यंब्राह्मणाःप्रीणयामितम् ॥ ४ ॥ दिवोदासो पिराजर्षिःकाशींधर्मेणपालयन् ॥ सदेहोमत्पदंप्राप्तोयतोनपुनरागतिः ॥ ५ ॥ अत्रयोगस्तथाज्ञानंमुक्तिरेकेनजन्मना ॥ अतोविमुक्तमासाद्यनान्यद्गच्छे त्तपोवनम् ॥ ६ ॥ मोक्षंसुदुर्लभंज्ञात्वासंसारंचातिभीषणम् ॥ अश्मनाचरणौहत्वाकालमत्रप्रतीक्षयेत् ॥ ७ ॥ अविमुक्तंपरित्यज्ययदायास्यंतिदुर्धियः ॥ हसिष्यंतितदाभूतान्यन्योन्यकरताडनैः ॥ ८ ॥ प्राप्यवाराणसींपुण्यांसिद्धिक्षेत्रमनुत्तमम् ॥ परिनिष्क्रांतुमन्यत्रकस्यजंतोर्मतिर्भवेत् ॥ ९ ॥ महादानेनचान्यत्रयत्फलंलभ्यतेनरैः ॥ अविमुक्तेतुकाकिण्यांदत्तायांतदवाप्यते ॥ ११० ॥ ॥२७१॥

मार्गाज्जातैः ॥ पाठांतरेप्ययमेवार्थः ॥ ३ ॥ पुमर्थेनस्थितेर्हेतोःपुरुषार्थचतुष्टयेनस्थितेर्वसतेर्निमित्तत्वात् ॥ ब्राह्मणाहेब्राह्मणाः ॥ ४ ॥ ५ ॥ ६ ॥ अश्मनापाषाणेन ॥७॥८॥ ९ ॥ काकिण्यांविं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतिवराटिकायाम् ॥ ११० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ वाडवाब्राह्मणाः ॥ १२० ॥ समार्चिषुःसम्यगर्चयामासुः ॥ २१ ॥ १२२ ॥
॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांचतुःषष्टितमोध्यायः ॥ ६४ ॥ ॥छ॥ पराशरेश्वरादीनांकंदुकेशादिसंयुजाम् ॥ पंचषष्टितमेऽध्यायेमहिमावर्ण्यतेद्भुतः :॥ १ ॥ १ ॥ २ ॥ ३ ॥

एकंसमर्चयेल्लिंगंतपस्तप्येतचापरः ॥ तयोर्मध्येतुसश्रेष्ठोयोलिंगंपूजयेदिह ॥ ११ ॥ तीर्थांतरेगवांकोटिंविधिवद्यःप्रयच्छति ॥ एकाहंयोवसेत्काश्यांकाशीवासीतयोर्वरः ॥ ॥ १२ ॥ अन्यत्रब्राह्मणानांतुकोटिंसंभोज्ययत्फलम् ॥ वाराणस्यांतुचैकेनभोजितेनतदाप्यते ॥ १३ ॥ सन्निहत्यांकुरुक्षेत्रेराहुग्रस्तेदिवाकरे ॥ तुलापुरुषदानेनकाशीभिक्षासमाभवेत् ॥ १४ ॥ ममेहपरमंज्योतिरापातालाद्व्यवस्थितम् ॥ अतीत्यसप्तलोकादीननंतंलिंगरूपधृक् ॥ १५ ॥ पृथिव्यंतेपियेलिंगमविमुक्तंस्मरंतिमे ॥ कलुषैस्तेविमुच्यंतेमहद्भिरितिनिश्चितम् ॥ १६ ॥ अस्मिन्क्षेत्रेतुयेनाहंदृष्टःस्पृष्टःसमर्चितः ॥ संप्राप्यतारकंज्ञानंनसभूयोभिजायते ॥ १७ ॥ योमामिहसमभ्यर्च्यम्रियतेन्यत्रकुत्रचित् ॥ जन्मांतरेपिमांप्राप्यसविमुक्तोभविष्यति ॥१८॥ इत्युक्त्वाक्षेत्रमाहात्म्यंद्विजानामग्रतोहरः ॥ पश्यतामेवतेषांतुतत्रैवांतर्हितोभवत् ॥ १९ ॥ तेपिसाक्षाद्विरूपाक्षंप्रत्यक्षीकृत्यवाडवाः ॥ प्रहृष्टमनसोऽत्यंतंप्रययुःस्वंस्वमाश्रयम् ॥ १२० ॥ शंभोर्वाक्यंविनिश्चित्यसर्वज्ञस्यकृपानिधेः ॥ त्यक्त्वाकार्यांतरंविप्रालिंगान्येवसमार्चिषुः ॥ २१ ॥ ॥ स्कंदउवाच ॥ ॥ पठित्वापाठयित्वाचरहस्याख्यानमुत्तमम् ॥ श्रद्धालुःपातकैर्मुक्तःशिवलोकेमहीयते ॥ १२२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धे क्षेत्ररहस्यकथनंनामचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ स्कंदउवाच ॥ ॥ ज्येष्ठेश्वरस्यपरितोयानिलिंगानिकुंभज ॥ तानिपंचसहस्राणिमुनीनांसिद्धिदान्यलम् ॥ १ ॥ पराशरेश्वरंलिंगंज्येष्ठेशादुत्तरेमहत् ॥ तस्यदर्शनमात्रेणनिर्मलंज्ञानमाप्यते ॥ २ ॥ तत्रैवसिद्धिदंलिंगंमांडव्येश्वरसंज्ञितम् ॥ नतस्यदर्शनाज्जातुदुर्बुद्धिंप्राप्नुयान्नरः ॥ ३ ॥ लिंगंचशंकरेशाख्यंतत्रैवशुभदंसदा ॥ भृगुनारायणस्तत्रभक्तानांसर्वसिद्धिदः ॥ ४ ॥ जाबालीश्वरसंज्ञंचालिंगंतत्रातिसिद्धिदम् ॥ तस्यसंदर्शनाज्जातुनजंतुर्दुर्गतिंव्रजेत् ॥ ५ ॥ सुमंतुमुनिनाश्रेष्ठस्तत्रादित्यःप्रतिष्ठितः ॥ तस्यसंदर्शनादेवकुष्ठव्याधिःप्रशाम्यति ॥ ६ ॥ भैरवीभीषणानामतत्रभीषणरूपिणी ॥ क्षेत्रस्यभीषणंसर्वंनाशयेद्भावतोर्चिता ॥ ७ ॥ तत्रोपजंघनेर्लिंगंकर्मबंधविमोक्षणम् ॥ नृभिःसंसेवितंभक्त्याषण्मासात्सिद्धिदंपरम् ॥८॥ भारद्वाजेश्वरंलिंगंलिंगमाद्रीश्वरंवरम् ॥ एकत्रसंस्थितेद्वेतुद्रष्टव्येसुकृतात्मना ॥९॥ अरुणिस्थापितंलिंगंतत्रैवकलशोद्भव ॥ तस्यलिंगस्यसेवातःसर्वामृद्धिमवाप्नुयात् ॥ १० ॥ लिंगंवाजसनेयाख्यंतत्रास्त्यतिमनोहरम् ॥ तस्यसंदर्शनात्पुंसांवाजपेयफलंभवेत् ॥ ११ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ लिंगमाद्रीश्वरमिति ॥ झिंटीश्वरमितिकचित् ॥ आदीश्वरमितिचान्यत्र ॥ ९ ॥ १० ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥१२॥१३॥१४रूपितंस्थापितम्॥१५॥१६॥१७॥१८॥१९॥ स्मरणादित्यादीनांपंचश्लोकानामेतेषांशुभलिंगानामितिद्वितीयेनान्वयः ॥२०॥२१॥२२॥ स्वैरमिति॥महेशितुःशिवाशक्तिरूपापार्वतीत्यर्थः॥कंदुकलीलयागेंदुकक्रीडया॥चिक्रीडविहृतवतीत्यर्थः॥२३॥ किंकुर्वती ॥ उदूर्ध्वमंचंतिगच्छंतीत्युदंचंतिअधोऽचंतीतिन्यंचंतिउदंचंतिचतानिन्यंचंतिचेत्युदंचन्न्यचंतिचतानिअंगानिचोतिउदंचन्न्यंचदंगानितेषांलाघवंलघुत्वंलघिमानंपरितन्वतीपरितोविस्तारयंती॥मृडानीविदलोत्पलाभ्यांदानवाभ्यांददृशेइतिपंचमेनान्वयः॥मृडानींविशिनाष्टि निःश्वासेतित्रयेण॥ निःश्वासामोदेनमिलितैर्भ्रमरै

कण्वेश्वरंशुभंलिंगंलिंगंकात्यायनेश्वरम् ॥ वामदेवेश्वरंलिंगमौतथ्येश्वरमेवच ॥ १२ ॥ हारीतेश्वरसंज्ञंचलिंगंवैगालवेश्वरम् ॥ कुंभोलिंगंमहापुण्यंतथावैकौसुमेश्वरम् ॥ १३ ॥ अग्निवर्णेश्वरंचैवनैध्रुवेश्वरमेवच ॥ वत्सेश्वरंमहालिंगंपर्णादेश्वरमेवच ॥ १४ ॥ सक्तुप्रस्थेश्वरंलिंगंकणादेशंतथैवच ॥ अन्यंतत्रमहालिंगंमांडूकायनिरूपितम् ॥ १५ ॥ बाभ्रवेयेश्वरंलिंगंशिलावृत्तीश्वरंतथा ॥ च्यवनेश्वरलिंगंचशालंकायनकेश्वरम् ॥ १६ ॥ कलिंदमेश्वरंलिंगंलिंगमक्रोधनेश्वरम् ॥ लिंगंकपोतवृत्तीशंकंकेशंकुंतलेश्वरम् ॥ १७ ॥ कंठेश्वरंकहोलेशंलिंगंतुंबुरुपूजितम् ॥ मतंगेशंमरुत्तेशंमगधेयेश्वरंतथा ॥ १८ ॥ जातूकर्णेश्वरंलिंगंजंबुकेश्वरमेवच ॥ जारुधीशंजलेशंचजाल्मेशंजालकेश्वरम् ॥ १९ ॥ एवमादीनि लिंगानिअयुतार्धानिकुंभज ॥ स्मरणाद्दर्शनात्स्पर्शादर्चनान्नमनात्स्तुतेः ॥ २० ॥ नजातुजायतेजंतोःकलुषस्यसमुद्भवः ॥ एतेषांशुभलिंगानांज्येष्ठस्थानेतिपावने ॥ २१ ॥

॥ स्कंदउवाच ॥ ॥ एकदातत्रयद्वृत्तंज्येष्ठस्थानेमहामुने ॥ तदहंतेप्रवक्ष्यामिशृणुष्वाघविनाशनम् ॥ २२ ॥ स्वैरंविहरतस्तत्रज्येष्ठस्थानेमहेशितुः ॥ कौतुकेनैवचिक्रीडशिवाकंदुकलीलया ॥ २३ ॥ उदंचन्न्यंचदंगानांलाघवंपरितन्वती ॥ निःश्वासामोदमुदितभ्रमराकुलितेक्षणा ॥ २४ ॥ भ्रश्यद्धम्मिल्लसन्माल्यस्थपुटीकृतभूमिका ॥ स्विद्यत्कपोलपत्रालीस्रवदंबुकणोज्ज्वला ॥ २५ ॥ स्फुटच्चोलांशुकपथनिर्यदंगप्रभावृता ॥ उल्लसत्कंदुकास्फालातिशोणितकरांबुजा ॥ २६ ॥ कंदुकानुगसद्दृष्टिनर्तितभ्रूलतांचला ॥ मृडानीकिलखेलंतीददृशेजगदंबिका ॥ २७ ॥ अंतरिक्षचराभ्यांचदितिजाभ्यांमनोहरा ॥ कटाक्षिताभ्यामिववैसमुपस्थितमृत्युना ॥ २८ ॥ विदलोत्पलसंज्ञाभ्यांदृप्ताभ्यांवरतोविधेः ॥ तृणीकृतत्रिजगतीपुरुषाभ्यांस्वदोर्बलात् ॥ २९ ॥ देवींपरिजिहीर्षूतौविषमेषुप्रपीडितौ ॥ दिवोवतेरतुःक्षिप्रंमायांस्वीकृत्यशांबरीम् ॥ ३० ॥

राकुलितेईक्षणेयस्याःसा ॥२४॥ भ्रश्यद्भिर्धम्मिल्लसन्माल्यैःस्थपुटीकृताआच्छादिताभूमिर्ययासातथा ॥ स्विद्यद्भ्यांस्वेदमुद्गिरद्भ्यांकपोलाभ्यांपत्राल्यास्रवद्भिरंबुकणैरुज्ज्वलादेदीप्यमाना ॥२५॥ स्फुटतोःसंचलतोश्चोलांशुकयोःकंचुकपरिधानवस्त्रयोरत्यंतसूक्ष्मयोःपंथानश्छिद्राणितेषुनिर्यंत्योनिर्गच्छंत्योयाअंगप्रभास्ताभिरावृताव्याप्ता ॥ उल्लसतऊर्ध्वंगच्छतःकंदुकस्ययआस्फालःस्फालनंकरेपतनंतेनातिशोणितंकरांबुजंयस्याःसातथा ॥ २६ ॥ कंदुकानुगायासतीदृष्टिस्तयानर्तितंभ्रूलतायाअंचलंप्रांतभागोययासा ॥ २७ ॥ २८ ॥ २९ ॥ विषमेषुःकामः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३१॥३२॥३३॥३४॥ वृंतात्प्रसववंधनात् ॥ फलेतालफले ॥ दंभोलिनावज्रेण ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ दुंदुभेरिवनिर्ह्रादः

धृत्वापारषदींमूर्तिमायातावंबिकांतिकम् ॥ तावत्यंतंसुदुर्वृत्तावतिचंचलमानसौ ॥ ३१ ॥ सर्वज्ञेनपरिज्ञातौचांचल्याल्लोचनोद्भवात् ॥ कटाक्षिताथदेवे नदुर्गादुर्गारिघातिनी ॥ ३२ ॥ विज्ञायनेत्रसंज्ञांतुसर्वज्ञार्धशरीरिणी ॥ तेनैवकंदुकेनाथयुगपन्निजघानतौ ॥ ३३ ॥ महाबलौमहादेव्याकंदुकेनसमाहतौ॥ परिभ्रम्यपरिभ्रम्यतौदुष्टौविनिपेततुः ॥ ३४ ॥ वृंतादिवफलेपक्केतालादनिललोलिते ॥ दंभोलिनापरिहतेशृंगेइवमहागिरेः ॥ ३५ ॥ तौनिपात्यमहा दैत्यावकार्यकरणोद्यतौ ॥ ततःपरिणतिंयातोलिंगरूपेणकंदुकः ॥३६॥ कंदुकेश्वरसंज्ञंचतल्लिंगमभवत्तदा ॥ ज्येष्ठेश्वरसमीपेतुसर्वदुष्टनिवारणम् ॥३७॥ कंदुकेशसमुत्पत्तिंयःश्रोष्यतिमुदान्वितः ॥ पूजयिष्यतियोभक्तस्तस्यदुःखभयंकुतः ॥ ३८ ॥ कंदुकेश्वरभक्तानांमानवानांनिरेनसाम् ॥ योगक्षेमं सदाकुर्याद्भवानीभयनाशिनी ॥ ३९ ॥ मृडानीतस्यालिंगस्यपूजांकुर्यात्सदैवहि ॥ तत्रैवदेव्याःसान्निध्यंपार्वत्याभक्तसिद्धिदम् ॥ ४० ॥ कंदुकेशंमहा लिंगंकाश्यांयैर्नसमर्चितम् ॥ कथंतेषांभवानीशौस्यातांसर्वेप्सितप्रदौ ॥ ४१ ॥ द्रष्टव्यंचप्रयत्नेनतल्लिंगंकंदुकेश्वरम् ॥ सर्वोपसर्गसंघातविघातकरणं परम् ॥ ४२ ॥ कंदुकेश्वरनामापिश्रुत्वावृजिनसंततिः ॥ क्षिप्रंक्षयमवाप्नोतितमःप्राप्योष्णगुंयथा ॥ ४३ ॥ ॥ स्कंदउवाच ॥ ॥ संशृणुष्वमहाभाग ज्येष्ठेश्वरसमीपतः ॥ यद्वृत्तांतमभूद्विप्रपरमाश्चर्यकृद्ध्रुवम् ॥ ४४ ॥ दंडखातेमहातीर्थेदेवर्षिपितृतृप्तिदे ॥ तप्यमानेषुविप्रेषुनिष्कामंपरमंतपः ॥ ४५ ॥ दैत्योदुंदुभिनिर्ह्रादोदुष्टःप्रह्लादमातुलः ॥ देवाःकथंसुजेयाःस्युरित्युपायमचिंतयत् ॥ ४६ ॥ किंबलाश्चकिमाहाराःकिमाधाराहिदेवताः ॥ विचार्य बहुशोदैत्यस्तत्त्वंविज्ञायनिश्चितम् ॥ ४७ ॥ अवश्यमग्रजन्मानोहेतवोत्रविचारतः ॥ ब्राह्मणान्हंतुमसकृत्कृतवानुद्यमंततः ॥ ४८ ॥ यतःक्रतुभुजोदेवाः क्रतवोवेदसंभवाः ॥ तेवेदाब्राह्मणाधीनास्ततोदेवबलंद्विजाः ॥ ४९ ॥ निश्चितंब्राह्मणाधाराःसर्वेवेदाःसवासवाः ॥ गीर्वाणाब्राह्मणबलानात्रकार्याविचा रणा ॥ ५० ॥ ब्राह्मणायदिनष्टाःस्युर्वेदानष्टास्ततःस्वयम् ॥ आम्नायेषुप्रणष्टेषुविनष्टाःशततंतवः ॥ ५१ ॥ यज्ञेषुनाशंगच्छत्सुहृताहारास्ततःसुराः ॥ निर्बलाःसुखजेयाःस्युर्जितेषुत्रिदशेष्वथ ॥ ५२ ॥ अहमेवभविष्यामिमान्यस्त्रिजगतीपतिः ॥ आहरिष्यामिदेवानामक्षयाःसर्वसंपदः ॥ ५३ ॥ निर्वे क्ष्यामिसुखान्येवराज्येनिहतकंटके ॥ इतिनिश्चित्यदुर्बुद्धिःपुनश्चिंतितवान्मुने ॥ ५४ ॥ द्विजाःक्वसंतिभूयांसोब्रह्मतेजोतिबृंहिताः ॥ श्रुत्यध्ययनसं पन्नास्तपोबलसमन्विताः ॥ ५५ ॥ भूयसांब्राह्मणानांतुस्थानंवाराणसीभवेत् ॥ तानादावुपसंहृत्ययामितीर्थांतरंततः ॥ ५६ ॥ यत्रयत्रहितीर्थेषुयत्रय त्राश्रमेषुच ॥ संतिसर्वेऽग्रजन्मानस्तेमयाद्याःसमंततः ॥ ५७ ॥

शब्दोयस्यसदुन्दुभिनिर्ह्रादएतन्नामा ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ शततंतवोयागाः ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥५५ ॥ ५६ ॥ अद्याभक्ष्याः ॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ काशींप्राप्य सर्वभूतरक्षैवोचिताऽयंतुकाशींप्राप्यापिद्विजानवधीदित्यपिशब्दार्थः ॥ तत्रहेतुद्वयमाह ॥ मतिंकृत्वाकुलोचितांदुर्वृत्तइतिच ॥ ५८ ॥ ५९ ॥ यादोरूपीकुंभीरादिरूपी ॥ ६० ॥ ॥ ६१ ॥ प्रवेशंनिर्गमंचस्वात्मनः ॥ उटजानांचेतिचकारेणमठादयोगृह्यंते ॥ ६२ ॥ कीकसमस्थि ॥ ६३ ॥ एकोमुख्यः ॥ ६४ ॥ ६५ ॥ कृतोऽस्त्रमन्त्रेणअस्त्रायफट्इतिमन्त्रेणअस्त्ररूपेणमंत्रेणवान्यासोयेनतंकृतास्त्रमन्त्रविन्यासम् ॥ ६६ ॥ ६७ ॥ आदित्सतिआदातुमिच्छतिभक्तमितिशेषः ॥ ६८ ॥ ६९ ॥ ७० ॥ पंचास्यंव्याघ्रंमुखवत्करचरणाअप्यस्यनरतुरगादि

इतिदुंदुभिनिर्ह्रादोमतिंकृत्वाकुलोचिताम् ॥ प्राप्यापिकाशींदुर्वृत्तोमायावीन्यवधीद्द्विजान् ॥ ५८ ॥ समित्कुशान्समादातुंयत्रयांतिद्विजोत्तमाः ॥ अरण्येतत्रतान्सर्वान्सभक्षयतिदुर्मतिः ॥ ५९॥ यथाकोपिनवेत्त्येवतथाच्छन्नोऽभवत्पुनः ॥ वनेवनेचरोभूत्वायादोरूपीजलाशये ॥ ६० ॥ अदृश्यरूपीमायावीदेवानामप्यगोचरः ॥ दिवाध्यानपरस्तिष्ठेन्मुनिवन्मुनिमध्यगः ॥ ६१ ॥ प्रवेशमुटजानांचनिर्गमंचविलोकयन् ॥ यामिन्यांव्याघ्ररूपेणब्राह्मणान्भक्षयेद्बहून् ॥ ६२ ॥ निःशब्दमेवनयतिनत्यजेदपिकीकसम् ॥ इत्थंनिपातिताविप्रास्तेनदुष्टेनभूरिशः ॥ ६३ ॥ एकदाशिवरात्रौतुभक्तस्त्वेकोनिजोटजे ॥ सपर्यांदेवदेवस्यकृत्वाध्यानस्थितोभवत् ॥ ६४ ॥ सचदुंदुभिनिर्ह्रादोदैत्येंद्रोबलदर्पितः ॥ व्याघ्ररूपंसमास्थायतमादातुंमतिंदधे ॥६५॥ तंभक्तंध्यानमापन्नंदृढचित्तंशिवेक्षणे ॥ कृतास्त्रमंत्रविन्यासंतंक्रांतुमशकन्नसः ॥ ६६ ॥ अथसर्वगतःशंभुर्ज्ञात्वातस्याशयंहरः ॥ दैत्यस्यदुष्टरूपस्यवधायविदधेधियम् ॥ ६७ ॥ यावदादित्सतिव्याघ्रस्तावदाविरभूद्धरः ॥ जगद्रक्षामणिस्त्र्यक्षोभक्तरक्षणदक्षधीः ॥ ६८ ॥ रुद्रमायांतमालोक्यतद्भक्तार्चितलिंगतः ॥ दैत्यस्तेनैवरूपेणववृधेभूधरोपमः ॥ ६९ ॥ सावज्ञमथसर्वज्ञंयावत्पश्यतिदानवः ॥ तावदायांतमादायकक्षायंत्रेन्यपीडयत् ॥ ७० ॥ पंचास्यस्त्वथपंचास्यंमुष्ट्यामूर्धन्यताडयत् ॥ सचतेनैवरूपेणकक्षानिष्पेषणेनच ॥७१ ॥ अत्यार्तमरटद्व्याघ्रोरोदसीपरिपूरयन् ॥ तेननादेनसहसासंप्रवेपितमानसाः ॥७२॥ तपोधनाःसमाजग्मुर्निशिशब्दानुसारतः ॥ तत्रेश्वरंसमालोक्यकक्षीकृतमृगेश्वरम् ॥७३॥ तुष्टुवुःप्रणताःसर्वेशर्वंजयजयाक्षरैः ॥ परित्राताजगत्रातःप्रत्यूहाद्दारुणादितः ॥ ७४ ॥ अनुग्रहंकुरुष्वेशतिष्ठात्रैवजगद्गुरो ॥ अनेनैवहिरूपेणव्याघ्रेशइतिनामतः ॥ ७५ ॥ कुरुरक्षांमहादेवज्येष्ठस्थानस्यसर्वदा ॥ अन्येभ्योप्युपसर्गेभ्योरक्षनस्तीर्थवासिनः ॥ ७६ ॥ इतिश्रुत्वावचस्तेषांदेवश्चंद्रविभूषणः ॥ तथेत्युक्त्वापुनःप्राहशृणुध्वंद्विजपुंगवाः ॥ ७७ ॥ योमामनेनरूपेणद्रक्ष्यतिश्रद्धयात्रवै ॥ तस्योपसर्गसंघातंघातयिष्याम्यसंशयम् ॥ ७८ ॥

विदारणसमर्थाइतितैःसहपंचास्यइतिव्युत्पत्तेः ॥ सचतेनैवरूपेणव्याघ्ररूपेणअत्यार्तंयथास्यात्तथाअरटच्छब्दंकृतवान् इत्यन्वयः ॥ सतेनमुष्टिघातेनेतिकश्चित् ॥७१॥७२॥७३ ॥ प्रत्यूहान्मृत्योः ॥ ॥ ७४ ॥ नोऽस्मान् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७९॥ ८० ॥ ८१ ॥ ८२ ॥ किंकरायमदूताः ॥ यामादेवविशेषागणावा ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांपंचषष्टितमोऽध्यायः ॥ ६५ ॥
षड्भिःषष्टितमेध्यायेसर्वाश्चर्यमनोहरे ॥ शैलेश्वरादिलिंगानांनिर्णीतिर्वर्ण्यतेस्फुटा ॥ १ ॥ ज्येष्ठेश्वरस्यपरितोयानिलिंगानीत्युक्तंतत्रातीतेऽध्यायेकानिचिदुक्त्वाअवशिष्टानिवक्तुंप्रक्रमते ॥ ज्येष्ठे

एतल्लिंगंसमभ्यर्च्ययोयातिपथिमानवः ॥ चौरव्याघ्रादिसंभूतंभयंतस्यकुतोभवेत् ॥ ७९ ॥ मच्चरित्रमिदंश्रुत्वास्मृत्वालिंगमिदंहृदि ॥ संग्रामेप्रविशन्म त्योंजयमाप्नोतिनान्यथा ॥८०॥ इत्युक्त्वादेवदेवशस्तस्मिँल्लिंगेलयंययौ ॥ सविस्मयास्ततोविप्राःप्रातर्यातायथागतम् ॥ ८१ ॥ ॥ स्कन्द उवाच ॥ ॥ तदाप्रभृतिकुंभोत्थलिंगंव्याघ्रेश्वराभिधम् ॥ ज्येष्ठेशादुत्तरेभागेदृष्टंस्पृष्टंभयापहम् ॥ ८२ ॥ व्याघ्रेश्वरस्ययेभक्तास्तेभ्योबिभ्यतिकिंकराः ॥ यामाअपि महाक्रूराजयजीवेतिवादिनः ॥ ८३ ॥ पराशरेश्वरादीनांलिंगानामिहसंभवम् ॥ श्रुत्वानरोनलिप्येतमहापातककर्दमैः ॥ ८४ ॥ कंदुकेशसमुत्पत्तिंव्याघ्रे शाविर्भवंतथा ॥ समाकर्ण्यनरोजातुनोपसर्गैःप्रदूयते ॥ ८५ ॥ उटजेश्वरलिंगंतुव्याघ्रेशात्पश्चिमेस्थितम् ॥ भक्तरक्षार्थमुद्भूतंस्यात्समभ्यर्च्यनिर्भयः ॥ ८६ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डउत्तरार्धेपराशरेश्वरादिलिंगसंभवोनामपंचषष्टितमोऽध्यायः ॥ ६५ ॥

॥ स्कन्दउवाच ॥ ॥ ज्येष्ठेश्वरस्यपरितोलिंगान्यन्यानियानितु ॥ तानितेकथयिष्यामिशृणुत्रातापितापन ॥ १ ॥ ज्येष्ठेशाद्दक्षिणेभागेलिंगमप्सरसां शुभम् ॥ तत्रैवाप्सरसःकूपःसौभाग्योदकसंज्ञकः ॥ २ ॥ तत्कूपजलसुस्नातोविलोक्याप्सरसेश्वरम् ॥ नदौर्भाग्यमवाप्नोतिनारीवापुरुषोथवा ॥ ३ ॥ तत्रैवकुक्कुटेशाख्यंलिंगंवापीसमीपगम् ॥ तस्यपूजनतःपुंसांकुटुंबंपरिवर्धते ॥ ४ ॥ पितामहेश्वरंलिंगंज्येष्ठवापीतटेशुभम् ॥ तत्रश्राद्धंनरःकृत्वापितॄणां मुदमर्पयेत् ॥ ५ ॥ पितामहेशान्नैर्ऋत्यांपूजनीयंप्रयत्नतः ॥ गदाधरेश्वरंलिंगंपितॄणांपरितृप्तिदम् ॥ ६ ॥ दिशिपुण्यजनाख्यायांलिंगाज्ज्येष्ठेश्वरान्मुने ॥ वासुकीश्वरसंज्ञंचलिंगमर्च्यंसमंततः ॥ ७ ॥ तत्रवासुकिकुंडेचस्नानदानादिकाःक्रियाः ॥ सर्पभीतिहराःपुंसांवासुकीशप्रभावतः ॥ ८ ॥ यःस्नातो नागपंचम्यांकुंडेवासुकिसंज्ञिते ॥ नतस्यविषसंसर्गोभवेत्सर्पसमुद्भवः ॥ ९ ॥ कर्तव्यानागपञ्चम्यांयात्रावर्षासुतत्रवै ॥ नागाःप्रसन्नाजायंतेकुलेतस्या पिसर्वदा ॥ १० ॥ तत्कुण्डात्पश्चिमेभागेलिंगंवैतक्षकेश्वरम् ॥ पूजनीयंप्रयत्नेनभक्तानांसर्वसिद्धिदम् ॥ ११ ॥ मुनेतस्योत्तरेभागेकुण्डंतक्षकसंज्ञितम् ॥ कृतोदकक्रियस्तत्रनसर्पैरभिभूयते ॥१२॥ तत्कुण्डादुत्तरेभागेक्षेत्रक्षेमकरःसदा ॥ भक्तानांसाध्वसध्वंसीकपालीनामभैरवः ॥१३॥ भैरवस्यमहाक्षेत्रंतद्वैसाध कसिद्धिदम् ॥ तत्रसंसाधिताविद्याःषण्मासात्सिद्धिमाप्नुयुः ॥१४॥ तत्रचण्डीमहामुण्डाभक्तविघ्नोपशांतिदा ॥ बलिपूजोपहाराद्यैःपूज्यास्वाभीष्टसिद्धये ॥१५॥

श्वरस्येति ॥ १ ॥ २ ॥ अप्सरसेश्वरमित्यदन्तत्वमार्षम् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ महन्मुण्डंयस्याःसा ॥ महातुण्डेतिक्वचित् ॥१५॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ पुरूरवेश्वरमितिसलोपआर्षः ॥ २७ ॥ २८ ॥ २९ ॥ पूज्येष्टसिद्ध्येपूज्यापूजितासती इष्टसिद्ध्येभवतीत्यर्थः ॥ ३० ॥ हुंडनेत्यत्रकुंडनेतिक्वचित् ॥ विधत्तःकुरुतइत्यर्थः ॥ ३१ ॥ ३२ ॥ शैलेशोत्पत्तिंकथयिष्यन्नगस्तिंसावधानयति ॥ इल्वलेति ॥ ३३ ॥ अद्रींद्रंहिमवंतम् ॥

तस्यायात्रांतुयःकुर्यान्महाष्टम्यांनरोत्तमः ॥ यशस्वीपुत्रपौत्राढ्योलक्ष्मीवाँश्चापिजायते ॥ १६ ॥ महाकुण्डात्प्रतीच्यांतुचतुःसागरवापिका ॥ तस्यां स्नातोभवेत्स्नातःसागरेषुचतुर्ष्वपि ॥ १७ ॥ महाप्रसिद्धंतत्स्थानंचतुःसागरसंज्ञितम् ॥ चत्वारितत्रलिंगानिसागरैःस्थापितानिच ॥ १८ ॥ तस्यावाप्या श्चतुर्दिक्षुपूजितानिदहंत्यघम् ॥ तदुत्तरेमहालिंगंवृषभेश्वरसंज्ञितम् ॥ १९ ॥ हरस्यवृषभेणैवस्थापितंतत्स्वभक्तितः ॥ तस्यदर्शनतःपुंसांषण्मासान्मु क्तिरुद्भवेत् ॥ २० ॥ वृषेश्वरादुदीच्यांतुगंधर्वेश्वरसंज्ञितम् ॥ गंधर्वकुण्डंतत्प्राच्यांतत्रस्नात्वानरोत्तमः ॥ २१ ॥ गंधर्वेश्वरमभ्यर्च्यदत्त्वादानानिश क्तितः ॥ सन्तर्प्यपितृदेवांश्चगंधर्वैःसहमोदते ॥ २२ ॥ कर्कोटनामानागोस्तिगन्धर्वेश्वरपूर्वतः ॥ तत्रकर्कोटवापीचलिंगंकर्कोटकेश्वरम् ॥ २३ ॥ तस्यांवाप्यांनरःस्नात्वाकर्कोटेशंसमर्च्यच ॥ कर्कोटनागमाराध्यनागलोकेमहीयते ॥ २४ ॥ कर्कोटनागोयैर्दृष्टस्तद्वाप्यांविहितोदकैः ॥ क्रमतेनविषंतेषां देहेस्थावरजंगमम् ॥ २५ ॥ कर्कोटेशात्प्रतीच्यांतुधुंधुमारीश्वराभिधम् ॥ तल्लिंगाभ्यर्चनात्पुंसांनभवेद्वैरिजंभयम् ॥ २६ ॥ पुरूरवेश्वरंलिंगंतदुदीच्यां व्यवस्थितम् ॥ द्रष्टव्यंतत्प्रयत्नेनचतुर्वर्गफलप्रदम् ॥ २७ ॥ दिग्गजेनार्चितंलिंगंसुप्रतीकेनतत्पुरः ॥ सुप्रतीकेश्वरंनाम्नायशोबलविवर्धनम् ॥ २८ ॥ सरश्चसुप्रतीकाख्यंतत्पुरोभासतेमहत् ॥ तत्रस्नात्वाचतल्लिंगंदृष्ट्वादिक्पतितांलभेत् ॥ २९ ॥ तत्रास्त्येकामहागौरीनाम्नाविजयभैरवी ॥ रक्षार्थंसुतरद्वा रिस्थितापूज्येष्टसिद्धये ॥ ३० ॥ वरणायास्तटेरम्येगणौहुंडनमुंडनौ ॥ क्षेत्ररक्षांविधत्तस्तौविघ्नस्तंभनकारकौ ॥ ३१ ॥ तौद्रष्टव्यौप्रयत्नेनक्षेत्रनिर्विघ्न हेतवे ॥ हुंडनेशंमुडनेशंतत्रदृष्ट्वासुखीभवेत् ॥ ३२ ॥ स्कंदउवाच ॥ ॥ इल्वलारेकथामेकांशृणुष्वावहितोभव ॥ वरणायास्तटेरम्येयद्वृत्तंपूर्वंमुत्तमम् ॥ ३३ ॥ एकदाद्रींद्रमालोक्यमेनासंहृष्टमानसम् ॥ उमांसंस्मृत्यनिःश्वस्यप्रोवाचेतिपतिव्रता ॥ ३४ ॥ ॥ मेनोवाच ॥ ॥ आर्यपुत्रनजानामिप्रवृ त्तिमपिकांचन ॥ विवाहसमयादूर्ध्वंतस्यागौर्यागिरीश्वर ॥ ३५ ॥ सवृषेंद्रगतिर्देवोभस्मोरगविभूषणः ॥ महापितृवनावासोदिग्वासाःक्वास्तिसंप्रति ॥ ३६ ॥ अष्टौयामातरोदृष्टाब्राह्मीप्रभृतयःप्रिय ॥ स्वस्वरूपास्तामन्येऽहंबालिकाःकष्टहेतवः ॥ ३७ ॥

मेनापितॄणांमानसीकन्याहिमवतोभार्या ॥ तथाचहरिवंशे ॥ सनातनलोकस्थान्पितृगणानुपक्रम्य एतेषांमानसीकन्यामेनानाममहागिरेः ॥ पत्नीहिमवतःश्रेष्ठायस्यांमैनाकउच्यतेइति ॥ ३४ ॥ ॥ ३५ ॥ ३६ ॥ गौरीविरहसंतापेनाह ॥ अष्टौयाइति ॥ हेप्रियस्वामिन्अष्टौयाब्राह्मीप्रभृतयोब्राह्मीप्रमुखामातरोदृष्टाः ॥ ताश्चवक्ष्यति ॥ ब्रह्माणीवैष्णवीरौद्रीवाराहीनारसिंहिका ॥ कौमारीचापिमाहें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रीचामुंडाचैवचंडिकेति ॥ स्वस्वरूपाःस्वःसुखंस्वरूपंयासांताः ॥ सुखस्वरूपिण्यइत्यर्थः ॥ इत्यहंमन्ये ॥ अन्यावालिकाःकन्यकास्ताःपित्रादीनांदुःखहेतवोदुःखदाइत्यर्थः ॥ तथाचप्राकृतं वाक्यम् ॥ जातेतिकन्याप्रथमेऽतिशोकःकस्मैददामीतिमहान्वितर्कः ॥ दत्तायदातद्गमनेतिकष्टंकन्यापितॄणांखलुदुःखहेतुरिति ॥ यद्वा अष्टौयामातरोमयादृष्टास्तावालिकायागौर्याःकष्टहेतवइत्यहं मन्ये ॥ तत्रहेतुः ॥ सुस्वरूपाःअतीवरूपवत्यः ॥ तद्रूपधर्षितःशंकरउमांनाद्रियेतेतिशंकार्थः ॥ दुराधर्षाइतिक्वचित्पाठः ॥३७॥ प्रकृतायाउमायादुःखहेतुत्वंप्रकटयंतीअर्थाज्जगदीश्वरंस्तौत्यर्धेन ॥ तस्यशूलिनःकोप्यन्योनास्तीत्यन्वयः ॥ अनेनसजातीयभेदाभावोध्वनितः॥ एकस्येतिविजातीयभेदाभावः॥ अद्वितीयस्येतिस्वगतभेदाभावश्च ॥ तथाचश्रुतिः॥ एकमेवाद्वितीयंब्रह्मेति ॥ पक्षांतरेऽन्यो नास्तीत्यत्रहेतुमाह॥ एकस्येति ॥अस्मिन्ग्रामेएकएवपुरुषइतिवदेकशब्दस्यमुख्यार्थत्वमित्याशंकायामाह ॥ अद्वितीयस्येति ॥ तदुदंतप्रवृत्त्यैतस्यशूलिनोजामातुर्ज्ञानाय॥जामातुर्वृत्तांतज्ञानेकन्यकाया अपिवृत्तांतोज्ञातएवेत्याशयः ॥३८॥ सास्त्रमस्रसहितंयथाभवतितथासाक्रंदमित्येतत् ॥ उमावात्सल्यसन्नगीःउमायावात्सल्येनस्नेहेनसन्नाअवरुद्धागद्गदागीर्यस्यसतथा ॥ ३९ ॥ प्रेमस्नेहोबाधतेमा मितिशेषः॥ कथंभूतंमाम् ॥ तदहृष्ट्यग्निदूषितंतस्याउमायाअदृष्टिरदर्शनंसैवाग्निस्तेनदूषितंसंतापितम्॥४०॥पद्मसद्मालक्ष्मीः ॥ सद्यःपद्मेतिक्वचित्पाठः ॥ सद्यःपद्मापिनिर्ययावितिपाठेअपिशब्दाद्गृह

तस्यैकस्यनकोप्यन्योस्त्यद्वितीयस्यशूलिनः ॥ तदुदंतप्रवृत्त्यैचक्रियतामुद्यमोविभो ॥ ३८ ॥ तस्याःप्रियायावाक्येनतदपत्यप्रियोगिरिः ॥ उवाचव चनंसास्रमुमावात्सल्यसन्नगीः ॥३९॥ ॥ गिरिराजउवाच ॥ ॥ अहमेवगमिष्यामितस्यामेनेगवेषणे ॥ नितरांबाधतेप्रेमतददृष्ट्यग्निदूषितम् ॥४०॥ यदाप्रभृतिसागौरीनिर्गताममसद्मतः ॥ मन्येमेनेतदारभ्यपद्मसद्माविनिर्ययौ ॥ ४१॥ तदालापामृतधयौनमेशब्दग्रहौप्रिये ॥ प्राणेश्वरितदारभ्यस्याताां शब्दांतरग्रहौ ॥ ४२ ॥ जैवातृकीयतोह्नःस्यादूरीभूताहशोर्मम ॥ अहोजैवातृकीज्योत्स्नाततोह्नोतिदुनोतिमाम् ॥ ४३ ॥ इत्युक्त्वादायरत्नानिवासांसि विविधानिच ॥ धराधरेंद्रोनिर्यातःशुभलग्नबलोदये ॥ ४४ ॥ अगस्त्यउवाच ॥ ॥ कानिकानिचरत्नानिकियंत्यपिचषण्मुख ॥ यान्यादायप्रतस्थेस तानिमेब्रूहिपृच्छतः ॥ ४५ ॥ ॥ स्कंदउवाच ॥ तुलामुक्ताफलानांतुकोटिद्वयपरीमिताः ॥ तथावारितराणांचहीरकाणांतुलाशतम् ॥ ४६ ॥

सौख्यमपिगतमित्यर्थः॥४१॥तदिति ॥ हेप्रियेहेप्राणेश्वरितदारभ्यतस्याउमायागमनमारभ्यममेमेशब्दग्रहौश्रोत्रेंद्रियेशब्दांतरग्रहौनेत्यन्वयः ॥ कथंभूतौ ॥ तदालापामृतधयौउमावाक्यसुधांपिबंतौ ॥ अयंभावः ॥ यथापीतामृतस्यान्यपानेनेच्छोदेतितथापीततद्वाक्यामृतस्यममशब्दांतरेनेच्छोल्लसतीत्यर्थः ॥ ४२ ॥ जैवेति ॥ अहोइतिखेदे ॥ यतोऽह्नोयस्माद्दिवसादारभ्यजैवातृकश्चंद्रस्तस्येयंजै वातृकीचंद्रज्योत्स्नातत्तुल्यागौरीममदृशोर्नेत्रयोर्दूरीभूतास्यादभवत्ततोह्नस्तस्मादिनादारभ्यजैवातृकीज्योत्स्नाचांद्रमसीकौमुदीमामातिदुनोत्युपतापयतीत्यर्थः ॥ सुखदापिचंद्रिकाउमाविश्लेषान्ममदुः खदाभातीत्यर्थः ॥ ४३ ॥ शुभलग्नबलोदयेशुभलग्नबलस्योदयेसतीत्यर्थः ॥४४॥ इत्युक्त्वादायरत्नानीत्युक्तंतत्रपृच्छति ॥ कानिकानिचेति ॥ कानिकानीतिसंख्येयजातिविषयेप्रश्नः ॥ कियंतीतिसं ख्यानविषये ॥४५॥ तदुभयंदर्शयति ॥ तुलेति ॥ तुलापलशतम्॥ यदाहामरः ॥ तुलास्त्रियांपलशतमिति ॥ मुक्ताफलानांमौक्तिकफलानाम् ॥ यदाहामरः॥अथमौक्तिकम्। मुक्तेति ॥ हीरकाणां वज्राणांहिराइतिलोकेप्रसिद्धानाम् ॥ कथंभूतानाम् ॥ वारितराणांवार्षुइतःप्राप्तेरःप्रकाशोयैस्तेवारितरास्तेषां जलोद्भवत्वेनअतिशुभ्राणांश्वेतानामित्यर्थः ॥ यद्वावारिषुतरंतिप्लवंतीतिवारितराः ॥४६॥

CC-0. In Public Domain. Digitization by eGangotri

नवलक्षाधिकंतुलाशतमित्यन्वयः॥षडस्राणांषट्कोणानाम्॥सुतेजसामितिषडस्राणांविशेषणम्॥ विदूराणांविशेषणंचविमलवर्चसामिति ॥४७॥ पद्मरागाणांशोणरत्नानाम् ॥यदाहामरः॥ शोणरत्नंलोहितकंपद्मरागइति॥पुष्परागतुलालक्षंरत्नविशेषाणांपलशतसहस्रम्॥४८॥गोमेदरत्नानांपीतवर्णरत्नानामित्यर्थः॥४९॥गरुडोद्गाररत्नानांगारुत्मतानांहरिन्मणीनामितियावत्॥यदाहामरः॥ गारुत्मतंमरकतमश्मगर्भोहरिन्मणिरिति ॥ शुद्धविद्रुमरत्नानांनिर्मलप्रवालरत्नानामित्यर्थः ॥५०॥ अष्टांगाभरणानांशिरोललाटघ्राणश्रोत्रग्रीवाहस्तकटिचरणदेशानाम् ॥५१॥५२॥५३॥ काशींविशिनष्टि॥ अनेकेतित्रिभिः ॥ खचिताखिलभूमिकांव्याप्ताऽखिलस्थानकाम् ॥ नानेति ॥ अनेकप्रासादमाणिक्यज्योतिर्भिस्ततंव्याप्तंततंविभुअम्बरमाकाशंययाताम् ॥५४॥ सौधानामग्रेउपरिविविधायेस्वर्णकल

नवलक्षाधिकंविप्रषडस्राणांसुतेजसाम् ॥ लक्षद्वयंविदूराणांतुलाविमलवर्चसाम् ॥ ४७ ॥ कोटयःपद्मरागाणांपंचवैहितुलामुने ॥ पुष्परागतुलालक्षंगुणितंनवसंख्यया ॥ ४८ ॥ तथागोमेदरत्नानांतुलालक्षमितामुने ॥ इंद्रनीलमणीनांचतुलाःकोट्यर्धसंमिताः ॥ ४९ ॥ गरुडोद्गाररत्नानांतुलाःप्रयुतसंमिताः ॥ शुद्धविद्रुमरत्नानांतुलाश्चनवकोटयः ॥ ५० ॥ अष्टांगाभरणानांचसंख्याकर्तुंनशक्यते ॥ वाससांचविचित्राणांकोमलानांतथामुने ॥ ५१ ॥ चामराणिचभूयांसिद्रव्याण्यामोदवंतिच ॥ सुवर्णदासदास्यादीन्यसंख्यातानिवैमुने ॥ ५२ ॥ सर्वाण्यपिसमादायप्रतस्थेभूधरेश्वरः ॥ आगत्यवरणातीरंदूरात्काशीमलोकयत् ॥ ५३ ॥ अनेकरत्ननिचयैःखचिताऽखिलभूमिकाम् ॥ नानाप्रासादमाणिक्यज्योतिस्तततताम्बराम् ॥ ५४ ॥ सौधाग्रविविधस्वर्णकलशोज्ज्वलदिङ्मुखाम् ॥ जयंतीवैजयंतीनांनिकरैस्त्रिदिवस्थलीम् ॥ ५५ ॥ महासिद्ध्यष्टकस्यापिक्रीडाभवनमद्भुतम् ॥ जितकल्पद्रुमवनांवनैःसर्वफलावनैः ॥ ५६ ॥ इतिकाशीसमृद्धिंसविलोक्याभूद्विलज्जितः ॥ उवाचचमनस्येवभूधरेंद्रइदंवचः ॥ ५७ ॥ प्रासादेषुप्रतोलीषुप्राकारेषुगृहेषुच ॥ गोपुरेषुविचित्रेषुकपाटेषुतटेष्वपि ॥ ५८ ॥ मणिमाणिक्यरत्नानामुच्छलच्चारुरोचिषाम् ॥ ज्योतिर्जालैर्जटिलितंयथेदमवलोक्यते ॥ ५९ ॥ द्यावाभूम्योरंतरालंतथेतिसमवैम्यहम् ॥ ईदृक्संपत्तिसंभारःकुबेरस्यापिनोगृहे ॥ ६० ॥ अपिवैकुंठभुवनेनेतरस्येहकाकथा ॥ इतियावद्गिरींद्रोसौसंभावयतिचेतसि ॥ ६१ ॥ तावत्कार्पटिकःकश्चित्तल्लोचनपथंगतः ॥ आहूयबहुमानंतमपृच्छच्चाचलेश्वरः ॥ ६२ ॥ ॥ हिमवानुवाच ॥ ॥ हंहो कार्पटिकश्रेष्ठअध्यास्वैतदिहासनम् ॥ स्वपुरोदंतमाख्याहिकिमपूर्वमिहाध्वग ॥ ६३ ॥

शास्तैरुज्ज्वलमतिप्रकाशमानंदिशांमुखंयस्यांताम् ॥ जयन्तीवैजयंतीनांतत्तन्नामपताकाविशेषाणांनिकरैःकृत्वात्रिदिवस्थलीमिवेतिलुप्तोपमा॥५५॥महासिद्ध्यष्टकमणिमादिपञ्चादिवा ॥ सर्वफलानामवनंपालनंयेषुतैर्वनैःसर्वफलसमृद्धैरित्यर्थः ॥ ५६ ॥ ५७ ॥ तटेषूच्चप्रदेशेषु गंगातीरेष्वितिवा ॥ ५८ ॥ उच्छलत्प्रस्फुरच्चारुसुंदरंचरोचिर्दीप्तिर्येषांतेषाम् ॥ जटिलितंसंवलितम् ॥ ५९ ॥ ६० ॥ अपिवैकुण्ठभवनेतत्रापिनइतरस्यभवनेकाकथा ॥ तादृक्समृद्धिर्नास्तीतिकिंवक्तव्यमित्यर्थः ॥ ६१ ॥ कार्पटिकःकाषायवस्त्रधारीसच्छूद्राविशेषः ॥ ६२ ॥ हंहोइत्यव्ययंसंबोधने ॥ अध्यास्वअ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धितिष्ठस्वपुरोदन्तंस्वसंबंधिपुरमविमुक्तंतस्योदंतंवृत्तान्तमाख्याहिकथय ॥ इहस्वपुरेअपूर्वंचकिंतदप्याख्याहीत्यर्थः ॥ किमपूर्वमितिस्वपुरेत्यस्यविशेषणंवा ॥ ६३ ॥ ६४ ॥ समुपचक्रमेउपक्रांतवान् ॥ ६५ ॥ अहानीति ॥ मंदराज्जगन्नाथेविश्वनाथेसमायातेसतिपंचषाणिपंचवाषड्वाऽहानिदिनान्येकव्यतिक्रांतानिव्यतीतानीतिद्वयोरन्वयः॥६६॥ ननुब्रह्मणोवरदानाद्दिवोदासेधर्मेणराज्यंशासतिसति कथंकाश्यांविश्वेशागमनंतत्राह ॥ दिवोदासेगतेदिवीति ॥ ६७ ॥ यत्पृष्टंकोत्रसंप्रत्यधिष्ठातेतितत्रोत्तरमाह ॥ योवाइति ॥ वैशब्दःप्रसिद्धिद्योतनार्थः ॥ अत्रकाश्याम् ॥ ननुपरिच्छिन्नस्यकथंजगदधिष्ठातृत्वंतत्राह ॥ सर्वगइति ॥ व्यापकइत्यर्थः ॥ सर्वदृगितिपृथग्वाक्यम् ॥ अतःसर्वगइत्यनेननपौनरुक्त्यम् ॥ सर्वइतिपाठेसर्वस्वरूपइत्यर्थः ॥ ब्रह्मैवेदंसर्वमित्यादिश्रुतेः ॥ ६८ ॥ दृषत्स्वरूपः

कोत्रसंप्रत्यधिष्ठाताकिमधिष्ठातृचेष्टितम् ॥ यदिजानासितत्सर्वमिहाचक्ष्वममाग्रतः ॥ ६४ ॥ सोपिकार्पटिकस्तस्यगिरिराजस्यभाषितम् ॥ समाकर्ण्य समाचष्टुंमुनेसमुपचक्रमे ॥ ६५ ॥ ॥ कार्पटिकउवाच ॥ ॥ आचक्षेशृणुराजेंद्रयत्पृष्टोस्मित्वयाखिलम् ॥ अहानिपंचषाण्येवव्यतिक्रांतानिमानद ॥६६॥ समायातेजगन्नाथेपर्वतेंद्रसुतापतौ ॥ सुंदरान्मंदरादद्रेर्दिवोदासेगतेदिवि ॥६७॥ योवैजगदधिष्ठातासोधिष्ठातात्रसर्वगः ॥ सर्वदृक्सर्वदःशर्वःकथंनज्ञायतेविभो ॥६८॥ मन्येदृषत्स्वरूपोसिदृषदोपिकठोरधीः ॥ यतोविश्वेश्वरंकाश्यांनवेत्सिगिरिजापतिम् ॥६९॥ स्वभावकठिनात्मापिसवरंहिमवान्गिरिः ॥ प्राणाधिकसुतादानाद्योधिनोद्विश्वनायकम् ॥ ७० ॥ बिभ्रत्सहजकाठिन्यंजातोगौरीगुरुर्गुरुः ॥ शंभुंप्रपूज्यसुतयास्रजाविश्वगुरोरपि ॥ ७१ ॥ चेष्टितं तस्यकोवेदवेदवेद्यस्यचेशितुः ॥ मनागितिचजानेहंतच्चेष्टितमिदंजगत् ॥७२॥ अधिष्ठातामयाख्यातस्तथाधिष्ठातृचेष्टितम् ॥ अपूर्वंयत्त्वयापृष्टंतदाख्यामिचतच्छृणु ॥ ७३ ॥ शुभेज्येष्ठेश्वरस्थानेसांप्रतंसउमापतिः ॥ काशींप्राप्यमुदातिष्ठेद्गिरिराजांगजासखः ॥ ७४ ॥ ॥ स्कंदउवाच ॥ ॥ यदायदासगिरिजामृदुनामाक्षरामृतम् ॥ आविष्करोतिपथिकोऽद्रींद्रोहृष्येत्तदातदा ॥ ७५ ॥ उमानामामृतंपीतंयेनेहजगतीतले ॥ नजातुजननस्तिन्यंसपिबेत्कुंभसंभव ॥ ७६ ॥ उमेतिद्व्यक्षरंमंत्रंयोऽहर्निशमनुस्मरेत् ॥ नस्मरेच्चित्रगुप्तस्तंकृतपापमपिद्विज ॥ ७७ ॥ पुनःशुश्रावहिमवान्हृष्टःकार्पटिकोदितम् ॥ ॥ कार्पटिकउवाच ॥ ॥ राजन्विश्वेश्वरार्थेयंप्रासादोविश्वकर्मणा ॥ ७८ ॥ निर्मीयतेसुनिर्माणोजन्मिनिर्वाणदायिनः ॥ तदपूर्वंनकर्णाभ्यामप्याकर्णितवानहम् ॥ ७९ ॥

पाषाणतुल्यःदृषदुपमापितवन्यूनेत्याह ॥ दृषदोपीति ॥ तत्रहेतुमाह ॥ यतइति ॥ ६९ ॥ एतद्विवृणोति स्वभावकठिनात्मेतिद्वाभ्याम् ॥ अधिनोत्अप्रीयततोषयामासेत्यर्थः ॥ ७० ॥ विश्वेशप्रीणनफलमाह ॥ बिभ्रदिति ॥ स्रजाशिरोधार्यया ॥ विश्वगुरोर्ब्रह्मणः ॥७१॥ यत्पृष्टंकिमधिष्ठातृचेष्टितमितितत्रोत्तरमाह ॥ चेष्टितमिति ॥ चएवार्थे ॥ वेदवेद्यस्यवेदांतैकवेद्यस्येत्यर्थः ॥ ७२ ॥ यत्पृष्टंकिमपूर्वमिहाध्वगेतितस्योत्तरंपूर्वोक्तानुवादपूर्वकमाह ॥ अधिष्ठातेति ॥ ७३ ॥ तिष्ठेत्तिष्ठति ॥ गिरिराजांगजापार्वतीसखीजायासखासहायोवायस्यतथा ॥७४ ॥ ७५ ॥ हर्षेहेतुमाह ॥ उपमानामृतमितिद्वाभ्याम् ॥ ७६ ॥ ७७ ॥ राजन्निति ॥ विश्वेश्वरस्यार्थेयंप्रासादोविश्वकर्मणानिर्मीयतेतदन्यदपूर्वमितिद्वितीयेनान्वयः ॥ ७८ ॥ किंभूतःप्रासादः ॥ सुशोभनंनिर्माणंयस्य ॥ कथंभूत

CC-0. In Public Domain. Digitization by eGangotri

स्यविश्वेश्वरस्य ॥ जन्मिनिर्वाणदायिनःप्राणिमात्रस्यमोक्षदायिनः ॥ समासनिविष्टस्यापिविशेषणंछांदसम् ॥ अपूर्वत्वेहेतुमाह ॥ नकर्गाभ्यामिति ॥ ७९ ॥ प्रासादंविशिनष्टि यत्रेत्यादिकथं तंत्वमित्यतःप्राक्तनेनग्रंथेन ॥ यत्रप्रासादइत्यन्वयः ॥ मित्रंसूर्यमतिक्रांतानितेजांसियासांशलाकानांताभिरतिमित्रतेजोभिः ॥ ८० ॥ अष्टाष्टाविति पृथक्पदे ॥ वलोपश्छांदसः ॥ ८१ ॥ विष्टपेषु भुवनेषु ॥ विमानेप्रासादे ॥ ८२ ॥ स्तंभिताआक्रांताः ॥ तत्प्रभाभरास्तेषांचित्ररत्नमयस्तंभानांप्रभाविभ्रतीतितथा ॥ तत्प्रभांतराइतिक्वचित् ॥ ८३ ॥ शालीनाःशोभनाःशालभंजिकाःपुत्त

यत्रातिमित्रतेजोभिःशलाकाभिःसमंततः ॥ मणिमाणिक्यरत्नानांप्रासादेभित्तयःकृताः ॥८० ॥ यत्रसंतिशतंस्तंभास्त्रंतोद्वादशोत्तराः ॥ एकैकंभुवनं धर्तुमष्टाष्टाविति कल्पिताः ॥ ८१ ॥ चतुर्दशसुयाशोभाविष्टपेषुसमंततः ॥ तस्मिन्विमानेसास्तीहशतकोटिगुणोत्तरा ॥ ८२ ॥ चंद्रकांतमणीनांचस्तं भाधारशिलाश्चयाः ॥ चित्ररत्नमयैःस्तंभैःस्तंभितास्तत्प्रभाभराः ॥ ८३ ॥ पद्मरागेंद्रनीलानांशालीनाःशालभंजिकाः ॥ नीराजयंत्यहोरात्रंयत्ररत्नप्रदी पकैः ॥ ८४ ॥ स्फुरत्स्फटिकनिर्माणश्लक्ष्णपद्मशिलातले ॥ अनेकरत्नरूपाणिविचित्राणिसमंततः ॥८५॥ आरक्तपीतमंजिष्ठनीलकिर्मीरवर्णकैः ॥ विन्यस्तानीवभासंतेचित्रेचित्रकृतायतः ॥ ८६ ॥ हक्पिच्छिलाविलोक्यंतेमाणिक्यस्तंभराजयः ॥ यतोऽविमुक्तेस्त्रक्षेत्रेमोक्षलक्ष्म्यंकुराइव ॥ ८७ ॥ रत्नाकरेभ्यःसर्वेभ्योगणारत्नोच्चयान्बहून् ॥ राशींश्चक्रुःसमानीययत्राद्रिशिखरोपमान् ॥ ८८ ॥ यत्रपातालतलतोनागानांकोशवेश्मतः ॥ गणैर्मणिगणाः सर्वेसमाहृत्यगिरीकृताः ॥ ८९ ॥ शिवभक्तःस्वयंयत्रपौलस्त्यःस्वद्रिकूटतः ॥ कोटिहाटककूटानिआनयामासराक्षसैः ॥ ९० ॥ प्रासादनिर्मितिंश्रुत्वा भक्ताद्वीपांतरस्थिताः ॥ माणिक्यानिसमाजह्रुर्यथासंख्यान्यहोनृप ॥ ९१ ॥ चिंतामणिःस्वयंयत्रकर्मणेविश्वकर्मणे ॥ विश्राणयेदहोरात्रंविचित्रांश्चिं तितान्मणीन् ॥ ९२ ॥ नानावर्णपताकाश्चयत्रकल्पमहीरुहः ॥ अनल्पाःकल्पयंत्येवनित्यंभक्तिसमन्विताः ॥ ९३ ॥ अघ्ययोयत्रसततंदधिक्षीरेक्षुसर्पि षाम् ॥ पंचामृतानांकलशैःस्नपयंतिदिनेदिने ॥ ९४ ॥ यत्रकामदुघानित्यंस्नपयेन्मधुधारया ॥ स्वदुग्धयास्वयंभक्त्याविश्वेशंलिंगरूपिणम् ॥ ९५ ॥ गंधसाररसैर्यचसेवतेमलयाचलः ॥ कर्पूररंभाकर्पूरपूरैर्भक्त्यानिषेवते ॥ ९६ ॥

लिकाः ॥ नीराजयंतिनीराजनांकुर्वंति ॥ ८४ ॥ ८५ ॥ किर्मीरःकल्माषः ॥ चित्रकृताचित्रकारेण ॥ ८६ ॥ हक्पिच्छिलानेत्रदृष्टिप्रतिबंधकाः ॥ यतोयत्रप्रासादे ॥ यत्राविमुक्तेइतिपाठेपूर्वं यतोयत्रप्रासादइतिव्याख्येयम् ॥ ८७ ॥ रत्नोच्चयान्रत्नसमूहान् ॥ ८८ ॥ ८९ ॥ पौलस्त्यःकुबेरःस्वद्रिकूटतः ॥ शोभनाद्रिशृंगेभ्यःचित्रकूटतइतिक्वचित् ॥ कोटिहाटककूटानि असंख्यातस्वर्ण राशीन्आनयामास ॥ कारयामासेतिक्वचित् ॥९०॥ यथासंख्यानिसमानानि ॥ यद्वा यथायथावदसंख्यातानीत्यर्थः ॥९१॥९२॥९३॥९४॥ कामदुघाकामधेनुः ॥९५॥ गंधसाररसैश्चंदनरसैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्पूररंभाकर्पूरोत्पादिकाकदली ॥ पूरैःसमूहैः ॥९६॥९७॥ त्रपयालज्जया ॥ ९८ ॥ पारितोषिकंपरितोषेणदेयम् ॥९९॥१००॥१॥ प्राभृतकउपस्कारः ॥ २ ॥ वृद्धोक्षमात्रसंपत्तिर्जर्जरवृषमात्र संभारः ॥३॥ अन्वयोवंशः ॥ उह्यतेप्राप्यतेज्ञायतइत्यर्थः ॥४॥५॥६॥७॥८॥९॥ अपश्यंज्ञातवान् ॥११०॥ यतःईश्वरात् ॥ वित्तोजानीतः नियतंयथास्यात्॥११॥परापरःकार्यकारणस्वरूपः ॥

इत्याद्यपूर्वंयत्रास्तिप्रत्यहंशंकरालये ॥ कथंतंत्वमुमाकांतंनवेत्सिकठिनाशय ॥ ९७ ॥ इतितस्यसमृद्धिंतांदृष्ट्वाजामातुरद्रिराट् ॥ त्रपयापरिभूतोभून्नितरां कुंभसंभव ॥ ९८ ॥ तस्मैकार्पटिकायाथसदत्त्वापारितोषिकम् ॥ पुनश्चिंतापरोजातोऽद्रिराट्कार्पटिकेगते ॥ ९९ ॥ उवाचेतिमनस्येवविस्मयोत्फुल्ललो चनः ॥ अहोभद्रमिदंजातंयत्त्वयाश्राविशर्मभाक् ॥ १०० ॥ यावत्संपत्तिसंभारःश्रूयतेदृश्यतेत्रवै ॥ जामातुरत्रसदनेलीलात्रिजगतीपतेः ॥ १ ॥ ततः प्राभृतकस्तुच्छोनितरांप्रतिभातिमे ॥ कन्यार्थंयोमयानीतोजामातुःपरितोषकृत् ॥ २ ॥ अहंमन्येतथैवासौयथादर्शिमयापुरा ॥ वृद्धोक्षमात्रसंपत्तिःसर्व कर्मपराङ्मुखः ॥ ३ ॥ नैनंकोपिविजानीयान्नान्वयोस्यकदाचन ॥ नामापियस्यनैकंचकिंदेशीयश्चनोह्यते ॥ ४ ॥ किंवृत्तश्चकिमाचारोनाममात्रेणचे श्वरः ॥ ऐश्वर्यसूचकंवस्तुयस्यकिंचिन्नलक्ष्यते ॥ ५ ॥ सोसौनिर्वाणसंपत्तिंरंकायापिददात्यहो ॥ सुमुखःसर्वकर्माणिफलवंतिकरोतिसः ॥ ६ ॥ वेदवे द्योहिसर्वज्ञोयत्संतानोऽखिलंजगत् ॥ यंनकोपिहिवेदादौवेदवेद्यःसएषवै ॥७॥ योनभिज्ञःसदाज्ञातःससर्वज्ञोयमेवहि ॥ यस्यैकमपिनोनामपुंसाज्ञेयं नकेनचित् ॥८॥ सर्वेषांसर्वनामानियस्यनामानिनिश्चितम् ॥ सोसौहिसर्वदेशीयःसर्वेभ्यःसर्वसिद्धिदः ॥९॥ यस्यदेशोनविदितोयस्तुवृत्तिपराङ्मुखः॥ आचारहीनमिवयंपुराऽपश्यंकठोरधीः ॥ ११० ॥ श्रुतिस्मृतीयतःसर्वमाचारंवित्तएवहि ॥ नाममात्रेणनियतंयमज्ञासिषमीश्वरम् ॥ ११ ॥ साक्षादी श्वरएवैपसोन्येष्वैश्वर्यसूचकः॥ अपिसर्वगुणाधारोगुणातीतःपरापरः ॥ १२ ॥ अर्वाचीनइहाप्येषपराचीनःपरात्परः ॥ भूधराणामहंनाथोविश्वनाथउमा पतिः ॥१३॥ अहंप्रमितसंपत्तिरप्रमेयधनोह्यसौ ॥ तुच्छप्राभृतकस्तस्मान्नेदानीमस्यदर्शनम् ॥ १४ ॥ करिष्येथकरिष्यामिव्यावृत्त्यागत्यकर्हिचित् ॥ संप्रधार्येतिमनसिसायंसचगिरीश्वरः ॥ १५ ॥ आहूयसर्वाननुगान्पार्वतीयान्महाबलान् ॥ आदिष्टवानिदंवाक्यंसर्वेयूयंबलाधिकाः ॥ १६ ॥ कुर्वंत्वेकं ममादेशंयावन्नोद्यतिभानुमान् ॥ तावच्छिवालयंचैकंविदधत्वत्रसत्वरम् ॥ १७॥ यस्मिन्कृतेकृतार्थःस्यामिहलोकेपरत्रच ॥ समागत्येहकाश्यांयःकुर्या देकंशिवालयम् ॥ १८ ॥ तेनत्रैलोक्यमखिलंसालयंकृतमेवहि ॥ तेनदत्तानिदानानिमहांतिविधिपूर्वकम् ॥ १९ ॥ सुपर्वणिसुपात्रायसुताथश्रद्धया धिकम् ॥ येनस्ववित्तमानेनधर्मोपार्जितवित्ततः ॥ १२० ॥ कृतंशंभोर्महासद्मनतंपश्चात्त्यजेत्क्वचित् ॥ तपांसितेनतप्तानिशीर्णपर्णाशनान्यपि ॥ २१ ॥

महेश्वरइतिक्वचित्पाठः ॥ १२ ॥ परादव्याकृतात् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ सुपर्वणिरविग्रहे ॥ १२० ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ २३ ॥ व्युष्टाप्रभाता॥२४॥ प्रशस्तिप्रासादकर्तृसूचिकांपत्रीम् ॥२५॥२६॥ राशिंरत्नानामितिशेषः ॥ २७ ॥ २८॥२९॥१३० ॥३१॥ नक्षिनदृष्टः प्रगेप्रातःकाले ॥३२॥३३॥३४॥
आलुलोकेददर्श ॥३५॥३६॥ शातनंनाशकम् ॥३७॥ जिज्ञासतिजिज्ञासतेविचारयतीत्यर्थः ॥३८॥ करामलकवत्सर्वदर्शित्वादिवशब्दः ॥ वाचयित्वैवेतिवापाठः ॥ मनोजहृत्कामनाशकृत्॥दिष्ट्या

वाराणसींसमासाद्ययेनाकारिशिवालयः ॥ अशेषाःसुविशेषाढ्याइष्टास्तेनमहामखाः ॥ २२ ॥ आनंदकाननेयेनदेवदेवालयःकृतः ॥ इतितस्यसमादेशं समाकर्ण्यानुगास्ततः ॥ २३ ॥ चक्रुर्देवालयंश्रेष्ठंयावद्व्युष्टानयामिनी ॥ तावच्छैलेश्वरंलिंगंशैलेशेनप्रतिष्ठितम् ॥ चंद्रकांतमणेश्चंचत्कांतिश्वेतितमंडपम् ॥ २४ ॥ अलेखयत्प्रशस्तिंचप्रशस्ताक्षरमालिनीम् ॥ व्याचक्षाणांनिजांसर्वगोत्रेभ्योप्यधिकोन्नतिम् ॥ २५ ॥ ततोऽरुणोदयेजातेस्नात्वापंचनदेह्रदे ॥ शैलराजःकालराजंनमस्कृत्यसमर्च्यच ॥ २६ ॥ तत्रराशिंससुत्सृज्यपरितस्त्वरितोययौ ॥ पार्वतीयैरनुगतःसर्वैरपिनिजालयम् ॥ २७ ॥ ततःप्रातःसमालोक्यगणौहुंडनमुंडनौ ॥ दृष्टैदेवालयंरम्यंवरणायास्तटेशुभे ॥ २८ ॥ अदृष्टपूर्वदेवायनिवेदयितुमागतौ ॥ तौतुदृष्ट्वामहादेवमुमादर्शितदर्पणम् ॥ २९ ॥ प्रणम्यदंडवद्भूमौकृतांजलिपुटौगणौ ॥ कृताभ्यनुज्ञौभ्रूक्षेपाद्विज्ञप्तिमथचक्रतुः ॥ १३० ॥ देवदेवनजानीवःकेनचिद्दृढभक्तिना ॥ अतीवरम्यःप्रासादोनिर्मितोवरणातटे ॥ ३१ ॥ आसायंनैक्षिचावाभ्यांदृष्टोद्यैवप्रगेविभो ॥ गणोदितमितीशानोनिशम्याहगिरींद्रजाम् ॥ ३२ ॥ विज्ञातसर्ववृत्तांतःसर्वज्ञोप्यनभिज्ञवत् ॥ अचलेंद्रांगजेयावस्तत्प्रासादविलोकने ॥३३॥ इत्युक्तेशःसगिरिजोनिरगात्सगणोमुने ॥ महास्यंदनमारुह्यप्रासादंद्रष्टुमुत्सुकः ॥ ३४ ॥ अथालुलोकेगिरिशःप्रासादंवरणातटे ॥ अतीवरम्यरचनंयामिनीमात्रनिर्मितम् ॥ ३५ ॥ स्यंदनादवरुह्याथगर्भागारमवीविशत् ॥ ददर्शचमहालिंगंचंद्रकांतशिलामयम् ॥ ३६ ॥ देदीप्यमानंमहसामोक्षलक्ष्म्यंकुराकृति ॥ दृष्टिप्रसादजननंपुनर्जननशातनम् ॥ ३७ ॥ केनेदंस्थापितंलिंगंयावज्जिज्ञासतीश्वरः ॥ तावद्ददर्शपुरतःप्रशस्तिकर्तृसूचिकाम् ॥३८॥ वाचयित्वेवचमनाङ्मनस्येवमनोजहृत् ॥ उवाचदेवींदिष्ट्येतिप्रेक्षस्वात्मपितुःकृतिम् ॥ ३९ ॥ उमाश्रुत्वेतिसंहृष्टाकदंबकुसुमश्रियम् ॥ आनंदांकुरलक्ष्मीवदंगेषुपरिबिभ्रती ॥ १४० ॥ ततोव्यजिज्ञपद्देवंदेवीपादौप्रणम्यच ॥ अस्मिँल्लिंगवरेनाथत्वयास्थेयमहर्निशम् ॥ ४१ ॥ अस्यलिंगस्ययेभक्ताःशैलेशस्यमहेशितुः ॥ तेभ्यस्त्वंमहतीमृद्धिंदास्यसीहपरत्रच ॥ ४२ ॥ तथेतिदेवउक्त्वातांपार्वतींपुनरब्रवीत् ॥ वरणायांकृतस्नानैःशैलेशोयैःसमार्चितः ॥ ४३ ॥ पितॄन्संतर्प्यचमुदादत्त्वादानानिशक्तितः ॥ नतेषांपुनरावृत्तिरत्रसंसारवर्त्मनि ॥ ४४ ॥ शैलेश्वरेमहालिंगेनित्यंस्थास्याम्यहंशुभे ॥ प्रदास्यामिपरांमुक्तिमेतल्लिंगार्चकेजने ॥ ४५ ॥

भद्रम् ॥ पोषकादिव्यावृत्त्यर्थमात्मपदम् ॥ ३९ ॥ उमेति ॥ कदम्बकुसुमश्रियंबिभ्रतीउमाततस्तदनंतरंदेवंव्यजिज्ञपद्विज्ञापितवतीतिद्वितीयेनान्वयः ॥१४०॥४१॥ ४२ ॥४३ ॥ ४४ ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरोधसिशोभनेतीरे ॥ ४६ ॥ ४७ ॥ ४८ ॥ पापकंचुकंपापमेवकंचुकंनिर्मोकम् ॥ १४९ ॥ इतिश्रीरामानन्दकृतायांकाशीखंडटीकायांषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ छ ॥ ॥ सप्तषष्टितमेध्यायेरत्नेशस्यमहेशितुः ॥ प्रशंसावर्ण्यतेतावत्सर्वपापप्रणाशिनी ॥१॥ इदानींकथयिष्यामिरत्नेश्वरसमुद्भवमित्युक्तंतत्रप्रश्नंकरोति ॥ रत्नेश्वरेति ॥१॥ पुनः प्रश्नद्वयमाह ॥ कोस्येतिं ॥ एतमेतत् ॥ यत्सर्वंपृष्टमित्यर्थः ॥ एतंमहिमानमितिवा ॥२॥ त्रयाणांपृष्टत्वेप्यनादिसिद्धत्वेनप्रतिष्ठितत्वाभावात्तंविहायद्वयोरनुवादमाह ॥ रत्नेश्वरस्येति ॥ ३ ॥ ब्रुवेस्पष्टंकथयामि ॥ ब्रवीमितेइति

शैलेश्वरंयेद्रक्ष्यंतिवरणायाःसुरोधसि ॥ तेषांकाश्यांनिवसतांदुःखंनाभिभविष्यति ॥ ४६ ॥ उमयापिवरोदत्तस्तत्रलिंगेघटोद्भव ॥ शैलेश्वरस्ययेभक्तास्तेमेपुत्रानसंशयः ॥ ४७ ॥ स्कंदउवाच ॥ ॥ इतिशैलेश्वरंलिंगंकथितंतेमहामुने ॥ इदानींकथयिष्यामिरत्नेश्वरसमुद्भवम् ॥ ४८ ॥ श्रुत्वाशैलेशमाहात्म्यंश्रद्धयापरयानरः ॥ पापकंचुकमुत्सृज्यशिवलोकमवाप्नुयात् ॥ १४९ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धे शैलेशादिलिंगनिर्णयोनामषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ रत्नेश्वरसमुत्पत्तिंकथयस्वषडानन ॥ रत्नभूतंमहालिंगंयत्काश्यांपरिवर्ण्यते ॥ १ ॥ कोस्यलिंगस्यमहिमाकेनैतच्चप्रतिष्ठितम् ॥ एतंविस्तरतोब्रूहिगौरीहृदयनंदन ॥ २ ॥ ॥ स्कंदउवाच ॥ रत्नेश्वरस्यमाहात्म्यंकथयिष्यामितेमुने ॥ यथाचतस्यलिंगस्यप्रादुर्भावोऽभवद्भुवि ॥ ३ ॥ श्रुतंनामापिलिंगस्ययस्यजन्मत्रयार्जितम् ॥ वृजिनंनाशयेत्तस्यप्रादुर्भावंब्रुवेमुने ॥ ४ ॥ शैलराजेनरत्नानियानिपुंजीकृतान्यहो ॥ उत्तरेकालराजस्यतानितस्यागिरेर्वृषात् ॥ ५ ॥ सर्वरत्नमयंलिंगंजातंतत्सुकृतात्मनः ॥ शक्रचापसमच्छायंसर्वरत्नद्युतिप्रभम् ॥ ६ ॥ तल्लिंगदर्शनादेवज्ञानरत्नमवाप्यते ॥ शैलेश्वरंसमालोक्यशिवौतत्रसमागतौ ॥ ७ ॥ यत्ररत्नमयंलिंगमाविर्भूतंस्वयंमुने ॥ तस्यस्फुरत्प्रभाजालैस्ततमंबरमंडलम् ॥ ८ ॥ तत्रदृष्ट्वाशुभंलिंगंसर्वरत्नसमुद्भवम् ॥ भवान्यदृष्टपूर्वांहिपरिपप्रच्छशंकरम् ॥ ९ ॥ देवदेवजगन्नाथसर्वभक्ताभयप्रद ॥ कुतस्त्यमेतल्लिंगंहिसप्तपातालमूलवत् ॥ १० ॥ ज्वालाजटिलिताकाशंप्रभाभासितदिङ्मुखम् ॥ किमाख्यंकिंस्वरूपंचकिंप्रभावंभवांतक ॥ ११ ॥ यस्यसंवीक्षणादेवमनोमेतीवहृष्टवत् ॥ इहैवरमतेनाथकथयैतत्प्रसादतः ॥ १२ ॥ ॥ देवदेवउवाच ॥ ॥ शृण्वपर्णेसमाख्यामियत्त्वयापृच्छिपार्वति ॥ स्वरूपमेतल्लिंगस्यसर्वतेजोनिधेःपरम् ॥ १३ ॥ तवपित्राहिमवतागिरिराजेनभामिनि ॥ त्वामुद्दिश्यमहारत्नसंभारोत्राप्यनायिहि ॥ १४ ॥

कचित् ॥ ४ ॥ कालराजस्यकालभैरवस्य ॥ वृषाद्धर्मात् ॥ ५ ॥ तत्प्रसिद्धम् ॥ हीतिकचित् ॥ सुकृतंपुण्यमात्मनियस्यससुकृतात्मातस्य ॥ शक्रचापसमच्छायामिंद्रधनुःसदृशकांति ॥ ६॥७ ॥ ततंव्याप्तम् ॥ ८ ॥ सर्वरत्नानांसमुद्भवोयस्मात्सर्वरत्नैःसमुद्भवोवायस्यततसर्वरत्नसमुद्भवंतत् ॥ अदृष्टपूर्वांनदृष्टंपूर्वंमर्यालिंगंययासातथा ॥ ९ ॥ सप्तपातालमूलवत्सप्तपातालपर्यंतंमूलंयस्यास्तितत्तथा ॥ १० ॥ ज्वालाजटिलिताकाशंज्वालाभिर्जटिलितंजटाव्याप्तमिवकृतमाकाशंयेनतत्तथा ॥ ११ ॥ १२ ॥ १३ ॥ महारत्नसंभारःतद्रूपःपारिबर्हः महारत्नानांसमूहइतिवा ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ १६ ॥ उमेहेमवानि ॥ भवेदितिकचित् ॥ १७ ॥ १८ ॥ विधापयकारय ॥ १९ ॥ ननुप्रासादकरणेकिंफलमितिपृच्छायामाह ॥ लिंगप्रासादेति ॥ २० ॥ व्यापारितानियुक्ताः॥ २१॥
॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ कामवर्जितानिष्कामाः ॥ ३१ ॥ ३२ ॥ किंतद्वृत्तंतदाह ॥ इतिहासमिति ॥ ३३ ॥ नाट्यार्थकोविदानृत्यकरणे

अत्रतानिचरत्नानिराशीकृत्यहिमाद्रिणा ॥ सुकृतोपार्जितान्येवययौस्वसदनंपुनः ॥ १५ ॥ तवार्थंवाममार्थंवाश्रद्धयायत्समर्प्यते ॥ काश्यांतस्यपरी
पाकोभवेदीदृग्विधोऽनघे ॥ १६ ॥ लिंगंरत्नेश्वराख्यंवैमत्स्वरूपंहिकेवलम् ॥ अस्यप्रभावोहिमहान्वाराणस्यामुमेध्रुवम् ॥ १७ ॥ सर्वेषामिहलिंगानां
रत्नभूतमिदंपरम् ॥ अतोरत्नेश्वरंनामपरंनिर्वाणरत्नदम् ॥ १८ ॥ अनेनैवसुवर्णेनपित्राराशीकृतेनच ॥ प्रासादमस्यलिंगस्यविधापयमहेश्वरि ॥१९॥
लिंगप्रासादकरणात्खंडस्फुटितसंस्कृतेः ॥ लिंगस्थापनजंपुण्यंहेलयैवेहलभ्यते ॥ २०॥ तथेतिभगवत्योक्तागणाःप्रासादनिर्मितौ ॥ सोमनंदिप्रभृतयो
ऽसंख्याव्यापारितामुने ॥ २१ ॥ गणैश्चकांचनमयोनानाकौतुकचित्रितः ॥ निर्ममेयाममात्रेणप्रासादोमेरुशृंगवत् ॥२२॥ देवीप्रहृष्टवदनादृष्ट्वाप्रासाद
निर्मितिम् ॥ गणेभ्योव्यतरद्भूरिसंमानंपारितोषिकम् ॥ २३ ॥ पुनश्चदेवीपप्रच्छप्रणिपातपुरःसरम् ॥ महिमानंमहादेवंलिंगस्यास्यमहामुने ॥२४॥ ॥
देवदेवउवाच ॥ ॥ लिंगंत्वनादिसंसिद्धमेतद्देविशुभप्रदम् ॥ आविर्भूतमिदानींचत्वात्पितुःपुण्यगौरवात् ॥ २५ ॥ गुह्यानांपरमंगुह्यंक्षेत्रेऽस्मिन्श्रिति
तप्रदम् ॥ कलौकलुषबुद्धीनांगोपनीयंप्रयत्नतः ॥ २६ ॥ यथारत्नंगृहेगुप्तंनकैश्चिज्ज्ञायतेपरैः ॥ अविमुक्तेतथालिंगंरत्नभूतंगृहेमम ॥ २७ ॥ यानिब्रह्मां
डमध्येत्रसंतिलिंगानिपार्वति ॥ तैरर्चितानिसर्वाणिरत्नेशोयैःसमर्चितः॥२८॥प्रमादेनापियैर्गौरिलिंगंरत्नेशमर्चितम् ॥ तेभवंत्येवनियतंसप्तद्वीपेश्वरानृपाः
॥ २९ ॥ त्रैलोक्येयानिवस्तूनिरत्नभूतानितानितु ॥ रत्नेश्वरंसमभ्यर्च्यसकृत्प्राप्नोतिमानवः ॥ ३० ॥ पूजयिष्यंतियेलिंगंरत्नेशंकामवर्जिताः ॥ तेसर्वे
मद्गणाभूत्वाप्रांतेद्रक्ष्यंतिमामिह ॥ ३१ ॥ रुद्राणांकोटिजप्येनयत्फलंपरिकीर्तितम् ॥ तत्फलंलभ्यतेदेविरत्नेशस्यसमर्चनात् ॥ ३२ ॥ लिंगेचानादिसं
सिद्धेयद्वृत्तंतद्ब्रवीमिते ॥ इतिहासंमहाश्चर्यंसर्वपापनिकृंतनम् ॥ ३३ ॥ पुरेहनर्तकीकाचिदासीन्नाट्यार्थकोविदा ॥ सैकदाफाल्गुनेमासिशिवरात्र्यां
कलावती ॥३४॥ ननर्तजागरंप्राप्यजगौगीतंचपेशलम् ॥ स्वयंचवादयामासनानावाद्यानिवाद्यवित् ॥३५॥ तेनतौर्यत्रिकेणापिप्रीणयित्वाथसानटी॥
रत्नेश्वरंमहालिंगंदेशमिष्टंजगामह ॥ ३६ ॥ कालधर्मवशंयातातत्रसावरनर्तकी ॥ सुतागंधर्वराजस्यवसुभूतेर्बभूवह ॥ ३७ ॥ संगीतस्यसवाद्यस्यतस्यला
स्यस्यपुण्यतः ॥ तत्रेशाग्रेकृतस्येहजागरेशिवरात्रिजे ॥ ३८ ॥

पंडिताः ॥ ३४ ॥ पेशलंमनोहरम् ॥ ३५ ॥ तौर्यत्रिकेणनृत्यवाद्यगीतेन ॥ यदाहामरः ॥ तौर्यत्रिकंनृत्यगीतवाद्यमिति ॥ ३६ ॥ ३७ ॥ लास्यस्यनृत्यस्य ॥ यदाहामरः ॥ लास्यंनृत्यंचनर्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वमिति ॥ ३८ ॥ कलानांचतुःषष्टीनांकलापःसमूहस्तत्रकुशलाः ॥ ३९ ॥ ४० ॥ मुनेइत्यगस्त्यसंबोधनंकार्तिकेयकृतम् ॥ ४१ ॥ वाग्देवीसरस्वती ॥ तिसृभिस्ताभिःसहितयारत्नावल्येत्यर्थः ॥ ॥ ४२ ॥ नियमंव्रतम् ॥ ४३ ॥ वचोवक्ष्यामिवचनंवदिष्यामि ॥ अपिशब्देनभोजनादिकंसंगृह्यते ॥ ४४ ॥ ४५ ॥ समानर्चपूजयामास ॥ चःसमुच्चये ॥ गीतमालयागीतसमूहेन ॥ ४६ ॥ अभवंजातः ॥ ४७ ॥ तवनामसनामाख्योरत्नचूडइत्यर्थः ॥ ४८ ॥ आनंदसंदोहमंथरासुखसमूहेनव्याप्तास्तब्धेतिवा ॥ ४९ ॥ निजोदंतंस्ववृत्तांतंरत्नेशेनोक्तंयस्त्वयेत्यादिरूपम् ॥ निजोदेश

रम्यारत्नावलीनामरूपलावण्यशालिनी ॥ कलाकलापकुशलामधुरालापवादिनी ॥ ३९ ॥ पितुरानंदकृन्नित्यंवसुभूतेर्घटोद्भव ॥ सर्वगांधर्वकुशलागुण रत्नमहाखनिः ॥ ४० ॥ मुनेसखीत्रयंतस्याश्चारुचातुर्यभाजनम् ॥ शशिलेखानंगलेखाचित्रलेखेतिनामतः ॥ ४१ ॥ तिसृभिस्ताभिरेकत्रवाग्देवीप रिशीलिता ॥ ताभ्यःसर्वाःकलाःप्रादात्परिप्रीतासरस्वती ॥ ४२ ॥ प्राप्यरत्नावलीगौरिसाजन्मांतरवासनाम् ॥ रत्नेश्वरस्यलिंगस्यजग्राहनियमंशुभम् ॥ ४३ ॥ रत्नभूतस्यलिंगस्यकाश्यांरत्नेश्वरस्यवै ॥ नित्यंसंदर्शनंप्राप्यवक्ष्याम्यपिवचोमुखे ॥ ४४ ॥ इत्थंनियमवत्यासीत्सागंधर्वसुतोत्तमा ॥ ताभिः सखीभिःसहितानित्यंलिंगंचपश्यति ॥ ४५ ॥ एकदाराध्यरत्नेशंममैतल्लिंगमुत्तमम् ॥ समानर्चचसाबालारम्ययागीतमालया ॥ ४६ ॥ सख्यःप्रदक्षिणी कर्तुंलिंगंतिस्रोऽप्युमेगताः ॥ तस्यागीतेनतुष्टोहंलिंगस्थोवरदोभवम् ॥ ४७ ॥ यस्त्वयारंस्यतेरात्रावद्यगंधर्वकन्यके ॥ तवनामसमानाख्यःसतेभर्ताभ विष्यति ॥ ४८ ॥ इतिलिंगांबुधेर्जातांपरिपीयवचःसुधाम् ॥ बभूवानंदसंदोहमंथरातीवह्रीमती ॥ ४९ ॥ गताथव्योममार्गेणसखीभिःस्वपितुर्गृहम् ॥ कथयंतीनिजोदंतंतमालीनांपुरोमुदा ॥ ५० ॥ ताभिर्दिष्ट्येतिदिष्ट्येतिसखीभिःपरिनंदिता ॥ अद्यतेवांछितंभाविरत्नेशस्यसमर्चनात् ॥ ५१ ॥ यद्यायातिसतेरात्रावद्यकौमारहारकः ॥ चोरोबाहुलतापाशैःपाशितव्योतियत्नतः ॥ ५२ ॥ गोचरीक्रियतेस्माभिर्यथाससुकृतैकभूः ॥ प्रातरेवतवप्रेयात्रत्ने शादिष्टइष्टकृत् ॥ ५३ ॥ यातास्वस्मासुहृष्टासुभवतीपुण्यगौरवात् ॥ अहोरत्नेश्वरंलिंगंप्रत्यक्षीकृतवत्यसि ॥ ५४ ॥ अहोभाग्योदयोनृणांमहोपुण्यसमु च्छ्रयः ॥ एकस्यैवभवेत्सिद्धिर्यदेकत्रापितिष्ठताम् ॥ ५५ ॥

मितिपाठेपिसएवार्थः ॥ आलीनांसखीनाम् ॥ यदाहामरः ॥ आलिःसखीवयस्याचेति ॥ ५० ॥ परिनंदिताहर्षिता ॥ भाविभवितृ ॥ ५१ ॥ बाहुलतापाशैःबाहूएवलतारूपाःपाशास्तै पाशितव्योबद्धव्यः ॥ ५२ ॥ सुकृतैकभूःपुण्यैकस्थानम् ॥ प्रातरिति ॥ भवत्याःपुण्यस्यगौरवाद्गुरोर्भावोगौरवंतस्मादस्मासुहृष्टासुयातासुसतीषुअस्माकमग्रेभाविहर्षनिमित्तंरत्नेशेनादिष्टस्तवप्रेयान् प्रियतमोभर्ताप्रातःकालेएवइष्टकृद्भविष्यतीत्यर्थः ॥ ५३ ॥ तस्याभाग्यमभिनंदंति अहोइतिसार्धेन अहोइत्याश्चर्येहर्षेवा ॥ ५४ ॥ उच्छ्रयउद्रेकः ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रदैवमेवकेवलंकारणमितिदैवप्राधान्यवादिवाक्यमनुवादपूर्वकमुदाहरंतिः॥ सत्यंवदंतीति ॥ ५६ ॥ तदेववाक्यंस्वस्मिन्योजयंति ॥ भवत्याअपीति ॥ दैवमदृष्टम् ॥ फलतिफलनिष्पत्तिंकरोति ॥ ॥ ५७ ॥ ननुतर्हिभवतीनांमांप्रतीर्ष्याजातानेत्याहुः ॥ लोकानामिति ॥ आलिहेसखि ॥ ५८ ॥ अतितुच्छवदत्यल्पवत् ॥ ५९ ॥ ६० ॥ ६१ ॥ निर्वर्त्यसमाप्य ॥ ६२ ॥ ६३ ॥ संवेशमंदिरं निद्रागृहम् ॥ शयनमंदिरमितिक्वचित् ॥ ६४ ॥ ६५ ॥ तंद्रीतंद्राआलस्यमितियावत् ॥ ६६ ॥ ६७ ॥ दोर्हस्तः ॥ कंकणेनवाहुवलयेनक्वणितंशब्दितम् ॥ उत्कटमुद्भटंमहदितियावत् ॥ तेनसिंजितेनक्वणितेन ॥ ६८ ॥ सुखेति ॥ सुखसंतानःसुखविस्तारएवपीयूषह्रदस्तस्मिन्परिनिमज्ज्यमंक्त्वाक्षणेनक्षणमात्रेणतद्वियोगाग्निकीलासुतद्विरहाग्निज्वालासुपतितास्मि ॥ यदाहामरः ॥ वह्नेर्द्वयो

सत्यंवदंतिनासत्यंदैवप्राधान्यवादिनः ॥ दैवमेवफलेदेकंनोद्यमोनापरंबलम् ॥ ५६ ॥ भवत्याअपिचास्माकमेकएवहिचोद्यमः ॥ परंदैवंफलत्येकंयथा तवननःपुरः ॥ ५७ ॥ लोकानांव्यवहारोयमालिप्रोक्तःप्रसंगतः ॥ परंमनोरथावातिस्तवयासैवनःस्फुटम् ॥५८॥ इतिसंव्याहरंतीनामनंतोध्वाऽतितुच्छ वत् ॥ क्षणात्तासांव्यतिक्रांतःप्राताश्चस्वंस्वमालयम् ॥ ५९ ॥ अथप्रातःसमुत्थायपुनरेकत्रसंगताः ॥ साचमौनवतीताभिःपरिमुक्तेवलक्षिता ॥ ॥ ६० ॥ तूर्ष्णींप्राप्याथकाशींसास्नात्वामंदाकिनीजले ॥ सखीभिःसहितापश्यल्लिंगंरत्नेश्वरंमम ॥ ६१ ॥ निर्वर्त्यनियमंसाथलज्जामुकुलितेक्षणा ॥ निर्बंधेनवयस्याभिःपरिपृष्टाजगादह ॥ ६२ ॥ ॥ रत्नावल्युवाच ॥ ॥ अथरत्नेशयात्रायाःप्रयातासुस्वमंदिरम् ॥ भवतीषुस्मरंत्येवतद्रत्नेशवचोऽमृतम् ॥ ६३ ॥ सविशेषांगसंस्काराऽविशंसंवेशमंदिरम् ॥ निद्रादरिद्रनयनातद्विलोकनलालसा ॥६४॥ बलात्स्वप्नदशांप्राप्ताभाविनोर्थस्यगौरवात् ॥ आत्मविस्मरणेहेतूततोमेद्रौबभूवतुः ॥ ६५ ॥ तंद्रीतदंगसंस्पर्शौममबोधापहारकौ ॥ तंद्र्यापरवशाचासंततस्तत्स्पर्शनेनच ॥ ६६ ॥ नजानेत्वथ किंवृत्तंकाहंक्वाहंसचाथकः ॥ तंनिर्लिंगमिपुंसख्योयावद्धर्तुंप्रसारितः ॥६७॥ दोःकंकणेनरिपुणाक्वणितंतावदुत्कटम् ॥ महतासिंजितेनाहंतेनाल्पंपरिबोधिता ॥ ६८ ॥ सुखसंतानपीयूषह्रदेपरिनिमंज्यवै ॥ क्षणेनतद्वियोगाग्निकीलासुपतिताबलात् ॥६९॥ किंकुलीयःसनोवेद्मिकिंदेशीयःकिमाख्यकः ॥ दुनोतिनितरांसख्यस्तद्विश्लेषानलोमहान् ॥७०॥ अनल्पोत्कलितंचेतःपुनस्तत्संगमाशया ॥ प्राणानांमेयियासूनामेकमेवमहौषधम् ॥ ७१ ॥ वयस्यानिशिभुक्तस्यतस्यैवपुनरीक्षणम् ॥ भवतीनामधीनंचतत्पुनर्दर्शनंमम ॥७२॥ काऽलीकमालयोवक्तिस्निग्धमुग्धेसखीजने ॥ तद्दर्शनेनस्थास्यंतिप्राणायास्यंतिचान्यथा ॥ ७३ ॥

ज्वालकीलावितिति ॥ वतेतिखेदे ॥ अवलेतिक्वचित्पाठः ॥ ६९ ॥ किंकुलीयःकस्मिन्कुलेभवः ॥ नोनिषेधे ॥ किमाख्यकःकाआख्यायस्यसतथा ॥ दुनोतिउपतापयति ॥ ७० ॥ अनल्पोत्कलितंमहदुत्कंठितम् ॥ अनल्पोत्कल्पितमितिपाठेपिसएवार्थः ॥ अनल्पोत्कंपितमितिचान्यत्र ॥ यियासूनांगंतुमिच्छूनाम् ॥ ७१ ॥ वयस्याहेसख्यः ॥ तर्हितस्यपुनर्दर्शनंकथंस्यात्तत्राह ॥ भवतीनामिति ॥ ७२ ॥ अलीकंकपटम् ॥ आलयोहेसख्यः ॥ स्निग्धश्चासौमुग्धःसुंदरश्चेतितथातस्मिन्सखीजनेकावक्तिनकापीत्यर्थः ॥ किंतन्निष्कपटंवाक्यंतदाह ॥ तद्दर्शनेनेति ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतइत्याकांक्षायामाह ॥ दशमीति ॥ दशम्यवस्थामरणावस्थेत्यर्थः ॥ सन्नह्येत्प्रवर्तेत ॥ दूनायाउपतापितायाः ॥ ताःसख्यः ॥ ७४ ॥ ७५ ॥ नोस्माभिः ॥ ७६ ॥ इतीति ॥ इत्येवंप्रकारांत द्गिरंतासांवाचंश्रुत्वाहेवयस्यामेममतदवाप्तौतस्यस्वप्नदृष्टस्यप्राणनाथस्यावाप्तिनिमित्तंयूयंकुंठिताइत्यर्थोक्तेनसाबालामुमूर्छमोहंप्राप्तवती ॥ हेतिपादपूरणेप्रसिद्धार्थेवा ॥ ७७ ॥ इत्यर्द्धोक्तेनेत्यस्यार्थं स्पष्टयति ॥ कुंठितशक्तयइति ॥ यूयंकुंठितशक्तयइतियत्तयावक्तव्यंतुपुनःतद्यूयंकुंठीतिभाषितमित्यर्थः ॥ ७८ ॥ व्यधुश्चक्रुः ॥ ७९ ॥ उपचारतःप्रयोगतः ॥ ८० ॥ उक्षणात्सेचनात् ॥ ८१ ॥ प्रसंगात्स्नपनोदकमाहात्म्यमाह श्रद्धेत्यादिचतुर्भिः ॥ उपसर्गेपीडायांव्याधाविवितियावत् ॥ स्नपनोदकमेवपादद्वारेणनिःसृतत्वाच्चरणोदकमित्युच्यते ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

दशम्यवस्थासन्नह्येद्बाधितुंमाधुनाभृशम् ॥ इतितस्यागिरःश्रुत्वादूनायानितरांचताः ॥ ७४ ॥ प्रवेपमानहृदयाःप्रोचुर्वीक्ष्यपरस्परम् ॥ ७५ ॥ ॥ सख्यऊचुः ॥ ॥ यस्यग्रामोननोनामनान्वयोनापिबुध्यते ॥ सकथंप्राप्यतेभद्रेकउपायोविधीयताम् ॥ ७६ ॥ इतिरत्नावलीश्रुत्वाससंदेहांचत द्गिरम् ॥ वयस्यास्तदवाप्तौमेयूयंकुंठिमुमूर्छह ॥ ७७ ॥ इत्यर्धोक्तेनसाबालायूयंकुंठितशक्तयः ॥ यद्वक्तव्यंत्वितितयायूयंकुंठीतिभाषितम् ॥ ७८ ॥ ततस्तास्त्वरिताःसख्यःपरितापोपहारकान् ॥ बहुशःशीतलोपायान्व्यधुर्मोहप्रशांतये ॥ ७९ ॥ व्यपैतिनयदामूर्छातत्तच्छीतोपचारतः ॥ तस्यास्तदै कयानीतंरत्नेशस्नपनोदकम् ॥ ८० ॥ तदुक्षणात्क्षणादेवतन्मूर्छाविरराम ह ॥ सुप्तोत्थितेवसावादीन्मुहुःशिवशिवेतिच ॥ ८१ ॥ ॥ स्कंदउवाच ॥ श्रद्धावतांस्वभक्तानामुपसर्गेमहत्यपि ॥ नोपायांतरमस्त्येवविनेशचरणोदकम् ॥ ८२ ॥ येव्याधयोपिदुःसाध्याबहिरंतःशरीरगाः ॥ श्रद्धयेशोदकस्पर्शा त्तेनश्यंत्येवनान्यथा ॥ ८३ ॥ सेवितंयेनसततंभगवच्चरणोदकम् ॥ तंबाह्याभ्यंतरशुचिंनोपसर्पतिदुर्गतिः ॥ ८४ ॥ आधिभौतिकतापंचतापं चाध्या धिदैविकम् ॥ आध्यात्मिकंतथातापंहरेच्छ्रीचरणोदकम् ॥ ८५ ॥ व्यपेतसंज्वराचाथगंधर्वतनयामुने ॥ उचितज्ञेतिहोवाचताःसखीःस्निग्धधीरधीः ॥ ८६ ॥ ॥ रत्नावल्युवाच ॥ ॥ शशिलेखेनंगलेखेचित्रलेखेमदीहिते ॥ यूयंकुंठितसामर्थ्याःकुतोवस्ताःकलाःक्वा ॥ ८७ ॥ मत्प्रियप्राप्तयेसम्यगुपायो ऽस्तिमयेक्षितः ॥ रत्नेश्वरानुग्रहतोऽनुतिष्ठतहितंहिताः ॥ ८८ ॥ शशिलेखेभिलषितप्राप्त्यैलेखांस्त्वमालिख ॥ संलिखानंगलेखेत्वंयूनःसभुवनी चरान् ॥ ८९ ॥ चित्रगेचित्रलेखेत्वंपातालतलशायिनः ॥ किंचिदाविर्भवच्चारुतारुण्यालंकृतीँल्लिख ॥ ९० ॥

उचितंजानातीतिउचितज्ञा॥इतिवक्ष्यमाणंवचनम्॥ हेतिप्रसिद्धौपादपूरणेवा॥स्निग्धधीरधीःस्निग्धाकोमलाधीराअर्थोपायविवेचनेसमर्थाधीर्बुद्धिर्यासांताः॥अत्रेयङभावआर्षः॥कर्तृविशेषणेतुसुसंगतमेव ॥ ८६ ॥ कुतःकस्मात् ॥ वोयुष्माकंताः ॥ कलावाक्केत्यन्वयः ॥ ८७ ॥ भवथयूयंयथातथाकिंतुरत्नेशानुग्रहान्ममकांतलब्धयेमयासम्यगुपायोदृष्टस्तंसध्रीचीनमुपायमनुतिष्ठतकुरुत ॥ हियस्मा द्यूयंममहिताःहितकारिण्यइति ॥ ८८ ॥ लेखान्देवान् ॥ यदाहामरः ॥ आदितेयादिविषदोलेखाअदितिनंदनाइति ॥ यूनस्तरुणान् ॥ ८९ ॥ पातालतलशायिनोनागादीन् ॥ कथंभूतान् ॥ आविर्भ

CC-0. In Public Domain. Digitization by eGangotri

वटुच्चरद्रम्यंतारुण्यमेवअलंकृतिरलंकरणंयेषांतेतथातान् ॥ ९० ॥ प्रवर्ण्यप्रशस्य ॥ यौवनशेवधीन्यौवनमेवशेवधिर्येषांतान्तारुण्यैकधनानित्यर्थः ॥ ९१ ॥ निर्यत्कौमारलक्ष्मीकान्निर्निःशेषेणयंतीगच्छंतीकौमारलक्ष्मीःकौमारसंपद्येषांतान् ॥ शेषाद्विभाषेतिकप्प्रत्ययः ॥ पुंवत्त्वश्रीसमावृतान्पुंवत्त्वश्रीःपुंस्त्वशोभातयासमावृतानलंकृतान् ॥ ९२ ॥ निकायान्समूहान् ॥ व्यलोकतापश्यत् ॥ ॥ ९३ ॥ प्रेमनिर्भरास्नेहपरिपूर्णा ॥ ९४ ॥ कर्णाभ्यर्णविलोचनाकर्णयोरभ्यर्णंनिकटंव्याप्यविशिष्टेलोचनेयस्याःसातथा ॥ वलिसद्मयुवसुसुतलस्थतरुणेषु ॥ ९५ ॥ मान्मथैःकामसंबंधिभिः ॥

अथाकर्ण्येतिताःसख्यस्तच्चातुर्यंप्रवर्ण्यच ॥ लिलिखुःक्रमशःसख्योयूनोयौवनशेवधीन् ॥ ९१ ॥ निर्यत्कौमारलक्ष्मीकान्पुंवत्त्वश्रीसमावृतान् ॥ प्रातःसंध्येवगंधर्वीन्नृपाद्यांस्तानवैक्षत ॥ ९२ ॥ सर्वान्सुरनिकायान्साव्यलोकतशुभेक्षणा ॥ नचांचल्यंजहावक्ष्णोस्तेषुस्वर्लोकवासिषु ॥ ९३ ॥ ततोमध्यमलोकस्थान्मुनिराजकुमारकान् ॥ विलोक्यापिनसाप्रीतिंकाप्यापप्रेमनिर्भरा ॥ ९४ ॥ अथरत्नावलीबालाकर्णाभ्यर्णविलोचना ॥ दृशौव्यापारयामासबलिसद्मयुवस्वपि ॥ ९५ ॥ दितिजान्दनुजान्वीक्ष्यसागंधर्वीकुमारकान् ॥ रतिंबबंधनक्वापितापितामान्मथैःशरैः ॥ ९६ ॥ सुधाकरकरस्पृष्टाप्यतिदूनांगयष्टिका ॥ पश्यंतीनागयूनःसाकिंचिदुच्छ्वसिताऽभवत् ॥ ९७ ॥ भोगिनस्तान्विलोक्यापिचित्रंचित्रगतानथ ॥ मनाक्संमुक्तभोगेवक्षणमासीत्कुमारिका ॥ ९८ ॥ यूनःप्रत्येकमद्राक्षीदशेषाञ्छेषवंशजान् ॥ तक्षकान्वयगांस्तद्वदथवासुकिगोत्रजान् ॥ ९९ ॥ पुलीकानंतकर्कोटभद्रसंतानगानपि ॥ दृष्ट्वानागकुमारांस्ताञ्छंखचूडमथैक्षत ॥ १०० ॥ शंखचूडेक्षणादेवपरांलज्जांबभारसा ॥ उद्भिन्नपुलकाप्यासीदंगप्रत्यंगसंधिषु ॥ १ ॥ तत्रपाभरतोऽज्ञायितत्कौमारहरोवरः ॥ तयावैदग्ध्यवरयाक्षणतश्चित्रलेखया ॥ २ ॥ अथचित्रपटीचित्रलेखाचित्रपटांचलम् ॥ परिक्षिप्यावृणोत्तूर्णंपरिहासैकपेशला ॥ ३ ॥ रत्नावलीचित्रलेखांह्रियामौनावलंबिनी ॥ दृशाकुटिलयाद्राक्षीत्प्रस्फुरद्दशनांबरा ॥ ४ ॥ कटाक्षितानंगलेखातयाथशशिलेखया ॥ चित्रलेखापरिक्षिप्तपटांचलमपाकरोत् ॥ ५ ॥ वसुभूतिसुतासाथकन्यारत्नावलीशुभा ॥ शंखचूडान्ववायेतंरत्नचूडमवैक्षत ॥ ६ ॥

॥ ९६ ॥ अतिदूनांगयष्टिकाऽतिव्यथितशरीरयष्टिका ॥ उच्छ्वसिताउल्लसिता ॥ ९७ ॥ भोगिनोनागान् ॥ ९८ ॥ शेषोऽनंतः ॥ ९९ ॥ पुलीकानंतेति ॥ अनंतनामाकश्चिदपरः ॥ संतानोवंशः ॥ ॥ १०० ॥ बभारधृतवती ॥ अंगप्रत्यंगसंधिषुअंगेषुसर्वांगसंधिषुचेत्यर्थः ॥ १ ॥ वरोभर्ता ॥ २ ॥ चित्रपटांचलंचित्रवस्त्राग्रभागम् ॥ पेशलाकुशला ॥ ३ ॥ ह्रियालज्जया ॥ कुटिलयावक्रया ॥ प्रस्फुरच्चंचद्दशनेनदंतेनांबरंवस्त्रंयस्याःसातथा ॥ प्रस्फुरद्दशनांबरमोष्ठोयस्याःसेतिवा ॥ ४ ॥ कटाक्षिताकटाक्षेणप्रेरिता ॥ अपाकरोद्दूरीचकार ॥ ५ ॥ रत्नारत्नावली ॥ भामासत्यभामाभीमो

१ किमभिप्रेतमनयोपमयेति चिन्त्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीमसेनइतिवत् ॥ आवनीशुभाआसमंततःअवनौपृथिव्यांशोभतेराजतइतितथा॥अवनीशुभेत्येवमेववा॥रत्नावलीतिवापाठः ॥६॥ तदीक्षणक्षणात्तस्यरत्नचूडस्यईक्षणेनजातोयःक्षणोऽवसरउत्सवो वा ॥ क्षणउद्धवउत्सवइत्यमरः ॥ तस्मादिति॥स्वेदोदकणिकांचिताघर्मांबुकणव्याप्ता ॥७॥ धृतंरोमांचरूपंकंचुकंययासातथा॥तस्तंभास्थितवती॥८॥औत्सुक्यमौत्कंठ्यंमाव्रजमागच्छ ॥ सौत्सुक्यमितिपाठे सात्वमित्यर्थः ॥ कुतइत्यतआह ॥ सिद्धइति ॥ ९ ॥ सिद्धिरेवकुतस्तत्राह ॥ एतस्येति ॥ एतावताकथंसुलभत्वमित्याशंकायामाह ॥ माविषीदेति ॥ एषसुलभोयतोरत्नेश्वरेणार्पितः ॥ ११० ॥ सदृग्वरावाप्त्यासदृशभर्तृप्राप्त्या ॥११॥१२॥ हरिःसिंहः ॥ विकटदंष्ट्रास्यइत्युभयोर्विशेषणम् ॥१३॥ वेपथुभूमयःकंपस्थानानि ॥१४॥ तन्माविधेहिमाकुरु ॥ किंतदाह ॥ यदेतदिति ॥ हाविधेही

तदीक्षणक्षणाद्दृष्टिरानंदाश्रुभिरावृता ॥ कपोलभित्तिरभवत्स्वेदोदकणिकांचिता ॥ ७ ॥ चकंपेगात्रलतिकाधृतरोमांचकंचुका ॥ चित्रन्यस्तेवतस्तं भक्षणंमुकुलितानना ॥ ८ ॥ ततःसाचित्रलेखातामेत्याश्वासयदातुराम् ॥ मौत्सुक्यंव्रजगंधर्वि सिद्धस्तेद्यमनोरथः ॥९॥ एतस्यावगतंसर्वंदेशनामान्वया दिकम् ॥ माविषीदालिसुलभस्त्वेषरत्नेश्वरार्पितः ॥११०॥ अहोसदृग्वराप्याप्यारत्नेशेनासितोषिता ॥ उत्तिष्ठयामःसदनंरत्नेशःसर्वदोहिनः ॥ ११ ॥ अथदैववशाद्यांत्यस्ताद्दृष्टागगनाध्वगाः ॥ सुबाहुनादानवेनपातालतलवासिना ॥ १२ ॥ गृहीत्वाताश्चतस्रोपिनिरगाद्दानवोगृहम् ॥ हरिर्विकटदंष्ट्रास्यः प्रांतरेहरिणीरिव ॥ १३ ॥ तास्तंविलोक्यगंधर्व्योदंष्ट्राविकटिताननम् ॥ रुधिरारुणनेत्रंचजातावेपथुभूमयः ॥ १४ ॥ हामातर्हापितस्त्राहिहाविधेमावि धेहितत् ॥ यदेतत्कर्तुमारब्धमनाथास्वतिनिष्ठुरम् ॥ १५ ॥ हादैवमंदभाग्याभिःकिमस्माभिरनुष्ठितम् ॥ सुकृतेतरवार्तापिनोचित्तेव्याहृताक्व चित् ॥ १६ ॥ शिशुक्रीडनकंहित्वाहित्वारत्नेश्वरार्चनम् ॥ पित्रोःस्वाधीनसच्चेष्टाइष्टंविघ्नोनकिंचन ॥१७॥ अधोभुवनगादीनाहीनानाथेनकोत्रनः ॥ त्रातित्राणार्थिनीर्बालाःशंभोरत्नेशसर्वग ॥ १८ ॥ इत्थंगंधर्वतनयाविलपंतीःकृपातुरम् ॥ शुश्रावनागराजोसौरत्नचूडोमहामनाः ॥ १९ ॥ कोसौ मत्स्वामिनोनामरत्नेशस्यमहेशितुः ॥ लिंगराजस्यगृह्णातिकर्मबंधनभेदिनः ॥ १२० ॥ पुनरप्यार्तरावंसश्रुत्वाबालामुखेरितम् ॥ रत्नेशरक्षरक्षेतिगृही तास्त्रोविनिर्ययौ ॥२१ ॥ तंवसारसपानेनमहामांसनिषेवणात् ॥ अत्यंतोन्मत्तदुश्चेष्टंरत्नचूडोनिरैक्षत ॥ २२ ॥ अध्याक्षिपच्चरेदुष्टशिष्टकन्यापहारक ॥ मद्दृष्टिगोचरंयातःक्वयास्यस्यद्यरेऽधम ॥ २३ ॥ ममबाणहतप्राणःप्रयाणंकुरुदुर्मते ॥ आर्तत्राणोद्यतमतेर्वैवस्वतपुरंप्रति ॥ २४ ॥ रत्नेश्वरस्ययैर्ना मप्रलयापद्यपिस्फुटम् ॥ गृहीतंनभवाद्दृग्भ्यस्तेषुभीतिर्भयात्मसु ॥ २५ ॥

तिपाठेऽकारप्रश्लेषेणव्याख्येयम् ॥१५॥ सुकृतेतरवार्तापापवार्ता ॥१६॥ स्वाधीनाःसच्चेष्टाःस्वायत्तोत्तमक्रियाश्चहित्वाकिंचनान्यदिष्टंनविघ्नइत्यर्थः ॥ दुष्टमितिक्वचित्पाठः ॥१७॥१८॥१९॥१२०॥ रत्नेश्वररक्षरक्षेत्यार्तरावंश्रुत्वेत्यन्वयः ॥ २१ ॥ वसाहृन्मेदःसएवरसस्तस्यपानेन ॥ वसासवपानेनेतिपाठेवसैवासवोमद्यंवसाचासवश्चेतिवातस्यपानेनेतिव्याख्येयातव्यम् ॥ निरैक्षतदृष्टवान् ॥ २२ ॥ अध्याक्षिपदाक्षिप्तवान् ॥ चःसमुच्चये ॥ २३ ॥ २४ ॥ रत्नेश्वरस्येति ॥ रत्नेश्वरस्यनामयैर्गृहीतंतेषुभवादृशेभ्यःस्फुटंनिश्चितंप्रलयापद्यपिभीतिर्नेत्यन्वयः ॥ भयात्मसुभयंभीतिरात्मस्वंतःकरणेषु

CC-0. In Public Domain. Digitization by eGangotri

भययुक्ताआत्मानोवायेषांतेतथातेषु ॥ २५ ॥ २६ ॥ तन्मुखेत्यत्रतच्छब्दोरत्नचूडविषयः ॥ व्याघ्रघ्राताव्याघ्रेणगृहीताः ॥ २७ ॥ कोदंडंधनुः ॥ २८ ॥ सोपीत्यत्रषष्ठाक्षरस्यलघुत्वंछांदसम् ॥ परिघंमुसलम् ॥ २९ ॥ रत्नचूडंप्रतिशंकमानंसूतंप्रत्याह ॥ हृदीति ॥ भ्रमेणक्रीडार्थंज्वलत्तृणादिनिर्मितोदंडोऽलातदंडः ॥ १३० ॥ अंतर्मध्ये ॥ ३१ ॥ कालानलसमंप्रलयानलसदृशम् ॥ प्रगवेष्यसम्यगन्विष्य ॥ ३२ ॥ अस्यसुवाहोः ॥ विनिर्यात्यनिःसार्यबहिःकृत्वेतियावत् ॥ तूणमिषुधिम् ॥ दूरमितिवापाठः ॥ तच्छरीरंलक्ष्यंभित्त्वादूरमगादित्यर्थः ॥ तत्रोत्प्रेक्षामाह ॥ हृदिस्थमिति ॥ ३३ ॥ नागाशुगोरत्नचूडशरः ॥ ३४ ॥ अधर्मोपार्जितवित्तानामनर्थकरत्वंकैमुत्यन्यायेनाह ॥ अन्यायेति ॥ यांत्येवतस्येत्यर्थः ॥ यदितिपाठेयत्सुखंतानितत्सुखसंबंधीनीतियत्त

रत्नेश्वरमहानामकृतत्राणास्तुयेनराः ॥ तेषांजन्मजराव्याधिकलिकालभयंकुतः ॥२६॥ इत्युक्त्वाताभयत्रस्तास्तन्मुखप्रहितेक्षणाः ॥ व्याघ्रघ्राताइवमृगीर्मभैषिष्टेत्युवाचसः ॥ २७ ॥ इत्याश्वास्याथगंधर्वीःसवैसुजगराजजः ॥ आकर्णपूर्णमाकृष्यकोदंडंप्राहिणोच्छरम् ॥ २८ ॥ सोपिक्रुद्धोदनुजराट्पदास्पृष्टभुजंगवत् ॥ आविद्ध्यकालदंडाभंपरिघंव्यसृजन्महत् ॥२९॥ हृदिरत्नेश्वरंलिंगंयस्यसम्यग्विजृंभते ॥ अलातदंडवत्तस्मिन्कालदंडोपिजायते ॥ ॥ १३० ॥ अंतरेवसचिच्छेदपरिघंस्वमहेषुभिः ॥ दुर्वृत्तस्ययथेहायुर्विच्छिद्येतांतरैवहि ॥ ३१ ॥ ततोस्यबाणंचिक्षेपकालानलसमप्रभम् ॥ सबाणस्तस्यहृदयंप्रविश्यप्रगवेष्यच ॥ ३२ ॥ प्राणानस्यविनिर्यात्यस्वयंतूणमगात्पुनः ॥ हृदिस्थंतस्यदौरात्म्यंसर्वंविज्ञायतत्त्वतः ॥ ३३ ॥ दिगंगनापुरःख्यातुमिवनागाशुगोगतः ॥ ३४ ॥ अन्यायोपार्जितैर्द्रव्यैर्यःसुखंभोक्तुमिच्छति ॥ तानिद्रव्याणियांत्येवसप्राणानिकुतःसुखम् ॥ ३५ ॥ इतितंदानवंहत्वानागराजोमहाबली ॥ प्रत्युवाचाथताःकन्याःकायूयंकस्यचात्मजाः ॥ ३६ ॥ दुरात्मनाकुतोनेनसंगतादनुजन्मना ॥ क्वारत्नेश्वरंलिंगंभवतीभिर्विलोकितम् ॥ ३७ ॥ यस्यनामाक्षरोच्चाराद्व्यपेतपरमापदः ॥ यूयमाशुतदाख्यातयेनजानामितत्त्वतः ॥३८॥ इतिश्रुत्वागिरस्तस्यनितरांप्रेमनिर्भराः ॥ परस्परंमुखंवीक्ष्यकोसौस्याद्दृष्टपूर्ववत् ॥ ३९ ॥ अकारणसखाकोसौप्रांतरेसमुपस्थितः ॥ निजप्राणान्पणीकृत्ययेनत्राताःस्मबालिकाः ॥ १४० ॥ अस्यसंदर्शनादेवस्वभावचपलान्यपि ॥ मंथराणींद्रियाणिस्युःपरिपीयसुधामिव ॥ ४१ ॥ यातुमन्यत्रनोनेत्रेप्रोत्सहेतेयथातथा ॥ अन्यद्वस्त्वंतरंप्रेक्ष्यरमणीयतरंत्वपि ॥ ४२ ॥ वचःपीयूषमाधुर्यंनितरांप्राप्यनःश्रुती ॥ शब्दांतरग्रहापेक्षांनकुर्वातेस्वजन्मनः ॥ ४३ ॥

च्छब्दार्थावुन्नेयाविति ॥ ३५ ॥ ३६ ॥ ३७ ॥ आख्यातकथयत ॥ ३८ ॥ इतिश्रुत्वागिरस्तस्येत्यादीनामितिब्रुवंत्यइत्यग्रिमेणान्वयः ॥ प्रेमनिर्भराःस्नेहगर्भाः ॥ दृष्टपूर्ववत्पूर्वंदृष्टइव ॥ ३९ ॥ प्रांतरेमध्यमार्गे ॥ पणीकृत्यग्लहंकृत्वा ॥ स्मेतिविस्मये ॥ १४० ॥ मंथराणिस्तब्धानि ॥ ४१ ॥ इंद्रियाणांस्तब्धतामेवाहुर्यातुमित्यादिना ॥ यथातथायाथातथ्येन ॥ नेत्रेचक्षुषी ॥ ॥ ४२ ॥ श्रुतीश्रवणेंद्रिये ॥ स्वजन्मनःआकाशस्य ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आप्नुतःप्राप्नुतः ॥ नोस्माकम् ॥ सन्मनएवमणिस्तस्यचोरंतस्करम् ॥ ४४ ॥ अनुल्बणमनुद्भटंसुकुमारांगमित्यर्थः ॥ ४५ ॥ अज्ञानेकारणमाह ॥ अतीवेति ॥ नाज्ञासिषुर्नज्ञातवत्यः ॥४६॥ ॥ ४७ ॥ अवधेहिस्थिरीकुरु ॥ ४८ ॥ वयस्याःसख्यः ॥ ४९ ॥ १५० ॥ हरिष्यतीतिशब्दस्यभविष्यतीत्यनेनसम्बन्धः ॥ ५१ ॥ ५२ ॥ कलाकौशल्यतःविद्यानैपुण्यात् ॥ ५३ ॥ ५४ ॥

आप्नुतःपंगुतामेतौपादौनश्चंचलावपि ॥ अमुंयुवानमालोक्यचोरंनःसन्मनोमणेः ॥ ४४ ॥ इतिब्रुवंत्यस्ताबालाःपरस्परमनुल्बणम् ॥ दृष्ट्वापिचित्रमध्यस्थंविविदुस्तन्नबालिकाः ॥ ४५ ॥ अतीवभीषणाकारदनुजस्यातिसाध्वसात् ॥ अंधीभूतेक्षणास्तंनाज्ञासिषुर्हरिणीक्षणाः ॥ ४६ ॥ ऊचुश्चतंयुवानंतानिजजीवितरक्षिणम् ॥ यदंगभवतापृष्टंस्नेहनिर्भरचेतसा ॥ ४७ ॥ तदाचक्ष्महेसर्वमवधेहिक्षणंमनः ॥ इयंगंधर्वराजस्यवसुभूतेस्तनूद्भवा ॥ ॥ ४८ ॥ कन्यारत्नावलीनामगुणरत्नमहाखनिः ॥ वयंवयस्याएतस्याश्छायेवानुगताःसदा ॥ ४९ ॥ आरभ्यबाल्यमप्येषालिंगंरत्नेश्वराभिधम् ॥ यातिपित्राप्यनुज्ञाताकाश्यामर्चयितुंसदा ॥ १५० ॥ वरोपिदत्तस्तेनास्यैप्रसन्नेनाथशंभुना ॥ हरिष्यतीतियःस्वप्नेकौमारंतेकुमारिके ॥ ५१ ॥ तवनामसमानाख्यःसतेभर्ताभविष्यति ॥ युवानंस्वप्नभोक्तारंप्राप्याप्येषासुदुःखिता ॥५२॥ पुनस्तद्विरहोत्थेनवह्निनातीवतापिता॥कलाकौशल्यतोऽस्माभिःसोपिचित्रेप्रदर्शितः ॥ ५३ ॥ यस्यनग्रामनामापिनान्वयोप्यवबुध्यते ॥ तंदृष्ट्वाचित्रलिखितमप्येषाजीवितापुनः ॥ ५४ ॥ ततोरत्नेश्वरंनत्वास्वगृहायोत्सुकाभवत् ॥ यांतीस्ततोऽनयासार्धंप्रांतरेगगनाध्वनि ॥ ५५ ॥ अतर्किताऽगमश्चास्मान्धृत्वापातालमाविशत् ॥ अनंतरंभवानेवतंवेत्तिदनुजाधमम् ॥ ॥५६॥ अंगइत्येववृत्तांतोनिजोऽस्माभिरुदीरितः ॥ प्रसादंकुरुचास्माकंपुरःकोसिकृपानिधे ॥५७॥ यदाप्रभृतिचास्माभिःसदृष्टोदुष्टदानवः ॥ तदाप्रभृतिनोनेत्रेविद्युतेवहतप्रभे ॥ ५८ ॥ कांदिशीकाभयत्रातर्नविद्मःकिंचिदेवहि ॥ क्ववयंकावयंकस्त्वंकिंजातंकिंभविष्यति ॥ ५९ ॥ निशम्येतिसपुण्यात्मानागराजकुमारकः ॥ आश्वास्यताभयत्रस्ताःप्रोवाचेदंचपुण्यधीः ॥ १६० ॥ मयासहसमायातरत्नेशंदर्शयामिवः ॥ इत्याहूयसतानिन्येक्रीडावापींसुखोदकाम् ॥६१॥ विचित्रमणिसोपानांहंसकोककृतारवाम्॥कवीनांवासितव्याजात्स्वागतंकुर्वतीमिव ॥६२॥ तत्रतेनाभ्यनुज्ञाताःक्रीडावाप्यांनिमज्ज्यताः ॥ सचैलपुष्पाभरणाःप्रोन्ममज्जुस्ततःपुनः ॥ ६३ ॥ बहिर्निर्गत्यगंधर्व्यःपश्यंत्यःस्थगिताइव ॥ रत्नेशालयमालोक्यकालराजसमीपतः ॥ ६४॥ परस्परंततःप्रोचुर्गंधर्व्योविस्मिताइव ॥ स्वप्नोयंकिंनुवासत्यंखेलोरत्नेश्वरस्यवा ॥ ६५ ॥

॥ ५५ ॥ ५६ ॥ पुरोग्रतः ॥ ५७ ॥ ५८ ॥ कांदिशीकाभयद्रुताः ॥ किंचिदित्यस्यविवरणंकेति ॥ ५९ ॥ १६० ॥ ६१ ॥ विचित्रमणिसोपानांनानामणिसंबद्धपद्यामित्यर्थः ॥ कवीनांवासितव्याजात्पक्षिणांशब्दच्छलात् ॥ ६२ ॥ निमज्ज्यजलाशयंगत्वाप्रोन्ममज्जुःशिरोभिःसम्यङ्मज्जनंचक्रुः ॥ ६३ ॥ स्थगिताइवजृंभिताइव ॥ ६४ ॥ खेलःक्रीडा ॥ ६५ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ६६ ॥ ६७ ॥ ६८ ॥ कालरूपःसर्पःकालसर्पस्तस्मात्कालश्चसर्पश्चताभ्यांवाजातंकालसर्पजम् ॥ ६९ ॥ १७० ॥ आशापुरीनाम्ना ॥ ७१ ॥ आशापुरीनामनिर्वक्ति ॥ याद्यापीति ॥७२॥सपर्यातःपूजातः ॥ सिद्धयष्टकमणिमादिकंपद्मादिकंवा ॥ विरजोदकमित्यत्रसंधिरार्षः ॥ ७३ ॥ सिद्ध्यष्टकंभवेदित्युक्तंतात्किंमूर्तिमद्मूर्तिमद्वेतिपृच्छायामाह ॥ सूर्त्योमू तिमत्यइत्यर्थः ॥ ७४ ॥ विनायकाविघ्नाः ॥ ७५ ॥ अतःअसौअत्रेतिवापाठः ॥ चःसमुच्चये ॥ ७६ ॥ ७७ ॥ मध्यमविष्टपेभूर्लोके ॥ ७८ ॥ ७९ ॥ प्रतिदर्शमत्यमावा

वयमेवहिवाभ्रांतागंधर्व्योनवयंकिमु ॥ किमेतन्नैवजानीमऐंद्रजालिकखेलवत् ॥ ६६ ॥ एषोत्तरवहागंगास्फुटमेवभवेदिह ॥ शंखचूडस्यत्राप्येपाशं खचूडालयस्त्वसौ ॥ ६७ ॥ एतत्पंचनदंतीर्थमेषवागीश्वरालयः ॥ यस्यसंदर्शनाद्देववाग्विभूतिर्विजृंभते ॥ ६८ ॥ शंखचूडेश्वरश्चैषशंखचूडप्रतिष्ठितः ॥ यस्यसंदर्शनात्पुंसांनभयंकालसर्पजम् ॥ ६९ ॥ एषामंदाकिनीनामदीर्घिकापुण्यतोयभूः ॥ यस्यांकृतोदकामर्त्यामर्त्यलोकेविशंतिन ॥ १७० ॥ असावाशापुरीदेवीयास्तुतात्रिपुरारिणा ॥ त्रिपुरंजेतुकामेनमंदाकिन्यास्तटेशुभे ॥ ७१ ॥ याद्यापिपूजितामर्त्यैराशांपूरयतेर्थिनाम् ॥ मंदाकिन्याः प्रतीच्यांतुएषसिद्धयष्टकेश्वरः ॥ ७२ ॥ भवेद्यस्यसपर्यातोगृहेसिद्ध्यष्टकंस्फुटम् ॥ कुंडंसिद्ध्यष्टकाख्यंचतत्रैवविरजोदकम् ॥ ७३ ॥ यत्रस्नात्वा कृतश्राद्धोविरजस्कोदिवंव्रजेत् ॥ मूर्त्यस्ताःसिद्धयश्चाष्टैयाःकाश्यांसर्वसिद्धिदाः ॥ ७४ ॥ सर्वसिद्धिप्रदश्चासौमहाराजविनायकः ॥ विनायकाःप्रणश्यं तियस्मैप्रणमतांनृणाम् ॥ ७५ ॥ असौसिद्धेश्वरस्योच्चैःप्रासादःकांचनोज्वलः ॥ रत्नध्वजपताकाश्चसिद्धिःस्याद्यद्विलोकनात् ॥ ७६ ॥ क्षेत्रस्यमध्यमे भागेमध्यमेश्वरएषवै ॥ मध्याधोलोकयोर्मध्येनत्रसेद्यस्यवीक्षणात् ॥ ७७ ॥ मध्यमेशंसमभ्यर्च्यनरोमध्यमविष्टपे ॥ आसमुद्रक्षितींद्रःस्यात्ततोमोक्षं चविंदति ॥ ७८ ॥ ऐरावतेश्वरंलिंगंतत्प्राच्यामिष्टसिद्धिकृत् ॥ दृश्यतेयत्पताकायांरम्यऐरावतोगजः ॥७९॥ वृद्धकालेश्वरस्यैषप्रासादोरत्ननिर्मितः ॥ प्रतिदर्शंवसेद्यत्ररात्रौचंद्रःसतारकः ॥ १८० ॥ यस्यसंदर्शनान्नृणांनकालःप्रभवेद्भवे ॥ नकलिःप्रभवेत्सत्यंनचकल्मषराशयः ॥ ८१ ॥ इतियावत्कथां चक्रुःसंभ्रांताइवबालिकाः ॥ तावद्वसुविभूतिःसगंधर्वस्त्वरयाययौ ॥८२॥ नारदाच्छ्रुतवृत्तांतःसुबाहुदनुजन्मनः ॥ रत्नावलीसुताप्रीतासखीकायथाहृता ॥ ८३ ॥ रत्नेश्वरात्समायांतीशून्येगगनवर्त्मनि ॥ यथानयच्चपातालंयथायुद्धमभूत्पुनः ॥ ८४ ॥ यथारत्नेशभक्तेनरत्नचूडेनघातितः ॥ ससुबाहुर्दनुज नुर्महेष्वासेनचेषुणा ॥ ८५ ॥ यथाचपृष्टवृत्तांतोवापीमार्गेणचानयत् ॥ शंखचूडस्यवापींतांपातालेषुप्रवर्तिनीम् ॥ ८६ ॥ यथाचप्राप्यनिर्यातःकाशीं दृष्ट्वापिबालिकाः ॥ भृशंसंभ्रांतिमापन्नाःपश्यंत्योपिसमुत्सुकाः ॥ ८७ ॥

स्यायाम् ॥ १८० ॥ भवेसंसारे ॥ ८१ ॥ ८२ ॥ सुबाहुदनुजन्मनःदनोर्दक्षदुहितुःकश्यपपत्न्याजन्मयस्यसदनुजन्मा सुबाहुश्चासौदनुजन्माचेतितथातस्य ॥ वृत्तांतमेवसंक्षेपतोदर्शयति ॥ प्रीतारत्नेशवरदानेनप्रीतास्निग्धेतिवा ॥ ८३ ॥ ८४ ॥ दनुजनुर्दनुजन्मा ॥ महदिष्वासंधनुर्यस्यसतथातेन ॥ ८५ ॥ ८६ ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रासादनम्लानाम्लाना ॥ द्वौनञौप्रकृतार्थंगमयतइतिन्यायात् ॥ मुखपंकजेसुशोभनाश्रीःकांतिर्यस्याःसातथाताम् ॥ ८८ ॥ ८९ ॥ दनुजापहृतेर्दानवापहरणस्य ॥ १९० ॥ ९१ ॥ कृतीविद्वान् ॥ ॥ ९२ ॥ एवरंत्नावल्यावृत्तांतमुक्कारत्नचूडवृत्तान्तम्प्रस्तावयाति ॥ आकर्णयेति ॥ विशेषेणवर्धयतिछेदयतीतिविवर्धनस्तत्संबोधनंतथा ॥ वृधुच्छेदनइतिधातुः॥ निर्बर्हणेतिक्कचित्पाठः ॥ ९३ ॥

दृष्ट्वागंधर्वराजस्तांपुनर्जातामिवात्मजाम् ॥ सवयस्यामनम्लानमुखपंकजसुश्रियम् ॥ ८८ ॥ परिष्वज्यसमाघ्रायललाटफलकंमुहुः ॥ अंकमारोप्यपप्रच्छसर्ववृत्तांतमादरात्॥८९॥अथसाकथयामासदनुजापहृतेःकथाम् ॥ रत्नेश्वरंवरावाप्तिंस्वप्नावस्थांविहायच॥१९०॥रत्नावलीमनोवृत्तिंविज्ञायाथसुखेंगितैः ॥ शशिलेखासमाचष्टस्पष्टवर्णैःसविस्तरम् ॥ ९१ ॥ तुतोषनितरांसोथगंधर्वाधिपतिःकृती ॥ प्रभाववर्णयामाससुदारत्नेश्वरस्यच ॥ ९२ ॥ स्कंदउवाच ॥ ॥ आकर्णयमुनिश्रेष्ठविंध्यवृद्धिविवर्धन ॥ प्रत्यहंरत्नचूडोपिवापीमार्गेणसंयमी ॥९३॥ नागलोकात्समागत्यस्नात्वामंदाकिनीजले ॥ रत्नेश्वरंसमभ्यर्च्यरत्नांजलयष्टकेनवै ॥ ९४ ॥ सुवर्णपंकजान्यष्टौसमर्पयतिहृष्टवत् ॥ एकदास्वप्नसमयेरत्नेशोलिंगरूपधृक् ॥ ९५ ॥ रत्नचूडमुवाचेदंनिजभक्तंदृढव्रतम् ॥ दानवेनहृतांकन्यांमोचयिष्यतियांभवान् ॥ ९६ ॥ तंदानवंरणेजित्वासातेपत्नीभविष्यति ॥ इतिस्मरन्वरंसोथनागराजोमहामनाः ॥९७॥ तांकन्यांदानवंहत्वाविमोच्यनिजवीर्यतः ॥ वापीमार्गेणपातालादानिनायपुनर्महीम् ॥९८॥ स्वयंचसाधयांचक्रेप्रत्यहंनियमंसुधीः॥ लिंगंसमर्चयित्वाथकृत्वाचापिप्रदक्षिणम् ॥ ९९ ॥ यावद्बहिःसमागच्छेद्रम्याद्रत्नेशमंडपात् ॥ तावद्गंधर्वराजायताभिःसवसुभूतये ॥ २०० ॥ सोयंसोयंयुवाधन्यस्तर्जन्यग्रेणदर्शितः ॥ गंधर्वराजस्तंदृष्ट्वानागराजकुमारकम् ॥ १ ॥ अतीवस्मेरनयनःसंप्रहृष्टतनूरुहः ॥ मनस्येनंचसंवर्ण्यतद्रूपंसवयोन्वयम् ॥ २ ॥ धन्योस्म्यनुगृहीतोस्मिरत्नेशेनवरार्पणात् ॥ कन्याधन्यतराचेयमनुरूपोस्तियत्पतिः ॥ ३ ॥ संप्रधार्येतिहृद्येनंसमाकार्यचसुंदरम् ॥ पृष्ट्वातन्नामगोत्रंचगणयित्वाबलाबलम् ॥ ४ ॥ रत्नेश्वरस्यपुरतस्तस्मैकन्यांददौमुदा ॥ नीत्वागंधर्वलोकंचकृतकौतुकमंगलम् ॥ ५ ॥ मधुपर्केणसंपूज्यपाणिमग्राहयत्ततः ॥ वैवाहिकेनविधिनाददौरत्नान्यनेकशः ॥ ६ ॥ शशिलेखानंगलेखाचित्रलेखापिकुंभज ॥ विज्ञाप्यस्वजनेतारंवरयामासतंपतिम् ॥.७ ॥ उपयम्यचतस्रोपिसगंधर्वसुताःशुभाः ॥ रत्नचूडोजगामाथताभिःस्वपितृमंदिरम् ॥ ८ ॥ यथाचतसृभिःसार्धंश्रुतिभिःप्रणवःशिवम् ॥ स्वपित्रोश्चरणौनत्वानवोढाभिःसनागराट् ॥ ९ ॥

॥९४॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ नियमंरत्नांजलयष्टकेनपूजनंसुवर्णपंकजाष्टकसमर्पणरूपव्रतम् ॥९९ ॥ २०० ॥ १ ॥ सवयोन्वयंवयोन्वयाभ्यांसहितंतद्रूपंच ॥ २ ॥ वरार्पणात्जामात्रर्पणात् ॥ यद्यस्याःयस्मादितिवा ॥ ३ ॥ समाकार्यआकारयित्वा ॥ अवधार्यचेतिक्वचित्पाठः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ उपयम्यविवाह्य ॥८॥ प्रणवओंकारःशिवंविश्वेश्वरंयथागच्छतितद्वदित्यर्थः ॥

१ विबन्धनेतिचपाठान्तरं सध्रीचीनमिवाभातीति ।

CC-0. In Public Domain. Digitization by eGangotri

नवोढाभिः सूर्याभिर्नूतनविवाहिताभिरितियावत् ॥ ९ ॥ २१० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २२५ ॥
इतिश्रीरामानन्दकृतायां काशीखण्डटीकायांसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ छ ॥ ॥ अष्टषष्टितमेध्यायेवर्ण्यतेतिसुपेशलम् ॥ गजासुरवधाख्यानंमहाश्चर्यप्रदंनृणाम् ॥ १ ॥ कृत्तिवासेश्वरो

विनिवेदितवृत्तांतोरत्नेशानुग्रहस्यच ॥ उवासताभिःससुखंपितृभ्यामभिनंदितः ॥२१०॥ ॥ ईश्वरउवाच ॥ ॥ रत्नेश्वरस्यलिंगस्यममस्थावररूपिणः ॥ सर्वेषांसर्वदस्यास्यप्रभावोगिरिजेऽतुलः ॥ ११ ॥ अस्मिँल्लिंगेपरांसिद्धिंप्राप्ताःसिद्धाःसहस्रशः ॥ गुप्तमासीदिदंलिंगमद्ययावत्सुमध्यमे ॥ ॥ १२ ॥ तवपित्राहिमवताममभक्तेनसर्वथा ॥ पुण्यार्जितैर्महारत्नैरत्नेशःप्रकटीकृतः ॥ १३ ॥ अस्मिँल्लिंगेममप्रीतिर्नितरामद्रिराजजे ॥ वाराणस्यामिदंलिंगंपूजनीयंप्रयत्नतः ॥ १४ ॥ नानारत्नानिलभ्यंतेरत्नेशानुग्रहादुमे ॥ स्त्रीरत्नपुत्ररत्नादिस्वर्गमोक्षावपिप्रिये ॥ १५ ॥ योऽत्ररत्नेश्वरंनत्वामृतोदेशांतरेष्वपि ॥ नसस्वर्गादिहागच्छेत्कल्पकोटिशतैरपि ॥१६॥ असितायांचतुर्दश्यामुपोष्यनिशिजागरात् ॥रत्नेशसन्निधौदेविममसान्निध्यमाप्नुयात् ॥ ॥ १७ ॥ अस्यलिंगस्यपूर्वेणत्वयाजन्मांतरेप्रिये ॥ दाक्षायणीश्वरंलिंगंमद्भक्त्यात्रप्रतिष्ठितम् ॥ १८ ॥ तस्यसंदर्शनादेवननरोयातिदुर्गतिम् ॥ अंबिकानामगौरीत्वंतत्राहंचांबिकेश्वरः ॥ १९ ॥ मूर्तःषडाननस्तत्रतवपुत्रःसुमध्यमे ॥ एतत्रयंनरोदृष्ट्वानगर्भंप्रविशेदुमे ॥ २२० ॥ रत्नेश्वरस्यमाहात्म्यंमयातेसमुदीरितम् ॥ गोपनीयंप्रयत्नेनकालिकल्मषचेतसाम् ॥ २१ ॥ इदंरत्नेश्वराख्यानंयःपठिष्यतिसर्वदा ॥ सपुत्रपौत्रपशुभिर्नवियुज्येतकर्हिचित् ॥ २२ ॥ श्रुत्वारत्नेश्वरोत्पत्तिंसेतिहासांनरोत्तमः ॥ अनूढोलभतेसत्यंकन्यारत्नंकुलोचितम् ॥ २३ ॥ कन्यापीमंसमाकर्ण्यत्वितिहासंमनोरमम् ॥ श्रद्धयासत्पतिंप्राप्यभविष्यतिपतिव्रता ॥ २४ ॥ इतिहासमिमंश्रुत्वानारीवापुरुषोपिवा ॥ नजातुइष्टवियोगाग्नितापेनपरितप्यते ॥२२५॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेरत्नेश्वरप्रशंसनंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ स्कंदउवाच ॥ अन्यच्चशृणुविप्रेंद्रवृत्तांतंतत्रसंभवम् ॥ महाश्चर्यप्रजननंमहापातकहारिच ॥ १ ॥ इत्थंकथांप्रकुर्वाणेरत्नेशस्यमहेश्वरे ॥ कोलाहलोमहानासीत्त्रातत्रातेतिसर्वतः ॥ २ ॥ महिषासुरपुत्रोसौसमायातिगजासुरः ॥ प्रमथन्प्रमथान्सर्वान्निजवीर्यमदोद्धतः ॥ ३ ॥

त्पत्तिंकथयितुंगजासुराख्यानंप्रस्तावयति ॥ अन्यच्चेति ॥ सम्यग्भवतीतिसम्भवम् ॥ १ ॥ कोलाहलःकलकलःबहुभिःकृतोऽव्यक्तशब्दइत्यर्थः ॥ यदाहामरः ॥ कोलाहलःकलकलइति ॥२ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमिणोतिप्रक्षिपति ॥ अचलाप्युल्लोलयांचक्रेआंदोलयांचक्रइत्यर्थः ॥ ४ ॥ शिखरैःसहशिलोच्चयाःपर्वताश्चूर्णाःस्युरित्यन्वयः ॥ ५ ॥ मौलिजसंघर्षात्केशसंमर्दनात् ॥ ६ ॥ निःश्वाससंभारैःश्वाससमूहैः ॥ उत्तरंगाउच्चोर्मयः तिमिभिर्जलचरैः ॥ ७ ॥ ८ ॥ पिंगलिमापिंगलता ॥ तरलिमातरलता ॥ नोज्झ्यते नत्यज्यते ॥ ९ ॥ समीभवेदुच्चनीचादिकंपरित्यज्यसमाभवेदित्यर्थः ॥ १० ॥ ब्रह्मलब्धवरस्वरूपमेवाह ॥ अवद्ध्योहमिति ॥ ११ ॥ त्रिशूलंहेतिरस्त्रंयस्यसतथा ॥ १२ ॥ प्रोतोग्रथितः ॥ ततइतिक्वचित् ॥ जगौउक्तवान् ॥ १३ ॥ पुरांतक त्रिपुरांतक

यत्रयत्रधरायांसचरणंप्रमिणोतिहि ॥ अचलोल्लोलयांचक्रेतत्रतत्रास्यभारतः ॥ ४ ॥ ऊरुवेगेनतरवःपतंतिशिखरैःसह ॥ यस्यदोर्दंडघातेनचूर्णाः स्युश्चशिलोच्चयाः ॥ ५ ॥ यस्यमौलिजसंघर्षाद्घनाव्योमत्यजंत्यपि ॥ नीलिमानंनचाद्यापिजह्युस्तत्केशसंगजम् ॥ ६ ॥ यस्यनिःश्वाससंभारैरुत्तरंगामहाब्धयः ॥ नद्योप्यमंदकल्लोलाभवंतितिमिभिःसह ॥ ७ ॥ योजनानांसहस्राणिनवयस्यसमुच्छ्रयः ॥ तावानेवहिविस्तारस्तनोर्मायाविनोस्यहि ॥ ॥ ८ ॥ यन्नेत्रयोःपिंगलिमातथातरलिमापुनः ॥ विद्युतानोज्झ्यतेऽद्यापिसोयमायातिसत्वरः ॥ ९ ॥ यांयांदिशंसमभ्येतिसोयंदुःसहदानवः ॥ सासा समीभवेदस्यसाध्वसादिवदिग्ध्रुवम् ॥ १० ॥ ब्रह्मलब्धवरश्चायंतृणीकृतजगत्रयः ॥ अवध्योहंभवामीतिस्त्रीपुंसैःकामनिर्जितैः ॥ ११ ॥ ततस्त्रिशूलहेतिस्तमायांतंदैत्यपुंगवम् ॥ विज्ञायावध्यमन्येनशूलेनाभिजघानतम् ॥ १२ ॥ प्रोतस्तेनत्रिशूलेनसचदैत्योगजासुरः ॥ छत्रीकृतमिवात्मानंमन्यमानो जगौहरम् ॥ १३ ॥ ॥ गजासुरउवाच ॥ ॥ त्रिशूलपाणेदेवेशजानेत्वांस्मरहारिणम् ॥ तवहस्तेममवधःश्रेयानेवपुरांतक ॥ १४ ॥ किंचिद्विज्ञप्तुमिच्छामिअवधेहिममेरितम् ॥ सत्यंब्रवीमिनासत्यंमृत्युंजयविचारय ॥१५॥ त्वमेकोजगतांवंद्योविश्वस्योपरिसंस्थितः ॥ अहंत्वदुपरिष्टाच्चस्थितोस्मीतिजितंमया ॥ १६ ॥ धन्योस्म्यनुगृहीतोस्मित्वत्त्रिशूलाग्रसंस्थितः ॥ कालेनसर्वैर्मर्तव्यंश्रेयसेमृत्युरीदृशः ॥ १७ ॥ इतितस्यवचःश्रुत्वादेवदेवःकृपानिधिः ॥ प्रोवाचप्रहसञ्छंभुर्घटोद्भवगजासुरम् ॥ १८ ॥ ॥ ईश्वरउवाच ॥ ॥ गजासुरप्रसन्नोस्मिमहापौरुषशेवधे ॥ स्वानुकूलंवरंब्रूहिददामिसुमतेऽसुर ॥ १९ ॥ इत्याकर्ण्यसदैत्येंद्रःप्रत्युवाचमहेश्वरम् ॥ ॥ गजासुरउवाच ॥ ॥ यदिप्रसन्नोदिग्वासस्तदानित्यंवसानमे ॥ २० ॥ इमांकृत्तिंविरूपाक्षत्वत्त्रिशूलाग्निपाविताम् ॥ स्वप्रमाणांसुखस्पर्शांरणांगणपणीकृताम् ॥ २१ ॥ इष्टगंधिःसदैवास्तुसदैवास्त्वतिकोमला ॥ सदैवनिर्मलाचास्तु सदैवास्त्वतिमंडनम् ॥ २२ ॥ महातपोऽनलज्वालाःप्राप्यापिसुचिरंविभो ॥ नदग्धाकृत्तिरेषामेपुण्यगंधानिधिस्ततः ॥ २३ ॥

॥ १४ ॥ अवधेहिशृणु ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ महापौरुषशेवधेमहापुरुषकाराश्रय ॥ १९ ॥ दिग्वासःहेदिग्वसन वसानआच्छादयपरिधेहीत्यर्थः ॥ २० ॥ कृत्तिचर्म ॥ यदाहामरः ॥ अजिनंचर्मकृत्तिस्त्रीति ॥ दिगंबरस्यवस्त्रपरिग्रहस्यैवानुचितत्वान्मदीयंचर्मगृहाणेत्यर्थः ॥ स्वप्रमाणांस्वपरिमिताम् ॥ सुप्रमाणामितिपाठेसएवार्थः ॥ रणांगणपणीकृतांरणभूमौग्लहनवेनदत्तामित्यर्थः ॥ २१ ॥ वरांतरंप्रार्थयते ॥ इष्टगंधिरिति ॥ इष्टोभिप्रेतोगंधोयस्याःसाइष्टगंधिः ॥ अतिमंडनमतिशयविभूषणम् ॥ २२ ॥ महातपएवअनलज्वालाः ॥ यद्वा महातपश्चतदुत्थोऽ

CC-0. In Public Domain. Digitization by eGangotri

न्निर्लक्ष्यते ॥ अनलश्चअनलनेत्रत्वादीश्वरस्यतयोर्ज्वालाःप्राप्यापियतएपात्वक्भस्मसान्नजातातततस्तस्मात्पुण्यगंधानिधिःपुण्यगंधयोराश्रयोसिस्त्वत्यर्थः ॥ पाठांतरेअदंतत्वमार्षम् ॥ २३ ॥ पुण्यनिधित्व मेवतर्केणोपपादयति ॥ यदीति ॥ २४ ॥ तृतीयंवरंप्रार्थयति ॥ अन्यच्चेति ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ उत्तमांगवच्छिरोवत् ॥ ३० ॥ सपरिग्रहःउमागजाननादिसहितः ॥ ३१ ॥

यदिपुण्यवतीनैषाममकृत्तिर्दिगंबर ॥ तदात्वदंगसंगोस्याःकथंजातोरणांगणे ॥ २४ ॥ अन्यंचमेवरंदेहियादितुष्टोसिशंकर ॥ नामास्तुकृत्तिवासास्तेप्रारभ्याद्यतनंदिनम् ॥ २५ ॥ इतितस्यवचःश्रुत्वातथेत्युक्त्वाचशंकरः ॥ पुनःप्रोवाचतंदैत्यंभक्तिनिर्मलमानसम् ॥ २६ ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुपुण्यनिधेदैत्यवरमन्यंसुदुर्लभम् ॥ अविमुक्तेमहाक्षेत्रेरणत्यक्तकलेवर ॥२७॥ इदंपुण्यशरीरंतेक्षेत्रेस्मिन्मुक्तिसाधने ॥ ममलिंगंभवत्वत्रसर्वेषांमुक्तिदायकम् ॥ २८ ॥ कृत्तिवासेश्वरंनाममहापातकनाशनम् ॥ सर्वेषामेवलिंगानांशिरोभूतमिदंवरम् ॥ २९ ॥ यावंतिसंतिलिंगानिवाराणस्यांमहांत्यपि ॥ उत्तमंतावतामेतदुत्तमांगवदुत्तमम् ॥ ३० ॥ मानवानांहितायात्रस्थास्येहंसपरिग्रहः ॥ दृष्टेनानेनलिंगेनपूजितेनस्तुतेनच ॥ कृतकृत्योभवेन्मर्त्यःसंसारंनविशेत्पुनः ॥ ३१ ॥ रुद्राःपाशुपताःसिद्धाऋषयस्तत्त्वचिंतकाः ॥ शांतादांताजितक्रोधानिर्द्वंद्वानिष्परिग्रहाः ॥ ३२ ॥ अविमुक्तेस्थितायेतुममभक्तामुमुक्षवः ॥ मानापमानयोस्तुल्याःसमलोष्टाश्मकांचनाः ॥३३॥ कृत्तिवासेश्वरेलिंगेस्थास्येहंतदनुग्रहे ॥ दशकोटिसहस्राणितीर्थानिप्रतिवासरम् ॥ ॥ ३४ ॥ त्रिकालमागमिष्यंतिकृत्तिवासेनसंशयः ॥ कलिद्वापरसंभूतानराःकल्मषबुद्धयः ॥ ३५ ॥ सदाचारविनिर्मुक्ताःसत्यशौचपराङ्मुखाः ॥ माययादंभलोभाभ्यांमोहाहंकृतिसंयुताः ॥ ३६ ॥ शूद्रान्नसेविनोविप्राजिह्वालाअतिलालसाः ॥ संध्यास्नानजपेज्यासुदूरीकृतमनोधियः ॥ ३७ ॥ कृत्तिवासेश्वरंप्राप्यसर्वपापविवर्जिताः ॥ सुखेनमोक्षमेष्यंतियथासुकृतिनस्तथा ॥ ३८ ॥ कृत्तिवासेश्वरंलिंगंसेव्यंकाश्यांततोनरैः ॥ जन्मांतरसहस्रेषुमोक्षोन्यत्रसुदुर्लभः ॥ ३९ ॥ कृत्तिवासेश्वरेलिंगेलभ्यस्त्वेकेनजन्मना ॥ पूर्वजन्मकृतंपापंतपोदानादिभिःशनैः ॥ नश्येत्सद्योविनश्येतकृत्तिवासेश्वरेक्षणात् ॥४०॥ कृत्तिवासेश्वरंलिंगंयेर्चयिष्यंतिमानवाः ॥ प्रविष्टास्तेशरीरेमेतेषांनास्तिपुनर्भवः ॥४१॥ अविमुक्तेऽत्रवस्तव्यंजप्तव्यंशतरुद्रियम् ॥ कृत्तिवासेश्वरोदेवोद्रष्टव्यश्चपुनःपुनः ॥ ४२ ॥ सप्तकोटिमहारुद्रैःसुजप्तैर्यत्फलंभवेत् ॥ तत्फलंलभ्यतेकाश्यांपूजनात्कृत्तिवाससः ॥ ४३ ॥ माघकृष्णचतुर्दश्यामुपोष्यनिशिजागृयात् ॥ कृत्तिवासेशमभ्यर्च्ययःसयायात्परांगतिम् ॥ ४४ ॥

रुद्राइत्यादीनांतदनुग्रहइत्यनेनान्वयः ॥ येएतेरुद्रादयस्तेषामनुग्रहेनिमित्तेकृत्तिवासेश्वरेस्थास्यामीत्यर्थः ॥ तदनुग्रहादितिवापाठः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ जिह्वालाःलोलुपाः ॥ जिह्वालौल्यातिलालसाइतिक्वचित्पाठः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ अविमुक्तेअत्रेतिव्यधिकरणसप्तम्यौ ॥ अत्रकृत्तिवाससःसमीपे ॥ ४२ ॥ ४३ ॥ जागृयाज्जागरणंकुर्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जागरादितिक्वचित् ॥ ४४ ॥ पंचदश्यांपौर्णमास्याम् ॥ कर्ताकरिष्यति ॥ प्रवेक्ष्यतेप्रवेक्ष्यतीत्यर्थः ॥ ४५ ॥ प्रावृणोत्पर्यधात् ॥ हरिदंबरोदिगंबरः ॥ सदिगंबरइतिपाठेसप्रसिद्धः ॥ ४६ ॥ कृत्तिवासत्वंकृत्तिवासस्त्वमित्यर्थः ॥ ४७ ॥ ४८ ॥ ४९ ॥ एतस्यकुंडस्यहंसतीर्थनामेतिवक्तुमाख्यायिकामवतारयति ॥ तस्मिन्निति ॥ ५० ॥ चैत्र्यांपौर्णमास्यामितिशेषः ॥ उपहारसमुद्भवंबलिभिःसमुपजातम् ॥ ५१ ॥ बहुदेवलकैरनेकैर्देवपूजकैः ॥ तमन्नराशिम् ॥ अमिलन्मिलिताबभूवुः ॥ ५२ ॥ बलिपुष्टैःकाकैः ॥ कटुतीक्ष्णंयथास्यात्तथारटंतःशब्दंकुर्वंतः ॥ करटाः

शुक्लायांपंचदश्यांयश्चैत्र्यांकर्तामहोत्सवम् ॥ कृत्तिवासेश्वरेलिंगेनसगर्भंप्रवेक्ष्यते ॥ ४५ ॥ कथयित्वेतिदेवेशस्तत्कृत्तिंपरिगृह्यच ॥ गजासुरस्यमहतीं प्रावृणोद्धरिदंबरः ॥ ४६ ॥ महामहोत्सवोजातस्तस्मिन्नहनिकुंभज ॥ कृत्तिवासत्वमापेदेयस्मिन्देवोदिगंबरः ॥ ४७ ॥ यत्रच्छत्रीकृतोदैत्यःशूलमारोप्यभूतले ॥ तच्छूलोत्पाटनाज्जातंतत्रकुंडंमहत्तरम् ॥४८॥ तस्मिन्कुंडेनरःस्नात्वाकृत्वाचपितृतर्पणम् ॥ कृत्तिवासेश्वरंदृष्ट्वाकृतकृत्योनरोभवेत् ॥४९॥ स्कंदउवाच ॥ तस्मिंस्तीर्थेतुयद्वृत्तंतदगस्तेनिशामय ॥ काकाहंसत्वमापन्नास्तत्तीर्थस्यप्रभावतः ॥ ५० ॥ एकदाकृत्तिवासेतुचैत्र्यांयात्राऽभवत्पुरा ॥ अन्नराशीकृतंतत्रह्युपहारसमुद्भवम् ॥ ५१ ॥ बहुदेवलकैर्विप्रतंदृष्ट्वापक्षिणोमिलन् ॥ परस्परंतदन्नार्थंयुध्यंतोव्योमवर्त्मनि ॥ ५२ ॥ बलिपुष्टैरपुष्टांगारटंतःकरटाःकटु ॥ बलिभिश्चातिपुष्टांगैरबलाश्चंचुभिर्हताः ॥ ५३ ॥ तेहन्यमानान्यपतंस्तस्मिन्कुंडेनभोंगणात् ॥ आयुःशेषेणसंत्राताहंसीभूतास्तुवायसाः ॥ ५४ ॥ आश्चर्यवंतस्तत्रत्यायात्रायांमिलिताजनाः ॥ ऊचुरंगुलिनिर्देशैरहोपश्यतपश्यत ॥ ५५ ॥ अस्मासुवीक्षमाणेषुकाकाःकुंडेत्रयेपतन् ॥ धार्तराष्ट्रास्तुतेजातास्तीर्थस्यास्यप्रभावतः ॥ ५६ ॥ हंसतीर्थंतदारभ्यकृत्तिवाससमीपतः ॥ नाम्नाख्यातमभूल्लोकेतत्कुंडंकलशोद्भव ॥ ५७ ॥ अतीवमलिनात्मानोमहामलिनकर्मभिः ॥ क्षणान्निर्मलतांयांतिहंसतीर्थकृतोदकाः ॥ ५८ ॥ काश्यांसदैववस्तव्यंस्नातव्यंहंसतीर्थके ॥ द्रष्टव्यःकृत्तिवासेशःप्राप्तव्यंपरमंपदम् ॥ ५९ ॥ काश्यांलिंगान्यनेकानिमुनेसंतिपदेपदे ॥ कृत्तिवासेश्वरंलिंगंसर्वलिंगशिरःस्मृतम् ॥ ६० ॥

काकाः॥यदाहामरः॥काकेतुकरटारिष्टबलिपुष्टसकृत्प्रजाइति ॥बलिभिःसमर्थैः॥ अबलाःदुर्बलाः ॥ बलिभिश्चंचुभिरितिपाठेचंचुविशेषणम् ॥ उपहारैःपुष्टांगैश्चंचुभिस्तुण्डैः ॥ ५३ ॥ ५४ ॥ ५५ ॥ धार्तराष्ट्राः कृष्णचंचुचरणैरुपलक्षिताहंसाः ॥ यदाहामरः ॥ धार्तराष्ट्राःसितेतरैरीति ॥ ५६ ॥ कृत्तिवाससमीपतइत्यत्रविसर्गलोपआर्षः ॥ कृत्तिवासेत्यकारांतोवात्रपाठः ॥ एवमुत्तरत्रापि ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

CC-0. In Public Domain. Digitization by eGangotri

कृत्तिवासंकृत्तिवाससम् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ सपर्ययित्वापूजयित्वा ॥ ६८ ॥ रुद्रदिक्स्थितमैशान्यांदिशिस्थितम् ॥ रुद्रेशितमि तिपाठेप्ययमेवार्थः ॥ ६९ ॥ वरिवस्यातःपूजातः ॥ ७० ॥ ७१ ॥ कृत्तिवासात्कृत्तिवाससः ॥ ७२ ॥ वेतालोभूतविशेषः ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ तदुत्तरइति ॥ हेमुने तस्यगणस्योत्तरेरुद्रोऽस्तीत्यन्वयः ॥ कीदृशः ॥ वृषाकारोधर्मरूपोमन्त्रोक्तयज्ञरूपपरमेश्वरइत्यर्थः ॥ चत्वारोवेदाःशृंगाणियस्यसः ॥ वाय्वादीन्भीषयतीतिभीषणः ॥ तथाचश्रुतिः ॥ भीषास्माद्वातः

कृत्तिवासंसमाराध्यभक्तियुक्तेनचेतसा ॥ सर्वलिंगाराधनजंफलंकाश्यामवाप्यते ॥ ६१ ॥ जपोदानंतपोहोमस्तर्पणंदेवतार्चनम् ॥ समीपेकृत्तिवास स्यकृतंसर्वमनंतकम् ॥ ६२ ॥ तीर्थंत्वनादिसंसिद्धमेतत्कलशसंभव ॥ पुनर्देवस्यसान्निध्यादाविरासीन्महेशितुः ॥ ६३ ॥ एतानिसिद्धलिंगानिच्छन्ना निस्युर्युगेयुगे ॥ अवाप्यशंभुसान्निध्यंपुनराविर्भवंतिहि ॥ ६४ ॥ हंसतीर्थस्यपरितोलिंगानामयुतंमुने ॥ प्रतिष्ठितंमुनिवरैरत्रास्तिद्विशतोत्तरम् ॥६५॥ एकैकंसिद्धिदंनॄणामविमुक्तनिवासिनाम् ॥ लिंगंकात्यायनेशादिच्यवनेशांतमेवहि ॥ ६६ ॥ लोमशेशंमहालिंगंलोमशेनप्रतिष्ठितम् ॥ कृत्तिवासःप्रती च्यांतुतद्दृष्ट्वाकांतकाद्भयम् ॥ ६७ ॥ मालतीशंशुभंलिंगंकृत्तिवासोत्तरेमहत् ॥ सपर्ययित्वातल्लिंगंराजागजपतिर्भवेत् ॥ ६८ ॥ अंतकेश्वरसंज्ञंच लिंगंतद्रुद्रदिक्स्थितम् ॥ अतिपापोपिनिष्पापोजायतेतद्विलोकनात् ॥६९॥ जनकेशंमहालिंगंतत्पार्श्वेज्ञानदंपरम्॥तल्लिंगवरिवस्यातोब्रह्मज्ञानमवाप्यते ॥ ७० ॥ तदुत्तरेमहामूर्तिरसितांगोस्तिभैरवः ॥ तस्यदर्शनतःपुंसांनभवेद्यमदर्शनम् ॥७१॥ शुष्कोदरीचतत्रास्तिदेवीविकटलोचना ॥ कृत्तिवासादुदी च्यांतुकाशीप्रत्यूहभक्षिणी ॥ ७२ ॥ अग्निजिह्वोस्तिवेतालस्तस्यादेव्यास्तुनैर्ऋते ॥ ददातिवांछितांसिद्धिंसोर्चितोभौमवासरे ॥ ७३ ॥ वेतालकुंडंतत्रा स्तिसर्वव्याधिविघातकृत् ॥ तत्कुंडोदकसंस्पर्शाद्व्रणविस्फोटरुग्व्रजेत् ॥ ७४ ॥ वेतालकुंडेसुस्नातोवेतालंप्रणिपत्यच ॥ लभेतवांछितांसिद्धिंदुर्ल भांसर्वदेहिभिः ॥ ७५ ॥ गणोस्तितत्रद्विभुजश्चतुष्पात्पंचशीर्षकः ॥ तस्यसंवीक्षणादेवपापंयातिसहस्रधा ॥ ७६ ॥ तदुत्तरेमुनेरुद्रश्चतुःशृंगोस्तिभी षणः ॥ त्रिपादस्तुद्विशीर्षाचहस्ताःस्युःसप्तएवहि ॥ ७७ ॥

पवतेभीषोदेतिसूर्यः ॥ भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमइति ॥ त्रीणिसवनानिपादायस्यसः ॥ प्रायणीयोदयनीयेद्वेशीर्षणीमस्तकेयस्यसः ॥ यस्यसप्तच्छंदांसिहस्ताःस्युः ॥ सःरोरूयतेपुनः पुनरत्यर्थंवारौतीत्यर्थः ॥ रोरवणंसवनक्रमेणऋग्भिर्यजुर्भिःसामभिः ॥ यदेनमृग्भिःशंसंतियजुर्भिर्यजंतिसामाभिःस्तुवंतीति ॥ त्रिधावद्धोमन्त्रब्राह्मणकल्पैर्बद्धइत्यर्थः ॥ तथाचमन्त्रः ॥ चत्वारिश्शृंगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोऽस्यपादाद्वेशीर्षेसप्तहस्तासोऽस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँऽआविवेशेति ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥
इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ एकोनसप्ततितमेऽध्यायेगर्भनिवासहृत् ॥ अष्टषष्टेश्वक्षेत्राणांवर्ण्यतेत्रसमागमः ॥ १ ॥ अष्टषष्ट्यायत

रोरूयतेवृषाकारस्त्रिधाबद्धःसकुंभज ॥ काशीविघ्नकरायेचयेकाश्यांपापबुद्धयः ॥ ७८ ॥ तेषांचसंछिदांकर्तुमहंधृतकुठारकः ॥ येकाश्यांविघ्नहर्तारोये काश्यांधर्मबुद्धयः ॥ ७९ ॥ सुधाघटकरश्चाहंतद्वंशपरिषेककृत् ॥ तंदृष्ट्वावृषरुद्रंवैपूजयित्वातुभक्तितः ॥ ८० ॥ महामहोपचारैश्वनविघ्नैरभिभूयते ॥ मणिप्रदीपोनागोऽस्तितस्माद्रुद्रादुदग्दिशि ॥ ८१ ॥ मणिकुंडंतदग्रेतुविषव्याधिहरंपरम् ॥ तस्मिन्कुंडेकृतस्नानस्तंनागंपरिवीक्ष्यच ॥ ८२ ॥ मणिमा णिक्यसंपूर्णगजाश्वरथसंकुलम् ॥ स्त्रीरत्नपुत्ररत्नैश्वसमृद्धंराज्यमाप्नुयात् ॥ ८३ ॥ कृत्तिवासेश्वरंलिंगंकाश्यांयैर्नविलोकितम् ॥ तेमर्त्यलोकेभारायभुवो भूतानसंशयः ॥ ८४ ॥ ॥ स्कंदउवाच ॥ ॥ कृत्तिवासःसमुत्पत्तिंयेश्रोष्यंतीहमानवाः ॥ तल्लिंगदर्शनाच्छ्रेयोलप्स्यंतेनात्रसंशयः ॥ ८५ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेकृत्तिवासःसमुद्भवोनामाष्टषष्टितमोऽध्यायः ॥६८॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यतपोराशेकाश्यांलिंगानियानिवै ॥ सेवितानिनृणांमुक्त्यैभवेयुर्भावितात्मनाम् ॥ १ ॥ कृत्तिप्रावरणंयत्रकृतंदेवेनलीलया ॥ रुद्रावासइति ख्यातंतत्स्थानंसर्वसिद्धिदम् ॥ २ ॥ स्थितेतत्रोमयासार्धंस्वेच्छयाकृत्तिवाससि ॥ आगत्यनंदीविज्ञप्तिंचक्रेप्रणतिपूर्वकम् ॥ ३ ॥ देवदेवेश विश्वे शप्रासादाःसुमनोहराः ॥ सर्वरत्नमयारम्याःसाष्टाषष्टिरभूदिह ॥ ४ ॥ भूर्भुवःस्वस्तलेयानिशुभान्यायतनानिहि ॥ मुक्तिदान्यपितानीहमयानीता निसर्वतः ॥ ५ ॥ यतोयच्चसमानीतंयत्रयच्चकृतास्पदम् ॥ कथयिष्याम्यहंनाथक्षणंतदवधार्यताम् ॥ ६ ॥ स्थाणुर्नाममहालिंगंदेवदेवस्यमोक्षदम् ॥ कुरुक्षेत्रादिहोद्धृतंकलाशेषोस्तितत्रवै ॥ ७ ॥ तदग्रेसन्निहत्याख्यामहापुष्करिणीशुभा ॥ लोलार्कपश्चिमेभागेकुरुक्षेत्रस्थलीतुसा ॥ ८ ॥ तत्रस्नातंहुतं जप्तंतत्तद्दत्तंशुभार्थिभिः ॥ कुरुक्षेत्राद्भवेत्सत्यंकोटिकोटिगुणाधिकम् ॥ ९ ॥ नैमिषादेवदेवोत्रब्रह्मावर्तेनसंयुतः ॥ तत्रांशमात्रंसंस्थाप्यकाश्यामाविरभू द्विभो ॥ १० ॥ ढुंढिराजोत्तरेभागेसिद्धिदंसाधकस्यवै ॥ लिंगंवैदेवदेवाख्यंतदग्रेकूपउत्तमः ॥ ११ ॥

नानांकाश्यामागमनंवक्तुंतेषांमहत्त्वख्यापनपूर्वकंश्रोतारमभिमुखीकरोतिशृण्वगस्त्येति ॥ १ ॥ कृत्तिवासःपीठस्यरुद्रेणावासयत्वाद्रुद्रावासइतिनामवृत्तमित्याह ॥ कृत्तीति ॥ २ ॥ स्थितस्तत्रेतिपाठे कृत्तिवाससीतिपीठविशेषणम् ॥ ३ ॥ साष्टाअष्टभिःसहवर्तमाना ॥ साष्टषष्टिरितिवापाठः ॥ ४ ॥ ५ ॥ अवधार्यतांश्रूयताम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ब्रह्मावर्तेनतन्नाम्नाकूपेन ॥ १० ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

नृणांप्राणिमात्राणाम् ॥ १२ ॥ १३ ॥ एनःपापम् ॥ कथंभूतम् ॥ महावलंमहापातकमपीत्यर्थः ॥ १४ ॥ विद्रातिविशेषेणद्रातिगच्छतीत्यर्थः ॥ दूरतःदूरे ॥ १५ ॥ निर्वाणनगरं कैवल्यस्थानंच ॥ १६ ॥ १७ ॥ उज्जयिन्याःअवंत्याः ॥ १८ ॥ कलिकालतःकलिकालाभ्यामित्यर्थः ॥ १९ ॥ २० ॥ २१ ॥ अट्टहासात्क्षेत्रविशेषात् ॥ २२ ॥ मरुत्कोटात् ॥ आयतन

ब्रह्मावर्तइतिख्यातः पुनरावृत्तिहृन्नृणाम् ॥ तत्कूपाद्भिःकृतस्नानोदेवदेवंसमर्च्यच ॥ १२ ॥ तत्पुण्यंनैमिषारण्यात्कोटिकोटिगुणंस्मृतम् ॥ गोकर्णाग्रत नादत्रस्वयमाविरभून्महत् ॥ १३ ॥ लिंगंमहाबलंनामसांबादित्यसमीपतः ॥ दर्शनात्स्पर्शनाद्यस्यक्षणादेनोमहाबलम् ॥ १४ ॥ वाताहतस्तूलराशि रिवविद्रातिदूरतः ॥ कपालमोचनपुरोदृष्ट्वालिंगंमहाबलम् ॥ १५ ॥ महाबलमवाप्नोतिनिर्वाणनगरंव्रजेत् ॥ ऋणमोचनतःप्राच्यांप्रभासात्क्षेत्रसत्तमात् ॥ १६ ॥ शशिभूषणसंज्ञंतुलिंगमत्रप्रतिष्ठितम् ॥ तल्लिंगसेवनान्मर्त्यःशशिभूषणतांव्रजेत् ॥ १७ ॥ प्रभासक्षेत्रयात्रायाःपुण्यंप्राप्नोतिकोटिकृत् ॥ उज्ज यिन्यामहाकालःस्वयमत्रागतोविभुः ॥ १८ ॥ यन्नामस्मरणादेवनभयंकलिकालतः ॥ प्रणवाख्यान्महालिंगात्प्राच्यांकल्मषनाशनम् ॥ १९ ॥ महा कालाभिधंलिंगंदर्शनान्मोक्षदंपरम् ॥ अयोगंधेश्वरंलिंगंपुष्करात्तीर्थसत्तमात् ॥ २० ॥ आविरासीदिहमहत्पुष्करेणसहैवतु ॥ मत्स्योदर्युत्तरेभागेदृष्ट्वा ऽयोगंधमीश्वरम् ॥ २१ ॥ स्नात्वाऽयोगंधकुंडेतुभवात्तारयतेपितॄन् ॥ महानादेश्वरंलिंगमट्टहासादिहागतम् ॥ २२ ॥ त्रिलोचनादुदीच्यांतुतद्दृष्ट्वामुक्त येमतम् ॥ महोत्कटेश्वरंलिंगंमरुत्कोटादिहागतम् ॥ कामेश्वरोत्तरेभागेदृष्टंविमलसिद्धिदम् ॥ २३ ॥ विश्वस्थानादिहायातंलिंगंवैविमलेश्वरम् ॥ स्वर्लीनात्पश्चिमेभागेदृष्टंविमलसिद्धिदम् ॥ २४ ॥ महाव्रतंमहालिंगंमहेंद्रादिहसंस्थितम् ॥ स्कंदेश्वरसमीपेतुमहाव्रतफलप्रदम् ॥ २५ ॥ वृंदारकर्षि वृंदानांस्तुवतांप्रथमेयुगे ॥ उत्पन्नंयन्महालिंगंभूमिंभित्त्वासुदुर्भिदाम् ॥ २६ ॥ महादेवेतितैरुक्तंयन्मनोरथपूरणात् ॥ वाराणस्यांमहादेवस्तदारभ्या भवच्चयत् ॥ २७ ॥ मुक्तिक्षेत्रंकृतंयेनमहालिंगेनकाशिका ॥ अविमुक्तेमहादेवंयोद्रक्ष्यत्यत्रमानवः ॥ २८ ॥ शंभुलोकेगमस्तस्ययत्रतत्रमृतस्यहि ॥ अविमुक्तेप्रयत्नेनतत्संसेव्यंमुमुक्षुभिः ॥ २९ ॥ कल्पांतरेपिनत्यक्तंकदाप्यानंदकाननम् ॥ येनलिंगस्वरूपेणमहादेवेनसर्वथा ॥ ३० ॥ तत्प्रासादो यमतुलःसर्वरत्नमयःशुभः ॥ हिरण्यगर्भतीर्थाच्चप्रतीच्यांक्षेत्ररक्षकम् ॥ ३१ ॥ वाराणस्यामधिष्ठात्रीदेवतासाभिलाषदा ॥ महादेवेतिसंज्ञावैसर्वलिंगस्व रूपिणी ॥ ३२ ॥ वाराणस्यांमहादेवोदृष्टोयैर्लिंगरूपधृक् ॥ तेनत्रैलोक्यलिंगानिदृष्टानीहनसंशयः ॥ ३३ ॥

विशेषात् ॥ २३ ॥ विश्वस्थानात्स्थलविशेषात् ॥ २४ ॥ महेंद्राद्गिरेः ॥ २५ ॥ महाव्रतस्यनामांतरमाह ॥ वृंदारकेति ॥ देवर्षिसमूहानामित्यर्थः ॥ प्रथमेयुगेआदौकृतयुगे ॥ २६ ॥ यन्मनोरथपूरणाद्येषांमनोरथसंपादनात् ॥ २७ ॥ महादेवनाम्निकारणांतरमाह ॥ मुक्तिक्षेत्रमिति ॥ २८ ॥ शंभुलोकेगमोगमनंभवतीतिशेषः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आभूतसंप्लवंप्रलयम् ॥ ३४ ॥ पवित्रपर्वणिशुक्लचतुर्दश्याम् ॥ पवित्रंसूत्रम् ॥ ३५ ॥ ३६ ॥ अयुतंशतंदशलक्षमित्यर्थः ॥ ३७ ॥ ३८ ॥ महेश्वरःशूलटंकएव ॥ ३९ ॥ ४० ॥ महेश्वरःसएव ॥ ४१ ॥ महेश्वरंतमेव ॥ ४२ ॥ ४३ ॥ ४४ ॥ ज्वालाजटिलिताकाशोदीप्त्यावृतगगनः ॥ ४५ ॥ धामस्थानम् ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

वाराणस्यांमहादेवंसमभ्यर्च्यसकृन्नरः ॥ आभूतसंप्लवंयावच्छिवलोकेवसेन्मुदा ॥३४॥ पवित्रपर्वणिसदाश्रावणेमासियत्नतः ॥ लिंगेपवित्रमारोप्यमहादेवेनगर्भभाक् ॥३५॥ पितामहेश्वरंलिंगंगयातीर्थादिहागतम् ॥ फल्गुप्रभृतिभिस्तीर्थैःसार्धकोट्यष्टसंमितैः ॥३६॥ धर्मेणयत्रवैतप्तंयुगानामयुतंशतम् ॥ साक्षीकृत्यमहालिंगंश्रीमद्धर्मेश्वराभिधम् ॥ ३७ ॥ पितामहेश्वरंलिंगंतत्राभ्यर्च्यनरोमुदा ॥ त्रिःसप्तकुलसंयुक्तोमुच्यतेनात्रसंशयः ॥३८॥ प्रयागात्तीर्थराजाच्चशूलटंकोमहेश्वरः ॥ तीर्थराजेनसहितःस्थितआगत्यवैस्वयम् ॥ ३९ ॥ निर्वाणमंडपाद्रम्याद्वाच्यामतिनिर्मलः ॥ प्रासादोमेरुणायस्यस्पर्धतेकांचनोज्ज्वलः ॥ ४० ॥ देवेनैववरोदत्तोयत्रपूर्वंयुगांतरे ॥ पूज्योमहेश्वरःकाश्यांप्रथमंकलुषापहः ॥ ४१ ॥ यःप्रयागइहस्नातोनमस्यतिमहेश्वरम् ॥ समभ्यर्च्यविधानेनमहासंभारविस्तरैः ॥ ४२ ॥ प्रयागस्नानजात्पुण्याच्छूलटंकविलोकनात् ॥ सप्राप्नुयान्नसंदेहःपुण्यंकोटिगुणोत्तरम् ॥ ४३ ॥ शंकुकर्णान्महाक्षेत्रान्महातेजइतीरितम् ॥ लिंगमाविरभूदत्रमहातेजोविवृद्धिदम् ॥ ४४ ॥ महातेजोनिधिस्तस्यप्रासादोतीवनिर्मलः ॥ ज्वालाजटिलिताकाशोमाणिक्यैरेवनिर्मितः ॥ ४५ ॥ तल्लिंगदर्शनात्स्पर्शात्स्तवनाच्चसमर्चनात् ॥ प्राप्यतेतत्परंधामयत्रगत्वानशोचते ॥ ४६ ॥ विनायकेश्वरात्पूर्वंमहातेजःसमर्चनात् ॥ तेजोमयेनयानेनयातिमाहेश्वरंपदम् ॥ ४७ ॥ रुद्रकोटिसमाख्यातात्तीर्थात्परमपावनात् ॥ महायोगीश्वरंलिंगमाविश्चक्रेस्वयंपरम् ॥ ४८ ॥ पार्वतीश्वरलिंगस्यसमीपेसर्वसिद्धिकृत् ॥ तल्लिंगदर्शनात्पुंसांकोटिलिंगफलंभवेत् ॥ ४९ ॥ तत्प्रासादस्यपरितोरुद्राणांकोटिसंमिताः ॥ प्रासादारम्यसंस्थानानिर्मितारुद्रमूर्तिभिः ॥ ५० ॥ काश्यांरुद्रस्थलीसातुपठ्यतेवेदवादिभिः ॥ रुद्रस्थल्यांमृतायेवैकृमिकीटपतंगकाः ॥ ॥ ५१ ॥ पशुपक्षिमृगामर्त्याम्लेच्छावाप्यथदीक्षिताः ॥ तेषांतुरुद्रीभूतानांपुनरावृत्तिरत्रन ॥ ५२ ॥ जन्मांतरसहस्रेषुयत्पापंसमुपार्जितम् ॥ रुद्रस्थलींप्रविष्टस्यतत्सर्वंव्रजतिक्षयम् ॥ ५३ ॥ अकामोवासकामोवातिर्यग्योनिगतोपिवा ॥ रुद्रस्थल्यांत्यजन्प्राणान्परंनिर्वाणमाप्नुयात् ॥ ५४ ॥ स्वयमेकांबरात्क्षेत्रात्कृत्तिवासाइहागतः ॥ कृत्तिवाससिलिंगेत्रस्वयमेवव्यवस्थितः ॥ ५५ ॥ अस्मिन्स्थानेस्वभक्तानांसांबःसर्षिगणोविभुः ॥ स्वयंचोपदिशेद्ब्रह्मश्रुतौश्रुतिभिरीडितम् ॥ ५६ ॥ क्षेत्रेत्रसिद्धिदेप्राप्तश्चंडीशोमरुजांगलात् ॥ प्रचंडपापसंघातंखंडयेच्छतधेक्षणात् ॥ ५७ ॥

एकांबराद्भुवनेश्वरात् ॥ कृत्तिवाससीत्यादिसार्धपद्यंस्कंदोक्तिः ॥ कृत्तिवासाभिधेइतिक्वचित्पाठः ॥ उभयत्रभवानित्यध्याहारेणनंयुक्तमेववा ॥ ५५ ॥ सांबःअंबयासहितः ॥५६॥ मरुजांगलात्क्षेत्र

CC-0. In Public Domain. Digitization by eGangotri

विशेषात् ॥ मत्तजांगलादितिक्वचित्पाठः ॥ ५७ ॥ ५८ ॥ कालंजरात्पर्वतात् ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ त्रिदंडायाःपुर्याः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥७०॥

पाशपाणिगणाध्यक्षसमीपेयःप्रपश्यति ॥ चंडीश्वरंमहालिंगंसयातिपरमांगतिम् ॥ ५८ ॥ कालंजरान्नीलकंठस्तिष्ठेदत्रस्वयंविभुः ॥ गणेशाद्दंतकूटाख्यात्समीपेभवनाशनः ॥ ५९ ॥ नीलकंठेश्वरंलिंगंकाश्यांयैःपरिपूजितम् ॥ नीलकंठास्तएवस्युस्तएवशशिभूषणाः ॥ ६० ॥ काश्मीरादिहसंप्राप्तं लिंगंविजयसंज्ञितम् ॥ सदाविजयदंपुंसांप्राच्यांशालकटंकटात् ॥ ६१ ॥ रणेराजकुलेद्यूतेविवादेसर्वदैवहि ॥ विजयोजायतेपुंसांविजयेशसमर्चनात् ॥ ॥ ६२ ॥ ऊर्ध्वरेतास्त्रिदंडायाः संप्राप्तोत्रस्वयंविभुः ॥ कूश्मांडकंगणाध्यक्षंपुरस्कृत्यव्यवस्थितः ॥ ६३ ॥ ऊर्ध्वांगतिमवाप्नोतिवीक्षणादूर्ध्वरेतसः ॥ ऊर्ध्वरेतसियेभक्तानहितेषामधोगतिः ॥ ६४ ॥ मंडलेश्वरतःक्षेत्राल्लिंगंश्रीकंठसंज्ञितम् ॥ विनायकान्मंडसंज्ञादुत्तरस्यांव्यवस्थितम् ॥ ६५ ॥ श्रीकंठस्यचयेभक्ताःश्रीकंठाएवतेनराः ॥ नेहश्रियावियुज्यंतेनपरत्रकदाचन ॥ ६६ ॥ छागलांडान्महातीर्थात्कपर्दीश्वरसंज्ञितः ॥ पिशाचमोचनेतीर्थेस्वयमाविरभूद्विभुः ॥ ६७ ॥ कपर्दीशंसमभ्यर्च्यननरोनिरयंव्रजेत् ॥ नपिशाचत्वमाप्नोतिकृत्वात्राप्यघमुत्तमम् ॥ ६८ ॥ आम्रातकेश्वरात्क्षेत्राल्लिंगंसूक्ष्मेशसंज्ञितम् ॥ स्वयमभ्यागतंचात्रक्षेत्रेवैश्रेयसांपदे ॥ ६९ ॥ विकटद्विजसंज्ञस्यगणेशस्यसमीपतः ॥ दृष्ट्वासूक्ष्मेश्वरंलिंगंगतिंसूक्ष्मामवाप्नुयात् ॥७०॥ संप्राप्तमिहदेवेशंजयंतंमधुकेश्वरात् ॥ लंबोदराद्गणपतेःपुरस्तात्तदवस्थितम् ॥ ७१ ॥ जयंतेश्वरमालोक्यस्नात्वागंगाजलेशुभे ॥ प्राप्नुयाद्वांछितांसिद्धिं सर्वत्रविजयीभवेत् ॥ ७२ ॥ प्रादुश्चकारदेवेशःश्रीशैलात्त्रिपुरांतकः ॥ शैश्रीलशिखरंदृष्ट्वायत्फलंसमुदीरितम् ॥ ७३ ॥ त्रिपुरांतकमालोक्यतत्फलंहेलयाप्यते ॥ विश्वेशात्पश्चिमेभागेत्रिपुरांतकमीश्वरम् ॥ ७४ ॥ संपूज्यपरयाभक्त्यानंनरोगर्भमाविशेत् ॥ सौम्यस्थानादिहायातोभगवान्कुक्कुटेश्वरः ॥ ॥ ७५ ॥ वक्रतुंडगणाध्यक्षसमीपेसोपतिष्ठते ॥ तद्दर्शनादर्चनाच्चकरस्थाःसर्वसिद्धयः ॥७६॥ जालेश्वरात्त्रिशूलीचस्वयमीशःसमागतः ॥ कूटदंताद्गणपतेःपुरस्तात्सर्वसिद्धिदः ॥ ७७ ॥ रामेश्वरान्महाक्षेत्राज्जटीदेवःसमागतः ॥ एकदंतोत्तरेभागेसोर्चितःसर्वकामदः ॥ ७८ ॥ त्रिसंध्यात्क्षेत्रतोदेवस्त्र्यंबकोस्तिसमागतः ॥ त्रिमुखात्पूर्वदिग्भागेपूजितस्त्र्यंबकत्वकृत् ॥ ७९ ॥

मधुकेश्वरात्क्षेत्रादितिशेषः ॥ ७१ ॥ ७२ ॥ प्रादुश्चकारआविर्बभूव ॥७३॥७४॥ सौम्यस्थानात्क्षेत्रविशेषात् ॥ ७५ ॥७६॥ जालेश्वरात्क्षेत्रादितिशेषः ॥ ७७ ॥ रामेश्वरात्सेतुबन्धात्॥७८॥७९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८० ॥ पुरोधायाग्रेकृत्वा ॥ ८१ ॥ ८२ ॥ स्थलेश्वरात्स्थानेश्वरात्क्षेत्रादितिशेषः ॥ यत्रस्थलेश्वरेक्षेत्रेयज्ञेश्वरंमहालिंगंलिंगांतरंमहालिंगमेत्रवा ॥ ८३ ॥ ८४ ॥ सुवर्णाख्यात्क्षेत्रादितिशेषः ॥ ८५ ॥ अवाच्यांदक्षिणस्याम् ॥ ८६ ॥ हर्षितात्क्षेत्रादितिशेषः ॥ ८७ ॥ ८८ ॥ रुद्रमहालयात्क्षेत्रादितिशेषः ॥ ८९ ॥ ९० ॥ इवएव ॥ अयमेववापाठः ॥ ९१ ॥ वृषभध्वजात्क्षे

हरेश्वरोहरिश्चंद्रात्क्षेत्रादत्रसमागतः ॥ हरिश्चंद्रेश्वरपुरःपूजितोजयदः सदा ॥ ८० ॥ इहशर्वः समायातःस्थानान्मध्यमकेश्वरात् ॥ चतुर्वेदेश्वरंलिंगंपुरोधायव्यवस्थितम् ॥ ८१ ॥ शर्वलिंगंसमभ्यर्च्यकाश्यांपरमसिद्धिकृत् ॥ नजातुजंतुपदवींप्राप्नुयात्क्वापिमानवः ॥ ८२ ॥ स्थलेश्वरान्महालिंगंप्रादुर्भूतंपरंत्विह ॥ यत्रयज्ञेश्वरंलिंगंसर्वलिंगफलप्रदम् ॥ ८३ ॥ महालिंगंसमभ्यर्च्यमहाश्रद्धासमन्वितः ॥ महतींश्रियमाप्नोतिलोकेत्रचपरत्रच ॥ ८४ ॥ इहलिंगंसहस्राक्षंसुवर्णाख्यात्समागतम् ॥ यस्यसंदर्शनात्पुंसांज्ञानचक्षुःप्रजायते ॥ ८५॥ शैलेश्वरादवाच्यांतुसहस्राक्षेश्वरंविभुम् ॥ दृष्ट्वाजन्मसहस्राणांशतानांपातकंत्यजेत् ॥ ८६ ॥ हर्षिताद्धर्षितंचात्रप्रादुरासीत्तमोहरम् ॥ लिंगंहर्षप्रदंपुंसांदर्शनात्स्पर्शनादपि ॥ ८७॥ मंत्रेश्वरसमीपेतुप्रासादोहर्षितेशितुः ॥ तद्विलोकनतःपुंसांनित्यंहर्षपरंपरा ॥ ८८ ॥ इहस्वयंसमायातोरुद्रोरुद्रमहालयात् ॥ यस्यदर्शनतोयांतिरुद्रलोकेनराःस्फुटम् ॥ ८९ ॥ यैस्तुरुद्रेश्वरंलिंगंकाश्यामत्रसमर्चितम् ॥ तेरुद्ररूपिणोमर्त्याविज्ञेयानात्रसंशयः ॥ ९० ॥ त्रिपुरेशसमीपेतुदृष्ट्वारुद्रेश्वरंविभुम् ॥ रुद्रास्तइवविज्ञेयाजीवंतोपिमृताअपि ॥९१॥ आगादिहमहादेवोवृषेशोवृषभध्वजात् ॥ बाणेश्वरस्यलिंगस्यसमीपेवृषदःसदा ॥९२॥ इहागतंतुकेदारादीशानेश्वरसंज्ञितम् ॥ तद्द्रष्टव्यंप्रतीच्यांचलिंगंप्रह्लादकेशवात् ॥ ९३ ॥ ईशानेशंसमभ्यर्च्यस्नात्वोत्तरवहांभसि ॥ वसेदीशाननगरेईशानसदृशप्रभः ॥ ९४ ॥ भैरवाद्भैरवीमूर्तिरत्रायातामनोहरा ॥ संहारभैरवोनामद्रष्टव्यःसप्रयत्नतः ॥ ९५ ॥ पूजनात्सर्वसिद्ध्यैसप्राच्यांखर्वविनायकात् ॥ संहारभैरवःकाश्यांसंहरेदघसंततिम् ॥ ९६ ॥ उग्रःकनखलात्तीर्थादाविरासेहसिद्धिदः ॥ तद्विलोकनतोनॄणामुग्रंपापंप्रणश्यति ॥ ९७ ॥ उग्रंलिंगंसदासेव्यंप्राच्यामर्कविनायकात् ॥ अत्युग्राअपिनश्येयुरुपसर्गास्तदर्चनात् ॥ ९८ ॥ वस्त्रापथान्महाक्षेत्राद्भवोनामस्वयंविभुः ॥ भीमचंडीसमीपेतुप्रादुरासीदिहप्रभो ॥ ९९ ॥ भवेश्वरंसमभ्यर्च्यभवेनाविर्भवेन्नरः ॥ प्रभुर्भवतिसर्वेषांराज्ञामाज्ञाकृतामिह ॥ १०० ॥ देवदारुवनाद्दंडीदंडयन्पातकावलीः ॥ वाराणस्यांसमागत्यस्थितोलिंगाकृतिर्विभुः ॥१॥ प्राच्यांदंडीश्वरःपूज्यःसदेहलिविनायकात् ॥ तस्यार्चनेनमर्त्यानांनपुनर्भवईक्ष्यते ॥ २ ॥ भद्रकर्णह्रदादत्रभद्रकर्णह्रदान्वितः ॥ शिवःसाक्षादिहायातःसर्वेषांशिवदोर्चितः ॥ ३ ॥

त्रादितिशेषः ॥ ९२ ॥ केदारात्क्षेत्रादितिशेषः ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ उग्रःप्रचण्डः ॥ ९७ ॥ ९८ ॥ ९९ ॥ भवेसंसारे ॥ १०० ॥ पातकावलीःपापपंक्तीः ॥ १ ॥ २ ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ४ ॥ भद्रकर्णेशपूजनाद्भद्रकर्णह्रदेस्थितईशोभद्रकर्णेशस्तस्यपूजनात् ॥ भद्रंकर्णेभिरुत्तमामितिपाठेकर्णेभिःकर्णैरित्यर्थः ॥ तथाचमन्त्रःभद्रंकर्णेभिःशृणुयामदेवा भद्रंपश्येमाक्षभिर्यजत्राः इत्यादि ॥
अक्षिभिर्नेत्रैः ॥ ५ ॥ त्वत्त्वत्तःहरिश्चन्द्रशिवाह्वयात् ॥ तदितिपाठेपिसएवार्थः ॥ जनिर्जन्म॥६॥ पश्चिमेनेतिनतृतीयाकिंतुपश्चिमायांदिशीत्यस्मिन्नर्थेतद्धितोयंप्रत्ययोऽव्ययसंज्ञः॥ पश्चिमेनपश्चिमायां

उद्दंडाख्याद्गणपतेःप्राच्यांतत्तीर्थमुत्तमम् ॥ भद्रकर्णह्रदेस्नात्वाभ्यर्च्यलिंगंशिवाह्वयम् ॥ ४ ॥ सर्वत्रशिवमाप्नोतिभद्रकर्णेशपूजनात् ॥ शृणुयात्सर्व
भूतानांभद्रंपश्यतिचाक्षिभिः ॥ ५ ॥ शंकरश्चहरिश्चंद्रात्त्वत्पुरःप्रतिभासते ॥ तत्पूजनाज्जनानांनजननीजठरेजनिः ॥ ६ ॥ यमलिंगान्महातीर्थात्का
ललिंगमिहस्थितम् ॥ कलशेशइतिख्यातंचंद्रेशात्पश्चिमेनच ॥ ७ ॥ यमतीर्थेनरःस्नात्वामित्रावरुणदक्षिणे ॥ काललिंगंसमालोक्यकलिकालभयं
कुतः ॥ ८ ॥ तत्रभौमचतुर्दश्यांयस्तुयात्रांकरिष्यति ॥ अपिपातकयुक्तःसयमयात्रांनयास्यति ॥ ९ ॥ नैपालाच्चमहाक्षेत्रादायात्पशुपतिस्त्विह ॥
यत्रपाशुपतोयोगउपदिष्टःपिनाकिना ॥ ११० ॥ भवतादेवदेवेनब्रह्मादिभ्योविमुक्तये ॥ तस्यसंदर्शनादेवपशुपाशैर्वियुज्यते ॥ ११ ॥ करवीरकतीर्था
च्चकपालीशइहागतः ॥ कपालमोचनेतीर्थेद्रष्टव्यःसप्रयत्नतः ॥ १२ ॥ तद्विलोकनमात्रेणब्रह्महत्याविलीयते ॥ उमापतिर्देविकायाइहागत्यव्ययंस्थितः
॥ १३ ॥ दृष्टःपशुपतिःप्राच्यांहरेत्पापंचिरार्जितम् ॥ लिंगंमहेश्वरक्षेत्रादिहदीप्तेशसंज्ञितम् ॥ १४ ॥ उपोमापतितिष्ठेतदीप्त्यैचेहपरत्रच ॥ भुक्तिमुक्तिप्र
दंलिंगंदीप्तेशंकाशिमध्यगम् ॥१५॥ कायारोहणतःक्षेत्रादाचार्योनकुलीश्वरः ॥ शिष्यैःपरिवृतस्तिष्ठेन्महापाशुपतव्रतैः ॥ १६ ॥ दक्षिणेहिमहादेवाद्दृष्टो
ज्ञानंप्रयच्छति ॥ अज्ञानंनाशयेत्क्षिप्रंगर्भसंसृतिहेतुकम् ॥ १७ ॥ गंगासागरतश्चायादमरेशइतीरितम् ॥ लिंगंयद्दर्शनादेवनामरत्वंहिदुर्लभम् ॥१८॥
सप्तगोदावरीतीर्थाद्देवोभीमेश्वरःप्रभुः ॥ प्रकाशतेलिंगरूपीभुक्त्यैमुक्त्यैनृणामिह ॥ १९ ॥ नकुलीशात्पुरोभागेदृष्ट्वाभीमेश्वरंप्रभुम् ॥ महाभीमानिपापा
निप्रणश्यंतिहितत्क्षणात् ॥ १२० ॥ भूतेश्वराद्भस्मगात्रंप्रादुरासीदिहस्वयम् ॥ भीमेशाद्दक्षिणेभागेतदभ्यर्च्यप्रयत्नतः ॥ २१ ॥ सम्यक्पाशुपताद्यो
गादभ्यस्ताच्चसमाःशतम् ॥ यत्प्राप्यतेफलंतत्स्याद्भस्मगात्रविलोकनात् ॥ २२ ॥ नकुलीश्वरतोदेवःस्वयंभूरितिविश्रुतः ॥ आत्मनाप्रकटीभूतःकाश्यां
लिंगाकृतिर्हरः ॥ २३ ॥ स्वयंभुलिंगंसंपूज्यस्नात्वासिद्धिह्रदेनरः ॥ महालक्ष्मीश्वरपुरोनभूयोजन्मभाग्भवेत् ॥ २४ ॥ प्रयागतीर्थनिकषाप्रासादोवि
द्रुमप्रभः ॥ वाराहस्यमहानेषधरणीनाम्नएवहि ॥ २५ ॥

दिशीत्यर्थः ॥ ७ ॥ ८ ॥ ९ ॥११० ॥ ११ ॥ १२ ॥ देविकायाःपुर्याइतिशेषः ॥ १३ ॥ महेश्वरक्षेत्रात्कैलासात् ॥ १४ ॥ उपोमापतेःसमीपे ॥१५॥ नकुलीत्यलत्रकुलीतिक्वचित् ॥ नकुली
श्वरस्यदक्षिणेभागइत्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ प्रयागतीर्थनिकषाप्रयागतीर्थसमीपे ॥ वाराहस्यसूकराकृतेः वाराणस्यामिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वचित्पाठः ॥ २५ ॥ मंदरात्समागतंश्रुत्वेत्यन्वयः ॥ २६ ॥ २७ ॥ कर्णिकारप्रसूनरुक्द्रुमोत्पलपुष्पकांतिः ॥ २८ ॥२९॥ हेमकूटात्पर्वतात् ॥१३०॥३१॥३२॥ सयंत्राणिऔषधिप्रयुक्तनिक्षिप्यमाणशिलाद्यस्त्रविशेषसहितानि ॥ कपाटविकटानिकपाटैर्विषमाणि ॥ सकपाटविटानिचेतिपाठेविटाःपाषाणगुडकाः ॥ ३३ ॥ कोटिकोटिभटानामपरिमितयोधानामाढ्यमटनंयेषुतानि ॥ तथा ॥ भटाढ्यानीतिक्वचित् ॥ कांस्यरीतिकसीसकैःकांस्यानिचप्रसिद्धानिरीतिकाश्चआरकूटाः ॥ स्वार्थेकः ॥ पित्तलानीतियावत् ॥ यदाहामरः ॥ रीतिःस्त्रियामारकूटोनस्त्रियामिति ॥

विंध्यपर्वततःप्राप्तोदेवंश्रुत्वासमागतम् ॥ सगणंसर्षिदेवंचमंदराद्रत्नकंदरात् ॥ २६ ॥ काश्यांधरणिवाराहोद्रष्टव्यःसप्रयत्नतः ॥ आपत्समुद्रसंमग्नमुद्धरेच्छरणागतम् ॥ २७ ॥ कर्णिकाराद्गणाध्यक्षःकर्णिकारप्रसूनरुक् ॥ समर्च्योयंगदाहस्तउपसर्गसहस्रहृत् ॥२८॥ तस्माद्धरणिवाराहात्प्रतीच्यांदिशिसंस्थितम् ॥ पूजयित्वागणाध्यक्षंगाणपत्यपदंलभेत् ॥ २९ ॥ हेमकूटाद्विरूपाक्षंलिंगमत्राविरासह ॥ महेश्वरादवाच्यांचदृष्टंसंसारतारकम् ॥ १३० ॥ गंगाद्वाराद्धिमस्थेशंलिंगंहिमसमप्रभम् ॥ ब्रह्मनालात्प्रतीच्यांचद्रष्टव्यमिहसिद्धिदम् ॥ ३१ ॥ गणाधिपश्चकैलासाद्गणाअन्येमहाबलाः ॥ कैलासाद्रेःसमायाताःसप्तकोटिमिताःप्रभो ॥ ३२ ॥ दुर्गाणितैःकृतानीहसप्तस्वर्गसमानिच ॥ सद्वाराणिसयंत्राणिकपाटविकटानिच ॥३३॥ कोटिकोटिभटाढ्यानिसर्वर्द्धिसहितान्यपि ॥ सुवर्णरूप्यताम्रैश्चकांस्यरीतिकसीसकैः ॥ ३४ ॥ अयस्कांतेनकांतानिदृढान्यभ्रंलिहान्यपि ॥ ततःशैलंमहादुर्गंतैःकाशीपरितःकृतम् ॥ ३५ ॥ परिखापिकृतानिम्नामत्स्योदर्याजलाविला ॥ मत्स्योदरीद्विधाजाताबहिरंतश्चरापुनः ॥ ३६ ॥ तच्चतीर्थंमहत्ख्यातंमिलितंगांगवारिभिः ॥ यदासंहारमार्गेणगंगांभःप्रसरेदिह ॥ ३७ ॥ तदामत्स्योदरीतीर्थंलभ्यतेपुण्यगौरवात् ॥ सूर्याचंद्रमसोःपर्वतदाकोटिगुणंशतम् ॥ ३८ ॥ सर्वपर्वाणितत्रैवसर्वतीर्थानितत्रवै ॥ तत्रैवसर्वलिंगानिगंगामत्स्योदरीयतः ॥ ३९ ॥ मत्स्योदर्यांहियेस्नातायत्रकुत्रापिमानवाः ॥ कृतपिंडप्रदानास्तेनमातुरुदरेशयाः ॥ १४० ॥ अविमुक्तमिदंक्षेत्रंमत्स्याकारत्वमाप्नुयात् ॥ परितःस्वर्धुनीवारिसंसारिपरिवीक्ष्यते ॥ ४१ ॥ मत्स्योदर्यांकृतस्नानायेनरास्तेनरोत्तमाः ॥ कृत्वापिबहुपापानिनेक्षंतेभास्करेःपुरीम् ॥४२॥ किंस्नात्वाबहुतीर्थेषुकिंतप्त्वादुष्करंतपः ॥ यदिमत्स्योदरीस्नाताकुतोगर्भभयंततः ॥ ४३ ॥ यत्रयत्रहिलिंगानिनृदेवर्षिकृतान्यपि ॥ तत्रमत्स्योदरींप्राप्यसुस्नातोमोक्षभाजनम् ॥४४॥ संतितीर्थान्यनेकानिभूर्भुवःस्वर्गतान्यपि ॥ नसमानिपरंतानिकोट्यंशेनापिनिश्चितम् ॥ ४५ ॥ इत्थंतीर्थंकृतंतेनविभोकैलासवासिना ॥ गणाधिपेनसुमहत्सुमहोदारकर्मणा ॥ ४६ ॥

सीसकानिनागाः ॥ यदाहामरः ॥ नागसीसकयोगेष्टवप्राणीतितैः ॥ ३४ ॥ ३५ ॥ ३६ ॥ संहारमार्गेणप्रतिलोमवर्त्मनादक्षिणप्रवाहेणेत्यर्थः ॥ इहमत्स्योदर्याम् ॥ ३७ ॥ सूर्याचंद्रमसोः ॥ देवताद्वंद्वेचेतिदीर्घत्वम् ॥ एवंमित्रावरुणदक्षिणेइत्यादिष्वपि ॥ ३८ ॥ गंगयासहमत्स्योदरीगंगामत्स्योदरी ॥ यतोयदा ॥ ३९ ॥ यत्रकुत्रापियदाकदापीत्यर्थः ॥ १४० ॥ अविमुक्तमिति ॥ मत्स्याकारत्वमाप्नुयात् ॥ कदेत्याकांक्षायामाह ॥ परितइति ॥ संसारिसंसरणशीलम् ॥ ४१ ॥ ४२ ॥ ततस्तदा ॥ ४३ ॥ तत्रेत्यत्रवीप्साज्ञेया ॥४४॥४५॥ गणाधिपेनसप्तकोटिपेन ॥ ४६ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ४७ ॥ भूर्भुवःस्वर्महःपरेभूरादीनांलोकानामुपरि ॥ ४८ ॥ भोगवत्यापातालगंगया ॥ ४९ ॥ निरमायिनिर्मितः ॥ १५० ॥ हाटकमयंस्वर्णमयम् ॥ ५१ ॥ ५२ ॥ तारकात्तारा लोकात् ॥ ५३ ॥ ५४ ॥ यावल्लिंगविलोकनंकरोतीतिशेषः ॥ तावत्सर्वपापेभ्योमुच्यते ॥ ५५ ॥ यस्माज्ज्ञानान्मुच्यतेतत्तारकंज्ञानंप्रांतेअंतकालेप्राप्नोति ॥ ५६ ॥ किरातात्तीर्थादितिशेषः ॥ देशाद्वा ॥ किंतत्किरातंतदाह ॥ किरातरूपइति ॥ ५७ ॥ ५८ ॥ ५९ ॥ पौलस्त्यराघवात्पौलस्त्योबिभीषणस्तेनस्थापितोराघवःपौलस्त्यराघवोरामचंद्रस्तस्मादिति ॥ १६० ॥ स्थलात्स्थल

भूर्भुवःसंज्ञकंलिंगंपर्वताद्गंधमादनात् ॥ स्वयमाविरभूदत्रतस्मात्प्राच्यांगणाधिपात् ॥ ४७ ॥ विलोक्यभूर्भुवंलिंगंभूर्भुवःस्वर्महःपरे ॥ निवसंतिजनाः पुण्याःसुचिरंदिव्यभोगिनः ॥ ४८ ॥ हाटकेशंमहालिंगंभोगवत्यासमायुतम् ॥ सप्तपातालतलतइहायातंस्वयंविभो ॥ ४९ ॥ शेषवासुकिमुख्यैश्चतत्प्रा सादोमहानिह ॥ मणिमाणिक्यरत्नौघैर्निरमायिप्रयत्नतः ॥ १५० ॥ तल्लिंगंहाटकमयंरत्नमालाभिरर्चितम् ॥ ईशानेश्वरतःप्राच्यांपूजनीयंप्रयत्नतः ॥ ॥ ५१ ॥ भक्तितोऽभ्यर्च्यतल्लिंगंनरःसर्वसमृद्धिमान् ॥ भुक्त्वाभोगानसंख्यातानंतेनिर्वाणमृच्छति ॥५२॥ आकाशात्तारकाल्लिंगंज्योतीरूपमिहागतम् ॥ ज्ञानवाप्याःपुरोभागेतल्लिंगंतारकेश्वरम् ॥ ५३ ॥ तारकंज्ञानमाप्येततल्लिंगस्यसमर्चनात् ॥ ज्ञानवाप्यांनरःस्नात्वातारकेशंविलोक्यच ॥ ५४ ॥ कृतसं ध्यादिनियमःपरितर्प्यपितामहान् ॥ धृतमौनव्रतोधीमान्यावल्लिंगविलोकनम् ॥ ५५ ॥ मुच्यतेसर्वपापेभ्यःपुण्यंप्राप्नोतिशाश्वतम् ॥ प्रांतेचतारकंज्ञानं यस्माज्ज्ञानाद्विमुच्यते ॥ ५६ ॥ किराताच्चकिरातेशइहचाविर्बभूवह ॥ किरातरूपोभगवान्यत्रदेवोऽभवत्पुरा ॥ ५७ ॥ तत्किरातेश्वरंलिंगंभारभूते श्वरादनु ॥ नमस्कृत्यनरोजातुनमातुरुदरेशयः ॥ ५८ ॥ लंकापुर्याःसमागच्छन्मरुकेश्वरसंज्ञकम् ॥ लिंगंयदर्चनात्पुंसांनभयंरक्षसांभवेत् ॥ ५९ ॥ नैर्ऋत्यांदिशितल्लिंगंनैर्ऋतेश्वरसंज्ञकम् ॥ पौलस्त्यराघवात्पश्चात्पूजितंसर्वदुष्टहृत् ॥ १६० ॥ पुण्यंजलप्रियंलिंगंजललिंगंस्थलादपि ॥ आयातं तच्चगङ्गायाजलमध्येव्यवस्थितम् ॥ ६१ ॥ तत्प्रासादोऽद्भुततरोमध्येगंगंनिरीक्ष्यते ॥ सर्वधातुमयःश्रेष्ठःसर्वरत्नमयःशुभः ॥ ६२ ॥ अद्यापिदृश्यते कैश्चित्पुण्यसंभारगौरवात् ॥ श्रेष्ठंलिंगमिहायातंतीर्थात्कोटीश्वरादपि ॥ ६३ ॥ कोटिलिंगेक्षणेपुण्यंतल्लिंगस्यनिरीक्षणात् ॥ श्रेष्ठंज्येष्ठेश्वरात्पश्चाच्छ्रेष्ठ सिद्धिप्रदायकम् ॥ ६४ ॥ वडवास्यात्समुद्भूतंलिंगमत्रानलेश्वरम् ॥ नलेश्वरपुरोभागेपूजितंसर्वसिद्धिदम् ॥ ६५ ॥ आगत्यविरजस्तीर्थाद्देवदेवस्त्रिलो चनः ॥ लिंगेत्वनादिसंसिद्धेह्यवतस्थेत्रिविष्टपे ॥ ६६ ॥ पुण्येपिलिपिलातीर्थेसर्वेषांतारकप्रदे ॥ आविश्चक्रेस्वयंदेवओंकारोमरकंटकात् ॥ ६७ ॥

लिंगात् ॥ ६१ ॥ मध्येगंगंगंगायामध्ये ॥ ६२ ॥ कोटीश्वरात्स्थानादितिशेषः ॥ ६३ ॥ ६४ ॥ वडवास्याद्वडवानलास्यादित्यर्थः ॥ ६५ ॥ विरजस्तीर्थंजाजपुरस्थनाभिगयास्थंयत्रविरजाख्या चंडिकातस्मात् ॥ ६६ ॥ अमरकंटकात् ॥ मालवदेशांतर्गतरेवातीरस्थात् ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंतत्स्वरूपंकदावामादुर्वभूवतदाह ॥ तदार्यालिंगम् ॥ कथंभूतम् ॥ तारकक्षेत्रंतारकःप्रणवःसएवक्षेत्रमुपलब्धिस्थानंयस्यतत्तथा ॥ ६८ ॥ तदाकृतिमप्रणवाकृति ॥ ततस्तदातदाकृतीतिकचित् ॥ यत्तदाद्यंप्रणवाद्यंतारकक्षेत्रमविमुक्तंतदाकृतिक्षेत्राकृतीतितदाव्याकर्तव्यम् ॥ ६९ ॥ आयतनानिस्थानानिआनिनायेत्यहमानीतवानित्यर्थः ॥ आगतानीतिकचित्पाठः सचपौनरुक्त्याद्धेयः ॥ तस्मिन्नित्यत्रवीप्साज्ञातव्या ॥ १७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ श्रद्धाप्रसाद्यशैलादिंश्रद्धयाप्रसाद्यःश्रद्धाप्रसाद्यःसचासौशैलादिश्चतम् ॥ मुदाप्रसाद्येतिक

तदाद्यंतारकक्षेत्रंयदागंगानचागता ॥ यदैवाविरभूत्काशीत्रैलोक्योद्धरणायवै ॥ ६८ ॥ तदाकृतिमहल्लिंगंस्वयमाविरभूत्ततः ॥ महिमानंनतस्यान्यःपरिवेत्तिविभोर्ऋते ॥ ६९ ॥ एतान्यायतनानीशआनिनायमहांतिच ॥ शेषयित्वांशमात्रंचतस्मिन्क्षेत्रेनिजेनिजे ॥ १७० ॥ इहायातानिपुण्यानिसर्वभावेननान्यथा ॥ प्रासादाःसर्वतश्चैषांरम्याअभ्रंलिहाविभो ॥७१॥ बहुधातुमयाश्चित्राःसर्वरत्नसमुज्ज्वलाः ॥ येषांकलशमात्रस्यदर्शनान्मुक्तिराप्यते॥७२॥ श्रुत्वापिनामचैतेषांलिंगानांसुरसत्तम ॥ अपिजन्मसहस्रोत्थाःक्षीयंतेपापराशयः ॥ ७३ ॥ इदानींकोनिदेशोत्रमयानुष्ठेयईशितः ॥ प्रसादीक्रियतांसोपिसिद्धोमंतव्यएवहि ॥ ७४ ॥ ॥ स्कंदउवाच ॥ ॥ श्रुत्वेतिनंदिनोवाक्यंदेवदेवेश्वरोहरः ॥ श्रद्धाप्रसाद्यशैलादिमिदंप्रोवाचकुंभज ॥ ७५ ॥ ॥ श्रीदेवदेवउवाच ॥ ॥ साधूक्तंत्वयानंदिन्सदानंदविधायक ॥ विधेहिमेनिदेशंचचंडीर्व्यापारयाधुना ॥७६॥ नवकोट्यस्तुचामुंडायायत्रनिवसंतिहि ॥ स्वदेवताभिःसहिताभूतवेतालभैरवैः ॥ ७७ ॥ ताःपुरीरक्षणार्थायसवाहनबलायुधाः ॥ प्रतिदुर्गंदुर्गरूपाःपरितःपरिवासय ॥ ७८ ॥ ॥ स्कंदउवाच ॥ नंदिनंसंनिदेश्येतिमृडान्यासहितोमृडः ॥ ययौत्रैविष्टपंक्षेत्रंमुक्तिबीजप्ररोहणम् ॥ ७९ ॥ शिलादतनयोप्यैशीमूर्द्धन्याज्ञांविधायच ॥ आहूयसर्वतोदुर्गाःप्रतिदुर्गंन्यवेशयत् ॥ १८० ॥ निशम्याध्यायमेतंचपुण्यायतनगर्भिणम् ॥ नरःस्वर्गापवर्गौचप्राप्नुयाच्छ्रद्धयाक्रमात् ॥ ८१ ॥ श्रुत्वाष्टषष्टिमेतांवैमहायतनसंश्रयाम् ॥ नजातुप्रविशेन्मर्त्योजनन्याजाठरींदरीम् ॥ १८२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्धेऽष्टषष्ट्यायतनसमागमोनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ अगस्त्यउवाच ॥ कात्यायनेयकथयनंदिनाविश्वनंदिना ॥ यथाव्यापारितादेव्योदेवदेवनिदेशतः ॥ १ ॥ अविमुक्तस्यरक्षार्थंयत्रयादेवताःस्थिताः ॥ प्रसादंकुरुमेदेवताःसमाचक्ष्वतत्त्वतः ॥ २ ॥ इत्यगस्त्युदितंश्रुत्वामहादेवतनूद्भवः ॥ कथयामाससयायत्रस्थिताऽऽनंदवनेमुदा ॥ ३ ॥

चित्पाठस्तदास्पष्टएवार्थः ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ऐशीमिशिसंबंधिनीम् ॥ १८० ॥ ८१ ॥ दरींकन्दराम् ॥ १८२ ॥ इतिश्रीरा० काशीखंडटीकायामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ छ ॥ अध्यायेसप्ततितमेमहापापापहेनृणाम् ॥ देवतानामधिष्ठानंवर्ण्यतेतिसुखावहम् ॥ १ ॥ साधूक्तंत्वयानंदिन्नित्यादिनाविश्वेशेनचण्डीःपरिवासयेत्युक्तमतस्तासांपरिवसतिंश्रोतुंकार्तिकेयमभ्यर्थयाति ॥ कात्यायनेयेति ॥ कात्यायनीभवानीतस्याअपत्यंकात्यायनेयस्तत्संबोधनंतथा ॥ १ ॥ २ ॥ अगस्तिशब्दोप्यस्ति ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ समन्वितैःसहितैः ॥ ८ ॥ ९ ॥ वाराणस्यांविशालाक्षीति ॥ तदुक्तंमात्स्ये ॥ वाराणस्यांविशालाक्षीविमलापुरुषोत्तमे ॥ रुक्मिणीद्वारवत्यांतुराधावृन्दावनेवने इति ॥ उपहारैर्बलिभिर्नैवेद्यैरित्यर्थः ॥ १० ॥ उल्लोचोवितानंचन्द्रातपइतियावत् ॥ दुकूलैःक्षौमैः ॥ ११ ॥ अप्यल्पमपीत्यत्रपूर्वापिशब्दस्यपूर्वेणसम्बन्धः ॥ १२ ॥ पीठंस्थानम् ॥ १३ ॥

स्कंदउवाच ॥ ॥ वाराणस्यांविशालाक्षीक्षेत्रस्यपरमेष्टदा ॥ विशालतीर्थगंगायांकृत्वापृष्ठेव्यवस्थिता ॥ ४ ॥ स्नात्वाविशालतीर्थेवैविशालाक्षीं प्रणम्यच ॥ विशालांलभतेलक्ष्मींपरत्रेहचशर्मदाम् ॥ ५ ॥ भाद्रकृष्णतृतीयायामुपोषणपरैर्नृभिः ॥ कृत्वाजागरणंरात्रौविशालाक्षीसमीपतः ॥ ६ ॥ प्रातर्भोज्याःप्रयत्नेनचतुर्दशकुमारिकाः ॥ अलंकृतायथाशक्त्यास्रगंबरविभूषणैः ॥७॥ विधायपारणंपश्चात्पुत्रभृत्यसमन्वितैः॥सम्यग्वाराणसीवासफलं लभ्येतकुंभज ॥ ८ ॥ तस्यांतिथौमहायात्राकार्याक्षेत्रनिवासिभिः ॥ उपसर्गप्रशांत्यर्थंनिर्वाणकमलाप्तये ॥ ९ ॥ वाराणस्यांविशालाक्षीपूजनीयाप्रय त्नतः ॥ धूपैर्दीपैःशुभैर्माल्यैरुपहारैर्मनोहरैः ॥१०॥ मणिमुक्ताद्यलंकारैर्विचित्रोल्लोचचामरैः ॥ शुभैरनुपभुक्तैश्चदुकूलैर्गंधवासितैः ॥ ११॥ मोक्षलक्ष्मी समृद्ध्यर्थंयत्रकुत्रनिवासिभिः ॥ अप्यल्पमपियद्दत्तंविशालाक्ष्यैनरोत्तमैः ॥ १२ ॥ तदानंत्यायजायेतमुनेलोकद्वयेपिहि ॥ विशालाक्षीमहापीठेदत्तं जप्तंहुतंस्तुतम् ॥ १३ ॥ मोक्षस्तस्यपरीपाकोनात्रकार्याविचारणा ॥ विशालाक्षीसमर्चातोरूपसंपत्तियुक्पतिः ॥ १४ ॥ प्राप्यतेत्रकुमारीभिर्गुणशी लाद्यलंकृतः ॥ गुर्विणीभिःसुतनयोवंध्याभिर्गर्भसंभवः ॥ १५ ॥ असौभाग्यवतीभिश्चसौभाग्यंमहदाप्यते ॥ विधवाभिर्नवैधव्यंपुनर्जन्मांतरेक्वचित् ॥ ॥ १६ ॥ सीमंतिनीभिःपुंभिर्वापरंनिर्वाणमिच्छुभिः ॥ श्रुताद्दष्टार्चिताकाश्यांविशालाक्ष्यभिलाषदा ॥१७॥ ततोन्यल्ललितातीर्थंगंगाकेशवसन्निधौ ॥ तत्रास्तिललितादेवीक्षेत्ररक्षाकरीपरा ॥ १८ ॥ साचपूज्याप्रयत्नेनसर्वसंपत्समृद्धये ॥ ललितापूजकानांचजातुविघ्नोनजायते ॥ १९ ॥ इषेकृष्णद्विती यायांललितांपरिपूज्यवै ॥ नारीवापुरुषोवापिलभतेवांछितंपदम् ॥ २० ॥ स्नात्वाचललितातीर्थेललितांप्रणिपत्यवै ॥ लभेत्सर्वत्रलालित्यंयद्वातद्वा ऽनुलप्यच ॥ २१ ॥ मुनेविश्वभुजागौरीविशालाक्षीपुरःस्थिता ॥ संहरंतीमहाविघ्नंक्षेत्रभक्तिजुषांसदा ॥ २२ ॥ शारदंनवरात्रंचकार्यायात्राप्रयत्नतः ॥ देव्याविश्वभुजायावैसर्वकामसमृद्धये ॥ २३ ॥ योनविश्वभुजांदेवींवाराणस्यांनमेन्नरः ॥ कुतोमहोपसर्गेभ्यस्तस्यशांतिर्दुरात्मनः ॥ २४ ॥ यैस्तुविश्वभु जादेवीवाराणस्यांस्तुतार्चिता ॥ नहितान्विघ्नसंघातोबाधतेसुकृतात्मनः ॥ २५ ॥ अन्यास्तिकाश्यांवाराहीक्रतुवाराहसन्निधौ ॥ तांप्रणम्यनरो भक्त्याविपदब्धौनमज्जति ॥ २६ ॥

परीपाकःफलम् ॥ १४ ॥ अत्रकाश्याम् ॥ जगतीतिवा ॥ शीलमाचारः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ इषेआश्विने ॥ २० ॥ लालित्यंसौभाग्यम् ॥ यद्वातद्वाअनुलप्यचयत्किंचि त्स्तुत्वेत्यर्थः ॥ यत्रतत्रस्थितोपिचेतिक्वचित् ॥ २१ ॥ २२ ॥ शारदंशरत्सम्बन्धि ॥ सादरमितिक्वचित् ॥ नवरात्रंशुक्लप्रतिपदमारभ्यनवमीपर्यंतमित्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अरितर्जनीशत्रुभर्त्सनी ॥ २७ ॥ गजराजरथास्थितागजराजऐरावतःसएवरथस्तत्रास्थिता ॥ २८ ॥ वर्हियानगामयूररथगा ॥ प्रेक्षणीयाद्रष्टव्या ॥ अर्चनीयेतिकचित् ॥ २९ ॥ महेश्वरादित्यत्रम हेशाचेतिकचित् ॥ महावृषोमहाधर्मस्तत्समृद्धिदाअनेकगोवृषसमृद्धिदावा ॥ ३० ॥ समुद्यच्चक्ररम्यदोःसम्यगुच्चलत्सुदर्शनमनोहरहस्ता ॥ ३१ ॥ गलत्कमण्डलुजलचुलकाताडिताहिताक्षर त्कुंडीवारिगंडूषपातितविपक्षा ॥ ३२ ॥ निजतत्त्वंब्रह्मात्मतत्त्वम् ॥ ३३ ॥ ३४ ॥ भ्राम्यच्चक्रोच्चतर्जनींभ्राम्यच्चक्रंयस्याउच्चंतर्जनंदुष्टान्प्रतियस्याः साचसाच भ्राम्यच्चक्रेणउच्चातर्जनीतर्जन्याख्या

शिवदूतीतुतत्रैवद्रष्टव्याऽऽपद्विनाशिनी ॥ आनंदवनरक्षार्थमुद्यच्छूलारितर्जनी ॥ २७ ॥ वज्रहस्तातथाचैंद्रीगजराजरथास्थिता ॥ इंद्रेशाद्दक्षिणेभागेऽचिंतासंपत्करीसदा ॥ २८ ॥ स्कंदेश्वरसमीपेतुकौमारीबर्हियानगा ॥ प्रेक्षणीयाप्रयत्नेनमहाफलसमृद्धये ॥ २९ ॥ महेश्वराद्दक्षिणतोदेवीमाहेश्वरी नरैः ॥ वृषयानवतीपूज्यामहावृषसमृद्धिदा ॥ ३० ॥ निर्वाणनरसिंहस्यसमीपेमोक्षकांक्षिभिः ॥ नारसिंहीसमर्च्याचसमुद्यच्चक्ररम्यदोः ॥ ३१ ॥ हंसयानवतीब्राह्मीब्रह्मेशात्पश्चिमेस्थिता ॥ गलत्कमंडलुजलचुलकाताडिताहिता ॥ ३२ ॥ ब्रह्मविद्याप्रबोधार्थंकाश्यांपूज्यादिनेदिने ॥ ब्राह्मणैर्यतिभिर्नित्यंनिजतत्त्वावबोधिभिः ॥ ३३ ॥ शार्ङ्गचापविनिर्मुक्तमहेषुभिरितस्ततः ॥ उत्सादयंतींप्रत्यूहान्काश्यांनारायणींश्रयेत् ॥ ३४ ॥ प्रतीच्यांगोपिगोविंदाद्भ्राम्यच्चक्रोच्चतर्जनीम् ॥ नारायणींयःप्रणमेत्तस्यकाश्यांमहोदयः ॥३५॥ ततोगौरींविरूपाक्षींदेवयान्याउदग्दिशि ॥ पूजयित्वानरोभक्त्यावांछितांलभतेश्रियम् ॥ ३६ ॥ शैलेश्वरीसमभ्यर्च्याशैलेश्वरसमीपगा ॥ तर्जयंतीचतर्जन्यासंसर्गमुपसर्गजम् ॥ ३७ ॥ चित्रकूपेनरःस्नात्वाविचित्रफलदेनृणाम् ॥ चित्रगुप्तेश्वरंवीक्ष्यचित्रघंटांप्रपूज्यच ॥ ३८ ॥ बहुपातकयुक्तोपित्यक्तधर्मपथोपिवा ॥ नचित्रगुप्तलेख्यःस्याच्चित्रघंटार्चकोनरः ॥ ३९ ॥ योषिद्वापुरुषोवापिचित्रघंटांनयोर्चयेत् ॥ काश्यांविघ्नसहस्राणितंसेवंतेपदेपदे ॥४०॥ चैत्रशुक्लतृतीयायांकार्यायात्राप्रयत्नतः ॥ महामहोत्सवःकार्योनिशिजागरणंतथा ॥ ४१ ॥ महापूजोपकरणैश्चित्रघंटांसमर्च्यच ॥ शृणोतिनांतकस्येहघंटांमहिषकंठगाम् ॥ ४२ ॥ चित्रांगदेश्वरप्राच्यांचित्रग्रीवांप्रणम्यच ॥ नजातुजंतुर्वीक्षेतविचित्रांयमयातनाम् ॥ ४३ ॥ भद्रकालींनरोदृष्ट्वानाभद्रंपश्यतिकचित् ॥ भद्रनागस्यपुरतोभद्रवाप्यांकृतोदकः ॥ ४४ ॥ हरसिद्धिंप्रयत्नेनपूजयित्वानरोत्तमः ॥ महासिद्धिमवाप्नोतिप्राच्यांसिद्धिविनायकात् ॥ ४५ ॥ विधिंसंपूज्यविधिवद्विविधैरुपहारकैः ॥ विविधांलभतेसिद्धिंविधीश्वरसमीपगाम् ॥ ४६ ॥ प्रयागतीर्थेसुस्नातोजनोनिगडभंजनीम् ॥ सभाजयित्वानोजातुनिगडैःपरिबाध्यते ॥ ४७ ॥ भौमवारेसदापूज्यादेवीनिगडभंजनी ॥ कृत्वैकभुक्तंभक्त्यात्रबंदीमोक्षणकाम्यया ॥ ४८ ॥

अंगुलिर्यस्याःसातथेतिवा ॥ ३५ ॥ देवयानीकाव्यसुता ॥ ३६ ॥ संसर्गदोषम् ॥ उपसर्गजमुत्पातजम् ॥ ३७ ॥ ३८ ॥ लेख्योलेखनाविषयः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ॥ ४५ ॥ ४६ ॥ निगडोलोहश्रृंखलम् ॥ सभाजयित्वापूजयित्वा ॥ ४७ ॥ एकभुक्तमेकभोजनम् ॥ एकभक्तमितिपाठेएकान्नमित्यर्थः ॥ बंदीबद्धस्तस्यमोक्षणकाम्यया ॥ यद्वा बंदीतितस्या

CC-0. In Public Domain. Digitization by eGangotri

नाम ॥ अतएववक्ष्यतिवंदीपदज्जुषामिति ॥ ४८ ॥ ४९ ॥ ५० ॥ काशीसंदेहहारिणी संदेहःसंशयःकाशीमरणेनमुक्तिर्भवतिनवेत्यादिरूपः ॥ संदंशेतिपाठेसंदंशइवसंदंशोविघ्नस्तद्धारिणी ॥ ५१ ॥
घनटंककरामुद्गरटंकहस्ता ॥ टंकटाकीतिप्रसिद्धम् ॥ तीर्थराजःप्रयागः ॥ ५२ ॥ ५३ ॥ ५४ ॥ दक्षिणेवामेहस्तेइतिशेषः ॥ अभयदामितिच्छेदः ॥ ५५ ॥ सिद्धलक्ष्मीत्यत्रसिद्धिलक्ष्मीति

संसारबंधविच्छित्तिमपियच्छतिसार्चिता ॥ गणनाशृंखलादीनांकाचतस्याःसमर्चनात् ॥४९॥ दूरस्थोपिहियोबंधुःसोपिक्षिप्रंसमेष्यति ॥ बंदीपदजुषां पुंसांश्रद्धयानात्रसंशयः ॥ ५० ॥ किंचिन्नियममालंब्ययदिसापरिषेविता ॥ कामान्पूरयतिक्षिप्रंकाशीसंदेहहारिणी ॥ ५१ ॥ घनटंककरादेवीभक्तबं धनभेदिनी ॥ कंकंनपूरयेत्कामंतीर्थराजसमीपगा ॥ ५२ ॥ देवीपशुपतेःपश्चादमृतेश्वरसन्निधौ ॥ स्नात्वाचैवामृतेकूपेनमनीयाप्रयत्नतः ॥ ५३ ॥ पूज यित्वानरोभक्त्यादेवताममृतेश्वरीम् ॥ अमृतत्वंभजेदेवतत्पादांबुजसेवनात् ॥ ५४ ॥ धारयंतींमहामायाममृतस्यकमंडलुम् ॥ दक्षिणेऽभयदांवामे ध्यात्वाकोनाऽमृतत्वभाक् ॥५५॥ सिद्धलक्ष्मीजगद्धात्रीप्रतीच्याममृतेश्वरात् ॥ प्रपितामहलिंगस्यपुरतःसिद्धिदार्चिता ॥५६॥ प्रासादंसिद्धलक्ष्म्याश्च विलोक्यकमलाकृतिम् ॥ लक्ष्मीविलाससंज्ञंचकोनलक्ष्मींसमाप्नुयात् ॥५७॥ ततःकुब्जाजगन्मातानलकूबरलिंगतः ॥ पूजनीयापुरोभागेप्रपितामहप श्चिमे ॥ ५८ ॥ उपसर्गानशेषांश्चकुब्जाहरतिपूजिता ॥ तस्मात्कुब्जाप्रयत्नेनपूज्याकाश्यांशुभार्थिभिः ॥ ५९ ॥ कुब्जांबरेश्वरंलिंगंनलकूबरपश्चिमे ॥ त्रिलोकसुंदरीगौरीतत्रार्च्याभीष्टदायिनी ॥ ६० ॥ त्रिलोकसुंदरीसिद्धिंदद्यात्त्रैलोक्यसुंदरीम् ॥ वैधव्यंनाप्यतेक्वापितस्यादेव्याःसमर्चनात् ॥ ६१ ॥ दीप्तानाममहाशक्तिःसांबादित्यसमीपगा ॥ देदीप्यमानलक्ष्मीकाजायंतेतत्समर्चनात् ॥ ६२ ॥ श्रीकंठसन्निधौदेवीमहालक्ष्मीर्जगज्जनिः ॥ स्नात्वाश्री कुंडतीर्थेतुसमर्च्यांजगदंबिका ॥ ६३ ॥ पितॄन्संतर्प्यविधिवत्तीर्थेश्रीकुंडसंज्ञिते ॥ दत्त्वादानानिविधिवन्नलक्ष्म्यापरिमुच्यते ॥ ६४ ॥ लक्ष्मीक्षे त्रंमहापीठंसाधकस्यैवसिद्धिदम् ॥ साधकस्तत्रमंत्रांश्चनरःसिद्धिमवाप्नुयात् ॥ ६५ ॥ संतिपीठान्यनेकानिकाश्यांसिद्धिकराण्यपि ॥ महालक्ष्मीपी ठसमंनान्यल्लक्ष्मीकरंपरम् ॥ ६६ ॥ महालक्ष्म्यष्टमींप्राप्यतत्रयात्राकृतांनृणाम् ॥ संपूजितेहविधिवत्पद्मासद्मनमुंचति ॥ ६७ ॥ उत्तरेतुमहालक्ष्म्या हयकंठीकुठारधृक् ॥ काशीविघ्नमहावृक्षांश्छिनत्तिप्रतिवासरम् ॥ ६८ ॥ कौर्मीशक्तिर्महालक्ष्मीदक्षिणेपाशपाणिका ॥ बध्नातिविघ्नसंघातंक्षे त्रस्यास्यप्रतिक्षणम् ॥ ६९ ॥

क्वचित् ॥ ५६ ॥ ५७ ॥ ५८ ॥ उपसर्गानुत्पातान् ॥ ५९ ॥ १६० ॥ ६१ ॥ देदीप्यमानलक्ष्मीकाअतिशयप्रकाशमानकान्तयः ॥ ६२ ॥६३॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७॥ ६८॥६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ पल्लवान्पत्राणिक्षुद्रशाखावा ॥ ७४ ॥ महाष्टम्यामाश्विनशुक्लायाम् ॥ ७५ ॥ ७६ ॥ ७७ ॥ विघ्नसंहतिंविघ्नसमूहम् ॥ ७८ ॥ ७९ ॥ आकाशोष्ठीमाकाशोर्ध्वौष्ठीमित्यर्थः ॥ धराधरांपृथ्व्यधरोष्ठामित्यर्थः ॥ ८० ॥ कर्त्रीछुरिका ॥ स्नायुनद्धांस्नाय्वावसायामांसप्रभवधातुविशेषेणेतियावत् ॥ नद्धांबद्धाम् ॥ दुष्टानांमांसादिभक्षणेनतेनव्या

साप्यूजितास्तुतामर्त्यैःक्षेत्रसिद्धिंप्रयच्छति ॥ वायव्यांचशिखीचंडीक्षेत्ररक्षाकरीपरा ॥ ७० ॥ खादंतीविघ्नसंघातांशिखीशब्दंकरोतिच ॥ तस्याःसंदर्शनात्पुंसांनश्यंतिव्याधयोखिलाः ॥ ७१ ॥ भीमचंडयुत्तरद्वारंसदारक्षेदतंद्रिता ॥ भीमेश्वरस्यपुरतःपाशमुद्गरधारिणीम् ॥ ७२ ॥ भीमचंडींनरोदृष्ट्वाभीमकुंडेकृतोदकः ॥ भीमाकृतीन्नैवपश्येद्याम्यान्दूतान्कचित्कृती ॥७३॥ छागवक्त्रेश्वरीदेवीदक्षिणेवृषभध्वजात् ॥ अहर्निशंभक्षयतिविघ्नौघतरुपल्लवान्॥ ॥ ७४ ॥ तस्यादेव्याःप्रसादेनकाशीवासःप्रलभ्यते ॥ अतश्छागेश्वरींदेवींमहाष्टम्यांप्रपूजयेत् ॥७५॥ तालजंघेश्वरींदेवीतालवृक्षकृतायुधा ॥ उत्सादयतिविघ्नौघानानंदवनमध्यगान् ॥ ७६ ॥ संगमेश्वरलिंगस्यदक्षिणेविकटाननाम् ॥ तालजंघेश्वरींनत्वानविघ्नैरभिभूयते ॥७७॥ उद्दालकेश्वराल्लिंगात्तीर्थउद्दालकाभिधे ॥ याम्यांचयमदंष्ट्राख्याचर्वयेद्विघ्नसंहतिम् ॥ ७८ ॥ प्रणतायमदंष्ट्रायैस्तीर्थेचोद्दालकाभिधे ॥ कृत्वापिपापसंघातंनयमाद्भिभ्यतीहते ॥ ॥ ७९ ॥ दारुकेश्वरतीर्थेतुदारुकेशसमीपतः ॥ पातालतालुवदनामाकाशोष्ठींधराधराम् ॥ ८० ॥ कपालकर्त्रीहस्तांचब्रह्मांडकवलप्रियाम् ॥ शुष्कोदरींस्नायुबद्धांचर्ममुंडेतिविश्रुताम् ॥ ८१ ॥ क्षेत्रस्यपूर्वदिग्भागंरक्षंतींविघ्नसंघतः ॥ लसत्सहस्रदोर्दंडांज्वलत्केकरवीक्षणाम् ॥ ८२ ॥ पारावारप्रसृमर हस्तन्यस्तारिमोदकाम् ॥ द्वीपिकृत्तिपरीधानांकटुकाट्टाट्टहासिनीम् ॥ ८३ ॥ मृणालनालवत्तीव्रंचर्वंतीमस्थिपापिनः ॥ शूलाग्रप्रोतदुर्वृत्तक्षेत्रद्रोहिकलेवराम् ॥ ८४ ॥ कपालमालाभरणांमहाभीषणरूपिणीम् ॥ चर्ममुंडांनरोनत्वाक्षेत्रविघ्नैर्नबाध्यते ॥ ८५ ॥ यथैवचर्ममुंडैषामहारुंडापितादृशी ॥ एतावानेवभेदोस्यारुंडस्रग्भूषणात्वियम् ॥ ८६ ॥ क्षेत्ररक्षांप्रकुरुतउभेदेव्यौमहाबले ॥ हसंत्यौकरतालीभिरन्योन्यंदोःप्रसारणात् ॥८७॥ हयग्रीवेश्वरेतीर्थेलोलार्कादुत्तरेसदा ॥ महारुंडाप्रचंडास्यातिष्ठतेभक्तविघ्नहृत् ॥८८॥ चर्ममुंडामहारुंडाकथितेयेतुदेवते ॥ तयोरंतरतस्तिष्ठेच्चामुंडामुंडरूपिणी ॥ ८९ ॥

मामित्यर्थः ॥ ८१ ॥ लसंतःसहस्रमपरिमितादोर्दंडायस्यास्ताम् ॥ ज्वलंतिकेकराणितिर्यग्गतानिवीक्षणानिनेत्राणियस्यास्ताम् ॥ ऐकपद्यपाठेकर्मधारयः ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ मुंडस्रग्भूषणाकबन्धमालाभरणा ॥ यदाहामरः ॥ कबंधोरुंडमस्त्रियाम् ॥८६॥ दोःप्रसरणाद्धस्तप्रसरणात् ॥८७॥८८॥ मुंडैःकृत्वारूपंवर्ततेयस्याःसाम्मुंडरूपिणी ॥ चंडरूपिणीतिक्वचित् ॥८९॥

---

१ ईकारत्वमार्षम् इकारस्यप्रश्लेषोवेति ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ९० ॥ अमूरिमाः ॥ नैःश्रेयसींकैवल्याख्याम् ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्ततितमोऽध्यायः ॥ ७० ॥
॥ ॥ छ ॥ ॥ अथैकसप्ततितमेऽध्यायेऽत्यन्तमनोरमे ॥ दुर्गनाम्नोऽसुरेंद्रस्यवर्ण्यतेतिपराक्रमः ॥ १ ॥ पूर्वाध्यायांतेदुर्गादेवीव्यवस्थितेत्युक्तंतत्रपृच्छाति ॥ कथंदुर्गेतीति ॥ १ ॥ २ ॥ यश्चे
त्यत्रयतइतिपाठेप्रथमांतात्तसिल ॥ ३ ॥ स्वसात्कृताआत्माधीनाःकृताः ॥ स्वभुजसारतःस्वीयहस्तवलेन ॥ ४ ॥ ५ ॥ स्वयमीशानेत्यत्रतथानिर्ऋतीतिकचित् ॥ तपांस्यतीत्यत्रतपांस्यपीतिक्व

एतास्तिस्रःप्रयत्नेनपूज्याःक्षेत्रनिवासिभिः ॥ धनधान्यप्रदाश्चैताःपुत्रपौत्रप्रदाइमाः ॥ ९० ॥ उपसर्गान्मूर्ध्नतिदद्युर्नैःश्रेयसींश्रियम् ॥ स्मृताद्दृष्टानताः
स्पृष्टाःपूजिताःश्रद्धयानरैः ॥ ९१ ॥ महारुंडाप्रतीच्यांचदेवीस्वप्नेश्वरीशुभा ॥ भविष्यंकथयेत्स्वप्नेभक्तस्याग्रेशुभाशुभम् ॥ ९२ ॥ तत्रस्वप्नेश्वरंलिंगं
देवींस्वप्नेश्वरींतथा ॥ स्नात्वासिसंगमेपुण्येयस्मिन्कस्मिंस्तिथावपि ॥ ९३ ॥ उपोषणपरोधीमान्नारीवापुरुषोपिवा ॥ संपूज्यस्थंडिलशयःस्वप्नेभावि
विलोकयेत् ॥९४॥ अद्यापिप्रत्ययस्तत्रकार्यएषविजानता ॥ भूतंभाविभवत्सर्ववदेत्स्वप्नेश्वरीनिशि ॥९५॥ अष्टम्यांचचतुर्दश्यांनवम्यांनिशिवादिवा॥
प्रयत्नतःसमर्च्यासाकाश्यांज्ञानार्थिभिर्नरैः ॥ ९६ ॥ स्वप्नेश्वर्याश्ववारुण्यांदुर्गादेवीव्यवस्थिता ॥ क्षेत्रस्यदक्षिणंभागंसासदैवाभिरक्षति ॥ ९७ ॥
इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदेवताधिष्ठानंनामसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ अगस्त्यउवाच ॥ ॥
कथंदुर्गेतिवैनामदेव्याजातमुमासुत ॥ कथंचकाश्यांसासेव्यासमाचक्ष्वेतिमामिह ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ कथयामिमहाबुद्धेयथाकलशसंभव ॥
दुर्गानामाभवद्देव्यायथासेव्याचसाधकैः ॥ २ ॥ दुर्गोनाममहादैत्योरुरुदैत्यांगजोभवत् ॥ यश्चतत्वातपस्तीव्रंपुंभ्योजेयत्वमाप्तवान् ॥ ३ ॥ ततस्तेना
खिलालोकाभूर्भुवःस्वर्मुखाअपि ॥ स्वसात्कृताविनिर्जित्यरणेस्वभुजसारतः ॥ ४ ॥ स्वयमिंद्रःस्वयंवायुःस्वयंचंद्रःस्वयंयमः ॥ स्वयमग्निःस्वयंपाशी
धनदोभूत्स्वयंबली ॥ ५ ॥ स्वयमीशानरुद्रार्कवसूनांपदमाददे ॥ तत्साध्वसाद्विमुक्तानितपांस्यतितपस्विभिः ॥ ६ ॥ नवेदाध्ययनंचक्रुर्ब्राह्मणास्तद्भया
र्दिताः ॥ यज्ञवाटाविनिर्ध्वस्तास्तद्भटैरतिदुःसहैः ॥ ७ ॥ विध्वस्ताबहुशःसाध्व्यस्तैरमार्गकृतास्पदैः ॥ प्रसभंचपरस्वानिअपहृत्यदुरासदाः ॥ ८ ॥
अभोक्षिषुर्दुराचाराःक्रूरकर्मपरिग्रहाः ॥ नद्योविमार्गगाआसञ्ज्वलंतिनतथाग्नयः ॥९॥ ज्योतींषिनप्रदीप्यंतितद्भयाकुलितान्यहो ॥ दिग्वधूवसनान्यास
न्विच्छायानिसमंततः ॥ १० ॥ धर्मक्रियाविलुप्ताश्चप्रवृत्ताःसुकृतेतराः ॥ तएवजलदीभूयववृषुर्निजलीलया ॥ ११ ॥

चित् ॥ ६ ॥ यज्ञवाटायज्ञस्थानानि ॥ ७ ॥ अमार्गकृतास्पदैःपाषंडमार्गकृताश्रयैः ॥ अमार्गकृतादैरीरितिकचित् ॥ प्रसभंबलात्कारेण ॥ दुरासदादुर्गम्याः ॥८॥ अभोक्षिषुर्बुभुजुः ॥ अरक्षिषुरि
तिवापाठः ॥ क्रूरकर्माणःपरिग्रहाभृत्याद्याःक्रूरकर्मणांवापरिग्रहोयेषांतेतथा ॥ ९ ॥ वसनानिवस्त्राणि ॥ वदनानीतिक्वचित् ॥ विच्छायानिविगतकांतीनि ॥ १० ॥ सुकृतेतराअधमाः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुप्ताऽवापितापि ॥ अवकेशिनोवंध्याअफलाअपि ॥ यदाहामरः ॥ वंध्योऽफलोवकेशीचेति ॥ १२ ॥ १३ ॥ विपज्जुषोविपत्सेविनः ॥ १४ ॥ ननुकुलीनत्वात्सदाचारत्वाच्चमहांतस्तावद्देवाअतः किमितितान्गृहागतान्भयपीडिताअपिसूनृतयापिवाचानपूजितवंतस्तत्राह ॥ नकौलीन्यमिति ॥ किंतर्हिमहत्त्वायकल्पतेतदाह ॥ एकमिति ॥ पदंस्थानंस्वीयमैश्वर्यमित्यर्थः ॥ श्रेयःश्रेयोहेतुर्महत्त्वकारणमित्यर्थः ॥ लाघवंलघुत्त्वममहत्त्वकारणमित्यर्थः ॥ १५ ॥ तस्माद्विपद्यपिआपत्कालेपियेदैन्यप्रेरिताधनैर्मलिनचित्तानामंगणंप्रांगणंक्कचित्कदाचिदपियेनालभंतेनप्राप्नुवंतितेधन्याइति ॥ १६ ॥ तर्हिमरणमेवप्राप्तंतत्राह ॥ पंचत्वमेवेति ॥ १७ ॥ किंचतएवेति ॥ १८ ॥ किंचसंपाद्विपदुद्गमयोःकादाचित्कत्वात्तदुभयंलब्ध्वास्थिरतांनत्यजेदित्याह ॥ कदाचिदिति ॥ १९ ॥ तत्रदृष्टान्तमाह ॥

सस्यानितद्भयात्सूतेत्वनुप्तापिवसुंधरा ॥ सदैवफलिनोजातास्तरवोप्यवकेशिनः ॥१२॥ बंदीकृताःसुरर्षीणांपत्न्यस्तेनातिदर्पिणा ॥ दिवौकसःकृतास्तेनसमस्ताःकाननौकसः ॥ १३ ॥ मर्त्याअमर्त्यान्स्वगृहंप्राप्तानपिभयार्दिताः ॥ अपिसंभाषमात्रेणनार्चयंतिविपज्जुषः ॥ १४ ॥ ॥ स्कंदउवाच ॥ नकौलीन्यंनसद्वृत्तंमहत्त्वायप्रकल्पते ॥ एकमेवपदंश्रेयःपदभ्रंशोहिलाघवम् ॥ १५ ॥ विपद्यपिहितेधन्यानयैदैन्यप्रणोदिताः ॥ धनैर्मलिनचित्तानामालभंतेंगणंक्कचित् ॥ १६ ॥ पंचत्वमेववहिवरंलोकेलाघववर्जितम् ॥ नामरत्वमपिश्रेयोलाघवेनसमन्वितम् ॥ १७ ॥ तएवलोकेजीवंतिपुण्यभाजस्तएववै ॥ विपद्यपिनगांभीर्ययच्चेतोब्धिःपरित्यजेत् ॥ १८ ॥ कदाचित्संपदुदयःकदाचिद्विपदुद्गमः ॥ दैवाद्वयमपिप्राप्यधीरोधैर्यंनहापयेत् ॥ १९ ॥ उदयानुदयौप्राज्ञैर्दृष्टव्यौपुष्पवंतयोः ॥ सदैकरूपताऽत्याज्याहर्षाहर्षौततोऽध्रुवौ ॥ २० ॥ यस्त्वापदंसमासाद्यदैन्यग्रस्तोविपद्यते ॥ तस्यलोकद्वयंनष्टंतस्माद्दैन्यंविवर्जयेत् ॥ २१ ॥ आपद्यपिहियेधीराइहलोकेपरत्रच ॥ नतान्पुनःस्पृशेदापत्तद्धैर्येणावधीरिता ॥ २२ ॥ भ्रष्टराज्याश्वविबुधामहेशंशरणंगताः ॥ सर्वज्ञेनततोदेवीप्रेरिताऽसुरमर्दने ॥२३॥ माहेश्वरींसमासाद्यभवान्याज्ञांप्रहृष्टवत् ॥ अमर्त्यायाऽभयंदत्त्वासमरायोपचक्रमे ॥२४॥ कालरात्रींसमाहूयकांत्यात्रैलोक्यसुंदरीम् ॥ प्रेषयामासरुद्राणीतमाह्लातुंसुरद्रुहम् ॥ २५ ॥ कालरात्रीसमासाद्यतंदैत्यंदुष्टचेष्टितम् ॥ उवाचदैत्याधिपतेत्यजत्रैलोक्यसंपदम् ॥ २६ ॥ त्रिलोकीलभतामिंद्रस्त्वंतुयाहिरसातलम् ॥ प्रवर्ततांक्रियाःसर्वावेदोक्तावेदवादिनाम् ॥ २७ ॥ अथचेद्बलेशोऽस्तितदायाहिसमाजये ॥ अथवाजीविताकांक्षीतादिंद्रंशरणंव्रज ॥ २८ ॥

उदयानुदयाविति ॥ पुष्पवंतयोश्चन्द्रसूर्ययोः ॥ अतस्तयोरिवएकरूपताऽत्याज्यानत्याज्या ॥ ततोहर्षाहर्षौअध्रुवौनिष्फलावित्यर्थः ॥ २० ॥ आपदिदैन्यान्मरणेदोषमाह ॥ यस्त्विति ॥ उपसंहरति ॥ तस्मादिति ॥ २१ ॥ किंच आपदीति ॥ तद्धैर्येणेत्यत्रतच्छब्दोधीरविषयः ॥ अवधीरितात्यक्तादूरीकृतेत्यर्थः ॥ २२ ॥ प्रासंगिकंपरिसमाप्यप्रकृतमनुवर्णयति ॥ भ्रष्टराज्याइति ॥ सर्वज्ञेनपुरुषेभ्योऽवध्योयमितिजानतेत्यर्थः ॥ २३ ॥ माहेश्वरीमाज्ञामित्यन्वयः ॥ अमर्त्यायदेवाय ॥ जातावेकवचनम् ॥ अमर्त्येभ्यइतिक्वचित्पाठः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ समाजयेसम्य

CC-0. In Public Domain. Digitization by eGangotri

ग्युद्धाय ॥ रणायवाइतिक्कचित् ॥ २८ ॥ रूपयेत्यत्र पूरयेतिक्कचित् ॥ तदुपेक्षयातस्यावचसउपेक्षया ॥ मृत्युस्तेततपदाब्जजेतिपाठेऽहंविशेषणम् ॥ मृत्युर्मृत्युहेतुरित्यर्थः ॥ तुइतिपाठेतेइत्यर्थात् ॥ २९ ॥ जीवग्राहंजीवनग्रहणंयथाभवतितथात्रजविश्वेश्वर्याःशरणापन्नोभवेत्यर्थः ॥ हितमित्यस्यविशेषणंवा ॥ ३० ॥ महाकाल्याःकालरात्र्याः ॥३१॥ गौरवैर्महत्त्वैः ॥ वल्लीलता ॥ ३२ ॥ गृहंगृहेगृहिणीतिवा ॥ शुभोदयात्पुण्योत्कर्षात् ॥ शुभोदयेतिक्कचित् ॥ ३३ ॥ गौरवात् गौरवंगुरुत्वंतस्मादित्यर्थः ॥ यद्वा गौरवमत्तीतिगौरवात् ॥ प्रथमांतंयदित्यस्यविशेषणम् ॥ भाग्यस्यगौरवाधीनत्वमित्यर्थः ॥ ३४ ॥ सतीअलंकृतिर्यस्यास्तया ॥ ३५ ॥ महामतेरुदारचित्तस्य ॥ ३६ ॥ ३७ ॥ इतिएवंदैत्येंद्रेब्रुवति सौविदल्लकाःकंचुकिनोंऽतःपुररक्षकाइत्यर्थः ॥ यदाहामरः ॥ सौवि

इतिवक्तुंमहादेव्यामहामंगलरूपया ॥ त्वदंतिकेप्रेषिताहंमृत्युस्तेतदुपेक्षया ॥२९॥ अतोयदुचितंकर्तुंतद्विधेहिमहासुर ॥ परंहितंचेच्छृणुयाज्जीवग्राहंततो व्रज ॥ ३० ॥ इत्याकर्ण्यवचोदेव्यामहाकाल्याःसदैत्यराट् ॥ प्रजज्वालतदाक्रोधाद्गृह्यतांगृह्यतामियम् ॥ ३१ ॥ त्रैलोक्यमोहिनीह्येषाप्राप्तामद्भाग्यगौरवैः ॥ त्रैलोक्यराज्यसंपत्तिवल्ल्याःफलमिदंमहत् ॥ ३२ ॥ एतदर्थंहिदेवर्षिनृपाबंदीकृतामया ॥ अनायासेनमेप्राप्तागृहमेषाशुभोदयात् ॥ ३३ ॥ अवश्यंयस्ययोग्यंयत्तत्तस्येहोपतिष्ठते ॥ अरण्येवागृहेवापियतोभाग्यस्यगौरवात् ॥ ३४ ॥ अंतःपुरचराएतांनयंत्वंतःपुरंमहत् ॥ अनयासदलंकृत्यासमराष्ट्रमलंकृतम् ॥ ३५ ॥ अहोमहोदयश्चाद्यजातोममममहामतेः ॥ केवलंनममैकस्यसर्वदैत्यान्वयस्यच ॥ ३६ ॥ नृत्यंतुपितरश्चाद्यमोदंतांबांधवाःसुखम् ॥ मृत्युःकालोंऽतकोदेवाःप्राप्नुवंत्वद्यमेभयम् ॥ ३७ ॥ इतियावत्समायातास्तांनेतुंसौविदल्लकाः ॥ तावत्तयाकालरात्र्याप्रत्युक्तोदैत्यपुंगवः॥ ॥ ३८ ॥ ॥ कालरात्र्युवाच ॥ ॥ दैत्यराजमहाप्राज्ञनैतद्युक्तंभवादृशाम् ॥ वयंदूत्यःपरवशाराजनीतिविदुत्तम ॥ ३९ ॥ अल्पोपिदूतसंबाधांनविदध्यात्कदाचन ॥ किंपुनर्येभवादृक्षामहांतोबलिनोऽधिपाः ॥ ४० ॥ दूतीषुकोनुरागोयंमहाराजाल्पिकास्विह ॥ अनायासेनचवयमायास्यामस्तदागमात् ॥ ४१ ॥ विजित्यसमरेतांतुस्वामिनींममदैत्यप ॥ मादृशीनांसहस्राणिपरिभुंक्ष्वयथेच्छया ॥४२॥ अद्यैवतेमहासौख्यंभावितस्याविलोकनात्॥ बांधवानांसुखंतेद्यभवितासहपूर्वजैः ॥ ४३ ॥ संपत्स्यंतेऽद्यतेकामाःसर्वेयेचिरचिंतिताः ॥ अबलासाचमुग्धाचतस्यास्त्रातानकश्चन ॥ ४४ ॥ सर्वरूपमयीचैवतांभवान्द्रष्टुमर्हति ॥ अहंहिदर्शयिष्यामियत्रसाऽस्तिजगत्खनिः ॥ ४५ ॥ धृतायामपिचैकस्यांकस्तेकामोभविष्यति ॥ अहंतेसन्निधिंनैवत्यक्ष्याम्यद्यदिनावधि ॥ ४६ ॥ ततोनिवारयैतान्मामादित्सून्सौविदल्लकान् ॥ इतिश्रुत्वावचस्तस्याःसकामक्रोधमोहितः ॥ ४७ ॥

दल्लाःकंचुकिनःस्थापत्याःसौविदाश्चतेइति ॥ स्वार्थेकः ॥ पुंगवःश्रेष्ठः ॥३८॥ दूत्यःसंचारिकाः॥यदाहामरः ॥ दूतीसंचारिकेसमेइति ॥ यद्वादूत्या दूत्यकर्मकर्त्र्यः ॥ राजनीतिविदुत्तमराजनीतिविदां मध्येश्रेष्ठ ॥ ३९ ॥ ४० ॥ अल्पोपिजनः ॥ भवादृक्षाभवत्सदृशाः ॥ तदागमात्महादेव्यागमात् ॥ ४१ ॥ ४२ ॥ ४३ ॥ अबलाबलहीनास्त्रीतिवा [illegible] ॥ वस्तुतस्त्वस्यविष्णोरिवबलंयस्याः ॥ नविद्यतेबलंयस्याःसर्वातिशयबलेत्यर्थइतिवा ॥ मुग्धामूढा वस्तुतस्तुसुंदरी ॥ ४४ ॥ ४५ ॥ ४६ ॥ आदित्सून्ग्रहीतुकामान् ॥ तांदृष्ट्वाकामःत्रिलोकीं[illegible]भतामिंद्रइत्यादिसाक्षेपवचनात्क्रोधस्ताभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहितःसंक्षुब्धः ॥ ४७ ॥ मृत्युमितिवक्तव्येषष्ठीद्वितीयार्थे ॥ बहुमंस्तवबहुयथास्यात्तथाऽमन्यत ॥ शुद्धांतरक्षिणोंऽतःपुरपालिनः ॥ यदाहामरः ॥ स्त्र्यगारंभूभुजामंतःपुरंस्यादवरोधनम् ॥ शुद्धांतश्चावरोधश्चेति ॥ अरमलम् ॥ ४८ ॥ वर्षवराःषंढाःछिन्नवृषणाइतियावत् ॥ यदाहामरः ॥ षंढोवर्षवरइति ॥ ४९ ॥ ५० ॥ त्र्ययुतसंमितान्त्रिंशत्सहस्रसंख्याकान् ॥ दृशानेत्रेणकटाक्षेणेतियावत् ॥ तेषांमध्येकेषांचिन्नामानिदर्शयति दुर्धरमितिसपादेन ॥ ५१ ॥ ५२ ॥ एवमापाततोदृशाज्ञाप्यपश्चाद्वचनेनाप्याज्ञापयति बद्ध्वापाशैरितिश्लोकेन ॥ विस्रस्त केशवेशामुन्मुक्तकबराम् ॥ यदाहामरः ॥ कबरीकेशवेशोथेति ॥ केशपाशामितिपाठेऽपिसएवार्थः ॥ ५३ ॥ ५४ ॥ वर्ष्मशरीरम् ॥ शस्त्राणिखड्गादीनिअस्त्राणिक्षेपणीयानिभल्लादीनितैरुद्यता

तामेवबहुमंस्तैकांदूतींमृत्योरिवासुरः ॥ शुद्धांतरक्षिणश्चैतांशुद्धांतंप्रापयंत्वरम् ॥ ४८ ॥ इतितेनसमादिष्टाःसर्वेवर्षवरामुने ॥ तांधर्तुमुद्यमंचक्रुर्बले नवलवत्तराः ॥ ४९ ॥ सातान्भस्मीचकाराशुहुंकारजनिताग्निना ॥ ततोदैत्यपतिःक्रुद्धोदृष्ट्वातान्भस्मसात्कृतान् ॥ ५० ॥ क्षणेनैवतयादूत्यादैत्यां स्त्र्ययुतसंमितान् ॥ दृशाव्यापारयामासदुर्धरंदुर्मुखंखरम् ॥ ५१ ॥ सीरपाणिंपाशपाणिंपुरंदरदमनंहनुम् ॥ यज्ञारिंखड्गलोमानमुग्रास्यंदेवकंपनम् ॥ ॥ ५२ ॥ बद्ध्वापाशैरिमांदुष्टामानयंत्वाशुदानवाः ॥ विध्वस्तकेशवेशांचविस्रस्तांबरभूषणाम् ॥ ५३ ॥ इतिदैत्याधिपादेशाद्दुर्धरप्रमुखास्ततः ॥ पाशा सिमुद्गरधरास्तामादातुंकृतोद्यमाः ॥ ५४ ॥ गिरींद्रगुरुवर्ष्माणःशस्त्रास्त्रोद्यतपाणयः ॥ दिगंतंतेपरिप्राप्तास्तदुच्छ्वासानिलाहताः ॥ ५५ ॥ तेषूड्डीने पुदैत्येषुशतकोटिमितेषुच ॥ निर्जगामततःसातुकालरात्रिर्नभोध्वगा ॥ ५६ ॥ ततस्तांतुविनिर्यांतीमनुजग्मुर्महासुराः ॥ कोटिकोटिसहस्राणिपूर यित्वातुरोदसी ॥ ५७ ॥ दुर्गोनाममहादैत्यःशतकोटिरथावृतः ॥ गजानामर्बुदशतद्वयेनपरिवारितः ॥ ५८ ॥ कोट्यर्बुदेनसहितोहयानांवातरंहसाम् ॥ पदातिभिरसंख्यातैःपच्चूर्णितशिलोच्चयैः ॥ ५९ ॥ उदायुधैर्महाभीमैःकृतत्रिजगतीभयैः ॥ समेतःसमहादैत्योदुर्गःक्रुद्धोविनिर्ययौ ॥ ६० ॥ अथदृष्ट्वामहादेवींविंध्याचलकृतालयाम् ॥ आगत्यकालरात्र्याचनिवेदिततदागसम् ॥ ६१ ॥ महाभुजसहस्राढ्यांमहातेजोभिबृंहिताम् ॥ तत्तद्घोरप्रह रणांरणकौतुकसादराम् ॥ ६२ ॥ प्रोद्यच्चंद्रसहस्रांशुनिर्मार्जितशुभाननाम् ॥ लावण्यवार्धिनिर्गच्छच्चंचच्चंद्रैकचंद्रिकाम् ॥ ६३ ॥

उद्युक्ताःपाणयोयेषांतेतथा ॥ ५५ ॥ ५६ ॥ रोदसीद्यावाभूम्योरंतरम् ॥ ५७ ॥ दुर्गइति ॥ दुर्गोनामयोमहादैत्यःसक्रुद्धःसन्विनिर्ययावितितृतीयेनान्वयः ॥ तंपंचभिर्विशेषणैर्विशिनष्टि शत कोटीत्यादिना ॥ अर्बुदशतद्वयेनदशकोटयएकमर्बुदंतस्यशतद्वयेनखर्वद्वयेनेत्यर्थः ॥ ५८ ॥ कोट्यर्बुदेनपरार्धसंख्यामितेन ॥ पच्चूर्णितशिलोच्चयैःपादविष्टपर्वतैः ॥ ५९ ॥ उदायुधैरुद्यत शस्त्रैः ॥ समहादैत्यः ॥ महादैत्यैस्सहवर्तमानः ॥ ६० ॥ अथेति ॥ अथानंतरंमहादेवींदृष्ट्वादैत्यश्रेष्ठोमहासेनापतीनादिष्टवानितिषष्ठेनान्वयः ॥ द्वादशभिर्विशेषणैस्तांविशिनष्टि विंध्याचले त्यादिना ॥ निवेदितंकथितंतदागःदुर्गापराधोयस्यैताम् ॥ तदागमामितिक्वचित् ॥ ६१ ॥ तत्तदित्यत्रउद्यदितिक्वचित् ॥ ६२ ॥ प्रोद्यदिति ॥ उद्यन्तत्सुधांशुपरिमितकिरणानिर्मृष्टोत्तमास्याम् ॥

CC-0. In Public Domain. Digitization by eGangotri

लावण्येति ॥ सौंदर्यसमुद्रनिःसरदुच्छलच्चंद्रमुख्यज्योत्स्नाम् ॥ ६३ ॥ महेति ॥ अनेकमाणिक्यसमूहदीप्तिव्याप्तशरीराम् ॥ ६४ ॥ हरेति ॥ महादेवनयनानलभस्मीभूतमदनजीवनौषध लताम् ॥ यदाहामरः ॥ जोवातुर्जीवनौषधमिति ॥ संभारःसमूहःसामग्रीवा ॥ महौषधींमहौषधरूपाम् ॥ ६५ ॥ विषमेषुःकामः ॥ ६६ ॥ आज्ञाप्रकारमाह अयिजंभेत्यादिनेत्याकर्ण्येत्यतः प्राक्तनेनग्रंथेन ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ धृत्याधैर्येणसाम्नेतियावत् ॥ बुद्ध्यादाक्षिण्येनदानेनवा बलेनदंडेन छलेनभेदेन ॥ सामदानदंडभेदोपायचतुष्टयेने

महामाणिक्यनिचयरोचिःखचितविग्रहाम् ॥ त्रैलोक्यरम्यनगरीसुप्रकाशप्रदीपिकाम् ॥६४॥ हरनेत्राग्निनिर्दग्धकामजीवातुवीरुधम् ॥ लसत्सौंदर्यसं
भारजगन्मोहमहौषधिम् ॥ ६५ ॥ विषमेषुशरैर्भिन्नहृदयोदैत्यपुंगवः ॥ आदिष्टवान्महासैन्यनायकानुग्रशासनः ॥ ६६ ॥ अयिजंभमहाजंभकुजंभ
विकटानन ॥ लंबोदरमहाकायमहादंष्ट्रमहाहनो ॥ ६७ ॥ पिंगाक्षमहिषग्रीवमहोग्रात्युग्रविग्रह ॥ क्रूराक्षक्रोधनाक्रंदसंक्रंदनमहाभय ॥ ६८ ॥ जितां
तकमहाबाहोमहावक्त्रमहीधर ॥ दुंदुभेदुंदुभिरवमहादुंदुभिनासिक ॥ ६९ ॥ उग्रास्यदीर्घदशनमेघकेशग्रृकानन ॥ सिंहास्यसूकरमुखशिवारावमहो
त्कट ॥ ७० ॥ शुकतुंडप्रचंडास्यभीमाक्षक्षुद्रमानस ॥ उलूकनेत्रकंकास्यकाकतुंडकरालवाक् ॥७१॥ दीर्घग्रीवमहाजंघक्रमेलकशिरोधर ॥ रक्तबिंदो
जपानेत्रविद्युज्जिह्वाग्नितापन ॥ ७२ ॥ धूम्राक्षधूमनिःश्वासचंडचंडांशुतापन ॥ महाभीषणमुख्याश्चशृण्वंत्वाज्ञांममादरात् ॥ ७३ ॥ भवत्स्वेतेषुचान्ये
षुयएतांविंध्यवासिनीम् ॥ धृत्यानेष्यतिबुद्ध्यावाबलेनापिच्छलेनवा ॥ ७४॥ तस्याहमिंद्रपदवीमद्यदास्याम्यसंशयम्॥ दृष्ट्वैतांसुंदरीमद्यमनोमेव्याकुलं
भवेत् ॥ ७५ ॥ यांतुक्षिप्रंनयावन्मेपंचेषुशरपीडितम् ॥ मनोविह्वलतांगच्छेदेतत्प्राप्तेरभावतः ॥७६॥ इत्याकर्ण्यवचस्तस्यदुर्गस्यदनुजेशितुः ॥ प्रोचुः
सर्वेतदादैत्याःप्रबद्धकरसंपुटाः ॥ ७७ ॥ अवधेहिमहाराजकिमेतत्कर्मदुष्करम् ॥ अनाथायास्तथैकस्याअबलायाविशेषतः ॥ ७८॥ अस्याआनयने
कोयंमहायत्नविधिःप्रभो ॥ कोऽस्मान्प्रलयकालाग्निमहाज्वालावलीसमान् ॥ ७९ ॥ सहेतत्रिषुलोकेषुत्वत्प्रसादात्कृतोद्यमान् ॥ यद्यादेशोभवेदद्यतदेंद्रं
समरुद्गणम् ॥ ८० ॥ सांतःपुरंसमानीयक्षिप्रमस्त्वत्पदाग्रतः ॥ भूर्भुवःस्वरिदंसर्वंत्वदाज्ञावशवर्तितम् ॥ ८१ ॥ महर्जनस्तपःसत्यलोकास्त्वदधिका
रिणः ॥ तत्राप्यसाध्यंनास्माकंत्वन्निदेशान्महासुर ॥ ८२ ॥ वैकुंठनायकोनित्यंत्वदाज्ञापरिपालकः ॥ यानिरम्याणिरत्नानितानिसंप्रेषयन्मुदा ॥८३॥

त्यर्थः ॥ धृत्वाकेष्यतीतिक्काचित् ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ अवधेहिशृणु एतत्कर्मदुष्करंकिंकाकादुष्करमेवेतिवास्तवोर्थः ॥ दुष्करत्वमेवाह ॥ अनाथायाः अःविष्णुर्नाथो यस्यास्तथानविद्यतेनाथोयस्यास्तस्याइतिवास्वतंत्रायाइत्यर्थः ॥ एकस्यामुख्यायाअद्वितीयायावेत्यर्थः ॥ विशेषतःअस्यविष्णोरिवबलंयस्यास्तस्याइति ॥ कृपणायाइतिपाठेकृपणवद्वर्तमानाया इत्यर्थः ॥ ७८ ॥ कोयंमहायत्नविधिः ॥ अकइतिपदच्छेदेअयमत्यंतप्रयत्नप्रकारःअकःनकोपीत्यर्थः ॥ प्राकृतंव्याख्यानंस्पष्टम् ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ वैकुंठनायकःविकुंठाशुभ्रस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्नीतस्यामुत्पन्नोवैकुंठस्तेननिर्मितोलोकोपिवैकुंठस्तस्यनायकोविष्णुरित्यर्थः ॥ तदुक्तंभागवते ॥ पत्नीविकुंठाशुभ्रस्यवैकुंठैःसुरसत्तमैः ॥ तस्यांसकलयाजज्ञेवैकुंठोभगवान्स्वयम् ॥ वैकुंठःकल्पि
तोयेनलोकोलोकनमस्कृतः ॥ रमयाप्रार्थ्यमानेनदेव्यातत्प्रियकाम्ययेति ॥ सःयानिउत्कृष्टानिरत्नानिमुदासंप्रेषयंस्त्वदाज्ञायाअपरिपालकःत्वदाज्ञांनकरोतीत्यर्थः ॥ ८३ ॥ यःकैलासेश्वरःशिवःसोप्य
स्माभिःसंत्यक्तउपेक्षितःकिम् ॥ स्वयमेवसर्वेषामवध्यइत्यर्थः ॥ यश्चलोकानामतिनिःस्वत्वादतिकार्पण्याददतिकरुणयाविषाशीविषभक्षकोभूत् ॥ योलीलार्थंभस्मचर्मसर्पभूषणः ॥ ८४ ॥ अस्मद्भयेन
तेनएकाऽनुपमास्त्रीअर्धांगेननिगूहितासंवृताकिम् ॥ अपितुनसंवृतेत्यर्थः ॥ तस्यसकलेपिग्रामेऽशेषेपिजगतिद्वितीयोऽन्यश्चतुष्पदोवृषोनास्तिकिंत्वेकोऽनुपमोऽजरद्गवस्तरुणोवाहनोगोवृषोऽस्तिसोपि

अस्माभिरेवसंत्यक्तःकैलासाधिपतिःसवै ॥ विषाशीचातिनिःस्वत्वाद्भस्मकृत्त्यहिभूषणः ॥ ८४ ॥ अर्धांगेनास्मद्भयतोयोषिदेकानिगूहिता ॥ तस्यग्रामे
पिसकलेद्वितीयोनचतुष्पदः ॥ ८५ ॥ एकोऽजरद्गवःसोपिनान्यस्मात्परिजीवति ॥ श्मशानवासिनःसर्वेसर्वेकौपीनवाससः ॥८६॥ सर्वेविभूतिधवलाः
सर्वेप्येककपर्दिनः ॥ समस्तेनगरेतस्यवसंत्येवंविधागणाः॥८७॥ तेषांगणानांकिंकुर्मोदरिद्राणांवयंविभो ॥ समुद्रारत्नसंभारंप्रत्यहंप्रेषयंतिच ॥ ८८ ॥
नागावराकाश्चास्माकंसायंसायंस्वयंप्रभो ॥ प्रदीपयंतिसततंफणारत्नप्रदीपकान् ॥ ८९ ॥ कल्पद्रुमःकामगवीचिंतामणिगणाबहु ॥ तवप्रसादाद
स्माकमपितिष्ठंतिवेश्मसु ॥ ९० ॥ वायुर्व्यंजनतांयातस्त्वांसेवेतप्रयत्नतः ॥ स्वच्छान्यंबूनिवरुणःप्रत्यहंपूरयत्यहो ॥ ९१ ॥ वासांसिक्षालयेदग्निश्चं
द्रश्छत्रधरःस्वयम् ॥ सूर्यःप्रकाशयेन्नित्यंक्रीडावाप्यंबुजानिच ॥९२॥ कस्त्वत्प्रसादंनेक्षेतमर्त्यामर्त्योरगेषुच ॥ सर्वेत्वामुपजीवंतिसुराऽसुरखगादयः ॥
॥ ९३ ॥ पश्यनःपौरुषंराजन्नानयामोबलादिमाम् ॥ इत्युक्त्वायुगपत्सर्वेक्षुब्धास्तोयधयोयथा ॥९४॥ संवर्तकालमासाद्यप्लावितुंजगतीमिमाम् ॥ रणतूर्य
निनादश्चसमुत्तस्थौसमंततः ॥ ९५ ॥ रोमांचितायच्छ्रवणात्कातराअप्यकातराः ॥ ततोदेवाभयत्रस्ताश्चकंपेचवसुंधरा ॥ ९६ ॥ क्षुब्धाअंबुधयःसर्वेपे
तुर्नक्षत्रमालिकाः ॥ रोदसीमंडलंव्याप्तंतेनतूर्यरवेणवै ॥ ९७ ॥ ततोभगवतीदेवीस्वशरीरसमुद्भवाः ॥ शक्तीरुत्पादयामासशतशोऽथसहस्रशः ॥९८॥
ताभिःशक्तिभिरेतेषांबलिनांदितिजन्मनाम् ॥ प्रत्येकंपरितोरुद्धउद्वेलःसैन्यसागरः ॥ ९९ ॥

किमन्यस्मात्परिजीवतिअपितुनेत्यर्थइत्यन्वयः ॥ तस्यगणाअप्यवधीरितभोगाईश्वराएवतेपुवयमकिंचित्कराएवेत्याहुः श्मशानेतिद्वयेन ॥ ८५ ॥ ८६ ॥ अदरिद्राणामीश्वराणाम् ॥ पक्षांतरेयथा
श्रुतएवस्पष्टोर्थः ॥ ८७ ॥ किंतुसमुद्राइति ॥ ८८ ॥ ८९ ॥ कामगवीकामधेनुः ॥ ९० ॥ पूरयतिस्वर्णादिकलशेष्वितिशेषः ॥ ९१ ॥ ९२ ॥ ९३ ॥ क्षुब्धास्तांबलाद्धर्तुंसंचलिताः ॥
प्रलयकालंप्राप्यसमुद्रायथाक्षुब्धाभवंतितद्वदित्यर्थः ॥ ९४ ॥९५॥९६॥ नक्षत्रमालिकाःऋक्षसमूहाः ॥ रोदसीमंडलंद्यावाभूम्योरंतरम् ॥९७॥ शक्तीरंशरूपामूर्तीः ॥९८॥ रुद्धआवृतोनिवारितइति

यावत् ॥ उद्वेलोलंघितमर्यादः ॥ ९९ ॥ संगरेसंग्रामे ॥ तृणीकृत्यतुच्छीकृत्योज्झितानित्यक्तानिनाशितानीत्यर्थः ॥ अरंशीघ्रम् ॥ १०० ॥ असिःखड्गःभुशुंडीसर्वत्रलोहकंट
कव्याप्ताक्रमात्स्थूलाच ॥ तदुक्तम् ॥ भुशुंडीसर्वतोलोहकंटकानुक्रमोन्नतेति ॥ मुद्गरोद्रुघनः ॥ यदाहामरः ॥ द्रुघनेमुद्गरघनाविति ॥ तोमरःशर्वला शेलइतियावत् ॥ यदाहामरः ॥ शर्वलातोमरो
ऽस्त्रियामिति ॥ १ ॥ भिंदिपालैःसृगैःलोहबद्धदंडैरितियावत् ॥ यदाहामरः ॥ भिंदिपालःसृगस्तुल्याविति ॥ परिघैःपरिघातनैर्हस्तप्रमाणकांडैरितियावत् ॥ यदाहामरः ॥ परिघःपरिघातनइति ॥

शस्त्रास्त्राणिमहादैत्यैर्यान्युत्सृष्टानिसंगरे ॥ ताभिःशक्तिभिरुग्राणितृणीकृत्योज्झितान्यरम् ॥ १०० ॥ ततोतिकोपपूर्णास्तेजंभमुख्याःसुरारयः ॥ असि
चक्रभुशुंडीभिर्गदामुद्गरतोमरैः ॥ १ ॥ भिंदिपालैश्चपरिघैःकुंतैःशल्यैश्चशक्तिभिः ॥ अर्धचंद्रैःक्षुरप्रैश्चनाराचैश्चशिलीमुखैः ॥ २ ॥ महाभल्लैःपरशुभि
र्भिदुरैर्मर्मभेदिभिः ॥ वृक्षोपलमहावर्षैर्ववृषुर्जलदाइव ॥ ३ ॥ अथसाविंध्यनिलयामहामायामहेश्वरी ॥ आदायोद्दंडकोदंडंवायव्यास्त्रेणहेलया ॥ ४ ॥
दैत्यास्त्रशस्त्रजालानिपरिचिक्षेपदूरतः ॥ ततोमहासुरोदुर्गोवीक्ष्यसैन्यंनिरायुधम् ॥ ५ ॥ ज्वलंतींशक्तिमादायतांदेवींप्रतिसोऽक्षिपत् ॥ तांतुशक्तिंसमायां
तींमहावेगवतींरणे ॥ ६ ॥ निजचापविनिर्मुक्तैर्बाणैश्चूर्णीचकारसा ॥ भग्नांशक्तिंसमालोक्यततोदुर्गोमहासुरः ॥ ७ ॥ चक्रंचप्रेषयामासदैत्यचक्रातिहर्ष
दम् ॥ तच्चदेव्याशरशतैरंतरैवाणुवत्कृतम् ॥ ८ ॥ ततःशार्ङ्गंसमादायधनुःशक्रधनुर्यथा ॥ हृदिविव्याधबाणेनतांदेवीममरार्दनः ॥ ९ ॥ सचबाणस्तया
देव्यानिजबाणैर्महाजवैः ॥ निवारितोपिवेगेनतांदेवीमभ्यगान्मुने ॥ ११० ॥ ततःकोदंडदंडेनआशुगेनतमाशुगम् ॥ हत्वानिवारयामासकालदंड
मिवापरम् ॥ ११ ॥ तस्मिन्विमुखतांयातेमार्गणेदुर्गमासुरः ॥ क्रुद्धःशूलंसमादायसंवर्तानलसुप्रभम् ॥ १२ ॥ महावेगेनचिक्षेपतांदेवीमभिदैत्यपः ॥
परापतच्चतच्छूलंनिजशूलेनचंडिका ॥ १३ ॥ अंतरैवप्रचिच्छेदसहदैत्यजयाशया ॥ तस्मिन्नपिमहाशूलेदेवीशूलावहेलिते ॥ १४ ॥

कुंतैःप्रासैः ॥ यदाहामरः ॥ प्रासस्तुकुंतइति ॥ शल्यैःशंकुभिःसर्वलीतिख्यातैरित्यर्थः ॥ यदाहामरः ॥ वापुंसिशल्यंशंकुर्नेति ॥ शक्तिर्लोहकंटकव्याप्ताचतुर्हस्तप्रमाणाशतघ्नी ॥ तदुक्तम् ॥ शतघ्नी
तुचतुर्हस्तालोहकंटकसंचितेति ॥ नाराचैःप्रक्ष्वेडनैः ॥ यदाहामरः ॥ प्रक्ष्वेडनास्तुनाराचाइति ॥ २ ॥ परशुभिःकुठारैः ॥ यदाहामरः ॥ द्वयोःकुठारःस्वधितिःपरशुश्चपरश्वधइति ॥ शेषाअस्त्रविशेषाः ॥
भिदुरैर्भेदनशीलैःउपलःपाषाणः ॥३॥ उद्दंडकोदंडंमहद्धनुः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ शृंगैर्निर्मितंशार्ङ्गंधनुः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ परापतत् आगच्छत् ॥ १३॥ अन्तरामध्ये ॥

१ कुलिशंभिदुरंपविः । भिदुरंवज्रम् । मर्मभेदिभिरित्यत्रैवभेदनशीलस्यगतार्थत्वादितिचिंतनीयम् ।

CC-0. In Public Domain. Digitization by eGangotri

अवहेलितेऽवज्ञातेछिन्नेइतियावत् ॥ १४ ॥ १५ ॥ परिपुस्फोटवभंजेत्यर्थः ॥ १६ ॥ गाढंयथास्यात् ॥ १७ ॥ १८ ॥ संवर्तेप्रलयकाले ॥ ११९ ॥ इतिश्रीरामानन्दकृतायांकाशी खंडटीकायामेकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥ ॥ द्व्यधिकेसप्ततितमेऽध्यायेतावद्विवर्ण्यते ॥ दुर्गायाविजयोविश्वजनन्याःपरमाद्भुतः ॥ १ ॥ जगज्जनन्याशक्तयःप्रेरिताइत्युक्तं तत्रपृच्छति ॥ पार्वतीति ॥ १ ॥ २ ॥ तारेत्यत्रआधारेतिपाठेएकंनाम ॥ ३ ॥ जलेशीत्यत्रजलदेतिक्वचित् ॥ ४ ॥ ५ ॥ हुंकारहेतिःहुंकारास्त्रा ॥ तालेशीतृणराजदंडप्रयोक्त्री ॥ ६ ॥ शराशना

गदामादायदैत्येंद्रःसहसाभिपपातह ॥ आजघानचतांदेवींभुजमूलेमहाबलः ॥ १५ ॥ सापिदेवीभुजंप्राप्यगिरींद्रशिखराकृतिः ॥ गदाशुपरिपुस्फो टशतधाचसहस्रधा ॥ १६ ॥ तदादेव्यासदैत्येंद्रोवामपादतलेनहि ॥ आताडितःपपातोर्व्याह्वादिगाढंप्रपीडितः ॥१७॥ तत्क्षणादेवदैत्येंद्रःपतित्वापुनरु त्थितः ॥ बभूवसहसादृश्योदीपोवातहतोयथा ॥ १८ ॥ तावज्जगज्जनन्याताःप्रेरितानिजशक्तयः ॥ विचेरुर्दैत्यसैन्येषुसंवर्तेमृत्युसैन्यवत् ॥ ११९ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदुर्गपराक्रमोनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ अगस्त्यउवाच ॥ पार्वतीहृदयानंदस्कंदसर्वज्ञनंदन ॥ काःकास्तुशक्तयस्तावैतासांनामानिमेवद ॥१॥ ॥ स्कंदउवाच ॥ ॥ तासांपरमशक्तीनांशृणुमावयवसंभुवाम् ॥ आख्याम्याख्यांशृणुमुनेकुंभसंभवतत्त्वतः ॥ २ ॥ त्रैलोक्यविजयातारक्षमात्रैलोक्यसुंदरी ॥ त्रिपुरात्रिजगन्माताभीमात्रिपुरभैरवी ॥ ३ ॥ कामाख्या कमलाक्षीचधृतिस्त्रिपुरतापनी ॥ जयाजयंतीविजयाजलेशीचापराजिता ॥४॥ शंखिनीगजवक्त्राचमहिषघ्नीरणप्रिया ॥ शुभानंदाकोटराक्षीविद्युज्जिह्वा शिवारवा ॥ ५ ॥ त्रिनेत्राचत्रिवक्त्राचत्रिपदासर्वमंगला ॥ हुंकारहेतिस्तालेशीसर्पास्यासर्वसुंदरी ॥ ६ ॥ सिद्धिर्बुद्धिःस्वधास्वाहामहानिद्राशराशना ॥ पाशपाणिःखरमुखीवज्रतारापडानना ॥ ७ ॥ मयूरवदनाकाकीशुकीभासीगरुत्मती ॥ पद्मावतीपद्मकेशीपद्मास्यापद्मवासिनी ॥ ८ ॥ अक्षरात्र्यक्षरातं तुःप्रणवेशीस्वरात्मिका ॥ त्रिवर्गागर्वरहिताअजपाजपहारिणी ॥ ९ ॥ जपासिद्धिस्तपःसिद्धिर्योगसिद्धिःपरामृता ॥ मैत्रीकृन्मित्रनेत्राचरक्षोघ्नीदैत्य तापनी ॥ १० ॥ स्तंभनीमोहनीमायाबहुमायाबलोत्कटा ॥ उच्चाटनीमहोल्कास्यादनुजेंद्रक्षयंकरी ॥११॥ क्षेमंकरीसिद्धिकरीछिन्नमस्ताशुभानना ॥ शाकंभरीमोक्षलक्ष्मीस्त्रिवर्गफलदायिनी ॥ १२ ॥ वार्तालीजंभलीक्लिन्नाअश्वारूढासुरेश्वरी ॥ ज्वालामुखीप्रभृतयोनवकोट्योमहाबलाः ॥ १३ ॥ बलानिबलिनांताभिर्दानवानांस्वलीलया ॥ संक्षिप्तानिजगंतीवप्रलयानलहेतिभिः ॥ १४ ॥

बाणभक्षणा ॥ पाठांतरेशरक्षेपणा ॥ वज्रतारावज्रकनीनिका ॥ ७ ॥ ८ ॥ तंतुःतंतुवत्सूक्ष्मा ॥ ९ ॥ परामृताचेतिनामद्वयंवा ॥ १० ॥ ११ ॥ १२ ॥ वार्तालीति ॥ वार्तानामावलिःपंक्तिर्य स्यांसावार्तालीजंभंतन्नामानमसुरंलातियुद्धायादत्तइतिजंभली ॥ ऐंद्रीशक्तिरित्यर्थः ॥ अन्यासामपियथासंभवंव्युत्पत्तिरूहनीया ॥ १३ ॥ संक्षिप्तानिनाशितानि ॥ हेतिभिःशिखाभिः ॥ यदाह

CC-0. In Public Domain. Digitization by eGangotri

मरः ॥ वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखास्त्रियामिति ॥ १४ ॥ करकावृष्टिंवर्षपाषाणवृष्टिम् ॥ यदाहामरः ॥ वर्षोपलस्तुकरकेति ॥ वात्यावातमंडली ॥ १५ ॥ १६ ॥ षंढंवर्षवरंछिन्नांडकोश
मितियावत् ॥ १७ ॥ बाहुसंकर्षकोपतःबाहुस्फालनपूर्वककोपात् ॥ राह्विितिपाठेराहुसंकर्षकोपतः स्वर्भानुसदृशकोपात् ॥ बहुधामर्षेतिक्वचित् ॥ १८ ॥ शतकोटिर्वज्रम् ॥ शकलंखंडम् ॥ १९ ॥
॥२०॥ जवतःशीघ्रम् ॥ करंशुंडादंडम् ॥२१॥ चीत्कृत्यगजजातिशब्दंकृत्वा ॥ अकिंचित्करतांकिंचित्कर्तुमशक्तताम् ॥२२॥२३॥ २४ ॥ २५ ॥ अकांडेनानवसरेण ॥ २६ ॥ वेषमाकारम् ॥

तावत्सदुर्गोदैत्येंद्रःपयोदांतरतोबली ॥ चकारकरकावृष्टिंवात्यावेगवतींबहु ॥१५॥ ततोभगवतीदेवीशोषणास्त्रप्रयोगतः॥वृष्टिंनिवारयामासवर्षोपलमयीं
क्षणात् ॥ १६ ॥ योषिन्मनोरथवतीषंढंप्राप्ययथाऽफला ॥ सादैत्यकरकावृष्टिर्देवींप्राप्यतथाभवत् ॥ १७ ॥ अथदैतेयराजेनबाहुसंकर्षकोपतः ॥
उत्पाट्यशैलशिखरंपरिक्षिप्तंनभोंगणात् ॥ १८ ॥ अद्रेःशृंगंसुविस्तीर्णमापतत्परिवीक्ष्यसा ॥ शतकोटिप्रहारेणकोटिशःसकलंव्यधात् ॥ १९ ॥
आंदोल्यमौलिमसकृत्कुंडलाभ्यांविराजितम् ॥ गजीभूयाशुदुद्रावतांदेवींसमरेऽसुरः ॥२०॥ शैलाकारंतमायांतंदृष्ट्वाभगवतीगजम् ॥ बद्ध्वापाशेनजवतः
खड्गेनकरमच्छिनत् ॥ २१ ॥ ततोत्यंतंसचीत्कृत्यदेव्याकृत्तकरःकरी ॥ अकिंचित्करतांप्राप्यमाहिषंवपुरादधे ॥ २२ ॥ अचलांसचलांसर्वांसचक्रेखुर
घाततः ॥ शिलोच्चयांश्चबहुशःशृंगाभ्यांसोक्षिपद्बली ॥२३॥ निःश्वासवातनिहताःपेतुरुर्व्यांमहाद्रुमाः ॥ उद्वेलिताःसमभवन्सप्तापिजलराशयः ॥२४॥
महामहिषरूपेणतेनत्रैलोक्यमंडपः ॥ आंदोलितोतिबलिनायुगांतेवात्ययायथा ॥ २५ ॥ ब्रह्मांडमप्यकांडेनतद्भयेनसमाकुलम् ॥ दृष्ट्वाभगवतीक्रुद्धा
त्रिशूलेनजघानतम् ॥ २६ ॥ त्रिशूलघातविभ्रांतःपतित्वापुनरुत्थितः ॥ तंत्यक्त्वामाहिषंवेषमभूद्बाहुसहस्रभृत् ॥ २७ ॥ सदुर्गोनितरांदुर्गोविबभौ
समराजिरे ॥ आयुधानांसहस्राणिबिभ्रत्कालांतकोपमः ॥ २८ ॥ अथतूर्णंसदैत्येंद्रस्तांदेवींरणकोविदाम् ॥ महाबलःप्रगृह्याशुनीतवान्गगनांगणम् ॥
॥ २९ ॥ ततोनभोंगणाद्दूरात्क्षिप्त्वासजगदंबिकाम् ॥ क्षणात्कलंबजालेनच्छादयामासवेगवान् ॥ ३० ॥ अथांतरिक्षगादेवीतस्यमार्गणमध्यगा ॥
विद्युन्मालेवविबभौमहाभ्रपटलीधृता ॥३१॥ तंविधूयशरव्रातंनिजेषुनिकरैरलम् ॥ महेषुणाथविव्याधसातंदैत्यजनेश्वरम् ॥ ३२ ॥ हृदिविद्धस्तयादे
व्यासचतेनमहेषुणा ॥ व्याघूर्णमाननयनःक्षितिमापातिविह्वलः ॥३३॥ महारुधिरधाराभिःस्रवंतींचप्रवर्तयन् ॥ तस्मिन्निपतितेदुर्गेमहादुर्गपराक्रमे॥
॥ ३४ ॥ देवदुंदुभयोनेदुःप्रहृष्टानिजगंतिच ॥ सूर्याचंद्रमसौसाग्नीतेजोनिजमवापतुः ॥ ३५ ॥ पुष्पवृष्टिंप्रकुर्वंतःप्रातादेवामहर्षिभिः ॥ तुष्टुवुश्चमहा
देवींमहास्तुतिभिरादरात् ॥ ३६ ॥ ॥ देवाऊचुः ॥ ॥ नमोदेविजगद्धात्रिजगत्त्रयमहारणे ॥ महेश्वरमहाशक्तेदैत्यद्रुमकुठारिके ॥ ३७ ॥

॥ २७ ॥ समराजिरेसंग्रामभूमौ ॥ कालश्चांतकश्चतदुपमः ॥ २८ ॥ २९ ॥ कलंबजालेनशरसमूहेन ॥ कलंबीशाकभेदेस्यात् ॥ कदंबशरयोःपुमानितिमेदिनीकारः ॥ वाणौघजालेनेति
क्वचित् ॥ तत्रजालमानायः ॥ ३० ॥ महाभ्रपटलीधृतामहामेघपंक्तौस्थिता ॥ वृतेतिक्वचित् ॥ ३१ ॥ ३२ ॥ ३३ ॥ स्रवंतींनदीम् ॥ ३४ ॥ ३५ ॥ ३६ ॥ एकोनत्रिंशतापद्यैर्दुर्गांदुर्गविम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिंनीम् ॥ प्रणतास्त्रिदशाःसर्वेतुष्टुवुर्जगदंविकाम् ॥ १ ॥ तत्रप्रथमतोब्रह्मविष्णुमहेश्वरशक्तिरूपेणप्रणमंति नमइतित्रयेण ॥ हेदेविनमस्तुभ्यमितिशेषः ॥ नमस्कारेहेतुः ॥ जगद्धात्रिहेविश्व पोष्ट्रि ॥ अनेनविष्णोःसत्त्वप्रधानास्थितिशक्तिरुक्ता ॥ जगत्त्रयमहारणेहेजगत्त्रितयमहोत्पत्तिस्थानरूपे ॥ अनेनब्रह्मणोरजःप्रधानासृष्टिशक्तिरुक्ता ॥ महेश्वरमहाशक्तेहेविश्वनाथमहाशक्ते ॥ अनेनकालाग्निरुद्रात्मनोविश्वेश्वरस्यसर्वसंहारपटीयसीतमःप्रधानाशक्तिरुक्ता ॥ अतएवदैत्यद्रुमकुठारिकेहेदानवरूपवृक्षपरश्वधेछेत्रीत्यर्थः ॥ ३७ ॥ विष्णुशक्तिंदर्शयंतोनमंति ॥ त्रैलोक्येति ॥ धरीधात्रिधरेइतिक्वचित् ॥ स्वशार्ङ्गेत्यत्रसुशार्ङ्गेतिक्वचित् ॥ ३८ ॥ ब्रह्मशक्तिंकथयंतोनमस्यंति ॥ हंसयानइति ॥ प्राचांप्राचीनानामनादिसिद्धानाम् ॥ ३९ ॥ सर्वस्वरूपत्वंदर्शयंतःपरमात्मत्वे नस्तुवंति त्वमैंद्रीत्यादि मातस्त्वयेत्यंतेन ॥ तत्राष्टलोकपालचंद्रसवितृशक्तित्वेनस्तुवंतिसार्धेन ॥ कौवेरीत्यत्रकौमारीतिपाठःसचिंत्यः ॥ अंवुपावारुणीशक्तिः ॥ ४० ॥ सौरीसूर्यप्रभाशक्तिरीतिसर्व त्रसंवध्यते ॥ किंचवहुनेत्याहुः ॥ सर्वदेवेति ॥ ४१ ॥ सर्वदेवशक्तित्वमेवसंक्षेपेणदर्शयंति त्वमित्यर्धेन ॥ चतुर्विंशतितत्त्वरूपेणस्तुवंति ॥ प्रकृतिस्त्वमितिसार्धेन ॥ प्रकृतिःप्रधानम् ॥ मतिर्महत्तत्त्वं

त्रैलोक्यव्यापिनिशिवेशंखचक्रगदाधरि ॥ स्वशार्ङ्गव्यग्रहस्ताग्रेनमोविष्णुस्वरूपिणि ॥ ३८ ॥ हंसयानेनमस्तुभ्यंसर्वसृष्टिविधायिनि ॥ प्राचांवाचां जन्मभूमेचतुराननरूपिणि ॥ ३९ ॥ त्वमैंद्रीत्वंचकौबेरीवायवीत्वंत्वमंबुपा ॥ त्वंयामीनैर्ऋतीत्वंचत्वमैशीत्वंचपावकी ॥ ४० ॥ शशांककौमुदीत्वंचसौरीशक्तिस्त्वमेवच ॥ सर्वदेवमयीशक्तिस्त्वमेवपरमेश्वरी ॥ ४१ ॥ त्वंगौरीत्वंचसावित्रीत्वंगायत्रीसरस्वती ॥ प्रकृतिस्त्वंमतिस्त्वंचत्वमहंकृतिरूपिणी ॥ ४२ ॥ चेतःस्वरूपिणीत्वंवैत्वंसर्वेंद्रियरूपिणी ॥ पंचतन्मात्ररूपात्वंमहाभूतात्मिकेंबिके ॥ ४३ ॥ शब्दादिरूपिणीत्वंवैकरणानुग्रहात्वमु ॥ ब्रह्मांडकर्त्रीत्वंदेविब्रह्मांडांतस्त्वमेवहि ॥ ४४ ॥ त्वंपरासिमहादेवित्वंचदेविपरापरा ॥ परापराणांपरमापरमात्मस्वरूपिणी ॥ ४५ ॥ सर्वरूपात्वमीशानित्वमरूपासिसर्वगे ॥ त्वंचिच्छक्तिर्महामायेत्वंस्वाहात्वंस्वधामृते ॥ ४६ ॥ वषड्वौषट्स्वरूपासित्वमेवप्रणवात्मिका ॥ सर्वमंत्रमयीत्वंवैब्रह्माद्यास्त्वत्समुद्भवाः ॥ ४७ ॥

हैरण्यगर्भीबुद्धिरितियावत् ॥४२॥ चेतोंतरिंद्रियम् ॥ सर्वेंद्रियेत्यत्रसर्वशब्दोज्ञानकर्मविषयः ॥ क्रमोत्रनविवक्षितः ॥ पंचतन्मात्ररूपाअपंचीकृतपंचमहाभूतस्वरूपेत्यर्थः ॥ महाभूतात्मिकेस्थूलपंचमहाभूतस्वरूपेइत्यर्थः ॥४३॥ पंचभूतगुणत्वेनइंद्रियाधिष्ठातृदेवतारूपेणचस्तुवंति शब्दादीत्यर्धेन ॥ आदिशब्देनस्पर्शरूपरसगंधागृह्यंते ॥ करणमिंद्रियमनुगृह्णातीतिकरणानुग्रहाइंद्रियाधिष्ठातृदेवतारूपेत्यर्थः ॥ सर्वकर्तृत्वेनसर्वरूपत्वेनचस्तुवंति ब्रह्मांडेत्यर्धेन ॥ अंतशब्दोऽत्रस्वरूपवचनः ॥ ४४ ॥ ननुहिरण्यगर्भोब्रह्मांडंसृजतिब्रह्मांडंमहदादिकार्यंभौतिकमेवाकिमत्राहंतत्राहुः ॥ त्वमिति ॥ त्वंपराईश्वरीअसि ॥ हिरण्यगर्भस्रष्टातद्द्वारात्वमेवब्रह्मांडंसृजसीत्यर्थः ॥ तथाचश्रुतिः ॥ योवैब्रह्माणंविदधातिपूर्वमिति ॥ परंमहदादिअपरंतत्कार्यंतेपरापरेतद्रूपापराऽपरा ॥ अतस्त्वमेवब्रह्मांडरूपेत्यर्थः ॥ उपसंहरंति ॥ परापराणामिति ॥ ४५ ॥ ननुपरापररूपत्वेकथंपरमात्मस्वरूपत्वंतत्राहुः ॥ माययासर्वरूपात्वमिति ॥ वस्तुतोऽरूपासि ॥ अरूपत्वेहेतुस्त्वंचिच्छक्तिरिति ॥ ज्ञानैकस्वरूपेत्यर्थः ॥ सर्वरूपत्वंसंक्षेपेणदर्शयंति ॥ त्वंस्वाहेति ॥ ४६ ॥ वैदिकमंत्ररूपेणस्तुवंति ॥ वषडिति ॥ किंचकिंवहुनेत्याहुः ॥ सर्वमंत्रेति ॥ सर्वकारणत्वेनस्तुवंति ॥ ब्रह्मेति ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वरूपत्वमुपसंहरंति ॥ ब्रह्मेतीतिवा ॥ ४७ ॥ चतुर्वर्गात्मकत्वेनतद्दातृत्वेनचस्तुवंति ॥ चतुर्वर्गेति ॥ चतुर्वर्गफलस्यपुरुषार्थचतुष्टयफलस्योदयोयस्यास्तत्संबोधनंचतुर्वर्गफलोदये ॥ उपसंहरंति ॥ त्वत्तइति ॥ निमित्तकारणमात्रतांव्यावर्तयंति ॥ त्वयीति ॥ प्रलयकालेसर्वजगन्निधीयतेऽस्यामितितत्संबोधनंतथा ॥ जगन्मयेइतिक्वचित् ॥ ४८ ॥ यदिति ॥ स्थूलसूक्ष्मस्वरूपतःस्थूलसूक्ष्मस्वरूपंयद्दृश्यंपृथिव्यादियददृश्यमाकाशादितत्रत्वंशक्तिरूपेणवर्तसे ॥ तत्तच्छक्तिरूपायांत्वयितत्तद्वस्तुग्रथितमित्यर्थः ॥ अतस्त्वांविनाकिंचिन्नात्रास्तीति ॥ ४९ ॥ ननुब्रह्मादीन्विहायकिमितिमां शरणंप्राप्तास्तत्राहुः ॥ मातरिति ॥ निसर्गविबुधाआजानसिद्धादेवाब्रह्माद्याःपुंभ्योऽजेयत्वात्तेषुअर्पितंदैत्यसैन्यंयेनदुर्गेणतंविनिहत्य ॥ ५० ॥ विश्वंव्याप्येतिशेषः ॥ सुहृक्शोभनदृष्टिः ॥ ५१ ॥

चतुर्वर्गात्मिकात्वंवैचतुर्वर्गफलोदये ॥ त्वत्तःसर्वमिदंविश्वंत्वयिसर्वजगन्निधे ॥ ४८ ॥ यद्दृश्यंयददृश्यंचस्थूलसूक्ष्मस्वरूपतः ॥ तत्रत्वंशक्तिरूपेणकिंचिन्नत्वदृतेक्वचित् ॥ ४९ ॥ मातस्त्वयाद्यविनिहत्यमहासुरेंद्रंदुर्गंनिसर्गविबुधार्पितदैत्यसैन्यम् ॥ त्राताःस्मदेविसततंनमतांशरण्येत्वत्तोऽपरःकइहयं शरणंव्रजामः ॥ ५० ॥ लोकेतएवधनधान्यसमृद्धिभाजस्तेपुत्रपौत्रसुकलत्रसुमित्रवंतः ॥ तेषांयशःप्रसरचंद्रकरावदातंविश्वंभवेद्भवसियेषुसुहृक्त्वमीशे ॥ ॥ ५१ ॥ त्वद्भक्तिचेतसिजनेनविपत्तिलेशःक्लेशःक्ववानुभवतीनतिकृत्सुपुंसु ॥ त्वन्नामसंस्मृतिजुषांसकलायुषांक्वभूयःपुनर्जननिरिहत्रिपुरारिपत्नि ॥ ५२ ॥ चित्रंयदत्रसमरेसहिदुर्गदैत्यस्त्वद्दृष्टिपातमधिगम्यसुधानिधानम् ॥ मृत्योर्वशत्वमगमाद्विदितंभवानिदुष्टोपितेदृशिगतःकुगतिंनयाति ॥ ५३ ॥ त्वच्छस्त्रवह्निशलभत्वमिताअपीहदैत्याःपतंगरुचिमाप्यदिवंव्रजंति ॥ संतःखलेष्वपिनदुष्टधियोयतःस्युःसाधुष्विवप्रणयिनःस्वपथंदिशंति ॥ ५४ ॥ प्राच्यांमृडानिपरिपाहिसदानतान्नोयाम्यामवप्रतिपदंविपदोभवानि ॥ प्रत्यग्दिशित्रिपुरतापनपत्निरक्षत्वंपाह्युदीचिनिजभक्तजनान्महेशि ॥ ५५ ॥ ब्रह्माणिरक्षसततंनतमौलिदेशंत्वंवैष्णविप्रतिकुलंपरिपालयाधः ॥ रुद्राग्निनैर्ऋतिसदागतिदिक्षुपांतुमृत्युंजयात्रिनयनात्रिपुरात्रिशक्त्यः ॥ ५६ ॥ पातुत्रिशूलममलेतवमौलिजान्नोभालस्थलंशशिकलामृदुमाभ्रुवौच ॥ नेत्रेत्रिलोचनवधूर्गिरिजाचनासामोष्ठंजयाचविजयात्वधरप्रदेशम् ॥ ५७ ॥ श्रोत्रद्वयंश्रुतिरवादशनावलिंश्रीश्चंडीकपोलयुगलंरसनांचवाणी ॥ पायात्सदैवचिबुकंजयमंगलानःकात्यायनीवदनमंडलमेवसर्वम् ॥ ५८ ॥ कंठप्रदेशमवतादिहनीलकंठीभूदारशक्तिरनिशंचकृकाटिकायाम् ॥ कौर्म्यंसदेशमनिशंभुजदंडमैंद्रीपद्माचपाणिफलकंनतिकारिणांनः ॥ ५९ ॥

ननुनिश्चितम् ॥ भवतीनतिकृत्सुत्वत्प्रणामकर्तृषु ॥ सकलायुषांसंपूर्णायुषाम् ॥ सफलायुषामितिवापाठः ॥ ५२ ॥ ५३ ॥ शलभत्वंपतंगत्वम् ॥ यदाहामरः ॥ समौपतंगशलभाविति ॥ पतंगरुचिंप्राप्यसूर्यमंडलंभित्त्वेत्यर्थः ॥ यदाहामरः ॥ पतंगौपक्षिसूर्यौचेति ॥ ५४ ॥ अवरक्ष ॥ प्रतिपदंप्रतिक्षणम् ॥ विपदोविपत्तेः ॥ प्रतिपदमित्यत्रप्रतिकुलमितिपाठेप्रतिभक्तकुलमित्यर्थः ॥ ॥ ५५ ॥ त्रिपुसृष्टिस्थितिप्रलयेषुशक्तिःसामर्थ्यंयस्याःसात्रिशक्तिः ॥ यथासंख्येनान्वयः ॥ ५६ ॥ भालंललाटम् ॥ ५७ ॥ चिबुकमोष्ठाधरयोरधःप्रदेशम् ॥ ५८ ॥ भूदारशक्तिर्वाराही ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृकाटिकायामवटौ द्वितीयार्थेसप्तमी ॥ ग्रीवाशिरःसंधेःपश्चात्पृष्ठवंशोपरिभागेइत्यर्थः ॥ यदाहामरः ॥ वटुर्घाटाकृकाटिकेति ॥ पाणिफलकंहस्तखंडकंम् ॥ ५९ ॥ ६० ॥ उदरदरींजठरगुहाम् ॥ कटिंश्रोणिम् ॥ स्फिचौप्रोथौ ॥ यदाहामरः ॥ स्त्रियांस्फिचौकटिप्रोथाविति ॥ गुह्यंगुह्येंद्रियंशिश्नमितियावत् ॥ अपानमपानेंद्रियंगुदमित्यर्थः ॥ ६१ ॥ जानूजानुनीऊरुपर्वणीइत्यर्थः ॥ यदाहामरः ॥ जानूरुपर्वाष्ठीवदस्त्रियामिति ॥ जंघेप्रसृतेजानुनोरधोभागौ ॥ गुल्फौपादग्रंथी ॥ चांद्रीचंद्रशक्तिःरोहिणीवा ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

हस्तांगुलीःकमलजाविरजानखांश्चकक्षांतरंतरणिमंडलगातमोघ्नी ॥ वक्षःस्थलंस्थलचरीहृदयंधरित्रीकुक्षिद्वयंत्ववतुनःक्षणदाचरघ्नी ॥६०॥ अव्यात्सदोदरदरींजगदीश्वरीनोनाभिंनभोगतिरजात्वथपृष्ठदेशम् ॥ पायात्कटिंचविकटापरमास्फिचौनोगुह्यंगुहारणिरपानमपायहंत्री ॥६१॥ ऊरुद्वयंचविपुलाललिताचजानूजंघेजवाऽवतुकठोरतरात्रगुल्फौ ॥ पादौरसातलचरांगुलिदेशमुग्राचांद्रीनखान्पदतलंतलवासिनीच ॥६२॥ गृहंरक्षतुनोलक्ष्मीःक्षेत्रंक्षेमकरीसदा ॥ पातुपुत्रान्प्रियकरीपायादायुःसनातनी ॥६३॥ यशःपातुमहादेवीधर्मंपातुधनुर्धरी ॥ कुलदेवीकुलंपातुसद्गतिंसद्गतिप्रदा ॥ ६४ ॥ रणेराजकुलेद्यूतेसंग्रामेशत्रुसंकटे ॥ गृहेवनेजलादौचशर्वाणीसर्वतोऽवतु ॥ ६५ ॥ इतिस्तुत्वाजगद्धात्रींप्रणेमुश्चपुनःपुनः ॥ सर्वेसवासवादेवाःसर्षिगंधर्वचारणाः ॥ ६६ ॥ ततस्तुष्टाजगन्मातातानाहसुरसत्तमान् ॥ स्वाधिकारान्सुराःसर्वेशास्तुप्राग्यथायथा ॥ ६७॥ तुष्टाहमनयास्तुत्यानितरांतुयथार्थया ॥ वरमन्यंप्रदास्यामितच्छृणुध्वंसुरोत्तमाः ॥ ६८ ॥ ॥ दुर्गोवाच ॥ ॥ यःस्तोष्यतितुमांभक्त्यानरःस्तुत्यानयाशुचिः ॥ तस्याहंनाशयिष्यामिविपदंचपदेपदे॥६९॥एतत्स्तोत्रस्यकवचंपरिधास्यतियोनरः ॥ तस्यक्वचिद्भयंनास्तिवज्रपंजरगस्यहि ॥७०॥ अद्यप्रभृतिमेनामदुर्गेतिख्यातिमेष्यति ॥ दुर्गंदैत्यस्यसमरेपातनादतिदुर्गमात्॥७१॥येमांदुर्गांशरणगानतेषांदुर्गतिःक्वचित् ॥ दुर्गास्तुतिरियंपुण्यावज्रपंजरसंज्ञिका ॥७२॥ अनयाकवचंकृत्वामाबिभेतुयमादपि ॥ भूतप्रेतपिशाचाश्चशाकिनीडाकिनीगणाः॥७३॥झोटिंगाराक्षसाःक्रूराविषसर्पाग्निदस्यवः ॥ वेतालाश्चापिकंकालग्रहाबालग्रहाअपि॥७४॥

यथार्थयासान्वयया ॥ यथातथेतिपाठेपिसएवार्थः ॥ ६८ ॥ ६९ ॥ ७० ॥ दुर्गेतिदुर्गनामानंदैत्यंहंतीतिदुर्गा ॥ घ्नेत्यस्याश्रवणमार्षम् ॥ यद्वा दुर्गमतिदुर्गमंदुर्गदैत्यस्यहननंघातनमस्याअस्तीतिदुर्गा ॥ अर्शआदिभ्योऽच् ॥ तदेतदाह ॥ दुर्गदैत्यस्येति ॥ ७१॥७२॥ माबिभेतुभयंमाकरोतु ॥ शाकिनीडाकिन्यौदुष्टग्रहविशेषौ ॥७३॥ झोटिंगाःपिशाचाः झाटिंगाइतिपाठेपिसएवार्थः ॥ वेताला

भूतविशेषाः॥कंकालाःपिशाचभेदाः ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ रक्षामिति ॥ परिपरितःसर्वतोभावेनेत्यर्थः ॥ ८० ॥ तयातस्याइत्यर्थः ॥ तस्याइतिवापाठः ॥ ८१ ॥ ८२ ॥
नवरात्रमाश्विनशुक्लपक्षीयम् ॥ सुमतिंज्ञानम् ॥ सद्गतिमितिक्वचित् ॥ ८३ ॥ महाबलिरित्यत्रबलिशब्देनपक्वान्नानिगृह्यंते ॥ ८४ ॥ शारदंतदेव ॥ ८५ ॥ ८६ ॥८७॥ कालरात्रिमुखाःकालरात्रि

वातपित्तादिजनितास्तथाचविषमज्वराः ॥ दूरादेवपलायंतेश्रुत्वास्तुतिमिमांशुभाम् ॥७५॥ वज्रपंजरनामैतत्स्तोत्रंदुर्गाप्रशंसनम् ॥ एतत्स्तोत्रकृतत्राणे
वज्रादपिभयंनहि ॥ ७६ ॥ अष्टजप्तेनचानेनयोभिमंत्र्यजलंपिबेत् ॥ तस्योदरगतापीडाक्वापिनोसंभविष्यति ॥७७॥ गर्भपीडातुनोजातुभविष्यत्यभिमं
त्रणात् ॥ बालानांपरमाशांतिरेतत्स्तोत्रांबुपानतः ॥ ७८ ॥ यत्रसान्निध्यमेतस्यस्तवस्येहभविष्यति ॥ एतास्तुशक्तयःसर्वाःसर्वत्रसहितामया ॥ ७९ ॥
रक्षांपरिकरिष्यंतिमद्भक्तानांममाज्ञया ॥ इतिदत्त्वावरान्देवीदेवेभ्योंतर्हितातदा ॥ ८० ॥ तेपिस्वर्गौकसःसर्वेस्वंस्वंस्वर्गंययुर्मुदा ॥ ॥ स्कंदउवाच ॥
इत्थंदुर्गाभवन्नामतयादेव्यामहामुने ॥ काश्यांसेव्यायथासाचतच्छृणुष्ववदामिते ॥८१॥ अष्टम्यांचचतुर्दश्यांभौमवारेविशेषतः ॥ संपूज्यासततंकाश्यां
दुर्गादुर्गतिनाशिनी ॥ ८२ ॥ नवरात्रंप्रयत्नेनप्रत्यहंसासमर्चिता ॥ नाशयिष्यतिविघ्नौघान्सुमतिंचप्रदास्यति ॥ ८३ ॥ महापूजोपहारैश्चमहाबलिनि
वेदनैः ॥ दास्यत्यभीष्टदासिद्धिंदुर्गाकाश्यांनसंशयः ॥ ८४ ॥ प्रतिसंवत्सरंतस्याःकार्यायात्राप्रयत्नतः ॥ शारदंनवरात्रंचसकुटुंबैःशुभार्थिभिः ॥८५॥
योनसांवत्सरींयात्रांदुर्गायाःकुरुतेकुधीः ॥ काश्यांविघ्नसहस्राणितस्यस्युश्चपदेपदे ॥ ८६ ॥ दुर्गाकुंडेनरःस्नात्वासर्वदुर्गार्तिहारिणीम् ॥ दुर्गांसंपूज्यवि
धिवन्नवजन्माघमुत्सृजेत् ॥ ८७ ॥ सादुर्गाशक्तिभिःसार्धंकाशींरक्षतिसर्वतः ॥ ताःप्रयत्नेनसंपूज्याःकालरात्रिमुखानरैः ॥८८॥ रक्षंतिक्षेत्रमेतद्वैतथान्यान
वशक्तयः ॥ उपसर्गसहस्रेभ्यस्तावैदिग्देवताःक्रमात् ॥ ८९ ॥ शतनेत्रासहस्रास्यातथायुतभुजापरा ॥ अश्वारूढागजास्याचत्वरिताशववाहिनी ॥ ९० ॥
विश्वासौभाग्यगौरीचसृष्टाःप्राच्यादिमध्यतः ॥ एतायत्नेनसंपूज्याःक्षेत्ररक्षणदेवताः ॥९१॥ तथैवभैरवाश्चाष्टौदिक्ष्वष्टासुप्रतिष्ठिताः ॥ रक्षंतिसततंकाशीं
निर्वाणश्रीनिकेतनम् ॥ ९२ ॥ रुरुश्चंडोसितांगश्चकपालीक्रोधनस्तथा ॥ उन्मत्तभैरवस्तद्वत्क्रमात्संहारभीषणौ ॥ ९३ ॥ चतुःषष्टिस्तुवेतालामहाभी
षणमूर्तयः ॥ रुंडमुंडस्रजःसर्वेकर्त्रीखर्परपाणयः ॥ ९४ ॥ श्ववाहनारक्तमुखामहादंष्ट्रामहाभुजाः ॥ नग्नाविमुक्तकेशाश्चप्रमत्तारुधिरासवैः ॥ ९५ ॥

प्रधानाः ॥ ८८ ॥ ८९ ॥ त्वरितावेगवत्तरा ॥ ९०॥ सृष्टानिसृष्टानियुक्ताइतियावत् ॥ देव्याइतिशेषः ॥ सृष्टचेतिपाठेसृष्टिमार्गेणेत्यर्थः ॥ प्राच्यादिमध्यतःप्राच्यादिषुदिक्षुमध्येचेत्यर्थः ॥ ९१ ॥
निर्वाणश्रीनिकेतनंकैवल्यस्यरम्यंस्थानंकैवल्यलक्ष्म्यानिकेतनमितिवा ॥९२॥ क्रमात्प्राच्यादिक्रमात् ॥९३॥ रुंडमुंडस्रजःकबंधशिरोमालाः॥९४॥ रुधिरासवैःरुधिराण्येवआसवामद्यानितैः ॥९५॥

CC-0. In Public Domain. Digitization by eGangotri

कोटिशोरुधिराशनाइतिकचित् ॥ कोटिशोऽपरिमिताः ॥ ९६ ॥ तेषुचतुःषष्ट्यांकांश्चिद्वेतालान्दर्शयति विद्युज्जिह्वइतित्रयेण ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥
भूतावलीभूतपंक्तिर्भूतसमूहइत्यर्थः ॥ अवतिरक्षति ॥ ५ ॥ पदेपदेक्षणेक्षणे ॥ ६ ॥ दुर्गसंकटम् ॥ ७ ॥ ८ ॥ सहेति श्रोतारमपिरक्षिष्यंतीत्यर्थः ॥ ९ ॥ ११० ॥ अहंबुद्धिगृहीतानांरक्षणंप्रार्थ

नानारूपधराःसर्वेनानाशस्त्रास्त्रपाणयः ॥ तदाकारैश्चतद्भृत्यैःकोटिशःपरिवारिताः ॥ ९६ ॥ विद्युज्जिह्वोललज्जिह्वःक्रूरास्यःक्रूरलोचनः॥ उग्रोविकटदं
ष्ट्रश्चवक्रास्योवक्रनासिकः ॥ ९७ ॥ जंभकोजृंभणमुखोज्वालानेत्रोवृकोदरः ॥ गर्तनेत्रोमहानेत्रस्तुच्छनेत्रोंऽत्रमण्डनः ॥ ९८ ॥ ज्वलत्केशःकंबुशिराः
खर्वग्रीवोमहाहनुः ॥ महानासोलंबकर्णःकर्णप्रावरणोनसः ॥९९॥ इत्यादयोमुनेक्षेत्रंदुर्वृत्तरुधिरप्रियाः ॥ त्रासयंतोदुराचारान्रक्षंतिपरितःसदा ॥१००॥
त्रैलोक्यविजयाद्याश्चज्वालामुख्यंतगाश्चयाः ॥ शक्तयोऽत्रमयाख्यातामुनेकलशसंभव ॥ १ ॥ ताःकाशींपरिरक्षंतिचतुर्दिक्षूद्यतायुधाः ॥ ताःसमर्च्याः
प्रयत्नेनमहाविघ्नप्रशांतये ॥२॥ भैरवारुरुमुख्याश्चमहाभयनिवारकाः ॥ संपूज्याःसर्वदाकाश्यांसर्वसंपत्तिहेतवः ॥३॥ विद्युज्जिह्वप्रभृतयोवेतालाउग्ररू
पिणः ॥ अत्युग्रानपिविघ्नौघान्हरिष्यंत्यर्चिताइह ॥ ४ ॥ तथाभूतावलीचात्रनानाभीषणरूपिणी ॥ उदायुधाऽवतिपुरींशतकोटिमितामुने ॥ ५ ॥
निर्वाणलक्ष्मीक्षेत्रस्यपालयित्रीपदेपदे ॥ एतावैदेवताःपूज्याःकाश्यांनिर्वाणकांक्षिभिः ॥ ६ ॥ श्रुत्वाध्यायमिमंपुण्यंनरोदुर्गजयाभिधम् ॥ नानाश
क्तिसमायुक्तंदुर्गमाशुतरिष्यति ॥ ७ ॥ यएतेभैरवाःप्रोक्तायेवेतालाउदाहृताः ॥ तेषांनामानिचाकर्ण्यनरोविघ्नैर्नदूयते ॥ ८ ॥ अदृष्टाअपितेभूताएतदा
ख्यानपाठकम् ॥ रक्षिष्यंतिप्रयत्नेनसहश्रोतृजनेनच ॥ ९ ॥ तस्मात्सर्वप्रयत्नेनकाशीभक्तिपरैर्नरैः ॥ श्रोतव्यमिदमाख्यानंमहाविघ्ननिवारणम् ॥
॥ ११० ॥ गृहेपियस्यलिखितमेतत्स्थास्यतिपूजितम् ॥ तस्यापदांसहस्राणिनाशयिष्यंतिदेवताः ॥ ११ ॥ काश्यांयस्यास्तिवैप्रेमतेनकृत्वाऽऽदरंगु
रुम् ॥ श्रोतव्यमिदमाख्यानंवज्रपंजरसन्निभम् ॥११२॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदुर्गाविजयो
नामद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ अगस्त्यउवाच ॥ त्रिलोचनंसमासाद्यदेवदेवःषडाननः ॥ जगदंबिकयायुक्तःकिंचकाराशुतद्वद ॥ १ ॥ ॥
स्कन्दउवाच ॥ ॥ मुनेकलशजाख्यामियत्पृष्टंतन्निशामय ॥ विरजःसंज्ञकंपीठंयत्प्रोक्तंसर्वसिद्धिदम् ॥ २ ॥ तत्पीठदर्शनादेवविरजाजायतेनरः ॥
यत्रास्तितन्महालिंगंवाराणस्यांत्रिलोचनम् ॥ ३ ॥

यित्वाममबुद्धिगृहीतानामपितत्प्रार्थयति ॥ गृहेपीति ॥ ११ ॥ गुरुंमहांतम् ॥ ११२ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ त्रिसप्ततितमेध्याये
श्रीमदोंकारवर्णनम् ॥ क्रियतेतीवपापघ्नंमहाश्चर्यप्रदंनृणाम् ॥१॥ नंदिनंसन्निदेश्येतिमृडान्यासहितोमृडः ॥ ययौत्रैविष्टपंक्षेत्रंमुक्तिबीजप्ररोहणमित्युक्तमतःपृच्छति ॥ त्रिलोचनमिति ॥१॥२॥३॥

CC-0. In Public Domain. Digitization by eGangotri

पिलिपिलेतिलक्ष्म्याएवनामांतरम् ॥ ४ ॥ तीर्थलिंगयोस्त्रिविष्टपंनाम ॥ त्रिविष्टपनामनिरुक्त्यादर्शयति ॥ विष्टपेति ॥ विष्टपत्रितयेभुवनत्रयमध्ये ॥ तत्रेतितीर्थलिंगयोर्निरुक्तिः ॥ यद्यतः ॥ ॥ ५ ॥ महत्तरंश्रेष्ठतमंच ॥ पाठांतरंस्पष्टम् ॥ ६ ॥ ७ ॥ सर्वोपकारार्थमज्ञेवपृच्छति ॥ देवदेवेति नवभिः देवदेवेतिसंबोधनानिभक्त्युद्रेकख्यापकानि ॥ सर्वदसर्वगेत्यत्रसर्वसमर्चितेति क्वचित् ॥८॥९॥ विष्वक्सर्वव्यापीत्यर्थः ॥ केनब्रह्मणायेनकेनापिवाऽनवगम्यतेकाक्कानावगम्यतएवेत्यर्थः ॥१०॥ स्वयंभून्यपीत्यत्रस्वभूमिष्ठानीतिपाठेस्वस्थानस्थितानि ॥ स्वयंभुस्थापितानीतिपाठे

तीर्थंपिलिपिलाख्यंतद्द्युनद्यंभसिविश्रुतम् ॥ सर्वतीर्थमयंतीर्थंतत्काश्यांपरिगीयते ॥ ४ ॥ विष्टपत्रितयांतर्येदेवर्षिमनुजोरगाः ॥ ससरित्पर्वतारण्याःसंतितेतत्रयन्मुने ॥ ५ ॥ तदारभ्यचतत्तीर्थंतच्चलिंगंत्रिलोचनम् ॥ त्रिविष्टपमितिख्यातमतोहेतोर्महत्तरम् ॥ ६ ॥ त्रिविष्टपस्यलिंगस्यमहिमोक्तःपिनाकिना ॥ जगज्जनन्याःपुरतोयथावच्मितथामुने ॥७॥ ॥ देव्युवाच ॥ ॥ देवदेवजगन्नाथशर्वसर्वदसर्वग ॥ सर्वदृक्सर्वजनककिंचित्पृच्छामितद्वद ॥ ॥८॥ इदंतवप्रियंक्षेत्रंकर्मबीजमहौषधम् ॥ नैःश्रेयस्याःश्रियोगेहंममापिप्रीतिदंमहत् ॥९॥ यत्क्षेत्ररजसोप्यग्रेत्रिलोक्यपितृणायते ॥ तस्याखिलस्यमहिमाविष्वक्केनावगम्यते ॥ १० ॥ यानीहसंतिलिंगानितानिसर्वाण्यसंशयम् ॥ निर्वाणकारणान्येवस्वयंभून्यपितान्यपि ॥ ११ ॥ यद्यप्येवंतथापीशविशेषंवक्तुमर्हसि ॥ काश्यामनादिसिद्धानिकानिलिंगानिशंकर ॥१२॥ यत्रदेवःसदातिष्ठेत्संवर्तेऽपिसवल्लभः ॥ यैरियंप्रथितिंप्राप्ताकाशीमुक्तिपुरीतिच ॥ ॥ १३ ॥ येषांस्मरणतोप्यत्रभवेत्पापस्यसंक्षयः ॥ दर्शनस्पर्शनाभ्यांचस्यातांस्वर्गापवर्गकौ ॥ १४ ॥ येषांसमर्चनादेवमध्येजन्मसकृद्विभो ॥ लिंगानिपूजितानिस्युःकाश्यांसर्वाणिनिश्चितम् ॥१५॥ विधायमय्यनुक्रोशंकारुण्यामृतसागर ॥ एतदाचक्ष्वमेशंभोपादयोःप्रणतास्म्यहम् ॥१६॥ इत्याकर्ण्यमहेशानस्तस्यादेव्याःसुभाषितम् ॥ कथयामासविंध्यारेमहालिंगानिसत्तम ॥१७॥ यन्नामाकर्णनादेवक्षीयंतेपापराशयः ॥ प्राप्यतेपुण्यसंभारःकाश्यांनिर्वाणकारणम् ॥ १८ ॥ ॥ देवदेवउवाच ॥ ॥ शृणुदेविपरंगुह्यंक्षेत्रेऽस्मिन्मुक्तिकारणम् ॥ इदंविदंतिनैवापिब्रह्मनारायणादयः ॥ १९ ॥ असंख्यातानिलिंगानिपार्वत्यानंदकानने ॥ स्थूलान्यपिचसूक्ष्माणिनानारत्नमयानिच ॥ २० ॥ नानाधातुमयानीशेदार्षदान्यप्यनेकशः ॥ स्वयंभून्यप्यनेकानिदेवर्षिस्थापितान्यहो ॥२१॥ सिद्धचारणगंधर्वयक्षरक्षोर्चितान्यपि ॥ असुरोरगमर्त्यैश्चदानवैरप्सरोगणैः ॥२२॥ दिग्गजैर्गिरिभिस्तीर्थैर्ऋक्षवानरकिन्नरैः ॥ पतत्रिप्रमुखैर्देविस्वस्वनामांकितानिवै ॥२३॥ प्रतिष्ठितानियानीहमुक्तिहेतूनितान्यपि ॥ अदृश्यान्यपिदृश्यानिदुरवस्थान्यपिप्रिये ॥२४॥

स्वयंभूनिस्थापितानिचेत्यर्थः ॥ ११ ॥ १२ ॥ यत्रकाश्याम् ॥ सवल्लभःसशक्तिकः ॥ १३ ॥ १४ ॥ जन्मनोमध्येमध्येजन्मसकृत्समर्चनादित्यन्वयः ॥ १५ ॥ १६ ॥ अगस्त्यस्यविंध्यारित्वंतद्वृद्धिविघातकत्वाज्ज्ञेयम् ॥ १७ ॥ १८ ॥ १९ ॥ असंख्यातानिलिंगानीत्यादीनांपूज्यानीतिषष्ठेनान्वयः ॥२० ॥ २१ ॥ २२ ॥ २३ ॥ दुरवस्थानीति ॥ यवनादिभिरतिशयेनदुर्दुष्टाअवस्थायेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानितथा ॥ २४ ॥ परार्द्धशतसंख्यानिपरार्धंब्रह्मणःपंचाशद्वर्षंतन्मानेनमानुषदिनसंख्यासंख्याविशेषोवातच्छतसंख्यानिपरार्धशतसंख्यानि ॥ २५ ॥ तिष्येकलौ ॥ २६ ॥ गणनेति ॥ हेगौरिममभक्तजनैरिहकाश्यांयानिलिंगानिप्रतिष्ठितानितेषांगणनाअंतोनास्ति ॥ उपसंहरति ॥ अतस्तेषांसंख्यानविद्यतेइति ॥ गणनादिवसादर्वागिति ॥ यस्मिन्दिवसेमयागणनाकृतातस्माद्दिव

भग्नान्यंपिचकालेनतानिपूज्यानिसुंदरि ॥ परार्धशतसंख्यानिगणितान्येकदामया ॥ २५ ॥ गंगांभस्यपितिष्ठंतिषष्टिकोटिमितानिहि ॥ सिद्धलिंगानितानीशेतिष्येऽदृश्यत्वमाययुः ॥ २६ ॥ गणनादिवसादर्वाङ्ममभक्तजनैःप्रिये ॥ प्रतिष्ठितानियानीहतेषांसंख्यानविद्यते ॥२७॥ त्वयातुयानिपृष्टानियैरिदंक्षेत्रमुत्तमम् ॥ तानिलिंगानिवक्ष्यामिमुक्तिहेतूनिसुंदरि ॥ २८ ॥ कलावतीवगोप्यानिभविष्यंतिगिरींद्रजे ॥ परंतेषांप्रभावोयःस्वंस्वंस्थानंनहास्यति ॥ २९ ॥ कलिकल्मषपुष्टाययेदुष्टानास्तिकाःशठाः ॥ एतेषांसिद्धलिंगानांज्ञास्यंत्याख्यामपीहन ॥ ३० ॥ नामश्रवणतोपीहयल्लिंगानांशुभानने ॥ वृजिनानिक्षयंयांतिवर्धंतेपुण्यराशयः ॥ ३१ ॥ ओंकारःप्रथमंलिंगंद्वितीयंचत्रिलोचनम् ॥ तृतीयश्चमहादेवःकृत्तिवासाश्चतुर्थकम् ॥ ॥ ३२ ॥ रत्नेशःपंचमंलिंगंषष्ठंचंद्रेश्वराभिधम् ॥ केदारःसप्तमंलिंगंधर्मेशश्चाष्टमंप्रिये ॥ ३३ ॥ वीरेश्वरंचनवमंकामेशंदशमंविदुः ॥ विश्वकर्मेश्वरंलिंगंशुभमेकादशंपरम् ॥ ३४ ॥ द्वादशंमणिकर्णीशमविमुक्तंत्रयोदशम् ॥ चतुर्दशंमहालिंगंममविश्वेश्वराभिधम् ॥ ३५ ॥ प्रियेचतुर्दशैतानिश्रियोहेतूनिसुंदरि ॥ एतेषांसमवायोयंमुक्तिक्षेत्रमिहेरितम् ॥ ३६ ॥ देवताःसमधिष्ठात्र्यःक्षेत्रस्यास्यपराइमाः ॥ आराधिताःप्रयच्छंतिनृभ्योनैःश्रेयसींश्रियम् ॥३७॥ आनंदकाननेमुक्त्यैप्रोक्तान्येतानिसुंदरि ॥ प्रियेचतुर्दशेज्यानिमहालिंगानिदेहिनाम् ॥ ३८ ॥ प्रतिमासंसमारभ्यतिथिंप्रतिपदंशुभाम् ॥ एतेषांलिंगमुख्यानांकार्यायात्राप्रयत्नतः ॥३९॥ अनाराध्यमहादेवमेषुलिंगेषुकुंभज ॥ कःकाश्यांमोक्षमाप्नोतिसत्यंसत्यंपुनःपुनः ॥४०॥ तस्मात्सर्वप्रयत्नेनकाशीफलमभीप्सुभिः ॥ पूज्यान्येतानिलिंगानिभक्त्यापरमयामुने ॥४१॥ ॥ अगस्त्यउवाच ॥ ॥ एतान्येवकिमन्यानिमहालिंगानिषण्मुख ॥ निर्वाणकारणानीहयदिसंतितदावद ॥ ४२ ॥ ॥ स्कंदउवाच ॥ ॥ अन्यान्यपिचसंतीहमहालिंगानिसुव्रत ॥ कलिप्रभावाद्गुप्तानिभविष्यंत्येवतानिवै ॥ ॥ ४३ ॥ यस्येश्वरेसदाभक्तिर्यःकाशीतत्त्ववित्तमः ॥ सएवैतानिलिंगानिवेत्स्यत्यन्योनकश्चन ॥ ४४ ॥ येषांनामग्रहेणापिकलिकल्मषसंक्षयः ॥ अमृतेशस्तारकेशोज्ञानेशःकरुणेश्वरः ॥ ४५ ॥

सादर्वागूर्ध्वमित्यतिरोहितएवार्थः ॥ २७ ॥ २८ ॥ नहास्यतिनत्यक्ष्यति ॥ २९ ॥ पुष्टाःस्थूलाव्याप्तावा ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ समवायःसमाहारोमेलनमितियावत् ॥ ॥ ३६ ॥ नैःश्रेयसींकैवल्याख्याम् ॥ ३७ ॥ देहिनांमुक्त्यैइत्यन्वयः ॥ ३८ ॥ प्रतिमासमित्यर्धंशोक्तिः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ पार्वत्याईश्वरोक्तान्येवान्यानिचतुर्दश

CC-0. In Public Domain. Digitization by eGangotri

लिंगान्याह ॥ अमृतेशइति ॥ ४५ ॥ लांगलःलांगलीश्वरः ॥ ब्रह्मेशलांगलीशौचेतिक्वचित् ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ काशीकोशोऽविमुक्तशरीरम् ॥ सारइतिकचित् ॥ ५० ॥ ५१ ॥ ॥ ५२ ॥ महतीभक्तिर्येषांतेमहाभक्तयस्तेषांकृपावशात् ॥ महाभक्तेतिपाठेस्पष्टएवार्थः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ निरेनसानिष्पापेन ॥ ५७ ॥ ५८ ॥ अग्रजईश्वरस्यमुखद्वारात्प्रथमतो

मोक्षद्वारेश्वरश्चैवस्वर्गद्वारेश्वरस्तथा ॥ ब्रह्मेशोलांगलश्चैववृद्धकालेश्वरस्तथा ॥ ४६ ॥ वृषेशश्चैवचंडीशोनंदिकेशोमहेश्वरः ॥ ज्योतीरूपेश्वरंलिंगंख्यात मत्रचतुर्दशम् ॥ ४७ ॥ काश्यांचतुर्दशैतानिमहालिंगानिसुंदरि ॥ इमानिमुक्तिहेतूनिलिंगान्यानंदकानने ॥ ४८ ॥ कलिकलमषबुद्धीनांनाख्येया निकदाचन ॥ एतान्याराधयेद्यस्तुलिंगानीहचतुर्दश ॥ ४९ ॥ नतस्यपुनरावृत्तिःसंसाराध्वनिकर्हिचित् ॥ काशीकोशोयमतुलोनप्रकाश्योयतस्ततः ॥ ॥ ५० ॥ एतल्लिंगाभिधादेविमहापद्यपिदुःखहृत् ॥ रहस्यंपरमंचैतत्क्षेत्रस्यास्यवरानने ॥ ५१ ॥ चतुर्दशापिलिंगानिमत्सान्निध्यकराणिहि ॥ अवि मुक्तस्यहृदयमेतदेवगिरींद्रजे ॥ ५२ ॥ इमानियानिलिंगानिसर्वेषांमुक्तिदानिहि ॥ एकैकभुवनस्येहसारमादायसर्वतः ॥ मयैतानिकृतान्येवमहाभ क्तिकृपावशात् ॥ ५३ ॥ अस्मिन्क्षेत्रेध्रुवंमुक्तिरितियाप्रथितिःप्रिये ॥ कारणंतत्रलिंगानिममैतानिचतुर्दश ॥५४॥ तएवव्रतिनःकांतेतएवचतपस्विनः॥ ध्यातान्येतानियैर्भक्तैर्लिंगान्यानंदकानने ॥५५॥ तएवाभ्यस्तसद्योगादत्तदानास्तएवहि ॥ काश्यामिमानिलिंगानियैर्दृष्टान्यपिदूरतः ॥ ५६॥ इष्टापूर्ता श्रयेधर्माःप्रणीतामुनिसत्तमैः ॥ तेसर्वैतेनविहितायावज्जीवंनिरेनसा ॥ ५७ ॥ येनाविमुक्तमासाद्यमहालिंगानिपार्वति ॥ सकृदभ्यर्चितानीहसमुक्तो नात्रसंशयः ॥ ५८ ॥ ॥ स्कंदउवाच ॥ ॥ अन्यान्यपिचविंध्यारेदेव्यैप्रोक्तानिशंभुना ॥ स्वभक्तानांहितार्थायतान्यथाकर्णयाग्रज ॥ ५९ ॥ शैलेशःसंगमेशश्चस्वर्लीनोमध्यमेश्वरः ॥ हिरण्यगर्भईशानोगोप्रेक्षोवृषभध्वजः ॥ ६० ॥ उपशांतशिवोज्येष्ठोनिवासेश्वरएवच ॥ शुक्रेशोव्याघ्रलिंगं चजंबुकेशंचतुर्दशम् ॥ ६१ ॥ मुनेचतुर्दशैतानिमहांत्यायतनानिवै ॥ एतेषामपिसेवातोनरोमोक्षमवाप्नुयात् ॥ ६२ ॥ चैत्रकृष्णप्रतिपदंसमारभ्यप्रय ततः ॥ आचतुर्दशिपूज्यानिलिंगान्येतानिसत्तमैः ॥ ६३ ॥ एतेषांवार्षिकीयात्रासुमहोत्सवपूर्वकम् ॥ कार्यामुमुक्षुभिःसम्यक्क्षेत्रसंसिद्धिदायिनी ॥ ॥ ६४ ॥ मुनेचतुर्दशैतानिमहालिंगानियत्नतः ॥ दृष्ट्वानजायतेजंतुःसंसारेदुःखसागरे ॥६५॥ क्षेत्रस्यपरमंतत्त्वमेतदेवप्रियेध्रुवम् ॥ संसाररोगग्रस्ताना मिदमेवमहौषधम् ॥ ६६ ॥ क्षेत्रस्योपनिषच्चैषामुक्तिबीजमिदंपरम् ॥ कर्मकाननदावाग्निरेषालिंगावलिःप्रिये ॥ ६७ ॥

जातः ॥ द्विजेतिवापाठः ॥ ५९ ॥ महायतनानितृतीयचतुर्दशलिंगान्याह ॥ शैलेशइति ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ उपनिषद्रहस्यम् ॥ लिंगावलिर्लिंगपंक्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समूहइत्यर्थः ॥ ६७ ॥ ६८ ॥ ६९ ॥ उक्तानुवादपूर्वकंप्रत्येकंसर्वलिंगानांमहिमानंपृच्छति ॥ रहस्यमिति ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ आराधिआराधितःपूजितः ॥७४ ॥ विधायकृत्वा ॥ ॥ ७५ ॥ तपःकरणसमयेपर्णमपिनभक्षितमित्यपर्णा ॥ तदुक्तम् ॥ स्वयंविशीर्णद्रुमपर्णवृत्तितापराहिकाष्ठातपसस्तयापुनः ॥ तदप्यपाकीर्णमतःप्रियंवदांवदंत्यपर्णामितितांपुराविदइति ॥ तस्याः संबोधनमपर्णेइति ॥ अनेनतवैतत्कथाश्रवणेधिकारोस्तीतिसूचयति ॥ ७६ ॥ परंतपइत्यन्वयः ॥ परंसमाधिमितिवा ॥ ७७ ॥ पुरोऽग्रतः ॥ विद्योतितहरिन्मुखंप्रकाशितदिक्समूहम् ॥ यदाहामरः ॥ दिशस्तुककुभःकाष्ठाआशाश्चहरितश्चताइति ॥ ७८ ॥ किंतज्ज्योतिरित्यतआह ॥ यदंतरिति ॥ अंतरंतःकरणे ॥ आविःप्रकटम् ॥ निर्व्याजेनफलाभिसंधिरहितेनसजातीयविजातीय प्रत्ययशून्येनेतिवा ॥ ७९ ॥ नन्वसंप्रज्ञातसमाधिस्थस्यब्रह्मणोज्योतिषोवहिःप्राकट्यंदुर्घटमित्याशंक्याह ॥ योभूदिति ॥ स्फुटतोविदारंप्राप्नुवतोभूमिभागाद्यश्चटचटाशब्दोऽभूत्तच्छब्दाद्ब्रह्माक्रमतः

एकैकस्यास्यलिंगस्यमहिमाद्यंतवर्जितः ॥ मयैवज्ञायतेदेविसम्यङ्नान्येनकेनचित् ॥६८॥ इतिश्रुत्वामुनेप्राहदेवीहृष्टतनूरुहा ॥ प्रणम्यदेवमीशानंसर्वज्ञंसर्वदंशिवम् ॥ ६९ ॥ ॥ देव्युवाच ॥ ॥ रहस्यंपरमंकाश्यांयदेतत्समुदीरितम् ॥ तच्छ्रुत्वोत्सुकतांप्राप्तंमनोमेतीववल्लभ ॥ ७० ॥ यदुक्तंलिंगमेकैकंमहासारतरंपरम् ॥ काश्यांपरमनिर्वाणकारणंकारणेश्वर ॥ ७१ ॥ प्रत्येकंमहिमानंमेब्रूह्येषांभुवनेश्वर ॥ चतुर्दशानांलिंगानांश्रवणादघहारिणाम् ॥ ॥ ७२ ॥ ओंकारेशस्यलिंगस्यकथमत्रसमागमः ॥ अतिपुण्यतमात्तस्मात्क्षेत्रादमरकंटकात् ॥ ७३ ॥ किमात्मकोऽयमोंकारोमहिमास्यचकोहर ॥ केनाराधिपुराचैषददावाराधितश्चकिम् ॥ ७४ ॥ मृडानीवाक्सुधामेतांविधायश्रुतिगोचराम् ॥ कथामकथयद्देवओंकारस्यमहाद्भुताम् ॥ ७५ ॥ ॥ देवदेवउवाच ॥ ॥ कथामाकर्णयापर्णेवर्णयामितवाग्रतः ॥ यथोंकारस्यलिंगस्यप्रादुर्भावइहाभवत् ॥७६॥ पुरानंदवनेचात्रब्रह्मणाविश्वयोनिना ॥ तपस्तप्तंमहादेविसमाधिंदधतापरम् ॥ ७७ ॥ पूर्णेयुगसहस्रेऽथभित्त्वापातालसप्तकम् ॥ उदतिष्ठत्पुरोज्योतिर्विद्योतितहरिन्मुखम् ॥ ७८ ॥ यदंतराविरभवन्निर्व्याजेनसमाधिना॥तदेवपरमंधामबहिराविरभूद्विधेः ॥७९॥ योभूच्चटचटाशब्दःस्फुटतोभूमिभागतः॥ तच्छब्दाद्व्यसृजद्द्वेधाःसमाधिंक्रमतोवशी ॥ ॥ ८० ॥ स्रष्टाविसृष्टतद्ध्यानोयावदुन्मील्यलोचने ॥ पुरःपश्येद्ददर्शाग्रेतावदक्षरमादिमम् ॥ ८१ ॥ अकारंसत्त्वसंपन्नमृक्क्षेत्रंसृष्टिपालकम् ॥ नारायणात्मकंसाक्षात्तमःपारेप्रतिष्ठितम् ॥ ८२ ॥ उकारमथतस्याग्रेरजोरूपंयजुर्जनिम् ॥ विधातारंसमस्तस्यस्वाकारमिवबिंबितम् ॥ ८३ ॥

शनैःशनैःसमाधिंत्यक्तवानित्यर्थः ॥ स्फुटितइतिपाठेशब्दविशेषणम् ॥ अत्युत्कटइत्यर्थः ॥ ८०॥ स्रष्टेति ॥ ब्रह्मात्यक्तनिर्गुणब्रह्मध्यानोनेत्रेविकचय्ययावत्पुरःपश्येत्पश्यातितावदाद्दिममादौभवंप्रणवमक्षरंददर्शेत्यर्थः ॥ तथाचश्रीभागवते ॥ ततोभूत्त्रिवृदोंकारइति ॥८१॥ प्रणवस्वरूपंकथयंस्तंविशिनष्टि ॥ अकारमितिसार्धत्रयेण ॥ अकारोकारमकारनादबिंद्वात्मकोहिप्रणवस्तत्राकारार्थमाह ॥ अकारमिति ॥ सत्त्वसंपन्नंसत्त्वगुणोपेतम् ॥ ऋक्क्षेत्रमृग्वेदाधिष्ठानंतत्कारणमित्यर्थः ॥ तमःपारेऽज्ञानपारेसब्रह्माददर्शेतितृतीयेनान्वयः ॥ ८२ ॥ उकारार्थमाह ॥ उकारमिति ॥

CC-0. In Public Domain. Digitization by eGangotri

अथानंतरंतस्याग्रेऽकाराग्रेरजोरूपंरजोगुणव्याप्तंयजुर्जनिंयजुर्वेदोत्पत्तिहेतुंस्वाकारंब्रह्मशरीरंविंवितंप्रतिविंवितम् ॥ चिंतितमितिपाठेभावितमित्यर्थः ॥ ८३ ॥ नीरवंनिःशब्दंयद्ध्वांतमंधतमसंतस्य यत्संकेतसदनंसंकेतस्थानंतदाभंतत्तुल्यम् ॥ नीरवदितिपाठेलवणोदधिजलवदित्यर्थः ॥ तथाचहरिवंशे ॥ महतस्तमसःपारइति ॥ तमसस्तमःप्रायक्षारसमुद्रस्येत्यर्थः ॥ मकारार्थमाह ॥ तदग्रतः उकारस्याग्रेतमोगुणेनरूप्यतइतितमोरूपम् ॥ ८४ ॥ नादार्थमाह ॥ अथेति ॥ तत्पुरतोमकाराग्रतः ॥ ध्याताध्यानकर्ता ॥ धातेतिक्वचित् ॥ व्यधादकरोत् ॥ स्वनयनातिथिंस्वनेत्रगोचरम् ॥ ॥ ८५ ॥ विश्वरूपमयाकारंप्रपंचस्वरूपाकृतिः ॥ विश्वरूपमथोंकारमितिपाठेऽथेत्यर्थांतरे ॥ ओंकारमित्यवयवावयविनोरभेदाभिप्रायेण ॥ अनाख्यनादःपरातस्यसदनमाश्रयंकारणमित्यर्थः ॥ तदुक्तम् ॥ वैखरीशब्दनिष्पत्तिर्मध्यमाश्रुतिगोचरा ॥ उद्यतार्थाचपश्यंतीसूक्ष्मावागनपायिनीति ॥ सूक्ष्मापरा ॥ अनपायिन्यनाख्येत्यर्थः ॥ ८६ ॥ शब्दब्रह्मवेदः ॥ विंद्वर्थमाह ॥ अथोपरिष्टा दिति ॥ उपरिष्टादुपरि ॥ परात्प्रधानादेःपरमुत्कृष्टम् ॥ ८७ ॥ तत्कुतइत्यतआह ॥ कारणमिति ॥ कारणानांप्रधानादीनाम् ॥ अतएवजगद्योनिंतंपरम् ॥ विधिर्ब्रह्मा ॥ विलोकयांचक्रेददर्श ॥

नीरवध्वांतसंकेतसदनाभंतदग्रतः ॥ मकारंसददर्शाथतमोरूपंविशेषतः ॥ ८४ ॥ साम्नोयोनिंलयेहेतुंसाक्षाद्रुद्रस्वरूपिणम् ॥ अथतत्पुरतोध्याताव्यधा त्स्वनयनातिथिम् ॥ ८५ ॥ विश्वरूपमयाकारंसगुणंवापिनिर्गुणम् ॥ अनाख्यनादसदनंपरमानंदविग्रहम् ॥८६॥ शब्दब्रह्मेतियत्ख्यातंसर्ववाङ्मयका रणम् ॥ अथोपरिष्टान्नादस्यबिंदुरूपंपरात्परम् ॥ ८७ ॥ कारणंकारणानांचजगद्योनिंचतंपरम् ॥ विधिर्विलोकयांचक्रेतपसागोचरीकृतम् ॥ ८८ ॥ अवनादोमितिख्यातंसर्वस्यास्यप्रभावतः ॥ भक्तमुन्नयतेयस्मात्तदोमितियईरितः ॥ ८९ ॥ अरूपोपिसरूपाढ्यःसधात्रानेत्रगीकृतः ॥ तारयेद्यद्भवांभो धेःस्वजपासक्तमानसम् ॥ ततस्तारइतिख्यातोयस्तंब्रह्माव्यलोकयत् ॥ ९० ॥ प्रणूयतेयतःसर्वैःपरनिर्वाणकामुकैः ॥ सर्वेभ्योभ्यधिकस्तस्मात्प्रणवो यैःप्रकीर्तितः ॥ ९१ ॥ स्वसेवितारंपुरुषंप्रणयेद्यःपरंपदम् ॥ अतस्तंप्रणवंशांतंप्रत्यक्षीकृतवान्विधिः ॥ ९२ ॥ त्रयीमयस्तुरीयोयस्तुर्यातीतोखिला त्मकः ॥ नादबिंदुस्वरूपोयःसप्रैक्षिद्विजगामिना ॥ ९३ ॥ प्रावर्ततयतोवेदाःसांगाःसर्वस्ययोनयः ॥ सवेदादिःपद्मभुवापुरस्तादवलोकितः ॥ ९४ ॥ वृषभोयस्त्रिधाबद्धोरोरवीतिमहोमयः ॥ सनेत्रविषयीचक्रेपरमःपरमेष्ठिना ॥ ९५ ॥

जगदासिंचकमितिपाठेजगदासिंचतिपालयतीतितथातम् ॥ ८८ ॥ एवमवयवार्थनिरूपणेनैवावयविनमोंकारंनिरूप्यओंनामद्विधानिर्वक्ति ॥ अवनादितिसार्धेन ॥ ८९ ॥ नेत्रगीकृतश्चक्षुर्विषयीकृतः ॥ तारनामनिर्वक्ति॥तारयेदिति ॥ ९० ॥ प्रणवनामद्विधानिर्वक्तिप्रणूयतइतिद्वाभ्याम् ॥ प्रणूयतेप्रकर्षेणस्तूयते ॥ प्रणयेत्प्रापयेत् ॥ ९१ ॥ ९२ ॥ त्रयीमयोवेदत्रयात्मकोब्रह्मविष्णुरुद्रात्मकोवा ॥ असंगोनिर्विकारः ॥ परात्मातुरीयः ॥ तदुक्तम् ॥ अहंभावानहंभावौत्यक्त्वासदसतीतथा ॥ यदसक्तंसमंस्वच्छंस्थितंतत्तुर्यमुच्यतेइति ॥ वस्तुतस्तुरीयातीतः ॥ अविद्योपहितविश्वाद्यपेक्षयातुरीय त्वस्यकल्पितत्वात् ॥ माययाऽखिलात्मकः ॥ प्रैक्षिप्रेक्षितोदृष्टइतियावत् ॥ द्विजोऽत्रहंसस्तद्गामिनाब्रह्मणेत्यर्थः ॥ ९३ ॥ सांगाःषड्भिःशिक्षाकल्पव्याकरणनिरुक्तच्छंदोज्योतिर्भिरंगैःसहिताः ॥ ॥ ९४ ॥ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहादेवोमर्त्यांआविवेशेतिश्रुत्युक्तोमहेशोब्रह्मणादृष्टइत्याह वृषभोयइतिद्वयेन ॥ योवृषभोमंत्रोक्तोयज्ञरूपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुरितियावत् ॥ त्रिधाबद्धोमंत्रब्राह्मणकल्पैःसंबद्धइत्यर्थः ॥ रोरवीतिपुनःपुनरत्यर्थंवारौतीत्यर्थः ॥ रोरवणंनामसवनक्रमेणऋग्भिर्यजुर्भिःसामभिः ॥ यदेनमृग्भिःशंसंतियजुर्भिर्यजंतिसामभिः स्तुवंतीति॥महोमयस्तेजोरूपः ॥ ९५ ॥ शृंगाःशृंगाणिचत्वारिऋग्यजुःसामाथर्वरूपाणि ॥ हस्तासोहस्ताः ॥ सप्तहस्ताःसप्तछंदांसि ॥ द्वेशीर्षेप्रायणीयोदयनीये ॥ त्रयःपादास्त्रीणिसवनानि ॥ एवं भूतोदेवःसब्रह्मणाऐक्षतेतिद्वयोरन्वयः ॥ ९६ ॥ जगदभिन्नोपादानंब्रह्मब्रह्मणादृष्टमित्याह ॥ यदंतरिति ॥ पुनर्भूयोपिलयादिप्रवाहस्यानादित्वात् ॥ तद्बीजंतस्याऽखिलस्यभूतादेःकारणम् ॥ स्वयंतुबीजरहितम् ॥ ९७ ॥ लिंगनामनिर्वचनपूर्वकंलिंगशब्दाभिधेयंब्रह्मब्रह्मणादृष्टमित्याह ॥ लीनमिति ॥ ९८ ॥ पंचार्थाःअस्तिभातिप्रियंरूपंनामचेत्येवंरूपाः ॥ अस्थिभातिप्रियंरूपंनामचे त्यर्थपंचकमित्युक्तेः ॥ चत्वारोवेदाइतिहासपुराणानिचेतिपंचब्रह्माणि ॥ इतिहासपुराणानिपंचमोवेदउच्यतइत्युक्तेः ॥ रामलक्ष्मणभरतशत्रुघ्नाजानकीचेत्येवंरूपाणिवासुदेवसंकर्षणप्रद्युम्नानिरुद्धा रुक्मिणीचेत्येवंरूपाणिवातन्मयंतत्स्वरूपम् ॥ अःआदिर्येषांपंचानामितितद्गुणसंविज्ञानोबहुव्रीहिः ॥ अकारोकारमकारार्धमात्राबिंदुनादाइतिसमासार्थः ॥ तन्मयंतत्स्वरूपम् ॥ तथाचश्रुतिः ॥ अकारःप्रथमाक्षरोभवत्युकारोहिद्वितीयाक्षरोभवतिमकारस्तृतीयाक्षरोभवत्यर्धमात्रश्चतुर्थाक्षरोभवतिबिंदुःपंचमाक्षरोभवतिनादःषष्ठाक्षरोभवतीति ॥ निरैक्षिनितरांदृष्टमित्यर्थः ॥ ९९ ॥ पंचाक्षरंपंचा

शृंगाश्चत्वारियस्यासन्हस्तासःसप्तएवच ॥ द्वेशीर्षेचत्रयःपादाःसदेवोविधिनैक्षत ॥ ९६ ॥ यदंतर्लीनमखिलंभूतंभाविभवत्पुनः ॥ तद्बीजंबीजरहितंद्रुहिणेनविलोकितम् ॥ ९७ ॥ लीनंमृग्येतयत्रैतदाब्रह्मस्तंबभाजनम् ॥ अतःसभाज्यतेसद्भिर्यल्लिंगंतद्विलोकितम् ॥९८॥ पंचार्थायत्रभासंतेपंचब्रह्ममयंहियत् ॥ आदिपंचस्वरूपंयन्निरैक्षिब्रह्मणाहितत् ॥ ९९ ॥ तमालोक्यततोवेधालिंगरूपिणमीश्वरम् ॥ पंचाक्षरंप्रपंचाच्चभिन्नंतुष्टावशंकरम् ॥ १०० ॥

ब्रह्मोवाच ॥ ॥ नमओंकाररूपायनमोऽक्षरवपुर्धृते ॥ नमोऽकारादिवर्णानांप्रभवायसदाशिव ॥ १ ॥ अकारस्त्वमुकारस्त्वंमकारस्त्वमनाकृते ॥ ऋग्यजुःसामरूपायरूपातीतायतेनमः ॥ २ ॥ नमोनादात्मनेतुभ्यंनमोबिंदुकलात्मने ॥ अलिंगलिंगरूपायसर्वरूपस्वरूपिणे ॥ ३ ॥ नमस्तेधामनिधयेनिधनादिविवर्जित ॥ नमोभवायरुद्रायशर्वायचनमोस्तुते ॥ ४ ॥

क्षरात्मकम् ॥ तदुक्तमत्रैव ॥ अश्चउश्चमकारश्चनादोबिंदुश्चपंचमः ॥ पंचात्मकंपरंब्रह्मनित्यंयत्रप्रकाशतइति ॥ १०० ॥ चत्वारिंशतपद्यवृंदैरोंकारंजगदीश्वरम् ॥ तुष्टावात्याहृतःसम्यग्वेदगर्भोविदां वरः ॥१॥ समाधित्यागानंतरंयादृग्रूपंदृष्टंप्रथमंतदेवनमति॥नमओंकाररूपायेति ॥ प्रणवरूपत्वेनैवतत्प्रभवाकाराद्यक्षरधारकत्वमाह ॥ नमोऽक्षरेति ॥ अकारादिस्वरूपंकारणत्वेनस्वास्मिन्धारयतीतितथा तस्मैओंकारप्रभवावेदाओंकारप्रभवाःस्वराइतिस्मृतेः ॥ कूटस्थवपुर्धृतइतिवा एतच्चाक्षरस्याप्युपलक्षणम् ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यतइतिस्मृतेः ॥ अकारादिवपुर्धृत्त्वमेवस्पष्टयन्नमति ॥ नमोऽकारादीति ॥ १ ॥ ओंकाररूपत्वंस्पष्टयन्स्तौति ॥ अकारस्त्वमिति ॥ वस्तुतोऽनाकृतेआकाररहित ॥ ऋग्यजुःसाम्नांरूपंस्वरूपंयस्मात्तस्मै ॥ पाठांतरेतत्समुदायात्मकायेत्यर्थः ॥ निःश्वसितमे तदृग्वेदोयजुर्वेदःसामवेदइतिश्रुतेः ॥ वस्तुतोरूपातीताय ॥ २ ॥ नादात्मनेपरापश्यंतीमध्यमावैखर्याख्यायेत्यर्थः ॥ बिंदुकलात्मनेबिंद्वंशरूपायेत्यर्थः ॥ अखिलात्मकत्वेनस्तौति अलिंगे त्यादिना ॥ अलिंगलिंगरूपायादृश्यदृश्यरूपाय ॥ अतएवसर्वरूपस्वरूपिणे ॥ पाठांतरेलिंगंशिवलिंगम् ॥ ३ ॥ धामतेजःसत्त्वंवातस्यनिधयेआश्रयाय ॥ निधनादीत्यत्रादिपदेनजायतेऽस्तिवर्धते

CC-0. In Public Domain. Digitization by eGangotri

विपरिणमतेऽपक्षीयतइतिपंचविकाराग्रह्यंते ॥ ४ ॥ पशूनांजीवानाम् ॥ तारःप्रणवः ॥ उत्कटइतिवा ॥ तदासर्वेभ्यउत्कृष्टायेत्यर्थः ॥ सम्यक्संभवत्यस्मादितिसंभवस्तस्मैसर्वकारणाये त्यर्थः ॥ शंभवायेतिपाठेशंभवइत्यर्थः ॥ तथाचश्रुतिः ॥ नमःशंभवायचमयोभवायचनमःशंकरायचमयस्करायचेति ॥ ५ ॥ अमायायशुद्धाय ॥ शिवतरायपरममंगलाय ॥ मंगलानांचमंगल मितिस्मृतेः ॥ कपर्दिनेजटाजूटधारिणे ॥ शितिकंठनीलग्रीव ॥ ६ ॥ मीढुष्टमायफलसेक्तॄणांमध्येश्रेष्ठाय ॥ शिपिःपशुःतेषुप्रविशतितिष्ठतियज्ञरूपेणेतिशिपिविष्टस्तस्मै ॥ तथाचश्रुतिः ॥ यज्ञोवैविष्णुः पशवःशिपिः यज्ञएवपशुषुप्रतितिष्ठतीतिं ॥ शिपयोरश्मयस्तेषुनिविष्टायेतिवा ॥ शैत्याच्छयनयोगाच्चशीतिवारिप्रचक्षते ॥ तत्पानाद्रक्षणाच्चैवशिपयोरश्मयोमताः ॥ तेषुप्रवेशाद्विश्वेशः शिपिविष्टइहोच्यतइतिवचनात् ॥ अह्रस्वायदीर्घाय ॥ खर्वायह्रस्वाय ॥ बृहतेस्थूलाय ॥ ७ ॥ कुमारगुरवेस्कंदजनयित्रे ॥ श्वेतायशुक्लाय ॥ कृष्णायनीलाय ॥ पीतायहरिद्राय ॥ अरुणमूर्त येईषल्लोहितरूपायेत्यर्थः ॥ अव्यक्तरागवर्णायेतिवा ॥ ८ ॥ धूम्रवर्णायकृष्णलोहितरूपाय ॥ पिंगायकपिलवर्णाय ॥ किर्मीरवर्चसेकर्बुरवर्णाय ॥ पाटलवर्णायश्वेतरक्तवर्णाय ॥ शुक्लपीतामि

नमउग्रायभीमायपशूनांपतयेनमः ॥ नमस्तारस्वरूपायसंभवायनमोस्तुते ॥ ५ ॥ अमायायनमस्तुभ्यंनमःशिवतरायते ॥ कपर्दिनेनमस्तुभ्यंशिति कंठनमोस्तुते ॥ ६ ॥ मीढुष्टमायगिरिशशिपिविष्टायतेनमः ॥ नमोऽह्रस्वायखर्वायबृहतेवृद्धरूपिणे ॥ ७ ॥ कुमारगुरवेतुभ्यंकुमारवपुषेनमः ॥ नमः श्वेतायकृष्णायपीतायारुणमूर्तये ॥ ८ ॥ धूम्रवर्णायपिंगायनमःकिर्मीरवर्चसे ॥ नमःपाटलवर्णायनमोहरिततेजसे ॥ ९ ॥ नानावर्णस्वरूपायवर्णा नांपतयेनमः ॥ नमस्तेस्वररूपायनमोव्यंजनरूपिणे ॥ ११० ॥ उदात्तायानुदात्तायस्वरितायनमोनमः ॥ ह्रस्वदीर्घप्लुतेशायसविसर्गायतेनमः ॥ ॥ ११ ॥ अनुस्वारस्वरूपायनमस्तेसानुनासिक ॥ नमोनिरनुनासायदंत्यतालव्यरूपिणे ॥ १२ ॥ ओष्ठ्योरस्यस्वरूपायनमऊष्मस्वरूपिणे ॥ अंतस्थायनमस्तुभ्यंपंचमायपिनाकिने ॥ १३ ॥ निषादायनमस्तुभ्यंनिषादपतयेनमः ॥ वीणावेणुमृदंगादिवाद्यरूपायतेनमः ॥ १४ ॥

श्रितवर्णायेत्यर्थः ॥ हरिततेजसेपालाशवर्णाय ॥ ९ ॥ नानावर्णस्वरूपायउक्तशुक्लादिवर्णरूपायेत्यर्थः ॥ ब्राह्मणादिवर्णस्वरूपायेतिवा ॥ वर्णानांपतयेतेषामेवनियंत्रे ॥ स्वराअकारादिचतुर्दश ॥ व्यंजनानिकादीनिहकारपर्यंतानि ॥ ११० ॥ ऊर्ध्वमादत्तइत्युदात्तस्तद्विपरीतमादत्तइत्यनुदात्तस्तयोःसमाहारःस्वरितस्तद्रूपाय ॥ ह्रस्वाःअइउऋऌइतिपंच ॥ दीर्घाआईऊॠॡइतिपंच ॥ प्लुतादूराह्वानेगानेलोकप्रसिद्धास्तत्रितयेशायह्रस्वादिनियंत्रे ॥ विसर्गेणसहवर्ततइतिसविसर्गोवर्णविशेषस्तद्रूपाय ॥ ११ ॥ अनुस्वारस्वरूपायबिंद्वात्मकाय ॥ सानुनासिकअनुनासिकैर्ञमङणनमैः सहवर्तमानहेतुरूपेत्यर्थः ॥ निरनुनासायतद्रूपायेत्यर्थः ॥ ऌवर्णतवर्गलसादंत्याः ॥ इवर्णचवर्गयशास्तालव्यास्तद्रूपिणे ॥ १२ ॥ ओष्ठेभवाओष्ठ्याउवर्णपवर्गोपध्मानीयाःउरसिभवाउरस्यास्तत्तद्वर्ण रूपायेत्यर्थः ॥ ऊष्माणःशषसहास्तत्स्वरूपिणे ॥ अंतस्थायरलवास्तस्मैतद्रूपायेत्यर्थः ॥ परपुरुषब्रह्मविष्णुचतुष्टयापेक्षयापंचमायश्रीरुद्रायपंचमाख्यस्वररूपायेतिवा ॥ पिनाकिनेआजगवापरपर्या यधनुर्धारिणे ॥ १३ ॥ निषादायनिषादाख्यस्वररूपाय ॥ यदाहामरः ॥ निषादर्षभेति ॥ यद्वा निषादायश्वपचाय ॥ तेषांपतयेस्वामिने ॥ शृंगवेरपुरनिवासिनेश्रीराममित्रायगुहायेतिवा ॥

१ नैषाव्याख्यामनोरमा, अर्जुनयुद्धेकिरातेश्वरायेतिसमीचीनाचिन्तनीयाचेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृदंगादीत्यादिशब्देनडमरुप्रभृतयोगृह्यंते ॥ १४ ॥ तारायात्युच्चध्वनिरूपाय ॥ यदाहामरस्तारोत्युच्चइति ॥ मंद्रायगंभीरशब्दरूपाय ॥ पापिनांघोरायभयंकराय ॥ तद्विपरीतानामघोरायअघा
राख्यमंत्ररूपायेतिवा ॥ तानायअतिलंबस्वरूपाय ॥ तदुक्तम् ॥ तानाएकोनपंचाशदिति ॥ मूर्च्छनापतयेतदालापप्रवर्तयित्रे ॥ तदुक्तम् ॥ मूर्च्छनास्त्वेकविंशतिरिति ॥ १९ ॥ स्थायिसंचारि
भेदेनस्थावरजंगमभेदेन ॥ यद्वा स्थायिसंचारिभेदौसंगीतशास्त्रेप्रसिद्धौतयोर्भेदेनभावस्वरूपिणे पदार्थरूपिणे ॥ तालप्रियायकालक्रियामानप्रियाय ॥ यदाहामरः ॥ तालःकालक्रियामानमिति ॥
करपुटादिक्रियमाणवाद्यप्रियायेतिवा ॥ तालायतत्स्वरूपाय ॥ लास्यतांडवजन्मनेलास्यतांडवयोर्नर्तनविशेषयोःकारणाय ॥१६॥ तौर्यत्रिकंनृत्यगीतवाद्यंतत्स्वरूपाय ॥ तदेवतौर्यत्रिकंमहत्प्रियंयस्य

नमस्तारायमंद्रायघोरायाघोरमूर्तये ॥ नमस्तानस्वरूपायमूर्च्छनापतयेनमः ॥ १९ ॥ स्थायिसंचारिभेदेननमोभावस्वरूपिणे ॥ तालप्रियायतालाय
लास्यतांडवजन्मने ॥ १६ ॥ तौर्यत्रिकस्वरूपायतौर्यत्रिकमहाप्रिय ॥ तौर्यत्रिककृतांभक्त्यानिर्वाणश्रीप्रदायक ॥१७॥ स्थूलसूक्ष्मस्वरूपायदृश्याद्दृ
श्यस्वरूपिणे ॥ अर्वाचीनायचनमःपराचीनायतेनमः ॥ १८ ॥ वाक्प्रपंचस्वरूपायवाक्प्रपंचपरायच ॥ एकायानेकभेदायसदसत्पतयेनमः ॥१९॥
शब्दब्रह्मनमस्तुभ्यंपरब्रह्मनमोस्तुते ॥ नमोवेदांतवेद्यायवेदानांपतयेनमः ॥ १२० ॥ नमोवेदस्वरूपायवेदगोचरमूर्तये ॥ पार्वतीशनमस्तुभ्यंजगदी
शनमोस्तुते ॥ २१ ॥ नमस्तेदेवदेवेशदेवादिव्यपदप्रद ॥ शंकरायनमस्तुभ्यंनमस्तुभ्यंमहेश्वर ॥ २२ ॥ नमस्तेजगदानंदनमस्तेशशिशेखर ॥ मृत्युं
जयनमस्तुभ्यंनमस्तेत्र्यंबकायच ॥ २३ ॥ नमःपिनाकहस्तायत्रिशूलायुधधारिणे ॥ नमस्त्रिपुरहंत्रेचनमोंधकनिषूदन ॥ २४ ॥ कंदर्पदर्पदलननमो
जालंधरारये ॥ कालायकालकालायकालकूटविषादिने ॥ २५ ॥ विषादहंत्रेभक्तानामभक्तैकविषादद ॥ ज्ञानायज्ञानरूपायसर्वज्ञायनमोऽस्तुते ॥
॥ २६ ॥ योगसिद्धिप्रदोसित्वंयोगिनांयोगसत्तम ॥ तपसांफलदोसित्वंतपस्विभ्यस्तपोधन ॥ २७ ॥

सतथातत्संबोधनंतौर्यत्रिकमहाप्रिय ॥ यदाहामरएतदेवेति ॥ निर्वाणश्रीःकैवल्यलक्ष्मीः ॥१७॥ स्थूलसूक्ष्मेकार्यकारणे ॥ दृश्यंपृथिव्यप्तेजःअदृश्यंवाय्वाकाशंतत्स्वरूपिणेभावाभावरूपिणेइतिवा ॥
अर्वाचीनायइदानींतनाय ॥ पराचीनायप्राक्कालीनाय ॥१८॥ वाक्प्रपंचःशब्दविस्तरः ॥ परायकारणाय ॥ वस्तुतएकाय ॥ माययाऽनेकप्रकाराय ॥ सदसत्पतयेकार्यकारणनियंत्रे ॥१९॥ शब्दब्रह्म
वेदः ॥ वेदांतवेद्यायवेदैकगोचराय ॥ तंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः ॥ पतयेनियंत्रे ॥ १२० ॥ वेदगोचरमूर्तयेवेदनंवेदःस्वप्रकाशश्चिद्धातुस्तद्विषयरूपाय ॥ २१ ॥ २२॥२३॥२४॥ कालंकाल
यतीतिकालकालः ॥ सकालकालःकालाग्निकालमूषिकभक्षकः॥कालोपिकाल्यतेऽनेनेत्यादिश्रुतिस्मृतिभ्यः॥कालकूटाख्यंयद्विषंतद्भक्षिणे ॥२५॥ ज्ञायतेनेनेतिज्ञानंतस्मैसाधनायेत्यर्थः ॥२६॥२७॥

॥ २८ ॥ २९ ॥ १३० ॥ ३१ ॥ नीरजस्कंपदंकैवल्यम् ॥ ३२ ॥ पितृवनंश्मशानम् ॥ ३३ ॥ कृतांतकृतांतकोयमस्यापियमइत्यर्थः ॥ कालाग्निरुद्रःसंकर्षणमुखाग्निः ॥ संवर्तःप्रलयः ॥ ३४ ॥ पुंप्रकृतिरूपाभ्यांपुरुषप्रधानरूपाभ्याम् ॥ अक्षिपक्ष्मणोनेत्रावरकस्यसमुत्क्षेपादुन्मेषात ॥ ३९ ॥ ननुकपालस्रग्विणोमेकिमियमतिस्तुतिःक्रियतेतत्राह ॥ कपालेति ॥ खेलः

त्वमेवमंत्ररूपोसिमंत्राणांफलदोभवान् ॥ महादानफलंत्वंवैमहादानप्रदोभवान् ॥ २८ ॥ महायज्ञस्त्वमेवेशमहायज्ञफलप्रद ॥ त्वंसर्वःसर्वगस्त्वंवैसर्वदः सर्वदृग्भवान् ॥ २९ ॥ सर्वभुक्सर्वकर्तात्वंसर्वसंहारकारक ॥ योगिनांहृदयाकाशकृतालयनमोस्तुते ॥ १३० ॥ त्वमेवविष्णुरूपेणशंखचक्रगदाधर ॥ त्रिलोकींत्रायसेत्रातःसत्त्वमूर्तेनमोस्तुते ॥ ३१ ॥ त्वमेवविद्धास्येतद्विधिर्भूत्वाविधानवित् ॥ रजोरूपंसमालंब्यनीरजस्कपदप्रद ॥ ३२ ॥ त्वमेवहि महारुद्रस्त्वंमहोग्रोभुजंगभृत् ॥ त्वमेवहिमहाभीमोमहापितृवनेचर ॥ ३३ ॥ तामसींतनुमाश्रित्यत्वंकृतांतकृतांतक ॥ कालाग्निरुद्रोभूत्वांतेत्वंसंवर्त प्रवर्तकः ॥ ३४ ॥ त्वंपुंप्रकृतिरूपाभ्यांमहदाद्यखिलंजगत् ॥ अक्षिपक्ष्मसमुत्क्षेपात्पुनराविःकरोष्यज ॥३५॥ उन्मेषविनिमेषौतेसर्गासर्गैककारणम् ॥ कपालमालाखेलोयंभवतःस्वैरचारिणः ॥ ३६ ॥ त्वत्कंठेनृकरोटीयंधूर्जटेयाविभासते ॥ सर्वेषामंतदग्धानांसास्फुटंबीजमालिका ॥ ३७ ॥ त्वत्तःसर्व मिदंशंभोत्वयिसर्वंचराचरम् ॥ कस्त्वांस्तोतुंविजानातिपुरावाचामगोचरम् ॥ ३८ ॥ स्तोतात्वंहिस्तुतिस्त्वंहिनित्यंस्तुत्यस्त्वमेवच ॥ वेद्म्यहंनमः शिवायेतिनान्यद्वेद्म्येवकिंचन ॥ ३९ ॥ त्वमेवहिशरण्यंमेत्वमेवहिगतिःपरा ॥ त्वामेवप्रणमामीशनमस्तुभ्यंनमोनमः ॥ १४० ॥ इत्युदीर्यासकृद्वेधाः प्रणनाममहेश्वरम् ॥ प्रणवाख्यंमहालिंगरूपिणंदंडवत्क्षितौ ॥ ४१ ॥ ॥ ईश्वरउवाच ॥ ॥ ततोगिरींद्रतनयेश्रुत्वाब्रह्मस्तुतिंपराम् ॥ परमैश्वर्यसंप त्तिहेतुंतुष्टोहमद्भुतम् ॥ ४२ ॥ अमूर्तोऽहंततोलिंगान्मूर्तिमास्थायशांकरीम् ॥ प्रसन्नोस्मिवरंब्रूहीत्युवाचचतुराननम् ॥ ४३ ॥ चतुर्वक्त्रःसमुत्थायप्रत्यक्षं वीक्ष्यमामथ ॥ पुनर्जयजयेत्युक्त्वाप्रणनामकृतांजलिः ॥ ४४ ॥ आनंदबाष्पसलिलनेत्रोहृष्टतनूरुहः ॥ गद्गदेनस्वरेणाथप्रोवाचजलजासनः ॥ ४५ ॥ ब्रह्मोवाच ॥ ॥ यदिप्रसन्नोदेवेशयदिदेयोवरोमम ॥ तदेतस्मिन्महालिंगेसान्निध्यंतेऽस्तुशंकर ॥ ४६ ॥

क्रीडा ॥ ३६ ॥ नृकरोटीनरशिरोऽस्थि ॥ यदाहामरः ॥ शिरोस्थनिकरोटिःस्त्रीति ॥ अंतःप्रलयः ॥ बीजमज्ञानम् ॥ ३७ ॥ अभिन्ननिमित्तोपादानतामाह ॥ त्वत्तःसर्वमिति ॥ पुरावाचां प्राचांमूर्तिमतांवेदादीनामनादीनां वाचांवेदानामितिसामानाधिकरण्यंवा ॥ ३८ ॥ हिशब्दावेवकारार्थे ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ जलजासनःपद्मासनः ॥ ४५ ॥ ४६ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तैकमुक्तिदंभक्तानामेकांमुख्यांसायुज्यलक्षणांमुक्तिंददातीतितथा ॥ ४७ ॥ विध्युक्तंब्रह्मोक्तम् ॥ ४८ ॥ ४९ ॥ सर्वाम्नायनिधिरखिलवेदाश्रयः ॥१५०॥ ५१ ॥ ५२ ॥ ५३ ॥ पंचायतनंपं चानामकारादीनांतद्वाच्यानांवाब्रह्मविष्णुरुद्रेश्वरसदाशिवानामायतनमाश्रयभूतमीशानंलिंगमित्यर्थः ॥ ५४ ॥ ५५ ॥ ५६ ॥ कपिलोविष्णुः ॥ सिद्धानांकपिलश्चास्मीतिभगवदुक्तेः ॥

अयमेववरोदेयोनान्यंवरमहंवृणे ॥ ओंकारेश्वरनामैतदस्तुभक्तैकमुक्तिदम् ॥ ४७ ॥ ॥ स्कंदउवाच ॥ ॥ विध्युक्तमितिविप्रर्षेसमाकर्ण्यतदेशिता ॥ उवाचवचनंचैतत्तथास्तुचतुराननम् ॥४८॥ वरानन्यानपिविभुःप्रसन्नस्तत्क्षणाद्ददौ॥विधयेदीर्घतपसेतयास्तुत्यातितोषितः ॥४९॥ ॥ ईश्वरउवाच ॥ सुरश्रेष्ठतपःश्रेष्ठसर्वाम्नायनिधिर्भव ॥ सृष्टेःकरणसामर्थ्यंतवास्तुमदनुग्रहात् ॥१५०॥ पितामहस्त्वंसर्वेषांसर्वेषांमान्यभूर्भवान् ॥ त्वत्तपःफलदानार्थंयदेत ल्लिंगमुत्थितम् ॥ ५१ ॥ परमोंकाररूपंचशब्दब्रह्ममयंविधे ॥ अस्याराधनतःपुंसांनदूरंब्रह्मणःपदम् ॥५२॥ अकाराख्यमिदंलिंगमुकाराख्यमिदंपरम् ॥ मकाराह्वयमेतच्चनादाख्यंबिंदुसंज्ञकम् ॥ ५३ ॥ पंचायतनमीशानमित्थमेतदुदीरितम् ॥ मोक्षायसर्वजंतूनामस्मिन्नानंदकानने ॥ ५४ ॥ स्नात्वामत्स्यो दरीतीर्थेविलोक्योंकारमीश्वरम् ॥ नजातुजायतेजंतुर्जननीजठरेक्वचित् ॥ ५५ ॥ एतन्नादेश्वरंलिंगमेतल्लिंगंसुदुर्लभम् ॥ रम्येमत्स्योदरीतीरेदृष्टंस्पृष्टंविमु क्तिदम् ॥ ५६ ॥ यदेतत्कापिलंज्योतिरेतल्लिंगेविलोक्यते ॥ अतस्तुकपिलेशाख्यमेतल्लिंगंसुदुर्लभम् ॥५७॥ मत्स्योदरीयदागंगाकपिलेश्वरसन्निधौ ॥ तदातत्रनरःस्नात्वाब्रह्महत्यांव्यपोहति ॥ ५८ ॥ वरणोत्सिक्तपानीयेद्युनदीतोयमिश्रिते ॥ स्नात्वानादेश्वरंदृष्ट्वानरःकिमनुशोचति ॥ ५९ ॥ अष्टम्यां चचतुर्दश्यांतीर्थानिसहस्रागरैः ॥ षष्टिकोटिसहस्राणिमत्स्योदर्यांविशंतिहि ॥१६०॥ प्रणवेशसमीपेतुयदागंगासमेष्यति ॥ तदापुण्यतमःकालोदेवर्षि पितृवल्लभः ॥ ६१ ॥ तत्रस्नानंजपोदानंहवनंदेवतार्चनम् ॥ मत्स्योदर्यामक्षयंस्यादोंकारेश्वरसन्निधौ ॥ ६२ ॥ ओंकारदर्शनादेववाजिमेधफलंलभेत् ॥ तस्मात्काश्यांप्रयत्नेनदृश्यओंकारईश्वरः ॥ ६३ ॥ दुर्लभंमानवंजन्मचतुर्वर्गैकसाधनम् ॥ जलबुद्बुदवत्तत्स्यान्नादेशोयेननेक्षितः ॥ ६४ ॥ निरीक्ष्यक पिलेशानंस्नात्वामत्स्योदरीजले ॥ कृत्वापिंडप्रदानानिपितॄणामनृणोभवेत् ॥ ६५ ॥ कृत्वापिमोहात्पापानिभूरीण्येवमहांत्यपि ॥ काश्यामोंकारमालो क्यकुतस्त्रस्यतिवैयमात् ॥ ६६ ॥ ओंकारयात्राभिमुखंनरंवीक्ष्यपितामहाः ॥ परिनृत्यंतिमुदिताःस्वसंतानसमुद्भवम् ॥ ६७ ॥ यस्ययस्यचवै नामस्मृत्वास्मृत्वानमस्यति ॥ तंतमुन्नयतेप्राज्ञःपितरंब्रह्मणःपदम् ॥ ६८ ॥ रुद्राणांनियुतंजप्त्वायत्फलंसम्यगाप्यते ॥ तत्फलंलभतेनूनंभक्त्योंकारविलोकनात् ॥ ६९ ॥

तत्संबंधिज्योतिःकापिलंज्योतिः ॥५७॥५८॥५९॥१६०॥६१॥६२॥६३॥ जलबुद्बुदंयथाउत्तिष्ठतितद्वत्तस्यजन्मवृथेत्यर्थः ॥६४॥६५॥६६॥ संतानोवंशः ॥ ६७ ॥६८॥ नियुतंलक्षम् ॥६९॥

॥ ७० ॥ ७१ ॥ विपद्यतेम्रियते ॥ ७२ ॥ ७३ ॥ ७४ ॥ तारतीर्थमोंकारतीर्थम् ॥ ७५ ॥ ७६ ॥ नान्यैरत्रावगम्यतेकिंतुत्वयैवज्ञायतेइत्यर्थः ॥ तत्रहेतुस्त्वत्पुण्येति ॥ त्वत्पुण्योदयत स्तवशुभादृष्टस्योदयात् ॥ ७७ ॥ विधेविधेहीति ॥ अत्रवाराणस्यांस्थित्वाचराचरंविधेहीत्युक्तवान् ॥ सृष्टेःपूर्वमपिकाशीस्थितैवातःप्रलयेपिकाश्यानोनाशइतिपूर्वमुक्तंनविस्मर्तव्यमिति ॥ ७८ ॥ सम्यग्भवत्यस्मात्प्रजेतिसंभूस्तस्मैसंभुवे ॥ ७९ ॥ ब्रह्मस्तवेनब्रह्मप्रतिपादकेनस्वकृतेनवा ॥ १८० ॥ ८१ ॥ १८२ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांत्रिसप्ततितमो

केवलंभूमिभारायजन्मिनोजन्मतस्यवै ॥ येनानंदवनेदृष्टोनोंकारःसर्वकामदः ॥ १७० ॥ एकमोंकारमालोक्यसमस्तेक्षोणिमंडले ॥ लिंगजातानिसर्वा णिदृष्टानिस्युर्नसंशयः ॥ ७१ ॥ प्रणवेशंप्रणम्याथयद्यन्यत्रविपद्यते ॥ स्वर्गलोकमवाप्याथकाश्यांमुक्तिमवाप्नुयात् ॥ ७२ ॥ अस्मिँल्लिंगेसदाब्रह्म न्स्थास्यामीतिविनिश्चितम् ॥ दास्यामिचसदामोक्षमेतल्लिंगार्चकायवै ॥ ७३ ॥ ओंकारंसकृदप्यत्रनरोनत्वाप्रयत्नतः ॥ कृतकृत्योभवेन्नूनंपरमान्मद नुग्रहात् ॥ ७४ ॥ ओंकारपश्चिमेभागेतारतीर्थमनुत्तमम् ॥ कृतोदकक्रियस्तत्रनरस्तरतिदुर्गतिम् ॥ ७५ ॥ ओंकारेशस्ययेभक्ताज्ञेयास्तेनैवमानवाः ॥ मनुष्यचर्मणानद्धास्तेरुद्रामोक्षगामिनः ॥ ७६ ॥ अस्यलिंगस्यमहिमानान्यैरत्रावगम्यते ॥ त्वत्पुण्योदयतोयस्माद्विधेत्राविरभूदिदम् ॥ ७७ ॥ एतल्लिंगप्रभावाच्चसर्वज्ञास्यासितत्त्वतः ॥ विधेविधेहितस्मात्त्वंसर्वमेतच्चराचरम् ॥७८॥ इतिदत्त्वावरंतस्मैब्रह्मणेपद्मसंभुवे॥ तस्मिन्नेवमहालिंगेशंभुर्लीनो बभूवह ॥७९॥ ॥ स्कंदउवाच ॥ ॥ ब्रह्मापिभजतेद्यापितल्लिंगंकलशोद्भव ॥ स्तुवन्ब्रह्मस्तवेनैवस्वात्मनाविहितेनहि ॥१८०॥ ब्रह्मस्तवंजपन्मर्त्यः सर्वैःपापैःप्रमुच्यते ॥ पूर्यतेचमहापुण्यैर्ज्ञानंप्राप्नोतिसत्तमम् ॥ ८१ ॥ ब्रह्मस्तवमिमंजप्त्वात्रिकालंपरिवत्सरम् ॥ अंतकालेभवेज्ज्ञानंयेनबंधात्प्रमुच्यते ॥ ॥ १८२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धओंकारमहिमवर्णनंनामत्रिसप्ततितमोऽध्यायः॥ ७३ ॥

॥ स्कंदउवाच ॥ ॥ शृणुवातापिसंहर्तःकाश्यांपातकतंकिनी ॥ पद्मकल्पेतुयावृत्तादमनस्यद्विजन्मनः ॥१॥ भारद्वाजस्यतनयोदमनोनामनामतः ॥ कृतमौंजीविधिःसोथविद्याजातंप्रगृह्यच ॥ २ ॥ संसारंदुःखबहुलंजीवितंचापिचंचलम् ॥ विज्ञायदमनोविद्वान्निर्जगामगृहान्निजात् ॥ ३ ॥ कांचिद्दिशं समालंब्यनिर्वेदंपरमंगतः ॥ प्रत्याश्रमंप्रतिनगंप्रत्यब्धिप्रतिकाननम् ॥ ४ ॥ प्रतितीर्थंप्रतिनदिसबभ्रामतपोयुतः ॥ यावंत्यायतनानीहतिष्ठंतिपरितो भुवम् ॥५॥ अध्युवाससतावंतिसंयतेंद्रियमानसः ॥ परंनमनसःस्थैर्यंक्वापिप्रापिचतेनवै ॥ ६ ॥ मनोरथोपदेष्टाचकुत्रचित्क्वापिनेक्षितः ॥ कदाचिद्दैवयो गात्सदमनोनामतापसः ॥७॥ रेवातटेनिरैक्षिष्टतीर्थंचामरकंटकम् ॥ महदायतनंपुण्यमोंकारस्यापितत्रवै ॥८॥ दृष्ट्वाहृष्टमनाआसीच्चेतःस्थैर्यमवापह ॥ अथपाशुपतांस्तत्रसनिरीक्ष्यतपोधनान् ॥ ९ ॥

ऽध्यायः ॥७३॥ ॥छ॥ ॥ अध्यायेसप्ततितमेचतुर्भिरधिकेतथा ॥ पुनरोंकारमाहात्म्यंवर्ण्यतेथसविस्तरम् ॥ १ ॥ विस्तरेणोंकारमाहात्म्यंप्रवक्तुमितिहासंप्रस्तावयति ॥ शृण्विति ॥ दमनस्य यावृत्ताकथेतिशेषः ॥ तांशृण्वित्यर्थः ॥ कीदृशीकथेत्यत्राह ॥ महापातकस्यतंकिनीनाशिनी ॥ १ ॥ २ ॥ ३ ॥ प्रत्यब्धिप्रतिसमुद्रम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ रेवानर्मदा ॥ ८ ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहितप्राणयात्रान्प्राणसंधारणार्थंकृतभैक्षान्भुक्तभैक्षान्नानितियावत् ॥ तथाचमैत्रायणीयश्रुतिः ॥ चतुर्षुवर्णेषुभैक्षंचरेत्पाणिपात्रेणाशनंकुर्यात् ॥ ओषधवत्प्राश्नीयात् ॥ प्राणसंधारणार्थंयथामे
दोवृद्धिर्नजायतइत्यादिः ॥ १० ॥ अचलमानसान्स्थिरचित्तान् ॥ आचार्यस्यगर्गनाम्नः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ भगोःहेपूज्य ॥ १५ ॥ दायादःपुत्रः ॥ १६ ॥ अशिश्रिय
श्रितवानस्मि ॥ १७ ॥ हवनंहोमः ॥ १८ ॥ वह्वनेहसंवहुकालम् ॥ अतिवाहितानीताः ॥ १९ ॥ अध्युषितानिआश्रितानि ॥ २० ॥ रसायनानिधातुप्रयोगाः ॥ सिद्धाध्युषितकंदराः

विभूतिभूषिततनून्कृतलिंगसमर्चनान् ॥ विहितप्राणयात्रांश्चकृतागमविचारणान् ॥ १० ॥ स्वस्थोपविष्टान्स्वगुरोरग्रतोऽचलमानसान् ॥ प्रणम्योपा
विशत्तत्रतदाचार्यस्यसन्निधौ ॥ ११ ॥ प्रबद्धहस्तयुगलःप्रणमत्तरकंधरः ॥ अथपाशुपताचार्योगर्गोनाममहामुनिः ॥ १२ ॥ वार्धकेनसमाक्रांतस्तप
साकृशविग्रहः ॥ शंभोराराधनेनिष्ठःश्रेष्ठःसर्वतपस्विषु ॥१३॥ पप्रच्छदमनंचेतिकस्त्वंकस्मादिहागतः ॥ तरुणोपिविरक्तोसिकुतस्तद्वदसत्तम ॥१४॥
इतिप्रणयपूर्वंसनिशम्यदमनोऽब्रवीत् ॥ भगोःपाशुपताचार्यसर्वज्ञाराधनप्रिय ॥ १५ ॥ कथयामियथार्थंतेनिजचेतोविचेष्टितम् ॥ अहंब्राह्मणदायादो
वेदशास्त्रकृतश्रमः ॥ १६ ॥ संसारासारतांज्ञात्वावानप्रस्थमशिश्रियम् ॥ अनेनैवशरीरेणमहासिद्धिमभीप्सता ॥१७॥ स्नातंबहुषुतीर्थेषुमंत्राजप्तास्तुको
टिशः ॥ देवताःसेविताबह्व्योहवनंचकृतंबहु ॥ १८ ॥ शुश्रूषिताश्चगुरवोबहवोबह्वनेहसम् ॥ महाश्मशानेषुनिशाभूयस्योप्यतिवाहिताः ॥ १९ ॥
शिखराणिगिरींद्राणांमयाचाध्युषितान्यहो ॥ दिव्यौषधिसहस्राणिमयासंसाधितान्यपि ॥२०॥ रसायनानिबहुशःसेवितानिमयापुनः ॥ महासाहसमालं
व्यसिद्धाध्युषितकंदराः ॥ २१ ॥ मयाप्रविष्टाबहुशःकृतांतवदनोपमाः ॥ तपश्चापिमहत्तप्तंबहुभिर्नियमैर्यमैः ॥ २२ ॥ परंकिंचित्क्वचिन्नैक्षिसिद्ध्यं
कुरमपिप्रभो ॥ इदानींत्वामनुप्राप्यमहींपर्यटतामया ॥ २३ ॥ मनसःस्थैर्यमापन्नमिवसंप्राप्तसिद्धिना ॥ अवश्यंत्वन्मुखांभोजाद्यद्वचोनिःसारिष्यति ॥
॥ २४ ॥ तेनैवमहतीसिद्धिर्भवित्रीममनान्यथा ॥ तद्ब्रूहिसूपदेशंचकथंसिद्धिर्भवेन्मम ॥ २५ ॥ अनेनैवशरीरेणपार्थिवेनप्रथीयसी ॥ दमनस्यनि
शम्येतिगर्गाचार्योवचस्तदा ॥ २६ ॥ प्रत्यक्षदृष्टंप्रोवाचमहदाश्चर्यमुत्तमम् ॥ सर्वेषांशृण्वतांतत्रशिष्याणांस्थिरचेतसाम् ॥ मुमुक्षूणांधृतवतांमहापाशुपतं
व्रतम् ॥२७॥ ॥ गर्गउवाच ॥ ॥ अनेनैवहदेहेनयदित्वंसिद्धिकामुकः ॥ शृणुष्वावहितोभूत्वातदातेकथयाम्यहम् ॥२८॥ अविमुक्तेमहाक्षेत्रेसर्वासि
द्धिप्रदेसताम् ॥ धर्मार्थकाममोक्षाख्यरत्नानांपरमाकरे ॥ २९ ॥

सिद्धसेवितदर्यः ॥ २१ ॥ २२ ॥ सिद्ध्यंकुरंसिद्धिकारणम् ॥ अपिरेवार्थेनैक्षीत्यनंतरंद्रष्टव्यः ॥२३॥ संप्राप्तासिद्धिर्येनतेन ॥ शुद्धिनेतिक्वचित् ॥२४॥ यथामनसःस्थैर्यमाप्यतेतथामहतीसिद्धिः
कथंमेभविष्यतितदेतत्सूपदेशंसोपपत्तिकमुपदेशंशोभनंवचनंवाब्रूहिकथयेत्यर्थः ॥२५॥ प्रथीयसीमहत्तरा ॥२६॥२७॥२८॥ अविमुक्तइति ॥ अविमुक्तेसाक्षान्नमयद्वृत्तंतत्कथयामीत्यष्टमेनान्वयः ॥

CC-0. In Public Domain. Digitization by eGangotri

अविमुक्तंविशिनष्टि महाक्षेत्रइत्यक्षरचतुष्टयन्यूनैःसार्धसप्तभिः ॥ सतांसमष्टिव्यष्टिप्राणिमात्राणामाकरेजन्मभूमिरूपसागरे ॥ २९ ॥ सर्वकर्माण्येवशलभाःपतंगास्तेषांप्रदीपाभेप्रदीप्ताग्निसदृशे ॥
अतिप्रसंगंवारयन्केषामित्यपेक्षायामाह ॥ समाश्रितानांसर्वेषांजंतूनामिति ॥ तमस्तोममहाद्विषिअज्ञाननिकरमहाशत्रो ॥ तपस्तोममहात्विषीतिक्वचित् ॥ ३० ॥ कर्माण्येवभूरुहावृक्षास्तेषांदावाग्नौवन
वह्नौ ॥ और्वोवडवानलस्तस्यशोचिषिरोचीरूपे ॥३१॥ दीर्घनिद्राआत्माज्ञानम् ॥ तदुक्तमद्वैतमकरंदे ॥ आत्माज्ञानंमहानिद्राजृंभितेऽस्मिञ्जगन्मये ॥ दीर्घस्वप्नेस्फुरंत्येतेस्वर्गमोक्षादिविभ्रमाइति ॥

समाश्रितानांजंतूनांसर्वेषांसर्वकर्मणाम् ॥ शलभानांप्रदीपाभेतमःस्तोममहाद्विषि ॥ ३० ॥ कर्मभूरुहदावाग्नौसंसाराब्ध्यौर्वशोचिषि ॥ निर्वाणलक्ष्मीक्षीराब्धौसुखसंकेतसद्मनि ॥ ३१ ॥ दीर्घनिद्राप्रसुप्तानांपरमोद्बोधदायिनि ॥ यातायातश्रमापन्नप्राणिमार्गमहीरुहि ॥ ३२ ॥ अनेकजन्मजनितमहापापाद्रिवज्रिणि ॥ नामोच्चारकृतांपुंसांमहाश्रेयोविधायिनि ॥ ३३ ॥ विश्वेशितुःपरेधाम्निसीम्निस्वर्गापवर्गयोः ॥ स्वर्धुनीलोलकल्लोलनित्यक्षालितभूतले ॥ ३४ ॥ एवंविधेमहाक्षेत्रेसर्वदुःखौघहारिणि ॥ प्रत्यक्षंममयद्वृत्तंतद्ब्रवीमिमहामते ॥ ३५ ॥ यत्रकालभयंनास्तियत्रनास्त्येनसोभयम् ॥ तत्क्षेत्रमहिमानंकःसम्यग्वर्णयितुंक्षमः ॥ ३६ ॥ तीर्थानियानिलोकेस्मिञ्जंतूनामघहान्यहो ॥ तानिसर्वाणिशुद्ध्यर्थंकाशीमायांतिनित्यशः ॥ ३७ ॥ अपिकाश्यांवसेद्यस्तुसर्वाशीसर्वविक्रयी ॥ सयांगतिंलभेन्मर्त्योयज्ञैर्दानैर्नसान्यतः ॥ ३८ ॥ रागबीजसमुद्भूतःसंसारविटपोमहान् ॥ दीर्घस्वापकुठारेणच्छिन्नःकाश्यांनवर्धते ॥ ३९ ॥ सर्वेषामूषराणांतुकाशीपरमऊषरः ॥ वप्तुर्बीजमिदंतस्मिन्नुप्तंनैवप्ररोहति ॥ ४० ॥ स्मरिष्यंतीहयेकाशीमवश्यंतेपिसाधवः ॥ तेप्यघौघविनिर्मुक्तायास्यंतिगतिमुत्तमाम् ॥ ४१ ॥ विभूतिःसर्वलोकानांसत्यादीनांसुभंगुरा ॥ अभंगुराविमुक्तस्यसातुलभ्याशिवाज्ञया ॥ ४२ ॥ कृमिकीटपतंगानामविमुक्तेतनुत्यजाम् ॥ विभूतिर्दृश्यतेयासाक्कास्तिब्रह्मांडमंडले ॥ ४३ ॥ वाराणसीयदाप्राप्ताकदाचित्कालपर्ययात् ॥ सउपायोविधातव्योयेननोनिष्क्रमोबहिः ॥ ४४ ॥ पूर्वतोमणिकर्णीशोब्रह्मेशोदक्षिणेस्थितः ॥ पश्चिमेचैवगोकर्णोभारभूतस्तथोत्तरे ॥४५॥

महीरुहिमहीरुहे ॥ अयमेववापाठः ॥३२॥३३॥३४॥ एवंविधेमहाक्षेत्रेइत्यनुवादः ॥३५॥ एनसःपापस्य ॥३६॥३७॥ अन्यतःअन्यत्र ॥ आप्यतइतिवापाठः ॥३८॥ दीर्घस्वापोमरणम् ॥ यद्वा
वहिर्वृत्त्यभावसाम्येनदीर्घस्वापोविश्वेशानुशीलनमसंप्रज्ञातसमाधिरितियावत् ॥ काश्यांदेहपातनिमित्तोमोक्षोवा ॥ ३९ ॥ वप्तुःकर्मरूपस्यबीजस्यवपनकर्तुः ॥ वपुरितिक्वचित् ॥ बीजंकर्मरूपम् ॥ ॥३०५॥
उप्तंनिक्षिप्तंकृतमित्यर्थः ॥ ४० ॥ ४१ ॥ ४२ ॥ विभूतिःसंपात्तिरैश्वर्यंमुक्तिर्वा ॥ ४३ ॥ येनउपायेननिष्क्रमोनिर्गमनम् ॥ काशीतइतिशेषः ॥ ४४ ॥ तत्रावांतरविशेषमाह ॥ पूर्वतोमणिकर्णी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शइतिसार्धेन ॥ ४९ ॥ क्षेत्रमविमुक्तमंतर्गृहंवा ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ रक्षःकाष्ठांनैर्ऋतींदिशम् ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ आनंदगोपकइतिक्वचित् ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥ सहुडुत्कारंहुडुत्कारसहितंयथाभवतितथा ॥ ६०॥६१ ॥ भेकीदर्दुरी ॥ ६२ ॥ निर्माल्यभक्षणादिति ॥ यद्यपिबाणलिंगेस्वयंभूतेप्राणलिंगेहृदिस्थिते ॥ अत्रकोटिगुणं

इत्येतदुक्तमंक्षेत्रमविमुक्तेमहाफलम् ॥ मणिकर्णींह्रदेस्नात्वादृष्ट्वाविश्वेश्वरंविभुम् ॥४६॥ क्षेत्रंप्रदक्षिणीकृत्यराजसूयफलंलभेत् ॥ तत्रश्राद्धप्रदातुश्चमुच्यंतेप्रपितामहाः ॥ ४७ ॥ अविमुक्तसमंक्षेत्रमपिब्रह्मांडगोलके ॥ नविद्यतेक्वचित्सत्यंसत्यंसाधकसिद्धिदम् ॥४८॥ रक्षंतिसततंक्षेत्रंयत्रपाशासिपाणयः ॥ महापारिषदाउग्राःक्रूरेभ्योऽक्रूरबुद्धयः ॥ ४९ ॥ प्राग्द्वारमट्टहासश्चगणकोटिपरीवृतः ॥ रक्षेदहर्निशंक्षेत्रंदुर्वृत्तेभ्योविभीषणः ॥ ५० ॥ तथैवभूतधात्रीशःक्षेत्रदक्षिणरक्षकः ॥ गोकर्णःपश्चिमद्वारंपातिकोटिगणावृतः ॥ ५१ ॥ उदग्द्वारंतथारक्षेद्घंटाकर्णोमहागणः ॥ ऐशंकोणंछागवक्त्रोभीषणोवह्निदिग्दलम् ॥५२॥ रक्षःकाष्ठांशंकुकर्णोद्रमिचंडोमरुद्दिशम् ॥ इत्थंक्षेत्रंसदापांतिगणाएतेऽतिभास्वराः ॥५३॥ कालाक्षोरणभद्रस्तुकौलेयःकालकंपनः ॥ एतेपूर्वेणरक्षंतिगंगापारेस्थितागणाः ॥ ५४ ॥ वीरभद्रोनभश्चैवकर्दमालितविग्रहः ॥ स्थूलकर्णोमहाबाहुरसिपारेव्यवस्थिताः ॥ ५५ ॥ विशालाक्षोमहाभीमःकुंडोदरमहोदरौ ॥ रक्षंतिपश्चिमद्वारंदेहलीदेशसंस्थिताः ॥५६॥ नंदिसेनश्चपंचालःखरपादःकरंटकः ॥ आनंदोगोपकोबभ्रूरक्षंतिवरणातटे ॥ ॥ ५७ ॥ तस्मिन्क्षेत्रेमहापुण्येलिंगमोंकारसंज्ञकम् ॥ तत्रसिद्धिंपरांप्राप्तादेहेनानेनसाधकाः ॥ ५८ ॥ कपिलश्चैवसावर्णिःश्रीकंठःपिंगलोंऽशुमान् ॥ एतेपाशुपताःसिद्धास्तल्लिंगाराधनेनहि ॥ ५९ ॥ एकदातस्यलिंगस्यकृत्वापंचापिपूजनम् ॥ नृत्यंतःसहुडुत्कारंतस्मिँल्लिंगेलयंययुः ॥ ६० ॥ अन्यच्चतेप्रवक्ष्यामितत्रयद्वृत्तमद्भुतम् ॥ निशामयमहाबुद्धेदमनद्विजसत्तम ॥ ६१ ॥ एकाभेकीमुनेतत्रचरंतीलिंगसन्निधौ ॥ प्रदक्षिणंसदाकुर्यान्निर्माल्याक्षतभक्षिणी ॥ ६२ ॥ सातत्रमृत्युंनप्रापशिवनिर्माल्यभक्षणात् ॥ क्षेत्रादन्यत्रमरणंजातंतस्यास्तदेनसः ॥ ६३ ॥ वरंविषमपिप्राश्यंशिवस्वंनैवभक्षयेत् ॥ विषमेकाकिनंहंतिशिवस्वंपुत्रपौत्रकम् ॥ ६४॥ शिवस्वपरिपुष्टांगाःस्पर्शनीयानसाधुभिः ॥ तेनकर्मविपाकेनततस्तेरौरवौकसः ॥६५॥ कश्चित्काकःसमालोक्यमंडकींतामितस्ततः ॥ पोप्लूयमानामादायचंच्वाक्षेत्राद्बहिर्गतः ॥ ६६ ॥

पुण्यंशंभोर्नैवेद्यभक्षणमित्यादिवचनात्स्वयंभूलिंगस्यओंकारस्यनैवेद्यभक्षणादनंतमेवपुण्यंतथाप्यस्यालोभाद्भक्षितत्वान्मनाक्पापमेवसंवृत्तमितिज्ञातव्यम्॥तदेनसस्तत्पापात् ॥ ६३ ॥ प्रसंगाद्बाणलिंगादिव्यतिरिक्तशिवनिर्माल्यभक्षणदोषमाह वरमितिद्वाभ्याम् ॥ ६४ ॥ ततस्तदनंतरम् ॥ यतइतिक्वचित् ॥ विपाकेनफलेन ॥ रौरवोनरकविशेषःसओकोयेषांतेतथा ॥ ६५ ॥ क्षेत्रादन्यत्रमरणे

CC-0. In Public Domain. Digitization by eGangotri

कारणमाह ॥ कश्चिदिति ॥ पोप्लूयमानामतिशयेनगच्छंतीम् ॥ चंच्चातुंडेन ॥ ६६ ॥ वर्षाभ्वीभेकी ॥ ६७ ॥ ६८ ॥ गृध्रोदाक्षाय्यापरपर्यायोमांसाशीपक्षिविशेषस्तन्मुखी ॥ ६९ ॥ सम्यग्गीतरहस्यज्ञत्वमेवाह ॥ सप्तस्वराइति ॥ इतिगीतोपनिषदाएवंप्रकारेणसंगीतरहस्येनगांधर्ववेदेनवासामाधवीनाम्नीसदोंकारमर्चयेदितिचतुर्थेनान्वयः ॥ इतिशब्दोक्तमेवंप्रकारत्वमेवाह ॥ सप्तस्वराः षड्जऋषभगांधारमध्यमपंचमधैवतनिषादाः ॥ यद्यप्यमरेण निषादर्षभगांधारषड्जमध्यमधैवताः ॥ पंचमश्चेत्यमीसप्ततंत्रीकंठोत्थिताःस्वराइत्युक्तंतथापिशार्ङ्गदेवविरचितसङ्गीतरत्नाकरानुसारेणैवं विलिखितमिति ॥ तदुक्तम् ॥ श्रुतिभ्यःस्युःस्वराःषड्जर्षभगांधारमध्यमाः ॥ पंचमोधैवतश्चाथनिषादइतिसप्तते ॥ तेषांसंज्ञासारिगमपधनीत्यपरामताइति ॥ तेषांस्वरूपंनिर्वचनचतत्रैव टीकायां मल्लिनाथविरचितसङ्गीतरत्नाकरकलानिधौद्रष्टव्यम् ॥ एवमग्रेपि ॥ त्रयोग्रामाःषड्जग्राममध्यमग्रामगांधारग्रामाः ॥ तदुक्तम् ॥ तौद्वौधरातलेतत्रस्यात्षड्जग्रामआदिमः ॥ द्वितीयोमध्यमग्रामस्तयोर्लक्षणमुच्यते ॥ गांधारग्राममाचष्टतदायंनारदोमुनिरिति ॥ मूर्च्छनास्त्वेकविंशतिरिति ॥ तत्रषड्जग्रामेउत्तरमंद्रारजनउित्तरायताशुद्धषड्जामत्सरिताअश्वक्रांताअभिरुद्गतेतिसप्त ॥ मध्यमग्रामेसौवीरिहारीणाअश्वाकालोपनताशुद्धमध्यमागीपौरवीतिसप्त ॥ गांधारग्रामेनंदाविशालासुमुखीचित्राचित्रवतीसुखाआलापेतिसप्त ॥ तदुक्तम् ॥ षड्जेतूत्तरमंद्रादौरजनीचोत्तरायता ॥ शुद्धषड्जामत्सरिताअश्वक्रांताभिरुद्गता ॥ मध्यमेस्यात्तुसौवीरीहारिणाश्वाततःपरम् ॥ स्यात्कालोपनताशुद्धमध्यमागीश्चपौरवी ॥ नंदाविशालासुमुखीचित्राचित्रवतीसुखा ॥ आलापाचेतिगांधारग्रामेस्युःसप्तमूर्च्छनाइतिनारदोक्ताश्च ॥ तदुक्तम् ॥ तासामन्यानिनामानिनारदोमुनिरब्रवीत् ॥ अश्वक्रांताचसौवीरीहृष्यकाचोत्तरायता ॥ रजनीतिसमाख्याताऋ-

वर्षाभ्वीतेनसाक्षिप्ताकाकेनक्षेत्रबाह्यतः ॥ अथसाकालतोभेकीतत्रैवक्षेत्रसत्तमे ॥ ६७ ॥ प्रदक्षिणीकरणतोलिंगस्यस्पर्शनादपि ॥ पुण्याद्पुण्यवतीजाता कन्यापुष्पबटोर्गृहे ॥ ६८ ॥ शुभावयवसंस्थानाशुभलक्षणलक्षिता ॥ परंगृध्रमुखीजातानिर्माल्याक्षतभक्षणात् ॥ ६९ ॥ सम्यग्गीतरहस्यज्ञानितरां मधुरस्वरा ॥ सप्तस्वरास्त्रयोग्रामामूर्च्छनास्त्वेकविंशतिः ॥७०॥ तानाएकोनपंचाशत्तालाएकोत्तरंशतम् ॥ रागाःषडेवतेषांतुपंचपंचापिचांगनाः॥७१॥

षिणासप्तमूर्च्छनाः ॥ आप्यायनीविश्वकृताचंद्राहैमाकपर्दिनी ॥ मैत्रीचांद्रमसीमित्र्यामध्यमेमूर्च्छनाइमाः ॥ गांधारेपूर्वोक्ताएव ॥ शार्ङ्गदेवेनचतुर्दशैवोक्ताः ॥ ७० ॥ तानाएकोनपंचाशदिति ॥ अग्निष्टोमात्यग्निष्टोमवाजपेयषोडशीपुंडरीकाऽश्वमेधराजसूयाः (सर्वस्वदक्षिणदीक्षासोमे) स्विष्टकृद्बहुसुवर्णगोसवमहाव्रतविश्वजिद्ब्रह्मयज्ञप्राजापत्याश्वक्रांतरथक्रांतविष्णुक्रांतसूर्यक्रांतगजक्रांतवलभिन्नागपक्षचातुर्मास्यसंस्थाशस्त्रउक्थसौत्रामणीचित्राउद्भित्सावित्रीअर्धसावित्रीसर्वतोभद्रआदित्यानामयनगवामयनसर्पाणामयनकौंडपायिनामयनअग्निचिद्द्वादशाहउपांशुसोम अश्वप्रतिग्रहबर्हिरथअभ्युदयइत्येकोनपंचाशत् ॥ तदुक्तम् ॥ अग्निष्टोमोऽत्यग्निष्टोमोवाजपेयश्चषोडशी ॥ पुंडरीकोऽश्वमेधश्चराजसूयस्ततःपरम् ॥ इतिस्युःषड्जहीनानांसप्तनामान्यनुक्रमात् ॥ क्रमादृषभहीनानांतानानामभिधाइमाः ॥ स्विष्टकृद्बहुसुवर्णोगोसवश्चमहाव्रतः ॥ विश्वजिद्ब्रह्मयज्ञश्चप्राजापत्यस्तुसप्तमः ॥ क्रमादृषभहीनानांतानानामभिधाःस्मृताः ॥ अश्वक्रांतोरथक्रांतोविष्णुक्रांतस्ततःपरम् ॥ सूर्यक्रांतोगजक्रांतोवलभिन्नागपक्षकः ॥ इतिमध्यमहीनानांसंज्ञाःसप्तक्रमान्मताः ॥ चातुर्मास्योऽथसंस्थाख्यःशस्त्रश्चोक्थश्चतुर्थकः ॥ सौत्रामणीतथाचित्रासप्तमस्तूद्भिदाह्वयः॥संज्ञाः पंचमहीनानांवाडवानामिमाःक्रमात् ॥ सावित्रीचार्धसावित्रीसर्वतोभद्रसंज्ञकः ॥ आदित्यानामयनंचगवामयनमेवच ॥ सर्पाणामयनःषष्ठःसप्तमःकौंडपायनः ॥ धैवतेनविहीनानांसप्तनामानिमेनिरे ॥ अग्निचिद्द्वादशाहश्चोपांशुःसोमाभिधस्ततः ॥ अश्वप्रतिग्रहोबर्हिरथोभ्युदयसंज्ञकः ॥ संज्ञानिषादहीनानांतानानामितिमन्वते ॥ तानाःस्युर्मूर्च्छनाःशुद्धाइत्युपक्रम्यएतेचैकोनपंचाशदिति ॥ तालाएकोत्तरंशतमिति ॥ तेचध्रुवशाम्यसन्निपातादयः ॥ तदुक्तम् ॥ ध्रुवंशाम्यस्तथातालःसन्निपातइतीरिताइत्यादि ॥ रागाःश्रीरागादयः ॥ तदुक्तंग्रंथांतरे ॥ श्रीरागोथवसंतश्चपंचमोभैरवस्तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेघरागश्चविज्ञेयःषष्ठोजटुलरायणइति ॥ तेषांतुतेषामेवषण्णांरागाणांपंचपंचचैवंत्रिंशदंगनाः ॥ अपिःसमुच्चये ॥ तेषांरागाणांप्रत्येकंपंचपंचअंगनाःस्त्रियोपीत्यर्थः ॥ ७१ ॥ एवंमिलित्वाषड्रागास्त्रिंशद्रागिण्यइतिषट्त्रिंशद्रागरागिण्यः ॥ इतिरागिमुदावहाः॥इतिशब्देनपूर्वोक्ताःसप्तस्वरादयोगृह्यंते ॥ रागिमुदावहाःकामिनांहर्षजनकाः ॥ मतांतरमाह॥ देशकालविभेदेनेति ॥ कालेत्यत्रकाकुरितिचपाठोदृश्यते ॥ अपरारागाः ॥ तेचमालवश्रीस्तोडीवसंतोधन्वाशींदेशीवंगालोभैरवोवराडीगुर्जरीत्यादिकाः ॥ ७२ ॥ पक्षांतरमाह ॥ यावंतइति ॥ एकोत्तरशतमित्यर्थः ॥ ७३ ॥ ७४ ॥ अमंस्तामन्यत ॥ ७५ ॥ हेदमन ॥ महतिब्रह्मणिआत्मायस्यसमहात्मातस्य ॥ ७६ ॥ अतंद्रितमनाअनालस्यचित्ता ॥ ७७ ॥ विघ्नानुमेयप्रकारमाह ॥ निमेषांतरितइति ॥ ७८ ॥ ततःसाप्रायश्चित्तंकृतवतीत्याह ॥ इतीति ॥ नतत्याजनत्यक्तवती ॥ तत्प्राप्यचोंकृतेरितिपाठेतत्तदाओंकारेश्वरस्यसेवांप्राप्यसामाधवीओंकारेश्वरलिंगनामामृतंपिबेदित्यन्वयः ॥ ७९ ॥ द्रष्टुमिच्छा

षड्विंशद्रागरागिण्यइतिरागिमुदावहाः ॥ देशकालविभेदेनपंचषष्टिस्तथापराः ॥ ७२ ॥ यावंतएवतालाःस्यूरागास्तावंतएवहि ॥ इतिगीतोपनिषदाप्रत्यहंसाशुभव्रता ॥ ७३ ॥ माधवीमधुरालापासदोंकारंसमर्चयेत् ॥ प्राप्याप्यनर्घ्यतारुण्यंसातुपुष्पबटोःसुता ॥ ७४ ॥ प्राग्जन्मवासनायोगादोंकारंबह्वमंस्तवै ॥ स्वभावचंचलंचेतस्तस्यास्तल्लिंगसेवनात् ॥ ७५ ॥ दमनस्थैर्यमगमद्योगेनेवमहात्मनः ॥ नदिवाबाधयांचक्रेक्षुत्तृण्निद्राक्षपासुताम् ॥ ७६ ॥ अतंद्रितमनाआसीत्सातल्लिंगनिरीक्षणे ॥ अक्ष्णोर्निमेषायावंतस्तस्याआसन्दिवानिशम् ॥ ७७ ॥ तावत्कालस्तयासाध्व्यामहान्विघ्नोऽनुमीयते ॥ निमेषांतरितःकालोयोयोव्यर्थोगतोमम ॥ लिंगानवेक्षणात्तत्रप्रायश्चित्तंकथंभवेत् ॥ ७८ ॥ इतिसंचिंतयंत्येवसेवांतत्याजनोंकृतेः ॥ जलाभिलाषिणीसातुलिंगनामामृतंपिबेत् ॥ ७९ ॥ नान्यद्दिदृक्षिणीतस्याअक्षिणीश्रुतिगेअपि ॥ विहायलिंगमोंकारंहृद्विहायःस्थितंसताम् ॥ ८० ॥ तस्याःशब्दग्रहौनान्यशब्दग्रहणतत्परौ ॥ अतीवनिपुणौजातौतत्सन्माल्यकरौकरौ ॥ ८१ ॥ नान्यत्रचरणौतस्याश्चरतःसुखवांछया ॥ त्यक्त्वोंकाराजिरक्षोणींक्षुण्णांनिर्वाणपद्मया ॥ ८२ ॥ ओंकारंप्रणवंसारंपरंब्रह्मप्रकाशकम् ॥ शब्दब्रह्मत्रयीरूपंनादबिंदुकलालयम् ॥ ८३ ॥ सदक्षरंचादिरूपंविश्वरूपंपरावरम् ॥ वरंवरेण्यंवरदंशाश्वतंशांतमीश्वरम् ॥ ८४ ॥

दिदृक्षासावर्ततेययोस्तेतथा ॥ श्रुतिगेकर्णगेअतिविशालेइतियावत् ॥ नान्यदित्यनेनाक्षिप्तंदिदृक्षाविषयमाह ॥ विहायेति ॥ हृद्विहायःस्थितंहृदयाकाशस्थितम् ॥ ८० ॥ शब्दग्रहौकर्णौ ॥ ८१ ॥ अजिरक्षोणींप्रांगणभूमिम् ॥ क्षुण्णामधिष्ठितामित्यर्थः ॥ ८२ ॥ ओंकारमोंकारेश्वरंप्रोच्चरत्तस्यामाधव्यावागिंद्रियंनामांतरंनगृह्णातीतिसप्तमेनान्वयः ॥ तंविशिनष्टि मध्येन ॥ सर्वैःप्रणूयतेस्तूयतेस्वसेवितारंपदंप्रणयेदितिवाप्रणवस्तम् ॥ तयाचोक्तमत्रैवं प्रणूयतइत्यादि ॥ स्वसेवितारमित्यादिचोति ॥ सारंस्थिरंप्रलयेप्यवशिष्यमाणम् ॥ परंसर्वाधिकम् ॥ तदुक्तमत्रैव ॥ सर्वेभ्योप्यधिकइति ॥ ब्रह्मप्रकाशकंपरमात्मप्रकाशकम् ॥ शब्दब्रह्मरूपायात्रयीवेदस्तस्यरूपंयस्मात्तंतद्रूपंवा ॥ नादबिंद्वात्मकयोःकलयोःआलयमाश्रयम् ॥ ८३ ॥ सदक्षरंसर्वभूतमक्षरकूटस्थमव्याकृतमितियावत्तद्रूपम् ॥ पृथक्पदंवा ॥ तदुक्तंभगवता ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यतइति ॥ आदिरूपमादिकारणमीश्वरमितियावत् ॥ अतएवविश्वंरूप्यतेऽभिव्यज्यतेयेनतद्विश्वरूपम् ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वप्रपंचरूपंवा ॥ परावरंकार्यकारणात्मकम् ॥ परेब्रह्मादयोऽवरेयस्मात् उत्कृष्टापकृष्टरूपंवा ॥ वरंसर्वश्रेष्ठम् ॥ वरेण्यंवरणाययोग्यम् ॥ वरदंवरदातारम् ॥ ईश्वरंसर्वनियंतारम् ॥ ८४ ॥
॥ ८५ ॥ स्वांतमंतःकरणम् ॥ ८६ ॥ निरुपाधिकार्योपाधिरहितम् ॥ ऐकपद्यपाठेकर्मधारयः ॥ अज्यतेऽनेनेत्यंजनमुपाधिः ॥ निरंजनंकारणोपाधिरहितमितियावत् ॥ निर्मलंरागादिशून्यम् ॥
निजोऽसाधारणउदयोयस्यतम् ॥ ८७ ॥ सर्वंश्रीरुद्ररूपम् ॥ ८८ ॥ ८९ ॥ ९० ॥ रंगमालाश्चित्रसमूहान् ॥ प्रासादंपरितःप्रासादस्यसर्वतइत्यर्थः ॥ ९१ ॥ ९२ ॥ चतुर्दश्यांशुक्लायामि

सर्वलोकैकजनकंसर्वलोकैकरक्षकम् ॥ सर्वलोकैकसंहर्तृसर्वलोकैकवंदितम् ॥ ८५ ॥ आद्यंतरहितंनित्यंशिवंशंकरमव्ययम् ॥ एकंगुणत्रयातीतं भक्तस्वांतकृतास्पदम् ॥ ८६ ॥ निरुपाधिंनिराकारंनिर्विकारंनिरंजनम् ॥ निर्मलंनिरहंकारंनिष्प्रपंचंनिजोदयम् ॥ ८७ ॥ स्वात्मारामसनंतंचसर्वगंसर्वदर्शिनम् ॥ सर्वदंसर्वभोक्तारंसर्वंसर्वसुखास्पदम् ॥८८॥ वागिंद्रियंतदीयंचप्रोच्चरत्तदहर्निशम् ॥ नामांतरंनगृह्णातिकचिदन्यस्यकस्यचित् ॥८९॥ एतन्नामाक्षररसंरसयंतीदिवानिशम् ॥ रसनानैवजानातितस्याअन्यद्रसांतरम् ॥ ९० ॥ संमार्जनंरंगमालाःप्रासादंपरितःसदा ॥ विदध्यान्माधवीतत्रतथार्चापात्रशोधनम् ॥ ९१ ॥ तत्रपाशुपतायैवैप्रणवेशार्चनेरताः ॥ तांश्चशुश्रूषयेन्नित्यंपितृबुद्ध्यातिभक्तितः ॥ ९२ ॥ वैशाखस्यचतुर्दश्यामेकदासातुमाधवी ॥ रात्रौजागरणंकृत्वादिवोपवसनान्विता ॥ ९३ ॥ यात्रामिलितभक्तेषुप्रातर्यातेषुसर्वतः ॥ संमार्जनादिकंकृत्वालिंगमभ्यर्च्यहर्षतः ॥ ९४ ॥ गायंतीमधुरंगीतंनृत्यंतीनिजलीलया ॥ ध्यायंतीलिंगमोंकारंतत्रलिंगेलयंययौ ॥ ९५ ॥ अनेनैवशरीरेणपार्थिवेनमहामतिः ॥ अस्मदाचार्यमुख्यानांपश्यतांचतपस्विनाम् ॥ ९६ ॥ प्रादुर्बभूवयल्लिंगाज्ज्योतिर्जटिलितांबरम् ॥ तत्रज्योतिषिसाबालाज्योतिर्मय्यपिसाप्यभूत् ॥ ९७ ॥ राधशुक्लचतुर्दश्यामद्यापिक्षेत्रवासिनः ॥ तत्रयात्रांप्रकुर्वंतिमहोत्सवपुरःसराः ॥ ९८ ॥ तत्रजागरणंकृत्वाचतुर्दश्यामुपोषिताः ॥ प्राप्नुवंतिपरंज्ञानंयत्रकुत्रापिवैमृताः ॥ ९९ ॥ ब्रह्मांडोदरमध्येतुयानितीर्थानिसर्वतः ॥ तानिवैशाखभूतायामायांत्योंकृतिदर्शने ॥१००॥ लिंगाग्रेश्रीमुखीनाम्नीगुहास्तिपरमोत्तमा ॥ पातालस्यचतद्द्वारंतत्रसिद्धावसंतिहि ॥ १ ॥ तिष्ठ्युःपंचरात्रंयेगुहायांतत्रसुव्रताः ॥ तेनागकन्याःपश्यंतिब्रूयुस्ताश्चशुभाशुभम् ॥ २ ॥ कंदरोत्तरदिग्भागेतत्रकूपोरसोदकः ॥ आषण्मासंचतत्पीत्वापिबेद्ब्रह्मरसायनम् ॥ ३ ॥ तत्रनादेश्वरंलिंगंदृष्ट्वानादनिदानभूः ॥ सर्वनादात्मकंविश्वंतच्छ्रोगोचरीभवेत् ॥ ४ ॥ तत्रमत्स्योदरींस्नात्वास्वर्धुनींवरुणाप्लुताम् ॥ कृतकृत्योभवेज्जंतुर्नैवशोचतिकुत्रचित् ॥ ५ ॥

तिशेषः ॥ अग्रेतथोक्तेः ॥ उपवसनान्विताउपोषणयुतेत्यर्थः ॥ ९३ ॥ ९४ ॥ ९५ ॥ अस्माकमाचार्यागुरवोमुख्याःश्रेष्ठायेषांतेतथातेषाम् ॥ ९६ ॥ लयप्रकारमाह ॥ प्रादुरिति ॥ जटिलितां
वरंव्याप्ताकाशम् ॥ ९७ ॥ राधोवैशाखः ॥ यदाहामरः ॥ वैशाखेमाधवोराधइति ॥ ९८ ॥ ९९ ॥ भूतायांचतुर्दश्यांशुक्लायामित्येव ॥ १०० ॥ १ ॥ २ ॥ कंदरागुहा ॥ ब्रह्मरसायनं
ब्रह्मामृतम् ॥ ३ ॥ नादनिदानभूःनादोत्पत्तिस्थानम् ॥ पाठांतरेनिनादउद्रेकःप्रकटतेतियावत् ॥ सर्वनादात्मकंतच्छ्रवोगोचरीभवेत् ॥ तल्लिंगम् ॥ द्रष्टुःश्रवणेंद्रियस्यविषयःस्यादित्यर्थः ॥४॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिवीभागस्याधिक्यात्पार्थिवेनेत्युक्तम् ॥ वस्तुतःपांचभौतिकेनेत्यर्थः ॥ तथाचव्याससूत्रम् ॥ तेषुवैशेष्यात्तद्वादस्तद्वादइति ॥ ६ ॥ ७ ॥ ८ ॥ गहनेवने ॥ ९ ॥ आयतनानिदेवतास्थानानि ॥ ततस्तदा ॥ ११० ॥ ११ ॥ १२ ॥ शीलिताश्रिता ॥ १३ ॥ १४ ॥ शिश्रियुःसेवितवंतः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ १२२ ॥ ॥

असंख्यातागताःसिद्धिमोंकारेश्वरसेवकाः ॥ पार्थिवेनैवदेहेनादिव्यभूतेनतत्क्षणात् ॥ ६ ॥ अविमुक्तंपरंक्षेत्रंब्रह्मांडादपिसर्वतः ॥ ततोपिपरओंकारउक्तोमत्स्योदरीतटे ॥ ७ ॥ प्रणवेशोंऽग्रयैःकाश्यांननतोनापिचार्चितः ॥ किमर्थंतेसमुत्पन्नामातृतारुण्यहारिणः ॥ ८ ॥ यदाप्रभृतिविश्वेशोमंदरादागतोऽभवत् ॥ तस्मिन्नानंद गहनेतदाप्रभृतिसत्तम ॥ ९ ॥ सर्वाण्यायतनान्याशुसाब्धीनिसगिरीण्यपि ॥ सनदीनिसतीर्थानिसद्वीपानियुस्ततः ॥ ॥ ११० ॥ इदानींममभाग्येनस्मारितोहंत्वयामुने ॥ अहमप्यागमिष्यामियामःकाशींशनैःशनैः ॥ ११ ॥ एतेपिममशिष्यायेमहापाशुपतव्रताः ॥ काशींयियासवस्तेपियतःसर्वेमुमुक्षवः ॥ १२ ॥ अपिवार्धकमासाद्ययैःकाशीनैवशीलिता ॥ मानुषेदुर्लभेनष्टेकुतस्तेषांमहासुखम् ॥ १३ ॥ यावन्नेंद्रियवैकल्यंयावन्नैवायुषःक्षयः ॥ तावत्सेव्यंप्रयत्नेनशंभोरानंदकाननम् ॥ १४ ॥ यआनंदवनंशंभोःशिश्रियुःश्रीनिकेतनम् ॥ अचलाश्रीर्नमुंचेत्तान्महासौख्यैकशेवधीन् ॥ १५ ॥ इत्याख्यायकथांरम्यांगर्गःपाशुपतोत्तमः ॥ भारद्वाजेनसहितःप्रापवाराणसींपुरीम् ॥ १६ ॥ दमनोपिहिधर्मात्मागगर्गाचार्येणसंयुतः ॥ आराध्य श्रीमदोंकारंतस्मिँल्लिंगेलयंगतः ॥ १७ ॥ ॥ स्कंदउवाच ॥ ॥ इल्वलारेपरंस्थानमोंकारमविमुक्तके ॥ तत्रासिद्धिंपरांजग्मुःसाधकावहुशोमुने ॥ १८ ॥ कलौकलुषचित्तानांपुरोनाख्येयमेवहि ॥ प्रणवेश्वरमाहात्म्यंनास्तिकानांविशेषतः ॥ १९ ॥ येनिंदंतिमहादेवंक्षेत्रंनिंदंतियेऽधियः ॥ पुराणंयेचनिंदंतितेसंभाष्यानकुत्रचित् ॥ १२० ॥ ओंकारसदृशंलिंगंनक्वचिज्जगतीतले ॥ इतिगौर्यैसामाख्यातंदेवदेवेननिश्चितम् ॥ १२१ ॥ इममध्यायमाकर्ण्यनरस्तद्गतमानसः ॥ विमुक्तःसर्वपापेभ्यःशिवलोकमवाप्नुयात् ॥ १२२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धओंकारमाहात्म्यंनामचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ छ ॥ ॥ अगस्त्यउवाच ॥ ॥ श्रुत्वोंकारकथामेतांमहापातकनाशिनीम् ॥ नतृप्तोस्मिविशाखाथब्रूहित्रैविष्टपींकथाम् ॥ १ ॥

इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांचतुःसप्ततितमोऽध्यायः ॥७४॥ ॥छ॥ ॥ अध्यायेसप्ततितमेपंचोर्ध्वेपरमाद्भुते ॥ त्रिलोचनस्यदेवस्यह्याविर्भावोऽनुवर्ण्यते ॥१॥ त्रिलोचनतीर्थसंबंधिनींत्रैविष्टपींत्रिलोचनसंबंधिनींवा ॥ तदुक्तमत्रैव ॥ विष्टपत्रितयांतर्येदेवर्षिमनुजोरगाः ॥ ससरित्पर्वतारण्याःसंतितेतत्रयन्मुने ॥ तदारभ्यचतत्तीर्थंतच्चलिंगंत्रिलोचनम् ॥ त्रिविष्टपमितिख्यातामिति॥ १॥

Mahendra Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २ ॥ ३ ॥ विरजाख्यमित्यत्रसंधिरार्षः ॥ सर्वेसांताअकारांताइतिवा ॥ ४ ॥ अन्वयभेदात्तिस्रइतिपदयोरपौनरुक्त्यम् ॥ ५ ॥ ६ ॥ महाधाममहातेजोमहाधारंवा ॥ ७ ॥ ८ ॥ ९ ॥ प्रतीच्यांपश्चिमायांदिशि ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ स्रष्टारोत्रह्माणः ॥ १४ ॥ शुद्धबुद्धिभिरिति ॥ नेदमधिकारिविशेषणंकिंत्वन्येषामश्रद्धयातत्राप्रवृत्तेरर्थात्तेष्वेवपर्यवसानादनुवादमात्रम् ॥

कथंचकथितादेव्यैदेवदेवेनषण्मुख ॥ आविर्भूतिर्महाबुद्धेपुण्यात्रैलोचनीपरा ॥ २ ॥ स्कंदउवाच ॥ ॥ आकर्णयमुनेवच्मिकथांश्रमनिवारिणीम् ॥ यथादेवेनकथितांत्रिविष्टपसमुद्भवाम् ॥ ३ ॥ विरजाख्यंहितत्पीठंतत्रलिंगंत्रिविष्टपम् ॥ तत्पीठदर्शनादेवविरजाजायतेनरः ॥ ४ ॥ तिस्रस्तुसंगतास्तत्रस्रोतस्विन्योघटोद्भव ॥ तिस्रःकल्मषहारिण्योदक्षिणेहित्रिलोचनात् ॥ ५ ॥ स्रोतोमूर्तिधराःसाक्षाल्लिंगस्नपनहेतवे ॥ सरस्वत्यथकालिंदीनर्मदाचातिशर्मदा ॥ ६ ॥ तिस्रोपिहित्रिसंध्यंताःसरितःकुंभपाणयः ॥ स्नपयतिमहाधामलिंगंत्रैविष्टपंमहत् ॥ ७ ॥ लिंगानिपरितस्ताभिःस्वनाम्नास्थापितान्यपि ॥ तेषांसंदर्शनात्पुंसांतासांस्नानफलंभवेत् ॥ ८ ॥ सरस्वतीश्वरंलिंगंदक्षिणेनत्रिविष्टपात् ॥ सारस्वतंपदंदद्याद्दृष्टंस्पृष्टंचजाडचहृत् ॥ ९ ॥ यमुनेशंप्रतीच्यांचनरैर्भक्त्यासमर्चितम् ॥ अपिकिल्बिषवह्निश्चयमलोकनिवारणम् ॥ १० ॥ दृष्टंत्रिलोचनात्प्राच्यांनर्मदेशंसुशर्मदम् ॥ तल्लिंगार्चनतोनृणांगर्भवासोनिषिध्यते ॥ ११ ॥ स्नात्वापिलिपिलातीर्थेत्रिविष्टपसमीपतः ॥ दृष्ट्वात्रिलोचनंलिंगंकिंभूयःपरिशोचति ॥ १२ ॥ त्रिविष्टपस्यलिंगस्यस्मरणादपिमानवः ॥ त्रिविष्टपपतिर्भूयान्नात्रकार्याविचारणा ॥ १३ ॥ त्रिविष्टपस्यद्रष्टारःस्रष्टारःस्युर्नसंशयः ॥ कृतकृत्यास्तएवात्रतएवात्रमहाधियः ॥ १४ ॥ आनंदकाननेलिंगंप्रणतंयैस्त्रिविष्टपम् ॥ त्रिलोचनस्यनामापियैःश्रुतंशुद्धबुद्धिभिः ॥ १५ ॥ सप्तजन्मार्जितात्पापात्तेपूतानात्रसंशयः ॥ पृथिव्यांयानिलिंगानितेषुदृष्टेषुयत्फलम् ॥ १६ ॥ तत्स्यात्रिविष्टपेदृष्टेकाश्यांमन्येततोधिकम् ॥ काश्यांत्रिविष्टपेदृष्टेदृष्टंसर्वंत्रिविष्टपम् ॥ १७ ॥ क्षणान्निर्धूतपापोसौनपुनर्गर्भभाग्भवेत् ॥ सस्नातःसर्वतीर्थेषुसर्वावभृथवान्सच ॥ १८ ॥ योवैपिलिपिलातीर्थेस्नात्वोत्तरवहांभसि ॥ सरित्त्रयंमहापुण्यंयत्रसाक्षाद्वसेत्सदा ॥ १९ ॥ तत्रश्राद्धादिकंकृत्वागयायांकिंकरिष्यति ॥ स्नात्वापिलिपिलातीर्थेकृत्वावैपिंडपातनम् ॥ २० ॥ दृष्ट्वात्रिविष्टपंलिंगंकोटितीर्थफलंलभेत् ॥ यदन्यत्रार्जितंपापंतत्काशीदर्शनाद्व्रजेत् ॥ २१ ॥ काश्यांतुयत्कृतंपापंतत्पैशाचपदप्रदम् ॥ प्रमादात्पातकंकृत्वाशंभोरानंदकानने ॥ २२ ॥ दृष्ट्वात्रिविष्टपंलिंगंतत्पापमपिहास्यति ॥ सर्वस्मिन्नपिभूपृष्ठेश्रेष्ठमानंदकाननम् ॥ २३ ॥ तत्रापिसर्वतीर्थानिततोप्योंकारभूमिका ॥ ओंकारादपिसल्लिंगान्मोक्षवर्त्मप्रकाशकात् ॥ २४ ॥ अतिश्रेष्ठतरंलिंगंश्रेयोरूपंत्रिलोचनम् ॥ २५ ॥ तेजस्विषुयथाभानुर्दृश्येषुचयथाशशी ॥ तथालिंगेषुसर्वेषुपरंलिंगंत्रिलोचनम् ॥ २६ ॥ त्रिलोचनार्चकानांसापदवीनदवीयसी ॥ परंनिर्वाणपद्मायामहासौख्यैकशेवधेः ॥ २७ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ दृश्येषुदर्शनीयेषु ॥ २६ ॥ महासौख्यैकशेवधेःपरमानंदैकनिधेः ॥ निर्वाणपद्मायाःमोक्षलक्ष्म्याः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सापंदवीत्रिलोचनार्चकानांनदवीयसीनदूरेइत्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ निष्कृतिंमुक्तिम् ॥ ३८ ॥ मुक्कैकंशिवानिंदकमितिय

सकृत्त्रिलोचनार्चातोयच्छ्रेयःसमुपार्ज्यते ॥ नतदाजन्मसंपूज्यलिंगान्यन्यानिलभ्यते ॥२८॥ काश्यांत्रिलोचनंलिंगंयेर्चयंतिमहाधियः ॥ तेर्च्यास्त्रिभुवनौकोभिर्मम्प्रीतिमभीप्सुभिः ॥ २९ ॥ कृत्वापिसर्वसंन्यासंकृत्वापाशुपतव्रतम् ॥ नियमेभ्यःस्खलित्वापिकुतोबिभ्यतिमानवाः ॥ ३० ॥ विद्यमाने महालिंगेमहापापौघहारिणि॥त्रिविष्टपेपुण्यराशौमोक्षनिक्षेपसद्मनि ॥३१॥ समभ्यर्च्यमहालिंगंसकृदेवत्रिलोचनम् ॥ मुच्यतेकलुषैःसर्वैरपिजन्मशतार्जितैः ॥ ३२ ॥ ब्रह्महापिसुरापोवास्तेयीवागुरुतल्पगः ॥ तत्संयोग्यपिवावर्षमहापापीप्रकीर्तितः ॥ ३३ ॥ परदाररतश्चापिपरहिंसारतोपिवा ॥ परापवादशीलोपितथाविस्रंभघातकः ॥ ३४ ॥ कृतघ्नोपिभ्रूणहापिवृषलीपतिरेववा ॥ मातापितृगुरुत्यागीवह्निदोगरदोपिवा ॥ ३५ ॥ गोघ्नःस्त्रीघ्नोपिशूद्रघ्नः कन्यादूषयितापिच ॥ क्रूरोवापिशुनोवापिनिजधर्मपराङ्मुखः ॥ ३६ ॥ निंदकोनास्तिकोवापिकूटसाक्ष्यप्रवादकः ॥ अभक्ष्यभक्षकोवापितथाऽविक्रेयविक्रयी ॥ ३७ ॥ इत्यादिपापशीलोपिमुक्त्वैकंशिवनिंदकम् ॥ पापान्निष्कृतिमाप्नोतिनत्वालिंगंत्रिलोचनम् ॥ ३८ ॥ शिवनिंदारतोमूढःशिवशास्त्रविनिंदकः ॥ तस्यनोनिष्कृतिर्दृष्टाक्वापिशास्त्रेपिकेनचित् ॥ ३९ ॥ आत्मघातीसविज्ञेयःसदात्रैलोक्यघातकः ॥ शिवानिंदांविधत्तेयःसनाभाष्योऽधमाधमः ॥ ४० ॥ शिवनिंदारतायेचशिवभक्तजनेष्वपि ॥ तेयांतिनरकेघोरेयावच्चंद्रदिवाकरौ ॥ ४१ ॥ शैवाःपूज्याःप्रयत्नेनकाश्यांमोक्षमभीप्सुभिः ॥ तेष्वर्चितेष्वपिशिवःप्रीतोभवत्यसंशयः ॥ ४२ ॥ सर्वेषामिहपापानांप्रायश्चित्तचिकीर्षया ॥ निःशंकैरेववक्तव्यंप्रमाणज्ञैरिदंवचः ॥ ४३ ॥ पुरश्चरणकामश्चेद्भीतोसियदिपापतः ॥ मन्यसेयदिनःसत्यंवाक्यंशास्त्रप्रमाणतः ॥ ४४ ॥ ततःसर्वंपरित्यज्यकृत्वामनसिनिश्चयम् ॥ आनंदकाननंयाहि यत्रविश्वेश्वरःस्वयम् ॥ ४५ ॥ यत्रक्षेत्रप्रविष्टानांनराणांनिश्चितात्मनाम् ॥ नबाधतेऽघनिचयःप्राप्येतचपरोवृषः ॥ ४६ ॥ तत्राद्यापिमहातीर्थेत्रिस्रोतस्यतिनिर्मले ॥ पुण्येपिलिपिलानाम्नित्रिसरित्परिसेविते ॥ ४७ ॥ त्रिलोचनाक्षिविक्षेपपरिक्षिप्तमहैनसि ॥ स्नात्वागृह्योक्तविधिनातर्पणीयान्प्रतर्प्यच ॥ ४८ ॥ दत्त्वादेयंयथाशक्तिवित्तशाठ्यविवर्जितः ॥ दृष्ट्वात्रिविष्टपंलिंगंसमभ्यर्च्यातिभक्तितः ॥ ४९ ॥

दुक्तंतत्रानुवादपूर्वकंहेतुमाह शिवनिंदेतित्रिभिः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ सर्वेषांपापानांश्रेष्ठंप्रायश्चित्तंवक्तुमाह ॥ सर्वेषामिति ॥ ४३ ॥ ४४ ॥ ४५ ॥ वृषोधर्मः ॥४६॥४७॥४८॥४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधाद्यैरित्यादितृतीयांतानांपदानांसमभ्यर्च्यैत्यनेनान्वयः ॥ माल्यैर्मालाभिःपुष्पैर्वा ॥ ५० ॥ ५१ ॥ ५२ ॥ निरेनानिष्पापः ॥ ५३ ॥ एवंपापक्षयमुक्त्वापुण्यप्राप्तिमाह ॥ ततइत्येकेन ॥५४॥ ५५ ॥ ५६ ॥ प्रदक्षिणातइतिशेषः ॥ ५७ ॥ भुजगोऽनंतोमेखलाकांचीयस्यतम् ॥ ५८ ॥ रात्रिंदिवंरात्रौदिवसेच ॥ तत्रापिसर्वदेत्यर्थः ॥ ५९ ॥ प्रकृंतिप्रकर्षेणच्छे

गंधाद्यैर्विविधैर्माल्यैःपंचामृतपुरःसरैः ॥ धूपैर्दीपैःसनैवेद्यैर्वासोभिर्बहुभूषणैः ॥ ५० ॥ पूजोपकरणैर्द्रव्यैर्घंटादर्पणचामरैः ॥ चित्रध्वजपताकाभिर्नृत्यवाद्यसुगायनैः ॥ ५१ ॥ जपैःप्रदक्षिणाभिश्चनमस्कारैर्मुदायुतैः ॥ परिचारकसंतोषैःकृत्वेतिपरिपूजनम् ॥ ५२ ॥ ब्राह्मणान्वाचयेत्पश्चान्निष्पापोहमितिब्रुवन् ॥ एवंकुर्वन्नरःप्राज्ञोनिरेनाजायतेक्षणात् ॥ ५३ ॥ ततःपंचनदेस्नात्वामणिकर्णीह्रदेततः ॥ ततोविश्वेशमभ्यर्च्यप्राप्नोतिसुकृतंमहत् ॥५४॥ प्रायश्चित्तमिदंप्रोक्तंमहापापविशोधनम् ॥ नास्तिकेनप्रवक्तव्यंकाशीमाहात्म्यनिंदके ॥ ५५ ॥ ददच्चद्रव्यलोभेनप्रायश्चित्तमिदंशुभम् ॥ दातानरकमाप्नोतिसत्यंसत्यंघटोद्भव ॥ ५६ ॥ क्ष्मांप्रदक्षिणीकृत्ययत्फलंसम्यगाप्यते ॥ प्रदोषेतत्फलंकाश्यांसप्तकृत्वस्त्रिलोचने ॥ ५७ ॥ भुजंगमेखलंलिंगंकाश्यांदृष्ट्वात्रिविष्टपम् ॥ जन्मांतरेपिमुक्तःस्यादन्यत्रमरणेसति ॥ ५८ ॥ अन्यत्रसर्वलिंगेषुपुण्यकालोविशिष्यते ॥ त्रिविष्टपेपुण्यकालःसदारात्रिंदिवंनृणाम् ॥ ५९ ॥ लिंगान्योंकारमुख्यानिसर्वपापप्रकृंत्यलम् ॥ परंत्रैलोचनीशक्तिःकाचिदन्यैवपार्वति ॥ ६० ॥ यतःसर्वेषुलिंगेषुलिंगमेतदनुत्तमम् ॥ तत्कारणंशृणुवपर्णेकर्णेकुरुवदाम्यहम् ॥ ६१ ॥ पुरामेयोगयुक्तस्यलिंगमेतद्भुवस्तलात् ॥ उद्भिद्यसप्तपातालंनिरगात्पुरतोमहत् ॥ ६२ ॥ अस्मिँल्लिंगेपुरागौरिसुगुप्तंतिष्ठतामया ॥ तुभ्यंनेत्रत्रयंदत्तंनिरैक्षिष्ठास्तथोत्तमम् ॥ ६३ ॥ तदाप्रभृतिदेवेशिलिंगमेतत्रिलोचनम् ॥ विष्टपत्रितयांतःस्थैर्गीयतेज्ञानदृष्टिदम् ॥ ६४ ॥ त्रिलोचनस्ययेभक्तास्तेपिसर्वेत्रिलोचनाः ॥ ममपारिषदास्तेतुजीवन्मुक्तास्तएवहि ॥ ६५ ॥ त्रिलोचनस्यलिंगस्यमहिमानंनकश्चन ॥ सम्यग्वेत्तिमहेशानिमयैवपरिगोपितम् ॥६६॥ शुक्लराधतृतीयायांस्नात्वापैलिपिलेह्रदे ॥ उपोषणपराभक्त्यारात्रौजागरणान्विताः ॥६७॥ त्रिलोचनंपूजयित्वाप्रातःस्नात्वापितत्रवै ॥ पुनर्लिंगंसमभ्यर्च्यदत्त्वाधर्मघटानपि ॥ ६८ ॥ सान्नान्सदक्षिणान्देविपितॄनुद्दिश्यहर्षिताः ॥ विधायपारणंपश्चाच्छिवभक्तजनैःसह ॥ ६९ ॥ विसृज्यपार्थिवंदेहंतेनपुण्येननोदिताः ॥ भवंतिदेविनियतंगणाममपुरोगमाः ॥ ७० ॥ तावद्भ्रमंतिसंसारेदेवामर्त्यामहोरगाः ॥ गौरियावन्नपश्यंतिकाश्यांलिंगंत्रिलोचनम् ॥७१॥ सकृत्त्रिविष्टपंदृष्ट्वास्नात्वापैलिपिलेह्रदे ॥ नजातुःमातुस्तनपोजायतेजंतुरत्रहि ॥७२॥

दकानि ॥ प्रहंतीतिपाठेपिसएवार्थः ॥६०॥६१॥ भुवस्तलाद्भूमेरधोभागात् ॥ तत्रावधिमाह ॥ उद्भिद्येति ॥ ६२ ॥ त्रिलोचननामनिर्वक्ति अस्मिन्निति द्वयेन ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ॥ ६७ ॥ धर्मघटान्धर्ममुद्दिश्यदीयमानान्कुंभान् ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ सकृत्त्रिविष्टपमिति ॥ अग्निहोत्रंजुहोतियवागूंपचतीतिवदर्थक्रमोऽत्रद्रष्टव्योनतिवडोयजतीत्यादिवत्पाठक्रमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातश्चतुर्थ्यांस्नात्वायस्तीर्थेपैलिपिलेशुभे ॥ त्रिलोचनंसमभ्यर्च्येत्यादिबहुवचनविरोधात् ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ शांतनवंशंतनुनास्थापितम् ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ॥ ८१ ॥ ८२ ॥ आख्यायिकांप्रस्तावयति ॥ अन्यच्चेति ॥ ८३ ॥ ॥ इतिश्रीरामानन्दकृतायांकाशीखण्डटीकायांपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ षट्सप्ततितमेऽध्याये प्रभावोतिमहत्तरः ॥ त्रिलोचनस्यदेवस्यवर्ण्यतेतिसुखप्रदः ॥ १ ॥ अन्यच्चात्रैवयद्वृत्तंतद्ब्रवीमीत्युक्तंतमेवेतिहासंश्रोतृमनःसमाधानप्रार्थनापूर्वकंप्रस्तावयति ॥ शृणुष्वेति ॥ इतिहासःपुरावृत्तः

प्रतिमासंसदाष्टम्यांचतुर्दश्यांचभामिनि ॥ आयांतिसर्वतीर्थानिद्रष्टुंदेवंत्रिविष्टपम् ॥७३॥ त्रिविष्टपाद्दक्षिणतःस्नातःपैलिपिलेंऽभसि॥तत्रसंध्यामुपास्यै कांराजसूयफलंलभेत् ॥ ७४ ॥ पादोदकाख्यस्तत्रैवकूपःपापविनाशकः ॥ प्राश्यतस्योदकंमर्त्योनमर्त्योजायतेपुनः ॥ ७५ ॥ तस्यलिंगस्यपार्श्वेतुसंति लिंगान्यनेकशः ॥ कैवल्यदानितान्यत्रदर्शनात्स्पर्शनादपि ॥७६॥ तत्रशांतनवंलिंगंगंगातीरेप्रतिष्ठितम् ॥ तद्दृष्ट्वाशांतिमाप्नोतिनरःसंसारतापितः॥७७॥ तद्दक्षिणेमहालिंगंमुनेभीष्मेशसंज्ञितम् ॥ कलिःकालश्चकामश्चबाधतेनतदीक्षणात् ॥ ७८ ॥ तत्प्रतीच्यांमहालिंगंद्रोणेशइतिकीर्तितम् ॥ यल्लिंगपूज नाद्द्रोणोज्योतीरूपंपुनर्दधौ ॥ ७९ ॥ अश्वत्थामेश्वरंलिंगंतदग्रेचातिपुण्यदम् ॥ यदर्चनवशाद्द्रौणिर्नबिभेत्यपिकालतः ॥ ८० ॥ द्रोणेशाद्वायुदिग्भागे वालखिल्येश्वरंपरम् ॥ तल्लिंगंश्रद्धयादृष्ट्वासर्वक्रतुफलंलभेत् ॥ ८१ ॥ तद्वामेलिंगमालोक्यवाल्मीकेश्वरसंज्ञितम् ॥ तस्यसंदर्शनादेवविशोकोजायते नरः ॥ ८२ ॥ अन्यच्चात्रैवयद्वृत्तंतद्ब्रवीमिघटोद्भव ॥ त्रिविष्टपस्यमाहात्म्यंदेव्यैदेवेनभाषितम् ॥ ८३ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यां संहितायांचतुर्थेकाशीखंडउत्तरार्धे पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुष्वमैत्रावरुणेपुराकल्पेरथंतरे ॥ इतिहासइहासीद्यः पीठेविरजसंज्ञिते ॥ १ ॥ त्रिलोचनस्यप्रासादेमणिमाणिक्यनिर्मिते ॥ नानाभंगिगवाक्षाढ्येरत्नसानाविवायते ॥ २ ॥ कदाचिदपिकल्पांतेद्योलोकेभ्रंश तिक्षये ॥ प्रोत्तंभनंस्तंभइवदत्तोविश्वकृतास्वयम् ॥ ३ ॥ मरुत्तरंगिताग्राभिःपताकाभिरितस्ततः ॥ सन्निवारयतीवेत्थमघौघान्विशतोमुने ॥ ४ ॥ देदी प्यमानसौवर्णकलशेनविराजिते ॥ पार्वणेनशशांकेनखेदादिवसमाश्रिते ॥ ५ ॥

संवादः ॥ १ ॥ त्रिलोचनस्यप्रासादइत्येतस्यपारावतद्वंद्वंकलरवयुगलंवसेद्वसतिस्मावसदितिवेतिपंचमेनान्वयः ॥ प्रासादंविशिनष्टि मणीत्यादिपादोनचतुर्भिः ॥ नानाभंगिगवाक्षाढ्येनानापरिपाटि भित्तिच्छिद्राढ्ये ॥ रत्नसानौमेरौ ॥ २ ॥ कल्पांतेस्थित्यवसाने ॥ द्योलोकेस्वर्गलोकेभ्रंशतिभ्रश्यतिसति ॥ क्षयेप्रलये ॥ यातिसंक्षयमितिपाठांतरम् ॥ प्रोत्तंभनस्तंभोधारणस्तंभः॥विश्वकृताविश्वेश्वरे णब्रह्मणावादत्तइवयस्तस्मिन्नित्यर्थः ॥३॥ इत्थमनेनप्रकारेण॥तमेवप्रकारमाह॥मरुत्तरंगिताग्राभिःपवनचंचलाग्राभिःसर्वतःपताकाभिरघौघान्सन्निवारयतीवयस्तस्मिन्नित्यर्थः॥४॥उभयत्राप्युत्प्रेक्षा ॥

CC-0. In Public Domain. Digitization by eGangotri

पार्वणेनपूर्णिमासंबंधिना ॥ ५ ॥ ६ ॥ ७ ॥ कर्णातिथिः कर्णगोचरः ॥ ८ ॥ चतुर्विधानिकांस्यतालादीनि ॥ कर्णगुहांकर्णशष्कुलीम् ॥ प्रतिशब्दंप्रतिध्वनिंप्रतन्वतेप्रजनयंति ॥ ॥ ९ ॥ मंगलाययदारार्तिकंवहुदीपयुक्तंपात्रंतत्संबंधियज्ज्योतिस्तत्कर्तृतयोःपक्षिणोर्नेत्रांतर्नेत्रमध्येनिविशत्प्रविशद्भक्तानांचेष्टांपूजादिव्यापारंप्रदर्शयेद्दर्शयतीत्यर्थः ॥ १० ॥ प्राणयात्रां प्राणवृत्तिमाहारमितियावत् ॥ वांछितमभिमतप्रदेशम् ॥ नोयातोनगच्छतः ॥ ११ ॥ प्रासादंपरितःदेवगृहस्यसर्वतइत्यर्थः ॥ १२ ॥ गंगासरस्वतीयमुनानर्मदाश्चतस्रःस्रोतस्विन्योनद्यस्तासां

तत्रपारावतद्वंद्वंवसेत्स्वैरंकृतालयम् ॥ प्रातःसायंचमध्याह्नेकुर्वन्नित्यंप्रदक्षिणम् ॥ ६ ॥ उड्डीयमानंपरितःपक्षवातैरितस्ततः ॥ रजःप्रासादसंलग्नंदूरीकुर्व द्दिनेदिने ॥ ७ ॥ त्रिलोचनेतिसततंनामभक्तैरुदाहृतम् ॥ त्रिविष्टपेतिचतथातयोःकर्णातिथीभवेत् ॥ ८ ॥ चतुर्विधानिवाद्यानिशंसुप्रीतिकराण्यलम् ॥ तयोःकर्णगुहांप्राप्यप्रतिशब्दंप्रतन्वते ॥ ९ ॥ मंगलारार्तिकज्योतिस्त्रिसंध्यंपक्षिणोस्तयोः ॥ नेत्रांतर्निविशन्नित्यंभक्तचेष्टांप्रदर्शयेत् ॥१०॥ प्राणयात्रां विहायापिकदाचित्स्थिरमानसौ ॥ नोड्डीयवांछितंयातःपश्यंतौकौतुकंखगौ ॥ ११ ॥ तत्रभक्तजनाकीर्णप्रासादंपरितोमुने ॥ तंडुलादिचरंतौतौकुर्वाते चप्रदक्षिणम् ॥ १२ ॥ देवदक्षिणदिग्भागेचतुःस्रोतस्विनीजलम् ॥ तृषार्तौधयतोविप्रप्राप्तौजातुचिदंडजौ ॥ १३ ॥ तयोरित्थंविचरतोस्त्रिलोचनसमी पतः ॥ अगाद्बहुतिथःकालोद्विजयोःसाधुचेष्टयोः ॥ १४ ॥ अथदेवालयस्कंधेगवाक्षांतर्गतौचतौ ॥ श्येनेनकेनचिद्दृष्टौक्रूरदृष्ट्यासुखस्थितौ ॥ १५ ॥ तच्चपारावतद्वंद्वंश्येनःपरिजिघृक्षुकः ॥ अवतीर्यांबरादाशुप्रविष्टोन्यशिवालये ॥ १६ ॥ ततोविलोकयामासतदागमविनिर्गमौ ॥ केनमार्गेणविशतोदुर्ग मेतौपतत्रिणौ ॥ १७ ॥ केनाध्वनाचनिर्यातःककालेकुरुतश्चकिम् ॥ कथंयुगपदेतौमेग्राह्यौस्वैरंभविष्यतः ॥ १८ ॥ मध्येदुर्गंप्रविष्टौचममवश्याविमौ नयत् ॥ एकदृष्टिःक्षणंतस्थौश्येनइत्थंविचिंतयन् ॥ १९ ॥ अहोदुर्गबलंप्राज्ञाःशंसंत्येवेतिहेतुतः ॥ दुर्बलोप्याकलयितुंसहसारिर्नशक्यते ॥ २० ॥ करि णांतुसहस्रेणवराश्वानांनलक्षतः ॥ तत्कर्मसिद्धिर्नृपतेर्दुर्गेणैकेनयद्भवेत् ॥ २१ ॥ दुर्गस्थोनाभिभूयेतविपक्षःकेनचित्क्वचित् ॥ स्वतंत्रंयदिदुर्गंस्यादमर्म ज्ञप्रकाशितम् ॥ २२ ॥ इतिदुर्गबलंशंसञ्श्येनोरोषारुणेक्षणः ॥ असाध्वसौकलरवौवीक्ष्ययातोनभोंगणम् ॥ २३ ॥ अथपारावतीदक्षाविपक्षंप्रेक्ष्यप क्षिणम् ॥ महाबलंदुर्गबलाप्राहपारावतंपतिम् ॥ २४ ॥ ॥ कलरव्युवाच ॥ ॥ प्रियपारावतप्राज्ञसर्वकामिसुखारव ॥ तवदृग्विषयंप्रातःश्येनोयंप्रबलो रिपुः ॥ २५ ॥ सावज्ञंवाक्यमाकर्ण्यपारावत्याःसतत्पतिः ॥ पारावतीमुवाचेदंकाचिंतेतितवप्रिये ॥ २६ ॥ ॥ पारावतउवाच ॥ ॥ कतिनामनसंती हसुभगेव्योमचारिणः ॥ कतिदेवालयेष्वेषुखगानोपविशंतिहि ॥ २७ ॥

जलंधयतःपिवतः ॥ धेट्पाने ॥ जातुचित्कदाचित् ॥ १३ ॥ द्विजयोःपक्षिणोः ॥ १४ ॥ देवालयस्कंधेदेवालयशृंगादधोभागे ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ ननुदुर्बलयोर्ग्रहणेकिमितिकथं कारस्तत्राह ॥ मध्येदुर्गंदुर्गस्यमध्ये ॥ यद्यस्मात् ॥ इत्थंवक्ष्यमाणम् ॥ १९ ॥ १२० ॥ लक्षतःलक्षेण ॥ २१ ॥ २२ ॥ शंसन्स्तुवन् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तदा ॥२८॥२९॥ पत्युःपादयोरर्पितेईक्षणेनेत्रेययासा ॥ ३० ॥ युक्तंचैतदित्याह ॥ हितेति ॥ जोषंप्रीतिर्यथास्यात्तथास्थेयम् ॥ किमित्यतआह ॥ कार्यमिति ॥ ३१ ॥ ३२ ॥ मंडलगत्या परिभ्रमणगमनेनसश्येनःतद्गतायातौतयोर्गमनागमनमार्गौ ॥ गगनमार्गतःआकाशमार्गेण ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ताएवगतीर्दर्शयति ॥ प्रडीनेति ॥ व्याडेत्येका ॥ एतासां

कतिचैवनपश्यंतिनौसुखस्थाविहप्रिये ॥ तेभ्योयदीहभेतव्यंकुतोनौतत्सुखंप्रिये ॥ २८ ॥ रमस्वत्वंमयासार्धंत्यजचिंतामिमांशुभे ॥ अस्यश्येनवराकस्यगणनापिनमेहृदि ॥ २९ ॥ इत्थंपारावतवचःश्रुत्वापारावतीततः ॥ मौनमालंब्यसंतस्थेपत्युःपादार्पितेक्षणा ॥ ३० ॥ हितवर्त्मोपदिश्यापिप्रियप्रियचिकीर्षया ॥ साध्व्याजोषंसमास्थेयंकार्यंपत्युर्वचःसदा ॥ ३१ ॥ अन्येद्युरप्यथायातःश्येनोपश्यत्सदंपती ॥ अपरिच्छिन्नयाहृष्ट्यायथामृत्युर्गतायुषम् ॥ ३२ ॥ अथमंडलगत्यासप्रासादंपरितोभ्रमन् ॥ निरीक्ष्यतद्गतायातौयातोगगनमार्गतः ॥ ३३ ॥ गतेऽथनभसिश्येनेपुनःपारावतांगना ॥ प्रोवाचप्रेयसीनाथदृष्टोदुष्टस्त्वयाऽहितः ॥ ३४ ॥ तस्यावाक्यंसमाकर्ण्यपुनःकलरवोब्रवीत् ॥ किंकरिष्यत्यसौमुग्धेममव्योमविहारिणः ॥ ३५ ॥ दुर्गंचस्वर्गतुल्यंमेयत्रनास्त्यरितोभयम् ॥ अयंनतागतीर्वेत्तियावेदाहंनभोंगणे ॥ ३६ ॥ प्रडीनोड्डीनसंडीनकांडव्याडकपाटिकाः ॥ स्रंसनीमंडलवतीगतयोष्टावुदाहृताः ॥ ३७ ॥ यथैतास्विहकौशल्यंमयिपारावतिप्रिये ॥ गतिषुक्वापिकस्यापिपक्षिणोनतथांबरे ॥ ३८ ॥ सुखेनतिष्ठकांचितामयिजीवतितेप्रिये ॥ इतितद्वचनंश्रुत्वासास्थितामूकवत्सती ॥ ३९ ॥ अपरेद्युरपिश्येनस्तत्रभारशिलातले ॥ कियदंतरमासाद्योपविष्टोऽतिप्रहृष्टवत् ॥४०॥ आयामंतत्रसंस्थित्वातत्कुलायंविलोक्यच ॥ पुनर्विनिर्गतःश्येनःसापिभीताब्रवीत्पुनः ॥४१॥ प्रियस्थानमिदंत्याज्यंदुष्टदृष्टिविदूषितम् ॥ असौक्रूरोतिनिकटमुपविष्टोऽतिहृष्टवत् ॥ ४२ ॥ सावज्ञंसपुनःप्राहकिंकरिष्यत्यसौप्रिये ॥ मृगाक्षीणांस्वभावोयंप्रायशोभीरुवृत्तयः ॥ ४३ ॥ इतरेद्युरपिप्रातःसचश्येनोमहाबलः ॥ तयोरभिमुखंतत्रस्थितोयामद्वयावधि ॥४४॥ पुनर्विलोक्यतद्वर्त्मशीघ्रंयातोयथागतम् ॥ गतेथशकुनौतस्मिन्साबभाषेविहंगमी ॥ ॥ ४५ ॥ नाथस्थानांतरंयावोमृत्युर्नौनिकटोत्रयत् ॥ पुनर्दुष्टेप्रणष्टेस्मिन्नावांस्यावःसुखंप्रिय ॥ ४६ ॥ प्रिययस्यसपक्षस्यगतिःसर्वत्रसिद्धिदा ॥ सकिंस्वदेशरागेणनाशंप्राप्नोतिबुद्धिमान् ॥ ४७ ॥ सोपसर्गंनिजंदेशंत्यक्त्वायोन्यत्रनव्रजेत् ॥ सपंगुर्नाशमाप्नोतिकूलस्थितइवद्रुमः ॥ ४८ ॥

भेदोग्रंथांतरेद्रष्टव्यः ॥ ३७ ॥ ३८ ॥ ३९ ॥ तत्रमठे ॥ भारशिलातलेभारधारणार्थंदत्तायाशिलातस्यास्तलेउपरिभारवच्छिलातलइतिवा ॥ महापाषाणइत्यर्थः ॥ ४० ॥ आयामंप्रहरमात्रंव्याप्य ॥ कुलायंनीडम् ॥ ४१ ॥ ४२ ॥ भीरुवृत्तयोभीरुस्वभावाः ॥ ४३ ॥ ४४ ॥ ४५ ॥ प्रनष्टेऽदर्शनंगते ॥ ४६ ॥ सपक्षस्यसपत्रस्य ॥ ४७ ॥ पंगुःपंगुतुल्यः ॥ ४८ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रियोदितंनिशम्येतिसभवित्रीदशार्दितः ॥ सरीढंपुनरप्याहप्रियेमाभैःखगात्ततः ॥ ४९ ॥ अथापरस्मिन्नहनिसश्येनःप्रातरेवहि ॥ तद्द्वारदेशमासाद्यसायं यावत्स्थितोबलः ॥ ५० ॥ अस्ताचलस्याशिखरंयातेभानौगतेखगे ॥ कुलायाद्बाह्यमागत्योवाचपारावतीपतिम् ॥ ५१ ॥ नाथनिर्गमनस्यायंकालः कालोऽतिदूरतः ॥ यावत्तावद्विनिर्याहित्यक्त्वामामपिसन्मते ॥ ५२ ॥ त्वयिजीवतिदुष्प्राप्यंनकिंचिज्जगतीतले ॥ पुनर्दाराःपुनर्मित्रंपुनर्वसुपुनर्गृहम् ॥ ॥ ५३ ॥ यद्यात्मारक्षितःपुंसादारैरपिधनैरपि ॥ तदासर्वंहरिश्चंद्रभूपेनेवेहलभ्यते ॥ ५४ ॥ अयमात्माप्रियोबंधुरयमात्मामहद्धनम् ॥ धर्मार्थकाममोक्षाणामयमात्मार्जकःपरः ॥ ५५ ॥ यावदात्मनिवैक्षेमंतावत्क्षेमंजगत्त्रये ॥ सोपिक्षेमःसुमतिनायशसासहवांछ्यते ॥ ५६ ॥ यशोहीनंतुयत्क्षेमंतत्क्षेमान्निधनंवरम् ॥ तद्यशःप्राप्यतेपुंभिर्नीतिमार्गप्रवर्तने ॥ ५७ ॥ अतोनीतिपथंश्रुत्वानाथस्थानादितोव्रज ॥ नगमिष्यसिचेत्प्रातस्ततोमेसंस्मरिष्यसि ॥ ॥ ५८ ॥ इत्युक्तोपिसवैपत्न्यापारावत्यासुमेधया ॥ ननिर्ययौप्रतिस्थानाद्भवित्र्याप्रतिवारितः ॥ ५९ ॥ अथोषसिसमागत्यश्येनेनबलिनातदा ॥ तन्निर्गमाध्वासंरुद्धःकिंचिद्भक्ष्यवतासुने ॥ ६० ॥ दिनानिकतिचित्तत्रस्थित्वाश्येनोमहामतिः ॥ पारावतमुवाचेदंधिक्त्वांपौरुषवर्जितम् ॥ ६१ ॥ किंवायुध्यस्वदुर्बुद्धेकिंवानिर्याहिमेगिरा ॥ क्षुधाक्षीणोमृतःपश्चान्निरयंयास्यसिध्रुवम् ॥ ६२ ॥ द्वौभवंतावहंचैकश्चलौजयपराजयौ ॥ स्थानार्थंयुध्यतः सत्त्वात्स्वर्गोवादुर्गमेववा ॥ ६३ ॥ पुरुषार्थंसमालंब्ययेयतंतेमहाधियः ॥ विधिरेवहिसाहाय्यंकुर्यात्तत्सत्त्वचोदितः ॥ ६४ ॥ इत्थंसश्येनसंप्रोक्तः पत्न्याप्युत्साहितःखगः ॥ अयुध्यत्तेनश्येनेनस्वदुर्गद्वारमाश्रितः ॥ ६५ ॥ क्षुधितस्तृषितःसोथश्येनेनबलिनाधृतः ॥ चरणेनदृढेनाशुचंच्वासापि धृताखगी ॥ ६६ ॥ तावादायोड्डयांचक्रेश्येनोव्योमनिसत्वरम् ॥ चिंतयद्भक्षणस्थानमन्यपक्षिविवर्जितम् ॥ ६७ ॥ अथपत्न्याकलरवःप्रोक्तस्तत्रसुमेधया ॥ वचोवमानितंनाथत्वयामेस्त्रीतिबुद्धितः ॥ ६८ ॥ अतोऽवस्थामिमांप्राप्तःकिंकुर्यामबलायतः ॥ अधुनापिवचश्चैकंकरोषियदिमेप्रिय ॥ ६९ ॥ तदाहितंतेवक्ष्यामिकुरुचैवाविचारितम् ॥ ममैकवाक्यकरणात्स्त्रीजितोनभविष्यसि ॥ ७० ॥

यया ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ युध्यतोयुद्धंकुर्वाणस्यपुंसः ॥ सत्त्वात्सत्त्वगुणाददृष्टादितिवा ॥ ६३ ॥ तत्सत्त्वचोदितस्तस्ययुध्यमानस्यसत्त्वेनगुणेनादृष्टेन वाप्रेरितः ॥ ६४ ॥ ६५ ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशचंच्चात्रोटय ॥ ७१ ॥ चीत्कृतवान्श्येनजातिशब्दमकरोत् ॥ ७२ ॥ अपतन्मुक्तः ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ नियमंविशिनष्टिनिश्चितमिति ॥ निश्चयेनचितंव्याप्तमित्यर्थः ॥ तत्स्वरूपमेवाह ॥ एकपत्नीति ॥ ८० ॥ किमित्येताद्दशंनियमंगृहीतवांस्तत्राह ॥ परयोषिदिति ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥

यावदास्यगतास्म्यस्ययावत्खस्थोनभूमिगः ॥ तावदात्मविमुक्त्यैत्वमरेःपादंदृढंदश ॥७१॥ इतिपत्नीवचःश्रुत्वातथासकृतवान्खगः ॥ सपीडितोदृढंपादेश्येनश्चीत्कृतवान्बहु ॥ ७२ ॥ तेनचीत्करणेनाथमुक्तासाम्मुखसंपुटात् ॥ पादांगुलिश्लथत्वेनसोपिपारावतोऽपतत् ॥ ७३ ॥ विपद्यपिचनप्राज्ञैःसंत्याज्यःक्वचिदुद्यमः ॥ क्वचचंचुपुटस्तस्यक्वचतत्पादपीडनम् ॥७४॥ क्वचद्वयोस्तथाभूतादरेर्मोक्षणमद्भुतम् ॥ दुर्बलेप्युद्यमवतिफलंभाग्यंयतोऽर्पयेत् ॥ ॥ ७५ ॥ तस्माद्भाग्यानुसारेणफलत्येवसदोद्यमः ॥ प्रशंसंत्युद्यमंचातोविपद्यपिमनीषिणः ॥ ७६ ॥ अथतौकालयोगेनविपन्नौसरयूतटे ॥ मुक्तिपुर्यामयोध्यायामेकोविद्याधरोऽभवत् ॥ ७७ ॥ मृतानांयत्रजंतूनांकाशीप्राप्तिर्भवेद्ध्रुवम् ॥ मंदारदामतनयोनाम्नापरिमलालयः ॥ ७८ ॥ अनेकविद्यानिलयःकलाकौशलभाजनम् ॥ कौमारंवयआसाद्यशिवभक्तिपरोभवत् ॥ ७९ ॥ नियमंचातिजग्राहविजितेंद्रियमानसः ॥ एकपत्नीव्रतंनित्यंचरिष्यामीतिनिश्चितम् ॥ ८० ॥ परयोषित्समासक्तिरायुःकीर्तिंबलंसुखम् ॥ हरेत्स्वर्गगतिंचापितस्मात्तांवर्जयेत्सुधीः ॥ ८१ ॥ अपरंचापिनियमंसशुचिष्मान्समाददे ॥ गतजन्मांतराभ्यासात्त्रिलोचनसमाश्रयात् ॥ ८२ ॥ समस्तपुण्यनिलयंसमस्तार्थप्रकाशकम् ॥ समस्तकामजनकंपरानंदैककारणम् ॥ ॥ ८३ ॥ यावच्छरीरमरुजंयावन्नेंद्रियविप्लवः ॥ तावत्त्रिलोचनंकाश्यामनर्च्यश्नामिनाण्वपि ॥८४॥ इत्थंमंदारदामिःसनित्यंपरिमलालयः ॥ काश्यांत्रिविष्टपंद्रष्टुंसमागच्छेत्प्रयत्नवान् ॥ ८५ ॥ पारावत्यपिसाजातारत्नदीपस्यमंदिरे ॥ नागराजस्यपातालेनाम्नारत्नावलीतिच ॥ ८६ ॥ समस्तनागकन्यानांरूपशीलकलागुणैः ॥ एकैवरत्नभूतासीद्रत्नदीपोरगात्मजा ॥ ८७ ॥ तस्याःसखीद्वयंचासीदेकानाम्नाप्रभावती ॥ कलावतीतथान्याचनित्यंतदनुगेउभे ॥ ८८॥ स्वदेहादनपायिन्यौछायाकांतीयथातथा ॥ तेद्वेसख्यावभूतांहिरत्नावल्याघटोद्भव ॥ ८९ ॥ सातुबाल्येव्यतिक्रांतेकिंचिदुद्भिन्नयौवना ॥ शिवभक्तंस्वपितरंदृष्ट्वानियममग्रहीत् ॥ ९० ॥ पितस्त्रिलोचनंकाश्यामर्चयित्वादिनेदिने ॥ अभ्यांसखीभ्यांसहितामौनंत्यक्ष्यामिनान्यथा ॥ ॥ ९१ ॥ एवंनागकुमारीसासखीद्वयसमन्विता ॥ त्रिलोचनंसमभ्यर्च्यगृहानहरहोव्रजेत् ॥ ९२ ॥ दिनेदिनेसाप्रत्यग्रैःकुसुमैरिष्टगंधिभिः ॥ सुविचित्राणिमाल्यानिपरिगुंफ्यार्चयेद्विभुम् ॥ ९३ ॥ तिस्रोपिगीतंगायंतिलसद्ग्रांधारसुंदरम् ॥ रासमंडलभेदेनलास्यंतिस्रोपिकुर्वते ॥ ९४ ॥

॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ प्रत्यग्रैर्विकसितैः ॥ माल्यानिमालाः ॥ परिगुंफ्यगुंफित्वासीवित्वेतियावत् ॥ ग्रथ्येतिक्वचित् ॥ ९३ ॥ लसद्ग्रांधारसुंदरंशोभ

CC-0. In Public Domain. Digitization by eGangotri

मानगांधाररागेणमनोहरम् ॥ रासमंडलभेदेनबहुनर्तकीयुक्तोनृत्यविशेषोरासस्तद्भ्रमणबाहुल्येन ॥ लास्यंनृत्यम् ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ पिलिपिलेत्पैलिपिलंतस्मिन् ॥ ९८ ॥
॥ ९९ ॥ १०० ॥ १ ॥ अङ्गमोटनवत्यःशरीरचालनवत्यः ॥ क्वणिताननाःशब्दितमुखाः ॥२॥ संभ्रमेणादरेणापन्नंव्याप्तंमानसंयासांताःसंभ्रमापन्नमानसाः ॥ अतर्कितागमोऽसंभावितागमनः ॥

वीणावेणुमृदंगांश्चलयतालविचक्षणाः ॥ वादयंतिमुदायुक्तास्तिस्रोपीश्वरसन्निधौ ॥९५॥ इत्थमाराधयंतीशंतिस्रोनागकुमारिकाः ॥ विचित्रगंधमालाभिः संमार्जनविलेपनैः ॥ ९६ ॥ एकदामाधवेमासितृतीयायामुपोषिताः ॥ रात्रौजागरणंकृत्वानृत्यगीतकथादिभिः ॥ ९७ ॥ प्रातश्चतुर्थ्यांस्नात्वाथतीर्थेपैलिपिलेशुभे ॥ त्रिलोचनंसमभ्यर्च्याथप्रसुप्तारंगमंडपे ॥ ९८ ॥ सुप्तासुतासुबालासुत्रिनेत्रःशशिभूषणः ॥ शुद्धकर्पूरगौरांगोजटामुकुटमंडलः ॥ ९९ ॥ तमालनीलसुग्रीवःस्फुरत्फणिविभूषणः ॥ वामार्धविलसच्छक्तिर्नागयज्ञोपवीतवान् ॥१००॥ तस्मादेवविनिष्क्रम्यलिंगात्पन्नगमेखलात् ॥ उवाचचततोबालाविभुरुत्तिष्ठतेतिसः ॥ १ ॥ उत्थायताविनिर्माज्र्यलोचनेश्रुतिसंगते ॥ अंगमोटनवत्यश्चजृंभाभिःक्वणिताननाः ॥ २ ॥ यावत्पश्यंतिपुरतःसंभ्रमापन्नमानसाः ॥ अतर्कितागमस्तावत्ताभिर्दृष्टस्त्रिलोचनः ॥३॥ ववंदुरथताबालाज्ञात्वालक्ष्मभिरीश्वरम् ॥ तुष्टुवुश्चप्रहृष्टास्याःसन्नकंठयोतिगद्गदम् ॥ ४ ॥ जयशंभोजयेशानजयसर्वगसर्वद ॥ जयत्रिपुरसंहर्तर्जयांधकनिषूदन ॥ ५ ॥ जयजालंधरहरजयकंदर्पदर्पहृत् ॥ जयत्रैलोक्यजनकजयत्रैलोक्यवर्धन ॥ ६ ॥ जयत्रैलोक्यनिलयजयत्रैलोक्यवंदित ॥ जयभक्तजनाधीनजयप्रमथनायक ॥ ७ ॥ जयत्रिपथगापाथःप्रक्षालितजटातट ॥ जयचंद्रकलाज्योतिर्विद्योतितजगत्त्रय ॥ ८ ॥ जयसर्पफणारत्नप्रभाभासितविग्रह ॥ जयाद्रिराजतनयातपःक्रीतार्धदेहक ॥ ९ ॥ जयश्मशाननिलयजयवाराणसीप्रिय ॥ जयानंदवनाध्यासिप्राणिनिर्वाणदायक ॥ ११० ॥ जयविश्वपतेशर्वशर्वरीपरिवर्जित ॥ जयनृत्यप्रियेशोग्रजयगीतविशारद ॥ ११ ॥ जयप्रणवसद्वासजयधाममहानिधे ॥ जयशूलिन्विरूपाक्षजयप्रणतसर्वद ॥ १२ ॥ विधिःसर्वविधिज्ञोपिनत्वांस्तोतुंविचक्षणः ॥ वाचोवाचस्पतेर्नाथत्वत्स्तुतौपरिकुंठिताः ॥ १३ ॥

॥ ३ ॥ लक्ष्मभिःशशिभूषणादिचिह्नैः ॥४॥ तिस्रोनागकुमार्यस्ताःश्रीकंठंशशिभूषणम् ॥ एकादशसुपद्यैस्तुतुष्टुवुःप्रणताःशिवम् ॥१॥ जयसर्वोत्कर्षमाविष्कुरु ॥ ५ ॥ ६ ॥७॥ पाथोजलम् ॥८॥
॥ ९ ॥ ११० ॥ ११ ॥ प्रणवप्रणवस्वरूप ॥ सद्वाससतांवासआश्रय ॥ सद्धामेतिपाठेऽपिसएवार्थः ॥ धाममहानिधेतेजसांमहाशेवधेमहाश्रयेत्यर्थः ॥ विरूपाक्षत्रिनेत्र ॥१२॥ विधिर्ब्रह्मा ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमनतिमननविषयंनकरोतीतियर्थः ॥ १४ ॥ नमःशब्दावृत्तिरादरार्था ॥ १९ ॥ १६ ॥ १७ ॥ १८ ॥ सचभक्तइत्येकवचनंपरिणमय्यानुषंगः ॥ १९ ॥ निर्मलत्वेहेतुः ॥
भक्तिभावितंभक्त्यायुक्तमित्यर्थः ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ तस्यपरिमलालयस्य ॥ २६ ॥ २७ ॥ २८ ॥ नुन्नंप्रेरितंदूरीकृतमितियावत् ॥ २९ ॥ १३० ॥ चतुर्नंदे

विदंतिवेदाःसर्वज्ञनत्वांनाथयथार्थतः ॥ मनतीहमनोनत्वामनंतंचादिवर्जितम् ॥ १४ ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः ॥ त्रिलोचननमस्तुभ्यं
त्रिविष्टपनमोस्तुते ॥ १५ ॥ इत्युक्त्वादंडवद्भूमौप्रणिपेतुःकुमारिकाः ॥ अथोत्थाप्यकुमारीस्ताःप्रोवाचशशिभूषणः ॥ १६ ॥ सुतोमंदारदाम्नश्चनाम्नापरि
मलालयः ॥ पतिर्विद्याधरवरोभवतीनांभविष्यति ॥ १७ ॥ चिरंविद्याधरेलोकेभोगान्भुक्त्वासमंततः ॥ ततोनिर्वेदमापन्नाःकाशीसिद्धिमवाप्स्यथ ॥
॥ १८ ॥ यूयंतिस्रोपिमेभक्ताःसचविद्याधरोयुवा ॥ चत्वारोप्येतएवात्रप्रांतेमोक्षमवाप्स्यथ ॥ १९ ॥ जन्मांतरेपिमेत्सेवाभवतीभिश्चतेनच ॥ विहितात
नवोजन्मनिर्मलंभक्तिभावितम् ॥ २० ॥ एतच्चभवतीस्तोत्रंयःपठिष्यतिमेपुरः ॥ तस्यकामंप्रदास्यामिभवतीनामिवस्फुटम् ॥ २१ ॥ त्यजेत्क्षपाकृतं
पापंशुचिःप्रातःपठन्नरः ॥ दिवाकृतमलंहंतिसायंपठनतःस्फुटम् ॥२२॥ इत्युक्तवतिदेवेशेताःकन्याहृष्टमानसाः ॥ प्रणम्यप्रोचुरीशानंप्रबद्धकरसंपुटाः ॥
॥ २३ ॥ नागकन्याऊचुः ॥ ॥ पृच्छामोब्रूहिनोनाथकरुणाकरशंकर ॥ जन्मांतरेकथंसेवाचतुर्भिर्भवतःकृता ॥ २४ ॥ भवप्राग्भववृत्तांतंतस्यापि
सुकृतात्मनः ॥ अस्माकमपिचाख्याहिकृपांकुरुकृपानिधे ॥२५॥ इतिश्रुत्वाप्रणयतोबालोदीरितमीशिता ॥ प्रोवाचतासांतस्यापिभवांतरविचेष्टितम् ॥
॥ २६ ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुध्वंनागतनयास्तिस्रोपिहिसमाहिताः ॥ प्राग्भवंभवतीनांचतस्यापिकथयाम्यहम् ॥ २७ ॥ एषारत्नावली
पूर्वमासीत्पारावतीखगी ॥ सचविद्याधरवरःपतिरस्याःखगोभवत् ॥ २८ ॥ प्रासादेत्रममैताभ्यामुषितंसुचिरंसुखम् ॥ रजःप्रासादसंलग्नंनुन्नंपक्षानिलैः
पुनः ॥ २९ ॥ उपरिष्टादधस्ताच्चकृतावह्वचःप्रदक्षिणाः ॥ व्योम्नासंचरमाणाभ्यांसंचरद्भ्यांममाजिरे ॥ १३० ॥ स्नातंचतुर्नदेतीर्थेपीतंतत्रांबुचासकृत् ॥
आभ्यांकलरवाभ्यांचकृतःकलरवोमुदे ॥ ३१ ॥ एताभ्यांस्थिरचेतोभ्यांमुदिताभ्यामतीवहि ॥ दृष्टानिकौतुकान्यत्रममभक्तैःकृतानिवै ॥३२॥ अमूभ्यां
बहुशोदृष्टाममंगलदीपिकाः ॥ पीतंश्रुतिपुटाभ्यांचममनामाक्षरामृतम् ॥ ३३ ॥ तिर्यग्योनिप्रभावेननमृतौममसन्निधौ ॥ मृतंपुर्यामयोध्यायांकाशीप्रा
तिकृतिध्रुवम् ॥ ३४ ॥ अयोध्यानिधनादेपारत्नदीपसुताभवत् ॥ पतिःपारावतोऽस्याःसजातोविद्याधरांगजः ॥३५॥ एषाप्रभावतीनागीनागराजस्यप
त्निनः ॥ इहजन्मनिकन्यासीत्पूर्वंजन्मब्रवीमिवः ॥३६॥ त्रिशिखस्योरगेंद्रस्यसुताचेयंकलावती ॥ एतस्याअपिवृत्तांतंनिशामयतवच्म्यहम् ॥ ३७ ॥

चतसृणांनदीनांसमाहारश्चतुर्नदंतस्मिन् ॥ मुदेहर्षायममेतिशेषः ॥ ३१ ॥ ३२ ॥ ३३ ॥ काशीप्राप्तिंकरोतीतितथातस्यांकाशीप्राप्तिकृति ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥३८॥३९॥ दंदशूकेनसर्पेण ॥१४०॥४१॥ परिणेताविवाहकर्ता ॥ देवसरिदाह्वानांदेवनदीनाम्नीम् ॥४२॥ रंभाकदली ॥४३॥ शाखामृग्यौवानर्यौ ॥ ननुमासोपवासादिकृतवत्योस्तयोःकथंशाखा
मृगीत्वंतत्राह ॥ फलेति ॥ विपाकेनफलेन ॥ तर्हिमासोपवासादिनापातिव्रत्यरक्षणेनकिंकृतंतत्राह ॥ शीलेति ॥४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८॥ ४९ ॥ १५० ॥ ५१ ॥ तदुत्प्लुत्यादिवानर

भवांतरेतृतीयेऽतःकन्येचारायणस्यह ॥ आस्तांमहर्षेःशीलाढ्येप्रेमवत्यौपरस्परम् ॥३८॥ पित्राचारायणेनापिताभ्यांसंप्रेरितेनते ॥ आमुष्यायणपुत्रा यदत्तेनारायणायहि ॥ ३९॥ अप्राप्तयौवनःसोथसमिदाहरणायवै ॥ गतोविधिवशादृष्टोदंदशूकेनकानने ॥१४०॥ भवानीगौतमीनाम्न्यौतेतुचारायणां गजे ॥ वैधव्यदुःखमापन्नेदैन्यग्रस्तेबभूवतुः ॥ ४१ ॥ अतएवप्रयत्नेनपरिणेताविवर्जयेत् ॥ देवतासरिदाह्वानांकन्यांपाणिग्रहेसुधीः ॥ ४२ ॥ अथर्षेः कस्यचिद्दैवादाश्रमेपरमाद्भुते ॥ रंभाफलान्यदत्तानिमोहाज्जगृहतुस्तदा ॥४३॥ कृत्वामासोपवासादिव्रतानिब्राह्मणांगजे ॥ अवाप्यनिधनंकालाच्छाखा मृग्यौबभूवतुः ॥ ४४ ॥ फलचौर्यविपाकेनवानरीत्वंतयोरभूत् ॥ शीलरक्षणधर्मेणकाश्यांजनिमवापतुः ॥४५॥ सचनारायणोविप्रःपितृशुश्रूषणव्रतः॥ दष्टोपिदंदशूकेनकाश्यांपारावतोभवत् ॥ ४६ ॥ एवंभवांतरेचासीदेतयोःपतिरेषकः ॥ तिसृणांभवतीनांचभावीभर्ताधुनापिहि ॥ ४७ ॥ प्रासादस्या स्यपार्श्वेतुन्यग्रोधस्तुमहानभूत् ॥ तस्मिन्शाखिनिशाखाढ्येशाखामृग्यौबभूवतुः ॥ ४८ ॥ चतुःस्रोतस्विनीतीर्थेक्रीडयाचममज्जतुः ॥ पपतुश्चापि पानीयंतस्मिंस्तीर्थेतृषातुरे ॥ ४९ ॥ जातिस्वभावचापल्यात्क्रीडंत्यौचप्रदक्षिणम् ॥ चक्रतुर्बहुकृत्वश्चलिंगंदृदशतुर्बहु ॥ १५० ॥ विचरंत्यावितिस्वैरं तत्रन्यग्रोधसन्निधौ ॥ केनचिद्योगिवेषेणपाशेनचनियंत्रिते ॥ ५१ ॥ भिक्षार्थंशिक्षितेतेनतदुत्प्लुत्यादिनर्तनम् ॥ अथतेक्वापिमर्कट्यौकालधर्मवशंगते॥ ॥ ५२ ॥ काशीवासजपुण्येनत्रैलोचन्यानुसेवया ॥ प्रादक्षिण्यादिरूपिण्याजातेनागसुतेइति ॥५३॥ अधुनातंपतिंप्राप्यविद्याधरकुमारकम् ॥ निर्वि श्यस्वर्गभोगांश्चकाश्यांनिर्वृतिमेष्यथ ॥ ५४ ॥ यदल्पमपिवैकाश्यांकृतंकर्मशुभावहम् ॥ तस्यमोक्षःपरीपाकोनिश्चितंमदनुग्रहात् ॥५५॥ त्रिलोक्याअ पिसर्वस्याःश्रेष्ठावाराणसीपुरी ॥ ततोपिलिंगमोंकारंततोप्यत्रत्रिलोचनम् ॥५६॥ तिष्ठमानोत्रलिंगेहंभक्तमुक्तिंदिशाम्यहम् ॥ ततःसर्वप्रयत्नेनकाश्यांपू ज्यस्त्रिलोचनः ॥ ५७ ॥ इत्युक्त्वादेवदेवेशस्तत्प्रासादांतरंविशत् ॥ अवाच्यरूपमासाद्यस्थूलंत्रिभुवनादपि ॥ ५८ ॥ ताश्चस्वंस्वंपदंप्राप्यतद्वृत्तांतमशे षतः ॥ स्वमातृपुरतश्चोक्त्वाकृतकृत्याइवाभवन् ॥५९॥ एकदामाधवेमासिमहायात्रासमागता ॥ विद्याधरास्तथानागामिलिताःसपरिच्छदाः ॥१६०॥ ॥३१३॥

जातेरुत्फालादितत्प्रसिद्धमितिवा ॥ मर्कटचौशाखामृग्यौ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६॥ ५७ ॥ अवाच्यंवाङ्मनसयोरगोचरंस्थूलंव्यापकंपरिपूर्णमितियावत् ॥ ५८ ॥ ५९ ॥ १६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलावलींकुलपरंपराम् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ अतिगौरवमतिमाहात्म्यम् ॥ ६५ ॥ ६६ ॥ मध्येलिंगंलिंगस्यमध्ये ॥ ६७ ॥ ६८ ॥ १६९ ॥ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायांषट्सप्ततितमोऽध्यायः ॥७६॥ ॥छ॥ ॥ अध्यायेसप्ततितमेसप्ताधिकउशत्तमम् ॥ केदारेशस्यमाहात्म्यंवर्ण्यतेसर्वकामदम् ॥१॥ त्रिसप्ततितमेध्यायेओंकारादिचतुर्दशलिंगगण

विरजस्केमहाक्षेत्रेत्रिलोचनसमीपतः ॥ देवस्यवरदानाच्चपृष्ट्वान्योन्यंकुलावलीम् ॥६१॥ विद्याधरायतानागैःकन्यास्तिस्रोपिकलिपताः ॥ मंदारदामासं तुष्टःप्राप्यतच्चक्षुषात्रयम् ॥ ६२ ॥ रत्नदीपश्चनागेंद्रःपद्मीचभुजगेश्वरः ॥ त्रिशिखोपिफणींद्रश्चहृष्टाएतेत्रयोपिच ॥ ६३ ॥ जामातरंसमासाद्यशुभंप रिमलालयम् ॥ अन्योन्यंस्वजनास्तेतुमुदाविकसितेक्षणाः ॥ ६४ ॥ विवाहोत्सवमाकल्प्यस्वंस्वंभुवनमाविशन् ॥ त्रिलोचनस्यलिंगस्यवर्णयंतोतिगौ रवम् ॥ ६५ ॥ सचविद्याधरःश्रीमान्नागीभिर्विपुलंसुखम् ॥ भुक्त्वावाराणसींप्राप्यसंसेव्याथत्रिलोचनम् ॥ ६६ ॥ गायन्गीतंसुमधुरंनागीभिःसहितः कृती ॥ आत्मानंचातिसंस्मृत्यमध्येलिंगंलयंगतः ॥ ६७ ॥ ॥ स्कंदउवाच ॥ ॥ त्रिलोचनस्यमहिमाकलौदेवेनगोपितः ॥ अतोल्पसत्त्वामनुजानत ल्लिंगमुपासते ॥ ६८ ॥ त्रिलोचनकथामेतांश्रुत्वापापान्वितोप्यहो ॥ विपाप्माजायतेमर्त्योलभतेचपरांगतिम् ॥ १६९ ॥ ॥ इतिश्रीस्कांदेमहापु राणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंड उत्तरार्धे त्रिलोचनप्रभावोनामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ पार्वत्युवाच ॥ ॥ नमस्ते देवदेवेशप्रणमत्करुणानिधे ॥ वदकेदारमाहात्म्यंभक्तानामनुकंपया ॥१॥ तस्मिँल्लिंगेमहाप्रीतिस्तवकाश्यामनुत्तमा ॥ तद्भक्ताश्चजनानित्यंदेवदेवमहा धियः ॥ २ ॥ ॥ देवदेवउवाच ॥ ॥ शृणवपर्णेभिधास्यामिकेदारेश्वरसंकथाम् ॥ समाकर्ण्यापियांपापोप्यपापोजायतेक्षणात् ॥ ३ ॥ केदारंयातु कामस्यपुंसोनिश्चितचेतसः ॥ आजन्मसंचितंपापंतत्क्षणादेवनश्यति ॥ ४ ॥ गृहाद्विनिर्गतेपुंसिकेदारमभिनिश्चितम् ॥ जन्मद्वयार्जितंपापंशरीराद पिनिर्व्रजेत् ॥ ५ ॥ मध्येमार्गंप्रपन्नस्यत्रिजन्मजनितंत्वघम् ॥ देहगेहाद्विनिःसृत्यनिराशंयातिनिःश्वसत् ॥ ६ ॥ सायंकेदारकेदारकेदारेतित्रिरुच्चरन् ॥ गृहेपिनिवसन्नूनंयात्राफलमवाप्नुयात् ॥ ७ ॥ दृष्ट्वाकेदाराशिखरंपीत्वातत्रत्यमंबुच ॥ सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः ॥८॥ हरपापह्रदेस्नात्वाके दारेशंप्रपूज्यच ॥ कोटिजन्मार्जितैर्नोभिर्मुच्यतेनात्रसंशयः ॥९॥ सकृत्प्रणम्यकेदारंहरपापकृतोदकः ॥ स्थाप्यलिंगंह्रदंभोजेप्रांतेमोक्षंगमिष्यति॥१०॥

नामध्येयेओंकारादीनांषण्णांप्रादुर्भावमाहात्म्ययोः पूर्वमुक्तत्वात्क्रमप्राप्तंकेदाराविर्भावमाहात्म्यंप्रणतिपूर्वकंपृच्छति ॥ नमस्तइति ॥ १ ॥ २॥३॥४॥५॥ मध्येमार्गंमार्गस्यमध्ये ॥६॥७॥ केदार शिखरंकेदारेश्वरप्रासादाग्रम् ॥ सप्तजन्मकृतात्सप्तजन्मस्वनुष्ठितात् ॥ जन्मजन्मकृतादितिक्वचित् ॥८॥ एनोभिःपापैः ॥ ९ ॥ पापंहरतीतिहरपापंहरतिपापंयत्तद्वाहरपापम् ॥ उभयथाप्यार्षम् ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११ ॥ केदारेश्वरंदिदृक्षूणांमध्येमार्गेमृतानांकैलासेवासोभवत्यस्मिन्नर्थेइतिहासमुत्थापयति ॥ पुरेति ॥ राथंतरेकल्पेरथंतरनाम्नि ॥ १२ ॥ १३ ॥ जटाएवमुकुटानितैर्भूषितैरलंकृतैः ॥ १४ ॥ भूतिभूषितवर्ष्मभिःविभूतिभूषितदेहैः ॥ भिक्षामाधूकरप्राक्प्रणीतायाचितातात्कालिकोपपन्नरूपापंचविधाः ॥ तदुक्तम् ॥ माधूकरमसंक्लृप्तंप्राक्प्रणीतमयाचितम् ॥ तत्कालिकंचोपपन्नंभैक्षंपंच

हरपापह्रदेश्राद्धंश्रद्धयायःकरिष्यति ॥ उद्धृत्यसप्तपुरुषान्समेलोकंगमिष्यति ॥ ११ ॥ पुराराथंतरेकल्पेयदभूदत्रतच्छृणु ॥ अपर्णेदत्तकर्णात्वंवर्णयामितवाग्रतः ॥१२॥ एकोब्राह्मणदायादउज्जायिन्याइहागतः ॥ कृतोपनयनःपित्राब्रह्मचर्यव्रतोस्थितः ॥१३॥ स्थलींपाशुपतींकाशींसविलोक्यसमंततः॥ द्विजैःपाशुपतैःकीर्णांजटामुकुटभूषितैः ॥ १४ ॥ कृतलिंगसमर्चैश्चभूतिभूषितवर्ष्मभिः ॥ भिक्षाहृतान्नसंतुष्टैःपुष्टैर्गंगामृतोदकैः ॥ १५ ॥ बभूवानंदितमनाव्रतंजग्राहचोत्तमम् ॥ हिरण्यगर्भादाचार्यान्महत्पाशुपताभिधम् ॥ १६ ॥ सचशिष्योवशिष्ठोभूत्सर्वपाशुपतोत्तमः ॥ स्नात्वाह्रदेहरपापेनित्यंप्रातःसमुत्थितः ॥१७॥ विभूत्याहरहःस्नातित्रिकालंलिंगमर्चयन् ॥ नांतरंसविजानातिशिवलिंगेगुरौतथा ॥१८॥ सद्वादशाब्ददेशीयोवशिष्ठोगुरुणासह ॥ ययौकेदारयात्रार्थंगिरिंगौरीगुरोर्गुरुम् ॥१९॥ यत्रगत्वानशोचंतिकिंचित्संसारिणःक्वचित् ॥ प्राश्योदकंलिंगरूपंलिंगरूपत्वमागताः ॥२०॥ असिधारंगिरिंप्राप्यवशिष्ठस्यतपस्विनः ॥ गुरुर्हिरण्यगर्भाख्यःपंचत्वमगमत्तदा ॥ २१ ॥ पश्यतांतापसानांचविमानेसार्वकामिके ॥ आरोप्यतंपारिषदाःकैलासमनयन्मुदा ॥ २२ ॥ यस्तुकेदारमुद्दिश्यगेहादर्धपथेप्यहो ॥ अकातरस्त्यजेत्प्राणान्कैलासेसचिरंवसेत् ॥ २३ ॥ तदाश्चर्यंसमालोक्यसवशिष्ठस्तपोधनः ॥ केदारमेवलिंगेषुबहुमंस्तसुनिश्चितम् ॥ २४ ॥ अथकृत्वासकेदारींयात्रांवाराणसीमगात् ॥ अग्रहीन्नियमंचापियथार्थंचाकरोत्पुनः ॥ ॥ २५ ॥ प्रतिचैत्रंसदाचैत्र्यांयावज्जीवमहंध्रुवम् ॥ विलोकयिष्येकेदारंवसन्वाराणसींपुरीम् ॥ २६ ॥ तेनयात्राःकृताःसम्यक्षष्टिरेकाधिकामुदा ॥ आनंदकाननेनित्यंवसताब्रह्मचारिणा ॥ २७ ॥ पुनर्यात्रांसवैचक्रेमधौनिकटवर्तिनि ॥ परमोत्साहसंतुष्टःपलिताकलितोप्यलम् ॥ २८ ॥ तपोधनैस्तन्निधनंशंकमानैर्निवारितः ॥ कारुण्यपूर्णहृदयैरन्यैरपिचसंगिभिः ॥ २९ ॥ ततोपिनतदुत्साहभंगोभूद्दृढचेतसः ॥ मध्येमार्गंमृतस्यापिगुरोरिवगतिर्मम ॥ ३० ॥ इतिनिश्चितचेतस्केवशिष्ठेतापसेशुचौ ॥ अशूद्रान्नपरीपुष्टेतुष्टोहंचंडिकेऽभवम् ॥ ३१ ॥ स्वप्नेमयासंप्रोक्तोवशिष्ठस्तापसोत्तमः ॥ दृढव्रतप्रसन्नोस्मिकेदारंविद्धिमामिह ॥ ३२ ॥ अभीष्टंचवरंमत्तःप्रार्थयस्वाविचारितम् ॥ इत्युक्तवत्यपिमयिस्वप्नोमिथ्येतिसोब्रवीत् ॥ ३३ ॥ ततोपिसमयाप्रोक्तःस्वप्नोमिथ्याऽशुचिष्मताम् ॥ भवादृशामामिथ्यैवस्वाख्यासदृशवर्तिनाम् ॥ ३४ ॥

विधंस्मृतमिति ॥ असंक्लृप्तमितिमाधूकरविशेषणम् ॥ ताभिःकृतानियान्यन्नानितैःसंतुष्टैः ॥ १५ ॥ १६ ॥ प्रकृष्टोवशीवशिष्ठइतियावत् ॥ वसिष्ठइतिवापाठः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ गुरोर्महतःहिरण्यगर्भस्यवा ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ स्वाख्यासदृशंवर्तितुंशीलंयेषांतेषाम् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्त्ववतोधैर्यवतःसात्त्विकस्येतिवा ॥ ३५ ॥ ३६ ॥ मेममसंबंधिनः ॥ सार्थभूताइत्यर्थः ॥ ३७ ॥ ३८ ॥ ३९ ॥ सवशिष्ठइत्यारभ्यात्रपूर्वंत्वित्यतःप्राक्तनस्यग्रंथस्यायंभावः ॥ हरपापं तीर्थंकेदाराख्यंलिंगंचकाश्यांपूर्वमप्यस्त्येव ॥ वशिष्ठवरप्रार्थनातुतत्रकलामात्रावशेषेणात्रसर्वात्मनावस्थितिरिति ॥ अतएवकाशीस्थस्यवशिष्ठस्यपूर्वम् ॥ स्नात्वाह्नदेहरपापेनित्यंप्रातःसमुत्थितः ॥ विभूत्याहरहःस्नातित्रिकालंलिंगमर्चयन् ॥ इत्याद्युक्तमुपपन्नतरम् ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ तत्रहिमाद्रौकेदारे ॥ ४७ ॥ ४८ ॥ गौरीकुंडंयथातत्रे

वरंब्रूहिप्रसन्नोस्मिस्वप्रशंकांत्यजद्विज ॥ तवसत्त्ववतःकिंचिन्मयादेयंनकिंचन ॥ ३५ ॥ इत्युक्तंमेसमाकर्ण्यवरयामासमामिति ॥ शिष्योहिरण्यगर्भस्यतपस्विजनसत्तमः ॥ ३६ ॥ यदिप्रसन्नोदेवेशतदामेसानुगाइमे ॥ सर्वेशूलिन्ननुग्राह्याएषएववरोमम ॥ ३७ ॥ देवितस्येदमाकर्ण्यपरोपकृतिशालिनः ॥ वचनंनितरांप्रीतस्तथेतितमुवाचह ॥ ३८ ॥ पुनःपरोपकरणात्तत्तपोद्विगुणीकृतम् ॥ तेनपुण्येनसमयापुनःप्रोक्तोवरंवृणु ॥ ३९ ॥ सवशिष्ठोमहाप्राज्ञोदृढपाशुपतव्रतः ॥ देविमेप्रार्थयामासहिमशैलादिहस्थितिम् ॥ ४० ॥ ततस्तत्तपसाकृष्टःकलामात्रेणतत्रहि ॥ हिमशैलेततश्चात्रसर्वभावेनसंस्थितः ॥ ४१ ॥ ततःप्रभातेसंजातेसर्वेषांपश्यतामहम् ॥ हिमाद्रेःप्रस्थितःप्रातःस्तूयमानःसुरर्षिभिः ॥४२॥ वशिष्ठंपुरतःकृत्वासर्वसार्थसमायुतम् ॥ हरपापह्नदेतीर्थेस्थितोहंतदनुग्रहात् ॥ ४३ ॥ मत्परिग्रहतःसर्वेहरपापेकृतोदकाः ॥ आराध्यमामनेनैववपुषासिद्धिमागताः ॥ ४४ ॥ तदाप्रभृतिलिंगेस्मिन्स्थितःसाधकसिद्धये ॥ अविमुक्तेपरेक्षेत्रेकलिकालेविशेषतः ॥ ४५॥ तुषाराद्रिंसमारुह्यकेदारंवीक्ष्ययत्फलम् ॥ तत्फलंसप्तगुणितंकाश्यांकेदारदर्शने ॥ ४६ ॥ गौरीकुंडंयथातत्रहंसतीर्थंचनिर्मलम् ॥ यथामधुस्रवागंगाकाश्यांतदखिलंतथा ॥ ४७ ॥ इदंतीर्थंहरपापंसप्तजन्माघनाशनम् ॥ गंगायांमिलितंपश्चाजन्मकोटिकृताघहम् ॥ ४८ ॥ अत्रपूर्वंतुकाकोलौयुध्यंतौखान्निपेततुः ॥ पश्यतांतत्रसंस्थानांहंसौभूत्वाविनिर्गतौ ॥४९॥ गौरित्वयाकृतंपूर्वंस्नानमत्रमहाह्नदे ॥ गौरीतीर्थंततःख्यातंसर्वतीर्थोत्तमोत्तमम् ॥ ५० ॥ अत्रामृतस्रवागंगामहामोहांधकारहृत् ॥ अनेकजन्मजनितजाड्यध्वंसविधायिनी ॥ ५१ ॥ सरसामानसेनात्रपूर्वंतप्तंमहातपः ॥ अतस्तुमानसंतीर्थंजनेख्यातिमिदंगतम् ॥५२॥ अत्रपूर्वंजनःस्नानमात्रेणैवप्रमुच्यते ॥ पश्चात्प्रसादितश्चाहंत्रिदशैर्मुक्तिदुर्दृशैः ॥ ५३ ॥ सर्वेमुक्तिंगमिष्यंतियदिदेवेहमानवाः ॥ केदारकुंडेसुस्नातास्तदोच्छित्तिर्भविष्यति ॥ ५४ ॥ सर्वेषामेववर्णानामाश्रमाणांचधर्मिणाम् ॥ तस्मात्तनुविसर्गेत्रमोक्षंदास्यतिनान्यथा ॥ ५५ ॥ ततस्तदुपरोधेनतथेतिचमयोदितम् ॥ तदारभ्यमहादेविस्नानात्केदारकुंडतः ॥ ५६ ॥ समर्चनाच्चभक्त्यावैममनामजपादपि ॥ नैःश्रेयसींश्रियंदद्यामन्यत्रापितनुत्यजाम् ॥ ५७ ॥ केदारतीर्थेयःस्नात्वापिंडान्दास्यतिचात्वरः ॥ एकोत्तरशतंवंश्यास्तस्यतीर्णाभवांबुधिम् ॥ ५८ ॥

त्याद्युक्तंक्रमनादृत्यतद्दर्शयति ॥ अत्रेति ॥ काकोलौद्रोणकाकौ ॥ ४९ ॥ ५० ॥ ५१ ॥ मानसेनसरसामानससरोधिष्ठात्रा ॥ द्विजेनेतिकेचित् ॥ तत्रतन्नाम्नाब्राह्मणेनेत्यर्थः ॥ अत्रहरपापे ॥ मानसमितिख्यातिंगतम् ॥ इदंहरपापम् ॥ ५२ ॥ मुक्तिदुर्दृशैःमनुष्याणांप्राप्यंकैवल्यंद्रष्टुमशक्तुवद्भिः ॥ ५३ ॥५४ ॥ तनुविसर्गेतनुत्यागे ॥ ५५ ॥ ५६ ॥ ५७ ॥ भवांबुधिंसंसारार्णवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवांबुधेरितिचपाठः ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ विषाद्दुःखरूपात् ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ आख्यायिकथितः ॥ ॥ ७३ ॥ ७४ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ अष्टाधिकेमहाश्चर्येश्रोत्रानंदविधायिनि ॥ अध्यायेसप्ततितमेधर्मेशमाहि

भौमवारेयदादर्शस्तदायःश्राद्धदोनरः ॥ केदारकुंडमासाद्यगयाश्राद्धेनाकिंततः ॥ ५९ ॥ केदारंगंतुकामस्यबुद्धिर्देयानरैरियम् ॥ काश्यांस्पृशंस्त्वंकेदारं कृतकृत्योभविष्यसि ॥ ६० ॥ चैत्रकृष्णचतुर्दश्यासुपवासंविधायच ॥ त्रिगंडूषान्पिबन्प्रातर्हृल्लिंगमधितिष्ठति ॥ ६१ ॥ केदारोदकपानेनयथातत्रफलंभवेत् ॥ तथात्रजायतेपुंसांस्त्रीणांचापिनसंशयः ॥ ६२ ॥ केदारभक्तंसंपूज्यवासोन्नद्रविणादिभिः ॥ आजन्मजंनितंपापंत्यक्त्वायातिममालयम् ॥ ॥ ६३ ॥ आषण्मासंत्रिकालंयःकेदारेशंनमस्यति ॥ तंनमस्यंतिसततंलोकपालायमादयः ॥ ६४ ॥ कलौकेदारमाहात्म्यंयोपिकोपिनवेत्स्यति ॥ योवेत्स्यतिसपुण्यात्मासर्ववेत्स्यतिसध्रुवम् ॥ ६५ ॥ केदारेशंसकृद्दृष्ट्वादेविमेऽनुचरोभवेत् ॥ तस्मात्काश्यांप्रयत्नेनकेदारेशंविलोकयेत् ॥६६॥ चित्रांगदेश्वरंलिंगंकेदारादुत्तरेशुभम् ॥ तस्यार्चनान्नरोनित्यंस्वर्गभोगानुपाश्नुते ॥ ६७ ॥ केदाराद्दक्षिणेभागेनीलकंठविलोकनात् ॥ संसारोरगदष्टस्यतस्यनास्तिविषाद्भयम् ॥ ६८ ॥ तद्वायव्यैंबरीषेशोनरस्तदवलोकनात् ॥ गर्भवासंनचाप्नोतिसंसारेदुःखसंकुले ॥६९॥ इंद्रद्युम्नेश्वरंलिंगंतत्समीपेसमर्च्यच ॥ तेजोमयेनयानेनसस्वर्गंभुविमोदते ॥ ७० ॥ तद्दक्षिणेनरोदृष्ट्वालिंगंकालंजरेश्वरम् ॥ जरांकालंविनिर्जित्यममलोकेवसेच्चिरम् ॥७१॥ दृष्ट्वाक्षेमेश्वरंलिंगमुदक्चित्रांगदेश्वरात् ॥ सर्वत्रक्षेममाप्नोतिलोकेऽत्रचपरत्रच ॥७२॥ ॥ स्कंदउवाच ॥ ॥ देवदेवेनविंध्यारेकेदारमहिमामहान् ॥ इत्याख्यायिपुरांबायैमयातेपिनिरूपितः ॥ ७३ ॥ केदारेश्वरलिंगस्यश्रुत्वोत्पत्तिंकृतीनरः ॥ शिवलोकमवाप्नोतिनिष्पापोजायतेक्षणात् ॥ ७४ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेकेदारमहिमाख्यानंनामसप्तसप्ततितमोऽध्यायः ॥७७॥ ॥ पार्वत्युवाच ॥ ॥ आनंदकाननेशंभोयल्लिंगंपुण्यवर्धनम् ॥ यन्नामस्मरणादेवमहापातकसंक्षयः ॥ १ ॥ यत्सेव्यंसाधकैर्नित्यंयत्रप्रीतिरनुत्तमा ॥ यत्रदत्तंहुतंजप्तंध्यातंभवतिचाक्षयम् ॥ २ ॥ यस्यसंस्मरणादेवयल्लिंगस्यविलोकनात् ॥ यल्लिंगप्रणतेश्चापियस्यसंस्पर्शनादपि ॥ ३ ॥ पंचामृतादिस्नपनपूर्वाद्यस्यार्चनादपि ॥ तल्लिंगंकथयेशानभवेच्छ्रेयःपरंपरा ॥४॥ ॥ स्कंदउवाच ॥ ॥ इतिदेवीसमुदितंसमाकर्ण्यघटोद्भव ॥ सर्वज्ञेनयदाख्यातंतदाख्यास्यामितेशृणु ॥ ५ ॥ देवदेवउवाच ॥ ॥ उमेभवत्यायत्पृष्टंभवबंधविमोक्षकृत् ॥ ततोऽहंकथयिष्यामिलिंगंस्थिरमनाभव ॥ ६ ॥

मोच्यते ॥ १ ॥ विशेषंज्ञातुंपृच्छति ॥ आनंदेति ॥१॥२॥३॥ श्रेयःपरंपरानिरंतरंश्रेयः ॥४॥ समुदितंसम्यक्पृष्टम् ॥ ५ ॥ उमेइति ॥ उइतिसंबोध्यतपसेमाइतिमात्रानिषिद्धत्वादुमा ॥ तथाच हरिवंशे ॥ एकातत्रनिराहारातांमाताप्रत्यबोधयत् ॥ उमाइतिनिषेधंतीमातृस्नेहेनयंत्रिता ॥ सातथोक्तातदामात्रादेवीदुश्चरचारिणी ॥ उमेत्येवाभवत्ख्यातात्रिषुलोकेषुविश्रुतेति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७ ॥ ८ ॥ यत्रेतिसप्तम्यंतानांपदानांतस्यलिंगस्येतिसप्तमेनान्वयः ॥ सर्वत्रसामीप्येसप्तमी ॥ यस्यालिंगस्यसमीपेइत्यर्थः ॥ स्वयंविश्वभुजाख्या ॥ नंदनःपुत्रआशाविनायकाख्यइत्यर्थः ॥ ९ ॥
॥१०॥११॥१२॥१३॥१४॥१५॥ धर्मपीठंधर्मस्थानम् ॥ तद्धर्मेशायतनम् ॥१६॥ विवस्वतःसूर्यस्य ॥ १७ ॥ शिशिरेशिशिरऋतौ ॥ अभ्रावकाशकः ॥ मेघप्रावरणकः ॥ आसारषाडित्यर्थः ॥
तपतौग्रीष्मर्तौ ॥ पंचवह्निस्थःसूर्येणसार्धंचतुर्दिशमग्निस्थः ॥१८॥ वह्वनेहसंवहुकालम् ॥१९॥ समीराभ्यवहर्तावाय्वाहारः ॥ वहुदिष्टमनेककालम् ॥ दिष्टवान्भाग्यवान् ॥वहुदानंदत्तवानित्यर्थः ॥

आनंदकाननेचात्ररहस्यंपरमंमम ॥ नमयाकस्यचित्ख्यातंनप्रष्टुंवेत्तिकश्चन ॥७॥ संतिलिंगान्यनेकानिममानंदवनेप्रिये॥परंत्वयायथापृष्टंयथावत्तद्ब्रवी
मिते ॥ ८ ॥ यत्रमुक्तिस्वरूपात्वंस्त्वयंतिष्ठसिविश्वगे ॥ यत्रतेनंदनश्चास्तिक्षेत्रविघ्नविघातकृत् ॥ ९ ॥ ममापियेनत्रिपुरसमरेजयकांक्षिणः ॥ जयाशापू
रितास्तुत्याबहुमोदकदानतः ॥ १० ॥ यत्रास्तितीर्थमघहृत्पितृप्रीतिविवर्धनम् ॥ यत्स्नानाद्वृत्रहावृत्रवधपापाद्विमुक्तवान् ॥ ११ ॥ धर्माधिकरणंयत्र
धर्मराजोप्यवाप्तवान् ॥ सुदुष्करंतपस्तप्त्वापरमेणसमाधिना ॥ १२ ॥ पक्षिणोपिहियत्रापुर्ज्ञानंसंसारमोचनम् ॥ रम्योहिरण्मयोयत्रबभूवबहुपाद्द्रुमः ॥
॥ १३ ॥ यल्लिंगदर्शनादेवदुर्दमोनामपार्थिवः ॥ उद्वेजकोपिलोकानांक्षणाद्धर्ममतिस्त्वभूत् ॥ १४ ॥ तस्यालिंगस्यमाहात्म्यमाविर्भावंचसुंदरि ॥
निशामयाभिधास्यामिमहापातकनाशनम् ॥ १५ ॥ धर्मपीठंतदुद्दिष्टमत्रानंदवनेमम ॥ तत्पीठदर्शनादेवनरःपापैःप्रमुच्यते ॥ १६ ॥ पुराविवस्वतः
पुत्रोयमःपरमसंयमी ॥ तपस्ततापविपुलंविशालाक्षितवाग्रतः ॥ १७ ॥ शिशिरेजलमध्यस्थोवर्षास्वभ्रावकाशकः ॥ तपतौपंचवह्निस्थःकदाचिदि
तितप्तवान् ॥ १८ ॥ पादाग्रांगुष्ठभूस्पर्शीबहुकालंसतस्थिवान् ॥ एकपादस्थितःसोपिकदाचिद्बह्वनेहसम् ॥ १९ ॥ समीराभ्यवहर्तासीद्बहुदिष्टंसदि
ष्टवान् ॥ पपौसतुपिपासुःसन्कुशाग्रजलविप्रुषः ॥ २० ॥ दिव्यांचतुर्युगीमित्थंसनिनायतपश्चरन् ॥ चतुर्गुणंदिदृक्षुर्मांपरमेणसमाधिना ॥ २१ ॥
ततोहंतस्यतपसासंतुष्टःस्थिरचेतसः ॥ ययौतस्मैवरान्दातुंशमनायमहात्मने ॥२२॥ वटःकांचनशाखाख्योयस्तपस्तापसंततिम् ॥ दूरीचकारसुच्छायो
वहुद्विजसमाश्रयः ॥ २३ ॥ मंदमंदमरुल्लोलपल्लवैःकरपल्लवैः ॥ योध्वगानध्वसंतप्तानाह्वयेदिवतापहृत् ॥ २४ ॥ स्वानुरागैःसुरभिभिःस्वादुभिश्चपचे
लिमैः ॥ प्रीणयेदर्थिसार्थंयोवृत्तैर्निजफलैरलम् ॥२५॥ तदधस्तात्परंवीक्ष्यतमहंतपनांगजम् ॥ स्थाणुनिश्चलवर्ष्माणंनासाग्रन्यस्तलोचनम् ॥ २६ ॥
तपस्तेजोभिरुद्यद्भिःपरितःपरिधीकृतम् ॥ भानुमंतमिवाकाशेसुनीलेस्वेनतेजसा ॥ २७ ॥

विप्रुषःकणान् ॥२०॥ दिव्यांदेवपरिमाणांचतुर्युगींसत्यत्रेताद्वापरकल्याख्याम् ॥ चतुर्गुणंयथास्यात्तथानिनाय ॥ चतुर्गुणामितिवापाठः ॥ २१ ॥ शमनाययमाय ॥ २२ ॥ तपरतापसंतातिंतपो
जन्यतापपरंपराम् ॥ द्विजाःपक्षिणः ॥ २३ ॥ कररूपाःपल्लवाःकरपल्लवाःशाखाइत्यर्थः ॥ तैःकथंभूतैः ॥ मंदमंदमरुल्लोलपल्लवैःईषदीषत्पवनांदोलितपत्रैः ॥ २४ ॥ स्वानुरागैःस्वीयस्नेहैः ॥
पचेलिमैःपक्वैः ॥ वृत्तैर्वर्तुलैःवृत्तैरुत्पन्नैरितिवा ॥ २५ ॥ तदधस्तात्तस्यवृक्षस्यमूलेपरंतपःकर्तृषुश्रेष्ठंधर्मराजंवरंब्रूहीत्यहंप्रत्यवोचमितिचतुर्थेनान्वयः ॥ २६ ॥ परिधीकृतंपरिवेषीकृतंमंडलाकारेण

... Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिवेष्टितमित्यर्थः ॥ स्वेनसौरेण ॥ २७ ॥ स्वस्याख्यास्वाख्याधर्मइत्येवंरूपातयांकितंचिह्नितंधर्मेश्वरमित्यर्थः ॥ उपलःपाषाणः ॥ २८ ॥ २९ ॥ ३० ॥ परिहृष्टानिइंद्रियाणितेषामीश्वरंमनश्च यस्यसपरिहृष्टेंद्रियेश्वरः ॥ निर्व्याजंनिष्कपटम् ॥ सधर्मराजः ॥ ३१ ॥ पद्यैर्दशभिरुत्कृष्टैःप्रजासंयमनोयमः ॥ तुष्टावजगदीशानंशंकरंचंद्रशेखरम् ॥१ ॥ कारणानांप्रकृत्यादीनाम् ॥ कार्यमयाय विवर्तरूपप्रपंचाधिष्ठानाय ॥ ३२ ॥ वस्तुतोऽरूपरूपायमाययासमस्तरूपिणे ॥ पराणुरूपायपरमसूक्ष्माय ॥ परापरायकार्यकारणरूपाय ॥ अपारःपारोयस्यसतथातस्मैपरिपूर्णायेत्यर्थः ॥ पराब्धिपारप्रदायशत्रुरूपसंसारार्णवनाशायेत्यर्थः ॥ ३३ ॥ अनीश्वरःअधीश्वरः ॥ कालमत्तीतिकालात्तथात्वमित्यर्थः ॥ कालात्कालद्वाराप्रकृतेकारणेतिवा ॥ कालांतकृतइतिपाठेकालस्यांतं

स्वाख्यांकितंमहालिंगंप्रतिष्ठाप्यातिभक्तितः ॥ स्वच्छसूर्योपलमयंतेजःपुंजैरिवार्चितम् ॥ २८ ॥ साक्षीकृत्यैवतल्लिंगंतप्यमानंमहत्तपः ॥ प्रत्यवोचंधर्मराजंवरंब्रूहीतिभास्करे ॥ २९ ॥ अलंतस्वामहाभागप्रसन्नोस्मिशुभव्रत ॥ निशम्यशमनश्चेतिदृष्ट्वामांप्रणनामह ॥ ३० ॥ चकारस्तवनंचापिपरिहृष्टेंद्रियेश्वरः ॥ निर्व्याजंससमाधिंचविसृज्यब्रध्ननंदनः ॥ ३१ ॥ धर्मउवाच ॥ ॥ नमोनमःकारणकारणानांनमोनमःकारणवर्जिताय ॥ नमोनमःकार्यमयायतुभ्यंनमोनमःकार्यविभिन्नरूप ॥ ३२ ॥ अरूपरूपायसमस्तरूपिणेपराणुरूपायपरापराय ॥ अपारपारायपराब्धिपारप्रदायतुभ्यंशशिमौलयेनमः ॥ ॥ ३३ ॥ अनीश्वरस्त्वंजगदीश्वरस्त्वंगुणात्मकस्त्वंगुणवर्जितस्त्वम् ॥ कालात्परस्त्वंप्रकृतेःपरस्त्वंकालायकालात्प्रकृतेनमस्ते ॥ ३४ ॥ त्वमेवनिर्वाणपदप्रदोसित्वमेवनिर्वाणमनंतशक्ते ॥ त्वमात्मरूपःपरमात्मरूपस्त्वमंतरात्मासिचराचरस्य ॥ ३५ ॥ त्वत्तोजगत्त्वंजगदेवसाक्षाज्जगत्त्वदीयंजगदेकबंधो ॥ हर्तावितात्वंप्रथमोविधाताविधातृविष्ण्वीशनमोनमस्ते ॥ ३६ ॥ मृडस्त्वमेवश्रुतिवर्त्मगेषुत्वमेवभीमोऽश्रुतिवर्त्मगेषु ॥ त्वंशंकरःसोमसुभक्तिभाजाम्सुग्रोसिरुद्रत्वमभक्तिभाजाम् ॥ ३७ ॥ त्वमेवशूलीद्विषतांत्वमेवविनम्रचेतोवचसांशिवोसि ॥ श्रीकंठएकःस्वपदश्रितानांदुरात्मनांहालहलोग्रकंठः ॥ ३८ ॥ नमोस्तुतेशंकरशांतशंभोनमोस्तुतेचंद्रकलावतंस ॥ नमोस्तुतुभ्यंफणिभूषणायपिनाकपाणेऽधकवैरिणेनमः ॥ ३९ ॥ सएवधन्यस्तवभक्तिभाग्यस्तवार्चकोयःसुकृतीसएव ॥ तवस्तुतिंयःकुरुतेसदैवसस्तूयतेदुश्च्यवनादिदेवैः ॥ ४० ॥ कस्त्वामिहस्तोतुमनंतशक्तेशक्नोतिमादृग्लघुबुद्धिवैभवः ॥ प्राचांनवाचामिहगोचरोयःस्तुतिस्त्वयीयंनतिरेवयावत् ॥ ४१ ॥

करोतीतिकालांतकृत्तस्मै ॥ ३४ ॥ आत्मरूपोजीवरूपः ॥ अंतरात्मांऽतर्यामी ॥ ३५ ॥ प्रथमोविधातास्रष्टातदनंतरमविताततोहर्तेत्यर्थः ॥ विधात्रादिस्वरूपमाह ॥ विधातृविष्ण्वीशेति ॥ विधाताचतुराननः ॥ ३६ ॥ मृडःसुखरूपः ॥ भीमोदुर्दर्शोदुःखदइत्यर्थः ॥ शंकरःकल्याणकरः ॥ सोमउमयासहवर्तमान ॥ ३७ ॥ शूलीत्रिशूली ॥ शिवःकल्याणरूपः ॥ हालहलेनविषेणउग्रःकंठोयस्यसः ॥ ३८ ॥ अवतंसोभूषणम् ॥ ३९ ॥ दुश्च्यवनःइंद्रः ॥ ४० ॥ लघुबुद्धिरेववैभवंयस्यसः ॥ प्राचांप्राचीनानाम् ॥ तस्मिंस्त्वयि ॥ यावदितिसाकल्यार्थे ॥ साकल्येनयाइयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुतिःसानतिरेवेत्यर्थः ॥ ४१ ॥ इलामिलन्मौलिःपृथिवीस्पृशन्मस्तकः ॥ ४२ ॥ सप्ततुरंगःसूर्यःनामतोपिअपिशब्दादर्थतोपि ॥ ४३ ॥ धर्माधिकृतौधर्माधिकारे ॥ धर्मेत्युपलक्षणम् ॥
धर्माधर्माधिकारइत्यर्थः ॥ अद्यदिनादिकृत्यम् अद्यदिनादौइदंदिनमारभ्यकृत्यंधर्माधर्मादिविचारलक्षणंयस्यसः ॥ ४४ ॥ इतोमर्त्यलोकात् ॥ ४५ ॥ ४६ ॥ अवदातबुद्धिर्निर्मलांतः

स्कंदउवाच ॥ ॥ उदीर्यसूर्यस्यसुतोतिभक्त्यानमःशिवायेतिससमुच्चरन्सः ॥ इलामिलन्मौलिरतीवहृष्टःसहस्रकृत्वःप्रणनामशंभुम् ॥४२॥ ततःशिवस्तं
तपसातिखिन्नंनिवार्यताभ्यःप्रणतिभ्यईश्वरः ॥ वरान्ददौसप्ततुरंगसूनवेत्वंधर्मराजोभवनामतोपि ॥ ४३ ॥ त्वमेवधर्माधिकृतौसमस्तशरीरिणांस्थावरजं
गमानाम् ॥ मयानियुक्तोद्यदिनादिकृत्यःप्रशाधिसर्वान्ममशासनेन ॥४४॥ त्वंदक्षिणायाश्चदिशोधिनाथस्त्वंकर्मसाक्षीभवसर्वजंतोः ॥ त्वद्दर्शिताध्वान
इतोत्रजंतुस्वकर्मयोग्यांगतिमुत्तमाधमाः ॥ ४५ ॥ त्वयायदेतन्ममभक्तिभाजालिंगंसमाराधितमत्रधर्म ॥ तद्दर्शनात्स्पर्शनतोऽर्चनाच्चसिद्धिर्भविष्यत्य
चिरेणपुंसाम् ॥ ४६ ॥ धर्मेश्वरंयःसकृदेवमर्त्योविलोकयिष्यत्यवदातबुद्धिः ॥ स्नात्वापुरस्तेऽत्रचधर्मतीर्थेनतस्यदूरेपुरुषार्थसिद्धिः ॥ ४७ ॥ कृत्वाप्य
घानामिहयःसहस्रंधर्मेश्वरंपश्यतिदैवयोगात् ॥ सहेतनोजातुसनारकींव्यथांकथांतदीयांदिविकुर्वतेमराः ॥ ४८ ॥ योधर्मपीठंप्रतिलभ्यकाश्यांस्वश्रेयसे
नोयततेऽत्रमर्त्यः ॥ कथंसधर्मत्वमिवातितेजाःकरिष्यतिस्वंकृतकृत्यमेव ॥४९॥त्वयायथाप्ताइहधर्मराजमनोरथास्तेगुरुभिस्तपोभिः ॥ तथैवधर्मेश्वरभ
क्तिभाजांकामाःफलिष्यंतिनसंशयोत्र ॥ ५० ॥ कृत्वाप्यघान्येवमहांत्यपीहधर्मेश्वरार्चांसकृदेवकुर्वन् ॥ कुतोबिभेतिप्रियबंधुरेवतवत्वदीयार्चित
लिंगभक्तः ॥ ५१ ॥ पत्रेणपुष्पेणजलेनदूर्वयायोधर्मधर्मेश्वरमर्चयिष्यति ॥ समर्चयिष्यंत्यमृतांधसस्तंमंदारमालाभिरतिप्रहृष्टाः ॥ ५२ ॥ त्वत्तो
विभेष्यंतिकृतैनसोयेभयंनतेषांभविताकदाचित् ॥ धर्मेश्वरार्चारचनांकरिष्यतांहरिष्यतांबंधुतयामनस्ते ॥ ५३ ॥ यदत्रदास्यंतिहिधर्मपीठेनराद्युनद्यां
कृतमज्जनाश्च ॥ तदक्षयंभावियुगांतरेपिकृतप्रणामास्तवधर्मलिंगे ॥ ५४ ॥ येकार्तिकेमासिसिताष्टमीतिथौयात्रांकरिष्यंतिनराउपोषिताः ॥ रात्रौचवै
जागरणंमहोत्सवैर्धर्मेश्वरेतेनपुनर्भवाभुवि ॥ ५५ ॥ स्तुतिंचयेवैत्वदुदीरितामिमांनराःपठिष्यंतितवाग्रतःक्वचित् ॥ निरेनसस्तेममलोकगामिनःप्राप्स्यं
तितेवैभवतःसखित्वम् ॥ ५६ ॥

करणः ॥ ४७ ॥ दैवयोगाद्यदृच्छातः ॥ सहेतप्राप्नुयात् ॥ ४८ ॥ हेधर्म ॥ स्वमात्मानम् ॥ कथंभूतम् ॥ कृतंकृत्यंयेनतंकृतार्थमित्यर्थः :॥ ४९ ॥ ५० ॥ त्वदीयंत्वयास्थापितमर्चितमर्थात्त्व
यायल्लिंगंतद्भक्तः ॥ ५१ ॥ ५२ ॥ चरिष्यतामितिपाठेतेमनोनुकूलंकरिष्यतामित्यर्थः ॥ ५३ ॥ युगांतरेपिअपिशब्दात्कल्पांतरेपि ॥ ५४ ॥ ५५ ॥ निरेनसोनिष्पापाः ॥ ५६ ॥

CC-0. In Public Domain. Digitization by eGangotri

तेजोनिधेःसूर्यस्य ॥ विधेहिकुरु ॥९७॥ स्वमनोरथाभिदंस्वमनोरथानभितोददातीतितम् ॥ आनंदसंदोहएवसरस्तस्मिन्मग्नः ॥९८॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ एकेनरहितेऽशीतितमेऽध्यायेमनोरमे ॥ धर्मेश्वरस्यमहिमावर्ण्यतेऽतिमनोहरः ॥ १ ॥ सौधाभ्याममृतसंस्राविभ्याम् ॥ १ ॥ अंकुरयामासरोहयामास ॥ २ ॥ ब्रध्नस्यसूर्यस्यपुत्रोत्राग्निः ॥ ३ ॥ ४ ॥ वेदपूरुषौब्रह्मविष्णू ॥ ततोपिसाक्षात्कारादेव ॥ तत्तस्मात् ॥ यद्वा ततःसाक्षात्कारादपिचेद्वरयोग्योहंभवामितार्हिवरंप्रार्थयामीति ॥ ५ ॥ प्रार्थनामेवाह

पुनर्वरंब्रूहियथेप्सितंददेतेजोनिधेर्नंदनधर्मराज ॥ अदेयमत्रास्तिनकिंचिदेवतेविधेहिवाग्युद्यममात्रमेव ॥ ९७ ॥ प्रसन्नमूर्तिंसविलोक्यशंकरंकारुण्यपूर्णं स्वमनोरथाभिदम् ॥ आनंदसंदोहसरोनिमग्नोवकुंक्षणंनैवशशाककिंचित् ॥ ९८ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडउत्तरार्धेधर्मेशमहिमाख्यानंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ स्कंदउवाच ॥ आनंदबाष्पसलिलरुद्धकंठंविलोक्यतम् ॥ मृडःपस्पर्श पाणिभ्यांसौधाभ्यांतुसुधांबुधिः ॥ १ ॥ अथतत्स्पर्शसौख्येनधर्मराजोमहातपाः ॥ पुनरंकुरयामासतपोग्निज्वलितांतनुम् ॥ २ ॥ ततःप्रोवाचसब्राध्निर्देव देवमुमापतिम् ॥ प्रसन्नवदनंशांतंशांतपारिषदावृतम् ॥ ३ ॥ प्रसन्नोसियदीशानसर्वज्ञकरुणानिधे ॥ किमन्येनवरेणात्रयत्त्वंसाक्षात्कृतोमया ॥ ४ ॥ यंनवेदाविदुःसम्यङ्नचतौवेदपूरुषौ ॥ ततोपिवरयोग्योस्मितन्नाथप्रार्थयाम्यहम् ॥ ५ ॥ श्रीकंठांडजडिंभानाममीषांमधुरस्रुवाम् ॥ मत्तपश्चिरसाक्षीणां मत्पुरःप्राप्तजन्मनाम् ॥ ६ ॥ पितृभ्यांपरिहीनानामितिहासकथाविदाम् ॥ त्यक्ताहारविहाराणांकीराणांवरदोभव ॥७॥ एतत्प्रसूतिसमयेआमयेनप्रपी डिता ॥ शुकीपंचत्वमापन्नाशुकःश्येनेनभक्षितः ॥ ८ ॥ रक्षितानामनाथानांसदामन्मुखदर्शिनाम् ॥ अनाथनाथभवताह्यायुःशेषस्वरूपिणा ॥ ९ ॥ इतिधर्मवचःश्रुत्वापरोपकृतिनिर्मलम् ॥ तानाहूयमुनेशंभुर्विनयावनताननान् ॥१०॥ उवाचधर्मेतिप्रीतःशुकशावानिदंवचः ॥ अयिपत्त्ररथाःसाधवो धर्मसंगताः ॥ ११ ॥ कोवरोभवतांदेयोधर्मेशपरिचारिणाम् ॥ साधुसंसर्गसंक्षीणजन्मांतरमहैनसाम् ॥ १२ ॥ इतिश्रुत्वामहेशस्यवचनंतेपत त्रिणः ॥ प्रोचुःप्रणम्यदेवेशंनमस्तेभवनाशन ॥ १३ ॥ ॥ पक्षिणऊचुः ॥ ॥ अनाथनाथसर्वज्ञकोवरोनःसमीहितः ॥ इतोपितिर्यक्षयत्साक्षा त्तिर्यक्त्वेपिसमीक्षिताः ॥ १४ ॥

श्रीकंठेतिचतुर्भिः ॥ अंडजडिंभानांपक्षिबालकानांवरदोभवेतिद्वितीयेनान्वयः ॥ ६ ॥ ७ ॥ पितृभ्यांपरिहीनानामितिस्पष्यति ॥ एतदिति ॥ आमयेनरोगेणं ॥ सामनस्येतिपाठेप्रसवसमयोत्पन्नरोगेणेत्यर्थः ॥ पंचत्वंमरणम् ॥ ८ ॥ तर्हिकथंजीवितास्तत्राह ॥ रक्षितानामिति ॥ भवतारक्षितानामितिसंबंधः ॥ ननुनाकालेम्रियतेकश्चित्प्राप्तकालोनजीवतीतिन्यायेनआयुःशेषेणैवतेरक्षितानतुमयेत्याशंक्यविशिनष्टि ॥ आयुःशेषस्वरूपिणेति ॥९॥१०॥ धर्मेयमे ॥ प्रथमांतपाठेधर्मोधर्मेश्वरः ॥ पत्त्ररथाःहेपक्षिणः ॥ यूयंसाधवः ॥ धर्मेणधर्मराजेनसंगताः ॥११॥१२॥१३॥ तिर्यक्त्वेपिपाक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वोपि ॥ समीक्षिताःभवतेतिशेषः ॥ १४ ॥ भवेर्भवसि ॥ १५ ॥ सपर्यापूजा ॥ अभंगुराअविनाशिफलत्वात् ॥ १६ ॥ एतत्तपस्वीत्यत्रैतच्छब्दोयमपरः ॥ १७ ॥ अनेकजन्म स्मृतीरेवदर्शयंति देवयोनिरितिसार्धसप्तभिः ॥ ईशितःहेईश्वर ॥ १८ ॥ १९ ॥ २० ॥ घातुकाहिंस्राः ॥ २१ ॥ आस्मजाताः ॥ २२ ॥ चतुर्षुजरायुजांडजस्वेदजोद्भिज्जेषु ॥ २३ ॥ २४ ॥ मनागपिसुखलेशःअत्यल्पोप्यानंदलवोस्माभिर्नलब्धइतिशेषः ॥ २५ ॥ तापनेःतपनात्मजस्य ॥ २६ ॥ २७ ॥ २८ ॥ नविद्यतेपुनर्भवोस्मिंस्तंमृत्युम् ॥ २९ ॥ ननुकाशीमरणेकैवल्यमिति

लाभाःसंतूद्यमवतांगिरीशेहपरःशताः ॥ परंपरोयंलाभोत्रयत्त्वंदृग्गोचरीभवेः ॥ १५ ॥ यदेतद्दृश्यतेनाथतत्सर्वंक्षणभंगुरम् ॥ अभंगुरोभवानेकस्त्वत्स पर्याप्यभंगुरा ॥ १६ ॥ विचित्रजन्मकोटीनांस्मृतिर्नोत्रपरिस्फुरेत् ॥ एतत्तपस्विरचितलिंगपूजाविलोकनात् ॥ १७ ॥ देवयोनिरपिप्राप्ताचिरमस्मा भिरीशितः ॥ दिव्यांगनाःसहस्राणितत्रभुक्तास्वलीलया ॥ १८ ॥ आसुरीदानवीनागीनैर्ऋतीचापिकैन्नरी ॥ विद्याधरीचगांधर्वीयोनिरस्माभिरर्जिता ॥ ॥ १९ ॥ नरत्वेभूपतित्वंचपरिप्राप्तमनेकशः ॥ जलेजलचरत्वंचस्थलेचस्थलचारिता ॥ २० ॥ वनेवनौकसोजाताग्रामेषुग्रामवासिनः ॥ दातारोया चितारश्चरक्षितारश्चघातुकाः ॥ २१ ॥ सुखिनोपिवयंजाताद्दुःखिनोवयमास्मच ॥ जेतारश्चवयंजाताःपराजेतारएवच ॥ २२ ॥ अधीतिनोपिमूर्खा श्चस्वामिनःसेवकाअपि ॥ चतुर्षुभूतग्रामेषुउत्तमाधममध्यमाः ॥ २३ ॥ अभूमभूरिशःशंभोनक्वापिस्थैर्यमागताः ॥ इतोयोनेस्ततोयोनौततोयोनेस्ततो न्यतः ॥ २४ ॥ पिनाकिन्क्वापिनप्रापिसुखलेशोमनागपि ॥ इदानींपुण्यसंभारैर्धर्मेश्वरविलोकनात् ॥२५॥ तापनेःसुतपोवह्निज्वालाप्रज्वलितैनसः ॥ संवीक्ष्यत्र्यक्षसाक्षात्त्वांकृतकृत्याबभूविम ॥ २६ ॥ तथापिचेद्वरोदेयस्तिर्यक्ष्वस्मासुधूर्जटे ॥ कृपणेष्वपिशोच्येषुज्ञानंसर्वज्ञदेहितत् ॥ २७ ॥ येनज्ञाने नमुक्ताःस्मोऽमुष्मात्संसारबंधनात् ॥ यंत्रिताःप्राकृतैःपाशैरदुर्भेद्यैश्चमादृशैः ॥ २८ ॥ ऐंद्रंपदंनवांछामोनचाद्रंनान्यदेवहि ॥ वाञ्छामःकेवलंमृत्युंका श्यांशंभोऽपुनर्भवम् ॥ २९ ॥ त्वत्सान्निध्याद्विजानीमःसर्वज्ञसकलंवयम् ॥ यथाचंदनसंसर्गात्सर्वेसुरभयोद्रुमाः ॥ ३० ॥ एतदेवपरंज्ञानंसंसारोच्छित्ति कारणम् ॥ वपुर्विसर्जनंकालेयत्तवानंदकानने ॥ ३१ ॥ निर्मथ्यविष्वग्वाग्जालंसारभूतमिदंपरम् ॥ ब्रह्मणोदीरितंपूर्वंकाश्यांमुक्तिस्तनुत्यजाम् ॥३२॥ यद्वाच्यंबहुभिर्ग्रंथैस्तदष्टाभिरिहाक्षरैः ॥ हरिणोक्तंरविपुरःकैवल्यंकाशिसंस्थितौ ॥ ३३ ॥ याज्ञवल्क्योमुनिवरःप्रोक्तवान्मुनिसंसदि ॥ रवेरधीत्यनि गमान्काश्यामंतेपरंपदम् ॥ ३४ ॥ स्वामिनापिजगद्धात्रीपुरतोमंदराचले ॥ इदमेवपुराप्रोक्तंकाशीनिर्वाणजन्मभूः ॥ ३५ ॥

कुतोऽज्ञायितत्राहुः ॥ त्वदिति ॥ ३० ॥ ननुतथापिज्ञानंदेहीतिप्रार्थयित्वाकाशीमृत्युप्रार्थनमकांडतांडवमित्याशंक्याहुः ॥ एतदेवेति ॥ वपुर्विसर्जनमितिलांगलंजीवनमितिवत्सामानाधिकरण्यम् ॥ ॥ ३१ ॥ काश्यांमृतौज्ञानद्वारामुक्तिरित्यत्रेश्वराणांमुनीनांचसंमतिमाहुः ॥ निर्मथ्येति ॥३२॥ ३३ ॥ ३४ ॥३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ ३७ ॥ ३८ ॥ ननुतिरश्चामेतादृशंज्ञानंकथमित्याशंक्यतत्सान्निध्यादित्यादिनोक्तंसहेतुकंज्ञानंस्पष्टयंति ॥ भूतमिति ॥३९॥ ४०॥४१ ॥ ४२॥ स्वप्रमाणंस्वानुभवैकगोचरम् ॥ ४३ ॥ पीठगौरवंस्यानमाहात्म्यम् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७॥ ४८ ॥ नेत्रातिथीकृताचक्षुर्विषयीकृता ॥ ४९ ॥ कंदस्यमूलस्य ॥ ५० ॥ ५१ ॥ समासादः ॥ सौधोदत्तचूर्णः ॥ प्रासादोदइ

कृष्णद्वैपायनोप्येवंशंभोवक्ष्यतिनान्यथा॥यत्रविश्वेश्वरःसाक्षान्मुक्तिस्तत्रपदेपदे ॥३६॥ वदंत्यन्येपिमुनयस्तीर्थसंन्यासकारिणः॥चिरंतनालोमशाद्याः काशिकामुक्तिकाशिका ॥ ३७ ॥ वयमप्येवंजानीमोयत्रस्वर्गतरंगिणी ॥ आनंदकाननेशंभोर्मोक्षस्तत्रैवनिश्चितम् ॥ ३८ ॥ भूतंभाविभविष्यंयत्स्वर्गे मर्त्येरसातले ॥ तत्सर्वमेवजानीमोधर्मेशानुग्रहात्परात् ॥३९॥ अतोहिरण्यगर्भोक्तंहरिप्रोक्तंमुनीरितम् ॥ भवतोक्तंचनिखिलंशंभोजानीमहेवयम् ॥४०॥ करामलकवत्सर्वमेतद्ब्रह्मांडगोलकम् ॥ अस्मद्वाग्गोचरेऽस्त्येवधर्मपीठनिषेवणात् ॥ ४१ ॥ धर्मराजस्यतपसातिर्यञ्चोपिवयंविभो ॥ जाताःस्मनिर्विकल्पंहिसर्वज्ञानस्यभाजनम् ॥ ४२ ॥ मधुरंमृदुलंसत्यंस्वप्रमाणंसुसंस्कृतम् ॥ हितंमितंसदृष्टांतंश्रुत्वापक्षिसुभाषितम् ॥ ४३ ॥ देवोतिविस्मयापन्नोऽवर्णयत्पीठगौरवम् ॥ त्रैलोक्यनगरेचात्रकाशीराजगृहंमम ॥ ४४ ॥ तत्रापिभोगभवनमनर्घ्यमणिनिर्मितम् ॥ मोक्षलक्ष्मीविलासाख्यःप्रासादोमेतिशर्मभूः ॥ ४५ ॥ पतत्रिणोपिमुच्यंतेयंकुर्वाणाःप्रदक्षिणम् ॥ स्वेच्छयाविचरंतःखेखेचराअपिदेवताः ॥४६॥ मोक्षलक्ष्मीविलासाख्यप्रासादस्यविलोकनात् ॥ शरीराद्दूरतोयातिब्रह्महत्यापिनान्यथा ॥ ४७ ॥ मोक्षलक्ष्मीविलासस्यकलशोयैर्निरीक्षतः ॥ निधानकलशास्तांस्तुनमुंचंतिपदेपदे ॥ ४८ ॥ दूरतोपिपताकापिममप्रासादमूर्धगा ॥ नेत्रातिथीकृतायैस्तुनित्यंतेऽतिथयोमम ॥ ४९ ॥ भूमिंभित्त्वास्वयंजातस्तत्प्रासादमिषेणहि ॥ आनंदाख्यस्यकंदस्यकोप्येषपरमोंकुरः ॥५०॥ ब्रह्मादिस्थावरांतानियत्ररूपाण्यनेकशः ॥ मामेवोपासतेनित्यंचित्रंचित्रगतान्यपि ॥५१॥ ससौधोमेखिलेलोकेस्थानंपरमनिर्वृतेः ॥ रतिशालासमेरम्यासमेविश्वासभूमिका ॥५२॥ ममसर्वगतस्यापिप्रासादोयंपरास्पदम् ॥ परंब्रह्मयदाम्नातंपरमोपनिषद्गिरा ॥ अमूर्तंतदहंमूर्तोभूयांभक्तकृपावशात् ॥ ५३ ॥ नैःश्रेयस्याःश्रियोधामतद्याम्यांमंडपोस्तिमे ॥ तत्राहंसततंतिष्ठतत्सदोमंडपंमम ॥ ५४ ॥ निमेषार्धप्रमाणंचकालंतिष्ठतिनिश्चलः ॥ तत्रयस्तेनवैयोगःसमभ्यस्तःसमाःशतम् ॥ ५५ ॥ निर्वाणमंडपंनामतत्स्थानंजगतीतले ॥ तत्रचंसंजपन्नेकांलभेत्सर्वश्रुतेःफलम् ॥ ॥ ५६ ॥ प्राणायामंतुयःकुर्यादप्येकंमुक्तिमंडपे ॥ तेनाष्टांगःसमभ्यस्तोयोगोऽन्यत्रायुतंसमाः ॥ ५७ ॥

तिपाठेषंढत्वमार्षम् ॥ ५२ ॥ ननुपरिच्छिन्नस्यमूर्तस्यैवप्रासादोघटतेतद्विपरीतस्यतवकथंसइत्यतआह ॥ परमिति ॥ ५३ ॥ तद्याम्यांतस्यप्रासादस्ययाम्यांदक्षिणस्यांदिशि ॥ सदोमंडपसभास्थानम् ॥ ५४ ॥ ५५ ॥ ५६ ॥ अष्टौअंगानियमनियमासनप्राणसंरोधप्रत्याहारधारणाध्यानसमाधिलक्षणानियस्यसः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षडक्षरम् ॐ नमःशिवायेतिमंत्रम् ॥ ५८ ॥ ५९ ॥ ब्रह्मयज्ञंतत्त्वज्ञानोपदेशंवेदपाठंवा ॥ ६० ॥ ६१ ॥ ६२ ॥ मौनंमौनात् ॥ कृत्वेतिशेषोवा ॥ ६३ ॥ कृष्णलकेनरक्तिकापरिमाणेन ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ तत्प्रासादपुरोभागइति ॥ सचासौप्रासादश्चेतितत्प्रासादोमोक्षलक्ष्मीविलासाख्यस्तस्यपुरोभागेऽग्रभागेभैरवप्रदेशेपश्चिमायांदिशीत्येतत् ॥ पूर्वदिग्भागेज्ञानमंडपस्योक्तत्वात् ॥ श्रृंगारमंडपंप्राप्ययच्चकारवदामितत् ॥ प्राङ्मुखस्तूपविश्येशइतिवक्ष्यमाणत्वाच्चश्रृंगारमंडपोऽलंकारस्थानम् ॥ ७० ॥ ७१ ॥ नेपथ्यं

निर्वाणमंडपेयस्तुजपेदेकंषडक्षरम् ॥ कोटिरुद्रेणजप्तेनयत्फलंतस्यतद्भवेत् ॥५८॥ शुचिर्गंगांभसिस्नातोयोजपेच्छतरुद्रियम् ॥ निर्वाणमंडपेज्ञेयःसरुद्रोद्विजवेषभृत् ॥ ५९ ॥ ब्रह्मयज्ञंसकृत्कृत्वाममदक्षिणमंडपे ॥ ब्रह्मलोकमवाप्याथपरंब्रह्माधिगच्छति ॥ ६० ॥ धर्मशास्त्रंपुराणानिसेतिहासानितत्रयः ॥ पठेन्निरभिलाषुःसन्सवसेन्ममवेश्मनि ॥ ६१ ॥ तिष्ठेदिंद्रियचापल्यंयोनिवार्यक्षणंकृती ॥ निर्वाणमंडपेन्यत्रतेनतप्तंमहत्तपः ॥ ६२ ॥ वायुभक्षणतोन्यत्रयत्पुण्यंशरदांशतम् ॥ तत्पुण्यंघटिकार्धेनमौनंदक्षिणमंडपे ॥ ६३ ॥ मितंकृष्णलकेनापियोदद्यान्मुक्तिमंडपे ॥ स्वर्णसौवर्णयानेनसतुसंचरतेदिवि ॥ ६४ ॥ तत्रैकंजागरंकुर्याद्यस्मिन्कस्मिन्दिनेपियः ॥ उपोषितोर्चयेल्लिंगंससर्वव्रतपुण्यभाक् ॥ ६५ ॥ तत्रदत्त्वामहादानंतत्रकृत्वामहाव्रतम् ॥ तत्राधीत्याखिलंवेदंच्यवतेननरोदिवः ॥ ६६ ॥ प्रयाणंकुर्वतेयस्यप्राणामेमुक्तिमंडपे ॥ समाममनुप्रविष्टोत्रतिष्ठेद्यावदहंखलु ॥ ६७ ॥ जलक्रीडांसदाकुर्याज्ज्ञानवाप्यांसहोमया ॥ यदंबुपानमात्रेणज्ञानंजायेतनिर्मलम् ॥ ६८ ॥ तज्जलक्रीडनस्थानंममप्रीतिकरंमहत् ॥ अमुष्मिन्राजसदनेजाडचहृज्जलपूरितम् ॥ ६९ ॥ तत्प्रासादपुरोभागेममश्रृंगारमंडपः ॥ श्रीपीठंतद्धिविज्ञेयंनिःश्रीकश्रीसमर्पणम् ॥७०॥ मदर्थंतत्रयोदद्याद्दुकूलानिशुचीन्यहो ॥ माल्यानिसुविचित्राणियक्षकर्दमवंतिच ॥ ७१ ॥ नानानेपथ्यवस्तूनिपूजोपकरणान्यपि ॥ सश्रियालंकृतस्तिष्ठेद्यत्रकुत्रापिसत्तमः ॥७२॥ निर्वाणलक्ष्मीर्वृणुतेतंनिर्वाणपदाप्तये ॥ यत्रकुत्रापिनिधनंप्राप्नुयादपिसध्रुवम् ॥ ७३ ॥ मोक्षलक्ष्मीविलासाख्यप्रासादस्योत्तरेमम ॥ ऐश्वर्यमंडपंरम्यंतत्रैश्वर्यंददाम्यहम् ॥ ७४ ॥ मत्प्रासादैंद्रदिग्भागेज्ञानमंडपमस्तियत् ॥ ज्ञानंदिशामिसततंतत्रमांध्यायतांसताम् ॥ ७५ ॥ भवानिराजसदनेममास्तिहिमहानसम् ॥ यत्तत्रोपहृतंपुण्यंनिर्विशामिमुदैवतत् ॥ ७६ ॥ विशालाक्ष्यामहासौधेममविश्रामभूमिका ॥ तत्रसंसृतिखिन्नानांविश्रामंश्राणयाम्यहम् ॥ ७७ ॥ नियमस्नानतीर्थंचचक्रपुष्करिणीमम ॥ तत्रस्नानवतांपुंसांतन्नैर्मल्यंदिशाम्यहम् ॥ ७८ ॥

भूषणम् ॥ ७२ ॥ वृणुतेआवृणोति ॥ ७३ ॥ ७४ ॥ ७५ ॥ महानसंपाकगृहम् ॥ उपहृतमुपहारत्वेनसमर्पितम् ॥ पुण्यंपुण्यहेतुत्वात् ॥ निर्विशामिनितरांगृह्णामि ॥ भक्तोपहृतंगृहीतुंनिर्विशामिप्रविशामीतिवा ॥ ७६ ॥ विगतःश्रमोयस्मिंस्तंमोक्षमित्यर्थः ॥ श्राणयामिददामि ॥ ७७ ॥ नियमस्नानतीर्थंनियमेनमध्याह्नेस्नानंयस्मिंस्तच्चतत्तीर्थंच तत्प्रसिद्धंब्रह्मलक्षणंवा ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७९ ॥ ८० ॥ विपाशयामिमोचयामि ॥ पाशितान्बद्धान् ॥ पशूनज्ञमात्रान् ॥ ८१ ॥ तदेवाह ॥ निर्वाणेति ॥ दानस्थानंमुक्तिदानस्थानम् ॥ ८२ ॥ ८३ ॥ सौभाग्यभाग्यभूः ॥ भागो भगसमुदायस्तस्यशोभनोभावःसौभाग्यंतस्यप्रापकंभाग्यमदृष्टंतद्भूः ॥ भगसमुदायप्रापकादृष्टजन्मस्थानमित्यर्थः ॥ भागभूरितिपाठेसौभाग्यंसौंदर्यंभागोभगसमुदायस्तयोर्भूरितिव्याख्येयम् ॥ ८४ ॥

यदाहुःपरमंतत्त्वंयदाहुर्ब्रह्मसत्तमम् ॥ स्वसंवेद्यंयदाहुश्चतत्तत्रांतेदिशाम्यहम् ॥७९॥ यदाहुस्तारकंज्ञानंयदाहुरतिनिर्मलम् ॥ स्वात्मारामंयदाहुश्चतत्तत्रां तेदिशाम्यहम् ॥ ८० ॥ जगन्मंगलभूर्यात्रपरमामणिकर्णिका ॥ विपाशयामितत्राहंकर्मभिःपाशितान्पशून् ॥ ८१ ॥ निर्वाणश्राणनेयत्रपात्रापात्रंनाचिंतये ॥ आनंदकाननेतन्मेदानस्थानंदिवानिशम् ॥ ८२ ॥ भवांबुधौमहागाधेप्राणिनःपारमिच्छतः ॥ भूत्वैवकर्णधारोंतेयत्रसंतारयाम्यहम् ॥ ८३ ॥ सौभाग्यभाग्यभूर्यावैविख्यातामणिकर्णिका ॥ ददामितस्यांसर्वस्वमग्रजायांत्यजायवा ॥८४॥ महासमाधिसंपन्नैर्वेदांतार्थनिषेविभिः ॥ दुष्प्रापोन्यत्रयो मोक्षःशोच्यैरपिसलभ्यते ॥ ८५ ॥ दीक्षितोवादिवाकीर्तिःपंडितोवाप्यपंडितः ॥ तुल्योमेमोक्षदीक्षायांसंप्राप्यमणिकर्णिकाम् ॥ ८६ ॥ यत्त्यागेन्यत्र कृपणस्तत्प्राप्यमणिकर्णिकाम् ॥ ददामिजंतुमात्रायसर्वस्वंचिरसंचितम् ॥ ८७ ॥ यदिदैवादिहप्राप्तस्त्रिसंयोगोऽतिदुर्घटः ॥ अविचारंतदादेयंसर्वस्वं चिरसंचितम् ॥ ८८ ॥ शरीरमथसंपत्तिरथसामणिकर्णिका ॥ त्रिसंयोगोयमप्राप्योदेवैरिंद्रादिकैरपि ॥ ८९ ॥ पुनःपुनर्विचार्येतिजंतुमात्रेभ्यएवच ॥ निर्वाणलक्ष्मींयच्छामिसदोपमणिकर्णिकम् ॥ ९० ॥ मुक्तिदानमहीसामेवाराणस्यांमहीयसी ॥ तन्महीरजसासाम्यंत्रिलोक्यपिनचोद्वहेत् ॥ ९१ ॥ परंलिंगार्चनस्थानमविमुक्तेश्वरेश्वरम् ॥ तत्रपूजांसकृत्कृत्वाकृतकृत्योनरोभवेत् ॥ ९२ ॥ सायंपाशुपतींसंध्यांकुर्यांपशुपतीश्वरे ॥ विभूतिधारणात्त त्रपशुपाशैर्नबध्यते ॥ ९३ ॥ प्रातःसंध्यांकरोम्येवसदोंकारनिकेतने ॥ तत्रैकापिकृतासंध्यासर्वपातककृंतनी ॥ ९४ ॥ वसामिकृत्तिवासेहंसदाप्रति चतुर्दशि ॥ अत्रजागरणंकृत्वाचतुर्दश्यांनगर्भभाक् ॥ ९५ ॥ रत्नेश्वरोर्चितोदद्यान्महारत्नानिभक्तितः ॥ रत्नैःसमर्च्यतल्लिंगंस्त्रीरत्नादिलभेन्नरः ॥ ९६ ॥ विष्टपत्रितयांतःस्थोप्यहंलिंगेत्रिविष्टपे ॥ तिष्ठामिसततंभक्तमनोरथसमृद्धये ॥ ९७ ॥

सलभ्यतेतस्यांमणिकर्णिकायामित्यनुषंजनीयम् ॥ ८५ ॥ दिवाकीर्तिश्चांडालः ॥ ८६ ॥ यत्कैवल्यम् ॥ ८७ ॥ ८८ ॥ त्रिसंयोगोऽतिदुर्घटइत्येतत्स्वयमेवव्याकरोति ॥ शरीरमिति ॥ संपत्तिर्धनम् ॥ ८९ ॥ उपमणिकर्णिकंमणिकर्णिकाह्रदसमीपइत्यर्थः ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥९६॥ विष्टपत्रितयांतःस्थःसर्वव्यापकोपीत्यर्थः ॥ त्रिविष्टपेत्रिलोचने ॥९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरजानिष्पापः ॥ रजोगुणरहितोवा ॥ चतुर्नदेपिलिपिलातीर्थे ॥ ९८ ॥ महादेवेतन्नाम्निलिंगे ॥ ९९ ॥ १०० ॥ श्वेतद्वीपमनिरुद्धमूर्त्यधिष्ठितंवैकुंठसदृशंस्थानविशेषम् ॥ नयेप्रापये ॥ ॥ १ ॥ उपपंचनदंपंचनदसमीपे ॥ २ ॥ यत्रउपपंचनदे ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ यदर्थंपीठानिनिरूपितानितदाह ॥ अनेकानीति ॥ ७ ॥ आसुर्बभूवुः ॥ ८ ॥ ९ ॥ ११० ॥ ११ ॥

विरजस्कंमहापीठंतत्रसंसेव्यमानवः ॥ विरजाजायतेनूनंचतुर्नदकृतोदकः ॥ ९८ ॥ महादेवेमहापीठंममसाधकसिद्धिदम् ॥ तत्पीठदर्शनादेवमहापापैः प्रमुच्यते ॥ ९९ ॥ पितृप्रीतिप्रदंपीठंवृषभध्वजसंज्ञकम् ॥ पितृतर्पणकृत्तत्रपितॄंस्तारयतिक्षणात् ॥ १०० ॥ आदिकेशवपीठेहमादिकेशवरूपधृक् ॥ श्वेतद्वीपंनयेभक्तान्वैष्णवानतिवल्लभान् ॥ १ ॥ तत्रैवमंगलापीठेसर्वमंगलदायिनि ॥ उपपंचनदेतीर्थेभक्तान्संतारयाम्यहम् ॥ २ ॥ बिंदुमाधवरूपेणयत्राहंवैष्णवाञ्जनान् ॥ नयेपंचनदस्नातांस्तद्विष्णोःपरमंपदम् ॥ ३ ॥ पंचमुद्रेमहापीठेयेवीरेश्वरसेवकाः ॥ तेषांपरमनिर्वाणंकालेनाल्पेनजायते ॥ ॥ ४ ॥ तत्रसिद्धेश्वरीपीठेचंद्रेश्वरसमीपतः ॥ तत्रसंनिधिकर्तॄणांसिद्धिःषण्मासतोभवेत् ॥ ५ ॥ काश्यांचयोगिनीपीठेयोगसिद्धिविधायिनि ॥ सिद्धीरुच्चाटनाद्याश्चकैर्नलब्धाःसुसाधकैः ॥ ६ ॥ अनेकानीहपीठानिसंतिकाश्यांपदेपदे ॥ परंधर्मेशपीठस्यकाचिच्छक्तिरनुत्तमा ॥ ७ ॥ यत्रामीबालकीराश्चनिर्मलज्ञानभाजनम् ॥ आसुःसदुपदेशान्मेत्रातत्रातेतिभाषिणः ॥ ८ ॥ एतद्धर्मेश्वरंपीठंत्यजाम्यद्यदिनावधि ॥ नकदाचित्तरणिजत्वत्तपोवनसुत्तमम् ॥ ९ ॥ ममानुग्रहतःकीरानेतान्पश्यरवेःसुत ॥ दिव्यंविमानमारुह्यगंतारोमत्पुरंमहत् ॥ ११० ॥ तत्रभुक्त्वाचिरंभोगाञ्ज्ञानंप्राप्यमयेरितम् ॥ इहमुक्तिमवाप्स्यंतित्वत्संसर्गातिनिर्मलाः ॥ ११ ॥ इत्युक्तवतिदेवेशेकैलासशिखरोपमम् ॥ दिव्यंविमानमापन्नंरुद्रकन्यापरिष्कृतम् ॥ १२ ॥ आरुह्यतेनयानेनदिव्यरूपधराःखगाः ॥ कैलासमभिसंजग्मुर्धर्ममापृच्छ्यतेऽमलाः ॥११३॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेधर्मेशाख्यानंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ स्कंदउवाच ॥ ॥ कुंभोद्भूततदाश्चर्यंविलोक्यजगदंबिका ॥ उवाचशंभुंप्रणताप्रणतार्तिहरंपरम् ॥१॥ ॥ अंबिकोवाच ॥ ॥ अस्यपीठस्यमाहात्म्यंमहादेवमहेश्वर ॥ तिरश्चामपियज्जातंज्ञानंसंसारमोचनम् ॥ २ ॥ अतःप्रभावंविज्ञायधर्मपीठस्यधूर्जटे ॥ धर्मेश्वरसमीपेहंस्थास्याम्यद्यदिनावधि ॥ ३ ॥

॥ १२ ॥ ११३ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ छ ॥ ॥ अथाशीतितमेध्यायेधर्मेशाख्यानमध्यगे ॥ श्रीमद्विश्वभुजाशाख्येगणेशस्तुतिपूर्वकम् ॥ १ ॥ सर्वकामप्रदंपुंसांस्त्रीणांचैवविशेषतः ॥ मनोरथतृतीयाख्यव्रतंसम्यङ्निरुच्यते ॥ २ ॥ विश्वभुजाशाविनायकैदैवतंमनोरथतृतीयाख्यंव्रतंकथयितुंप्रस्तावयति ॥ कुंभोद्भूतेति ॥ १ ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४ ॥ मनोरथंकरोतीतिमनोरथकृत्तस्यमनोरथकृतः ॥ ५ ॥ ६ ॥ पूजाप्रकारमाह विश्वइत्यर्धेन ॥ यद्वा विश्वेत्यादीनिमहेशकृतसंबोधनानि ॥ ७ ॥ मनोरथतृतीयाचैत्रशुक्लतृतीयातस्याम् ॥ ॥ ८ ॥ ९ ॥ १० ॥ भवात्तारिणिसंसारतारिणि ॥ ११ ॥ पुलोमानामदैत्यस्तत्तनयाशची ॥ १२ ॥ सरहस्येनगोप्यसहितेन ॥ कलकंठीकलेनकोकिलायामधुरस्वनतुल्येनमधुरेणसुश्रव्येण ॥

अत्रलिंगेतुयेभक्ताःस्त्रियोवापुरुषास्तुवा ॥ तेषामभीष्टांसंसिद्धिंसाधयिष्याम्यहंसदा ॥ ४ ॥ ॥ ईश्वरउवाच ॥ ॥ साधुकृतंत्वयादेविकृतवत्यापरिग्रहम् ॥ अस्येहधर्मपीठस्यमनोरथकृतःसताम् ॥ ५ ॥ तएवविश्वभोक्तारोविश्वमान्यास्तएवहि ॥ येत्वांविश्वभुजामत्रपूजयिष्यंतिमानवाः ॥ ६ ॥ विश्वेविश्वभुजेविश्वस्थित्युत्पत्तिलयप्रदे ॥ नरास्त्वदर्चकाश्चात्रभविष्यंत्यमलात्मकाः ॥७॥ मनोरथतृतीयायांयस्तेभक्तिंविधास्यति ॥ तन्मनोरथसंसिद्धिर्भवित्रीमदनुग्रहात् ॥ ८ ॥ नारीवापुरुषोवाथत्वद्व्रताचरणात्प्रिये ॥ मनोरथानिहप्राप्यज्ञानमंतेचलप्स्यते ॥ ९ ॥ ॥ देव्युवाच ॥ ॥ मनोरथतृतीयायांव्रतंकीदृक्कथाकथम् ॥ किंफलंकैःकृतंनाथकथयैतत्कृपांकुरु ॥ १० ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुदेवियथापृष्टंभवत्याभवतारिणि ॥ मनोरथव्रतंचैतद्गुह्याद्गुह्यतरंपरम् ॥ ११ ॥ पुलोमतनयापूर्वंततापपरमंतपः ॥ किंचिन्मनोरथंप्राप्तुंनचापतपसःफलम् ॥ १२ ॥ अपूपुजत्ततोमांसाभक्त्यापरमयामुदा ॥ गीतेनसरहस्येनकलकंठीकलेनहि ॥ १३ ॥ तद्गानेनातिसंतुष्टोमृदुनामधुरेणच ॥ सुतालेनसुरंगेणधातुमात्राकलावता ॥ १४ ॥ प्रोवाचतांवरंब्रूहिप्रसन्नोस्मिपुलोमजे ॥ अनेनचसुगीतेनत्वनयालिंगपूजया ॥ १५ ॥ ॥ पुलोमजोवाच ॥ ॥ यदिप्रसन्नोदेवेशतदायोमेमनोरथः ॥ तंपूरयमहादेवमहादेवीमहाप्रिय ॥ १६ ॥ सर्वदेवेषुयोमान्यःसर्वदेवेषुसुंदरः ॥ यायजूकेषुसर्वेषुयःश्रेष्ठःसोस्तुमेपतिः ॥ १७ ॥ यथाभिलषितंरूपंयथाभिलषितंसुखम् ॥ यथाभिलषितंचायुःप्रसन्नोदेहिमेभव ॥ १८ ॥ यदायदाचपत्यामेसंगःस्याद्धृतसुखेच्छया ॥ तदातदाचतंदेहंत्यक्त्वान्यंदेहमाप्नुयाम् ॥ ॥ १९ ॥ सदाचलिंगपूजायांममभक्तिरनुत्तमा ॥ भवभूयाद्भवहरजरामरणहारिणी ॥ २० ॥ भर्तुर्व्ययेपिवैधव्यंक्षणमात्रमपीहन ॥ ममभाविमहादेवपातिव्रत्यंचयातुमा ॥ २१ ॥ ॥ स्कंदउवाच ॥ ॥ इमंमनोरथंतस्याःपौलोम्याःपुरसूदनः ॥ समाकर्ण्यक्षणंस्मित्वाप्राहेशोविस्मयान्वितः ॥ २२ ॥ ईश्वरउवाच ॥ ॥ पुलोमकन्येयश्चैषत्वयाकारिमनोरथः ॥ लप्स्यसेव्रतचर्यातस्तत्कुरुष्वाजितेंद्रिये ॥ २३ ॥

॥१३॥सुतालेनशोभनतालयुक्तेन ॥ सुरंगेणशोभनोरंगोयस्मात्तेन ॥ धातुमात्राकलावतातानमानकलावता ॥ एतत्पाठेस्पष्टएवार्थः ॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥ २१॥ २२ ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २४ ॥ २५ ॥ किमात्मिकाकिंस्वरूपा ॥ पाठांतरेकिंनामाकिंनाम्नीत्यर्थः ॥ २६ ॥ इतिकर्तव्यतानुष्ठानप्रकारः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ तद्गत मानसःविश्वभुजागतचित्तः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ घृतपूरान्पक्वान्नविशेषान् ॥ नैवेद्यैर्घृतपूरैः ॥ ३७ ॥ ३८ ॥ राधोवैशाखः ॥ ३९ ॥ ४० ॥ ४१ ॥

मनोरथतृतीयायाश्चरणेनभविष्यति ॥ तत्प्राप्तयेव्रतंवक्ष्येतद्विधेहियथोदितम् ॥ २४ ॥ तेनव्रतेनचीर्णेनमहासौभाग्यदेनतु ॥ अवश्यंभविताबालेतवचैवं मनोरथः ॥ २५ ॥ ॥ पुलोमकन्योवाच ॥ ॥ कारुण्यवारिधेशंभोप्रणतप्राणिसर्वद ॥ किमात्मिकाथकाशक्तिःकापूज्यातत्रदेवता ॥ २६ ॥ कदा चताद्विधातव्यमितिकर्तव्यताचका ॥ इत्याकर्ण्यशिवोवाक्यंतांतुप्रणिजगादह ॥ २७ ॥ ॥ ईश्वरउवाच ॥ ॥ मनोरथतृतीयायांव्रतंपौलोमितच्छुभम् ॥ पूज्याविश्वभुजागौरीभुजविंशतिशालिनी ॥ २८ ॥ वरदोऽभयहस्तश्चसाक्षसूत्रःसमोदकः ॥ देव्याःपुरस्ताद्व्रतिनापूज्यआशाविनायकः ॥ २९ ॥ चैत्रशुक्ल तृतीयायांकृत्वावैदंतधावनम् ॥ सायंतनींचनिर्वर्त्यनातितृप्त्याभुजिक्रियाम् ॥ ३० ॥ नियमंचेतिगृह्णीयाज्जितक्रोधोजितेंद्रियः ॥ संत्यक्तास्पृश्यसंस्पर्शः शुचिस्तद्गतमानसः ॥ ३१ ॥ प्रातर्व्रतंचरिष्यामिमातर्विश्वभुजेनघे ॥ विधेहितत्रसांनिध्यंमन्मनोरथसिद्धये ॥ ३२ ॥ नियमंचेतिसंगृह्यस्वपेद्रात्रौशुभं स्मरन् ॥ प्रातरुत्थायमेधावीविधायावश्यकंविधिम् ॥ ३३ ॥ शौचमाचमनंकृत्वादंतकाष्ठंसमाददेत् ॥ अशोकवृक्षस्यशुभंसर्वशोकनिशातनम् ॥ ३४ ॥ नित्यंतनंचनिष्पाद्यविधिंविधिविदांवरः ॥ स्नात्वाशुद्धांबरःसायंगौरीपूजांसमाचरेत् ॥ ३५ ॥ आदौविनायकंपूज्यघृतपूरान्निवेद्यच ॥ ततोर्चयेद्विश्वभु जामशोककुसुमैःशुभैः ॥ ३६ ॥ अशोकवर्तिनैवेद्यैर्धूपैश्चागुरुसंभवैः ॥ कुंकुमेनानुलिप्यादावेकभक्तंततश्चरेत् ॥ ३७ ॥ अशोकवर्तिसहितैर्घृतपूरैर्म नोहरैः ॥ एवंचैत्रतृतीयायांव्यतीतायांपुलोमजे ॥ ३८ ॥ राधादिफाल्गुनांतासुतृतीयासुव्रतंचरेत् ॥ क्रमेणदंतकाष्ठानिकथयामितवानघे ॥ ३९ ॥ अनुले पनवस्तूनिकुसुमानितथैवच ॥ नैवेद्यानिगजास्यस्यदेव्याश्चापिशुभव्रते ॥ ४० ॥ अन्नानिचैकभक्तस्यशृणुतानिफलातये ॥ जंब्वपामार्गखदिरजाती चूतकदंबकम् ॥ ४१ ॥ प्लक्षोदुंबरखर्जूरीबीजपूरीसदाडिमी ॥ दंतकाष्ठद्रुमाएतेव्रतिनःसमुदाहृताः ॥ ४२ ॥ सिंदूरागुरुकस्तूरीचंदनंरक्तचंदनम् ॥ गोरोचना देवदारुपद्माक्षंचनिशाद्वयम् ॥ ४३ ॥ प्रीत्यानुलेपनंबालेयक्षकर्दमसंभवम् ॥ सर्वेषामप्यलाभेचप्रशस्तोयक्षकर्दमः ॥ ४४ ॥ कस्तूरिकायाद्वौभागौद्वौभागौ कुंकुमस्यच ॥ चंदनस्यत्रयोभागाःशशिनस्त्वेकएवहि ॥ ४५ ॥ यक्षकर्दमइत्येषसमस्तसुरवल्लभः ॥ अनुलिप्याथकुसुमैरर्चयेद्वच्मितान्यपि ॥ ४६ ॥

॥ ४२ ॥ गोरोचनागोशृंगयोर्मध्येसमुत्पन्नद्रव्यविशेषः ॥ निशाद्वयंहरिद्राद्वयम् ॥ ४३ ॥ ४४ ॥ यक्षकर्दमंस्वयमेवव्याचष्टे ॥ कस्तूरिकायाइति ॥ ४५ ॥ शशिनःकर्पूरस्य ॥ तानिकुसुमानि ॥ ४६ ॥

CC-0. In Public Domain. Digitization by eGangotri

नंद्यावर्तैस्तगरैः ॥ ४७ ॥ तच्छदैस्तेषांवृक्षाणांपत्रैः ॥ ४८ ॥ चैत्रमासनैवेद्यस्यपूर्वमुक्तत्वादवशिष्टानांमासानांनैवेद्यानाह ॥ करंभइति ॥ करंभोदधिमिश्रःसक्तुः ॥ ४९ ॥ ५० ॥ मुष्टिकाः

पाटलामल्लिकापद्मकेतकीकरवीरकैः ॥ उत्पलैराजचंपैश्चनंद्यावर्तैश्चजातिभिः ॥ ४७ ॥ कुमारीभिःकर्णिकारैरलाभेतच्छदैःसह ॥ सुगंधिभिःप्रसूनौघैः सर्वालाभेपिपूजयेत् ॥ ४८ ॥ करंभोदधिभक्तंचसचूतरसमंडकाः ॥ फेणिकावटकाश्चैवपायसंचसशर्करम् ॥ ४९ ॥ ससुद्गंसघृतंभक्तंकार्त्तिकेविनिवेदयेत् ॥ इंडेरिकाश्चलड्डूकामाघेलंपसिकाशुभा ॥ ५० ॥ मुष्टिकाःशर्करागर्भाःसर्पिषापरिसाधिताः ॥ निवेद्याःफाल्गुनेदेव्यैसार्धंविघ्नजितामुदा ॥ ५१ ॥ निवेदयेद्यदन्नंहिएकभक्तेपितत्स्मृतम् ॥ अन्यन्निवेद्यसंमूढोभुंजानोऽन्यत्पतेदधः ॥ ५२ ॥ प्रतिमासंतृतीयायामेवमाराध्यवत्सरम् ॥ व्रतसंपूर्तयेकुर्यात्स्थंडिलेऽग्निसमर्चनम् ॥ ५३ ॥ जातवेदसमंत्रेणातिलाज्यद्रविणेनच ॥ शतमष्टाधिकंहोमंकारयेद्विधिनाव्रती ॥५४॥ सदैवनक्तेपूजोक्तासदानक्तेतुभोजनम् ॥ नक्तएवहिहोमोऽयंनक्तएवक्षमापनम् ॥ ५५ ॥ गृहाणपूजांमेभक्त्यामातर्विघ्नजितासह ॥ नमोस्तुतेविश्वसृजेपूरयाशुमनोरथम् ॥ ५६ ॥ नमो विघ्नकृतेतुभ्यंनमआशाविनायक ॥ त्वंविश्वसृजयासार्धंममदेहिमनोरथम् ॥५७॥ एतौमंत्रौसमुच्चार्यपूज्यौगौरीविनायकौ ॥ व्रतक्षमापनेदेयःपर्यंकस्तूलिकान्वितः ॥ ५८ ॥ उपधान्यासमायुक्तोदीपीदर्पणसंयुतः ॥ आचार्यंचसपत्नीकंपर्यंकउपवेश्यच ॥ ५९ ॥ व्रतीसमर्चयेद्वस्त्रैःकरकर्णविभूषणैः ॥ सुगंधचंदनैर्माल्यैर्दक्षिणाभिर्मुदान्वितः ॥ ६० ॥ दद्यात्पयस्विनागांचव्रतस्यपरिपूर्तये ॥ तथोपभोगवस्तूनिच्छत्रोपानत्कमंडलुम् ॥ ६१ ॥ मनोरथतृतीयायाव्रतमेतन्मयाकृतम् ॥ न्यूनातिरिक्तंसंपूर्णमेतदस्तुभवद्गिरा ॥६२॥ इत्याचार्यंसमापृच्छ्यतथेत्युक्तश्चतेनवै ॥ आसीमांतमनुव्रज्यदत्त्वान्येभ्योपिशक्तितः ॥ ६३ ॥ नक्तंसमाचरेत्पोष्यैःसार्धंसुप्रीतमानसः ॥ प्रातश्चतुर्थ्यांसंभोज्यचतुरश्चकुमारकान् ॥ ६४ ॥ अभ्यर्च्यगंधमाल्याद्यैर्द्वादशापिकुमारिकाः ॥ एवंसंपूर्णतांयातिव्रतमेतत्सुनिर्मलम् ॥६५॥ कार्यंमनोरथावाप्त्यैसर्वैरेतद्व्रतंशुभम् ॥ पत्नींमनोरमांकुल्यांमनोवृत्त्यनुसारिणीम् ॥६६॥ तारिणींदुःखसंसारसागरस्यपतिव्रताम् ॥ कुर्वन्नेतद्व्रतंवर्षंकुमारःप्राप्नुयात्स्फुटम् ॥ ६७ ॥ कुमारीपतिमाप्नोतिस्वाव्यंसर्वगुणाधिकम् ॥ सुवासिनीलभेत्पुत्रान्पत्युःसौख्यमखंडितम् ॥ ६८ ॥ दुर्भगासुभगास्याच्चधनाढ्यास्याद्दरिद्रिणी ॥ विधवापिनवैधव्यंपुनराप्नोतिकुत्रचित् ॥ ६९ ॥ गुर्विणीचशुभंपुत्रंलभतेसुचिरायुषम् ॥ ब्राह्मणोलभतेविद्यांसर्वसौभाग्यदायिनीम् ॥ ७० ॥

पूरिकाः ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ दीपीदीपधारिकापुत्तलिका ॥५९॥६०॥६१॥६२॥६३॥ नक्तंनक्तभोजनम् ॥६४॥६५॥६६॥६७॥६८॥६९॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ क्षिप्रमिति ॥ नत्वानमस्कारमात्रंकृत्वादूरंगतानपिजनान् ॥ चिंतितैःस्वाभिलाषैः ॥ कृतकृत्यान्कृतार्थान्विधायकृत्वाआगम यित्वातेषामागमनंकारयित्वेत्यर्थः ॥ ७८ ॥ अन्यत्रेति ॥ विश्वेहेविश्वभुजे ॥ कार्येतिपाठेऽन्वयभेदादपौनरुक्त्यम् ॥ ७९ ॥ ८० ॥ ८१ ॥ अंगजोत्तमःपुत्र श्रेष्ठः ॥ ८२ ॥

राज्यभ्रष्टोलभेद्राज्यंवैश्योलाभंचविंदति ॥ चिंतितंलभतेशूद्रोव्रतस्यास्यनिषेवणात् ॥७१॥ धर्मार्थीधर्ममाप्नोतिधनार्थीधनमाप्नुयात् ॥ कामीकामानवाप्नोतिमोक्षार्थीमोक्षमाप्नुयात् ॥ ७२ ॥ योयोमनोरथोयस्यसतंतंविंदतेध्रुवम् ॥ मनोरथतृतीयायाव्रतस्यचरणाद्व्रती ॥ ७३ ॥ ॥ स्कंदउवाच ॥ ॥ इत्थंनिशम्यशिवतःशिवासंतुष्टमानसा ॥ पुनःपप्रच्छविश्वेशंप्रबद्धकरसंपुटा ॥ ७४ ॥ अन्यत्रयेव्रतंचैतत्करिष्यंतिसदाशिव ॥ तेकथंपूजयिष्यंतिमां चआशाविनायकम् ॥ ७५ ॥ ॥ शिवउवाच ॥ ॥ साधुपृष्टंत्वयादेविसर्वसंदेहभेदिनि ॥ वाराणस्यांसमर्च्यात्वंविश्वेप्रत्यक्षरूपिणी ॥७६॥ आशाविघ्नजितासार्धंसर्वाशापूर्तिकारिणा ॥ हारिणानंतविघ्नानांममक्षेत्रशुभार्थिना ॥ ७७ ॥ क्षिप्रमागमयित्वाचनत्वादूरंगतानपि ॥ कृतकृत्यान्विधायाथार्चिंतितैःसुमनोरथैः ॥ ७८ ॥ अन्यत्रव्रतिभिर्विश्वेकांचनीप्रतिमातव ॥ पंचकृष्णलकादूर्ध्वंकार्याविघ्नहृतोपिच ॥ ७९ ॥ आचार्यायव्रतीदद्याद्व्रतांतेप्रतिमाद्वयम् ॥ सकृत्कृतेव्रतीचास्मिन्कृतकृत्योव्रतीभवेत् ॥ ८० ॥ ततःपुलोमजादेविश्रुत्वैतद्व्रतमुत्तमम् ॥ कृत्वामनोरथंप्रापयथाभिवांछितंहृदि ॥८१॥ अरुंधत्यावसिष्ठोपिलब्धोऽत्रिरनसूयया ॥ सुनीत्योत्तानपादाच्चध्रुवःप्राप्तोंऽगजोत्तमः ॥ ८२ ॥ सुनीतेर्दुर्भगत्वंचपुनरस्माद्व्रताद्गतम् ॥ चतुर्भुजःपतिःप्राप्तःक्षीरनीरधिजन्मना ॥ ८३ ॥ किंबहूक्तेनसुश्रोणिकृतंयेनव्रतंत्विदम् ॥ व्रतानितेनसर्वाणिकृतानिव्रतिनाध्रुवम् ॥ ८४ ॥ श्रुत्वाधीमान्कथांपुण्यांपुनस्तद्व्रतमानसः ॥ शुभबुद्धिमवाप्नोतिपापैरपिविमुच्यते ॥ ८५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेधर्मेश्वराख्यानेविश्वभुजाशाविनायकप्रशंसनेमनोरथतृतीयाव्रताख्यानंनामाशीतितमोध्यायः ॥ ८० ॥ ॥ अगस्त्यउवाच ॥ ॥ धर्मतीर्थस्यमाहात्म्यं कीदृग्देवेनशंभुना ॥ स्कंददेव्यैसमाख्यातंतदाख्याहिकृपांकुरु ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ विंध्योन्नतिहृदाख्यामिधर्मतीर्थसमुद्भवम् ॥ आकर्णयमहाप्राज्ञयथादेवेनभाषितम् ॥ २ ॥

क्षीरनीरधेर्दुग्धार्णवाज्जन्मयस्यास्तयालक्ष्म्या ॥ ८३ ॥ ८४ ॥ ८५ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥ ॥ एकाशीतितमेध्याये नानाश्चर्यैकमंदिरे ॥ दुर्दमाख्यानसंसर्गिधर्मेशाख्यानमुच्यते ॥ १ ॥ १ ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

अनुतप्तः प्रतिक्षणंसंततः ॥ तयातप्तइतिक्कचित् ॥ ३ ॥ अपानुनुत्सुरपाकर्तुमिच्छुः ॥४ ॥ परांश्रेष्ठाम् ॥ पाठांतरेकेवलमित्यर्थः ॥ ५ ॥ वैधसंब्राह्मम् ॥ ६ ॥ ७ ॥ महापापजुषामपीत्यपिशब्दा
दुपपापजुषामपि ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ कर्माण्येवबीजानियेषाम् ॥ व्यधिकरणेवाषष्ठ्यौ ॥ हरदृष्ट्याप्तशुष्मणांहरदर्शनप्राप्तदाहानाम् ॥ १२ ॥ १३ ॥ घातुकांनाशिनीम् ॥ १४ ॥

वृत्रंनिहत्यवृत्रारिर्ब्रह्महत्यामवाप्तवान् ॥ अनुतप्तोथपप्रच्छप्रायश्चित्तंपुरोहितम् ॥ ३ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ यदित्वंदेवराजेमांब्रह्महत्यांसुदु
स्त्यजाम् ॥ अपानुनुत्सुस्तद्याहिकाशींविश्वेशपालिताम् ॥ ४ ॥ नान्यत्किंचित्क्कचिद्दृष्टंब्रह्महत्यामहौषधम् ॥ राजधानींपरित्यज्यशक्रविश्वेशितुः
पराम् ॥ ५ ॥ भैरवस्यापिहस्ताग्रादपतद्वैधसंशिरः ॥ यत्रानंदवनेतत्रवृत्रशत्रोव्रजद्रुतम् ॥६॥ सीमानमपिसंप्राप्यशक्रानंदवनस्यहि ॥ ब्रह्महत्यापलाये
तवेपमानानिराश्रया ॥ ७ ॥ अन्येषामपिपापानांमहापापजुषामपि ॥ नाशयित्रीपराकाशीविश्वेशसमधिष्ठिता ॥ ८ ॥ महापातकतोमुक्तिःकाश्यामे
वशतक्रतो ॥ महासंसारतोमुक्तिःकाश्यामेवनचान्यतः ॥९॥ निर्वाणनगरीकाशीकाशीसर्वाघसंघहृत् ॥ विश्वेशितुःप्रियाकाशीद्यौःकाशीसदृशीनहि ॥
॥ १० ॥ ब्रह्महत्याभयंयस्ययस्यसंसारतोभयम् ॥ जातुचित्तेननत्याज्याकाशिकामुक्तिकाशिका ॥११॥ जंतूनांकर्मबीजानांयत्रदेहविसर्जने ॥ नजातु
चित्प्ररोहोस्तिहरदृष्ट्याप्तशुष्मणाम् ॥ १२ ॥ तांकाशींप्राप्यवृत्रारेवृत्रहत्यापनुत्तये ॥ समाराधयविश्वेशंविश्वमुक्तिप्रदायकम् ॥ १३ ॥ बृहस्पतेरिति
वचोनिशम्यससहस्रदृक् ॥ आयाद्द्रुततरंकाशींमहापातकघातुकाम् ॥ १४ ॥ स्नात्वोत्तरवहायांचधर्मेशंपरितःस्थितः ॥ आराधयन्महादेवंब्रह्महत्याप
नुत्तये ॥ १५ ॥ महारुद्रजपासक्तःसुत्रामाथत्रिलोचनम् ॥ ददर्शलिंगमध्यस्थंस्वभासादीपितांबरम् ॥ १६ ॥ पुनस्तुष्टाववेदोक्तैरुद्रसूक्तैरनेकधा ॥
विनिष्क्रम्यततोलिंगादाविर्भूयभवोवदत् ॥ १७ ॥ शचीपतेप्रसन्नोस्मिवरंवरयसुव्रत ॥ किंदेयंद्रुतमाख्याहिधर्मपीठकृतास्पद ॥ १८ ॥ श्रुत्वेतिदेवदे
वस्यसप्रेमवचनंहरिः ॥ सर्वज्ञकिंतेऽविदितंतमुवाचेतिवृत्रहा ॥ १९ ॥ ततस्तत्कृपयानुन्नोधर्मपीठनिषेवणात् ॥ निष्पाद्यतीर्थंतत्रेशोऽत्रस्नाहींद्रेति
चाब्रवीत् ॥२०॥ तत्रेंद्रःस्नानमात्रेणदिव्यगंधोऽभवत्क्षणात् ॥ अवापचरुचिंचारुंप्राक्तनींशातयाज्ञिकीम् ॥२१॥ तदाश्चर्यमथोदृष्ट्वामुनयोनारदादयः ॥
परिसस्नुर्मुदायुक्ताधर्मतीर्थेऽघहारिणि ॥ २२ ॥ अतर्पयन्पितॄन्दिव्यान्व्यधुःश्राद्धानिश्रद्धया ॥ धर्मेशंस्नापयामासुस्तत्तीर्थाम्बुभृतैर्घटैः ॥ २३ ॥
तदाप्रभृतितत्तीर्थंधर्मांधुरितिविश्रुतम् ॥ ब्रह्महत्यादिपापानामक्लेशंक्षालनंपरम् ॥ २४ ॥

॥ १५ ॥ सुत्रामाइंद्रः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥२१॥ अथोअनंतरम् ॥ अदइतिक्कचित् ॥२२॥२३॥ धर्मांधुर्धर्मकूपः ॥ अक्लेशंयथास्यात्तथा ॥ नविद्यंतेक्लेशायस्मादितिवा ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थराजस्यसमुद्रस्यप्रयागस्यवा ॥ २५ ॥ धर्मतीर्थेधर्मेशाधिष्ठितेतीर्थे ॥ २६ ॥ २७ ॥ द्वारिकेसागरेद्वारकासंबंधिनिसागरे ॥ देवकइतिपाठेदेवकपत्तनेप्रभासक्षेत्रेइतियावत् ॥ २८ ॥
सौकरंशौरभइतिप्रसिद्धम् ॥ गंगातीरे ॥ गौरीमहाह्रदेकेदारे ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ निष्कृतिरानृण्यंपिंडदानमितियावत् ॥ ३४ ॥ ३५ ॥ स्वंप्रतिविंबम् ॥ ३६ ॥

यत्फलंतीर्थराजस्यस्नानेनपरिकीर्त्यते ॥ सहस्रगुणितंतत्स्याद्धर्मांधुस्नानमात्रतः ॥ २५ ॥ गंगाद्वारेकुरुक्षेत्रेगंगासागरसंगमे ॥ यत्फलंलभतेमर्त्यो धर्मतीर्थेतदाप्नुयात् ॥ २६ ॥ नर्मदायांसरस्वत्यांगौतम्यांसिंहगेगुरौ ॥ स्नात्वायत्फलमाप्येतधर्मकूपेतदाप्नुयात् ॥ २७ ॥ मानसेपुष्करेचैवद्वारिकेसागरेतथा ॥ तीर्थेस्नात्वाफलंयत्स्यात्तत्स्याद्धर्मजलाशये ॥२८॥ कार्तिक्यांसूकरक्षेत्रेचैत्र्यांगौरीमहाह्रदे ॥ शंखोद्धारेहरिदिनेयत्फलंतत्फलंत्विह ॥२९॥ तीर्थद्वयंप्रतीक्षंतेसिस्नासून्पितरोनरान् ॥ गंगायांधर्मकूपेचपिंडनिर्वपणाशया ॥३०॥ पितामहसमीपेवाधर्मेशस्याग्रतोथवा ॥ फल्गौचधर्मकूपेचमाद्यंतिप्रपितामहाः ॥ ३१ ॥ धर्मकूपेनरःस्नात्वापरितर्प्यपितामहान् ॥ गयांगत्वाकिमधिकंकर्तापितृमुदावहम् ॥ ३२ ॥ यथागयायांतृप्ताःस्युःपिंडदानेपितामहाः ॥ धर्मतीर्थेतथैवस्युर्नन्यूनंनैवचाधिकम् ॥ ३३ ॥ तेधन्याःपितृभक्तास्तेप्रीणितास्तैःपितामहाः ॥ पैत्राहणाद्धर्मतीर्थेनिष्कृतिर्यैःकृतासुतैः ॥ ३४ ॥ तत्तीर्थस्यप्रभावेणनिष्पापोभूत्क्षणेनच ॥ प्रणम्यदेवदेवेशमिंद्रोऽगादमरावतीम् ॥३५॥ अपारोमहिमातस्यधर्मतीर्थस्यकुंभज ॥ तत्कूपेस्वंनिरीक्ष्यापिश्राद्धदानफलंलभेत् ॥ ३६ ॥ तत्रापिकाकिणीमात्रंयच्छेत्पितृमुदेनरः ॥ अक्षयंफलमाप्नोतिधर्मपीठप्रभावतः ॥ ३७ ॥ तत्रयोभोजयेद्विप्रान्यतिनोथतपस्विनः ॥ सिक्थेसिक्थेलभेत्सोथवाजपेयफलंस्फुटम् ॥ ३८ ॥ प्राप्यामरावतींशक्रस्ततोदिविषदांपुरः ॥ धर्मपीठस्यमाहात्म्यंमहत्काश्यामवर्णयत् ॥ ३९ ॥ आगत्यपुनरप्यत्रशंभोरानंदकानने ॥ मुनिवृंदारकैःसार्धंलिंगमस्थापयद्धरिः ॥४०॥ तारकेशात्पश्चिमतइंद्रेश्वरमितीरितम् ॥ तस्यसंदर्शनात्पुंसामैंद्रलोकोनदूरतः ॥४१॥ तद्दक्षिणेशचीशश्चस्वयंशच्याप्रतिष्ठितः ॥ शचीशार्चनतःस्त्रीणांसौभाग्यमतुलंभवेत् ॥ ४२ ॥ तत्समीपेस्तिरंभेशोवहुसौख्यसमृद्धिदः ॥ इंद्रेश्वरस्यपरितोलोकपालेश्वरोपरः ॥ ४३ ॥ तदर्चनात्प्रसीदंतिलोकपालाःसमृद्धिदाः ॥ धर्मेशात्पश्चिमाशायांधरणीशःप्रकीर्तितः ॥ तद्दर्शनेनधैर्यंस्याद्राज्येराजकुलादिषु ॥ ४४ ॥ धर्मेशाद्दक्षिणेपूज्यंतत्त्वेशाख्यंपरंनरैः ॥ तत्त्वज्ञानंप्रवर्तेततल्लिंगस्यसमर्चनात् ॥ ४५ ॥ धर्मेशात्पूर्वदिग्भागेवैराग्येशंसमर्चयेत् ॥ निवृत्तिश्चेतसस्तस्यलिंगस्यस्पर्शनादपि ॥ ४६ ॥ ज्ञानेश्वरंतथैशान्यांज्ञानदंसर्वदेहिनाम् ॥ ऐश्वर्येशमुदीच्यांचलिंगाद्धर्मेश्वराच्छुभात् ॥ ४७ ॥ तद्दर्शनाद्भवेन्नॄणामैश्वर्यंमनसेप्सितम् ॥ पंचवक्त्रस्यरूपाणिलिंगान्येतानिकुंभज ॥४८॥

काकिणीविंशतिवराटिका ॥ ३७ ॥ सिक्थेसिक्थेकणायांकणायाम् ॥ ३८ ॥ दिविषदांदेवानाम् ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

CC-0. In Public Domain. Digitization by eGangotri

शाश्वतंकैवल्यम् ॥ दुर्दमाख्यानंवक्तुंप्रस्तावयति ॥ अन्यदिति ॥ ४९ ॥ पादःकच्छः ॥५०॥५१॥ प्रसभंबलात् ॥ पाठांतरेप्रथमंयथास्यात् ॥ पुरंध्रीर्युवतीःस्त्रीरित्यर्थः ॥५२॥ मृगयुर्लुब्धकः ॥ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ धूमकेतुर्मृत्युः ॥ अकांडेऽनवसरे ॥ ५७ ॥ गृष्टिरत्रमृगः :॥ ५८ ॥ ५९ ॥ अवकेशिनोवंध्यफलान् ॥ सुविकासितानितिक्वचित् ॥

एतान्यवश्यंसंसेव्यनरःप्राप्नोतिशाश्वतम् ॥ अन्यत्तत्रैवयद्वृत्तंतदाख्यामिमुनेशृणु ॥४९॥ यच्छ्रुत्वापिनरोघोरेसंसाराब्धौनमज्जति ॥ कदंबशिखरोनाम विंध्यपादोमहानिह ॥ ५० ॥ दमस्यपुत्रस्तत्रासीद्दुर्दमोनामपार्थिवः ॥ पितर्युपरतेराज्यंसंप्राप्याविजितेंद्रियः ॥ ५१ ॥ हरेत्पुरंध्रीःप्रसभंपौराणांकाममोहितः ॥ असाधवःप्रियास्तस्यसाधवोऽप्रियतांययुः ॥ ५२ ॥ अदंड्यान्दंडयांचक्रेदंड्येष्वासीत्पराङ्मुखः ॥ सदैवमृगयाशीलःसोऽभून्मृगयुसंगतः ॥ ॥ ५३ ॥ विवासिताःस्वविषयात्तेनसन्मतिदायिनः ॥ धर्माधिकारिणःशूद्राब्राह्मणाःकरदीकृताः ॥५४॥ परदारेषुसंतुष्टःस्वदारेषुपराङ्मुखः ॥ आनर्च जातुचिन्नैवदेवौदुःखांतकारिणौ ॥ ५५ ॥ हारिणौसर्वपापानांसर्ववांछितदायिनौ ॥ सर्वेषांजगतीसारौश्रीकंठश्रीपतीपती ॥ ५६ ॥ स्वप्रजास्वेकउदितोधूमकेतुरिवापरः ॥ दुर्दमोनामभूपालःक्षयायाकांडएवहि ॥५७॥ सकदाचिन्मृगयुभिःपापर्धिव्यसनातुरः ॥ सार्धंविवेशारण्यानिगृष्टिपृष्ठानुगोहयी ॥ ॥ ५८ ॥ एकाकीदैवयोगेनदुर्दमःसोऽवनीपतिः ॥ धन्वीतुरंगमारूढोऽविशदानंदकाननम् ॥ ५९ ॥ सविलोक्याथसर्वत्रपादपानवकेशिनः ॥ सुच्छायांश्चसुविस्तारान्गतश्रमइवाभवत् ॥ ६० ॥ सुगंधेनसुशीतेनसुमंदेनसुवायुना ॥ क्षणंसंवीजितोराजापल्लवव्यजनैःकुजैः ॥ ६१ ॥ केवलंमृगयाजातस्तत्खेदोनव्यपाव्रजत् ॥ आजन्मजनितःखेदोनिरगात्तद्वनेक्षणात् ॥ ६२ ॥ मध्येवनंसचापश्यत्प्रासादंचुंबितांबरम् ॥ महारत्नशलाकानांरम्यमेकमिवाकरम् ॥६३॥ अथावरुह्यतुरगात्सभूपालोतिविस्मितः ॥ धर्मेशमंडपंप्राप्यस्वात्मानंप्रशशंसह ॥६४॥ धन्योस्म्यहंप्रसन्नोस्मिधन्येमेद्यविलोचने ॥ धन्यमद्यतनंचाहर्यदपश्यमिमांभुवम् ॥ ६५ ॥ पुनर्निनिंदचात्मानंधर्मपीठप्रभावतः ॥ धिङ्मांदुर्जनसंसर्गंत्यक्तसज्जनसंगमम् ॥ ६६ ॥ जंतूद्वेगकरं मूढंप्रजापीडनपंडितम् ॥ परदारपरद्रव्यापहृत्यासुखमानिनम् ॥६७॥ अद्ययावन्ममगतंवृथाजन्मालपमेधसः ॥ धर्मस्थानानीदृशानियदृष्टानिनकुत्रचित् ॥ ६८ ॥ एवंबहुविनिंद्यस्वंनत्वाधर्मेश्वरंविभुम् ॥ आरुह्याश्वंययौराजादुर्दमोविषयंस्वकम् ॥ ६९ ॥ ततोमात्यान्समाहूयक्रमायातांश्चिरंतनान् ॥ नवीनान्परिनिर्वास्यपौरांश्चापिसमाह्वयत् ॥ ७० ॥ ब्राह्मणांश्चनमस्कृत्यतेभ्योवृत्तीःप्रदायच ॥ पुत्रेराज्यंसमारोप्यप्रजाधर्मेनिवेश्यच ॥ ७१ ॥ परिदंड्यचदंडार्हान्साधूंश्चपरितोष्यच ॥ दारानपिपरित्यज्यविषयेषुपराङ्मुखः ॥ ७२ ॥

॥ ६० ॥ कुजैर्वृक्षैः ॥ ६१ ॥ ६२ ॥ मध्येवनंवनमध्ये ॥ चुंवितांवरमत्युच्चम् ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ अपहृत्याअपहारेण ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७३ ॥ दमिनामिंद्रियनिग्रहवताम् ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ अथाशीतितमेध्यायेद्व्यधिकेऽत्यंतसुंदरे ॥ वीरेश्वरस्यलिंगस्यप्रादुर्भावःप्रतन्यते ॥ १ ॥ वीरेश्वरस्याविर्भावंप्रष्टुमाह ॥ वीरेशस्येति ॥ १ ॥ २ ॥ ३ ॥ तत्राख्यायिकामवतारयति ॥ आसीदिति ॥ राजानंविशिनष्टि षडक्षराधिकसार्द्धषड्भिः ॥ ४ ॥ वदान्योदाता ॥ ५ ॥ ६ ॥ शौचनिलयःशौचाश्रयः ॥ शौचनियमइतिकश्चित् ॥ ७ ॥ संख्यावान्विद्वान् ॥ सदोजिरेसभांगणे ॥

समागच्छदथैकाकीकाशींश्रेयोविकासिनीम् ॥ धर्मेश्वरंसमाराध्यकालान्निर्वाणमाप्तवान् ॥ ७३ ॥ धर्मेशदर्शनान्नित्यंतथाभूतःसदुर्दमः ॥ बभूवदमिनांश्रेष्ठःप्रांतेमोक्षंचलब्धवान् ॥ ७४ ॥ इत्थंधर्मेशमाहात्म्यंमयास्वल्पंनिरूपितम् ॥ धर्मपीठस्यमाहात्म्यंसम्यक्कोवेदकुंभज ॥ ७५ ॥ इदंधर्मेश्वराख्यानंयःश्रोष्यतिनरोत्तमः ॥ आजन्मसंचितात्पापात्समुक्तोभवतिक्षणात् ॥७६॥ श्राद्धकालेविशेषेणधर्मेशाख्यानमुत्तमम्॥ श्रावयेद्ब्राह्मणान्धीमान्पितॄणांतृप्तिकारणम् ॥ ७७ ॥ धर्माख्यानमिदंशृण्वन्नपिदूरस्थितःसुधीः ॥ सर्वपापैर्विनिर्मुक्तोगंतांतेशिवमंदिरम् ॥ ७८ ॥ ॥ इतिश्रीस्कांदेमहापुराणेएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्धेधर्मेश्वराख्यानंनामैकाशीतितमोध्यायः ॥ ८१ ॥ ॥ पार्वत्युवाच ॥ ॥ वीरेशस्यमहेशानश्रूयतेमहिमामहान् ॥ परांसिद्धिंपरोपतुस्तत्रसिद्धाःपरःशताः ॥१॥ कथमाविर्भवस्तस्यकाश्यांलिंगवरस्यतु ॥ आशुसिद्धिप्रदस्येहतन्मेब्रूहिजगत्पते ॥ २ ॥ ॥ महेश्वरउवाच ॥ ॥ निशामयमहादेविवीरेशाविर्भवंपरम् ॥ यंश्रुत्वापिनरःपुण्यंप्राप्नोतिविपुलंशिवे ॥३॥ आसीदमित्रजिन्नामराजापरपुरंजयः ॥ धार्मिकःसत्त्वसंपन्नःप्रजारंजनतत्परः ॥ ४ ॥ यशोधनोवदान्यश्चसुधीर्ब्राह्मणदैवतः ॥ सदैवावभृथस्नानपरिक्लिन्नशिरोरुहः ॥ ५ ॥ विनीतोनीतिसंपन्नःकुशलःसर्वकर्मसु ॥ विद्याब्धिपारदृश्वाचगुणवान्गुणिवत्सलः ॥ ६ ॥ कृतज्ञोमधुरालापःपापकर्मपराङ्मुखः ॥ सत्यवाक्छौचनिलयःस्वल्पवाग्विजितेंद्रियः ॥ ७ ॥ रणांगणेकृतांताभःसंख्यावांश्चसदोजिरे ॥ कामिनीकामकेलिज्ञोयुवापिस्थविरप्रियः ॥ ८ ॥ धर्मार्थैधितकोशश्चसमृद्धबलवाहनः ॥ सुभगश्चसुरूपश्चसुमेधाःसुप्रजाश्रयः ॥९॥ स्थैर्यधैर्यसमापन्नोदेशकालविचक्षणः ॥ मान्यमानप्रदोनित्यंसर्वदूषणवर्जितः ॥ १० ॥ वासुदेवांघ्रियुगलेचेतोवृत्तिंनिधायसः ॥ चकारराज्यंनिर्द्वंद्वंविष्वगीतिविवर्जितम् ॥ ११ ॥ अलंघ्यशासनःश्रीमान्विष्णुभक्तिपरायणः ॥ अभुनक्प्रचुरान्भोगान्समंताद्विष्णुसात्कृतान् ॥ १२ ॥

ज्ञानवांश्चपरात्मनीतिकश्चित् ॥ ८ ॥ ९ ॥ १० ॥ विष्वक्सर्वतः ॥ ईतयोऽतिवृष्ट्यादयः ॥ तदुक्तम् ॥ अतिवृष्टिरनावृष्टिःशलभामूषकाःखगाः ॥ प्रत्यर्थिनश्चराजानःसप्तैताईतयःस्मृताइति ॥ ताभिःरहितम् ॥ ११ ॥ समंतात्कायवाङ्मनआदिभिर्विष्णुसात्कृतान्विष्णवेसमर्पितान् ॥ तदुक्तंभागवते ॥ कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात् ॥ करोतियद्यत्सकलंपरस्मै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारायणायेतिसमर्पयेत्तदिति ॥ १२ ॥ हरेरिति ॥ हरेरायतनानिप्रतिपदेपदेस्थानेस्थानेउच्चैरुन्नतंसौधंदेवालयम् ॥ महाभाग्यनिधेस्तस्यराज्येसमभवदित्यन्वयः ॥ विसर्गाभावपाठेदेव्याःसंबो धनम् ॥ १३ ॥ गोविंदेत्यादिश्लोकानांमधुद्विषोगोविंदादिनामानियस्यराज्येयत्रकुत्रापिश्रूयंतइतिनवमेनान्वयः ॥ १४ ॥ कीनाशोमृत्युः ॥ १५ ॥ १६ ॥ जंजपूकाजपशीलास्तेषामघनाशन ॥ भक्तानामितिक्वचित् ॥ १७ ॥ १८ ॥ दुरंतकदुर्निवार्यमृत्यो ॥ पुरांतकेतिक्वचित् ॥ दंदशूकेश्वरेशयअनंतशायिन् ॥ १९ ॥ विष्टरश्रवःयाज्ञवल्क्यादिषुश्रूयमाण ॥ :विराधनामराक्षसारे ॥

हरेरायतनान्युच्चैःप्रतिसौधंपदेपदे ॥ तस्यराज्येसमभवन्महाभाग्यनिधेःशिवे ॥१३॥ गोविंदगोपगोपालगोपीजनमनोहर ॥ गदापाणेगुणातीतगुणाढ्य गरुडध्वज ॥ १४ ॥ केशिहृत्कैटभारातेकंसारेकमलापते ॥ कृष्णकेशवकंजाक्षकीनाशभयनाशन ॥ १५ ॥ पुरुषोत्तमपापारेपुंडरीकविलोचन ॥ पीतकौशेयवसनपद्मनाभपरात्पर ॥ १६ ॥ जनार्दनजगन्नाथजाह्नवीजलजन्मभूः ॥ जन्मिनांजन्महरणजंजपूकाघनाशन ॥ १७ ॥ श्रीवत्सवक्षःश्रीकां तश्रीकरश्रेयसांनिधे ॥ श्रीरंगशार्ङ्गकोदंडशौरेशीतांशुलोचन ॥ १८ ॥ दैत्यारेदानवारातेदामोदरदुरंतक ॥ देवकीहृदयानंददंदशूकेश्वरेशय ॥ १९ ॥ विष्णोवैकुंठनिलयबाणारेविष्टरश्रवः ॥ विष्वक्सेनविराधारेवनमालिन्वनप्रिय ॥ २० ॥ त्रिविक्रमत्रिलोकीशचक्रपाणेचतुर्भुज ॥ इत्यादीनिपवित्रा णिनामानिप्रतिमंदिरम् ॥ २१ ॥ स्त्रीवृद्धबालगोपालवदनोदीरितानितु ॥ श्रूयंतेयत्रकुत्रापिरम्याणिमधुविद्विषः ॥ २२ ॥ सुरसाकाननान्येवविलोक्यं तेगृहेगृहे ॥ चरित्राणिविचित्राणिपवित्राण्यब्धिजापतेः ॥ २३ ॥ सौधभित्तिषुदृश्यंतेचित्रकृन्निर्मितानितु ॥ ऋतेहरिकथायास्तुनान्यावार्तानिशम्यते ॥ ॥ २४ ॥ हरिणानैवविध्यंतेहरिनामांशधारिणः ॥ तस्यराज्ञोभयाद्व्याधैररण्यसुखचारिणः ॥ २५ ॥ नमत्स्यानैवकमठानवराहाश्चकेनचित् ॥ हन्यंते क्वापितद्भीत्यामत्स्यमांसाशिनापिवै ॥ २६ ॥ अप्युत्तानशयास्तस्यराष्ट्रेमित्रजितःक्वचित् ॥ स्तनपानंनकुर्वंतिसंप्राप्यहरिवासरम् ॥ २७ ॥ पशवोपि तृणाहारंपरित्यज्यहरेर्दिने ॥ उपोषणपराजाताअन्येषांकाकथानृणाम् ॥ २८ ॥ महामहोत्सवःसर्वैःपुरौकोभिर्वितन्यते ॥ तस्मिन्प्रशासतिभुवंसंप्राप्तेह रिवासरे ॥ २९ ॥ सएवदंड्योऽभूत्तस्यराज्ञोमित्रजितःक्षितौ ॥ योविष्णुभक्तिरहितःप्राणैरपिधनैरपि ॥ ३० ॥

विधेर्वीरेतिक्वचित् ॥ २० ॥ २१ ॥ २२ ॥ सुरसाकाननानितुलसीवनानि ॥ शोभनोरसोरागोभगवतोयस्यामितिव्युत्पत्तेः ॥ यदाहधन्वंतरिः ॥ तुलसीसुरसागौरीभूतघ्नीवहुमंजरीति ॥ चरित्राणि पूतनावधशकटभंजनादीनि ॥ २३ ॥ नकेवलंगृहेगृहेविलोक्यंतेसौधभित्तिषुचदृश्यंतइतिसंबंधः ॥ २४ ॥ हरिनामलक्षणोयोंशोभागस्तद्धारिणः ॥ २५ ॥ २६ ॥ २७ ॥२८॥ २९ ॥३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीक्षिताइवयज्ञादिदीक्षायांदीक्षिताइव ॥ न्यवसन्भुवीतिकचित् ॥ ३१ ॥ ३२ ॥ नभज्येतनसेव्येत ॥ ३३ ॥ ३४ ॥ ३५ ॥ दध्नामिश्रितंजलंमधुपर्कः ॥ ३६ ॥ ३७ ॥ ३८ ॥
अहमगमंप्राप्तः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ सर्वत्रदेहादौ ॥ कर्तव्यइतिकचित् ॥ ४४ ॥ प्रणिधानेनपूजनेनध्यानेनवाशीलयित्वापूजयित्वाध्यात्वावा ॥ ४५ ॥ ४६ ॥

अंत्यजा अपितद्राष्ट्रेशंखचक्रांकधारिणः ॥ संप्राप्यवैष्णवींदीक्षांदीक्षिताइवसंबभुः ॥ ३१ ॥ शुभानियानिकर्माणिक्रियंतेऽनुदिनंजनैः ॥ वासुदेवेसमर्प्यंतेतानितैरफलेप्सुभिः ॥ ३२ ॥ विनामुकुंदंगोविंदंपरमानंदमच्युतम् ॥ नान्योजप्येतमन्येतनभज्येतजनैःक्वचित् ॥ ३३ ॥ कृष्णएवपरोदेवःकृष्णएवपरागतिः ॥ कृष्णएवपरोबंधुस्तस्यासीदवनीपतेः ॥३४॥ एवंतस्मिन्महीपालेराज्यंसम्यक्प्रशासति ॥ एकदानारदःश्रीमांस्तंदिदृक्षुःसमाययौ ॥३५॥ राज्ञासमर्चितःसोथमधुपर्कविधानतः ॥ नारदोवर्णयामासतममित्रजितंनृपम् ॥ ३६ ॥ ॥ नारदउवाच ॥ ॥ धन्योसिकृतकृत्योसिमान्योप्यासिदिवौकसाम् ॥ सर्वभूतेषुगोविंदंपरिपश्यन्विशांपते ॥ ३७ ॥ योवेदपुरुषोविष्णुर्योयज्ञपुरुषोहरिः ॥ योंतरात्मास्यजगतःकर्ताहर्ताविताविभुः ॥ ३८ ॥ तन्मयंपश्यतोविश्वंतवभूपालसत्तम ॥ दर्शनंप्राप्यशुभदंशुचित्वमगमंपरम् ॥ ३९ ॥ एकएवहिसारोत्रसंसारेक्षणभंगुरे ॥ कमलाकांतपादाब्जभक्तिभावोऽखिलप्रदः ॥ ४० ॥ परित्यज्यहियःसर्वंविष्णुमेकंसदाभजेत् ॥ सुमेधसंभजंतेतंपदार्थाःसर्वएवहि ॥ ४१ ॥ हृषीकेशेहृषीकाणियस्यस्थैर्यंगतान्यहो ॥ सएवस्थैर्यमाप्नोतिब्रह्मांडेऽतीवचंचले ॥ ४२ ॥ यौवनंधनमायुष्यंपद्मिनीजलबिंदुवत् ॥ अतीवचपलंज्ञात्वाऽच्युतमेकंसमाश्रयेत् ॥ ४३ ॥ वाचिचेतसिसर्वत्रयस्यदेवोजनार्दनः ॥ सएवसर्वदावंद्योनररूपीजनार्दनः ॥ ४४ ॥ निर्व्याजप्रणिधानेनशीलयित्वाश्रियःपतिम् ॥ पुरुषोत्तमतांकोनप्राप्तवानिहभूतले ॥ ४५ ॥ अनयाविष्णुभक्त्यातेसंतुष्टेंद्रियमानसः ॥ उपकर्तुमनाब्रूयांतन्निशामयभूपते ॥ ४६ ॥ बालाविद्याधरसुतानाम्नामलयगंधिनी ॥ क्रीडंतीपितुराक्रीडेहृताकंकालकेतुना ॥ ४७ ॥ कपालकेतुपुत्रेणदानवेनबलीयसा ॥ आगामिन्यांतृतीयायांतस्याःपाणिग्रहःकिल ॥ ४८ ॥ पातालेचंपकावत्यांनगर्यांसास्तिसांप्रतम् ॥ हाटकेशात्समागच्छंस्तयाहंसाश्रुनेत्रया ॥ ४९ ॥ दृष्टःप्रणम्यविज्ञप्तोयथातच्चानिशामय ॥ ब्रह्मचारिन्मुनिश्रेष्ठगंधमादनशैलतः ॥ ५० ॥ बालक्रीडनकासक्तांमोहयित्वानिनायसः ॥ कंकालकेतुर्दुर्वृत्तोदुर्जयोन्यास्त्रघाततः ॥ ५१ ॥ स्वस्यत्रिशूलघातेनम्रियतेनान्यथारणे ॥ जगत्पर्याकुलीकृत्यनिद्रात्यत्रविनिर्भयः ॥ ५२ ॥

मलयशब्देनात्रमलयजोलक्ष्यते ॥ तद्वद्गंधोवर्ततेयस्याःसामलयगंधिनी ॥ ४७ ॥ पाणिग्रहःदेव्योदिष्टइतिशेषः ॥ ४८ ॥ हाटकेशातपातालस्थानात् ॥ ४९ ॥ ५० ॥ मोहयित्वामाययामोहंसंपाद्यमांज्ञात्वात्रेतिकचित् ॥ ५१ ॥ सस्वेतिपाठेअन्वयभेदादपौनरुक्त्यम् ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri

यदीति ॥ कोपिनरइत्यन्वयः ॥ ५३ ॥ यद्यादिअत्रास्मिन्नर्थेउपचिकीर्षुःउपकर्तुमिच्छुः ॥ ५४ ॥ आतृतीयातिथीतिवचनात्तृतीयायांविवाहोभविष्यतीतिदेव्योक्तमितिज्ञातव्यम् ॥ ५५ ॥ मामेवप्रार्थयेतिशंकांशातयति ॥ तथेति ॥ ५६ ॥ ५७ ॥ जीवेजीविष्यति ॥ त्वद्वाराघातयिष्यतिच ॥ जीवेदित्यत्रवालेतिवापाठः ॥ ५८ ॥ अनल्पावहुलाउत्कलिकारोमांचोयस्यसः ॥ ५९ ॥ ॥ ६० ॥ पूर्णिमादिवसइति ॥ चतुर्दश्यांनारदागमनंपूर्णिमायांसमुद्रप्राप्तिर्देवीदर्शनंचप्रतिपदिजलप्रवेशादिकंचेतिविवेकः ॥ ६१ ॥ तत्रदिव्यांगनेत्यादेरयंभावः ॥ ययादेव्यातस्यैवरोदत्तःसैवत्वां तत्रनेतुंत्वयातस्याःपरिणयनमवश्यंभावीतिसूचयंतीगाथांगास्यतीति ॥ ६२ ॥ गाथामेवाह ॥ यदिति ॥ तच्छुभाशुभंकर्मतथ्यमेतदवश्यमित्यर्थः ॥ विधिर्नोदनासएवसूत्रंरज्जुस्तेननियंत्रितो

यदिकोपिकृतज्ञोमांहत्वेमंदुष्टदानवम् ॥ मद्दत्तेनत्रिशूलेननयेद्वद्वंभवेन्नरः ॥ ५३ ॥ यदत्रोपचिकीर्षुस्त्वंरक्षमांदुष्टदानवात् ॥ ममापिहिवरोदत्तोभगवत्यामहामुने ॥ ५४ ॥ विष्णुभक्तोयुवाधीमान्पुत्रित्वांपारिणेष्यति ॥ आतृतीयातिथियथातद्वाक्यंतथ्यतांव्रजेत् ॥ ५५ ॥ तथानिमित्तमात्रंत्वंभवयत्नं समाचर ॥ इतितद्वचनाद्राजन्विष्णुभक्तिपरायणम् ॥ युवानंचापिधीमंतंत्वामनुप्राप्तवानहम् ॥५६॥ तद्गच्छकार्यसिद्धयैत्वंहत्वातंदुष्टदानवम् ॥ आनयाशुमहाबाहोशुभांमलयगंधिनीम् ॥ ५७ ॥ सातुविद्याधरीजीवेद्विलोक्यत्वांनरेश्वर ॥ पार्वतीवचनाद्दुष्टंघातयिष्यत्ययत्नतः ॥५८॥ इतिनारदवाक्यंसंनिशम्यामित्रजिन्नृपः ॥ अनल्पोत्कलिकोजातोविद्याधरसुतांप्रति ॥ ५९ ॥ उपायंचापिपप्रच्छगंतुंतांचंपकावतीम् ॥ नारदेनपुनःप्रोक्तःसराजागिरिराजजे ॥ ६० ॥ तूर्णमर्णवमासाद्यपूर्णिमादिवसेनृप ॥ भवान्द्रक्ष्यतिपोतस्थःकल्पवृक्षंरथस्थितम् ॥६१॥ तत्रदिव्यांगनाकाचिद्दिव्यपर्यंकसंस्थिता ॥ वीणामादायगायंतीगाथांगास्यतिसुस्वरम् ॥ ६२ ॥ यत्कर्मविहितंयेनशुभंवाथशुभेतरम् ॥ सएवभुंक्तेतत्तथ्यंविधिसूत्रनियंत्रितः ॥ ६३ ॥ गाथामिमांसासंगीयसरथासमहीरुहा ॥ सपर्यंकाक्षणादेवमध्येसिंधुप्रवेक्ष्यति ॥६४॥ भवानप्यविशंकंचततःपोतान्महार्णवे ॥ तामनुव्रजतुक्षिप्रंयज्ञवाराहमास्तुवन् ॥६५॥ ततोद्रक्ष्यसिपातालेनगरींचंपकावतीम् ॥ महामनोहरांराजन्सहितांबालयानया ॥६६॥ इत्युक्त्वांतर्हितोदेविसचतुर्मुखनंदनः ॥ राजाप्यर्णवमासाद्ययथोक्तंपरिलक्ष्यच ॥ ६७ ॥ विवेशांतःसमुद्रंचनगरीमाससादताम् ॥ साथविद्याधरीबालानेत्रप्राघुणकीकृता ॥ ६८ ॥ तेनराज्ञात्रिजगतीसौंदर्यश्रीरिवैकिका ॥ पातालदेवतेयंवाममनेत्रोत्सवायकिम् ॥६९॥ निरणायिमधुद्वेष्ट्रास्रष्टुःसृष्टिविलक्षणा ॥ कुहूराहुभयादेषाकांतिश्चांद्रमसीकिमु ॥७०॥

बद्धः ॥ वेदकिंकरःसन्नित्यर्थः ॥ वेदगर्भाज्ञालक्षणसूत्रनियंत्रितइतिवा ॥ ६३ ॥ ६४ ॥ आस्तुवन्आसमंतात्कायवाङ्मनोभिः ॥ यज्ञवराहस्यजलक्रीडाभिरुचिरस्य ॥ तदुक्तंवनपर्वणि ॥ जलक्रीडाभिरुचिरंवाराहंरूपमस्मरादिति ॥ पृथिव्युद्धरणायजलेप्रविष्टत्वात्तत्स्तवेननेतनधरायाइवजलप्रवेशावाधेनस्वयामलयगंधिन्याउद्धारोभाविष्यतीतिभावः ॥ ६५ ॥ अनयामलयगंधिन्या ॥ ६६ ॥ ॥ ६७ ॥ नेत्रप्राघुणकीचक्षुरतिथिः ॥ ६८ ॥ त्रिजगतीत्यादेरित्थंक्षणंतांनिर्वर्ण्यवितर्क्येतितृतीयेनान्वयः ॥ एकिकामुख्याएकाकिनीतिवा ॥ ६९ ॥ कुहूरमावास्याचराहुश्चतयोर्भयात् ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७१ ॥ सेति ॥ सातंराजानंविलोक्यहृष्टतनूरुहासीदितितृतीयेनान्वयः ॥ ७२ ॥ ७३ ॥ ७४ ॥ दोलापर्यंकमांदोलनखट्वाम् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥
कलयन्चालयन् ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ सुखसंदोहोवृत्तिरूपस्तेनमेदुरःपूर्णः ॥ परांनिर्वृतिंपरमानंदम् ॥ तदुक्तम् ॥ आनंदःपरएवात्माभेदसंसर्गव

योषिद्रूपंसमाश्रित्यतिष्ठतेऽत्राकुतोऽभया ॥ इत्थंक्षणंतांनिर्वर्ण्यसराजागात्तदंतिकम् ॥ ७१ ॥ साविलोक्याथतंबालानितरांमधुराकृतिम् ॥ विशालो
रस्थलतलंप्रलंबतुलसीस्रजम् ॥ ७२ ॥ शंखचक्रांकसुभगभुजद्वयविराजितम् ॥ हरिनामाक्षरसुधासुधौतरदनावलिम् ॥ ७३ ॥ भवानीभक्तिबीजोत्थं
भूरुहंपुरुषाकृतिम् ॥ मनोरथफलैःपूर्णमासीद्धृष्टतनूरुहा ॥७४॥ दोलापर्यंकमुत्सृज्यह्रीभरानम्रकंधरा ॥ वेपथुंचपरिष्टभ्यबालाप्रोवाचभूपतिम् ॥७५॥
कस्त्वमत्रकृतांतस्यभवनंमधुराकृते ॥ प्राप्तोमेमंदभाग्यायाश्चेतोवृत्तिंनिरुंधयन् ॥ ७६ ॥ यावन्नायातिसुभगसकठोरतराकृतिः ॥ अतिपर्याकुलीकृत्य
त्रिलोकींदानवोमुहुः ॥७७॥ कंकालकेतुर्दुर्वृत्तस्त्ववध्यःपरहेतिभिः ॥ तावद्गुप्तंसमातिष्ठशस्त्रागारेतिगह्वरे ॥७८॥ नमेकन्याव्रतंभंक्तुंससमर्थउमावरात्॥
आगामिन्यांतृतीयायांपरश्वःपाणिपीडनम् ॥ ७९ ॥ संचिकीर्षतिदुष्टात्मागतायुर्ममशापतः ॥ मातद्भीतिंकुरुयुवंस्तत्कार्यंभविताचिरम् ॥ ८० ॥
विद्याधर्येतिचोक्तःसशस्त्रागारेनिगूढवत् ॥ स्थितोवीरोमहाबाहुर्दानवागमनेक्षणः ॥८१॥ अथसायंसमायातोदानवोभीषणाकृतिः॥ त्रिशूलंकलयन्पाणौ
मृत्योरपिभयावहम् ॥ ८२ ॥ आगत्यदानवोरौद्रःप्रलयांबुदनिस्वनः॥ विद्याधरींजगादेतिमदाघूर्णितलोचनः ॥८३॥ गृहाणेमानिरत्नानिदिव्यानिवरव
र्णिनि ॥ कन्यात्वंचपरश्वस्तेपाणिग्राहाद्पैष्यति ॥ ८४ ॥ दासीनामयुतंप्रातर्दास्यामितवसुंदरि ॥ आसुरीणांसुरीणांचदानवीनांमनोहरम् ॥ ८५ ॥
गंधर्वीणांनरीणांचकिन्नरीणांशतंशतम् ॥ विद्याधरीणांनागीनांयक्षिणीनांशतानिषट् ॥ ८६ ॥ राक्षसीनांशतान्यष्टौशतमप्सरसांवरम् ॥ एतास्तेपरि
चारिण्योभविष्यंत्यमलाशये ॥ ८७ ॥ यावत्संपत्तिसंभारोदिक्पालानांगृहेषुवै ॥ मत्परिग्रहतांप्राप्यतावतस्त्वमिहेश्वरी ॥ ८८ ॥ दिव्यान्भोगान्मया
सार्धंभोक्ष्यसेमत्परिग्रहात् ॥ कदापरश्वोभवितायस्मिन्वैवाहिकोविधिः ॥ ८९ ॥ त्वदंगसंगसंस्पर्शसुखसंदोहमेदुरः ॥ परांनिर्वृतिमाप्स्यामिपरश्वोनि
कटंयदि ॥ ९० ॥ मनोरथाश्चिरंयावद्येमेहृदिसमेधिताः ॥ तान्कृतार्थीकरिष्यामिपरश्वस्तवसंगमात् ॥ ९१ ॥ जित्वादेवान्रणेसर्वानिंद्रादीन्मृगलो
चने ॥ त्रैलोक्यैश्वर्यसंपत्तेस्त्वांकरिष्यामिचेश्वरीम् ॥ ९२ ॥ आधायांकेत्रिशूलंस्वेसुष्वापेतिप्रलप्यसः ॥ नरमांसवसास्वादप्रमत्तोवीतसाध्वसः ॥
॥९३॥ वरंस्मरंतीसागौर्याविद्याधरकुमारिका ॥ विज्ञायतंप्रमत्तंचसुसुप्तंचातिनिर्भयम् ॥ ९४ ॥ आहूयतंनरवरवरंसर्वांगसुंदरम् ॥ विष्णुभक्तिकृतत्राणं
प्राणनाथेतिजल्प्यच ॥ ९५ ॥ शूलंतदंकादादायगृहाणेमंजहिद्रुतम् ॥ इतित्रिशूलंबालातोबालार्कसदृशद्युतिः ॥ ९६ ॥

र्जितः ॥ सएवसुखरूपेणव्यज्यतेपुण्यकर्मभिरिति ॥ ९० ॥ ९१ ॥ ९२ ॥ वसाहृन्मेदः ॥ वीतसाध्वसोगतभयःपाठांतरेवरविशेषणम् ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥९७॥९८॥९९॥१००॥१॥ कंडूयनक्षमःकंडूयनक्रियायोग्यः ॥२॥ उपढौकितःउपढौकत्वेनउपहारत्वेनप्रस्थापितः ॥३॥४॥ अनुदत्अखिद्यत्॥५॥ चपेटयाप्रसृतांगुलिकरेण ॥६॥७॥८॥९॥

समादायमहाबाहुःसतदामित्रजिन्नृपः ॥ जहर्षचजगादोच्चैर्बालायाश्चाभयंदिशन् ॥ ९७ ॥ वामपादप्रहारेणतमाताड्यसनिर्भयः ॥ संस्मरंश्चक्रिणंचित्ते जगद्रक्षामणिंहरिम् ॥ ९८ ॥ जगादतिष्ठरेदुष्टकन्याधर्षणलालस ॥ युध्यस्वात्रमयासार्धंनसुप्तंहन्म्यहंरिपुम् ॥९९॥ इतिसंश्रुत्यसंभ्रांतउत्थायसदनोः सुतः ॥ त्रिशूलंदेहिमेकांतेप्रोवाचेतिमुहुर्मुहुः ॥ १०० ॥ कोयंमृत्युगृहंप्राप्तःकस्यरुष्टोऽद्यचांतकः ॥ कआयुषाद्यसंत्यक्तोयःप्राप्तोममगोचरम् ॥ १ ॥ ममप्रचंडदोर्दंडकंडूकंडूयनक्षमः ॥ नाल्पोनरोयंभवितार्किंत्रिशूलेनसुंदरि ॥२॥ माभैर्मेकौतुकंपश्यभक्ष्योऽयंममसांप्रतम् ॥ कालेनमत्तोभीतेनस्वयमे वोपढौकितः ॥ ३ ॥ इत्युक्त्वामुष्टिघातेनतेनोच्चैर्दनुसूनुना ॥ हृदयेनिहतोराजाशिलातिकठिनेद्रुतम् ॥ ४ ॥ सचक्रिणाकृतत्राणःपीडामल्पीयसीमपि ॥ नोवेदकठिनोरस्कस्तत्करंप्रत्युतानुदत् ॥ ५ ॥ अथकोपवताराज्ञाहतोवक्त्रेचपेटया ॥ आघूर्णितशिराभूमौपतित्वापुनरुत्थितः ॥ ६ ॥ उवाचचवचोधैर्य मवष्टभ्यमहाबली ॥ ७ ॥ ॥ दानवउवाच ॥ ॥ ज्ञातंनत्वंमनुष्योसिनृरूपेणचतुर्भुजः ॥ आयातश्छिद्रमासाद्यहंतुंमांदानवांतकः ॥ ८ ॥ एकंवि धेहिमधुभिद्यदित्वंबलवानासि ॥ विहायैतन्महच्छूलंयुध्यस्वस्वायुधैर्मया ॥९॥ त्वयाकपटरूपेणबलिनःकैटभादयः ॥ नबलेनहताःसंख्येहताएवच्छले नहि ॥ ११० ॥ बलिंपातालमनयस्त्वंनृवामनतांदधत् ॥ नृमृगत्वेनभवताहिरण्यकशिपुर्हतः ॥ ११ ॥ त्वयाजटिलरूपेणलंकेशोविनिपातितः ॥ गोपालवेषमासाद्यकंसाद्याघातितास्त्वया ॥ १२ ॥ स्त्रीरूपेणाहरस्त्वंतुविप्रलाप्यासुरान्सुधाम् ॥ यादोरूपेणभवताशंखाद्यानिहताबहु ॥१३॥ मायावि नामग्रगण्यसर्वमर्मज्ञसाधक ॥ नत्वत्तोहंबिभेम्यद्ययदिशूलंविहास्यसि ॥ १४ ॥ अथवादैन्यवचनैःकिमेभिःकातरोचितैः ॥ नत्यक्ष्यासित्रिशूलंत्वं नत्वांजेष्याम्यहंरणे ॥ १५ ॥ अवश्यमेवमर्तव्यमद्यप्रातःशरीरिणा ॥ त्वत्करेणवरंमृत्युर्बलेनापिच्छलेनवा ॥ १६ ॥ इयंविद्याधरीकन्यानमयादूषि तासती ॥ साक्षाच्छ्रीरिवमंतव्यातवार्थेरक्षितामया ॥ १७ ॥

कपटरूपेणहताइत्यन्वयः ॥ ११० ॥ कापट्यमेवक्वचिद्दर्शयति ॥ बलिमित्यादिना ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ त्वत्करेणत्वद्धस्तेन ॥ पाठांतरेशयेहस्ते ॥ १६ ॥ परयोषिच्छं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कयाइमांनगृह्णीयादितिमत्वाह ॥ इयमिति ॥१७॥१८॥ वक्षःप्रहारसुरसिताडनम् ॥ वक्षइत्यत्रःवाहमिति पाठांतरेवाहंप्राप्तम् ॥१९॥१२०॥२१॥२२॥ पणीकृतांविक्रीताम्॥जीवातोहेजीवनौषध ॥

इत्युक्त्वावामदोर्दंडप्रहारेणातिनिष्ठुरम् ॥ निजघानदनोःसूनुस्तंशिलोच्चयकंपिना ॥ ११८ ॥ नृपोवक्षःप्रहारंतंविषह्यरणमूर्द्धनि ॥ लक्ष्मीचकारतद्वक्षास्त्रिशूलं तोलयन्करे ॥ ११९ ॥ निजघानमहाबाहुःसचप्राणाञ्जहौक्षणात् ॥ इत्थंकंकालकेतुंसनिहत्यसुरकंपनम् ॥ १२० ॥ विद्याधरींप्रपश्यंतींप्राहहृष्टतनूरुहाम् ॥ नारदस्यमुनेर्वाक्यात्तवसुश्रोणिवांछितम् ॥ २१ ॥ कृतंमयाकृतज्ञेकिंकरवाण्यधुनावद ॥ श्रुत्वेतितस्यसावाक्यंप्राहगंभीरचेतसः ॥ २२ ॥ मलयगंधिन्युवाच ॥ ॥ अथोदारमतेवीरनिजप्राणैःपणीकृताम् ॥ किंमांपृच्छसिजीवातोकुलकन्यामदूषिताम् ॥ २३ ॥ इतिब्रुवत्यांकन्यायांपुनःस्वैरचरोमुनिः ॥ अतर्कितागमःप्राप्तोनारदोदेवलोकतः ॥२४॥ ततस्तुतुषतुस्तौतुदृष्ट्वातंमुनिसत्तमम् ॥ कृतप्रणामौमुनिनापरिविश्राणिताशिषौ ॥२५॥ पाणिग्रहणविधिनाऽभिषिक्तौनारदेनतु ॥ जग्मतुर्नारदादिष्टवर्त्मनाकृतमंगलौ ॥ २६ ॥ तयामलयगंधिन्यायुतःसोऽमित्रजिन्नृपः ॥ पुरींवाराणसींप्राप्यपौरैर्विहितमंगलाम् ॥ २७ ॥ यद्वीक्षणादपिनरोनारकींनैवजातुचित् ॥ गतिमाप्नोतिमेधावीतांपुरीमाविशन्नृपः ॥ २८ ॥ यस्यांपुर्यांप्रवेशंनलभंतेवासवादयः ॥ कैवल्यजनयित्र्यांहितांपुरीमविशन्नृपः ॥२९॥ अपिस्मृत्वापुरींयांवैकाशींत्रैलोक्यकांक्षिताम् ॥ ननरोलिप्यतेपापैस्तांविवेशसभूपतिः ॥ १३० ॥ यस्यांपुर्यांप्रविष्टोनामहद्भिरपिपातकैः ॥ नाभिभूयेततांकाशींप्राविशत्सविशांपतिः ॥ ३१ ॥ सापिविद्याधरीकाशीसमृद्धिंवीक्ष्यदूरतः ॥ निनिंदस्वर्गलोकंचपातालनगरीमपि ॥ ३२ ॥ प्राप्यामित्रजितंकांतंतथाहृष्टानसावधूः ॥ यथादृष्ट्वाप्यहोकाशींपरमानंदकेतनम् ॥ ३३ ॥ साकृतार्थमिवात्मानंमन्यमानामनस्विनी ॥ तेनपत्याचकाश्याचपरांनिर्वृतिमाययौ ॥ ३४ ॥ सोप्यमित्रजिदासाद्यपत्नींमलयगंधिनीम् ॥ धर्मप्रधानंसंसेव्यकामंप्रापोत्तमंसुखम् ॥ ३५ ॥ सैकदातंपतिंराज्ञीविष्णुभक्तिपरायणम् ॥ रहोविज्ञापयांचक्रेपतिभक्तासुतार्थिनी ॥ ३६ ॥ ॥ राज्युवाच ॥ ॥ भूपाभीष्टतृतीयायाश्चरिष्यामिमहाव्रतम् ॥ यद्यनुज्ञाभवेद्भर्तुःपुत्रकामार्थितप्रदम् ॥ ३७ ॥ ॥ राजोवाच ॥ ॥ देव्यभीष्टतृतीयायांव्रतंकीदृग्भवेद्वद ॥ कादेवतातत्रपूज्याविधानंचापिकिंफलम् ॥ ३८ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ पुरींवाराणसीमित्यनेनकाश्यांसराजासीदितिज्ञेयम् ॥ २७ ॥ २८ ॥ २९ ॥ १३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥९७॥९८॥९९॥१००॥१॥ कंडूयनक्षमःकंडूयनक्रियायोग्यः ॥२॥ उपढौकितःउपढौकत्वेनउपहारत्वेनप्रस्थापितः ॥३॥४॥ अनुदत्अखिद्यत्॥५॥ चपेटयाप्रसृतांगुलिकरेण ॥६॥७॥८॥९॥

समादायमहाबाहुःसतदामित्रजिन्नृपः ॥ जहर्षचजगादोच्चैर्बालायाश्चाभयंदिशन् ॥ ९७ ॥ वामपादप्रहारेणतमाताडयसनिर्भयः ॥ संस्मरंश्चक्रिणंचित्ते जगद्रक्षामणिंहरिम् ॥ ९८ ॥ जगादतिष्ठरेदुष्टकन्याधर्षणलालस ॥ युध्यस्वात्रमयासार्धंनसुतंहन्म्यहंरिपुम् ॥९९॥ इतिसंश्रुत्यसंभ्रांतउत्थायसदनोः सुतः ॥ त्रिशूलंदेहिमेकांतेप्रोवाचेतिमुहुर्मुहुः ॥ १०० ॥ कोयंमृत्युगृहंप्राप्तःकस्यरुष्टोऽद्यचांतकः ॥ कआयुषाद्यसंत्यक्तोयःप्राप्तोममगोचरम् ॥ १ ॥ ममप्रचंडदोर्दंडकंडूकंडूयनक्षमः ॥ नाल्पोनरोयंभविताकिंत्रिशूलेनसुंदरि ॥२॥ माभैर्मेकौतुकंपश्यभक्ष्योऽयंममसांप्रतम् ॥ कालेनमत्तोभीतेनस्वयमेवोपढौकितः ॥ ३ ॥ इत्युक्त्वामुष्टिघातेनतेनोच्चैर्दनुसूनुना ॥ हृदयेनिहतोराजाशिलातिकठिनेद्रुतम् ॥ ४ ॥ सचक्रिणाकृतत्राणःपीडामल्पीयसीमपि ॥ नोवेदकठिनोरस्कस्तत्करंप्रत्युतानुदत् ॥ ५ ॥ अथकोपवताराज्ञाहतोवक्त्रेचपेटया ॥ आघूर्णितशिराभूमौपतित्वापुनरुत्थितः ॥ ६ ॥ उवाचचवचोधैर्यमवष्टभ्यमहाबली ॥ ७ ॥ ॥ दानवउवाच ॥ ॥ ज्ञातंनत्वंमनुष्योसिनृरूपेणचतुर्भुजः ॥ आयातश्छिद्रमासाद्यहंतुंमांदानवांतकः ॥ ८ ॥ एकंविधेहिमधुभिद्यदित्वंबलवानासि ॥ विहायैतन्महच्छूलंयुध्यस्वस्वायुधैर्मया ॥९॥ त्वयाकपटरूपेणबलिनःकैटभादयः ॥ नबलेनहताःसंख्येहताएवच्छलेनहि ॥ ११० ॥ बलिंपातालमनयस्त्वंनृवामनतांदधत् ॥ नृमृगत्वेनभवताहिरण्यकशिपुर्हतः ॥ ११ ॥ त्वयाजटिलरूपेणलंकेशोविनिपातितः ॥ गोपालवेषमास्थायकंसाद्याघातितास्त्वया ॥ १२ ॥ स्त्रीरूपेणाहरस्त्वंतुविप्रलाप्यासुरान्सुधाम् ॥ यादोरूपेणभवताशंखाद्यानिहताबहु ॥१३॥ मायाविनामग्रगण्यसर्वमर्मज्ञसाधक ॥ नत्वत्तोहंबिभेम्यद्ययदिशूलंविहास्यसि ॥ १४ ॥ अथवादैन्यवचनैःकिमेभिःकातरोचितैः ॥ नत्यक्ष्यासित्रिशूलंत्वंनत्वांजेष्याम्यहंरणे ॥ १५ ॥ अवश्यमेवमर्तव्यमद्यप्रातःशरीरिणा ॥ त्वत्करेणवरंमृत्युर्बलेनापिच्छलेनवा ॥ १६ ॥ इयंविद्याधरीकन्यानमयादूषितासती ॥ साक्षाच्छ्रीरिवमंतव्यातवार्थेरक्षितामया ॥ १७ ॥

कपटरूपेणहताइत्यन्वयः ॥ ११० ॥ कापटयमेवक्वचिद्दर्शयति ॥ बलिमित्यादिना ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ त्वत्करेणत्वद्धस्तेन ॥ पाठांतरेशयेहस्ते ॥ १६ ॥ परयोषिच्छं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वावामदोर्दंडप्रहारेणातिनिष्ठुरम् ॥ निजघानदनोःसूनुस्तांशिलोच्चयकंपिना ॥ १८ ॥ नृपोवक्षःप्रहारंतंविषह्यरणमूर्द्धनि ॥ लक्ष्मीचकारतद्वक्षस्त्रिशूलं तोलयन्करे ॥ १९ ॥ निजघानमहाबाहुःसचप्राणाञ्जहौक्षणात् ॥ इत्थंकंकालकेतुंसनिहत्यसुरकंपनम् ॥ १२० ॥ विद्याधरींप्रपश्यंतींप्राहहृष्टतनूरुहाम् ॥ नारदस्यमुनेर्वाक्यात्तवसुश्रोणिवांछितम् ॥ २१ ॥ कृतंमयाकृतज्ञोकिंकरवाण्यधुनावद ॥ श्रुत्वेतितस्यसावाक्यंप्राहगंभीरचेतसः ॥ २२ ॥ मलयगंधिन्युवाच ॥ ॥ अथोदारमतेवीरनिजप्राणैःपणीकृताम् ॥ किंमांपृच्छसिजीवातोकुलकन्यामदूषिताम् ॥ २३ ॥ इतिब्रुवत्यांकन्यायांपुनः स्वैरचरोमुनिः ॥ अतर्कितागमःप्राप्तोनारदोदेवलोकतः ॥२४॥ ततस्तुतुषतुस्तौतुदृष्ट्वातंमुनिसत्तमम् ॥ कृतप्रणामौमुनिनापरिविश्राणिताशिषौ ॥२५॥ पाणिग्रहणविधिनाऽभिषिक्तौनारदेनतु ॥ जग्मतुर्नारदादिष्टवर्त्मनाकृतमंगलौ ॥ २६ ॥ तयामलयगंधिन्यायुतःसोऽमित्रजिन्नृपः ॥ पुरींवाराणसीं प्राप्यपौरैर्विहितमंगलाम् ॥ २७ ॥ यद्वीक्षणादपिनरोनारकीनैवजातुचित् ॥ गतिमाप्नोतिमेधावीतांपुरीमाविशन्नृपः ॥ २८ ॥ यस्यांपुर्यांप्रवेशंनलभंते वासवादयः ॥ कैवल्यजनयित्र्यांहितांपुरीमविशन्नृपः ॥२९॥ अपिस्मृत्वापुरीयांवैकाशींत्रैलोक्यकांक्षिताम् ॥ ननरोलिप्यतेपापैस्तांविवेशसभूपतिः ॥ ॥ १३० ॥ यस्यांपुर्यांप्रविष्टोनामहद्भिरपिपातकैः ॥ नाभिभूयेततांकाशींप्राविशत्सविशांपतिः ॥ ३१ ॥ सापिविद्याधरीकाशीसमृद्धिंवीक्ष्यदूरतः ॥ निनिंदस्वर्गलोकंचपातालनगरीमपि ॥ ३२ ॥ प्राप्यामित्रजितंकांतंतथाहृष्टानसावधूः ॥ यथादृष्ट्वाप्यहोकाशींपरमानंदकेतनम् ॥ ३३ ॥ साकृतार्थमिवात्मानंमन्यमानामनस्विनी ॥ तेनपत्याचकाश्याचपरांनिर्वृतिमाययौ ॥ ३४ ॥ सोप्यमित्रजिदासाद्यपत्नींमलयगंधिनीम् ॥ धर्मप्रधानंसंसेव्यकामंप्रापोत्तमंसुखम् ॥ ३५ ॥ सैकदातंपतिंराज्ञीविष्णुभक्तिपरायणम् ॥ रहोविज्ञापयांचक्रेपतिभक्तासुतार्थिनी ॥ ३६ ॥ ॥ राज्ञ्युवाच ॥ ॥ भूपाभीष्टतृतीयायाश्चरिष्यामिमहाव्रतम् ॥ यद्यनुज्ञांभवेद्भर्तुःपुत्रकामार्थितप्रदम् ॥ ३७ ॥ ॥ राजोवाच ॥ ॥ देव्यभीष्टतृतीयायांव्रतंकीदृग्भवेद्वद ॥ कादेवतातत्रपूज्याविधानंचापिकिंफलम् ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३९ ॥ १४० ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ छ ॥ ॥ अथाशीतितमेध्यायेत्र्यधिकेसर्वसुंदरे ॥ वीरेशाविष्कृतिःपुण्यासम्यक्ता वन्निरूप्यते ॥ १ ॥ अभीष्टतृतीयाव्रतंकथयति ॥ अवधेहीति ॥ १ ॥ पुरोग्रतः ॥ श्रीदपत्न्याःकुबेरकांतायाऋद्धेः ॥ श्रीरिवमुखंमुख्याश्रेष्ठासेव्याश्रियोमुखमिववामुखंयस्याःसातथा ॥ २ ॥ ॥३॥ विधिनापिविधिनैव ॥ अस्तीतिपाठपूज्याभवतीत्यर्थः ॥ अत्रव्रते ॥ स्तनंधयेनवालापत्येनउन्मुखंयथास्यात्तथापिवता ॥ उन्मुखंक्षरद्दुग्धमितिस्तनविशेषणंवा ॥ धयताचस्तनंतथेतिक्वचित् ॥

नारीपत्यननुज्ञाताया व्रतादिसमाचरेत् ॥ जीवंतीदुःखिनीसास्यान्मृतानिरयमृच्छति ॥ ३९ ॥ इतिराज्ञोदिताराज्ञीप्रवक्तुमुपचक्रमे ॥ इतिकर्तव्यतां तस्यव्रतस्यसरहस्यकाम् ॥१४०॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेवीरेश्वराविर्भावेऽमित्रजित्पराक्रमो नामद्व्यशीतितमोध्यायः ॥ ८२ ॥ राज्युवाच ॥ ॥ अवधेहिधरानाथकथयामियथातथम् ॥ व्रतस्यास्यविधानंचफलंचाभीष्टदेवताम् ॥ १ ॥ पुरापुरःश्रीदपत्न्याःश्रीमुख्याब्रह्मसूनुना ॥ नारदेनसुतार्थिन्याव्रतमेतदुदीरितम् ॥ २ ॥ चीर्णंचाथतयादेव्यापुत्रोभून्नलकूबरः ॥ अन्याभिरपिबह्वीभिः पुत्राःप्राप्ताव्रतादितः ॥ ३ ॥ विधिनाप्यत्रसंपूज्यागौरीसर्वविधानवित् ॥ स्तनंधयेनसहिताधयतास्तनमुन्मुखम् ॥ ४ ॥ मार्गशीर्षतृतीयायांशुक्लायां कलशोपरि ॥ ताम्रपात्रंनिधायैकंतंडुलैःपरिपूरितम् ॥ ५ ॥ अविच्छिन्नंनवीनंचरजनीरागरंजितम् ॥ वासःपात्रोपरिन्यस्यसूक्ष्मात्सूक्ष्मतरंपरम् ॥६॥ तस्योपरिशुभंपद्मंरविरश्मिविकासितम् ॥ तत्कर्णिकायाउपरिचतुःस्वर्णविनिर्मितम् ॥ ७ ॥ विधिंसंपूजयेद्भक्त्यारत्नपट्टांबरादिभिः ॥ पुष्पैर्नानाविधै रम्यैःफलैर्नारंगमुख्यकैः ॥ ८ ॥ सुगंधैश्चंदनाद्यैश्चकर्पूरमृगनाभिभिः ॥ परमान्नादिनैवेद्यैःपक्वान्नैर्बहुभंगिभिः ॥९॥ धूपैरगुरुमुख्यैश्चरम्येकुसुममंडपे ॥ रात्रौजागरणंकार्यंविनिद्रैःपरमोत्सवैः ॥ १० ॥ हस्तमात्रमितेकुंडेजातवेदसइत्यृचा ॥ घृतेनमधुनाप्लुत्यजुहुयान्मंत्रविद्द्विजः ॥ ११ ॥ सहस्रंकमलानां चस्मेराणांस्वयमेवहि ॥ नवप्रसूतांकपिलांसुशीलांचपयस्विनीम् ॥ १२ ॥ दद्यादाचार्यवर्यायसालंकारांसलक्षणाम् ॥ उपोष्यदंपतीभक्त्यानवांबरवि भूषितौ ॥ १३ ॥ प्रातःस्नात्वाचतुर्थ्यांचसंपूज्याचार्यमादृतः ॥ वस्त्रैराभरणैर्माल्यैर्दक्षिणाभिर्मुदान्वितौ ॥ १४ ॥

॥ ४ ॥ ५ ॥ रजनीहरिद्रा ॥ ६ ॥ स्वर्णपरिमाणंचाशीतिरक्तिकम् ॥ ७ ॥ विधिंब्रह्माणम् ॥ नारंगमुख्यकैर्नारंगाद्यैरित्यर्थः ॥ ८ ॥ मृगनाभिभिःकस्तूरीभिः ॥ बहुभंगिभिःनानाभेदवद्भिः ॥ ॥ ९ ॥ विगतानिद्रायेभ्यस्तैः ॥ कुसुममंडपेकुसुमव्याप्तमंडपे ॥ १० ॥ जातवेदसइतिऋचामंत्रेण ॥ आप्लुत्यआलोड्य ॥ द्विजइत्यनेनद्विजातीनामेवास्मिन्व्रतेऽधिकारइतिसूचितम् ॥ ११ ॥ ॥ १२ ॥ दंपतीस्त्रीपुंसौ ॥ १३ ॥ आचार्यंच आदृतःआदरयतः ॥ दंपत्योर्विशेषणंमुदान्वितावीति ॥ यद्वादंपतीव्रतकर्तारौआदृतःआदरतःमुदान्वितौभवेतामितिशेषः ॥ अन्यत्समानम् ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ विद्घातीतिविधिस्तत्संबोधनंहेसृष्टिकर्त्रीत्यर्थः ॥ १६ ॥ भुक्तशेषेणावशिष्टेनान्नेन ॥ १७ ॥ १८ ॥ मुनेव्रतंसमाचीर्णपत्न्यासहेतिशेषः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अरिष्टेसूतिकागृहेसंस्थिता ॥ विज्ञापनमेवाह ॥ देवीति ॥ २४ ॥ २५ ॥ समाकार्यआकारयित्वा ॥ २६ ॥ २७ ॥ मंत्रिविज्ञप्तिनुन्नयामंत्रिवाक्यप्रेरितया ॥ पाठांतरेमंत्रिभिर्विज्ञप्तः पितुरनिष्टकृत्पुत्रोयस्यास्तया ॥ लास्यशशिप्रभंकमनीयचंद्रप्रभम् ॥ २८ ॥ स्थाप्यनिधाय ॥ न्यस्यपुरोभागेइतिकश्चित् ॥ न्यस्यसंन्यस्येत्यर्थः ॥ योगिनीश्चतुःषष्टियोगिनीः ॥ २९ ॥

सोपस्करांचतांमूर्तिमाचार्यायनिवेदयेत् ॥ समुच्चरन्निमंमंत्रंव्रतकृन्मिथुनंमुदा ॥ १५ ॥ नमोविश्वविधानज्ञेविधेविविधकारिणि ॥ सुतंवंशकरंदेहि तुष्टासुष्माद्व्रताच्छुभात् ॥ १६ ॥ सहस्रंभोजयित्वाथद्विजानांभक्तिपूर्वकम् ॥ भुक्तशेषेणचान्नेनकुर्याद्वैपारणंततः ॥ १७ ॥ इत्थमेतद्व्रतंराजंश्चिकीर्षा मित्वयासह ॥ कुरुचैतत्प्रियंमह्यमभीष्टफललब्धये ॥ १८ ॥ इतिभूपालवर्येणश्रुत्वासंहृष्टचेतसा ॥ मुनेव्रतंसमाचीर्णंसांतर्वत्नीबभूवह ॥ १९ ॥ तयाथप्रार्थितागौरीगर्भिण्याभक्तितोषिता ॥ पुत्रंदेहिमहामायेसाक्षाद्विष्णवंशसंभवम् ॥ २० ॥ जातमात्रोव्रजेत्स्वर्गंपुनरायातिचात्रवै ॥ भक्तःसदाशिवे ऽस्त्यर्थप्रसिद्धःसर्वभूतले ॥२१॥ विनैवस्तन्यपानेनषोडशाब्दाकृतिःक्षणात् ॥ एवंभूतःसुतोगौरियथामेस्यात्तथाकुरु ॥२२॥ मृडान्यापितथेत्युक्ताराज्ञी भक्त्यातितुष्टया ॥ अथकालेनतनयंमूलर्क्षेसाप्यजीजनत् ॥ २३ ॥ हितैरमात्यैरथसाविज्ञप्तारिष्टसंस्थिता ॥ देविराजार्थिनीचेत्त्वंत्यजदुष्टर्क्षजंसुतम् ॥ ॥ २४ ॥ सामंत्रिवाक्यमाकर्ण्यकेवलंपतिदेवता ॥ अत्याक्षीत्तंतथाप्राप्तंतनयंनयकोविदा ॥ २५ ॥ धात्रेयिकांसमाकार्यप्राहेदंसानृपांगना ॥ पंचमुद्रे महापीठेविकटानाममातृका ॥ २६ ॥ तदग्रेस्थापयित्वामुंबालंधात्रेयिकेवद ॥ गौर्यादत्तःशिशुरसौतवाग्रेविनिवेदितः ॥ २७ ॥ राज्ञ्यापत्युःप्रियैषि ण्यामंत्रिविज्ञप्तिनुन्नया ॥ सापिराज्ञ्युदितंश्रुत्वाशिशुंलास्यशशिप्रभम् ॥ २८ ॥ विकटायाःपुरःस्थाप्यगृहंधात्रेयिकागता ॥ अथसाविकटादेवीसमाहू यचयोगिनीः ॥ २९ ॥ उवाचनयतक्षिप्रंशिशुंमातृगणाग्रतः ॥ तासामाज्ञांचकुरुतरक्षतासुंप्रयत्नतः ॥ ३० ॥ योगिन्योविकटावाक्यात्खेचर्यस्ताःक्षणे नतम् ॥ निन्युर्गगनमार्गेणब्राह्म्याद्यायत्रमातरः ॥ ३१ ॥ प्रणम्ययोगिनीवृंदंतंशिशुंसूर्यवर्चसम् ॥ पुरोनिधायमातॄणांप्रोवाचविकटोदितम् ॥ ३२ ॥ ब्रह्माणीवैष्णवीरौद्रीवाराहीनारसिंहिका ॥ कौमारीचापिमाहेंद्रीचामुंडाचैवचंडिका ॥ ३३ ॥ दृष्ट्वातंबालकंरम्यंविकटाप्रेषितंततः ॥ पप्रच्छुर्युगप ड्डिंभकस्तेतातःप्रसूश्चका ॥ ३४ ॥

उवाचनयतक्षिप्रमित्यादिजातमात्रोव्रजेत्स्वर्गमित्यादिदेवीवराभिप्रायेण ॥ मातृगणोवक्ष्यमाणाःब्रह्माण्याद्याःशक्तयः ॥ स्तनपानंचेतिकश्चित ॥ कुरुतकारयतेत्यर्थः ॥ ३० ॥ ३१ ॥ ३२ ॥ ॥ ३३ ॥ डिंभंशिशुम् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ३५ ॥ ३६ ॥ ३७ ॥ पदेपदेस्थानेस्थाने ॥ ३८ ॥ ३९ ॥ मातृगणाशीर्भिर्विशिष्टः ॥ मातृगणाधीनेतिक्वचित् ॥ पंचमुद्रांकितंपंचमुद्रानाम्नाचिह्नितमित्यर्थः ॥ ४० ॥ ४१ ॥ ४२ ॥
॥ ४३ ॥ वाङ्मयंवेदयोनिम् ॥ बृहत्परिपूर्णम् ॥ बृहदनुग्रहादित्येकंवापदम् ॥ ४४ ॥ सूक्तैरुद्रसूक्तैः ॥ अतएवरुद्रदैवतैरितिविशेषणम् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

मातृभिश्चेतिपृष्टःसयदाकिंचिन्नवक्तिच ॥ तदातद्योगिनीचक्रंप्राहमातृगणास्त्विति ॥ ३५ ॥ राज्ययोग्योभवत्येषमहालक्षणलक्षितः ॥ पुनस्तत्रैवनेतव्यो
योगिन्यस्त्वविलंबितम् ॥ ३६ ॥ पंचमुद्रामहादेवीतिष्ठतेयत्रकाम्यदा ॥ यस्याःसंसेवनान्नृणांनिर्वाणश्रीरदूरतः ॥ ३७ ॥ सर्वत्रशुभजान्मिन्यांकाश्यांमु
क्तिःपदेपदे ॥ तथापिसविशेषंहितत्पीठंसर्वसिद्धिकृत् ॥ ३८ ॥ तत्पीठसेवनादस्यषोडशाब्दाकृतेःशिशोः ॥ सिद्धिर्भवित्रीपरमाविश्वेशानुग्रहात्परात् ॥
॥ ३९ ॥ एवंमातृगणाशीर्भिर्योगिनीभिःक्षणेनहि ॥ प्रापितोमातृवाक्येनपंचमुद्रांकितंपुनः ॥ ४० ॥ संप्राप्यतन्महापीठंस्वर्गलोकादिहागतः ॥ आनं
दकाननेदिव्यंततापविपुलंतपः ॥ ४१ ॥ तपसातीवतीव्रेणनिश्चलेंद्रियचेतसः ॥ तस्यराजकुमारस्यप्रसन्नोभूदुमाधवः ॥४२॥ आविर्बभूवपुरतोलिंगरूपे
णशंकरः ॥ प्रोवाचचप्रसन्नोस्मिवरंब्रूहिनृपांगज ॥४३॥ ॥ स्कंदउवाच ॥ ॥ सर्वज्योतिर्मयंलिंगंपुरतोवीक्ष्यवाङ्मयम् ॥ सप्तपातालमुद्भिद्यास्थितं
बृहदनुग्रहात् ॥ ४४ ॥ प्रणम्यदंडवद्भूमौपरितुष्टावधूर्जटिम् ॥ सूक्तैर्जन्मांतराभ्यस्तैःसुहृद्घोरुद्रदैवतैः ॥ ४५ ॥ ततःप्रसन्नोभगवान्देवदेवोमहेश्वरः ॥
संतुष्टस्तपसातस्यप्रोवाचवृषभध्वजः॥ ४६ ॥ ॥ देवदेवउवाच ॥ ॥ वरंवरयसंतप्ततपसाक्लेशितंवपुः ॥ त्वयेदंबालवपुषावशीकृतंमनोमम ॥ ४७ ॥
शिवोक्तंचसमाकर्ण्यवरदानंपुनःपुनः ॥ वरंचप्रार्थयांचक्रेपरिहृष्टतनूरुहः ॥ ४८ ॥ ॥ कुमारउवाच ॥ ॥ देवदेवमहादेवयदिदेयोवरोमम ॥ तदत्रभवता
स्थयंभवतापहतासदा ॥ ४९ ॥ अस्मिँल्लिंगेस्थितःशंभोकुरुभक्तसमीहितम् ॥ विनामुद्रादिकरणंमंत्रेणापिविनाविभो ॥ ५० ॥ दिशसिद्धिंपरामत्रदर्श
नात्स्पर्शनान्नतेः ॥ अस्यलिंगस्ययेभक्तामनोवाक्कायकर्मभिः ॥५१॥ सदैवानुग्रहस्तेषुकर्तव्योवरएषमे ॥ इतितद्वरमाकर्ण्यलिंगरूपोवदत्प्रभुः ॥५२॥
एवमस्तुयदुक्तंतेवीरवैष्णवसूनुना ॥ जनेतुर्विष्णुभक्ताख्यराज्ञोऽमित्रजितोभवान् ॥ ५३ ॥ विष्णवंशएवमुत्पन्नोममभक्तिपरांगज ॥ वीरवीरेश्वरंनामालिंग
मेतत्त्वदाख्यया ॥ ५४ ॥ काश्यांदास्यत्यभीष्टानिभक्तानांचिंतितान्यहो ॥ अस्मिँल्लिंगेसदावीरस्थास्याम्यद्यदिनावधि ॥ ५५ ॥ दास्यामिचपरांसि
द्धिमाश्रितेभ्योनसंशयः ॥ परंनमहिमानंमेकलौकश्चिद्वेत्स्यति ॥ ५६ ॥ यस्तुवेत्स्यतिभाग्येनसपरांसिद्धिमाप्स्यति ॥ अत्रजप्तंहुतंदत्तंस्तुतमर्चितमे
वंवा ॥ ५७ ॥ जीर्णोद्धारादिकरणमक्षय्यफलहेतुकम् ॥ त्वंतुराज्यंपरंप्राप्यसर्वभूपालदुर्लभम् ॥ ५८ ॥

॥ ५१ ॥ ५२ ॥ वीरहेवीर ॥ अनेननामापिविश्वेशेनकृतमितिज्ञेयम् ॥ ५३ ॥ भक्तयाचेतिक्वचित् ॥ हेममभक्तिपरअंगजपुत्र ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥५९॥६०॥६१॥६२॥६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ सूतवधाल्लोमहर्षणवधात् ॥ ७७ ॥ अंततोऽतकाले ॥७८॥

भुक्त्वाभोगांश्चविपुलानंतेसिद्धिमवाप्स्यसि ॥ पुरीवाराणसीरम्यासर्वस्मिञ्जगतीतले ॥५९॥ पुण्यस्तत्रापिसंभेदःसरितोरसिगंगयोः ॥ ततोऽपिचहयग्रीवंतीर्थंचैवातिपुण्यदम् ॥ ६० ॥ यत्रविष्णुर्हयग्रीवोभक्तचिंतितमर्पयेत् ॥ हयग्रीवाच्चवैतीर्थाद्गजतीर्थंविशिष्यते ॥ ६१ ॥ यत्रवैस्नानमात्रेणगजदानफलंलभेत् ॥ कोकावराहतीर्थंचपुण्यदंगजतीर्थतः ॥ ६२ ॥ कोकावराहमभ्यर्च्यतत्रनोजन्मभाग्जनः ॥ अपिकोकावराहाच्चदिलीपेश्वरसन्निधौ ॥ ६३ ॥ दिलीपतीर्थंसुश्रेष्ठंसद्यःपापहरंपरम् ॥ ततःसगरतीर्थंचसगरेशसमीपतः ॥ ६४ ॥ यत्रमज्जन्नरोमज्जेन्नभूयोदुःखसागरे ॥ सप्तसागरतीर्थंचशुभंसगरतीर्थतः ॥ ६५ ॥ सप्ताब्धिस्नानजंपुण्यंयत्रस्नात्वानरोलभेत् ॥ महोदधीतिविख्यातंतीर्थंसप्ताब्धितीर्थतः ॥ ६६ ॥ सकृद्यत्राप्लुतोधीमान्दहेदघमहोदधिम् ॥ चौरतीर्थंततःपुण्यंकपिलेश्वरसन्निधौ ॥ ६७ ॥ पापंसुवर्णचौर्यादियत्रस्नात्वाक्षयंव्रजेत् ॥ हंसतीर्थंततोपीडयंकेदारेश्वरसन्निधौ ॥ ६८ ॥ हंसस्वरूपीयत्राहंनयामिब्रह्मदेहिनः ॥ ६९ ॥ ततस्त्रिभुवनाख्यस्यकेशवस्यातिपुण्यदम् ॥ तीर्थंयत्राप्लुतामर्त्यामर्त्यलोकंविशंतिन ॥ ७० ॥ गोव्याघ्रेश्वरतीर्थंचततोप्यधिकमेवहि ॥ स्वभाववैरमुत्सृज्ययत्रोभौसिद्धिमापतुः ॥ ७१ ॥ ततोपिहिवरंवीरतीर्थंमांधातृसंज्ञितम् ॥ चक्रवर्तिपदंयत्रप्राप्तंतेनमहीभुजा ॥ ७२ ॥ ततोपिमुचुकुंदाख्यंतीर्थंचातीवपुण्यदम् ॥ यत्रस्नातोनरोजातुरिपुभिर्नाभिभूयते ॥७३॥ पृथुतीर्थंततोप्युच्चैःश्रेयसांसाधनंपरम् ॥ पृथ्वीश्वरंयत्रदृष्ट्वानरःपृथ्वीपतिर्भवेत् ॥ ७४ ॥ ततःपरशुरामस्यतीर्थंचातीवसिद्धिदम् ॥ यत्रक्षत्रवधात्पापाज्जामदग्न्योविमुक्तवान् ॥ ७५ ॥ अद्यापिक्षत्रवधजंपापंतत्रप्रणश्यति ॥ एकेनस्नानमात्रेणज्ञानाज्ञानकृतेनच ॥ ७६ ॥ ततोपिश्रेयसांकर्तृतीर्थंकृष्णाग्रजस्यहि ॥ यत्रसूतवधात्पापाद्बलदेवोविमुक्तवान् ॥ ७७ ॥ दिवोदासस्यवैतीर्थंतत्रराज्ञोऽतिमेधसः ॥ तत्रस्नातोनरोजातुनज्ञानाच्च्यवतेंऽततः ॥ ७८ ॥ ततोपिहिमहातीर्थंसर्वपापप्रणाशनम् ॥ यत्रभागीरथीसाक्षान्मूर्तिरूपेणतिष्ठति ॥ ७९ ॥ स्नात्वाभागीरथीतीर्थेकृत्वाश्राद्धंविधानवित् ॥ दत्त्वादानंचपात्रेभ्योनभूयोगर्भभाग्भवेत् ॥ ८० ॥ हरपापंचभोवीरतीर्थंभागीरथीतटे ॥ तत्रस्नात्वाक्षयंयांतिमहापापकुलान्यपि ॥८१॥ योनिष्पापेश्वरंलिंगंतत्रपश्यतिमानवः ॥ निष्पापोजायतेवीरसतल्लिंगेक्षणात्क्षणात् ॥८२॥ दशाश्वमेधतीर्थंचततोपिप्रवरंमतम् ॥ दशानामश्वमेधानांयत्रस्नात्वाफलंलभेत् ॥८३॥ ततोपिशुभदंवीरबंदीतीर्थंप्रचक्षते ॥ यत्रस्नातोनरोमुच्येदपिसंसारबंधनात् ॥ ८४ ॥ हिरण्याक्षेणदैत्येनबहुशोदेवताःपुरा ॥ बंदीकृतानिगडितास्तुष्टुवुर्जगदंबिकाम् ॥ ८५ ॥

॥ ७९ ॥ ८० ॥ हरपापंकेदारकुंडम् ॥ तत्रस्नात्वास्थितस्येत्यर्थः ॥ तीर्थांतरंवा ॥ ८१ ॥ ८२ ॥ ८३ ॥ बंदीदेवी ॥ ८४ ॥ बंदीनामनिर्वक्ति हिरण्येतिद्वाभ्याम् ॥ निगडितालोहशृंखलै

CC-0. In Public Domain. Digitization by eGangotri

वंद्दाश्च ॥ ८५ ॥ यचदा ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ब्रह्मतीर्थमिति ॥ पूर्वस्मात्पूर्वस्मात्तीर्थादुत्तरोत्तरस्याधिक्यमात्रमत्रविवक्षितं

ततोविशृंखलीभूतैर्वंदितायजगज्जनिः ॥ तदाप्रभृतिबंदीतिगीयतेद्यापिमानवैः ॥ ८६ ॥ बंदीतीर्थंततत्रैवमहानिगडखंडनम् ॥ तत्रस्नातोविमुच्येतसर्व
स्मात्कर्मपाशतः ॥ ८७ ॥ बंदीतीर्थमहाश्रेष्ठंकाशिपुर्यांविशांपते ॥ तत्रस्नातोनरोयायाद्विमुक्तिंदेव्यनुग्रहात् ॥ ८८ ॥ ततोपिहिश्रेष्ठतरंप्रयागमिति
विश्रुतम् ॥ प्रयागमाधवोयत्रसर्वयागफलप्रदः ॥ ८९ ॥ क्षोणीवराहतीर्थंचततोपिशुभदंपरम् ॥ तत्रस्नातोनरोजातुतिर्यग्योनिंनगच्छति ॥ ९० ॥
ततःकालेश्वरंतीर्थंवीरश्रेष्ठतरंपरम् ॥ कलिकालोनबाधेतयत्रस्नातंनरोत्तमम् ॥९१॥ अशोकतीर्थंतत्रैवततोप्यतितरांशुभम् ॥ यत्रस्नातोनरोजातुनापते
च्छोकसागरे ॥ ९२ ॥ ततोतिनिर्मलतरंशुक्रतीर्थंनृपांगज ॥ शुक्रद्वारानजायेतयत्रस्नातोनरोत्तमः ॥९३॥ ततोऽपिपुण्यदंराजन्भवानीतीर्थमुत्तमम् ॥
यत्रस्नात्वाभवानीशौद्दष्ट्वानैवपुनर्भवेत् ॥ ९४ ॥ प्रभासतीर्थंविख्यातंततोपिशुभदंनृणाम् ॥ सोमेश्वरस्यपुरतस्तत्रस्नातोनगर्भभाक् ॥ ९५ ॥ ततो
गरुडतीर्थंचसंसारविपनाशनम् ॥ गरुडेशंसमभ्यर्च्यतत्रस्नात्वानशोचति ॥ ९६ ॥ ब्रह्मतीर्थंततःपुण्यंवीरब्रह्मेश्वरात्पुरः ॥ ब्रह्मविद्यामवाप्नोतितत्रस्नाने
नमानवः ॥ ९७ ॥ ततोवृद्धार्कतीर्थंचविधितीर्थंततःपरम् ॥ तत्राप्लुतोनरोयातिरविलोकंसुनिर्मलम् ॥ ९८ ॥ ततोनृसिंहतीर्थंचमहाभयनिवारणम् ॥
कालादपिकुतस्तत्रस्नात्वापरिबिभेतिच ॥ ९९ ॥ ततोपिपुण्यदंनृणांतीर्थंचित्ररथेश्वरम् ॥ यत्रस्नात्वाचदत्त्वाचचित्रगुप्तंनपश्यति ॥१००॥ धर्मतीर्थं
ततःपुण्यंधर्मेशपुरतःस्थितम् ॥ तत्रश्राद्धादिकंकृत्वापितृणामनृणोभवेत् ॥१॥ विशालतीर्थंविमलंविशालफलदंततः ॥ तत्रस्नात्वाविशालाक्षींदृष्ट्वागर्भे
नजायते ॥ २ ॥ जरासंधेशतीर्थंचजरासंधेशसन्निधौ ॥ संसारज्वरपीडाभिस्तत्रस्नातोनमुह्यति ॥ ३ ॥ ततोऽपिललितातीर्थंमहासौभाग्यवर्धनम् ॥
स्नात्वार्चयित्वाललितांनदरिद्रोनदुःखभाक् ॥ ४ ॥ ततोगौतमतीर्थंचसर्वपापविशोधनम् ॥ स्नात्वापिंडान्विनिर्वाप्ययत्रशोचतिनकश्चित् ॥ ५ ॥
गंगाकेशवतीर्थंचतीर्थंचागस्त्यसंज्ञकम् ॥ ततस्तुयोगिनीतीर्थंत्रिसंध्याख्यंततःपरम् ॥ ६ ॥ ततस्तुनार्मदंतीर्थंततआरुंधतेयकम् ॥ वासिष्ठंचततस्ती
र्थंमार्कंडेयमनुत्तमम् ॥ ७ ॥

नतुक्रमोपि ॥ अतएववक्ष्यति ॥ ज्ञेयान्येतानितीर्थानिपुण्यदान्युत्तरोत्तरमिति ॥९७ ॥ वृद्धार्कतीर्थमिति॥ब्रह्मार्केतिपाठेब्रह्माब्रह्मणोवृद्धहारीतएवतन्नामार्कोब्रह्मार्कस्तत्तीर्थमित्यर्थः ॥ ९८ ॥ ९९ ॥
चित्रगुप्तंनपश्यतितितोनंविभेतीत्यर्थः ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयान्येतानितीर्थानिपुण्यदान्युत्तरोत्तरम् ॥ खुरकर्तरिसंज्ञंचततस्तीर्थमनुत्तमम् ॥ ८ ॥ तत्रश्राद्धादिकरणान्नरोमुच्येतकिल्बिषैः ॥ ततोभगीरथंतीर्थंराजर्षेरतिपुण्यदम् ॥ ९ ॥ तत्राल्पमपियच्छेद्यत्कल्पांतेप्यक्षयंहितत् ॥ एतेभ्योपिहितीर्थेभ्योलिंगकोटित्रयादपि ॥११०॥ वीरवीरेश्वरंलिंगंमहाश्रेष्ठंभ
विष्यति ॥ वीरतीर्थेनरःस्नात्वावीरेशंपरिपूज्यच ॥ ११ ॥ तीर्थेष्वेतेषुसर्वेषुस्नातोभवतिनान्यथा ॥ यस्तुवीरेश्वरंलिंगंनक्तमभ्यर्चयिष्यति ॥ तेनत्रिको
टिसंख्यानिलिंगानीहार्चितानिवै ॥ १२ ॥ यस्तुकामयतेलक्ष्मींमुक्तिदांभुक्तिदामपि ॥ तेनवीरेश्वरंलिंगंसंसेव्यमतियत्नतः ॥ १३ ॥ विधायैकंजागरणं
नरोवीरेशमर्चयन् ॥ भूतायांनैवगृह्णातिशरीरंपांचभौतिकम् ॥ १४ ॥ इदंलिंगंसदाभ्यर्च्यंसिद्धैःसंसिद्धिकामुकैः ॥ ऐहिकामुष्मिकान्यस्मात्सर्वा
न्कामान्समर्थयेत् ॥ १५ ॥ पंचामृतेनस्नपनंयःकरिष्यतिमानवः ॥ पलेपलेफलंतस्यवीरेशेघटकोटिजम् ॥ १६ ॥ यदन्यत्रफलंलिंगेकोटिपुष्पप्र
दानतः ॥ तदेकेनैवपुष्पेणवीरेशेनात्रसंशयः ॥ १७ ॥ एकामप्याहुतिंदत्त्वावीरेश्वरसमीपतः ॥ कोटिहोमफलंसम्यङ्नात्रकार्याविचारणा ॥ १८ ॥
सिक्थेसिक्थेचनैवेद्येकोटिसिक्थफलंभवेत् ॥ अत्यल्पमपिवीरेशेकृतमक्षयतांव्रजेत् ॥ १९ ॥ अप्येकंयोमहारुद्रंजपेद्वीरेशसन्निधौ ॥ जापयेद्वाभवे
त्तस्यकोटिरुद्रफलंध्रुवम् ॥ १२० ॥ व्रतोत्सर्गादिवीरेशेयत्कृतंव्रतिभिर्नृभिः ॥ तत्कोटिगुणसंख्याकंभवत्येवनसंशयः ॥ २१ ॥ कृताअष्टौनमस्काराये
नवीरेश्वराग्रतः ॥ अष्टकोटिनमस्कारफलंतस्यनसंशयः ॥ २२ ॥ सर्वासांसंपदांस्थानमिदंलिंगंभविष्यति ॥ वीरेश्वरंनसंदेहोवीरमेवरदानतः ॥ २३ ॥
ज्ञानमुत्पत्स्यतेपुंसांतारकाख्यंममाज्ञया ॥ जीवतामेवतत्सेव्यमेतल्लिंगंशुभार्थिभिः ॥ २४ ॥ एतच्छ्रुत्वापुनःप्राहवीरोमित्राजितःसुतः ॥ प्रणम्यदेवदेवेशंप
रिपूर्णमनोरथः ॥ २५ ॥ तीर्थान्येतानिदेवेशयान्युक्तानिममाग्रतः ॥ कृपयापुनरप्येत्रतदन्यानिवदप्रभो ॥ २६ ॥ आदिकेशवमारभ्यतत्तीर्थंचभगी
रथात् ॥ येषांश्रवणमात्रेणनिष्पापोजायतेनरः ॥ २७ ॥ इतिश्रुत्वामहेशानोमहीपतनयोदितम् ॥ पुनस्तीर्थानिगंगायांवक्तुंसमुपचक्रमे ॥ १२८ ॥
इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेवीरेश्वराविर्भावोनामत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ स्कंदउवाच ॥
आकर्णयक्षोणिसुरयथास्थाणुरचीकरत् ॥ गंगावरणयोःपुण्यात्संभेदात्तीर्थभूमिकाम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगीरथतीर्थपर्यंतानितीर्थानिकथयति ॥ आकर्णयेति ॥ संभेदात्संगमात् ॥ तीर्थभूमिकांतीर्थस्थानम् ॥ जातावेकवचनम् ॥ १ ॥ निष्णातःनितरांस्नातः ॥ २ ॥ पादोदकाख्यानेकारणमाह ॥

संगमेतत्रनिष्णातःसंगमेशंसमर्च्यच ॥ नरोनजातुजननीगर्भसंगमवाप्नुयात् ॥ २ ॥ तत्रपादोदकंतीर्थंयत्रदेवेनशार्ङ्गिणा ॥ आदौपादौक्षालितौतुमं
दराद्यागतेनयत् ॥ ३ ॥ विष्णुपादोदकेतीर्थेवारिकार्यंकरोतियः ॥ व्यतीपातेननियतंभूयःसांसारिकीगतिः ॥४॥ कृतपादोदकस्नानःकृतकेशवपूजनः ॥
वीतसंसारवसतिःकाश्यामासीन्नरोत्तमः ॥ ५ ॥ काश्यांसाभूमिरुद्दिष्टाश्वेतद्वीपइतिद्विजैः ॥ तत्रपुण्यार्जनंकृत्वाश्वेतद्वीपाधिपोभवेत् ॥ ६ ॥ ततःपादो
दकात्तीर्थात्तीर्थंक्षीराब्धिसंज्ञकम् ॥ तत्रार्जितमहापुण्योवसेत्क्षीराब्धिरोधसि ॥ ७ ॥ क्षीरोदाद्दक्षिणेभागेतीर्थंशंखाख्यमुत्तमम् ॥ तत्रस्नातोभवेन्नूनं
नाशंखादिनिधेःपतिः ॥ ८ ॥ अर्वाक्चशंखतीर्थाद्वैचक्रतीर्थमनुत्तमम् ॥ संसारचक्रेनपतेत्तत्तीर्थजलमज्जनात् ॥ ९ ॥ गदातीर्थंतदग्रेतुसंसारगदना
शनम् ॥ तत्रश्राद्धादिकरणात्पश्येद्देवंगदाधरम् ॥ १० ॥ पद्माकृत्पद्मतीर्थंचतदग्रेपितृतृप्तिकृत् ॥ तत्रस्नानादिकरणात्प्राप्नुयादघसंक्षयम् ॥ ११ ॥
ततस्तीर्थंमहालक्ष्म्यामहापुण्यफलप्रदम् ॥ तत्राभ्यर्च्यमहालक्ष्मींनिर्वाणकमलांलभेत् ॥ १२ ॥ ततोगारुत्मतंतीर्थंसंसारगरनाशनम् ॥ कृतोदकक्रि
यस्तत्रवैकुंठेवसतिंलभेत् ॥ १३ ॥ ततोनारदतीर्थंचब्रह्मविद्यैककारणम् ॥ तत्रस्नानेनमुक्तःस्याद्दृष्ट्वानारदकेशवम् ॥ १४ ॥ प्रह्लादतीर्थंतद्याम्येमहाभ
क्तिफलप्रदम् ॥ तत्रवैस्नानमात्रेणविष्णोःप्रियतरोभवेत् ॥ १५ ॥ अंबरीषंततस्तीर्थंमहापातकनाशनम् ॥ तत्रवैशुभकर्माणोजनानोगर्भभाजनम् ॥
॥ १६ ॥ आदित्यकेशवंनामतदग्रेतीर्थमुत्तमम् ॥ कृताभिषेकस्तत्रापिलभेत्स्वर्गाभिषेचनम् ॥ १७ ॥ दत्तात्रेयस्यतत्रास्तितीर्थंत्रैलोक्यपावनम् ॥
योगसिद्धिंलभेत्तत्रस्नानमात्रेणभावतः ॥ १८ ॥ तदग्रेभार्गवंतीर्थंमहाज्ञानसमर्पकम् ॥ तत्रस्नानविधानेनभवेद्भार्गवलोकभाक् ॥ १९ ॥ ततो
वामनतीर्थंचविष्णुसान्निध्यहेतुकम् ॥ तत्रश्राद्धविधानेनमुच्यतेपितृजादृणात् ॥ २० ॥ नरनारायणाख्यंहिततस्तीर्थंशुभप्रदम् ॥ तत्तीर्थमज्जनात्पुं
सांगर्भवासःसुदुर्लभः ॥ २१ ॥

यत्रेति ॥ यद्यतः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ गारुत्मतंगारुडम् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ भावतोभक्त्या ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नातस्यस्नातानाम् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ तत्तीर्थम् ॥ २९ ॥ सांख्ययोगोज्ञानयोगः ॥ प्रसीदतिसम्यग्भवतीत्यर्थः ॥ ३० ॥ ३१ ॥

यज्ञवाराहतीर्थंचततोदक्षिणतःशुभम् ॥ यत्रस्नातस्यवैपुंसांराजसूयफलंध्रुवम् ॥ २२ ॥ विदारनारसिंहाख्यंतीर्थंतत्रास्तिपावनम् ॥ यत्रैकस्नानतोनश्ये
दघंजन्मशतार्जितम् ॥ २३ ॥ गोपीगोविंदतीर्थंचततोवैष्णवलोकदम् ॥ यस्मिन्स्नातोनरोविद्वान्नविंद्याद्गर्भवेदनम् ॥ २४ ॥ लक्ष्मीनृसिंहतीर्थंचगोपी
गोविंददक्षिणे ॥ निर्वाणलक्ष्म्यायत्रत्योम्रियतेतुनरोत्तमः ॥ २५ ॥ तद्दक्षिणायांकाष्ठायांशेषतीर्थमनुत्तमम् ॥ महापापौघशेषोपिनतिष्ठेद्यन्निमज्जनात् ॥
॥ २६ ॥ शंखमाधवतीर्थंचतद्याम्यांदिशिचोत्तमम् ॥ तत्तीर्थसेवनान्नृणांकुतःपापभयंमहत् ॥ २७ ॥ ततोपिपावनतरंतीर्थंतत्क्षणसिद्धिदम् ॥ नीलग्री
वाख्यमतुलंतत्स्नायीसर्वदाशुचिः ॥ २८ ॥ तत्रोद्दालकतीर्थंचसर्वाघौघविनाशनम् ॥ ददातिमहतीमृद्धिंस्नानमात्रेणतन्नृणाम् ॥ २९ ॥ ततःसांख्या
ख्यतीर्थंचसांख्येश्वरसमीपतः ॥ तत्तीर्थसेवनात्पुंसांसांख्ययोगःप्रसीदति ॥ ३० ॥ स्वर्लोकाद्यत्रसंलीनःस्वयंदेवउमापतिः ॥ अतःस्वर्लीनतीर्थंचस्वर्ली
नेश्वरसन्निधौ ॥ ३१ ॥ तत्रस्नानेनदानेनश्रद्धयाद्विजभोजनैः ॥ जपहोमार्चनैःपुंसामक्षयंसर्वमेवहि ॥ ३२ ॥ महिषासुरतीर्थंचतत्समीपेतिपावनम् ॥
यत्रतप्त्वासदैत्येंद्रोविजिग्येसकलान्सुरान् ॥ ३३ ॥ तत्तीर्थसेवकोद्यापिनारिभिःपरिभूयते ॥ नपातकैर्महद्भिश्चप्रार्थितंचफलंलभेत् ॥ ३४ ॥ बाणतीर्थं
चतस्यारात्तत्सहस्रभुजप्रदम् ॥ तत्रस्नातोनरोभक्तिंप्राप्नुयाच्छांभवींस्थिराम् ॥ ३५ ॥ गोप्रतारेश्वरंनामतदग्रेतीर्थमुत्तमम् ॥ अपुत्रोपितरेद्यत्रस्नातो
वैतरणींसुखम् ॥ ३६ ॥ तीर्थंहिरण्यगर्भाख्यंतद्याम्येसर्वपापहृत् ॥ तत्रस्नातोहिरण्येनमुच्यतेनकदाचन ॥३७॥ ततःप्रणवतीर्थंचसर्वतीर्थोत्तमोत्तमम् ॥
जीवन्मुक्तोभवेत्तत्रस्नानमात्रेणमानवः ॥ ३८ ॥ ततःपिशंगिलातीर्थंदर्शनादपिपापहृत् ॥ मुनेममाधिष्ठानंवैतदगस्तेऽतिसिद्धिदम् ॥ ३९ ॥ स्नात्वा
पिशंगिलातीर्थेदत्त्वादानंचकिंचन ॥ किंशोचतिकृतात्पापादन्यत्रापिमृतोयदि ॥ ४० ॥ योवैपिशंगिलातीर्थेस्नात्वामामर्चयिष्यति ॥ भविष्यतिसमे
मित्रंमित्रतेजःसमप्रभम् ॥ ४१ ॥ ततस्त्रैविष्टपीदृष्टिर्निर्मलीकृतपुष्कलम् ॥ तीर्थंपिलिपिलाख्यंवैमनोमलविनाशनम् ॥ ४२ ॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ वैतरणींयमद्वारस्थांनदीम् ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ मित्रतेजःसमप्रभंसूर्यसदृशतेजस्कम् ॥ ४१ ॥ त्रैविष्टपीदृष्टिनिर्मली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृतपुष्कलंत्रिलोचनदर्शनशुद्धजातसर्वम् ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ऊर्जेकार्तिके ॥ नुत्तयेनाशाय ॥ ५१ ॥ ५२ ॥ मध्येकाशिकाश्यामध्ये ॥

तत्रश्राद्धादिकरणाद्दीनानाथप्रतर्पणात् ॥ महतींश्रियमाप्नोतिमानवोतीवनिश्चलाम् ॥ ४३ ॥ ततोनागेश्वरंतीर्थंमहाघपरिशोधनम् ॥ तत्तीर्थमज्जनादे
वभवेत्सर्वाघसंक्षयः ॥ ४४ ॥ तद्दक्षिणेमहापुण्यंकर्णादित्याख्यमुत्तमम् ॥ तीर्थंयत्राप्लुतोमर्त्योभास्करींश्रियमावहेत् ॥ ४५ ॥ ततोभैरवतीर्थंचमहाघौ
घक्षयप्रदम् ॥ चतुरर्थोदयकरंसर्वविघ्ननिवारणम् ॥ ४६ ॥ भौमाष्टम्यांतत्रनरःस्नात्वासंतर्पयेत्पितॄन् ॥ दृष्ट्वाचभैरवंकालंकलिंकालंचसंजयेत् ॥ ४७ ॥
तीर्थंखर्वनृसिंहाख्यंतीर्थाद्भैरवतःपुरः ॥ तत्रस्नातस्यवैपुंसःकुतोघजनितंभयम् ॥ ४८ ॥ मृकंडस्यमुनेस्तीर्थंतद्याम्यामतिनिर्मलम् ॥ तत्रस्नाने
नमर्त्यानांनापायमरणंक्वचित् ॥ ४९ ॥ ततःपंचनदाख्यंवैसर्वतीर्थनिषेवितम् ॥ तीर्थंयत्रनरःस्नात्वानसंसारीपुनर्भवेत् ॥ ५० ॥ ब्रह्मांडोदरवर्तीनिया
नितीर्थानिसर्वतः ॥ ऊर्जेयत्रसमायांतिस्वाघौघपरिनुत्तये ॥ ५१ ॥ सर्वदायत्रसर्वाणिदशम्यादिदिनत्रयम् ॥ तिष्ठंतितीर्थवर्याणिनिजनैर्मल्यहेतवे ॥
॥ ५२ ॥ भूरिशःसर्वतीर्थानिमध्येकाशिपदेपदे ॥ परंपांचनदःकैश्चिन्महिमानापिकुत्रचित् ॥ ५३ ॥ अप्येकंकार्तिकस्याहस्तत्रवैसफलीकृतम् ॥
जपहोमार्चनादानैःकृतकृत्यास्तएवहि ॥ ५४ ॥ सर्वाण्यपिचतीर्थानियुगपत्तुलितान्यपि ॥ नाधिजग्मुःपंचनद्याःकलायाअपितुल्यताम् ॥ ५५ ॥
स्नात्वापांचनदेतीर्थेदृष्ट्वावैबिंदुमाधवम् ॥ नजातुजायतेधीमाञ्जननीजठराजिरे ॥ ५६ ॥ ततोज्ञानह्रदंतीर्थंजडानामपिजाड्यहृत् ॥ तत्रस्नातोनरो
जातुज्ञानभ्रंशंनचाप्नुयात् ॥ ५७ ॥ तत्रज्ञानह्रदेस्नात्वादृष्ट्वाज्ञानेश्वरंनरः ॥ ज्ञानंतदधिगच्छेद्वैयेननोबाध्यतेपुनः ॥ ५८ ॥ ततोस्तिमंगलंतीर्थं
सर्वामंगलनाशनम् ॥ तत्रावगाहनंकृत्वाभवेन्मंगलभाजनम् ॥ ५९ ॥ अमंगलानिनश्येयुर्भवेयुर्मंगलानिच ॥ स्नातुर्वैमंगलेतीर्थेनमस्कर्तुश्चमंगलम् ॥
॥ ६० ॥ मयूखमालिनस्तीर्थंतदग्रेमलनाशनम् ॥ तत्राप्लुतोगभस्तीशंविलोक्यविमलोभवेत् ॥ ६१ ॥ मखतीर्थंतुतत्रैवमखेश्वरसमीपतः ॥ मखजं
पुण्यमाप्नोतितत्रस्नातोनरोत्तमः ॥ ६२ ॥ तत्पार्श्वेबिंदुतीर्थंचपरमज्ञानकारणम् ॥ तत्रश्राद्धादिकंकृत्वालभेत्सुकृतमुत्तमम् ॥ ६३ ॥ पिप्पलाद
स्यचमुनेस्तीर्थंतद्याम्यदिक्स्थितम् ॥ स्नात्वाशनेर्दिनेतत्रदृष्ट्वावैपिप्पलेश्वरम् ॥ ६४ ॥ पिप्पलंतत्रसेवित्वाअश्वत्थइतिमंत्रतः ॥ शनिपीडांनलभतेदुः
स्वप्नंचापिनाशयेत् ॥ ६५ ॥

कैश्चित्तीर्थैर्नापिनप्राप्तः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ जडानामज्ञानाम् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ अश्वत्थइतिमंत्रतइति ॥ अश्वत्थेवोनिषदनंपर्णे

CC-0. In Public Domain. Digitization by eGangotri

वोवसतिष्कृता ॥ गोभाजइत्किलासयथत्सनवथपूरुषमित्यादिमंत्रेणेत्यर्थः ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ऐक्ष्वाकवमिक्ष्वाकोरिदम् ॥ ७० ॥ अर्च्यअर्चयित्वा ॥ ७१ ॥७२॥७३॥

ततस्ताम्रवराहाख्यंतीर्थंचैवातिपावनम् ॥ यत्रस्नानेनदानेननमज्जेदघसागरे ॥ ६६ ॥ तदग्रेकालगंगाचकलिकल्मषनाशिनी ॥ तस्यांस्नात्वानरोधीमांस्तत्क्षणान्निरघोभवेत् ॥६७॥ इंद्रद्युम्नंमहातीर्थमिंद्रद्युम्नेश्वराग्रतः ॥ तोयकृत्यंतत्रकृत्वालोकमैंद्रमवाप्नुयात् ॥६८॥ततस्तुरामतीर्थंचवीररामेश्वराग्रतः॥ तत्तीर्थस्नानमात्रेणवैष्णवंलोकमाप्नुयात् ॥ ६९ ॥ ततऐक्ष्वाकवंतीर्थंसर्वाघौघविनाशनम् ॥ तत्रस्नानेनपूतात्माजायतेमनुजोत्तमः ॥ ७० ॥ मरुत्ततीर्थंतत्रांतिमरुत्तेश्वरसन्निधौ ॥ तत्रस्नात्वातमर्च्येशंमहदैश्वर्यमाप्नुयात् ॥ ७१ ॥ मैत्रावरुणतीर्थंचततःपातकनाशनम् ॥ तत्रपिंडप्रदानेनपितॄणांभवतिप्रियः ॥ ७२ ॥ ततोग्नितीर्थंविमलमग्नीशपुरतोमहत् ॥ अग्निलोकमवाप्नोतितत्तीर्थपरिमज्जनात् ॥ ७३ ॥ अंगारतीर्थंतत्रैवअंगारेश्वरसन्निधौ ॥ तत्रांगारचतुर्थ्यांतुस्नात्वानिष्पापतामियात् ॥ ७४ ॥ ततोवैकलितीर्थंचकलशेश्वरसन्निधौ ॥ स्नात्वातल्लिंगमभ्यर्च्यकलिकालान्नबिभ्यति ॥७५॥ चंद्रतीर्थंचतत्रैवचंद्रेश्वरसमीपतः ॥ तत्रस्नात्वार्च्यचंद्रेशंचंद्रलोकमवाप्नुयात् ॥ ७६ ॥ तदग्रेवीरतीर्थंचवीरेश्वरसमीपतः ॥ यदुक्तंप्राक्तवपुरस्तीर्थानामुत्तमंपरम् ॥ ७७ ॥ विघ्नेशतीर्थंचततःसर्वविघ्नविघातकृत् ॥ जातुचित्तत्रसंस्नातोनविघ्नैरभिभूयते ॥ ७८ ॥ हरिश्चंद्रस्यराजर्षेस्ततस्तीर्थमनुत्तमम् ॥ यत्रस्नातोनरोजातुनसत्याच्च्यवतेक्वचित् ॥ ७९ ॥ हरिश्चंद्रस्यतीर्थेतुयच्छ्रेयःसमुपार्जितम् ॥ तदक्षयफलंवीरइहलोकेपरत्रच ॥ ८० ॥ ततःपर्वततीर्थंचपर्वतेशसमीपतः ॥ सर्वपर्वफलंतस्यस्नात्वापर्वण्यपर्वणि ॥८१॥ कंबलाश्वतरंतीर्थंतत्रसर्वविषापहम् ॥ तत्रस्नातोभवेन्मर्त्योगीतविद्याविशारदः ॥ ८२ ॥ ततःसारस्वतंतीर्थंसर्वविद्योपपादकम् ॥ तिष्ठेयुःपितरस्तत्रसहदेवर्षिमानवैः ॥ ८३ ॥ उमातीर्थंतुतत्रैवसर्वशक्तिसमन्वितम् ॥ औमेयलोकप्राप्त्यैस्यात्स्नानमात्रेणनिश्चितम् ॥ ८४ ॥ ततस्त्रिलोकीविख्यातंत्रिलोक्युद्धरणक्षमम् ॥ तीर्थश्रेष्ठतरंवीरयदाख्यामणिकर्णिका ॥ ८५ ॥ चक्रपुष्करिणीतीर्थंतदादौविष्णुनाकृतम् ॥ तदाख्याकर्णनादेवसर्वैःपापैःप्रमुच्यते ॥ ८६ ॥ स्वर्गौकसस्त्रिसंध्यंवैजपंतिमणिकर्णिकाम् ॥ यन्नामग्रहणंपुंसांश्रेयसेपरमायहि ॥ ८७ ॥ यैःश्रुतायैःस्मृतावीरयैर्दृष्टामणिकर्णिका ॥ तएवकृतिनोलोकेकृतकृत्यास्तएवहि ॥ ८८ ॥ त्रिलोकेयेजपंतीहमानवामणिकर्णिकाम् ॥ जपामितानहंवीरत्रिकालंपुण्यकर्मणः ॥ ८९ ॥

॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ अपर्वणिच ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ यदाख्यायस्याख्यामणिकर्णिकातदित्यर्थः ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

CC-0. In Public Domain. Digitization by eGangotri

 इष्टंतेनमहायज्ञैःसहस्रशतदक्षिणैः ॥ पंचाक्षरीमहाविद्यायेनोक्तामणिकर्णिका ॥ ९० ॥ महादानानिदत्तानितेनवैपुण्यकर्मणा ॥ येनाहमर्चितोवीरसं
प्राप्यमणिकर्णिकाम् ॥ ९१ ॥ मणिकर्ण्यंबुभिर्येनतर्पिताःप्रपितामहाः ॥ तेनश्राद्धानिदत्तानिगयायांमधुपायसैः ॥ ९२ ॥ मणिकर्णीजलंयेनसंपीतं
शुद्धबुद्धिना ॥ किंतस्यसोमपानैस्तैःपुनरावृत्तिलक्षणैः ॥ ९३ ॥ तेस्नाताःसर्वतीर्थेषुमहापर्वसुभूरिशः ॥ तथाचसर्वावभृथैर्यैःस्नातामणिकर्णिका ॥
॥ ९४ ॥ तैःसुराःपूजिताःसर्वेब्रह्मविष्णुमुखामखैः ॥ यैःस्वर्णकुसुमैरत्नैरर्चितामणिकर्णिका ॥९५॥ अहंतेनोमयासार्धंदीक्षांसंप्राप्यशांभवीम् ॥ अर्चितः
प्रत्यहंयेनपूजितामणिकर्णिका ॥ ९६ ॥ तपांसितेनतप्तानिशीर्णपर्णादिनाचिरम् ॥ सेविताश्रद्धयायेनश्रीमतीमणिकर्णिका ॥ ९७ ॥ दत्त्वादानानि
भूरीणिमखानिष्ट्वातुभूरिशः ॥ चिरंतप्त्वाप्यरण्येषुस्वर्गैश्वर्यान्महींपुनः ॥ ९८ ॥ विपुलेत्रमहीपृष्ठेपंचक्रोश्यांमनोहरा ॥ संश्रितामणिकर्णीयैस्तेयाताश्चा
निवर्तकाः ॥ ९९ ॥ दानानांचव्रतानांचक्रतूनांतपसामपि ॥ इदमेवफलंमन्येयदाप्यामणिकर्णिका ॥ १०० ॥ मोक्षलक्ष्मीरियंसाक्षाच्छ्रीमतीमणिक
र्णिका ॥ प्रायोस्यामहिमानंवैनवेद्म्यहमपिस्फुटम् ॥ १ ॥ अवाच्यांमणिकर्ण्याश्चतीर्थंपाशुपतंपरम् ॥ तीर्थंतुरुद्रवासाख्यंविश्वतीर्थमतःपरम् ॥ २ ॥
मुक्तितीर्थंततोरम्यमविमुक्तमथोत्तमम् ॥ तीर्थंचतारकंस्कांदंढुंढेस्तीर्थंततोपिच ॥ ३ ॥ भवानेयमथैशानंज्ञानतीर्थमथोत्तमम् ॥ नंदितीर्थंविष्णुतीर्थंती
र्थंपैतामहंततः ॥ ४ ॥ नाभितीर्थमिदंचैवब्रह्मनालमतःपरम् ॥ ततोभागीरथंतीर्थंयत्तत्वाग्रेपुराकथि ॥५॥ तीर्थान्युत्तरवाहिन्यांस्वर्धुन्यांकाशिसन्निधौ ॥
संत्यनेकानिपुण्यानिमयोक्तान्यल्पशःपुनः ॥ ६ ॥ तत्रापिनितरांश्रेष्ठापंचतीर्थीनृपांगज ॥ यस्यांस्नात्वानरोभूयोगर्भवासंनसंस्मरेत् ॥ ७ ॥ प्रथमंचा
सिसंभेदंतीर्थानांप्रवरंपरम् ॥ ततोदशाश्वमेधाख्यंसर्वतीर्थनिषेवितम् ॥ ८ ॥ ततःपादोदकंतीर्थमादिकेशवसन्निधौ ॥ ततःपंचनदंपुण्यंस्नानमात्रादघौ
घहृत् ॥ ९ ॥ एतेषामपितीर्थानांचतुर्णामपिसत्तम ॥ पंचमंमणिकर्ण्याख्यंमनोवेयवशुद्धिदम् ॥११०॥ अहंस्नाम्यत्रसततमुमयासहपर्वसु ॥ ब्रह्मणा
विष्णुनासार्धंसहेंद्रादिसुरर्षिभिः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १२ ॥ १३ ॥ सद्योजातवामदेवाघोरतत्पुरुषेशानपंचमुखत्वात्पंचास्योविश्वेश्वरः ॥ १४ ॥ १५ ॥ १६ ॥ कामेशंकामेशाख्यानम् ॥ ११७ ॥ ॥ इतिश्रीरामा०काशी०टी०चतुरशी
तितमोऽध्यायः ॥ ८४ ॥ ॥ पंचाशीतितमेऽध्यायेदुर्वासोवरपूर्वकम् ॥ श्रीमत्कामेश्वरोत्पत्तिर्वर्ण्यतेतिमनोहरा ॥ १ ॥ कामेश्वरोत्पत्तिंवक्तुंप्रतिजानीते ॥ जगज्जनन्याइति ॥ १ ॥

अतएवात्रगीयेतगाथेयंश्रुतिसंमता ॥ नागलोककृतावासैःस्वर्गौकोभिश्चसंततम् ॥ १२ ॥ सत्यंसत्यंपुनःसत्यंसत्यपूर्वमिदंवचः ॥ मणिकर्णीसमंतीर्थंनास्तिब्रह्मांडगोलके ॥ १३ ॥ पंचतीर्थ्यांनरःस्नात्वानदेहंपांचभौतिकम् ॥ गृह्णातिजातुचित्काश्यांपंचास्योवाथजायते ॥ १४ ॥ इतिदत्त्वावरान्देवोवीरस्यांतर्दधेहरः ॥ सचवीरोपिवीरेशंप्रार्च्यप्राप्तःसमीहितम् ॥ १५ ॥ ॥ स्कंदउवाच ॥ ॥ तीर्थाध्यायमिमंपुण्यमगस्तेयोनिशामयेत् ॥ तस्याघंसंक्षयंयायादपिजन्मशतार्जितम् ॥ १६ ॥ इतिवीरेश्वराख्यानंतीर्थाख्यानप्रसंगतः ॥ कथितंतेपुरागस्तेकामेशंकथयाम्यतः ॥११७॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेवीरेश्वराख्यानंनामचतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥छ॥ ॥ स्कंदउवाच ॥ ॥ जगज्जनन्याःपार्वत्याःपुरोगस्तेपुरारिणा ॥ यथाख्यायिकथापुण्यातथातेकथयाम्यहम् ॥ १ ॥ पुरामहीमिमांसर्वांससमुद्राद्रिकाननाम् ॥ ससरित्कांसार्णवांचसग्रामपुरपत्तनाम् ॥ २ ॥ परिभ्रम्यमहातेजामहामर्षोमहातपाः ॥ दुर्वासाःसंपरिप्राप्तःशंभोरानंदकाननम् ॥ ३ ॥ विलोक्याक्रीडमखिलंबहुप्रासादमंडितम् ॥ बहुकुंडतडागंचशंभोस्तोषमुपागमत् ॥४॥ पदेपदेमुनीनांचजितकालमहाभियाम् ॥ दृष्ट्वोटजानिरम्याणिदुर्वासाविस्मितोभवत् ॥ ॥ ५ ॥ सर्वर्तुकुसुमान्वृक्षान्सुच्छायस्निग्धपल्लवान् ॥ सफलान्सुलताश्लिष्टान्दृष्ट्वाप्रीतिमगान्मुनिः ॥ ६ ॥ दुर्वासाश्चातिहृष्टोभूद्दृष्ट्वापाशुपतोत्तमान् ॥ भूतिभूषितसर्वांगाञ्जटाजटितमौलिकान् ॥ ७ ॥ कौपीनमात्रवसनान्स्मरारिध्यानतत्परान् ॥ कक्षीकृतमहालाबून्हुडुत्कारजितांबुदान् ॥ ८ ॥ करंडदंडपानीयपात्रमात्रपरिग्रहान् ॥ क्वचित्रिदंडिनोदृष्ट्वानिःसंगान्निष्परिग्रहान् ॥ ९ ॥ कालादपिनिरातंकान्विश्वेशशरणंगतान् ॥ क्वचिद्वेदरहस्यज्ञानाबाल्यब्रह्मचारिणः ॥ १० ॥ नित्यंभागीरथीस्नानपरिपिंगलमूर्धजान् ॥ विलोक्यकाश्यांदुर्वासाब्राह्मणान्मुमुदेतराम् ॥ ११ ॥

॥ २ ॥ महामर्षोऽसहनशीलोमहाक्रोधइतिवा ॥ ३ ॥ ४ ॥ उटजानिपर्णशालाः ॥ ५ ॥ ६ ॥ जटाजटितमौलिकान्जटाव्याप्तमस्तकान् ॥ ७ ॥ कक्षीति ॥ कक्षीकृताःकक्षेधृता
अलाब्वोविभूतिपात्राणियैस्तान् ॥ हुडुत्कारजितांबुदान्हुडुत्कारशब्दैर्जितमेघस्वनानित्यर्थः ॥ फुडुदितिक्वचित् ॥ उडुदित्यन्यत्र ॥ ८ ॥ करंडोदेवाधारपात्रम् ॥ ९ ॥ १० ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशुषुग्राम्येषुगोमहिषादिषु ॥ मृगेष्वारण्येषुहरिणादिषु ॥ तिर्यक्षुपक्षिषु ॥ हृष्टिर्हृष्टता ॥१२॥ व्युष्टिःविशिष्टंस्थानम् ॥ १३ ॥ १४ ॥ शुभाआयतिरुत्तरकालीनफलंयस्यसः ॥ १५ ॥ नागभूः पातालम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अमर्षिणोऽसहिष्णवः ॥२४॥ क्रुधाक्रोधेन ॥ २५ ॥ ननुयद्येवंभूतास्तापसाःदुर्वासःप्रभृतयः कथंतर्हितानन्येतपस्वि

पशुष्वापिचयातुष्टिर्मृगेष्वपिचयाद्युतिः ॥ तिर्यक्ष्वपिचयाहृष्टिःकाश्यांनान्यत्रसास्फुटम् ॥ १२ ॥ इदंसुश्रेयसोव्युष्टिःक्कामरेषुत्रिविष्टपे ॥ यत्रत्येष्वपि तिर्यक्षुपरमानंदवर्धिनी ॥ १३ ॥ वरमेतेपिपशवआनंदवनचारिणः ॥ सदानंदाःपुनर्देवाननंदनवनाश्रिताः ॥ १४ ॥ वरंकाशीपुरीवासीम्लेच्छोपिहि शुभायतिः ॥ नान्यत्रत्योदीक्षितोपिसहिमुक्तेरभाजनम् ॥ १५ ॥ वैश्वेश्वरीपुरीचैषायथामेचित्तहारिणी ॥ सर्वापिनतथाक्षोणीनस्वर्गोनैवनागभूः॥१६॥ स्थैर्यंबबंधनक्कापिभ्रमतोमेमनोगतिः ॥ सर्वस्मिन्नपिभूभागेयथास्थैर्यमगादिह ॥ १७ ॥ रम्यापुरीभवेदेषाब्रह्मांडादखिलादपि ॥ परिष्टुत्येतिदुर्वासाश्चे तोवृत्तिमवापह ॥ १८ ॥ तप्यमानोपिहितपःसुचिरंसमहातपाः ॥ यदानापफलंकिंचित्तुकोपचतदाभृशम् ॥ १९ ॥ धिक्चमांतापसंदुष्टंधिक्चमेदुश्चरं तपः ॥ धिक्चक्षेत्रमिदंशंभोःसर्वेषांचप्रतारकम् ॥ २० ॥ यथानमुक्तिरत्रस्यात्कस्यापिकरवैतथा ॥ इतिशप्तुंयदोद्युक्तःसंजहासतदाशिवः ॥२१॥ तत्र लिंगमभूदेकंख्यातंप्रहसितेश्वरम् ॥ तल्लिंगदर्शनात्पुंसामानंदःस्यात्पदेपदे ॥ २२ ॥ उवाचविस्मयाविष्टोमनस्येवमहेशिता ॥ ईदृशेभ्यस्तपस्विभ्योनमो स्त्वितिपुनःपुनः ॥२३॥ यत्रैवहितपस्यंतियत्रैवविहिताश्रमाः ॥ लब्धप्रतिष्ठायत्रैवतत्रैवामर्षिणोद्विजाः॥२४॥ मनाक्किंचतितमात्रंतुचेच्छभंतेनतापसाः ॥ क्रुधातदैवजीर्यंतेहारिण्यातपसांश्रियः ॥ २५ ॥ तथापितापसामान्याःस्वश्रेयोवृद्धिकांक्षिभिः ॥ अक्रोधनाःक्रोधनावाकाचिंताहितपस्विनाम् ॥ २६ ॥ इतियावन्महेशानोमनस्येवविचिंतयेत् ॥ तावत्तत्क्रोधजोवह्निर्व्यानशेव्योममंडलम् ॥ २७ ॥ तत्क्रोधानलधूमौघैर्व्यापितंयन्नभोंगणम् ॥ तद्घातिनभो व्यापिनीलिमानंमहत्तरम् ॥ २८ ॥ ततोगणाःपरिक्षुब्धाःप्रलयार्णवनीरवत् ॥ आःकिमेतत्किमेतद्वैभाषमाणाःपरस्परम् ॥ २९ ॥ गर्जंतस्तर्जयंतश्चप्रो द्यतायुधपाणयः ॥ प्रमथाःपरितस्थुस्तेपरितोधामशांभवम् ॥३०॥ कोयमःकोथवाकालःकोमृत्युःकस्तथांतकः॥कोवाविधाताकेलेखाःक्रुद्धेष्वस्मासुकः परः ॥ ३१ ॥ अग्निंपिबामोजलवच्चूर्णीकुर्मोखिलान्गिरीन् ॥ सप्तापिचार्णवांस्तूर्णंकरवाममरुस्थलीम् ॥ ३२ ॥ पातालंचानयामोर्ध्वमधोदध्मोथवा दिवम् ॥ एकमेवहिवाग्रासंगगनंकरवामहे ॥ ३३ ॥

नोमन्यंतेतत्राह ॥ तथापीति ॥ २६ ॥ व्यानशेव्याप्तवान् ॥ २७ ॥ व्यापितंव्याप्तम् ॥ यद्यस्मात्तत्तस्मात् ॥ २८ ॥ आइतिकोपेपीडायांवा ॥ २९ ॥ परितोधामशांभवंशंभोर्धाम्निःआनंदका ननस्यचतुर्दिक्ष्वित्यर्थः ॥ ३० ॥ अंतकःकालाग्निरुद्रःप्रलयानलइतियावत् ॥ विधाताब्रह्मा ॥ लेखादेवाइंद्रादयः ॥ परोविष्णुः ॥३१॥ मरुस्थलींनिरुदकभूमिम् ॥ ३२॥ दध्मोधारयेम ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फोटयामःखंडनयामः ॥ आस्फालयामोदूरेप्रक्षेप्स्यामः ॥ अन्योन्यंपरस्परम् ॥ तालवद्यथैकेनतालेनतालांतरंदूरीक्रियतेतेनाप्यन्यत्तद्वदित्यर्थः ॥ ३४ ॥ ग्रसामइति ॥ यद्यपिवाराणसीभुवनमध्ये नभवतितथापिप्रतीत्यभिप्रायेणेदमुक्तमितिज्ञेयम् ॥ ३५ ॥ ३६ ॥ ३७ ॥ शकलीकृत्यखंडशःकृत्य ॥ प्रलयानलंदुर्वासःक्रोधवह्निम् ॥ ३८ ॥ ३९ ॥ ४० ॥ भृंगिरिटिरितीदंतत्वमार्षम् ॥ ४१ ॥ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ प्राभंजनींवायुसंबंधिनीम् ॥ ४६ ॥ दुर्वाससश्चेतिचकारोभिन्नक्रमे ॥ क्षुब्धेषुतेषुचेतिसंबध्यते ॥ ४७ ॥ ननुयदिवायोरपिगतिर्नास्तिकथंचंद्रसूर्यौ

ब्रह्मांडभांडमथवास्फोटयामःक्षणेनहि ॥ आस्फालयामोवान्योन्यंकालंमृत्युंचतालवत् ॥ ३४ ॥ ग्रसामोवाथभुवनंमुक्त्वावाराणसींपुरीम् ॥ यत्रमुक्ताभवंत्येवमृतमात्रेणजंतवः ॥ ३५ ॥ कुतोऽयंधूमसंभारोज्वालावल्यःकुतस्त्वमूः ॥ कोवामृत्युंजयंरुद्रंनोविद्यान्मदमोहितः ॥ ३६ ॥ इतिपारिषदाःशंभोर्महाभयभयप्रदाः ॥ जल्पंतःकल्पयामासुःप्राकारंगगनस्पृशम् ॥३७॥ शकलीकृत्यबहुशःशिलावत्प्रलयानलम् ॥ नंदीचनंदिषेणश्चसोमनंदीमहोदरः ॥ ॥ ३८ ॥ महाहनुर्महाग्रीवोमहाकालोजितांतकः ॥ मृत्युप्रकंपनोभीमोघंटाकर्णोमहाबलः ॥३९॥ क्षोभणोद्रावणोजृंभीपंचास्यःपंचलोचनः ॥ द्विशिरास्त्रिशिराःसोमःपंचहस्तोदशाननः ॥ ४० ॥ चंडोभृंगिरिटिस्तुंडीप्रचंडस्तांडवप्रियः ॥ पिचिंडिलःस्थूलशिराःस्थूलकेशोगभस्तिमान् ॥ ४१ ॥ क्षेमकःक्षेमधन्वाचवीरभद्रोरणप्रियः ॥ चंडपाणिःशूलपाणिःपाशपाणिःकृशोदरः ॥ ४२ ॥ दीर्घग्रीवोथपिंगाक्षःपिंगलःपिंगमूर्धजः ॥ बहुनेत्रोलंबकर्णःखर्वःपर्वतविग्रहः ॥४३॥ गोकर्णोगजकर्णश्चकोकिलाख्योगजाननः ॥ अहंवैनैगमेयश्चविकटास्योट्टहासकः॥४४॥सीरपाणिःशिवारावोवैणिकोवेणुवादनः ॥ दुराधर्षोदुःसहश्चगर्जनोरिपुतर्जनः ॥ ४५ ॥ इत्यादयोगणेशानाःशतकोटिदुरासदाः ॥ काश्यांनिवारयामासुरपिप्राभंजनींगतिम् ॥ ४६ ॥ क्षुब्धेषुतेषुवीरेषुचकंपेभुवनत्रयम् ॥ दुर्वाससश्चकोपाग्निज्वालाभिर्व्याकुलीकृतम् ॥ ४७ ॥ तदाविविशतुःकाश्यांसूर्याचंद्रमसावपि ॥ नगणैरकृतानुज्ञौतत्तेजःशमितप्रभौ ॥ ४८ ॥ निवार्यप्रमथानीकमतिक्षुब्धमुमाधवः ॥ मदंशएवहिमुनीरानसूयेयएषवै ॥ ४९ ॥ अथोदुर्वाससोलिंगादाविरासीत्कृपानिधिः ॥ महातेजोमयःशंभुर्मुनिशापात्पुरीमवन् ॥५०॥ माभूच्छापोमुनेःकाश्यांनिर्वाणप्रतिबंधकः ॥ इत्यनुक्रोशतोदेवस्तस्यप्रत्यक्षतांगतः ॥ ५१ ॥ उवाचचप्रसन्नोस्मिमहाक्रोधनतापस ॥ वरयस्ववरःकस्तेमयादेयोविशंकितः ॥ ५२ ॥ ततोविलज्जितोगस्त्यशापोद्यतकरोमुनिः ॥ अपराद्धंबहुमयाक्रोधांधेनेतिदुर्धिया ॥ ५३ ॥ उवाचचेतिबहुशोधिङ्मांक्रोधवशंगतम् ॥ त्रैलोक्याभयदांकाशींशप्तुमुद्यतचेतसम् ॥ ५४ ॥

प्रविष्टावित्यतआह ॥ नगणैरिति ॥ नअकृतानुज्ञौअपितुकृतानुज्ञौ ॥ तत्रहेतुस्तत्तेजइति ॥ स्वतेजसानिष्प्रभौदृष्ट्वाकरुणयाकृतानुज्ञावित्यर्थः ॥ ४८ ॥ आनुसूयेयःअनुसूयायाः पुत्रइत्यर्थः ॥ ॥ ४९ ॥ अवन्रक्षन् ॥ ५० ॥ अनुक्रोशतोदयातः ॥ ५१ ॥ अविशंकितःविशंकारहितःसन् ॥ पाठांतरेक्रियाविशेषणम् ॥ ५२ ॥ ५३ ॥ उवाचेतिचकारस्याग्रिमकर्मणासंबंधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलमपराद्धमित्युवाचधिङ्मामितिचोवाचेत्यर्थः ॥ वहुशइत्यस्योभयत्रसंबंधः ॥ ५४ ॥ त्रैलोक्याभयदत्वमेवाह दुःखार्णवेत्यादिना ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ लब्धमुल्लब्धहर्षः ॥ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ लौकिकानिशोभनोक्तानिवारयति ॥ श्रुतीरितैरिति ॥ ६६ ॥ भाविभविष्यति ॥ ६७ ॥ ६८ ॥ ननुक्रुद्धानांकुतःश्लाघनीयत्वंतत्राह ॥

दुःखार्णवनिमग्नानांयातायातेतिखेदिनाम् ॥ कर्मपाशितकंठानांकाश्येकामुक्तिसाधनम् ॥ ५५ ॥ सर्वेषांजंतुजातानांजनन्येकैवकाशिका ॥ महामृतस्तन्यदात्रीनेत्रीचपरमंपदम् ॥ ५६ ॥ जनन्यासहनोकाशीलभेदुपमितिंकाचित् ॥ धारयेज्जननीगर्भेकाशीगर्भाद्विमोचयेत् ॥ ५७ ॥ एवंभूतांतुयःकाशीमन्योपिहिशपिष्यति ॥ तस्यैवशापोभवितानतुकाश्याःकथंचन ॥ ५८ ॥ इतिदुर्वाससोवाक्यंश्रुत्वादेवस्त्रिलोचनः ॥ अतीवतुषितोजातःकाशीस्तवनलब्धमुत् ॥५९॥ यःकाशींस्तौतिमेधावीयःकाशींहृदिधारयेत् ॥ तेनतप्तंतपस्तीव्रंतेनेष्टंक्रतुकोटिभिः ॥६०॥ जिह्वाग्रेवर्ततेयस्यकाशीत्यक्षरयुग्मकम् ॥ नतस्यगर्भवासःस्यात्क्वचिदेवसुमेधसः ॥ ६१ ॥ योमंत्रंजपतिप्रातःकाशीवर्णद्वयात्मकम् ॥ सतुलोकद्वयंजित्वालोकातीतंव्रजेत्पदम् ॥६२॥ आनुसूयेयतेज्ञानंकाशस्तिवनपुण्यतः ॥ यथेदानींसमुत्पन्नंतथानतपसःपुरा ॥ ६३ ॥ मुनेनमेप्रियस्तद्वद्दीक्षितोममपूजकः ॥ यादृक्प्रियतरःसत्यंकाशीस्तवनलालसः ॥६४॥ तादृक्तुष्टिर्नमेदानैस्तादृक्तुष्टिर्नमेमखैः ॥ नतुष्टिस्तपसातादृग्यादृशीकाशिसंस्तवैः ॥ ६५ ॥ आनंदकाननंयेनस्तुतमेतत्सुचेतसा ॥ तेनाहंसंस्तुतःसम्यक्सर्वैःसूक्तैःश्रुतीरितैः ॥ ६६ ॥ तवकामाःसमृद्धाःस्युरानुसूयेयतापस ॥ ज्ञानंतेपरमंभाविमहामोहविनाशनम् ॥ ६७ ॥ अपरंचवरंब्रूहिकिंदातव्यंतवानघ ॥ त्वादृशाएवमुनयःश्लाघनीयायतःसताम् ॥ ६८ ॥ यस्यास्त्येवहिसामर्थ्यंतपसःक्रुद्ध्यतीहसः ॥ कुपितोप्यसमर्थस्तुकिंकर्ताक्षीणवृत्तिवत् ॥६९॥ इतिश्रुत्वापरिष्टुत्यदुर्वासाःकृत्तिवाससम् ॥ वरंचप्रार्थयामासपरिहृष्टतनूरुहः ॥ ७० ॥ ॥ दुर्वासाउवाच ॥ ॥ देवदेवजगन्नाथकरुणाकरशंकर ॥ महापराधविध्वंसिन्नंधकारेस्मरांतक ॥ ७१ ॥ मृत्युंजयोग्रभूतेशमृडानीशत्रिलोचन ॥ यदिप्रसन्नोमेनाथयदिदेयोवरोमम ॥ ७२ ॥ तदिदंकामदंनामलिंगमस्त्विहधूर्जटे ॥ इदंचपल्वलंमेत्रकामकुंडाख्यमस्तुवै ॥ ७३ ॥ ॥ देवदेवउवाच ॥ ॥ एवमस्तुमहातेजोमुनेपरमकोपन ॥ यत्त्वयास्थापितंलिंगंदुर्वासेश्वरसंज्ञितम् ॥ ७४ ॥ तदेवकामकृन्नृणांकामेश्वरमिहास्त्विति ॥ यःप्रदोषेत्रयोदश्यांशनिवासरसंयुजि ॥ ७५ ॥ संस्नास्यतिनरोधीमान्कामकुंडेत्वदास्पदे ॥ त्वत्स्थापितंचकामेशंलिंगंद्रक्ष्यतिमानवः ॥ ७६ ॥

यस्यास्तीति ॥ कर्ताकरिष्यतिक्षीणवृत्तिवत् यथादरिद्रःक्रुद्धोपिकिमपिकर्तुंनशक्नोतितद्वदित्यर्थः ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाप्मानःपापानि ॥७७॥७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांपंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥छ॥ ॥ षडशीतितमेध्यायेनानाश्चर्यप्रदेनृणाम् ॥ विश्वकर्मेश्वरोत्पत्तिर्वर्ण्यतेबहुपुण्यदा ॥ १ ॥ विश्वकर्मेश्वरोत्पत्तिंपृच्छति ॥ विश्वकर्मेश्वरमिति ॥ १ ॥ २ ॥ निपुणःसर्वकर्मस्वितिसिद्धवत्कृत्योक्तम् ॥ किंचित्कर्तुंनजानामीतिवक्ष्यमाणविरो

सर्वैकामकृतादोषायामींनाप्स्यतियातनाम् ॥ बहवोपिहिपाप्मानोबहुभिर्जन्मभिःकृताः ॥ ७७ ॥ कामतीर्थांबुसंस्नानाद्यास्यंतिविलयंक्षणात् ॥ कामाः समृद्धिमाप्स्यंतिकामेश्वरनिषेवणात् ॥ ७८ ॥ इतिदत्त्वावरान्शंभुस्तल्लिंगेलयमाययौ ॥ ॥ स्कंदउवाच ॥ तल्लिंगाराधनात्कामाःप्राप्तादुर्वाससा भृशम् ॥ ७९ ॥ तस्मात्सर्वप्रयत्नेनकाश्यांकामेश्वरःसदा ॥ पूजनीयःप्रयत्नेनमहाकामाभिलाषुकैः ॥ ८० ॥ कामकुंडकृतस्नानैर्महापातकशांतये ॥ इदं कामेश्वराख्यानंयःपठिष्यतिपुण्यवान् ॥ यःश्रोष्यतिचमेधावीतौनिष्पापौभविष्यतः ॥ ८१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडउत्तरार्धेदुर्वाससोवरप्रदानंनामपंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥ पार्वत्युवाच ॥ ॥ विश्वकर्मेश्वरंलिंगंयत्काश्यांप्रथितंपरम् ॥ तस्यलिंगस्यकथयदेवदेवसमुद्भवम् ॥ १ ॥ ॥ देवदेवउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिकथांपातकनाशिनीम् ॥ विश्वकर्मेशलिंगस्यप्रादुर्भावंमनो हरम् ॥२॥ विश्वकर्माभवत्पूर्वंब्रह्मणस्त्वपरातनुः ॥ त्वष्टुःप्रजापतेःपुत्रोनिपुणःसर्वकर्मसु ॥३॥ कृतोपनयनःसोथबालोगुरुकुलेवसन् ॥ चकारगुरुशुश्रूषां भिक्षान्नकृतभोजनः ॥४ ॥ एकदातद्गुरुःप्राहप्रावृट्कालेसमागते ॥ कुटजंमदर्थंत्वंयथाप्रावृण्नबाधते ॥ ५ ॥ यत्कदाचिन्नभज्येतनपुरातनतांव्रजेत् ॥ गुरुपत्न्यात्वभिहितोरेत्वाष्ट्रकुरुकंचुकम् ॥६॥ ममांगयोग्यंनोगाढंनश्लथंचप्रयत्नतः ॥ विनैववाससाचारुवाल्कलंचसदोज्ज्वलम् ॥७॥ गुरुपुत्रेणचाज्ञप्तो ममार्थंपादुकेकुरु ॥ यदारूढस्यमेपादौनपंकःसंस्पृशेत्क्वचित् ॥ ८ ॥ चर्मादिबंधनिर्मुक्तेधावतोमेसुखप्रदे ॥ याभ्यांचसंचरेवारिस्थलभूमाविवद्रुतम् ॥ ॥ ९ ॥ गुरुकन्यापितंप्राहत्वाष्ट्रमेश्रवणोचिते ॥ भूषणेस्वेनहस्तेनकुरुकांचननिर्मिते ॥१०॥ कुमारीक्रीडनीयानिकौतुकानिचदेहिमे ॥ दंतिदंतमयान्ये वस्वहस्तरचितानिच ॥ ११ ॥ गृहोपकरणंद्रव्यंमुसलोलूखलादिकम् ॥ तथाघटयमेधाविन्यथात्रुटयतिनक्वचित् ॥ १२ ॥ अक्षालितान्यपियथानित्यं पीठानिसत्तम ॥ उज्ज्वलानिभवंत्येवस्थालिकाश्चतथाकुरु ॥ १३ ॥ सूपकर्मण्यपिचमांप्रशाधित्वष्टनंदन ॥ यथांगुल्योनदह्यंतेपाकःस्याच्चयथाशुभः ॥ ॥ १४ ॥ एकस्तंभमयंगेहमेकदारुविनिर्मितम् ॥ तथाकुरुवरंत्वाष्ट्रयत्रेच्छातत्रधारये ॥ १५ ॥ येसहाध्यायिनोप्यस्यवयोज्येष्ठाश्चतेपिहि ॥ सर्वेसर्वं समीहंतेकर्मतत्कृतमेवहि ॥ १६ ॥

धात् ॥ ३ ॥ ४ ॥ उटजंपर्णशालाम् ॥ ५ ॥ कंचुकंप्रसिद्धम् ॥ ६ ॥ वाल्कलंवल्कलेननिर्मितम् ॥ ७ ॥ पादौकर्मभूतौ ॥ ८ ॥ ९ ॥ १० ॥ क्रीडनीयानिक्रीडासाधनानि ॥ कौतुकानिकौतुकजनकानि ॥ ११ ॥ घटयचेष्टयसंपादयेत्यर्थः ॥ १२ ॥ स्थालिकाःपाकपात्राणि ॥ १३ ॥ प्रशाधिशिक्षय ॥ १४ ॥ वरंश्रेष्ठम् ॥ १५ ॥ नन्वन्येपिशिष्याःसंतितान्विहायायमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमितिनियुज्यतेतत्राह ॥ यइति ॥ संमीहंतेवांछंति ॥ तत्कृतंत्वाष्ट्रकृतम् ॥ तत्कर्मतेनजानंतीत्यर्थः ॥१६॥ कथमेतत्करिष्यामीतिचिंता ॥ अकरणेशापाद्भयंनरकाच्चताभ्यामर्दितःपीडितः॥१७॥
तत्रहेतुमाह ॥ किंचिदिति ॥ १८ ॥ चिंताभयेविवृणोति ॥ किंकरोमीति ॥ मेबुद्धेःसाहाय्यमित्यन्वयः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अधोनरकम् ॥ २४ ॥ तद्धीत्यातेषांगुर्वादीनां

तथेतिसप्रतिज्ञायसर्वेषांपुरतोद्विजे ॥ मध्येवनंप्राविशच्चमहाचिंताभयार्दितः ॥१७॥ किंचित्कर्तुंनजानातिप्रतिज्ञातंचतेनवै॥ सर्वेषांपुरतःसर्वंकरिष्यामी
तिनिश्चितम् ॥ १८ ॥ किंकरोमिक्वगच्छामिकोमेसाहाय्यमर्पयेत् ॥ बुद्धेरपिवनस्थस्यशरणंकंव्रजामिच ॥ १९ ॥ अंगीकृत्यगुरोर्वाक्यंगुरुपत्न्यागुरोः
शिशोः ॥ योननिष्पादयेन्मूढःसभवेन्निरयीनरः ॥ २० ॥ गुरुशुश्रूषणंधर्मएकोहिब्रह्मचारिणाम् ॥ अनिष्पाद्यतुतद्वाक्यंकथंमेनिष्कृतिर्भवेत् ॥ २१ ॥
गुरूणांवाक्यकरणात्सर्वएवमनोरथाः ॥ सिद्ध्यंतीतरथानैवतस्मात्कार्यंहितद्वचः ॥२२॥ कथंतद्वचसःसिद्धिंप्राप्स्याम्यत्रवनेस्थितः ॥ कश्चमेत्रसहायी
स्याद्धिषणादुर्बलस्यवै ॥ २३ ॥ आस्तांगुरुकथादूरंयोऽन्यस्यापिलघोरपि ॥ ओमित्युक्त्वानकुरुतेकार्यंसोथव्रजत्यधः ॥ २४ ॥ कथमेतानिकर्माणिक
रिष्येऽज्ञोऽसहायवान् ॥ अंगीकृतानितद्धीत्यानमस्तेभवितव्यते ॥ २५ ॥ यावदित्थंचिंतयतिसत्वाष्ट्रोवनमध्यगः ॥ तावत्तदैवसंप्राप्तस्तेनैकोऽदर्शिता
पसः ॥ २६ ॥ अथनत्वासतंप्राहवनेदृष्टंतपस्विनम् ॥ कोभवान्मानसंमेयोनितरांसुखयत्यहो ॥२७॥ त्वद्दर्शनेनमेगात्रंचिंतासंतापतापितम् ॥ हिमानी
गाहनेनेवशीतलंभवतिक्षणम् ॥ २८ ॥ किंत्वंमेप्राक्तनंकर्मप्राप्तंतापसरूपधृक् ॥ अथवाकरुणावार्धिराविर्भूतःशिवोभवान् ॥ २९ ॥ योसिसोसिनमस्तु
भ्यमुपदेशेनयुंक्ष्वमाम् ॥ गुरूक्तंगुरुपत्न्युक्तंगुर्वपत्योक्तमेवच ॥ ३० ॥ कथंकर्तुमहंशक्तःकर्मतत्रदिशाद्भुतम् ॥ कुरुमेबुद्धिसाहाय्यंनिर्जनेबंधुतांगतः ॥
॥ ३१ ॥ इत्युक्तस्तेनसवनेतापसोब्रह्मचारिणा ॥ कारुण्यपूर्णहृदयोयथोक्तमुपदिष्टवान् ॥ ३२ ॥ यआप्तत्वेनसंपृष्टोदुर्बुद्धिंसंप्रयच्छति ॥ सयाति
नरकंघोरंयावदाभूतसंप्लवम् ॥ ३३ ॥ तापसउवाच ॥ ॥ ब्रह्मचारिञ्शृणुब्रूयांकिमद्भुततरंत्विदम् ॥ विश्वेशानुग्रहाद्ब्रह्माप्यभवत्सृष्टिकोविदः ॥ ३४ ॥
यदित्वंत्वाष्ट्सर्वज्ञंकाश्यामाराधयिष्यसि ॥ ततस्तेविश्वकर्मेतिनामसत्यंभविष्यति ॥ ३५ ॥ विश्वेशानुग्रहात्काश्यामभिलाषानदुर्लभाः ॥ सुलभोदुर्ल
भोवैयद्यत्रमोक्षस्तनुत्यजाम् ॥ ३६ ॥

शापभीत्येत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ हिमानीहिमसंहतिः ॥ २८ ॥ वितर्कयति ॥ किंत्वमिति ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ सत्यंसार्थकम् ॥ ३५ ॥ अनुग्रहात्कृपातः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आराधनादितिक्वचित् ॥ तत्रहेतुमाह ॥ यद्यस्मात् ॥ वैनिश्चितंप्रसिद्धौवा ॥ दुर्लभोमोक्षोऽत्रकाश्यांसुलभः ॥ दुर्लभोप्यत्रेतिपाठेअत्रजगतिदुर्लभोपीत्यर्थः ॥ ३६ ॥ प्रापिप्राप्ता ॥ ३७ ॥
इच्छेरिच्छसि ॥ ३८ ॥ पयोमात्रंकेवलंदुग्धम् ॥ ३९ ॥ ४० ॥ ४१ ॥ वीथीमार्गः ॥ ४२ ॥ याहियाहीत्यादेर्वीप्सा ॥ ४३ ॥ श्रितआश्रितोभवति ॥ ४४ ॥ ४५ ॥ त्रयीस्थितंलोकत्रय

सृष्टेःकरणसामर्थ्यंसृष्टिरक्षाप्रवीणता ॥ विधिनाविष्णुनाप्रापिविश्वेशानुग्रहात्परात् ॥ ३७ ॥ याहिवैश्वेश्वरंसद्मपद्मयासमधिष्ठितम् ॥ निर्वाणसं
ज्ञयाबालायदीच्छेःस्वान्मनोरथान् ॥ ३८ ॥ सहिसर्वप्रदःशंभुर्याचितश्चोपमन्युना ॥ पयोमात्रंददौतस्मैसर्वंक्षीराब्धिमेवच ॥ ३९ ॥ आनंदकानने
शंभोःकिंकिंकेननलभ्यते ॥ यत्रवासकृतांपुंसांधर्मराशिःपदेपदे ॥ ४० ॥ स्वर्धुनीस्पर्शमात्रेणमहापातकसंततिः ॥ यत्रसंक्षयतिक्षिप्रंतांकाशींकोनसं
श्रयेत् ॥ ४१ ॥ नतादृग्धर्मसंभारोलभ्यतेक्रतुकोटिभिः ॥ यादृग्वाराणसीवीथीसंचारेणपदेपदे ॥ ४२ ॥ धर्मार्थकाममोक्षाणांयद्यत्रास्तिमनोरथः ॥
तदावाराणसींयाहियाहित्रैलोक्यपावनीम् ॥ ४३ ॥ सर्वकामफलप्राप्तिस्तदैवस्याद्ध्रुवंनृणाम् ॥ यदैवसर्वदःसर्वःकाश्यांविश्वेश्वरःश्रितः ॥ ४४ ॥
सतापसोक्तमाकर्ण्यत्वाष्ट्रइत्थंसुहृष्टवान् ॥ काशीसंप्राप्त्युपायंचतमेवसमपृच्छत ॥४५॥ ॥ त्वाष्ट्रउवाच ॥ ॥ तदानंदवनंशंभोःक्वास्तितापससत्तम ॥
यत्रनोदुर्लभंकिंचित्साधकानांत्रयीस्थितम् ॥ ४६ ॥ स्वर्गेवामर्त्यलोकेवाबलिसद्मनिवामुने ॥ क्वतदानंदगहनंयत्रानंदपयोब्धिजा ॥ ४७ ॥ यत्रविश्वे
श्वरोदेवोविश्वेषांकर्णधारकः ॥ व्याचष्टेतारकंज्ञानंयेनतन्मयतांययुः ॥ ४८ ॥ सुलभायत्रनियतमानंदवनचारिणः ॥ अपिनैःश्रेयसीलक्ष्मीःकिमन्येल्प
मनोरथाः॥४९॥कस्तांमांप्रापयेच्छंभोःकथंयामितथावद ॥ सतपस्वीतितद्वाक्यमाकर्ण्यश्रद्धयान्वितम् ॥५०॥ प्राहागच्छनयामित्वांयियासुरहमप्यहो॥
दुर्लभंप्राप्यमानुष्यंयदिकाशीनसेविता ॥ ५१ ॥ पुनःक्वनृत्वंश्रेयोभूःक्वकाशीकर्मबंधहृत् ॥ वृथागतेहिमानुष्येकाशीप्राप्तिविवर्जनात् ॥ ५२ ॥ आयुष्यं
चभविष्यंचसर्वमेववृथागतम् ॥ अतोहंसफलीकर्तुंमानुष्यंचातिचंचलम् ॥ ५३ ॥ यास्यामिकाशीमायाहिमायांहित्वात्वमप्यहो ॥ इतितेनसहत्वाष्ट्रोमु
निनातिकृपालुना ॥ ५४ ॥ पुरींवैश्वेश्वरींप्राप्तोमनःस्वास्थ्यमवापच ॥ ततःप्राप्यतांकाशींतापसःक्वाप्यतर्कितम् ॥ ५५ ॥ जगामकुंभसंभूतसत्वाष्ट्रो
पीत्यमन्यत ॥ अवश्यंसहिविश्वेशःसर्वेषांचिंतितप्रदः॥५६॥सत्पथस्थिरवृत्तीनांदूरस्थोपिसमीपगः ॥ यस्मिन्प्रसन्नेदृक्त्र्यक्षस्तंदविष्ठमपिध्रुवम् ॥५७॥

स्थितम् ॥ ४६ ॥ लोकत्रयमेवाह ॥ स्वर्गइति ॥ वेदत्रयप्रतिपाद्यंवा ॥ ४७ ॥ ४८ ॥ वनचारिणइतिषष्ठ्येकवचनम् ॥ नैःश्रेयसीकैवल्यरूपा ॥ ४९ ॥ ५० ॥ ५१ ॥ श्रेयःकल्याणम् ॥
॥ ५२ ॥ आयुष्यंचआयुषेहितंकारणंसुलक्षणरूपकरचरणरेखादि ॥ भविष्यंचभविष्यत्सूचकंस्वयोगग्रहताराादि ॥ ५३ ॥ ५४ ॥ अतर्कितंयथास्यात् ॥ ५५ ॥ ५६ ॥ दविष्ठंदूरस्थम् ॥ सुनेदिष्ठम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिनिकटम् ॥ ५७ ॥ ५८ ॥ ५९ ॥ रवसिनन्निश्वेश्वरकृपामसंभाव्यांसंभावयति ॥ नाराधितइत्यादि ॥ ६० ॥ ६१ ॥ ६२ ॥ हेत्वंतरमाह॥अथवेति ॥ ६३ ॥ ६४ ॥ ६५ ॥ क्षुण्णंक्षोदितं सेवितम् ॥ ६६ ॥ समर्थ्यसमर्थयित्वा ॥ समर्प्येतिपाठेप्राप्येत्यर्थः ॥ ६७ ॥ आर्तवंमृतुभवम् ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ नेपथ्यमलंकरणम् ॥

सुनेदिष्टंकरोत्येवस्वयंवत्मोंपदेशयन् ॥ क्काहंतत्रवनेबालश्चिंताकुलितमानसः ॥ क्कतापसःसयोमांवैसूपादिश्येहचानयत् ॥ ५८ ॥ खेलोयमस्यत्र्यक्षस्य यस्यभक्तस्यकुत्रचित् ॥ नदुर्लभतरंकिंचिदहोक्काहंक्ककाशिका ॥ ५९ ॥ नाराधितोमयाशंभुःप्राक्तनेजन्मनिक्कचित् ॥ शरीरित्वानुमानेनज्ञातमेतदसंशयम् ॥ ६० ॥ अस्मिञ्जन्मनिबालत्वान्नचैवाराधितःस्फुटम् ॥ प्रत्यक्षमेवमेवैतत्कुतोनुग्रहधीर्मयि ॥ ६१ ॥ आज्ञातंगुरुभक्तिर्मेहेतुःशंभुप्रसादने ॥ ययेहानुगृहीतोस्मिविश्वेशेनकृपालुना ॥ ६२ ॥ अथवाकारणापेक्षस्त्र्यक्षस्त्वितरदेववत् ॥ रंकमप्यनुगृह्णातिकेवलंकारणंकृपा ॥ ६३ ॥ यदिनोमय्यनुक्रोशःकथंतापससंगतिः ॥ तद्रूपेणस्वयंशंभुरानिनायेहमांध्रुवम् ॥ ६४ ॥ नदानानिनवैयज्ञानतपांसिव्रतानिच ॥ शंभोःप्रसादहेतूनिकारणंतत्कृपैवहि ॥ ॥ ६५ ॥ दयामपितदाकुर्यादसौविश्वेश्वरःपराम् ॥ यदाश्रुत्युक्तमध्वानंसद्भिःक्षुण्णंनसंत्यजेत् ॥ ६६ ॥ अनुक्रोशंसमर्थ्येतिसत्वाष्टूःशांभवंशुचिः ॥ संस्थाप्यलिंगमीशस्याराधयत्स्वस्थमानसः ॥ ६७ ॥ आनीयपुष्पसंभारमार्तवंकाननाद्बहु ॥ स्नात्वाभ्यर्चयतीशानंकंदमूलफलाशनः ॥ ६८ ॥ इत्थंत्वष्टृतनूजस्यलिंगाराधनचेतसः ॥ त्रिहायनात्प्रसन्नोभूत्तस्येशःकरुणानिधिः ॥ ६९ ॥ तस्मादेवहिलिंगाच्चप्रादुर्भूयभवोऽब्रवीत् ॥ वरंवरयरे त्वाष्ट्रदृढभक्त्यानयातव ॥ ॥ ७० ॥ प्रसन्नोस्मिभृशंबालगुर्वर्थकृतचेतसः ॥ गुरुणागुरुपत्न्याचगुर्वपत्यद्वयेनच ॥ ७१ ॥ यथार्थितंतथाकर्तुंतेसामर्थ्यं भविष्यति ॥ ७२ ॥ अन्यान्वरांश्चतेदद्यांत्वाष्ट्रतुष्टस्त्वदर्चया ॥ ताञ्शृणुष्वमहाभागलिंगस्यास्याद्भुतश्रियः ॥ ७३ ॥ त्वंसुवर्णादिधातूनांदारूणां दृषदामपि ॥ मणीनामपिरत्नानांपुष्पाणामपिवाससाम् ॥ ७४ ॥ कर्पूरादिसुगंधीनांद्रव्याणामप्यपामपि ॥ कंदमूलफलानांचद्रव्याणामपिचत्वचाम् ॥ ॥ ७५ ॥ सर्वेषांवस्तुजातानांकर्तुंकर्मप्रवेत्स्यसि ॥ यस्ययस्यरुचिर्यत्रसद्मदेवालयादिषु ॥ ७६ ॥ तस्यतस्येहतुष्ट्यैत्वंतथाकर्तुंप्रवेत्स्यसि ॥ सर्वंनेपथ्यरचनाःसर्वाःसूपस्यसंस्कृतीः ॥७७॥ सर्वाणिशिल्पिकार्याणितौर्यत्रिकमथापिच ॥ सर्वंज्ञास्यसिकर्तुंत्वंद्वितीयइवपद्मभूः ॥७८॥ नानाविधानियंत्राणिनानायुधविधानकम् ॥ जलाशयानांरचनाःसुदुर्गरचनास्तथा ॥ ७९ ॥ तादृक्कर्तुंपुरावेत्तिसियादृङ्नान्योऽधियास्यति ॥ कलाजातंहिसर्वंत्वमवयास्यसिमेवरात् ॥ ८० ॥ सर्वेंद्रजालिकीविद्यात्वदधीनाभविष्यति ॥ सर्वकर्मसुकौशल्यंसर्वबुद्धिवरिष्ठताम् ॥ ८१ ॥ सर्वेषांचमनोवृत्तिंत्वंज्ञास्यसिवरान्मम ॥ किंबहूक्तेनयत्स्वर्गेयत्पातालेयदत्रच ॥ ८२ ॥ अतिलोकोत्तरंकर्मतत्सर्वंवेत्स्यासिस्वयम् ॥ ८३ ॥ ॥३३६॥

॥ ७७ ॥ तौर्यत्रिकंनृत्यगीतवादित्रम् ॥ ७८ ॥ ७९ ॥ वेत्सिज्ञास्यसि ॥ पुराप्रथमतः ॥ यंत्राणिवाद्यविशेषान् ॥ कलाजातंशैवतंत्रोक्तचतुःषष्टिलक्षणम ॥ ८० ॥ ८१ ॥ ८२ ॥ अतिलोकोत्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मलौकिकंलोकत्रयातीतमितियावत् ॥ ८३ ॥ विश्वकर्मनामनिर्वक्ति ॥ विश्वेषामिति ॥ ८४ ॥ ८५ ॥ विकाशिकंविशिष्टकाशीसंबंधि ॥ ८६ ॥ समेरूपायदर्पणः ममरूपंतत्राविर्भवतीत्यर्थः ॥ ॥ ८७ ॥ स्वच्छोनिर्मलःमुकुरोदर्पणः ॥ ममनेत्रत्रयस्येतिसामानाधिकरण्यम् ॥ ८८ ॥ मांहित्वामत्तोऽभेददर्शनेसत्यपिसर्वथामांहित्वायःकेवलमन्यंसूर्यगणेशादिपूजयेत् ॥ ८९ ॥ तत्तस्मात् ॥ तस्मादित्यनेनापेक्षितंहेतुमाह ॥ द्रुहिणेति ॥ नसमर्च्यतेयतइतिशेषः ॥ ९० ॥ ९१ ॥ श्राणितंदत्तम् ॥ ९२ ॥ सद्बुद्धिभाजनंब्रह्मज्ञानपात्रम् ॥ ९३ ॥ मयाकृत्वाविनिर्मापयिताविशेषेणनिर्माण

विश्वेषांविश्वकर्माणिविश्वेषुभुवनेषुच ॥ यतोज्ञास्यसितन्नामविश्वकर्मेतितेऽनघ ॥ ८४ ॥ अपरःकोवरोदेयस्तवतंप्रार्थयाश्वहो ॥ तवादेयंनमेकिंचि
ल्लिंगार्चनरतस्यहि ॥ ८५ ॥ अन्यत्रापिहियोलिंगंसमर्चयतिसन्मतिः ॥ तस्यापिवांछितंदेयंकिंपुनर्योविकाशिकम् ॥ ८६ ॥ येनकाश्यांसमभ्यर्चितंये
नकाश्यांप्रतिष्ठितम् ॥ येनकाश्यांस्तुतंलिंगंसमेरूपायदर्पणः॥ ८७ ॥ तत्त्वंस्वच्छोसिमुकुरोममनेत्रत्रयस्यहि ॥ काश्यांलिंगार्चनात्त्वाद्यवरंवरयसुव्रत
॥ ८८ ॥ काश्यांयोराजधान्यांमेहित्वामामन्यमर्चयेत् ॥ सवराकोल्पधीर्मुष्टोऽल्पतुष्टिर्मुक्तिवर्जितः ॥ ८९ ॥ तदानंदवनेह्यत्रसमर्च्योहंमुमुक्षुभिः ॥
द्रुहिणोपेंद्रचंद्रेंद्रैरिहान्योनसमर्च्यते ॥ ९० ॥ यथानंदवनंप्राप्यत्वंमामार्चितवानसि ॥ तथान्येपुण्यकर्माणोमामभ्यर्च्यैवमामिताः ॥ ९१ ॥ अनु
श्राह्योऽसिनितरांततोवरयदुर्लभम् ॥ श्राणितंतदवैहित्वंवदमाचिरयस्वभोः ॥ ९२ ॥ ॥ विश्वकर्मोवाच ॥ ॥ इदंयत्स्थापितंलिंगंमयाज्ञेनापिशंकर ॥
तल्लिंगमन्येप्याराध्यसंतुसद्बुद्धिभाजनम् ॥ ९३ ॥ अन्यच्चनाथप्रार्थ्योसितच्चविश्राणयिष्यसि ॥ मयाविनिर्मापयितास्वंप्रासादंकदाभवान् ॥ ९४ ॥
देवदेवउवाच ॥ ॥ एवमस्तुयदुक्तंतेतवलिंगसमर्चकाः ॥ सद्बुद्धिभाजनंवैस्युःस्युश्चनिर्वाणदीक्षिताः ॥ ९५ ॥ यदाचराजाभवितादिवोदासोविधेर्व
रात् ॥ तदामेवचनात्तातप्रासादंमेविधास्यति ॥ ९६ ॥ नवीकृत्यपुनःकाशीनिर्विघ्नातेनभूभुजा ॥ गणेशमाययाराज्यात्परिनिर्विण्णचेतसा ॥ ९७ ॥
विष्णोः सदुपदेशाच्चमामेवशरणंगतः ॥ निर्वाणलक्ष्मीःप्राप्तेहहित्वाराज्यश्रियंचलाम् ॥ ९८ ॥ विश्वकर्मन्त्रजगुरोःशासनाययतस्त्वच ॥ गुरुभक्तिकृतो
यस्मान्मद्भक्तानात्रसंशयः ॥ ९९ ॥ येगुरुंचावमन्यंतेतेवमान्यामयाप्यहो ॥ तस्माद्गुरूपदिष्टंहिकुरुशिष्यसमीहितम् ॥ १०० ॥ ततआगत्यमे
पार्श्वंयावन्निर्वाणमेष्यसि ॥ तावत्स्थास्यसिशुद्धात्मादेवानांहितमाचरन् ॥ १ ॥ तवात्रलिंगेसततंस्थास्याम्यहमभीष्टदः ॥ अस्यलिंगस्यभक्तानां
निर्वाणश्रीरदूरतः ॥ २ ॥ अंगारेशादुदीच्यांयेत्वल्लिंगस्यसमर्चकाः ॥ तेषांमनोरथावाप्तिर्भविष्यतिपदेपदे ॥ ३ ॥

कर्ता ॥ अत्राक्षराधिक्याच्छंदोभंगश्छांदसत्वान्नदोषः ॥ तथाचश्रुतिः ॥ नवाएकेनाक्षरेणान्यच्छंदोभवतिनद्वाभ्यामिति ॥ ९४ ॥ ९५ ॥ विधास्यतिभवानितिशेषः ॥ अथवाभवद्द्वारासएव विधास्यति ॥ ९६ ॥ निर्विघ्नानितरांवेशिताप्राप्ता ॥ ९७ ॥ प्राप्तातेनराज्ञेतिशेषः ॥ ९८ ॥ गुरुभक्तिकृतोगुरुभक्तिकर्तारः ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥ ११ ॥ अब्दंनआवासोवासइष्यतेएकत्रेतिशेषः ॥ वार्षिकान्निवसेत्पुनरितिक्वचित् ॥ १२ ॥ १३ ॥ १४ ॥ १५॥१६॥ स्वयोगेनाध्यात्मयोगेन ॥ सयोगेनेतिपाठेपिसएवार्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ भूतग्रामोजरायुजांडजस्वेदजोद्भिज्जलक्षणभूतसमुदायः ॥ २१ ॥ त्यक्ताधर्मरतिर्येनसत्यक्तधर्मरतिश्चेत्तर्हिसाक्षादत्रस्थितोरुद्र

इत्युक्त्वांतर्दधेदेवस्त्वाष्ट्रोपिगुरुमाप्तवान् ॥ गुरोःसमीहितंभूरिविधायसगृहान्ययौ ॥४॥ गृहेपिमातापितरौसंतोष्यनिजकर्मणा ॥ तदुक्ताज्ञांसमाधायपुनः काशींसमाययौ ॥ ५ ॥ स्वलिंगाराधनासक्तोनाद्यापित्वष्टृनंदनः ॥ काशींत्यजतिमेधावीसर्वदेवाप्रियंचरन् ॥ ६ ॥ ॥ ईश्वरउवाच ॥ ॥ पृष्टा नियानिलिंगानित्वयादेविगिरींद्रजे ॥ काशीमुक्तौसमर्थानितान्युक्तानिमयातव ॥ ७ ॥ लिंगमोंकारसंज्ञंचतथादेवंत्रिविष्टपम् ॥ महादेवःकृत्तिवासारत्ने शश्चंद्रसंज्ञकः ॥ ८ ॥ केदारश्चापिधर्मेशस्तथावीरेश्वराभिधः ॥ कामेशविश्वकर्मेशौमणिकर्णीश्वरस्तथा ॥ ९ ॥ ममाचर्यमविमुक्ताख्यंततोदेविममा ख्यकम् ॥ विश्वनाथेतिविश्वस्मिन्प्रथितंविश्वसौख्यदम् ॥ ११० ॥ अविमुक्तंसमासाद्ययेनविश्वेश्वरोर्चितः ॥ नतस्यास्तिपुनर्जन्मकल्पकोटिशतेष्वपि ॥ ११ ॥ अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनाम् ॥ एकत्रचतुरोमासानब्दंनावासइष्यते ॥ १२ ॥ अविमुक्तेप्रविष्टानांविहारोनैवयुज्यते ॥ मोक्षो प्यसंशयश्चात्रतस्मात्त्याज्यानकाशिका ॥ १३ ॥ आनंदकाननंहित्वानान्यद्गच्छेत्तपोवनम् ॥ तपोयोगश्चमोक्षश्चयतोत्रैवमदाश्रयात् ॥ १४ ॥ कृपयासर्वजंतूनांक्षेत्रमेतन्मयाकृतम् ॥ अवश्यमेवसिद्ध्यंतिक्षेत्रेस्मिन्सिद्धिकांक्षिणः ॥ १५ ॥ अतीतंवर्तमानंचज्ञानतोऽज्ञानतःकृतम् ॥ यदेनस्तत्क्षयं यायादानंदवनवीक्षणात् ॥ १६ ॥ अत्युग्रैश्चतपोभिर्यन्महादानैर्महाव्रतैः ॥ नियमैश्चयमैःसम्यक्स्वयोगेनमहामखैः ॥ १७ ॥ वेदांतशास्त्राभ्यसनैः सर्वोपनिषदाश्रयात् ॥ एभिर्वैयदवाप्येततत्काश्यांहेलयाप्यते ॥१८॥ कर्मसूत्रेणबद्धावैभ्राम्यंतेतावदेवहि ॥ यावद्वैश्वेश्वरेधाम्निममनैवतनुत्यजः ॥१९॥ काश्यांस्वलीलयादेवितिर्यग्योनिजुषामपि ॥ ददामिचांतेतत्स्थानंयत्रयांतिनयाज्ञिकाः ॥ १२० ॥ भूतग्रामोऽखिलोप्यत्रमुक्तिक्षेत्रेकृतालयः ॥ काले नानिधनंयातोयात्येवपरमांगतिम् ॥ २१ ॥ विषयासक्तचित्तोपित्यक्तधर्मरतिस्त्वपि ॥ कालेनोज्झितदेहोऽत्रनसंसारंपुनर्विशेत् ॥ २२ ॥ प्रयागे यत्फलंदेविमाघेचोपसिमज्जनात् ॥ तत्फलंकोटिगुणितंवाराणस्यांक्षणेक्षणे ॥ २३ ॥ अस्यक्षेत्रस्यमहिमाकोपिवाचामगोचरः ॥ उद्देशमात्रमाख्या यिमयातेप्रीतिकाम्यया ॥ २४ ॥ चतुर्दशानांलिंगानांश्रुत्वाख्यानानिसत्तमः ॥ चतुर्दशसुलोकेषुपूजांप्राप्स्यत्यनुत्तमाम् ॥ १२५॥ इतिश्रीस्कांदे महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेविश्वकर्मेशप्रादुर्भावोनामषडशीतितमोऽध्यायः ॥ ८६ ॥

पिशाचभोगानंतरमित्यर्थः ॥ चांतेधर्मरतिरितिक्वचित् ॥ २२ ॥ २३ ॥ २४ ॥ १२५ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांषडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्ताशीतितमेध्यायेदक्षेशोत्पत्तिसिद्धये ॥ सर्वर्द्धिविपुलस्तावद्दक्षयज्ञोनिरूप्यते ॥ १ ॥ दक्षेशादीनियानिलिंगानितन्महिमानंचप्रष्टुमुक्तमनुवदन्प्रीतिमाविष्करोति सर्वज्ञेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ प्रष्टव्यमर्थमाह ॥ स्कंदेति ॥ हेस्कंदओंकारादीनियानिचतुर्दशलिंगानितान्युक्तानीहइदानींदक्षेश्वरादीनियान्यष्टौलिंगानिअशेषतस्तत्प्रभावंचसमाचक्ष्वेत्यर्थः ॥ यद्वा दक्षेश्वरादीनियान्यष्टौ लिंगानियानीहचपूर्वमुक्तानिअमृतेशादीनिचतुर्दशअशेषतःओंकारादिशैलेशादिचतुर्दशद्वयमध्येपियान्यनुक्तानितानितत्प्रभावंचसमाचक्ष्वेति ॥ ४ ॥ संशयमाह ॥ योदक्षइति ॥ ५ ॥

॥ अगस्त्यउवाच ॥ ॥ सर्वज्ञसूनोषड्वक्त्रसर्वार्थकुशलप्रभो ॥ प्रादुर्भावंनिशम्यैषांलिंगानांमुक्तिदायिनाम् ॥ १ ॥ नितरांपरितृप्तोस्मिसुधांपीत्वेव निर्जरः ॥ ओंकारप्रमुखैर्लिंगैरिदमानंदकाननम् ॥२॥ आनंदमेवजनयेदपिपापजुषामिह ॥ परानंदमहंप्राप्तःश्रुत्वैतल्लिंगकीर्तनम् ॥३॥ जीवन्मुक्तइवासं हिक्षेत्रतत्त्वश्रुतेरहम् ॥ स्कंददक्षेश्वरादीनिलिंगानीहचतुर्दश ॥ यान्युक्तानिसमाचक्ष्वतत्प्रभावमशेषतः ॥ ४ ॥ योदक्षोगर्हयामासमध्येदेवसभंविभुम् ॥ सकथंलिंगमीशस्यप्रत्यस्थापयदद्भुतम् ॥५॥ इतिश्रुत्वाशिखिरथःकुंभयोनेरुदीरितम् ॥ सूतसंकथयामासदक्षेश्वरसमुद्भवम् ॥६॥ ॥ स्कंदउवाच ॥ आकर्णयमुनेवच्मिकथांकल्मषहारिणीम् ॥ पुरश्चरणकामोसौदक्षःकाशींसमाययौ ॥ ७ ॥ छागवक्त्रोविरूपास्योदधीचिपरिधिक्कृतः ॥ प्रायश्चित्तवि धानार्थमुपदिष्टःस्वयंभुवा ॥ ८ ॥ एकदादेवदेवस्यसेवार्थंशशिमौलिनः ॥ कैलासमगमद्विष्णुःपद्मयोनिपुरस्कृतः ॥ ९ ॥ इंद्रादयोलोकपालाविश्वेदे वामरुद्गणाः ॥ आदित्यावसवोरुद्राःसाध्याविद्याधरोरगाः ॥ १० ॥ ऋषयोऽप्सरसोयक्षागंधर्वाःसिद्धचारणाः ॥ तैर्नतोदेवदेवेशःपरिहृष्टतनूरुहैः ॥११॥ स्तुतश्चनानास्तुतिभिःशंभुनापिकृतादराः ॥ विविशुश्चासनश्रेण्यांतन्मुखासक्तदृष्टयः ॥ १२ ॥ अथतेषूपविष्टेषुशंभुनाविष्टरश्रवाः ॥ कृतहस्तपरिस्पर्श मानःपृष्टोमहादरम् ॥ १३ ॥ श्रीवत्सलांछनहरेदैत्यवंशदवानल ॥ कच्चित्पालयितुंशक्तिस्त्रिलोकीमस्त्यकुंठिता ॥ १४ ॥ दितिजान्दनुजान्दुष्टान्क च्चिच्छासिरणांगणे ॥ अपिकुद्धान्महीदेवान्मामिवप्रतिमन्यसे ॥ १५ ॥ बाधयारहितागावःकच्चित्संतिमहीतले ॥ स्त्रियःसंतिहिसुश्रीकाःपतिव्रतप रायणाः ॥ १६ ॥ विधियज्ञाःप्रवर्ततेपृथिव्यांबहुदक्षिणाः ॥ निराबाधंतपःकच्चिदस्तिशश्वत्तपस्विनाम् ॥ १७ ॥ निष्प्रत्यूहंपठंत्येवसांगान्वेदान्द्विजो त्तमाः ॥ महीपालाःप्रजाःकच्चित्पांतित्वमिवकेशव ॥ १८॥ स्वेषुस्वेषुचधर्मेषुकच्चिद्वर्णाश्रमास्तथा ॥ निष्ठावंतोहितिष्ठंतिप्रहृष्टेंद्रियमानसाः ॥ १९ ॥

इतिश्रुत्वेतिव्यासवाक्यम् ॥ ६ ॥कथायाउपोद्घातमाह पुरश्चरणेतिसार्धेन ॥ ७ ॥ ८ ॥ कथामेवाह ॥ एकदेति ॥ ९ ॥ इंद्रादयोप्यगमन् ॥ १० ॥ ११ ॥ १२ ॥ कृतोहस्तपरिस्पर्शनेनमानः पूजायस्यसः ॥ १३ ॥ कच्चित्किम् ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मंवेदाध्ययनजंब्राह्मणसंबंधीतिवा ॥ २० ॥ २१ ॥ प्रशासतिपालयंति ॥ दोषोहस्ताएवदंडास्तैःपालितारक्षिताः ॥ २२ ॥ २३ ॥ सौधंसुधयाधवलितंप्रासादम् ॥ २४ ॥ २५ ॥ क्रोधरयेण क्रोधवेगेनांधाहग्ज्ञानंयस्यसः ॥ २६ ॥ उक्तिमेवाह ॥ अतीवगर्वितोजातइत्यारभ्यसंप्रधार्येत्यतःप्राक्तनेनग्रंथेन ॥ तत्रेश्वरमधिक्षिपति अतीवेतिसार्धपंचदशभिः ॥ अधिक्षेपेप्रत्युक्तापिदक्षस्य भारतीश्रीविश्वनाथंस्तौति ॥ तत्रईश्वरस्यप्रत्यगात्मनोऽद्वितीयत्वसमर्थनार्थसंबंध्यभावंसंबंधिनिप्रमाणाभावेनाह ॥ कस्यचिदिति ॥ तदुक्तंस्वरूपप्रकरणेभगवत्पादैः ॥ अहमेकोनमेकश्चिन्नाहम न्यस्यकस्यचित् ॥ नतंपश्यामियस्याहंतंनपश्यामियोममेति ॥ २७ ॥ किंशब्दस्यप्रयोगेसर्वत्रकाक्वानञर्थोज्ञेयः ॥ अविषादीतिच्छेदः ॥ विषादरहितः ॥ सच्चिदानंदस्वरूपत्वात् ॥ वृषवाहनः

धूर्जटिःपरिपृच्छयेतिहृष्टवैकुंठनायकम् ॥ ब्रह्माणंचापिपप्रच्छब्राह्मंतेजःसमेधते ॥ २० ॥ सत्यमस्खलितंकच्चिदस्तित्रैलोक्यमंडपे ॥ तीर्थावरोधोनक्वा पिकेनचित्क्रियतेविधे ॥ २१ ॥ इंद्रादयःसुराःकच्चित्स्वेषुस्वेषुपुरेष्वहो ॥ राज्यंप्रशासतिस्वस्थाःकृष्णदोर्दंडपालिताः ॥ २२ ॥ प्रत्येकंपरिपृच्छयेशः सर्वानित्थंकृतादरान् ॥ पृष्ट्वागमनकार्यंचतेषांकृत्वामनोरथान् ॥ २३ ॥ विससर्जाथतान्सर्वान्देवःसौधंसमाविशत् ॥ गतेष्वथचदेवेषुस्वस्वधिष्ण्ये षुहृष्टवत् ॥ २४ ॥ मध्येमार्गंसचिंतोभूद्दक्षःसत्याःपितातदा ॥ अन्यदेवसमानंसमानंप्रापनचाधिकम् ॥ २५ ॥ अतीवक्षुब्धचित्तोभून्मंदरावाततोऽ ब्धिवत् ॥ उवाचचमनस्येतन्महाक्रोधरयांधदृक् ॥ २६ ॥ अतीवगर्वितोजातःसतींमेप्राप्यकन्यकाम् ॥ कस्यचिन्नाप्यसौप्रायोनकोस्यापिक्वचित्पुनः ॥ २७ ॥ किंवंश्यस्त्वेषकिंगोत्रःकिंदेशीयःकिमात्मकः ॥ किंवृत्तिःकिंसमाचारोविषादीवृषवाहनः ॥ २८ ॥ नप्रायशस्तपस्व्येषक्वतपःक्वास्त्रधार णम् ॥ नगृहस्थेषुगण्योसौश्मशाननिलयोयतः ॥ २९ ॥ असौनब्रह्मचारीस्यात्कृतपाणिग्रहस्थितिः ॥ वानप्रस्थ्यंकुतश्चास्मिन्नैश्वर्यमदमोहिते ॥ ३० ॥ नब्राह्मणोभवत्येषयतोवेदोनवेत्त्यमुम् ॥ शस्त्रास्त्रधारणात्प्रायःक्षत्रियःस्यान्नसोप्ययम् ॥ ३१ ॥ क्षतात्संत्राणनात्क्षत्रंतत्क्वास्मिन्प्रलयप्रिये ॥ वैश्यो पिनभवेदेषसदानिर्धनचेष्टनः ॥ ३२ ॥

वृषभूतोविष्णुर्वाहनंयस्यसः ॥ सर्वेश्वरत्वात् ॥ २८ ॥ तदुक्तंभागवते ॥ क्वतपः निवृत्ताधिकारत्वात् ॥ क्वास्त्रधारणमशरीरत्वात्अद्वितीयत्वाच्च ॥ श्मशानवदशिवमज्ञानंतस्यनिलयआश्रयः ॥ ॥ २९ ॥ कृतःसत्याजगज्जनन्याअघटनघटनापटीयस्यामहामायायाःपाणिग्रहःकरग्रहोविवाहइतियावत् ॥ तेनस्थितिर्यस्यसः ॥ मदयतीतिमदःकामः ॥ ऐश्वर्येणमदोमोहितोविचित्ततांनीतो येनसः ॥ स्वतःप्राप्तसर्वकामत्वात् ॥ ३० ॥ अमुंश्रीरुद्रम् ॥ यतोवाचोनिवर्ततेअप्राप्यमनसासहेतिश्रुतेः ॥ ३१ ॥ तत्क्षत्रंक्षत्रियजातिः ॥ निर्धनानांचेष्टनंचेष्टायस्यसः ॥ लीलाविग्रहत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमग्रेपियथायोग्यंहेतुर्मंतव्यः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ तथाचश्रुतिः ॥ अथातआदेशोनेतिनेतितदेतद्ब्रह्मास्थूलमनणुअनामागोत्रमित्यादिः ॥ भागवतेच ॥ सवैनदेवासुरमर्त्यतिर्यङ्नस्त्रीनषंढोनपुमान्नजंतुः ॥ नायंगुणःकर्मनसन्नचासन्निषेधशेषोजयतादशेषइत्यादि ॥ दशश्लोक्यांच ॥ नवर्णाश्रमाचारधर्माइत्यादि ॥ उपसंहरति ॥ किंवहूक्तेनेति ॥ ॥ ३९ ॥ धाष्टर्यमहत्त्वम् ॥ ४० ॥ मातापितृविवर्जिताःतयोरभावेशिक्षाभावात् ॥ निर्गुणाःगुणातीतत्वात् ॥ अकुलीनागोत्ररहितत्वात् ॥ कर्मभ्रष्टानिवृत्ताधिकारत्वात् ॥ निरंकुशाःस्वतंत्राई

शूद्रोपिनभवेत्प्रायोनागयज्ञोपवीतवान् ॥ एवंवर्णाश्रमातीतःकोसौसम्यङ्नकीर्त्यते ॥ ३३ ॥ सर्वःप्रकृत्याज्ञायेतस्थाणुःप्रकृतिवर्जितः ॥ प्रायशः पुरुषोनासावर्धनारीवपुर्यतः ॥ ३४ ॥ योषापिनभवेदेषयतोसौश्मश्रुलाननः ॥ नपुंसकोपिनभवेल्लिंगमस्ययतोर्च्यते ॥ ३५ ॥ बालोपिनभवत्ये षयतोऽयंबहुवार्षिकः॥ अनादिवृद्धोलोकेपुगीयतेचोग्रएषयत् ॥ ३६ ॥ अतोयुवत्वंसंभाव्यंनात्रनूनंचिरंतने ॥ वृद्धोऽपिनभवत्येषजरामरणवर्जितः ॥ ३७ ॥ ब्रह्मादीन्संहरेत्प्रांतेतथापिचनपातकी ॥ पुण्यलेशोपिनास्त्यस्मिन्ब्रह्ममौलिच्छिदिक्रुधा॥ ३८ ॥ अस्थिनेपथ्यवतिचक्रशुचित्वंविवासस्ि ॥ किंवहूक्तेननोकिंचिज्ज्ञायतेऽस्यविचेष्टितम् ॥ ३९ ॥ अहोधाष्टर्यंमहद्दृष्टंजटिलस्याद्यचाद्भुतम् ॥ यदासनान्नोत्थितोसौदृष्ट्वामांश्वशुरंगुरुम् ॥ ४० ॥ एवंभूताभवंत्येवमातापितृविवर्जिताः ॥ निर्गुणाअकुलीनाश्चकर्मभ्रष्टानिरंकुशाः ॥ ४१ ॥ स्वच्छंदचारिणोऽनाथाःसर्वत्रस्वाभिमानिनः ॥ अकिंचनाअ पिप्रायस्तथापीश्वरमानिनः ॥ ४२ ॥ जामातॄणांस्वभावोयंप्रायशोगर्वभाजनम् ॥ किंचिदैश्वर्यमासाद्यभवत्येवनसंशयः ॥ ४३ ॥ द्विजराजःसगर्वि ष्ठोरोहिणीप्रेमनिर्भरः ॥ कृत्तिकादिषुचास्नेहीमयाशप्तःक्षयीकृतः ॥ ४४ ॥ अस्याहंगर्वसर्वस्वंहरिष्याम्येवशूलिनः ॥ यथावमानितश्चाहमनेनास्यगृहं गतः ॥ ४५ ॥ तथास्याहंकरिष्यामिमानहानिंचसर्वतः ॥ संप्रधार्येतिबहुशःसतुदक्षःप्रजापतिः ॥ ४६ ॥ प्राप्यस्वभवनंदेवानाजुहावसवासवान् ॥ अहं यियक्षुर्यूयंमेयज्ञसाहाय्यकारिणः ॥ ४७ ॥ भवंतुयज्ञसंभारानानयंतुत्वरान्विताः ॥ श्वेतद्वीपमथोगत्वाचक्रेचक्रिणमच्युतम् ॥ ४८ ॥ महाक्रतूपद्रष्टारं यज्ञपूरुषमेवच ॥ तस्यर्त्विजोभवन्सर्वऋषयोब्रह्मवादिनः ॥ ४९ ॥ प्रावर्तततततस्तस्यदक्षस्यचमहाध्वरः ॥ दृष्ट्वादेवनिकायांश्चतस्मिन्दक्षमहाध्वरे ॥ ५० ॥ अनीश्वरांस्ततोवेधाव्याजंकृत्वागृहंययौ ॥ दधीचिरथसंवीक्ष्यसर्वांस्त्रैलोक्यवासिनः ॥ ५१ ॥

श्वरत्वात् ॥ ४१ ॥ अतएवस्वच्छंदचारिणः ॥ नाथाःसर्वस्वामिनः ॥ पक्षेअनाथाः ॥ स्वाभिमानिनआत्माभिमानिनः ॥ पक्षेऽहंकाराभिमानिननः ॥ अकिंचनानाविद्यतोकिंचनये भ्यस्ते ॥ ईश्वरमानिनोब्रह्मादिपूजाभाजः ॥ सर्वत्राक्षेपःस्पष्टएव ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ अनीश्वरान्महादेवरहितान् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५२ ॥ शुभोदर्कंशुभोत्तरफलम् ॥ ५३ ॥ ५४ ॥ नेदसिनेदीयसिइदानींतनेनिकटइतिवा ॥ नास्तिक्रतुसमोरिपुरिति ॥ तदुक्तम् ॥ अन्नहीनोदहेद्राष्ट्रंमंत्रहीनस्तुऋत्विजम् ॥ यजमानमदाक्षिण्यो नास्तिक्रतुसमोरिपुरिति ॥ ५५ ॥ ५६ ॥ यज्ञपुमान्विष्णुः ॥ असावित्यंगुल्यानिर्दिशति ॥ एषभृगुःसाक्षाद्ब्रह्मेतिसंबंधः ॥ ५७ ॥ ५८ ॥ प्रसूतेर्नामांतरंशतरूपा ॥ कल्पभेदेनवा नामभेदः ॥

दक्षयज्ञेसमायातान्सतीश्वरविवर्जितान्॥प्राप्तसंमानसंभारान्वासोलंकृतिपूर्वकम्॥५२॥दक्षस्यहिशुभोदर्कमिच्छन्प्रोवाचचेतिवै ॥ ॥ दधीचिरुवाच ॥ दक्षप्रजापतेदक्षसाक्षाद्धातृस्वरूपधृक् ॥ ५३ ॥ नचास्तितवसामर्थ्यंकापिकस्यापिनिश्चितम् ॥ यादृशःक्रतुसंभारस्तवचेहसमीक्ष्यते ॥ ५४ ॥ नतादृङ्नेदसिप्रायःक्वापिज्ञातोमहामते ॥ क्रतुस्तुनैवकर्तव्योनास्तिक्रतुसमोरिपुः ॥ ५५ ॥ कर्तव्यश्चेत्तदाकार्यःस्याच्चेत्संपत्तिरीदृशी ॥ साक्षादग्निःस्वयंकुंडे साक्षादिंद्रादिदेवताः ॥५६॥ साक्षाच्चसर्वेमंत्रावैसाक्षाद्यज्ञपुमानसौ ॥ आचार्यपदवीमेषदेवाचार्यःस्वयंचरेत् ॥ साक्षाद्ब्रह्मास्वयंचैषभृगुर्वैकर्मकांडवित् ॥ ॥ ५७ ॥ अयंपूषाभगस्त्वेषइयंदेवीसरस्वती ॥ एतेचसर्वदिक्पालायज्ञरक्षाकृतःस्वयम् ॥ ५८॥ त्वंचदीक्षांशुभांप्राप्तोदेव्याचशतरूपया ॥ जामातात्वेषतेधर्मःपत्नीभिर्दशभिःसह ॥ ५९ ॥ स्वयमेवहिकुर्वीतधर्मकार्यंप्रयत्नतः ॥ ओषधीनामयंनाथस्तवजामातृपूत्तमः ॥ ६० ॥ सप्तविंशतिभिःसार्धंपत्नीभिस्तवकार्यकृत् ॥ ओषधीःपूरयेत्सर्वाद्विजराजोमहासुधीः ॥६१॥ दीक्षितोराजसूयस्यदत्तत्रैलोक्यदक्षिणः॥मारीचःकश्यपश्चासौप्रजापतिषुसत्तमः ॥ त्रयोदशमिताभिश्चभार्याभिस्तवकार्यकृत् ॥ ६२ ॥ हविःकामदुघासूतेकल्पवृक्षःसमित्कुशान् ॥ दारुपात्राणिसर्वाणिशकटंमंडपादिकम् ॥ ६३ ॥ विश्वकर्माप्यलंकारान्कुरुतेभ्यागतर्त्विजाम् ॥ वसूनिचाऽपिवासांसिवसवोष्टौददत्यपि ॥ ६४ ॥ स्वयंलक्ष्मीरलंकुर्याद्यावैचात्रसुवासिनीः ॥ ६५ ॥ सर्वेसुखायमेदक्षवीक्षमाणस्यसर्वतः ॥ एकंदुःखाकरोत्येवयत्त्वंविस्मृतवानसि ॥ ६६ ॥ जीवहीनोयथादेहोभूषितोपिनशोभते ॥ तथेश्वरंविनायज्ञः श्मशानमिवलक्ष्यते ॥ ६७ ॥ इत्थंदधीचिवचनंश्रुत्वादक्षःप्रजापतिः ॥ भृशंजज्वालकोपेनहविषाकृष्णवर्त्मवत् ॥ ६८ ॥ पूर्वंस्तुत्यातिसंहृष्टोहृष्टोयोसौदधीचिना ॥ सएवचापिकोपाग्निमुद्वमन्वीक्षितोमुखात् ॥ ६९ ॥ प्रत्युवाचाथतंविप्रंवेपमानांगयष्टिकः ॥ दक्षःप्रजापतीरोषाज्जिघांसुरिवतंद्विजम् ॥ ७० ॥ ॥ दक्षउवाच ॥ ॥ ब्राह्मणोसिदधीचेत्वंकिंकरोमितवात्रवै ॥ दीक्षामहमहोप्राप्तःकर्तुंनायातिकिंचन ॥ ७१ ॥ भवान्केनसमाहूतोयदत्रागान्महाजडः ॥ आगतोपिहिकेनत्वंपृष्टइत्थंब्रवीषियत् ॥ ७२ ॥

एवमन्यत्रापि ॥ तेतव ॥ ५९ ॥ कुर्वीतकरोति ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ अभ्यागताश्चऋत्विजश्चतेषाम् ॥ वसूनिधनानि ॥ ६४ ॥ सुवासिनीःकुलवधूः ॥ ६५ ॥ दुःखाकरोतिदुःखंदुःखिनंकरोति ॥ ६६ ॥ यद्यस्मात् ॥ अग्रिमेणान्वयः ॥ यद्वा यत्श्रुतिस्मृतिप्रसिद्धंविश्वेश्वराख्यंपरंब्रह्मतद्विस्मृतवानसीत्यर्थः ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७३ ॥ ७४ ॥ ७५ ॥ अमंगलभुवाश्मशानस्थलया ॥ तयाप्रसिद्धया ॥ ७६ ॥ पितृकाननंश्मशानम् ॥ ७७ ॥ मंगलेतरभूमिरपितदेव ॥ ७८ ॥ ७९ ॥ विष्णुरपिशांभवीशक्तिरितिवेदेपठ्यते ॥ तमेववेदमर्थतःपठति ॥ वामांगमिति ॥ तदितरद्दक्षिणांगम् ॥ ८० ॥ दुर्वाससाश्रीशंकरांशेन ॥ तदुक्तंवैष्णवे ॥ दुर्वासाःशंकरस्यांशश्चचारपृथिवीमिमामिति ॥ ८१ ॥ ८२ ॥ श्वेतंश्वेतनामानंपाशयतोवध्नतः ॥ ८३ ॥ पार्ष्णिग्राहीपृष्ठरक्षकःसहायइतियावत् ॥ अधार्षीद्धर्षितवानंहार्षीदितियावत् ॥ ८४ ॥ संविदानाःसम्यग्जानानाअपितथापिप्रावर्तंत ॥ ८५ ॥

सर्वमंगलमांगल्योयत्रश्रीमानयंहरिः ॥ स्वयंवैयज्ञपुरुषःसमखःकिंश्मशानवत् ॥ ७३ ॥ यत्रवज्रधरःशक्रःशतयज्ञैकदीक्षितः ॥ त्रयस्त्रिंशतिकोटीनाममराणांपतिःस्वयम् ॥ ७४ ॥ तंत्वंचोपमिमीषेमुंश्मशानेनमहामखम् ॥ धर्मराट्चस्वयंयत्रधर्माधर्मैककोविदः ॥ ७५ ॥ श्रीदोस्तियत्रश्रीदातासाक्षाद्यत्राशुशुक्षणिः ॥ तंयज्ञमुपमासित्वममंगलभुवातया ॥ ७६ ॥ देवाचार्यःस्वयंयत्रक्रतोराचार्यतांगतः ॥ अभिमानवशात्तंत्वमाख्यासिपितृकाननम् ॥ ७७ ॥ यत्रार्त्विज्यंभजंतेऽमीवसिष्ठप्रमुखर्षयः ॥ तमध्वरंसमाचक्षेमंगलेतरभूमिवत् ॥ ७८ ॥ निशम्येतिमुनिःप्राहदधीचिर्ज्ञानिनांवरः ॥ सर्वमंगलमांगल्योभवेद्यज्ञपुमान्हरिः ॥ ७९ ॥ तथापिशांभवीशक्तिर्वेदेविष्णुःप्रपठ्यते ॥ वामांगंत्वष्टुराद्यस्यहरिस्तदितरद्विधिः ॥ ८० ॥ दीक्षितोयोश्वमेधानांशतस्यकुलिशायुधः ॥ दुर्वाससाक्षणेनापिनीतोनिःश्रीकतांहिसः ॥ ८१ ॥ पुनराराध्यभूतेशंप्रापैकाममरावतीम् ॥ यस्त्वयाधर्मराजोत्रकथितःक्रतुरक्षकः ॥ ८२ ॥ बलंतस्याखिलैर्ज्ञातंश्वेतंपाशयतःपुरा ॥ धनदस्त्र्यंबकसखस्तच्चक्षुश्चाशुशुक्षणिः ॥ ८३ ॥ पार्ष्णिग्राह्यभवद्रुद्रोदेवाचार्यस्यवैतदा ॥ यदातारामधार्षीत्सद्विजराजोऽतिसुंदरीम् ॥ ८४ ॥ तंविदंतिवसिष्ठाद्यास्तवार्त्विज्यंभजंतिये ॥ एकोरुद्रोनद्वितीयःसंविदानाअपीतिहि ॥ ८५ ॥ प्रावर्तंतर्पयोन्येपिगौरवात्तवतेक्रतौ ॥ यदिमेब्राह्मणस्यैकंशृणोषिवचनंहितम् ॥ ८६ ॥ तदाक्रतुफलाधीशंविश्वेशंत्वंसमाह्वय ॥ विनातेनक्रतुरसौकृतोप्यकृतएवहि ॥ ८७ ॥ सतितस्मिन्महादेवेविश्वकर्मैकसाक्षिणि ॥ तवापिचैषांसर्वेषांफलिष्यंतिमनोरथाः ॥ ८८ ॥ यथाजडानिबीजानिनफलंतिस्वयंतथा ॥ जडानिसर्वकर्माणिनफलंतीश्वरंविना ॥ ८९ ॥ अर्थहीनायथावाणीधर्महीनायथातनुः ॥ पतिहीनायथानारीशिवहीनातथाक्रिया ॥ ९० ॥ गंगाहीनायथादेशाःपुत्रहीनायथागृहाः ॥ दानहीनायथासंपच्छिवहीनातथाक्रिया ॥ ९१ ॥ मंत्रिहीनंयथाराज्यंश्रुतिहीनायथाद्विजाः ॥ योषाहीनंयथासौख्यंशिवहीनातथाक्रिया ॥ ९२ ॥ दर्भहीनायथासंध्यातिलहीनंचतर्पणम् ॥ हविर्हीनोयथाहोमःशिवहीनातथाक्रिया ॥ ९३ ॥

किंतत्रकारणंतदाह ॥ तवगौरवादिति ॥ ८६ ॥ ८७ ॥ विश्वकर्मैकसाक्षिणिसर्वव्यापारमुख्यद्रष्टरि ॥ ८८ ॥ ८९ ॥ भक्त्युद्रेकाद्दक्षस्यरुच्युत्पादनार्थंवाबहुधादृष्टांतयति अर्थहीनेत्यादिना ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षोपिनिपुणोपिचतुरोपीतियावत् ॥ वचनाग्रहणेहेतुमाह ॥ शंभोरिति ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ महामंगलमूर्तिनासर्वमंगलस्वरूपेणेतिवास्तवार्थः ॥ १ ॥ क्रतुमुख्यानीत्यत्रतदुत्तरमाह ॥ यथार्थेति ॥ २ ॥ विपक्षेबाधकमाह ॥ तदधीनाश्चेति ॥ ३ ॥ ईश्वरइत्यादेरुत्तरमाह ॥ सामान्येति ॥ असंदिग्धःसंदेहरहितः ॥ प्रतिभूर्दाता ॥ ४ ॥

इत्थंदधीचिनाख्यातंजग्राहवचनंनतत् ॥ दक्षोदक्षोपितत्रैवशंभोर्मायाविमोहितः॥ ९४ ॥ प्रोवाचचभृशंक्रुद्धःकाचिंतातवमेक्रतोः ॥ क्रतुमुख्यानिसर्वाणियानिकर्माणिसर्वतः ॥ ९५ ॥ तानिसिद्ध्यंतिनियतंयथार्थकरणादिह ॥ अयथार्थविधानेनसिद्ध्येत्कर्मापिनेशितुः ॥ ९६ ॥ स्वकर्मसिद्ध्येचाथ सर्वएवहिचेश्वरः ॥ ईश्वरःकर्मणांसाक्षीयत्त्वयापीतिभाषितम् ॥ ९७ ॥ तत्तथास्तुपरंसाक्षीनार्थंदद्याच्चकुत्रचित् ॥ ९८ ॥ जडानिसर्वकर्माणिनफलंतीश्वरंविना ॥ यदुक्तंभवतातत्राप्यहोदृष्टांतयाम्यहम् ॥ ९९ ॥ जडान्यपिचबीजानिकालंसंप्राप्यचात्मनः ॥ अंकूरयंतिकालाच्चपुष्प्यंतिचफलंतिच ॥ १०० ॥ विनापीशंतथाकर्मस्वयंकालात्फलत्यहो ॥ किमीश्वरेणतेनात्रमहामंगलमूर्तिना ॥ १ ॥ ॥ दधीचिरुवाच ॥ ॥ यथार्थकरणात्सिद्धमपिकार्यंकदाचन ॥ ईश्वरप्रातिकूल्याच्चसिद्धमेवाशुनश्यति ॥ २ ॥ ईश्वरेच्छाबलात्कर्मकृतमप्यविधानतः ॥ संसिद्ध्येत्तदधीनाश्चकथंसर्वइहेश्वराः ॥ ३ ॥ सामान्यसाक्षिवन्नेशःसर्वेषांसर्वकर्मणाम् ॥ साक्षीभवेदसंदिग्धःफलस्यप्रतिभूरपि ॥ ४ ॥ भूजलादिस्वरूपेणबीजमाविश्यसर्वकृत् ॥ स्वयंकालस्वरूपेणविदध्यादंकुरोदयम् ॥ ५ ॥ यत्त्वयोक्तंविनापीशंकालेकर्मफलेत्स्वयम् ॥ सएवकालोभगवान्सर्वकर्तामहेशिता ॥ ६ ॥ अन्यच्चभवताप्रोक्तंतदेकंतथ्यमेवतत् ॥ किमीश्वरेणतेनात्रमहामंगलमूर्तिना ॥ ७ ॥ येमहांतोभवंत्येवयेचमंगलमूर्तयः ॥ ईश्वराख्याचयेष्वस्तिकिंतैरत्रतवांतिके ॥ ८ ॥ उत्तरादुत्तरंचेतिप्रत्युत्तरयतिद्विजे ॥ दधीचौचुक्रुधेऽत्यंतंदक्षोगर्वातिसुश्रिया ॥ ९ ॥ आदिदेशसमीपस्थानालोक्यपरितस्त्विति ॥ ब्राह्मणापसदंचामुंपरिदूरयताशुवै ॥ ११० ॥ अमुष्मादध्वरश्रेष्ठादवरिष्ठमनोगतम् ॥ इत्थंदधीचिराकर्ण्यप्रोवाचप्रहसन्निव ॥ ११ ॥ किंमांदूरयसेमूढदूरीभूतोभवानपि ॥ सर्वेभ्योमंगलेभ्यश्चससैवैरेभिःसमंध्रुवम् ॥ १२ ॥

जडानीत्यादिनायद्दृष्टांतितिंतद्विघटयति ॥ भूजलादीति ॥ ५ ॥ विनापीशमितियदुक्तंतदनूद्यदूषयति ॥ यत्त्वयोक्तमिति ॥६ ॥ किमीश्वरेणेतियदुक्तंतदनूद्यस्वीकरोति ॥ अन्यच्चेति ॥ ७ ॥ ८ ॥ दक्षस्यउत्तरादुत्तरमनेकमुत्तरंप्रत्युत्तरयाति ॥ निराकृतवति ॥ चुक्रुधेक्रोधंकृतवान् ॥९॥ ब्राह्मणाअपसदाअधमायस्मात्तम् ॥११०॥ नवरिष्ठःश्रेष्ठोयस्मात्तस्मिन्मनोगतंयस्यतम् ॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतेइतिदक्षस्यसोपहासंसंबोधनम् ॥ १३ ॥ भवानगस्त्यः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ मानभुवःपूजाधाराः ॥ १९ ॥ तारेणोच्चेन ॥ १२० ॥ २१ ॥ पिचंडिलाः स्थूलोदराः ॥ २२ ॥ कुल्याःसरितः ॥ द्रप्सस्येति ॥ द्रवीभूतगुडस्येत्यर्थः ॥ दध्नश्चेतिक्वचित् ॥ २३ ॥ २४ ॥ मार्गिताअन्विष्टाः ॥ मार्गणायाचकाः ॥ २५ ॥ व्यानशेव्याप्तवान् ॥

अकांडेक्रोधजोदंडस्तवमूर्ध्निपतिष्यति ॥ महेशितुस्त्रिजगतीपरिशास्तुःप्रजापते ॥ १३ ॥ इत्युक्त्वानिर्जगामाशुयज्ञवाटात्ततोद्विजः ॥ तस्मिन्निर्यातिनिर्यातोदुर्वासाश्च्यवनोभवान् ॥ १४ ॥ उत्तंकउपमन्युश्चऋचीकोद्दालकावपि ॥ मांडव्योवामदेवश्चगालवोगर्गगौतमौ ॥१५॥ शिवतत्त्वविदोन्येपिदक्षयज्ञाद्विनिर्ययुः ॥ गतेदधीचौसानंदंप्रावर्ततमहामखः ॥१६॥ येस्थिताब्राह्मणास्तत्रतेभ्योद्विगुणदक्षिणाम् ॥ प्रादात्प्रजापतिर्दक्षस्त्वन्येभ्योप्यधिकंवसु ॥ १७ ॥ सर्वेजामातरस्तेनतोषिताभूरिशोधनैः ॥ कन्याश्चालंकृताःसर्वामहाविभवविस्तरैः ॥१८॥ ऋषिपत्न्योपिबहुशोदेवपत्न्योप्यनेकशः ॥ तथापुरांगनाःसर्वास्तेनमानभुवःकृताः ॥ १९ ॥ ब्रह्मघोषेणतारेणव्योमशब्दगुणंस्फुटम् ॥ कारितंतेनदक्षेणविप्राणांहृष्टचेतसाम् ॥ १२० ॥ अग्निर्मंदाग्निरभवत्तस्मिन्जुह्वतिदीक्षिते ॥ हविःपरिमलैनैवपरितृप्तादिगंगनाः ॥ २१ ॥ स्वाहाकारैर्वषट्कारैःसुराजाताःपिचंडिलाः ॥ रचितागिरयस्तेनसदन्नानांपदेपदे ॥२२॥ घृतकुल्याःकृतास्तेनमधुकुल्याःसहस्रशः ॥ महासरांसिपयसांद्रप्सस्यापिमहाह्रदाः ॥ २३ ॥ राशयश्चदुकूलानांरत्नानांशिखराणिच ॥ यज्ञवाटस्यवसुधास्वर्णरूप्यमयीकृता ॥ २४ ॥ नलभ्यंतेक्रतौतस्यमार्गिताअपिमार्गणाः ॥ हृष्टाःपुष्टाःसमभवन्नपितत्परिचारकाः ॥ २५ ॥ ध्वनिर्मंगलगीतानांव्यानशेगगनांगणम् ॥ जहृषेचाप्सरोवृंदैर्गंधर्वैर्मुमुदेतराम् ॥ २६ ॥ विद्याधरैर्ननंदेचवसुधाववृधेभृशम् ॥ महाविभवसंभारेतस्मिन्दाक्षेमहाक्रतौ ॥ इत्थंप्रवृत्तेऽथमुनिःकैलासंनारदोययौ ॥१२७॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदक्षयज्ञप्रादुर्भावोनामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥ ॥ अगस्त्यउवाच ॥ ॥ शिवलोकंसमासाद्यमुनिनाब्रह्मसूनुना ॥ किंचक्रेब्रूहिषड्वक्त्रकथांकौतुकशालिनीम् ॥ १ ॥ स्कंदउवाच ॥ ॥ शृणुकुंभजवक्ष्यामिनारदेनमहात्मना ॥ यत्कृतंतत्रगत्वाशुकैलासंशंकरालयम् ॥ २ ॥ मुनिर्गगनमार्गेणप्राप्यतद्धामशांभवम् ॥ दृष्ट्वाशिवौप्रणम्याथशिवेनविहितादरः ॥ ३ ॥

जहृषेसंहर्षंचक्रे ॥ मुमुदेतरामतिशयेनसहर्षंचक्रे ॥२६॥ ननंदेसमृद्धंचक्रेगगनांगणमित्येव ॥ दाक्षेदक्षसंबंधिनि ॥ १२७ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥छ॥ ॥ अष्टाशीतितमेऽध्यायेसत्यादेहविसर्जनम् ॥ वर्ण्यतेत्यद्भुततरंवैराग्यप्रतिपादकम् ॥ १ ॥ कैलासंनारदोययावित्युक्तंतत्रपृच्छति ॥ शिवलोकमिति ॥ १ ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षाभ्यांपाशकाभ्याम् ॥ द्वंद्वाभ्यामितिपाठेपिसएवार्थः ॥ ४ ॥ क्रीडालीलातद्देवाह ॥ मासाइति ॥ सारिफलकेसारिफलनिमित्तम् ॥ ५ ॥ मासेयाःशुक्लाःशुक्लेतराःकृष्णाश्चद्विपंचदशात्रिंश त्तिथयस्ताःसारिकाःफलकाःवलानीतिप्रसिद्धाइत्यर्थः ॥ अक्षयुग्मंपाशकयुगलम् ॥ अयनेदक्षिणोत्तरे ॥६॥ ग्लहौपणौ ॥ ७ ॥ खेलसमयःक्रीडाकालः ॥ उपसंहरति ॥ इत्थमिति ॥ ८ ॥ तथा पिलीलाविग्रहधारिणोर्युवयोर्व्यवहारगोचरेऽक्षक्रीडायांजयपराजयौनस्तइत्याह ॥ नदेवीति ॥ किंचक्रेइतियत्पृष्टंतदाह ॥ किंचिदिति ॥९॥ अवबुध्यतिअवबुध्यते ॥१०॥ ननुगुणवान्शरीरीकथंमाना पमानयोर्दूरेतिष्ठतितत्राह ॥ लीलात्मेति ॥ यद्यपिमायाख्ययात्वयाशक्त्याऽयंलीलाविग्रहोगुणवांश्चतथापिविचाराद्वेदांततात्पर्यावधारणादतिनिर्गुणःअतएवसृष्ट्यादिकर्माणिकुर्वन्नापितैःकर्मभिर्न

तदुद्दिष्टासनंभेजेपश्यंस्तत्क्रीडनंपरम् ॥ क्रीडंतौतौतुचाक्षाभ्यांयदानचाविरेमतुः ॥ ४ ॥ तदौत्सुक्येनसमुनिःप्रेर्यमाणउवाचह ॥ ॥ नारदउवाच ॥ ॥ देवदेवतवक्रीडाखिलंब्रह्मांडगोलकम् ॥ मासाद्वादशयेनाथतेसारिफलकेगृहाः ॥ ५ ॥ कृष्णाःकृष्णेतरायावैतिथयस्ताश्चसारिकाः ॥ द्विपंचदशमासे यास्त्वक्षयुग्मंतथायने ॥ ६ ॥ सृष्टिप्रलयसंज्ञौद्वौग्लहौजयपराजयौ ॥ देवीजयेभवेत्सृष्टिरसृष्टिर्धूर्जटेर्जये ॥ ७ ॥ भवतोःखेलसमयोयःसास्थिति रुदाहृता ॥ इत्थंक्रीडैवसकलमेतद्ब्रह्मांडमीशयोः ॥ ८ ॥ नदेवीजेष्यतिपतिंनेशःशक्तिंविजेष्यति ॥ किंचिद्विज्ञप्तुकामोस्मितन्मातरवधार्यताम् ॥ ९ ॥ देवःसर्वज्ञनाथोपिनाकिंचिदवबुध्यति ॥ मानापमानयोर्यस्मादसौदूरेव्यवस्थितः ॥ १० ॥ लीलात्मागुणवानेषविचारादतिनिर्गुणः ॥ कुर्वन्नपिहिकर्मा णिबाध्येतनैवकर्मभिः ॥ ११ ॥ मध्यस्थोपिहिसर्वस्यमाध्यस्थ्यमवलंबते ॥ सर्वत्रायंमहेशानोमित्राऽमित्रसमानदृक् ॥ १२ ॥ त्वंशक्तिरस्यदेवस्यसर्वे षांमान्यभूःपरा ॥ दक्षस्यापित्वयामानोदत्तोपत्यनिमित्तकः ॥ १३ ॥ परंत्वंसर्वजगतांजनयित्र्येकिकाध्रुवम् ॥ त्वत्तआविर्भवंत्येवधातृकेशववासवाः ॥ ॥ १४ ॥ त्वमात्मानंनजानासित्र्यक्षमायाविमोहिता ॥ अतएवहिमेचित्तंदुनोत्यतितरांसति ॥ १५ ॥ अन्याअपिहियाःसत्यःपातिव्रत्यपरायणाः ॥ ताभर्तृचरणौहित्वाकिंचिदन्यन्नमन्वते ॥ १६ ॥ अथवास्तामियंवार्ताप्रस्तुतंप्रब्रवीम्यहम् ॥ अद्यनीलगिरेस्तस्माद्धरिद्वारसमीपतः ॥ १७ ॥ अपूर्व मिवसंवीक्ष्यपरिप्राप्तस्तवांतिकम् ॥ अत्याश्चर्यविषादाभ्यांकिंचिद्वक्तुमिहोत्सुकः ॥ १८ ॥ आश्चर्यहेतुरेवायंयत्पुंजातंत्रयीतले ॥ तद्दृष्टंसकलत्रंचदक्ष स्याध्वरमंडपे ॥ १९ ॥ सालंकारंसमानंचसानंदमुखपंकजम् ॥ विस्मृताखिलकार्यंचदक्षयज्ञप्रवर्तकम् ॥ २० ॥ विषादेकारणंचैतद्यतोजातमिदंज गत् ॥ यस्मिन्प्रवर्ततेयत्रलयमेष्यतिचध्रुवम् ॥ २१ ॥ तदेवतत्रनोदृष्टंभवद्वंद्वंभवापहम् ॥ प्रायोविषादजनकंभवतोर्यददर्शनम् ॥ २२ ॥

लिप्यतइति ॥ ११ ॥ तथापिलीलाविग्रहावस्थायांनिग्रहानुग्रहौभवेतामेवनेत्याह ॥ मध्यस्थोपिउदासीनएवेत्यर्थः ॥ तत्रहेतुमाह ॥ सर्वत्रेति ॥ १२ ॥ १३ ॥ परंकेवलम् ॥ एकिकामुख्या ॥ ॥ १४ ॥ त्वंकथंभूता ॥ त्र्यक्षमायास्वयमेवविमोहिता ॥ ऐकपद्येपिसएवार्थः ॥ दुनोतिव्यथते ॥ १५ ॥ कैमुत्यन्यायमाह ॥ अन्याअपीति ॥ मन्वतेमन्यंते ॥ जानतइतिक्वचित् ॥ १६ ॥ नीलगिरेःपुरुषोत्तमात्सकाशात् ॥ समीपतःसमीपे ॥ हरिद्वारंमायापुरी ॥ १७ ॥ १८ ॥ पुंजातंपुरुषसमुदायः ॥ पुंमात्रंयत्तुजातमितिचक्वचित् ॥ १९ ॥ २० ॥ २१ ॥ भवद्वंद्वंभवश्चभवानी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतयोर्युगलम् ॥ २२ ॥ तद्भवतोर्दर्शनम् ॥ अन्यर्त्किंतत्राह ॥ तच्चेति ॥ २३ ॥ द्रुहिणेनब्रह्मणा ॥ ययेयातंगतर्मितियावत् ॥ धिक्कृतस्तिरस्कृतः ॥ दधीचेनअकारांतोयम् ॥ २४ ॥ २५ ॥

तदेवनाभवत्तत्रसम्मभूदन्यदेवहि ॥ तच्चवक्तुंनशक्येततद्भक्तादक्षएवसः ॥ २३ ॥ तानिवाक्यानिचाकर्ण्यद्रुहिणेनययेततः ॥ महर्षिणादधीचेनधिक्कृतो नितरांहिसः ॥ २४ ॥ शप्तश्चवीक्षमाणानांदेवर्षीणांप्रजापतिः ॥ मयाचकर्णौपिहितौश्रुत्वातद्गर्हणागिरः ॥ २५ ॥ दधीचिनासमंकेचिद्दुर्वासःप्रमुखा द्विजाः ॥ भवनिंदांसमाकर्ण्यकियंतोपिविनिर्ययुः ॥२६॥ प्रावर्ततमहायागोहृष्टपुष्टमहाजनः ॥ तथाद्रष्टुंनशक्नोमिततआगतवानिह ॥ २७ ॥ भगिन्यो पिचयादेवितवतत्रसभर्तृकाः ॥ तासांगौरवमालोक्यनकिंचिद्वक्तुमुत्सहे ॥ २८ ॥ इतिदेवीसमाकर्ण्यसतीदक्षकुमारिका ॥ करादक्षौसमुत्सृज्यदध्यौकिं चित्क्षणंहृदि ॥ २९ ॥ उवाचचभवत्वेवंशरणंभवएवमे ॥ संप्रधार्येतिमनसिसतीदाक्षायणीततः ॥३०॥ द्रुतमेवसमुत्तस्थौप्रणनामचशंकरम् ॥ मौला वंजलिमाधायदेवीदेवंव्यजिज्ञपत् ॥३१॥ ॥ देव्युवाच ॥ ॥ विजयस्वांधकध्वंसिंस्त्र्यंबकत्रिपुरांतक ॥ चरणौशरणंतेमेदेह्यनुज्ञांसदाशिव ॥३२॥ मानिपेधीःप्रार्थयामियास्यामिपितुरंतिकम् ॥ उक्तेतिमौलिमदधादंधकारिपदांबुजे ॥ ३३ ॥ अथोक्ताशंभुनादेवीमृडान्युत्तिष्ठभामिनि ॥ किमपूर्णं तवास्त्यत्रवदसौभाग्यसुंदरि ॥ ३४ ॥ लक्ष्म्याअपिचसौभाग्यंब्रह्माण्यैकांतिरुत्तमा ॥ शच्यैनित्यनवीनत्वंभवत्यादत्तमीश्वरि ॥ ३५ ॥ त्वयाचश क्तिमानस्मिमहदैश्वर्यरक्षणे ॥ त्वांचशक्तिंसमासाद्यस्वलीलारूपधारिणीम् ॥ ३६ ॥ एतत्सृजामिपाम्यद्मित्वल्लीलाप्रेरितोंगने ॥ कुतोमांहातुमिच्छेस्त्वं ममवामार्धधारिणि ॥ ३७ ॥ शिवाशिवोदितंचेतिश्रुत्वाप्याहमहेश्वरम् ॥ जीवितेशविहायत्वांनक्वापिपरियाम्यहम् ॥३८॥ मनोमेचरणद्वंद्वेतवस्थास्य तिनिश्चलम् ॥ क्रतुंद्रष्टुंपितुर्यामिनैक्षियज्ञोमयाक्वचित् ॥३९॥ शंभुःकात्यायनीवाक्यमितिश्रुत्वातदाब्रवीत् ॥ क्रतुस्त्वयानेक्षितश्चेदाहरामिततःक्रतुम् ॥ ४० ॥ मच्छक्तिधारिणीत्वंवासृजैवान्यांक्रतुक्रियाम् ॥ अन्योयज्ञपुमानस्तुसंत्वन्येलोकपालकाः ॥ ४१ ॥ अन्यानाशुविधेहित्वमृषीनार्त्विज्यक र्मणि ॥ पुनर्जगाददेवीतिश्रुत्वाशंभोरुदीरितम् ॥ ४२ ॥

भवनिंदामीश्वरतिरस्कारम् ॥ भवासूर्क्षणमितिपाठेपिसएवार्थः ॥ २६ ॥ प्रावर्तत ॥ प्रावर्तिष्टेतिक्वचित् ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४३ ॥ प्रतिषेधेकृतेप्यहंयास्यामीत्याशयेनाह ॥ कइति ॥ ४४ ॥ ४५ ॥ पंगुवासरःशनैर्दिनम् ॥ ४६ ॥ सप्तदशोयोगोव्यतीपातः ॥ धनिष्ठावसुनक्षत्रम् ॥ ४७ ॥ ४८ ॥ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ कार्यार्थयात्रानिमित्तम् ॥ ५४ ॥ तदेवाह ॥ ननामेति ॥ अतएवनमस्कारप्रदक्षिणयोरकरणादेवगतासतीपुनरागताने त्यन्वयः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ विमानंविशिनष्टि सपादचतुर्भिः ॥ मनःपवनौचक्रेयस्य ॥ पंचास्यायुतसंयुक्तंसिंहदशसहस्रसंबद्धम् ॥ रत्नसानुःसुमेरुर्ध्वजदंडउच्छ्रितो

पितुर्यज्ञोत्सवोनाथद्रष्टव्योऽत्रमयाध्रुवम् ॥ देह्यनुज्ञांगमिष्यामिमामेकार्षीर्विचोन्यथा ॥ ४३ ॥ कःप्रतीपयितुंशक्तश्चेतोवाजलमेववा ॥ निम्नायाभ्युद्यतं नाथमाद्यमांप्रतिषेधय ॥ ४४ ॥ निशम्येतिपुनःप्राहसर्वज्ञोभूतनायकः ॥ मायाहिदेविमांहित्वागताचनमिलिष्यसि ॥ ४५ ॥ अद्यप्राचींयियासुंत्वां वारयेत्पंगुवासरः ॥ नक्षत्रंचतथाज्येष्ठातिथिश्चनवमीप्रिये ॥ ४६ ॥ अद्यसप्तदशोयोगोवियोगोद्यतनोऽशुभः ॥ धनिष्ठार्धसमुत्पन्नेतवताराद्यपंचमी ॥ ॥ ४७ ॥ मागादेविगताद्यत्वंनहिद्रक्ष्यसिमांपुनः ॥ पुनर्देवीबभाषेसायदिनाम्नाप्यहंसती ॥ ४८ ॥ तदातन्वंतरेणापिकारिष्येतवदासताम् ॥ ततोभवः पुनःप्राहकोवावारयितुंप्रभुः ॥ ४९ ॥ परिक्षुब्धमनोवृत्तिंस्त्रियंवापुरुषंतुवा ॥ पुनर्नदर्शनंदेविमयासत्यंब्रवीम्यहम् ॥५०॥ परंनदेविगंतव्यंमह्यामानधने च्छुभिः ॥ अनाहूततयाकांतेमातापितृगृहानपि ॥ ५१ ॥ यथासिंधुगतासिंधुर्नपुनःपरिवर्तते ॥ तथाद्यगंत्र्यानोजातुतवागमनमिष्यते ॥ ५२ ॥ ॥ देव्युवाच ॥ ॥ अवश्यंयद्यहंरक्तातवपादांबुजद्वये ॥ तथात्वमेवमेनाथोभविष्यसिभवांतरे ॥ ५३ ॥ इत्युक्त्वानिर्ययौदेवीकोपांधीकृतलोचना ॥ यियासुभिश्चकार्यार्थंयत्कर्तव्यंनतत्कृतम् ॥ ५४ ॥ ननाममहादेवंनचचक्रेप्रदक्षिणम् ॥ अतएवहिसादेवीनगतापुनरागता ॥ ५५ ॥ अप्रणम्यमहे शानमकृत्वापिप्रदक्षिणम् ॥ अद्यापिननिवर्ततेगताःप्राग्वासराइव ॥ ५६ ॥ तयाचरणचारिण्याराइयात्रिभुवनेशितुः ॥ अपितत्पावनंवर्त्ममेनेतिकठिनं बहु ॥ ५७ ॥ देवोपितांसतींयांतींदृष्ट्वाचरणचारिणीम् ॥ अतीवविव्यथेचित्तेगणांश्चाथसमाह्वयत् ॥ ५८ ॥ गणाविमानंनयतमनःपवनचक्रिणम् ॥ पंचास्यायुतसंयुक्तंरत्नसानुध्वजोच्छ्रितम् ॥ ५९ ॥ महावातपताकंचमहाबुद्ध्यक्षलक्षितम् ॥ नर्मदालकनंदाचयत्रेषादंडतांगते ॥ ६० ॥ छत्रीभूतौ चयत्रस्तःसूर्याचंद्रमसावपि ॥ यस्मिन्मकरतुंडंचवाराहीशक्तिरुत्तमा ॥ ६१ ॥ धूःस्वयंचापिगायत्रीरज्जवस्तक्षकादयः ॥ सारथिःप्रणवोयत्रकें कारःप्रणवध्वनिः ॥ ६२ ॥ अंगानिरक्षकायत्रवरूथश्छंदसांगणः ॥ इत्याज्ञप्तागणास्तूर्णंरथंनिन्युर्हराज्ञया ॥ ६३ ॥

यस्य ॥ क्वचिद्विशेषणस्यापिपूर्वनिपातः ॥ रत्नसानुलक्षणेनध्वजेनउच्छ्रितमुच्चमितिवा ॥ ५९ ॥ महावातःप्रवहःपताकायस्यतत् ॥ समहाबुद्धिर्महत्तत्त्वंसैवाक्षोमध्येदीर्घाकारकाष्ठंतेनलक्षितम् ॥ अलकनंदागंगा ॥ ईषादंडतांगतेप्राप्ते ॥६०॥ मकराकारंतुंडंमकरतुंडम् ॥६१॥ धूर्युगपृष्ठभागः ॥ केंकारःशब्दः ॥६२॥ अंगानिशिक्षाकल्पव्याकरणनिरुक्तच्छंदोज्योतींषि ॥ वरूथोरथगुप्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छंदसांगणःसप्तछंदांसीत्यर्थः ॥ ६३ ॥ तेजोविजृंभिणींसूर्यादितेजस्तिरस्कारिणीमित्यर्थः ॥ ६४ ॥ अंगणमजिरम् ॥ ६५ ॥ यज्ञवाटंयज्ञभूमिम् ॥ चकितंसशंकंयथास्यात्तथारक्षिभिर्वीक्षितासतीताःप्रस्वादीःसर्वाअसंभाष्यैवदक्षांतिकंगतेतिचतुर्थेनान्वयः ॥ ६६ ॥ ससाध्वसाःससंभ्रमाः ॥ ६७ ॥ ६८ ॥ पृष्टाउक्ता ॥ दृष्टेतिपाठेत्वदागमेभद्रंजातमित्यध्याहर्तव्यम् ॥ तुएव ॥ ६९ ॥ हेजनेतस्तात ॥ ७० ॥ अयीतिसानुकंपेसंबोधने ॥ अनन्येसर्वोत्कृष्टेइत्यर्थः ॥ ७१ ॥ यदहमिति ॥ निरीश्वरएवासावीश्वरइत्यहंतंयद्यादिसमाज्ञास्यंसम्यगवेदिषंतदात्वांकथमहंतस्मैरुद्रायादास्य

देव्यासनाथंतंकृत्वाविमानंपार्षदादिवि ॥ अनुजग्मुर्महादेवींदिव्यांतेजोविजृंभिणीम् ॥ ६४ ॥ साक्षणंत्र्यक्षरमणीवीक्ष्यदक्षसभांगणम् ॥ नभोऽगणाद्विमानस्थानतोवेगादवातरत् ॥ ६५ ॥ अविशद्यज्ञवाटंचचकितंरक्षिवीक्षिता ॥ कृतमंगलनेपथ्यांप्रसूंदृष्ट्वाकिरीटिनीम् ॥ ६६ ॥ सभर्तृकाश्चभगिनीर्नवालंकृतिशालिनीः ॥ साश्चर्याश्चसगर्वाश्चसानंदाश्चससाध्वसाः ॥ ६७ ॥ अचिंतितात्वनाहूताविमानाद्धरवल्लभा ॥ कथमेषापरिप्राप्ताक्षणमित्थंप्रपश्यतीः ॥ ॥ ६८ ॥ असंभाष्यापिताःसर्वागतादक्षांतिकंसती ॥ पित्रापृष्टातुमात्रापिभद्रंजातंत्वदागमे ॥ ६९ ॥ ॥ सत्युवाच ॥ ॥ यदिभद्रंजनेतर्मेसमागमनतोभवेत् ॥ कथंनाहंसमाहूतायथैतामेसहोदराः ॥ ७० ॥ ॥ दक्षउवाच ॥ ॥ अयिकन्येमहाधन्येह्यनन्येसर्वमंगले ॥ अयंतेनमनाग्दोषोदोषएषममैवहि ॥ ७१ ॥ तादृग्विधाययत्पत्येमयादत्ताज्ञबुद्धिना ॥ यदहंतंसमाज्ञास्यमीश्वरोसौनिरीश्वरः ॥ ७२ ॥ तदाकथमदास्यंत्वांतस्मैमायास्वरूपिणे ॥ अहंशिवाख्ययातुष्टोनजानेशिवरूपिणम् ॥ ७३ ॥ पितामहेनबहुधावर्णितोसौममाग्रतः ॥ शंकरोयमयंशंभुरसौपशुपतिःशिवः ॥ ७४ ॥ श्रीकंठोसौमहेशोऽसौसर्वज्ञोसौवृषध्वजः ॥ अस्मैकन्यांप्रयच्छत्वंमहादेवायधन्विने ॥ ७५ ॥ वाक्याच्छतधृतेस्तस्मात्तस्मैदत्तामयानघे ॥ नजानेतंविरूपाक्षमुक्षगंविषभक्षिणम् ॥ ७६ ॥ पितृकाननसंवासंशूलिनंचकपालिनम् ॥ द्विजिह्वसंगसुभगंजलाधारंकपर्दिनम् ॥ ७७ ॥ कलंकिकृतमौलिंचधूलिधूसरचर्चितम् ॥ क्वचित्कौपीनवसनंनग्नंवातूलवत्क्वचित् ॥ ७८ ॥ क्वचिच्चचर्मवसनंक्वचिद्भिक्षाटनप्रियम् ॥ विटंकभूतानुचरंस्थाणुमुग्रंतमोगुणम् ॥ ॥ ७९ ॥ रुद्रंरौद्रपरीवारंमहाकालवपुर्धरम् ॥ नृकरोटीपरिकरंजातिगोत्रविवर्जितम् ॥ ८० ॥

मदर्दिपमित्यर्थः ॥ ७२ ॥ अशिवरूपिणमितिच्छेदः ॥ वस्तुतःशिवरूपिणम् ॥ पितामहेनेति ॥ ब्रह्मणायद्यप्यसौबहुधावर्णितस्तथापितंनजानेइत्यग्रिमेणान्वयइतिवारतवोर्थः ॥ ७३ ॥ ७४ ॥ ॥ ७५ ॥ तत्रहेतुगर्भाणिविशेषणानि ॥ लीलयाविरूपाक्षम् ॥ उक्षगंवृषवाहनमित्यर्थः ॥ ७६ ॥ जलंजलदआधारोयस्यतंमेघवाहनत्वात् ॥ जलस्यगंगारूपस्यवाआधारः ॥ ७७ ॥ कलंकीचंद्रःकृतोमौलौयेनतम् ॥ धूलिधूसरचर्चितंधूलिभिर्धूसरत्वेनचर्चितंलिप्तम् ॥ ७८ ॥ विटंकाविरूपाभूताअनुचरायस्यतम् ॥ ७९ ॥ नृकरोटीमनुष्यास्थिपरिकरःखट्वांगादिकंयस्यतम् ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जानानोपिहिरण्यगर्भवचनाद्विद्वानपिप्रतारितस्तन्माययावंचितइतिवास्तवोऽर्थः ॥८१॥ पांसुलोधूलिर्भस्मवासएवपटस्तेनच्छन्नः ॥ महाशंखोमनुष्यास्थि ॥८२॥८३॥ अज्ञानंतत्कार्यंचहरतीतिहरःसर्वे पांसुक्तिदःक ॥ अमंगलालयःसंसाराश्रयोऽयमध्वरःक्वेतिवास्तवोर्थः ॥ ८४ ॥ ८५ ॥ इहमंगलेमंगलाभासेकर्मणिसपरमेश्वरःशूलधृक्सर्वसंहारकर्ताविषमेक्षणःचंद्रसूर्याग्निनेत्रःकथमर्होयोग्यः स्यादितिवास्तवोर्थः ॥ ८६ ॥ यथाश्रुतमादायदूनहृदयत्वंप्रत्युत्तरंच ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ वर्ष्मणःशरीरस्य ॥ ९३ ॥ प्राणितव्यंजीवितव्यम् ॥ विगर्हणायांश्रुतायां

नसम्यग्वेत्तितंकश्चिज्जानानोपिप्रतारितः ॥ किंबहूक्तेनतनयेसमस्तनयशालिनि ॥ ८१ ॥ क्वपांसुलपटच्छन्नोमहाशंखविभूषणः ॥ प्रबद्धसर्पकेयूरःप्रलंबितजटासटः ॥ ८२ ॥ डमड्डमरुकव्यग्रहस्ताग्रःखंडचंद्रभृत् ॥ तांडवाडंबररुचिःसर्वामंगलचेष्टितः ॥८३॥ मृडानिसहरःक्वाऽयमध्वरोमंगलालयः ॥ अतएवसमाहूतानेहत्वंसर्वमंगले ॥ ८४ ॥ दुकूलान्यनुकूलानिरत्नालंकृतयःशुभाः ॥ प्रागेवधारितास्तेत्रपश्यागत्यगृहाणच ॥ ८५ ॥ इहमंगलवेशेषु देवेंद्रेषुसशूलधृक् ॥ कथमर्होभवेच्चेतिमंगलेविषमेक्षणः ॥ ८६ ॥ इत्याकर्ण्यसतीसाध्वीजनेतुरुदितंतदा ॥ अत्यंतदूनहृदयावक्तुंसमुपचक्रमे ॥८७॥ सत्युवाच ॥ ॥ नाकार्णितंमयाकिंचित्त्वयिप्रब्रुवतिप्रभो ॥ पदद्वयींसमाकर्ण्यतांचतेकथयाम्यहम् ॥८८॥ नसम्यग्वेत्तितंकश्चिज्जानानोपिप्रतारितः ॥ एतत्सम्यक्त्वयाख्यायिकस्तंवेत्तिसदाशिवम् ॥ ८९ ॥ त्वंतुप्रतारितःपूर्वमधुनापिप्रतारितः ॥ कृत्वातेनचसंबंधमसंबद्धप्रलापभाक् ॥ ९० ॥ यादृशंवक्षितंशंभुंतादृशंयद्यमन्यथाः ॥ कुतोमामददास्तस्मैयंचकश्चनवेदन ॥ ९१ ॥ अथवातेनसंबंधेनहेतुर्भवतोमतिः ॥ तत्रहेतुरभूत्तातममपुण्यैकगौरवम् ॥ ॥ ९२ ॥ अथोक्तैर्वंबहुतरंत्वंजनेतास्यवर्ष्मणः ॥ श्रुतानेनचदेहेनपत्युःपरिविगर्हणा ॥ ९३ ॥ पुरश्चरणमेवैतद्यदस्यैवविसर्जनम् ॥ सुश्लाघ्यजन्मयातावत्प्राणितव्यंसुयोषिता ॥ यावज्जीवितनाथस्याश्रवणीयाविगर्हणा ॥ ९४ ॥ इत्युक्त्वाक्रोधदीप्ताग्नौमहादेवस्वरूपिणि ॥ जुहावदेहसमिधंप्राणरोधविधानतः ॥ ९५ ॥ ततोविवर्णतांप्राप्ताःसर्वेदेवाःसवासवाः ॥ नाग्निर्जज्वालचतथायथाज्याहुतिभिःपुरा ॥ ९६ ॥ मंत्राःकुंठितसामर्थ्यास्तत्क्षणादेवचाभवन् ॥ अहोमहानिष्टतरंकिमेतत्समुपस्थितम् ॥९७॥ केचिदूचुर्द्विजवरामिथःपरियियासवः ॥ महाझंझानिलःप्राप्तःपर्वतांदोलनक्षमः ॥ ९८॥ मखमंडपभूस्तेनक्षणतःस्थपुटीकृता ॥ अकांडतडिदापातोजातोभूद्भूप्रकंपनः ॥९९॥ दिवश्चोल्काःप्रपतिताःपिशाचानृत्यमादधुः ॥ आतापिगृध्रैरुपरिगगनेमंडलायितम् ॥ १०० ॥ रवेरधस्तादशिवंशिवास्तत्राप्यरारिषुः ॥ मेघारुधिरविप्रुडभिस्तत्रवृष्टिंव्यधुःपराम् ॥ १ ॥

शरीरंत्यक्तव्यमितिभावः ॥९४॥ महादेवस्वरूपिणिईश्वरस्याष्टमूर्तित्वात् ॥ प्राणरोधविधानतःप्राणरोधप्रकारेण ॥ ९५ ॥ ९६ ॥ ९७ ॥ झंझाकठोरः ॥ ९८ ॥ स्थपुटीकृतातृणादिनाच्छादिता ॥ ९९ ॥ १०० ॥ अरारिषुःशब्दंचक्रुः ॥ रुधिरविप्रुड्भिःरक्तबिंदुभिः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२॥क्रोष्टुभिःसृगालैःश्वभिश्च ॥ चकोराश्चंद्ररश्मिभोक्तारःपक्षिविशेषाः ॥ करटाःकाकाः ॥ ३ ॥४॥ अशोभिशोभारहितम् ॥ स्थगिताःशंकिताःजृंभिताइतिवा ॥५॥१०६॥ ॥ इतिश्रीरामानंद कृतायांकाशीखंडटीकायामष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ छ ॥ ॥ नवाशीतितमेऽध्यायेयज्ञध्वंसादिपूर्वकम् :॥ दक्षेश्वरसमुत्पत्तिर्वर्ण्यतेऽतिमनोहरा ॥ १ ॥ २ ॥ वैलक्ष्यमिति ॥ किंचिद्वैलक्ष्यंनाटयन्पूर्वागमनादीषदन्यथात्वंघटयन् ॥ यद्वा लक्ष्यतइतिलक्ष्यंशरीरंविगतंलक्ष्यंवैलक्ष्यम् ॥ स्वार्थेतद्धितः ॥ किंचिद्यथास्यात्तथावैलक्ष्यंसत्यादेहत्यागमाकारेणप्रकटयन्क्षणंजोषंतूष्णीं

निर्घातनिःस्वनोभूमेरुत्थितोद्दृतप्रकंपनः ॥ दिव्यायुधानिचमिथोयुध्यंतिस्मातिभीषणम् ॥ २ ॥ हवनीयंमहाद्रव्यंदूषितंक्रोष्टुभिःश्वभिः ॥ चकोराः करटास्तत्रविचेरुर्यज्ञमंडपे ॥ ३ ॥ श्मशानवाटवज्जातोयज्ञवाटःसवैक्षणात् ॥ यद्यत्रावस्थितंसर्वंतत्तत्रैवपरिष्ठितम् ॥ ४ ॥ चित्रन्यस्तमिवासीच्चवस्तुजातमशोभिच ॥ स्थगिताइवसंवृत्तास्तत्रचक्रधरादयः ॥ ५ ॥ दक्षोपिवदनग्लानिमवाप्यसपरिच्छदः ॥ पुनर्यथाकथंचिच्चयज्ञंप्रावर्तयन्द्विजाः ॥१०६॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेसतीदेहविसर्जनंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ स्कंदउवाच ॥ पुनःसनारदोऽगस्त्यदेव्याःप्राक्समुपागतः ॥ तद्वृत्तांतमशेषंचहरायावेदितुंययौ ॥ १ ॥ दृष्ट्वासनारदःशंभुंनंदिनासहसंकथाम् ॥ कांचित्तर्जनिविन्यासपूर्वंकुर्वंतमानमत् ॥ २ ॥ उपाविशच्चशैलादिविसृष्टासनमुत्तमम् ॥ वैलक्ष्यंनाटयन्किंचित्क्षणंजोषंसमास्थितः ॥३॥ आकारेणैवसर्वज्ञस्तद्वृत्तांतंविवेदह ॥ अवादीच्चमुनिंशंभुःकुतोमौनावलंबनम् ॥ ४ ॥ शरीरिणांस्थितिरियमुत्पत्तिप्रलयात्मिका ॥ दिव्यान्यपिशरीराणिकालाद्यांत्येवमेवहि ॥ ५ ॥ दृश्यंविनश्वरंसर्वंविशेषाद्यदनीश्वरम् ॥ ततोऽत्राचित्रंकिंब्रह्मन्कंकालःकालयेन्नवै ॥६॥ अभाविनोहिभावस्यभावःक्वापिनसंभवेत् ॥ भाविनोपिहिनाभावस्ततोमुह्यंतिनोबुधाः ॥ ७ ॥ शंभूदीरितमाकर्ण्यसइत्थंमुनिपुंगवः ॥ प्रोक्तवान्सत्यमेवैतद्यद्देवेनप्रभाषितम् ॥ ८ ॥ अवश्यमेवयद्भाव्यंतद्भूतंनात्रसंशयः ॥ परंमांबाधतेत्यंतंचिंतैकाचित्तमाथिनी ॥ ९ ॥ नापचीयेततेकिंचिन्नोपचीयेततत्त्वतः ॥ अव्ययत्वाच्चपूर्णत्वाद्धानिवृद्धीकुतस्त्वयि ॥ १० ॥

समास्थितइत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ अनीश्वरमस्वतंत्रम् ॥ कालयेच्चालयेन्नाशयेदितियावत् ॥ ६ ॥ अभाविनोऽसतःपदार्थस्य ॥ भाविनःसतःपदार्थस्य ॥ तदुक्तमीश्वरेण ॥ नासतोविद्यतेभावोनाभावोविद्यतेसतः ॥ उभयोरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिरिति ॥ ७ ॥ ८ ॥ ९ ॥ नापचीयेतनहीयेत ॥ नोपचीयेतनवर्धेत ॥ एतदेवहेतुपूर्वकंस्पष्टयाति ॥ अव्ययत्वादिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अव्ययत्वाद्धानिर्नास्तिपूर्णत्वाद्वृद्धिर्नास्तीत्यर्थः ॥ १० ॥ यद्यस्मात् ॥ ११ ॥ रीढितमवज्ञातम् ॥ वीढितमितिपाठेपिसएवार्थः ॥ १२ ॥ हेडनेतिडलयोरेकत्वात् ॥ प्रतिष्ठाभाजनंकिंकाकाने त्यर्थः ॥ उइतिवितर्केसंबोधनेवा ॥ १३ ॥ अभिमानधनायेनतेलब्धरीढाःप्राप्तावहेलनाः ॥ १४ ॥ वरंश्रेष्ठंयथास्यात्केवलमितिवा ॥ १५ ॥ महाकालःसर्वसंहारकइत्यर्थः ॥ सकालकालईश्वरः ॥

अहोवराकःसंसारःक्वभविष्यत्यनीश्वरः ॥ आरभ्याद्यदिनंनत्वामर्चयिष्यंतिकेपियत् ॥ ११ ॥ यतःप्रजापतिर्दक्षोनत्वामाहूतवान्क्रतौ ॥ तेनाद्यरीढितंदृष्ट्वादेवर्षिमनुजाअपि ॥ १२ ॥ तवरीढांकरिष्यंतिकिमैश्वर्येणरीढिनाम् ॥ प्राप्तावहेडनालोकेजितकालभयाअपि ॥ अथैश्वर्येणसंपन्नाःप्रतिष्ठाभाजनंकिमु ॥ १३ ॥ महीयसायुषातेषांवसुभिर्भूरिभिश्चकिम् ॥ येऽभिमानधनानेहलब्धरीढाःपदेपदे ॥ १४ ॥ अचेतनाश्चसावज्ञाजीवंतोपिनकीर्तये ॥ अभिमानधनाधन्यावरंयोषित्सुसासती ॥ १५ ॥ यात्वद्विनिंदाश्रवणात्तृणीचक्रेस्वजीवितम् ॥ इत्याकर्ण्यमहाकालःसम्यग्ज्ञात्वासतीव्ययम् ॥ १६ ॥ सत्यंमुनेसतीदेवीतृणीचक्रेस्वजीवितम् ॥ जोषंस्थितेमुनौतत्रतन्महाकालसाध्वसात् ॥१७॥ रुद्रश्चातीवरुद्रोभूद्बहुकोपाग्निदीपितः ॥ ततस्तत्कोपजाद्बह्नेराविरासीन्महाद्युतिः ॥१८॥ प्रत्यक्षःप्रतिमाकारःकालमृत्युप्रकंपनः ॥ उवाचचप्रणम्येशंभुशुंडींमहतींदधत् ॥१९॥ आज्ञांदेहिपितःकिंतेकरवैदास्यमुत्तमम् ॥ ब्रह्मांडमेककवलंकरवाणित्वदाज्ञया ॥ २० ॥ पिबामिचार्णवान्सप्ताप्येकेनचुलुकेनवै ॥ रसातलंवापातालंपातालंवारसातलम् ॥ २१ ॥ त्वदाज्ञयानयामीशविनिमय्यस्वहेलया ॥ सलोकपालमिंद्रंवाधृत्वाकेशैरिहानये ॥ २२ ॥ अपिवैकुंठनाथश्चेत्तत्साहाय्यंकरिष्यति ॥ तदातंकुंठितास्त्रंचकरिष्यामित्वदाज्ञया ॥ २३ ॥ दनुजादितिजाःकेवैवराकारणदुर्बलाः ॥ तेषुचोत्कटतांकोपिधत्तेतंप्रणिहन्म्यहम् ॥ २४ ॥ कालंबध्नामिवासंख्येमृत्योर्वामृत्युमर्थये ॥ स्थावरेषुचरेष्वत्रमयिक्रुद्धेरणांगणे ॥ २५ ॥ त्वद्बलेनमहेशाननकोपिस्थैर्यमेष्यति ॥ ममपादतलाघातादेतद्वैक्षोणिमंडलम् ॥ २६ ॥ कदलीदलवद्घाताद्वैपतेसरसातलम् ॥ चूर्णीकरोमिदोर्दंडघाताच्चैतान्कुलाचलान् ॥ २७ ॥ किंबहूक्तेनदेह्याज्ञांममासाध्यंनकिंचन ॥ त्वत्पादबलमासाद्यकृतंविद्धयद्यचिंतितम् ॥ २८ ॥

कालमृषिकभक्षकइत्यादिश्रुतिस्मृतिभ्यः ॥ १६ ॥ सत्यमित्याद्याहेतिशेषः ॥ जोषंतूष्णीमितिगुहोक्तिः ॥ १७ ॥ १८ ॥ प्रतिमाकारःपर्वताग्निःसृतपुत्तलिकाकारः ॥ अभूतोपमेयम् ॥ १९ ॥ करवैकरोमि ॥ २० ॥ २१ ॥ विनिमय्यपरिवर्त्य ॥ स्वहेलयास्वीयलीलया ॥ आशुहेलयेतिक्वचित् ॥ २२ ॥ २३ ॥ तेषुमध्ये ॥ प्रणिहन्मिप्रकर्षेणनिहन्मि ॥ २४ ॥२५॥२६॥२७ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतंकृत्यंयेनतमिवसंपादितकार्यमिव ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ अवासृजत्सृष्टवान् ॥ असीसृजदितिक्वचित् ॥ ३४ ॥ ३५ ॥ आचूडमूलाःसमग्राइत्यर्थः ॥ विधूता कंपिताउत्पाटिताइतिवा ॥ ३६ ॥ ३७ ॥ अचीखनन्खनयामासुः ॥ वैनिश्चितंप्रसिद्धौवा ॥ वितर्दीरितिपाठेपिसएवार्थः ॥ पृषद्दधि ॥ ३८ ॥ दध्वंसुर्ध्वंसयामासुः ॥ ३९ ॥ स्रुचांस्रुगादीना

इतिप्रतिज्ञांतस्येशःश्रुत्वाकृतममन्यत ॥ कृतकृत्यमिवात्यंतंतंमुदाप्रत्युवाचच ॥ २९ ॥ महावीरोसिरेभद्रममसर्वगणेष्विह ॥ वीरभद्राख्ययात्वंहिप्रथितिंपरमांव्रज ॥ ३० ॥ कुरुमेसत्वरंकार्यंदक्षयज्ञंक्षयंनय ॥ येत्वांतत्रावमन्यंतेतत्साहाय्यविधायिनः ॥ ३१ ॥ तेत्वयाप्यवमंतव्यात्रजपुत्रशुभोदय ॥ इत्याज्ञांमूर्ध्निचाधायसततःपारमेश्वरीम् ॥ ३२ ॥ हरंप्रदक्षिणीकृत्यजग्मिवानतिरंहसा ॥ ततस्तदनुगान्शंभुःस्वनिःश्वाससमुद्गतान् ॥ ३३ ॥ शतकोटिमितानुग्रान्गणानन्न्यानवासृजत् ॥ तेगणावीरभद्रंतंयांतंकेचित्पुरोगताः ॥ ३४ ॥ केचित्तदनुगाजाताःकेचित्तत्पार्श्वगाययुः ॥ अंबरंतैःसमाक्रांतंतेजोविजितभास्करैः ॥ ३५ ॥ शृंगाग्राणिगिरीणांचकैश्चिदुत्पाटितानिवै ॥ आचूडमूलाःकैश्चिच्चविधतावैशिलोच्चयाः ॥३६॥ उत्पाट्यमहतोवृक्षान्केचित्प्रातामखांगणम् ॥ कैश्चिदुत्पाटितायूपाःकेचित्कुंडान्यपूपुरन् ॥ ३७ ॥ मंडपंध्वंसयामासुःकेचित्क्रोधोद्धुरागणाः ॥ अचीखनन्वैवेदीश्चकेचिद्वैशूलपाणयः ॥ अभक्षयन्हवींष्यन्येपृषदाज्यंपपुःपरे ॥ ३८ ॥ दध्वंसुरन्नराशींश्चकेचित्पर्वतसन्निभान् ॥ केचिद्वैपायसाहाराःकेचिद्वैक्षीरपायिनः ॥ ॥ ३९ ॥ केचित्पक्वान्नपुष्टांगायज्ञपात्राण्यचूर्णयन् ॥ अमोटयन्स्रुचांदंडान्केचिद्दोर्दंडशालिनः ॥ ४० ॥ व्यभंजञ्छकटान्केचित्पशून्केचिदजीगिलन् ॥ अग्निंनिर्वापयामासुःकेचिदत्यग्नितेजसः ॥ ४१ ॥ स्वयंपरिदधुश्चान्येदुकूलानिमुदायुताः ॥ जगृहुःकेचनपुरारत्नानांपर्वतंकृतम् ॥ ४२ ॥ एकेनचभगोदेवःपश्यंश्चक्रेविलोचनः ॥ पूष्णोदंतावलीमन्यःपातयामासकोपितः ॥ ४३ ॥ यज्ञःपलायितोदृष्टःकेनचिन्मृगरूपधृक् ॥ शिरोविरहितश्चक्रेतेनचक्रेणदूरतः ॥ ४४ ॥ एकःसरस्वतींयांतींदृष्ट्वानिर्नासिकांव्यधात् ॥ आदितेरोष्ठपुटकौछिन्नावन्येनकोपिना ॥ ४५ ॥ अर्यम्णोबाहुयुगलंतथोत्पाटितवान्परः॥अग्नेरुत्पाटयामासकश्चिज्जिह्वांप्रसह्यच ॥४६॥ चिच्छेदवायोर्वृषणंपार्षदोन्यःप्रतापवान् ॥ पाशयित्वायमंकश्चित्क्रोधर्मइतिपृष्टवान् ॥४७॥

मित्यर्थः ॥ स्रुवार्दींश्चेतिक्वचित् ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ केनाचिद्येनदृष्टस्तेनेत्यर्थः ॥ ४४ ॥ निर्नासिकांव्यधाद्विगतनासिकामकरोत् ॥ ४५ ॥ ४६ ॥ पाशयित्वाबद्ध्वा ॥ ४७ ॥

CC-0. In Public Domain. Digitization by eGangotri

आतोल्याकृष्य ॥ ४८ ॥ पादयोःपादौधृत्वाऽधुनोदकंपयत् ॥ ४९ ॥ वामयामासोद्गिरयामासच ॥ भक्षिताभक्षकः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ जगौउवाच ॥ ५५ ॥ अतःकुतोमहे
श्वरेद्वेषइति ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ वात्ययाचक्रवातेन ॥ ६० ॥ नष्टेष्वदर्शनंगतेषु ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ततस्तंरक्षयत्नतइतिगर्वोक्तिः ॥ ६५ ॥ किंचयुद्धंतदप्रदानंचत्व

यत्रधर्मेमहेशोनप्रथमंपरिपूज्यते ॥ नैर्ऋतंसंगृहीत्वान्यःकेशेष्वातोल्यचासकृत् ॥४८॥ अनीश्वरंहविर्भुक्तंत्वयेत्याताडयत्पदा ॥ कुबेरमपरोधृत्वापादयो
रधुनोद्बलात् ॥ ४९ ॥ वामयामासबहुशोभक्षिताह्यध्वराहुतीः ॥ एकादशाऽपियेरुद्रालोकपालैकपंक्तयः ॥ ५० ॥ रुद्राख्याधारणवशात्प्रमथैस्तेऽवहे
लिताः ॥ वरुणोदरमापीड्यप्रमथोन्योबलेनहि ॥ ५१ ॥ बहिरुद्गिरयामासयद्दत्तंचेशवर्ज्जितम् ॥ मायूरींतनुमासाद्यसहस्राक्षोमहामतिः ॥ ५२ ॥ उड्डी
यगिरिमाश्रित्यच्छन्नःकौतुकमैक्षत ॥ ब्राह्मणान्प्रमथानत्वायातयातेतिचाब्रुवन् ॥ ५३ ॥ प्रमथाःकालयामासुरन्यानपिचयाचकान् ॥ इत्थंप्रमथितेयागे
प्रमथैःप्रथमागतैः ॥ वीरभद्रःस्वतःप्राप्तःप्रमथानीकिनीवृतः ॥५४॥ यज्ञवाटंश्मशानाभंदृष्ट्वातैःप्रमथैःपुरा ॥ अतिशोच्यांदशांनीतंवीरभद्रस्ततोजगौ ॥
॥ ५५ ॥ गणाःपश्यतदुर्वृत्तैःप्रारब्धानांचकर्मणाम् ॥ अनीश्वरैरवस्थेयंकुतोद्वेषोमहेश्वरे ॥ ५६ ॥ येद्विषंतिमहादेवंसर्वकर्मैकसाक्षिणम् ॥ धर्मकार्ये
प्रवृत्तास्तुतेप्राप्स्यंतीदृशींदशाम् ॥ ५७ ॥ क्वसदक्षोदुराचारःक्वचयज्ञभुजःसुराः ॥ धृत्वासर्वानानयतयातद्रुततरंगणाः ॥५८॥ इत्याज्ञांवीरभद्रस्यप्राप्य
तेप्रमथाद्रुतम् ॥ यावद्यांत्यग्रतस्तावद्दृष्टःक्रुद्धोगदाधरः ॥ ५९ ॥ तेनतेप्रमथाःसर्वेमहाबलपराक्रमाः ॥ शुष्कपर्णतृणावस्थांप्रापितावात्ययेवहि ॥६०॥
अथनष्टेषुसर्वेषुप्रमथेषुहरेर्भयात् ॥ चुकोपवीरभद्रःसप्रलयानलसंनिभः ॥ ६१ ॥ ददर्शशार्ङ्गिणंचाग्रेस्वगणैश्चपरिष्टुतम् ॥ चतुर्भुजैरसंख्यातैर्जितदै
त्यमहाबलैः ॥६२॥ चक्रिभिर्गदिभिर्जुष्टंखड्गिभिश्चापिशार्ङ्गिभिः ॥ वीरभद्रस्ततःप्राहदृष्ट्वातंदैत्यसूदनम् ॥ ६३ ॥ त्वंतुयज्ञपुमानत्रमहायज्ञप्रवर्तकः ॥
रक्षितानिजवीर्येणदक्षस्यत्र्यक्षवैरिणः ॥ ६४ ॥ किंवादक्षंसमानीयदेहियुध्यस्ववामया ॥ नदास्यसिचचेद्दक्षंततस्तंरक्षयत्नतः ॥ ६५ ॥ प्रायशःशंभुभक्ते
षुयतस्त्वंप्रोच्यसेऽग्रणीः ॥ एकोनेऽब्जसहस्रेप्राग्ददौनेत्रांबुजंभवान् ॥ ६६ ॥ तुष्टेनशंभुनादत्तंतुभ्यंचक्रंसुदर्शनम् ॥ यत्साहाय्यमवाप्याजौत्वंजयेर्द
नुजाधिपान् ॥ ६७ ॥ इत्याकर्ण्यवचस्तस्यवीरभद्रस्यचोर्जितम् ॥ जिज्ञासुस्तद्बलंविष्णुर्वीरभद्रमुवाचह ॥ ६८ ॥ त्वंशंभोःसुतदेशीयोगणानांप्रवरो
स्यहो ॥ राजादेशमनुप्राप्यततोप्यतिबलोमहान् ॥ ६९ ॥

यिनसंभाव्यतइत्याह ॥ प्रायशइति ॥ यद्वा रक्षवद्धास्थापय ॥ तत्रहेतुमाह ॥ प्रायशइति ॥ नेत्ररूपमंबुजंनेत्रांबुजम् ॥ ६६ ॥ ६७ ॥ ६८ ॥ सुतदेशीयःपुत्रस्थानीयःपुत्रात्किंचिन्न्यूनइतिवा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजतइतिराजाविश्वनाथस्तस्यादेशमाज्ञामिति ॥ ६९ ॥ कथंकेनप्रकारेण ॥ स्वयमितिकचित् ॥ तत्रस्वयंबलादित्येव ॥ ७० ॥ दृष्टिभंग्यैवकटाक्षेणैव ॥ ७१ ॥ अथतैरिति ॥ अथेत्यर्थांतरम् ॥ तैःप्रसिद्धैर्नंदिभृंगिप्रमुखैःप्रमथैःशंभोःपार्षदैर्विष्णोरनुगाभृत्याःसुनंदनंदप्रबलार्हणाद्यास्तिष्ठथमास्मत्तोजीवंतोमोक्ष्यध्वमित्येवंगदिताआक्षिप्ताःसंतोरणेसंग्रामेभयाद्वक्रेणतृणमाददानागृह्णानाः पाशवीं पशुसंबंधिनींपशवोयथामुखेनतृणंगृह्णंतितादृशींदशामापिताःप्रापिताइत्यर्थः ॥ चक्रेणेतिपाठेगदितागदाभिर्युक्ताः ॥ अस्त्यर्थेइतच ॥ चक्रेणोपलक्षिताश्चक्रहस्ताअपीत्यर्थः ॥ शेषंसमानम् ॥

योसिसोस्यहमप्यत्रदक्षरक्षणदक्षधीः ॥ पश्यामितवसामर्थ्यंकथंदक्षंहरिष्यसि ॥ ७० ॥ इत्युक्तोवीरभद्रःसतेनवैशार्ङ्गधन्वना ॥ प्रमथान्दृष्टिभंग्यैवप्रेरयामाससंगरे ॥ ७१ ॥ अथतैःप्रमथैर्विष्णोरनुगागदितारणे ॥ आददानास्तृणंवक्रेणापिताःपाशवींदशाम् ॥ ७२ ॥ ततस्ताक्ष्यरथःक्रुद्धस्त्वेकैकंरणमूर्धनि ॥ सहस्रेणसहस्रेणबाणानांह्यताडयत् ॥ ७३ ॥ तेभिन्नवक्षसःसर्वेगणारुधिरवर्षिणः ॥ वासंतींकैंशुकींशोभांपरिप्रापूरणाजिरे ॥ ७४ ॥ क्षरंतइवमातंगाःस्रवंतइवपर्वताः ॥ मदेनधातुरागेणमिश्रैःशुशुभिरेगणाः ॥ ७५ ॥ ततःप्रहस्यगणपोऽब्रवीद्वैकुंठनायकम् ॥ हेशार्ङ्गधन्वज्ञानेत्वांवरणांगणपंडितः ॥ ७६ ॥ परंयुध्यसिदैत्येंद्रैर्दानवेंद्रैर्नपार्षदैः ॥ इत्युक्त्वावीरभद्रेणभुशुंडीकलिताकरे ॥७७॥ गदिनाऽथगदातूर्णंदैत्येंद्रगिरिरेणुकृत् ॥ ततःप्रहतवान्वीरोभुशुंड्यातंगदाधरम् ॥ ७८ ॥ तदंगसंगमासाद्यविदद्रेशतधातया ॥ कौमोदकीप्रहारेणवीरभद्रंप्रतापिनम् ॥ ७९ ॥ जघानवासुदेवोपितरसाऽज्ञातवेदनम् ॥ ततःखट्वांगमादायगदाहस्तंगदाधरम् ॥८०॥ आताडयसव्यदोर्दंडेगदांभूमावपातयत् ॥ कुपितोयंमधुद्वेषीचक्रेणाताडयच्च तम् ॥ ॥ ८१ ॥ सचचक्रंसमागच्छदृष्ट्वासस्मारशंकरम् ॥ शंकरस्मरणाच्चचक्रंमनाग्वक्रत्वमाप्यच ॥ कंठमासाद्यवीरस्यसम्यग्जातंसुदर्शनम् ॥८२॥ तेनचक्रेणशुशुभेनितरांसगणेश्वरः ॥ वीरलक्ष्म्यावृतइवसमरेविजयस्रजा ॥ ८३ ॥ ततःसुदर्शनंदृष्ट्वातत्कंठाभरणंहरिः ॥ मनाक्सचकितंस्मित्वाततोजग्राहनंदकम् ॥ ८४ ॥ सनंदकंकरंतस्यप्रोद्यतंमधुविद्विषः ॥ पश्यतांदिविसिद्धानांस्तंभयामासहुंकृता ॥ ८५ ॥ अभ्यधावच्चवेगेनगृहीत्वाशूलमुज्ज्वलम् ॥ यावज्जिघांसतिहरिंतावदाकाशवाचया ॥ ८६ ॥ वारितोगणराजःसमाकार्षीःसाहसंत्विति ॥ ततस्तमपहायाशुवीरभद्रोगणोत्तमः ॥ ८७ ॥

॥ ७२ ॥ एकैकंगणम् ॥ ७३ ॥ ७४ ॥ मिश्रैर्मदधातुरागरक्तैः द्रवैरितिशेषः ॥ सर्वेइतिपाठेस्पष्टएवार्थः ॥ ७५ ॥ गणपोवीरभद्रः ॥७६॥ कलितागृहीता ॥ भुशुंड्याऽस्त्रविशेषेण ॥७७॥७८॥ तदंगसंगंहरेर्देहसामीप्यम् ॥ विदद्रेविदीर्णा ॥ तयागदया ॥ विपफालतयातुसेतिकचित् ॥ ७९ ॥ अज्ञातावेदनायेनतम् ॥ मनागापसवेदनामितिकचित् ॥ खट्वांगमस्त्रविशेषम् ॥ ८० ॥ ८१ ॥ ॥ ८२ ॥ ८३ ॥ ८४ ॥ हुंकृताहुंकारेण ॥ ८५ ॥ ८६ ॥ ८७ ॥

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिपूर्वकंनिंदति॥यस्येति॥सहायिनःसाहाय्यकारिणः ॥ इत्याकर्ण्येत्यारभ्यप्राप्यदक्षमित्यादेःप्राक्तनस्यग्रंथस्यायमभिप्रायः ॥ स्वांतमेनोविश्वेशस्ययोवैविष्णुःसवैरुद्रइत्याद्युक्तेः ॥ मानोविधेयः ॥ अतएवात्माभिन्नस्यरुद्रस्याज्ञाकर्तुर्वीरभद्रस्यसामर्थ्यजिज्ञासापूर्वकंमानोदेयः॥ स्वभक्तस्यशरणापन्नस्यदक्षस्यापिसाहाय्यंविधेयम् ॥ अतएतत्त्रितयंमनसिविधायभगवांस्तथाचक्रे ॥ यथापरशुरामरूपेणशरणापन्नायाअंबायाःस्वशिष्यस्यचभीष्मस्यसाहाय्यमानदानार्थंयुद्धंमोहंपराजयंचस्वीकृतवानिति॥ अन्यथाऽनीश्वरत्वापत्तेः॥ तदुक्तंहरिवंशेवैशंपायनेन॥ नूनमात्मेच्छयाब्रह्मन्कृतवान्हरिरीश्वरः॥ कोहिमोहयितुंशक्तोरणेनारायणंप्रभुमिति॥अतोवैष्णवैर्मनोनखेदनीयमिति ॥ दधीचिशापाद्वैवम् ॥ भविष्यसिहृषीकेशःस्वाश्रितोपिपराङ्मुखः॥एवमुक्त्वातुविप्रर्षिर्विरराम तपोनिधिरितिकूर्मोक्तेः॥८८॥

प्राप्यदक्षंविनद्योच्चैर्धिक्कामीश्वरनिंदकम् ॥ यस्येदृगस्तिसंपत्तिर्यत्रदेवाःसहायिनः ॥ सकथंसेश्वरंकर्मनकुर्याद्दक्षतांदधत् ॥ ८८ ॥ येनास्येनापवित्रेणभवतानिंदितःशिवः ॥ चूर्णयामितदास्यंतेचपेटाभिःसमंततः ॥८९॥ इत्युक्तातस्यदक्षस्यहरपारुष्यभाषिणः ॥ चिच्छेदवदनंवीरश्चपेटशतघातनैः ॥ ॥ ९० ॥ ततस्त्वदितिमुख्यानांमिलितानांमहोत्सवे ॥ त्रोटयामासकर्णादीन्यंगप्रत्यंगकानिच ॥ ९१ ॥ वेणीदंडाश्चकासांचित्तेनच्छिन्नामहारुषा ॥ कासांचिच्चकराश्छिन्नाःकासांचित्कर्तिताःस्तनाः ॥ ९२ ॥ नासापुटांस्तथान्यासांपाटयामासपार्षदः ॥ चिच्छेदचांगुलीश्चापितथान्यासांशिवप्रियः॥ ॥ ९३ ॥ येयेनिनिंदुर्देवेशंयेयेचशुश्रुवुस्तदा ॥ तेषांजिह्वाश्रुतीःकोपादच्छिनद्व्याकरोद्द्विधा ॥ ९४ ॥ केचिदुल्लंबितायूपेपाशयित्वादृढंगले ॥ अधोमुखायैर्देवेशंविहायात्तंमहाहविः ॥ ९५ ॥ द्विजराजश्चधर्मश्चभृगुमारीचिमुख्यकाः ॥ अत्यंतमपमानस्यभाजनंतेनकारिताः ॥ ९६ ॥ एतेजामातरस्तस्ययतोदक्षस्यदुर्धियः ॥ हित्वामहेश्वरममून्सोपश्यदधिकाञ्शिवात् ॥ ९७ ॥ तानिकुंडानितेयूपास्तेस्तंभाःसचमंडपः ॥ तावेद्यस्तानिपात्राणितानिहव्यान्यनेकधा ॥ ९८ ॥ तेचवैयज्ञसंभारास्तेतेयज्ञप्रवर्तकाः ॥ तेरक्षपालास्तेमंत्राविनेशुर्हेलयाऽखिलाः ॥ ९९ ॥ स्तोकेनैवहिकालेनयथर्धिःपरवंचनात् ॥ अर्जितानश्यतिक्षिप्रंदक्षसंपद्गताऽशिवा ॥१००॥ नीतेमहाक्रतौतेनसगणेनेदृशींदशाम् ॥ विधिर्विधिविलोपाच्चहरंविज्ञाप्यचानयत् ॥१॥ तत्रयत्रमखःसोभूदीदृक्षःशिववर्जितः ॥ आयातेथमहादेवेवीरभद्रोतिलज्जितः ॥ २ ॥ नत्वानकिंचिदवदद्देवःसर्वमवैत्स्वयम् ॥ प्रसाद्यदेवदेवेशंसुरज्येष्ठोऽब्रवीत्पुनः ॥ ३ ॥ अपराध्यप्ययंदक्षःसंप्रसाद्यःकृपानिधे ॥ यथापूर्वंपुनरमून्सर्वान्कारयशंकर ॥ ४ ॥ यथाविधिःप्रवर्तेतवैदिकःपुनरेवहि ॥ तथाज्ञादीयतांशंभोकर्मसिद्ध्यतिसेश्वरम् ॥५ ॥ अनीश्वरासुसर्वासुक्रियासुपरमेश्वर ॥ एवमेवभवंत्येवविघ्नजाताःसहस्रशः ॥ ६ ॥

॥८९॥९०॥ अंगप्रत्यंगकानिअंगाभरणानि ॥९१॥ कर्तिताश्छिन्नाः ॥९२॥९३॥ शुश्रुवुःश्रुतवंतः॥मुमुदुरितिक्वचित्॥जिह्वाःअच्छिनत् ॥ श्रुतीःकर्णान्द्विधाअकरोदित्यर्थः ॥९४॥ उल्लंबिताःभूम्यस्पर्शंयथास्यात्तथास्थापिताइत्यर्थः ॥ अधोमुखाश्चकेचिदुल्लंबिताइत्यन्वयः ॥ केतेतत्राह ॥ यैर्देवेशमिति ॥९५॥९६॥९७॥९८॥ हेलयाईश्वरस्यवीरभद्रस्यवेतिशेषः ॥९९॥ अशिवाअमंगलरूपा ॥ नविद्यतेशिवईश्वरोयस्यामितिवा ॥१००॥१॥ईदृक्षःईदृशः ॥ विष्णुतिरस्कारेणशिवभियावीरभद्रोलज्जितः ॥ २ ॥ ३ ॥ संप्रसाद्यःसम्यक्प्रसादंप्राप्यःप्रापणीयः ॥ ४ ॥ ५ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७॥ ८ ॥ ९ ॥ वीरंवीरभद्रम् ॥ प्रकल्पयसंपादय ॥ प्रकल्पयन्नितिकिंचित् ॥ ११० ॥ ११ ॥ १२ ॥ हिमप्रस्थंहिमालयंवानप्रस्थमितियावत् ॥१३ ॥ १४ ॥१५॥१६॥ कांक्षाआकांक्षा ॥

विचारतोवराकोयंदक्षोभक्ततरस्तव ॥ कुर्वन्योऽनीश्वरंकर्मपरदृष्टांततांगतः ॥ ७ ॥ अन्योपियोमहेशानंहित्वाकर्मकरिष्यति ॥ तस्यतत्कर्मसंसिद्धिर्द
क्षस्येवभविष्यति ॥८॥ अतोनकश्चित्किंचिच्चक्वचित्कर्मविनाशिवम् ॥ विधास्यतिनिशम्यास्यदक्षस्येदृक्षचेष्टितम् ॥९॥ विधीरितमितिश्रुत्वास्मित्वा
देवोमहेश्वरः ॥ वीरमाज्ञापयामासयथापूर्वंप्रकल्पय ॥ ११० ॥ वीरभद्रोपितत्सर्वंशर्वाज्ञांप्रतिपद्यच ॥ विनादक्षस्यवदनंयथापूर्वमकल्पयत् ॥ ११ ॥
ईश्वरंयेविनिंदंतितेमूकाःपशवोध्रुवम् ॥ ततोमेषमुखंदक्षंवीरभद्रोगणोव्यधात् ॥ १२ ॥ देवोब्रह्माणमापृच्छ्यधर्मोद्वाहस्थ्यतश्च्युतः ॥ सपार्षदोहिमप्रस्थं
जगामतपसेततः ॥ १३ ॥ अनाश्रमवतापुंसायतःकालोमनागपि ॥ मुधाकलयितव्योनतस्माच्छ्रेयःसदाश्रमः ॥ १४ ॥ अतःससर्वतपसांफलदातामहे
श्वरः ॥ तपश्चचारसगणोब्रह्मादक्षंत्वशिक्षयत् ॥ १५ ॥ हरनिंदासमुद्भूतपापपंकसुदुस्त्यजम् ॥ यदिक्षालयितुंकांक्षातदावाराणसींव्रज ॥ १६ ॥ प्राप्य
वाराणसींपुण्यांमहापापौघहारिणीम् ॥ कुरुलिंगप्रतिष्ठांत्वंतेनशंभुःसतुष्यति ॥ १७ ॥ तुष्टेमहेश्वरेतुष्टंजगदेतच्चराचरम् ॥ नान्यत्रपापंतेगंतृविनावा
राणसींपुरीम् ॥ १८ ॥ ब्रह्महत्यादिपापानांप्रायश्चित्तंमनीषिभिः ॥ प्रोक्तंनहरनिंदायास्तत्रकाश्येवकेवलम् ॥१९॥ काश्यांलिंगप्रतिष्ठायैःकृताऽत्रमुक्
तात्मभिः ॥ सर्वेधर्माःकृतास्तैस्तुतएवपुरुषार्थिनः ॥ १२० ॥ इत्याकर्ण्यविधेर्वाक्यंदक्षःप्राप्याथसत्वरम् ॥ अविमुक्तंमहाक्षेत्रंततापपरमंतपः ॥२१॥
संस्थाप्यलिंगंविधिवल्लिंगाराधनतत्परः ॥ नवेत्तिलिंगादपरंसकिंचिज्जगतीतले ॥ २२ ॥ दिवानिशंमहेशानंपरिष्टौतिसमर्चति ॥ नमतिध्यायतीक्षे
तदक्षोदक्षप्रजापतिः ॥२३॥ एकचित्तस्यदक्षस्यध्यायतोलिंगमैश्वरम् ॥ समाःसहस्रमगमन्मितंद्वादशसंख्यया ॥२४॥ मेनांयावत्सतीप्राप्यहिमाचलप
तिव्रताम् ॥ उमारूपातितपसापतिंप्रापपिनाकिनम् ॥२५॥ तावत्सदक्षस्तपसिनिश्चलेलिंगमार्चयत् ॥ ततःकाशींसमासाद्यसहभर्त्रागिरींद्रजा ॥२६॥
दृष्ट्वातंनिश्चलहृदंशिवलिंगार्चनेरतम् ॥ हरंव्यजिज्ञपद्देवीक्षीणोयंतपसाविभो ॥ २७ ॥ प्रसादयकृपासिंधोवरेणैनंप्रजापतिम् ॥ इत्युक्तोऽपर्णयाशंभुः
प्राहतंदक्षमीशिता ॥ २८ ॥ वरंब्रूहिमहाभागदास्यामिमनसेप्सितम् ॥ इतीशोदितमाकर्ण्यप्रणम्यबहुशोहरम् ॥२९॥ स्तुत्वानानाविधैःस्तोत्रैःप्रसन्नंवी
क्ष्यशंकरम् ॥ प्रोवाचेदंवदेवेशंयदिदेयोवरोमम ॥ १३० ॥ तत्त्वदीयपदद्वंद्वेनिर्द्वंद्वाभक्तिरस्तुमे ॥ इदंचतेमहालिंगंयन्मयाऽत्रप्रतिष्ठितम् ॥ अस्मिँल्लिंगे
त्वयानाथस्थातव्यंसर्वदैवहि ॥ ३१ ॥

॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ व्यजिज्ञपद्विज्ञापितवती ॥ पाठांतरेऽडभावआर्षः ॥ २७ ॥ २८ ॥ २९ ॥ १३० ॥ तत्तदा ॥ निर्द्वंद्वाऽ

CC-0. In Public Domain. Digitization by eGangotri

व्यभिचारिणी ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ अपराधालयोऽपराधाश्रयः ॥ १३९ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांनवाशीतितमोऽध्यायः ॥ ८९ ॥ ॥ छ ॥ ॥ अध्यायेत्रनवत्याख्येसर्वकामैकदायके ॥ पार्वतीश्वरमाहात्म्यंवर्ण्यतेतिमनोहरम् ॥ १ ॥ पार्वतीश्वरोत्पत्तिंपृच्छति ॥ पार्वतीति ॥ प्राक्पूर्वम् ॥ १ ॥

मयापराद्धंयद्देवतत्क्षंतव्यंकृपानिधे ॥ एतएववराःसंतुकिमन्यैरुत्तमैर्वरैः ॥३२॥ इतिश्रुत्वामहादेवःप्रसन्नोतितरांभवः ॥ प्रोवाचचयदुक्तंतेतत्तथास्तुनचान्यथा ॥ ३३ ॥ अन्यच्चतेवरंदद्यांतच्छृणुष्वप्रजापते ॥ यत्त्वयास्थापितंलिंगमेतद्दक्षेश्वराभिधम् ॥ ३४ ॥ अस्यसंसेवनात्पुंसामपराधसहस्रकम् ॥ क्षमिष्येहंनसंदेहस्तस्मात्पूज्यमिदंजनैः ॥ ३५ ॥ त्वंतुलिंगार्चनादस्मात्सर्वमान्योभविष्यसि ॥ परार्धद्वितयप्रांतेततोमोक्षमवाप्स्यसि ॥ ३६ ॥ इत्युक्त्वादेवदेवेशस्तस्मिँल्लिंगेलयंययौ ॥ दक्षोपिगतवान्गेहंपरिप्राप्तमनोरथः ॥ ३७ ॥ ॥ स्कंदउवाच ॥ ॥ इत्यगस्त्यसमाख्यातोदक्षेश्वरसमुद्भवः ॥ यंश्रुत्वामुच्यतेजंतुरपराधशतैरपि ॥३८॥ श्रुत्वाख्यानमिदंपुण्यंदक्षेश्वरसमुद्भवम् ॥ नरोनलिप्यतेपापैरपराधालयोपिहि ॥ १३९ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदक्षेश्वरप्रादुर्भावोनामनवाशीतितमोऽध्यायः ॥ ८९ ॥ ॥ अगस्त्यउवाच ॥ ॥ पार्वतीहृदयानंदपार्वतीशसमुद्भवम् ॥ कथयेहयदुद्दिष्टंभवताप्रागघापहम् ॥ १ ॥ ॥ स्कंदउवाच ॥ शृण्वगस्तेयदामेनाहिमाचलपतिव्रता ॥ गिरींद्रजांसुतामाहपुत्रितेस्यमहेशितुः ॥ २ ॥ किंस्थानंवसतिर्वाकाकोबंधुर्वेत्सिकिंचन ॥ प्रायोगृहंनजामातुरस्यकोपिचकुत्रचित् ॥ ३ ॥ निशम्येतिवचोमातुरतिह्रीणागिरींद्रजा ॥ आसाद्यावसरंशंभुंनत्वागौरीव्यजिज्ञपत् ॥ ४ ॥ मयाश्वश्रूगृहंकांतगम्यमद्यविनिश्चितम् ॥ नाथात्रनैववस्तव्यंनयमांस्वंनिकेतनम् ॥ ५ ॥ गिरींद्रजागिरंश्रुत्वागिरीशइतितत्त्ववित् ॥ हित्वाहिमगिरिंप्राप्तोनिजमानंदकाननम् ॥ ६ ॥ प्राप्यानंदवनंदेवीपरमानंदकारणम् ॥ विस्मृत्यपितृसंवासंजाताचानंदरूपिणी ॥ ७ ॥ अथविज्ञापयांचक्रेगौरीगिरिशमेकदा ॥ अच्छिन्नानंदसंदोहःकुतःक्षेत्रेऽत्रतद्वद ॥ ८ ॥ इतिगौरीरितंश्रुत्वाप्रत्युवाचपिनाकधृक् ॥ पंचक्रोशपरीमाणेक्षेत्रेस्मिन्मुक्तिसद्मनि ॥ ९ ॥

सतीमितिपाठेसतींपतिव्रतांपूर्वजन्मनितन्नाम्नीमितिवा ॥ २ ॥ किंस्थानंकोदेशः ॥ वसतिर्वाका ॥ गृहंवाकिम् ॥ ३ ॥ अतिह्रीणातिशयेनलज्जिता ॥ ४ ॥ ५ ॥ तत्त्ववित्उमाभिप्रायवित् ॥ सर्वज्ञइतिवा ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकैकमेकैकस्यलिंगस्य ॥ १० ॥ ११ ॥ १२ ॥ आपिप्राप्ता ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ यच्छेद्यच्छति ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ तद्देहावसितिंयेन देहेनपूजाकृतातस्यावसानमित्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांनवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ एकाधिकेथनव

तिलांतरंनदेव्यस्तिविनालिंगंहिकुत्रचित् ॥ एकैकंपरितोलिंगंक्रोशंक्रोशंचयावनिः ॥ १० ॥ अन्यत्रापिहिसादेविभवेदानंदकारणम् ॥ अत्रानंदवनेदेविपरमानंदजन्मनि ॥ ११ ॥ परमानंदरूपाणिसंतिलिंगान्यनेकशः ॥ चतुर्दशसुलोकेषुकृतिनोयेवसंतिहि ॥ १२ ॥ तैःस्वनाम्नेहलिंगानिकृत्वाऽऽपिकृतकृत्यता ॥ अत्रयेनमहादेविलिंगंसंस्थापितंमम ॥ १३ ॥ वेत्तितच्छ्रेयसःसंख्यांशेषोपिनविशेषवित् ॥ १४ ॥ परिच्छेदव्यतीतस्यानंदस्यपरकारणम् ॥ अतस्त्विदंपरंक्षेत्रंलिंगैर्भूयोभिरद्रिजे ॥ १५ ॥ निशम्येतिमहादेवीपुनःपादौप्रणम्यच ॥ देह्यनुज्ञांमहादेवलिंगसंस्थापनायमे ॥ १६ ॥ पत्युराज्ञांसमासाद्ययच्छेच्छ्रेयःपतिव्रता ॥ नतस्याःश्रेयसोहानिःसंवर्तेपिकदाचन ॥ १७ ॥ इतिप्रसाद्यदेवेशमाज्ञांप्राप्यमहेशितुः ॥ लिंगंसंस्थापितंगौर्यामहादेवसमीपतः ॥ १८ ॥ तल्लिंगदर्शनात्पुंसांब्रह्महत्यादिपातकम् ॥ विलीयेतनसंदेहोदेहबंधोपिनोपुनः ॥ १९ ॥ तत्रलिंगेवरोदत्तोदेवदेवेनयःपुनः ॥ निशामयमुनेतंतुभक्तानांहितकाम्यया ॥ २० ॥ लिंगंयःपार्वतीशाख्यंकाश्यांसंपूजयिष्यति ॥ तद्देहावसितिंप्राप्यकाशीलिंगंभविष्यति ॥ २१ ॥ काशीलिंगत्वमासाद्यमामेवानुप्रवेक्ष्यति ॥ चैत्रशुक्लतृतीयायांपार्वतीशसमर्चनात् ॥ २२ ॥ इहसौभाग्यमाप्नोतिपरत्रचशुभांगतिम् ॥ पार्वतीश्वरमाराध्ययोपिद्वापुरुषोपिवा ॥ २३ ॥ नगर्भमाविशेद्भूयोभवेत्सौभाग्यभाजनम् ॥ पार्वतीशस्यलिंगस्यनामापिपरिगृह्णतः ॥ २४ ॥ अपिजन्मसहस्रस्यपापंक्षयतितत्क्षणात् ॥ पार्वतीशस्यमाहात्म्यंयःश्रोष्यतिनरोत्तमः ॥ ऐहिकामुष्मिकान्कामान्सप्राप्स्यतिमहामतिः ॥ २५ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेपार्वतीशवर्णनंनामनवतितमोऽध्यायः ॥ ९० ॥ ॥ स्कंदउवाच ॥ ॥ पार्वतीशस्यमहिमाकथितस्तेमयानघ ॥ मुनेनिशामयेदानींगंगेश्वरसमुद्भवम् ॥ १ ॥ यंश्रुत्वायत्रकुत्रापिगंगास्नानफलंलभेत् ॥ चक्रपुष्करिणीतीर्थंयदागंगासमागता ॥ ॥ २ ॥ तेनदैलीपिनासार्धमस्मिन्नानंदकानने ॥ क्षेत्रप्रभावमतुलंज्ञात्वाशंभुपरिग्रहात् ॥ ३ ॥

तितमेऽध्यायेऽतिसुंदरे ॥ गंगेश्वरस्यमाहात्म्यंवर्ण्यतेपापहृत्परम् ॥ १ ॥ अनुवादपूर्वकंगंगेशोत्पत्तिंकथयति ॥ पार्वतीशस्येति ॥ १ ॥ यत्रेत्यस्यानंतरंतत्रेतिज्ञातव्यम् ॥ २ ॥ दैलीपिना

Shri Lal Bahadur Shastri Sanskrit University, Saumeeth Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिलीपस्यपुत्रेणभगीरथेन ॥ ३ ॥ ४॥५॥६॥७॥८॥९॥ १० ॥ ११ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामेकनवतितमोऽध्यायः ॥ ९१ ॥ ॥छ॥ ॥ छ ॥
द्वियुङ्नवतिकेऽध्यायेसर्वाघौघविनाशिनि ॥ नर्मदेशस्यमाहात्म्यंवर्ण्यतेतिशुभप्रदम् ॥ १ ॥ नर्मदेशोत्पत्तिंकथयति ॥ नर्मदेशस्येति ॥ १ ॥ २ ॥ वृषप्रदाःपुण्यदात्र्यः ॥ ३ ॥ ४ ॥ धुनीषुनदीषु ॥

स्मृत्वालिंगप्रतिष्ठायाःकाश्यांलोकोत्तरंफलम् ॥ गंगयास्थापितंलिंगंविश्वेशात्पूर्वतःशुभम् ॥ ४ ॥ गंगेश्वरस्यलिंगस्यकाश्यांदृष्टिःसुदुर्लभा ॥ तिथौ
दशहरायांचयोगंगेशंसमर्चयेत् ॥ ५ ॥ तस्यजन्मसहस्रस्यपापंसंक्षीयतेक्षणात् ॥ कलौगंगेश्वरंलिंगंगुप्तप्रायंभविष्यति ॥ ६ ॥ तस्यसंदर्शनंपुंसां
जायतेपुण्यहेतवे ॥ दृष्टंगंगेश्वरंलिंगंयेनकाश्यांसुदुर्लभम् ॥ ७॥ प्रत्यक्षरूपिणीगंगातेनदृष्टानसंशयः ॥ कलौसुदुर्लभागंगासर्वकल्मषहारिणी ॥ ८ ॥
भविष्यतिनसंदेहोमित्रावरुणनंदन ॥ ततोपितिष्येसंप्राप्तेकाश्यत्यंतंसुदुर्लभा ॥ ९ ॥ ततोपिदुर्लभंकाश्यांलिंगंगंगेश्वराभिधम् ॥ यस्यसंदर्शनंपुंसांभ
वेत्पापक्षयायवै ॥ १० ॥ श्रुत्वागंगेशमाहात्म्यंननरोनिरयीभवेत् ॥ लभेच्चपुण्यसंभारंचिंतितंचाधिगच्छति ॥ ११ ॥ इतिश्रीस्कांदेमहापुराणएकाशी
तिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेगंगेश्वरमहिमाख्यानंनामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ स्कंदउवाच ॥ ॥ नर्मदेशस्यमाहात्म्यं
कथयामिमुनेतव ॥ यस्यस्मरणमात्रेणमहापातकसंक्षयः ॥ १ ॥ अस्यवाराहकल्पस्यप्रवेशेमुनिपुंगवैः ॥ आपृच्छिकासरिच्छ्रेष्ठावदतांत्वंमृकंडज ॥२॥
मार्कंडेयउवाच ॥ ॥ शृणुध्वंमुनयःसर्वेसंतिनद्यःपरःशतम् ॥ सर्वाअप्यघहारिण्यःसर्वाअपिवृषप्रदाः॥३॥ सर्वाभ्योपिनदीभ्यश्चश्रेष्ठाःसर्वाःसमुद्रगाः॥
ततोपिहिमहाश्रेष्ठाःसरित्सुसरिदुत्तमाः ॥ ४ ॥ गंगाचयमुनाचाथनर्मदाचसरस्वती ॥ चतुष्टयमिदंपुण्यंधुनीषुमुनिपुंगवाः ॥ ५ ॥ ऋग्वेदमूर्तिर्गंगास्या
द्यमुनाचयजुर्ध्रुवम् ॥ नर्मदासाममूर्तिस्तुस्यादथर्वासरस्वती ॥ ६ ॥ गंगासर्वसरिद्योनिःसमुद्रस्यापिपूरणी ॥ गंगायानलभेत्साम्यंकाचिदत्रसरिद्वरा ॥
॥ ७ ॥ किंतुपूर्वंतपस्तप्त्वारेवयाबह्वनेहसम् ॥ वरदानोन्मुखोधाताप्रार्थितश्चेतिसत्तम ॥ ८ ॥ गंगासाम्यंविधेदेहिप्रसन्नोसियदिप्रभो ॥ ब्रह्मणाथततः
प्रोक्तानर्मदास्मितपूर्वकम् ॥९॥ यदित्र्यक्षसमत्वंतुलभ्यतेऽन्येनकेनचित् ॥ तदागंगासमत्वंचलभ्यतेसरितान्यया ॥१०॥ पुरुषोत्तमतुल्यःस्यात्पुरुषो
न्योयदिक्वचित् ॥ स्रोतस्विनीतदासाम्यंलभतेगंगयापरा ॥ ११ ॥ यदिगौरीसमानारीक्वचिदन्याभवेदिह ॥ अन्याधुनीहस्वर्धुन्यास्तदासाम्यमुपै
ष्यति ॥ १२ ॥ यदिकाशीपुरीतुल्याभवेदन्याक्वचित्पुरी ॥ तदास्वर्गतरंगिण्याःसाम्यमन्यानदीलभेत् ॥ १३ ॥

॥ ५ ॥ ६ ॥ नलभेच्चप्राप्नुयात् ॥ लभेतसाम्यमितिपाठेकाकानकाचिदितिव्याख्येयम् ॥ ७ ॥ बह्वनेहसंबहुकालम् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्येतिविधेर्वाक्यंनर्मदासरिदुत्तमा ॥ धातुर्वरंपरित्यज्यप्राप्तावाराणसींपुरीम् ॥ १४ ॥ सर्वेभ्योपिहिपुण्येभ्यःकाश्यांलिंगप्रतिष्ठितेः ॥ अपरानसमु दिष्टाकैश्चिच्छ्रेयस्करीक्रिया ॥ १५ ॥ अथसानर्मदापुण्याविधिपूर्वाप्रतिष्ठितिम् ॥ व्यधात्पिलिपिलातीर्थेत्रिविष्टपसमीपतः ॥ १६ ॥ ततःशंभुः प्रसन्नोभूत्तस्यैनद्यैशुभात्मने ॥ वरंवृणीष्वसुभगेयत्तुभ्यंरोचतेऽनघे ॥ १७ ॥ सरिद्वरानिशम्येतिरेवाप्राहमहेश्वरम् ॥ किंवरेणेहदेवेशभृशंतुच्छेनधूर्जटे ॥ ॥ १८ ॥ निर्द्वंद्वात्वत्पदद्वंद्वेभक्तिरस्तुमहेश्वर ॥ श्रुत्वेतिनितरांतुष्टोरेवागिरमनुत्तमाम् ॥ १९ ॥ प्रोवाचचसरिच्छ्रेष्ठेत्वयोक्तंयत्तथास्तुतत् ॥ गृहाण पुण्यनिलयेवितरामिवरांतरम् ॥ २० ॥ यावंत्योदृषदःसंतितवरोधसिनर्मदे ॥ तावंत्योलिंगरूपिण्योभविष्यंतिवरान्मम ॥ २१ ॥ अन्यंचतेवरंदद्यां तमप्याकर्णयोत्तमम् ॥ दुष्प्रापंयच्चतपसांराशिभिःपरमार्थतः ॥ २२ ॥ सद्यःपापहरागंगासप्ताहेनकलिंदजा ॥ त्र्यहात्सरस्वतीरेवेत्वंतुदर्शनमात्रतः ॥ ॥ २३ ॥ अपरंचवरंदद्यांनर्मदेदर्शनाघहे ॥ भवत्यास्थापितंलिंगंनर्मदेश्वरसंज्ञकम् ॥ २४ ॥ यत्तल्लिंगंमहापुण्यंमुक्तिंदास्यतिशाश्वतीम् ॥ अस्य लिंगस्ययेभक्तास्तान्दृष्ट्वासूर्यनंदनः ॥ २५ ॥ प्रणमिष्यतियत्नेनमहाश्रेयोभिवृद्धये ॥ संतिलिंगान्यनेकानिकाश्यांदेविपदेपदे ॥ २६ ॥ परंहि नर्मदेशस्यमहिमाकोपिचाद्भुतः ॥ इत्युक्त्वादेवदेवेशस्तस्मिँल्लिंगेलयंययौ ॥ २७ ॥ नर्मदापिप्रहृष्टासीत्पावित्र्यंप्राप्यचाद्भुतम् ॥ स्वदेशंचपरिप्राप्ताद्द ष्टमात्राघहारिणी ॥ २८ ॥ वाक्यंमृकंडजमुनेस्तेपिश्रुत्वामुनीश्वराः ॥ प्रहृष्टचेतसोजाताश्चक्रुःस्वंस्वंततोहितम् ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ नर्मदेशस्यमाहात्म्यंश्रुत्वाभक्तियुतोनरः ॥ पापकंचुकमुत्सृज्यप्राप्स्यतिज्ञानमुत्तमम् ॥ ३० ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहि तायांचतुर्थेकाशीखंडउत्तरार्धेनर्मदेश्वराख्याननंनामद्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ अगस्त्यउवाच ॥ ॥ नर्मदेशस्यमाहात्म्यंश्रुतंकल्मषना शनम् ॥ इदानींकथयस्कंदसतीश्वरसमुद्भवम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतीश्वरोत्पत्तिंपृच्छति ॥ नमदेशस्येति ॥ १ ॥ २ ॥ शतधृतिर्ब्रह्मा ॥ ३ ॥ हेलोककृत् ॥ ४ ॥ ५ ॥ देवीचिच्छक्तिर्महामायेतियावत् ॥ तस्यामुखम् ॥ ६ ॥ ७ ॥ उत्तानशयः शिशुः ॥ ८ ॥ पृथुकोवालकः ॥९॥ मायाडिंभकःमायावालकः ॥ रोदनादिति ॥ रोदनाद्रुद्रनामब्रह्माकृतवानित्यर्थः ॥ १० ॥ ११ ॥ १२ ॥ अहोइत्याश्चर्ये ॥ वीक्षितुंद्रष्टुम् ॥१३॥१४॥१५॥

स्कंदउवाच ॥ ॥ मित्रावरुणसंभूतकथयामिकथांशृणु ॥ यथासतीश्वरंलिंगंकाश्यामाविर्बभूवह ॥ २ ॥ पुराततापसुमहत्तपःशतधृतिर्मुने ॥ तपसाते नदेवेशःसंतुष्टोवरदोऽभवत् ॥ ३ ॥ उवाचचापिब्रह्माणंनितरांब्राह्मणप्रियः ॥ सर्वज्ञनाथोलोकात्मावरंवरयलोककृत् ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ यदिप्रसन्नोदेवेशवरंदास्यसिवांछितम् ॥ तदात्वंमेभवसुतोदेवीदक्षसुताऽस्तुच ॥ ५ ॥ इतिश्रुत्वामहादेवःसर्वदोब्रह्मणोवरम् ॥ स्मित्वादेवीमुखंवीक्ष्यप्रो वाचचतुराननम् ॥ ६ ॥ ब्रह्मंस्त्वद्वांछितंभूयात्किमदेयंपितामह ॥ इत्युक्त्वाब्रह्मणोभालादाविरासीच्छशांकभृत् ॥ ७ ॥ रुदन्सउत्तानशयोब्रह्मणोमुखमै क्षत ॥ ततोब्रह्मापितंबालंरुदंतंप्रविलोक्यच ॥ ८ ॥ किंमांजनकमाप्यापित्वंरोदिषिमुहुर्मुहुः ॥ श्रुत्वेतिपृथुकःप्राहयथोक्तंपरमेष्ठिना ॥ ९ ॥ नाम्नेरो दिमिमेस्रष्टर्नामदेहिपितामह ॥ रोदनाद्रुद्रइत्याख्यांसमायाडिंभकोलभत् ॥१०॥ ॥ अगस्त्यउवाच ॥ ॥ अर्भकत्वंगतोपीशःकिंरुरोदषडानन ॥ यदिवेत्सितदाचक्ष्वमहत्कौतूहलंहिमे ॥ ११ ॥ ॥ स्कंदउवाच ॥ ॥ सर्वज्ञस्यकुमारत्वात्किंचित्किंचिदवैम्यहम् ॥ रोदनेकारणंवच्मिशृणुकुं भसमुद्भव ॥ १२ ॥ मनसीतिविचारोभूद्देवस्यपरमात्मनः ॥ बुद्धिवैभवमस्याहोवीक्षितुंपरमेष्ठिनः ॥१३॥ सत्यलोकाधिनाथस्यचतुरास्यस्यवेधसः ॥ इत्यानंदात्समुद्भूतोबाष्पपूरोमहेशितुः ॥१४॥ ॥ अगस्त्यउवाच ॥ ॥ किंबुद्धिवैभवंधातुःशंभुनामनसीक्षितम् ॥ येनानंदाश्रुसंभारोबाल्येप्यभवदी शितुः ॥१५॥ एतत्कथयमेप्राज्ञसर्वज्ञानंदवर्धन ॥ श्रुत्वागस्त्युदितंवाक्यंतारकारिरुवाचह ॥१६॥ देवेनमनसिध्यातमितिकुंभजनेमुने ॥ विनापत्यं जनेतारंकउद्धर्तुमिहप्रभुः ॥ १७ ॥ एकोमनोरथश्चायंद्वितीयोयंसुनिश्चितम् ॥ अपत्यत्वंगतेचास्मिन्स्मर्तुरुत्पत्तिहारिणि ॥ १८ ॥ क्षणंक्षणंसमा लोक्यमंगस्पर्शंक्षणंक्षणम् ॥ एकशय्यासनाहारंलप्स्येऽनेनक्षणेक्षणे ॥ १९ ॥ योयंनगोचरःक्वापिवाणीमनसयोरपि ॥ समेऽपत्यत्वमासाद्य किंनदास्यतिचिंतितम् ॥ २० ॥

॥१६॥ देवेनशिवेन ॥ मनसिध्यातम्॥ब्रह्मसमीहितं विनेत्यादिस्यामसंशयमित्यंतेन ॥१७॥१८॥ समालोक्यंसम्यग्दर्शनम् ॥ लप्स्येप्राप्स्येइत्यग्रिमेणान्वयः॥एकशय्यासनाहारंच ॥१९॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ २१ ॥ २२ ॥ चक्षुस्त्रयंबाष्पकलितमासीदित्यर्थः ॥ २३ ॥ २४ ॥ चिदात्मनेज्ञानरूपाय ॥ २५ ॥ स्कंदोपिश्रोतुरानंददर्शनाद्धन्यइत्यादिनाऽगस्तिऋषिंसमाभाष्यपुनःप्राहे तितृतीयेनान्वयः ॥ २६ ॥ २७ ॥ किंतत्तदाह ॥ देवइति ॥ २८ ॥ २९ ॥ ३० ॥ मनसोपिसमुच्छ्रितंयादृक्पतिर्मनसावांछयतेततोप्युत्कृष्टमित्यर्थः ॥ ३१ ॥ ३२ ॥ ३३ ॥ त्वज्जने

योऽसुंसकृत्स्पृशेज्जंतुर्योसुंपश्येत्सकृन्मुदा ॥ नसभूयोभिजायेतभवेच्चानंदमेदुरः ॥ २१ ॥ गृहक्रीडनकंमेसौयदिभूयात्कथंचन ॥ तदापरस्यसौख्यस्य निधानंस्यामसंशयम् ॥ २२ ॥ विधेःसमीहितंचेतिनूनंज्ञात्वाससर्ववित् ॥ आनंदबाष्पकलितंचक्षुस्त्रयमदीधरत् ॥ २३ ॥ श्रुत्वेत्यगस्तिःस्कंदस्यभाषितंपर्यमूमुदत् ॥ ननामचांघ्रीप्रोवाचजयसर्वज्ञनंदन ॥ २४ ॥ विधेरपिमनोज्ञातंशंभोरपिमनोगतम् ॥ सम्यक्त्वित्तंत्वयाज्ञातंनमस्तुभ्यंचिदात्मने ॥ २५ ॥ स्कंदोपिनितरांतुष्टःश्रोतुरानंददर्शनात् ॥ धन्योस्यगस्त्यधन्योसिश्रोतुंजानासितत्त्वतः ॥ २६ ॥ नमेश्रमोवृथाजातोब्रुवतस्तेपुरःकथाम् ॥ इत्यगस्तिंसमाभाष्यपुनःप्राहषडाननः ॥ २७ ॥ देवेरुद्रत्वमापन्नेदेवीदक्षसुताभवत् ॥ सापितप्वातपस्तीव्रंसतीकाश्यांवरार्थिनी ॥ २८ ॥ ददर्शलिंगरूपेणप्रादुर्भूतंहरंपुरः ॥ अलंतप्त्वामहादेविप्रोक्तवंतामितिस्फुटम् ॥ २९ ॥ इदंसतीश्वरंलिंगंतवनाम्नाभविष्यति ॥ यथामनोरथस्तेऽत्रफलितोदक्षकन्यके ॥ ३० ॥ तथैतल्लिंगमाराध्यान्यस्यापिहिफलिष्यति ॥ कुमारीप्राप्स्यतिपतिंमनसोपिसमुच्छ्रितम् ॥ ३१ ॥ एतल्लिंगंसमाराध्यकुमारोपिवरांगनाम् ॥ यस्ययस्यहियःकामस्तस्यतस्यहिसध्रुवम् ॥ ३२ ॥ भविष्यतिनसंदेहःसतीश्वरसमर्चनात् ॥ सतीश्वरंसमभ्यर्च्ययोयोयंयंसमीहते ॥ ३३ ॥ तस्यतस्य ससक्षिप्रंभविष्यतिमनोरथः ॥ ३४ ॥ इतोष्टमेचदिवसेत्वज्जनेताप्रजापतिः ॥ मह्यंदास्यतिकन्यांत्वांसफलस्तेमनोरथः ॥ इत्युक्त्वादेवदेवेशस्तत्रैवांतर्हितोभवत् ॥ ३५ ॥ सापिस्वभवनंयातासतीदाक्षायणीमुदा ॥ पितापितस्मैप्रादात्तांरुद्रायदिवसेष्टमे ॥ ३६ ॥ ॥ स्कंदउवाच ॥ ॥ इत्थंसतीश्वरंलिंगंकाश्यांप्रादुरभून्मुने ॥ स्मरणादपिलिंगंचदद्यात्सत्त्वगुणंपरम् ॥ ३७ ॥ रत्नेशात्पूर्वतोभागेदृष्ट्वालिंगंसतीश्वरम् ॥ मुच्यतेपातकैःसद्यःक्रमाज्ज्ञानंचविंदति ॥ ३८ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेसतीश्वरप्रादुर्भावोनामत्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ छ ॥ ॥ स्कंदउवाच ॥ ॥ अन्यान्यपिच लिंगानिकथयामिमहामुने ॥ अमृतेशमुखादीनियन्नामाप्यमृतप्रदम् ॥ १ ॥ पुरासनारुनामासीन्मुनिरत्रगृहाश्रमी ॥ ब्रह्मयज्ञरतोनित्यंनित्यंचातिथिदैवतः ॥ २ ॥

तातवपिता ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायांत्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ छ ॥ ॥ अमृतःकरुणेशश्चज्योतीरूपेश्वरस्तथा ॥ वर्ण्यंतेऽत्रनवत्याख्येचतुर्भिरधिकेशुभे ॥ १ ॥ अमृतेशादीनिलिंगानिकथयति ॥ अन्यानीति ॥ अमृतप्रदंमोक्षप्रदम् ॥ १ ॥ अत्रकाश्याम् ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३ ॥ पृदाकुनासर्पेण ॥ सवयोभिःसमानवयस्कैर्मित्रैरित्यर्थः ॥ ४ ॥ ५ ॥ शवंमृतम् ॥ शिवमितिपाठेतस्यकल्याणमित्यर्थः ॥ ६ ॥ तदेवदर्शयाति ॥ सर्पेति ॥ ७ ॥ प्राणितसंपन्नंचेष्टायुक्तमित्यर्थः ॥ ८ ॥ प्राणितंव्येचेष्टितव्ये ॥ क्षेत्रादिति ॥ क्षेत्राद्बहिरहिर्यदष्टादंशकर्ताभवेत्सक्षेत्रमध्येआनीतःपरासुतांमृततांनप्राप्नोतीत्यर्थः ॥ दष्ट्वेतिपाठेस्पष्टएवार्थः ॥ ९ ॥ तज्जीवितैकिकांजीवितमे

लिंगपूजारतोनित्यंनित्यंतीर्थाप्रतिग्रही ॥ तस्यर्षेरभवत्पुत्रःसनारोरुपजंघनिः ॥ ३ ॥ सकदाचिद्गतोरण्यंतत्रदष्टःपृदाकुना ॥ अथतत्सवयोभिश्चसआनीतःस्वमाश्रमम् ॥ ४ ॥ सनारुणासमुच्छ्वस्यनीतःसउपजंघनिः ॥ महाश्मशानभूभागंस्वर्गद्वारसमीपतः ॥ ५ ॥ तत्रासीच्छ्रीफलाकारंलिंगमेकंसुगुप्तवत् ॥ निधायतत्रतंयावच्छवंसंचिंतयेत्सुधीः ॥ ६ ॥ सर्पदष्टस्यसंस्कारःकथंभवतिचेतिवै ॥ तावत्सजीवन्नुत्तस्थौसुप्तवच्चोपजंघनिः ॥ ७ ॥ अथतंवीक्ष्यसमुनिःसनारुरुपजंघनिम् ॥ पुनःप्राणितसंपन्नंविस्मयंप्राप्तवान्परम् ॥ ८ ॥ प्राणितव्येऽत्रकोहेतुर्मच्छिशोरुपजंघनेः ॥ क्षेत्राद्बहिरहिर्यंहिदष्टानैर्षीत्परासुताम् ॥ ९ ॥ इतियावत्ससंधत्तेधियंतज्जीवितैकिकाम् ॥ तावत्पिपीलिकात्वेकामृतंक्वापिपिपीलिकम् ॥ १० ॥ आनिनायचतत्रैवसोप्यनन्निर्गतस्ततः ॥ अथाविज्ञायसमुनिस्तत्त्वंजीवितसूचितम् ॥ ११ ॥ मृदुहस्ततलेनैवयावत्खनतिवैमुनिः ॥ तावच्छ्रीफलमात्रंहिलिंगंतेनसमीक्षितम् ॥ १२ ॥ सनारुणाथतल्लिंगंतेनतत्रसमर्चितम् ॥ चिरकालीनलिंगस्यकृतंनामापिसान्वयम् ॥ १३ ॥ अमृतेश्वरनामेदंलिंगमानंदकानने ॥ एतल्लिंगस्यसंस्पर्शादमृतत्वंलभेद्ध्रुवम् ॥ १४ ॥ अमृतेशंसमभ्यर्च्यजीवत्पुत्रःसवैमुनिः ॥ स्वास्पदंसमनुप्राप्तोदृष्टआश्चर्यवज्जनैः ॥ १५ ॥ तदाप्रभृतितल्लिंगममृतेशंमुनीश्वर ॥ काश्यांसिद्धिप्रदंनृणांकलौगुप्तंभवेत्पुनः ॥ १६ ॥ अमृतेश्वरसंस्पर्शान्मृताजीवंतितत्क्षणात् ॥ अमृतत्वंभजंतेऽत्रजीवंतःस्पर्शमात्रतः ॥ १७ ॥ अमृतेशसमंलिंगंनास्तिक्वापिमहीतले ॥ तल्लिंगंशंभुनातिष्येकृतंगुप्तंप्रयत्नतः ॥ १८ ॥ अमृतेश्वरनामापियेकाश्यांपरिगृह्णते ॥ नतेषामुपसर्गोत्थंभयंक्वापिभविष्यति ॥ १९ ॥ मुनेऽन्यच्चमहालिंगंकरुणेश्वरसंज्ञितम् ॥ मोक्षद्वारसमीपेतुमोक्षद्वारेश्वराग्रतः ॥ २० ॥ दर्शनात्तस्यलिंगस्यमहाकारुणिकस्यवै ॥ नक्षेत्रान्निर्गमोजातुबहिर्भवतिकस्यचित् ॥ २१ ॥ स्नातव्यंमणिकर्ण्यांचद्रष्टव्यःकरुणेश्वरः ॥ क्षेत्रोपसर्गजाभीतिर्हातव्यापरयामुदा ॥ २२ ॥ सोमवासरमासाद्यएकभक्तव्रतंचरेत् ॥ यष्टव्यःकरुणापुष्पैर्व्रतिनाकरुणेश्वरः ॥ २३ ॥

वैकंमुख्यंयस्यास्ताम् ॥ तज्जीवितंप्रतीतिकचित् ॥ १० ॥ सपिपीलिकः ॥ अनन्प्राणन्चेष्टन्नित्यर्थः ॥ तत्त्वंपदार्थम् ॥ जीवितसूचितमुभयोर्जीवनेनानुमितम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ जीवत्पुत्रःजीवन्पुत्रोयस्यसः ॥ पाठांतरेपिसएवार्थः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ उपसर्गोत्थंग्रहादिपीडोत्थंविघ्नोत्थमितिवा ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ करुणापुष्पैःप्रसिद्धैः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ २४ ॥ तत्पत्रैस्तत्फलैरित्यत्रतच्छब्दः करुणावृक्षपरः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ एतेषुअमृतेशादिषुलिंगाष्टकममृतेशता रकेशज्ञानेशकरुणेशमोक्षद्वारेशस्वर्गद्वारेशब्रह्मेशलांगलीशानामष्टकम् ॥ ३५ ॥ ३६ ॥ ३७ ॥ षट्त्रिंशत्तत्त्वरूपइति ॥ तान्युक्तान्यागमे ॥ तत्त्वानिशैवान्युच्यंतेशिवःशक्तिःसदाशिवः ॥

तेनव्रतेनसंतुष्टःकरुणेशःकदाचन ॥ नतंक्षेत्राद्बहिःकुर्यात्तस्मात्कार्यंव्रतंत्विदम् ॥ २४ ॥ तत्पत्रैस्तत्फलैर्वापिसंपूज्यःकरुणेश्वरः ॥ योनजानातित ल्लिंगंसम्यग्ज्ञानविवर्जितः ॥ २५ ॥ तेनार्च्यःकरुणावृक्षोदेवेशःप्रीयतामिति ॥ योवर्षंसोमवारस्यव्रतंकुर्यादितिद्विजः ॥ २६ ॥ प्रसन्नःकरुणेशोत्रतस्य दास्यतिवांछितम् ॥ द्रष्टव्यःकरुणेशोत्रकाश्यांयत्नेनमानवैः ॥ २७ ॥ इतितेकरुणेशस्यमहिमोक्तोमहत्तरः ॥ यंश्रुत्वानोपसर्गोत्थंभयंकाश्यांभवि ष्यति ॥ २८ ॥ मोक्षद्वारेश्वरंचैवस्वर्गद्वारेश्वरंतथा ॥ उभौकाश्यांनरोदृष्ट्वास्वर्गंमोक्षंचविंदति ॥ २९ ॥ ज्योतीरूपेश्वरंलिंगंकाश्यामन्यत्प्रकाशते ॥ तस्यसंपूजनाद्भक्ताज्योतीरूपाभवंतिहि ॥ ३० ॥ चक्रपुष्करिणीतीरेज्योतीरूपेश्वरंपरम् ॥ समभ्यर्च्यामुयान्मर्त्योज्योतीरूपंनसंशयः ॥ ३१ ॥ यदाभागीरथीगंगातत्रप्राप्तासरिद्वरा ॥ तदारभ्यार्चयेन्नित्यंतल्लिंगंस्वर्धुनीमुदा ॥ ३२ ॥ पुराविष्णौतपत्यत्रतल्लिंगंस्वयमेवहि ॥ तत्राविरासीत्तेजस्विते नक्षेत्रमिदंशुभम् ॥ ३३ ॥ चक्रपुष्करिणीतीरेज्योतीरूपेश्वरंतदा ॥ दूरस्थोपीहयोध्यायेत्तस्यसिद्धिरदूरतः॥३४॥ एतेष्वपिचलिंगेषुचतुर्दशमुसत्तम॥ लिंगाष्टकंमहावीर्यंकर्मबीजदवानलम् ॥ ३५ ॥ ओंकारादीनिलिंगानियान्युक्तानिचतुर्दश ॥ तथादक्षेश्वरादीनिलिंगान्यष्टौमहांतिच ॥३६॥ शैलेशादी निलिंगानितथायानिचतुर्दश ॥ पुनःषट्त्रिंशदेतानिक्षेत्रसंसिद्धिहेतवे ॥ ३७ ॥ षट्त्रिंशत्तत्त्वरूपोसौलिंगेष्वेषुसदाशिवः ॥ अस्मिन्क्षेत्रेवसन्नित्यं तारकंज्ञानमादिशेत् ॥ ३८ ॥ क्षेत्रस्यतत्त्वमेतद्धिषट्त्रिंशल्लिंगरूप्यहो ॥ एतेषांभजनात्पुंसांनभवेद्दुर्गतिःक्वचित् ॥३९॥ मुनेरहस्यभूतानिलिंगान्येता निनिश्चितम् ॥ एतल्लिंगप्रभावाच्चमुक्तिरत्रसुनिश्चिता ॥ ४० ॥ मोक्षक्षेत्रमिदंकाशीलिंगैरेतैर्महामते ॥ एतान्यन्यानिसिद्धानिसंभवंतियुगेयुगे ॥ ४१ ॥

ईश्वरोविद्ययासार्धंपंचशुद्धान्यमूनिहि ॥ मायाकालश्चनियतिःकलाविद्यापुनःस्मृता ॥ रागःपुरुषएतानिशुद्धाशुद्धानिसप्तच ॥ प्रकृतिर्बुद्ध्यहंकारौमनोज्ञानेंद्रियाण्यथ ॥ कर्मेंद्रियाणितन्मात्राः पंचभूतानिदेशिकाः ॥ एतान्याहुरशुद्धानिचतुर्विंशतिरागमे ॥ शैवानामितितत्त्वानांविभागोत्रप्रदर्शितइति ॥३८॥ तत्त्वंस्वरूपंपरमार्थमितियावत् ॥ ३९ ॥ निश्चितंनिर्णीतमित्यर्थः ॥ ४० ॥४१॥

CC-0. In Public Domain. Digitization by eGangotri

संस्थितिंसम्यग्वसतिंमरणंवा ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ मुष्टावंचितादैवेनेतिशेषः ॥ मूढाइतिपाठेअविवेकिनः ॥ तत्रहेतुर्मंदबुद्धयइति ॥ ४९ ॥
॥५०॥ यादृग्भिस्तपआदिभिः ॥ मोक्षोत्तमोत्तमःसायुज्यमुक्तिरित्यर्थः ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ननुसप्तैतामोक्षदाइत्यादिष्वन्यत्रापिमुक्तिःश्रूयतेकथमुक्तंनान्यत्रेतितत्राह ॥ सायुज्येति ॥

आनंदकाननंशंभोःक्षेत्रमेतदनादिमत् ॥ अत्रसंस्थितिमापन्नामुक्ताएवनसंशयः ॥ ४२ ॥ योगसिद्धिरिहास्त्येवतपःसिद्धिरिहैवहि ॥ व्रतसिद्धिर्मंत्रसिद्धिस्तीर्थसिद्धिःसुनिश्चितम् ॥ ४३ ॥ सिद्धयष्टकंतुयत्प्रोक्तमणिमादिमहत्तरम् ॥ तज्जन्मभूमिरेषैवशंभोरानंदवाटिका ॥४४॥ निर्वाणलक्ष्म्याःसदनमेतदानंदकाननम् ॥ एतत्प्राप्यनमोक्तव्यंपुण्यैःसंसारभीरुणा ॥ ४५ ॥ अयमेवमहालाभइदमेवपरंतपः ॥ एतदेवमहत्पुण्यंलब्धावाराणसीहयत् ॥ ॥ ४६ ॥ अवश्यंजन्मिनोमृत्युर्यत्रकुत्रभविष्यति ॥ कर्मानुसारिणीलभ्यागतिःपश्चाच्छुभाशुभा ॥ ४७ ॥ मृत्युंविज्ञायनियतंगतिंकर्मानुसारिणीम् ॥ अवश्यंकाशिकासेव्यासर्वकर्मनिवारिणी ॥ ४८ ॥ मानुष्यंप्राप्ययेमूढानिमेषमितजीवितम् ॥ नसेवंतेपुरींकाशींतेमुष्टामंदबुद्धयः ॥ ४९ ॥ दुर्लभंजन्ममानुष्यंदुर्लभाकाशिकापुरी ॥ उभयोःसंगमासाद्यमुक्ताएवनसंशयः ॥ ५० ॥ क्वचतादृक्तपांसीहक्वतादृग्योगउत्तमः ॥ यादृग्भिःप्राप्यतेमुक्तिःकाश्यांमोक्षोत्तमोत्तमः ॥ ५१ ॥ सत्यंसत्यंपुनःसत्यंसत्यपूर्वंपुनःपुनः ॥ नकाशीसदृशीमुक्त्यैभूमिरन्यामहीतले ॥ ५२ ॥ विश्वेशोमुक्तिदोनित्यंमुक्त्यैचोत्तरवाहिनी ॥ आनंदकाननेमुक्तिर्मुक्तिर्नान्यत्रकुत्रचित् ॥ ५३ ॥ एकएवहिविश्वेशोमुक्तिदोनान्यएवहि ॥ सएवकाशींप्राप्यमुक्तिंयच्छतिनान्यतः ॥ ५४ ॥ सायुज्यमुक्तिरत्रैवसान्निध्यादिरथान्यतः ॥ सुलभासापिनोनूनंकाश्यांमोक्षोस्तिहेलया ॥५५॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यमहाभागभविष्यंकथयाम्यहम् ॥ कृष्णद्वैपायनोव्यासोऽकथयद्यन्महद्वचः ॥ निश्चिकेतुमनाःपश्चाद्यत्करिष्यतितच्छृणु ॥५६॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेऽमृतेशादिलिंगप्रादुर्भावोनामचतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ व्यासउवाच ॥ ॥ शृणुसूतमहाबुद्धेयथास्कंदेनभाषितम् ॥ भविष्यंममतस्याग्रेकुंभयोनेमहामते ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ निशामयमहाभागत्वंमैत्रावरुणेमुने ॥ पाराशर्योमुनिवरोयथामोहमुपैष्यति ॥ २ ॥

॥ ५५ ॥ अकथयत्कथयामासयन्महद्वचः ॥ श्रोष्यत्येतन्महद्वचइतिकचित्तत्रएकएवहिविश्वेशोमुक्तिदोनान्यएवहिइत्येतच्छब्देनगृह्यते ॥ ५६ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायां
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥छ॥ ः ॥ पंचाधिकेतथाध्यायेनवत्याख्यउशत्तमे ॥ श्रीमद्व्यासभुजस्तंभोवर्ण्यतेसंशयापहः ॥ १ ॥ स्वस्यागामिवृत्तंकथयति ॥ शृणुसूतेति ॥ १ ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३ ॥ ४ ॥ ५ ॥ नैमिषारण्यंविशिनष्टि ॥ यत्रसंतीति पादाधिकेनैकेन ॥ ६ ॥ ७ ॥ विभूतिधारिणइत्यादीनांद्वितीयांतानांपदानांविलोक्यसइतितृतीयेनान्वयः ॥ ८ ॥ ९ ॥
गिरिशात्मनःविश्वेश्वरचित्तान् ॥ वचोवचनम् ॥ पुनःपुनरितिंक्वचित् ॥ १० ॥ ११ ॥ १२ ॥ तदेवचवचनमाह नवेदादित्यादि ॥ १३ ॥ अपिएव ॥ १४॥१५ ॥ विपक्षेवाधकमाह॥विहायेति ॥

व्यस्यवेदान्महाबुद्धिर्नानाशाखाप्रभेदतः ॥ अष्टादशपुराणानिसूतादीन्परिपाठयच ॥ ३ ॥ श्रुतिस्मृतिपुराणानांरहस्यंयस्त्वचीकरत् ॥ महाभारतसं
ज्ञंचसर्वलोकमनोहरम् ॥४॥ सर्वपापप्रशमनंसवेशांतिकरंपरम् ॥ यस्यश्रवणमात्रेणब्रह्महत्याविनश्यति ॥५॥ एकदाससुनिःश्रीमान्पर्यटन्पृथिवीतले ॥
संप्राप्तोनैमिषारण्यंयत्रसंतिमुनीश्वराः ॥ ६ ॥ अष्टाशीतिसहस्राणिशौनकाद्यास्तपोधनाः ॥ त्रिपुंड्रितमहाभालालसद्रुद्राक्षमालिनः ॥ ७ ॥ विभूतिधा
रिणोभक्त्यारुद्रसूक्तजपप्रियान् ॥ लिंगाराधनसंसक्तान्छिवनामकृतादरान् ॥ ८ ॥ एकएवहिविश्वेशोमुक्तिदोनान्यएवहि ॥ इतिब्रुवाणान्सततंपारिनि
श्चितमानसान् ॥ ९ ॥ विलोक्यसमुनिर्व्यासस्तान्सर्वान्गिरिशात्मनः ॥ उत्क्षिप्यतर्जनीमुचैःप्रोवाचेदंवचःपुनः ॥ १० ॥ परिनिर्मथ्यवाग्जालंसुनि
श्चित्यासकृद्द्रुहु ॥ इदमेकंपरिज्ञातंसेव्यःसर्वेश्वरोहरिः ॥ ११ ॥ वेदेरामायणेचैवपुराणेषुचभारते ॥ आदिमध्यावसानेषुहरिरेकोऽत्रनापरः ॥ १२ ॥
सत्यंसत्यंत्रिसत्यंपुनःसत्यंनमृषापुनः ॥ नवेदादपरंशास्त्रंनदेवोच्युततःपरः ॥ १३ ॥ लक्ष्मीशःसर्वदोनान्योलक्ष्मीशोप्यपवर्गदः ॥ एकएवहिलक्ष्मी
शस्ततोध्येयोनचापरः ॥ १४ ॥ मुक्तेर्मुक्तेरिहान्यत्रनान्योदाताजनार्दनात् ॥ तस्माच्चतुर्भुजोनित्यंसेवनीयःसुखेप्सुभिः ॥ १५ ॥ विहायकेशवान्यं
येसेवंतेल्पमेधसः ॥ संसारचक्रेगहनेतेविशंतिपुनःपुनः ॥ १६ ॥ एकएवहिसर्वेशोहृषीकेशःपरात्परः ॥ तंसेवमानःसततंसेव्यस्त्रिजगतांभवेत् ॥१७॥
एकोधर्मप्रदोविष्णुस्त्वेकोबह्वर्थदोहरिः ॥ एकःकामप्रदश्चक्रीत्वेकोमोक्षप्रदोच्युतः ॥ १८ ॥ शार्ङ्गिणंयेपरित्यज्यदेवमन्यमुपासते ॥ तेसद्भिश्चबहि
ष्कार्यावेदहीनायथाद्विजाः ॥ १९ ॥ श्रुत्वेतिवाक्यंव्यासस्यनैमिषारण्यवासिनः ॥ प्रवेपमानहृदयाःपरिप्रोचुरिदंवचः ॥ २० ॥ ॥ ऋषयऊचुः ॥ ॥
पाराशर्यमुनेमान्यस्त्वमस्माकंमहामते ॥ यतोवेदास्त्वयाव्यस्ताःपुराणान्यपिवेत्सियत् ॥ २१ ॥ यतश्चकर्तात्वमसिमहतोभारतस्यवै ॥ धर्मार्थकाममो
क्षाणांविनिश्चयकृतोध्रुवम् ॥ २२ ॥ तत्त्वज्ञःकोपरश्चात्रत्वत्तःसत्यवतीसुत ॥ भवतायत्प्रतिज्ञातंनिश्चित्योत्क्षिप्यतर्जनीम् ॥ २३ ॥

॥ १६ ॥ १७ ॥ १८ ॥ विष्णुंविहायान्यंसेवमानानांनकेवलंसंसारप्रवेशमात्रमपितुमहतीनिंदाचेत्याह ॥ शार्ङ्गिणमिति ॥१९॥२०॥ यद्यतः ॥२१॥ विनिश्चयकृतोनिर्णयकारकस्य ॥२२॥२३॥

माणवकावालकाः ॥ २४ ॥ वैनिश्चितम् ॥ ऋतमितिकचित् ॥ २५ ॥ युगधर्माभावेहेतुमाह ॥ नचलग्नेति ॥ नतत्रेत्यस्यायंभावः युगधर्मवशात्त्वमेवंब्रूषेवाराणस्यांगतोनव
क्ष्यसीति ॥ २६ ॥ २७ ॥ पादोदकंगंगावरणसंगमम् ॥ २८ ॥ पंचरात्रंपंचदिनानि ॥ कृत्वावैष्णवंतीर्थानिसंसेव्येत्यर्थः ॥ यद्वा पंचरात्रंकृत्वापंचरात्रागमोक्तेनप्रकारेणमाधवकेशवादीन्दृष्ट्वा
समर्च्यसंपूज्येत्यर्थः ॥ २९ ॥ जयविष्णोइत्यादीनामित्यादिनाममालाभिःसंस्तुवन्व्यासोविश्वेशभवनंसमायातइत्येकादशेनान्वयः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ बलारातिस्तुतइंद्रनुतः ॥

अस्मिन्माणवकास्तत्रपरिश्रद्दधतेनहि ॥ प्रतिज्ञातस्यवचसस्तवश्रद्धाभवेत्तदा ॥२४॥ यदाऽऽनंदवनेशंभोःप्रतिजानासिवैवचः ॥२५॥ गच्छवाराणसीं व्यासयत्रविश्वेश्वरःस्वयम् ॥ नतत्रयुगधर्मोऽस्तिनचलग्नावसुंधरा ॥२६॥ इतिश्रुत्वामुनिर्व्यासःकिंचित्कुपितवद्धृदि ॥ जगामतूर्णंसहितःस्वशिष्यैरयुतोन्मितैः ॥ २७ ॥ प्राप्यवाराणसींव्यासःस्नात्वापंचनदेह्रदे ॥ श्रीमन्माधवमभ्यर्च्यययौपादोदकंततः ॥ २८ ॥ तत्रस्नानादिकंकृत्वादृष्ट्वाचैवादिकेशवम् ॥ पंचरात्रंततःकृत्वावैष्णवैरभिनंदितः ॥ २९ ॥ अग्रतःपृष्ठतःशंखैर्वाद्यमानैःप्रमोदितः ॥ जयविष्णोहृषीकेशगोविंदमधुसूदन ॥ ३० ॥ अच्युतानंतवैकुंठमाधवोपेंद्रकेशव ॥ त्रिविक्रमगदापाणेशार्ङ्गपाणेजनार्दन ॥ ३१ ॥ श्रीवत्सवक्षःश्रीकांतपीतांबरमुरांतक ॥ कैटभारेबलिध्वंसिन्कंसारेकेशिसूदन ॥ ३२ ॥ नारायणासुरारिपोकृष्णशौरेचतुर्भुज ॥ देवकीहृदयानंदयशोदानंदवर्धन ॥ ३३ ॥ पुंडरीकाक्षदैत्यारेदामोदरबलप्रिय ॥ बलारातिस्तुतहरेवासुदेववसुप्रद ॥ ३४ ॥ विष्वक्चमूस्ताक्ष्यर्रथवनमालिन्नरोत्तम ॥ अधोक्षजक्षमाधारपद्मनाभजलेशय ॥३५॥ नृसिंहयज्ञवाराहगोपगोपालवल्लभ ॥ गोपीपतेगुणातीतगरुडध्वजगोत्रभृत् ॥ ३६ ॥ जयचाणूरमथनजयत्रैलोक्यरक्षण ॥ जयानाद्यजयानंदजयनीलोत्पलद्युते ॥ ३७ ॥ कौस्तुभोद्भूषितोरस्कपूतनाधातुशोषण ॥ रक्षरक्षजगद्रक्षामणेनरकहारक ॥ ३८ ॥ सहस्रशीर्षपुरुषपुरुहूतसुखप्रद ॥ यद्भूतंयच्चभाव्यंवैतत्रैकःपुरुषोभवान् ॥ ३९ ॥ इत्यादिनाममालाभिःसंस्तुवन्वनमालिनम् ॥ स्वच्छंदलीलयागायन्नृत्यंश्चपरयामुदा ॥ ४० ॥ व्यासोविश्वेशभवनंसमायातःसहृष्टवत् ॥ ज्ञानवापीपुरोभागेमहाभागवतैःसह ॥ ४१ ॥ विराजमानसत्कंठस्तुलसीवरदामभिः ॥ स्वयंतालधरोजातःस्वयंजातःसुनर्तकः ॥४२॥ वेणुवादनतत्त्वज्ञःस्वयंश्रुतिधरोभवत् ॥ नृत्यंपरिसमाप्येत्थंव्यासःसत्यवतीसुतः ॥ ४३ ॥ पुनरूर्ध्वंभुजंकृत्वादक्षिणंशिष्यमध्यगः ॥ पुनःपपाठतानेवश्लोकान्गायन्निवोच्चकैः ॥ ४४ ॥ परिनिर्मथ्यवाग्जालंसुनिश्चित्यासकृद्बहु ॥ इदमेकंपरिज्ञातंसेव्यःसर्वेश्वरोहरिः ॥ ४५ ॥

॥ ३४ ॥ विष्वक्सर्वतश्चमूःसेनायस्यततसंबोधनंविष्वक्चमूः ॥ ह्रस्वाभावोविसर्गश्चार्षः ॥ विष्वक्सेनमहाबाहोइतिकचित् ॥ ३५ ॥ गोपालवल्लभगोपानांप्रिय ॥ ३६ ॥ आदौभवआद्यःनआद्यः
अनाद्यःतत्संबोधनमनाद्य ॥ अनघेतिकचित् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४६॥४७॥४८॥४९॥५०॥ तत्प्रसिद्धंपरमैश्वर्यंचदत्तम् ॥ लब्धंवरात्ततइति ॥ वराच्छ्रेष्ठात्तस्मात्परमैश्वर्यंलब्धमित्यर्थः ॥ ५१ ॥ शेमुषीबुद्धिः ॥ ईदृशीमतस्तवनपरा ॥ मेस्तुतिःपरेतिक्वचित् ॥ संज्ञयानेत्रचालनादिना ॥५२॥ कंठकंदलींकंठमूलम् ॥५३॥ भवांतकंसंसारनाशकम् ॥५४॥ स्तंभितदोर्लतस्तिमितहस्तवल्लिकः॥५५॥पद्यैश्चित्रपदार्थार्थैरष्टभिःसुमनोरमैः ॥ कृष्णद्वैपायनोऽस्तौषी द्भवानीशंजगत्पतिम् ॥ तापत्रयात्मकंसंसारदुःखंदुःखहेतुर्वारुतद्द्रावयतिनाशयतीतिरुद्रः॥रुदुःखंदुःखहेतुर्वाद्रावयत्येषनःप्रभुः॥रुद्रइत्युच्यतेसद्भिःशिवःपरमकारणमितिस्मृतेः॥अशुभद्रावकोरुद्रोयज्जहा चपुनर्वदन्॥ततःस्मृतमथोरुद्रशब्देनात्रविधीयतइतिवा॥रुतानिभूतानित्वंतेद्रवतिद्रावयतीतिवारुद्रः॥रुत्यावेदरूपयाधर्मादीन्बोधयतिद्रावयतीतिवारुद्रः॥रुत्याप्रणवरूपयास्वात्मानंप्रापयतीतिवारुद्रः॥ रोरूयमाणोद्रवतिप्रविशतिमर्त्यानितिवारुद्रः॥त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ऽआविवेशेति श्रुतेः ॥ बोधिकाबंधिकामोहिकाचशक्तीरुवृत द्रांस्तस्याद्रावयिताभक्तेभ्यइतिवारुद्रः॥ रुतिंशब्दंवेदा

इत्यादिश्लोकसंघातंस्वप्रतिज्ञाप्रबोधकम् ॥ यावत्पठतिसव्यासःसव्यमुत्क्षिप्यवैभुजम् ॥४६॥ तस्तंभतावत्तद्वाहुंसशैलादिःस्वलीलया ॥ वाक्स्तंभश्चा पितस्यासीन्मुनेर्व्यासस्यसन्मुनेः ॥ ४७ ॥ ततोगुप्तंसमागम्यविष्णुर्व्यासमभाषत ॥ अपराद्धंमहच्चात्रभवताव्यासनिश्चितम् ॥ ४८ ॥ तवैतदपराधे नभीतिर्मेपिमहत्तरा ॥ एकएवहिविश्वेशोद्वितीयोनास्तिकश्चन ॥ ४९ ॥ तत्प्रसादादहंचक्रीलक्ष्मीशस्तत्प्रभावतः ॥ त्रैलोक्यरक्षासामर्थ्यंदत्तंतेनैवशं भुना ॥५०॥ तद्भक्त्यापरमैश्वर्यंमयालब्धंवरात्ततः ॥ इदानींस्तुहितंशंभुंयदिमेशुभमिच्छसि ॥५१॥ अन्यदापिनवैकार्याभवताशेमुषीदृशी ॥ पाराशर्य इतिश्रुत्वासंज्ञयाव्याजहारह ॥५२॥ भुजस्तंभःकृतस्तेननंदिनादृष्टिमात्रतः ॥ वाक्स्तंभस्तद्भयाज्जातःस्पृशमेकंठकंदलीम् ॥ ५३ ॥ यथास्तोतुंभवानी शंप्रभवामिभवांतकम् ॥ संस्पृश्यविष्णुस्तत्कंठंगुप्तमेवजगामह ॥५४॥ ततःसत्यवतीसूनुस्तथास्तंभितदोर्लतः॥प्रारब्धवान्महेशानंपरिष्टोतुमुदारधीः ॥ ॥ ५५ ॥ ॥ व्यासउवाच ॥ ॥ एकोरुद्रोनद्वितीयोयतस्तद्ब्रह्मैवैकंनेहनानास्तिकिंचित् ॥ यद्यप्यन्यःकोपिवाकुत्रचिद्वाव्या चष्टांतद्यस्यशक्तिर्म दग्रे ॥ ५६ ॥ यःक्षीराब्धेर्मंदराघातजातोज्वालामालीकालकूटोतिभीमः ॥ तंसोढुंवाकोपरोऽभून्महेशाद्यत्कीलाभिःकृष्णतामापविष्णुः ॥ ५७ ॥ यद्बाणोभूच्छ्रीपतिर्यस्ययंतालोकेशोयत्स्यंदनंभूःसमस्ता ॥ वाहावेदायस्ययेनेषुपातादग्धाग्रामास्त्रैपुरास्तत्समःकः ॥ ५८ ॥

त्मानंकल्पादौब्रह्मणेददातीतिरुद्रः ॥ योवैवेदांश्चप्रहिणोतितस्माइतिश्रुतेः ॥ अलमतिविस्तरेण ॥ सएकःसजातीयविजातीयस्वगतभेदशून्यः ॥ एतदेवव्यतिरेकमुखेनाह ॥ नद्वितीयइति ॥ एंकत्वेहेतुमाह ॥ यतस्तद्ब्रह्मैवैकमिति ॥ पदत्रयेणसजातीयविजातीयस्वगतभेदत्रयंनिराक्रियतेएकमेवाद्वितीयमिति ॥ एकमेवाद्वितीयंब्रह्मेतिश्रुतेः ॥ व्यतिरेकेहेतुमाह ॥ नेहेति ॥ तथाचश्रुतिर्ने हादिकिंचनांतायथापादमेव ॥ कुत्रचिद्वेतिवाशब्दःसमुच्चयार्थः ॥ कालंसमुच्चिनोति ॥ क्वचित्कालेवेत्यर्थः ॥ कुत्रचिद्देशे ॥ तत्पदार्थम् ॥ मदग्रेममसंमुखम् ॥ समग्रेतिक्वचित् ॥ ५६ ॥ यत्कीला भिर्यस्यज्वालाभिः॥ यज्ज्वालाभिरितिक्वचित्॥कृष्णतांनवीनमेघश्यामताम्॥ तदुक्तम्॥विषेणोत्तिष्ठमानेनकालानलसमत्विषा॥निर्दग्धोहेमगौरांगःकृतःकृष्णोजनार्दनइति ॥५७॥ यद्बाणोयस्यशरः॥

CC-0. In Public Domain. Digitization by eGangotri

यंतासारथिः ॥ लोकेशोब्रह्मा ॥ येनश्रीरुद्रेण ॥ ५८ ॥ ५९ ॥ ६० ॥ सर्वविश्वम् ॥ सर्वेइतिकंचित् ॥ सर्वःसर्वरूपः ॥ ६१ ॥ आनत्यानमस्कारमात्रेण ॥ ६२ ॥ ६३ ॥
स्मायंस्मायंस्मित्वास्मित्वापुनःपुनरीषद्धास्यंविधायेतियावत् ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ॥ इतिश्रीरामानंदकृतायां

यंकंदर्पोवीक्षमाणःसमानंदैवैरन्यैर्भस्मजातःस्वयंहि ॥ पौष्पैर्बाणैःसर्वविश्वैकजेताकोवास्तुत्यःकामजेतुस्ततोन्यः ॥ ५९ ॥ यंवैवेदोवेदनोनैवविष्णुर्नो
वावेधानोमनोनैववाणी ॥ तंदेवेशंमादृशःकोल्पमेधायाथात्म्याद्वेवेत्त्यहोविश्वनाथम् ॥ ६० ॥ यस्मिन्सर्वंयस्तुसर्वत्रसर्वोयोवैकर्तायोऽवितायोऽपहर्ता ॥
नोयस्यादिर्यःसमस्तादिरेकोनोयस्यांतोयोंतकृत्तंनतोस्मि ॥ ६१ ॥ यस्यैकाख्यावाजिमेधेनतुल्यायस्यानत्याचैकयाल्पेंद्रलक्ष्मीः ॥ यस्यस्तुत्यालभ्य
तेसत्यलोकोयस्यार्चातोमोक्षलक्ष्मीरदूरा ॥६२॥ नान्यंदेवंवेद्म्यहंश्रीमहेशान्नान्यंदेवंस्तौमिशंभोर्ऋतेऽहम् ॥ नान्यंदेवंत्वानमामित्रिनेत्रात्सत्यंसत्यंसत्य
मेतन्मृषान ॥ ६३ ॥ इत्थंयावत्स्तौतिशंभुंमहर्षिस्तावन्नंदीशांभवाद्दक्प्रसादात् ॥ तद्दोःस्तंभंत्यक्तवांश्चाबभाषेस्मायंस्मायंब्राह्मणेभ्योनमोवः ॥ ६४ ॥
नंदिकेश्वरउवाच ॥ इदंस्तवंमहापुण्यंव्यासतेपरिकीर्तितम् ॥ यःपठिष्यतिमेधावीतस्यतुष्यतिशंकरः ॥६५॥ व्यासाष्टकमिदंप्रातःपठितव्यंप्रयत्नतः ॥
दुःस्वप्नपापशमनंशिवसान्निध्यकारकम् ॥ ६६ ॥ मातृहापितृहावापिगोघ्नोबालघ्नएववा ॥ सुरापीस्वर्णहृद्वापिनिष्पापोस्याःस्तुतेर्जपात् ॥ ६७ ॥
स्कंदउवाच ॥ ॥ पाराशर्यस्तदारभ्यशंभुभक्तिपरोभवत् ॥ लिंगंव्यासेश्वरंस्थाप्यघंटाकर्णह्रदाग्रतः ॥६८॥ विभूतिभूषणोनित्यंनित्यंरुद्राक्षभूषणः ॥
रुद्रसूक्तपरोनित्यंनित्यंलिंगार्चकोभवत् ॥ ६९ ॥ सकृत्वाक्षेत्रसंन्यासंत्यजेन्नाद्यापिकाशिकाम् ॥ तत्त्वंक्षेत्रस्यविज्ञायनिर्वाणपददायिनः ॥ ७० ॥
घंटाकर्णह्रदेस्नात्वादृष्ट्वाव्यासेश्वरंनरः ॥ यत्रकुत्रमृतोवापिवाराणस्यांमृतोभवेत् ॥ ७१ ॥ काश्यांव्यासेश्वरंलिंगंपूजयित्वानरोत्तमः ॥ नज्ञानाद्भ्रश्यते
क्वापिपातकैर्नाभिभूयते ॥ ७२ ॥ व्यासेश्वरस्ययेभक्तानतेषांकलिकालतः ॥ नपापतोभयंक्वापिनचक्षेत्रोपसर्गतः ॥ ७३ ॥ व्यासेश्वरःप्रयत्नेनद्रष्टव्यः
काशिवासिभिः ॥ घंटाकर्णकृतस्नानैःक्षेत्रपातकभीरुभिः ॥ ७४ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धे
व्यासभुजस्तंभोनामपंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ अगस्त्यउवाच ॥ ॥ कृष्णद्वैपायनःस्कंदशंभुभक्तिपरोयदि ॥ यदिक्षेत्ररहस्यज्ञः
क्षेत्रसंन्यासकृद्यदि ॥ १ ॥

काशीखंडटीकायांपंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥छ॥ ॥ अध्यायेषड्भिरधिकेनवत्याख्येमनोहरे ॥ व्यासशापविमोक्षश्चवर्ण्यतेतिकुतूहलः ॥ १ ॥ काशींव्यासःशप्स्यतीतिपूर्वमेवजान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नाक्षिपति ॥ कृष्णद्वैपायनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ संस्तवनमेवाह ॥ काश्यामिति ॥ काश्यामित्यादिसार्धस्यइतिसंव्याहरन्नित्यग्रिमेणान्वयः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ क्षेत्रमहिमानमेव सपरिकरमाह अत्रेत्यारभ्यागस्त्यउवाचेत्यतःप्राक्तनेनग्रंथेन ॥ ९ ॥ १० ॥ ११ ॥ असकृदितिच्छेदः ॥ प्रत्यहंसकृदितिवा ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ भाषयेद्वदेत् ॥

तथादृष्टप्रभावश्चेत्तथाचेज्ज्ञानिनांवरः ॥ पुरींवाराणसींश्रेष्ठांकथंकिलशपिष्यति ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ सत्यमेतत्त्वयापृष्टिकथयामिमुनेशृणु ॥ तस्यव्यासस्यचरितंभविष्यंत्वयिपृच्छति ॥ ३ ॥ यदारभ्यमुनेस्तस्यनंदीस्तंभितवान्भुजम् ॥ तदारभ्यमहेशानंसंस्तौतिपरमादृतः ॥ ४ ॥ काश्यांतीर्थान्यनेकानिकाश्यांलिंगान्यनेकशः ॥ तथापिसेव्योविश्वेशःस्नातव्यामणिकर्णिका ॥ ५ ॥ लिंगेष्वेकोहिविश्वेशस्तीर्थेषुमणिकर्णिका ॥ इतिसंव्याहरन्व्यासस्तद्द्वयंबहुमन्यते ॥ ६ ॥ त्यक्त्वासबहुवाग्जालंप्रातःस्नात्वादिनेदिने ॥ निर्वाणमंडपेवक्तिमहिमानंमहेशितुः ॥ ७ ॥ शिष्याणांपुरतोनित्यंक्षेत्रस्यमहिमामहान् ॥ व्याख्यायतेमुदातेनव्यासेनपरमर्षिणा ॥ ८ ॥ अत्रयत्क्रियतेक्षेत्रेशुभंवाऽशुभमेववा ॥ संवर्तेपिनतस्यांतस्तस्माच्छ्रेयःसमाचरेत् ॥ ९ ॥ क्षेत्रसिद्धिंसमीहंतेयेचात्रकृतिनोजनाः ॥ यावज्जीवंनतैस्त्याज्यासुधीभिर्मणिकर्णिका ॥ १० ॥ चक्रपुष्करिणीतीर्थेस्नातव्यंप्रतिवासरम् ॥ पुष्पैःपत्रैःफलैस्तोयैरर्च्योविश्वेश्वरःसदा ॥ ११ ॥ स्ववर्णाश्रमधर्मश्चत्यक्तव्योनमनागपि ॥ प्रत्यहंक्षेत्रमहिमाश्रोतव्यःश्रद्धयासकृत् ॥ १२ ॥ यथाशक्तिचदेयानिदानान्यत्रसुगुप्तवत् ॥ अन्नान्यपिचदेयानिविप्रान्परिजिहीर्षुणा ॥ १३ ॥ परोपकरणंचात्रकर्तव्यंसुधियासदा ॥ पर्वस्वत्रापिविशेषेणस्नानदानादिकाःक्रियाः ॥ १४ ॥ विशेषपूजाकर्तव्यासुमहोत्सवपूर्वकम् ॥ कार्यास्तथाधिकायात्राःसमर्च्याःक्षेत्रदेवताः ॥ १५ ॥ अत्रमर्मनवक्तव्यंसुधियाकस्यचित्क्वचित् ॥ परदारपरद्रव्यपरापकरणंत्यजेत् ॥ १६ ॥ परापवादोनोवाच्यःपरेर्ष्यांनचकारयेत् ॥ असत्यंनैववक्तव्यंप्राणैःकंठगतैरपि ॥ १७ ॥ अत्रत्यजंतुरक्षार्थमसत्यमपिभाषयेत् ॥ येनकेनप्रकारेणशुभेनाप्यशुभेनवा ॥ १८ ॥ अत्रत्यःप्राणिमात्रोपिरक्षणीयःप्रयत्नतः ॥ एकस्मिन्रक्षितेजंतावत्रकाश्यांप्रयत्नतः ॥ त्रैलोक्यरक्षणात्पुण्यंयत्स्यात्तत्स्यान्नसंशयः ॥ १९ ॥ येवसंतिसदाकाश्यांक्षेत्रसंन्यासकारिणः ॥ तएवरुद्रामंतव्याजीवन्मुक्तानसंशयः ॥ २० ॥ तेपूज्यास्तेनमस्कार्यास्तेसंतोष्याःप्रयत्नतः ॥ तेषुवैपरितुष्टेषुतुष्येद्विश्वेश्वरःस्वयम् ॥ २१ ॥ काश्यांवसंतियेमर्त्यादूरस्थैरपिसन्नरैः ॥ योगक्षेमोविधातव्यस्तेषांविश्वेशितुर्मुदे ॥ २२ ॥ प्रसरंस्त्विंद्रियाणांचनिवार्योत्रनिवासिभिः ॥ मनसोपिहिचांचल्यमिहवार्यंप्रयत्नतः ॥ २३ ॥ मरणंनाभिकांक्षेद्धिकांक्ष्योमोक्षोऽपिनोपुनः ॥ शरीरशोषणोपायःकर्तव्यःसुधियानहि ॥ २४ ॥

न्यान्वाभाषयेदिति ॥ १८ ॥ तर्ह्यनृतेनपापमपिस्यादित्याशंक्याह ॥ एकस्मिन्निति ॥ पापस्याल्पत्वात्पुण्यस्यबहुत्वान्नानृताद्भेतव्यम् ॥ यद्वात्रानृतेपुण्यमेवनपापंयागेपशुहिंसायामिवेतिभावः ॥ ॥ १९ ॥ २० ॥ २१ ॥ योगक्षेमोयोगसहितःक्षेमोयोगस्यक्षेमइतिवा ॥ तत्रालब्धस्यलाभोयोगोलब्धस्यरक्षणंक्षेमइतिभेदः ॥ २२ ॥ २३ ॥ सुधियाहितात्रसुखेयात्रेतिपाठेइंद्रियचांचल्य

CC-0. In Public Domain. Digitization by eGangotri

परिहारोपयोगितयाशरीरशोषणोपायःकर्तव्योनपुनःशरीरनाशायेत्यर्थः ॥ २४ ॥ नहीत्यत्रेहेतुमाह ॥ शरीरसौष्ठवमिति ॥ सौष्ठवंपाटवम् ॥ पौष्टिकमितिपाठेपुष्ट्युपायमित्यर्थः ॥ २५ ॥
अत्रात्मत्यजनोपायंमनसापिनचिंतयेदित्यनशनंविनेतिबोद्धव्यम् ॥ विनात्मघातमशनंत्यक्त्वाप्रायोपवेशनम् ॥ अनाशकंयःकुरुतेमद्भक्तइहसुव्रतः ॥ नतस्यपुनरावृत्तिरित्याद्युक्तेः ॥ २६ ॥ २७ ॥

शरीरसौष्ठवंकांक्ष्यंव्रतस्नानादिसिद्धये ॥ आयुर्बह्वत्रवैचिंत्यंमहाफलसमृद्धये ॥ २५ ॥ आत्मरक्षात्रकर्तव्यामहाश्रेयोभिवृद्धये ॥ अत्रात्मत्यजनोपायं मनसापिनचिंतयेत् ॥ २६ ॥ एकस्मिन्नपियच्चाह्निकाश्यांश्रेयोभिलभ्यते ॥ नतुवर्षशतेनापितदन्यत्राप्यतेक्वचित् ॥ २७ ॥ अन्यत्रयोगाभ्यसनाद्या वज्जन्मयदर्ज्यते ॥ वाराणस्यांतदेकेनप्राणायामेनलभ्यते ॥२८॥ सर्वतीर्थावगाहाच्चयावज्जन्मयदर्ज्यते ॥ तदानंदवनेप्राप्यंमणिकर्ण्येकमज्जनात् ॥ ॥ २९ ॥ सर्वलिंगार्चनात्पुण्यंयावज्जन्मयदर्ज्यते ॥ सकृद्विश्वेशमभ्यर्च्यश्रद्धयातदवाप्यते ॥३०॥ यज्जन्मनांसहस्रेणनिर्मलंपुण्यमर्जितम् ॥ तत्पुण्यप रिवर्तेनभवेद्विश्वेशदर्शनम् ॥ ३१ ॥ गवांकोटिप्रदानेनसम्यग्दत्तेनयत्फलम् ॥ तत्फलंसम्यगाप्येतविश्वेश्वरविलोकनात् ॥ ३२ ॥ यत्षोडशमहादानैः पुण्यंप्रोक्तंमहर्षिभिः ॥ तत्पुण्यंजायतेपुंसांविश्वेशेपुष्पदानतः ॥३३॥ अश्वमेधादिभिर्यज्ञैर्यत्फलंप्राप्यतेखिलैः ॥ पंचामृतानांस्नपनाद्विश्वेशेतदवाप्यते ॥३४॥ वाजपेयसहस्रेणसम्यगिष्टेनयत्फलम् ॥ सकृन्महार्हैर्नैवेद्यैर्विश्वेशेतच्छताधिकम् ॥३५॥ ध्वजातपत्रंचमरंविश्वेशेयःसमर्पयेत् ॥ एकच्छत्रंससैवै राज्यंप्राप्नुयाद्वसुधातले ॥ ३६ ॥ महापूजोपकरणंयोर्पयेद्विश्वभर्तरि ॥ नतंसंपत्तिसंभाराविमुंचंतीहकुत्रचित् ॥ ३७ ॥ सर्वर्तुकुसुमाढ्यांचयः कुर्यात्पुष्पवाटिकाम् ॥ तदंगणेकल्पवृक्षाश्छायांकुर्वंतिशीतलाम् ॥३८॥ यःक्षीरस्नपनार्थंवैविश्वेशेधेनुमर्पयेत् ॥ क्षीरार्णवतटेतस्यानिवसेयुःपितामहाः ॥ ॥ ३९ ॥ विश्वेशराजसदनेयःसुधांचित्रमेववा ॥ कारयेत्तस्यभवनंकैलासेसचित्रितंभवेत् ॥ ४० ॥ ब्राह्मणान्यतिनोवापितथैवशिवयोगिनः ॥ भोजये द्योत्रवैकाश्यामेकैकगणनाक्रमात् ॥ ४१ ॥ कोटिभोज्यफलंतस्यश्रद्धयानात्रसंशयः ॥ तपस्त्वत्रप्रकर्तव्यंदानमत्रप्रदापयेत् ॥ ४२ ॥ विश्वेशस्तोषणी योत्रस्नानहोमजपादिभिः ॥ अन्यत्रकोटिजप्येनयत्फलंप्राप्यतेनरैः ॥ अष्टोत्तरशतंजप्त्वातदत्रसमवाप्यते ॥ ४३ ॥ कोटिहोमेनयत्प्रोक्तंफलमन्यत्रसू रिभिः ॥ अष्टोत्तराहुतिशतात्तदत्रानंदकानने ॥ ४४ ॥ योजपेद्रुद्रसूक्तानिकाश्यांविश्वेशसन्निधौ ॥ पारायणेनवेदानांसर्वेषांफलमाप्यते ॥ ४५ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ४१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥४०॥ शिवयोगिनःपाशुपतान् ॥ शिवैकभक्तानितिवा ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परेअक्षरेनित्येमहादेवेचिंतितेयत्पुण्यंभवतितदियदितिनाहंजाने ॥ ४६ ॥ ४७ ॥ ४८ ॥ अथकृच्छ्रचांद्रायणकरणाद्यनंतरंनबाधंतेतत्कर्तॄन्नरानित्यर्थः ॥४९॥ यदिचेत् ॥ यदितिपाठेप्ययमेवार्थः ॥
॥ ५० ॥ कृच्छ्रचांद्रायणादीनिकर्तव्यानीत्युक्तंतत्रपृच्छति ॥ कृच्छ्रेति ॥५१॥ कृच्छ्रादीनिव्यासेनवक्ष्यमाणानि ॥५२॥ एकभक्तेनेत्यादीनांपद्यानामित्यादिसत्प्रवृत्तिश्चेतिसार्धसप्तविंशतितमश्लो

तस्यपुण्यंनजानामिचिंतितेचाक्षरेपरे[1] ॥ काश्यांनित्यंप्रवस्तव्यंसेव्योत्तरवहासदा ॥ ४६ ॥ आपद्यपिहिघोरायांकाशीत्याज्यानकुत्रचित् ॥ यतःसर्वा
पदांहर्तात्राताविश्वपतिःप्रभुः ॥ ४७ ॥ अवंध्यंदिवसंकुर्यात्स्नानदानजपादिभिः ॥ यतःकाश्यांकृतंकर्ममहत्त्वायप्रकल्पते ॥ ४८ ॥ कृच्छ्रचांद्रायणादी
निकर्तव्यानिप्रयत्नतः ॥ तथेंद्रियविकाराश्चनबाधंतेत्रकर्हिचित् ॥ ४९ ॥ यदींद्रियाणिकुर्वंतिविक्रियामिहदेहिनाम् ॥ तदात्रवाससंसिद्धिर्विघ्नेभ्योनै
वलभ्यते ॥ ५० ॥ ॥ अगस्त्यउवाच ॥ ॥ कृच्छ्रचांद्रायणादीनिव्यासोवक्ष्यतियानिवै ॥ तेषांस्वरूपमाख्याहिस्कंदेंद्रियविशुद्धये ॥ ५१ ॥ ॥
स्कंदउवाच ॥ ॥ कथयामिमहाबुद्धेकृच्छ्रादीनितवाग्रतः ॥ यानिकृत्वात्रमनुजोदेहशुद्धिंलभेत्पराम् ॥ ५२ ॥ एकभक्तेननक्तेनतथैवायाचितेनच ॥
उपवासेनचैकेनपादकृच्छ्रःप्रकीर्तितः ॥ ५३ ॥ वटोदुंबरराजीवबिल्वपत्रकुशोदकम् ॥ प्रत्येकंप्रत्यहंपीतंपर्णकृच्छ्रःप्रकीर्तितः ॥५४॥ पिण्याकघृततक्रां
बुसक्तूनांप्रतिवासरम् ॥ एकैकमुपवासश्चकृच्छ्रःसौम्यःप्रकीर्तितः ॥ ५५ ॥ हविषाप्रातरश्नीतहविषासायमेवच ॥ हविषायाचितंत्रींस्तुसोपवासस्त्र्यहं
वसेत् ॥ ५६ ॥ एकैकंग्रासमश्नीयादहानित्रीणिपूर्ववत् ॥ त्र्यहंचोपवसेदंत्यमतिकृच्छ्रंचरन्द्विजः ॥ ५७ ॥ कृच्छ्रातिकृच्छ्रंपयसादिवसानेकविंशतिः ॥
द्वादशाहोपवासेनपराकःपरिकीर्तितः ॥ ५८ ॥ त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितम् ॥ त्र्यहंचोपवसेदंत्यंप्राजापत्यंचरन्द्विजः ॥ ५९ ॥ गोमूत्रंगोमयं
क्षीरंदधिसर्पिःकुशोदकम् ॥ एकरात्रोपवासश्चकृच्छ्रःसांतपनःस्मृतः ॥ ६० ॥ पृथक्सांतपनद्रव्यैःषडहःसोपवासकः ॥ सप्ताहेनतुकृच्छ्रोयंमहासांतपनः
स्मृतः ॥ ६१ ॥ तप्तकृच्छ्रंचरन्विप्रोजलक्षीरघृतानिलान् ॥ एतांस्त्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितः ॥ ६२ ॥ त्र्यहमुष्णाःपिबेदापस्त्र्यहमुष्णंपयःपि
बेत ॥ त्र्यहमुष्णंघृतंप्राश्यवायुभक्षोदिनत्रयम् ॥ ६३ ॥ पलमेकंपयःपीत्वासर्पिषश्चपलद्वयम् ॥ पलमेकंतुतोयस्यतप्तकृच्छ्रउदाहृतः ॥ ६४ ॥ गोमूत्रे
णसमायुक्तंयावकंयःप्रयोजयेत् ॥ कृच्छ्रमेकाह्निकंप्रोक्तंशरीरस्यविशोधनम् ॥ ६५ ॥

केनान्वयः ॥५३॥ राजीवंपद्मम् ॥५४॥ पिण्याकंतिलपिष्टंच ॥ घृतंचतक्रंचांबुचसक्तुश्चतेषांप्रत्येकाभ्यवहरणमितिशेषः ॥५५॥ त्रीनितिसर्वत्रसंबध्यते ॥ हविषात्रीन्दिवसान्प्रातरित्यर्थः ॥५६॥
पूर्ववत्प्रातरादिवत् ॥ ५७ ॥ ५८ ॥ ५९ ॥ गोमूत्रमित्यादीनामेकीकृत्यभक्षणम् ॥ ६० ॥ षडहःषडहानि ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ यावकंयवान्नम् ॥ प्रयोजयेद्भक्षयेदित्यर्थः ॥ ६५ ॥

---

१ परेऽक्षरेचिंतितेसति, वेदाक्षरार्थावगमनपूर्वकरुद्रसूक्तपाठेकृतेसतियत्फलमाप्यतेतन्मयापिनज्ञायतइतिमूलकाराभिप्रायआभातीतिचिन्तनीयम् ।

CC-0. In Public Domain. Digitization by eGangotri

व्युष्टःमासप्रातःकालः ॥ ६६ ॥ ६७ ॥ ६८ ॥ शिशुचांद्रायणंब्रह्मचारिचांद्रायणम् ॥ ६९ ॥ ७० ॥ तिस्रोऽशीतीःअशीतित्रयम् ॥ यथाकथंचिदित्येकादश्युपवासाभिप्रायम् ॥ ७१ ॥ भूतात्मा हंकारः ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ लिंगपूजार्चकइति ॥ पूजात्ररुद्रियपाठः ॥ वसेत्पुरा ॥ भविष्यदर्थेपुरेत्यतीतनिर्देशः ॥ ८१ ॥ भिक्षाटनं

हस्तावुत्तानतःकृत्वादिवसंमारुताशनः ॥ रात्रौजलेस्थितोव्युष्टःप्राजापत्येनतत्समम् ॥ ६६॥ एकैकंह्रासयेद्ग्रासंकृष्णेशुक्लेचवर्धयेत् ॥ उपस्पृशंस्त्रिषवण मेतच्चांद्रायणंस्मृतम् ॥ ६७ ॥ एकैकंवर्धयेद्ग्रासंशुक्लेकृष्णेचह्रासयेत् ॥ भुंजीतदर्शेनोकिंचिदेषचांद्रायणोविधिः ॥६८॥ चतुरःप्रातरश्नीयात्पिंडान्विप्रः समाहितः ॥ चतुरोस्तमितेसूर्येशिशुचांद्रायणंस्मृतम् ॥ ६९ ॥ अष्टावष्टौसमश्नीयात्पिंडान्मध्यंदिनेस्थिते ॥ नियतात्माहविष्यस्ययतिचांद्रायणं स्मृतम् ॥ ७० ॥ यथाकथंचित्पिंडानांतिस्रोशीतीःसमाहितः ॥ मासेनाश्नन्हविष्यस्यचंद्रस्यैतिसलोकताम् ॥ ७१ ॥ अद्भिर्गात्राणिशुध्यंतिमनःसत्ये नशुद्ध्यति ॥ विद्यातपोभ्यांभूतात्माबुद्धिर्ज्ञानेनशुद्ध्यति ॥७२॥ तच्चज्ञानंभवेत्पुंसांसम्यक्काशीनिषेवणात् ॥ काशीनिषेवणेनस्याद्विश्वेशकरुणोदयः॥ ॥ ७३ ॥ ततोमहोदयावाप्तिःकर्मनिर्मूलनक्षमा ॥ अतःकाश्यांप्रयत्नेनस्नानंदानंतपोजपः ॥७४॥ व्रतंपुराणश्रवणंस्मृत्युक्ताध्वनिषेवणम् ॥ प्रतिक्षणंप्रति दिनंविश्वेशपदचिंतनम् ॥ ७५ ॥ लिंगार्चनंत्रिकालंचलिंगस्यापिप्रतिष्ठितिः ॥ साधुभिःसहसंलापोजल्पःशिवशिवेतिच ॥७६॥ अतिथेश्चापिसत्कारो मैत्रीतीर्थनिवासिभिः ॥ आस्तिक्यबुद्धिर्विनयोमानामानसमानधीः ॥ ७७ ॥ अकामितात्वनौद्धत्यमरागित्वमहिंसनम् ॥ अप्रतिग्रहवृत्तिश्चमति श्चानुग्रहात्मिका ॥ ७८ ॥ अदंभितात्वमात्सर्यमप्रार्थितधनागमः ॥ अलोभित्वमनालस्यमपारुष्यमदीनता ॥ ७९ ॥ इत्यादिसत्प्रवृत्तिश्चकर्तव्याक्षे त्रवासिना ॥ प्रत्यहंचेतिशिष्येभ्यःसधर्मसमुपदेक्ष्यति ॥ ८० ॥ नित्यंत्रिषवणस्नायीनित्यंभिक्षाकृताशनः ॥ लिंगपूजार्चकोनित्यमित्थंव्यासोवसेत्पुरा ॥ ॥ ८१ ॥ एकदातस्यजिज्ञासांकर्तुंदेवींहरोवदत् ॥ अद्यभिक्षाटनंप्राप्तेव्यासेपरमधार्मिके ॥ ८२ ॥ अपिसर्वगतेक्वापिभिक्षांमायच्छसुंदरि ॥ तथे त्युक्त्वाभवानीसाभवंभवनिवारणम् ॥ ८३ ॥ नमस्कृत्यप्रतिगृहंतस्यभिक्षांन्यषेधयत् ॥ ससुनिःसहितःशिष्यैर्भिक्षामप्राप्यदूनवत् ॥ ८४ ॥ वेलाति क्रममालोक्यपुनर्बभ्रामतांपुरीम् ॥ गृहेगृहेपरिप्राप्ताभिक्षान्यैःसर्वभिक्षुकैः ॥८५॥ तदह्निनालभद्भिक्षांसशिष्यःसमुनिःक्वचित् ॥ अथसायंतनंकर्मकृत्वा छात्रैःसमन्वितः ॥ ८६ ॥ उपोषणपरोभूत्वातथैवासीदहर्निशम् ॥ अथान्येद्युर्मुनिर्व्यासःकृत्वामाध्याह्निकंविधिम् ॥ ८७ ॥

प्राप्तेभिक्षितुंगतेसतीत्यर्थः ॥ ८२ ॥ ८३ ॥ तस्यसशिष्यस्यभिक्षांन्यषेधयत् ॥ दूनवत्खिन्नवत् ॥ ८४ ॥ ८५ ॥ छत्रमिवगुरुंगोपायंतीतिछात्राःशिष्यास्तैः ॥ ८६ ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८८ ॥ ८९ ॥ यत्नेनरक्षिताप्रयत्नेनकेनचिद्वारितेत्यर्थः ॥ यत्नेकृतेपिचेतिपाठःसुगमः ॥ अंतेवासिनःशिष्यान् ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ दुस्थास्तुपीडितावा ॥ उपसर्गेणदुर्निमित्तेन ॥ ९४ ॥ पवित्रचरणादाराध्यचरणात् ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ विश्वेशनिर्माल्योपभुजांलैंगिकानांदेवलकानामितिवा ॥ ९९ ॥ यादृशस्तादृशइतिचवहुवचनम् ॥ १०० ॥

यथौभिक्षाटनंकर्तुंसशिष्यःपरितःपुरीम् ॥ सर्वत्रसपरिभ्रांतःप्रतिसौधंमुहुर्मुहुः ॥ ८८ ॥ नक्कापिलब्धवान्भिक्षांभाग्यहीनोधनंयथा ॥ अथाचिंतितवान्व्यासःपरिश्रांतःपरिभ्रमन् ॥ ८९ ॥ कोहेतुर्यन्नलभ्येतभिक्षायत्नेनरक्षिता ॥ अंतेवासिनआहूयव्यासःपप्रच्छचाखिलान् ॥ ९० ॥ भवद्भिरपिनोभिक्षापरिप्राप्तेतिगम्यते ॥ किमत्रपुरिसंवृत्तंद्विप्रायातममाज्ञया ॥ ९१ ॥ द्वितीयेह्न्यपियद्भिक्षानलभ्येतातियत्नतः ॥ अनिष्टंकिंचिदत्रासीन्महागुरुनिपातजम् ॥ ९२ ॥ अन्नक्षयोवासर्वस्यांनगर्याममभवत्क्षणात् ॥ राजदंडोथयुगपज्जातःसर्वपुरौकसाम् ॥ ९३ ॥ अथवावारिताभिक्षाकेनाप्यस्मासुचेर्ष्यया ॥ पुरौकसोभवन्दुस्थास्तूपसर्गेणकेनचित् ॥ ९४ ॥ किमेतदखिलंज्ञात्वासमागच्छतसत्वरम् ॥ द्विजाः पवित्रचरणात्प्राप्यानुज्ञांगुरोरथ ॥ समाचख्युः समागम्यदृष्टंदृष्टंतत्पुरौकसाम् ॥ ९५ ॥ ॥ शिष्याऊचुः ॥ ॥ शृण्वंत्वाराध्यचरणानोपसर्गोत्रकश्चन ॥ नान्नक्षयोवासर्वस्यांनगर्यामिहकुत्रचित् ॥ ९६ ॥ यत्रविश्वेश्वरःसाक्षाद्यत्राऽमरधुनीस्वयम् ॥ त्वादृशायत्रमुनयःक्कभीस्तत्रोपसर्गजा ॥ ९७ ॥ समृद्धिर्यागृहस्थानामिहविश्वेशितुःपुरि ॥ नसद्धिरस्तिवैकुंठेत्वल्पास्ताअलकादयः ॥ ९८ ॥ रत्नाकरेषुरत्नानिनतावंतिमहामुने ॥ यावंतिसंतिविश्वेशनिर्माल्योपभुजांगृहे ॥ ९९ ॥ गृहेगृहेत्रधान्यानांराशयोयादृशःपुनः ॥ नतादृशःकल्पवृक्षदत्ताऐंद्रेपुरेक्कचित् ॥ १०० ॥ यत्रसाक्षाद्विशालाक्षीसुविस्तारफलप्रदा ॥ नतत्रपुरिसर्वस्यांनरोवैनिर्धनःक्कचित् ॥ १ ॥ निर्वाणलक्ष्म्याःसदनेत्वस्मिन्नानंदकानने ॥ मोक्षोपियत्रसुलभःकिमन्यत्तत्रदुर्लभम् ॥ २ ॥ सीमंतिन्यःस्त्रियःसर्वाःपतिव्रतपरायणाः ॥ सर्वाभवानीरूपिण्योविश्वेशार्पितसत्क्रियाः ॥३॥ यावंतःपुरुषाःकाश्यांसर्वएवगणाधिपाः ॥ सर्वएवकुमारावैसर्वेतारकदृष्टयः ॥४॥ त्रिपुंड्रांकितभालायेतेसर्वेचंद्रमौलयः ॥ उपसर्गसहस्रैश्चपीड्यमानाअपीहये ॥ ५ ॥ नत्यजंतिसदाकाशींसर्वज्ञाएवतेखिलाः ॥ गृहेगृहेपिबट्वोब्रह्मवादविवादिनः ॥ ६ ॥ स्वर्धुनीधूतकलुषाःसंतीहचतुराननाः ॥ निर्वाणलक्ष्मीपतयःक्षेत्रसंन्यासकारिणः ॥७॥ सर्वएवहृषीकेशाःसर्वेवैपुरुषोत्तमाः ॥ अच्युताएवविज्ञेयाएतत्क्षेत्रपरिग्रहाः ॥ ८ ॥ स्त्रियोवापुरुषावापिसर्वएवनसंशयः ॥ सर्वएवत्रिनयनाःसर्वएवचतुर्भुजाः ॥ ९ ॥ श्रीकंठाःसर्वएवात्रसर्वेमृत्युंजयाध्रुवम् ॥ मोक्षश्रीश्रितवर्ष्माणस्त्वर्धनारीश्वरायतः ॥ ११० ॥ धर्मराशिःपरश्चात्रमहांतोऽत्रार्थराशयः ॥ सर्वेकामाःफलंत्यत्रकैवल्यंचात्रनिर्मलम् ॥ ११ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ चतुराननाहिरण्यगर्भसदृशाः ॥ वाक्चातुर्ययुक्तान्याननानियेषांतेइतिवा ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१२॥ नादबिंदुकलात्मकोनादबिंदुकलास्वरूपः॥वाच्यवाचकयोरभेदनिर्देशात्सामानाधिकरण्यम् ॥ षष्ठ्यंतपाठेतद्वाच्योविश्वेश्वरोयत्रास्तीतिपृथग्वाक्यम् ॥१३॥१४॥१५॥ नीराजयंतिनीराजनां प्रापयंति ॥१६॥१७॥ पंचपीयूषधाराभिःपंचामृतसंपातैः ॥१८॥ तरुभिरन्यैर्वृक्षैःसह ॥ ऋतुभिरितिक्वचित् ॥ निवसंतीतिशेषः ॥१९॥१२०॥२१॥२२॥२३॥२४॥शपञ्शप्स्यति ॥ अशपत्त्विती

नगर्भवाससंसर्गःकाशीसंस्थितिकारिणाम् ॥ नकलिश्चात्रबाधेतकालोनैवप्रबाधते ॥ १२ ॥ एनांसिनात्रबाधंतेविश्वेशशरणार्थिनः ॥ यत्रविश्वेश्वरः साक्षान्नादबिंदुकलात्मकः ॥ १३ ॥ ध्वनिरूपीहितत्रास्तिप्रणवोमंत्रविग्रहः ॥ अतोविग्रहवंतोत्रसंतिवेदाविनिश्चितम् ॥ १४ ॥ सरस्वतीसरिद्रूपाह्यतः शास्त्रनिकेतनम् ॥ आनंदकाननंसर्वधर्मशास्त्रकृतालयम् ॥ १५ ॥ यावंतोदिविवैदेवास्तावंतोत्रमृषानहि ॥ नीराजयंतिविश्वेशंरात्रौरात्रौसदाऽह्यः ॥ ॥ १६ ॥ स्वफणामणिदीपैश्चप्राप्यकाशींरसातलात् ॥ समुद्राःसर्वएवात्रकामधेनुव्रजान्विताः ॥१७॥ पंचपीयूषधाराभिर्विश्वेशंस्नपयंतिहि ॥ मंदारःपारिजातश्चसंतानोहरिचंदनः ॥ १८ ॥ कल्पद्रुमश्चपंचैतेतरुभिःसहसर्वदा ॥ १९ ॥ सर्वेसुरनिकायाश्चसर्वएवमहर्षयः ॥ योगिनःसर्वएवात्रकाशीनाथमुपासते ॥१२०॥ विद्यानांसदनंकाशीकाशीलक्ष्म्याःपरालयः ॥ मुक्तिक्षेत्रमिदंकाशीकाशीसर्वात्रयीमयी ॥२१॥ इतिश्रुत्वामुनिवरःपाराशर्योमहातपाः ॥ एवंबभाषेताञ्शिष्यान्पुनःश्लोकंपठंत्वमुम् ॥ २२ ॥ ॥ शिष्याऊचुः ॥ ॥ विद्यानांचाश्रयःकाशीकाशीलक्ष्म्याःपरालयः ॥ मुक्तिक्षेत्रमिदंकाशीकाशीसर्वात्रयीमयी ॥ २३ ॥ ॥ स्कंदउवाच ॥ ॥ निशम्येतितदाव्यासःक्रोधांधीकृतलोचनः ॥ क्षुत्कृशानुज्वलन्मूर्तिःकाशींशप्स्यतिकुंभज ॥ ॥ २४ ॥ ॥ व्यासउवाच ॥ ॥ माभूत्त्रैपूरुषीविद्यामाभूत्त्रैपूरुषंधनम् ॥ माभूत्त्रैपूरुषीमुक्तिःकाशींव्यासःशपन्निति ॥२५॥ गर्वःपरोत्रविद्यानांधनगर्वोत्रवैमहान् ॥ मुक्तिगर्वेणनोभिक्षांप्रयच्छंत्यत्रवासिनः ॥ २६ ॥ इतिकृत्वामतिंव्यासःकाश्यांशापमदात्तदा ॥ दत्त्वापिशापंसमुनिर्भिक्षितुंक्रोधवान्ययौ॥ ॥ २७ ॥ प्रतिगेहंत्वरायुक्तःप्रविशन्व्योमदत्तदृक् ॥ बभ्रामनगरींसर्वांक्वापिभैक्षंनलब्धवान् ॥२८॥ अंशुमालिनमावीक्ष्यमनाग्लोहितमंडलम् ॥ भिक्षापात्रंपरिक्षिप्यनिर्ययावाश्रमंप्रति ॥ २९ ॥ अथगच्छन्महादेव्यागृहद्वारिनिषण्णया ॥ प्राकृतस्त्रीस्वरूपिण्याभिक्षायैप्रार्थितोतिथिः ॥ १३० ॥ ॥ गृहिण्युवाच ॥ ॥ भगवन्भिक्षुकास्तावदद्यदृष्टानकुत्रचित् ॥ असत्कृत्यातिथिंनाथोनमेभोक्ष्यतिकर्हिचित् ॥ ३१ ॥ वैश्वदेवादिकंकर्मकृत्वागृहपतिर्मम ॥ प्रतीक्षेतातिथिपथंतस्मात्त्वमतिथिर्भव ॥ ३२ ॥ विनातिथिंगृहस्थोयस्त्वन्नमेकोनिषेवते ॥ निषेवतेऽघंसपरंसहितःस्वपितामहैः ॥ ३३ ॥

तिक्वचित् ॥ तत्रविभक्तिव्यत्ययश्छांदसः ॥ २५ ॥ एतादृशशापेकारणमाह ॥ गर्वःपरोऽत्रविद्यानामिति ॥ परोह्यत्रविद्येतिपाठेगर्वोगर्वहेतुरित्यर्थः ॥२६॥२७॥२८॥२९॥१३०॥३१॥३२॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३४ ॥ ३५ ॥ ३६ ॥ सुधाऽमृताधिष्ठात्रीदेवता ॥ ३७ ॥ ३८ ॥ अथवेतिपक्षांतरे ॥ आज्ञातमितिक्वचित् ॥ ३९ ॥ १४० ॥ ४१ ॥ ४२ ॥ भक्तपोतप्रदासंसारार्णवतारणाय

तस्मात्त्वरितमायाहिकुरुमेपत्युरीहितम् ॥ गार्हस्थ्यंसफलंकर्तुमिच्छतोऽतिथिपूजनात् ॥ ३४ ॥ इतिश्रुत्वागतामर्षोव्यासस्तामाहाविस्मितः ॥ ॥ व्यासउवाच ॥ ॥ भद्रेकात्वंकुतःप्राप्ताप्राप्तापूर्वंदृष्टानकुत्रचित् ॥ ३५ ॥ मन्येधर्ममयीमूर्तिःकापित्वंशुचिमानसा ॥ त्वद्दर्शनात्परांप्रीतिंसंप्राप्तानींद्रियाणिमे ॥ ३६ ॥ त्वंसुधैवभवेःप्रायःसर्वावयवसुंदरि ॥ मंदराघातसंत्रासात्त्यक्तक्षीरार्णवस्थितिः ॥ ३७ ॥ कलासुधाकरस्याथकुहूराहुभयार्दिता ॥ सीमंतिनीस्वरूपेणातिष्ठेःकाश्यामनिर्भया ॥ ३८ ॥ अथवाकमलासित्वंविहायकमलालयम् ॥ निशिसंकोचिनंकाश्यांविकाशिन्यांवसेःसदा ॥ ३९ ॥ किंवानुकरुणामूर्तिरिहकाशिनिवासिनाम् ॥ सर्वदुःखौघहरिणीपरानंदप्रदायिनी ॥ १४० ॥ वाराणस्याःकिमथवाऽधिष्ठात्रीदेवतात्वमु ॥ किंवानिर्वाणलक्ष्मीस्त्वंयाकाश्यांपरिगीयते ॥ ४१ ॥ श्वपाकंयायजूकंवाप्रांतेऽलंकुर्वतीसमम् ॥ मद्भाग्यंवापरिणतमेतद्योषित्स्वरूपतः ॥ ४२ ॥ अथवासाभवेन्नूनंयाक्षेत्रेपरिगीयते ॥ भक्तपोतप्रदाभक्त्याभवानीभवनाशिनी ॥ ४३ ॥ सर्वथैवननारीत्वंनासुरीनैवकिन्नरी ॥ विद्याधरीननोनागीनोगंधर्वीनयक्षिणी ॥ ४४ ॥ त्वमिष्टदेवतैवासिकाचिन्मेमोहहारिणी ॥ केयंचिंताथवामेत्रकाचित्त्वंभवसुंदरि ॥४५॥ परवानस्म्यहंजातस्तवदर्शनतोऽधुना ॥ अवश्यमेवकर्तास्मितवादेश्यंतदादिश ॥ ४६ ॥ एकंतपोव्ययंहित्वाकारयिष्यसियत्पुनः ॥ तदेवाहंकरिष्यामिविधेयःशुभलोचने ॥ ४७ ॥ नवचस्त्वादृशीनांहिमहत्त्वंहापयेत्सताम् ॥ परंत्वंकासिसुभगेसत्यंब्रूहिममाग्रतः ॥ ४८ ॥ अथवातवदेहेस्मिन्कासत्यंनिर्मलेक्षणे ॥ इतिपृष्टाहमुनिनासाविश्वायुर्घटोद्भव ॥ ४९ ॥ अत्रत्यस्यैवहिमुनेगृहिणीगृहमेधिनः ॥ नित्यंवीक्षेचरंतंत्वांभिक्षांशिष्यगणैर्वृतम् ॥ १५० ॥ त्वमेवमांनोजानीषेजानेत्वामहमेवहि ॥ तपस्विन्किंबहूक्तेनयावन्नास्तंव्रजेद्रविः ॥ ५१ ॥ प्राणनाथस्यमेतावदातिथ्यंसफलीकुरु ॥ तच्छ्रुत्वासमुनिःप्राहविनयानतकंधरः ॥ ५२ ॥ ॥ व्यासउवाच ॥ ॥ अस्तिमेनियमःकश्चित्ससिद्धिंचेद्व्रजेच्छुभे ॥ एकभिक्षांतदाहंतुकरिष्येनान्यथापुनः ॥ ५३ ॥ तपस्व्युदीरितंश्रुत्वासाप्रोवाचवचस्ततः ॥ अविशंकंवदमुनेकस्तेस्तिनियमःसुधीः ॥ ५४ ॥

विद्यानौप्रदेत्यर्थः ॥ किमितिसर्वेसंसारंनतरेयुरितितत्राह ॥ भक्त्येति ॥ प्रेमलक्षणयेत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ विधेयस्त्वदधीनस्त्वयोक्तइतियावत् ॥ ४७ ॥ ४८ ॥ विश्वायुर्विश्वैकजीवनेत्यर्थः ॥ तदुक्तम् ॥ यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थितेति ॥ ४९ ॥ १५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ सुधीरितिकटाक्षः ॥ ५४ ॥

Sampurnanand Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५५॥५६॥५७॥५८॥५९॥ सर्वशः सर्वप्रकारेण॥ तादृश्यश्चतामहिला श्चभार्यास्तादृङ्महिलाः ॥१६०॥६१॥६२॥६३॥६४॥ तन्मार्गलोचनांव्यासागमवर्त्मदृष्टिम् ॥६५॥ समयासमीपे ॥६६॥
ज्योतिस्तत्याज्योतिषोविस्तारेणाहितासमर्पितादिनश्रीर्येषांते ॥ स्वर्जितस्वर्गमाश्रियमितिपाठेसौधमध्यविशेषणम् ॥ ६७ ॥ कतिचित्परिविष्टान्नाःकतिचिद्विर्जनैःपरिविष्टमन्नंयेभ्यस्तेतथा ॥ ६८ ॥

ममभर्तुःप्रसादेनकिंचिन्न्यूनंनयतोऽत्रन ॥ इतिश्रुत्वाप्रहृष्टात्मासतामाहतपोधनः ॥ ५५ ॥ अयुतंममशिष्यायेतैःसपंक्तिमहंवृणे ॥ अस्तंयावन्नयात्यर्क
स्तावद्भोक्ष्येन्यथानहि ॥ ५६ ॥ निशम्येतिप्रहृष्टास्यासाप्रोवाचमुनिंततः ॥ किंविलंबेनतद्याहिसर्वान्शिष्यान्समाह्वय ॥ ५७ ॥ पुनःप्राहसतांसाध्वि
त्वेतावत्सिद्धिरस्तिते ॥ येनतृप्तिंगमिष्यंतिमच्छिष्याःसर्वएवते ॥५८॥ स्मित्वाथसाब्रवीत्तंतुमुनेभर्तुरनुग्रहात् ॥ सिद्धमेवसदैवास्तेसर्वंतावन्ममालये ॥
॥ ५९ ॥ यावतार्थिजनस्तृप्तिमेतिसर्वोपिसर्वशः ॥ वयंनतादृङ्महिलाभर्तृसंदेहकारिकाः ॥ १६० ॥ आयातोर्थीयदागेहेसिद्धंकार्यंतदैवहि ॥ परिपूर्णा
दिशःसर्वाःपरिपूर्णामनोरथाः ॥ ६१ ॥ परिपूर्णंगृहंसर्वंपत्युःपादप्रसादतः ॥ याहितूर्णंसमायाहियावदन्नार्थिभिःसह ॥ ६२ ॥ पतिर्मेबहुकालीनःकालं
नसहतेचिरम् ॥ प्रियातिथिःप्रियतमस्तदातिथ्यसमृद्धये ॥६३॥ आशुगत्वासमागच्छयावन्नास्तमितोरविः ॥ इतिप्रहृष्टस्त्वरितःशिष्यानाहूयसर्वतः ॥
॥ ६४ ॥ आगत्यतांपुनःप्राहदृष्ट्वातन्मार्गलोचनाम् ॥ मातःसर्वेसमायातास्त्वरितंदेहिभोजनम् ॥ ६५ ॥ अस्ताचलंहिसमयासमियादेषभास्करः ॥
इत्युक्तामंदिरस्यांतर्विविशुस्तेतपोधनाः ॥ ६६ ॥ तन्मंडपमणिज्योतिस्तत्याहितदिनश्रियः ॥ यावद्गच्छंतितत्सौधमध्यमाशुतपस्विनः ॥ ६७ ॥
पादौप्रक्षाल्यतावत्तेकैश्चित्कैश्चित्समर्च्यच ॥ कतिचित्परिविष्टान्नाभोक्तुमेवोपवेशिताः ॥ ६८ ॥ तद्दिव्यपाकसंभारान्दृष्ट्वातद्दृष्टयःक्षणात् ॥ परांतृप्ति
मुपागच्छन्घ्राणन्यामोदराजिभिः ॥ ६९ ॥ अतितृप्तिंसमापन्नास्तेतदन्ननिषेवणात् ॥ आचांताश्चंदनैःस्रग्भिरंबरैःपरिभूषिताः ॥ १७० ॥ अथसांध्यंवि
धिंकृत्वाप्रोपविश्यतदग्रतः ॥ अभिनंद्यमहाशीर्भिर्याবद्गंतुंप्रचक्रमुः ॥ ७१ ॥ तावद्वृद्धगृहस्थेनगृहिणीसाकटाक्षिता ॥ पप्रच्छतीर्थेवसतांकोधर्मोमुख्यए
वहि ॥ ७२ ॥ तथातदनुसारेणतीर्थेवर्तामहेवयम् ॥ सर्वधर्मविदांश्रेष्ठःश्रुत्वातद्गृहिणीवचः ॥७३॥ तदादरसुधाक्लिन्नमहान्नस्वादतर्पितः ॥ प्रत्युवाचमुनि
र्व्यासःस्मित्वातांसर्ववित्तमाम् ॥७४॥ ॥ व्यासउवाच ॥ ॥ स्वच्छांतःकरणेमातर्महामिष्टान्नमानदे ॥ सएषधर्मोनान्योस्तियत्त्वयापरिचर्यते ॥७५॥

घ्राणेंद्रियहिताघ्राणन्यस्ताश्चतांआमोदराजयश्चताभिः ॥ घ्राणनेतिक्वचित् ॥ तत्रघ्राणनमाघ्राणम् ॥ ६९ ॥ १७० ॥ तदग्रतःगृहस्थाग्रतः ॥ ७१ ॥ कटाक्षिताकटाक्षेणंप्रेरिता ॥ ७२ ॥ ७३ ॥
तदिति॥तस्याभवान्याआदररूपसुधैवक्लिन्नंसुपक्वंयन्महान्नम् ॥ यद्वाऽऽदरसुधयाक्लिन्नमार्द्रंतत्पूर्वकंयन्महान्नमित्यर्थः ॥ तस्ययःस्वादस्तेनतर्पितइति ॥ ७४ ॥ मिष्टान्नंचमानश्चेतिद्वंद्वः ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ १८० ॥ ८१ ॥ तत्तेषुधर्मेषु ॥ ऐक्षिदृष्टा ॥ दानंचऐक्षीत्यन्वयः ॥ तदत्रतावन्नैक्षिष्टेतिकचित्पाठः ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥
तस्यसशापःकस्यस्यादित्यर्थः ॥ कस्याभाग्यात्मकस्यसइतिकचित् ॥ अभाग्यात्स्वस्येतिचान्यत्र ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ शापवर्जितेदत्तोपिशापोत्रनप्रभवतीत्यर्थः ॥ १९० ॥

त्वमेवधर्मंजानासिपतिशुश्रूषणेरता ॥ यदिपृच्छसिमांसत्यंतदाकिंचनवच्मिते ॥ ७६ ॥ वक्तव्यमेवपृष्टेनमनागपिविजानता ॥ सएवधर्मःसुभगेनान्यो धर्मोस्तिकश्चन ॥ ७७ ॥ येनैषतोषमायातितवभर्ताचिरंतनः ॥ ॥ गृहिण्युवाच ॥ ॥ अयंधर्मोभवेन्नूनंक्रियतेचस्वशक्तितः ॥ ७८ ॥ साधारणानिधर्माणिसंपृच्छेतानिमेवद ॥ ॥ व्यासउवाच ॥ ॥ अनुद्वेगकरंवाक्यंपरोत्कर्षसहिष्णुता ॥ ७९ ॥ विचार्यकारितानित्यंस्वधिष्ण्योदयचिंतनम् ॥ गृहस्थउवाच ॥ ॥ एषुधर्मेषुभोविद्वंस्त्वयिकोस्तीहतद्वद ॥ १८० ॥ ततःस्थगितवद्व्यासस्तस्थौकिंचिन्नचोक्तवान् ॥ ततःपुनर्गृहस्थेनसहिप्रोक्तस्तपोधनः ॥ ८१ ॥ यद्येतएवंवैधर्मास्त्वयायेप्रतिपादिताः ॥ तद्दांततातवैवैक्षिदानंशापस्यचोत्तमम् ॥ ८२ ॥ त्वय्येवहिदयासम्यग्धैर्यंत्वय्येवचोत्तमम् ॥ त्वयिसंभावनास्त्येवकामक्रोधविनिग्रहे ॥ ८३ ॥ त्वमेवसम्यग्जानीषेवक्तुंचोद्वेगवर्जितम् ॥ त्वय्येवसम्यग्दृश्येतपरोत्कर्षसहिष्णुता ॥ ८४ ॥ विचार्यकारितायाश्चत्वमेवनिलयोमहान् ॥ स्वस्यधिष्ण्यस्यचभवांश्चिंतयेदुदयंध्रुवम् ॥ ८५ ॥ ममैकंब्रूहिभोविद्वञ्छापंदद्याश्चयःक्रुधा ॥ अलभन्स्वार्थसंसिद्धिमभाग्यात्तस्यकस्यसः ॥ ८६ ॥ ॥ व्यासउवाच ॥ ॥ यःस्वार्थसिद्धिमलभन्नभाग्याच्छपतिक्रुधा ॥ सशापःप्रत्युतभवेच्छप्तुरेवाविवेकिनः ॥ ८७ ॥ ॥ गृहस्थउवाच ॥ ॥ भवताभ्रमताविप्रनाप्ताभिक्षायदाप्यहो ॥ तदापराद्धंकिमिहवराकैःक्षेत्रवासिभिः ॥ ८८ ॥ तपस्विञ्शृणुमेवाक्यंराजधान्यांममेहयः ॥ ऋद्धिंद्रष्टुंनशक्नोतिपरिशप्तःसएवहि ॥ ८९ ॥ अद्यप्रभृतिनक्षेत्रेमदीयेशापवर्जिते ॥ आवसक्रोधनमुनेनवासेयोग्यतात्रते ॥ ॥ १९० ॥ इदानीमेवनिर्गच्छबहिःक्षेत्रादितोभव ॥ त्वद्विधानांनयोग्यंमेक्षेत्रंमोक्षैकसाधनम् ॥ ९१ ॥ अत्राल्पमपियद्दौष्ट्यंकृतंमत्क्षेत्रवासिनाम् ॥ तद्दौष्ट्यस्यपरीपाकोरुद्रपैशाच्यमेवहि ॥ ९२ ॥ तच्छ्रुत्वावेपमानःसपरिशुष्कौष्ठतालुकः ॥ जगामशरणंगौरींलुठंस्तच्चरणाग्रतः ॥ ९३ ॥ उवाचचवचोमातस्त्राहित्राहिभृशंरुदन् ॥ अनाथस्त्वत्सनाथोहंबालिशस्तवबालकः ॥ ९४ ॥ शरणागतंचसंत्राहिरक्षमांशरणागतम् ॥ बहूनामागसांगेहमस्माकंदुष्टमानसम् ॥ ९५ ॥ शंभुशापोऽन्यथाकर्तुंभवत्यापिनशक्यते ॥ अहंचशरणायातस्तदेकंक्रियतांशिवे ॥ ९६ ॥ प्रत्यष्टमिसदाक्षेत्रेप्रतिभूतंचपार्वति ॥ दिशप्रवेशनादेशंनेशस्त्वद्वाक्यलंघकः ॥ ९७ ॥ इत्युक्तातेनमुनिनाभवानीकरुणाजनिः ॥ मुखंमहेशितुर्वीक्ष्यतथेत्याहतदाज्ञया ॥ ९८ ॥ अथांतर्हितवंतौतौशिवौक्षेत्रशिवंकरौ ॥ व्यासोपिनिर्ययौक्षेत्रात्स्वापराधवशंवदन् ॥ ९९ ॥

त्वद्विधानामित्ययंभावः ॥ अत्रत्यैःकामक्रोधादिरहितैर्भाव्यमिति ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ प्रतिभूतंप्रतिचतुर्दशि ॥ ९७ ॥ ९८ ॥ स्वश्वासौअपराधवशश्चतमात्मानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदतीतितथा ॥ छांदसोलुगभावः ॥ स्वापराधंचसंवदन्नितिकचित् ॥ ९९ ॥ २०० ॥ रोधसितीरे ॥ १ ॥ २ ॥ आख्यानतात्पर्यमाह ॥ अतइति ॥ ३ ॥ १०४ ॥ ॥ इतिश्रीरामानंद
कृतायांकाशीखंडटीकायांषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ छ ॥ ॥ सप्तभिःसहितेध्यायेनवत्याख्येमनोहरे ॥ वर्णनंक्षेत्रतीर्थानांक्रियतेसर्वपापनुत् ॥ १ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

अहोरात्रंसपश्यन्वैक्षेत्रंदृष्टेरदूरगम् ॥ प्राप्याष्टमींचभूतांचमध्येक्षेत्रंसदाविशेत् ॥ २०० ॥ लोलार्कादग्निदिग्भागेस्वर्धुनीपूर्वरोधसि ॥ स्थितोद्यापि
पश्येत्सकाशीप्रासादराजिकाम् ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ इत्थंकुंभजसव्यासःक्षेत्रेशापंप्रदास्यति ॥ क्षेत्रशापप्रदानाच्चबहिर्यास्यतितत्क्षणात् ॥
॥ २ ॥ अतएवाविमुक्तस्यक्षेत्रस्यशुभशंसिनः ॥ भविष्यतिशुभंनित्यमन्यथात्वन्यथैवहि ॥ ३ ॥ श्रुत्वाध्यायमिमंपुण्यंव्यासशापविमोक्षणम् ॥
महादुर्गोपसर्गेभ्योभयंतस्यनकुत्रचित् ॥ २०४ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेव्यासशापविमो
क्षणंनामषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ छ ॥ ॥ अगस्त्यउवाच ॥ ॥ एतद्भविष्यंश्रुत्वाहंव्यासस्यशिवनंदन ॥ आश्चर्यभाजनंजातस्तीर्था
निकथयाधुना ॥ १ ॥ आनंदकाननेयानियत्रसंतिषडानन ॥ तानिलिंगस्वरूपाणिसमाचक्ष्वममाग्रतः ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ अयमेवहि
वैप्रश्नोदेव्यैदेवेनभोस्तदा ॥ यादृशःकथितोवच्मितादृशंशृणुकुंभज ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ यानियानिहितीर्थानियत्रयत्रमहेश्वर ॥ तानितानी
हमेकाश्यांतत्रतत्रवदप्रभो ॥ ४ ॥ ॥ देवदेवउवाच ॥ ॥ शृणुदेविविशालाक्षितीर्थंलिंगमुदाहृतम् ॥ जलाशयेपितीर्थाख्याजातामूर्तिपरिग्रहात् ॥
॥ ५ ॥ मूर्तयोब्रह्मविष्ण्वर्कशिवविघ्नेश्वरादिकाः ॥ लिंगंशैवमितिख्यातंयत्रैतत्तीर्थमेवतत् ॥ ६ ॥ वाराणस्यांमहादेवःप्रथमंतीर्थमुच्यते ॥ तदुत्तरेमहाकूपः
सारस्वतपदप्रदः ॥ ७ ॥ क्षेत्रपूर्वोत्तरेभागेतद्दृष्टंपशुपाशहृत् ॥ तत्पश्चाद्विग्रहवतीपूज्यावाराणसीनरैः ॥ ८ ॥ सापूजिताप्रयत्नेनसुखवस्तिप्रदासदा ॥
महादेवस्यपूर्वेणगोप्रेक्षंलिंगमुत्तमम् ॥ ९ ॥ तद्दर्शनाद्भवेत्सम्यग्गोदानजनितंफलम् ॥ गोलोकात्प्रेषितागावःपूर्वंयच्छंभुनास्वयम् ॥ १० ॥ वाराणसीं
समायातागोप्रेक्षंतत्ततःस्मृतम् ॥ गोप्रेक्षाद्दक्षिणेभागेदधीचीश्वरसंज्ञितम् ॥ ११ ॥ तद्दर्शनाद्भवेत्पुंसांफलंयज्ञसमुद्भवम् ॥ अत्रीश्वरंतुतत्प्राच्यांमधुकैटभपू
जितम् ॥ १२ ॥ लिंगंदृष्ट्वाप्रयत्नेनवैष्णवंपदमृच्छति ॥ गोप्रेक्षात्पूर्वदिग्भागेलिंगंवैविज्वरंस्मृतम् ॥ १३ ॥ तस्यसंपूजनान्मर्त्योविज्वरोजायतेक्षणात् ॥
प्राच्यांवेदेश्वरस्तस्यचतुर्वेदफलप्रदः ॥ १४ ॥ वेदेश्वरादुदीच्यांतुक्षेत्रज्ञश्चादिकेशवः ॥ दृष्टंत्रिभुवनंसर्वंतस्यसंदर्शनाद्ध्रुवम् ॥ १५ ॥

हेविशालाक्षितर्हिजलाशयादेःकथंतीर्थत्वंतत्राह ॥ जलाशयइति ॥ ५ ॥ मूर्तीनामधिष्ठानादित्युक्तंतामूर्तीरेवदर्शयति ॥ मूर्तयइति ॥ शैवंशिवसंबंधिमूर्तिरूपंलिंगमित्यन्वयः ॥ ६ ॥ ७ ॥ पशवो
जीवास्तेषांपाशाश्चतुर्विंशतितत्त्वानितद्धृत् ॥ ८ ॥ ९ ॥ १० ॥ शंभुप्रेषितगोभिःप्रेक्ष्यतइतिगोप्रेक्षम् ॥ ११ ॥ १२ ॥ १३ ॥ तस्यप्राच्यांवेदेश्वरइत्यन्वयः ॥ १४ ॥ क्षेत्रज्ञईश्वरः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधिनास्थापितमितिशेषः ॥ १६ ॥ १७ ॥ कुंतीश्वरंपृथयास्थापितम् ॥ कुंभीश्वरमितिक्वचित् ॥ १८ ॥ १९ ॥ रौरवादिषुआदिशब्देनमहारौरवादयोगृह्यंते ॥ २० ॥ २१ ॥ २२ ॥ यांसिद्धिं

संगमेश्वरमालोक्यतत्प्राच्यांजायतेनघः ॥ चतुर्मुखेनविधिनातत्पूर्वेणचतुर्मुखम् ॥ १६ ॥ प्रयागसंज्ञकंलिंगमर्चितंब्रह्मलोकदम् ॥ तत्रशांतिकरीगौरी
पूजिताशांतिकृद्भवेत् ॥ १७ ॥ वरणायास्तटेपूर्वेपूज्यंकुंतीश्वरंनृभिः ॥ तत्पूजनात्प्रजायंतेपुत्रानिजकुलोज्ज्वलाः ॥ १८ ॥ कुंतीश्वरादुत्तरतस्तीर्थंवैका
पिलोह्रदः ॥ तत्रवैस्नानमात्रेणवृषभध्वजपूजनात् ॥ १९ ॥ राजसूयस्ययज्ञस्यफलंत्वविकलंभवेत् ॥ रौरवादिषुयेकेचित्पितरःकोटिसंमिताः ॥२०॥
तत्रश्राद्धेकृतेपुत्रैःपितृलोकंप्रयांतिते ॥ आनुसूयेश्वरंलिंगंगोप्रेक्षादुत्तरेमुने ॥ २१ ॥ तद्दर्शनाद्भवेत्स्त्रीणांपातिव्रत्यफलंस्फुटम् ॥ तल्लिंगपूर्वदिग्भागेपूज्यः
सिद्धिविनायकः ॥२२॥ यांसिद्धिंयःसमीहेतसतामाप्नोतितन्नतेः ॥ हिरण्यकशिपोर्लिंगंगणेशात्पश्चिमेततः ॥२३॥ हिरण्यकूपस्तत्रास्तिहिरण्याश्वसमृ
द्धिकृत् ॥ २४ ॥ मुंडासुरेश्वरंलिंगंतत्प्रतीच्यांचसिद्धिदम् ॥ अभीष्टदंतुनैर्ऋत्यांगोप्रेक्षाद्वृषभेश्वरम् ॥ २५ ॥ मुनेस्कंदेश्वरंलिंगंमहादेवस्यपश्चिमे ॥
तल्लिंगपूजनान्नॄणांभवेन्ममसलोकता ॥ २६ ॥ तत्पार्श्वतोहिशाखेशोविशाखेशश्चतत्रवै ॥ नैगमेयेश्वरस्तत्रयेन्येनंद्यादयोगणाः ॥ २७ ॥ तेषामपिहि
लिंगानितत्रसंतिसहस्रशः ॥ तद्दर्शनाद्भवेत्पुंसांतत्तद्गणसलोकता ॥ २८ ॥ नंदीश्वरात्प्रतीच्यांचशिलादेशःकुधीहरः ॥ महाबलप्रदस्तत्रहिरण्याक्षेश्वरः
शुभः ॥ २९ ॥ तद्दक्षिणेट्टहासाख्यंलिंगंसर्वसुखप्रदम् ॥ प्रसन्नवदनेशाख्यंलिंगंतस्योत्तरेशुभम् ॥ ३० ॥ प्रसन्नवदनस्तिष्ठेद्भक्तस्तद्दर्शनाच्छुभात् ॥
तदुत्तरेप्रसन्नोदंकुंडंनैर्मल्यदंनृणाम् ॥ ३१ ॥ प्रतीच्यामट्टहासस्यमित्रावरुणनामनी ॥ लिंगेतल्लोकदेपूज्येमहापातकहारिणी ॥ ३२ ॥ नैर्ऋत्यांचाट्टहा
सस्यवृद्धवासिष्ठसंज्ञकम् ॥ लिंगंतत्पूजनात्पुंसांज्ञानमुत्पद्यतेमहत् ॥ ३३ ॥ वसिष्ठेशसमीपस्थःकृष्णेशोविष्णुलोकदः ॥ तद्याम्यांयाज्ञवल्क्येशोब्रह्मते
जोविवर्धनः ॥ ३४ ॥ प्रह्लादेश्वरमभ्यर्च्यतत्पश्चाद्भक्तिवर्धनम् ॥ स्वयंलीनःशिवोयत्रभक्तानुग्रहकाम्यया ॥ ३५ ॥ अतःस्वलीनंतत्पूर्वेलिंगंपूज्यं
प्रयत्नतः ॥ सदैवज्ञाननिष्ठानांपरमानंदमिच्छताम् ॥ यागतिर्विहितातेषांस्वलीनेसातनुत्यजाम् ॥ ३६ ॥ वैरोचनेश्वरंलिंगंस्वलीनात्पुरतःस्थितम् ॥
तदुत्तरेबलीशंचमहाबलविवर्धनम् ॥ ३७ ॥ तत्रैवलिंगंबाणेशंपूजितंसर्वकामदम् ॥ चंद्रेश्वरस्यपूर्वेणलिंगंविद्येश्वराभिधम् ॥ ३८ ॥

मभीष्टांसिद्धिम् ॥ तन्नतेःतस्यनमस्कारतः ॥ २३ ॥ २४ ॥ २५ ॥ ममस्कंदस्यसलोकतासमानलोकता ॥ २६ ॥ २७ ॥ २८ ॥२९॥३०॥३१॥३२॥३३॥३४॥३५॥ ३६ ॥ ३७ ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वाविद्याःप्रसन्नाःस्युस्तस्यलिंगस्यसेवनात् ॥ तद्दक्षिणेतुवीरेशोमहासिद्धिविधायकः ॥३९॥ तत्रैवविकटादेवीसर्वदुःखौघमोचनी ॥ पंचमुद्रंमहापीठं तज्ज्ञेयंसर्वसिद्धिदम् ॥ ४० ॥ तत्रजप्तामहामंत्राःक्षिप्रंसिध्यंतिनान्यथा ॥ तत्पीठेवायुकोणेतुसंपूज्यःसगरेश्वरः ॥ ४१ ॥ तदर्चनादश्वमेधफलंत्ववि कलंभवेत् ॥ तदीशानेचवालीशस्तिर्यग्योनिनिवारकः ॥ ४२ ॥ महापापौघविध्वंसीसुग्रीवेशस्तदुत्तरे ॥ हनूमदीश्वरस्तत्रब्रह्मचर्यफलप्रदः ॥ ४३ ॥ महाबुद्धिप्रदस्तत्रपूज्योजांबवतीश्वरः ॥ आश्विनेयेश्वरौपूज्यौगंगायाःपश्चिमेतटे ॥ ४४ ॥ तदुत्तरेभद्रह्रदोगवांक्षीरेणपूरितः ॥ कपिलानांसहस्रेणसम्य ग्दत्तेनयत्फलम् ॥ ४५ ॥ तत्फलंलभतेमर्त्यःस्नातोभद्रह्रदेध्रुवम् ॥ पूर्वाभाद्रपदायुक्तापौर्णमासीयदाभवेत् ॥ ४६ ॥ तदापुण्यतमःकालोवाजिमेधफ लप्रदः ॥ ह्रदपश्चिमतीरेतुभद्रेश्वरविलोकनात् ॥ ४७ ॥ गोलोकंप्राप्नुयात्तस्मात्पुण्यान्नैवात्रसंशयः ॥ भद्रेश्वराद्यातुधान्यामुपशांतशिवोमुने ॥ ४८ ॥ तस्यलिंगस्यसंस्पर्शात्परांशांतिंसमृच्छति ॥ उपशांतशिवंलिंगंदृष्ट्वाजन्मशतार्जितम् ॥४९॥ त्यजेदश्रेयसोराशिंश्रेयोराशिंचविंदति ॥ तदुत्तरेचचक्रेशो योनिचक्रनिवारकः ॥ ५० ॥ तदुत्तरेचक्रह्रदोमहापुण्यविवर्धनः ॥ स्नात्वाचक्रह्रदेमर्त्यश्चक्रेशंपरिपूज्यच ॥ ५१ ॥ शिवलोकमवाप्नोतिभावितेनां तरात्मना ॥ तन्नैर्ऋतेचशूलेशोद्रष्टव्यश्चप्रयत्नतः ॥ ५२ ॥ शूलंतत्रपुरान्यस्तंस्नानार्थंवरवर्णिनि ॥ ह्रदस्तत्रसमुत्पन्नःशूलेशस्याग्रतोमहान् ॥ ५३ ॥ स्नानंकृत्वाह्रदेतत्रदृष्ट्वाशूलेश्वरंविभुम् ॥ रुद्रलोकंनरायांतित्यक्त्वासंसारगह्वरम् ॥५४॥ तत्पूर्वतोनारदेनतपस्तप्तंमहत्तरम् ॥ लिंगंचस्थापितंश्रेष्ठंकुंडंचा पिशुभंकृतम् ॥ ५५ ॥ तत्रकुंडेनरःस्नात्वादृष्ट्वावैनारदेश्वरम् ॥ संसाराब्धिंमहाघोरंसंतरेन्नात्रसंजयः ॥ ५६ ॥ नारदेश्वरपूर्वेणदृष्ट्वाऽवभ्रातकेश्वरम् ॥ निर्मलांगतिमाप्नोतिपापौघंचविमुंचति ॥ ५७ ॥ तदग्रेताम्रकुंडंचतत्रस्नातोनगर्भभाक् ॥ विघ्नहर्तागणाध्यक्षस्तद्वायव्येसुविघ्नहृत् ॥ ५८ ॥ तत्रवि घ्नहरंकुंडंतत्रस्नातोनविघ्नभाक् ॥ अनारकेश्वरंलिंगंतदुदग्दिशिचोत्तमम् ॥ ५९ ॥ कुंडंचानारकाख्यंवैतत्रस्नातोननारकी ॥ वरणायास्तटेरम्येवरणे शस्तदुत्तरे ॥ ६० ॥ तत्रपाशुपतःसिद्धस्त्वक्षपादोमहामुने ॥ अनेनैवशरीरेणशाश्वतींसिद्धिमागतः ॥ ६१ ॥ तत्पश्चिमेचशैलेशःपरनिर्वाणकामदः ॥ कोटीश्वरंतुतद्याम्यांलिंगंशाश्वतसिद्धिदम् ॥ ६२ ॥ कोटितीर्थेह्रदेस्नात्वाकोटीशंपरिपूज्यच ॥ गवांकोटिप्रदानस्यफलमाप्नोतिमानवः ॥ ६३ ॥ ॥३५९॥
महाश्मशानस्तंभोस्तिकोटीशाद्दक्षिदिक्स्थितः ॥ तस्मिन्स्तंभेमहारुद्रस्तिष्ठतेचोमयासह ॥ ६४ ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ श्मशानवदतिभीषणत्वात् श्मशानस्तंभःकुलस्तंभइतिप्रसिद्धः ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६५ ॥ ६६ ॥ भवतिचभवत्येव ॥ ऋणतःऋणत्रयात् ॥ अंगारनिर्मलंज्वलदंगारवदुज्ज्वलम् ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥

तंस्तंभंसमलंकृत्यनरस्तत्पदमाप्नुयात् ॥ तत्रैवतीर्थंपरमंकपालेशसमीपतः ॥६५॥ कपालमोचनंनामतत्रस्नातोऽश्वमेधभाक् ॥ ऋणमोचनतीर्थंतुतदुदग्दिशिशोभनम् ॥ ६६ ॥ तत्रतीर्थेनरःस्नात्वामुक्तोभवतिचर्णतः ॥ तत्रैवांगारकंतीर्थंकुंडंचांगारनिर्मलम् ॥ ६७ ॥ स्नात्वांगारकतीर्थेतुभवेद्भूयोनगर्भभाक् ॥ अंगारवारयुक्तायांचतुर्थ्यांस्नातियोनरः ॥ व्याधिभिर्नाभिभूयेतनचदुःखीकदाचन ॥ ६८ ॥ विश्वकर्मेश्वरंलिंगंज्ञानदंचतदुत्तरे ॥ महामुंडेश्वरंलिंगंतस्यदक्षिणतःशुभम् ॥ ६९ ॥ कूपःशुभोदनामापिस्नातव्यंतत्रनिश्चितम् ॥ तत्रमुंडमयीमालामयाक्षिप्तातिशोभना ॥ ७० ॥ महामुंडाततोदेवीसमुत्पन्नाघहारिणी ॥ खट्वांगंचधृतंतत्रखट्वांगेशस्ततोभवत् ॥ ७१ ॥ निष्पापोजायतेमर्त्यःखट्वांगेशविलोकनात् ॥ भुवनेशस्ततोयाम्यांकुंडंचभुवनेश्वरम् ॥ ७२ ॥ तत्रकुंडेनरःस्नातोभुवनेशोभवेन्नरः ॥ तद्याम्यांविमलेशश्चकुंडंचविमलोदकम् ॥ ७३ ॥ तत्रस्नात्वाविलोक्येशंविमलोजायतेनरः ॥ तत्रपाशुपतःसिद्धस्त्र्यंबकोनामनामतः ॥ ७४ ॥ अनेनैवशरीरेणरुद्रलोकमवाप्तवान् ॥ भृगोरायतनंतस्यपश्चिमेऽतीवपुण्यदम् ॥ ७५ ॥ विधिपूर्वंतदभ्यर्च्यप्राप्नुयाच्छिवमंदिरम् ॥ शुभेश्वरश्चतद्याम्यांमहाशुभफलप्रदः ॥ ७६ ॥ तत्रसिद्धःपाशुपतःकपिलर्षिर्महातपाः ॥ तत्रास्तिहिगुहारम्याकपिलेश्वरसंनिधौ ॥ ७७ ॥ तांगुहांप्रविशेद्योवैनसगर्भेविशेत्क्वचित् ॥ तत्रयज्ञोदकूपोस्तिवाजिमेधफलप्रदः ॥ ७८ ॥ ओंकारएषएवासावादिवर्णमयात्मकः ॥ मत्स्योदर्युत्तरेकूलेनादेशस्त्वहमेवच ॥ ७९ ॥ नादेशःपरमंब्रह्मनादेशःपरमागतिः ॥ नादेशःपरमंस्थानंदुःखसंसारमोचनम् ॥ ८० ॥ कदाचित्तस्यदेवस्यदर्शनेयातिजाह्नवी ॥ मत्स्योदरीसाकथितास्नानंपुण्यैरवाप्यते ॥ ८१ ॥ मत्स्योदरीयदागंगापश्चिमेकपिलेश्वरम् ॥ समायातिमहादेवितदायोगःसुदुर्लभः ॥ ८२ ॥ उद्दालकेश्वरंलिंगमुदीच्यांकपिलेश्वरात् ॥ तद्दर्शनेनसंसिद्धिःपरासर्वैरवाप्यते ॥ ८३ ॥ तदुत्तरेबाष्कुलीशंलिंगंसर्वार्थसिद्धिदम् ॥ बाष्कुलीशाद्दक्षिणतोलिंगंवैकौस्तुभेश्वरम् ॥ ८४ ॥ तस्यार्चनेनरत्नौघैर्नवियुज्येतकर्हिचित् ॥ शंकुकर्णेश्वरंलिंगंकौस्तुभेश्वरदक्षिणे ॥ ॥ ८५ ॥ संसेव्यपरमंज्ञानंलभेदद्यापिसाधकः ॥ अघोरेशोगुहाद्वारिकूपस्तस्योत्तरेशुभः ॥ ८६ ॥ अघोरोदइतिख्यातोवाजिमेधफलप्रदः ॥ गर्गेशोदमनेशश्चतत्रलिंगद्वयंशुभम् ॥ ८७ ॥

॥ ७८ ॥ आदिवर्णमयात्मकःअकारोकारमकारवर्णत्रयात्मकइत्यर्थः ॥ ७९ ॥ ८० ॥ ८१ ॥ पश्चिमेतस्याःपश्चिमे ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ अघोरोदःअघोरंसंसारनिवर्तकमुद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनैवेहदेहेनयत्रतौसिद्धिमापतुः ॥ तल्लिंगयोःसमर्चातःसिद्धिर्भवतिवांछिता ॥ ८८ ॥ तद्दक्षिणेमहाकुंडंरुद्रावासइतिस्मृतम् ॥ तत्ररुद्रेशमभ्यर्च्यको
टिरुद्रफलंलभेत् ॥ ८९ ॥ चतुर्दशीयदापर्णेरुद्रनक्षत्रसंयुता ॥ तदापुण्यतमःकालस्तस्मिन्कुंडेमहाफलः ॥ ९० ॥ रुद्रकुंडेनरःस्नात्वादृष्ट्वारुद्रेश्वरंवि
भुम् ॥ यत्रतत्रमृतोवापिरुद्रलोकमवाप्नुयात् ॥ ९१ ॥ रुद्रस्यनैर्ऋतेभागेलिंगंतत्रमहालयम् ॥ तदग्रेपितृकूपोस्तिपितृणामालयःपरः ॥९२॥ तत्रश्राद्धं
नरःकृत्वापिंडान्कूपेपरिक्षिपेत् ॥ एकविंशकुलोपेतःश्राद्धकृद्रुद्रलोकभाक् ॥ ९३ ॥ तत्रवैतरणीनामदीर्घिकापश्चिमानना ॥ तस्यांस्नातोनरोदेविनरकंनै
वगच्छति ॥ ९४ ॥ बृहस्पतीश्वरंलिंगंरुद्रकुंडाच्चपश्चिमे ॥ गुरुपुष्यसमायोगेदृष्ट्वादिव्यांलभेद्गिरम् ॥ ९५ ॥ रुद्रावासाद्दक्षिणतःकामेशंलिंगमुत्तमम् ॥
तद्दक्षिणेमहाकुंडंस्नानाच्चिंतितकामदम् ॥ ९६ ॥ चैत्रशुक्लत्रयोदश्यांतत्रयात्राचकामदा ॥ नलकूबरलिंगंचप्राच्यांकामेश्वराच्छुभम् ॥९७॥ तदग्रेपावनः
कूपोधनधान्यसमृद्धिदः ॥ नलकूबरपूर्वेणसूर्याचंद्रमसेश्वरौ ॥ ९८ ॥ अज्ञानध्वांतपटलींहरतस्तौसमर्चितौ ॥ तद्दक्षिणेध्वकेशश्चदृष्टोमोहविनाशनः ॥
॥९९॥ तत्रसिद्धीश्वरंलिंगंमहासिद्धिसमर्पकम् ॥ तत्रैवमंडलेशश्चमंडलेशपदप्रदः ॥ १०० ॥ कामकुंडस्यपूर्वेणच्यवनेशःसमृद्धिदः ॥ तत्रैवसनकेशश्च
राजसूयफलप्रदः ॥ १ ॥ सनत्कुमारलिंगंचतत्पश्चाद्योगसिद्धिकृत् ॥ तदुत्तरेसनंदेशोमहाज्ञानसमर्थकः ॥२॥ तद्याम्यामाहुतीशश्चदृष्टोहोमफलप्रदः ॥
तद्याम्यांपुण्यजनकंलिंगंपंचशिखेश्वरम् ॥ ३ ॥ मार्कंडेयह्रदस्तस्यपश्चिमेपुण्यवर्धनः ॥ तस्मिन्ह्रदेनरःस्नात्वाकिंभूयःपरिशोचति ॥ ४ ॥ तत्रस्नानंचदानं
चभवेदक्षयपुण्यदम् ॥ तदुत्तरेचकुंडेशःसर्वसिद्धैर्नमस्कृतः ॥५॥ दीक्षांपाशुपतींलब्ध्वाद्वादशाब्देनयत्फलम् ॥ तत्फलंलभतेविप्रमर्त्यःकुंडेशदर्शनात् ॥
॥ ६ ॥ मार्कंडेयह्रदात्पूर्वंशांडिल्येशःसुपुण्यदः ॥ तत्पश्चिमेचचंडेशश्चंडांशुग्रहणाघहृत् ॥ ७ ॥ दक्षिणेचकपालेशात्कुंडंश्रीकंठसंज्ञितम् ॥ तत्रकुंडे
नरःस्नात्वादातास्याच्छ्रीप्रभावतः ॥ ८ ॥ महालक्ष्मीश्वरंलिंगंतस्यकुंडस्यसन्निधौ ॥ महालक्ष्मींसमभ्यर्च्यस्नातस्तत्कुंडवारिषु ॥९॥ चामरासक्तहस्ता
भिर्दिव्यस्त्रीभिश्चवीज्यते ॥ यदामत्स्योदरींयांतिस्वर्गलोकाद्दिवौकसः ॥ तदातेनैवमार्गेणयांतिस्त्रीभिर्वृताःसुखम् ॥११०॥ स्वर्गद्वारमतःख्यातंतत्स्थानं
मुनिसत्तम ॥ तत्कुंडदक्षिणेभागेलिंगंब्रह्मपदप्रदम् ॥ ११ ॥ गायत्रीश्वरसावित्रीश्वरौपूज्यौप्रयत्नतः ॥ मत्स्योदर्यास्तटेरम्येलिंगंसत्यवतीश्वरम् ॥१२॥ ॥३६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वेणपूर्वे ॥१३॥ कनखलंहरिद्वारंगयावांतरतीर्थविशेषोवा ॥१४॥१५॥ इंद्रेश्वरमन्यत् ॥१६॥१७॥१८॥ अग्नीशोप्यन्यएवप्रसिद्धः॥१९॥ आग्नेयेश्वरतःप्राच्यांकुंडमित्यनुवादः॥तद्दक्षिणेआग्नेयकुंडदक्षिणेशुभंकुंडमितिशेषः ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ तदंधोःतत्कूपस्य ॥ विश्वेश्वराह्वयमित्यन्यदेव ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ ततःकालोदात् ॥ २९॥१३०॥ महाकुंडे

तयोःपूर्वेणसंपूज्यंतपःश्रीपरिवर्धनम् ॥ उग्रेश्वरंमहालिंगंलक्ष्मीशात्पूर्वदिक्स्थितम् ॥१३॥ जातिस्मरोभवेन्मर्त्यस्तल्लिंगस्यसमर्चनात् ॥ तद्दक्षिणेचोग्रकुंडंस्नानात्कनखलाधिकम् ॥ १४ ॥ करवीरेश्वरंलिंगंतस्यकुंडस्यपश्चिमे ॥ तस्यदर्शनतःपुंसांजायतेरोगसंक्षयः ॥ १५ ॥ तद्वायव्येमरीचीशंकुंडंचाघौघनाशनम् ॥ तत्पश्चाच्चेंद्रकुंडंचलिंगंचेंद्रेश्वरंमुने ॥ १६ ॥ इंद्रेशाद्दक्षिणेभागेशुभाकर्कोटवापिका ॥ तत्रवापीजलेस्नात्वादृष्ट्वाकर्कोटकेश्वरम् ॥ ॥ १७ ॥ नागानामाधिपत्यंतुजायतेनात्रसंशयः ॥ तत्पश्चाद्दमिचंडेशोब्रह्महत्याहरोहरः ॥ १८॥ तद्दक्षिणेमहाकुंडंरुद्रलोकफलप्रदम् ॥ तत्पश्चिमेमहालिंगमग्नीशइतिविश्रुतम् ॥ १९ ॥ आग्नेयंनामकुंडंचतत्पूर्वेग्निसलोकदम् ॥ आग्नेयेश्वरतःप्राच्यांकुंडंतदक्षिणेशुभम् ॥ १२० ॥ तत्रकुंडेनरःस्नात्वास्वर्गेवसतिपूर्वजैः ॥ तत्प्राच्यांबालचंद्रेशश्चंद्रलोकगतिप्रदः ॥ २१ ॥ परितोबालचंद्रेशंगणलिंगान्यनेकशः ॥ विलोक्यतानिलिंगानिगाणपत्यंपदंलभेत् ॥ २२ ॥ बालचंद्रसमीपेतुकूपःपितृगणप्रियः ॥ तत्रश्राद्धप्रदःस्नात्वापितॄन्सप्ताऽत्रतारयेत् ॥ २३ ॥ तदंधोःपूर्वतोलिंगंपुण्यंविश्वेश्वराह्वयम् ॥ विश्वेश्वरस्यपूर्वेणवृद्धकालेश्वरोहरः ॥ २४ ॥ कालोदोनामकूपोस्तितदग्रेसर्वरोगहृत् ॥ यैस्तुतत्रोदकंपीतंस्त्रीभिःपुंभिःस्वकर्मभिः ॥ २५ ॥ नतेषांपारिवर्तोत्रकल्पकोटिशतैरपि ॥ तत्पीत्वाजन्मबंधोत्थाद्भयान्मुच्येतमानवः ॥ २६ ॥ तत्रकूपेतुयद्दत्तंदानंशिवरतात्मनाम् ॥ संवर्तेपिनतस्यास्तिनाशःकलशसंभव ॥२७॥ खंडस्फुटितसंस्कारंतत्रकुर्वंतियेनराः ॥ तेरुद्रलोकमासाद्यमोदंतेसुखिनःसदा ॥ २८ ॥ कालेशाद्दक्षिणेभागेमृत्यीशस्त्वपमृत्युहृत् ॥ लिंगंदक्षेश्वराह्वंचततःकूपादुदग्दिशि ॥ २९ ॥ अपराधसहस्रंतुनश्येत्तस्यसमर्चनात् ॥ १३० ॥ महाकालेशलिंगंचदक्षेशात्पूर्वतोमहत् ॥ महाकुंडेनरःस्नात्वामहाकालंतुयोर्चयेत् ॥३१॥ अर्चितंतेनवैतत्रजगदेतच्चराचरम् ॥ अंतकेश्वरमालोक्यतद्याम्यांनांतकस्यभीः ॥ ३२ ॥ हस्तिपालेश्वरंलिंगंतस्यदक्षिणतोमुने ॥ तस्यपूजनतोयातिपुण्यंवैहस्तिदानजम् ॥ ३३ ॥ तत्रैरावतकुंडंचालिंगमैरावतेश्वरम् ॥ तल्लिंगमर्चयन्मर्त्योधनधान्यसमृद्धिभाक् ॥ ३४ ॥ तद्दक्षिणेश्रेयसेचालिंगंस्यान्मालतीश्वरम् ॥ हस्तीश्वरादुत्तरेतुजयंतेशोजयप्रदः ॥ ३५ ॥ बंदीश्वरोमहाकालकुंडादुत्तरतःशुभः ॥ बंदिकुंडंचविख्यातंवाराणस्यांमहाघहृत् ॥ ३६॥ तत्रस्नानेनदानेनश्राद्धेनाक्षयमश्नुते ॥ धन्वंतरीश्वरंलिंगंकुंडंतन्नामचैवहि ॥ ३७ ॥ तस्यलिंगस्यनामान्यत्कुंडनामान्यदेवहि ॥ तुंगेश्वरंलिंगनामकुंडंवैद्येश्वराभिधम् ॥ ३८ ॥ सुधामय्योमहौषध्यःक्षिप्तास्तत्रमहाधियः ॥ तत्कुंडस्नानतस्तस्मात्ल्लिंगपरिवीक्षणात् ॥ नश्यंतिव्याधयःसर्वेसहपापैःसुदारुणैः ॥ ३९ ॥

महाकालकुंडे॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥ लिंगकुंडयोरन्यनामनीएवाह ॥ तुंगेश्वरमिति ॥३८॥ सुधामय्योयामहौषध्योमृतसंजीविन्यादिरूपावर्ततेतामहामहौषधस्तत्रक्षिप्ताइत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

कथंभूतामहौषध्यःमहाधियःस्वास्थ्यप्रदात्र्योमहाऽगदरूपाइत्यर्थः ॥ क्षिप्तास्तत्रमहाधियेतिपाठेस्पष्टएवार्थः ॥ ३९ ॥ तुंगनाम्नस्तुंगेश्वरादित्यर्थः ॥१४०॥४१॥४२॥४३॥४४॥४५॥ तमीश्वरंपंचचूडेशमित्यर्थः ॥४६॥ प्रियोभर्ता ॥४७॥४८॥४९॥ अशोकाष्टम्यामितिच्छेदः ॥ मधौचैत्रे ॥१५०॥ मुक्तिक्षेत्रेति ॥ सर्वतोमुक्तिक्षेत्रंतस्यप्रमाणमित्यर्थः ॥ तत्रदक्षिणतस्तटेश्वरमारभ्यक्रोशपारि

तदुत्तरेहलीशेशःसर्वव्याधिनिषूदनः ॥ शिवेश्वरःशिवकरस्तुंगनाम्नश्चदक्षिणे ॥ १४० ॥ जमदग्नीश्वरंलिंगंशिवेशाद्दक्षिणेशुभम् ॥ तत्पश्चिमेभैरवेशः
कूपस्तस्योत्तरेशुभः ॥ ४१ ॥ तदुदस्पर्शमात्रेणसर्वयज्ञफलंलभेत् ॥ तत्कूपपश्चिमेभागेसुकेशोयोगसिद्धिदः ॥ ४२ ॥ तन्नैर्ऋत्यांचव्यासेशःकूपश्चवि
मलोदकः ॥ व्यासकूपेनरःस्नात्वातर्पयित्वासुरान्पितॄन् ॥ ४३ ॥ अक्षयंलभतेलोकंयत्रकुत्राभिकांक्षितम् ॥ व्यासतीर्थात्पश्चिमतोघंटाकर्णोह्रदो
महान् ॥ ४४ ॥ घंटाकर्णह्रदेस्नात्वाव्यासेशपरिदर्शनात् ॥ यत्रतत्रमृतोवापिवाराणस्यांमृतोभवेत् ॥ ४५ ॥ घंटाकर्णसमीपेतुपंचचूडाप्सरःसरः ॥
पंचचूडाजलेस्नात्वादृष्ट्वादेवंतमीश्वरम् ॥ ४६ ॥ स्वर्गलोकंनरोयातिपंचचूडाप्रियोभवेत् ॥ गौरीकूपस्ततोवाच्यांसर्वजाड्यविनाशनः ॥ ४७ ॥ पंचचूडो
त्तरेभागेतीर्थंचाशोकसंज्ञितम् ॥ मंदाकिनीमहातीर्थंतदुदीच्यांमहाघहृत् ॥ ४८ ॥ स्वर्गलोकेपिसापुण्याकिंपुनर्मानवेमुने ॥ तदुत्तरेमध्यमेशोमध्ये
क्षेत्रस्यापित्यहो ॥४९॥ तत्रजागरणंकृत्वाऽशोकाष्टम्यांमधौनरः ॥ नजातुशोकंलभतेसदानंदमयोभवेत् ॥१५०॥ मुक्तिक्षेत्रप्रमाणंचक्रोशंक्रोशंचसर्वतः ॥
आरभ्यलिंगादस्माच्चपुण्यदान्मध्यमेश्वरात् ॥५१॥ एतदेवसदाप्राहुःसर्वेवैप्रपितामहाः ॥ कश्चिदस्मत्कुलेजातोमंदाकिन्याजलाप्लुतः ॥५२॥ भोजये
त्प्रयतोविप्रान्यतीन्पाशुपतानपि ॥ मंदाकिन्यांनरःस्नात्वादृष्ट्वावैमध्यमेश्वरम् ॥ ५३ ॥ एकविंशत्कुलोपेतोरुद्रलोकेवसेच्चिरम् ॥ मध्यमेशादवाच्यांच
विश्वेदेवेश्वरःशुभः ॥५४॥ तदर्चनादर्चिताःस्युर्विश्वेदेवास्त्रयोदश ॥ तत्पूर्वेवीरभद्रेशोमहावीरपदप्रदः ॥५५॥ भद्रदाभद्रकालीचतस्यदक्षिणतःशुभा ॥
भद्राकालह्रदोनामतत्रातीवशुभप्रदः ॥५६॥ आपस्तंबेश्वरंलिंगंतत्प्राच्यांज्ञानदंपरम् ॥ तदुत्तरेपुण्यकूपस्तत्पश्चाच्छौनकोह्रदः ॥ ५७ ॥ ह्रदपश्चिमतो
लिंगंशौनकेशंसुधीप्रदम् ॥ ह्रदेतत्रनरःस्नात्वादृष्ट्वावैशौनकेश्वरम् ॥ ५८ ॥ ज्ञानंतत्संलभेद्दिव्यंयेनमृत्युंतरत्यसौ ॥ तद्दक्षिणेजंबुकेशस्तिर्यग्योनि
निवारकः ॥५९॥ तदुत्तरेमतंगेशोगानविद्याप्रबोधकः ॥ मतंगेशस्यवायव्येनानालिंगानिसर्वतः ॥१६०॥ मुनिभिःस्थापितानीहसर्वसिद्धिप्रदानिच ॥
ब्रह्मरातेश्वरंलिंगंमतंगेशाच्चदक्षिणे ॥६१॥ तल्लिंगदर्शनादायुर्नांतराच्छिद्यतेक्वचित् ॥ तत्राज्यपेश्वरंलिंगंपितृलिंगान्यनेकशः ॥ तल्लिंगसेवयासर्वेतुष्यं
तिप्रपितामहाः ॥ ६२ ॥ तद्दक्षिणेसिद्धकूपःसिद्धाःसंतिसहस्रशः ॥ वायुरूपास्तुयेसिद्धायेसिद्धाभानुरश्मिगाः ॥ ६३ ॥

मितंक्षेत्रमुत्तरतश्चैवमिति ॥ अतएवयदागंगामणिकर्णिकायांमिलतितदागंगातस्तुयवाधिकेतिगंगापारेपिवर्ततइतिवचनंसंगच्छेत ॥ तत्रयवाधिकेतिनयवपरिमाणमात्रंविवक्षितंकिंतुयथाप्रमाणंगंगातोप्यधिकेत्यर्थः ॥ अत्यतिष्ठद्दशांगुलमितिवत् ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ वीरभद्रेशोऽन्यः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ १६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥६४ ॥ ६५ ॥ ६६॥ ६७ ॥ ६८ ॥ ६९ ॥ १७० ॥ ७१ ॥ शतकालनामनिर्वक्ति ॥ शतमिति ॥ ७२ ॥ ७३ ॥ अक्षपादेतिछेदः ॥ ७४ ॥ प्रहिःकूपः ॥ ७५ ॥ ७६ ॥ दुर्वासेशः कामेशात्तेनस्थापितादन्यः ॥ संघिरार्षः ॥ दुर्वासोवाकश्चिद्व्रणः ॥ ७७ ॥ ७८ ॥ यत्समेति ॥ निष्ठानियमस्तत्पूर्वकंपाशुपतव्रतंसमाप्ययत्पुण्यमाप्यतेतदत्रकाश्यांविश्वेशयोःशंखलिखितेश्वरयोर्दर्श

तैःस्थापितंतुयल्लिंगंतात्सिद्धेश्वरमीरितम् ॥ तस्यसंदर्शनादेवसर्वाःस्युःसिद्धयोऽमलाः ॥ ६४ ॥ तत्पश्चिमेसिद्धवापीपीतास्नाताचसिद्धिदा ॥ प्राच्यां चसिद्धकूपाद्वैलिंगंव्याघ्रेश्वराभिधम् ॥ ६५ ॥ तल्लिंगदर्शनान्नृणांनभयंव्याघ्रचोरजम् ॥ ज्येष्ठेश्वरंचतद्याम्यांज्येष्ठस्थानेतिसिद्धिदम् ॥६६॥ तद्दक्षिणे मुदांधामलिंगंप्रहसितेश्वरम् ॥ तदुत्तरेनिवासेशःकाशीवासफलप्रदः ॥ ६७ ॥ चतुःसमुद्रकूपोस्तितत्राब्धिस्नानपुण्यदः ॥ ज्येष्ठादेवीतुतत्रास्तिनता ज्येष्ठपदप्रदा ॥ ६८ ॥ अवाच्यांव्याघ्रलिंगाच्चलिंगंचंडीश्वराभिधम् ॥ तदुत्तरेदंडखातंसरःपितृमुदावहम् ॥ ६९ ॥ ग्रहणानंतरेस्नानंदंडखातेति पुण्यदम् ॥ जैगीषव्यगुहातत्रतत्रलिंगंतदाह्वयम् ॥१७०॥ त्रिरात्रोपोषितस्तत्रज्ञानंलभ्येतनिर्मलम् ॥ महापुण्यप्रदंलिंगंतत्पश्चाद्देवलेश्वरम् ॥ ७१ ॥ शतकालस्तत्समीपेशतंकालानुमापतिः ॥ ताल्लिंगाविर्भवेकाश्यांकालयामासकुंभज ॥ ७२ ॥ तल्लिंगदर्शनादायुःशतवर्षाण्यखंडितम् ॥ शातातपेशस्त द्याम्यांमहाजपफलप्रदः ॥ ७३ ॥ तत्पश्चिमेहेतुकेशोहेतुभूतोमहाफले ॥ तद्दक्षिणेक्षपादेशोमहाज्ञानप्रवर्तकः ॥ ७४ ॥ तदग्रेचकणादेशस्तत्रपुण्योदकः प्रहिः ॥ स्नात्वाकाणादकूपेयःकणादेशंसमर्चयेत् ॥ ७५ ॥ नधनेननधान्येनत्यज्यतेसकदाचन ॥ तस्यदक्षिणतोदृश्योभूतीशोभूतिकृत्सताम् ॥७६॥ तत्पश्चिमेऽघसंहर्तृआषाढीश्वरसंज्ञितम् ॥ दुर्वासेशश्चतत्पूर्वेसर्वकामसमृद्धिकृत् ॥ ७७ ॥ तद्याम्यांभारभूतेशःपापभारापहारकः ॥ व्यासेश्वरस्यपूर्वे णद्वौशंखलिखितेश्वरौ ॥ तौदृश्यौयत्नतःकाश्यांमहाज्ञानप्रवर्तकौ ॥ ७८ ॥ यत्समाप्याऽप्यतेपुण्यंनिष्ठापाशुपतव्रतम् ॥ तदाप्यतेत्रविश्वेशसकृदी क्षणतःक्षणात् ॥७९॥ तदीशानेवधूतेशोयोगज्ञानप्रवर्तकः ॥ तीर्थंचैवावधूतेशंसर्वकल्मषनाशकृत् ॥१८०॥ अवधूतेश्वरात्पूर्वेलिंगंपशुपतीश्वरम् ॥ तल्लिंगसेवयापुंसांपशुपाशविमोक्षणम् ॥८१॥ तद्दक्षिणेगोभिलशोमहाभिलषितप्रदः॥ जीमूतवाहनेशश्चतत्पश्चाल्लिंगमुत्तमम् ॥ ८२ ॥ विद्याधरपदप्रा प्तिस्तल्लिंगपारिसेवनात्॥ मयूखार्कःपंचनदेगभस्तीशश्चतत्रवै ॥ ८३ ॥ दधिकल्पह्रदोनामतदुदीच्यांमहाप्रहिः ॥ दुर्लभंतत्प्रहिस्नानंदुर्लभंचतदी क्षणम् ॥ ८४ ॥ गभस्तीशोत्तरेभागेदधिकल्पेश्वरोहरः ॥ नरस्तमाशुसंवीक्ष्यकल्पंत्र्यक्षपुरेवसेत् ॥ ८५ ॥ गभस्तीशाद्दक्षिणेतुमंगलामंगलालयाम् ॥ उद्दिश्यमंगलांगौरींभोजयेद्द्विजदंपती ॥ ८६ ॥ अलंकृत्ययथाशक्तितत्पुण्यांतोनकर्हिचित् ॥ क्षितिप्रदक्षिणफलामंगलैकाप्रदक्षिणा ॥ ८७ ॥

नात्क्षणात्प्राप्यतइत्यर्थः ॥ यत्सम्यक्प्राप्यतेइतिपाठेनिष्ठापूर्वकंयत्पाशुपतव्रतंतस्मादित्यध्याहरणीयम् ॥ ७९ ॥ १८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८८ ॥ ८९ ॥१९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ यमेयाम्येकोणेइत्यर्थः ॥ ९६ ॥ धातेशःधात्रीशइत्यर्थः ॥ ९७ ॥ सन्मुदेसतांमुदेइत्यर्थः ॥ ९८ ॥ ९९ ॥ तदुदीच्यामि

वदनप्रेक्षणादेवीमुखप्रेक्षेश्वरोत्तरे ॥ मंगलायाःसमापेतुसर्वासिद्धिकरीशिवा ॥ ८८ ॥ लिंगेत्वष्टीशग्वत्तेशौमुखप्रेक्षोत्तरेशुभे ॥ सहेमभूमिदानस्यफलंदर्श नतस्तयोः ॥८९॥ तदुत्तरेचर्चिकायादेव्याःसंदर्शनंशुभम् ॥ रेवतेश्वरलिंगंचचर्चिकाग्रेणशांतिकृत् ॥ १९० ॥ महाशुभायतस्याग्रेलिंगंपंचनदेश्वरम् ॥ मंगलोदोमहाकूपोमंगलापश्चिमेशुभः ॥ ९१ ॥ उपमन्योर्महालिंगंमंगलापश्चिमेशुभम् ॥ व्याघ्रपादेश्वरलिंगंतत्पश्चाद्व्याघ्रभीतिहृत् ॥ ९२ ॥ नैर्ऋत्यां चगभस्तीशाच्छशांकेशोघसंघहृत् ॥ तत्पश्चिमेचैत्ररथंलिंगंदिव्यगतिप्रदम् ॥ ९३ ॥ रेवतेशात्पश्चिमतोजैमिनीशोमहाघहृत् ॥ तत्रलिंगान्यनेका निऋषीणामृषिसत्तम ॥ ९४ ॥ जैमिनीशाच्चवायव्येलिंगंवैरावणेश्वरम् ॥ नतद्दर्शनतःपुंसांराक्षसानांमहाभयम् ॥ ९५ ॥ तद्दक्षिणेवराहेशोमांडव्ये शस्ततोयमे ॥ तद्दक्षिणेप्रचंडेशोयोगेशोदक्षिणेततः ॥ ९६ ॥ तद्दक्षिणेचधातेशःसोमेशश्चतदग्रतः ॥ तन्नैर्ऋत्यांकनकेशोमहाकनकदःसताम् ॥ ९७ ॥ तदुत्तरेपांडवानांपंचलिंगानिसन्मुदे ॥ संवर्तेशस्तदग्रेचश्वेतेशस्तस्यपश्चिमे ॥ ९८ ॥ तत्पश्चात्कलशेशश्चलिंगंकालाभयप्रदम् ॥ कालेनपाशितेश्वेते मुनेकुंभात्समुत्थितम् ॥९९॥ चित्रगुप्तेश्वरंलिंगंतदुदीच्यामघापहम् ॥ चित्रगुप्तेश्वरात्पश्चाद्योढ्ढेशोमहाफलः ॥ २०० ॥ कलशेशादवाच्यांचग्रहेशो लिंगमुत्तमम् ॥ ग्रहबाधांशमयतितल्लिंगपरिलोकनम् ॥ १ ॥ चित्रगुप्तेश्वरात्पश्चाद्यद्दच्छेशोमहाफलः ॥ उतथ्यवामदेवेशंलिंगंयाम्यांग्रहेश्वरात् ॥२॥ कंबलाश्वतरेशौचतस्यदक्षिणतःशुभे ॥ तत्रैवनिर्मललिंगंनलकूबरपूजितम् ॥ ३ ॥ तद्याम्यांमणिकर्णीशंतदुदक्पलितेश्वरम् ॥ जराहरंचतत्रैवतत्पश्चा त्पापनाशनम् ॥४॥ तत्पश्चिमेनिर्जरेशस्तन्नैर्ऋत्यांपितामहः ॥ पितामहस्रोतिकाचतत्रश्राद्धंमहाफलम् ॥५॥ तद्याम्यांवरुणेशश्चबाणेशस्तस्यदक्षिणे॥ पितामहस्रोतिकायांकूश्मांडेशस्तुसिद्धिकृत् ॥ ६ ॥ तत्पूर्वतोराक्षसेशोगंगेशस्तस्यदक्षिणे ॥ तदुत्तरेनिम्नगेशाःसंतिलिंगान्यनेकशः ॥ ७ ॥ वैवस्वते श्वरस्तत्रयमलोकनिवारकः ॥ तत्पश्चाददितीशश्चचक्रेशस्तस्यचाग्रतः ॥ ८ ॥ तदग्रेकालकेशाख्योदृष्टप्रत्ययकृत्परः ॥ छायासंदृश्यतेतत्रनिष्पाप स्तदवेक्षणात् ॥ ९ ॥ तदग्रेतारकेशश्चतदग्रेस्वर्णभारदः ॥ तदुत्तरेमरुत्तेशःशक्रेशश्चतदग्रतः ॥ २१० ॥ तद्दक्षिणेचरंभेशस्तत्रैवचशशीश्वरः ॥ तदुत्तरेलोकपेशास्तत्रलिंगान्यनेकशः ॥ ११ ॥ नागगंधर्वयक्षाणांकिन्नराप्सरसामपि ॥ देवर्षिगणवृंदानांनानासिद्धिकराण्यपि ॥ १२ ॥

तिस्थूलगत्योक्तम् ॥ अन्यद्याचित्रगुप्तेश्वरमिति ॥ २०० ॥ १ ॥ २ ॥ ३ ॥ जराहरंलिंगमितिशेषः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ छायादेवप्रतिबिंबः ॥ तदवेक्षणाच्छायादर्शनात् ॥ ९ ॥ २१० ॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१३॥१४॥ १५॥ १६ ॥ १७ ॥१८॥ पर्वणिशिवरात्रौ ॥१९॥२२०॥ तारःतारकेशःकालःकालेशः ॥ शिलादजोनंदिकेश्वरः ॥ २१ ॥ यज्जलंश्रद्धयापीतंलिंगत्रयमर्पयेत्तदंबुप्राशनमितिपूर्वेणै
वान्वयः ॥२२॥ समर्चयेत्तमित्यर्थः ॥२३॥२४ ॥२५॥ सुसिद्धिदःशोभनसिद्धिदःस्वरूपभूतसिद्धिदइतिवा॥२६॥२७॥ उपस्पृश्यस्नात्वा॥२८॥२९॥२३०॥ रघुणारघुवंशोद्भवेनरामाख्येनविष्णुने

शक्रेशाद्दक्षिणेभागेफाल्गुनेशोमहाघहृत् ॥ महापाशुपतेशश्चतद्याम्यांशुभकृत्परः ॥ १३ ॥ तत्पश्चिमेसमुद्रेशईशानेशस्तदुत्तरे ॥ तत्पूर्वेलांगली
शश्चसर्वसिद्धिसमर्पकः ॥ १४ ॥ रागद्वेषविनिर्मुक्ताःसिद्धिंयांतिचपूजकाः ॥ तेषांमोक्षोमयाख्यातोनतुतेदेविमानवाः ॥ १५ ॥ मधुपिंगश्वेतकेतूलां
गलीशेतपास्विनौ ॥ अनेनैवशरीरेणजग्मतुःसिद्धिमुत्तमाम् ॥ १६ ॥ तत्रैवनकुलीशश्चकपिलेशश्चतत्रवै ॥ रहस्यंपरमंचोभौममव्रतनिषेविणौ ॥ १७ ॥
तत्सन्निधौप्रीतिकेशस्तत्रप्रीतिर्ममप्रिये ॥ तत्रोपवासादेकस्मात्फलमब्दशताधिकम् ॥ १८ ॥ एकंजागरणंकृत्वाप्रीतिकेशउपोषितः ॥ गणत्वपदवी
तस्यनिश्चितामम पर्वणि ॥ १९ ॥ देवस्यदक्षिणेभागेतत्रवापीशुभोदका ॥ तदंबुप्राशनंनृणामपुनर्भवहेतवे ॥ २२० ॥ तज्जलात्पश्चिमेभागेदंडपाणिः
सदावति ॥ तत्प्राच्यवाच्युत्तरस्यांतारःकालःशिलादजः॥२१॥ लिंगत्रयंहृदजेयच्छ्रद्धयापीतमर्पयेत् ॥ यैस्तत्रतज्जलंपीतंकृतार्थास्तेनरोत्तमाः ॥२२॥
अविमुक्तसमीपेच्योंमोक्षेशोमोक्षबुद्धिदः ॥ करुणेशोदयाधामतदुदीच्यांसमर्चयेत् ॥२३॥ स्वर्णाक्षेशस्तुतत्प्राच्यांज्ञानदस्तस्यचोत्तरे ॥ सौभाग्यगौरी
संपूज्याबहुसौभाग्यसंपदे ॥२४॥ विश्वेशाद्दक्षिणेभागेनिकुंभेशःप्रयत्नतः ॥ क्षेत्रक्षेमकरःपूज्यस्तत्पश्चाद्विघ्ननायकः ॥ २५ ॥ सर्वविघ्नच्छिदभ्यर्च्यश्चतु
र्थ्यांतुविशेषतः ॥ विरूपाक्षोनिकुंभेशाद्दक्षौपूज्यःसुसिद्धिदः ॥ २६ ॥ तद्दक्षिणेचशुक्रेशःपुत्रपौत्रप्रवर्धनः ॥ तदुदीच्यांमहालिंगंदेवयानीश्वरा
भिधम् ॥ २७ ॥ शुक्रेशादग्रतःपूज्यःकचेशइतिसंज्ञितः ॥ शुक्रकूपमुपस्पृश्यहयमेधफलंलभेत् ॥ २८ ॥ भवानीशौनमस्यौचशुक्रेशात्पश्चिमेशुभौ ॥
भक्तपोतप्रदौतौतुनिजभक्तस्यसर्वदा ॥ २९ ॥ अलर्केशःसमभ्यर्च्यःशुक्रेशात्पूर्वदिक्स्थितः ॥ मदालसेश्वरस्तत्रतत्पूर्वेसर्वविघ्नहृत् ॥ २३० ॥
गणेश्वरेश्वरंलिंगंसर्वसिद्धिकरंपरम् ॥ हत्वालंकेश्वरंविप्ररघुणाथप्रतिष्ठितम् ॥३१॥ तल्लिंगस्पर्शनादाशुब्रह्महापिविशुध्यति ॥ महापुण्यप्रदंचान्यत्त
त्रार्च्यंत्रिपुरांतकम् ॥ ३२ ॥ दत्तात्रेयेश्वरंलिंगंतस्यपश्चिमतःशुभम् ॥ तद्याम्यांहारिकेशेशोगोकर्णेशस्ततःपरम् ॥ ३३ ॥ सरस्तदग्रेपापघ्नंतत्प
श्चाद्ध्रुवेश्वरः ॥ तदग्रेध्रुवकुंडंचपितृप्रीतिकरंपरम् ॥ ३४ ॥ तदुत्तरेपिशाचेशःपैशाच्यपदहारकः ॥ पित्रीशस्तद्यमादेशिपितृकुंडंतदग्रतः ॥ ३५ ॥
तत्रश्राद्धकृतांपुंसांतुष्येयुःप्रपितामहाः ॥ अग्रेध्रुवेशात्तारेशोवैद्यनाथःसएवहि ॥ ३६ ॥

तियावत् ॥ तदुक्तमारण्यकेपर्वणि ॥ जातोदशरथस्यासीद्रामोनाममहात्मनः ॥ विष्णुःस्वेनशरीरेणरावणस्यवधायचेति ॥ रघुनाथेतिपाठेस्पष्टएवार्थः॥३१॥३२॥३३॥३४॥३५॥तारेशःप्रणवेशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ता॰गइतिक्वचित् ॥ ३६ ॥ ३७ ॥ ऋष्यशृंगिणईश्वरइति ॥ ३८ ॥ ३९ ॥ क्षेत्रवस्तिदंकाशीवासदम् ॥ २४० ॥ ४१ ॥ ४२ ॥ वाजिमेधकोवाजिमेधेश्वरइत्यर्थः ॥ ४३ ॥ ४४ ॥ ॥ ४५ ॥ तवागस्तेः ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ २५० ॥ सर्वाशापूरकोऽर्कविनायकइतिशेषः ॥ ५१ ॥ ५२ ॥ शुष्कयाअसीनाम्न्यानद्या ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥

तत्रैर्ऋत्यांमनोर्लिंगंवंशवृद्धिकरंपरम् ॥ प्रियव्रतेश्वरंलिंगंवैद्यनाथपुरोगतम् ॥ ३७ ॥ तद्याम्यांमुचुकुंदेशस्तत्पार्श्वेगौतमेश्वरः ॥ तत्पश्चिमेनभद्रेशस्त द्याम्यामृष्यशृंगिणः ॥ ३८ ॥ ब्रह्मेशस्तत्पुरस्ताच्चपर्जन्येशस्तदीशगः ॥ तत्प्राच्यांनहुषेशश्चविशालाक्षीचतत्पुरः ॥ ३९ ॥ विशालाक्षीश्वरंलिंगंतत्रै वक्षेत्रवस्तिदम् ॥ जरासंधेश्वरंलिंगंतद्याम्यांज्वरनाशनम् ॥ २४० ॥ तत्पुरस्ताद्धिरण्याक्षलिंगंपूज्यंहिरण्यदम् ॥ तत्पश्चिमेगयाधीशस्तत्प्रतीच्यांभगी रथः ॥ ४१ ॥ तदग्रेचदिलीपेशोब्रह्मेशात्पश्चिमेमुने ॥ तत्रलिंगंसकुंडंचस्नातुरिष्टफलप्रदम् ॥ ४२ ॥ तत्रविश्वावसोर्लिंगंमुंडेशस्तत्रपूर्वतः ॥ तद्दक्षिणे विधीशश्चतद्याम्यांवाजिमेधकः ॥४३ ॥ दशाश्वमेधिकेस्नात्वादृष्ट्वातल्लिंगमुत्तमम् ॥ दशानामश्वमेधानांफलंप्राप्नोतिमानवः ॥ ४४ ॥ तदुत्तरेमातृती र्थस्नातुर्जन्मभयापहृत् ॥ तत्रस्नानंतुयःकुर्यान्नारीवापुरुषोपिवा ॥ ४५ ॥ ईप्सितंफलमाप्नोतिमातृणांचप्रसादतः ॥ दक्षिणेतत्कुंडाच्चपुष्पदंतेश्वरः परः ॥ ४६ ॥ तदाग्नेदिशिदेवर्षिगणलिंगान्यनेकशः ॥ पुष्पदंताद्दक्षिणतःसिद्धीशःपरसिद्धिदः ॥ ४७ ॥ पंचोपचारपूजातःस्वप्नेसिद्धिंपरांदिशेत् ॥ राज्यप्राप्तिर्भवेत्पुंसांहरिश्चंद्रेशसेवया ॥ ४८ ॥ तत्पश्चिमेनैर्ऋतेशोंगिरसेशस्ततोयमे ॥ तद्दक्षिणेचक्षेमेशश्चित्रांगेशस्ततोयमे ॥ ४९ ॥ तद्दक्षिणेचकेदा रोरुद्रानुचरताप्रदः ॥ चंद्रसूर्यान्वयैर्भूपैःकेदाराद्दक्षिणापथे ॥ २५० ॥ प्रतिष्ठितानिलिंगानिशतशोथसहस्रशः ॥ लोलार्काद्दक्षिणाशायांसर्वाशापूरको र्चितः ॥ ५१ ॥ करंधमेश्वरंलिंगंतत्प्रतीच्यांमहाफलम् ॥ तत्पश्चिमेमहादुर्गामहादुर्गप्रभंजनी ॥ ५२ ॥ शुष्केश्वरंचतद्याम्यांशुष्कयासरितार्चितम् ॥ जनकेशस्तत्प्रतीच्यांशंकुकर्णस्तदुत्तरे ॥ ५३ ॥ महासिद्धीश्वरंलिंगंतत्प्राच्यांसर्वसिद्धिदम् ॥ सिद्धकुंडेनरःस्नात्वादृष्ट्वासिद्धेश्वरंमहत् ॥ ५४ ॥सर्वा सामेवसिद्धीनांपारंगच्छतिमानवः ॥ शंकुकर्णेशवायव्येलिंगंवाडव्यसंज्ञितम् ॥ ५५ ॥ तदग्रेचविभांडेशःकहोलेशस्तदुत्तरे ॥ तत्रद्वारेश्वरंलिंगंदेवीद्वारे श्वरीशुभा ॥ ५६ ॥ तत्पूजनाद्भवेत्सिद्धिरानंदारण्यवस्तिदा ॥ रक्षकाश्चगणास्तत्रनानारूपायुधामुने ॥ ५७ ॥ तत्रैवहरिदीशंचलिंगंकात्यायनंततः ॥ तत्पार्श्वेजांगलेशश्चतत्पश्चान्मुकुटेश्वरः ॥ ५८ ॥ तत्रैवकुंडंविमलंसर्वयात्राफलप्रदम् ॥ स्नात्वामुकुटकुंडेचदृष्ट्वावैमुकुटेश्वरम् ॥ ५९ ॥ यात्रयासर्व लिंगानांयत्फलंतदवाप्यते ॥ तपसश्चापियोगस्यसिद्धिदासाऽवनीपरा ॥२६०॥ मुनेशतंसहस्राणितत्रलिंगानिसिद्धये ॥ एकादिगुत्तरादेविवाराणस्यां प्रियामम ॥ ६१ ॥ तत्रापिपंचायतनेरतिर्मेनितरांप्रिये ॥ उत्पत्तिस्थितिकालेपितत्राहंसर्वदास्थितः ॥ ६२ ॥

आनंदारण्यवस्तिदाअविमुक्तिवसतिदा ॥ ५७ ॥ ५८ ॥ ५९ ॥ २६० ॥ उत्तरादिगितित्रिलोचनेस्थितत्वादुक्तम् ॥ ६१ ॥ पंचायतनेओंकारे ॥ उत्पत्तिस्थितिकालेपीत्यपिशब्दाल्लयेपि ॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ ६४ ॥ ६५ ॥ अंधवः कूपाः ॥ श्रद्धेयानिआस्तिक्यबुद्ध्यासेव्यानि ॥ ६६ ॥ सरसांसरोवराणांपुष्करिणीनामितियावत् ॥ तत्र शतहस्तावाप्यः ॥ द्विशतहस्ताःपुष्करिण्यः ॥ शतहस्ताभवेद्वापीद्विगुणापुष्करिणीभवेदितिवचनात् ॥ ६७ ॥ ६८ ॥ ६९ ॥ स्वर्गापवर्गयोरिति ॥ दृष्टांस्वर्गदादेहांतसेविताअपवर्गदेत्यर्थः ॥ २७० ॥ ७१ ॥ तेमेशाखविशाखाभाःतत्सदृशा

एवंयस्तुविजानातिनसपापैःप्रलिप्यते ॥ सत्यंसत्यंपुनःसत्यंत्रिसत्यंनान्यतःप्रिये ॥ ६३ ॥ शीघ्रंतत्रैवगंतव्यंयदीच्छेन्मामकंपदम् ॥ उद्देशमात्रंलिंगानिकाथितानिमयासुने ॥ ६४ ॥ द्विस्त्रिःकृत्वःस्थापितानिभक्त्यालिंगानिकानिचित् ॥ नतानिपुनरुक्तानिश्रद्धयाचर्यानिसर्वतः ॥ ६५ ॥ एतानियानिलिंगानियानिकुंडानियेंऽधवः ॥ यावाप्यस्तानिसर्वाणिश्रद्धेयानिमनीषिभिः ॥६६॥ एतेषांदर्शनात्स्नानात्फलमत्रोत्तरोत्तरम् ॥ अत्रत्यानांचलिंगानांकूपानांसरसामपि ॥६७॥ वापीनांचापिमूर्तीनांकःसंख्यातुंप्रभुर्भवेत् ॥ आनंदकाननस्थानितृणान्यपिपरंवरम् ॥६८॥ दिवौकसोपिनान्यत्रयत्पुनर्जन्मभाजनम् ॥ सर्वलिंगमयीकाशीसर्वतीर्थैकजन्मभूः ॥६९॥ स्वर्गापवर्गयोर्दात्रीदृष्टादेहांतसेविता ॥ ममप्रियतमादेवित्वमेवतपसोबलात् ॥ २७० ॥ स्वभावतस्त्वियंकाशीसुखविश्रामभूर्मम ॥ येकाश्यानामगृह्णंतियेनुमोदंतएवहि ॥ ७१ ॥ तेमेशाखविशाखाभाःस्कंदनंदिगजास्यवत् ॥ तएवभक्तामेदेवितएवममसेवकाः ॥७२॥ मुमुक्षवस्तएवात्रयेचानंदवनौकसः ॥ तपस्ततप्तंमहत्तैस्तुकृतंतैस्तुमहाव्रतम् ॥ ७३ ॥ तैश्चदत्तंमहादानंयेचानंदवनौकसः ॥ तेस्नातसर्वतीर्थावैतेऽखिलाध्वरदीक्षिताः ॥ ७४ ॥ तेचीर्णसर्वधर्माहियेचानंदवनौकसः ॥ सुरासुरोरगनराभूमिभारायतेऽखिलाः ॥ वयस्यपीहचरमेयेनानंदवनौकसः ॥ ७५ ॥ अंत्यजोपिवरःकाश्यांनान्यत्रश्रुतिपारगः ॥ संसारपारगःपूर्वस्त्वंत्यश्चांत्यजतोप्यधः ॥ ७६ ॥ सएवनूनंसर्वज्ञःसएवध्यधिकेक्षणः ॥ यःपार्थिवींतनुंहित्वाकाश्यांधत्तेसुधामयीम् ॥७७॥ श्रुत्वाध्यायमिदंपुण्यंसर्वतीर्थरहस्यवत् ॥ काशीदर्शनजंपुण्यंप्राप्नोतिनियतंनरः ॥७८॥ यःपठेदिममध्यायंप्रातःप्रातर्दिनेदिने ॥ दृष्टानितेनसर्वाणितीर्थान्येतानिनान्यथा ॥ ७९ ॥ सर्वलिंगमयाध्यायंयोऽमुंनित्यंजपेत्सुधीः ॥ नतंयमोनतंदूतानैनमंहोपिबाधते ॥ २८० ॥ ब्रह्मयज्ञफलंतस्यजायतेसुकृतात्मनः ॥ योजपेदमुमध्यायंशुचिस्तद्गतमानसः ॥ ८१ ॥ सस्नातःसर्वकुंडेषुसर्वत्र.प्यंबुपःसच ॥ सर्वलिंगार्चकःसोत्रयोऽमुमध्यायमाजपेत् ॥८२॥ किमन्यैर्बहुभिःस्तोत्रैरतिस्तोकफलप्रदैः ॥ मत्प्रेमवद्भिरध्यायोजप्तव्योयंमहाफलः ॥८३॥ महादानेषुदत्तेषुयत्फलंप्राप्यतेऽत्रवै ॥ सकृज्जपान्महाध्यायादमुष्मात्तत्समाप्यते ॥ ८४ ॥

इत्यर्थः ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ श्रुत्वाध्यायमिदंपुण्यामिति ॥ इदंपुण्यमाख्यानंश्रुत्वा ॥ किंतत् ॥ अध्यायमध्यायरूपम् ॥ इममितिपाठश्चेद्दृश्यतेतदाऋजुरेवार्थः ॥ ॥ ७८ ॥ ७९ ॥ २८० ॥ ब्रह्मयज्ञोज्ञानयज्ञः ॥ ८१ ॥ ८२ ॥ ८३॥ ८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८५ ॥ ८६ ॥ जप्यतइतिजपोऽध्यायः ॥ ८७ ॥ ८८ ॥ ८९ ॥ २९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ २९७ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायां सप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ छ ॥ ॥ अष्टाधिकेनवत्याख्येऽध्यायेतावन्निरुच्यते ॥ श्रीमुक्तिमंडपेश्रीमद्विश्वेश्वरसमागमः ॥ १ ॥ विश्वेश्वरस्यमहामहोत्सवंवक्तुंप्रस्तावयति ॥ शृणुसूतेति ॥ कुंभसंभवेकुंभसंभवायकुंभात्सम्यग्भवतीतिकुंभसंभुस्तस्मैइतिवा ॥ १ ॥ प्रावेशिकींप्रवेशसंसृष्टांततसंबद्धामित्यर्थः ॥ तंकिनींनाशिनीम् ॥ २ ॥ दमनपर्वणिदमनत्रयोदश्यांचैत्रशुक्लत्रयो

स्नात्वासर्वाणितीर्थानिदृष्ट्वालिंगान्यनेकशः ॥ यत्फलंलभ्यतेमर्त्यैस्तदेतज्जपनाद्भवम् ॥ ८५ ॥ इदमेवतपोत्युग्रमयमेवजपोमहान् ॥ काशीलिंगावलीनामाध्यायोजप्येतयन्मुने ॥ ८६ ॥ ममद्रुहेनास्तिकायवेदनिंदारतायच ॥ नदातव्योनदातव्योनदातव्योजपस्त्वयम् ॥ ८७ ॥ अध्यायस्यास्यजपनात्पापंब्रह्मवधोद्भवम् ॥ अगम्यागमनंचापितथाभक्ष्यस्यभक्षणम् ॥ ८८ ॥ गुरुदाराभिचारोत्थंहेमस्तेयसमुद्भवम् ॥ मातापितृवधाज्जातंगोभ्रूणहननोद्भवम् ॥ ८९ ॥ महापापानिपापानिज्ञाताज्ञातानिभूरिशः ॥ उपपापानिपापानिमनोवाक्कायजान्यपि ॥ ९० ॥ विलयंयांत्यशेषाणिनिःसंदेहंममाज्ञया ॥ पुत्रान्पौत्रान्धनंधान्यंकलत्रंक्षेत्रमेवच ॥ ९१ ॥ मनःसमीहितंसर्वंस्वर्गंमोक्षंसुखान्यपि ॥ जप्त्वाध्यायमिमंविद्वान्प्राप्स्यत्येवनसंशयः ॥ ९२ ॥ इतियावत्समाख्यातिदेवोदेवीपुरःकथाम् ॥ तावन्नंदीसमागत्यप्रणम्येतिव्यजिज्ञपत् ॥ ९३ ॥ जातापरिसमाप्तिश्चमहाप्रासादनिर्मितेः ॥ सज्जीकृतोरथश्चायंब्रह्माद्यामिलिताःसुराः ॥ ९४ ॥ तार्क्ष्यगःपुंडरीकाक्षोद्वारितिष्ठतिसानुगः ॥ प्रतीक्षमाणोऽवसरंपुरस्कृत्यमुनीश्वरान् ॥ ९५ ॥ चतुर्दशसुलोकेषुयेयेतिष्ठंतिसुव्रताः ॥ तेनिशम्याद्यमिलिताःप्रावेशिकमहोत्सवम् ॥ ९६ ॥ ॥ स्कंदउवाच ॥ ॥ इतिनंदिवचःश्रुत्वादेवोदेवीसमायुतः ॥ दिव्यंरथंसमारुह्यनिर्जगामत्रिविष्टपात् ॥ २९७ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेक्षेत्रतीर्थवर्णनंनामसप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ व्यास उवाच ॥ ॥ शृणुसूतमहाभागयथास्कंदेनभाषितः ॥ महामहोत्सवःशंभोःपृच्छतेकुंभसंभवे ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ निशामयमहाप्राज्ञशंभुप्रावेशिकींकथाम् ॥ त्रैलोक्यानंदजननींमहापातकतंकिनीम् ॥ २ ॥ मंदरादागतःशंभुश्चैत्रेदमनपर्वणि ॥ प्राप्याप्यानंदगहनमितश्चेतश्चचारह ॥ ३ ॥ मोक्षलक्ष्मीविलासेथप्रासादेसिद्धिमागते ॥ देवोविरजसःपीठादंतर्गेहंविवेशह ॥ ४ ॥ ऊर्जशुक्लप्रतिपदिबुधराधासमायुजि ॥ चंद्रेसप्तमराशिस्थेशेषेषूच्चग्रहेषुच ॥ ५ ॥ वाद्यमानेषुवाद्येषुप्रसन्नासुहरित्सुच ॥ ब्राह्मणानांश्रुतिरवन्यकृतान्यरवांतरे ॥ ६ ॥

दश्यामित्यर्थः ॥ प्राप्यापीति ॥ आनंदवनस्यमाहात्म्यैवयद्यपिपरमानंदोजातस्तथापिइतस्ततश्चचारेत्यर्थः ॥ ३ ॥ विरजसःपीठात्रिलोचनस्थानात् ॥ ४ ॥ बुधराधेति ॥ राधाऽनुराधा ॥ अनुराधानक्षत्रेचंद्रस्यवृश्चिकराशिस्थत्वाद्विश्वेश्वरनाम्नश्चवृषभराशिस्थत्वाच्चंद्रेसप्तमराशिस्थेइत्युक्तम् ॥ ५ ॥ हरित्सुदिक्षु ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतीति ॥ प्रतिशब्दितःप्रतिध्वनिंप्राप्तोभूर्लोकभुवर्लोकयोरंतरध्वातास्मिन्सतीत्यर्थः ॥ प्रावेशिकोत्सवस्यविशेषणंवा ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ चत्वारःपुरुषार्थाइत्यन्वयः ॥ ११ ॥
यद्रक्तंयेननीलिम्नारक्तंसंवद्धंतंनीलिमानमितिसंवंधः ॥ प्रततमितिवापाठः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ छटाःप्रक्षेपाविंदवोवा ॥ १६ ॥ रंगमालाउत्सवनिमित्तामालाः ॥ १७ ॥ रत्नकुट्टिम
भूभागाःरत्नानिचकुट्टिमानिमणयश्चतैर्वद्धाभूभागाइत्यर्थः ॥ गोपुराग्रेषुवहिर्द्वारसंमुखेषु ॥ १८ ॥ १९ ॥ तत्तुजन्मदिवाभवद्यस्मिन्दिवसेविश्वेशस्यप्रवेशस्तदेवदिनंतेषांसर्वेषांजन्मदिवसमभवदि

प्रतिशब्दितभूर्लोकभुवर्लोकांतराध्वनि ॥ सर्वप्रमुदितंचासीच्छंभोःप्रावेशिकोत्सवे ॥ ७ ॥ जगुर्गंधर्वनिकराननृतुश्चाप्सरोगणाः ॥ चारणास्तुस्तुतिं
कुर्युर्जहृषुर्देवतागणाः ॥८॥ ववुर्गंधवहावातावव्रृषुःकुसुमैर्घनाः ॥ सर्वेमंगलनेपथ्याःसर्वेमंगलभाषिणः ॥९॥ स्थावराजंगमाःसर्वेजाताआनंदमेदुराः॥
सुरासुरेषुसर्वेषुगंधर्वेषूरगेषुच ॥ १० ॥ विद्याधरेषुसाध्येषुकिन्नरेषुनरेषुच ॥ स्त्रीपुंजातेषुसर्वेषुरेजुश्चत्वारएवच ॥ ११ ॥ निष्प्रत्यूहंचनितरांपुरुषार्थाः
पदेपदे ॥ धूपधूमभरैर्व्योमयद्रक्तंतुतदामुने ॥ १२ ॥ नाद्यापिनीलिमानंतंपरित्यजतिकर्हिचित् ॥ नीराजनाययेदीपास्तदासर्वेप्रबोधिताः ॥ १३ ॥
तेषांज्योतींषिखेद्यापिराजंतेतारकाच्छलात् ॥ प्रतिसौधंपताकाश्चनानाकाराविचित्रिताः ॥ १४ ॥ रम्यध्वजप्रभाधौतारेजुःप्रतिशिवालयम् ॥ क्वचि
द्गायंतिगीतज्ञाःक्वचिन्नृत्यंतिनर्तकाः ॥ १५ ॥ चतुर्विधानिवाद्यानिवाद्यंतेचक्वचित्क्वचित् ॥ प्रत्यध्वंचंदनरसच्छटापिच्छिलभूमयः ॥ १६ ॥
हरितश्वेतमांजिष्ठनीलपीतबहुप्रभाः ॥ प्रत्यंगणंशुभाकारारंगमालाश्चकाशिरे ॥ १७ ॥ रत्नकुट्टिमभूभागागोपुराग्रेषुरेजिरे ॥ सुधोज्ज्वलाहर्म्यमालाःसौ
धनामप्रपेदिरे ॥१८॥ अचेतनान्यपितदाचेतनानीवसंबभुः ॥ यानिकानीहकीर्त्यंतेमंगलानिघटोद्भव ॥ १९॥ तेषामेवहिसर्वेषांतत्तुजन्मदिवाभवत् ॥
आगत्यदेवदेवोथमुक्तिमंडपमाविशत् ॥ २० ॥ अथाभिषिक्तश्चतुराननेनमहर्षिवृंदैःसहदेवदेवः ॥ शुभासनस्थःसहितोभवान्याकुमारवृंदैःपरितोवृतश्च॥
॥ २१ ॥ रत्नैरसंख्यैर्बहुभिर्दुकूलैर्माल्यैर्विचित्रैर्लसदिष्टगंधैः ॥ अपूपुजन्देवगणामहेशंतदामुदातेचमहोरगेंद्राः ॥ २२ ॥ रत्नाकरैश्चापिगिरींद्रवर्यै
थास्वमन्यैरपिपुण्यधीभिः ॥ संपूजितःकुंभजतत्रशंभुर्नीराजितोमातृगणैरथेशः ॥२३॥ संतोष्यसर्वान्प्रथमंमुनींद्रान्स्वैःस्वैर्हृदिस्थैश्चचिराभिलाषैः ॥
ब्रह्माणमाभाष्यशिवोथविष्णुंजगादसर्वामरवृंदवंद्यः ॥ २४ ॥ इतोनिषीदेतिसमानपूर्वंत्वंमेसमस्तप्रभुतैकहेतुः ॥ दूरेपितिष्ठन्निकटस्त्वमेवत्वत्तोनक
श्चिन्ममकार्यकर्ता ॥ २५ ॥ त्वयादिवोदासनरेंद्रवर्यःसदूपदेशैश्चतथोपदिष्टः ॥ यथाससिद्धिंपरमामवापसमीहितंमेनिखिलंचसिद्धम् ॥ २६ ॥ विष्णो
वरंब्रूहियदीप्सितस्तेनादेयमत्रास्तिकिमप्यहोते ॥ इदंमयाऽऽनंदवनंयदाप्तंहेतुस्तुतत्रत्वमसौगणेशः ॥ २७ ॥

त्यर्थः ॥ तत्तदितिपाठेतत्प्रसिद्धंतद्दिनमितियोज्यम् ॥ २० ॥ कुमारवृंदागणेशकार्तिकेयसमूहाःसनकादयोवा ॥ २१ ॥ मुदाहर्षेण ॥ द्वेइतिपाठेद्वेलक्षेदेवगणाइत्यर्थः ॥ २२ ॥
॥ २३ ॥ २४ ॥ २५ ॥ सदूपदेशैरित्यत्रदैर्घ्यमार्षम् ॥ सदोपदेशैरितिपाठेसंतआसमंततोयेउपदेशास्तैरित्यर्थः ॥ २६ ॥ हेतुस्त्वितितुश्चार्थेगणेशश्चेत्यनेनसंबध्यते ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri

दीर्घशायिनांत्यक्तप्राणानाम् ॥ २८ ॥ २९ ॥ निर्वाणरमाश्रयेमोक्षलक्ष्म्यास्पदेमुक्तिमंडपइतियावत् ॥ तवलक्ष्मीपतित्वान्मोक्षलक्ष्म्याःसन्निस्थातुमुचितमितिभावः ॥ ३० ॥ मेकथंभूतात्परात्परान्महतोपिमहतइत्यर्थः॥महतोमहीयानितिश्रुतेः ॥ वरात्परादितिक्कचित् ॥३१॥ निश्चलश्रियिनिश्चलाश्रीर्यस्मिंस्तस्मिन् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ मत्तयैजनामुक्तिजनामुमुक्षवइत्यर्थः ॥

नमेप्रियंकिंचनविष्टपत्रयेतथायथेयंपरसौख्यभूमिः ॥ वाराणसीब्रह्मरसायनस्यखनिर्जनिर्यत्रनदीर्घशायिनाम् ॥ २८ ॥ श्रुत्वेतिवाक्यंजगदीशितुश्चप्रो
वाचविष्णुर्वरदंमहेशम् ॥ यदिप्रसन्नोसिपिनाकपाणेतदापदाद्दूरमहंनतेस्याम् ॥ २९ ॥ श्रुत्वेतिवाक्यंमधुसूदनस्यजगादतुष्टोनितरांपुरारिः ॥ सदासुरारे
ममसन्निधौत्वंतिष्ठस्वनिर्वाणरमाश्रयेत्र ॥ ३० ॥ आदावनाराध्यभवंतमत्रयोमांभजिष्यत्यपिभक्तियुक्तः ॥ समीहितंतस्यनसेत्स्यतिध्रुवंपरात्परान्मेंबुजचक्रपाणे ॥ ३१ ॥ सर्वत्रसौख्यंममसुक्तिमंडपेसंतिष्ठमानस्यभवेदिहाच्युत ॥ नतत्तुकैलासगिरौसुनिर्मलेनभक्तचेतस्यपिनिश्चलश्रियि ॥ ३२ ॥
निमेषमात्रंस्थिरचित्तवृत्तयस्तिष्ठंतियेदक्षिणमंडपेत्रमे ॥ अनन्यभावाअपिगाढमानसानतेपुनर्गर्भदशामुपासते ॥ ३३ ॥ संस्नाययेचक्रसरस्यगाधे
समस्ततीर्थैकशिरोविभूषणे ॥ क्षणंविशंतीहनिरीहमानसानिरेनसस्तेममपार्षदाहि ॥ ३४ ॥ स्मरंतियेमामपवर्गमंडपेकिंचिद्यथाशक्तिददत्यपिस्वम् ॥
शृण्वंतिपुण्याश्चकथाः क्षणंस्थिरास्तेकोटिगोदानफलंभजंति ॥ ३५ ॥ उपेंद्रतप्तानितपांसितैश्चिरंस्नाताहितेचाखिलतीर्थसार्थकैः ॥ स्नात्वेहयेवैमाणिकर्णिकाह्रदेसमासतेमुक्तिजनाश्रयेक्षणम् ॥ ३६ ॥ तीर्थानिसंतीहपदेपदेहरेतुलाक्वतेषांमणिकर्णिकायाः ॥ कतीहनोसंतिशुभाश्चमंडपाःपरंपरोमुक्तिरमाश्रयोयम् ॥ ३७ ॥ कैवल्यमंडपस्यास्यभविष्येद्वापरेहरे ॥ लोकेख्यातिर्भवित्रीयमेषकुक्कुटमंडपः ॥ ३८ ॥ ॥ हरिरुवाच ॥ ॥ भालनेत्रसमाख्याहिकथंनिर्वाणमंडपः ॥ तथाख्यातिमसौगंतायथादेवेनभाषितम् ॥ ३९ ॥ ॥ देवदेवउवाच ॥ ॥ महानंदोद्विजोनामभविष्योत्रचतुर्भुज ॥
अग्रवेदीसमाचारस्त्यक्ततीर्थप्रतिग्रहः ॥ ४० ॥ अदांभिकोऽक्रूरमनाःसदैवातिथिवल्लभः ॥ अथयौवनमासाद्यपितर्युपरतेसहि ॥ ४१ ॥ विषमेषुशरैस्तीव्रैःकारितस्त्वपदेपदम् ॥ जहारकस्यचिद्भार्यांमैत्रींकृत्वातुतेनवै ॥ ४२ ॥ तयाचप्रेरितोऽपेयंपपौचापिविमोहितः ॥ अभक्ष्यभक्षणरुचिरभून्मदनमोहितः ॥४३॥ वैष्णवान्धनिनोदृष्ट्वाक्षणंवैष्णववेषभृत् ॥ शैवान्निंदतिमूढात्मानरकत्राणकारणम् ॥४४॥ शिवभक्तान्समालोक्यकिंचिच्चपरिदित्सुकान् ॥
गर्हयेद्वैष्णवान्सर्वाञ्शैवलिंगोपजीवकः ॥ ४५ ॥ इतिपाखंडधर्मज्ञःसंध्यास्नानपराङ्मुखः ॥ विशालतिलकःस्रग्वीशुद्धधौतांबरोज्ज्वलः ॥ ४६ ॥
शिखीचोपग्रहकरःसर्वेभ्योऽसत्प्रतिग्रही ॥ तस्यापत्यद्वयंजातमुन्मत्तपथवर्तिनः ॥ ४७ ॥

तेषामाश्रये ॥ मुक्तिरमाश्रयइतिक्कचित् ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ अग्रवेदीऋग्वेदी ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ उपग्रहकरःहस्तकुशलइत्यर्थः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ उत्तमोत्तमेतिधनलोभाच्चांडालंसंबोधयति ॥ विष्णुसंबोधनं वा ॥ ५७ ॥ आदास्यामीतिच्छेदः ॥५८॥५९ ॥ ६० ॥ ६१॥६२॥पार्वतीयोयातःस्वदेशंगतः ॥ ६३ ॥ धिक्कृतस्तिरस्कृतः ॥ ६४॥६५॥ थूत्कुर्वंतःथूशब्दपूर्वकंश्लेष्माणंत्यजंतइत्यर्थः ॥ अस्मिन्पादेऽक्षराधिक्यमार्षम् ॥६६॥ दिवांधःपेचकः ॥ लज्जा

एवंतस्यप्रवृत्तस्यकश्चित्पर्वतदेशतः ॥ समागमिष्यतिधनीतीर्थयात्रार्थसिद्धये ॥ ४८ ॥ स्नात्वासचक्रसरसिकथयिष्यतिचेतिवै ॥ अहमस्तिधनो दित्सुर्जात्याचांडालसत्तमः ॥४९॥ अस्तिकश्चित्प्रतिग्राहीयस्मैदद्यामहंधनम् ॥ इतितस्यवचःश्रुत्वाकौश्चिच्चांगुलिसंज्ञया ॥५०॥ उद्दिष्टउपविष्टोसौयो जपेद्ध्यानमुद्रया ॥ एषप्रतिग्रहंत्वत्तोग्रहीष्यतिनचेतरः ॥५१॥ इतितेषांवचःश्रुत्वासगत्वातत्समीपतः ॥ दंडवत्प्रणिपत्याथतंबभाषेतदांत्यजः ॥५२॥ मामुद्धरमहाविप्रतीर्थंमेसफलीकुरु ॥ किंचिद्वस्त्वस्तिमेतत्त्वंगृहाणानुग्रहंकुरु ॥ ५३ ॥ अथाक्षमालिकांकर्णेकृत्वाध्यानंविसृज्यच ॥ कियद्धनंतवास्ती हपप्रच्छकरसंज्ञया ॥ ५४ ॥ तस्यसंज्ञांसवैबुद्ध्वाप्रोवाचातिप्रहृष्टवत् ॥ संतृप्तिर्यावतातेस्यात्तावद्दास्यामिनान्यथा ॥ ५५ ॥ इतितद्वचनंश्रुत्वात्यक्तमौ नमुवाचह ॥ सानंदःसमहानंदोनिःस्पृहोस्मिप्रतिग्रहे ॥ ५६ ॥ परंतेऽनुग्रहार्थंतुकरिष्यामिप्रतिग्रहम् ॥ किंचमेवचनंत्वंचेत्करिष्यस्युत्तमोत्तम ॥ ५७ ॥ यावदस्त्यखिलंवित्तंतन्मध्येन्यस्यकस्यचित् ॥ नस्तोकमपिदातव्यंतदाऽऽदास्यामिनान्यथा ॥५८॥ ॥ चांडालउवाच ॥ ॥ यावदस्तिमयानीतंवि श्वेशप्रीतयेवसु ॥ तावत्तुभ्यंप्रदास्यामिविश्वेशस्त्वंयतोमम॥५९॥ येवसंतीहविश्वेशराजधान्यांद्विजोत्तम ॥ क्षुद्राक्षुद्राजंतुमात्राविश्वेशांशास्तएवहि॥६०॥ परोद्धरणशीलायेयेपरेच्छाप्रपूरकाः ॥ परोपकृतिशीलायेविश्वेशांशास्तएवहि ॥ ६१ ॥ इतितद्वचनंश्रुत्वाप्रहृष्टेंद्रियमानसः ॥ उवाचपार्वतीयंतंसोऽ ग्रजन्मांत्यजंतदा ॥ ६२ ॥ आयाहिदर्भानादेहिकुरूत्सर्गंत्वराम्वितः ॥ तथेतिसचकाराशुपार्वतीयोमहामनाः ॥ ६३ ॥ विश्वेशःप्रीयतांचेतिप्रोच्ययातो यथागतः ॥ सचद्विजोद्विजैरन्यैर्धिक्कृतोपिवसन्निह ॥ ६४ ॥ बहिर्निर्गतमात्रस्तुबहुभिःपरिभूयते ॥ चांडालब्राह्मणश्चैषचांडालात्तधनस्त्वसौ ॥ ६५ ॥ असावेवहिचांडालःसर्वलोकबहिष्कृतः ॥ इत्थंतमनुधावंतिथूत्कुर्वंतःपरितोहरे ॥ ६६ ॥ सचतद्भयतोगेहात्काकभीतदिवांधवत् ॥ ननिःसरेत्क्वचिदपि लज्जाक्रांतिनतास्यकः ॥६७॥ सएकदासंप्रधार्यगृहिण्यालोकदूषितः ॥ जगामकीकटान्देशांस्त्यक्त्वावाराणसींपुरीम्॥६८॥ मध्येमार्गंसगच्छन्वैलक्षितस्तु सकांचनः ॥ अपिकार्पटिकांतस्थःसरुद्धोमार्गरोधिभिः॥६९॥ नीत्वाततमरण्यानींतस्कराःसपरिच्छदम् ॥ उल्लुंठ्यधनमादायसमालोच्यपरस्परम्॥७०॥

क्रांतिनतास्यकःव्रीडाकरणाधोमुखः ॥ लज्जयाकुलिताननइतिकचित् ॥६७॥ कीकटान्गयाप्रदेशान् ॥६८॥ सकांचनःस्वर्णवान् ॥ ६९ ॥ अरण्यानींमहारण्यम् ॥ उल्लुंठ्यआच्छिद्यध्नपात्रमुन्मु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्येतियावत् ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ताम्रचूडत्वंकुक्कुटत्वम् ॥ यदाहामरः ॥ कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधइति ॥ ७७ ॥ ७८ ॥ चरणायुधास्तएव ॥ ॥ ७९ ॥ ८० ॥ ८१ ॥ चरिष्यंतश्चरिष्यंतिपर्यटिष्यंतीत्यर्थः ॥ जिताहारानित्यादेर्मानयामासुरथेतितृतीयेनान्वयः ॥ ८२ ॥ प्रहासान्प्रकृष्टोहासोयेषांतान्त्रसन्नानित्यर्थः ॥ शृण्वतइतिकश्चित् ॥ ॥ ८३ ॥ ८४ ॥ ८५ ॥ पश्यतामितिश्लोकद्वयंवाक्यम् ॥ हेविष्णोतेचत्वारःकुक्कुटाइत्यनुषज्जते ॥ विमानमधिरुह्यसुचिरंकालंमत्पदंप्राप्यभोगान्निर्विश्यभुक्त्वाऽत्रकाश्यांकैलासेज्ञानिनोभूत्वा ॥ तेनैवशरीरेणेतिशेषः ॥ शाश्वतींमुक्तिंप्राप्स्यंतीत्यन्वयः ॥ ननुकाशीमृतानांकथंविमानमधिरुह्यकैलासेगमनंभोगोवातत्राह ॥ मदनुग्रहादिति ॥ अंतकालेकाशीस्मरणान्मत्तोषणाज्ज तोयोमदनु

प्रोचुर्भूरिधनंचैतज्जीर्यत्यस्मिन्नजीवति ॥ असौधनीप्रयत्नेनवध्यःसपरिचारकः ॥ ७१ ॥ संप्रधार्येतितेप्राहुःस्मर्तव्यंस्मरपांथिक ॥ त्वांत्वयंघात यिष्यामोनिश्चितंसपरिच्छदम् ॥ ७२ ॥ निशम्येतिमनस्येवकथयामाससद्द्विजः ॥ अहोप्रतिगृहीतंमेयदर्थंवसुभूरिशः ॥ ७३ ॥ कुटुंबमपि तन्नष्टंनष्टश्चापिप्रतिग्रहः ॥ जीवितंचापिमेनष्टंनष्टाकाशीपुरीस्थितिः ॥ ७४ ॥ युगपत्सर्वमेवाशुनष्टंदुर्बुद्धिचेष्टया ॥ नकाश्यांमरणंप्राप्तंतस्माद्दुष्टप्रति ग्रहात् ॥ ७५ ॥ प्रांतेकुटुंबस्मरणात्तथाकाशीस्मृतेरपि ॥ चोरैर्हतोपिसतदाकीकटेकुक्कुटोऽभवत् ॥७६॥ साकुकुटीसुतौतौतुताम्रचूडत्वमापतुः ॥ प्रांते काशीस्मरणतोजाताजातिस्मृतिःपरा ॥ ७७ ॥ इत्थंबहुतिथेकालेगतेकार्पटिकोत्तमाः ॥ तस्मिन्नेवाध्वनिप्राप्ताश्चत्वारोयत्रकुक्कुटाः ॥७८॥ वाराणस्याः कथांप्रोच्चैःकुर्वतोऽन्योन्यमेवहि ॥ काशीकथांसमाकर्ण्यतदातेचरणायुधाः ॥ ७९ ॥ जातिस्मृतिप्रभावेणतत्संगेनतुनिर्गताः ॥ तैश्चकार्पटिकश्रेष्ठैःपथि दृष्टाकृपालुभिः ॥ ८० ॥ तंदुलादिपरिक्षेपैःप्रापिताःक्षेत्रमुत्तमम् ॥ तेतुक्षेत्रंसमासाद्यचत्वारश्चरणायुधाः ॥ ८१ ॥ चरिष्यंतोऽत्रपरितोमुक्तिमंडपमु त्तमम् ॥ जिताहारान्सनियमान्कामक्रोधपराङ्मुखान् ॥ ८२ ॥ प्रहासान्मत्कथालापाँल्लोभमोहाविवर्जितान् ॥ स्वर्धुनीस्नानसंक्लिन्नसुनिर्मलशिरो रुहान् ॥ ८३ ॥ मन्नामोच्चारणपरान्मत्कथार्पितसुश्रुतीन् ॥ मद्दत्तचित्तसद्वृत्तीन्दृष्ट्वाक्षेत्रनिवासिनः ॥ ८४ ॥ मानयामासुरथतान्कुक्कुटान्साधुवर्त्मनः ॥ प्राक्तनाद्वासनायोगात्संप्रधार्यपरस्परम् ॥ क्रमेणाहारमाकुंच्यप्राणांस्त्यक्ष्यंतिचात्रवै ॥ ८५ ॥ पश्यतांसर्वलोकानांविष्णोतेमदनुग्रहात् ॥ विमानम धिरुह्याशुकैलासंप्राप्यमत्पदम् ॥ ८६ ॥

ग्रहएतेभुक्तिमुक्तीमयाप्रापणीयाइतियाममेच्छातस्मादित्यर्थः ॥ इदमत्रतत्त्वम् ॥ अंतकालेहितस्यस्मृतित्रयमुद्भूतम् ॥ तत्रनष्टश्चापिप्रतिग्रहइत्यनेनभोगस्मृतिःकुटुंबस्मृतिर्वाराणसीस्मृतिश्चेति ॥ तत्रमरणे यामतिःसागतिरितिन्यायेनवाराणस्याःस्मृतिसामर्थ्येनरुद्रपिशाचभोगमप्राप्यैवमणिकर्णिकायांचंडालप्रतिग्रहस्यात्यंतनिषिद्धत्वात्तत्पापलेशेनकुटुंबस्मरणेनकुक्कुटाअभवन् ॥ तत्रकुक्कुटशरीरेदिव्यभो गस्यासंभवादंतकालेकाशीस्मरणेनेश्वरानुग्रहात्कुक्कुटशरीराणिविहायविमानेनकैलासमारुह्यदिव्यान्भोगान्भुक्त्वाततस्तैरेवदिव्यदेहैर्ज्ञानिनोभूत्वाविदेहकैवल्यंप्राप्ताइति ॥ अतएवश्रूयते ॥ काश्यामवश्यं त्यजतांशरीरंशरीरिणांनास्तिपुनःशरीरम् ॥ यद्यस्तिकंठेगरलंललाटेत्रिलोचनंचंद्रकलाचमौलाविति ॥ यत्तुकाशीमृतानांजन्माद्यभाववचनंतत्तुयोनिद्वारेतिसर्वंसमंजसम् ॥ अन्यथेश्वरेच्छयायातना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहादेरप्यभावप्रसंगादिति ॥ यद्वा पाठक्रममुल्लंघ्यार्थक्रममंगीकृत्यव्याख्येयम् ॥ कुक्कुटान्साधुवर्त्मनइत्यस्यानंतरम् पश्यतांसर्वलोकानांविष्णोतेमदनुग्रहात् ॥ विमानमधिरुह्याशुकैलासंप्राप्यम त्पदम् ॥ निर्विश्यसुचिरंकालंदिव्यान्भोगाननुत्तमान् ॥ ततः प्राक्तनाद्वासनायोगात्संप्रधार्यपरस्परम् ॥ क्रमेणाहारमाकुंच्यप्राणांस्त्यक्ष्यंतिचात्रते।।ततोऽत्रज्ञानिनोभूत्वामुक्तिंप्राप्स्यंतिशाश्वतीमितिव्यु त्क्रमेणव्याख्येयम् ॥ पाठक्रमादर्थक्रमोबलीयानितिन्यायात् ॥ तथाहि ॥ अग्निहोत्रंजुहोतियवागूंपचतीतिवेदेपठ्यते ॥ तत्रयथायवागूंपचतिअग्निहोत्रंजुहोतीत्यर्थक्रमोऽंगीक्रियतेतथेति ॥ ८६ ॥ ॥ ८७ ॥ ८८ ॥ ८९ ॥ तुमुलोनादइति ॥ लिंगरूपिणोविश्वेशस्यभुवंविदार्योद्भूतोघंटानामिवनादोजातइत्यर्थः ॥ ९० ॥ ९१ ॥ ९२ ॥ मोक्षलक्ष्मीविलासःमोक्षलक्ष्म्याविलासउल्लासःस्फू

निर्विश्यसुचिरंकालंदिव्यान्भोगाननुत्तमान् ॥ ततोऽत्रज्ञानिनोभूत्वामुक्तिंप्राप्स्यंतिशाश्वतीम् ॥ ८७ ॥ ततोलोकास्तदारभ्यकथयिष्यंतिसर्वतः ॥ मुक्तिमंडपनामैतदेषकुक्कुटमंडपः ॥ ८८ ॥ चरित्रमपिवैतेषांयेस्मरिष्यंतिमानवाः ॥ मुक्तिमंडपमासाद्यश्रेयःप्राप्स्यंतितेपिहि ॥ ८९ ॥ इतियावत्कथां शंभुर्भविष्यामग्रतोहरेः ॥ अकरोत्तुमुलोनादोघंटानांतावदुद्गतः ॥ ९० ॥ अथनंदिनमाहूयदेवदेवउमाधवः ॥ प्रोवाचनंदिन्विज्ञायागत्यब्रूहिकुतोरवः ॥९१॥ अथनंदीसमागत्यप्रोवाचवृषभध्वजम् ॥ नमस्कृत्यप्रहृष्टास्यःप्रबद्धकरसंपुटः ॥ ९२ ॥ ॥ नंद्युवाच ॥ ॥ देवदेवत्रिनयनकिमपूर्वंब्रवीमिते ॥ मोक्षलक्ष्मीविलासोऽत्रकैश्चित्कैश्चित्समर्च्यते ॥९३॥ अथस्मित्वाब्रवीच्छंभुःसिद्धंनस्तुसमीहितम् ॥ उत्थायदेवदेवेशःसहदेव्यासुमंगलः॥९४॥ब्रह्मणाह रिणासार्धंततोऽगाद्रंगमंडपम् ॥ ॥ स्कंदउवाच ॥ ॥ श्रुत्वाध्यायमिमंपुण्यंपरमानंदकारणम् ॥ नरःपरांमुदंप्राप्यकैलासंप्राप्स्यतिध्रुवम् ॥ ९५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेमुक्तिमंडपगमनंनामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ व्यासउवाच ॥ शृणुसूतयथाप्रोक्तंकुंभजेशरजन्मना ॥ देवदेवस्यचरितंविश्वेशस्यपरात्मनः ॥ १ ॥ अगस्त्यउवाच ॥ सेनानीःकथयत्वंमेततोनिर्वाणमंडपात् ॥ निर्गत्यदेवोदेवेंद्रैःसहितःकिंचकारह ॥ २ ॥ स्कंदउवाच ॥ मुक्तिमंडपतःशंभुर्ब्रह्मविष्णुपुरोगमः ॥ शृंगारमंडपंप्राप्ययच्चकारवदामितत् ॥ ३ ॥ प्राङ्मुखस्तूपविश्येशःसहास्माभिःसहेशया ॥ ब्रह्मणाधिष्ठितःसव्येवामपार्श्वेथशार्ङ्गिणा ॥ ४ ॥ वीज्यमानोमहेंद्रेणऋषिभिःपरितोवृतः ॥ गणैःपृष्ठप्रदे शस्थैर्जोषंतिष्ठद्भिरादरात् ॥ ५ ॥ उदायुधैःसेव्यमानश्चावसन्मानभूरिभिः ॥ ब्रह्मणेविष्णवेशंभुःपाणिमुत्क्षिप्यदक्षिणम् ॥ ६ ॥ दर्शयामासदेवेशोलिंगं पश्यतपश्यत ॥ इदमेवपरंज्योतिरिदमेवपरात्परम् ॥ ७ ॥

र्तिर्यस्मात्सपदार्थस्तथा ॥ ९३ ॥ ९४ ॥ रंगमंडपंशृंगारमंडपम् ॥ ९५ ॥ ॥ ॥ इतिश्रीरामानंदकृतायांकाशीखंडटीकायामष्टनवतितमोऽध्यायः ॥ ९८ ॥ नवाधिकेनवत्याख्येऽध्यायेता वन्निरुच्यते ॥ श्रीविश्वेश्वरलिंगस्यमहिमापरमाद्भुतः ॥१॥ विश्वेशस्यचारितंवक्तुंप्रस्तावयति ॥ शृण्विति ॥ १ ॥ सेनानीःहेकार्तिकेय ॥ २ ॥ ३ ॥ प्रागिति ॥ पूर्वमुखउपविश्येशोब्रह्मणेविष्णवे चपाणिमुत्क्षिप्यलिंगंदर्शयामासेतिचतुर्थेनान्वयः ॥ अधिष्ठितआश्रितः ॥ ४ ॥ जोषंतूष्णींप्रीतिंवा ॥ ५ ॥ आवसदातिष्ठत् ॥ मानभूरिभिःमानानांभूरिप्राचुर्ययेषुतेतथातैः ॥ ६ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतपाशुपताइत्यादीनांसदैवमेमहाप्रीताइतिषष्ठेनान्वयः ॥ ८ ॥ : पंचार्थज्ञाननिर्मलाःपंचानामकारोकारमकारनादबिंदुरूपाणामर्थज्ञानेननिर्मलाःचत्वारोवेदाइतिहासपुराणंचेतिवापंचपंचाक्षरीविद्या
वर्णानांब्रह्मविष्णुरुद्रेश्वरसदाशिवाख्यानांवार्थज्ञानान्निर्मलाइतिवा ॥ भस्मकूटशयाइतिभस्मकूटेभस्मसमूहेशेरतइति ॥ तथाचश्रुतिः ॥ भस्मच्छन्नोभस्मशय्याशयानोरुद्राध्यायीमुच्यतेसर्वपापैरिति ॥

इदमेवहिमेरूपंस्थावरंचातिसिद्धिदम् ॥ एतेपाशुपताःसिद्धाआबालब्रह्मचारिणः ॥ ८ ॥ जितेंद्रियास्तपोनिष्ठाःपंचार्थज्ञाननिर्मलाः ॥ भस्मकूटशयादां
ताःसुशीलाऊर्ध्वरेतसः ॥ ९ ॥ लिंगार्चनरतानित्यमनन्येंद्रियमानसाः ॥ सदैववारुणाग्नेयस्नानद्वयसुनिर्मलाः ॥ १० ॥ कंदमूलफलाहाराःपरतत्त्वा
र्पितेक्षणाः ॥ सत्यवंतोजितक्रोधानिर्मोहानिष्परिग्रहाः ॥ ११ ॥ निरीहानिष्प्रपंचाश्चनिरातंकानिरामयाः ॥ निर्भंगानिरुपायाश्चनिःसंगानिर्मलाशयाः
॥ १२ ॥ निस्तीर्णोदग्रसंसारानिर्विकल्पानिरेनसः ॥ निर्द्वंद्वानिश्चितार्थाश्चनिरहंकारवृत्तयः ॥ १३ ॥ सदैवमेमहाप्रीतामत्पुत्रामत्स्वरूपिणः ॥ एते
पूज्यानमस्याश्चमद्बुद्ध्यामत्परायणैः ॥ १४ ॥ अर्चितेष्वेष्वहंप्रीतोभविष्यामिनसंशयः ॥ अस्मिन्वैश्वेश्वरेक्षेत्रेसंभोज्याःशिवयोगिनः ॥ १५ ॥
कोटिभोज्यफलंसम्यगेकैकपरिसंख्यया ॥ अयंविश्वेश्वरःसाक्षात्स्थावरात्माजगत्प्रभुः ॥ १६ ॥ सर्वेषांसर्वसिद्धीनांकर्ताभक्तिजुषामिह ॥ अहंकदा
चिद्दृश्यःस्यामदृश्यःस्यांकदाचन ॥ १७ ॥ आनंदकाननेचात्रस्वैरंतिष्ठामिदेवताः ॥ अनुग्रहायसर्वेषांभक्तानामिहसर्वदा ॥ १८ ॥ स्थास्यामिलिंगरूपे
णाचिंतितार्थफलप्रदः ॥ स्वयंभून्यस्वयंभूनियानिलिंगानिसर्वतः ॥ तानिसर्वाणिचायांतिद्रष्टुंलिंगमिदंसदा ॥ १९ ॥ अहंसर्वेषुलिंगेषुतिष्ठाम्येवनसं
शयः ॥ परंत्वियंपरामूर्तिर्ममलिंगस्वरूपिणी ॥ २० ॥ येनलिंगमिदंदृष्टंश्रद्धयाशुद्धचक्षुषा ॥ साक्षात्कारेणतेनाहंदृष्टएवदिवौकसः ॥ २१ ॥
श्रवणादस्यलिंगस्यपातकंजन्मसंचितम् ॥ क्षणात्क्षयतिशृण्वंतुदेवाऋषिगणैःसह ॥ २२ ॥ स्मरणादस्यलिंगस्यपापंजन्मद्वयार्जितम् ॥ अवश्यंनश्य
तिक्षिप्रंममवाक्यान्नसंशयः ॥२३॥ एतल्लिंगंसमुद्दिश्यगृहान्निष्क्रमणक्षणात् ॥ विलीयतेमहापापमपिजन्मत्रयार्जितम् ॥२४॥ दर्शनादस्यलिंगस्यहय
मेधशतोद्भवम् ॥ पुण्यंलभेतनियतंममानुग्रहतोमराः ॥२५॥ स्वयंभुवोस्यलिंगस्यममविश्वेशितुःसुराः ॥ राजसूयसहस्रस्यफलंस्यात्स्पर्शमात्रतः॥२६॥
पुष्पमात्रप्रदानाच्चचुलुकोदकपूर्वकम् ॥ शतसौवर्णिकंपुण्यंलभतेभक्तियोगतः ॥२७॥ पूजामात्रंविधायास्यलिंगराजस्यभक्तितः ॥ सहस्रहेमकमलपूजा
फलमवाप्यते ॥ २८ ॥ विधायमहतींपूजांपंचामृतपुरःसराम् ॥ अस्यलिंगस्यलभतेपुरुषार्थचतुष्टयम् ॥ २९ ॥ वस्त्रपूतजलैर्लिंगंस्नापयित्वाम
मामराः ॥ लक्षाश्वमेधजनितंपुण्यमाप्नोतिसत्तमः ॥ ३० ॥ सुगंधचंदनरसैर्लिंगमालिप्यभक्तितः ॥ आलिप्यतेसुरस्त्रीभिःसुगंधैर्यक्षकर्दमैः ॥ ३१ ॥

॥ ९ ॥ आग्नेयमग्निहोत्रजंभस्म ॥ १० ॥ ११ ॥ निष्प्रपंचाःदेहाद्यभिमानशून्याः ॥ निर्भगास्त्यक्तैश्वर्याः ॥ निर्द्वंद्वाइतिक्वचित् ॥१२॥१३॥१४॥१५॥१६॥ १७ ॥ हेदेवताः ॥१८॥ १९ ॥
इयमेतत्स्थानाधेया ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ स्वयंभुवःस्वेच्छयाप्तस्थितेः ॥ अस्यएतत्स्थानाश्रितस्य ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ सुगंधेति ॥ सुगंधचंदन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसैर्भक्तितोलिंगमालिप्ययइहवर्ततेससुरस्त्रीभिःसुगंधैर्यक्षकर्दमैःकर्पूरागुरुकस्तूरीकंकोलैर्लिप्यतइत्यर्थः ॥ ३१ ॥ सामोदधूपदानैःसुगंधधूपप्रदानैः ॥ ३२ ॥ ३३ ॥ सिक्थेसिक्थेकणेकणे ॥ ३४ ॥ ३५ ॥ उल्लोचंवितानम् ॥ ३६ ॥ ३७ ॥ ३८ ॥ व्यधात्कुर्यात् ॥ ३९ ॥ ४० ॥ मध्येजन्मजन्मनोमध्ये ॥ ४१ ॥ विपद्यतेनश्यति ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥

सामोदधूपदानैश्चदिव्यगंधाश्रयोभवेत् ॥ घृतदीपप्रबोधैश्चज्योतीरूपाविमानगः ॥ ३२ ॥ कर्पूरवर्तिदीपेनसकृद्दत्तेनभक्तितः ॥ कर्पूरदेहगौरश्रीर्भवेद्भाल विलोचनः ॥ ३३ ॥ दत्त्वानैवेद्यमात्रंतुसिक्थेसिक्थेयुगंयुगम् ॥ कैलासाद्रौवसेद्धीमान्महाभोगसमन्वितः ॥ ३४ ॥ विश्वेशेपरमान्नंयोदद्यात्साज्यं सशर्करम् ॥ त्रैलोक्यंतर्पितंतेनसदेवपितृमानवम् ॥ ३५ ॥ मुखवासंतुयोदद्यादर्पणंचारुचामरम् ॥ उल्लोचंसुखपर्यंकंतस्यपुण्यफलंमहत् ॥ ३६ ॥ संख्यासागररत्नानांकथंचित्कर्तुमिष्यते ॥ मुखवासादिदानस्यकःसंख्यामत्रकारयेत् ॥ ३७ ॥ पूजोपकरणद्रव्यंयोघंटागडुकादिकम् ॥ भक्त्यामेभवने दद्यात्सवसेदत्रमेंतिके ॥ ३८ ॥ योगीतवाद्यनृत्यानामेकंमत्प्रीतयेव्यधात् ॥ तस्याग्रतोदिवारात्रंभवेत्तौर्यत्रिकंमहत् ॥ ३९ ॥ चित्रलेखनकर्मादिप्रासा देमेऽत्रकारयेत् ॥ यःसचित्रान्महाभोगान्भुंक्तेमत्पुरतःस्थितः ॥४०॥ सकृद्विश्वेश्वरंनत्वामध्येजन्मसुधीर्नरः ॥ त्रैलोक्यवंदितपदोजायतेवसुधापतिः॥ ॥ ४१ ॥ यस्तुविश्वेश्वरंदृष्ट्वाह्यन्यत्रापिविपद्यते ॥ तस्यजन्मांतरेमोक्षोभवत्येवनसंशयः ॥ ४२ ॥ विश्वेशाख्यातुजिह्वाग्रेविश्वनाथकथाश्रुतौ ॥ विश्वे शशीलनंचित्तेयस्यतस्यजनिःकुतः ॥ ४३ ॥ लिंगंमेविश्वनाथस्यदृष्ट्वायश्चानुमोदते ॥ समेगणेषुगण्येतमहापुण्यबलाश्रितः ॥ ४४ ॥ नित्यंविश्वेश विश्वेशविश्वनाथेतियोजपेत् ॥ त्रिसंध्यंतंसुकृतिनंजपाम्यहमपिध्रुवम् ॥ ४५ ॥ ममापीदंमहालिंगंसदापूज्यतमंसुराः ॥ तस्मात्सर्वप्रयत्नेनपूज्यंदेवर्षि मानवैः ॥ ४६ ॥ यैर्नविश्वेश्वरोदृष्टोयैर्नविश्वेश्वरःस्मृतः ॥ कृतांतदूतैस्तेदृष्टास्तैःस्मृतागर्भवेदना ॥ ४७ ॥ यैरिदंप्रणतंलिंगंप्रणतास्तेसुरासुरैः ॥ यस्यै केनप्रणामेनदिक्पालपदमल्पकम् ॥ दिक्पालपदतःपातःपातःशिवनतेर्नहि ॥ ४८ ॥ शृण्वंतुदेवर्षिगणाःसमस्तास्तथ्यंब्रुवेतच्चपरोपकृत्यै ॥ नभूर्भुवः स्वर्गमहर्जनांतर्विश्वेशतुल्यंक्वचिदस्तिलिंगम् ॥ ४९ ॥ नसत्यलोकेनतपस्यहोसुरावैकुंठकैलासरसातलेषु ॥ तीर्थंक्वचिद्वैमणिकर्णिकासमंलिंगंचविश्वे श्वरतुल्यमन्यतः ॥ ५० ॥ नविश्वनाथस्यसमंहिलिंगंनतीर्थमन्यन्मणिकर्णिकातः ॥ तपोवनंक्वापिचिदस्तिनान्यच्छुभंममानंदवनेनतुल्यम् ॥ ५१ ॥ वाराणसीतीर्थमयीसमस्तायस्यास्तुनामापिहितीर्थतीर्थम् ॥ तत्रापिकाचिन्ममसौख्यभूमिर्महापवित्रामणिकर्णिकासौ ॥ ५२ ॥ स्थानादमुष्मान्ममरा जसौधात्प्राच्यांमनागीशसमाश्रितायाम् ॥ सव्येपसव्येचकराःक्रमेणशतत्रयीयापिशतद्वयीच ॥ ५३ ॥

स्मृताप्राप्ता ॥४७ ॥ ४८ ॥ जनेतितपःसत्ययोरुपलक्षणम् ॥४९॥ अन्यतःअन्यत्र ॥ अन्यादितिवा ॥५०॥५१॥५२॥ स्थानादमुष्मादितिअमुष्मात्स्थानाद्यन्ममराजसौधंराजगृहम् ॥ तथाचोक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोक्षस्वर्द्वारयोर्मध्येतुधाराजगृहंविदुरिति ॥ तस्मात्प्रासादान्मनागीशसमाश्रितायांप्राच्यामितिपूर्वोत्तरयोर्दिशोरंतरालइत्यर्थः ॥ तस्यांदिशियास्थलीसेयंमणिकर्णिकायैःसेवितातेममहच्छया इतिद्वितीयेनान्वयः ॥ किमाकारपरिमाणकेत्याकांक्षायांवेदिकारूपकेणनिरूपयितुमाह ॥ सव्यइति ॥ क्रमेणेति ॥ शतत्रयीसव्येवामपार्श्वेहरिश्चंद्रेश्वरपर्यंतमित्यर्थः ॥ तथाऽपसव्येदक्षिणपार्श्वे शतद्वयंगंगाकेशवपर्यंतमित्यर्थः ॥९३॥ गंगायांपंचशतंहस्तास्तावत्पर्यंतंमणिकर्णिकेत्यर्थः ॥ तदुक्तमत्रैव ॥ आमध्याद्देवसरितआहरिश्चंद्रमंडपात् ॥ आगंगाकेशवाच्चैवस्वर्द्वारान्मणिकर्णिकेति ॥ एव मुदीच्यवाच्योरितिचतुष्कोणोपलक्षणम् ॥ वनराजिसौधादितिकचित् ॥ तत्रवनराजोहनुमान् ॥ परकोशभूमिःपरमात्माधारस्थानम् ॥ परकेशभूमिरितिपाठेब्रह्मविष्णुरुद्रभूमिः ॥ परलोकभूमिरिति कचित ॥ हृद्यंतःकरणेशेरतइतिहृच्छयाःसद्रूपाइत्यर्थः ॥ ९४ ॥ सुधाधामसुधामधामसुधामृतंकैवल्यंतस्यधामसुस्थानेषुद्वारकादिषुधाम्नःस्वप्रकाशस्यधामस्फूर्तिर्यस्मात्तत् ॥ यद्वा सुधामधाम

हस्ताःशतंपंचसुरापगायामुदीच्यवाच्योर्मणिकर्णिकेयम् ॥ सारास्त्रिलोक्याःपरकोशभूमिर्यैःसेवितातेममहृच्छयाहि ॥ ९४ ॥ अस्मिन्ममानंदवनेयदेत ल्लिंगंसुधाधामसुधामधाम ॥ आसप्तपातालतलात्स्वयंभुसमुत्थितंभक्तकृपावशेन ॥९५॥ येस्मिञ्जनाःकृत्रिमभावबुद्ध्यालिंगंभजिष्यंतिचहेतुवादैः ॥ तेषांहिदंडःपरएषएवनगर्भवासाद्विरमंतितेध्रुवम् ॥ ९६ ॥ यद्यद्धितंस्वस्यसदैवतत्तल्लिंगेत्रदेयंममभक्तिमद्भिः ॥ इहाप्यमुत्रापिनतस्यसंक्षयोयथेहपाप स्यकृतस्यपापिभिः ॥ ९७ ॥ दूरस्थितैरप्यधिबुद्धिभिर्यैर्लिंगंसमाराधिममेदमत्र ॥ मयैवदत्तैःशुभवस्तुजातैर्निःश्रेयसःश्रीर्वसयेत्सतस्तान् ॥ ९८ ॥ शृणुष्वविष्णोशृणुसृष्टिकर्तःशृण्वंतुदेवर्षिगणाःसमस्ताः ॥ इदंहिलिंगंपरसिद्धिदंसतांभेदोमनागत्रनमत्सकाशतः ॥ ९९ ॥ अस्मिन्हिलिंगेऽखिलसि द्धिसाधनेसमर्पितंयैःसुकृतार्जितंवसु ॥ तेभ्येतिमात्राखिलसौख्यसाधनंददामिनिर्वाणपदंसुनिर्भयम् ॥ ६० ॥ उत्क्षिप्यबाहुंत्वसकृद्ब्रवीमित्रयीमयेऽ स्मिन्स्वयमेवसारम् ॥ विश्वेशलिंगंमणिकर्णिकांबुकाशीपुरीसत्यमिदंत्रिसत्यम् ॥ ६१ ॥ उत्थायदेवोथसशक्तिरीशस्तस्मिन्हिलिंगेकृतचारुपूजः ॥ ययौ लयंतेचसुराजयेतिजयेतिचोक्त्वानुनुवुस्तमीशम् ॥ ६२ ॥

श्रेष्ठंस्थानमित्यर्थः ॥ आसप्तेति ॥ अस्मिन्नित्यंगुल्या निर्दिशति ॥ अयमर्थः ॥ अस्मिन्स्थानेयद्यल्लिंगंतत्तदासप्तपातालतलात्स्वयंभुसमुत्थितमितिमंतव्यम् ॥ ततोहेतुवादैरेतदविकरणकालिंगंकृ त्रिमंभवितुमर्हतिकेनचित्स्थापितत्वात्सप्रतिपन्नवत् इत्यादिकुतर्कैःकृत्रिमभावबुद्ध्यायेभजिष्यंतितेषामेषएवपरोदंडइति यथाश्रुतव्याख्यानेकृत्रिमभावबुद्ध्यनुत्पत्तेः ॥ नहिसप्तपातालादुत्थितस्यस्व यंभुवःकृत्रिमभावमनीपासंभवतीति ॥ ९५ ॥ ९६ ॥ ९७ ॥ अधिबुद्धिभिःअधिकबुद्धिभिः ॥ वसयेत्तान्सतोऽधिश्रित्यवसेदित्यर्थः ॥ परयेदितिकचित् ॥ ९८ ॥ ९९ ॥ वसुधनम् ॥ पद्यतेऽ नेनेतिपदंज्ञानम् ॥ अतिमात्राऽखिलसौख्यसाधनम् ॥ मात्राविषयानतिक्रांतमतिमात्रंतच्चतदखिलंसौख्यंसुखंचतस्यसाधनम् ॥ अतिशयसुखसाधनमितिवा ॥ ६० ॥ ६१ ॥ कृतचारुपूजःकृताचार्वी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजायेनसः सप्तम्यंतोवापाठः ॥ अखिललोककामदइतिक्वचित् ॥ नुनुवुस्तुष्टुवुः ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ॥ इतिश्रीरामानंदकृतायां काशीखंडटीकायांनवनवतितमोऽध्यायः ॥ ९९ ॥ ॥छ॥ ॥ अथाध्यायेशततमेसर्वाभीष्टफलप्रदे ॥ अनुक्रमणिकानामसम्यगत्रनिरूप्यते ॥ १ ॥ पूर्वाध्यायांतेइदानींप्रष्टुकामोसिकिंतत्पृच्छवदामितइत्युक्तंतत्रोक्तानुवादपूर्वकंतृप्तिमाविष्कुर्वन्ननुक्रमणिकातन्माहात्म्येपृच्छति इदंस्कांदमितिद्वयेन ॥ १ ॥ २ ॥ ३ ॥ खंडजंकाशीखंडजम् ॥ महाफलमितिपाठेअप्यर्थेचकारः ॥ ॥ ४ ॥ प्रथमाध्यायार्थमाह ॥ विंध्येति ॥ द्वितीयाध्यायार्थमाह ॥ सत्येति ॥ द्वितीयोद्वितीयाध्यायोक्तइत्यर्थः ॥५॥ तृतीयाध्यायार्थमाह ॥ अगस्तेरिति ॥ चतुर्थाध्यायार्थमाह ॥ पतिव्रतेति ॥

स्कंदउवाच ॥ ॥ क्षेत्रस्यमैत्रावरुणेविमुक्तस्यमहामते ॥ प्रभावस्यैकदेशोयंकथितःकल्मषापहः ॥ ६३ ॥ तवाग्रेतुयथाबुद्धिकाशीविश्लेषतापिनः ॥ अचिरेणैवकालेनकाशींप्राप्स्यस्यनुत्तमाम् ॥ ६४ ॥ अस्ताचलस्यशिखरंप्राप्तवानेषभानुमान् ॥ तवापिहिममाप्येषमौनस्यसमयोऽभवत् ॥ ६५ ॥ ॥ व्यासउवाच ॥ ॥ श्रुत्वेतिसमुनिःसूतसंध्योपास्त्यैविनिर्गतः ॥ प्रणम्यौमेयमसकृल्लोपामुद्रासमन्वितः ॥ ६६ ॥ रहस्यंपरिविज्ञायक्षेत्रस्यशशिमौलिनः ॥ अगस्त्योनिश्चितमनाःशिवध्यानपरोभवत् ॥ ६७ ॥ आनंदकाननस्येहमहिमानंमहत्तरम् ॥ कोत्रवर्णयितुंशक्तःसूतवर्षशतैरपि ॥ ६८ ॥ यथादेव्यैसमाख्यायिशिवेनपरमात्मना ॥ तथास्कंदेनकथितंमाहात्म्यंकुंभसंभवे ॥ ६९ ॥ तवाग्रेचसमाख्यातंशुकादीनांचसत्तम ॥ इदानींप्रष्टुकामोसिकिंतत्पृच्छवदामिते ॥७०॥ श्रुत्वाध्यायमिमंपुण्यंसर्वकल्मषनाशनम् ॥ समस्तचिंतितफलप्रदंमर्त्योभवेत्कृती ॥७१॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेविश्वेश्वरलिंगमहिमाख्योनामनवनवतितमोऽध्यायः ॥ ९९ ॥ ॥ सूतउवाच ॥ ॥ इदंस्कांदमहंश्रुत्वाकाशीखंडमनुत्तमम् ॥ नितरांपरितृप्तोस्मिहृदिचापिविधारितम् ॥ १ ॥ अनुक्रमणिकाध्यायंतथामाहात्म्यमुत्तमम् ॥ पाराशर्यसमाचक्ष्वयथापूर्वमिदंभवेत् ॥ २ ॥ ॥ व्यासउवाच ॥ ॥ सूतावधेहिधर्मात्मञ्जातूकर्ण्यनिशामय ॥ शुकवैशंपायनाद्याःशृण्वंत्वपिचबालकाः ॥ ३ ॥ अनुक्रमणिकाध्यायंमाहात्म्यंचापिखंडजम् ॥ प्रवक्ष्याम्यघनाशायमहापुण्यप्रवर्धनम् ॥ ४ ॥ विंध्यनारदसंवादःप्रथमेपरिकीर्तितः ॥ सत्यलोकप्रभावश्चद्वितीयःसमुदाहृतः ॥ ५ ॥ अगस्तेराश्रमपदेदेवानामागमस्ततः ॥ पतिव्रताचरित्रंचप्रस्थानंकुंभसंभवः ॥ ६ ॥ तीर्थप्रशंसाचततःसप्तपुर्यस्ततःस्मृताः ॥ संयमिन्याःस्वरूपंचब्रह्मलोकस्ततःपरम् ॥ ७ ॥ इंद्राग्न्योर्लोकसंप्राप्तिस्ततश्चशिवशर्मणः ॥ अग्नेःसमुद्भवस्तस्मात्क्रव्याद्वरुणसंभवः ॥ ८ ॥

पंचमाध्यायार्थमाह ॥ प्रस्थानमिति ॥ कुंभसंभवःकुंभसंभवस्य ॥ छांदसोविभक्तिव्यत्ययः ॥ कुंभसंभवोयस्तस्यप्रस्थानमितिवा ॥ यदाकुंभसंभुवइतिपाठःस्यात्तदाकुंभात्सम्यक्भवतीतिकुंभसंभूस्तस्य ॥ कौंभसंभवमितिक्वचित् ॥ ६ ॥ षष्ठाध्यायार्थमाह ॥ तीर्थेति ॥ सप्तमाध्यायार्थमाह ॥ सप्तेति ॥ अष्टमाध्यायार्थमाह ॥ संयमिन्याइति ॥ नवमाध्यायार्थमाह ॥ ब्रह्मेति ॥ ७ दशमाध्यायार्थमाह॥इंद्राग्न्योरिति॥एकादशाध्यायार्थमाह॥अग्नेरिति॥द्वादशाध्यायार्थमाह ॥तस्मादिति॥तस्मात्तदनंतरमित्यर्थः॥क्रव्यंमांसमत्तीतिक्रव्यान्निर्ऋतिः॥सचवरुणश्चतयोःसंभवइत्यर्थः ॥ ८ ॥

University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशाध्यायार्थमाह ॥ गंधवतीति ॥ गंधवतीवायोःपुरी ॥ ईशयोर्वायुकुबेरयोः ॥ चतुर्दशाध्यायार्थमाह ॥ चंद्रलोकेति ॥ ९ ॥ पंचदशाध्यायार्थमाह ॥ उडुलोकेति ॥ तस्मात्तदनंतरमुडु लोककथेत्यन्वयः ॥ षोडशाध्यायार्थमाह ॥ ततःशुक्रेति ॥ सप्तदशाध्यायार्थमाह ॥ माहेयेति ॥ मह्याःपुत्रोमंगलोगुरुर्बृहस्पतिः सौरिःशनिस्तेषामिति ॥ १० ॥ अष्टादशाध्यायार्थमाह ॥ सप्तर्षीणामिति ॥ अवांतरभेदाल्लोकाइतिबहुवचनम् ॥ लोकइत्येववापाठः ॥ एकोनविंशत्यध्यायार्थमाह ॥ ध्रुवस्येति ॥ विंशत्यध्यायार्थमाह ॥ ततइति ॥ ध्रुवोनिश्चितःकूटस्थइतियावत् ॥ पद्यतेज्ञायतेमुमुक्षुभिरितिपदः ॥ ध्रुवश्चासौपदश्चेतिध्रुवपदोविष्णुस्तस्यप्राप्तिरित्यर्थः ॥ एकविंशत्यध्यायार्थमाह ॥ ध्रुवलोकेति ॥ स्थितिःप्राप्तिः ॥ ११ ॥ द्वाविंशत्यध्यायार्थमाह ॥ दर्शनमिति ॥ त्रयोविंशत्यध्यायार्थमाह ॥ चतुर्भुजेति ॥ चतुर्विंशत्यध्यायार्थमाह ॥ निर्वाणमिति ॥ १२ ॥ पंचविंशत्यध्यायार्थमाह ॥ स्कंदागस्त्योरिति ॥ षड्विंशत्यध्यायार्थमाह ॥ मणिकर्ण्याइति ॥ सप्तविंशत्यध्यायार्थमाह ॥ ततस्त्विति ॥ १३ ॥ अष्टाविंशत्यध्यायार्थमाह ॥ प्रभावश्चेति ॥ एकोनत्रिंशदध्यायार्थमाह ॥ गंगानामेति ॥ त्रिंशदध्यायार्थमाह ॥ वाराणस्याइति ॥ एकत्रिंशदध्या

गंधवत्यलकापुर्योरीशयोस्तुसमुद्भवः ॥ चंद्रलोकपरिप्राप्तिःशिवशर्मद्विजन्मनः ॥ ९ ॥ उडुलोककथातस्मात्ततःशुक्रसमुद्भवः ॥ माहेयगुरुसौरीणांलो
कानांवर्णनंततः ॥ १० ॥ सप्तर्षीणांततोलोकाध्रुवस्यचतपस्ततः ॥ ततोध्रुवपदप्राप्तिर्ध्रुवलोकस्थितिस्ततः ॥ ११ ॥ दर्शनंसत्यलोकस्यतस्यवैशिव
शर्मणः ॥ चतुर्भुजाभिषेकश्चनिर्वाणंशिवशर्मणः ॥१२॥ स्कंदागस्त्योश्चसंवादोमणिकर्ण्याःसमुद्भवः ॥ ततस्तुगंगामाहात्म्यंततोदशहरास्तवः ॥१३॥
प्रभावश्चापिगंगायागंगानामसहस्रकम् ॥ वाराणस्याःप्रशंसाथभैरवाविर्भवस्ततः ॥ १४ ॥ दंडपाणेःसमुद्भूतिर्ज्ञानवाप्युद्भवस्ततः ॥ आख्यानंचकलाव
त्याःसदाचारस्ततःपरम् ॥ १५ ॥ ब्रह्मचारिप्रकरणंततःस्त्रीलक्षणानिच ॥ कृत्याकृत्यप्रकरणमविमुक्तेशवर्णनम् ॥ १६ ॥ ततोगृहस्थधर्माश्चततोयोग
निरूपणम् ॥ कालज्ञानंततःप्रोक्तंदिवोदासस्यवर्णनम् ॥ १७ ॥ काश्याश्चवर्णनंतस्माद्योगिनीवर्णनंततः ॥ लोलार्कस्यसमाख्यानमुत्तरार्ककथाततः ॥
॥१८॥ सांबादित्यस्यमहिमाद्रुपदादित्यशंसनम् ॥ ततस्तुगरुडाख्यानमरुणार्कादयस्ततः ॥ १९ ॥ दशाश्वमेधिकंतीर्थंमंदराद्गणागमः ॥ पिशाचमो
चनाख्यानंगणेशप्रेषणंततः ॥ २० ॥

यार्थमाह ॥ भैरवेति ॥ १४ ॥ द्वात्रिंशदध्यायार्थमाह ॥ दंडपाणेरिति ॥ त्रयस्त्रिंशदध्यायार्थमाह ॥ ज्ञानवापीति ॥ चतुस्त्रिंशदध्यायार्थमाह ॥ आख्यानंचेति ॥ पंचत्रिंशदध्यायार्थमाह ॥ सदाचारइति ॥ १५ ॥ षट्त्रिंशदध्यायार्थमाह ॥ ब्रह्मचारीति ॥ सप्तत्रिंशदध्यायार्थमाह ॥ ततःस्त्रीति ॥ अष्टत्रिंशदध्यायार्थमाह ॥ कृत्याकृत्येति ॥ एकोनचत्वारिंशदध्यायार्थमाह ॥ अवि मुक्तेशेति ॥ १६ ॥ चत्वारिंशदध्यायार्थमाह ॥ ततोगृहस्थेति ॥ एकचत्वारिंशदध्यायार्थमाह ॥ ततोयोगेति ॥ द्विचत्वारिंशदध्यायार्थमाह ॥ कालज्ञानमिति ॥ त्रिचत्वारिंशदध्यायार्थमाह ॥ दिवोदासस्येति ॥ १७ ॥ चतुश्चत्वारिंशदध्यायार्थमाह ॥ काश्याश्चेति ॥ तस्मात्तदनंतरम् ॥ पंचचत्वारिंशाध्यायार्थमाह ॥ योगिनीति ॥ षट्चत्वारिंशदध्यायार्थमाह ॥ लोलार्कस्येति ॥ सप्तचत्वारिंशदध्यायार्थमाह ॥ उत्तरार्केति ॥ १८ ॥ अष्टचत्वारिंशदध्यायार्थमाह ॥ सांबादित्यस्येति ॥ एकोनपंचाशदध्यायार्थमाह ॥ द्रुपदेति ॥ उपलक्षणमेतन्मयूखादित्यस्य ॥ पंचाशदध्या यार्थमाह ॥ ततस्तुगरुडेति ॥ एकपंचाशदध्यायार्थमाह ॥ अरुणार्कादयइति ॥ आदिशब्देनवृद्धकेशवविमलगंगादित्यानांग्रहणम् ॥ १९ ॥ द्विपंचाशदध्यायार्थमाह ॥ दशाश्वमेधिकमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपंचाशदध्यायार्थमाह ॥ मंदराचेति ॥ चतुष्पंचाशदध्यायार्थमाह ॥ पिशाचेति ॥ पंचपंचाशदध्यायार्थमाह ॥ गणेशेति ॥ २० ॥ षट्पंचाशदध्यायार्थमाह ॥ मायेति ॥ सप्तपंचाशदध्यायार्थमाह ॥ ढुंढीति ॥ अष्टपंचाशदध्यायार्थमाह ॥ विष्णुमायेति ॥ विसर्जनंकैलासप्रस्थानम् ॥ २१ ॥ एकोनषष्ट्यध्यायार्थमाह ॥ ततःपंचनदेति ॥ षष्ट्यध्यायार्थमाह ॥ बिंदुमाधवेति ॥ एकषष्ट्यध्यायार्थमाह ॥ ततोवैष्णवेति ॥ २२ ॥ द्विषष्ट्यध्यायार्थमाह ॥ प्रयाणमिति ॥ त्रिषष्ट्यध्यायार्थमाह ॥ जैगीषव्येति ॥ २३ ॥ चतुःषष्ट्यध्यायार्थमाह ॥ ततःक्षेत्रेति ॥ पंचषष्ट्यध्यायार्थमाह ॥ अथातइति ॥ अथशब्दोत्रलिंगप्रादुर्भावेमंगलार्थः ॥ २४ ॥ षट्षष्ट्यध्यायार्थमाह ॥ ततःशैलेश्वरेति ॥ सप्तषष्ट्यध्यायार्थमाह ॥ रत्नेशस्येति ॥ अष्टषष्ट्यध्यायार्थमाह ॥ कृत्तिवासइति ॥ एकोनसप्तत्यध्यायार्थमाह ॥ ततश्चायतनेति ॥ २५ ॥ सप्तत्यध्यायार्थमाह ॥ देवतानामिति ॥ एकसप्तत्यध्यायार्थमाह ॥ दुर्गासुरेति ॥ द्विसप्तत्यध्यायार्थमाह ॥ दुर्गायाइति ॥ त्रिसप्तत्यध्यायार्थमाह ॥ ततओंकारेति ॥ २६ ॥ चतुःसप्तत्यध्यायार्थमाह ॥ पुनरोंकारेति ॥ पंचसप्तत्यध्यायार्थमाह ॥ त्रिलोचनेति ॥ षट्सप्तत्यध्यायार्थमाह ॥ त्रिलोचनप्रभावइति ॥ सप्तसप्तत्यध्या

मायागणपतेश्चाथढुंढिप्रादुर्भवस्ततः ॥ विष्णुमायाप्रपंचोथदिवोदासविसर्जनम् ॥ २१ ॥ ततःपंचनदोत्पत्तिर्बिंदुमाधवसंभवः ॥ ततोवैष्णवतीर्थानां माहात्म्यपरिवर्णनम् ॥ २२ ॥ प्रयाणंमंदरात्काशींवृषभध्वजशूलिनः ॥ जैगीषव्येनसंवादोज्येष्ठस्थानेमहेशितुः ॥ २३ ॥ ततःक्षेत्ररहस्यस्यकथनं पापनाशनम् ॥ अथातःकंदुकेशस्यव्याघ्रेशस्यसमुद्भवः ॥२४॥ ततःशैलेश्वरकथारत्नेशस्यचदर्शनम् ॥ कृत्तिवासःसमुत्पत्तिस्ततश्चायतनागमः ॥२५॥ देवतानामधिष्ठानंदुर्गासुरपराक्रमः ॥ दुर्गायाविजयश्चाथततओंकारवर्णनम् ॥ २६ ॥ पुनरोंकारमाहात्म्यंत्रिलोचनसमुद्भवः ॥ त्रिलोचनप्रभावो थकेदाराख्यानमेवच ॥ २७ ॥ ततोधर्मेशमहिमाततःपक्षिकथाशुभा ॥ ततोविश्वभुजाख्यानंदुर्दमस्यकथाततः ॥ २८ ॥ ततोवीरेश्वराख्यानंगंगेशम हिमापुनः ॥ गंगातीर्थैश्चसंयुक्ताकामेशमहिमाततः ॥ २९ ॥ विश्वकर्मेशमहिमादक्षयज्ञसमुद्भवः ॥ सत्यादेहविसर्गश्चततोदक्षेश्वरोद्भवः ॥ ३० ॥ ततोविपार्वतीशस्यमहिम्नःपरिकीर्तनम् ॥ गंगेशस्याथमहिमानर्मदेशसमुद्भवः ॥ ३१ ॥ सतीश्वरसमुत्पत्तिरमृतेशादिवर्णनम् ॥ व्यासस्यहिभुजस्तंभो व्यासशापविमोक्षणम् ॥ ३२ ॥ क्षेत्रतीर्थकदंबंचमुक्तिमंडपसंकथा ॥ विश्वेशाविर्भवश्चाथततोयात्रापरिक्रमः ॥ ३३ ॥

यार्थमाह ॥ केदारेति ॥ २७ ॥ अष्टसप्तत्यध्यायार्थमाह ॥ ततोधर्मेशेति ॥ एकोनाशीत्यध्यायार्थमाह ॥ ततःपक्षीति ॥ अशीत्यध्यायार्थमाह ॥ ततोविश्वभुजेति ॥ एकाशीत्यध्यायार्थमाह ॥ दुर्दमस्येति ॥ २८ ॥ द्व्यशीत्यध्यायार्थमाह ॥ ततोवीरेति ॥ त्र्यशीत्यध्यायार्थमाह ॥ वीरेशेति ॥ चतुरशीत्यध्यायार्थमाह ॥ गंगेति ॥ पंचाशीत्यध्यायार्थमाह ॥ कामेशेति ॥ २९ ॥ षडशीत्यध्यायार्थमाह ॥ विश्वकर्मेति ॥ सप्ताशीत्यध्यायार्थमाह ॥ दक्षयज्ञेति ॥ अष्टाशीत्यध्यायार्थमाह ॥ सत्याइति ॥ नवाशीत्यध्यायार्थमाह ॥ ततोदक्षेति ॥ ३० ॥ नवत्यध्यायार्थमाह ॥ ततोविइति ॥ एकनवत्यध्यायार्थमाह ॥ गंगेति ॥ द्विनवत्यध्यायार्थमाह ॥ नर्मदेति ॥ ३१ ॥ त्रिनवत्यध्यायार्थमाह ॥ सतीश्वरेति ॥ चतुर्नवत्यध्यायार्थमाह ॥ अमृतेति ॥ पंचनवत्यध्यायार्थमाह ॥ व्यासस्येति ॥ षण्णवत्यध्यायार्थमाह ॥ व्यासशापेति ॥ ३२ ॥ सप्तनवत्यध्यायार्थमाह ॥ क्षेत्रेति ॥ अष्टनवत्यध्यायार्थमाह ॥ मुक्तिमंडपेति ॥ नवनवत्यध्यायार्थमाह ॥ विश्वेशेति ॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शततमाध्यायार्थमाह॥ततोयात्रेति॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ सचैलमितिश्लोकोक्तमेकम् ॥३७॥ आदित्यमित्यक्षरचतुष्टयाधिकार्धोक्तंद्वितीयम् ॥ ततोगच्छेदितिसार्धपादोक्तंतृतीयम् ॥३८॥

एतदाख्यानशतकंक्रमेणपरिकीर्तितम् ॥ यस्यश्रवणमात्रेणसर्वखंडश्रुतेःफलम् ॥ अनुक्रमणिकाध्यायेप्यस्तियात्रापरिक्रमः ॥३४॥ ॥ सूतउवाच ॥
यात्रापरिक्रमंब्रूहिजनानांहितकाम्यया ॥ यथावत्सिद्धिकामानांसत्यवत्याःसुतोत्तम ॥ ३५ ॥ ॥ व्यासउवाच ॥ ॥ निशामयमहाप्राज्ञलोमहर्षणव
च्मिते ॥ यथाप्रथमतोयात्राकर्तव्यायात्रिकैर्मुदा ॥ ३६ ॥ सचैलमादौसंस्नायचक्रपुष्करिणीजले ॥ संतर्प्यदेवान्सपितॄन्ब्राह्मणांश्चतथार्थिनः ॥ ३७ ॥
आदित्यंद्रौपदींविष्णुंदंडपाणिंमहेश्वरम् ॥ नमस्कृत्यततोगच्छेद्द्रष्टुंढुंढिविनायकम् ॥३८॥ ज्ञानवापीमुपस्पृश्यनंदिकेशंततोर्चयेत् ॥ तारकेशंततोभ्यर्च्य
महाकालेश्वरंततः ॥ ३९ ॥ ततःपुनर्दंडपाणिमित्येषापंचतीर्थिका ॥ ४० ॥ दैनंदिनीविधातव्यामहाफलमभीप्सुभिः ॥ ततोवैश्वेश्वरीयात्राकार्यासर्वा
र्थसिद्धिदा ॥ ४१ ॥ द्विसप्तायतनानांचकार्यायात्राप्रयत्नतः ॥ कृष्णांप्रतिपदंप्राप्यभूतावधियथाविधि ॥ ४२ ॥ अथवाप्रतिभूतंचक्षेत्रसिद्धिमभी
प्सुभिः ॥ तत्तत्तीर्थकृतस्नानस्तत्तल्लिंगकृतार्चनः ॥४३॥ मौनेनयात्रांकुर्वाणःफलंप्राप्नोतियात्रिकः ॥ ओंकारंप्रथमंपश्येन्मत्स्योदर्यांकृतोदकः ॥ ४४ ॥
त्रिविष्टपंमहादेवंततोवैकृत्तिवाससम् ॥ रत्नेशंचाथचंद्रेशंकेदारंचततोव्रजेत् ॥४५॥ धर्मेश्वरंचवीरेशंगच्छेत्कामेश्वरंततः ॥ विश्वकर्मेश्वरंचाथमणिकर्णी
श्वरंततः ॥ ४६ ॥ अविमुक्तेश्वरंदृष्ट्वाततोविश्वेशमर्चयेत् ॥ एषायात्राप्रयत्नेनकर्तव्याक्षेत्रवासिना ॥ ४७ ॥ यस्तुक्षेत्रमुषित्वातुनैतांयात्रांसमाचरेत् ॥
विघ्नास्तस्योपतिष्ठंतेक्षेत्रोच्चाटनसूचकाः ॥ ४८ ॥ अष्टायतनयात्रान्याकर्तव्याविघ्नशांतये ॥ दक्षेशःपार्वतीशश्चतथापशुपतीश्वरः ॥४९॥ गंगेशोनर्म
देशश्चगभस्तीशःसतीश्वरः ॥ अष्टमस्तारकेशश्चप्रत्यष्टमिविशेषतः ॥ ५० ॥ दृश्यान्येतानिलिंगानिमहापापोपशांतये ॥ अपरापिशुभायात्रायोगक्षे
मकरीसदा ॥ ५१ ॥ सर्वविघ्नोपहंत्रीचकर्तव्याक्षेत्रवासिभिः ॥ शैलेशंप्रथमंवीक्ष्यवरणास्नानपूर्वकम् ॥ ५२ ॥ स्नानंतुसंगमेकृत्वाद्रष्टव्यःसंगमेश्वरः ॥
स्वलीनतीर्थेसुस्नातःपश्येत्स्वलीनमीश्वरम् ॥ ५३ ॥ स्नात्वामंदाकिनीतीर्थेद्रष्टव्योमध्यमेश्वरः ॥ पश्येद्धिरण्यगर्भेशंतत्रतीर्थेकृतोदकः ॥ ५४ ॥
मणिकर्ण्यांततःस्नात्वापश्येदीशानमीश्वरम् ॥ ततःकूपमुपस्पृश्यगोप्रेक्षमवलोकयेत् ॥ ५५ ॥ कापिलेयह्रदेस्नात्वावीक्षेतवृषभध्वजम् ॥ उपशांतशिवं
पश्येत्तत्कूपविहितोदकः ॥ ५६ ॥ पंचचूडाह्रदेस्नात्वाज्येष्ठस्थानंततोर्चयेत् ॥ चतुःसमुद्रकूपेतुस्नात्वादेवंसमर्चयेत् ॥ ५७ ॥

ज्ञानवापीमितिश्लोकोक्तंचतुर्थम् ॥ ३९ ॥ ततइतिपादोक्तंपंचममित्येषापंचतीर्थिकेति ॥ पूर्वोक्तरूपावा ॥ ४० ॥ ४१ ॥ भूतावधिचतुर्दशीपर्यंतम् ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ विघ्नगृद्धिदासर्वसंपद्दात्री ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

॥५८॥५९॥६०॥ एषचासौक्रमश्चेति ॥ एतदायतनानिपूर्वोक्तशैलेशाद्याश्रितानि

दंडखातेततःस्नात्वांव्याघ्रेशंपूजयेत्ततः ॥ शौनकेश्वरकुंडेतुस्नानं
देवस्याग्रेतुयावापीतत्रोपस्पर्शनेकृते ॥ शुक्रेश्वरंततःपश्येत्तत्कूपविहितोदकः ॥५८॥ दंडखातेततःस्नात्वांव्याघ्रेशंपूजयेत्ततः ॥ शौनकेश्वरकुंडेतुस्नानं
कृत्वाततोर्चयेत् ॥५९॥ जंबुकेशंमहालिंगंकृत्वायात्रामिमांनरः॥ क्वचिन्नजायतेभूयःसंसारेदुःखसागरे ॥६०॥ समारभ्यप्रतिपदंयावत्कृष्णाचतुर्दशी ॥
एतत्क्रमेणकर्तव्यान्येतदायतनानिवै ॥६१॥ इमांयात्रांनरःकृत्वानभूयोप्यभिजायते ॥ अन्यायात्राप्रकर्तव्यैकादशायतनोद्भवा ॥ ६२ ॥ आग्नीध्रकुंडे
सुस्नातःपश्येदाग्नीध्रमीश्वरम् ॥ उर्वशीशंततोगच्छेत्ततस्तुनकुलीश्वरम् ॥६३॥ आषाढीशंततोदृष्ट्वाभारभूतेश्वरंततः ॥ लांगलीशमथालोक्यततस्तु
त्रिपुरांतकम् ॥ ६४ ॥ ततोमनःप्रकामेशंप्रीतिकेशमथोव्रजेत् ॥ मदालसेश्वरंतस्मात्तिलपर्णेश्वरंततः ॥ ६५ ॥ यात्रैकादशलिंगानामेषाकार्याप्रयत्नतः॥
इमांयात्रांप्रकुर्वाणोरुद्रत्वंप्राप्नुयान्नरः ॥ ६६॥ अतःपरंप्रवक्ष्यामिगौरीयात्रामनुत्तमाम् ॥ शुक्लपक्षेतृतीयायांयायात्राविघ्नगृद्धिदा ॥ ६७ ॥ गोप्रेक्षतीर्थे
सुस्नायमुखनिर्मालिकांव्रजेत् ॥ ज्येष्ठावाप्यांनरःस्नात्वाज्येष्ठांगौरींसमर्चयेत् ॥६८॥ सौभाग्यगौरींसंपूज्याज्ञानवाप्यांकृतोदकैः॥ततःशृंगारगौरींचतत्रै
वचकृतोदकः ॥ ६९ ॥ स्नात्वाविशालगंगायांविशालाक्षींततोव्रजेत् ॥ सुस्नातोललितातीर्थेललितामर्चयेत्ततः ॥७०॥ स्नात्वाभवानीतीर्थेथभवानीं
परिपूजयेत् ॥ मंगलाचततोभ्यर्च्याबिंदुतीर्थकृतोदकैः ॥ ७१ ॥ ततोगच्छेन्महालक्ष्मींस्थिरलक्ष्मीसमृद्धये ॥ इमांयात्रांनरःकृत्वाक्षेत्रेस्मिन्मुक्तिज
न्मनि ॥ ७२ ॥ नदुःखैरभिभूयेतइहामुत्रापिकुत्रचित् ॥ कुर्यात्प्रतिचतुर्थींहयात्रांविघ्नेशितुःसदा ॥ ७३ ॥ ब्राह्मणेभ्यस्तदुद्देशाद्देयावैमोदकासुदे ॥
भौमेभैरवयात्राचकार्यापातकहारिणी ॥ ७४ ॥ रविवारेरवेर्यात्राषष्ठ्यांवारविसंयुजि ॥ तथैवरविसतम्यांसर्वविघ्नोपशांतये ॥ ७५ ॥ नवम्यामथवा
ष्टम्यांचंडीयात्राशुभामता ॥ अंतर्गृहस्यवैयात्राकर्तव्याप्रतिवासरम् ॥ ७६ ॥ प्रातःस्नानंविधायादौनत्वापंचविनायकान् ॥ नमस्कृत्वाथविश्वेशं
स्थित्वानिर्वाणमंडपे ॥ ७७ ॥ अंतर्गृहस्ययात्रांवैकरिष्येघौघशांतये ॥ गृहीत्वानियमंचेतिगत्वाथमणिकर्णिकाम् ॥ ७८ ॥ स्नात्वामौनेनचागत्य
मणिकर्णीशमर्चयेत् ॥ कंबलाश्वतरौनत्वावासुकीशंप्रणम्यच ॥ ७९ ॥ पर्वतेशंततोदृष्ट्वागंगाकेशवमप्यथ ॥ ततस्तुललितांदृष्ट्वाजरासंधेश्वरंततः ॥८०॥
ततोवैसोमनाथंचवाराहंचततोव्रजेत् ॥ ब्रह्मेश्वरंततोनत्वानत्वागस्तीश्वरंततः ॥ ८१ ॥ कश्यपेशंनमस्कृत्यहरिकेशवनंततः ॥ वैद्यनाथंततोदृष्ट्वाध्रुवे
शमथवीक्ष्यच ॥ ८२ ॥ गोकर्णेश्वरमभ्यर्च्यहाटकेशमथोव्रजेत् ॥ अस्थिक्षेपतडागेचदृष्ट्वावैकीकसेश्वरम् ॥ ८३ ॥

॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भारभूतंततोनत्वाचित्रगुप्तेश्वरंततः ॥ चित्रघंटांप्रणम्याथततःपशुपतीश्वरम् ॥ ८४ ॥ पितामहेश्वरंगत्वाततस्तुकलशेश्वरम् ॥ चंद्रेशस्त्वथवीरेशोविद्ये
शोग्नीशएवच ॥८५॥ नागेश्वरोहरिश्चंद्रश्चिंतामणिविनायकः ॥ सेनाविनायकश्चाथद्रष्टव्यःसर्वविघ्नहृत् ॥ ८६ ॥ वसिष्ठवामदेवौचमूर्तिरूपधराबुभौ ॥
द्रष्टव्यौयत्नतःकाश्यांमहाविघ्नविनाशिनौ ॥ ८७ ॥ सीमाविनायकंचाथकरुणेशंततोव्रजेत् ॥ त्रिसंध्येशोविशालाक्षीधर्मेशोविश्वबाहुका ॥ आशावि
नायकश्चाथवृद्धादित्यस्ततःपुनः ॥ ८८ ॥ चतुर्वक्रेश्वरंलिंगंब्राह्मीशस्तुततःपरः ॥ ततोमनःप्रकामेशईशानेशस्ततःपरम् ॥ ८९ ॥ चंडीचंडीश्वरौदृश्यौ
भवानीशंकरौततः ॥ ढुंढिंप्रणम्यचततोराजराजेशमर्चयेत् ॥ ९० ॥ लांगलीशस्ततोभ्यर्च्यस्ततस्तुनकुलीश्वरः ॥ परान्नेशमथोनत्वापरद्रव्येश्वरंततः
॥ ९१ ॥ प्रतिग्रहेश्वरंवापिनिष्कलंकेशमेवच ॥ मार्कंडेयेशमभ्यर्च्यततश्चाप्सरसेश्वरम् ॥ ९२ ॥ गंगेशोर्च्यस्ततोज्ञानवाप्यांस्नानंसमाचरेत् ॥ नंदि
केशंतारकेशंमहाकालेश्वरंततः ॥ ९३ ॥ दंडपाणिंमहेशंचमोक्षेशंप्रणमेत्ततः ॥ वीरभद्रेश्वरंनत्वाअविमुक्तेश्वरंततः ॥९४॥ विनायकांस्ततःपंचविश्वनाथं
ततोव्रजेत् ॥ ततोमौनंविसृज्याथमंत्रमेतमुदीरयेत् ॥ ९५ ॥ अंतर्गृहस्ययात्रेयंयथावद्यामयाकृता ॥ न्यूनातिरिक्तयाशंभुःप्रीयतामनयाविभुः ॥९६॥
इतिमंत्रंसमुच्चार्यक्षणंवैमुक्तिमंडपे ॥ विश्रम्ययायाद्भवनंनिष्पापःपुण्यवान्नरः ॥९७॥ संप्राप्यवासरंविष्णोर्विष्णुतीर्थेषुसर्वतः ॥ कार्यायात्राप्रयत्नेनमहापु
ण्यसमृद्धये ॥ ९८ ॥ नभस्यपंचदश्यांचकुलस्तंभंसमर्चयेत् ॥ दुःखंरुद्रपिशाचत्वंनभवेद्यस्यपूजनात् ॥ ९९ ॥ श्रद्धापूर्वमिमायात्राःकर्तव्याःक्षेत्रवा
सिभिः ॥ पर्वस्वपिविशेषेणकार्यायात्राश्चसर्वतः ॥ १०० ॥ नवंध्यंदिवसंकुर्याद्विनायात्रांक्वचित्कृती ॥ यात्राद्वयंप्रयत्नेनकर्तव्यंप्रतिवासरम् ॥ १ ॥
आदौस्वर्गतरंगिण्यास्ततोविश्वेशितुर्ध्रुवम् ॥ यस्यवंध्यंदिनंयातंकाश्यांनिवसतःसतः ॥२॥निराशाःपितरस्तस्यतस्मिन्नेवादिनेऽभवन् ॥ सदष्टःकालसर्पे
णसदृष्टोमृत्युनास्फुटम् ॥ ३ ॥ समुष्टस्तत्रदिवसेविश्वेशोयत्रनेक्षितः ॥ सर्वतीर्थेषुसस्नौसंसर्वयात्रांव्यधात्सच ॥ मणिकर्ण्यांतुयःस्नातोयोविश्वेशंनिरै
क्षत ॥४॥ सत्यंसत्यंपुनःसत्यंसत्यंसत्यंपुनःपुनः ॥ दृश्योविश्वेश्वरोनित्यंस्नातव्यामणिकर्णिका ॥५॥ ॥ व्यासउवाच ॥ ॥ सूतस्कांदमिदंश्रुत्वाकाशी
माहात्म्यमुत्तमम् ॥ नरोननिरयंयातिकृत्वाप्यघसहस्रकम् ॥ ६ ॥ स्नात्वासर्वाणितीर्थानियच्छ्रेयःसमुपार्ज्यते ॥ काशीखंडस्यश्रवणात्तत्स्यात्सूतन ॥३७१॥
संशयः ॥७॥ दत्त्वादानानिसर्वाणिकृत्वायज्ञाननेकशः ॥ तत्पुण्यंलभतेमर्त्यस्तदातच्छ्रवणाद्ध्रुवम् ॥८॥ तप्त्वातपांसिचोग्राणिप्राप्यतेयन्महत्फलम् ॥
श्रवणादस्यखंडस्यलभतेतन्नसंशयः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ १३० ॥ ३१ ॥ ३२॥३३॥

अधीत्यचतुरोवेदान्सांगान्यत्फलमाप्यते ॥ काशीखंडंसमाकर्ण्यतत्फलंलभ्यतेनरैः ॥ ११० ॥ गयायांश्राद्धदानाच्चयथातृप्यंतिपूर्वजाः ॥ तथैतच्छ्रव णान्नृणांतृप्तुवंतिपितामहाः ॥ ११ ॥ तैश्चसर्वपुराणानिश्रुतानिस्थिरबुद्धिभिः ॥ काशीखंडंश्रुतंयैश्चसर्वेषांश्रेयसांपदम् ॥ १२ ॥ श्रुताश्चसर्वधर्मास्तैर्महा पुण्यैकराशिभिः ॥ श्रुतंयैःस्थिरचेतोभिःकाशीमाहात्म्यमुत्तमम् ॥ १३ ॥ इदमेवहिदेवेज्यापरमापरिकीर्तिता ॥ जपेत्तत्खंडमखिलंश्रोतव्यंश्रद्धयाद्विजाः ॥ १४ ॥ शृणुयादेकमपियआख्यानंकाशिखंडजम् ॥ श्रुतानितेनसर्वाणिधर्मशास्त्राण्यसंशयम् ॥ १५ ॥ महाधर्मैकजननंमहार्थप्रतिपादकम् ॥ कारणंसर्वकामानांकाशीखंडमिदंस्मृतम् ॥ १६ ॥ एतच्छ्रवणतःपुंसांकैवल्यंनैवदूरतः ॥ तुष्यंतिसर्वेपितरःश्रुत्वैतत्खंडमुत्तमम् ॥ १७॥ प्रीणंत्यमर्त्याः सर्वेपिब्रह्मविष्णुशिवादयः ॥ मुनयःपरिमोदंतेमाद्यंतिसनकादयः ॥ १८ ॥ हृष्टःसर्वोभवेदेवभूतग्रामश्चतुर्विधः ॥ महिमश्रवणादस्माद्वाराणस्यानसं शयः ॥ १९ ॥ यइदंश्रावयेद्विद्वान्समस्तंत्वर्धमेववा ॥ पादमात्रंतदर्धंवात्वेकंव्याख्यानमुत्तमम् ॥ १२० ॥ सनमस्यःप्रयत्नेनसंपूज्यस्त्विष्टदेववत् ॥ तस्मैदेयंप्रयत्नेनविश्वेशप्रीतयेसदा ॥ २१ ॥ तस्मिंस्तुष्टेहिसंतुष्टोविश्वेशोनात्रसंशयः ॥ यत्रैतत्पठ्यतेखंडंपरानंदसमाश्रयम् ॥ २२ ॥ नतत्रप्रभवे त्कश्चिदमंगलसमुद्भवः ॥ यइदंशृणुयाद्विद्वान्यश्चेदंश्रावयेत्सुधीः ॥ २३ ॥ यःपठेदपिपुण्यात्मातेसर्वेरुद्रमूर्तयः ॥ यएतत्पुस्तकंरम्यंलेखयित्वासमर्प येत् ॥ २४ ॥ अखिलानिपुराणानितेनदत्तानिनान्यथा ॥ अत्राख्यानानियावंतिश्लोकायावंतएवहि ॥ २५ ॥ तथापदानियावंतिवर्णायावंतएवहि ॥ यावंत्यपिचमात्राणियावत्यःपदपंक्तयः ॥ २६ ॥ गुणेसूत्राणियावंतियावंतःपटतंतवः ॥ चित्ररूपाणियावंतिरम्यपुस्तकसंचके ॥ २७ ॥ ताव द्युगसहस्राणिदातास्वर्गेमहीयते ॥ एतद्द्वादशकृत्वोयःशृणुयात्खंडमुत्तमम् ॥ २८ ॥ ब्रह्महत्यापितस्याशुनश्येच्छंभोरनुग्रहात् ॥ अपुत्रःशृणुयाद्य स्तुसुस्नातःश्रद्धयान्वितः ॥ २९ ॥ तस्यपुत्रोभवत्येवशंभोराज्ञाप्रभावतः ॥ किंबहूक्तेनसूतेहयस्ययस्यमनोरथः ॥ १३० ॥ योयस्तंतं ससदाश्रुत्वैतत्प्राप्नुयात्कृती ॥ शृणुयाद्दूरदेशेपियःकाशीखंडमुत्तमम् ॥ ३१ ॥ सकाशीवासपुण्यस्यभाजनंस्याच्छिवाज्ञया ॥ एतच्छ्रवणतः पुंसांसर्वत्रविजयोभवेत् ॥ सौभाग्यंचापिसर्वत्रप्राप्नुयान्निर्मलाशयः ॥ ३२ ॥ यस्यविश्वेश्वरस्तुष्टस्तस्यैतच्छ्रवणेमतिः ॥ जायतेपुण्ययुक्त स्यमहानिर्मलचेतसः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३४ ॥ सच्चिदानंदसंदोहपरिपूर्णैकभानवे ॥ भक्तेच्छोपात्तदेहायकृष्णायहरयेनमः ॥ १ ॥ वेदांतेसत्यवत्यात्मजइवसुनयेभार्गवोवायजीवोन्यायेकाणादवत्सैन्यंथचगुहतरोगौतमोवाक्षपादः ॥
सांख्येयोदेवहूत्यात्मजइवहिनथावासुकिर्योगशास्त्रेप्राक्कांडेभट्टतुल्यःसजयतिपरमःश्रीसुरेंद्रोगुरुर्नः ॥ २ ॥ वेदांतेथपुराणभारतविधौश्रीसत्यवत्यात्मजःसांख्येश्रीकपिलःकणादइह यौनै शेषिके गौतमः ॥
न्यायेयोगनयेपतंजलिरथोचंद्रप्रभावल्लभोभट्टाचार्यचतुर्भुजोविजयतेप्राक्कांडकौमारिलः ॥ ३ ॥ सकोशाचविकोशाचद्वेटीकेलिखितेमया ॥ यत्रयस्याभिलाषःस्यात्सातेनपरिगृह्यताम् ॥ ४ ॥

सर्वेषांमंगलानांचमहामंगलमुत्तमम् ॥ गृहेपिलिखितंपूज्यंसर्वमंगलसिद्धये ॥१३४॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडउत्तरार्धेऽनुक्रमणिकानामशततमोऽध्यायः ॥ १०० ॥ ॥छ॥ ॥ श्रीकाशीखण्डोत्तरार्धंसम्पूर्णम् ॥ ॥ समाप्तंचेदंचतुर्थंकाशीखंडम् ॥४॥

आसीत्कश्यपवंशभूषणमणिर्मान्योमुकुंदप्रियोविप्रोदारगदाधरस्यतनयःशुक्लांबरःसन्मतिः ॥ गंधर्वीजठरेततःसमभवच्छ्रीरामनामासुतस्तेनेयंविहिताहितायविदुषांटीकानुधैर्वीक्ष्यताम् ॥ ५ ॥ ॥
इतिश्रीमत्परमहंसपरिव्राजकाचार्यभगवत्पूज्यपादशिष्यश्रीरामेंद्रवनशिष्येणचैतन्यवनापरपर्यायेणरामानंदेनकृतायांकाशीखंडटीकायांशततमोऽध्यायः ॥ १०० ॥ ॥ समाप्ताचेयंकाशीखंडटीका ॥

इदं स्कान्दपुराणीयकाशीखण्डपुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" [स्टीम्] मुद्रणालये मुद्रयित्वा प्रकाशितम्।
संवत् १९६५, शके १८३०.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रय्यपुस्तकानि-(पुराणग्रन्थाः।)

ब्रह्मपुराण-संपूर्ण मूल संस्कृत .... ९)

पद्मपुराण-संपूर्ण ५५००० ग्रंथ छः खंडोंमें शुद्धतापूर्वक, कईएक व्रतादि-माहात्म्य, तीर्थमाहात्म्य, शिवविष्णु महिमा, रुद्राक्ष तुलसी माहात्म्यादि सृष्टिखंड, भूमिखंड, स्वर्गखंड, ब्रह्मखंड, पातालखंड उत्तरखंड क्रियायोगखंडमें सांगोपांग वर्णन है, यह ग्रंथ वैष्णवोंके अत्यन्त उपयागा है १५)

शिवपुराण-पं० ज्वालाप्रसाद मिश्रकृत भाषाटीकासमेत ... ... १५)

शिवपुराणमाहात्म्य-मूल ... . ≡)

अग्निपुराण-इसमें शास्त्रकलाओंका संक्षेप वर्णन सर्वदेवताओंकी प्रतिष्ठा लक्षकोटि आदि होम, शिल्पशास्त्र, राजधर्म, राजनीति, युद्धरचना, भारतसार, रामायणसार, ईश्वरावतार; सर्वतिथिवारनक्षत्रादि व्रत षट्प्रयोग, गन्धर्ववेद, भरतशास्त्र, काव्य नाटकभेद, स्त्रीशिक्षा, रत्नादिपरीक्षा, वेदशास्त्रादि बहुतसे विषयोंका अपूर्व वर्णन है ... . ४)

ब्रह्मवैवर्त्तपुराण-संपूर्ण चारोंखण्ड-इसमें श्रीकृष्णजीके अपूर्व चरित्र कथा स्तोत्रादि और नारदादिकी उत्पति, गंगोपाख्यान, सावित्र्युपाख्यान, लक्ष्मीकी उत्पत्ति मनसादेवी उपाख्यान, गणपति उत्पत्ति और कथा। कृष्णजन्मखंडमें श्रीकृष्णलीला और रासोत्सवादि वर्णनहै .... ७)

मार्कंडेयपुराण-सप्तशती शान्तनवीटीकासह इसमें मार्कंडेय और जैमिनिका सत्संग और संवाद अप्सराओंपर दुर्वासामुनिका शाप कंकके मारे जानेपर विद्युतरूप राक्षसका माराजाना। पक्षियोंके जन्म और चरित्र और देवीजीका माहात्म्य संयुक्त है .... ४)

वाराहपुराण-धर्म अर्थ काम मोक्षादि सिद्धहोनेके लिये इतिहास संयुक्त कथाओंका वर्णन है .... ४)

मत्स्यपुराण-जगत्की रचनाकेहेतु और मत्स्यावतार धारण करनेका कारण प्रलय होनेका कालपूर्वक वर्णन ब्रह्माके चारमुख होनेका कारण और दानवगंधर्वकी उत्पत्ति सूर्यवंश चंद्रवंशका वर्णन इत्यादि कथाहैं .... ५)

ब्रह्मांडपुराण-संपूर्ण .... ९)

वायुपुराण-इसमें अनेक विषय संयुक्त देवादि सृष्टिवर्णन मन्वन्तरादि चतुर्युगाख्यान पृथुवंशकीर्तन श्राद्धक्रिया वर्णन और गयामाहात्म्यादि बहुतसे विषयहैं .... ५)

श्रीमद्भागवत-श्रीधरीटीका और टिप्पणीसह, ग्लेज कांगज .... १०)

पुस्तक मिलनेका ठिकाना-खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस-बंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीस्कांदमहापुराणांतर्गतचतुर्थकाशीखंडोत्तरार्धं सम्पूर्णम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu